॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३

शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः ।

तृतीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी-१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

N ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORD GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEI GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART THREE

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145

शब्दकल्पद्रुमः।

तृतीयकाण्डम्।

प, पकारः। स तु पवर्गस्य प्रथमो व्यञ्जनस्यैकविंशतितमो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति व्याकरणम्॥ (तथा च शिक्षायाम्।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू"॥
अस्योच्चारणे आभ्यन्तरप्रयत्नः। ओष्ठेन सह जिह्वाग्रस्य स्पर्शः॥) तत्पर्य्यायः। लोहितः २ पार्श्वः ३ सूरः ४। इति रुद्रयामले वर्णाभिधानम्॥ अस्य तत्त्वं यथा,—
"अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम्।
चतुर्व्वर्गप्रदं वर्णं शरच्चन्द्रसमप्रभम्॥
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा॥
त्रिगुणसहितं वर्णमात्मादितत्त्वसंयुतम्।
महामोक्षप्रदं वर्णं हृदि भावय पार्व्वति!"॥
इति कामधेनुतन्त्रे ९ पटलः॥
(वङ्गभाषायां) अस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वता वामरेखायाः कोणाद्दक्षिणतोऽपरा।
ऊर्द्ध्वता सापि विज्ञेया मात्रा वामोन्नता तथा॥
एष्वेव भगवती क्रमशस्तासु तिष्ठति"॥
इति वर्णोद्धारतन्त्रम्॥
अस्योत्पत्तिप्रकारो यथा,—
"चतुरैष्मकारश्च षड्भिगो दण्डगस्तथा।
क्रमवर्णमनोज्ञात्मा पुष्पभागसंज्ञकान्"॥
इति प्रपञ्चसारः॥ तस्य ध्यानं यथा,—
"विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम्।
रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम्॥
मणिरत्नादिकेयूरहारभूषितविग्रहाम्।
चतुर्व्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम्॥
एवं ध्यात्वा पकारन्तु तन्मन्त्रं दशधा जपेत्"॥
इति वर्णोद्धारतन्त्रम्॥*॥ तस्य नामानि यथा।
"पः पूरप्रियता तीक्ष्णा लोहितः पञ्चमो रमा।
गुह्यकर्त्ता निधिः शेषः कालरात्रिः सुवाहिता॥
तपनः पावनः पाता मन्त्रेशुर्निरञ्जनः।
सावित्री पालिनी पार्श्वं वीरतन्त्रो धनुर्द्धरः॥
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः।
उड्डीशं वसिनी कुम्भोऽलयं रेखा च मोहकः॥
मूला द्वितीयमित्राख्यो लोकाक्षी मन व्यालनः"॥
इति नानातन्त्रशास्त्रम्॥
(छन्दःशास्त्रविशेषः। यथा कविकल्पद्रुमे।
'गः स्वादिः भो हृषादिर्मः श्रमादिर्म्मो हिचौजसोः'।
तेन हृच स्व श्र म भौ मोच इत्यस्य नटि सुचति॥)
प, पुं, (पातयति वेगेन हृक्षादीन्। पत्+कर्त्तरि डः। अन्तर्णिच्।) पवनः। (पतति वृक्षात्। पत्+कर्त्तरि डः।) पर्णम्। (पीयते इति।) पानम्। पाता। इत्येकाक्षरकोषः॥
(यथा, मनुः। २। १३८।
"राजस्नातकयोश्चैव स्नातको नृपमानभाक्"॥)
पक्कणः, पुं क्लीं, (पचति आदिशिक्षारम्भमिति। पच्+क्विप्। पक् शबरः तस्य कणः कलहशब्दः कोलाहलशब्दो वा यत्र।) शबरालयः। इत्यमरः॥ २। २। २०॥ (यदुक्तम्।
"मध्येविन्ध्याटवि पुरा पक्कणस्थानवासिनौ।
पक्कीमतिरभूद्यस्य पिप्पलाख्य इति विश्रुतः"॥)
पक्कपोड़ः, पुं, हृक्षविशेषः। पक्कोड़ा इति हिन्दी भाषा। तत्पर्य्यायः। पक्कलकः २ वर्द्धनः ३ पक्करञ्जकः ४। अस्य गुणाः। दृग्रञ्जनविधौ प्रशस्तम्। कटुत्वम्। जीर्णज्वरापहत्वञ्च। इति राजनिर्घण्टः॥
पक्ता, [ऋ] त्रि, (पचतीति। पच पाके+"ण्वुल्तृचौ"। ३। १। १३३। इति तृच्।) पाककर्त्ता।
(यथा अथर्व्ववेदे। १०। ८। ७।
"ये ते देवि! शमितारः पक्तारो ये च ते जनाः"॥)
अग्नौ पुं। यथा। आग्नेये २ अध्यायः॥
"चमसश्च च भक्ता च पचभोक्ता पचे नमः"॥
पक्तिः, स्त्री, (पच्यते परिणम्यते इति। भावे क्तिन्।) गौरवम्। पाकः। इति मेदिनी॥
(यथा, मनुः। ३। ६७।
"वैवाहिकेऽग्नौ कुर्व्वीत गृह्यं कर्म्म यथाविधि।
पञ्चयज्ञविधानञ्च पक्तिञ्चान्वाहिकीं गृही"॥)
पक्तिशूलं, क्ली, (पक्तौ भुक्तद्रव्यादिकस्य परिणामे जायते यत् शूलं रोगविशेषः।) परिणामशूलम्। तत्पर्य्यायः। पाकजम् २ परिणामजम् ३। इति राजनिर्घण्टः॥
पक्तं, क्ली, (पच्यतेऽनेन। पच् "अशौधिचिचीति"। उणां ४। १६६। इति त्रः।) गार्हपत्याग्निः। इत्युणादिकोषः॥
पक्त्रिमं, त्रि, (पाकेन निर्वृत्तम्। डु पच पाके+"ड्वितः क्त्रिः"। ३। ३। ८८। इति क्त्रिः। "क्त्रेर्मम् नित्यम्"। इति मम्।) पाकिमम्। पाकाज्जातम्। इति त्रिकाण्डशेषः॥
पक्वं, क्ली, (पच्यते स्म। पच+क्त। "पचो वः"। ८। २। ५२। इति निष्ठातस्य वः।) सिद्धतण्डुलादि। तत्र पाकस्य विधिनिषेधादिर्यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा।
पचेदन्नं मध्याह्ने सायाह्ने च विवर्जयेत्॥
अन्याशाभिमुखे पक्वा अन्नतां विषोष च।
पूर्व्वमुखो धर्म्मकामः शोकवांश्च दक्षिणे॥
श्रीकामश्चोत्तरमुखो पतिकामश्च पश्चिमे।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः"॥*॥
"यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते॥
ताम्रे पक्वा चतुर्ज्ञानिर्मयो भवति वै चयम्।
स्वर्णपात्रे तु यत् पक्वं अन्नतं तदपि स्मृतम्"॥*॥
"पित्रर्थं पक्वमन्नञ्च पितृदेव मधुस्विनि!।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम्॥
मातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया।
असगोत्रेण यत् पक्वं शोणितं तदपि स्मृतम्॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत्"॥*॥
"उडुम्बरेण काष्ठेन कदम्बस्य दलेन च।
शालेन करमर्द्देन उदरावर्त्तकेन च॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत्।
गर्हितान्नमवीराणं भुक्त्वा कृच्छ्रं समाचरेत्॥
अप्रजा या तु वनिता भार्य्यापदेव तद्वदेत्"॥
"शालकाष्ठस्य पक्वान्नं शिरीषस्य चैव हि।
कलिचलासकस्यैव पक्वावटकस्य च।
भैरण्डशाकस्यापि पक्वान्नं वर्जितं स्मृतम्॥*॥"

"यद् वदन्नपयन्ते तु पक्वं वै चान्यकालिकम् ।
मासे पक्षे तथाष्टौ च तत् पात्रं विलपेद्दश्च ॥"॥ ● ॥
"धनुःपाके तथा सिंहे मिथुने वा वराजने ।
यः कुर्य्याद्धोमनं देवि ! लक्ष्मीर्येव विनुध्यति" ॥ ● ॥
"एकदा तु जलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पक्षान्तोयं न दापयेत्" ॥
इति ॥ ● ॥
"मोदकं कन्दुपक्वञ्च मध्याह्ने घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति" ॥
इति च मत्स्यसूक्ते महातन्त्रे ४२ पटलः ॥

पक्वं, त्रि, (पच्यते स्म यत् इति । पच + कर्म्मणि क्तः । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) परिणतम् । पाका इति भाषा । (यथा, मनुः । ६ । १७ ।
"अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा" ॥) शिर्णं प्राप्तम् । शुक्लमिति यावत् । यथा परिणता बुद्धिः । विनाशोन्मुखम् । प्रध्वंसविनाशम् । अतिपक्वयवब्रणशस्त्रजलादौ निष्पक्वं कथितम् । चौराण्यपयसो पाके कृतम् । ईषत्पक्वं आपक्वम् । इत्यमरभरतौ ॥ (भावे क्तः । पाकः । परिणामः ॥)

पक्वकृत्, पुं, (पक्वं करोति वैरनान्वितमधुरं परिणामयति निम्बिपत्रस्वगादिभिरिति । कृ + क्विप् तुक् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (पक्वं करोति पचत्यन्नादिकमित्यर्थः ।) पाककर्त्तरि त्रि ॥

पक्वरसः, पुं, (पक्वस्य गुडादेः रसः ।) मद्यम् । इति शब्दरत्नावली ॥

पक्ववारि, क्ली, (पक्वस्याग्नादेर्वारि यद्वा, पक्वं वारि स्विन्नसलिलमिति यावत् ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥ पक्ववारि इत्यपि पाठः ॥ पक्वजलम् ॥

पक्वान्नं, त्रि, (पक्वमन्नम् ।) कृतपाकतण्डुलादि । यथा,
"आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" ।
इति तिथितत्त्वम् ॥
("यती च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ" ।
इति सदाचारः ॥)

पक्वाशयः, पुं, (पक्वस्य आमादेराशयः आधानम् । यद्वा पक्वं आमादिकं आशेतेऽत्र । पक्व + आ + शीङ् + आधारे + अच् ।) नाभ्यधोभागः । इति राजनिर्घण्टः ॥
"पक्वाशयस्तथो नाभेरूर्द्ध्वमामाशयः स्मृतः" ।
इति वैद्यकम् ॥

पक्ष, क परिग्रहे । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) क, पक्षयति । इति दुर्गादासः ॥

पक्ष, स क परिग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा-परं-सकं-सेट् ।) पक्षयति अपपक्षयति । इति दुर्गादासः ॥

पक्षः, पुं, (पक्ष्यते परिगृह्यते देवपितृकार्य्याय यः । यद्वा, पच्यते चन्द्रस्य पञ्चदशभागो कलाकालापूरणं क्षयो वा येन । पच + घञ् । यद्वा, पचते इति । पच व्यक्तौ "पचिमव्योर्नित्रौच" । उणा १ । ६८ । इति सः कचान्तादेशः ।) पञ्चदशाहोरात्राः । स च द्विविधः । शुक्लपक्षः पूर्व्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः । तद्भेदेन मतद्वयं यथा ।
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः" ॥
अत्रामावास्यावर्त्तितिथिद्वयरहिताभ्यां न व्यवस्था किन्तु रवेरुदयास्तमयसम्बन्धात् शुक्लकृष्णपक्षाभ्यां व्यवस्था सा च युग्मादिवाक्यासिद्धिकर्म्मपरा सामान्यविशेषन्यायात्" । इति तिथ्यादितत्त्वम् ॥
पक्षिणामवयवविशेषः । पाखा इति भाषा । तत्पर्य्यायः । गरुत् २ छदः ३ पत्रम् ४ पतत्रम् ५ तनूरुहम् ६ ॥ शरपक्षः । तीरेर पाखा इति भाषा । तत्पर्य्यायः । वाजः २ । सहायः । कचात् परे समूहार्थः । यथा केशपक्षः । इत्यमरः ॥ (महाकालः शिवः । कालोपाधिभेदात् पक्षस्य तथात्वम् । यथा महाभारते । १३ । शिवसहस्रनामकीर्त्तने । १७ । १२८ ।
"ऋतुः संवत्सरो मासः पक्षः संख्या समापनः" ॥)
पार्श्वः । पक्षम् । साध्यम् । (सन्दिग्धसाध्यवान् पदार्थः । यथा, भाषापरिच्छेदे । ७० । ७१ ।
"सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥)
विरोधः । बलम् । (यथा, पञ्चतन्त्रे । ३ । ६६ ।
"यच्छोचीर्य्यपि मित्रं यत् परपक्षे विशेषतः ।
शुभेच्छरेष्वपी वेत्ति न स दुर्गतिमाप्नुयात्" ॥)
सखा । चुल्लीरन्ध्रम् । राजकुञ्जरः । इति मेदिनी ॥
विहगः । वलयम् । गृहः । इति शब्दरत्नावली ॥
वर्गः । (सजातीयवृन्दम् । यथा, गोः रामायणे । २ । १८ । १६
"भरतस्यापि वा पक्षं यो रक्षीयाद्विचेतनः ।
तं पापमश्मवेव प्रेषयामि यमक्षयम्" ॥)
पिच्छम् । देहाङ्गम् । इति हेमचन्द्रः ॥

पक्षः, [स्] क्ली, (पक्ष्यतीति । "पचिवचिभ्यां सुट् च" । उणा । ४ । २१८ । इति असुन् सुट् च ।) गरुत् । यथा । पक्षसी च क्षुतौ पक्षौ । इति भरतधृतसुभाषः ॥

पक्षकः, पुं, (पक्ष इव प्रतिकृतिः । "इवे प्रतिकृतौ" । ५ । ३ । ९६ । इति कन् ।) पक्षद्वारम् । पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीद्वार इति भाषा । पार्श्वमात्रम् । इति मेदिनी ॥ सहायः । इति शब्दरत्नावली ॥

पक्षघातः } पुं, (पक्षस्य देहार्द्धस्य घातं विनाशम् पक्षाघातः } यस्मात् यत्र वा ।) स्वनामख्यातवातरोगविशेषः । तल्लक्षणादि यथा,—
"गृहीत्वार्द्धं ततो वायुः शिराः स्नायुर्विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोक्षयन् ॥
कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः ।
एकाङ्गवातं तं केचिदन्ये पक्षवधं विदुः" ॥
अर्द्धं अर्द्धनारीश्वरवत् । पक्षं वाहुपार्श्वोरुजङ्घादिभागम् । अन्यतमं वामं दक्षिणं वा । विमोक्षयन् शिथिलीकुर्व्वन् । अकर्म्मण्यः कर्म्मासमर्थः । विचेतनः ईषत्स्पर्शादिज्ञानयुक्तः ॥ ● ॥
अस्य साध्यासाध्यलक्षणमाह ।
"दाहसन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्विते ।
शैत्यशोथगुरुत्वानि तस्मिन्नेव कफान्विते" ॥
दाहो बाह्यः । सन्तापः आभ्यन्तरः । एतच्च एकाङ्गरोगेऽपि वातव्याधौ बोद्धव्यम् । सामान्यतो वायाविति निर्द्देशात् ॥ ● ॥
पक्षाघातस्य साध्यत्वादिकमाह ।
"शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम्" ॥
शुद्धः केवलः । अन्येन पित्तेन कफेन वा । क्षयहेतुकं क्षयो धातुक्षयः । तत्कुपितं वातनिमित्तकम् ॥ ● ॥ अपरमसाध्यलक्षणमाह ।
"गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ।
पक्षाघातं परिहरेत् वेदनारहितो यदि" ॥
वेदनारहितो यदीति भिन्नमसाध्यलक्षणम् ॥ ● ॥
अथ तस्य चिकित्सा ।
"माषात्मगुप्ताबलारिवाट्यालकत्रटाभृतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ।
मात्विके हिङ्गुसिन्धूत्थे वरवासास्तु शासिका" ।
इति माषादिक्वाथः ॥ १ ॥
"ग्रन्थिकादिककणाशुण्ठीरास्नासैन्धवकल्कितम् ।
माषकाथसृतं तैलं पक्षाघातं व्यपोहति" ।
इति ग्रन्थिकादितैलम् ॥ २ ॥
"माषात्मगुप्तातिविषाबृक-
रास्नाशताह्वालवणैः सुपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं पचेत् हन्ति हि पक्षघातम्" ॥
इति माषादितैलम् ॥ ३ ॥ इति भावप्रकाशः ॥ ● ॥
पक्षाघातस्तु अकालमरणीयमहापातकशेषपापचिह्नविशेषः । यथा,—
"पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः ॥
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकासा अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवा मताः" ॥ ● ॥
तत्प्रायश्चित्तं यथा,—
"पक्षाघातवतं पुंसं प्रदद्यात् केशवार्च्चने ।
दद्यात् द्विजसहस्राय मिष्टान्नं द्विजभोजने" ॥
इति मलमासतत्त्वम् ॥ किञ्च ।
"कुष्ठी ब्रह्मवत्स्याद्द्वादशरात्रं कृच्छ्रं चरित्वा उद्धरेयाता सद्व्रतश्चाविति । अत्र द्वादशरात्रं पराककृच्छ्रम् । तत्र पक्ष नियमः । न तु प्राजापत्यं तद्बाधकार्थतिथ्याद्यवचनेन विषमोद्दिष्टत्वात् । अत्र वह्वनामेकधर्म्मोवाचामिति वचनाद्राजयक्ष्मादिमत्त्वात् कुष्ठादीनामपि प्रायश्चित्तम् । अत एव प्रायश्चित्तविवेकेऽप्युक्तम् । एवं दुश्चर्म्मादिष्वप्यूह्यम्" । इति शुद्धितत्त्वम् ॥

पक्षचरः, पुं, (पक्षे शुक्लपक्षे चरतीति । चर + टः ।) चन्द्रः । यूथभ्रष्टचारिगजः । इति मेदिनी ॥

पक्षजः, पुं, (पक्षे शुक्लपक्षे जायते इति । पक्ष + जन् + डः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

पक्षजन्मा, [न्] पुं, (पक्षे शुक्लपक्षे जन्म उत्पत्ति-

यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ पक्ष-
धारिणि त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्साविरह-
विशिष्टसिद्ध्यभावः । इयमनुमितिकारणम् । तच्च
पक्षत्वं यत्रानुमितौ अनुमित्साविरहविशिष्ट-
पक्षतद्धर्म्मिकसाध्यनिश्चयाभावः । यथा,—
"सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥
इति भाषापरिच्छेदे । ७२ ॥

पक्षतिः, स्त्री, (पक्षस्य मूलम् । "पक्षात्तिः" ।
५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं
तिथितत्त्वे ।
"पक्षत्याद्यास्तु तिथयः क्रमात् पक्षद्वये स्मृताः" ॥)
पक्षमूलम् । इत्यमरः । ३ । ३ । ७२ ॥ डानक्
इति भाषा ॥

पक्षद्वारं, क्ली, (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्व-
द्वारम् । इत्यमरः । २ । २ । १४ ॥ खड्कीद्वार
इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । धृ
+ अच् ।) चन्द्रः । इति जटाधरः ॥ पक्षधारण-
कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्याय्यसाहाय्ये पातः अभि-
निवेशः । स्नेहसम्बन्धादनुरोधत एकस्मिन्नेव वर्गे
आनुकूल्यप्रयोगेच्छेति भावः ।) अन्याय्य-
साहाय्यकरणम् । (यथा गोः रामायणे
२ । १०६ । ५७ ।
"कच्चिद्विवदतोऽर्थेषु बलिनो दुर्ब्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥)
ममताकरणम् । यथा । "ईश्वरत्वविषये विप-
श्चितां पक्षपातकरणे न कारणम्" । इत्युत्तर-
मीमांसायां संक्षेपशारीरम् ॥ (पक्षाभ्यां गरुता
पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं
"पक्षपातः पतङ्गानाम्" । इति विजयरक्षितः ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो
भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—
"न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिता
ऽनवलम्बे किमु मादृशेऽपि सा" ॥
इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य
इति पक्षपाती खगस्तस्य भावः । पक्षपातनञ्च ॥)

पक्षपालिः, पुं, (पक्षस्य गृहस्य पालिरिव ।) खड्-
किका । इति शब्दरत्नावली । खड्कीद्वार
इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य भाग एव वा
भागः ।) हस्तिपार्श्वभागः । इत्यमरः ।२।८।४० ॥

पक्षमूलं, क्ली, (पक्षस्य मूलम् ।) पक्षतिः । इत्य-
मरः । २ । ५ । ३६ । डानक् इति भाषा ॥

पक्षवाहनः, पुं, (पक्षौ वाहनमिव यस्य ।) पक्षी ।
इति शब्दचन्द्रिका ॥

पक्षसुन्दरः, पुं, (पक्षे देशाङ्गे कुसुमे सुन्दरः ।)
लोध्रः । इति हारावली ॥

पक्षान्तः, पुं, (पक्षस्य अन्तो यत्र काले ।) अमा-
वस्या । पूर्णिमा । तत्पर्य्यायः । पञ्चदशी २ ।
इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविश्लेषः ३ पर्व्व
४ । इति राजनिर्घण्टः ॥ पक्षावसरः ५ । इति
शब्दरत्नावली ॥ (अस्मिन् यात्रा निष्फला
भवति । यदुक्तं ज्योतिस्तत्त्वे ।
'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्' ॥)

पक्षालुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अस्त्यर्थे
आलुच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावसरः, पुं, (पक्षस्यावसरोऽवसानं यत्र
काले ।) पूर्णिमा । अमावस्या । इति शब्द-
रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्व्वापरदिने विद्येते
यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-
मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥
यथा, शुद्धितत्त्वे ।
"द्वावह्नावेकरात्रिश्च पक्षिणीत्यभिधीयते" ॥
पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।)
विहगी । शाकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य
पानार्थं जलस्य शालिका शाला ।) चुण्टीस्थाल-
बालम् । पक्षिजलपानस्थानम् । इति भूरि-
प्रयोगः ॥

पक्षिलः, पुं, (पक्षयति सत्पक्षं परिगृह्णातीति ।
पक्ष + बाहुलकादिलच् ।) वात्स्यायनमुनिः । इति
त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-
वान् ॥)

पक्षिशाला, स्त्री, (पक्षिणां शाला गृहम् ।) नीडम् ।
तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः, पुं, (पक्षी सिंह इव । उपमितसमासः ।
यद्वा, पक्षिषु सिंहः श्रेष्ठः । "सिंहशार्दूल-
नागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्ते-
स्तथात्वम् ।) गरुडः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पुं, (पक्षिणां स्वामी प्रभुः ।)
गरुडः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः शराटीनां पत्राणि सन्त्यस्य ।
"अत इनिठनौ" । ५ । २ । ११५ । इति इनिः ।)
बाणः । इति धराणिः ॥

पक्षी, [न्] पुं स्त्री, पक्षौ विद्येते यस्य । (पक्ष +
इनिः ।) विहङ्गमः ॥ पाखी इति चिड़िया इति
च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३
विहगः ४ विहङ्गमः ५ विहायाः ६ शकुन्तिः ७
शकुनिः ८ शकुन्तः ९ शकुनः १० द्विजः ११
पतत्री १२ पत्री १३ पतगः १४ पतन् १५ पत्र-
रथः १६ अण्डजः १७ नगौकाः १८ वाजी १९
विकिरः २० विः २१ विष्किरः २२ पतत्रिः २३
नीडोद्भवः २४ गरुत्मान् २५ पित्सन् २६ नभ-
सङ्गमः २७ । इत्यमरः । २ । ५ । ३४ ॥ नाडीचरणः
२८ कण्ठाग्निः २९ पतङ्गः ३० अगौकाः ३१ चञ्चु-
भृत् ३२ दुरुक्षः ३३ सरकः ३४ । इति शब्द-
रत्नावली ॥ पिपतिषुः ३५ पत्रवाहः ३६ द्रुगः
३७ । इति राजनिर्घण्टः ॥*॥ गुरुमध्यलघुभक्ष-
स्थूलकायपक्षिणां पूर्व्वाह्णस्य श्रेष्ठत्वं यथा,—
"गुरुभक्ष्या बहुभुजो ये चोपचितमेदसः ।
एकदेशेऽपि पूर्व्वाह्णे मृगाणां पक्षिणां परम्" ॥*॥
पक्षिणामङ्गादीनामुत्तरोत्तरं गुरुत्वं यथा,—
"सर्व्वेषाञ्च शिरःस्कन्धग्रीवचर्म्मयकृद्गुदम् ।
पादपुच्छान्त्रमांसास्थिमुष्कक्रोडाः समेहनाः ।
धातवः शोणिताद्याश्च गुरवः स्युः परस्परम्" ॥
अस्याण्डगुणाः ।
"मत्स्यकूर्म्मखगाण्डानि स्वादूनि बीजकराणि च ।
कटुपाकानि रुच्यानि वातश्लेष्महराणि च" ॥
इति राजवल्लभः ॥*॥ तेषामुत्पत्तिर्यथा,—
"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिसत्तमौ ॥
सम्पातिर्जनयत् पुत्रान् काकाः पुत्रा जटायुषः ।
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुकी शुकी ।
धृतराष्ट्री गरुत्मांस्तु सुख्यां चक्रे च षट् सुतान् ।
त्रिशिरश्च सुनेत्रश्च सुमुखं सुनसन्तथा ।
सुरूपन्तु सुपर्व्वाणं तेषां पुत्रा अनन्तकाः ।
चतुर्द्दशसहस्राणि क्रूराणां पन्नगाशिनाम् ॥
सप्तद्वीपेष्विमे सन्ति गारुड़ास्ते महाबलाः ।
भासीपुत्रास्तथा भासा उलूकाः काककुक्कुटाः ॥
मयूराः कलविङ्काश्च कपोतौ चैव तित्तिरी ।
क्रौञ्च्यां वाध्रीणसा श्येनाः कुररा सारसा बकाः ॥
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भामिनी ।
चक्रवाकांश्च विहगान् सर्व्वानौदकान् द्विजान् ॥
अन्यानपि द्विजान् चक्रे पुत्रपौत्राननन्तकान्" ॥
इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः । यथा,
महाभारते १३ । शिवनामकीर्त्तने । १७।६९ ।
"पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः" ॥)

पक्ष्णुः, त्रि, पाककर्त्ता । पच + "स्थाग्लाक्षाचि-
पचपरिमृजः स्नुः" । इति स्नुप्रत्ययनिष्पन्नः ।
इति मुग्धबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली, (पक्ष्यते परिगृह्यते आतपतापा-
दिकमनेन । पक्ष + करणे मनिन् ।) अक्षिलोम ।
नेत्रच्छदरोम । (यथा, भागवते । ३ । १ । ३९ ।
"यमावुतस्वित् तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव" ॥)
किञ्जल्कः । केशरः । तन्त्वादेरणीयान् । छत्रादे-
रल्पभागः । इत्यमरभरतौ ॥ गरुत् । पक्षः ।
इत्यमरमाला ॥

पङ्कः, पुं, क्ली, (पच्यते व्याप्यते क्लिद्यते वाऽनेन ।
पच् + घञ् कुत्वं च ।) कर्द्दमः । पाँक् इति
भाषा । (यथा, हितोपदेशे । १ । ६२ ।
"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संमृतो यथा" ॥
पच्यते पापीक्रियते दुःखमनेन । पचि विस्तारे
पापीकरणे च । पचधातोरिदित्वात् नुम् । "हल-
श्चेति" । ३ । ३ । १२१ । करणे घञ् ततो
चित्वात् पस्य कुत्वम् ।) पापम् । इत्यमरः ।
१ । ४ । २३ ॥ (यथा, यमाष्टके । ६ । "यत्रा-
करे यदुपि कङ्कादिरत्नपुषि कङ्कादिपङ्कविषये
त्वं कामनामयसि किं कारणं हृदय ! पङ्कारि-

मेदि गिरिशाम् ।”) पूर्व्वस्य गुणाः । पित्तास्रदाहनाशित्वम् । भग्नसन्धिहितत्वम् । हिमत्वञ्च । रक्तनिग्रहत्वम् ॥ शोथघ्नत्वम् । सरत्वञ्च । इति भावप्रकाशः ॥

पङ्ककर्व्वटः, पुं, (पङ्केषु कर्व्वटो मनोहरः ।) जलशुक्तपङ्कम् । यथा,—
“पुलको घनश्यामले ललाटे पङ्ककर्व्वटः” ।
इति त्रिकाण्डशेषः ॥

पङ्ककीरः, पुं, (पङ्कप्रियः कीरः पक्षिविशेषः ।) कोयष्टिपक्षी । इति त्रिकाण्डशेषः ॥ (कादाखोँचा इति भाषा ॥)

पङ्कक्रीडः, पुं, (पङ्के पङ्केन वा क्रीडति यः । पङ्क + क्रीड + अच् ।) शूकरः । इति कश्चित् । कर्द्दमखेलके, त्रि ॥

पङ्कगडकः, पुं, (पङ्के स्थितो गडकः ।) मत्स्यविशेषः । पाँकाल इति भाषा । तत्पर्य्यायः । मद्गी २ । इति त्रिकाण्डशेषः ॥

पङ्कगतिः, स्त्री, (पङ्के गतिरस्य ।) पङ्कगडकमत्स्यः । इति शब्दमाला ॥

पङ्कग्राहः, पुं, (पङ्केस्थितो ग्राहः जलजन्तुभेदः ।) मकरः । इति हारावली ॥

पङ्कजं, क्ली, (पङ्के पङ्कात् वा जायते इति । पङ्क + जन + कर्त्तरि + डः ।) पद्मम् । इति राजनिर्घण्टः ॥ (यथा रघुः । ३ । ८ ।
“तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोषयोः श्रियम्” ॥
अयं हि योगरूढ़शब्दः । यदुक्तम् ।
“रूढ़ा गवादयः प्रोक्ता यौगिकाः पाचकादयः ।
योगरूढ़ाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः” ॥)

पङ्कजन्मा, [न्] क्ली (पङ्के जन्म यस्य ।) पद्मम् । इति त्रिकाण्डशेषः ॥

पङ्कजिनी, स्त्री, (पङ्कजानि सन्त्यस्याम् । “पुष्करादिभ्यो देशे” । ५ । २ । १३५ । इति इनिः ।) पद्माकरः ।
(यथा, मार्कण्डेये । ७५ । २४ ।
“तस्यांसस्य तु या कान्तिजाता पङ्कजिनीचरः” ॥)
पद्मसमूहः । इति रत्नमाला हेमचन्द्रश्च ॥

पङ्कणः, पुं, (पङ्के मांसादिनिमित्तके पापाचारकर्म्मणि कणः कलनं यस्य सः । पृषोदरादित्वात् साधुः ।) पक्कणः । शवरालयः । इति शब्दरत्नावली ॥

पङ्कप्रभा, स्त्री, (पङ्कस्य प्रभा प्रकाशो यस्याम् ।) कर्द्दमयुक्तनरकविशेषः । इति हेमचन्द्रः ॥

पङ्कमण्डूकः, पुं, (पङ्के मण्डूक इव) शम्बूकः । इति हारावली ॥

पङ्करुट्, [ह्] क्ली, (पङ्के रोहतीति । पङ्क + रुह + क्विप् ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्करुहं, क्ली, (पङ्के रोहतीति । पङ्क + रुह् + “इगुपधज्ञाप्रीकिरः कः” । ३ । १ । १३५ । इति कः ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्कवासः, पुं, (पङ्के वासो यस्य सः ।) कर्क्कटः । इति राजनिर्घण्टः ॥ (मत्स्यादयोऽप्यत्र ॥)

पङ्कशुक्तिः, स्त्री, (पङ्के स्थिता या शुक्तिः ।) दुर्नामा । इति हारावली ॥ झिनुक् इति भाषा ॥

पङ्कशूरणः, पुं, (पङ्के शूरण इव ।) शालूकः । इति त्रिकाण्डशेषः ॥

पङ्कारः, पुं, (पङ्कमृच्छति पङ्कं प्राप्य वर्द्धते इति यावत् । पङ्क + ऋ + उपपदे “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) शैवलः । सेतुः । सोपानम् । जलकुब्जकः । इति मेदिनी ॥

पङ्किलः, त्रि, (पङ्कोऽस्त्यस्मिन् । “लोमादिपामादिपिच्छादिभ्यः शनेलचः” । ५ । २ । १०० । इति इलच् ।) सकर्द्दमः । तत्पर्य्यायः । सजम्बालः २ । इत्यमरः । ३ । १ । १० ॥ पङ्कयुक्तः ३ । इति शब्दरत्नावली । कर्द्दमान्वितः ४ । इति जटाधरः ॥ (कलुषया स्वार्थेऽपि । यथा महाभारते ८ पर्व्वणि । “मांसमज्जास्थिपङ्किला मही” ॥)

पङ्केजं, क्ली, (पङ्के जायते इति । “सप्तम्यां जनेर्डः” । ३ । २ । ९७ । इति डः । “तत्पुरुषे कृति” । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इति त्रिकाण्डशेषः ॥

पङ्केरुहं, क्ली, (पङ्के रोहतीति । पङ्क + रुह + “इगुपधेति” । ३ । १ । १३५ । इति कः । “तत्पुरुषे कृति बहुलम्” । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इत्यमरः । १ । १० । ४० ॥ (यथा, भागवते । ७ । १५ । ६८ ।
“यत्पादपङ्केरुहसेवया भवानपारयोगोन्निर्जितदिग्गजः क्रतून्” ॥) सारसपक्षिणि, पुं ॥

पङ्क्तिः, स्त्री, (पच्यते व्यक्तीक्रियते श्रेणीविशेषेणेति यावत् । पचि + व्यक्तीकरणे + भावे + क्तिन् । इदित्त्वात् नुम् । यद्वा, पञ्चयति विस्तारयति जातिसंस्थानविशेषमिति । पचि + विस्तारे + कर्त्तरि + क्तिच् ।) सजातीयसंस्थानविशेषः । धारि इति पाँति इति च भाषा । तत्पर्य्यायः । वीथी २ आलिः ३ आवलिः ४ श्रेणी ५ । इत्यमरः । २ । ४ । ४ ॥ वीथिः ६ आली ७ आवली ८ पङ्क्ती ९ अलिः १० । इति भरतः ॥ सरणिः ११ सन्ततिः १२ । इति जटाधरः ॥ विश्रोणी १३ पालिः १४ पाली १५ वीथिका १६ । इति शब्दरत्नावली ॥
(यथा, मार्कण्डेये । ४२ । २८ ।
‘विलोक्या विशदा यैषा, घनपङ्क्तिः सुभैरवा’ ॥) पञ्चाक्षरपादच्छन्दोविशेषः । तस्य लक्षणं यथा । “भ्मौ गिति पङ्क्तिः” ॥१॥ उदाहरणं यथा,—
“कृष्णसनाथा तर्णकपङ्क्तिः ।
यामुनकच्छे चारु चचार” ॥
इति छन्दोमञ्जरी ॥ (पङ्क्तिच्छन्दस उत्पत्तिस्थानं यथा, भागवते । ३ । १२ । ४६ ।
“मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्” ॥) पञ्चकद्वयं परिमाणमस्य इति । “पङ्क्तिविंशतित्रिंशदिति” । ५ । १ । ५९ । निपातनात् प्रकृतेः पञ्चन्शब्दस्य टिलोपः तिप्रत्ययश्च ।) दशाक्षरपादच्छन्दः । दशसंख्या । इति मेदिनी ॥ (यथा, रघुः । १२ । ९९ ।
“तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम्” ॥)
पृथिवी । इति शब्दमाला ॥ गौरवम् । पाकः । इति हेमचन्द्रः ॥ * ॥
अथ पङ्क्तिसाङ्कर्य्यदोषाः यथा,—
“न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥
एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापने योनिस्तथैव सह भोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्” ॥ * ॥
पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा,—
“एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम् ।
भस्मना कृतमर्य्यादा न तेषां सङ्करो भवेत् ॥
अग्निना भस्मना चैव सद्भिः पङ्क्तिर्विभिद्यते” ।
इति कूर्म्मे १५ अध्यायः ॥

पङ्क्तिग्रीवः, पुं, (पङ्क्तिः दशपङ्क्तिका ग्रीवा यस्य ।) रावणः । इति शब्दरत्नावली ॥

पङ्क्तिचरः, पुं, (पङ्क्त्या श्रेणीबद्धः सन् चरतीति । पङ्क्ति + चर् + टः ।) कुररपक्षी । इति राजनिर्घण्टः ॥

पङ्क्तिदूषकः, पुं, (श्राद्धकाले भोजनार्थमुपविष्टानां ब्राह्मणानां पङ्क्तिं दोषैः दूषयति यः । पङ्क्ति + दूष + कर्त्तरि ण्वुल् ।) अपाङ्क्तेयः । श्राद्धभोजनानर्हब्राह्मणः । यथा,—
“अपाङ्क्तेयांस्तु मे राजन् ! कीर्त्तयिष्यामि तान् शृणु ।
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ॥
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ।
अगारदाही गरदः कुण्डाशी सोमविक्रयी ॥
सामुद्रिको राजदूतस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ॥
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ।
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः ॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ।
श्वभिश्च यः परिक्रामेत् यः शुना दष्ट एव च ॥
परिवित्तिश्च यश्च स्याद्दुश्चर्म्मा गुरुतल्पगः ।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ॥
ईदृशान् ब्राह्मणान् ये च अपाङ्क्तेयांस्तु ते मताः ।
रक्षांसि गच्छते हव्यं यदेषाञ्च प्रदीयते” ॥ * ॥
“श्राद्धे भुक्त्वा महाराज ! दुश्चर्म्मा गुरुतल्पगः ।
श्राद्धं नाशयते तस्य पितरोऽपि न संशयः ॥
सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप ।
भिषजे शोणितसमं नष्टं देवलके तथा ॥
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ।
वहुवाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ।
ये तु धर्म्मव्यपेतेषु चारित्रापगतेषु च ॥
हव्यं कव्यं प्रयच्छन्ति तेषां तत् परिनश्यति ।
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ॥
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ।

एतान्विद्धि महाबाहो अपाङ्क्तेयान् द्विजाधमान् ।
शूद्राणामुपदेशन्तु ये कुर्व्वन्त्यल्पबुद्धयः ॥
षष्टिं काणः शतं षण्डः श्वित्री यावत् प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ! ॥
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
असूयते च यद्दत्तं यच्च श्रद्धाविवर्ज्जितम् ।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन ॥”३।
“तस्मात् परिश्रिते दद्यात्तिलांश्चान्वि विकीरयेत् ।
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च ॥
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ।
अपाङ्क्तेयानतः पङ्क्त्यां भुञ्जानो यत्र पश्यति ।
तावत् फलाद्भ्रंशयति दातारं तस्य बालिशम् ॥”
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः ॥

पङ्क्तिपावनः, पुं, (पङ्क्तिं श्राद्धोपलक्षे भोजनायोपविष्टानां वेदविद्याविशारदानां ब्राह्मणानां श्रेणीं पुनाति पावयति वा स्वोपवेशनेनेति । पङ्क्ति+पावि+ल्युः ।) श्रेणिपवित्रकर्त्ता । श्राद्धभोजनार्हब्राह्मणः । यथा,—
“इमे हि मनुजश्रेष्ठ ! विज्ञेयाः पङ्क्तिपावनाः ।
विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः ।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दश पूरुषः ॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः ॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ।
मखेषु च समस्तेषु भवन्त्यवभृथप्लुताः ॥
अक्रोधना अचपलाः क्षान्ता दान्ता जितेन्द्रियाः ।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान् निमन्त्रयेत् ॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः ॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः ॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः ।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च ।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः ॥
अनृत्विगनुपाध्यायः स चेदग्रासनं भवेत् ।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्व्विवर्ज्जितः ।
न च स्यात् पतितो राजन् ! पङ्क्तिपावन उच्यते ॥”
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः ॥
(पञ्चाग्निर्यस्य । यथाह हारीतः ।
“पञ्च पावनकास्ता यस्य पञ्चाग्नयो गृहे ।
सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः ॥”)

पङ्क्तिरथः, पुं, (पङ्क्तिषु दशसु दिक्षु गतो रथो यस्य ।) दशरथराजः । इति शब्दरत्नावली ॥ तथा च ।
“अयोध्यायां महाराजः पुरा पङ्क्तिरथो बली ।
तस्यात्मजो रामचन्द्रः सर्व्वशूरशिरोमणिः ॥”
इति पाद्मे पातालखण्डम् ॥ (तथा, रघुः । ९ । ७४ ।
“ नृपतेः प्रतिषिद्धमेव तत्
कृतवान् पङ्क्तिरथो विलङ्घ्य यत् ॥”)

पङ्क्तिवीजः, पुं, (पङ्क्तिभूतानि वीजानि यस्य सः ।) वर्व्वूरवृक्षः । इति राजनिर्घण्टः ॥

पङ्गुः, पुं, (खञ्जति गतिवैकल्यं प्राप्नोतीति । खजि गतिवैकल्ये । “बाहुलकात् कुः । खजयोः पगौ नुमागमश्च ।” उणां । १ । ३७ । इति पगौ नुमागमश्च । अस्य कक्षाया अत्युच्चतया बहुकालेन राशिभागादिभोगात् मन्दगतित्वादस्य तथात्वम् ।) शनैश्चरः । इति शब्दमाला ॥ (परिव्राट् । यथोक्तं चिन्तामणौ ।
“ भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च ।
योजनान्न परं याति सर्व्वथा पङ्गुरेव सः ॥”)

पङ्गुः, त्रि, (खजि गतिवैकल्ये । बाहुलकात् कुः । खस्य पत्वे जस्य गादेशः नुम् च । उणां १ । ३७ ।) जङ्घावैकल्येन चलनाक्षमः । तत्पर्य्यायः । श्रोणः २ । इत्यमरः । २ । ६ । ४८ ॥ जङ्घाहीनः ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते २ । ५ । १२५ ।
“कच्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान् ।
पितेव पासि धर्म्मज्ञ ! तथा प्रव्रजितानपि ॥”
यानहरणेनैव लोकः पङ्गुर्भवति । यथा, मार्कण्डेये । १५ । ३१ ।
“पुष्पापहृद्दरिद्रश्च पङ्गुर्यानापहृन्नरः ॥”)
अस्य लक्षणं खञ्जशब्दे द्रष्टव्यम् ॥

पङ्गुलः, पुं, सितकाचाभघोटकः । इति हेमचन्द्रः ॥

पङ्गुत्वहारिणी, स्त्री, (सेवनेन पङ्गुत्वं पङ्गुत्वं हरति या । पङ्गुत्व+हृ+णिनि+ङीप् ।) शिम्बीलुपः । इति राजनिर्घण्टः ॥

पच, इ क ततौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) ततिरिह विस्तारवचनम् । इ क, पञ्चयति धीरो ग्रन्थार्थम् । इति दुर्गादासः ॥ (यथा, गीतगोविन्दे । १० । १३ ।
“व्यथयति वृथा मौनं तन्वि ! प्रपञ्चय पञ्चमम् ।
तरुणि ! मधुरालापैस्तापं विनोदय दृष्टिभिः ॥”)

पच, इ ङ व्यक्तीकारे । (भ्वां-आत्मं-सकं-सेट् ।) इ, कर्म्मणि पञ्च्यते । ङ, पञ्चते स्वगुणं भिक्षुकः । इति दुर्गादासः ॥

पच, ङ औ व्यक्तीकारे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) औ, पक्ता । ङ, पचते स्वगुणं भिक्षुकः । इति दुर्गादासः ॥

पच, डु ञ औ ष पाके । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट् ।) पाको विक्लित्त्यनुकूलव्यापारः । डु, पक्त्रिमम् । ञ, पचति पचते तण्डुलानोदनं लोकः । औ, पक्ता । ष, पचा । इति दुर्गादासः ॥

पचः, त्रि, पचति यः । (पच्+“नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।” ३ । १ । १३४ । इति अच् ।) पाककर्त्ता । इति व्याकरणम् ॥ स्वार्थे कनि पचकश्च ॥

पचतः, पुं, (पचतीति । “भृमृदृशियजिपर्व्विपच्यमितमिनमिहर्य्येभ्योऽतच् ।” उणां । ३ । ११० । इति अतच् ।) सूर्य्यः । अग्निः । इन्द्रः । इत्युणादिकोषः ॥ (पचिते, त्रि । यथा, ऋग्वेदे । १ । ६१ । ७ । “पचतं सहीयान् विध्यद्वराहं तिरो अद्रिमस्ता ॥”)

पचतिकल्पं, क्ली, (ईषदूनं पचतीति तिङन्तात् कल्पप् ।) ईषदूनस्य पाकस्य कर्त्ता । इति व्याकरणम् ॥

पचत्पुटः, पुं, (पचत् पुटमस्य ।) सूर्य्यमणिवृक्षः । इति शब्दचन्द्रिका ॥

पचन्, [त्] त्रि, (पचति यः । “लटः शत्रिति ।” २ । २ । १२४ । इति शतृप्रत्ययः ।) पाककर्त्ता । इति व्याकरणम् ॥

पचनं, क्ली, (पच्यते इति । पच्+भावे ल्युट् ।) पाकः । (यथा, भागवते । ३ । २६ । ४० ।
“द्योतनं पचनं पानमदनं हिममर्द्दनम् ॥”
पच्यतेऽनेन इति पचेः करणे ल्युट् । पाकसाधनम् । यथा, ऋग्वेदे । १ । १६२ । ६ । “ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्त्तिर्न इन्वतु ॥”)

पचनः, पुं, (पचत्यसौ इति । पच्+कर्त्तरि ल्युः ।) अग्निः । इति शब्दचन्द्रिका ॥ पाककर्त्तरि, त्रि ॥

पचनी, स्त्री, (भुक्तमजीर्णादिकं पच्यतेऽनया । पच्+करणे ल्युट् स्त्रियां ङीप् ।) वनवीजपूरकः । इति राजनिर्घण्टः ॥

पचन्ती, स्त्री, (ओदनादीन् पचति या । पच्+शतृ+स्त्रियां ङीप् ।) पाककर्त्री । इति व्याकरणम् ॥

पचमानः, त्रि, (पचतेऽसौ इति । “लटः शतृशानचौ” । २ । २ । १२४ । इति शानच् ।) पाककर्त्ता । इति व्याकरणम् ॥ (पुं, वह्निः ॥)

पचम्पचा, स्त्री, (पचं पचं पचति । पचेः खश् ततो मुम् । स्त्रियां टाप् ।) दारुहरिद्रा । इत्यमरः । २ । ४ । १०२ ॥

पचा, स्त्री, (पच्यते इति पचेः षित्वादङ् ततष्टाप् ।) पाकः । इत्यमरः । ३ । २ । ८ ॥ (पचत्यसौ इति पचाद्यच् स्त्रियां टाप् । पाककर्त्री ।)

पचिः, पुं, (पचतीति । पच्+“सर्व्वधातुभ्य इन् ।” उणां । ४ । ११७ । इति इन् ।) अग्निः । इति त्रिकाण्डशेषः ॥ पचनम् । इति संक्षिप्तसारव्याकरणम् ॥

पचेलिमः, पुं, (पचत्यसौ इति । “पच एलिमच् ।” उणां । ४ । ३७ । इति एलिमच् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः ॥ कर्त्तृश्रमायासेन स्वयं पक्वे, त्रि । (स्वयमेव पच्यते यः कर्म्मकर्त्तरि केलिमप्रत्ययः ।) यथा, पचेलिमाः साक्षुमाः । इति

मनौ । ४ । १७२ । श्लोकस्य टीकायां कुल्लूकभट्टः । “यथा भूमिरुप्तबीजमात्रा सद्यैव प्रचुरपर्णलिमफलशीघ्रलितपकसम्मिलिता न भवति ॥”)

पचेलुकः पुं, (पचत्योदनादीन् । पचो बाहुलकादेलुकः ।) सूदः । पाचकः । इति त्रिकाण्डशेषः ॥

पच्छः, [स्] अ, (वीप्सार्थे पादं पादमिति पञ्चावृत्ततः शस् ।) पादं पादम् । इति संक्षिप्तसारव्याकरणम् ॥

पच्यमानः, त्रि, (पच्यतेऽसौ इति । पच् + कर्मणि शानच् ।) वर्त्तमानपचनकर्म्मताश्रयः । वर्त्तमानपाकविशिष्टतण्डुलादि । इति व्याकरणम् ॥

पज, द रोधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट्-इदित् ।) रोध व्याकरणम् । पञ्जरः । सौत्रधातुरयम् । इति दुर्गादासः ॥

पज्रः, पुं, (पद्भ्यां जातः । पद् + जन् + कर्त्तरि डः ।) शूद्रः । इति हेमचन्द्रः ॥ (शूद्रस्य पद्जातत्वमुक्तं श्रुतौ यथा,—

“ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यत् वैश्यः पद्भ्यां शूद्रो अजायत ॥”)

पज्झटिका, स्त्री, छन्दोविशेषः । तल्लक्षणं यथा,

“प्रतिमदयमकितषोडशमात्रा
नवमगुरुत्वविभूषितगात्रा ।
पज्झटिका पुनरत्र विवेकः
क्वापि न मध्यगुरुर्गण एकः ॥”

उदाहरणं यथा,—

“सरलवतंसाश्लिष्टस्कन्ध-
चलनतरलपज्झटिकाकटिबन्धः ।
मौलिचपलशिखिचन्द्रकच्छन्दः
कालियशिरसि ननर्त्त मुकुन्दः ॥”

इति छन्दोमञ्जर्यां मात्रावृत्ताख्यः ५ स्तवकः ॥ (तथा च भगवच्छङ्कराचार्य्यकृतमोहमुद्गरे ४ ।

“मा कुरु धनजनयौवनगर्व्वम्
हरति निमेषात् कालः सर्व्वम् ।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा ॥”४॥)

पद्धटिका । इति छन्दोमञ्जरीटीका ॥

पञ्च, [न्] त्रि, संख्याविशेषः । पाँच इति भाषा । बहुवचनान्तोऽयम् । इत्युणादिकोषः ॥ (यथा, मनुः । ११ । १६५ ।

“पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥”)

तद्वाचकानि यथा । पाण्डवः १ शिवास्यम् २ इन्द्रियम् ३ स्वर्गः ४ व्रताग्निः ५ महापापम् ६ महाभूतम् ७ महाकाव्यम् ८ महामखः ९ पुराणलक्षणम् १० अङ्गम् ११ प्राणाः १२ वर्गः १३ इन्द्रियार्थः १४ बाणः १५ । इति कविकल्पलता ॥ पञ्चसंख्याविशिष्टे, त्रि । यदुक्तम् । “संख्यासंख्येये ह्यादश त्रिषु ।” इत्यमरः । २ । ९ । ८३ ॥

पञ्चकं, त्रि, (पञ्चैव इति स्वार्थे कन् ।) पञ्च । यथा, भाषापरिच्छेदे । ३३ । “संख्यादिपञ्चकं कालदिशोः शब्दस्य ते च खे ।” इति ॥ (पञ्च संख्यापरिमाणमस्य । “तदस्य परिमाणम् ।” ५ । १ । ५७ । इत्यनुवृत्तौ “संख्यायाः संज्ञासंघसूत्राध्ययनेषु ।” ५ । १ । ५८ । इति पञ्चसंख्यापरिमितिमिति संघार्थे कन् प्रत्ययः । शकुनादि पञ्चकवचनम् । यथाह चिन्तामणिः ।

“अग्निचौरभयं रोगो राजपीडा धनक्षतिः ।
संग्रहे तृणकाष्ठानां कृते वस्वादिपञ्चके ॥”

पञ्चभिः क्रीतम् । “संख्याया अतिशदन्तायाः कन् ।” ५ । १ । २२ । इति कन् । पञ्चभिः क्रीते द्रव्यविशेषे ॥)

पञ्चकपालः, पुं, पञ्चसु कपालेषु संस्कृतः पुरोडाशः । (“संस्कृतं भक्षाः ।” ४।२।१६ । इत्यण् ततो “द्विगोर्लुगनपत्ये ।” ४ । १ । ८८ । इत्यणो लुक् ।) स तु यज्ञविशेषः । यथा । “यदा वा एष यज्ञं पशून् वपति योऽभिसुद्धासयते पञ्चकपालः पुरोडाशो भवति ।” इत्यादि यजुर्वेदीयश्रुतिः ॥ (पञ्चानां कपालानां समाहारः । परनिपातः ।) कपालपञ्चके, क्ली ॥

पञ्चकर्म्म, [न्] क्ली, (पञ्चानां कर्म्मणां समाहारः ।) पञ्चप्रकारशारीरिकचिकित्साविशेषः । यथा,—

“वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
पञ्चकर्म्मेदमन्यच्च क्षार उत्क्षेपणादिकम् ॥”

इति शब्दचन्द्रिका ॥ (भाषापरिच्छेदोक्तानि पञ्चकर्म्माणि । यथा, तत्रैव ६ ।

“उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥”)

पञ्चकषायः, पुं, (पञ्चविधः कषायः । अथवा पञ्चानां द्रव्याणां कषायः वल्कलरसः । क्वचिदयं बहुवचनान्तोऽपि दृश्यते । तत्र तु पञ्च च ते कषायाश्चेति एवमेव ।) मद्दापानीयपञ्चप्रकारकषायद्रव्यम् । यथा,—

“जम्ब्वाशाल्मलिवाट्यालं वकुलं बदरं तथा ।
कषायाः पञ्च विज्ञेया देव्याः प्रीतिकराः शुभाः ॥”

इति दुर्गोत्सवपद्धतिः ॥

पञ्चकृत्यः, पुं, (पञ्च विसृतं कृत्यं शाखापत्रादिकं यस्य ।) पञ्चपीडूकपः । इति राजनिर्घण्टः ॥ (क्ली, पञ्च प्रचलितं कृत्यं कार्य्यं सृष्ट्यादिकम् । सृष्टिस्थितिध्वंसविधानानुग्रहात्मकं कार्य्यम् इति भावः । यथाह चिन्तामणिः ।

“यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वद्भासते तं नुमः शिवम् ॥”)

पञ्चकोलं, क्ली, पाचनविशेषः । यथा,—

“पञ्चकोलं कणामूलं चव्याचव्यानिनागरैः ।”

इति शब्दचन्द्रिका ॥ अस्य गुणाः ।

“पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम् ।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् ।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम् ॥”

इति भावप्रकाशः ॥ अपि च ।

“पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥”

इति चक्रपाणिदत्तः ॥ (पञ्चकोलघृतमुक्तं चरके चिकित्सितस्थाने १८ अध्याये ।

“पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
सक्षारैरर्द्धपलिकैर्द्विःप्रस्थं सर्पिषः पचेत् ॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च ।
दधिमस्तुनतकोपेतं तत् सर्पिर्जठरापहम् ।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत् ॥”)

पञ्चकोषाः, पुं, (पञ्च च ते कोषाश्चेति ।) कोषा इवात्माच्छादकत्वेन कोषाः । ते च पञ्चविधाः । यथा । अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोषः १ ॥ पञ्चकर्म्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोषः २ ॥ पञ्चज्ञानेन्द्रियसहितं मनः मनोमयकोषः ३ ॥ पञ्चज्ञानेन्द्रियसहिता बुद्धिः विज्ञानमयकोषः ४ ॥ अहङ्कारात्मकोऽविद्यात्मको वा आनन्दमयकोषः ५ ॥ इति शिवगीतामतम् ॥ * ॥ अपि च ।

“पितृभुक्तान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते ।
देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः ॥”

इत्यन्नमयकोषः १ ॥

“पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्त्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्ज्जनात् ॥”

इति प्राणमयकोषः २ ॥

“अहन्तां ममतां देहे गृहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥”

इति मनोमयकोषः ३ ॥

“लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥”

इति विज्ञानमयकोषः ४ ॥

“काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ।
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम् ॥”

इत्यानन्दमयकोषः ५ ॥ इति पञ्चदशी ॥

पञ्चक्षारगणः, पुं, (पञ्चानां क्षाराणां गणः ।) क्षारपञ्चकम् । पञ्चलवणम् । यथा,—

“क्षारैस्तु पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः ।
काचसैन्धवसामुद्रविट्सौवर्च्चलकैः समैः ।
स्यात् पञ्चलवणं तच्च भूयोपेतं पटाह्वयम् ॥”

इति राजनिर्घण्टः ॥

पञ्चखट्वं, क्ली स्त्री, (पञ्चानां खट्वानां समाहारः ।) पञ्चखट्वाः समाहृताः । इति व्याकरणम् ॥

पञ्चगन्धयोगः, पुं, (पञ्चानां गन्धो यत्र स एव योगः ।) विसारी गन्धा बृहती पृश्निपर्णी निदिग्धिका श्वदंष्ट्रा एता मिलिताः । इति राजनिर्घण्टः ॥

पञ्चगवं, क्ली स्त्री, पञ्चानां गवां समाहारः ॥ (समासे टच् ।) पञ्च गावः समाहृताः । इति व्याकरणम् ॥

पञ्चगवधनः, त्रि, पञ्च गावो धनं यस्य । इति मुग्धबोधव्याकरणम् ॥

पञ्चगव्यं, क्ली, (गोर्विकारः गव्यम् । पञ्चगुणितं गव्यम् ।) गोसम्बन्धिपञ्चप्रकारद्रव्यम् । (यथा, मनुः । ११ । १६५ ।

“ब्रह्मभोज्यापहरणे यानशय्यासनस्य च ।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥”)

तत्तु गोमयगोमूत्रदुग्धदधिघृतरूपम् । यथा,—
“पञ्चगव्यं दधिक्षीरघृतगोमूत्रगोमयैः ।” इति
शब्दचन्द्रिका ॥ * ॥ तत्परिमाणं यथा,—
“पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतञ्च पलमात्रं स्यात् गोमयं तोलकत्रयम् ॥
दधि प्रसृतमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथवा पञ्चगव्यानां समानो भाग इष्यते ॥”
इति गौतमीयतन्त्रम् ॥ * ॥ अपि च ।
“गोशकृद्द्विगुणं मूत्रं पयः स्यात्तच्चतुर्गुणम् ।
घृतं तद्द्विगुणं प्रोक्तं पञ्चगव्ये तथा दधि ॥” * ॥
तस्य पानफलं यथा,—
“पञ्चगव्येन पूतन्तु वाजिमेधफलं लभेत् ।
गव्यन्तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥
सौम्ये मुहूर्त्ते संयुक्ते पञ्चगव्यन्तु यः पिबेत् ।
यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ॥”
गव्यानां देवप्रीतिकरत्वं यथा,—
“दध्ना हि त्रिदशाः सर्व्वे क्षीरेण च महेश्वरः ।
घृतेन पावको नित्यं पायसेन पितामहः ॥
सकृद्दत्तेन प्रीयन्ते वर्षाण्यष्ट त्रयोदश ।
तां दत्त्वा चैव पीत्वा च प्रेतो मेध्यस्तु जायते ॥”
इति वराहपुराणम् ॥ * ॥
तस्य विशेषो यथा,—
“पयः काञ्चनवर्णाया श्वेतवर्णोत्थगोमयम् ।
गोमूत्रं ताम्रवर्णाया नीलवर्णाभवं घृतम् ॥
दधि स्यात् कृष्णवर्णाया दर्भोदकसमायुतम् ।
गोमूत्रमाषकाण्यष्टौ गोमयस्य चतुष्टयम् ॥
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश उच्यते ।
घृतस्य माषकाः पञ्च पञ्चगव्यं मलापहम् ॥”
इति गारुडे प्रायश्चित्तप्रकरणम् ॥

पञ्चगुः, त्रि, पञ्चभिर्गोभिः क्रीतः । इति मुग्धबोधव्याकरणे द्विगुसमासः ॥

पञ्चगुप्तः, पुं, (पञ्चानामिन्द्रियाणां चापल्यं गुप्तं यत्र । यद्वा पञ्चानां पदार्थानां गुप्तः गोपनं यत्र ।) चार्व्वाकदर्शनम् । (करौ चरणौ शिरश्चेति पञ्चाङ्गानि गुप्तानि यस्य ।) कच्छपः । इति मेदिनी ॥

पञ्चगुप्तरसा, स्त्री, (पञ्चधा गुप्तो रसोऽस्याः ।) पृक्का । इति राजनिर्घण्टः ॥

पञ्चचामरं, क्ली, षोडशाक्षरपादच्छन्दोविशेषः । यथा,—
“प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥”
इति छन्दोमञ्जरी ॥४॥ (अस्योदाहरणमाह तत्रैव ।
“सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ॥
सुराङ्गनामवल्लवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥”)

पञ्चचीरः, पुं, (पञ्च चीराण्यस्य । बौद्धधर्म्मोपलम्भि-जिनभेदः । पञ्च चीराणि स्वरभेदा अस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

पञ्चचूडा, स्त्री, (पञ्चसङ्ख्याः चूडाः शिरोरत्नानि यस्याः ।) अप्सरोविशेषः । इति पुराणम् ॥ (यथा, रामायणे । ६ । ९२ । ७१ ।
“उर्व्वशी मेनका रम्भा पञ्चचूडा तिलोत्तमा ।
उपानृत्यंस्तु काकुत्स्थं प्रहृष्टा रक्षसो वधात् ॥”)

पञ्चजनः, पुं, (पञ्चभिर्भूतैर्जन्यतेऽसौ । पञ्च+जन्+कर्म्मणि घञ् । “जनिवध्योश्च” ।७।३।३५। इति न वृद्धिः ।) पुरुषः । इत्यमरः । २ । ६ । १ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३५५ ।
“सङ्ग्रामयात्रादिका देशास्तेन श्रीमन्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन् निवेशिताः ॥”)
दैत्यविशेषः । स च संह्रादस्य कृतौ पत्न्यां जातः । (यथा, श्रीभागवते । ६ । १८ । १४ ।
“संह्रादस्य कृतिर्भार्य्याऽसूत पञ्चजनं ततः ॥”
अपरो दैत्यभेदः । श्रीकृष्णः एनं हत्वा सान्दीपनिमुनये अस्य मृतं पुत्त्रं गुरुदक्षिणास्वरूपं ददौ । यथा, भागवते । ३ । ३ । २ ।
“सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य सविस्तरम् ।
तस्मै प्रादात् वरं पुत्त्रं मृतं पञ्चजनोदरात् ॥”)
अस्यास्थ्ना पाञ्चजन्यनामा शङ्खो जातः । स च श्रीकृष्णस्य । यथा,—
“पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥”
इत्यादि श्रीभगवद्गीतायाम् । १ । १५ ॥ (प्रजापतिः । यथा, भागवते । ६ । ४ । ५१ ।
“एषा पञ्चजनस्याङ्ग ! दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश ! प्रतिगृह्यताम् ॥”
सगरराजपुत्त्रः । यथा, हरिवंशे । १५ । ६ ।
“केशिन्यसूत सगरादसमञ्जसमात्मजम् ।
राजा पञ्चजनो नाम बभूव स महाबलः ॥”
गन्धर्व्वाः पितरो देवा असुरा रक्षांसि पञ्चजनपदवाच्यानि भवन्ति । इति चिन्तामणिः ॥)

पञ्चजनी, स्त्री, पञ्चानां जनानां समाहारः ततो ङीप् । इति व्याकरणम् ॥ (विश्वरूपकन्या । यथा, भागवते । ५ । ७ । १ । “तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥”)

पञ्चजनीनः, पुं, (पञ्चसु जनेषु व्यापृतः । दिक्संख्ये संज्ञायामिति समासः । पञ्चजने हितम् । पञ्चजनादुपसङ्ख्यानमिति खः । पा । ५ । १ । ९ । वार्त्तिके ।) भण्डः । इति हलायुधः ॥ पञ्चजनसम्बन्धिनि पञ्चजन्याः प्रभौ च त्रि ॥

पञ्चज्ञानः, पुं, (पञ्चानां पदार्थानां ज्ञानमस्य ।) बुद्धः । इति हेमचन्द्रः ॥

पञ्चतक्षं, क्ली स्त्री, पञ्चानां तक्ष्णां समाहारः । इति व्याकरणम् ॥

पञ्चतत्त्वं, क्ली, (पञ्चानां तत्त्वानां समाहारः ।) पञ्चभूतम् । इति स्वरोदयः ॥ पञ्चमकारः । मद्यमांसमत्स्यमुद्रामैथुनरूपम् । यथा,—
“मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ॥
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥”
इति कैवल्यतन्त्रे प्रथमपटलः ॥ वैष्णवानां यथा,—
“तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः ।
गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि ! ॥
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने ! ।
तत्रादौ श्रीगुरोस्तत्त्वं कथयिष्यामि पार्व्वति ! ॥
सतैलं वर्त्तिकायुक्तं देहस्थं ब्रह्मतेजसम् ।
गुरुणा मन्त्रदानेन तत्तत्त्वं दीपितं भवेत् ॥
देवतायाः शरीरं हि मन्त्राद्युत्पद्यते ध्रुवम् ।
अत एव हि तस्यात्मा देवरूपो न संशयः ॥
ईश्वरस्य तु यद्बीजं तदेव अक्षयात्मकम् ।
तेन वर्णात्मकं देहं जन्तोरेव न संशयः ॥
मन्त्रवर्णं सर्व्ववर्णमयास्ते परमेश्वरि ! ।
मर्णतत्त्वमिदं देवि ! सर्व्वस्वं मम यद्भवेत् ॥
स्वयं देवो न चान्योऽसि निर्म्मलो देवरूपकः ।
सर्व्वत्र देवतां ध्यायेत् वृक्षगुल्मलतादिषु ॥
ध्यानेन लभते सर्व्वं ध्यानेन विष्णुरूपकः ।
ध्यानेन सिद्धिमाप्नोति विना ध्यानं न सिध्यति ॥
इति ते कथितं सर्व्वं वैष्णवस्य सुरेश्वरि ! ।
यज्ज्ञानादमरत्वञ्च विष्णुरूपो भवेन्नरः ॥
ते नरा नहि गच्छन्ति कदाचिद्यममन्दिरम् ॥”
इति निर्व्वाणतन्त्रे १२ पटलः ॥

पञ्चतपाः, [स्] त्रि, (अग्न्यादिभिः पञ्चभिस्तेजःपदार्थैस्तपति यः । पञ्च+तप्+असुन् ।) अग्निचतुष्टयसूर्य्यपञ्चकसाध्यतपोविशिष्टः । यथा,
“तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥”
इति माघे । २ । ५१ ॥

पञ्चतयं, त्रि, (पञ्च अवयवा यस्य । अवयवे तयप् ।) पञ्चावयवम् । इति व्याकरणम् ॥

पञ्चतन्मात्रं, क्ली, (पञ्चगुणितं शब्दादिभूतसूक्ष्मात्मकं तन्मात्रम् ।) तामसाहङ्कारोत्पन्नमहाभूतोपादानकारणशब्दस्पर्शरूपरसगन्धाः । तदाश्रयद्रव्याणि च । इति सांख्यभाष्यम् ॥

पञ्चता, स्त्री, (पञ्चानां भूतानां भावः । पाञ्चभौतिकस्य शरीरस्य पञ्चधाभावे आरम्भकाणां भूतानां तद्भावापत्तौ सत्यां औपचारिकत्वात् ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ (यथा, भागवते । ७ । ८ । ५२ ।
“स तु जनपरितापं तत्कृतं जानता ते ।
नरहर उपनीतः पञ्चतां पञ्चविंश ॥”)
देहारम्भकाणां पृथिव्यादिपञ्चमहाभूतानां स्वांशसंक्रमणात् पृथक्त्वम् । इति भरतः ॥ पञ्चभावः । इति मेदिनी ॥ (यथा, मनुः । ८ । १५१ ।
“धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् ॥”)

पञ्चतिक्तं, क्ली, (पञ्चगुणितं तिक्तम् ।) तिक्तद्रव्यपञ्चकम् । यथा । निम्बामृतावृषपटोलनिदिग्धिकाः । इत्यादि चक्रपाणिदत्तः ॥

पञ्चतीर्थी, स्त्री, (पञ्चानां तीर्थानां समाहारः । ङीप् ।) तीर्थपञ्चकम् । यथा । “विषुवद्दिवसे प्राप्ते पञ्चतीर्थीविधानतः ।” इति तिथितत्त्वम् । पञ्चतीर्थान्याह । (तानि च भिन्नदेशे भिन्नरूपाणि, तत्र काशीस्थानि । यथा, काशीखण्डे । १०० । ३९—४० ।
“ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ॥”)

पुरुषोत्तमस्थानि यथा,—
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥"
इति तीर्थतत्त्वम् ॥ ७ ॥ अपि च । नाना-
स्थानस्थानि यथा,—
"पृथिव्यां यानि तीर्थानि सर्व्वाण्येवाभिषेचनात् ।
तत्पञ्चतीर्थस्नानेन समं नास्त्यत्र संशयः ॥
एकादश्याञ्च विपाशायां द्वादश्यां शौकरे तथा ।
त्रयोदश्यां नैमिषे च प्रयागे च चतुर्द्दश्याम् ॥
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते ।
कालेष्वेषु नरः स्नात्वा सर्व्वं पापं व्यपोहति ॥"
इति वराहपुराणम् ॥
पञ्चत्वं, क्ली, (पञ्चानां क्षित्यादिभूतानां भावः ।)
मरणम् । पञ्चानां भावः । इति हेमचन्द्रः ॥
("पञ्चधात्वम्भृतः कायो यदि पञ्चत्वमागतः ।
पञ्चभिः स्वशरीरोत्थैस्तत्र का परिवेदना" ॥
तथा, भागवते । १ । १५ । ४१ ।
"तत्राजुहावाथ सोऽसृजत् तं पञ्चत्वे ह्यजोहवीत् ॥")
पञ्चदशः, त्रि, पञ्चदशानां पूरणः । (पूरणे डट् ।
पञ्चाधिका दश यत्र वा ।) पोनेर इत्यादि
भाषा । तत्संख्यामात्रवाचित्वे नान्तबहुवच-
नान्तोऽयम् । इति व्याकरणम् ॥ तद्वाचकशब्दः ।
(यथा, अथर्व्ववेदे । ११ । १ । १९ । "पितामहाः
पितरः प्रजोपजाहं पक्ता पञ्चदशस्ते अस्मि ॥")
तिथिः । इति कविकल्पलता ॥
पञ्चदशी, स्त्री, (पञ्चदशानां पूरणी । डट् ।
ङीप् ।) पूर्णिमा । अमावास्या । इति
मेदिनी ॥ (यथाह याज्ञवल्क्यः । १ । १४६ ।
"पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥"
(पञ्चदशप्रकरणात्मिका ग्रन्थविशेषः ।) श्रीमद्भारती-
तीर्थविद्यारण्यमुनीश्वरकृतो वेदान्तग्रन्थविशेषः ॥
पञ्चदीर्घं, क्ली, (शरीरस्य स्वनिशाखोक्तपञ्च-
सङ्ख्यकस्थले दीर्घं यत्र पञ्चसु अवयवेषु दीर्घलक्ष-
णकमित्यर्थः ।) शरीरपञ्चावयवलक्षणविशेषः ।
यथा,—
"बाहू नेत्रद्वयं कुक्षिर्द्वे तु नासे तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥"
इति सामुद्रकम् ॥
पञ्चधा, व्य, (पञ्चन् + "संख्याया विधार्थे धा ।"
५ । ३ । ४२ । इति धा ।) पञ्चप्रकारम् । इति
व्याकरणम् ॥ (यथा, भागवते । ८ । १९ । ३७ ।
"धर्म्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥")
पञ्चनखः, पुं, (पञ्च नखा यस्य ।) हस्ती । कूर्म्मः ।
इति हेमचन्द्रः ॥ व्याघ्रः । इति राजनिर्घण्टः ॥ * ॥
भक्षणीयपञ्चनखा यथा,—
"शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः ॥"
इति स्मृतिः ॥
(तथाच याज्ञवल्क्यः । १ । १७७ ।
"भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः ।
शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥")

"पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः ।
कौशल्याग ! शशादीनां तेषां नैकोऽप्यहं कपिः ॥"
इति भट्टिः । ६ । १३१ ॥
पञ्चनदः, पुं, (पञ्च पञ्चसङ्ख्याकाः नद्यः सन्त्यत्र ।
समासे टच् ।) पञ्चनदीयुक्तदेशविशेषः ।
पञ्जाब इति भारतभाषा । तस्य नामान्तरम् ।
वाह्लीकः मद्रदेशश्च । ता नद्यो यथा । शतद्रुः
१ विपाशा २ इरावती ३ चन्द्रभागा ४ वितस्ता
५ । इति पुराणम् ॥
(यथा, राजतरङ्गिण्याम् । ४ । २४८ ।
"सद्यः पञ्चनदे जातु दुस्तरैः सिन्धुसङ्गमैः ॥")
पञ्चानां नदीनां समाहारे क्ली ॥ (यथा,
रामायणे । २ । ४३ । २१ ।
"ततः पञ्चनदं क्रान्त्वं निवेतथं समन्ततः ॥"
तथ काशीस्थनदीपञ्चकरूपं तीर्थम् । यथा,
काशीखण्डे । ५९ । ११३—११६ ।
"किरणाधूतपापे च तस्मिन् धर्म्मनदे शुभे ।
स्वधन्धौ पापसंहर्त्री धाराकृत्स्नां शुभव्रते ॥
ततो भागीरथी प्राप्ता तेन दिलीपिना सह ।
भागीरथी समायाता यमुना च सरस्वती ॥
किरणाधूतपापा च पुण्यतोया सरस्वती ।
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्त्तिताः ।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७९ ।
"अथ पञ्चनदं गत्वा नियतो नियताशनः ।
पञ्चयज्ञानवाप्नोति क्रमशो येऽनुकीर्त्तिताः ॥"
असुरभेदः । यथा, हरिवंशे । १२० । ८८ ।
"हत्वा पञ्चनदं नाम नरकस्य महासुरम् ॥")
पञ्चनिम्बं, क्ली, (पञ्चानां त्वक्पुष्पफलादि-
रूपाणां निम्बानां समाहारः ।) निम्बवृक्षस्य-
पत्रत्वक्पुष्पफलमूलानि । इति राजनिर्घण्टः ॥
"पञ्चनिम्बन्तु तत्पुष्पपत्रवल्कफलच्छदैः ॥"
इति शब्दचन्द्रिका ॥
पञ्चनी, स्त्री, (पञ्च्यते प्रपञ्च्यते पाशक्रीडा-
नियमो यत्र । पचि विस्तारे + ल्युट् स्त्रियां
ङीप् ।) शारिफलकम् । इति शब्दरत्नावली ॥
(पाशार छक् इति भाषा ॥)
पञ्चनीराजनं, क्ली, पञ्चानां नीराजनानां समा-
हारः । पञ्चप्रकारारात्रिकम् । इति कालोत्तर-
तन्त्रम् ॥ अस्य विवरणं नीराजनशब्दे द्रष्टव्यम् ॥
पञ्चपक्षी, [न्] पुं, (अकारादि-ओकारान्ताः
अइउएओरूपाः पञ्चस्वराः पक्षिणः पक्षि-
स्वरूपा यत्र ।) पारिभाषिकपक्षिपञ्चकद्वारा
त्रिकालबोधकग्रन्थः । यथा,—
"प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम् ।
भविष्यदर्थबोधाय पप्रच्छ गिरिजा सदा ॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः ।
त्रिकालज्ञानबोधार्थं पञ्चपक्षी प्रदर्श्यते ॥
अनेन शास्त्रसारेण लोकैः कालत्रयं प्रति ।
बलाबलानि दृश्यन्ते सर्व्वकार्य्येषु निश्चिताः ॥
आगतं प्रश्नकं दृष्ट्वा दैवज्ञः सावधानतः ।
यद्यत् करोति कर्म्माणि तस्मात् सर्व्वं विचारयेत् ॥

ऊर्द्ध्वावलोकने जीवलाभोऽष्टौ तु मङ्गलम् ।
अधोदृष्टौ भवेद्धातुरेताश्चिन्ताप्रभेदतः ॥"
तत्र ।
"ललाटे पुत्रचिन्ता स्यात् कामचिन्ता च कण्ठके ।
बाहुभ्यां वस्तुचिन्ता च व्याधिचिन्ता तथोदरे ॥
कटौ विच्छेदचिन्ता च शत्रुचिन्ता च गुह्यके ।
दुःखचिन्ता भवेत् पादे इति चिन्ताप्रभेदकाः ॥" ॥
अपरञ्च ।
"अक्षरं पक्षिसत्त्वञ्च दिग्दैवमदिनानि च ।
कालं वर्णं बलं मित्रं धातुमूलादिकं क्रमात् ॥
आरूढ़पञ्चलग्नेभ्यः प्रथमाक्षरतोऽपि वा ।
प्रष्टुकस्य वचः श्रुत्वा मात्रा वर्णाः स्वरस्तथा ॥ ॥
स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते ।
पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः ॥" ॥
"अकारादिरोकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः ।
शुभार्थं कल्पयेद्रूपं स्वरास्ते पक्षिरूपिणः ॥
अकारः श्येन आख्यात इकारः पिङ्गलस्तथा ।
उकारो वायसश्चैव एकारस्ताम्रशेखरः ।
ओकारो नीलकण्ठश्च स्वरास्ते पक्षिसंज्ञकाः ॥
अकारः पूर्व्वदिग्भागे इकारश्चैव दक्षिणे ।
उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा ॥
शेषस्थानेषु सर्व्वेषु ओकारस्तु प्रकीर्त्तितः ।
शकुनानां क्रियाणाञ्च शुभे युद्धे जयाजयौ ॥
प्राक् श्येनः पिङ्गलो याम्ये पश्चिमे काक उच्यते ।
उत्तरे ताम्रचूड़श्च कलापी मध्यगः स्मृतः ॥
इष्टाक्षरैर्नाम ककारादींस्तु विन्यसेत् ।
अकारादिषु हान्तांस्तानेकैकं पट् परिक्रमात् ॥
अक्षरे कचडा वर्णा धभवाश्च भवन्ति हि ।
खछठा नमशा वर्णा इकारे परिकीर्त्तिताः ।
गजढा थयषा वर्णा उकारे स्युर्यथाक्रमम् ॥
घटघा फरसा एते वर्णा एकारमानगाः ।
ङञणा बलहा वर्णा ओकारे परिकीर्त्तिताः ॥ ॥
प्रथमे रविभौमौ च द्वितीये चन्द्रचन्द्रजौ ।
तृतीये जीववारश्च चतुर्थे भृगुवासरः ॥
पञ्चमे मन्दवारश्च पक्षिणां क्रमशो लिखेत् ।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात् ॥
अकारे मेषसिंहालिः इः कन्यायुग्मकर्कटाः ।
उकारे चापमीनौ च एकारे च तुलावृषौ ॥
ओकारे मकरकुम्भौ च एव राशिस्तु संलिखेत् ।
स्वराधः स्थापयेत् खेटान् राशयो यस्य नायकः ॥
अकारे सप्त नक्षत्राणि रेवत्यादिकमेण च ।
पञ्च पञ्च इकारादावेवम्भं स्वरोदये ॥ ॐ ॥
प्रथमे चाश्विनी पूर्व्वं पञ्चनक्षत्रसप्तके ।
अतः क्रमात् द्विषट् चैव पञ्च पञ्च च तारकाः ॥
स्वराणाञ्च क्रमेणैव देवताः परिकीर्त्तिताः ।
ईश्वरः पवनश्चैव इन्द्राकाशः सदाशिवः ॥ ॐ ॥
प्राच्यां पृथ्वी गुरुश्चैव याम्यां शुक्रो जलं तथा ।
अङ्गारकः पश्चिमेऽग्निर्बुधो वायुश्चयोत्तरे ॥
सूर्य्यपुत्रस्तथाकाशे ऊर्द्ध्वमेवं लिखेत्ततः ।
क्षितौ ब्रह्मा जले विष्णुस्तथा वह्नौ हुताशनः ॥
ईश्वरः पवने चैव तथाकाशे सदाशिवः ।
भूमौ मयूरः कुक्कुटो कुक्कुटो वर्त्तमानकः ॥

बलिभुक्श्येनकौ ख्यातौ भविष्यन्तौ सुनिश्चितम् ।
श्येनो हिरण्यवर्णश्च पिङ्गलः शुक्लवर्णकः ॥
काको रक्तोऽसितश्चित्रः कुक्कुटः श्यामलः शिखी ।
काको बलीयान् सर्व्वेभ्यस्तस्मात् श्येनो हि
दुर्ब्बलः ॥
कुक्कुटो दुर्ब्बलस्ताभ्यां पिङ्गलस्तेभ्य ऊनकः ।
सर्व्वेभ्यो दुर्ब्बलः पक्षी नीलकण्ठो न संशयः ॥
बली मयूरात् कुक्कस्तु ताम्रचूडस्तयोर्बली ।
एतेभ्यो बलवान् श्येनश्चतुर्भ्यो वायसो बली ॥ * ॥
मित्रं मयूरः श्येनस्य मयूरस्य च पिङ्गलः ।
ताम्रचूडस्य सुहृदौ मयूरपिङ्गलौ तथा ॥
वायसस्यापि मित्रं स्यात् शिखी भवति सर्व्वदा ।
सुहृदौ पिङ्गलश्येनौ मयूरस्य शिखावरौ ॥ * ॥
काककुक्कुटश्येनाश्च पिङ्गलस्य च विद्विषः ।
मयूरस्य रिपू नित्यं सर्व्वदा श्येनवायसौ ॥
भवतः श्येनकाकौ द्वौ ताम्रचूडस्य विद्विषौ ।
काकस्य शत्रवो नित्यं पिङ्गलश्येनकुक्कुटाः ॥ * ॥
ऊर्द्ध्वदृष्टिर्भवेत् जीवो ह्यधोदृष्टिस्तु मूलकम् ।
समदृष्टिर्भवेद्धातुरेते चिन्ताप्रभेदकाः ॥ * ॥
श्येनो मूलं तथा कुक्को जीवो धातुश्च वायसः ।
कुक्कुटो मूलजीवौ च मूलधातू शिखण्ड्यपि ॥ * ॥
श्येनो नरो वधूः कुक्कः पुरुषो वायसस्तथा ।
कुक्कुटः स्त्री पुमांश्चैव शिखी नपुंसकस्तथा ॥ * ॥
श्येनकुक्कौ द्विजश्रेष्ठौ महीपालस्तु वायसः ।
ताम्रचूडो वणिक् शूद्रो नीलकण्ठस्तथान्त्यजः ॥ * ॥
चतुष्पात् पिङ्गलो ज्ञेयो द्विपदौ श्येनवायसौ ।
ताम्रचूडो नखी शृङ्गी शिखण्डी पक्षिणीवकः ॥ * ॥
श्येनो मुखं कण्ठबाहू कुक्को वक्षस्तु वायसः ।
कुक्कुटः पृष्ठभागः स्यात् शिखी पादयुगं क्रमात् ॥ *
श्येनो भूम्यां धनं ज्ञेयं पिङ्गलो जलपङ्कयुक् ।
वायसस्तृणसङ्घाते कुक्कुटो भक्षनाष्टतम् ॥
श्येनः शिखी गृहानर्घं वन्धुस्थानेषु निश्चितम् ।
स्वग्रामे श्येनकुक्कौ तु वायसो वन्धुमाप्नुयात् ॥
कुक्कुटः परदेशे च परग्रामे तथा शिखी ।
कुक्कस्तु दशहस्ते च स्वार्द्धक्रोशे तु कुक्कुटः ॥
द्विक्रोशे तु तथा काकः श्येनः क्रोशे तु पूर्व्वतः ।
मयूरो योजने चेति तथैव दूरनिश्चयः ॥ * ॥

संक्रौ च मासो गमने च पक्षो
राज्ये दिनानि त्वयनन्तु सप्ते ।
रसे च वर्षं शकुनस्य चर्य्या
कालप्रमाणं सुनयो वदन्ति ॥

शुक्रे चन्द्रे गुल्मवल्ली लताकन्दौ बुधे तथा ।
पत्रं गुरौ फलं सूर्य्ये मूलञ्च रविजे कुजे ॥ * ॥
शुक्रे चन्द्रे भवेन्नीप्यं बुधे स्वर्णसुराङ्गसम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमेव च ॥
भौमे ताम्रं शनौ लौहं राहावस्थीनि कीर्त्तयेत् ।
एतेषां धातुभेदञ्च वाराणामुदयक्रमात् ॥ * ॥
शुक्रे चन्द्रे जलाधारो देवतावर्णस्तिर्गुरौ ।
रवौ चतुष्पदस्थानमिष्टकानिलयो बुधे ॥
दग्धस्थानं कुजे प्रोक्तं शनौ राहौ च वाह्यभूः ।
चमीभिर्द्विङ्कके स्थाने नष्टभूमिं विलोकयेत् ॥ * ॥
रवौ भौमे च भेरुण्डो मयूरो वायसः शनौ ।

पादायुधः शिखी शुक्रे काककुक्कौ गुरौ तथा ॥
कुक्ककुक्कुटाविन्दुशौ क्रमोऽयं शुक्लकृष्णयोः ।
यस्य वारस्य यः पक्षी तदादिं गणयेद्बुधः ॥
दिनपक्षी कार्य्यरूपी प्रश्नपक्षी फलप्रदः ।
दिनेषु शुक्लपक्षे यत् कृष्णे रात्रिषु तत्तथा ॥
कृष्णे दिनेषु यद्यत्तत् शुक्ले रात्रिषु योजयेत् ।
बालः कुमारस्तरुणो वृद्धो मृत इति क्रमात् ॥
घटिका षट् षड़ेवं हि फलमेषामुदीरितम् ।
किञ्चिल्लाभकरो बालः कुमारस्त्वर्द्धलाभदः ॥
तरुणो राज्यदो वृद्धो हानिदो मृत्युदो मृतः ।
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
एकान्तरे भवेत् कृष्णे शुक्ले स्यात् क्रमशो विदुः ।
पक्षिणां क्रमशो ज्ञात्वा फलं ब्रूयात् यथा तथा ॥
गणयेत् पञ्चपक्ष्यादौ जातभूतगणादपि ॥”
शुक्लपक्षे ॥ * ॥ ततः कृष्णपक्षे ।
“भोजनं मरणञ्चैव निद्रा राज्यं तथैव च ।
गमनं पञ्चपक्षाणां कृष्णपक्षे क्रमो दिवा ॥ * ॥
राज्यं सुभिक्षमक्षोभं नष्टलाभं सदा जयम् ।
रोगमुक्तं महालाभं पक्षिणां भुक्तिलक्षणम् ॥ * ॥
धनायासेन वृष्टिः स्याद्दृष्टधनसञ्चयः ।
भूलाभो रोगनाशश्च यात्रासिद्धी रणे जयः ॥
दूरादागमनं योगः प्रयाणे पक्षिलक्षणम् ।
राज्योदये यदि प्रश्नो लाभार्थे स्वल्पलाभदः ॥
रुजानां चिररोगः स्यात् याने हानिः क्षयो रणे ।
पुरग्रामप्रवेशश्च गमनं कलहं तथा ॥
मनश्चञ्चलमारोग्यं गमनेषु विचारयेत् ॥ * ॥
राज्यलाभो जयं सौख्यमक्षोभं रोगनाशनम् ।
सुभिक्षं बहुवृष्टिश्च पक्षिणां राज्यलक्षणम् ॥ * ॥
यात्राहानिरनावृष्टिः कार्य्यहानिरदर्शनम् ।
व्याधिश्च दीर्घरोगश्च पक्षिणां सुप्तिलक्षणम् ॥
अपमृत्युभयञ्चैव सर्व्वकार्य्यविनाशनम् ।
एतदेव फलं ब्रूयात् पक्षिणां मृत्युलक्षणम् ॥ * ॥
श्येने भोक्तरि काकस्तु मान्त्री राजा भुजङ्गभुक् ।
स्वप्नावस्थां गतः कुक्कः परासुस्ताम्रशेखरः ॥ * ॥
काके भोक्तरि केकी तु मान्त्रः स्यात् पिङ्गलो नृपः ।
ताम्रचूड़स्तथा स्वापी श्येनः कालवशं गतः ॥ * ॥
मयूरे भोक्तरि तथा कुक्को यात्रावशं गतः ।
महीपः कुक्कुटः श्येनः स्वापी काको वशं गतः ॥
कुक्के भोक्तरि मान्त्रस्तु कुक्कुटः श्येनको नृपः ।
काको निद्रावशं यातो मयूरो मरणं गतः ॥ * ॥
कुक्कुटे भोक्तरि श्येनः मान्त्रो राजा तु वायसः ।
शिखी निद्रावशं यातः पिङ्गलः कालमाप्नुयात् ॥”
इति कृष्णपक्षस्य दिवाक्रमः शुक्लपक्षस्य रात्रिक्रमश्च ॥ अपरोऽपि यथा । अङ्कमोदिते । उष्णोदितेन । व्योमिथ्यवायुः । इत्येव जुहो । एवमुक्तोऽपि ॥ * ॥
“श्येने भोक्तरि कुक्कः स्यात् मान्त्रः काको महीपतिः ।
ताम्रचूड़ो निद्रितश्च शिखी कालवशं गतः ॥ * ॥
मयूरे भोक्तरि श्येनः मान्त्रः कुक्को महीपतिः ।
स्वप्नावस्थां गतः काकस्ताम्रचूड़ो मृतस्तथा ॥ * ॥
कुक्कुटे भोक्तरि शिखी सदा गमनमाप्नुयात् ।
श्येनो महीपतिः कुक्कः स्वापी काको मृतिं गतः ॥ * ॥
काके भोक्तरि यात्रायां ताम्रचूड़ः शिखी नृपः ।
निद्रायां रमते श्येनः कुक्कः कालवशं गतः ॥ * ॥
कुक्के भोक्तरि यात्रायां वायसः कुक्कुटो नृपः ।
नीलकण्ठस्तथा स्वापी श्येनो मृत्युवशं गतः ॥”
इति शुक्लपक्षस्य दिवाक्रमः कृष्णपक्षस्य रात्रिक्रमश्च ॥ * ॥ अपरोऽपि यथा । अहिपुरेभोः । गोकरिपुरे । शकोनरिपुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः ॥ * ॥
“इत्युक्तं पक्षिणां कार्य्यं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावद्गर्ज्जन्ति शास्त्राणि शकुनानामनेकशः ।
यावन्न श्रूयते पक्षिशकुनं शङ्करोदितम् ॥”
इति श्रीमहादेवविरचितं पञ्चपक्षिशाकुनं समाप्तम् ॥

पञ्चपर्णिका, स्त्री, (पञ्च पञ्च पर्णान्यस्याः । ततः कप् कापि अत इत्वम् ।) गोरक्षीक्षुपः । इति राजनिर्घण्टः ॥

पञ्चपल्लवं, क्ली, (पञ्चानां पल्लवानां समाहारः ।) आम्रादिपत्रपञ्चकम् । यथा,—
“आम्रजम्बूकपित्थानां बीजपूरकविल्वयोः ।
गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम् ॥”
इति शब्दचन्द्रिका ॥
वैदिककर्म्मणि घटोपरिदेयपञ्चपल्लवं यथा,— आम्राश्वत्थवटपर्कटीयज्ञोडुम्बराणि । तान्त्रिक-कर्म्मणि पञ्चपल्लवं यथा,—
“पनसाम्रं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमुक्तञ्च मुनिभिस्तन्त्रवेदिभिः ॥”
इति तन्त्रसारः ॥

पञ्चपात्रं, क्ली, पञ्चानां पात्राणां समाहारः । इति व्याकरणम् ॥ पञ्चपात्रकरणकपार्व्वणविधिकश्राद्धम् । तत्तु अन्वष्टकाश्राद्धम् । अमावस्यामृतप्रेतपञ्चत्वसाम्वत्सरिकं सपिण्डीकरणञ्च । इति लोकप्रसिद्धम् ॥

पञ्चपित्तं, क्ली, (पञ्चविधं पित्तम् ।) पित्तपञ्चकम् । यथा,—
“वराहच्छागमहिषमत्स्यमायूरपित्तकम् ।
पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु ॥”
इति वैद्यकम् ॥

पञ्चप्रदीपः, पुं, (पञ्चसंख्यकाः प्रदीपा यत्र ।) पञ्चदीपयुक्तारात्रिकम् । यथा,—
“कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः ।
हरेः पञ्चप्रदीपेन बहुधा भक्तितत्परः ॥”
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

पञ्चप्रासादः, पुं, (प्रसीदन्ति मनांसि अत्र । प्र+सद्+अधिकरणे घञ् । “उपसर्गस्य दीर्घत्वं क्वचित्स्यादिति ।” इति वचनात् दीर्घः । पञ्चचूडान्वितः प्रासादः । मध्यमदलोपिकर्म्मधारयः ।) देवगृहविशेषः । पञ्चरत्न इति ख्यातः । यथा,—
“पञ्चैकचितं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो प्रमोदितम् ॥”

पञ्चबन्धः, पुं, (पञ्चमः बन्धः भागो यत्र ।) नष्टद्रव्यस्य पञ्चमांशदण्डः । यथा,—
"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते ॥"
आगमेन विक्रयक्रयादिना । उपभोगेन च मदीयमिदं द्रव्यं तदैवं नष्टमपहृतं चेत्तापि । भाव्यं साधनीयं तत् स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते । पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः । इति मिताक्षरा ॥

पञ्चभद्रः, पुं, (पञ्चसु अङ्गभेदेषु भद्रः शुभः पुष्पितचाम् ।) पञ्चस्थानेषु पुष्पितोऽश्वविशेषः । यथा,—
"पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ॥"
इति हेमचन्द्रः ॥ पाचनविशेषः । यथा,—
"छिन्नोद्भवापर्पटवारिवाह-
भूनिम्बशुण्ठीजनितः कषायः ।
समीरपित्तज्वरजर्जराणां
करोति भद्रं खलु पञ्चभद्रः ॥"
इति शार्ङ्गधरः ॥

पञ्चभूतं, क्ली, पञ्चानां भूतानां क्षित्यप्तेजोमरुद्व्योम्नां समाहारः । (केचित्तु संज्ञाप्रयुक्तत्वात् पञ्च च तानि भूतानि चेति कर्म्मधारयसमासमाहुस्तत्र तु एकवचनं चिन्तनीयम् ।)
अस्योत्पत्तिर्यथा ।
"अभूत्समादहङ्कारस्त्रिविधः सृष्टिभेदतः ।
वैकारिकादहङ्कारादेवा वैकारिका दश ॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।
तैजसादिन्द्रियाण्यासंस्तन्मात्राः क्रमयोगतः ।
भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे ॥"
इति शारदायां प्रथमपटलः ॥ * ॥
"सोऽहङ्कारस्त्रिभेदः स्यात् सत्त्वादिगुणयोगतः ।
वैकारः सात्त्विको नाम तैजसो राजसः स्मृतः ॥
भूतादिस्तामसस्ते च पृथक्तत्त्वाद्यवाङ्कजन् ।
वैकारिकाद्दिग्वाताद्याश्चन्द्रान्तैकादश स्मृताः ॥
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः ।
यथापरं मनस्तत्त्वं सङ्कल्पविकल्पकम् ॥
तैजसादेव तस्मात्तमिन्द्रियाणि तथा दश ।
भूतादेः पञ्चतन्मात्राण्यासन् भूतमतः परम् ॥"
इति राघवभट्टधृतम् ॥ * ॥
"शब्दादिमात्रस्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्वह्निरेते रसाच्च ।
अम्भांस्येतैर्गन्धतो भूर्धरात्मा
भूताः पञ्च स्युर्गुणोनाः क्रमेण ॥"
इति प्रपञ्चसारे प्रथमपटलः ॥ * ॥
"आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः ।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही ॥"
(तथा च श्रुतिः ।
"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत ॥".
तत्रक्रमं व्यञ्जयन्नाह मनुनाप्युक्तम् । १ । २० । यथा,—
" आद्याद्यस्य गुणन्त्वेषामवाप्नोति परःपरः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥"
अत्र कुल्लूकभट्टः ।
"आद्याद्यस्याकाशादेर्गुणं शब्दादिकं वाय्वादिः परः परः प्राप्नोति । एतदेव स्फुटयति यो यः इति येषां मध्ये यो यो यावतां पूरणो यावतिथः षष्ठादिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुणः इत्येवमादिमन्वादिभिः स्मृतः । एतेनैतदुक्तं भवति । आकाशस्य शब्दो गुणः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगन्धा इति ॥)
तस्य लयप्रकारो यथा,—
"मही संलीयते तोये तोयं संलीयते रवौ ।
रविः संलीयते वायौ वायुर्नभसि लीयते ।
पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वे तत्त्वं विलीयते ॥"
इति ब्रह्मज्ञानतन्त्रनिर्व्वाणतन्त्रे ॥ * ॥
तद्गुणास्थ्यादि यथा,—
"अस्थिमांसनखाश्चैव नाड़ी त्वक् चेति पञ्चमः ।
पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च ।
तोयपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
हासो निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च ।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
धारणं चालनं क्षेपः सङ्कोचः प्रसरस्तथा ।
वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
कामक्रोधस्तथा लोभस्तथा मोहश्च पञ्चमः ।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥"
इति ब्रह्मज्ञानतन्त्रे प्रथमपटलः ॥ * ॥
पञ्चभूतनक्षत्राणि यथा,—
"धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा ।
अभिजिच्चोत्तराषाढ़ा पृथ्वीतत्त्वमुदाहृतम् ॥
पूर्व्वाषाढ़ा तथाश्लेषा मूलार्द्रा चैव रोहिणी ।
उत्तरभाद्रपदा तोयं आपस्तत्त्वमभीष्टदम् ॥
भरणी कृत्तिका पुष्या मघा पूर्व्वा च फल्गुनी ।
पूर्व्वभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये ॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्व्वसुः ।
अश्विनी मृगशीर्षं च वायुतत्त्वमुदाहृतम् ॥"
इति स्वरोदयः ॥

पञ्चमं, क्ली, मैथुनम् । यथा,—
"भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ।
तस्य नाम भवेद्देवि पञ्चमं परिकीर्त्तितम् ॥"
इति समयाचारतन्त्रे द्वितीयपटलः ॥

पञ्चमः, त्रि, पञ्चानां पूरणः । (पूरणे डट् ततः नान्तादिति मट् ।) पाँच इत्यादि भाषा । इति मेदिनी ॥ (यथा, मनुः । ८ । १२५ ।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥")
रुचिरः । दक्षः । इति हेमचन्द्रः ॥

पञ्चमः, पुं, पञ्चानां स्वराणां पूरणः । सप्तकण्ठोत्थितस्वरविशेषः । इत्यमरः ॥ स तु षड्जादिसप्तस्वराणां पञ्चमः स्वरः । तस्योत्पत्तिर्यथा,—
"वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ॥"
इति तट्टीकायां भरतः ॥ अपि च ।
"प्राणोऽपानः समानश्च उदानो व्यान एव च ।
एतेषां समवायेन जायते पञ्चमः स्वरः ॥"
इति सङ्गीतदामोदरः ॥ अस्य जातिः औड़वः । पञ्चस्वरमिलित इति यावत् । अस्य कूटतानाः विंशत्यधिकशतम् १२० प्रत्येकताने चत्वारिंशत् ४० । समुदायेन चतुःसहस्राष्टशतानि ४८०० तानाः भवन्ति । अस्योच्चारणजातिः पिकः । उच्चारणस्थानं उरः गलः शिरश्च । व्याकरणमते अधरः । अयं विप्रवर्णः । इति सङ्गीतशास्त्रविवेकलक्षणम् ॥ अस्य रूपं इन्द्ररूपतुल्यम् । वर्णः श्यामः । स्थानं क्रौञ्चद्वीपम् । देवता महादेवः । वारो बृहस्पतिः । समयश्चतुस्त्रिंशत्पलाधिकाष्टौ घटिकाः । श्रुतयश्चत्वारः क्षितिः रक्ता सन्दीपनी आलापिनी च । मूर्च्छनास्तिस्रः पमनी निर्मली कोमली च । इति नारदपुराणम् ॥ * ॥ रागभेदः । इति मेदिनी ॥ अयं कल्लिनाथमते सोमेश्वरमते च षड्रागाणां मध्ये तृतीयरागः । सोमेश्वरमते अस्य गानसमयः शरदृतुः प्रातःकालश्च । कल्लिनाथमते अस्य रागिण्यः षट् । यथा, त्रिवेणी १ स्तम्भतीर्था २ आभीरी ३ ककुभ् ४ वराटी ५ सावेरी ६ । सोमेश्वरमते तु विभाषा १ भूपाली २ कर्णाटी ३ वड़हंसिका ४ मालश्रीः ५ पटमञ्जरी ६ । अस्मिन्नागो गान्धारस्वरस्तीव्रः । ऋषभपञ्चमौ स्वरौ लुप्तौ । षड्जस्वरः ग्रहांशन्यासाः । स च हनूमन्मते भरतमते च भैरवरागस्याष्टमपुत्रः । इति सङ्गीतशास्त्रम् ॥

पञ्चमकारं, क्ली, (पञ्चसंख्यकं मकारं तत्त्वं यत्र । मद्यं मांसमित्यादिषु आदौ मकारस्थितत्वात्तथात्वम् ।) मकारपञ्चकम् । पञ्चतत्त्वम् । तत्तु मुद्रामैथुनमद्यमांसमत्स्यात्मकम् । यथा,—
"मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ।
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥"
इति गुप्तसाधनतन्त्रे ७ पटलः ॥ * ॥
"मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि ।
स्त्रीभिः सार्द्धं महासाधुरर्च्चयेद्जगदम्बिकाम् ॥
अन्यथा च महानिन्दा गीयते पण्डितैः सुरैः ।
कायेन मनसा वाचा तस्मात्तत्त्वपरो भवेत् ॥"
इति कामाख्यातन्त्रे ५ पटलः ॥ * ॥
"या सुरा सर्व्वकार्य्येषु कथिता भुवि सुन्दरि ।
तस्या नाम भवेद्देवि ! तीर्थं परमं सुदुर्लभम् ॥
भूदायां भक्ष्ययोग्यानां यत्नांश्च देवनिर्म्मितम् ।
वेदमन्त्रैः विधिवत् प्रोक्ता या शुद्धिरुत्तमा ॥
भक्ष्ययोग्याश्च कथिता ये ये मत्स्या वरानने ! ।
ते रहस्ये मया प्रोक्ता मीनाः सिद्धिप्रदायकाः ॥

पृथुकास्तण्डुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! मुद्रा मुक्तिप्रदायिनी ॥
भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ! ।
तस्य नाम भवेद्देवि ! पञ्चमं परिकीर्त्तितम् ॥
प्रथमन्तु भवेन्मद्यं मांसञ्चैव द्वितीयकम् ।
मत्स्यञ्चैव तृतीयं स्यान्मुद्रा चैव चतुर्थिका ॥
पञ्चमं पञ्चमं विद्यात् पञ्च ते नामतः स्मृताः ॥”
इति समयाचारतन्त्रे २ पटलः ॥ * ॥
अथ मत्स्यादिव्युत्पत्तिः ।
“मायामलादिशमनान्मोक्षमार्गनिरूपणात् ।
अष्टदुःखादिविरहान्मत्स्येति परिकीर्त्तितः ॥
माङ्गल्यजननाद्देवि ! संविदानन्ददानतः ।
सर्व्वदेवप्रियत्वाच्च मांस इत्यभिधीयते ॥
पञ्चमं देवि ! सर्व्वेषु मम प्राणप्रियं भवेत् ।
पञ्चमेन विना देवि ! चण्डीमन्त्रं कथं जपेत् ॥
यदि पञ्चमकारेषु भ्रान्तिश्चेत् कुरुते प्रिये ! ।
तस्य सिद्धिः कथं देवि ! चण्डीमन्त्रं कथं जपेत् ॥
आनन्दं परमं ब्रह्म मकारास्तस्य सूचकाः ॥”
इति कुलार्णवतन्त्रे पञ्चमखण्डे १७ उल्लासः ॥ * ॥
तेषां शोधनादिकं बाहुल्यभिया लोकमोह-
भयाच्च नोक्तम् ॥

पञ्चमहायज्ञाः, पुं, (पञ्चविधा महायज्ञाः ।)
गृहस्थकर्त्तव्यपञ्चप्रकारनित्यकर्म्माणि । यथा,—
“पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः ।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः ॥”
इत्यमरः । २ । ७ । १४ ॥
(तथा च मनुः । ३ । ६८–७० ।
“पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महात्मभिः ।
पञ्चकॢप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥”)

पञ्चमारः, पुं, (पञ्चसु इन्द्रियेषु म्रियते आसक्तो
भवतीति । पञ्च+मृ+कर्त्तरि अण् ।) बल-
देवपुत्त्रः । इति शब्दमाला ॥

पञ्चमास्यः, पुं, (पञ्चमो रागः स्वरो वा आस्ये
यस्य । “कोकिलः पञ्चमं वदेत् ।” इत्युक्तेरस्य
तथात्वम् ।) कोकिलः । इति शब्दरत्नावली ॥

पञ्चमी, स्त्री, (पञ्चानां पाण्डवानां इयम् । अथवा
पञ्च पतीन् मिनोति सेवाशुश्रूषादिभिर्बध्नाति या ।
पञ्च+मी+क्विप् । मीधातुरत्र बन्धार्थः ।)
पाण्डवपत्नी । द्रौपदी । इति मेदिनी । (पञ्चानां
पूरणी डट् ततो मट् स्त्रियां ङीप् ।) पारि-
प्रश्नका । पाशार छक् इति भाषा । इति भूरि-
प्रयोगः ॥ * ॥ तिथिविशेषः । सा च चन्द्रस्य
पञ्चमकलाक्रियारूपा तदुपलक्षितकालश्च ।
मल्लिकाकारघटितेन शुक्लपक्षे ५ कृष्णपक्षे २०
एतदङ्कबोधिता ॥ * ॥ अथ पञ्चमीव्यवस्था ।
सा च चतुर्थीयुता ग्राह्या युग्मात् ।
“पञ्चमी च प्रकर्त्तव्या चतुर्थीसहिता विभो ! ॥”
इति स्कन्दपुराणाच्च ॥ * ॥

अथ नागपञ्चमी । यथा,—देवीपुराणे ।
“शुभे जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसा देवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥”
देवैरिति सहार्थे तृतीया । तथा,—
“देवीं संपूज्य गत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागाननन्ताद्यान्महोरगान् ।
क्षीरं सर्पिस्तु नैवेद्यं देयं सर्व्वविषापहम् ॥”
एवं गारुड़े तथैव नागानाह ।
“अनन्तं वासुकिं पद्मं शङ्खं कम्बलमेव च ।
तथा कर्क्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम् ॥
कालीयं तक्षकञ्चैव पिङ्गलं मासि मासि च ।
यजेत्कामसिते नागान् दष्टमुक्तो दिवं व्रजेत् ॥”
पुराणान्तरेऽपि ।
“अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलिकः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः ॥”
पुराणान्तरेऽपि ।
“शेषः पद्मो महापद्मः कुलीरः शङ्खपालकः ।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः ।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥”
अत्र च ।
“योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः ॥”
इत्यनेन ओंकारपूर्व्वेण मत्स्यपुराणोक्तेनानन्तं
पूजयेत् । रत्नाकरे ।
“पिचुमर्द्दस्य पत्राणि स्थापयेद्भवनोदरे ।
स्वयञ्चापि तदश्नीयाद्ब्राह्मणांश्चैव भोजयेत् ॥” * ॥
अथ श्रीपञ्चमी । भविष्योत्तरे । माघशुक्लपञ्च-
मधिकृत्य,—
“चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥”
सम्वत्सरप्रदीपे ।
“पञ्चम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः ।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्ततः ॥
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया ।
तस्याः पूर्व्वाह्ण एवेह कार्य्यः सारस्वतोत्सवः ॥”
इत्युपादानात् श्रियः सरस्वत्याः । तथा च वाह्निः ।
“लक्ष्मीधरन्त्सुधीधीत्रिवर्गसम्पद्विभूतिशोभासु ।
उपकरणवेशरचनाविधासु च श्रीरिति प्रथिता ॥”
ध्यानं यथा,—
“तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥”
इति सारदोक्तं ध्यायेत् । पाद्यादिभिः पूजयित्वा ।
“भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥”
स्वाहेति मन्त्रपुराणीयेन त्रिः पूजयेत् । मत्स्य-
सूक्ते । बन्धुजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत् ।
सरस्वतीं संपूज्य,—

“यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत् ।
न विहीनं त्वया देवि ! तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्म्मां सरस्वति ! ॥”
इति मत्स्यपुराणीयैः प्रार्थयेत् ॥ * ॥
अथ पञ्चमीव्रतम् ।
तच्च शुद्धकाले माघशुक्लपञ्चम्यामारभ्य षड्वर्ष-
पर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां कार्य्यम् । यथा,—
“क्षीरोदे च पुरा सुप्तं लक्ष्मीसमन्वितं हरिम् ।
प्रणम्य परिपप्रच्छ नारदो मुनिसत्तमः ॥
नारद उवाच ।
केनोपायेन देवेश ! नारीणाञ्च सुखं भवेत् ।
सौभाग्यमतुलं याति तन्मे त्वं वक्तुमर्हसि ॥
श्रुत्वा तद्वचनं देवो नारदस्य महात्मनः ।
संप्रेक्ष्य कमलां प्राह ब्रूहि देवि शुभानने ! ॥
इङ्गितं मधुरालोक्य पद्मपत्रायतेक्षणा ।
वल्लभं तं पुरस्कृत्य प्रीत्या प्रत्युवाच ह ॥
देव्युवाच ।
अस्ति श्रीपञ्चमीनाम व्रतं परमदुर्लभम् ।
यत् कृत्वा प्राप्यते लोकैः सुखं सौभाग्यमुत्तमम् ॥
तत्र मां पूजयेद्भक्त्या माधवञ्च प्रयत्नतः ।
गन्धैः पुष्पैश्च वस्त्रैश्च धूपैर्नानाविधैः फलैः ॥
श्रद्धया पूजयेद्भक्त्या माघादौ पञ्चमीदिने ।
इमां ब्रह्मपुराणोक्तां या करोति च पञ्चमीम् ॥
लक्ष्मीसमा भवेन्नारी इह लोके परत्र च ।
विधानं शृणु धर्म्मज्ञ ! यादृशी पञ्चमी मम ॥
वर्षाणि षट् प्रकर्त्तव्या परमप्रीतिमानसा ।
शुद्धकाले तु संप्राप्ते पञ्चमी या शुभा भवेत् ॥
तस्यामारभ्य कर्त्तव्यं व्रतं पापप्रणाशनम् ।
स्वयं यतात्मा भूत्वा च आरभेद्व्रतमुत्तमम् ॥
आज्याद्व्यमल्वणेन हविष्येण हयं तथा ।
फलैनैकन्तु कर्त्तव्यमुपचारैः प्रतिष्ठयेत् ॥
प्रतिष्ठाया विधिरयं काञ्चनस्य श्रियं हरिम् ।
ब्राह्मणञ्च सपत्नीकं पूर्व्वेद्युरधिवासयेत् ॥
पञ्चम्यामर्च्चितं विप्रमाचार्य्यञ्च द्विजोत्तमम् ।
पूजा च विविधा कार्य्या मूलमन्त्रेण भक्तितः ॥
होमञ्च तिललाजानां घृतं कुर्य्यात् पृथक् पृथक् ।
नैवेद्यं विविधं कुर्य्यात् लड्डुकं पूपमुत्तमम् ॥
आसनं पाद्यमर्घ्यञ्च तथाप्याचमनीयकम् ।
वासो यज्ञोपवीतञ्च गन्धपुष्पफलं तथा ॥
छत्रं धूपः प्रदीपश्च ताम्बूलं फलमेव च ।
गौः शय्या कमलञ्चैव हिरण्यं रजतं तथा ॥
ब्राह्मणेभ्यः प्रदेयानि दक्षिणासंयुतानि च ।
यथोक्तेन विधानेन या कुर्य्यात् पञ्चमीव्रतम् ॥
आत्मकुलमुद्धृत्य विष्णुलोकमवाप्नुयात् ।
श्वशुरस्य पितृकुलस्य पत्युश्च भर्त्तुरस्य च ॥
शङ्करस्य यथा गौरी तथा भर्त्तुः सा शुभा ।
मासि मासि सिते पक्षे पञ्चमी या प्रकीर्त्तिता
तस्यां पूज्या सदा देवी भक्तितः कमलोद्भवा ।
लक्ष्मीसमा भवेन्नारी षट्पञ्चमीव्रतेन वै ।

श्रीपञ्चमीव्रतं रम्यं या करोति पतिव्रता ।
तस्याहं स्थिरतां यामि यथा नारायणे स्थिरा ॥
मत्प्रसादान्मुनिश्रेष्ठ ! सर्व्वसौभाग्यमाप्नुयात् ॥”
इति ब्रह्मपुराणोक्तषट्पञ्चमीव्रतकथा समाप्ता ॥

अथ पञ्चमीजातफलं यथा ।
“भूपालमान्यो मनुजः सुगात्रः
क्षमासमेतो विदुषां वरेण्यः ।
वाग्मी गुणी बन्धुजनैकमान्यः
प्रसूतिकाले यदि पञ्चमी स्यात् ॥”
इति कोष्ठीप्रदीपः ॥

विद्याविशेषः । तद्विवरणं यथा,—
“कामं विष्णुयुतं देवि ! शक्तिमायेन्दुमेव च ।
महामायां ततः पश्चात् वाग्भवं बीजमुद्धरेत् ॥”
विष्णुयुतं ,अकारयुक्तमित्यर्थः । शक्तिरेकारः । माया ईकारः ।
“वियच्चन्द्रस्ततः पश्चात् कलौ नकुलिरेव च ।
मायाक्षरेण संयुक्तं नादबिन्दुकलान्वितम् ॥
प्रथमं कामराजस्य बीजं परमदुर्लभम् ।
वियद्विष्णुयुतं कामो हंसः शक्रस्ततः परम् ॥
महामाया ततः पश्चात् स्वप्नावतीति कथ्यते ॥”
हंसो सकारः । एतद्वितीयं कामकूटम् ॥ * ॥
“मादनं शिवबीजञ्च वायुबीजं ततः परम् ।
इन्द्रबीजं ततः पश्चात् महामायां समुद्धरेत् ॥”
इति तृतीयम् । इयं मधुमती ॥ * ॥
“शिवबीजं तथा कामं इन्द्रं देवीं नियोजयेत् ।
महामायां ततः पश्चात् शक्तिकूटं समुद्धरेत् ॥”
देवीं सकारम् ।
“वाग्भवं प्रथमं कूटं शक्तिकूटन्तु पञ्चमम् ।
मध्यकूटत्रयं देवि ! कामराजं मनोहरम् ।
कथिता पञ्चमी विद्या त्रैलोक्यसुभगोदया ॥” * ॥
ईश्वर उवाच ।
“शृणु देवि ! महाभागे शक्तिकूटं सुदुर्लभम् ।
वाग्भवं प्रथमं कूटं कामराजं त्रिकूटकम् ॥
शक्तिकूटं प्रवक्ष्यामि तव स्नेहात् विशेषतः ।
जीवप्राणौ महादेवि ! मादनं तदनन्तरम् ॥
इन्द्रबीजं ततः पश्चात् भुवनेशी तु पञ्चमम् ॥”
जीवः सकारः । प्राणो हकारः । इति वा शक्तिकूटम् ॥ * ॥
“अथवा देवदेवेशि ! सौभाग्यायाश्च वाग्भवम् ।
कूटत्रयं कामराजं शक्तिबीजञ्च पूर्व्ववत् ।
एषा प्रोक्ता महादेवि ! पञ्चमी परमेश्वरी ॥”
अस्या वाग्भवं कूटं हित्वा सौभाग्यायाः प्रथमकूटं वाग्भवं कूटमित्यर्थः । कामराजकूटत्रयं पञ्चम्या एव ।
“वामनेत्रादिकूटं वा भगादिकूटमेव वा ।
नारिद्या सिद्धिदा विद्या सर्व्वदोषविवर्ज्जिता ॥”
भग एकारः । एतेनान्यथा पञ्चमी वाग्भवशक्तिकूटभेदेन ॥ * ॥ यामले ।
“द्विविधा पञ्चमी विद्या पञ्चपञ्चाक्षरी परा ।
मध्ये षडक्षरी चैव शक्तिश्च चतुरक्षरी ॥”
षडिति कामराजविद्याया मध्यकूटमित्यर्थः ।
शक्तिरिति कामराजस्य शक्तिकूटमित्यर्थः ।
एषा चतुर्थी वाग्भवकूटभेदात् । एतयोः कामराजस्य तृतीयकूटन्तु तथैव ॥ * ॥
“कामबीजं महेशानि ! शिवबीजं ततः परम् ।
तदधो हंसबीजन्तु इन्द्रबीजं विचिन्तयेत् ॥
महामाया ततः पश्चात् कूटं परमदुर्लभम् ॥”
एषा पूर्व्ववदष्टधा । अन्या चतुर्थी ॥ * ॥
तथा तत्त्वबोधे ।
“कामाकाशपरा शक्र संख्यानक्षत्ररूपिणी ॥”
परा सकारः । संख्यानक्षत्ररूपिणी महामाया ॥ * ॥
तथा च तन्त्रे ।
“कामबीजं महेशानि ! शम्भुबीजं ततः परम् ।
तदधश्चन्द्रबीजन्तु पृथ्वीबीजं ततो लिखेत् ।
तदन्ते च महामाया कूटं परमदुर्लभम् ॥”
एषा पूर्व्ववदष्टधा । अन्या चतुर्थी । तेन षट्त्रिंशद्रूपिणी पञ्चमी ॥ * ॥ हंसमाहेश्वरे ।
“वामकेश्वरविद्यायाः कूटं वाग्भवमुत्तमम् ।
एकारादि वाग्भवन्तु कूटं वाग्भवमुत्तमम् ॥
एकारादि वाग्भवन्तु सौभाग्यायाश्च वाग्भवम् ।
एषा च पञ्चमी विद्या त्रैलोक्यवशकारिणी ॥” * ॥
श्रीक्रमे ।
“एतासां चैव विद्यानां प्राणं शृणु वरानने ! ।
रमां मायां हंसबीजं वाग्भवादौ नियोजयेत् ॥
शक्त्यन्ते तु महादेवि ! हंसं मायां रमां तथा ।
एभिर्युक्तेन देवेशि ! विद्याजपनमाचरेत् ॥”
जपश्च सप्तवारमेव दीपन्यां तथा दर्शनात् ।
एतासां पूर्व्वोक्तश्रीक्रमोक्तविद्यानाम् ॥ * ॥
पञ्चम्यास्तु विशेषो यथा ।
“रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ।
शक्त्यन्ते तु महेशानि ! हंसं मायां रमां तथा ॥
कामराजचये देवि ! ककारं शक्रसंयुतम् ।
मायाबिन्द्वीश्वरयुतं सूर्य्यकोटिसमप्रभम् ॥
प्रथमं कामकूटस्य चाद्ये नियोजयेदिदम् ॥
वान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
नादबिन्दुसमायुक्तं श्रियो बीजमुदाहृतम् ।
द्वितीयं कामबीजन्तु जपेदुक्ता च सुन्दरि ! ॥
गगनं वह्निसंयुक्तं वामनेत्रविभूषितम् ।
नादबिन्दुसमायुक्तं मायाबीजं प्रकीर्त्तितम् ॥
मधुमतीं जपेच्चापि सर्व्वकामफलप्रदाम् ॥”
इति तन्त्रसारः ॥ * ॥ * ॥ रागिणीविशेषः । सा च वसन्तरागस्य प्रिया । यथा,—
“वसन्ती पञ्चमी दोली वहारी रूपमञ्जरी ।
रागिण्य ऋतुराजस्य वसन्तस्य प्रिया इमाः ॥”
अस्या ध्यानं यथा,—
“सङ्गीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
स्वर्णाङ्गिणी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेद्या ॥”
इति सङ्गीतदर्पणः ॥
(नदीविशेषः । यथा, महाभारते ।६।९।२४।
“वरां वीरकराञ्चापि पञ्चमीञ्च महानदीम् ॥”)

पञ्चमीव्रतं, क्ली, (पञ्चम्यां माघशुक्लपञ्चमीमारभ्य षड्वर्षं यावत् प्रतिमासीयशुक्लपञ्चम्यां क्रियमाणं कर्त्तव्यं व्रतम् नियमविशेषः ।) माघशुक्लपञ्चमीमारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां लक्ष्मीकर्त्तव्यनियमविशेषः । तत्प्रयोगो यथा, तत्रादौ कृतनित्यक्रियः पञ्चभागा कुशहस्तान्य स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । विष्णुर्ओंऽद्य माघे मासि शुक्ले पक्षे पञ्चम्यां तिथौ अमुकगोत्रा श्रीअमुकी पुत्रपौत्राद्यनवच्छिन्नसन्ततिमहदैश्वर्य्यसौभाग्यारोग्यसौन्दर्य्याद्यैश्वर्य्यप्राप्तिपूर्व्वकविष्णुलोकप्राप्तिकामा अद्यारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां गन्धपुष्पादिनानादैवताखण्डौकवासुदेवपूजापूर्व्वकभविष्यपुराणोक्तकथाश्रवणरूपषट्पञ्चमीव्रतमहं करिष्ये । इति सङ्कल्प्य सूक्तं पाठयेत् । ततः सामान्यार्घ्यादि आसनशुद्धिभूतशुद्धिमातृकान्यासकराङ्गन्यासान्तं कृत्वा गणेशादीन् संपूज्य लक्ष्मीं नारायणञ्च यथाशक्ति पूजयेत् । ततो भोज्योत्सर्गं कृत्वा प्रणमेत् ॥ * ॥
अथ कथा ।
“शेषशय्यासमासीनं लक्ष्मीधृतपदाम्बुजम् ।
योगनिद्रान्वितं कृष्णं नारदः परिपृच्छति ॥
केनोपायेन मानवनारी दुःखं न विन्दति ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रादिकं लभेत् ॥
इत्युक्तो माधवश्चक्रे लक्ष्मीमुखनिरीक्षणम् ।
इङ्गिताकारतत्त्वज्ञा पद्मा पद्मायतप्रभा ।
पद्मभाजो पुरस्कृत्य प्रीता वचनमब्रवीत् ॥
श्रीरुवाच ।
षट्पञ्चमीव्रतं सम्यक् शृणुतां पापनाशनम् ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रधनप्रदम् ॥
माघे मासि सिते पक्षे पञ्चमी या शुभा भवेत् ।
तस्यामारभ्य कर्त्तव्यं षडब्दं व्रतमुत्तमम् ॥
प्रतिमासि च पञ्चम्यां लक्ष्मीं संपूज्य केशवम् ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैः पृथग्विधैः ॥
कुर्य्याद्धोमञ्च विधिवत् गणेशस्य ग्रहस्य च ।
विष्णोर्लक्ष्म्याश्च वाग्देव्या दुर्गाया विधिक्रमात् ॥
अन्येषाञ्च यथाशक्ति तिलाज्ययवधान्यकैः ।
ततोऽश्नीयादलवणमादौ संवत्सरद्वयम् ॥
तृतीये च चतुर्थे च हविष्यान्नञ्च भोजयेत् ।
पञ्चमे पायसमश्नीयात् षष्ठे कुर्य्यादुपोषणम् ।
षष्ठे प्रतिष्ठा कर्त्तव्या भोजयेद्द्वादश द्विजान् ॥
तत्र षोडशदानानि हेमपद्मीमलङ्कृताम् ।
दक्षिणासहितां दद्यादाचार्य्याय मुनीश्वर ॥
ततः पर्य्यङ्कं दद्यात् सर्व्वालङ्कारभूषितम् ।
काञ्चनप्रतिमायुक्तं लक्ष्मीनारायणान्वितम् ॥
विधिनानेन या कुर्य्यात् पञ्चमीव्रतमुत्तमम् ।
सर्व्वांस्तु सम्प्रहृष्य विष्णुलोकमवाप्नुयात् ॥
एतत्ते कथितं विप्र ! सर्व्वलोके प्रकाशितम् ।
शोकसन्तापहानिश्च इत्याद्दुःखं न जायते ॥
धर्म्मं यशश्चायुष्यमैश्वर्य्यञ्चापि वर्द्धयेत् ।
याश्च कुर्व्वन्ति भूर्लोके साध्व्यः सर्व्वं सुखावहम् ॥
श्रीरुवाच ।
शृणु सर्व्वं मुनिश्रेष्ठ ! देवा यत् कथितं मयि ।
सद्गुणानसर्व्वेषां प्रतिष्ठाच द्विजोत्तम ! ॥
या करोति व्रतं साध्वी धर्म्मकामफलं लभेत् ।

तस्याः श्रीनिश्चला गेहे सत्यं सत्यं हि नारद ! ॥
यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा ।
शङ्करस्य यथा गौरी सापि भर्त्तुर्भवेत्तथा ॥
या पञ्चमीव्रतं कुर्य्यात् सा भवेच्च पतिव्रता ।
यथोक्तविधिना या तु कुर्व्वीत व्रतमुत्तमम् ॥
पुत्त्रपौत्त्रधनैश्वर्य्यं पद्ममीकरणादपि ।
एतत्ते कथितं सर्व्वं तत्त्वं कमललोचन ! ॥

नारद उवाच ।

केनापि कथितं पूर्व्वं कृतं केनापि वा पुनः ।
प्राप्तं कुत्र त्वया देवि ! श्रोतुमिच्छामि तद्वद ॥

श्रीरुवाच ।

माघे मासि सिते पक्षे पञ्चम्याञ्च महासुने ! ।
निशावसानसमये चन्द्रभागां महानदीम् ॥
हंसवृन्दैः समाकीर्णां नलिनीपुलिनोज्ज्वलाम् ।
तत्र गौरी शची मेधा सावित्री चोर्व्वशी परा ॥
नारायणं समारोप्य कुर्व्वन्ति व्रतमुत्तमम् ।
काम्यव्रतमिदं यद्वै ! लभते फलमुत्तमम् ॥
हर्षवतीश्च तां वीक्ष्य प्रोवाच कमलालया ।
पुष्पञ्च देहि मे धूपं दीपं नैवेद्यकलकम् ॥
मया तव प्रसादेन क्रियते व्रतमुत्तमम् ।
ततस्तासां फलैः पुष्पैर्नैवेद्यैश्च व्रतं कृतम् ॥
ततस्तासां प्रसादेन वक्षभागं जनार्द्दन ! ।
त्वयि देव जगन्नाथ ! नरनारीगणेन च ॥
भक्त्या मया ते कथितं मर्त्यलोके प्रकाशितम् ।
या करोति व्रतं ह्येतत् यथाविधिविधानतः ॥
इह लोके सुखं भुक्त्वा नारायणपुरं व्रजेत् ।
श्रुत्वा व्रतस्य माहात्म्यं व्रतमेतत् चरन्ति यः ॥
न किञ्चिदुष्कृतं लोके तासां सत्यं वदाम्यहम् ।
हरन्ति तासां पापानि यास्य दुःखमहर्निशम् ॥
नारायणं नमस्कृत्य प्रपूज्य च विसर्ज्जयेत् ॥"

इति भविष्यपुराणोक्ता षट्पञ्चमीव्रतकथा समाप्ता ॥

पञ्चमुखः, पुं, (पञ्चं विस्तृतं मुखं यस्य सः ।) सिंहः । इति राजनिर्घण्टः ॥ (पञ्च मुखानि यस्य सः ।) शिवः । इति हेमचन्द्रः ॥ तस्य नामवर्णादि यथा, देवीपुराणे ।
"शिवश्च स्थितः साक्षात् सर्व्वव्यापहरः प्रभुः ।
स तु पञ्चमुखः ख्यातो लोके सर्व्वार्थसाधकः ।
पञ्चब्रह्मात्मको यस्मात्तेन पञ्चमुखः स्मृतः ॥
पश्चिमे तु मुखे सद्यो वामदेवस्तथोत्तरे ।
पूर्व्वे तत्पुरुषं विद्यादघोरश्चापि दक्षिणे ॥
ईशानः पञ्चमो मध्ये सर्व्वेषामुपरि स्थितः ।
इति पञ्च मुखा वत्स ! पापघ्ना महनाशनाः ॥
सद्योजातं भवेच्छुक्लं वामदेवन्तु पीतकम् ।
रक्तस्तत्पुरुषो ज्ञेयोऽघोरः कृष्णः स एव च ॥
ईशानः पश्चिमस्तेषां सर्व्ववर्णसमन्वितः ।
कामदः कामरूपी स्यात् नानाधारः शिवात्मकः ॥
(रुद्राक्षविशेषः । अस्य धारणतः शुभं भवति ॥ पञ्च मुखानि यस्य इति विग्रहे वाच्यलिङ्गत्वम् । यथा, रामायणे ।५।३१।२३।
[ततः
"तस्य पञ्चायतांल्लोलान् शिलान् पञ्चमुखान् शिरस्सु पन्नगाभान् दुर्द्धर्षः संन्यवेशयन् ।")

पञ्चमुखी, स्त्री, (पञ्चमुखानीव कन्दस्याः ।) वासकः । इति राजनिर्घण्टः ॥ जवापुष्पविशेषश्च ॥ (पञ्चं विस्तृतं मुखमस्याः । सिंहस्त्री ॥ हठिकाले पञ्च- महाभूतान्येव पञ्चमुखानीव यस्याः प्रकृतिरित्यर्थः । शिवपत्नी । इति शब्दाम्बुधिः ॥)

पञ्चमुद्रा, स्त्री, (पञ्चविधा मुद्रा ।) पूजायां कर्त्तव्या पञ्चप्रकारमुद्रा । तस्या अनुष्ठानं यथा,—
"सम्यक् सम्पूरितः पुष्पैः कराभ्यां कल्पितोऽञ्जलिः ।
आवाहनी समाख्याता मुद्रा देशिकसत्तमैः ॥१॥
अधोमुखी त्वियञ्चेत् स्यात् स्थापनी मुद्रिका भवेत् ।२।
उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात् सन्निधापनी ।३।
अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधनी मता । ४ ।
उत्तानमुष्टियुगला संमुखी करणी मता ॥"५॥

इति पूजाप्रदीपः ॥

पञ्चमूत्रं, क्ली, (पञ्चविधं मूत्रम् ।) गवाजामेषी- महिषीगर्दभीमूत्रम् । इति राजनिर्घण्टः ॥

पञ्चमूलं, क्ली, (पञ्चप्रकारं पञ्चगुणितं वा मूलम् ।) स्वनामख्यातपाचनम् । तत् त्रिविधं वृहत् स्वल्पं तृणाख्यञ्च । आद्यं यथा,—
"बिल्वश्योनाकगाम्भारीपाटलागणिकारिका ।
कफवातहरं श्रेष्ठं पञ्चमूलमिदं महत् ॥"
द्वितीयं यथा,—
"शालपर्णी पृश्निपर्णी वृहतीद्वयगोक्षुरम् ।
वातपित्तहरं हृद्यं कनीयः पञ्चमूलकम् ॥"
तृतीयं यथा,—
"कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवः ।"

इति चक्रपाणिदत्तः ॥

अपि च ।
"बिल्वाग्निमन्थश्योनाककाश्मर्य्यः पाटला तथा ।
ज्ञेयं वृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम् ॥
शरेक्षुदर्भकाशानां नलस्य मूलमेव च ।
सोऽश्रुतवारकश्चैव तृणाख्यं पञ्चमूलकम् ॥"

इति शब्दचन्द्रिका ॥

(पञ्चानां मूलानां समाहारः । इति विग्रहे मूलपञ्चकम् ॥)

पञ्चमूली, स्त्री, (पञ्चानां मूलानां समाहारः । "द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) स्वल्प- पञ्चमूलपाचनम् । यथा,—
"शालपर्णी पृश्निपर्णी वृहती कण्टकारिका ।
तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी ॥"

इति शब्दचन्द्रिका ॥

पञ्चयज्ञाः, पुं, (पञ्चविधा यज्ञाः ।) गृहस्थकर्त्तव्य- पञ्चप्रकारयज्ञविशेषाः । यथा,—
"ब्रह्मयज्ञो नृयज्ञश्च देवयज्ञश्च सत्तम ! ।
पितृयज्ञो भूतयज्ञः पञ्चयज्ञाः प्रकीर्त्तिताः ॥"

इति पाद्मे क्रियायोगसारे २६ अध्यायः ॥

शूद्रमधिकृत्य,—
"नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत् ।"

इति तिथ्यादितत्त्वम् ॥

अस्य विवरणं पञ्चमहायज्ञशब्दे द्रष्टव्यम् ॥

पञ्चरक्षकः, पुं, (पञ्चगुणितानि रक्षका इव कण्ट-
कानि यस्मिन् ।) पत्रपीडकः । इति राजनिर्घण्टः ॥

पञ्चरत्नं, क्ली, पञ्चानां रत्नानां समाहारः । (यद्वा पञ्चविधं पञ्चगुणितं वा रत्नम् ।) तद्यथा, कनकम् १ हीरकम् २ नीलमणिः ३ पद्मरागः ४ मुक्ता ५ । यथा,—
"कनकं हीरकं नीलं पद्मरागञ्च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्व्वदर्शिभिः ॥
रत्नानामप्यभावे तु स्वर्णं कर्षार्द्धमेव वा ।
सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः ॥"

इति हेमाद्रिः ॥

कनकरजतप्रवालमौक्तिकराजपट्टात्मकमिति गौड़ाः ॥

पञ्चरसा, स्त्री, (पञ्च विस्तीर्णो रसोऽस्याम् ।) आमलकी । इति हारावली शब्दमाला च ॥

पञ्चरात्रं, क्ली, (पञ्चविधानि रात्राणि ज्ञानानि यत्र । समासे अच् ।) शास्त्रविशेषः । यथा,—
"रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रञ्च प्रवदन्ति मनीषिणः ॥
प्रथमं सात्त्विकं ज्ञानं द्वितीयन्तु सदेव च ।
नैर्गुण्यञ्च तृतीयञ्च ज्ञानञ्च सर्व्वतः परम् ॥
चतुर्थञ्च राजसिकं भक्तस्तन्नाभिवाञ्छति ।
पञ्चमं तामसं ज्ञानं विद्वांस्तन्नाभिवाञ्छति ॥
ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः ॥"
तत् सप्तविधं यथा,—
"पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम् ।
ब्राह्मं शैवञ्च कौमारं वाशिष्ठं कापिलं परम् ॥
गौतमीयं नारदीयमिदं सप्तविधं स्मृतम् ॥"

इति नारदपञ्चरात्रे प्रथमरात्रम् ॥

अपि च ।
"पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यपूर्व्वकम् ।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः ॥
एतदतिरिक्तानि हयशीर्षपृथुवादिपञ्चरात्राणि सन्ति ॥ (पञ्चानां रात्रीणां समाहारः ।) पञ्च निशाः । यथाह चक्रपाणिदत्तः ।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्य्यादारोग्यदर्शनात् ॥"

पञ्चलक्षणं, क्ली, (सर्गादि पञ्चविधानि लक्षणानि यत्र ।) पुराणम् । यथा,—
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥"

इत्यमरभरतौ ॥

(पञ्चानां लक्षणानां समाहारः । इति विग्रहे पञ्चलक्षणानि ॥)

पञ्चलवणं, क्ली, पञ्चानां लवणानां समाहारः । (पञ्चगुणितं लवणमिति केचित् ।) तद्यथा,— काचम् । सैन्धवम् । सामुद्रम् । विड़म् । सौवर्च्चलम् । इति राजनिर्घण्टः ॥

पञ्चलाङ्गलकं, क्ली, (सुवर्णादिविभूषितदम्भक

युक्तानि सारदारुनिर्म्मितानि पञ्च लाङ्गलकानि यस्मिन् ।) महादानभेदः । यथा,—
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥
पुण्यां तिथिं समासाद्य युगादिग्रहणादिकाम् ।
भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम् ॥
कर्व्वटं खेटकञ्चापि ग्रामं वा शस्यशालिनम् ।
निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः ॥
सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः ।
सर्व्वोपकरणैर्युक्तानन्यान् पञ्च च काञ्चनान् ॥
वृषलक्षणसंयुक्तान् दशैव तु धुरन्धरान् ।
सुवर्णशृङ्गाभरणान् मुक्तालाङ्गूलभूषितान् ॥
रौप्यखुराग्रतिलकान् रक्तकौषेयभूषणान् ।
स्रग्दामचन्दनयुतान् शालायामधिवासयेत् ॥
मण्डपे ग्रहयज्ञेन पायसं निर्व्वपेत् चरुम् ।
एकस्मिन्नेव कुण्डे तु गुरुर्वह्निं निवेदयेत् ॥
शालाभिः समिधश्चाज्यं कृष्णतिलांस्तथा ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ततो मङ्गलशब्देन शुक्लमाल्याम्बरो बुधः ।
आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुलीयकैः ॥
कौषेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत् ।
शय्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीम् ॥
तथाष्टादश धान्यानि समन्तादधिवासयेत् ।
ततः प्रदक्षिणं कृत्वा गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रमथ सर्व्वं निवेदयेत् ।
यस्माद्देवगणाः सर्व्वे स्थावराणि चराणि च ॥
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवास्तु मे ।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोडशीम् ॥
दानान्यन्यानि मे भक्तिर्धर्म्मे एव दृढ़ा भवेत् ।
दण्डेन सप्तहस्तेन त्रिंशद्दण्डानिवर्त्तनम् ॥
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः ।
मानेनानेन यो दद्यात् निवर्त्तनशतं बुधः ॥
विधिनानेन तस्याशु क्षीयते पापसंहतिः ।
तदर्द्धमथवा दद्यादपि गोचर्म्ममात्रकम् ।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥
यावन्ति लाङ्गलकमार्गमुखानि भूमे-
स्तासां पतिर्द्विगुणरञ्जनरोमकाणि ।
तावन्ति शङ्करपुरे वर्षाणि तिष्ठे-
द्भूमिप्रदानमथ यः कुरुते मनुष्यः ॥
गन्धर्व्वकिन्नरसुरासुरसिद्धसंघै-
राधूतचामरमुपैत्य महाद्विमानम् ।
सम्पूज्यते पितृपितामहबन्धुयुक्तः
शम्भोः पुरं व्रजति चामरनायकः सन् ॥
इन्द्रत्वमप्यधिगतं चयमभ्युपैति
गोभूमिलाङ्गलधुरन्धरसंप्रदानात् ।
तस्मादघौघपटलक्षयकारिभूमे-
र्दानं विधेयमिति भूतिभवाभवाय ॥"
इति मात्स्ये २५० अध्यायः ॥

पञ्चलोहं, क्ली, (पञ्चं विस्तीर्णं लोहम् ।) मौराष्ट्रक-लोहम् । इति हेमचन्द्रः ॥ (पञ्चगुणितं लोहम् । सुवर्णरजतताम्रसीसकरङ्गाणि ॥)

पञ्चलोहकं, क्ली, पञ्चानां लोहकानां धातूनां समाहारः । तद्यथा । सुवर्णरजतताम्ररङ्गनागानि । इति राजनिर्घण्टः ॥

पञ्चवक्त्रः, पुं, (पञ्च वक्त्राणि यस्य ।) शिवः । ("विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥" इति शिवध्यानम् ॥)
अस्य मन्त्रा यथा,—
"समस्तानां स्वराणान्तु दीर्घाः षष्ठाः सविन्दुकाः ।
सह्रस्वकशून्याः साङ्गचन्द्रा उपान्ते नाभिसंस्थिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
क्रमात् सम्मदचन्दोहमादगौरवसंज्ञकाः ॥
प्रासादस्तु भवेत् षष्ठं पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं चतुर्दिशं कृत्वा पञ्चभिर्व्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ॥
सम्मदादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ।
शम्भोः प्रसादनेनैव यस्मादृष्टस्तु मन्त्रकः ॥
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्मन्त्रः सम्मद उच्यते ।
मनःप्रपूरणश्चापि मन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
एतत्पञ्चं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
महाक्षरश्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
स्वयमनेन मन्त्रेण आराधयतमीश्वरम् ॥ * ॥
ध्यानञ्च शृणु वक्ष्यामि सम्यक्तात्भैरवौ ।
पञ्चवक्त्रं महाकायं जटाजूटविभूषितम् ॥
चारुचन्द्रकलायुक्तं मूर्द्ध्नि चालोचसंगतम् ।
बाहुभिर्दशभिर्युक्तं व्याघ्रचर्म्माम्बराम्बरम् ॥
कालकूटधरं कण्ठे नागहारोपशोभितम् ।
कोटीरवेष्टनं बाहुभूषणाश्च भुजङ्गमाः ॥
विभूतिं सर्व्वगात्रेषु ज्योतिर्व्वापितमरोचिषम् ।
भूरिसंलिप्तसर्व्वाङ्गमेकैकञ्च त्रिभिस्त्रिभिः ॥
नेत्रैस्तु पञ्चदशभिर्ज्योतिशङ्खविभूषितम् ।
वृषभोपरि संस्थन्तु गजकृत्तिपरिच्छदम् ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
तत्पुरुषं यथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातं भवेद्वक्त्रं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
नीलवर्णमघोरन्तु दंष्ट्राभीतिविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिं मनोहरम् ॥
श्यामलञ्च तथेशानं सर्व्वदैव शिवात्मकम् ।
चिन्तयेत् पश्चिमे साद्यं द्वितीयञ्च तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषन्तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेद्भक्तितत्परः ॥
शक्तित्रिशूलखट्वाङ्गवराभयदं शिवम् ।
दक्षिणेष्वथ हस्तेषु वामेष्वपि ततः शृणु ॥
अक्षसूत्रं वीजपूरं भुजगं डमरूत्पलम् ।
अष्टैश्वर्य्यसमायुक्तं ध्यायेत्तु हृष्टं शिवम् ॥"
इति कालिकापुराणे ५० अध्यायः ॥ * ॥
पञ्चमुखरुद्राक्षः । यथा स्कान्दे,—
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथितत्त्वम् ॥
(पञ्चं विस्तृतं वक्त्रं वदनं यस्य । इति विग्रहे । सिंहः ॥)

पञ्चवटः, पुं, (पञ्चो विस्तीर्णो वटः ।) उरश्छदः । तत्पर्य्यायः । चोटिकः २ महाव्रती ३ बाल-यज्ञोपवीतकम् ४ । इति त्रिकाण्डशेषः ॥ (पञ्च-संख्यका वटा अश्वत्थविल्ववटधात्र्यशोक-रूपा वृक्षा यस्मिन् । पञ्चवटीवनम् । यथा रामायणे । ३ । ३ । १३ ।
"समागमं विराधेन रामं पञ्चवटे तथा ।")

पञ्चवटी, स्त्री, (पञ्चानां वटानां समाहारः । तद्धितार्थेति तत्पुरुषः 'संख्यापूर्व्वो द्विगुरिति द्विगुसंज्ञायां "द्विगोः" ।४।१।२१। इति ङीप् । द्विगुरेकवचनमिति एकवचनम् ।) पञ्चप्रकार-वृक्षविशेषः । यथा,—
"अश्वत्थविल्ववृक्षञ्च वटधात्र्यशोककम् ।
वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च ॥
अश्वत्थं स्थापयेत् प्राचि विल्वमुत्तरभागतः ।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा ॥
अशोकं वह्निदिक्स्थाप्य तपस्यार्थं सुरेश्वरि ।
मध्ये वेदीं चतुर्हस्तां सुन्दरीं सुमनोहराम् ॥
प्रतिष्ठां कारयेत्तस्याः पञ्चवर्षोत्तरं द्विजे ॥
अनन्तफलदात्री सा तपस्याफलदायिनी ॥ * ॥
इयं पञ्चवटी प्रोक्ता वृहत्पञ्चवटीं शृणु ।
विल्ववृक्षं मध्यभागे चतुर्दिक्षु चतुष्टयम् ॥
वटवृक्षं चतुष्कोणे वेदसंख्यां प्ररोपयेत् ।
अशोकं वर्त्तुलाकारं पञ्चविंशतिसम्मितम् ॥
दिग्विदिक्ष्वामलकीञ्चैव एकैकं परमेश्वरि ।
अश्वत्थञ्च चतुर्दिक्षु वृहत्पञ्चवटी भवेत् ॥
यः करोति महेशानि ! साक्षादिन्द्रसमो भवेत् ।
इह लोके मन्त्रसिद्धिः परे च परमा गतिः ॥"
इति हैमाद्रीयव्रतखण्डधृतस्कन्दपुराणवचनानि ॥
(स्वनामख्यातः प्रदेशविशेषः । यथा, रामायणे । १ । १ । ४५ ।
"ईशः पञ्चवटीनाम तत्र वासं स कल्पयत् ॥")

पञ्चवल्कलं, क्ली, (पञ्चानां वल्कलानां समा-हारः ।) वल्कलपञ्चकम् । यथा,—
"न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
सर्व्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते ॥"
अपि च ।
"न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलपीतनाः ।
क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम् ॥"
इति शब्दचन्द्रिका ॥
अस्य गुणाः ।
"पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ।
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ॥"
इति राजनिर्घण्टः ॥

पञ्चवाणः, पुं, (पञ्च वाणाः शरा यस्य सः ।) कामदेवः । इति हेमचन्द्रः ॥ पञ्चानां वाणानां समाहारे क्ली । (कामस्य पञ्च वाणा यथा,—
"द्रवणं शोषणं वाणं तापनं मोहनाभिधम् ।

उन्मादनश्च कामस्य बाणाः पञ्च प्रकीर्त्तिताः ॥”
पञ्चपुष्पबाणा यथा,—
“अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥”)
पञ्चबाणविशिष्टे त्रि ॥

पञ्चशरः, पुं, (पञ्च शरा यस्य सः ।) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ अस्य पञ्च शराश्च यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्याये ।
“सम्मोहनं समुद्वेगबीजं स्तम्भनकारणम् ।
उन्मत्तबीजं ज्वलनं शश्वच्चेतनहारकम् ॥”
अपि च ।
“सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥”
पञ्च इन्द्रियार्थाः शरा अस्येत्यन्ये । इति भरतः ॥
(यथा, कुमारे । ७ । ९२ ।
“शापावसाने प्रतिपन्नमूर्त्ते-
र्ययाचिरे पञ्चशरस्य सेवाम् ॥”)

पञ्चशस्यं, क्ली, (पञ्चानां शस्यानां समाहारः ।) शस्यपञ्चकम् । तत्तु धान्यमुद्गतिलयवश्वेतसर्षपरूपम् । सर्षपस्थाने माषोऽपि । इति दुर्गोत्सवपद्धतिः ॥

पञ्चशाखः, पुं, (पञ्च शाखा इवाङ्गुलयो यस्य ।) हस्तः । इत्यमरः । २ । ६ । ८१ ॥ पञ्चानां शाखानां समाहारे क्ली । पञ्चशाखाविशिष्टे त्रि ॥

पञ्चशिखः, पुं, (पञ्चा विस्तीर्णा शिखा केशराशिर्यस्य ।) सिंहः । इति हेमचन्द्रः ॥ धर्म्मस्य हिंसाभार्य्यायां जातो मुनिविशेषः । यथा,—
“धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्त्रचतुष्टयम् ।
सम्प्राप्तं मुनिशार्दूल ! योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः ।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम् ॥”
इति वामने ५० अध्यायः ॥
(अस्य अन्यप्रकारोत्पत्तिर्नामनिरुक्तिश्च उक्ता महाभारते । १२ । २१८ । ६—१६ ।
“तत्र पञ्चशिखो नाम कापिलेयो महामुनिः ।
परिधावन् महीं कृत्स्नां जगाम मिथिलामथ ॥
सर्व्वसन्न्यासधर्म्माणां तत्त्वज्ञानविनिश्चये ।
सुपर्य्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः ॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु ।
शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम् ॥
यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् ।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम् ॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् ।
पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम् ॥
यत्र चासीनमागम्य कापिलं मण्डलं महत् ।
पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ॥
इष्टसत्रेण संसृष्टो भूयश्च तपसासुरिः ।
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः ॥
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ।
आसुरिर्म्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् ॥
तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः ।
ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी ॥
तस्याः पुत्त्रत्वमागम्य स्त्रियाः स पिबति स्तनौ ।
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम् ॥
एतन्मे भगवानाह कापिलेयस्य सम्भवम् ।
तस्य तत् कापिलेयत्वं सर्व्ववित्त्वमनुत्तमम् ॥
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमम् ।
उपेत्य शतमाचार्य्यान्मोहयामास हेतुभिः ॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् ।
उत्सृज्य शतमाचार्य्यान् पृष्ठतोऽनुजगाम तम् ॥
पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः ॥”
गायत्रीस्वरूपायां शक्तौ स्त्री । यथा, देवीभागवते । १२ । ६ । १०५ ।
“पानप्रिया पञ्चशिखा पन्नगोपरिशायिनी ॥”)

पञ्चशूरणः, पुं, (पञ्च शूरणा यत्र ।) पञ्चप्रकारशूरणः । तद्यथा । अत्यम्लपर्णी काण्डीरः मालाकन्दः शूरणः श्वेतशूरणश्च । तथाहि ।
“अत्यम्लपर्णीकाण्डीरमालाकन्दद्विशूरणैः ।
कृत्स्नो भवति योगोऽयं पञ्चशूरणसंज्ञकः ॥”
इति राजनिर्घण्टः ॥

पञ्चशैरीषकं, क्ली, (शिरीषस्येदम् शैरीषकम् । पञ्चसंख्यकं शैरीषकम् ।) शिरीषवृक्षस्य कुसुममूलफलपत्रत्वचः । इति राजनिर्घण्टः ॥

पञ्चषाः, त्रि, पञ्च वा षड्वा परिमाणं येषां ते । बहुवचनान्तोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ॥

पञ्चसिद्धौषधिः, पुं, (पञ्च सिद्धा ओषधयो यस्मिन् ।) पञ्चप्रकारौषधिविशेषः । यथा,—
“तैलकन्दसुधाकन्दक्रोडकन्दरुदन्तिकाः ।
सर्पनेत्रयुताः पञ्चसिद्धौषधिकसंज्ञकाः ॥”
इति राजनिर्घण्टः ॥

पञ्चसुगन्धकं, क्ली, (पञ्च सुगन्धा यत्र । ततः कप् ।) पञ्चप्रकारसुगन्धिद्रव्यम् । यथा,—
“कुसुमानि लवङ्गस्य तथा कक्कोलकाख्ययोः ।
जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम् ॥”
इति शब्दचन्द्रिका ॥
अपि च ।
“कर्पूरकक्कोललवङ्गपुष्प-
गुवाकजातीफलपञ्चकेन ।
समांशभागेन च योजितेन
मनोहरं पञ्चसुगन्धकं स्यात् ॥”
इति राजनिर्घण्टः ॥

पञ्चसूना, स्त्री, (पञ्चगुणिता सूना प्राणिवधस्थानम् ।) पञ्चप्रकारप्राणिवधस्थानम् । यथा,—
“पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥”
इति शुद्धितत्त्वम् ॥
तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति तस्य प्रायश्चित्तं वैश्वदेवः । यथा,—
“लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवन्तु कुर्व्वीत पञ्चसूनापनुत्तये ॥”
इति आह्निकतत्त्वधृतशातातपवचनम् ॥
अशौचकालोत्पन्नपञ्चसूनादिजन्यपापस्य दानादिनाश्यत्वं यथा,—
“दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवित् ।
दानञ्च विधिना देयमशुभात्तारकं हि तत् ॥”
इति शुद्धितत्त्वधृतसम्बर्त्तवचनम् ॥

पञ्चस्वरा, स्त्री, (पञ्च स्वरा यत्र ।) प्रजापतिदासवैद्यकृतशिशुरिष्टमातृरिष्टपितृरिष्टस्त्रीपुंनपुंसकज्ञानसुखदुःखरिष्टच्छेदादियोगस्वरज्ञाननिर्णय इति सप्ताध्यायात्मकज्योतिर्ग्रन्थविशेषः यथा । तत्रैव ।
“पञ्चस्वराभिधानञ्च ग्रन्थं निदानसम्मतम् ।
किञ्चिदुद्देशगम्यञ्च स्वल्पं वक्ष्यामि साम्प्रतम् ॥”

पञ्चस्वरोदयः, पुं, (पञ्चानां स्वराणामुदयो यत्र ।) ज्योतिःशास्त्रविशेषः । यथा,—
“कालं वक्ष्यामि संसिद्ध्यै वद पञ्चस्वरोदयात् ।
राजा माजा उदासा च पीडा मृत्युस्तथैव च ॥
अ इ उ ए ओ स्वरांश्च लिखेत् पञ्चादिकोष्ठके ।
ऊर्द्ध्वतिर्य्यग्गतै रेखैः षड् वह्निक्रमसंगतैः ॥
तिथौ एकादिकोष्ठेषु नयो राजाय माजया ।
उदासा पीडा मृत्युश्च कुजः सोमसुतः क्रमात् ॥
गुरुशुक्रशनैश्चररविचन्द्रा यथोदितम् ।
रेवत्यादिशिवान्ताश्च अश्वाद्य प्रथमाः कलाः ॥
पञ्चपञ्चान्यत्र भानि चैत्राद्य उदयस्तथा ।
द्वादशाद्या द्वयो मासा नाम्न आद्यक्षरं तथा ॥
कला लिङ्गश्च या तिष्ठेत् पञ्चमस्तस्य वै स्मृतिः ।
लका तिथिस्तथा वारनक्षत्रं मासमेव च ॥
नामोदयस्य पूर्व्वञ्च तथा भवति नान्यथा ॥”
इति गरुडपुराणम् ॥

पञ्चाग्नि, क्ली, पञ्चानामग्नीनां समाहारः । अस्य विवरणं पञ्चातपाशब्दे द्रष्टव्यम् ॥ शरीरस्थपञ्चाग्नयो यथा,—
“उदरे गार्हपत्याग्निर्म्मध्यदेशे तु दक्षिणः ।
आस्ये आहवनोऽग्निश्च सभ्यः पर्व्व च मूर्द्धनि ।
यः पञ्चाग्नीनिमान् वेद आहिताग्निः स उच्यते ॥”
इति गरुडपुराणम् ॥
(पञ्चाग्नयो यस्य । इति विग्रहे वाच्यलिङ्गत्वम् । यथा मनुः । ३ । १८५ ।
“त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥”)

पञ्चाङ्गं, क्ली, पञ्चानां अङ्गानां एकवृक्षस्य त्वक्पत्रपुष्पमूलफलानां समाहारः । यथा,—
“त्वक्पत्रकुसुमं मूलं फलमेकस्य शाखिनः ।
एकत्र मिलितञ्चैतत् पञ्चाङ्गमिति संज्ञितम् ॥”
इति राजनिर्घण्टः ॥
पुरश्चरणविशेषः । यथा,—
“जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥”
इति तन्त्रसारः ॥
वारतिथिनक्षत्रयोगकरणात्मकपञ्जिका । यथा,

“तिथिर्वारश्च नक्षत्रं योगः करणमेव च ।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत्” ॥
इति ज्योतिषम् ॥

पञ्चाङ्गः, पुं, (पञ्चाङ्गानि यस्य ।) कमठः । इति शब्दमाला ॥ अश्वविशेषः । तत्पर्य्यायः । पञ्चभद्रः २ पुष्पितस्तुरङ्गमः ३ । इति शब्दरत्नावली ॥ प्रणामविशेषः । यथा,—
“बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥”
इति तन्त्रसारः ॥
(राजनयः । यदुक्तम् ।
“सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते ॥”)

पञ्चाङ्गगुप्तः, पुं, (पञ्चसंख्यकानि अङ्गानि गुप्तानि यस्य ।) कच्छपः । इति त्रिकाण्डशेषः ॥

पञ्चाङ्गुलः, पुं, (पञ्च अङ्गुलय इव पत्राणि यस्य ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ । पञ्चाङ्गुलपरिमाणयुक्ते त्रि ॥

पञ्चाङ्गुलिः, त्रि, पञ्चाङ्गुलयो यस्य सः । इति व्याकरणम् ॥

पञ्चाङ्गुली, स्त्री, सम्भालुवृक्षः । इति राजनिर्घण्टः ॥

पञ्चातपा, स्त्री, (पञ्चभिरग्निसूर्य्यैरातप्यते इति । आङ् + तप् + अच् । ततः टाप् ।) तपस्याविशेषः । यथा,—
“चर्य्या पञ्चातपाभिख्या शाम्भवी शाम्भवो जपः ।
यज्ञियैर्दारुभिः शुष्कैश्चतुर्दिक्षु चतुष्कृतम् ॥
वह्निसंस्थापनं यत्र तीव्रांशुश्चात्र पञ्चमः ।
हस्तान्तरे चतुर्वह्नीन् कृत्वा वैश्वानरेऽग्निना ॥
समाधस्था सूर्य्यबिम्बं वीक्षन्ती मञ्जुलांशुका ।”
इति कालिकापुराणे ४२ अध्यायः ॥

पञ्चाननः, पुं, (पञ्च आननानि यस्य ।) शिवः । (पञ्चं विस्तृतं आननं यस्य ।) सिंहः । इति मेदिनी ॥ अलुयः । इति शब्दरत्नावली ॥ (ज्योतिषोक्तसिंहराशिः । यथाह स्मृतिः ।
“पञ्चाननगते भानौ मत्स्ययोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥”
कलसविशेषः । तद्वारम्भे मङ्गलकुम्भं भवति ॥)

पञ्चामरा, स्त्री, (पञ्च अमराः । संज्ञात्वात् कर्म्मधारयः ।) पञ्चप्रकारामरलतादि । यथा,—
“एका तु अमरा दूर्व्वा तस्या यत्नं समाचरेत् ।
अन्या तु विजया देवी सिद्धिरूपा सरस्वती ॥
अन्या तु बिल्वपत्रस्था शिवसन्तोषकारिणी ।
अन्या तु योगसिद्ध्यर्थं निर्गुण्डी चामरा लता ॥
अन्या तु कालतुलसी गौरविष्णोः प्रियतोषिणी ।
एताः पञ्चामरा ज्ञेया योगसाधनकर्म्मणि ॥”
इति रुद्रयामलोत्तरखण्डे ३६ पटलः ॥

पञ्चामृतं, क्ली, (पञ्चानाममृतानां समाहारः ।) दुग्धशर्करादधिघृतमधुघटितम् । यथा,—
“दुग्धं च शर्करा चैव घृतं दधि तथा मधु ।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥”
गर्भवतीभ्यस्तद्दानस्य दिनं यथा,—
“रेवत्यश्विपुनर्व्वसुद्वयमहस्तानुराधामघा-
हस्ताषाढ़फल्गुनीषु भृगुजे जीवार्कवारे तथा ।
सन्त्यज्यद्यवरोहिणीषु नियतं सन्त्यज्य रिक्तां तिथिं
देयं मासि च पञ्चमेषु करणे पञ्चामृतं योषिताम् ॥”
इति ज्योतिस्तत्त्वम् ॥

पञ्चामृतयोगः, पुं, (पञ्चानाममृतानां गुड़ूच्यादीनां योगः ।) गुड़ूचीगोक्षुरमुषलीमुण्डिकाशतावरीणां संयोगः । यदुक्तं राजनिर्घण्टे ।
“गुड़ूची गोक्षुरश्चैव मुषली मुण्डिका तथा ।
शतावरीति पञ्चानां योगः पञ्चामृताभिधः ॥”

पञ्चाम्नायः, पुं, (पञ्चसंख्यकः आम्नायः ।) शिवस्य पञ्चवक्त्रविनिर्गततन्त्रशास्त्रविशेषः । यथा,—
“पूर्व्वाम्नायः पूर्व्वमुखः पश्चिमः पश्चिमामुखः ।
दक्षिणो दक्षिणाङ्गुत्तरश्चोत्तरः परः ॥
निरुत्तरं तथा चोर्द्ध्वं सिद्धान्तागमरूपिणम् ।
ऊर्द्ध्वाम्नायपरिज्ञानं नाल्पस्य तपसः फलम् ॥”
अन्यच्च ।
“पूर्व्वाम्नायः शब्दरूपो दक्षिणः कर्म्मरूपकः ।
पश्चिमः मन्त्ररूपः स्यादुत्तरश्चोत्तरस्तथा ॥
ऊर्द्ध्वाम्नायस्तत्त्वबोधः केवलानुभवात्मकः ॥”
इत्यादि । इति भैरवतन्त्रम् ॥
मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः ।”
इति कुलार्णवतन्त्रम् ॥ * ॥
“विभाय मुखमत्रं हि शिवस्य वरवर्णिनि ।
सद्योजातं वामदेवमघोरञ्च ततः परम् ॥
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातस्य वै मुखं शुद्धस्फाटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरस्य सर्म भीमातिवर्द्धनम् ।
रक्तं तत्पुरुषं देवि ! दिव्यमूर्त्ति मनोहरम् ॥
श्यामलस्य तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयस्य तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ज्ञेयं चिन्तयेद्भक्तितत्परः ॥”
इति निरुत्तरतन्त्रे ६ पटलः ॥ * ॥
अन्यत् षड़ाम्नायशब्दे द्रष्टव्यम् ॥

पञ्चाम्रं, क्ली, (अमन्ति रसानि प्राप्नुवन्तीति । अम-गत्यादिषु + “अमितम्योर्दीर्घश्च ।” उणां २।१६ । इति रक् दीर्घश्चोपधायाः । इति आम्रा इत्यः । पञ्चानां आम्राणामश्वत्थादिवृक्षाणां समाहारः ।) वृक्षविशेषाणां समाहारः । यथा,—
“अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः ।
द्वे द्वे तथा दाड़िममातुलङ्गे
पञ्चाम्रवापी नरकं न याति ॥”
इति वराहपुराणम् ॥
अपि च ।
“अश्वत्थ एकः पिचुमर्द्द एको
द्वौ चम्पकौ नौषि च केशराणि ।
सप्ताथ ताला नव नारिकेलाः
पञ्चाम्ररोपी नरकं न याति ॥”
इति तिथितत्त्वम् ॥

पञ्चाम्लं, क्ली, (पञ्चानामम्लानां कोलादीनां समाहारः ।) अम्लपञ्चकम् । यथा,—
“कोलदाड़िमवृक्षाम्लैश्चुक्रैकमम्लसंयुतैः ।
चतुरम्लञ्च पञ्चाम्लं मातुलङ्गसमन्वितम् ॥”
इति शब्दचन्द्रिका ॥

पञ्चारी, स्त्री, (पञ्चपञ्चसंख्याश्छ्यतीति । ऋ गतौ “कर्म्मण्यण्” । ३।२।१ । इति अण् । गौरादित्वात् ङीष् ।) शारिफलकः । इति शब्दमाला ॥ (छावार छक इति भाषा ॥)

पञ्चार्चिः, [स्] पुं, (पञ्च अर्च्चींषि यस्य सः ।) बुधग्रहः । इति त्रिकाण्डशेषः ॥

पञ्चालः, पुं (पचि विस्तारवचने + “तमिविशिविडि-म्रडिकलीति ।” उणां १।११७ । इति कालन् ।) देशविशेषः । इत्युणादिकोषः ॥ तस्य व्युत्पत्तिर्यथा । “हर्य्यश्वात् मुद्गलसञ्जयवृहदिषुयवीनरकाम्पिल्यसंज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः ।” इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (अस्य स्थितिनिर्णय उक्तस्तन्त्रशास्त्रे यथा,—
“कुरुक्षेत्रात् पश्चिमेषु तथाचोत्तरभागतः ।
इन्द्रप्रस्थान्महेशानि ! दशयोजनकद्वये ।
पञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ॥”)

पञ्चालाः, पुं, (पञ्चालाः क्षत्रियास्तेषां निवासो जनपदः । निवासेऽर्थे जनपदे लुप् ।) नीवृद्विशेषः । बहुवचनान्तोऽयम् । इति मेदिनी ॥

पञ्चालिका, स्त्री, (पञ्चभिर्वर्णैरलति इति । आ + अल भूषणे + अच् । टाप् स्वार्थे कन् इत्वञ्च ।) पुत्तली । इत्यमरटीकायां भरतः ॥

पञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलति । आ + अल भूषणे + अच् । गौरादित्वात् ङीष् ।) वस्त्रादिकृतपुत्तिका । कानिर पुतुल इति भाषा ॥ गीतविशेषः । इति मेदिनी ॥ पाँचाली इति भाषा ॥ (पञ्चारी रस्य लत्वे सिद्धम् ।) शारिफलकः । इति त्रिकाण्डशेषः ॥ छक इति भाषा ॥

पञ्चावटं, क्ली, (पञ्च विस्तृतमुरःस्थले आवर्त्तते वेष्टते इति । आ + वट् + अच् ।) उरस्कटम् । व्यालोपवीतम् । इति हारावली ॥ (पञ्चानां वटानां वटादिवृक्षाणां समाहारः । निपातनात् साधुः । पञ्चवटी । यथा, गोः रामायणे । ३ । २० । २८ ।
“विवेश पञ्चावटसम्परिवेष्टितम्
रिपून् दिधक्षुः शलभानिवाग्नयः ॥”)

पञ्चावस्थः, पुं, (पञ्चसु भूतेषु अवस्था यस्य । तस्य देहारम्भकस्वकारणेषु लयत्वात्तथात्वम् ॥) शवः । इति त्रिकाण्डशेषः ॥ पञ्चावस्थायुक्ते त्रि ॥

पञ्चाशत्, त्रि, (पञ्चदशतः परिमाणमस्य ।) “पङ्क्तिविंशतित्रिंशदिति ।” ५ । १ । ५९ । निपातनात् साधुः ।) संख्याविशेषः । इति ज्योतिषम् ॥ पञ्चाश इति भाषा ॥ (यथा, श्रुतिपञ्चाशदिति ॥५२।

"पञ्चाशल्लिपिभिः पुरा भगवति ! त्वया यदङ्गीकृतं तत्राहं सफलोऽधुनापि विमतिस्तनुपादपद्मस्मृतेः ॥")

पञ्चास्यः, पुं, (पञ्चं विस्तृतं आस्यं यस्य ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ (पञ्चानि आस्यानि यस्य । शिवः ॥ पञ्चमुखविशिष्टे, त्रि । यथा, गोः रामायणे । ५ । ७४ । २३ ।

"त्वच्चितेयं विशालाक्षी मया शोकपरायणा ।
व्यादायेतो न जानीषे पञ्चास्यामिव भोगिनीम् ॥")

पञ्चीकरणं, क्ली, पञ्चभूतानां भागविशेषेण मिश्रीकरणम् । यथा । "पञ्चीकरणन्तु आकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम् ।

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥ इति ॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेन आकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते । वायौ शब्दस्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्दस्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानां अतलवितलसुतलरसातलतलातलमहातलपातालनामकानां अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्तिर्भवति ॥" इति वेदान्तसारः । ३९-४२ ॥

पञ्चेन्द्रियं, क्ली, पञ्चानां ज्ञानेन्द्रियाणां समाहारः । यथा । "श्रोत्रत्वङ्नेत्ररसनघ्राणं पञ्चेन्द्रियाणि च ।" इति शब्दचन्द्रिका ॥ पञ्चकर्मेन्द्रियञ्च ॥

पञ्चेषुः, पुं, (पञ्च इषवो यस्य ।) कामदेवः । इति हलायुधः ॥

पञ्चोपविषं, क्ली, (पञ्चसंख्यकं उपविषम् ।) उपविषपञ्चकम् । यथा, राजनिर्घण्टे ।

"स्नुह्यर्ककरवीराणि लाङ्गली विषमुष्टिका ।
एतान्युपविषाण्याहुः पञ्च पाण्डित्यशालिनः ॥"

पञ्चोष्माणः, पुं, (पञ्च उष्माणः ।) आहारपाचकशरीरस्थपञ्चाग्नयः । यथा, सारकौमुद्याम् ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यणु ।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥"

पञ्जरं, क्ली, (पञ्जाते रुध्यते उदरयन्त्रमनेन । पजि रोधे + अरन् ।) कायास्थिबन्धम् । शरीरास्थिपञ्जरम् । (यथा, पञ्चदशी । ६ । १७३ ।

"देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिभ्रमणं भवेत् ॥"

पञ्जाते रुध्यते पक्ष्यादिरत्र ।) पक्ष्यादिबन्धगृहम् । इत्यमरभरतौ । पिंजरा इति भाषा । तत्पर्य्यायः । शालारम् २ । इति जटाधरः ॥ (यथा, हैः रामायणे । २ । ६५ । ५ ।

"तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः ।
शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥")

पञ्जरः, पुं, (पञ्जाते रुध्यते आत्मा यस्मिन् । पजि रोधे + अरन् ।) शरीरम् । इति त्रिकाण्डशेषः ॥ (यथा, हठयोगप्रदीपिकायाम् । ४ । १८ ।

"द्वासप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वेव निरर्थकाः ॥"

"पञ्जरे पञ्जरवच्छिद्रास्थिभिर्बद्धे शरीरे ।" इति तट्टीका ॥) देहास्थिसमूहः । तत्पर्य्यायः । कङ्कालः २ देहबन्धास्थि ३ । इति जटाधरः ॥ कलियुगम् । गवां नीराजनाविधिः । इति सारस्वताभिधानम् ॥

पञ्जराखेटः, पुं, (पञ्जरेणेव यन्त्रेण आखेटो मृगया यस्मात् ।) मत्स्यमारणोपाययन्त्रम् । पोलो इति भाषा । तत्पर्य्यायः । प्लवः २ मलवः ३ । इति त्रिकाण्डशेषः ॥ [राजनिर्घण्टः ॥

पञ्जलः, पुं, (पञ्ज + वलच् ।) कोलकन्दः । इति

पञ्जिः, स्त्री, (पञ्ज + इन् ।) सूत्रनालिका । इति शब्दमाला । पाँइज इति भाषा । पञ्जिका च ॥

पञ्जिका, स्त्री, (पञ्जि + स्वार्थे कन् टाप् ।) तूलनालिका । इति हारावली ॥ पाँइज इति भाषा ॥ टीकाविशेषः । यथाह हेमचन्द्रः ।

"टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका ॥"

व्ययसन्धानी । इति त्रिकाण्डशेषः ॥ पञ्चाङ्गम् । पाँजि इति भाषा । तच्छ्रवणफलं यथा,—

"वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गाया योगः सागरसङ्गमः ।
करणं सर्वतीर्थानि श्रूयते दिनपञ्जिका ॥"
इति दैवज्ञाः ॥

अपि च ज्योतिस्तत्त्वे वराहवचनम् ।

"दुःस्वप्ननाशको वारो नक्षत्रं पापनाशनम् ।
तिथिरायुष्करी प्रोक्ता योगो बुद्धिविवर्द्धकः ॥
चन्द्रः करोति सौभाग्यमंशकः शुभदायकः ।
करणाल्लभते लक्ष्मीं यः शृणोति दिने दिने ॥"

निःशेषपदव्याख्यात्री । तिथिवारादिज्ञापिका । आयव्ययलिखनार्था च । इत्यमरटीकायां भरतः ॥

पञ्जिकारकः, पुं, (पञ्जिं करोतीति । कृ + ण्वुल् ।) कायस्थजातिः । यथाह जटाधरः ।

"अथ कायस्थः करणः पञ्जिकारकः ॥"

(अस्य पञ्जिकरणकथा कायस्थशब्दे द्रष्टव्यम् ॥) पञ्जिकाकारश्च ॥

पञ्जी, स्त्री, (पञ्जि + वा ङीप् ।) पञ्जिः । नालिका । इति शब्दमाला ॥ पञ्जिका । पाँजि इति भाषा । यथोक्तं दैवज्ञैः ।

"दैवज्ञवक्त्रेण शृणोति पञ्जीं
शत्रुक्षयं याति शशीव कृष्णे ॥"

ग्रन्थविशेषः । यथाह ध्रुवानन्दमिश्रः ।

"प्रणम्य त्रिनेश्वरपादमादौ
सरस्वतीं तां कुलदेवताञ्च ।
शिशुप्रबोधाय कुलस्य पञ्जी
विलिख्यते श्रीसुतमिश्रकेण ॥"

पञ्जीकरः, पुं, (पञ्जीं पञ्जिकां करोतीति । कृ + टः ।) कायस्थः । यथा । "कायस्थे कूटकृत्पञ्जीकरौ ।" इति त्रिकाण्डशेषः ॥

पट, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं सेट् ।) पटति । इति दुर्गादासः ॥

पट, क लिपि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, पाटयति । लिपि दीप्तौ । इति दुर्गादासः ॥

पट, त् क वेष्टने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) त, ग्रन्थने । इत्यन्ये । पटयति मालां मालिकः । इति दुर्गादासः ॥

पटं, क्ली, (पटतीति । पट् + पचाद्यच् ।) छदिः । चालम् । इति पटलशब्दटीकायां भरतः ॥

पटः, पुं, क्ली, (पटयत्यनेन । पट वेष्टने घञर्थे कः ।) शोभनवस्त्रम् । तत्पर्य्यायः । सुचेलकः २ । इत्यमरः । २ । ६ । ११६ ॥ (यथा, पञ्चदशी । ६ । ? ।

"यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्यामिसूत्रात्मविराट् चात्मा तथेर्य्यते ॥")

चित्रपटः । इति मेदिनी ॥ तस्य लक्षणं यथा,—

"पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः ।
ग्रन्थिकेशविहीने तु अजीर्णे समतन्तुके ॥
अस्फाटिते अच्छिद्रे तु स्थलेनैव समालिखेत् ।
योगिनी रूपिणी कार्य्या जयाद्यैः परिवारिता ॥
दृष्टेन च भवेद्वृद्धो व्याधिते व्याधितो भवेत् ।
कुरूपेण कुरूपस्तु सर्वेण तु न पूज्यते ॥
लेखकस्य तु यद्रूपं चित्रे भवति तादृशम् ॥"
इति देवीपुराणम् ॥

पटः, पुं, पियालवृक्षः । इति मेदिनी ॥ पुरस्कृतः । इति विश्वः ॥

पटकः, पुं, (पटेन छदनेन कायति प्रकाशते इति । कै + कः ।) शिविरम् । इति शब्दमाला ॥

पटकारः, पुं, (पटं शोभनवस्त्रं चित्रं वा करोति यः । पट् + कृ + अण् ।) तन्तुवायः । चित्रकरः ॥

पटकुटी, स्त्री, (पटस्य पटनिर्म्मिता वा कुटी ।) वस्त्रवेश्म । ताँबु इति भाषा । तत्पर्य्यायः । केणिका २ गुणलयनिका ३ । इति हेमचन्द्रः ॥

पटच्चरं, क्ली, (भूतपूर्व्वं पटत् । भूतपूर्व्वे चरट् । यद्वा पटदित्यव्यक्तं शब्दं चरतीति । पटत् + चर + अच् ।) जीर्णवस्त्रम् । इत्यमरः । २ । ६ । ११५ ॥ (पच्यते व्याविध्यते इति । पट् — बाहुलकात् अत् । पटदिव चरति यः । चर् + अच् ।) चौरे पुं इत्यमरटीकायां रमानाथः ॥

पटमण्डपः, पुं, (पटानां वस्त्राणां मण्डपः ।) पटकुटी । इति शब्दचन्द्रिका ॥

पटमयं, क्ली, (पट + मयट् ।) वस्त्रगृहम् । यथा,—

"पटवापः पटमयं दूष्यं वस्त्रगृहं स्मृतम् ॥"
इति त्रिकाण्डशेषः ॥

शाटी । यथा, शब्दरत्नावल्याम् ।

"पटवासः पटमयं शाटी शाटक इत्यपि ॥"

पटरकः, पुं, (पटर+स्वार्थे कन् ।) गुन्द्रतृणः । इति राजनिर्घण्टः ॥

पटलं, क्ली, (पटं विस्तृतं लाति । पट्+ला+ "आतोऽनुपेति" ।३।२।३। कः । यद्वा पटतीति । पट+"तृषादिभ्यश्चित् ।" उणां ।१।१०८। इति कलच् ।) छदिः । चाल इति भाषा । नेत्ररोगः । इत्यमरः ।३।३।२०० ॥ पिटकः । परिच्छदः । तिलकः । (यथा, कलाविलासे । १ । २५ ।
"अस्तमिते दिवसकरे तिमिरभरादिरदसंसक्ता । सिन्दूरपटलपाटलकान्तिरिवाभूद्विभौ सन्ध्या ॥")
समूहे क्ली स्त्री । इति मेदिनी ॥ (यथा, भागवते । ३ । १४ । २६ ।
"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं बिभित्सवः ।
निरस्तसाम्यातिशयोऽपि यत् स्वयं
पिशाचचर्य्यामचरत् गतिः सताम् ॥")
दृष्ट्यावरकम् । चक्षुर परदा इति भाषा । यथाह माधवकरः ।
"प्रथमे पटले दोषो यस्य दृष्ट्या व्यवस्थितः ।
अव्यक्तानि सरूपाणि कदाचिदथ पश्यति ॥"
दृष्ट्यां चत्वारि पटलानि । रसरक्ताश्रयं बाह्यं द्वितीयं मांससंश्रयं तृतीयं मेदःसंश्रितं चतुर्थं कालकास्थिसंश्रितम् । तथा च सुश्रुतः ।
"तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् । मेदस्तृतीयं पटलमाश्रितं त्वस्थि चापरम् । पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते ॥"
इति । अत्र तेजःशब्देन रक्तं जलशब्देन रसो व्याख्यातः । तेषु पटलेषु बाह्यादिभेदेनाधिष्ठानविशेषप्रभावात् दोषाणां लिङ्गविशेषमाह प्रथमे पटले इत्यादि । प्रथमे पटले सर्व्वाभ्यन्तरे न तु बाह्ये । इति विजयरक्षितः ॥

पटलः, पुं, क्ली, (पाटयति दीप्यते यः । पट्+कलच् ।) पन्थाः । इषुः । इति शब्दरत्नावली ॥ इषुस्थाने इन्दोऽपि पाठः ॥

पटलप्रान्तं, क्ली,(पटलस्य छदिषः प्रान्तम् ।) गृहचालिकान्तभागः । छाँच इति भाषा । तत्पर्य्यायः । वलीकम् २ नीव्रम् ३ । इत्यमरः । २ । २ । १४ ॥

पटली, स्त्री, (पटल+ङीष् ।) छदिः । इति भरतहेमचन्द्रौ । चाल इति भाषा ॥

पटवापः,पुं,(पट उप्यते प्रादुर्य्येण दीयते यत्र । पट+वप्+घञ् ।) वस्त्रगृहम् । इति त्रिकाण्डशेषः ॥

पटवासः,पुं,(पटस्य पटनिर्म्मितो वा वासः गृहम् ।) वस्त्रगृहम् । घाटी । इति शब्दरत्नावली ॥

पटवासकः, पुं, पटो वास्यतेऽनेनेति घञि पटवासः ततः स्वार्थे कन् । पटवासचूर्णम् । तत्पर्य्यायः । पिष्टातः २ । पिष्टेन कुङ्कुमचूर्णादिना अततीति पिष्टातः पचाद्यच् । इत्यमरभरतौ ॥

पटहं, क्ली पुं, (पटेन वध्यते इति । पट+हन्+ड ।) पटमुखशब्दं जहाति पटहः डः निपातनात् तलोपः । इति भरतः ॥ आनकवाद्यम् । इत्यमरः । १ । ७ । ६ ॥

पटहः, पुं, (पट इत्यस्फुटं शब्दं जहाति त्यजतीति । पट+हा+ड ।) पाटयति नाशयति घोषान् शुद्धाय उत्साहवर्द्धकत्वात् पट गतौ वाग्नीति चाहः । इति भरतः ॥ युद्धे वाद्यमानढक्का । तत्पर्य्यायः । आडम्बरः २ । इत्यमरः । १ । ८ । १०८ ॥ समारम्भः । हिंसनम् । इति शब्दरत्नावली ॥

पटाकः, पुं, (पटति गच्छतीति । पट्+निपातनात् आकः ।) पक्षिविशेषः । इत्युणादिकोषः ॥

पटाका, स्त्री, (पटाक+टाप् ।) पताका । इति शब्दरत्नावली ॥

पटालुका, स्त्री, (पट इव अलतीति । पट्+बाहुलकात् उकः ततष्टाप् ।) जलौका । इति त्रिकाण्डशेषः ॥

पटिः, स्त्री, (पट+इन् ।) पटभेदः । वाटुलिः । कुम्भिकाद्रुमः । इति मेदिनी ॥

पटिका, स्त्री, (पटि+स्वार्थे कन् ततः टाप् ।) पटिः । वस्त्रम् । यथा, लीलावती । [चे-
"विस्तारे त्रिकराः कराष्टकमिता दैर्घ्ये विचित्राश्च
रूपैरुत्कटपट्टसूत्रपटिका अष्टौ लभन्ते शतम् । दैर्घ्ये सार्द्धकरत्रया परपटी हस्तार्द्धविस्तारिणी ताहक् किं लभते द्रुतं वद वणिग् वाणिज्यकं वेत्सि
चेत् ॥"

पटिष्ठः, त्रि, (अयमेषामतिशयेन पटुः । पट+"अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटी, स्त्री, (पट+इन् । वा ङीप् ।) वस्त्रभेदः । इति शब्दरत्नावली । यवनिका । इति त्रिकाण्डशेषः ॥

पटीयान्, [स्] त्रि, (अयमेषामतिशयेन पटुः । पटु+"द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटीरं, क्ली, (पटतीति । पट गतौ । "कृशॄपॄकटिपटिशौटिभ्य ईरन् ।" उणां । ४ । ३० । इति ईरन् ।) तिलउः । गुञ्जम् । मूलकम् । केदारः । वारिदः । वेणुसारः । चालिकः । चन्दनम् । इति शब्दरत्नावली ॥ खदिरम् । उदरम् । कन्दर्पः । चरणीयम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पटु, क्ली, (पाटयति । पट गतौ ण्यन्तः । "फलिपाटीति ।" उणां ।१।१९। इति उः पटादेशश्च ।) छत्रा । लवणम् । इति मेदिनी ॥ पांशुलवणम् । इति रत्नमाला ॥

पटुः, पुं, (पाटयतीति । पट्+णिच्+"फलिपाटीति ।" उणां । १ । १९ । इति उः पटादेशश्च ।) पटोलः । इत्यमरः । २ । ४ । १५५ ॥ पटोलपत्रम् । इति मिश्रः ॥ काकोरलता । कारवेल्लः । चोरकः । इति राजनिर्घण्टः ॥

पटुः, त्रि, (पाटयतीति । पट गतौ । ण्यन्तः । "फलिपाटीति ।" उणां । १ । १९ । इति उः पटादेशश्च ।) दक्षः । (यथा, रघुः । ९ । ३६ ।
"कुसुमजन्म ततो नवपल्लवं
तदनु षट्पदकोकिलकूजितम् ।
इति यथाक्रममाविरभून्मधु-
र्द्रुमवतीमवतीर्य्य वनस्थलीम् ॥")
रोगः । चतुरः । इति मेदिनी ॥ (मधुरः । यथा, रघुः । ९ । ७३ ।
"कृतप्रणामः पटुरत्र-
मुच्चार मिनदोऽपि सखा ॥")
तीक्ष्णः । स्फुटः । इति हेमचन्द्रः ॥ निष्ठुरः । इति जटाधरः ॥ धूर्त्तः । इति त्रिकाण्डशेषः ॥

पटुकः, पुं, (पटु+स्वार्थे कन् ।) पटोलः । इति शब्दरत्नावली ॥

पटुकल्पः, त्रि, ईषदूनः पटुः । (पटु+कल्पप् ।) इति व्याकरणम् ॥

पटुजातीयः, त्रि, पटुप्रकारः । (पटु+जातीयर् ।) इति व्याकरणम् ॥

पटुतृणकं, क्ली, (पटु लवणं तत्प्रचुरं तृणम् । ततः कन् ।) लवणतृणम् । इति राजनिर्घण्टः ॥

पटुपत्रिका, स्त्री, (पटु पत्रमस्याः कप् । टापि अत इत्वम् ।) क्षुद्रचञ्चुपः । इति राजनिर्घण्टः ॥

पटुपर्णिका, स्त्री, (पटु पर्णमस्याः । कप् टाप् अत इत्वञ्च ।) क्षीरिणीक्षुपः । इति राजनिर्घण्टः ॥

पटुपर्णी, स्त्री, (पटुपर्ण+"पाककर्णपर्णपुष्पफलेति ।" ४।१।६४ । इति ङीष् ।) स्वर्णक्षीरी । इत्यमरः । २ । ४ । १३८ ॥

पटरूपः,त्रि,(प्रशस्तः पटुः । पटु+रूपप् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटोटजं, क्ली, (पटस्य छदिषः उटे इवादौ जायते यत् । "सप्तम्यां जनेर्डः ।" ३।२।९७ । इति डः ।) छत्राकः । इति शब्दरत्नावली ॥

पटोलं, क्ली, (पट गतौ+"कपिगडिगण्डीति ।" उणां ।१।६७। इति ओलच् ।) वस्त्रभेदः । इति मेदिनी ॥ तत्तु गुर्ज्जरदेशीयविचित्रपट्टवस्त्रम् ॥

पटोलः, पुं, (पटति बहुगुणान् प्राप्नोतीति । पट गतौ+"कपिगडिगण्डीति ।" उणां । १ । ६७ । इति ओलच् ।) स्वनामप्रसिद्धलतिकाफलम् । परवल् इति हिन्दी भाषा ॥ (यथा, मथ्यतन्त्रे १ । ४०९ ।
"सार्द्धैव यत्र शिखिनं तत्र दष्टो भुजेन विनियोज्यः । पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥")
तत्पर्य्यायः । कुलकम् २ तिक्तकः ३ पटुः ४ । इत्यमरः । २।४।१५५ ॥ कर्कशच्छदः ५ ग्रामजः ६ वाजिमान् ७ लताफलः ८ राजफलः ९ वरतिक्तः १० अमृताफलः ११ । इति रत्नमाला ॥ कटुफलः १२ कटुकः १३ कर्कशच्छदः १४ राजनामा १५ अमृतापलः १६ पाण्डुः १७ पाण्डुफलः १८ बीजगर्भः १९ नागफलः २० कुलजः २१ कासमर्दनः २२ पञ्जरः २३ ज्योत्स्नीफलः २४ ज्योत्स्नी २५ कच्छुघ्नी २६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारकत्वम् । पित्तवलासकफकण्डूतिकुष्ठाशयज्वरदाहार्त्तिनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

पाचनत्वम् । हृद्यत्वम् । उष्णत्वम् । लघुत्वम् । अग्निदीपनत्वम् । स्निग्धत्वम् । कासदोषत्रयक्रिमिनाशित्वञ्च । तस्य मूलादिगुणाः ।

"पटोलस्य भवेन्मूलं विरेचनकरं सुखात् ।
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः ॥
दोषत्रयहरं प्रोक्तं तद्वत्तिक्ता पटोलिका ॥"
इति भावप्रकाशः ॥

अपि च राजवल्लभः ।
"पटोलं कफपित्तास्रज्वरकुष्ठव्रणापहम् ।
विसर्पनयनव्याधिविदोषमरनाशिनौ ।
पटोलफलकर्षं ति किञ्चिद्गुरुकान्तराद्भौ ॥"

पटोलकः, पुं, (पटोल इव कायति प्रकाशते इति कै+कः ।) शुक्तिः । इति शब्दमाला ॥

पटोलिका, स्त्री, (पटोल+कन्+टाप्+अत इत्वञ्च ।) फलविशेषः । झिङ्गा इति भाषा । मोहलि इति ख्याता । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । ज्योत्स्नी २ जाली ३ । इत्यमरः । २ । ४ । ११८ ॥ ज्योत्स्ना ४ । इति स्वामी ॥

पटोली, स्त्री, (पटोल+जातित्वात् ङीष् ।) ज्योत्स्नी । इति मेदिनी ॥ (झिङ्गा इति भाषा । यथा, गारुडे १९८ अध्याये ।
"पटोलीतुम्बकाभ्याञ्च वासकेन च नाशयेत् ॥")

पट्टं, क्ली, (पट् गतौ+क्तः । नेट् ।) नगरम् । इति शब्दरत्नावली ॥

पट्टः, पुं, (पट्+क्तः । नेट् ।) पेषणपाषाणः । शिल् इति भाषा ॥ (यथा, रघुः । १८ । १७ ।
"तस्याभवत् सूनुरुदारशीलः
शिलः शिलापट्टविशालवक्षाः ॥")
व्रणादीनां बन्धनम् । पटी इति भाषा ॥ चतुष्पथः । चौमाता रास्ता इति भाषा ॥ राजादिशासनान्तरम् । पाट्टा इति भाषा ॥ (यथा, मार्कण्डेये । ३६ । ८ ।
"तदास्मात् पुत्र! निष्कृष्य मद्गतादङ्गुलीयकात् ।
वाचयेथाः शासनं पट्टे सूक्ष्माक्षरनिवेशितम् ॥")
पीठः । इति मेदिनी ॥ पिंड़ि इति भाषा ॥ फलकः । इति त्रिकाण्डशेषः ॥ ढाल इति भाषा ॥ उष्णीषादिः । इति स्वामी ॥ पाग् इत्यादि भाषा ॥ उत्तरीयादिः । इति सुभूतिः ॥ एक पाट्टा इति भाषा ॥ (यथा, भट्टिः । १० । ६० ।
"गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम् ॥")
कौषेयः । इति मुकुटः ॥ पाट् रेशम् इति च भाषा । लोहितकौषेयमुष्णीषादि । इति भरतः ॥ राङ्गा रेशमी पाग् इत्यादि भाषा ॥ (नृपादीनां किरीटविशेषस्वरूपपट्टलक्षणं वृहत्संहितायां ४९ अध्याये उक्तम् । तद्यथा,—
"विस्तरशो निर्द्दिष्टं पट्टानां लक्षणं यदाचार्य्यैः ।
तत् संक्षेपः क्रियते मयात्र सकलार्थसम्पन्नः ॥
पट्टः शुभदो राज्ञां मध्येऽष्टाङ्गुलानि विस्तीर्णः ।
सप्तनरेन्द्रमहिष्याः षड्युवराजस्य निर्द्दिष्टः ॥
चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये ।
द्वे च प्रसादपट्टः पञ्च ते कीर्त्तिताः पट्टाः ॥
सर्व्वे द्विगुणायामा मध्यादर्द्धेन पार्श्वविस्तीर्णाः ।
सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो वृद्ध्यै ॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः ।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया ॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य ।
वृद्धिजयौ भूमिपतेस्तथा प्रजानाञ्च सुखसम्पत् ॥
जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः ।
मध्ये स्फुटितस्त्याज्यो विघ्नकरः पार्श्वयोः स्फुटितः ।
अशुभनिमित्तोत्पत्तौ शास्त्रज्ञः शान्तिमादिशेत् प्राज्ञः ।
शस्तनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति ॥")

पट्टकः, पुं, पट्ट एव इत्यर्थे स्वार्थे कन् । पट्टः ॥

पट्टजं, क्ली, (पट्टात् कौषेयात् जायते इति । पट्ट+जन्+ड ।) वस्त्रभेदः । पट्टवस्त्रम् । इति जटाधरः ॥ (यथा, महाभारते । २ । ५० । २३ ।
"श्यौर्षञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा ।
कुटीकृतं तथैवात्र कमलाभं सहस्रशः ॥")

पट्टदेवी, स्त्री, (पट्टा सिंहासनार्हा देवी ।) महादेवी । इति राजनिर्घण्टः ॥ पाटराणी इति भाषा ॥

पट्टनं, क्ली, (पटन्ति गच्छन्ति वणिजो यत्र । पट गतौ + बाहुलकात् तनन् ।) पत्तनम् । इति द्विरूपकोषः ॥

पट्टनी, स्त्री, (पट्टन+गौरादित्वात् ङीष् ।) पत्तनम् । इति द्विरूपकोषः ॥

पट्टरङ्गं, क्ली, (पट्टं वस्त्रं रज्यतेऽनेन । पट्ट+रञ्ज+घञ् ।) पत्तरङ्गम् । इति राजनिर्घण्टः ॥ बकम् इति भाषा ॥

पट्टरञ्जनकं, क्ली, (पट्टानां वस्त्राणां रञ्जनम् । ततः कन् ।) पत्तरङ्गम् । इति राजनिर्घण्टः ॥

पट्टशाकं, क्ली पुं, (पट्टस्य पट्टवृक्षस्य शाकम् ।) नालिताशाकम् । इति शब्दमाला भावप्रकाशश्च ॥ अस्य गुणाः नाड़ीचशब्दे द्रष्टव्याः ॥

पट्टार्हा, स्त्री, (पट्टे नृपासने अर्हा योग्या ।) महादेवी । इति राजनिर्घण्टः ॥ पाटराणी इति भाषा ॥

पट्टिका, स्त्री, (पट्टिरिव कायति प्रकाशते इति । पट्टि+कै+कः । स्त्रियां टाप् ।) पट्टिकाख्यलोध्रः । इत्यमरटीकायां वाचस्पतिः ॥ (पुनः पट्टः । ह्रस्वार्थे कन् । स्त्रियां टाप् इत्वञ्च । वितस्तिविस्तारं वस्त्रम् । इति चिन्तामणिः ॥ पट्टः । पाटा इति भाषा । यथा, नैषधे । १६ । ६१ ।
"सर्व्वं विसृज्य दैवात् स्मृति-
सरणिं गतां चोमवन् यो धवंशां
प्राक् संस्कारेण सम्प्रत्यपि धुवति
शिरः पट्टिकापाठनेन ॥")

पट्टिकाख्यः, पुं, (पट्टिका आख्या यस्य ।) रक्तलोध्रः । पाटियालोध इति भाषा । तत्पर्य्यायः । क्रमुकः २ पट्टी ३ लाक्षाप्रसादनः ४ । इत्यमरः । २ । ४ । ४१ ॥

पट्टिकालोध्रः, पुं, (पट्टिका एव लोध्रः ।) रक्तलोध्रः । पाटिया लोध इति भाषा । तत्पर्य्यायः । क्रमुकः २ वल्कलोध्रः ३ बृहद्दलः ४ जीर्णबुध्नः ५ बृहद्वल्कः ६ शीर्णपत्रः ७ अक्षिभेषजः ८ शावरः ९ श्वेतलोध्रः १० गालवः ११ बृहत्त्वचः १२ पट्टी १३ लाक्षाप्रसादः १४ वल्कः १५ । इति राजनिर्घण्टः ॥ स्थूलवल्कलः १६ जीर्णपत्रः १७ बृहत्पत्रः १८ । इति भावप्रकाशः ॥ लोध्रद्वयगुणाः । कषायत्वम् । शीतत्वम् । वातकफास्रविषनाशित्वम् । चक्षुष्यत्वम् । तत्र वल्कलोध्रको विशिष्टः । इति राजनिर्घण्टः ॥ ग्राहित्वम् । लघुत्वम् । पित्तरक्तपित्तातीसारशोथनाशित्वञ्च । इति भावप्रकाशः ॥

पट्टिलः, पुं, (पट्टो विद्यतेऽस्य । पट्ट+अस्त्यर्थे इलच् ।) पूतिकरञ्जः । इति जटाधरः ॥

पट्टिलोध्रः, पुं, (पट्टिरेव लोध्रः ।) पट्टिकालोध्रः । इति शब्दरत्नावली ॥

पट्टिलोध्रकः, पुं, (पट्टिलोध्र+स्वार्थे कन् ।) पट्टिकालोध्रः । इति शब्दरत्नावली ॥

पट्टिशः, पट्टिसः, पुं, (पट् गतौ+बाहुलकात् टिश(स) च ।) अस्त्रविशेषः । यथा,—
"परशुः पट्टिशो नाम स एव च परश्वधः ॥"
इत्यमरटीकायां भरतः ॥
(यथा, भागवते । ८ । १० । ३६ ।
"भुशुण्डिभिश्चक्रगदार्ष्टिपट्टिशैः
शक्त्युल्मुकैः प्रासपरश्वधैरपि ।
निस्त्रिंशभल्लैः परिघैः समुद्गरैः
सभिन्दिपालैश्च शिरांसि चिच्छिदुः ॥")

पट्टी, स्त्री, (पट्टि+वा ङीप् ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥ ललाटभूषा । इति विश्वः ॥ तलसारकम् । अश्ववक्षःस्थलबन्धनरज्जुः । इति शब्दमाला ॥

पट्टी, [न्] पुं, (पट्टोऽस्यास्तीति । इनिः ।) रक्तलोध्रः । इति स्वामी ॥ इत्यमरटीकायां भरतः ॥

पट्टोलिका, स्त्री (पट्टं पट्टार्थं उलति प्राप्नोतीति । उल गतौ+ण्वुल् टापि इत्वम् ।) कृष्णकीला । अमस्थापनं इति केचित् । पाट्टा । इति च केचित् । इति त्रिकाण्डशेषः ॥

पठ, वाचि । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) पठति श्लोकं धीरः । इति दुर्गादासः ॥

पठनं, क्ली, (पठ्+भावे ल्युट् ।) वाचनम् । पड़न् इति भाषा । यथा, मार्कण्डेये । ९२ । १८ ।
"भूतप्रेतपिशाचानां पठनादेव नाशनम् ॥"

पठमञ्जरी, स्त्री, श्रीरागस्य चतुर्थरागिणी । तस्या न्यासांशग्रहाः षड्जः । गानसमयस्तु एकप्रहरदिवसोत्तरम् । इति सङ्गीतदर्पणः ॥ लक्षणं यथा, सङ्गीतदामोदरे ।
"वियोगिनी कान्तवितीर्णपुष्पां
स्रजं वहन्ती वपुषातिमुग्धा ।
आश्वास्यमाना प्रियया च सख्या
विधूसराङ्गी पटमञ्जरीयम् ॥"

पठमञ्जरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

पठिः, स्त्री, (पठ् + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति इन् ।) पठनम् । पाठः । इति शब्दरत्नावली ॥

पठितः, त्रि, (पठ् + क्त ।) वाचितः । कृतपाठः । अधीतः । उच्चारितः । यथा, छाग्यार्णवे ।
"मया न पठिता चण्डी त्वया नापि चिकित्सितम् ।
अकस्मान्नगरीयान्ते कथं धूमायते चिता ॥"

पठितव्यं, त्रि, (पठ् + "तव्यत्तव्यानीयरः ।" ३ । १ । ९६ । इति तव्य ।) पठनीयम् । पाठ्यम् । यथा, मार्कण्डेये देवीमाहात्म्ये । ९२ । ६ ।
"तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥"

पड, इ क संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, पण्डयति । संहतौ राशीकरणम् । इति दुर्गादासः ॥

पड, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् । इदित् ।) इ, पण्ड्यते । ङ, पण्डते । इति दुर्गादासः ॥

पण, ङ व्यवहृतौ । स्तुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) व्यवहृतौ व्यवहारे । ङ, पणते । पणायति पणायते आयान्तत्वादुभयपदमिति वोपदेवः । प्राणानामपणिष्टासौ अत्र कर्म्मणि षष्ठी । स्तुतौ तु पणायति पणायते विष्णुं धीरः । अन्ये तु द्वयोरर्थयोरेव आयस्याप्राप्तिपक्षे आत्मनेपदमेव । अपणिष्ट पेञ्चो माणवा मणिधोरे पणिष्यते अपणिष्यत् । इति दुर्गादासः ॥

पणः, पुं, (पण्यतेऽनेन । पण व्यवहारे + "ग्लहः पणः परिमाणे ।" ३ । ३ । ६६ । इति अप् ।) कार्षिकतान्त्रिकः । स तु पञ्चगण्डकमात्रकारमत्रात्मकर्षशतव्यवहारद्रव्यम् । पूर्व्वं हि ताम्रस्तिकायाः कपर्द्दक एको भत्र्यमिति अशीतिवराटकः । लोके तृपव्यागात् कार्षापणवत् पणव्यपदेशो मूल्य एव । निर्व्वेशः । भृतिः । (पणो ग्लहोऽस्यस्मिन् । पण + "अर्श आदिभ्यो ऽच् ।" ५ । २ । १२७ । इत्यच् ।) द्यूतम् । ग्लहः । आड् इति घोड़ इति बाजि इति च भाषा । (यथा, आर्य्यासप्तशती । ३५४ ।
"प्रतिभूः शुकी विपक्षे दक्षः प्रद्वारसंकथा गुरुषु ।
पुरुषायितं पणस्तद्माले परिभाषसां दायः ॥"
पण्यते व्यवह्रियते इति । "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः ।) मूल्यम् । धनम् । इत्यमरभरतौ ॥ कार्षापणः । (यथा, मनुः । ८ । २२४ ।
"यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥")
क्रय्यव्यवहारिका । व्यवहारः । इति मेदिनी ॥ विंशतिगण्डकः । इति हेमचन्द्रः ॥ शौण्डिकः । इति जटाधरः ॥ गृहम् । इति शब्दमाला ॥ (पणते अधिकारिभेदेन सुखभोगादिकं व्यवहरति साधकस्य सुखदुःखमारेण वैकुण्ठवासादिफलं प्रददातीत्यर्थः । पचाद्यच् । यद्वा, पण्यते स्तूयते यः । पण स्तुतौ "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । विष्णुः । यथा, महाभारते । १३ । १४९ । ११५ ।
"ऊर्द्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥")

पणग्रन्थिः, पुं, (पणस्य विक्रयादेर्ग्रन्थिर्यत्र ।) हट्टः । इति शब्दरत्नावली ॥

पणनं, क्ली, (पण व्यवहारे + भावे ल्युट् ।) विक्रयः । इति शब्दरत्नावली ॥

पणफरं, क्ली, लग्नात् द्वितीयपञ्चमाष्टमैकादशलग्नाः । यथा, ज्योतिस्तत्त्वे ।
"पणफरं द्वितीयाष्टपञ्चमैकादशं विदुः ॥"

पणवः, पुं, (पणं स्तुतिं वातीति । पण + वा + कः ।) गायनपटहः । (यथा, गीतायाम् । १ । १३ ।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥")
प्रणव इति केचित् । इत्यमरभरतौ ॥

पणवा, स्त्री, (पणव + टाप् ।) पणवः । यथा —
"पणवः पणवा च स्यात् प्रणवोऽप्यत्र वर्त्तते ॥"
इति भरतद्विरूपकोषः ॥

पणकः, पुं, (पणायते इति । पण + "क्वुन् शिल्पिसंज्ञयोः ।" उणां । २ । ३२ । इति क्वुन् ।) ...

पणकः, पुं, (पणायते इति । पण + "आयविच्छीति ।" उणां । ३ । ११७ । इति अच् ।) भध्यद्रव्यम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पणाङ्गना, स्त्री, (पणेन धनेन लभ्या अङ्गना । धनेन वश्यत्वात् तथात्वम् ।) वेश्या । इति हेमचन्द्रः ॥

पणाया, स्त्री, (पणाय्यते व्यवह्रियते इति । पण व्यवहारे स्तुतौ च + स्वार्थे आय + ततो भावे अप् । ततष्टाप् ।) क्रयविक्रयव्यवहारः । इति जटाधरः ॥ (स्तुतिः । दानम् । इति धात्वर्थलब्धोऽर्थः ॥)

पणायितः, त्रि, (पणायते स्म इति । पण व्यवहारे स्तुतौ च । "आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति स्वार्थे आयस्ततः क्तः ।) स्तुतः । इत्यमरः । ३ । १ । १०९ ॥ (व्यवहृतम् । क्रीतम् । विक्रीतम् । इति धात्वर्थलब्धोऽर्थः ॥)

पणास्थि, क्ली, (पणस्य पणाय वा यदस्थि ।) कपर्द्दकम् । वराटकः । इति त्रिकाण्डशेषः ॥

पणास्थिकं, क्ली, (पणास्थि + स्वार्थे कन् ।) वराटकः । इति हेमचन्द्रः ॥

पणितं, त्रि, (पण्यते स्म इति । पण + क्त । अयाभावपक्षे सिद्धम् ।) स्तुतम् । इत्यमरः ।३।१।१०९॥ व्यवहृतम् । इति पणधात्वर्थदर्शनात् ॥ (क्लवे, क्ली । बाजि इति भाषा । यथा, महाभारते १ । सौपर्णे । २२ । ४ ।
"ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम ! ।
जग्मतुः परया प्रीत्या परं पारं महोदधेः ॥")

पणितव्यं, त्रि, (पण्यते इति । पण ङ व्यवहारे स्तुतौ च । "तव्यत्तव्यानीयरः ।" ३ । १ । ९६ । इति तव्य ।) विक्रेयद्रव्यम् । इत्यमरः । २ । ९ । ८२ ॥ स्तोतव्यम् । व्यवहार्य्यम् । इति पणधात्वर्थदर्शनात् ॥

पण्डः, पुं, (पण्डते निष्फलत्वं प्राप्नोतीति । पडि गतौ + पचाद्यच् । यद्वा पण ङ व्यवहारे । "पञ्चमात् डः ।" उणां । १ । ११३ । इति डः ।) क्लीवम् । नपुंसकम् । इत्यमरः । २ । ६ । ३९ । निष्फले, त्रि, ॥

पण्डा, स्त्री, (पण ङ व्यवहारे । "पञ्चमात् डः ।" उणां । १ । ११३ । इति डः । ततष्टाप् ।) बुद्धिः । इति मेदिनी ॥ तत्त्वानुगा बुद्धिः । इति हेमचन्द्रः ॥

पण्डापूर्व्वं, क्ली, (पण्डं निष्फलं अपूर्व्वं अदृष्टम् ।) फलाजनकादृष्टम् । तद्विशिष्टे त्रि । यथा,
"यद्यपि पण्डापूर्व्वं फलमिति तदपि न कामनाभावे अकरणापत्तेर्बोधात् ।" इति सिद्धान्तमुक्तावली ॥

पण्डितः, पुं, (पण्डा वेदोज्ज्वला तत्त्वविषयिणी वा बुद्धिः । सा जाता अस्य । "तदस्य संजातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् । यद्वा, पण्डते तत्त्वज्ञानं प्राप्नोति । गत्यर्थत्वात् क्तः ।) शास्त्रज्ञः । अस्य लक्षणं यथा,—
("निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत् पण्डितलक्षणम् ॥"
इति चिन्तामणिः ॥)
"पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥"
इति महाभारते वनपर्व्व ॥
अपि च श्रीभगवद्गीतायाम् । ५ । १७ ।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥"
तत्पर्य्यायः । विद्वान् २ विपश्चित् ३ दोषज्ञः ४ सन् ५ सुधीः ६ कोविदः ७ बुधः ८ धीरः ९ मनीषी १० ज्ञः ११ प्राज्ञः १२ संख्यावान् १३ कविः १४ धीमान् १५ सूरिः १६ कृती १७ कृष्टिः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२ । इत्यमरः । २ । ७ । ५-६ ॥ विशारदः २३ । कवी २४ सूरी २५ । इति भरतः ॥ विदग्धः २६ दूरदृक् २७ वेदी २८ वृद्धः २९ बुद्धः ३० विधानगः ३१ प्रज्ञिलः ३२ कृष्णिः ३३ । इति शब्दरत्नावली ॥ विज्ञः ३४ मेधावी ३५ । इति राजनिर्घण्टः ॥ सिह्लकः । इति मेदिनी ॥ (सर्व्वज्ञत्वात् महादेवः । यथा, महाभारते । १३ । १७ । १२४ ।
"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः ॥")

पण्डितम्मन्यः, त्रि, (आत्मानं पण्डितम्मन्यते यः सः । "आत्ममाने खश्च ।" ३ । २ । ८३ । इति खश् ।) पण्डिताभिमानी । इति व्याकरणम् ॥

पण्डितमानी, [न्] त्रि, (आत्मानं पण्डितं मन्यते इति । मन + णिनिः ।) पण्डिताभिमानी । यथा
"मूर्खाः पण्डितमानिनः ।" इति प्राचीनाः ॥

पण्यं, त्रि, (पण्यते इति । पण ङ व्यवहारे स्तुतौ च । "अवद्यपण्यवर्य्या गर्ह्येति ।" ३ । १ । १०१ । निपातनात् साधु ।) पणितव्यम् । विक्रेयद्रव्यम् । इत्यमरः । २ । ९ । ८२ । (यथा, रामायणे । २ । ४८ । ४ ।
"न चाक्रुश्यन् न चामोदन् वणिजो न प्रसारयन् ।

न चाप्योभक्ष पण्यानि नापचन् गृहमेधिनः ॥")

व्यवहार्य्यम्। स्तोतव्यम्। इति पणधात्वर्थदर्शनात् ॥ (क्ली, पण्यते व्यवह्रियतेऽत्र। पण+यत्। विपणिः। यथा, मनुः। ५। १२९।

"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम् ॥"

"पण्ये पण्यवीथिकायाम्।" इति कुल्लूकभट्टः ॥)

पण्यवीथिका, स्त्री, (पण्यानां विक्रेयद्रव्याणां वीथिका गृहम्।) विपणिः। इत्यमरः। २।२।२॥ पण्यविक्रयशाला। इति हलायुधः॥ हट्टः। इत्यन्ये॥ विक्रयार्थप्रसारितनानाद्रव्याणां वणिग्वीथी। वाणियाविट्टी इति बाजार इति च ख्यातः। इति केचित्। हट्टमण्डपः। इति केचित्। हट्टमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति सट्टीकायां भरतः॥

"आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्॥"

इति शाश्वतः॥

पण्यवीथी, स्त्री, (पण्यानां वीथी विक्रयगृहम्।) क्रयविक्रयस्थानम्। इति शब्दमाला॥

पण्यशाला, स्त्री, (पण्यानां विक्रेयद्रव्याणां शाला गृहम्।) हट्टः। इति हेमचन्द्रः॥ विक्रयगृहञ्च॥

पण्यस्त्री, स्त्री, (पण्या मूल्येन लभ्या या स्त्री। यद्वा पण्ये हट्टादिस्थले स्थिता स्त्री।) वेश्या। इति कोषान्तरम्॥

पण्या, स्त्री, (पण्यते स्तूयते रोगहन्तृत्वात्। पण ङ व्यवहारे स्तुतौ च+कर्म्मणि यत् ततष्टाप्।) प्रियङ्गु। इति हिरूपकोषः॥

पण्याङ्गना, स्त्री, (पण्या पणेन मूल्येन लभ्या या अङ्गना।) वेश्या। इति हेमचन्द्रः॥

पण्याजीवः, पुं, (पण्यैः क्रयविक्रयद्रव्यैराजीवति प्राणिति। आ+जीव+कः।) क्रयविक्रयिकः। वणिक्। इत्यमरः। २। ९। ७८॥

पण्याजीवकं, क्ली, (पण्यैः क्रयविक्रयद्रव्यैराजीवति तिष्ठतीति। पण्याजीवस्ततः स्वार्थे कन्। अभिधानात् क्लीवत्वम्। यद्वा, पण्याजीवैर्वणिग्भिः कायति शब्दायते इति। कै+कः।) हट्टः। इति त्रिकाण्डशेषः॥ पण्यजीवकमित्यपि पाठः॥

पण्यान्धा, स्त्री, (पण्यं अन्धयति स्वगुणेन या। अन्ध+अच्।) तृणविशेषः। तत्पर्य्यायः। कङ्गुनीपत्रा २ पण्यधा ३ पणधा ४। अस्या गुणाः। समवीर्य्यत्वम्। तिक्तत्वम्। चारत्वम्। सारकत्वम्। तत्कालशस्त्रघातव्रणसंरोपणत्वञ्च।

"दीर्घा मध्या तथा ह्रस्वा पण्यान्धा त्रिविधा स्मृता।
रसवीर्य्यविपाकेषु मध्यमा गुणदायिका॥"

इति राजनिर्घण्टः॥

पण्यन्धा इत्यपि पाठः॥

पत् [द्] पुं, (पद्यते गच्छत्यनेन। पद्यौ ङ गतौ+करणे क्विप्।) पादः। इत्यमरः। २। ६। ७१॥ (यथा, मनुः। ४। २०७।

"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन।
केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः॥"

केचित्तु पादशब्दस्य पद् इत्यादेशो भवतीति वदन्ति। अन्ये तु न मन्यन्ते यतः "पदादयः पृथक्शब्दा इत्येके।" इति मुग्धबोधे वोपदेवेनोक्तम्॥)

पत, ऌ ज गतौ। ऐश्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऌ, अपतत्। ज, पातः पतः। गतिरिह पतनम्। पतति पत्रं वृक्षात्। इति दुर्गादासः॥

पत, त् क गतौ। ऐश्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) ऐश्यमिश्वरीभावः। गतिरिह पतनम्। पतयति पत्रं वृक्षात्। इति दुर्गादासः॥

पत, य ङ ऐश्ये। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) य ङ, पत्यते। ऐश्यमैश्वर्य्यमिश्वरीभावः। इति दुर्गादासः॥

पतं, त्रि, (पततीति। पत्+अच्।) पुष्टम्। इति जटाधरः॥ (पतनकर्त्तरि च, त्रि॥)

पतगः, पुं, (पत उत्पतितः सन् गच्छति। यद्वा पतेन पक्षेण गच्छतीति। गम्+डः।) पक्षी। इत्यमरः। २। ५। ३३॥ (यथा, मनुः। ७। २३।

"देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः॥")

पतङ्गं, क्ली, (पत् ऌ गत्यैश्वर्य्ययोः। बाहुलकात् अङ्गच्।) सूतम्। पारदम्। इति मेदिनी॥ चन्दनभेदः। इति शब्दचन्द्रिका॥

पतङ्गः, पुं, (पतति गच्छतीति। "पतेरङ्गच् पक्षिणि।" उणां। १। ११८। इति अङ्गच्।) पक्षी। (यथा, मार्कण्डेये। १०। ८६।

"ततः सर्व्वेषु निस्तीर्णः पापी तिर्य्यक्त्वमश्नुते।
क्रमिकीटपतङ्गेषु श्वापदे मशकादिषु॥")

सूर्य्यः। (यथा, माघे। १। १२।

"पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत॥"

"कथं पतङ्गः सूर्य्यः। खगत्वसामान्योपचारात्। 'पतङ्गः शलभे सूर्य्ये पतङ्गः पक्षिणि स्मृतः॥' इति कोषान्तरम्॥" इत्युज्ज्वलदत्तः॥)

शलभः। इत्यमरः। ३। ३। २०॥ शालिप्रभेदः। इति मेदिनी॥ जलमधूकवृक्षः। इति राजनिर्घण्टः॥

पतङ्गमः, पुं, (पत उत्पतितः सन् गच्छतीति। गम्+खच्। मुम् च।) पक्षी। इति व्याकरणम्॥ (शलभः। यथा, भागवते। ७। ८। २४।

"चलच्छितोऽसौ पतितः पतङ्गमो
यथा नृसिंहौजसि सोऽसुरस्तदा॥")

पतङ्गिका, स्त्री, (पतङ्ग+स्वल्पार्थे संज्ञायां वा कन्। स्त्रियां टाप् अत इत्वञ्च।) मधुमक्षिकाविशेषः। तत्पर्य्यायः। पुत्तिका २। इत्यमरः। २। ५। २७॥ (यथा, महाभारते। १। १०८। १०।

"पतङ्गिकानां पुच्छेषु त्वयेषीका प्रवेशिता।
कर्म्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन!॥")

पतञ्चिका, स्त्री, (पतमभिगतं शत्रुमित्यर्थः चिक्कयति पीड़यति शरारोपितशरेणेति यावत्। पृषोदरात् साधुः।) धनुर्ज्या। इति शब्दरत्नावली॥

पतञ्जलिः, पुं, (पतः पतन् वा अञ्जलिः नमस्कार्थतया यस्मिन्। शकन्ध्वादित्वात् साधुः।) मुनिविशेषः। स तु पातञ्जलदर्शनपाणिनिटीकामहाभाष्यादिग्रन्थकर्त्ता। तत्पर्य्यायः। गोनर्दीयः २। इति हेमचन्द्रः॥ चूर्णिकृत् ३ भाष्यकारः ४। इति त्रिकाण्डशेषः॥ वररुचिः ५। इति शब्दरत्नावली॥ (केषाञ्चिन्मते योगसूत्रकारकपतञ्जलेर्भाष्यकृत् पतञ्जलिर्भिन्न एव। अनयोरभेदस्तान्तु निर्दिशन्ति पाश्चात्याः॥ पातञ्जलयोगशास्त्रन्तु पादचतुष्टयात्मकं तत्र प्रथमे पादे "अथ योगानुशासनम्।" इति योगशास्त्रारम्भप्रतिज्ञां विधाय "योगश्चित्तवृत्तिनिरोधः।" इत्यादिना योगलक्षणमुक्त्वा सप्रपञ्चसमाधिनिर्देशं कृतवान् भगवान् पतञ्जलिः। द्वितीये तु "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।" इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च वहिरङ्गाणि साधनानि च निरदिशत्। तृतीये "देशबन्धश्चित्तस्य धारणा।" इत्यादिना धारणाध्यानसमाधित्रयरूपमन्तरङ्गं संयमपदवाच्यं तत्र अवान्तरफलं विभूतिजातञ्च उपादिदेश। चतुर्थे पादे तु "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः।" इत्यादिना सिद्धिपञ्चकं मुख्यं प्रयोजनं कैवल्यं प्रधानादीनि पञ्चविंशतितत्त्वानि क्लेशकर्म्मविपाकाशयैरसंश्लिष्टं पुरुषं स्वेच्छया निर्म्माणकायमधिष्ठाय लौकिकादिसम्प्रदायप्रवर्त्तकं संसारदहने दग्धानां जीवानां निस्तारकञ्च उपदिष्टवान्॥)

पतत्त्रं, क्ली, (पतन्तं त्रायते इति। पतत्+त्रै+कः।) पक्षः। पाखा इति भाषा। इत्यमरः। २। ५। ३६। (यथा, भागवते। ८। ११। ३४।

"येन मे पूर्व्वमद्रीणां पक्षच्छेदः प्रजात्यये।
कृतो निविशतां भारैः पतत्त्रैः पततां भुवि॥"

(त्रं) पत ऌ गतौ। "अमिनक्षियजिवधिपतिभ्योऽत्रन्।" उणां। ३। १०५। इति अत्रन्। वाहनम्। इत्युज्ज्वलदत्तः॥)

पतत्त्री, [न्] पुं, (पतत्त्रं पक्षो विद्यतेऽस्य। पतत्त्र+इनिः।) पक्षी। इत्यमरः। २। ५। ३३॥ (यथा, कुमारे। ५। ४।

"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्त्रिणः॥")

पतत्रिः, पुं, (पतति उत्पततीति। "पतेरत्रिन्।" उणां। ४। ६९। इति अत्रिन्।) पक्षी। इत्यमरः। २। ५। ३३॥

पतद्ग्रहः, पुं, (पतन् मुखादिभ्यः स्खलन् जलादि गृह्णातीति। पतत्+ग्रह+अच्।) प्रतिग्राहः। इत्यमरः। २। ९। १३९॥ पिकदानी इति भाषा॥

पतद्भीरुः, पुं, (पतन् पक्षी भीरुर्यस्मात्।) श्येनः। इति शब्दरत्नावली॥

पतन् [त्] पुं, (पततीति। पत्+शतृ।) पक्षी। (यथा, महाभारते। २। ३८। २८।

"नयनाभ्यां सुखं यत्र आदित्यसमतां सुतम्।

पर्व्वतानां सुखं मेरुर्गरुड़: पततां सुखम् ॥")
पतनशीले त्रि । इति मेदिनी ॥

पतनं, क्ली, (पत् + भावे ल्युट् ।) पातः । पड़न् इति भाषा । यथा,— [द्रःसहम् ॥"
"अधनेः पतने न वेदना पतनज्ञानमतीव
दलुद्गटः ॥
"हिंसातिकर्म्मभ्यो हानिः पतनं परत्र चाविहि-
ताभेके नरकम् ।" इति हारीतवचनम् ॥ पापम् ।
यथा, प्रायश्चित्तविवेके ।
"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥"


पतमः, पुं, (पतति कर्म्मक्षये यस्मात् । पत् + अम । क्षीणपुण्यानां चन्द्रलोकात् पतनं शास्त्रे प्रसिद्धम् ।) चन्द्रः । (पततीति । पत् + अम ।) पक्षी । पतङ्गः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पतयालुः, त्रि, (पत् + "स्पृहिगृहिपतिदयीति ।" ३।२।१५८ । इति आलुच् ।) पतनशीलः । तत्पर्य्यायः । पातुकः २ । इत्यमरः ।३।२।२७ ॥

पतसः, पुं, (पततीति । "अत्यविचमीति ।" उणा° ३।११७। इति असच् ।) पक्षी । इत्युणादिवृत्तिः ॥ चन्द्रः । पतङ्गः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पताका, स्त्री, पत्यते ज्ञायते कस्यचित् भेदोऽनया । (पत् + "पताकादयश्च ।" उणा° ४।१४ । इति आक प्रत्ययेन साधुः ।) ध्वजम् । निशान् इति भाषा । (यथा, महाभारते ।१।१७।१५ ।
"श्वेतैश्छत्रैः पताकाभिर्ध्वजवारणवाजिभिः ।
सान्यनीकान्यशोभन्त राजन्यपदातिभिः ॥")
तत्पर्य्यायः । वैजयन्ती २ केतनम् ३ ध्वजम् ४ । इत्यमरः ।२।८।९९ ॥ पटाका ५ जयन्ती ६ वैजयन्तिका ७ कदली ८ कन्दली ९ केतुः १० कदलिका ११ क्षौमभण्डनम् १२ । इति शब्दरत्नावली ॥ चिह्नम् १३ । इति जटाधरः ॥ केतनं ध्वजं एतद्द्वयं पताकादण्डे । इति भरतः ॥ सौभाग्यम् । नाटकाङ्गम् । इति मेदिनी ॥ (यथा, साहित्यदर्पणे । ६ । २७ ।
"पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि ॥"
इह नाट्ये ॥ तल्लक्षणं यथा तत्रैव । ६ । २८ ।
"यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥"
तद्भेदानाह तत्रैव । ६ । २९—३२ ।
"सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥
यथा, रत्नावल्यां 'वासवदत्तेयमिति' राजा यदा तत्कण्ठपाशं मोचयति तदा तदुक्त्या 'सागरिकेयमिति' प्रत्यभिज्ञाय 'कथं प्रिया मे सागरिका अलमलमतिमात्रम्' इत्यादि फलरूपार्थसम्पत्तिः पूर्व्वापेक्षया उपचारातिशयात् गुणवती उत्कृष्टा ।१।
वचः सातिशयश्लिष्टं नानाबन्धसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥
यथा, वेणीसंहारे सूत्रधारः ।
'रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ।'
अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् नेष्टमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम् ।२।
अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥
लीनं अव्यक्तार्थं श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतं सविनयं विशेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानम् । यथा, वेणीसंहारे २ अङ्के । कञ्चुकी । 'देव ! भग्नं भग्नम् ।' राजा । 'केन ।' कञ्चुकी । 'भीमेन ।' राजा । 'कस्य ।' कञ्चुकी । 'भवतः ।' राजा । 'आः ! किं प्रलपसि ?' कञ्चुकी । (सभयम्) 'देव ! ननु ब्रवीमि । भग्नं भीमेन भवतः ।' राजा । 'धिक् वृद्धापसद ! कोऽयमद्य ते व्यामोहः ।' कञ्चुकी । 'देव ! न व्यामोहः सत्यमेव ।
भग्नं भीमेन भवतो मरुता रथकेतनम् ।
पतितं किङ्किणीक्वाणबद्धाक्रन्दमिवावनौ ॥'
अत्र दुर्य्योधनोरुभङ्गरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम् ।३।
द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम् ॥"४ ॥)
अङ्कः । केतुः । इति हेमचन्द्रः ॥ अस्य विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

पताकी, [न्] त्रि, (पताका विद्यतेऽस्य । पताका + इनिः ।) वैजयन्तिकः । पताकाधारी । इत्यमरः । २ । ८ । ७१ ॥ (यथा, महाभारते । ६ । १७ । २० ।
" स तु गोवासनः शैब्यः सहितः सर्व्वराजभिः ।
ययौ मातङ्गराजेन राजार्हेण पताकिना ॥")
दिवारात्रिबोधकचक्रविशेषः । तस्य लिखनक्रमो यथा,—
"तिर्य्यगूर्द्ध्वगता रेखास्तिस्रो देयाः पताकया ।
शुभाः कार्य्या देवविदा सर्व्वमङ्गलरेखया ॥
दक्षसोर्द्ध्वतरेखातो वामं मेषादयो राशयः ।
पञ्चाष्टयुग्मविंशाश्च षड्दशेन्द्राग्निसागराः ।
कर्कटादिमीनपर्य्यन्तमङ्का देया यथाक्रमम् ॥



बालस्य जन्मकालीनग्रहलग्नभादिषु ।
विद्धस्य चिन्तयेत् प्राज्ञः शुभाशुभं यथाक्रमात् ॥"
तत्र शुभाशुभज्ञानं यथा,—
"शुभग्रहयोगवेधैर्लग्नाद्बालस्य शोभनम् ।
पापग्रहयोगवेधैरायुर्ह्रानिरिकालविन् ।
लग्नेऽधिके दिनं मध्ये मासो दोषे च हायनम् ॥"
देहज्ञानं यथा,—
"कर्कमीनधनुर्भ्याश्च हरेः कीटघटेन च ।
स्त्रियास्तौलिभ्यश्चाभ्याश्च घटे मीनेन कन्यया ॥
धनुषो मृगकर्किभ्यां मकरे धनुषा स्त्रिया ।
मीने कर्कितुलाभ्याश्च मीनस्यैकतुलालये ॥
तुलाकर्किमृगैर्दन्ते कीटकुम्भद्वयेन च ।
सिंहवेधे एतेषु नामदायिसंमुखे ॥
राहुकेत्वर्कसौरारैः पापविद्धो मृतोऽशुभः ।
तदन्यैर्गुणविद्धस्तु लग्नराशिः शुभप्रदः ॥"
तिथिकालौ यथा,—
"एकोनविंशतिः कर्के सिंहे सप्तदशैव तु ।
षट्त्रिंशद्वृषलायाश्च षड्विंशतिस्तुलाधरे ॥
वृश्चिके सिंहवत्त्रिंशत्रिंशच्चरासने ।
षड्विंशं मकरे चैवं कुम्भे सप्तदश स्मृताः ॥
नव तुले तथा मीने मेषे षड्दशभिस्तथा ।
वृषभे च तथा सिंहे मुनेऽत्र हरलोचने ॥
त्रिनयाङ्काद्रिसंख्या दिनमासाब्दनिर्णये ।
एकाङ्काग्निचन्द्रान्दा क्रमादिदमेव सम्मताः ॥"
अथ यामार्द्धाधिपज्ञानम् ।
"वारेशाद्द्युयामेषु राशाङ्काः षष्ठषट् क्रमात् ।
अधिपाः स्युर्द्दिवाजन्म यदा कार्य्ये भवन्ति ते ।
रवीज्येन्दुभृगुज्ञाशशनिज्ञरवयो निशि ॥
रविशुक्रशशाङ्कीज्यकुजभास्कराः ।
दिने लग्नाः परस्मिन् नवाधपाश्चतुर्थकाः ॥"
अथ दशाधिपज्ञानम् ।
"पापदशे भवेदिष्टिः शुभदशे शुभं भवेत् ।
शुभाग्रहस्य दशे तु कर्म्मारम्भाच्छुभं भवेत् ॥
यस्यार्द्धयामकस्यैव प्राग्दशः सर्व्वदा नरः ।
षट् षट् परोक्ष्य दशाश्च नयो रात्रौ मतायथा ॥
आदित्ये भृगुजो बुधोऽपि च शशी भौमे शनीज्यौ
कुजौ
भौमेऽर्कः सितसोमजौ च शशिजे सोमः शनि-
र्व्वाक्पतिः ।
जीवेऽङ्गारकरवी भृगुर्भृ गुरुने सौम्येन्दुमार्गस्थाः
काले जीवमहीजतिग्मकिरणा रात्रौ च दशा-
धिपाः ॥
यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धकः ।
तदर्द्धात् तृतीयः स्यात्तदर्द्धात् तुरीयकः ॥
अङ्काभावे तु राहुः स्यात् तदङ्को वसुसंज्ञकः ।
भमाङ्कस्य परित्यागाद्द्विवादशाधिपा यथा ॥
रविदशुभबुधलौच्छस्वराधरका:
कुजरविदशुभशीन्दुधराधराश्च ।
गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः
शनिकुजरविदैत्या दशमायाह्नयामे ॥"
शुभाशुभदशाज्ञानं यथा,—
"शैषानकेस्य दशौ सततशुभकरावादिशौ यौ
तथेन्दोः
शेषौ दशः कुजस्याप्यथ गुरुबुधयोरादमर्द्धं
प्रशस्तम् ।
आदित्यस्यैको भृगुकुलपतेः सर्व्वकार्य्येषु शस्तौ
दशावलात् एते शशिदपि समये नैव शौरेः
प्रशस्ताः ॥"

पलपताकी यथा,—
"प्रतिदण्डं पलाग्रैर्वा ज्ञात्वा वाच्यं शुभाशुभम् ॥
रवौ च वेदा वसवः सुधांशौ
कुजे च वाणाः शशिजे तथाङ्गाः ।
शनाश्चतुर्दिक् च वृहस्पतौ स्या-
द्राहौ तुरङ्गा भृगुजे च रुद्राः ॥"
बालस्य शुभाशुभफलं यथा,—
"अशुभे दण्डसंयोगे सर्व्वत्र पुण्यवर्जिते ।
बालस्य मरणं शीघ्रं यदि पापैः समन्वितम् ॥
अशुभग्रहदण्डे तु सर्व्वत्र पापवर्ज्जिते ।
बालस्य कुशलं सर्व्वं शुभैर्यदि समन्वितम् ॥
अशुभो दण्डनाथो हि वेधश्चेत्तेन लभ्यते ।
मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत् ॥
पापस्य दण्डमात्रे तु तद्योगवेधवर्जिते ।
बालस्य कुशलं तत्र शुभैर्यदि समन्वितम् ॥"
इति ज्योतिस्तत्त्वे पताकीवेधः ॥
(स्त्रियां ङीप् । सेना । यथा, रघुः । ४ । ८२ ।
"स प्रविश्य स रुद्धार्कमधारावर्षदुर्द्दिनम् ।
रथवर्त्म रजोऽप्यस्य कुत एव पताकिनीम् ॥")

पतिः, पुं, (पाति रक्षतीति । पा स रक्षणे + डतिः ।) मूलम् । गतिः । इति विश्वः ॥ पाणिग्रहीता । भातार इति भाषा । तत्पर्य्यायः । धवः २ प्रियः ३ भर्त्ता ४ । इत्यमरः । २ । ६ । ३५ ॥ कान्तः ५ प्राणनाथः ६ गुरुः ७ हृदयेशः ८ जीवितेशः ९ जामाता १० सुखोत्सवः ११ नर्म्मकीलः १२ रतगुरुः १३ स्वामी १४ रमणः १५ । इति शब्दरत्नावली ॥ वरः १६ परिणेता १७ पष्ठी १८ । इति राजनिर्घण्टः ॥ तस्य लक्षणम् । विधिवत्पाणिग्राहकः । अनुकूलदक्षिणधृष्टशठभेदात् पतिश्चतुर्द्धा । सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः । १ । सकलनायिकाविषयसमसहजानुरागो दक्षिणः । २ । भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः । ३ । कामिनीविषयकपटपटुः शठः । ४ । इति रसमञ्जरी ॥ * ॥ पतिसेवादिफलं यथा,—
"कथं मे सुव्रते ! साध्वि ! निद्राभङ्गः कृतस्त्वया ।
व्यर्थं व्रतादिकं तस्या या भर्त्तुरपकारिणी ॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् ।
भर्त्तुरप्रियकारिण्याः सर्व्वं भवति निष्फलम् ॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् ॥
सर्व्वदानं सर्व्वयज्ञः सर्व्वतीर्थनिषेवणम् ।
सर्व्वं व्रतं तपः सर्व्वमुपवासादिकञ्च यत् ॥
सर्व्वधर्म्मश्च सत्यञ्च सर्व्वदेवप्रपूजनम् ।
तत् सर्व्वं स्वामिसेवायाः कलां नार्हन्ति
षोडशीम् ॥
सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः शतम् ॥
विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् ।
असत्कुलप्रजाता या तत्फलं श्रूयतां सति ! ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्त्रविवर्ज्जिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४३ अध्यायः ॥ * ॥
अपि च ।
"स्वकान्तश्च परो बन्धुरिह लोके परत्र च ।
नहि कान्तात् परः श्रेयान् कुलस्त्रीणां परो गुरुः ॥
देवपूजा व्रतं दानं तपश्चानशनं जपः ।
स्नानञ्च सर्व्वतीर्थेषु दीक्षा सर्व्वमखेषु च ॥
प्रादक्षिण्यं पृथिव्याश्च ब्राह्मणातिथिसेवनम् ।
सर्व्वाणि पतिसेवायाः कलां नार्हन्ति षोडशीम् ॥
किमतः पतिभक्तायाः अभक्तायाश्च भारते ।
यया दुःखी सुखारम्भे साकाङ्क्षः प्रथमो भवेत् ॥
पतिसेवापरो धर्म्मो नहि स्त्रीणां श्रुतौ श्रुतम् ।
स्वप्ने ध्याने च सततं कान्तं नारायणाधिकम् ॥
दृष्ट्वा तच्चरणाम्भोजं सेवां नित्यं करिष्यसि ॥
परिहासेन कोपेन भ्रमेणाज्ञया सुते ! ।
कटूक्तिं स्वामिनः साक्षात् परोक्षान्न करिष्यसि ॥
स्त्रिया वाग्योनिदुष्टायाः कामतो भारते भुवि ।
प्रायश्चित्तं श्रुतौ नास्ति नरकं ब्रह्मणः शतम् ॥
सर्व्वधर्म्मपरीता या कटूक्तिं कुरुते पतिम् ।
शतजन्मार्ज्जितं पुण्यं तस्या नश्यति निश्चितम् ॥
दत्त्वा कन्यां बोधयित्वा जगाम मुनिपुङ्गवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २४ अध्यायः ॥
अपि च ।
"या स्त्री भर्त्तुरसौभाग्या साऽसौभाग्या च सर्व्वतः ।
शयने भोजने तस्या न सुखं जीवनं वृथा ॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत् किं पुत्त्रे धने रूपे सम्पत्तौ यौवनेऽथवा ॥
यन्नास्ति कान्ते च सर्व्वप्रियतमे परे ।
सा शुचिधर्म्महीना च सर्व्वकर्म्मविवर्ज्जिता ॥
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च ।
सर्व्वस्माच्च परः स्वामी न गुरुः स्वामिनः परः ॥
पिता माता सुतो भ्राता स्निग्धो दत्त्वा मितं धनम् ।
सर्व्वस्वदाता स्वामी च महतां योषितां सुराः ! ॥
काचिदेव हि जानाति महासाध्वी च स्वामिनम् ।
अतिसद्वंशजाता च सुशीला कुलपालिका ॥
असद्वंशप्रसूता या दुःशीला धर्म्मवर्ज्जिता ।
सत्यदुष्टा योनिदुष्टा पतिं निन्दति कोपतः ॥
या स्त्री द्वेष्टि सर्व्वपरं पतिं विष्णुसमं गुरुम् ।
कुम्भीपाके पचति सा यावदिन्द्राश्चतुर्द्दश ॥
व्रतस्नानशनं दानं सत्यं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५७ अध्यायः ॥
अपि च ।
"साध्व्याः सद्वंशजायाश्च शतपुत्त्राधिकः पतिः ।
असद्वंशप्रसूता या दुःशीला ज्ञानवर्ज्जिता ॥
स्वामिनं मन्यते नासौ पित्रोर्द्दोषेण कुत्सिता ।
कुत्सितं पतितं मूढं दरिद्रं रोगिणं जडम् ॥
कुलजा विष्णुतुल्यञ्च कान्तं पश्यति सन्ततम् ॥
हुताशनो वा सूर्य्यो वा सर्व्वतेजस्विनां परः ।
पतिव्रतातेजसश्च कलां नार्हन्ति षोडशीम् ॥
महादानानि पुण्यानि व्रतान्यनशनानि च ।
तपांसि पतिसेवायाः कलां नार्हन्ति षोडशीम् ॥
पुत्त्रो वापि पिता वापि बान्धवो वा सहोदरः ।
योषितां कुलजातानां न कश्चित् स्वामिनः समः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ४४ अध्यायः ॥ * ॥
पतिदक्षिणादि यथा,—
"निरूपितश्च वेदेषु स्वशब्दो धनवाचकः ।
तद्यस्यास्तीति स स्वामी वेदज्ञ ! शृणु मद्वचः ॥
तस्य दाता सदा स्वामी न च स्वं स्वामिनो भवेत् ।
अहो व्यवस्था भवतां वेदज्ञानमबोधताम् ॥
धर्म्म उवाच ।
पत्नीं विना न स्वं साध्वि ! स्वामिनं दातुमक्षमम् ।
दम्पती ध्रुवमेकाङ्गौ तयोर्द्दाता च द्वौ समौ ॥
निरूपिता पुण्यके च व्रते स्वामी च दक्षिणा ।
श्रुतौ श्रुतो यः स्वधर्म्मो विपरीतो ह्यधर्म्मकः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः ॥

पतिः, त्रि, (पाति रक्षति पालयतीति वा । "पातेर्डतिः ।" उणां । ४ । ५७ । इति डतिः ।) अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३ ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८ परिवृढः ९ अधिपः १० । इत्यमरः । ३ । १ । १० । ११ ॥ (यथा, मनुः । ७ । ११५ ।
"ग्रामस्याधिपतिं कुर्य्यात् दशग्रामपतिं तथा ।
विंशतीशं शतेशञ्च सहस्रपतिमेव च ॥")

पतिंवरा, स्त्री, (पतिं वृणीते या सा । वृ ञ वरणे + खच् । "संज्ञायां भृतॄवृजि ..." ३ । २ । ४६ । इति मुम् ।) स्वयंवरा । स्वेच्छया पत्यन्वेषिणी । (यथा, रघौ । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कॢप्तविवाहवेशा ॥")
कृष्णजीरकः । इति शब्दचन्द्रिका ॥

पतिघ्नी, स्त्री, (पतिं हन्ति इति । "लक्षणे जायापत्योष्टक् ।" ३ । २ । ५२ । इति टक् ततो ङीप् ।) पतिनाशकहस्तरेखाविशेषः । यथा, "लक्षणे जायापतिभ्याम् । जायाघ्नो वृषलः । पतिघ्नी पाणिरेखा ।" इति संक्षिप्तसारव्याकरणम् ॥ स्वामिघ्नी । (विवाहात् प्राक् वेदादिन्यस्तपिण्डाष्टकस्य कुमार्य्यै परीक्षार्थं दाने तदा श्मशानजातस्य पिण्डस्य ग्रहणे कुमार्य्यास्तस्याः पतिहननरूपफलं यथा, आश्वलायनगृह्यसूत्रे १ । ५ । ६ । "अष्टौ पिण्डान् कृत्वा पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषामेकं गृहाणेति ।" इति नियोजिता कुमारी यदि श्मशानादाहृतं मृदं गृह्णाति तदा पतिघ्नीति तां विद्यात् ॥)

पतितः, त्रि, (पतति भ्रष्टो भवति स्वधर्म्मात् प्रायश्चित्तकर्म्मणः सदाचारादिभ्यो वा यः । पत् + कर्त्तरि क्तः ।) च्युतः । गलितः । पतनाश्रयः । पड़ा इति भाषा । तत्पर्य्यायः । प्रस्कन्नः २ । इति हेमचन्द्रः ॥ धर्म्मात् विचलितः । स्वधर्म्मच्युतः । तस्य लक्षणं यथा, मार्कण्डेयपुराणे ।
"स्वधर्म्मं यः समुत्सृज्य परधर्म्मं समाश्रयेत् ।
अनापदि स विद्वद्भिः पतितः परिकीर्त्तितः ॥"

मातिश्यकारणं यथा, मात्स्ये २०१ अध्याये ।
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
पतिता यथा,—
"गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः ।
क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ।
कुशिल्पजीविनश्चैव सूनालङ्कारकारिणः ॥"
तथा,—
"ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥"
तेषां दाहादिनिषेधो यथा,—
"पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ॥"
इति शुद्धितत्त्वे ब्रह्मपुराणम् ॥ * ॥
तेषां संसर्गनिषेधो यथा, वराहपुराणे ।
"आसनशयनयानेन भोजनात् कथनादिषु ।
संवत्सरेण पतति पतितेन सहाचरन् ॥"
प्रायश्चित्तेतरवैदिककर्म्मानधिकारी सन् नरकभागी । यथा,—
"पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम् ।
संवत्सरेण पतति पतितेन सहाचरन् ॥
याजनाध्यापनाद्यौनाच्छयानपानाशनासनात् ।
यो येन पतितेनैव संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये ॥"
तेषामुदककार्य्यं यथा,—
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नाशौचं बान्धवैः सह ॥
निवर्त्तयेरंस्तस्मात्तु सम्भाषणसहासनम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
अत्याज्या पतिता यथा, मत्स्यपुराणे ।
"पतिता गुरवस्त्याज्या न तु माता कदाचन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥"
द्वादशवार्षिकव्रतनाश्यपापयुक्तः । तस्य और्द्ध्वदेहिकविधिर्यथा, "पूर्व्वोक्तघातप्रदादेः दाहाशौचादिनिषेधस्तदानीमेव । वत्सरान्ते तु सर्व्वमौर्द्ध्वदेहिकं कुर्य्यात् ॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्ध्वं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्ध्वदेहिकम् ॥"
इति हेमाद्रौ षट्त्रिंशन्मतात् ॥
एवं म्लेच्छीकृतानामपि । गयाश्राद्धमपि कार्य्यम् ।
"ब्रह्महा च कृतघ्नश्च गोघाती पञ्चपातकी ।
सर्व्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥"
इत्यग्निपुराणात् ॥ * ॥
एवं ब्राह्मेऽपि ।
"क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वात् गयाकूपे स्वबन्धुभिः ॥
भार्गवपादमूले वा श्राद्धं परिहरी चरन् ॥"
रुद्रपदे इत्यर्थः ॥ * ॥ तत्र वर्षमध्ये कृत्यमुक्तमपरार्के वायुपुराणे ।
"शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरम् ।
द्वादश्याहानि वा कुर्य्यात् शुक्ले च प्रथमेऽहनि ॥"
छागलेयः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥"
व्यासः ।
"नारायणं समुद्दिश्य शिवं वा यत् प्रदीयते ।
तस्य शुद्धिकरं कर्म्म तद्भवेन्नैतदन्यथा ॥"
स चात्मघातादिप्रायश्चित्तं कृत्वा कार्य्यः । तदुक्तं हेमाद्रौ षट्त्रिंशन्मते ।
"कृत्वा चान्द्रायणं पूर्व्वं क्रिया कार्य्या यथाविधि ।
नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ॥
पिण्डोदकक्रियाः पश्चात् वृषोत्सर्गादिकञ्च यत् ।
एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा ॥"
दिवोदासीये वृद्धशातातपस्त्वाह ।
"पतिते च मृते शुद्धेः प्राणायामास्तु षोडश ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥"
इदं प्रायश्चित्तार्हपित्रादिविषयम् ।
"इन्द्रियैरपरित्यक्ता ये च मूढा विमादिनः ।
घातयन्ति स्वमात्मानं पाषाणादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यथाश्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे ॥"
इति हेमाद्रौ तेनैवोक्तेः ॥ * ॥
तत्रैव बौधायनोऽपि । नारायणबलिं व्याख्यास्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि चीर्णे वा वारिमरणं यत्र यस्य तत्र तत्र कुर्व्वीतेति ॥ * ॥ हस्तपरिशिष्टे तु चण्डालादिव्यापन्नाः,—
"दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तन्तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयम् ॥"
इत्युक्तम् ॥ * ॥ मदनरत्ने ।
"ब्राह्मणहतानाञ्च द्वादशवर्षाणि चीर्णे वा कुर्व्वीतेति ॥" * ॥ मदनरत्ने ब्राह्मे ।
"प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः ।
चण्डालैर्ब्राह्मणैर्व्वा निहतो यत्र कुत्रचित् ॥
तस्य दाहादिकं कार्य्यं यस्मान्न पतितस्तु सः ।
चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान् पञ्चदश कृत्वा तु विधिना दहेत् ।
बुद्धिपूर्व्वमृतानान्तु त्रिंशत्कृच्छ्रं समाचरेत् ॥"
इत्युक्तम् । स्मृतिरत्नावल्यां तद्द्विगुणं प्रायश्चित्तं कृत्वा अर्व्वागप्यब्दात् सर्व्वं कार्य्यं इत्युक्तम् ।
"आत्मनो घातकस्यार्थे चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यात् दहनादि यथोदितम् ।
कृत्वा नारायणबलिमित्यादाङ्गिराः ॥" इति ॥
इदञ्चात्मवधनिमित्तं तज्ज्ञातिवधप्रायश्चित्तेन सहोचितं कार्य्यम् । अतएव बौधायनेनोक्तम् । द्वादशवर्षाणि चीर्णे देति । मदनपारिजाते स्मृत्यर्थसारे च ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणबलिः कार्य्य इत्युक्तम् । एवं म्लेच्छीकृतानामपि ॥ * ॥ यत्तु कश्चिदाह । पुत्रकृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः आत्मघाते तु वचनादस्तु । महापातके तु कथं स्यादिति । स स्वयमेव आत्मवधप्रायश्चित्तञ्च ज्ञातिवधनिमित्तेन सह्यश्च यदन् हृदयङ्गम एव । नहि ज्ञातिवधनिमित्तं पुत्रैः कार्य्यमिति वचनमस्ति पुत्रकर्त्तृकसर्व्वप्रायश्चित्तादिविषयापत्तेः । प्रागुक्तबौधायनवचनाच्चेति दिक् । इदं प्रायश्चित्तार्हाणामेव । प्रायश्चित्तानर्हाणान्तु पतितोदकमात्रं कार्य्यमिति केचित् । मदनपारिजातादिस्वरसोऽप्येवम् । वस्तुतस्तु तद्दानयोर्व्वचनेऽनुपादानात् अविशेषात् तत्रापि नारायणबलिर्याश्राद्धञ्चेति युक्तम् ॥ * ॥ पतितोदकविधिस्तु मित्राद्यतिरिक्तविषय इत्यपरे । स यथा, हेमाद्रौ ब्राह्मे ।
"पतितस्य तु कारुण्यात् यस्तृप्तिं कर्त्तुमिच्छति ।
स हि दासीं समाहूय सर्व्वां दत्तवेतनाम् ॥
अशुद्धघटहस्ताञ्च यथाशक्तं नवोढपि ।
हे दासि ! गच्छ मूल्येन तिलानानय सत्वरम् ॥
तोयपूर्णं घटञ्चेमं सतिलं दक्षिणामुखी ।
उपविष्टा तु वामेन चरणेन ततः क्षिप ॥
कीर्त्तयेः पातकिसंज्ञं त्वं पिबेति मुहुर्मुहुः ।
निशम्य तस्य वाक्यं सा कथमुल्या करोति तत् ॥
एवं कृते भवेत्तृप्तिः पतितानां न चान्यथा ॥"
इति ।
इदञ्च मृताहे कार्य्यम् । पतितस्य दासी मृताहे यदा घटमपवर्ज्जयेदेतावतायमुपचरितो भवतीति मदनरत्ने विष्णूक्तेः । इदञ्चात्मत्यागिविषयम् । आत्मत्यागिनः पतितास्तेषामशौचोदकभाजः स्युरित्युपक्रम्य विष्णुना एतस्याभिधानादिति गौड़ाः । उपलक्षणत्वात् सर्व्वेषामिति तु युक्तम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥

पतिवत्नी, स्त्री, (पतिर्विद्यते यस्याः । पति+मतुप् । "अन्तर्वत्पतिवतोर्नुक् ।" ४ । १ । ३२ । इति निपातनात् मत्वं नुगागमश्च । ततः । "ऋन्नेभ्यो ङीप् ।" ४ । १ । ५ । इति ङीप् ।) सभर्तृका । सधवा । इत्यमरः । २ । ६ । १२ ॥ (यथा, रघुः । १५ । ३५ ।
"इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विसूनवः ॥")

पतिव्रता, स्त्री, (पतिर्व्रतमिव धर्म्मार्थकामेषु कायवाङ्मनोभिः सदोपास्योऽस्याः ।) स्वाम्यनुरक्ता । तत्पर्य्यायः । सुचरित्रा २ सती ३ साध्वी ४ । इत्यमरः । २ । ६ । ६ ॥ एकपत्नी ५ । इति शब्दरत्नावली ॥ तस्या लक्षणं यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"
इति शुद्धितत्त्वम् ॥ * ॥
तस्या माहात्म्यं यथा,—
नारद उवाच ।
"कर्म्मणा केन राजेन्द्र ! तपसा वा तपोधन ! ।
उत्तमाञ्च गतिं याति तथ्यवाचः प्रभो मम ॥
एवमुक्तस्तु धर्म्मात्मा नारदेनाम्बरीषकः ।

यम उवाच ।
न तस्या नियमो विप्र ! समो नैव च सुव्रत ! ।
उपवासो न दानञ्च न दमो वा महामते ! ॥
यादृशी तु भवेद्विप्र ! शृणु तत्त्वं समासतः ।
प्रसुप्ते या प्रस्वपिति विबुद्धे जागर्ति स्वयम् ॥
भुक्ते तु भोजिते विप्र ! सा मृत्युञ्जयति ध्रुवम् ।
मौने मौना भवेद्या तु स्थिते तिष्ठति या स्वयम् ।
सा मृत्युञ्जयते विप्र ! नान्यत् पश्यामि किञ्चन ॥
एकदृष्टिरेकमना भर्त्तुर्व्वचनकारिणी ।
तस्या बिभीमहे सर्व्वे ये तथान्ये तपोधन ! ॥
देवानामपि सा साध्वी पूज्या परमशोभना ।
भर्त्ता वाभिहिता वापि प्रत्याख्यायिनी भवेत् ॥
वर्त्तमानापि विप्रेन्द्र ! प्रत्याख्यानापि सा यदा ।
तदैव तं संश्रयति पतिं नान्यं कदाचन ॥
भर्त्तुर्मृत्युमुखं ब्रह्मन् ! या पश्यति वराङ्गना ।
एवं याति भवेन्नित्यं भर्त्तुः प्रियहिते रता ॥
अनुविष्टेन भावेन भर्त्तारमनुगच्छति ।
सा तु मृत्युमुखद्वारं न गच्छेद्ब्रह्मसम्भव ! ॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
एवं शुश्रूषते या तु सा मां विजयते सदा ।
पतिव्रता तु या साध्वी तस्याश्चाहं कृताञ्जलिः ॥
भर्त्तारमनुध्यायन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती मृत्युद्वारं न पश्यति ॥
गीतवादित्रनृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येत मृत्युद्वारं न पश्यति ॥
स्नायन्ती तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यञ्च मनसा ध्यायेत् कदाचिदपि सुव्रता ॥
देवता चर्च्चयन्ती वा भोजयन्त्यथ वा द्विजान् ।
पतिं न त्यजते चित्तात् मृत्युद्वारं न पश्यति ॥
भानौ चानुदिते या तु उत्थाय च तपोधन ! ।
गृहं मार्ज्जयते नित्यं मृत्युद्वारं न पश्यति ॥
चक्षुर्देहः स्वभावश्च यस्या नित्यं सुसंवृतम् ।
शीलाचारसमायुक्ता सापि मृत्युं न पश्यति ॥
भर्त्तुर्मुखं प्रपश्यन्ती भर्त्तुश्चित्तानुसारिणी ।
वर्त्तते च हिते भर्त्तुर्मृत्युद्वारं न पश्यति ॥
एवं कीर्त्तिमती लोके दृश्यन्ते दिवि देवताः ।
मानुषाश्चाश्च भार्य्या वै तत्र देशे तु दृश्यते ॥
कथितैवं पुरा विप्र ! आदित्येन पतिव्रता ।
मया तस्माच्च विप्रर्षे ! यथावृत्तं यथाश्रुतम् ॥
शुद्धमेतत्ततो दृष्ट्वा पूजयामि पतिव्रताम् ॥”

इति वाराहे पतिव्रताचरित्रम् ॥ * ॥

पतिव्रताधर्म्मो यथा,—
“पतिव्रतानां यद्धर्म्मं तन्निबोध व्रजेश्वर ! ।
नित्यं भर्त्तुर्युतपुत्रकया तत्पादोदकमीप्सितम् ।
भक्तिभावेन सततं भोक्तव्यं तदनुज्ञया ॥
व्रतं तपस्या देवार्च्चा परित्यज्य प्रयत्नतः ।
कुर्य्याच्चरणसेवाञ्च स्वामिनं परितोषयन् ॥
तदाज्ञारहितं कर्म्म न कुर्य्यादैरतः सती ।
नारायणात् परं कान्तं ध्यायते सततं सती ॥
परपुंसां पुरश्चैव सुवेशं पुरुषं परम् ।
यात्रामहोत्सवं नित्यं नर्त्तकं गायनं व्रज ।
परक्रीडाञ्च सततं नहि पश्यति सुव्रता ॥
यद्भक्ष्यं स्वामिना नित्यं तदेवमपि योषिताम् ।
नहि त्यजेत् तत्सङ्गं क्षणमेव च सुव्रता ॥
उत्तरे नोत्तरं दद्यात् स्वामिनश्च पतिव्रता ।
न कोपं कुरुते शुद्धा ताडनाच्चापि कोपतः ॥
क्षुधितं भोजयेत् कान्तं दद्यात् पानञ्च तोयदे ।
न बोधयेत्तं निद्रालुं प्रेरयत्येव कर्म्मसु ॥
पुत्रात्याञ्च शतगुणं स्नेहं कुर्य्यात् पतिं सती ।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं कुलयोषितः ॥
शुभं दृष्ट्वा सुधातुल्यं कान्तं पश्यति सुन्दरी ।
सस्मितं वदनं कृत्वा भक्तिभावेन यत्नतः ॥
पुरुषाणां सहस्रञ्च सती स्त्री च समुद्धरेत् ।
पतिः पतिव्रतानाञ्च मुच्यते सर्व्वपातकात् ॥
नास्ति तेषां कर्म्मभोगः सतीनां व्रततेजसा ।
तया सार्द्धञ्च निष्कर्म्मी मोदते हरिमन्दिरे ॥
पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि ।
तेजश्च सर्व्वदेवानां मुनीनाञ्च सतीषु च ॥
तपस्विनां तपः सर्व्वं व्रतिनां यत् फलं व्रज ।
दाने फलं यद्दातॄणां तत् सर्व्वं तासु सन्ततम् ॥
स्वयं नारायणः शम्भुर्विधाता जगतामपि ।
सुराः सर्व्वे सुमुनयो भीतास्ताभ्यश्च सन्ततम् ॥
सतीनां पादरजसा सद्यः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥
त्रैलोक्यं भस्मसात् कर्त्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥
सतीनाञ्च पतिः साध्वीपुत्रो निःशङ्क एव च ।
नहि तस्य भयं किञ्चिद्देवेभ्यश्च यमादपि ॥
शतजन्मपुण्यवतां गृहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता तथा ॥
सती स्त्री प्रातरुत्थाय त्यक्त्वा च रात्रिवाससम् ।
भर्त्तारञ्च नमस्कृत्य करोति स्तवनं मुदा ॥
गृहकार्य्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुक्लपुष्पञ्च भक्तितः पूजयेत् पतिम् ॥
स्नापयित्वा सुपूतेन जलेन निर्म्मलेन च ।
तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥
आसने वासयित्वा च दत्त्वा भाले च चन्दनम् ।
सर्व्वाङ्गलेपनं कृत्वा दत्त्वा माल्यं गलेऽपि च ॥
सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ।
संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥
‘ओँ नमः कान्ताय शान्ताय सर्व्वदेवाश्रयाय
स्वाहा ।’
इत्यनेनैव मन्त्रेण दत्त्वा पुष्पञ्च चन्दनम् ।
पाद्यार्घ्यधूपदीपांश्च वस्त्रं नैवेद्यमुत्तमम् ॥
जलं सुवासितं शुद्धं ताम्बूलञ्च सुसंस्कृतम् ।
दत्त्वा स्तोत्रञ्च प्रपठेत् यत् कृतं माधवेन च ॥
ओँ नमः कान्ताय शान्ताय च शिवचन्द्रस्वरूपिणे ।
नमः शान्ताय दान्ताय सर्व्वदेवाश्रयाय च ॥
नमो ब्रह्मस्वरूपाय सतीप्राणपराय च ।
नमस्याय च पूज्याय हृदाधाराय ते नमः ॥
पञ्चप्राणाधिदेवाय चक्षुस्तारकाय च ।
ज्ञानाधाराय पत्नीनां परमानन्दरूपिणे ॥
पतिर्ब्रह्मा पतिर्विष्णुः पतिरेव महेश्वरः ।
पतिश्च निर्गुणाधारो ब्रह्मरूप ! नमोऽस्तु ते ॥
क्षमस्व भगवन् ! दोषं ज्ञानाज्ञानकृतञ्च यत् ।
पत्नीबन्धो ! दयासिन्धो ! दासीदोषं क्षमस्व च ॥
इदं स्तोत्रं महापुण्यं सृष्ट्यादौ पद्मया कृतम् ।
सरस्वत्या च धरया गङ्गया च पुरा व्रज ॥
सावित्र्या च कृतं पूर्व्वं ब्रह्मणे चापि नित्यशः ।
पार्व्वत्या च कृतं भक्त्या कैलासे शङ्कराय च ॥
मुनीनाञ्च सुराणाञ्च पत्नीभिश्च कृतं पुरा ।
पतिव्रतानां सर्व्वासां स्तोत्रमेतत् शुभावहम् ॥
इदं स्तोत्रं महापुण्यं या शृणोति पतिव्रता ।
नरोऽन्यो वापि नारी वा लभते सर्व्ववाञ्छितम् ॥
अपुत्त्रो लभते पुत्त्रं निर्धनो लभते धनम् ।
रोगी च मुच्यते रोगात् बद्धो मुच्येत बन्धनात् ॥
पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ।
फलञ्च सर्व्वतपसां व्रतानाञ्च व्रजेश्वर ! ॥
इदं स्तुत्वा नमस्कृत्य भुङ्क्ते सा तदनुज्ञया ।
उक्तः पतिव्रताधर्म्मो गृहिणां श्रूयतां व्रज ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥ * ॥

पतिव्रतानामानि यथा,—
सूर्य्यस्य सुवर्चला १ शक्रस्य शची २ वशिष्ठस्य अरुन्धती ३ चन्द्रस्य रोहिणी ४ अगस्त्यस्य लोपामुद्रा ५ च्यवनस्य सुकन्या ६ सत्यवतः सावित्री ७ कपिलस्य श्रीमती ८ सौदासस्य मदयन्ती ९ सगरस्य केशिनी १० नलस्य दमयन्ती ११ रामस्य सीता १२ शिवस्य सती १३ नारायणस्य लक्ष्मीः १४ ब्रह्मणः सावित्री १५ रावणस्य मन्दोदरी १६ । इति पुराणान्तरम् ॥ (गायत्रीस्वरूपा भगवती। यथा, देवीभागवते । १२ । ६ । ६६ ।
“पतिव्रता पवित्राङ्गी पथ्याहारपरायणा ।
प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥”)

पतेरः, पुं स्त्री, (पतति गच्छतीति । पत्लृ गतौ + “पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ।” उणां १।५९। इति कर्त्तरि एरक् ।) पक्षी । गन्तरि त्रि । इत्युणादिकोषः ॥

पतेरः, पुं, (पतन्त्यस्मिन्निति । “पति कठीति ।” उणां १।५९। इति अधिकरणे एरक् ।) आढकः । गर्त्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पतङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । पृषोदरात्-साधु ।) रक्तचन्दनम् । इति शब्दरत्नावली ॥ वृक्षविशेषः । बकम् इति भाषा । तत्पर्य्यायः । पत्राङ्गम् २ रक्तकाष्ठम् ३ सुरङ्गदम् ४ पत्रा-ढ्यम् ५ पट्टरञ्जनम् ६ भार्य्यावृक्षः ७ रक्तकः ८ लोहितम् ९ रङ्गकाष्ठम् १० रागकाष्ठम् ११ कुचन्दनम् १२ पट्टरञ्जनकम् १३ सुरङ्गम् १४ । अस्य गुणाः । कटुत्वम् । रूक्षत्वम् । अम्लत्वम् । शीतत्वम् । गौल्यत्वम् । वातपित्तज्वरविस्फोटोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च भावप्रकाशे ।
“पतङ्गन्तु रक्तसारं सुरङ्गं रञ्जनं तथा ।
पटरञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम् ॥
पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् ।
हरिचन्दनवद्वेद्यं विशेषाद्दाहनाशनम् ॥”

समाप्यनोसंख्या: साष्टाङ्गप्रणामसहस्रमसंख्यो नमो नारायणायेति मन्त्रेणाकलितमस्तु ॥ ॥

अथ भृत्यप्रशस्ति: ।

स्वस्तिभगवच्चरणपरायणसकलविद्याधिरचकश्रीमद्विद्यादिपतिपालकनिखिलवंशगुणसेवकवर्ग्यवरांशकभृत्ये प्रति ॥ ॥

अथारिप्रशस्ति: ।

स्वस्तिसमराङ्गनप्रतिभटयश:परिपूरितमकलसामन्तराजधानीविजृम्भितवीरशब्दावघोषितनिजवंशगुरुचकसततपरिचक्षारणागतासुकं प्रति ॥ ५ ॥

अथ विवेकिनां प्रशस्ति: ।

स्वस्तिश्रीभगवत्पदपङ्कजपूजनोपचितपुण्यपुञ्जपवित्रीकृतान्त:करणदिग्विलासिनीविसरद्विमलमिलन्मालतीमालाकलापशोभुगन्धिनिरवधिवसुविश्राणनाधरीकृतसुरपुरभूमीरुहेषु ।

स्वस्तिश्रीमत्परमेश्वरपादमाधोक्षजाम्बादनुरञ्जितानेकभूवृन्दारकवृन्दावगर्जितामितयश:पटीरपङ्कपटलालङ्कृतदिगङ्गनागणजनतटप्रबलप्रतापौर्वीचिखीलतदर्थिसार्थगव्यांकूपारपारेषु ।” इति वररुचिकृतपत्रकौमुदी ॥

पत्रकं, क्ली, (पत्रमेव । पत्र+स्वार्थे कन् ।) वृक्षस्य पत्रम् । पत्रावली । इति शब्दरत्नावली । तेजपत्रम् । अस्य गुणः । कफवायुमूर्च्छानासार्तिघनाशित्वम् । इति राजवल्लभः । शालिञ्चशाके पुं । इति रत्नमाला ॥

पत्रकाहला, स्त्री, (पत्रकार्या आहला शब्दः ।) भिल्लोसा । पत्रशब्दः । इति हारावली ॥

पत्रकृच्छ्रः, पुं, (पत्रैः पत्रक्वाथैः साध्यः कृच्छ्रो व्रतविशेषः ।) पर्णकृच्छ्रव्रतम् । यथा,—

“पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः ॥”

इति याज्ञवल्क्यः ॥

“पलाशोदुम्बरारविन्द-श्रीवृक्ष-पर्णानामेकैकेन क्वथितमुदकं प्रत्यहं पिबेत् कुशोदकञ्च एकस्मिन्नहनीति पञ्चाहसाध्यः पर्णकृच्छ्रः ।” इति मिताक्षरा ॥

पत्रगुप्तः, पुं, (पत्राणि गुप्तानि यस्य ।) त्रिकण्टः । इति शब्दचन्द्रिका । तेकाँटा सिज् इति भाषा ॥

पत्रघना, स्त्री, (पत्रमेव घनं यस्याः । पत्रबाहुल्यात्तथात्वम् ।) सातलावृक्षः । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, (पत्रमङ्ग्यतेऽनेन । अङ्ग+करणे घञ् । यद्वा पत्रवत् अङ्गं यस्य । शकन्ध्वादित्वात् साधु ।) पत्राङ्गम् । रक्तचन्दनम् । इति शब्दरत्नावली ।

पत्रझङ्कारः, पु, (पत्रेषु झङ्कारवत् शब्दो यस्य ।) पुरोटिः । इति त्रिकाण्डशेषः । रायभाटी इति भाषा ॥

पत्रणा, स्त्री, (अत प्राप्ते + अप् अथः । सतां प्रतिमसमनाय । पत्रैः अथो जीवनमिव यत्र ।) शरपत्ररचना । यथाह हारावली ।

“शराणां पत्ररचना पत्रणा परिकीर्तिता ॥”

पत्रतण्डुली, स्त्री, (पत्रेषु तण्डुलवत् विद्यतेऽस्याः । अर्श-आदित्वादच् । गौरादित्वात् ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः ॥

पत्रतरुः, पुं, (पत्रप्रधानस्तरुः । शाकपार्थिववत् समासः ।) दुर्गन्धखदिरः । इति राजनिर्घण्टः ॥

पत्रदारकः, पुं, (पत्रवत् दारयति वृक्षाणि इति । दृ + णिच् + ण्वुल् ।) क्रकचः । इति त्रिकाण्डशेषः । करात् इति भाषा ॥

पत्रनाड़िका, स्त्री, (पत्रस्य नाड़िका ।) पत्रशिरा । इति जटाधरः ॥

पत्रपरशुः, पुं, (पत्रे धातुनिर्मितपत्राकारे परशुरिव । तच्छेदकत्वात्तथात्वम् ।) स्वर्णकारादीनां स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । व्रश्चनः २ । इत्यमरः । २।१०।३३॥ पत्रपर्शुः ३ । इति शब्दरत्नावली ॥

पत्रपा, स्त्री, (अपत्रपणमिति । अप + त्रप् + अच् । निपातनात् अकारलोपः ।) अपत्रपा । लज्जा । इति शब्दरत्नावली ॥

पत्रपालः, पुं, (पत्रवत् पाल्यते प्राप्यतेऽसौ । पत्र+ पल गतौ + घञ् ।) व्यायता छुरिका । इति हेमचन्द्रः । ३ । ४४८ ॥

पत्रपाली, स्त्री, (पत्रवत् पालिरग्रभागो यस्याः । ङीप् ।) कर्त्तनी । इति हलायुधः ॥ काँची इति भाषा ।

पत्रपाश्या, स्त्री, (पाशानां समूहः पाश्या । पत्रमिव पाश्या ।) स्वर्णादिरचितललाटाभरणम् । इत्यमरः । २।६।१०३ ॥ टीका इति भाषा ॥

पत्रपिशाचिका, स्त्री, (पत्रैः पत्रेण वा पिशाचीव । स्वार्थे कन् ।) जलत्रा । टोका इति भाषा । तत्पर्य्यायः । खर्परः २ वारित्रा ३ शुद्धखीलम् ४ । इति त्रिकाण्डशेषः ॥ मस्तके पलाशपत्रबन्धनम् । यदुक्तं

“शम्: पलाशपत्राणां शीर्षे पत्रपिशाचिका ॥”

इति हारावली ॥

पत्रपुष्पः, पुं, (पत्रं पुष्पमिव यस्य ।) रक्ततुलसी । इति शब्दचन्द्रिका ॥

पत्रपुष्पकः, पुं, (पत्रपुष्प इव कायति प्रकाशते इति । कै + कः ।) भूर्ज्जपत्रम् । इति शब्दमाला ॥

पत्रपुष्पा, स्त्री, (पत्रपुष्प + स्त्रियां टाप् ।) तुलसी । इति शब्दमाला ॥ क्षुद्रपत्रतुलसी । इति रत्नमाला ॥

पत्रबन्धः, पुं, (पत्राणां बन्धो बन्धनं यस्मिन् । पुष्परचनाकाले हि पत्राणां बन्धनं स्यादतस्तथात्वम् ।) पुष्परचना । यथा, शब्दरत्नावल्याम् ।

“रचना च परिस्पन्दः पत्रबन्ध इति त्रयम् ।
पत्रभङ्गप्रसूनादिरचनायां निगद्यते ॥”

पत्रबालः, पुं, (पत्रवत् वलति धीयतेऽस्मिन् । वल संवृतौ + अधिकरणे घञ् । अग्रभागे पत्राकृतित्वात्तथात्वम् ।) तुलाघटः । इति त्रिकाण्डशेषः । दाँड़ इति भाषा ॥

पत्रभङ्गः, पुं, (पत्राणां लिखितपत्राकृतीनां भङ्गो विचित्रता यत्र ।) स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । तत्पर्य्यायः । पत्रलेखा २ पत्रवल्ली ३ पत्रलता ४ पत्राङ्गुली ५ । इति हेमचन्द्रः ॥ पत्राङ्गुलिः ६ पत्रभङ्गी ७ पत्रकम् ८ पत्रभङ्गिः ९ पत्रावली १० । इति शब्दरत्नावली ।

पत्रभङ्गी, स्त्री, (पत्रभङ्ग + गौरादित्वात् ङीष् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥

पत्रयौवनं, क्ली, (पत्राणां यौवनं यत्र ।) पल्लवम् । नूतनपत्रम् । यथा, जटाधरः ।

“नवोद्गते किशलयं किशलं पत्रयौवनम् ॥”

पत्ररथः, पुं, स्त्री, (पत्रं पक्षौ रथो यानमिव यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, भागवते । ३ । ६ । १३ ।

“चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियम् ।
नलवेणुशरस्तम्भकुशकीचकगह्वरम् ॥”)

पत्रलं, क्ली, दध्यग्रम् । घनदधि । इति हेमचन्द्रः ॥

पत्रलेखा, स्त्री, (पत्राणां कस्तूरिकादिरचितपत्राकृतीनां लेखा रचना ।) पत्रभङ्गः । इत्यमरः ॥ २ । ६ । १२२ ॥ (यथा, रघुः ६ । ७२ ।

“महेन्द्रमास्थाय महोक्षरूपं
यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥”)

पत्रवल्ली, स्त्री, (पत्राणां रचितपत्राकृतीनां वल्ली लतेव ।) पत्रभङ्गः । इति हेमचन्द्रः ।३।३१८। (यथा, माघे । ८ । ५९ ।

“गण्डेषु स्फुटरचिताङ्कपत्रवल्ली
मर्य्यादां पयसि विभूषणं वधूनाम् ॥”)

रुदन्ती । पलाशी लता । इति राजनिर्घण्टः । पर्णलता च ॥

पत्रवाहः, पुं, (पत्रेण पक्षच्छदेन उह्यते इति । वह + घञ् ।) बाणः । इति जटाधरः । (पत्र लिपिं वहतीति । वह + अण् ।) लिपिवाहके त्रि ।

पत्रशाकः, पुं, (पत्रप्रधानः शाकः । शाकपार्थिववत् समासः ।) षड्विधशाकान्तर्गतपत्रात्मकशाकः । यथाह राजवल्लभः ।

“पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥”

पत्रशिरा, स्त्री, (पत्रस्य शिरेव ।) पत्रभङ्गः । तत्पर्य्यायः । नाड़िः २ । इति हारावली ॥ पत्रनाड़ी च ॥

पत्रश्रेणी, स्त्री, (पत्राणां श्रेणीव ।) मूषिकपर्णी । इति राजनिर्घण्टः ॥ पर्णपंक्तिश्च ॥

पत्रश्रेष्ठः, पुं, (पत्रं श्रेष्ठं यस्य ।) बिल्वः । इति राजनिर्घण्टः ॥

पत्रसूचिः, पुं, (पत्राणां सूचिरिव ।) कण्टकम् । इति त्रिकाण्डशेषः ॥

पत्रहिमं, क्ली, (पत्रेषु हिमं यस्मिन् दिने ।) हिमदुर्दिनम् । इति त्रिकाण्डशेषः ॥

पत्राख्यं, क्ली, (पत्रमेव आख्या यस्य ।) तेजपत्रम् । इति शब्दचन्द्रिका ॥ तालीशपत्रम् । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । यद्वा पत्रेषु अङ्गतीति । अगि गतौ + अच् ।) रक्तचन्दनम् । रक्तचन्दनसदृशकाष्ठविशेषः । बकम् इति भाषा । इत्यमरः । २ । ६ । १३२ ॥ भूर्ज्जम् । पद्मकम् । इति मेदिनी ॥

पत्राङ्गुलिः, स्त्री, (पत्रं अङ्गुलिरिव यत्र । यद्वा अङ्गुलिभिर्लिखितं रचितं पत्रं पत्राङ्गुलिरत्र इति परनिपातत्वात्तथात्वम् ।) पत्रभङ्गः । स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । इत्यमरः । २ । ६ । १२२ ॥

पत्राञ्जनं, क्ली, (पत्रं लेखनपत्रमञ्ज्यतेऽनेन । पत्र + अञ्ज + करणे ल्युट् ।) मसी । इति शब्दरत्नावली ॥

पत्राढ्यं, क्ली, (पत्रैराढ्यम् ।) पिप्पलीमूलम् । पर्व्वततृणम् । इति राजनिर्घण्टः ॥

पत्राप्यं, क्ली, पत्राङ्गम् । इति राजनिर्घण्टः ॥

पत्रालुः, पुं, (पत्र + अस्त्यर्थे आलुः ।) कासालुः । इक्षुदर्भा । इति राजनिर्घण्टः ॥

पत्रावलिः, स्त्री, (पत्राणां पत्राकृतीनां आवलिः पङ्क्तिरिव रचना यस्याः ।) गैरिकम् । इति शब्दचन्द्रिका ॥ (पत्राणां आवलिः श्रेणी राजिर्वा ।) पत्रश्रेणी च ॥

पत्रावली, स्त्री, (पत्रावलि + वा ङीप् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥ नवदूर्गासम्प्रदानकमधुमिश्रितयवचूर्णयुक्तनवाश्वत्थपत्राणि । यथा,—

"अमायां निशि संघे तु पत्रे चाश्वत्थसंज्ञके ।
क्रमात् पत्रावली देयं मधुना यवचूर्णकम् ॥"
इति कैवल्यतन्त्रम् ।

देवादिसन्निधौ सन्दिग्धवस्तुनोरेकतरावधारणार्थकमाक्षयबालकोत्तोलिततत्तन्दैककोटिलिखितपत्रसमूहश्च ॥

पत्रिका, स्त्री, (पत्री एव । स्वार्थे कन् ततो ह्रस्वः ।) पत्री । लिपिः । यथा, ज्योतिषे ।

"आदित्यादिग्रहाः सर्व्वे नक्षत्राणि च राशयः ।
दीर्घमायुः प्रकुर्व्वन्तु यस्येयं जन्मपत्रिका ॥"

(प्रशस्तपत्रं विद्यते यस्याः । पत्र + विद्यमानार्थे ठन् ।) कदल्यादिनवपत्रिका । यथा, दुर्गोत्सवपद्धतौ ।

"कदली दाडिमी धान्यं हरिद्रा मानकं कचु ।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

पत्रिकाख्यः, पुं, (पत्रिका आख्या यस्य ।) कर्पूरभेदः । इति राजनिर्घण्टः ॥ पत्रिकानामके त्रि ॥

पत्रिणी, स्त्री, (पत्राणि सन्त्यस्याः । पत्र + इनिः । स्त्रियां ङीप् ।) पल्लवः । इति शब्दचन्द्रिका ॥

पत्री, [न्] पुं, (पत्रं पक्षो विद्यतेऽस्य । पत्र + इनिः ।) बाणः । (यथा, रघुः । ११ । ८४ ।

"धुंस किं गतिमनेन पत्रिणा
हन्ति लोकमुत ते मखाश्रितम् ॥")

पक्षी । इत्यमरः । ३ । ३ । १०५ ॥ (यथा, रघुः ११ । २९ ।

"तं शरप्रशकलीकृतं ततो
पत्रिणां अभजदाश्रमादृषिः ॥")

श्येनः । (यथा, नैषधे । १९ । १२ ।

"नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्रिणामिह विहरणैः श्येनम्पातां रवेरवधारयन् ॥"

"पत्रिणां श्येनाख्यपक्षिरूपाणाम् ।" इति तट्टीकायां नारायणः ॥ पत्राणि छदानि सन्त्यस्य । अत इनिः ।) वृक्षः । रथी । पर्व्वतः । इति मेदिनी ॥ तालः । श्वेतकिण्हिही । गङ्गापत्री । पाची । इति राजनिर्घण्टः ॥ पत्रविशिष्टे, त्रि ॥

पत्री, स्त्री, (पत्र + स्त्रियां ङीप् ।) लिपिः । पत्रम् । यथा, जातके ।

"श्रीमत्पङ्कजिनीपतिः कुमुदिनीप्राणेश्वरो भूभवः
शाशाङ्किः सुरराजवन्दितपदो दैत्येन्द्रमन्त्री शनिः ।
स्वर्भानुः शिखिनां गणो गणपतिर्ब्रह्मेशलक्ष्मीधरास्त्वां रक्षन्तु सदैव यस्य विमला पत्री मया लिख्यते ॥"

पत्रोपस्करः, पुं, (पत्रमेव उपस्कर उपकरणं यस्य ।) कासमर्द्दः । इति हारावली ॥

पत्रोर्णं, क्ली, (पत्रजा ऊर्णा साधनत्वेनास्त्यस्य । "अर्श आदिभ्योऽच् ।" ५।२।१२७। इति अच् ।) वटलकुचादिपत्रेषु क्रिमिभिरूर्णायाः कृतत्वात् पत्रसम्बन्धिनी ऊर्णा अस्येति । इति भरतः ॥ धौतकौषेयम् । इत्यमरः । २ । ६ । ११३ ॥ (यथा, महाभारते । १३ । १११ । १०३ ।

"पत्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति ॥")

पत्रोर्णः, पुं, (पत्रेषु ऊर्णा यस्य ।) शोणाकवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

पत्सलं, क्ली, (पतति गच्छति अस्मिन् । पत्लृ गतौ + "पतेरस्र लः ।" उणां । ३ । ७४ । इति अस्र लश्च ।) पन्थाः । इत्युणादिवृत्तिः ॥

पथ, इ क गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, पन्थयति । इति दुर्गादासः ॥

पथ, ए ज गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ज्वलादिः ।) ए, अपथीत् । ज, पाथः पथः । इति दुर्गादासः ॥

पथः, पुं, (पथति गच्छति अत्र । पथ गतौ + घञर्थे अधिकरणे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

पथन्, [न्] पुं, पथः । इत्यमरटीका ॥ (पथति गच्छति । पथ गतौ + अच् ।) गमनकर्त्ता च ॥

पथिकः, त्रि, पन्थानं गच्छति यः । (पथिन् + "पथः ष्कन् ।" ५ । १ । ७५ । इति ष्कन् षो ङीषर्थः ।) पथगन्ता । (यथा, गोः रामायणे । १ । ५ । १० ।

"नानापथिकदूतैश्च वणिग्भिश्चोपशोभिताम् ।
देवतायतनैश्चैव विमानैरिव शोभिताम् ॥")

तत्पर्य्यायः । अध्वनीनः २ अध्वगः ३ अध्वन्यः ४ पान्थः ५ । इत्यमरः । २ । ८ । १७ ॥ गन्तुः ६ यातुः ७ पथकः ८ याचिकः ९ यात्रकः १० । इति शब्दरत्नावली ॥ पथिकः ११ । इत्युणादिकोषः ॥

पथिकसन्ततिः, स्त्री, (पथिकानां सन्ततिः समूहः ।) पथिकसङ्घः । तत्पर्य्यायः । हारिः २ । इति त्रिकाण्डशेषः ॥ पथिकसंहतिः ३ । इति हारावली ॥

पथिका, स्त्री, (पथिक + टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

पथिद्रुमः, पुं, (पथि प्रशस्तगुणो द्रुमः । बहुगुणवत्त्वात्तथात्वम् ।) खदिरवृक्षः । इति जटाधरः ॥ श्वेतखदिरः । इति राजनिर्घण्टः ॥

पथिलः, त्रि, (पथति गच्छतीति । पथ गतौ + "मिथिलादयश्च ।" उणां । १ । ५८ । इति निपातनात् साधुः ।) पथिकः । इत्युणादिकोषः ॥

पथिवाहकः, त्रि, (पन्थानं वाहयतीति । वह + णिच् + ण्वुल् ।) शाकुनिकः । निष्ठुरः । इति शब्दमाला ॥ भारवाहकश्च ॥

पथ्यं, त्रि, (पथिन् + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) चिकित्सादौ हितकारकम् । तत्पर्य्यायः । करणम् २ हितम् ३ । इति शब्दचन्द्रिका ॥ आत्मीयम् ४ आयुष्यम् ५ । सैन्धवे क्ली । इति राजनिर्घण्टः ॥

पथ्यः, पुं, (पथि साधुः । दिगादित्वात् यत् इनो लोपः ।) हरीतकीवृक्षः । यथा,—

शिवायां अगतिक्तः स्यात् पथ्यः सुन्दरमाढकी ।"
इति शब्दमाला ॥

पथ्यशाकः, पुं, (पथ्यं हितकरं शाकं यस्य ।) तण्डुलीयशाकः । इति राजनिर्घण्टः ॥

पथ्या, स्त्री, (पथ्य + टाप् ।) हरीतकी । (यथा, हठयोगदीपिकायाम् । ३ । ३५ ।

"ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥")

महोर्व्वारुः । चिर्भिटा । वन्ध्या कर्कोटकी । इति राजनिर्घण्टः ॥ (संसाररोगस्य पथ्यस्वरूपत्वात् गङ्गापि पथ्यस्वरूपा । यथा, काशीखण्डे २९ । ११९ ।

"पद्मनाभपदार्घ्येश्च प्रसृता पद्ममालिनी ।
परर्द्धिदा पुष्टिकरी पथ्या पूर्त्तिः प्रभावती ॥")

पथ्यादिगुग्गुलुः, पुं, (पथ्या आदिर्यस्य तथाविधो गुग्गुलुः ।) औषधविशेषः । यथा,—

"पथ्या विभीतामलकीफलानां
शतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तश्च पलङ्कषायाः
द्रोणे जले संस्थितमेकरात्रम् ॥
अर्द्धावशेषं क्वथितं कषायं
भाण्डे पचेत्तत् पुनरेव लौहे ।
अग्निं विदित्वात्म्यं दद्यात्
दद्यात्रिसंचूर्ण्य पलार्द्धकानि ॥
त्रिकटुत्रिफलाग्रन्थि-
कन्यानिदन्तागरशोषणानि ।
यथेष्टचेष्टस्य नरस्य प्रीतं
हिमाम्बुपानानि च भोजनानि ॥
नियच्छति निहन्ति रोगान्
कण्डूश्च गुल्मसहलाश्च ।
शोथानसृग्दद्रुमरोगान्
पाण्डुत्वकुष्ठानि वातरक्तम् ॥

पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विशेषः ।
पलस्य सन्धानकरो विशेषा-
द्रोगेषु शस्तः सकलेषु तज्ज्ञैः ॥"
इति भावप्रकाशः ॥

पथ्यापथ्यं, क्ली, (पथ्यं रोगिणां हितकरं अपथ्यं अशुभकरं द्वयोः समाहारः ।) रोगिणां हिताहितकारकद्रव्याणि ।

तत्र तरुणज्वरे पथ्यं यथा ।

वमनम् । लङ्घनम् । कालोष्णाम्बु: । यवागुः । स्वेदनम् । कटुतिक्तरसौ । एतानि पाचनानि ॥*॥

नवज्वरे अपथ्यं यथा ।

स्नानम् । विरेकः । सुरतम् । कषायः । व्यायामः । अभ्यञ्जनम् । दिवानिद्रा । दुग्धम् । घृतम् । वैदलम् । आमिषम् । तक्रम् । सुरा । स्वादुगुरुद्रवद्रव्याणि । अन्नम् । प्रवातः । भ्रमणम् । कोपः ॥*॥

मध्यज्वरे पथ्यं यथा ।

पुरातनषष्टिकः । पुरातनशालिः । वार्त्ताकुः । शोभाञ्जनम् । कारवेल्लः । वेत्राग्रम् । आषाढ़फलम् । पटोलम् । कर्कोटकम् । मूलकपोतिका । मुद्गमसूरचणककुलत्थमुकुष्ठकानां यूषः । पाठा । अमृता । वास्तूकम् । तण्डुलीयः । जीवन्ती । काकमाची । सूपकानि द्राक्षाकपित्थदाड़िमविकङ्कतफलानि । लघूनि खाद्यानि च भेषजानि ॥*॥

अथ पुराणज्वरे पथ्यम् ।

विरेचनम् । छर्द्दनम् । अञ्जनम् । नस्यम् । धूमः । अनुवासनम् । सिराव्यधः । संशमनम् । प्रदेहः । अभ्यङ्गः । अवगाहः । शिशिरोपचारः । एणः । कुलिङ्गः । हरिणः । मयूरः । लावः । शशः । तित्तिरिः । कुक्कुटः । क्रौञ्चः । कुरङ्गः । पृषतः । चकोरः । कपिञ्जलः । वर्त्तकः । कालपुच्छः । गोक्षीरम् । अजाक्षीरम् । गोघृतम् । अजाघृतम् । हरीतकी । पर्व्वतनिर्झराम्भः । एरण्डतैलम् । सितचन्दनम् । ज्योत्स्ना । प्रियालिङ्गनम् ॥*॥

व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणं तथा ।
ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत् ॥*॥

अथातिसाररोगे पथ्यम् ।

वमनम् । लङ्घनम् । निद्रा । पुराणाः शालिषष्टिकाः । विलेपी । लाजमण्डः । मसूरतुवरीशशैणलावहरिणकपिञ्जलभवयूषः । सर्व्वे क्षुद्रमत्स्याः । शफरी । खड्गीशः । मधुरालिका । तैलम् । छागघृतक्षीरे । गोदधितक्रे । गवाजयोर्दधिजं पयोजं वा नवनीतम् । नवरम्भापुष्पम् । नवरम्भाफलम् । क्षौमम् । जम्बुफलम् । भव्यम् । मधार्द्रकम् । निम्बम् । शालुकम् । विकङ्कतम् । कपित्थम् । बकुलम् । बिल्वम् । तिन्दुकम् । दाड़िमद्वयम् । तिलकम् । कच्चटदलम् । चाङ्गेरी । विजया । अरणा । जातीफलम् । अहिफेनम् । जीरकः । गिरिमल्लिका । कुस्तुम्बुरु । महानिम्बम् । सकलकषायरसः । दीपनानि लघून्यन्नपानानि । नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंशास्थिमूले प्रक्षेण अर्द्धचन्द्रवद्दाहः ॥*॥

अतीसारे अपथ्यं यथा ।

स्वेदः । अञ्जनम् । रुधिरमोक्षणम् । अम्बुपानम् । स्नानम् । व्यवायः । जागरणम् । धूमः । नस्यम् । अभ्यञ्जनम् । सकलवेगधारणम् । रूक्षाणि । असात्म्यभक्षणम् । विरुद्धाशनम् । गोधूमः । माषः । यवः । वास्तूकम् । काकमाची । निष्पावः । कन्दः । मधुशिग्रुः । रसालम् । पूगम् । कुष्माण्डम् । तुम्बी । बदरम् । गुर्व्वन्नम् । गुरुपानम् । ताम्बूलम् । इक्षुः । गुड़ः । मद्यम् । उपोदिका । द्राक्षा । अम्लवेतसफलम् । लशुनम् । धात्री । दुष्टाम्बु । मस्तु । गन्धवारि । नारिकेलम् । स्नेहनम् । स्त्रीमदः । अखिलपत्रशाकम् । क्षारः । सर्व्वाणि सराणि । पुनर्नवा । इर्व्वारुकम् । लवणम् । अम्लम् ॥*॥

अथ ग्रहणीरोगे पथ्यम् ।

निद्रा । छर्द्दनम् । लङ्घनम् । पुरातनशालयः । पुरातनषष्टिकाः । लाजमण्डः । मसूरतुवरीमुद्गभवयूषः । निःशेषोद्धृतसारगव्यदधि । गव्यं छाग्यं वा पयोजं नवनीतम् । छागघृतपयोदधीनि । तिलतैलम् । सुरा । माक्षिकम् । शालूकम् । बकुलम् । दाड़िमयुगम् । नव्यं भव्यम् । रम्भापुष्पम् । रम्भाफलम् । तरुणबिल्वम् । शृङ्गाटकम् । चाङ्गेरी । विजया । कपित्थम् । कुटजम् । अजाजी । कसेरुः । तक्रम् । कच्चटपल्लवम् । तिलकम् । जातीफलम् । जाम्बवम् । धन्याकम् । तिन्दुकम् । महानिम्बम् । अरणा । अहिफेनम् । क्रथाः । लावशशैणतित्तिरिमांसयूषः । सर्व्वे क्षुद्रमत्स्याः । खड्गीशः । मधुरालिकामत्स्यः । खलिशः । सर्व्वकषायरसः । नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंशास्थिमूले प्रज्वलितायसार्द्धचन्द्रवद्दाहः ॥*॥

ग्रहण्यामपथ्यं यथा ।

रक्तस्रुतिः । जागरः । अम्बुपानम् । स्नानम् । स्त्री । वेगविधारणम् । नस्यम् । अञ्जनम् । स्वेदनम् । धूमपानम् । श्रमः । विरुद्धाशनम् । आतपः । गोधूमः । निष्पावः । कलायः । माषः । यवः । आर्द्रकम् । छत्रकम् । राजमाषः । उपोदिका । वास्तूकः । काकमाची । कुष्माण्डः । तुम्बी । मधुशिग्रुः । कन्दः । ताम्बूलम् । इक्षुः । बदरम् । रसालम् । इर्व्वारुकम् । पूगफलम् । रसोनम् । धान्याम्लम् । सौवीरम् । तुषोदकम् । दुग्धम् । गुड़ः । मस्तु । नारिकेलम् । पुनर्नवा । वार्द्धनम् । वैणवम् । सर्व्वाणि पत्रशाकानि । दुष्टाम्बु । गोक्षुरम् । [illegible] । क्षारम् । [illegible] । द्राक्षा । अन्नम् । लवणरसः । गुर्व्वन्नम् । गुरुपानम् । सर्व्वे पूपाः ॥*॥

अथार्शसि पथ्यम् ।

विरेचनम् । लेपनम् । असृमोक्षः । क्षारः । अग्निकर्म । शस्त्रकर्म । पुरातनलोहितशालयः । पुरातनषष्टिकाः । यवाः । कुलत्थाः । गोधाशशजोष्ट्रकूर्म्माविकलिङ्गाखरोलुकीशरतुकामशृगालकाकानां मांसानि । स्वल्पमांसाः प्रसहाः । पटोलम् । पत्तूरः । रसोनकम् । वह्निः । पुनर्नवा । शूरणः । वास्तूकम् । जीवन्तिका । दन्तशठः । सुरा । त्रुटिः । वयःस्था । नवनीतम् । तक्रम् । कक्कोलम् । धात्री । वचकम् । कपित्थम् । उष्ट्रमूत्राजापयांसि । भल्लातकम् । सर्षपतैलम् । गोमूत्रम् । सौवीरम् । तुषोदकम् । वातानुलोमनपानम् । अग्निवर्द्धकान्नपानम् ॥*॥

अर्शसि अपथ्यं यथा ।

आनूपमामिषम् । मत्स्यः । पिण्याकः । दधि । पिष्टकम् । माषः । करीरम् । निष्पावः । बिल्वम् । तुम्बी । उपोदिका । पक्वान्नम् । सर्व्वशालूकम् । विष्टम्भीनि । गुरूणि । आतपः । जलपानम् । वमनम् । वस्तिकर्म । नदीनां सलिलम् । विरुद्धानि सर्व्वाणि । पूर्व्वदिग्भववायुः । वेगरोधः । स्त्रियः । पृष्ठयानम् । उत्कटकासनम् । यथास्वं दोषलं द्रव्यम् । रक्तपित्तिनां यद्यत् पथ्यापथ्यं तत्तदपि रक्तार्शोरोगिणां विशेषतो विद्यात् ॥*॥

अथाग्निमान्द्याजीर्णादौ पथ्यम् ।

श्लैष्मिके पूर्व्वं वमनम् । पैत्तिके विरेचनम् । वातिके स्वेदनम् । यथावस्थं हितवस्तूनि । नानाप्रकारव्यायामः । दीपनानि । लघूनि । बहुकालसमुत्पन्ना मुद्गलोहितशालयः । विलेपी । लाजमण्डः । मुद्गभवमण्डः । सुरा । एणः । शफरी । शशः । लावः । सर्व्वक्षुद्रमत्स्याः । शालिञ्चशाकम् । वेत्राग्रम् । वास्तूकम् । बालमूलम् । लशुनम् । वृद्धकुष्माण्डम् । नवीनकदलीफलम् । शोभाञ्जनम् । पटोलम् । वार्त्ताकुः । जलदाम्बु । कर्कोटकम् । कारवेल्लम् । वार्हतम् । महार्द्रकम् । प्रसारणी । काकमाची । चाङ्गेरी । सुनिषण्णकम् । धात्रीफलम् । मातुलुङ्गम् । दाड़िमम् । यवः । पर्पटः । अम्लवेतसम् । जम्बीरम् । नागरङ्गम् । माक्षिकम् । नवनीतम् । घृतम् । तक्रम् । सौवीरकम् । तुषोदकम् । धान्याम्लम् । कटुतैलम् । रामठम् । लवणार्द्रकम् । यमानी । मरिचम् । मेथी । धान्यकम् । जीरकम् । दधि । ताम्बूलम् । तप्तसलिलम् । कटुरसः । तिक्तरसः ॥*॥

अग्निमान्द्याजीर्णादौ अपथ्यं यथा ।

विरेचनम् । विण्मूत्रवायूनां वेगधारणम् । अतिरिक्ताशनम् । अध्यशनम् । जागरणम् । विषमाशनम् । रक्तस्रुतिः । शमीधान्यम् । मत्स्यः । मांसम् । उपोदिका । जलपानम् । पिष्टकम् ।

आमवम् । सर्व्वशालूकम् । कूर्च्चिका । मोरटः ।
क्षीरम् । किलाटः । प्रपानकम् । तालास्थि-
मज्जम् । बालतालम् । खेदनम् । दुष्टवारि ।
विरुद्धपानाशनम् । असात्म्यपानाशनम् । विष्ट-
म्भीनि । गुरूणि ।
प्रवर्त्ति वमिं स्वेदं लङ्घनं चामतर्पणम् ।
विशेषादलसे कुर्य्यादिखद्यामतिसारवत् ॥ * ॥

अथ क्रिमिरोगे पथ्यम् ।

आस्थापनम् । कायविरेचनम् । शिरोविरे-
चनम् । धूमः । कफघ्नानि द्रव्याणि । शरीर-
मार्ज्जना । पुरातनवेणवरक्तशालयः । पटोलम् ।
वेत्राग्रम् । रसोनम् । वास्तूकम् । कुलत्थः ।
मन्दारदलम् । सर्षपः । नवीनमोचम् । हस्ती-
फलम् । तिक्तानि नालीचदलानि । मौषिक-
मांसम् । विडङ्गम् । पिचुमर्द्दपल्लवम् । पथ्या ।
तिलतैलम् । सर्षपतैलम् । सौवीरम् । शुक्तम् ।
तुषोदकम् । मध । पचेलिमतालम् । अरु-
ष्करम् । गोमूत्रम् । ताम्बूलम् । सुरा । म्रगा-
रुजम् । औष्ट्रमूत्राण्यपयांसि । रामठम् ।
क्षारः । अजमोदा । खदिरः । वत्सकम् ।
जम्बीरनीरम् । सुवर्ची । यमानिका । सुराष्ट्रा-
गुरुषिंशपोद्भवसारः । तिक्तकटुकषायरसाः ॥ * ॥

क्रिमिरोगे अपथ्यं यथा ।

छर्द्दिः । सवेगविधारणम् । विरुद्धपानाशनम् ।
दिवानिद्रा । द्रवद्रव्यम् । पिष्टान्नम् । अजीर्ण-
भोजनम् । घृतम् । माषः । दधि । पत्रशाकम् ।
मांसम् । पयः । अम्लः । मधुररसः ॥ * ॥

अथ पाण्डुरोगे पथ्यम् ।

छर्द्दिः । विरेचनम् । पुरातनयवगोधूमशालयः ।
मुद्गाढकीमसूराणां यूषः । जाङ्गलजरसः । पटो-
लम् । वृद्धकुष्माण्डम् । तरुणकदलीफलम् ।
जीवन्ती । क्षुरः । मत्स्याक्षी । गुडूची । तण्डु-
लीयकम् । पुनर्नवा । द्रोणपुष्पी । वार्त्ताकुः ।
लशुनद्वयम् । पक्वाम्रम् । अभया । बिम्बी । शिङ्गी
मत्स्यः । गोमूत्रम् । धात्री । तक्रम् । घृतम् ।
तैलम् । सौवीरकम् । तुषोदकम् । नवनीतम् ।
गन्धसारः । हरिद्रा । नागकेशरम् । यवक्षारः ।
लौहभस्म । कषायद्रव्यम् । कुङ्कुमम् । चरणयोः
अधो नाभेर्द्व्यङ्गुलादधः मस्तके हस्तयोर्मूले
ललाटकर्णयोर्मध्ये च दाहः । यथादोषमिदं पथ्यं
पाण्डुरोगवतां भवेत् ॥ * ॥

पाण्डुरोगे अपथ्यं यथा ।

रक्तस्रुतिः । धूमपानम । वमिः । वेगधारणम् ।
स्वेदनम् । मैथुनम् । शिम्बी । पत्रशाकानि ।
रामठम् । माषः । अम्बुपानम् । पिण्याकः ।
ताम्बूलम् । सर्षपः । सुरा । मृद्भक्षणम् । दिवा-
स्वप्नः । तीक्ष्णानि । लवणानि । विन्ध्यविन्ध्याद्रि-
जातनदीनां जलम् । सर्व्वाण्यम्लानि । दुष्टाम्भः ।
विरुद्धाशनानि । गुर्व्वन्नम् । विदाहीनि ॥ * ॥

अथ रक्तपित्ते पथ्यम् ।

अधोगमे छर्द्दनम् । ऊर्द्धनिर्गमे विरेचनम् ।
उभयत्र लङ्घनम् । पुरातनाः षष्टिकाशालिकोद्रव-
प्रियङ्गुनीवारयवप्रशातिकाः । मुद्गः । मसूरः ।
चणकः । तुवरी । मकुष्टकः । चिङ्गटः । वर्म्मि-
मत्स्यः । शशः । कपोतः । हरिणः । एणः ।
लावः । शरालिः । पारावतः । वर्त्तकः । वकः ।
उरभ्रः । कालपुच्छः । कपिञ्जलः । कषायवर्गः ।
गोदुग्धघृतम् । अजादुग्धघृतम् । महिषीघृतम् ।
पनसम् । पियालम् । रम्भाफलम् । कच्चटम् ।
तण्डुलीयः । पटोलम् । वेत्राग्रम् । महार्द्रकम् ।
पुराणकुष्माण्डफलम् । पक्वतालम् । सद्बीजजलम् ।
वासा । स्वादूनि । बिल्वम् । दाडिमम् । खर्ज्जू-
रम् । धात्री । मिषिः । नारिकेलम् । कशेरु ।
शृङ्गाटकम् । पौष्करम् । कपित्थम् । शालू-
कम् । परूषकम् । भूनिम्बशाकम् । पिचुमर्द्द-
पत्रम् । तुम्बी । कलिङ्गम् । लाजशक्तवः ।
द्राक्षा । सिता । माक्षिकम् । ऐक्षवम् । शीतो-
दकम् । औद्भिदवारि । सेकः । अवगाहः ।
शतधौतसर्पिः । अभ्यङ्गः । शिशिरप्रदेहः ।
हिमानिलः । चन्दनम् । इन्दुपादाः । मनोज्ञ-
कुलविचित्रकथा । धारागृहम् । सुशीतं भूमि-
गृहम् । वैदूर्य्यमुक्तामणीनां धारणम् । रम्भोत्-
पलाम्भोरुहपत्राणां शय्या । क्षौमाम्बरम् ।
सुशीतोपवनम् । प्रियङ्गुः । चन्दनचर्च्चितानां
वराङ्गनानामालिङ्गनम् । पद्माकरसरित्ह्रद-
चन्द्रोदयहिमवद्दरीसुशीतलगिरिनिर्भराणामा-
लिङ्गनम् । श्रुतिप्रशस्तकीर्त्तनम् । प्रवीणनीरम् ।
हिमवालुका ॥ * ॥

रक्तपित्ते अपथ्यं यथा ।

व्यायामः । अध्वनिषेवणम् । रविकरः । ती-
क्ष्णानि कर्म्माणि । क्षोभः । वेगधारणम् ।
चपलता । हस्त्यश्वयानानि । स्वेदः । असृक्स्रुतिः ।
धूमपानम् । सुरतः । क्रोधः । कुलत्थः । गुडः ।
वार्त्ताकुः । तिलः । माषः । सर्षपः । दधि ।
क्षारः । कौपपयः । ताम्बूलम् । नलदाम्बु ।
मद्यम् । लशुनम् । शिम्बी । विरुद्धाशनम् । कटु ।
अम्लम् । लवणम् । विदाहिद्रव्यम् ॥ * ॥

अथ राजयक्ष्मणि पथ्यम् ।

घृतपक्वमरिचजीरकसंस्कृतलावतित्तिरिजरसः ।
दोषाधिकस्य बलिनोऽपि मृदुशुद्धिः । गोधूमः ।
मुद्गः । चणकः । अरुणशालयः । छागानि मांस-
नवनीतपयोघृतानि । क्रव्यादमांसम् । जाङ्ग-
लजा रसाः । मार्त्तण्डचण्डकिरणपरिशोषितसु-
चूर्णितपक्वपललं लेह्यम् । रागाः । काम्बलिकः ।
षाडवः । वेशवारः । शशाङ्ककिरणः । मधुर-
रसः । मोचपनसाम्राणां पक्वफलानि । धात्री ।
खर्ज्जूरम् । पौष्करम् । परूषकम् । नारि-
केलम् । शोभाञ्जनम् । वकुलम् । नवताल-
शस्यम् । द्राक्षा । मिषिः । मालिमत्स्यम् ।
सिंहास्यपत्रम् । अजागोमहिषीघृतम् । छागा-
शयः । छागावस्करमूत्रलेपः । मत्स्यण्डिका ।
शिखरिणी । मदिरा । रसाला । कर्पूरम् ।
मृगमदः । सितचन्दनम् । अभ्यञ्जनानि । सुरभी-
ण्यनुलेपनानि । स्नानम् । वेशरचनम् । अव-
गाहनम् । हर्म्यम् । स्रजः । स्मरकथा । मृदु-
गन्धवाहः । गीतानि । लास्यम् । चन्द्ररुचिः ।
विपञ्ची । मृगदृशां सन्दर्शनम् । हेमपूर्णम् ।
मुक्तामणिप्रचुरभूषणधारणम् । होमः । प्रदा-
नम् । अमरपूजा । द्विजपूजा । ब्रह्माम-
पानम् ॥ * ॥

राजयक्ष्मणि अपथ्यं यथा ।

विरेचनम् । वेगधारणम् । श्रमः । स्त्री । स्वेदः ।
अञ्जनम् । प्रजागरः । साहसकर्म्मसेवा ।
रूक्षान्नपानम् । विषमाशनम् । ताम्बूलम् ।
कालिङ्गम् । कुलत्थम् । माषः । रसोनम् । वंशा-
ङ्कुरः । रामठम् । अम्लम् । तिक्तम् । कषायः ।
सर्व्वकटु । पत्रशाकः । क्षारः । विरुद्धाशनम् ।
शिम्बी । कर्कोटकम् । विदाहिद्रव्यम् । उष्ण-
कठिल्लकम् ॥ * ॥

अथ कासे पथ्यम् ।

स्वेदः । विरेचनम् । छर्द्दिः । धूमपानम् । समा-
शनम् । शालिः । षष्टिकः । गोधूमः । श्यामाकः ।
यवः । कोद्रवः । आत्मगुप्ता । माषमुद्गकुलत्थानां
रसाः । ग्राम्योदकम् । अनूपधन्वदेशभवविविध-
मांसानि । सुरा । पुरातनसर्पिः । छागदुग्धम् ।
छागघृतम् । वास्तूकम् । वायसीशाकम् ।
वार्त्ताकुः । बालमूलकम् । कण्टकारी । काश-
मर्द्दः । जीवन्ती । सुनिषण्णकम् । द्राक्षा ।
बिम्बी । मातुलुङ्गम् । पौष्करम् । वासकः ।
त्रुटिः । गोमूत्रम् । लशुनम् । पथ्या । शोषम् ।
उष्णोदकम् । मधु । लाजाः । दिवसनिद्रा ।
लघून्यन्नानि ॥ * ॥

कासे अपथ्यं यथा ।

बस्तिः । नस्यम् । असृङ्मोक्षः । व्यायामः ।
दन्तघर्षणम् । आतपः । दुष्टपवनः । रजः ।
मार्गनिषेवणम् । विष्टम्भीनि । विदाहीनि ।
विविधरूक्षाणि । शकृन्मूत्रोद्गारकासवमिवेग-
विधारणम् । मत्स्यः । कन्दः । सर्षपः । तुम्बी ।
उपोदिका । दुष्टाम्बु । दुष्टान्नपानम् । विरुद्धा-
शनम् । गुरुशीतान्नपानम् ॥ * ॥

अथ श्वासे पथ्यम् ।

विरेचनम् । स्वेदनम् । धूमपानम् । प्रच्छर्द्दनम् ।
दिवास्वपनम् । पुरातनाः षष्टिकरक्तशालिकुलत्थ-
गोधूमयवाः । शशः । अहिभुक् । तित्तिरिः ।
लावः । दक्षः । शुकादयः । धन्वमृगाः । धन्व-
पक्षिणः । पुरातनसर्पिः । अजादुग्धघृतम् ।
सुरा । मधु । निदिग्धिका । वास्तूकम् । तण्डु-
लीयः । जीवन्तिका । मूलकपोतिका । पटो-
लम् । वार्त्ताकुः । रसोनम् । पथ्या । जम्बीरम् ।
बिम्बीफलम् । मातुलुङ्गम् । द्राक्षा । त्रुटिः ।
पौष्करम् । उष्णवारि । कटुत्रयम् । गोमूत्रम् ।
कफानिलघ्नान्यन्नपानभेषजानि । अधःप्रदेशात्
पार्श्वयुग्मे करस्थयोर्मध्यमयोर्द्वयोः कण्ठकूपे च
शरीमर्लौहेन दाहः ॥ * ॥

श्वासे अपथ्यं यथा ।

मूत्रोद्गारच्छर्द्दितृट्क्षवथूनां रोधः ।

वस्तिः । दन्तकाष्ठम् । श्रमः । अध्वा । भारः । रेणुः । सूर्य्यकिरणः । विष्टम्भीनि । ग्राम्यधर्म्मः । विदाहीनि । आनूपमामिषम् । निष्पावः । श्लेष्मकारीणि । माषः । रक्तस्रावः । पूर्व्ववाताम्नपानम् । मेषीछागदुग्धम् । दुष्टजलम् । मत्स्यः । कन्दः । सर्षपः । रूक्षशीतगुर्व्वन्नपानम् ॥ * ॥

अथ हिक्कायां पथ्यम् ।

स्वेदनम् । वमनम् । नस्यम् । धूमपानम् । विरेचनम् । निद्रा । स्निग्धानि लघून्यन्नानि । लवणानि । जीर्णकुलत्थगोधूमशालिषष्टिकयवाः । एणतित्तिरिलावाद्या जाङ्गला मृगपक्षिणः । पक्वकपित्थम् । लशुनम् । पटोलम् । बालमूलकम् । पौष्करम् । कृष्णतुलसी । मदिरा । नलदाम्बु । उष्णोदकम् । मातुलुङ्गम् । माक्षिकम् । सुरभिजलम् । वातश्लेष्महराण्यन्नपानानि । शीताम्बुसेकः । सहसा त्रासः । विस्मापनम् । भयम् । क्रोधः । हर्षः । प्रियोद्वेगः । प्राणायामनिषेवणम् । दग्धमृत्तिकाघ्राणम् । ऊर्द्ध्वे धाराजलार्पणम् । नाभ्यूर्द्ध्वपीडनम् । पायूर्द्ध्वं नाभेर्द्व्यङ्गुलादूर्द्ध्वञ्च दीपदग्धहरिद्रया दाहः ॥ * ॥

हिक्कायामपथ्यं यथा ।

वातमूत्रोद्गारकासक्षुद्वेगधारणम् । रजः । अनिलः । आतपः । विरुद्धाशनम् । विष्टम्भीनि । विदाहीनि । रूक्षाणि । कफदानि । निष्पावः । पिष्टकः । माषः । पिण्याकः । आनूपमामिषम् । अविदुग्धम् । दन्तकाष्ठम् । वस्तिः । मत्स्यः । सर्षपम् । अम्लम् । तुम्बी । कन्दः । तैलभृष्टम् । उपोदिका । गुरुशीतान्नपानम् ॥ * ॥

अथ स्वरभेदे पथ्यम् ।

स्वेदः । वस्तिः । धूमपानम् । विरेकः । कवलग्रहः । नस्यम् । भालशिरावेधः । यवः । लोहितशालिः । हंसाटवी । ताम्रचूडकेकिनोर्मांसरसाः । सुरा । गोकण्टकः । काकमाची । जीवन्ती । बालमूलकम् । द्राक्षा । पथ्या । मातुलुङ्गम् । लशुनम् । लवणार्द्रकम् । ताम्बूलम् । मरिचम् । सर्पिः ॥ * ॥

स्वरभेदे अपथ्यम् ।

आमकपित्थम् । बकुलम् । शालूकम् । जाम्बवम् । तिन्दुकम् । कषायः । वमिः । स्वप्नः । प्रजल्पनम् । अनुपानम् ॥ * ॥

अथारोचके पथ्यम् ।

वस्तिः । विरेकः । यथाबलं वमनम् । धूमोपसेवा । कवलग्रहः । तिक्तकाष्ठेन दन्तधावनम् । विचित्रान्नपानम् । गोधूमः । मुद्गाः । लोहितशालयः । षष्टिका । वराहच्छागशशैणानां मांसम् । चिङ्गः । भक्ष्यम् । मधुरालिका । इक्षवः । प्रोष्ठी । खलिशः । कवयी । रोहितः । कर्कोटः । वेसवारम् । नवीनमूलकम् । वार्त्ताकुः । शोभाञ्जनम् । मोचम् । दाडिमम् । भव्यम् । पटोलम् । रुचकम् । घृतम् । पयः । बालतालम् । रसोनम् । सूरणम् । द्राक्षा । रसालम् । नलदाम्बु । काञ्जिकम् । मद्यम् । रसाला । दधि । तक्रम् । आर्द्रकम् । कक्कोलम् । खर्ज्जूरम् । पियालम् । तिन्दुकम् । पक्वकपित्थम् । बदरम् । विकङ्कतम् । तालास्थिमज्जा । हिमवालुका । सिता । पथ्या । यमानी । मरिचम् । रामठम् । स्वाद्वम्लतिक्तानि । देहमार्जना ॥ * ॥

अरोचके अपथ्यम् ।

कासोद्गारक्षुधानिद्रावमीनां वेगधारणम् । असृग्दानम् । अहृद्भोज्यः । क्रोधः । लोभः । भयम् । शोकः । दुर्गन्धः । दुष्टसेवा ॥ * ॥

अथ छर्द्द्यां पथ्यम् ।

विरेचनम् । छर्द्दनम् । लङ्घनम् । स्नानम् । मुद्गाः । लाजमण्डः । पुरातनाः षष्टिकशालिमुद्गाः । कलायः । गोधूमः । यवः । मधु । शशाहिभुक्तित्तिरिलावकाद्याः । जाङ्गलमृगपक्षिणः । मनोज्ञनानारसगन्धरूपा रसाः । मौद्गा यूषाः । रागाः । खड्वाः । काम्बलिकाः । सुरा । वेत्राग्रम् । कुस्तुम्बुरु । नारिकेलम् । पचेलिमानि जम्बीरधात्रीसहकारकोलद्राक्षाकपित्थानि । हरीतकी । दाडिमम् । बीजपूरम् । जातीफलम् । बालकम् । निम्बम् । वासा । सिता । शताह्वा । करिकेशरम् । चित्तमनःप्रीतिकरभक्ष्याः । शुक्तस्य वक्त्रे शिशिराम्बुसेकः । कस्तूरिका । चन्दनम् । इन्दुकिरणः । मनोज्ञगन्धान्यनुलेपनानि । सुगन्धिपुष्पपानफलानि । स्वमनोऽनुकूलरूपरसगन्धस्पर्शशब्दाः । नाभेस्त्रियवोपरिष्टाद्दाहः ॥ * ॥

छर्द्द्यामपथ्यम् ।

नस्यम् । वस्तिः । स्वेदनम् । स्नेहपानम् । रक्तस्रावः । दन्तकाष्ठम् । द्रवान्नम् । बीभत्सदर्शनम् । भीतिः । उद्वेगः । उष्णस्निग्धासात्म्यविरोधिकान्नम् । रम्भा । शिम्बी । कोषवती । मधूकम् । चिञ्चा । रूक्षौला । सर्षपः । देवदाली । व्यायामः । छुचिका । अञ्जनम् ॥ * ॥

अथ तृष्णायां पथ्यम् ।

शोधनम् । वमनम् । निद्रा । स्नानम् । कवलधारणम् । दीपदग्धहरिद्रया जिह्वाधःशिरयोर्दाहः । कोद्रवाः । शालयः । पेयाः । विलेपी । लाजशक्तवः । आममण्डः । धन्वरसः । शर्करा । रागः । षाडवः । भृष्टमुद्गमसूरचणककुलत्थरसः । रम्भापुष्पम् । तैलकूर्च्चम् । द्राक्षा । पर्पटपल्लवः । कपित्थम् । कोलम् । मल्लिका । कुष्माण्डकम् । उपोदिका । खर्ज्जूरम् । दाडिमम् । धात्री । कर्कटी । नलदाम्बु । जम्बीरम् । करमर्द्दम् । बीजपूरम् । गवां पयः । मधूकपुष्पम् । ह्रीवेरम् । तिक्तानि । मधुराणि । बालतालाम्बु । शीताम्बु । पयःपेटी । प्रपानकम् । माक्षिकम् । सरसीतोयम् । प्रलाक्षा । नागकेशरम् । एला । जातीफलम् । पथ्या । कुस्तुम्बुरु । टङ्कणम् । घनसारः । गन्धसारः । कौमुदी । शिशिरानिलः । चन्द्रार्द्रप्रियाश्लेषः । रत्नाभरणधारणम् । हिमानुलेपनम् ॥ * ॥

तृष्णायामपथ्यम् ।

स्नेहः । अञ्जनम् । स्वेदः । धूमपानम् । व्यायामः । नस्यम् । आतपः । दन्तकाष्ठम् । गुर्व्वन्नम् । अम्लम् । लवणम् । कषायः । कटुः । क्षारः । दुष्टजलम् । तीक्ष्णम् ॥ * ॥

अथ मूर्च्छायां पथ्यम् ।

सेकः । अवगाहः । मणिः । हारः । शीताः प्रदेहाः । व्यजनानिलः । शीतानि गन्धवन्ति पानानि । धारागृहम् । शीतमरीचिरोचिः । धूमः । अञ्जनम् । नावनम् । असृङ्मोक्षः । दाहः । सूचीभिस्तोदनम् । लोम्नां कचानाञ्च लुञ्चनम् । नखान्तपीडा । दशनोपदंशः । नासामुखद्वारमरुन्निरोधः । विरेचनम् । छर्द्दनम् । लङ्घनम् । क्रोधः । भयम् । दुःखकरी व्यथा । विचित्रा मनोहराः कथाः । छाया । नभोऽम्भः । शतधौतसर्पिः । मृदूनि । तिक्तानि । लाजमण्डः । जीर्णयवलोहितशालयः । कौम्भं हविः । मुद्गयूषः । सतीलयूषः । धन्वोद्भवा मांसरसाः । रागाः । षाडवाः । गव्यपयः । सिता । पुराणकुष्माण्डम् । पटोलम् । मोचम् । हरीतकी । दाडिमम् । नारिकेलम् । मधूकपुष्पम् । तण्डुलीयः । तुषोदकम् । लघून्यन्नानि । उशीरनीरम् । सितचन्दनम् । कर्पूरनीरम् । हिमवालुका । वल्गुशब्दः । अद्भुतदर्शनम् । उत्कटगीतम् । उत्कटवाद्यम् । श्रमः । स्मृतिः । चिन्तनम् । आत्मबोधः । धैर्य्यम् ॥ * ॥

मूर्च्छायामपथ्यं यथा ।

ताम्बूलम् । पत्रशाकम् । व्यवायः । स्वेदनम् । कटुः । तृण्निद्रयोर्वेगरोधः । तक्रम् ॥ * ॥

अथ मदात्यये पथ्यम् ।

संशोधनम् । संशमनम् । स्नपनम् । लङ्घनम् । श्रमः । अब्दसमुत्पन्नशालिषष्टिकयवमुद्गमाषगोधूमसतीनाः । रागः । षाडवः । एणतित्तिरिलावाजदक्षबर्हिशशानामामिषम् । वेसवारः । विचित्रान्नम् । स्वच्छमद्यम् । पयः । सिता । तण्डुलीयः । पटोलम् । मातुलुङ्गम् । परूषकम् । खर्ज्जूरम् । दाडिमम् । धात्री । नारिकेलम् । गोस्तनी । पुराणसर्पिः । कर्पूरम् । उशीरम् । शिशिरानिलः । धारागृहम् । चन्द्रपादाः । मणयः । मिथःसङ्गमः । क्षौमाम्बरम् । प्रियाश्लेषः । उत्तुङ्गगीतवादित्रम् । शीताम्बु । चन्दनम् । स्नानम् ॥ * ॥

मदात्यये अपथ्यं यथा ।

स्वेदः । अञ्जनम् । धूमपानम् । नावनम् । दन्तघर्षणम् । ताम्बूलम् ॥ * ॥

अथ दाहे पथ्यम् ।

शालयः । षष्टिकाः । मुद्गाः । मसूराः । चणकाः । यवाः । धन्वमांसरसाः । लाजमण्डः । लाजशक्तवः । सिता । शतधौतघृतम् । दुग्धम् । पयोभवनवनीतम् । कुष्माण्डम् । कर्कटी । मोचम् । पनसम् । स्वादुदाडिमम् । पटोलम् । पर्पटम् । द्राक्षा । धात्रीफलम् । परूषकम् । शिम्बी । तुम्बी । पयःपेटी । खर्ज्जूरम् । धान्यकम् । बिसः । बालतालम् । पियालम् । शृङ्गाटकम् । कशेरुकम् । मधूकपुष्पम् । ह्रीवेरम् ।

पथ्या। सर्व्वाणि तिक्तानि। शीताः प्रदेहाः। भूवेश्म। सेकः। अभ्यङ्गः। अवगाहनम्। पद्मोत्पलदलशौमाणां शय्या। शीतलकाननम्। विचित्रा कथा। गीतानि। शिशिरः। मञ्जु-भाषणम्। उशीरचन्दनालेपः। शीताम्बु। शिशिरानिलः। धारागृहम्। प्रियास्पर्शः। प्रनीरम्। हिमवालुका। शुभ्रांशुरश्मयः। स्नानम्। प्रणयः। मधुररसः॥ * ॥

दाहे अपथ्यम्।

विरुद्धान्यन्नपानानि। क्रोधः। वेगधारणम्। गजाश्वयानम्। अध्वा। क्षारम्। पित्तकराणि। व्यायामः। आतपः। तक्रम्। ताम्बूलम्। मधु। रामठम्। व्यवायः। कटुः। तिक्तः। उष्णः॥ * ॥

अथोन्मादे भूतोन्मादे च पथ्यम्।

मरुद्भवे पूर्व्वं स्वेदः। पित्तोद्भवे पूर्व्वं विरेकः। कफोद्भवे पूर्व्वं वमनम्। ततःपरं वस्तिविधिः। नस्यम्। सन्तर्पणम्। ताड़नम्। अञ्जनम्। आश्वासनम्। त्रासनम्। बन्धनम्। भयम्। हर्षणम्। दानम्। धूपः। दमः। विस्मरणम्। प्रदेहः। शिराव्यधः। संशमनम्। सेकः। आश्चर्य्यकर्म्माणि। धूमपानम्। धीधैर्य्यम्। सत्त्वम्। आत्मनिवेदनम्। अभ्यञ्जनम्। स्वाप-नम्। आसनम्। निद्रा। सुशीतान्यनुलेपनानि। गोधूमः। मुद्गः। अरुणशालयः। धारोष्णदुग्धम्। शतधौतसर्पिः। नवीनघृतम्। पुरातनघृतम्। कूर्म्मामिषम्। धन्वरसः। रसालम्। पुराण-कुष्माण्डफलम्। पटोलम्। ब्राह्मीदलम्। वास्तू-कम्। तण्डुलीयः। खराश्वमूत्रम्। गगनाम्बु। पथ्या। सुवर्णचूर्णम्। नारिकेलम्। द्राक्षा। कपित्थम्। पनसम्॥ * ॥

उन्मादे अपथ्यम्।

मद्यम्। विरुद्धाशनम्। उष्णभोजनम्। निद्रा-क्षुत्तृष्णावेगधारणम्। व्यवायः। आषाढ़फलम्। करीरकम्। पत्रशाकम्। तिक्तानि। बिम्बी॥ * ॥

अथापस्मारे पथ्यम्।

वातोद्भवे पूर्व्वं वस्तिः। पैत्तिके विरेचनम्। श्लैष्मिके वमनम्। परं धूपनम्। अञ्जनम्। नस्यम्। शिराव्यधः। दानम्। त्रासनम्। बन्धनम्। भयम्। तर्ज्जनम्। ताड़नम्। हर्षः। धूम-पानम्। विस्मयः। धीधैर्य्यम्। आत्मादिविज्ञा-नम्। स्नानम्। अभ्यञ्जनम्। लोहितशालयः। मुद्गाः। गोधूमाः। प्रतनं हविः। कूर्म्मामिषम्। धन्वरसः। दुग्धम्। ब्राह्मीदलम्। वचा। पटो-लम्। वृद्धकुष्माण्डम्। वास्तूकम्। स्वादुदाड़ि-मम्। शोभाञ्जनम्। पयःपेटी। द्राक्षा। धात्री। परूषकम्। तैलम्। खराश्वमूत्रम्। गगनाम्बु। हरीतकी॥ * ॥

अपस्मारे अपथ्यम्।

चिन्ता। शोकभयम्। क्रोधः। अशुचीन्यन्न-पानानि। मद्यम्। मत्स्यः। विरुद्धान्नम्। तीक्ष्णोष्ण-गुरुभोजनम्। अतिव्यवायः। आयासः। पूज्य-

पूजाव्यतिक्रमः। पत्रशाकानि। बिम्बी। आषाढ़-फलम्। तृष्णानिद्राक्षुधावेगाः॥ * ॥

अथ वातरोगे पथ्यम्।

अभ्यङ्गः। मर्द्दनम्। वस्तिः। स्नेहः। स्वेदः। अवगाहनम्। संवाहनम्। संशमनम्। प्रावृतिः। वातवर्ज्जनम्। अग्निकर्म्म। उपनाहः। भूशय्या। स्नानम्। आसनम्। तैलद्रोणी। शिरोवस्तिः। शयनम्। नस्यम्। आतपः। सन्तर्पणम्। बृंह-णम्। किलाटः। दधि। कूर्च्चिका। सर्पिः। तैलम्। वसा। मज्जा। स्वाद्वम्ललवणा रसाः। नवीनतिलगोधूममाषाः। समतुषरोहितशालि-षष्टिकाः। कुलत्थरसः। सुरा। ग्राम्या गोऽश्व-तरोष्ट्ररासभच्छागलादयः। आनूपाः कोल-महिषन्यङ्कुखड्गिगवादयः। औदका हंस-कादम्बचक्रमद्गुरकादयः। विलेशया भेक-गोधानकुलश्वाविदादयः। जाङ्गलाः चटक-कुक्कुटबर्हितित्तिरयः। शिलिन्दः। पर्व्वतः। नक्रः। गर्गरः। कवयी। रक्तिमः। एरण्डः। चुलुकी। कूर्म्मः। शिशुमारः। तिमिङ्गिलः। रोहितः। मद्गुरः। शृङ्गी। वर्म्मी। खड्गीशः। एते झषाः। पटोलम्। शिग्रु। वार्त्ताकुः। लशुनम्। दाड़िमद्वयम्। पक्वतालम्। रसा-लम्। नलदाम्बु। परूषकम्। जम्बीरम्। वदरम्। द्राक्षा। नागरङ्गम्। मधूकफलम्। प्रसारणी। गोक्षुरकः। मुक्ताची। पारि-भद्रकः। पयांसि। पयःपेटी। एरण्डतैलम्। गवां जलम्। मत्स्यण्डिका। ताम्बूलम्। धान्याम्लम्। निन्तिड़ीफलम्। स्निग्धोष्णभोज्यानि। स्निग्धो-ष्णानुलेपनम्। आमाशयमुपागते विशेषाद्वम-नम्। पक्वाशयस्थे तथा मांसस्थे स्निग्धविरेच-नम्। प्रत्याध्मानाध्मानसङ्गे वर्त्तिः लङ्घनं दीप-नम्। अष्ठीलाख्ये गुल्मविधिः। शुक्रस्थे यथ-जितक्रिया। त्वङ्मांसासृक्शिराश्रमे रक्त-मोक्षणम्॥ * ॥

वातरोगे अपथ्यम्।

चिन्ता। प्रजागरः। वेगधारणम्। छर्द्दिः। श्रमः। अनशनम्। चणकः। कलायः। नीवार-काङ्गुयववैणवकोरदूषश्यामाकचूर्णम्। कुरु-विन्दः। तृणधान्यानि। राजमाषः। मुद्गः। तड़ागसरिदम्बु। करीरम्। जम्बु। कशेरु। तलकम्। क्रमुकम्। मृणालम्। निष्पावबीजम्। तालफलास्थिमज्जा। शालूकम्। तिन्दुकम्। कठिल्लकम्। बालतालम्। बिम्बी। पत्रशाकम्। उडुम्बरम्। शीताम्बु। रासभपयः। विरुद्ध-मन्नम्। क्षारः। शुष्कपललम्। जलप्लुतिः। चौद्रम्। कषायकटुतिक्तरसाः। व्यवायः। हस्त्यश्वयानम्। चंक्रमणम्। खट्वा। आशानि-लोऽहितवतीऽपि विशेषात् स्नानम्। मद्दुष्ट-सलिलम्। दन्तघर्षणम्॥ * ॥

अथ वाते गुग्गुलुसेविनां पथ्यम्।

क्षीरम्। मांसरसाः। यूषाः। कलमादिशालयः। यवगोधूममाषाः॥ * ॥

गुग्गुलावपथ्यम्।

व्यायामः। आतपः। रूक्षम्। स्नानम्। बहु-भाषणम्। प्रवातः। मैथुनम्। यानम्॥ * ॥

अथ वातरक्ते पथ्यम्।

उत्तानेऽभ्यञ्जनम् सेकः सोपनाहः प्रलेपनम्। गम्भीरे स्नेहपानं आस्थापनं विरेचनम्। सर्व्वत्र स्वौजलौकश्वङ्गालाबुभिरस्रस्रुतिः। शतधौत-घृताभ्यङ्गः। मेषीदुग्धावसेचनम्। यवः। षष्टिकः। नीवारः। कलमः। अरुणशालिः। गोधूमः। चणकः। मुद्गः। तुवरी। मकुष्ठकः। अथजामहिषीगवां पयः। लावः। तित्तिरिः। सर्पहिट्। ताम्रचूड़ादिः। एते विष्किराः। प्रतुदाः शुकदात्यूहकपोतचटकादयः। उपो-दिका। काकमाची। वेत्राग्रम्। सुनिषण्णकम्। वास्तूकम्। कारवेल्लम्। तण्डुलीयः। प्रसारणी। धत्तूरः। वृद्धकुष्माण्डम्। सर्पिः। सम्पाकपल्ल-वम्। पटोलम्। एरण्डतैलम्। मृद्वीका। श्वेत-शर्करा। नवनीतम्। सोमवल्ली। कस्तूरी। सितचन्दनम्। शिंशपागुरुदेवाह्वसरलस्नेह-मर्द्दनम। तिक्तम्॥ * ॥

वातरक्ते अपथ्यम्।

दिवास्वप्नः। अग्निसन्तापः। व्यायामः। आतपः। मैथुनम्। माषः। कुलत्थः। निष्पावः। कलायः। क्षारसेवनम्। अम्बुजानूपमांसानि। विरुद्धानि। दधीनि। इक्षुः। मूलकम्। मद्यम्। पिण्या-कम्। अम्लम। काञ्जिकम्। कटु। उष्णम्। गुरु। अभिष्यन्दि। लवणम्। शक्तवः॥ * ॥

अथोरुस्तम्भे पथ्यम्।

सर्व्वो रूक्षविधिः। स्वेदः। कोद्रवः। रक्तशालिः। यवः। कुलत्थः। श्यामाकः। पुरातनोद्दालाः। शोभाञ्जनम्। कारवेल्लम्। पटोलम्। लशुनम्। सुनिषण्णम्। काकमाची। वेत्राग्रम्। निम्ब-पल्लवम्। धत्तूरः। वास्तूकम्। पथ्या। वार्त्ताकुः। तप्तवारि। सम्पाकशाकम्। पिण्याकम्। तक्रम्। अरिष्टम्। मधु। कटुः। तिक्तः। कषायः। क्षीरसेवा। गवां जलम्। यथाशक्तिव्यायामः। स्थलस्याक्रमणम्। अच्छह्रदे सन्तरणम्। नदीषु प्रतिस्रोतः सन्तरणम्। श्लेष्महरणम्। आमा-शतकोपनम्॥ * ॥

ऊरुस्तम्भे अपथ्यम्।

गुरुशीतद्रवस्निग्धविरुद्धाद्यात्मभोजनम्। विरे-चनम्। स्नेहनम्। वमनम्। रक्तमोक्षणम्। वस्तिः॥ * ॥

अथामवाते पथ्यम्।

रूक्षस्वेदः। लङ्घनम्। स्नेहपानम्। वस्तिः। लेपः। रेचनम्। पाचनानि। अन्दोत्पन्नशालि-कुलत्थाः। जीर्णं मद्यम्। जाङ्गलानां रसः। वातघ्नशाकानि सर्व्वाणि। तक्रम्। उष्णांभः। एरण्डतैलम्। रसोनम्। पटोलम्। धत्तूरकम्। कारवेल्लम्। वार्त्ताकुः। शिग्रु। तप्तनीरम्। मन्दारः। गोकण्टकः। देवदारः। भल्लातकम्।

गोजलम् । आर्द्रकम् । कटूनि । तिक्तानि । दीपनानि ॥ * ॥

आमवाते अपथ्यम् ।

दधि । मत्स्यः । गुडः । क्षीरम् । उपोदिका । माषः । पिष्टकम् । दुष्टनीरम् । पूर्ववातः । विरुद्धाशनम् । असात्म्यम् । वेगरोधः । जागरः । विषमाशनम् ॥ * ॥

अथ शूले पथ्यम् ।

छर्दिः । स्वेदः । लङ्घनम् । पायुवर्त्तिः । वस्तिः । निद्रा । रेचनम् । पाचनम् । अब्दोत्पन्नाः शालयः । वाट्यमण्डः । तप्तनीरम् । जाङ्गलानां रसः । पटोलम् । शोभाञ्जनम् । कारवेल्लम् । वार्त्ताकुः । पक्वाम्रम् । द्राक्षा । कपित्थम् । रुचकम् । पियालम् । शालिञ्चपत्राणि । वास्तूकम् । सामुद्रम् । सौवर्चलम् । हिङ्गु । बिल्वम् । विडम् । शलाका । लशुनम् । लवङ्गम् । एरण्डतैलम् । सुरभीजलम् । गवाम्बु । जम्बीररसः । कुष्ठम् । लघूनि । क्षारचूर्णानि ॥ * ॥

शूले अपथ्यम् ।

विरुद्धान्नपानम् । जागरः । विषमाशनम् । रूक्षतिक्तकषायाणि । शीतलानि । गुरूणि । व्यायामः । मैथुनम् । मद्यम् । वैदलम् । लवणम् । कटु । वेगरोधः । शोकः । क्रोधः ॥ * ॥

अथोदावर्त्तानाहयोः पथ्यम् ।

नारिकेलपुष्पमिश्रितशीतलोदकपानम् । स्नेहस्वेदः । विरेकः । वस्तिः । फलवर्त्तिः । अभ्यङ्गः । यवः । दृष्टविण्मूत्रमारुतः । शाल्योदकम् । आनूपरसः । रसुतैलम् । वारुणी । बालमूलकम् । सम्पाकः । त्रिवृत् । तिलः । सुधादलम् । शृङ्गवेरम् । मातुलुङ्गम् । यवक्षारः । हरीतकी । लवङ्गम् । रामठम् । द्राक्षा । गोमूत्रम् । लवणानि । अधोवातसङ्गे तु । स्नेहः । स्वेदः । वर्त्तिः । वस्तिः । समीरघ्नद्रव्यान्नपानम् । तथा पुरीषजे । वस्तिः । स्वेदः । अभ्यङ्गः । अवगाहनम् । फलवर्त्तिः । विड्भेदान्नपानम् । मूत्रवेगसमुत्पन्ने । त्रिविधं वस्तिकर्म । स्वेदः । अभ्यङ्गः । अवगाहः । सर्पिषावपीडनम् । उद्गारोत्थे हिक्कार्हविधिः । कासजे कासजिद्विधिः । क्षवजे । स्वेदनम् । धूमः । औत्तरभक्तिकघृतम् । क्षवप्रवर्त्तनद्रव्यम् । ऊर्द्ध्वजत्रुकाभ्यङ्गः । तृष्णोत्थे शीतान्नपानम् । जृम्भोत्थे वातजित् क्रिया । निद्रावेगोत्थिते क्षीरम् । स्वप्नसंवाहनम् । बुभुक्षोत्थे स्निग्धाल्पोष्णलघुभोजनम् । बाष्पजे बाष्पसंमोक्षः । स्वप्नः । मद्यम् । प्रियकथा । श्रमश्वाससमुत्पन्ने विश्रामः । वातघ्नादिक्रम् । शुक्रोत्थे वस्तिः । अभ्यङ्गः । अवगाहः । चरणायुधः । शालिः । मदिरा । क्षीरम् । यौवनान्वितप्रिया । छर्द्युत्थे लङ्घनम् । धूमः । भुक्त्वा प्रच्छर्दनम् । श्रमः । रूक्षान्नपानम् । विरेकः । रक्तमोक्षणम् ॥ * ॥

उदावर्त्तानाहयोरपथ्यम् ।

वमनम् । वेगरोधः । शमीधान्यम् । कोद्रवः । शालिञ्चशाकम् । शालूकम् । जाम्बवम् । कर्कटीफलम् । पिण्याकम् । मर्कमालुकम् । करीरः । पिष्टवैकृतम् । विष्टम्भीनि । विरुद्धानि । कषायाणि । गुरूणि ॥ * ॥

अथ गुल्मे पथ्यम् ।

स्नेहस्वेदः । विरेकः । वस्तिः । वातघ्नौषधः । लङ्घनम् । वर्त्तिः । अभ्यङ्गः । स्नेहः । पक्वे तु पाटनम् । सम्वत्सरसमुत्पन्नकलायरक्तशालयः । खड्ः । कुलत्थयूषः । धन्वमांसरसः । सुरा । गवाजयोः पयः । मृद्वीका । परूषकम् । खर्जूरम् । दाडिमम् । धात्री । नागरङ्गम् । अम्लवेतसम् । तक्रम् । एरण्डतैलम् । लशुनम् । बालमूलकम् । पशूरः । वास्तूकम् । शिग्रु । यवक्षारः । हरीतकी । रामठम् । मातुलुङ्गम् । त्र्यूषणम् । सुरभीजलम् । स्निग्धोष्णद्रवलघुदीपनान्नानि । वातानुलोमनम् ॥ * ॥

गुल्मे अपथ्यम् ।

सर्वं वातकारि । विरुद्धाशनम् । वल्लूरम् । मूलकम् । मत्स्यः । मधुरफलम् । शुष्कशाकम् । शमीधान्यम् । विष्टम्भीनि । गुरूणि । अधोवातशकृन्मूत्रवमथुश्वासाश्रुधारणम् । वमनम् । जलपानम् ॥ * ॥

अथ हृद्रोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । लङ्घनम् । वस्तिः । विलेपी । पुरातनरक्तशालयः । जाङ्गलमृगपक्षियूषाः । मुद्गकुलत्थरसाः । रागाः । खडाः । काम्बलिकाः । षाड्वाः । मद्यम् । पटोलम् । कदलीफलम् । पुराणकूष्माण्डम् । रसालम् । दाडिमम् । सम्पाकशाकम् । नवमूलकम् । एरण्डतैलम् । गवाम्बु । सैन्धवम् । द्राक्षा । तक्रम् । पुरातनगुडः । शुण्ठी । यमानी । लशुनम् । हरीतकी । कुष्ठम् । कुस्तुम्बुरु । लाघवम् । आर्द्रकम् । सौवीरम् । शुक्तम् । मधु । जम्बीररसः । कस्तूरिका । चन्दनम् । प्रपानकम् । ताम्बूलम् ॥ * ॥

हृद्रोगे अपथ्यम् ।

तृट्छर्दिमूत्रवातशुक्रकासोद्गारश्रमश्वासविड्मूर्च्छा वेगधारणम् । सह्याद्रिविन्ध्याद्रिनदीनां जलम् । मेषीपयः । दुष्टजलम् । कषायः । विरूढम् । उष्णम् । गुरु । तिक्तः । अम्लः । चिरन्तनमद्योत्थशाकानि । क्षारः । मधूकम् । दन्तकाष्ठम् । रक्तस्रुतिः ॥ * ॥

अथ मूत्रकृच्छ्रे पथ्यम् ।

वातोद्भवे अभ्यङ्गः । निरूहः । वस्तिः । स्वेदः । अवगाहः । उत्तरवस्तिः । सेकः । पैत्ते अवगाहः । शिशिरप्रदेहः । पैत्तो विधिः । वस्तिविधिः । विरेकः । श्लेष्मोद्भवे स्वेदः । विरेकः । वस्तिः । क्षारः । यवान्नम् । तीक्ष्णम् । उष्णम् । त्रिदोषजे अभ्यङ्गपुरःसराणि त्रिमलोदितानि सर्वाण्यपि । यथा यथा दोषमयं मयः । पुरातनलोहितशालिः । गोमयतक्रपयोदधीनि । धन्वामिषम् । मुद्गरसः । सिता । पुराणकूष्माण्डफलम् । पटोलम् । महार्द्रकम् । गोक्षुरकः । कुमारी । गुवाकखर्जूरनारिकेलतालद्रुमाणां शिरांसि । पथ्या । तालास्थिमज्जा । त्रपुसम् । त्रुटिः । शीतपानम् । शीताशनम् । क्षीरनीरम् । हिमवालुका ॥ * ॥

मूत्रकृच्छ्रे अपथ्यम् ।

मद्यम् । श्रमः । निधुवनम् । गजवाजियानम् । सर्वं विरुद्धाशनम् । विषमाशनम् । ताम्बूलम् । मत्स्यः । लवणम् । आर्द्रकम् । तैलभृष्टम् । पिण्याकम् । हिङ्गु । तिलः । सर्षपः । वेगरोधः । माषः । करीरः । अतितीक्ष्णम् । विदाहि । रूक्षम् । अम्लः ॥ * ॥

अथ मूत्राघाते पथ्यम् ।

अभ्यञ्जनम् । स्नेहः । विरेकः । वस्तिः । स्वेदः । अवगाहः । उत्तरवस्तिः । पुरातनलोहितशालिः । धन्वभवमांसम् । मद्यम् । तक्रम् । पयः । दधि । माषयूषः । पुराणकूष्माण्डफलम् । पटोलम् । महार्द्रकम् । तालफलास्थिमज्जा । हरीतकी । कोमलनारिकेलम् । गुवाकखर्जूरनारिकेलतालद्रुमाणां मस्तकानि ॥ * ॥

मूत्राघाते अपथ्यम् ।

सर्वाणि विरुद्धानि । व्यायामः । मार्गः । शीतलम् । रूक्षम् । विदाहि । विष्टम्भि । यवासः । वेगधारणम् । करीरम् । वमनम् ॥ * ॥

अथाश्मर्यां पथ्यम् ।

वस्तिः । विरेकः । वमनम् । लङ्घनम् । स्वेदः । अवगाहः । वारिसेचनम् । यवाः । कुलत्थाः । प्रपुराणशालयः । मद्यम् । धन्वाजमांसरसः । पुराणकूष्माण्डफलम् । कर्कटकम् । गोक्षुरकः । वारुणशाकम् । आर्द्रकम् । पाषाणभेदी । यवशूकः । रेणुः । शिखा । अश्मनां समाकर्षणम् ॥

अश्मर्यां अपथ्यम् ।

मूत्रस्य शुक्रस्य च वेगधारणम् । श्रमः । विष्टम्भि । रूक्षम् । गुर्वन्नपानम् । विरुद्धपानाशनम् ॥ * ॥

अथ प्रमेहे पथ्यम् ।

पूर्वं लङ्घनम् । वमनम् । विरेचनम् । शोधनम् । शमनम् । दीपनम् । नीवारः । कङ्गुः । यवः । वेणवः । कोरदूषः । श्यामाकः । मुद्गः । कुरुविन्दः । शुकजकः । गोधूमः । शालिः । कलमः । पुरातनकुलत्थः । मुद्गाढकीचणकयूषरसाः । तिक्ताः । लाजाः । पुरातनसुरा । मधु । वाट्यमण्डः । तक्रम् । रासभजलम् । महिषीजलम् । कङ्कः । जाङ्गलाः कपोतशशतित्तिरिलावकपिञ्जलैणकुरङ्गादयः । शोभाञ्जनम् । कुलकम् । कठिल्लकम् । कर्कोटकम् । तलकम् । वार्त्ताकम् । चाङ्गेरम् । लशुनम् । नवीनमोचम् । पशूरम् । गोक्षुरकम् । सर्षपशाकम् । मन्दारपत्रम् । अमृता । त्रिफला । कपित्थम् । जम्बूः । कमेरु । कमलोत्पलकन्दबीजम् । खर्जूरनारिकेलतालतरूणां मस्तकम् । बीजम् । तिन्दुकफलम् । खदिरः । कलिङ्गः ।

तिक्तः। कषायः। हस्त्यश्ववाहनम्। अतिभ्रमणम्। रविकिरणः। व्यायामः॥ * ॥

प्रमेहे अपथ्यम्।

मूत्रवेगः। धूमपानम्। स्वेदः। रक्तमोक्षणम्। सदासनम्। दिवानिद्रा। नवान्नम्। दधि। आनूपमांसम्। निष्पावम्। पिष्टान्नम्। मैथुनम्। सौवीरकम्। सुरा। शुक्तम्। तैलम्। क्षीरम्। घृतम्। गुडः। तुम्बी। तालास्थिमज्जा। विरुद्धाशनम्। कुष्माण्डम्। इक्षुः। दुष्टाम्बु। स्वादु। अम्लः। लवणम्। अभिष्यन्दि॥ * ॥

अथ मेदसि पथ्यम्।

चिन्ता। श्रमः। जागरणम्। व्यवायः। प्रोद्वर्तनम्। लङ्घनम्। आतपः। हस्त्यश्वयानम्। भ्रमणम्। विरेकः। प्रच्छर्द्दनम्। अपतर्पणम्। पुरातना वेणवकोरदूषश्यामाकनीवारप्रियङ्गुजूर्णाः। यवः। कुलत्थः। चणकः। मसूरः। मुद्गः। तुवरी। मधु। लाजाः। कटुतिक्तकषायाणि। तक्रम्। सुरा। चिल्लटमत्स्यः। दग्धवार्त्ताकुः। फलत्रयम्। यवासकम्। शिरीषलोध्रहरीतकीनां चूर्णेन गात्रविलेपनम्। कटुत्रयम्। सर्षपतैलम्। एला। सर्व्वाणि रूक्षाणि। सुरसतैलम्। पत्रशाकः। अगुरुलेपनम्। प्रतप्तनीराणि। शिलाजतूनि। भोजनात् प्राक् वारिपानम्॥ * ॥

मेदसि अपथ्यम्।

स्नानम्। रसायनम्। शालिः। गोधूमः। सुखशीलता। क्षीरम्। इक्षुविकृतिः। माषः। सौहित्यम्। स्वेदनानि। मत्स्यः। मांसम्। दिवानिद्रा। स्रक्। गन्धः। मधुराणि। समग्रभोजनस्य पश्चात् जलपानम्। अतिमात्रोपचिते विशेषाद्वमनक्रिया॥ * ॥

अथोदररोगे पथ्यम्।

विरेचनम्। लङ्घनम्। अब्दसम्भवकुलत्थमुद्गारुणशालियवाः। जाङ्गलम्रगपक्षिणः। सिता। सुरा। मार्त्तिकम्। सीधुः। माध्वीकम्। माड़वः। तक्रम्। रसोनम्। वपुतैलम्। आर्द्रकम्। शालिञ्चशाकम्। कुलकम्। कठिल्लकम्। पुनर्नवा। शिग्रुफलम्। हरीतकी। ताम्बूलम्। एला। यवशूकम्। आयसम्। अजागवोष्ट्रीमहिषीणां पयः मूत्रञ्च। लघूनि। तिक्तानि। दीपनानि। वस्त्रेण सम्वेष्टनम्। अग्निकर्म। विषप्रयोगः। विशेषतः प्लीहसञ्जाते वामे बाहौ धमनीव्यधः। वद्धाख्ये उदरके वातोत्थिते नाभेरधः यथाविधिशस्त्रविधिः। समीरणोत्थे वादितः घृतपानम्। अभ्यञ्जनम्। अनुवासनम्॥ * ॥

उदररोगे अपथ्यम्।

सम्वेदनम्। धूमपानम्। जलपानम्। शिराव्यधः। छर्द्दिः। स्नानम्। दिवानिद्रा। व्यायामः। पिष्टतैलम्। औदकानूपमांसम्। पत्रशाकम्। तिलः। उष्णानि। विदाहीनि। लवणाशनम्। शमीधान्यम्। विरुद्धान्नम्। दुष्टनीरम्। गुरूणि।

महेन्द्रगिरिजातानां नदीनां जलम्। विरूक्षाणि। छिद्रसमुद्भवे विशेषतः स्वेदः॥ * ॥

अथ शोथे पथ्यम्।

संशोधनम्। लङ्घनम्। असमोक्षः। स्वेदः। प्रलेपः। परिषेचनम्। पुरातनशालियवकुलत्थमुद्गाः। गोधा। शल्लकः। भुजङ्गभुकतित्तिरिताम्रचूड़लावादयो जाङ्गलविष्किराः। कूर्म्मः। मद्गुः। मधुपुराणसर्पिः। तक्रम्। सुरा। माक्षिकम्। आसवः। निष्पावः। कठिल्लकम्। रक्तशिग्रु। रसोनम्। कर्कोटकम्। मानमूलम्। सुवर्चला। शल्लनकः। पटोलम्। वैत्राग्रम्। वार्त्ताकुनम्। मूलकम्। पुनर्नवा। चित्रकम्। पारिभद्रः। श्रीपर्णम्। निम्बः। सुरपल्लवम्। एरण्डतैलम्। कटुका। हरिद्रा। हरीतकी। क्षारनिषेवणम्। भल्लातकम्। गुग्गुलुः। आयसम्। कटूनि। तिक्तानि। दीपनानि। गोऽजामहिषीभवमूत्राणि। कस्तूरिका। शिलाजतु। पाण्डुरोगोक्तवह्निकर्म्म॥ * ॥

शोथे अपथ्यम्।

मवनसलिलम्। वेगरोधः। विरुद्धपानाशनम्। विषमाशनम्। स्वप्नक्षयम्। ग्राम्यानानूपशिशितलवणं। शुष्कशाकम्। नवान्नम्। गौड़म्। पिष्टान्नम्। दधि। सम्भरम्। विज्जलम्। मद्यम्। अम्लम्। धानाः। वल्लूरम्। गुरु। असात्म्यम्। विदाहि। अरात्रौ स्वप्नः। मैथुनम्॥ * ॥

अथ वृद्धिब्रध्नाधिकारे पथ्यम्।

संशोधनम्। वस्तिः। अधविमोक्षः। स्वेदः। प्रलेपः। रक्तशालयः। एरण्डतैलम्। सुरभीजलम्। धन्वामिषम्। शिग्रुफलम्। पटोलम्। पुनर्नवा। गोक्षुरः। अग्निमन्थः। ताम्बूलम्। पथ्या। सरला। रसोनम्। वार्त्ताकुनम्। शल्लनकम्। मधूनि। कौम्भं घृतम्। तप्तजलम्। तक्रम्। आमवातापक्षमधिकारि चान्नपानम्। पुराणसुरा। अर्द्धेन्दुवद्दंशणयोर्दाहः। आमाशये पार्ष्णिशिराव्यधः॥ * ॥

ब्रध्नवृद्धावपथ्यम्।

विरुद्धपानान्नम्। असात्म्यसेवा। संक्षोभणम्। हस्तिहयादियानम्। आनूपमांसानि। दधीनि। माषाः। दुग्धानि। पिष्टान्नम्। उपोदिका। गुरूणि। शुक्रोत्थितवेगरोधः॥ * ॥

अथ गलगण्डादौ पथ्यम्।

छर्द्दिः। विरेचनम्। नस्यम्। स्वेदः। धूमः। शिराव्यधः। अग्निकर्म्म। क्षारयोगः। प्रलेपः। लङ्घनम्। पुराणघृतपानम्। जीर्णलोहितशालयः। यवाः। मुद्गाः। पटोलम्। रक्तशिग्रु। कठिल्लकम्। शालिञ्चशाकम्। वैत्राग्रम्। रूक्षाणि। कटूनि। सर्व्वाणि दीपनानि। गुग्गुलुः। शिलाजतु। विशेषतः जिह्वातलस्य शिराद्वयच्छेदः। मणिबन्धोर्द्ध्वं अङ्गुलान्तरास्तिस्रो रेखाः कार्य्याः। गलगण्डगण्डमालापचीग्रन्थ्यर्बुदातुरे यथादोषं यथावस्थं प्रसक्तं सर्व्वं पथ्यम्॥ * ॥

गलगण्डे अपथ्यम्।

सर्व्वक्षीरेक्षुविकृतिः। आनूपमांसम्। पिष्टान्नम्। अम्लम्। मधुरम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ श्लीपदे पथ्यम्।

प्रच्छर्द्दनम्। लङ्घनम्। असमोक्षः। स्वेदः। विरेकः। परिलेपनम्। पुरातनषष्टिकशालयः। यवाः। कुलत्थाः। लशुनम्। पटोलम्। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लम्। पुनर्नवा। मूलकम्। पूतिका। एरण्डतैलम्। सुरभीजलम्। कटूनि। तिक्तानि। दीपनानि। वातोद्भवे गुल्फोपरिष्टात् चतुरङ्गुले शिराव्यधः। पैत्तिके गुल्फतले शिराव्यधः। कफजे अङ्गुष्ठमूले शिराव्यधः॥ * ॥

श्लीपदे अपथ्यम्।

पिष्टान्नम्। दुग्धविकृतम्। गुड़ः। आनूपमामिषम्। स्वादुरसः। पारिपात्रसह्यविन्ध्यनदीजलम्। पिच्छिलम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ विद्रधौ पथ्यम्।

आमावस्थे रेचनलेपस्वेदासमोक्षणानि। जीर्णश्यामाककलमौ। कुलत्थः। लशुनम्। रक्तशिग्रु। निष्पावः। कारवेल्लः। पुनर्नवा। श्रीपर्णी। चित्रकम्। क्षौद्रम्। शोथोक्तानि सर्व्वाणि। पक्वावस्थे शस्त्रकर्म्म। पुराणरक्तशालिः। घृतम्। तैलम्। मुद्गरसः। विलेपी। धन्वजरसाः। शालिञ्चशाकम्। कदलम्। पटोलम्। हिमवालुका। चन्दनम्। तप्ताम्बु। शीताम्बु। व्रणोदितं सर्व्वम्॥ * ॥

विद्रधावपथ्यम्।

आमावस्थे शोथोक्तान्यपथ्यानि। पक्वावस्थे व्रणोक्तान्यपथ्यानि॥ * ॥

अथ व्रणशोथव्रणसद्योव्रणनाड़ीव्रणेषु पथ्यम्।

विम्लापनम्। रक्तस्रुतिः। उपनाहः। विपाटनम्। शोधनम्। रोपणम्। पुरातनमितशालयः। यवः। षष्टिकः। गोधूमः। जाङ्गलम्रगपक्षिणः। विलेपी। लाजमण्डः। कटुतैलम्। घृतम्। मधु। तैलम्। मसूरम्। तुवरी। मुद्गयूषः। शर्करा। आषाढ़फलम्। वार्त्ताकुः। कर्कोटकम्। पटोलम्। कारवेल्लम्। निम्बपत्रम्। वैत्राग्रम्। बालमूलकम्। सुनिषण्णकम्। शालिञ्चशाकम्। तण्डुलीयः। वास्तूकम्। त्रिफला। पनसम्। मोचम्। दाडिमम्। कटुकाफलम्। जीवन्ती। सैन्धवम्। द्राक्षा। स्वादुतिक्तकषायाः। स्निग्धोष्णद्रवोत्तरान्नम्। उद्वर्त्तनम्। शमनम्। दाहः। स्वेदनम्। बन्धनक्रिया। प्रक्षालपूर्व्वकम्। लेपः। धूपनम्। पत्रधारणम्। उशीरम्। बालव्यजनम्। चन्दनम्। निर्लेपनम्। तप्तशीताम्बु। कर्पूरम्। पक्वतः परा वैद्यता:॥ * ॥

व्रणशोथव्रणसद्योव्रणनाड़ीव्रणेषु अपथ्यम्।

नवधान्यम्। तिलः। कलायः। माषः।

क्षवः । हिमाम्भः । विविधक्षीरेक्षुविकारः । अम्लानि । पत्रशाकम् । अजाङ्गलमांसम् । अध्याशनम् । विदाहि । विष्टम्भि । गुरूणि । कटु । अम्लम् । शीतम् । लवणम् । अवायः । व्यायामः । उच्चैः परिभाषणम् । प्रियासमालोकनम् । अह्नि निद्रा । प्रजागरम् । नितान्तचंक्रमणम् । यथास्थितं प्राग्विरोधनम् । नस्यम् । ताम्बूलम् । अजीर्णता । पथश्रमः । आतपः । धूमः । वृष्टिः । रजः । भयम् । क्रोधः । वमिः । प्रहर्षः । शोकः । विरुद्धाशनम् । अम्बुपानम् । मोक्षणम् । उष्णम् । रूक्षम् । विघट्टनम् । कण्डूयनम् । काञ्चनक्षारादिसेकः । निरम्भभावः । विषमोपचारः ॥ * ॥

अथ भग्ने पथ्यम् ।

शीताम्बु । चन्दनम् । पद्मप्रदेहः । बन्धनक्रिया । शालिः । प्रियङ्गुः । गोधूमः । मुद्गसतीनयोर्यूषः । नवनीतम् । घृतम् । क्षीरम् । तैलम् । मांसरसः । मधु । पटोलम् । लशुनम् । शिग्रु । पत्तूरम् । बालमूलकम् । द्राक्षा । धात्री । [illegible] । लाक्षा । बृंहणम् ॥ * ॥

भग्ने अपथ्यम् ।

लवणम् । कटुकम् । क्षारः । अम्लः । मैथुनम् । आतपः । व्यायामः । रूक्षान्नम् ॥ * ॥

अथ भगन्दरे पथ्यम् ।

आमे संशोधनम् । लेपः । लङ्घनम् । रक्तमोक्षणम् । पक्वे यथाविधिशस्त्रवह्निक्षारकर्म्माणि । मर्षः । शालिः । मुद्गः । विलेपी । जाङ्गलरसः । पटोलम् । शिग्रु । वेत्राग्रम् । पत्तूरम् । बालमूलकम् । तिलसर्षपयोस्तैलम् । तिक्तवर्गः । घृतम् । मधु ॥ * ॥

भगन्दरे अपथ्यम् ।

विरुद्धान्नपानानि । विषमाशनम् । आतपः । व्यायामः । मैथुनम् । युद्धम् । पृष्ठयानम् । गुरूणि । रूढ़व्रणोऽपि नरः सम्वत्सरं यावत् सर्व्वं परिहरेत् ॥ * ॥

अथोपदंशे पथ्यम् ।

छर्द्दिः । विरेकः । अग्रमध्यनाडीवेधः । जलौका । परिपातनम् । सेकः । प्रलेपः । यवः । शालयः । धन्वामिषम् । मुद्गरसः । घृतम् । कठिल्लकम् । शिग्रुफलम् । पटोलम् । शालिञ्चशाकम् । नवमूलकम् । तिक्तम् । कषायम् । मधु । कूपवारि । तैलम् ॥ * ॥

उपदंशे अपथ्यम् ।

दिवानिद्रा । मूत्रवेगः । गुर्व्वन्नम् । मैथुनम् । गुडः । आयासः । अम्लम् । तक्रम् ॥ * ॥

अथ शूकदोषे पथ्यम् ।

लेपः । विरेकः । असृङ्मोक्षः । सर्पिःपानम् । शालिः । यवः । जाङ्गलमांसम् । मुद्गयूषः । कठिल्लकम् । पटोलम् । शिग्रु । कर्कोटम् । पत्तूरम् । बालमूलकम् । वेत्राग्रम् । आषाढ़फलम् । दाड़िमम् । सैन्धवम् । वचा । कूपोदकम् । गन्धसारः । कस्तूरी । हिमवालुका । तक्रम् । कषायम् । तैलम् ॥ * ॥

शूकदोषे अपथ्यम् ।

मूत्रवेगः । दिवानिद्रा । व्यायामः । मैथुनम् । गुड़ः । विदाहि । गुर्व्वन्नम् । तक्रम् ॥ * ॥

अथ कुष्ठरोगे पथ्यम् ।

पक्षात् पक्षात् छर्द्दनम् । मासात् मासाद्विरेचनम् । त्र्यहात् त्र्यहात् नस्यम् । षष्ठे षष्ठे मासि असृङ्मोक्षणम् । सर्पिर्लेपः । पुराणाः यवगोधूमशालिमुद्गाढ़कीमसूराः । माक्षिकम् । जाङ्गलामिषम् । आषाढ़फलम् । वेत्राग्रम् । पटोलम् । बृहतीफलम् । काकमाची । निम्बपत्रम् । लशुनम् । हिलमोचिका । पुनर्नवा । मेषशृङ्गम् । चक्रमर्द्ददलम् । भल्लातकम् । [illegible]सालम् । खदिरः । चित्रकः । वरा । जातीफलम् । नागपुष्पम् । कुङ्कुमम् । [illegible] । कोषातकी । करञ्जोमातिलसर्षपनिम्बेङ्गुदीभवतैलम् । लघूनि अन्नानि । सरलदेवदार्व्वग्निशिंशपागुरुसम्भवस्नेहः । गोखरोष्ट्राश्वमहिषीणां मूत्राणि । कस्तूरिका । गन्धसारः । तिक्तानि । क्षारकर्म्म ॥ * ॥

कुष्ठरोगे अपथ्यम् ।

पापकर्म्म । सत्त्वभावः । गुरुनिन्दा । गुरुधर्षणम् । विरुद्धपानाशनम् । दिवानिद्रा । चण्डांशुतापः । विषमाशनम् । स्वेदः । रतम् । वेगरोधः । इक्षुः । व्यायामः । अम्लम् । तिलः । माषः । द्रवगुरुनवान्नानां भोजनम् । विदाहि । विष्टम्भि । मूलकम् । सह्याद्रिविन्ध्याद्रिसम्भवनदीजलम् । आनूपमांसम् । दधि । दुग्धम् । मद्यम् । गुड़ः ॥ * ॥

अथ शीतपित्तोदर्द्दकोठरोगेषु पथ्यम् ।

छर्द्दिः । विरेचनम् । लेपः । असृङ्मोक्षः । पुराणशालिः । जाङ्गलामिषमुद्गकुलत्थानां यूषः । कर्कोटकम् । कारवेल्लम् । शिग्रु । मूलकपोतिका । शालिञ्चशाकम् । वेत्राग्रम् । दाड़िमम् । त्रिफला । मधु । कटुतैलम् । तप्तनीरम् । मितश्लेष्महरद्रव्यम् । सर्व्वकटुतिक्तकषायाणि ॥ * ॥

शीतपित्तादावपथ्यम् ।

विविधक्षीरेक्षुविकाराः । मत्स्यः । उदकानूपभवामिषम् । नवीनमद्यम् । वमिवेगरोधः । प्राग्दक्षिणाशापवनः । अह्नि निद्रा । स्नानम् । विरुद्धाशनम् । आतपः । स्निग्धम् । अम्लम् । मधुरम् । कषायः । गुर्व्वन्नपानानि ॥ * ॥

अथाम्लपित्ते पथ्यम् ।

ऊर्द्ध्वगे पूर्व्वं वमनम् । अधोगे पूर्व्वं विरेचनम् । पश्चादास्थापनम् । निरूहः । शालिः । यवः । गोधूमः । मुद्गः । जाङ्गलरसः । तप्तशीतजलानि । शर्करा । मधु । शक्तुः । कर्कोटकम् । कारवेल्लम् । पटोलम् । हिलमोचिका । वेत्राग्रम् । वृद्धकुष्माण्डम् । रम्भापुष्पम् । वास्तूकम् । कपित्थम् । दाड़िमम् । धात्री । तिक्तानि । कफपित्तहरपानाशनम् ॥ * ॥

अम्लपित्ते अपथ्यम् ।

नवान्नम् । विरुद्धद्रव्यम् । पित्तप्रकोपकरद्रव्यम् । वेगरोधः । तिलः । माषः । कुलत्थः । तैलभक्षणम् । अविदुग्धम् । धान्याम्लम् । लवणम् । अम्लम् । कटु । गुर्व्वन्नम् । दधि । मद्यम् ॥ * ॥

अथ विसर्पे पथ्यम् ।

विरेकः । वमनम् । लेपः । लङ्घनम् । रक्तमोक्षणम् । पुराणयवगोधूमकङ्गुषष्टिकशालयः । मुद्गः । मसूरः । चणकः । तुवरी । जाङ्गलरसः । नवनीतम् । घृतम् । द्राक्षा । दाड़िमम् । कारवेल्लकम् । वेत्राग्रम् । कुलकम् । धात्री । खदिरः । नागकेशरम् । लाक्षा । शिरीषः । कर्पूरम् । चन्दनम् । तिक्तलेपनम् । ह्रीवेरकम् । सुरुकम् । सकलानि तिक्तानि ।

विसर्पे अपथ्यम् ।

व्यायामः । अह्नि शयनम् । सुरतम् । प्रवातः । क्रोधः । शोकः । वमनम् । वेगः । अध्यशनम् । शाकम् । विरुद्धाशनम् । दधि । शुक्तिका । सौवीरकादि । अनेकविधकिलाटः । गुर्व्वन्नपानम् । लशुनम् । कुलत्थः । माषः । तिलः । सकलमजाङ्गलमांसम् । स्वेदः । विदाहि । लवणम् । अम्लम् । कटु । मद्यम् । अर्कप्रभा ॥ * ॥

अथ विस्फोटे पथ्यम् ।

विरेचनम् । छर्द्दनम् । लेपः । लङ्घनम् । पुरातनयष्टिकशालयः । यवः । मुद्गः । मसूरः । चणकः । मकुष्टकः । धन्वामिषम् । [illegible] । कठिल्लकम् । वेत्राग्रम् । आषाढ़फलम् । पटोलम् । ज्योतिष्मती । निम्बदलम् । चन्दनम् । तैलम् । सिताभ्रः । सितलेपः । अञ्जनम् । बालकम् ॥ * ॥

विस्फोटे अपथ्यम् ।

स्वेदः । व्यवायः । व्यायामः । क्रोधः । दुर्व्वान्नम् । आतपः । वमिवेगः । पत्रशाकम् । प्रवासः । दिवास्वप्नः । ग्राम्योदकम् । आनूपमांसम् । विरुद्धान्यशनानि । तिलः । माषः । कुलत्थः । लवणाम्लकटूनि । विदाहि । रूक्षम् । उष्णम् ॥ * ॥

अथ मसूर्य्यां पथ्यम् ।

पूर्व्वं लङ्घनवान्तिरेचनशिरावेधाः । प्रशस्तशालिषष्टिकशालयः । चणकः । मुद्गः । मसूरः । यवः । कपोतचटकदात्यूहकोक[illegible]दयः पक्षिणः । मद्गुः । कठिल्लम् । आषाढ़कम् । कर्कोटम् । कन्दम् । शिग्रु । वास्तुकम् । द्राक्षा । दाड़िमम् । [illegible] । कोलम् । मागधः । [illegible] सेकविधौ [illegible]शीतोदकम् । [illegible]कोदरकोषक्षीरम् । कर्पूरचूर्णम् । पक्वे सुरसः । आम्ररसः । शालिञ्चशाकम् । घृतम् । निर्गुण्डीजलम् । वचाधूपविधितो धूपः । दग्धगोमयभस्मगुण्ठनम् । सुप्ते शिवाशिवयोः पिचुमर्द्दपत्रनिशयोरालेपः । घने प्रलेपक्रिया ॥ * ॥

मसूर्य्यामपथ्यम्।

स्नानम्। स्वेदः। श्रमः। तैलम्। गुर्व्वन्नम्। क्रोधः। आतपः। दुष्टाम्बु। दुष्टपवनः। विरुद्धाशनम्। निष्पावः। आनूपशाकम्। लवणम्। विषमाशनम्। कटु। अम्लम्। वेगरोधः॥ *॥

अथ क्षुद्ररोगे पथ्यापथ्यम्। यथा,—

क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु।
दोषान् दूष्यानवस्थाञ्च निरीक्ष्य मतिमान् भिषक्।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः।
यथादोषं यथादूष्यं यथादृष्टञ्च कल्पयेत्॥ *॥

अथ मुखरोगे पथ्यम्।

स्वेदः। विरेकः। वमनम्। गण्डूषः। प्रतिसारणम्। कवलः। अस्रक्स्रुतिः। नस्यम्। धूमः। शस्त्राग्निकर्म्मणी। तृणधान्यम्। यवः। मुद्गः। कुलत्थः। जाङ्गलरसः। दृढतृणोष्ठी। कारवेल्लम्। पटोलम्। बालमूलकम्। कर्पूरनीरम्। ताम्बूलम्। तप्ताम्बु। खदिरः। घृतम्। कटु। तिक्तम्॥ *॥

मुखरोगे अपथ्यम्।

दन्तकाष्ठम्। स्नानम्। अम्लम्। मत्स्यः। आनूपामिषम्। दधि। क्षीरम्। गुडः। माषम्। रूक्षान्नम्। कठिनाशनम्। अधोमुखशयनम्। गुरु। अभिष्यन्दकारि। दिवानिद्रा॥ *॥

अथ कर्णरोगे पथ्यम्।

स्वेदः। विरेकः। वमनम्। नस्यम्। धूमः। सिराव्यधः। गोधूमः। शालिः। मुद्गः। यवः। पुरातनहविः। लावः। मयूरः। हरिणः। तित्तिरिः। वनकुक्कुटः। पटोलम्। शिग्रु। वार्त्ताकुः। सुनिषण्णम्। कठिल्लकम्। रसायनपयम्। ब्रह्मचर्य्यम्। अभाषणम्॥ *॥

कर्णरोगे अपथ्यम्।

विरुद्धान्नपानम्। वेगरोधः। प्रजल्पनम्। दन्तकाष्ठम्। शिरःस्नानम्। व्यवायः। श्लेष्मलम्। गुरु। कण्डूयनम्। तुषारः॥ *॥

अथ नासारोगे पथ्यम्।

निर्व्वातनिलयस्थितिः। प्रगाढ़ोष्णीषधारणम्। गण्डूषः। लङ्घनम्। नस्यम्। धूमः। छर्द्दिः। सिराव्यधः। कटुचूर्णं नासारन्ध्रे निःक्षिप्य क्षिः प्रवेशनम्। स्वेदः। सेकः। शिरोऽभ्यङ्गः। पुराणा यवशालयः। कुलत्थमुद्गयोर्यूषः। ग्राम्यजाङ्गलजा रसाः। वार्त्ताकुः। कुलकम्। शिग्रु। कर्कोटः। बालमूलकम्। लशुनम्। दधि। तप्ताम्बु। वारुणी। कटुवर्गः। कटु। अम्लम्। लवणम्। स्निग्धम्। उष्णम्। लघुभोजनम्॥ *॥

नासारोगे अपथ्यम्।

विरुद्धान्नम्। दिवास्वप्नः। अभिष्यन्दि। गुरूणि। स्नानम्। क्रोधः। शकृन्मूत्रवाष्पाणां वेगधारणम्। शोकः। द्रवम्। भूशय्या॥ *॥

अथ नेत्ररोगे पथ्यम्।

आश्च्योतनम्। लङ्घनम्। अञ्जनम्। स्वेदः। विरेकः। प्रतिसारणम्। प्रपूरणम्। नस्यम्। असृङ्मोक्षः। शस्त्रक्रिया। लेपनम्। आश्च्यपानम्। सेकः। मनोनिर्वृतिः। अङ्घ्रिपूजा। मुद्गः। यवः। लोहितशालिः। लावः। मयूरः। वनकुक्कुटः। कूर्म्मः। कुलिङ्गः। कपिञ्जलः। कौर्म्मं हविः। वन्यकुलत्थयूषः। पेया। विलेपी। लशुनम्। पटोलम्। वार्त्ताकुः। कर्कोटकः। कारवेल्लम्। नवीनमोचम्। नवमूलकम्। पुनर्नवा। मार्कवः। काकमाची। मधुरशाकम्। कुमारिका। द्राक्षा। कुस्तुम्बुरु। माक्षिकमत्स्यम्। लोध्रम्। वरा। क्षौद्रम्। उपानहौ। नारीपयः। चन्दनम्। इन्दुखण्डम्। तिक्तम्। लघु॥

नेत्ररोगे अपथ्यम्।

क्रोधः। शोकः। मैथुनम्। अश्रुवायुविण्मूत्रनिद्रावमीनां वेगरोधः। सूक्ष्मेक्षणम्। दन्तविघर्षणम्। स्नानम्। निशाभोजनम्। आतपः। प्रजल्पनम्। छर्द्दनम्। अम्बुपानम्। मधूकपुष्पम्। दधि। पत्रशाकम्। कलिङ्गम्। पिण्याकः। विरूढ़कम्। मत्स्यः। सुरा। अजाङ्गलमांसम्। ताम्बूलम्। अम्लम्। लवणम्। विदाहि। तीक्ष्णम्। कटु। उष्णम्। गुर्व्वन्नपानम्॥ *॥

अथ शिरोरोगे पथ्यम्।

स्वेदः। नस्यम्। धूमपानम्। विरेकः। लेपः। छर्द्दिः। लङ्घनम्। शीर्षवस्तिः। रक्तोन्मुक्तिः। वह्निकर्म्म। उपनाहः। जीर्णसर्पिः। शालिः। षष्टिकः। यूषः। दुग्धम्। धन्वमांसम्। पटोलम्। शिग्रु। द्राक्षा। वास्तूकम्। कारवेल्लम्। आम्रम्। धात्री। दाड़िमम्। मातुलुङ्गम्। तैलम्। तक्रम्। काञ्जिकम्। नारिकेलम्। पथ्या। कुष्ठम्। भृङ्गराजः। कुमारी। मुस्तः। उशीरम्। चन्द्रिका। गन्धसारः। कर्पूरम्॥ *॥

शिरोरोगे अपथ्यम्।

क्षवथुजृम्भमूत्राश्रुनिद्राविड्जानां वेगधारणम्। अञ्जनम्। दुष्टनीरम्। विरुद्धान्नम्। सह्यविन्ध्यसरिज्जलम्। दन्तकाष्ठम्। दिवानिद्रा॥ *॥

अथ स्त्रीरोगे पथ्यापथ्यम्।

यत्पथ्यं यदपथ्यञ्च रक्तपित्तेषु कीर्त्तितम्।
प्रदरेषु यथादोषं तत्तन्नारी भजेत्त्यजेत्॥
वातव्याधिमतां पथ्यमपथ्यञ्च यदीरितम्।
योनिव्यापत्सु सर्व्वासु तद्विद्याच्च यथामलम्॥ *॥

अथ गर्भिणीपथ्यम्।

शालिः। षष्टिकः। मुद्गः। गोधूमः। लाजसक्तुः। नवनीतम्। घृतम्। क्षीरम्। रसाला। मधु। शर्करा। पनसम्। कदलम्। धात्री। द्राक्षा। अम्लम्। स्वादु। शीतलम्। कस्तूरी। चन्दनम्। माला। कर्पूरम्। अनुलेपनम्। चन्द्रिका। स्नानम्। अभ्यङ्गः। मृदुशय्या। हिमानिलः। सन्तर्पणम्। प्रियवाक्। मनोरमविहारः। प्रियङ्गुराग्रपानम्॥ *॥

गर्भिण्या अपथ्यम्।

स्वेदनम्। वमनम्। क्षारः। कलहः। विषमाशनम्। अकालाशम्। नक्तञ्चारः। चौर्य्यम्। अप्रियदर्शनम्। अतिव्यवायः। आयासः। भारः। गुरुप्रावरणम्। अकालजागरणं स्वप्नञ्च। कठिनोत्कटकासनम्। शोकः। क्रोधः। भयम्। उद्वेगः। श्रद्धा। वेगविधारणम्। उपवासः। अध्वगमनम्। तीक्ष्णोष्णगुरुविष्टम्भिभोजनम्। नक्तम्। निरशनम्। श्वभ्रकूपेक्षणम्। मद्यम्। आमिषम्। उत्तानशयनम्। स्त्रीणामनौचितम्॥ *॥

अष्टममासमारभ्य गर्भिण्या अपथ्यं यथा,—

तथा रक्तस्रुतिं शुद्धिं वस्तिमामासतोऽष्टमात्।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा॥
भजेन्न नित्यं तिक्ताम्लकटूष्णकषायकान्।
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः॥
पित्तलैः खलती पिङ्गः श्वित्री पङ्गः कफात्मभिः।
अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः॥ *॥

अथ प्रसूतायाः पथ्यम्।

लङ्घनम्। स्वेदस्वेदः। गर्भकोष्ठविशोधनम्। अभ्यञ्जनम्। तैलपानम्। कटुतिक्तोष्णसेवनम्। दीपनम्। पाचनम्। मद्यम्। पुराणयवषष्टिशालयः। कुलत्थः। लशुनम्। शिग्रु। वार्त्ताकुः। बालमूलकम्। पटोलम्। मातुलुङ्गम्। ताम्बूलम्। दाड़िमद्वयम्। श्लेष्मानिलघ्नानि। अर्द्धमासात् परं किञ्चित् हंहणम्। द्वादशाहात् परं आमिषम्। सार्द्धमासात् परं आहारादियन्त्रणात्यागः॥ *॥

प्रसूताया अपथ्यम्।

श्रमः। नस्यम्। रक्तस्रुतिः। मैथुनम्। विषमाशनम्। विरुद्धान्नम्। वेगरोधः। असात्म्यम्। अतिभोजनम्। दिवानिद्रा। अभिष्यन्दि। विष्टम्भि गुरुभोजनम्॥

सूतिकायाश्च रोगेषु वातश्लेष्मपित्तानि च।
तत्तद्रोगानुकूल्येन पथ्यापथ्यानि निर्द्दिशेत्॥ *॥

अथ बालरोगे पथ्यापथ्यम्।

वृद्धाः ज्वरादिषु यत् पथ्यापथ्यं बालानामौचित्यात् तद्विधेयम्। मन्दाग्नौ यत् पथ्यापथ्यं बालानां पारिगर्भिके तद्विधेयम्। आगन्तुकोन्मादिनां यत् पथ्यापथ्यं बालानां ग्रहरोगिणां तद्योज्यम्॥ *॥

अथ विषरोगे पथ्यम्।

अरिष्टाबन्धनम्। मन्त्रक्रिया। छर्द्दिः। विरेचनम्। लङ्घनम्। शोणितस्रुतिः। परिषेकः। अवगाहनम्। हृदयावरणम्। नस्यम्। अञ्जनम्। प्रतिसारणम्। उत्कर्त्तनम्। प्रशमनम्। प्रलेपः। वह्निकर्म्म। उपधानम्। प्रतिविषम्। धूपः। संज्ञाप्रबोधनम्। शालिः। षष्टिकः। कोरदूषः। प्रियङ्गुः। मुद्गः। हरेणुः। तैलम्। सर्पिः। शिखितित्तिरिलावैणगोधाशशहरिणामिषम्। वार्त्ताकुः। कुलकम्। धात्री। निष्पावः। तण्डुलीयः। मण्डूकपर्णी। जीवन्ती। सुनिषण्णम्।

ज्वरः । हिमाम्भः । विविधक्षीरेक्षुविकारः । अम्लानि । पत्रशाकम् । अजाङ्गलमांसम् । अध्यशनम् । विदाहि । विष्टम्भि । गुरूणि । कटु । अम्लम् । शीतम् । लवणम् । कषायः । व्यायामः । उच्चैः परिभाषणम् । प्रियाप्रमालोकनम् । अति निद्रा । प्रजागरम् । नितान्तचङ्क्रमणम् । यथास्थितं प्रागविरोधिपथ्यम् । नस्यम् । ताम्बूलम् । अजीर्णता । प्रबलवातः । आतपः । धूमः । वृष्टिः । रजः । भयम् । क्रोधः । वमिः । प्रहर्षः । शोकः । विरुद्धाशनम् । अम्बुपानम् । शोधनम् । उष्णम् । स्नानम् । विषदूषणम् । कण्डूयनम् । काष्ठनखादिनोदः । निरन्नभावः । विषमोपचारः ॥ ० ॥

अथ भग्ने पथ्यम् ।

शीताम्बु । चन्दनम् । पङ्कप्रदेहः । बन्धनक्रिया । शालिः । प्रियङ्गुः । गोधूमः । मुद्गमसूरयोर्यूषः । नवनीतम् । घृतम् । क्षीरम् । तैलम् । मांसरसः । मधु । पटोलम् । लशुनम् । शिग्रु । मयूरम् । बालमूलकम् । द्राक्षा । धात्री । वज्रवल्ली । लाक्षा । बृंहणम् ॥ ० ॥

भग्ने अपथ्यम् ।

लवणम् । कटुकम् । क्षारः । अम्लः । मैथुनम् । आतपः । व्यायामः । रूक्षान्नम् ॥ ० ॥

अथ भगन्दरे पथ्यम् ।

आमे संशोधनम् । लेपः । लङ्घनम् । रक्तमोक्षणम् । पक्वे यथाविधिशस्त्राग्निक्षारकर्माणि । सर्पिः । शालिः । मुद्गः । विलेपी । जाङ्गलरसः । पटोलम् । शिग्रु । वेत्राग्रम् । मसूरम् । बालमूलकम् । तिलसर्षपयोस्तैलम् । तिक्तवर्गः । घृतम् । मधु ॥ ० ॥

भगन्दरे अपथ्यम् ।

विरुद्धान्नपानानि । विषमाशनम् । आतपः । व्यायामः । मैथुनम् । युद्धम् । पृष्ठयानम् । गुरूणि । रूढव्रणोऽपि नरः सम्वत्सरं एतत् सर्व्वं परिहरेत् ॥ ० ॥

अथोपदंशे पथ्यम् ।

छर्दिः । विरेकः । रक्तमोक्षणाय शिरावेधः । जलौका । परिषेचनम् । सेकः । प्रलेपः । यवः । शालयः । धन्वामिषम् । मुद्गरसः । घृतम् । कठिल्लकम् । शिग्रुफलम् । पटोलम् । शालिञ्चशाकम् । नवमूलकम् । तिक्तम् । कषायम् । मधु । शुभवारि । तैलम् ॥ ० ॥

उपदंशे अपथ्यम् ।

दिवानिद्रा । मूत्रवेगः । गुर्व्वन्नम् । मैथुनम् । गुडः । व्यायामः । अम्लम् । तक्रम् ॥ ० ॥

अथ शूकदोषे पथ्यम् ।

लेपः । विरेकः । असृङ्मोक्षः । सर्पिःपानम् । शालिः । यवः । जाङ्गलमांसम् । मुद्गयूषः । कठिल्लकम् । पटोलम् । शिग्रु । कर्कोटम् । पनसम् । बालमूलकम् । वेत्राग्रम् । आषाढ़फलम् । दाड़िमम् । सैन्धवम् । वचा । क्षुपोदकम् । गन्धसारः । कस्तूरी । हिमवालुका । तक्रम् । कषायम् । तैलम् ॥ ० ॥

शूकदोषे अपथ्यम् ।

मूत्रवेगः । दिवानिद्रा । व्यायामः । मैथुनम् । गुडः । विदाहि । गुरुभक्ष्यम् । तक्रम् ॥ ० ॥

अथ कुष्ठरोगे पथ्यम् ।

पक्षात् पक्षात् छर्द्दनम् । मासात् मासाद्विरेचनम् । त्र्यहात् त्र्यहात् नस्यम् । षष्ठे षष्ठे मासि असृङ्मोक्षणम् । सर्पिर्लेपः । पुराणाः यवगोधूमशालिमुद्गाढकीमसूराः । माक्षिकम् । जाङ्गलामिषम् । आषाढ़फलम् । वेत्राग्रम् । पटोलम् । बृहतीफलम् । काकमाची । निम्बपत्रम् । लशुनम् । हिलमोचिका । पुनर्नवा । मेषशृङ्गम् । चक्रमर्द्ददलम् । भल्लातकम् । मक्षसालम् । खदिरः । चित्रकः । वरा । जातीफलम् । नागपुष्पम् । कुङ्कुमम् । प्रपुन्नाडः । कोशातकी । करञ्जमातिलसर्षपनिम्बेङ्गुदीभवतैलम् । लघूनि अन्नानि । सरलदेवदारुशिंशपागुरुसम्भवस्नेहः । गोखरोष्ट्राश्वमहिषीणां मूत्राणि । कस्तूरिका । गन्धसारः । तिक्तानि । क्षारकर्म ॥ ० ॥

कुष्ठरोगे अपथ्यम् ।

पापकर्म । कृतघ्नभावः । गुरुनिन्दा । गुरुधर्षणम् । विरुद्धपानाशनम् । दिवानिद्रा । चण्डांशुतापः । विषमाशनम् । स्वेदः । रतम् । वेगरोधः । इक्षुः । व्यायामः । अम्लम् । तिलः । माषः । द्रवगुरुनवान्नानां भोजनम् । विदाहि । विष्टम्भि । मूलकम् । सह्याद्रिविन्ध्यादिप्रसूतनदीजलम् । आनूपमांसम् । दधि । दुग्धम् । मद्यम् । गुडः ॥ ० ॥

अथ शीतपित्तोदर्दकोठरोगेषु पथ्यम् ।

छर्दिः । विरेचनम् । लेपः । असृङ्मोक्षः । पुराणशालिः । जाङ्गलामिषमुद्गकुलत्थानां यूषः । कर्कोटकम् । कारवेल्लम् । शिग्रु । मूलकपोतिका । शालिञ्चशाकम् । वेत्राग्रम् । दाड़िमम् । त्रिफला । मधु । कटुतैलम् । तप्तनीरम् । पित्तश्लेष्महरद्रव्यम् । सर्व्वकटुतिक्तकषायाणि ॥ ० ॥

शीतपित्तादावपथ्यम् ।

विविधक्षीरेक्षुविकाराः । मत्स्याः । उदकानूपभवामिषम् । नवीनमद्यम् । वमिवेगरोधः । प्राग्दक्षिणाशापवनः । अति निद्रा । स्नानम् । विरुद्धाशनम् । आतपः । स्निग्धम् । अम्लम् । मधुरम् । कषायः । गुर्व्वन्नपानानि ॥ ० ॥

अथाम्लपित्ते पथ्यम् ।

ऊर्द्ध्वगे पूर्व्वं वमनम् । अधोगे पूर्व्वं विरेचनम् । पश्चादनुवासनम् । निरूहः । शालिः । यवः । गोधूमः । मुद्गः । जाङ्गलरसः । तप्तशीतजलानि । शर्करा । मधु । सक्तुः । कर्कोटकम् । कारवेल्लम् । पटोलम् । हिलमोचिका । वेत्राग्रम् । वृद्धकुष्माण्डम् । रम्भापुष्पम् । वास्तूकम् । कपित्थम् । दाड़िमम् । धात्री । तिक्तानि । कफपित्तहरपानान्नम् ॥ ० ॥

अम्लपित्ते अपथ्यम् ।

नवान्नम् । विरुद्धद्रव्यम् । पित्तप्रकोपकद्रव्यम् । वेगरोधः । तिलः । माषः । कुलत्थः । तैलभक्षणम् । अविदुग्धम् । धान्याम्लम् । लवणम् । अम्लम् । कटु । गुर्व्वन्नम् । दधि । मद्यम् ॥ ० ॥

अथ विसर्पे पथ्यम् ।

विरेकः । वमनम् । लेपः । लङ्घनम् । रक्तमोक्षणम् । पुराणयवगोधूमषष्टिकशालयः । मुद्गः । मसूरः । चणकः । तुवरी । जाङ्गलरसः । नवनीतम् । घृतम् । द्राक्षा । दाड़िमम् । कारवेल्लकम् । वेत्राग्रम् । कुलकम् । धात्री । खदिरः । नागकेशरम् । लाक्षा । शिरीषः । कर्पूरम् । चन्दनम् । तिक्तलेपनम् । ह्रीवेरकम् । मुस्तकम् । सकलानि तिक्तानि ॥

विसर्पे अपथ्यम् ।

व्यायामः । अति शयनम् । सुरतम् । प्रवातः । क्रोधः । शोकः । वमनम् । वेगः । अध्यशनम् । शाकम् । विरुद्धाशनम् । दधि । कूर्चिका । सौवीरकादि । अनेकविधकिलाटः । गुर्व्वन्नपानम् । लशुनम् । कुलत्थः । माषः । तिलः । सकलमजाङ्गलमांसम् । स्वेदः । विदाहि । लवणम् । अम्लम् । कटु । मद्यम् । अर्कप्रभा ॥ ० ॥

अथ विस्फोटे पथ्यम् ।

विरेचनम् । छर्द्दनम् । लेपः । लङ्घनम् । पुराणषष्टिकशालयः । यवः । मुद्गः । मसूरः । चणकः । मकुष्ठकः । धन्वामिषम् । मधूकम् । कठिल्लकम् । वेत्राग्रम् । आषाढ़फलम् । पटोलम् । ज्योतिष्मती । निम्बदलम् । चन्दनम् । तैलम् । सिताभ्रः । तिक्तलेपः । लघ्वन्नम् । शालम् ॥ ० ॥

विस्फोटे अपथ्यम् ।

स्वेदः । कषायः । व्यायामः । क्रोधः । गुर्व्वन्नम् । आतपः । वमिवेगः । पत्रशाकम् । प्रवातः । दिवास्वप्नः । अम्भोदकम् । आनूपमांसम् । विरुद्धान्नपानानि । तिलः । माषः । कुलत्थः । लवणाम्लकटूनि । विदाहि । रूक्षम् । उष्णम् ॥ ० ॥

अथ मसूर्यां पथ्यम् ।

पूर्व्वं लङ्घनवमनविरेचनशिराव्यधाः । शालिजीर्णषष्टिकशालयः । चणकः । मुद्गः । मसूरः । यवः । कर्कोटपटोलकारवेल्लकोषातकीवार्त्ताकुमूलकादयः पथ्याः । मङ्गलः । कठिल्लम् । आषाढ़कम् । कर्कोटम् । करञ्जम् । शिग्रु । रूचकम् । द्राक्षा । दाड़िमम् । हैमवंशलोचनम् । कोलम् । मालूरः । अक्षोटिकाविषौ । नवमधुकोद्भवशीतोदकम् । उक्षुकोदरक्षीरम् । कर्पूरचूर्णम् । पक्वे शुष्करसः । जाङ्गलरसः । शालिञ्चशाकम् । घृतम् । शिंशपाजलम् । गन्धधूमार्जितो धूमः । श्वेतगोमयभस्मगुण्डनम् । शुष्के त्रिफलादिकैः पिचुमर्द्दपत्रशिरीषोदुम्बरलेपः । दाहे शीतक्रिया ॥ ० ॥

मद्यामयेऽपथ्यम्।

रतम्। स्वेदः। श्रमः। तैलम्। गुर्व्वन्नम्। क्रोधः। आतपः। दुष्टाम्बु। दुष्टपवनः। विरुद्धाशनम्। निष्पावः। आनूपशाकम्। लवणम्। विषमाशनम्। कटु। अम्लम्। वेगरोधः॥ *॥

अथ क्षुद्ररोगे पथ्यापथ्यम्। यथा,—
क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु।
दोषान् दूष्यानवस्थाश्च निरीक्ष्य मतिमान् भिषक्।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः।
यथादोषं यथादृष्टं यथाहृष्टञ्च कल्पयेत्॥ *॥

अथ मुखरोगे पथ्यम्।

स्वेदः। विरेकः। वमनम्। गण्डूषः। प्रतिसारणम्। कवलः। रक्तस्रुतिः। नस्यम्। धूमः। शस्त्राग्निकर्म्मणी। तृणधान्यम्। यवः। मुद्गः। कुलत्थः। जाङ्गलरसः। हस्ततृप्रोष्ठी। कारवेल्लम्। पटोलम्। बालमूलकम्। कर्पूरनीरम्। ताम्बूलम्। तप्ताम्बु। खदिरः। घृतम्। कटु। तिक्तम्॥ *॥

मुखरोगे अपथ्यम्।

दन्तकाष्ठम्। स्नानम्। अम्लम्। मत्स्यः। आनूपामिषम्। दधि। क्षीरम्। गुडः। माषम्। रूक्षान्नम्। कठिनाशनम्। अधोमुखशयनम्। गुरु। अभिष्यन्दकारि। दिवानिद्रा॥ *॥

अथ कर्णरोगे पथ्यम्।

स्वेदः। विरेकः। वमनम्। नस्यम्। धूमः। शिराव्यधः। गोधूमः। शालिः। मुद्गः। यवः। पुरातनहविः। लावः। मयूरः। हरिणः। तित्तिरिः। वनकुक्कुटः। पटोलम्। शिग्रु। वार्त्ताकुः। सुनिषण्णम्। कठिल्लकम्। रसायनद्रव्यम्। ब्रह्मचर्य्यम्। अभाषणम्॥ *॥

कर्णरोगे अपथ्यम्।

विरुद्धान्नपानम्। वेगरोधः। प्रजल्पनम्। दन्तकाष्ठम्। शिरःस्नानम्। व्यवायः। श्लेष्मलम्। गुरु। कण्डूयनम्। तुषारः॥ *॥

अथ नासारोगे पथ्यम्।

निर्व्वातनिलयस्थितिः। उपानहोष्णीषधारणम्। गण्डूषः। लङ्घनम्। नस्यम्। धूमः। छर्द्दिः। शिराव्यधः। कटुचूर्णं नासारन्ध्रे निःक्षिप्य चिः प्रवेशनम्। स्वेदः। स्नेहः। शिरोऽभ्यङ्गः। पुराणा यवशालयः। कुलत्थमुद्गयोर्यूषः। ग्राम्यजाङ्गलजा रसाः। वार्त्ताकुः। कुलकम्। शिग्रु। कर्कोटः। बालमूलकम्। लशुनम्। दधि। तप्ताम्बु। वारुणी। कटुत्रयम्। कटु। अम्लम्। लवणम्। स्निग्धम्। उष्णम्। लघुभोजनम्॥ *॥

नासारोगे अपथ्यम्।

विरुद्धान्नम्। दिवास्वप्नः। अभिष्यन्दि। गुर्व्वि। स्नानम्। क्रोधः। शकृन्मूत्रवाष्पानां वेगधारणम्। शोकः। नवम्। भूशय्या॥ *॥

अथ नेत्ररोगे पथ्यम्।

आश्च्योतनम्। लङ्घनम्। अञ्जनम्। स्वेदः। विरेकः। प्रतिसारणम्। प्रपूरणम्। नस्यम्। असृङ्मोक्षः। शस्त्रक्रिया। लेपनम्। आज्यपानम्। सेकः। मनोनिर्वृतिः। अङ्घ्रिपूजा। मुद्गः। यवः। लोहितशालिः। लावः। मयूरः। वनकुक्कुटः। कूर्म्मः। कुलिङ्गः। कपिञ्जलः। कौर्म्मं हविः। वन्यकुलत्थयूषः। पेया। विलेपी। लशुनम्। पटोलम्। वार्त्ताकुः। कर्कोटकः। कारवेल्लम्। नवीनमोचम्। नवमूलकम्। पुनर्नवा। मार्कवः। काकमाची। मधूरशाकम्। कुमारिका। द्राक्षा। कुस्तुम्बुरु। माणिमन्थम्। लोध्रम्। वरा। क्षौद्रम्। उपानहौ। नारीपयः। चन्दनम्। इन्दुखण्डम्। तिक्तम्। लघु॥

नेत्ररोगे अपथ्यम्।

क्रोधः। शोकः। मैथुनम्। अश्रुवायुविण्मूत्रनिद्रावमीनां वेगरोधः। सूक्ष्मेक्षणम्। दन्तविघर्षणम्। स्नानम्। निशाभोजनम्। आतपः। प्रजल्पनम्। छर्द्दनम्। अम्बुपानम्। मधूकपुष्पम्। दधि। पत्रशाकम्। कठिल्लम्। पिण्याकः। विरूढकम्। मत्स्यः। सुरा। अजाङ्गलमांसम्। ताम्बूलम्। अम्लम्। लवणम्। विदाहि। तीक्ष्णम्। कटु। उष्णम्। गुर्व्वन्नपानम्॥ *॥

अथ शिरोरोगे पथ्यम्।

स्वेदः। नस्यम्। धूमपानम्। विरेकः। लेपः। छर्द्दिः। लङ्घनम्। शीर्षवस्तिः। रक्तोन्मुक्तिः। वह्निकर्म्म। उपनाहः। जीर्णसर्पिः। शालिः। षष्टिकः। यूषः। दुग्धम्। धन्वमांसम्। पटोलम्। शिग्रु। द्राक्षा। वास्तूकम्। कारवेल्लम्। आम्रम्। धात्री। दाडिमम्। मातुलुङ्गम्। तैलम्। तक्रम्। काञ्जिकम्। नारिकेलम्। पथ्या। कुष्ठम्। भृङ्गराजः। कुमारी। मुस्ता। उशीरम्। चन्द्रिका। गन्धसारः। कर्पूरम्॥ *॥

शिरोरोगे अपथ्यम्।

क्षवजृम्भमूत्रवाष्पनिद्राविड़ानां वेगधारणम्। अञ्जनम्। दुष्टनीरम्। विरुद्धान्नम्। सह्यविन्ध्यसरिज्जलम्। दन्तकाष्ठम्। दिवानिद्रा॥ *॥

अथ स्त्रीरोगे पथ्यापथ्यम्।
यत्पथ्यं यदपथ्यञ्च रक्तपित्तेषु कीर्त्तितम्।
प्रदरेषु यथादोषं तत्तन्नारी भजेत्क्रमात्।
वातव्याधिमतां पथ्यमपथ्यञ्च यदीरितम्।
योनिव्यापत्सु सर्व्वासु तद्विद्याच्च यथामलम्॥ *॥

अथ गर्भिण्याः पथ्यम्।

शालिः। षष्टिकः। मुद्गः। गोधूमः। लाजसक्तुः। नवनीतम्। घृतम्। क्षीरम्। रसाला। मधु। शर्करा। पनसम्। कदलम्। धात्री। द्राक्षा। अम्लम्। स्वादु। शीतलम्। कस्तूरी। चन्दनम्। माला। कर्पूरम्। अनुलेपनम्। चन्द्रिका। स्नानम्। अभ्यङ्गः। मृदुशय्या। हिमानिलः। सन्तर्पणम्। प्रियवाक्। मनोरमविहारः। प्रियदुराप्रपानम्॥ *॥

गर्भिण्या अपथ्यम्।

स्वेदनम्। वमनम्। क्षारः। कलहः। विषमाशनम्। अपालयम्। नक्तचारः। चौर्य्यम्। अप्रियदर्शनम्। अतिव्यवायः। आयासः। भारः। गुरुप्रावरणम्। अकालजागरणं स्वप्नश्च। कठिनोत्कटकासनम्। शोकः। क्रोधः। भयम्। उद्वेगः। श्रद्धा। वेगविधारणम्। उपवासः। अध्वगमनम्। तीक्ष्णोष्णगुरुविष्टम्भिभोजनम्। गर्त्तम्। निरशनम्। श्वभ्रकूपेक्षणम्। मद्यम्। आमिषम्। उत्तानशयनम्। स्त्रीणामनीप्सितम्॥ *॥

अष्टममासमारभ्य गर्भिण्या अपथ्यं यथा,—
तथा रक्तस्रुतिं शुद्धिं वस्तिमामासतोऽष्टमात्।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा॥
भजेन्न नित्यं तिक्ताम्लकटूष्णकषायकान्।
वातलैश्च भवेद्गर्भः कुब्जान्धजडवामनः॥
पित्तजैः खलती पिङ्गः श्वित्री पङ्गुः कफात्मभिः।
अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः॥ *॥

अथ प्रसूतायाः पथ्यम्।

लङ्घनम्। मृदुस्वेदः। गर्भकोष्ठविशोधनम्। अभ्यञ्जनम्। तैलपानम्। कटुतिक्तोष्णसेवनम्। दीपनम्। पाचनम्। मद्यम्। पुराणषष्टिशालयः। कुलत्थः। लशुनम्। शिग्रु। वार्त्ताकुः। बालमूलकम्। पटोलम्। मातुलुङ्गम्। ताम्बूलम्। दाडिमद्वयम्। श्लेष्मानिलघ्नानि। पञ्चाहात् परं किञ्चित् बृंहणम्। द्वादशाहात् परं आमिषम्। सार्द्धमासात् परं आहारादियन्त्रणात्यागः॥ *॥

प्रसूताया अपथ्यम्।

श्रमः। नस्यम्। रक्तस्रुतिः। मैथुनम्। विषमाशनम्। विरुद्धान्नम्। वेगरोधः। अपालयम्। अतिभोजनम्। दिवानिद्रा। अभिष्यन्दि। विष्टम्भि गुरुभोजनम्॥
सूतिकायाश्च रोगेषु वातश्लेष्मोचितानि च।
तत्तद्दोषानुकूल्येन पथ्यापथ्यानि निर्द्दिशेत्॥ *॥

अथ बालरोगे पथ्यापथ्यम्।

शूलज्वरादिषु यत् पथ्यापथ्यं बालानामौचित्यात् तद्विधेयम्। मन्दाग्नौ यत् पथ्यापथ्यं बालानां पारिगर्भिके तद्विधेयम्। आगन्तुकोत्थादीनां यत् पथ्यापथ्यं बालानां पक्वरोगिणां तद्योज्यम्॥ *॥

अथ विषरोगे पथ्यम्।

अरिष्टाबन्धनम्। मन्त्रक्रिया। छर्द्दिः। विरेचनम्। रूक्षणम्। शोणितस्रुतिः। परिषेकः। अवगाहनम्। हृदयावरणम्। नस्यम्। अञ्जनम्। प्रतिसारणम्। उत्कर्षणम्। प्रधमनम्। प्रलेपः। वह्निकर्म्म। उपधानम्। प्रतिविषम्। धूपः। संज्ञासम्बोधनम्। शालिः। षष्टिकः। कोरदूषः। प्रियङ्गुः। मुद्गः। हरेणुः। तैलम्। सर्पिः। शिखितित्तिरिलावैणगोधाशल्यविशालामिषम्। वार्त्ताकुः। कुलकम्। धात्री। निष्पावः। तण्डुलीयः। मधुकपर्णी। जीवन्ती। हिमजलम्।

उपोदिका । कालशाकम् । लशुनम् । दाडिमम् । विकङ्कतम् । प्राचीनामलकम् । मद्या । कपित्थम् । नागकेशरम् । गोक्षुरागरुमुस्ताग्नि । तक्रम् । शीताम्बु । शर्करा । अविदाहीन्यन्नानि । सैन्धवम् । मधु । कुङ्कुमम् । पश्चिमोत्तरवातः । हरिद्रा । सितचन्दनम् । सुधाम् । शिरीषः । कस्तूरी । तिक्तानि । मधुराणि । हेमचूर्णम् ॥ * ॥

विषरोगे अपथ्यम् ।

क्रोधः । विरुद्धाशनम् । अध्यशनम् । व्यवायः । ताम्बूलम् । आयासः । प्रवातः । सन्धानम् । [illegible] । नानाविधसंस्वेदनम् । निद्रा । भयम् । धूमविधिः । क्षुधा ॥ * ॥

अथ रोगसङ्करे पथ्यम् ।

सर्वो गदानां यदि सङ्करः स्या-
त्तत्र प्रयत्नेन भिषड्मनीषी ।
पथ्येषु पथ्येषु विरोधि यद्य-
त्तत्तत् प्रयुञ्जीत चिकित्सितेषु ॥*॥

रोगसङ्करे अपथ्यम् ।

अपथ्यानि च सर्व्वाणि तत्तद्रोगोदितानि च । वमनामलविरेको वर्ज्जयेद्व्याधिसङ्करे ॥ * ॥

अथ वातिकरोगे पथ्यम् ।

अभ्यङ्गः । परिमर्द्दनम् । मर्दनम् । संवेष्टनम् । [illegible] । स्वेदः । स्वेदनम् । आसना । शयनम् । संवाहनम् । बस्तिः । नस्यम् । प्रावरणम् । [illegible] । अवगाहः । शिरोबस्तिः । [illegible] । दिवाकरकराः । स्नानम् । [illegible] । तैलद्रोणी । [illegible] । गाढोपनाहः । सुरा । भूशय्या । सुखशीतला । स्वाद्वम्ला रसाः । [illegible] । तैलम् । वसा । घृतम् । नवमाषः । कुलत्थः । तिलः । गोधूमः । शूकः । कलमः । शालिः । षष्टिकः । पेया । आम्रफलम् । पयः । [illegible] । मस्तुः । सुखोष्णोदकम् । गोमूत्रम् । नलदाम्बु । दधि । पयःपेटी । मद्यः । कूर्चिका । आनूपाः [illegible] । हंसः । [illegible] । कुम्भीरः । तित्तिरिः । मकरः । गण्डूपदः । कच्छपः । रोहितमत्स्यः । वर्मिः । मद्गुरः । शिलिन्दः । [illegible] । शृङ्गी । [illegible] । शृङ्गी । गर्गरः । [illegible] । अन्ये जलचराः । वार्ताकुः । कुलकम् । शिग्रुः । लशुनम् । द्राक्षा । आम्रम् । आम्रातकम् । धात्री । दाडिमम् । अम्लवेतसफलम् । कोलम् । कपित्थम् । शिवा । पक्वतालम् । वकुलम् । गोकण्टकः । मातुलुङ्गम् । [illegible] । मल्लिका । [illegible] । मन्दारपत्रम् । ताम्बूलम् । सितशर्करा । लवणः । सीधुः । तुरुष्कः । अगुरु । [illegible] । सुरदारु । गुग्गुलुः । [illegible] । कुङ्कुमम् । स्निग्धोष्णविधिः । [illegible] । [illegible] ॥ * ॥

वातिकरोगे अपथ्यम् ।

चिन्ता । जागरणम् । अस्रमोक्षः । वमिः । लङ्घनम् । व्यायामः । गजवाजिवाहनविधिः । सञ्चारणम् । मैथुनम् । आघातः । अपतर्पणम् । प्रपतनम् । धातुक्षयः । क्षोभणम् । शोकः । चङ्क्रमणम् । विरुद्धाशनम् । [illegible] । [illegible] । जलदागमः । रजनीशेषः । अपराह्णः । भयम् । रूक्षाम्लकषायतिक्तकटुकक्षारातिशीतानामशनम् । तृणधान्यम् । [illegible] । आढकी । कङ्गुः । उद्दालः । मुकुष्टकः । कोद्रवः । यवः । श्यामाकः । [illegible] । शिम्बी । अम्बु । राजमाषः । चणकः । मुद्गः । कुलत्थः । विषम् । शालूकम् । क्रमुकम् । [illegible] । तालकम् । काठिल्लकम् । तिन्दुकम् । कर्कोटम् । [illegible] । तालास्थिमज्जा । नदीसरस्तडागजलम् । करका । निष्पावबीजम् । पिण्याकः । शिशिराम्बु । रासभपयः । पत्रशाकम् । त्रिवृत् । भूनिम्बम् । कटुका । करीरम् । अखिलशुष्कामिषम् । माक्षिकम् । धूमः । [illegible] । रजः । परिभवः । [illegible] ॥ * ॥

अथ पैत्तिके पथ्यम् ।

सर्पिःपानविधिः । विरेचनम् । अस्रमोक्षः । रक्तशालिः । गोधूमः । आढकिः । धान्यकम् । चणकः । मुद्गः । मसूरः । यवः । [illegible] । पयः । पयःपेटी । [illegible] । माक्षिकम् । लाजाः । [illegible] । घृतानि । सिता । शीतोदकम् । उद्भिदः । कर्कोटम् । कदलम् । कण्टकिफलम् । वेत्राग्रम् । आषाढकम् । [illegible] । कोमलकदलकम् । कूष्माण्डम् । [illegible] । तुम्बी । पर्पटकः । अल्पमारिषदलम् । काठिल्लकम् । दाडिमम् । धात्री । कोमलतालफलम् । अभया । खर्जूरम् । [illegible] । [illegible] । कषायः । तिक्तः । मधुरः । मधूकम् । [illegible] । कांस्यम् । [illegible] । रजतम् । हेम । कटुका । निम्बः । त्रिवृत् । चन्दनम् । [illegible] । भूमिग्रहम् । सुशीतलपवनम् । धारागृहम् । चन्द्रिका । [illegible] । शीतलप्रदेशाः । भूशय्या । [illegible] । प्रदोषसमयः । गीतम् । प्रियालिङ्गनम् । स्नानम् । [illegible] । प्रियकथा । मन्दानिलः । अभ्युक्षणम् । [illegible] । मनोरमतरभाषा । [illegible] । [illegible] । [illegible] । मनोरमशीतलम् । शीतक्रिया ॥ * ॥

पैत्तिके अपथ्यम् ।

धूमः । स्वेदनम् । आतपः । निधुवनम् । [illegible] । क्रोधः । क्षारः । क्षुधा । गजवाजिवाहनविधिः । तीक्ष्णकर्म्म । व्यायामः । [illegible] । पौष्टः । विरुद्धाशनम् । मध्याह्नः । जलदात्ययः । रजनीमध्यम् । [illegible] । [illegible] । तैलम् । तिलः । लशुनम् । माषः । कुलत्थः । शुकः । निष्पावः । मदिरा । अतसी । मरीचकम् । [illegible] । [illegible] ।

अभीरम् । नलदाम्बु । हिङ्गु । लशुनम् । [illegible] । भल्लातकम् । ताम्बूलम् । दधि । [illegible] । बदरम् । तैलाशनम् । तिन्तिडी । कटु । [illegible] । [illegible] । विदाहि ॥ * ॥

अथ श्लैष्मिके पथ्यम् ।

छर्दिः । लङ्घनम् । अञ्जनम् । निधुवनम् । [illegible] । स्वेदनम् । चिन्ता । जागरणम् । श्रमः । अतिगमनम् । [illegible] । [illegible] । प्रतिसारणम् । प्रधमनम् । [illegible] । धूमः । प्रावरणम् । नियुद्धम् । अग्निसन्तोभः । नस्यम् । भयम् । रूक्षोष्णविधिः । पुराणशालिः । षष्टिका । निष्पावः । [illegible] । चणकः । मुद्गः । कुलत्थरसः । क्षारः । सर्षपतैलम् । उष्णजलम् । धन्वामिषम् । राजिका । वैत्राग्रम् । कुलकम् । काठिल्लकम् । वार्ताकुः । [illegible] । कर्कोटम् । लशुनम् । [illegible] । मम् । [illegible] । [illegible] । निम्बम् । [illegible] । तिक्ता । त्रिवृत् । माक्षिकम् । ताम्बूलम् । नलदाम्बु । जीर्णमदिरा । [illegible] । सुरा । गोजलम् । क्वाथः । [illegible] । तिक्तम् । सुखोष्णालयः । [illegible] । क्षयः । अञ्जनम् । मौक्तिकम् । कटुः । कषायरसः ॥ * ॥

श्लैष्मिके अपथ्यम् ।

खेदः । अभ्यञ्जनम् । आसनम् । [illegible] । स्नानम् । विरुद्धाशनम् । पूर्वानिलः । शिशिरः । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । माषः । [illegible] । मत्स्यः । मांसम् । [illegible] । [illegible] । [illegible] । तालास्थिमज्जा । मद्यः । पेया । भक्षम् । उपोदिका । यवकम् । [illegible] । आषाढकम् । खर्जूरम् । [illegible] । पयःपेटी । पयः । पायसः । [illegible] । अम्लम् । लवणम् । शुक्ति । [illegible] । [illegible] ॥ * ॥

अथ वक्षसि पथ्यम् ।

वमनम् । व्यवायः । व्यायामः । [illegible] । भ्रमणम् । अभिषेका । कटुः । तिक्तः । विदाहि । [illegible] । कषायः । [illegible] ॥ * ॥

वक्षसि अपथ्यम् ।

दिवानिद्रा । [illegible] । आतपम् । [illegible] । पिच्छालुकम् । स्वादु । गुरुद्रव्याम् । [illegible] । दधि । क्षीरम् । घृतम् ॥ * ॥

अथ मौक्तिके पथ्यम् ।

चन्दनम् । शीतवातः । छाया । अम्बु । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । प्रियभोजनम् ॥ * ॥

मौक्तिके अपथ्यम् ।

कटु । तिक्तम् । उष्णम् । क्षारम् । [illegible] । रौद्रम् । [illegible] । अभिषेका । [illegible] । [illegible] । [illegible] । दधि । तक्रम् । तैलम् ॥ * ॥

अथ वर्षासु पथ्यम् ।
लवणम् । अम्लम् । मिष्टम् । सारम् । प्रियम् । स्निग्धम् । गुरु । उष्णम् । बल्यम् । अभ्यङ्गः । उद्वर्त्तनम् । अग्निसेवा । तप्ताम्बुपानम् । दधि ॥

वर्षास्वपथ्यम् ।
पूर्व्वपवनः । वृष्टिः । घर्म्मः । हिमः । श्रमः । नदीनीरम् । दिवास्वप्नः । रूक्षम् । नित्यनैपुनम् ॥ * ॥

शरदि पथ्यम् ।
शीतरश्म्यनुपानम् । तरुच्छाया । चन्दनम् । इन्दुसेवा । सिता । शुक्लः । मधुरम् । गव्यदुग्धम् । इक्षुः । शाल्योदनम् ॥ * ॥

शरद्यपथ्यम् ।
लवणम् । अम्लम् । तीक्ष्णम् । कटु । पिष्टम् । आतपो । विदाहि । सुरा । नालम् । दधि । तक्रम् । तैलम् । क्रोधः । उपवासः । आतपः । मैथुनम् ॥ * ॥

अथ हिमर्त्तौ पथ्यम् ।
तप्तजलम् । उपनाहः । पयः । अम्लम् । पानम् । घृतम् । स्त्रीसेवा । वह्निसेवा । गुरूणि । यथेष्टशक्तम् ॥ * ॥

हिमर्त्तावपथ्यम् ।
दिवानिद्रा । कुभोजनम् । अभोजनम् । लङ्घनम् । पुरातनान्नम् । लघुपाकि । शैत्यम् । वार्य्योदनम् । शीतजलावगाहः ॥ * ॥

शिशिरे पथ्यम् ।
स्त्री । वह्निसेवा । मत्स्यः । अजमांसम् । दधि । दुग्धम् । सर्पिः ॥ * ॥

शिशिरेऽपथ्यम् ।
तीक्ष्णोष्णकट्वम्लकषायतिक्तानि । सामुद्रकम् । आर्द्रभोजनम् । दिवानिद्रा । चन्दनम् । चन्द्रसेवा । शीतजलस्नानादि ॥ * ॥

माघे विशेषो यथा ।
माघे च शीतद्रवमिष्टपिष्टं
कन्दः कदन्नं गुरुशालिभक्तम् ।
इति षड्ऋतुपथ्यापथ्याधिकारः ॥ * ॥

आगन्तुकज्वराणां पथ्यापथ्यं ज्वराधिकारे
न लिखितमतोऽत्र लिख्यते ।

"अभिघातसमुत्थाने पानाभ्यङ्गौ च सर्पिषः ।
क्षतजे व्रणजे चापि क्षतव्रणचिकित्सितम् ॥
औषधीगन्धविषजे विषपित्तप्रसाधनम् ।
अभिचाराभिशापोत्थे जपहोमादिभेषजम् ॥
उत्पातग्रहपीड़ोत्थे दानस्वस्त्ययनादयः ।
क्रोधोत्थिते पित्तहरं कामजे कामजित्क्रिया ॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया ।
आश्वासनेष्टलाभौ हर्षदायीनि यानि च ॥
विशेषतः पुनश्चात्र कामक्रोधसमुत्थिते ।
भयशोकसमुद्भूते कामक्रोधोत्कर्षणम् ॥
भूताभिषङ्गजे भूतबन्धावेशनताड़नम् ।
मनःक्षोभसमुत्पन्ने मनसः सान्त्वनानि च ॥
इत्यागन्तुज्वरे पूर्व्वैर्भिषग्भिः पथ्यमिष्यते ।
विप्रोगांमहद्वृद्ध पाठनं श्रवणं श्रुतेः ॥
देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम् ।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः ॥
साधूनां दर्शनं सख्यं रत्नौषधिविधारणम् ।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत् ॥"

आगन्तुकज्वरे अपथ्यम् ।
"अधिवासनकर्म्माणि रक्तसग्वस्त्रधारणम् ।
वमिवेगं दन्तकाष्ठमसात्म्यमपि भोजनम् ॥
विरुद्धान्यन्नपानानि विदाहीनि गुरूणि च ।
दुष्टाम्बुपानमन्नानि मत्स्यशाकं पिरूढ़कम् ॥
नवदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम् ।
आड़ीमत्स्यञ्च पिण्याकं छत्राकं पिष्टवैतसम् ॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्ज्जयेत् ॥"
इति पथ्यापथ्यविनिश्चयः समाप्तः ॥

पद, स्थैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) पदति । इति दुर्गादासः ॥

पद, सु क ङ गतौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-आत्मं-सकं-सेट् ।) क ङ, पदयते । इति दुर्गादासः ॥

पद, य ङ औ गत्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) य ङ, पद्यते । औ, पत्ता । इति दुर्गादासः ॥

पदं, क्ली, (पद + "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।" ३ । १ । १३४ । इति अच् ।) व्यवसायः । त्राणम् । स्थानम् । (यथा, मनुः । १२ । १२५ ।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥")
चिह्नम् । पादः । वस्तु । इत्यमरः । ३ । ३ । ९३ ॥ शब्दः । वाक्यम् । प्रदेशः । पादचिह्नम् । श्लोकपादः । (यथा, रामायणे । १ । २ । १८ ।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥")
किरणे पुं । इति मेदिनी ॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।"
इति साहित्यदर्पणे । २ । ४ ॥

श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णीं राजतीं वापि पाषाणनिर्म्मितामपि ।
पादयोश्चाङ्कितां कृत्वा पूजाञ्चैव समाचरेत् ॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्त्यजः ।
तत्र नन्दजनस्याशेषसंसारच्छेदनाय वः ॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः ।
धातुश्चित्तद्विरेफाणां लोभमायाति शोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारणम् ।
भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्व्वणि ।
तथा वामाङ्गुष्ठमूले पाञ्चजन्यस्य लाञ्छनम् ।
सर्व्वविद्याप्रकाशाय धत्ते च भगवानजः ॥"
इति भाद्रे मासमाहात्म्ये १९ अध्यायः ॥

पदकः, पुं, पदं वेत्ति यः । ("क्रमादिभ्यो वुन् ।" ४ । २ । ६१ । इति वुन् ।) पदज्ञाता । इति व्याकरणम् ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३९ ।
"रामलाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् ।
व्याख्यातृपदकश्चक्रे स तस्मिन् सुरमन्दिरे ॥")
स्वनामख्यातकण्ठभूषणञ्च । देवपदचिह्नादियुक्तत्वात् ॥ (पदमेव इति स्वार्थे के कृते, क्ली । पदम् । यथा, महाभारते अनुशासनपर्व्वणि ।
"इतःप्रभृति यातव्यं पदकं पदकं शनैः ॥")

पदगः, पुं, (पदाभ्यां गच्छतीति । गम सृगतौ + "अन्येष्वपि ।" इति डः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥ पद्भ्यां गमनकर्त्तरि त्रि ॥

पदन्यासः, पुं, (पदस्य गोपदस्येव न्यासो यत्र ।) गोक्षुरः । इति शब्दचन्द्रिका ॥ पदस्य विन्यासः । यथा, रसमञ्जरी ।
"पदन्यासो गेहाद्बहिरहिमपारोहणसमः
स्वगेहादन्यत् स्यादुपवनमपरद्वीपसुलितम् ।
वचो शोकालभ्यं कृपणधनतुल्यं स्वगद्भवः
पुमानन्यः कान्ताद्विपुरिव चतुर्थीसमुदितः ॥"
(तन्त्रोक्तामपूर्व्वामन्त्रस्यपदानां तत्तदङ्गेषु न्यासः । यदुक्तं तन्त्रसारधृतानार्णवे ।
"एकमेकं पुनस्त्वेकं पुनरेकं द्वयन्ततः ।
चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्व्वति ॥ १
पदान्येतानि देवेशि । नवद्वारेषु विन्यसेत् ।
मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने ॥
गुह्यादिमस्तकान्तं पदानां नवकं न्यसेत् ॥")

पदभञ्जनं, क्ली, (विभक्तियुक्तानां पदानां भञ्जनं विशेषो यत्र । यद्वा, पदानि भज्यन्तेऽनेन । भञ्ज + करणे ल्युट् ।) निरुक्तम् । गूढ़ार्थशब्दव्याख्या । इति हेमचन्द्रः ॥

पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका ।) पञ्जिका । टिप्पनी । इति हेमचन्द्रः ॥

पदमाला, स्त्री, (पदानां माला विस्तृतिर्यस्याम् ।) मोहनशीला विद्या । यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम् ।
याचयामि सुरेशानसुमादेवाद्धंधारिणम् ॥"
इति देवीपुराणे ९ अध्यायः ॥
अस्या विवरणं तत्रैव द्रष्टव्यम् । पदमेधी च ॥

पदविः, स्त्री, (पद्यते गम्यतेऽनया । पद गतौ + "पद्यटिभ्यामविः ।" इति अविः ।) पद्धतिः । पन्थाः । इत्यमरः । २ । १ । १५ ॥

पदवी, स्त्री, (पदवि + "कृदिकारादक्तिनः ।" इति पक्षे ङीष् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, रघुः । ७ । ७ ।
"उत्पक्ष्मणीवातविशामवाक्षा-
दलक्तकाङ्कां पदवीं ततान ॥"
पद्धतिः । यथा, तत्रैव । ३ । ५० ।
"अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥"
पदम् । यथा, पञ्चतन्त्रे । १ । २५८ । "अथ तेन सिंहाय अमात्यपदवी प्रदत्ता यावत् भ्यापालमिति ॥")

पदष्ठीवं, क्ली, (पादौ च अष्ठीवन्तौ च तयोः समाहारः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति

निपातनात् सिद्धम् ।) युगपदुपस्थितपदद्वय-भाक्शनी । इति व्याकरणम् ॥

पदाङ्कः, पुं, (पदस्य अङ्कश्चिह्नम् ।) क्रमाङ्कः । पादचिह्नम् । यथा,—

"पादे प्रापदनेन पादयुगलं श्रीशङ्करस्याम्बुज-
मालम्बप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
धन्ये लब्धपदाङ्कदूतमतुलं प्रीतिप्रदं प्रत्यहं
धीरः श्रीरघुनाथदासमहिमा यश्चोत्तमादरात् ॥"

इति पदाङ्कदूतकाव्यम् ॥

पदाङ्गी, स्त्री, (हंसस्य पदमिव अङ्गं यस्याः । ङिपां ङीष् ।) हंसपदी । इति राजनिर्घण्टः ॥

पदाजिः, पुं, (पादाभ्यामजतीति । अज गतौ + "पादे च ।" उणां । ४।१३१ । इति पादे चोपपदे इण् । "पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ । इति पदादेशः । बहुलवचनात् अजेर्वीभावः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥

पदातः, पुं, (पदाभ्यामततीति । पद् + अत् + अच् ।) पादातिकः । इति शब्दरत्नावली ॥

पदातिः, पुं, (पादाभ्यामतति गच्छतीति "पादे च ।" उणां ४।१३१ । इति पाद् + अति + इण् । "पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ । इति पदादेशः ।) पदातिकः । पैयादा इति भाषा । तत्पर्य्यायः । पत्तिः २ पत्तगः ३ पादातिकः ४ पदाजिः ५ पदः ६ पदिकः ७ । इत्यमरः । २ । ८ । ६६ ॥ पदातिकः ८ पादातः ९ पादाविकः १० पदात् ११ पादिकः १२ पदचारिः १३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३८ । ३१ ।

"गजानश्वान् रथांश्चैव पातयामास पाण्डवः ।
पदातींश्च रथांश्चैव न्यवधीदर्ज्जुनस्तथा ॥")

पदातिकः, पुं, (पदाति + स्वार्थे कन् ।) पदातिः । इति शब्दरत्नावली ॥

पदारः, पुं, (पदं ऋच्छति प्राप्नोतीति । ऋ + अण् ।) पादधूलिः । पादालिन्दः । इति मेदिनी ॥

पदार्थः, पुं, पदानां घटपटादीनां अर्थोऽभिधेयः । तत्पर्य्यायः । भावः २ धर्म्मः ३ तत्त्वम् ४ वस्तु ५ सत्त्वम् ६ । इति जटाधरः ॥ * ॥ (पदार्थं ज्ञि दर्शनमतभेदेन नानाविधाः । तत्र वैशेषिकाणां मते ।) सप्त पदार्थाः । यथा,—

"द्रव्यं गुणस्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः ॥"
"सप्तानामपि साधर्म्म्यं ज्ञेयत्वादिकमिष्यते ।
द्रव्यादयः पञ्च भावा अनेके समवायिनः ॥
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥"

इति भाषापरिच्छेदे । २, १४ ॥

"एते पदार्था वैशेषिकप्रसिद्धाः । नैयायिकानामप्यविरुद्धाः ।" इति सिद्धान्तमुक्तावली ॥ गोतमोक्तषोडशपदार्थास्तु न्यायशब्दे द्रष्टव्याः ॥ (कपिलमते प्रकृत्यादयः पञ्चविंशतिः । पातञ्जलमते तु ईश्वरेण सह षड्विंशतिः । वेदान्तमते आत्मानात्मभेदात् द्विविधः । तत्र आत्मापि द्विविधः ईश्वरजीवादुपाधिभेदात् । एतावपि विद्याविद्याभेदेन द्विविधौ । केवलसविशेषत्वाद्भेदश्चतुष्कारः । अनात्मापि कारणसूक्ष्मस्थूलभेदात् त्रिविधः इति ॥)

पदासनं, क्ली, (पदः पादस्य वा आसनम् ।) पादपीठम् । इति हेमचन्द्रः ॥ पा राखा टुल् । इति भाषा ॥

पदिकः, पुं, (पादेन चरतीति । पाद + "पर्पादिभ्यः ष्ठन् ।" ४।४।१० । इति ष्ठन् । ततः पदादेशश्च ।) पदातिः । इत्यमरः । २ । ८ । ६७ ॥

पद्गः, पुं, (पद्भ्यां गच्छतीति । पद् + गम् + "अन्येभ्योऽपीति डः ।) पदातिकः । इत्यमरः । २।८।६७ ॥

पद्धतिः, } स्त्री, (पद्भ्यां हन्ति गच्छतीति । हन
पद्धती, } गतौ + क्तिन् । "हिमकाषिहतिषु च ।" ६।३।५४ । इति पद्भावः । "कृदिकारादक्तिनः ।" ४।१।४५ । इति वा ङीष् ।) वर्त्म । (यथा, रघुः ३।४६ ।

"पथः श्रुतेर्दर्शयितार ईश्वराः
मलीमसामाददते न पद्धतिम् ॥")

पंक्तिः । इति मेदिनी ॥ ग्रन्थार्थबोधकग्रन्थः । इति हेमचन्द्रः ॥ पदवी । सा च घोषवसुमित्रादिरूपा । यथा । "षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले इति मनुवचनात् चूडाकार्य्या यथाकुलमिति याज्ञवल्क्यवचनात् देशादिष्टं कुलधर्म्मतस्त्वं सगोत्रधर्म्मं नदि संस्कृतिं च इति वामनपुराणाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरे मङ्गलविशेषाचरणवत् शूद्राणां नामकरणे वसुघोषादिरूपपद्धतियुक्तनामत्वं बोध्यम् । एवमेव कुलकभट्टः ।" इत्युद्वाहतत्त्वम् ॥

पद्धिमं, क्ली, (पादस्य हिमम् । "हिमकाषिहतिषु च ।" ६।३।५४ । इति पद्भावः ।) पदस्य शीतलता । इति संक्षिप्तसारव्याकरणम् ॥

पद्मं, क्ली पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तुसुहुसृ" इति । उणां । १ । १३९ । इति मन् । पद्मा, पद्मा लक्ष्मीरस्त्यस्मिन् । "अर्श आदिभ्योऽच् ।" ५।२।१२७ । इति अच् ।) स्वनामख्यातपुष्पविशेषः । तत्पर्य्यायः । नलिनम् २ अरविन्दम् ३ महोत्पलम् ४ सहस्रपत्रम् ५ कमलम् ६ शतपत्रम् ७ कुशेशयम् ८ पङ्केरुहम् ९ तामरसम् १० सारसम् ११ सरसीरुहम् १२ बिसप्रसूनम् १३ राजीवम् १४ पुष्करम् १५ अम्भोरुहम् १६ । इत्यमरः । १ । १० । ३९-४० ॥ पङ्कजम् १७ अम्भोजम् १८ अम्बुजम् १९ सरसिजम् २० श्रीवासम् २१ श्रीपर्णम् २२ इन्दिरालयम् २३ जलेजातम् २४ अब्जम् २५ कञ्जम् २६ नलम् २७ वार्जिम् २८ वारिजम् २९ नलकम् ३० अम्बुजम् ३१ पुटकम् ३२ पद्मः ३३ । इति शब्दरत्नावली ॥ अस्य गुणाः । कषायत्वम् । मधुरत्वम् । शीतत्वम् । पित्तकफास्रनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ अन्यद्विवरणम् कमलशब्दे द्रष्टव्यम् ॥ * ॥ पद्मकम् । तत्र नागस्य सुरादिभ्यो बिन्दुसमूहः । व्यूहविशेषः । (यथा, मनुः ७ । १८८ ।

"यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥")

निधिभेदः । (यथा, महाभारते । ८।१०।३६ ।

"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ।
सर्व्वान्निधीन् प्रगृह्याथ उपास्ते वै धनेश्वरम् ॥")

संख्यान्तरम् । तच्च दशार्व्वुदम् । (यथा, महाभारते ।

"अयुतम् प्रयुतञ्चैव पद्मम् सर्व्वगणार्व्वुदम् ॥")

इत्युक्तञ्च इति मेदिनी ॥ पद्मकाष्ठौषधिः । इति धरणिः ॥ पुष्करमूलम् । सीसकम् । इति राजनिर्घण्टः । (कल्पविशेषः । यथा, मार्कण्डेये ४७।११ ।

"पद्मावसाने प्रलये निशासुप्तोत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत ॥")

शरीरस्थषट्पद्मानि यथा,—

"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ।
तदूर्द्ध्वे कामबीजन्तु कलाशान्तीन्दुनादकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्बाह्ये हेमवर्णाभम् व स-वर्णचतुर्द्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥१॥
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥२॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम् ॥३॥
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ॥
अनाहताख्यं पद्मं मुनिभिः परिकीर्त्तितम् ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥४॥
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम् ॥५॥
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् ।
आज्ञा संक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ॥६॥
कैलासाख्यं तदूर्द्ध्वे तु बोधनीन्तु तदूर्द्ध्वतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ॥
सहस्रारायुतं बिन्दुस्थानं तदूर्द्ध्वमीरितम् ॥"

इति तन्त्रसारः ॥

पद्मः, पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तुसुहु" इति । उणां । १।१३९ । इति मन् ।) नागविशेषः । कालविशेषः । इति धरणिः ॥ (यथा, महाभारते ।१।३५।८ ।

"सुमुखश्च कोटिकश्चैव पद्मश्चित्रश्च वीर्य्यवान् ।"

पद्मोत्तरात्मजः । स तु द्वादशजिनचक्रवर्त्त्यन्तर्गतचक्रवर्त्तिविशेषः । बलदेवः । इति हेमचन्द्रः । षोडशरतिबन्धान्तर्गतप्रथमबन्धः । यथा,—
"हस्ताभ्याञ्च समालिङ्ग्य नारी पद्मासनोपरि ।
रमेद्गाढं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः ॥"
इति रतिमञ्जरी ॥

पद्मकं, क्ली, (पद्ममिव कायतीति । पद्म+कै+कः । पद्मवर्त्तिश्वेतलोहितवर्णत्वात् तथात्वम् ।) बिन्दुजालम् । गजस्य मुखादिस्थो बिन्दुसमूहः । इत्यमरभरतौ ॥ (यथा, कुमारे । १ । ७ श्लोकटीकायां मल्लिनाथः । "अतएव कुञ्जरस्य ये बिन्दवः काये वयोविशेषभाविनः पद्मकाख्याः ।) पद्मकाष्ठम् । इति मेदिनीधरण्यौ ॥ (यथा, गारुडे १६८ अध्याये ।
"कर्पूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम् ।
प्रमेहमलदौर्गन्ध्यकण्डुकुष्ठहरं परम् ॥"
अस्य गुणा यथा, भावप्रकाशे ।
"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥")
कुष्ठम् । इति राजनिर्घण्टः ॥

पद्मकन्दः, पुं, (पद्मस्य कन्दः ।) कमलकन्दः । तत्पर्य्यायः । शालूकम् २ पद्ममूलम् ३ कटाह्वयम् ४ शालुकम् ५ जलालूकम् ६ । अस्य गुणाः । कटुत्वम् । विष्टम्भित्वम् । रूक्षत्वम् । रुच्यत्वम् । कषायत्वम् । कफपित्तकासतृष्णादाहविनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पद्मादिकन्दः शालूकं करहाटश्च कथ्यते ।
मृणालमूलं भिस्साण्डं जलालूकञ्च कथ्यते ॥
शालूकं शीतलं वृष्यं पित्तदाहास्रनुद्गुरु ।
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ॥
संग्राहि मधुरं रूक्षं भिस्साण्डमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥

पद्मकाष्ठं, क्ली (पद्ममिव गन्धवत् काष्ठम् ।) औषधिविशेषः । तत्पर्य्यायः । पद्मकम् २ पीतकम् ३ पीतम् ४ मालयम् ५ शीतलम् ६ हिमम् ७ शुभम् ८ केदारजम् ९ रक्तम् १० पाटलापुष्पसन्निभम् ११ पद्माह्वयम् १२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । रक्तपित्तविनाशित्वम् । मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटशान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च भावप्रकाशे ।
"पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥"
इति भावप्रकाशः ॥

पद्मकी [न्,] पुं, (पद्मकं बिन्दुजालमस्त्यस्य । इनिः ।) भूर्ज्जवृक्षः । इति शब्दमाला ॥

पद्मकेशरः, पुं क्ली, (पद्मस्य केशरः ।) किञ्जल्कः । इति राजनिर्घण्टः ॥ (यथा, रसेन्द्रसारसंग्रहे ।
"गौर्यादिः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ॥")

पद्मगन्ध, पद्मगन्धि, } त्रि, (पद्मस्येव गन्धोऽस्य । "उपमानाच्च ।" ५।४।१३७ । इति इत् । सुपद्मबोधमते तु यातूपमानादित्युक्तेर्विभाषा ।) पद्मस्येव गन्धो यस्य तत् । इति मुग्धबोधव्याकरणम् ॥

पद्मगर्भः, पुं, (पद्मं गर्भः कुक्षिरिव यस्य । विष्णुनाभिकमलजातत्वात् तथात्वम् ।) ब्रह्मा । इति शब्दरत्नावली ॥ (पद्मस्य हृदयाख्यपद्मस्य गर्भे ध्यानेन कल्पितो यस्य उपासकैरिति विग्रहः । विष्णुः । यथा, महाभारते । १३।१४९।५१ ।
"पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥"
"पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः ।"
इति भाष्यम् ॥
शिवः । यथा, तत्रैव १३।१७।१३२ ।
"पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥")

पद्मचारिणी, स्त्री (पद्ममिव चरतीति । चर+णिनिः स्त्रियां ङीप् ॥) उत्तरापथभवस्वनामख्यातवृक्षविशेषः । (स्थलकमलिनी इति ख्याता ।) तत्पर्य्यायः । अव्यथा २ अतिचरा ३ पद्मा ४ चारटी ५ । इत्यमरः । २ । ४ । १४६ ॥ अस्याः पर्य्यायान्तरं गुणाश्च स्थलपद्मिनीशब्दे ज्ञातव्याः ॥

पद्मतन्तुः, पुं, (पद्मस्य तन्तुः ।) मृणालम् । इति राजनिर्घण्टः ॥

पद्मदर्शनः, पुं, (पद्मस्येव दर्शनमस्य ।) श्रीवासः । इति शब्दचन्द्रिका ॥ लोवान् इति भाषा ॥

पद्मनाभः, पुं, (पद्मं नाभौ यस्य । "अच्प्रत्यन्वय पूर्व्वात् सामलोम्नः ।" ५ । ४ । ७५ । इत्यच "अच्" इति योगविभागादच् । ब्रह्मोत्पत्तिकारणीभूतपद्मस्य नाभिजातत्वादस्य तथात्वम् ।) विष्णुः । इत्यमरः । १ । १ । १० ॥ (यथा, महाभारते । १३ । १४९ । १८ ॥
"अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥")
शयने तस्य स्मरणीयत्वं यथा,—
"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम् ॥"
इत्यादि बृहन्नन्दिकेश्वरपुराणम् ॥
(हृदयपद्मस्थनाभौ नाभिरीषदुपरिभागे प्रकाशनात् महादेवः । यथा, महाभारते । १३ । १७ । १०५ ।
"पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥"
पद्ममिव वर्त्तुलाकृतिः नाभिर्यस्य । धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते ।१।६७।९५ ।
"कर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ।"
नागविशेषः । यथा, तत्रैव । १२ । ३५५ । ३ ।
"सतताधिवासी धर्म्मात्मा तत्र चक्षुःश्रवा महान् ।
पद्मनाभो महानाभः पद्म इत्येव विश्रुतः ॥")
भाविजिनविशेषः । इति हेमचन्द्रः ॥ (अस्त्रविशेषः । यथा, गो: रामायणे १ ।३१।७ ।
"पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः ॥")

पद्मनाभिः, पुं, (पद्मं नाभौ यस्य । अजिति योगविभागस्य अधार्मिकत्वात् न अच् ।) पद्मनाभः । इति द्विरूपकोषः ॥

पद्मनालं, क्ली, (पद्मस्य नालम् ।) मृणालम् । यथा,
"कर्णिका पद्मनालन्तु मृणालं तन्तुलं विसम् ॥"
इति हेमचन्द्रः । ४ । २३१ ॥

पद्मपत्रं, क्ली, (पद्मस्य पत्रमिव । पद्मपर्णवदाकारोऽस्य तथात्वम् ।) पुष्करमूलम् । इत्यमरः । २ । ४ । १४५ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये । "शैवलपद्मकपद्मपत्रप्रभृतिभिः ।"॥ पद्मस्य पत्रम् ।) कमलदलम् ॥ (यथा, हठयोगदीपिकायाम् । २ । ७० ।
"अन्तः प्रवर्त्तितोद्दारमारुतापूरितोदरः ।
पयस्यगाधेऽपि सुखात् प्लवते पद्मपत्रवत् ॥")

पद्मपर्णं, क्ली, (पद्मस्य पर्णं पत्रम् ।) पद्मपत्रम् । पुष्करमूलम् । इत्यमरटीका ॥

पद्मपलाशलोचनः, पुं, (पद्मस्य पलाशे पत्रे इव लोचने यस्य । पद्मपुष्पदलाकारचक्षुर्विशिष्टत्वात्तथात्वम् ।) विष्णुः । । यथा,—
"नान्यं ततः पद्मपलाशलोचनाद्-
दुःखच्छिदन्ते मृगयामि कञ्चन ।
यो मृग्यते हस्तगृहीतपद्मया-
श्रियेतरैरङ्ग ! विमृग्यमाणया ॥"
इति श्रीभागवते ४ स्कन्धः ॥

पद्मपाणिः, पुं, (पद्मं पाणौ यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ बुद्धः । सूर्य्यः । इति त्रिकाण्डशेषः ॥ (पद्महस्ते त्रि ॥)

पद्मपुष्पः, पुं, (पद्ममिव पुष्पमस्य ।) कर्णिकारवृक्षः । पिकाङ्गपक्षी । इति शब्दचन्द्रिका ॥

पद्मप्रभः, पुं, (पद्मस्येव प्रभा दीप्तिर्यस्य ।) चतुर्विंशतिजिनान्तर्गतषष्ठजिनः । इति हेमचन्द्रः ॥ पद्मतुल्यप्रभायुक्ते त्रि ॥

पद्मप्रिया, स्त्री, (पद्मानि प्रियाणि यस्याः ।) जरत्कारुमुनिपत्नी । मनसादेवी । इति शब्दरत्नावली ॥ (गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ८४ ।
"पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ॥")

पद्मबन्धः, पुं, (पद्मस्येव बन्धो रचना यस्य ।) चित्रकाव्यविशेषः । शब्दालङ्कारप्रभेदः । यथा,
"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।"
अस्य च तथाविधविशेषवशेन चमत्कारविधायिनामपि वर्णानां तथाविधयोगाकाशसमवायविशेषवशेन च चमत्कारविधायिभिर्वर्णैरभेदोपचाराच्छब्दालङ्कारत्वम् । उदाहरणं यथा, साहित्यदर्पणे ।
"मारमा सुषमा चारु रुचा मार वधूत्तमा ।
मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मा रमा ॥"
अत्र पद्मरूपेण वर्णविन्यासक्रमः ॥



पद्मबन्धुः, पुं (पद्मस्य कमलस्य बन्धुः । सूर्य्योदये पद्मस्य प्रकाशतया तथात्वम् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (पद्ममेव बध्नाति रुध्नाति असौ विश्रामो मधुलोभात् इति भावः । बन्ध+उन् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पद्मभूः, पुं, (पद्मं विष्णुनाभिभवकमलं भूरुत्पत्तिस्थानं यस्य । (यद्वा, पद्मात् भवतीति । भू+क्विप् ।) ब्रह्मा । इति हलायुधः ॥ (अस्योत्पत्तिकथा यथा भागवते । ९ । १ । ८—९ ।
"परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥
तस्य नाभेः समभवत् पद्मकोषो हिरण्मयः ।
तस्मिन् जज्ञे महाराज । स्वयम्भूश्चतुराननः ॥")

पद्ममुखी, स्त्री, (पद्मस्य मुखमिव मुखं उत्पत्तिप्रारम्भो यस्याः । स्त्रियां ङीष् ।) दुरालभा । इति शब्दचन्द्रिका ॥ (पद्मस्य मुखमिव मुखं वदनं यस्य ।) पद्मसदृशमुखविशिष्टे त्रि ॥

पद्मयोनिः, पुं, (पद्मं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य ।) ब्रह्मा । यथा,—
"कस्मात् कारणाद्भूतः । पुत्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो मत्प्रियार्थं जगन्मयः ॥"
इति कौर्म्मे ९ अध्यायः ॥

पद्मरागः, पुं, (पद्मस्येव रागो यस्य ।) रक्तवर्णमणिविशेषः । मानिक इति भाषा । तत्पर्य्यायः । शोणरत्नम् २ । लोहितकः ३ । इत्यमरः । २ । ९ । ९२ ॥ लोहितम् ४ । कुरुविन्दकम् ५ । इति शब्दरत्नावली ॥ (बृहत्संहितायां ८२ अध्याये अस्य परीक्षादिकं यथा,—
"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः ।
सौगन्धिकजा भ्रमराञ्जनाब्जजम्बूरसद्युतयः ॥
कुरुविन्दभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च ॥
स्निग्धः प्रभानुलेपी स्वच्छोऽर्चिष्मान् गुरुः सुसंस्थानः ।
अन्तःप्रभोऽतिरागो मणिरत्नगुणाः समस्तानाम् ॥
कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः ।
दुर्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः ॥
भ्रमरशिखिकण्ठवर्णो
दीपशिखासप्रभो भुजङ्गानाम् ।
भवति मणिः किल मूर्द्धनि योऽनर्घेयः स विज्ञेयः ॥
यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देवः
शत्रूंश्च नाशयति तस्य मणेः प्रभावात् ॥
षड्विंशतिः सहस्राण्येकस्य मणेः पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य ॥
अर्द्धपलस्य द्वादश कर्षस्यैकस्य षट् सहस्राणि ।
यच्चाष्टमाषकधृतं तस्य सहस्रत्रयं मूल्यम् ॥
माषकचतुष्टयं दशशतक्रयं
द्वौ तु पञ्चशतमूल्यौ ।
परिकल्प्यमन्तराले
मूल्यं हीनाधिकगुणानाम् ॥
वर्णन्यूनस्यार्द्धं तेजोहीनस्य मूल्यमष्टांशः ।
अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम् ॥
आधूम्रं व्रणबहुलं स्वल्पगुणं चाप्नुयाद्द्विशतभागम् ।
इति पद्मरागमूल्यं पूर्व्वाचार्य्यैः समुद्दिष्टम् ॥")
राजनिर्घण्टोक्तपर्य्यायगुणौ माणिक्यशब्दे द्रष्टव्यौ । अस्य वर्णा यथा,—
"सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं कालपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमन्ध्रं सौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूतं निकृष्टं तुम्बुरोद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं देशभेदतः ॥*॥
तथा च ।
बन्धूकगुञ्जाशकलेन्द्रगोप-
जवासमासृक्कुसुमवर्णशोभाः ।
भान्त्यत्र दाडिमबीजवर्णा-
स्तथापरे किंशुकपुष्पभासः ॥
सिन्दूरपद्मोत्पलकुङ्कुमानां
लाक्षारसस्यापि समानवर्णाः ।
यान्ये निरागे प्रभया स्वयैव
भान्ति स्वतल्या स्फुटमध्यशोभाः ॥
भानोश्च भासामनुवेधयोग-
मासाद्य रश्मिप्रकरैश्च दूरम् ।
पार्श्वानि सर्व्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥
कुसुम्भनीलीव्यतिमिश्रराग-
प्रत्यक्षकाम्बरतुल्यभासः ।
तथापरेऽम्बरकण्टकारी-
पुष्पत्विषो हिङ्गुलकत्विषोऽन्ये ॥
चकोरपुंस्कोकिलसारसानां
नेत्रावभासाश्च भवन्ति केचित् ।
अन्ये पुनः पुष्पितबुष्मितानां
तुल्यत्विषः कोकनदोदराणाम् ॥
प्रभावकान्तिस्थगुणप्रयोगैः
प्रायः समानाः स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासः
सौगन्धिकाख्या मणयो भवन्ति ॥
ये कुन्दराभाः कुरुविन्दजेषु
न ते च जाताः स्फटिकोद्भवेषु ।
निरर्चिषोऽन्तर्बहुलीभवन्ति
प्रभावबन्तोऽपि न तत्समानाः ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्फटिकार्चिषः ॥
बर्हांशुमालिवक्त्राब्जे तथापरे ।
न जायन्ते तु ये केचित् मूल्यलेशमवाप्नुयुः ॥
तथैव स्फटिकोत्थानां देशे तुम्बुरसंज्ञके ।
श्यामाभाः प्रभवन्ति स्वल्पमूल्या हि ते स्मृताः ॥"*

अथ छायादि ।
"माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् ।
ब्रह्मक्षत्रियवैश्याश्च शूद्राश्च यथाक्रमम् ॥
रक्तश्वेतो भवेद्विप्रस्त्वतिरक्तस्तु क्षत्रियः ।
रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथान्त्यजः ॥
पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः ।
सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्त्यजः ॥
शोणपद्मसमाकारः खदिराङ्गारसप्रभः ।
पद्मरागो द्विजः प्रोक्तश्छायाभिरेव सर्व्वदा ॥
गुञ्जासिन्दूरबन्धूककाशगुञ्जासमप्रभः ।
दाडिमीकुसुमाभासः कुरुविन्दस्तु बाहुजः ॥
हिङ्गुलाभाशोकपुष्पाभनीलपीतश्च शोभितम् ।
जवान्तावारसप्रायं वैश्यं सौगन्धिकं विदुः ॥
आरक्तः कान्तिहीनश्च विच्छायश्च विशेषतः ।
मांसखण्डसमाभासो शूद्रश्च पापकारकः ॥"
नीलकस्तु नीलगन्धिः संज्ञा ॥ * ॥

अथ दोषाः ।
"माणिक्यस्य समाख्याता अष्टौ दोषा मनीषिभिः ।
द्विच्छायश्च द्विपदश्च सभेदः कर्करस्तथा ॥
अशोभनं कोकिलश्च जलं धूम्राभिधश्च वै ।
गुणाश्चत्वार आख्याताश्छायाः षोडश कीर्त्तिताः ॥"
छायास्तु पूर्व्वोक्ता एव ।
"छायाद्वितयसम्बन्धाद्द्विच्छायं बन्धुनाशनम् ।
द्विपदं द्विपदर्णेन माणिक्येन पराभवः ॥
सभेदो निर्मितुराङ्गं शस्त्रघातविधायकः ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशनम् ॥
दुग्धेनेव समालिप्तमथ नीपुटसुप्रभे ।
अशोभनं समुद्दिष्टं माणिक्यं बहुदुःखकृत् ॥
मधुविन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं तत्र धारणात् ॥
रागहीनं जलं प्रोक्तं धनधान्यापहारकम् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥"
तथा,—
"शोभाद्वितयवन्तो ये मणयः कलिकारकाः ।
उभयत्र पदे येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे मृत्युः स्यात् कर्करस्वजनाशनम् ।
दुग्धेनेव समालिप्तः पृष्ठे यस्तु तमर्जयेत् ॥
दुःखकृत् स समाख्यातो न युद्धे रणजीवकः ।
मधुविन्दुसमा शोभा कोकिलाख्या प्रकीर्त्तिता ॥
तेषाञ्च बहुभेदाः स्युस्ते न धार्य्याः कदाचन ॥"

अथ गुणाः ।
"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ॥"
तथा च ।
"वर्णाधिक्यं गुरुत्वञ्च स्निग्धता समकायता ।
अर्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः ॥"* ॥
अन्यच्च ।
"ये कर्कराच्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समासतो जातिगुणैः समेताः ॥
दोषोपसृष्टं मणिमप्रबोधा-
द्बिभर्त्ति यः कञ्चन कश्चिदेवम् ।

मं बन्धुदुःखाय सबन्धुवित्त-
नाशादयो दोषगणा भवन्ति ।
सपत्नमध्येऽपि कृताधिवासं
प्रमादवृत्तावपि वर्त्तमानम् ।
न पद्मरागस्य महागुणस्य
भर्त्तारमापत् समुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समुख्यैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥" * ॥
अस्य परीक्षा यथा,—
"बालार्ककरसंस्पर्शात् यः शिलां लोहितां वमेत् ।
रञ्जयेदाश्रमं वापि स महागुण उच्यते ॥
दुग्धे शतगुणे क्षिप्तो रञ्जयेद् यः समन्ततः ।
धमेत् क्षिप्तो लोहितो वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः ।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
सर्व्वारिष्टप्रशमनाः सर्व्वसम्पत्तिदायकाः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्दृश्यते दूरात् ज्वलदग्निसमच्छविः ।
वंशकान्तिः स विज्ञेयः सर्व्वसम्पत्तिकारकः ॥
यत्र यत्र भव विंशति रागः
स्निग्ध एव सकलः खलु वर्ण्ये ।
वर्द्धयेद्रमति वा करजाल-
स्तत्र तोत्तरमहागुणिनस्ते ॥
नीलं रसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विशतप्रमाणम् ।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः ॥" * ॥
परिमाणम् ।
"गुञ्जाचतुष्प्रमाणस्तु दशसप्तविगुञ्जकात् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
क्रोष्टुकोलफलाकारो द्वादशाद्याश्विगुञ्जकात् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
बदरीफलतुल्यो यः स्वर्दिग्गुणमाषकः ।
तथा धात्रीफलविंशदिंशतिद्वात्रमाषकः ॥
तथा चणकतुल्यो यो वह्निपञ्चैकमाषकः ।
ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः ॥
बिम्बीफलसमाकारो वसुषड्दशतोलकः ।
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात् ॥
केचिद्धाधतराः सन्ति जातीनां प्रतिरूपकाः ।
विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत् ॥
कलशपुरोद्भवसिंहलतुम्बुरुदेशोत्थमुक्तमालीयाः ।
श्रीपर्णिकाश्च सदृशा विजातयः पद्मरागाणाम् ॥
तुषोपसर्गात् कलशाभिधान-
मातास्रभावादपि तुम्बुरुत्थम् ।
काष्ण्यात्तथा सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात् ।
श्रीपर्णकं दीप्तिविराहतिला-
द्विजातिलिङ्गान्यय एष भेदः ॥"
तथा च ।
"स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाणामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रमृष्टः प्रजहाति दीप्तिम् ।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
सम्प्राप्य चोत्क्षेपमथाप्युदस्तं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ॥
प्राप्यापि रत्नाकरजां स्वजातिं
लब्धेतरत्वेन गुणेन विद्वान् ॥
अप्रत्ययश्चेति सन्देहे शिलायां परिघर्षयेत् ।
घृष्टो योऽत्यन्तशोभावान् गरिमाणं न मुञ्चति ।
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः ॥
स्वजातकं समस्त्येन विलिखेद्वा परस्परम् ।
वज्रं वा कुरुविन्दं वा विमुच्यान्योन्यकेनचित् ।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
जातस्य सर्व्वेऽपि मणेर्न जातु
विजातयः कान्तिसमानवर्णाः ।
तथापि नानाकरणार्थमेवं
भेदप्रकारः परमः प्रदिष्टः ॥
गुणोपपन्नेन सहावबद्धो
मणिस्तु धार्य्यो विगुणेन जात्यः ।
न कौस्तुभेनापि सहावबद्धं
विद्वान् विजातिं बिभृयात् कदाचित् ॥
यस्मात् एकोऽपि यथा द्विजातीन्
समेत्य भूरीनपचत्यपात्रान् ।
तथा मणीन् भूरिगुणोपपन्नान्
शक्नोति विद्रावयितुं विजातः ॥" * ॥
अथ मूल्यम् ।
बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम् ।
तत्र कान्तिविभागेन छायाभानं विनिर्द्दिशेत् ॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुत्थापितगौरवस्य ।
तत्पद्मरागस्य गुणान्वितस्य
स्यान्माषकाख्या तुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथा शुद्धे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्यचतुर्थांशहीनं स्यात् सौगन्धिके ॥
यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः ।
तावन्मूल्यचतुर्थांशं दीयते शूद्रजन्मनि ॥
पद्मरागः षड्यवस्तु धत्ते लाक्षारसप्रभः ।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षेणैकेन यो मणिः ।
द्वाविंशतिं सहस्राणि तस्य मूल्यं विनिर्द्दिशेत् ।
एकोनो भूयते यस्तु जवाकुसुमसन्निभः ।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्द्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं चार्थं मूल्यं रत्नविचक्षणैः ॥
अतोऽन्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वयं द्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ये ।
तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यान्याश्चतुर्धा ये प्रकीर्त्तिताः ॥
चतुर्व्विधैर्नृपतिभिर्धार्य्या सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्याद्रोगशोकभयक्षयम् ॥"
इति युक्तिकल्पतरौ पद्मरागपरीक्षा ॥

पद्मलाञ्छनः, पुं, (पद्मवत् लाञ्छनं पद्माकारलक्षणं चिह्नमितियावत् यस्य ।) ब्रह्मा । सूर्य्यः । कुबेरः । राजा । इति मेदिनी ॥ (बुद्धविशेषः । इति शब्दचिन्तामणिः ॥)

पद्मलाञ्छना, स्त्री, (पद्मं लाञ्छनं यस्याः ।) तारा । लक्ष्मीः । सरस्वती । इति मेदिनी ॥

पद्मवर्णकं, क्ली, (पद्मस्येव वर्णोऽस्य । कप् ।) पुष्करमूलम् । इति जटाधरः ॥ पद्मतुल्यवर्णे युक्ते त्रि ॥

पद्मवासा, स्त्री, (पद्मे वासो यस्याः ।) लक्ष्मीः । इति हेमचन्द्रः ॥

पद्मवीजं, क्ली, (पद्मस्य वीजम् ।) कमलवीजम् । तत्पर्य्यायः । पद्माक्षम् २ गालोड्यम् ३ कन्दली ४ भेण्डा ५ क्रौञ्चादनी ६ क्रौञ्चा ७ श्यामा ८ पद्मकर्कटी ९ । अस्य गुणाः । कटुत्वम् । स्वादुत्वम् । पित्तच्छर्द्दिदाहास्रशोषनाशित्वम् । पाचनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥
"पद्मवीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् ॥
कफवातकरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥"
इति भावप्रकाशः ॥
(पद्मवीजमालाजपेनात् साधकः सिद्धिमाप्नुयात् । इति तन्त्रशास्त्रे प्रसिद्धिः ॥ तदुक्तं यथा,—
"मन्त्रं यो जपते नित्यं पद्मवीजैः सुदेशिकः ।
अचिरात्लभते सिद्धिं सत्यं सत्यं न संशयः ॥"

पद्मवीजाभं, क्ली, (पद्मवीजस्य आभा इव आभा यस्य । पद्मवीजवत् आभातीति वा । आ + भा + कः ।) मखान्नम् । इति राजनिर्घण्टः । माखाना इति भाषा ॥

पद्मा, स्त्री, (पद्मं वासस्थानत्वेनास्त्यस्याः । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् टाप् च ।) लक्ष्मीः । (यथा, रघुः । ४ । ५ ।
"छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥")
लवङ्गम् । पद्मचारिणी । इत्यमरः ॥ (पद्यते इति । "अर्त्तिस्तुसु..." उणा । १ । १४० । इति मन् टाप् च ।) पद्मनी । सा तु मनसा । पद्मिका । इति मेदिनीशब्दरत्नावल्यौ ॥ श्वेतार्कमाता । इति हेमचन्द्रः ॥ कुसुम्भपुष्पम् । इति रत्नमाला ॥ बृहद्रथराजकन्या कल्किदेवेन विवाहिता । यथा, कल्किपुराणे १० अध्यायः ॥
"हरेरागमनं श्रुत्वा सहर्षोऽभूद्बृहद्रथः ।
पुरोधसा ब्राह्मणैश्च पात्रैर्मित्रैः सुमङ्गलैः ॥
वाद्यतालध्वजोत्तैश्च पूजायोजनपाणिभिः ।
आगमानयितुं कल्किं सार्द्धं निजजनैः प्रभुः ॥
ततो जलाश्रयाभ्यासं गत्वा विष्णुयशःसुतम् ।
मणिवेदिकमासीनं भुवनैकगतिं पतिम् ॥
ददर्श पुरतो राजा रूपशीलगुणाकरम् ।
साश्रुः सपुलकः शीर्षं बद्धा साधु समर्चयन् ॥
मामागोचरमेतन्मे तवागमनमीश्वर ! ।
यथा साध्यात्मपुंस्य यच्चादेन कानने ॥
इत्युक्त्वा तं पूजयित्वा समानीय निजालये ।
हर्म्यप्रासादसंबाधे स्थापयित्वा ददौ सुताम् ॥
पद्मां पद्मविशालाक्षीं पद्मनेत्राय पद्मिनीम् ।
पद्मजाद्यैरीप्सितः पद्मनाभायादाद्यथा श्रियम् ॥
कल्किर्लब्धा प्रियां भार्यां सिंहले साधु सत्कृतः ।
समुवास विशेषज्ञः समीक्ष्य द्वीपसत्तमम् ॥"

पद्माकरः, पुं, (पद्मस्य आकरः ।) पद्मकमलाश्रयः । तत्पर्य्यायः । तडागः २ कासारः ३ सरसी ४ सरः ५ । इत्यमरः । १ । १० । २८ ॥ सरोजिनी ६ । इति जटाधरः ॥ सरोवरः ७ तड़ाकः ८ तटाकः ९ सरसम् १० सरम् ११ सरकम् १२ । इति शब्दरत्नावली ॥ अथ नदीशगाधे महाजलाशये समष्टि योग्यता निम्बाडि च । सर्वेव सरोमात्रे । इति पद्मिकाकोषकटारयोरपि । पद्माकरादित्रयं समपद्मागाधजलाशये । कासारादित्रयं कृत्रिमपद्माकरे । इति स्वाम्यादयः । पद्माकरादित्रयं पद्मयुक्तजलाशयमात्रे । कासारादित्रयं सरोवरमात्रे । इत्यन्ये । पद्मानामाकर उत्पत्तिस्थानं पद्माकरः क्वचित् पद्मशून्योऽपि योग्यतयेति सुभूतिः । इति भरतः ॥

पद्माक्षं, क्ली, (पद्मस्य अक्षीव । समासे षच् ।) पद्मबीजम् । इति हारावली ॥ (पद्मे इव पद्मयुग्मवत् अक्षिणी यस्य ।) पद्मतुल्याक्षि त्रि ॥

पद्माटः, पुं, (पद्मं पद्माकारं अटति व्याप्नोति इति अट गतौ + "कर्मण्यण् ।" ३ । २ । १ । इति अण् ।) चक्रमर्द्दः । इत्यमरः । २ । ४ । १३७ ॥

पद्मालया, स्त्री, (पद्ममेव आलयो वासस्थानं यस्याः ।) लक्ष्मीः । लवङ्गम् । इत्यमरः ॥ (लक्ष्मीस्वरूपत्वात् गङ्गापि । यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने । २९ । १०५ ।
"पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥")

पद्मावती, स्त्री, (पद्म + अस्त्यर्थे मतुप् मस्य वत्वम् । संज्ञायां दीर्घः ।) मनसादेवी । नदीविशेषः । पद्मा इति ख्याता । इति शब्दरत्नावली ॥ पद्मचारिणी । इति जटाधरः ॥ जयदेवपत्नी । यथा,—
"जयति पद्मावतीरमणजयदेव-
कविभारतीभणितमतिशातम् ।"
इति गीतगोविन्दः ॥

पद्मावतीप्रियः, पुं, (पद्मावत्याः प्रियः स्वामी ।) जरत्कारुमुनिः । इति शब्दरत्नावली ॥ जयदेवश्च ॥

पद्मासनं क्ली, (पद्ममिव पद्माकारेण बद्धमित्यर्थः । आसनम् ।) योगासनविशेषः । यथा,—
"वामोरूपरि दक्षिणं नियमतः संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारनाशनकरं पद्मासनं प्रोच्यते ॥"
अन्यदपि ।
"वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा-
प्यन्योरूपरि तस्य बन्धनविधौ धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते ॥"
इति गोरक्षसंहिता ॥
(मतान्तराभ्याभिमतं पद्मासनं यथा, हठयोगदीपिकायाम् । १ । ४४-४७ ।
"वामोरूपरि दक्षिणञ्च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्र-
मालोकयेदेतद्व्याधिविनाशकारि यमिनां
पद्मासनं प्रोच्यते ॥
उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥
नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया ।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः ॥
इदं पद्मासनं प्रोक्तं सर्व्वव्याधिविनाशनम् ।
दुर्लभं येन केनापि धीमता लभ्यते भुवि ॥")
भूपार्थे धातुमयपद्माकारासनञ्च ।
(रतिबन्धकपद्मासनम् यथा, रतिमञ्जर्य्याम् ३० ।
"पद्मासनो नायपादौ नायकोऽङ्घ्रिसंयुतः ॥"
तल्लक्षणं यथा, तत्रैव ३१ ।
"हस्ताभ्यां च समालिङ्ग्य नारीं पद्मासनोपरि ।
रमेद्गाढं समाकृष्य बन्धोऽयं पद्मसंज्ञकः ॥")

पद्मासनः, पुं, (पद्मं विष्णुनाभिकमलं आसनं यस्य ।) ब्रह्मा । कमलासनः । इत्यमरटीकायाम् ॥

पद्माह्वा, स्त्री, (पद्मस्य आह्वा आख्या यस्याः ।) पद्मचारिणी । इति राजनिर्घण्टः ॥

पद्मिनी, स्त्री, (पद्मानि सन्त्यस्याम् । पुष्करादिभ्यो देशे इनिः ।) पद्मयुक्तदेशः । पद्मसमूहः । पद्मलता । इति भरतः ॥ तत्पर्य्यायः । नलिनी २ बिसिनी ३ । इत्यमरः । १ । १० । ३९ ॥ मृणालिनी ४ कमलिनी ५ पुटकिनी ६ पङ्कजिनी ७ सरोजिनी ८ । इति माधवः ॥ नालिकिनी ९ नालीकिनी १० अरविन्दिनी ११ । इति कोषान्तरम् ॥ अम्भोजिनी १२ पुष्करिणी १३ अम्बुजिनी १४ । इति शब्दरत्नावली ॥ अब्जिनी १५ । तस्या लक्षणं यथा,—
"नलनालदलोत्फुल्लकमलैः सहिता पुनः ।
पद्मिनी प्रोच्यते प्राज्ञैर्बिसिन्यादिश्च सा स्मृता ॥"
तस्या गुणाः ।
"पद्मिनी मधुरा तिक्ता कषाया शिशिरा परा ।
पित्तकृमिशोषवान्तिभ्रान्तिसन्तापदोषहृत् ॥"
इति राजनिर्घण्टः ॥
(पद्मं पद्मगन्धोऽस्त्यस्याः पद्मस्य गन्ध इव गन्धो विद्यते शरीरे यस्याः इति तात्पर्य्यार्थः अत एव पद्मगन्धयोगादासां पद्मिनीत्वेन समाख्या कथिता ।) चतुर्विधस्त्रीमध्ये स्त्रीविशेषः । तस्या लक्षणं यथा,—
"भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी ।
मृदुवचनसुशीला नृत्यगीतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥"
इति रतिमञ्जरी । ४ । ७ ।
(अस्या रतिप्रकारः यथोक्तः तत्रैव । २८ ।
"कुर्य्यं कामं संमर्द्य पीडयेदधरं दृढम् ।
रमयेत् पद्मगन्धिं पद्मिनीं रतिमादिशेत् ॥")
सरोवरम् । पद्मम् । इति विश्वः ॥ (यथा, कुमारे । ३ । ७६ ।
"सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः ॥")
मृणालम् । इति शब्दमाला ॥ हस्तिनी । इति धरणिः ॥

पद्मिनीकण्टकः, पुं, (पद्मिनीकण्टक इव आकृतिर्विद्यतेऽस्य ।) क्षुद्ररोगविशेषः । पद्मकाँटा इति भाषा । तल्लक्षणं यथा,—
"कण्टकैराचितं वृत्तं कण्डूमत् पाण्डुमण्डलम् ।
पद्मिनीकण्टकप्रख्यैराख्यातं कफवातजम् ॥"
अर्शितं चापम् । पद्मिनीकण्टकप्रख्यैः कण्टकैराचिततनुः । तदाख्यं पद्मिनीकण्टकनामकम् ॥
तच्चिकित्सा यथा,—
"पद्मिनीकण्टके योगी छर्द्दयेन्निम्बवारिणा ।
तेनैव सिद्धं सर्पिश्च मधुना पाययेद्बुधः ॥
निम्बारग्वधकल्केन मुहुरुद्वर्त्तनं हितम् ।
चतुर्द्दिनं निम्बोदककाथेन सेचनम् ॥
सर्वेष्वपि निम्बवृक्षकल्कप्रलेपः ।
अर्शेभूतं यदेव सिद्धं तत् पिबेत् मधुनान्वितम् ॥

पद्मिनीकण्टकाद्रोगान्मुक्तो भवति नान्यथा ॥”
इति निम्बादिष्टतम् । इति भावप्रकाशः ॥

पद्मिनीकान्तः, पुं, (पद्मिन्याः कान्तः । पद्मपुष्पप्रकाशकत्वादस्य तथात्वम् ।) सूर्य्यः । इति जटाधरः ॥

पद्मिनीवल्लभः, पुं, (पद्मिन्या नलिन्या वल्लभः प्रियः । पद्मिनी वल्लभाऽस्येति वा ।) सूर्य्यः । इति शब्दरत्नावली ॥

पद्मी, [न्] पुं, (पद्मं विन्दुजालकमस्त्यस्य । पद्म + इनिः ।) हस्ती । इत्यमरः । २ । ८ । ३५ ॥ (यथा, महाभारते । १२ । २९ । ६६ ।
“सर्व्वा रथगताः कन्या रथाः सर्व्वे चतुर्युजः ।
शतं शतं रथे नागाः पद्मिनो हेममालिनः ॥”
नाभिकमले हस्ते वा पद्ममस्यास्तीति । विष्णुः । यथा, महाभारते । १३ । १४९ । ५० ।
“अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ।
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥”)

पद्मेशयः, पुं, (पद्मे शेते इति । शीङ् स्वप्ने + “अधिकरणे शेतेः ।” ३ । २ । १५ । इति अच् । “शयवासवासिष्वकालात् ।” ६ । ३ । १८ । इत्यलुक् ।) विष्णुः । इति हेमचन्द्रः ॥

पद्मोत्तरः, पुं, (पद्मादुत्तरः सर्व्वतः श्रेष्ठः ।) कुसुम्भः । इति राजनिर्घण्टः ॥

पद्मोत्तरात्मजः, पुं, (पद्मोत्तरस्य आत्मजः पुत्त्रः ।) जिनचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥

पद्मोद्भवः, पुं, (पद्मं उद्भव उत्पत्तिस्थानं यद्वा पद्मे पद्माद्वा उद्भवो यस्य ।) ब्रह्मा । अब्जयोनिरित्यमरदर्शनात् ॥ (यथा, महाभारते । १३।६।४ ।
“ततः पद्मोद्भवो राजन् ! देवदेवः पितामहः ।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम् ॥”)

पद्मोद्भवा, स्त्री, (पद्मे पद्माद्वा उद्भवो यस्याः ।) मनसा देवी । यथास्याः पौराणिकध्यानम् ।
“कान्त्या काञ्चनसन्निभां सुवदनां पद्मासनां शोभनां
नागेन्द्रैः कृतशेखरां विषहरीं पद्मोद्भवां जाङ्गलीम् ॥”

पद्यं, क्ली, (पदं चरणमर्हतीति । पद + यत् ।) कविकृतिः । श्लोकः । इत्यमरः । ३ । ५ । २१ ॥ तस्य लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
“पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥”
(तत्तु अन्वयगतिवशात् मुक्तकयुग्मकसन्दानितककलापककुलकभेदात् पञ्चविधम् । यदुक्तं साहित्यदर्पणे । ६ । २९७ ।
“छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥”
“तदूर्द्ध्वं कुलकं स्मृतम् ।” इति क्वचित् पाठः ॥)
शर्करा । इति जटाधरः ॥ (“पदमस्मिन् दृश्यम् ।” ४ । ४ । ८७ । इति यत् । मार्गिगुल्फकर्द्दमः । इति सिद्धान्तकौमुदी ॥)

पद्यः, पुं, (पद्भ्यां जातः । पद + यत् ।) शूद्रः । इति मेदिनी ॥ (यदुक्तं यजुषि ।
“ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥”)

पद्या, स्त्री, (पादाय हिता । शरीरावयवात् यत् । “पद्यत्यतदर्थे ।” ६ । ३ । ५२ । इति पद्भावः ।) स्तुतिः । इति विश्वः ॥ पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, ऋग्वेदे ।२।३१।२ ।
“यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥” पादौ विध्यन्ति पद्याः शर्कराः । इति सिद्धान्तकौमुदी । “विध्यत्यधनुषा ।” ४ । ४ । ८३ । इति यत् । “पद्यत्यतदर्थे ।” ६।३।५२ । इति पदादेशः ॥)

पद्रः, पुं, (पद्यतेऽस्मिन्निति । पद गतौ । “स्फायितञ्चीति ।” उणां । २ । १३ । इति रक् ।) ग्रामः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ग्रामपथः । इत्युणादिकोषः ॥ भूलोकः । देशभेदः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पद्वः, पुं, (पद्यते गम्यतेऽस्मिन्ननेन वा । पद गतौ “सर्व्वनिघृष्वरिष्वेति ।” उणां । १ । १५३ । इति निपातनात् सिद्धम् ।) भूलोकः । रथः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पन्थाः । इत्युणादिकोषः ॥

पद्वा, [न्] पुं, (पद्यते गम्यते यत्र । पद गतौ + “अमामसिपदीति ।” उणां । ४ । ११२ । इति वनिप् ।) पन्थाः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पन, ङ ईडे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ईडः स्तुतिः । पनायति पनायते विष्णुं धीरः । आयान्तत्वादुभयपदमिति वोपदेवः । परे तु आयस्याप्राप्तिपक्षे आत्मनेपदमेव । ङ, अपनिष्ट पेने पनिता पनिषीष्ट पनिष्यते अपनिष्यत । इति दुर्गादासः ॥

पनसः, पुं, (पनाय्यते स्तूयतेऽनेन देवः मनुष्यादिर्वेति । यद्वा पनायति स्तौति सन्तोषयतीत्यर्थः देवमनुष्यादीन् इति । पन स्तुतौ + “अर्त्तिपृवपियजितनिधनितपिभ्यो नित् ।” इति बाहुलकात् “अत्यविचमितमीति ।” उणां । ३ । ११७ । इति असच् ।) फलवृक्षविशेषः । काँटाल इति भाषा ॥ (यथा भागवते । ८ । २ । १० ।
“चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥”)
तत्पर्य्यायः । कण्टकिफलः २ । इत्यमरः । २।४।६१ ॥ महासर्ज्जः ३ फलिनः ४ फलवृक्षकः ५ स्थूलः ६ कण्टफलः ७ मूलफलदः ८ अपुष्पफलदः ९ पूतफलः १० चम्पकोषः ११ चम्पालुः १२ कण्टकीफलः १३ रसालः १४ मृदङ्गफलः १५ पानसः १६ । इति शब्दरत्नावली ॥ अस्य फलगुणाः । मधुरत्वम् । सुपिच्छिलत्वम् । गुरुत्वम् । हृद्यत्वम् । बलवीर्य्यवृद्धिदत्वम् । श्रमदाहविशोषनाशित्वम् । रुचिकारित्वम् । ग्राहित्वम् । परमदुर्ज्जरत्वञ्च । तद्वीजगुणाः । ईषत्कषायत्वम् । मधुरत्वम् । वातलत्वम् । गुरुत्वम् । रुच्यत्वम् । तत्फलविकारत्वम्दोषनाशित्वञ्च ।
“बालन्तु नीरसं हृद्यं मध्यं पक्वन्तु दीपनम् ।
रुचिदं लवणाभ्यक्तं पनसस्य फलं स्मृतम् ॥”
इति राजनिर्घण्टः ॥ * ॥
“पनसः कण्टकिफलः फणसोऽतिबृहत्फलः ।
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ॥
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतव्रणान् ॥
आमन्तदेव विष्टम्भि वातलं तुवरं गुरु ।
दाहकृन्मधुरं बल्यं कफमेदोविवर्द्धनम् ॥
पनसोद्भूतवीजानि वृष्याणि मधुराणि च ।
गुरूणि बद्धवर्चांसि सृष्टमूत्राणि संवदेत् ॥”
अन्यच्च ।
“मज्जाः पनसजो वृष्यो वातपित्तकफापहः ।
विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥
अलं मनसपाकाय फलं कदलसम्भवम् ॥”
इति भावप्रकाशः ॥ * ॥
“कण्टाफलं सुमधुरं बृंहणं स्निग्धशीतलम् ।
दुर्ज्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम् ॥
तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम् ।
छर्द्दिघ्नं न च पथ्यं स्यात्तच्च वातपित्तनुत् ॥
कण्टाफलमपक्वन्तु कषायं स्वादु वातलम् ।
रक्तपित्तहरं स्वादु तत्फलास्थ्यापि तद्गुणम् ॥”
इति राजवल्लभः ॥

पनसतालिका, स्त्री, (पनसं दीर्घत्वेन तुल्यं यत्तालम् । तद्वत् फलमस्त्यस्याः । ठन् ।) कण्टकिफलम् । इति शब्दमाला ॥

पनसिका, स्त्री, (पनसवत् कण्टकमयाकृतिर्विद्यते यस्याः । पनस + ठन् ।) क्षुद्ररोगविशेषः । स च कर्णमध्यजातव्रणः । तल्लक्षणं यथा,—
“कर्णस्याभ्यन्तरे जातां पिडकामुग्रवेदनाम् ।
स्थिरां पनसिकां तान्तु विद्याद्वातकफोत्थिताम् ॥”
तच्चिकित्सा यथा,—
“भिषक् पनसिकां पूर्व्वं स्वेदयेदथ लेपयेत् ।
कल्कैर्मनःशिलाकुष्ठनिशातालकदारुजैः ॥
पक्वां विज्ञाय तां भित्त्वा व्रणवत् समुपाचरेत् ॥”
इति भावप्रकाशः ॥

पन्थाः, [इन्] पुं, पतन्ति यान्त्यनेन । (पत्लृ गतौ + “पतस्थ च ।” उणां । ४ । १२ । इति इनिः थकारान्तादेशः ।) रथ्या । रास्ता इति भाषा ॥ (यथा, मनुः । ४ । ४५ ।
“न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ॥”)
तत्पर्य्यायः । अयनम् २ वर्त्म ३ मार्गः ४ अध्वा ५ पदवी ६ सृतिः ७ सरणिः ८ पद्धतिः ९ पद्या १० वर्त्तनी ११ एकपदी १२ । इत्यमरः । २।१।१५ ॥ पथः १३ पदविः १४ पदवी १५ सरणी १६ शरणिः १७ पद्धती १८ वर्त्तनिः १९ । इति भरतः ॥ शरणी २० वाटः २१ घर्म्मवर्त्तनम् २२ मार्गः २३ विशिखः २४ वीथिः २५ । इति शब्दरत्नावली ॥ * ॥

मार्ग लक्षणम् ।
“विंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः ।
विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दश विस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ॥

त्रिकराश्चोपरश्चास्तु द्विकराश्चुपरश्चका ।
चतुष्पथचतुष्पार्श्वक्षिप्रादस्य यथान्तरम् ।
इतोपादत्वर्द्धपादः पार्श्वंशः पादकः स्मृतः ॥
अवकरः परीवारः पादमात्रः समन्ततः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणाध्यायः ॥ * ॥
चतुष्पथलक्षणादि यथा,—
"एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथन्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥"
इति गौतमतन्त्रम् ॥ * ॥
पथगमनगुणाः ।
"अध्वा मेदःकफस्थौल्यसौकुमार्य्यविनाशनः ।
यत्तु चङ्क्रमणं नातिदेहपीडाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥"
इति राजवल्लभः ॥ * ॥
ब्राह्मणादिभ्यः पथावकाशो देयो यथा,—
"पन्था देयो ब्राह्मणाय स्त्रियै राज्ञे ह्यचक्षुषे ।
वृद्धाय भारभुग्नाय रोगिणे दुर्ब्बलाय च ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥ * ॥
गोपथदानफलं यथा,—
"गोमार्गस्य तथा कर्त्ता गोलोके क्रीडते चिरम् ।"
इति प्रतिष्ठातत्त्वे हयशीर्षपञ्चरात्रम् ॥ * ॥
महाजनाचाराद्युपचारो यथा,—
"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
इति महाभारते ।३।३१२।११२। धर्म्मबकप्रश्ने युधिष्ठिरोत्तरम् ॥ * ॥ नरकविशेषः । यथा- ट्यामते । इति मनौ ४ अध्यायः ॥
पन्नं, त्रि, (पद्लृ इ गतौ + "गत्यर्थेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥
पन्नः, पुं, (पन स्तुतौ + "कृदन्तु भिद्यमौति ।" उणा । ३ । १० । इति नः स च कित् ।) अधोगमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
पन्नगः, पुं, (पन्नं अधोगमनं पतितं वा गच्छतीति । गम ऌ गतौ + "अन्येष्वपि दृश्यते।" ३ । २ । ४८ । इत्यस्य वार्त्ते इति डः । पद्भ्यां न गच्छतीति वा विग्रहः ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, विष्णुपुराणे । १ । १७ । ७ ।
"पातालमहीं महामायं हिरण्यकशिपुं तदा ।
अवसाधयिष्ये दर्पं जिह्वामग्नेस्तदा ।")
ओषधीभेदः । पद्मकाष्ठम् । इति मेदिनी ॥
पन्नगकेसरः, पुं, (पन्नगस्य केसरो यत्र ।) नागकेसरवृक्षः । इति राजनिर्घण्टः ।
पन्नगाशनः, पुं, (पन्नगं सर्पं अश्नातीति । अश् भोजने + ल्युः । पन्नगः अशनं भक्ष्यो यस्येति वा ।) गरुडः । इत्यमरः । १ । १ । ३१ ॥
पन्नगी, स्त्री, (पन्नग + जातौ ङीष् ।) पन्नगपत्नी । (यथा, भागवते । ३ । १८ । ११ ।
"तां स व्यापततीं वीक्ष्य भगवान् समवस्थितः ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥")
मनसा देवी । यथा, तिथितत्त्वे ।
"पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥".
सर्पिणीक्षुपः । इति राजनिर्घण्टः ॥
पन्नद्धा, स्त्री, (पदि नद्धा बद्धा ।) चर्म्मपादुका । इति हेमचन्द्रः ॥
पन्नद्धी, स्त्री, (पदोर्बद्धस्योपनद्धी ।) चर्म्मपादुका । इति त्रिकाण्डशेषः ॥
पपिः, पुं, (पाति लोकम् । पिबति वा । पा + "आदृगमहनजनः किकिनौ लिट् च ।" ३।२। १७१ । इति किः द्वित्वञ्च ।) चन्द्रः । पानकर्त्तरि त्रि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, ऋग्वेदे ।८।२३।८। "पपिः सोमं ददिर्गाः ॥")
पपीः, पुं, (पाति लोकम् । पा रक्षणे + "पापीः किन् द्वे च ।" उणा । ४ । १५६ । इति ईक् द्वित्वञ्च ।) सूर्य्यः । चन्द्रः । इत्युणादिकोषः ॥
पपुः, पुं, (पाति रक्षतीति । "कुर्भ्रश्चेति ।" उणा । १ । २४ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च ।) पालकः । धात्री स्त्री । इत्युणादिकोषः ॥
पमरा, स्त्री, गन्धद्रव्यविशेषः । सम्मुकी इति ख्याता । अस्या गुणाः । कटुत्वम् । पवनालक्ष्मीरघोज्वर- नाशित्वम् । इति राजवल्लभः ॥
पम्पा, स्त्री, (पाति रक्षति मत्स्यादीन् स्वीय- पवित्रसलिलदानादिभिरिति शेषः । पा पालने + "खष्प-शिल्प-शष्प-बाष्प-रूप-पर्प-तल्पाः ।" उणा । ३ । २८ । इति निपातनात् पम्पा सुका- गमत्वे च साधुः ।) ओड्रदेशस्थनदीविशेषः । इत्युणादिकोषः ॥ (यथा, रघुः । १३ । ३० ।
"दूरावतीर्णां पिबतीव खेदा- दमूनि पम्पासलिलानि दृष्टिः ॥"
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥)
पम्ब, गतौ । (भ्वा-परं-सकं-सेट् ।) ओष्ठवर्गी- यशेषोपधः । पम्बति । इति दुर्गादासः ॥
पय, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा- आत्मं- सकं-सेट् ।) इ, पय्यते । इति दुर्गादासः ॥
पयः [स्] क्ली, (पयते पीयते वा पय गतौ पी इ पाने वा + "सर्व्वधातुभ्योऽसुन् ।" उणा । ४ । १८८ । इत्यसुन् ।) जलम् । (यथा, रघुः ।१।४०।
"पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ॥")
दुग्धम् । इति मेदिनी ॥ (यथा, मनुः । ३ । ८२ ।
"कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्व्वापि पितृभ्यः प्रीतिमावहन् ॥")
पयःकन्दा, स्त्री, (पयः कन्दे यस्याः ।) क्षीर- विदारी । इति राजनिर्घण्टः ॥
पयःपेयी, स्त्री, (पयो दुग्धमिव पेयमस्याः । गौरा- दित्वात् ङीष् ।) दुग्धफेनीक्षुपः । इति राज- निर्घण्टः ॥
पयश्चयः, पुं, (पयसां चयः समूहः ।) जलसमूहः । समुद्रादिः । पूरः । वैकि । इति जटाधरः ॥
पयस्यं, त्रि, (पयसो विकारस्तस्य हितं वा । पयस् + "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् ।) पयोविकारः । घृतदध्यादि । इत्यमरः । २ । ९ । ५१ ॥ पयोहितम् । इति मेदिनी ॥
पयस्यः, पुं, (पयः पिबतीति ।) बिडालः । इति शब्दचन्द्रिका ॥
पयस्या, स्त्री (पयस्य + टाप् ।) दुग्धिका । क्षीर- काकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्क- पुष्पिका । इति रत्नमाला ॥ कुट्टुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥ आमिक्षा । इति हेम- चन्द्रः ॥
पयस्वलः, पुं (पयोऽस्त्यस्य । पयस् + "सिध्मादिभ्यो- ऽपीति ।" वलच् ।) छागः । इति राज- निर्घण्टः ॥
पयस्विनी, स्त्री, (पयो विद्यतेऽस्याः । "अस्माया- मेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ततो ङीप् ।) नदी । (प्रशस्तजल- वत्त्वात्तथा पुण्यसलिलत्वाद् गङ्गा । यथा, काशी- खण्डे गङ्गासहस्रनामकीर्त्तने । २९ । १०६ ।
"परापरफलप्राप्तिः पावनी च पयस्विनी ॥")
धेनुः ।(यथा, रघुः, । २ । २१ ।
"प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ॥")
रात्रिः । इति मेदिनी ॥ काकोली । क्षीर- काकोली । दुग्धफेनी । क्षीरविदारी । छागी । इति राजनिर्घण्टः ॥ जीवन्ती इति भावप्रकाशः ॥ (गायत्रीस्वरूपा महादेवी । यथा, देवीभाग- वते । १२ । ६ । ८६ ।
"प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥")
पयोगडः, पुं, (पयसो गड इव ।) वर्षोपलः । द्वीपः । इति शब्दमाला ॥
पयोघनः, पुं, (पयोभिर्घनः सान्द्रः ।) घनोपलः । इति त्रिकाण्डशेषः ॥
पयोजन्मा, [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।) मेघः । इति शब्दमाला ॥
पयोधरः, पुं, (धरतीति धरः । धृ + अच् । पयसो दुग्धस्य जलस्य वा धरः ।) कोलकः । (यथा, रघुः । १४ । २२ ।
"अङ्गुलनखक्षतपयोधरेषु
श्रेता च सपत्नीव सुखं सा तु")
मेघः । इत्यमरः । १ । ३ । १११ ॥ कोषकारः । नारिकेलम् । कशेरु । इति मेदिनी ॥
पयोधाः, [स्] पुं, (पयो जलं दधातीति । डु धा ञ् धारणे + "पयसि च ।" पक्षे । ४ । ३ । २२८ । इति असिः ।) समुद्रः । जलाधारः । इत्युणादि- कोषः ॥
पयोधिः, पुं, (पयांसि धीयन्तेऽस्मिन् । डु धा ञ् + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । इति राजनिर्घण्टः ॥
पयोधिकं, स्त्री, (पयोधौ समुद्रे कायति प्रका- शते इति । कै + कः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥

पयोनिधिः, पुं, (पयांसि निधीयन्तेऽस्मिन्। धा धारणे+अधिकरणे किः।) समुद्रः। यथा,—
"न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता।"
इति नैषधे। ४। ५०॥ (पय इव शुक्लः सत्त्वगुणः निधीयतेऽत्र इति विग्रहे। शिवः। यथा, महाभारते। १३। १७। ८१।
"लम्बनो शमितोऽश्च महामायः पयोनिधिः॥")
पयोरः, पुं, (पयो जलं रातीति। रा+कः।) खदिरः। इति शब्दचन्द्रिका॥
पयोलता, स्त्री, (पयः क्षीरं तेनाढ्या लता।) क्षीरविदारी। इति राजनिर्घण्टः॥
पयोव्रतः, पुं, (पयोमात्रपानसाध्यो व्रतः।) पयोमात्रपानरूपव्रतविशेषः। यथा,—
"पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम्।
पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा॥"
इति मात्स्ये १५२ अध्यायः॥ *॥
द्वादशाहसाध्यविष्णुव्रतविशेषः। यथा,—
कश्यप उवाच।
"एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम्॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः।
अर्च्चयेदरविन्दाक्षं भक्त्या परमयान्वितः॥
सिनीवाल्यां मृदालिप्य स्नायात् क्रोडविदीर्णया।
यदि लभ्येत वै स्रोतस्येतन्मन्त्रमुदीरयेत्॥
त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता।
उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय॥
निर्व्वर्त्तितात्मनियमो देवमर्च्चेत् समाहितः।
अर्च्चायां स्थण्डिले सूर्य्ये जले वह्नौ गुरावपि॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे।
सर्व्वभूतनिवासाय वासुदेवाय साक्षिणे॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च।
चतुर्व्विंशद्गुणज्ञाय गुणसंख्यानहेतवे॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः॥
नमः शिवाय रुद्राय नमः शक्तिधराय च।
सर्व्वविद्याधिपतये भूतानां पतये नमः॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने।
योगैश्वर्य्यशरीराय नमस्ते योगहेतवे॥
नमस्त आदिदेवाय साक्षिभूताय ते नमः।
नारायणाय ऋषये नराय हरये नमः॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे॥
त्वं सर्व्ववरदः पुंसां वरेण्य वरदर्षभ!।
अतस्ते श्रेयसे धीराः पादरेणुमुपासते॥
अन्ववर्त्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः।
स्पृहयन्त इवामोदं भगवान्मे प्रसीदताम्॥
एतैर्म्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम्।
अर्च्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः॥
अर्च्चित्वा गन्धमाल्याद्यैः पयसा स्नापयेद्विभुम्।
वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः॥
गन्धधूपादिभिश्चार्च्चेद्द्वादशाक्षरविद्यया।
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति॥
ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया।
निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वयम्॥
दत्त्वाचमनमर्च्चित्वा ताम्बूलञ्च निवेदयेत्।
जपेदष्टोत्तरशतं स्तवीत स्तुतिभिः प्रभुम्॥
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा।
कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः॥
द्व्यवरान् भोजयेद्विप्रान् पायसेन यथोचितम्।
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः॥
ब्रह्मचार्य्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि।
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः॥
पयसा स्नापयित्वार्च्चेद्यावद्व्रतसमापनम्।
पयोभक्षो व्रतमिदं चरेद्विष्ण्वर्च्चनादृतः॥
पूर्व्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत्।
एवन्त्वहरहः कुर्य्याद्द्वादशाहं पयोव्रतम्॥
हरेराराधनं होममर्हणं द्विजतर्पणम्।
प्रतिपद्दिनमारभ्य यावत् शुक्लत्रयोदशीम्॥
ब्रह्मचर्य्यमधःस्वप्नं स्नानं त्रिषवनञ्चरेत्।
वर्ज्जयेदसदालापं भोगानुच्चावचांस्तथा॥
अहिंस्रः सर्व्वभूतानां वासुदेवपरायणः।
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः॥
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः।
पूजाञ्च महतीं कुर्य्याद्वित्तशाठ्यविवर्ज्जितः॥
चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे।
सूक्तेन तेन पुरुषं यजेत सुसमाहितः॥
नैवेद्यञ्चातिगुणवद्दद्यात् पुरुषतुष्टिदम्।
आचार्य्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः॥
तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः।
भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते॥
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः।
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः॥
अन्नाद्येनाश्वपाकांश्च प्रीणयेत् समुपागतान्।
भुक्तवत्सु च सर्व्वेषु दीनान्धकृपणेषु च॥
विष्णोस्तत् प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः।
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचनैः॥
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम्।
एतत् पयोव्रतं नाम पुरुषाराधनं परम्॥
पितामहेनाभिहितं मया ते समुदाहृतम्।
त्वञ्चानेन महाभागे! सम्यक् चीर्णेन केशवम्॥
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम्।
अयं वै सर्व्वयज्ञाख्यः सर्व्वव्रतमिति स्मृतम्॥
तपःसारमिदं भद्रे दानञ्चेश्वरतर्पणम्।
त एव नियमाः साक्षात्त एव च यमोत्तमाः॥
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः।
तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर॥
भगवान् परितुष्टस्ते वरानाशु विधास्यति॥"
इति श्रीभागवते ८ स्कन्धे १६ अध्यायः॥
पयोष्णिजाता, स्त्री, (पयोष्णी नाम्नी नदी जाता यस्याः। पञ्चोदरात् साधुः।) सरस्वती नदी। इति राजनिर्घण्टः॥
पयोष्णी, स्त्री, (पयः सलिलं उष्णं उष्णगुणं वा यस्याः।) नदीविशेषः। सा विन्ध्याचलदक्षिणे प्रसिद्धा। अस्या जलगुणाः।
"पयोष्णीसलिलं रुच्यं पवित्रं पापनाशनम्।
सर्व्वामयहरं सौख्यबलकान्तिप्रदं लघु॥"
इति राजनिर्घण्टः॥
परं, क्ली, (पॄ+"ऋदोरप्।" ३।३।५७। इति अप्।) केवलम्। इति मेदिनी॥ मोक्षः। यथा। कैवल्यमन्दतं परम्। इति मुक्तिपर्य्याये रत्नावली॥ (ब्रह्म ब्रह्मा च। यदुक्तं श्रुतौ।
"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च॥"
विष्णुः। यथा, महाभारते। १३। १४९। २०।
"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम्॥"
ब्रह्मण आयुः। यथा, मार्कण्डेये। ४६। ४२।
"एवन्तु ब्रह्मणो वर्षमेकं वर्षशतन्तु तत्।
शतं हि तस्य वर्षाणां परमित्यभिधीयते।
पञ्चाशद्भिस्तथा वर्षैः परार्द्धमिति कीर्त्त्यते॥")
परं, [म्] अ, नियोगः। क्षेपः। इति मेदिनी॥
परः, पुं, (पॄ+अप्।) शत्रुः। इत्यमरः॥ (यथा, रघुः। ७। ६७।
"इतः परानर्भकहार्य्यशस्त्रान्
वैदर्भि! पश्यानुमता मयासि॥")
ब्रह्मण आयुः। यथा,—
"कालसंख्यां समासेन पूर्व्वार्द्धद्वयकल्पिताम्।
स एव स्यात् परः कालस्तदन्ते परिपूर्य्यते॥
निजेन तस्य मानेन आयुर्व्वर्षशतं स्मृतम्।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते॥"
अपि च।
"त्रीणि कल्पशतानि स्युस्तथा पञ्चाशदुत्तमाः।
ब्रह्मणः कथितं वर्षं पराख्यं तच्च तत् पदम्॥"
इति कौर्म्मे ५ अध्यायः॥
(शिवः। यथा, तत्रैव। १३। १७। ९७।
"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः॥")
परः, त्रि, श्रेष्ठः। (यथा, आर्य्यासप्तशत्याम्।६५५।
"परमोहनाय मुक्तो निष्करुणो
तरुणि! तव कटाक्षोऽयम्।
विशिख इव कलितकर्णः
प्रविशति हृदयं निःसरति॥")
अरिः। दूरः। अन्यः। उत्तरः। इति मेदिनी॥*॥
न्यायमते न्यूनदेशवृत्तिसत्ता। इयं व्यापक जातिः। यथा,—
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥
परभिन्ना तु या जातिः सैवापरतयोच्यते।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते॥
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च॥"
इति भाषापरिच्छेदे। ८—९॥*॥
परात्मादिभवत्यादेः शीनाथकार्थं यथा,—
"परात्परतरश्च परमात्मा परश्रियः।
परेऽस्मिन् वासश्च प्रकाशरूपं हरेर्स्थितम्॥"
इति गरुडपुराणम्॥*॥
इष्टवाचकपरशब्दप्रयोगाः। यथा,—
"अमरात्मः शतगुरोर्भीष्टदेवः परः स्मृतः।
गुरुत्वश्चाद्भुतगुणो विश्रामकप्रदायकः॥"

अज्ञानतिमिरान्धस्य ज्ञानदीपेन चक्षुषा ।
यः सन्मार्गं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुरं भजेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कामस्थात् स महापातकी प्रिय ! ॥
नास्ति वेदात् परं शास्त्रं न हि कृष्णात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीपरम् ॥
क्षमावती भूपरा न पुत्रादास्ति परः प्रियः ।
न च दैवात् परः शक्तो व्रतं नैकादशीं विना ॥
शालग्रामात् परो यन्त्रो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वत्याः परा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

परःशतं, त्रि, शतात् परम् । शताधिकसंख्या । इत्यमरः । ३ । १ । ६४ ॥

परःश्वः, [स्] अ, श्वो दिनात् परमहः परःश्वः परः गवमवत् पारस्करादित्वात् सुट् परःश्व इति मधुः । सुटं नेच्छन्त्यन्ये परश्व इत्याहुः । अतिक्रान्ते पूर्व्वतरे दिने परश्वो जात इति प्रयोगो गौणः तत्र परश्च तत् श्वश्चेति कर्म्मधारयः । इति भरतः ॥ श्वः परदिः । इत्यमरः । ३ । ४ । २१ ॥ परशु । इति भाषा ॥

परःसहस्रं, त्रि, सहस्रात् परम् । सहस्राधिकसंख्या । इत्यमरटीका ॥

परकीयं, त्रि, (परस्येदम् । "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः । "कुगुजनस्य परस्य च ।" इति कुक् ।) परसम्बन्धि । (यथा, मनुः ।४।२०१ ।
"परकीयनिपानेषु न स्नायाच्च कदाचन ॥")

परकीया, स्त्री, (परकीय+टाप् ।) नायिकाभेदः । अस्या लक्षणं यथा । अप्रकटपरपुरुषानुरागा । सा च द्विविधा । परोढ़ा १ कन्यका च २ । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा ॥ ० ॥
परोढ़ा यथा,—
"अयं दैवाकृष्टः कुसुमशरकेलीकलहिनः
कलिन्दीयं कूलादविरलदलालम्बितवनः ।
इयं प्रावृड्धन्या जलधरविलासैकचतुरा
परपारीणं चेतः सखि ! किमपि कर्त्तुं व्यवसिते ॥" * ॥
गुप्ताविदग्धालक्षिताकुलटानुशयानामुदितानां भेदा परकीयायाः इत्यवान्तरभेदाः । गुप्ता त्रिविधा । वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वर्त्तमानसुरतगोपना च ३ ।
प्रथमा यथा,—
"श्वश्रूः कुप्यतु विद्विषन्तु पशवो निन्दन्तु वा पामर-
कामिन् किन्तु न मन्दिरे भवति । तुभ्यः गतो
[illegible] मता ।
कासारात्तमरालकोऽम्बुरुहाद्भृङ्गान्मरालतनो
माग्नोति स्मरैः शरैः क्षतवती को को न मे
दूरं गमात् ॥" * ॥

विदग्धा द्विविधा । वाग्विदग्धा १ क्रियाविदग्धा चेति २ । प्रथमा,—
"निविडतमतमालमञ्जुवल्ली-
विचकिलराजिविराजितोपकण्ठे ।
पथिक समुचितस्तवाद्य तीर्थे
सवितरि तव सरितटे निवासः ॥"
द्वितीया यथा,—
"दाराय भवनमार्थे बदरीमपनेतुमादिशति ।
ईमर्थे हरिणाक्षी वहति कुठारं विनिश्चि-
नति ॥" * ॥
लक्षिता यथा,—
"अङ्गूलं लङ्घितं पङ्कपातादपि वा भूयात् ।
पङ्कवत् सङ्कवत् वा विफलमत्र गोपनायासः ॥" * ॥
कुलटा यथा,—
"एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाड्वलमुद्वमन्ति न वितरन्त्येते पुनर्नायकान् ।
त्रैलोक्ये तरवः फलानि सुवते नैवार्भकान् मनागिति
धातः ! कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ॥"
अपि च ।
"दृष्टौ तावत्तिरोधा विपुलजघनयोर्याचकद्वं सदैव
तस्यामेवास्ति गोष्ठी विपिनमपि तथा चैत्र-काशारकूपाः ।
लोकानामद्वैभारी भिषुरपि नरसः कोऽपि रोगी विवेकी
मिथ्यावादी ममायं सुरतसुखपरः पुंश्चली पुंश्चलीति ॥" * ॥
अनुशयाना त्रिविधा ।
वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तृगमनानुमानेन प्रत्येकं उदाहरणानि ।
"यमुनातटवर्त्तिनि चैत्रे विपतति पत्रे तपङ्कनतिकायाः ।
सुतनुः कपोलपाली प्रिय प्रिय शालीदलद्युतिं लेभे ॥" * ॥
"विलासुकेकिमिथुनानि कपोतपोत-
व्यापूतकूजनमहीरुहमण्डपानि ।
तन्वानि सन्ति न वनानि कियन्ति सन्ति
सिद्धास्त्र न प्रियतमस्य गृहं प्रयाहि ॥
कर्णावतंसरसालमञ्जरी-
पिञ्जरीकृतकपोलमण्डलः ।
निर्गतघनवारिधारया
राधया मधुरिपुर्निरीक्ष्यते ॥" * ॥
मुदिता यथा,—
"गोष्ठेषु तिष्ठति पतिर्व्वधिरा ननान्दा
नैवाङ्गनस्य न च मातृवमेति यातुः ।
इत्थं निशम्य सुतनुः कुचकुम्भयोरपि
रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥" * ॥
कन्यका यथा,—
"किञ्चित्कुञ्चितहारयष्टिरलसभ्रूवल्लिराविष्कृतं
प्रालम्बागतविलोचनद्युतिसुधा सर्व्वत्र कर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्व्वाणा नृपकन्यका सुकृतिनं प्रत्यासमालो-
कते ॥"
इति रसमञ्जरी ॥

परक्षेत्रं, क्ली, (परस्य क्षेत्रं शस्यादि ।) परस्त्री । (यथा, मनुः । ३ । १७५ ।
"तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥")
परशरीरम् । परभूमिः । यथा,—
"इत्यादौ परक्षेत्रादागतानि शेखरकाः ।"
इति चन्द्रालोकः ॥
(तथा च मनुः । ८ । ३४१ ।
"द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥")

परग्रन्थिः, पुं, (परेषां ग्रन्थिरिव ।) पर्व्वसन्धिः । अङ्गुलिपर्व्व । इति हारावली ॥

परच्छन्दः, त्रि, (परस्य छन्दो यस्य ।) पराधीनः । इति हेमचन्द्रः ॥

परच्छिद्रं, क्ली, (परस्य छिद्रम् ।) परदोषः । यथा,
"नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥"
इति गरुडपुराणम् ॥

परजातः, त्रि, (परस्य जातः । परपुष्टत्वात्तथात्वम् ।) परैधितः । कोकिलेति परपुष्टः । परपोषितत्वात् । परजातः । इत्यमरभरतौ ॥ अन्येनोत्पन्नश्च ॥ (कोकिले पुं । तस्य हि काकेन पुष्टो भवतीति प्रसिद्धिः ॥)

परजितः, त्रि, (परेण जितः ।) परपुष्टः । अमुना पराजितः । इति केचित् ॥

परञ्जः, पुं, (परं जयतीति । जि जये+बाहुलकात् डः ।) तैलयन्त्रम् । छुरिकाफलः । फेनः । इति मेदिनी ॥

परञ्जनः, पुं, (परस्याः पश्चिमस्या दिशो जनः स्वामी । निपातनात् साधुः ।) वरुणः । इति हेमचन्द्रः ॥

परञ्जयः, पुं, (परां पश्चिमां दिशं जयति वशीकरोति । जि+खच् । अरुर्द्विषदिति मुम् च ।) वरुणः । इति त्रिकाण्डशेषः ॥ शत्रुजयकर्त्तरि । परान् जयतीति व्युत्पत्तिलभ्यः ॥

परतन्त्रः, त्रि, (परस्तन्त्रं प्रधानं यस्य ।) पराधीनः । इत्यमरः ॥ (यथा, महाभारते । १ । ११ । १४ ।
"परतन्त्रं कथं हेतुमावाभ्यामनुमन्यसे ।
कर्म्मणा हि महाभाग ! धर्म्यं क्षत्रवधिकम् ॥"
परस्य तन्त्रं इति विग्रहे क्ली । परकीयशास्त्रम् । परं श्रेष्ठं तन्त्रमिति विग्रहे । उत्कृष्टशास्त्रम् । उत्तमपरिच्छदम् ॥)

परत्रभीरुः, त्रि, (परत्र परलोके भयात् भीतः ।) धार्म्मिकः । परलोकभयभीतः । यथा,—

"परत्रभीरुं धर्म्मिष्ठमुद्युक्तं क्रोधवर्ज्जितम् ॥"
इति मिताक्षरायां कात्यायनः ॥

परत्वं, क्ली, परस्य भावः । परता । न्यायमते तद्द्विविधम् । दैशिकम् १ । तत्तु बहुतरमूर्त्तसंयोगज्ञानजन्यगुणः । कालिकम् २ तच्च बहुतरकालान्तरितत्वज्ञानजन्यगुणः । एतद्द्वयं मूर्त्तपदार्थगुणः । दैशिकपरत्वस्यासमवायिकारणं दिक्शरीरसंयोगः । कालपरत्वस्यासमवायिकारणं कालपिण्डसंयोगः । ते अपेक्षाबुद्धिजन्ये । तन्नाशनाश्ये च । यथा,—
"परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् ।
दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥
परत्वं मूर्त्तसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दभूयस्त्वोत्पन्नत्वबुद्धितः ॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी तु संयोगः कालपिण्डयोः ॥
अपेक्षा बुद्धिनाशाच्च नाशस्तेषां निरूपितः ।"
इति भाषापरिच्छेदः ॥

परदारः, (परस्य दाराः ।) परभार्य्या । तद्गमने दोषो यथा, कर्म्मलोचनम् ॥
"परदाररताश्चैव परद्रव्यहराश्च ये ।
अधोऽधो नरके यान्ति पीड्यन्ते यमकिङ्करैः ॥"
"ब्राह्मणः क्षत्त्रियो वैश्यो यो रतः परयोषिति ।
याति तस्यापूजितस्य रुष्टा लक्ष्मीर्गृहादपि ॥
इहातिनिन्द्यः सर्व्वत्र नाधिकारी स्वकर्म्मसु ।
परत्रैवान्धकूपे च यावदर्षशतं वसेत् ॥
अपि च ।
"किन्त्वल्पेन तपसा मौनेन च व्रतेन च ।
सुरार्च्चनेन तीर्थेन स्त्रीभिर्यस्य मनो हृतम् ॥
सर्व्वमायाकरण्डञ्च धर्म्ममार्गार्गलं नृणाम् ।
व्यवधानञ्च तपसां दोषाणामाश्रमं परम् ॥
कर्म्मबन्धनिबद्धानां निगड़ं कठिनं सुत ! ।
प्रदीपरूपं कीटानां मीनानां वड़िशं यथा ॥
विषकुम्भं दुग्धमुखमारम्भे मधुरोपमम् ।
परिणामे दुःखबीजं सोपानं नरकस्य च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० । ६१ अध्यायः ॥ * ॥
"यस्तु पाणिगृहीतां तां हित्वान्यां योषितं व्रजेत् ।
अगम्यागमनं तद्धि सद्यो नरककारणम् ॥
नित्यं नैमित्तिकं काम्यं यागयोग्यव्रतादिकम् ।
क्षेत्रतीर्थाटनं तस्मिन् वासो धर्म्मक्रियादिकम् ॥
स्वाध्यायादि तपो दैवं पैत्रं कर्म्म वरानने ! ।
यान्येतान्यफलं सर्व्वं परस्त्रीगमनात्मनाम् ॥
परदाराभिगमनात् कोटि एकादशीव्रतम् ।
अपरं किन्तु वक्तव्यं निष्फलं निरये स्थितिः ॥
सत्यं सत्यं पुनः सत्यं सत्यमेव ब्रवीमि ते ।
परयोनौ पतन् बिन्दुः कोटिपूजां विनाशयेत् ॥"
इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥ * ॥
अपि च ।
"स्याप्यं धर्म्मान्वितैर्नित्यं परदारोपसेवनम् ।
नयन्ति परदारा हि नरकानेकविंशतिम् ॥
सर्व्वेषामेव वर्णानामेष धर्म्मो ध्रुवोऽव्यय ! ॥
एवं पुरा सुरपते ! देवर्षिरसितोऽव्ययः ।
प्राह धर्म्मव्यवस्थानं खगेन्द्रायारुणाय हि ।
तस्मात् सुदूरतो वर्ज्जेत् परदारान् विचक्षणः ।
नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥"
इति वामने ६३ अध्यायः ॥

परदुःखं, क्ली, (परेषां दुःखम् ।) अन्यजनपीड़ा । यथा,—
"त्यक्तात्मसुखभोगेच्छाः सर्व्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥"
इत्यग्निपुराणम् ॥

परद्वेषी, [न्] त्रि, (परेभ्यो द्वेष्टीति । पर+द्विष्+णिनिः ।) विदूषकः । परद्वेष्टा । इति शब्दमाला ॥

परध्यानं, क्ली, (परं श्रेष्ठं ध्यानम् ।) ध्यानविशेषः । यथा,—
"ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥"
इति गरुड़पुराणम् ॥
(परस्य ब्रह्मणो ध्यानं यद्वा परं ब्रह्मविषयकं ध्यानमिति । ब्रह्मचिन्तनम् ॥ परेषां ध्यानमिति विग्रहे । परानिष्टचिन्तनम् ॥)

परन्तपः, त्रि, (परान् शत्रून् तापयतीति । तप सन्तापे "द्विषत्परयोस्तापेः ।" ३ । २ । ३९ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति उपधाया ह्रस्वत्वे मुम् ।) परतापी । (यथा, भट्टिः । १ । १ ।
"अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ॥")
(जितेन्द्रियः । इति चिन्तामणिः ॥ तामसमनोः पुत्त्रभेदः । यथा, हरिवंशे । ७ । २४ ।
"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः ।
तपोरतिरकल्माषस्तन्वीधन्वी परन्तपः ।
तामसस्य मनोरेते दशपुत्त्रा महाबलाः ॥"
नृपविशेषः । असौ हि मगधेश्वरः । यदुक्तं रघौ । ६ । २१ ।
"असौ शरण्यः शरणोन्मुखानां
अगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा ॥")

परपदं, क्ली, (परं श्रेष्ठं पदम् ।) श्रेष्ठस्थानम् । मुक्तिः । यथा,—
"कल्याणानां निदानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।"
इति महानाटकम् ॥
(परस्य परेषां वा पदं स्थानमितिविग्रहे । पराश्रम् ॥)

परपाकनिवृत्तः, पुं, (परार्थात् पाकात् निवृत्तः ।) परोद्देश्यकपाकरहितः । पञ्चयज्ञाकर्त्ता । यथा,—
"गृहीत्वाग्निं समारोप्य पञ्चयज्ञान्न निर्व्वपेत् ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्त्तितः ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपाकरतः, पुं, (परस्य पाके रतः ।) परपाकरुचिः । प्रातः पञ्चयज्ञानिर्व्वर्त्य परान्नभोजी । यथा,—मिताक्षरायां प्रायश्चित्ताध्याये ।
"पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥" * ॥
परपाकनिवृत्तपरपाकरतयोरन्नभोजने दोषो यथा,—
"परपाकनिवृत्तस्य परपाकरतस्य च ।
अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणञ्चरेत् ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपिण्डादः, त्रि, (परस्य पिण्डं अन्नादिकं अत्तीति । अद् भक्षणे + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) परान्नोपजीवी । इत्यमरः । ३ । १ । २० ॥

परपुरुषः, पुं, (परः श्रेष्ठः पुरुषः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (परोऽन्यः पुरुषः ।) अन्यपुमान् । उपनायकः । यथा,—
"राजन् श्रीवावधानं कुरु शृणु निभृतं प्रेयसीनां कुचेष्टा
एका ते कीर्त्तिकान्ता जगदटनपरा विश्वभोग्या परा श्रीः ।
या वा पाणौ गृहीता विधिवदसिलता शत्रुधारेति मत्वा
सोत्कण्ठं सापि नित्यं परपुरुषगतं मारभावादुपैति ॥"
इति कर्णाटराजस्तुति कालिदासः ॥

परपुष्टः, पुं, (परेण काकेन पुष्टः पालितः । डिम्बस्फोटनाक्षमया कोकिलया हि नीड़स्थं काकडिम्बमपसार्य्य स्वडिम्बे तत्र स्थापिते काक्या निजडिम्बबुद्ध्या तत्परिपाल्यते इति प्रसिद्धेरस्य तथात्वम् ।) कोकिलः । इति मेदिनी ॥ परेण पोषिते त्रि । इति धरणिः ॥

परपुष्टमहोत्सवः, पुं, (परपुष्टानां कोकिलानां महोत्सवो यत्र । आम्रमुकुलोद्गमे हि कोकिलानां आनन्दो जायते ।) आम्रः । इति शब्दमाला ॥

परपुष्टा, स्त्री, (परेण परपुरुषेण पुष्टा पालिता ।) वेश्या । इति मेदिनी ॥ पराश्रया । इति शब्दचन्द्रिका ॥ परगाछा इति भाषा ॥

परपूर्व्वा, स्त्री, परोऽन्यः पूर्व्वो भर्त्ता यस्याः सा पञ्चकारणवशात् प्रागन्येन गृहीतास्त्रीविशेषः । अस्या लक्षणं यथा, मानवे ९ अध्यायः ॥
"पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
अस्याः प्रकारो यथा,—
"परपूर्व्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥"
इति मिताक्षरायां काश्यपः ॥

परप्रतिकमा, [न्] } पुं, (प्रतिनप्तुः परः
परप्रपौत्रः } अपत्यः ।) वृद्धप्रपौत्रः ।
इति हेमचन्द्रः ॥

परभागः, पुं, (परस्य श्रेष्ठस्य भागः ।) गुणोत्कर्षः । इति हेमचन्द्रः ॥ (यथा, रघुः । ५।७० ॥
"आभाति लब्धपरभागतयाधरोष्ठे
लीलास्मितं सदशनार्च्चिरिव त्वदीयम् ॥")
सम्पत् । इति त्रिकाण्डशेषः ॥ शेषांशश्च ॥

परभुक्ता, स्त्री, (परेण परपुरुषेण भुक्ता ।) अन्यपुरुषसम्भोगविशिष्टा । यथा,—
"परभुक्तां च कान्तां च यो भुङ्क्ते स नराधमः ।
स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
न सा देवे न सा पैत्र्ये पाकार्हा पापसंयुता ।
तस्या व्यालिङ्गने भर्त्ता ब्रह्महत्यासमो भवेत् ॥
देवताः पितरस्तस्य श्रद्धादानं च तर्पणम् ।
तुष्टिनो न भवन्त्येव निरर्थश्च कर्म्मोद्भवः ॥
तस्मादुपन्नेव भार्य्यां च इत्युत्तं कुरुते सुधीः ।
अन्यथा पापिनीभर्त्ता निश्चितं नरकं व्रजेत् ॥
पत्नी यदि भवेत्तस्य कान्तां त्यजति पण्डितः ।
न पश्यति स्वपत्नी यो या दीपान्तरकारिका ॥
कलत्रं पाकपात्रं च सदा रक्षितुमर्हति ।
परस्पर्शाद्यथा पात्रं शुद्धं स्वस्थानं सदा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः ॥
अन्येन भक्षिते त्रि ॥

परभृत्, पुं, (परान् कोकिलान् बिभर्त्तीति । डु भृञ् भरणपोषणे + क्विप् । परेषां भर्त्ता इति केचित् ।) काकः । इत्यमरः । २ । ५ । २० ॥
(परजनपोषके, त्रि । यथा, भागवते । २ । २ । ५ ।
"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")

परभृतः, पुं, (परेण काकेन भृतः पुष्टः ।) कोकिलः । इत्यमरः । २ । ५ । १९ ॥ (यथा, मृच्छकटिके ।
"परभृत इव नीडे रक्षितो वायसीभिः ॥"
स्त्रियां टाप् । यथा, रघौ । ८ । ६० ।
"परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः ॥"
तथाच कुमारे । ६ । २ ।
"चूतमञ्जरिताभ्याशे सखी परभृतोन्मुखी ।"
अत्र मल्लिनाथः । "परभृतया कोकिलया उन्मुखी तुल्यदा । परभृतेति क्रियायोगविवक्षायां 'जातेरस्त्री' इति ङीप् प्रत्ययो न भवति । अथवा भृतशब्दं सम्पदादित्वात् क्विप् । परैः भृतम्मात्रसया परभृता इति क्षीरस्वामी । परभृतयैतास्तु परैः भियते इति कर्म्मणि क्तप्रत्ययः ।") परपोषिते त्रि ॥

परम्, अ, (पृ पूर्त्तौ + अम् ।) क्लीबः । शेषः । इति मेदिनी ॥ पश्चात् ॥ (किन्तु । यथा, पञ्चतन्त्रे ।
"नीचो भर्त्ता ह्रस्वपादस्तथा परं हृदयदूषिता ॥"
आतिशयम् । यथा, रघुः । १ । १० ।
"तेजसामिव सामान्यसौवर्णाग्रवंशः परम् ॥"
अनन्तरम् । यथा, तत्रैव । १ । ६६ ।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ॥")

परम, च, अव्यया । इति मेदिनी ॥ ओं इति भाषा । यथा च । ओमित्येव परमं मतं । इत्यमरः । ३ । ४ । १२ ॥ ओमिति मतं अनुमतौ । ओं कुरु ओमित्युक्तवान् । एवं वाढं एवं यथाह भवान् । परममेतत् यावत् सर्वमिदं परमम् । अयं प्रकारोऽपि । इति भरतः ॥

परमः, त्रि, (परं उत्कृष्टं मातीति । "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) परः । उत्कृष्टः । इति मेदिनी ॥ (यथा, मनुः । ८।३१८ ।
"सर्व्वेषां ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥")
प्रधानम् । (यथा, मनुः । ६ । ८६ ।
"एवं संन्यस्य कर्म्माणि स्वकार्य्यपरमोऽस्पृहः ॥")
आद्यः । श्रीहरः । इति विश्वः ॥ (यथा, कुमारे । ६ । ३५ ।
"ततः परमभिव्यक्ता प्रतस्थे मुनिमण्डलम् ॥")
कर्णिकारः । इति हेमचन्द्रः ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ५१ ।
मन्त्रवित् परमो मन्त्रः सर्व्वभावकरो हरः ॥")

परमगतिः, स्त्री, (परमा गतिः ।) मुक्तिः । मोक्षः । इति त्रि । यथा । गुणातीतोऽभायुक्तिगुणकलिव-पश्चात् परमयोगिमूर्त्तिः सदसद्विनियकर्म्माणि कुरुते । कृपापारावारः परमात्मनिरत निखलां नयस्तवी कालीचिदम्बरमार्गण्ये पुरभिद् ॥ इति मङ्गलवादः ॥ तस्या लक्षणं यथा,—
"ये विप्राः सर्व्वतः प्राज्ञा विशुद्धा ज्ञाननिश्चयाः ।
गतिं गच्छन्ति सम्पूर्णानामाहुः परमां गतिम् ॥"
इति महाभारते मोक्षधर्म्मः ॥

परमगवः, पुं, स्त्री, परमश्चासौ गौश्चेति कर्म्मधारयः ।

परमपदः, पुं, क्ली, (पद्यते ज्ञानिभिः प्राप्यते इति पदम् । ततः कर्म्मधारयः ।) श्रेष्ठस्थानम् । पर देवतापदम् । यथा । अपुण्यैराकीर्णे कुगरुपदुपी मन्दिरमयी पुरी ध्यायन् ध्यायन् यदि चरति भक्तस्य गतुम् । स ताण्डवाद्योपगति इषि कलिव्याप्तनदीनदीनः प्रयत्नो परमपदलीनः प्रभवति ॥ इति कर्पूरस्तोत्रम् ॥

परमब्रह्म, [न्] क्ली, (परमं ब्रह्म ।) परमेश्वरः । नारायणः । यथा ।
सनत्कुमार उवाच ।
"यदेतत् परमं ब्रह्म त्वया प्रोक्तं महामुने ! ।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः ॥
अनामगोत्ररहितमरूपं मोर्त्तिवर्जितम् ।
कथं तत्प्राप्यते ब्रह्म संस्कारादिविवर्जितम् ॥
तत्तस्य संस्थां कथय देव जानाम्यहं गुरो ! ॥"
कृष्णांशा उवाच ।
"यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते ।
स देवः पुण्डरीकाक्षः स्वयं नारायणः परः ॥
न योगिभिर्विधिविदैरपिदेवैरपि गम्यते ! ॥
ध्यानेन परमो देवः स्वयं नारायणो हरिः ॥"
इति वराहपुराणम् ॥

परमर्षिः, पुं, (परमश्चासौ ऋषिश्चेति ।) श्रेष्ठ ऋषिः । यथा,—
"महर्षिर्भगवान् व्यासः कृष्णद्वैपायनः प्रभुः ।
एष सन्निधयो यस्मात् नरकश्च तपस्विनः ॥
विभूतिमनकालज्ञः तथा कपिलश्चर्षिसत्तमः ।
गच्छते परमं यस्मात् परमर्षिस्ततः स्मृतः ॥
गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम् ।
यस्मादेव स्वयं भूतस्तस्माच्च ऋषिता मता ॥"
इति वायुपुराणे १० अध्यायः ।
भेलादिऋषिविशेषः । इति त्रिकाण्डशेषः ॥
(वेदव्यासो हि परमर्षिः । यथा, महाभारते । १ । १ । १० ।
"द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा ॥")

परमात्मधर्म्मा, [न्] त्रि, परमात्मा धर्म्मो यस्य । इति कर्म्मधारयपूर्व्वपदबहुव्रीहौ सिद्धान्तकौमुदी ॥

परमहंसः, पुं, (परमः श्रेष्ठः हंसः योऽहं आत्मा यस्य ।) संन्यासिविशेषः । तस्य लक्षणं यथा । जातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं यथोक्तकाले भैक्षमाचरन् लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतवासी निष्प्रयत्नो निर्म्ममः शुक्लध्यानपरायणः अध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति यः स एव परमहंसो नामेति श्रीमत्श्रुतिविवेकः ॥
(अयं हि चतुर्विधावधूतेषु श्रेष्ठः । यदुक्तं महानिर्व्वाणतन्त्रे ।
"चतुर्थोऽवधूताख्यो तुरीयो हंस उच्यते ।
अयोऽन्ये श्रीमदेन्द्रजालयुक्ताः सर्व्वे त्रिश्रीयकाः ॥"
परमहंसेन हि यज्ञोपवीतादिचिह्नानि परित्यज्य कौपीनादिकं धारणीयम् । यदुक्तं कूर्म्मपुराणे ब्रह्मयोगे ।
"परमहंसाश्रितस्यैव एकं गोबालविधिवत् ।
त्रिदण्डं कमण्डलुञ्चैव शिक्यञ्च कमण्डलुम् ॥
पवित्रमणिमं वस्त्रं यत् शालिनो जलाधिकाम् ।
शिखां यज्ञोपवीतञ्च नित्यकर्म्म परित्यजेत् ॥
कौपीनं धारणं यष्टिं कन्थां शोभिनिवारिणाम् ।
योगपट्टं बहिर्वस्त्रं पादुकां छत्रमङ्गलम् ॥
आत्ममात्रां सर्वकालं वैवत्वं धारयेत् ।
अतिरिक्ताद्भिन्नैः कर्म्माधिकारमेव न स्यात् ॥
ज्ञानेन च शिखिः प्रोक्तं परमहंसस्य सत्त्वम् ।"
अविद्या परमहंसेन एकदण्डं धारयेत् ।
विदुषा तु दण्डादिकं किमपि न धारणीयम् ।
यदुक्तं निर्णयसिन्धौ । "परमहंसोऽपि द्विविधः विद्वानविद्वांश्च । विद्वांस्तु योऽपि न धारयेत् ।
न दण्डं न शिखां नाच्छादनं चरति परमहंसः ।"
परमहंसास्तु श्रेष्ठं ब्रह्मसायुज्यं प्राप्नुवन्ति । यदुक्तं हरिवंशगाथायाम् ।
"एकवासाध्ययनेषेवा कटके चर्मणा विना ।
सत्यात् प्रस्थानमेवैह परमहंसः सदा भवेत् ।
त्रिविधैश्चाप्रसादेन तत्त्वाभिः परमात्मनः ।
प्रकाशित अस्तीहो भवेत् ब्रह्मविदा वरः ॥"
परमहंसास्तु "तत्त्वमसि" इत्यादि महावाक्यार्थ

सम्बनेन आत्मज्ञानानुशीलिनो भवन्ति "सोऽहं" "शिवोऽहं" इत्यादि वदन्तस्तत्त्वज्ञानावलम्बनता परिचयं प्रयच्छन्ति च। एषामध्यक्षो हि स्वामीत्याख्यया प्रसिद्धः। एते हि तीर्थभ्रमणनिपुणास्तीर्थस्थानस्थाश्च। मतस्य परमहंसस्य शरीरं भूमौ निखातव्यम्। यदुक्तं वायुसंहितायाम्।

"मृते न दहनं कार्य्यं परमहंसस्य सर्व्वदा।
कर्त्तव्यं खननं तस्य नाशौचं नोदकक्रिया॥"

परमहंसस्तु दण्डिपरमहंसावधूतपरमहंसभेदेन द्विविधः। ये तु दण्डं परित्यज्य पारमहंस्यव्रतावलम्बनं कुर्व्वन्ति ते दण्डिपरमहंसाः। ये चावधूतव्रतानुष्ठानेन परमहंसास्ते एवावधूतपरमहंसाः। परं सर्व्वे एव प्रणवोपासकाः इति॥ *॥

शुक्लयजुर्व्वेदगत उपनिषद्विशेषः। इति मुक्तिकोपनिषत्॥)

परमाणुः, पुं, (परमः सर्व्वचरमकोऽणुः।) पृथिव्यादिभूतचतुष्टयानां द्व्यणुकानामवयवः। स च नित्यः निरवयवः ततः किमपि सूक्ष्मं नास्ति। यथा,—

"नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥"

पारिमाण्डल्यनामकतत्परिमाणन्तु न कस्यापि कारणम्। यथा,

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

जलादिपरमाणुरूपस्य नित्यत्वम्। पार्थिवपरमाणुरूपस्यानित्यत्वम्। पार्थिवपरमाणुरूपस्यानित्यत्वम्। यथा, भाषापरिच्छेदे॥

"जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।"

तैरेव परमाणुभिराद्युपादानैर्द्व्यणुकत्रसरेण्वादिक्रमेण स्थूलक्षितिजलतेजोमरुतः सृजति परमेश्वरः। यथा आद्योजनं परमाणुकर्म तथा च सर्गाद्यकालीनं द्व्यणुकारम्भकपरमाणुकर्म यत्नजन्यं प्रयत्नवदात्मसंयोगजन्यं वा कर्म्मत्वात् अस्मदादिशरीरकर्म्मवत् इति कुसुमाञ्जलिः॥ प्रलयेऽतिसूक्ष्मस्थूलनाशानन्तरं परमाणुक्रियाविभागपूर्व्वसंयोगनाशादिक्रमेण द्व्यणुकनाशात्तिष्ठन्ति परमाणव एवेति। यथा,—

"शोष्यमाणास्तिष्ठन्ति प्रलये परमाणवः।"

इति प्राचीनकारिका॥

तस्य महत्त्वाभावादतीन्द्रियत्वम्। यथा। महत्त्वं षड्विधे हेतुरिति भाषापरिच्छेदः॥ *॥

कालविशेषः। यथा, श्रीभागवते ३।११।४-५॥

"स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतो विशेषभुग् यस्तु कालः स परमो महान्॥
अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्॥"

अस्यार्थः। एतदेव प्रपञ्चयति स इत्यादिना। सतः प्रपञ्चस्य परमाणुतां परमाण्ववस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैवाविशेषं चाकल्यं यो भुङ्क्ते स परममहान्। अयमर्थः ग्रहर्क्षताराचक्रस्य इत्यादिना यत् सूर्य्यपर्य्यटनं वक्ष्यति तत्र सूर्य्यो यावता परमाणुदेशमतिक्रामति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्व्वं भुवनकोषमतिक्रामति स परममहान् संवत्सरात्मकः तस्यैवावृत्त्या युगमन्वन्तरादिक्रमेण द्विपरार्द्धान्तत्वमिति। तथा च पञ्चमे सूर्य्यगत्यैव कालादिविभागं वक्ष्यति।४। इदानीं द्व्यणुकादिलक्षणपूर्व्वकं मध्यमकालावस्थां कथयति द्वौ परमाणू अणुः स्यात् त्रयोऽणवस्त्रसरेणुः स तु प्रत्यक्ष इत्याह जालार्केति गवाक्षप्रविष्टैरर्करश्मिभिरवगतः कोऽसौ योऽनिलघुत्वेन खमेवानुपतन् अगात् गतः। न गामिति पाठे खमेवानुपतन्नवगतः न तु गां पृथ्वीम्। इति श्रीधरस्वामी॥

परमाण्वङ्गकः, पुं, (परमाणुरङ्गं यस्य। कप्।) विष्णुः। इति शब्दमाला॥

परमात्मा, [न्] पुं, (परमः केवलः आत्मा।) परं ब्रह्म। तत्पर्य्यायः। आपोज्योतिः २ चिदात्मा ३। यथा,—

"परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः।
कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

(विष्णुः। यथा, महाभारते। १३। १४८।१५।

"पूतात्मा परमात्मा च मुक्तानां परमा गतिः॥"

महादेवः। यथा, तत्रैव। १३। १७। १२७।

"प्रीतात्मा परमात्मा च प्रयतात्मा प्रधानधृक्॥")

परमाद्वैतः, पुं, (परमः अद्वैतः द्वैतवर्ज्जितः।) विष्णुः। यथा,—

"नमस्ते ज्ञानसद्भाव नमस्ते ज्ञानदायक।
नमस्ते परमाद्वैत नमस्ते पुरुषोत्तम!॥"

इति गरुडपुराणम्॥

परमान्नं, क्ली, देवप्रियत्वात् परमसुत्कृष्टमन्नम्। परमाणामुत्कृष्टानां देवादीनामन्नमिति वा। इति भरतः॥ तत्पर्य्यायः। पायसः २। इत्यमरः। २। ७। २४॥ क्षीरिका ३। तस्य पाकप्रकारो यथा,—

"शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत्।
ते सिद्धाः क्षीरिका ख्याता सा सिताज्ययुतोत्तमा॥"

अस्य गुणाः।

"क्षीरिका दुर्ज्जरा बल्या धातुपुष्टिप्रदा गुरुः।
विष्टम्भिनी हरेत् पित्तरक्तपित्ताग्निमारुतान्॥"

इति भावप्रकाशः॥

परमायुः, [स्] क्ली, (परमं आयुः।) जीवितकालः। यथा,—

"शतं वर्षाणि विंशत्या दिवाभिः पञ्चभिः सह।
परमायुरिदं प्रोक्तं नराणां करिणामिह॥
अन्दा द्वात्रिंशदश्वानां शुनां द्वादशवत्सराः।
पञ्चविंशतिवर्षाणि रासभस्य करभस्य च॥
चतुर्व्विंशतिरब्दानां वृषस्य महिषस्य च।
छागसूकरशालादिपशूनां षड्दशान्विता॥"

इति शब्दमाला॥ *॥

अथायुरानयनम्।

"अज्ञानादायुषः सर्व्वं विफलं कीर्त्तितञ्च यत्।
तस्मादानयनं तस्य स्फुटार्थमभिधीयते॥
नीचान्तरस्य खेटस्य भागास्तुङ्गगुणो भवेत्।
चेष्टा केन्द्रस्तु चेत् षड्भाद्धिकं चक्रशोधितम्॥
नान्यथा तस्य भागादि चेष्टा गुणक उच्यते।
गुणश्चेत् षष्टि६०तो न्यूनं तदा द्व्यग्रं सराभ्रलः ३०॥
एवं तुङ्गगुणश्चेष्टा गुणो यत् स्यात् तयोर्व्वधात्।
मूलं कलादिकं तत् स्याद्गुणकस्फुट उच्यते॥
अथाश्रयगुणं वक्ष्ये क्षेत्रादिकाद्यवर्गजम्।
वर्गे क्षेत्रादिके स्वर्क्षे त्रात्रिंशत्३० कलागुणः॥
अधिमित्रगृहे तत्त्वम् २५ मित्रे विंशगुणात्तयः।
२१। ४०।
समे पञ्चदश ग्राह्याः शत्रौ स्वत्र्यंशकोरगाः८।२०
पञ्चात्यरौ ५ तदेवं यत् क्षेत्रोत्थगुणयुक् पुनः।
स्वर्क्षे वर्गोत्तमे स्वांशे स्वत्र्यंशे स्यादयं गुणः॥
अधीष्टर्क्षे शुभांशोऽनत्र्यंशोनो मित्रवेश्मनि।
समे द्व्यंशो रिपौ त्र्यंशो शुभांशस्त्वतिशत्रुभे॥
एवं स्यादाश्रयगुणो विशेषो यः स उच्यते।
स्वत्र्यंशकः स्वांशको वा वर्गोत्तमगतोऽपि वा॥
यदि स्यादधिमित्रर्क्षे तदा तत्राश्रये गुणे।
गजनेत्रे वसुद्वाक्षी २८।२४ कलाद्यं मित्रयेद्बुधः॥
एवं मित्रगृहे तद्वद्रूपत्रिंशद्विमिश्रयेत् १।३०।
शत्रुक्षेत्रे तु षड्लिप्ता कुनेत्रविकला क्षिपेत्॥ ६।२१
अधिशत्रुगृहे बाणदास्त्री ५। ३२ लिप्तादिकं क्षिपेत्।
आश्रयस्य गुणस्तस्य वधः स्फुटगुणस्य च॥
तन्मूलं कर्म्मयोग्यः स्यात् द्विघ्नायुर्व्विधौ स्मृतः।
खेटानाञ्च तनोर्भागाः स्वाब्धि ४० ह्रिताः कलीकृताः॥
पुनः शून्यरसा ६० भक्ताः क्रमात् स्यादायुषः पलम्।
जन्मलग्नं षड्वीनं न्यूनं चक्रार्द्धतो यदि॥
तत्कला स्यात्तदाहारो नायं षड्भाधिके विधिः।
खखष्ट्या १८०० खखाष्टेन ८०० गुणितं पलमायुषः॥
क्रमतः पापसौम्यानां हारार्थं शोधनं भवेत्।
खखष्ट्यूनहरद्वेहारो हारदलं क्रमात्॥
आयुः पलघ्नं शून्याश्वं एकाप्तं शोधनं तथा।
आयुःपलं शोधनोनमेवं चक्रार्द्धशोधनम्॥
चक्रार्द्धशोधने खेचराणां द्व्यादिषट्के सति।
एकस्याधिकवीर्य्यस्य हानिं मन्यः प्रभाषते॥
आयुःपलं हतं खेषुशैर्वर्षैः कलादिभिः।
षष्ट्याप्तम् ६० तत् पुनः सर्व्वसङ्ख्याः १२०००
समाद्यः।
तनोरायुः पलं सर्वैः सङ्ख्याता समाद्यः।
वैषम्यं वत्सद्वयोश्च राशितुल्याः समास्तथा॥
द्वादशांशगतभागाद्दिनाद्यपि मंयुताः।
एवं सूर्य्यादिलग्नानामायुः प्रस्फुटं भवेत्॥
ग्रहाणामितखेटस्य कृता आयुःपलं भवेत्।
तथैव षड्भः कलाम्बुर्न तथा तां

अथवा ।
"सुरौ चाक्लिराः सिद्धः सयद्भः सकलीशतः ।
आयुःप्रमाणमिदं प्राहैर्यं पैत्रादिस्वके ॥
अंशयोगं प्रभुभम्यस्य विनाशमायुषः पलम् ।
अशनास्य द्विभागीनं द्विता शुक्रमेवरी ॥
एकस्य यदि रोटस्य अंशमाहुर्वाचिताभव: ।
अधिकैका सदा चाथि: कर्तयाद्य द्वियथिता ॥
चक्रार्द्धयोधनं कार्यं पूर्ववत् भनि सम्भवे ।
क्रमायु:पलं पैत्रे चौव: प्रोक्तं निसर्गके ॥
पैत्रं यदागतं मौरभांगीचिंत्राद्विवर्जितम् ।
चन्द्रस्य देहभागार्द्ध भगोर०निर्गतसंयुतम् ॥
कुजगुरुर्गोध्रुवांशयोगं सप्ताई तत प्रदायियुक् ।
आयु:पलं निसर्गाख्ये दत्तिकयोर्यथागतम् ॥
लग्नांशोदयं प्रमय श्रीमम्य विद्धांशकम् ।
दशांशं भूमिपुत्रस्य विंशदंशं निशापतिः ॥
दशमं गुरुभिर्भक्तं प्रकैरायु:पलं भवेत् ।
जीवांशं सप्तभागांशं मर्त्ये धामागथ: पलम् ॥
आयु: पलस्य ताम्रादशिभागेन १०८०० समा-
युतम् ।
दत्यमायु:पलं तात्दशांतम् १०८० ख्यात् समा-
दिकम् ॥
पैत्रैस्तर्यंजीवोक्ते भवेदायु: समाभिधाम् ।"
अथवा ।
"दत्तेरायु:पलं श्रयामं नियतांशं दिनादिकम् ।
पैत्रमायुर्भवेदिन्दोर्मानगमप्रा द्वादशांश दूतम् ।
कुजगुरोर्ध्रुवेन नामं बुधस्य पवभिर्हतम् ।
शनेः पैतपलं विंशत्यामं २० मांशिर्भोजितम् ।
विधोरायु:पलं लभ्यं सप्तमैः स्वादिनादिकम् ।
निर्मणं शनिपुत्रत्रय: रागत्र सप्तभोद्धृतम् ।
रविकयोर्गुणितानां कुजस्य समुत्तोद्धृतम् ॥
गुरोर्विंशं रावसानांश० युत्तेन्दके ॥ प्रमो-
दितम् ॥"
अथवा ।
"आयु:पलमिमाद्योर्या साधिकन्दाल ८६४०
भागयुक् ।
दिक्षं समायभायुः स्यादिनादि जीवभाविकम् ॥
विशादिमर्त्यदिवसा तरसांके१२०००गुणानमोः ।
मदं मनानमं धियमायुः पैत्रादिकमर्यं ॥
अंशदन्ते: तमोरायुमेंदनि मणो सुधा: ।
केचिदादिमर्त्य-केचिताम्य सर्वादियो मर्यो ॥
स्पश्चपुरुस्य निसर्गान्निर्वाणायुदुर्हुवादिताम् ।
प्रत्येकं नक्षत्रिमामि ९१६००० अंशदुर्वाधिकं
भवेत् ॥
अनेन दीर्घमायुर्मणे प्रायश्चे गति ।
दशे तु मौम्यादेव तक्रार्देन नरा विदुः ॥
आयातमृत्युसन्धेव द्वच्छान्तकमाश्रितम् ।
केन्द्र प्रायुर्भेवराशिं सप्ता निदाविना क्रिया ।
अन्ते भयव्यवस्था भावोन्नत्यानांकनम् ।
कुरानं धीअमायुरेव तदुदारांश विशोधयेत् ।
तथापि यदि प्रायो भेद् यदि दत्तारं भवेत् तत् ।
भावं पुत्रशेवैव विधा कार्या विचक्षणैः ।
प्रायेऽपि यदि ज्येष्ठे न कर्मदा नित्यं क्रिया ।

अंशायुषि न कार्यैव हानि: प्राये: कथञ्चन ॥
तमस्य वीर्यादंशीयं पैत्रं भागीमिताधिकात् ।
निसर्गीयं विधोर्धामायु: सार्धं विधापते: ॥
अथवेदलाशीला: स्फुर्जीवोक्तं साधयेत्तदा ।
लग्ने दोषप्रभावोय वर्णौधो: समरौचयो: ॥
तदायुषो यदेकार्द्ध तद्युक्तं जीवराशिभि: ।
भागसमाशमायायु: एषकमूल्यकमांशके: ॥
सात्पर्यांशके:१२ऋर्द्धेन भौर वर्णादिकं भवेत् ॥
पद्मायिन: कथंता ये मच्छीलाद्या मितविमया: ।
गुरुदेवद्विजे भक्ताश्चेषामेवायुरोरितम् ॥
ये पापा युद्धरमणा देवब्राह्मणनिन्दकाः ।
अधुशुर्वद्भतायकासौ अल्पकालेन: ॥"
इति नीलकण्ठमायुर्दायाध्याय: ॥

परमायुष:, पुं, (परमं आयुर्यस्य । पृषोदरादि-त्वात् । दीर्घकालजीवित्वादस्य तथात्वम् ।) आसनद्रुम: । इति शब्दचन्द्रिका ॥

परमार्थ:, पुं, (परम: श्रेष्ठ: अर्थ: ।) उत्कृष्टवस्तु । यथार्थ: । यथा,—
"प्रपञ्चो यदि वर्तेत निवर्तेत न संशय: ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थत: ॥"
इति माण्डूक्यवार्त्तिकम् ॥
(तथा च कुमारे । ५ । ७१ ।
"उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।"
परम: मुख्य: अर्थ: प्रयोजनमिति विग्रहे । मोक्ष: । सुखम् । सुखभोग: दु:खाभाव: । इति न्यायदर्शनम् ॥)

परमार्हत:, पुं, (परम: अर्हन् देवता उपास्यतया अस्यास्य । परमार्हन् + अण् ।) जैनराजविशेष: । इति हेमचन्द्र: ॥

परमेष्ठु:, पुं, परेभ्यो मधुरस्य । (दोषादिना मधोरभावात् अस्य तथात्वम् ।) काक: । इति त्रिकाण्डशेष: ॥

परमेश्वर:, पुं, (परमश्चासौ ईश्वरश्चेति ।) शिव: । इति हलायुध: ॥ (यथा, महालिङ्गार्चनतन्त्रे शिवप्रणामे प्रथमे,—
"नमस्ते भगवन् शिवोऽखिलसारे ।
त्रिगुणाय महेशाय । परमेश्वर ईरित: ॥")
विष्णु: । यथा,—
"इदन्तु द्वादशं प्रोक्तं यत्र वै केशवस्य हि ।
द्वारकायां तथा चक्रे यत्राभिरिकार्थं तथा ॥
निग्रहकोमर्त्येन तथोक्त: परमेश्वर: ॥"
इति वामने १७ अध्याय: ॥
(स्त्रियां ङीप् । दुर्गा । यथा,—
देवीभागवते । ७ । १० । ८० ।
"देवकी मधुरायान्तु गायत्री परमेश्वरी ॥")

परमेष्ठिनी, स्त्री (परमेष्ठिन् + ङीप् ।) ब्राह्मी । इति राजनिर्घण्ट: ॥ ब्रह्मयष्टी इति भाषा ॥
परमेष्ठिन: प्रतिष्ठ ॥

परमेष्ठी, [न्] पुं, (परमे स्थीयते निरतिशये प्रकृष्टे वा तिष्ठतीति । परमेष्ठिति । उणादि विहन्ती "परमे स्थ:" उणा । ४ । १० । इति इनि: । ब्र च

त्वम् । "तत्स्थाने – परमस्थ: संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् "स्थादिषु अध्यासम् । इति षत्वम् । परमे स्थाने गोलोकवासस्थानेऽपि तिष्ठतीति कृष्णभक्त: ।) ब्रह्मा । इत्यमर: । १ । १ । १६ । (यथा, मनु: । १२० ।
"महत्सरादयश्चांस्तापि धर्म: सर्वादर इव च ।
जीवात्मविशेषकुत्के परमेष्ठी पुन: पुन: ॥"
विष्णु: । यथा, महाभारते । १३ । १४९ । १८ ।
"वायु: सूर्योग: काल: परमेष्ठी परिग्रह: ।"
महादेव: । यथा, महाभारते । ३ । १७ । १८ ।
"क्रियतां यत्नो देवस्य परमेष्ठिन: ।
दर्शनागतस्य भीमेन ! प्रतिशुत: मर्मेषु च ॥")
जिन: । इति हेमचन्द्र: ॥ शालग्रामविशेष: । यथा,—
"परमेष्ठी च शुक्लाभ: पद्मचक्रसमन्वित: ।
चिन्हाष्टमिलिता पृष्ठे सुचिरप्रातिसूक्ष्मकम् ॥
परमेष्ठी गोविन्दानामचक्रमेवं तदा युतम् ।
विमानाकारमिलाया देवा सुचिरप्रातिसूक्ष्मकम् ॥"
इति ब्रह्मपुराणम् ।
"परमेष्ठी च शुक्लाभश्चक्रपद्मसमन्वित: ।
स सर्वेन्तद्मपा पीता: पृष्ठे च सुषिरं भुवम् ॥"
इति पुराणसंग्रह: ।
"परमेष्ठी तु रक्ताभश्चक्रपद्मसमन्वित: ।
छिद्राङ्कितकया पृष्ठे सुषिरश्चापि वर्तुकम् ।
पीतवर्णयुतो वापि शक्तिगृक्तिवरप्रद: ॥"
इति वैश्वानरसंहिता ॥ ७ ॥
गुरुविशेष: । यथा,—
"श्रीगौ गत्वेव देवेशि ! श्रवत: परमो गुरु: ।
परापरगुरुकार्य हि परमेष्ठी सर्व गुरु: ॥"
इति हरगौरीतन्त्रे १ पटल: ॥
मन्त्रदाता गुरु: प्रोक्तो मन्त्रस्तु परमो गुरु: ।
परापरगुरुवर्ग हि परमेष्ठिगुरुस्तत्रम् ॥"
इति तन्त्रान्तरम् ॥
(अग्नीध्रपुत्र: । यथा, महाभारते । १४ । ११ ।
"अग्नीध्रो परमेश्वरो तस्मिन् वंश: प्रतिष्ठित: ।
कद् पुत्रान् भौमनयश्चक्र तिष्ठतोऽपि नाश ॥
अपरं भूमिपुत्रोऽपि भुवनापरमेष्ठिनो ॥"
परमब्रह्माणि गायत्रि शास्त्रेऽपि । यथा, मार्कण्डेये । ७६ । २ ।
"नमस्याम्यहं भगवनीं चक्षुष: परमेष्ठिन: ।
परात्परभगवस्य मनसानिधनादि द्विज ! ॥")

परम्पर:, पु, (परं पिपर्तीति । पृणि पूर्त्तौ + अच् । "तत्पुरुषे कृति" अलुक् ।) प्रपौत्रादि: । वन्यमृग: । इति हेमचन्द्र: ॥ प्रपौत्रादय: । इति मेदिनी ॥

परम्परा, स्त्री, सन्तति: । (यथा कुमारे । ६ । १८ ।
"यत्पारम्परीणां सा यथा पदद:परा ।
मौलिमन्यांसपरापो च देवि सरितस्यरा ॥")
परिपाटी: । वध: । हिंसा । इति हेमचन्द्र: ॥ परिपाटी । अनुक्रम: । इति शब्दरत्नावली ॥ यथा
"इमं विवस्वते प्रोक्तं योगमव्ययमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

एवं परम्पराप्राप्तं तथा राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ! ॥”
इति श्रीभगवद्गीतायां ४ अध्यायः ॥

परम्पराकं, क्ली, (परम्परया कायते प्रकाश्यते इति । कै + कः । परम्परास्थापितपशुहननात् तथात्वम् ।) यज्ञार्थपशुहननम् । तत्पर्य्यायः । शमनम् २ प्रोक्षणम् ३ । इत्यमरः । २।७।२६ ॥ घातनम् ४ वधः ५ । इति शब्दरत्नावली ॥

परम्परीणं, त्रि, (परांश्च परतरांश्च अनुभवति । “परोवरपरम्परेति ।” ५।२।१० । इति खः । प्रकृतेः परम्परभावो निपात्यते ।) परम्पराप्राप्तम् । यथा, भट्टिः । ५ । १५ ।
“लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय ॥”

परलः, पुं, (पिपर्त्ति देहादिकं पूरयतीति । पॄ + बाहुलकात् अलः ।) केशराजः । इति त्रिकाण्डशेषः ॥

परलोकः, पुं, (परो लोकः ।) लोकान्तरम् । तच्च स्वर्गादि । यथा,—
“क्षमक्षमाणाल्पभूयिष्ठपान्थवैभवमेत्य यम् ।
लोके प्रयाति पन्थानं परलोकेन तं कुतः ॥”
इति नैषधम् ॥

परलोकगमः, पुं, (परलोके लोकान्तरे गमो गमनं यस्मात् ।) मृत्युः । इति हेमचन्द्रः ॥

परवशः, त्रि, (परस्य परेषां वा वशः वशीभूतः ।) अन्यवशीभूतः । तत्पर्य्यायः । परायत्तः २ पराधीनः ३ परच्छन्दः ४ परवान् ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १५९ ।
“यद्यत् परवशं कर्म्म तत्तद् यत्नेन वर्ज्जयेत् ।
यद्यदात्मवशन्तु स्यात्तत्तत् सेवेत यत्नतः ॥”)

परवाचि:, पुं, (परं धर्म्मं वाचयति प्रकाशयति । वच शब्दे + णिच् + इन् । धातूनामनेकार्थत्वादत्र प्रकाशार्थः ।) धर्म्माध्यक्षः । वत्सरः । इति मेदिनी । (परं शत्रुं सर्पमित्यर्थः वाचयतीति ।) कार्त्तिकेयवाहनो मयूरः । इति शब्दमाला ॥

परवान्, [त्] त्रि, (परः स्वामी अस्त्यस्य । “तदस्यास्त्यस्मिन्निति ।” ५ । २ । ९४ । इति मतुप् मस्य वः ।) पराधीनः । इत्यमरः ।३।१।१६ (यथा, रघौ । २ । ५६ ।
“भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ ॥”)

परव्रतः, पुं, (परं व्रतमस्य ।) धृतराष्ट्रः । इति शब्दरत्नावली ॥

परशं, क्ली, (स्पृशतीति । पृषोदरादित्वात् साधुः । अस्य स्पर्शनात् अपरस्य धातोः स्वर्णत्वं जायते अतोऽस्य तथात्वम् ।) रत्नविशेषः । यथा,—
“शतकोटिविपरशमणिरत्नाकरान्वितम् ।
स्यमन्तकेन्द्रनीलादिविराजितविराजितम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

परशव्यं, त्रि, परशवे हितम् । तस्मै हितमित्युगवादित्वात् यत् । इति संक्षिप्तसारव्याकरणम् ॥ (गो उगवादिभ्यो यत् । परशुहितम् । इति व्याकरणम् ॥)

परशुः, पुं, (परान् शत्रून् शृणाति हिनस्त्यनेनेति । शॄ हिंसायाम् + “आङ्परयोः खनिशृभ्यां डिच्च ।” उणा । १ । ३४ । इति कुः स च डित् ।) अस्त्रविशेषः । टाङ्गी इति भाषा । तत्पर्य्यायः । पर्शुः २ परश्वधः ३ परश्वधः ४ स्वधितिः ५ कुठारः ६ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८३ । १४ ।
“ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघैरपातयत भूतले ॥”)

परशुधरः, पुं, (धरतीति धरः । धृ + अच् । ततः परशोर्धरः ।) गणेशः । इति हलायुधः ॥ (परशुरामः । परशुशस्त्रप्रधानत्वादस्य तथात्वम् ॥)

परशुरामः, पुं, (परशुना कुठाराख्यशस्त्रेण रामः रमणं यस्य । परशुशस्त्रवधेनैव दुष्टक्षत्रियवंशान् निहत्यात्मानं रमयति इति तात्पर्य्यार्थः ।) भगवतः षोडशावतारः । यथा,—
“अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥”
इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥
तत्पर्य्यायः । जामदग्न्यः २ पर्शुरामः ३ परशुरामकः ४ भार्गवः ५ भृगुपतिः ६ भृगुसुतः ७ । इति शब्दरत्नावली ॥ अस्योत्पत्त्यादिकं यथा —
मार्कण्डेय उवाच ।
“अथ काले व्यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान् ॥
रुमण्वन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधायाशु शक्राद्यैः सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदाच न ॥
अयं निजपितामहाच्चास्त्रशक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ।
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदञ्च सर्व्वशः ।
स्वतातात् कृतकृत्योऽभूद्वेदविद्याविशारदः ॥”
इति कालिकापुराणे ८५ अध्यायः ॥
अवशिष्टं मार्कण्डेयोत्तरखण्डे ६० अध्याये द्रष्टव्यम् ॥
(अयमेव पितुरादेशात् परशुना स्वमातुः शिरश्चिच्छेद तत प्रसन्नात् पितुर्वरं लब्ध्वा मातरं पुनर्जीवयामास । यदुक्तं महाभारते । ३ । ११६ । ५—१८ ।
“कदाचिद्वै सर्व्वेषु गतेष्वथ सुतेषु वै ।
रेणुका स्नातुमगमत् कदाचिन्नियतव्रता ॥
सा तु चित्ररथं नाम मार्त्तिकावतकं नृपम् ।
ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ॥
क्रीडन्तं सलिले दृष्ट्वा सभार्य्यं पद्ममालिनम् ।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ॥
व्यभिचाराच्च सा तस्मात् क्लिन्नाम्भसि विचेतना ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्त्ता न्वबुध्यत ॥
स (जमदग्निः) तां दृष्ट्वा च्युतां धैर्य्यात् ब्राह्म्या लक्ष्म्या विवर्ज्जिताम् ।
धिक्शब्देन महातेजा गर्हयामास वीर्य्यवान् ॥
ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा ॥
तानानुपूर्व्व्याद्भगवान् वधे मातुरचोदयत् ।
न च ते जातसम्मोहाः किञ्चिदूचुर्विचेतसः ॥
ततः शशाप तान् क्रोधात्ते शप्ताश्चेतनां जहुः ।
मृगपक्षिसधर्म्माणः क्षिप्रमासन् जडोपमाः ॥
ततो रामोऽभ्ययात् पश्चादाश्रमं परवीरहा ।
तमुवाच महाबाहुं जमदग्निर्महातपाः ॥
जहीमां मातरं पापां मा च पुत्र ! व्यथां कृथाः ।
तत आदाय परशुं रामो मातुः शिरोऽहरत् ॥
ततस्तस्य महाराज ! जमदग्नेर्महात्मनः ।
कोपोऽभ्यगच्छत् सहसा प्रसन्नश्चाब्रवीदिदम् ॥
ममेदं वचनात्तात ! कृतं ते कर्म्म दुष्करम् ।
वृणीष्व कामान् धर्म्मज्ञ ! यावतो वाञ्छसे हृदा ॥
स वव्रे मातुरुत्थानमस्मृतिञ्च वधस्य वै ।
पापेन तेन चास्पर्शं भ्रातॄणां प्रकृतिन्तथा ॥
अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ! ।
ददौ च सर्व्वान् कामांस्तान् जमदग्निर्महातपाः ॥”
अयं पुनर्बलदर्पितं आश्रमात् धनुस्तहारिणं कार्त्तवीर्य्यार्ज्जुनं हतवान् । अनेन जातामर्षाः तस्यार्ज्जुनस्य सुतास्ततःप्रभृति कालं प्रतीक्षमाणाः कदाचित् रामविरहितमाश्रममासाद्य तस्य पितरं जमदग्निं निजघ्नुः । रामस्तु तस्मात् पितृवधामर्षात् त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रियामकरोत् । ततो गच्छति काले दाशरथिना रामेण हृतगर्व्वो दक्षिणाशां गत्वा महेन्द्रे गिरौ उषित्वा तपसा कालं यापयति ॥)

परश्वः, [स्] अ, श्वः परदिनम् । आगामिदिनात् परदिनम् । इत्यमरः । ३ । ४ । २२ ॥ अस्य टीका परश्वःशब्दे द्रष्टव्या । गतदिनात् पूर्व्वदिनम् । परशुं इति भाषा ॥ यथा,—
“परश्वश्च महाभाग ! याति गङ्गाहृदं गता ।
अपतीर्थ्या विहराम्यहि षष्ठगामिन केशवित् ॥”
इति मार्कण्डेयपुराणे अवीक्षिच्चरितम् ॥

परश्वधः, पुं, (पर + श्वि + अन्येभ्योऽपीति डः । ततः परश्वं दधातीति । “आतोऽनुपेति” ३ । ४ । ३. इति कः ।) कुठारः । इत्यमरः । २ । ८ । ९२ ॥ (यथा, रघौ । ११ । ४२ ।
“धारी स्थितं रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम् ॥”)

परषण्डकः, पुं, (परा सेहा षंडा यस्य । ततः कप् ।) आज्ञा । इति शब्दरत्नावली ॥

परस्परं, त्रि, (“कर्म्मव्यतिहारे सर्व्वनाम्नो द्वे वाच्ये समासवच्च बहुलम् ।” वार्त्ति अन्समासवद्भावे पूर्व्वपदस्य सुपः सुर्व्वक्तव्यः । कस्कादित्वात् विसर्जनीयस्य सः ।) अन्योन्यम् । इतरेतरम् । यथा,—
“यानि तोयानि च दिवाकरैः
दृष्टेः परोक्षेव चिन्तितैः ॥

"परस्परं विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥"
इति भट्टिः । २ । ५ ॥

परस्मैपदं, क्ली, (परस्मै परार्थं परबोधकं पदम् ।) दशलकारादौ प्रत्येकं पूर्ब्बनवविभक्तयः । यथा, "लकारादिषु पूर्ब्बं नव परस्मैपदं परे नव आत्मनेपदं परिभाष्यन्ते । इति संक्षिप्तसारव्याकरणम् ॥ (तच्च पाणिनिमते । तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥) वोपदेवेनास्य पसंज्ञा कृता । यथा । "नवाद्याः पमे मितोऽन्यद्विङ्गां दि ।" इति मुग्धबोधव्याकरणम् ॥

परस्वधः, पुं, (परश्वध + निपातनात् सत्वम् ।) परश्वधः । कुठारः । इत्यमरटीकायां रायमुकुटः ॥

परा, व्य, विमोक्षः । प्राधान्यम् । प्रातिलोम्यम् । धर्षणम् । आभिमुख्यम् । भृशार्थम् । विक्रमः । गतिः । वधः । इति मेदिनी ॥ ० ॥ उपसर्गविशेषः । आसार्थः । भङ्गः । अनादरः । प्रत्यावृत्तिः । न्यग्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परा, स्त्री, (पृ + अप् + ततः टाप् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ (अस्याः गुणा यथा,—
"वन्ध्याकर्कोटकी लघ्वी कफवृद्व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) नाभिचक्रमूलाधारात् प्रथमोदितनादस्वरूपवर्णः । यथा,—
"मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः ॥"
इत्यलङ्कारकौस्तुभे प्रथमकिरणः ॥
(पूरयति साधकं भक्तमभीष्टफलेनेति दुर्गाया नाम । यथा, काशीखण्डे । ५८ । १०६ ।
"परानन्दा परतरा प्रतिज्ञा पालनी परा ।"
गायत्री । यथा, देवीभागवते । १२ । ६ । ९० ।
"धार्म्मिकी परमोदारा परमब्रह्मात्मिका परा ॥")

पराकः, पुं, (परं प्रकृष्टं अकं दुःखं उपवासादिजन्यशारीरिकक्लेशादिरूपं यत्र यस्माद्वा ।) खड्गविशेषः । खड्गः । इति मेदिनी ॥ क्षुद्रः । रोगविशेषः । जन्तुविशेषः । इति त्रिका० ॥ ० ॥ पराकव्रतमाह मनुः । ११ । २१५ ।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥"
पराके सप्त धेनवः, पराकस्य प्राजापत्यपञ्चकतुल्यत्वात् । यथा अङ्गिराः ।
"षड्भिर्म्मासैः सम्पूर्णात्मा अथवा तु विशुध्यति ।
मासि मासि पराकैश्च त्रिभिर्म्मासैर्व्यपोहति ॥"
अत्र षड्भिर्म्मासैः षण्मासनिर्वर्त्यप्राजापत्यानि पूर्णान्याह तदा प्रतिमासं चैकपराकेण अर्द्धं द्वादश पराकाः संवत्सरे षट्त्रिंशत् पराकाः । ततश्च षट्त्रिंशत् पराकाः मौञ्जुल्यप्राजापत्याव्रतयोः एवञ्च प्राजापत्यपराकयोरेकार्थकरत्वात् तुल्यत्वं षट्त्रिंशत्त्वञ्च षट्त्रिंशत्पराकोपपादनं भवतीति । अतः प्राजापत्यपञ्चकतुल्यः पराकः । इति प्रायश्चित्ततत्त्वम् ॥ ० ॥
"द्वादशाहोपवासेन पराकः सर्व्वपापहा ॥"
इति गरुडपुराणे प्रायश्चित्तप्रकरणम् ॥

पराक्, [च्] त्रि, परा अञ्चतीति । (परा + अञ्च + क्विन् ।) प्रतिलोमगमनाश्रयः ॥

पराक्पुष्पी, स्त्री, (पराक् पुष्पं यस्याः ।) अपामार्गः । इति राजनिर्घण्टः ॥ (अपामार्गशब्देऽस्या विवृतिर्ज्ञेया ॥)

पराक्रमः, पुं, पराक्रम्यतेऽनेन । (क्रम + "हलश्च ।" ३ । ३ । १२१ । इति घञ् । "नोदात्तोपदेशस्य ।" ७ । ३ । ३४ । इति न वृद्धिः ।) तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ शक्तिः ९ प्राणः १० । इत्यमरः । २ । ८ । १०२ ॥ मदः ११ ऊर्ज्ज १२ सामर्थ्यम् १३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये देवीमाहात्म्ये । ८२ । ११ ।
"पराक्रमस्य युद्धेषु जायते निर्भयः पुमान् ॥")
विक्रमः ॥ (यथा, मार्कण्डेये । २० । ४५ ।
"यस्य मित्राणि मित्राण्यमित्राश्च पराक्रमम् ।
कथयन्ति सदा सन्तः पुत्रवांस्तेन वै पिता ॥")
उद्योगः । इति मेदिनी ॥ निष्क्रान्तिः । इति शब्दरत्नावली ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ४४ ।
"औषधं जगतः सेतुः सत्यधर्म्मपराक्रमः ॥")

परागः, पुं, (परागच्छतीति । गम + "अन्येष्वपि दृश्यते" इति डः ।) पुष्पधूलिः । तत्पर्य्यायः । सुमनोरजः २ कौसुमरेणुः ३ । इत्यमरः । २ । ४ । १७ ॥ पुष्परेणुः ४ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशती । ५०६ ।
"जितं न सुखं खाद्यं न पपातौ न चरणाः पराग-
भृशमिव गलिता विदधत्यखिले मधु पीतम् ॥") [शिख ।
धूलिः ॥ (यथा, रघुः । ४ । ३० ।
"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥")
स्नानीयचन्दनम् ॥ गिरिप्रभेदः ॥ विख्यातिः ॥ उपरागः ॥ चन्दनम् । इति मेदिनी ॥ स्वच्छन्दगमनम् । इति शब्दरत्नावली ॥

पराङ्गदः, पुं, (परं अङ्गं काशीस्थलो प्रियत्वं ददातीति । दा + कः ।) शिवः । इति शब्दमाला ॥

पराङ्गवः, पुं, (पराङ्गं अन्तःस्था जलचरशरीरं वाति प्राप्नोतीति । वा + कः ।) समुद्रः । इति त्रिकाण्डशेषः ॥

पराङ्मुखः, त्रि, (पराक् प्रतिलोमगामि मुखं यस्य ।) विमुखः । तत्पर्य्यायः । पराचीनः २ । इत्यमरः । ३ । १ । ९२ ॥ (यथा, मनुः । १० । ११९ ।
"धर्म्मो विजयता? [illegible] पराङ्मुखः ॥"
तच्छीलमर्थाभिदधे, पुं । यथा, तन्त्रसारे ।
"वासवोऽर्कं श्रुति माता पितरक्तद्धुदेव च ।
पञ्चौ पराङ्मुखः शोच्यो मध्ये तु विमुखाग्निः ॥")

पराचितः, त्रि, (परेण आचितः पालितः ।) परपुष्टः । परद्वारा प्रतिपालितः । तत्पर्य्यायः । परिस्कन्दः २ परजातः ३ परैधितः ४ । इत्यमरः । ३ । १० । १८ ॥ परिष्कन्दः ५ । इति भरतः ॥

पराचीनः, त्रि, (पराञ्चति अवाङ्मुखीभवतीति । अञ्चु + "ऋत्विग्दधृक् ।" ३ । २ । ५९ । इति क्विन् ततः स्वार्थे "विभाषाञ्चेरदिक्स्त्रियाम् ।" ५ । ४ । ८ । इति खः ।) पराङ्मुखः । इत्यमरः । ३ । १ । ९२ ॥ (यथा, भागवते । ११ । ३ । २४ ।
"ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्म्मिणा ॥")

पराजयः, पुं, (परा + जि + अच् ।) रणे भङ्गः । इत्यमरः । २ । ८ । ११२ ॥ (अत्र रण इत्युपलक्षणं वस्तुतस्तु विद्यावादादावपि तदेव ॥) तत्पर्य्यायः । भङ्गः २ हारी ३ हारिः ४ पराभवः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ७ । १९९ ।
"अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥")

पराजितः, त्रि, (परा + जि + कर्म्मणि क्तः ।) कृतपराजयः । हारितः । तत्पर्य्यायः । पराभूतः २ विजितः ३ निर्जितः ४ जितः ५ । इति शब्दरत्नावली ॥ "इदं चार्थशास्त्रमहीने अर्थ पराजितो भवतीति इमानि खलु पराणि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

पराञ्जः, पुं, (पराक् अञ्जतीति । अञ्जु व्यक्तौ + अच् ।) तैलयन्त्रः । फेनः । छुरिकाफलम् । इति शब्दरत्नावली ॥

परात्परः, पुं, परात् श्रेष्ठादपि परः श्रेष्ठः । श्रीकृष्णः । यथा,—
"देवाः कालस्य कालोऽहं विधातुर्विधिरेव च ।
संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

परात्प्रियः, पुं, (परादपि प्रियः ।) इक्षुविशेषः । इति शब्दचन्द्रिका । उलु इति भाषा ॥

परादनः, पुं, (परस्यादनं खादनं यस्य यद्वा परान् शत्रून् अपि अदयति पारसीकाः आरदति विदारयति खुरैरिति वा अद भक्षणे ल्युः ।) पारसीकघोटकः । इति त्रिकाण्डशेषः ॥

पराधीनः, त्रि, (परस्य अधीनः वा अधीनः ।) परवशः । तत्पर्य्यायः । परतन्त्रः २ परवान् ३ नाथवान् ४ । इत्यमरः । ३ । १ । १६ ॥ अस्य जीवनार्हं यथा,—
"ज्वालाप्नोति? [illegible] पराधीनजीविका ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते मृताः ॥"
इति ब्रह्मपुराणे १११ अध्यायः ॥

परापरा, स्त्री, [illegible] । इति शब्दचन्द्रिका ॥

परार्द्धं, क्ली, (परस्य अर्द्धम् ।) अन्त्यसङ्ख्याविशेषः । परस्य ब्रह्मणः आयुषः अर्द्धम् । तस्य कालत्वं यथा,—

"परान्नं परवासश्च नित्यं धर्मरतस्त्यजेत् ।"
इति स्मृतिः ॥
संयमदिने तस्य त्याज्यत्वं यथा,—
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ।"॥
पारणदिने तस्य त्याज्यत्वं यथा,—
"अभ्यङ्गञ्च परान्नञ्च तैलं निर्माल्यलङ्घनम् ।
तुलसीचयनं द्यूतं पुनर्भोजनमेव वा ॥
पक्षपीड़ां तथा चारं द्वादश्यां वर्ज्जयेद्बुधः ।"॥
तद्भोक्तुर्यागादिविफलत्वं यथा,—
"परपाकेन पुष्टस्य द्विजस्य गृहमेधिनः ।
इष्टं दत्तं तपोऽधीतं यस्यान्नं तस्य तद्भवेत् ।"॥
तद्भुक्त्वा पुत्रोत्पादने दोषो यथा,—
"यस्यान्नेन तु भुक्तेन भार्य्यां समधिगच्छति ।
यस्यान्नं तस्य ते पुत्रा अन्नाद्रेतः प्रवर्त्तते ॥"॥
ब्राह्मणादिस्वामिकान्नभोजने दोषो यथा,—
"ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यताम् ।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेनैरकं व्रजेत् ॥"
इत्येकादशीतत्त्वम् ॥॥
परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा,—
"षोड़शांशं स लभते यः परान्नेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥"
इति प्रायश्चित्ततत्त्वम् ॥॥
महागुरुनिपाते तस्य त्याज्यत्वं यथा,—
"दन्तधावनं परान्नञ्च गन्धं माल्यञ्च मैथुनम् ।
वर्ज्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः ॥"
इति शुद्धितत्त्वम् ॥॥
तद्भोक्तुर्मन्त्रसिद्धिहानिर्यथा,—
"जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने ! ।"
इति तन्त्रम् ॥॥
तद्भोजने प्रतिप्रसवो यथा,—
"गुर्व्वन्नं मातुलान्नं वा श्वशुरान्नं तथैव च ।
पितुः पुत्रस्य चैवान्नं न परान्नमिति स्मृतिः ॥"
इत्येकादशीतत्त्वम् ॥
परान्नः, त्रि, (परान्नं नित्यमस्यास्ति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) परान्नोपजीवी । तत्पर्य्यायः । परपिण्डादः २ । इत्यमरः । ३ । १ । ३० ॥
परापं, त्रि, (परागता आपो यस्मात् । "अवर्णान्ताद्वा ।" ६ । ३ । ९७ । इत्यस्य वार्त्तिं इत्यनेन पक्षे अप ईत्वाभावः ।) पक्षे ईत्वे परेपम् । इति सिद्धान्तकौमुदी ॥
परापरं, क्ली, (परमापिपर्त्ति । आ + पृ + अच् ।) परूषकम् । इति भावप्रकाशः ॥ (अस्य विवरणं परूष शब्दे ज्ञेयम् ॥ परञ्चापरञ्च द्वयोः समाहारः ।) परमपरञ्च ॥ (यथा, विष्णुपुराणे । १।६।२७ ।
"एताश्च सहयज्ञैश्च प्रजानां कारणं परम् ।
परापरविदः प्राज्ञास्ततो यज्ञान् वितन्वते ॥")
परापरगुरुः, पुं, (परमादपि परः य ईड़ः परापरः । पृषोदरादित्वात् साधुः ततः कर्म्मधारयः ।) गुरुविशेषः । स तु भावती । (यथा,—
"आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"
इति दक्षिणीलतन्त्रे २ पटलः ॥
(तन्त्रान्तरे च यथा,—
"मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठिगुरुस्त्वहम् ॥")
पराभवः, पुं, (पराभूयते इति पराभवनमित्यर्थः । परा + भू + भावे अप् ।) तिरस्कारः । (यथा, मार्कण्डेये । ८ । २९ ।
"महापातकोऽहमुच्छिष्टो मयैवाहं जितेन्द्रियः ।
कथमिच्छथ मत्तोऽपि देवाः प्रभुपराभवम् ॥")
अस्य पर्य्यायः । न्यक्कारः २ तिरस्क्रिया ३ परिभावः ४ विप्रकारः ५ परिभवः ६ अभिभवः ७ अत्याकारः ८ निकारः ९ । इति हेमचन्द्रः ॥ विनाशः । इति मेदिनी ॥
पराभूतः, त्रि, (पराभूयते स्म । परा + भू + क्त ।) पराजितः । इत्यमरः । ३ । ८ । ११२ ॥
परामर्शः, पुं, (परामृश्यते इति । परामर्शनमित्यर्थः । परा + मृश् + भावे घञ् ।) युक्तिः । विवेचनम् । तत्पर्य्यायः । वितर्कः २ उन्नयनम् ३ विमर्शनम् ४ अध्याहारः ५ तर्कः ६ ऊहः ७ । इति हेमचन्द्रः ॥ तर्कशास्त्रे तु व्याप्तिविशिष्टपक्षधर्म्मताज्ञानम् । यथा,—
"व्याप्यस्य पक्षधर्म्मत्वधीः परामर्श उच्यते ॥"
इति भाषापरिच्छेदः ॥
अस्यार्थः "व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानमनुमितिजनकम् । तच्च व्याप्यः पक्षे इति ज्ञानं पक्षो व्याप्यवान् इति ज्ञानं वा ।" इति सिद्धान्तमुक्तावली ॥ स चानुमितव्यापारः । यथा,—
"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥"
इति भाषापरिच्छेदः ॥
अस्यार्थः । "अनुमायामनुमितौ व्याप्तिज्ञानं कारणं परामर्शो व्यापारः । तथा हि । येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित् पर्व्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य पुरुषस्य भवति पश्चाच्च वह्निव्याप्यधूमवान् पर्व्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते ।"
इति सिद्धान्तमुक्तावली ॥
परान्तं, क्ली (परमन्तं वारि यस्मात् ।) वर्षाम् । इति त्रिकाण्डशेषः ॥ (परमन्तं अमरत्वधर्म्मकं ब्रह्मात्मभूतं यस्य । इति विग्रहे वाच्यलिङ्गः । यथा, मुण्डकोपनिषदि । ३ । २ । ६ ।
"वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद् यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्व्वे ॥")
परामृष्टः, त्रि, (परामृश्यते स्म । परा + मृश् + कर्म्मणि क्तः ।) सम्बद्धः । सम्बन्धयुक्तः । यथा,—
"क्लेशकर्म्मविपाकाद्यैरपरामृष्टः ।" इति कुसु- माञ्जलिकारिकाव्याख्याने रामभद्रः ॥ कृतपरामर्शः । विवेचितः ॥
परायणं, त्रि, आसङ्गवचनम् । इत्यमरः । ३ । २ । २ ॥ परं केवलमयनमासक्तिस्थानमिति परायणम् । यथा धर्म्मपरायणो धर्म्मासक्तः । इति भरतः ॥ आश्रयः । (यथा, मनुः । ४ । १० ।
"वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ॥"
तत्परम् । अभीष्टम् । इति मेदिनी । (नित्यप्रतिष्ठा । यथा, रामायणे । २ । ४८ । १७ ।
"पादच्छायासुखं भर्त्तुस्तादृशस्य महात्मनः ।
स हि नाथोऽनाथानां स गतिः स परायणम् ॥"
"परायणं शाश्वतप्रतिष्ठा ।" इति रामानुजः ।)
परायत्तं, त्रि, परस्य परेषां वा आयत्तम् ।) पराधीनम् । यथा,—
"तथायत्तवशाधीनच्छन्दवन्तः परात्परे ॥"
इति हेमचन्द्रः ॥
परारि, अ (पूर्व्वतरे वत्सरे इत्यर्थे "सद्यः परुत्परारीति ।" ५ । ३ । २२ । इति पूर्व्वतरस्य परभावः आरि च प्रत्ययः ।) पूर्व्वतरवत्सरे । गतवृतीयवर्षे । इत्यमरभरतौ ॥ (परस्य अरिः ।) परशत्रौ त्रि ॥
परारीणः, त्रि, (परारि भवः । "चिरपरुत्परारिभ्यस्त्नो वक्तव्यः ।" ४ । ३ । २३ । इत्यस्य वार्त्तिं इत्यनेन त्नः ।) पूर्व्वतरवत्सरसम्बन्धी । इति व्याकरणम् ॥
परारुः, पुं, (पराम्ऋच्छतीति । परा + ऋ + उन् ।) कारवेल्लः । इति त्रिकाण्डशेषः ॥ (कारवेल्लशब्देऽस्य गुणादयो ज्ञातव्याः ॥)
परारुकः, पुं, (पराम्ऋच्छतीति । परा + ऋ + उकः ।) प्रस्तरः । इति त्रिकाण्डशेषः ॥
परार्द्ध क्ली, (परार्द्धति सर्व्वोत्कृष्टतया मर्हति इति । अर्धाद्यर्ह इत्यादि + अच् ।) दशगुणोत्तरसंख्या । अन्त्यलक्षकोटिः । १००,०००,०००,०००,०००,००० इदं चरमसंख्या अष्टादशाङ्कपर्य्यन्तम् । इति हेमचन्द्रः ज्योतिषञ्च ॥ (यथा, नैषधे । ३ । ४० ।
"यदि त्रिलोकीगणनापरा स्यात्
तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥")
ब्रह्मण आयुषोऽर्द्धम् । यथा,—
"निजेन तस्य मानेन आयुर्व्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
इति कौर्म्मे ५ अध्यायः ॥
(तथा, मार्कण्डेये । ४६ । ३२—३३ ।
"शतं हि तस्य (ब्रह्मणः) वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्भिस्तथावर्षैः परार्द्धमिति कीर्त्त्यते ॥
इत्येतस्य परार्द्धन्तु अतीतं द्विजसत्तम ! ।
यस्यान्तेऽभूम्महाकल्पः पाद्म इत्यभिविश्रुतः ॥")
परार्द्ध्यः, त्रि, (परार्द्धे परार्द्धसंख्यावत् प्रधानत्व-मर्हतीति । परार्द्ध + यत् यद्वा परस्मिन्नर्द्धे भवः । "परावराधमोत्तमपूर्व्वाच्च ।" ४ । ३ । ५ । इति

मत् ।) प्रधानः । श्रेष्ठः । इत्यमरः ।३।१।५८।
(यथा, रघुः ।१०।६६।
"तामभ्यगच्छद्रुदितानुसारी मुनिः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥")

(... best reading:)
"तान्महाधाविवान् सम्राट् मुत्वा प्रीतो हि पार्थिवः ।
मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")

परावर्त्तं, क्ली, (परावर्त्ततीति । परा + वृत + बाहुलकात् अलच् ।) परूषकम् । इति राजनिर्घण्टः ॥

परावर्त्तः, पुं, (परा वर्त्तते इति । परा + वृत + घञ् ।) परिवर्त्तः । विनिमयः । इति हेमचन्द्रः ॥

परावहः, पुं, (परं वहतीति । वह् + अच् ।) सप्तवायुमध्ये षष्ठवायुः । स तु परिवहवायोरूर्द्ध्वस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।
"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")

पराविद्धः, पुं, (परा + व्यध + क्तः ।) कुबेरः । इति शब्दमाला ॥

परावेदी, स्त्री, (परस्य गुणकर्म्माविन्दतीति । विद् + अच् । स्त्रियां ङीप् ।) कण्टकारी । इति केचित् ॥

पराशरः, पुं, (अस्य निरुक्तिर्यथा, महाभारते ।१।१७८।३।
"पराशुः स यतस्तेन वशिष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"
"परासोराशनं यस्मात् तेन च पराशरः ।
यातुधानाश्च ततो वेदान् ॥" इति शौनकस्य ॥)
व्यासपिता । शक्तिमुनिपुत्रः । यथा,—
"सुतं सत्यवतीरत्नं पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ॥"
इति विष्णुपुराणम् ॥
(अयं हि द्वादशाध्यायात्मिका धर्म्मसंहितां रचितवान् । सा च कलियुगधर्म्मविषया । यदुक्तं तत्रैव ।
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
तत्र संहितायां १म अध्याये युगभेदे धर्म्मभेदादिकथनम् । २यः आचारधर्म्मगृहस्थधर्म्मादिकथनम् । ३यः जननमरणाशौचकालकथनम् । ४र्थः आर्त्तस्नानपतितादिप्रायश्चित्तकथनम् । ५मः आहिताग्निदाहादिकथनम् । ६ष्ठः प्राणिवधप्रायश्चित्तकथनम् । ७मः द्रव्यशुद्ध्यादि । ८मः गोवधादिप्रायश्चित्तम् । ९मः गोवधप्रायश्चित्तादि । १०मः अगम्यागमनादिप्रायश्चित्तम् । ११शः अभक्ष्यभक्षणादि प्रायश्चित्तम् । १२शः प्रायश्चित्तसंख्यानादि ॥ ० ॥
अयं खलु भगवतो वेदव्यासस्य पितुरन्यः । एतद्विवरणं यथा देवीभागवते । ७ स्कन्धे । ४ अध्याये द्रष्टव्यम् ॥
परान् शत्रून् आशृणाति हिनस्तीति । श हि हिंसे + अच् ।" भारतोऽरः । यथा, महाभारते ।
१।१७०।१८। "पराशरो वीरकृत्; शुचिर्निधनैतिकः । पराशरपुत्रको मरिमकथाधातवस्ति: ॥")

पराशरी, [न्] पुं, पराशरेण प्रोक्तं भिक्षुसूत्रं पाराशरं तदधीते अध्ययनविधेति यः इन् च । पराशरीति इत्यादिवत् । इत्यमरटीकायां भरतः ॥ पाराशरी । चतुर्थाश्रमी ॥

पराश्रया, स्त्री, (परः आश्रयो यस्याः ।) वृक्षोपरिजातलताविशेषः । परगाछा इति भाषा । तत्पर्य्यायः । वन्दा २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ पद्मिनी ६ पुष्पिणी ७ वन्ध्या ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)

परासनं, क्ली, (परा + अस् + भावे ल्युट् ।) मारणम् । वधः । इत्यमरः ।२।८।११६॥

परासुः, त्रि, (परागताः प्रस्थिताः असवः प्राणा यस्य ।) मृतः । इत्यमरः ।२।८।११७॥
(यथा, रघौ ।९।७८।
"तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥")
परासुपरीक्षा वैद्यके यथा,—
"तस्य चेत् परिदृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिगुदरपार्श्व-पृष्ठेक्षिका-पाणिग्रीवा-ताल्वोष्ठ-ललाटं स्विन्नं शीतं प्रतप्तं दारुणं शीतमोघोम्मितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिमृश्यमानानि पृथक्त्वेन गुल्फजानुवङ्क्षण-गुद-वृषण-मेढ्रनाभ्यंसस्तनमणिकहृदयनासिका कर्णाक्षिभ्रूशङ्खादीनि सन्धानि घनानि श्लथानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् ।"
"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेत्कर्णौ परिदृश्यमानेन न स्पृश्येयातां परासुरिति विद्यात् । तस्य चेदूर्ध्वाः प्रतिलोमाः श्वेताः आस्यमूर्द्धजाः स्युः परासुरिति विद्यात् । तस्य चेत् पक्ष्माणि जटाबद्धानि स्युः परासुरिति विद्यात् । तस्य चेच्चक्षुषी प्रकृतिहीने विकृतियुक्ते अत्युत्पिण्डिते अतिप्रविष्टे अतिजिह्मे अतिविषमे अतिप्रस्रुते अतिविमुक्तबन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषातिप्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके हीनदृष्टिके व्यस्तदृष्टिके नकुलाभे कपोताभे अलातवर्णे श्यावनीलपीतशरावशुक्लकरक्तवर्णे ताम्रवर्णे वाऽतिपरिस्रुते चक्षुषी भवतो वा स्यातां परासुरिति विद्यात् ।
तस्य चेत् ललाटे शीतमापद्यते शीतकाले ज्वरस्य वक्षोरुजः परासुरिति विद्यात् ।
अथ परासुर्वै शिरस्तीव्रवेदनातुरः क्षुत्तृष्णार्दितः स्वेदवान् स्फुटितस्फिक् परासुरिति विद्यात् ।"
इति चरके इन्द्रियस्थाने चतुर्थोऽध्याये उक्तम् ।
"भ्रातारो भीता नु हृदये मनोऽर्द्दमनुवासिनी ।
कथाप्रविरेचकरी च परासुरलक्षणम् ॥"
इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)

परासुता, स्त्री, (परासोर्मृतस्य भावः । परासु + तल् स्त्रियां टाप् ।) मरणम् । विनाशदशा । इति पुराणम् ॥

परास्कन्दी, [न्] पुं, (परान् आस्कन्दितुं शीलमस्य । आ + स्कन्द + णिनिः ।) चौरः । इत्यमरः ।२।१०।२५॥

परास्तं, त्रि (परास्यते स्म । परा + अस् + क्तः ।) निरस्तम् । पराजितम् । यथा —
"श्रीमिरिरास्तु वरमस्तु दुरन्त-
लीलालतैव परवागपराहता ॥"
इति नैषधे ५ सर्गः ॥

पराह्णः, पुं, (परमह्नः । "राजाहःसखिभ्यष्टच् ।" ५।४।९१। इति टच् ।) अपराह्णम् । यथा । पूर्व्वाह्णे तदहः पराह्णे विप्राय दद्यादिति पराह्ण एव । इति तिथितत्त्वम् ।

पराह्नः, पुं, (अह्नः परं इति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५।४।८८। इति अह्नादेशः । ततः णत्वं च ।) अपराह्णः । विकालः । (केचित्तु अर्द्धं पराह्णोऽपि ।)

परि, व्य, सर्व्वतोभावः । वर्जनम् । व्याप्तिः । दोषः । दुःखभागः । आख्यानम् । भागः । पौनः । आलिङ्गनम् । लक्षणम् । दोषकथनम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी । उपरमः । शोकः । इति हेमचन्द्रः । सन्तोषभाषणम् । इति शब्दरत्नावली । उपसर्गविशेषः । अस्यार्थः । सर्वतोभावः । व्याप्तिः । पौनः । दत्ताभावः । चिह्नम् । भागः । क्रमः । नियमः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परिकथा, स्त्री, (परितः कथा ।) कथाभेदः । यथा,
"अथ बाह्यविधाः प्रकथाः सत्कथा कथा ।
आख्यायिका परिकथा कथानकर्षिकेति ॥"
इति शिक्षादर्पणः ।

परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥

परिकरः, पुं, (परिक्रियतेऽनेनेति । परि + कृ + "ऋदोरप् ।" ३।३।५७। इति अप् । यद्वा परिकिरति विक्षिपतीति पुंसीति घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः ।३।३।१६१॥ प्रगाढः । वृन्दम् । आरम्भः । इति शब्दरत्नावली । समूहः । मार्जिकावन्धः । (यथा, मार्कण्डेये ।१६।१२१।
"बाहुं नरेन्द्रं वरं कुशमारात् नाथितम् ।
तत्राप्य जनुकल्पितो ॥")
। कटिबन्धः । यथा,—

"परिकरः सहकारी स च व्याप्तिपक्षधर्म्मत्वादिः।" इति सामान्यनिरुक्तौ जगदीशः॥ (अलङ्कारविशेषः। यथा, साहित्यदर्पणे।१०।७५। "उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः॥" उदाहरणं यथा तत्रैव। "अङ्गराज! सेनापते! द्रोणोपहासिन्! कर्ण! रक्षैनं भीमाद्दुःशासनम्॥")

परिकर्त्ता, [ऋ] पुं, (परिकरोतीति। परि+कृ+तृच्।) अनूढ़ज्येष्ठे कनिष्ठविवाहस्य याजकः। इत्युद्वाहतत्त्वम्॥

परिकर्म्म, [न्] क्ली, (परिक्रियते इति। परि+कृ+मनिन्।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादि। इति स्वामी॥ शरीरसंस्कारमात्रम्। इत्यन्ये॥ तत्पर्य्यायः। अङ्गसंस्कारः २। इत्यमरः।२।६।१२१॥ प्रतिकर्म्म ३। इति शब्दरत्नावली॥ (यथा कुमारे।४।१८।

"विबुधैरपि यस्य दारुणै-
रसमाप्ते परिकर्म्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे॥")

परिकर्म्मा, [न्] पुं, (परितः कर्म्म यस्य।) परिचारकः। सेवकः। इति रत्नमाला॥

परिकर्म्मी, [न्] त्रि, (परिकर्म्म विद्यतेऽस्य। परिकर्म्म+इनिः।) परिकर्म्मा। इति हेमचन्द्रः॥

परिकाङ्क्षितः, त्रि, (परित्यक्तं काङ्क्षितं अभिलाषो येन।) तपस्वी। इति शब्दरत्नावली॥

परिकूटं, क्ली, (परि सर्व्वतो भूषितं कूटम्।) पुरद्वारकूटकम्। तत्पर्य्यायः। हस्तिनखः २ नगरद्वारकूटकम् ३। इति हेमचन्द्रः॥

परिक्रमः, पुं, (परिक्रमणम्। क्रमु पादविक्षेपे+भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति उपधाया न वृद्धिः।) क्रीड़ार्थं पद्भ्यां गमनम्। तत्पर्य्यायः। विहारः २। इत्यमरः।३।२।१६॥ प्रदक्षिणम्। यथा,—

वराह उवाच।

"शृणु भद्रे! महापुण्यं पृथिव्यां सर्व्वतो दिशम्।
परिक्रम्य यथान्यायं प्रमाणगणितं शुभम्॥
भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च॥
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा॥
वरुणा लोमशेनैव नारदेन ध्रुवेण च।
जाम्बवता सुषेणेन रावणेन हनूमता॥
एतैरनेकधा दैवैः ससागरवना मही।
क्रमिता बालिना चैव पाद्ममलरेखया॥
अमरा असमर्थेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वदैत्येन्द्रैः पञ्चभिः पाण्डुनन्दनैः॥
योगसिद्धैस्तथा वैविध्यमार्कण्डेयसुतैरपि।
क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः॥
अन्यपापबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः।
मनसापि न शक्यन्ते गमनस्य च का कथा॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत्।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः।
कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा॥"
इति वराहपुराणम्॥

परिक्रमसहः, पुं, (परिक्रमं विहारं सहते इति। सह+पचाद्यच्।) छागलः। इति त्रिकाण्डशेषः॥

परिक्रिया, स्त्री, (परिकरणम्। परि+कृ+शच्। "रिङ् शयग्लिङ्क्षु।" ७।४।२८। इति रिङ्।) परिखाजलादिना वेष्टनम्। तत्पर्य्यायः। परिसर्पः २। इत्यमरः।३।२।२०॥ (एकाहयागविशेषः। यदुक्तं आश्वलायनश्रौते।९।५।१२। "सद्यस्क्रिया अनुक्रिया परिक्रिया वा स्वर्गकामः॥" "परिक्रियाख्येकाहा भवति एषामन्यतमेन स्वर्गकामो यजेत॥" इति नारायणी॥)

परिक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते क्षण्यते दुरितं येन। परि+क्षि+क्विप्। कलिशासनकर्त्तृत्वादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। तथा चोक्तं महाभारते।१०।१६।२—३॥

"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः।
उपप्लव्ये गतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत्॥
परिक्षीणेषु कुरुषु पुत्त्रस्तव भविष्यति।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति॥")

अभिमन्युपुत्त्रः। तत्पर्य्यायः। परीक्षित् २ पारिक्षीतः ३ परिक्षितः ४। इति शब्दरत्नावली॥ (अयं पुनर्युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तराया गर्भाज्जातः। अयमेव गर्भस्थः सुद्राश्वत्थामप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवतः कृष्णस्य प्रभावात् जीवितं लब्धवान्। अयमेव इतस्ततः पित्र्यं धर्म्मं नियम्यन्तं कलिं शशास। ततो गच्छति काले एकदाऽयं मृगयां विचरन् क्षुधाक्रान्तपीड़ितः मौनव्रतावलम्बिनः शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासञ्जयामास। अनेनापराधेनेमं राजानं शमीकस्य पुत्त्रः शृङ्गी नामा तपस्वी इतः सप्तमेऽहनि तक्षकदंशेनायं मृतो भविष्यतीत्यभिशप्तवान्। एतदाकर्ण्यायं गङ्गातीरे शुकप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोचयन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च। इत्थं तत्कथा महाभारते विस्तरतो द्रष्टव्या।) (कुरुपुत्त्रविशेषः। यथा, हरिवंशे।३२।९०।

"कुरोस्तु पुत्त्राश्चत्वारः सुधन्वा सुधनुस्तथा।
परिक्षित्तु महाबाहुः प्रवरश्चारिमेजयः॥"

अविक्षित्-पुत्त्रः। यथा, महाभारते।१।९४।५०।

"अविक्षितः परिक्षिच्च शबलाश्वश्च वीर्य्यवान्॥")

परिक्षिप्तं, त्रि, (परितः क्षिप्यते स्म इति। क्षिप्+क्त।) परिखादिना वेष्टितम्। तत्पर्य्यायः। निवृतम् २। इत्यमरः।३।१।८८॥ सर्व्वतोभावेन क्षेपयुक्तञ्च॥

परिखा, स्त्री, (परितः खन्यते इति। खन्+"अन्येष्वपीति।" ३।२।१०१। डः।) राजधान्यादिवेष्टनखातम्। इति भरतः॥ गड़खाइ इति खाना इति च यस्याः प्रसिद्धिः। तत्पर्य्यायः। खेयम्। इत्यमरः।१।१०।२८॥ (यथा, मनुः।७।१९६।

"भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥")

तस्या मानं यथा,—

"प्रस्थे च परिखामानं शतहस्तं प्रमाणकम्।
परितः शिविरायाश्च गम्भीरं दशहस्तकम्॥"
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २०२ अध्यायः॥

परिख्यातः, त्रि, परिसर्व्वतोभावेन ख्यातः प्रथितः। इति परिपूर्व्वख्याधातोः कर्त्तरि क्तप्रत्ययनिष्पन्नः॥ विख्यातः॥

परिगणितः, त्रि, (परिसर्व्वतोभावेन गण्यते स्म। परि+गण+क्त।) सर्व्वतोभावेन गणनायुक्तः। यथा। "परिगणितव्यतिरिक्तेषु संसर्गजातविशेषो भावरूपीयः परिगणनानर्थक्यात्।" इति जीमूतवाहनः॥

परिगतः, त्रि, (परि+गम्+क्त।) प्राप्तः। विस्मृतः। ज्ञातः। चेष्टितः। इति मेदिनी॥ गतः। इति हेमचन्द्रः॥ वेष्टितः। यथा,—

"अथ सवल्कदुकूलकुथादिभिः
परिगतोऽज्वलदुद्धतबालधिः।"
इति भट्टिकाव्ये।१०।१॥

परिग्रहा, स्त्री, (परि सर्व्वतोभावेन गृह्यते या परि+ग्रह+कर्म्मणि अप्।) नारी। इति शब्दचन्द्रिका॥

परिग्रहः, पुं, (परिग्रहणमिति। परि+ग्रह+"ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति अप्।) प्रतिग्रहः। (यथा, पञ्चतन्त्रे।४।७।

"कक्षाक्षेपपरिग्रहे शिथिलता यस्यादराद्युग्मति
तन्ते धूर्त्त! हृदि स्थिता प्रियतमा काचिन्ममे-
वापरा॥")

सैन्यपश्चाद्भागः। पत्नी। भार्य्या। (यथा, रघुः।८।१४।

"समदुकन्याः सपत्नपरिग्रहा-
मनल्पकालसकाञ्चमां पुरीम्॥")

परिजनः। परिवारः। आदानम्। (यथा, रघुः।८।६६।

"अनुभवन्नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया।
अनयदासनरज्जुपरिग्रहे
भुजलतां जलतामबलाजनः॥")

स्वीकारः। (यथा, रघुः।१८।१८

यत् ।) प्रधानः । श्रेष्ठः । इत्यमरः । ३ । १ । ५८ । (यथा, रघुः । १० । ६४ ।
"साध्वसत्यविधानं सप्तानां शुत्वा प्रीतो हि पार्थिवः ।
मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")
परावतं, क्ली, (परावसतीति । परा+अव+बाहुलकात् अतच् ।) परूषकम् । इति राजनिर्घण्टः ॥
परावर्त्तः, पुं, (परा वर्त्तते इति । परा+वृत्+घञ् ।) परिवर्त्तः । विनिमयः । इति हेमचन्द्रः ॥
परावहः, पुं, (परं वहतीति । वह्+अच् ।) सप्तवायुमार्गान्तर्गतषष्ठवायुः । स तु परिवहवायोरूर्द्ध्वस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।
"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")
पराविद्धः, पुं, (परा+व्यध+क्तः ।) कुवेरः । इति शब्दमाला ॥
परावेदी, स्त्री, (परस्तत्कर्ममाविन्दतीति । विद्+अण् । स्त्रियां ङीप् ।) कण्टकारी । इति केचित् ॥
पराशरः, पुं, (अस्य निरुक्तिरुक्ता यथा, महाभारते । १ । १७८ । ३ ।
"परासुः स यतस्तेन वशिष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"
"पराशीर्णाशासनमवस्थानं येन स पराशरः । आङ्पूर्व्वाच्छृणातेरेरन् ।" इति नीलकण्ठः ॥) व्यासपिता । शक्तिमुनिपुत्रः । यथा,—
"सुतं लब्धमयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ॥"
इत्यग्निपुराणम् ।
(अयं हि द्वादशाध्यायात्मिकां धर्म्मसंहितां कृतवान् । सा च कलिकर्त्तव्यधर्म्मविषया । यदुक्तं तत्रैव ।
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
तत्र संहितायां १मे अध्याये युगभेदे धर्म्मभेदादिकथनम् । २यः आचारधर्म्मगृहधर्म्मादिकथनम् । ३यः अशौचव्यवस्था आपद्धर्म्मादिदोषाः । ४र्थः प्रायश्चित्तमतानन्त्यक्रियाकुशपुत्तलिकादिकथनम् । ५मः श्राद्धप्रायश्चित्तव्यवस्था । ६ष्ठः प्राणिवधप्रायश्चित्तकथनम् । ७मः द्रव्यशुद्ध्यादि । ८मः गोवधादिप्रायश्चित्तम् । ९मः गोवधापवादादि । १०मः अगम्यागमनादिप्रायश्चित्तम् । ११शः अमेध्यभक्षणादि प्रायश्चित्तम् । १२शः प्रायश्चित्ताङ्गस्नानभेदादि ॥ ० ॥
अयं खलु मनुप्रमुखानां सप्तानां वेदव्यासमुनिप्रभृतीनाञ्च । एतद्विवरणन्तु यथा देवीभागवते । २ स्कन्धे । २ अध्याये द्रष्टव्यम् ॥
परान् आशृणाति हिनस्तीति । शृ हिंसे + अच् ।" नागभेदः । यथा, महाभारते । १ । ५७ । १८ । "पराशरो नीरकः सुचित्रश्चित्रवेगिकः । पराशरस्तरुणको मणिस्कन्धस्तथारुणिः ॥")
पराशरी, [न्] पुं, पराशरेण प्रोक्तं भिक्षुसूत्रं पाराशरं तद्विद्यतेऽस्याध्ययनायेति इन् च । पराशरीति ह्रस्वादिश्च । इत्यमरटीकायां भरतः ॥ पाराशरी । चतुर्थाश्रमी ॥
पराश्रया, स्त्री, (परं आश्रयो यस्याः ।) वृक्षोपरिजातलताविशेषः । परगाछा इति भाषा । तत्पर्य्यायः । वन्दा २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ शशिनी ६ पुष्पिणी ७ वन्ध्या ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)
परासनं, क्ली, (परा+अस्+भावे ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥
परासुः, त्रि, (परागताः प्रस्थिता असवः प्राणा यस्य ।) मृतः । इत्यमरः । २ । ८ । ११७ ॥ (यथा, रघौ । ९ । ७८ ।
"तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥"
परासुपरीक्षा वैद्यके यथा,—
"तस्य चेत् परिमृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिगुदरपार्श्व-पृष्ठपिण्डिका-पाणिग्रीवा-ताल्वोष्ठललाटं स्विन्नं शीतं स्तब्धं दारुणं शीतमांसशोणितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिमृश्यमानानि पृथक्त्वेन गुल्फजानुवङ्क्षण-गुदवृषण-मेढ्रनाभ्यंसस्तनमणिकहृदयपर्शुका नासिका कर्णाक्षिभ्रूशङ्खादीनि स्रस्तानि च्युतानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् ।"
"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेत्कण्ठे परिमृश्यमानेन न स्पन्देयातां परासुरिति विद्यात् । तस्य चेद्दन्ताः प्रसिक्ताः श्वेता जातशर्कराः स्युः परासुरिति विद्यात् । तस्य चेत् पक्ष्माणि जटाबद्धानि स्युः परासुरिति विद्यात् । तस्य चेदक्षिणी प्रकृतिहीने विकृतियुक्ते अश्रुसिक्ते अतिप्रविष्टे अतिजिह्मे अतिविषमे अतिप्रसुते अतिविमुक्तबन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषातिप्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके हीनदृष्टिके व्यस्तदृष्टिके नकुलान्धे कपोतान्धे अलातवर्णे कृष्णनीलपीतश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनाभिसंप्लुते वा स्यातां परासुरिति विद्यात् । अथास्य केशलोमान्यायच्छेत् । तस्य चेत् केशलोमान्यायम्यमानानि प्रलुच्येरन् नचेत् वेदयेत् परासुरिति विद्यात् ।
तस्य चेदुदरे शिराः प्रकाशेरन् । श्यावताम्रनील-हारिद्रशुक्ला वा स्युः परासुरिति विद्यात् । तस्य चेन्नखा पीतमांसशोणिताः पक्वजाम्बववर्णाः स्युः परासुरिति विद्यात् ।
अथास्याङ्गुलीरायच्छेत्तस्य चेदङ्गुल्य आयम्यमाना नचेत् स्फुटेयुः परासुरिति विद्यात् ।"
इति चरकेन्द्रियस्थाने चतुर्थेऽध्याये उक्तम् ॥
"वाताष्ठीला तु हृदये यस्योर्द्ध्वमनुयायिनी ।
रुजान्नविद्वेषकरी स परासुरसंशयम् ॥"
इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)
परासुता, स्त्री, (परासोर्मृतस्य भावः । परासु+तल् स्त्रियां टाप् ।) मृतत्वम् । निरापदत्ता । इति पुराणम् ॥
परास्कन्दी, [न्] पुं, (परान् आस्कन्दितुं शीलमस्य । आ+स्कन्द+णिनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥
परास्तं, त्रि (परास्यते स्म । परा+अस्+क्तः ।) निरस्तम् । पराजितम् । यथा —
"श्रीर्गिरस्तु परमस्तु पुनर्मा-
स्त्रीकृतैव परवागपरास्ता ॥"
इति नैषधे ५ सर्गः ॥
पराह्णः, पुं, (परस्तत्परवर्त्ती अह्नः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) परदिनम् । यथा । पूर्व्वाह्ने सद्दिनेऽपि पराह्ने त्रिसन्ध्याव्यापित्वे पराह्ण एव । इति सावित्रीव्रते तिथितत्त्वम् ॥
पराह्णः, पुं, (परश्च तदह्नश्चेति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । ततः नस्य णः ।) अपराह्णः । विकालः । (केषाञ्चिन्मते अयं पराह्नोऽपि ॥)
परि, व, सर्व्वतोभावः । वर्ज्जनम् । व्याप्तिः । दोषः । इत्थम्भूतः । आख्यानम् । भागः । वीप्सा । आलिङ्गनम् । लक्षणम् । दोषाख्यानम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी ॥ उपरमः । शोकः । इति हेमचन्द्रः ॥ समीपभावनम् । इति शब्दरत्नावली ॥ उपसर्गविशेषः । अस्यार्थः । सर्व्वतोभावः । अतिशयः । वीप्सा । इत्थम्भावः । चिह्नम् । भागः । त्यागः । नियमः । इति मुग्धबोधटीकायां दुर्गादासः ॥
परिकथा, स्त्री, (परितः कथा ।) वाङ्मयभेदः । यथा,
"अथ वाङ्मयभेदाः स्युरुपकथा कथा ।
आख्यायिका परिकथा कथानकविशेषकौ ॥"
इति त्रिकाण्डशेषः ॥
परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥
परिकरः, पुं, (परिकीर्य्यते इति । कृ विक्षेपे + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । यद्वा परिक्रियतेऽनेनेति पुंसीति घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः । ३ । ३ । १६९ ॥ समारम्भः । वृन्दः । इति शब्दरत्नावली ॥ प्रगाढ़गात्रिकाबन्धः । (यथा, मार्कण्डेये । १६ । २१ ।
"गाढ़ं परिकरं बद्ध्वा शुल्कमादाय चाधिकम् ।
स्कन्धे भर्त्तारमादाय जगाम मदुगामिनी ॥")
विवेकः । इति विश्वः । सहकारी । यथा,—

"परिकरः सहकारी स च व्याप्तिपक्षधर्म्मत्वादिः ।" इति सामान्यनिरुक्तौ जागदीशः । (अलङ्कारविशेषः । यथा, साहित्यदर्पणे ।१०।७५।
"उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः ।" उदाहरणं यथा तत्रैव । "अङ्गराज ! सेनापते ! द्रोणोपहासिन् ! कर्ण ! रक्षैनं भीमाद्दुःशासनम् ।")

परिकर्त्ता, [र्त्तृ] पुं, (परिकरोतीति । परि+कृ+तृच् ।) अनूढ़ज्येष्ठे कनिष्ठविवाहस्य याजकः । इत्युद्वाहतत्त्वम् ।

परिकर्म्म, [न्] क्ली, (परिक्रियते इति । परि+कृ+मनिन् ।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कारः । इति भरतः । स्नानोद्वर्त्तनादि । इति स्वामी । शरीरसंस्कारमात्रम् । इत्यन्ये । तत्पर्य्यायः । अङ्गसंस्कारः २ । इत्यमरः । २ । ६ । १२१ । प्रतिकर्म्म ३ । इति शब्दरत्नावली । (यथा कुमारे । ४ । १९ ।
"विबुधैरसि यस्य दारुणै-
रसमाप्ते परिकर्म्मणि स्मृतः ।
तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे ।")

परिकर्म्मा, [न्] पुं, (परितः कर्म्म यस्य ।) परिचारकः । सेवकः । इति रत्नमाला ।

परिकर्म्मी, [न्] त्रि, (परिकर्म्म विद्यतेऽस्य । परिकर्म्म+इनिः ।) परिकर्म्मा । इति हेमचन्द्रः ।

परिकाङ्क्षितः, त्रि, (परित्यक्तं काङ्क्षितं अभिलाषो येन ।) तपस्वी । इति शब्दरत्नावली ।

परिकूटं, क्ली, (परि सर्व्वतो भूषितं कूटम् ।) पुरद्वारकूटकम् । तत्पर्य्यायः । हस्तिनखः २ नगरद्वारकूटकम् ३ । इति हेमचन्द्रः ।

परिक्रमः, पुं, (परिक्रमणम् । क्रमु पादविक्षेपे+भावे घञ् । "नोदात्तोपदेशस्येति ।" ७ । ३ । ३४ । इति उपधाया न वृद्धिः ।) क्रीडार्थं पद्भ्यां गमनम् । तत्पर्य्यायः । विहारः २ । इत्यमरः । ३ । २ । १६ । प्रदक्षिणम् । यथा,—
वराह उवाच ।
"प्रथ भद्रे ! महापुण्यं पृथिव्यां सर्व्वतो दिशम् ।
परिक्रम्य यथाध्यानं प्रमाणगणितं शुभम् ॥
भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च ।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥
तीर्थान्येतानि दैवाच तारकाश्च नभस्तले ।
गणितानि समस्तानि वायुना जगदायुषा ॥
महता लोमशेनैव नारदेन ध्रुवेण च ।
जाम्बवता सपुत्रेण रावणेन हनूमता ॥
एतैरनेकधा देवैः ससागरवना मही ।
क्रमिता बालिना चैव वाह्यमण्डलरेखया ॥
अमरा भ्रमणेनैव शुश्रीवेण महात्मना ।
तथा च पूर्व्वदेवैश्च पञ्चभिः पाण्डुनन्दनैः ॥
योगसिद्धैस्तथा केश्चिन्मार्कण्डेयसमैरपि ।
क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः ॥
अत्यल्पबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः ।
भ्रमसापि न शक्यन्ते गमनस्य च का कथा ॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत् ।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे ॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः ।
कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा ॥"
इति वराहपुराणम् ।

परिक्रमसहः, पुं, (परिक्रमं विहारं सहते इति । सह+पचाद्यच् ।) छागलः । इति त्रिकाण्डशेषः ।

परिक्रिया, स्त्री, (परिकरणम् । परि+कृ+श । "रिङ् शयग्लिङ्क्षु ।" ७ । ४ । २८ । इति रिङ् ।) परिखाजलादिना वेष्टनम् । तत्पर्य्यायः । परिसर्पः २ । इत्यमरः । ३ । २ । २० । (एकाहयागविशेषः । यदुक्तं आश्वलायनश्रौते ।९।५।१२।
"सद्यस्क्रिया अनुक्रिया परिक्रिया वा स्वर्गकामः ।" "परिक्रियाप्येकाहा भवति एषामन्यतमेन स्वर्गकामो यजेत ।" इति नारायणी ।)

परिक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन । परि+क्षि+क्विप् । कलिशासनकर्त्तृत्वादस्य तथात्वम् । यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति । तथा चोक्तं महाभारते । १० । १६ । २—३ ।
"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः ।
उपप्लव्य गतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत् ॥
परिक्षीणेषु कुरुषु पुत्त्रस्तव भविष्यति ।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ॥")
अभिमन्युपुत्त्रः । तत्पर्य्यायः । परीक्षित् २ पारिक्षितः ३ परिक्षितः ४ । इति शब्दरत्नावली । (अयं पुनर्युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत् । कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तराया गर्भाज्जातः । अयमेव गर्भस्थः द्रोणाश्वत्थामप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवतः कृष्णस्य प्रभावात् जीवितं लब्धवान् । अयमेव वृषरूपिणं धर्म्मं निघ्नन्तं कलिं प्रशशास । ततो गच्छति काले एकदाऽसौ मृगयां विहरन् क्षुधार्त्तपीडितः मौनव्रतावलम्बिनः शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासञ्जयामास । अनेनापराधेनेमं राजानं शमीकस्य पुत्त्रः शृङ्गी नामा तपस्वी इतः सप्तमेऽहनि तक्षकदष्टोऽयं मृतो भविष्यतीत्यभिशप्तवान् । एतदाकर्ण्यायं गङ्गातीरे मुनिप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोचयन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च । इत्थं तत्कथा महाभारते विस्तरतो द्रष्टव्या ।) (कुरुपुत्त्रविशेषः । यथा, हरिवंशे । ३२ । ९० ।
"कुरोस्तु पुत्त्राश्चत्वारः सुधन्वा सुधनुस्तथा ।
परिक्षित्तु महाबाहुः प्रवरश्चारिमेजयः ॥"
अविक्षित्-पुत्त्रः । यथा, महाभारते । १।९४।५० ।
"अविक्षितः . . . .)

परिक्षिप्तं, त्रि, (परितः क्षिप्यते स्म इति । क्षिप्+क्त ।) परिखादिना वेष्टितम् । तत्पर्य्यायः । निवृतम् २ । इत्यमरः । ३ । १ । ८८ । सर्व्वतोभावेन क्षेपयुक्तञ्च ।

परिखा, स्त्री, (परितः खन्यते इति । खन्+"अन्येष्वपीति ।" ३ । २ । १०१ । डः ।) राजधान्यादिवेष्टनखातम् । इति भरतः । गड़खाइ इति खाना इति च यस्याः प्रसिद्धिः । तत्पर्य्यायः । खेयम् । इत्यमरः । १ । १० । २९ । (यथा, मनुः । ७ । १९६ ।
"भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥")
तस्या मानं यथा,—
"प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् ।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम् ॥
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम् ।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ।

परिख्यातः, त्रि, परि सर्व्वतोभावेन ख्यातः प्रथितः । इति परिपूर्व्वख्याधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नः । विख्यातः ।

परिगणितः, त्रि, (परि सर्व्वतोभावेन गण्यते स्म । परि+गण+क्त ।) सर्व्वतोभावेन गणनायुक्तः । यथा । "परिगणितव्यतिरिक्तेषु संसर्गाभावविशेषो नादरणीयः परिगणनानर्थक्यात् ।" इति कौमुदीवाचस्पत्यः ।

परिगतः, त्रि, (परि+गम्+क्त ।) प्राप्तः । विस्मृतः । ज्ञातः । चेष्टितः । इति मेदिनी । गतः । इति हेमचन्द्रः । वेष्टितः । यथा,—
"अथ सवल्कदुकूलकुथादिभिः
परिगतोज्ज्वलदुद्धतबालधिः ।"
इति भट्टिकाव्ये । १० । १ ।

परिगृह्या, स्त्री, (परि सर्व्वतोभावेन गृह्यते या परि+ग्रह+कर्म्मणि क्यप् ।) नारी । इति शब्दचन्द्रिका ।

परिग्रहः, पुं, (परिग्रहणमिति । परि+ग्रह+"ग्रह वृद्‌निश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) प्रतिग्रहः । (यथा, पञ्चतन्त्रे । ४ । ७ ।
"कष्टाश्रमपरिग्रहे शिथिलता प्रमादरागुमति सति धूर्त्त ! हृदि स्थिता प्रियतमा काचिन्ममेवापरा ॥")
सैन्यपश्चाद्भागः । पत्नी । भार्य्या । (यथा, रघुः । ९ । १४ ।
"समनुकम्प्य सपत्नपरिग्रहा-
मनलकामलकावधिमां पुरीम् ।")
परिजनः । परिवारः । आदानम् । (यथा, रघुः । ९ । ४६ ।
"अनुभवन्नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे
भुजलतां जलतामबलाजनः ॥")
स्वीकारः । (यथा, रघुः । १८ । ३ ...

"लोकेन भावी पितुरेव तुल्यः
सम्भावितो मौलिपरिग्रहात् सः ॥")
मूलम् । कन्दः । ग्रासः । ग्रपथः । इत्यमरभरतौ ॥
राहुग्रस्तभास्करः । इत्यजयः ॥ (पुत्रदारादि-
भर्त्तव्यपरिमाणम् । यथा, मनुः । १० । १२६ ।
"प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद् यथार्हतः ।
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥"
परिगृह्यतेऽनेनेति विग्रहे हस्तः । विष्णुः । यथा,
महाभारते । १३ । १४९ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
"शरणार्थिभिः परितो गृह्यते सर्व्वगतत्वात्
परितो ज्ञायत इति वा । पुष्पादिभिर्भक्तैरर्पितं
परिगृह्णाति इति वा परिग्रहः ।" इति शाङ्कर-
भाष्यम् ॥ शापनम् । यथा, रघुः । ९ । २१ ।
"अनिशमपि मकरध्वजस्य नोढुं
ययतिरं मगमत्स्वपरिग्रहाम् ॥"
"स्वाधत्तं परिग्रहः कल्पनसाधनं यस्यास्ताम् ।"
इति तट्टीकायां मल्लिनाथः ॥)
परिग्राहः, पुं, (परि+ग्रह+"परौ यज्ञे ।" ३ ।
३ । ४७ । इति घञ् ।) यज्ञवेदिविशेषः । इति
केचित् ॥
परिघः, पुं, (परि हन्यतेऽनेनेति । परि+हन्+
"परौ घः ।" ३ । ३ । ८४ । इति अप्
घादेशश्च ।) लोहबद्धलगुडः । लोहमय-
लगुडः लोहमुखलगुडः । तत्पर्य्यायः । परि-
घातनः २ । इत्यमरः । २ । ८ । ९१ ॥ परि-
घातकः ३ । इति शब्दरत्नावली ॥ (यथा,
महाभारते । ६ । ६० । २४ ।
"बाहूनासुतमात्राणां कार्म्मुकाणाञ्च भारत ! ।
गदानां परिघाणाञ्च हस्तानाञ्चोरुभिः सह ॥")
परिघातः । परितो हननम् । इत्यमरभरतौ ॥
विष्कम्भादिसप्तविंशतियोगान्तर्गत ऊनविंशति-
योगः । (यथा, ज्योतिषे ।
"वज्रोऽथक् च व्यतीपातो वरीयान् परिघस्तथा ॥"
अस्य अर्द्धांशं परित्यज्य शुभं कर्म्म कुर्य्यात् ।
यदुक्तं तत्रैव ।
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ॥")
अथ परिघयोगजातफलम् ।
"उत्पत्तिकाले परिघो यदि स्या-
त्तदा नरो वंशकुठारकल्पः ।
अशक्तवाग्मी च सभा विशोकः
सत्याशुभोक्ता विजितारिपक्षः ॥"
इति कोष्ठीप्रदीपः ॥
अर्गलः । इति मेदिनी ॥ मुद्गरः । शूलः । इत्य-
जयः ॥ कलशः । काचघटः । गोपुरम् । गृहम् ।
इति शब्दरत्नावली ॥ ॥ (आर्गलाकृतिचक्र-
विशेषः । यथा, महाभारते । ९ । ३५ । १६ ।
"परिघश्च वटश्चैव भौमश्च सुमहाबलम् ।
दहति दहनश्चैव प्रचण्डौ वीर्य्यसम्मतौ ॥
अंशोऽप्यनुचरान् पञ्च ददौ स्कन्दाय धीमते ॥"
चक्रान्तविशेषः । यथा, महाभारते । १९ ।
११८ । ११४ ।
"सम्वर्त्तो महावक्त्रो मलिनो घोरदर्शनः ।
परिघो नाम चण्डालः शुक्लमालिरहन्यत ॥")
परिघातः, पुं, (परिहन्यतेऽनेन । परि+हन्+
घञ् । "हनस्तोऽचिण्णलोः ।" इति तः ।)
अस्त्रम् । हननम् । इति धरणिः ॥
परिघातनः, पुं, (परितो घातनं यस्मात् ।) परिघा-
ख्यम् । इत्यमरः । २ । ८ । ९१ ॥ सर्व्वतो-
भावेन हनने क्ली ॥
परिघोषः, पुं, (परितो घोषो यस्मिन् ।) मेघ-
शब्दः । शब्दः । अवाच्यः । इति मेदिनी ॥
परिचयः, पुं, (परि समन्तात् चयनं बोधो ज्ञान-
मित्यर्थः । परि+चि+अप् ।) विशेषेण ज्ञानम् ।
चेना इति भाषा । तत्पर्य्यायः । संस्तवः २ ।
इत्यमरः ।३।२।२४ ॥ प्रणयः ३ । इति भरतः ॥
(यथा, माघे । ७ । ६१ ।
"न परिचयो मलिनात्मनां प्रधानम् ॥"
अभ्यासः । यथा, माघे । २ । ७५ ।
"हेतुः परिचयस्थैर्य्ये वक्तुर्गुणनिकेव सा ॥"
नादस्य अवस्थाविशेषः । यथा, हठयोगदीपि-
कायाम् । ४ । ६९ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥")
परिचरः, पुं, (परितश्चरतीति । परि+चर+
पचाद्यच् ।) युद्धकाले परप्रहारात् रथरक्षकः ।
प्रजाधामस्थापनकारी । इति केचित् ॥
सेनायां राज्ञो दण्डनायकः । इत्यन्ये । इति
भरतः ॥ तत्पर्य्यायः । परिधिस्थः २ । इत्य-
मरः । २ । ८ । ६२ ॥ सहायः ३ । इति रत्न-
माला ॥ (परिचर्य्याकारकः । यथा वैद्यके,—
"उपचारज्ञता दाक्ष्यमनुरागश्च भर्त्तरि ।
शौचञ्चेति चतुष्कोऽयं गुणः परिचरे जने ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥
"स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्याये ॥)
परिचरणकर्म्म, [न्] क्ली, (परिचरणं सेवैव
कर्म्म ।) परिचर्य्या । तद्वैदिकपर्य्यायाः । इर-
ज्यति १ विधेम २ सपर्य्यति ३ नमस्यति ४ दुर-
स्यति ५ ऋध्नोति ६ ऋणद्धि ७ अर्च्चति ८
सपति ९ विवासति १० । इति दश परिचरण-
कर्म्माणः । इति वेदनिघण्टौ ३ अध्याये ॥
परिचर्य्या, स्त्री, (परिचर्य्यते परिचरणमित्यर्थः ।
परि+चर्+"परिचर्य्यापरिसर्य्येति ।" ३ । ३ ।
१०१ । इत्यस्य वार्त्तिं इति शो यक् च
निपात्यते ।) सेवा । (यथा, देवीभागवते ।
१ । ४ । ११ ।
"अथवा वार्द्धके प्राप्ते परिचर्य्यां करिष्यति ।
पुत्रः परमधर्म्मिष्ठः पुण्यार्थं चोभयोः ॥")
तत्पर्य्यायः । वरिवस्या २ शुश्रूषा ३ उपा-
सनम् ४ । इत्यमरः । २ । ७ । ३५ ॥ परिचर्य्या ५
उपासना ६ उपास्तिः ७ । इति भरतः ॥ शुश्रू-
षणा ८ । इति शब्दरत्नावली ॥
परिचाय्यः, पुं, (परिचीयते इति । चिञ् चयने
+"अग्नौ परिचाय्योपचाय्यसमूह्याः ।" ३ । १ ।
१३१ । इत्यनेन साधुः ।) यज्ञाग्निः । तत्पर्य्यायः ।
समूह्यः २ उपचाय्यः ३ । इत्यमरः । २ । ७ । २० ॥
(अग्निरिह न वह्निः किन्त्वग्निधारणाधारस्थल-
विशेषः । इति सिद्धान्तकौमुदी ॥)
परिचारकः, त्रि, (परिचरतीति । परि+चर+
ण्वुल् ।) सेवकः । चाकर इति भाषा । (यथा,
मनुः । ७ । २१७ ।
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥")
तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४
दासः ५ गोप्यकः ६ चेटकः ७ नियोज्यः ८
किङ्करः ९ प्रैष्यः १० भुजिष्यः ११ । इत्य-
मरः । २ । १० । १७ ॥ किङ्करः १२ चेटः १३
गोप्यः १४ पराचितः १५ परिस्कन्दः १६ परि-
कर्म्मी १७ । इति हेमचन्द्रः । ३ । २४ ॥
परिचार्य्यः, त्रि, परिचर्य्यतेऽसौ इति । परि+
चर+कर्म्मणि ण्यत् । सेव्यः ॥
परिचितः, त्रि, (परि+चि+कर्म्मणि क्तः ।)
परिचयविशिष्टः । ज्ञातः । यथा,—
"व्यक्तश्चेयं चिरपरिचिता जन्मभूमीति मुग्धा
मा खिद्यस्व त्रिभुवनजनश्लाघनीतेः क्रमाद्र ! ।
किन्नु त्याज्यं भवति महतां चेत् परस्योपकारे ।
याराग्रस्था सुनिरचिंगतौ दक्षिणाशामगस्त्यः ॥"
इति पदाङ्कदूतः ॥
परिचेयं, त्रि, परि पूर्व्वचिधातोः कर्म्मणि यप्रत्ययेन
निष्पन्नम् ॥ परिचययोग्यम् । परिचयनीयम् ।
परिचेतव्यम् ॥
परिच्छदः, पुं, (परिच्छाद्यतेऽनेनेति । परि+छद
+णिच्+"पुंसि संज्ञायाम् ।" ३ । ३ । ११८ ।
इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ ।
इति उपधाह्रस्वः ।) परिवारः । इति हेम-
चन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । ६७३ ।
"सहधर्म्मचारिणी मम परिच्छदः सुतनु ! नैव
सन्देहः ।
न तु सुलभयति गुणिनं दिनच्छदसहायेव सख्यन्तो ॥")
शरण्यवस्त्रकम्बलादुपकरणम् । यथा,—
"परिच्छदं छुपार्हेऽपि परिबर्होऽप्यथा परे ॥"
इत्यस्य टीकायां भरतः ॥
(यथा, रघुः । १ । १९ ।
"सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता ॥")
आच्छादनम् । यथा,—
"पयःफेननिभा शय्या दान्ता रुक्मपरिच्छदा ।"
इति श्रीभागवतम् ॥
परिच्छन्दः, पुं, (परिच्छन्द्यतेऽनेन । परि+छदि
संवरणे+घञ् ।) परिच्छदः । इति हला-
युधः ॥
परिच्छन्नः, त्रि, परिपूर्व्वच्छदधातोः कर्त्तरि कर्म्मणि
च क्तप्रत्ययनिष्पन्नः । परिच्छदविशिष्टः । वस्त्रादि-
भिराच्छादितः । संवृतः ॥

परिच्छिन्नः, त्रि, (परि+छिद्+कर्म्मणि क्तः।) परिच्छेदविशिष्टः। अवधिप्राप्तः। यथा,—
"परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विघ्नस्तत्त्वं वयमिह हि यत्त्वं न भवसि।"
इति महिम्नः स्तोत्रम्॥
सर्व्वतोभावेन छेदविशिष्टश्च॥

परिच्छेदः, पुं, (परि+छिद्+भावे करणादौ च घञ्।) ग्रन्थविच्छेदः। यथा, त्रिकाण्डशेषे॥
"सर्गवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम्॥
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः॥"
(तत्र काव्ये सर्गः। कोषे वर्गः। अलङ्कारे परिच्छेदोच्छ्वासौ। कथायामुद्घातः। पुराणसंहितादौ अध्यायः। नाटके अङ्कः। तन्त्रे पटलः। ब्राह्मणे काण्डम्। संगीते प्रकरणम्। इतिहासे पर्व्व। भाष्ये आह्निकम्। एवमन्येऽपि पादतरङ्गस्तवकप्रपाठकस्कन्धमञ्जरीलहरीशाखादयो ग्रन्थसन्धयो ग्रन्थभेदे यथायथं ज्ञेयाः॥)
सीमा। अवधिः। यथा, मालतीमाधवे।
"परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते॥"

परिजनः, पुं, (परिगतो जनः।) परिवारः। पोष्यवर्गः। यथा, महिम्नः स्तोत्रे।
"यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः॥"
नियतसन्निधिवर्त्तिपरिचारकः। यथा, आनन्दलहर्य्याम्। ३०।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्।
प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते॥"
"परिजनः नियतसन्निधिवर्त्तिपरिचारकः।"
इत्यस्यश्लोकस्य व्याख्यायां गौरीकान्तसार्व्वभौमः॥

परिजल्पितं, क्ली, (परि+जल्प+भावे क्तः।) उज्ज्वलनीलमण्युक्तचित्रजल्पान्तर्गतद्वितीयजल्पनम्। यथा,
"प्रभोर्निर्द्दयताशाठ्यचापलाद्युपपादनात्।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥"
इत्युज्ज्वलनीलमणिः॥

परिज्मा, [न्] पुं, (परिजायते इति। परि+जन्+मन्। निपातनात् साधुः।) चन्द्रः। अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (पर्य्यजतीति। अजेः परिपूर्व्वस्य श्वन्नुक्षन्नित्यादिना मनिप्रत्ययोऽकारलोपः आद्युदात्तत्वञ्च निपात्यते। परिज्मा। इति वेदभाष्यम्॥)

परिज्वा, [न्] पुं, (परि+ज्वु सौत्रधातुः+"श्वन्नुक्षन् पूषन्निति।" उणां। १। १५८। इति कनिन्। इदन्तु उज्ज्वलदत्तमतम्।) चन्द्रः। अग्निः। इति संक्षिप्तसारोणादिवृत्तिः॥

परिडीनकं, क्ली, (परि+डी+क्तः। ततः स्वार्थे कन्।) पक्षिगतिविशेषः। यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम्।"
इति जटाधरः॥
(तथाच महाभारते। ८। ४१। २७।
"अतिडीनं महाडीनं खडीनं परिडीनकम्॥")

परिणतं, त्रि, (परिणमति स्म। परि+नम्+क्तः।) पक्वम्। इत्यमरः। ३। १। ८६॥ तिर्य्यग्घातिगजः। इति हेमचन्द्रः॥ (यथा, माघे। ४। २९।
"सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्त्ति॥")
सर्व्वतोभावेन नतश्च॥

परिणयः, पुं, (परिणयनम्। परि+नी+अच्।) विवाहः। इत्यमरः। २। ७। ५७॥

परिणामः, पुं, (परिणमनम्। परि+नम्+घञ्।) विकारः। प्रकृतेरन्यथाभावः। यथा। दुग्धस्य विकारः क्षीरदधि। केचित्तु। प्रकृतिध्वंसजन्यविकारः। यथा काष्ठस्य विकारो भस्म। मृत्पिण्डस्य घटः। इत्यमरभरतौ॥ चरमः। शेषः। यथा,—
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम्।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः॥"
इति भारवौ। २। ४॥
(निदानभेदेन यथा,—
"असात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामभेदात्त्रिविधो वा॥" "परिणामोऽयोगादियुक्ता ऋतुस्वभावजा शीतादयः। अधर्म्मस्य च रोगहेतोरत्रैवान्तर्भाव इति भट्टारहरिचन्द्रः॥" इति माधवकरकृतरुग्विनिश्चयस्य मधुनिदानव्याख्याने विजयेनोक्तम्॥
"कालस्य परिणामेन जरामृत्युनिमित्तजाः।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः॥"
इति चरके शरीरस्थाने प्रथमेऽध्याये॥
अर्थालङ्कारभेदः। तल्लक्षणं यथा,—
"परिणामः क्रियार्थश्चेद्विषयी विषयात्मना॥")

परिणामदर्शी, [न्] त्रि, (परिणामं चरमं पश्यतीति। दृश्+णिनि।) चरमकालप्रेक्षी। यथा-दर्शी। विषयादेः शेषद्रष्टा। इति भारतम्॥

परिणामशूलः, पुं, (परिणामे चरमावस्थायां शूलं यस्य। यद्वा परिणामे भुक्तान्नादेः परिपाके उत्पद्यते शूलं यस्मात्।) रोगविशेषः। तस्योत्पत्तिर्यथा,—
"स्वैर्निदानैः प्रकुपितो वायुः सन्निहितो यदा।
कफपित्ते समावृत्य शूलकारी भवेद्बली॥"
तस्य लक्षणं यथा,—
"भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम्।
तस्य लक्षणमप्येतत् समासेनाभिधीयते॥"
वातिकस्य तस्य लक्षणं यथा,—
"आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः।
स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक्॥"
पैत्तिकस्य तस्य लक्षणं यथा,—
"तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम्।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक्॥"
श्लैष्मिकस्य तस्य लक्षणं यथा,—
"छर्द्दिहृल्लाससम्मोहं स्वल्परुग्दीर्घसन्तति।
कटुतिक्तोपशान्तौ च तद्विज्ञेयं कफात्मकम्॥"
त्रिदोषजस्य तस्य लक्षणं यथा,—
"संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत्।
त्रिदोषजमसाध्यन्तु क्षीणमांसबलानलम्॥"
इति माधवकरः।
तस्यौषधं यथा, गरुड़पुराणे।
"लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा।
मधुना खादितं रुद्र! परिणामाख्यशूलनुत्॥"
(चिकित्सास्य यथा,—
"वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते।
वस्तयश्च हिताः शूले परिणामसमुद्भवे॥
विड़ङ्गतण्डुलव्योषं त्रिवृद्दन्तीसचित्रकम्।
सर्व्वाण्येतानि संहृत्य श्लक्ष्णचूर्णानि कारयेत्॥
गुड़ेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थितः।
उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम्॥
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम्॥
नागरगुड़तिलकल्कं पयसा संसाध्य यः पुमानद्यात्।
उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण॥"
"तिलनागरपथ्यानां भागं शम्बूकभस्मनाम्।
द्विभागगुड़संयुक्तं गुड़ीं कुर्य्यादक्षभागिकाम्॥
शीताम्बुपानं पूर्व्वाह्णे भक्षयेत् क्षीरभोजनः।
सायाह्णे रसकं पीत्वा नरो मुच्येत दुर्ज्जयात्॥
परिणामसमुत्थाच्च शूलाच्चिरभवादपि।
शम्बूकं त्र्यूषणञ्चैव पञ्चैव लवणानि च॥
समांशां गुड़िकां कृत्वा कलम्बीकरसेन वा।
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम्॥
शूलाद्विमुच्यते जन्तुः सहसा परिणामजात्॥
यः पिबति सप्तरात्रं शक्तूनेकान् कलायपूषेण।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम्॥
लौहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा।
परिणामशूलं शमयेत्तत्कलं वा पयोऽन्वितम्॥
सामुद्रं सैन्धवं क्षारो रुचकं रौमकं विड़म्।
दन्ती लौहरजः किट्टं त्रिवृत्सूरणकं समम्॥
दधिगोमूत्रपयसा मन्दपावकपाचितम्।
तदयःपात्रिकं चूर्णं पिबेदुष्णेन वारिणा॥
जीर्णाजीर्णे तु भुञ्जीत मांसादिरसगर्व्वितम्।
नाभिशूलं प्लीहशूलं यकृद्गुल्मकृतञ्च यत्॥
विद्रध्यष्ठीलिकं हन्ति कफवातोद्भवन्तथा।
शूलानामपि सर्व्वेषामौषधं नास्ति तत्परम्॥
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम्॥"
इति सामुद्राद्यं चूर्णम्॥ ०॥
"सचिक्कणोगुड़ं सर्पिः पचेत् क्षीरे चतुर्गुणे।
निहन्त्यम्लपित्तञ्च शूलञ्च परिणामजम्॥"
इति गुड़पिप्पलीघृतम्॥ ०॥
"क्षारेण कल्केन च पिप्पलीनां
सिद्धं घृतं माहिषमप्युदग्रम्।

जीरात्रुपानं विनिहन्त्यवश्यं
शूलं प्रवृद्धं परिणामसंज्ञम् ॥"

इति पिप्पलीघृतम् ॥ * ॥

"मण्डूरं शोधितं चूर्णीकृतं लौहभस्म वा गुडेन तु ।
भक्षयन्मुच्यते शूलात् परिणामसमुद्भवात् ॥
संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम् ।
शतावरीरसस्याष्टौ दध्नस्तु पयसस्तथा ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः ।
विपचेत् सर्वमेकत्र यावत् पिण्डत्वमागतम् ॥
निष्कन्तु भक्षयेन्मध्ये भोजनस्याद्यन्तेऽपि वा ।
वातात्मकं पित्तभवं शूलञ्च परिणामजम् ॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः ॥"

इति शतावरीमण्डूरम् ॥ * ॥

इति वैद्यकचक्रपाणिसंग्रहे शूलाधिकारे ॥

"जीर्णेऽन्नप्रशमः प्रोक्तो द्रवमः परिणामजः ।"
"जीर्णेऽन्ने च भवेद्यस्तु स ज्ञेयः परिणामजः ॥"
"लङ्घनं वमनञ्चैव विरेकश्चानुवासनम् ।
निरूहो वस्तिकर्माणि परिणामे विशोधने ।
त्रिफलां त्रिवृतां दन्तीं पिचुमर्दं कटुत्रयम् ।
समं चूर्णं गुडेनाथ कारयेन्मोदकान् सुधीः ।
भक्षयेत् प्रातरुत्थाय पश्चादुष्णोदकं पिबेत् ॥
परिणामोद्भवं शूलं हन्ति शोथं गरस्य च ।
यवानीचित्रकं विश्वं यवक्षारं सौवर्चलाभया ।
सुरामण्डेन पातव्या परिणामे विशोधने ॥
चित्रव्योषवचाजमोदहपुषा पथ्याजगन्धा शठी
जातीपिप्पलीदाडिमहवीतिन्तिडीकचव्याग्नि-
कम् ।
तक्रारम्बहुवर्धेशा च यवक्षारं तथा स्वर्जिका
सिन्धूत्थं बिड़पूर्वकं समलवं स्वादीन्द्रपूरे रसे ।
सम्भाव्यं शुक्तसालनेन गुड़िका चाष्टममात्रा तया
कष्टौ वातविकारिणौ प्रदहतः शूलाशेषः
शोधकान् ॥"
"अथ चित्रादिको नाम सर्वशूलार्त्तिनाशनः ।
सर्ववातविकारघ्नः सर्वचयनिवारणः ।
परिणामोद्भवं शूलं वारयत्याश्वसंशयम् ॥"

इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥

परिणायः, पुं, (परितो नामदक्षिणतो नयनम् । परि + नी + "परिन्योर्नीणोर्द्यूताभ्रेषयोः ।" ३ । ३ । ३७ । इति घञ् ।) शारीणां समन्तान्नयनम् । इत्यमरः । ३ । १० । ४६ ॥ परेरितो दीर्घत्वे परीणायश्च । इति भरतः ॥

परिणाहः, पुं, (परिणह्यतेऽनेन इति । परि + नह + घञ् ।) विस्तारः । तत्पर्यायः । विशालता २ । इत्यमरः । २ । ६ । ११४ ॥ चौसार इति चौड़ा इति च भाषा ॥ (यथा, महाभारते । १ । ७ । ५२ ।
"अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ।
परिणाहस्तु वृक्षस्य फलानां दशवेदिनाम् ॥")

परिणेता, [ऋ] पुं, (परिणयतीति । परि + नी + तृच् ।) वोढा । भर्त्ता २ । इति राजनिर्घण्टः ॥ (यथा,—
"स्त्रिये रक्षपतो रक्षाम् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥"
इति रघुः । १ । २५ ।)

परितः, [स्] अव्य, (परि + "पर्यभिभ्याञ्च ।" ५ । ३ । ९ । इति तसिल् ।) सर्वतः । चतुर्दिगभिधायी । इत्यमरः । ३ । ४ । १२ ॥ (यथा, रघुः । ६ । ८ ।
"पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तान्
तूर्यस्वने मूर्च्छति मङ्गलार्थे ॥")

परितापः, पुं, (परितः सर्वतोभावेन तप्यतेऽनेन । परि + तप् + घञ् ।) दुःखम् । (यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंश ॥")
नरकान्तरम् । इति मेदिनी ॥ शोकः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । २७ । २५ ।
"एतया मत्वया बुद्ध्या संजल्पाकालमात्मना ।
व्याहृतेऽप्यभिषिक्ते मे परितापो न विद्यते ॥")
भयम् । कम्पः । इति विश्वः ॥ अनुतापश्च ॥ (यथा, मार्कण्डेये । १५ । ४८ ।
"परितापश्च गात्रेभ्यः पीडाबाधाश्च तत्क्षयः ।
अपहन्ति नरव्याघ्र ! दयां कुरु महीपते ! ॥")

परितुष्टः, त्रि, (परि + तुष् + क्तः ।) परितोषयुक्तः । सन्तुष्टः । यथा,—
"यत् प्रार्थ्यते त्वया भूप ! त्वया च कुलनन्दन ! ।
मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ९३ । १० ॥

परितोषः, पुं, (परितोषणमिति । परि + तुष् + घञ् ।) सर्वतोभावेन तुष्टिः । सन्तोषः । यथा,—
"त्वामुदर ! साधुमन्ये शाके-
रपि यदसि लब्धपरितोषम् ।
हतहृदयं ह्यधिकाधिक-
वाञ्छाशतदुर्भरं न पुनः ॥"
इति शान्तिशतके ॥

परित्यागः, पुं, (परित्यजनमिति । परि + त्यज् + घञ् ।) सर्वतोभावेन वर्जनम् । तत्पर्यायः । छोरणम् २ । इति त्रिकाण्डशेषः ॥ * ॥
"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥"
इति मत्स्यसूक्तम् ॥

परित्राणं, क्ली, (परित्रायते इति । परि + त्रै + ल्युट् ।) मारणोद्यतस्य निवारणम् । तत्पर्य्यायः । पर्य्याप्तिः २ हस्तवारणम् ३ । इत्यमरः । ३ । २ । ५ ॥ रक्षणम् । यथा,—
"परित्राणाय साधूनां विनाशाय च
धर्मसंस्थापनार्थाय सम्भवामि युगे
इति

परिदानं, क्ली, (परिदीयते
भावे ल्युट् ।) परीवर्त्तः ।
मरः । २ । ९ । ८० ॥

परिदायी, [न्] पुं, (
तीति । परि + दा +

सत्कनिष्ठाय कन्यादाता । "यथा हारीतः । ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिवित्तो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकस्ते सर्वे पतिताः ।" इत्युद्वाहतत्त्वम् ॥

परिदेवनं, क्ली, (परि + दिव + ल्युट् ।) अनुशोचनोक्तिः । विलापः । इत्यमरः । १ । ६ । १६ ॥ (यथा, महाभारते । १ । २ । १४६ ।
"परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ ।
आश्वासनञ्च कृष्णस्य दुःखार्त्तायाः प्रकीर्त्ति-
तम् ॥")

परिदेवना, स्त्री, (परिदेवयतीति । परि + दिवि + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । ततष्टाप् ।) शोकनिमित्तो विलापः । यथा,—
"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥"
इति श्रीभगवद्गीताद्वितीयाध्यायश्लोकव्याख्याने श्रीधरस्वामी ॥ अपि च ।
"न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च ।
अलभ्यं लभते मर्त्त्यस्तत्र का परिदेवना ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
अयाचितो मया लब्धस्तत्प्रेषितः पुनः कृतः ।
यत्रागतस्तत्र गतस्तत्र का परिदेवना ॥
एकवृक्षे यथा रात्रौ नानापक्षिसमागमः ।
प्रभाते दश दिशो यान्ति तत्र का परिदेवना ॥
एकसार्थप्रयातानां सर्व्वेषां तत्र गामिनाम् ।
यद्येकस्त्वरितो याति का तत्र परिदेवना ॥"
इति गरुड़पुराणे १११ अध्यायः ॥

परिधानं, क्ली, (परिधीयते यत् । परि + धा + कर्म्मणि ल्युट् ।) परिधेयवस्त्रम् । तत्पर्य्यायः । अन्तरीयम् २ उपसंव्यानम् ३ अधोंऽशुकम् ४ । इत्यमरः । २ । ६ । ११७ ॥ (यथा, पञ्चतन्त्रे । ५ । २३ ।
"वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥")

परिधायः, पुं, (परिधीयतेऽत्र । परि + धा + घञ् ।) जनस्थानम् । परिच्छदः । नितम्बः । इति मेदिनी ॥ (जलस्थानमित्यत्र जलस्थानमिति केचित् ॥)

परिधिः, ... परिधीयतेऽनेन । परि + धा + कि: । ३ । ३ । ९२ । इति

परिधयः पालाशकाष्ठकाः खादिरौदुम्बरबिल्व-
रोहितकविकङ्कतानां ये वा यज्ञिया वृक्षा
आर्द्राः शुष्कस्सत्वचकाः ॥" इति ॥ * ॥)
भूगोलाद्यैर्वेष्टनम्। यथा,—

"व्यासेभनन्दाग्निहते विभक्ते
खबाणसूर्यैः परिधिस्तु सूक्ष्मः ॥"

इति लीलावती ॥

(क्ली, परिधीयते यदिति। परि+धा+
कर्म्मणि किः। परिधेयवस्त्रम्। यथा, भाग-
वते। ८। ७। १७।
"मेघश्यामः कनकपरिधिः कर्णविद्योतविद्यु-
न्मूर्द्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः ॥"
"कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य"
इति तट्टीका ॥)

परिधिस्थः, पुं, (परिधौ तिष्ठतीति। परिधि+
स्था+कः।) परिचरः। इत्यमरः।२।८।६२॥
युद्धकाले परप्रहारात् रथरक्षके। प्रजा-
नामन्तर्व्यवस्थापनकारिणीति केचित्। सेनायां
राज्ञो दण्डनायकः। इत्यन्ये। इति भरतः ॥

परिधेयं, त्रि, (परिधातुं शक्यम्। परि+धा+
"अचो यत्।" ३। १। ९७। इति यत्
"ईद्यति।" ६। ४। ६५। इति आत ईत्
ततो गुणः।) परिधानीयम्। परिधातव्यम्।
परिधानोपयुक्तवस्त्रादि। यथा,—
"न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्त्रीत्व-
इष्टार्थत्वापत्तेः।" इति विवादचिन्तामणिः ॥

परिपणं, क्ली, (परिपण्यते व्यवह्रियतेऽनेन।
परि+पण+"पुंसि संज्ञायां घः प्रायेण।"
३।३।११८। इति घः।) मूलधनम्। इत्य-
मरः।२।९।८०। पुंजि इति भाषा ॥

परिपन्थकः, पुं, (परिपन्थयति दोषादिकं प्राप्नो
तीति। परि+पथि क गतौ+ण्वुल्।) शत्रुः।
इति हेमचन्द्रः।३।३९३॥ (यथा, महा-
भारते।१०।१६।२१।
"हतो दुर्य्योधनः पापो राज्यस्य परिपन्थकः॥")

परिपन्थी, [न्] त्रि, (परितोऽन्यतो भावेन दोषा-
ख्यानं पन्थयितुं शीलमस्य। परि+पन्थ+
णिनिः।) शत्रुः। इत्यमरः।२।८।११।
(यथा, गीतायाम्।३।३४।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ॥"
प्रतिकूलाचारी। यथाह कश्चित्।
"अपराधिनि चेत् क्रोधः क्रोधे क्रोधः कथं नहि।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि॥")

परिपाकः, पुं, (परिपच्यते इति। परि+पच्+
घञ्।) परिपक्वता। यथा, भावप्रकाशे।

"रक्तमुक्तं केवलपद्मिपक्ष-
मांसेन मनुष्यः परिपाकमेति।"

नैपुण्यम्। यथा,—

"कौशलं तस्य विनये परिपाकं
पाकशासनपदं सूपमोऽपि।"

इति नैषधचरितम् ॥

परिपाकिनी, स्त्री, (परिपाकः परिपाकशक्ति-
र्विद्यतेऽस्याः। परिपाक+इनि+ङीप्।)
त्रिवृता। इति शब्दचन्द्रिका ॥

परिपाटिः, स्त्री, (परिपाटनम्। परि+पट्+
स्वार्थे णिच्+अच इः। यद्वा परि भागे
भागेन पाटिः पाटनं गतिर्यस्याम्।) पारिपाट्य-
विशिष्टः। तत्पर्य्यायः। आनुपूर्व्वी २ आवृत् ३
अनुक्रमः ४ पर्य्यायः ५। इत्यमरः।२।७।३७॥
आनुपूर्व्वम् ६ परिपाटी ७। इति भरतः॥
आनुपूर्व्यम् ८ आनुपूर्व्वकम् ९। इति टीका-
न्तरम् ॥ क्रमः १०। इति जटाधरशब्दरत्ना-
वल्यौ ॥

परिपिष्टकं, क्ली, (परि+पिष्+क्त+संज्ञायां
कन्।) सीसकम्। इति राजनिर्घण्टः ॥

परिपुष्करा, स्त्री, (परितः पुष्करं मुखं यस्याः।)
गोडुम्बा। इति शब्दचन्द्रिका ॥ राणगोमक्
इति भाषा ॥

परिपूतं, क्ली, (परि+पू+क्तः।) अपास्ततुष-
धान्यम्। यथा, मनुः।
"परिपूतेषु धान्येषु शाकमूलफलेषु च।
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः॥"
त्रि, सर्व्वतोभावेन पवित्रम्। (यथा, माघे।२।१६।
"घूर्णयन् मदिरास्वादमदपाटलितद्युती।
रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ॥")

परिपूर्णता, स्त्री, (परिपूर्णस्य भावः। परिपूर्ण+
"तस्य भावस्त्वतलौ।" ५।१।११९। इति
तल् ततः "त्वान्तं क्लीबमन्यत् स्त्रियाम्।" इति
वार्त्तिकोक्तत्वात् स्त्रियां टाप्।) परिपूर्णत्वम्।
सम्पूर्णता। तत्पर्य्यायः। आभोगः २। इत्य-
मरः।२।६।१३७॥

परिपूर्णत्वं, क्ली, (परिपूर्णस्य भावः। "तस्य
भावस्त्वतलौ।" ५।१।११९। इति त्व।
ततः क्लीवत्वम्।) परिपूर्णता। सम्पूर्णत्वम्। इति
जटाधरः॥ (यथा,—
"दृश्यते परिपूर्णत्वं मुखचन्द्रस्य ते सखि!।
न जाने कचकोरं हि विधाता पालयिष्यति॥"

इत्युद्भटः।)

परिपेलं, क्ली, (परिपेलति मृदुतां गच्छतीति।
पेल गतौ+अच्।) परिपेलवम्। कैवर्त्ती-
मुस्तकम्। इति शब्दमाला॥ तत्पर्य्याये यथा,—
"परिपेलं प्लवं गन्धं तत्कुटमटसंज्ञकम्।
जायते मुक्ताकाकारं शैवालकुलसंश्रये॥"

इत्यमरटीकायां भरतः॥

परिपेलवं, क्ली, (परि सर्व्वतः पेलवं मृदुता यस्य।)
कैवर्त्तीमुस्तकम्। इत्यमरः।२।४।१२१॥
(अत्यन्तकोमले, त्रि। यथा, बृहत्संहितायाम्।
९४।८।
"स्फीतमधुपरिपेलवं फलं
क्षीरमध्यचिरकालसम्भवम्॥"
शुक्लादयोऽप्य कैवर्त्तीमुस्तकार्थे पर्य्यायाः॥)

परिप्लवः, त्रि, (परिप्लवते इति। प्लु+अच्।) चञ्च-
लम्। इत्यमरः।३।१।७९।

(यथा, माघे।१४।६८।

"मतुक्तयाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां चयम्॥"

पुं, राज्ञः सुनीथस्य पुत्रः। यथा, भागवते।
९।२२।४२।
"सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः।
परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः॥")

परिप्लुतः, त्रि, (परिप्लु+क्तः।) जलादिप्लावितः।
यथा, मार्कण्डेये देवीमाहात्म्ये १ अध्यायः॥
"आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता॥"

परिप्लुता, स्त्री, (परि+प्लु+क्तः। स्त्रियां टाप्।)
मदिरा। इति हेमचन्द्रः।३।५६६॥ ग्राम्य-
धर्म्मे (मैथुने) वेदनावती योनिः। यथा,—
"परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशम्।"

इति योनिव्यापन्निदाने माधवकरः॥

("पित्तलाया नृसंवासे क्षवथूद्गारधारणात्।
पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रियाः॥
शूनास्पर्शाक्षमासार्त्तिर्नीलपीतमसृक् स्रवेत्।
श्रोणीवंक्षणपृष्ठार्त्तिज्वरार्त्तायाः परिप्लुता॥"

इति चरके चिकित्सास्थाने त्रिंशोऽध्याये॥)

आप्लुते त्रि॥

परिबर्हः, पुं, (परिबर्ह्यतेऽनेन। बर्ह प्राधान्ये+
घञ्।) परिच्छदः। छत्रचामरव्यजनादि।
नृपार्होऽर्थः। राजयोग्यमर्थं सितच्छत्रादि।
नृपार्हं सितच्छत्रादि अर्थो धनमिति केचित्।
इत्यमरभरतौ॥ (यथा,—

"निवेश्य गङ्गामनु तां महानदीं
चमूं विधानैः परिबर्हशोभिनीम्।
उवास रामस्य तदा महात्मनो
विचिन्तमानो भरतो निवर्त्तनम्॥"

इति रामायणे।२।८३।२६।)

परिभवः, पुं, (परि+भू+अप्।) अनादरः।
इत्यमरः।१।७।२२॥ (यथा, रघुः।१२।१०।
"फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम्।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम्॥")

परिभावः, पुं, (परि+भू+"परौ भुवोऽवज्ञाने।"
३।३।५५। इति घञ्।) परिभवः। इत्य-
मरः।१।७।२२॥

परिभाषणं, क्ली, (परि+भाष्+ल्युट्।) सनिन्द
उपालम्भः। इत्यमरः।१।६।१४॥ उपालम्भो
दुर्व्वादः। निन्दया सह वर्त्तमानो य उपा-
लम्भस्तत्र सनिन्दे परिभाषणम्। उपालम्भो
गुणाभिस्मरणेन स्तुतिपूर्व्वकोऽपि भवति। यथा
महाकुलस्य भवतः किमिदमुचितं भवति।
अत्र तु स्तुतौ न परिभाषणम्। टीकान्तरे-
ऽपि सनिन्द [illegible]
निन्दापूर्व्वः।। [illegible]
इति स्तुतिपूर्व्वक उपालम्भः। इति भरतः॥
नियमः। इति मेदिनी॥ , इति
त्रिकः॥

परिभाषा, स्त्री, (परि+भाष्+अच्। ततष्टाप्।) परिष्कृतं भाषणम्। पदार्थविवेचकाचार्य्याणां युक्तियुक्ता वाक्। इति काव्यप्रकाशटीकायां चण्डीदासः॥ तत्पर्य्यायः। प्रज्ञप्तिः २ शैली ३ मर्य्यादा ४ समयकारः ५। इति त्रिकाण्डशेषः॥ (व्याकरणसूत्रविशेषः। सूत्रं षड्विधम्। यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥")
"ग्रन्थस्य संक्षेपनिर्म्माणार्थसङ्केतविशेषः। यथा अणोऽदित्यादि।" इति मुग्धबोधटीकायां दुर्गादासः॥ यथा माघे। १६। ८०।
"न खलु प्रतिहन्यते कुतश्चित्
परिभाषेव गरीयसी यदाज्ञा॥"
("अथातः सम्प्रवक्ष्यामि सन्दिग्धार्थप्रकाशिकाः।
परिभाषाः प्रयत्नेन दीपीभूताः सुनिश्चिताः॥"
इति वैद्यकपरिभाषाया लक्षणम्।
"प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा।"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥)

परिभूतं, त्रि, (परिभूयते स्म। परि+भू+क्तः।) अनादृतम्। तत्पर्य्यायः। अवगणितम् २ अवमतम् ३ अवज्ञातम् ४ अवमानितम् ५। इत्यमरः। ३।१।१०६। अभिभूतम् ६। इति जटाधरः॥ अपमानितम् ७। इति शब्दरत्नावली॥ (यथा, सारावल्यां विंशाध्याये।
"परिभूतं सुखरहितं कुलटापुरुषमतिपापरतञ्च।
जनयति गगनचरस्थितिः शिशिरसुतदृष्टो भवि शूरम्॥")

परिभ्रमः, पुं, (परि+भ्रम्+घञ्।) सर्व्वतोभ्रमणम्। परिपूर्व्वभ्रमधातोर्भावे घञ्प्रत्ययनिष्पन्नः॥

परिमण्डलं, त्रि, (परि सर्व्वतो मण्डलम्।) वर्त्तुलम्। इति हेमचन्द्रः॥ (यथा, भागवते ।५।२४।१८।
"तथोत्तरं शार्ङ्गधरकोटियोजनपरिमण्डलं भूमण्डलस्य चार्द्धेन सप्तपुष्करं द्विसहस्रयोजनानि स भुङ्क्ते॥" परमाणुपरिमाणम्। परिमाणविशिष्टः परमाणुः। इति वैशेषिकसूत्रविवृतिः॥ शब्दोऽयं न्यग्रोधशब्देन युक्तः अर्थान्तरं प्रकाशयति। पुं, पुरुषविशेषः। तस्य लक्षणं यथा, मात्स्ये ११८ अध्याये।
"न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते।
व्यामेन उच्छ्रयो यस्य अध ऊर्द्धञ्च देहिनः।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः॥"
स्त्री, लक्षणान्वितरमणीविशेषः। यथा, शब्दरत्नावल्याम्।
"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता।
मध्ये क्षीणा भवेद् या च न्यग्रोधपरिमण्डला॥"
सर्व्वतोभावे। यथा महाभारते ६। ६। ११।
"परिमण्डलयोर्मध्ये मेरुः कनकपर्व्वतः।
आदित्यतरुणाभासो विधूम इव पावकः॥")

परिमलः, पुं, (परिमर्द्दे सुगन्धिपार्थिवद्रव्यं मलतीति। मल ह धारणे+अच्। "चिताविव मलः।" इति न्यायादस्य तथात्वम्।) विमर्द्दनम्। कुङ्कुमादिमर्द्दनम्। विमर्द्दोत्थजनमनोहरगन्धः। सुरतादिविमर्द्दोत्थविशेषनकुङ्कुमादिगन्धः। इत्यमरभरतौ॥ सुरभिमाल्यगन्धादिधारणेनोत्पन्नो हृद्यो गन्धः। इति स्वामी॥ (यथा, कलाविलासे। १।५।
"रतिकुसुमितकलितललनाक्रमणलनवारिको
सुहृदैव।
प्रथयेत्कुसुमपरिमलवासितदेशा वसन्त-
निलाः॥")
तत्पर्य्यायः। आमोदः २ गन्धः ३ सौरभ्यम् ४ सौरभम् ५। इति राजनिर्घण्टः॥ पण्डितसमूहः। इति शब्दरत्नावली॥

परिमाणं, क्ली, परिमीयतेऽनेन। (परि+मा+करणे ल्युट्।) परिमितव्यवहारासाधारणकारणम्। इति सिद्धान्तमुक्तावली॥ माप इति भाषा। (यथा, मनुः। ८। १३३।
"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः॥")
तत्पर्य्यायप्रकारा यथा,—
"पौतवं द्रवयं पाय्यमिति मानार्थकं त्रयम्।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः॥
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम्।
सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः।
आचितं दशभाराः स्युः शाकटो भार आचितः॥
कार्षापणः कार्षिकः स्यात् ताम्रिके कार्षिके पणः।
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्॥"
इत्यमरः। २। ९। ८५—८८॥
न्यायमते तद्यथा,—
"परिमाणं भवेन्मानव्यवहारस्य कारणम्।
अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः॥
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्।
संख्यातः परिमाणाच्च प्रचयादपि जायते॥
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्।
परिमाणं घटादौ तु परिमाणजमुच्यते॥
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते।
परिमाणन्तूलकादौ नाशस्त्वाश्रयनाशतः॥"
इति भाषापरिच्छेदे। ११०—११३॥
(परिमाणं निरूपयति। परिमाणमिति। परिमितव्यवहारासाधारणं कारणं परिमाणमित्यर्थः। तच्चतुर्व्विधं अणु महद्दीर्घं ह्रस्वञ्च इदं चातुर्व्विध्यं प्रत्यक्षसिद्धं तथाह्यणुत्वमहत्त्वदीर्घत्वह्रस्वत्वानि च समनियतानि तत्परिमाणं नित्यानित्यपरिमाणभेदेन द्विविधमित्याह अनित्य इति नित्यानित्यविभागमनुवर्त्तते। अनित्यमिति पूर्व्वेणान्वितं तथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यञ्चेत्यर्थः। तत्र संख्याजन्यमुदाहरति द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु परमाणुत्वादेर्यथा नोत्कृष्टं त्रसरेणुपरिमाणन्तु न समानजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजन्यं कपालादि परिमाणजन्यम्। प्रचयजन्यमुदाहरन् प्रचयं निर्व्वक्ति प्रचय इति अर्थान्तरप्रचयस्य यथावयवविनाशः कथं परिमाणनाशकः अवयवविभागेऽपि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम्। परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तस्य च द्व्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशेऽवभ्युपगमस्यावश्यं नाशस्य अवयविनुपलब्धकत्वात् शरीरादावयवोपचये असमवायिकारणनाशस्यावश्यकत्वादवयविनाशः आवश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तथापि वेमाद्यभिघातेन असमवायिकारणसंयोगनाशात् पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तथाच तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत् न च पूर्व्वतन्तव एव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभ्यमिति वाच्यम् मूर्त्तयोः समानदेशताविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलब्धेः बाधितत्वाच्च पूर्व्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्॥" इति सिद्धान्तमुक्तावली॥)

परिमार्ग्यं, त्रि, (परि+मृज्+ण्यत्। "ऋहलोर्ण्यत्" ३।१।१२४। इति ण्यत्। "चजोः कु घिण्ण्यतोः।" ७।३।५२। इति कुत्वम्। "मृजेर्वृद्धिः।" ७।२।११४। इति वृद्धिः।) परिष्करणम्। परिशोधनीयम्॥

परिमार्जनं, क्ली, (परि+मृज्+ल्युट्। ततो वृद्धिः।) खाद्यभेदः। मधुमस्तकम्। यथा, शब्दचन्द्रिका।
"मधुतैलघृते गन्धे वेष्टिताः समिताश्च ये।
मधुमस्तकसदृशं तत्ख्याता परिमार्जनम्।"
परिशोधनञ्च॥

परिमितं, त्रि, (परि+मा+क्तः। परितो मितं वा।) युक्तम्। इति त्रिकाण्डशेषः॥ परिमाणविशिष्टम्। यथा, उद्भटः।
"इयमियं परिमितमधिक-
र्णायतं नयनमाकुली कुरुते।
पीवायतमिव पीन-
स्तनजघनायाः कृशोदर्य्याः॥"

परिमृज्यं, त्रि, (परि+मृज्+"मृजेर्विभाषा।" ३।१।११३। इति क्यप्।) परिमार्ग्यम्। इति व्याकरणम्॥

परिमेयं, त्रि, (परिमीयते इति। परि+मा+"अचो यत्।" ३।१।९७। इति यत्। "ईद्यति।" ६।४।६५। इति ईत् ततो गुणः।) परि-

मार्थविशिष्टम्। परिमातव्यम्। परिमाणीयम्। (यथा, रघुः। १। ३७।
"माभूदाश्रमपीड़ेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिगताविव ॥")

परिमोक्षः, पुं, (परितो मोक्षः परित्यागः।) मलत्यागः। यथा, श्रीभागवते २। ६। १०।
"पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद!।
हिंसाया निरृतेर्मृत्योर्निरयस्य गुदं स्मृतम्॥"
"परिमोक्षस्य मलत्यागस्य। पायुरिन्द्रियं गुदं स्थानम्। निरृतेरलक्ष्म्याः।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ परित्राणम्। यथा, विष्णुधर्म्मोत्तरे।
"सर्व्वाशुभानां परिमोक्षकारि
संपूजनं देववरस्य विष्णोः।"
इति तिथ्यादितत्त्वम् ॥
(विमुक्तिः। यथा, महाभारते। १। २। १६०।
"कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्॥")

परिमोषी, [न्] त्रि, (परिमुष्णातीति। परि+मुष्+णिनिः।) परिमोषणशीलः। चौरः। (इति हेमचन्द्रः। ३। ४६॥)

परिरम्भः, पुं, (परिरभ्यते इति। परि+रभि+घञ्। "रभेरशब्लिटोः।" ७। १। ६३। इति नुम्।) आलिङ्गनम्। इत्यमरः। ३। २। ३०॥ (यथा, गीतगोविन्दे। ५। ७।
"ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥")

परिवत्सरः, पुं, वत्सरः। इति जटाधरः॥ वत्सरविशेषः। यथा, मलमासतत्त्वे।
"शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः।
सम्परीदान्वपूर्व्वाश्च तथोदापूर्व्वका मताः॥"
"परिपूर्व्वे तथादानं यवानाञ्च द्विजोत्तमाः॥"
इति विष्णुधर्म्मोत्तरम्॥

परिवर्ज्जनं, क्ली, (परिवर्ज्यते,परिवृज्यते प्राणैर्येन। परि+वृज्+णिच्+ल्युट्।) मारणम्। इत्यमरः। २।८।११४॥ (भावे ल्युट्।) परित्यागः। यथा, उद्भटः।
"गोप्यो न दोषो मधुराङ्गनानां
घृणास्य कष्टस्य हि रीतिरेषा।
विपर्य्ययो येन कृतः स्वपक्षो-
स्तस्योपपन्नोपरिवर्ज्जनं किम्॥"
परिवर्ज्जनीया यथा,कौर्म्मे उपरिभागे १५ अः।
"एकशय्यासनं पंक्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्ययने योनिस्तथैव सहभोजनम्॥
सहाध्यायस्तु दशमः सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम्।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्॥"
"यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित्तं देशं परिवर्ज्जयेत्॥"
इति चाणक्यम्॥
"शाकटं शाकिनं चान्नमयोद्धारं विशां जडम्।
शूद्रमचरसंयुक्तं दूरतः परिवर्ज्जयेत्।
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम्।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत्॥"
इति गरुड़पुराणे ११२ अध्यायः॥
("यस्य वै भाषमाणस्य रुजत्यूर्द्धमुरोऽश्रमम्।
अन्नञ्च च्यवते भुक्तं स्थितञ्चापि न जीर्य्यति॥
बलञ्च हीयते यस्य तृष्णा चाभिप्रवर्द्धते।
जायते हृदि शूलञ्च तं भिषक् परिवर्ज्जयेत्॥"
इति चरकेणेन्द्रियस्थाने षष्ठेऽध्याय उक्तम्॥)

परिवर्त्तः, पुं, (परिवर्त्तनमिति। परि+वृत्+भावे घञ्।) विनिमयः। (यथा, रामायणे। २। १०५। २५।
"हृष्यन्त्यृतुमुखं दृष्ट्वा नवं नवमिवागतम्।
ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंक्षयः॥")
कूर्म्मराजः। अपवर्त्तनम्। इति मेदिनी॥ युगान्तः। इति हेमचन्द्रः॥ ग्रन्थविच्छेदः। इति जटाधरः॥ मृत्युपुत्रस्य दुःसहस्यौरसेन कलिकन्यानिर्म्माष्टिगर्भजाताष्टपुत्रान्तर्गतद्वितीयपुत्रः। (यथा, मार्कण्डेये। ५१। २।
"अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः।
दन्ताकृष्टिस्तथोक्तिश्च परिवर्त्तस्तथापरः॥"
तन्नामनिरुक्तिर्यथा तत्रैव १४ श्लोके।
"अन्यगर्भे परान् गर्भान् सदैव परिवर्त्तयन्।
रतिमाप्नोति वाक्यञ्च विवक्षोरन्यदेव यत्॥
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः।
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्व्वीत तत्त्ववित्॥")
तस्य पुत्त्रयोः कर्म्मादि यथा,—
"परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज!।
तौ तु वृक्षादिपरिखाप्राकाराम्भोधिसंश्रयौ॥
गुर्व्विण्याः परिवर्त्तन्तौ कुरुतः पादपादिषु।
क्रोष्टुके! परिवर्त्तः स्यात् गर्भस्यान्योदरागतः॥
न वृक्षच्छायां नैवाद्रिं न प्राकारं पयोनिधिम्।
परिखां न समाक्रामेदबला गर्भधारिणी॥"
इति मार्कण्डेयपुराणे। ५१। ६२—६४॥

परिवर्त्तनं, क्ली, (परि+वृत्+ल्युट्।) परिवर्त्तः। तत्पर्य्यायः। परिदानम् २ विनिमयः ३ नैमेयः ४ व्यतिहारः ५ परावर्त्तः ६ वैमेयः ७ विमयः ८। इति हेमचन्द्रः॥ (यथा, रघुः। १९। १६।
"अङ्गसत्त्वपरिवर्त्तनोचिते
तस्य निन्यतुरशून्यतामुभे।
वल्लकी च हृदयङ्गमस्वना
वल्गुवागपि च वामलोचना॥")

परिवर्त्तिका, स्त्री, मेढ्रजातक्षुद्ररोगविशेषः। तल्लक्षणमाह।
"मर्द्दनात् पीड़नाद्वापि तथैवाप्यभिघाततः।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन्॥
तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते।
सवेदनं सदाहञ्च पाकञ्च व्रजति क्वचित्॥
मणेरधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते।
मारुतागन्तुसम्भूतां विन्द्यात्तां परिवर्त्तिकाम्।
सकण्डुः कठिना चापि सैव श्लेष्मसमन्विता॥"
अस्यां वातजायामपि पित्तानुबन्धो बोद्धव्यो दाहपाकभावात्। शोथः चर्म्मकोषः॥ * ॥
अथ तस्याश्चिकित्सा।
"परिवृत्तं घृताभ्यक्तं सुस्विन्नमुपनाहयेत्।
त्रिरात्रं पञ्चरात्रं वा वातघ्नैः शाल्वणादिभिः॥
ततोऽभ्यज्य शनैश्चर्म्म पाटयेत् पीड़येन्मणिम्।
प्रविष्टे चर्म्मणि मणौ स्वेदयेदुपनाहयेत्॥
दद्याद्वातहरान् वस्तीन् स्निग्धान्यन्नानि भोजयेत्।"
इति भावप्रकाशः॥

परिवसथः, पुं, (परितो वसन्त्यत्र। परि+वस्+ "उपसर्गे वसेरिति" अथच्।) ग्रामः। इति हेमचन्द्रः। ४। २७॥

परिवहः, पुं, (परि सर्व्वतोभावेन वहतीति। परि+वह्+अच्।) सप्तवायुमार्गस्थसप्तमवायुः। स तु सुवहवायोरुपरिस्थितः। (यथा, सिद्धान्तशिरोमणौ।
"भूवायुरावह इह प्रवहस्तदूर्द्धं
स्यादुद्वहस्तदनुसंवहसंज्ञकश्च।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकाऽस्मात्
बाह्यः परावह इमे पवनाः प्रसिद्धाः॥")

परिवादः, पुं, (परिसर्व्वतो दोषोल्लेखेन वादः कथनम्। परि+वद्+भावे घञ्।) अपवादः। (यथा, महानिर्व्वाणतन्त्रे। १। ४२।
"नीचसंसर्गनिरताः परवित्तापहारकाः।
परनिन्दापरद्रोह-परिवादपराः खलाः॥")॥ (परि+वद्+णिच्+करणे घञ्।) वीणावादनवस्तु। इति मेदिनी॥

परिवादकः, त्रि, (परिवदतीति। परि+वद्+ण्वुल्।) परिवादकर्त्ता। इति व्याकरणम्॥

परिवादिनी, स्त्री, (परिवदति स्वरानिति। परि+वद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३।२।७८। इति णिनिः स्त्रियां ङीप्।) सप्ततन्त्रीयुक्तवीणा। इत्यमरः॥ (यथा, माघे। ६। ९।
"कलतया वचसः परिवादिनी
स्वरजिता रजितावशमाययुः॥")
परिवादविशिष्टा च॥

परिवादी, [न्] त्रि, (परिवदतीति परिवदितुं शीलमस्य वा। परि+वद्+शीलार्थे कर्त्तरि णिनिः।) परिवादकर्त्ता। (यथा, महाभारते। ७। ७१। २६।
"साधूनसूयतां ये च ये चापि परिवादिनाम्॥"
परिवादो निन्दा विद्यतेऽस्य।) परिवादविशिष्टः। इति परिवादशब्दादस्त्यर्थे इनिः॥

परिवापः, पुं, (परितः उप्यते इति। परि+वप्+घञ्।) पर्य्युप्तिः। वपनम्। जलस्थानम्। परिच्छदः। इति मेदिनी। पे २५॥

परिवापनं, क्ली, (परि+वप्+णिच्+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः॥

परिवापितं, त्रि, (परिवाप्यते स्म। परि+वप्+णिच्+क्त।) मुण्डितम्। इत्यमरः॥३।१।८७॥

परिवारः, पुं, (परिव्रियतेऽनेन। परि+वृ+करणे घञ्।) परिजनः। (यथा, रघुः। ६। १०।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि।

विवेश मण्डमरराजमार्गं
पतिंवरा क्लृप्तविवाहवेषा ॥")

खड्गकोषः । परिच्छदः । इति मेदिनी । रे । २८० ॥

परिवाहः, पुं, (पर्य्युह्यते तडागादिकं येन । परि+वह्+घञ् ।) परीवाहः । जलोच्छ्वासः । इत्यमरटीकायां रमानाथः ॥ (यथा, रघुः । ८।७४।
"स विवेश पुरीं तया विना
क्षणदापायशशाङ्कदर्शनः ।
परिवाहमिवावलोकयन्
स्वशुचः पौरवधूमुखाश्रुषु ॥")

परिविन्नः, पुं, (परि+विद्+क्तः ।) परिवित्तिः । यथा, उद्वाहतत्त्वे ।
"ज्येष्ठे निर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्व्वे पतिताः ॥"

परिवित्तिः, पुं, (परिगच्छन्नं विन्दति लभते इति । परि+विद्+क्तिच् ।) परिवेत्तृज्येष्ठः । कृतविवाहस्यानूढज्येष्ठभ्राता । इत्यमरः ।२।७।६०॥ (यथा, मनुः । ३ । १७१ ।
"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥")

परिविन्दन्, [त्] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति अग्न्याधानभार्य्यादिकं लभते इति । विद्+शतृ ।) परिवेदनकर्त्ता । यथा,—
"देशान्तरस्थक्लीवैकवृषणानसहोदरान् ।
वेश्याभिषक्तपतितशूद्रतुल्यातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान् ।
अतिवृद्धानभार्य्यांश्च लोकसक्तान् नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति ॥"
इत्युद्वाहतत्त्वे छन्दोगपरिशिष्टम् ॥

परिविष्णु, क्ली, सर्व्वतो विष्णुः । विष्णुं विष्णुं परि इत्यव्ययीभावसमासे दुर्गादासः ॥

परिवृंहितं, त्रि, वृहिधातोः कर्म्मणि क्तः । (ततः परितो वृंहितमिति ।) सर्व्वतोभावेन दीप्तिविशिष्टम् । सर्व्वतोभावेन करिगर्ज्जितम् । सर्व्वतोभावेन वृद्धिविशिष्टम् । सर्व्वतोभावेन अर्थविशिष्टम् ॥

परिवृढः, त्रि, (परिसर्व्वतोभावेन वृंहति वर्द्धते इति । वृहि वृद्धौ+कर्त्तरि क्तः । निपातनात् नकारलोपो निष्ठातस्य ढत्वञ्च ।) अधिपः । प्रभुः । इत्यमरः । ३ । १ । ११ ॥
(यथा, राजतरङ्गिण्याम् । १ । ५८२ ।
"कामुपरिवृढः पौण्ड्रौलिकं स पवार्धितम् ।
हत्वा प्रादुर्भूतस्तत्र सौ भूयोऽप्यमापत ॥")

परिवृतः, त्रि, (परिसर्व्वतोभावेन वृतः ।) आवृतः । वेष्टितः । यथा,—
"अवस्थारान् धनः पश्चिन् पश्चैः परिवृतोऽव्ययम् ।"
इति मिताक्षरा ॥

परिवृत्तिः, पुं, (परिसर्व्वतो वर्त्तते इति । परि+वृत्+क्तिन् ।) परिवर्त्तः । इति वसुः ॥ (परि+वृत्+भावे क्तिन् । परिवर्त्तनम् । यथा, महाभारते । १४ । १८ । ३६ ।
"तस्य कामपरीभावमकरोत् स पितामहः ।
भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव च ॥"
अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । १०५ ।
"परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् ॥"
क्रमेणोदाहरणं यथा,—
"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः ॥"
अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन ॥)

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टनविशिष्टम् । सर्व्वतोभावेनोदरविशिष्टम् । इति वेष्टधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नम् ॥

परिवेत्ता, [ऋ] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति भार्य्यामग्न्यादिकं वा लभते इति । विद लाभे+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति तृच् ।) अनूढज्येष्ठे कृतविवाहकनिष्ठः । इत्युद्वाहतत्त्वम् ॥ (यथा, मनुः । ३ । १७१ ।
"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥")

परिवेदनं, क्ली, (परि+विद्+ल्युट् ।) विवाहः । अग्न्याधानम् । यथा,—
"क्लीवे देशान्तरगते पतिते भिक्षुकेऽपि वा ।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥"
इत्युद्वाहतत्त्वे शातातपः ॥
सर्व्वतोभावेन ज्ञानम् । (यथा, महाभारते । १४ । १६ । १९ ।
"स हि धर्म्मः सुपर्य्याप्तो ब्रह्मणः परिवेदने ।
न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः ॥")
सर्व्वतोभावेन विचारणम् । सर्व्वतोभावेन विद्यमानत्वम् । सर्व्वतोभावेन लाभः ॥

परिवेदिनी, स्त्री, (परिवेदोऽस्त्यस्यामिति । इनि ङीप् च ।) परिवेत्तुः स्त्री । इति हेमचन्द्रः ॥

परिवेदनीया, स्त्री, (परिविद्यते या । परि+विद्+अनीयर् ।) अनूढज्येष्ठे तत्कनिष्ठेन विवाहिता कन्या । अस्य प्रमाणं परिदायिशब्दे द्रष्टव्यम् ॥

परिवेशः, पुं, (परितो विशतीति । परि+विश्+घञ् ।) वेष्टनम् । परिधिः । इति मेदिनी । शे । १७ ॥
"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः ।
मालाभा व्योम्नि कुर्व्वन्ति परिवेशः प्रकीर्त्तितः ॥"
इति भरतधृतशब्दार्णवः ॥

परिवेषः, पुं, (परितो विष्यते व्याप्यतेऽनेन । विष्लृ व्याप्तौ+घञ् ।) परिधिः । परिवेशः । (बृहत्संहितायाम् ३४ अध्याये तल्लक्षणादिकं सूक्तम् । तद्यथा,—
"सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः ।
नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः ॥
ते रक्तनीलपाण्डुरकापोताभाभ्रशबलहरितशुक्लाः ।
इन्द्रयमवरुणनिरृतिश्वसनेशपितामहाग्निकृताः ॥
धनदः करोति मेचकमन्योन्यगुणाश्रयेण चाप्यन्यम् ।
प्रविलीयते मुहुर्मुहुरल्पफलः सोऽपि वायुकृतः ॥
चाषशिखिरजततैलक्षीरजलाभः स्वकालसम्भूतः ।
अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः ॥
सकलगगनानुचारी नैकाभः क्षतजसन्निभो रूक्षः ।
असकलशकटशरासनशृङ्गाटकवत्स्थितः पापः ॥
शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे ।
हरिचापनिभे युद्धान्यशोकपुष्पप्रभे चापि ॥
वर्णेनैकेन यदा बहुलः स्निग्धः क्षुराभ्रकाकीर्णः ।
स्वर्त्तौ सद्यो वर्षं करोति पीतश्च दीप्तार्कः ॥
दीप्तविहङ्गमृगरुतः कलुषः सन्ध्यात्रयोत्थितोऽतिमहान् ।
भयकृत्तडिदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण ॥
प्रतिदिनमर्कहिमांश्वोरहर्निशं रक्तयोर्नरेन्द्रवधः ।
परिविष्टयोरभीक्ष्णं लग्नास्तमयोदयस्थयोस्तद्वत् ॥
सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोपकरः ।
त्रिप्रभृति शस्त्रकोपं युवराजभयं करोत्यधिकम् ॥
उदितास्तशिरोवन्दिमण्डलैर्वा नृपगुरुभूतनिरोधः ।
क्षीरस्थिताधिपयोर्मरणं वा भ्रमो राज्ञः ॥
परिवेषमण्डलगतो रविजाग्रमयः क्षुद्रधान्यनाश-
करः ।
जनयति च वातवृष्टिं स्थावरकृषिकृन्निहन्ता च ॥
भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्र-
भयम् ।
जीवे परिवेषगते पुरोहितामात्यनृपपीडा ॥
मन्त्रिस्थावरलेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च ।
शुक्रे यायिक्षत्रियराज्ञां पीडा प्रियं चान्नम् ॥
क्षुद्रगणप्रभवनराधिपमृत्युर्भ्यो जायते भयं केतौ ।
परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयञ्च ॥
युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्ग्रहयोः ।
दिवसकृतः शशिनो वा क्षुदवृष्टिमयं त्रिषु
प्रोक्तम् ॥
याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं
मृत्योः ।
प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु ॥
तारामहस्तु कुर्य्यात् दृष्टमेव सम्मुखितो नरेन्द्र-
वधम् ।
नक्षत्रमथवा यदि केतोर्वोदयो भवति ॥
विग्रहविपर्य्ययवृत्तसदा भवेत् प्रतिपदादिषु
क्रमशः ।
ब्रह्मपुरकोष्ठागारे महस्यादिष्वनुक्रमसारी ॥
युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोष-
करः ।
पुररोधो द्वादश्यां सैन्यक्षोभश्च घोरमासाम् ॥
मदनीयवतोपीड़ा परिवेषोऽभ्युदितबाहुल्येऽप्यास्

कुर्य्यात्तु पश्चदशां पीड़ां मनुजाधिपस्यैव ॥
नागरकाणामभ्यन्तरस्थिता यायिनाञ्च बाह्यस्था।
परिवेषमध्यरेखा विज्ञेया क्रन्दसाराणाम् ॥
रक्तः श्यामो रूक्षश्च भवति येषां पराजय-
स्तेषाम्।
स्निग्धः श्वेतो द्युतिमान् येषां भागो जय-
स्तेषाम् ॥”)

परिवेषणम्। इति हेमचन्द्रः ॥

परिवेषकः, पुं, (परिवेषयतीति। परि+विष्+ण्वुल्।) परिवेष्टा। परिवेषणकर्त्ता। तस्य लक्षणं यथा,—
“स्नातश्चन्दनचर्च्चितः सुवसनः स्रग्वी प्रसन्नाननः
सदात्मा सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः।
स्वामिस्नेहपरः स्वकार्य्यनिपुणः प्रौढ़ो वदान्यः शुचि-
र्विप्रो वा परिवेषकस्तु कुलजश्चान्योऽपि वा
भूपतेः ॥”
इति पाकराजेश्वरः ॥

परिवेषणं, क्ली, (परि+विष्+णिच्+ल्युट्।) वेष्टनम्। भोजनार्थं भोजनपात्रे व्यञ्जनादेर्दानम्। अथ श्राद्धे परिवेषणं मनुः।
“पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥
अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं पूरितं पात्रमिति शेषः। उपनिक्षिपेत् परिवेषणार्थम्। तथा च पाकस्थाल्या आहृत्य प्रथमं भोजनपात्रे न देयं किन्तु स्थाल्यादिकं पाणिभ्यां पात्रसमीपे भूमौ संस्थाप्य पश्चात् पाणिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषयेत्। उभाभ्यामपि हस्ताभ्यामाहृत्य परिवेषयेदिति मत्स्यपुराणात्। यत्तु श्राद्धे परिवेषणन्तु दक्षिणपाणिमात्रेणैवाङ्गानभिधानादिति मैथिलोक्तं तन्न। एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेदित्यादि पुराणीयेन एकपाणिदत्तशूद्रादत्तभक्षणनिषेधेन तस्मान्नपरिवेषणस्यापि निषिद्धत्वात् पाणिभ्यामपि पात्रान्तरितं कृत्वा देयम्।
घृतदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते च किल्बिषम् ॥
तस्मादन्तरितं देयं पर्णेनाप्य तृणेन वा।
प्रदद्यान्न तु हस्तेन नायसेन कदाचन ॥
इति वशिष्ठवचनेन सामान्यतोऽभिधानात्। पिष्टभक्षितरङ्गिण्यामप्येवम्। मनुः।
गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु।
विन्यसेत् प्रयतः सम्यग्भूमावेव समाहितः ॥
आमिषं पानभाषश्च भोक्तुर्दक्षिणतो न्यसेत्।
भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ॥
हृद्यानि चैव मांसानि पानानि सुरभीणि च।
उपनीय च तत् सर्व्वं शनकैः सुसमाहितः ॥
परिवेषयेत् प्रयतो गुणान् सर्व्वान् प्रचोदयन्।
गुणान् उपकरणानि भूमावेव न तु व्यञ्जनादिभाजनादि घृतादि पात्रोपरि निक्षिपेत्।” इति श्राद्धतत्त्वम् ॥

परिवेषिका, स्त्री, (परिवेषयति या। परि+विष्+ण्वुल्। स्त्रियां टाप् अत इत्वञ्च।) परिवेषणकर्त्री। तस्या लक्षणं यथा,—
“स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभमुखी नयनाभिरामा।
बिम्बाधरा शिरसि बद्धसुगन्धिपुष्पा
मन्दस्मिता क्षितिभृतां परिवेषिका स्यात् ॥”
इति पाकराजेश्वरः ॥

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टितम्। तत्पर्य्यायः। परिक्षिप्तम् २ वलयितम् ३ निवृतम् ४ परिष्कृतम् ५ परीतम् ६। इति हेमचन्द्रः ॥

परिव्याधः, पुं, (परि सर्व्वतोभावेन विध्यतीति। परि+व्यधौ ताड़े+“श्याद्व्यधेति।” ३।१।१४१। इति णः।) अम्बुवेतसः। द्रुमोत्पलः। इत्यमरः। २।४।३०,६० ॥

परिव्रज्या, स्त्री, (परि+व्रज+भावे क्यप्। स्त्रियां टाप्।) तपस्या। इति हेमचन्द्रः। १।८१। (इतस्ततो भ्रमणम्। यथा, मनुः। १०।५२।
“वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥”
“लौहवलयादि चालङ्करणं सर्व्वदा च भ्रमणशीलत्वम् ॥” इति कुल्लूकभट्टः ॥)

परिव्राजः, पुं, (परित्यज्य सर्व्वान् विषयभोगान् गृहाश्रमाद् व्रजतीति। परि+व्रज्+संज्ञायां कर्त्तरि घञ्।) परिव्राट्। इत्यमरटीकायां रमानाथः ॥

परिव्राजकः, पुं, (परिव्राज+स्वार्थे कन्। परिव्रजतीति। परि+व्रज्+ण्वुल् वा।) परिव्राट् ॥ (यथा, गोः रामायणे। ३।५५।२।
“स परिव्राजकच्छद्मा महाकायशिरोधरः।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः ॥”)

परिव्राजिः, स्त्री, (परि+व्रज्+णिच्+इन्।) श्रावणी। इति राजनिर्घण्टः ॥ मुलकुड़ी इति भाषा ॥ (श्रावणीमुण्डकपर्णीशब्दयोरस्या विशेषो ज्ञेयः।)

परिव्राट्, [ज्] परिव्राड्, } पुं, (परित्यज्य सर्व्वं विषयभोगं गृहस्थाश्रमाद् व्रजति गच्छतीति। परि+व्रज्+क्विप् दीर्घश्च।) चतुर्थाश्रमी। तत्पर्य्यायः। भिक्षुः २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५। इत्यमरः। २।७।४२ ॥ सन्न्यासी ६ श्रमणः ७। इति जटाधरः ॥ परिव्राजकः ८ पराशरी ९ व्रजकः १०। इति शब्दरत्नावली ॥ तस्य लक्षणं यथा, गरुडपुराणे।
“सर्व्वारम्भपरित्यागो भैक्ष्याशं वृक्षमूलता।
निष्परिग्रहताद्रोहसमताः सर्व्वजन्तुषु ॥
प्रियाप्रियपरिष्वङ्गे सुखदुःखाविकारिता।
सवाह्याभ्यन्तरं शौचं सुखदुःखाविकारिता ॥
सर्व्वेन्द्रियसमाहारो धारणा ध्याननित्यता।
भावसंशुद्धिरित्येष परिव्राड्धर्म्म उच्यते ॥”

परिशङ्कनीयः, त्रि, (परिशङ्क्यते इति। परि+शङ्क+अनीयर्।) सर्व्वतोभावेन शङ्काविषयः। (यथा,
“शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीयमाराधितोऽपि नृपतिः परिशङ्कनीयः।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥”
इत्युद्भटः ॥

परिशिष्टं, क्ली, (परितः शिष्टः। शिष्+क्तः।) परिशेषविशिष्टम्। अवशिष्टार्थबोधकग्रन्थः। इति हेमचन्द्रः। २।१७१ ॥ (यथा, छान्दोगपरिशिष्टम्। गृह्यपरिशिष्टमित्यादि ॥)

परिशुष्कं, क्ली, (परितः शुष्कम्। शुष्+क्तः।) मांसव्यञ्जनभेदः। यथा,—
“मांसं बहुघृतैर्भृष्टं सिक्तं चाम्बुना मुहुः।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥”
इति शब्दचन्द्रिका ॥
सर्व्वतोनीरसे त्रि ॥ (यथा, रामायणे। २।५९।५।
“उपतप्तोदका नद्यः पल्वलानि सरांसि च।
परिशुष्कपलाशानि वनान्युपवनानि च ॥”)

परिशोधः, पुं, (परि+शुध्+भावे घञ्।) परिशोधनम्। सर्व्वतोभावेन शुद्धिः ॥

परिशोषः, पुं, (परि+शुष्+भावे घञ्।) सर्व्वतोभावेन शुष्कता। (यथा, गोः रामायणे। ४।१५।३४।
“वाय्वर्कपरिपीताम्बुर्विपरिम्लानपङ्कजः।
तड़ाग इव कालेन परिशोषं गमिष्यति ॥”)

परिश्रमः, पुं, (परि+श्रम्+घञ्। न वृद्धिः।) परिश्रान्तिः। तत्पर्य्यायः। श्रमः २ क्लमः ३ क्लेशः ४ प्रयासः ५ आयासः ६ व्यायामः ७। इति हेमचन्द्रः। २।२३३ ॥ (यथा, रघुः। १।५८।
“तमातिथ्यक्रियाशान्त-रथक्षोभपरिश्रमम्।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥”)

परिश्रयः, पुं, (परिश्रयत्यस्मिन् इति। परि+श्रि+“एरच्।” ३।३।५६। इति अच्।) सभा। (भावे अच्।) आश्रयः। इति मेदिनी। ये। १२२ ॥

परिश्रान्तः, त्रि, (परि+श्रम+कर्त्तरि क्तः।) सर्व्वतोभावेन श्रान्तियुक्तः। (यथा, महाभारते। १।४९।२६।
“परिश्रान्तो वयःस्थश्च षष्टिवर्षो जरान्वितः।
क्षुधितः स महारण्ये ददर्श मुनिसत्तमम् ॥”
स्त्री। गायत्रीस्वरूपा भगवती। यथा, देवीभागवते। १२।६।९३।
“पावनी पादसहिता पेशला पवनाशिनी।
प्रजापतिः परिश्रान्ता पर्व्वतस्तनमण्डला ॥”)

परिश्रुतः, त्रि, (परि+श्रु+क्तः।) सर्व्वतोभावेन श्रवणविषयः ॥

परिश्लेषः, पुं, (परि+श्लिष+भावे घञ्।) आश्लेषः ॥

परिषत्, [द्] स्त्री, (परितः सीदन्त्यस्याम्। परि+सद्+अधिकरणे क्विप्। “सदिरप्रतेः।” ८।३।६६। इति षत्वम्।) सभा। इत्यमरः। २।७।१५ ॥ (यथा, गोः रामायणे। २।१२।१६।

"यदश्वी परिषत् सौते ! दूतश्चायं तथाविधः ।
ध्रुवमद्यैव राजा मां यौवराज्येऽभिषेक्ष्यति ॥"
परिषत् खलु द्विविधा, ज्ञानवती मूढपरिषच्च, सैव द्विविधा सती त्रिविधा पुनरनेन कार्य्यविभागेन सुहृत्परिषत्, उदासीनपरिषत्, प्रतिनिविष्टपरिषच्चेति । तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नायां मूढायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते । मूढायान्तु सुहृत्परिषदि उदासीनायां वा ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणाप्यदीप्तयशसा महाजनविद्विष्टेन सह जल्पो विधीयते । तद्विधेन च सह कथयता आविद्धदीर्घसूत्रसङ्कुलैर्वाक्यदण्डकैः कथयितव्यम् । अतिहृष्टं मुहुर्मुहुरुपहसता परं रूपयता च परिषदमाकारैर्ब्रुवतश्चास्य वाक्यावकाशो न देयः । कष्टशब्दञ्च ब्रुवन् वक्तव्यो नोच्यते इति । अथवा पुनर्हीना ते प्रतिज्ञेति पुनश्चाह्वयमानः प्रतिवक्तव्यः । परिसंवत्सरो भव शिक्षस्व तावत् । पर्य्याप्तमेतावत्ते । सकृदपि हि परिक्षेपिकं निहतं निहतमाहुरिति । नास्य योगः कर्त्तव्यः कथञ्चिदप्येवं श्रेयसा सह विगृह्य वक्तव्यमित्याहुरित्येके । न त्वेवं ज्यायसा सह विग्रहं प्रशंसन्ति कुशलाः । प्रत्यवरेण तु सह समानाभिमतेन वा विगृह्य जल्पता सुहृत्परिषदि कथयितव्यम् । अथवाप्युदासीनपरिषदि अवधानश्रवणज्ञानविज्ञानोपधारणवचनप्रतिवचनशक्तिसम्पन्नायां कथयता चावहितेन परस्य साद्गुण्यदोषबलमवेक्षितव्यम् । समवेक्ष्य च यत्रैनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेत् अनाविष्कृतमयोगं कुर्व्वन् । यत्र त्वेनमवरं मन्येत सद्य एवैनमाशु निगृह्णीयात् ॥"
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
परिषत्त्वं यथा, प्रायश्चित्तविवेके ।
"एकविंशतिसंख्याकैर्मीमांसान्यायपारगैः ।
वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् ॥"

परिषदः, पुं, (परितः सीदतीति । परि+सद्+अच् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) पारिषदः । अनुचरः । इति भरतधृतद्विरूपकोषः ॥

परिषद्यः, पुं, (परिषदमर्हतीति । परिषद्+यत् ।) परिषद्वलः । इति भरतधृतद्विरूपकोषः ॥

परिषद्वलः, पुं, (परिषदस्यास्तीति । परिषद्+"रजःकृष्यासुतिपरिषदो वलच् ।" ५ । २ । ११२ । इति वलच् ।) सभासदः । पारिषदः । इति शब्दरत्नावली । (यथा, भट्टिः । ४ । १२ ।
"आसीनमासन्नशिलालयस्थैः शुभ्रैः परिषद्वलम् ।
परिवल्गत्कपिध्वानकोराटं नैकटिकाश्रमात् ॥")

परिष्कन्दः, त्रि, (परिस्कन्दतीति । परि+स्कन्दिर् गतिशोषणयोः+पचाद्यच् । "परेश्च ।" ८ । ३ । ७४ । इति षत्वम् ।) परिस्कन्दः । परपुष्टः । इत्यमरटीकायां रमानाथः ॥

परिष्कण्णः, त्रि, (परि+स्कन्द+क्तः । इदम् तस्य च नः । "परेश्च ।" ८ । ३ । ७४ । इति षत्वम् ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥

परिष्कारः, पुं, (परिष्क्रियतेऽनेन । परि+कृ+"सम्परिभ्यां करोतौ भूषणे ।" ६ । १ । १३७ । इति सुट् । "परिनिविभ्यः ।" ८ । ३ । ७० । इति षत्वम् ।) अलङ्कारः । इत्यमरः । २ । ६ । १०१ ॥ संस्कारः । शुद्धिः ॥

परिष्कृतः, त्रि, (परिष्क्रियते स्म इति । परि+कृ+क्तः । "सम्परिभ्यामिति ।" सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वञ्च ।) भूषितः । अलङ्कृतः । इत्यमरः । २ । ६ । १०० ॥ वेष्टितः । इति हेमचन्द्रः ॥ आहितसंस्कारः । इति मेदिन्यब्दटीकायां भरतः ॥

परिष्कृतभूमिः, स्त्री, वेदिः । परिष्कृता यज्ञार्थं यज्ञबन्धनाय यज्ञपात्रासादनाय चाहितसंस्कारा भूमिः । इत्यमरभरतौ ॥

परिष्टोमः, पुं, (परितः स्तूयते नानावर्णवस्त्रादिभिः । स्तु+मन् । ततः षत्वम् । केचित्तु "परेःस्तौतिं प्रति अनुपसर्गत्वान्न षः ।" इत्युक्त्वा परिस्तोम इति कथयन्ति ।) परिस्तोमः । इत्यमरटीकायां स्वामी ॥

परिष्वङ्गः, पुं, (परिष्वञ्जनम् । परि+स्वञ्ज+घञ् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) आलिङ्गनम् । इत्यमरः । ३ । २ । १० ॥ (यथा, गोः रामायणे । २ । ४ । ८८ ।
"अङ्गदप्रमुखानाञ्च हरीणां रामदर्शनम् ।
हनूमतः परिष्वङ्गो राघवेण महात्मना ॥")

परिषद्यः, पुं, सर्व्वतोभावेन सभायां साधुः इत्यर्थे यत् प्रत्ययः । परिषदः । सभासदः ॥

परिसरः, पुं, (परितः सरत्यत्र । परि+सृ+"पुंसीति ।" ३ । ३ । ११८ । इति घः ।) पर्य्यन्तभूः । नदीनगरपर्व्वतादेरुपान्तभूमिः । इत्यमरभरतौ ॥ (यथा, मेघदूते । ६८ ।
"मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥")
मृत्युः । विधिः । इति मेदिनी । रे । २०८ ॥

परिसर्पः, पुं, (परि समन्तात् सर्पणम् । परि+सृप्+घञ् ।) परिक्रिया । परिखनादिना वेष्टनम् । समन्तात् सर्पणम् । इत्यमरभरतौ ॥ (सर्पविशेषः । यथा, सुश्रुते कल्पस्थाने ४ अध्याये । तत्र दर्व्वीकराः । "गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मः ।" इति । कुष्ठविशेषः । यथा, तत्रैव निदानस्थाने ५म अध्याये । "सुक्ष्मकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठचर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्चिका किटिभं पामा रकसा चेति ॥")

परिसर्य्या, स्त्री, (परिसरणमिति । सृ गतौ+"परिचर्य्यापरिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिं इति निपातनात् सिद्धम् ।) परीसारः । सर्व्वतोगमनम् । भूमौ सर्व्वतोभ्रमणम् । इति कर्द्दमम् । अवकाशरम् । इति जैमिनिः । इत्यमरभरतौ ॥

परिस्कन्दः, पुं, (परिस्कन्दतीति । परि+स्कन्द+अच् । "परेश्च ।" ८ । ३ । ७४ । इति पक्षे षत्वाभावः ।) परपुष्टः । परेण प्रतिपालितः । इत्यमरः । २ । १० । १८ ॥

परिस्कन्नः, पुं, (परि+स्कन्द+क्त । "परेश्च ।" ८ । ३ । ७४ । इति पक्षे षत्वाभावः ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥

परिस्तोमः, पुं, (परि स्तूयते प्रशस्यते नानावर्णवत्त्वात् । परि+स्तु+"अर्त्तिस्तुसुहुसृधृक्षीति ।" मन् । यद्वा परितः स्तोमोऽस्य बहुस्तोमत्वात् ।) गजपृष्ठस्थचित्रकम्बलः । इत्यमरः । २ । ८ । ४२ ॥ हातीर पिठेर झुल इति भाषा ॥

परिस्पन्दः, पुं, (परि+स्पन्द+अधिकरणे घञ् ।) कुसुमप्रकराद्यैः यथावस्थादेश रचना । इत्यमरः । २ । ६ । १३० ॥ परिकरः । परिवारः । इति हेमचन्द्रः । ६ । ३८८ ॥ (भावे+घञ् ।) सर्व्वतोभावेन स्पन्दनम् ॥ (सर्व्वम् । यथा, महाभारते । १ । १५४ । ८ ।
"अद्यैनं हनिष्यामि प्रेक्षन्त्यास्ते सुमध्यमे ! ।
नायं प्रतिबली भीरु ! राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः ॥")

परिस्पन्दनं, क्ली, (परि सर्व्वतोभावेन स्पन्दते इति । परि+स्पन्द+ल्युट् ।) सर्व्वतोभावेन कम्पनम् । यथा । कोऽपि परिस्पन्दनसाधनबाधः । यथा नमनादिः । कोऽप्यपरिस्पन्दनसाधनबाधः । यथा आश्रयणादिः । इति गोयीचन्द्रः ॥

परिस्पन्दमानः, त्रि, (परिस्पन्दते इति । परि+स्पन्द+शानच् ।) सर्व्वतोभावेन कम्पमानः । यथा । "अनवरतपरिस्पन्दमाना परिमिलपवनादिप्रसरमाकुलितनभोमण्डलाभाः पालिमालीनामविरलमेघोपरमात् ।" इति वाकाव्यलक्षणायां शिरोमणिः ॥

परिस्यन्दः, पुं, (परि+स्यन्द+भावे घञ् । अधिकरणे वा घञ् ।) परिस्पन्दः । इत्यमरटीकायां भरतः ॥

परिस्रुत्, स्त्री, (परिस्रवतीति । परि+स्रु+क्विप् तुक् च ।) मदिरा । इत्यमरः । २ । १० । ३९ ॥ (यथा, अथर्ववेदे । ३ । १२ । ७ ।
"एमां परिस्रुतः कुम्भ आदधः कलशैरगुः ।"
सर्व्वतोभावेन क्षरिते त्रि । यथा, ऋग्वेदे । ८ । ६८ । १० ।
"आमासः परिस्रुतः परियन्ति बद्धीनां समना-
मन्थे माते ॥")

परिस्रुतः, त्रि, (परितः स्रूयते स्म । स्रु स्रवणे+"गत्यर्थेति ।" ३ । ४ । ७२ । इति क्तः ।) आस्रुतः । सर्व्वतोभावेन चरितः । इति मेदिनी । ते । २०६ ॥ (वारुणीसन्धिरेषा विशतिर्वाजिना । यथा, यजुर्वेदे । २ । ३४ ।
"ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परि-
स्रुतम् ॥")

परिस्रुता, स्त्री, (परितः स्रूयते ऽसौ । परि+स्रु+क्तः ।) स्त्रियां टाप् । माधाद्यैरिव वर्णेन मानं

त्वात् तथात्वम् ।) वारुणी । मदिरा इति मेदिनी । ते । २०६ ॥

परिहारः, पुं, (परिह्रियतेऽनेनेति । परि+हृ+घञ् ।) अवज्ञा । अनादरः । इति शब्दरत्नावली ॥ ("परिहारो नाम तस्यैव दोषवचनस्य परिहरणं यथा नित्यमात्मनि शरीरस्थे जीवलिङ्गान्युपलभ्यन्ते तस्य चापगमान्नोपलभ्यन्ते तस्मादन्यः शरीरादात्मा नित्यः शरीरञ्चेति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ त्यागः । परिवर्ज्जनम् । यथा, राजतरङ्गिण्याम् । ४ । ६७६ ।
"दुर्वृत्तस्य प्रभोरन्यत परिहारात् न भेषजम् ॥"
गोपनम् । यथा, शकुन्तलायां १ म अङ्के ।
"कथमिदानीमात्मानं निवेदयामि कथं वा आत्मनः परिहारं करोमि ॥" विजितद्रव्यादिकम् । यथा, मनुः । ७ । २०१ ।
"जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान् ।
प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च ॥"
ग्रामविशेषः । यथा, मनुः । ८ । २३७ ।
"धनुःशतं परीहारो ग्रामस्य स्यात् समन्ततः ॥"
अत्र कुल्लूकभट्टः । "चतुर्हस्तो धनुः शम्या यष्टिस्तस्याः पातः प्रक्षेपो ग्रामसमीपे सर्व्वासु दिक्षु चत्वारि हस्तशतानि त्रीन् वा यष्टिप्रक्षेपान् यावत् पशुप्रचारार्थं शस्यवपनादिसंरोधपरिहारः कार्य्यः ॥")

परिहार्य्यः, पुं, (परि+हृ+ण्यत् ।) पारिहार्य्यः । वलयः । इति भरतद्विरूपकोषः ॥ परिहरणीये त्रि ॥ (यथा, शकुन्तलायाम् १ मे अङ्के ।
"न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते ॥")

परिहासः, पुं, (परि+हस्+भावे घञ् ।) परिहसनम् । ठाट्टा इति भाषा । परीहासः । यथा । "परिहासः केलिमुखः केलिर्द्रवननर्म्मणी ।" इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । क्रीडः २ द्रवना ३ । इति शब्दरत्नावली ॥ चर्करा ४ । इति जटाधरः ॥ (यथा, शकुन्तलायाम् २ ये अङ्के ।
"परिहासविजल्पितं सखे ! परमार्थेन न गृह्यतां वचः ॥")

परीक्षकः, त्रि, (परि+ईक्ष+ण्वुल् ।) निरूपकः । (यथा, पञ्चतन्त्रे । १ । ८४ ।
"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")
तत्पर्य्यायः । कारणिकः २ । इत्यमरः ।३।१।१७॥ परीक्षते अवधारयति प्रमाणेन । यथा, वह्निना परीक्षकः स्वर्णस्य स्वर्णकारः । कारणैर्हेतुभिश्चरति कारणिकः इति भरतः ॥

परीक्षणं, क्ली, (परि+ईक्ष+ल्युट् ।) परीक्षा । राज्ञा धर्म्मकामार्थभयैरमात्यादेर्भावतत्त्वनिरूपणम् । इति भरतः ॥ यथा,—
"भेदोपजापाद्युपधा धर्म्माद्यैर्यत् परीक्षणम् ।"
इत्यमरः । २ । ८ । २१ ॥
सर्व्वतोभावेन दर्शनञ्च ॥

परीक्षा, स्त्री, (परितः ईक्ष्यतेऽनया । परि+ईक्ष+"गुरोश्च हलः ।" ३ । ३ । १०२ । इति अः । ततष्टाप् ।) दिव्यम् । अथ दिव्यानि । तत्र बृहस्पतिः ।
"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
षष्ठञ्च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"
अथ किन्तद्दिव्यम् ।
तत्र मानुषप्रमाणानिर्णेयस्यापि निर्णायकं यत्तद्दिव्यमिति लोकप्रसिद्धम् । एतद्द्वयस्यापि प्रमयानामस्ति तथापि कालान्तरनिर्णायकत्वेन तेषां भेदात् । अपिना मानुषप्रमाणसत्त्वेऽपि यत्र घटादीनामङ्गीकारस्तत्रापि तद्भवति इति सूचितम् । अतएव लिखितसाक्षिभुक्तिलक्षणत्रिविधमानुषप्रमाणभिन्नप्रमाणं यत्तद्दिव्यं प्रमाणं तत प्रमाणं न भावैकगोचरं किन्तु भावाभावाविशेषेण गोचरयतीति । तत्र महाभियोगेषु दिव्यान्याह याज्ञवल्क्यः ।
"तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥"
विशुद्धये सन्दिग्धार्थस्य सन्देहनिरासाय । महाभियोगेषु महापातकादिगरुतराभियोगेषु । शीर्षकस्थ इति शीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः । तेन दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदण्डभागीत्यर्थः । महाभियोगान् स्पष्टयति कालिकापुराणम् ।
"परदाराभिशापे च चौर्य्यागम्यागमेषु च ।
महापातकशस्तेषु स्याद्दिव्यं नृपसाक्षिके ॥
प्रतिपत्तौ विवादे च न्यासस्य स्थापने हृते ।
तत्रैव स्थापयेद्दिव्यं शिरःपूर्व्वं महीपतिः ॥
परदाराभिशापे च बहवो यत्र वादिनः ।
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् ॥"
पितामहः ।
"शिरःस्थायिविहीनानि दिव्यानि परिवर्ज्जयेत् ।
चत्वारि तु घटादीनि कोषश्चैवाशिराः स्मृतः ॥"
महाभियोगेतरेऽपि कोषमाह स्मृतिः । कोषमल्पे च दापयेत् । याज्ञवल्क्येनाभियोक्तुर्वादिनः शिरोवर्त्तित्वाभिधानादभियोज्यस्य दिव्यकर्त्तृत्वं प्रतिपादितम् । यत्तमाह कात्यायनः ।
"न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥"
प्रत्यर्थिस्वीकारेणार्थिनोऽपि दिव्यमाह याज्ञवल्क्यः ।
"रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ।
विनापि शीर्षकात् कुर्य्यान्नृपद्रोहेऽथ पातके ॥"
इतरोऽभियुक्तः शिरः शारीरदण्डमर्थदण्डं वा वर्त्तयेत् स्वीकुर्य्यात् । बृहस्पतिः ।
"स्नेहात् क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः ।
विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचित् ॥"
भेदः अन्यादृशपरीक्षणम् । यत्तु कात्यायनवचनम् ।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु ।
लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः ॥"
इति तद्गुणान्वितसाक्षिपरम् । यथा व्यासः ।
"मणिमन्त्रौषधिबलात् प्रदत्तं वा विधानतः ।
विसंवदेद्दिव्यमपि न तु साक्षी गुणान्वितः ॥"
अतएव नारदः ।
"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ॥"
एनं विप्रतिपद्यमानमर्थं अर्द्दयेत् पीडयेत् । निर्द्धारयेदिति यावत् ॥*॥ शपथानाह नारदः ।
सत्यवाहनशस्त्राणि गोबीजकनकानि च ।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥
स्पृशेच्छिरांसि पुत्त्राणां दाराणां सुहृदां तथा ।
अभियोगेषु सर्व्वेषु कोषपानमथापि वा ॥
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणात् ॥"
बृहस्पतिः ।
"यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः ।
अयथोक्तप्रदत्तन्तु न शक्तं साध्यसाधने ॥
अदेशकालदत्तानि बहिर्वादिकृतानि च ।
व्यभिचारं सदा त्वेवं कुर्व्वन्तीह न संशयः ॥"
बहिर्वादिकृतमभियोक्तारं विना कृतम् । एतच्च प्रायिकं आत्मशुद्धिपराणामभियोक्तारं विनापि दिव्यविधानात् ।
तथा च नारदः ।
"राजभिः शङ्कितानाञ्च निर्द्दिष्टानाञ्च दस्युभिः ।
आत्मशुद्धिपराणाञ्च देयं दिव्यं शिरो विना ॥*॥"
अथ दिव्यदेशाः । कात्यायनः ।
"इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् ।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे ।
अतोऽन्येषु च कार्य्येषु सभामध्ये विदुर्बुधाः ॥"
इन्द्रस्थाने इन्द्रध्वजस्थाने ॥*॥
अथ दिव्यकालाः । पितामहः ।
"चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव हि ।
एते साधारणा मासा दिव्यानामविरोधिनः ॥
घटः सर्व्वर्त्तुकः प्रोक्तो वाते वाति विवर्ज्जयेत् ।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः ॥
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ।
कोषस्तु सर्व्वदा देयस्तुला स्यात् सार्व्वकालिकीति ॥"
मिताक्षरायां नारदः ।
"न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् ।
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृप ! ॥"
नारदः ।
"पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानं परिकीर्त्तितम् ।
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन ॥"
शीते हेमन्तशिशिरयोः । उष्णकाले ग्रीष्मशरदोः । वर्षासु विषनिषेधश्चतुर्थंमासातिरिक्तपरः । यतः चतुर्थंमासा इति वराहमिहिरवचनात् । तदनुसारेणान्ध विषेणाभिधानात् मार्गशीर्ष-

परीक्षा

परीक्षा

कलम् । अत्र त्रिंशे विंशतो वर्षान्निषेधात् वस्तु-
स्नानवचने सिंहस्थरव्यादिष परीक्षाभावविधि-
नाच दिव्यान्तरं सिंहस्थेऽपि वर्षास्वपि कुर्व्वीत ।
अतोपाध्याये रवौ शुभे सर्व्वकर्म्माणि वर्ज्जये-
दित्यस्य न विषयः । ज्योतिषे ।
सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा ।
मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा ॥
रविशुद्धौ गुरौ चैव न शुक्रेऽस्तङ्गते पुनः ।
"सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः ॥
कार्त्त्यां न चतुर्द्दश्यां प्रायश्चित्तपरीक्षणे ।
न परीक्षा विधातव्या प्रतिभौमदिने तथा ॥
रविशुद्धौ गुरौ चैवेत्यत्र प्रशस्त इति शेषः ॥
तथा च दीपिकायाम् ।
"नो शुक्रास्तेऽष्टमेऽर्के गुरुमदिनकरौ अन्त्यमासे-
ऽष्टमेन्दौ
रिक्ते मासे मलाख्ये कुजयमदिवसे जन्म-
तारासु चाथ ।
नाडीनक्षत्रेऽपि गुरुरविजभौमाद्यताराविशुद्धौ
प्रातः कार्य्या परीक्षा हितकृदुपचयस्थोदये
प्रशस्ते ॥" * ॥

पितामहः ।
"प्रत्यहं दापयेद्दिव्यं राजा चाधिकृतोऽपि वा ।
ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च ॥"
ब्राह्मणानां प्रकृतीनाञ्च समक्षं दिव्यं दापये-
दित्यन्वयः । प्रकृतयस्तु ।
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेति
अमरसिंहोक्ताः ॥ * ॥
अथ दिव्यविशेषाधिकारिणः । नारदः ।
"ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुला स्मृता ॥"
यत् पुनरनेन ।
"सखलानां भयार्त्तानां व्याधितानां तपस्विनाम् ।
स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्म्मस्त्वपेक्षितः ॥"
इति स्त्र्यादीनां दिव्यं निषिद्धं तत्तुलेतरविषय-
मिति शूलपाणिः । मिताक्षरायान्तु ।
स्त्रीपुंसयोरित्यादेन स्त्रीणां दिव्यमिति वचना-
त्तन्नरः कुम्भादीनि विकल्पविधानार्थमेतदुक्तं
भवति । परस्पराभियोगेषु स्त्र्यादीनामभि-
योक्तृत्वे अभियोज्यानामेव दिव्यं स्त्रीणामभियोगे
योक्तृत्वेऽपि अभियोक्तृणामेव दिव्यं परस्पराभि-
योगे तु विकल्प एव तथापि तुलैवेति नियमार्थे ।
तथा महापातकादिमहाभियोगे तु स्त्र्यादीनां
तुलैव । यथा याज्ञवल्क्यः ।
"तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ॥"
स्त्रीमात्रं जातिमात्रोऽस्मादिति चाधारणेन ब्राह्म-
णादीनामवस्थाविशेषमात्रविधिपरत्वादेव दृष्टो-
ऽधीनतयातः । एतच्च वचनं कर्म्मदिव्यमाघा-
दिषु मार्गशिरश्चैत्रवैशाखेषु स्त्र्यादीनां सर्व्व-
दिव्यसमयदानविधाने नियमार्थं शतपाथेयम् । न
च सर्व्वकालं स्त्रीणामुक्तैवेति ।
"स्त्रीणाम् न विषं प्रोक्तं न चापि सलिलं स्मृतम् ।
घटकोषादिभिस्तासामन्तस्तत्त्वं विचारयेत् ॥"
इति विषसलिलव्यतिरिक्तघटकोषादिभिः शुद्धि-
विधानात् । एवं मासादिष्वपि योजनीयम् ।
तथा ब्राह्मणादीनामपि न सार्व्वकालिकतुलादि-
नियमः ।
"सर्व्वेषामेव वर्णानां कोषाच्छुद्धिर्विधीयते ।
सर्व्वाण्येतानि सर्व्वेषां ब्राह्मणस्य विषं विना ॥"
इति पितामहवचनात् ।
तस्मात् साधारणे काले बहुदिव्यसमवधाने
तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु
तत्तत्कालविहितं सर्व्वेषाम् । तथा हि वर्षा-
स्वग्निरेव सर्व्वेषां हेमन्तशिशिरयोस्तु क्षत्रिया-
दीनां ग्रीष्मे अग्निविषयोर्विकल्पः ब्राह्मणस्य
तु अग्निरेव न कदाचिद्विषं ब्राह्मणस्य विषं
विनेति निषेधात् । ग्रीष्मशरदोस्तु सलिलमेव ।
येषां कुष्ठादीनान्तु विशेषेणाग्न्यादिनिषेधः ।
"कुष्ठिनां वर्ज्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्ज्जयेदिति वच-
नात्तेषामन्याद्दिकालेऽपि साधारणं तुलाद्येव
दिव्यं भवति । यथा । रोगसम्पत्तिविशेषेण दातव्यं
बलिनां तुलामिति कारणात् । दुर्ब्बलानामपि
सर्व्वथा विषनिषेधात् तत्कालानतिक्रमेण ज्ञाति-
वर्ण्याद्यवस्थाविरतानि दिव्यानि देयानि । अत्र च
यत्र यानि विशेषसामान्यधर्म्मैर्दर्शितविहितानि
तानि मुख्यकल्पानुकल्परूपाणि वेदितव्यानि ।
यथा, ब्राह्मणस्य घटो मुख्यः कोषस्त्वनुकल्पः ।
तथाग्नी चानुकल्पौ प्रागुक्तनारदवचने एव-
कारश्रुतेर्मुख्यकल्पादिकं न तु प्रत्यक्षतमादिक-
मिति । एवञ्चापि यथोक्तसदस्तु न प्राप्तं
ताम्रपात्रे इति प्रागुक्तं बोध्यम् । स्मृतिः ।
"अवरुध्याभियुक्तानां घटादीनि विनिर्द्दिशेत् ।
तण्डुलस्यैव कोषस्य प्रत्ययस्यैव न संशयः ॥"
अवरुद्धोऽत्र नियतः । शिरोवर्त्तिनेति केचित् ।
इति व्यवहारदीपिका । कात्यायनः ।
"अस्पृश्याधमदासानां म्लेच्छानां पापकर्म्मिणाम् ।
प्रतिलोमप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि समये तेषु निर्द्दिशेत् ॥"
तत्प्रसिद्धानि सर्पघटादीनि । तथा,—
देशकालाविरोधेन तु यथायुक्तं प्रकल्पयेत् ।
अन्येन कारयेद्दिव्यं विधिरेव विपर्य्यये ॥"
अन्येन प्रतिनिधिना कारयेत् कारयेत् । विप-
र्य्यये अभियुक्तस्यासामर्थ्ये ।
अन्यत्र महापातकादीनामन्यथाऽपि दिव्यमाह
स एव ।
"मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रसभानाञ्च मन्त्रयोगक्रियावताम् ।
वर्णसङ्करजातानां पापाभ्यासप्रवर्त्तिनाम् ॥
एतेष्वेवाभियोगेषु निन्द्येष्वेव प्रयत्नतः ।
इत्यादि निधाय ।
दिव्यं प्रकल्पयेन्नैव राजा धर्म्मपरायणः ।
एतैरेव प्रयुक्तानां साधूनां दिव्यमर्हति ॥"
कात्यायनः ।
"न लौहशिल्पिनामग्निं सलिलं नाम्बुसेविनाम् ।
मन्त्रविदां विषञ्चैव ब्राह्मणं तुलारोगिणम् ॥"
नारदः ।
"नोपातुरान् मन्दहीनान् परितापादिताधरान् ।
नाशक्तानातुरांश्चैव नाग्नौ क्षिपेन्न घटे सदा ॥
नारीणां नीचवृत्तिः स्यात् विषं नित्यदीक्षिताम् ।
निषादान्त्यकुलजादीनां नाग्निकर्म्म विधीयते ॥"
न स्पर्शनं स्त्रीबालयोर्धर्म्मशास्त्रविचारकैः ।
विसृजन्मादात् व्याधितभ्रामार्त्तानोऽपि निमज्ज-
येत् ॥
न चापि दारयेदग्निं न विषेण नियोजयेत् ॥
यत्तु,—
स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेदिति
पितामहवचनं तल्लिखितसाक्ष्यादिसत्त्वे दिव्य-
निषेधकम् । यद्यपि व्यवस्थापितके दिव्यं
व्यवहारे विनिर्द्दिष्टेऽपि स्थावरविवादादावेऽपि
क्षेत्रादिविषये दिव्यादानादरयापि ऋणादानादि-
विवादे वादिपरवादी सतोऽपि प्रत्यर्थी यदि
स्वाङ्गीकारेण दिव्यमङ्गीकरोति तदा दिव्यमपि
भवति साक्षिणां दोषसम्भवादिव्यस्य तु निर्नि-
मित्तेन अनुपलब्धिविषयत्वात् तत्कारकत्वाच्च धर्म्मस्य ।
यथाह नारदः ।
"तत्र सत्ये स्थितो धर्म्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषेयं न लेख्यं वा प्रयोजयेत् ॥"
स्थावरविवादे तु प्रत्यर्थिना स्वाङ्गीकारेण
दिव्यावलम्बने सति साक्ष्यादिसत्त्वसाध्यवादा-
ऽपि दिव्यं प्राप्नोतीति निरर्थकविवादत्वात्
स्थावरेष्वित्यादि पितामहवचनं प्राप्तस्यैव दिव्यं
निराकरणाय लिखितादभावे स्थावरादिषु
निर्णयाय भवति ॥ * ॥
अथ दण्डसंस्था दिव्यविशेषाः । विष्णुः ।
अथ समयक्रियाराजद्रोहसाहसेषु यथाकामं
निःक्षेपचौर्य्येष्वर्थप्रमाणात् दिव्यं । समयो दिव्यं
राजद्रोहादिषु यथाकामं राजेच्छानुरोधाद्दिव्यं
निःक्षेपादिषु तु अर्थप्रमाणानुसारतो दिव्यम् ।
बृहस्पतिः ।
"अंशत्रयं शतकोणसमाप्ता काञ्चनादधा ।
कार्षापणाद्या या दिव्ये निक्षेप्या विषये तथा ॥
विषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्द्धे देयो घटः सदा ॥
चतुःशताभियोगे तु दातव्यस्तप्तमाषकः ।
त्रिशती तण्डुला देयाः कोषश्चैव तदर्द्धके ॥
शते हृतेऽपहृते च दातव्यं धर्म्मशोधनम् ।
गोचौरस्य प्रदातव्यं सद्भिः कार्य्यं प्रयत्नतः ॥
एता संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानान्तु कल्पनीया परीक्षकैः ॥"
हरिहरः ।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥"
इति मनूक्तम् ।

"कार्षापणान्ता पणान्ता कार्षापणः पण इति पर्य्यायदर्शनात् । विनये दण्डे । एवञ्च सहस्र इत्यादौ पण इति शेषं उपक्रमात् निकृष्टानां जातिकर्म्मगुणैः । नाधस्त्राङ्करेदग्निं न तुलां न विषमपीति याज्ञवल्क्यवचनं मध्यमोत्तमविषयत्वेन बृहस्पतिवचनैकवाक्यत्वादविरुद्धम् ।
"सहस्रेषु घटं दद्यात् सहस्रार्द्धे तथायसम् ।
शतार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतम् ॥"
इति वचनं चत्वारपराधे पातित्यं तद्विषयमिति । एतत् सर्व्वं स्तेयसाहसविषयम् । अपह्नवे तु कात्यायनः ।
"दत्तस्यापह्नवो यत्र प्रमाणं तत्र कारयेत् ।
स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत् ॥
सर्व्वद्रव्यप्रमाणन्तु ज्ञात्वा हेम प्रकल्पयेत् ।
हेमप्रमाणयुक्तन्तु तदा दिव्यं प्रदापयेत् ॥
ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतम् ।
अशीतेश्च विनाशे तु दद्याच्चैव हुताशनम् ॥
षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम् ।
विंशद्दशविनाशे तु कोषपानं विधीयते ॥
पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुलाः ।
ततोऽर्द्धार्द्धविनाशे तु स्पृशेत् पुत्रादिमस्तकान् ॥
ततोऽर्द्धार्द्धविनाशे तु लौकिकाश्च क्रियाः स्मृताः ।
एवं विचारयन् राजा धर्म्मार्थाभ्यां न हीयते ॥"
सुवर्णानां पञ्च कृष्णलको माषस्ते सुवर्णस्तु षोडश इत्युक्ताशीतिरक्तिकापरिमितहेम्नो नाशे अपह्नवे वा दशाधिकस्य पञ्चाधिकस्य वा विंशस्य नाशे कोषपानमित्यर्थः । तण्डुलाः पुनरल्पचौर्य्याभिशङ्कायामेव न तु साहसादौ । चौर्य्ये च तण्डुला देया नान्यत्रेति विनिश्चय इति पितामहस्मृतेः । तत्प्रमाणन्तु महाचौर्य्याभिशङ्कायाम् ।
महाचौर्य्याभियुक्तानां तत्प्रमाणो विधीयते ।
इति स्मृतिः ।

व्यवहारमातृकायाम् ।
"समस्तं साधिता यत्र दिव्येनापि शोधयेत् ।
प्रायाणिकविवादेषु विद्यमानेषु साक्षिषु ॥
दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः ॥"
इति दिव्यतत्त्वम् ॥ * ॥
घटादिनवविधपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥
("बुद्धिः पश्यति या भावान् बहुकारणयोगजान् ।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया ॥
एषा परीक्षा नास्त्यन्या यया सर्व्वं परीक्ष्यते ।
परीक्ष्यं सदसच्चैव तया चास्ति पुनर्भवः ॥"
इति चरके सूत्रस्थाने एकादशेऽध्याये ॥
"तत्र चेद्भिषगभिषजा भिषजं पृच्छेद्वमनविरेचनास्थापनानुवासन-शिरोविरेचनानि प्रयोक्तुकामेन भिषजा कतिविधया परीक्षया कतिविधं परीक्ष्यं कश्चात्र परीक्ष्यविशेषः कथञ्च परीक्षितव्यं किंप्रयोजना च परीक्षा क्व च वमनादीनां प्रवृत्तिः क्व च निवृत्तिः प्रवृत्तिनिवृत्तिलक्षण-संयोगे च किं नैष्ठिकं कानि च वमनादीनां भेषजद्रव्याणि उपयोगं गच्छन्तीति । स एवं पृष्टो यदि मोहयितुमिच्छेत् ब्रूयादेनं बहुविधा परीक्षा तथा परीक्ष्यविधिभेदः कतमेन विधिभेदप्रकृत्यन्तरेण परीक्षया भिन्नभेदाग्रं भवान् पृच्छत्याख्यायमानं नेदानीं भवतोऽन्येन वा विधिभेदप्रकृत्यन्तरेण परीक्ष्यस्य भिन्नस्याभिलषितमर्थं श्रोतुमहमन्येन परीक्षा विधिभेदप्रकृत्यन्तरेण परीक्ष्यं भिन्नार्थमाचक्षाण इच्छां पूरयेयमिति ।

द्विविधा परीक्षा ज्ञानवतां प्रत्यक्षमनुमानञ्च एतत्तु द्वयमुपदेशश्च परीक्षात्रयमेवमेषा द्विविधा परीक्षा त्रिविधा वा सहोपदेशेन ।
दशविधं परीक्ष्यं कारणादि यदुक्तमग्रे तदिह भिषगादिषु संसार्य्य सन्दर्शयिष्यामः इह कार्य्यप्राप्तेः कारणं भिषक्करणं पुनर्भेषजं कार्य्ययोनिर्धातुवैषम्यं कार्य्यं धातुसाम्यं कार्य्यफलं सुखावाप्तिः अनुबन्धः खल्वायुः देशो भूमिरातुरश्च कालः संवत्सरश्चातुरावस्था च प्रवृत्तिः प्रतिकर्म्मसमारम्भः उपायो भिषगादीनां सौष्ठवमभिविधानञ्च सम्यगिष्टाप्यस्योपायस्य विषयः पूर्व्वैर्व्वोपायविशेषेण व्याख्यात इति कारणादीनि दश-दशसु भिषगादिषु संसार्य्य सन्दर्शितानि तथैवानुपूर्व्व्या एतद्दशविधपरीक्ष्यमुक्तम् ।

तस्य यो यो विशेषो यथा यथा च परीक्षितव्यः स स तथा तथा व्याख्यास्यते कारणं भिषगित्युक्तमग्रे तस्य परीक्षा भिषङ्नाम यो भिषज्यति यः सूत्रार्थप्रयोगकुशलः यस्य चायुः सर्व्वथा विदितम् । यथावत् सर्व्वधातुसाम्यं चिकीर्षन्नात्मानमेवादितः परीक्षेत गुणेषु गुणतः कार्य्याभिनिर्वृत्तिं पश्यन् कच्चिदहमस्य कार्य्यस्याभिनिर्वर्त्तने समर्थो नवेति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

परीक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते ध्वस्यते कलिदुरितं येन । परि+क्षि वधे+क्विप् । कलिप्रशमनादस्य तथात्वम् । यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति । क्षि ऐश्वर्य्ये+क्विप् । "उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचिद्भवेत् ।" इति वाक्यात् उपसर्गस्य दीर्घत्वम् । अस्य निरुक्तिरुक्ता महाभारते । १ । ९५ । ८४ ।
"स भगवता वासुदेवेनार्थं जातबलवीर्य्यपराक्रमोऽकालजातोऽश्वत्थाम्ना दग्धस्तेजसा स्वेन संजीवितः । संजीवयित्वा चैनमुवाच । परिक्षीणे कुले जातो भवत्वयं परीक्षिन्नामेति ।") अभिमन्युपुत्रः । स युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत् । यथा,—
"अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थाम्नः प्रयुक्तब्रह्मास्त्रेण गर्भे एव भस्मीकृतो भगवतः सकलसुरासुरवन्दितचरणयुगलस्य आत्मेच्छया कारणमानुषरूपधारिणोऽनुभावात् पुनर्जीवितमवाप्य परीक्षिज्जज्ञे । योऽयं साम्प्रतमेतद्भूमण्डलमखण्डितायति धर्म्मेण पालयति ।" इति विष्णुपुराणे ४ अंशे २० अध्यायः ॥
"विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षितः ॥
प्रयास्यन्ति यदा चैते पूर्व्वाषाढां महर्षयः ।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे ॥"
इति तत्रैव २४ अः । ३९—४० ॥
(अनश्वपुत्रः । यथा, महाभारते । १ । ९५ । ४० ।
"अनश्वा खलु मागधीमुपयेमे अमृतां
नाम तस्यामस्य जज्ञे परीक्षित् ॥")

परीक्षितः, पुं, (परिक्षीणे कुरुकुले क्षियति स्म ईष्टे स्म इति । परि+क्षि+क्तः । उपसर्गस्य दीर्घत्वम् ।) अभिमन्युपुत्रः । (यथा, देवीभागवते । २ । ७ । ६ ।
"परिक्षीणेषु वंशेषु जातो यस्मात् नरः सुतः ।
तस्मात् परीक्षितो नाम विख्यातः पृथिवीतले ॥" * ॥
परीक्षा सञ्जाता अस्य । परीक्षा+इतच् । सतपरीक्षिते, त्रि । यथा, गोः रामायणे । २ । ४३ । ९ ।
"स हि राजगुणैर्युक्तो युवराजः परीक्षितः ॥")

परीणायः, पुं, (परितो नयनम् । परि+नी+घञ् । "उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचिद्भवेत् ।" इति णत्वे दीर्घः ।) परिणायः । शारीणां समन्तान्नयनम् । इत्यमरटीकायां भरतः ॥

परीत, त्रि, (परि+इ+क्तः ।) परिवेष्टितम् । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । ११५ । ७ ।
"ततः कामपरीताङ्गी सकृत्प्रचलमानया ।
व्रीडमाना स्वयं कुन्ती राज्ञः स्कन्धे समासजत् ॥")

परीतत्, त्रि, (परि+तन+क्विप्+"नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः ।) सर्व्वतोभावेन विस्तृतम् । इति मुग्धबोधव्याकरणम् ॥

परीभावः, पुं, (परिभाव्यते इति । परि+भावि+घञ् वैकल्पिकदीर्घश्च ।) परिभावः । अनादरः । इत्यमरटीकायां भरतः ॥

परीरं, क्ली, (पूर्य्यतेऽनेनेति । पॄ+"कॄपॄकटिपटिशौटिभ्य ईरन् ।" उणा ४ । ३० । इति ईरन् ।) फलम् । इत्युणादिकोषः ॥

परीरम्भः, पुं, (परिरभ्यते इति । परि+रभ+घञ् भावे वैकल्पिकदीर्घत्वम् ।) परिरम्भः । आलिङ्गनम् । इति भरतद्विरूपकोषः ॥

परीवर्त्तः, पुं, (परि+वृत्+घञ् । "उपसर्गस्य घञीति ।" ६ । ३ । १२२ । इति दीर्घः ।) परिवर्त्तनम् । तत्पर्य्यायः । प्रतिदानम् २ वैमेयः ३ निमयः ४ । इत्यमरः । २ । ९ । ८० ॥ परिवर्त्तः ५ वैमेयः ६ विनिमयः ७ परिदानम् ८ । इति शब्दरत्नावली ॥ कूर्म्मराजः । इति जटाधरः ॥

परीवादः, पुं, (परि+वद्+भावे घञ्। "उपसर्गस्य घञीति।" ६।३।१२२। इति दीर्घः।) दोषोत्कीर्त्तनम्। तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ जुगुप्सनम् १० आक्षेपः ११ अवर्णः १२ निर्वादः १३ अपक्रोशः १४ भर्त्सनम् १५ उपक्रोशः १६ अपवादः १७ आक्षारः १८। इति शब्दरत्नावली॥ (यथा,
"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नो हरति महिमानं जनरवः।
तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो नहि भवति कन्यां गतवतः॥")
वीणादिवादनम्। येन काष्ठविशेषादिना वीणादिर्वाद्यते सः। इति जटाधरः।

परीवारः, पुं, (परिव्रियतेऽनेनेति। परि+वृ+घञ्। उपसर्गस्य दीर्घः।) खड्गकोषः। जङ्गमः। (यथा, रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः।
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः॥")
परिच्छदः। इत्यमरः। ३। ३। १९८॥
परीवारः परिजने खड्गकोषे परिच्छदे।
इत्यनेकार्थदर्शनात्। जङ्गमो जङ्गमविशेषः परिजन इत्यर्थः। खड्गकोषोऽभिधायकः श्रेयान् इति रमानाथः। परिच्छदः शोभाजनकमुपकरणं छत्रचामरादिः सम्पन्नजनादिश्च एव परीवारः। इति तट्टीकायां भरतः॥

परीवाहः, पुं, (परितो वहत्यनेनेति। परि+वह+"हलश्च।" ३। ३। १२१। इति घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) जलोच्छ्रायः। इत्यमरः। १।१०।१०॥ (अत्र जलशब्द उपलक्षणमात्रं ज्ञेयम्। तेन द्रव्यमात्रस्य प्रवाहोऽप्यत्रार्थो बोद्धव्यः। यथा च महाभारते। ७। १९। ११।
"रुधिरस्य परीवाहान् पूरयित्वा सरांसि च॥"
बहिरस्य उह्यते इति।) राजयोग्यवस्तु। इति मेदिनी। हे, १३॥

परीष्टिः, स्त्री, (परि+इष्+"परेर्वा।" ६।१।१०७। इत्यस्य वार्त्तिं इति पक्षे क्तिन्।) अन्वेषणा। इत्यमरः। २। ७। ३२॥ परिचर्य्या। प्राकाम्यम्। इति मेदिनी। टे, ३९॥

परीसारः, पुं, (परिसरणम्। परि+सृ+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) परिसर्पा। सर्वतोगमनम्। इत्यमरः। ३। २। २१॥

परीहारः, पुं, (परिहरणम्। परि+हृञ् हरणे+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) अवज्ञा। इति शब्दरत्नावली॥

परीहासः, पुं, (परि+हस+घञ्। उपसर्गस्य दीर्घः।) परिहसनम्। (यथा, मार्कण्डेये। ३४। ८३।
"परीहासं न कुर्व्वीत परीवादञ्च वर्जयेत्॥")
तत्पर्य्यायः। द्रवः २ केलिः ३ क्रीडा ४ लीला ५ नर्म्म ६। इत्यमरः। १। ७। ३४॥ परिहासः ७ केलिमुखम् ८ दैरनम् ९। इति त्रिकाण्डशेषः॥

परुः, पुं, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकात् उः।) समुद्रः। स्वर्गलोकः। ग्रन्थिः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः॥

परुः, [स्] क्ली, (पॄ+"अर्त्तिपॄवपियजितनिधनितपिभ्यो नित्।" उणा। २। ११८। इति उस्।) ग्रन्थिः। इत्यमरः। ३। ४। १६२॥ (यथा, वाजसनेयसंहितायाम्। १३। २०। [परुषस्परि॥")
"काण्डात् काण्डात् प्ररोहन्ति परुषः (षः)

परुत्, व्य, (पूर्व्वस्मिन् वत्सरे इति। "सद्यः परुदिति।" ५। ३। २२। इति पूर्व्वस्य परभावः उत् च।) गतवत्सरः। इत्यमरः। ३। ४। २०॥

परुत्नः, त्रि, (परुत् गतवत्सरे भवः। परुत्+"चिरपरुत्परारिभ्यस्त्नो वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिं इति त्नः।) इति व्याकरणम्॥

परुद्वारः, पुं, (परुः पर्व्वणः पर्व्वतो वा द्वारमिव यस्य।) घोटकः। इति शब्दमाला॥

परुषं, क्ली, (पिपर्त्ति खलं वृद्धिं करोतीति। पॄ+"पॄनहिकलिभ्य उषच्।" उणा। ४। ७५। इति उषच्।) निष्ठुरवाक्यम्। इत्यमरः। १। ६। १९॥ (परेषां दैन्यजातिकुलविद्याशिल्पकर्म-वृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रख्यापन-दोषवचनं परुषमिति वदन्ति॥ यथा, दे: रामायणे। १। १। ८२।
"तामुवाच ततो रामः परुषं जनसंसदि।
आत्ययमाशा या सीता विदेह ध्यलनं सती॥")
नीलझिण्टी। इति शब्दचन्द्रिका। परुषकम्। इति भावप्रकाशः। (नीलझिण्टीशब्देऽस्य गुणादयो ज्ञातव्याः॥)

परुषं, त्रि, (पिपर्त्तीति। पॄ लि पूर्त्तौ+"पॄनहि-कलिभ्य उषच्।" उणा। ४। ७५। इति उषच्।) कर्बुरः। (यथा, हनूमच्चिन्तायाम्। १। १९।
"प्रोषितविविधनीलयवो भयानकः।
सुगन्धसेरमारवत्तेव निद्राहृतुरि॥")
रूक्षः। (यथा, दे: रामायणे। १। ६८। १०।
"अथ रात्र्यां व्यतीतायां राजा पञ्चालतां गतः।
मोहनस्य परो मोहः परुषो ध्यानमर्दकः॥")
निष्ठुरोक्तिः। इति मेदिनी। षे, ३०॥ (क्लिष्टः। यथा, आर्य्यासप्तशत्याम्। ३१६।
"भक्तप्रदीपेऽपि गिरिशे ऽदिगतो भस्मविलेपेन
शुभगापि।"
"भवन्तमपि गिरिशे।" इति तट्टीका॥)

परुषोक्तिकः, त्रि, (परुषैव उक्तिर्यस्य। ततः स्वार्थे कप् कन् वा।) निष्ठुरवक्ता। इति जटाधरः॥

परूषं, क्ली, (पॄ+ऊषन्।) फलविशेषः। परूषक इति वङ्गभाषा। फलसा इति हिन्दीभाषा च। तत्पर्य्यायः। परूषकम् २ हारहूरकम् ३। इति रत्नमाला। परुषम्। अल्पास्थि ५ परापरम् ६। इति भावप्रकाशः॥ नीलपर्णी ७ गिरिपीलु ८ परावतम् ९ नील-मण्डलम् १० पत्रः ११। अस्य गुणाः। आम-त्वम्। कटुत्वम्। कषायत्वम्। वातनाशित्वञ्च। तदाम-गुणः। पित्तरक्तनाशित्वञ्च। तत्पक्व-गुणाः। मधुरत्वम्। रुचिकरत्वम्। पित्तदोष-हरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥
"परूषकं कषायाम्लमामं पित्तकरं लघु।
तत् पक्वं मधुरं पाके शीतं विष्टम्भि बृंहणम्।
हृद्यं तृट्पित्तदाहामज्वरक्षयसमीरहृत्॥"
इति भावप्रकाशः॥
("मधूककैटर्य्यकपीलुफलानि
पियालपीलूनि परूषकाणाम्।
फलानि पैत्तानि निहन्ति पित्तं
हन्त्याश्च सर्वाण्युरसक्षितानाम्॥"
इति चरके प्रथमस्थाने सप्तमेऽध्याये॥)

परूषकं, क्ली, (परूष+स्वार्थे कन्।) परूषम्। इति राजनिर्घण्टः॥ (अस्य पर्य्याया यथा,—
"परूषकं परुषं स्यात् अल्पास्थि परापरम्॥"
इति वैद्यकरत्नमालायाम्॥
अस्य गुणाः चरके सूत्रस्थाने २७ अध्याये।
"अम्लं परूषकं द्राक्षा बदराण्यारुकाणि च।
पित्तश्लेष्मप्रकोपीणि कर्कन्धुनिकुचान्यपि॥"
"अथान्यमीषन्मधुरं कषायानुरसं लघु।
वातघ्नं पित्तजननमाग्नेयं च परूषकम्॥
तदेव पक्वं मधुरं वातपित्तनिबर्हणम्।
विपाके मधुरं शीतं रक्तपित्तप्रसादनम्॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्याये॥)

परेतः, त्रि, (परं लोकमितः।) मृतः। इत्यमरः। २। ८। ११७॥ (यथा, कुमारे। ५। ६८।
"अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु॥")
भूतान्तरे पुं। इति मेदिनी। ते, १०६॥

परेतराट्, [ज्] पुं, (परेतेषु प्रेतेषु राजते इति। राज् दीप्तौ+"सत्सूद्विषेति।" ३। २। ६१। इति क्विप्। यद्वा, परेतानां प्रेतानां राट्।) प्रेतराजः। यमः। इत्यमरः। १। १। ६१॥

परेद्यवि, व्य, परस्मिन्नहनि। ("सद्यःपरुदिति।" ५। ३। २२। इति निपातनात् साधुः।) पर-दिनम्। इति मुग्धबोधव्याकरणम्॥ यथा,—
"परेद्यवद्यपूर्व्वेद्युरन्येद्युश्चापि विक्लवम्।
उभयद्युश्च सौमित्रिः प्रियमायुष्मतामगात्॥"
इति भट्टिः। ६। १६॥

परेद्युः, [स्] व्य, (पर+एद्युस्।) परदिनम्। इति मुग्धबोधव्याकरणम्॥

परेशं, त्रि, परः आत्मा यस्य। ("इजादेः सर्व्वनाम्नः ईड्।" ६। ३। ९०। इत्यस्य वार्त्तिं "आत्मनश्च।" इति ईश्। इदम्।) इति सिद्धान्तकौमुदी॥

परेष्टुका, स्त्री, (परैरिष्यते इति। इष+बाहुलकात् तुन्। स्वार्थे कन्। स्त्रियां टाप्।) बहुसूतिः। बहुप्रसूता गौः। इत्यमरः। २। ९। ७०॥

परैधितः, त्रि, (परैरेधितः सम्वर्द्धितः ।) श्वौदासीन्येन परपुष्टः । परेण संवर्द्धितः । तत्पर्य्यायः । पराचितः २ परिस्कन्दः ३ परजातः ४ । इत्यमरः । २ । १० । १८ ॥ कोकिले पुं । इति शब्दमाला ॥

परोक्षं, क्ली, (अक्ष्णोः परम् ।) अप्रत्यक्षम् । अयाचात् । यथा, चाणक्यशतके ।
"परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥"
(परोक्षं परोक्षत्वमित्यर्थः विद्यतेऽस्य । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) तद्विशिष्टे त्रि ॥ (शुक्लाभन्यादिज्ञानविशेषः । यथा, पञ्चदश्याम् । ७ । ३१ ।
"अस्ति कूटस्य इत्यादौ परोक्षं वेत्ति वार्त्तया ॥")

परोक्षः, पुं, (परोक्षमस्यास्तीति । शुक्लाभवाक्यमनय जन्यदाढ्यार्थेवेति बोध्यम् ।) तपस्वी । इति शब्दमाला ॥ यवातिपुत्रस्यानोः पुत्रविशेषः । यथा, भागवते । ९ । २३ । १ ।
"अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ॥")

परोपकारः, पुं, (परेषामुपकारः ।) परेषामुपकृतिः । धर्म्मसम्बन्धिहितम् । यथा,—
"एष मे प्रवरो भाति शुद्धधर्म्मप्रदो विधिः ।
परोपकरणादन्यत् धर्म्मकृत्यं स्मृतं बुधैः ॥
परोपकारिभिर्द्दत्ता स्वप्राया ऋषिभिः पुरा ।
यद्धि प्रेतोपकारः स्यात् किन्न लब्धं मया पुनः ॥
दधीचिना पुरा गीतः श्लोकश्च श्रूयते भुवि ।
सर्व्वधर्म्ममयः सारः सर्व्वधर्म्मज्ञसम्मतः ॥
परोपकारः कर्त्तव्यः प्राणैः कण्ठगतैरपि ।
परोपकारजं पुण्यं तुल्यं क्रतुशतैरपि ॥"
इति पद्मोत्तरखण्डे २२ अध्यायः ॥

परोवरीणः, त्रि, परांश्चावरांश्चानुभवति । ("परोवरपरम्परपुत्रपौत्रमनुभवति ।" ५ । २ । १० । इति ।) अवरस्योत्वं निपात्यते । श्रेष्ठार्थेऽप्युक्तः । इति सिद्धान्तकौमुदी ॥

परोष्णी, स्त्री, (परः प्रकृष्ट उष्णो यस्याः ।) तैलपायिका । इत्यमरः । २ । ५ । २६ ॥ (काश्मीरदेशस्थनदीविशेषः । यथा, राजतरङ्गिण्याम् । ८ । २००७ ।
"कोटकोमककोष्ठाद्यैर्मितैर्युक्तोऽपि सादिभिः ।
सोऽर्मा परोष्णीं सन्तुसेना निर्म्मायाप्रमा-
थिनीम् ॥")

पर्कटिः, } स्त्री, (पृच् धी च् सम्पर्के+बाहु-
पर्कटी, } लकादटिः ।"कृदादिभ्यश्च ।"४।१।४५ इति वा ङीष् ।) प्लक्षवृक्षः । इत्यमरटीकायां भरतः ॥ पाकुड़ इति भाषा ॥ (यथा, हितोपदेशे । "अस्ति तत्र महान् पर्कटीवृक्षः ॥") तस्य गुणाः भावप्रकाशे ।
"प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।
दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ॥"

पर्कटी, [न्] पुं, वृक्षविशेषः । पाकुड़ इति भाषा । तत्पर्य्यायः । प्लक्षः २ जटी ३ । इत्यमरः । २ । ४ । ३२ ॥ कमण्डलुतरुः ४ । इति रत्नमाला ॥ कपीतनः ५ क्षीरी ६ सुपार्श्वः ७ कमण्डलुः ८ शृङ्गी ९ अवरोहः १० शाखी ११ गर्द्दभाण्डः १२ पीतनः १३ दृढप्ररोहः १४ प्लवकः १५ प्लवङ्गः १६ महाबलः १७ । अस्य गुणाः कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । विशेषतो दृढप्ररोहस्यैते गुणाः । इति राजनिर्घण्टः ॥

पर्ज्जनी, स्त्री, (परं स्वार्थं जनयतीति । पर्+जन+णिच् । "कर्म्मण्यण् ।" ३।२।१। इत्यण् । स्त्रियां ङीप् ।) दारुहरिद्रा । इत्यमरः।२।४।१०२॥

पर्ज्जन्यः, पुं, (पर्षति सिञ्चति वृष्टिं ददातीति । पृष सेचने+"पर्ज्जन्यः ।" उणा । ३ । १०३ । इति निपातनात् षकारस्य जकारत्वे साधुः ।) इन्द्रः । (यथा, ऋग्वेदे ।६।५२।१६ । [स्तुतिं नः ॥"]
"अग्नीपर्ज्जन्याववतं धियं मेऽस्मिन् हवे सुहवा
शब्दायमानमेघः । इत्यमरः । ३ । ३ । १४६ ॥ मेघशब्दः । इति विश्वः ॥ गर्ज्जन्नपि मेघः । इति भरतः ॥ यथा, श्रीभगवद्गीतायाम् ।
"यज्ञाद्भवति पर्ज्जन्यः पर्ज्जन्यादन्नसम्भवः ॥"
(कश्यपपत्न्या.मुनेः पुत्रविशेषः । स तु गन्धर्व्वविशेषः । यथा, महाभारते । १ । ६५ । ४४ ।
"तथा शालिशिरा राजन् ! पर्ज्जन्यश्च चतुर्द्दश ।
कलिः पञ्चदशश्चैषां नारदश्चैव षोड्शः ॥"
पर्ज्जन्य इव सर्व्वकामप्रदानात् विष्णुः । यथा, महाभारते । १३ । १४९ । १०० ।
"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पावनोऽनिलः ॥"
"पर्ज्जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वान् कामानभिवर्षतीति पर्ज्जन्यः ।" इति शाङ्करभाष्यम् ॥)

पर्ज्जन्या, स्त्री, (पर्ज्जन्य+टाप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

पर्ण, त् क हारिते । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-परं-सकं-सेट् ।) हरित् पीतवर्णस्तस्य भावः हारित्यम् । पर्णयति पर्णापयति चम्पकम् । इति दुर्गादासः ॥

पर्णं, क्ली, (पिपर्त्तीति । पृ+"धापृवस्यज्यतिभ्यो नः ।". उणा । ३ । ६ । इति नः । यद्वा, पर्णयतीति । पर्ण त् क हारित्ये+अच् ।) पत्रम् । इत्यमरः । २ । ४ । १४ ॥ (यथा, कुमारे । ५ । २८ ।
"स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥")
ताम्बूलम् । यथा, राजनिर्घण्टे ।
"अनिधाय मुखे पर्णं पूगं खादति यो नरः ।
सप्तजन्म दरिद्रः स्यादन्ते न स्मरते हरिम् ॥
ताम्बूलधारित्वमपि यथा,—
"अनाचार्य्योऽशुचिश्चैव दृढभक्तिश्च पार्व्वती ।
ताम्बूलधारी भवति नारी वामेव तद्गुणा ॥"
इति मातृस्ये १५८ अध्यायः ॥
(बिभर्त्ति मालयति प्राणपालनादिति । पृ+न । पलः । यथा, महाभारते । १ । ३३ । २४ ।
"तद्वृत्तमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
दृष्टानि सर्व्वभूतानि नाम चक्रुर्गरुत्मतः ।
सुरूप पत्रमालक्ष्य तस्य पर्णमनुत्तमम् ॥")

पर्णः, पुं, (पिपर्त्तीति । पृ पालने+"धापृवस्यज्यतिभ्यो नः । उणा । ३ । ६ । इति नः । पलाशवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (यथा, ऋग्वेदे । १० । ७ । ५ ।
"अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥")

पर्णकारः, पुं, (पर्णं ताम्बूलम् । करोति उत्पादयतीति । पर्ण+कृ+अण् ।) बारजीवी । बारइ इति भाषा ॥ इति केचित् ॥

पर्णकृच्छ्रः, पुं, (पर्णैः साध्यं कृच्छ्रं व्रतं यत्र । पत्रकृच्छ्रव्रतम् । यथा, याज्ञवल्क्ये । ३।३१६ ।
"पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः ॥"

पर्णखण्डः, पुं, (पर्णमेव खण्डो यस्य । पुष्पादिहीनत्वात्तथात्वम् ।) वनस्पतिः । इति शब्दचन्द्रिका ॥ (पर्णस्य ताम्बूलस्य खण्डः ।) ताम्बूलखण्डश्च ॥

पर्णचोरकः, पुं, (पर्णं चोरयतीति । पर्ण+चोरि+ण्वुल् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

पर्णध्वत्, [स्] त्रि, पर्ण+ध्वन्स्+कर्त्तरि क्विप् । पर्णध्वंसकर्त्ता । इति व्याकरणम् ॥

पर्णनरः, पुं, (पर्णैः पलाशपत्रैर्निर्म्मितो नरः नराकारः पुत्तलकः ।) मित्रादिदेशास्थलाभे दाहार्थं तत्प्रतिनिधीभूतशरपलाशपत्ररचितोर्णातन्तुवेष्टितयवपिष्टलिप्तनराकारपुत्तलकः । यथा,
"आश्वलायनगृह्यपरिशिष्टम् । अस्थिनाशे पलाशवृन्तानां त्रीणि षष्टिशतानि पृथक्प्रसितानि कृत्वा,
अधीत्यङ्गानु शिरसि ग्रीवायां दश योजयेत् ।
उरसि त्रिंशतं दद्यात् विंशतिं जठरे तथा ॥
बाहुभ्याञ्च शतं दद्यात् दद्यादङ्गुलिभिर्दश ।
द्वादशार्द्धं वृषणयोरष्टार्द्धं शिश्न एव च ॥
ऊरुभ्याञ्च शतं दद्यात् विंशतं जानुजङ्घयोः ।
पादाङ्गुलीषु च दश एतत् प्रेतस्य लक्षणम् ॥
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ॥'
आदिपुराणम् ।
'तदलाभे पलाशोत्थैः पर्णैः कार्य्यः पुमानपि ।
शतैस्त्रिभिस्तथा षष्ट्या शरपर्णैर्विधानतः ॥'
तदलाभे अस्थ्यलाभे । अथ पलाशपत्रशरपत्रयोः तुल्यत्वेऽपि आश्वलायनवचनेऽपि प्रतिकृतौ शरपत्रस्य लाभः । अत्रापाराद्दृष्टोत्स्वाच शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि । ततो वेष्टनं ऊर्णासूत्रेण लेपनं यवपिष्टेनेति । अस्थ्योपाध्यमनरदाहे देशविशेषः । तद्व्यतिरिक्तपर्णनरदाहे तु विरामम् । यत् पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदित्यादि पुराणात् । यत्पारर्यः ।
'पूर्व्वाचेत् पूर्णञ्च तदलौति कदाचन ।
तदलाभे पलाशस्य समभो हि कुशः क्रिया ॥'

र्थि यजमानस्याभे कत्याममावास्यां यजमानस्य तन्त्रपुत्तलकस्य दाहक्रिया। पुनरपि यजमाने व्याप्तिलाभे पुनरपि अग्निदाहक्रिया विहिता तस्मात् यदि पुनरस्यौव प्राप्यते तदा पुनर्दाह-विराधायोऽपि कर्त्तव्ये न पुनः पिण्डादिदानं यत्तन्मातृयुक्तेः। विष्णुः।

"विपन्ने तु गते पर्णनरं दहात्तनयिकः।
विपन्नाभ्यन्तरे राजनैव पर्णनरं दहेत्॥
तद्दग्धमध्यमी प्राप्य दर्शं याति विपन्नकः॥"

दहेदिति शेषः। अस्यार्थः। अशौचाभ्यन्तरे यदि पर्णनरदाहं न कुर्यात्तदा मरणदिना-वधिविपन्नाभ्यन्तरं दाहः कार्य्य इत्यर्थः। इति हरिदासतर्काचार्य्यः। पारस्करोऽप्येवम्। अत्र चारोऽपि ईदृश एव।

'पर्णनरं दहेन्नैव विना दर्शं कदाचन।
अस्थ्रामलाभे दर्शे तु ततः पर्णनरं दहेदिति।'
दीपकलिकायां तदनुवचनात् दर्शे पर्णनर-दाहः। दर्शमिश्रवारमीरिति क्वचित् पाठः। अमावस्यां कृत्वा पिण्डकर्मापि तत्प्रभृत्य प्राप्यस्योक्तेः।" इति शुद्धितत्त्वम्॥

पर्णभेदिनी, स्त्री, (पर्णानि भिनत्तीति। पर्ण+भिद्+णिनिः स्त्रियां ङीप्।) प्रियङ्गुः। इति राजनिर्घण्टः॥

पर्णभोजनः, पुं, (पर्णान्येव भोजनं यस्य। पर्णानि भुङ्क्ते इति वा। भुज्+कर्त्तरि ल्युः।) छागलः। इति शब्दरत्नावली॥

पर्णमाचालः, पुं, (पर्णमाचालयतीति। पर्ण+आ+चल+णिच्+अच्। निपातनात् विभक्तेर्लोपाभावः। बाहुलकात् मुम् वा।) कर्म्मरङ्ग-वृक्षः। इति शब्दमाला॥

पर्णमृगः, पुं, (पर्णचारी मृगः पशुः।) वन्य-पशुविशेषः। यथा,—

"वनौकोऽश्वमार्ज्जारश्वमर्कटिकादयः।
एते पर्णमृगाः प्रोक्ताः सुश्रुतादैर्महर्षिभिः॥
वनौका वानरो वृक्षमार्ज्जारो वृक्षविडालः।
वृक्षमर्कटिका वृक्षी इति लोके। वनौका मांसगुणाः। [हिताः।
"मधुरा पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे
मूत्रवर्चःकासघ्नाः शोणितार्श्वचूर्णिताः॥"
इति भावप्रकाशः॥

पर्णलता, स्त्री, (पर्णप्रधाना लता।) नागवल्ली। इति राजनिर्घण्टः॥

पर्णवल्ली, स्त्री, (पर्णप्रधाना वल्ली।) पलाशी लता। इति राजनिर्घण्टः॥

पर्णशाला, स्त्री, (पर्णैः पत्रादिभिः रचिता शाला। मध्यपदलोपिसमासः।) तृणैर्ना पर्णैर्निर्म्मितगृहम्। तत्पर्य्यायः। उटजम् २। इत्यमरः। २। २। ६॥ पर्णोटजम् ३। इति शब्दरत्नावली। पर्णनी शाला। पर्णप्रधाना शाला वा। इति भरतः॥ (यथा, रघुः। १। ९५।

"निर्द्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः।

तस्मिन्नाध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय॥"
मध्यदेशस्थग्रामविशेषः। यथा महाभारते। १३। ६८। ३।
"मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह।
गङ्गायमुनयोर्म्मध्ये यामुनस्य गिरेरधः॥
पर्णशालेति विख्यातो रमणीयो नराधिप।॥")

पर्णसिः, पुं, (पॄ पूर्त्तौ+"पानीविषिभ्यः पः।" इति सिः। "पॄ पूरणे+"धापॄवस्यज्यतिभ्यो नः।" इत्यसिः।" उणां। ४। १०७। इति असिर्नुक् च।) पद्मम्। इत्युणादिकोषः॥ जलगृहम्। जलटुङ्गी इति भाषा। इति सिद्धान्तकौमुद्या-मुणादिवृत्तिः॥ शाकम्। आभरणक्रिया। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्णसिग्वः, पुं, (पर्णं अश्नाति भक्षयतीति। अश्+क्तः। पर्णानामशनः।) मेघः। इति शब्दमाला॥

पर्णासः, पुं, (पर्णैरसति दीप्यति शोभते इति यावत्। अस दीप्तौ+अच्।) तुलसी। इत्यमरः। २। ४। ७९॥

पर्णिनी, स्त्री, (पर्णानि सन्त्यस्याः। पर्ण+इनिः।) माषपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते उत्तरतन्त्रे ६२ अध्याये।
"वर्द्धिकरञ्जनीकुष्ठ पर्णिनीमादियाक्वयेः॥"
अप्सरोविशेषः। यथा, हरिवंशे। २१८। ३९।
"मेनकासहजन्या च पर्णिनी पुञ्जिकास्थला॥")

पर्णी, [न्] पुं, (पर्णानि सन्त्यस्य। पर्ण+इनिः।) वृक्षः। इति हेमचन्द्रः। ४। १८०॥

पर्णोटजं, क्ली, (पर्णनिर्म्मितं उटजम्।) पर्ण-शाला। इति शब्दरत्नावली॥

पर्द्द, ङ अपानोत्सर्गे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, पर्द्दते शद्धः। इति दुर्गादासः॥

पर्द्दः, पुं, (पृ+बाहुलकात् दः।) केशपक्षः। इत्युणादिकोषः॥ (पर्द्द अपानोत्सर्गे+घञ्।) अपानोत्सर्गश्च॥

पर्द्दनं, क्ली, (पर्द्द+ल्युट्।) अपानोत्सर्गः। इति हेमचन्द्रः। ६। १९॥ पाद् इति भाषा॥

पर्ण, क्ली, (पृ पालनपूरणयोः+"शक्यमितम्यमपवाप्य-ग्रुयममेभ्यस्त्यः।" उणां। ३। १८। इति निपा-तनात् सिद्धम्।) चरत्वम्। यज्ञम्। इत्युणादि-कोषः॥ यज्ञपात्रप्रभेदम्। इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः॥

पर्पटः, पुं, (पर्प+अटन्।) क्षुपविशेषः। क्षेत-पापड़ा इति चट्टभाषा। क्षेतपापर इति हिन्दीभाषा। तत्पर्य्यायः। वरकः २ तिक्तः ३। इति रत्नमाला॥ चरकः ४ रेणुः ५ वर्म्मकण्टकः ६ पांशुः ७ अरकः ८ शीतः ९ शीतप्रियः १० पांशुः ११ कल्पाङ्गः १२ कर्म्मकण्टकः १३ तस्य-स्थानः १४ प्रगन्धः १५ तृषितः १६ कृष्ण-पुष्पकः १७ तिक्ताङ्गः १८ बहुपत्रः १९ वक्रः २०। अस्य गुणाः। शीतत्वम्। तिक्तत्वम्। पित्तश्लेष्मज्वरदाहवर्णविकारशमनाधि-त्वञ्च। इति राजनिर्घण्टः॥ * ॥

"पर्पटो हन्ति पित्तास्रतृष्णाज्वरहरः शतः।
कथितः पांशुपर्य्यायस्तथा कवचनामकः॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान्।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः॥"
इति भावप्रकाशः॥ * ॥

पिष्टकभेदः। पापड़ इति भाषा। तस्य गुणः। लघुत्वम्। रुच्यत्वञ्च। इति राजवल्लभः॥
"धूमसौरभिता पिष्टपरिमाणावगुण्ठिताः।
चौरकमलिकाभ्यां च तवे तप्ता च वेल्लिताः॥
दीपनाः पाचना रुच्या गुरवः किञ्चिदीरिताः।
मौद्गाश्च तद्गुणाः प्रोक्ता विशिष्टाश्चणजा हिताः॥
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः।
स्वेदे भृष्टास्तु ते सर्व्वे भवेयुर्मध्यमा गुणैः॥"
इति भावप्रकाशे पूर्व्वखण्डे द्वितीयभागे॥

पर्पटद्रुमः, पुं, (पर्पट एव द्रुमः।) कुम्भीवृक्षः। इति राजनिर्घण्टः॥

पर्पटी, स्त्री, (पर्पट+ङीष्।) सौराष्ट्रमृत्तिका। इति रत्नमाला॥ पिष्टकभेदः। इत्युणादिकोषः॥ उपरदेशभवसुगन्धिद्रव्यम्। पपरीति प्रसि-द्धम्। पद्मावतीति च। तत्पर्य्यायः। रञ्जनी २ हस्वा ३ जतुका ४ जननी ५ जनी ६ जतु-कृष्णा ७ संस्पर्शा ८ जतुकृत् ९ चक्रवर्त्तिनी १०। अस्या गुणाः। तुवरत्वम्। तिक्तत्वम्। हिमत्वम्। वर्णकरत्वम्। लघुत्वम्। विषव्रणकण्डूकफपित्तास्रकुष्ठनाशित्वञ्च। इति भावप्रकाशः॥

पर्परीकः, पुं, (पिपर्त्तीति। पृ+"पर्पुरुषो ईकन्याभ्यासस्य।" उणां। ४। १९। इति ईकन् द्वित्वं अभ्यासस्य रुमागमश्च।) सूर्य्यः। इत्यु-णादिकोषः॥ वह्निः। इति सिद्धान्तशेषः। जलाशयः। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्परीकः, पुं स्त्री, पर्पेव अस्त्यत्रेति। (पर्प+ठन्।) राज्ञः। इति सिद्धान्तकौमुदी॥ [सेट्।)

पर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-

पर्य्यङ्कः, पुं, (परितोऽङ्क्यते इति। परि+अकि लक्षणे+घञ्।) खट्टा। पालङ्क इति भाषा॥ इत्यमरः। २। ६। १३८॥ तत्पर्य्यायः। (मञ्चः मञ्चकः २ पल्यङ्कः ३। इति हेमचन्द्रः। ३। ३४७।) पर्य्यङ्किका ४ परिकरः ५ अवसक्थिका ६।) इति च तत्रैव। ३। ३४१॥ (यथा, महा-भारते। ३। ४४। ८।
"अदोपविष्ट राजानं पर्य्यङ्के जालपाणी।
उपवृत्तं यथा श्रीशं राजश्री राविमश्चपि।
पयसाप्यनेशीत् कर्णों दुर्य्योधनमिदं तदा॥"
योगबन्धः। यथा, कुमारे। ३। ४५।
पर्य्यङ्कबन्धस्थिरपूर्व्वकाय-
मृज्वायतं सन्नमितोभयांसम्॥")

पर्य्यङ्कपादिका, स्त्री, (पर्य्यङ्कस्येव पादौ अस्याः। कप् टाप् च।) कोशाविम्बी। इति राज-निर्घण्टः॥

पर्य्यङ्कवन्धं, क्ली, (पर्य्यङ्कस्य बन्धनम्।) वस्त्रादिना पृष्ठजानुजङ्घादिबन्धनम्। चापडावा इति भाषा। यथा,—

"पादप्रसारणञ्चाग्रे तथा पर्य्यङ्कबन्धनम् ॥"

इत्यपराधगणनायां हरिभक्तिविलासः ॥

पर्य्यटनं, क्ली, (परितोऽटनं भ्रमणम् । परि+अट+भावे ल्युट् ।) सर्व्वतोभावेनाटनम् । पुनः पुनर्गमनम् । भ्रमणम् । तत्पर्य्यायः । व्रज्या २ अटाट्या ३ । इत्यमरः । २ । ७ । ३६ ॥ (यथा, भागवते । ६ । ७ । १८ ।

"भूमेः पर्य्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः ॥")

पर्य्यनुयोगः, पुं, (परितोऽनुयोगः पृच्छा । परि+अनु+युज्+भावे घञ् ।) जिज्ञासा । इति हलायुधः ॥ ("एतेनास्यापि पर्य्यनुयोगस्यानवकाशः ।" इति दायभागः ॥)

पर्य्यन्तः, पुं, (परितोऽन्तम् । प्रादिसमासः ।) शेषसीमा । इति दुर्गादासः ॥ (यथा, पञ्चतन्त्रे । १ । १४१ ।

"पर्य्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि ।
न कथञ्चित् महीपस्य चित्तान्तः केनचित् क्वचित् ॥"

समीपम् । यथा, हरिवंशे । १२२ । ५३ ।

"पर्य्यन्तदेशं सरसेन देवी
लिलेप सा लोहितचन्दनेन ॥"

पार्श्वः । यथा, रघौ । १८ । ४३ ।

"पर्य्यन्तसञ्चारितचामरस्य
कपोललोलोभयकाकपक्षात् ।
तस्याननादुच्चरितो विवादः
चस्खाल वेलास्वपि नार्णवानाम् ॥")

पर्य्यन्तभूः, स्त्री, (पर्य्यन्तस्य शेषसीमाया भूः पृथिवी ।) नदीनगरपर्व्वतादेरुपान्तभूमिः । तत्पर्य्यायः । परिसरः २ । इत्यमरः । ३ । १ । १४ ॥

पर्य्यन्तिका, स्त्री, (परितः सर्व्वतो भावेन अन्तिका गुणादीनां नाशिका ।) गुणभ्रंशः । इति हारावली । २१० ॥

पर्य्यन्यः, पुं, (पर्ज्जन्य+पृषोदरादित्वात् साधुः ।) इन्द्रः । शब्दायमानमेघः । मेघशब्दः । इत्युणादिकोषः ॥ (यथा, गोः रामायणे । ६ । २१ । ३२ ।

"ततो दुन्दुभिनिर्घोषः पर्य्यन्यनिनदोपमः ॥")

पर्य्ययः, पुं, (परि क्रमशः अयो गमनम् ।) क्रमोल्लङ्घनम् । (परि शास्त्रलोकाचारमर्य्यादां परिक्रम्य अयो गमनमुल्लङ्घनमित्यर्थः ।) व्यतिक्रमः । शास्त्रतो लोकव्यवहाराच्च प्राप्तस्यार्थस्य परित्यागः । तत्पर्य्यायः । अतिपातः २ उपात्ययः ३ । इत्यमरभरतौ ॥ विपर्य्ययः ४ अत्ययः ५ । अतिपतनम् ६ अत्ययः ७ व्यतिक्रमः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ४८ । १९ ।

"यथाभ्यासादधे चाहं यथा कुरुवरस्तथा ।
अधर्मं धारये चोग्रं प्रतीच्छन् कालपर्य्ययम् ॥")

पर्य्ययणं, क्ली, (परितोऽयते गच्छत्यनेन । परि+अय+ल्युट् ।) अश्वसज्जा । इति शब्दमाला ॥ जिन् इति भाषा ॥

पर्य्यवस्था, स्त्री, (परितोऽवस्थानम् । परि+अव+स्था+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इत्यङ् ।) विरोधनम् । इत्यमरः । ३ । २ । २१ ॥

पर्य्यवस्थाता, [ऋ] त्रि, (पर्य्यवतिष्ठते इति । परि+अव+स्था+तृच् ।) पर्य्यवस्थाकर्त्ता । विरोधी । इति हलायुधः ॥ (यथा, किरातार्ज्जुनीये । ११ । १३ ।

"अन्तकः पर्य्यवस्थाता जन्मिनः सन्ततापदः ।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥")

पर्य्यवस्थानं, क्ली, (परितोऽवतिष्ठतेऽनेन । परि+अव+स्था+करणे ल्युट् ।) विरोधः । इति जटाधरः ॥ सर्व्वतोभावेनावस्थितिश्च ॥

पर्य्यस्तः, त्रि, (परितोऽस्तः क्षिप्तः । असु इर क्षेपे+क्तः ।) पतितः । हतः । इति मेदिनी । ते, १२१ ॥ (सर्व्वतः प्रसृतः । विस्तृतः । यथा, हरिवंशे । १५६ । ९० ।

"पर्य्यस्ता पृथिवी तत्र्ता शाम्बी सरथकुञ्जराम् ॥")

पर्य्यस्तिका, स्त्री, (परितः अस्यते क्षिप्यते शरीरमत्र । परि+अस क्षेपे+अधिकरणे क्तिन् । ततः स्वार्थे कन् ।) खट्टा । इति हेमचन्द्रः । ३ । ३४३ ॥

पर्य्याणं, क्ली, (परितो याति गच्छत्यनेनेति । परि+या+ल्युट् । पृषोदरादित्वात् साधुः ।) अश्वपल्ययनम् । इति हेमचन्द्रः । ४ । ३१८ ॥ (यथा, बृहत्संहितायाम् । ६३ । ६ ।

"आरोहणमन्यवाजिनां
पर्य्याणादियुतस्य वाजिनः ।
उपवाह्य तुरङ्गमस्य वा
कल्यस्यैव विपन्नशोभना ॥")

पर्य्याप्तं, क्ली, (परि+आप्+भावे क्तः ।) यथेष्टम् । तृप्तिः । शक्तिः । निवारणम् । इति मेदिनी । ते, १२७ ॥ त्रि, प्राप्तः ॥ (शक्तिसम्पन्नः । यथा, भगवद्गीतायाम् । १ । १० ।

"पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम् ।"

"पर्य्याप्तं समर्थं भाति इति ।" श्रीधरस्वामी ॥)

पर्य्याप्तिः, स्त्री, (परि+आप+क्तिन् ।) परित्राणम् । मरणोद्यतस्य निवारणम् । इत्यमरभरतौ ॥ यथाशः । प्राप्तिः । इति शब्दरत्नावली ॥ (तृप्तिः । यथा, कथासरित्सागरे । २६ । १६६ ।

"नास्ति बधनिर्णा यतुष्य भवि पर्य्याप्तये धनम् ॥"

शक्तिः । यथा, तत्रैव । २६ । ४० ।

"प्रविष्टः सोऽप्यपश्यत्तां तत्र नेत्रोत्सवप्रदाम् ।
धातुरद्भुतनिर्म्माणपर्य्याप्तिमिव रूपिणीम् ॥")

स्वरूपसम्बन्धविशेषः । स च सर्व्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः । पदार्थभेदेन नाना । यथा । पर्य्याप्तिसम्बन्धेन एको घट इमौ द्वौ इत्यादि प्रतीतिसाधकः स्वरूपसम्बन्धविशेषः । इति दीधितिः ॥ समवायेन गुणे गुणत्वाभावेऽपि चत्वारो गुणा इत्यादि प्रतीत्या गुणादिषु संख्यादिमत्त्वनियामकोऽपि तादृशसम्बन्धः । इति सामान्याभावे जगदीशः ॥ द्वितीयद्युत्पत्तिवादे गदाधरभट्टाचार्य्यश्च ॥

पर्य्यायः, पुं, (परि+इण गतौ+"परावनुपात्यय इणः ।" ३ । ३ । ३८ । इति घञ् । क्रमप्राप्तस्यानतिपातोऽनुपात्ययः ।) पर्य्ययणम् । क्रमः । (यथा, कुमारे । २ । ३६ ।

"पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥")

तत्पर्य्यायः । आनुपूर्व्वी २ आवृत् ३ परिपाटी ४ अनुक्रमः ५ । इत्यमरः । २ । ७ । ३७ ॥ आनुपूर्व्व्यम् ६ आनुपूर्व्वम् ७ आनुपूर्व्वकम् ८ परिपाटिः ९ । इति भरतादयः ॥ प्रकारः । अवसरः । इति मेदिनी । ये, ८९ ॥ निर्म्माणम् । द्रव्यधर्म्मः । इति हेमचन्द्रः ॥ ६ । १३९ । क्रमे एकार्थवाचकाः शब्दाः पर्य्यायाः । इति विजयरक्षितः ॥ सम्पर्कविशेषः । येन सह यत्सम्पर्कः सम्बन्धस्तेन सह तत्पर्य्यायः । यथा,—

"समानं कुलभावश्च दानादानक्रियैव च ।
तयोर्व्विप्रसमानं हि पर्य्यायश्च प्रचक्षते ॥"

इति कुलदीपिका ॥

(अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे १० । १०४ ।

"क्वचिदेकमनेकस्मिन्ननेकञ्चैकगं क्रमात् ।
भवति क्रियते वा चेत् तदा पर्य्याय इष्यते ॥"

उदाहरणं क्रमेण यथा,—

"स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः ॥

विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः ।
वृककाकशिवास्तत्र धावन्त्यरिपुरे तव ॥

विम्बाधरागादधरान्निवर्त्तित-
स्तनाङ्गरागादरुणाच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥

ययोरारोपितस्तारो हारस्तेऽरिवधूजनैः ।
निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुबिन्दवः ॥

एषु च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च । क्वचिदाधेयमपि । यथा, 'स्थिताः क्षणं पक्ष्मसु' इत्यत्र उदबिन्दवः पक्ष्मादावसंहतरूप आधारे क्रमेणाभवन् । 'विचरन्ति' इत्याधेयभूताः वृकादयः संहतरूपारिपुरे क्रमेणाभवन् । एवमन्यत् । अत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालङ्काराद्भेदः । विनिमयाभावात् परिवृत्तेः ॥")

पर्य्यायशयनं, क्ली, (पर्य्यायेण क्रमेण शयनम् ।) प्रहरिकादीनां क्रमेण शयनम् । तत्पर्य्यायः । उपशायः २ विशायः ३ । इत्यमरभरतौ ॥

पर्य्यासः, पुं, (पर्य्यस्यते इति । परि+अस्+घञ् ।) पतनम् । हननम् । इति पर्य्यस्तशब्दार्थदर्शनात् ॥ (परिवर्त्तः । यथा, मार्कण्डेयपुराणे । ४२ । २ ।

"महाभूतप्रमाणञ्च लोकानांकल्पनैव च ।
पर्य्यासं परिमाणञ्च गतिश्चन्द्रार्कयोरपि ॥")

पर्य्युदसनं, क्ली, (पर्य्युदस्यते इति । परि+उत्+अस+"कृत्यल्युटो बहुलम् ।" ३ । ३ । ११३ । इति ल्युट् ।) वर्जनम् । इत्यमरः । ३ । ९ । ११ ॥

"अथोत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम्।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम्।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः॥
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः।
दिवं यास्यन्ति मे पूर्व्वे गङ्गातोयपरिप्लुताः॥
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता॥"

इति मात्स्ये १२१ अध्यायः॥

अथ दशधा पर्व्वतदानम्।
"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः॥
धान्यशैलादयो देया यथाशास्त्रं विजानता।
तीर्थेष्वायतने वापि गोष्ठे वा भवनाङ्गने॥
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम्।
प्रागुदक्प्रवणं तद्वत् प्राङ्मुखं वा विधानतः॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम्॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः॥
मेरुर्महाव्रीहिमयस्तु मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात्।
पूर्व्वेण मुक्ताफलवज्रयुक्तो
याम्येन गोमेदकपुष्परागैः॥
पश्चाच्च गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवाल-
लतान्वितः शुक्तिशिलातलः स्यात्॥
ब्रह्माथ विष्णुर्भगवान् पुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात्।
मूर्द्धन्यवस्थानममत्सरेण
कार्य्यं त्वनेकैश्च पुरोहितौघैः॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतः स्यात्।
तथेक्षुवंशावृतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण पीतानि च दक्षिणेन।
वासांसि पश्चादथ कर्व्वुराणि
रक्तानि चैवोत्तरतो घनाली॥
रौप्यान्महेन्द्रप्रमुखांस्तथाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलालीश्च मनोरमाः स्या-
न्मनोरमं माल्यविलेपनञ्च॥
वितानकञ्चोपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितं वा।
इत्थं निवेश्यामरशैलमग्र्य-
मतस्तु विष्कम्भगिरीन् क्रमेण॥
तुरीयभागेन चतुर्दिशन्तु
संस्थापयेत् पुष्पविलेपनाढ्यान्॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचिह्नम्।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम्॥
क्षीरारुणोदसरसाथ वनेन चैव
रौप्येण शक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनश्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजम्बुः॥
हैमेन यक्षपतिना घृतमानसेन
वस्त्रैश्च राजतवनेन च संयुतः स्यात्।
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम्॥
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे।
संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सुवस्त्रम्॥
पुष्पैश्च हेमवटपादपशेखरन्त-
माकारयेत् कनकधेनुविराजमानम्।
माक्षीकभद्रसरसा च वनेन तद्व-
द्रौप्येण भास्वरवता च युतं विधाय॥
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः।
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यस्तिलैर्यवघृतेन समित्कुशैश्च॥
रात्रौ च जागरमनुद्धतगीततूर्य्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम्।
त्वं सर्व्वदेवगणधामनिधे! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत! नाशयाशु॥
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
सम्पूजितः परमभक्तिमता मया हि॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः।
मूर्त्तामूर्त्तपरं बीजमतः पाहि सनातन॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम्।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे॥
यस्मादशून्यममरैर्नारीभिश्च शिरस्तव।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत्।
यस्माच्चैत्ररथेन त्वं भद्राश्वेन च वर्षतः॥
शोभसे मन्दर! क्षिप्रमतस्तुष्टिकरो भव।
यस्माच्चूड़ामणिर्जम्बूद्वीपे त्वं गन्धमादन!॥
गन्धर्व्ववनशोभावानतः कीर्त्तिर्दृढास्तु मे।
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च॥
हिरण्मयाश्वत्थशिरास्तस्मात् पुष्टिर्ध्रुवास्तु मे।
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च॥
सुपार्श्व! राजसे नित्यमतः श्रीरक्षयास्तु मे।
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः।
आचार्य्याय गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम्॥
विष्कम्भान् पर्व्वतान् दद्यादृत्विग्भ्यः क्रमशो मुने।
गावो देयाश्चतुर्व्विंशदथवा दश नारद॥
शक्तितः सप्त चाष्टौ वा पञ्च दद्यादशक्तिमान्।
एकापि गुरवे देया कपिलाथ पयस्विनी॥
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः।
त एव पूजने मन्त्रास्त एवोपस्कराः स्मृताः॥
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा।
स्वमन्त्रेणैव सर्व्वेषु होमः शैलेषु पठ्यते॥
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते।
विधानं सर्व्वशैलानां क्रमशः शृणु नारद॥
दानकाले च ये मन्त्राः पर्व्वतेषु च यत् फलम्।
अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः॥
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते।
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः॥
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम!॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम्।
मन्वन्तरशतं साग्रं देवलोके महीयते॥
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजता।
विमानेन दिवः पृष्ठमायाति सुरसेवितम्॥
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः॥१॥
अथातः सम्प्रवक्ष्यामि लवणाचलमुत्तमम्।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम्॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत्।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक्॥
विधानं पूर्व्ववत् कुर्य्याद् ब्रह्मादीनाञ्च सर्व्वदा।
तद्वद्धेममयान् सर्व्वान् लोकपालान्निवेशयेत्॥
सरांसि कामदेवादींस्तद्वदत्र निवेशयेत्।
कुर्य्याज्जागरमत्रापि दानमन्त्रान्निबोध मे॥
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम!॥
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना।
प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिप्रदो भव॥
विष्णुदेहसमुद्भूतो यस्मादारोग्यवर्द्धनः।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात्॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम्।
उमालोके वसेत् कल्पं ततो याति परां गतिम्॥२॥
अतः परं प्रवक्ष्यामि गुड़पर्व्वतमुत्तमम्।
यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितः॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः।
त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पवित्तवान्॥
तद्वदामन्त्रणं पूजा हेमवृक्षसुरार्च्चनम्।
विष्कम्भपर्व्वतास्तद्वत् सरांसि वनदेवताः॥
होमजागरणं तद्वल्लोकपालाधिवासनम्।
धान्यपर्व्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत्॥
यथा देवेषु विश्वात्मा प्रवरोऽयं जनार्द्दनः।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम्॥
प्रणवः सर्व्वमन्त्राणां नारीणां पार्व्वती यथा।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः॥
मम तस्मात् परां लक्ष्मीं गुड़रूपेण देहि वै।

यस्मात् सौभाग्यदायिन्या भ्राता त्वं गुडपर्व्वत !।
निवासश्चापि पार्व्वत्यास्तस्मान्मां पाहि सर्व्वदा।
अनेन विधिना यस्तु दद्याद्गुडमयं गिरिम्।
पूज्यमानः सगन्धर्व्वैर्गौरीलोके महीयते।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत्॥
आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः॥ ३॥
अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम्।
यस्य प्रदानाद्भुवनं वैरिञ्चं याति मानवः॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः।
तदर्द्धेनाधमस्तद्वदल्पवित्तोऽपि शक्तितः॥
दद्यादेकपलादूर्द्ध्वं यथाशक्त्या विमत्सरः।
धान्यपर्व्वतवत् सर्व्वं विदध्यान्मुनिपुङ्गव !॥
विष्कम्भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत्।
नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः॥
यस्मादनन्तफलदस्तस्मात् पाहि शिलोच्चय !।
यस्मादग्नेरपत्यं त्वं तस्मात्त्वं जगत्पते !॥
हेमपर्व्वतरूपेण तस्मात् पाहि नगोत्तम !।
अनेन विधिना यस्तु दद्यात् कनकपर्व्वतम्॥
स याति परमं ब्रह्मलोकमानन्दकारकम्।
तत्र कल्पशतन्तिष्ठेत्ततो याति परां गतिम्॥ ४॥
अतः परं प्रवक्ष्यामि तिलशैलं विधानतः।
यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम्॥
उत्तमो दशभिर्द्रोणैः पञ्चभिर्मध्यमो मतः।
त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्त्तितः॥
पूर्व्ववच्चापरं सर्व्वं विष्कम्भपर्व्वतादिकम्।
दानमन्त्रं प्रवक्ष्यामि यथावन्मुनिसत्तम !॥
यस्मान्मधुवधे विष्णोर्देहात् स्वेदसमुद्भवाः।
तिलाः कुशाश्च माषाश्च तस्माच्छन्नो भवन्त्विह॥
हव्यकव्येषु यस्माच्च तिला एवाभिरक्षणम्।
भवादुद्धर शैलेन्द्र ! तिलाचल ! नमोऽस्तु ते॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम्।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम्॥
दीर्घायुष्ट्वमवाप्नोति पुत्त्रपौत्त्रैश्च मानवः।
पितृभिर्देवगन्धर्व्वैः पूज्यमानो दिवं व्रजेत्॥ ५॥
अथातः संप्रवक्ष्यामि कार्पासाचलमुत्तमम्।
यत्प्रदानान्नरो नित्यमाप्नोति परमं पदम्॥
कार्पासपर्व्वतस्तद्वद्विंशद्भारैरिहोत्तमः।
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्मतः॥
भारेणाल्पधनो दद्याद्वित्तशाठ्येन वर्ज्जितः।
धान्यपर्व्वतवत् सर्व्वमासाद्य मुनिपुङ्गव !॥
प्रभातायान्तु शर्व्वर्य्यां दद्यादिदमुदीरयेत्।
त्वमेवावरणं यस्माल्लोकानामिह सर्व्वदा॥
कार्पासाद्रे नमस्तस्मादघौघध्वंसनो भव।
इति कार्पासशैलेन्द्रं यो दद्यात् शर्व्वसन्निधौ॥
रुद्रलोके वसेत् कल्पं ततो राजा भवेदिह॥ ६॥
अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम्।
तेजोऽमृतमयं दिव्यं महापातकनाशनम्॥
विंशत्या घृतकुम्भानामुत्तमः स्याद्घृताचलः।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्वधमः स्मृतः॥
अल्पवित्तोऽपि कुर्व्वीत द्वाभ्यामिह विधानतः।
विष्कम्भान् पर्व्वतांस्तद्वच्चतुर्भागेन कल्पयेत्॥
शालितण्डुलपात्राणि कुम्भोपरि निवेशयेत्।
कारयेत् संहतानुच्चान् यथाशोभं विधानतः॥
वेष्टयेत् शुक्लवासोभिरिक्षुदण्डफलादिकैः।
धान्यपर्व्वतवत् सर्व्वं विधानमिह पठ्यते॥
अधिवासनपूर्व्वन्तु तद्वद्धोमसुरार्च्चनम्।
प्रभातायान्तु शर्व्वर्य्यां गुरवे च निवेदयेत्॥
विष्कम्भपर्व्वतांस्तद्वदृत्विग्भ्यः शान्तमानसः।
संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसोः॥
तस्माद्घृतार्च्चिर्व्विश्वात्मा प्रीयतामत्र शङ्करः।
यस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम्॥
घृतपर्व्वतरूपेण तस्मात्त्वं पाहि भूधर !।
अनेन विधिना दद्याद्घृताचलमनुत्तमम्॥
महापातकयुक्तोऽपि लोकमायाति शाङ्करम्।
हंससारसयुक्तेन किङ्किणीजालमालिना॥
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः।
विहरेत पितृभिः सार्द्धं यावदाभूतसंप्लवम्॥ ७॥
अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम्।
मुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः॥
मध्यमः पञ्चशतिकस्त्रिशतेनावरः स्मृतः।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः॥
पूर्व्वेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः।
पुष्परागयुतैः कार्य्यो विद्वद्भिर्गन्धमादनः॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विपुलोऽचलः।
पद्मरागैः ससौवर्णैरुत्तरेण तु विन्यसेत्॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत्।
तद्वदावाहनं कृत्वा वृक्षान् देवांश्च काञ्चनान्॥
पूजयेत् पुष्पपानीयैः प्रभाते च यथा पूर्व्ववत्।
पूर्व्ववद्गुरु-ऋत्विग्भ्य इममन्त्रमुदीरयेत्॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल !॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः।
सदारत्नप्रदानेन तस्मान्नः पाहि पर्व्वत !॥
अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम्।
स याति वैष्णवं लोकममरेश्वरपूजितः॥
यावत् कल्पशतं साग्रं वसेच्चेह नराधिप !।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत्॥
ब्रह्महत्यादिकं किञ्चिदयदत्रामुत्र वा कृतम्।
तत् सर्व्वं नाशमायाति गिरिर्व्वज्रहतो यथा॥ ८॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम !॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः॥
अशक्तो विंशतेरूर्द्ध्वं कारयेत् शक्तितः सदा।
विष्कम्भपर्व्वतांस्तद्वत्तुरीयांशेन कल्पयेत्॥
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानतः।
कलधौतमयांस्तत्र लोकेशान् स्थापयेद्बुधः॥
ब्रह्मविष्ण्वर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मयः।
राजतं स्याद्यदन्येषां सर्व्वन्तदिह काञ्चनम्॥
शेषञ्च पूर्व्ववत् कुर्य्याद्धोमजागरणादिकम्।
प्रदद्यात्तं प्रभाते तु गुरवे रौप्यपर्व्वतम्॥
विष्कम्भशैलानृत्विग्भ्यः पूज्य वस्त्रविभूषणैः।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्विमत्सरः॥
पितॄणां वल्लभं यस्माद्धरीन्द्रेशानयोस्तथा।
रजतं पाहि तस्मान्नः शोकसंसारसागरात्।
इत्थं निवेश्य यो दद्याद्रजताचलमुत्तमम्।
गवामयुतदानस्य फलं प्राप्नोति मानवः॥
सोमलोके स गन्धर्व्वैः किन्नराप्सरसाङ्गणैः।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम्॥ ९॥
अथातः संप्रवक्ष्यामि शर्करापर्व्वतमुत्तमम्।
यस्य प्रदानाद्विष्ण्वर्करुद्रास्तुष्यन्ति सर्व्वदा॥
अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः॥
भारेण चार्द्धभारेण शैलं यः कुर्य्यात् स्वल्पवित्तवान्।
विष्कम्भपर्व्वतान् कुर्य्यात्तुरीयांशेन मानवः॥
धान्यपर्व्वतवत् सर्व्वमासाद्य मेरवं शुभम्।
मेरोरुपरि तद्वच्च स्थाप्यं हेमतरुत्रयम्॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः।
एतद्वृक्षत्रयं मूर्द्ध्नि सर्व्वेष्वपि निवेशयेत्॥
हरिचन्दनसन्तानौ पूर्व्वपश्चिमभागयोः।
निवेश्यौ सर्व्वशैलेषु विशेषाच्छर्कराचले॥
मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत्।
गन्धमादनशृङ्गेषु धनदः स्यादुदङ्मुखः॥
प्राङ्मुखो वेदमूर्त्तिश्च हंसः स्याद्विपुलाचले।
हैमी सुपार्श्वे सुरभी दक्षिणाभिमुखी भवेत्॥
धान्यपर्व्वतवत् सर्व्वमावाहनमखादिकम्।
कृत्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम्।
ऋत्विग्भ्यश्च नरः शैलानिमान्मन्त्रानुदीरयेत्॥
सौभाग्यामृतसारोऽयं परमः शर्करायुतः।
तत् सदानन्दकारी त्वं भव शैलेन्द्र ! सर्व्वदा॥
अमृतं पिबतां ये तु निपेतुर्भुवि शीकराः।
देवानान्तत्समुत्थोऽयं पाहि नः शर्कराचल !॥
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः।
तन्मयोऽसि महाशैल ! पाहि संसारसागरात्॥
यो दद्यात् शर्कराशैलमनेन विधिना नरः।
सर्व्वपापविनिर्मुक्तः प्रयाति शिवमन्दिरम्॥
चन्द्रादित्यप्रतीकाशमधिरुह्यानुजीविभिः।
सहैव यानमातिष्ठेत् स तु विष्णुप्रचोदितः॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत्।
आयुरारोग्यसम्पन्नो यावज्जन्मार्ब्बुदत्रयम्॥
भोजनं शक्तितः कुर्य्यात् सर्व्वशैलेष्वमत्सरः।
सर्व्वत्राक्षारलवणमश्नीयात्तदनुज्ञया।
पर्व्वतोपस्करान् सर्व्वान् प्रापयेत् ब्राह्मणा-
लयम्॥ १०॥
इति मात्स्ये ७७ अध्यायः॥
देवर्षिविशेषः। यथा,—
“कश्यपान्नारदश्चैव पर्व्वतोऽरुन्धती तथा।”
इति वह्निपुराणम्।
(यथाच, महाभारते। १। ५९। ४४।
“सोमश्रवोऽपवेशस्य नारदैर्हमायनस्य च।
नारदस्य च राजेन्द्र ! देवर्षेः पर्व्वतस्य च।”)
मत्स्यविशेषः। पायरा इति भाषा। अस्य
गुणाः। वातुलादित्वम्। स्निग्धत्वम्। बलपुष्टि-
कारित्वञ्च। इति राजवल्लभः। वृक्षः। शाक-
भित्। इति मेदिनी। ते, १५१। (मनुष्यवि-
शेषः। स तु दशरथस्य मन्त्रिविशेषः

पिप्पलविशेषः। यथा, भागवतेऽष्टमस्कन्धे अमृतमन्थनप्रकरणे।
"दधार पर्व्वतमधेन पौष्ठे यो ध्यानधारणात्।
भारात्तु भारं विश्राणिति पर्व्वतः परिकीर्त्तितः॥")

पर्व्वतकाकः, पुं, (पर्व्वते स्थायः काकः। प्रायशः पर्व्वतवासत्वात्तथात्वम्।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३। ८८।

पर्व्वतजा, स्त्री, (पर्व्वतात् जायते या। पर्व्वत + जन् + "सप्तम्यां जनेर्डः।" ३। २। ९७। इति डः।) नदी। इति हेमचन्द्रः। ४। १४९। (हिमगिरिजातत्वात् गौरी।) गिरिभवमात्रमपि।

पर्व्वततृणं, क्ली, (पर्व्वतभवं तृणम्। शाकपार्थिवादित्वात् समासः।) तृणभेदः। गन्ध इति हिन्दी भाषा। तत्पर्य्यायः। तृणाढ्यम् २ पर्व्वताढ्यम् ३ पर्व्वतप्रियम् ४। अस्य गुणाः। बलपुष्टिकारित्वम्। मधुरत्वं सर्व्वदा पित्तलत्व। इति राजनिर्घण्टः।

पर्व्वतमोचा, स्त्री, (पर्व्वतोद्भवा मोचा कदली-भेदः।) गिरिकदली। इति राजनिर्घण्टः।

पर्व्वतराजः, पुं, (पर्व्वतानां राजा। "राजाहः-सखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) हिमालयगिरिः। अस्य प्रमाणं अर्थसाम्यप्रदर्शनतः दर्शयम्।

पर्व्वतराजपुत्री, स्त्री, (पर्व्वतराजस्य हिमालयस्य पुत्री।) दुर्गा। यथा, त्रिकाण्डशब्दप्रयोगयोः।
"प्रकम्पनात् यदपुरी दधार्ण्यपञ्चागुभ्यो मितयञ्जी या।
स्वारम्भ भक्तां दधतीव यानम्
प्रपूजयेत् पर्व्वतराजपुत्रीम्॥"
इति तिथ्यादितत्त्वम्।

पर्व्वतवासिनी, स्त्री, (पर्व्वते वसतीति। पर्व्वत + वस + णिनि + ङीप्।) आकाशमांसी। इति राजनिर्घण्टः। गायत्री। यथा,—
"उत्तरे शिखरे देवि। भूम्यां पर्व्वतवासिनि॥
ब्रह्मयोनिसमुत्पन्ने। गच्छ देवि। यथासुखम्॥"
इति यजुर्व्वेदीयसन्ध्याविसर्ज्जनमन्त्रः।
काली। यथा, श्यामापूजायां विसर्ज्जनमन्त्रः।
"उत्तरे शिखरे देवि। भूम्यां पर्व्वतवासिनि॥
ब्रह्मयोनिसमुत्पन्ने गच्छ देवि। यथासुखम्॥"

पर्व्वताधारा, स्त्री, (पर्व्वताः आधाराः यस्याः। अष्टकुलाचलैः पृथिवी धियते इति पुराण-प्रसिद्धत्वात्तथात्वम्।) पृथिवी। इति हेमचन्द्रः। ४। ३।

पर्व्वतारिः, पुं, (पर्व्वतानामरिः शत्रुः। पर्व्वत-पक्षच्छेदकारित्वात् तथात्वम्।) इन्द्रः। इति शब्दरत्नावली।

पर्व्वताशयः, पुं, (पर्व्वते आशेते इति। आ + शी + "अधिकरणे शेतेः।" ३। २। १५। इति अच्।) मेघः। इति शब्दचन्द्रिका।

पर्व्वतासनः, पुं, (पर्व्वत आसनं यस्य तादृशस्य स्थानम्।) ... इति राजनिर्घण्टः। पर्व्वतवासिनि च।

पर्व्वतीयः, त्रि, (पर्व्वते भवः। पर्व्वत + "शिलाया अमुष्य।" ४। २। १४३। इति छः।) पर्व्वत-

सम्बन्धी। पर्व्वताश्रयः। पार्व्वतीयाः इति भाषा। पर्व्वतस्मिन्नास्त् भवार्थे ईयप्रत्ययनिषेधः। (मनुष्ये तु पार्व्वतीयः। इति सिद्धान्तकौमुदी। यथा, रघुः। ४। ७१।
"तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गणैरभूत्।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम्॥")

पर्व्वतोर्म्मिः, पुं, मत्स्यविशेषः। इति कश्मिन् भूरि-प्रयोगे प्रमादलिखनं, पर्व्वतोरस्मिरिति मनुष्य-तृणपर्य्यायकपाठः पाठः।

पर्व्वधिः, पुं, (पर्व्वाणि अमावास्यापूर्णिमयोः स्वाग-सन्धिं दधातीति। पर्व्व + धा + किः।) चन्द्रः। इति त्रिकाण्डशेषः।

पर्व्वपुष्पी, स्त्री, (पर्व्वसु ग्रन्थिषु पुष्पं यस्याः। स्त्रियां ङीप्।) रामदूतीवृक्षः। नागदन्ती। इति शब्दचन्द्रिका रत्नमाला च।

पर्व्वपूर्णता, स्त्री, (पर्व्वणः पूर्णता।) सम्भारः। आयोजनम्। इति भूरिप्रयोगः। पर्व्वणः पूर्णत्वञ्च।

पर्व्वफला, स्त्री, (पर्व्वणि पर्व्वणि फलं यस्याः। यद्वा, पर्व्व ग्रन्थिरेव फलं यस्याः।) श्वेता। इति राजनिर्घण्टः।

पर्व्वयोनिः, पुं, (पर्व्व ग्रन्थिरेव योनिरुत्पत्तिकारणं यस्य।) इक्ष्वादि। इति हेमचन्द्रः। ४। २६१।

पर्व्वरीणं, क्ली, पर्व्व। इति शब्दरत्नावली।

पर्व्वरीणः, पुं, पर्णच्छत्रपत्रः। गर्व्वः। मारुतः। पर्णशिरा। ग्रन्थकम्। द्यूतकरः। पत्र-पुष्परसः। इति शब्दरत्नावली। पर्व्वरीण इति मेदिनी पाठः।

पर्व्वरुट्, [ह्], पुं, (पर्व्वसु ग्रन्थिषु रोहतीति। रुह + क्विप्।) दाडिमः। इति त्रिकाण्डशेषः।

पर्व्ववल्ली, स्त्री, (पर्व्वप्रधाना ग्रन्थियुक्ता वल्ली लता।) मालादूर्व्वा। इति राजनिर्घण्टः।

पर्व्वसन्धिः, पुं, (पर्व्वणोः सन्धिः) प्रतिपत्पञ्च-दश्योरन्तरम्। इत्यमरः। १। ४। ७। "प्रतिपत्-पञ्चदश्योर्मध्यं स पर्व्वसन्धिः। किञ्च च सन्धिः पर्व्वसन्धयः। पञ्चदशाहो पूर्णो पञ्च-दशी संज्ञाया पठ्यति तद्विभागाय। पञ्चदशोऽन्त्ये पूर्णिमायाममावास्यायोर्व्वा संज्ञकम्। अमावस्य पौर्णमास्या अमावास्या वा शेषपादे-प्रतिपत्तुरीयं प्रतिपद्य प्रथमपादेनवस्थितम् पर्व्वसन्धिरिति स्मृताः। पौर्णमासी यदा वायु-यर्व्वाणि पर्व्वसन्धिरिति मतः। पर्व्वणोः सन्धिः पर्व्वसन्धिः पूर्णातीर्थमिव पर्व्वपूर्णो दर्शस्य आवश्यकमिति वा पर्व्व। प्रतिपत्पञ्चदश्योस्तु सन्धिः पर्व्वाय दिक्, अकुर्व्वति स्वामी।
दर्शार्णिमयोः सन्धौ प्रतिपत्प्राप्तयोरपि।
पर्व्वसन्धौ हि विप्रस्य प्रतिमयि प्रबले।
इति स्कन्दः।" इति भरतः।

पर्व्वशः, पुं, (पर्व्व पर्व्वसन्धिमासमस्य। पर्व्व + इत्य।) पर्व्वसम्पूर्णः। इति शब्दरत्नावली।

पर्शुः, पुं, (परं शत्रुं शृणातीति। शॄ हिंसे + "आङ्परयोः खनिशॄभ्यां डिच्च।" उणा।

१। ३३। इति कुः स च डित्। पृषोदरादि-त्वात् साधुः। यद्वा, स्पृशति स्पृशतीति। स्पृश संस्पर्शे + "स्पृशेः श्वण् शुनौ पृ च।" उणां ५। २०। इति शुन् धातोश्च पृ आदेशः।) परशुः। इति हेमचन्द्रः। ३। ४४०। (यथा, रामायणे। १। ७९। ४३।
"भिन्दिपालान् गदाशूलान् शक्तीश्च तोमरान्।
शराणि धनुषा पर्शुन् कृपाणांश्च पुनः पुनः॥")

पर्शुका, स्त्री, (पर्शुरिव प्रतिकृतिः। "इवे प्रति-कृतौ।" ५। ३। ९६। इति कन्। स्त्रियां टाप्।) पार्श्वास्थि। इत्यमरः। २। ६। ६९।

पर्शुपाणिः, पुं, (पर्शुः परशुः पाणौ यस्य।) गणेशः। इति हेमचन्द्रः। २। १२१। (परशुरामः। इति कुमारसम्भवोऽर्थः।)

पर्शुरामः, पुं, (पर्शुधारी रामः। शाकपार्थिवादि-वत् समासः। परशुना सह जातत्वादस्य तथा-त्वम्। तदुक्तं कालिकापुराणे ८५ अध्याये।
"आदायसहजस्याभूत् जातः परशुना सह।
नामतः परशुरामस्तु न जहाति कदाचन॥")
परशुरामः। इति शब्दरत्नावली।

पर्श्वधः, पुं, (परश्वं दधातीति। परश्व + धा + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। पृषोदरात् साधुः।) कुठारः। इत्यमरः।

पर्ष, ङ स्नेहे। इति कविकल्पद्रुमः। (भ्वा-आत्म-अक-सेट्।) रेफोपधः। स्नेह इह आर्द्री-भावः। ङ, पर्षते पयसा पटः। स्नेह इति धातुर्भ्रमः। सर्पति मदनैः। इति दुर्गादासः।

पर्षत्, [द्] स्त्री, (परितः सीदन्त्यस्याम्। परि + सद् + "सत्सूद्विष—" ३। २। ६१। इति क्विप्। "परेश्च।" ८। ३। ७४। इति षत्वम्। पृषोदरादित्वात् इकारलोपः। यद्वा, "पृभिदिव्यधिगृधिधृषिहृषिभ्यः।" उणां १। १४८। इति पृष-अनुनासिकलोपः पर्षं धातोः स्त्रियामपि आदिः।) सभा। इत्यमरादिकोषः। (यथा, माघकाव्ये। १। ९।
"चत्वारो वेदधर्म्मज्ञाः पर्षत्त्रैविद्यमेव वा।
सा ब्रूते यं स धर्म्मः स्यादेको वाध्यात्म-
वित्तमः॥")

पर्षद्वलः, त्रि, (पर्षद् सभा विद्यते यस्य। पर्षद् + "रजःकृष्यासुतिपरिषदो वलच्।" ५। २। ११२। इति वलच्।) पारिषदः। इति शब्दरत्नावली। (यथा, भट्टिः। ३। १२।
"आशीविषाधरहाक्ष्मा दानवः परिदुष्यद्। पर्षद्वलान् महाब्रह्मैराट नैकटिकाश्रमात्॥")

पल, ङ रक्षे। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट्।) ङ, पलयति। चुरादेः। ईदित्वात् विपद्यते ... इति दुर्गादासः।

पल, ल गतौ। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट्।) ल, पलति। इति दुर्गादासः।

पलं, क्ली, (पलतीति । पल + अच् ।) आमिषम् । कर्षचतुष्टयम् । इत्यमरः ।३।३।२०१॥२।९।८६ ॥ तत्तु शास्त्रे तोलकचतुष्टयम् । वैद्यके अष्टतोलकम् । लौकिके सार्द्धत्रिंशद्विमाषकतोलकत्रितयम् । तत्पर्य्यायः । मुष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ बिल्वम् ५ षोडशिकाम्रम् ६ । इति वैद्यकपरिभाषा ॥ यथा, तिथ्यादितत्त्वे ।
"पलन्तु लौकिकैर्म्मानैः सार्द्धत्रिंशद्विमाषकम् ।
तोलकत्रितयं ज्ञेयं ज्योतिर्भिः स्मृतिसम्मतम् ॥"
त्रिघटिका । इति राजनिर्घण्टः ॥ सा तु घटिकाषष्टिभागैकभागः । षष्टिविपलञ्च । पलदण्डयोः प्रमाणन्तु ।
"दशगुर्व्वक्षरोच्चारकालः प्राणः षडात्मकैः ।
तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते ॥"
तेन च ।
"सा कान्ते पलसप्तके पयसिकाश्ये देशे त्वाश्वीः
कान्तं वक्रं सुसं पूर्णं चन्द्रं मत्वा राशौ चेत् ।
सुप्रामः प्राटं च तथैतो राहुः क्रूरः प्राप्ता-
समाहात्ते इमांसात्ते प्रयैऽकान्ते कर्त्तव्या ॥"
अस्यैकपाठात् पलं षष्टिपाठाद्दण्डः । इति ज्योतिस्तत्त्वम् ॥

पलः, पुं, (पलतीति । पल + अच् ।) पलालः । इति हेमचन्द्रः । ४ । २४८ ॥ (यथा, महाभारते । ३ । २३३ । ११ ।
"चण्डाय शौण्डाय महाबलाय
वीराय दुष्टाय पलाय वर्म्मिणः ॥")

पलक्या, स्त्री, (पलकं मांसं तद्धृदये हितम् । पलक + यत् । स्त्रियां टाप् ।) पालङ्कशाकः । इति राजनिर्घण्टः ॥

पलगण्डः, पुं, (पलं मांसं सदृक् गण्डति भित्तौ मृदादिना लिम्पतीति । गण्ड + अच् ।) लेपकः । इत्यमरः । २ । १० । ६ ॥ राज इति भाषा ॥

पलङ्कटः, त्रि, (पलं मांसं कटति व्याकुलितं करोतीति । पल + कट + बाहुलकात् खच् मुम् च ।) भयशीलः । भीरुः । इति त्रिकाण्डशेषः ॥

पलङ्करः, पुं, (पलं मांसं करोतीति । पल + कृ + खच् । "तत्पुरुषे कृतीति ।" ६।३।१४ । इति द्वितीयायाः अलुक् ।) पित्तम् । इति त्रिकाण्डशेषः ॥

पलङ्कषः, पुं, (पलं कषतीति । कष हिंसायाम् + खच् । "तत्पुरुषे कृतीति ।" ६ । ३ । १४ । इति द्वितीयाया अलुक् ।) राक्षसः । इति मेदिनी । षे, ५३ ॥ कणगुग्गुलुः । इति राजनिर्घण्टः ॥

पलङ्कषा, स्त्री, (पलङ्कष + टाप् ।) गोक्षुरकः । रास्ना । गुग्गुलुः । किंशुकः । सुक्षीरी । लाक्षा । इति मेदिनी ॥ क्षुद्रगोक्षुरकः । महाश्रावणी । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"कणायोषसंयोगस्तु दशाङ्गं पलङ्कषा ।") [illegible] । इति राजनिर्घण्टः ॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य ।) द्रोणकाकः । इति राजनिर्घण्टः ॥ मांसाशिनि, त्रि ॥

पलभा, स्त्री, (पलस्य भा द्युतिरिव ।) मेषसंक्रमणादर्व्वाक् सपादाष्टदिने मध्याह्ने द्वादशाङ्गुलशङ्कुभा छाया । तत्पर्य्यायः । पलविभा २ विषुवत्प्रभा ३ । यथा, ग्रहलाघवे ।
"मेषादिगे सायनभागसूर्य्ये
दिनार्द्धजा भा पलभा भवेत् सा ॥"
पलभयोद्भूतचरखण्डकैः क्रमोत्क्रमस्थैर्हीनान्वितैर्लङ्कोदयैः स्वदेशीयोदया भवन्ति । अन्यत्र पाठाधिकारेऽपि चरसंस्कृता ग्रहाः स्पष्टा भवन्तीति प्रयोजनम् ॥ यथा, सिद्धान्तशिरोमणौ ॥
"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनशयोऽथ दिने विषुवद्दिनम् ।
मकरकर्कटसंक्रमतोऽयनं द्युदलभा विषुवद्दिवसेऽक्षभा ॥"
"एवं विषुवती छाया स्वदेशे या दिनार्द्धजा ।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा ॥"
इति सूर्य्यसिद्धान्तः ॥
"अजतुलादिगतस्य रवेर्द्दिने
द्युदलभार्कमिताङ्गुलशङ्कुजा ।
पलविभाच— ॥"
इति वृद्धवशिष्ठसिद्धान्तः ॥

पललं, क्ली, (पलति गच्छतीति वा । पल गतौ + "वृषादिभ्यश्चित् ।" उणां १ । १०८ । इति कलच् ।) मांसम् । इत्यमरः ।२।६।६३ ॥ (यथा, गारुडे । १८१ अध्याये ।
"मार्ज्जारपललं पिष्ठा हरितालञ्च भावितम् ।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत् ॥")
पङ्कम् । (यथा, श्रीरामायणे ।५।८०।२६ ।
'दीर्घपङ्कनिमग्नं त्वामयशःपललावृतम् ।
सर्व्वथा मानुषो रामस्त्वमहमुपनेष्यति ॥")
तिलचूर्णम् । इति मेदिनी । ले, १०४ ।
"पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिष्टकः ।
पललं मधुरं वृष्यं पित्तानिलघ्नमिदम् ॥"
इति राजनिर्घण्टः ॥
सैन्धवतिलचूर्णम् । तिलकुटा इति भाषा । यथा, वैद्यके ।
"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम् ।
पललं मलकृद् वृष्यं वातघ्नं कफपित्तकृत् ॥
बृंहणं गुरु स्निग्धञ्च स्निग्धं मूत्रनिवर्त्तकम् ॥"

पललः, पुं, (पलतीति । पल गतौ + "वृषादिभ्यश्चित् ।" उणां । १ । १०८ । इति कलच् । यद्वा, पलं मांसं लातीति । ला + कः ।) राक्षसः । इति मेदिनी । ले, १०४ ॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव ।) पित्तम् । इति हारावली । १३१ ॥

पललाशयः, पुं, (पलले आशेते इति । आङ् + शीङ् शयने + अच् ।) गलरोगः । इति शब्दरत्नावली ।

पलवः, पुं, (पलं मत्स्यादिकं वाति हिनस्ति बध्नातीति । पल + वा गतिगन्धनयोः + "आतो ऽनुपसर्गे कः ।" ३।२।३ । इति कः ।) मत्स्यधारणोपायः । पोलो इति भाषा । तत्पर्य्यायः । प्लवः २ पञ्जरखेटः ३ । इति त्रिकाण्डशेषः ॥

पलाग्निः, पुं, (पलस्य मांसस्य अग्निः । मांसपाकशक्तिमत्त्वादस्य तथात्वम् ।) पित्तम् । इति हारावली । १३१ ॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य ।) शिशुमारः । इति हारावली । ८७ ॥

पलाण्डुः, पुं, (पलाय मांसाय [illegible]तीति । "मृगय्वादयश्च ।" उणां १।३८ । इति कुप्रत्ययात् साधुः ।) मूलविशेषः । पेयाज् इति भाषा । तत्पर्य्यायः । सुकन्दकः २ । इत्यमरः ।२।४।१४७ ॥ लोहितकन्दः ३ । इति रत्नमाला ॥ तीक्ष्णकन्दः ४ उष्णः ५ मुखदूषणः ६ शूद्रप्रियः ७ कृमिघ्नः ८ दीपनः ९ मुखगन्धकः १० बहुपत्रः ११ विश्वगन्धः १२ रोचनः १३ पलाण्डुः १४ सुकुन्दकः १५ । इति शब्दरत्नावली ॥ अस्य गुणाः । कटुत्वम् । बल्यत्वम् । कफपित्तवातिदोषनाशित्वम् । गुरुत्वम् । वृष्यत्वम् । रोचनत्वम् । स्निग्धत्वञ्च । इति राजनिर्घण्टः ॥ यथा, भावप्रकाशे ।
"पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ।
पलाण्डुस्तु गुणैर्ज्ञेयो रसोनसदृशो गुणैः ॥
स्वादुपाकरसोऽनुष्णः कफकृन्नातिपित्तलः ।
हरते केवलं वातं बलवीर्य्यकरो गुरुः ॥"
पलाण्डुभक्षणे दोषो यथा,—
"पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम् ।
लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत् ॥"
इति प्रायश्चित्तविवेके याज्ञवल्क्यः ॥

पलादः, पुं स्त्री, (पलं मांसमत्तीति । अद भक्षणे + "कर्म्मण्यण् ।" ३ । २ । १ इत्यण् ।) राक्षसः । इति जटाधरः ॥ (मांसभक्षके, त्रि ॥)

पलादनः, पुं स्त्री, (पलं मांसमत्तीति । पल + अद + ल्युः ।) राक्षसः । इति हेमचन्द्रः ॥ मांसभक्षणशीले, त्रि ॥

पलान्नं, क्ली, (पलं मांसं तेन सह पक्वं अन्नम् । शाकपार्थिवादित्वात् समासः ।) मांसादियुक्तसिद्धभक्तम् । पोलाओ इति भाषा । तस्य पाकप्रकारो द्रव्याणि च यथा । छागमांसं १ शरावं । दुग्धं १० शरावपादः । घृतं १ माषकम् । लवणं ३ माषकम् । एला ३ माषकम् । तण्डुलं १ शरावः । मरिचं ४ तोलकम् । [illegible] २ तोलकम् । कुङ्कुमं १ माषकम् । आर्द्रकं ७ तोलकम् । लवङ्गं ६ तोलकम् । धन्याकं २ तोलकम् । जलम् १० शरावपादार्द्धम् । छागमांसं खण्डं दीर्घायता मुष्टिप्रदेशमात्रकरणानन्तरं पाषाणे सेचनीयोपरि [illegible] प्रथमं [illegible] । [illegible] [illegible] [illegible] । एवं प्रकारेण बारं बारं [illegible] तदुपरि [illegible]

सितमेन दलद्वयं समाह्लादिनि दधीत । इति भास्कराचार्यः ॥ ० ॥ अथ लौकिकानि मनुष्य-पलाशपत्रादिनां गन्धद्रव्यैः सह प्रयोगः इतर्वासाग्न्यादिविषयत्र भक्षितुमर्हन्ति ॥

पलाशः, पुं, (पलं मांसं आशयति भोज्यति शाकुनेन । पल+आश+णिच्+अण् ।) कच्चुपत्रकः । हस्तिकपोलः । इति शब्दमाला ॥

पलायनं, क्ली, (पलायते इति । पलाय+भावे ल्युट् ।) भयादिना स्थानान्तरगमनम् । पालान इति भीत देश्येन इति च भाषा ॥ (यथा, रघुः ।१९।११ ।

"सिक्त हव्यमर्पितमिव पार्श्वतः
प्रमितं तमनयस्थितं प्रियाः ।
विद्धि ! पि शठ ! पलायनच्छला-
न्यञ्जसेति रुरुधुः कचग्रहैः ॥")

तत्पर्य्यायः । अपयानम् २ संदावः ३ द्रवः ४ विद्रवः ५ उपक्रमः ६ संद्रावः ७ उद्द्रावः ८ प्रद्रावः ९ । इति हेमचन्द्रः । ३ । ४६६ ॥ निद्रावः १० उद्द्रवः ११ पलायः १२ द्रावः १३ प्रद्राविका १४ अपक्रमः १५ अवक्रमः १६ । इति शब्दरत्नावली ॥

पलायितः, त्रि, (पलाय+क्तः ।) पलायनविशिष्टः । तत्पर्य्यायः । गतः २ गतीन्द्रिकः ३ तिरोहितः ४ । इति हेमचन्द्रः ॥

पलालः, पुं क्ली, (पलति शस्यशून्यत्वं प्राप्नोतीति । पल+"तमिविशिविडीति ।" उणा० १ ।११७ । इति कालन् । यद्वा, पलं अलतीति । अल+"कर्मण्यण् ।" ३ । २ । १ । इति अण् ।) निष्फलकाण्डः । शस्यशून्यधान्यनालः । इत्यमरः । २।९।२२ ॥ पोयाल इति भाषा ॥ (यथा, मनुः । ५ । १२२ ।

"प्रोक्षणात् तृणकाष्ठञ्च पलालञ्चैव शुध्यति ॥"

स्त्री, स्कन्दस्य मातृविशेषः । यथा, महाभारते । ९ । ४६ । १० ।

"काली च हसिता चैव मानिनी इन्दिला तथा ।
आर्य्या पलाला वैमित्रा पलिता तिर्य्यकाननः ॥")

पलालदोहदः, पुं, (पलालं दोहदं यस्य ।) आम्रवृक्षः । इति शब्दमाला ॥

पलाशं, क्ली, (पलं गतिं कम्पनमित्यर्थः । अश्नुते व्याप्नोतीति । पल+अश+"कर्मण्यण् ।" ३ । २ । १ । इत्यण् ।) पत्रम् । इत्यमरः । २।४।१४ ॥ (यथा, महाभारते । १ । १६ । २५ ।

"हयच्छाय इवाभूत् मालापुष्पपलाशवान् ॥"

पलाशस्य पलाशतरोरिदम् । पलाशकुसुमादि । यथा कुमारे । ३ । २९ ।

"बालेन्दुवक्राण्यविकाशभावात्
बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम् ॥")

पलाशः, पुं, (पलाशानि सन्त्यस्य अस्मिन् वा । "अर्श आदिभ्योऽच् ।" ५।२।१२७ । इत्यच् ।) स्वनामख्यातवृक्षः । स तु ब्रह्मणः स्वरूपः । यथा,—

सूत उवाच ।

"अश्वत्थरूपी भगवान् विष्णुरेव न संशयः ।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥

ऋषय ऊचुः ।

कथं वृक्षस्वरूपास्ते ब्रह्मविष्णुमहेश्वराः ।
एतत् कथय सर्वज्ञ ! संशयोऽत्र महान् हि नः ॥

सूत उवाच ।

पार्व्वतीशिवयोर्देवैः सुरतं कुर्व्वतोः किल ।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः ।
रतेःसौख्यपरिभ्रंशकम्पमाना तदा रुषा ॥

पार्व्वत्युवाच ।

क्रिमिकीटादयोऽप्येते जानन्ति सुरतीः सुखम् ।
तस्मान्मम सुखभ्रंशाद्यूयं वृक्षत्वमाप्स्यथ ॥

सूत उवाच ।

एवं सा पार्व्वती देवी अशपत् कोपमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥"

इति पाद्मोत्तरखण्डे ११० अध्यायः ॥

तत्पर्य्यायः । किंशुकः २ पर्णः ३ वातपोथः ४ । इत्यमरः । २ । ४ । २९ ॥ याज्ञिकः ५ त्रिपर्णः ६ रक्तपुष्पः ७ पूतद्रुः ८ क्षारश्रेष्ठः ९ ब्रह्मोपनेता १० काष्ठद्रुः ११ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । क्रिमिदोषविनाशित्वञ्च । तद्बीजगुणाः । पामकण्डूविदद्रुत्वग्दोषनाशित्वम् ॥ तत्पुष्पगुणाः । स्वादुत्वम् । कफकुष्ठनाशित्वञ्च ॥ तत्पुष्पं चतुर्विधं यथा, राजनिर्घण्टे ।

"रक्तः पीतः सितो नीलः कुसुमैस्तु विभाव्यते ।
किंशुकैस्तु पलाशोऽपि सितो विद्याप्रदः स्मृतः ॥"

"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः ।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥
भग्नसन्धानकृद्दोषग्रहण्यर्शःक्रिमीन् हरेत् ।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम् ॥
वातलं कफपित्तास्रकृच्छ्रजित् ग्राहि शीतलम् ।
तृड्दाहशमनं वातरक्तकुष्ठहरं परम् ॥
फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम् ।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत् ॥"

इति भावप्रकाशः ॥

पलाशगिरा । यथा,—

"गहिडिस्यात् किंशुकः क्रिमघ्नो हरिकर्टकः ॥"

इति शब्दरत्नावली ॥

(पलाशस्य वृक्षाकारो यो ।) शटी । (पलं मांसं अश्नातीति । पल+अश्+अण् । यद्वा, पले मांसे आशा यस्य ।) राक्षसः । इति मेदिनी । शे, ५३ ॥ हरितः । मगधदेशः । इति शब्दरत्नावली ॥

पलाशः, त्रि, (पलाशवद्वरितवर्णं अस्ति अस्यति वा इति । अश+अण् ।) हरिद्वर्णविशिष्टः । इति मेदिनी । शे, ५४ ॥ निर्द्दयः । इति धरणिः ॥

पलाशकः, पुं, (पलाश+संज्ञायां कन् ।) शटी । इति जटाधरः । पलाशवृक्षः । इति शब्दरत्नावली ॥

पलाशपर्णी, स्त्री, (पलाशस्य पर्णमिव पर्णमस्याः । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥

पलाशाख्यः, पुं, (पलाशस्य आख्या आख्या यस्य । यद्वा, पलाशं पलाशतुल्यमाख्यातीति । आ+ख्या+कः ।) नाडीहिङ्गुः । इति राजनिर्घण्टः ॥

पलाशान्ता, स्त्री, (पलाशं अन्ते यस्याः । यद्वा, पलाशानां पत्राणां अन्तो प्रधानं यस्याः ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

पलाशी, [न्] पुं, (पलाशं विद्यतेऽस्य । पलाश+इनिः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (पलं मांसं अश्नातीति । अश+णिनिः ।) राक्षसः । इति मेदिनी । ने, ११९ ॥ कौटिल्यः । इति रत्नमाला ॥ (पर्वतविशेषे राजसिंहः । यथा,—

"ततः स भगवान् विप्रान् कारयेद्धि ब्राह्मणः ।
ब्रह्मराक्षितं सर्वं त्रिधा मानवोत्तम् ॥
अयुतं शतसाहस्रं ततः पलाशपालितम् ।
पलाशिनं शालिवश्च तथा निजवित्तं पुनः ॥"

इति महाभारते । १ । ३३ । ८—१० ॥

स्त्री, नदीविशेषः । यथा शुक्तिमत्पर्वतप्रसूता । यथा, मार्कण्डेये । ५७ । ३० ।

"कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥")

पलाशी, स्त्री, (पलाश+गौरादित्वात् ङीष् ।) लाक्षा । लताविशेषः । तत्पर्य्यायः । पत्रश्रेणी २ पर्णपत्री ३ पलाशिका ४ सुपर्णी ५ सुपर्णी ६ दीर्घवल्ली ७ त्रिपादिका ८ बहुपर्णी ९ दीर्घपर्णी १० रक्तला ११ भलिका १२ ब्रह्मपत्री १३ कालिका १४ । अस्या गुणाः । मधुरत्वम् । कषायत्वम् । तृषादोषाहरत्वकारित्वम् । पथ्यत्वम् । पित्तश्लेष्मकारित्वम् । इति राजनिर्घण्टः ॥

पलिक्नी, स्त्री, (पलितमस्या अस्तीति । "अर्श आदिभ्योऽच् ।" इत्यच् । "वर्णादनुदात्तात्तोपधात्तो नः ।" पाणि । "छन्दसि क्नमित्येके ।" इति तस्य क्नादेशो भवति । ततो गौरादित्वात् ङीष् ।) वृद्धा । इत्यमरः । २ । ६ । १४ ॥ बालगर्भिणी गौः । इति हेमचन्द्रः ॥

पलिघः, पुं, (परिहन्यतेऽनेनेति । परि+हन+"मूर्त्तौ घनः ।" ३ । ३ । ७७ । इति अप् घादेशश्च । ततः "परेश्च घाङ्कयोः ।" ८ । २ । २२ । इति रस्य लः ।) काचकलशः । घटः । प्राकारः । गोपुरम् । इति मेदिनी । घे, ८ ॥

पलितं, क्ली, (पल+भावे क्तः । यद्वा, पलतमिति । पल+"अञ्जेरितश्च पि च ।" उणा० ३ । ९३ । इति इतच् तस्य पत्वम् ।) जरया कैशादौ शौक्ल्यम् । कैशपाकः । इत्यमरः । २ । ६ । ४१ ॥ (यथा, मनुः । ६ । २ ।

"गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥")

नस्य निदानं यथाह माधवकरः ।
"क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः ।
पित्तञ्च केशान् पचति पलितं तेन जायते ॥"
तच्चिकित्सा यथा,—
"लौहचूर्णस्य कर्षन्तु दशार्द्धं भृतमञ्जसः ।
धात्रीफलद्वयं पथ्ये द्वे तथैकं विभीतकम् ॥
पिष्ट्वा लौहमये भाण्डे स्थापयेन्निशि वासयेत् ।
लेपोऽयमचिराद्धन्ति पलितं नेह संशयः ॥
दशार्द्धं पञ्चकर्षाणि ।
काश्मर्य्या मूलमार्द्रौ सहचरकुसुमं केतकस्यापि मूलं
लौहं चूर्णं सभृङ्गं त्रिफलपलयुतं तैलमेभिः पचेयुः ।
कृत्वा लोहस्य भाण्डे क्षितितलनिहितं स्थापयेन्मासमेकं
केशाः काशप्रकाशा अपि मधुपनिभा अस्य योगाद्भवन्ति ॥
त्रिफला नीलिकापत्रं भृङ्गराजोऽयसो रजः ।
अवीमूत्रेण संपिष्टं लेपात् कृष्णीकरं परम् ॥"
इति भावप्रकाशे मध्यखण्डे क्षुद्ररोगाधिकारे ॥
शैलजम् । तापः । कर्द्दमः । इति मेदिनी । ते, १२२ ॥ (पल गतौ + "लोटपलितौ ।" उणां । ३ । ९ । इति क्तप्रत्ययेन निपातनात् सिद्धम् ।) केशपाशः । इति हेमचन्द्र, उज्ज्वलदत्तश्च ॥

पलितः, पुं, (पलति वृद्धावस्थायां केशशौक्ल्यादिकं प्राप्नोतीति । पल + "पलेरितच्चादेश पः ।" उणां । ५ । ३४ । इति इतच् पस्य च पः ।) वृद्धः । इति जटाधरः ॥

पलिता, स्त्री, (पलित + टाप् ।) वृद्धा । इति जटाधरः ॥

पल्यङ्कः, पुं, (परितोऽङ्क्यतेऽत्र इति । परि + अकि लक्षणे + घञ् । "परेश्च घाङ्कयोः ।" ८ । २ । २२ । इति रस्य लः ।) पर्य्यङ्कः । इत्यमरः । २ । ७ । १३८ ॥ (यथा, रामायणे । २ । ६२ । ९ ।
"पल्यङ्कमग्र्यास्तरणं नानारत्नविभूषितम् ।
ममयोक्ष्यति वैदेही प्रातस्तापयितुं त्वयि ॥")

पल्ययनं, क्ली, (परितः अयति गच्छति अनेन । परि + अय गतौ + करणे ल्युट् । रस्य लत्वम् ।) पर्य्याणम् । इति हेमचन्द्रः । ४ । ३१८ ॥ घोडार जिन् इति भाषा ॥

पल्युल, लु क लूनिपूत्योः । इति कविकल्पद्रुमः । (अदन्तचुरा-परं-सकं-सेट् ।) पकारयुक्तैकलकारमध्यः ह्रस्वमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्युलत् हस्तं लोकः । पल्युलयति अन्नं गङ्गा । इति दुर्गादासः ॥

पल्यूल, लु क लूनिपूत्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-परं-सकं-सेट् ।) पकारयुक्तैकलकारमध्यः दीर्घमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्यूलत् हस्तं लोकः । पल्यूलयति अन्नं गङ्गा । इति दुर्गादासः ॥

पल्ल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) पल्लति । इति दुर्गादासः ॥

पल्लः, पुं, (पल्लति शस्यादिप्राचुर्य्यं गच्छतीति । पल्ल + पचाद्यच् ।) स्थूलकुशूलकम् । इति मेदिनी । ले, ३० ॥ पात्तुर इति मराट इति च भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये ।
"सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत् ॥")

पल्लवः, पुं, क्ली, (पल्यते इति पल् । पल् + क्विप् । लूयते इति लवः । लू + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ततः पल् चासौ लवश्चेति ।) नवपत्रादियुक्तशाखाग्रपर्व्व । इति भरतः ॥ नवपत्रस्तवकः । "इति मधुः ॥ पल्लवपत्रादिसंघाते शाखायाः पल्लवो मतः ।" इति कोषान्तरम् ॥ (यथा, रघुः । ९ । ३२ ।
"अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः
सकलिकाकलिकामजितामपि ॥")
तत्पर्य्यायः । किसलयम् २ । इत्यमरः । २ । ४ । १४ ॥ प्रवालम् ३ नवपत्रम् ४ । इति राजनिर्घण्टः ॥ वलम् ५ किसलम् ६ किशलम् ७ किशलयम् ८ विटपः ९ । इति शब्दरत्नावली ॥ पत्रयौवनम् १० । इति जटाधरः ॥ विस्तारः । वलम् । शृङ्गारः । अलक्तरागः । इति विश्वमेदिन्यौ ॥ वलमित्यत्र वनमिति क्वचित् पाठः ॥ वलयः । चापलः । इति शब्दरत्नावली ॥ (देशविशेषः । तद्देशवासिषु पुं भूम्नि । यथा, मार्कण्डेये । ५७ । ३६ ।
"अपरान्ताश्च शूद्राश्च पल्लवाश्चर्म्मखण्डिकाः ।
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥")

पल्लवकः, पुं, (पल्लवेन शृङ्गारेण कायतीति । पल्लव + कै + कः ।) वेश्यापतिः । (पल्लव इव कायतीति ।) मत्स्यविशेषः । इति त्रिकाण्डशेषः ॥ (पल्लवैः किशलयैः कायतीति । अशोकवृक्षः । इति कश्चित् ॥)

पल्लवद्रुः, पुं, (पल्लवप्रधानो द्रुर्वृक्षः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

पल्लवाधारः, पुं, (पल्लवस्य आधारः ।) शाखा । इति शब्दचन्द्रिका ॥

पल्लविकः, त्रि, (पल्लवः शृङ्गाररसोऽस्त्यस्मिन् वा । पल्लव + ठन् ।) कामुकः । इति हेमचन्द्रः । ३ । २४५ ॥

पल्लवितं, क्ली, (पल्लवोऽलक्तरागः सञ्जातोऽस्य । तारकादित्वात् इतच् ।) लाक्षारक्तः । इति मेदिनी । ते, २०४ ॥

पल्लवितः, त्रि, (पल्लवः सञ्जातोऽस्य । पल्लव + इतच् ।) सपल्लवः । पल्लवयुक्तः । ततम् । विस्तृतम् । इति मेदिनी । ते, २०४ ॥

पल्लवी, [न्] पुं, (पल्लवाः सन्त्यस्य । पल्लव + इनिः ।) वृक्षः । इति शब्दमाला ॥ (पल्लवविशिष्टे, त्रि । यथा, कुमारे । ३ । ५४ ।
"पर्य्याप्तपुष्पस्तबकावनम्रा
सञ्चारिणी पल्लविनी लतेव ॥")

पल्लिः, स्त्री, (पल्लतीति । पल्ल + "सर्व्वधातुभ्य इन् ।" इति इन् ।) ग्रामकः । कुटी । इति हेमचन्द्रः ॥ कुटीसमुदायः । ग्रामः । इत्यन्ये । गृहमिति भट्टः ॥ कुटीग्रामकयोः पल्लीति शाश्वतः ॥ स्थानमिति स्वामी ॥ पतन्ति भरणेन भ्रमणेन च जीवन्तीति क्विपि पलो गावः ते लीयन्तेऽत्र पल्लिः नाम्नीति ङिः शाण्डोगादीनि ङीपि पल्ली च गोपपल्लीप्रभृति च । इत्याभीरपल्लिशब्दटीकायां भरतः ॥ (गृहगोधिका । इति हेमचन्द्रे पल्लीशब्ददर्शनात् ॥)

पल्लिका, स्त्री, (पल्लि + स्वार्थे कन् ततष्टाप् ।) गृहगोधिका । इति राजनिर्घण्टः ॥

पल्लिवाहः, पुं, (पल्लिं कुटीं वाहयति निर्वाहयतीति । पल्लि + वह + णिच् + अण् ।) तृणभेदः । यथाह राजनिर्घण्टः ।
"पल्लिवाहो दीर्घतृणः सुमचस्ताम्रपर्णकः ।
षट्पः शाकपत्रादिः मयूराभवलग्नदः ॥"

पल्ली, स्त्री, (पल्लि + "कृदिकारादक्तिनः ।" वा ङीष् ।) स्वल्पग्रामः । (यथा, कथासरित्सागरे । १० । १९५ ।
"इतस्त्वं गच्छ मत्पल्लीं त्वाने या तत्र ते गता ।
अहं तत्रैव नेष्यामि दास्याम्यभिमतञ्च ते ॥")
कुटी । इति विश्वमेदिन्यौ ॥ नगरभेदः । स तु दक्षिणदेशे प्रसिद्धः त्रिचनापल्ल्यादिः । इति शब्दरत्नावली ॥ क्षुद्रजन्तुविशेषः । टिकटिकी इति भाषा । तत्पर्य्यायः । मुषली २ गृहगोधा ३ विशम्भरा ४ ज्येष्ठा ५ कुड्यमत्स्यः ६ पल्लिका ७ गृहगोधिका ८ । इति राजनिर्घण्टः ॥ गृहगोलिका ९ माणिक्या १० भित्तिका ११ गृहोलिका १२ । इति हेमचन्द्रः । ४ । ३६६ ॥ अवशिष्टं ज्येष्ठीशब्दे द्रष्टव्यम् ॥ (अस्याः पतनफलानि यथा, ज्योतिषशास्त्रे ।
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो व्याधिदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणहृदिस्था सर्व्वसौख्यं ददाति ॥")

पल्वलं, क्ली, पुं, (पलति गच्छति निम्नस्थलं वा । पल गतौ वा माने वा + "सानसिवर्णसिपर्णसि—" इति । उणां । ४ । १०७ । इति निपातनात् वलच् प्रत्ययेन सिद्धम् ।) अल्पसरः । इत्यमरः । १ । १० । २८ ॥ (यथा, महाभारते । ७ । ९१ । ९ ।
"पल्वलानि च सर्व्वाणि सर्व्वे चैव हृदोपमाः ।
स्वादरं वह्न्यचैव निःशेषं कुरुते जगत् ॥")
तस्य जलं यथा,—
"आन्पं वरः पल्वलं स्यादुदकं सकद्रोणि रवौ ।
न तिष्ठति जलं किञ्चित्तत्र वारि पाल्वलम् ॥
तच्चाश्रुयाः ।
पाल्वलं वारिभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥"
इति भावप्रकाशः ॥
"पाल्वलं मुर्व्वभिष्यन्दि विदाहि दोषलं परम् ॥"
इति राजवल्लभः ॥

पव, क्ली, (पूयतेऽनेन। पूञ् पवने। "पादेरप्" ३।३।५७। इति अप्।) गोमयम्। इति शब्दचन्द्रिका॥ (गोमयशब्दे विवरणमस्य ज्ञातव्यम्॥)

पवः, पुं, (पवनमिति। पूञ् शोधने + भावे अप्। यद्वा, पुनातीति। पू + अच्।) निष्पावः। स च धान्यादीनां निर्बुषीकरणम्। धान्यादेः शोधनं बहुलीकरणम्। इत्यमरभरतौ॥ (पू + कर्मणि अप्। यद्वा पुनातीति कर्त्तरि अच्।) वायुः। इति शब्दचन्द्रिका॥

पवनं क्ली, (पूयते धान्यसंयोगेन यस्मिन्। पू + आधारे ल्युट्।) कुम्भकारस्य आमपात्रादिपाकस्थानम्। पोयान् इति भाषा। इति मेदिनी। ने, ८३॥ (यथा,—
"यः कुम्भकारपवनोपरि ...
...यस्य केवलमसौ न तु मानसान्धे॥")
...

पवनमिति प्रमादपाठः। जलम्। इति शब्दमाला॥ पवते स्त्रि। इति शब्दरत्नावली। (भावे ल्युट्।) पवित्रीकरणम्॥

पवनः, पुं, (पुनातीति। पू + बहुलमन्यत्रापीति युच्।) निश्वासः। वायुः। इति मेदिनी। ने, ८३॥ (यथा, गीतायाम्। १०। ३१।
"पवनः पवतामस्मि रामः शस्त्रभृतामहम्॥")
अस्य वायवनता यथा, विष्णुपादिपुराणे।
"भूतानुगाश्च इह पवनकादयः
प्राणादयः पवनविशेषसंज्ञाः।
...परतोऽपि च परिपूर्णबलोऽन्या-
इत्यः पदार्थ इमे पवनाः प्रसिद्धाः॥"
अथ पवनाधिपा यथा, ज्योतिषे।
"शाकः प्रदक्षिणदक्षिणो मुनिभिरीशाद्यस्तिः।
आग्नेयादिकमेणैव अष्ट वाताः प्रकीर्तिताः॥
आग्नेयः प्रदक्षिणैव नमस्कृतो विरक्तकः।
उत्तरो विरक्तो वायुः ... वाताः प्रकीर्तिताः॥"
अस्य पुराणम् ... (प्राणवायुः। यथा, कठोपनिषदि। १। ७२।
"अनेनैव विधानेन प्रयाति पवनो ... ।
... आयते ... ॥"
... यथा, भागवते। ५। २। १३।
"हारीत ... नाम प्रियवनामो मधुः।
... ॥")

पवनविजयः, पुं, (पवनं श्वासवायुं विजयतेऽनेन। वि + जि + करणे अच्। यद्वा, पवनस्य विजयो यत्र।) शुभाशुभज्ञापकश्वासवायुप्रचारशास्त्रविशेषः। यथा—

पाश्ववाच।

"हरेः शुभा हरी गौरी देवानां ज्ञानमूर्त्तये।
कृष्णो ब्रह्मा हरिः ... प्रकीर्तिताः॥
... ।
... ॥
... ।
... ॥"

...स्थानभेदेन तथा ... ।
... शुभकर्माणि ... प्रयत्नतः॥
... ॥
... ।
शुभाशुभविवेको हि ... ।
... ॥
... ।
... ॥
... ।
... ॥
... ।
... ॥
... ।
... ॥
... ।
... ॥
... ।
... ॥

...

इति शाक्ते पवनविजयादि १७ अध्यायः॥

पवनव्याधिः, पुं, (पवनः वायुरेव व्याधिरस्य।) उद्धवः। भीमसेन राजा। इति त्रिकाण्ड-शेषः॥ (यथा,—
"...।
... ॥"
इति माघे। ५। १६।
पवनात् प्रकुपितवायोर्जातो व्याधिः।) वातरोगः॥

पवनात्मजः, पुं, (पवनस्य आत्मजः पुत्रः।) हनूमान्। इति शब्दरत्नावली। (पवनस्य वायो-रात्मजः। "वायोरिति।" इति कुमारसम्भव-... तनयः।) भीमसेनः। इति महा... (भीमसेनः। इति महाभारतम्॥ यथा, राजतरङ्गिण्याम्। ५। ८४।
"... ।
... ॥")

पवनाशः, पुं, (पवनमश्नाति ... अश + अण्।) सर्पः। ... इत्यमरः। ... ।
... । ... । ... ।
... । ... । ... ।
... । ... । इति शब्दरत्नावली॥

पवनाशः, पुं, (पवनं वायुं अश्नाति भक्षयतीति । अश भोजने+"कर्म्मण्यण् ।" ३।२।१ । इति अण् ।) सर्पः । इति हलायुधः ॥

पवनाशनः, पुं, (पवनो वायुरशनं भक्ष्यं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥

पवनाशनाशः, पुं, (पवनाशनस्य सर्पस्य नाशो यस्मात् । यद्वा, पवनाशनं सर्पमश्नातीति । अश्+अण् ।) गरुड़ः । इति हलायुधः ॥ मयूरः । यथा, उत्तररामचरिते ।

"त्वद्योनिभव्यञ्जनसम्भवानां
श्रुत्वा निनादं गिरिगह्वरेषु ।
तमोऽरिबिम्बप्रतिबिम्बधारी
ररास कान्ते ! पवनाशनाशः ॥"

पवनेष्टः, पुं, (पवने वायुरोगे इष्टः ।) महानिम्बः । इति रत्नमाला ॥ (महानिम्बशब्देऽस्य गुणा-दिकं ज्ञेयम् ॥)

पवनोत्भुजं, क्ली, पद्मम् । इति शब्दचन्द्रिका ॥

पवमानः, पुं, (पवते शोधयतीति । पूङ् शोधने+"पूङ्यजोः शानन् ।" ३।२।१२८ । इति शानन् । "आने मुक् ।" ७।२।८२ । इति मुमागमः ।) वायुः । इत्यमरः । १।१।६१ ॥ (यथा, रघुः ।८।९।

"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो
नमयामास नृपाननुद्धरन् ॥"

अग्निः स्वाहायां जातः पुत्रः । यथा, मार्कण्डेये । ५२ । २७-२८ ॥

"पीतासवसिरश्चाभीर्मतसहसा इतोऽध्यच: ।
तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज ॥
पावकं पवमानञ्च शुचिञ्चापि जलाशिनम् ।
तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च ॥")

निर्मथ्याग्निः । स च गार्हपत्याग्निः । यथा,—

"अथ यः पवमानस्तु निर्मथ्योऽग्निः स उच्यते ।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः ॥"

इति मात्स्ये ४८ अध्यायः ॥

पवमानात्मजः, पुं, (पवमानस्य वायोरात्मजः । "वायोरग्निः ।" इति श्रुतेरग्नेर्वायुजन्यत्वाच्च तथात्वम् । यद्वा, पवमानस्य अग्निविशेषस्य आत्मजः ।) हव्यवाहनः । यथा,—

"पवमानात्मजो ह्यग्निर्हव्यवाहन उच्यते ।"

इति मात्स्ये ४८ अध्यायः ॥

पवाका, स्त्री, (पुनातीति । पूञ् ञि शोधने+"बलाकादयश्च ।" उणां ४ । १४ । इति आक-प्रत्ययेन निपातनात् साधुः ।) वात्या । चक्र-वातः । इत्युणादिकोषः ॥

पविः, पुं, (पुनातीति । पूञ् शोधने+"अच इः ।" उणां ४ । १३८ । इति इः ।) वज्रम् । इत्य-मरः । १ । १ । ५० ॥

पवितः, त्रि, (पूयते स्म । पूङ् शोधे+क्तः।"पूङ्श्च" ७।२।५१ । इति इट् । "पूङः क्त्वा च ।"१।२।२२। इति न कित्वम् ।) पूतः । इति मुग्धबोध-व्याकरणम् ॥ मरीचि, क्ली । इति राजनिर्घण्टः ॥

पविता [तृ], त्रि, (पुनातीति । पू+तृच् ।) पवित्रताकारकः । यथा, नैषधे ।

"तनुश्रिया यस्य हृतं स मन्मथः
कुलश्रिया यः पविताऽऽदन्वयम् ॥"

पवित्रं, क्ली, (पूयतेऽनेनेति । पूं+"पुवः संज्ञा-याम् ।" ३ । २ । १८५ । इति इत्रः ।) वर्षणम् । कुशम् । (यथा, मनुः ।२ । ७५ ।

"प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥")

ताम्रम् । पयः । इति मेदिनी । रे, १०७ ॥ घर्षणम् । इति विश्वः ॥ अर्घोपकरणम् । इति हेमचन्द्रः ॥ यज्ञोपवीतम् । इति त्रिकाण्डशेषः ॥ घृतम् । मधु । इति राजनिर्घण्टः ॥ पार्व्वण-श्राद्धादावर्घार्थे होमादावाज्यसंस्कारार्थञ्च साग्रनिर्गर्भकुशाग्रद्वयवेष्टितप्रादेशमात्रकुशपत्र-द्वयम् । यथा,—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥"

इति श्राद्धतत्त्वम् ॥

(विष्णुः । यथा, महाभारते । १३।१४९।२० ।

"प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥"

महादेवः । यथा तत्रैव । १३।१७।३५ ।

"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः ॥")

पवित्रः, त्रि, (पू+इत्र ।) व्रतादिना शुद्धः । (यथा, गीतायाम् । ४ । ३८ ।

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥")

तत्पर्य्यायः । प्रयतः २ पूतः ३ । एतत्त्रयं प्राणिविषयमात्रम् । शुचिः ४ शुद्धः ५ पवि-त्रितः ६ । इति शब्दरत्नावली ॥ पुण्यः ७ पावनः ८ । इति जटाधरः ॥ (पूयतेऽनेन । पूञ् +"पुवः संज्ञायाम् ।"३।२।१८५ । इति इत्रः ।) शुद्धद्रव्यम् । तत्पर्य्यायः । पूतम् २ मेध्यम् ३ । एतत्त्रयं अप्राणिद्रव्यविषयम् । इति मल्लवर्गो विशिष्यलिङ्गे च अमरभरतौ ॥ शुद्धम् ४ शुचि ५ पुण्यम् ६ पूतिकम् ७ । इति जटाधरः ॥ (यथा,—

"मधु पवित्रमायुष्यं सुमङ्गल्यं रसायनम् ।
एतत्तु गन्धद्रव्यपरम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

पवित्रः, पुं, (पुनातीति । पू+कर्त्तरि इत्रः ।) तिलवृक्षः । पुत्रजीववृक्षः । इति राजनिर्घण्टः ॥ (तिलपुत्रजीवशब्दयोरस्य विवृतिर्ज्ञेया ॥) कार्त्तिकेयस्य नामान्तरम् । यथा, महाभारते । ३ । २३१ । ६ ।

"महीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः ॥")

पवित्रकं, क्ली, (पवित्र+कन् । यद्वा, पवित्रे पयसि कायतीति । कै+कः ।) जालम् । इति शब्दरत्नावली ॥ शणसूत्रजालम् । इत्यमरः । १ । १० । १६ ॥ पवित्रस्य यज्ञोपवीतम् । यथा,

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्धवृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥
इति मनुवचनात् पवित्रकमपि तदुच्यते । इत्य-मरटीकायां भरतः ॥

पवित्रकः, पुं, (पवित्र+स्वार्थे कन् ।) कुशः । दमनकः । अश्वत्थः । उडुम्बरः । इति राज-निर्घण्टः ॥

पवित्रधान्यं, क्ली, (पवित्रं धान्यम् । नित्यकर्म्म-धारयः ।) यवः । इति राजनिर्घण्टः ॥ (यव-शब्देऽस्य गुणादयो वक्तव्याः ॥)

पवित्रा, स्त्री, (पवित्र+टाप् ।) तुलसी । इति शब्दमाला ॥ नदीभेदः । इति हेमचन्द्रः ॥ हरिद्रा । अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

पवित्रारोपणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोपणं प्रदानं यत्र ।) श्रीकृष्णसम्प्रदानकोप-वीतदानरूपोत्सवविशेषः । यथा,—

"श्रावणस्य सिते पक्षे द्वादश्यां वैष्णवैर्मुदा ।
कर्त्तव्यः कृष्णदेवस्य पवित्रारोपणोत्सवः ॥"

अथ तन्नित्यता हरिभक्तिविलासे ।

"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
हरेश्च प्रीतिमाप्नोति यः पवित्रं समाचरेत् ॥
विधिना श्रावणे यो न कुर्य्यात् पवित्रकम् ।
हरन्ति राक्षसास्तस्य सर्व्वपूजादिकं फलम् ॥"

योगसारे च पवित्रोत्सवनामारंभस्तु भागवतं पवित्रं प्रति श्रीकृष्णेन वरदानम् । यथा,—

"ये त्वां न वस्तुमन्यन्ते यथा समाचिन्तो मया ।
जपहोमादिकं तेषां फलं स्यामेतु निष्फलम् ॥

विष्णुरहस्ये ।

न करोति विधानेन पवित्रारोपणन्तु यः ।
तस्य साम्वत्सरी पूजा निष्फला मुनिसत्तम ॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः ॥"

अथ पवित्रारोपणमाहात्म्यम् ।

तत्र बौधायनः ।

"यावन्तस्तु पवित्रस्य तन्तवः स्वर्गे महीयते ।
आयुरारोग्यमैश्वर्य्यं विपुलं तस्य वर्द्धते ॥

मत्स्यसंहितायाम् ।

सम्बत्सरेण या पूजा कृता वै मानसा द्विज ।
पवित्रदानात् पूर्णां स्याद्दिव्याह भगवान् हरिः ॥

विष्णुरहस्ये ।

पवित्रारोपणं विष्णोर्भुक्तिमुक्तिप्रदायकम् ।
स्त्रीपुंसोर्निगदं पुण्यं सुखसम्पत्प्रदायकम् ॥
पुण्यानाञ्च तथा पुण्यं सर्व्वपापहरन्तु वै ।
पवित्रारोपणं तस्मात् पवित्रं परमं स्मृतम् ॥
सम्वत्सरे नरो भक्त्या समभ्यर्च्य जनार्द्दनम् ।
यत् फलं समवाप्नोति पवित्रारोपणेन तत् ॥

किञ्च ।

मासचक्रिणो नित्यं चार्चितं भवबन्धनात् ।
पवित्रं तेन विख्यातं शास्त्रं तेनाभिधीयते ॥
विष्णुरूपा तु विख्यातं तदा लोके विधीयते ।
न यत्र सम्यक्पूजायां देवः कर्म्मणां प्रभुः ।
तदेव विष्णोरुक्तं मतं नारायणात्मना ।
निर्द्दिष्टा निर्देशका आपदः प्रसवः स्मृतः ॥"

अथ पवित्रारोपणविधिः ।

"गौरवं राजमेधार्थैः सौमैः तथैव मार्द्दकैः ।
कार्यामेषां पवित्रारोपणं वार्द्धः कुर्व्वीत ॥

अथ कारयितव्यं पवित्रं वासनोपर्निर्मितं शुभम् ।
ग्रन्थीन् विधाय तत्र पूर्वोक्तगुणदेवाक्षितः ॥
एकमेकं तत् प्रोक्तं प्रमाणं तु विवासुधा ।
मध्यकेऽपि तत्करणं मन्त्रिताभिमन्त्रयेत् ॥
कोटिं सहस्रेणाय गायत्र्याहं वाच्यार्हतः ।
अलङ्कृतामिदमपि परिधाप्य प्रापयेत् प्रभोः ॥
षट्त्रिंशद्गुणकमपि वामादि कार्यास्तु प्रथमे ।
चतुर्विंशतिरपि च द्वादशाक्षरो बुधैः ।
अङ्गुष्ठपर्वमात्रम् कुर्वीतद्व्यमपोत्तमे ।
गन्धं मध्यमे कुर्यात्तदर्द्धं च कनीयसि ॥
ग्रन्थीन् कुर्वीत मध्ये तु शुभान् सुमनोहरान् ।
न ह्येवं विन्यसेन्नाकान् ग्रन्थीन् कुर्वीत कुर्वीत ।
अष्टोत्तरशतमेव सूत्रयस्य पवित्रकम् ।
अष्टोत्तरशतं यद्वा पञ्चाशत्संख्यया चरेत् ॥
आरभ्य सूत्रं यत्तु सर्वैर्विरचिता शुभा ।
आधारशक्तिमी माला वनमाला प्रकीर्तिता ॥
कर्तव्यं कुर्यात् सर्वैर्द्वादशभिः शुभैः ।
चार्चयामिनं तथ द्वादशग्रन्थिकं चरेत् ॥
परिधापि सर्वेषां देवतानां प्रमाचरेत् ।
सर्वेषां च संख्याकैः कर्मसंख्याकैः ॥
तेन ग्रन्थीन् यथायोगं वा वहेत् दीरपि ।
सर्वैर्ग्रन्थिभिः सूत्रैः षड्विंशतिभिस्तथा ॥
यथाक्रमं स्वमन्त्रेण परिधापि च कारयेत् ।
तथायेन मन्त्रेण प्रोक्षयेत्तु यत्नतः ॥
तथा चोक्तम् ।
त्रिलोकमण्डलेन सूत्रं प्रत्यग्रं शुभम् ।
षष्ठं यया भक्त्या तथा कुर्वीत प्रोक्षितम् ॥
चतुर्विधाय ग्रामोन्नयनोषितादिका ।
प्रसन्नायाह प्रदाने न्यायेनापि वेदने ॥”
इति पवित्रविधिप्रोक्तम् ॥ * ॥
“कृत्वा तु पवित्राणि परिवारोपणाय हि ।
स्नानं विधाय तथा पूर्व यथा प्राक्लिखितं चरेत् ॥
एकादश्यां प्रभाते च नित्यकर्म समाप्य हि ।
देवालये तु मण्डपं सर्वं रचयेत् शुभम् ॥
कृत्वा कलशं विन्यस्य परिवारोपणात्मकम् ।
पूजां विधिवत् कृत्वा ततः विनायकेतिम् ॥
विनायकं विधिना प्रथमा विधिवत् प्रभो ।
मन्त्रेण विधिवद्देवं मण्डपेत् पवित्रकम् ॥
न ते विघ्नो भवत्विह कुरु नाथ । पूजां सदैव ।
सर्वथा सर्वदा विघ्नं । कृपा मे परमा भव ॥
इत्युक्त्वा सर्वतो गन्धपुष्पाद्यैः परं कृत्वा ।
संनिधाप्य परिधाय कुसुमं नैवेद्यां च ॥
दत्त्वाद्यमेकं मूलं चार्घ्यं दत्त्वा तथा ।
ततः पीठाद्यावाहनं यथामार्गं पृथक् पृथक् ॥
पूजां कृत्वा सर्वानाथ सर्वथा सर्वत्र ।
देवताश्च विधाय परिवारन्दिवानयेत् ॥”
अथ परिवाराधिवासनम् ।
“अथ पुनरपि रात्र्यां पुनरपि पुनरम् ।
गन्धपुष्पाद्यैर्गन्धपुष्पैरथ मन्त्रपूतैः पृथक् ॥
मन्त्रश्चायम् ।
ओँ ओं आवाहयामि त्वां परिवारोपणाय भोः ।
विष्णुलोकात् पवित्राद् आगच्छ सन्निधत्स्व मे ॥
विभावसोः सभार्यायां प्रकाशः देवतानाम् ।
तत्तन्मन्त्रैः अभिमन्त्र्य तत्तन्मन्त्राद्विरावर्त्तयेत् ॥
तत्र तत्र वा देवताक्षोभाः ।
अधिवासं प्रकाशस्वमात्रकं प्रावृत्य देवताः स्थाप्याः ।
प्रकाशः सोमवती च प्रभा भानुः प्रभा तथा ॥
विद्युच्च विश्वदेवाश्च सरस्वत्यादिदेवताः ।
क्रिया च पीवरी वीरा अपूर्वी चानुरागिणा ।
जया च विजया चैव मुक्तिदा च वरप्रदा ।
शत्रुघ्नी तु नवमी दशमी सर्वतोमुखी ।
एतासां देवतानां तासां च विधिविन्यसेत् ॥
मन्त्राश्चैते ।
ओँ वर्णमध्यनिवासाय । सर्वदेवमयाय च ।
लावण्यरूपविन्यासाय । नमोऽस्तु वासुदेवाय ॥
ओँ सर्वमन्त्रेश्वर । देवेश । सर्वैश्वर्यपरायण ।
विधानस्य विधाता च । सान्निध्यं कुरु मे प्रभो ॥
ओँ भक्तिप्रियाय नमस्ते । प्रपन्नाय । हि नमस्ते ।
सम्भवेद्दिवि प्रमाणे । देव । तेन संवत्सरेण ।
तत्र मन्त्रेण पर्वतं तथासमेतं तत्र च ।
कृपाभिर्मन्त्रपूर्वकैः प्रासादैः समन्वितम् ॥ ॥
अथ प्रभवनामाक्षिमेव पवित्रमेव विन्यसेत् ।
विन्यस्य पवित्रं पवित्रं क्षितिवत् सन्निधापनकम् ॥
तत्र मन्त्रः ।
ओँ संवत्सरकृतायाः सम्यक्पूजनादि यत् ।
परिपूर्णकरणायेदं कौतुकं धत्ते नमः ॥
ततो गन्धविधानेन प्रदीप्य पुष्पितं बुधः ।
प्राङ्मुखं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥
आमन्त्रितोऽसि देवेश ! प्रातः देवगणैः सह ।
प्रातस्त्वां पूजयिष्यामि तत्र सन्निधिर्भव ॥
आमन्त्र्य भगवन् ! विधिवत्पूर्वविधानं च ।
प्रातस्त्वां पूजयिष्यामि सन्निधिं कुरु केशव ! ॥
तथाच ।
विष्णुवेदोक्तं सर्वं सर्वप्रतिष्ठाकम् ।
सर्वकामदं देव तावद्धि धारयामहम् ॥
अनेन मन्त्रेण विहरन् पश्चात्पूजितेन हि ।
एतद्रूपं समर्पयेत् सम्प्राप्तात्मवर्धनम् ॥
कौतुकं देवं बुद्धा च तथा पुष्पाञ्जलिं ततः ।
तदधिवासने ततकुम्भमध्यात्माद्यधापयेत् ॥
पूर्वपदमनुष्ठानेन वाद्यादिना निशि ।
गीतवाद्यादिना कुर्याज्जागरं यथाविधि ॥”
अथ परिवारार्चनम् ।
“प्रातःकालाद्विशिष्टं विधाय विधिवत् तथा च ।
विशेषतोऽपि पवित्राणि च पूजयेत् ॥
अष्टाक्षरप्रमोदेन सावशेषेण देवते ।
सम्यक्पूर्णोऽस्मि परिवारार्पणं प्रयत्नः ॥
कृत्वा स्नानमात्मनो प्रभा प्राक्तनं तेजसः ।
पूजां कृत्वा पवित्रार्पणं तत्स्तवैः ॥
मन्त्रेणाथ ।
कृत ! कृष्ण ! पद्मपूजं मया दीप्तं पवित्रकम् ।
पवित्रमञ्जनायैव पवित्रं प्रमाणम् ॥
तदिदं पूजनाद् वचसा पुण्यं सतम् ।
कृतो मया कर्म देव ! प्रसूनादरमेवदेव ! ॥
प्रसादपूर्वं मम क्षमा पूजा संवत्सरं प्रसाद ।
समस्तं यत्नतः सर्वं स्वामिनोऽहं पवित्रकम् ।
तत्सर्वं परिपूर्णं मे सम्पूर्णं करु धर्म ॥
सर्वथा भजामि देव ! कृपया समर्प्य यत् ।
अद्य पवित्रमभ्यर्च्य मुक्त्वा तत्र सर्वं मया ॥
कृष्णा सर्वाय दिवि विधिवद्भाव्य प्रभोः ।
गुरवे पूजयित्वा पवित्रं गुरवेऽर्पयेत् ।
वैष्णवेभ्यः परिवारैः दत्त्वैवं चाशीर्वदेत् ।
संपूज्य वैष्णवान् विप्रान् तथा भक्तैः सह ।
सर्वं सदा प्रसादं सुखं प्रदीप वैष्णवः ॥”
अथ परिवारविसर्जनविधिः । तत्र ।
“प्रातः प्रभाते विसर्ज्य विसर्ज्य पारयेत्तदा ।
ऐवं तं प्रणमन्त्रेण देवदेवाक्षरागतम् ॥
प्रमाणं प्रणमेद्भक्त्या प्रणम्य प्रार्थयेत् ।
आविर्भाव्य तोषेन पूर्वदैव विधिवद्येत् ॥
गमनं देवमन्त्रे विधिना पूजनं कृत्वा ।
नैवेद्यं विविधं दत्त्वा ततः सर्वं विसर्जयेत् ॥
ओँ सांवत्सरीं इमां पूजां सम्पाद्य विधिवन्मया ।
व्रजेदानीं पवित्र ! त्वं विष्णुलोकं विसर्जितम् ॥
तावद्देवे पवित्राणि तावद्विष्णुः समाहितः ।
अक्षयाणी च प्रत्यक्षा देवपूजानिमित्तकम् ॥
तस्य यत्नेन चोपाहरेत् ।
गृहे यः कुरुते विष्णुं यद्वे यत्र न संशयः ।
न याति यत्र स्थानं यत्र देवो जनार्दनः ॥”
अथ तत्र मुख्यतीर्थस्नानविधिः ।
“मूलमन्त्रेण विधाय विधियोगं प्रति ।
आधाराणि कर्तव्यं पवित्रारोपणं प्रभोः ॥
तथा च विष्णुधर्मे ।
आषाढ्यां तिथौ पक्षे कर्तव्यो विधायकैः ।
द्वादश्यां शाह्निकाय पवित्रारोपणं शुभम् ॥
सिंहस्थे वा रवौ कार्यं कन्यायां तत्रैव वा ।
तुलायाम् तिथौ समये तुलायामपि कर्कटे ॥
प्रमाणमनुसारेण च ।
कर्कटस्थे तत्र सर्वे तथा सिंहस्थेऽपि वा ।
द्वादश्यां शुक्लपक्षे च चैत्रे वा पवित्रकम् ॥
अथ श्रीकृष्णार्थं सर्वकामो न सन्देहः ।
प्रयाणमपि कुर्वीत वासन्तीमपि चरेत् ॥”
इति परिवारविसर्जनविधानम् ॥
पवित्रारोपणं, क्लीं, (पवित्रस्य आरोपणम् आरोपणं यत्र ।) पवित्रारोपणम् ।
यथा,—
“आषाढशुक्लपक्षे द्वादश्यां श्रावणे च ।
परिवारोपणं कुर्यात्तिथौ भक्त्या नरः ॥
वृत्तिर्विधिना सर्वैर् कुर्यात्पवित्र वैष्णव ।
वैष्णवैः सहापि च पवित्रारोपणम् ॥
विशेषात् आषाढादि देवान् कुर्वीत पवित्रम् ।
कर्कटस्थे देवानां पवित्रारोपणं च ॥
आषाढादि आरभ्य कार्तिकं यावद्वरम् ।
पवित्रकरणाभिः पवित्रारोपणं विधिः ॥
द्विवा हीना विना तु विधिवत्तथा हीनः ॥
प्रतीयां आषाढे कर्कटे मासि च ।
तथापि कार्तिके वापि कुर्वीत च ।

सप्तमी भास्करस्योक्ता दुर्गायाश्च तथाष्टमी ।
मातॄणां नवमी प्रोक्ता वासुकेर्दशमी स्मृता ।
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ।
त्रयोदशी त्वनङ्गस्य मम चैव चतुर्द्दशी ।
ब्रह्मणो दिक्पतीनाञ्च पौर्णमासी तिथिर्म्मता ।
पवित्रारोहणं यो वै देवानां न समाचरेत् ।
तस्य सांवत्सरीपूजाफलं हरति केशवः ।
तस्माद्यत्नेन कर्त्तव्यं पवित्रारोहणं परम् ।
कृते बहुफलप्राप्तिस्तत्पूजा सफला भवेत् ।
पवित्रं येन सूत्रेण यथा कार्य्यं विजानता ।
तत् शृणुष्व प्रमाणञ्च रचनाञ्च च भैरव ! ।
प्रथमं दर्भसूत्रञ्च पट्टसूत्रं ततः परम् ।
ततः क्षौमं सुपुण्यं स्यात् कार्पासकमतः परम् ।
पट्टसूत्रं तथान्येन पवित्राणि न कारयेत् ।
पवित्राणि त्रिवृत्ताणि कर्त्तव्यानि प्रयत्नतः ।
गन्धमाल्यैः सुरभिभिरर्च्चितानि यथोदितम् ।
कन्या च कर्त्तयेत् सूत्रं प्रमदा वा पतिव्रता ।
विधवा साधुशीला च दुःशीला न हि कर्त्तयेत् ।
यत् सूचिभिन्नं दग्धञ्च भस्मधूमाभिगुण्ठितम् ।
तद्वर्ज्जयेत यत्नेन सूत्रमस्मात् पवित्रके ।
उपयुक्तञ्चाप्युदस्तं मद्यरक्तादिदूषितम् ।
मलिनं नीलरक्तञ्च यत्नेन परिवर्ज्जयेत् ।
सूत्रैः पवित्रं कुर्व्वीत कनिष्ठोत्तममध्यमम् ।
कनिष्ठकं पवित्रन्तु सप्तविंशतितन्तुभिः ।
मर्त्यलोके यशःकीर्त्तिसुखसौभाग्यवर्द्धनम् ।
चतुःपञ्चाशता प्रोक्तं तन्तूनां मध्यमं परम् ।
दिव्यभोगावहं पुण्यं स्वर्गसौख्यप्रदायकम् ।
उत्तमञ्चैव तन्तूनामष्टोत्तरशतेन वै ।
तद्दत्वा तु महादेव्यै शिवसायुज्यमाप्नुयात् ।
उत्तमं वासुदेवाय दद्याद्यदि पवित्रकम् ।
सदा याति हरेर्लोकं साधको नात्र संशयः ।
अष्टोत्तरसहस्रन्तु रत्नमालेति गीयते ।
पवित्रन्तु महादेव्या भुक्तिमुक्तिप्रदायकम् ।
रत्नमालान्तु यो दद्यान्महादेव्यै पवित्रकम् ।
कल्पकोटिसहस्राणि स्वर्गे स्थित्वा शिवो भवेत् ।
एतत्तु नागहाराख्यं शङ्करस्य पवित्रकम् ।
अष्टोत्तरसहस्रेण तन्तूनां सुमनोहरम् ।
यः प्रयच्छति सद्भक्त्या स यावत् मनुसत्तमः ।
तावत्कल्पसहस्राणि मम लोके प्रमोदते ।
अष्टोत्तरसहस्रेण वनमाला हरेः स्मृता ।
तन्तूनां तस्य दानेन विष्णुसायुज्यमाप्नुयात् ।
यत् कनिष्ठं पवित्रन्तु नाभिमात्रं भवेत्तु तत् ।
हारग्रन्थिसंयुक्तमालामानेन योजयेत् ।
ऊरुप्रमाणं मध्यं स्यात् जङ्घान्तं तत्र योजयेत् ।
चतुर्विंशतिमध्यस्य मालामानेन एव च ।
पवित्रमुत्तमं प्रोक्तं जानुमात्रञ्च भैरव ! ।
षट्त्रिंशत्तन्तुग्रन्थीनां योजयेदात्ममानतः ।
शतमष्टोत्तरं कार्य्यं ग्रन्थीनां सविधानतः ।
नागहाराद्यं तद्वर्णेषु च विधानतः ।
पवित्रं क्रियते येन सूत्रेण मन्त्रतः पुनः ।
तदग्रवर्णसूत्रेण कर्त्तव्या तद्ग्रन्थिताः ।
ग्रन्थिषु ग्रहभिः कुर्य्याद्वर्णभेदेषु कर्णिके ।

द्विगुणैर्मध्यमे कुर्य्यात्त्रिगुणैरुत्तमे तथा ।
अधिवास्य पवित्राणि पूर्व्वस्मिन्दिवसे पुनः ।
मन्त्रन्यासं पवित्रेषु कुर्य्यात्तत्र परेऽहनि ।
दुर्गाबीजेन मन्त्रेण मन्त्रन्यासं द्विजश्चरेत् ।
वैष्णवीतन्त्रमन्त्रेण कुर्य्युरन्ये च भैरव ! ।
प्रतिग्रन्थि स्वयं कुर्य्यान्मन्त्रन्यासं विचक्षणः ।
अङ्गुष्ठादौ जपन्तु मालायामिह भैरव ! ।
यावन्तो ग्रन्थयश्चात्र तावन्त्येव च संन्यसेत् ।
मन्त्राणि तस्य तेन स्यात् देवाङ्गोपनियोजनम् ।
दुर्गातन्त्रेण मन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
एकत्र न्यस्य सकलं यज्ञपात्रे पवित्रकम् ।
सन्निधाय पुष्पाणि गन्धादि च सुशोभनम् ।
तत्त्वन्यासं ततः कुर्य्यादङ्गुल्यग्रेण भैरव ! ।
विष्णोस्तु मूलमन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
इदं विष्णुरिति प्रोक्तं मन्त्रन्यासे द्विजस्य हि ।
शूद्राणां मन्त्रविन्यासे मन्त्रो वै द्वादशाक्षरः ।
प्रासादेन तु मन्त्रेण मन्त्रन्यासो मम स्मृतः ।
अनेन मन्त्रन्यासन्तु दानञ्चानेन कारयेत् ।
कुङ्कुमोशीरकर्पूरैश्चन्दनादिविलेपनैः ।
पवित्राणि विलिप्याथ तत्त्वन्यासन्तु योजयेत् ।
सम्पूज्य विधिवद्देवीं मण्डले प्रयतो नरः ।
वैष्णवीतन्त्रमन्त्रेण दुर्गामन्त्रेण भैरव ! ।
दुर्गाबीजेन दद्यात्तु देव्या मह्यं पवित्रकम् ।
यस्य देवस्य या पूजा तस्य तस्यैव मण्डलम् ।
यस्य यस्य तु यो मन्त्रो यथाध्यानादिपूजनम् ।
तं देवं तेन भावेन पूजयित्वा प्रयत्नतः ।
तस्यैव बीजमन्त्राभ्यां मह्यं दद्यात् पवित्रकम् ।
पवित्रं समये दद्याद्देवेभ्यश्च पवित्रकम् ।
सर्व्वेषामेव देवानां सम्पूर्णार्थञ्च भैरव ! ।
अग्निर्ब्रह्मा भवानी च गणनाथो महोरगः ।
स्कन्दो भानुर्मातृगणो दिक्पालाश्च नव ग्रहाः ।
एषां घटेषु प्रत्येकं पूजयित्वा यथाविधि ।
मह्यं पवित्रमेकैकं दद्यादेभ्यः समाहितः ।
पञ्चगव्यचरुं कृत्वा देव्यै दत्वाहुतित्रयम् ।
तेनैव वह्नये दत्वा प्राश्नीत च यथाविधि ।
आज्यैरष्टोत्तरशतं तिलैराज्यैस्तथैव च ।
अष्टोत्तरशतं दद्यान्महादेव्यै च साधकः ।
एवमेवं विधानेन विष्ण्वादीनाञ्च वैष्णवः ।
पवित्रारोपणं कुर्य्याद्धर्म्मकामार्थसिद्धये ।
नैवेद्यैर्विविधैः पयोवटपिष्टकमोदकैः ।
कूष्माण्डैर्नारिकेलैश्च खर्ज्जूरैः पनसैस्तथा ।
आम्रदाडिमकर्कन्धुद्राक्षादिविविधैः फलैः ।
भक्ष्यभोज्यादिभिः सर्व्वैर्मद्यैर्मांसैस्तथोत्तमैः ।
गन्धैः पुष्पैस्तथा धूपैर्दीपैश्च सुमनोहरैः ।
वाद्यैर्भूषणैश्चैव भवानीं साधको यजेत् ।
नटनर्त्तकसंघैश्च वेश्याभिरपि भैरव ! ।
कृष्णगीतैः प्रहृष्टो जागरं कारयेन्निशि ।
भोजयेद्ब्राह्मणांश्चापि ज्ञातीनपि द्विजोत्तमः ।
पवित्रारोहणे कृते दक्षिणामुपपादयेत् ।
हिरण्यं गां तिलं वासो घृतं वा शाकमेव वा ।
इमं मन्त्रं ततः पश्चात् साधकः समुदीरयेत् ।
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।

इयं सांवत्सरी पूजा तथास्तु परमेश्वरि ! ।
ततो विसर्ज्जयेद्देवीं पूर्व्वभिः प्रतिपत्तिभिः ।
एवं कृते पवित्राणां दाने देव्या यथाविधि ।
संवत्सरस्य या पूजा सम्पूर्णा नृप ! जायते ।
कल्पकोटिशतं यावद्देवीगेहे वसेन्नरः ।
अत्रापि सुखसौभाग्यसम्पद्विरतुला भवेत् ।"
इति कालिकापुराणे ५८ अध्यायः ॥
गरुडपुराणे ४२ । ४३ अध्याययोरप्येतद्द्रष्टव्यम् ॥

पवित्रितः, त्रि, पवित्रमस्य जातं इत्यर्थे तारकादित्वात् इतच्प्रत्ययनिष्पन्नः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ पूतः ४ शुचिः ५ शुद्धः ६ । इति शब्दरत्नावली ॥

पश, क बन्धे । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) क, पाशयति । इति दुर्गादासः ॥

पश, ष बाधे । ग्रन्थे । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-सेट् ।) ष, पशति, पशते । बाधो विहतिः । ग्रन्थो ग्रन्थनम् । ग्रन्थस्थाने स्पर्शनं पठन्ति केचित् । इति दुर्गादासः ॥

पश, त क अनुपसर्गाद्बन्धबाधयोः । स्पर्शगत्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-परं-सकं-सेट् ।) तालव्योपधः । पशयति । अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते । बाधो विहतिः । इति दुर्गादासः ॥

पशव्यं, त्रि, (पशोरिदं पशवे हितं वा । पशु+यत् ।) पशुसम्बन्धि । इति संक्षिप्तसारव्याकरणम् ॥ (पशुहितकरम् । यथा, याज्ञवल्क्ये । १ । ३२१ ।
"रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ।")

पशुः, पुं, (अविशेषेण सर्व्वं पश्यतीति । दृशिरो प्रेक्षणे + "अर्ज्जिदृशिकम्यमिपंसीति ।" उणां । १ । २८ । इति कुः पशादेशश्च ।) अस्य व्युत्पत्तिर्यथा, "पशयन्ति पशन्ति माञ्चब्रजाभ्यां हिताहितम् ।" इति भरतः ॥ जन्तुविशेषः । तस्य लक्षणम् । लोमशलाङ्गूलवत्त्वम् । इति भावार्थे कलापः ॥ तद्भेदा यथा । सिंहः १ व्याघ्रः २ तरक्षुः ३ वराहः ४ कपिः ५ भल्लूकः ६ खड्गी ७ महिषः ८ शृगालः ९ विडालः १० गोधा ११ श्वावित् १२ हरिणः १३ कृष्णसारः १४ रुरुः १५ न्यङ्कुः १६ रङ्कुः १७ शम्बरः १८ रोहिषः १९ गोकर्णः २० पृषतः २१ एणः २२ ऋष्यः २३ रोहितः २४ चमरः २५ गन्धर्व्वः २६ शरभः २७ रामः २८ सृमरः २९ गवयः ३० उष्ट्रः ३१ [illegible] ३२ गौः ३३ उष्ट्रः ३४ छागः ३५ मेषः ३६ खरः ३७ हस्ती ३८ अश्वः ३९ । इत्यमरः ॥ (यथा,
("पशुः पशूनां दीर्घत्वात् [illegible] प्रकाशते ।
[illegible] भवेत् पशुः ।
[illegible] ।
[illegible] ।"
इति चरके सूत्रस्थाने [illegible]ऽध्याये ॥)
तत्र पाश्चात्यदेशीयैश्चतुर्द्दशधा पशवो यथा,

"गौरविरश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः । महिषवानरऋक्षसरीसृपरुरुपृषतमृगाश्चेति सप्तारण्याः पशवः ॥"
इति दुर्गादासधृतपैठीनसिः ॥ * ॥ वैद्यके भूमणपानाद्भक्षभेदेन स द्विविधः । तत्र बिलशायित्वात् भूशया मण्डूकगोधादयः । तेषां मांसगुणाः ।
"भूशया भूमणानुसारिणो वातघ्नाः ।
गुरूष्णमधुराः स्निग्धा बल्याः शुक्रवर्द्धनाः ॥
ग्रामजा आनूपाः प्रोक्ता गवाद्या अनूपचारिणः ।
आनूपा हरिणाश्चादयः । तेषां मांसगुणाः ।
मधुराः शीतमधुराः स्वपाका हिता दृष्टाम् ।
पित्तश्लेष्मकरा गुरुः ।
गुरुभक्ष्या बहुभुजो हि वीर्यविभेदकाः ।
एकदेशेऽपि पूर्णाङ्गं समाना मलिनं परम् ॥
सर्वेषाम् शिरःस्कन्धोदरपृष्ठपदद्वयम् ।
पादपुच्छाक्षमस्तिष्कत्वक्श्लेष्मकोष्ठाः सम्भवाः ।
प्रायः श्रोणिपादाश्च गुरवः स्युः यथोत्तरम् ॥"
इति राजवल्लभः ॥ * ॥
("तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोद्रन्यङ्कुप्रभृतयः कूलचराः पशवः ।" एषां गुणा यथा,—
"वातपित्तहरा वृष्या मधुरा रसपाकयोः ।
शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
"उष्ट्रा गजा वाजिनश्च महिषाः गोरमाविकाः ।
खरगोकर्णमेषाश्च ये च मार्ग्याविघातकाः ।
इत्येते पशवो ज्ञेया ग्रामारण्यनिवासिनः ॥"
इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)
ज्ञानादौ पशुपदप्रयोगमाह भगवान् ।
"उष्ट्रो वा यदि वा मेषस्तातो वा यदि वा वृषः ।
पशुस्थाने नियुक्तानां पशुमन्त्राभिधीयते ॥"
इति कालिकापुराणधृत तिथितत्त्वम् ॥ * ॥
अवैधपशुहनने दोषो यथा,—
"यदि च मर्त्ये वीरे ददाति पशुरोमभिः ।
तावन्ति पुरावाणी दो कल्पविधिना पशुना ॥"
इति मार्कण्डे ६५ अध्यायः ॥ * ॥
पशुभिजातो देवता यथा,—
"सिंहं ददाति दुर्गा च सरभिं च प्रजापतिः ।
हस्ति च वरुणे वाडुर्मेषे चैव च चन्द्रमाः ।
कल्पयति च दमूषे हस्तकारे हरिः स्वयम् ।
मत्स्यकूर्मौ तथा मानवे सुपर्णाश्च च ॥
इस्के महिषाणद्यो वने विश्वं हिमवान् ।
अन्ये तु दारमासिका आकर्षे गर्भदेवताः ।
प्रजा तु चामरे चैव चामरे तु सदाशिवः ।
स्वप्नतां कारमाद्देवौ पुत्रा वन्दाः प्रजाः ॥"
इति ब्रह्मवैवर्त्ते ९८ अध्यायः ॥ * ॥
छागः । देवः । लोमश्रायम् । इति शब्दरत्नावली । यज्ञः । यथा । संसारिजीवमात्रा । इति मेदिनी । पशुत्वकुमारः । इति शब्दचन्द्रिका ॥ * ॥ तान्त्रिकानां भावत्रयान्तर्गतो भावः । तत्र त्रिविधो भावः यथाह ।

"पशुभावस्थितानां नाथ ! देवानां सदा शिवालयम् ।
दशाङ्कुशो त्रिशूलको द्विहस्ताय मिलयः ॥
आदरे हि यः करोति स पशूत्तमः स्मृतः ।
केवलं द्विहस्ताय यः करोति च साधकः ॥
पशूनां मध्यतः सिमायां द्विधा पशु चौत्तमः ।
केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः ॥
भूतानां देवतानां शिवो कुर्वन्ति सर्वदा ।
पशुनामधमाः प्रोक्ता बरसाद न संशयः ॥
अनुरितो सह शिवाय स्वच्छी साहितितम् ।
एकाग्निसम्भूतानां कालिकानां महाप्रभो ॥
पवित्रीभो भूमिगोतो सतः तेषां सुसम्भवाम् ।
यः पशुं दत्तहत्यादिपरित्यज्य कुरुते सदा ।
तदा मिताहरणसंगो ये वा महोत्तमाः ।
वैष्णवाधा भूतादिदेवता सर्वकामदाः ॥
एतेषु पशुभावेन विष्णुभावकरो यतः ॥"
द्वितीयपटले ।
"नित्यमाह सदा मन्त्रान्तरं पितृदैवतम् ।
दैवतान्तरीयं मत्स्यतीर्थं सौर्यस्य प्रोक्तम् ॥
गुरोरोषासनार्थ वैष्णवानिरूपणम् ।
पशुभावस्थितो मन्त्री मन्त्रसिद्धं समद्भुतम् ॥"
सप्तपटले ।
"पुण्यार्थं सर्वोऽपि तद्भावात्तदुर्लभम् ।
यस्मात् सिद्धिमाप्नोति पशुभावाद्यसोत्तमः ॥
वैकुण्ठनगरे याति पशुर्भूत्वा कलेवरः ।
इन्द्रचन्द्रादिदेवानां गन्धर्वाणाम् ॥
महापद्मसमर्यादो महाविद्याप्रचारकः ।
पशुभावं महाभावं भावानां सिद्धिदं परम् ॥
आद्यो भावं पशोः स्मृत्वा यथा यथा कुर्यादनुष्ठानम् ।
वीरभावं महाभावं सर्वभावोत्तमोत्तमम् ।
तत्पश्चादपि दिव्यं दिव्यभावं महाफलम् ॥"
इति रुद्रयामले उत्तरतन्त्रम् ॥ * ॥
तत्र कालो यथा,—
"आदौ दशसहस्रेण पशुभावसमाधि वा ॥"
इति तत्रैव ।
"अष्टभावं पशुभावं सर्वतोऽप्यकारयति ॥"
इति बामकेश्वरे ४१ पटलः ॥ * ॥
पशुभावस्थितस्य तन्त्रसंग्रहाभिन्नाग्राह ।
"पशुभावरता ये च केवलं पशुरूपिणः ।
रात्रौ मन्त्र जपत न स्पृशेत् न भवेत् क्वचित् ॥
संकल्पो यदर्थे च सर्वं च संशयः सदा ।
स्नात्वा च दर्शनं च मत्स्यमांसे गुरौ सदा ॥
प्रतिपदा द्विपादुन्निर्भिन्नो देवी पुनः ।
नित्यमित्येव देवेष्टि । देवानां पशुत्वम् ॥
कन्यावेद यत्र भार्यं ऊनर्वे देवतादृशम् ।
कर्षरोऽपि निन्दतु यः पुत्राय मवेदति ॥
न तत्र पशुभावेन ब्राह्मणः कीर्त्तितः ॥"
इति रुद्रयामले उत्तरतन्त्रे ६ पटलः ॥ * ॥
"दशमी चैव संक्रान्ती अमावास्या वा पराह्णे ।
अनुष्ठानं दिवा रात्रौ । दिवसं पर्वसन्धिषु ।
मांसादिकं न खादति । जपेत् यदा सदैव ।
दृष्टमृदुतीतिदर्शं कुर्याद्दिवसानुष्ठानः ॥"
इति निरुत्तरे १ पटलः ॥ * ॥

पशूनां कामवृद्धार्थिनां यथा,—
"पशूनां ब्रह्मचारी दिवं पश्यतः सह ।
सप्ताङ्के निषाङ्के निष्पूज्यादिकर्मसु ।
पदार्थं प्रकटयन्तौ प्रवदेतिरस्तालवत् ॥"
इति रुद्रयामले उत्तरतन्त्रे ६ पटलः ॥
पशु, व्य, (स्वार्थे इति । स्पृश+"आङ्गिरसेति । उणा ।१।३८। इति भावे कुः सुट्-आदेशश्च दर्शनम् । इति मेदिनी । थ, १० ॥
पशुक्रिया, स्त्री, (पशोरिव क्रिया कार्य्यम् ।) मैथुनम् । इति हेमचन्द्रः । ३ । ४०२ ॥ (पशुबधार्थविनाशार्थ क्रिया इति विग्रहे छागादि पशुबधिनारम्भकार्य्यम् । यथा, कुमारे । १६ ।
"लभाद्युपात्ता भूमौ लग्ने दिव्यां मांसवालिसिद्धां ।
निन्दां महत्यां पूजायां प्रायाति तत्पशुक्रियाम्॥")
पशुगायत्री, स्त्री, (पशुकर्मणयो गायत्री ।) बलिदानीयपशुकर्णे जप्यमानगायत्रीः । यथा,—
पशुकर्णे पशुगायत्रीं जपेत् । सा यथा । "पशुपाशाय विद्महे विश्वकर्माय धीमहि तन्नः पशुः प्रचोदयात् ।" इति दुर्गोत्सवपद्धतिः ॥
पशुपतिः, पुं, (पशूनां ब्रह्मादिस्थावरान्तानां पतिः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा महाभारते । १३ । १७ । १२१ ॥
"अजैकपात्पशुपतिर्ध्यानाद्धा सर्वेश्वरः ॥"
तस्य निरुक्तिर्यथा शिवपुराणे वायवीयसंहितायाम् —
"ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्त्तिताः ।
तेषां पतिर्महादेवः स्मृतः पशुपतिः श्रुतौ ॥")
अपरं विवक्षितं चन्द्रचूडाय ।
"यस्य च गर्भितं प्राणं मतिरोधः सत्यात्मकः ।
सर्वं वै पतिभावेन पशूनामृषि स्वाश्रितः ।
स च पशुपतिः सं लोके स्वात्मविधीयते ॥"
अर्थे पञ्चाननपतिः । यथा । पशुपतेः तत्र साकर्णीये मनः । इत्यर्थमङ्गलाद्यौ अभिवदनम् । (महादेवो हि नीवाबे योऽस्मात् पशु-पतिः ।(ज्ञानमार्गे) ख्यायते । पशुर्वै महादिक्-ज्वरस्तौ प्रियस्य प्रसन्नायोऽपि,—
"सेनापे च पशुपतिः कैलासे धर्मपत्नः ॥")
पशुपल्वलं, क्ली, (पशुप्रियं पल्वलं स्थानमत्र पशुनितिकारमभिधायकत्वात् । अत् । पशुप्रियं पल्वलमिदेति केचित् ।) कैवर्तीमुस्तकम् । इति शब्दचन्द्रिका ॥
पशुपालकः, पुं, (पशूनालिव पालयति यः पालकः ।) इति शब्दरत्नावली । यथा,—
"(अचवाच्य पशूस्ताइशी अपरान्तःपशुवर्गं ।
क्षत्रियेण इन्द्र कारयो नपरोऽयं पशुपालकः ॥"
इति हरिवंशे ॥
पशुप्रेरणं, क्ली, (पशूनां प्रेरणम् ।) प्रतोदिः ताडनम् । तदुपेहरः । (यथा, मनुः ९ । १० । १९ ॥
पशुमोहनिका, स्त्री, (मुहयन्त्यनया । मुह + णिच् । करणे ल्युट् । ततः स्त्रियां ङीप् । पशूनां मोहनिका ।) कटुकी । इति राज-निर्घण्टः ॥ (कटुकीशब्देऽस्या विवृतिर्ज्ञेया ॥)

पशुरज्जुः, स्त्री, पशूनामश्वादीनां बन्धनाय रज्जुः। तत्पर्य्यायः। दामनी २। इत्यमरः। २।८।७३॥ बन्धनी ३। इति शब्दरत्नावली॥

पशुराजः, पुं, (पशूनां राजा। "राजाहःसखि-भ्यष्टच्।" ५।४।९१। इति समासान्तष्टच्।) सिंहः। इति शब्दचन्द्रिका॥

पशुहरीतकी, स्त्री, (पशूनां हरीतकीव हित-कारित्वात्।) आम्रातकफलम्। इति त्रिकाण्ड-शेषः॥

पश्चात्, व्य, (अपरस्मिन् अपरस्मात् अपरो वा वसति आगतो रमणीयं वा। "पश्चात्।" ५।३।३२। इति अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातिविषये।) प्रतीची। चरमम्। इत्यमरः। ३।३।२४२॥ (यथा, रघुः।४।३०। "प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्। ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः॥") अधिकारः। इति मेदिनी। ते, ३१॥

पश्चात्तापः, पुं, (पश्चात् अस्मतोऽकार्य्ये कृते चरमे तापः।) अनुशोचनम्। चरमे शोकः। पस्ताण इति भाषा। तत्पर्य्यायः। अनुतापः २ विप्रती-सारः ३। इत्यमरः। १।७।२५॥ (यथा, रामायणे। ३।५१।३६।
"उक्त्वेति परुषं वाक्यं पश्चात्तापसमन्वितः॥"
केचित्तु पश्चात् ताप इति पदद्वयमिच्छन्ति॥)

पश्चार्द्धः, त्रि, (अपरश्चासावर्द्धश्च इति। "अपर-स्यार्द्धे पश्चभावो वक्तव्यः।" २।१।५८। इत्यस्य वार्त्ति इति पश्चभावः।) शेषार्द्धः। अपरार्द्धः। यथा, शकुन्तलायाम्। १अङ्के।
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्ध-दृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्व-कायम्॥"

पश्चिमं, त्रि, (पश्चाद्भवम्। "अग्रादिपश्चात् डिमच्।" ४।३।२३। इत्यस्य वार्त्ति इति डिमच्।) पश्चाद्भवम्। इत्यमरः। ३।१।८१। (यथा, रघुः। १७।८।
"तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः। स्मरन्तः पश्चिमामाज्ञां भर्त्तुः संग्रामयायिनः॥")

पश्चिमा, स्त्री, (पश्चिम+टाप्।) अस्ताचला-वच्छिन्नदिक्। तत्पर्य्यायः। प्रतीची२ वारुणी३ प्रत्यक् ४। तद्दिग्भववायुगुणाः।
"पश्चिमो मारुतस्तीक्ष्णः कफमेदविशोषणः। सद्यः प्राणहरो दृष्टः शोषकारी शरीरिणाम्॥"
इति राजनिर्घण्टः॥
अपिच। राजवल्लभः।
"पश्चिमोऽनिलपूर्व्वैश्च बलारोग्यदिपङ्कजः। कषायः शोषणः स्वर्ग्यो रोचनो विशदो लघुः॥ अर्ब्बा लघुत्वैश्वर्यप्रदौ श्लेष्मसङ्कारकः। वर्मदर्चयचभित्क्षमप्रमावरणीसंततः॥ प्रकर्षरोपणस्वच्छो दाहशोषप्रलापकः॥"
तद्दिगधिपतिर्वरुणः। यथा, अमरे। १।३।१।
"इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्।

कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्॥"
तद्दिक्पतयो मिथुनतुलाकुम्भराशयश्च। यथा,
"प्रागादिकण्टकाभाशा यथासंख्यं प्रदक्षिणम्। मेषाद्या राशयो ज्ञेयाश्चिरावृत्ति परिभ्रमात्॥"
इति ज्योतिस्तत्त्वम्॥

पश्य, त्र, प्रशंसा। विस्मयः। इति शब्दरत्ना-वली॥ (पश्यतीति व्युत्पत्त्या "पाघ्राध्माधेट्-दृशः शः।" ३।१।१३७। इति शप्रत्ययेन पश्यो वाच्यलिङ्गः। द्रष्टा। यथा, मुण्डकोप-निषदि। ३।१।३।
"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥")

पश्यतिकर्म्मा, [न्] पुं, (पश्यतिर्दर्शनमेव कर्म्म यस्य।) दर्शनकर्म्मा। तद्वैदिकपर्य्यायाः। चिक्यत् १ चाकनत् २ चाचक्षत् ३ चष्टे ४ विचष्टे ५ विचर्षणिः ६ विश्वचर्षणिः ७ अव-चाकशत् ८। इत्यष्टौ पश्यतिकर्म्माणः। इति वेदनिघण्टौ ३ अध्यायः॥

पश्यतोहरः, त्रि, (पश्यन्तं जनमनादृत्य हर-तीति। हृञ् हरणे+अच्। "षष्ठी चाना-दरे।" २।३।३८। इति अनादरे षष्ठी। "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु।" ६।३।२१। इत्यस्य वार्त्ति इति षष्ठ्या अलुक्।) चौरः। यथा, हेमचन्द्रे। ३।४६।
"यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः॥"

पश्यन् [त्], त्रि, (पश्यतीति। दृशिर् प्रेक्षणे +"लटः शतृशानचाविति।" ३।२।१२४। इति शतृ।) ईक्षणकर्त्ता। इति व्याक-रणम्॥ (यथा, मार्कण्डेये। ८२।२९।
"इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा। पश्यतामेव देवानां तत्रैवान्तरधीयत॥")

पश्यन्ती, स्त्री, (पश्यति या दृश्+शतृ+ङीप्। ततः "शप्श्यनोर्नित्यम्।"७।१।८१। इति नुम्।) मूलाधारोत्थितहृदयगतनादरूपवर्णः। यथा,—
"मूलाधारात् प्रथममुदितो यस्तु तारः परारव्यः पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः॥"
इत्यलङ्कारकौस्तुभः॥
(यथाच,—
"वैखरीशक्तिनिष्पत्तिर्मध्यमा श्रुतिगोचरा। द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी॥"
इति मल्लिनाथधृतवाक्यम्॥
ईक्षणकर्त्री। इति व्याकरणम्॥)

पश्वाचारः, पुं, (पशूनां तन्त्रोक्ताधिकारिविशेषाणा-माचारः।) आचारविशेषः। यथा,—
"वेदोक्तेन पथा देवीं कामयन्नपूर्व्वकम्। स एव वैदिकाचारः पश्वाचारः स उच्यते॥"
इत्याचारभेदतन्त्रम्॥

पष, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पाषयति। तालव्यान्त इत्याद-मिति रमानाथः। दन्त्यान्त इति केचित्। गर्द्द-भान्तपाठस्तु कस्यचिदनुरोधात्। इति दुर्गा-दासः॥

पष, ञ बाधे। गत्यै। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, पषति पषते। बाधो विहतिः। गत्यो गमनम्। गत्यनन्त्याने स्पर्शनं केचित् पठन्ति। इति दुर्गादासः॥

पस, त् क अनुपसर्गाद्ग्रन्थबाधयोः। स्पर्शगत्योः। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) ग्रहणग्रन्थनम्। क, पसयति। अनुप-सर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते। बाधो विहतिः। इति दुर्गादासः॥

पस, इ क नाशे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) नाश इह नष्टीकरणम्। इ क, पंसयति पापं गङ्गा। इति दुर्गादासः॥

पस, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पासयति। पृथक्पाठा-दयं न मित्। अन्यथा पस कि ञ इत्यनेनैवेष्ट-सिद्धे पृथक्पाठोऽनर्थकः स्यात्। इति दुर्गा-दासः॥

पस, ञ बाधे। गत्यै। इति कविकल्पद्रुमः। (भ्वां-उभं-सकं-सेट्।) ञ, पसति पसते। इति दुर्गा-दासः॥

पस्त्यं, क्ली, (अपस्त्यायन्ति सङ्घीभूय तिष्ठन्ति जीवा यत्र। अप+स्त्यै सङ्घातशब्दयोः+ "आतश्चोपसर्गे।" ३।१।१३६। इति कः। उपसर्गस्याकारलोपो निपातनात्।) गृहम्। इति हेमचन्द्रः। ४।५६॥ (यथा, ऋग्वेदे। १०।४६।११। [सद्मेव॥")
प्र पस्त्यमसुर हर्य्यतं गोराविष्कृधि हरये

पह्लवः, पुं, म्लेच्छजातिविशेषः। तस्य विवरणं यथा, हरिवंशे। १४। १५—१९।
"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च। धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥ अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्। यवनानां शिरः सर्व्वं काम्बोजानां तथैव च॥ पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः। निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥ शका यवनकाम्बोजाः पारदाः पह्लवास्तथा। कोलाः सर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥ सर्व्वे ते क्षत्रियास्तात। धर्म्मस्तेषां निराकृतः। वशिष्ठवचनाद्राजन्! सगरेण महात्मना॥"
(क्वचित् पह्नवः पाठोऽपि दृश्यते। यथा, गौः रामायणे। १।५५।१८।
"तस्या हुम्भारवोत्सृष्टाः पह्नवाः शतशो नृप॥ नाशयन्त बलं सर्व्वं विश्वामित्रस्य पश्यतः॥")

पह्निका, स्त्री, वारिपर्णी। इति शब्दमाला॥

पा, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अस्यैव पिबादेशः। पिबति पयः बालः। इति दुर्गादासः॥

पा, ल रक्षणे। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) ल, पाति। इति दुर्गा-दासः॥

पाः, त्रि, (पिबतीति । पा पाने + क्विप् ।) पान-कर्त्ता । (पातीति रक्षतीति । पा रक्षणे + क्विप् ।) रक्षाकर्त्ता । ("विश्वं पातीति विश्वपाः ।" इति मुग्धबोधव्याकरणम् ।)

पांशवः, पुं, (पांशोर्लवणविशेषस्य विकारः । पांशु + अण् ।) लवणविशेषः । पांगा नोन इति भाषा । तत्पर्य्यायः । रौमकम् २ औद्भिदम् ३ वसुकम् ४ वसुपांशुः ५ ऊषरम् ६ औषरम् ७ ऐरिणम् ८ पार्वेयम् ९ सामुद्रम् १० । अस्य गुणाः । तीक्ष्णत्वम् । अनुष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । दाहशोषकरत्वम् । वातघ्नत्वम् । पित्तशोषकरत्वञ्च । इति राजनिर्घण्टः ॥

"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम् ॥"
इति भावप्रकाशः ॥

पांशुः, पुं, (पंशयति नाशयति आकाशमिति । पशि नाशने + "अर्जिदृशिकम्यमि ।" उणा । १ । २८ । इति कुः दीर्घश्च ।) धूलिः । इत्यमरः । ३ । ८ । ९८ ॥ (यथा, मनुः । ४ । १०२ ।
"कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥")
शुष्कादिपिष्टगोमयः । सार इति भाषा ॥ इति मेदिनी । शे, ११ ॥ पर्पटः । कर्पूरविशेषः । इति राजनिर्घण्टः ॥ (इत्यमरकारागोऽपि दृश्यते ।)

पांशुकासीसं, क्ली, (पांशुरिव कासीसम् ।) कासीसम् । इति राजनिर्घण्टः ॥

पांशुकूली, स्त्री, (पांशुना कीर्णानि कूलान्यस्य सन्तीति । कूल + अच् । ततः स्त्रियां ङीष् ।) राजमार्गः । यथा । "एषा पांशुकूली भवेत् ।" इति हारावली । ११० ॥

पांशुकूलं, क्ली, (पांशोः कूलमिव ।) पथ्यसञ्चितचीरम् । यथा, शिशुपालवधे ।
"ग्राह्यं यत्नेन यः स्थान्ताकूलिनः स्पशमागतम् ।
पश्चात्पिण्डं कुलश्रेष्ठा पांशुकूलं न वर्जयेत् ॥"

पांशुचामरः, पुं, (पांशुभिश्चामर इव ।) पटवासः । इति शब्दमाला ॥

पांशुचन्दनः, पुं, (पांशुभिश्चन्दनमिव चन्दनमिव यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥

पांशुजालिकः, पुं, (पांशुभिर्जालमिव यस्य ।) पतङ्गः । इति जटाधरः ॥ माँचि इति भाषा ॥ (पांशुरेव कुम्भाकार इव यस्य ।) कुम्भीर्जलजन्तुविशेषः । महिषः । महीरुहः । पुण्डरीकः । शुष्कवृक्षः । इति मेदिनी । रे, ३०५ ॥

पांशुजं, क्ली, (पांशोर्जायते इति । पांशु + जन् + डः ।) पांशुलवणम् । पांगा नोन इति भाषा ॥ तत्पर्य्यायः । लवणम् २ औद्भिदम् ३ । पार्शवम् ४ सामुद्रम् ५ पटु ६ । इति रत्नमाला ॥ अस्य गुणाः । पित्तकरत्वम् । वातघ्नत्वम् । तिक्तत्वम् । इति राजवल्लभः ॥

पांशुपत्रं, क्ली, (पांशुः पत्रे इव यस्य तादृशं पत्रं यस्य ।) वास्तूकम् । इति शब्दमाला ॥

पांशुमर्द्दनः, पुं, (मृद्यतेऽस्मादिति । मृद् + ल्युट् । मर्द्दनः । ततः पांशुः मर्द्दनो यत्र । यद्वा पांशोर्मर्द्दनं यत्र ।) आलवालः । इति त्रिकाण्डशेषः ॥

पांशुरः, पुं, (पांशुं निरर्थकधूलिमात्रादिकमनु-गतिक्षेपेण राति ददातीति । पांशु + रा + कः ।) दंशकः । डाँस इति भाषा ॥ पीठसर्पी । खञ्जः । इति हारावली । १४६ ॥ (पांशुरस्यास्तीति । "नगपांशुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिके इति रः । पांशुविशिष्टे, त्रि । यथा, भट्टिः । १ । १४ । १७ ।
"ददृशे निपुणैर्नितम्बे च यथा निरुद्धे परम् ।
मलकलस पांशु(शु)रे ॥")

पांशुरागिणी, स्त्री, (पांशुरागो विद्यतेऽस्याः । इनिः स्त्रियां ङीप् च ।) महामेदा । इति राज-निर्घण्टः ॥

पांशुलः, पुं, (पांशुर्विद्यतेऽस्य । पांशु + "सिध्मा-दिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) हरः । इति शब्दरत्नावली ॥ पुंश्चलः । लम्पटः । व्यभिचारी । इति मेदिनी । ले, १०८ ॥ पूतिकः । काँटाकरञ्ज इति भाषा ॥ इति शब्दचन्द्रिका ॥ पांशुयुक्ते त्रि । इति धरणिः ॥ (पांशुरस्त्यस्य पांशुयुक्ते च त्रि । यथा, रघुः । ११ ।
"तस्याः स्फुरन्मणिविघट्टितपांशुलायां
सद्यः पुनाति भुवि कीर्त्तितोऽपि ।
मार्गे मनुष्येश्वरशासनस्य
शुश्रूषितायाँ शमितश्रमज्ञम् ॥")

पांशुला, स्त्री, (पांशुल + टाप् ।) कुलटा । भूमिः । इति शब्दरत्नावली ॥ केतकी । रजस्वला । इति राजनिर्घण्टः ॥

पाकलः, त्रि, (पचति कुष्ठादिकं नाशयतीति । पचि + कलः । बाहुलकात् दीर्घः ।) कुष्ठः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १५४ । ६३ ।
"निराशपाकादपि हरी यथा राक्षसमीलिष ! ।
पक्षिणीमाहूयसि पुरुषा वनमाविशः ॥")

पाकलः, पुं, (पचतीति । पचि पाके + "अर्त्ति-हृधृक्षिक्षमिभ्यः ।" उणा । १ । ७८ । इति कलः दीर्घश्च ।) धूलिः । (यथा, रामायणे । २ । ८० । ११ ।
"कषाये पूरयन् कुणप् पांशुभिः श्वभ्रमायतम् ।
निम्नाग्नानीकदेशास्तु समांश्चक्रुः समन्ततः ॥")
शिरःशिक्षणीयम् । ग्रहुकादिरोगः अन्नश्च । मार इति भाषा ॥

पाकः, पुं, (पच् + भावे घञ् ।) पचनम् । अन्नम् । तत्पर्य्यायः । पक्तिः २ । इत्यमरः । १ । ३ । ८ ॥ इन्धनम् । स तु चतुर्विधो यथा,—
"भर्ज्जनं तलनं स्वेदः पचनं क्वथनं तथा ।
तान्दूरं पुटपाकश्च पाकः षड्विधो मतः ॥"
भर्ज्जनं दिव्यतामे । तलनं स्नेहतले । स्वेदं बाष्पनीरे । पचनं जले । क्वथनं विशुद्धजल-मध्ये । तान्दूरं इष्टकादाहकलसे । पुटपाकः मृत्पिण्डे परिवेष्टितेन्धनैः । इति पाकराजेश्वरः ॥ सोऽपि पाकः ईर्ष्याद्वेषरोगक्रोधोद्भवोत्कटो मानसविकारः पाकः । इति मूर्त्तिः । ७ । पाकदशायाः आवश्यकं यथा,—
"मिश्रं कुलवधूरिव कर्त्तव्यः पाक इव च ।
भाव्या सम्यगवेक्ष्य समस्तार्थं प्रविदैषिः ॥"
इति शब्दार्णवोदयावत् । ७ ॥
पाकशालो गृहस्थादिदाववितेषी यथा,—
"गृहस्थाश्रित्य यो स्यात् पाकशाले शिवयः ।
गृहाग्नं भोक्तुं बाह्यणः शुद्धाशितवान् ॥"
इति कर्म्मलोचनम् । ७ ॥
पक्वोद्दिष्टमाह पाक विवर्णं यथा,—
"पक्वोद्दिष्टञ्च कर्त्तव्यं पाकेनैव सदा बुधैः ।
अभावे पाकपात्राणां गवलाप्रदीपका ॥"
इति श्राद्धतत्त्वम् । ७ ॥
तस्य विधिर्यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराभिमुखोऽथ वा ।
प्रविश्याथ स्थाल्यां पात्राणि च विन्यसेत् ॥
अन्नशाकादिभूतानि पात्रसामान्यानि विन्यसेत् ।
पूर्वाशायां पक्वमांसं ओदनादिच दक्षिणे ।
नैऋत्यामधोभागे पाकपात्रञ्च पश्चिमे ।
ऐशान्यामिपूर्वे तथा दक्षिणे स्थापयेत् बुधः ।
यत्र तु स्थापयेत् पाके पचमानानि वै द्विजः ।
न पश्येदपि भुक्तार्थं रौद्रे वारिपकार्थे ॥
तासां यत्र सन्दर्शनीयो भवति वै ध्रुवम् ।
शिखण्डी पद्ममध्ये निवेशाय दर्शयति ॥
पुष्करीकस्य मध्ये समन्ते प्रसारिताञ्च ॥
यादृशेन तु यत्र यत्र भविष्यत वा वीक्षया ।
अप्रदीपेन तत्र यत्र दीपितं भवेद वारणम् ॥
अधरोष्ठेन च यत्र यत्र क्रिया पक्षपातेन च ।
मध्याह्ने च यत्र यत्र तत्र स्थित्वा विनश्यं भवेत् ॥
उत्तमेन वारिण परमात्म दृष्टेन च ।
प्रातेन वस्त्रादि उत्तरस्थितेन च ॥
स्वार्थं चैव गृहीत्वा सुधा ताविद्वयावृतेः ।
महिम्नाननीरागं भुक्त्वा स्वर्णं सम्पादयेत् ।
अथवा मातृ पतिता वार्त्तापादेय समुद्दिष्टे ।
यावत्कालं स्वार्थं तिष्ठेत्स्वस्थेव हि ।
कश्चिदुत्तमवर्णेन स्वधारेणहट च ।
मैत्रसाक्षाद्देवोऽपि स्वार्थं सर्व्वं स्थापयेत् ।
यदा अन्नपात्रं तु वर्णं वै भार्य्याकार्य्यम् ।
ततो यदि तथाहि न तस्यार्थं निवेदयेत् बुधो ।
ऋतुः पाके तथा विदि निवृत्ते वा कारयेत् ॥
सः पूर्व्वाग्निवर्णं देवं स्वर्णेन निवेदयेत् ।
एकतः तु वर्णं दद्यात् शिवायै न समाचरेत् ।
विमलं पुरुषेण् सार्थं चक्रादपि न दापयेत् ॥"
इति पद्मपुराणे १२ अध्यायः ॥ ७ ॥
परिणतिः । (यथा, मार्कण्डेये । ७० । ३३ ।
"कर्मणोऽथ फलस्येव भर्ज्जनस्य महामते ।
विपाकेनानुपादि प्रदीप्यमानेन विद्यते ॥")
शिशुः बालः अल्पवयस्क इति । पा पाने + "इण्-भीकापाशल्यर्त्तिमर्चिभ्यः कन् ।" उणा । ३ । ४३ । इति कन् ।) शिशुः । बालकः दैत्यविशेषः । यथा कश्चित् । इति मेदिनी । के, ५६ ॥

पेचकः । राष्ट्रादि। भङ्गः। भीतिः। इति शब्द-रत्नावली ॥ दैत्यः। इति हेमचन्द्रः । २ । ८८ ॥ (यथा, भागवते । ७ । २ । ४ ।
"भो भो दानवदैतेया! द्विमूर्द्धन्! त्र्यक्ष! शम्बर!। शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!॥"
पिबतीति। पा+"इण्भीकापाशल्यर्त्तिमर्चिभ्यः कन्।" उणां ३ । ४३ । इति कन्।) पानकर्त्तरि त्रि ॥

पाकफलः, पुं, (पाके फलं पक्वे यस्य।) कृष्ण-फलपाकः। पानी आमला। इति शब्द-चन्द्रिका ॥

पाकफलपाकः, पुं, (पाके कृष्णं फलं यस्य।) पाकफलः। इति शब्दमाला ॥

पाकजं, क्ली, (पाकात् जायते इति। पाक+जन्+ड।) काचलवणम्। परिणामशूलम्। इति राजनिर्घण्टः ॥ (पाकजाते त्रि। यथा, भाषापरिच्छेदे । ३६ ।
"सर्वोत्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः॥")

पाकपुटी, स्त्री, (पाकाय पुटी।) कुम्भशाला। इति हेमचन्द्रः ।४।१९९॥ पोयान् इति भाषा ॥

पाकफलः, पुं, (पाककृष्णं फलमस्य।) फलपाकः। इति शब्दचन्द्रिका। पानी आमला इति भाषा ॥

पाकभाण्डं, क्ली, (पाकाय पाकस्य वा भाण्डम्।) पाकपात्रम्। यथा,—
"यस्य यस्य तु वर्णस्य यद्यत् स्यात् पश्चिमत्वचः।
स तत्र गृहशुद्धिञ्च पक्षशुद्धिं करोत्यपि॥
पश्चिमत्वचः अशौचान्तदिनम्। गृहशुद्धिं मा-र्जनपाकभाण्डत्यागोपलेपनादिना।" इति शुद्धि-तत्त्वम् ॥

पाकमत्स्यः, पुं, (पाकः पाकयुक्तो मत्स्यो यत्र।) मत्स्यव्यञ्जनम्। तत्पर्य्यायः। मत्स्यालम् २। इति शब्दचन्द्रिका ॥ (समुद्रजातमत्स्य-विशेषः। यथा, सुश्रुते सूत्रस्थाने । ४६ अध्याये। "तिमितिमिङ्गिलकुलिशपाकमत्स्य-निरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहा-मीनराजीवप्रभृतयः सामुद्राः॥" कीटविशेषः। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"पद्मकीटो दुन्दुभिको मकरः शतपादकः।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी॥")

पाकयज्ञः, पुं, (पाकसाध्यो यज्ञः। शाकपार्थिव-वत् समासः।) वृषोत्सर्गगृहप्रतिष्ठादीनां होमः। पञ्चयोगाह्वककर्म्म। यथा,—
"प्रायश्चित्तं विधुर्येव पाकयज्ञे तु वाहयः॥" इति तिथितत्त्वम् ॥
(ब्रह्मयज्ञादन्ये पञ्चमहायज्ञान्तर्गता वैश्वदेव-होमबलिकर्म्मनित्यश्राद्धातिथिभोजनात्मका-श्चत्वारः पाकयज्ञाः। यथा, मनुः । २ । ८६ ।
"ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः। सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्॥"
अष्टकादयोऽपि पाकयज्ञाः। यथा, तत्रैव। ५ । १११ ।
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते॥"
"अष्टकादीन् पाकयज्ञान्।" इति तट्टीकायां कुल्लुकभट्टः॥)

पाकयज्ञिकः, पुं, (पाकयज्ञं करोतीति। पाकयज्ञ+ठञ्।) पाकयज्ञकर्त्ता। (पाकयज्ञस्य व्याख्यान-स्तत्र भवो वा। "क्रतुयज्ञेभ्यश्च।" ४ । ३ । ६८। इति ठञ्। पाकयज्ञव्याख्यानग्रन्थः। पाकयज्ञभवश्च। इति व्याकरणम्॥)

पाकरञ्जनं, क्ली, (पाकं पच्यमानं रञ्जयतीति। रञ्ज+णिच्+ल्युः।) तेजपत्रम। इति शब्द-चन्द्रिका ॥

पाकलं, क्ली, (पाकं लातीति। ला+"आतो-ऽनुपसर्गे कः।" ३ । २ । ३ । इति कः।) कुष्ठौ-षधिः। इत्यमरः । २ । ४ । १२६ ॥

पाकलः, पुं, (पाक+ला+कः।) कुञ्जरज्वरः। इति मेदिनी। ले, १०८॥ बोधनद्रव्यम्। अनिलः। अनलः। इति विश्वः॥ प्रपाकादि-कारिणि, त्रि ॥

पाकलिः, स्त्री, (पाक+ला+इन्।) वृक्ष-विशेषः। इति रत्नमाला। रोहिणीति केचित्॥

पाकली, स्त्री, (पाकलि+ङीष्।) कर्कटी। इति शब्दमाला ॥

पाकशाला, स्त्री, (पाकस्य शाला गृहम्।) रन्धनगृहम्। तत्पर्य्यायः। रसवती २। इति जटाधरः। पाकस्थानम् ३ महानसम् ४। इत्य-मरः । २ । ९ । २७ ॥ अग्निकोणे तस्याः कर्त्तव्यता। यथा,—
"प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्।
शयनं याम्यदिग्भागे नैरृत्यां शस्त्रमन्दिरम्॥
प्रतीच्यां भोजनगृहं वायुभागे सभागृहम्।
भाण्डारसदनं सौम्ये त्वैशान्यां देवतालयम्॥" इति शुद्धगुणचिन्तामणिटीकायां पीयूषधारायां वशिष्ठवचनम् ॥

पाकशासनः, पुं, (शास्तीति। शास+ल्युः। ततः पाकस्य तदाख्यया प्रसिद्धस्य असुरस्य शासनः शास्ता।) इन्द्रः। इत्यमरः । १।१।४४ ॥ तन्नाम-कारणं यथा, वामनपुराणे।
"पाकं जघान तीक्ष्णाग्रैर्म्मार्गणैः कङ्कवाससैः।
तत्र नाम विभुर्लेभे शासनत्वात्पुरन्दरः।
पाकशासनतां शक्रः सर्व्वामरपतिर्व्विभुः॥"

पाकशासनिः, पुं, (पाकशासनस्यापत्यम्। "अत इञ्।" ४ ।१। ९५ । इति इञ्।) इन्द्रपुत्रः। जयन्तः। इत्यमरः । १ । १ । ४९ ॥ (अर्ज्जुनः। यथा, महाभारते । १ । १३० । ८ ।
"सोऽब्रवीदेषगम्भीरमरीच बरलामर:।
भ्राता भ्रातरमन्वार्त्तं सात्विकः पाकशासनिम्॥")

पाकशुक्ला, स्त्री, (पाके परिणामे शुक्ला।) खड़ी। यथा, शब्दचन्द्रिकायाम्।
"पाकशुक्ला शिलाधातुः कठिनी शर्कराटी खड़ी॥"

पाकस्थानं, क्ली, (पाकस्य स्थानम्।) महानसम्। इत्यमरः । २ । ९ । २७ ॥

पाका, स्त्री, (पाक + अजादित्वात् टाप्।) बालिका। इति जटाधरः ॥

पाकारिः, पुं, (पाकं ऋच्छतीति। ऋ गतौ+इन्।) श्वेतकाञ्चनम्। इति रत्नमाला ॥

पाकिमं, त्रि, (पाकेन निर्वृत्तम्। पाक+भाव-प्रत्ययान्तादिमप्।) पक्तिमम्। पाकेन निष्प-न्नम्। इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते। सूत्रस्थाने । ४६ अध्याये।
"मेदोघ्नः पाकिमः क्षारो मूत्रवस्तिविशोधनः॥")

पाकुकः, पुं, (पचतीति। पच पाके+"सृघि-वह्योर्गुणो कनुकसुमौ च।" उणां । २ । ३० । इति शुकन् कादेशश्च।) सूपकारः। इत्यु-णादिकोषः ॥

पाक्यं, क्ली, (पच्यतेऽनेन। पच्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। "चजोः कु घिण्ण्यतोः।" ७।३।५२। इति कुत्वम्।) विड्लवणम्। इत्यमरः । २ । ९ । ४२ ॥ पांशुलवणम्। इति रत्नमाला ॥ (यथा, सुश्रुते ।१।४२।
"सैन्धवसौवर्च्चलविड्पाक्यरोमकसामुद्रकपक्तिम-यवक्षारोषरप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः॥" पचनीये, त्रि। यथा, चक्रपाणि-संग्रहे ज्वराधिकारे पित्तज्वरचिकित्सायाम्।
"अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥")

पाक्यः, पुं, (पच्+ण्यत् कुत्वञ्च।) यवक्षारः। इत्यमरः । २ । ९ । १०९ ॥

पाक्षायणः, त्रि, (पक्षस्यार्द्धे पक्षे भवः पक्षेण निर्वृत्त इति वा। पक्ष+"पुष्यह्नकठजिनि।" ४ । २ । ८० । इति फक्।) पक्षसम्बन्धी। पक्षे भवः। इति सिद्धान्तकौमुदी ॥

पाक्षिकः, त्रि, (पक्षे तिष्ठतीति। पक्ष+ठक्।) पक्षपाती। यथा,—
"स को राजा न पाता यः प्रजानाञ्च पाक्षिकः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्यायः ॥ (पक्षिणो हन्तीति। "पक्षिमत्स्यमृगान् हन्ति।" ४ । ४ । ३५ । इति ठक्।) पक्षिघातकः॥ (पक्षे पक्षान्तरे भवतीति। पक्षकालभवः॥ पक्षेण निर्वृत्त इति। पक्ष+ठञ्। पक्षसाध्यः। इति मुग्धपिलङ्गबोधः॥)

पाखण्डः, पुं, (पातीति। पा+क्विप्। पान्तश्री-धर्म्मनं खण्डयतीति। खडि भेदने+घञ्-टाप्। यदुक्तम्।
"पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते।
तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना।
नानावतधरा नानावेशाः पाखण्डिनो मताः॥")
पाषण्डः। इत्यमरटीकायां भानुदीक्षितः॥

पागलः, पुं, (पा रक्षणं तस्मात् गलति अपस-रणात् विच्युतो भवतीति। गल्+अच्।) उन्मत्तः। वातुलः। यथा,—
"पागलायाज्ञहीनाय कोपाय बधिराय च।
अङ्गाय चैव पङ्गाय अौकुन्नाय मायिने।
अकल्पदातुर्धर्म्मोऽपि दत्तः सकलो दत्तानि च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः॥

मदारौ मेदकः क्वाथः पेयः सर्वज्वरापहः ।"
इति पिप्पल्यादिः । ७६ ।

अथ जीर्णज्वरे ।

"निदिग्धिकानागरकामृतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्दितपीनसेषु ।

अमृताष्टकमिदं प्राहुः क्वाथं तैलामपित्तके ।"
इति निदिग्धिकादिः । ७७ ।

"पिप्पलीमूलसंयुक्तः क्वाथश्छिन्नरुहोद्भवः ।
जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा ।
कासार्शोग्रहणीपाण्डु मान्द्याग्निविनाशनम् । ७८ ।
इति जीर्णज्वराधिकारः । ४ ।

अथ कफवातादिज्वरे ।

"मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकम् ।
छिन्नोद्भवा पटोलञ्च क्वाथं समधुशर्करम् ।
ज्वरं प्रवृद्धं हन्यात् सन्तापं मुखशोषणम् ।
वमिञ्च पैत्तिकञ्चैव प्रेहिकं वातपैत्तिकम् ।
दाहं पिपासामत्युग्रां विदाहं भ्रममेव च ।"
इति मधुकादिः । ७९ ।

"कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी । ८० ।
पटोलं सारिवा मुस्ता पाठा कटुकरोहिणी । ८१ ।
निम्बं पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ । ८२ ।
किराततिक्तममृता चन्दनं विश्वभेषजम् । ८३ ।
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापनाः ।
कषायाः शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ।
समस्तं सन्निपातोत्थं ... ।
गुडूचीमुस्तधान्याकैः ... ।
मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्वाथः ।
पीतः सकणाचूर्णः समस्तविषमज्वरं हन्ति ।"
इति मुस्तादिः । ८५ । ५ ।

अथ ... ज्वरे ।

"सद्योज्वरं ... ।
... ।"
इति सद्योत्थादिः । ८६ ।

अथ धातुगतज्वरे ।

"द्राक्षामधूकमधुलोध्र... ।
... ।" ८७ ।
इति ज्वराधिकारः । ७ ।

अथ ज्वरातीसारे ।

"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकामृताः ।
जयन्त्यामसतीसारं सज्वरं समहौषधाः ।"
इति पाठादिः । ८८ ।

"नागरातिविषामुस्तभूनिम्बामृतवत्सकैः ।
सर्वज्वरहरः क्वाथः सर्वातीसारनाशनः ।"
इति नागरादिः । ८९ ।

"ह्रीबेरातिविषामुस्तबिल्वधान्यकनागरैः ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ।
सरक्तं हन्त्यतीसारं सज्वरं वाथ विज्वरम् ।"
इति ह्रीबेरादिः । ९० ।

"गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दबालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ।
कषायः शीतलः पेयो ज्वरातीसारशान्तये ।
... ।"
इति गुडूच्यादिः । ९१ ।

"उशीरं बालकं मुस्तं धन्याकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं बिल्वं दीपनपाचनम् ।
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विज्वरम् ।"
इति उशीरादिः । ९२ ।

"पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बह्रीबेरकुटजत्वक्फलैः शृतम् ।
हन्ति सर्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम् ।"
इति पञ्चमूल्यादिः । ९३ ।

"कलिङ्गातिविषाशुण्ठीकिराताम्बुयवासकम् ।
ज्वरातीसारसन्तापं नाशयेदचिरेण तु ।"
इति कलिङ्गादिः । ९४ ।

"वत्सकस्य फलं दारु रोहिणी गजपिप्पली ।"
इति वत्सकादिः । ९५ ।

"श्वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठायमानिका ।"
इति श्वदंष्ट्रादिः । ९६ ।

"दार्वी ... ।
ज्वरातीसार... ।
... ।
... ।"
इति दार्व्यादिः । ९७ ।

"मुस्तकविश्वातिविषा...
... ।
... ।"
इति मुस्तकादिः । ९८ ।

"... ।
... ।"
इति ... । ९९ ।

"... ।
... ।"
इति ह्रस्वपञ्चमूली । १०० ।

"किराततिक्त... ।
... ।"
इति किरातादिः । १०१ ।
इति ज्वरातीसाराधिकारः । ८ ।

अथातीसारे ।

"धान्यकं नागरं मुस्तं बालकं बिल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ।"
इति धान्यपञ्चकम् । १०२ ।

"... ।"
इति धान्यचतुष्कम् । १०३ ।

"... ।
... ।"
इति ... । १०४ ।

"... ।
... ।"
इति ... । १०५ ।

"कुटज... ।
... ।"
इति कुटजादिः । १०६ ।

"... ।
... ।"
इति ... । १०७ ।

"पटोल... ।
... ।"
इति पटोलादिकषायः । १०८ ।

"कुटजं दाडिमं मुस्तं धातकी बिल्वबालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ।
आमे ... ।
कुटजादिरिति ख्यातः सर्वातीसारनाशनः ।"
इति कुटजादिः । १०९ ।

"... ।
... ।"
इति समङ्गादिः । ११० ।

"कुटजत्वक्... ।
... ।"
इति कुटजक्वाथः । १११ ।

"वत्सकः सातिविषः सबिल्वः
सोदीच्यमुस्तश्च कृतः कषायः ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ।"
इति वत्सकादिः । ११२ ।

"... ।
... ।"
इति कुटजदाडिमम् । ११३ । ९ ।

अथ ग्रहण्याम् ।

"... ।
... ।
... ।"
इति ... । ११४ । १० ।

अथाग्निमान्द्ये ।

"... ।
... ।
... ।"
इति ... । ११५ । ११ ।

अथाजीर्णे ।

"... ।
... ।"
इति धान्यशुण्ठी । ११६ । १२ ।

अथ ... ।

"... ।
... ।"
इति ... । ११७ । १३ ।

अथ ... ।

"... ।
... ।"
इति ... । ११८ । १४ ।

अथ राजयक्ष्मणि ।
"धन्याकपिप्पलीविश्वदशमूलीजलं पिबेत् ।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥"
इति धन्याकादि ॥ ११९ ॥
"अश्वगन्धामृताभीरुदशमूलीबलावृषाः ।
पुष्करातिविषे घ्नन्ति क्षयं क्षीररसाशिनः ॥"
इति अश्वगन्धादि ॥ १२० ॥
"दशमूलबलारास्नापुष्करसुरदारुनागरैः क्वथितम् ।
पेयं पार्श्वांसशिरोरुक्क्षयकासादिशान्तये
सलिलम् ॥"
इति दशमूलादि ॥ १२१ ॥
इति राजयक्ष्माधिकारः ॥ * ॥

अथ कासे ।
"पञ्चमूलीकृतः क्वाथः पिप्पलीचूर्णसंयुतः ।
रसान्नमश्नतो नित्यं वातकासमुदस्यति ॥"
इति पिप्पलीचूर्णयुक्तपञ्चमूली ॥ १२२ ॥
"पौष्करं कट्फलं भार्गी पिप्पलीविश्वसाधितम् ।
पिबेत् क्वाथं कफोद्रेके कासे श्वासे च हृद्ग्रहे ॥"
इति पौष्करादि ॥ १२३ ॥
"पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत् ॥"
इति पिप्पलीचूर्णयुक्तदशमूली ॥ १२४ ॥
"कट्फलं कतृणं भार्गी मुस्तं धान्यं वचाभया ।
शृङ्गी पर्पटकं शुण्ठी सुराह्वञ्च जले शृतम् ॥
मधुहिङ्गुयुतं पेयं कासे वातकफात्मके ।
कण्ठरोगे मुखे शूले श्वासहिक्काज्वरेषु च ॥"
इति कट्फलादि ॥ १२५ ॥
"कण्टकारीकृतः क्वाथः सकृष्णः सर्व्वकासहा ॥"
इति कण्टकारीक्वाथः ॥ १२६ ॥
इति कासाधिकारः ॥ * ॥

अथ हिक्कायाम् ।
"अमृतानागरफञ्जीव्याघ्रीपर्णाससाधितक्वाथः ।
पीतः सकणाचूर्णः कासश्वासौ जयत्याशु ॥"
इति अमृतादि ॥ १२७ ॥
"दशमूलीकषायस्तु पुष्करेणावचूर्णितः ।
कासश्वासप्रशमनः पार्श्वहृच्छूलनाशनः ॥"
इति कुष्ठचूर्णयुक्तदशमूली ॥ १२८ ॥
"कुलत्थनागरव्याघ्रीवासाभिः क्वथितं जलम् ।
पीतं पुष्करसंयुक्तं हिक्काश्वासनिवारणम् ॥"
इति कुलत्थादि ॥ १२९ ॥
"शृङ्गीमहौषधकणाघनपौष्कराणां
चूर्णं शटीमरिचशर्करया विमिश्रम् ।
क्वाथेन पीतममृतावृषपञ्चमूल्याः
श्वासं जयेद्विविधमप्यतिरोषमुग्रम् ॥"
इति शृङ्ग्यादि ॥ १३० ॥
इति हिक्काश्वासाधिकारः ॥ * ॥

अथ छर्द्याम् ।
"कषायो भद्रमुस्तस्य सनागरमधुशर्करः ।
त्रिदोषच्छर्द्दितोयार्त्ते देयाच्छर्दिरसाकुलितम् ॥"
इति भद्रमुस्तकषायः ॥ १३१ ॥
"गुडूचीत्रिफलारिष्टपटोलैः क्वथितं पिबेत् ।
क्षौद्रयुक्तं निहन्त्याशु छर्दिं पित्तकफात्मिकाम् ॥"
इति गुडूच्यादि ॥ १३२ ॥

"क्वाथः पर्पटजः पीतः सक्षौद्रश्छर्दिनाशनः ॥"
इति पर्पटक्वाथः ॥ १३३ ॥
"कृतं गुडूच्या विधिवत् कषायं हिमसंज्ञितम् ।
निहन्त्यपि भवेत् पथ्यं माक्षिकेण समायुतम् ॥
द्रव्यादापोथितात्तोये प्रतप्ते निशि संस्थितात् ।
कषायो योऽभिनिर्याति स शीतः समुदाहृतः ॥"
इति गुडूचीशीतकषायः ॥ १३४ ॥
"श्रीफलस्य गुडूच्या वा कषायो मधुसंयुतः ।
पेयश्छर्दित्रये शीतो मूर्वा वा तण्डुलाम्बुना ॥"
इति बिल्वफलगुडूचीकषायौ ॥ १३५ ॥
"जम्ब्वाम्रपल्लवगवेधुकधान्यसेव्य-
ह्रीवेरवारि पिबतो मधुनाल्पमल्पम् ।
छर्द्दिः प्रयाति शमनं त्रिसुगन्धियुक्ता
लीढा निहन्ति मधुनाथ दुरालभा वा ॥"
इति जम्ब्वादिवारि ॥ १३६ ॥
इति छर्द्यधिकारः ॥ * ॥

अथ मूर्च्छायाम् ।
"महौषधामृताक्षौद्रपौष्करं ग्रन्थिकोद्भवम् ।
पिबेत् कणायुतं क्वाथं मूर्च्छायेषु मदेषु च ॥"
इति महौषधादि ॥ १३७ ॥
"पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ॥"
इति दुरालभाक्वाथः ॥ १३८ ॥
इति मूर्च्छाधिकारः ॥ * ॥

अथोन्मादे ।
"दशमूलाम्बु सघृतं युक्तं मांसरसेन वा ।
ससिद्धार्थकचूर्णं वा पुराणं केवलं घृतम् ॥"
इति घृतादियुक्तदशमूलम् ॥ १३९ ॥ * ॥

अथापस्मारे ।
"भूतकम्पोऽधिकजा यस्य स्वेदो ज्वलादि-
प्रीतता ।
दशमूलीजलं तस्य कल्याणाज्यञ्च योजयेत् ॥"
इति दशमूलीकल्याणघृतौ ॥ १४० ॥ * ॥

अथ वातरोगे ।
"पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा ।
रूक्षः स्वेदस्तथा नस्यं मन्याकम्पे प्रशस्यते ॥"
इति पञ्चमूली-दशमूलीक्वाथौ ॥ १४१ ॥
"अर्द्दिते नवनीतेन खादेन्माषेण्डरीं नरः ।
क्षीरमांसरसैर्भुक्त्वा दशमूली जलं पिबेत् ॥"
इति दशमूली ॥ १४२ ॥
"माषबलाशुकशिम्बीकतृणरास्नाश्वगन्धो-
रुबूकाणाम् ।
क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्णः ॥
अपहरति पक्षवातं मन्यास्तम्भं सकर्ण-
नादरुजम् ।
दुर्ज्जयमर्द्दितवातं सप्ताहाज्जयति चावश्यम् ॥"
इति माषबलादि ॥ १४३ ॥
"दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नस्यं विश्वाच्यामवबाहुके ॥"
इति दशमूलादि ॥ १४४ ॥
"माषात्मगुप्तकैरण्डवाट्यालकशृतं पिबेत् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥"
इति माषादि ॥ १४५ ॥

"वाताढ्ये दशमूल्या च नरं कुशलमाचरेत् ॥"
इति वातप्रशमदशमूलीक्वाथः ॥ १४६ ॥
"दशमूली बला रास्ना गुडूची विश्वभेषजम् ।
पिबेदेरण्डतैलेन गृध्रसीखञ्जपङ्गुषु ॥"
इति एरण्डतैलयुक्तदशमूल्यादि ॥ १४७ ॥
"शेफालिकादलक्वाथो मृद्वग्निपरिसाधितः ।
दुर्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत् ॥"
इति शेफालीक्वाथः ॥ १४८ ॥
"पञ्चमूलीकषायन्तु रुबुतैलविमिश्रितम् ।
त्रिवृत्तैलेनाथवा युक्तं गृध्रसीगुल्मशूलनुत् ॥"
इति एरण्डतैलयुक्तपञ्चमूली ॥ १४९ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कटीशूलेषु सर्व्वेषु तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलीशुण्ठीक्वाथौ ॥ १५० ॥
"गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीत्रिफलाम्भसा ।
क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम् ॥"
इति गुग्गुलुयुक्तगुडूचीत्रिफलाक्वाथः ॥ १५१ ॥
इति वातव्याध्यधिकारः ॥ * ॥

अथ वातरक्ते ।
"अमृतानागरधन्याककर्षत्रयेण पाचनकं सिद्धम् ।
जयति सरक्तं वातं सामं कुष्ठान्यशेषाणि ॥"
इति अमृतादि ॥ १५२ ॥
"वत्सादनीभवः क्वाथः पीतो गुग्गुलुसंयुतः ।
समीरणसमायुक्तं शोणितं संप्रसादयेत् ॥"
इति वत्सादनीक्वाथः ॥ १५३ ॥
"वासागुडूचीचतुरङ्गुलाना-
मेरण्डतैलेन पिबेत् कषायम् ।
क्रमेण सर्व्वाङ्गजमप्यशेषं
जयेदसृग्वातभवं विकारम् ॥"
इति वासादि ॥ १५४ ॥
"लीढा सुविलिकाचूर्णं मधुसर्पिःसमन्वितम् ।
छिन्नाक्वाथं पिबन् हन्ति वातरक्तं सुदुस्तरम् ॥"
इति गुडूचीक्वाथः ॥ १५५ ॥
"तिक्तोऽथवा पञ्चगुडेन पथ्या
जग्ध्वा पिबेच्छिन्नरुहाकषायम् ।
सवातरक्तं शमयत्युदीर्णं-
माजानुसंस्थञ्च निहन्त्यवश्यम् ॥"
इति गुडूचीकषायः ॥ १५६ ॥
इति वातरक्ताधिकारः ॥ * ॥

अथोरुस्तम्भे ।
"शिलाजतुं गुग्गुलुं वा पिप्पलीमथ नागरम् ।
उरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा ॥"
इति शिलाजत्वादियुक्तदशमूली ॥ १५७ ॥
"भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवाः ।
पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिवारणाः ॥"
इति भल्लातकादि ॥ १५८ ॥
"पिप्पली पिप्पलीमूलं भल्लातकाच्च एव वा ।
कल्को वा समधुर्देय ऊरुस्तम्भविनाशनः ॥"
इति पिप्पल्यादि ॥ १५९ ॥
इत्यूरुस्तम्भाधिकारः ॥ * ॥

अथामवाते ।
"शटीशुण्ठ्यभया चोग्रा देवदार्व्वतिविषामृता ।

मसूरो मेदनः क्वाथः पेयः सर्वज्वरापहः ।”
इति मिश्रकादि । ७६ ।
अथ जीर्णज्वरे ।
“निदिग्धिकानागरकामृताभिः
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्द्दितपीनसेषु ।
कस्तूरीहेमगर्भं प्राय: सामं तिरोधयिष्यति ।”
इति निदिग्धादि । ७७ ।
“पिप्पलीचूर्णसंयुक्तः क्वाथश्छिन्नरुहोद्भवः ।
जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा ।
कासश्वासारुचिश्वासघ्नम् पाण्डुक्रिमिरोगनुत्
। ७८ ।
इति जीर्णज्वराधिकारः । ॰ ।
अथ सन्तातादिज्वरे ।
“मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकम् ।
छिन्नोद्भवा पटोलञ्च क्वाथं समधुशर्करम् ।
ज्वरं पञ्चविधं हन्यात् सन्ततादं सुदारुणम् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ।
क्वाथं त्रिपादयुक्तामु विरामं प्रमयत्यपि ।”
इति मधुकादम् ।७९।
“कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी ।८०।
पटोलं शारिवा मुस्ता पाठा कटुकरोहिणी ।८१।
निम्बं पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ ।
। ८२ ।
किरातातिक्तममृता चन्दनं विश्वभेषजम् ।८३।
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापनाः ।
कषायाः शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ।
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
गुडूचीमुस्तधात्रीणां कषायो वा समाक्षिकम् ।
मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्वाथः ।
पीतः सकणाचूर्णः समस्तविषमज्वरं हन्ति ।”
इति मुस्तादि । ८५ । ॰ ।
अथ तृतीयकज्वरे ।
“महौषधामृतामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ।”
इति महौषधादि । ८६ ।
अथ चातुर्थकज्वरे ।
“वासाधात्रीस्थिरादारुपथ्यानागरसाधितः ।
सितामधुयुतः क्वाथश्चातुर्थकनिवारणः ।”८७ ।
इति ज्वराधिकारः । ॰ ।
अथ ज्वरातीसारे ।
“पाठेन्द्रयवभूनिम्बमुस्तापर्पटकामृताः ।
जयन्त्यामातीसारं सज्वरं समहौषधाः ।”
इति पाठादि । ८८ ।
“नागरातिविषामुस्तभूनिम्बामृतवत्सकैः ।
सर्वज्वरहरः क्वाथः सर्वातीसारनाशनः ।”
इति नागरादि । ८९ ।
“ह्रीवेरातिविषामुस्तबिल्वधान्यकनागरैः ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ।
सरक्तं हन्त्यतीसारं सज्वरं वाथ विज्वरम् ।”
इति ह्रीवेरादि । ९० ।

“गुडूच्यतिविषाधान्यशुण्ठीबिल्वाम्बुवालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ।
कषायः शीतलः पेयो ज्वरातीसारशान्तये ।
हृल्लासारोचकच्छर्द्दिपिपासादाहनाशनः ।”
इति गुडूच्यादि । ९१ ।
“उशीरं बालकं मुस्तं धन्याकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं बिल्वं दीपनपाचनम् ।
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विज्वरम् ।”
इति उशीरादि । ९२ ।
“पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बह्रीवेरकुटजत्वक्फलैः शृतम् ।
हन्ति सर्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम् ।”
इति पञ्चमूल्यादि । ९३ ।
“कलिङ्गातिविषाशुण्ठीकिराताम्बुयवासकम् ।
ज्वरातिसारसन्तापं नाशयेदविकल्पतः ।”
इति कलिङ्गादि । ९४ ।
“वत्सकस्य फलं दारु रोहिणी गजपिप्पली ।”
इति वत्सकादि । ९५ ।
“श्वदंष्ट्रा पिप्पलीधान्यं बिल्वं पाठायमानिका ।”
इति श्वदंष्ट्रादि । ९६ ।
“द्वावेतौ विहितौ योगौ शोथार्शोभगन्दरे ।
ज्वरातीसारशमनौ विधिनाह्वयनाशनौ ।
नागराम्बुभूनिम्बबिल्वबालकवत्सकैः ।
समुस्तातिविषाशीरैर्ज्वरातीसारनुत्तमम् ।”
इति नागरादि । ९७ ।
“गुडूचीबिल्वातिविषापाठाभूनिम्ब-
वत्सकैः क्वाथः ।
मकरध्वजभेषुतो ज्वरातिसारी जयेद्घोरौ ।”
इति गुडूच्यादि । ९८ ।
“वत्सकपाठातिविषामुस्तपर्पटधान्य-
रोहिणीबिल्वैः ।
शिष्यपैः शृतसम्भः सातीसारं ज्वरं जयति ।”
इति वत्सादि । ९९ ।
“ह्रीवेरनीलकमपि विश्वमुस्तं पिबेत् ।
ज्वरं चैवातिसारं च मधौ पिबेत् सदाम्बीयते ।”
इति ह्रीवेरपञ्चकी । १०० ।
“किरातातिक्तनागरबिल्वचन्दनोशीरधान्यकैः ।
शोथातीसारशमनं विधिवत् ज्वरनाशनम् ।”
इति किरातादि । १०१ ।
इति ज्वरातीसाराधिकारः । ॰ ।
अथातीसारे ।
“धान्यकं नागरं मुस्तं बालकं बिल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ।”
इति धान्यपञ्चकम् । १०२ ।
“एवं धान्यचतुष्कं स्यात् पैत्ते शुण्ठीं विना पुनः ।”
इति धान्यचतुष्कम् । १०३ ।
“वत्सकातिविषामुस्तपाठाबिल्वबलाह्रीबेरम् ।
जलधरमागरशालिनं श्लेष्मातिसारी संश्रयेत् ।
इति वत्सकादि । १०४ ।
“किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् ।
पिबेत् पित्तातिसारघ्नं समीरं हिङ्गुसंयुतम् ।
इति किराततिक्तकादि । १०५ ।
“कुटजस्य फलं मुस्तं क्वाथयित्वा जलं पिबेत् ।
रक्तातिसारं जयेदाशु शर्करामधुयोजितम् ।”
इति कुटजादि । १०६ ।
“बिल्वपत्राग्निशुण्ठीभिः पीतः कषायोऽम्बुकण्टकैः ।
निहन्त्याशु सहातीसारं वैश्वानर इवाहुतिम् ।”
इति बिल्वादिक्वाथः । १०७ ।
“पटोलयवधान्याकक्वाथः पेयः सुशीतलः ।
शर्करामधुसंयुक्तश्छर्द्द्यतीसारनाशनः ।”
इति पटोलादिक्वाथः । १०८ ।
“कुटजं दाडिमं मुस्तं धातकी बिल्वबालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ।
आमे सशूले रक्ते च पिच्छामार्गे च दुर्गमे ।
कुटजादिरिति ख्यातः सर्वातीसारनाशनः ।”
इति कुटजादि । १०९ ।
“समङ्गातिविषा मुस्तं बिल्वं ह्रीवेरधातकी ।
कुटजस्य फलं बिल्वं क्वाथः सर्वातिसारनुत् ।”
इति समङ्गादि । ११० ।
“कुटजत्वक्कृतक्वाथो घनीभूतः सुशीतलः ।
लोध्रितोऽतिविषायुक्तः सर्वातीसारनाशनः ।”
इति कुटजक्वाथः । १११ ।
“वत्सकः सातिविषः सबिल्वः
सोदीच्यमुस्तश्च कृतः कषायः ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ।”
इति वत्सकादि । ११२ ।
“कषायो मधुना पीतस्त्वचो दाडिमवत्सकात् ।
सद्यो जयेदतीसारं सरक्तं दुर्निवारकम् ।”
इति कुटजदाडिमम् । ११३ । ॰ ।
अथ ग्रहण्याम् ।
“पञ्चकोलादिकं दोषघ्नीनामनन्तरेण ।
अतीसारोक्तविधिना ग्रहणीमपि साधयेत् ।
नागरातिविषामुस्तक्वाथः स्यादामपाचनः ।”
इति नागरादि । ११४ । ॰ ।
अथाग्निमान्द्ये ।
“त्रिफलामृतागुडूचीश्च क्वाथेन वत्सकम् ।
पिबेत् मेदुनि मन्दाग्नौ शक्रयवाम्बुशीतलम् ।
पञ्चकोलं समरिचं वह्निचपलादिनम् ।”
इति वत्सकादिक्वाथादि । ११५ । ॰ ।
अथाजीर्णे ।
“धान्यनागरसंसिद्धं तोयं दद्याद्विचक्षणः ।
आमाजीर्णप्रशमनं दीपनं बस्तिशोधनम् ।”
इति धान्यशुण्ठी । ११६ । ॰ ।
अथ पाण्डुरोगे ।
“फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम् ।”
इति फलत्रिकादि । ११७ । ॰ ।
अथ रक्तपित्ते ।
“वासा द्राक्षाभयाक्वाथः शर्करामधुसंयुतः ।
श्वासकासं रक्तपित्तं नाशयेन्नात्र संशयः ।”
इति वासादिक्वाथः । ११८ । ॰ ।

अथ राजयक्ष्मणि ।
"धन्याकपिप्पलीविश्वदशमूलीजलं पिबेत् ।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥"
इति धन्याकादि ॥ ११९ ॥
"अश्वगन्धामृताभीरुदशमूलीबलावृषाः ।
पुष्करातिविषे घ्नन्ति क्षयं क्षीररसाशिनः ॥"
इति अश्वगन्धादि ॥ १२० ॥
"दशमूलबलारास्नापुष्करसुरदारुनागरैः क्वथितम् ।
पेयं पार्श्वांसशिरोरुक्क्षयकासादिशान्तये
सलिलम् ॥"
इति दशमूलादि ॥ १२१ ॥
इति राजयक्ष्माधिकारः ॥ ० ॥

अथ कासे ।
"पञ्चमूलीकृतः क्वाथः पिप्पलीचूर्णसंयुतः ।
रसान्नमश्नतो नित्यं वातकासमुदस्यति ॥"
इति पिप्पलीचूर्णयुक्तपञ्चमूली ॥ १२२ ॥
"पौष्करं कट्फलं भार्गी पिप्पलीविश्वसाधितम् ।
पिबेत् क्वाथं कफोद्रिक्ते कासे श्वासे च हृद्ग्रहे ॥"
इति पौष्करादि ॥ १२३ ॥
"पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत् ॥"
इति पिप्पलीचूर्णयुक्तदशमूली ॥ १२४ ॥
"कट्फलं कतृणं भार्गी मुस्तं धान्यं वचाभया ।
शृङ्गी पर्पटकं शुण्ठी सुराह्वञ्च जले शृतम् ॥
मधुहिङ्गुयुतं पेयं कासे वातकफात्मके ।
कण्ठरोगे मुखे शूले श्वासहिक्काज्वरेषु च ॥"
इति कट्फलादि ॥ १२५ ॥
"कण्टकारीकृतः क्वाथः सकणः सर्वकासहा ॥"
इति कण्टकारीक्वाथः ॥ १२६ ॥
इति कासाधिकारः ॥ ० ॥

अथ हिक्कायाम् ।
"अमृतानागरफञ्जीव्याघ्रीपर्णाशृतसाधितक्वाथः ।
पीतः सकणाचूर्णः कासश्वासौ जयत्याशु ॥"
इति अमृतादि ॥ १२७ ॥
"दशमूलीकषायस्तु पुष्करेणावचूर्णितः ।
कासश्वासप्रशमनः पार्श्वहृच्छूलनाशनः ॥"
इति कुष्ठचूर्णयुक्तदशमूली ॥ १२८ ॥
"कुलत्थनागरव्याघ्रीवासाभिः क्वथितं जलम् ।
पीतं पुष्करसंयुक्तं हिक्काश्वासनिवारणम् ॥"
इति कुलत्थादि ॥ १२९ ॥
"शृङ्गीमहौषधकणाघनपौष्कराणां
चूर्णं शटीमरिचशर्करया विमिश्रम् ।
क्वाथेन पीतमगदारुकपञ्चमूल्याः
श्वासं जयेद्विविधमप्यतिदोषयुक्तम् ॥"
इति शृङ्ग्यादि ॥ १३० ॥
इति हिक्काश्वासाधिकारः ॥ ० ॥

अथ छर्द्याम् ।
"कषायो भद्रमुस्तस्य मध्वा समधुशर्करः ।
निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥"
इति भद्रमुस्तकक्वाथः ॥ १३१ ॥
"गुडूचीत्रिफलारिष्टपटोलैः क्वथितं पिबेत् ।
क्षौद्रयुक्तं विहन्त्याशु छर्दिं पित्तकफात्मिकाम् ॥"
इति गुडूच्यादि ॥ १३२ ॥

"क्वाथः पर्पटजः पीतः सक्षौद्रश्छर्दिनाशनः ॥"
इति पर्पटक्वाथः ॥ १३३ ॥
"कृतं गुडूच्या विधिवत् कषायं हिमसंज्ञितम् ।
निहन्त्यपि भवेत् पथ्यं माक्षिकेण समायुतम् ॥
मृत्पात्रपोषितास्तोये प्रतप्ते निशि संस्थितात् ।
कषायो योऽभिनिर्याति स शीतः समुदाहृतः ॥"
इति गुडूचीशीतकषायः ॥ १३४ ॥
"श्रीफलस्य गुडूच्या वा कषायो मधुसंयुतः ।
पेयश्छर्दित्रये शीतो मूर्वा वा तण्डुलाम्बुना ॥"
इति बिल्वमूलगुडूचीकषायौ ॥ १३५ ॥
"जम्ब्वाम्रपल्लवगवेधुकधान्यसेव्य-
ह्रीवेरवारि पिबतो मधुनाल्पमल्पम् ।
छर्दिः प्रयाति शमनं त्रिसुगन्धियुक्ता
लीढा निहन्ति मधुनाथ दुरालभा वा ॥"
इति जम्ब्वादिवारि ॥ १३६ ॥
इति छर्द्यधिकारः ॥ ० ॥

अथ मूर्च्छायाम् ।
"महौषधामृताक्षौद्रं पौष्करं ग्रन्थिकोद्भवम् ।
पिबेत् कणायुतं क्वाथं मूर्च्छायां मदेषु च ॥"
इति महौषधादि ॥ १३७ ॥
"पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ॥"
इति दुरालभाक्वाथः ॥ १३८ ॥
इति मूर्च्छाधिकारः ॥ ० ॥

अथोन्मादे ।
"दशमूलाम्बु सघृतं युक्तं मांसरसेन वा ।
ससिद्धार्थकचूर्णं वा पुराणं चैककं घृतम् ॥"
इति घृतादियुक्तदशमूलम् ॥ १३९ ॥ ० ॥

अथापस्मारे ।
"हृत्कम्पोऽक्षिरुजा यस्य स्वेदो हस्तादि-
शीतता ।
दशमूलीजलं तस्य कल्याणाज्यञ्च योजयेत् ॥"
इति दशमूलीकल्याणघृतौ ॥ १४० ॥ ० ॥

अथ वातरोगे ।
"पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा ।
रूक्षः स्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते ॥"
इति पञ्चमूली-दशमूलीक्वाथौ ॥ १४१ ॥
"अर्दिते नवनीतेन खादेन्माषेण्डरीं नरः ।
क्षीरमांसरसैर्भुक्त्वा दशमूली जलं पिबेत् ॥"
इति दशमूली ॥ १४२ ॥
"माषबलाशुकशिम्बीकतृणरास्नाश्वगन्धो-
रुबूकाणाम् ।
क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्णः ॥
अपहरति पक्षवातं मन्यास्तम्भं सकर्ण-
नादरुजम् ।
दुर्ज्जयमर्द्दितवातं सप्ताहाज्जयति चाभ्यासम् ॥"
इति माषबलादि ॥ १४३ ॥
"दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नस्यं विश्वाच्यामवबाहुके ॥"
इति दशमूल्यादि ॥ १४४ ॥
"माषात्मगुप्तकैरण्डवाट्यालकशृतं पिबेत् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥"
इति माषादि ॥ १४५ ॥

"वातघ्नैर्दशमूल्या च शृतं कुब्जमुपाचरेत् ॥"
इति वातघ्नगणदशमूलीकषायौ ॥ १४६ ॥
"दशमूली बला रास्ना गुडूची विश्वभेषजम् ।
पिबेदेरण्डतैलेन गृध्रसीखञ्जपङ्गुषु ॥"
इति एरण्डतैलयुक्तदशमूल्यादि ॥ १४७ ॥
"शेफालिकादलक्वाथो मृद्वग्निपरिसाधितः ।
दुर्व्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत् ॥"
इति शेफालीक्वाथः ॥ १४८ ॥
"पञ्चमूलीकषायन्तु रुबुतैलविमिश्रितम् ।
त्रिवृतैर्वाथवा युक्तं गृध्रसीगुल्मशूलनुत् ॥"
इति एरण्डतैलयुक्तपञ्चमूली ॥ १४९ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कटीशूलेषु सर्वेषु तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलीशुण्ठीक्वाथौ ॥ १५० ॥
"गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीं त्रिफलाम्भसा ।
मत्स्यविशेषः । बोयालि इति भाषा । तत्-
पर्य्यायः । सहस्रदंष्ट्रः २ । इत्यमरः ॥ वदाल-
दंष्ट्री ३ बोदालः ४ वदालकः ५ । इति शब्द-
रत्नावली ॥ (यथा, मनुः । ५ । १६ ।
“पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥”)
अस्य गुणाः । श्लेष्मलत्वम् । स्निग्धत्वम् । मधुर-
त्वम् । कषायत्वम् । बल्यत्वम् । वृष्यत्वम् । पाके
कटुत्वम् । रोचनत्वम् । वातपित्तनाशित्वञ्च । इति
राजवल्लभः ॥ (यथा च ।
“पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिता-
शनः ।
दूषयत्यपि तत्तु कुष्ठरोगं करोत्यसौ ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ।)
गुग्गुलुद्रुमः । इति मेदिनी । ने, ५८ ॥

पाठ्यं, त्रि, (पठ्यते इति । पठ+“ऋहलोर्ण्यत् ।”
३ । १ । १२४ । इति ण्यत् ।) पठनीयम् ।
पठितव्यम् । यथा,—
“तिष्ठ रे तिष्ठ कष्टोऽहं कृष्णयामि कथारणम् ।
अमङ्गु पठतः पाठ्यमधिगोऽहि द्रष्टव्य ते ॥”
इति नैषधे १७ सर्गः ॥

पाणः, पुं, (पणाते व्यवह्रियतेऽनेनेति । पण+
करणे घञ् ।) पाणिः । इति शब्दचन्द्रिका ॥
(पण+भावे घञ् । पणनम् । व्ययः । यथा,
महाभारते । २ । ६७ । ८ ।
“दीव्यामेति मया पाणः स्थितो
कुरुष्व पाणं विरह मा

पाणिः, स्त्री, (पणायन्ते व्यवहरन्त्यनेनेति । पण + "अशिपणाय्यो रुडायलुकौ च ।" उणां ४ । १३३ । इति इण् आयप्रत्ययस्य लुक् च ।) पञ्चशाखः । करः । इत्युणादिकोषः ॥

पाणिः, पुं, (पणायन्ते व्यवहरन्त्यनेन । पण व्यवहारे + "अशिपणाय्यो रुडायलुकौ च ।" उणां ४ । १३३ । इति इण् आयप्रत्ययस्य लुक् च ।) स च मणिबन्धावध्यङ्गुलिपर्य्यन्तभागः । स तु गर्भस्थबालकस्य मासषट्केन भवति । इति सुखबोधः । तत्पर्य्यायः । पञ्चशाखः २ शयः ३ शमः ४ हस्तः ५ करः ६ । इत्यमरभरतौ । भुजः ७ । इति जटाधरः । कुलिः ८ । इति शब्दरत्नावली । भुजादलः ९ । इति त्रिकाण्डशेषः ॥ (यथा, हितोपदेशे । २ । २ । १९ ।
"असमाप्तिजुगुप्सौ तौ कृता कान्तौ मनो रमाम् ।
अभग इति यदि पाणौ गृहीत्वापयोधितः ॥")
कुशिकच्छपः । इति रत्नमाला । कुशिकाकडा इति भाषा ॥

पाणिकच्छपिका, स्त्री, (कच्छपः कूर्म्मस्तदाकारो-ऽस्त्यस्याः । कच्छप + ठन् । टापि अत इत्वम् । पाणिभ्यां कृता कच्छपिका कूर्म्माकृतिमुद्रा ।) कूर्म्ममुद्रा । यथा,—
"पाणिकच्छपिकां कृत्वा कूर्म्मं कूर्म्ममन्त्रेण पादयेत् ।
तत्र संस्थाप्य पूर्व्वेण दक्षिणेनाधरो बहुः ।
पूर्व्वं तेन तु दक्षिणं स्थाप्य ध्यायेत् ॥"
कूर्म्मरूपो यथा,—
"द्वितीयं पृष्ठदेशञ्च चौर्यं विन्दुपूर्व्वकम् ।
कच्छपो यन्त्ररूपं कूर्म्मपीठं प्रकीर्त्तितम् ॥"
इति कालिकापुराणे ६६ अध्यायः ॥

पाणिगृहीती, स्त्री, (पाणिर्गृहीतो यस्याः । "पाणिगृहीती भार्य्यायाम् ।" ४ । १ । ५२ । इत्यस्य वार्त्तिकोक्त्या ङीष् ।) विवाहिता । इत्यमरः । २ । ६ । ६ ॥

पाणिग्रहणं, क्ली, (पाणेर्ग्रहणं यत्र ।) विवाहः । इति हेमचन्द्रः । ३ । १७८ ॥ (यथा, रघुः । ७ । २९ ।
"इति स्वसुर्भोजकुलप्रदीपः
सम्पाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः ॥")

पाणिघः, पुं, (पाणिं हन्ति पाणिना वा हन्तीति । हन + "पाणिघताडघौ शिल्पिनि ।" ३ । २ । ५५ । इति टक् निपात्यते च घत्वं टिलोपश्च ।) वादकः । पाणिना मृदङ्गादिवादकः । पाणिं वा हन्ति सः । सः पाणिनैव मृदङ्गादिवादन-तत्परः तस्य च । पाणिना मृदङ्गादि वादने तत्परः च । इति सिद्धान्तकौमुदी ॥

पाणिघातः, पुं, (पाणिना हन्तीति । हन + कर्म्मण्यण् ।) पाणिप्रहारः । इति सिद्धान्तकौमुदी ॥ (हन + भावे घञ् । पाणेर्घातः प्रहारः । पाणिप्रहारः ।)

पाणिजः, पुं, (पाणौ जायते इति । पाणि + जन + "सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) नखः । इति हलायुधः ॥

पाणितलं, क्ली, (पाणिस्तलमिव प्रतिष्ठा-स्थानम् । अच् ।) कर्षद्वयपरिमाणम् । तोलकद्वयम् । इति वैद्यकपरिभाषा ॥ (पर्य्यायोऽस्य यथा,—
"कोलद्वयञ्च कर्षः स्यात् स प्रोक्तः पाणिमानिका ।
अक्षं पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम् ।
विडालपदकञ्चैव सुवर्णं कवलग्रहः ।
उदुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते ॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ।
पर्य्यायान्तरं यथा,—
"विडालो संयतौ कर्णौ सुवर्णं कावयवेन च ।
विडालपदकञ्चैव विन्दुर्माणिकमष्टमम् ।
निष्कञ्च विदालोन्मादं कवलग्रहमेव च ॥"
इति चरके कल्पस्थाने सप्तमेऽध्याये ।
पाणितलम् ।) करतलभागः ॥ (यथा,
रघौ । ७ । १९ ।
"वृद्धौ नानर्त्तयितैमिरत्नाद्धिः पाणौ च पञ्चपदीव ।
सा वत्सा वीज एव पर्य्याय पाणितलमिव तु ॥")

पाणिनः, पुं, (पणिनो ऋषेर्गोत्रापत्यम् । पणिन् + अण् । "गाथिविदथिकेशिगणिपणिनश्च ।" ६ । ४ । १६५ । इति न टिलोपः ।) पाणिनिः । इति त्रिकाण्डशेषः ॥

पाणिनिः, पुं, (पणिनो ऋषेर्युवापत्यम् । पणिन् + इञ् । न टिलोपः ।) मुनिविशेषः । तत्पर्य्यायः । आहिकः २ दाक्षीपुत्रः ३ शालङ्की ४ पाणिनः ५ शालातुरीयः ६ । इति त्रिकाण्डशेषः ॥ * ॥ (अयं हि पणिन्-वंशसम्भूतः प्रसिद्धो व्याकरण-कर्त्ता । अस्य माता दाक्षी इत्याख्यया विश्रुता । यथा, भागवतपाठादिकायाम् । १ । ४ । ४० ।
"सर्व्वे सर्व्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।"
तथाच दिव्यावदान । ४६ ।
"शङ्करः शाङ्करी प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥"
अस्य शालातुरीय इत्याख्यापि दृश्यते । यथा,
गणरत्नमहोदधौ । १ । ३११ ।
"———————————अथ पाणिनी ।
शालातुरीयकार्ष्णी———————————।"
"शालातुरीयस्तत्रभवान् पाणिनिराचार्य्यकृत-प्रत्ययः" इत्यत्र शब्दः ।" इति विवरणम् वदरीति वा ।
इदं तु शालातुरीयोऽस्य अभिजनत्वेनेति व
बोद्धव्यम् । यतः शलातुरोऽभिजनोऽस्य इति
व्युत्पत्त्या शालातुरस्थेव शलातुरवैयोऽपि
सर्व्वे ग्रामाः सन्ति । अष्टाध्यायीस्थ-
सूत्रम् "तूदीशलातुरवर्म्मतीकूचवाराड्ढक्-
छण्ढञ्यकः ।" ४ । ३ । ९४ । तस्य अभि-
जनार्थे अण् प्रत्ययः । शालातुरीयो-
ऽपि चैव तु "शालातुरः ।" ४ । ३ । ९० ।
इति सूत्रे "तत्र भवे अण्ड इति विग्रहः । तत्र
शलातुरे शालातुरीयः ।" इत्यभिलक्ष्य-
त्वार्थे, वर्णिते । अतः अयम् पाणिनिश्च-
पर्व्वतः पाणिनिः पूर्व्वमुच्चादौ व्याकरणेऽभवत्
व्याकरणानि च तस्य सम्भवानि ।

पुरा किल कात्यायनस्य मुनिः वररुच-
र्यौवनकाले यस्य तपस्वी भार्य्यायां गते लिखन
कात्यायने व्याकरणान्तर्गतं । शोभितासु तु तः
कारोऽस्ति महता कल्पादिर्भावात् प्रचलया
प्रसिद्धं यतः लिखितवान् सूत्राद्यैः व्याख्यातुं
वर्णयितव्यं । यथा, तत्रैव । ४ । ९०—९४ ।
"अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत् ॥
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्य्यया ।
अगच्छत्तपसे खिन्नो विद्याकामो हिमालयम् ॥
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्व्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ॥
ततश्चागत्य मामेव वादायाह्वयते स्म सः ।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्त वासराः ॥
अष्टमेऽह्नि मया तस्मिञ्जिते तत्समनन्तरम् ।
नभःस्थेन महाघोरो हुङ्कारः शम्भुना कृतः ॥
तेन प्रणष्टमैन्द्रं तदस्मद्व्याकरणं भुवि ।
जिताः पाणिनिना सर्व्वे मूर्खीभूता वयं पुनः ॥
अथ सञ्जातनिर्व्वेदः स्वगृहस्थापितं धनम् ।
हस्ते हिरण्यदत्तस्य विधाय वणिजो निजम् ॥
उक्त्वा तच्चोपकोशायै गतवानस्मि सत्वरम् ।
तपोभिराराधयितुं निराहारो हिमालयम् ॥"
* * * *
"अप्रमाणे गुरावासे कृत्वा लोकाय तत् ततः ।
आराधितो यथा देवो वरदः पार्व्वतीपतिः ।
तदैव तेन शास्त्रं मे पाणिनीयं प्रकाशितम् ।
तदिच्छानुग्रहादेव मया पूर्णीकृतञ्च तत् ॥"
* * * *
"वर्षोऽपि च मत्तो उपदेशं मया व्याकरणं नवम् ।
ततः प्रकाशितं शास्त्रं पाणिनेः इति तत्र वै ।
ततो व्याडिरमात्यो विवादे रहिते सति ।
गुरवे गुरुदक्षिणे दत्त्वा तेऽपि तपोवनम् ॥
अद्यैव युगे पूर्व्वस्मिन् गते च नामाप्यभिधानम् ।
इति दासः सति ; तस्मात् पाणिनेः गुरुदक्षिणाम्
गृहाणेमां वाक्यतोऽवधिर्मम व्याकरणानि ।
व्याकरणात् तस्य ऋषेः गोत्रे गोत्रान्तरेऽपि हि नः ॥"
इत्युपाख्याने पाणिनिः कात्यायनस्य वार्त्ति-
कस्य च व्याकरणस्य दर्शयति । यः
कात्यायनस्ततिः पाणिनीयव्याकरणस्य वार्त्तिक-
व्याख्यानात् पूर्व्वकं व्याकरणस्येति विज्ञायते
यतः कात्यायन इव वार्त्तिककारः व्याकरणस्य
वार्त्तिककारः । स च व्याकरणे विचार्य तं
पाणिनीयं व्याकरणमेव प्रतिपन्नवान् । (४ । ४ ।
१०४ । वामनस्य काशिकायाम् ।) पाणिनेस्तु सोऽपि
व्याकरणे पूर्व्वसूत्राणां बहूनां विधुतं पाणिनीयं
प्रमाणम् सर्व्वं कृताति व्याकरणस्य नाम पाणि-
निनानेन, पतञ्जलेरप्यस्य व्याकरणस्य पाणिनिः व्याक-
रणम् स्मृतम् इति ।

अपि च महाभाष्यं पाणिनेः रचितं व्याकरणं
पाणिनीयव्याकरणमिति प्रसिद्धम् । व्याकरण

एवास्य वार्त्तिकं विधाय तीव्रसमालोचनाञ्चकार। परं पतञ्जलिः सूत्रपाठस्य वार्त्तिकस्य च महाभाष्यं विधाय सर्व्वतः प्रमादपरिशून्योऽयं पाणिनीयाष्टाध्यायीग्रन्थ इति प्रदर्शयन् कात्यायनतीव्रदृष्टेः रक्षयैवं समादरणीयं ग्रन्थरत्नम्। अष्टाध्यायीप्रारम्भे तु चतुर्द्दशसूत्राणि सन्ति तानि तु प्रत्याहारसूत्राणि।

अष्टाध्यायीसूत्रपाठे, आपिशलिः।६।१।९२। गालवः।६।३।६१। चाक्रवर्म्मणः।६।१।१३०। स्फोटायनः।६।१।१२३। काश्यपः।८।४।६७। गार्ग्यः।८।४।६७। भारद्वाजः।७।२।६३। सेनकः५।४।११२। शाकटायनः।३।४।१११। शाकल्यः।१।१।१६। एतेषां पूर्व्वतनवैयाकरणानां नामानि सन्ति। अत्र ३९९६ संख्यकानि सूत्राणि विद्यन्ते। काश्मीरराजस्य जयापीडस्य राजत्वसमये पाणिनिव्याकरणं वार्त्तिकेन महाभाष्येण च सह विशेषविद्यार्थिसुधीवरविज्ञत्वमधिकार्यं प्रचलितमासीत्। यथा, राजतरङ्गिण्याम्। ४। ६३८—६४०।

"भिक्षाभ्रं समसत्वस्य गुणवृद्धिविधायिनः।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम्॥
भाष्ययाख्यायते यौक्तैर्लक्षणाश्रयतः स्तुतः।
सोऽयं तस्य विपर्य्यस्तो बुधैरिव विवर्त्तितः॥
सत्त्वविप्रोपचर्गस्य भूतविद्याविधायिनः।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम्॥"

कात्यायनकृतवार्त्तिकात् पतञ्जलिकृतमहाभाष्याच्च अन्या अपि अष्टाध्यायीसूत्रपाठस्य उत्क्षिप्तमहाभाष्यस्य च बह्व्यष्टीकाः सन्ति बाहुल्यभिया तासां नामानि न प्रदत्तानि ॥)

पाणिनीयं, त्रि, (पाणिनिना प्रोक्तं उपदिष्टं वा। पाणिनि+"वृद्धाच्छः।" ४।२।११४। इति छः।) पाणिनिना कृतं ग्रन्थादि। इति मुग्धबोधव्याकरणम्॥

पाणिन्धमः, त्रि, (पाणिं धमतीति। ध्मा शब्दाग्निसंयोगयोः+ "उपपदमतिङ्मेरपाणिन्धमाश्च।" ३।२।३७। इति खश् मुम् च।) हस्तकर्म्मताकारनिर्घोषकर्त्ता। एवं शब्दकर्त्ता च। इति मुग्धबोधव्याकरणम्॥ ("पाण्योः ध्मायन्ते ऽग्निमिति पाणिन्धमोऽध्वा। अन्धकाराद्यस्य रूपम्। तत्र हि सर्पाद्यपनोदनाय पाणयः ध्मायन्ते।" इति सिद्धान्तकौमुदी॥)

पाणिपचः, त्रि, (पाणिभ्यां पचति पिबतीति। पीट पाने+ "नाडीमुष्टीध्मनकरतुर्द्दपाणिमाणिकात् खश्।" इति खश्प्रत्ययेन पाध्मः।) पाणिद्वारा पानकर्त्ता। इति मुग्धबोधव्याकरणम्॥

पाणिपादं, क्ली, पाणिश्च पादश्च इयोः समाहारः। पाणिपादयोः समाहारः। इति व्याकरणम्॥

पाणिपीडनं, क्ली, (पाणेः पीडनं ग्रहणं यत्र।) पाणिग्रहणम्। विवाहः। इत्यमरः॥ (पाणिभ्यां पीडनमिति विग्रहे क्रोधादिना करसंमर्द्दनम्॥)

पाणिभुक्, [ज्] पुं, (पाणिनेव भुज्यते दीयतेऽनेन पर्व्वादिरूपं यदा, पाणिरिव भुज्यते यत्रादिरूपं यदा ध्रियते इति। भुज्+क्विप्।) उडुम्बरवृक्षः। इति शब्दचन्द्रिका॥ (पाणिना भुङ्क्ते इति। भुज्+क्विप्।) पाणिकरणकभोक्तरि,त्रि।

पाणिमर्द्दः, पुं, (पाणिं मृद्नातीति। पाणि+मृद+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) करमर्द्दकः। इति राजनिर्घण्टः॥

पाणिमुक्तं, क्ली, (पाणिभ्यां मुक्तं परित्यक्तम्।) अस्त्रम्। इति हलायुधः॥

पाणिरुहः, पुं, (पाणौ रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) नखः। इति राजनिर्घण्टः॥

पाणिवादः, त्रि, (पाणिं पाणिना वा वादयतीति। वद+णिच्+अण्।) पाणिघः। मृदङ्गादिवादकः। इत्यमरः॥ (पाणिना वाद्यते इति। वद्+णिच्+कर्म्मणि घञ्। मृदङ्गादौ, क्ली। यथा, रामायणे। २। ६५। ४।

"अपदानान्युदाहृत्य पाणिवादान्यवादयन्॥")

पाणिवादकः, त्रि, (पाणिं पाणिना वा वादयतीति। वद्+णिच्+ण्वुल्।) पाणिवादः। इति हेमचन्द्रः। ३। ५८९॥ (यथा, रामायणे। २। ६५। ४।

"ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः।
अपदानान्युदाहृत्य पाणिवादान्यवादयन्॥")

पाणिसर्ग्या, स्त्री, (पाणिभ्यां सृज्यतेऽसौ। सृजी विसर्गे+"पाणौ सृजेर्ण्यत् वाच्यः।" इति ण्यत्। "चजोः कु घिण्ण्यतोः।" ७।३।५२। इति कुत्वम्।) रज्जुः। इति मुग्धबोधव्याकरणम्॥

पाणीतलं, क्ली, (पाणितलं निपातनात् दीर्घः।) तोलकद्वयम्। यथा,—

"विड़ालपदकर्षौ च पाणीतलसुवर्णकम्॥"
इति शब्दमाला॥

पाणीकरणं, क्ली, (पाणौ क्रियतेऽनेनाग्निर्वा। कृ+ल्युट्। अभूततद्भावे च्विः।) विवाहः। इति जटाधरः॥

पाण्डरं, क्ली, (पाण्डरो वर्णोऽस्त्यस्येति। अच्।) कुन्दपुष्पम्। गैरिकम्। इति शब्दचन्द्रिका॥

पाण्डरः, पुं, (पाण्डरः शुक्लवर्णोऽस्त्यस्येति। अच्।) मरुवकवृक्षः। (पडि+अरन्+दीर्घश्च।) श्वेतवर्णः। (पर्व्वतविशेषः। स तु मेरोः पश्चिमे वर्त्तते। यथा, मार्कण्डेये। ५५। १०।

"अग्निः कुक्कुटः हंसः पाण्डरश्चापि कोत्तमाः॥"
"पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः।
एतेऽचलाः समाख्याताः——————॥"

ऐरावतकुलोद्भवनागविशेषः। यथा, महाभारते। १। ३५। ११—१२।

"पारावतः पारियातः पाण्डरो हरिणः कृशः।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्॥"

पक्षिविशेषः। यथा, ज्योतिस्तत्त्वधृतवचनम्।

"श्येनः कङ्कः कपोतश्च उलूकः श्वान एव च।
पिङ्गश्च पर्व्वपिङ्गश्च भासः पाण्डर एव च।
दृष्टे यस्य पतन्त्येते गेहे तस्य विपद्यते॥")

तद्वर्णविशिष्टे, त्रि। इत्युणादिकोषः॥ (यथा, हरिवंशे। ८२। ५०।

"अविताम्बरपीतं पाण्डरं पाण्डरासनम्॥")

पाण्डरपुष्पिका, स्त्री, (पाण्डरं शुक्लवर्णं पुष्पमस्याः। कप्। ततः कापि अत इत्वम्।) शीतलावृक्षः। इति शब्दचन्द्रिका॥

पाण्डवः, पुं, (पाण्डोरपत्यानि प्रसिद्धस्य राज्ञोऽपत्यम्। पाण्डु+"ऋष्यण्।" ४।१।७१। इत्यण्।) पाण्डुनन्दनः। तत्पाण्डवोत्पत्तिर्यथा,—

वैशम्पायन उवाच।

"संवत्सरधृते गर्भे गान्धार्य्यां जनमेजय।
आह्वयामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम्॥
सा बलिं त्वरिता देवी धर्म्मायोपजहार ह।
जजाप मन्त्रं विधिवद्दत्तं दुर्व्वाससा पुरा॥
संगम्य सा तु धर्म्मेण योगमूर्त्तिधरेण ह।
लेभे पुत्रं वरारोहा सर्व्वप्राणिहितं परम्॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे।
दिवामध्यगते सूर्य्ये तिथौ पुण्येऽभिपूजिते॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति॥
युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः।
यशसा तेजसा चैव वृत्तेन च समन्वितः॥१०॥
धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत्।
प्राहुः क्षत्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥
तमप्यतिबलं जातं वागुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत॥
इदमत्यद्भुतञ्चासीज्जातमात्रे वृकोदरे।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल।
नान्वबुध्यत तं सुप्तमुत्सङ्गे स्वे वृकोदरम्॥
ततः स वज्रसङ्घातः कुमारोऽभ्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥
तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः।
यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम॥
दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप॥२०॥
जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत्।
कथन्नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति॥
दैवे पुरुषकारे च लोकोऽयं सम्प्रतिष्ठितः।
तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते॥
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम्।
अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः॥
तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम्।
यं दास्यति स मे पुत्रं स वरीयान् भविष्यति॥

अमोघा मनसा सर्वा समासन्नृपो महत्तपः ।
ततः पाण्डुर्महाराज मन्त्रयित्वा महर्षिभिः ॥
दिदेश कुन्त्याः कौरव्यो व्रतं सांवत्सरं शुभम् ।
आत्मना च महाबाहुरेकपादस्थितोऽभवत् ॥
उग्रं स तप आतस्थे परमेण समाधिना ।
आरिराधयिषुर्देवं त्रिदशानां तमीश्वरम् ॥
सूर्येण सह धर्मात्मा पर्यतप्यत भारत ।
तं तु कालेन महता वासवः प्रत्यपद्यत ॥
इन्द्र उवाच ।
पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् ।
ब्राह्मणानां गवाञ्चैव सुहृदाञ्चार्थसाधकम् ॥
दुर्हृदां शोकजननं सर्वबान्धवनन्दनम् ।
सुतं तेऽग्र्यं प्रदास्यामि सर्वामित्रविनाशनम् ॥
इत्युक्तः कौरवो राजा वासवेन महात्मना ।
उवाच कुन्तीं धर्मात्मा देवराजवचः स्मरन् ॥
उदर्कस्तव कल्याणि तुष्टो देवगणेश्वरः ।
दातुमिच्छति ते पुत्रं यथासंकल्पितं त्वया ॥
अतिमानुषकर्माणं यशस्विनमरिन्दमम् ।
नीतिमन्तं महात्मानमादित्यसमतेजसम् ॥
दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् ।
पुत्रं जनय सुश्रोणि धाम क्षत्रियतेजसाम् ॥
लब्धः प्रसादो देवेन्द्रात् तमाह्वय शुचिस्मिते ।
एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ॥
अथाजगाम देवेन्द्रो जनयामास चार्जुनम् ।
जातमात्रे कुमारे तु वागुवाचाशरीरिणी ॥
महागम्भीरनिर्घोषा नभो नादयती तदा ।
शृण्वतां सर्वभूतानां तेषाञ्चाश्रमवासिनाम् ॥
कुन्तीमाभाष्य विस्पष्टमुवाचेदं शुचिस्मिताम् ।
कार्तवीर्यसमः कुन्ति ! शिबितुल्यपराक्रमः ॥
एष शक्र इवाजेयो यशस्ते प्रथयिष्यति ।
अदित्या विष्णुना प्रीतिर्यथाभूदभिवर्द्धिता ॥
तथा विष्णुसमः प्रीतिं वर्द्धयिष्यति तेऽर्जुनः ।
एष मद्रान् वशे कृत्वा कुरूंश्च सह सोमकैः ॥
चेदिकाशिकरूषांश्च कुरुलक्ष्मीं वहिष्यति ।
एतस्य भुजवीर्येण खाण्डवे हव्यवाहनः ॥
मेदसा सर्वभूतानां तृप्तिं यास्यति वै पराम् ।
ग्रामणीश्च महीपालानेष जित्वा महाबलः ॥
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति ।
जामदग्न्यसमः कुन्ति ! विष्णुतुल्यपराक्रमः ॥
एष वीर्यवतां श्रेष्ठो भविष्यति महायशाः ।
तथा दिव्यानि चास्त्राणि निखिलान्याहरिष्यति ॥
विप्रनष्टां श्रियञ्चायमाहर्त्ता पुरुषर्षभः ।
एतामत्यद्भुतां वाचं कुन्ती शुश्राव सूतके ॥
वाचमुच्चारितामुच्चैस्तां निशम्य तपस्विनाम् ।
बभूव परमो हर्षः शतशृङ्गनिवासिनाम् ॥
तथा देवनिकायानां सेन्द्राणाञ्च दिवौकसाम् ।
आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ॥
उदतिष्ठन्महाघोषः पुष्पवृष्टिभिरावृतः ॥
वैशम्पायन उवाच ।
"कुन्तीपुत्त्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥
न मेऽस्ति त्वयि सन्तापो विगुणेऽपि परन्तप ।
नावरत्वे वरार्हायाः स्थित्वा चानघ ! नित्यदा ॥
गान्धार्य्याश्चैव नृपते ! जातं पुत्त्रशतं तथा ।
श्रुत्वा न मे तथा दुःखमभवत् कुरुनन्दन ! ॥
इदन्तु मे महद्दुःखं तुल्यतायामपुत्त्रता ।
दिष्ट्या त्विदानीं भर्त्तुर्मे कुन्त्यामप्यस्ति सन्ततिः ॥
यदि त्वपत्यसन्तानं कुन्तिराजसुता मयि ।
कुर्य्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥
संरम्भो हि सपत्नीत्वाद्वक्तुं कुन्तिसुतां प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥
पाण्डुरुवाच ।
ममाप्येष सदा माद्रि ! हृद्यर्थः परिवर्त्तते ।
न तु त्वां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥
तव त्विदं मतं ज्ञात्वा प्रयतिष्याम्यतः परम् ।
मन्ये ध्रुवं मयोक्ता सा वचनं प्रतिपत्स्यते ॥
वैशम्पायन उवाच ।
ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् ।
कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥
मम चापिण्डनाशाय पूर्व्वेषामपि चात्मनः ।
मत्प्रियार्थञ्च कल्याणि ! कुरु कल्याणमुत्तमम् ॥
यशसोऽर्थाय चैव त्वं कुरु कर्म्म सुदुष्करम् ।
दृष्ट्वा गुरूणां मौनानां सर्वाचिन्त्य दैवतम् ।
तथा ते भवितापत्यमनुरूपमसंशयम् ॥
ततो माद्री विचार्य्यैव जगाम मनसाश्विनौ ।
तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ॥
नकुलं सहदेवञ्च रूपेणाप्रतिमौ भुवि ।
तथैव तावपि यमौ वागुवाचाशरीरिणी ॥
सत्त्वरूपगुणोपेतौ भवतोऽत्यश्विनावपि ।
भासतस्तेजसात्यर्थं रूपद्रविणसम्पदा ॥
नामानि चक्रिरे तेषां शतशृङ्गनिवासिनः ।
भक्त्या च कर्म्मणा चैव तथाशीर्भिर्विशाम्पते ! ॥
ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमम् ।
अर्जुनेति तृतीयञ्च कुन्तीपुत्त्रानकल्पयन् ॥
पूर्ब्बजं नकुलेत्येवं सहदेवेति चापरम् ।
माद्रीपुत्त्रावकथयंस्ते विप्राः प्रीतमानसाः ॥"

इति महाभारते १ । १२३—१२४ ॥

तेषां पुत्त्रा यथा,—

"प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार्जुनात् ।
शतानीकः श्रुतकर्म्मा द्रौपद्याः पञ्च विश्रुताः ॥"

तेषां भार्य्या यथा, भारते १९८ अध्याये ।

"द्रौपदी च हिडिम्बा च भार्य्या चैव सुभद्रिका ।
दिव्या मे देवकन्या च सन्ततिस्तु सुताः क्रमात् ॥
देवी कर्णेरुमत्या च बलन्धरा चापरा ।
भार्य्या विजयस्य चोलूपी चित्राङ्गदा च भाविनी ॥"

पाण्डवेयः, त्रि, (पाण्डोरिदं इत्यण् ढक् च पाण्डवी कुन्ती माद्री च तयोरपत्यम् इति । ढक् ।) पाण्डवेयम् । इति शब्दरत्नावली ॥ (युधिष्ठिरादयः पञ्च भ्रातरः । यथा, महाभारते । १ । २०२ । ११ ।

"पाण्डवानाञ्च सर्व्वेषां कर्त्तुं पाण्डवसन्निधिम् ।
इत्यर्थं पाण्डवेयानां पाण्डवानां व्रतं तत ॥")

अभिमन्युप्रभृतिः पाण्डवापत्यः परीक्षित् । यथा, भारते । १ । ३ । ७ ।

"कथं वा पाण्डवेयस्य राजर्षेस्तपसा युतः ।
संवादः समभूत्तात ! यथैवं माधवी श्रुतिः ॥")

पाण्डवाभीलः, पुं, (पाण्डोः अपत्यं पाण्डवः । पा + अः । पाण्डवेभ्योऽभीलो भयानकः । पाण्डवान् अभिलक्षीकृत्य अभीलं भयं करोति वा ।) कृष्णः । इति त्रिकाण्डशेषः ॥

पाण्डवायनः, पुं, (पाण्डवानामयनं रक्षणं यस्य ।) कृष्णः । इति हेमचन्द्रः । २ । १३१ ॥

पाण्डित्यं, क्ली, (पण्डितस्य भावः कर्म्म वा । इति "ब्राह्मणादिभ्यः ष्यञ् च ।" ५ । १ । १२४ । इति ष्यञ् ।) पण्डितस्य धर्म्मः कर्म्मादि । यथा,—

"इयता पाण्डित्यमपि तु दक्षिणानामधमधर्म्म ।"

इति पुराणम् ॥

(यथा, च महाभारते । ३ । ३१ । २ ।

"यत् वाजसे पाण्डित्यं पण्डितानां वाग्ग्रामम् ।
इदानीं धर्म्मसाधनं दुरन्तामृतनामधरम् ॥")

पाण्डुः, पुं, (पडि गतौ + "मृगय्वादयश्च ।" उणा० १ । ३७ । इति कुः । निपातनात् साधुः ।) पाण्डुरवर्णः । पीतभा । इति हेमचन्द्रः ॥ श्वेतपीतमिश्रितवर्णः । तत्पर्य्यायः । हरिणः २ । पाण्डुरः ३ । पाण्डरः ४ । इत्यमरः ॥

"विपरीतमपाङ्गसः पाण्डुरवर्णः प्रकीर्त्तितः ।"

इति हलायुधः ॥

पीतोऽपि भवति यथा,—

"पाण्डुरस्तु श्वेतपीतभागो धूसरपाण्डरः ।
पाण्डुस्तु पीतभागार्द्धः केतकीधूलिसन्निभः ॥"

इति भरतः ॥

तद्वति, त्रि । इत्यमरः ॥ (यथा, रघुः । ३ । २ ।

"शरीरसादादसमग्रभूषणा
मुखेन सालक्ष्यत लोध्रपाण्डुना ॥")

कुन्तीपतिः । स तु कुरुवंशीयपाण्डुपितृविचित्रवीर्य्यक्षेत्रे व्यासादुत्पन्नः । (यथा, महाभारते । १ । ११७ । १ ।

"राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते ।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम् ॥"

अस्य वैवाहिकादिकं कालक्रियादिकं च यथा, महाभारते । १ । १०६ । ११—१३ ।

"अथ पारशवीं कन्यां देवकस्य महीपतेः ।
रूपयौवनसम्पन्नां स शुश्रावापगासुतः ॥
ततस्तु वरयित्वा तामानाय्य पुरुषर्षभः ।
विवाहं कारयामास विदुरस्य महामतेः ॥
तस्याञ्चोत्पादयामास विदुरः कुरुनन्दनः ।
पुत्रान् विनयसम्पन्नानात्मनः सदृशान् गुणैः ॥")

पाण्डुरः । श्वेतवर्णः । शितवर्णः । पीत-पिङ्गः । इति शब्दरत्नावली ॥ ॥

पाण्डोरपत्यम् । यथा,—

"पाण्डोस्तु जज्ञिरे पुत्राः पञ्च देवसमप्रभाः ।
धर्म्मात् युधिष्ठिरो ज्येष्ठो भीमसेनो महाबलः ॥
अर्जुनश्च महावीर्य्यः
अन्यौ तु माद्रीसुतौ यमौ ।"

निषेवमाणस्य समेत्य रक्तं
दोषास्त्वचं पाण्डुरतां नयन्ति ॥ * ॥
तस्य पूर्व्वरूपाणि यथा,—
त्वक्स्फोटनष्ठीवनगात्रसाद-
मृद्भक्षणप्रेक्षणकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको
भविष्यतस्तस्य पुरःसराणि ॥ * ॥
वातिकस्य तस्य लक्षणं यथा,—
त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता ।
वातपाण्ड्वामये कम्पतोदानाहभ्रमादयः ॥ * ॥
पैत्तिकस्य लक्षणं यथा,—
पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥
श्लैष्मिकस्य लक्षणं यथा,—
कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ * ॥
त्रिदोषजस्य लक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्द्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥
मृज्जस्य संप्राप्तिर्यथा,—
मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ।
कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥
कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ * ॥
मृत्तिकाभक्षणजन्यपाण्डुलक्षणं यथा,—
मृद्भक्षणाद्भवेत् पाण्डुस्तन्द्रालस्यनिपीड़ितः ।
सकासश्वासशूलार्त्तः सदारुचिसमन्वितः ॥
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
क्रिमिकोष्ठोऽतिसार्य्येत मलं सासृक्कफान्वितम् ॥
तस्य असाध्यलक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्द्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥
पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ॥
बद्धाल्पविट् सहरितं सकफं योऽतिसार्य्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्द्दिमूर्च्छातृषान्वितः ॥
स नास्त्यसृक्क्षयाद्यश्च पाण्डुः श्वेतत्वमाप्नुयात् ॥
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥
अन्तेषु शूनं परिहीनमध्यं
म्लानं तथान्तेषु च मध्यशूनम् ।
गुदे च शेफस्यथ मुष्कयोश्च
शूनं प्रताम्यन्तमसंज्ञकल्पम् ॥
विवर्जयेत् पाण्डुकिनं यशोऽर्थी
तथातिसारज्वरपीड़ितञ्च ॥"
इति माधवकरः ॥
(यथा च,—
"पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः ।
तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम् ॥
धमनीर्दश सम्प्राप्य व्याप्नुवत् सकलां तनुम् ।
श्लेष्मत्वग्रक्तमांसानि प्रदूष्यान्तरमाश्रितम् ॥
त्वङ्मांसयोस्तत् कुरुते त्वचि वर्णान् पृथग्-
विधान् ।
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम् ॥
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम् ।
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥
ततोऽल्परक्तमेदस्को निःसारः स्यात् श्लथेन्द्रियः ।
मृद्यमानैरिवाङ्गैर्ना द्रवता हृदयेन च ॥
शूनाक्षिकूटवदनः कोपनः ष्ठीवनोऽल्पवाक् ।
अन्नद्विट् शिशिरद्वेषी शीर्णरोमा हतानलः ॥
सन्नसक्थो ज्वरी श्वासी कर्णक्ष्वेडी भ्रमी श्रमी ।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि ।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता ॥
सादः श्रमोऽनिलात्तत्र गात्ररुक्तोदकम्पनम् ।
कृष्णरूक्षारुणसिराननखविण्मूत्रनेत्रता ॥
शोफानाहास्यवैरस्यविट्शोषाः पार्श्वमूर्द्धरुक् ।
पित्ताद्धरितपीताभसिरादित्वं ज्वरस्तमः ॥
तृट्स्वेदमूर्च्छाशीतेच्छा दौर्गन्ध्यं कटुवक्त्रता ।
वर्च्चोभेदोऽम्लको दाहः कफात् शुक्लसिरादिता ॥
तन्द्रालवणवक्त्रत्वं रोमहर्षः स्वरक्षयः ।
कासश्छर्द्दिश्च निचयान्मिश्रलिङ्गोऽतिदुःसहः ॥
मृत्कषायानिलं पित्तमूषरा मधुराकफम् ।
दूषयित्वा रसादींश्च रौक्ष्याद्भुक्तं विरूक्ष्य च ॥
स्रोतांस्यपक्वैवापूर्य्य कुर्य्याद्रुद्ध्वा च पूर्व्ववत् ।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥
पुरीषं कृमिमन्मुञ्चेद्भिन्नं सासृक्कफं नरः ॥"
इति वाभटे निदानस्थाने । १३ । १—१९ ।)
तस्यौषधं यथा,—
"लोहचूर्णं सकृत्पीतं पाण्डुरोगहरं भवेत् ॥"
इति गारुडे १८० अध्यायः ॥
अपि च ।
"सप्तरात्रं गवां मूत्रे भावितं वाप्ययो रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ १ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुड़मश्नतः ।
पाण्डुरोगः क्षयं याति पक्तिशूलञ्च दारुणम् ॥ २ ॥
अयोमलं सुसन्तप्तं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं खादन् पाण्डुरोगी सुखी भवेत् ॥ ३ ॥
पुनर्नवानिशाशोषविश्वं दारु शिवात्रयम् ।
कुष्ठं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥
कटुका पिप्पलीमूलं मुस्तं शृङ्गी च कारवी ।
समांशो कट्फलञ्चेति पृथक्पलमितं मतम् ॥" ४ ॥
इति भावप्रकाशः ॥ * ॥
(अस्य मन्त्रात्मकचिकित्सादिर्यथा,—
"शृणु पुत्र ! प्रवक्ष्यामि पाण्डुरोगं महागदम् ।
यथैव पाण्डुरोगाख्यो जायतेऽत्र मानुषे ॥
वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ।
पञ्चमो मृद्भवः प्रोक्तो वक्ष्ये चैषान्तु सम्भवम् ॥
दोषाश्रया पीड़िता वा ज्वरेण
रक्तस्रावैः पीड़ितो वा रणेन ।
स्त्रियाव्यवायाशोकवाहे मनुष्ये
चायं पाण्डुत्वं याति तैरेव च ।
क्षाराम्लं कल्यमैरेयसेवा
व्यायामाध्वोष्णवातिश्रमैव ।
निद्रानाशे रात्रिनिद्रा दिवापि
योगैश्चैतैर्मृत्तिकाभक्षणेन ॥
अतिशिथिलशरीरे रोगसम्पीड़िते वा
लवणकटुकषायासेवनाच्चेन वह्निः ।
अतिसुरतमलं वै सेवनातिक्रमेण
नयति रुधिरशोषं तेन वै पाण्डुरोगम् ॥
तेनाक्षिकूटे श्वयथुः शरीरे
पाण्डुत्वमायाति सपीतगात्रः ।
निष्ठीवती त्वक् प्रविदीर्य्यते च
संजायते तस्य पुरःसराणि ॥
तोदः प्रकम्पश्च शिरोगुरुत्वं
त्वङ्मूत्रनेत्रे नखकालिमा स्यात् ।
वातात्मकं लक्षणमस्य विद्धि
लिङ्गैरुपेतोऽनिलपाण्डुरोगः ॥
आमत्वपीतत्वकरो हि लोके
बिभर्त्ति शोथं कटुकास्यता च ।
मन्दज्वरो वै भ्रमशोषमोहः
पीतच्छविः पीतमयो हि पाण्डुः ॥
तन्द्रालुताशोथकफेन युक्तः
आलस्यकस्वेदगुरुत्वमेव ।
संजायते तस्य कफात्मकोऽपि
नरस्य पाण्डुप्रभवो विकारः ॥
तन्द्रालस्यं श्वयथुमथ कासप्रमाणशोथा
विड्भेदः स्यात् पवनशयने सज्वरो वै तृषार्त्तः ।
मोहस्तृष्णाक्लमश्च मनुजस्यात्र यस्मिन् सुदूर
त्याज्यो वैद्यैर्निपुणमतिभिः सन्निपातोत्थपाण्डुः ॥
मृत्तिकाभक्षणाच्च शृणु पुत्र ! गदो महान् ।
पाण्डुरोगो नरस्योऽपि भवेद्गात्ररुजाकरः ॥
मृद्भक्षणाच्चैव मलं प्रकोप्य
स्रोतांसि रुन्धन्ति च मृत्तिकायाः ।
तेनैव नाडीः परिवर्त्तयन्ति
न तर्पयन्ते वपुषं रसेन ॥
क्षारात् कषायान्मधुरस्य पानात्
स कोपयत्याशु नरस्य मृत्स्ना ।
श्लेष्मप्रकोपान्मधुरात् करोति
मृत्स्ना न जन्या पित्तकारिणी स्यात् ॥
विहतिशुभगताक्षि मारुतादाल्पवक्त्र
बलवदुदरशोथो मारुतश्चाशु रोगाः ।
भवति विकलमेवं पाण्डुरोगे शरीरं
नयति सदरमाशु रोगं यामप्रवीरः ॥"
"गोमूत्रमध्ये मणिमान् ध्यापयेत् सप्तरात्रि-
कम् ।
तदा तु चूर्णं मधुना देयं पाण्डुामयापहम् ॥
शुण्ठ्यं त्रिफला तथा त्रिवृतं चित्रकं
समम् ।
माक्षिकं लौहचूर्णमिश्रकं विभावयेत् ॥
चतुष्पलमथ चौरमलितं
दृषदापि धृतं प्रकरं स्यात् ।
हरितमनु मधुरादि [illegible]
[illegible]

[illegible]

इति [illegible] ॥ १० ॥

[illegible]

इति [illegible] ॥ ४ ॥

[illegible] यथा,—

[illegible]

इति [illegible] ॥ ६ ॥

[illegible] यथा,—

[illegible]

[illegible]

इति [illegible] ॥ ७ ॥

[illegible]

[illegible]

[illegible] यथा,—

[illegible]

इति [illegible] ॥

[illegible]

इति [illegible] ॥

[illegible]

इति [illegible] ॥

इति वैद्यकरसेन्द्रसारसंग्रहे पाण्डुरोगाधिकारे । ७ । ७ ।)

पाण्डुः, स्त्री, (पडि+कुः । नियातनात् दीर्घत्वम् ।) माषपर्णी । इति शब्दचन्द्रिका । माषाणी इति भाषा । पाण्डुवर्णस्त्री । इति मुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं, (पाण्डु+संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराजा । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पुं, (पाण्डुवर्णानि कण्टकान्यस्येति ।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकम्बलः, पुं, (पाण्डुवर्णः कम्बलः नित्यकर्म्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी । ले, १०० ॥ पाण्डुवर्णकम्बलः । इति भरतः ॥

पाण्डुकम्बली, [न्] पुं, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल+"पाण्डुकम्बलादिनिः ।" ४ । २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलावृतरथः । इत्यमरः । २ । ८ । ५६ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पुं, (पाण्डुवर्णस्तरुरिति कर्म्मधारयः ।) धववृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पुं, (पाण्डुवर्णो नाग इव । यद्वा, नाग इव पाण्डुरिति राजदन्तादिवत् समासः ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतसर्पश्च ॥

पाण्डुपत्री, स्त्री, (पाण्डु पत्रमस्या इति जातित्वात् ङीष् ।) रेणुका । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुतः । अलक्षणः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पुं, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) चिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरस्य इति । "कृष्णोदक्पाण्डुसंख्यापूर्व्वाया भूमेरजिष्यते ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा,—
"पाण्डूदक् कृष्णतो भूमिः पाण्डूदक् कृष्ण मृत्तिका ।"
इति हेमचन्द्रः ॥

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुमृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पुं, (पाण्डुरस्यास्तीति । पाण्डु+"नगपांशुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १७ । (यथा, भागवते । ८ । ८ । ३ ।
"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः स्पृहाञ्चक्रे नेन्द्र ईश्वरशिक्षया ॥")
कामलारोगः । इति शब्दरत्नावली ॥ श्वित्ररोगे, स्त्री । इति हलायुधः ॥

पाण्डुराङ्गः, पुं, (पाण्डुराणि अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिश्लेष्मपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पुं, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिका पुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि, (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं यस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूसरा ३ हस्तवीरका ४ भूरिपलितदा ५ पाण्डुफली ६ । अस्या गुणाः । शिशिरत्वम् । गौल्यत्वम् । रक्तामदोषपित्तमूत्राघातनाशित्वम् । बल्यत्वम् । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरत्वमस्या इति अच् टाप् च ।) माषपर्णी । इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पुं, (पाण्डुरं पाण्डुरत्वं आ सम्यक् रूपेण गच्छतीति । गम+डः । यद्वा, पाण्डुः रागोऽस्येति ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते, त्रि ॥

पाण्डुरेक्षुः, पुं, (पाण्डुरः श्वेतवर्ण इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पुं, (पाण्डुर्लेखः ।) पाण्डुलिपिः । मुसविदा इति पारस्यभाषा । यथाह व्यासः ।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥
फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानीवाङ्गान्यस्याः ।) माषपर्णी । इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री, (पाण्डु लोम यस्याः ।) माषपर्णी । इति जटाधरः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ॥

पाण्डुशर्करा, स्त्री, (पाण्डुः शर्करा इव यस्याः रोगावस्थायामिति शेषः ।) रोगविशेषः । यथा, माधवे १८२ अध्याये ।
"पित्तं वै मारुतोन्मर्दं बीजद्वारे समावृतम् ।
शोषयेद्धारुणा योनौ शर्करत्वावितम् ॥
करोत्यश्मरीवच्च शरीरे पाण्डुशर्कराम् ॥"

पाण्डुशर्मिला, स्त्री, द्रौपदी । इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः, पुं, वर्णसङ्करविशेषः । स तु चाण्डालात् वैदेह्यां जातः ॥ (अस्योत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।
"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥"
"वैदेह्यां चण्डालात् पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसोपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १३ । ४८ । २६ ।
"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥")

पाण्यः, त्रि, (पण व्यवहारस्तुत्योः+ण्यत् ।) स्तुत्यः । श्लाघ्यः । ("पण्या गौः व्यवहर्त्तव्येत्यर्थः । पाण्यमन्यत् स्तुत्यर्हमित्यर्थः ।" इति सिद्धान्तकौमुद्याम् । ३ । १ । १०१ । इत्यस्य सूत्रस्य वृत्तौ व्याख्यातम् ।)

पातः, पुं, (पत+घञ् ।) पतनम् । (यथा, महाभारते । १ । १६३ । २६ ।
"वह्वे इव संयुक्ते ग्रहपाते दिवौकसाम् ।
कन्ययोर्गर्भमाधत्त गर्भं सुषुवतुश्च तम् ॥")
घाते, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ छादयतीति । पत+णिच्+अच् ।) राहुः । यथा,—
"ताडितः सरघैर्हिमभानोः
षट्कषट्कशरलग्नफलांशाः ।
स्वं क्षिपेत् कुहरितोदितयामो
राहुमाहुरिह केऽपि तदेव ॥"
इति सिद्धान्तशिरोमणिः ॥

पातकं, क्ली, (पातयति अधो गमयति दुष्क्रियाकारिणमिति । पत+णिच्+ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ एनः ६ पाप्मा ७ किल्बिषम् ८ कलुषम् ९ किण्वम् १० कल्मषम् ११ वृजिनम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तत्तु नवविधं यथा । अतिपातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ सङ्करीकरणम् ५ अपात्रीकरणम् ६ जातिभ्रंशकरम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःकृतानि दशविधपापानि यथा,—
"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

पातङ्गिः, पुं, (पतङ्गस्य सूर्य्यस्यापत्यमिति । पतङ्ग+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) शनैश्चरः । इति शब्दरत्नावली ॥

[illegible]

इति ...वर्णनम् ॥ ३ ॥

[illegible]

इति ...वर्णनम् ॥ ४ ॥

[illegible]

[illegible]

[illegible]

इति वैद्यकरसेन्द्रसारसंग्रहे पाण्डुरोगाधिकारे । ०। ०।)

पाण्डूः, स्त्री, (पडि+कुः । निपातनात् दीर्घत्वम् ।) माषपर्णी । इति शब्दचन्द्रिका । माषाणी इति भाषा । पाण्डुवर्णस्त्री । इति मुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं, (पाण्डु+संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराणा । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पुं, (पाण्डुवर्णानि कण्टकान्यस्येति ।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकम्बलः, पुं, (पाण्डुवर्णः कम्बलः कर्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी । वे,१७० । पाण्डुवर्णकम्बलः । इति भरतः ॥

पाण्डुकम्बली, [न्] पुं, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल+"पाण्डुकम्बलादिनिः ।" ४ । २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलाच्छन्नरथः । इत्यमरः । २ । ८ । ५६ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पुं, (पाण्डुवर्णस्तरुरिति कर्मधारयः ।) धवदृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पुं, (पाण्डुवर्णो नाग इव । यद्वा, नाग इव पाण्डुरिति राजदन्तादिवत् समासः ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतसर्पश्च ॥

पाण्डुपत्री, स्त्री, (पाण्डु पत्रमस्या इति जातित्वात् ङीष् ।) रेणुका । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुक्तः । अलक्षणः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पुं, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) चिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरस्य इति । "सङ्ख्योदकपाण्डुदक्पूर्व्वाया भूमेरजिष्यते ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा,—
"पाण्डूदक् स्यात्तो भूमिः पाण्डूदक् स्यात् मृत्तिका ॥"
इति हेमचन्द्रः ।

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुर्मृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पुं, (पाण्डु रङ्गमस्तीति । पाण्डु+"नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १७ ।

(यथा, भागवते । ८ । ८ । ३ ।
"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः स्पृहाञ्चक्रे नेन्द्र ईश्वरशिक्षया ।")
कामलारोगः । इति शब्दरत्नावली ॥ श्वित्ररोगे, स्त्री । इति हलायुधः ॥

पाण्डुरङ्गः, पुं, (पाण्डु रागो अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिदोषपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पुं, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"कुटजः कूटजः कौटी वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिका पुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि, (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं अस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूसरा ३ दृढवीजका ४ भूरिपलितदा ५ पाण्डुफली ६ । अस्या गुणाः । शिशिरत्वम् । गौल्यत्वम् । तृष्णाश्रमदोषपित्तश्वासनाशित्वम् । बल्यत्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरवर्णास्त्या इति ततष्टाप् च ।) माषपर्णी । इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पुं, (पाण्डुरं पाण्डुरत्वं वा सम्यक्रूपेण गच्छतीति । गम+डः । यद्वा, पाण्डुः रागोऽस्येति ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते, त्रि ॥

पाण्डुरेक्षुः, पुं, (पाण्डुरः श्वेतवर्ण इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पुं, (पाण्डुर्लेखः ।) पाण्डुलिपिः । मुसविदा इति पारस्यभाषा । यथाह व्यासः ।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥
फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानि सन्त्यस्याः ।) माषपर्णी । इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री, (पाण्डु लोम यस्याः ।) माषपर्णी । इति जटाधरः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ।

पाण्डुशर्करा, स्त्री, (पाण्डुः शर्करा इव मूत्रे रोगावस्थायामिति शेषः ।) रोगविशेषः । यथा, माधवे १८८ अध्याये ।
"चिरं हि सा वातरोगोत्थं पीडनार्थं समाश्रुतम् ।
धातुभिर्न्नाम दृढ्येन मोलं शर्करयान्वितम् ॥
हरेत् स्वविरोधेन शरीरे पाण्डुशर्कराम् ॥"

पाण्डुशर्म्मिला, स्त्री, द्रौपदी । इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः, पुं, वर्णसङ्करविशेषः । स तु चाण्डालात् वैदेह्यां जातः । (अस्योत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।
"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥"
"वैदेह्यां चण्डालात् पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसौपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १३ । ४८ । २६ ।
"चण्डालात् पाण्डुसौपाकस्त्वक्सारव्यवहारवान् ॥")

पाण्ड्यः, त्रि, (पण व्यवहारस्तुत्योः+ण्यत् ।) स्तुत्यः । श्लाघ्यः । ("पण्डा धीः तत्सम्पन्नः पण्डितः । पाण्ड्यमप्यत् स्तुत्यर्थमित्यर्थः ।" इति "सिद्धान्तकौमुद्याम् । ३ । १ । १०१ । इत्यस्य सूत्रस्य वृत्तौ व्याख्यातम् ।)

पातः, पुं, (पत+घञ् ।) पतनम् । (यथा, महाभारते । १ । १३२ । २६ ।
"ववृधे द्रव संयुक्ते स्नेहपाते दिवौकसाम् ।
कलशोर्गर्भमाधत्त गर्भं सुषुवतुश्च कम् ।")
पाती, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ छादयतीति । पत+णिच्+अच् ।) राहुः । यथा,—
"ताडितः खरशरैर्हिमधाम्नः
पट्कपट्कपुरकस्तपनमाशाः ।
तं मुवे कुद्धरिमौर्ग्रतिगामी
राहुमाहुरिह केऽपि नरेन्द्र ॥"
इति सिद्धान्तशिरोमणिः ॥

पातकं, क्ली, (पातयति अधो गमयति दुष्क्रियाकारिणमिति । पत+णिच्+ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ एनः ६ पाप्मा ७ किल्बिषम् ८ कलुषम् ९ किण्वम् १० कल्मषम् ११ वृजिनम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तत्तु नवविधं यथा । अतिपातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ सङ्करीकरणम् ५ अपात्रीकरणम् ६ जातिभ्रंशकरम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःकृतानि दशविधपापानि यथा,—
"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

पातङ्गिः, पुं, (पतङ्गस्य सूर्य्यस्यापत्यमिति । पतङ्ग+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) शनैश्चरः । इति शब्दरत्नावली ॥

पातालं, क्ली, [illegible]

[illegible]

पातालः, पुं, [illegible]

[illegible]

पाति, पुं, [illegible]

पातिकः, पुं, [illegible]

पातिली, स्त्री, [illegible]

पातुकः, त्रि, [illegible]

[illegible]

पात्रं, क्ली, [illegible]

यांशेयधारणवस्तु । तत्पर्य्यायः । अमत्रम् २ भाजनम् ३ । इत्यमरः ।२ । ९।३३ ॥ भाण्डम् ४ कोशः ५ कोषः ६ पात्री ७ कोशी ८ कोषी ९ कोशिका १० कोषिका ११ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । २ । ४० ।

"सकलगुणगणानामेकपात्रं पवित्र-
मखिलभुवनमातुर्नाट्यमेतद्दृष्टिचित्रम् ॥")

योग्यम् । स्रुवादि । राजमन्त्री । तीरद्वयान्तरम् । इति मेदिनी ॥ पातार इति भाषा ॥ पर्णम् । नाट्यानुकर्त्ता । इति हेमचन्द्रः ॥ आढकपरिमाणम् । इति वैद्यकपरिभाषा ॥*॥ (यथा, चरके कल्पस्थाने १० अध्याये ।

"————————वसुः प्रस्थमथाढकम् ।
पात्रं सदैव विज्ञेयं————————॥")

पात्राणां विधिर्यथा,—

"हैमपात्रेण सर्व्वाणि लभते चैति ताम्भुवे ॥
अर्घं दत्त्वा तु रौप्येण आयूराज्यसुतान् लभेत् ॥
ताम्रपात्रेण सौभाग्यं धर्म्मं च्यवनमर्पयेत् ।
वार्त्तपात्राणि रम्याणि मैलिकादिषु कारयेत् ॥
शैलानि कारयासीना रत्नानि सर्व्वकामिनाम् ।
धातुसमानि पात्राणि कुम्भराद्ध्विरुद्धये ॥
मधुक्षीरकलीनानि वल्वलादिषु कारयेत् ।
विवाहयज्ञश्राद्धेषु प्रतिष्ठासु विशेषतः ॥
पात्राणाञ्चादरः कार्य्यः पात्राण्येवोत्तमानि च ।
पात्रेषु पृथिवी दुग्धा सुधा पात्रेषु धार्य्यते ॥
दिवाः सोमः क्रतुयज्ञः पात्राण्येवं विदुर्बुधाः ।
बलिहोमक्रियादीनि विना पात्रैर्न सिध्यति ।
तस्मादुपप्रयत्नेन तु पात्रसायं महामुने ।॥"

तत्परिमाणादि यथा,—

"षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम् ।
मध्यमं त्रिभागेन भागं कन्यसमीरितम् ॥
त्र्यङ्गुलप्रमाणन्तु तत् पात्रं कारयेत् क्वचित् ।
नानाविचित्ररूपाणि पौण्डरीकाकृतीनि च ॥
पद्मनीलोत्पलाकारपात्राणि परिकल्पयेत् ।
रत्नादिरचितान् कुर्य्यात् काष्ठैमष्टगुणचितान् ॥
यथाशोभं यथालाभं तथा पात्राणि कारयेत् ।
विना पात्रेण यः कुर्य्यात् प्रतिष्ठायाश्चिकीं
क्रियाम् ।
विफला भवते सर्व्वा वाक्यादिधनापदा ॥"
इति देवीपुराणम् ९० ॥

भोजनपात्राणि भोजनशब्दे द्रष्टव्यानि ॥

पात्रटः, पुं, (पात्रा इव पिवन्निव वा अटतीति । अट्+अच् ।) कर्पटकः । कृशे, त्रि । इति शब्दरत्नावली ॥

पात्रटीरः, पुं, (पात्रीव दृश्यते पिवन्निव वा अटतीति । अट+बाहुलकात् ईरन् ।) मुख्यामात्यः । लौहपात्रम् । कांस्यपात्रम् । इत्यमरपालः । चिल्लाकः । माधवः । इति शब्दमाला मेदिनी च ॥ रे, २८९ । पिसामः । वायसः । कङ्कः । इति शब्दरत्नावली ॥

पात्रपालः, पुं, (पात्रं पालयतीति । पाल+ "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तुला-

घटः । इति जटाधरः ॥ पातध्योपार इति भाषा ॥

पात्रसंस्कारः, पुं, (संस्क्रियते इति । सम्+कृ+ घञ् । पात्रस्य संस्कारः शुद्धिः ।) भाजनशुद्धिः । पुटोटिः । इति शब्दचन्द्रिका ॥ रायभाटी इति भाषा ॥

पात्री, स्त्री, (पा+ष्ट्रन् । षित्वात् ङीष् ।) पात्रम् । इति त्रिलिङ्गसंग्रहे अमरः । ३ । ५ । ३९ ॥ (यथा, पाद्मे सृष्टिखण्डे तडागविधिप्रकरणे ।

"पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ।
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः ॥")

पात्रीयं, क्ली, (पात्रे साधु । पात्र+बाहुलकात् छः ।) यज्ञपात्रम् । इति त्रिकाण्डशेषः ॥

पात्रीरः, पुं, (पात्रे राति पात्रीं रातीति वा । रा+कः ।) यज्ञद्रव्यम् । इति भूरिप्रयोगः ॥

पात्रेसमितः, त्रि, (पात्रे भोजनसमये एव समितः सङ्गतः ।) भोजनादन्यत्र यो न मिलितः सः । भोजनेष्वेव दक्षः । यथा,—

"स पात्रेसमितोऽन्यत्र भोजनान्मिलितो न यः ॥"
इति त्रिकाण्डशेषः ॥

पापविशेषः । यथा,—

"विधाय हृदये पापं यः परं शंसति स्वयम् ।
स पात्रेसमितोऽपि स्यात् ॥" इति शब्दमाला ॥

पात्रोपकरणं, क्ली, (पात्रस्य पात्राणां वा उपकरणम् उपभूषणम् ।) उपभूषणम् । यथा,—

"दौलिवर्गादिसंज्ञानं पात्रोपकरणादिकम् ।
दद्यादायसवर्ज्ज्यन्तु भूषणं न कदाचन ॥
घण्टाचामरकुम्भादिपात्रोपकरणादिकम् ।
तद्भूषणान्तरे दद्यादयमात्तदुपभूषणम् ॥"
इति कालिकापुराणे ६८ अध्यायः ॥

पाथं, क्ली, (पततीति । पत+क्विप् । पतं अधः-पतन्तं अर्थं त्रायते । त्रै+कः । ततः स्वार्थे प्रज्ञाद्यण् निर्देशस्य त्वविशिष्ट दर्शनीया ।) धाथि-धाता । यथा, भविष्यपुराणे ।

"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः ।
पतन्तं त्रायते यस्मादतीवनरकार्णवात् ॥"
महेश्वर इति प्रदर्शकं हेतोरविशेषात् ।
तथा वह्निपुराणम् ।

"पात्राण्याध्यात्मिका मुख्या विद्वांसश्चादिशो-
त्रियः ।
दैवताश्च तथा शम्भोः सर्व्वं च्छिद्रसमम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

पात्रता, स्त्री, (पात्रस्य भावः ।) पात्रत्वम् । विद्यातपश्चाचारयुक्तता । यथा,—

"न विद्यया केवलया तपसा वापि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ॥"
इति शुद्धितत्त्वम् ॥

पाथं, क्ली, जलम् । इति मेदिनी । थे, ८ ॥

पाथः, पुं, (पातीति । पा+थुट् निपातनात् ।) सूर्य्यः । अग्निः । इति मेदिनी । थे, ८ ॥

पाथः, [स्] क्ली, (पाति रक्षति जीवानिति । पा+"उदके थुट् च ।" उणां । ४ । २०३ ।

इति असुन् थुट् च । "पातेर्बलौदके थश्चोऽसुन् तस्य थुडागम इत्युज्ज्वलदत्तः ।) जलम् । इत्यमरः ॥ (यथा, काशीखण्डे । ८९ । ४९ ।

"सरसन्तापशमनी सरितः पीयूषपाथसाम् ॥")

पाथिः, [स्] पुं, (पिबति उदकादिकमाकर्षतीति । "पिबतेस्थुक् च ।" उणां । २ । ११५ । इति इसिन् थुगागमश्च ।) समुद्रः । इत्युणादि-कोषः ॥ चक्षुः । इति सिद्धान्तकौमुद्यामुणादि-वृत्तिः ॥ (पीयते इति । पा+इसिन् थुगागमश्च ।) कीलाले, क्ली । इत्युणादिकोषः ॥

पाथेयं, क्ली, (पथि साधुरिति । "पथ्यतिथिवसति-स्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् ।) पथि व्ययितद्रव्यम् । इति हेमचन्द्रः ॥ पथ-खरच इति भाषा ॥ तत्पर्य्यायः । शम्बलम् २ । इत्यमरः ॥ सम्बलम् ३ । इति भरतः ॥ (यथा, देवीभागवते । ३ । २५ । १८ ।

"लुण्ठिता तस्करैर्मार्गे वक्षमाणा तथा सता ।
पाथेयञ्च हृतं सर्व्वं बालपुत्रा निराश्रया ॥")

कन्याराशिः । यथा,—

"क्रियतापुरिथितुमकुलीरसिंहपाथेययूककौ-
र्पाख्याः ।
तौक्षिक आकोकेरो हृद्रोगमान्त्यभञ्चेत्थम् ॥"
इति ज्योतिषतत्त्वम् ॥

पाथोजं, क्ली, (पाथसि जले जायते इति । जन+ डः ।) कमलम् । इति राजनिर्घण्टः ॥ (यथा, नैषधे । १९ । ३० ।

"अगतिरिथिरवे पुमान्देन प्रगल्भवत्ताः सद्य
प्रणमनमपः पाथोजाक्षे निविष्टा विरेमिरा ॥"
कमलशब्दे विवरणं सविस्तरं ज्ञेयम् ॥)

पाथोदः, पुं, (पाथो जलं ददातीति । दा+कः ।) मेघः । इति त्रिकाण्डशेषः ॥

पाथोधरः, पुं,(धरति धारयतीति वा । धृ+अच् । पाथसो धरः पाथो धारयतीति । धारि+अच् इत्यस्य रूपेण ।) मेघः । इति हलायुधः ॥ (यथा, राजतरङ्गिण्याम् । १ । २१० ।

"अकार्षे सतत श्रुतानि मजलहानेन पाथोधरै-
रातान्यपनितोत्पादकरणैराविश्य इत्यावली ॥")

पाथोधिः, पुं, (पाथांसि धीयन्तेऽत्र । धा+कि ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । १ । ९८ ।

"कालोक्षीर्थं पृथिवी समया भवदुप्यताम् ।
विनुः शैषान् सम्पताप्नु शूलिः पाथोधिमञ्जुषे ॥")

पाथोनिधिः, पुं, (पाथांसि जलानि निधीयन्ते-ऽस्मिन् इति । नि+धा+कि: ।) समुद्रः । इति शब्दरत्नावली ॥

पाद्, पुं, (पद+णिच्+क्विप् ।) पादः । इति जटाधरः ॥

पादः, पुं, (पद+करणे घञ् ।) चरणे गमने करणे । पा इति भाषा । स न कर्णाधरस्थास्य सापशुदेव भवति । यथा,—

"पादेन तु शिरो हन्यां पादस्फुटात्तस्त्रिविक्रमः ॥"
इति भागवतीपद्यचौड्जयः ॥

पातञ्जलं, क्ली, (पतञ्जलिना ऋषिणा निर्मितम् अनेन प्रणीतं प्रोक्तं वा इति अण् ।) पतञ्जलि-मुनिप्रणीतसांख्यप्रवचनाख्ययोगशास्त्रविशेषः । तत्र प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भं प्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योग-लक्षणमभिधाय समाधिं सप्रपञ्चं निरदिक्षद्भग-वान् पतञ्जलिः ॥ १ ॥ द्वितीये तपःस्वाध्याये-श्वरप्रणिधानानि क्रियायोग इत्यादिना व्युत्थित-चित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गानि साधनानि ॥ २ ॥ तृतीये । देशबन्धश्चित्तस्य धार-णेत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं संयमपदवाच्यं तदवान्तरफलं विभूतिजातम् ॥ ३ ॥ चतुर्थे जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इत्यादिना सिद्धिप्रपञ्चपुरःसरं परमं प्रयो-जनं कैवल्यम् ॥ ४ ॥ प्रधानादीनि पञ्चविंशति-तत्त्वानि साङ्ख्योक्तान्येवाभ्युपैति । षड्विंशस्तु परमेश्वरोऽधिकः । इति सर्व्वदर्शनसंग्रहः ॥

पातनं, क्ली, (पत + णिच् + भावे ल्युट् ।) अधो-नयनम् । यथा "जङ्घांघ्रिस्तम्भपातनादिभी रघस्य सभाविधौ शुद्धिरुक्ता ।" इति रत्नावली ॥

पाता, [ऋ] त्रि, (पाति रक्षतीति । पा रक्षणे + तृच् ।) रक्षिता । यथा,—
"यं बालकस्तुः संहर्त्ता पातुः पाता परात्परः ।
ममाश्रयायं संहर्त्ता काम्या तेन हरः स्तुतः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ६ अध्यायः ॥
रक्षकः । इति शब्दचन्द्रिका । बाचुर इति भाषा ॥

पातालं, क्ली, (पतन्त्यस्मिन् दुष्क्रियावन्त इति । पत + "पतिचण्डिभ्यामालञ् ।" उणा० १ । ११६ । इति आलञ् । पादस्य तले वर्त्तते इति पृषोदरादित्वात् साधुरित्येके ।) विवरम् । नागलोकः । इति मेदिनी । लग्नाच्चतुर्थस्थानम् । यथा,—
"पातालं विद्रुमस्येव शुक्लरम्भाशुकदलम् ॥"
इति ज्योतिस्तत्त्वम् ॥
सप्ताधोलोकभुवनविशेषः । तत्पर्य्यायः । अधो-भुवनम् २ बलिसद्म ३ रसातलम् ४ नागलोकः ५ । इत्यमरः ॥ अधः ६ उरगस्थानम् ७ ॥ ७ ॥ अथ पातालानि यथा,—
"अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ।
तलं सुतलमाख्यातं पातालानि तु सप्त वै ॥"
इति शब्दरत्नावली ॥
ईश्वर उवाच ।
"कथयामि महाभाग ! पातालस्य विनिर्णयम् ।
क्रमादेव निबोधैतत् यथावन्मे द्विजर्षभ ! ॥
पातालानि च सप्तैव सुधियः संप्रचक्षते ।
अतलं वितलञ्चैव सुतलञ्च तलातलम् ॥
महातलञ्च विख्यातं ततो ज्ञेयं रसातलम् ।
ततः पातालमित्येवं सप्त पातालसंज्ञकाः ॥
एते सर्व्वे सुविस्तारा निम्नगाः संप्रकीर्त्तिताः ।
सप्त प्रभवतोऽनन्तविस्ताराः कीर्त्तिता मया ॥
या च सा मेदिनी भद्र ! यत्र स्थावरजङ्गमाः ।
अधस्तस्या यदतलं योजनायुततो द्विज ! ॥
मयपुत्रो महामायी बलश्चैव महासुरः ।
येन सृष्टाः पुरा माया षड्विंशतिः किल ॥ १ ॥
तदधो वितलं नाम योजनानां ततोऽयुते ।
हरो विहरते तत्र भवान्या हाटकेश्वरः ॥
सुपार्श्वैर्भूतगणैर्भवान्या च सह प्रभुः ।
प्रसूता च सरित् तत्र हाटकी नाम विश्रुता ॥ २ ॥
अधः सुतलमित्येतत् योजनानां ततोऽयुते ।
उदारश्रवाः पुण्यश्लोको वैरोचनिर्बलिः ॥ ३ ॥
तलातलं ततोऽधस्तात् सुतलाद्योजनायुते ।
मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्महान् ।
निवसत्र सुचिरं मायावी परमाश्रयः ॥ ४ ॥
महातले ततोऽधस्ताद्योजनानामथायुते ।
यत्रास्ते काद्रवेयानां गणः क्रोधवशाह्वयः ॥
गरुडात् सर्व्वदा भीतः कुहकः शङ्खदन्तकः ।
निवसन्त्यभिमानः पक्षिराजेन शङ्कर ॥ ५ ॥
रसातले ततोऽधस्ताद्योजनानामथायुते ।
निवसन्ति दानवाश्च प्रकामैता निरन्तरम् ॥ ६ ॥
पाताले तु ततोऽधस्ताद्योजनानां द्वितायुते ।
नागलोकेश्वराः शूरा निवसन्ति महाबलाः ॥" ७
इति पाद्मे पातालखण्डे १ । २ । १ अध्यायाः ॥
अपि च वह्निपुराणे ।
"अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् ।
महातलं रसातलं पातालं सप्तमं स्मृतम् ॥
कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम् ।
रक्तपीतश्वेतकृष्णभौमानि च भवन्ति हि ॥
पातालानाञ्च सर्व्वेषां लोकानाञ्च यदन्तरम् ।
सुचिरं तानि कथ्यन्ते सहस्राणि चतुर्दश ॥
अष्टाविंशतिविख्यातास्तथा नरककोटयः ।
नरकाणामधस्ताच्च पुनः कालाग्निरुद्रकः ॥
तस्याधस्तादनन्ताख्यो यः सर्व्वमयो महान् ।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत् ॥" ७ ॥
अन्यच्च ।
"दशसाहस्रमेकैकं पातालं मुनिसत्तम ! ।
अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ॥
महाख्यं सुतलञ्चाग्र्यं पातालञ्चापि सप्तमम् ।
शुक्लकृष्णारुणापीतशर्कराशैलकाञ्चनाः ॥
भूमयो यत्र मैत्रेय ! वरप्रासादशोभिताः ।
तेषु दानवदैतेयजातयः शतशस्तथा ॥
निवसन्ति महानागजातयश्च महामुने ! ।
स्वर्लोकादपि रम्याणि पातालानीति नारदः ॥
दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपम् ।
शशिरश्मिर्न शीताय निशि द्योताय केवलम् ॥
पातालानामधश्चास्ते विष्णोर्या तामसी तनुः ।
शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः ॥
योऽनन्तः पठ्यते सिद्धैर्देवदेवर्षिपूजितः ।
सहस्रशिरसा स्पष्टं फणामणिविराजिता ।
यस्यासौ कुसुममन्येव कल्पान्ते वक्ष्यति ॥
मदा निमीलिताक्षोऽसौ सदाघूर्णितलोचनः ।
सदा गर्ज्जति भुवि वा वारिधीवाम्बकारणा ॥"
इति विष्णुपुराणे । २ । ५ । अध्यायः ॥

पातालः, पुं, (पतति आरणादयं पारदादिर्यत्र । पत + आलच् ।) औषधपाकार्थयन्त्र-विशेषः । इति शब्दचन्द्रिका । तत्प्रकारो यथा, वैद्यके ।
"आर्द्रमासमतये बाहुमेषे तु रसबन्धनः ।
पातालयन्त्रमेतद्धि प्रोच्यते तैलकादिकम् ॥"

पातालगरुडी, स्त्री, (पातालस्था गरुडी ।) लता-विशेषः । छिउका इति हिन्दीभाषा । तत्-पर्य्यायः । पत्रमालगी २ सोमवल्ली ३ तितिक्षा ४ मेचकाभिधा ५ ताक्षी ६ सौपर्णी ७ गारुडी ८ दीर्घकाण्डा ९ दृढ़काण्डा १० महाबला ११ दीर्घवल्ली १२ दृढ़लता १३ । अस्या गुणाः । मधुरत्वम् । पित्तदाहास्रदोषविषदोषनाशि-त्वम् । वृष्यत्वम् । सन्तर्पणत्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"छिलिहिण्डो महामूलः पातालगरुडाह्वयः ।
छिलिहिण्डः परं वृष्यः कफघ्नः पवनापहः ॥"
इति भावप्रकाशः ॥

पातालनिलयः, पुं, (पाताले पातालं वा निलयो यस्य ।) दैत्यः । इति हलायुधः ॥ सर्पः । इति राजनिर्घण्टः ॥

पातालौकाः, [स्] पुं, (पातालमोकः स्थान-मस्येति ।) दैत्यः । इति हेमचन्द्रः ॥ पाताल-वासिनि, त्रि ॥

पातिः, पुं, (पाति रक्षतीति । पा + "पातेर्डतिः ।" उणा० ४ । ५ । इति अतिप्रत्ययः ।) प्रभुः । स्वामी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पातिकः, पुं, (पातः पतनं जले निमज्जनोन्मज्जन-मेवास्त्यस्येति । पात + ठन् ।) शिशुमारः । इति शब्दमाला ॥

पातिली, स्त्री, (पातिः स्वामी पतिरूपं लीयते-ऽत्र । ली + डः । ङीष् च ।) वागुरा । (पातिः स्वामी लीयतेऽस्याम् ।) नारी । मृत्पात्र-भेदः । इति मेदिनी । पातिल इति भाषा ॥

पातुकः, त्रि, (पत + "लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ।" ३ । २ । १५४ । इति उकञ् ।) पतयालुः । पतन-शीलः । इत्यमरः ॥ (यथा, महाभारते । १२ । ९१ । ३९ ।
"यमो राजा धार्म्मिकाणां मान्यानां परमेश्वरः ।
संयच्छन् भवति प्राणानसंयच्छंस्तु पातुकः ॥")
प्रपाते जलहस्तिनि च पुं । इति मेदिनी ॥

पात्यः, त्रि, (पातयितुमर्हो यत् ।
"अपराधः पात्यतां याति यत्र पात्यो न विद्यते ॥"
इति कुल्लूकादिदर्शितवृद्धकात्यायनः ॥
तथा च महाभारते । १२ । ३८ । २२ ।
"स्त्री पापे ये सुखा भीमसेने
त्राणाय दोषो आत्मज्ञपापकारे ॥")
पापानोऽस्य तर्पणीयदण्डकाकारणम् ॥

पात्रं, क्ली, पाति रक्षति द्रव्यमनेन वा । त्रिप-त्यनेनेति वा । पा रक्षणे पाने वा + "सर्व्व-धातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।)

धारणयोग्यवस्तु । तत्पर्य्यायः । अमत्रम् २ भाजनम् ३ । इत्यमरः ।२।९।३३॥ भाण्डम् ४ कोशः ५ कोषः ६ पात्री ७ कोशी ८ कोषी ९ कोशिका १० कोषिका ११ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । २ । ४० ।

"सकलगुणगणानामेकपात्रं पवित्र-
मखिलभुवनमातुर्नाट्यमेतद्विचित्रम् ॥")

योग्यम् । स्रुवादि । राजमन्त्री । तीरद्वयान्तरम् । इति मेदिनी ॥ पातार इति भाषा ॥ पर्णम् । नाट्यानुकर्त्ता । इति हेमचन्द्रः ॥ आढकपरिमाणम् । इति वैद्यकपरिभाषा ॥ * ॥ (यथा, चरके कल्पस्थाने १२ अध्याये ।

"——————चतुः प्रस्थमथाढकम् ।
पात्रं तदेव विज्ञेयं——————॥")

पात्राणां विधिर्यथा,—

"हेमपात्रेण सर्व्वाणि लभते चेति ताम्मुने ।।
अर्घं दत्त्वा तु रौप्येण आयूराज्यसुतान् लभेत् ।
ताम्रपात्रेण सौभाग्यं धर्म्मं त्वक्षयमाप्नुयात् ।
शालपत्राणि रम्याणि गैरिकादिषु कारयेत् ।
ऐशानि क्रूरभालीनां रक्तानि सर्व्वकामिनाम् ।
धातूत्तमानि पात्राणि भूपराष्ट्रविवृद्धये ।
अपुष्पफलीदानि अन्यथादिषु कारयेत् ।
विनाशयन्त्यमाङ्गेषु प्रतिष्ठासु विशेषतः ॥
पात्राधारस्तथा कार्य्यः पात्राण्येवोत्तमानि च ।
पात्रेषु पृथिवी दुग्धा सुधा पात्रेषु धार्य्यते ॥
देवाः सोमः क्रतुर्यज्ञः पात्राण्येव विदुर्बुधाः ।
बलिहोमक्रियादीनि विना पात्रैर्न सिध्यति ॥
तस्माद्यत्नात्प्रयत्नेन पात्रधार्य्यं महामुने ।।"

तत्परिमाणादिर्यथा,—

"षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम् ।
मध्यमं त्रिविभागेन भागं कन्यसमीरितम् ।
दशाङ्गुलप्रमाणन्तु तत् पात्रं कारयेत् क्वचित् ।
नानाविचित्ररूपाणि पौण्डरीकाकृतीनि च ।
नलिनीनीलपद्माकारपात्राणि परिकल्पयेत् ।
रत्नादिरचितान् कुर्य्यात् काञ्चनमणिसुखचितान् ।
यथाशोभं यथालाभं तथा पात्राणि कारयेत् ।
विना पात्रेण यः कुर्य्यात् प्रतिष्ठायाज्ञिकीं
क्रियाम् ।
निष्फला भवते सर्व्वा वाहनादिधनापदा ॥"

इति देवीपुराणम् ९० ॥

भोजनपात्राणि भोजनशब्दे द्रष्टव्यानि ॥

पात्रटः, पुं, (पात्रा इव निर्गतं वा अटतीति । अट्+अच् ।) कर्पटकः । कृशे, त्रि । इति शब्दरत्नावली ॥

पात्रटीरः, पुं, (पात्रमिव रक्षति पिबति वा अटतीति । अट+बाहुलकात् ईरन् ।) शुक्लव्यापारमन्त्री । लौहपात्रम् । कांस्यपात्रम् । रजतपात्रम् । सिंहाणम् । पावकः । इति शब्दमाला मेदिनी च । रे, २८१ । मिहाणः । वायसः । कङ्कः । इति शब्दरत्नावली ॥

पात्रपालः, पुं, (पात्रं पालयतीति । पाल+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तुला-घटः । इति जटाधरः ॥ पातथोयार इति भाषा ॥

पात्रसंस्कारः, पुं, (संस्क्रियते इति । सम्+कृ+घञ् । पात्रस्य संस्कारः शुद्धिः ।) भाजनशुद्धिः । पुरोटिः । इति शब्दचन्द्रिका ॥ रायभाटी इति भाषा ॥

पात्री, स्त्री, (पा+ष्ट्रन् । षित्वात् ङीष् ।) पात्रम् । इति लिङ्गादिसंग्रहे अमरः । ३ । ५ । ३२ ॥ (यथा, पाद्मे सृष्टिखण्डे तडागविधिप्रकरणे ।

"पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ।
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः ॥")

पात्रीयं, क्ली, (पात्रे साधु । पात्र+बाहुलकात् छः ।) यज्ञपात्रम् । इति त्रिकाण्डशेषः ॥

पात्रीरः, पुं, (पात्रीं राति पात्रीं रातीति वा । रा+कः ।) यज्ञद्रव्यम् । इति भूरिप्रयोगः ॥

पात्रेसमितः, त्रि, (पात्रे भोजनसमये एव समितः सङ्गतः ।) भोजनादन्यत्र यो न मिलितः सः । भोजनेष्वेव दक्षः । यथा,—

"स पात्रेसमितोऽन्यत्र भोजनामिलितो न यः ॥"

इति त्रिकाण्डशेषः ॥

पापविशेषः । यथा,—

"निधाय हृदये पापं यः परं शंसति स्वयम् ।
स पात्रेसमितोऽपि स्यात् ।" इति शब्दमाला ॥

पात्रोपकरणं, क्ली, (पात्रस्य पात्राणां वा उपकरणम् उपभूषणम् ।) उपभूषणम् । यथा,—

"रौतिवर्गादिसंजातं पात्रोपकरणादिकम् ।
दद्यादायसवर्णेषु भूषणं न कदाचन ।
घण्टाचामरकुम्भादिपात्रोपकरणादिकम् ।
तद्भूषणाख्यं दद्याद्यस्मात्तदुपभूषणम् ॥"

इति कालिकापुराणे ६८ अध्यायः ॥

पात्रं, क्ली, (पततीति । पत+क्विप् । पतं अधःपतनं त्रायते । त्रै+कः । ततः स्वार्थे प्रज्ञाद्यण् निपातेऽस्य निष्पत्तिश्च दर्शनीया ।) पापित्राता । यथा, भविष्यपुराणे ।

"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः ।
पतनात् त्रायते यस्मादतो नरकार्णवात् ।"
महेश्वर इति प्रदर्शकं हेतोरविशेषात् ।
तथा नन्दिपुराणम् ।
"पात्रात्पात्राधिका शुद्धा विशुद्धाचारविशो-
धिणः ।
देवतास्तु तथा शुद्धा गोदानं ह्येतदुत्तमम् ।"

इति प्रायश्चित्ततत्त्वम् ॥

पात्रता, स्त्री, (पात्रस्य भावः ।) पात्रत्वम् । विद्यातपस्याचारयुक्तता । यथा,—

"न विद्यया केवलया तपसा वापि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ॥"

इति शुद्धितत्त्वम् ॥

पाथं, क्ली, जलम् । इति मेदिनी । थे, ९ ॥

पाथः, पुं, (पातीति । पा+थुट् निपातनात् ।) सूर्य्यः । अग्निः । इति मेदिनी । थे, ९ ॥

पाथः, [स्] क्ली, (पाति रक्षति जीवानिति । पा+"उदके थुट् च ।" उणां । ४ । २०४ । इति असुन् थुट् च । "पातेरेषोदके चाप्यसुन् तस्य थुडागम इत्युज्ज्वलदत्तः ।) जलम् । इत्यमरः ॥ (यथा, काशीखण्डे । ८९ । ४९ ।

"खरवन्नायमयमभी स्वनिः पीयूषपाथसाम् ॥")

पाथिः, [स्] पुं, (पिबति नद्यादिजलमाकर्षतीति । "पिबतेस्थुक् च ।" उणां । २ । ११५ । इति इसिन् थुगागमश्च ।) समुद्रः । इत्युणादिकोषः । चक्षुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पीयते इति । पा+इसिन् थुगागमश्च ।) कीलाले, क्ली । इत्युणादिकोषः ॥

पाथेयं, क्ली, (पथि साधुरिति । "पथ्यतिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् ।) पथि पथिकभक्ष्यम् । इति हेमचन्द्रः ॥ पथखरच इति भाषा ॥ तत्पर्य्यायः । शम्बलम् २ । इत्यमरः ॥ सम्बलम् ३ । इति भरतः ॥ (यथा, देवीभागवते । ६ । ५५ । १२ ।

"क्षुधिता तस्करैर्मार्गे वस्त्रभाजा तथा-हृता ।
पाथेयञ्च हृतं सर्व्वं बालपुत्रा निराश्रया ॥")

कन्याराशिः । यथा,—

"क्रियतावुरिविक्षुमकुलीरपाथेययूककी-
पोक्षाः ।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ॥"

इति ज्योतिस्तत्त्वम् ॥

पाथोजं, क्ली, (पाथसि जले जायते इति । जन+डः ।) कमलम् । इति राजनिर्घण्टः ॥ (यथा, नैषधे । १९ । २० ।

"वनतिमिरविरहे शुभावेन प्रगल्भवल्लाः सद्य
प्रसभमन्वयः पाथोजास्ये निर्विशन्निरन्तरः ॥"

कमलशब्दे विवरणं सविस्तरं ज्ञेयम् ॥)

पाथोदः, पुं, (पाथो जलं ददातीति । दा+कः ।) मेघः । इति त्रिकाण्डशेषः ॥

पाथोधरः, पुं, (धरति धारयतीति वा । धृ+अच् । पाथसो धरः पाथो धारयतीति । धारि+अच् ह्रस्व इत्येके ।) मेघः । इति हलायुधः ॥ (यथा, राजतरङ्गिण्याम् । ३ । २४० ।

"अन्तर्यं पतनं सुठगिरं गञ्जराजानेव पाथोधरे-
दारान्निपतितान्कारुदवरैराक्षिप्य दशदशौ ।")

पाथोधिः, पुं, (पाथांसि धीयन्तेऽत्र । धा+कि ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । १ । १८ ।

"मन्ये इयं पृथिवी तनुया भवदन्ययाम् ।
येन श्रीमान् कल्पताम् मुनिः पाथोधिमन्थने ॥")

पाथोनिधिः, पुं, (पाथांसि जलानि निधीयन्तेऽस्मिन् इति । नि+धा+किः ।) समुद्रः । इति शब्दरत्नावली ॥

पाद्, पुं, (पद+क्विप्+णिच् ।) पादः । इति जटाधरः ॥

पादः, पुं, (पद+करणे घञ् ।) पद्यते गम्यते अनेन । पा इति भाषा । स तु शरीरस्यान्यत्र गमनसाधनम् । यथा,—

"पादेन तु शिरो हन्यात् ..."

इति भागवतीयपदार्थः ॥

तत्पर्य्यायः । पत् २ अङ्घ्रिः ३ चरणः ४ । इत्यमरः । अंह्रिः ५ । इति शब्दरत्नावली ॥ * ॥ श्लोकादीयचतुर्थांशः । श्लोकचतुर्थांशः । यथा, पादाद्येष्वेव सन्धिरपि पूर्व्वत । इह च एकपाद एव ग्रहणे । इति वामनः ॥ अविशेषात् श्लोकपादोऽपि । ऋक्पादे । इति सिद्धान्तकौमुदी ॥ * ॥ पादद्वारा पादाक्रमणादिनिषेधो यथा,—
"पादेन नाक्रमेत् पादमुच्छिष्टं नैव लङ्घयेत् ।
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ॥"
इति कर्म्मलोचनम् ॥ * ॥
पादप्रक्षालनादिनिषेधो यथा,—
"न पादक्षालनं कुर्य्यात् पादेन वा कदाचन ।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः ॥
नातिप्रसारयेद्देवं ब्राह्मणान् गामथापि वा ।
वाय्वग्निगुरुविप्रान् वा सूर्य्यं वा शशिनं प्रति ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥
पादेन्द्रियस्याध्यात्मं तथाधिभूतमधिदैवतञ्च यथा, महाभारते आश्वमेधिकपर्व्वणि ४२ अध्याये ।
"अतः परं प्रवक्ष्यामि सर्व्वं विविधमिन्द्रियम् ।
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ॥
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥"
मूलम् । चरणम् । तुरीयांशः । चतुर्थभागः । शैलाद्यन्तपर्व्वतः । महाद्रिसमीपे क्षुद्रपर्व्वतः । (यथा, हरिवंशे ८४ । २० ।
"उभयोर्विन्ध्यशैलयोः पादे नगयोस्तौ महा-
पुरेण ॥")
मयूखः । किरणः । इति मेदिनी ॥ (किरणः । यथा, महाभारते । १२ । १० । १२१ ।
"न्यायनिर्म्मितः पादः पश्चिमो सर्व्वतोऽपरः ॥"
चिकित्साचतुष्टयं यथा,—
"वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्युं विनाध्वरे ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति च सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥
"धर्म्मं चोद्भवतुर्थं विद्धि पादचतुष्टयम् ॥"
इति चरके सूत्रस्थाने नवमोऽध्याये ।
अस्य शुभलक्षणं यथा,—
"अस्विन्नौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ च निगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥"
अशुभलक्षणञ्च यथा,—
"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरा-
सन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्य-
दुःखप्रदौ ॥")
पादकटकः, पुं, (पादस्य कटक इवेति ।) नूपुरः । इत्यमरटीकायां भरतः । पैंज मल इति भाषा । तत्पर्य्यायः । मञ्जीरः २ । इत्यमर-
भरतौ ॥
पादकृच्छ्रः, पुं, व्रतविशेषः । यथा,—
"एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकृच्छ्र उदाहृतः ॥"
इति गारुडे १०६ अध्यायः ॥
पादगण्डीरः, पुं, (गण्डते चर्म्मणि पूयरक्तादि यस्मात् यत्र वा पादे इत्यर्थः । गड्+किरच् इति गण्डिरः पदः ततो राजदन्तादिवत् परनिपातनात् साधुः । पादगण्डीर इति पाठोऽपि दृश्यते तत्र गड्+ईरन्प्रत्ययेन साधुरिति ।) श्लीपदम् । इति त्रिकाण्डशेषः । गोद इति भाषा । (श्लीपदशब्देऽस्य विवृतिर्ज्ञेया ॥)
पादग्रहणं, क्ली, (पादयोर्ग्रहणम् इति । ग्रह्+भावे ल्युट् ।) अभिवादनम् । पादस्पर्शपूर्व्वक-प्रणामः । इत्यमरः ॥ तद्विधौ यथा, "दक्षिणं दक्षिणेन सव्यं सव्येन पादावभिवादयेत् यथा-विधि दृष्टम् ।" इति बौधायनः ॥
"व्यत्यस्तपाणिना कार्य्यमुपसङ्ग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥"
इति कल्पतरौ ॥
न पुष्पाक्षतपाणिर्नाशुचिर्न जपन् न देवपितृ-कार्य्यं कुर्व्वन् । अभिवादयेदित्यनुवृत्तौ प्रच-लितौ ॥ * ॥ तद्विधिः ।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥" * ॥
तत्प्रकारः ।
"अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥
नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च ॥
भोः शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः ॥"
इति मनुः । २ । १२१—१२४ ॥
पादचत्वरः, पुं, (पादे चत्वाकारे अमरारो चतुरः ।) छागः । अश्वत्थः । सिकता । करकः । पवनोऽपि । इति मेदिनी । रे, १०१ ॥
पादचारी, [न्] पुं, (पद्भ्यां चरतीति । चर+णिनिः ।) पदातिः । इति हेमचन्द्रः । ३ । ४१२ ॥ पद्भ्यां गमनशीले, त्रि ॥ (यथा, भागवते । ६ । १२ । २८ ।
"शिरस्त्राद् पादचारीव पद्भ्यां निर्जगत्
महीम् ।
जगाम स महाराज शक्तिमं ह्यनुगामिनम् ॥")
पादजः, पुं, (पद्भ्यां जायते इति । जन्+डः । "पद्भ्यां शूद्रोऽजायत ।" इति श्रुतेरस्य पद्भ्यां जातत्वात् ।) शूद्रः । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि, ३८ । ६२ ।
"न विप्रा न च राजानो न वैश्या न च
पादजाः ॥"
पादोद्भवमात्रे, त्रि ॥)
पादजालं, क्ली, (पादयोर्जालं यस्मात् ।) पादुका । इति जटाधरः ॥ (यथा, सुश्रुते चिकित्सित-स्थाने २४ अध्याये । "चक्षुष्यं पादाभ्यङ्गं पाद-त्राणानधारणं विरुद्धेन ..." शौनकपादरक्षा च वचनात् यथा,—
"उपानद्भ्यामेकेङ्गुलिः पादतः प्रयत्नतः ।
मुक्ताक्षिकिरणान् ..." पादज्ञालच प्रयेरा ॥")
पादपः, पुं, (पादैर्मूलैः पिबतीति रसानिति । पा+कः ।) वृक्षः । इत्यमरः ॥ (यथा, किरातार्ज्जुनीये । ९ । ६९ ।
"यत्र विद्युज्जनो नास्ति ... ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥"
पादौ पाति रक्षतीति । पा+रक्ष्+कः ।)
पादपीठः । इति मेदिनी । पे, २१ ॥
पादपरुहा, स्त्री, (पादपे वृक्षे रोहतीति । रुह्+कः ।) वन्दाकः । इति राजनिर्घण्टः ॥
पादपा, स्त्री, (पादौ पाति रक्षतीति । पा+कः+टाप् ।) पादुका । इति मेदिनी । पे, २१ ॥
पादपाशः, पुं, (पादस्य पाशः ।) अश्वाभरणम् । तत्पर्य्यायः । दामाञ्चनम् २ । इति हेमचन्द्रः । ४ । ३१५ ॥
पादपाशी, स्त्री, (पादपाश+ङ्ग्रीष् गौरादित्वात् ङीप् ।) शृङ्खला । शिकल इति भाषा । मल्लिका । छिकली इति भाषा । इति मेदिनी ।
पादपीठं, क्ली, (पादस्य पीठम् ।) पादस्थापनासनम् । पा राखा टुल इति भाषा । तत्पर्य्यायः । पदासनम् २ । इति हेमचन्द्रः । ३ । ३४८ ॥ (यथा, रघुः । १० । ५९ ।
"निवासचरितं तत्र पैत्रं ... ।
चक्राग्निभिद् ... पादपीठं ... ॥")
पादपीठिका, स्त्री, (पादपीठं कायति प्रकाशयति । पादपीठ+कन् ।) नापितशिल्पम् । यथा,—
"नापितादिक्रियाख्या तु कारिका पादपीठिका ॥"
इति शब्दमाला ॥

पादप्रक्षालनं, क्ली, (पादयोः प्रक्षालनम् ।) चरणधौतम् । पा धोयोया इति भाषा । अस्य गुणाः । मेधाजनकत्वम् । पवित्रत्वम् । आयुष्यत्वम् । अलक्ष्मीकलिनाशकत्वञ्च । इति राजवल्लभः ॥ (यथा च,—
"पादप्रक्षालनं पादमलरोगश्रमापहम् ।
चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम् ॥"
इति चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पादप्रधारणं, क्ली, (पादौ प्रधार्य्येते कण्टकादिभ्यो रक्ष्येतेऽनेनेति । प्र+धृ+णिच्+ल्युट् ।) पादुका । इति केचित् ॥

पादप्रहारः, पुं, (पादस्य पादेन वा प्रहारः ।) पदाघातः । लाथि इति भाषा । यथा । "नायिकापादप्रहारादिना नायकस्य कोपादिवर्णनम् ।" इति काव्यप्रकाशे सप्तमोल्लासः ॥ (यथा च साहित्यदर्पणे । १० । २९ ।
"दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि ! नात्र दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यत्खिद्यते मृदु पदं ननु सा व्यथा मे ॥")

पादबन्धनं, क्ली, (पादयोर्गोमहिष्यादीनामिव्यर्थः । यद्बन्धनम् ।) गोमहिष्यादिबन्धनम् । इति जटाधरः ॥ पादबन्धटीकायां भरतश्च ॥ (बध्यतेऽनेनेति । बन्ध+करणे ल्युट् । पादयोर्बन्धनं तत्साधनवस्तु । गोमहिष्यादीनां पादबन्धनद्रव्यम् । यथा, हेमचन्द्रः । ४ । ३२९ ।
"स तु प्रग्रहकः काष्ठमयैः स्यात् पादबन्धनैः ॥")
चरणोद्गारश्च ॥

पादमूलं, क्ली, (पादयोर्मूलम् ।) चरणाधोभागः । यथा, हेमचन्द्रः ।
"पादमूलं गोहिरं स्यात् पार्ष्णिस्तु घुटयोरधः ॥"
(यथा, रामायणे । २ । ७८ । २५ ।
"सा पादमूले कैकेय्या मन्थरा निपपात ह ।"
प्रत्यन्तपर्व्वताधोभागः । यथा, कथासरित्सागरे । १ । ३० ।
"मर्ही भ्रमन्तौ हिमवत्पादमूलमवापतुः ॥")

पादरक्षणं, क्ली, (पादयो रक्षणं यस्मात् ।) पादुका । इति हेमचन्द्रः । ३ । ५७८ ॥

पादरज्जुः, स्त्री, (पादबन्धनार्था रज्जुः ।) हस्तिपादबन्धनरज्जुः । तत्पर्य्यायः । पारी २ । इति जटाधरः । चरणबन्धनदाममात्रञ्च ॥

पादरथी, स्त्री, (पादस्य रथी सुखो रथ इव ।) पादुका । इति त्रिकाण्डशेषः ॥

पादरोहकः, पुं, (पादैर्मूलैः रोहतीति । रुह+ण्वुः ।) वटवृक्षः । इति राजनिर्घण्टः ॥

पादवल्मीकः, पुं, (पादे वल्मीक इव ।) श्लीपदम् । इति हेमचन्द्रः । ३ । १०९ ॥ (श्लीपदरोगशब्देऽस्य विवरणं ज्ञातव्यम् ।)

पादविकः, पुं, (पदवीं धावतीति । पदवी+"माथोत्तरपदपदव्यनुपदं धावति ।" ४ । ४ । ३७ । इति ठक् ।) पथिकः । इति सिद्धान्तकौमुदी ॥

पादविरजाः, [स्] स्त्री, (पादौ विरजौ धूलिविहीनौ यस्याः ।) पादुका । इति हारावली । ७४ ॥

पादशः, [स्] अ, पादं पादम् । पादशब्दात् वीप्सायां शस्प्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥ (यथा, मनुः । १ । ८२ ।
"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥")

पादशैलः, पुं, (पादः महाद्रिसमीपस्थः क्षुद्रपर्व्वतः स एव शैलः ।) प्रत्यन्तपर्व्वतः । इति शब्दरत्नावली ॥

पादशोथः, पुं. (पादोद्भवः शोथः । शाकपार्थिवादिवत् समासः ।) पादगतशोथः । यथा,—
"अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयम् ॥"
इति माधवकरः ॥
(यथा च हारीते चिकित्सितस्थाने २४ अः ॥
"शोथो भवेच्च विकलेन्द्रियरोममार्गैः
क्षीणे क्षये वपुषि चाम्लकटूष्णसेवया ।
शैत्यात्तथा विषमपिच्छिलसेवनेन
कृच्छ्राभिघातपतनेन च धारणाद्वा ।
आमाशये गतिरतोऽपि नरस्य यस्य
अन्ते प्रधावति ततोऽपि च दोष एषः ।
करोति पाणिचरणे च पृथक् प्रवृत्तो
द्वन्द्वेन वा भवति शोथविकारचारः ॥
नरस्य चान्तःप्रभवाश्च शोथाः
साध्या भवेयुर्विनता सुखेन ।
असाध्यकाः सर्व्वशरीरगाश्च
पादे स्त्रिया वा वदने नरस्य ॥")

पादस्फोटः, पुं, (पादस्य स्फोटः । पादं स्फोटयतीति वा । स्फुट्+"कर्म्मण्यण् ।" ३ । २ । १, इत्यण् ।) रोगविशेषः । तत्पर्य्यायः । विपादिका २ । इत्यमरः ॥ स्फुटी ३ स्फुटिः ४ पादस्फोटिः ५ । इति शब्दरत्नावली ॥ स तु एकादशक्षुद्रकुष्ठान्तर्गतक्षुद्रकुष्ठम् । यथा,—
"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत् ॥ इति माधवकरः ॥ अस्य चिकित्सा कुष्ठशब्दे द्रष्टव्या ॥

पादहारकः, त्रि, पादाभ्यां ह्रियतेऽसौ । पादशब्दात् निपातनात् कर्म्मणि वुञ्प्रत्ययान्तः । इति मुग्धबोधव्याकरणम् ॥ ("लक्षकुटो बहुलम् ।" ३।१।११२ । इति कर्म्मणि ण्वुल् । इति सिद्धान्तकौमुदी ।) चरणद्वारा हरणकर्त्ता ॥

पादाग्रं, क्ली, (पादयोरग्रम् ।) चरणाग्रभागः । तत्पर्य्यायः । प्रपदम् २ । इत्यमरः ॥

पादाङ्गदं, क्ली, (पादस्य अङ्गदमिव ।) नूपुरम् । इत्यमरः ॥

पादात्, पुं, (पादाभ्यामततीति गच्छतीति । अत+क्विप् ।) पदातिः । इति शब्दरत्नावली ॥ (पादाभ्यामप्नोति । आप्+क्विप् । ह्रस्वः । इति दुर्गादासटीकायां)

पादातं, क्ली, (पदातीनां समूहः । पदाति+"भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) पत्तिसंहतिः । पदातिसमूहः । इत्यमरः ॥
(यथा, महाभारते । १२ । ६९ । ८ ।
"सादिनामन्तरे स्थाप्यं पादातमपि दंशितम् ॥")

पादातः, पुं, (पादाभ्यामततीति । अत+अच् ।) पादातिः । यथा,—
"पदातिपत्तिपादातपादातिकपदाजयः ॥"
इत्यमरमाला ॥
(यथा, महाभारते । २ । ५१ । ४१ ।
"अयुतं त्रीणि पद्मानि गजारोहाः ससादिनः ।
रथानामर्ब्बुदं चापि पादाता बहवस्तथा ॥")

पादातिः, पुं, (पादाभ्यामततीति । अत+इन् ।) पदातिः । इति हेमचन्द्रः ॥

पादातिकः, पुं, (पादातिरेव । पादाति+स्वार्थे कन् ।) पदातिः । इति हेमचन्द्रः । ३ । ४६२ ॥

पादारकः, पुं, (पाद इव अच्छतीति । ऋ+ण्वुल् ।) पोतिन्दः । इति त्रिकाण्डशेषः ॥

पादालिन्दी, स्त्री, (पाद इव अलिन्दो यत्र । गौरादित्वात् ङीष् ।) नौका । इति हारावली । ५९ ॥

पादावर्त्तः, पुं, (पाद इव आवर्त्तते इति । आ+वृत्+अच् ।) अरघट्टकः । इति हेमचन्द्रः । ४ । १५९ ॥ रहट् इति हिन्दीभाषा ॥

पादाविकः, पुं, (अव रक्षणे+भावे घञ् । पादेन अवः रक्षणम् । तत्र पादावे पादेन शरीरादिरक्षणे नियुक्तः । पादाव+"तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) पदातिः । इति शब्दरत्नावली ॥

पादी, [न्] पुं, (पादोऽस्त्यस्येति । पाद+इनिः ।) पादविशिष्टजलचरजन्तुः । अस्य मांसस्य गुणाश्च यथा, भावप्रकाशे ।
"कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः ॥"
चतुर्थांशभागी । यथा, मनुः । ८ । २१० ।
"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे ।
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥"

पादुकः, त्रि, (पद्यते गच्छतीति । पद+"लषपतपदेति ।" ३ । २ । १५४ । इति उकञ् ।) गमनशीलः । पदधातोः कर्त्तरि उकञ्प्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

पादुका, स्त्री, (पादूरेव । पादू+स्वार्थे कन् ततो ह्रस्वः ।) चर्म्मादिनिर्म्मितपादावरणम् । जुता इति भाषा ॥ तत्पर्य्यायः । पादूः २ उपानत् ३ । इत्यमरः ॥ पन्नद्धा ४ पादरथिका ५ पादविरजा ६ । इति हेमचन्द्रः ॥ पनद्धी ७ पादरथी ८ । इति त्रिकाण्डशेषः ॥ कौशी ९ । इति शब्दरत्नावली ॥ १० ॥ तस्या धारणविधिर्यथा,—
"वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥"
इति

अस्या धारणगुणाः ।
"पादप्रचारकं वृष्यमोजस्यं चक्षुषोर्हितम् ।
सुखप्रचारमायुष्यं बल्यं पादत्रधारणम् ॥"
अस्या अधारणे दोषो यथा,—
"पादाभ्यामनुपानद्भ्यां भ्रमणं चंक्रमणं यदा ।
अनारोग्यमनायुष्यमिन्द्रियघ्नमुदाहृतम् ॥"
इति राजवल्लभः ॥ * ॥
तस्या दानफलं यथा,—
"इष्टमार्गाय विप्राय यः प्रयच्छत्युपानहौ ।
न तस्य मानसो दाहः कदाचिदपि जायते ॥
यानञ्चाश्वतरीयुक्तं तस्य हैममयं शुभम् ।
उपतिष्ठति विप्रर्षे धर्म्मरत्नविभूषितम् ॥
दानमन्यत् यथोत्पन्नं तत्ते वक्ष्यामि पार्थिव ।
प्रवृत्तमेकदा भूप ! लोके धर्म्मसुखप्रदम् ॥
जमदग्निमुनिः पूर्व्वं तपःस्वाध्यायकर्षितः ।
चापसद्बाणधरो धन्वी बभूव सततोद्यतः ॥
धनुर्वेदे तथा वेदे सर्व्वाश्चपारगोऽभवत् ।
क्षिपन् बाणांस्तथा मध्ये भार्य्यामाह यतो हि सः ॥
कदा निदाघकाले तु क्षिपन् बाणान् भृगूद्वहः ।
तस्मै भार्य्या ददौ बाणान् प्रतिकर्म्म महामुनेः ॥
निदाघतीव्रसन्तापात् क्लान्तया सततं भयात् ।
भर्त्तुः शीघ्रतया यान्त्या तस्याश्चुक्रोध वै रविः ॥
शुभ्रांशुमसन्तापार्त्ता तथा यातुं न शक्नुवन् ।
तृणमोहपरिश्रान्ता रेणुका च तपस्विनी ॥
तां दृष्ट्वा तु मुनिः प्राह भार्य्यां किन्नु चिरायितम् ।
कोपान्वितमिव भर्त्तारं न कोपं कर्त्तुमर्हसि ॥
निदाघतीव्रसन्तापात् श्रमपादा त्वयार्दिता ।
रश्मिदग्धशिराः भूत्वा न शक्ताहं मार्गितुम् ॥
इत्युक्ते च कुपाविष्टः प्राह चण्डांशुमालिने ।
एतदर्कं यो न जानाति ह्यर्कं विभेत्स्यामि सायकैः ॥
यः कष्टयति मे भार्य्यां साध्वीं धर्म्मपरायणाम् ।
पातयाम्यद्य बाणेन पातयामि तथा हि ॥
इत्युक्त्वा धनुरादाय अर्कं विभेत्तुमैहत ।
यतीन्द्र हि सूर्योऽथ ब्राह्मणवपुः शुचिः ॥
तं विप्रश्च मुनिं धन्वी द्विजोऽभूदिन्द्रमानवान् ।
किमर्थं धावसि सूर्यं पुनः पुनरतीव हि ॥
सुरासुरभिगम्यानां कदम्बानां सुधे ॥
रक्षतः स तमाहेदं पातयिष्याम्यहं रविम् ।
दिवस्तु महातापात् मुखे विश्वं हिनस्ति मे ।
मातुरद्भुतरूपो वदद्दाहकं विमृशति ।
शीघ्रयानो न शक्नोमि विविधांस्तु यासि मे सद ।
हिम ! शृणु क्षमिन्तव्यं तं वचः प्रार्थयिष्यति ॥
तद्दृष्ट्वा समुपेत्याह प्राह सद्यः द्विजोत्तम ! ।
यातनिप्यान्वये यदर्थं सूर्यं तमःस्थितम् ॥
दिवाकरो यदा सर्व्वं सर्व्वलोके सदाहितः ।
सम्भाव्ये तिरस्करोषि सर्व्वत्रोपान्मदर्षितान् ॥
गत्वाधे शाश्वतं अतिद्यामि दिवाकरः ।
यत् ते मार्गयामि सर्व्वमथ द्विजोत्तम ! ।
तद्दृष्ट्वा महर्षेरिभिश्वाध्य उपाययौ यथा ।
सर्व्वे तं पन्नगाय दत्वा छत्रमुपानहौ ॥
इत्युक्त्वा तं दिवाकरं दिव्यं परिमोचने ।
दत्तं तेषां दत्तमेतौ धर्म्मसमावौ द्विजोत्तम ! ॥
यो ददाति द्विजेभ्यस्तु छत्त्रोपानहपादुकौ ।
वैशाखे शुक्लपक्षे तु वल्लभं यमकाञ्चितम् ॥
न तस्य मानसो दाहो मन्युशोकोऽभिजायते ।
सर्व्वव्याधिविनिर्मुक्तः श्रियं पुष्टिञ्च विन्दति ॥
कालादिह यदा याति मम लोके द्विजोत्तम ! ।
यानं चाश्वतरीयुक्तं सर्व्वहैममयं शुभम् ॥
दिव्याङ्गनाभिराकीर्णं सर्व्वरत्नविभूषितम् ।
उपतिष्ठति विप्रेन्द्र ! सर्व्वकामफलप्रदम् ॥"
इति वह्निपुराणम् ॥ * ॥
विष्णुगृहे सपादुकगमने दोषो यथा,—
वराह उवाच ।
"यद्युपानहौ पद्भ्यां यस्तु मामुपयात्यसौ ।
धर्म्माचारस्तु कादेन वर्षाणाञ्च त्रयोदश ॥
तत्र जन्मपरिभ्रष्टः शूकरो जायते पुनः ।
शूकरत्वे परिभ्रष्टः श्वा च तत्रैव जायते ॥
ततः श्वत्वात् परिभ्रष्टो मानुषश्चैव जायते ।
मद्भक्तश्च विनीतश्च अपराधविवर्ज्जितः ॥
मुक्तो तु सर्व्वसंसारं मम लोकाय गच्छति ॥
य एतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
न स लिप्यति पापेन स्वर्गमेताति संशयः ॥"
इति वराहपुराणे उपानदपराधप्रायश्चित्तम् ॥
अथ देवतापादुकानिर्म्माणपूजनविधिः । यथा,—
"मणिरत्नमयी कार्य्या हैमरूप्यमयी पि वा ।
चन्दनेनापि कर्त्तव्या पादुकाप्रतिमापि वा ॥
श्रीपर्णी सिद्रुमा वापि देवदारुमयी पि वा ।
गङ्गायां च वा कार्य्या पादुके पूजयेत् यदा ॥"
इति देवीपुराणम् ॥ * ॥
गुरुपादुकास्तोत्रं यथा,—

"ब्रह्मरन्ध्रसरसीरुहोदरे
नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
द्वादशार्णसरसीरुहं भजे ॥ १ ॥
तस्य कन्दलितकर्णिकापुटे
क्लृप्तरेखमकथादिरेखया ।
कोणलक्षितहलक्षमण्डली-
भावलक्ष्यमबलालयं भजे ॥ २ ॥
तत्पुटे पटुतडित्कडारिम-
स्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपु-
र्बिन्दुनादमणिपीठमण्डलम् ॥ ३ ॥
ऊर्द्ध्वमस्य हुतभुक्शिखात्रयं
तद्विलासपरिबृंहणास्पदम् ।
विश्वघस्मरमहोच्चिदोत्कटं
व्यामृशामि युगमादिहंसयोः ॥ ४ ॥
तत्र नाथचरणारविन्दयोः
कुङ्कुमासवझरीमरन्दयोः ।
द्वन्द्वमिन्दुमकरन्दशीतलं
मानसं स्मरति मङ्गलास्पदम् ॥ ५ ॥
पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलोपेतं प्रपञ्चे चातिदुर्लभम् ॥"
इति रुद्रयामलम् ॥

पादुकाकारः, पुं, (पादुकां करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति हलायुधः ॥
पादुकाकृत्, पुं, (पादुकां करोतीति । कृ + क्विप् ।) चर्म्मकारः । इति हेमचन्द्रः । ३ । ५०८ ॥
पादूः, स्त्री, (पद्यते गम्यते अनेन पदेः । पद + "पिचुकाशिपद्रुभ्यः ।" उणा० १ । ८० । इति कुः । स च णित् ।) पादुका । इत्यमरः ॥
पादूकृत्, पुं, (पादूं पादुकां करोतीति । कृ + क्विप् । तुक् ।) चर्म्मकारः । इत्यमरः ॥
पादोदकं, क्ली, (पादप्रक्षालनजातं उदकम् । शाकपार्थिवादिवत् समासः ।) चरणामृतम् । यथा,—
"हरि रूपं शुचि नाम नैवेद्यहृदये हरेः ।
पादोदकञ्च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलेन विष्णोः ।
योऽश्नाति नित्यं पुरतो मुरारेः
प्राप्नोति सुखैसहुतां च भक्तिम् ॥
कृत्वा यानि यदिह पूजितानि तुलसीदल पादोदकं
नैवेद्यं बहुमयपापदुरितं गुर्व्वङ्गनागमम् ।
भक्त्यापीतमतिः स्त्रियं द्विजवधं तत्पुरं तथा
प्रायश्चित्तमिवार्दितानि दहति वै वै हरेः ॥"
इति पाद्मोत्तरखण्डे १०० अध्यायः ॥ * ॥
अथ श्रीचरणोदकाभिषेकमाहात्म्यं पद्मपुराणे ।
"श्रुतवान् धर्म्मशास्त्राणि सर्व्वयज्ञेषु दीक्षितः ।
शालग्रामशिलातोयैर्योऽभिषिक्तो न पाण्डव ॥
गङ्गाभोगावतीनाथो गदिन्दराद्य यः ।
तिष्ठन्ति सर्व्वतीर्थानि शालग्रामशिलाश्रयैः ।
कोटितीर्थसहस्रेषु स्नातैः किं प्रयोजनम् ।
तोयं यदि भवेत् पुण्यं शालग्रामशिलोद्भवम् ॥"
तत्रैव गौतमाम्बरीषसंवादे ।
"येषां चैव मम पितृ हरेः पादोदकेन वै ।
अम्बरीष ! कुर्व्वन्ति राजेन्द्र यावतः सदा ॥
तावन्तोऽपि नाम लोकानि सुव्रते ।
यावत् प्राप्नोति तोयं शालग्रामाभिषेचनम् ॥"
इत्यादि कार्त्तिकमाहात्म्ये ।
"सर्व्वेऽपि यज्ञतीर्थे गङ्गायां दिने दिने ।
शालग्रामशिलातोयैर्योऽभिषिञ्चति मानवः ॥"
तत्रैवान्यच्च ।
"यानि कानि च तीर्थानि ब्रह्माद्या देवता-
स्तथा ।
विष्णुपादोदकस्यैते कलां नार्हन्ति षोडशीम् ।
शालग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः स्नानतोयेन ब्रह्महत्या विनश्यति ॥"
किञ्च ।
"न वै मातृहणः स च ब्रह्मघ्नो गुरुतल्पगः ।
विष्णुपादोदकं पीत्वा क्वचित् यान्ति मानवः ॥"
कौर्म्मे पुराणे ।
"महापातकयुक्तानि श्वपचादीनि
दुष्टानि यानि कुकर्म्मोत्पादकानि ।

कालेन तीर्थसलिलानि पुनन्ति पापं
पादोदकं भगवतः प्रपुनाति सद्यः ।”
स्मृतौ च ।
“त्रिरात्रिफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगाश्च पक्षस्य मासस्य सरितां पतिः ॥
षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी ।
पादोदकं भगवतो द्वादशाब्दफलप्रदम् ॥”
तन्निष्ठता च गरुडपुराणे ।
“जलञ्च येषां तुलसीविमिश्रितं
पादोदकं चक्रशिलासमुद्भवम् ।
नित्यं त्रिसन्ध्यं प्रवदेत् न गात्रं
खगेन्द्र ! ते धर्म्मबहिष्कृता नराः ॥”
अथ श्रीचरणोदकपानमाहात्म्यम् । पाद्मे गौत-
माम्बरीषसंवादे ।
“हरेः स्नानावशेषन्तु जलं यस्योदरे स्थितम् ।
अम्बरीष ! प्रणम्योच्चैः पादपांशुः प्रगृह्यताम् ॥”
तत्रैव देवदूतविकुण्डलसंवादे ।
“ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु सेवितैः किं प्रयोजनम् ॥
कोटितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
नित्यं यदि पिबेत् पुण्यं शालग्रामशिलाजलम् ॥
शालग्रामशिलातोयं यः पिबेद्विन्दुना समम् ।
मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्नरः ॥”
किञ्च ।
“दहन्ति नरकान् सर्व्वान् गर्भवासञ्च दारुणम् ।
पीतं यैस्तु सदा नित्यं शालग्रामशिलाजलम् ॥”
तत्रैव श्रीयमधूम्रकेतुसंवादे ।
“शालग्रामशिलातोयं बिन्दुमात्रं तु यः पिबेत् ।
सर्व्वपापैः प्रमुच्येत मुक्तिमार्गे स्थलोद्यमः ॥”
तत्रैव पुलस्त्यभगीरथसंवादे ।
“पादोदकस्य माहात्म्यं भगीरथ ! वदामि ते ।
पावनं सर्व्वतीर्थेभ्यो हत्याकोटिविनाशनम् ॥
धृते शिरसि पीते च सर्व्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तन्तु पापानां कलौ पादोदकं हरेः ॥”
किञ्च ।
“त्रिभिः सारस्वतं तोयं सप्ताहेन तु नार्म्मदम् ।
सद्यः पुनाति गाङ्गेयं दर्शनादेव यामुनम् ॥
पुनन्त्येतानि तोयानि स्नानदर्शनकीर्त्तनैः ।
पुनाति स्मरणादेव कलौ पादोदकं हरेः ॥
अर्च्चितैः कोटिभिर्लिङ्गैर्नित्यं यत् क्रियते फलम् ।
तत् फलं शतसाहस्रं पीतैः पादोदकैर्हरेः ॥
अशुचिर्वा दुराचारो महापातकसंयुतः ।
स्पृष्ट्वा पादोदकं विष्णोः सदा शुद्ध्यति मानवः ॥
पापकोटियुतो यस्तु मृत्युकाले शिरे सखे ।
देहि पादोदकं यस्य न प्रयाति यमालयम् ॥
न दानं न हविर्यस्य स्वाध्यायो न सुरार्च्चनम् ।
सोऽपि पादोदकं पीत्वा प्रयाति परमां गतिम् ॥
विपाशावचर्य्यशक्ता वैपाशो किं करिष्यति ।
निष्कारणे महातीर्थे उज्ज्वलिन्दी भगीरथ ! ॥
माघमासे प्रयागे तु स्नानं वै किं करिष्यति ।
प्रणामं कृतं तस्य यस्य पादोदकं हरेः ॥
वाराणसे सामितोथोते किं करिष्यति पुष्करे ।
नित्यन्तु पुष्करं तस्य यस्य पादोदकं हरेः ॥
प्रबोधवासरे प्राप्ते मथुरायाञ्च तस्य किम् ।
नित्यञ्च याम्यं स्नानं यस्य पादोदकं हरेः ॥
काश्यामुत्तरवाहिन्यां गङ्गायान्तु स्मृतस्य किम् ।
यस्य पादोदकं विष्णोर्मुखे चैवावतिष्ठते ॥”
किञ्च ।
“पीत्वा पादोदकं विष्णोर्योऽन्यतीर्थानि गच्छति ।
अनर्घ्यरत्नमुत्सृज्य लोष्ट्रं वाञ्छति दुर्म्मतिः ॥
कुरुक्षेत्रसमो देवी विष्णुपादोदकं मतः ।
पतेद् यथाम्बयं पुण्यं नित्यं भवति तद्गृहे ॥
गयापिण्डसमं पुण्यं पुत्राणामपि जायते ।
पादोदकेन देवस्य ये कुर्युः पितृतर्पणम् ॥
नास्ति तेषां भयं तस्य प्रेतजन्यं न राक्षसम् ।
न रोगस्य भयं चैव नास्ति विघ्नकृतं भयम् ॥
न दुष्टा नैव घोराश्चाप्यपरोत्थभयं नहि ।
ग्रहाः पीड़ां न कुर्व्वन्ति वैरा नश्यन्ति दारुणाः ॥
किं तस्य तीर्थगमने देवर्षीणाञ्च दर्शने ।
यस्य पादोदकं मूर्द्ध्नि शालग्रामशिलोद्भवम् ॥
प्रीतो भवति मार्त्तण्डः प्रीतो भवति केशवः ।
ब्रह्मा भवति सुप्रीतः प्रीतो भवति शङ्करः ॥
पादोदकस्य माहात्म्यं यः पठेत् केशवाग्रतः ।
स याति परमं स्थानं यत्र देवो जनार्द्दनः ॥”
ब्रह्माण्डपुराणे श्रीब्रह्मनारदसंवादे ।
“प्रायश्चित्तं यदि प्राप्तं कृच्छ्रं वा त्वघमर्षणम् ।
सोऽपि पादोदकं पीत्वा शुद्धिं प्राप्नोति तत्क्षणात् ॥
अशौचं नैव विद्येत सूतके मृतकेऽपि च ।
येषां पादोदकं मूर्द्ध्नि प्राशनं ये प्रकुर्व्वते ॥
अन्तकालेऽपि यस्येह दीयते पादयोर्जलम् ।
सोऽपि सद्गतिमाप्नोति सदाचारैर्बहिष्कृतः ॥
अपेयं पिबते यस्तु भुङ्क्ते यच्चाप्यभोजनम् ।
अगम्यागमना ये वै पापाचाररता ये नराः ।
तेऽपि पूता भवन्त्याशु सद्यः पादाम्बुसेवनात् ॥”
किञ्च ।
“अपवित्रं यदन्नं स्यात् पानीयं चापि पापिनाम् ।
भुक्त्वा पीत्वा विशुद्धः स्यात् पीत्वा पादोदकं
हरेः ॥
शमलञ्चात् पञ्चगव्यात् महाकृच्छ्राद्विशिष्यते ।
चान्द्रायणात् पादकृच्छ्रात् पराकादपि सुव्रत ।
कायशुद्धिर्भवेदाशु पीत्वा पादोदकं हरेः ॥
अगुरुं कुङ्कुमं चापि कर्पूरं चानुलेपनम् ।
विष्णुपादाम्बुसंगम्यं तद्धि पावनपावनम् ॥
हरिपूजन्तु यत्तोयं विष्णुना प्रभविष्णुना ।
तद्धि पापहरं पुत्र ! किं पुनः पादयोर्जलम् ॥
सकर्पूरं च पुत्र ! शिरसा विष्णुतत्परः ।
धारयामि दिवारात्रं माहात्म्यं विदितं मम ॥
विघ्नप्रशमनः पुत्र स्पर्शं मर्द्दितं मया ।
दृष्ट्वा मे मनसो न बालकं करावन ॥
धारयेत् सदा मूर्द्ध्नि पादजं पुत्र वैष्णवः ॥
यथाक्रूरान् दुःखौघान् नाशयामि पुत्रक ।”
विष्णुधर्म्मोत्तरे ।
“अतः परतरं पुण्यं सर्व्वपापविनाशनम् ।
सर्व्वमङ्गलमङ्गल्यं सर्व्वदुःखविनाशनम् ।
दुःस्वप्ननाशनं पुण्यं विष्णुपादोदकं शुभम् ।
सर्व्वोपद्रवहन्तारं सर्व्वव्याधिविनाशनम् ।
सर्व्वोत्पातप्रशमनं सर्व्वतापनिवारणम् ॥
सर्व्वकल्याणसुखदं सर्व्वकामफलप्रदम् ।
सर्व्वसिद्धिप्रदं धन्यं सर्व्वधर्म्मविवर्द्धनम् ॥
सर्व्वशत्रुप्रशमनं सर्व्वभोगप्रदायकम् ।
सर्व्वतीर्थस्य फलदं मूर्द्ध्नि पादाम्बुधारणम् ॥
प्रयागस्य प्रभासस्य पुष्करस्य च सेवने ।
पृथूदकस्य तीर्थस्य स्नानान्नो लभते फलम् ।
चक्रतीर्थे फलं यादृक् तादृक् पादाम्बुधारणात् ॥
सरस्वत्यां गयायाञ्च गत्वा यत् प्राप्नुयात् फलम् ।
तत् फलं लभते येऽत्र मूर्द्ध्नि पादाम्बुधारणात् ॥”
स्कान्दे ।
“पादोदकस्य माहात्म्यं देवो जानाति शङ्करः ।
विष्णुपादच्युता गङ्गा शिरसा येन धारिता ॥
स्थानं नैवास्ति पापस्य देहिनां देहमध्यतः ।
सबाह्याभ्यन्तरं यस्य स्नानं पादोदकेन वै ॥
पादोदं विष्णुनैवेद्यमुदरे यस्य तिष्ठति ।
नाश्रयं लभते पापं स्वयमेव विनश्यति ॥
महापापग्रहग्रस्तो व्याप्तो रोगशतैरपि ।
हरेः पादोदकं पीत्वा मुच्यते नात्र संशयः ॥
शिरसा तिष्ठते येषां नित्यं पादोदकं हरेः ।
किं करिष्यन्ति ते लोके तीर्थकोटिमनोरथैः ॥
अयमेव परो धर्म्म इदमेव परं तपः ।
इदमेव परं तीर्थं विष्णुपादाम्बु यत् पिबेत् ॥”
तत्रैव शिवोमासंवादे ।
“विलयं यान्ति पापानि पीते पादोदके हरेः ।
किं पुनर्विष्णुपादोदं शालग्रामशिलाप्लुतम् ॥
विशेषेण हरेत् पापं ब्रह्महत्यादिकं प्रिये ।
पीते पादोदके विष्णोर्यदि प्राणैर्विमुच्यते ।
धूत्वा यमभटान् सर्व्वान् वैष्णवं लोकमाप्नुयात् ॥
तत्रैव शिवकार्त्तिकेयसंवादे शालग्रामशिला-
माहात्म्ये ।
“छिन्नस्तेन महासेन ! गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैश्च तीर्थैश्च पीत्वा पादोदकं शुचिः ॥
इहभारते मुखकोटिमालाभरणे ।
हरिपादोदकं यस्तु पतमानश्च धारयेत् ।
न स्यात् कर्म्मणीदं तु विष्णोः प्रियतरं यथा ॥
अकालमृत्युहरणं सर्व्वव्याधिविनाशनम् ।
सर्व्वदुःखोपशमनं हरिपादोदकं शुभम् ॥”
तत्रैव सहस्रनामाख्ये ।
“हरिपादोदकस्पर्शाद्भक्तो वीतकल्मषः ।
दिव्यं विमानमारुह्य हरिलोकमवाप्नुयात् ॥
हरिपादोदकं यस्य शिरसा धारितं सदा ।
नास्तिकोऽपि नरा यस्य याति परमं पदम् ॥”
हरिभक्तिसुधोदये ।
“पादं पूर्व्वं त्रिविक्रमस्य ब्रह्मणः कमण्डलौ
विष्णोः ... पादाम्बु ... ॥

कोपे च हि । पानार्हद्रव्यविशेषः । पाना इति बङ्गभाषा । शरबत् इति पारस्यभाषा । तत्र आम्लिकापानीयं पित्तशमनाशकम् । सित-दाडिमोत्थपानीयं प्रतिश्यायकासघ्नम् । आम्र-दाडिमोत्थपानीयं उदरविकारे धारणं क्षुधावृद्धि-कारकञ्च । निम्बूपानीयं हृदि तृष्णाशमनं पित्तज्वर-निवारणं मन्दाग्निहारणञ्च । नागरङ्ग-पानीयं कासपित्तविनाशकं मलस्तम्भनाशकं बलदञ्च । सैन्धवपानीयं बलकारकं उन्माद-रक्तपित्तरोगाग्निमान्द्यकारकं रतिशक्तिवर्द्धकं उदर-विकारोपकारकञ्च । इति पाकराजेश्वरः । (अस्य पानकशब्देऽपि द्रष्टव्यम् ॥ * ॥) जल-दानविधिर्यथा,—

यम उवाच ।

"दत्ते जलं विप्र ! मम लोके तु दुर्लभम् ।
पानीयं अन्नतस्तस्मात् दातव्यं सुखमिच्छता ॥
जलेऽहं कारयेत् कूपं वापीं वा बहुसञ्चयम् ।
बहुस्रोताकुले देशे धर्म्मपत्नीपतौ विमम् ॥"

इति वह्निपुराणम् ॥

तड़ागादौ पानफलं यथा,—
"पानीयं प्राणिनः प्राणाः पानीयं पावनं मतम् ।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥"

इति स्मृतिः ॥

तत्पर्य्यायः ।
"पानीयजीवनवनान्यमृताम्बराम्भः-
पाथोऽम्बुकम्बरपयःसलिलोदकानि ।
आपः कबन्धकजलान्यपि नीरं
कीलालवारिकमलानि विषार्णसी च ॥
भुवनं दकवारान्वितं तोयं कमलोदकम् ।
क्षीरं पयरं निकरं मेघप्रसो रसः ॥"

अस्य साधारणगुणाः ।
"पानीयं मधुरं हिमञ्च रुचिदं क्लान्तिविषोन्मर्द्दं
मोहभ्रान्तिमदापहारि कुरुते तृष्णाप्रशान्तिं परम् ।
निद्रालस्यविदाहनं त्रिदशदं क्लान्तिश्रमारोधनं
तृष्णा जीवनदायि सञ्जीवनं सकलप्राणिनाम् ॥"
मन्दो ज्वराम्बु भूमिजं बहुधं दोषदायकम् ।
निरस्तिरं लघु शस्तं पथ्यं स्यात् सुखावहम् ॥"
देशभूमिविशेषजगुणाः ।
"जलं जाङ्गलदेशजं लघुतरं वातादिदोषापहं
हेमाक्षाङ्गलजञ्च दुर्जरतरं दोषावहं दूषणम् ।
जाङ्गलञ्च हिमाद्रिशैलजमलं पथ्यं लघु स्वादुकं
मेध्यं साधारणाद्रिजं सहजकं यन्नाम्बुपं
जलम् ॥"

इति राजनिर्घण्टः ॥

"त्रिविधं कथितं विप्र ! पर्णैः शारदयामिभिः ।
दिव्यं दिव्यं वान्यं दुर्लभं च दिव्यं जलम् ॥
तत्कालैकरणं तूर्णं वायुना स्थापितं गुरुः ।
दर्शनीयमपि सदा यतं शीतरश्मिना च ॥
तस्मादुत्तमहीद्रं पैतमात्यन्तोद्भवम् ।
वैधात्रं दोषदं तूर्णं त्रिविधदोषप्रकोपनम् ॥"

इति राजवल्लभः ॥

पानीयनकुलः, पुं, (पानीये नकुल इव ।) उद्रः । उदबिडाल इति भाषा । यथा,—
"उद्रस्तु जलमार्जारः पानीयनकुलो जली ॥"

इति हेमचन्द्रः ॥

पानीयपृष्ठजः, पुं, (पानीयपृष्ठे जलोपरि जायते इति । जन+डः ।) कुम्भी । इति रत्नमाला ॥ पाना इति भाषा ॥

पानीयफलं, क्ली, (पानीयजातं फलमिति मध्यपदलोपी समासः ।) मखान्नम् । इति भावप्रकाशः ॥ माखाना इति भाषा ।

पानीयमूलकं, क्ली, (पानीयमेव मूलमस्य । ततः कप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

पानीयवर्णिका, स्त्री, (पानीयं वर्णयति प्रकाशयतीति । वर्णि+ण्वुल् । टाप् अत इत्वञ्च ।) बालुका । इति राजनिर्घण्टः ॥

पानीयशालिका, स्त्री, (पानीयस्य जलस्य वितरणार्थं शालिका शालायामल्पार्थे कः ।) जलाश्रयगृहम् । पानिशाला इति जलछत्र इति च भाषा । तत्पर्य्यायः । प्रपा २ । इत्यमरः ॥ तन्निर्माणफलं यथा,—
"कूपारामप्रपाकारी तथा वृक्षादिरोपकः ।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम् ॥"

इत्युद्वाहतत्त्वे यमः ॥

पानीयामलकं, क्ली, (पानीयमामलकं पानीयाख्यमामलकं वा ।) प्राचीनामलकम् । पानि आमला इति भाषा । अस्य गुणाः । दीपनत्व-ज्वरनाशित्वम् । इति भावप्रकाशः ॥ मल-शुद्धिमलबद्धकारित्वम् । अम्लत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥

पानीयालुः, पुं, (पानीयसम्भूत आलुः ।) कन्द-विशेषः । पानियालु इति हिन्दीभाषा । तत्पर्य्यायः । जलालुः २ स्वल्पालुः ३ वालुकः ४ । अस्य गुणः । त्रिदोषनाशित्वम् । अल्पवीर्य्यकारित्वञ्च । इति राजनिर्घण्टः ॥

पानीयाला, स्त्री, (पानीयं जलं अस्यतीति । असु क्षेपणे + बाहुलकात् णः । ततष्टाप् ।) बल्वजा । इति राजनिर्घण्टः ॥

पान्थः, त्रि, (पन्थानं नित्यं गच्छतीति वा । "पन्थो ण नित्यम् ।" ५ । १ । ७६ । पथः पन्थ च इत्यनेन पन्थादेशे कृते णः ।) पथिकः । इत्यमरः । २ । ८ । १७ ॥ (यथा, हरिवंशे । ४५ । २ ।
"यथा निदाघदग्धेषु धर्म्मार्त्तपरिपीडितः ।
पान्थो याति जलं दृष्ट्वा त्वरितं तृषिता-
न्वया ॥")

पापं, क्ली, (पाति रक्षति आत्मानमस्मादिति । पा+"पानीविषिभ्यः पः ।" उणा० ३ । २३ । इति पः ।) अधर्म्मम् । दुरितम् । तत्पर्य्यायः । अघम् २ पाप्मा ३ पापम् ४ किल्विषम् ५ कल्मषम् ६ कलुषम् ७ वृजिनम् ८ एनः ९ अंहः १० दुरितम् ११ दुष्कृतम् १२ । दुष्कृतः । पातकम् १३ तूलम् १४ कल्कम् १५ अंहसम् १६ पापकम् १७ । इति शब्दरत्नावली ॥ (विविधकर्म्महेतुकविहितकर्म्मानुष्ठानात् पापोत्पत्तिं दर्शयन्नाह श्रीधरस्वामी ।
"अनुष्ठानं निषिद्धस्य स्वामी विहितवर्ज्जनः ।
कृत्वा जायते पापं क्षेमदोषामयप्रदम् ॥
ज्ञानतो ज्ञानतश्चैव यदाशिवोपकारकात् ।
तदेव पापं द्विविधं ज्ञातोऽज्ञात कृतादिके ॥
यदाऽचिदकृतात् पापात् मुच्यते दानधारणात् ।
अज्ञानकृतमुच्यते सर्व्वैः प्रायश्चित्ता समाचरेत् ।
प्रायश्चित्तात्यथा दर्शं पुराण ते नराः ।
नरकान् न निवर्त्तन्ते दृष्टान्त विवर्ज्जिताः ॥"

इति श्रीमदानिरुद्धतर्के ।)

तद्दशविधं यथा,—
"प्राणाभिपातनं स्तैन्यं परदाराभिगामि च ।
त्रीणि पापानि कायेन सर्व्वतः परिवर्ज्जयेत् ॥
असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा ।
चत्वारि वाचा राजेन्द्र ! न जल्पेन्न चिन्तयेत् ॥
अनभिध्या परस्वेषु सर्व्वसत्त्वेषु सौहृदम् ।
कर्म्मणा फलमस्तीति त्रिविधं मनसा चरेत् ॥"

इति शान्तिपर्व्वणि राजधर्म्मः ॥

महापातकादीनि पातकशब्दे लिखितानि ॥ पापस्य पुण्यप्रभावविनाशितं यथा,—
"धर्म्माचरितो राजन् ! यतः पतति गौरवे ।
सर्व्वे राजर्षिमालस्तु भयात्तदपि भिन्नाणि ॥
यदि ज्ञात्वापि निर्विष्ट न पिन् पूर्व्वं स्पृशु ।
पापमाचरितं कर्म्म विनश्यत्युत्तमे ॥
मनसैवं कृतं पापं गुरुशुश्रूषयाऽपहरे ॥"

इति मात्स्ये ९८ अध्यायः ॥ * ॥

तीर्थेषु पापनाशकत्वं तत्र कृतपापस्य दृढ-त्वञ्च । यथा,—
"अन्यत्र हि कृतं पापं तीर्थमासाद्य नश्यति ।
तीर्थे तु यत् कृतं पापं वज्रलेपो भविष्यति ॥
मथुरायां कृतं पापं तत्रैव च विनश्यति ।
एषा पुरी महापुण्या यत्र पापं न विद्यते ॥"

इति वाराहे मथुरामाहात्म्यम् ॥ * ॥

शिवापराधजं यथा,—
"अतः परं प्रवक्ष्यामि शिवापराध सञ्चयम् ।
यत्र देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितृणाञ्च विशेषेण । सर्व्वकर्म्मसु चैव तः ।
ओङ्कारादिविहीनञ्च मारकार्य्यकृतिस्थ वा ॥
कन्यादिकं महापापं ब्रह्मघातजं तथा ।
एतादिविविधं घोरं शास्त्रकारैर्निगद्यते ॥
स्त्रीवधोत्पन्नं पापं परस्त्रीगमनोद्भवम् ।
देवादिद्रव्यहरणं निहतं बहुपापम् ॥
दातिकं तावदादिकं वाचा पापात्मजैव तैः ।
मारणमपाधिकं चक्रोत्थयुक्तं ॥
अतः पापेषु कृत्स्नः प्रभवति यदि शङ्करः ॥"

इति वामने १८ अध्यायः ॥

बाहुल्येनात्मकृतपापानि यथा,—
"ब्रह्मघ्नायत्र पतिमात्रप्रकाशनिवम् ।
ब्राह्मणाश्रमे धौतिकटेन वक्षोपवम् ।
महापापेषु दारमः महापापदेव च ।

एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ।
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत् ॥”
इति कौर्म्मे उपरिविभागे १५ अध्यायः ॥
“आलापाद्गात्रसंस्पर्शात् संवासात् सहभोजनात् ।
आसनाच्छयनाद्यानात् पापं संक्रमते नृणाम् ॥
आसनादेकशय्याया भोजनात् पंक्तिसङ्करात् ।
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥”
इति गारुडे नीतिसारे ११२ अध्यायः ॥
राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा,—
“राजा राष्ट्रकृतात् पापात् पापी भवति वै हरे ! ।
तथैव राज्ञः पापेन तद्राष्ट्रस्थास्तु ये जनाः ॥
वर्णाश्रमाद्यः सर्व्वे पापिनो नात्र संशयः ।
भार्य्यादोषाद्दुष्कृती स्वामी दूषितात् स्वामिनोऽबला ॥
तथा दैशिकपापात्तु शिष्यः स्यात् पातकी सदा ।
शिष्याद्धि पापिनो नित्यं गुरुर्भवति दुष्कृती ॥
पातकी यजमानः स्यात् पापिनोऽङ्ग ! पुरोधसः ।
पुरोहितस्तथा पापी यजमानादसौ ध्रुवम् ॥”
अदत्तपुण्यपापभागित्वं यथा,—
“अदत्तानि च पुण्यानि पापानि च यथा प्रिये ! ।
प्राप्नोति कर्म्मणा येन तद्यथावन्निशामय ॥
देशग्रामकुलानि स्युर्भागभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्त्ता फलभुक् पुण्यपापयोः ॥
अकृतेऽपि च संसर्गे व्यवस्थेयमुदाहृता ।
संसर्गात् पुण्यपापानि यथा यान्ति निबोध तत् ॥
एकत्र मैथुनाद्यानादेकपात्रस्थभोजनात् ।
फलार्द्धं प्राप्नुयान्मर्त्त्यो यथावत् पुण्यपापयोः ॥
स्पर्शनाद्भाषणाच्चापि परस्य स्तवनादपि ।
दशांशं पुण्यपापानां नित्यं प्राप्नोति मानवः ॥
दर्शनश्रवणाभ्याञ्च मनोध्यानात्तथैव च ।
परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥
परस्य निन्दां पैशुन्यं धिक्कारञ्च करोति यः ।
तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥
कुर्व्वतः पुण्यकर्म्माणि सेवां यः कुरुते नरः ।
पत्नी भृत्योऽथ शिष्यो वा यथानीयोऽपि मानवः ।
नाथ सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥
एकपंक्तिगतो यस्तु लङ्घयन् परिवेशयेत् ।
तस्य पापषडंशन्तु लभते परिवेशकः ॥
स्नानसन्ध्यादिकं कुर्व्वन् यः स्पृशेद्वा प्रभाषते ।
स पुण्यकर्म्मकर्त्ता तं दद्यात् षष्ठं सुनिश्चितम् ॥
धर्म्मोद्देशेन यो द्रव्यं परं याचते नरः ।
तत् पुण्यं कर्म्मजं तस्य दद्यात् द्रव्यानुपात् फलम् ॥
अपहृत्य परस्वं तु पुण्यकर्म्म करोति यः ।
कर्म्मकृत् पापभोक्ता च धनवान् लभते फलम् ॥
नापहृत्य ऋणं यस्तु परस्य म्रियते नरः ।
धनी तत् पुण्यमाप्नोति साधयन्नानुरूपतः ॥
बुद्धिदस्त्वनुमन्ता च यश्चोपकरणप्रदः ।
बलदश्चापि षष्ठांशं प्राप्नुयात् पुण्यपापयोः ॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ।
शिष्याद्गुरुः स्त्रिया भर्त्ता पिता पुत्रात्तथैव च ।
स्वपतेरपि पुण्यस्य भार्य्यार्द्धं समवाप्नुयात् ॥
परहस्तेन दानादि कुर्व्वतः पुण्यकर्म्मणः ।
विना भृतकशिष्याभ्यां कर्त्ता षष्ठांशमाहरेत् ।
आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥
श्रीकृष्ण उवाच ।
इत्थं ह्यदत्तान्यपि पुण्यपापा-
न्यायान्ति नित्यं परसञ्चितानि ।
इत्थञ्च चाख्यातमितिहासमग्रं
पुराभवं पुण्यमतिप्रियञ्च ॥”
इति पाद्मोत्तरखण्डे । ७१।१५७ अध्यायः ॥
क्षुद्रजन्तुप्रभृतीनां वधे पापं तत्प्रायश्चित्तञ्च यथा,—
“वधे च क्षुद्रजन्तूनां हिंसकानाञ्च मक्षिकाः ।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते ॥
अहिंसकानां क्षुद्राणां वधे शतगुणं ध्रुवम् ।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना ॥
वधे विशिष्टजन्तूनां मत्स्यादीनाञ्च कामतः ।
ततः शतगुणं पापं निश्चितं मनुरब्रवीत् ॥
नराणां म्लेच्छजातीनां वधे शतगुणं ततः ।
म्लेच्छानाञ्च शतानाञ्च यत् पापं लभते वधी ।
सच्छूद्रैकस्य च वधे तत् पापं लभते पुमान् ॥
सच्छूद्राणां शतानाञ्च यत् पापं लभते वधी ।
तत् पापं लभते नूनं गोवधेनैव निश्चितम् ॥
गवां दशगुणं पापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥” * ॥
पापिदर्शनजन्यपापं यथा,—
“पापं यद्दर्शने तात ! कथयामि निशामय ।
दुःस्वप्नं पापबीजञ्च केवलं विघ्नकारकम् ॥
गोघ्नञ्च ब्रह्मघ्नं वापि कृतघ्नं कुटिलं तथा ।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥
मिथ्यासाक्ष्यप्रदातारं यथातिथ्यविवञ्चकम् ।
ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥
अश्वत्थघातिनं दुष्टं शिवविष्णुविनिन्दकम् ।
अदीक्षितमनाचारं सन्ध्याहीनं द्विजन्मनाम् ॥
देवलं वृषवाहञ्च शूद्राणां सूपकारकम् ।
शवदाही च शूद्राणां शूद्रान्नभोजिनम् ॥
अबीरां द्विजनारीञ्च देवब्राह्मणनिन्दकम् ।
पतिभक्तिविहीनाञ्च विष्णुभक्तिविहीनकम् ॥
शूद्राणां विप्राणाञ्चैव चाण्डालं व्यभिचारिणीम् ।
सततं क्रोधयुतं दुष्टमन्यायञ्च चाटकम् ॥
चौरं मिथ्यावादिनञ्च शरणागतघातिनम् ।
मांसापहारिणञ्चैव ब्राह्मणं वृषलीपतिम् ॥
ब्राह्मणीगामिनं शूद्रं द्विजं वार्द्धुषिकन्तथा ।
अगम्यागामिनं दुष्टं चतुर्भेदं नराधमम् ॥
मातामहस्य माता च गुरुश्च भगिनी तथा ।
गुरुपत्नी पुत्रपत्नी सोदरस्य प्रिया सती ।
मातृष्वसा पितृष्वसा भागिनेयप्रिया तथा ।
मातुलानी सपत्नी च पितृव्यस्त्री स्वकन्यका ॥
निकृष्टा परकन्यैव चाण्डाल्यश्च तथा स्मृताः ।
कीर्त्तिताः सामवेदे च पर्य्यटाः कर्म्म वत्स ! ॥
एतान् दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां लभेन्नरः ।
स्नात्वा देवादिमान् दृष्ट्वा सूर्य्यं दृष्ट्वा हरिं स्मरेत् ॥
कामतो यदि पश्यन्ति तत्तुल्यास्ते भवन्ति वै ।
तस्मात् सन्तो न पश्यन्ति पापभीता ब्रजेश्वर ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७८ अध्यायः ॥
(अनिष्टम् । वधः । इति रामानुजः ॥ यथा, रामायणे । २ । ८ । १२ ।
“तस्मात् न लप्स्यते रामः पापं किञ्चित् करिष्यति ।
रामस्तु भरतं पापं कुर्य्यादेव न संशयः ॥”
तद्वति, त्रि । इत्यमरः ॥ यथा, महाभारते । १ । ९० । १९ ।
“पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव ! ॥”)

पापकं, क्ली, (पापमेव । स्वार्थे कन् ।) पापम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ७४ । २० ।
“मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥”
पापेन कायतीति । कै + कः । पापवति, त्रि । यथा, महाभारते । १ । ७४ । २९ ।
“एकोऽहमस्मीति च मन्यसे त्वं
न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्म्मणः पापकस्य
यस्यान्तिके त्वं वृजिनं करोषि ॥”)

पापकृत्, त्रि, (पापं करोतीति । पाप + कृ + “सुकर्म्मपापमन्त्रपुण्येषु कृञः ।” ३ । २ । ८९ । इति क्विप् ।) पापकर्त्ता । यथा,—
“स्नानेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापाद्दानेन च दमेन च ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(यथा च महाभारते । १ । ९० । १९ ।
“पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ॥”)

पापग्रहः, पुं, (पापोऽशुभकारी ग्रहः ।) अशुभग्रहः । कुजः । राहुः । शनिः । पापयुक्तो बुधः । रविः । यथा, ज्योतिस्तत्त्वे ।
“क्षीणेन्दुः कुजो राहुः शनिः केतुश्च दङ्गणः ।
रविः पापा भवन्त्येते शुभाः शेषाः प्रकीर्त्तिताः ॥”

पापघ्नः, पुं, (पापं हन्तीति । पाप + हन + “अमनुष्यकर्त्तृके च ।” ३ । २ । ५३ । इति टक् ।) तिलः । इति राजनिर्घण्टः ॥ पापनाशके, त्रि । इति मुग्धबोधव्याकरणम् ॥

पापचेलिका, स्त्री, (पापमशुभं चेलति गच्छतीति । चेल + ण्वुल् + टाप् । कापि अत इत्वम् ।) पाठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

पापचेली, स्त्री, (पापं चेलतीति । चेल + अच् + गौरादित्वात् ङीष् ।) पाठा । इत्यमरः । २ । ४ । ८४ ॥

पापनक्षत्रः, पुं, (पापो नक्षत्रः ।) पूर्व्वफाल्गुनी, इति ज्योतिषसारसंग्रहः ॥

पापपतिः, पुं, (पापोत्पादकः पतिः ।) उपपतिः । इति त्रिकाण्डशेषः ॥

पापपुरुषः, पुं, (पापः पापरूपः पुरुषः ।) पापमयपुरुषः । यथा,—

"वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ।
खड्गचर्मधरं क्रुद्धं कुक्षौ विचिन्तयेत् ॥"

इति भूतशुद्धितन्त्रे पञ्चमः पटलः ॥

"अङ्गुष्ठमात्रं पुरुषं कृष्णवर्णं भयानकम् ।
ब्रह्महत्याशिरस्कं तं पापपुरुषमेव च ॥
स्वर्णस्तेयभुजं घोरं सुरापानहृदं तथा ।
गुरुतल्पकटिं चैव तत्संसर्गिपदं तथा ॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ।
खड्गचर्मधरं दुष्टं कुक्षौ पापं विचिन्तयेत् ॥
अधोमुखं कृष्णवर्णं ध्यात्वा पापं तु दाहयेत् ।
सर्वपापहरं ध्यानं पापपुरुषनाशनम् ॥"

इति पाद्मे क्रियायोगसारे २१ अध्यायः ॥

पापमुक्तः, त्रि, पापाद्मुक्तः । निष्पापः । इति केचित् । स च यथा,—

"यः सदा सर्वभूतेषु दयावान् धर्मतत्परः ।
स पापेभ्यो विमुक्तः स्यात् न स पापैर्विलिप्यते ॥
गुरुदेवद्विजातीनां पूजकः शुद्धमानसः ।
सत्येन धर्मयुक्तश्च न पापेभ्यः प्रमुच्यते ॥
अहिंसकः सर्वभूतेषु क्षमावान् विजितेन्द्रियः ।
सुमनाः सदा यश्च स पापेभ्यः प्रमुच्यते ॥
परद्रव्येषु निःस्पृहः परदारविवर्जितः ।
ब्रह्मविद्यारतो यस्तु स पापेभ्यः प्रमुच्यते ॥
विरक्तः सर्वकामेभ्यो निर्द्वन्द्वश्च न लोलुपः ।
यो नित्यं सत्यवादी धर्मवान् प्रमुच्यते ॥
अद्रोही निरहङ्कारः परदारविवर्जितः ।
अलोभश्च यो नरः स पापेभ्यः प्रमुच्यते ॥
गुरुशुश्रूषणे युक्तो ब्रह्मचारी च यः ।
गुरुभक्तः शुद्धचेताः स पापेभ्यः प्रमुच्यते ॥
व्रतानि च यः कुर्वीत तीर्थानि च सेवते ।
क्रोधमत्सरहीनो यो निर्मलात्मा च यः ॥
भागीरथ्यां स्नानं च स पापेभ्यः प्रमुच्यते ॥
नित्यं धर्मरतो भक्त्या हरिभक्तिपरायणः ।
ब्राह्मणान् पूजयेन्नित्यं स पापेभ्यः प्रमुच्यते ॥"

इति महाभारतम् ॥

पापरोगः, पुं, (पापोद्भवो रोगः ।) मसूरिकारोगः । इति हेमचन्द्रः ॥ (यथा, मनुः । ११ । ४९ ।

"इह दुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा ।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ॥"

सुरापानादिजन्या सूक्ष्मदेहावरणस्था पापविशेषात् प्राप्नोति पापरोगैश्च पीड्यते ॥"
यद्यपापजन्यो रोगो भवति तद्यत्वं कर्मविपाकग्रन्थे द्रष्टव्यम् ॥)

पापर्द्धिः, स्त्री, (पापार्थं ऋद्धिः हिंसैव ।) मृगया । इति हेमचन्द्रः । ३ । ५८१ ॥ (यथा, पञ्चतन्त्रे । ५ । ७० ।

"अस्ति कश्चिन्महारण्ये कश्चित् पुलिन्दः ।
स च पापर्द्धिं कर्त्तुं वनं प्रस्थितः ॥")

पापलं, क्ली, परिमाणविशेषः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पापं लातीति । ला + कः ।) पापग्राहके, त्रि ॥

पापशमनी, स्त्री, (पापं शमयतीत्यनयेति । शम + णिच् + करणे ल्युट् । स्त्रियां ङीप् ।) शमीवृक्षः । इति राजनिर्घण्टः ॥ पातकनाशिका च ॥

पापात्मा, [न्] पुं, (पापः पापविशिष्ट आत्मा यस्य । पापे अधर्मे आत्मा बुद्धिर्यस्येति वा ।) पापी । यथा,—

"पापात्मनां सदा गतिं विस्तरेण वदाम्यहम् ।
षडशीतिसहस्राणि योजनानि दुरत्ययाम् ॥
प्रोक्तो मार्गस्य विस्तारः सर्वदुःखान्वितस्तथा ।
क्वचिद्भयावह भस्मनाट्टैः क्वचिद्दग्धः क्वचित् ।
क्वचित् क्वचित् क्रिमयश्च क्वचित् पङ्कपालुकम् ॥
क्वचित् क्वचिदसितप्रकला: क्वचित्तप्तशिलातलाः ।
क्वचित् क्वचिज्ज्वलद्वह्निः क्वचिदङ्गारवर्षणम् ।
क्वचिच्छिलावृष्टिरपि पुनश्चित पङ्कवर्षणम् ॥
उग्रगन्धाग्नि क्वापि क्वचिन्न पापमर्दनम् ।
क्वचिदन्धतमिस्रं क्वापि गच्छन्ति यान्ति मानवाः ॥
गम्भीरा अन्धकूपाश्च दुःखदायका इव ।
क्वापि कण्टकपाषाण नाराचशरसङ्कुलाः ॥
पापाचारैर्नराः क्वापि दुरारोहाः पदे पदे ।
क्वचित्ताडयन्ति क्वचित् शोणित-

कर्दमाः ।

क्वचिद्दन्दशूकाश्च क्वचित् काकाः क्वचिद्गृध्राः ।
क्वचित् क्वचित् सुकण्टकाश्च लोहाश्च क्वचित्

क्वचित् ।

क्वचिदग्नी राशयश्च दुर्गन्धा सोमराशयः ।
क्वचित् वज्रकण्टका इव पीडयन्ति क्वचित्

क्वचित् ।

श्रीगन्धा मेघः क्वापि शतिकाशाल्मला द्रुमाः ।
दहनश्च कर्दमः क्वापि क्वचिच्छिला भयङ्कराः ॥
एवं बहुविधक्लेशैर् यातनाभिर्निपीड्यते ।
तत्र यान्ति हि पापिष्ठा यान्ति पापिनो गच्छन्ति दुःखिताः ॥
यथा विमूढचित्ताश्च पीड्यमानाश्च दुःखिताः ।
गच्छन्ति पापिनस्तत्र दुःखशोकाकुलाः ॥"

इति क्रियायोगसारे २२ अध्यायः ॥

पापान्तं, क्ली, (पापं अन्तयतीति । अन्त + "कर्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तीर्थविशेषः । तत्र स्नानात् पापान्तं भवतीत्यर्थः । यथा,—

"पापान्तं महातीर्थं सर्वपापविनाशनम् ।
तत्र स्नात्वा नरो याति विष्णुलोकं सनातनम् ।
पुष्करे तथा स्नात्वा सर्वपापं प्रमुच्यते ।
स्नात्वा तत्र नरो राजन् सर्वतीर्थफलं लभेत् ॥
ततः स निजपापाय प्रायश्चित्तं विधाय च ।
पुरोहितेन संयुक्तो दत्त्वा दानं यथाविधि ॥
तत्र स्नात्वा विमलः पुण्यकीर्तिर्यशो महत् ।
प्राप्नोति स राजा च सुखं प्रयाति न संशयः ॥
ब्राह्मणा वाचयामासुः पुण्याहं विधिवत्तदा ।
प्रायश्चित्तविधानेन कृत्वा पुण्यं शुभम् ॥
स्नात्वा च तीर्थे तस्मिन् पापं मुक्तः पुनः ।
उत्थाय पापाच्च सर्वपापात् स्वर्गं ययौ ॥
तस्मिन् तीर्थे तु यः स्नाति महापापी विमुच्यते ।
स प्राप्नोति गतिं दिव्यां सर्वदा विष्णुलोकं च ॥
तत्र तीर्थं सुविख्यातं पापान्तं नाम नामतः ।
सत्ये च अक्षयं तत्र सर्वपापहरं शुभम् ॥
तस्मिन् स्नात्वा च भक्त्या च गच्छति सर्वदा ।
धर्मं प्राप्नोति यज्ञस्य अश्वमेधस्य मानवः ॥
पापान्तमिति विख्यातं तीर्थं पुण्यतमं द्विजाः ॥"

इति वामनपुराणे ४५ अध्यायः ॥

पापी, [न्] पुं, (पापमस्यास्तीति । इनिः ।) पापयुक्तः । यथा,—

"रुधिरोक्षिताः केचित् केचित् कर्दमभूषिताः ।
केचित् केचित् ज्वलदग्निना पथि गच्छन्ति

पापिनः ॥

क्रन्दन्तो यमपथा केचित् श्वभ्रजालाकुलेक्षणाः ।
शोकेन यान्ति केचिदु केचित् क्रन्दन्ति पापिनः ।
कश्चित् पापं महापापाद्यत्नं पापिनो यान्ति ।
कण्ठाग्रे कश्चिदन्धः कश्चिच्च मुखादपि ।
कश्चिदधोमुखाः केचिन्निर्दयैर्यमकिङ्करैः ।
अङ्कुशाग्रैर्विनिर्भिद्य क्रीडयामासुः द्विज ॥
ग्रामे कृमिसङ्कीर्णे मार्गं दत्वा यदुच्यते ।
यातनाभिर्यमदूतैः केशाश्च संकर्षणा ।
विकृताकाराः कर्णहीनाः पापिनो यान्ति कण्टकैः ।
व्याघ्रैर्भक्ष्यमाणाश्च पथि पापिनः ।
काश्चिद्यमभयाः केचित् काश्चित् पतिव्रता पापिनः ।
काश्चिद्रुदन्ति यान्ति नरके भयविह्वलाः ।
शोकार्ता पापिनः काश्चित् करपादहीनाः ।
भिन्ना भिन्ना यमपथे यान्ति यमालयम् ।
यातनाशरीराः केचिद्दुःखेन पापा यान्ति ।
अन्ये तु बहुभिः केचिद्बहुविधा यान्ति ।
एवं विलापशताः आर्त्ताः क्रोशन्तः ।
यमदूतैस्ताड्यमानाः पापिनोऽपि च तत्र वै ॥"

इति पाद्मे क्रियायोगसारे २२ अध्यायः ॥

पामा, [न्] स्त्री, (पा + "नामन् सीमन्निति ।" उणां । ४ । १५० । इति मनिन् । पृषोदरादित्वात् साधुः ।) पामन् । इत्यमरः । २ । ६ । ५३ ॥ (यथा, मनुः । ३ । ७ ।

"अपि तु नक्तदोषेण परिहर्त्तव्यानि तानि कुलानि ।
न विवाहेषु पामायां दत्वा धर्मकामार्थिनः ॥")

पाम, [न्] स्त्री, (पा + मनिन् ।) विचर्चिका । इत्यमरः । २ । ६ । ५३ ॥ (यथा, भागवते ।

"सुक्ष्मा सर्पाः पीडयन्ति मानवान्
पामिदूषिताः कण्डूकाः कराला ॥")

पामघ्नः, पुं, (पामं हन्तीति । हन् + टक् ।) गन्धकः । इति जटाधरः ॥

पामघ्नी, स्त्री, (पामं हन्तीति । हन्+टक् । टित्वात् ङीप् ।) कटुका । इति राजनिर्घण्टः ॥

पामनः, त्रि, (पामास्यास्य इति । "लोमादि पामादिपिच्छादिभ्यः शनेलचः ।" ५ । २ । १०० । इत्यस्य वार्त्तिकोक्त्या "पामादिभ्यो नः ।" इति नः ।) पामरोगविशिष्टः । तत्पर्य्यायः । कच्छुरः २ । इति हेमचन्द्रः ॥

पामरः, त्रि, (पाम पापादिरोगात्मकमस्यास्तीति । पामन्+"अश्मादिभ्यो रः ।" ४ । २ । ८० । इत्यस्य वार्त्तिकोक्त्या रः । ततो न लोपे साधुः ।) खलः । नीचः । इति मेदिनी । रे, १८२ ॥ (यथा, राजतरङ्गिण्याम् । १ । ३०८ ।
"दूरात् पामरपुत्रकैः श्रुतिपथप्राप्तैः प्रवृत्तस्वभूकृतो निर्भरवारिभिः सहमनाः स्वर्भे निमज्जन्निव ॥")
मूर्खः । इति हेमचन्द्रः ॥

पामरोद्धारा, स्त्री, (पामरं उद्धरतीति । उत्+धृ+अण् । ततो अजादित्वात् टाप् ।) गुडूची । इति शब्दचन्द्रिका ॥

पामा, [न्] स्त्री, (पामन्+"मनः ।" ४ । १ । ११ । इति न ङीप् ।) कच्छूः । इत्यमरः । २ । ६ । ५३ ॥ पाँचड़ा इति भाषा ॥ अस्या औषधं यथा,—
"हरिद्रा हरितालञ्च दूर्व्वागोमयसैन्धवम् ।
अयं पिष्टो हन्ति दद्रुं पामानं वै गदं तथा ॥"
अपि च ।
"माहिषं नवनीतञ्च सिन्दूरञ्च मरीचकम् ।
पामा विलेपिता नश्येत् बहुलापि क्षणान्न ॥"
अन्यच्च ।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ॥
विशाला करवीरञ्च अर्कक्षीरं शकृत् पलम् ।
दद्याच्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ।
मृन्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् ॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च ।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते ॥
प्रसूतानामपि स्त्रीणां स्तनौ तैलेन स्रक्षयेत् ।
चिरोत्थितमपि स्निग्धं विवर्णं तत्पलात् हरेत् ॥"
इति गारुडे १८४ । १८८ अध्यायौ ॥

पामारिः, पुं, (पामाया अरिर्नाशकः ।) गन्धकः । इति हेमचन्द्रः ॥

पायसः, पुं क्ली, क्षैरेयः । टारसिन् इति भाषा ॥ यथार्थ संस्कृतः । (पयसः विकारः इत्यण् ।) परमान्नम् । इत्यमरमेदिनीकरौ ॥ अस्य पाकप्रकारो गुणाश्च ।
"अक्षतस्तण्डुलो धौतः सर्पिषा भर्ज्जितो दुग्धेन च ।
तक्रदुग्धेन दुग्धेन पाचितः पायसो भवेत् ॥
पायसः कफकृद्बल्यो निद्राकृत् मधुरो गुरुः ॥"
तस्य पितृदेवादिमुद्दिश्य दाने निःशेषे फलं यथा,—
"पितृनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम् ।
दद्याद्गुडेनापि सार्द्धं महान्नमपि विधिवद्विदेत् ॥
क्षमा भवन्ति पितरस्तस्य वर्षशतं हरे ॥
यच्छन्ति विविधान् कामान् परितुष्टाः पितामहाः ॥"
इति स्कान्दे काशीखण्डे २० अध्यायः ॥
चन्द्रप्रभपायसो यथा,—
"शङ्खक्षीरचतुर्जातचन्द्रकान्तः सुरोचनः ॥"
इति राजवल्लभः ॥
पयोविकारे, त्रि । यथा,—
"कण्डूपकानि तैलेन पायसं दधि शक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥"
इति सिद्धिखण्डे पराशरपुराणम् ॥

पायिकः, पुं, पदातिकः । इति शब्दरत्नावली ॥

पायुः, पुं, (पाति रक्षति शरीरं मलनिःसारणेनेति । यद्वा, पिबति वस्तौषधमनेनेति । पा+"कृवापाजीति ।" उणां १ । १ । इत्युण् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) मलद्वारम् । स तु गर्भस्थस्य मत्स्याभिमांसैर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । अपानम् २ गुदम् ३ धुतिः ४ अधोमर्म्म ५ मलद्वारम् ६ त्रिवलीकम् ७ वलिः ८ । इति हेमचन्द्रः । ३ । २७६ ॥ (यथा, पञ्चदश्याम् । १ । २१ ।
"रजोऽंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु ।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥")
तस्याध्यात्मादि यथा,—
"अपानगतिरपानश्च पायुरध्यात्ममुच्यते ।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
(भरद्वाजपुत्रः । यथा, ऋग्वेदे । ६ । ४७ । २४ । "अश्वथ, पायवेऽदात् ॥"
"पायवे भरद्वाजपुत्रायैतन्नामकायास्मद्दात्रे अश्वथोऽश्वपालितः प्रस्तोकोऽदात् दत्तवान् ।" इति तद्भाष्ये सायनः ॥ पालके, त्रि । यथा, ऋग्वेदे । २ । २ । ७ ।
"सं पायुरंशे यस्तेऽविधत् ॥")

पाय्यं, क्ली, (मीयतेऽनेनेति । मा माने+"पाय्य सान्नाय्येति ।" ३ । १ । १२९ । इति निपातनात् ण्यत्प्रत्ययादिः धत्वं पुगागमश्च ।) परिमाणम् । इत्यमरः । २ । ९ । ८९ ॥ मानम् । इति सिद्धान्तकौमुद्यादिदर्शनात् ॥ पानम् । नियन्तीव, त्रि । इति त्रिकः ॥ (पा पाने+णिच्+यत् ।) पाययितव्ये । यथा, ऋग्वेदे । १ । ५६ ।
"भूतश्च पाय्यः न यतः सुवीर्यं
क्षिप्रं विदेयः स पयोऽर्दनम् ॥")

पार, त् क कर्म्मसमाप्तौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सकं०-सेट् ।) अपपारत् । इति दुर्गादासः ॥

पारं, क्ली, (पारयन्तीति । पार+पचाद्यच् ।) परतीरम् । नदीतीरं तस्मात् परतीरम् । इत्यमरः । १ । १० । ८ ॥ (यथा, कठोपनिषदि ।
"आरम्भेषु परं पारं न जानाति जनस्ततो ।
चरन्ति संख्यभवान् दुर्भ्यां चरन्ति चरन्ति ॥")

पारः, पुं, (पूर्य्यतेऽनेनेति । पॄ+घञ् ।) पारदः इत्यमरटीकायां सारसुन्दरी ॥ प्रान्तभागः, पुं क्ली । इति मेदिनी । रे, ५६ ॥

पारकः, त्रि, (पॄ पूर्त्तौ पालने प्रीतौ व्यायामे च+ण्वुल् ।) पूर्त्तिकारकः । पालनकारकः । प्रीतिकारकः । व्यायामकारकः । एष्वर्थेषु पृधातोः कर्त्तरि ण्वुलप्रत्ययनिष्पन्नः ॥

पारक्, [न्] पुं, (पारयतीति । पार कर्म्मसमाप्तौ+णिच्+"पारेरकिः ।" उणां १ । १२५ । इति अकिः । किनीदः ।) सुवर्णम् । इत्युणादिकोषः ॥

पारक्यं क्ली, (परस्मै लोकाय हितम् । पर+ष्यञ् कुक् च ।) परलोकहितकर्म्म । यथा,—
"पादेन तस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान् ।
अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितः ॥
पादञ्चाद्धं मूलभूतं विवर्द्धयेत् ।
एवमाचरतः पुत्र अर्थः साफल्यमृच्छति ॥"
इति मार्कण्डेयपुराणम् ॥
(परस्य इदमिति । परकीये, त्रि । यथा, मनुः । १० । ९७ ।
"वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥")

पारगः, त्रि, (पारं गच्छतीति । पार+गम+"अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः ।" ३ । २ । ४८ । इति डः ।) पारगामी । तत्पर्य्यायः । कर्म्मशीलः २ । इति शब्दमाला ॥ (यथा, महाभारते । ४ । १४ । २१ ।
"उत्तितीर्षुरहं रात्रौ पारं सचिव पारगः ॥"
तथा च तत्रैव । १ । १३० । २६ ।
"भारतश्च धनुर्वेदे समुद्रस्य धनञ्जयः ॥")

पारगतः, पुं, (संसारस्य अविद्याया वा पारं गतः ।) जिनः । इति हेमचन्द्रः ॥ पारगे, त्रि ॥

पारजायिकः, पुं, (परजायां गच्छतीति । परजाया+ठक् ।) पारदारिकः । (यथा, महाभारते । १२ । ३७ । १८ ।
"वाक्शूरो दण्डपरुषो यश्च स्यात् पारजायिकः ।
यः परलमपाददात् कान्त्या अभ्याप्यस्य इति ॥")

पारटीटः, पुं, प्रस्तरः । इति त्रिकाण्डशेषः ॥

पारणः, पुं, (पारयतीति । पार+णिच्+ल्युः ।) मेघः । इति शब्दमाला ॥

पारणं, क्ली, (पार+भावे ल्युट् ।) उपवासव्रतादिपरदिवसकर्त्तव्यप्राथमिकभोजनम् । तिप्तकरणञ्च तोयपानादि इत्यदः ॥

पारणा, स्त्री, (पार+णिच्+युच् ।) उपवासव्रतादिपरदिवसकर्त्तव्यप्राथमिकभोजनम् । यथा,—
"पारणं पावनं पुंसां सर्वपापप्रणाशनम् ।
उपवासफलञ्च अपरं पुण्यकारकम् ॥
कर्म्मणोऽपि चातिदिग्धं दिवसारम्भकारिणि ।
अनया चरन्ति प्राज्ञाः प्रारब्धपारणम् ॥
न द्वादशी पारणं कुर्य्याद्वै रौहिणोऽष्टमात् ।
त्रियामां पारणं कुर्य्याच्छ्रवणां त्रितयं सदा ॥
दूर्ष्मादौ पारणं कुर्य्यात् कृत्वा दिन सुसम्भवम् ।

सर्व्वदा मज्जनं कुर्य्यात् हते वै रोहिणीव्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥
अथ श्रीकृष्णजन्माष्टमीव्रतपारणकालः ।
"अष्टम्यामथ रोहिण्यां न कुर्य्यात् पारणं क्वचित् ।
हन्यात् पुराकृतं कर्म्म उपवासार्ज्जितं फलम् ॥
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात्तिथिभान्ते च पारणम् ॥"
तथोभयवियोगे पारणमुक्तम् । "यदा सार्द्ध-प्रहरनिशाभ्यन्तरे एकस्यैव वियोगस्तदैकतर-वियोगेऽपि पारणम् ॥ तथा च नारदीये ।
"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥
संक्षीणिके व्रते प्राप्ते यद्येकोऽपि विमुच्यते ।
तदैव पारणं कुर्य्यादेवं वेदविदो विदुः ॥
यदैकस्यापि सार्द्धप्रहररात्र्यभ्यन्तरे न वियोगस्तदा तयोर्वियोगेऽपि प्रातरुत्सवान्ते पारणम् । निशायां चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् । इत्युक्तत्वात् ॥ * ॥ महाद्वादशीपारणं सत्यामपि यथाविधि कर्त्तव्यम् । यथा,—
"महत्यां महतीयुक्ते सम्यामपरेऽहनि ।
मलमासीभिरुक्तेषु स्नातैर्वेदगुणत्तमम् ॥
लिखेद्व विधिनानेन सर्वं कुर्व्वीत मानवः ॥"
सिद्धान्तु यज्ञासमलक्षिताया न तेन पारणं किन्तु महान्तेन । महद्द्वादशीपारणे रविवारादौ सोमनिषिद्धः । एवं सोमाद्यलाभगतनियमेन विशेषादिष्वपि सोमं वर्जनीयम् ॥ * ॥
अथ श्रीरामनवमीव्रतपारणकालः ।
"नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥"
अथैकादशीव्रतपारणकालः ।
"कलां काष्ठां हरिर्विद्धे विशेषोपोषणं व्रती ।
द्वादश्यां पारणं कुर्य्यात्त्यक्त्वा द्विजोदकीम् ॥"
द्वादशीलङ्घने दोषमाह नारदीयम् ।
"महापातककरी ह्येषा द्वादशी लङ्घिता नृणाम् ॥
विष्णुधर्म्मोत्तरे ॥
"द्वादश्याः प्रथमः पादः हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः ॥"
अथ जयन्त्यादिद्वादशीपारणकालः ।
"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावदैकस्य संक्षयः ॥
तिथिरेव सदा ज्ञेया भवेद्वह्नेस्तदा यदि ।
तिथिमध्ये भोक्तव्यं द्वादशी नैव लङ्घयेत् ॥"
तिथिमध्येन द्वादशीमध्येन भोक्तव्यं द्वादशी पारणैरिन्यर्थः ॥ * ॥ अथ शिवरात्रिव्रतपारणकालः ।
"उपवासी शिवरात्रिव्रते कार्य्ये भवचतुर्थ्यके ।
चतुर्दश्यां निशायां सदा कुर्य्याच्च पारणम् ॥"
निशायां पारणन्तु अपवादविषयम् । अथ शरदुत्सवादेरपि ।
"प्रकाशीतरमप्यूनं तु काले भोज्यादि कालि वै ।
दुर्गार्चनं स्वयमेव भुक्त्वा पारणं तथा ॥"*

पारणद्विने कर्त्तव्यानि यथा, ब्रह्माण्डपुराणम् ।
"कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च प्रवासञ्च दिवास्वप्नं तथाञ्जनम् ॥
तिलपिष्टं मसूरञ्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्ज्जयेन्नित्यं सर्व्वपापैः प्रमुच्यते ॥"
स्मृतिसंग्रहेऽपि ।
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
अन्नोपवासदिनेऽपि तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरयोर्दिवसयोर्वर्ज्जनम् । इति तिथ्यादितत्त्वम् ॥
पारतः, पुं, (विविधव्याधिसङ्कटादिभ्यः पारं तनोतीति । तन + अन्येभ्योऽपीति डः ।) पारदः । इति हेमचन्द्रः । ४ । ११६ ॥
पारतन्त्र्यं, क्ली, (परतन्त्रस्य भावः । परतन्त्र + ष्यञ् ।) परतन्त्रता । पराधीनत्वम् । अस्वाधीनता । यथा, माघकारः ।
"दोषाक्रान्तौ समवेतावाभ्यां विकल्पैः ग्राह्यकल्पना ।
मानसपारतन्त्र्याभ्यां यावैः प्राधान्यमादिशत् ॥"
पारत्रिकं, त्रि, (परत्र भवम् । परत्र + ठक् ।) पारलौकिकम् । परत्र भवमित्यर्थे ठिकप्रत्ययनिष्पन्नम् ॥
पारदः, पुं, (जरामरणव्याध्यादिभ्यः पारं ददातीति । दा + कः ।) धातुविशेषः । पारा इति भाषा । तत्पर्य्यायः । रसराजः २ रसनाथः ३ महारसः ४ रसः ५ महातेजः ६ रसलेहः ७ रसोत्तमः ८ सूतराट् ९ चपलः १० जैत्रः ११ शिववीजम् १२ शिवः १३ अमृतम् १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० रसधातुः २१ अचिन्त्यजः २२ खेचरः २३ अमरः २४ देहदः २५ मृत्युनाशकः २६ सूतः २७ स्कन्दः २८ स्कन्दांशकः २९ देवः ३० दिव्यरसः ३१ रसायनश्रेष्ठः ३२ यशोदः ३३ । इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ । इति शब्दरत्नावली । हरवीजम् ३७ रसलः ३८ । इति हेमचन्द्रः । शिववीर्य्यम् ३९ शिवाह्वयः ४० । इति भावप्रकाशः ॥ अस्य गुणाः । अतिस्निग्धत्वम् । चक्षुष्यत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥ अपि च मृतस्य पूर्व्वोक्तं मारणप्रकरणं निष्ठति । इति परिभाषा ॥ * ॥ अपि च ।
"पारदः सकलरोगनाशकः
षड्‌गुणो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तितो
दिव्यलोचनसिद्धिकारकः ॥
सर्व्वजनी हरते व्याधीन् वह्नः शिवस्यसिद्धिदः ।
जरामृत्युहरो लोके नियतो देहसिद्धिदः ॥
विविधव्याधिभयोद्दामपराजयसङ्कटादपि
सर्व्वेभ्यः ।
पारं ददाति यस्मात्तस्मादयं पारदः कथितः ॥"
इति राजनिर्घण्टः ॥

मलदोषादिनिवृत्तिर्यथा,—
"गिरिजाङ्गात् प्रसूतं देवः पवित्रं परमेश्वरः ।
तद्देहपारमनल्पात् प्रत्यक्षमभूत् ततः ॥
अथ भेदेन विश्वे दिव्यास्तेषु चतुर्व्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ॥
धातुवादे तु तत् पीतं खे गतौ कृष्णमेव च ।
पारदः षड्‌रसः स्निग्धस्त्रिदोषघ्नो रसायनः ॥
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ।
सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठनुत् ॥
स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्द्दनः ।
रञ्जितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥
मूर्च्छितो हरति व्याधीन् बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि मृतः कोऽन्यः करुणाकरः सूतात् ॥"
रसान्तरे ।
"यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"
तस्य दोषा यथा,—
"मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ मुनीश्वरैः ॥
मलेन मूर्च्छां मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्या-
च्चाञ्चल्यतो वीर्य्यहृतिश्च पुंसाम् ॥
वङ्गेन कुष्ठं भुजगेन शण्ढो
भवेदतोऽसौ परिशोधनीयः ॥
वह्निर्विषं मलश्चेति मुख्या दोषास्त्रयो रसे ।
एते कुर्व्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥
अन्येऽपि दोषाः कथिता भिषग्भिः पारदे यदि ।
तथापि मुख्या दोषाः स्युरेकैका विदिताः ॥
संस्कारहीनं खलु सूतराजं
यः सेवते तस्य करोति बाधाम् ।
देहस्य नाशं विदधाति नूनं
कष्टांश्च रोगान् जनयेन्नराणाम् ॥"
शोधितस्य सर्व्वरोगनाशकत्वात् तस्य गुणाः ।
"पारदः सर्व्वरोगघ्नो वृष्यो बल्यः रसायनः ।
सद्गुणः महारोगघ्नो योगवाही महाबलः ॥
मृत्युभीतिहरो नृणां बलवीर्य्यकरः परः ।
चक्षुष्यः स्निग्धः शिवः शीतः ॥
पारदः सकलरोगनाशनः
षड्‌गुणो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तित-
स्तेन मृत्युभयहारको मतः ॥" * ॥
अथ तस्य शोधनविधिः । तत्र मन्त्रः ।
"आयाह्यास्ते देवा यथेष्टमनुत्तमैः ।
चन्द्रार्कौ पुनर्नवेन्दुदारुपुनर्नवादयः ॥
एकत्र मूर्च्छनाद्यैर्विधानैः शुद्धयेत ॥

मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी ।
त्रिफला गिरिकर्णी च हंसपादी च चित्रकः ।
समूलं कुट्टयित्वा तु यथालाभं विनिःक्षिपेत् ।
पूर्व्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम् ।
स्वेदनादिषु सर्व्वत्र रसराजस्य योजयेत् ॥”
विष्णुक्रान्ता गिरिकर्णी च अपराजितैव श्वेत-
नीलपुष्पभेदात् । चाङ्गेरीमारनालं वा तदभावे
प्रयोजयेत् । तदभावे धान्याम्लाभावे ।
“नागरं मरिचं राजी रजनी त्रिफलार्द्रकम् ।
महाबला नागबला मेघनादः पुनर्नवा ॥
मेषशृङ्गी चित्रकश्च नवसारं समं समम् ।
एतत् समस्तं व्यस्तं वा पूर्व्वाम्लेनैव पेषयेत् ॥
प्रलिप्तेनेन कल्केन वस्त्रमङ्गुलमात्रकम् ।
तन्मध्ये निःक्षिपेत् सूतं बद्धा तत्त्रिदिनं पचेत् ॥
दोलायन्त्रेऽम्लसंयुक्ते जायते स्वेदितो रसः ॥”
मेघनादः चवराइशाकविशेषः । मेषशृङ्गी मेढ़ा-
शृङ्गी । तदलाभे कर्कटशृङ्गी ग्राह्या । नवसारं
नौसादर । अन्यच्च ।
“कुमारिकानलसिन्धूत्थभृङ्गमण्डूककराजिकाः ।
रसस्य षोडशांशेन द्रव्यं युञ्ज्यात् पृथक् पृथक् ॥
द्रव्येष्वनुक्तमानेषु मानं भागमिदं बुधैः ।
पञ्चाङ्गेष्वेतत्सु सूतं प्रलिप्य काञ्जिके ॥
स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान् ।
मेदाशोषो भवेत् सूतो मर्द्दनाच्च सुनिर्म्मलः ॥”
नलकं सुरद । अनलश्चित्रकम् । त्र्यूषणं त्रिकटु ।
राजिका राइ । * । अथ मर्द्दनम् ।
“इष्टिकाचूर्णाभ्यामादौ मर्द्यो रसस्ततः ।
दधा गुडेन सिन्धूत्थराजिकाहृद्धूमकैः ॥”
अन्यच्च ।

“कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीत्रिमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥” * ।

अथ मूर्च्छनम् ।
“त्र्यूषणं त्रिफलावन्ध्याकन्दैः शुद्धाद्रपान्वितैः ।
चित्रकोर्णानिशाक्षारकन्यार्ककनकद्रवैः ॥
सूतं सतेन मूर्च्छेत वारान् सप्ताभिमर्द्दयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥”
वन्ध्याकन्दः वाञ्झखसमाकन्दः । शुद्धरपं छोटी-
कटेया बड़ोकटेया । ऊर्णा ऊर्णामेषका । निशा
हरिद्रा । क्षारः यवक्षारः । कन्या कुमारिका ।
अर्कः अर्कपत्ररसः । कनकः धुस्तूरपत्ररसः ॥ * ॥
अथोर्द्ध्वपातनम् ।
“मयूरग्रीवताप्याभ्यां नष्टपिष्टीकृतस्य च ।
यन्त्रे विद्याधरे कुर्य्यादूर्द्ध्वस्योर्द्ध्वपातनम् ।
ततः स्यादूर्द्ध्वपातेन सर्व्वदोषविवर्ज्जितः ॥”
मयूरग्रीवा तुत्थम् । ताप्यः स्वर्णमाक्षी । नष्ट-
पिष्टीकृतस्य कुमारिकाद्रवेण तावन्मर्द्दितं
कर्त्तव्यं यावत् पारदः पृथक् दृश्यो न स्यात् ।
विद्याधरयन्त्रं वक्ष्यते । * ।
अथाधःपातनम् ।
“त्रिफलाशिग्रुशिखिभिर्लवणासुरिसंयुतैः ।
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध्वभाजनम् ।
ततो दीप्तैरधःपातमुपलैस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुद्ध्यति ।
स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत् ।
तदा कार्य्याणि कुरुते प्रयोज्यः सर्व्वकर्म्मसु ॥”
अथ मुख्यदोषहरशोधनविधिः ।
“गृहकन्या हरति मलं त्रिफलाग्निं चित्रको
विषं हन्ति ।
तस्मादेभिर्म्मिश्रैर्वारान् संमूर्च्छयेत् सप्त ॥” * ।
अथ सर्व्वदोषहरः संक्षिप्तः शोधनविधिः ।

“कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीत्रिमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥

एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
षड्भिरौषधीकषायैस्तु स्वेदितः स बली भवेत् ॥
सर्पाक्षीचिञ्चिकावन्ध्याभृङ्गाद्भिः स्वेदितो बली ।
ततः स पावकद्रावैः क्षिप्तः स्यादतिदीप्तिमान् ॥”
सर्पाक्षी नागफणी । चिञ्चिका अम्लिली । वन्ध्या
बाँझखसखा । भृङ्गः भृङ्गराजः । अन्दो राखा ।
पावकः चित्रकः ॥ * ॥
अथ रसस्य मारणविधिः ।
“धूमसारं रसं तोरीं गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताञ्च मृद्वस्त्रमुद्रया ।
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं वालुकापूरैर्भृत्वा च कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तमूर्द्ध्वगं गन्धकं त्यजेत् ॥
अधःस्थञ्च मृतं सूतं गृह्णीयात्तञ्च मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥” * ।
अथान्यप्रकारः ।
“अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ।
तत् संपुटे क्षिपेत् सूतं मलपूदुग्धमिश्रितम् ॥”
मलपूः काकोडुम्बरिका ।
“द्रोणपुष्पीप्रसूनानि विडङ्गमरिमेदकः ।
एतच्चूर्णमधश्चोर्द्ध्वं दत्त्वा मुद्रां प्रदीपयेत् ।
तद्गोलमाधमेत् सम्यक् मृन्मूषासंपुटे सुधीः ।
मुद्रां दत्त्वा शोषयित्वा ततो गजपुटे पचेत् ॥
एकेनैव पुटेनैव सूतकं भस्म जायते ।
तत् प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥”
अथान्यप्रकारः ।
“काकोडुम्बरिकादुग्धे रसं किञ्चिद्विमर्द्दयेत् ।
तद्दुग्धघृष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत् ।
क्षिप्त्वा मूषासंपुटे सूतं तत्र मुद्रां प्रदापयेत् ।
धृत्वा तद्गोलकं प्राज्ञो मृन्मूषासंपुटेऽधिके ।
पचेद्गजपुटे तेन सूतकं याति भस्मताम् ॥”
अन्यः प्रकारः ।
“नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः ।
मृन्मूषासंपुटे पक्वः सूतो याति भस्मताम् ॥”
इति भावप्रकाशे पूर्व्वखण्डे २ भागे ॥
अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
“पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ! ।
अतएव महेशानि ! शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिवबीजं हि ताडनं नहि कारयेत् ।
ताडनादितनाशः स्यात्ताडनाद्विघ्नदीनता ॥
ताडनाद्रोगयुक्तस्य ताडनान्मरणं भवेत् ।
द्वादशं पार्थिवं लिङ्गमथवा चैव षोडश ।
पञ्चादिरुद्रनिर्म्माणरचितं शक्तितेन वा ॥
पुरुषस्य यथायोग्यं युग्मवस्त्रं निवेदयेत् ॥
भोगयोग्यं प्रदातव्यं मधुपर्कं कुलेश्वरि ! ।
अलङ्कारं यथाशक्ति दद्यात् कल्याणहेतवे ॥
पूजयेद्भक्तियत्नेन विल्वपत्रेण पार्व्वति ! ।
तोडलोक्तेन विधिना प्रत्येकेनायुतं जपेत् ॥
आदौ पश्चात्तरं मन्त्रमष्टोत्तरशतं जपेत् ।
पूजान्ते प्रजपेत् पश्चात् प्रासादाख्यं महामनुम् ॥
दक्षिणान्तं समाचर्य्य हविष्याशी जितेन्द्रियः ।
ताम्बूलञ्च तथा मद्यं वर्ज्जयेत् प्रयत्नतः ।
अन्तिमान्ते हविष्यान्तं ताम्बूलं मोक्षमुत्तमम् ।
होमयेत् परमेशानि ! दशांशं वा शतांशकम् ।
होमस्य दक्षिणा कार्य्या तदा विघ्नं निवर्त्तते ।
ततः परस्मिन् दिवसे पारदं स्नानयेत् सुधीः ।
तस्योपरि जपेन्मन्त्रं सर्व्वतन्त्रं यथाक्रमम् ।
व्योमबीजं शिवान्तं च बलाढ्यं बिन्दुमस्तकम् ।
वायुबीजं बिन्दुयुतं त्रितयं नामकं प्रिये ! ॥
इमं मन्त्रं महेशानि ! प्रजपेदौषधोपरि ।
पारदे प्रजपेन्मन्त्रमष्टोत्तरशतं यदि ।
तदैवौषधयोगेन बद्धो भवति साम्प्रतम् ।
ततः परस्मिन् दिवसे शृणु यत् प्राणवल्लभे ! ।
धारयेत् सर्व्वकर्माणि यथोक्तविधिना यदि ।
सुवर्णं चम्पकाकारं कर्षद्वयं निवेदयेत् ।
चतुष्कोणयुतं मत्यैं गोवादौ सुमनोहरम् ।
स्वल्पत्वे महेशानि ! दद्यात्कन्यकुमारकम् ।
वलयं कुण्डलञ्च अङ्गुरीयं तथैव च ।
कर्म्मी दद्यात् योगाय योगयुक्तं प्रिये ! ।
एवं कृत्वा महेशानि ! शिवलिङ्गं विचिन्तयेत् ।
अथातः संप्रवक्ष्यामि विधानं शृणु पार्व्वति ! ।
प्रहारे चैव संस्थाप्य विष्टोपचारेण च ।
प्रजवेन समाराध्य कुर्य्यात् मर्द्दनकं प्रिये ! ।
निर्म्माणयोग्यं तद्रूपं यदि स्यात् सुरसुन्दरि ! ।
तदा निर्म्माय तल्लिङ्गं पूजयेत् प्रयत्नतः ।
सत्यपर्वयुते वह्नौ वसुधायां च कारिके ।
किञ्चिदूनं प्रकर्त्तव्यं यतो दृढतरं भवेत् ॥”
इति मातृकाभेदतन्त्रे ७ पटलः ॥ * ॥
कार्त्तिकेयस्य पारिषदविशेषः ।
(यथा, महाभारते । ९ । ४५ । १३ ।
“[illegible] ।
[illegible] ॥”)
अथ [illegible] ।
पारदस्कन्धः, पुं, देशविशेषः । इति [illegible]
[illegible] । इति केचित् ।

पारदारिकः, पुं, (परेषां दारेषु दारान् गच्छतीति । परदार + "गच्छतौ परदारादिभ्यः ।" ४।४।१ । इत्यस्य वार्त्तिकोक्त्या ठक् ।) जारः । परदारगः । (यथा, महाभारते १।१११।२१ ।
"तव सादृशमौदासीं भजस्व व्यपायकः ।
पूज्यते हि महोनी वै दूरलाभ पारदारिकः ॥")
"दुष्पथाल्पवर्धिद्विजिरामाखिलं
धव मीनमकरध्वजासिनः ।
पारदारिकविलासमाश्वर्यं
देवभर्तृकट्टाक्षि मिनेत्र ॥"
इति च नैषधे १८ सर्गः ॥
अस्य दोषा यथा,—
"यः परस्त्रीषु निरतस्तस्य दीनां कुतो यशः ।
स च निन्द्यः पापयुक्तः प्रेत्य नर्कभागी च ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ४१ अध्यायः ॥

पारदार्य्यं, क्ली, (परदारा दारा यस्य स परदारः । तस्य कर्म्मेति ष्यञ् ।) परदारगमनम् । यथा,
"शृङ्गारभवनाख्ये भवकाधाराधनसया ।
पारदार्य्यं पारिचिन्तं चार्थ्यं मनतत्त्विया ॥"
इत्युपपातकमध्ये प्राञ्चवल्क्यः ॥

पारदेश्यः, त्रि, प्रोषितः । पारदेशिकः । पथिकः । परदेशो नत इत्यर्थे ष्याप्यधपविन्यसः ॥ (परदेशे भव इति ष्यञ् । परदेशभवः । यथा, याज्ञवल्क्ये । २ । २५५ ।
"अदयपण्यं तु यस्तं वणिक्प्रदशीन संयतम् ।
तत्सर्वं पारदेश्ये तु यः यदः क्रयविक्रयौ ॥")

पारमर्षं, त्रि, (परमर्षिभिर्भवं परमर्षेरागत भवः परमर्षेरिव दृष्टं यत् प्राप्तमिति वा । परमर्षि + अण् ।) परमर्षिसम्बन्धि । यथा,
"आनन्दस्य प्रणवम् पुराणमथ वरिष्ठ मासं प्रियं वासान् पारमार्थ्यप्रदीपकसमं ज्ञानं परं मोक्षदं ।
यच्च ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥"
इति श्रीभागवते । १२ । १३ । १८ ।
"पारमर्षं परमर्षेः प्राप्तम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ (परमस्थान । यथा, भागवते । ६ । १८ । ४३ ।
"तत्रापुरस्ता यदर्थैव धीरा
यथोक्त देवा'ङ्ग गङ्गायाम् ।
वसन्ति भक्तास्तव पादमूलं
प्रतिपादिर्बोधनातः प्रपन्नाः ॥"
परम'स्वामृतम् । यथा, तत्रैव । ४ । ७ । ४६ ।
"पुंसां पुनः पारमहंस्य आश्रम
व्यवस्थितानामनुमृग्यदाशुषे ॥"
ज्ञानमात्रम् । यथा, तत्रैव । ७ । १३ । ३६ ।
"न वै नृणां देहभृतां ज्ञानेषु
[illegible] पारमहंस्यमेव ॥")

पारमार्थिकः, त्रि, (परमार्थाय परमार्थप्रयोजनमस्य [illegible] इत्यर्थे ठञ् ।) परमार्थरूपः । यथा,—
"अतात्त्विको न भेदो न नैव पारमार्थिकः"
इति पुराणम् ॥

सत्यम् । यथा,—
"नित्यस्तत्रभवानेकब्रह्मचर्य एव च ।
अभेद घटिका श्रीनारायणं पारमार्थिकम् ॥"
इति मिथ्यादितत्त्वम् ॥
(यथार्थः । यथा, मनौ ८ । ४९ श्लोकटीकायां कुल्लूकभट्टः । "तेषां प्रकारापकारसहकारान् मकर्म्मणि परीक्षयेत् ये पारमार्थिका दोषा इति ।" परमार्थविभागः । यथा, भागवते । ३ । ९६ । ६ ।
"तत्त्वं सुखदुःखानां प्रतीतिः पृथक् च ।
स्वरूपं लक्षितमोदी येन तत् पारमार्थिकम् ॥"
"पारमार्थिकं परमार्थविभक्तमित्यर्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

पारम्पर्य्यं, क्ली, (परम्परायाः आगतम् । तत आगत इत्यण् । चतुर्वर्णादित्वात् ष्यञ् । परम्परा + स्वार्थे ष्यञ् वा ।) आम्नायः । कुलक्रमः । इति हेमचन्द्रः ॥ तथा च ।
"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
तत्र तं नावमन्येत धर्म्मोत्कर्षेण मानवः ॥"
इति विवादमङ्गार्णवः ॥
परम्परायाः भावश्च ॥ (यथा, महाभारते । ६ । ११० । २७ ।
"निहतेषु च भीष्मेषु पारम्पर्येण भक्तिमः ।
विशुद्धमनसा तमौ श्रीकृष्णोपुर्नराधिपाः ॥")

पारम्पर्य्योपदेशः, पुं, (पारम्पर्येण गुरुपरम्परया प्राप्त उपदेशः ।) उपदेशपरम्परा । तत्पर्य्यायः । ऐतिह्यम् २ इतिह ३ । इत्यमरः । २ । ७ । १२ ॥ परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ्; पारम्पर्य्यक्रमेणोपदेशः पारम्पर्य्योपदेशः तत्र इतिहयमृतेऽपि । यथा । इतिह वटवृक्षं इह वटे यक्षः प्रतिवसतीति । इति सर्वे वदन्ति इतिह यक्ष इति वा । इतिह अव्ययात् स्वार्थे ष्यञ् ऐतिह्यम् । इति भरतः ॥

पारलौकिकः, त्रि, (परलोके भवः परलोकाय हित इति वा । परलोक + ठञ् । "अनु-शतिकादीनाञ्च ।" ७।३।२० । इति विकल्पादुभय-पदवृद्धिः ।) परलोकसम्बन्धी । यथा,—
"दानवाधमसङ्कुलेविबेक-
मारेि कौटिल्यमिं दिवि राति ।
वापूरं नि त्वरमेषि कर्म्म
पारलौकिकमुपैतुमुपैति ॥"
इति नैषधे । ५ । ६९ ॥
(यथा च महाभारते । १३ । ३११ । १२ ।
"आत्मनाम्रात्मनैव पापानि निवेत वर्जितः ।
धर्मे यतो सम्प्राप्तो यदायः पारलौकिकः ॥")

पारवतः, पुं, पारावतः । इति हिरण्यकोषः ॥

पारशवः, पुं, शूद्रायां विप्रजातः । इत्यमरः । २ । १० । ३४८ । स तु निषादः । यथा,—
"ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ।
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥
शूद्रकन्यायामुत्पन्नो निषाद उत्पद्यते यतः ।

पराशरेण पारशवेत्यभेदे । शौचविषय-संस्कारविधिमात्रः ।
स पारशवेन मंस्करणात् पारशवः स्मृतः ।
स शौचमेव प्रयुज्यः ।" इति मनुवृहस्पती ॥
परश्वोत्पन्नः । (परश्वेव स्वार्थे अण् ।) अस्त्रम् । तत्तु लौहम् । इति मेदिनी । वे । १७ ॥
परशुधारी, त्रि ॥

पारशीकः, पुं, पारसीकः । इत्यमरटीकायां रमानाथः ॥

पारश्वधः, पुं, (परश्वधेन कुठारेण चरतः कर इत्यसत्येति वा । परश्वध + "प्रहरणम् ।" इत्यण् ।) परश्वधधारी । पारश्वधिकः । इति हेमचन्द्रः ॥

पारश्वधिकः, पुं, (परश्वधः प्रहरणमस्य । "पर-श्वधाट्ठञ् च ।" ४ । ४ । ५८ । इति ठञ् ।) परशुवैधिकः । कुठारधारी । तत्पर्य्यायः । पारश्वधः २ परश्वधायुधः ३ । इति हेमचन्द्रः ॥

पारसिकः, पुं, पारसीकः । इति शब्दरत्नावली ॥

पारसी, स्त्री, पारस्यभाषा । पारसीकदेश-भाषादि । तदाश्रितं यथा,—
"स्त्रियात्रिंशात्यायुर्मारिवर्णसरमोदके ।
विशालाद्वीतकायाङ्गमणि पापावरे ।
लघे शिरे गतश्री च पारसीभाषयी पठेत् ॥"
इति मल्लपरिशिष्टे ॥

पारसीकः, पुं, पारसीकदेशोद्भवघोटकः । तत्-पर्य्यायः । वानायुजः २ । इति वैजयन्तीमत-टीकायां भरतः ॥ पर्वतः ३ स्थायुकः ४ । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ४ ।
"पारसीकाश्चाश्ववारा[illegible] घोटकाः [illegible]-
[illegible] ॥")
देशविशेषः । तत्पर्य्यायः । पारसिकः २ । इति शब्दरत्नावली । तद्देशोद्भवे, त्रि ॥ (यथा रघुः । ४ । ६० ।
"पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ॥")

पारस्त्रैणेयः, त्रि, (परस्त्रियाः अपत्यम् । "कल्याण्यादीनामिनङ् ।" ४ । १ । १२६ । इति ढक् इनङादेशश्च । तत उभयपदवृद्धिः ।) परस्त्रीजातः । इत्यमरः । २ । ६ । २४ ॥

पारा, स्त्री, (पारोऽस्त्यस्याः इत्यच् टाप् ।) नदीविशेषः । सा तु मालवदेशे नदीभेदः । इति मेदिनी । रे, ५४ । (यथा, मार्कण्डेये । ५७ । ११ ।
"पारा चर्म्मण्वती रूपा विदिशा वेत्रवत्यपि ॥")

पारायणः, पुं, (पारं शिरःपर्यन्तं यावत् पाठः पारायणमस्ति अस्येति । मत + अच् ।) पारायणः । इत्यमरटीकायां रमानाथः ॥

पारावारः, पुं, (पारश्चावारश्च स्तोऽस्य । "पार्थ-वारिमोऽपि ।" । ३ । २ । ३४८ । इत्यण् ।) पारावारः । इति हिरण्यकोषः ॥

पारायणं, क्ली, आद्यन्तपठनम् । इत्यमरः । ३ । २ । ७ । "आदौ आवृत्ति अन्तपर्यन्तं [illegible] पारायणं तदनुविदिवासम् । [illegible] निःशेषेण [illegible] पारायणम् । यथा [illegible]

पारायणं नाम लङ्घेति मम मेऽपिसीति भट्टिः ।"
इति भरतः । (पारमयनं समाप्तिं प्राप्नुवन्ति येनेति । अय + ल्युट् करणे इत्येके ।) पुराणपाठः । (यथा, देवीभागवते । १ । २६ । १७ ।
"वरयेद्ब्राह्मणं प्राज्ञं पारायणकृते तदा ।")
तत्र श्रीभागवतपाठानुक्रमो यथा,—

श्रीपार्व्वत्युवाच ।
"स्कन्धैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं प्रभो ! ।
शुकस्तच्छ्रावयामास महाराजं परीक्षितम् ॥
सप्ताहेनेति भगवन् ! श्रूयते तत्र तत्र च ।
तस्यानुक्रममिच्छामि श्रोतुं तत्फलमेव च ॥

सदाशिव उवाच ।
साधु पृष्टं महाभागे ! लोके यत् प्रचरिष्यति ।
पारायणमिति ख्यातं सद्यो मुक्तिप्रदं शुभम् ॥
शुकस्योक्तिक्रमेणैव पठेद्भागवतन्तु यः ।
यावदेकतुयाहादपि तस्यानन्तं फलं भवेत् ॥
स्नातनित्यक्रियः प्रातः कुशहस्तः कृतासनः ।
देवद्विजगुरून्नत्वा ध्यात्वा विष्णुं सनातनम् ॥
द्वैपायनं नमस्कृत्य शुकदेवञ्च भक्तितः ।
हिरण्याक्षवधं यावत् प्रथमेऽहनि कीर्त्तयेत् ॥
चरितं भरतस्यापि द्वितीयेऽथ तृतीयके ।
मन्वन्तरस्यापि यत्र कूर्म्मः स्वयं हरिः ॥
चतुर्थेऽहनि चैव दशमे हरिजन्म च ।
पञ्चमे तु पठेद्विद्वान् रुक्मिण्या हरणावधि ॥
षष्ठे चोद्धवसंवादं सप्तमे तु समापयेत् ।
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ॥
कृते विरामे मध्ये तु अध्यायादिं पठेत् पुनः ।
पठेदेवं पुराणज्ञः श्रावयेद्द्विजसत्तमे ! ॥
श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्भक्तितत्परः ।
अध्याये सर्व्वमासीनं तथा दद्याच्च दक्षिणाम् ॥
समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत् ।
कुर्य्याच्च वैष्णवं होमं ब्राह्मणान् भोजयेत्ततः ॥
एवं यः कुरुते देवि ! पाठं भागवतस्य तु ।
श्रवणं श्रावयेद्वापि स हरेर्गतिमाप्नुयात् ।
एतत् पारायणं नाम सर्व्वकामफलप्रदम् ॥
पाठकाले तु विप्राश्च सुभक्ताश्च तपोधनाः ।
पार्षदाश्च तथा विष्णोः सान्निध्यं तत्र कुर्व्वते ॥
इत्येतत् कथितं देवि ! पारायणविधानकम् ।
विष्णुप्रीतिकरं पुण्यं किमन्यत् श्रोतुमिच्छसि ॥"
इति पाद्मे पातालखण्डे पारायणमाहात्म्ये ७१ अध्यायः ॥ * ॥ अपिच ।

कुमारा ऊचुः ।
"अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम् ।
सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ॥
दैवज्ञं तु समाहूय मुहूर्त्तं पृच्छ यत्नतः ।
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् ॥
नभस्य आश्विनोर्ज्जौ च मार्गशीर्षः शुचिर्नभाः ।
एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः ॥
मासानां विग्रहे यानि तानि त्याज्यानि सर्व्वथा ।
सहायाश्च त एवात्र कर्त्तव्याः सोद्यमाश्च ये ॥
देशे देशे तथा सेयं वार्त्ता प्रेष्या प्रयत्नतः ।
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः ॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः ।
स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ॥
देशे देशे विरक्ता ये वैष्णवाः कीर्त्तनोत्सुकाः ।
तेष्वेव पत्रं प्रेष्यञ्च तल्लेखनमितीरितम् ॥
सतां समाजो भविता सप्तरात्रं सुदुर्लभः ।
अपूर्व्वरसरूपैव कथा चात्र भविष्यति ॥
श्रीभागवतपीयूषपानाय रसलम्पटाः ।
भवन्तश्च तदा प्रीत्या समायान्तु प्रेमतत्पराः ॥
नावकाशः कदाचिच्चेद्दिनमात्रं तथापि वा ।
सर्व्वथा गमनं कार्य्यं क्षणोऽत्रैव सुदुर्लभः ॥
एवमाकारणं तेषां कर्त्तव्यं विनयेन च ।
आगन्तुकानां सर्व्वेषां वासस्थानानि कल्पयेत् ॥
तीर्थे वापि वने वापि गृहे वा श्रवणं स्मृतम् ।
विशाला वसुधा यत्र कर्त्तव्यं तत्कथास्थलम् ॥
शोधनं मार्ज्जनं भूमेर्लेपनं धातुमण्डनम् ।
गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् ॥
अर्व्वाक् पञ्चाहतो यत्नादास्तीर्णानि प्रक्षिपयेत् ।
कर्त्तव्यं मण्डपं प्रोच्चैः कदलीखण्डमण्डितम् ॥
फलपुष्पदलैर्विष्वक् विताने च विराजितम् ।
चतुर्द्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः ॥
ऊर्द्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरम् ।
तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबुध्य च ॥
पूर्व्वं तेषामासनानि कर्त्तव्यानि यथोत्तरम् ।
वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत् ॥
उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा ।
प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा ॥
अथवा पूर्व्वदिग् ज्ञेया पूज्यपूजकमध्यतः ।
श्रोतॄणामागमः प्रोक्तो देशकालादिकोविदैः ॥
विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिमान् ।
दृष्टान्तकुशलो धीरो वक्ता कार्य्योऽतिनिःस्पृहः ॥
अनेकधर्म्मविभ्रान्ताः स्त्रैणाः पाषण्डवादिनः ।
शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः ॥
वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः ।
पण्डितः संशयच्छेत्ता लोकबोधनतत्परः ॥
वक्त्रा क्षौरं प्रकर्त्तव्यं दिनादर्व्वाक् व्रताप्तये ।
अरुणोदयेऽसौ निर्व्वर्त्त्य शौचं स्नानं समाचरेत् ॥
सन्ध्यादि प्रकर्त्तव्यं तत्र स्थाप्यो घटिकया ।
तच्छुद्धिञ्च गणेश चरेत् पूजाविधिं क्रमात् ।
सर्व्वविघ्ननमस्कारात् पूजान्ते स्तुतिमाचरेत् ॥
संसारसागरे मग्नं दीनं मां करुणानिधे ! ।
कर्म्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात् ॥
श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः ।
कर्त्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥
ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् ।
स्तुतिः प्रसन्नचित्तेन कर्त्तव्या केवलं तदा ॥
श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ।
स्वीकृतोऽसि मया नाथ ! मुक्त्यर्थं भवसागरे ॥
मनोरथो मदीयोऽयं सफलः सर्व्वथा त्वया ।
निर्विघ्नेनैव कर्त्तव्यो दासोऽहं तव केशव ! ॥
एवं दीनं वचः प्रोक्ता वक्तारं चाथ पूजयेत् ।
संभूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तवेत् ॥
शुकरूप प्रबोधज्ञ सर्व्वशास्त्रविशारद ।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥
तदग्रे नियमः पश्चात् कर्त्तव्यः श्रेयसे मुदा ।
सप्तरात्रं यथाशक्त्या धारणीयः स एव हि ॥
वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये ।
कर्त्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया ॥
ब्राह्मणान् वैष्णवान् चान्यान् तथा कीर्त्तनकारिणः ।
नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥
लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च ।
कथाचित्तः शुद्धमतिः स लभेत् फलमुत्तमम् ॥
आसूर्य्योदयमारभ्य सार्द्धत्रिप्रहरान्तकम् ।
वाचनीया कथा सम्यक् धीरकण्ठं सुधीमता ॥
कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयम् ।
तत्कथामनुकार्य्यं वै कीर्त्तनं वैष्णवैस्तदा ॥
मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः ।
हविष्यान्नेन कर्त्तव्यो ह्येकवारं कथार्थिना ॥
उपोष्य सप्तरात्रं वा शक्तिश्चेच्छृणुयात्तदा ।
घृतपानं पयःपानं कृत्वा वा शृणुयात् सुखम् ॥
फलाहारेण वा श्राव्यमेकभक्तेन वा पुनः ।
सुखसाध्यं भवेद्यत्तु कर्त्तव्यं श्रवणाय तत् ॥
भोजनन्तु वरं मन्ये कथाश्रवणकारकम् ।
नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि ॥
सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद ! ।
विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥
ब्रह्मचर्य्यमधःसुप्तिः पत्रावल्याञ्च भोजनम् ।
कथासमाप्तौ भुक्तिञ्च कुर्य्यान्नित्यं कथाव्रती ॥
द्विदलं मधु तैलञ्च गरिष्ठान्नं तथैव च ।
भावदुष्टं पर्य्युषितं जह्यान्नित्यं कथाव्रती ॥
वृन्ताकञ्च कलिङ्गञ्च दग्धान्नं नालिकेरम् ।
निष्पावनामिषञ्चैव वर्ज्जयेत्तु कथाव्रती ॥
पलाण्डुं लशुनं हिङ्गु मूलकं यज्ञदन्तया ।
कालिङ्गानलकुष्माण्डं नैवाद्याच्च कथाव्रती ॥
देवद्विजविप्राणां गुरुगोव्रतिनामपि ।
स्त्रीराजमहतां निन्दां वर्ज्जयेच्च कथाव्रती ॥
कामं क्रोधं मदं मानं मत्सरं लोभमेव च ।
दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥
रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैस्तथा ।
द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥
सत्यं शौचं दयां मौनं मार्ज्जवं विनयं तथा ।
उदारं मानसं तद्वत् कुर्य्यादेवं कथाव्रती ॥
दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्म्मवान् ।
अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम् ॥
अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका ।
स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ॥
एतेषु विधिना श्रावं तदक्षयतरं भवेत् ।
अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥
एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत् ।
जन्माष्टमीव्रतवत् कर्त्तव्यं फलकाङ्क्षिभिः ॥
अकिञ्चनेषु भक्तेषु प्रायो नोद्यापनाग्रहः ।
श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥
एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तदा ।
पुस्तकस्य च वक्तुश्च पूजा कार्य्यातिभक्तितः

यमाद्रमन्मोहात्मा योऽन्यकाय दीयताम् ।
अहङ्कारमपरित्यं वाचनं कोविदो नमः ॥
श्रवणार्थं समायान्तः प्रमादश्च त्यजताम् ।
निर्मिते वा नरैस्तथ विस्तरस्य श्रोतृणाम् ॥
निराकांक्षैर्यो श्रोता श्रोतः वाच्या यदेशयेत् ।
दश्यापि लक्ष्या श्रोता कर्त्तव्यः कर्म्मकाण्डे ।
उपविष्टेश्च कुरुष्वाद्विनिता दशमस्य च ।
पाठं नित्य मतिश्च विमादिसम्पूर्णम् ॥
मन्वन्तः श्रवणं कुर्वन्त्राथवा मुनसाधिनः ।
समाप्तान्ते पुराणस्य पत्नसत्यो नरोत्तमः ॥
गीतायाश्चै कृपो श्रीमद् दशमस्कन्धनिहयते ।
भावार्थविद्विषार्थं समाधिकमास्थितः ॥
श्रावणः मासमासेषु पवित्रमासमासकम् ।
तिथ स्थान नरनं नर्ज श्राद्धमादेधिकं धनः ॥
इत्यत्र श्रावणत् यथाशैवमेवाभूपाश्वे: ।
दत्वात् मुवर्णं पिशुन अनुपूर्वमिदृशे ॥
तर्को पश्चदशिनं मासं सर्व विधाय च ।
तथाक्षय दुग्धं स्यात् विविधं भक्तिमात्रम् ॥
अंत्स्यानाद्यकाद्वैनदपनादैः गदपितम् ।
स्वनपूर्णकामादैः पूजिताय समापने ॥
भक्ताभाय गुणोहंसा गुरुः स्यादुत्तवर्ध्यैः ।
एवं कृते विधाने च सर्वेषामभिवाञ्छितम् ।
वर्णितं स्यात् पुराणस्य श्रीमद्भागवतं शुभम् ॥
धर्मार्थकाममोक्षाणां साधनं भागवतम् ।
इति ते कथितं सर्वं किं भयः श्रोतुमिच्छसि ।
श्रीमद्भागवतेनैव भक्तिमुक्तिः प्रकाशिता ॥”
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये
६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण + “पारायणतुरायणेति ।” ५ । १ । ७२ । इति ठञ् ।) पाठकः । छात्रः । इति सिद्धान्तकौमुदी ॥

पारारकः, पुं, (पृ पूर्त्तौ + घञ् । पारं पूर्त्तिं आरयतीति । ऋ गतौ + ण्वुल् ।) प्रस्तरः । इति शब्दरत्नावली ।

पारावतः, पुं, (पारे गिरिसमीपपर्वतादिप्रान्तभागे आवर्त्ततीति । पार + आ + वृत + अच् । पृषोदरादित्वात् साधुः । चतुर्षु हरेत्यादिषु यथायथम् । यद्वा, पराशब्देन अगिरत्यादिशब्दैः अवः ... भावः अनु जिन इत्यर्थः । परावत् + अण् ।) पक्षिविशेषः । पायरा इति भाषा । तत्पर्य्यायः । कलरवः २ कपोतः ३ रक्तलोचनः ४ । इति अमरः ॥ पारापतः ५ कलरवः ६ धूम्रलोचनः ७ मदनकाकुरवः ८ अरुणः ९ रक्ताक्षः १० मदनमोहनकामी ११ कपोतः १२ गृहकपोतकः १३ ॥ (यथा,—
“कोको मत्तो हिरण्यकच्छमोमनोजो
वंशपक्षिणः कुरुते रतिकेलिविधानम् ।
पारावतः मधु हिरण्यनीलाम्बलोमी
कामी भवेत् सततं इह कोऽपि पैतृः ॥”
इत्यादि ॥)

अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तास्रदाहनाशित्वम् । वल्यत्वम् । वीर्य्यवृद्धिकारित्वम् । इति राजनिर्घण्टः ॥ इति पाठे स्वादुत्वम् । कषायत्वम् । विष्टम्भित्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
“पारावतोऽन्यो वनेऽस्य कामुको गृहपालकः ।
पारावताङ्घ्रिपिच्छश्च श्वेतो रक्तश्च यः ॥”
इति राजनिर्घण्टः ॥
मर्कटः । तिन्दुकः । इति मेदिनी । ते, ११२ ॥
गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । १९ ।
“पारावतः पारियात्रः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥”
फलवृक्षविशेषः । यथा, सुश्रुते । १ । ४६ ।
“द्राक्षामालवकाश्मर्यखर्जूरतालकपित्थकतकदै-
वदारुकोमलाञ्जवीजामलकतिन्दुकतिलकाश्मन्तक-
पारावतसेवलकमधूकपालङ्कदलपादरकश्मर्य-
शुभगौरीकहपोषकापणामलकप्रभृतीनि फला-
नि रक्तपित्तं हरणि ॥” * ॥ परान् शत्रोर्वेडवानानु अवति रक्षतीति । अव रक्षणे + ञ्वट् । ततः पारावते तदस्मिन् । सर्वेदशिकः । इत्यादिषु गुरुः । इति चिन्तामणिः ॥)

पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीष् । महात्मः ।) पारावताङ्घ्रिः । जयावज्री इति भाषा । इति रत्नमाला ॥ काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ८ अध्याये ।
“पारावतपदीदग्धांशवादाश्वेत वृहत्पदे ।
काकजङ्घाश्च च मधुपर्क पूर्व कुरिषु योजयेत् ॥”)

पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिर्मूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥

पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पक्षाग्रभागो यस्य ।) पक्षिविशेषः । पारावतः । इति राजनिर्घण्टः ॥

पारावती, स्त्री, (पारावतस्येव आविर्भवन्त्या इति । अच् । ततो ङीष् ।) गोपगीतम् । सरिद्भेदः । (यथा, शान्तिपर्व्वणि प्रथमस्कन्धे ७ अध्याये ।
“तदा चर्म्मण्वती वेत्रवती पारावती नदी ॥”)
लवलीफलम् । इति मेदिनी । ते, ४१४ ॥

पारावारं, क्ली, (पारं अवारञ्च तटद्वयं ष्वारयतीति । आ + वृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८२ ॥

पारावारः, पुं, (पारावारं तटद्वयं पारं अवारं च वा अस्यास्तीति । अच् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ६ । ३५ ।
“इदमर्थं कौमारं तमसिनुनासतः न तु वद
वदं पारावारस्वयमेवपूर्वः समाकलयितः ॥”)

पारावारीणः, त्रि, (पारावारं गच्छतीति । पारावार + “तद्गच्छति पथिदूतयोः ।” ४ । ३ । ८५ । इत्यत्र “अवारपारात्यन्तानुकामं गामी” इति वार्त्तिकोक्त्या ख ।) पारावारं गच्छति यः । पारावारगन्ता । श्रीमुकुलप्रलिङ्गः ॥

पाराशरं, क्ली, (पराशरेण प्रोक्तमिति । पराशर + अण् ।) पराशरोक्तभिक्षुसूत्रम् । इदं पाराशर्य्यप्रणीतोपाध्याय भवेत् ॥ (उपपुराण-विशेषः । इति पुराणम् । धर्म्मशास्त्रविशेषः । यथा, मत्स्यपुराणः ।
“महाबलभागुद्भवपरकौलूकौ हविः ।
शुश्रुयात् पारागमषि नन्द धर्म्मे मदोष्णमत् ।
धार्म्मोविदुषरोषकैः विषाण पद्मश्मिनि ।
श्रुविदर्श्चाश्मोऽपि च पाराशरमिदं श्रुतम् ॥”)

पाराशरः, पुं, (पराशरस्यापत्यं पुमान् । पराशर + “ऋष्यन्धकेति ।” ४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशर-सम्बन्धिनि त्रिविधविशेषः । यथा,—
“सा तु सास्मिन् धर्म्मनिरुद्धो मौनः कृतः ।
द्वापरे मगलिनित्य वशी पाराशरः भाव ॥”
अस्य विवरणमस्तु पराशरस्य द्रष्टव्यम् ॥) पराशरसम्बन्धिनि, त्रि ॥

पाराशरकल्पिकः, पुं, (पाराशरः पराशरकृतकल्पकं वेत्त्यधीते वा । “विद्यालक्षणकल्पान्ते-ति वक्तव्यम् ।” ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥

पाराशरिः, पुं, (पराशरस्यापत्यम् । “अत इञ् ।” ४ । १ । ९५ । इतीञ् ।) वेदव्यासः । इति शब्दरत्नावली ॥

पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुसूत्रमधीते इति । पाराशर्य + “पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।” ४ । ३ । ११० । इति णिनिः ।) मस्करी । परिव्राजकः । पाराशर्य्येण प्रोक्तं भिक्षुसूत्रं तदधीते ये ते पाराशरिणः । भिक्षवः ... इति शब्दरत्नावली ॥

पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर + “गर्गादिभ्यो यञ् ।” ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली । (यथा, देवीभागवते । १ । ४ । १० ।
“पाराशर्य्य ! महाभाग ! वक्तुं सर्व्वमर्हसि ॥”)

पारिकाङ्क्षी, [न्] पुं, (परमात्मानं काङ्क्षतीति । पारि ब्रह्मरूपं तत् काङ्क्षतीति । काङ्क्ष + णिनि ।) तपस्वी । इत्यमरः । २ । ७ । ४३ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिजातः, पुं, (पारे समुद्रस्य जातः । अत्र पृषोदरादित्वात् साधुः । पारिजातोऽपीति ...) देववृक्षः । सुरतरुः । इति मेदिनी । ते, ११२ ॥ (समुद्रमथनोत्पन्नवृक्षविशेषः । यथा, भागवते । ८ । ८ । ६ ।

"ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥")
अस्योत्पत्तिहरणे यथा,—
"अदित्या तु कृतानुज्ञो देवराजो जनार्द्दनम् ।
यथावत् पूजयामास बहुमानपुरःसरम् ॥
ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् ।
देवोद्यानानि सर्व्वाणि नन्दनादीनि सत्तम ! ॥
ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
नित्याह्लादकरं दिव्यं ताम्रपल्लवशोभितम् ॥
मथ्यमानेऽमृते जातं जातरूपसमत्वचम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ! ।
कस्मान्न द्वारकामेष नीयते कृष्ण ! पादपः ॥
इत्युक्तः स प्रहस्यैनं पारिजातं गरुत्मति ।
आरोपयामास हरिस्तमूचुर्वनरक्षिणः ॥
भोः शची देवराजस्य महिषी तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ।
शचीविभूषणार्थाय देवैरमृतमन्थने ।
उत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि ॥
[illegible] देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥
तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ! ।
विपाककटु यत् कर्म्म न तच्छंसन्ति पण्डिताः ॥
इत्युक्ते तैरुवाचैतान् सत्यभामातिकोपिनी ।
का शची पारिजातस्य कोऽयं शक्रः सुराधिपः ॥
सामान्यः सर्व्वलोकानां यद्येषोऽमृतमन्थने ।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥
यथा सुरा यथैवेन्दुर्यथा श्रीर्वनरक्षिणः ! ।
सामान्यः सर्व्वलोकस्य पारिजातस्तथा द्रुमः ॥
भर्त्तृबाहुमहागर्व्वाद्रुणद्ध्येनं यथा शची ।
तत् कथ्यतामलं क्षान्त्या सत्या हारयति द्रुमम् ॥
कथ्यतां च द्रुतं गत्वा पौलोम्या वचनं मम ।
सत्यभामा वदत्येतदिति गर्व्वोद्धताक्षरम् ॥
यदि त्वं दयिता भर्त्तुर्यदि वश्यः पतिस्तव ।
मद्भर्त्तुर्हरतो वृक्षं तत् कारय निवारणम् ॥
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् ।
पारिजातं तथाप्येनं मानुषी हारयामि ते ॥
श्रीपराशर उवाच ।
इत्युक्ता रक्षिणो गत्वा शच्याः प्रोचुर्यथोदितम् ।
शची चोत्साहयामास सुराणां त्रिदशाधिपम् ॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिः ।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज ! ॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः ।
बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते ॥
ततो निरीक्ष्य गोविन्दो नागराजोपरिस्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
मुमोच च शरव्रातं सहस्रायुतसम्मितम् ॥
[illegible] ।
जग्राह वासवो वज्रं कृष्णश्चक्रं सुदर्शनम् ॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम ! ।
वज्रचक्रधरौ दृष्ट्वा देवराजजनार्द्दनौ ॥
क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान् हरिः ।
न मुमोच तदा चक्रं शक्र ! तिष्ठेति चाब्रवीत् ।
प्रनष्टवज्रं देवेशं गरुडक्षतवाहनम् ।
सत्यभामाब्रवीद्वीरं पलायनपरायणम् ॥
त्रैलोक्येश्वर ! नो युक्तं शचीभर्त्तुः पलायनम् ।
पारिजातस्रगाभोगा त्वामुपस्थास्यते शची ॥
श्रीपराशर उवाच ।
इत्युक्तो वै निववृते देवराजस्तया द्विज ! ।
प्राह चैनामलं चण्डि ! सख्युः खेदातिविस्तरैः ॥
न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीडा जायते विश्वरूपिणा ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्माद्यतश्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीडा कथं भवति देवि ! निराकृतस्य ॥
संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ! ॥
देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते ! ।
क्षन्तव्यं भवतैवैतदपराधं कृतं मया ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
गृहीतोऽयं मया शक्र ! सत्यावचनकारणात् ॥
श्रीशक्र उवाच ।
किमोहयसि मामीश ! मर्त्त्योऽहमिति किं वदन् ।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्त्यलोके त्वया त्यक्ते नायं वै स्थास्यति भुवि ॥
तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ! ॥
अवतीर्य्याथ गरुडात् सत्यभामासहायवान् ।
निष्कुटे स्थापयामास पारिजातं महातरुम् ॥
यमभ्येत्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
वास्यते यस्य पुष्पोत्थगन्धेनोर्व्वी त्रियोजनम् ॥
ततस्ते यादवाः सर्व्वे देहबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्व्वन्तो मुखदर्शनम् ॥"
इति विष्णुपुराणे पञ्चमेंऽशे पारिजातहरणे ३० । ३१ अध्यायौ ॥ (ऐरावतकुलजातनागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।"
ऋषिविशेषः । यथा तत्रैव । २ । ५ । ११ ।
"पारिजातेन राजेन्द्र ! दैवतेन च धीमता ।
सुमुखेन च सौम्येन देवर्षिरमितद्युतिः ॥"
तन्त्रशास्त्रविशेषः । यथा, आगमतत्त्वविलासे ।
"भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमम् ॥")

पारिजातकः, पुं. पारेरुदधेर्जातः पारिजातः स्वार्थे कः । 'पारे जातो विद्युतराः पारिजातेति कीर्त्तितः ।' इत्यागमः ॥ देववृक्षः । तत्पर्य्यायः । मन्दारः २ । इत्यमरः । २ । ४ । २६ ॥ पारिभद्रः । पालितामादार इति भाषा ॥ "पारि पारं प्राप्य जातं जन्म यस्य । 'पारिभद्रे तु मन्दारमन्दारः पारिजातकः ।' इति चतुर्भुजः ॥" इत्यमरटीकायां भरतः ॥

पारिणाय्यं, त्रि, (परिणये विवाहकाले लभ्यम् । परिणय+ष्यञ् ।) परिणयलब्धं धनादिकम् । यथा,—
"मातुः पारिणाय्यं स्त्रियो विभजेरन् ॥"
इति दायभागधृतवशिष्ठवचनम् ॥

पारिणाह्यं, त्रि, (परिणाहमर्हतीति । परिणाह+ष्यञ् ।) गृहोपकरणशय्यासनकुम्भकटाहादि । यथा, मनुः । ९ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥"
"पारिणाह्यस्य गृहोपकरणस्य शय्यासनकुम्भकटाहादेरवेक्षणे स्त्रीं नियोजयेत् ॥" इति तट्टीकायां कुल्लूकभट्टः ॥

पारितथ्या, स्त्री, (परितस्तथाभूता परितथा । ततः स्वार्थे ष्यञ् ।) सीमन्तिकास्थितमणिरचितपट्टिका । सिंथी इति भाषा ॥ तत्पर्य्यायः । बालपाश्या २ । इत्यमरः । २ । ६ । १०२ ॥

पारितोषिकं, त्रि, (परितोषेण लब्धं परितोषादागतं वा । परितोष+ठक् ।) आनन्दकरम् । परितोषजनकद्रव्यम् । यथा,—
"ममापि चन्द्रशेखर-प्रसादनारोपणप्रथमकाङ्क्षिणः पारितोषिकं धारयसि ।" इति मुरारिः ॥

पारिन्द्रः, पुं, (पारीन्द्र+पृषोदरादित्वात् ह्रस्वः ।) सिंहः । इति हेमचन्द्रः । ४ । ३५० ॥

पारिपन्थिकः, पुं, (परिपन्थं मार्गं वर्जयित्वा व्याप्य वा तिष्ठति परिपन्थं हन्तीति वा । "परिपन्थञ्च तिष्ठति ।" ४ । ४ । ३६ । इति ठक् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥

पारिपाट्यं, स्त्री, (परिपाटी+ष्यञ् ।) परिपाट्या भावः । परिपाटीशब्दात् भावे ष्यञ्प्रत्ययः ॥

पारिपात्रः, पुं, पर्व्वतविशेषः । तत्पर्य्यायः । पारियात्रः २ । इति शब्दरत्नावली ॥ स तु विन्ध्यस्य पश्चिमे मालवदेशस्य सीमापर्व्वतः ॥ (अयं हि भारतवर्षस्य कुलपर्व्वतानामन्यतमः । यथा, मार्कण्डेये । ५७ । ११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥"
अस्मादुद्भूतनदी यथा, तत्रैव । ५७ । १९—२० ।
"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेण्या सानन्दिनी चैव सदानीरा मही तथा ।
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारिपात्राश्रयाः स्मृताः ॥")

पारिपात्रिकः, पुं. (पारिपात्र+स्वार्थे कन् ।) पारिपात्रपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥

पारिपार्श्विकः, पुं, (परिपार्श्वे वर्त्तते इति । परिपार्श्व+"परिमुखञ्च ।" ४ । ४ । २८ । इति चकारात् ठक् ।) अनुचरः । पार्श्वकः । इति हेमचन्द्रः । त्रि, पार्श्ववर्त्ती । यथा, अमरकोषे । १ । ७ । ११ ।
"मारिषः (विद्वान्) इत्यल्पाद्यः पारिपार्श्विकः ॥"

प्रसादमुत्तमीमाना श्रीकृष्णस्य दीयताम् ।
स्वद्वन्द्वालमलिनं कीर्त्तनं कीर्त्तयेत्ततः ॥
कथयन्तां नमःशब्दः शङ्खशब्दश्च गीयताम् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नञ्च दीयताम् ॥
विरक्तश्चेद्भवेत् श्रोता गीता वाच्या परेऽहनि ।
गृहस्थश्चेत्तदा होमः कर्त्तव्यः कर्म्मशान्तये ॥
प्रतिश्लोकञ्च जुहुयाद्विधिना दशमस्य च ।
पायसं मधु सर्पिश्च तिलादिमधुसंयुतम् ॥
अथवा हवनं कुर्य्याद्गायत्र्या सुसमाहितः ।
तन्मयत्वात् पुराणस्य परमस्यास्य तत्त्वतः ॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिकताययोः ॥
दोषयोः प्रशमार्थञ्च पठेन्नामसहस्रकम् ।
तेन स्यात् सफलं सर्व्वं नास्त्यस्मादधिकं यतः ॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः ।
दद्यात् सुवर्णं धेनुञ्च व्रतपूर्णत्वसिद्धये ॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ।
तत्रास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरम् ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥
आचार्य्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ।
एवं कृते विधाने च सर्व्वपापनिवारणे ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥
धर्म्मार्थकाममोक्षाणां साधनं नात्र संशयः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥
श्रीमद्भागवतेनैव भक्तिमुक्तिः प्रकाशिता ॥”
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये
६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण+“पारायणतुरायणेति ।” ५।१।७२। इति ठञ् ।) पाठकः । छात्रः । इति सिद्धान्तकौमुदी ॥

पारावकः, पुं, (पृ पूर्त्तौ+घञ् । पारं पूर्त्तिं अवतीति । अव गतौ+ण्वुल् ।) प्रस्तरः । इति शब्दरत्नावली ॥

पारावतः, पुं, (पारे गिरिदुर्गनद्यादिपरपारे आपततीति । पार+आ+पत+अच् । पृषोदरादित्वात् पस्य वः । उड्डीयने सुदक्षत्वादेतस्य तथात्वम् । यद्वा, परावद्दूरदेशस्तस्मिन् अमरीषादिदूरदेशे भवः उड्डीयमानः सन् स्थित इत्यर्थः । परावत्+अण् ।) पक्षिविशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः । छेदकण्ठः २ कपोतः ३ रक्तलोचनः ४ । इति रभसः ॥ पारापतः ५ कलरवः ६ अरुणलोचनः ७ मदनकाकुरवः ८ कामी ९ रतिजणः १० मदनमोहनवाणिलासी ११ कण्ठीरवः १२ गृहकपोतकः १३ ॥ (यथा,—
“सिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः ॥”
इत्युद्भटः ॥)
अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तास्रदाहनाशित्वम् । बल्यत्वम् । वीर्य्यवृद्धिदातृत्वम् । इति राजनिर्घण्टः ॥ रसे पाके स्वादुत्वम् । कषायत्वम् । विशदत्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
“पारावतोऽन्यो वनदेश्यो कामुको घुलघुलारवः ।
पारावताङ्घ्रिपिच्छश्च ज्ञेयो गलरवश्च सः ॥”
इति राजनिर्घण्टः ॥
मर्कटः । तित्तिरः । इति मेदिनी । ते, २१२ ॥ गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
“पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥”
आम्रवर्गाणामन्यतमः । यथा, सुश्रुते । १ । ४२ ।
“दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्द्दबदरकोलप्राचीनामलकतिन्तिडीककोशाम्रभव्यपारावतवेत्रफलनकुचाम्लवेतसदन्तशठनकारङ्गशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥” * ॥ परात् शत्रोरपकारात् अवति रक्षतीति । अव रक्षणे+शतृ । ततः पारावते इदमिति । तस्येदमित्यण् । रक्षाविषयस्य गुणः । इति चिन्तामणिः ॥)

पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीप् । पद्भावः ।) पारावताङ्घ्रिः । नयाफट्की इति भाषा ॥ इति रत्नमाला ॥ काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ९ अध्याये ।
“पारावतपदीदन्तीवाकुचीकैशराजयैः ।
कण्टकार्य्या च तत् पक्वं एतं कुष्ठेषु योजयेत् ॥”)

पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिमूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥

पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पश्चात्प्रदेशो यस्य ।) वनदेशीयपारावतः । इति राजनिर्घण्टः ॥

पारावती, स्त्री, (पारावतस्येव ध्वनिरस्त्यस्या इति । अच् । ततो ङीष् ।) गोपगीतम् । नदीभेदः । (यथा, हारीते प्रथमस्थाने ७ अध्याये ।
“तथा चर्म्मण्वती वेत्रवती पारावती तथा ॥”)
लवलीफलम् । इति मेदिनी । ते, २१२ ॥

पारावारं, क्ली, (पारं नद्यादिपरपारं आवृणोतीति । आ+वृ+“कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८१ ॥

पारावारः, पुं, (पारावारं तटद्वयं पारं अवारञ्च वा अस्त्यस्येति । अच् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ५ । ५८ ।
“यदर्थं कीलालं कलयितुमशक्तः स तु नरः
कथं पारावाराकलनचतुरः स्यादल्पमतिः ॥”)

पारावारीणः, त्रि, (पारावारं गच्छतीति । पारावार+“अवारपारात्यन्तानुकामं गामी ।” ४ । २ । ९३ । इत्यत्र “अवारपारादिगृहीतादपि विपरीताच्चेति वक्तव्यम् ।” इति वार्त्तिकोक्त्या खः ।) पारावारे गच्छति यः । पारावारशब्दात् खीनप्रत्ययनिष्पन्नः ।

पाराशरं, क्ली, (पराशरेण प्रोक्तमिति । पराशर+अण् ।) पराशरोक्तभिक्षुसूत्रम् । इति पाराशरिशब्दटीकायां भरतः ॥ (उपपुराणविशेषः । इति पुराणम् ॥ छन्दोविशेषः । यथाह चक्रदत्तः ।
“यष्टीबलागुडूच्यल्पपञ्चमूलीतुलां पचेत् ।
शूर्पेऽपामष्टभागस्थे तत्र पात्रे परिस्रुतम् ।
धात्रीविदारीक्षुरसं त्रिपात्रं पयसोऽर्म्मणे ।
सर्पिषोऽर्म्मणेनैष पाराशरमिदं घृतम् ॥”)

पाराशरः, पुं, (पराशरस्यापत्यं पुमान् । पराशर+“ऋष्यन्धकेति ।” ४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशरकृतस्मृतिसंहिताविशेषः । यथा,—
“कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥”
अस्य विशेषविवरणन्तु पराशरशब्दे द्रष्टव्यम् ॥)
पराशरसम्बन्धिनि, त्रि ॥

पाराशरकल्पिकः, पुं, (पाराशरः पराशरकृतः कल्पस्तं वेत्त्यधीते वा । “विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् ।” ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥

पाराशरिः, पुं, (पराशरस्यापत्यम् । “अत इञ् ।” ४ । १ । ९५ । इतीञ् ।) वेदव्यासः । इति भूरिप्रयोगः ॥

पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुसूत्रमधीते इति । पाराशर्य्य+“पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।” ४ । ३ । ११० । इति णिनिः ।) मस्करी । चतुर्थाश्रमी । पराशरेण प्रोक्तं भिक्षुसूत्रं इत्यर्थे अण् पाराशरं तदिशतेऽस्याध्ययनायेति भैक्षादित्वात् इनिः । इत्यमरभरतौ ॥

पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर+“गर्गादिभ्यो यञ् ।” ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ४ । ३२ ।
“पाराशर्य्य ! महाभाग ! यत्त्वं पृच्छसि मामिह ॥”)

पारिकाङ्क्षी, [न्] पुं, (पारमपारं काङ्क्षतीति । इतिः । पारि ब्रह्मज्ञानं तत् काङ्क्षतीति । काङ्क्ष+णिनिः ।) तपस्वी । इत्यमरः । २ । ७ । ४२ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७८ ॥

पारिजातः, पुं, (पारस्याकरीति पारी समुद्रस्तस्मात् जातः । समुद्रमन्थनकाले तद्गर्भात्जातत्वात्तथात्वम् । पारिणोऽद्रेर्जातः इति कश्चित् ।) पारिभद्रः । सुरतरुः । इति मेदिनी । ते, १११ ॥ (समुद्रमन्थनकालोत्पन्नोऽत्र कथा, यथा, भागवते । ८ । ८ । ६ । —

"ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यखिलो योऽसौ गन्धेन भुवि यथा भवान् ॥")
अस्योत्पत्तिहरणे यथा,—
"अदित्याप्यनुज्ञातो देवराजो जनार्द्दनम् ।
यथावत् पूजयामास बहुमानपुरःसरम् ॥
ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् ।
देवोद्यानानि सर्व्वाणि नन्दनादीनि सत्तम ! ॥
ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
नित्याह्लादकरं दिव्यं ताम्रपल्लवशोभितम् ॥
मथ्यमानेऽमृते जातं जातरूपमयत्वचम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ! ।
कस्मान्न द्वारकामेष नीयते कृष्ण ! पादपः ॥
इत्युक्तः स प्रहस्यैनं पारिजातं गरुत्मति ।
आरोपयामास हरिस्तमूचुर्वनरक्षिणः ॥
भोः शची देवराजस्य महिषी तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ।
शचीविभूषणार्थाय देवैरमृतमन्थने ।
उत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि ॥
अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥
तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ! ।
विपाककटु यत् कर्म्म न तच्छंसन्ति पण्डिताः ॥
इत्युक्ते तैरुवाचैतान् सत्यभामातिकोपिनी ।
का शची पारिजातस्य कोऽयं शक्रः सुराधिपः ॥
सामान्यः सर्व्वलोकानां यद्येषोऽमृतमन्थने ।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥
यथा सुधा यथैवेन्दुर्यथा श्रीर्वनरक्षिणः ! ।
सामान्यः सर्व्वलोकस्य पारिजातस्तथा तरुः ॥
भर्त्तृबाहुमहागर्व्वाद्रुणद्ध्येनं यथा शची ।
तत् कथ्यतामलं क्षान्त्या सत्या हारयति द्रुमम् ॥
कथ्यतां वै द्रुतं गत्वा पौलोम्या वचनं मम ।
सत्यभामा वदत्येतदिति गर्व्वोद्धताक्षरम् ॥
यदि त्वं दयिता भर्त्तुर्यदि वश्यः पतिस्तव ।
मद्भर्त्तुर्हरतो वृक्षं तत् कारय निवारणम् ॥
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् ।
पारिजातं तथाप्येनं मानुषी हारयामि ते ॥
श्रीपराशर उवाच ।
इत्युक्ता रक्षिणो गत्वा शच्याः प्रोचुर्यथोदितम् ।
शची चोत्साहयामास भर्त्तारं त्रिदशाधिपम् ॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिः ।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज ! ॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः ।
बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते ॥
ततो निरीक्ष्य गोविन्दो नागराजोपरि स्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
मुमोच च शरव्रातं सहस्रायुतसम्मितम् ॥
दिशश्चैव दिशश्चैव दृष्ट्वा च्छन्नं तथाम्बरम् ।
जग्राह वामतो वज्रं ज्वलच्चक्रं सुदर्शनम् ॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम ! ।
वज्रचक्रधरौ दृष्ट्वा देवराजजनार्द्दनौ ॥
क्षिप्तं वज्रमहेन्द्रेण जग्राह भगवान् हरिः ।
न मुमोच तदा चक्रं शक्र ! तिष्ठेति चाब्रवीत् ।
प्रनष्टवज्रं देवेशं गरुडक्षतवाहनम् ।
सत्यभामाब्रवीद्वीरं पलायनपरायणम् ॥
त्रैलोक्येश्वर ! नो युक्तं शचीभर्त्तुः पलायनम् ।
पारिजातस्रगाभोगा त्वामुपस्थास्यते शची ॥
श्रीपराशर उवाच ।
इत्युक्तो वै निववृते देवराजस्तदा द्विज ! ।
प्राह चैनामलं चण्डि ! सख्युः खेदातिविस्तरैः ॥
न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीडा जायते विश्वरूपिणा ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्माद्यतश्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीडा कथं भवति देवि ! निराकृतस्य ॥
संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ! ॥
देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते ! ।
क्षन्तव्यं भवतैवैतदपराधं कृतं मया ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
गृहीतोऽयं मया शक्र ! सत्यावचनकारणात् ॥
श्रीशक्र उवाच ।
किमेवं वदसि मामीश ! मर्त्त्योऽहमिति किं वदन् ।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्त्यलोके त्वया त्यक्ते नायं वै स्थास्यते भुवि ॥
तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ! ॥
अवतीर्य्याथ गरुडात् सत्यभामासहायवान् ।
निष्कुटे स्थापयामास पारिजातं महातरुम् ॥
यमभ्येत्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
वास्यते यस्य पुष्पोत्थगन्धेनोर्व्वी त्रियोजनम् ॥
ततस्ते यादवाः सर्व्वे देहबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्व्वन्तो मुखदर्शनम् ॥"
इति विष्णुपुराणे पञ्चमेऽंशे पारिजातहरणे ३० । ३१ अध्यायौ ॥ (ऐरावतकुलजातनागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।"
ऋषिविशेषः । यथा तत्रैव । २ । ४ । ११ ।
"पारिजातेन राजेन्द्र ! रैवतेन च धीमता ।
सुमुखेन च सौम्येन देवर्षिरमितद्युतिः ॥"
तन्त्रशास्त्रविशेषः । यथा, आगमतत्त्वविलासे ।
"भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमम् ॥")

पारिजातकः, पुं, पारिजोऽद्रिजातः पारिजातः स्वार्थे कः । 'पारे जाता विटपदाः पारिजातका इति प्रसिद्धाः ।' इत्यागमः । देवतरुः । तत्पर्य्यायः । मन्दारः २ । इत्यमरः । २ । ४ । २८ ॥ पारिभद्रः । पालितामादार इति भाषा ॥ "पारिं पारं प्राप्य जातं जलं यस्य । 'पारिभद्रे तु मन्दारकोविदारः पारिजातकः ।' इति वसुचन्द्रः ।" इत्यमरटीकायां भरतः ॥

पारिणाय्यं, त्रि, (परिणये विवाहकाले लब्धम् । परिणय + ष्यञ् ।) परिणयलब्धं धनादिकम् । यथा,—
"मातुः पारिणाय्यं स्त्रियो विभजेरन् ॥"
इति दायभागधृतवसिष्ठवचनम् ॥

पारिणाह्यं, त्रि, (परिणाहमर्हतीति । परिणाह + ष्यञ् ।) गृहोपकरणशय्यासनकुम्भकटाहादि । यथा, मनुः । ९ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥"
"पारिणाह्यस्य गृहोपकरणस्य शय्यासनकुम्भकटाहादेरवेक्षणे एनां नियोजयेत् ॥" इति तट्टीकायां कुल्लूकभट्टः ॥

पारितथ्या, स्त्री, (परितस्तथाभूता परितथा । ततः स्वार्थे ष्यञ् ।) सीमन्तिकाशिरस्थालङ्कारविशेषपट्टिका । सिँथी इति भाषा । तत्पर्य्यायः । बालपाश्या २ । इत्यमरः । २ । ६ । १०३ ॥

पारितोषिकं, त्रि, (परितोषेण लब्धं परितोषादागतं वा । परितोष + ठञ् ।) आनन्दकरम् । परितोषजनकद्रव्यम् । यथा,—
"ममापि चन्द्रशेखर-प्रसादसमारोपितप्रथमकाद्रिन: पारितोषिकं धारयसि ।" इति सुरारिः ॥

पारिन्द्रः, पुं, (पारीन्द्र + पृषोदरादित्वात् ह्रस्वः ।) सिंहः । इति हेमचन्द्रः । ४ । ३५० ॥

पारिपन्थिकः, पुं, (परिपन्थं पन्थानं वर्जयित्वा वा तिष्ठति परिपन्थं हन्तीति वा । "परिपन्थञ्च तिष्ठति ।" ४ । ४ । ३६ । इति ठक् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥

पारिपाट्यं, क्ली, (परिपाटी + ष्यञ् ।) परिपाट्या भावः । परिपाटीशब्दात् भावे ष्यञ्प्रत्ययः ॥

पारिपात्रः, पुं, पर्व्वतविशेषः । तत्पर्य्यायः । पारियात्रः २ । इति शब्दरत्नावली ॥ स तु विन्ध्यस्य पश्चिमे मालवदेशस्य सीमापर्व्वतः । (अयं हि भारतवर्षस्य सप्तकुलपर्व्वतानामन्यतमः । यथा, मार्कण्डेये । ५७ । ११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तैव कुलपर्व्वताः ॥"
अस्मादुद्भूतनदी यथा, तत्रैव । ५७ । १९—२० ।
"वेदस्मृतिर्म्मेदवती वृत्रघ्नी सिन्धुरेव च ।
वेण्वा सानन्दिनी चैव सदानीरा मही तथा ।
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥")

पारिपात्रिकः, पुं, (पारिपात्र + स्वार्थे कन् ।) पारिपात्रपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥

पारिपार्श्विकः, पुं, (पार्श्वे वर्त्तते इति । परिपार्श्व + "परिमुखञ्च ।" ४ । ४ । २८ । इति चकारात् ठञ् ।) अनुचरः । पार्श्वगः । इति हेमचन्द्रः । त्रि, पार्श्ववर्त्ती । यथा, अमरकोषे । ३ । १ । ६९ ।
"भट्टरः त्रिषु नाट्योक्तौ पारिपार्श्विकः ॥"

पारिप्लवं, त्रि, (परि+प्लु+अच् । ततः प्रज्ञाद्यण् ।) चञ्चलम् । इत्यमरः ।३।१।७५। (यथा, रघुः । ३ । ११ ।
"तयोपचाराञ्जलिखिन्नहस्तया
ननन्द पारिप्लवनेत्रया नृपः ।")
व्याकुलः । इति मेदिनी । वे, ६० । (क्ली, तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । १२ ।
"ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत ॥"
पुं, जलपक्षी । इति रामानुजः । यथा, रामायणे । ४ । २७ । २३ ।
"पारिप्लवप्लवैर्जुष्टा बर्हिक्रौञ्चविनादिता ।
रमणीया नदी सौम्या मुनिसङ्घनिषेविता ॥"
प्रथममन्वन्तरीयप्रकृतिविशेषः । यथा, हरिवंशे । ७ । २० ।
"देवाश्चाभूतरजसस्तथा प्रकृतयोऽपरे ।
पारिप्लवश्च रैभ्यश्च मनोरन्तरमुच्यते ॥")

पारिभद्रः, पुं, (परितो भद्रमस्मात् । परिभद्र ततः प्रज्ञाद्यण् ।) वृक्षविशेषः । पालितामादार इति भाषा । तत्पर्य्यायः । निम्बतरुः २ मन्दारः ३ पारिजातकः ४ । इत्यमरः ।२।४।२६। रक्तकुसुमः ५ कमिघ्नः ६ बहुपुष्पः ७ रक्तकेसरः ८ । इति राजनिर्घण्टः । अस्य गुणः । अनिलश्लेष्मशोथमेदःकृमिनाशित्वम् । अस्य पुष्पगुणः । पित्तरोगकर्णव्याधिनाशित्वम् । इति भावप्रकाशः । देवदारु । इति मेदिनी । सरलद्रुमः । इति शब्दचन्द्रिका । (यज्ञबाहस्य पुत्रविशेषः । प्लक्षद्वीपस्य वर्षविशेषः । यथा, भागवते । ५ । २० । ९ ।
"तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् । सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमविज्ञातमिति ।")

पारिभद्रकः, पुं, (पारिभद्र एव । स्वार्थे कन् ।) देवदारुवृक्षः । इत्यमरः । (यथा, महाभारते । १ । १२५ । ३ ।
"पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।")
निम्बवृक्षः । कुष्ठौषधे, क्ली । इति राजनिर्घण्टः ॥

पारिभाव्यं, क्ली, (परिभवाय रोगादिनाशाय हितम् । परिभव+ष्यञ् ।) कुष्ठौषधम् । इत्यमरः ।२।४।१२६। परिभुवो भावः । जामिनी इति भाषा । यथा,—
"साक्षित्वं पारिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥

पारिभाषिकं, क्ली, (परिभाषास आगतम् । परिभाषा+ठञ् ।) परिभाषयार्थबोधकं पदम् । यथा । तन्त्राधुनिकसङ्केतः परिभाषा तया अर्थबोधकं पदं पारिभाषिकम् । यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम् । इति शक्तिवादे गदाधरः ॥

पारिमाण्डल्यं, क्ली, (परिमण्डलस्य परमाणोर्भावः । परिमण्डल+ष्यञ् ।) परमाणुपरिमाणम् । यथा, भाषापरिच्छेदे । १५ ।
"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥"

पारिमुखिकः, त्रि, (परिमुखं वर्त्तते इति । "परिमुखञ्च ।" ४ । ४ । २९ । इति ठक् ।) परिमुखेन तिष्ठति यः । सम्मुखवर्त्ती । परिमुखशब्दात् ष्णिकप्रत्ययनिष्पन्नः ॥

पारियात्रः, पुं, (परितो यात्रया इज्यते । "शेषे ।" ४।२।९२ । इत्यण् ।) पारियात्रपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, गोलाध्याये । ३ । ४२ ।
"माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्याः सविन्ध्य इह सप्तकुलाचलाख्याः ॥")

पारियात्रिकः, पुं, (पारियात्र एव । स्वार्थे ठक् ।) पारियात्रः । इति हेमचन्द्रः । ४ । ९७ ॥

पारियानिकः, पुं, (परियानं प्रयोजनमस्य । परियान+ठञ् ।) अध्वरथः । इति हेमचन्द्रः । ३ । ४१६ ॥ परियातिकोऽपि पाठः ॥

पारिरक्षकः, पुं, (परिरक्षति आत्मानमिति । परि+रक्ष+ण्वुल् । ततः प्रज्ञाद्यण् ।) मस्करी । तापसः । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिशः, पुं, वृक्षविशेषः । पलाशपिपुल इति गजदण्ड इति च भाषा । तत्पर्य्यायः । पलीशः २ कपिचूतः ३ कमण्डलुः ४ गर्द्दभाण्डः ५ कन्दरालः ६ कपीतनः ७ सुपार्श्वकः ८ । अस्य गुणाः । दुर्ज्जरत्वम् । स्निग्धत्वम् । कृमिशुक्रकफप्रदत्वम् । फले अम्लत्वम् । मूले मधुरत्वम् । कषायत्वम् । स्वादुमज्जकत्वञ्च । इति भावप्रकाशः ॥

पारिषदः, पुं, परिषदि तिष्ठति यः । (परिषदि साधुः । परिषदो ण्यः इत्यत्र योगविभागात् णः ।) सभास्थः । तत्पर्य्यायः । सभ्यः २ सभास्तारः ३ सभासत् ४ परिषद्वलः ५ पर्षद्वलः ६ पारिषद्यः ७ पार्षदः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । १० । ३२ ।
"शङ्कुकर्णमुखाः सर्व्वे दिव्याः पारिषदास्तथा ॥"
परिषद् इदम् । "तस्येदम् ।" ४ । ३ । १२० । इति अण् ।) परिषत्सम्बन्धिनि, त्रि ॥

पारिषद्यः, पुं, (परिषदं समवैति । "परिषदो ण्यः ।" ४ । ४ । ४४ । इति ण्यः ।) पारिषदः । इति शब्दरत्नावली ॥

पारिहारिकः, त्रि, (परिहारे साधुः । परिहार+ठञ् ।) परिहारकर्त्ता । परिहारं करोति यः इत्यर्थे ष्णिकप्रत्ययनिष्पन्नः ॥

पारिहार्य्यः, पुं, (परिह्रियते इति । परि+हृ+ण्यत् । ततः प्रज्ञाद्यण् ।) वलयः । इत्यमरः ॥ परिहार्य्ये, क्ली ॥

पारिहास्यं, क्ली, (परिहास+ष्यञ् ।) परिहासस्य भावः । परिहासद्वारा कृतम् । यथा, श्रीभागवते । ६ । अजामिलोपाख्याने ।२।१४।
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"
"नन्वयं पुत्त्रनामाग्रहीत् न भगवन्नामतत्राह ।
साङ्केत्यं पुत्त्रादौ सङ्केतितम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थं कृतम् । हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति तट्टीकायां श्रीधरस्वामी ॥

पारी, स्त्री, (पारयत्यनयेति । पॄ पूर्त्तौ+णिच्+घञ् । ततो ङीष् ।) पूरः । जलसमूहः । कर्करी । हस्तिपादरज्जुः । इति मेदिनी । रे, ११ । भाषा । परागः । इति विश्वः । (पीयतेऽनेनेति । पा+क्विप् । तद्राति । रा+कः । ङीष् ।) पानपात्रम् । इति त्रिकाण्डशेषः । (यथा, राजतरङ्गिण्याम् । ४ । १७३ ।
"कर्पूरपारीपतितं शौरेयमिव द्वारितम् ।")
दोहनपात्रम् । इति जटाधरः ॥

पारीक्षितः, पुं, परीक्षितराजः । इति शब्दरत्नावली ॥ जनमेजयः । परीक्षितोऽपत्यं इत्यर्थे अण्प्रत्ययनिष्पन्नः ॥ (यथा, देवीभागवते । १ । ११ । १२ ।
"ततः सुवर्णवर्म्माख्यो राजा काशीपतिः किल ।
वपुष्टमां शुभां कन्यां ददौ पारीक्षिताय च ॥")

पारीणः, त्रि, (पारं गामीति । पार+"अवारपारात्यन्तानुकामं गामी ।" ५ । २ । ११ । इति खः ।) पारगमनकर्त्ता । पारं गच्छति इत्यर्थे खप्रत्ययनिष्पन्नः ॥ (यथा, भट्टिः । २ । ४९ ।
"त्रिवर्गपारीणमसौ भवन्तमध्यासयन्नासनमेकमिन्द्रः ।")

पारीन्द्रः, पुं, (पॄ पालने+कर्म्मणि इन् । पारिः पशुस्तस्य इन्द्रः ।) सिंहः । अजगरसर्पः । इति हेमचन्द्रः ॥

पारीरणः, पुं, (पार्य्यां जलपूरे रणं यस्य ।) कमठः । दण्डः । पटशाटकः । इति त्रिका ॥

पारुः, पुं, (पिबति रसानिति । पा+"पातृ तुदि वचि रिचि सिचिभ्यस्थक्" इत्यत्र "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च" इति बाहुलकात् पिबतेश्च । ४ । १०१ । इत्यत्र उणुक्त्या रुः ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥

पारुष्यं, क्ली, (परुषस्य भावः । परुष+ष्यञ् ।) अप्रियभाषणम् । तत्पर्य्यायः । अभिवादः २ । इत्यमरः । १ । ६ । १४ । तत्तु चतुर्व्विधवाक्पापान्तर्गतपापविशेषः । यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥"
इति तिथ्यादितत्त्वम् ॥
परुषत्वम् । दुर्व्वाक्यम् । इति मेदिनी । ये, ६१ । इन्द्रस्य वनम् । इति विश्वः ॥ अगुरु । इति शब्दचन्द्रिका ॥

पारुष्यः, पुं, (परुषस्य भावः पारुष्यं दुर्व्वाक्यं तदिव नीतिवाक्यमस्ति अस्याशिष्य आद्यच् ।) बृहस्पतिः । इति मेदिनी । ये, ६४ ।

पारेरकः, पुं, (वधादिः पारमीर्ष्य गच्छतीति । ईर्+ण्वुल् ।) खड्गः । इति शब्दमाला ॥

पार्षटं, क्ली, (पार्दे पटती इति अण्। ततः पृषोदरादित्वात् साधुः।) पांशु। इति धारावली। १६२।

पार्थः पुं, पृथिवीपालः। (पृथाया अपत्यं पुमान्। शिवादित्वादण्।) पृथापुत्रः। (यथा, महाभारते। २। २३५। ६।
"सरस्तदासाद्य वनञ्च पुण्यं
ततः परं किमकुर्व्वन्त पार्थाः॥")
अर्ज्जुनः। यथा, भगवद्गीतायाम्। १। २५।
"उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति॥")
अर्ज्जुनद्रुमः। इति शब्दचन्द्रिका॥

पार्थक्यं, क्ली, (पृथक्+भावे ष्यञ्।) पृथक्त्वम्। पृथक् इत्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम्॥ ("घटप्रदीपवद् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेव।" इति साहित्यदर्पणम्॥)

पार्थवं, क्ली, (पृथोर्भावः। पृथु+अण्।) पृथुता। पृथोर्भावः इति भावार्थे अण्प्रत्ययनिष्पन्नम्॥ (पृथनामा राजा तस्येदमित्यण्। पृथुराजसम्बन्धिनि, त्रि। यथा, भागवते। १। ३। १४।
"ऋषिभिर्याचितो भेजे नवमं पार्थवं वपुः॥")

पार्थिवं, क्ली, (पृथिव्या विकारः पृथिव्यां भवमिति वा अण्।) तगरपुष्पम्। इति राजनिर्घण्टः॥

पार्थिवः, पुं, (पृथिव्या ईश्वरः।) पृथिवी+ "तस्येश्वरः।" ५। १। ४२। इति अञ्।) राजा। इत्यमरः॥ (यथा, मनुः। ७। १९८।
"तेषाञ्च समवेतानां साम्यौ घातकपार्थिवौ।
राजघातकयोश्चैव घातको शुभमागभाक्॥"
वत्सरविशेषः। यथा,—
"बहुशस्यानि जायन्ते पश्चिदेशे सुलोचने।
सौराष्ट्रलाटदेशे च पार्थिवे नाम संज्ञक॥"
इति ज्योतिस्तत्त्वधृतवचनम्॥
पृथिव्या अयं इत्यण्।) मृदादः। इति त्रिकाण्डशेषः॥ (पृथिव्या विकार इति। "पर्व्व-भूमिपृथिवीभ्यामञणौ।" ४। १। ४१। इत्यञ्।) पृथिवीविकृतौ, त्रि। इति मेदिनी॥ (यथा, भागवते। १। २। २४।
"पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥"
पृथिव्या विभिन्नं संयोग उत्पातो वा।
पृथिवीसम्बन्धिनि, त्रि। यदुक्तम्।
"मधुमत् पार्थिवं रजः॥")

पार्थिवी, स्त्री, (पृथिव्यां भवा। "दिष्ठादित्वीति।" ४। ११ ८५। इत्यत्र सुबन्तवार्त्तिके "पृथिव्या आञौ।" इत्युक्तेरञ्। ततो ङीप्।) सीता। इति मेदिनी। वे, ३६॥

पार्न्दरः, पुं, मसः। इति जटाधरः॥

पार्व्वणः, पुं, (पर्व्वणि भवः। "सन्धिवेलाद्यृतु-नक्षत्रेभ्योऽण्।" इत्यण्।) श्राद्धविशेषः। इति शब्दचन्द्रिका॥ (पर्व्वणि क्रियते यत् तत्।) अमावास्यापर्व्वणामावाश्राद्धम्। यथा,—
"अमावास्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्।
क्रियते पर्व्वणि वा यत्तत् पार्व्वणमुदाहृतम्॥"
इति भविष्यपुराणम्॥
पर्व्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्व्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनयौगिकत्वेन पार्व्वणत्वप्राप्तौ अमावास्यायां पृथगभिधानं तद-मावास्याश्राद्धस्य रूढ़ित्वार्थं तेन पार्व्वणेन विधानेनेत्यादौ यौगिकमात्रावयवप्रत्ययेन एकस्याः समुदायशक्तिसम्बन्धात् अमावास्या-पार्व्वणातिदेशो लभ्यते न तु पूषाष्टकादि-पार्व्वणधर्म्मातिदेशः।" इति श्राद्धतत्त्वम्॥ *॥
सामगानां तस्य प्रयोगो यथा,—
"विप्रामन्त्रणं श्राद्धार्थं क्रमशस्त्वनम्।
श्राद्धपूर्व्वदिने मांसस्त्रीत्यागश्चैकभोजनम्॥
श्राद्धार्थे दन्तकाष्ठस्य त्यागः स्नानं तथौषधि।
शय्यास्तरं पादशौचे वाससां विष्णुचिन्तनम्॥
तस्ये पूजा मूलादानं परभूस्वामिनेऽथवा।
तत् पिष्टव्याप्यदानं दर्भादीनकुशादिभिः॥
श्राद्धारम्भा च गायत्री देवताभ्य इति त्रिधा।
अन्नप्रोक्षणं दर्भासनस्थापनमेकतः॥
पूर्व्वे विप्रकरे तोयं कुशासनमनन्तरम्।
दक्षिणे देवविप्रस्य पितृविप्रस्य वामतः॥
आवाहनार्थं अनुज्ञा ततो गन्धादिपञ्चकम्।
ऐशानीक्रमतो रेखा प्रागग्रा देवमण्डले॥
नैरृतीक्रमतो रेखा दक्षिणाग्रा पितृमण्डले।
पात्रायां तेषु विन्यासो सोमप्रशोऽपि होमकः॥
हुतशेषप्रदानञ्च पात्रालम्भोऽन्नवेशनम्।
इदमन्नमिति: चैमसूक्तौ देवे पत्रस्य च॥
पित्रे मन्त्रेण निःक्षेपस्तिलस्याप्यहता इति।
मधुनीत्ति च निःक्षेपो गायत्र्यादिजपस्ततः॥
मधुवाता तृचा चैव मधुमन्त्रजपेन च।
यथाभिमतकं तस्य दानं अन्ननिवेदनम्॥
गायत्र्यादिनिवेदनयोरन्यहीनजपस्तथा।
द्विजाभावेऽपि स्थानार्थं गायत्र्यादिविकल्प च॥
पुरुषाख्यानस्य च जपः सतिलम्रोक्षितौ भुवि।
अग्निदग्धेति मन्त्राभ्यां सतिलान्ननिवेदनम्॥
पश्चात् पानपादमनं हरिस्मृतिर्मन्त्रस्य च।
पिण्डादिक्रमतो दानं गायत्र्यादिजपः पुनः॥
पिण्डावेक्षणयोः प्रश्नो विद्धीति च मन्त्रवे।
अपहतामिति मन्त्राभ्यां रेखायुग्मं पितृक्रमात्॥
आस्तरो देवतेभ्यश्च आवाहनं तिलैः।
अवनेजनदानञ्च मधुवाता मधुत्रयम्॥
अथाग्नौ पिण्डदानं दर्भेषोपावर्त्तनम्।
आचमनं स्मृतिर्निष्णोः पात्रस्यावनेजनम्॥
अचेल्यादिजपो वामावर्त्तेनोदकमुत्सृजत्।
आद्यावासोनपश्चैव न्यासदानोऽञ्जलिस्ततः॥
नम इत्यादिजपो वासोदानञ्च पूजनम्।
वस्त्राय जपश्चैव द्विजायभुनिपिन्नवम्॥
देवादिदक्षिणा दानं अन्नादिविकिरस्य च।
द्विजा इत्यादिजपमात्रयोरा मोक्षमिव्यपि॥
अन्नविकरणाः पिण्डे अधोवाचनमर्पणम्।
शुभोत्थानं पितुः पश्चे दक्षिणाग्रागमन्तः॥
विश्वेदेवाश्च दाताऽरौ देवैर्निवर्ज्जनम्।
विसर्ज्जनं वाच इति वामावेति प्रदक्षिणम्।
अस्मादेः प्रतिनिविष्ट वामदेवजपांस्तथा।
दीपप्रच्छादनं चक्रासनमाचमने तथा॥
अच्छिन्नदाशनं विप्रसारस्यं प्रियभोजनम्।
उपवासदिने प्रायं मांसितरापितार्थति॥
तद्दिने मैथुनत्यागः श्राद्धकृच्छ्राद्धभोजिनोः॥" *॥
यजुषां विशेषो यथा,—
"आस्तरो देवताभ्यश्च तिलपुष्पजलैस्ततः।
अवनेजनपिण्डौ च प्रक्षालेपावमर्षणम्॥
प्रक्षालनाचमनं विष्णोः संस्मरणाय वै।
अपेत्यादिजपो वामावर्त्तेनोदकमुत्सृजत्॥
आद्यामीणपश्चैव न्यासः प्रत्यवनेजनम्।
नीवीविसंसनश्चैव तथैवाचमनद्वयम्॥
नमो वः पितरः शुष्मायेत्यादिकृताञ्जलिः।
अनुमन्त्रणमेवार्थं वासः पिण्डप्रपूजनम्॥
देवादिदक्षिणे दानं अन्नादिनिवयस्य च।
शिवा इत्यादिनाचमनयोरा मोक्षमिव्यपि॥
दातारोऽभ्यश्चैव एवाः सन्त्वाशिषोऽञ्जलि॥
स्वधावितकुशाः पिण्डे स्वधावाचनमर्पणम्॥
आशास्यैव पितॄणां तेषामुत्तोलनन्ततः।
शुभोत्थानं पितुः पश्चे दक्षिणाग्रागमन्ततः॥
विश्वेदेवाश्च प्रीयन्तां देवे वा जलमित्यपि।
विसर्ज्जनं वाज इति आमावेति प्रदक्षिणम्॥
अन्यत् सर्व्वं समानम्।" इति श्राद्धप्रयोगतत्त्वम्॥

पार्व्वतः, पुं, (पर्व्वते भवः। "विभाषा मनुष्ये।" ४। २। १४४। इति पक्षे अण्।) महानिम्बः। इति रत्नमाला॥ घोड़ानिम् इति भाषा॥ (अश्व-विशेषः। यथा, महाभारते। १। १९६। १०।
"भीमेन पार्वतश्चापि पार्व्वतेनाभवद्गिरिः॥")
पर्व्वतसम्बन्धिनि, त्रि। (यथा, महाभारते। १। ८०। १०।
"यावत् पृथिव्यां विहितं गवाश्वं
सहान्यैः पशुभिः पार्व्वतैश्च॥")

पार्व्वती, स्त्री, (पर्व्वतो हिमालयस्तस्य तदधिष्ठातृदेवस्येति भावः अपत्यमिति। अण् ङीप् च।) दुर्गा। इत्यमरः॥ तस्या व्युत्पत्तिर्यथा,—
"तिथिभेदे कल्पभेदे पर्व्वभेदप्रभेदतः।
ख्याता तेषु च विख्याता पार्व्वती तेन कीर्त्तिता॥
महोत्सवविशेषश्च पर्व्वेति परिकीर्त्तितम्।
तस्याधिदेवी या सा पार्व्वती परिकीर्त्तिता॥
पर्व्वतस्य सुता देवी आविर्भूता च पर्व्वते।
पर्व्वताधिष्ठातृदेवी पार्व्वती तेन कीर्त्तिता॥"
इति ब्रह्मवैवर्त्ते दुर्गोपाख्याने ४४ अध्यायः॥
द्रुपदी। गोपालकर्कटी। इति मेदिनी॥ सौपर्णी। धोवनी। इति हेमः॥ घोरपर्णी। जतिका। इति रत्नमाला॥ धूमदाबलरिरा। शालसी। शैलजी। इति राजनिर्घण्टः॥

पार्व्वतीनन्दनः, पुं, (पार्व्वत्याः नन्दनः।) कार्त्ति-केयः। इत्यमरः। १। १। ४१॥

पार्व्वतीयकुमारः, पुं, (पार्व्वतीयः पार्व्वतीयानां कुमारः।) पार्व्वतीपुत्रः। यथा,—
"काष्ठकारविदेहाश्च वैद्वेहपाश्च ये।
पार्व्वतीयाः कुमाराश्च यथा कर्णाद् विनिर्ज्जिताः॥"
इति मार्कण्डेयपुराणम्॥

पार्व्वतेयं, क्ली, (पर्व्वते भवम् । पर्व्वत+ढक् ।) सौवीराञ्जनम् । इति शब्दचन्द्रिका ॥

पार्व्वतेयः, पुं, (पर्व्वते भवः । पर्व्वत+ढक् ।) सूर्य्यावर्त्तवृक्षः । इति रत्नमाला ॥ हुलहुलिया इति भाषा । पर्व्वतजाते, त्रि ॥

पार्शवः, पुं, (पर्शुना आयुधेन जीवतीति । पर्शु+ "पर्श्वादियौधेयादिभ्योऽणञौ ।" ५ । ३ । ११७ । इति अण् ।) पर्शुधारियोद्धा । पर्शुना युध्यते इत्यर्थे आयुधीयनियमः ॥

पार्श्वं, क्ली, पुं, (स्पृश्यते इति । स्पृश+ "स्पृशेः श्वण्शुनौ पृ च ।" उणां ५ । २७ । इति श्वण् पृ-आदेशश्च ।) कक्षाधोभागः । इत्यमरः । २ । ६ । ७९ ॥ पाश इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ३६ अध्याये ।

"तिर्य्यक् प्रणिहिते नेत्रे तथा पार्श्वावपीडिते ।"

यथा, शकुन्तलायाम् १ अङ्के ।

"न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात् ॥")

पार्श्वं, क्ली, (स्पृश+श्वण् धातोः पृ-आदेशश्च ।) चक्रोपान्तम् । (पर्शूनां समूहः । अण् ।) पर्शुगणः । पार्श्वास्थिसमूहः । इति मेदिनी ॥ (अनृजुरुपायः । इति सिद्धान्तकौमुदी ।)

पार्श्वः, पुं, जिनः । (अयमेव जैनागमोक्तत्रयोविंशतीर्थङ्करः । अस्य पिता विश्वसेनः माता च वामा । यदुक्तं पार्श्वनाथचरित्रे । १० । ७१ ।

"श्रीमत्श्रीपार्श्वतीर्थेशो विश्वसेनकृपालये ।
वामागर्भे जगन्नाथोऽवतरिष्यति मुक्तये ॥"

तथा च तत्रैव । ११ । ३८ ।

"विश्वसेनपतेर्व्वंशाः सद्गर्भेऽवतरिष्यति ।
श्रीपार्श्वनाथ एवाद्यतीर्थकर्त्ता जगद्गुरुः ॥"

हेमचन्द्राचार्य्यादिमते तु अस्य पितृनाम अश्वसेनः मातृनाम वामा ॥ * ॥

अस्य जन्मकालादिर्यथा तत्रैव । ११ । ४५—४६, ८६—८७ ।

"वैशाखकृष्णपक्षस्य द्वितीयायां निशात्यये ।
विशाखर्क्षे शुभमासे सन्मुहूर्त्ते सुरेश्वरः ॥
अवतीर्य्य दिवश्च्युत्वा शक्रा भोगान् सुनिर्म्मले ।
वामाया गर्भे निरौपम्ये शुद्धस्फाटिकसन्निभे ॥"

"नवमे मासि संपूर्णे पौषे मासि शुभोदयात् ।
कृष्णपक्षेऽनिले योगे शुभे एकादशीतिथौ ॥
शुभलग्नमुहूर्त्तादौ सुपुत्रेऽतिप्रसूतेव सा ।
सती देवकुमारीभिः सेव्या तीर्थङ्करं सुतम् ॥"

बाल्यकाले एवास्य वैराग्योत्पत्तिर्जाता । ततोऽसौ संसारासक्तिं तुच्छीकृत्य राज्यादिकं विहाय वनं प्रस्थितवान् । एतन्मतचलितमतं यथा, तत्रैव । १४ । ७८—८० ।

"मिथ्यात्वेनाविरत्या च प्रमादेन कषायतः ।
दृष्टयोगेन मूढानां महापापं प्रजायते ॥
पञ्चाम्निसाधनेनैव पृथिव्याद्यङ्गिराशयः ।
म्रियते बहुविधः सर्व्वदिक्षु तत्तापतो भृशम् ।
जीवघातेन घोराघं तस्य पाकेन दुर्गतिः ।
जायते च महद्दुःखं तापसानां कुदात्मनाम् ॥
ज्ञानहीनो वपुःक्लेशो व्यर्थः पापाय वाञ्छताम् ।
दयां विना तपो धर्म्मः सर्व्वमस्ति निरर्थकम् ॥
तुषखण्डनयोगेन लभ्यन्ते तण्डुला यथा ।
न तथा ज्ञानकष्टेन मोक्षमार्गोदयः क्वचित् ॥
यथा सुमथनाग्नेर्योत्पद्यते जातुचिद्घृतम् ।
तथा हिंसाकरेणैव तपसाप्त सुखादि च ॥
यथा पाषाणनावा स्वयं गौरवाच्च परो न हि ।
जायते जातु धर्म्मो वा सुखं पञ्चाग्निसाधनात् ॥
दवभीत्या यथान्धो धावन्नपि म्रियते यथा ।
कुर्व्वन्नपि तपो ज्ञानी मज्जत्येव भवार्णवे ॥
हेयादेयविचारश्च पुण्यपापे हिताहितम् ।
देवादेवं भवं मोक्षं साधनं सत्वरं शुभम् ।
निर्ज्जरा तत्त्वविज्ञानं गुरुं चकुगुरुं शुभम् ।
कुज्ञानं वेत्ति नाज्ञानी जात्यन्ध इव दन्तिनम् ॥
अतो जैनमतं सत्यं धर्म्मं जीवदयावहम् ।
सर्व्वज्ञाप्तं गृहाण त्वं त्यक्त्वा च दुराग्रहम् ॥
नैमन्ध्यतपसा मोक्षः सुखं वाचामगोचरम् ।
अज्ञानं तपसा दुःखं भ्रमणञ्च भवाटवौ ॥
भवतुर्व्वेदेन तथ्यं ते हितञ्च धर्म्मसाधनम् ।
वचः प्रोक्तं मयेति त्वां दीक्षिता शुभमञ्जसा ॥"

तत्त्वचलितानुप्रेक्षादिमतं तत्रैव १५ अध्याये विस्तृतौ द्रष्टव्यम् ॥ * ॥

जैनशास्त्रोक्ततत्त्वादीनि यथा, तत्रैव २० अध्याये ।

"शृणु तत्त्वं गणाधीश ! माहं शारदभिर्गतिः ।
तत्त्वादीनि प्रवक्ष्येऽहं स्वैकचित्तेन संप्रति ॥
जीवादिसप्तपदार्थानां याथार्थ्यं तत्त्वमिष्यति ।
सम्यक् जैनागमे तत्त्वं विद्धि नान्यत् कुशासने ॥
जीवाजीवास्रवबन्धः संवरो निर्ज्जरा शिवः ।
इत्युक्तानि जिनाधीशैः सप्त तत्त्वानि चागमे ॥
संसारिमुक्तभेदेन द्विधा जीवा भवन्त्यहो ।
मुक्ता भेदविनिष्क्रान्ता अनन्तगुणभाजनाः ॥
भव्याभव्यप्रभेदेन द्विधा संसारिणोऽङ्गिनः ।
त्रसस्थावरभेदेन वा मुक्तिभवे गामिनः ॥
एकाक्षा विकलाक्षाः पञ्चाक्षाश्चेति ते मताः ।
देवनारकतिर्य्यग्नृभेदा इति चतुर्व्विधाः ॥
एकद्वित्रिचतुःपञ्चेन्द्रियगत्योऽथ पञ्चधा ।
पृथ्व्यप्तेजोमरुद्वृक्षत्रसभेदात् षडङ्गिनः ॥
संज्ञिनोऽसंज्ञिनोद्वाख्याता हि चतुरिन्द्रियाः ।
एकाक्षा बादराः सूक्ष्माः सप्तधैवाङ्गिराशयः ॥
पर्य्याप्तेतरभेदेन ताः सप्त जीवयोनयः ।
गुणिता अखिला जीवसमासाः स्युश्चतुर्द्दश ॥
अष्टधा धातवो बादरसूक्ष्मैश्च चतुर्व्विधा ।
नित्येतरनिकोता हि विकलत्रयदेहिनः ॥
संज्ञिनोऽसंज्ञिनः सुप्रतिष्ठिताः अप्रतिष्ठिताः ।
इति संसारिणो जीवभेदा एकोनविंशतिः ॥
ते पर्य्याप्तेतरालब्धिपर्य्याप्तैर्गुणिता भुवि ।
सर्व्वे जीवसमासाः सप्तपञ्चाशत्प्रमा मताः ॥
स्थावराश्च द्विपञ्चाशद्भेदाः सुरनारकाः ।
द्विधाप्रथाप्ततिर्य्यञ्चश्चतुस्त्रिंशत्प्रमाः स्मृताः ॥
नवधा मानवाश्चैव नवधा विकलाङ्गिनः ।
इति जीवसमासाः स्युरष्टानवतिसंख्यकाः ॥
पृथ्व्यप्तेजःसमीरा अष्टधा बादरसूक्ष्मतः ।
नित्येतरनिकोताश्चतुर्द्धा बादरसूक्ष्मतः ॥
निकोतसहितास्तद्रहिताः प्रत्येककायिनः ।
एकत्र मेलिता एते सर्व्वे भेदाश्चतुर्द्दश ॥
एकाक्षा गुणितास्ते द्विचत्वारिंशत्प्रमाः स्फुटम् ।
पर्य्याप्तकेतरालब्धिपर्य्याप्तैः स्युर्व्विशागमे ॥
द्विप्रकाराः सुराः स्युः पर्य्याप्तापर्य्याप्तभेदतः ।
तथा च नारको ज्ञेयो द्विधा दुःखाब्धिमध्यगः ॥
जलस्थलनभश्चारिणः संज्ञासंज्ञिभेदतः ।
षड्विधा गर्भजा जीवाः पञ्चेन्द्रियसमाह्वयाः ॥
भोगभूमिभवा जीवा द्विधा स्थलखगामिनः ।
ते सर्व्वे मेलिता अष्टभेदाश्च गुणिताः पुनः ॥
पर्य्याप्तेतरभेदाभ्यां षोडशैव भवन्त्यपि ।
संज्ञासंज्ञित्वभेदाभ्यां जलस्थलखचारिणः ॥
षड्वा सम्मूर्च्छनास्ते पर्य्याप्तियुक्तास्त्वेतराः ।
भवन्त्यलब्धिपर्य्याप्तकाः प्रत्येकं किलाङ्गिनः ॥
ज्ञाता एकत्र ते सर्व्वे भेदा अष्टादशप्रमाः ।
गर्भसम्मूर्च्छिताः सर्व्वे स्युश्चतुस्त्रिंशदङ्गिनः ॥
आर्य्यम्लेच्छभवा भोगकुभोगभूमिजा नराः ।
अष्टभेदा मता वै पर्य्याप्तापर्य्याप्तभेदतः ॥
सम्मूर्च्छिनो मनुष्या अलब्धिपर्य्याप्तसंज्ञकाः ।
इति विश्वे भवन्त्यत्र नव भेदा नृयोनिजाः ॥
पर्य्याप्तादित्रिभेदेन गुणिता विकलाङ्गिनः ।
नवधा श्रीजिनैः प्रोक्ता आगमे जैनशासने ॥
अष्टानवतिरेते जीवसमासा विचक्षणैः ।
विज्ञेया यत्नतस्तेषां दया कार्य्या मुमुक्षुभिः ॥
भूतोदकाग्निवाताख्या नित्येतरनिकोतकाः ।
प्रत्येकपृथग्लक्षाश्च वनस्पतयो दश ॥
द्वित्रितुर्य्येन्द्रिया द्वौ द्वौ तथा देवाश्च नारकाः ।
पशवो हि चतुर्लक्षाश्चतुर्द्दशमनुजातयः ॥
चतुरशीतिलक्षा इमा जीवजातयोऽखिलाः ।
इत्युक्तीया प्रयत्नेन ज्ञात्वा दक्षैः स्वसत्कृपे ॥
कोटीकोटिकानवनवतिलक्षाश्च कोटयः ।
तत्पञ्चाशत्सहस्रा इत्यखिलाङ्गिकुलान्यपि ॥
जीवितः प्राणनादौ हि जीविष्यति पुनः सदा ।
जीवत्वयं ततस्तज्ज्ञो जीवद्रव्यं किलोच्यते ॥
अक्षाणाः पञ्च च प्राणा मनोवाक्कायतस्त्रयः ।
आयुरुच्छ्वासनिश्वासौ दशेति संज्ञिनां मताः ॥
असंज्ञिनां नवस्युस्ते विनाच मनसाखिलाः ।
चतुरेन्द्रियजीवानां ह्यष्टौ कर्णेन्द्रियं विना ॥
त्रीन्द्रियाणां विना चक्षुः सप्त प्राणाः प्रकीर्त्तिताः ।
द्वीन्द्रियाणां हि षट्प्राणाः कथिता नासिकां विना ॥
सुरसनाग्रभ्यां विनैकाक्षाणां प्राणाः स्युश्चतुःप्रमाः ।
यथायोग्यमपर्य्याप्तानां ज्ञेयास्ते जिनागमे ॥
आहाराङ्गेन्द्रियोच्छ्वासनिश्वासवाक्यचेतसः ।
षड्वा पर्य्याप्तयश्चेति विज्ञेया संज्ञिदेहिनाम् ॥
विकला संज्ञिनो पञ्चपर्य्याप्तयो मनो विना ।
चतुःपर्य्याप्तयो ज्ञेया एकाक्षाणां वचो विना ॥
निश्चयेन भवेत् केवलज्ञानदृग्मयोऽसुमान् ।

अनन्तसुखवीर्याद्यगणमाहात्म्य एव हि ।
व्यवहारेण मिथ्यादिविभावगुणसंयुतः ।
नेत्रादिदशभिर्युक्तः प्राणी कर्मकृतैः कली ॥
कर्मपुद्गलसंयोगान्मूर्त्तो जीवश्च व्यवहारतः ।
अमूर्त्तो निष्कलः शुद्धो ज्ञानमूर्त्तिश्च निश्चयात् ॥
व्यवहारे नयेनात्र गुणपात्रस्य चात्मना ।
कर्मणो कर्मणां कर्त्ता भोक्ता तत्फलसञ्चया ॥
उपचारस्वभावाख्या नयेन प्राणभृद्भुवि ।
कटपटगृहादीनां कर्त्ता च शिल्पिकर्मणाम् ॥
अशुद्धनिश्चयेनाङ्गी कर्त्ता च भावकर्मणाम् ।
रागद्वेषमदोन्मादशोकादिविषयात्मनाम् ॥
ज्ञानपुण्यजनान्मृत्युः प्रादुर्भावाद्यसम्भवः ।
द्रव्यरूपेण नित्यत्वं चतुर्गतिषु देहिनाम् ॥
जायतेऽतो गणाधीशैरुत्पादव्यय एव च ।
ध्रौव्यभावोऽत्र संप्रोक्तः सर्वेषां व्यवहारतः ॥
कायप्रमाण आत्मायं पर्यायनयतः क्वचित् ।
युक्तः प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥
विना समुद्घातैर्निश्चयेन भवेत् पुनः ।
कर्मोपप्राप्तदीनाङ्गी ह्यसंख्यातप्रदेशमः ॥
वेदनाख्यः कषायाख्यो विकुर्व्वणसमाह्वयः ।
मारणान्तिकसंज्ञश्च तथाहारकसंज्ञकौ ॥
केवलाख्यः समुद्घाताः सप्तेति श्रीजिनैर्मताः ।
केवल्यनेन नाहारायोगिनां स्युः परेऽङ्गिनाम्
पुण्यपापफलानां हि विविधानां चतुर्गतौ ।
शर्म्माशर्म्मकराणां प्राणी भोक्ता व्यवहारतः ॥
स्वात्मरूपस्य कर्त्ता शुद्धनिश्चयनयादसौ ।
अनन्तसुखराशीतो न कर्त्ता बन्धमोक्षयोः ॥
अतोऽभावात्मको ध्येयो निर्विकल्पपदाश्रितैः ।
गुणैः सिद्धैश्च साद्यन्तो ज्ञानमूर्त्तिरमूर्त्तिमान् ॥
यथाग्निर्दीपिकेनात्र दहन्ते काष्ठराशयः ।
अनन्तकर्मकाष्ठानि तथा ध्यानमयाग्निना ॥
इन्द्रभयो यथा नागो दंष्ट्राभयोषधो हरिः ।
महार्णवे च तथा ध्यानहीनः कर्मारिपातने ॥
निदानमिव रत्नानां कल्पवृक्षोऽथ प्राणिनाम् ।
निदयानां यथा ग्रहो दृष्टा मध्ये परो जिनः ॥
आकाशश्च तत्त्वानां पदार्थानां तथा महान् ।
सर्वेषामपदार्थानां द्रव्याणां स्वस्य एव हि ।
इति मत्वा भवोद्विग्नो मनः कृत्वातिनिश्चलम् ।
विषयेभ्यो विनिष्क्रान्तं संवेगादिगुणान्वितम् ॥
धर्मध्यानादिभूतोऽप्यनन्तगुणसागरः ।
सर्वावस्थासु सर्वत्र सात्मा ध्येयो मुमुक्षुभिः ।
इत्यानन्दसमास्वाद तीर्थनाथो जगत् प्रति ।
मार्गवादिकनाम्नार्तु प्रारेभे मार्गसिद्धये ।
यतिरिन्द्रियजायी हि योगवेदकवाचकः ।
श्रावणं समस्तलोकानामभयवाम्नृकसंज्ञिनः ॥
आचारे सार्वमर्थेऽपि चतुर्दश निदर्शिताः ।
जिनेन्द्राः सुधियो मुक्तो जीवतत्त्वो महाविदे ।
मिथ्यात्वाभास्करो मिश्रो विरताख्यचतुर्थकः ।
देशविरताख्यः प्रमत्तोऽप्रमत्तसंज्ञकः ॥
अपूर्वकरणो नाम्ना निवृत्तिवादराभिधः ।
ह्रियच्छमावतारोऽप्युपशान्तक्षीणकषायकाः ।
सयोग्ययोगिनामानौ चतुर्दशमकाविमे ।

चतुर्दश जिनैः प्रोक्ता गुणस्थानगुणाकराः ॥
मुक्तेः सोपानमाला एते भव्यानां जिनोदिताः ।
अभव्यानां किलैको मिथ्यागुणस्थानकाश्रमः ॥
हीनाधिकगुणैर्युक्ता भव्याख्यानेषु धीगुणैः ।
गुणानां स्थानकेष्वङ्गिनः सदीव गुणभ्रमैः ॥
इत्यादिवाक्सुधापूरैरापास्य निखिलां सभाम् ।
अजीवतत्त्वमाख्यातुं पुनरारब्धवान् प्रभुः ॥
पुद्गलो बहुधा धर्म्माऽधर्म्म आकाश एव हि ।
कालश्चेति जिनैः प्रोक्तो जीवद्रव्योऽत्र पञ्चधा ॥
पूरणाद्गलनादस्मैः पुद्गलोऽयं निरूपितः ।
मूर्त्तोऽनेकविधः सार्थनामकः कर्मदेहकृत् ॥
अष्टौ स्पर्शा रसाः पञ्च वर्णाः पञ्च गन्धौ द्विधा ।
इति विंशतिरस्यैव गुणाः प्रोक्ता द्विधात्मकाः ॥
शुद्धाणोर्विंगुणाः शुद्धा मताः स्वाभाविकाश्च ते ।
गुणाः स्कन्धेषु ये शुद्धा विभावाख्या हि ते बुधैः ॥
अणुस्कन्धविभेदेन पुद्गलस्य द्विधा स्थितिः ।
स्निग्धरूक्षमयाणूनां सङ्घातः स्कन्ध उच्यते ॥
अणवः कार्य्यलिङ्गाः स्युरन्त्यैकैकतयाखिलाः ।
नित्या द्रव्यार्थिकेनानित्याः पर्य्यायिकेण च ॥
सूक्ष्मसूक्ष्मास्तथा सूक्ष्माः सूक्ष्मस्थूलाभिधाः परे ।
स्थूलसूक्ष्मात्मकाः स्थूलाः स्थूलस्थूलाश्च पुद्गलाः ॥
एकोऽणुः सूक्ष्मसूक्ष्मः स्याद्दृश्यो नयनैर्नृणाम् ।
सूक्ष्मास्तेऽपि मताः सद्भिर्ये कर्ममयपुद्गलाः ॥
रसगन्धस्पर्शनघ्राणश्रोत्रैर्ये यान्ति पुद्गलाः ।
अक्षतास्ते समुद्दिष्टाः सूक्ष्मस्थूला जिनागमे ॥
स्थूलसूक्ष्मा जिनैर्ज्ञेयाश्छायाज्योत्स्नातपादयः ।
जलवातादयः स्थूला उच्यन्ते पुद्गला बुधैः ॥
भूकायादिविमानादयः स्थूलस्थूलपुद्गलाः ।
षड्भेदा इति तीर्थेशैः पुद्गला हि निरूपिताः ॥
शब्दो बन्धस्तथा सूक्ष्मः स्थूलः संस्थानसंज्ञकः ।
भेदस्तमस्तथाच्छायाद्युद्योतश्चातपादयः ॥
एते पुद्गलपर्याया विभावाख्या मता जिनैः ।
स्वाभाविकाश्च पर्याया अणुरूपाः पृथक्
पृथक् ॥
शरीरवाङ्मनःप्राणापानदुःखसुखादिकान् ।
कुर्वन्ति पुद्गला जीवानां मृत्युजीवितादिकान् ॥
जीवपुद्गलयोः सहकर्त्ता जिनैर्मतो गतौ ।
अमूर्त्तो निष्क्रियो धर्म्मो मत्स्यानाञ्च यथा जलम् ।
सहकारी मतो धर्म्मः स्थितौ पुद्गलजीवयोः ।
अमूर्त्तो निष्क्रियो नित्यो यथा च्छायाध्वगामि-
नाम् ॥
लोकालोकविभेदेन द्विधाकाशमवर्णभाक् ।
अवकाशप्रदः सर्वद्रव्याणां निष्क्रियोऽव्ययः ॥
पदार्था यत्र लोक्यन्ते लोकाकाशो मतो हि सः ।
तस्माद्बहिरनन्तोऽप्यलोकाकाशोऽस्ति केवलः ॥
धर्म्माधर्म्मैकजीवानां लोकाकाशस्य सन्ति च ।
असंख्याताः प्रदेशा हि पुद्गलानामनेकधा ॥
निश्चयव्यवहारेण द्विधा कालो निरूपितः ।
द्रव्याणां सहकारी परिणतो [illegible] ॥
समयादिमयः कालो व्यवहारोऽत्र कल्प्यते ।
लोकोत्तरादिकाद्यैः परमाणुमयोऽपरः ॥
भिन्नाभिन्नात्मको नैव लोकाकाशे रुदीरिताः ।

राशावेव रत्नानां स कालो निश्चयाभिधः ॥
एकत्र सह जीवेन बहुधा मुनिभिः स्मृताः ।
ते कालेन विना ज्ञेयाः पञ्चास्तिकायसंज्ञकाः ॥
पुद्गलौघो य आयाति कर्मरूपोऽत्र रागिणः ।
द्रव्यभावविभेदेन द्विधा स आश्रवो भवेत् ॥
रागद्वेषादियुक्तेन परिणामेन येन हि ।
आश्रवन्ति कर्माणि स स्याद्भावाश्रवोऽ-
ङ्गिनाम् ॥
मिथ्यात्वपञ्चकं द्वादशधा विरतयोऽशुभाः ।
प्रमादा हि नयचैव योगाः पञ्चदशात्मकाः ॥
सर्वदुःखाकरीभूताः कषायाः पञ्चविंशतिः ।
एतेऽत्र प्रत्यया ज्ञेया भावाश्रवनिबन्धनाः ॥
आयाति कर्मरूपेण पुद्गलौघोऽत्र योगिनः ।
द्रव्याश्रवः स विज्ञेयोऽप्यनन्तभवकारकः ॥
ध्यानादेराश्रवो यदो येषां स्युर्मुक्तिवल्लभाः ।
अन्यथा विषवल्लीवृक्षपोषणादितः सताम् ॥
संश्लेषो जीवकर्मणोर्यः स बन्धो द्विधा मतः ।
भावद्रव्यप्रभेदेन विश्वाशर्म्माकरोऽशुभः ॥
बध्यन्ते येन भावेन रागादिदूषितेन हि ।
कर्माणि भावबन्धोऽत्र जीवकर्मसंहतिप्रदः ॥
प्रकृतिस्थितिबन्धानुभागप्रदेशतोऽङ्गिनाम् ।
चतुर्धा बन्ध आम्नातोऽशानेकविक्रियाकरः ॥
प्रकृतिः स्वभावः स्याच्च स्थितिः कालावधारणम् ॥
रसतुल्योऽनुभागः प्रदेशो जीवप्रदेशयुक् ॥
सप्रकृतिप्रदेशाख्यौ बन्धौ च योगतो सताम् ।
स्थित्यनुभागबन्धौ कषायैर्भवनिबन्धनौ ॥
यथा बन्धनबन्धो लभते दुःखमनेकधा ।
कर्मप्रकृतिबद्धोऽङ्गी तथा श्वभ्रादिदुर्गतौ ॥
सर्वाश्रवनिरोधो यो ध्यानाद्यैः संवभावकः ।
स द्विधा संवरः प्रोक्तः स्वर्गमुक्त्यादिकारकः ॥
चैतन्यपरिणामो य एकीभूतो निजात्मकः ।
निर्विकल्पमयो ज्ञेयो भावसंवर एव सः ।
व्रतोदयविधं धर्मं परो धर्मो दयाकरः ।
द्विषड्भिदा अनुप्रेक्षाः परीषहजयोऽखिलः ॥
पञ्चधा संयमो ध्यानसूत्राभ्याससंयमादयः ।
भवन्त्यमी यतो सर्वे भावसंवरकारकाः ।
निरोधः क्रियते योऽत्र कर्मणां सततो बुधैः ।
सद्द्रव्यसंवरः प्रोक्तोऽनन्तसुखाकरः ॥
संवरेण समं इन्द्र यतोऽभ्यालिङ्गनं यदा ।
सतां मन्येत मुक्तिश्रीरन्या मोक्षकोटिभिः ॥
प्राक्तनः कर्मबन्धो यः कालेन तपसादया ।
जीयते निर्जरा ज्ञानविपाकेन रता द्विधा ॥
कर्मपाकेन या नाना गतिस्वकालिकात्मनाम् ।
सा दायमानविना चैव [illegible] ॥
संवरेण समं नाम निर्जरा क्रियते बुधैः ।
तपोभिः साविपाका प्राहेयाऽकालमाकरा ॥
निर्जरा कर्मणामत्र जायते हि यदा यदा ।
आयाति निकटं मुक्तिलक्ष्मी जिनं तदा तदा ॥
अनन्तदोषनिर्मुक्तः कर्मारिः सर्वतोऽङ्गिनाम् ।
[illegible] मोक्षः स्याद् द्रव्यभावाभिदा-
त्मकः ॥
एते देहवैरो द्वः [illegible] ।

"श्यामपित्तहराश्चासा पालिन्दीसकुणीयके ॥")
पालिन्धी । त्रिवृता । इति हिरूपकोषः ॥
(अस्याः पर्य्यायो यथा,—
"त्रिवृत् स्यात्सार्द्धचन्द्रा च पालिन्दी च सुषे-
णिका ।
मसूरविदलाकोलके यका कालमेषिका ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पालिन्धी, स्त्री, कृष्णत्रिवृता । इत्यमरः ।२।४।१०८॥
पाली, स्त्री, (पालि + कृदिकारादिति वा ङीष् ।)
यूका । सखस्त्रुयोषित् । इति मेदिनी । ले, २० ।
ऊर्णा । इति शब्दरत्नावली ॥ स्थाली । इति
शब्दचन्द्रिका ॥
पावकः, पुं, (पुनातीति । पू ञ मि शोधे + ण्वुल् ।)
अग्निः । इत्यमरः ।१।१।५७॥ (यथा, काशी-
खण्डे ८ अध्याये ।
"अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित् ।
पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः ॥")
वैद्युताग्निः । यथा,—
"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः ।
निर्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः ।
यश्चासौ तपते सूर्य्यः शुचिरग्निस्त्वसौ स्मृतः ॥"
इति कौर्म्मे १२ अध्यायः ॥
स च ब्रह्मणो मानसपुत्रादभिमानिनामकाग्नेः
स्वाहायां जातः । यथा,—
"योऽसावग्निरभीमानी स्मृतः स्वायम्भुवेऽन्तरे ।
ब्रह्मणो मानसः पुत्त्रस्तस्मात् स्वाहा व्यजीजनत् ॥
पावकं पवमानञ्च शुचिरग्निञ्च यः स्मृतः ॥"
इति मात्स्ये ४८ अध्यायः ॥
सदाचारः । वह्निमन्थः । (अस्य पर्य्यायो यथा,
"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणिः ।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
चित्रकः । भल्लातकः । विडङ्गः । इति मेदिनी ।
के, ११८॥ शोधयितृनरः । इति हेमचन्द्रः ॥ रक्त-
चित्रकः । कुसुम्भः । इति राजनिर्घण्टः ॥ (पवित्र-
कारके, त्रि । यथा, ऋग्वेदे । ३ । ३१ । २० ।
"मित्रः पावकाः प्रतता अभूवन् ।")
पावकारणिः, पुं, (पावकाय वह्न्युत्पादनार्थं
अरणिरिव ।) अग्निमन्थः । इति शब्दमाला ॥
पावकिः, (पावकस्यापत्यम् । पावक + इञ् ।)
कार्त्तिकेयः । यथा,—
"कथं तं कृत्तिकापुत्रस्कन्दान् तं हरं गुहम् ।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः ॥"
इति वराहपुराणम् ॥
पावनं, क्ली, (पावयत्यनेनेति । पूं + णिच् + ल्युट् ।)
जलम् । कृच्छ्रम् । इति मेदिनी । ने, ८० ॥ गोम-
यम् । इति शब्दचन्द्रिका ॥ रुद्राक्षम् । कुष्ठम् ।
इति राजनिर्घण्टः । चित्रकम् । अध्यासः ।
प्रायश्चित्तम् । इति विश्वः ॥ (शुद्धिः । यथा,
मनुः । ११ । १०८ ।
"सा तेन पुनः प्रदत्तेन सङ्घर्षोपयन्त्रिना ।
कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम् ॥")

पावनः, पुं, (पावयतीति । पू + णिच् + ल्युः ।)
व्यासः । पावकः । इति मेदिनी । ने, ८० ॥
(यथा, ३।१८५। मनुश्लोकटीकायां कुल्लूकभट्टः ।
"पावनः सर्व्वोऽप्ययं श्लोकपञ्चदशार्थं बहुषु
देशेष्वपि विधीयते ॥") सिह्लकः । इति विश्वः ॥
पीतभृङ्गराजः । इति राजनिर्घण्टः ॥ (विष्णुः ।
यथा, महाभारते । १३ । १४९ । ४५ ।
"भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥"
"पावयतीति पावनः । भीषास्माद्वातः पवते
इति श्रुतेः ।" इति शाङ्करभाष्यम् ॥) सिद्धः ।
पवित्रे पावयितरि च, त्रि । इति हेमचन्द्रः ॥
(यथा, रघुः । १६ । ५३ ।
"स त्वनेकवनिता सखोऽपि सन्
पावनीमनवलोक्य सन्ततिम् ।
वैद्ययत्नपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥")
पावनध्वनिः, पुं, (पावनः पवित्रजनको ध्वनि-
र्यस्य ।) शङ्खः । इति राजनिर्घण्टः ॥ (पावनो
ध्वनिरिति विग्रहे ।) पवित्रशब्दः ॥
पावनी, स्त्री, (पावयत्यनयेति । पू + णिच् +
ल्युट् + ङीप् ।) हरीतकी । इति विश्वः ॥
तुलसी । गौः । इति राजनिर्घण्टः । गङ्गा ।
यथा, शङ्कराचार्य्यकृतगङ्गाष्टके ।
"प्रत्यावर्त्तं खण्डयन्ती हरशिरसि जटावल्लि-
मुल्लासयन्ती
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्
स्खलन्ती ।
क्षौणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्-
सयन्ती
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः
पुनातु ॥"
(इयन्तु गङ्गायाः अंशविशेषः । यथा, मात्स्ये ।
१२० । ३८—४१ ।
"ततो विसर्ज्जयामास संरुद्धां स्वेन तेजसा ।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः ।
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गायाः ।
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव तु ।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ।
तस्माद् भागीरथी या वै प्रविष्टा दक्षिणो-
दधिम् ॥"
शाकद्वीपस्थ नदीविशेषः । यथा, मत्स्यपुराणे ।
१२१ । ६१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥")
पाशः, पुं, (पश्यते बध्यतेऽनेनेति । पश + घञ् ।)
शस्त्रभेदः । इति शब्दरत्नावली ॥ (वैशम्पा-
यनधनुर्व्वेदोक्तपाशलक्षणं यथा,—
"पाशः सूक्ष्मायतत्रो लौहधातुत्रिकोणवान् ।
प्रादेशपरिधिः सीसगुलिकाभरणान्वितः ॥"
अग्निपुराणधनुर्व्वेदोक्तलक्षणं यथा,—

"दशहस्तो भवेत् पाशो वृत्तः करमुखस्तथा ।
गुणकार्पासमुञ्जानामर्कस्नायवचर्म्मणाम् ।
अन्येषां सुदृढानाञ्च सुकृतं परिवेष्टितम् ।
तथा त्रिंशत्समं पाशं बुधः कुर्य्यात् सुवर्त्तितम् ॥"
अस्य क्रियादिकं यथा,—
"कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै सदा ।
वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः ॥
कुण्डलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि ।
क्षिपेत्तूर्णं ——————— ॥"
"यक्षिते च भुते चैव तथा प्रकम्पितेषु च ।
समयोगविधिं ज्ञात्वा प्रयुञ्जीत सुशिक्षितः ॥
विजित्वा तु यथान्यायं ततो बन्धं समाचरेत् ।
कट्यां बद्धा ततः खड्गं वामपार्श्वावलम्बितम् ।
दृढं विगृह्य वामेन निष्कर्षेद्दक्षिणेन च ॥"
अन्यच्च ।
"परावृत्तमपावृत्तं गृहीतं लघुसंज्ञितम् ।
ऊर्द्ध्वक्षिप्तमधःक्षिप्तं सन्धारितविधारितम् ॥
श्येनपातं गजपातं ग्राहग्राह्यं तथैव च ।
एवमेकादशविधा ज्ञेयाः पाशविधारणाः ॥"
वैशम्पायनोक्तक्रिया यथा,—
"प्रसारणं वेष्टनञ्च कर्त्तनञ्चेति ते त्रयः ।
योगाः पाशाश्रिता लोके पाशाः क्षुद्रसमा-
श्रिताः ॥"
अन्यच्च ।
"अभ्यायतं विशालञ्च तिर्य्यक्भ्रामितमेव च ।
पञ्च कर्म्मविनिर्दिष्टं व्यस्ते पाशे महात्मभिः ॥")
कचान्ते समूहार्थः । (यथा, माघे । ७ । १२ ।
"अथ शिरसिजपाशपाशभारा-
दिव नितरां नतिमद्भिरंसभागैः ॥")
कर्णान्ते शोभनार्थः । छात्रान्ते निन्दार्थः ।
पक्षादिबन्धनरज्ज्वादि । इति विश्वः ॥ (यथा,
महाभारते । ५ । ६४ । १ ।
"शकुनीनामिहार्थाय पाशं भूमावयोजयत् ।
कश्चिच्छाकुनिकस्तात पूर्व्वमामिति शुश्रुम ॥"
योगविशेषः । यथा, ज्योतिषे ।
"यदा राशिपञ्चके सप्त ग्रहाः भवन्ति तदा
पाशाख्ययोगो भवति ॥" पारिभाषिकपाशो
यथा, कुलार्णवे १ उल्लासे ।
"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी ।
कुलं शीलं तथा जातिरष्टौ पाशाः प्रकी-
र्त्तिताः ॥"
स्वप्नेऽस्य दर्शनफलं यथा,—
"कार्पासभस्मास्थिकपालमूलं
पङ्कञ्च पाशस्त्वथवा प्रपश्येत् ।
तस्यापदं रोगधनक्षयं वा
रोगी मृतिं वा मनुतेऽतिकष्टम् ॥"
इति हारीते द्वितीये स्थाने द्वितीयेऽध्याये ॥)
पाशकः, पुं, (पाशयति पीडयतीति । पश + णिच्
+ ण्वुल् ।) द्यूतविशेषः । पाशा इति भाषा ।
तत्पर्य्यायः । अक्षः २ देवनः ३ । इत्यमरः ।
२ । १० । ४५ ॥ शारिः ४ शारिः ५ सारः ६
प्रारः ७ पाशः ८ । इति शब्दरत्नावली ॥

पाशपाणिः, पुं, (पाशः पाणौ यस्य ।) वरुणः । इति हलायुधः ॥
पाशवपालनं, क्ली, (पाशवं पशुसंघं पालयतीति । पालि + ल्युः ।) घासः । इति शब्दचन्द्रिका ॥
पाशितः, त्रि, (पाश + क्त ।) पाशयुक्तः । बद्धः । इति धरणिः ॥
पाशी, [न्] पुं, (पाशोऽस्यास्तीति । पाश + इनिः ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ४ । ८ । "यदि शक्रं यमं वापि कुबेरमपि पाशिनम् ॥") व्याधः । इति मेदिनी । ने, ८१ ॥ यमः । इति कश्चित् ॥ पाशधरे, त्रि । इति विश्वः ॥
पाशीकृतः, त्रि, पाशबद्धः । अभूततद्भावे च्वि-प्रत्ययनिष्पन्नः ॥
पाशुपतः, पुं, (पशुपतिर्द्देवतास्येति । "सास्य देवता ।" ४ । २ । २४ । इति अण् ।) बक-पुष्पम् । (अस्य पर्य्यायो यथा, भावप्रकाशे ।१।१। "शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥") पशुपत्यधिदेवतः । तद्भक्तः । इति मेदिनी । ते, २११ ॥ (क्ली, तन्त्रशास्त्रविशेषः । यथा, कूर्म्म-पुराणे १४ अध्याये ।
"एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"
अथर्व्ववेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्ति-कोपनिषदि ।
"सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम् ॥")
पाशुपतव्रतं, क्ली, (पाशुपतं पशुपतिसम्बन्धि व्रतम् ।) पशुपतिव्रतविशेषः । यथा,—
"यथा पशुपतिर्नित्यं कृत्वा सर्व्वमिदं जगत् ।
न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् ॥
एतत्कमलतं नाम पूर्व्वमभ्यासतश्च यत् ।
व्रतं पाशुपतं नाम कृत्वा याति द्विजोत्तम ! ॥
द्वादश्यामेकभक्ताशी त्रयोदश्यामयाचितम् ।
चतुर्द्दश्यां तथा नक्तमुपवासं परेऽहनि ॥
गोवृषञ्चैव हैरण्यं रौप्यं ताम्रमयन्तथा ।
सौवर्णं कारयेत् सर्व्वं शुभाशोभा पृथक् पृथक् ॥
तथैवोत्तमेष्कर्त्ता शिवायाथ शिवस्य च ।
तत्प्रमाणं हरं कुर्य्यादीशं वैन्नचतुर्मुखैः ॥
रौप्याङ्गुलं ताम्रं तदर्द्धं वापि कारयेत् ।
पारदञ्च समारोप्य वस्त्रोत्तमयुतन्तथा ॥
चतुर्द्दश्यामेकभक्तं दिवायां नक्तमाचरेत् ।
कुर्य्यादर्च्चनं सर्व्वं पारणञ्चाचरेत् ॥
गन्धपुष्पैः सुनैवेद्यैर्धूपदीपवरौषधैः ।
महार्घं गन्धवन्तञ्च प्रार्थयेत् प्रवरं वरम् ॥
गङ्गाधर ! महादेव ! सर्व्वलोकचराचर ! ॥
यानि मे सर्व्वपापानि पूर्व्वार्ज्जितानि शङ्कर ! ॥
शङ्कराय नमस्तुभ्यं सर्व्वपापहराय च ।
यथा दानं न जानामि तथा मे कुरु शङ्कर ! ॥
यममार्गं यथा दृश्यो । न यास्यामि कदाचन ।
संपूजितो यथा भक्त्या तथा मे कुरु शङ्कर ! ॥
गङ्गाधर ! धराधीश ! परात्पर वरप्रद ! ॥
श्रीकण्ठ ! नीलकण्ठ शुभाकान्त ! नमोऽस्तु ते ॥
संपूज्यैवं विधानेन प्रतिपद्युदिते रवौ ।
हैरण्यादीन् गोवृषांश्च ब्राह्मणेभ्यो निवेदयेत् ॥
यथा त्वं सर्व्वगः सर्व्वः सर्व्वपापहरस्तु सर्व्वभृत् ।
न लिप्यसे विकर्म्माद्यैस्तथा मां कुरु शङ्कर ! ॥
एवं स्तुत्वा नमस्कृत्य इमांश्चैव यथोदितान् ।
गुर्व्वादिभ्यो द्विजेभ्यश्च शङ्करः प्रीयतामिति ॥
एवं व्रतमिदं कृत्वा स्वयं रुद्राद्दिवालये ।
यममार्गं महाघोरं न पश्यति कदाचन ॥
यः करोति व्रतेनैव सर्व्वपापप्रणाशनम् ।
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ॥
ब्रह्महत्यादिभिः पापैरगम्यागमनादिभिः ।
मुच्यते पातकेभ्योऽथ ह्यभक्ष्यापेयजैः पुमान् ॥
यः करोति महाभाग ! दानं सर्व्वसुखावहम् ।
छित्त्वा पापान्यशेषाणि स्वर्गलोकं स गच्छति ॥"
इति वह्निपुराणे पाशुपतव्रतनामाध्यायः ॥
(यथा च शिवपुराणे वायुसंहितायां पूर्व्वभागे २८ अध्याये ।
ऋषय ऊचुः ।
"भगवन् ! श्रोतुमिच्छामो व्रतं पाशुपतं परम् ।
ब्रह्मादयोऽपि यत् कृत्वा सर्व्वे पाशुपताः स्मृताः ॥
वायुरुवाच ।
रहस्यं वः प्रवक्ष्यामि सर्व्वपापनिकृन्तनम् ।
व्रतं पाशुपतं श्रौतमथर्व्वशिरसि श्रुतम् ॥
कालश्चैत्री पौर्णमासी देशः शिवपरिग्रहः ।
क्षेत्रारामाद्यरण्यं वा प्रशस्तः शुभलक्षणः ॥
तत्र पूर्व्वं त्रयोदश्यां सुस्नातः सुकृताह्निकः ।
अनुज्ञाप्य स्वमाचार्य्यं संपूज्य प्रणिपत्य च ॥
पूजां वैशेषिकीं कृत्वा शुक्लाम्बरधरः स्वयम् ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः ॥
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च ।
प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः ॥
ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनवर्त्मना ।
व्रतमेतत् करोमीति भवेत् संकल्प्य दीक्षितः ॥
यावच्छरीरपातं वा द्वादशाब्दमथापि वा ।
तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ॥
तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा ।
दिनद्वादशकं वाथ दिनषट्कमथापि वा ॥
तदर्द्धं दिनमेकं वा व्रतसंकल्पनावधि ।
अग्निमाधाय विधिवद्विरजाहोमकारणात् ॥
हुत्वाज्येन समिद्भिश्च चरुणा च यथाक्रमम् ।
पूर्णाहुतिं ततो भूयस्तत्त्वानां शुद्धिमुद्दिशन् ॥
जुहुयान्मूलमन्त्रेण तैरेव समिदादिभिः ।
तत्त्वान्येतानि मद्देहे शुध्यन्तामित्यनुस्मरन् ॥
पञ्च भूतानि तन्मात्राः पञ्च कर्म्मेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्च पञ्च विभागशः ॥
त्वगादिधातवः सप्त पञ्च प्राणादिवायवः ।
मनो बुद्धिरहंख्यातिर्गुणाः प्रकृतिपूरुषौ ॥
रागो विद्या कला चैव नियतिः काल एव च ।
माया च शुद्धविद्या च महेश्वरसदाशिवौ ॥
शक्तिश्च शिवतत्त्वञ्च तत्त्वानि क्रमशो विदुः ।
मन्त्रैस्तु विरजैर्हुत्वा होताऽसौ विरजो भवेत् ॥
अथ गोमयमादाय पिण्डीकृत्याभिमन्त्र्य च ।
न्यस्याग्नौ तच्च संरक्ष्य दिने तस्मिन् हविष्य-भुक् ॥
प्रभाते तु चतुर्द्दश्यां कृत्वा सर्व्वं पुरोदितम् ।
दिने तस्मिन्निराहारः कालशेषं समापयेत् ॥
प्रातः पर्व्वणि चाप्येवं कृत्वा होमावसानतः ।
उपसंहृत्य रुद्राग्निं गृह्णीयाद्भस्म यत्नतः ॥
ततस्तु जटिलो मुण्डः शिखैकजट एव वा ।
भूत्वा स्नात्वा पुनर्वीतलज्जश्चेत् स्याद्दिगम्बरः ॥
अन्यः काषायवसनश्चर्म्मचीराम्बरोऽथवा ।
एकाम्बरो वल्कली वा भवेद्दण्डी च मेखली ॥
प्रक्षाल्य चरणौ पश्चाद्द्विराचम्यात्मनस्तनुम् ।
संकलीकृत्य तद्भस्म विरजानलसम्भवम् ॥
अग्निरित्यादिभिर्मन्त्रैः षड्भिराथर्व्वणैः क्रमात् ।
विमृश्याङ्गानि मूर्द्धादिचरणान्तानि संस्पृशेत् ॥
ततस्तेन क्रमेणैव समुद्धृत्य च भस्मना
सर्व्वाङ्गोद्धूलनं कुर्य्यात् प्रणवेन शिवेन वा ॥
ततस्त्रिपुण्ड्रं रचयेत् त्रियायुषसमाह्वयम् ।
शिवभावं समागम्य शिवयोगं समाचरेत् ॥
कुर्य्यात् त्रिसन्ध्यमप्येवमेतत् पाशुपतं व्रतम् ।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः ॥
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतम् ।
कर्णिकाकेसरोपेतमासनं परिकल्पयेत् ॥
विभवे तदभावे तु रक्तं सितमथापि वा ।
पद्मं तस्याप्यभावे तु केवलं भावनामयम् ॥
तत्पद्मकर्णिकामध्ये कृत्वा लिङ्गं कनीयसम् ।
स्फाटिकं पीठिकोपेतं पूजयेद्विधिवत् क्रमात् ॥
प्रतिष्ठाप्य विधानेन तल्लिङ्गं कृतशोधनम् ।
परिकल्प्यासनं मूर्त्तिं पञ्चवक्त्रप्रकारतः ॥
पञ्चगव्यादिभिः पूर्णैर्यथाविभवसम्भृतैः ।
स्नापयेत् कलशैः पूर्णैरष्टापदसमुद्भवैः ॥
गन्धद्रव्यैः सकर्पूरैश्चन्दनाद्यैः सकुङ्कुमैः ।
सवेदिकं समालिप्य लिङ्गं भूषणभूषितम् ॥
बिल्वपत्रैश्च पद्मैश्च रक्तैः श्वेतैस्तथोत्पलैः ।
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सुगन्धिभिः ॥
पुण्यैः प्रशस्तैः पत्रैश्च चित्रैर्दूर्व्वाक्षतादिभिः ।
समभ्यर्च्य यथालाभं महापूजाविधानतः ॥
धूपं दीपं तथा चापि नैवेद्यञ्च समादिशेत् ।
निवेदयित्वा विभवे कल्याणञ्च समाचरेत् ॥
इष्टानि च विशिष्टानि न्यायेनोपार्ज्जितानि च ।
सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः ॥
श्रीपत्रोत्पलपद्मानां संख्या साहस्रिकी मता ।
प्रत्येकमपरा संख्या शतमष्टोत्तरं द्विजाः ॥
तत्रापि च विशेषेण न त्यजेद्बिल्वपत्रकम् ।
हैमैकं परं प्राहुः पद्मं पद्मसहस्रकात् ॥
नीलोत्पलादिष्वप्येतत्कामं विकल्पकैः ।
पुष्पान्तरस्य नियमाद्यथाकामं निवेदयेत् ॥
अष्टाङ्गमर्घ्यमुत्कृष्टं धूपाद्यैश्च विशेषतः ।
स्याद्गुग्गुलमपीताख्ये रचे मते मनःशिलाम् ।
चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे ।
ईशाने भसितं केचिदेवमिदमपीष्यते ॥

न धूप इति मन्तव्यो धूपाभावविधानतः ।
सितागुरुमघोराख्ये मुखे कृष्णागुरुं पुनः ॥
पौरुषे गुग्गुलुं सद्ये सौम्ये सौगन्धिकं मुखे ।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषतः ॥
शर्करामधुकर्पूरकपिलाघृतसंयुतम् ।
चन्दनागुरुकाष्ठाद्यं सामान्यं संप्रचक्षते ॥
कर्पूरवर्त्तिराज्याढ्या देया दीपावली ततः ।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमतःपरम् ॥
प्रथमावरणे पूज्यौ क्रमाद्धेरम्बषण्मुखौ ।
ब्रह्माङ्गानि ततश्चैवं प्रथमावरणेऽर्च्चिते ॥
द्वितीयावरणे पूज्या विघ्नेशाश्चक्रवर्त्तिनः ।
तृतीयावरणे पूज्या भवाद्या अष्टमूर्त्तयः ॥
महादेवादयस्तत्र तथैकादशमूर्त्तयः ।
चतुर्थावरणे पूज्याः सर्व्व एव गणेश्वराः ॥
बहिरेव तु पद्मस्य पञ्चमावरणे क्रमात् ।
दश दिक्पतयः पूज्याः सास्त्राः सानुचरास्तथा ॥
ब्रह्मणो मानसाः पुत्त्राः सर्व्वेऽपि ज्योतिषाङ्गणाः ।
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः ॥
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ।
योगिनो यक्षसः सर्व्वे पञ्चमे मातरस्तथा ॥
क्षेत्रपालाश्च सगणाः सर्व्वं चैतच्चराचरम् ।
अथावरणपूजान्ते सम्पूज्य परमेश्वरम् ॥
साज्यं सव्यञ्जनं हृद्यं हविर्भक्त्या निवेदयेत् ।
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ॥
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः ।
नीराजनान्ते विस्तीर्णं पूजाशेषं समापयेत् ॥
चन्द्रहाराभहारञ्च शयनीये समर्पयेत् ।
आढ्यं नृपोचितं हृद्यं सर्व्वमनुरूपतः ॥
कृत्वा च कारयित्वा च हुत्वा च प्रतिपूजनम् ।
स्तोत्रं जपोत्तमं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ॥
प्रदक्षिणां प्रणामञ्च कृत्वात्मानं समर्पयेत् ।
ततः पुरस्ताद्देवस्य गुर्व्विप्रौ च पूजयेत् ॥
दत्त्वार्घ्यमष्टौ पुष्पाणि देवमुद्वास्य लिङ्गतः ।
अग्नेश्चापि सुसंरक्ष्य उद्वास्य च समाप्य तु ॥
प्रत्यहं चैव एवं कुर्य्यात्सर्व्वं पुरोदितम् ।
ततस्तत्साम्मुखं लिङ्गं सर्व्वोपकरणान्वितम् ॥
समर्पयेत् स्वगुरवे स्थापयेद्वा शिवालये ।
संपूज्य च गुरून् ब्रह्मान् व्रतिनश्च विशेषतः ॥
भक्तान् द्विजांश्च सत्कृत्य दीनानाथांश्च तोषयेत् ।
स्वयं चानशनाशक्तः फलमूलाशनोऽथवा ॥
पयोव्रती वा भिक्षाशी भवेदेकाशनस्तथा ।
नक्तं युक्ताशनो नित्यं भूशय्यानिरतः शुचिः ॥
भस्मशायी तृणे शायी चीराजिनधरोऽथवा ।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥
अर्कवारे तथार्द्रायां पञ्चदश्याञ्च पक्षयोः ।
अष्टम्याञ्च चतुर्द्दश्यां शक्तस्तूपवसेदपि ॥
पाषण्डपतितोदक्यासूतिकान्त्यजपूर्व्वकान् ।
वर्ज्जयेत्सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमादानदयासत्याहिंसाशीलः सदा भवेत् ।
सन्तुष्टश्च प्रशान्तश्च जपध्यानरतः सदा ॥
कुर्य्यात्त्रिषवणस्नानं भस्मस्नानमथापि वा ।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥
बहुनात्र किमुक्तेन नाचरेदशिवं व्रती ।
प्रमादात्तु तथाचारे निरूप्य गुरुलाघवम् ॥
उचितां निष्कृतिं कुर्य्यात् पूजाहोमजपादिभिः ।
आसमाप्तेर्व्रतस्यैवमाचरेन्न प्रमादतः ॥
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा ।
सामान्यमेतत् कथितं व्रतस्यास्य समासतः ॥
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमम् ।
वैशाखे वज्रलिङ्गन्तु ज्यैष्ठे मारकतं शुभम् ॥
आषाढे मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम् ।
मासि भाद्रपदे चैव पद्मरागमयं परम् ॥
आश्वयुज्याञ्च विद्धि गोमेदकमयं शुभम् ।
कार्त्तिक्यां वै द्रुमं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥
पुष्परागमयं पौषे माघे द्युमणिजं तथा ।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्व्यत्ययोऽथवा ॥
सर्व्वमासेषु रत्नानामलाभे हैममेव वा ।
हैमाभावे राजतं वा ताम्रं शैलजमेव वा ॥
मृण्मयं वा यथालाभं जातुकं चान्दनं वा ।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ॥
व्रतावसानसमये समाचरितनैत्यकः ।
कृत्वा वैशेषिकीं पूजां हुत्वा चैव यथा पुरा ॥
संपूज्य च तदाचार्य्यं व्रतिनश्च विशेषतः ।
देशिकेनाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ॥
दर्भासनो दर्भपाणिः प्राणापानौ नियम्य च ।
जपित्वा शक्तितो मूलं ध्यात्वा साम्बं त्रियम्बकम् ॥
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः ।
समुत्सृजामि भगवन् ! व्रतमेतत्त्वदाज्ञया ॥
इत्युक्त्वा लिङ्गमूलेषु दर्भानुत्तरतस्त्यजेत् ।
ततो दण्डजटाचीरमेखलादपि चोत्सृजेत् ॥
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत् ।
यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः ॥
व्रतमेतत् प्रकुर्व्वीत स तु वै नैष्ठिकः स्मृतः ।
सोऽत्याश्रमी च विज्ञेयो महापाशुपतस्तथा ॥
स एव तपतां श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्यो मुमुक्षुषु ॥
यतिर्यो नैष्ठिको जातस्तमाहुर्नैष्ठिकोत्तमम् ।
योऽन्वहं द्वादशाहं वा व्रतमेतत् समाचरेत् ॥
सोऽपि नैष्ठिकतुल्यः स्यात्तीव्रव्रतसमन्वयात् ।
घृताक्तो यश्चरेदेतद्व्रतं व्रतपरायणः ॥
द्वित्रैकदिवसं वापि स च कश्चन नैष्ठिकः ।
कृत्यमित्येव निष्कामो यश्चरेद् व्रतमुत्तमम् ॥
शिवार्पितात्मा सततं न तेन सदृशः क्वचित् ।
भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः ॥
पापैर्व्विमुच्यते सद्यो मुच्यते नात्र संशयः ।
रुद्राग्नेर्यत्परं वीर्य्यं तद्भस्म परिकीर्त्तितम् ॥
तस्मात्सर्व्वेषु कालेषु वीर्य्यवान् भस्मसंयुतः ।
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ॥
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ।
भस्मना दिग्धसर्व्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ॥
भस्मशायी च पुरुषो भस्मनिष्ठः प्रचक्ष्यते ।
भूतिर्भूतिकरी पुण्या रक्षा रक्षाकरी परम् ॥
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम् ।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः ॥
परमास्त्रञ्च शैवानां भस्मैतत्पारमेश्वरम् ।
धौम्याग्रजस्य तपसि व्यापदो यन्निवारिताः ॥
तस्मात्सर्व्वप्रयत्नेन कृत्वा पाशुपतं व्रतम् ।
धनवद्भस्म संगृह्य भस्मस्नानरतो भवेत् ॥"
इति श्रीशिवपुराणे वायुसंहितायां पूर्व्वभागे एकोनत्रिंशोऽध्यायः ॥ * ॥)

पाशुपतास्त्रं, क्ली, (पाशुपतं पशुपतिसम्बन्धि अस्त्रम् ।) पशुपतेः शूलास्त्रम् । तस्य स्वरूपं यथा,—
"गजाननोऽपि सञ्चिन्त्य यत्तत् पाशुपतं परम् ।
महारूपं महाकायं युगान्ताग्निसमप्रभम् ॥
पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
सौम्यं घोरं सुघोरास्यमष्टदंष्ट्रं भयोत्कटम् ॥
जटाभारेन्दुगङ्गाहिशिरोमालं शिवाङ्गनम् ।
वेणुवीणाशुकघण्टं डमरुकारावसंकुलम् ॥
शिवारावं महाव्याधि शरभायसपीडितम् ।
उल्कादण्डज्वलज्ज्वालं नीलाब्जकृतभूषणम् ॥
ललज्जिह्वालनागेन्द्रं गजचर्म्मादिवाससम् ।
किंकरं तर्ज्जमानन्तु शूलखट्वाङ्गधारिणम् ॥
पश्यमानं समस्तं त्रैलोक्यं सचराचरम् ।
पुरतो विघ्ननाशस्य खेलहासं व्यवस्थितम् ॥"
इति देवीपुराणम् ॥

पाशुपाल्यं, क्ली, (पशुपालस्य भावः कर्म्म वा । पशुपाल + ष्यञ् ।) वैश्यवृत्तिः । पशून् गोमहिष्यादीन् पालयति पशुपालः टाण् अण् । पशुपालस्य भावः कर्म्म वा इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । इत्यमरभरतौ ॥ (यथा, मार्क्कण्डेये । २८ । ६ ।
"दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥")

पाश्चात्यः, त्रि, (पश्चात् + "दक्षिणापश्चात्पुरसस्त्यक् ।" ४ । २ । ९८ । इति त्यक् ।) पश्चाद्भवः । (यथा, देवीभागवते । १ । १० । ११ ।
"पाश्चात्यं यामिनीयामं ज्ञात्वेवानन्यचेतसा ।
स्नात्वा प्रातः क्रियाः कृत्वा पुनरास्ते समाहितः ॥")
पश्चिमदेशजातः । इति मुग्धबोधव्याकरणम् ॥
(यथा, महाभारते । १ । १२१ । ११ ।
"स विजित्य गृहीत्वा च भूपतीन् राजसत्तमः ।
प्राच्योदीच्यान् पाश्चात्यान् दाक्षिणात्यानथाहरत् ॥")

पाश्चात्याकरजभवं, क्ली, (पाश्चात्ये पश्चिमदिग्भवे आकरे जन्म उत्पत्तिर्यस्य ।) सामरीलवणम् । तत्पर्य्यायः । रौमकम् २ रामणेयम् ३ । इति रत्नमाला ॥

पाश्या, स्त्री, (पाशानां समूहः । पाश + "पाशादिभ्यो यः ।" ४ । २ । ४९ । इति यः ।) पाशसमूहः । इत्यमरः । ३ । २ । ४१ ॥

पाषकः, पुं, (पषति बध्नातीव चरणौ । पष बन्धे + ण्वुल् ।) पादाभरणविशेषः । पायझी इति भाषा । यथा,—
"रत्नपाषककटकैश्च विराजितपदाम्बुजैः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

पाषण्डः, पुं, (पापं सनोति दर्शनसंसर्गादिना ददातीति । षणु ञ दाने + अन्तर्भावितण्यर्थात् डः । पृषोदरादित्वात् साधुः । यद्वा, पाति रक्षति दुष्कृतेभ्य इति । पा + क्विप् । पा वेदधर्मस्तं षण्डयति खण्डयतीति । यदुक्तम् ।
"पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते ।
तं ष(ख)ण्डयन्ति ते यस्मात् पाषण्डास्तेन हेतुना ॥
नानाव्रतधरा नानावेशाः पाषण्डिनो मताः ॥")
वेदविरुद्धाचारवान् सर्व्ववर्णचिह्नधारी । बौद्धक्षपणकादिः । इति भरतः ॥ तत्पर्य्यायः । सर्व्वलिङ्गी २ । इत्यमरः । २।७।४५ ॥ कौलिकः ३ पाषण्डिकः ४ । इति शब्दरत्नावली ॥ * ॥ पाषण्डादिसम्भाषणे दोषो यथा,—
"तस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत् ।
विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षितः ॥
क्रियाहानिर्गृहे यस्य मासमेकं प्रजायते ।
तस्यावलोकनात् सूर्य्यं पश्येत मतिमान् नरः ॥
किं पुनर्य्यैस्तु सन्त्यक्ता त्रयी सर्व्वात्मना द्विज ! ।
पाषण्डभोजिभिः पापैर्व्वेदवादविरोधिभिः ॥
पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥
दूरापास्तस्तु संसर्गः सहास्या चापि पापिभिः ।
पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्ज्जयेत् ॥
एते नग्नास्तवाख्याता दृष्ट्या श्राद्धोपघातकाः ।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति ॥
एते पाषण्डिनः पापा न ह्येतानालपेद्बुधः ।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम् ॥
पुंसां जटाधरणमौण्ड्यवतां वृथैव
मोघाशिनामखिलशौचनिराकृतानाम् ।
तोयप्रदानपितृपिण्डबहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ * ॥
पाषण्डादीनां लक्षणं यथा,—
"अतः स्वधर्म्मात् पाषण्डी विकर्म्मस्थो निषिद्धकृत् ।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ॥
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम् ।
तस्मात् वैडालव्रतिकः ॥
नित्यं वक्ति पुरोऽन्यस्य विविधं कुरुते भयम् ।
ख्यातापराधवैतथ्य हैतोऽयं कथितो बुधैः ॥
यद्देहकहेतुभिर्यः शक्त्वमेतु सहेतुकः ।
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ॥
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः ॥" इति ।
एकादशीतत्त्वे धातौ ॥ * ॥ अपि च ।
महादेव उवाच ।
"ये त्वन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः ।
नारायणाज्जगन्नाथात् ते वै पाषण्डिनस्तथा ॥
कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः ।
ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः ।
अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा ॥
शङ्खचक्रोर्द्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः ।
रहिता ये द्विजा देवि ! ते वै पाषण्डिनो मताः ॥
श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः ।
स पाषण्डीति विज्ञेयः सर्व्वलोकेषु गर्हितः ॥
समस्तयज्ञभोक्तारं विष्णुं ब्रह्मण्यदैवतम् ।
उद्दिश्य देवतास्वेव जुहोति च ददाति च ।
स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्म्मसु ॥
स्वातन्त्र्यात् क्रियते यैस्तु कर्म्म वेदोदितं महत् ।
विना वै भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः ॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा ॥
अनास्था क्रियते यैस्तु मनोवाक्कायकर्म्मभिः ।
वासुदेवं न जानाति स पाषण्डी भवेद् द्विजः ॥
हरेर्नामैकमन्त्राभ्यां लोकाः सद्भिर्विवर्ज्जिताः ।
यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः ॥
वर्णानां गुरवो नित्यं प्रिये यद्यप्यवैष्णवाः ।
भगवद्धर्म्मरहिता वैष्णवादिविनिन्दकाः ॥
रजस्तमोमया जीवहिंसका जीवभक्षकाः ।
अवत्प्रतिग्रहरता देवला ग्रामयाजकाः ॥
भ्रष्टाचारास्तथा व्रात्या नानाविधपूजकाः ।
देवलोच्छिष्टश्राद्धादिभोजिनः शूद्रवत्क्रियाः ॥
विविधासत्कर्म्मरता अभक्ष्याद्यविचारिणः ।
लोभमोहमदक्रोधकामाहङ्कारिणः सदा ॥
एवंविधाः पारदारिकाद्या येऽत्र शुभानने ! ।
अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः ॥
वर्णाश्रमाद्या ये मर्त्त्याः स्वस्वधर्म्मविवर्ज्जिताः ।
ते वै पाषण्डिनो देवि ! नारायणपराङ्मुखाः ॥
सर्व्वाश्रमी द्विजा येऽपि धर्म्मविक्रयिणस्तथा ।
सद्वेदाचाररहितास्ते वै पाषण्डिनो मताः ॥
ये स्वगृहगमनादिरता लोका निरन्तरम् ।
प्रिये ! पाषण्डिनो ज्ञेया इह ते नात्र संशयः ॥
विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः ।
अश्वत्थगङ्गातीर्थक्षेत्रादिषु महागुरौ ॥
तुलसीसत्यगोविन्दाश्रयत्वाद्यु परानने ! ॥
स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः ॥
रुद्राक्षैकाञ्चभद्राक्षस्फाटिकादादिधारिणः ।
जटिनो भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये ! ॥
अनिकेतो मठीकीतो धावकः पाचकस्तथा ।
एते पाषण्डिनो विप्रा नाडकदम्भोजिनः ॥
देवि ! शाक्तादयो भक्ता अन्यथाप्रदास्तु ये ।
पाषण्डत्वं न कुर्व्वन्ति ते वै दाम्भोजके ॥
यदि देवब्राह्मणाभाजीवात्प्रदात्रभोजनम् ।
तत्प्रतिग्रहमपवारष्य वृत्तान्तमूल्यादिकम् ॥
स्वार्थमौषधनाशायपत्प्राशित्वतोऽपि स्वतः ।
पाषण्डिनो ये स्वत्वाः [illegible] का कथा ॥
[illegible] ते पाषण्डिनः स्मृताः ॥
[illegible] ।
पाषण्डिनस्तथा [illegible] ॥"
इति पाद्मोत्तरखण्डे पाषण्डलक्षणं नाम [illegible] ।
तत्र लक्षणं यथा,—
"अत पाषण्डधर्म्मं यच्छ्रुणु [illegible] ।
कामं क्रोधञ्च लोभञ्च मोहञ्च मदमत्सरौ ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥ * ॥
तस्य राज्ञा दण्ड्यत्वं कथितं यथा,—
"कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान् ।
विकर्म्मस्थान् शौण्डिकांश्च क्षिप्रं निर्व्वासयेत् पुरात् ॥
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः ।
विकर्म्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥"
इति मानवे ९ अध्यायः ॥
अपि च ।
"आक्रुष्टांश्च तथा लुब्धान् दृष्टापातनभाषिणः ।
पाषण्डिनस्तापसादीन् परराष्ट्रेषु योजयेत् ॥"
इति युक्तिकल्पतरुः ॥

पाषण्डकः, पुं, (पाषण्ड एव । स्वार्थे कन् ।) पाषण्डः । इति शब्दरत्नावली ॥

पाषण्डी, [न्] पुं, (पा त्रयीधर्म्मं षण्डयतीति । पा + षण्ड + णिनिः ।) पाषण्डः । इति जटाधरः ॥ (यथा, मनुः । ४ । ३० ।
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥")

पाषाणः, पुं, (पषति पीडयत्यनेनेति । पष पीडने + बाहुलकात् आनच् । "पषीषिच ।" २ । ८० । इत्युज्ज्वलदत्तोक्त्या च च सिद्धम् ।) प्रस्तरः । तत्पर्य्यायः । ग्रावा २ उपलः ३ अश्मा ४ शिला ५ दृषत् ६ । इत्यमरः । २।३।४ ॥ दृषद् ७ । इति भरतः ॥ प्रस्तरः ८ पाराकुशः ९ पारटीटः १० टङ्कनः ११ काचकः १२ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ४ । २१ । ४४ ।
"गृहीत्वा नारदे कंसः समाहूयाथ बालकम् ।
पाषाणे पोथयामास प्राणं त्राप च मन्दधीः ॥"
पाषाणादिनिर्म्मितत्वात् देवताप्रतिमादि । यथा, आर्य्यासप्तशत्याम् । ३५८ ।
"पूजा विना प्रतिष्ठां नास्ति न सर्व्वं विना प्रतिष्ठा च ।
तदुभयविरहितः पाषाणु [illegible] ॥")

पाषाणगर्द्दभः, पुं, हनुसन्धिसञ्जातशोथविशेषः । तल्लक्षणमाह ।
"वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः ।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्द्दभः ॥"
[illegible] ॥ * ॥ तच्चिकित्सा यथा,—
"पाषाणगर्द्दभं पूर्व्वं स्वेदयेत् कुशलो भिषक् ।
ततः [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
इति भावप्रकाशः ॥

पाषाणचतुर्द्दशी, स्त्री, (पाषाणरूपा पाषाणभक्षणविधानाय वा चतुर्द्दशी ।) अग्रहायणशुक्लचतुर्द्दशी । यथा, भविष्ये ।

"वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्द्दशी।
तस्यामाराधयेद्गौरीं नक्तं पाषाणभोजनैः॥
पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः।"
इति तिथ्यादितत्त्वम्॥

पाषाणदारकः, पुं, (दारयति विदारयतीति। दृ+णिच्+ण्वुल्। पाषाणस्य दारकः।) टङ्कः। इति हेमचन्द्रः।४।५८२॥

पाषाणदारणः, पुं, (दारयतीति। दृ+णिच्+ल्युः। पाषाणस्य दारणो विदारकः।) टङ्कः। इत्यमरः।२।१०।३४॥

पाषाणभेदनः, पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+ल्युः।) वृक्षविशेषः। पाथरकुचि इति भाषा। तत्पर्य्यायः। अश्मघ्नः २ शिलाभेदः ३ अश्मभेदकः ४ श्वेता ५ उपलभेदी ६ पलभित् ७ शिलागर्भजः ८। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। भेदकृद्दाहनुत्तृष्णाश्मरीनाशित्वम्। शीतलत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजनी।
अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः॥
भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः।
योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च॥"
इति भावप्रकाशः॥

पाषाणभेदी, [न्] पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+णिनिः।) वृक्षविशेषः। पाथरचुर इति भाषा। तत्पर्य्यायः। अश्मभेदः २ शिलाभिद् ३ अश्मभित् ४। इति रत्नमाला॥ (अश्मभेदशब्देऽस्य विवरणम्॥)

पाषाणी, स्त्री, (पाषाण+अल्पार्थे ङीष्।) क्षुद्रपाषाणः। स तु परिमापकविशेषः। बाट्खारा इति भाषा। तत्पर्य्यायः। दृषत्करा २। इति शब्दचन्द्रिका॥

पाहलः, पुं, (पाति रक्षति दुष्कृतेभ्य इति। पा+क्विप्। पां धर्म्मं हन्ति गच्छतीति। हन् गतौ+डः। पाहं सञ्चायं अलतीति। अच्।) मङ्गलवृक्षः। इति शब्दचन्द्रिका॥

पि, श गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) श, पियति। इति दुर्गादासः॥

पिकः, पुं, (अपि कायति शब्दायते इति। अपि+कै+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। अपेरकारलोपः।) कोकिलः। इत्यमरः॥२।५।१९॥ (यथा,—
"पिक! विमुञ्च ध्वनिं समं मम-
प्यसमपि चन्द्रविरोधिकूजितम्।
इति तयोरनयं हि विरोधिता
कथमयो ममता मम सम्प्रति॥"
रघुवंशः॥)

पिकप्रिया, स्त्री, (पिकानां प्रिया।) महाजम्बूः। इति राजनिर्घण्टः॥

पिकबन्धुः, पुं, (पिकानां बन्धुरिव।) आम्रवृक्षः। इति त्रिकाण्डशेषः॥

पिकरागः, पुं, (पिकानां रागोऽनुरागो यत्र।) आम्रवृक्षः। इति राजनिर्घण्टः॥

पिकवल्लभः, पुं, (पिकानां वल्लभः।) आम्रवृक्षः। इति भावप्रकाशः॥ (गुणाद्यास्य आम्रशब्दे ज्ञातव्याः॥)

पिकाक्षः, पुं, (पिकस्य अक्षि लोचनं तद्वत् वर्णो यस्य। समासे षच्।) रोचनी। इति शब्दचन्द्रिका॥

पिकाङ्गः, पुं, (पिकस्याङ्गमिव अङ्गं यस्य।) पक्षिविशेषः। इति शब्दचन्द्रिका॥

पिकानन्दः, पुं, (पिकानामानन्दो यस्मिन्।) वसन्तकालः। इति राजनिर्घण्टः॥

पिकी, स्त्री, (पिक+स्त्रियां ङीष्।) कोकिला। इति राजनिर्घण्टः॥

पिकेक्षणा, स्त्री, (पिकस्य ईक्षणं लोचनं तद्वत् वर्णो यस्याः।) कोकिलाक्षः। इति राजनिर्घण्टः॥ कोकिलाक्षुर्कुलाक्षुर्युक्ता च॥

पिक्कः, पुं, (पिक् इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः। पिक इव कायतीति। पृषोदरादित्वात् साधुरित्येके।) हस्तिशावकः। इति शब्दमाला॥

पिङ्गं, क्ली, (पिङ्गतीति। पिजि वर्णे+अच्। न्यङ्क्वादित्वात् कुत्वम्।) बालकः। इति मेदिनी। गे, १२॥ हरितालम्। इति राजनिर्घण्टः॥

पिङ्गः, पुं, (पिजि वर्णे+अच्। कुत्वञ्च।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः।१।५।१६॥ (यथा, महाभारते।१।१२३।३२।
"महाबाहुः पिङ्गस्तेजसा प्रज्वलन्निव।")
मूषकः। इति राजनिर्घण्टः॥

पिङ्गकपिशा, स्त्री, (पिङ्गा कपिशा च। वर्णो वर्णेनेति समासः।) तैलपायिका। इति हेमचन्द्रः।४।२७६॥

पिङ्गचक्षुः, [स्] पुं, (पिङ्गे चक्षुषी यस्य।) कुम्भीरः। इति हेमचन्द्रः।४।४१८॥

पिङ्गजटः, पुं (पिङ्गा पिङ्गलवर्णा जटा यस्य।) शिवः। इति हेमचन्द्रः।२।११३॥

पिङ्गलं, क्ली, (पिङ्गं लातीति। ला+कः।) रीतिः। इति राजनिर्घण्टः॥

पिङ्गलः, पुं, (पिङ्गो वर्णोऽस्यास्तीति। पिङ्ग+"सिध्मादिभ्यश्च।" ५।२।९७। इति लच्।) नीलपीतमिश्रितवर्णः। तत्पर्य्यायः। कडारः २ कपिलः ३ पिङ्गः ४ पिशङ्गः ५ कद्रुः ६। तद्वति, त्रि। इत्यमरः।१।५।१६॥ केचित् द्वयं द्वयं पर्य्यायमाहुः। अत्र नीलपीतः कपिलः। रोचनाभः पिशङ्गः। कनकपिङ्गलः कद्रुः। इति सुभूतिः॥
"पिशङ्गो रोचना पाण्डुः कद्रुः कनकपिङ्गलः॥"
इति नाममाला॥
"पिङ्गदीपशिखाभः स्यात् पिशङ्गः मधुधूलिवत्।
पीतनीलच्छविः कडारस्तृणवह्निवत्॥
अयन्तु हितः पीताङ्गः कपिलो रोचनाच्छायः॥
इत्यत्र भेदोऽपि दृश्यते। अन्यभेदत्वादित्याशौ माढरः।" इति तट्टीकायां भरतः॥ ॥ नागभेदः। (यथा, महाभारते।१।३५।८।
"निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा।")
यक्षः। चण्डांशुपारिपार्श्विकः। निधिभेदः। कपिः। अग्निः। इति मेदिनी। ले, ११६॥ मुनिविशेषः। (यथा, महाभारते।१।५३।६।
"सहाभवत् साङ्गरवो वत्स्यश्चापि पिङ्गलः॥")
नकुलः। स्थावरविषविशेषः। इति हेमचन्द्रः।४।१६५॥ क्षुद्रोलूकः। इति राजनिर्घण्टः॥ (यक्षविशेषः। यथा, महाभारते।२।२३०।५१॥
"पिङ्गलो नाम यक्षेन्द्रो लोकस्यानन्ददायकः॥"
पर्व्वतविशेषः। इति ब्रह्माण्डपुराणम्॥)
प्रभवादिषष्टिवर्षान्तर्गतैकपञ्चाशत्तमवर्षः। यथा,
"देशभङ्गोऽथ दुर्भिक्षं यमासात् कथयाम्यहम्।
पिङ्गले चारुपञ्चापि। दुर्भिक्षं नर्म्मदातटे॥"
इति ज्योतिस्तत्त्वम्॥ ॥
पिङ्गलाचार्य्यकृतच्छन्दोग्रन्थविशेषः। यथा,—
"जो विविहमत्तसाअरपारं पत्तो विविमलमर
हेलम्।
पढमं भासतरण्डो णाओसो पिङ्गलो जअइ॥"
अस्य व्याख्या।
"अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये प्रथमत् करोति। विविधा नानाप्रकारकविन्यासविशिष्टा मात्रा यत्र तद्विविधमात्रं छन्दःकदम्बं तदेव सागरः अतिदुर्गमत्वात् भाषा एव तरण्डा नौर्यस्य। प्राकृते स्वच्छता तेन भाषयैव छन्दःशास्त्रमुक्तमित्यवगम्यते। केचित्तु लघुगुरुरूपा या विविधा मात्रा सैव सागरः तत्पारं प्राप्तः अपिरवधारयेत्। विमलया मत्या हेला यत्र तद्यथा स्यात् निर्म्मलबुद्ध्या हेलयैव पारं गत इत्यर्थः। प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमित्यवगम्यते। अर्थान्तरमप्यनेनैव लभ्यते यो विविधमात्राभिः सागरपारं प्राप्तः किः पक्षी अर्थाद्गरुडः तस्य विमलमतौ हेला यत्र तत् यथा स्यात् भाषा अष्टभयवाक् सैव नौर्यस्य ईदृशो नागो जयति। एवं हि श्रूयते भोक्तुमुद्यतं गरुडं दृष्ट्वा सकौशलं सविनयं तमुवाच-भो गरुड ममेदं कौशलं पश्य यदेकवारं लिखितं मया लिख्यते तदा मां भक्षयेति। स तथेत्युक्त्वा सागरतीरं षड्विंशत्यक्षरपर्य्यन्तं प्रस्तारं प्रदर्श्य अगाधं प्रविवेश गरुडोऽपि सत्वरं गुरुत्वेन तत्र गत्वा तद्दर्शनाद्विरराम एतादृशं बुद्धिगौरवं यस्य अतएव जयति उत्कर्षेण वर्त्तते तं प्रति प्रणतोऽस्मीति गम्यते अथवा भाषायां भयत्रोपस्थाने मङ्गलार्थः प्रथमं भक्तोरावनयोर्भगणजगणयोर्दोषोऽशुचितोऽपि कश्चित्प्रचारैर्भाव्यम्।" इति पिङ्गलच्छन्दोटीका च॥

पिङ्गललोहं, क्ली, (पिङ्गलं लोहमिति कर्म्मधारयः।) पित्तलम्। इति राजनिर्घण्टः॥

पिङ्गला, स्त्री, (पिङ्गल+टाप्।) वामनाख्यदक्षिणदिग्गजस्य स्त्री। इत्यमरः।१।३।४॥ कुमुदस्य करिणी। वेश्याविशेषः। इति मेदिनी। ले, ११२॥ तस्या उपाख्यानं यथा,—

"पिङ्गला नाम वेश्यासीद्विदेहनगरे पुरा ।
तस्या मे शिक्षितं किञ्चिन्निबोध नृपनन्दन ! ॥
सा स्वैरिण्येकदा कान्तं सङ्केत उपनेष्यती ।
अभूत् काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥
मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ ! ।
तान् शुल्कदान् वित्तवतः कान्तान् मेनेऽर्थ-
कामुका ॥
आगतेष्वपयातेषु सा सङ्केतोपजीविनी ।
अप्यन्यो वित्तवान् कोऽपि मामुपैष्यति भूरिदः ॥
एवं दुराशया ध्वस्तनिद्रा द्वार्यवलम्बती ।
निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥
तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः ।
निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥
तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ।
निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ।
नह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति ॥
पिङ्गलोवाच ।
अहो मे मोहविततिं पश्यताविजितात्मनः ।
या कान्तादसतः कामं कामये येन बालिशा ॥
सन्तं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयाधिशोक-
मोहप्रदं तुच्छमहं भजेऽज्ञा ॥
अहो मयात्मा परितापितो वृथा
साङ्केत्यवृत्त्यातिविगर्ह्यवार्त्तया ।
स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्
क्रीतेन वित्तं रतिमात्मनेच्छती ॥
यदस्थिभिर्निर्मितवंशवंश्य-
स्थूणं त्वचा रोमनखैः पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्-
विण्मूत्रपूर्णं मदुपैति कान्या ॥
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ।
यान्यमिच्छन्त्यसत्यस्मादात्मदात् काममच्युतात् ॥
सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।
तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥
कियत् प्रियन्ते व्यभजन् कामा ये कामदा नराः ।
आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ।
नूनं मे भगवान् प्रीतो विष्णुः केनापि कर्म्मणा ।
निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥
मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः ।
येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥
तेनोपकृतमादाय शिरसा ग्राम्यसङ्गताः ।
त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरम् ॥
सन्तुष्टा श्रद्दधत्येतद्यथालाभेन जीवती ।
विहराम्यमुनैवाहमात्मना रमणेन वै ॥
संसारकूपे पतितं विषयैर्मुषितेक्षणम् ।
ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधी-
श्वरः ॥
आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात् ।
अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥
ब्राह्मण उवाच ।
एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम् ।
छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥"
इति श्रीभागवते ११ स्कन्धे श्रीभगवदुद्धव-
संवादे अष्टमेऽध्याये ।२२—४४ ॥ * ॥
कर्णिका । नाडीविशेषः । इति हेमचन्द्रः ॥
पक्षिभेदः । राजरीतिः । इति राजनिर्घण्टः ॥
शिंशपावृक्षः । इति रत्नमाला ॥ * ॥
अथ पिङ्गलादिनाडीनिरूपणम् ।
"दक्षिणांशः स्मृतः सूर्य्यो वामभागो निशाकरः ।
नाड्यस्तु विज्ञेयास्तु मुख्यास्तिस्रः प्रकीर्त्तिताः ॥
इडा वामे स्थिता मध्ये सुषुम्णा पिङ्गला परे ।
मध्या तास्वपि नाडी स्यादग्नीषोमस्वरूपिणी ॥"
"अथेडा वामवृक्षाधःस्था यकुन्मूला वामनासा-
पर्य्यन्तं गता एवं पिङ्गला दक्षिणवृक्षाधःस्था
यकुन्मूला दक्षिणनासान्तं गता इडयोरन्तर्गता
सुषुम्णा इत्यर्थः ।" इति शारदातिलकम् ॥
"नाडीनां संस्थितो देवि ! कन्दयोनिः खगाण्डवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ।"
कन्दस्य पद्मस्य योनिवत् पक्षिण्डाकारं स्थानमिति
यावत् ।
"प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्णा च तृतीयिका ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुषा कुहूश्चैव शङ्खिनी च दश स्मृताः ॥
एवं नाडीमयं चक्रं विज्ञेयं शक्तिचक्रके ।
इडायाः पिङ्गलायाश्च मध्ये या सा सुषुम्-
णिका ॥
त्रयश्च त्रिगुणा ज्ञेया सत्त्वचिच्छक्तिरात्मिका ।
रजोगुणा च वज्राख्या चित्रिणी सत्त्वसंयुता ॥
तमोगुणा ब्रह्मनाडी कार्य्यभेदक्रमेण च ॥"
इति निरुत्तरतन्त्रे प्रथमपटलः ॥
इडापिङ्गलयोः स्वरूपं यथा,—
"इडा च शुभ्रचन्द्राभा तस्या वामे व्यवस्थिता ।
पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता ।"
इति योगार्णवः ॥
"इडायां संस्थितश्चन्द्रः पिङ्गलायां दिवाकरः ॥"
इति तन्त्रान्तरम् ॥
पिङ्गलिका, स्त्री, (पिङ्गलो वर्णोऽस्त्यस्या इति ।
पिङ्गल + ठन् ।) बलाका । इति जटाधरः ॥
(कीटविशेषः । यथा, सुश्रुते । ५ । ८ ।
"मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधू-
लिका काषायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य
दाहशोथौ भवतः ॥")
पिङ्गसारः, पुं, (पिङ्ग एव सारो यस्य ।) हरि-
तालम् । इति राजनिर्घण्टः ॥ (हरितालशब्दे
विवरणमस्य ज्ञातव्यम् ॥)
पिङ्गस्फटिकः, पुं (पिङ्गः पिङ्गवर्णः स्फटिकः
इति मध्यपदलोपी समासः ।) गोमेदमणिः । इति
राजनिर्घण्टः ॥
पिङ्गा, स्त्री, (पिङ्ग + वर्णोऽस्त्यस्या इति । अच्
टाप् च ।) गोरोचना । हिङ्गुः । चण्डिका ।
चण्डिका । इति मेदिनी । गे, ११ ॥ हरिद्रा ।
इति शब्दचन्द्रिका ॥ वंशरोचना । इति राज-
निर्घण्टः ॥ (उमामनुयाता तपस्विनी । अस्या
आयमस्तु तीर्थस्यानमेन प्रसिद्धः । यथा,
महाभारते । ३ । ८२ । ५५ ।
"पिङ्गातीर्थमुपस्पृश्य ब्रह्मचारी नराधिप ! ।
कपिलानां नरव्याघ्र ! शतस्य फलमश्नुते ॥"
तथा च तत्रैव । १३ । २५ । ५३ ।
"उन्मादक उपस्पृश्य आश्रमस्य चाश्रमे ।
पिङ्गायाश्चाश्रमे स्नात्वा सर्व्वपापैः प्रमुच्यते ॥")
पिङ्गाक्षः, पुं, (पिङ्गे अक्षिणी यस्य । षच् समासे ।)
शिवः । इति त्रिकाण्डशेषः ॥ (कुम्भीरः । पिङ्ग-
चक्षुःशब्ददर्शनात् । द्रोणपुत्रपक्षिविशेषः । यथा,
मार्कण्डेये । ३ । २१ ।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा ।
द्रोणपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः शास्त्रचिन्तकाः ॥"
पिङ्गलनेत्रे, त्रि । यथा, तत्रैव । ८८ । ९५ ।
"नमस्तेऽस्तु पिङ्गाक्ष ! नमस्तेऽस्तु हुता-
शन ! ॥")
पिङ्गाशः, पुं, (पिङ्गं वर्णमश्नुते इति । अश +
अच् ।) पल्लीपतिः । मत्स्यभेदः । पाङ्गास इति
भाषा । जात्यस्वर्णं, क्ली । इति मेदिनी । शे, ४५ ॥
पिङ्गाशी, स्त्री, (पिङ्गं वर्णमश्नुते इति । अश +
अच् । स्त्रियां ङीष् ।) नीलिका । इति मेदिनी ।
शे, ४५ ॥
पिङ्गास्यः, पुं, (पिङ्गमास्यं वदनं यस्य ।) पिङ्गास्य-
मत्स्यः । इति शब्दरत्नावली ॥
पिङ्गी, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति । अच् ।
ततो गौरादित्वात् ङीष् ।) शमीवृक्षः । इति
मेदिनी । गे, १२ ॥
पिङ्गेक्षणः, पुं, (पिङ्गानि पिङ्गलवर्णानि ईक्षणानि
यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥
(कुम्भीरः । पिङ्गचक्षुःशब्ददर्शनात् । पिङ्गल-
नेत्रे, त्रि ।)
पिचण्डः, पुं, (अपिचण्ड्यतेऽनेनेति । अपि +
चडि कोपे + घञ् । अपेरल्लोपः ।) पशोर-
वयवः । उदरम् । इति हेमचन्द्रः । ३ । २८८ ॥
पिचण्डिलः, त्रि, (अतिवृद्धं पिचण्डमुदरमस्य ।
पिचण्ड + तुन्दादित्वात् इलच् ।) तुन्दिलः ।
इति हेमचन्द्रः । ३ । ११७ ॥ (यथा, काशी-
खण्डे । ८० । ११६ ।
"शाकाकारैर्मरुत्कारैः सुरा जाताः पिच-
ण्डिलाः ।
दर्शिता निजपक्षेण परमात्मा पदे पदे ॥")
पिचव्यः, पुं (पिचवे तूलाय साधुः । पिचु + यत् ।)
कार्पासः । इति हेमचन्द्रः । ४ । २०३ ॥
पिचिण्डः, पुं, उदरम् । इत्यमरः । २ । ६ । ७८ ॥
तस्य वचनं यथा,—
"मोदराः, शमठरा पिचण्डः कुक्षिरिभः ।
कर्पोलस्य हरितः स्तुः———— ।"
इति भरते द्विरूपकोषः ॥
पशोरवयवः । इति मेदिनी । डे, १२ ॥

पिचिण्डिका, स्त्री, (पिचिण्ड इव पिण्डाकृतिरस्य स्येति । पिचिण्ड+ठन् ।) पिण्डिका । इति हेमचन्द्रः । ३ । २७८ । मार हिम् इति भाषा ।

पिचिण्डिलः, पुं, (अतिशयितः पिचिण्ड उदरमस्य । पिचिण्ड+तुन्दादित्वात् इलच् ।) वृहदुदरयुक्तः । इत्यमरः । २ । ६ । ४४ । तत्पर्य्यायः । पिचण्डिलः २ वृहत्कुक्षिः ३ तुन्दी ४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७ उदरिलः ८ । इति हेमचन्द्रः । ३ । ११४ । (यथा, काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादे ।

"पिचिण्डिलैः स्थूलवक्त्रैर्मेघगम्भीरनिस्वनैः ।")

पिचुः, पुं (पेचतीति । पिच मर्द्दने+मृगय्वादित्वात् कुः ।) कार्पासतूलः । इत्यमरः । २ । ९ । १०६ । (यथा, सुश्रुते । ४ । ६ ।

"अर्शो वीक्ष्य शलाकयोत्पीड्य पिचुवल्कयोरन्यतरेण प्रमृज्य क्षारं पातयेत् ।") कुष्ठभेदः । कर्षः । असुरविशेषः । इति मेदिनी । चे, ७ । भैरवः । धान्यभेदः । इति विश्वः ।

(चिकित्सोपयोगिपश्चकर्म्मान्तर्गतक्रियाविशेषः । यथा,—

"कामिन्याः पुतियोन्याश्च कर्त्तव्यः स्वेदनो विधिः ।
क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत् ॥
शल्लकीजिङ्गिनीजम्बुधवत्वक्पञ्चवल्कलैः ।
कषायैः साधितैः स्नेहः पिचुः स्याद्विप्लुतापहः ॥"

इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापच्चिकित्सायाम् ।)

पिचुकः, पुं, (पिचुरिव कायतीति । कै+कः ।) मदनवृक्षः । इति रत्नमाला । मयना इति भाषा ।

पिचुतूलं क्ली, (पिचोस्तूलम् ।) तूलः । इति त्रिकाण्डशेषः ।

पिचुमन्दः, पुं, (पिचुं कुष्ठविशेषं मन्दयति नाशयतीति । मन्द+अण् ।) निम्बवृक्षः । इति हेमचन्द्रः । ४ । २०५ । (यथा, आर्य्यासप्तशत्याम् । ३४९ ।

"पश्चात्कृतपरिमिन्दिन्दिरेण माकन्दसिन्धुवारे
सुन्दरः ।
अपि च पिचुमन्दस्तबके मौकुलिककुलमाकुलं
मिलति ॥")

पिचुमर्द्दः, पुं, (पिचुं कुष्ठविशेषं मर्द्दयति नाशयतीति वा । मर्द्द+अण् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ । (यथा, देवीभागवते । १ । १० । १९ ।

"चन्दनानुसारेण वृक्षमार्ग्गाः विभूतयः ।
पिचुमर्द्दः पलाशोऽपि काकैरेवोपभुज्यते ॥"

पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"हैङ्गं पिचुमर्द्दश्च निम्बोऽरिष्टो वरत्वचा ।
दर्द्दुरो हिङ्गुनिर्य्यासः गर्ब्बनोभद्र इत्यपि ॥")

पिचुलः, पुं, (पिचुं लातीति । ला+कः ।) झावुकः । इत्यमरः । जलवायसः । इति मेदिनी । ले, ११४ । वनः । दन्मर्द्दटीकायां भरतसुन्दरी ।

पिच्च क छेदे । इति कविकल्पद्रुमः । (चुरां-परं-सकं-सेट् ।) क, पिच्चयति । इति दुर्गादासः ।

पिच्चटं, क्ली, (पिच्चयतीति । पिच्च छेदने+अटन् ।) सीसकम् । रङ्गम् । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"रङ्गं वङ्गञ्च कस्तीरं मधुकं पूर्ण पिच्चटम् ॥")

नेत्ररोगे, पुं । इति मेदिनी । टे, ५० ।

पिच्छ, श बाधे । इति कविकल्पद्रुमः । (तुदां-परं-सकं-सेट् ।) श, पिच्छती पिच्छन्ती । बाधो विहितिः । इति दुर्गादासः ।

पिच्छं, क्ली, (पिच्छतीति । पिच्छ+अच् ।) मयूरपुच्छम् । तत्पर्य्यायः । शिखण्डः २ वर्हम् ३ । इत्यमरः । २ । ५ । ३१ । शिखिपुच्छम् ४ शिखण्डकम् ५ । इति शब्दरत्नावली । (यथा, अनर्घराघवे । ६ । ६५ ।

"तस्याखिलभीमस्य ध्वजदण्डस्य लाञ्छनम् ।
दर्पदीप्रः चुरप्रेण मायूरं पिच्छमच्छिनत् ॥")

चूडा । इति मेदिनी । छे, ५ ।

पिच्छः, पुं, (पिच्छतीति । पिच्छ+अच् ।) लाङ्गूलम् । इति मेदिनी । छे, ५ ।

पिच्छलदला, स्त्री, (पिच्छलं दलं पत्रं यस्याः ।) बदरीवृक्षः । इति त्रिकाण्डशेषः ।

पिच्छबाणः, पुं, (पिच्छं बाण इव यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ।

पिच्छा, स्त्री, (पिच्छ+अजादित्वात् टाप् ।) शाल्मलीवेष्टः । इत्यमरः । २ । ४ । ४७ ।

(अस्याः पर्य्यायो यथा,—

"निर्य्यासः शाल्मलेः पिच्छा शाल्मली वेष्टकोऽपि च ।
मोचास्रावो मोचरसो मोचनिर्य्यास इत्यपि ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)

पूगः । घटा । कोषः । मोचा । भक्तमण्डमण्डम् । पङ्क्तिः । अश्वपदामयः । इति मेदिनी । छे, ४ । चोलिका । पश्चिताङ्गा । इति हारावली । २४० । शिंशपावृक्षः । इति शब्दचन्द्रिका ।

पिच्छिका, स्त्री, (पिच्छं मयूरवर्हं अस्त्यस्येति । पिच्छ+ठन् ।) चामरविशेषः । यथा । "पिच्छिका भ्रामयित्वा बहुविधं हास्यं कृत्वा पञ्चमढक्कदत्त्वा चरणे दर्दं करिष्यं अपिया कुञ्जमया ।" इति रत्नावलीनाटके ४ अङ्कः ।

पिच्छिलिका, स्त्री, शिंशपा । इति शब्दचन्द्रिका । (विवृतिरस्याः शिंशपाशब्दे ज्ञातव्या ।)

पिच्छिलं, त्रि, (पिच्छा भक्तसम्भूतमण्डं अस्त्यस्येति । पिच्छादित्वात् इलच् ।) भक्तमण्डयुक्तम् । इति रायमुकुटः । सरसव्यञ्जनादि । इति भरतः । सूपादि । इति रमानाथः । शिथिलव्यादि । इति भानुदीक्षितः । मण्डयुक्तभक्तम् । अन्नयुक्तव्यञ्जनम् । इति नीलकण्ठः । तत्पर्य्यायः । विजिलम् २ । इत्यमरः । २ । ९ । ४६ । विजयिलम् ३ विजिलम् ४ विज्ज-लम् ५ इज्जलम् ६ लालसीकम् ७ । इति शब्दरत्नावली । (यथा, छन्दोमञ्जर्य्याम् ।

"तदर्थं सर्षपशाकं नवौदनानि पिच्छिलानि च
दधीनि ।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति ॥")

पिच्छयुक्तः । (स्निग्धघनपदार्थविशेषः ।) इति भाषा । यथा, साहित्यदर्पणे १० । ५१ ।

"आलोके वारिधराणामपनीतया नैव शक्यते
स्थातुम् ।
उत्कण्ठितासि तरले ! नहि नहि सखि !
पिच्छिलः पन्थाः ॥")

पिच्छिलः, पुं, (पिच्छं चूडास्त्यस्येति । पिच्छादित्वात् इलच् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः ।

पिच्छिलकः, पुं, (पिच्छिलः सन् कायतीति । कै+कः ।) धन्वनवृक्षः । इति राजनिर्घण्टः ।

पिच्छिलच्छदा, स्त्री, (पिच्छिलच्छदो यस्याः ।) उपोदकी । इति राजनिर्घण्टः ।

पिच्छिलत्वक्, [च्] पुं, (पिच्छिला त्वक् यस्य ।) नागरङ्गवृक्षः । इति त्रिकाण्डशेषः । धन्वनवृक्षः । इति रत्नमाला ।

पिच्छिलसारः, पुं, (पिच्छिलः सारो यस्य ।) मोचरसः । इति राजनिर्घण्टः ।

पिच्छिला, स्त्री, (पिच्छा+इलच् । ततष्टाप् ।) पोतिका । शिंशपा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"पिङ्गला पिच्छिला धीरा लघुसारा च
शिंशपा ।")

शाल्मलिः । (अस्याः पर्य्यायो यथा,—

"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)

सिन्धुभेदः । इति मेदिनी । ले, ११५ । कोशातकः । वृश्चिकालुपः । मूलीछेणम् । अतसी । इति राजनिर्घण्टः । कची । इति शब्दचन्द्रिका ।

पिज, इ क भासार्थे । इति कविकल्पद्रुमः । (चुरां-परं-अकं-सकं च सेट् ।) इ क, पिञ्जयति । भाः दीप्तिः । भाषार्थी निक्षेपहिंसाबलदानानि । इति दुर्गादासः ।

पिज, इ ल इ वर्णपूजयोः । इति कविकल्पद्रुमः । (अदां-आत्मं-अकं-सकं च-सेट् ।) इ, पिञ्जते । ल इ, पिङ्क्ते । इति दुर्गादासः ।

पिञ्जं, क्ली, (पिञ्ज वधे+भावे घञ् ।) बलम् । आकुले, त्रि । इति मेदिनी । जे, १४ ।

पिञ्जः, पुं (पिञ्ज वधे+भावे घञ् ।) वधः । इत्यमरः । २ । ८ । ११५ । कर्पूरभेदः । इति राजनिर्घण्टः ।

पिञ्जटः, पुं, (पिञ्जयति नेत्रं दूषयतीति । पिजि+अटन् ।) नेत्रमलम् । पिंचुटि इति भाषा । यथा, शब्दरत्नावल्याम् ।

"दूषीका दूषिका दूषिः पिञ्जटपिञ्जटावपि ।"

पिञ्जनं, क्ली, (पिञ्ज्यतेऽनेनेति । पिजि स्फोटने + करणे ल्युट् ।) कार्पासस्फोटनधनुः । तत्पर्य्यायः । विहननम् २ तूलस्फोटनकार्मुकम् ३ । इति हेमचन्द्रः । ३ । ५७६ ॥

पिञ्जरं, क्ली, (पिजि दीप्तौ वर्णे वा + बाहुलकात् अरः । इत्युज्ज्वलदत्तः । ३ । १३१ ।) हरितालम् । इत्यमरः । २ । ९ । १०३ ॥ स्वर्णम् । इति मेदिनी । रे, १८५ ॥ नागकेशरम् । इति राजनिर्घण्टः ॥ पश्वादिबन्धनयन्त्रम् । कायास्थिबन्धम् । इत्यमरटीकायां रामाश्रमः ॥

पिञ्जरः, पुं, (पिजि + अरः ।) अश्वभेदः । पीतरक्तवर्णः । इति हेमचन्द्रः ॥ (सुमेरुपश्चिमपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५ । ९ ।
"पिञ्जरोऽथ महाभद्रः सुरसः कपिलो मधुः ॥")
पीते, त्रि । इति मेदिनी । रे, ११५ ॥ (यथा, आर्य्यासप्तशत्याम् । ३९९ ।
"प्रियया कुङ्कुमपिञ्जरपाणिद्वययोजनाङ्कितं वासः ।
प्रहितं मां यामुपालम्भितसकिरणाय ध्रियते ॥")

पिञ्जरकं, क्ली, (पिञ्जरमेव । स्वार्थे कन् ।) हरितालम् । इति राजनिर्घण्टः ॥ (पुं, नागविशेषः । यथा, महाभारते । १ । ३५ । ६ ।
"नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः ॥")

पिञ्जलं, क्ली, (पिजि हिंसायां वर्णे च + कलच् ।) कुशपत्रम् । हरितालम् । इति धरणिः ॥

पिञ्जलः, पुं, (पिजि + कलच् ।) अत्यन्ताकुलसैन्यादिः । इत्यमरः । २ । ८ । ९९ ॥

पिञ्जली, स्त्री, (पिञ्जल + स्त्रियां ङीष् ।) कुशाग्रद्वयरचितप्रादेशमात्रगात्रकुशपत्रद्वयम् । अस्या नामान्तरं पवित्रम् । यथा,—
"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम् ॥"
इति छन्दोगपरिशिष्टम् ॥

पिञ्जा, स्त्री, (पिञ्ज्यते स्फोट्यते इति । पिञ्ज + गुरोश्च हलः । ततष्टाप् ।) तूलम् । हरिद्रा । इति त्रिकाण्डशेषः ॥ हड्डी । हड्डा इति भाषा । यथा, शब्दमालायाम् । [च ॥"
"मोदुवन्तः पिंडशा स्यात्ततो पिञ्जा कटापि

पिञ्जानं, क्ली, स्वर्णम् । इति राजनिर्घण्टः ॥

पिञ्जिका, स्त्री, (पिञ्ज्यतीति । पिजि + ण्वुल् । टापि अत इत्वम् ।) तूलनालिका । इति त्रिकाण्डशेषः ॥ पाँइज इति भाषा ॥

पिञ्जूलं, क्ली, (पिञ्ज्यतीति । पिजि + "शलिमण्डिपिञ्जादिभ्य ऊलच् ॥" उणां ४ । ९० । इति ऊलच् ।) वर्त्तिका । इत्युणादिकोषः ॥

पिञ्जूषः, पुं, (पिञ्ज्यति हिनस्ति कर्णौ इति । पिजि + बाहुलकात् ऊषन् ।) कर्णमलम् । इति हेमचन्द्रः । ३ । २९६ ॥

पिञ्जेटः, पुं, (पिञ्जटः । पृषोदरादित्वात् साधुः ।) नेत्रमलम् । इति शब्दरत्नावली ॥

पिञ्जोला, स्त्री, (पिञ्ज्यतीति । पिजि + बाहुलकात् ओलः ।) पत्रकाहला । पत्रशब्दः । इति हारावली । ७०७ ॥

पिट, संहतौ । ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-अकं च-सेट् ।) पेटति जनः किञ्चिद्राशीकरोति शब्दायते वा । इति दुर्गादासः ॥

पिटं, क्ली, (पेटति संहतो भवतीति । पिट + कः ।) चालः । इति त्रिकाण्डशेषः ॥

पिटः, पुं, (पेटति द्रव्यान्तरैः संहतो भवतीति । पिट संहतौ + कः ।) पेटः । इति धरणिः ॥ पेटारा इति भाषा ॥

पिटकः, पुं, क्ली, (पेटतीति । पिट् + क्वुन् ।) वंशवेत्रादिमयसमुद्गकः । पेटारी इति पेटा इति पेड़ा इति च ख्यातः । तत्पर्य्यायः । पेटकः २ पेड़ा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ आद्यौ स्वल्पपेटिकायाम् । इति स्वामी ॥ पेटः ५ पेटिका ६ तदिः ७ तदीः ८ मञ्जुषा ९ पेड़िका १० । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ५० । ८६ ।
"कुद्दालदात्रपिटकास्तद्वत् ग्रन्थ्यादिभाजनम् ॥")
विस्फोटे, त्रि । इति मेदिनी । के, १२० ॥ (देहस्थानभेदेन जातस्यास्य शुभाशुभलक्षणम् । यथा, बृहत्संहितायाम् । ५२ । १—१० ।
"सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका ये ।
ते क्रमशः प्रोक्तफला वर्णानामग्रजादीनाम् ॥
सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्द्धि सौभाग्यमाराद्
दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलताञ्च ।
तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रव्रज्यां शङ्खदेशेऽश्रुजलनिपतनस्थानगाश्चातिचिन्ताम् ॥
घ्राणागण्डे वसनसुतलाभोष्ठदेशेऽन्नलाभं
कुर्य्युस्तद्वच्चिबुकतलगता भूरि वित्तं ललाटे ।
कर्णोत्थे तद्भूषणमथ श्रुतज्ञानमाभ्यां गलोत्थाः
श्रोत्रे तद्भूषणमपि ज्ञानमात्मज्ञतायाम् ॥
शिरःसन्धिप्रोत्थाश्छेदयन्तो शिरसि गला
अन्नपानं पानं सुतबन्धनाभं सुखमपि ।
प्रियसाहित्यं स्कन्धेऽप्यटनमथ भिक्षार्थमत्र दु-
ष्टिमार्थे कक्षोत्था विदधति धनानां मधु
सुखम् ॥
दुःखदहृदयनिशवक्ष विघातं
एकबाहुयुगला रचयन्ति ।
संचयं प्रदिशन्त्यवपाना
पृष्ठकान्तपयायुयुगोत्थाः ॥
धनार्त्ति सौभाग्यं सुखमपि कराङ्गुल्युदरजाः
सुताप्ताः नाभौ लभ्य इव पार्श्वकृषिम् ।
धनं धान्यं वस्तौ द्वर्षिमपि मेढ्रे सुस्थदायः
धनं सौभाग्यं वा गुह्यवृषणजा निर्दिशन्ति ।

स्कन्धांसाङ्गेनालाभं बाह्वोः शत्रुक्षयं सुखदान्तान्
चरितम् ।
पृष्ठेन बहुयोगं पार्श्वेऽव्ययस्कन्धे दारादिदम् ॥
स्फिक्कूपाधिपादजाता
धननाशागम्यागमनमध्वानम् ।
बन्धनमङ्गुलिनिचये-
ऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम् ॥
उत्पातगण्डपिटका
दक्षिणतो वामतस्त्वभीघाताः ।
धन्या भवन्ति पुंसां
तद्विपरीतास्तु नारीणाम् ॥
इति पिटकविभागः प्रोक्तो मया सङ्क्षेपोऽयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः ।
भवति मशककृष्णावर्त्तजन्मापि तद्व-
न्निगदितफलकारि प्राणिनां देहसंस्थम् ॥")

पिटङ्काशः, पुं, सर्व्वतोऽभिमनुष्यः । इति भरिप्रयोगः ॥

पिटङ्कोकी, स्त्री, इन्द्रवारुणी । इति रत्नमाला ॥

पिटाकः, पुं, मुनिविशेषः । इत्युणादिकोषः ॥

पिट्टकं, क्ली, (किट्टकं पृषोदरादित्वात् कस्य पः ।) दन्तकिट्टकम् । इति शब्दरत्नावली ॥

पिठ, क्लिशि । वधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-क्लेशे अकं-वधे सकं-सेट् ।) क्लेशावमर्दादिः । पेठति । पिपिठतुः । क्लिशि दुःखानुभवे । इति दुर्गादासः ॥

पिठरं, क्ली, (पिठं राजीति । रा + कः ।) मुस्ता । मन्थानदण्डः । इति मेदिनी । रे, १८३ ॥

पिठरः पुं, (पिठ्यते क्लिश्यतेऽनेनेति । पिठ + करन् ।) स्थालीभेदः । तत्पर्य्यायः । कुण्डः २ उखा ३ । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशत्याम् । ११२ । [धीमान् ॥")
"विदग्धालापबलपिशुनपरपिटरोदराद्धि-
कालो । इत्यमरः । २ । ९ । ३१ ॥ (यथा, महाभारते । १ । ३ । ७२ ।
"अद्योष्य पिठरं नाम्नं मया दत्तं कदाचित् ।
यावत् वर्द्धयति पापात्मा प्राविशत्पृष्ठतः ॥"
असुरविशेषः । यथा, हरिवंशे । १८० । ३१ ।
"पिठरः शमनः अश्वग्रीवो भास्वरश्च ।
तथाकारादयः पञ्च चतुर्दशोऽपि चामराः ॥"
दानवविशेषः । यथा, महाभारते । १ । ६५ । ३१ ।
"वटोदरो महादंष्ट्रः अथवा पिठरकस्तथा ॥")

पिठरी, स्त्री, (पिठर + स्त्रियां ङीष् ।) स्थाली । इत्यमरटीकायां रायमुकुटः ॥

पिड, इ क संहतौ । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) इ क, पिण्डयति । संहतिः राशीकरणम् । इति दुर्गादासः ॥

पिड, इ ङ संहतौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-अकं-सेट् । सर्व्वं इति केचित् ।) इ, पिण्डते । ङ, पिण्डते । इति दुर्गादासः ॥

पिड्डकः, पुं, (पीडयतीति । पीड + ण्वुल् । निपातनात् साधुः ।) स्फोटकः । इति हेमचन्द्रः । ३ । १३० ॥

पिडका, स्त्री, (पीडयतीति । पीड + ण्वुल् + टाप् । निपातनात् साधुः ।) स्फोटकविशेषः । प्रमेहजा सा दशविधा । यथा,—
"शराविका कच्छपिका जालिनी विनताऽलजी ।
मसूरिका सर्षपिका पुत्रिणी च विदारिका ।
विद्रधिश्चेति पिडकाः प्रमेहोपेक्षया दश ॥"
तासां प्रत्येकलक्षणं यथा,—
"सन्धिमर्म्मसु जायन्ते मांसलेषु च धामसु ।
अन्तोन्नता च तद्रूपा निम्नमध्या शराविका ॥१॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः ॥२॥
जालिनी तीव्रदाहा तु मांसजालसमावृता ॥३॥
अवगाढ़रुजा क्लेदा पृष्ठे वाप्युदरेऽपि वा ।
महती पिडका नीला विनता नाम सा स्मृता ॥४॥
रक्तासिता स्फोटचिता दारुणा त्वलजी भवेत् ॥५॥
मसूरदलसंस्थाना विज्ञेया सा मसूरिका ॥६॥
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी ॥७॥
महत्यल्पचिता ज्ञेया पिडका चापि पुत्रिणी ॥८॥
विदारीकन्दवद्वृत्ता कठिना च विदारिका ॥९॥
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा ॥"१०॥
कुष्ठपिडका यथा,—
"कण्डूविपूयकश्चैव कुष्ठे शोणितसंश्रिते ।
बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः ॥"*॥
पिडकाविशेषो यथा,—
"यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पिडका श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥
घनामवक्त्रां पिडकामुन्नतां परिमण्डलाम् ।
अन्त्रालजीमल्पपूयां तां विद्यात् कफवातजाम् ॥१॥
विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम् ।
परिमण्डलां पित्तकृतां विवृतां नाम तां विदुः ॥२॥
ग्रथिताः पञ्च वा षड़् वा दारुणाः कच्छपोन्नताः ।
कफानिलाभ्यां पिडका ज्ञेयाः कच्छपिका बुधैः ॥३॥
ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषैः ।
ग्रन्थिः सवल्मीकवदक्रियाणां
जातः क्रमेणैव गतः प्रवृद्धिम् ॥
मुखैरनेकैः श्रुतितोदवद्भि-
र्विसर्पवत् सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं
निष्प्रत्यनीकं चिरजं विशेषात् ॥४॥
पद्मकर्णिकवन्मध्ये पिडकाभिः समाचिताम् ।
इन्द्रवृद्धां तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥५॥
मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकाचितम् ।
रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजाम् ॥६॥
वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः ।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्द्दभः ॥७॥
कर्णस्याभ्यन्तरे जातां पिडकामुग्रवेदनाम् ।
स्थिरां पनसिकाख्यान्तु विद्यादन्तःप्रपाकिणीम् ॥८॥
विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः ॥९॥
पिडकामुत्तमाङ्गस्थां वृत्तामत्युग्ररुग्ज्वराम् ।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम् ॥१०॥
बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्द्दिशेत् ॥११॥
एकामेतादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम् ।
त्वग्गतां पित्तकोपेन गन्धनामां प्रचक्षते ॥१२॥
कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥
सप्ताहाद्वा दशाहाद्वा पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपाततः ॥१३॥
नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम् ।
कुरुते दाहपाकौ च व्याधिन्तं चिप्यमादिशेत् ॥
तदेवाल्पतरैर्दोषैः कुनखं परुषं वदेत् ॥१४॥
गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम् ।
पादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिणीम् ॥१५॥
विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु ।
विदारीति च तां विद्यात् सर्व्वजां सर्व्वलक्षणाम् ॥"१६॥
इति माधवकरः ॥

पिण्डं, क्ली, पुं, (पिण्डति संहतो भवतीति । पिडि संहतौ + अच् । पिण्ड्यते राशीक्रियते इति । कर्म्मणि घञ् वा ।) आजीवनम् । अयः । इति मेदिनी । डे, १९ ॥ श्राद्धीयमन्त्रविनिर्म्मितबिल्वफलाकारपितृदेश्यकर्द्दमान्नम् । यजुर्व्वेदिनां पिण्डशब्दो नपुंसकलिङ्गेन प्रयुज्यते । यथा,—
"अवनिक्तं पिण्डं दद्यादवनेजन इति श्राद्धविवेककृत पिण्डपितृयज्ञीयकात्यायनवचने पिण्डविशेषणे एतदिति नपुंसकनिर्द्देशात् भावेनैतच पे पिण्डं यद्दत्तस्य पूरकमिति शम्यादप्रवचनेऽपि तथा दर्शनाच्च । छन्दोगानां पिण्डशब्दः पुंलिङ्गेन प्रयुज्यते । दर्भेषु मधु मधु मध्विमच्चनामी मदन्त इति जपित्वा नीवीक्षौम् पिण्डान् दद्यादिति गोभिलसूत्रे पिण्डानिति पुंलिङ्गनिर्द्देशात् ।" इति श्राद्धतत्त्वम् ॥ * ॥ गयादावात्मपिण्डदानविधिर्यथा,—
"गयायां पिण्डदानञ्च गयायां तीर्थमेव च ।
यत्कामं कामरूपं पिण्डिकार्णं हरितु शुभे ।
अन्नाद्देनस्य हस्ते तु पिण्डं दद्यात् स्वकं नरः ।
विरजे च तथा चान्द्रकर्णे रामे च लोमके ।
जीवन्पिण्डप्रदानेन अक्षयायुर्जायते नरः ।
पञ्चाग्न्यै महाचैव स्वकं पिण्डं ददेत्तु यः ।
मासद्वयाधिकं वर्षमायुर्वै वर्द्धते क्रमात् ॥"
इति योगिनीतन्त्रे प्रथमखण्डे २ भागे ५ पटलः ॥
अन्यत् गयाशब्दे द्रष्टव्यम् ॥

पिण्डः, पुं, (पिडि संहतौ + अच् ।) बोलः । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"पिण्डान् गोपः पिण्डकश्च रक्तो बोलो रसोरसः ॥") बलम् । सान्द्रम् । देहैकदेशः । (यथा, महाभारते । २ । ११२ । ३ ।
"दौ चास्य पिण्डावधरेण वक्त्रा-
दथान्तरेणैव सुमनोहरौ च ॥")
आगारैकदेशः । देहसाधनम् । (यथा, रघुः । २ । ५७ ।
"एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु ॥")
निवापः । (यथा, मनुः । ३ । २१५ ।
"त्रींस्तु तस्माद्धविःशेषात् पिण्डान् कृत्वा समाहितः ।
औदकेनैव विधिना निर्व्वपेद्दक्षिणामुखः ॥")
गोलः । सिह्लकः । ओड्रपुष्पम् । इति मेदिनी । डे, १९ ॥ कवलः । इति हेमचन्द्रः ॥ (यथा, मनुः । ११ । २१७ ।
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ॥")
गजकुम्भः । इत्यमरः । ३ । ८ । २०१ ॥ मदनफलः । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"मदनश्छर्द्दनः पिण्डो नटः पिण्डीतकस्तथा ।
करहाटो मरुवकः शल्यको विषपुष्पकः ॥"
शिलाटः । यथा, वैद्यकरत्नमालायाम् ।
"शिलाटः कुञ्चिका पिण्डः ——— ॥")
निवापस्य पितृदेयस्य विधिर्यथा,—
"यावदन्नमुपादाय हविषोऽर्द्धमर्द्धकम् ।
अन्वष्टका सह श्रमीय पिण्डदानमुपक्रमेत् ॥
श्राद्धार्थहविषोऽन्नादेः सकाशात् यावदन्नमोदनखण्डमादि ततोऽस्थार्द्धं गृहीत्वा यत्तो चरुश्रेषेण सह संनीय मिश्रीकृत्य पिण्डदानमारभेतेत्यर्थः ।
मध्वाज्यतिलसंयुक्तं सर्व्वव्यञ्जनसंयुतम् ।
उपमादाय पिण्डन्तु कृत्वा बिल्वफलोपमम् ।
दद्यात् पितामहादिभ्यो दर्भमूलादथ क्रमम् ।
अत्र पितामहपदं पितृपरं वचनान्तरैकवाक्यत्वात् ।
सपिण्डे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ ।
पितामहाय चैवाथ तत्पित्रे च ततः परम् ।
दर्भमूले लेपभुजस्तर्पयेल्लेपघर्षणैः ।
पिण्डैर्मातामहांस्तद्वद्गन्धमाल्यादिसंयुतैः ।
पूजयित्वा द्विजाग्र्याणां दद्यादाचमनं ततः ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
अन्नाद्यभावे फलादिनापि तस्य करणं यथा,—
"इङ्गुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे ।
न्यस्य पिण्डं ततो रामः इदं वचनमब्रवीत् ।
इदं भुङ्क्ष्व महाराज प्रीतो यदशना वयम् ।
यदन्नाः पुरुषा राजंस्तदन्नाः पितृदेवताः ॥"
इत्ययोध्याकाण्डम् ॥ * ॥
पूरकपिण्डविधिर्यथा,—
"ततश्चोत्तरपूर्व्वस्यामपि प्रत्याक्कतोदिशि ।
तण्डुलप्रसृतिं तत्र प्रक्षाल्य त्रिः पचेत् जलम् ।
सर्वमेव सितैर्मिश्रा चैलकीटविवर्ज्जिताम् ।
दारीभाज्ये ततः स्निग्धा खर्जूरा गौरसर्षपान् ।
तत्पृष्ठे प्रस्तरेणांस्तु आच्छाद्य दैवमन्त्रतः

तमोऽथैनमन्वधात् संस्मरन् गोवनामनी ।
तिलसर्पिर्मधुक्षीरैः सिक्तं सप्तमेव हि ।
दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः ॥
फलमूलगुड़क्षीरतिलमिश्रन्तु कुर्य्यात् ।
धूपैः पुष्पैस्तथा दीपैर्गन्धैस्तोयैः सुशीतलैः ॥
ऊर्णातन्तुमयैः शुद्धैर्वासोभिः पिण्डमर्च्चयेत् ।
प्रयाति यावदाकाशं पिण्डदाशमयी शिखा ॥
तावत् संशुद्धसिद्धेन सर्व्वं तोये ततः क्षिपेत् ।
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ॥
सप्तःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ।
आद्यायोर्थे प्रदातव्याः प्रथमे त्वेक एव हि ॥
द्वितीयेऽपि तथा द्वौ तृतीये पञ्च चैव हि ।
एकस्तोयाञ्जलिस्त्वेवं प्राप्तमेकञ्च दीयते ॥
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ॥
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
एवं स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ॥
तोयपात्राणि तावन्ति संयुक्तानि जलादिभिः ॥"

इति शुद्धितत्त्वम् ॥ ० ॥

गयायामात्मपिण्डदानप्रमाणं यथा,—
"स्वकर्म्मधर्म्मयोगेन धनशुश्रूषणं बहु ।
उपार्ज्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥
पिण्डनिर्वपणं तत्र प्रेतानामनुपूर्व्वशः ।
चकार कपिलश्चापि दायादानामनन्तरम् ॥
आत्मनश्च महाबुद्धिर्मन्त्रवेत्ता तिलैर्विना ।
पिण्डनिर्वपणं चक्रे तथान्येषाञ्च गोत्रिणाम् ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥"

इति वामने ७९ अध्यायः ॥

पिण्डकं, क्ली, (पिण्ड इव कायतीति । कै + कः ।) बोलम् । पिण्डमूलम् । इति राजनिर्घण्टः ॥ (गोलः । यथा, सुश्रुते शारीरस्थाने ३ अध्याये । "हृतीये (मासि) हस्तपादशिरसां पञ्च पिण्डका निर्व्वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति ॥")

पिण्डकः, पुं, (पिण्ड इव कायतीति । कै + कः ।) सिह्लकाभिधद्रव्यम् । इत्यमरः । २ । ६ । १२८ ॥ (बोलः । अस्य पर्य्यायो यथा,— "दिवाद् बोलः पिण्डकश्च पिण्डो बोलो रसो रसः ॥" इति वैद्यकरत्नमालायाम् ॥) पिण्डालुः । इति त्रिकाण्डशेषः ॥ पिण्डालुः । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,— "पिण्डको वातलः शीतो गुरुर्ग्राही श्रमो गदा-तुरः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ पिण्ड + स्वार्थे कन् । कवलः । यथा, हरिवंशे भविष्यपर्व्वणि । ९० । ४१ । "ग्रस्तार्क्कं यथा कुर्व्वन् भक्षयन् हविःपिण्ड-कम् ॥")

पिण्डकन्दः, पुं, (पिण्डाकारः कन्दः ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (पिण्डालुशब्देऽस्य विवृतिर्ज्ञातव्या ।)

पिण्डखर्ज्जूरः, पुं, (पिण्डवत् खर्ज्जूरः ।) स्वनामख्यातखर्ज्जूरः । तत्पर्य्यायः । राजजम्बुः १ पिण्डी २ । इति जटाधरः ॥

पिण्डखर्ज्जूरी, स्त्री, (पिण्डखर्ज्जूर + स्त्रियां ङीष् ।) पिण्डखर्ज्जूरः । तत्पर्य्यायः । दीप्या १ स्वर्पिण्डा २ मधुरस्रवा ३ फलपुष्पा ४ स्वादुपिण्डा ५ हयभक्ष्या ६ पिण्डखर्ज्जूरिका ७ । अस्या गुणाः । शैत्यम् । स्निग्धत्वम् । पित्तदाहार्त्तिशोषभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता ।
जायते पश्चिमे देशे सा छोहारेति कीर्त्त्यते ।
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् ।
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकम् ।
महद्भिश्च गुणैरेभ्यः स्वल्पखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रदम् ॥"
अथ पिण्डखर्ज्जूरीभेदः ।
"सुलेमानी तु मृदुला हलदीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छास्रपित्तजित् ॥"

इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

पिण्डगोसः, पुं, (पिण्डवत् संहतो गोसः ।) गन्धरसः । इत्यमरटीकायां रमानाथः ॥

पिण्डतैलकः, पुं, (पिण्डवत् तैलं यस्य । कप् ।) तुरुष्कः । इति राजनिर्घण्टः ॥

पिण्डदः, पुं, (पिण्डं ददातीति । दा + कः ।) पिण्डदानकर्त्ता । यथा,—
"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥"

इति शुद्धितत्त्वम् ॥

अपि च ।
"मार्ज्जारैश्च हतो विप्रैः प्राप्नोति मानवो यदा ।
पैशाचः पश्चात् क्रियाः कार्य्याः यथाशास्त्रोदितैः ॥
क्रियां करोति यः पूर्व्वं विप्रो यश्च पिण्डदः ।
प्रायश्चित्तमथोर्ध्वं तदु प्रायश्चित्ती भवेत्तु सः ॥"

इति शुद्धितत्त्वम् ॥

पिण्डपदं, क्ली, (पिण्डस्य संहतस्य पदम् ।) चक्रविशेषः । यथा,—
"द्वादशचैर्विनिहतो भवनस्य यत्र
कोष्ठैः समन्तमिह पुष्पदरैर्भितम् ।
इत्येवं तं दुर्गतिहारकपुष्पयुक्त-
मिदं ततो भवति पिण्डपदं प्रभावम् ॥
द्वादशवेदकोष्ठा विविधः दुरितः भवनस्य
यत्र दीर्घकाररिष्टिकाः समन्तं स्तु-
संस्थानं पुष्पदरैर्भितं विविधाद्युग्मरस-
दुरितं दृष्टोऽपि पुष्पाद्य भित्तं इतिविप्रा-
करगुम्भुक्षत्रिदं षोडशाधिकदिव्यलक्षणार्चितं
तत् संस्थानं पिण्डपदसंज्ञं चक्रम् भवति ॥"

इति ज्योतिषतत्त्वम् ॥

पिण्डपादः, पुं, (पिण्ड इव पादौ यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

पिण्डपुष्पं, क्ली, (पिण्ड इव पुष्पं पुष्पगुच्छो यस्य ।) अशोकपुष्पम् । (क्वचित् पुं । यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) जवापुष्पम् । पद्मपुष्पम् । इति मेदिनी । पे, २० ॥ तगरपुष्पम् । इति शब्दरत्नावली ॥

पिण्डपुष्पकः, पुं, (पिण्डपुष्पमिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वास्तूकम् । इति शब्दमाला ॥ (वास्तूकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

पिण्डफला, स्त्री, (पिण्ड इव फलं यस्याः ।) कटुतुम्बी । इति जटाधरः ॥ (यथा,—
"निम्बस्य निम्बापनमेव कुर्य्या-
दकुष्ठलोद्दामलवेतसकैः ।
त्रिकण्टकारग्वधकाकजम्बू-
काकादनीतापसवृक्षगर्भैः ।
आस्थापयेत् पिण्डफलार्कभार्गी-
करञ्जकालामलकैश्च विद्वान् ॥"
इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

पिण्डबीजकः, पुं, (पिण्डवत् बीजानि यस्य । कप् ।) कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (कर्णिकारशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

पिण्डमुस्ता, स्त्री, (पिण्डवत् मूला मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

पिण्डमूलं, क्ली, (पिण्डमिव मूलमस्य ।) गर्ज्जरम् । मूलकभेदः । तत्पर्य्यायः । शिखामूलम् २ पिण्डकम् ३ पिण्डमूलकम् ४ । अस्य गुणाः । मधुरत्वम् । उष्णत्वम् । गुल्मवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पिण्डलः, पुं (पिडि संघाते + बाहुलकात् कलच् ।) सेतुः । इति शब्दरत्नावली । १५९ ॥

पिण्डसः, पुं, (पिण्डेन परदत्तान्नेन सनोति जीवतीति । सन + डः ।) भिक्षाशी । भिक्षोपजीवी । इति शब्दमाला ॥

पिण्डा, स्त्री, (पिण्ड + टाप् ।) पिण्डलम् । कस्तूरी भेदः । सा कुङ्कुमिलाच्छिदा विशल्यकृत्, इति राजनिर्घण्टः ॥ वंशपत्री । इति भावप्रकाशः ॥

पिण्डातः, पुं, (पिण्ड इव अतति सातत्यमपगच्छतीति । अत + अच् ।) सिल्हकः । इति शब्दमाला ॥

पिण्डार्ध, क्ली, (पिण्डवत् आर्द्रं ... ।) शर्क्करा । इति शब्दमाला ॥

पिण्डायसं, क्ली, (पिण्डं संहतमायसम् ।) तीक्ष्णायसम् । इति राजनिर्घण्टः ॥

पिण्डारं, क्ली, (पिण्डं संहतं ... । ... "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) क्ष-

शाकविशेषः। पिण्डारा इति हिन्दीभाषा। अस्य गुणाः। शीतलत्वम्। बल्यत्वम्। पित्त-नाशित्वम्। वर्ण्यकारित्वम्। पाके लघुत्वम्। विशेषेण विषघ्नाग्निकरत्वञ्च। इति भावप्रकाशः॥

पिण्डारः, पुं, (पिण्डं अरति गच्छतीति। ऋ+अण्।) क्षपणकः। गोपः। महिषीरक्षकः। द्रुमभेदः। इति मेदिनी। रे, १८५॥ विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

पिण्डालुः, पुं, (पिण्डवत् स्थूल आलुः।) कन्द-गुडूची। कन्दभेदः। पेंडालु इति हिन्दी-भाषा। चुवड़ि आलु इति वङ्गभाषा। तत्-पर्य्यायः। ग्रन्थिलः २ पिण्डकन्दः ३ ग्रन्थिः ४ रोमशः ५ रोमकन्दः ६ रोमालुः ७ ताम्बूल-पत्रः ८ नालाकन्दः ९ पिण्डकः १०। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। मूत्रकृच्छ्रदाह-शोषप्रमेहनाशित्वम्। वृष्यत्वम्। सन्तर्पणत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

पिण्डालुकं, क्ली, (पिण्डालुरिव प्रतिकृतिः। इवार्थे कन्।) आलुविशेषः। गोल आलु इति गुड़ आलु इति चुवड़ि आलु इति च भाषा। अस्य गुणाः। कफहरत्वम्। गुरुत्वम्। वातप्रकोप-कत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते। १।४६।
"विदारीकन्दशतावरीविसमृणालशृङ्गाटक-कशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुक-शङ्खालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि॥")

पिण्डाह्वा, स्त्री, (पिण्डो कस्तूरीविशेषमाह्वयते स्पर्द्धते स्वगन्धेनेति। ह्वे+कः।) नाडीहिङ्गु। इति राजनिर्घण्टः॥

पिण्डिः, स्त्री, (पिडि संहतौ+इन्।) पिण्डिका। इत्यमरटीकायां रमानाथः॥

पिण्डिका, स्त्री, (पिण्ड्यन्ते संहतानि भवन्ति पिण्ड्यन्ते राशीक्रियन्ते वा अराणि यस्याम्। पिण्ड+घञ्। गौरादित्वात् ङीष्। ततः कन्। ह्रस्वश्च।) रथनाभिः। इत्यमरः। २। ८। ५६॥ सा रथचक्रमध्ये मण्डलाकारा यस्यां सर्व्वाणि काष्ठान्यासज्यन्ते। इति रायमुकुटः॥ (पिण्डम्। यथा, शारीरे प्रथमस्थाने सप्तमेऽध्याये।
"कोष्ठपार्श्वे समुद्भूतं परीक्षेत भिषग्वरः। गुडकर्म्मा स तल्लक्ष्मा चैतन्यस्योदकस्य वा॥ पिण्डिका तत्र संलिप्ता नान्यथा भासिता पुनः॥")
पिचिण्डिका। सा जानुनोऽधोमांसलप्रदेशः। इति हेमचन्द्रः॥ पायेर डिम् इति भाषा। (यथा, चरके सूत्रस्थाने ७ अध्याये।
"वङ्क्षणपृष्ठशिरःशूलं वातवर्च्चोविरोधनम्। पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्याद्विधारिते॥")
श्वेतार्कः। इति राजनिर्घण्टः॥ पीठः। यथा,
सूत उवाच।
"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्व्वशः। पीठोच्छ्रायं यथावच्च भागान् षोडश कारयेत्॥ भूमावेकः प्रविष्टः स्याच्चतुर्भिर्जगती मता। वृत्तो भागस्तथैकः स्यात् वृत्तपट्टस्य भागतः॥ भागैस्त्रिभिस्तथा कण्ठं कण्ठपट्टस्तु भागतः। भागेन वृत्तपट्टस्तु शेषभागेन पट्टिका॥ प्रविष्टं भागमेकैकं जगती यावदेव तु। निर्गमस्तु पुरस्तस्या यावद्वै शेषपट्टिका॥ पीठिकानान्तु सर्व्वासामेतत् सामान्यलक्षणम्। निःशेषाद्विषमाभेदात् प्रवक्ष्ये द्विजसत्तमाः॥ स्थण्डिला वापि वापी च यक्षी वेदी च मण्डला। पूर्णचन्द्रा च वज्री च पद्मा वार्द्धशशी तथा॥ त्रिकोणा दशमी तासां संस्थानञ्च निबोधत। स्थण्डिला चतुरस्रा तु वर्ज्जिता मेखलादिभिः॥ वापी द्विमेखला ज्ञेया यक्षी चैव त्रिमेखला। चतुरस्रायता वेदी न तां लिङ्गेषु योजयेत्॥ मण्डला वर्त्तुला या तु मेखलाभिर्व्विवर्ज्जिता। रक्ता द्विमेखला मध्ये पूर्णचन्द्रा तु सा भवेत्॥ मेखलात्रयसंयुक्ता षडस्रा वज्रिका भवेत्। षोडशास्रा भवेत् पद्मा किञ्चिद्ध्रस्वा च मूलतः॥ तथैव धनुराकारा सार्द्धचन्द्रा प्रशस्यते। त्रिशूलसदृशा तद्वत् त्रिकोणानूर्द्धतो मता॥ प्रागुदक्प्रवणा तद्वत् प्रशस्ता लक्षणान्विता। परिवेषत्रिभागेन निर्गमस्तत्र कारयेत्॥ विस्तारस्तत्प्रमाणस्तु मध्ये चाग्रे तदूर्द्धतः। जलवापश्च कर्त्तव्यस्त्रिभागेन सुशोभनः॥ लिङ्गस्यार्द्धं त्रिभागेन स्थौल्येन समधिष्ठिता। मेखला तु त्रिभागेन खातं वै तत्प्रमाणतः॥ अथवा पादहीनन्तु शोभनं कारयेत् सदा। उत्तरस्थं प्रमाणन्तु प्रमाणादधिकं भवेत्॥ स्थण्डिलायामथारोग्यं धनधान्यञ्च पुष्कलम्। गोप्रदा तु भवेत् यक्षी वेदी सम्पत्प्रदा भवेत्॥ मण्डलायां भवेत् कीर्त्तिर्व्वरदा पूर्णचन्द्रिका। आयुःप्रदा भवेद्वज्री पद्मा सौभाग्यदायिनी॥ पुत्त्रप्रदार्द्धचन्द्रा स्यात् त्रिकोणा शत्रुनाशिनी। देवस्य यजनार्थन्तु पिण्डिका दश कीर्त्तिताः॥ शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीं तथा। दारुजे दारुजां कुर्य्यान्मिश्रे मिश्रान्तथैव च॥ नान्ययोनिस्तु कर्त्तव्या सदा शुभफलेप्सुभिः। अर्द्धायामसमं दैर्घ्यं लिङ्गायामसमं तथा। यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत्। एवमेतत् समाख्यातं समासात् पीठलक्षणम्॥"
इति मत्स्यपुराणे पीठिकानुकीर्त्तनं २६६ अः॥ (लिङ्गपीठम्। गौरीपट्टः। यथा, काशीखण्डे वायुसंहितायामुत्तरखण्डे। २८। ६।
"लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्येन शोधयेत्॥")

पिण्डितं, त्रि, (पिडि+क्तः।) गणितम्। घनम्। इति विश्वमेदिन्यौ॥ (संहतः। यथा, वायुपुराणे।
"अर्च्चिष्मान् पिण्डितशिखः सर्प्पिःकाञ्चनसन्निभः। स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्य-सिद्धये॥")
गुणितम्। इति हेमचन्द्रः॥ तुरुष्के, पुं। इति राजनिर्घण्टः॥

पिण्डिलः, पुं, (पिण्डवदाकृतिरस्त्यस्येति। पिण्ड+इलच्।) सेतुः। इति त्रिकाण्डशेषः॥ गणकः। इत्युणादिकोषः॥

पिण्डिला, स्त्री, (पिण्डिल+टाप्।) गोडुम्बा। इति शब्दचन्द्रिका॥

पिण्डी, [न्] त्रि, (पिण्डोऽस्त्यस्येति। इनिः।) शरीरी। यथा,—
"यथा सूर्य्यं विना भूमिर्यथा दीपविवर्ज्जितम्। लिङ्गहीनो यथा पिण्डी अयशीर्व्विना तथा॥"
इति जैमिनिभारते आश्वमेधिकपर्व्वणि १८ अध्याये॥

पिण्डी, स्त्री, (पिण्डाकारोऽस्त्यस्या इति। अच्। ततो ङीष्।) पिण्डीतगरः। अलावूः। खर्ज्जूर-विशेषः। इति मेदिनी। डे, २०॥ स्थानविहार-मार्य्यकौपन्यासः। इति धरणिः॥ (पिडि+इदितो वा ङीष्।) पिण्डिका। इत्यमर-टीकायां रायमुकुटः॥ पिण्डम्। यथा,—
"गीतायां तु गयायान्तु भक्तपिण्डी शताश्विनीम्। दद्यात् पुरोहितस्तत्र संस्कारं मानितमानकैः॥"
इति कालिकापुराणे ८६ अध्यायः॥

पिण्डीतकः, पुं, (पिण्डीं मल्लपिण्डं तनोतीति। तन+अन्येभ्योऽपीति डः। ततः संज्ञायां कन्।) मदनवृक्षः। इत्यमरः।२।४।५२। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"मदनः श्वसनो राठो गोलः पिण्डीतकः फलम्। छर्द्दनो विषपुष्पश्च करहाटश्च मरुवकः॥"
यथा च।
"पिण्डीतकस्य तु वराङ्गविभावितस्य
कल्केषु कन्दप्रकलेषु च औषधेषु।
तैलं शृतं गतिमपोहति शीघ्रमेतत्
कष्टेषु चामरवरायुधसाक्षयेषु॥"
इति सुश्रुते चिकित्सितस्थाने सप्तदशेऽध्याये॥) तगरः। पलिकुञ्चकः। इति विश्वः॥

पिण्डीतगरः, पुं, (पिण्ड्या पुष्पाधारवृन्देन उपलक्षितस्तगरः।) तगरविशेषः। तत्पर्य्यायः। कपवङ्गः २। इति त्रिकाण्डशेषः॥

पिण्डीतगरकः, पुं, (पिण्डीतगर+स्वार्थे संज्ञायां वा कन्।) तगरम्। इति राजनिर्घण्टः॥

पिण्डीतरुः, पुं, (पिण्ड्या उपलक्षितस्तरुः।) महापिण्डीतरुः। इति राजनिर्घण्टः॥

पिण्डीपुष्पः, पुं, (पिण्डीव पुष्पं पुष्पस्तवको यस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (अशोकशब्देऽस्य विशेषो ज्ञेयः॥)

पिण्डीरः, पुं, (पिण्डीमेव पिण्डाकारमेव ईर्षं फलानि ईरयतीति। ईर+णिच्+अच्।) दाडिमवृक्षः। इति त्रिकाण्डशेषः॥ डिण्डीरः। इत्यमरटीकायां रायमुकुटः॥ नीरसे, त्रि। इति शब्दावली। २६६॥

पिण्डीशूरः, पुं, (पिण्ड्यां पिण्डाकारे भोजने एव शूरः अतिनिपुणः नान्यत्र कार्य्यादाविति भावः।) छलितमात्रे वचनपरवैरी। तत्-पर्य्यायः। गेहेनर्द्दी २ गेहेशूरः ३। इति हेम-चन्द्रः।३।४२। (यथा, भट्टौ। ५। ८२।
"राक्षसान् वटुपर्द्धेषु पिण्डीशूरानिरस्यताम्। पदवीं ध्रुवमाक्रामि! नवैतावति कः क्षमः॥")

पिण्डोलिः, स्त्री, भुक्तपात्रोज्झितम् । इति हेमचन्द्रः । ३ । ८१ ॥

पिण्या, स्त्री, पण्यते स्तूयते रोगहन्तृत्वात् पण्या पण ड व्यवहृतौ स्तुतौ च + कृत्यल्युटः तथानीयया इति यः निपातनादत् इत् । पण्येति पठन्ति स्वामी । इति भरतः ॥ ज्योतिष्मती । इत्यमरः ॥ (ज्योतिष्मतीशब्देऽस्या विवृतिर्विज्ञेया ॥)

पिण्याकः, पुं, क्ली, (पिनष्टीति । पिष्लृ संचूर्णने + "पिनाकादयश्च ।" उणां । ४ । १५ । इति आकप्रत्ययेन निपातनात् साधुः ।) तिलकल्कः । (अस्य गुणाः यथा,—
"पिण्याको ग्लपनो रूक्षो विष्टम्भी दृष्टिदूषणः ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
यथा, महाभारते । १२ । १६० । ११ ।
"नवनीतं यथा दध्नस्तथा कामोऽर्थधर्मतः ।
श्रेयस्तैलं हि पिण्याकात् घृतं श्रेय उदश्वितः ॥")
अस्य भक्षणे दोषो यथा,—
"पिण्याकं भक्षयित्वा तु यो वै मामुपसर्पति ।
तस्य वै यत् शृणोषि ! प्रायश्चित्तं शुभेक्षणम् ॥
उलूको दशवर्षाणि काण्डपृष्ठ वसुन्धरे ।
जायते मानवस्तत्र मम कर्मपरायणः ॥"
इति वराहपुराणम् ॥
हिङ्गु । बाह्लीकम् । सिल्हकः । इति मेदिनी ॥
(शरलरसः । अस्य पर्यायो यथा,—
"तैलपर्णी दधित्थाख्यः पिण्याको रसशीर्षकः ।
पीतो रसाढ्यः श्रीवासः श्रीपिष्टसरलद्रवौ ॥"
इति वैद्यकरत्नमालायाम् ॥)

पितरौ, पुं, जननीजनकौ । माता च पिता चेति विग्रहे विकल्पादेकशेषे पितराविति प्राञ्चः । इति भरतः ॥ तत्पर्यायः । मातापितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४ । इत्यमरः । २ । ६ । ३७ ॥ (यथा, रघुः । १ । १ ।
"जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥")
तयोरभक्ता पालने दोषो यथा,—
"पितृमातृगुरूं चापि भक्तिहीनेन पालयेत् ।
पापा च ताडयेन्नित्यं स्वामिनं कुलटा च या ॥
या स्वतन्त्रीति विख्याता भाविनी भारते नरः ।
वह्निकुण्डं महाघोरं स च ना च प्रयाति च ॥
तत्र वह्नौ वसन्त्येव यावच्चन्द्रदिवाकरौ ।
ततो भवेज्जलौकाश्च जन्म यत्र ततः शुचिः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २८ अध्यायः ॥

पिता, [ऋ] पुं, पाति रक्षत्यपत्यं यः । (पा रक्षणे + "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणां । २ । ९६ । इति तृन्प्रत्ययेन निपातनात् साधुः ।) जन्मदाता । बाप् इति भाषा । तत्पर्यायः । तातः २ जनकः ३ । इत्यमरः । २ । ६ । २८ ॥ प्रसविता ४ वप्ता ५ जनयिता ६ गुरुः ७ जनकः ८ जन्यः ९ सविता १० । इति शब्दरत्नावली ॥ बीजी ११ वप्ता १२ । इति हेमचन्द्रः ॥ * ॥ तस्य माहात्म्यं सप्तविधत्वञ्च यथा,—
"तातः पूज्यश्च सर्वेभ्यः सर्वेषां जनको भवेत् ।
स्रष्टो यस्य प्रसादेन सर्वान् पश्यति मानवः ।
जनको अन्नदाता च रक्षकश्च पिता स्मृतः ।
तातो विस्तीर्णकरणात् कलया वा प्रजापतिः ॥"
इति ब्रह्मवैवर्ते गणपतिखण्डे ४४ अध्यायः ॥
स च गुरुः । यथा,—
"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥
बन्धुर्ज्येष्ठपितृव्यश्च पुंस्येते गुरवः स्मृताः ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
(ज्येष्ठपितृव्यार्थे पितृशब्दप्रयोगो यथा, महाभारते । ६ । ५३ । १ ।
"गरुडस्य स्वयं तुल्यं पिता देवव्रतस्तव ॥")
स हि महागुरुः । यथा, "महागुरुत्वात विष्णुः । त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति ।" इति शुद्धितत्त्वम् ॥
कामासक्तस्य पितुर्व्वचनमग्राह्यं यथा,—
"पितुर्व्वचो हि मा कार्षीः कामधायत्तचेतसः ।
आत्मानमभिषिञ्चस्व तदर्थं चरितो मयि ॥"
इत्याग्नेये श्रीरामं प्रति कौशल्यावाक्यम् ॥
तस्य पुत्रकृतधर्म्माधर्म्मभागित्वं यथा,—
"यः पिता स तु पुत्रोऽयमिति वै वैदिकी श्रुतिः ।
निगद्यते पुराविद् तु तां शृणुष्व यथातथम् ॥
न्यग्रोधस्य शुभाख्यायाः प्ररोहास्तु गता भुवि ।
प्ररोहाद्रुपमत्यन्तं शाखान्तु यतया गताः ॥
ताहृधाद्रुपपद्यन्ते तथान्ये ते च तादृशाः ।
शिष्यत्वे प्ररोहन्ति वीक्ष्योऽपि यथा तथा ॥
एवं पुत्रैः कृतो धर्मस्तथा धर्मश्च भूपते ।
पिता संलिप्यते तेन सा च तं संशयं त्यजाः ॥
न धर्मिष्ठो महाराज जीवन्मुक्तो भवेदिह ।
सर्वथा श्रूयते लोके जीवान् पुनः महत्कृपः ॥"
इत्याग्नेये वामनादवर्ण्णनाध्यायः ॥ * ॥
तस्मिन् जीवति श्राद्धादिनिषेधो यथा,—
"न श्राद्धाशनकं कुर्य्यात् यस्य जीवन् पिता स्थितः ।
तथा ज्येष्ठः सोदरश्च यस्य जीवति च तथा ॥"
इति वृहद्धर्म्मपुराणम् ॥ * ॥
उत्पादकब्रह्मदात्रपेक्षया ब्रह्मदातुर्गुरुत्वं यथा, तन्त्रसारे ।
"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम् ॥"
पञ्च पितरो यथा, चाणक्ये ।
"अन्नदाता भयत्राता यश्च कन्यां प्रयच्छति ।
जनिता चोपनेता च पञ्चैते पितरः स्मृताः ॥"
सप्त पितरो यथा,—
"कन्यादाताऽन्नदाता च ज्ञानदाताभयप्रदः ।
जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः स्मृताः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ६१ अध्यायः ॥
एकत्रिंशत्पितृगणा यथा,—
"विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ।
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ॥
कल्याणः कल्यदः कर्त्ता कल्पः कल्पतराश्रयः ।
कल्पताहेतुरनघः षडिमे ते गणाः स्मृताः ॥
वरो वरेण्यो वरदो भूतिदः पुष्टिदस्तथा ।
विश्वपाता तथा धाता सप्तैते च गणाः स्मृताः ॥
महान् महात्मा महितो महिमावान् महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः ।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत् ।
ते मेऽत्र तृप्तास्तुष्यन्तु दिशन्तु च सदा हितम् ॥"
इति गारुडे पितृस्तोत्रं ८९ अध्यायः ॥
(पितॄणां स्तुतिपूर्वकं नामसंख्यादिकथनम् यथा मार्कण्डेये । ९६ । ११—१८ ।

रुचिरुवाच ।

"नमस्येऽहं पितॄन् श्राद्धे ये वसन्त्यधिदेवताः ।
देवैरपि हि तर्प्यन्ते ये च श्राद्धे स्वधोत्तरैः ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैरपि ।
तन्मयत्वेन वाञ्छद्भिर्ऋद्धिमात्यन्तिकीं पराम् ॥
नमस्येऽहं पितॄन्मर्त्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्तिप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥
नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्धूतकिल्बिषैः ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकब्रह्मचारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान् ।
कव्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान् ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे शूद्रैरपि च भक्तितः ।
सन्तर्प्यन्ते जगत्यत्र नाम्ना ज्ञाताः सुकालिनः ॥
नमस्येऽहं पितॄन् श्राद्धे पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहारैस्त्यक्तदम्भमदैः सदा ॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्विधिवन्नागैः कामानभीप्सुभिः ॥
नमस्येऽहं पितॄन् श्राद्धैः सर्पैः सन्तर्पितान् सदा ।
तत्रैव विधिवन्मन्त्रभोगसम्पत्समन्वितैः ॥

पितॄन्नमस्ये निवसन्ति साक्षात्
ये देवलोकेऽथ महीतले वा ।
तथान्तरीक्षे च सुरारिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतम् ॥
पितॄन्नमस्ये परमार्थभूता
ये वै विमाने निवसन्ति मूर्त्ताः ।
यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥

तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
सुतान् पशून् स्वानि बलं गृहाणि ॥
सोमस्य ये रश्मिषु येऽर्कबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमितो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ॥
ये खड्गमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दिव्यमनोहरैश्च ।
कालेन शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्ट-
ान्यतीव तेषाममरार्च्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धाम्बुभोज्येषु मया कृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तृप्तिम् ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।
तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्णाशयन्त्वशिवं प्रजानाम् ।
आद्याः सुराधीशसुरेन्द्रपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे
दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्मृताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ॥
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ।
कल्याणः कल्यतां कर्त्ता कल्यः कल्यतराश्रयः ॥
कल्यताहेतुरनघः षडिमे ते गणाः स्मृताः ।
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा ॥
विश्वपाता तथा धाता सप्तैते च तथा गणाः ।
महान् महात्मा महितो महिमावान्महाबलः ॥
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ।
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः ॥
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ।
एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत् ॥
ते मेऽनुतृप्तास्तुष्यन्तु यच्छन्तु च सदा हितम् ॥"
शिवः । यथा, महाभारते ।१३ । १० । १४१ ।
"सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥")

पितामहः, पुं, (पितुः पितेति । "पितृव्यमातुल-
मातामहपितामहाः ।" ४ । २ । ३६ । इत्यत्र
"मातृपितृभ्यां पितरि डामहच् ।" इति वार्त्ति-
कोक्त्या डामहच् । मतान्तरे तु पितुः पिता जनक-
स्यापि जनकः । पितॄणां मरीच्यादीनां पितृ-
गणानां पिता वा ।) ब्रह्मा । (यथा, महा-
भारते । १ । १ । ३२ ।
"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥"
शिवः । यथा, महाभारते । १३ । १० । १४१ ।
"सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥")
पितृपिता । इत्यमरः । २ । ६ । ३३ ॥ ठाकुरदादा
इति भाषा ॥ अस्य पर्य्यायः । आर्य्यकः २ ।
इति शब्दमाला । (यथा, मनौ । ३ । २२१ ।
"पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः ।
पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम् ॥")

पितामही, स्त्री, (पितुर्मातेति । पितृव्यमातुलेत्यत्र
"मातृपितृभ्यां पितरि डामहच् ।" इति डाम-
हच् । ततः "मातरि षिच्चेति ।" वार्त्तिकोक्त्या ततः
षित्वात् ङीप् ।) पितामहपत्नी । इति जटा-
धरः ॥ ठाकुरमा इति भाषा ॥ (यथा, कौर्म्मे
उपविभागे १९ अध्याये ।
"मातामही मातुलानी तथा मातुश्च सोदरा ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियः ॥")
पौत्त्रैः पितामहधनविभागकरणे पितामह्यै
मातृवद्भागो देयः । यथा,—
"असुताश्च पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः ।
पितामह्यश्च सर्व्वास्ता मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागे व्यासः ॥

पितृकं, त्रि, (पितुः आगतमिति । पितुरागतं इति ।
पितृ+कन् । यद्वा, पैतृक+पृषोदरादित्वात्
साधुः ।) पितृसम्बन्धि । यथा,—
"सैव च पितृकयापि विभाज्य पितुरागतम् ॥"
इति शब्दमाला ॥

पितृकाननं, क्ली, (पितॄणां काननमिव ।) श्मशा-
नम् । इति जटाधरः ॥ (यथा, महानिर्व्वाण-
तन्त्रे । १० । ७८ ।
"पञ्चवर्षाधिकान् मर्त्त्यान् दाहयेत् पितृकानने ।
भर्त्ता सह कुलेशानि ! न दहेत् कुलकामिनीम् ॥")

पितृगृहं, क्ली, (पितॄणां गृहम् ।) श्मशानम् ।
इति हेमचन्द्रः ॥ (पितुर्गृहम् ।) पितृ-
वेश्म च ॥

पितृतर्पणं, क्ली, (तृप्यन्त्यनेनेति । तृप्+करणे
ल्युट् । पितॄणां तर्पणमिति । यद्वा, तृप्+भावे
ल्युट् । पितॄणां तर्पणं तृप्तिर्यस्मात् ।) पितृ-
तीर्थम् । तत्तु तर्ज्जन्यङ्गुष्ठयोर्मध्यम् । इति स्मृ-
तिचन्द्रिका ॥ तिलाः । इति हेमचन्द्रः ॥ तिलः ।
इति हारावलिः ॥ पितृतीर्थेन पितुरुद्देश
जलदानम् । तस्याङ्गत्वात् तर्पणशब्दे द्रष्टव्यम् ।
पितॄणां तृप्तिसाधनञ्च ॥

पितृतिथिः, स्त्री, (पितृप्रिया तिथिरिति मध्य-
लोपी समासः ।) अमावास्या । यथा,—
"अमावास्यादिनं योऽस्तु तस्यां कुशतिलोदकैः ।
सपित्रा मातृपैस्तृप्तिं परां गच्छन्त नान्यथा ॥"
इति वाराहे पितृसमुत्पत्तिवर्णनम् ॥

पितृतीर्थं, क्ली, (पितृप्रियं तीर्थम् ।) गया । इति
जटाधरः ॥ (गयादि-२२२ पितृवल्लभतीर्थानि
मत्स्यपुराणे श्राद्धकल्पे २२ अध्याये उक्तानि ।
यथा,—
"तीर्थानि कानि शस्तानि पितॄणां वल्लभानि च ।
नामतस्तानि वक्ष्यामि संक्षेपेण द्विजोत्तमाः ! ॥
पितृतीर्थं गया नाम सर्व्वतीर्थवरं शुभम् ।
यत्रास्ते देवदेवेशः स्वयमेव पितामहः ।
तत्रैषा पितृभिर्गीता गाथा भागमभीप्सुभिः ।
एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ।
तथा वाराणसी पुण्या पितॄणां वल्लभा सदा ।
तत्राविमुक्तसान्निध्यं भुक्तिमुक्तिफलप्रदम् ।
पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम् ।
पितृतीर्थं प्रयागन्तु सर्व्वकामफलप्रदम् ।
वटेश्वरस्तु भगवान् माधवेन समन्वितः ।
योगनिद्राशयस्तद्वत् सदा वसति केशवः ।
दशाश्वमेधिकं पुण्यं गङ्गाद्वारं तथैव च ।
नन्दाथ ललिता तद्वत्तीर्थं मायापुरी शुभा ।
तथा मित्रपदं नाम ततः केदारमुत्तमम् ।
गङ्गासागरमित्याहुः सर्व्वतीर्थमयं शुभम् ।
तीर्थं ब्रह्मसरस्तद्वच्छतद्रुसलिले ह्रदे ।
तीर्थन्तु नैमिषं नाम सर्व्वतीर्थफलप्रदम् ।
गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः ।
तथा यज्ञवराहस्तु देवदेवश्च शूलभृत् ।
यत्र तत्काञ्चनं द्वारमष्टादशभुजो हरः ।
नेमिस्तु हरिचक्रस्य शीर्णा यत्राभवत् पुरा ।
तदेतन्नैमिषारण्यं सर्व्वतीर्थनिषेवितम् ।
देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् ।
यः प्रयाति स पूतात्मा नारायणपदं व्रजेत् ।
कृतशौचं महापुण्यं सर्व्वपापनिषूदनम् ।
यत्रास्ते नारसिंहस्तु स्वयमेव जनार्दनः ।
तीर्थमिक्षुमती नाम पितॄणां वल्लभं सदा ।
सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा ।
कुरुक्षेत्रं महापुण्यं सर्व्वतीर्थसमन्वितम् ।
तथा च सरयूः पुण्या सर्व्वदेवनमस्कृता ।
इरावती नदी तद्वत् पितृतीर्थाधिवासिनी ।
यमुना देविका काली चन्द्रभागा दृषद्वती ।
नदी वेणुमती पुण्या परा वेत्रवती तथा ।

नित्यं पञ्चमी श्रेष्ठाः श्राद्धे कोटिगुणा मताः ।
जम्बूमार्गं महापुण्यं यत्र मार्गो हि लक्ष्यते ॥
अद्यापि पितृतीर्थं तत् सर्व्वकामफलप्रदम् ।
नीलकुण्डमिति ख्यातं पितृतीर्थं द्विजोत्तमाः ! ॥
तथा रुद्रसरः पुण्यं सरो मानसमेव च ।
मन्दाकिनी तथाच्छोदा विपाशाथ सरस्वती ॥
पूर्व्वमित्रपदं तद्वद्वैद्यनाथं महाफलम् ।
क्षिप्रा नदी महाकालस्तथा कालञ्जरं शुभम् ॥
वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महाफलम् ।
भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च ॥
गयापिण्डप्रदानेन समान्याहुर्महर्षयः ।
एतानि पितृतीर्थानि सर्व्वपापहराणि च ॥
स्मरणादपि लोकानां किमु श्राद्धकृतां नृणाम् ।
ओङ्कारं पितृतीर्थञ्च कावेरी कपिलोदकम् ॥
सम्भेदश्चण्डवेगायास्तथैवामरकण्टकम् ।
कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥
शुक्रतीर्थञ्च विख्यातं तीर्थं सोमेश्वरं परम् ।
सर्व्वव्याधिहरं पुण्यं शतकोटिफलाधिकम् ॥
श्राद्धे दाने तथा होमे स्वाध्याये जलसन्निधौ ।
कायावरोहणं नाम तथा चर्म्मण्वती नदी ॥
गोमती वरुणा तद्वत्तीर्थमौशनसं परम् ।
भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम् ॥
तीर्थं वैनायकं नाम भद्रेश्वरमतः परम् ।
तथा पापहरं नाम पुण्याथ तपती नदी ॥
मूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा ।
महाबोधिः पाटला च नागतीर्थमवन्तिका ॥
तथा वेणा नदी पुण्या महाशालं तथैव च ।
महारुद्रं महालिङ्गं दशार्णा च नदी शुभा ॥
शतरुद्रा शताह्वा च तथा विश्वपदं परम् ।
अङ्गारवाहिका तद्वन्नदौ तौ शोणघर्घरौ ॥
कालिका च नदी पुण्या वितस्ता च नदी तथा ।
एतानि पितृतीर्थानि शस्यन्ते स्नानदानयोः ॥
श्राद्धमेतेषु यद्दत्तमनन्तफलं स्मृतम् ।
द्रोणी वाटनदी धाराधरित् क्षीरनदी तथा ॥
गोकर्णं गजकर्णञ्च तथा च पुरुषोत्तमः ।
द्वारका कृष्णतीर्थञ्च तथार्बुदसरस्वती ॥
नदी मणिमती नाम तथा च गिरिकर्णिका ।
धूतपापं तथा तीर्थं समुद्रो दक्षिणस्तथा ॥
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
तीर्थं मेघकरं नाम स्वयमेव जनार्द्दनः ॥
यत्र शार्ङ्गधरो विष्णुर्मेखलायामवस्थितः ।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा ॥
तथा सामलनाथश्च महाशालनदी तथा ।
चक्रवाकं चर्म्मकोटं तथा जन्मेश्वरं महत् ॥
अर्ज्जुनं त्रिपुरं चैव सिद्धेश्वरमतः परम् ।
श्रीशैलं शाङ्करं तीर्थं नारसिंहमतःपरम् ॥
महेन्द्रञ्च तथा पुण्यमथ श्रीरङ्गसंज्ञितम् ।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम् ॥
दर्शनादपि चैतानि सद्यः पापहराणि वै ।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित् ॥
भीमेश्वरं कृष्णवेणा कावेरी कुड्मला नदी ।
नदी गोदावरी नाम त्रिसन्ध्या तीर्थमुत्तमम् ॥
तीर्थं त्रैयम्बकं नाम सर्व्वतीर्थनमस्कृतम् ।
यत्रास्ते भगवानीशः स्वयमेव त्रिलोचनः ॥
श्राद्धमेतेषु सर्व्वेषु कोटिकोटिगुणं भवेत् ।
स्मरणादपि पापानि नश्यन्ति शतधा द्विजाः ! ॥
श्रीपर्णी ताम्रपर्णी च जयातीर्थमनुत्तमम् ।
तथा मत्स्यनदी पुण्या शिवधारं तथैव च ॥
भद्रतीर्थञ्च विख्यातं पम्पातीर्थञ्च शाश्वतम् ।
पुण्यं रामेश्वरं तद्वदेलापुरमलं परम् ॥
अङ्गभूतञ्च विख्यातमामर्द्दकमलं शुभम् ।
आम्रातकेश्वरं तद्वदेकाम्रकमतः परम् ॥
गोवर्द्धनं हरिश्चन्द्रं कृपुचन्द्रं पृथूदकम् ।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी ॥
रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गमः ।
इन्द्रकीलं महानादस्तथा च प्रियमेलकम् ॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु ।
एतेषु सर्व्वदेवानां सान्निध्यं दृश्यते यतः ॥
दानमेतेषु सर्व्वेषु दत्तं कोटिशताधिकम् ।
बाहुदा च नदी पुण्या तथा सिद्धवनं शुभम् ॥
तीर्थं पाशुपतं नाम नदी पार्व्वतिका शुभा ।
श्राद्धमेतेषु सर्व्वेषु दत्तं कोटिशतोत्तरम् ॥
तथैव पितृतीर्थञ्च यत्र गोदावरी नदी ।
युतालिङ्गसहस्रेण सव्यान्तरजलावहा ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम् ।
प्रतीकस्य भयाद्भिन्नं यत्र गोदावरी नदी ॥
तत्तीर्थं हव्यकव्यानामप्सरोयुगसंज्ञितम् ।
श्राद्धाग्निकार्य्यदानेषु तथा कोटिशताधिकम् ॥
तथा सहस्रलिङ्गञ्च राघवेश्वरमुत्तमम् ।
इन्द्रफेना नदी पुण्या यत्रेन्द्रः पतितः पुरा ॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान् ।
तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत् ॥
तीर्थन्तु पुष्करं नाम शालग्रामं तथैव च ।
शोणपानञ्च विख्यातं यत्र वैश्वानरालयम् ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च ।
मलन्दरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥
वैदर्भा चाथ वेणा च पयोष्णी प्राङ्मुखा परा ।
कावेरी चोत्तरा पुण्या तथा जालन्धरो गिरिः ॥
एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
लोहदण्डं तथा तीर्थं चित्रकूटस्तथैव च ॥
विन्ध्ययोगश्च गङ्गायास्तथा नदीतटं शुभम् ।
कुब्जाम्रन्तु तथा तीर्थमुर्व्वशीपुलिनं तथा ॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम् ।
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥
अट्टहासं तथा तीर्थं गौतमेश्वरमेव च ।
तथा वसिष्ठं तीर्थन्तु हारीतन्तु ततः परम् ॥
ब्रह्मावर्त्तं कुशावर्त्तं हयतीर्थं तथैव च ।
पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च ॥
घण्टेश्वरं बिल्वकञ्च नीलपर्व्वतमेव च ।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥
अश्वतीर्थञ्च विख्यातमनन्तं श्राद्धदानयोः ।
तीर्थं वेदशिरो नाम तथैवौघवती नदी ॥
तीर्थं वसुपदं नाम छागलाण्डं तथैव च ।
एतेषु श्राद्धदातारः प्रयान्ति परमं पदम् ॥
तथा च बदरीतीर्थं गणतीर्थं तथैव च ।
जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च ॥
श्रीपतेश्च तथा तीर्थं तीर्थं रैवतकं तथा ।
तथैव शारदातीर्थं भद्रकालेश्वरं तथा ॥
वैकुण्ठतीर्थञ्च परं भीमेश्वरमथापि वा ।
एतेषु श्राद्धदातारः प्रयान्ति परमां गतिम् ॥
तीर्थं मातृगृहं नाम करवीरपुरं तथा ।
कुशेशयञ्च विख्यातं गौरीशिखरमेव च ॥
नकुलेशस्य तीर्थञ्च कर्द्दमालं तथैव च ।
दण्डिपुण्यकरं तद्वत् पुण्डरीकपुरं तथा ॥
सप्तगोदावरीतीर्थं सर्व्वतीर्थेश्वरेश्वरम् ।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभिः ॥
एष तूद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया ।
वागीशोऽपि न शक्नोति विस्तरात् किमु
मानुषः ॥
सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रहः ।
वर्णाश्रमाणां गेहेऽपि तीर्थन्तु समुदाहृतम् ॥
एतत्तीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थे श्राद्धं समाच-
रेत् ॥"०।)

तर्ज्जन्यङ्गुष्ठयोर्मध्यम् । इत्यमरः ॥
"अन्तराङ्गुष्ठदेशिन्योः पित्र्यं तीर्थमुत्तमम् ॥"
इति कौर्म्मे उपरिविभागे ११ अध्यायः ॥

पितृदानं, क्ली, (पितॄन् पितृभ्यो वा दानम् ।) पिण्डानु-द्देशेनाम्बुदानादिदानम् । पितृपदं गयोपलक्षितं तिल माषादेरपि प्रदानम् । तत्पर्य्यायः । निवापः २ । इत्यमरः । २।७।३१ ॥ पितृयज्ञः ३ पितृदानकम् ४ । इति शब्दरत्नावली ॥

पितृदानकं, क्ली, (पितृदान + स्वार्थे कन् ।) पितृउद्देशदानम् । इति शब्दरत्नावली ॥

पितृपक्षः, पुं, (पितृप्रियः पक्षः ।) भाद्राश्विन-कृष्णपक्षः । स तु प्रेतपक्षः । तत्र श्राद्धफलं यथा, हेमाद्रिमाधवीयधृतनागरखण्डम् ।
"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे ।
तस्य संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवम् ।
यथा चाथ नभस्ये वा नभस्याणौ यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ॥"
इति मलमासतत्त्वम् ॥

पितृपतिः, पुं, (पितॄणां पतिः ।) यमः । इत्य-मरः । १।१।६१ ॥ (यथा, मार्कण्डेये ८०।१७ ॥
"अयं ब्रह्मा हरिरयं [illegible]
दिनेशः पितृपतिरयमुदपतिः कुबेरः ।
सोमोऽग्नि[illegible]
[illegible] ॥")

पितृपिता, [ऋ] पुं, (पितुः पिता ।) पितामहः । इत्यमरः । २।६।३३ ॥

पितृप्रसूः, स्त्री, (पितॄन् [illegible] । [illegible]) सन्ध्या । इत्यमरः । १।४।३ ॥ (यथा, कथासरित्सागरे । १०२ ।
"[illegible] ।

रञ्जयति स्वयमिन्दुं कुणायकं द्रुष्टरूनीव ॥”
पितुः प्रसूर्जनयित्री ।) पितामही ॥

पितृप्रियः, पुं, (पितॄणां प्रियः ।) भृङ्गराजः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य भृङ्गराज-शब्दे ज्ञातव्याः ॥)

पितृबन्धुः, पुं, (पितुर्बन्धुः ।) पितामहभगिनी-पुत्रः । पितामहीभगिनीपुत्रः । पितुर्मातुल-पुत्रः । इत्युद्वाहतत्त्वम् ॥

पितृबान्धवः, पुं, (पितुर्बान्धवः ।) पितृबन्धुः । यथा, उद्वाहतत्त्वे ।
“पितुः पितुःस्वसुः पुत्राः पितुर्मातुःस्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥”

पितृभोजनः, पुं, (पितृभिर्भुज्यते इति । भुज + कर्म्मणि ल्युट् । पितृउद्देश्यकदानेऽस्य प्रशस्त-तमत्वात् तथात्वम् ।) माषः । इति राजनिर्घण्टः ॥ (भुज + भावे ल्युट् । पितॄणां भोजनमिति ।) पितॄणां भक्ष्यम्, क्ली ॥

पितृभ्राता, [ऋ] पुं, (पितुर्भ्राता ।) पितृव्यः । इत्यमरः । २ । ६ । ३१ ॥

पितृयज्ञः, पुं, (पितृभ्यः पितॄनुद्दिश्येत्यर्थः यो यज्ञः ।) तर्पणम् । यथा, मनुः । ३ । ७० ।
“अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥”

पितृलोकः, पुं, (पितॄणां लोकः ।) पितॄणां भुव-नम् । (यथा, महाभारते । १ । ४२ । १० ।
“कथञ्च बहुलाः सेनाः पाण्डवः छद्मसारथिः ।
अग्निकोऽभवत् धर्म्मः पितृलोकं धनञ्जयः ॥”)
अस्य विवरणं यथा,—

मार्कण्डेय उवाच ।
“सर्व्वेषामेव देवानामाद्यो नारायणो गुरुः ।
तस्मादुत्पन्नवान् ब्रह्मा सोऽपि सप्तात्मजानसृजत् ॥
स यजन्निति तेनोक्तास्तदा ते परमेष्ठिना ।
आत्मनात्मानमेवाग्रे अयजन्त इति श्रुतिः ॥
तेषां वै यज्ञजातानां यज्ञादिकाजिकर्म्मणाम् ।
अपयज्ञाभिचारेण यज्ञाभेव हतो यतः ।
प्रमदमानिनः सर्व्वे भविष्यथ न संशयः ॥
एवं प्रमाद्यतस्तेऽपि ब्रह्मशापभयद्रुताः ।
भद्रोर्ध्वकरान् पुत्रानुत्पाद्य त्रिदिवं ययुः ॥
गतेषु प्रयातेषु त्रिदिवे ब्रह्मवादिषु ।
तत्पुत्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥
ते च वैमानिकाः सर्व्वे ब्रह्मण्याः सप्त मानसाः ।
तत्पितृदानमन्त्रोक्तं प्रमाद्यन्तो व्यवस्थिताः ॥

गौरमुख उवाच ।
ये च ते पितरो ब्रह्मन् कस्य कालं समाप्यते ।
कियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः ॥

मार्कण्डेय उवाच ।
प्रवर्त्तन्ते वराः केचिद्देवानां सोमवर्द्धनाः ।
ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥
चत्वारो मूर्त्तिमन्तो वै त्रयस्तेषाममूर्त्तयः ।
तेषां लोकान् विसर्गञ्च कीर्त्तयिष्यामि तच्छृणु ॥
प्रभावञ्च महत्त्वञ्च विस्तरेण निबोध मे ।
धर्म्ममूर्त्तिधरास्तेषां त्रयो ये परमा गताः ॥
तेषां नामानि लोकांश्च कीर्त्तयिष्यामि तच्छृणु ।
लोकाः सनातनकामाख्या यत्र तिष्ठन्ति भास्वराः ।
अमूर्त्तयः पितृगणास्ते वै पुत्राः प्रजापतेः ॥
विराजस्य प्रजाः ख्यातास्ते वैराजा इति स्मृताः ।
देवानां पितरस्ते हि तान् यजन्तीह देवताः ॥
एते वै लोकविभ्रष्टा लोकान् प्राप्य सनातनान् ।
पुनर्युगसहस्रान्तेषु जायन्ते ब्रह्मवादिनः ॥
ते प्राप्य तां स्मृतिं भूयः सांख्ययोगमनुत्तमम् ।
चिन्त्य योगगतिं शुद्धां पुनरावृत्तिदुर्लभाः ॥
एतेऽस्मिन् पितरः श्राद्धे योगिनां योगवर्द्धनाः ।
आप्याययन्ति ते पूर्व्वं येऽपि योगबले रताः ॥
तस्मात् श्राद्धानि देयानि योगिनां योगसत्तमैः ।
एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥
एते त एकतनवो वर्त्तन्ते द्विजसत्तमाः ।
भूर्लोकवासिनो साध्या भुवर्लोकनिवासिनः ॥
स्वर्गलोका मरीच्याद्यास्तेषां साध्या महर्गताः ।
कश्यपानिकसंस्थानां तेषामपि जने स्थिताः ॥
सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः ।
तेषां सप्तगताः प्रोक्ता इत्येषा पितृसन्ततिः ॥
सप्तधा सप्तलोकेषु आदिमन्वन्तरक्रिया ।
अन्येषां वसवः साध्या रुद्रादित्याश्विनाविति ॥
अयतः सर्व्ववर्णानां साधारण्येन संस्थिताः ।
अस्ययथ सद्गुपमा इति सप्तविधा गणाः ॥
तेषां कन्यास्तु संजाता मह्यां पितृसन्ततिः ।
अग्निष्वात्ताश्च मारीचा वैराजा बर्हिसंज्ञिताः ॥
सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः ।
तेऽपि याज्याशिभिर्नॄणां शूद्रेण पृथक् कृतम् ॥
एवं यथाप्युपायः शूद्रः सर्व्वान् पितॄन् यजेत् ।
न तु तस्य पृथक् सन्ति पितरः शूद्रजातयः ॥
सुकालेनसका भवन्ति ! न हव्यन्ते पितृष्वपि ।
विविधाख्यानाख्यातः सु पुराणानाञ्च दर्शनात् ॥
एवं ऋषिस्तुतैः श्राद्धैस्तैः याज्ञवल्क्यादिभ्यः ।
स्वयं दृष्टा स्मृतिर्मेऽभूत् पुराणां ब्रह्मणा सह ॥
परं निर्व्वाणमापन्नास्तेऽपि ध्यानेन एव च ।
वैश्यादीनां कव्यपाद्याः वर्णानां यथादयः ॥
कार्य्ययेव विविधा सम्बन्धाद्या अपि ध्रुवम् ।
एष ते पैतृकः सर्गः उद्देशेन महामुने ॥
कथितो नाम्ना यथास्य सर्व्वलोके हि द्वारतः ॥”
इति वाराहे श्राद्धकल्पः ॥ * ॥

अपि च ।
“पितॄणां सम्भवं राजन् ! कथ्यमानं निबोध मे ।
पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥
एकाग्रमानसः सर्व्वाः सृष्टाः सप्त समोषितः ।
कृत्वा परमकं ब्रह्म ध्यायन् सर्व्वेषु द्वयम् ॥
तस्याग्रतो महा योगं समस्तं परमेष्ठिनः ।
तस्माच्च निर्गताः सर्व्वे तादृशा धूमवर्णककालिनः ॥
पितामह इति भाषन्तः सुरा सोमसिनीऽभवन् ।
ऊर्द्ध्वं निर्ममिरन्तो वै अधःसंस्थानायिनः ॥
तान् दृष्ट्वा सहसा ब्रह्मा तिर्य्यक्ऊर्द्ध्वस्थानारी-भूतान् ।
भवन्तः पितरः सन्तु सर्व्वेषां यज्वमेधिनाम् ।
ऊर्द्ध्वकास्तु ये तत्र ते नान्दीमुखसंस्थिताः ॥
इत्युक्ता तु तदा ब्रह्मा तेषां मध्यागमाकरोत् ।
दक्षिणायनसंशास्तु पितृमान्तु पितामहः ॥
गृह्णीष्व समस्तं भूतानि सम्यक् पितरकालः ।
वृत्तिं नो देहि भगवन् यथा विन्दामहे सुखम् ॥

ब्रह्मोवाच ।
अमावास्यादिनं योऽस्तु नष्टाः कुर्व्वन्तिसोदकैः ।
तर्पिता यान्त्वपेक्षाः परां भक्त्या मन्यथा ॥
तिला देयाश्च तैस्तस्मात् पोष्य पितृभक्तितः ।
परमं तस्य सन्तुष्टाः परं यच्छत मा चिरम् ॥”
इति वाराहे पितृसर्गोत्पत्तिवर्णनम् ॥ * ॥

पितृश्राद्धविधौ देवताविशेषाः पितृगणाश्च यथा,
“क्रतुदेवो वसुः सत्यः कामः कालस्तथा धृतिः ।
रोचकश्चार्द्रवाश्चैव तथा चान्यः पुरूरवाः ॥
विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिताः ।
विश्वदेवौ क्रतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ॥
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके ।
नवान्नलम्भने देवौ कामकालौ सदैव हि ।
अपि कन्यागते सूर्य्ये श्राद्धे च धूरिलोचकौ ।
पुरूरवार्द्रवाश्च विश्वदेवौ च पर्व्वणि ॥
सुभास्वरा बर्हिषदो अग्निष्वात्तास्तथैव च ।
आज्यपाश्चोपहूताश्च क्रव्यादाश्च सुकालिनः ।
एते पितृगणाः सप्त पौराणाः कीर्त्तिता हि ।”
इत्यग्निपुराणम् ॥ * ॥

अग्निष्वात्तादीनामुत्पत्तिर्यथा,—
“ततो निरीक्ष्येन्द्रियकं विकारं चतुराननः ।
निरस्तुरपि सन्ध्यां तां सन्ध्यां कामकर्षिणीम् ॥
तच्छरीरात्तु घर्म्माम्भो यत् पपात द्विजोत्तमाः ।
अग्निष्वात्ता बर्हिषदो जाताः पितृगणास्ततः ॥
भिन्नाञ्जननिभाः सर्व्वे फुल्लराजीवलोचनाः ।
नियतात्मसंयताः पुण्याः संसारविमुखाः परे ॥
सहस्राणां चतुःषष्टिरग्निष्वात्ताः प्रकीर्त्तिताः ।
षडशीतिसहस्राणि तथा बर्हिषदो द्विजाः ॥”
इति कालिकापुराणे २ अध्यायः ॥ * ॥

तेषां तर्पणविधिर्यथा,—
“अपसव्यं ततः कृत्वा सव्यं जानु च भूतले ।
अग्निष्वात्तास्तथा सौम्यान् हविष्मतस्तथोष्मपान् ॥
सुकालिनो बर्हिषदस्तथा चैवाज्यपान् पुनः ।
तर्पयेत्तु पितॄन् भक्त्या सतिलोदकचन्दनैः ॥
दर्भपाणिस्तु विधिवत् प्रेतान् स्मृत्वार्पयेत्ततः ।
पित्रादीन्नामगोत्रेण तथा मातामहानपि ॥
सन्तर्प्य विधिवद्भक्त्या इमं मन्त्रमुदीरयेत् ।
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिलां यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥”
इति मात्स्ये स्नानविधौ ८२ अध्यायः ॥

पितृवनं, क्ली, (पितॄणां वनमिव ।) श्मशानम् । इत्यमरः । ५ । ८ । ११८ ॥ (यथा, महाभारते । ११ । ७ । १४ ।
“सर्व्वे पितृवनं प्राप्य स्वपन्ति विगतज्वराः ।
निर्म्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥”)

पितृवनेचरः, पुं, (पितृवने श्मशाने चरतीति । चर + “चरेः ।” ३ । २ । १६ । इति टः । अलुक्समासः ।) शिवः । इति केचित् ॥

पितृवसतिः, स्त्री, (पितॄणां वसतिर्यत्र ।) श्मशान-स्थानम् । श्मशानम् । इत्यमरटीकायां रमानाथः ॥

पितृव्यः, पुं, (पितुर्भ्राता । “पितृव्यमातुलमाता-महपितामहाः ।” ४ । २ । ३६ । इत्यत्र “पितुर्भ्रातरि व्यत् ।” इति वार्त्तिकोक्त्या व्यत्-प्रत्ययः ।) पितृभ्राता । इत्यमरः । २ । ६ । ३१ ॥ अपि च ।
“पितृव्यो जनकभ्राता ज्येष्ठभ्रातोऽग्रजो यदि ।
पितुः कनिष्ठभ्राता तु खुल्लतातोऽभिधीयते ॥”
इति शब्दरत्नावली ॥

पितृष्वसा, [ऋ] स्त्री, (पितुः स्वसा भगिनी । “मातृपितृभ्यां स्वसा ।” ८ । ३ । ८४ । इति षत्वम् ।) पितुर्भगिनी । पिसी इति भाषा । यथा,
“मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥”
इति दायभागः ॥

पितृष्वसीयः, त्रि, पितृष्वसुरपत्यम् । (पितृष्वसृ + छः ।) पितृभागिनेयः । इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १११ । २ ।
“पितृष्वस्रीयाय सुतामनपत्याय भारत ! ।
अग्रजमथ प्रतिज्ञाय स्वस्यापत्यं स सत्यवाक् ॥”)

पितृसन्निभः, पुं, (सम्यङ्निभातीति सन्निभस्तुल्यः । पितुः सन्निभः ।) पितृतुल्यः । तत्पर्य्यायः । मनोजवः २ मनोजवसः ३ । इत्यमरभरतौ ॥

पितृसूः, स्त्री, (सूते इति सूः जननी । पितॄणां सूर्जननीव । पितृकृत्ये सन्ध्यायामित्यादिलिपिर्योग्यत्वात् जननीवत् पालकत्वेनैव तथात्वम् ।) सन्ध्या । इति शब्दमाला । (पितरं सूते इति । क्विप् । पितामही । इति मुग्धबोधटीकार्थः ।)

पितृहूः, पुं, (पितॄनाह्वयत्यनेनेति । पितृ + ह्वे + करणे क्विप् ।) दक्षिणकर्णः । यथा, श्रीभाग-वते । ४ । २५ । ५० ।
“पितृहूर्नृपपुर्य्या द्वारि दक्षिणेन पुरञ्जनः ॥”
“दक्षिणं च प्रथमं श्रोत्रं कर्म्मकाण्डं इत्येत-दना सामान्येन प्रवृत्तं प्रकृत्य कर्म्मकाण्डस्य दक्षिणकर्णेन श्रवणमित्यर्थः । ततस्तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्राप्तये पितृयाणं प्रप-द्यते । तदेव प्रकारेण पितृयाणाकारमनेन भवति पितृहूर्दक्षिणः कर्णः । एवं सदेवरीत्येव धनदेकर्णो देवहूः । तथा च व्याख्यास्यति ।
पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृतः ।
प्रवृत्तञ्च निवृत्तञ्च शास्त्रं पञ्चालसंज्ञितम् ॥”
इति तट्टीकायां श्रीधरस्वामी ॥

पित्तं, क्ली, (अपिदीयते खण्ड्यते अनया इत्यते विषमावस्थया मारुतेन वा शरीरं येनेति । अपि + दो अवखण्डने, दो ञ कर्म्मणि वा + क्तः । “अच उपसर्गात्तः ।” ७ । ४ । ४७ । इति तादेशः । अपेरकारलोपः ।) शरीरस्थधातुविशेषः । तत्-पर्य्यायः । मायुः २ । इत्यमरः । २ । ६ । ६२ । पलज्वलः ३ । इति शब्दरत्नावली । तेजः ४ मिलायुः ५ वह्निः ६ अग्निः ७ अनलः ८ ।
(यथा, महाभारते । ६ । ८६ । ४१ ।
“अभिमन्योस्ततस्तेस्तु घोरं युद्धमवर्त्तत ।
शरीरस्य यथा राजन् ! वातपित्तकफैस्त्रिभिः ॥”)
अस्य गुणाः ।
“पित्तञ्च तिक्ताम्लरसञ्च सारकं
उष्णं द्रवं तीक्ष्णमिदं मधौ च तु ।
वर्षान्तकाले भ्रममर्द्धरात्रे
मध्यन्दिने तप्तदिने च कुप्यति ॥”
इति राजनिर्घण्टः ॥ * ॥

अपि च ।
“सर्व्वं पित्तमपस्मारकुष्ठदुष्टव्रणापहम् ।
चक्षुष्यं कटुतीक्ष्णोष्णमुन्मादक्रिमिनाशनम् ॥”
इति राजवल्लभः ॥ * ॥

पित्तस्य स्वरूपमाह ।
“पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम् ।
सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः ॥”
पीतं निरामम् । नीलं सामम् । एकं पित्तं पाचकभ्राजकरञ्जकालोचकसाधककर्म्मभेदैः पञ्चविधम् ॥ * ॥

तेषां पित्तानां नामान्याह ।
“पाचकं रञ्जकञ्चापि साधकालोचके तथा ।
भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः ॥” * ॥

अथ पाचकादीनां स्थानान्याह ।
“अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात् ॥” * ॥

अथ तेषां कर्म्माण्याह ।
“पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥”
पाचकं पित्तमामपक्वाशयमध्यस्थं षड्विधमा-हारं भोज्यं भक्ष्यं चर्व्व्यं लेह्यं चूष्यं पेयं पचति दोषरसमूत्रपुरीषाणि पृथक् करोति च । तद्-गताश्रयस्थमेवात्मशक्त्या रसरक्तनखदन्तमलप-तनोद्गमादिकर्म्मप्रभावशक्त्यानुग्रह-शेषादिपाचकाग्निकर्म्मणा शेषाणां पित्तानां नामग्रहणं करोति । शेषाण्यपि पित्तस्थानानि यकृत्प्लीहादीनि भागेन तत्र तत्र रञ्जक-नादिकर्म्मभिरुपकरोतीत्यर्थः । अतएव पाचक पित्तं शेषाग्निबलवर्द्धनं शेषाः अग्नयः दधि-धात्वादिसहाभूतगताः सप्तधातुगताश्च । तत्र उक्तं चरकेण ।
“भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ॥”
इति ।

उष्मायोऽपचः । तत्र उक्तं वाग्भटे ।
“दोषधातुमलादीनामूष्मेत्यात्रेयशासनम् ॥” इति दोषधातुमलादीनामूष्मेत्यादिरर्थः । रसादि-धातुगताश्च तत्र तेषां बलवर्द्धनम् । यथा दधि क्षारादीनि रसादि तद्दोषसदृशभावस्येव तान्यपि दोषन्दोषित्वा दुष्टशक्तानि भवन्ति । तथा पाचकपित्तबलवर्द्धनस्य धातुबलवर्द्धनं बलवन्तो भवन्ति । तथा च वाग्भटः ।
“अन्नस्य पक्ता सर्व्वेषां पक्तॄणामधिपो मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥”
इति ।

ननु पित्ताग्न्योर्भेदो नास्ति पित्तमेवाग्निरिति सन्देहः । उच्यते पित्तस्याग्न्यादिगुणकारकत्वादाहार-पाचनरञ्जनदर्शनादिकर्म्मकरत्वाच्च न खलु पित्त-व्यतिरेकेणाग्न्योऽग्निः । तस्मादग्निरूपस्यैव पित्तस्य स्थानभेदात् पाचकरञ्जकसाधकालोचकभ्राजक-संज्ञाः । तथा च वाग्भटे ।
“पाचकं तिलमात्रं स्यात् कादिम्बादाष्य दोषना ।
पक्वपक्वाशयमध्यस्थं पित्तं पाकोदराग्निभिः ॥
सूक्ष्मक्षिप्रभावैर्वाधारोऽग्नितुष्टावुदीर्णैः ।
पित्तं पचात्मकं तत्र पक्वामाशयमध्यगम् ॥
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ।
त्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम् ॥
पचत्यन्नं विभजते सारकिट्टौ पृथक् तदा ।
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ॥
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥”
ननु यदि पित्ताग्न्योरभेदस्तदा कथं घृतं पित्तघ्नमग्निदीपनमिति । तथा मनुष्याः पित्तं कुर्व्वन्ति न च तेऽग्निदीप्तिकरा इति । तथा पित्ताधिक्यादौष्ण्योऽग्निरिति कथं स्यात् । तथा समदोषः समाग्निरिदमपि कथं न युज्यते । तथा द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्य-थेति । उच्यते । पित्तमग्निः सन्ताधिष्ठानम् । तथा चोक्तं तन्त्रान्तरे ।
“अग्निभिर्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा ।
द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा ॥
तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स पक्तिमान् ।
स पचत्यन्नं कुक्षिस्थः धर्म्मो दधनि इवोत्तमः ॥
स कायाग्निः स कायोष्मा स पक्ता स च जीवनम् ।
अत्यन्तसन्निकृष्टत्वं देहे कायाग्निरुच्यते ॥”
अन्यच्च ।
“नाभिपार्श्वोर्द्धं नाभिः किञ्चित् धीमान् मत-मम् ।
तन्मध्ये सततं सौम्यं तत्काष्ठेऽग्निर्व्यवस्थितः ॥
जठराग्निमाख्यातः सर्व्वभक्ष्यो विपर्य्ययः ॥”
तथा च सुश्रुते । “इन्द्रियज्ञादाहारश्च पित्तस्य तेजोभागोऽग्निरिति । तेन पित्तमव-लिखत उच्यते । अग्निनापित्ताधिकोऽस्मरः ।”
सत्त्वादौष्ण्यं नाभिः पित्तोद्रेक इत्येके सिद्धान्तः । अन्यच्च रसरत्ने ।
“जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः ।
सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥
नाभौ सत्त्वे शरीरस्य स्थितोऽग्निर्जीवनाशनम् ।
जीवनाश्रयकारणं तिष्ठत् सर्व्वत्र सञ्चरन् ॥
शरीरस्य पूर्णं जिह्वे सर्व्वं पुरातनम् ।
सम्यक् दिवि यथा चित्रं भित्तिकोपरि सर्व्वतः ॥
निर्देशयन् सर्व्वाणि पश्यन्ति शक्तिं च ।
तद्वदत्रीयं मुखं सर्व्वो नाभिमार्गेण ॥
सर्व्वो, यथा दिवं नानाकूर्म्मविशेषम् ।
कर्म्मादिषु सर्व्वेषु सत्त्वमार्गमानम् ।
कृष्णादिषु सर्व्वेषु निखिलाङ्गमानम् ।
कर्म्मयोगोपदिष्टः नाभ्यांमध्येऽग्निरुच्यते ॥” इति ।
पुनः कथमाशुश्रुतिः ।

"रञ्जकं नाम यत् पित्तं तद्रसं शोणितं नयेत् ।
यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम् ॥"
पुंसि त्रिधाम् ।
"पचनोष्मकमंशं तद्द्रव्यपचनकारकम् ।
भ्राजकं कान्तिकारि स्यात्तैलाभ्यङ्गादिपाचकम् ॥
पित्तप्रकृतिको यथा,—
"पित्तप्रकृतिको यादृक् तादृशोऽपि निगद्यते ।
अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ।
बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति ।
ताम्रकेशः शूरो मानी बहुवीर्य्यो महाबलः ॥
पित्तं वह्निर्वह्निजं वा तदस्मात्
पित्तोद्रिक्तस्तीव्रतृष्णो बुभुक्षुः ।
गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः
शूरो मानी पिङ्गकेशोऽल्परोमा ॥"
पित्तप्रकृतिकस्वप्ना यथा,—
"शाल्मलीकिंशुकारग्वधांश्च पैत्तिकाः ॥"
पित्तशोधनमर्हमाह ।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजन-ज्योत्स्नाभूगृहयन्त्रवारिजलदस्त्रीगात्रसंस्पर्शनम् ।
सर्पिःक्षीरविरेकशोणितस्रावप्रदेहादिकं पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत् ॥"
अथ पित्तप्रकोपकारणानि ।
"कट्वम्लविदाहितीक्ष्णलवणक्रोधोपवासातप-स्त्रीसम्भोगतृषाक्षुधाभिहननव्यायाममद्यादिभिः ।
भुक्ते जीर्य्यति भोजने च शरदि ग्रीष्मे तथा प्राणिनां मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत् ॥"
इति भावप्रकाशे पूर्व्वखण्डे २ भागे ॥
(यथा च ।
"अत्युष्णक्षारकटुम्लद्रव्यैः
तीक्ष्णैः सुराभिस्तैलादिधर्म्मैः ।
क्रोधादपि शोके च सदा च
अभोजने याति कोपञ्च पित्तम् ॥
कुलत्थाद्यैर्भोजनैर्भृशं हि
निदाघग्रीष्मशरदादिकाले ।
निशार्द्धकाले भोजने च मध्ये वा
मध्याह्ने दहनस्य प्रकोपः प्रदिष्टः ।
अर्द्धं वासरे मध्यगेऽर्के विशेषे
रात्रावर्द्धमध्ये प्रकोपः प्रदिष्टः ॥"
इति हारीते प्रथमस्थाने पञ्चमेऽध्याये ॥)
न तु अत्यन्तमम्लाद्यैर्व्वक्त ।
"अम्लादिभिश्च बलको अम्लाद्यैर्व्वक्ताश्रयः ।
शिलापिष्टमरीचाद्य पालिनी दुःसहाशयाः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥ ० ॥
(यथा च ।
"पित्तं पञ्चात्मकं तच्च पक्वामाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥
त्यक्तद्रवं पाकादिकर्म्मणानलशब्दितम् ।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।
बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥
साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम् ।
दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचः ॥"
इति वाभटे सूत्रस्थाने द्वादशेऽध्याये ॥
"पित्तविकाराश्चत्वारिंशदत ऊर्द्ध्वं व्याख्यास्यन्ते । तद्यथा, ओषश्च प्लोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च विदाहश्चान्तर्दाहश्चांसदाहश्चोष्माधिक्यञ्चातिस्वेदश्चाङ्गगन्धश्चाङ्गावदरणञ्च शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च मांसदाहश्च त्वङ्मांसदरणञ्च रक्तकोठाश्च रक्तविस्फोटाश्च रक्तपित्तञ्च रक्तमण्डलानि च हरितत्वञ्च हारिद्रत्वञ्च नीलिका च कक्षा च कामला च तिक्तास्यता च पूतिमुखता च तृष्णाधिक्यञ्चातृप्तिश्चास्यपाकश्च गलपाकश्चाक्षिपाकश्च गुदपाकश्च मेढ्रपाकश्च जीवादानञ्च तमःप्रवेशश्च हरितहारिद्रमूत्रनेत्रवर्च्चस्त्वञ्चेति चत्वारिंशत् पित्तविकाराः । पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति । सर्व्वेष्वपि खल्वेतेषु पित्तविकारेष्वन्येषु चानुक्तेषु पित्तस्येदमात्मरूपमपरिणामि कर्म्मणश्च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्तसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः । तद्यथा,—
औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्लारुणवर्ज्जो गन्धश्च विस्रो रसौ च कटुकाम्लौ सरत्वञ्च पित्तस्यात्मरूपाणि । एवंविधत्वाच्च कर्म्मणः स्वलक्षणमिदमस्य भवति । तं तं शरीरावयवमाविशतो दाहौष्ण्यपाकस्वेदक्लेदकोथस्रावरागाः यथास्वञ्च गन्धवर्णरसाभिनिर्व्वर्त्तनं पित्तस्य कर्म्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत् । तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत । स्नेह विरेकप्रदेहपरिषेकाभ्यङ्गावगाहादिभिः पित्तहरैर्मात्रां कालञ्च प्रमाणीकृत्य विरेचनन्तु सर्व्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः । तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलमपकर्षति । तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते । यथाग्नौ व्यपोढे केवलमग्निगृहं शीतं भवति तद्वत् ॥" इति चरके सूत्रस्थाने विंशेऽध्याये ॥ ० ॥
"पित्तमुष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकञ्च । तस्योष्ण्यात् पित्तला भवन्त्यसहिष्णवः सुकुमारावदातगात्राः प्रभूतपिप्लुव्यङ्गतिलकपिडकाः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायो मृद्वल्पकपिलश्मश्रुलोमकेशाः । तैक्ष्ण्यात्तीक्ष्णपराक्रमाः तीक्ष्णाग्नयः प्रभूताशनपानाः क्लेशासहिष्णवो दन्दशूकाः द्रवत्वात् शिथिलमृदुसन्धिमांसाः प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च विस्रत्वात् प्रभूतपूतिकक्षास्यशिरःशरीरगन्धाः । कट्वम्लत्वादल्पशुक्रव्यवायापत्याः । त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
पित्तघ्नी, स्त्री, (पित्तं हन्तीति । हन + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् । ततो ङीप् ।) गुडूची । इति शब्दचन्द्रिका ॥ (पित्तनाशके, त्रि । यथा, भावप्रकाशे । १ । १ ।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ॥")
पित्तज्वरः, पुं, (पित्तनिमित्तको ज्वरः ।) पैत्तिकज्वरः । यथा,—
"विशेषतः कोमलमारिकेलं
निहन्ति पित्तज्वरमश्वरोगान् ॥"
इति राजनिर्घण्टः ॥
अस्य लक्षणं ज्वरशब्दे द्रष्टव्यम् ॥ ० ॥
अथ पित्तज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्मात्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरमात्रस्य यदारोग्यदर्शनं लङ्घनाभिधानं पित्तज्वरेऽपि तद्विधाने विशेषमाह सुश्रुतः । पैत्तिके मद्यजे च ज्वरे गृह्णीत भेषजमिति । पयःपानेन तृष्णाशान्तिर्भवति तदर्थे । किञ्चिदूर्द्ध्वं तदाह ।
"तिक्तासुलायवैः पाठाशुद्धिप्रलाभ्यां सतोरणम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिक्वाथः ॥
"पर्प्पटो वासकस्तिक्ता कैराती धन्वयासकः ।
प्रियङ्गुश्च कृतः क्वाथ एषां शर्करया युतः ॥
पिपासादाहपित्ताढ्यं पित्तज्वरं हरेत् ॥"
इति पर्प्पटादिक्वाथः ॥
"द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्प्पटश्च कृतः क्वाथः एष पित्तज्वरापहः ॥
मुखशोषप्रलापार्त्तिदाहमूर्च्छाभ्रमान्वितम् ।
पिपासारक्तपित्ताढ्यं प्रशमो भिषजां मतः ॥"
इति द्राक्षादिक्वाथः ॥
"पटोलमथ धन्याकं मधुकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णाच्चातिप्रमादितोऽपि ॥"
इति पटोलादिक्वाथः ॥
"गुडूच्यामलकैर्युक्तः केवलो वापि पर्प्पटः ।
पित्तज्वरं हरत्याशु दाहशोषभ्रमान्वितम् ॥"
इति गुडूच्यादिक्वाथः ॥
"एकः पर्प्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ॥
हीबेरचन्दनोशीरपर्प्पटधान्यकम् ।
दद्यात् सुशीतलं वारि तृड्दाहज्वरशान्तये ॥"
इति ह्रीबेरादिक्वाथः ॥
"भूनिम्बामृतनिम्बाम्बुशुण्ठीचन्दनवालकाः ।
बालकं धान्यकं पित्तं यवासो वासकादिभिः ।
त्रिवृद्भिश्चापि काथो वा सन्निपातज्वरं हरेत् ॥"
इति भूनिम्बादिक्वाथः ॥

"द्राक्षाचन्दनपद्मानि मुस्ता तिक्ताऽमृताभि च ।
धात्री वालमुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
मधूकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधुकं कुमुदं वापि किरातो धान्यकं तथा ॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्द्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः ॥"

इति द्राक्षादिक्वाथः ॥

"सशिनो निशि पर्य्युषितः प्रातर्धन्याकतण्डुलक्वाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"

इति धन्याकक्वाथः ॥

"अमृताया हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा क्वाथो रक्तपित्तज्वरान् जयेत् ॥"

इति अमृतावासाक्वाथौ ॥

"गुडूची भूमिनिम्बश्च वालं वीरणमूलकम् ।
मधुमुस्तं विशालाभी द्राक्षा वासा च पर्पटः ॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम् ।
शोषदाहमपि प्रातर्निपीतो मधुना सह ॥"

इति गुडूच्यादिक्वाथः ॥

"पलाशस्य वरयां वा निम्बस्य मृदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥
मध्यां तैलघृतप्रोद्दैर्लिप्तम् दाहज्वरापहा ।
कासारकृपित्तशोषघ्नं नाशयेत् हन्ति वलीमपि ॥"
तैलघृतप्रोद्दैरित्यत्र न प्रयुक्तः तेन केवलेन प्रोद्दैरपि लिम्पात् ।
"काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ शीतकृशमिश्रशीतलीकृतवारिणा ॥
धात्रीमलककल्केन कवलोऽत्र हितो मतः ।
पक्वाद्रिमवीजैर्वा धन्याकल्केन च क्वचित् ॥"

इति कवलः ॥ धन्याकं धाम्याकम् ॥ * ॥

अथाप्रमाथ ।

"दाडिमस्वरितं पानं विरसं सर्व्वाश्रितम् ।
सर्व्वरामधुसंयुक्तं पाययेद्वातपर्व्वकम् ॥"
आम्रपर्व्वं आम्रमत्स्यण्डपर्व्वकम् । तथापर्व्व-
मत्स्यण्डपर्व्वं आमान्दकरपित्तिज्वरायाम् ।
"शुष्कपूरीषस्ते देयः स्निग्धा पैत्तिके ज्वरे ।
वर्त्ते गुडाभयाद्यादि प्रकाहकरयोनिमे ।
मनदोषकर्षितौ स्युराज् पित्तज्वरौ नरः ॥
शर्करासमोपदृष्टशोभलाभा
मुखसमृद्धामरभूमिकानाम् ।
निर्ममिषीवा सुपयोधरामा-
मालिङ्गनाद् हरन्ति दाहम् ॥
अतःश्रद्धयाल्ल विहाय तत्त्व क्वी सपेदुष्टः ।
विरच भोवकेरस्तं च विरं हरन्तं महत् ॥
यतः शकपक्वादिको शकुलकदरा भुसरः ।
चाईककर्पिणाद्भिः दाहरैवकरर भतरः ॥

इति पित्तज्वराधिकारः ।" इति भावप्रकाशे मध्यखण्डे प्रथमभागः ॥ * ॥

पित्तश्लेष्मज्वरनाशकौषधं यथा,—
"गुडूचीपद्मकारिष्टधान्याकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥"

इति गारुडे १८८ अध्यायः ॥

(अस्य पथ्यापथ्यचिकित्सितान्यपराणि यथा,—
"मूर्च्छा दाहो भ्रममदकम्पावेगतीव्रोऽतिसार-
स्तन्द्रालस्यं प्रलपनवमिः पाकतास्योष्ठकण्ठे ।
स्वेदः श्वासो भवति कटुकं विकलत्वं तृषा वा
एतैर्लिङ्गैर्भवति मनुजे पैत्तिको वै ज्वरस्तु ॥
दोषोत्पलाम्बुलतिका कमलं सिताढ्यं
तत्पारिवापश्चिमसेव हि पाचनेषु ।
निःक्वाथ्य पानमति चाशु निहन्ति पित्तं
पित्तज्वरप्रशमनं प्रकरोति पुंसाम् ॥
क्वथितं तण्डुलपयसा शक्राह्वकटुरोहिणीसहितम् ।
क्वाथं यष्टीमधुना निनाशनं पित्तज्वरामयानाम् ।
दुरालभावासकपर्पटानां
प्रियङ्गुनिम्बैः कटुरोहिणीनाम् ।
किराततिक्तं क्वथितं कषायं
सशर्कराढ्यं क्वथितञ्च पाचनम् ॥
सदाहपित्तज्वरमाशु हन्ति
तृष्णाभ्रमं शोषविकारयुक्तम् ।
एकोऽपि वै पर्पटको वरिष्ठः
पित्तज्वराणां शमनाय योग्यः ।
तस्मात् पुनर्नागरवालकाढ्यः
सिंहो यथा कट्टके प्रवृत्तः ॥
नागरोशीरमुस्ता च चन्दनं कटुरोहिणी ।
धान्यकानां क्वाथ एष पित्तज्वरविनाशनः ॥
अमृतापर्पटोधात्री क्वाथः पित्तज्वरं हरेत् ।
सितारग्वधयोर्वापि क्वाथमेकाकिनो वा पुनः ॥
द्राक्षापर्पटकं तिक्ता पथ्यारग्वधमुस्तकैः ।
क्वाथस्तृष्णाभ्रमदाहयुक्तपित्तज्वरापहः ॥
विदारिका रोध्रदधित्थकानां
द्राक्षाकपित्थस्य च दाडिमानाम् ।
यथानुलाभेन च कल्कमेवं
निहन्ति तृड्दाहगणं मुखस्य ॥
उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम् ।
नाभौ निधाय धाराम्बु शीतदाहनिवारणम् ॥
रम्भारामाकुचभरविनाशिनद्धदेहयष्ट्या
अनायामं सुविरचितं शीतलं शैवलं स्यात् ।
सुधाम्भोभिः मलयजकर्दमलिप्तसर्व्वाङ्गदोलनाम्भो
धाराधारो विहरणमुदिर्म कौमुदी वा सुरत्व ।
हरिचन्दनि इलाभराणि माइकाकाल निर्मल
दाहं दोषं शमयति नवा चन्दनं चन्दनञ्च ।
एभिर्दोषैर्भवति विरतो पित्तदाहस्य शान्ति-
र्दोषा चैव शमयति सदा मल्लिका शीतमाल्य ॥
शीतं पिता सपानपुद्रदो वै मद्यकस्य च ।
वैदरं मातुलुङ्गस्य मधुपैनपर्व्वद्रुमम् ।
वैद्यमार्त्तं सामुपैतः यतः पित्तज्वरातुरः ॥"

इति पित्तज्वरचिकित्सा ॥ * ॥

पित्तद्रावी, [न्] पुं, (पित्तं द्रावयतीति । द्रु + णिच् + णिनिः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥

पित्तरक्तं, क्ली, (पित्तसंसृष्टं रक्तमिति मध्यपदलोपी समासः ।) रोगविशेषः । तत्पर्य्यायः । रक्तपित्तम् २ पित्तासृक् ३ पित्तशोणितम् ४ । इति राजनिर्घण्टः ॥ अस्य विवरणं रक्तपित्तशब्दे द्रष्टव्यम् ॥

पित्तलं, क्ली, (पित्तं तद्वर्णं लातीति । ला + कः ।) धातुविशेषः । पितल इति भाषा ॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
"पित्तलञ्च तथा कांस्यं ताम्रवज्जारयेद्भिषक् ।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम् ॥")
तत्पर्य्यायः । आरकूटम् २ रीतिः ३ पीतिकावेरम् ४ ब्रह्मराज ५ । इति जटाधरः । रीती ६ । इति शब्दरत्नावली । निगमम् ७ । इति रत्नमाला । आरः ८ राजरीतिः ९ ब्रह्मरीतिः १० कपिला ११ पिङ्गला १२ । इति भावप्रकाशः । सुदलकः १३ पिङ्गलम् १४ पिङ्गलकम् १५ पीतलकम् १६ लोहितकम् १७ पिङ्गललोहम् १८ पीतकम् १९ । रीतिकागुणाः । तिक्तत्वम् । शीतलत्वम् । रुचि लवणत्वम् । शोधनत्वम् । पाण्डुवातकृमिप्लीह-पित्तनाशित्वञ्च ।
"शुक्ला स्निग्धा लघुः शीता सुरङ्गा लवणविषघ्नी ।
हेमोपमा शुभा स्वच्छा काव्या रीतिः प्रकीर्त्तिता ॥"

इति राजनिर्घण्टः ॥

"रीतिरप्युभया ज्ञेया ताम्रस्य यशदस्य च ।
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ॥
संयोगजप्रभावेन तस्यान्येऽपि गुणाः स्मृताः ।
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम् ॥"

इति भावप्रकाशः ॥ * ॥

भूर्जपत्रम् । इति शब्दमाला ॥ (पाण्डुरोगे पित्तमस्यास्तीति । पित्त + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) पित्तप्रकृतौ, त्रि । इति मेदिनी । ले, ११८ ॥ (पित्तवर्द्धके च । यथा, सुश्रुते सूत्रस्थाने । ४६ अध्याये ।
"अपाकं पित्तलं बीजं दिवसे रोचनं लघु ॥"
यथा च माधवकरकृतनिदानस्य मधुकोशव्याख्याधृतपाण्डु-कारे ।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥")

पित्तला, स्त्री, (पित्तल + टाप् ।) जलपिप्पली । इति मेदिनी । ले, ११८ ॥

पित्तारिः, पुं, (पित्तानामरिर्नाशकः ।) पर्पटः । लाक्षा । चन्दनम् । इति राजनिर्घण्टः ॥

पित्सत्, स्त्री, (पित्सती पतितुमिच्छति । पत् + "सन-मीमाघुरभलभशकपतपदामच इस् ।" ७ । ४ । ५४ । इति इस् । "अत्र लोपोऽभ्यासस्य ।" ७ । ४ । ५८ । इति अभ्यासलोपः ।) पक्षी ।

इति राजनिर्घण्टः ॥ पितृतीर्थम्। तत्तु तर्ज्जन्यङ्गुष्ठान्तः। इति हेमचन्द्रः। ३। ५०४ ॥ (पितुरिदं पितुरागतं वेति। पितृ+"पितुर्यत्।" ४। ३। ७९। इति यत्। ततो रीङादेशः।) पितृसम्बन्धिनि, त्रि। यथा,—

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुर्यथैव पितरन्तथा ॥"

इति दायभागः ॥

(पितृप्रियत्वात् माषार्थे च त्रि। यथा, सुश्रुते। २। ४६।

"कषायं स्वादु शिशिरं कषायमनिलापहम्।
पित्र्यं पवित्रमायुष्यं वह्निमन्दं विकाशनम् ॥")

पित्र्यः, पुं, (पितुस्तुल्य इति। बाहुलकात् यत्। ततो रीङादेशः।) ज्येष्ठभ्राता। इति हेमचन्द्रः। ३। २१५ ॥ (पितॄणां प्रिय इति यत्।) माषः। इति शब्दमाला ॥

पित्र्या, स्त्री, (पितरो देवता अस्या इति। पितृ+यत्। पितृदेवत्वादेव तथात्वम्।) मघानक्षत्रम्। इति हेमचन्द्रः। २। २५ ॥ पौर्णमासी। इति शब्दमाला ॥

पित्सत्, [त्] पुं, (पतितुमिच्छतीति। पत्+सन्+"सनि मीमाघुरभलभशकपतपदामच इस्।" ७। ४। ५४। इति इस्। अभ्यासस्य लोपश्च। ततः पित्स+शतृ।) पक्षी। इत्यमरः। २। ५। ३४ ॥ प्रतिपत्ने पतनेच्छौ च त्रि। इति विश्वः ॥

पित्सलं, क्ली, (पतन्त्यनेनेति। पत+"सलः पतेश्च।" २। ४६२। इति उणादिकोषधृतसूत्रात् अधिकरणे सलः। अकारस्य इत्व।) मार्गः। इत्युणादिकोषः। २। ४६२ ॥

पिधानं, क्ली, (अपि+धा+ल्युट्। अपेरल्लोपः।) छादनम्। इत्यमरः। १। ३। १२ ॥ (यथा, आर्य्यासप्तशत्याम्। ४८।

"गुरुपक्षवचोरचनपिधानमधुरे! जयामिलाषेऽसि!।
लोलाक्षि! नेव यवनो विरमति तव वचनपरिवर्त्तो ॥")

उद्घाटनम्। इति हेमचन्द्रः। ४। ८९ ॥

पिनद्धः, त्रि, (अपि नह्यते स्मेति। अपि+नह+क्तः। अपेरल्लोपः।) परिहितकवचादि। तत्पर्य्यायः। आमुक्तः २ प्रतिमुक्तः ३ अपिनद्धः ४। इत्यमरः। २। ८। ६५ ॥ (आच्छादितः। यथा, माघे। ११। ८। ११।

"यद्भिर्निर्मितस्नपुरस्तात्
स्पर्शं स्पष्टा रोमकैः पिनद्धम् ॥")

पिनाकः, पुं क्ली, (पाति रक्षति अनेन पायते वा। पान रक्षणे, पन स्तुतौ वा+"पिनाकादयश्च।" उणां ४। १५। इति आकप्रत्ययेन निपातनात् साधुः।) शिवधनुः। तत्पर्य्यायः। अजगवम् २। (यथा, महाभारते। ५। ५०। १८। "पिनाकमिव रुद्रस्य कुर्वन्नभिहतः धनुः ॥") शूलम्। इत्यमरः। १। १। ३०। शूलमपि त्रिशूलमिति केचित्। इति भरतः ॥ पांशुवर्षणम्। इति मेदिनी। के, ११६ ॥

पिनाकी, [न्] पुं, (पिनाकोऽस्यास्तीति। इनिः।) शिवः। इत्यमरः। १। १। ३३ ॥ (यथा, हरिवंशे। ३५। २०।

"हत्वा च निखिलं सर्वं पलायनपरायणाः।
विहाय मथुरां रम्यां मानयन्तः पिनाकिनम् ॥")

रुद्रभेदः। यथा, मात्स्ये। ५। २९—३०।

"अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥")

पिन्याशं, क्ली, (अपिगतो विख्यातो वाक्यगन्धत्वात् न्यासो यस्य। अपेरल्लोपः।) हिङ्गु। इति जटाधरः ॥

पिपतिषत्, [त्] त्रि, (पतितुमिच्छतीति। पत+सन्। ततः शतृ।) पतनेच्छुः। विहङ्गमे, पुं। इति मेदिनी। ते, २३१ ॥

पिपतिषुः, पुं, (पतितुमिच्छतीति। पत+सन्। पिपतिष+"सनाशंसभिक्ष उः।" ३। २। १६८। इति उः।) पक्षी। इति राजनिर्घण्टः ॥ (पतनेच्छौ, त्रि ॥)

पिपासा, स्त्री, (पातुमिच्छेति। पा+सन्+अः। ततष्टाप्।) पानेच्छा। तत्पर्य्यायः। तृष्णा २ तर्षः ३ उदन्यापिका ४ तृट् ५ तृषा ६ उदन्या ७। इति हेमचन्द्रः। ३। ५८ ॥ (यथा, सुश्रुते सूत्रस्थाने १ अध्याये। "स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः ॥")

पिपासितः, त्रि, (पिपासा जातास्येति। पिपासा+इतच्।) पिपासायुक्तः। तृषितः। इति हलायुधः ॥ (यथा, मनौ। ८। ९३।

"नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः।
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत् ॥")

पिपासुः, त्रि, (पातुमिच्छुः। पा+सन्+उः।) पानेच्छुः। तत्पर्य्यायः। तृषितः २ तृष्णक् ३। इति हेमचन्द्रः। ३। ५० ॥ (यथा, महाभारते। ३। २२१। २५।

"भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे।
पिपासवो ययुर्देवाः शतक्रतुपुरोगमाः ॥")

पिपीतकः, पुं, ब्राह्मणविशेषः। अस्य प्रमाणं पिपीतकीशब्दे द्रष्टव्यम् ॥

पिपीतकी, स्त्री, (पिपीतको ब्राह्मणविशेषः प्रवर्त्तकतयास्त्यस्येति। अच्। गौरादित्वात् ङीष्।) वैशाखशुक्लद्वादशी। तत्र कर्त्तव्यतं यथा,—

शतानीक उवाच।

"जनार्दनस्य माहात्म्यं त्वया परिकीर्त्तितम्।
तदहं श्रोतुमिच्छामि पिपीतकीकथां शुभाम् ॥
पुरा केन कृतश्चैतत् केन चैतत् प्रकाशितम्।
कथं पिपीतकीनाम विधानश्चैव कीदृशम् ॥
तत् सर्व्वं ब्रूहि विप्रेन्द्र! यदि तुष्टो मयि प्रभो! ॥

नारद उवाच।

शृणु राजन्! प्रवक्ष्यामि द्वादशीं तां पिपीतकीम्।
यां कृत्वा यमलोकादि प्राप्यते वैष्णवं पदम् ॥
पिपीतक इति ख्यातो ब्राह्मणः संशितव्रतः।
तपःस्वाध्यायनिरतः सर्व्वप्राणिहिते रतः ॥
शान्तो दान्तः क्षमायुक्तो वह्निहोमपरायणः।
निवसन् निर्ज्जनेऽरण्ये बहून् कालान् दिवौकसः ॥
चिरं कृत्वा तपोऽरण्ये काले स्वल्पायुषि विप्रात् ॥
ततः कालेन कियता यमदूतैर्महाबलैः।
नीयमानः स विप्रेन्द्रो यमलोकं भयावहम् ॥
ददर्श बहुशस्तत्र नरान्निरयसंस्थितान् ॥
असिपत्रवनेषु कुम्भीपाकेषु संस्थितान्।
शतार्त्तरावोल्लान् दृष्ट्वा विषादमगमद्द्विजः।
क्षुत्पिपासाकुलो भूत्वा प्रेतराजपुरं ततः।
बहून् पश्चात्कृतान् कुम्भान् ददर्शातिमनोहरान् ॥
प्रदेशाणोषिताश्च प्राप्यादैवयशोभितान् ॥
शीतवाद्यादिकृतैश्च सेव्यमानः समन्ततः।
कश्चित् प्रवरमानैश्च किङ्करैर्यमशासनैः।
नीयमानस्ततः प्रेतान् वध्यमानान् स्वकर्म्मभिः।
शोकधर्म्मापसंयुक्तान् तृषया परिपीडितः ॥
संप्रयामाणो राजेन्द्र! ययाचे किङ्करान् जलम्।
बहुशो याच्यमानेऽथ किङ्करैरभिताडितः।
स नीयमानो ददृशे बहुशस्तं हृदोत्तमम्।
सुच्छायं शीतलं रम्यं सुखास्वं चित्तहरम् ॥
तथैव रूपवान् कुम्भान् माल्ययोगान् सुशोभितान्।
ददर्श पश्चात्कृतराजान् सुवासितसुशीतलान् ॥
दृष्ट्वापि बहवस्तत्र किङ्कराः प्रसभादयः।
तोयदर्शनमात्रेण साकारो मायकोऽभवत् ॥
विनयावनतो भूत्वा ययाचे किङ्करान्जलम्।

ब्राह्मण उवाच।

यमदूता महात्मानस्तोयं मे दीयतामिति।
अप्राप्य तोयं प्राणानां विनाशो भवतेध्रुवम् ॥
तस्मात्तोयप्रदानेन प्राणान् रक्ष मे ध्रुवम्।
श्रुत्वा विप्रस्य तद्वाक्यं यमदूतैर्निकिङ्कराः।
न कृतं कर्म्म तद्विप्र! येन तोयञ्च लभ्यते ॥
प्रार्थयानः पुनस्तोयं यमदूतैः स ताडितः ॥
दूतार्त्तवचनं श्रुत्वा यमः प्रोवाच तं द्विजम्।
ब्रूहि त्वं विप्र! मा रोदीः का ते पीडाद्य

वर्त्तते ॥

पुनर्यथापि तत्तोयं तृषार्त्ताकुलचेतसः।
श्रुत्वा विप्रस्य तद्वाक्यं तत्प्राह च धर्म्मराट् ॥
त्वया तत्र कृतं कर्म्म येन वै लभ्यते जलम् ॥

ब्राह्मण उवाच।

मयि प्रसन्ने दिक्पाल! तत्तोयं दुर्ल्लभं न मे।
तस्मात्तोयप्रदानेन प्रायश्चित्तं कुरु प्रभो! ॥
इत्थं बहुविधैर्वाक्यैर्यमः प्रीतोऽभवत्तदा ॥

यम उवाच।

वरं वरय विप्रेन्द्र! यत्ते मनसि वर्त्तते ॥

ब्राह्मण उवाच।

यदि तुष्टोऽसि मे देव! मम प्राणोऽस्मि सत्तम।
तत् कुरुष्व धर्म्मराज! सर्व्वप्राणिवर! प्रभो! ॥

यम उवाच ।
वैशाखे तद्व्रतं विप्र ! कुरु गत्वा निजालयम् ।
विधानं शृणु विप्रेन्द्र ! द्वादशी याद‍ृशी भवेत् ॥
वैशाखे शुक्लपक्षस्य द्वादशी वैशाखी तिथिः ।
तस्यां शुभ्रैस्तिलजलैः स्नापयेत् केशवं प्रभुम् ॥
पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैर्विधानतः ।
नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वाससा ॥
अग्रे तु केशवं मन्त्रं दद्यात् प्रणमेत्ततः ।
दद्याद्विजेभ्यो विधिवत् कुम्भांस्तोयसमन्वितान् ।
प्रथमेऽब्दे चतुःकुम्भान् दद्याज्जलसमायुतान् ॥
शुक्लवस्त्राद्युतसुतान् उपवीतयुतसंयुतान् ।
धतुर्मासेषमायुक्तान् सर्वाभ्यर्चितान्वितान् ॥
द्वितीयेऽब्दे घटान्दद्याद्दधिशर्करसंयुतान् ।
तृतीये द्वादश घटान् तिलमोदकसंयुतान् ॥
चतुर्थे षोडशघटान् दुग्धलड्डुकसंयुतान् ।
दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः ॥
दक्षिणां शक्तितो दद्यात् भोज्यञ्चैव विशेषतः ।
यत्र कुत्रापि संगच्छेत् कृपापि हर्षान्वितः ॥
ततो द्विजो गृहं गत्वा चकार द्वादशीव्रतम् ।
अन्ते जगाम स्वर्लोकं वैशाखे पदमुत्तमम् ॥
पिपीतकीति नाम्नासौ विख्याता वैशाखी तिथिः ।
नरो यः कुरुते भक्त्या नारी वा भक्तिसंयुता ।
इह पुत्रादिसम्पन्ना धनधान्यसुतान्विता ॥”
इति भविष्यपुराणे पिपीतकीव्रतकथा समाप्ता ॥

पिपीलकः, पुं, (अपिपीलतीति । अपि + पील स्तम्भे + ण्वुल् । अपेरल्लोपः ।) पीलकः । इति हेमचन्द्रः । ४ । २७२ ॥ डेउया पिंपीड़ा इति भाषा ॥

पिपीलिका, स्त्री, (पिपीलक + टापि अत इत्वम् ।) कीटाङ्गी । इति हेमचन्द्रः । ४ । २७१ ॥ क्षुद्रे पिंपीड़ा इति भाषा ॥ तत्पर्य्यायः । पिपीलिकः २ पिपीलः ३ पीलकः ४ । इति शब्दरत्नावली ॥ पिपीली ५ पिपिली ६ स्त्रीसंज्ञा ७ । इति राजनिर्घण्टः ॥ चीटा ८ । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । २४ । ४ ।
“भुक्त्वा तु माषमांसं तौ कुटौ सम्भ्रमपीलि-
काम् ।
भक्षयन्तो महाशापमकस्मादेव चाप्यथ ॥”)

पिपीली, स्त्री, (अपिपीलतीति । पील् + अच् । अपेरल्लोपः । ततो गौरादित्वात् ङीष् ।) पिपीलिका । इति राजनिर्घण्टः ॥

पिप्पटा, स्त्री, खाद्यद्रव्यविशेषः । तत्पर्य्यायः । गुड़पत्रेरा २ । इति त्रिकाण्डशेषः ॥

पिप्पलं, क्ली, (पीयते इति । पा + अलच् । पृषोदरादित्वात् साधुः ।) जलम् । वस्त्रच्छेदभेदः । इति मेदिनी । ले, १११ ॥

पिप्पलः, पुं, (पिप्पलं फलं बिभ्रत्यनेनेति अलात्स्य मनाक् च्छेदे इति । पिप्पल + “अर्शआदिभ्यो ऽच् ।” ५ । २ । १२७ । इत्यच् ।) अश्वत्थवृक्षः । (यथा, महाभारते । ६ । २१ । ८ ।
“स्वर्गाजौ तु महीशाः पिप्पलाश्च मनोरमाः ।
कोशाम्ब जुषाः पार्थ ! स्वर्णपीठस्वस्तिकाः
मनाः ॥”)
निरंशुकः । पक्षिभेदः । इति मेदिनी । ले, ११२ ॥ * ॥ अश्वत्थस्वरूपं यथा,—

नारद उवाच ।
“अनायासेन यन्मर्त्त्याः सर्व्वान् कामानवाप्नुयात् ।
सर्व्वदेवात्मकञ्चैव तन्मे ब्रूहि पितामह ! ॥

ब्रह्मोवाच ।
शृणु नारद ! यत्नेन गुह्यं सर्व्वात्मकं गुरुम् ।
प्रदक्षिणीकृत्य नित्यं नराणां सर्व्वकामदम् ॥
पूजयेत् परया भक्त्या सर्व्वसिद्धियुतो भवेत् ।
अश्वत्थं पूजयेद्विप्र ! सर्व्वसिद्धिविधायकम् ॥ * ॥
अश्वत्थरूपी भगवान् प्रत्यक्षो विष्णुरेव च ।
ब्रह्मा चोत्तरतस्तस्य पूर्व्वे चेन्द्रादिदेवताः ॥
स्कन्धे स्कन्धे च पर्णेषु मारुता ऋषयः स्मृताः ।
तस्य मूले सर्व्वदेवाः शक्रा तस्य द्रुमाश्रिता ॥
नदीनदाः सागराद्याः पूर्व्वस्यान्दिशि संस्थिताः ।
लोकधर्म्मान् समाश्रित्य तस्मात्तं सेवयेन्नरः ॥
पुराणश्रुतिमन्त्रेभ्यः सारमुद्धृत्य संचितम् ।
नित्यप्रतिष्ठितं सम्यगश्वत्थं सेवयेन्नरः ॥
त्वं चौरो पवित्रश्चैव शीतलश्च चलच्छदे ! ।
त्वामाराध्य नरो दृष्यात् दैविकाधिष्ठितं मलम् ॥
अश्वत्थ ! यस्मात् त्वयि वृक्षराज !
नारायणस्तिष्ठति सर्व्वकालम् ।
अतः शुचिस्त्वं सततं तरूणां
विशेषतोऽरिष्टविनाशनोऽसि ॥
क्षीरोदमथने चैव यथा श्रीस्तामुपाश्रिता ।
सर्व्वेण तेन वृक्षेन्द्र ! श्वासोऽर्मयि निवेशतु ॥
एकादशोऽपि रुद्राणां वसूनामष्टमस्तथा ।
नारायणोऽसि देवानां वृक्षाणामसि पिप्पलः ॥
अग्निगर्भश्शमस्त्व ! देवगर्भ, प्रजापतिः ।
हिरण्यगर्भो भूगर्भो यज्ञगर्भ ! नमोऽस्तु ते ॥
अरातेरग्निरम्बत्य ! परापर ! नमोऽस्तु ते ।
नित्यं त्वभिवन्द्य मम्ब तेऽस्तु नमोऽस्तु ते ॥
अचिरस्पन्दं भुजगस्पन्दं दुःस्वप्नं दुर्व्विचिन्तितम् ।
शमयाश्व महावृक्षमश्वत्थ ! शमयाशु मे ॥
यं दृष्ट्वा मुच्यते रोगैः सर्व्वपापैः प्रमुच्यते ।
समाश्रित्य च दीर्घायुरश्वत्थं नमाम्यहम् ॥
अश्वत्थ ! सुमहाभाग ! सर्व्वदा प्रियदर्शन ! ।
रिपुनाशकोऽसि दीप्तः सुभगाय महात्मनाम् ॥
आयुः प्रजां धनं धान्यं सौभाग्यं सर्व्वदा
सुखम् ।
देहि देव महावृक्ष ! त्वामहं शरणं गतः ॥
अश्वत्थ ! देवमानवपूजितः प्रीयते यदा ।
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीड़ितः ।
आवृत्य एकलक्षन्तु स्यात् पापाविमुक्तो भवेत् ॥
ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः ।
पापापहन्ता मन्त्रेषु प्रसिद्धं समाचरेत् ॥
एकदर्भां द्विदर्भां वा कुर्य्यात् प्रोक्तविधानतः ।
अश्वत्थे मार्गशीर्षे यस्तु भवे समाचरेत् ॥
प्रभाते जन्मनि श्रीतो परमात्मानं विष्णुम् ॥
अश्वत्थमश्वत्थ [illegible] वा ।
एवं वा कोटिजन्मार्जितं कोटि कोटि फलं भवेत् ॥
अश्वत्थस्य [illegible] दुराधर्षम् ॥
अथायं मुनिशार्दूल ! जप्त्वा फलदं यदा ।
एवं सम्पूजितोऽश्वत्थः सर्व्वसौख्यप्रदो भवेत् ।
यत्रार्च्चितो हि दिव्योऽश्वत्थः सर्व्वारोग्यप्रदो भवेत् ॥
अश्वत्थः पूजितो येन पूजिताः सर्व्वदेवताः ।
अश्वत्थश्छेदितो येन छेदिताः सर्व्वदेवताः ॥
अतःश्रुतः सुसम्पूर्णोऽश्वत्थो देवमयो गुरुः ।
स सेव्यः पूजनीयश्च गुरुश्रयविनाशकः ॥
शनैश्चरवारे भौमे च मध्याह्ने निशि सन्ध्ययोः ।
अश्वत्थदर्शनं कार्य्यं कुलक्षयभयात्मभिः ॥ * ॥
अश्वत्थस्य तले यस्य छाया तिष्ठति कुत्रचित् ।
तत् प्रयागसमं तीर्थं तत्र सन्निहितो हरिः ॥
तस्मात् कार्त्तिकमासेऽपि पूर्व्वोक्तविधिना मुने ! ।
अश्वत्थं सेवयेद्विद्वान् संप्रदक्षिणमादिशेत् ॥
पापोपशमनार्थानां पापनाशो भवेद्ध्रुवम् ।
सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥
यः पठेत् प्रातरुत्थाय अश्वत्थस्य समीपतः ।
सर्व्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥”
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥

ऋषय ऊचुः ।
“कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥

सूत उवाच ।
अश्वत्थरूपी भगवान् विष्णुरेव न संशयः ।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥

ऋषय ऊचुः ।
कथं वृक्षस्वरूपत्वं ब्रह्मविष्णुमहेश्वराः ।
एतत् कथय सर्व्वज्ञ ! संशयोऽत्र महान् हि नः ॥

सूत उवाच ।
पार्व्वतीशिवयोर्देवैः सुरतं कुर्व्वतोः किल ।
वह्निं ब्राह्मणवेषेण प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः ।
रेतःसेकसुखध्वंसदुःखमाना तदा रुषा ॥

पार्व्वत्युवाच ।
क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम् ।
तस्मात्तु यूयं सर्व्वे वृक्षत्वमाप्नुत ॥

सूत उवाच ।
इति सा पार्व्वती देवी अशपत् क्रुद्धमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
अश्वत्थवटौ भुवि लोकवन्द्यौ ।
सोऽश्वत्थरूपं प्रतिपद्य विष्णु-
र्वटस्तु नामैव महेश्वरोऽभूत् ॥

ऋषय ऊचुः ।
अश्वत्थस्य कथं वाराः सूत ! सेवितव्याः सदा ।
स्पृष्टव्यश्च कथं वा [illegible] ॥

सूत उवाच ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

लक्ष्मीरुवाच ।
अवंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते ।
तस्मात्त्वमपयामैतामलक्ष्मीं मधुसूदन ! ॥
विवाह्योऽद्य मां यथादेव धर्मः सनातनः ।
तस्माद्धर्मव्यतिक्रामं न कुर्या मधुसूदन ! ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ।
उद्दालकाय मुनये सुदीर्घतपसे तदा ।
आमयाम्यादुदेवीन तामलक्ष्मीं ददौ किल ॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम् ।
सवदाराथमयनां स्वविभिन्नशिरोरुहाम् ॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य समाश्रमम् ।
वेदध्वनिसमायुक्तमानयामास धर्मवित् ॥
होमधूमसुगन्धाढ्यं वेदघोषैश्च नादितम् ।
आश्रममं विलोक्याथ ज्येष्ठा प्राब्रवीदिदम् ॥
ज्येष्ठोवाच ।
नहि चायोऽनुरूपोऽयं वेदध्वनियुतो मम ।
नागमिष्ये भो ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् ॥
उद्दालक उवाच ।
कथं नायासि किञ्चात्र वर्त्तते सम्मतं तव ।
तव योग्या च वसतिः का भवेत्तद्वदस्व माम् ॥
ज्येष्ठोवाच ।
वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम् ।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम् ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते ।
पितृदेवार्चनं यत्र तत्र नैव वसाम्यहम् ॥
दामर्थेऽपि न विद्यते परद्रव्यापहारिणः ।
परदाररता यत्र तत्र स्थाने रतिर्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादवमाननम् ।
विधुरं भावनं यत्र तत्र सम्यग्वसाम्यहम् ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा विमनावदनोऽभवत् ।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥
उद्दालक उवाच ।
अश्वत्थस्य तलेऽस्मिन्नलक्ष्मि ! त्यज्यतां त्वयम् ।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः ॥
सूत उवाच ।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः ।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा ॥
तदा चरोद करुणं भर्तृत्यागेन दुःखिता ।
तस्यास्तु क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ।
तदा विज्ञापयामास विष्णुं विमनास्तदा ॥
लक्ष्मीरुवाच ।
स्वामिन् ! मद्भगिनी ज्येष्ठा स्वामित्यागेन
दुःखिता ।
तामाश्वासयितुं याहि कृपालो ! मदर्थं प्रिय ॥
सूत उवाच ।
तस्या सह ततो विष्णुराजगाम जनार्दनः ।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् ॥
विष्णुरुवाच ।
अश्वत्थवृक्षमाश्रित्य वसालक्ष्मि ! स्थिरा भव ।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति ।
अस्पृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल ॥
प्रत्यब्दमर्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्मिणः ।
तैस्त्वियं श्रीः कनिष्ठा ते सदा तिष्ठतु नामया ॥”
इति पाद्मोत्तरखण्डे । १६०—१६१ । अध्यायौ ॥
(रेवत्यां जातो मित्रस्य पुत्रविशेषः । यथा, भागवते । ६ । १८ । ६ ।
“रेतः सिषिचतुः कुम्भे उर्व्वश्याः सन्निधौ द्रुतम् ।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥”)

पिप्पलकं, क्ली, (पीयते इति । पा + अलच् । पृषोदरादित्वात् साधुः । ततः संज्ञायां कन् ।) स्तनवृन्तम् । सीवनसूत्रम् । इति मेदिनी । के, १९८ ॥

पिप्पलिः, स्त्री, (पिपर्त्तीति । पॄ लि पूर्त्तौ + बाहुलकात् अलच् । गौरादित्वात् ङीष् । ह्रस्वः । पृषोदरादित्वात् साधुः ।) पिप्पली । इति शब्दरत्नावली ॥

पिप्पली, स्त्री, (पिपर्त्तीति + पॄ + बाहुलकात् अलच् । पृषोदरादित्वात् साधुः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । पिँपुल इति भाषा ॥ तत्पर्य्यायः । कृष्णा २ उपकुल्या ३ वैदेही ४ मागधी ५ चपला ६ कणा ७ उषणा ८ शौण्डी ९ कोला १० । इत्यमरः । २ । ४ । ९७ ॥ ऊषणा ११ पिप्पलिः १२ । इति भरतः ॥ तीक्ष्णतण्डुला १३ कटुबीजा १४ कोरङ्गी १५ तिक्ततण्डुला १६ श्यामा १७ दन्तफला १८ मगधोद्भवा १९ । अस्या गुणाः । ज्वरनाशित्वम् । रुच्यत्वम् । स्निग्धत्वम् । उष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । मारुतश्वासकासश्लेष्मक्षयापहत्वञ्च । इति राजनिर्घण्टः ॥ स्वादुपाकत्वम् । रसायनत्वम् । लघुत्वम् । पित्तलत्वम् । रेचनत्वम् । कुष्ठप्रमेहगुल्मार्शःप्लीहशूलामनाशित्वञ्च । आर्द्रायास्तस्या गुणाः । कफप्रदत्वम् । स्निग्धत्वम् । शीतलत्वम् । मधुरत्वम् । गुरुत्वम् । पित्तप्रशमनत्वञ्च । शुष्कायास्तु कफापहत्वम् । मधुयुक्तायास्तस्या गुणाः । मेदःकफश्वासकासज्वरहरत्वम् । वृष्यत्वम् । मेधाग्निवर्द्धनत्वञ्च । गुडपिप्पलीगुणाः । जीर्णज्वरे अग्निमान्द्ये च प्रशस्तत्वम् । कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिनाशित्वञ्च । द्विगुणात् पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः । इति भावप्रकाशः ॥ (अस्यपत्रपर्व्वताभिःसृतो नदीविशेषः । यथा, माघे । ११३ । २५ ।
“तमसा पिप्पली श्येनी तथा चित्रोत्पलापि
च ॥”)

पिप्पलीका, स्त्री, अश्वत्थोऽश्वः । इति राजनिर्घण्टः ॥

पिप्पलीमूलं, क्ली, (पिप्पल्या मूलमिव मूलमस्य ।) ग्रन्थिसम्भवम् । पिँपुलमूल इति भाषा । तत्पर्य्यायः । ग्रन्थिकम् २ चटिकाशिरः ३ । इत्यमरः । २ । ९ । ११० ॥ बहुग्रन्थि ४ । इति रत्नमाला ॥ मूलम् ५ कोलमूलम् ६ कटुग्रन्थि ७ कटुभद्रम् ८ कटूषणम् ९ सर्व्वग्रन्थि १० षड्ग्रन्थम् ११ विरूपम् १२ शौण्डीमूलम् १३ सुगन्धि १४ ग्रन्थिलम् १५ । इति राजनिर्घण्टः ॥ उषणम् १६ । अस्य गुणाः । दीपनत्वम् । कटुत्वम् । पाचनत्वम् । लघुत्वम् । रूक्षत्वम् । पित्तकरत्वम् । भेदकत्वम् । कफवातोदरानाहप्लीहगुल्मकृमिश्वासक्षयापहत्वञ्च । इति भावप्रकाशः ॥ उष्णत्वम् । दीपनत्वम् । इति राजनिर्घण्टः ॥

पिप्पिका, स्त्री, दन्तमलम् । इति हेमचन्द्रः । ३ । २९६ ॥

पिप्रुः, पुं, (अपि प्रवते देहोपरि इति । अपि + प्रु + डुः । अपेरल्लोपः ।) पटुलः । इत्यमरः । २ । ६ । ४९ ॥

पियालः, पुं, (पीयति गच्छतीति । पीय + “पीयुकणिभ्यां कालन् ह्रस्वः सम्प्रसारणञ्च ।” उणा० ४ । ७६ । इति कालन् ह्रस्वश्च ।) वृक्षविशेषः । अस्यैव बीजं चिरौञ्जीति ख्यातम् । तत्पर्य्यायः । राजादनम् २ सन्नकद्रुः ३ धनुष्पटः ४ । इत्यमरः । २ । ४ । ३५ ॥ राजातनम् ५ राजालः ६ प्रियालः ७ चारः ८ कदः ९ धद्रुः १० चरः ११ । इति तट्टीका ॥ बहुलकः १२ धनपटः १३ पियालकः १४ । इति शब्दरत्नावली ॥ खरस्कन्धः १५ चारः १६ बहुलवल्कलः १७ तापसेष्टः १८ ॥ (यथा, भागवते । ८ । २ । १० ।
“चूतैः पियालैः पनसैराम्रैराम्रातकैरपि ॥”)
तस्य गुणाः । पित्तकफास्रनाशित्वम् । इति भावप्रकाशः ॥ अस्य फलगुणाः । मधुरत्वम् । स्निग्धत्वम् । बृंहणत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥ गुरुत्वम् । सरत्वम् । दाहज्वरक्षयापहत्वञ्च । तस्य मज्जगुणाः । मधुरत्वम् । वृष्यत्वम् । पित्तानिलापहत्वम् । हृद्यत्वम् । अतिदुर्ज्जरत्वम् । स्निग्धत्वम् । विष्टम्भित्वम् । आमवर्द्धनत्वञ्च । इति भावप्रकाशे पूर्व्वखण्डे प्रथमो भागः ॥

पिल, क क्षिपे । इति कविकल्पद्रुमः ॥ (चुरां-परं सकं-सेट् ।) क, पेलयति । क्षिपे प्रेरणे । इति दुर्गादासः ॥

पिलुकः, पुं, (अपिलातीति । अपि + ला + बाहुलकात् कुः । अपेरल्लोपः । ततः कन् ।) पीलुवृक्षः । इति शब्दरत्नावली ॥

पिलुपर्णी, स्त्री, (पिलोरिव पर्णमस्याः । ङीष् ।) मोरटा । इति रत्नमाला ॥

पिल्लः, पुं, (क्लिन्ने चक्षुषी यस्येति । “क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी ।” ५ । २ । ३३ । इत्यत्र “क्लिन्नस्य चिल्पिलश्चास्य चक्षुषी ।” इति कात्यायनोक्त्या पिलादेशः ।) क्लिन्नचक्षुः । (अस्य चिकित्सा यथा,—
“लाक्षनाभि मधुकाञ्जनं त्रिसूक्ष्मं रसाञ्जनम् ।
आश्वतसार्तेन पक्वमञ्जनं पिल्लनाशनम् ॥”
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥)
तद्युक्ते, त्रि । इत्यमरः । २ । ६ । ६० ॥

पिल्लका, स्त्री, (पिल्लेन क्लेदयुक्तचक्षुषा कायतीति । कै+कः । टाप् ।) हस्तिनी । इति शब्दमाला ॥

पिश, ह सेचने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) ह, पिश्यति । इति दुर्गादासः ॥

पिश, श म अवयवे । इति कविकल्पद्रुमः ॥ (तुदां-मुचां-परं-अकं-सेट् ।) श म, पिंशति पटः अवयवी स्यादित्यर्थः । इति दुर्गादासः ॥

पिशङ्गः, पुं, (पिंशतीति । पिश+"पिशादिभ्यः कित् ।" उणां ।१।१२०। इत्यङ्गच् स च कित् ।) पिङ्गवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १६—१७ ॥ (यथा, ऋग्वेदे । १ । ८८ । २ ।
"रुक्मवक्षसैर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः ॥"
यथा च माघे । १ । ६ ।
"पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं शितिवाससस्तनुम् ॥"
नागभेदः । यथा, महाभारते । १ । ५७ । १६ ।
"भैरवो मुण्डवेदाङ्गः पिशङ्गश्चोद्रपारकः ॥")

पिशाचः, पुं, (पिशितं मांसमश्नातीति । पिशित+अश्+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततः "पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति शितभागस्य लोपः अश्भागस्य शाचादेशः ।) देवयोनिविशेषः । इत्यमरः । १ । १ । ११ ॥ पिचाश इति भाषा ॥ (यथा, मनौ । १ । ३७ ।
"यक्षरक्षःपिशाचांश्च गन्धर्व्वाप्सरसोऽसुरान् ॥"
"यक्षो वैश्रवणस्तदनुचराश्च । रक्षांसि रावणादीनि । पिशाचास्तेभ्योऽपकृष्टा अशुचिमरुदेशनिवासिनः ।" इति तट्टीकायां कुल्लूकभट्टः ॥)
तस्य लोको यथा,—
"अमरीलपरा ये च भूतप्रेतपिशाचकाः ।
धर्म्मविन्मा बदाकाले तथैव चरन्ति हि ॥
मोहं विस्मधि प्रतिलीयां समातपामनाम् ।
अत ऊर्द्ध्वं हि विप्रेन्द्र ! राक्षसा ये तमोमयः ।
ते तु धर्म्मादयः सर्व्वे पिशाचस्पृहवर्ज्जिताः ॥"
इति पाद्मे पातालखण्डे ११ अध्यायः ॥
प्रेतः । यथा, सुश्रुते ।
"अमोचाचाराद्गौचेऽपि यस्य लोमच्छवी बलः ।
पिशाचकं स्वैवैस्य रूपैः शास्त्रमतैरपि ॥"

पिशाचकी, [न्] पुं, (पिशाचाः सन्त्यस्येति । "बलादिभ्यो मतुबन्यतरस्याम् ।" ५ । २ । १३६ । इत्यत्र "पिशाचाच्च ।" इति वार्त्तिकोक्त्या इनिः कुक् च ।) कुवेरः । इति हेमचन्द्रः ।२।१०३॥

पिशाचद्रुः, पुं, (पिशाचानां द्रुः । पिशाचप्रियो द्रुर्वा । पिशाचानामाश्रयत्वात् तथात्वम् ।) शाखोटवृक्षः । इति त्रिकाण्डशेषः ॥ (शाखोटशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पिशाचवृक्षः, पुं, (पिशाचानां वृक्षः । पिशाचप्रियो वृक्षो वा ।) शाखोटवृक्षः । इति रत्नमाला ॥

पिशाचसभं, क्ली, पिशाचानां सभा । इति नपुं-सकलिङ्गसंग्रहटीकायां भरतः ॥

पिशाची, स्त्री, (पिशाच+ङीष् ।) पिशाचिका । स्त्री पिशाची । इति शब्दमाला ॥ (पिशाच-वद्गन्धोऽस्त्यस्या इति । अच् ततो ङीष् । तद्वद्गन्धयुक्तत्वात् तथात्वम् ।) गन्धमांसी । इति राजनिर्घण्टः ॥

पिशितं, क्ली, (पिंशति अवयवीभवतीति । पिश +"पिशेः किच ।" उणां । ३ । ९५ । इति इतन् स च कित् । यद्वा, पिश्यते स्मेति । क्तः ।) मांसम् । इत्यमरः । २ । ६ । ६३ ॥ (यथा, मार्कण्डेयपुराणे । २५ । १७ ।
"श्वासोऽस्थिसन्दर्शनमन्त्रपुञ्ज-
मज्जाकुलं सर्वेतमङ्गनायाः ।
कुर्यादि पीनं पिशितं घनं तन्
स्थानं रतेः किं नरकं न योषित् ॥")

पिशिता, स्त्री, (पिशितवद्गन्धोऽस्त्यस्या इति । अच् ततष्टाप् ।) जटामांसी । इति मेदिनी । ते, ३३ ॥

पिशिताशी, [न्] त्रि, (पिशितं अश्नातीति । अश्+णिनिः ।) राक्षसः । मांसभक्षकः । इति हेमचन्द्रः । ३ । ८६ ॥ (यथा, महाभारते । १ । ८३ । १४ ।
"पशुवीर्याचारधर्म्मेषु प्रतिलोमचरेषु च ।
पिशिताशिषु चान्त्येषु मूढ ! राजा भविष्यसि ॥")

पिशी, स्त्री, (पिंशतीति । पिश+कः । गौरादित्वात् ङीष् ।) जटामांसी । इति राजनिर्घण्टः ॥ (जटामांसीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पिशुनं, क्ली, (पिंशतीति । पिश+"क्षुधिपिशिमिथिभ्यः कित् ।" उणां ३ । ५५ । इति उनन् । स च कित् ।) कुङ्कुमम् । इत्यमरः । २ । ६ । १२४ ॥ (पर्य्यायोऽस्य यथा,—
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पिशुनः, पुं, (पिश+उनन् । स च कित् ।) कपि-वक्त्रः । नारदः । काकः । इति मेदिनी । ने, ८२ ॥ (दुःसहस्य पुत्रः । यथा, मार्कण्डेये । ५१ । ६५ ।
"अन्यश्च तनयं तेषे पिशुनं नाम नामतः ॥"
कौशिकस्य पुत्रभेदः । यथा, हरिवंशे । २१ । ५—६ ।
"वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च ।
खसृमः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा ॥
कौशिकस्य सुतास्तात ! शिष्या गार्गस्य भारत ! ॥
पितर्य्युपरते धर्म्मं चरन्तश्चारुमन्वयुः ॥")

पिशुन, त्रि, (पिश+उनन् । स च कित् ।) अटकादिवाक्यविश्लेषकः । परस्परभेदकः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः ।
"द्विजिह्वः सूचकः कर्णेजपः पिशुन इत्यपि ।
दुर्जनो दुर्मुखो द्विजवक्त्रः पिशुनः खलः ॥"
इति जटाधरः ॥
"कर्णेजपः सूचकः स्यात्कीलिञ्जबोधके ।
मत्सरे मेदखोजे पिशुनो दुर्जनः खलः ॥"
इति शब्दरत्नावली ॥
(यथा, आर्य्यासप्तशत्याम् । ५८ ।
"अनुपदेशेन तथा मदयति कटुकूजितैर्यथा पिशुनः ।
बधिरादान्धादधिकं दुनोति कर्णे कथन् भषकः ॥")
क्रूरः । इति मेदिनी । ने, ८२ ॥ (यथा, मनौ । ३ । १६१ ।
"भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ॥")

पिशुना, स्त्री, (पिशुन+टाप् ।) स्पृक्का । इति मेदिनी । ने, ८२ ॥ पिडिंशाक इति भाषा ॥ (स्पृक्काशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पिष, ऌ औ ल चूर्णने । इति कविकल्पद्रुमः ॥ (रुधां-परं-सकं-अनिट् ।) ऌ, पिनष्टि गोधूमम् । औ, पेष्टा । ल, अपिषत् । इति दुर्गादासः ॥

पिष्टं, क्ली, (पिष्यते स्मेति । पिष+क्तः ।) सीसकम् । इति रत्नमाला ॥ पिष्टकः । यथा,—
"अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनाच्च न भक्षणात् ॥" ॥
अस्य गुणाः ।
"पिष्टं प्रायकरं सर्व्वं विशेषेण गुरु दुर्ज्जरम् ॥
शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः ।
वैदला गुरवो भक्ष्या विष्टम्भिवस्त्रमादनाः ॥
गुरुका: सतिलाश्चैव यथोक्ताश्च गुरूवराः ।
भक्ष्या मत्स्याश्च कूर्म्माश्च गुरवो दृष्यताः परम् ॥
ससैन्धवाः क्षेहसिक्ताश्च भक्ष्या गोधूमजास्तथा ।
गुरवस्तर्पणा दृष्ट्या बल्याश्चानिलवर्द्धनाः ॥
मर्द्दिता मधिता क्षीरमादिश्चापूपादिभिः ।
अवदास्य घृते पक्वा घृतपूरोऽभिधीयते ॥
घृतपूरो गुरुर्वृष्यः कफकृत्पित्तवातजित् ।
रक्तपित्तहरो दृष्टः प्रायः पित्तहरोऽपि च ॥"
गोधूमचूर्णं समिता ।
"समिता मधुरा स्निग्धा बल्या स्वादुविनाशनी ।
घृते पक्वा पिष्टं सर्व्वं भक्षणे दृंहणो गुरुः ॥
समिता हिता सर्व्वमधु रसा घृते समाः ।
मधुमस्तकशर्करं न्यायं गुरु दुर्ज्जरम् ॥"
इति राजवल्लभः ॥
पिष्टंष्टकमोदककरणक्रियाभ्यां पूजायां प्रेताय इत्यादयः ॥ ० ॥ चूर्णितं, त्रि । (यथा, कथासरित्सागरे । ६ । ३६ ।
"इत्था सोदकगात्र् पिष्टात् दृष्टोला सह पुंसाम् ।
अविरं वसने इत्या ब्रह्मचारी कन्यादृष्टे ॥")

पिष्टं, क्ली, (पिष्टमिव प्रतिभाति । इत्यादि कन् ।) पिष्टचूर्णम् । इति शब्दचन्द्रिका ॥

पिष्टकः, पुं, (पिष्टमिव पिष्टकं इति । "संज्ञा-याम् ।" ५ । ३ । ७५ । इति कन् ।) पिष्टकः । तण्डुलादीनां पिष्टकः । पिठा इति भाषा ॥

तत्पर्य्यायः । पूपः २ अपूपः ३ । इत्यमरः । २ । ९ । ४८ ॥ आपूपः ४ पिष्टः ५ । इति शब्दरत्नावली ॥ अस्य गुणाः पिष्टशब्दे द्रष्टव्याः । नेत्ररोगविशेषः । इति मेदिनी ॥ के, १२० ॥ तस्य लक्षणम् । यथा,—

"श्लेष्मा मारुतकोपेन शुक्ले पिष्टवदुन्नतम् ।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम् ॥"

इति माधवकरः ॥

(अस्य चिकित्सा यथा —

"वैदेही तिलमारिचं मेध्यं नागरं समम् ।
मातुलुङ्गरसैः पिष्टमञ्जनं पिष्टकापहम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥)

पिष्टपं, क्ली, पुं, (विष्टपस्य पृषोदरादित्वात् पत्वम् । "विटपपिष्टपविशिपोलपाः ।" उणा । ३ । १४५ । इति कपप्रत्ययेन निपातनात् साधुः ।) भुवनम् । इत्यमररत्नकोषौ ॥ (यथा, मनौ । ४ । २११ ।

"अनडुहः श्रियं पुष्टिं सोदरो भ्रष्टस्य पिष्टपम् ॥")

पिष्टपचनं, क्ली, (पच्यते अनेनेति । पच + आधारे ल्युट् । पिष्टस्य पचनम् ।) पिष्टपाकपात्रम् । तेलाभी इति भाषा । इति सुभूतिः ॥ तत्पर्य्यायः । ऋजीषम् २ । इत्यमरः । २ । ९ । ३२ ॥ ऋचीषम् ३ । इति स्वामी ॥ पिष्टपाकभृत् ४ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते चिकित्सितस्थाने सप्तविंशाध्याये ।

"विकृतकलशाशो दीर्घं पिष्टपचने पिष्टवदुन्नमेदिति ॥")

पिष्टपाकभृत्, क्ली, (पिष्टपाकं तद्भक्तिरोऽपायो यत्र तत् पकाशते इति न्यायात् पत्रमात्राधारं बिभर्त्ति धारयतीति । भृ + क्विप् तुगागमश्च ।) पिष्टकपाकपात्रम् । इति हेमचन्द्रः । ४ । ८६ ॥

पिष्टपूरः, पुं, (पिष्टैः पूर्य्यते इति । पूरि + कर्म्मणि घञ् ।) घटकः । इति भूरिप्रयोगः ॥ पिष्टकविशेषः । तत्पर्य्यायः । घृतपूरः २ घृतवरः ३ घार्त्तिकः ४ । इति हेमचन्द्रः । ३ । ६७ ॥

पिष्टवर्त्तिः, पुं, (पिष्टं वर्त्तयतीति । वर्त्ति + इन् ।) गुडमधुरादिपिष्टम् । तत्पर्य्यायः । चमसिः २ । इति हेमचन्द्रः । ३ । ६४ ॥

पिष्टसौरभं, क्ली, (पिष्टेन पेषणेन सौरभं यस्य ।) चन्दनम् । इति शब्दचन्द्रिका ॥ १०६ ॥

पिष्टातः, पुं, (पिष्टं अतति गच्छतीति । अत + अण् ।) पटवासचूर्णम् । इति भरतः ॥ वस्त्रादिवासनार्थमबीरप्रभृतिसुगन्धचूर्णम् । इति सार-सुन्दरी ॥ फाग् । इति भानुदीक्षितः ॥ आबीर इति ख्यातः । इति रमानाथचौधरी ॥ तत्पर्य्यायः । पटवासकः २ । इत्यमरः । २ । ६ । १३९ ॥ धूलिगुच्छकः ३ । इति त्रिकाण्डशेषः ॥

पिष्टिकं, क्ली, (पिष्टान्निर्मितम् । पिष्ट + ठन् ।) तण्डुलोद्भवतच्चौरम् । इति राजनिर्घण्टः ॥

पिष्टिका, स्त्री, (पिष्टं पेषणं आयततया अस्त्यस्या इति । पिष्ट + ठन् । टाप् ।) पिष्टकविशेषः । पिठी इति हिन्दीभाषा । यथा,—

"शालिः संस्थापिता तोये ततोऽपहृतकञ्चुका ।
शिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः ॥"

इति भावप्रकाशः ॥

पिष्टोडी, स्त्री, श्वेतान्निः । इति राजनिर्घण्टः ॥

पिष, र कि हुर्त्ती । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट् । इदित् ।) र, पिंसयति । कि, पिंसयति पिंसति । द्युतिर्दीप्तिः । इति दुर्गादासः ॥

पिष, ऋ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अपिपेसत् अपिपिसत् । पिपेसतुः पिपिसतुः । इति दुर्गादासः ॥

पिष, क बध्यर्थे । गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पेसयति । बध्यर्थोऽयमिति केचित् । बध्यर्थो निकेतनहिंसा-बलदानानि । इति दुर्गादासः ॥

पिहितं, त्रि, (अपि धीयते स्मेति । धा + क्तः । "दधातेर्हिः ।" ७ । ४ । ४२ । इति ह्यादेशः । अपेरलोपः ।) आच्छादितम् । तत्पर्य्यायः । संवीतम् २ पिहितम् ३ आवृतम् ४ संवृतम् ५ छन्नम् ६ स्थगितम् ७ अपवारितम् ८ आच्छादितम् ९ तिरोधानम् १० । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । ४४ । १८ ।

"अनेन पिहिताः सर्व्वा दिशो न प्रतिभान्ति मे ।
शब्देनैवास्य च शब्देन कर्णौ मे बधिरीकृतौ ॥")

पी, ङ य पाने । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) ङ य, पीयते । इति दुर्गादासः ॥

पीठं, क्ली, (पेठन्त्युपविशन्त्यस्मिन्निति । पिठ + "हलश्च ।" ३ । ३ । १२१ । इति घञ् । बाहुलकादिकारस्य दीर्घः । यद्वा, पीयतेऽनेनेति । पी ङ पाने + बाहुलकात् ठक् ।) उपवेशनाधारः । इत्यमरः । २ । ९ । १३८ ॥ पिढ़ी चौकी इत्यादि भाषा । तत्पर्य्यायः । आसनम् २ उपासनम् ३ पीठी ४ विष्टरः ५ । इति शब्दरत्नावली ॥ व्रतिनामासनम् । तत्तु कुशासनादि । तत्पर्य्यायः । विष्टरः २ । इति त्रिकाण्डशेषः ॥ वृषी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ५ । ३८ । २ ।

"पीठं दत्वा साधवेऽभ्यागताय
आनीयापः परिनिर्णिज्य पादौ ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां
ततो दद्यादन्नमवेक्ष्य धीरः ॥")

अथ पीठोद्देशः ।

"धातुपाषाणकाष्ठैश्च पीठन्त्रिविध उच्यते ।
धातवश्च शिलाश्चैव काष्ठानि विविधानि च ॥
तदहं संप्रवक्ष्यामि यद्येषामुपयुज्यते ॥"

अथ मानम् ।

"दशाङ्गुलस्तु देर्घ्येण तदर्द्धे परिणाहतः ।
तदर्द्धमोन्नतः पीठः शुभ इत्यभिधीयते ॥
षडङ्गुलपाधिक्यात् पञ्च पीठा भवन्ति हि ।
सुखं जयः शुभः सिद्धिः सम्पदिति यथाक्रमम् ॥
चक्रमीलाद्येऽनर्थदाश्च प्रादेशपरामताः ।
समदीर्घप्रस्थाकारेविंशते विवस्तरः ॥
आयामपरिणाहाभ्यां चतुःषष्टिमितो हि यः ।
अर्द्धेनोन्नतः पीठो भारकी नाम विश्रुतः ।
देर्घ्यप्रस्थपरीणाहैश्चतुर्वेदमितो हि यः ।
राजपीठ इति ज्ञेयः शुभकार्येषु सर्व्वदा ।
अभिषेकमिच्छन्ति नित्यस्य सुराः ॥
देर्घ्यप्रस्थपरीणाहैः षट्कलामितो हि यः ।
राज्ञो विजयप्रदायी केलिपीठाभिधायकः ॥
देर्घ्यप्रस्थपरीणाहैरष्टकलामितो हि यः ।
अनुपीठो त्वयं नाम्ना भवेत् पदप्रदायकः ।
भारकी राजपीठः स्याज्जयो वा राज्ञः शुभः ।
राज्ञामेषोपयोगश्च न तथान्येऽन्तरेऽन्तरम् ।
राजपीठे चिरायुः स्यात् पदेऽन्यो महीपतेः ।
भारकी सर्व्वकामं तु स्वे सुखसम्पदाप्नुयात् ।
राजन्ः कौर्त्तिजयौ धर्मशास्त्रकरः परः ।
ताम्रः प्रतापजनको विपन्नाशप्रकारकः ।
लौहस्तूत्पाटने शस्तः सर्व्वकर्म्मसु युज्यते ।
अपूर्वास्तकराख्याः सुखसम्पत्प्रदाः ॥"

इति धातुपीठाः ।

अथ शिलापीठाः ।

"राजपीठो वज्रमणिभिश्च मारकतैश्च शस्यते ।
पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि ।
राजोमारकतः पीठः धनेश्वरस्य प्रदः ।
गोमेदकस्तु सौम्यस्य स्फाटिकस्तु हयग्रीवः ।
गुरुश्च वैदूर्य्यमयः प्रावालो मङ्गलस्य हि ॥"

इत्यं पुराणवाचः ॥ * ॥

"यो यस्य हि दशप्राप्तः पीठस्तस्य हि तन्मयः ।
स्फाटिकस्तु सर्वेषामपि धर्म्माय नित्यशः शुभः ।
अभिषेके च यात्रायां सुखे चापकर्म्मणि ।
अयस्कान्तोपघटितः संग्रामे पीठ इष्यते ।
मरकतोद्भवस्याऽऽरोपितः सर्वासु श्रुतिसम्पदुत् ।
शुद्धरत्नमयं पीठं भवति पञ्चकल्याणं ।
धामाच्च प्रास्तरः पीठो विलासाय महो-
दयात् ।
एवं मणं गुणांश्चापि विहिता धातुपीठयोः ।"

अथ काष्ठपीठाः ।

तद्यथा, मानं पूर्ववदेव ।

"सप्तविंशुलकाष्ठार्थं नाम्नानीदारितो जयः ।
भारकी रोगनाशाय शुभः शत्रुविनाशनः ।
सिद्धिः धर्म्मार्थसंसिद्ध्यै विजयाय च वैरिणाम् ।
शुभः स्यादभिषेके च सम्पदे हितकारकः ।
मालवी राजकः पीठः सुखकर्म्मणि कारकः ।
जयः स्यादभिषेके च शुभः शत्रुविनाशनः ।
शुभो रोगविनाशाय सिद्धिः धर्म्मार्थदायिका ।
सम्पद्युदारकर्म्मणि विहितं पीठलक्षणम् ।
चान्दनस्तु शुभः पीठो अभिषेके महोदयात् ।
जयः स्यात्तरोमवासाय शुभः पीठं प्रदर्शयेत् ।
भारकी मधुकाष्ठे च अन्ये तु इतिदृष्टाः ।
दन्तो विनिर्मितास्तु काष्ठान्तरकल्पनात् ।
कादम्बको मारको हि सर्व्वकामार्थसिद्धये ।
पीठानुक्तकारेषामन्ये चन्दनवर्दिनः ।
शाकजस्तु शुभः पीठो गृहकामार्थसिद्धये ।

अयो रोगविनाशाय मुक्तसम्पत्तिकारकः ।
सिद्धिः सिद्धिप्रदा सम्यक् संग्रामे विजयप्रदः ।
जारको जारणाय स्यादिति भीमस्य सम्मतम् ॥
एवं सुगन्धिकुसुमाः सफला ये च पादपाः ।
वाकुलेन समः कार्य्य एवं पीठस्य निर्णयः ॥
ये मध्यकाष्ठा वृक्षास्तु स्वरवो लघवोऽथवा ।
शाकाराटीवकद्याः पीठकर्णे कार्य्यस्तथा गुरुः ॥
फलिनश्च सफलाश्च रक्तसाराश्च ये नगाः ।
तेषां पादपवत् पीठस्यापि गुरुमाचरेत् ॥" * ॥

अथ निषेधः ।

"विज्ञेयो निन्दितः पीठो नीपोत्थः सर्व्वथा शुभे ।
शिलोत्थः शाकरो वर्ज्यः कर्करश्च विशेषतः ॥
काष्ठेषु च पीठेषु नासारा नातिसारिकः ॥"
तथाहि ।
"आम्रजम्बुकदम्बानामासनं वज्रनाशनम् ॥"
भीमस्यापि ।
"गुरुः पीठो गौरवाय लघुर्लाघवकारकः ॥"
पराशरस्तु ।
"नात्युच्चो नातिविस्तीर्णो नागुरुर्नातिलाघवः ।
पीठः स्यात् सुखसम्पत्त्यै नातिदीर्घो न वामनः ॥
ये चान्ये पीठवृक्षा हि ख्याताः शिल्पिविनिर्म्मिताः ।
गृहाच्छीघ्रं च मानञ्च तेषां पीठवदादिशेत् ॥
विचार्य्यानेन विधिना यः शुद्धं पीठमाचरेत् ।
तस्य लक्ष्मीरियं गेहे कदाचिन्न विमुञ्चति ॥
अज्ञानादथवा मोहाद्योऽन्यथा पीठमाचरेत् ।
एतानि तस्य नश्यन्ति लक्ष्मीरायुर्बलं कुलम् ॥"

इति युक्तिकल्पतरौ पीठोद्देशः ॥ * ॥

सत्ययुगे दक्षकन्या शिवनिन्दां श्रुत्वा प्राणा-स्तत्यजत्. तस्याः शरीरं शिरसि धृत्वा भ्रमति शिवे विष्णुना चक्रेण छिन्नास्तस्या अवयवा यत्र यत्र पतितास्तत्र तत्रैव एकपञ्चाशत्पीठा अभवन् । इति पौराणिकी वार्त्ता ॥ * ॥
तेषां निरूपणं यथा,—

ईश्वर उवाच ।

"मातः परात्परे ! देवि ! सर्व्वज्ञानमयीश्वरि ! ।
कथ्यतां मे सर्व्वपीठं शक्तिभैरवदेवता ॥

देव्युवाच ।

शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल ! ।
याभिर्व्विना न सिध्यन्ति जपसाधनसत्क्रियाः ॥
पञ्चाशदेकपीठानि एवं भैरवदेवताः ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
ममान्यवपुषो देव ! हिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ।
कोट्टरी सा महामाया त्रिगुणा या दिगम्बरी ॥ २ ॥
शर्क्कारे त्रिनेत्रं मे देवी महिषमर्द्दिनी ।
क्रोधीशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ३ ॥
सुगन्धायां नासिका मे देवस्त्र्यम्बकभैरवः ।
सुनन्दा सा महादेवी सुनन्दा तत्र देवता ॥ ४ ॥
काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥ ५ ॥
ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदानाम्नी ६ स्तनं जालन्धरे मम ।
भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी ॥ ६ ॥
हार्द्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः ।
देवता जयदुर्गाख्या ७ नेपाले जानुनी मम ।
कपाली भैरवः श्रीमान् महामाया च देवता ॥ ८ ॥
मानसे दक्षहस्तो मे देवी दाक्षायणी हर ।
अमरो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ९ ॥
उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥ १० ॥
गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः ।
तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः ॥ ११ ॥
बहुलायां वामबाहुर्बहुलाख्या च देवता ।
भीरुको भैरवो देवः सर्व्वसिद्धिप्रदायकः ॥ १२ ॥
उज्जयिन्यां कूर्परञ्च माङ्गल्यः कपिलाम्बरः ।
भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका ॥ १३ ॥
चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
व्यक्तरूपा भगवती भवानी तत्र देवता ।
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥ १४ ॥
त्रिपुरायां दक्षपादो देवता त्रिपुरा मता ।
भैरवस्त्रिपुरेशश्च सर्व्वाभीष्टफलप्रदः ॥ १५ ॥
त्रिस्रोतायां वामपादो भ्रामरी भैरवोऽम्बरः ॥ १६ ॥
योनिपीठं कामगिरौ कामाख्या तत्र देवता ।
यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी ।
यत्रास्ते माधवः साक्षादुमानन्दोऽथ भैरवः ।
सर्व्वदा विहरेद्देवी तत्र मुक्तिर्न संशयः ।
तत्र श्रीभैरवी देवी तत्र च क्षेत्रदेवता ।
प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुराम्बिका ।
बगला कमला तत्र भुवनेशी सधूमिनी ।
एतानि परपीठानि शंसन्ति वरभैरव ! ।
एवं ता देवताः सर्व्वा एवन्ते दश भैरवाः ।
सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे ।
गौरीशिखरमारुह्य पुनर्जन्म न विद्यते ॥ १७ ॥
करतोयां समासाद्य यावत् शिखरवासिनीम् ।
शतयोजनविस्तीर्णं त्रिकोणं सर्व्वसिद्धिदम् ।
देवा मरणमिच्छन्ति किं पुनर्मानवादयः ।
भूतधात्री महामाया भैरवः क्षीरखण्डकः ।
युगाद्यायां महादेव ! दक्षाङ्गुष्ठः पदो मम ॥ १८ ॥
नकुलीशः कालीपीठे दक्षपादाङ्गुली च ।
सर्व्वसिद्धिकरी देवी कालिका तत्र देवता ॥ १९ ॥
अङ्गुलीषु च हस्तस्य प्रयागे ललिता भवः ॥ २० ॥
जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः ॥ २१ ॥
भुवनेशी सिद्धिरूपा किरीटस्था किरीटतः ।
देवता विमला नाम्नी संवर्त्तो भैरवस्तथा ॥ २२ ॥
वाराणस्यां विशालाक्षी देवता कालभैरवः ।
मणिकर्णीति विख्याता कुण्डलञ्च मम श्रुतेः ॥ २३ ॥
कन्याश्रमे च पृष्ठं मे निमिषो भैरवस्तथा ।
सर्व्वाणी देवता तत्र २४ कुरुक्षेत्रे च गुल्फतः ।
स्थाणुर्नाम्ना च सावित्री देवता २५ मणि-वेदके ।
मणिबन्धे च गायत्री सर्व्वानन्दस्तु भैरवः ॥ २६ ॥
श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता ।
भैरवः सम्बरानन्दो देशे देशे व्यवस्थितः ॥ २७ ॥
कांच्यां देशे च कङ्कालो भैरवो रुरुनामकः ।
देवता देवगर्भाख्या २८ नितम्बः कालमाधवे ।
भैरवश्चासिताङ्गश्च देवी काली च सिद्धिदा ।
दृष्ट्वा दृष्ट्वा महादेव ! मन्त्रसिद्धिमवाप्नुयात् ।
कुब्जकारे भूतलिपौ विधार्द्धं यस्तु साधकः ।
नरा मदत्रिकोणस्थ सर्व्वसिद्धिमवाप्नुयात् ॥ २९ ॥
शोणाख्या भद्रसेनस्तु नर्म्मदाख्ये नितम्बकः ॥ ३० ॥
रामगिरौ स्तनान्यश्च शिवानी चण्डभैरवः ॥ ३१ ॥
वृन्दावने केशपाशे उमानाम्नी च देवता ।
भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ३२ ॥
संहाराख्य ऊर्द्ध्वदन्ते देवी नारायणी शुची ।
अधोदन्ते महारुद्रो वाराही पञ्चसागरे ॥ ३३ ॥
करतोयातटे तल्पं वामे वामनभैरवः ।
अपर्णा देवता तत्र ब्रह्मरूपा करोद्भवा ॥ ३४ ॥
श्रीपर्व्वते दक्षतल्पं तत्र श्रीसुन्दरी परा ।
सर्व्वसिद्धिकरी सर्व्वा सुन्दरानन्दभैरवः ॥ ३५ ॥
कपालिनी भीमरूपा वामगुल्फो विभाषके ॥ ३६ ॥
उदरञ्च प्रभासे मे चन्द्रभागा यशस्विनी ।
वक्रतुण्डो भैरवश्च ३७ चोर्द्धोष्ठो भैरवपर्व्वते ।
अवन्ती च महादेवी लम्बकर्णस्तु भैरवः ॥ ३८ ॥
चिबुके भ्रामरी देवी विकृताक्षी जनस्थले ॥ ३९ ॥
गण्डो गोदावरीतीरे विश्वेशी विश्वमातृका ।
दण्डपाणिर्भैरवस्तु वामगण्डे तु राकिणी ।
वत्सनाभो भैरवो वत्स ! पर्व्वते नाभ्रकोपरि ॥ ४० ॥
रत्नावल्यां दक्षस्कन्धः कुमारी भैरवः शिवः ॥ ४१ ॥
मिथिलायामुमा देवी वामस्कन्धे महोदरः ॥ ४२ ॥
नलहाट्यां नलापातो योगीशो भैरवस्तथा ।
तत्र सा कालिका देवी सर्व्वसिद्धिप्रदायिका ॥ ४३ ॥
कर्णाटे चैव कर्णं मे अभीरुर्नाम भैरवः ।
देवता जयदुर्गाख्या नानाभोगप्रदायिनी ॥ ४४ ॥
वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः ।
नदी पापहरा तत्र देवी महिषमर्द्दिनी ॥ ४५ ॥
यशोरे पाणिपद्मञ्च देवता यशोरेश्वरी ।
चण्डश्च भैरवो यत्र तत्र सिद्धिमवाप्नुयात् ॥ ४६ ॥
अट्टहासे चोष्ठपातो देवी सा फुल्लरा स्मृता ।
विश्वेशो भैरवस्तत्र सर्व्वाभीष्टप्रदायकः ॥ ४७ ॥
हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः ।
नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः ॥ ४८ ॥
लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः ।
इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा ॥ ४९ ॥
विराटदेशमध्ये तु पादाङ्गुलिनिपातनम् ।
भैरवश्चामृताख्यश्च देवी तत्राम्बिका स्मृता ॥ ५० ॥
मागधे दक्षजङ्घा मे व्योमकेशस्तु भैरवः ।
सर्व्वानन्दकरी देवी सर्व्वकामफलप्रदा ॥ ५१ ॥
एतानि कथिताः पुत्र ! पीठान्याद्यधिदेवताः ।
देवतानां विना देव ! पूजयेत् पीठदेवताम् ।
भैरवेऽर्हिते सर्व्वं जपपूजादिसाधनम् ।
अज्ञात्वा भैरवं दीर्घं पीठस्थानञ्च शङ्कर ! ।
शापदाच ! न सिद्ध्येत् जल्पकोटिजपादिभिः ।
न देयं परशिष्येभ्यो निन्दकाय दुरात्मने ।
दद्यात् भक्ताय देवं दत्त्वा बहुफलप्रदम् ।
इत्यादि डाकिनीतन्त्रे भैरवीभैरवे पुनौ ॥
वरदात्र कृतोत्र कर्णो समर्पितः ॥")

इति तन्त्रचूडामणौ शिवपार्व्वतीसंवादे एकपञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः ॥ ० ॥ (देवीभागवतोक्ताष्टाधिकशतपीठनामानि यथा, तत्रैव । ७ । ३० । ४४—८५ ।

"अवज्ञाता यतो यज्ञे दक्षमानात्तु निष्कृताम् ।
स्कन्धेऽध्यारोपयामास हा ! सतीति वदन् मुहुः ॥
बभ्राम भ्रान्तचित्तः सन्नानादेशेषु शङ्करः ।
तदा ब्रह्मादयो देवाश्चिन्तामापुरनुत्तमाम् ॥
विष्णुस्तु त्वरया तत्र धनुरुद्यम्य मार्गणैः ।
चिच्छेदावयवान् सत्यास्तत्स्थानेषु तेऽपतन् ॥
तत्तत् स्थानेषु तन्नानामूर्त्तिधरो हरः ।
उवाच च ततो देवान् स्थानेष्वेतेषु ये शिवाम् ॥
भजन्ति परया भक्त्या तेषां किञ्चिन्न दुर्लभम् ।
नित्यं सन्निहिता यत्र निजाङ्गेषु पराम्बिका ॥
स्थानेष्वेतेषु ये मर्त्त्याः पुरश्चरणकर्म्मिणः ।
तेषां मन्त्राः प्रसिध्यन्ति मायाबीजं विशेषतः ॥
इत्युक्त्वा शङ्करस्तेषु स्थानेषु विरहातुरः ।
कालं निन्ये नृपश्रेष्ठ ! जपध्यानसमाधिभिः ॥

जनमेजय उवाच ।

कानि स्थानानि तानि स्युः सिद्धपीठानि चानघ ! ।
कतिसंख्यानि नामानि कानि तेषाञ्च मे वद ॥
तत्र स्थितानां देवीनां नामानि च तपोधन ! ।
कृतार्थोऽहं भवे येन तद्वदाशु महामुने ! ॥

व्यास उवाच ।

शृणु राजन् ! प्रवक्ष्यामि देवीपीठानि साम्प्रतम् ।
येषां श्रवणमात्रेण पापहीनो भवेन्नरः ॥
येषु येषु च पीठेषूपास्येयं सिद्धिकाङ्क्षिभिः ।
भूतिकामैरभिध्येया तानि वक्ष्यामि तत्त्वतः ॥
वाराणस्यां विशालाक्षी गौरीमुखनिवासिनी ।
क्षेत्रे वै नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी ॥
प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने ।
मानसे कुमुदा प्रोक्ता दक्षिणे चोत्तरे तथा ॥
विश्वकामा भगवती विश्वकामप्रपूरिणी ।
गोमन्ते गोमती देवी मन्दरे कामचारिणी ॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥
एकाम्रपीठे संप्रोक्ता देवी सा कीर्त्तिमत्यपि ।
विश्वे विश्वेश्वरीं प्राहुः पुरुहूताञ्च पुष्करे ॥
केदारपीठे संप्रोक्ता देवी सन्मार्गदायिनी ।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥
स्थानेश्वरे भवानी तु बिल्वके बिल्वपत्रिका ।
श्रीशैले माधवी प्रोक्ता भद्रा भद्रेश्वरे तथा ॥
वराहशैले तु जया कमला कमलालये ।
रुद्राणी रुद्रकोट्यान्तु काली कालञ्जरे तथा ॥
शालग्रामे महादेवी शिवलिङ्गे जलप्रिया ।
महालिङ्गे तु कपिला माकोटे मुकुटेश्वरी ॥
मायापुर्य्यां कुमारी स्यात् सन्ताने ललिताम्बिका ।
गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ।
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने ॥
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ।
विपुले विपुला देवी कल्याणी मलयाचले ॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥
कोटवी कोटतीर्थे तु सुगन्धा माधवे वने ।
गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥
शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥
देवकी मथुरायान्तु पाताले परमेश्वरी ।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥
करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥
अभयेत्युष्णतीर्थेषु नितम्बा विन्ध्यपर्व्वते ।
माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरीपुरे ॥
छागलण्डे प्रचण्डा तु चण्डिकामरकण्टके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥
देवमाता सरस्वत्यां पारावारा तटे स्मृता ।
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ॥
सिंहिका कृतशौचे तु कार्त्तिके त्वतिशाङ्करी ।
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्ध्यपर्व्वते ॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमादेवी हिमाद्रौ तु तुष्टिर्विश्वेश्वरी तथा ॥
कपालमोचने शुद्धिर्माता कायावरोहणे ।
शङ्खोद्धारे ध्वनिर्नाम धृतिः पिण्डारके तथा ॥
कला तु चन्द्रभागायामच्छोदे शिवधारिणी ।
वेणायाममृता नाम बदर्य्यामुर्व्वशी तथा ॥
औषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ।
गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ।
सूर्य्यबिम्बे प्रभा नाम मातॄणां वैष्णवी मता ॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम् ॥
इमान्यष्टशतानि स्युः पीठानि जनमेजय ! ।
तत्संख्याकास्तदीशान्यो देव्यश्च परिकीर्त्तिताः ॥
सतीदेव्यङ्गभूतानि पीठानि कथितानि च ।
अन्यान्यपि प्रसङ्गेन यानि मुख्यानि भूतले ॥
यः स्मरेच्छृणुयाद्वापि नामाष्टशतमुत्तमम् ।
सर्व्वपापविनिर्म्मुक्तो देवीलोकं परं व्रजेत् ॥
एतेषु सर्व्वपीठेषु गच्छेद् यात्राविधानतः ।
सन्तर्पयेच्च पित्रादीन् श्राद्धादीनि विधाय च ॥
कुर्य्याच्च महतीं पूजां भगवत्या विधानतः ।
क्षमापयेज्जगद्धात्रीं जगदम्बां मुहुर्मुहुः ॥
कृतकृत्यं स्वमात्मानं जानीयाज्जनमेजय ! ।
भक्ष्यभोज्यादिभिः सर्व्वान् ब्राह्मणान् भोजये-
त्ततः ॥
सुवासिनीः कुमारीश्च बटुकादींस्तथा नृप ! ।
तस्मिन् क्षेत्रे स्थिता ये तु चाण्डालाद्या अपि
प्रभो ! ॥
देवीरूपाः स्मृताः सर्व्वे पूजनीयास्ततो हि ते ।
प्रतिग्रहादिकं सर्व्वं तेषु क्षेत्रेषु वर्ज्जयेत् ॥
यथाशक्ति पुरश्चर्य्यां कुर्य्यान्मन्त्रस्य पार्थिव ! ।
मायाबीजेन देवेशीं तत्तत्पीठाधिवासिनीम् ॥
पूजयेदनिशं राजन् ! पुरश्चरणतत्परः ।
वित्तशाठ्यं न कुर्व्वीत देवीभक्तिपरो नरः ॥
य एवं कुरुते यात्रां श्रीदेव्याः प्रीतमानसः ।
सहस्रकल्पपर्य्यन्तं ब्रह्मलोके महीयते ॥
वसन्ति पितरस्तस्य सोऽपि देवीपुरे सदा ।
अन्ते लब्ध्वा परं ज्ञानं भवेन्मुक्तो भवाम्बुधेः ॥")

अन्यानि पीठादीनि काशीपुराणे ७० । ११ अध्यायेषु द्रष्टव्यानि । ० । पीठस्थानन्तु कामरूपे द्रष्टव्यः । पीठदेवतापूजनं आह्निकशब्दे ।

पीठकेलिः, पुं, (पीठे आसने केलिर्नर्म्मास्येति ।) पीठमर्द्दनायकः । यथा,—
"विटश्चाटुकः षट्पदः कामकेलिर्विदूषकः ।
पीठकेलिः पीठमर्द्दो भविलक्षिद्दूरो विटः ॥"
इति त्रिकाण्डशेषः ।

पीठमर्द्दः, पुं, (मर्द्दयतीति । मर्द्द + अण् । पीठस्थापनस्य मर्द्दः ।) नायकविशेषः । तल्लक्षणम् । कुपितस्त्रीप्रसादकः । उदाहरणं यथा,—
"कोऽयं कोपविधिः प्रयच्छ वचनामृतं नो
बाला
पीयूषद्रवदीर्घिकापरिमलैरामोदिता दिक्तटी ।
आक्षेपो वा भ्रूकुटिकोपनमिदं वार्य्यतां
तत्
येऽसौ कुप्यसि तस्य सुन्दरि ! तवोरन्यानि
वन्दामहे ।
नर्म्मसचिवोऽप्ययमेव ।" इति रसमञ्जरी । (अयं हि नायकस्य उपनायकानामन्यतमः । इति साहित्यदर्पणम् ।३।४२ । नायकप्रियः । अतिधृष्टः । यथा, मेदिनी । दे, ५० ।
"पीठमर्द्दोऽतिधृष्टे स्यान्नायकस्य प्रियेऽपि च"
यथा, महाभारते । ४ । ५० । १६ ।
"प्रेषयति मां विराटस्तु कटुकं वदतो नराः ।
रक्षिनः पीठमर्द्दांश्च स्वस्य रोषाय वैस्मा ।")

पीठसर्पी, [न्] त्रि, (पीठेन सर्पतीति । सृप + णिनिः ।) खञ्जः । तत्पर्य्यायः । पीठगः २ । इति हारावली ॥

पीठी, स्त्री, (पीठ + स्वार्थे ङीप् ।) आसनम् । इति शब्दरत्नावली । पीँड़ी इति भाषा ।

पीड, ऌ ङ बाधे । गाहे । इति कविकल्पद्रुमः । (चुरा० परं० सकं० सेट् ।) बाधो विहतिः । गाहो विलोडनम् । ऌ, अपीपिडत् अपिपीडत् । ङ, पीडयति शत्रुं लोकः । पीडयति वस्त्रं कामी । इति दुर्गादासः ।

पीड़नं, क्ली, (पीड बाधे अवगाहे च + भावे ल्युट् ।) शस्यादिजातधान्यादेः करचरणाभ्यां पीडनम् । यन्त्रकर्त्तनादिव्यापारः । इति केचित् । मर्द्दनम् । इति मेदिनी । इति भरतः । तत्पर्य्यायः । अवमर्द्दः २ । इत्यमरः । २ । ८ । १०८ ।
(यथा, देवीभागवते । ३ । १५ । १६ ।
"पीड़नेनैव वाक्चाला कामा दूरे ...")

दुःखनम् । यथा,—
"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् ॥"
इति दायभागधृतमनुवचनम् ॥
मर्द्दनम् । टिपन चापन इत्यादि भाषा । यथा,—
"गर्भोऽभिघातविषमाशनपीडनाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन ॥"
इति माधवकरः ॥

पीडा, स्त्री, (पीडनमिति । पीड + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति अङ् । ततष्टाप् ।) पीडनम् । तत्पर्य्यायः । बाधा २ व्यथा ३ दुःखम् ४ आमनस्यम् ५ प्रसूतिजम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९ । इत्यमरः । १ । ९ । ३ ॥ आबाधा १० । इति हलायुधः ॥ आमानस्यम् ११ । इति रायमुकुटः ॥ (शूलम् १२ रुक् १३ वेदना १४ आर्त्तिः १५ तोदः १६ व्यथा १७ । इति वैद्यकरत्नमाला ॥ यथा, मनुः । ७ । १६९ ।
"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः ।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत् ॥")
एषां पीडादीनां मध्ये विशिष्टसाधनी ये दुःखकष्टकृच्छ्राभीलास्ते त्रिविधाः । या आध्यात्मिकाधिभौतिकाधिदैविकतापत्रयभेदेन त्रिविधा । आध्यात्मिकोऽपि द्विविधः । यथा,—
"आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥"
[illegible] । १ । ७ ।
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्य्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥
गर्भजन्मजराज्ञानमृत्युनारकजं तथा ।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ! ॥"
इति विष्णुपुराणे । ६ । ५ । १—८ ॥
कृपा । शिरोमाला । सरलद्रुः । इति मेदिनी । डे, १० ॥

पीडितं, त्रि, (पीड + क्तः । यद्वा, पीडा जाताऽस्येति तारकादित्वात् इतच् ।) क्लीबे कर-णम् । बाधितम् । व्यथितम् । इति मेदिनी । ते, १२१ ॥ मर्द्दितम् । इति हेमचन्द्रः ॥ रतबन्ध-

यातः पीडापर्य्यायोऽयम् । (मन्त्रभेदः । यथा, तन्त्रसारे ।
"शङ्खचार्य्याधिका मन्त्रा दशका: पीडिता-[दयः ।)

पीतं, क्ली, (पा + भावे क्तः ।) पानम् । इति मेदिनी । ते, ३४ ॥ (पीतो वर्णोऽस्त्यस्येति । अच् । पीताभत्वादस्य तथात्वम् ।) हरितालम् । इति राजनिर्घण्टः ॥ (हरिचन्दनम् । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"पीतसारं सुपीतञ्च तत्पीतं हरिचन्दनम् ॥")

पीतः, पुं, (पिबति वर्णान्तरमिति । पा + कर्त्तरि औणादिकः क्तः ।) वर्णविशेषः । हलदिया इति भाषा । तत्पर्य्यायः । गौरः २ हरिद्राभः ३ । इत्यमरः । १ । ५ । १४ ॥ कुसुम्भः । अङ्कोठः । शाखोटः । पुष्परागः । इति राजनिर्घण्टः ॥
पीतवस्तूनि यथा,—
"पीतानि मधु-१ जीवे-२ न्द्र-३ गरुड़-४ स्वरसत्-५
पटाः ६ ।
गौरी-७ शम्बर-८ गोमूत्र-९ मधु-१० गोरस्या-११
रजः १२ ।
हरिद्रा १३ रोचना १४ रीति-१५ गन्धके १६ दीप-
१७ चम्पके १८ ।
किञ्जल्क-१९ यक्षधूपे-२० ष्टाग्नि-२१ हरिताल-२२
मनःशिलाः २३ ।
कर्णिकारम् २४ चक्रवाक-२५ चामरी २६
पाटिकासुमम् २७ ।
केशवोडुक- चन्दक-२८ पराग-३० कनका-
दयः ३१ ॥" * ॥
पीतश्वेतवाचकानि यथा,—
"पीतश्वेतौ गौर-१ हिमराज-२ कपर्द-३ मधु-४
हरि-५ तार्क्ष्याः ६ ।
हेमक्षौमा-७ पारद-८ महारजत-९ पद्म-१०
कलधौताः ११ ॥"
अस्यार्थः । गौरः श्वेतपीतयोः । हिमराजो यवकृष्णयोः । कपर्दः शम्भुजटाजूटवराटयोः । मधुर्मद्यविशेषयोः । हरिः पिङ्गलहरितयोः । तार्क्ष्यौ गरुडः पक्षी उच्चैःश्रवाः । हेमक्षौमः हेमोऽयं हेमः पक्षे हिमस्थानम् । पारदं सुवर्णपारदयोः । महारजतं सुवर्णकुसुम्भयोः । पद्मः सर्वमहाहृदयोः । कलधौतं हेमरूप्ययोः ।
"हलोभितारकूटाख्यः सर्वकोमलमद्युतिः ।
हस्तोरवतमालिमाश्लिष्टवपुरित्युक्तः ॥"
अस्यार्थः । तारकूटो वर्ण्यपदः पक्षे आरकूटो रीतिः । सुवर्णमनर्घं बन्धकं । कोमल तालकार्जित हरितकपत्थकः । पक्षे कोमल-हितः नव तालकुसुमः । रामदेवोऽपि मैत्रोद-शेषः कोलपत्र ॥ ॥ पीतत्वाभासवाचकानि यथा,
"पीतत्वाभो ह्लकाम्बर-१ मधुलिह्-२ भाव-धनाः ३ ।
विद्युत्ताम्रा ४ काञ्चन-५ वह्नि-६ कर्पूर-चामराः ७ ॥"
अस्यार्थः । हलायुधं त्रिपुरसं हरितसारस्वतैः । मधुलिह् मधुदग्धाक्ष्यौ । भावधनौ घन-

तनसुतत्रयोः । विद्युत्ताम्रः मेघतडित्सम्बो-न्धयोः । आम्रदेशो सर्वाम्बरतुच्छयोः । हरिः कपिलपयोः । भवेत्स्वाप: सुवर्णसुन्दर-घटघटनुकम्पयोः । इति कविकल्पलता ॥ (पर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ८३ ।
"प्रथमः सर्व्वसङ्घातः सुजन्मा नाम पर्व्वतः ।
पीतस्तु मध्यमस्तत्र ह्यान्तकोम्भमयो गिरिः ॥")

पीतं, त्रि, (पीतवर्णोऽस्त्यस्येति । अच् ।) पीत-वर्णयुक्तम् । इति मेदिनी । ते, ३४ । (यथा, महाभारते । ४ । ४१ । २० ।
"ये त्विमे निशिताः पीताः पृथवो दीर्घवाससः ।
हैमपुङ्खास्त्रिपर्व्वाणो राज एते महाशराः ॥"
पा + कर्म्मणि क्तः ।) सम्पानम् । यथा,—
"हालाहलमपि पीतं बहुशो भिन्दापि भक्षिता
भवता ।
अनयोरन्यतरस्योः किमनन्तरं मद पीतम् ॥"
इत्युद्भटः ॥
(पीतं पानमस्यास्तीति । अच् । यद्वा, पीनं कोर घोरं वा येन इत्यत्र रलोपः । पीतकुम्भादि-कम् । यथा, रघौ । ५ । १ ।
"अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥")

पीतकं, क्ली, (पीत + "संज्ञायां कन् ।" ५ । ३ । ७५ । इति स्वार्थे कन् ।) हरितालम् । इत्यमरः ॥ (पीतेन पीतवर्णेन कायतीति । कै + कः ।) कुङ्कुमम् । इति जटाधरः ॥ (अस्य पर्य्यायो यथा, यथा,—
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत् ।
सूक्ष्मकेसरमारक्तं पद्मगन्धि तदुत्तमम् ॥
वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरं मतम् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेसरम् ॥
कुङ्कुमं पारसीकेयमधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेसरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अगुरु । पद्मकाष्ठम् । रीतिः । माक्षिकम् । इति राजनिर्घण्टः ॥ मधुकम् । पीतशालः । इति रत्नमाला ॥ तोयात्कर्षकः । हरिद्रा । विंश-रागकः । इति राजनिर्घण्टः ॥ (पीतेन पीतवर्णेन इव कायति । पीत + "संज्ञायां ... कन् ।" ५ । ३ । ७५ । इत्यत्र "पीतात् कन् ।" इति वार्त्तिकोक्त्या कन् । पीतवर्णविशिष्टे पीत-वर्णविशिष्टे च त्रि । पीत + स्वार्थे कन् । पीतवर्णे, पुं । यथा, महाभारते । १२ । १८४ । ५ ।
"शुक्लवर्णो [illegible] [illegible] पीतकः ।
[illegible] पीतको वर्णः [illegible] ॥")

पीतकदली, स्त्री, (पीता कदलीव । [illegible] ।) स्वर्णकदली । इति राजनिर्घण्टः ॥

पीतकद्रुमः, पुं, (पीतको द्रुम इति नित्यकर्म्मधारयः ।) सरलद्रुमः । इति राजनिर्घण्टः ॥ (सरलशब्देऽस्य विवरणं विज्ञेयम् ॥)

पीतकन्दं, क्ली, (पीतः कन्दोऽस्य ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतकरवीरकः, पुं, (पीतः करवीर इति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) पीतवर्णकरवीरपुष्पवृक्षः । तत्पर्य्यायः । पीतप्रसवः २ सुगन्धिकुसुमः ३ । अस्य गुणाः । श्यामाश्वकरवीरगुणतुल्याः । इति राजनिर्घण्टः ॥

पीतकावेरं, क्ली, (कुत्सितं वेरं शरीरं कावेरम् । पीतं कावेरं कुत्सितशरीरमपि यस्मात् ।) कुङ्कुमम् । पित्तलम् । इति मेदिनी । रे, १०५ ॥ (विवृतिरस्य कुङ्कुमपित्तलशब्दयोर्ज्ञेया ॥)

पीतकाष्ठं, क्ली, (पीतं काष्ठमिति नित्यकर्म्मधारयः ।) पीतचन्दनम् । इति राजनिर्घण्टः ॥

पीतकीला, स्त्री, (पीता कीला कीलतुल्या कलीति नित्यकर्म्मधारयः ।) आवर्त्तकीलता । इति राजनिर्घण्टः ॥

पीतघोषा, स्त्री, (पीतानि पुष्पाणि सन्त्यस्याः इति पीता पीतपुष्पविशिष्टा । ततः पीता घोषेति कर्म्मधारयः ।) पीतपुष्पघोषालता । इति रत्नमाला ॥ अस्याः पर्य्यायः घोषकशब्दे द्रष्टव्यः ॥

पीतचन्दनं, क्ली, (पीतं चन्दनमिति नित्यकर्म्मधारयः ।) पीतवर्णचन्दनम् । तत्तु मलयदेशे प्रसिद्धम् । कलम्बक इति ख्यातम् । तत्पर्य्यायः । पीतगन्धम् २ कालेयम् ३ पीतकम् ४ माधवप्रियम् ५ कालेयकम् ६ पीतकाष्ठम् ७ वर्व्वरम् ८ । इति राजनिर्घण्टः ॥ कालीयकम् ९ कालीयम् १० पीताभम् ११ हरिचन्दनम् १२ हरिप्रियम् १३ कालसारम् १४ कालानुसार्य्यकम् १५ । अस्य गुणाः । रक्तचन्दनगुणतुल्यगुणत्वम् । व्यङ्गनाशित्वञ्च । इति भावप्रकाशः ॥ शीतलत्वम् । तिक्तत्वम् । कुष्ठश्लेष्मकण्डूविचर्च्चिकादद्रुक्रिमिनाशित्वम् । कान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥

पीतचम्पकः, पुं, (पीतं चम्पकमिव प्रिया यस्य ।) प्रदीपः । इति जटाधरः ॥ (पीतं चम्पकं तत्पुष्पमस्य ।) पीतवर्णचम्पकपुष्पवृक्षश्च ॥

पीततण्डुलः, पुं, (पीतस्तण्डुलोऽस्य ।) कङ्गुनी । इति राजनिर्घण्टः ॥

पीततण्डुला, स्त्री, (पीतस्तण्डुलोऽस्याः ।) चविकावृक्षः । इति राजनिर्घण्टः ॥

पीततुण्डः, पुं, (पीतं तुण्डं यस्य ।) कारण्डवपक्षी । तत्पर्य्यायः । मधुर्ब्बलिः २ सुगृहः ३ । इति त्रिकाण्डशेषः ॥

पीतता, स्त्री, (पीत + तल् + टाप् ।) हरिद्राभता । पीतत्वम् । पीतशब्दात् भावार्थे तत्प्रत्ययनिष्पन्ना । इति व्याकरणम् ॥ (यथा, महाभारते । ३ । १६८ । २६ ।
"तापयोऽपि द्रुमा धर्म्मे हिमाद्रौ च पर्व्वते ।
विश्वं चं पीततां यान्ति चतुर्द्दा वैर रव च ॥")

पीततैला, स्त्री, (पीतं तैलमस्याः ।) ज्योतिष्मती लता । इति जटाधरः ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥

पीतदारु, क्ली, (पीतञ्च तत् दारु चेति ।) देवदारु । इत्यमरः । २ । ४ । ५३ ॥ (पर्य्यायोऽस्य यथा,—
"सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥"
इति वैद्यकरत्नमालायाम् ॥)
सरलः । इति रत्नमाला ॥ हरिद्रुः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतदुग्धा, स्त्री, पीतं दुग्धं यस्याः यया वा । धेनुष्या । दुग्धबन्धके संस्थिता गौः । इति हेमचन्द्रः ॥ (पीतं पीतवर्णं दुग्धं क्षीरमस्याः । कटुपर्णी । चोक इति भाषा ॥ यथास्याः पर्य्यायः ।
"कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हिमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतद्रुः, पुं, (पीतो द्रुरिति नित्यकर्म्मधारयः ।) सरलद्रुमः । दारुहरिद्रा । इत्यमरः । २ । ४ । ६०, २ । ४ । १०१ ॥ (यथास्य पर्य्यायः ।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतनं, क्ली, (पीतं करोतीति । तत्करोतीति णिच् । ततो ल्युः । यद्वा, पीतं पीतवर्णं नयतीति । पी + नः ।) कुङ्कुमम् । (यथा, श्रीकण्ठचरिते । ८ । १० ।
"अपघृत्य पीतनमशेष-
ममरसुदृशां शरीरतः ।
भीत इव सहनवाभिमुखो
प्रययाय पूर्व्वसविताथ पयोमरः ॥")
हरितालम् । पीतदारु । इत्यमरमेदिन्यौ ॥

पीतनः, पुं, (पीतं करोतीति । णिच् । ततो ल्युः ।) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥ आम्रातकः । इति मेदिनी । ने, ८९ ॥ (प्लक्षवृक्षः । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"प्लक्षोऽवरोहशाखी जटी पर्क्कटी च पीतनः ।
मङ्गल्यो गर्द्दभाण्डश्च स्यात् कपीतनः सुपार्श्वकः ॥")

पीतनकः, पुं, (पीतन एव । पीतन + स्वार्थे कन् ।) आम्रातकः । इति राजनिर्घण्टः ॥

पीतपर्णी, स्त्री, (पीतानि पीतवर्णानि पर्णानि यस्याः । ङीष् ।) वृश्चिकाली । इति शब्दचन्द्रिका ॥ बिछाटि इति भाषा ॥

पीतपादा, स्त्री, (पीतौ पादौ यस्याः ।) शारिकापक्षी । इति हेमचन्द्रः ॥ पीतवर्णचरणे, त्रि ॥

पीतपुष्पं, क्ली, (पीतानि पुष्पाणि यस्य ।) घोषकवृक्षः । इति राजनिर्घण्टः ॥ (कुङ्कुमम् । तत्पर्य्यायो यथा भावप्रकाशे ।
"कुङ्कुमं स्यात् पुष्पकं पीतपुष्पं ह्रस्वकम् ॥")
हरिद्राभकुसुमश्च ॥

पीतपुष्पः, पुं, (पीतानि पीतवर्णानि पुष्पाणि यस्य ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ चम्पकवृक्षः । इति राजनिर्घण्टः ॥ पीतझिण्टी । पिण्डीतकभेदः । इति रत्नमाला ॥ (हस्तिघोषः । यथा, वैद्यकरत्नमालायाम् ।
"पीतपुष्पोऽद्धारपुष्प इक्षुरो तारवर्णितः ॥"
राजकोषातकी । तत्पर्य्यायो यथा, भावप्रकाशे ।
"धामार्गवः पीतपुष्पो जालिनी कृतवेधना ।
राजकोषातकी चेति तथोक्ता राजिमत्फला ॥")

पीतपुष्पा, स्त्री, (पीतं पुष्पं यस्याः ।) इन्द्रवारुणी । झिण्टीवृक्षः । चाङ्गेरी । इति राजनिर्घण्टः ॥ (महाबला । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"स्यात्पीता अतिबला पीतपुष्पा महाबला ॥")

पीतपुष्पी, स्त्री, (पीतं पुष्पं यस्याः । जातित्वात् ङीष् ।) त्रपुषी । सहदेवी । महाकोषातकी । शङ्खिनी । इति राजनिर्घण्टः ॥

पीतफलः, पुं, (पीतानि फलानि यस्य ।) शाखोटवृक्षः । इति त्रिकाण्डशेषः ॥ कर्म्मारङ्गः । इति राजनिर्घण्टः ॥

पीतफलकः, पुं, (पीतफल एव । स्वार्थे कन् ।) शाखोटवृक्षः । इति भावप्रकाशः ॥

पीतवालुका, स्त्री, (पीता वालुकेव चूर्णवर्णो यस्याः ।) हरिद्रा । इति त्रिकाण्डशेषः ॥ पीतवर्णसिकता च ॥

पीतबीजा, स्त्री, (पीतं बीजं यस्याः ।) मेथिका इति राजनिर्घण्टः ॥ पीतवर्णबीजयुक्ते, त्रि ॥

पीतभृङ्गराजः, पुं, (पीतो भृङ्गराजः ।) पीतभृङ्गराजः । पीत केशुरिया इति भाषा । तत्पर्य्यायः । स्वर्णभृङ्गारः २ हरिप्रियः ३ देवप्रियः ४ वन्दनीयः ५ मार्कवः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामदोषशोथहारित्वम् । तथा पीतो रसायनः । इति राजनिर्घण्टः ॥

पीतमणिः, पुं, (पीतो मणिरिति नित्यकर्म्मधारयः ।) पुष्पराग । इति राजनिर्घण्टः ॥ (पुष्पराग-शब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पीतमाक्षिकं, क्ली, (पीतं माक्षिकम् ।) स्वर्णमाक्षिकम् । इति राजनिर्घण्टः ॥

पीतमुण्डः, पुं, (पीतः पीतवर्णो मुण्डः ।) हरिणविशेषः । पीता मुण्ड इति भाषा । तत्पर्य्यायः । मृगः २ अक्षीरः ३ प्रोतः ४ मृगः ५ खगरः ६ । इति हेमचन्द्रः । ४ । ३६० ॥

पीतमूलकं, क्ली, (पीतं मूलमस्य । कप् ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतयूथी, स्त्री, (पीता यूथी ।) स्वर्णयूथी । इति राजनिर्घण्टः ॥ (स्वर्णयूथीशब्देऽस्या विवृतिर्विज्ञेया ॥)

पीतरक्तं, क्ली, (पीतं रक्तञ्च । वर्णो वर्णेनेति समासः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीतरागं, क्ली, (पीतो रागो वर्णो यस्य ।) किञ्जल्कम् । सिक्थकम् । इति राजनिर्घण्टः ॥ पीतवर्णे, पुं । तद्वति, त्रि ॥

पीतरोहिणी, स्त्री, (पीता सती रोहतीति । रुह + णिनिः + ङीप् ।) काश्मरी । इति भावप्रकाशः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ॥")

पीतलः, पुं, (पीतं लातीति । ला + कः ।) पीतवर्णः । इति हेमचन्द्रः ।६।३०। तद्युक्ते, त्रि ॥

पीतलकं, क्ली, (पीतलेन पीतेन वर्णेन कायति प्रकाशते इति । कै + कः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पीतलोहं, क्ली, (पीतं लोहमिति कर्म्मधारयः ।) पित्तलभेदः । इति हेमचन्द्रः ।४।११४।

पीतवासाः, [स्] पुं, (पीतं वासो वस्त्रं यस्य ।) श्रीकृष्णः । इति हलायुधः ॥ पीतवस्त्रयुक्ते, त्रि ॥ (यथा, महाभारते । २ । ४३ । ५२ ।
"यः शङ्खचक्रगदापाणिः पीतवासाः प्रतिमः ।")

पीतवृक्षः, पुं, (पीतो वृक्षः ।) श्योनाकप्रभेदः । सरलद्रुमः । इति राजनिर्घण्टः ॥ (यथाऽस्य पर्य्यायः ।
"सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतशा(सा)लः, पुं, (पीतः शालो वृक्षविशेषः ।) असनवृक्षः । इति शब्दचन्द्रिका ॥ (यथा, कालिकापुराणे ६८ अध्याये ।
"पीतशालः परिमलो विमर्द्दोत्थगन्धकः ॥")

पीतसारं, क्ली, (पीतः सारो यस्य ।) पीतवर्णचन्दनम् । हरिचन्दनम् । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"पीतसारं सुशीतञ्च तत्पीतं हरिचन्दनम् ॥")

पीतसारः, पुं, (पीनः पीतवर्णः सारो यस्य ।) मलयजः । गोमेदकमणिः । इति मेदिनी । रे, २८१ ॥ अङ्कोठवृक्षः । इति जटाधरः ॥ तुरुष्कः । शीतकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"सीतकः पीतसारश्च पीतशालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥")

पीतसारकः, पुं, (पीतः सारो यस्य । कप् ।) निम्बवृक्षः । अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥

पीतसारि, क्ली, (पीतं पीतवर्णं करोति प्राप्नोतीति । कृ + इनिः ।) सौवीराञ्जनम् । इति शब्दचन्द्रिका ॥

पीतसालकः, पुं, (पीतः सालकः सालवृक्षः ।) पीतवर्णशालवृक्षः । पेयासाल इति भाषा । तत्पर्य्यायः । सर्ज्जकः २ असनः ३ बन्धूकपुष्पः ४ प्रियकः ५ जीवकः ६ । इत्यमरः । २ । ४ । ४१ ॥ अस्य पर्य्यायान्तरं गुणाश्च असनशब्दे द्रष्टव्याः ॥

पीतस्फटिकः, पुं, (पीतः स्फटिक इति कर्म्मधारयः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीता, स्त्री, (पीतो वर्णोऽस्त्यस्या इति । अच् । टाप् ।) हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"हरिद्रा पीतका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका ॥")
दारुहरिद्रा । महाज्योतिष्मती । कपिलशिंशपा । प्रियङ्गुः । गोरोचना । इति राजनिर्घण्टः ॥ अतिविषा । इति शब्दचन्द्रिका ॥ (पीतवर्णयुक्ते, त्रि । यथा, विश्वकर्म्मप्रकाशे । १ । २४ ।
"श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्व्वशः ॥")

पीताङ्गः, पुं, (पीतं अङ्गं यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

पीताब्धिः, पुं, (पीतः अब्धिः समुद्रो येन ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ॥ (अगस्त्यमुनेः समुद्रपानकथा यथा, महाभारते । ३ । १०५ । १—६ ।
"समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥
एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः ।
समुद्रमपिबत् क्रुद्धः सर्व्वलोकस्य पश्यतः ॥
पीयमानं समुद्रन्तु दृष्ट्वा सेन्द्रास्तदामराः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ॥
त्वं नस्त्राता विधाता च लोकानां लोकभावन ॥
त्वत्प्रसादात् समुच्छेदं न गच्छेत् सामरं जगत् ॥
संपूज्यमानस्त्रिदशैर्महात्मा
गन्धर्व्वतूर्य्येषु नदत्सु सर्व्वशः ।
दिव्यैश्च पुष्पैरवकीर्य्यमाणो
महार्णवं निःसलिलं चकार ॥")

पीताम्बरः, पुं, (पीतं अम्बरं वस्त्रं यस्य ।) विष्णुः । इत्यमरः ।१।१।१९। (यथा, विष्णुपुराणे ।१।।
"[illegible] माधवोऽपि ।
बालस्यैवैष लीलाविधिमयमचरत् साधु पीताम्बरस्य ॥")
नटः । इति मेदिनी । रे, २८१ ॥ पीतवस्त्रयुक्ते, त्रि । हरिद्राभवस्त्रे, क्ली ॥ (यथा,—
"पीताम्बरधरः [illegible] ॥"
इति पुराणम् ॥)

पीताश्मा, [न्] पुं, (पीतः अश्मा ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥ (विवरणमस्य पुष्परागशब्दे ज्ञातव्यम् ॥)

पीतिः, पुं, (पिबतीति । पा + क्तिच् । "घुमास्थागापेति ।" ६ । ४ । ६६ । इतीत्वम् ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥

पीतिः, स्त्री, (पा + भावे क्तिन् ।) पानम् । इति मेदिनी । ते, १३ ॥ (पीयतेऽनयेति । करणे क्तिन् ।) सुरा । इति शब्दचन्द्रिका ॥

पीतिका, स्त्री, (पीतो वर्णोऽस्त्यस्या इति । ठन् ।) हरिद्रा । इति रत्नमाला ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ स्वर्णयूथी । इति जटाधरः ॥

पीती, [न्] पुं, (पीतं पानं प्राचुर्य्येणास्त्यस्येति । इनिः ।) पीतिः । घोटकः । इत्यमरटीकायां रायमुकुटः ॥

पीतुः, पुं, (पिबति रसादीनिति । पा + "पः किच ।" उणां १ । ७१ । इति तुन् । स च कित् । कित्वात् ईत्वम् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः ॥ यूथपतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीथं, क्ली, (पीयते इति । पा + "पातृतुदीति ।" उणां २ । ७ । इति थक् ।) जलम् । इति हेमचन्द्रः ॥ घृतम् । इत्युणादिकोषः ॥ (पिबति रसादीनिति । पा + कर्त्तरि थक् ।) सूर्य्यः । अग्निः । कालः । इति सिद्धान्तकौमुदी ॥

पीथिः, पुं, (पीति + पृषोदरादित्वात् तस्य थः ।) पीतिः । घोटकः । इत्यमरटीकायां स्वामी ॥

पीनः, त्रि, (प्यै प्यायी इ वृद्धौ + क्तः । "प्योरितश्च ।" ६।१।२८। इति पिभावः नः ।) स्थूलः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, आर्य्यासप्तशत्याम् । ३६१ ।
"वक्षःस्थलपतने मम [illegible] न मौलिमालभवीः ।
पीनोत्तुङ्गस्तनभरदूरोन्नतं रतपाली ॥")

पीनसः, पुं, (पीनं स्थूलमपि जनं स्यति नाशयतीति । षो + कः ।) नासिकारोगविशेषः । पीनास इति भाषा । तत्पर्य्यायः । प्रतिश्यायः २ । इत्यमरः । २ । ६ । ५१ ॥ अपीनसः ३ प्रतिश्यायः ४ । इति भरतः ॥ नासिकामयः ५ । इति शब्दरत्नावली ॥ तस्य निदानं यथा,—
"आनह्यते यस्य विशुष्यते च
प्रक्लिद्यते धूप्यति चैव नासा ।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं व्यवस्येत् तमपीनसेन ॥
तं चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥"
इति माधवकरः ॥
आमपीनसलक्षणं यथा,—
"शिरोगुरुत्वमरुचिर्नासास्रावस्तनुः स्वरः ।
क्षामः ष्ठीवति चाभीक्ष्णमामपीनसलक्षणम् ॥"
पक्वपीनसलक्षणं यथा,—
"आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति ।
स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम् ॥"
तच्चिकित्सा यथा,—
"सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु ।
[illegible] ॥"

कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी।
एषां चूर्णं कषायं वा दद्यादार्द्रकजै रसैः॥
पीनसे स्वरभेदे च तमकश्वासहलीमके।
सन्निपाते कफे वाते कासे श्वासे च शस्यते॥२॥
व्योषचित्रकतालीशतिन्तिडीकाम्लवेतसम्।
चव्याजाजीतुगाक्षीरमेलात्वक्पत्रपादिकम्॥
व्योषादिकमिदं चूर्णं पुराणगुडमिश्रितम्।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम्॥" ३॥

इति भावप्रकाशः॥

"पिप्पलीपिप्पलीमूलं मधुकं चव्यमेव च।
गर्भरोगज्वरश्वासपीनसमपनोदयेत्॥"

इति गारुडे १९८ अध्यायः॥

(अथ चिकित्सान्तरं यथा,—
"वातात् सकफवैरस्यं यथावत् पीनसे घृतम्।
निवेशनं पयस्योषं स्वेदनं धूममेव वा॥"
"दशमूलस्य निष्क्वाथे रास्नामधुककल्कवत्।
सिद्धं सर्पिस्तैलं दशमूलो गुणाः स्मृतम्।
स्निग्धस्याध्मापनैरोषं निर्वैरेचनपीनसम्॥
पित्तरक्तोत्थितं कृष्णं पाययेद्वा रसैर्घृतम्।
उत्थापयेत् मात्रया पित्तसोऽप्रतिरुधः।
निमायायामशाकुन्तैरावबाधविरतो भवेत्।
पैत्ते सर्पिः पिबेत् सिद्धं शृङ्गबेरसमन्वयः॥
पाचनार्थं पिबेत् पक्वे कायं वा रविरेचनम्।
पाठादिरथनैः सर्पिः पिप्पलीशालिपर्णिभिः॥
दन्त्या च साधितं तैलं नस्यं सम्यक् पीनसे।
पूयास्रे रक्तपित्तघ्नाः कषायो नवनानि च॥
माकराष्टादशपेन पीता वेगाः समीरणाः।
शिखरलोमवारश्च कषायस्तुतिलसकाः॥"
"गौरवारोचकस्तम्भे लङ्घनं कफपीनसे।
सेकाः शिरःस माकार्दं सिञ्चे शिरसि सर्पिषा॥
लघुनं सक्तुपूर्णेन व्योषवारसमायुतम्।
देयं कवलं कफघ्नं शिरो विरेचनम्॥
कफपीनसे पूतिनस्ये शालपाद्यकन्दुकं।
धूमः प्रयोज्योऽपीडश्च कटुभिः कफपीनसे॥
ततः स्निग्धा यथादोषं विकृष्टं स्निग्धं गुडूचुः।
चूर्णं प्रियः प्रधमनः कटुभिश्च शलाकया॥"
"स्निग्धश्च वार्त्ता पैत्ते दद्यं कफपीनसे।
समपीनसलक्षणोत्तिमाधवराजुभिः॥"
"वर्जयेत् पीनसे दुष्टे कामं शोषे च शोषजित्।
पारोषं धाराप्रिय क्रिया सर्वमपेपा च॥"

इति चरके चिकित्सास्थाने २६ अध्याये॥

"सम एव प्रतिश्यायाः सर्वकार्यनिकारिणः।
कालेन रोगजननाः जायन्ते दुष्टपीनसाः॥
बाधिर्यमान्ध्यमघ्राणं घोरांश्च नयनामयान्।
कासाग्निसादशोषांश्च वृद्धाः कुर्वन्ति पीनसाः॥"
इत्युत्तरतन्त्रे चतुर्विंशेऽध्याये सुश्रुतोक्तम्॥)

पीनसा, स्त्री, (पीनं स्थूलं स्यतीति। सो+कः। टाप्।) कर्कटी। इति राजनिर्घण्टः॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

पीनसी, [न्] त्रि, पीनसरोगी। पीनसमन्दाग्नि-कार्श्ये रोगग्रस्तविषयः॥ (यथा, सुश्रुते उत्तर-तन्त्रे २४ अध्याये।

"विलङ्घने: पाचनदीपनीये-
रुपाचरेत् पीनसिनं यथावत्।
बहुदोषसञ्चितकफोपसृष्टं
प्रच्छर्दयेत् पीनसिनं यथाःस्यात्॥")

पीनोध्नी, स्त्री, (पीनं स्थूलमूधोऽस्याः। "बहु-व्रीहेरूधसो ङीष्।" ४।१।२५। इति ङीष्। "ऊधसोऽनङ्।" ५।४।१३१। इति ऊधो-ऽनङ् बहुव्रीहिसमासादेशः।) पीवरस्तनी गौः। इत्यमरः। २।९।७१॥

पीपरिः, पुं, (अपि पिपर्त्तीति। पॄ+इन्। अपे-रलोपः। दीर्घश्च।) प्लक्षवृक्षः। इति राज-निर्घण्टः॥

पीय, प्रीणने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) पीयूषं प्रीणनधातुरयम्। इति दुर्गादासः॥

पीयुः, पुं, (पिबतीति। पा+"कृमृकृपीङ्-पीनह्लृलिभ्यः।" उणां। १।२०। इति कुः। निपातनात् युगागमः ईत्वं चाकारादेशः।) कालः। रविः। घूकः। इति मेदिनी। ये, ३०॥ काकः। इति धर्मनिष्ठारोद्यादिवृत्तिः॥ (हिंसके प्रतिकूले च त्रि। यथा, ऋग्वेदे।१।१०४।८।
"भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः॥"
"पीयोः प्रतिकूलस्य हन्तस्य।" इति तद्भाष्ये सायनः॥)

पीयूषं, क्ली, (पीयते इति। पीय प्रीणनधातुः+"पीयेरूषन्।" उणां। ४।७६। इति ऊषन्।) अमृतम्। इत्यमरः। १।१।५१॥ (यथा, कामन्दकीये। २६। १८।
"दारचन्द्रमसयथान्तो मणिः पीयूषपादयाम्॥")
दुग्धम्। इति राजनिर्घण्टः॥ (यथा,—
"पानीयं श्रमनाशनं कफहरं मूर्च्छापिपासापहं
तन्द्राच्छर्दिविबन्धहृद्बलकरं निद्राहरं तर्पणम्।
हृद्यं गुप्तरसं ह्यजीर्णशमकं नित्यं हितं शीतलं
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम्॥"
इति भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे॥)

पीयूष, पुं, क्ली, (पीय+ऊषन्।) अभिनवं पयः। नवप्रसूताया गोः षडहाद्यान्तर्वर्त्ति दुग्धम्। इत्यमरभरतौ॥
"अथ पीयूषपिबं वर्ष मन्दिरायापि।"

इति छन्दोऽर्णवः॥

"आगमदाखमक्षं चोरं पेयूष उच्यते॥"

इति शब्दरत्नावली॥

पीयूषमहाः, [स्] पुं, (पीयूषममृतमयं महः किरणं यस्य। यद्वा, पीयूषमिव महो यस्य।) चन्द्रः। इति शब्दरत्नावली॥

पीयूषरुचिः, पुं, (पीयूषं पीयूषमयी रुचिर्दीप्तिर्यस्य।) चन्द्रः। इति हलायुधः॥ (पीयूषे अमृते रुचिर्यस्य।) अमरादिरपि॥

पील, रोधे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) रोधो। पीलः किवापिरोधः।

अकर्मिभावः स्तम्भः। पीलति वृक्षः। इति दुर्गा-दासः॥

पीलकः, पुं, (पीलति स्तम्भातीति। पील+ण्वुल्।) पिपीलिका। इति शब्दरत्नम्॥ (कालवर्ण-पक्षिविशेषः। यथा, वृहज्जातकालं-कारिकायाम्।
"कोकिला पिकपुत्रांश्च नित्यं पीलकान्तः॥")

पीलुः, पुं, (पीलति प्रतिष्टभ्नातीति। पील+"कृमृपारमब।" उणां। १।१०। इति कुः।) प्रसूनम्। परमाणुः। मतङ्गजः। काण्ड-खण्डम्। तालकाण्डः। इति मेदिनी। ले, १०॥ बाणः। शमिः। इति धरणिः॥ वृक्षविशेषः प्रसिद्धः फलवृक्षविशेषः। पीलु इति भाषा। तत्पर्यायः। गुडफलः २ स्रंसी ३। इत्यमरः।२।४।२८॥ शीतफलः ४ शाखी ५ विरेचनः ६ धानीफली ७ करभः ८ करभ-प्रियः ९॥ (यथा, महाभारते। ३।१०।११।
"उदपानोपलासश्च घृताः पीलुभिरोवृतैः॥")
अस्य फलगुणाः। पित्तदाहशोथकारित्वम्। पित्तदत्वम्। भेदकत्वम्। यत् स्वादु तिक्तं तत् नातिउष्णं त्रिदोषहरत्वञ्च। इति राज-निर्घण्टः॥

पीलुनी, स्त्री, (पील+बाहुलकात् उन। गौरा-दित्वात् ङीष्।) मूर्वा। इति रत्नमाला॥

पीलुपत्रः, पुं, (पीलुपत्रमिव पत्रमस्य।) मोरटा-लता। इति राजनिर्घण्टः॥

पीलुपर्णी, स्त्री, (पीलोरिव पर्णान्यस्याः।) यद्वा, पीलुप्रकाणि पर्णान्यस्याः। "पाककर्णपर्ण-पुष्पफलमूलबालोत्तरपदाच्च।" ४।१।६४। इति ङीष्।) मूर्वा। बिम्बिका। ओषधिभेदः। इति मेदिनी। णि, १०९॥

पीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) पीवति पीवः स्थूलः स्यादित्यर्थः। इति दुर्गादासः॥

पीव, [न्] त्रि, (प्यायते इति। प्यैङ् वृद्धौ+"श्वन्नुक्षन्।" उणां। १।१५७। इति कनिप् सम्प्रसारणञ्च। "हलः।" ६।४।२। इति दीर्घः।) स्थूलम्। इत्यमरः। ३।१।६१॥ (यथा, भागवते। ८। १८। २।
"पीवानं स्वस्थं पीवं मौष्टिकं दामबोपितम्।
न दृष्टोऽभवद्यालो वक्षोऽपि दरिपरेः॥")

पीवरः, त्रि, (प्यायते वर्धते इति। प्यैङ्+"छित्वरछत्वरधीवरपीवरमीवरचीवरतीवर-नीवरगह्वरकट्वरसंयद्वराः।" उणां। ३।१। इति ष्वरच्। सम्प्रसारणं दीर्घश्च।) स्थूल-वपुः। मोटा इति भाषा। तत्पर्यायः। पीनः १ पीवा २ स्थूलः ३। इत्यमरः। ३।१।६१॥ (यथा, आर्यासप्तशत्याम्। ३२०।
"यदचिन्तितं बलाद्विरहात् पीवरस्तनं करोति।
नितम्बं मुखम् मरुते निजकृत निश्चयः।"
पुं, तामसमन्वन्तरीयसप्तर्षिभेदः। यथा, मार्कण्डेये। ७४। ६८।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा ।
पीवरश्च तथा ब्रह्मन् ! सप्त सप्तर्षयोऽभवन् ॥")

पीवरस्तनी, स्त्री, (पीवरौ स्थूलौ स्तनौ यस्याः । "स्वाङ्गाच्चोपसर्जनादिति ।" ४ । १ । ५४ । इति ङीष् ।) पीनोध्नी । इत्यमरः ।२।९।७१॥ स्थूलस्तनयुक्ता नारी ॥ (यथा, भारवौ । ८ । १९ ।

"व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ॥")

पीवा, [न्] पुं, (प्यायते इति । प्यै ङ वृद्धौ + "श्याप्योः सम्प्रसारणम् ।" उणा० ४ । ११४ । इति कनिप् सम्प्रसारणञ्च । "हलः ।" ६ । ४ । २ । इति दीर्घः ।) बलवान् । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीवा, स्त्री, (पीयते इति । पी ङ पाने + बाहुलकात् वः । ततष्टाप् ।) उदकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीवरा, स्त्री, (पीवर + टाप् ।) अश्वगन्धा । शतावरी । इति राजनिर्घण्टः ॥ स्थूला च ॥

पीवरी, स्त्री, (प्यायते इति । प्यै + ष्वरच् । सम्प्रसारणं दीर्घः ङीप् च ।) शतमूली । इति रत्नमाला ॥ शालपर्णी । इति भावप्रकाशे ।१।१॥ तरुणी । गौः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (बर्हिषद्नामकपितॄणां मानसीकन्यानामन्यतमा । सा तु शुकदेवस्य पत्नी । यथा, हरिवंशे । १८ । ४९—५२ ।

"एतेषां मानसी कन्या पीवरी नाम विश्रुता ।
योगा च योगिपत्नी च योगिमाता तथैव च ॥
भविता द्वापरं प्राप्य युगं धर्म्मभृतां वरा ।
पराशरकुलोद्भूतं शुको नाम महातपाः ॥
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः ।
व्यासादरण्यां सम्भूतो विधूमाग्निरिवोज्ज्वलन् ॥
स तस्यां पितृकन्यायां पीवर्य्यां जनयिष्यति ।
कृष्णं गौरं प्रभुं शम्भुं तथा कन्यां तथैव च ॥")

पुंलिङ्गं, क्ली, (पुंसो लिङ्गं चिह्नम् ।) पुंचिह्नम् । शिश्नः । (यथा, महाभारते । ५ । १९४ । १ ।

"कञ्चित् कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव ।
आगन्तव्यं त्वया काले सत्यमेव वदस्व मे ॥")

शब्दवाचकानाम् पुं । इति कुमारः ॥ (पुंसो लिङ्गमत्रेति । पुंलिङ्गविशिष्टे, त्रि । यथा, महाभारते । ९ । ५८ । १७ ।

"पुंलिङ्गा इव मार्गेषु स्त्रीलिङ्गाः पुरुषाभवन् ।
दुर्द्दिने तदा राजन् ! पतिते तस्मिन् नृप ॥")

पुंवृषः, पुं, (पुमानिव वर्त्ततेति । वृष + कः ।) छुच्छुन्दरिकः । इति शब्दमाला । छुँचा इति भाषा ॥ (पुमान् गौः ।) वृषभः ॥

पुंश्चलः, पुं, (पुंश्चलीव । अवचारात् पुंस्त्वम् ।) व्यभिचारी । यथा, माघे ११ अध्याये ।

"[illegible] नृपः [illegible] ।
[illegible] ॥
[illegible] पुंश्चलाः ॥"

पुंश्चली, स्त्री, (पुंसो भर्त्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति । चल + अच् । गौरादित्वात् ङीष् ।) असती । इत्यमरः ।२।६।१०॥ अस्या अमरोक्तपर्य्यायः कुलटाशब्दे लिखितः । तद्भिन्नपर्य्यायो यथा, धृता १ दुष्टा २ धर्षिता ३ । इति शब्दरत्नावली ॥ लञ्जा ४ विशाच्चरी ५ अपारच्छा ६ । इति जटाधरः ॥ तस्याश्चरित्रदोषादि यथा,—

"अहो ! को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः ।
पुंश्चल्यो यो हि विश्वस्तो विधिना स विडम्बितः ॥
महिम्नश्च यशश्च धर्म्मेण सकुलेन च ।
वाञ्छितं नूतनं प्राप्य विनश्यति पुरातनम् ।
सदा स्वकर्म्मसाध्या या को वा तस्याः प्रियोऽप्रियः ॥
दैवे कर्म्मणि पैत्रे च पुत्रे बन्धौ च भर्त्तरि ।
दारुणं पुंश्चलीचित्तं सदा स्वव्यापारकर्म्मणि ॥
प्राणाधिकं रतिज्ञं सा मन्यते हृष्टा हि पुंश्चली ।
रतिप्रदं रत्यभिज्ञं विपद्दृष्ट्या हि पश्यति ॥
सर्व्वदा रतमस्त्येव पुंश्चलीनां न कुत्रचित् ।
दारुणा पुंश्चलीजातिर्दुर्जातिश्च सदा च ॥
निष्कृतिः कर्म्मभोगान्ते सर्व्वेषामस्ति निश्चितम् ।
न पुंश्चलीनां विप्रेन्द्र ! यावच्चन्द्रदिवाकरौ ॥
अन्यासां कामिनीनाञ्च कोटिं जन्मसु या दया ।
सा नास्ति पुंश्चलीनाञ्च कान्तं हन्तुं पुरातनम् ।
रतिज्ञं नूतनं प्राप्य विघ्नतुल्यं पुरातनम् ।
कान्तं दृष्ट्वा क्षिपत्येव सोपायेनावलीलया ॥
पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते ।
तिष्ठन्ति तानि न पराः पापिष्ठाः सन्ति केचन ॥
पुंश्चलीमन्दिरावासं सर्व्वपातकनिश्चितम् ।
दैवे कर्म्मणि पैत्रे च देयं न च तया जलम् ॥
अर्घं विष्ठा पयो मूत्रं पुंश्चलीनाञ्च निश्चितम् ।
दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत् ॥
शतवर्षं कालसूत्रे पचत्येव सुदारुणे ।
घोरान्धकारे कृमयो दशन्ति दिवानिशम् ॥
पुंश्चल्यन्नञ्च यो भुङ्क्ते दैवाद्यदि नराधमः ।
काककुम्भतं पुरुषं तत्र भवति निश्चितम् ॥
आयुःश्रीयशसां हानिरिह लोके परत्र च ।
तस्मादुग्रामिलापीयं पापमार्गं कलङ्कदम् ॥
पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम् ।
स्वप्ने च महापापं तीर्थस्नानादिशुध्यति ॥
कार्लं दानं व्रतञ्चैव जपञ्च देवपूजनम् ।
निष्फलं पुंश्चलीनाञ्च भारते कीर्त्तितं सदा ॥"

जारालिङ्गनकामपुंश्चलीनां रतौ दोषो यथा,—

"इन्द्रियतृप्तिमात्रा कामात् पुंश्चलीभिर्निषेवितः ।
परित्यक्तविषयधर्म्माभ्यासमाचरेत् ॥"

अथैव [illegible] यथा,
"[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
विष्टुदेहीनिर्जने देवा लोभान्मोघो यदा भवेत् ।
परदोषात् यथा मन्दं कुलटापि मतम्परम् ॥
सर्व्वेभ्यो द्विजबन्धुभ्यो विमुखीता भवेच्च सा ।
यो विप्रोऽसौ संगतो विप्रस्य पदे पदे ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ५१ । ६१ । १२ अध्यायाः ॥

पुंश्चिह्नं, क्ली, (पुंसः पुरुषस्य चिह्नम् ।) शिश्नः । इति हेमचन्द्रः । ३ । २७४ ।

पुंस, क मर्द्दे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) ओष्ठ्यवर्गशेषोपधः । संयोगाद्यनुस्वारः । तेन क्विपि पुंसोऽसुङित्यस्य इति पुमान् । मर्द्दोऽभिमर्द्दनम् । क, पुंसयति सर्पं राजा । इति दुर्गादासः ॥

पुंसवनं, क्ली, (पुमानिव सूते बलप्रदानेन पुरुषवत् जनयतीति । सू + करणे ल्युट् ।) दुग्धम् । इति हेमचन्द्रः । ३ । ४०४ ॥ (पुमान् सूयतेऽनेनेति । सू ङ स + करणे ल्युट् ।) संस्कारविशेषः । इति विशालकोषः ॥ (यथा, रघुवंशे । ३ । १० ।

"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥")

अस्येतिकर्त्तव्यता यथा । "गर्भेऽव्यक्ते तृतीयमासे प्रथमे वस्तुर्दिने तस्मिन् वापि कृतनित्यक्रियः [illegible] चन्द्रतारादिशुद्धौ ... [illegible] समाप्य स्नातायाः [illegible] द्विर [illegible] प्रादेशमात्रं [illegible] प्रमाणं [illegible] [illegible] कुर्य्यात् । यथा । प्रजापति-र्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृति-होमे विनियोगः ॐ भूः स्वाहा । प्रजापति-र्ऋषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृति-होमे विनियोगः ॐ भुवः स्वाहा । प्रजापति-र्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृति-होमे विनियोगः ॐ स्वः स्वाहा । ततः [illegible] वधूदक्षिणनासायां [illegible] हस्तेन [illegible] अनुष्टुप् छन्दो [illegible] देवता पुंसवने विनियोगः ।
ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे ॥
इत्येकं पुंसवनम् ॥ ० ॥

[illegible] पुंसवन- [illegible] ।
[illegible] ।
[illegible] इति [illegible] ॥ ३ ॥

ॐ यद्वामि सादनो यवमायस्या साक्षे परिक्रीणामि। इति गृह्यकर्मचैव द्वितीयं क्रयणम् ॥ २ ॥ ॐ यद्वामि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि। इति गृह्यकर्मचैव तृतीयं क्रयणम् ॥ ३ ॥ ॐ यद्वामि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि। इति गृह्यकर्मचैव चतुर्थं क्रयणम् ॥ ४ ॥ ॐ यद्वामि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि। इति गृह्यकर्मचैव पञ्चमं क्रयणम् ॥ ५ ॥ ॐ यद्वामि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि। इति गृह्यकर्मचैव षष्ठं क्रयणम् ॥ ६ ॥ ॐ यद्वामि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा परिक्रीणामि। इति गृह्यकर्मचैव सप्तमं क्रयणम् ॥ ७ ॥ ततः क्रीतौ यवगुञ्जौ यवेन सहैव हस्ताद्धारयेत्। प्रजापतिर्ऋषिरोषधी देवता न्यग्रोधशुङ्गाभ्यर्चने विनियोगः। ॐ ओषधयः सुमनसो भूत्वा अस्यां वीर्यं समाधत्त इयं कर्म करिष्यति। ततस्तां सम्वेष्टितामनवलोकितामाचार्यः पश्चात्पीठे स्थापयेत्। ततः स्नातोऽनवलोकितविनतः पत्नीनिरशितायां ब्रह्मचारी गर्भवती वा पुत्रकामा पत्नी वा ब्राह्मणः प्राकृतस्य धारायतो दीर्घावच्छिन्नेन धाराक्षमणेन पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमतः उत्तराग्रेषु कुशेषु पश्चिमाभिमुखीं वधूं पूर्वदिशाभिमुखो वा स्थित्वा तस्याः दक्षिणे नासापुटे शिञ्चेत्। प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्दक्षिणपाणिदक्षिणवायुश्च देवता पुत्रोत्पादने विनियोगः।

ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः।
पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् ॥

ततो महाव्याहृतिहोमं कृत्वा पूर्णां प्रादेशप्रमाणां घृताक्तां समिधमग्नौ हुत्वा प्रकृतं कर्म समाप्य पवित्रं प्राश्य ग्रामादिभ्यो होमादिकमर्द्धगतानां कर्म कृत्वा कर्मकारयित्रे ब्राह्मणाय दक्षिणां दद्यादिति पुंसवनम्।" इति दशकर्मपद्धतौ भवदेवभट्टः ॥ ८ ॥ अथ पुंसवनोक्तकाराः। रविमङ्गलबृहस्पतयः। मध्याह्ने। पूर्वाषाढा-स्वाती-पूर्वभाद्रपद-हस्त-श्रवण-पुष्य-पुनर्वसु-मृगशिरा-रेवती-चित्रा-उत्तरफल्गुनी-उत्तराषाढा-अश्विनी-धनिष्ठा-नक्षत्राणि। तिथयः। पक्षच्छिद्रा-रिक्ता-वर्जिताः। कुम्भसिंहवृषधनुर्मीन-मिथुनानि। विवाहवल्लारिष्टौ दशमांशगत-विहितकालवर्णलग्नात् परिक्रम्य गर्भधारण-दिवसादष्टमे मासि वा कर्त्तव्यम्। इति ज्योतिषम् ॥ ९ ॥ ज्योतिस्तत्त्वविदितः। यथा,—

श्रीराघोवाच।
"इमं पुंसवनं ब्रह्मन्! त्वया यद्वर्णितं पुरा।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥
श्रीशुक उवाच।
शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सार्वकामिकमादितः ॥
निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे।
पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ॥
अलं ते निरपेक्षाय पूर्णकाम! नमोऽस्तु ते।
महाविभूतिपतये नमः सकलसिद्धये ॥
यथा त्वं कृपया भूत्या तेजसा महिमौजसा।
जुष्ट ईशगुणैः सर्वैस्ततोऽसि भगवान् प्रभुः ॥
विष्णुपत्नि! महामाये महापुरुषलक्षणे।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपहरामीति। अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-स्नान-वासोपवीत-भूषण-गन्ध-पुष्प-धूप-दीपोपहाराद्युपचारान् सुसमाहितोपाहरेत्।
हविःशेषञ्च जुहुयादनले द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।
श्रियं विष्णुञ्च वरदावाशिषां प्रभवावुभौ।
भक्त्या सम्पूजयेन्नित्यं यदीच्छेत् सर्वसम्पदः ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा।
दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥
युवान्तु विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया ॥
तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥
त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।
गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् ॥
त्वं हि सर्वशरीर्य्यात्मा श्रीः शरीरेन्द्रियाशयाः।
नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ।
तथा म उत्तमश्लोक! सन्तु सत्या महाशिषः ॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह।
तन्निःसार्योपहरणं दत्त्वाचमनमर्च्चयेत् ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्च्चयेद्धरिम् ॥
पतिञ्च परया भक्त्या महापुरुषचेतसा।
प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥
बिभृयात् सर्वकर्म्माणि पत्न्या उच्चावचानि च।
कृतमेकतरेणापि दम्पत्योरुभयोरपि ॥
पत्न्यां कुर्य्यादनर्हायां पतिरेतत् समाहितः।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथञ्चन ॥
विप्रान् स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः।
अर्च्चेदहरहर्भक्त्या देवं नियममास्थिता ॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः।
अद्यादात्मविशुद्ध्यर्थं सर्व्वकामसमृद्धये ॥
एतेन पूजाविधिना मासान् द्वादश हायनम्।
नीत्वाथोपरमेत् साध्वी कार्त्तिके चरमेऽहनि ॥
श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्च पूर्व्ववत्।
पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥
आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥
आचार्य्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः।
दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥
एतच्चरित्वा विधिवद्व्रतं विभोः
रभीप्सितार्थं लभते पुमानिह।
स्त्री चैतदास्थाय लभेत सौभगं
श्रियं प्रजां जीवपतिं यशो गृहम् ॥
कन्या च विन्देत समग्रलक्षणं
पतिं त्ववीरा हतकिल्विषां गतिम्।
मृतप्रजा जीवसुता धनेश्वरी
सुदुर्भगा सुभगा रूपमग्र्यम् ॥
विन्देद्विरूपा विरुजा विमुच्यते
य आमयावीन्द्रियकल्पदेहम्।
एतत् पठन्नभ्युदये च कर्म-
ण्यनन्ततृप्तिः पितृदेवतानाम् ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्
होमावसाने हुतभुक् श्रीहरिश्च।
राजन्! महन्मरुतां जन्म पुण्यं
दितेर्व्रतञ्चाभिहितं महत्ते ॥"
इति श्रीभागवते ६ स्कन्धे पुंसवनव्रतवर्णनं १९ अध्यायः ॥ (पुंसः सूयते इति। कर्म्मणि ल्युट्।) गर्भः। इति श्रीधरस्वामी। यथा, भागवते। ५। २४। १६। "यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च।"॥ पुत्रोत्पादके, त्रि। यथा, भागवते। ६। १८। ४९।
"यमकुः कास्य कर्म्मेदं पीतं पुंसवनं व्रतम्।"
तथा च तत्रैव। ६। १९। १०—१८।
"स विप्रानुमतो राजा प्रतीक्ष्य क्षिपीकृतम्।
अवहाय सुरा पुरः पापान् धनान् वदारधीः।
सा तत् पुंसवनं राज्ञी प्राश्य वै पत्युराप्य।
गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजाः ॥")
पुंस्कोकिलः, पुं, (पुमान् कोकिलः।) पुरुषकोकिलपक्षी। तन्मुखपक्षि कोकिलशब्दस्य स्त्रीलिङ्गत्वात् समासे तद्वाचकोऽपि पुंसः पञ्चम्यन्ते अत्र न पुंवत् इति मतान्तरे निषेधः। इति रघुटीका व्याकरणम्। (यथा, कुमारे। १। ४५।
"चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज।")
पुंस्त्वं, क्ली, (पुंसः पुरुषस्य भावः। पुंस्+त्व।) शुक्रम्। इति हेमचन्द्रः। ३। २८३। पुरुषत्वञ्च। (यथा, मार्कण्डेये। १०। १४।
"योऽभ्यासोऽभ्यस्यता प्राणैः पुंस्त्वं स्त्रीत्वञ्च भुज्यते।
विभेद बहुधा देवः पुरुषैर्ल्लिङ्गिभिः स्थितः।")
पुंस्त्वविग्रहः, पुं, (पुंस्त्वस्य शुक्रस्य विग्रहो यत्र।) भल्लूकम्। इति राजनिर्घण्टः ॥
पुक्कसः, पुं, (पुक् कुत्सितं कसति गच्छतीति। कस गतौ+अच्।) चण्डालः। इत्यमरः। २। १०। २०॥ (यथा, मार्कण्डेये। ११। १४।
"सकृद्यद्विधोऽधमः पुंसां निकृष्टो नरकारकः।
सम्प्रत्यपु भावनः कृष्णः पुक्कसो याति गर्हितः॥"
स तु निषादात् शूद्रायां जातो जातिविशेषः।
यथा, मनुः। १०। ४९।
"न शूद्रेण वर्णिते वैश्याजातैः पुक्कसैः।")

पुक्कशः, पुं, (पुक् कुत्सितं कशतीति । कश गतौ + अच् ।) चण्डालः । इत्यमरटीकायां भरतः ॥

पुक्कसः, पुं, (पुक् कुत्सितं कसतीति । कस गतौ + अच् ।) चण्डालः । (स तु निषादात् शूद्रायां जातः । यथा, मनुः । १० । १८ ।

"जातो निषादात् शूद्रायां जात्या भवति पुक्कसः ॥")

अधमे, त्रि । इति मेदिनीशब्दरत्नावल्यौ ॥

पुक्कसी, स्त्री, कालिका । नीली । इति मेदिनी-शब्दरत्नावल्यौ ॥ (पुक्कस + जातौ ङीष् । पुक्कस-स्त्रीजातिः । यथा, मनुः । १० । ३८ ।

"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।

पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥")

पुङ्खः, पुं, (पुमांसं खनतीति । खन + डः ।) काण्ड-मूलम् । इत्यमरः । ३ । ५ । १० ॥ पुच्छ इति ख्यातम् ॥ (अर्द्धर्चादित्वात् क्लीवलिङ्गोऽपि । यथा, रघुः । २ । ३१ ।

"सक्ताङ्गुलिः सायकपुङ्ख एव

चित्रार्पितारम्भ इवावतस्थे ॥"

मङ्गलाचारः । इति हेमचन्द्रटीका ।)

पुङ्गः, पुं, स्त्री, (पुञ्ज + पृषोदरादित्वात् साधुः ।) समूहः । इति शब्दचन्द्रिका ॥

पुङ्खलः, पुं, (पुङ्खं देहगत्वं लाति आदत्ते इति । पुङ्ख + ला + कः ।) आत्मा । इति भूरि-प्रयोगः ॥

पुङ्गवः, पुं, (पुमान् गौः । "गोरतद्धितलुकि ।" ५ । ४ । ९२ । इति टच् ।) वृषः । (यथा, हरिवंशे । ७५ । ३१ ।

"भवता रक्षिता गोका गोलोकश्च महालयम् ।

पश्यं पुङ्गवैः सार्द्धं सहांसः प्रयवेस्तथा ॥")

औषधभेदः । (पुमान् गौरिव मदकत्वादि-गुणादिलुपमितसमासः ।) उत्तरपदस्थः श्रेष्ठ-वाचकः । इति मेदिनी । वे, ३३ ॥ (यथा, भाग-वते । १ । ८ । ३८ ।

"इति मतिरुपकल्पिता वितृष्णा

भगवति सात्वतपुङ्गवे विभूम्नि ॥")

ऋषभौषधम् । मर्त्तरः । इति राजनिर्घण्टः ॥

पुच्छ, प्रमादे । इत्यमरटीकायां रायमुकुटधृत-धातुः ॥ (भ्वा-परं-अकं सेट् ।)

पुच्छः, पुं,स्त्री, (पुच्छतीति । पुच्छ प्रमादे + अच् ।) लाङ्गूलम् । इत्यमरः ।२।८।५० ॥ (यथा, देवी-भागवते । ६ । ७ । ५६ ।

"प्रख्यातेऽपायां देवान् पुच्छस्य धमयेच्च ।

न कथान् चकारेशो मत्रिकः परमाकुलः ॥")

पश्चाद्भागे, पुं । इति मेदिनी । छे, ५ ॥ (यथा, महाभारते । ७ । ६ । २८ ।

"तस्य क्षपणो मध्यमे पुच्छेनासन्न कर्मेदः ॥")

लोमवल्लाङ्गूले प्रचारे च, स्त्री । इत्युणादिकोषः ।

पुच्छटि, स्त्री, (पुच्छ प्रमादे + अटि किप् । पुच्छं प्रमादं अटतीति । अट गतौ + इन् ।) अङ्गुलि-स्फोटनम् । इति सिद्धान्तकौमुदी ॥ अङ्गुलिमट-काव इति भाषा ॥

पुच्छदा, स्त्री, (पुच्छमिव ददातीति । दा + कः ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

पुच्छी, [न्] पुं, (पुच्छोऽस्त्यस्येति । पुच्छ + इनिः ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥ कुक्कुटः । इति शब्दचन्द्रिका ॥ लाङ्गूलयुक्ते, त्रि ॥

पुञ्जः, पुं, (पिञ्जते पिञ्जयतीति वा । पिजि + अच् । पृषोदरादित्वात् साधुः ।) समूहः । राशिः । इत्यमरः । २ । ५ । ४२ ॥ (यथा, मार्कण्डेये । ८ । ८२ ।

"महीमयस्थिपुञ्जश्च शवमालोपलङ्कृतः ॥")

पुट, क चूर्णे । भासि । इति कविकल्पद्रुमः ॥ (चुरां-परं-चूर्णे सकं-भासि अकं-सेट् ।) क, पोटयति । भासि दीप्तौ । इति दुर्गादासः ॥

पुट, तु क संसर्गे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां परं-सकं-सेट् ।) पुटयति पुष्पं लवेन वनः संश्लिष्यतीत्यर्थः । इति दुर्गादासः ॥

पुट, शि श्लेषे । इति कविकल्पद्रुमः ॥ (तुदां-कुटां-परं-अकं-सेट् ।) शि, पुटति अपुटीत् पुपोट । श्लेषः सम्बन्धीभावः । इति दुर्गादासः ॥

पुटं, स्त्री, (पुटतीति । पुट संश्लेषे + कः ।) जाती-फलम् । इति राजनिर्घण्टः ॥ उपर्यधोभाजन-सम्पुटयुक्तत्वादिकपात्रहयमध्यस्थौषधपाकपात्रम् । धात्वादिमारणोपयुक्तात् पुटप्रकारानाह रस-प्रदीपे ।

"लोहादेरपुनर्भावक्रद्गुणत्वं गुणाप्तता ।

यत्किञ्चित् तस्य प्राप्ति सम्यक् पुटनाद्भवेत् ॥

गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके ।

वनोपलसहस्रेण पूरिते पुटनौषधम् ॥

कोष्ठे बद्धं प्रयत्नेन गोविष्ठोपरि धारयेत् ।

वनोपलसहस्रार्द्धं कोष्ठिकोपरि निःक्षिपेत् ॥

वह्निं विनिःक्षिपेत्तत्र महापुटमिति स्मृतम् ॥१॥

कोष्ठं गर्त्ता । गोविष्ठा गोइठा । इति महापुटम् ॥

तथा हस्तप्रमाणेन कुण्डे निम्ने तथायते ।

वनोपलकपूर्णेन पूर्वमध्ये विधारयेत् ॥

पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां दृढे ।

अधोऽर्द्धानि करकाणि चार्द्धान्युपरि निःक्षिपेत् ॥

इत्यर्द्धपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमम् ।

हस्तचतुर्भिरङ्गुलप्रमाणः स कलाः तेन

विंशद्रत्नप्रमाणैर्वर्षैः । अन्यत्रोक्तम् ।

आधारयो भराङ्कुश्च विंशदङ्गुलको मतः ॥

इति गजपुटम् ॥ २ ॥

अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते ॥ ३ ॥

निर्णिक्तमात्रके यानि स्थापितं कोष्ठं पुटम् ।

'अरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः ।

२ । ६ । ८६ ॥ निःसृतकनिष्ठया मुष्टोपलक्षितो हस्तोऽरत्निरित्यर्थः ।

षोडशाङ्गुलके तानि कल्पितं कौक्कुटं पुटम् ॥

यत् पुटं दीयते तानि तुल्यसंख्यैरुपोपलैः ।

कपोतपुटमेतन्तु कथितं पुटकर्मणि ॥ ५ ॥

गोवालादीन्द्रिसमूहं गम्भवूर्णैर्गोमयम् ।

गोवरं तन्तु तत्कार्यं पादे इत्यादि ॥

इतद्रूपाकारैर्दुकोष्ठे रोदीये दीयते पुटम् ।

तस्मिन्नर्द्धपुटं प्रोक्तं भिषग्भिः स्वल्पभस्मकृत् ॥६॥

इत्यर्द्धादे तुषैः पूर्णे मध्ये मूषां विधारयेत् ।

विमर्दितं स्वयेत्ताव्यं तद्वाच्यं पुटमुच्यते ॥"७॥

इति भावप्रकाशे पूर्वखण्डे २ भागः ॥

पुटः, पुं स्त्री, (पुटतीति । पुट श्लेषे + कः ।) अश्व-खुरः । इति शब्दरत्नावली ॥

पुटः, त्रि, (पुट् + कः ।) आच्छादनम् । पत्रादि-रचितः पुष्पाद्याधारः । यथा, रघुः । १ । ६५ ।

"दुग्ध्वा पयः पत्रपुटे मदीयं

पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥"

(यथा च मनौ । ६ । २८ ।

"ग्राममाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ।

प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥")

मिथःसंश्लेषः । इति हलायुधः ॥ इत्यमरटीकायां भरतः ॥

पुटकं, स्त्री, (पुटवत् कायतीति । कै + कः ।) पद्मम् । इति शब्दरत्नावली ॥ स्वार्थे कप्रत्यये पुटशब्दार्थोऽप्यत्र ॥

पुटकन्दः, पुं, (पुटमिव कन्दो यस्य ।) कोलकन्दः । इति राजनिर्घण्टः ॥

पुटकिनी, स्त्री, (पुटकानि सन्त्यस्या इति । पुटक + "पुष्करादिभ्यो देशे ।" ५ । २ । १३५ । इति इनिः । स्त्रियां ङीप् ।) पद्मिनी । पद्मसमूहः । पद्मखण्डः पद्मलता च । इति हेमचन्द्रः ॥

पुटग्रीवः, पुं, (पुटमिव ग्रीवा यस्य ।) गर्गरी । ताम्रकुम्भः । इति मेदिनी । वे, ४१ ॥

पुटपाकः, पुं, (पुटेन पाकः ।) पुटाख्यपात्रेणौ-षधपचनम् । अथ पुटपाकविधिः ।

"पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।

अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥

पुटपाकस्य मात्रोऽयं लेपस्याङ्गारवर्णता ।

लेपञ्च द्व्यङ्गुलं स्थूलं कुर्यादङ्गुष्ठमात्रकम् ॥

काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।

पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥

कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥

अपि च ।

द्वे विल्वे चिरमामस्य दत्वा दद्याद्द्रवं भवम् ।

मधुकस्य कुशदीर्घाणां कर्षमेकञ्च दापयेत् ॥

तद्वेष्टनं समावेष्ट्य पद्मैः कमलादेर्दृढम् ।

पुटपाकविधानेन तत् पक्त्वा तस्य रसं बुधः ।

तद्वेष्टितेन विधिना दद्यात्कदलादिकम् ॥

हरिमध्ये निषेकः स्यात्तिक्तगुणादादिजः ।

श्वेतश्री वेतसकोऽपि रोहणीति च विख्या ।

द्विजः विश्वो विश्वतश्च विश्वस्य तु वैद्यक ।

हरेत्सकलसंशितः सिताद्यकुष्ठाकृत् ॥

इति रोगहा ।

श्लेष्मवातप्रकोपेषु वातपित्तेः कफे ।

श्वेतः पुटपाकः स्याद्वातपित्ते तु कः ।

वातघ्नं कोष्ठे लाघवम् ।

आदाय पुटपाके स्नेहवत्सकदुर्वेः ।

हिमवो माहूलं तस्य परं धारयतिष्यति ।
जम्बजाङ्गमभाण्डतिलकदमादिभिः ।
मेदसाविनृप्तो धार्यः पुटपाकस्तु रोपणः ।
निबन्धयाप्याय ।
निमाम्लताडपटोलनिदिग्धिकाभिः
यत्रान् यथातिलक इति प्रथितो मतोऽयम् ।
आपरैतपपीलान् क्रियां आपादितपूर्णे ।
आपादितदर्शने निषातनपुटपाकनतिनयाधि-
रूढेन ।
निर्बोधविनमाशाद्यमारचिं भाषदराधि च ।
नेत्रेष नर्विते मेजे पच वा पुटपाकतान् ।"
इति भावप्रकाशः ॥

पुटभेदः, पुं, (पुटं संश्लिष्टं भिनत्तीति । भिद+ "कर्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नदी- वक्रम् । (नदीवक्रम् । इत्यमरः । १ । १० । ७ । यथा, आर्यासप्तशत्याम् । ३६८ ।
"प्रार्थनैव हि नलिका नलिकानामाययन्नतुप- यान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥")
नगरम् । आतोद्यम् । इति मेदिनी । दे, ५० ।

पुटभेदनं, क्ली, (पुटैरन्तःपुरैर्भिद्यते इति । भिद+ कर्मणि ल्युट् ।) नगरम् । इत्यमरः । २ । २ । १ ।
(यथा, महाभारते । १ । १०० । १२ ।
"स हास्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्यन्तामन्वशासद्वसुन्धराम् ॥")

पुटालुः, पुं, (पुटः संश्लिष्ट आलुः ।) कोलकन्दः । इति राजनिर्घण्टः ॥

पुटिका, स्त्री, (पुटं अस्त्यस्या इति । पुट+ठन् +टाप् ।) एला । इति शब्दचन्द्रिका । ८७ ॥

पुटितं, त्रि, (पुटं जातमस्येति । पुट+इतच् । पुट+क्त वा ।) स्यूतम् । पाटितम् । हते, त्रि । इति मेदिनी । ते, १११ । आच्छादन- कारिपुटकमध्यादौ पुटयामि च त्रि ॥

पुटी, स्त्री, (पुटतीति । पुट+कः । गौरादित्वात् ङीष् ।) कौपीनम् । इति जटाधरः । आच्छा- दनम् । पत्रादिरचितः पुष्पाद्याधारः । इत्य- मरभरतौ । (यथा, आर्यासप्तशत्याम् । ११४ ।
"दरदलदमलदला अवतनी धौतमस्तुकाय- नहि ।
धूलिपुटीव भिषजो करम्बरं चरति दक्षि- णधुः ॥")

पुटोटजं, क्ली, (पुटं संश्लिष्टमुटजमिव ।) श्वेत- च्छत्रम् । इति त्रिकाण्डशेषः ॥

पुटोदकः, पुं, (पुटे अन्तर्गतमावरणमध्ये उदकं यस्य ।) नारिकेलः । इति शब्दचन्द्रिका । १०० ।

पुड, श उत्सर्गे । इति कविकल्पद्रुमः ॥ (तुदा०- पर०-अक०-सेट् ।) पवर्गादिः । दन्त्यान्तः । इत्य- न्ये । इति रमानाथः । श, पुडति । मौक्तिकमुत्सृ- जति । इति दुर्गादासः ॥

पुड, इ मर्दे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०- सक०-सेट् ।) पवर्गादिः । इ, पुण्ड्यते । मर्द- नमर्दनम् । इति दुर्गादासः ॥

पुण, श धर्मे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०- सक०-सेट् ।) शुभक्रियायामित्यन्ये । श, पुणति शुभं लोकः । पोषिता । इति दुर्गादासः ॥

पुण्ड्र, पुं, (पुण्डयति इति । पुडि मर्दे+घञ् ।) तिलकः । इति जटाधरः ॥

पुण्डरी, [न्] पुं, दक्षिणां मनुष्याणाञ्च चतुष्पः पुरविदम् । प्रासपर्णीपत्रसुक्षुन्दनः । पुण्ड- रियो इति ख्यातः । तत्पर्यायः । पौण्डरी- कम् १ पुण्डरीकम् २ पुण्डरीयकम् ३ प्रपौण्ड- रीकम् ४ चक्षुष्यम् ५ पौण्ड्र्यम् ६ तालपुष्प- कम् ७ सानुपुष्पम् ८ हरिद्रकम् ९ स्थलपद्मम् १० मालकम् ११ । केचित्तु पुष्पैरयं पद्मकाष्ठं प्रवदति । इति शब्दरत्नावली ॥

पुण्डरीकं, क्ली, (पुण्डति खण्डयति अलक्ष्मीं पुण्यं करोतीति । पुडि मर्दे+"फर्फरीकादयश्च ।" उणा० । ४ । २० । इति ईकन्प्रत्ययेन निपा- तनात् साधुः । "पुण्डतेः पुण्डरीकम् ।" इत्यु- ज्ज्वलदत्तः ।) शुक्लपद्मम् । तत्पर्यायः । सिता- म्भोजम् २ । इत्यमरः । १ । १० । ४१ ॥ शत- पत्रम् ३ महापद्मम् ४ सितालुजम् ५ । इति रत्नमाला ॥ अस्य पर्यायान्तरं गुणाश्च श्वेत- पद्मशब्दे द्रष्टव्याः ॥ (यथा, रघुः । ३ । १० ।
"पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥")
पद्ममात्रम् । इति भरतधृतव्याडिः ॥ श्वेत- च्छत्रम् । भेषजभेदः । इति मेदिनी । कि, १६९ ॥ अग्निदग्धाकृत्यामन्तमः । तत्पर्यायः यथाह माधवकरः ।
"गन्धेनं रक्तपर्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं तदुच्यते ॥"

पुण्डरीकः, पुं, (पुण्डरीकवर्णोऽस्त्यस्येति । अच् ।) अग्निकोणस्य दिग्गजः । व्याघ्रः । इत्यमरः । ३ । ३ । ११ ॥ कोषकारभेदः । इति मेदिनी ॥ गन्धकारः । सहकारः । शालिभेदः । अम्बष्ठः । इति हेमचन्द्रः ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (नागविशेषः । तद्यथा,—
"पुष्पदन्तः पुण्डरीकस्तथा मणिरमल्लकः ॥"
इति भागवतमात्स्य पूर्वखण्डे षष्ठे भागे ॥) कमण्डलुः । श्वेतवर्णः । इत्यनेकार्थकोषः ॥ (क्रौञ्चद्वीपस्थपर्वतविशेषः । यथा, मात्स्ये । १२१ । ८२ ।
"देवावृतः परेषादि पुण्डरीको महान् गिरिः ।
एते रत्नमयाः सप्त क्रौञ्चद्वीपस्य पर्वताः ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । ७८ ।
"शुक्लपक्षे दशम्याञ्च पुण्डरीकं समाविशेत् ।
तत्र स्नात्वा नरो राजन् पुण्डरीकफलं लभेत् ॥"
मेघविशेषः । यथा, तत्रैव । १ । २० । ६ ।
"अनन्तो वासुकिः पुण्डरीकोऽथ सोदरः ।
एतेऽपि महाभोगस्ते ते भूरितरस्विनः ॥"
राजविशेषः । यथा, तत्रैव । २ । १०३ । १६ ।
"कामस्यापि नैवाप्रतो वदत्येवं ते प्रभ ।
रणे हरौ पुण्डरीकश्च पृथोदरदर्शनः ॥"
दासचन्द्रवंशीयनृपविशेषः । यथा, रघुः । १८ । ८ ।
"तेन द्विपानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥"
पुण्डरीका: सन्त्यस्येति । अच् । पुण्डरीक- विशिष्टे, त्रि । यथा, मात्स्ये । १५० । १८ ।
"मयोदस्तु हरो गौरः स शुभः पुण्डरीकवान् ।
पुण्डरीकान् पयोदाश्च तस्मात् ते स्मृतान्वि- तान् ॥")

पुण्डरीकाक्षं, क्ली, (पुण्डरीकस्य दलमिवाक्षि यस्य । अच् समासे ।) प्रपौण्डरीकम् । इति शब्दचन्द्रिका ॥

पुण्डरीकाक्षः, पुं, (पुण्डरीकस्य दलमिवाक्षिणी यस्य । अच् समासे ।) विष्णुः । इत्यमरः । १ । १ । १९ ॥ (यथा, महाभारते । ५ । ७० । ६ ।
"पुण्डरीकं परं धाम नित्यमक्षयमव्ययम् ।
तद्भावात् पुण्डरीकाक्षो दस्युत्रासाज्जनार्दनः ॥")
"हृदयाख्यपुण्डरीकमध्ये व्याप्नोति सर्वेश्वर इति पुण्डरीकाक्षः । यद् पुण्डरीक- पुण्डरीकं परमात्मनम् इति श्रुतेः । अथवा पुण्डरीकाणि चक्षिति वा ।" इति शाङ्कर- भाष्यम् ॥) तस्य स्मरणे बाह्याभ्यन्तरशुचित्वं यथा,
"अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥"
इति वामने ३३ अध्यायः ।
(अलम्बरपतिविशेषः । तद्यथा,—
"उत्कोचः पुण्डरीकाक्षो वैनतेयोऽनुरुष्टरः ।"
इति गरुडे भवखण्डे ५० अध्याये ॥)

पुण्डरीयकं, क्ली, स्थलपद्मम् । इति शब्दरत्नावली ॥ प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

पुण्ड्र्यं, क्ली, (पुण्डतीति । पुडि+यत् । तस्यैव प्रधानम् । प्रज्ञादित्वात् साधुः ।) प्रपौण्ड- रीकम् । इत्यमरः । २ । ४ । १४० ॥ "द्वे दक्षिणी मनुष्याणाञ्च चतुष्पे पुरविदे प्रासपर्णी- तुल्यपत्रे । पुण्डरिया इति ख्याते । अमरे पुण्ड- रीकमिव दलदर्शनात् प्रपौण्डरीकं च । टी- काकारादिमतेऽनयदप्रयत्नो दृढः । पुण्डरी- कमस्यास्तीति पुण्डरीकं पुडि मर्दे भावे घञ् कर्म; पौण्डर्यमिति पाठे भावे ष्यः । पुं, पुण्डरीकाद्यस्यक ।
'अचयदं नाप्युपं हरितम् पुण्डरीकम् ।'
इति रमसः ।" इत्यमरटीकायां भरतः ॥

पुण्ड्रः, पुं, (पुण्डयति खण्डयति दुःखं पुण्डतीति । पुडि मर्दे+"स्फायितञ्चि ।" उणा० २ । १३ । इति रक् ।) इक्षुभेदः । पुँड़िया इति भाषा । इत्यमरः । २ । ४ । १६३ ॥ रक्तेक्षुः । अतिमुक्तकः । तिलकः । क्रिमिः । पुण्ड्रदेशे देशविशेषे, पुं भूम्नि । इति मेदिनी । रे, ९३ ॥ (यथा, मात्स्ये । ११३ । ४४ ।
"प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः ।
शाल्वमागधगोनर्दाः प्राच्या जनपदाः स्मृताः ॥")
तिलकभेदः । इति हेमचन्द्रः । इक्षुः ।

इति राजनिर्घण्टः ॥ (अश्वदेहस्थचिह्नविशेषः। अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य क्षेत्रजः पुत्रविशेषः। यन्नाम्नैव पुण्ड्रदेशो विख्यातः। यथा, महाभारते।१।१०४।४७—५१।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः।
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत्।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः॥
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ४।३।९६। इति कन्।) माधवीलता। इत्यमरः।२।४।७२॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः॥")
तिलकवृक्षः। (पुण्ड्र + स्वार्थे कन्।) इक्षुभेदः। पुँडि आक् इति भाषा। तत्पर्य्यायः। रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसदालिका ७ कर्कटालिः ८। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। दाहकारित्वम्। मृदुत्वम्। पित्तदाहहरत्वम्। रुच्यत्वम्। तेजोबलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (अश्वशरीरस्थचिह्नविशेषः, पुं, क्ली। यथा, अश्ववैद्यके।३।७१—८१।
"अथ ऊर्द्ध्वं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम्।
आवर्त्तैर्या यथादृष्टं मुनिभिस्तत्त्ववेदिभिः॥
शक्तिहलमहाशङ्खपद्मचक्राङ्कुशोपमाः।
प्रासायुधसमाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः॥
[illegible]दीपवर्णनिभाः।
[illegible]णाकाराः शुभदाः परिकीर्त्तिताः॥
ललाटे [illegible] यः पुण्ड्रो यस्य तिष्ठति।
स धन्यः पूजितो [illegible] भवेत्॥
[illegible] ये च [illegible]निभाः।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यविवर्द्धनाः॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्व्वमाचार्य्यसत्तमैः।
अशुभांश्च प्रवक्ष्यामि यथोक्तं मुनिभिः पुरा॥
[illegible]निभाः।
[illegible] पुण्ड्रका नैव पूजिताः॥
[illegible]निभाः।
[illegible] पुण्ड्रका न शुभाः स्मृताः॥
[illegible]
[illegible]॥"
[illegible]। यथा, महाभारते।२।३१।१६।
"[illegible] पुण्ड्रैश्च
[illegible]॥")

पुण्ड्रकेलिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य।) हस्ती। इति शब्दमाला॥

पुण्यं, क्ली, (पूयतेऽनेनेति। पू+"पूञो यण्णुक् ह्रस्वश्च।" उणा० ५।१५। इति यत् णुगागमो ह्रस्वश्च।) शुभादृष्टम्। तत्पर्य्यायः। धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५। इत्यमरः।१।४।२४॥ पुण्यभारवोढ्रुमशक्तस्य पतितस्य निन्दा यथा, स्मृतिः।
"दण्डितेनापि किन्तेन समर्थेन च देहिनाम्।
यत् पुण्यं भारसङ्कोढ्रुमशक्तं पारलौकिकम्॥"
आत्मकृतपुण्यकथननिषेधो यथा,—
"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्।
श्लाघानुशोचनाभ्याञ्च भग्नतेजो विपद्यते॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत्॥"
इति शुद्धितत्त्वे देवलः॥ *॥
अद्भुतपुण्यभागित्वं पापशब्दे द्रष्टव्यम्॥ *॥
शोभनकर्म्म। पावनम्। सुन्दरे, त्रि। इति हेमचन्द्रः॥ सुगन्धि। इति जटाधरः॥

पुण्यकं, क्ली, (पुण्याय कायतीति। कै+कः।) व्रतम्। तत्र उपवासादि। प्रायेण पुण्यलेशपरिणतान्यकर्म्मणि यद्वोपविश्युपवासादि तदेव व्रतं न तु यः कोऽपि नियमः। आदिना भक्तभोजनाचारलक्षणादिपरिग्रहः। इत्यमरभरतौ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति।) पतिसौभाग्यस्य गोकुलसुतपुत्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः। तस्य विधिर्यथा,—
महादेव उवाच।
"हरेराराधनं कृत्वा व्रतं कुरु वरानने!।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि॥
देवि। शुद्धे च कालेऽत्र परं नियमपूर्व्वकम्।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये!॥
स्नात्वा सुनिर्म्मलं स्नात्वा शिरःसंस्कारपूर्व्वकम्।
उपोष्य पूर्व्वदिवसे पश्चात् प्रयता व्रतः।
धौते च वाससी धृत्वा उपविश्यासने शुची।
आचम्य तिलकं धृत्वा निर्म्माय आह्निकं पुरः॥
घटस्थापनकं कृत्वा स्वस्तिवाचनपूर्व्वकम्॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः।
संकल्प्य देवविहितं सम्भोज्य यथाविधि॥
व्रते द्रव्याणि [illegible] षोडश।
देयानि विप्र देवेशि! श्रद्धाय परमात्मने।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्॥
मधुपर्कञ्च स्नानीयं वस्त्राण्याभरणानि च।
सुगन्धिपुष्पं धूपञ्च दीपनैवेद्यचन्दनम्॥
पानीयञ्च ताम्बूलं कर्पूरादिसुवासितम्।
[illegible] पूजाया [illegible]॥
[illegible]।
[illegible]॥
[illegible]॥
[illegible]।
[illegible]॥
[illegible]।
[illegible]॥

नीलोत्पलानां लक्षञ्च देयं कृष्णाय भक्तितः।
मनोरमभूतं देवेशि! सर्व्वत्र तत्र देवते॥
हिमालयोद्भवं लक्षं श्वेतं चम्पकमुत्तमम्।
मदने केशवायैव केशवौघं प्रदेवते॥
आमलकफलैर्युक्तं दर्पणानां सहस्रकम्।
देयं नारायणायैव नानिधौत्तं प्रदेवते॥
अगुरुचन्दनर्युक्तं पुष्पकानां सहस्रकम्।
प्रदेयं गोपिकेशाय नानिशास्त्रप्रदेवते॥
मधुकपुष्पलक्षञ्च देयं राधेश्वराय च।
कस्तूरीमाधवायैव मधुकौघं प्रदेवते॥
कुन्दपुष्पाणां लक्षञ्च दमनौघं प्रदेवते।
देयं गोपीकान्ताय शीतले। भक्तिपूर्व्वकम्॥
रक्तोत्पललक्षञ्च सहस्रौघं प्रदेवते।
महीश्वराय दातव्यं व्रते शैलेन्द्रकन्यके!॥
रत्नपात्रकलसञ्च देयं मधुसूदनाय च।
भोजाधःकुलकाय प्राणेशि! भक्तितो व्रते॥
कर्णभूषणलक्षञ्च रत्नसारविनिर्म्मितम्।
देयं सर्व्वेश्वरायैव कर्णौघं प्रदेवते॥
माध्वीककलशानाञ्च लक्षं रत्नविनिर्म्मितम्।
देयं विश्वेश्वरायैव मधुनौघं प्रदेवते॥
सुधापूर्णञ्च कुम्भानां लक्षं रत्नविनिर्म्मितम्।
देयं कृष्णाय देवेशि! बाहुलौघं प्रदेवते॥
रत्नप्रदीपलक्षञ्च गोपवेशविधायिने।
देयं किशोरवेशाय हरिणौघं प्रदेवते॥
पुलकुसुममालानां रत्नपात्रसहस्रकम्।
देयं गोपवेशायैव सहस्रौघं प्रदेवते॥
पत्नगारचितं पद्मानां सहस्रकम्।
देयं नन्दकनामाय बाहुनौघं प्रदेवते॥
लक्षञ्च रत्नपद्मानां बहुलौघं प्रदेवते।
देयं गोपाङ्गनेशाय नारायणि! हरिप्रिये॥
अङ्गुरीयकलक्षञ्च रत्नसारविनिर्म्मितम्।
अङ्गुलीभाव सुचारु देयं देवेश्वराय च॥
मनोऽस्मारलक्षञ्च चित्राढ्यं मनोहरम्।
देयं मुनीन्द्रनाथाय बाहुनौघं प्रदेवते॥
सहस्रगारहाराणां [illegible] मनोहरम्
देयं [illegible]नाथाय [illegible] प्रदेवते॥
सुगन्धि [illegible] सुमनोहरम्।
देयं सिद्धेन्द्रनाथाय [illegible] प्रदेवते॥
[illegible]कारं [illegible] मनोहरम्।
देयं महादेवाय [illegible] प्रदेवते॥
[illegible]।
[illegible] प्रदेवते॥
[illegible]।
[illegible]॥
[illegible] मनोहरम्
[illegible]
[illegible]
[illegible] प्रदेवते।
[illegible]।
[illegible] च॥
[illegible]।
[illegible] च॥

तैलको वाकृष्टतं तस्य परं धारयमिच्छति ।
कषायाङ्कनमभ्यण्यतिक्तकन्यभावितः ।
लेखनास्त्रिगुणो धार्यः पुटपाकस्तु रोपणः ।
तिक्तकदुयाण्याह ।
निम्बाम्बनाशृथयटोलनिदिग्धिकाभिः
स्यात् पचसिक्तक इति प्रथितो गणोऽयम् ।
प्रावरेत्तर्पणोक्तास्तु क्रियां यापनिदर्शने ।
यापनिदर्शने मिथ्याहतपुटपाकचनितत्वाधि-दर्शने ।
तेषांस्त्रनिलमाकाशमादर्शं भास्कराणि च ।
नैक्षेत सर्पिसे मेत्रे यस्य वा पुटपाकवान् ॥"
इति भावप्रकाशः ॥

पुटभेदः, पुं, (पुटं संश्लिष्टं भिनत्तीति । भिद+ "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नदी-वक्रम् । (नदीपक्रम् । इत्यमरः । १ । १० । ७ ॥ यथा, आर्य्यासप्तशत्याम् । ३८८ ।
"प्रायेणैव हि मलिना मलिनानामाश्रयत्वमुप-यान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥")
पत्तनम् । आतोद्यम् । इति मेदिनी । दे, ५० ॥

पुटभेदनं, क्ली, (पुटैरावरणैर्भिद्यते इति । भिद+ कर्म्मणि ल्युट् ।) नगरम् । इत्यमरः ।२।२।१॥
(यथा, महाभारते । १ । १०० । १२ ॥
"स हास्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्य्यन्तामन्वशाधद्वसुन्धराम् ॥")

पुटाशुः, पुं, (पुटः संश्लिष्ट आशुः ।) कोशकन्दः । इति राजनिर्घण्टः ॥

पुटिका, स्त्री, (पुटं अस्त्यस्या इति । पुट+ठन् +टाप् ।) एला । इति हारावली । ८० ॥

पुटितं, क्ली, (पुटं जातमस्येति । पुट+इतच् । पुट+क्त वा ।) हस्तपुटम् । पाटितम् । स्यूते, त्रि । इति मेदिनी । ते, १६४ ॥ आद्यन्तप्रथ-मादिगुणमन्तादौ पुटप्राप्ते च त्रि ॥

पुटी, स्त्री, (पुटतीति । पुट+कः । गौरादित्वात् ङीष् ।) कौपीनम् । इति जटाधरः ॥ आच्छा-दनम् । पत्रादिरचितः पुष्पाद्याधारः । इत्य-मरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् ।३४५।
"हरकण्ठपरिचयमदनयन्ती खेदमलहलुवन-लता ।
धूर्त्तपुटीव मिलन्ती स्मरज्वरं हरति हलिक-वधूः ॥")

पुटोटजं, क्ली, (पुटं संश्लिष्टमुटजमिव ।) श्वेत-च्छत्रम् । इति त्रिकाण्डशेषः ॥

पुटोदकः, पुं, (पुटे अन्तर्गुप्तभागमध्ये उदकं यस्य ।) नारिकेलः । इति हारावली । १०० ॥

पुट, क सौक्ष्म्ये । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) पञ्चमस्वरी । टवर्गान्तः । एक-टकार इति रामः । क, पुटयति । सौक्ष्म्यमल्पी-भावः । इति दुर्गादासः ॥

पुड, इ मर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) पञ्चमस्वरी । इ, पुण्डति । मर्द्द-श्चर्व्वीकरणम् । इति दुर्गादासः ॥

पुण, श धर्म्मे । इति कविकल्पद्रुमः ॥ (तुदा-परं-सकं-सेट् ।) शुभक्रियायामित्यन्ये । श, पुणति शुभं लोकः । पोणिता । इति दुर्गादासः ॥

पुण्डः, पुं, (पुण्ड्यते इति । पुडि मर्द्दे+घञ् ।) तिलकः । इति जटाधरः ॥

पुण्डरी, [न्] पुं, हस्तिनां मनुष्याणाञ्च चक्षुष्यः क्षुद्रविटपः । प्रालपर्णीपत्रतुल्यपत्रः । पुण्ड-रिया इति ख्यातः । तत्पर्य्यायः । पौण्डरी-कम् २ पुण्डरीकम् ३ पुण्डरीयकम् ४ प्रपौण्ड-रीकम् ५ चक्षुष्यम् ६ पौण्ड्र्यम् ७ तालपुष्प-कम् ८ सानुपुष्पम् ९ हरितम् १० स्थलपद्मम् ११ मालकम् १२ । केचित्तु पुन्नपुंसकं पद्मकाष्ठे प्रयुञ्जते ॥ इति शब्दरत्नावली ॥

पुण्डरीकं, क्ली, (पुण्डति अन्यपुष्पाणां गन्धं चूर्णी-करोतीति । पुडि मर्द्दे+"फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन निपा-तनात् साधुः । "पुण्डतेः पुण्डरीकम् ।" इत्यु-ज्ज्वलदत्तः ।) शुक्लपद्मम् । तत्पर्य्यायः । सिता-म्भोजम् २ । इत्यमरः । १ । १० । ४१ ॥ शत-पत्रम् ३ महापद्मम् ४ सिताम्बुजम् ५ । इति रत्नमाला ॥ अस्य पर्य्यायान्तरं गुणाश्च श्वेत-पद्मशब्दे द्रष्टव्याः ॥ (यथा, रघुः । ४ । १७ ।
"पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥")
पद्ममाघम् । इति भरतधृतव्याडिः ॥ श्वेत-च्छत्रम् । भेषजभेदः । इति मेदिनी । के, १८९ ॥ सप्तमहाकुष्ठानामन्यतमः । तल्लक्षणं यथाह माधवकरः ।
"सश्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं तदुच्यते ॥"

पुण्डरीकः, पुं, (पुण्डरीकवद्वर्णोऽस्त्यस्येति । अच् ।) अग्निकोणस्थदिग्गजः । व्याघ्रः । इत्यमरः ।३।३।११ ॥ कोषकारभेदः । इति मेदिनी ॥ सहकारः । गणधरः । राजिलसर्पः । गजज्वरः । इति हेमचन्द्रः ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (आम्रविशेषः । तद्यथा,—
"पुण्ड्रकः पुण्डरीकश्च महिषमस्तकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) कमण्डलुः । श्वेतवर्णः । इत्यनेकार्थकोषः ॥ (क्रौञ्चद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ८२ ।
"देवावृतः परेणापि पुण्डरीको महान् गिरिः ।
एते रत्नमयाः सप्त क्रौञ्चद्वीपस्य पर्व्वताः ॥"
तीर्थविशेषः । यथा, महाभारते ।३।८३।७६।
"शुक्लपक्षे दशम्याञ्च पुण्डरीकं समाविशेत् ।
तत्र स्नात्वा नरो राजन् ! पुण्डरीकफलं लभेत् ॥"
यज्ञविशेषः । यथा, तत्रैव ।१।१०।१७ ।
"अश्वमेधो राजसूयः पुण्डरीकोऽथ गोसवः ।
एतैरपि महायज्ञैरिष्टं ते भूरिदक्षिणैः ॥"
नागविशेषः । यथा, तत्रैव । ५ । १०३ । १३ ।
"नागाकालेकसंज्ञानौ महापौण्ड्र्य मे प्रभ ।
द्वौ पद्मौ पुण्डरीकश्च पुष्पो मुद्गरपर्णकः ॥"
रामचन्द्रवंशीयनृपविशेषः । यथा, रघुः ।१८।८ ।
"तेन द्विपानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्य्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥"
पुण्डरीकाः सन्त्यस्मिन्निति । अच् । पुण्डरीक-विशिष्टे, त्रि । यथा, मात्स्ये । १२० । ८ ।
"पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ।
पुण्डरीकात् पयोदाच्च तस्मात् द्वे सम्प्रव-साम् ॥")

पुण्डरीकाक्षं, क्ली, (पुण्डरीकवदक्षिणी यस्मात् । षच् समासे ।) पुण्ड्र्यम् । इति शब्दचन्द्रिका ॥

पुण्डरीकाक्षः, पुं, (पुण्डरीकवदक्षिणी यस्य । षच् समासे ।) विष्णुः । इत्यमरः ।१।१।१८॥
(यथा, महाभारते । ५ । ७० । ६ ।
"पुण्डरीकं परं धाम नित्यमक्षरमव्ययम् ।
तद्भावात् पुण्डरीकाक्षो दस्युत्रासाज्जनार्द्दनः ॥"
"हृदयाख्यपुण्डरीकमध्ये व्याप्नोति सर्वोपलभ्य इति पुण्डरीकाक्षः । यत् पुण्डरीकपुरं पुण्डरीकं परममध्यमस्य इति श्रुतेः । अथवा पुण्डरीकाणि-वाक्षिणी वा ।" इति शाङ्करभा-ष्यम् ॥) तस्य स्मरणे बाह्याभ्यन्तरशुचित्वं यथा,
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥"
इति वामने ३३ अध्यायः ॥
(जलचरपक्षिविशेषः । तद्यथा,—
"उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटी ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

पुण्डरीयकं, क्ली, स्थलपद्मम् । इति शब्दमाला ॥ प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

पुण्ड्र्यं, क्ली, (पुण्डतीति । पुडि+यत् । तत्रापि प्रधानम् । अकन्यादित्वात् साधुः ।) प्रपौण्ड-रीकम् । इत्यमरः । २।४।१२० ॥ "हे हस्तिनां मनुष्याणाञ्च चक्षुष्ये क्षुद्रविटपे प्रालपर्णीप-त्रतुल्यपत्रे । पुण्डरिया इति ख्याते । अवरं पुण्ड-रीकमिव दाहहरत्वात् प्रपौण्डरीकं च: हस्त्यादिस्यादन्तादसारी वृद्धिः । पुण्डरीकं खण्डयति दीपान् पुण्ड्र्यं पुडि मर्द्दे णाचीति घर्षः पौण्ड्र्यमिति पाठे स्वार्थे ष्यः ॥ पुण्डरीकादिरप्यत्र ।
'स्थलपद्मं सानुपुष्पं हरितम् पुण्डरीयकम् ।'
इति रभसः ।" इत्यमरटीकायां भरतः ॥

पुण्ड्रः, पुं, (पुण्ड्यते खण्ड्यते चूर्णीक्रियते इति । पुडि मर्द्दे+"स्फायितञ्चीति ।" उणां २।१३। इति रक् ।) इक्षुभेदः । पुँडिया इति भाषा । इत्यमरः । २ । ४ । १६३ ॥ दैत्यविशेषः । अतिमुक्तकः । तिलकम् । क्रिमिः । पुण्डरीकम् । देशविशेषे, पुं भूम्नि । इति मेदिनी । रे, ३८ ॥ (यथा, माघे । १२ । ३१ ।
"प्राक्ज्योतिषाश्च पुण्ड्राश्च विदेहाः ताम्रलिप्तकाः ।
शाल्वमागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥")
तिलकवृक्षः । इति हेमचन्द्रः ॥ पुण्ड्रकः ।

इति राजनिर्घण्टः ॥ (अस्य देशस्य चिह्नविशेषः । अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य क्षेत्रजः पुत्रविशेषः । यन्नाम्नैव पुण्ड्रदेशो विख्यातः । यथा, महाभारते । १ । १०४ । ४७—५१ ।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ।
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः ।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ॥
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिणः ॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) माधवीलता । इत्यमरः । २ । ४ । ७२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥")
तिलकवृक्षः । (पुण्ड्र + स्वार्थे कन् ।) इक्षुभेदः । पुँडि आक् इति भाषा । तत्पर्य्यायः । रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसदालिका ७ करङ्कशालिः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । दाहकारित्वम् । मृदुत्वम् । पित्तदाहहरत्वम् । श्रमहरत्वम् । तेजोबलविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (अश्वशरीरस्थचिह्नविशेषे, पुं, स्त्री । यथा, अश्ववैद्यके । ३ । ७३—८१ ।
"अथ ऊर्द्ध्वं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
यथापूर्व्वं यथादृष्टं मुनिभिस्तत्त्ववेदिभिः ॥
शक्तिशूलगदाखड्गपद्मचक्राङ्कुशोपमाः ।
प्रासभल्लशराकाराः धनुषाः पुण्ड्रकाः स्मृताः ॥
मकरच्छत्रचामरदर्पणयूपसन्निभाः ।
तोरणवंशाकाराः शुभदाः परिकीर्त्तिताः ॥
ललाटमध्ये यः पुण्ड्रो यस्य तिष्ठति ।
स धन्यः पूजितो नित्यं सुखमेव सोऽश्नुते ॥
ग्रीवायां पताकाभा ये च मत्स्याकारसन्निभाः ।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यसुखप्रदाः ॥
एते पुण्ड्राः शुभाः प्रोक्ताः पुंसां स्वस्थाश्च नान्यथा ।
अशुभानीह वक्ष्यामि यथोक्तं समासतः ॥
काकगृध्रकबन्धादिदस्युमण्डलसन्निभाः ।
कपिलाः शोणिताः रक्ताः दद्रुका नैव पूजिताः ॥
निर्ल्लक्षणाश्चैव विच्छिन्नाः शृगालाकारसन्निभाः ।
स्वामिनां नाशदेशस्थाः पुण्ड्रकाश्च शुभाः स्मृताः ॥
विनाशकर्त्तारश्चापि भर्त्तुर्वैभवादि च ।
इत्यादि च प्रयत्नेन निरस्तानि वाजिनः ॥"
इक्षुविशेषे । यथा, महाभारते । १३ । ५३ ।
"तथाङ्गारको यत्र पुण्ड्रेक्षु
रसाः पुण्ड्रकाश्च महाप्रभाः ॥")

पुण्ड्रकेलिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य ।) हस्ती । इति शब्दमाला ॥

पुण्यं, क्ली, (पूयतेऽनेनेति । पू+"पूञो यण्णुक् ह्रस्वश्च ।" उणा० ५ । १५ । इति यत् णुगागमो ह्रस्वश्च ।) शुभादृष्टम् । तत्पर्य्यायः । धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ पुण्यभारवोढुमशक्तस्य पतितस्य तैर्न्दा यथा, वह्निपुराणे ।
"अर्ज्जितेनापि किञ्चित् तमर्थेन च देहिनाम् ।
यत् पुण्यं भारवोढुमशक्तं पारलौकिकम् ॥"
आत्मकृतपुण्यकथननिषेधो यथा,—
"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
श्लाघानुशोचनाभ्याञ्च भग्नतेजो विपद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ॥"
इति शुद्धितत्त्वे देवलः ॥ ● ॥
अदत्तपुण्यभागित्वं पापशब्दे द्रष्टव्यम् ॥ ● ॥
शोभनकर्म्म । पावनम् । सुन्दरे, त्रि । इति हेमचन्द्रः ॥ सुगन्धि । इति जटाधरः ॥

पुण्यकं, क्ली, (पुण्याय कायतीति । कै+कः ।) व्रतम् । तच्च उपवासादि । शास्त्रे पुण्यत्वेन परिगणितत्वेन यदौषधतुल्यवासादि तदेव व्रतं न तु यः कोऽपि नियमः । आदिना नक्तं भोजनाद्यारम्भणादिपरिग्रहः । इत्यमरभरतौ ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति ।) पतिसौभाग्यस्य श्रीकृष्णतुल्यपुत्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः । तस्य विधिर्यथा,—
महादेव उवाच ।
"हरेराराधनं कृत्वा व्रतं कुरु वरानने ! ।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि ॥
देवि ! शुद्धे च काले च परं नियमपूर्व्वकम् ।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये ! ॥
सार्द्धं सुनिर्म्मलं कृत्वा शिरःसंस्कारपूर्व्वकम् ।
उपोष्य पूर्व्वदिवसे वर्ज्यं मत्स्याशनं यत्नतः ।
धौते च वाससी धृत्वा उपविश्यासने शुची ।
आचम्य तिलकं कृत्वा निर्म्माय चाह्निकं पुरः ॥
घटस्थापनकं कृत्वा स्वस्तिवाचनपूर्व्वकम् ॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ।
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥
अष्टौ द्रव्याणि दिव्यानि चोपचाराणि षोड्श ।
देयानि नित्यं देवेशि ! कृष्णाय परमात्मने ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥
मधुपर्कञ्च स्नानीयं वस्त्रालङ्करणानि च ।
सुगन्धि पुष्पं धूपञ्च दीपं नैवेद्यमुत्तमम् ॥
तदुत्तरञ्च ताम्बूलं चन्दनं पुष्पमालिकम् ।
इत्यादीनि पुष्पादीनि ...... ।
देवि ! विविधानि ...... ।
.... ॥
.... ।
.... ।
देवं परिहृत्य दूर्वा ! ...... ॥
...... ॥
....

शौरीर्प्यवतां तत्र देयं कृष्णाय भक्तितः ।
नवाम्भःपूर्णं देवेशि ! चञ्चमी स्वर्णदैवते ॥
हिमालयोद्भवं शस्त्रं रुचिरं श्वेतचामरम् ।
प्रदद्यात् कैशवायैव कृष्णायैवार्पयेत्तव ॥
कामरूपाकरचितं दर्पणानां सहस्रकम् ।
देयं नारायणायैव स्वामिनोऽन्तःप्रदैवते ॥
अनलङ्करमचितं पुष्पाणां सहस्रकम् ।
प्रदेयं गोपिवेशाय स्वामिकाभ्यर्दैवते ॥
सप्तकुसुमस्त्वथ देयं राधेश्वराय च ।
सुस्वरीकासहस्रीयैव मधुमीन्दर्यदैवते ॥
सुक्तापलानां लक्षञ्च दद्यात्मीयदैवते ।
देयं गोलोकनाथाय पीतवर्णं भक्तिपूर्व्वकम् ॥
रत्नसिंहासनञ्च महलोन्दर्यदैवते ।
मधीश्वराय दातव्यं व्रते श्वेतरत्नकं ॥
रत्नपात्रकम्पनञ्च देयं मथुरेश्वराय च ।
कोटिमध्यमलमाय प्राणेशि ! भक्तितो व्रते ॥
स्वर्णभूषणञ्च रत्नसारविनिर्म्मितम् ।
देयं धर्म्मेश्वरायैव कर्णपीन्दर्यदैवते ॥
माणिक्यकलशानाञ्च लक्षं रत्नविनिर्म्मितम् ।
देयं विश्वेश्वरायैव मनसीन्दर्यदैवते ॥
सुधापूर्णञ्च कुम्भानां सहस्रं रत्ननिर्म्मितम् ।
देयं कृष्णाय देवेशि ! वायवीन्दर्यदैवते ॥
रत्नप्रदीपलक्षञ्च गोपवेशविधायिने ।
देयं किशोरवेशाय हरिणीन्दर्यदैवते ॥
पुष्परकुसुमाकारं रत्नपात्रसहस्रकम् ।
देयं गोरक्षकायैव गगनीन्दर्यदैवते ॥
सहस्रसाररचितं पद्मानामयुतं सहस्रम् ।
देयं नन्दकनाशाय वायुर्मीन्दर्यदैवते ॥
लक्षञ्च रत्नपद्मानां वृन्दावनदैवते ।
देयं गोपाङ्गनेशाय नारायणि ! हरिणे ॥
चन्द्रोदयलक्षञ्च रत्नसारविनिर्म्मितम् ।
चञ्चलनाथ कृष्णाय देयं देवेश्वराय च ॥
मक्षीन्द्रसारलक्षञ्च श्वेतवर्णं मनोहरम् ।
देयं सुनीन्द्रनाथाय वसन्तीन्दर्यदैवते ॥
मकरकारहाराणां लक्षाणि मनोहरम्
देयं लक्ष्मीशाय वक्षःप्रीन्दर्यदैवते ॥
सुवर्णवलयादिकं लक्षञ्च सुमनोहरम् ।
देयं सिद्धिनाथाय कण्ठीन्दर्यदैवते ॥
कटककङ्कणाकारं लक्षाणां मनोहरम् ।
देयं पद्मोद्भवाय वैकुण्ठदैवते ॥
.... ।
.... ॥
.... ।
.... ।
....
....
....
.... ॥
.... ।
.... ।
.... ।
.... ॥

दिव्यञ्च रत्नसारेण स्वर्द्ध: सौन्दर्य्यहेतवे ।
मालतीनाञ्च कुसुममनन्तं लक्ष्मीश्वरि ! ।
देयं इन्द्रायनेशाय दास्यसौन्दर्य्यहेतवे ।
अमूल्यरत्नञ्च देयं नारायणाय वै ।
सुव्रते ! व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ।
शुद्धस्फटिकसङ्काशं मणीन्द्रसारलक्षकम् ।
देयं गुणीन्द्रनाथाय मन:सौन्दर्य्यहेतवे ।
प्रवालसारसङ्काशं मणिसारसहस्रकम् ।
देयं कृष्णाय भक्त्या च प्रियानुरागवृद्धये ।
माणिक्यसारलक्षञ्च देयं कृष्णाय यत्नत: ।
जन्मन: कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ।
कूष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्रहेतवे ।
रत्नेन्द्रसारलक्षञ्च देयं कृष्णाय यत्नत: ।
असंख्यजन्मपर्य्यन्तं स्वात्मनो धनवृद्धये ।
वाद्यं नानाप्रकारञ्च कांस्यतालादिकं परम् ।
व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं श्रावयेद्व्रती ।
पायसं पिष्टकं सर्पि:शर्कराक्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वात्मनो भोगवृद्धये ।
सुगन्धिपुष्पमाल्यानां लक्षमत्यन्तमीप्सितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ।
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे ! नानाविधानि च ।
नानाविधानि पुष्पाणि सुमनोभियुतानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ! ।
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वात्मन: श्रेयवृद्ध्यर्थं व्रते जन्मनि जन्मनि ।
पुष्पाञ्जलिशतं देयं नित्यं पूर्णे च पूजने ।
प्रणामशतकं देवि ! कर्त्तव्यं भक्तिवृद्धये ।
यज्ञार्थञ्च हविष्यान्नं नानानुपम फलादिकम् ।
हवि: पथ्यं जलं पथ्यं व्रते भक्ष्ये च सुव्रते ! ।
रत्नप्रदीपशतकं वह्निं दद्याद्दिवानिशम् ।
रात्रौ कुशासनं कृत्वा नित्यं जागरणं व्रते ।
स्मरणं कीर्त्तनं केलि: प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
मैथुनं विविधं त्याज्यं व्रते क्रीडाविवृद्धये ।
अन्नशुद्धिर्भारतके मुक्तिर्मितभोजने ।
लोभमोहकामक्रोधभयशोकविषादकम् ।
कलहञ्च परित्याज्यं व्रते वस्तुविग्रहके ।
संपूर्णे च व्रते देवि ! पतिदा शतमम्बरम् ।
त्रिशतञ्च शताधिकं कलकं भक्तकर्म्मणम् ।
अमोघं सोपवीतञ्च सोपचारं मनोहरम् ।
त्रिशतञ्च शताधिकं सवृषं विप्रभोजनम् ।
त्रिगुणञ्च शताधिकं सवृषं तिलकाञ्चनम् ।
त्रिशतञ्च शताधिकं सवृषं स्वर्णमेव च ।
देया प्रसवमानौ च दक्षिणा विधिबोधिता ।
अन्यां समाप्तिदिवसे कर्त्तव्यानि दक्षिणाम् ।
एतद्व्रतफलं देवि ! दृढा भक्तिर्हरौ भवेत् ।
हरितुल्यो भवेत् पुत्रो विद्यावान् गुणवानपि ।
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
सर्व्वदाभिमताकीर्त्ति: सर्व्वत्र जन्मनि जन्मनि ।
इत्येवं कथितं देवि ! व्रतं कुरु महेश्वरि ! ।
पुत्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-४। अध्यायौ ॥

पुण्यकृत्, त्रि, (पुण्यं करोतीति । कृ + “सुकर्म्मपापमन्त्रपुण्येषु कृञ: ।” ३।२।८९। इति क्विप् । “ह्रस्वस्य तुक् पिति कृति ।” ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिक: । यथा,
“पुण्यकृच्चाटुकारस्ते किङ्कर: सुरतेषु क: ॥”
इति भट्टि: । ५ । १८ ॥

पुण्यगन्ध:, पुं, (पुण्य: पवित्रो हृद्यश्च गन्धोऽस्य ।) चम्पक: । इति त्रिकाण्डशेष: ॥

पुण्यजन:, पुं, (पुण्य: विरुद्धलक्षणया पापी चासौ जनश्चेति ।) राक्षस: । इत्यमर: । १।१।६१॥ यक्ष: । (यथा, हरिवंशे । ८ । २६ ।
“सर्पा: पुण्यजनैश्चैव वीरुद्भि: पर्व्वतैस्तथा ॥”
पुण्याश्रितो जन: ।) सज्जन: । इति मेदिनी । ने, १६८ ॥

पुण्यजनेश्वर:, पुं, (पुण्यजनानां यक्षाणामीश्वर: ।) कुबेर: । इत्यमर: । १ । १ । ७३ ॥ (यथा, रघु: । ९ । ६ ।
“समतया वसुवृष्टिविसर्ज्जनै-
र्नियमनादसताञ्च नराधिप: ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥”)

पुण्यतृणं, क्ली, (पुण्यं पवित्रं तृणम् ।) श्वेतकुशम् । इति राजनिर्घण्ट: ॥

पुण्यदर्शन:, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्ट: ॥ (यद्दर्शनेन पुण्यं भवति तत्र, त्रि । यथा, रघु: । १ । ८६ ।
“तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधि: ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥”)

पुण्यफल:, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेद: । तत्पर्य्याय: । लक्ष्मारामः २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यजन्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनु: । ५ । ५३ ।
“वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समा: ।
मांसानि च न खादेद्यस्तयो: पुण्यफलं समम् ॥”)

पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + ण्वि: ।) पुण्यविशिष्ट: । यथा, पञ्चशायके ।
“कोऽप्यानन्दो विलासामधुरसरसा: पुण्यभाज:
धन्या: स्यु: ॥”

पुण्यभू:, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भू: भूमि: ।) आर्य्यावर्त्तदेश: । यथा, हैमचन्द्रे । ४ । १३ ।
“आर्य्यावर्त्तो जन्मभूमिर्जिनचक्र्यर्द्धचक्रिणाम् ।
पुण्यभूराचारवेदी मध्यं विन्ध्यहिमालयो: ॥”

पुण्यभूमि:, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमि: ।) आर्य्यावर्त्तदेश: । इत्यमर: । २।१।८ ॥ स तु विन्ध्यहिमालययोर्मध्यदेश: । यथा,—
“आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधा: ॥”
इति भरतधृतमनु: ॥
पुत्रक: । इति शब्दरत्नावली ॥

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य व: ।) पुण्ययुक्त: । तत्पर्य्याय: । सुकृती २ धन्य: ३ । इत्यमर: । ३।१।३॥ सुकृत् ४ पुण्यकृत् ५ । इति जटाधर: ॥ धर्म्मवान् ६ वैद-स्वान् ७ हयवान् ८ । इति पुण्यपर्य्यायकशब्देभ्यो मत्वर्थप्रत्ययेन निष्पन्ना: ॥ (यथा, महाभारते । १२ । २८७ । २८ ।
“ऊर्द्ध्वं भित्त्वा प्रतिष्ठन्ते प्राणा: पुण्यवतां नृप ! ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥”)

पुण्यश्लोक:, पुं, (पुण्य: पुण्यदायक: श्लोको यश: चरित्रं वा यस्य ।) विष्णु: । इति श्रीभागवतम् ॥ युधिष्ठिर: । इति महाभारतम् ॥ नलराज: । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
“पुण्यश्लोकस्य वै दासो वार्ष्णेय इति विश्रुत: ॥”)
पुण्यचरित्रे, त्रि ॥ (यथा, भागवते । १।१४।१ ।
“संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुञ्च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥”)

पुण्यश्लोका, स्त्री, (पुण्य: पुण्यजनक: श्लोको यश: चरित्रं वा यस्या: ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
“पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिर: ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दन: ॥”
इति पुराणम् ॥

पुण्या, स्त्री, (पुनाति या पूयतेऽनयेति वा । पू + “पूञो यण्णुक् ह्रस्वश्च ।” उणा० ५ । १५ । इति यत् णुक् ह्रस्वश्च धातो: । ततष्टाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥

पुण्यात्मा, [न्] त्रि, (पुण्य: आत्मा स्वभावो यस्य ।) पुण्यस्वभाव: । तस्य गत्यादिर्यथा,—
सुव्रतोवाच ।
“शृणु विप्र ! प्रवक्ष्यामि यस्त्वया श्रोतुमिच्छसि ।
पुण्यात्मनां पापिनाञ्च मरणं दु:खदु:सहम् ।
आदौ ब्रवीमि मरणं शृणु पुण्यवतामहम् ।
शृणुष्व द्विजशार्दूल ! प्रयाता प्रीतिवर्द्धनम् ।
प्रवरैरिह केयूरैर्दिव्यवस्त्रै: समावृत: ।
भाति पुण्यात्मनो मार्ग: सर्व्वोपद्रववर्ज्जित: ।
क्वचिद्गन्धर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिन्नागवधूराभिरप्सरोभिश्च नृत्यते ।
क्वचिच्च वीणाकलनं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिद्वायु: सुशीतल: ।
क्वचित् पुण्या: शीततोया: कूपिका मण्डलिका: ।
क्वचिद्देवाश्च गन्धर्व्वा: पठन्ति स्तवमुत्तमम् ।
क्वचित् क्वचिद्दीर्घिकाश्च पुष्करपद्मशोभिता: ।
सुच्छाया: पादपा: क्वापि पुष्पिता मधुरारवा: ।
कन्यकाश्च यशस्विन्य: पथि गच्छन्ति मार्गत: ।
पुण्यात्मानो हियन्त्येव । सुगन्धद्रुमराजि च ।
केचिद्गजेन्द्रमारूढा नानालङ्कारभूषिता: ।
सच्छत्रचामरैर्गन्धमाल्यादिसमलङ्कृता: ।
केचिद्यान्ति समारूढा रथारूढाश्च केचन ।
नानाकृत्या जना: केचित् यान्ति धर्म्ममन्दिरम् ।

केचिद्दिव्याङ्गनाद्धृजन्य(?)सचामरव्यायुभिः ।
गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः ॥
केचिद्दिव्याम्बरधराः सुचन्दनविभूषिताः ।
भुञ्जन्तो यान्ति नाम्बूलं पुष्पाकान्तो यमालयम् ॥
निजमाश्लिष्य केचिच्च पालयन्तो द्विजो दय ।
व्रजन्ति धर्मनगारं नानद्रत्नविवासिनः ॥
केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः ।
सुधापानं प्रकुर्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं नराः ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्दधीनि खादन्तः केचित्सारावलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
तानागतांस्ततो दृष्ट्वा नरान् धर्मपरायणान् ।
आस्ते हि प्रीतिमापन्नः स्वयं नारायणो भवेत् ॥
चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च चारुहासस्मिताननः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः ।
सर्वे नारायणाकारा बभूवुर्मधुरोक्तयः ॥
ततः स्वयं धर्मराजस्तान् सम्यक् पुण्यकर्मणाम् ।
परमां प्रीतिमापन्नः निमन्त्र्य पूजयेद्द्विज ॥
दिव्यैर्गन्धैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु साधुवादाय भास्करिः ।

यम उवाच ।

यूयं सर्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गम्यतां परमं पदम् ॥
संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् ॥
इत्युक्त्वा धर्मराजेन ते सर्वे द्विजसत्तम ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥"
इति पाद्मोत्तरे क्रियायोगसारे २२ अध्यायः ॥

पुत्त्रार्थं, क्ली, (पुत्त्रस्य तदहयेति । "रक्षाद्य-ष्टितिभ्यश्च ।" ५ । ४ । ८६ । इति टच् । "उपमेयाऽथाव ।" ५ । ४ । ८० । इति अद्दा-देशो च ।) पुत्त्रादिनम् । इत्यमरः । (यथा, भगवत्यां । ६६ ।
"पुत्त्रार्थं ब्रह्मपुत्त्रं सुविमलं प्राप्तः प्रयातस्य ते पत्युर्योऽभिनमोऽभितं प्रियतम । त्वं निर्गतः योऽपदि ।")

पुत्त्रादवाचकं, क्ली, (पुत्त्रादस्य वाचकम् ।) वैवाहिकमंत्रादी प्रकृतार्थे पुत्त्रादानिमित्तस्य वाक्यवचनम् । यथा,—
"पुत्त्रादवाचनं देवे ब्राह्मणस्य विशेषतः ।
तथैव निरोद्वारं कुर्यात् नान्दिमुखेऽग्रतः ॥
कोद्वारं चाहमे कुर्यात् विरोद्वारं सदोषतः ।
यदायुक्तं तथा देवे कुर्वे सर्वं मनोभवम् ॥"
इत्युद्वाहतत्त्वे यमः ॥

पुत्, स्त्री । (भी-ती-मर्ष-पेद ।) नरकान्तः । ईश्वरा । श्रीवाक्यानुरूपम् । इति पुत्त्राद्यः ॥

पुत्तकः, पुं, (पुत अन्ये + आदि कर । पुत्तं गमनं कन्यालङ्कारादि । ला + कः । ततः संज्ञायां कन् । यथाह्वयेदैव निगमनादिक्रियाविस्तारात्र तथात्वम् ।) पत्रादिनिर्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा, "आचारात् योग्यवाच मरणचैः पुत्तकं कत्वा शिरःप्रभृति पलाश-पत्राणि दद्यात् ।" इति शुद्धितत्त्वम् ॥

पुत्तलिका, स्त्री, दन्तकाष्ठवस्त्रधातुप्रभृतिनिर्मितप्रतिमूर्त्तिः । पुत्तली एवेति स्वार्थे कनि ईकारस्य ह्रस्वे टापि निष्पन्ना ॥

पुत्तली, स्त्री, (पुत्तं गमनं लाति अभ्यायतीति । ला + कः । ततो ङीप् ।) स्वर्णादिनिर्मितप्रति-मूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥
"अमावास्यां समासाद्य मध्यरात्रौ पितृक्षयः ।
स्वर्णमयीं पुत्तलीं कृत्वा होमादिभिरलङ्कृताम् ॥"

पुत्तिका, स्त्री, (पुत्तं इतस्ततो भ्रमणमस्त्यस्या इति । पुत्त + ठन् । ततष्टाप् ।) मधुमक्षिका-विशेषः । तत्पर्य्यायः । पत्तङ्गिका २ । इत्यमरः । २ । ५ । २७ ॥ (पिपीलिकाप्रभेदः । यथा, मनुः । ४ । २३८ ।
"धर्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥")

पु(त्)त्रः, पुं, लग्नात् पञ्चमस्थानम् । यथा,—
"पुत्त्रस्थितेऽर्के नरोऽधौ यमपुत्तह्वतः सिंहराशौ सुपुत्रः ॥"
इत्यादि ज्योतिषतत्त्वम् ॥
(पुनाति पित्रादीनिति । पू + "पुवो ह्रस्वश्च ।" उणा० ४ । १६४ । इति क्तः धातोर्ह्रस्वश्च । तकारद्वये तु पुन्नामनरकात् त्रायते इति । पुत् + त्रै + कः । पितॄन् पातीति पृषोदरा-दित्वात् साधुः । इति रामायणे ।२।१०७।१२। श्लोकटीकायां रामानुजः ।) देहजातः । पुत्राम-नरकत्राता । पुत इति बेटा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनुजः ६ आत्मजम् ७ दायादः ८ कुलधारकः ९ नन्दनः १० आत्मभवः ११ द्वितीयः १२ प्रसूतिः १३ अङ्गजः १४ । इति शब्दरत्नावली । अस्य निरुक्तिर्यथा,—
"पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥"
इति महाभारते । १ । ७४ । ३७ ॥
(यथा च रामायणे । २ । १०७ । १२ ।
"पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः पितॄन् यः पाति सर्वतः ॥")

स च द्वादशविधः यथा,—
"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥"
तेषां लक्षणानि यथा,—
"स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्त्रं प्रथमकल्पितम् ॥१॥
यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ।
स्वधर्मेण नियुक्तायां स पुत्त्रः क्षेत्रजः स्मृतः ॥२॥
माता पिता वा दद्यातां यमद्भिः पुत्त्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥३॥
सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्त्रं पुत्त्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥४॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥५॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्त्रं परिगृह्णीयादपविद्धः स उच्यते ॥६॥
पितृवेश्मनि कन्या तु यं पुत्त्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥७॥
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥८॥
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥९॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥१०॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ॥११॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥१२॥
क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्त्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥"
इति मानवे ९ अध्यायः ॥ * ॥

सत्पुत्त्रप्रशंसा यथा,—

सुमना उवाच ।

"अथ सत्पुत्त्रः केचित् केचिच्छत्रुसमा अथ ।
ऋणसम्बन्धिनः केचित्कर्मविपाकदर्शिनः ॥
भार्य्या पिता च माता च भ्राता सम्बन्धिबान्धवाः ।
स्वेन स्वेन हि कार्येण समर्थाः सर्व एव ते ।
न्यासापहारभावेन यस्य यस्य ऋणं भुवि ।
न्यासस्वामी भवेत् पुत्त्रो गुणवान् रूपवान् भुवि ।
तेन चापहृतं न्यासं ततो हित्वा न संशयः ।
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं ततः ।
न्यासधर्मो च पुत्त्रोऽभूत्तत्पापापहारकश्च च ।
गुणवान् रूपवांश्चैव सर्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयेत्तस्य पुत्त्रो भूत्वा दिने दिने ।
प्रियवाक्यकरो भाति बहुभिर्वसर्दैरपि ।
स्नेहं दर्शयते बहुभिः प्रीतिदो भावभावुकः ।
दत्त्वा तु यौवनात्तेन महाशय पुनर्जितम् ।
स्नेहात् पिता हर्षं सकलान्यत्तनात् हरः ।
पुत्रान्तेन समुद्भूतं शत्रुं दारुणं दारुणानि मम ।
मानयेत् सम्बन्धं तस्य तु पुत्त्रो सदा सहसम्भवैः ।
समुद्भवा भूमौ प्राणं दर्शने हि सदा ।
पुत्रं दत्त्वा सम्बन्धे दहत्यत्र पुत्त्रः पुत्त्रः ।
तथा ह पुत्त्र पुत्त्रेति प्रलापं हि करोति सः ।
तदा पापं सदैव हि सर्वं पुत्त्रो हि सफलं च ।
समासं न कुरुते दर्शनं दर्शनीयकम् ।
शरीरं पुत्त्रोऽपि पिता पुत्त्रसदृशं सदा च ।
निजकर्म्मणा तथा दृष्ट्वा निज पुत्त्रकम् ।

विविधं रत्नसारेण महं: सौन्दर्य्यहेतवे ।
मालतीनाञ्च कुसुममम्लानं लक्षमीश्वरि ! ।
देयं वृन्दावनेशाय हास्यसौन्दर्य्यहेतवे ॥
चम्पकानां दलञ्च देयं नारायणाय वै ।
सुव्रते ! व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ॥
शुद्धस्फटिकसङ्काशं मणीन्द्रसारलक्षकम् ।
देयं गुणीन्द्रनाथाय मनःसौन्दर्य्यहेतवे ॥
प्रवालसारसङ्काशं मणिसारसहस्रकम् ।
देयं कृष्णाय भक्त्या च प्रियानुरागवृद्धये ॥
माणिक्यसारलक्षञ्च देयं कृष्णाय यत्नतः ।
जन्मनः कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥
कुष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्रहेतवे ॥
इन्द्रनीलसारलक्षञ्च देयं कृष्णाय यत्नतः ।
असंख्यजन्मपर्य्यन्तं स्वात्मनो धनवृद्धये ॥
धान्यं नानाप्रकारञ्च काञ्चनालादिकं परम् ।
व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं भावयेद्व्रती ॥
पायसं पिष्टकं सर्पिःशर्कराक्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वात्मनो भोगवृद्धये ॥
सुगन्धिपुष्पमाल्यानां लक्षमम्लानमीप्सितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे ! नानाविधानि च ॥
नानाविधानि पुष्पाणि सुरम्याणि शुभानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ! ॥
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वात्मनः प्रत्यवृद्ध्यर्थं व्रते जन्मनि जन्मनि ॥
पुष्पाञ्जलिशतं देयं नित्यं पूर्णञ्च पूजने ।
प्रणामशतकं देवि ! कर्त्तव्यं भक्तिवृद्धये ॥
फलाद्यञ्च हविष्यान्नं भोजनं मत्र फलादिकम् ।
हविः पयो जलं पथ्यं व्रते पथ्ये च सुव्रते ! ॥
रत्नप्रदीपशतकं वह्निं दद्याद्दिवानिशम् ।
रात्रौ कुशासनं कृत्वा नित्यं जागरणं व्रते ॥
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
मैथुनं विविधं त्याज्यं व्रते क्रीडाविवृद्धये ।
स्नानशुद्धिर्जागरणं सुबुद्धिस्तिलभोजने ॥
लोभमोहकामक्रोधभयशोकविषादकम् ।
कलहञ्च परित्याज्यं व्रते वस्तुविवृद्धये ॥
संपूर्णे च व्रते देवि ! प्रतिष्ठा तदनन्तरम् ॥
त्रिंशच्च षष्ट्यधिकं शतकं पत्रसंयुतम् ।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम् ॥
त्रिंशच्च षष्ट्यधिकं सहस्रं विप्रभोजनम् ।
त्रिंशच्च षष्ट्यधिकं सहस्रं तिलहोमकम् ॥
त्रिंशच्च षष्ट्यधिकं सहस्रं स्वर्णमेव च ।
देया व्रतसमाप्तौ च दक्षिणा विधिबोधिता ।
अन्यां समाप्तिदिवसे कथयिष्यामि दक्षिणाम् ॥
व्रतस्यास्य फलं देवि ! दृढा भक्तिर्हरौ भवेत् ।
हरितुल्यो भवेत् पुत्रो विख्यातो भुवनत्रये ॥
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
सर्व्वाभीष्टसिद्धीनां बीजं जन्मनि जन्मनि ॥
इत्येतत् कथितं देवि ! व्रतं कुरु महेश्वरि ! ।
पुत्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-४। अध्यायौ ॥

पुण्यकृत्, त्रि, (पुण्यं करोति इति । कृ + “सुकर्म्मपापमन्त्रपुण्येषु कृञः ।” ३।२।८९। इति क्विप् । “ह्रस्वस्य पिति कृति तुक् ।” ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिकः । यथा,
“पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः ॥”
इति भट्टिः । ५ । ६८ ॥

पुण्यगन्धः, पुं, (पुण्यः पवित्रो गन्धश्च गन्धोऽस्य ।) चम्पकः । इति त्रिकाण्डशेषः ॥

पुण्यजनः, पुं, (पुण्यः विरुद्धलक्षणया पापी पापी जनश्चेति ।) राक्षसः । इत्यमरः । १।१।६३॥ यक्षः । (यथा, हरिवंशे । ९ । २६ ।
“सर्व्वैः पुण्यजनैश्चैव वीरद्भिः पर्व्वतैस्तथा ॥”
पुण्याश्रितो जनः ।) सज्जनः । इति मेदिनी । ने, १६८ ॥

पुण्यजनेश्वरः, पुं, (पुण्यजनानां यक्षाणामीश्वरः ।) कुबेरः । इत्यमरः । १ । १ । ७३ ॥ (यथा, रघुः । ९ । ६ ।
“समतया वसुवृष्टिविसर्ज्जनै-
र्नियमनादसतां च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥”)

पुण्यतृणं, क्ली, (पुण्यं पवित्रं तृणम् ।) श्वेतकुशम् । इति राजनिर्घण्टः ॥

पुण्यदर्शनः, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्टः ॥ (यद्दर्शनेन पुण्यं भवति तत्, त्रि । यथा, रघुः । १ । ८६ ।
“तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥”)

पुण्यफलः, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेदः । तत्पर्य्यायः । लक्ष्म्यारामः २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यगम्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनुः । ५ । ५३ ।
“वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥”)

पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + ण्विः ।) पुण्यविशिष्टः । यथा, महानाटके ।
“क्रीडापन्नो विनीतासुचरिततरसः पुण्यभाजः प्रजाः स्युः ॥”

पुण्यभूः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूः भूमिः ।) आर्य्यावर्त्तदेशः । यथा, हेमचन्द्रे । ४ । १२ ।
“आर्य्यावर्त्तो जन्मभूमिर्जिनचक्र्यर्द्धचक्रिणाम् ।
पुण्यभूराचारवेदी मध्यं विन्ध्यहिमालयोः ॥”

पुण्यभूमिः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमिः ।) आर्य्यावर्त्तदेशः । इत्यमरः । २।१।८॥ स तु विन्ध्यहिमालययोर्मध्यदेशः । यथा,—
“आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः ॥”
इति भरतधृतमनुः ॥
पुत्रकः । इति शब्दरत्नावली ॥

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य वः ।) पुण्ययुक्तः । तत्पर्य्यायः । सुकृती २ धन्यः ३ । इत्यमरः । ३।१।३॥ सुकृत् ४ पुण्यकृत् ५ । इति जटाधरः ॥ धर्म्मवान् ६ मेदस्वान् ७ वृषवान् ८ । इति पुण्यधर्म्मशब्दयोः परवतुप्रत्ययेन निष्पन्नाः ॥ (यथा, महाभारते । १२ । २६७ । २८ ।
“स्वर्गं भित्त्वा प्रविशन्ति प्राणाः पुण्यवतां ध्रुवम् ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥”)

पुण्यश्लोकः, पुं, (पुण्यः पुण्यदायकः श्लोको यशः चरित्रं वा यस्य ।) विष्णुः । इति श्रीभागवतम् ॥ युधिष्ठिरः । इति महाभारतम् ॥ नलराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
“पुण्यश्लोकस्य वै दूतो वार्ष्णेय इति विश्रुतः ॥”)
पुण्यचरित्रे, त्रि ॥ (यथा, भागवते ।१।१०।१।
“संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुञ्च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥”)

पुण्यश्लोका, स्त्री, (पुण्यः पुण्यजनकः श्लोको यशः चरित्रं वा यस्याः ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
“पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः ॥”
इति पुराणम् ॥

पुण्या, स्त्री, (पुनाति या पूयतेऽनयेति वा । पू + “पूञो यण्णुक् ह्रस्वश्च ।” उणा० ५ । १५ । इति यत् णुक् ह्रस्वश्च धातोः । ततष्टाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥

पुण्यात्मा, त्रि, (पुण्यः आत्मा स्वभावो यस्य ।) पुण्यस्वभावः । तस्य गत्यादिर्यथा,—
ब्रह्मोवाच ।
“शृणु विप्र ! प्रवक्ष्यामि यत्त्वया श्रोतुमिच्छसि ।
पुण्यात्मनां धार्म्मिकाणां पन्थानं सुमहत्तरम् ।
आदौ ब्रवीमि पन्थानं शृणु पुण्यवतामहम् ।
शृणुष्व द्विजशार्द्दूल ! प्रयातां प्रीतिवर्द्धनम् ।
प्रकीर्णैर्दिव्यकुसुमैर्दिव्यगन्धैः समावृतः ।
भाति पुण्यात्मनां पन्थाः सर्व्वोपद्रववर्ज्जितः ।
क्वचिद्गन्धर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिच्चाप्सरसाभिश्च नृत्यते ।
क्वचिच्च वीणावादनं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिद्वायुः सुशीतलः ।
क्वचित् पुण्याः शीततोयाः कूपाश्च भृङ्गमालिकाः ।
क्वचिद्देवाश्च गन्धर्व्वाः पठन्ति स्तवमुत्तमम् ।
क्वचित् वापीदीर्घिकाश्च पद्मोत्पलशोभिताः ।
सुच्छायाः पादपाः क्वापि पुष्पिता बहुवारदः ।
धर्म्मानुगसम्पन्नो पथि गच्छति मानवः ।
पुण्यात्मानो द्विजश्रेष्ठ ! सुरम्यभवनाय च ।
केचित्तुरङ्गमारूढा नानालङ्कारभूषिताः ।
उद्दामधवलच्छत्रैर्गच्छन्त्यानन्दसंयुताः ।
केचिद्यान्ति गजारूढा रथारूढाश्च केचन ।
यानारूढा नराः केचित् गतेन मन्दिरम् ।

केचिद्दिव्याङ्गनाहस्तन्यस्तचामरवायुभिः ।
गच्छन्ति वीजिता मर्त्त्याः स्तूयमानाः सुरर्षिभिः ॥
केचिद्दिव्याङ्गनधराः सुचन्दनविभूषिताः ।
भुञ्जन्तो यान्ति ताम्बूलं पुण्यात्मानो यमालयम् ॥
निजगात्रत्विषा केचिच्छालयन्तो दिशो दश ।
व्रजन्ति धर्म्मागारं नलदद्रुमनिवासिनः ॥
केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः ।
सुधापानं प्रकुर्व्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्दधीनि खादन्तः केचित्तालफलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमापन्नः स्वयं नारायणो भवेत् ॥
चतुर्ब्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च स्मेरचारुतराननः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः ।
सर्व्वे नारायणाकारा बभूवुर्म्मधुरीक्षयः ॥
ततः स्वयं धर्म्मराजस्तान् सर्व्वान्मनुजोत्तमान् ।
परमां प्रीतिमासाद्य मित्रवत् पूजयेद्द्विज ! ॥
दिव्यैर्गन्धैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु मानुषाचाय भास्करिः ॥
यम उवाच ।
यूयं सर्व्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गच्छत परमं पदम् ॥
संसारे ह्यत्र संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे माता स मे बन्धुः स मे सुहृत् ॥
इत्युक्ता धर्म्मराजेन ते सर्व्वे द्विजसत्तम ! ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥”
इति पाद्मोत्तरे क्रियायोगसारे २२ अध्यायः ॥

पुण्याहं, क्ली, (पुण्यञ्च तदहश्चेति । “राजाहः-सखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् । “उत्तमैकाभ्याञ्च ।” ५ । ४ । ९० । इति अह्नादेशो न ।) पुण्यदिनम् । इत्यमरः ॥ (यथा, अमरुशतके । ६१ ।
“पुण्याहं व्रजमङ्गलं सुदिवसं प्रातः प्रयातस्य ते यत्स्नेहोचितमीहितं प्रियतम ! त्वं निर्गतः श्रोष्यसि ॥”)

पुण्याहवाचनं, क्ली, (पुण्याहस्य वाचनम् ।) दैवादिकर्म्मादौ मङ्गलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनम् । यथा,—
“पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्त्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥”
इत्युद्वाहतत्त्वे यमः ॥

पुत, गतौ । (भ्वा-परं-सकं-सेट् ।) तकारान्तः । पुतिता । सौत्रधातुरयम् । इति दुर्गादासः ॥

पुत्तलः, पुं, (पुत गतौ+भावे घञ् । पुतं गमनं लाति अन्यस्मादिति । ला+कः । ततः संज्ञायां कन् । अथवाश्रयेणैव हि गमनादिक्रियावत्त्वादस्य तथात्वम् ।) पत्रादिनिर्म्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा, “आचारात् शौच्याच्च शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाश-पत्राणि देयानि ।” इति शुद्धितत्त्वम् ॥

पुत्तलिका, स्त्री, स्वर्णकाष्ठदन्तधातुरत्नादि-निर्म्मितप्रतिमूर्त्तिः । पुत्तली एवेति स्वार्थे कनि ईकारस्य ह्रस्वे टापि निष्पन्ना ॥

पुत्तली, स्त्री, (पुत्तं गमनं लाति अन्याश्रयेणेति । ला+कः । ततो ङीष् ।) स्वर्णादिनिर्म्मितप्रति-मूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥
“अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।
स्वर्णमयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम् ॥”

पुत्तिका, स्त्री, (पुत्तं इतस्ततो भ्रमणमस्त्यस्या इति । पुत्त+ठन् । ततष्टाप् ।) मधुमक्षिका-विशेषः । तत्पर्य्यायः । पत्तङ्गिका २ । इत्यमरः । २ । ५ । २७ ॥ (पिपीलिकाप्रभेदः । यथा, मनुः । ४ । २३८ ।
“धर्म्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्व्वभूतान्यपीडयन् ॥”)

पु(त्र)त्रः, पुं, लग्नात् पञ्चमस्थानम् । यथा,—
“पुत्त्रस्थितेऽर्के नरोऽसौ प्रथमसुतहतः सिंहराशौ सुपुत्त्रः ॥”
इत्यादि ज्योतिस्तत्त्वम् ॥
(पुनाति पित्रादीनिति । पू+“पुवो ह्रस्वश्च ।” उणा० ४ । १६४ । इति क्तः धातोर्ह्रस्वश्च । तकारद्वये तु पुन्नामनरकात् त्रायते इति । पुत्+त्रै+डः । पितॄन् पातीति श्रुतपन्था पृषोदरादित्वात् साधुः । इति रामायणे ।२।१०७।१२। श्लोकटीकायां रामानुजः ।) पुंसन्तानः । पुन्नाम-नरकत्राता । पुत इति बेटा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनूजः ६ अपत्यम् ७ दायादः ८ कुलाधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रसूतिः १३ स्वजः १४ । इति शब्दरत्नावली ॥ अस्य निरुक्तिर्यथा,—
“पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥”
इति महाभारते । १ । ७४ । ३७ ॥
(यथा च रामायणे । २ । १०७ । १२ ।
“पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः पितॄन् यः पाति सर्व्वतः ॥”)
स च द्वादशविधः यथा,—
“औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षड़दायादबान्धवाः ॥”
तेषां लक्षणानि यथा,—
“स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्त्रं प्रथमकल्पितम् ॥१॥
यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्त्रः क्षेत्रजः स्मृतः ॥२॥
माता पिता वा दद्यातां यमद्भिः पुत्त्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥३॥
सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्त्रं पुत्त्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥४॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥५॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्त्रं परिगृह्णीयादपविद्धः स उच्यते ॥६॥
पितृवेश्मनि कन्या तु यं पुत्त्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥७॥
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥८॥
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥९॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत पुनर्भूत्वा स पौनर्भव उच्यते ॥१०॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ॥११॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥१२॥
क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्त्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥”
इति मानवे ९ अध्यायः ॥ ● ॥
चतुर्व्विधपुत्त्रा यथा,—
सुमना उवाच ।
“ऋणसम्बन्धिनः केचित् केचिन्न्यासापहारकाः ।
रिपवश्च प्रियाश्चेति स्वकर्म्मवशवर्त्तिनः ॥
भेदैश्चतुर्भिर्जायन्ते पुत्त्रा मित्राः स्त्रियस्तथा ।
भार्य्या पिता च माता च भृत्याः स्वजनबान्धवाः ॥
स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले ।
न्यासापहारभावेन यस्य यस्य कृतं भुवि ॥
न्यासस्वामी भवेत् पुत्त्रो गुणवान् रूपवान् भुवि ।
येन चापहृतं न्यासं तस्य गेहे न संशयः ॥
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः ।
न्यासरूपी स पुत्त्रोऽभून्न्यासापहारकस्य च ॥
गुणवान् रूपवांश्चैव सर्व्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयेत्तस्य पुत्त्रो भूत्वा दिने दिने ॥
प्रियवाक्यधरो वापि बहुस्नेहं प्रदर्शयेत् ।
स्वीयं द्रव्यं समुद्गाढ्य प्रीतिमुत्पाद्य चातुलाम् ॥
भुक्त्वा तु यौवनानीव तद्दानाय पुनर्व्रजेत् ।
यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा ॥
दुःखमेव महत् कृत्वा दारुणं प्राणनाशनम् ।
तादृशं तस्य दद्यात् स पुत्त्रो भूत्वा महागुणैः ॥
अल्पायुषस्तथा भूत्वा मरणं यान्ति ते तथा ।
दुःखं दत्त्वा प्रयान्त्येवं मुहुश्चैवं पुनः पुनः ॥
सदाह पुत्त्र पुत्त्रेति प्रलापं हि करोति सः ।
तदा चास्यं करोत्येव कः स पुत्त्रो हि कस्य च ॥
अनेनापि कृतं न्यासं मदीयं परिचारिणा ।
न्यासापहारोऽपि पिता पूर्व्वमद्यैव तस्य च ॥
पिशाचत्वं मया दत्तमद्यैव हि दुरात्मनः ।

दशामदर्शनेनापि मम प्राणा गताः किल ।
दुःखेन महता चैव यदाहं पीडितः पुरा ।
तथा दुःखं प्रदत्वाहं दत्वं सुखात्सुखावहम् ॥
भोगेन सर्व्वमादाय चिरादित्थास्य सौम्यवत् ।
गतोऽस्मि त्वत्प्रसादाद्ध कस्याहं सुत ईदृशः ॥
न चैषोऽपि पिता पूर्व्वमद्यैव न च कस्यचित् ।
मिथ्याचारं मया दत्तमद्यैव च दुरात्मनः ॥
एवमुक्ता प्रयात्येव सं प्रहस्य पुनः पुनः ।
प्रयाणेनैव मार्गेण दुःखं दत्त्वा सुदारुणम् ॥
एवं न्यासस्य सम्बन्धात् पुत्राः किल भवन्ति वै ।
संसारे दुःखबहुला दृश्यन्ते यत्र तत्र हि ॥१॥
ऋणसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः ।
ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल ॥
अर्थदाता सुतो भूत्वा भ्राता वाथ पिता प्रियः ।
मित्ररूपेण वर्त्तेत व्यस्तद्वेषः सदैव सः ॥
गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः ।
जल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च ॥
नित्यं मिष्टं समश्नाति भोगान् भुङ्क्ते नित्यशः ।
द्यूतकर्म्मरतो नित्यं चौरकर्म्मणि नित्यशः ॥
गृहाद्द्रव्यं बलाद्धर्त्ता वार्य्यमाणः प्रकुप्यति ।
पितरं मातरञ्चैव कुत्सते च दिने दिने ॥
दायकञ्चामकञ्चैव बहुनिष्ठुरजल्पकः ।
वञ्चयित्वैव सुद्राय कृत्वा सुखेन तिष्ठति ॥
जातकर्म्मादिभिर्भूयो द्रव्यं गृह्णाति दारुणः ।
पुनर्व्विवाहसंयोगात्तन्नामभेदैरनेकधा ॥
एवं संक्षीयते द्रव्यं नैवमेतद्ददात्यपि ।
गृहक्षेत्रादिकं सर्व्वं ममैव हि न संशयः ॥
पितरं मातरञ्चैव पदघ्नैर्दिने दिने ।
मुद्गरैर्मुषलैश्चैव कथायातैस्तु दारुणैः ॥
मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् ।
निःस्नेहो निर्घृणश्चैव जायते नात्र संशयः ॥
श्राद्धकार्य्याणि दानानि न करोति कदाचन ।
एवंविधास्तथा पुत्रा भवन्ति च महीतले ॥२॥
रिपुपुत्रं प्रवक्ष्यामि तवार्थे द्विजपुङ्गव ! ।
बाल्ये वयसि संप्राप्ते रिपुवद्वर्त्तते सदा ॥
पितरं मातरञ्चैव क्रीडमानो हि ताडयेत् ।
ताड़यित्वा प्रयात्येवं प्रहस्यैव पुनः पुनः ॥
पुनरायाति सं तत्र पितरं मातरं पुनः ।
सक्रोधो वर्त्तते नित्यं वैरकर्म्मणि सर्व्वदा ॥
पितरं मारयित्वा तु मातरञ्च पुनः पुनः ।
प्रयात्येव स दुष्टात्मा पूर्व्ववैरानुभावतः ॥३॥७॥
अथातः संप्रवक्ष्यामि यस्माल्लभ्यो भवेत् प्रियः ।
जातमात्रः प्रियं कुर्य्याद्बाल्ये क्रीडनकैः ॥
वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम् ।
भक्त्या संतोषयेन्नित्यं तावुभौ परितोषयेत् ॥
स्नेहेन वचसा चैव प्रियसम्भाषणेन च ।
मृतौ गुरू समाज्ञाय स्नेहेन रुदते पुनः ॥
श्राद्धकर्म्माणि सर्व्वाणि पिण्डदानादिकां क्रियाम् ।
करोति दुःखसम्भिन्नो यात्रां प्रयच्छति ॥
ऋणत्रयान्वितः स्नेहाद्दिव्यं नयति विक्लवः ।
दत्त्वार्थं संतु कान्त प्रयच्छति न संशयः ।
पुत्रो भूत्वा यथापापः स्नेन विप्रिया किम ॥८॥

उदासीनं प्रवक्ष्यामि तवार्थे प्रिय ! साम्प्रतम् ।
उदासीनेन भावेन सदैव परिवर्त्तते ।
ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति ॥
नैवोपयाति संत्यज्य उदासीनो द्विजोत्तम ! ।
तवार्थे कथितं सर्व्वं पुत्राणां गतिरीदृशी ॥
यथा पुत्रास्तथा भार्य्या पिता माता च बान्धवाः ।
भृत्याश्चान्ये समाख्याताः पश्वश्वगजास्तथा ।
गजा महिष्यो दासाश्च ऋणसम्बन्धिनस्त्वमी ॥"*॥
सुपुत्रलक्षणं यथा,—

वशिष्ठ उवाच ।

"पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम् ।
पुण्यप्रसक्तो यस्यात्मा सत्यधर्म्मरतः सदा ।
बुद्धिमान् ज्ञानसम्पन्नस्तपस्वी वाग्विदांवरः ॥
सर्व्वकर्म्मसु सन् धीरो वेदाध्ययनतत्परः ।
सर्व्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः ॥
याजकः सर्व्वयज्ञानां दाता त्यागी प्रियंवदः ।
विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत्सदा ।
पितृमातृपरो नित्यं सर्व्वस्वजनवत्सलः ।
कुलस्य तारको विद्वान् कुलस्य परिपोषकः ॥
एवं गुणैः सुसंयुक्तः सुपुत्रः सुखदायकः ॥"*॥
पुत्रस्य जङ्गमतीर्थत्वं यथा,—
"सर्व्वतीर्थाधिकं तीर्थं पुत्रतीर्थमुदाहृतम् ।
यद्वैश्यो वैश्यवदर्शी सर्व्वधर्म्मविचक्षणः ॥
एतेन पुत्रतीर्थेन पवित्रोऽगात् परं पदम् ।
सत्पुत्रं परमं तीर्थं प्राप्य सुखन्ति पूर्व्वजाः ।
पितापि नरकान्मुक्तः स्यान्माले पुत्रे महात्मनि ॥"
वैष्णवपुत्रस्य पूर्व्वपुरुषोद्धारकत्वं यथा,—
"वैष्णवो यदि पुत्रः स्यात् स तारयति पूर्व्वजान् ।
पितृनधस्तना वंशात्तारयन्त्यतिपावनाः ॥"*॥
कुपुत्रजनने पितॄणां नरकगमनं यथा,—
"तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्व्वजाः ।
कुघोरे नरके दीनाः भ्रमन्ति च मुहुर्मुहुः ॥
यथा जलं कुप्लवेन तरन्नपि मूढधीः ।
तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति ॥
जातमात्रे कुले जन्तौ संश्रयते पितामहाः ।
किमेषोऽधो नयेदस्मानूर्द्ध्वं वा वैष्णवो भवेत् ॥"
इति पाद्मे भूमिखण्डे ११ । १२ । १८ । १९ ।
अध्यायाः ॥ * ॥
सप्तविधपुत्रा यथा,—
"दत्तो मौल्यश्चैव क्रीतनः पालकस्तथा ।
विद्यामन्त्रप्रणामाच्च यद्योना सप्तमः सुतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥*॥
पुत्रमुखदर्शने पुण्यं यथा,—

मार्कण्ड उवाच ।

"गृहमागत्य प्राणेश ! तपसां फलदायकम् ।
कल्पे कल्पे ध्यायते यं तं समागत्य मन्दिरम् ॥
पौत्रं पुत्रमुखं पश्य पुण्यबीजं मनोत्सवम् ।
पुन्नामनरकत्राणकारणं भवतारणम् ॥
स्नानेन सर्व्वतीर्थेषु सर्व्वयज्ञेषु दक्षिणा ।
पुत्रस्य दर्शनस्यास्य कलां नार्हन्ति षोडशीम् ॥
सर्व्वदानेन यत् पुण्यं यत् पृथिव्याः प्रदक्षिणम् ।
पुत्रदर्शनपुण्यस्य कलां नार्हन्ति षोडशीम् ॥

सर्व्वैस्तपोभिर्यत् पुण्यं यदेवानशनैर्व्रतैः ।
सत्पुत्रोद्भवपुण्यस्य कलां नार्हन्ति षोडशीम् ।
महाविप्रभोजनैः पुण्यं यदेव सुरसेवनैः ।
सत्पुत्रप्राप्तिपुण्यस्य कलां नार्हन्ति षोडशीम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ८ अध्यायः ॥*॥
पुत्रोत्सवविधिर्यथा,—
"महं पुत्रोत्सवे नन्दश्चकार परमादरात् ।
ददौ यशोदा गोपीभ्यो याचकेभ्यो ददौ मुदा ।
धनानि नानावस्तूनि तैलसिन्दूरमेव च ॥"
अपि च ।
"नन्दः सचेलः स्नात्वा च धृत्वा धौते च वाससी ।
पारम्पर्य्यविधिं तत्र चकार हृष्टमानसः ॥
ब्राह्मणान् भोजयामास कारयामास मङ्गलम् ।
वाद्यानि वादयामास वन्दिभ्यश्च ददौ धनम् ॥
ततो नन्दश्च सानन्दं ब्राह्मणेभ्यो ददौ धनम् ।
रत्नानि प्रवालानि हीरकाणि च सादरम् ।
तिलानां पर्व्वतान् सप्त सुवर्णं काञ्चनं मुने ! ।
रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ।
दधि दुग्धं शर्कराञ्च नवनीतं घृतं मधु ।
मिष्टान्नं लड्डुकौघञ्च स्वादूनि मोदकानि च ।
भूमिञ्च सर्व्वशस्याढ्यां वायुवेगास्तुरङ्गमान् ।
ताम्बूलानि च तैलानि दत्त्वा हृष्टो बभूव ह ॥"
पुत्रप्रशंसा यथा,—
"धनं धान्यञ्च रत्नं वा सत् सर्व्वं पुत्रहेतुकम् ।
न भवितं यत् पुत्रेण तद्द्रव्यं निष्फलं भुवि ।
शतकूपाधिका वापी शतवापीसमं सरः ।
सरःशताधिको यज्ञः पुत्रो यज्ञशताधिकः ।
तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम् ।
सुखप्रदोऽपि सत्पुत्रः प्राणेभ्योऽपि गरीयसम् ।
पुत्रादपि परो बन्धुर्न भूतो न भविष्यति ॥"
पुत्रात् पराजये आनन्दयुक्तत्वं यथा,—
"नन्दः सपुत्रको हृष्टः सभार्य्यो बान्धवैः ।
आनन्दयुक्ता मनुजा यदि पुत्रैः पराजिताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ । १३ । ११
अध्यायाः ॥ * ॥
बहवः पुत्राः काम्याः । यथा,—
"एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वा अश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥"
मातापित्रोराज्ञाकारित्वपुत्रस्यापि राज्य-
भागित्वं यथा,—

ययातिरुवाच ।

"पुत्रो यश्चानुवर्त्तेत स राजा पृथिवीपतिः ।
भवन्तः प्रतिजानन्तु पूरू राज्येऽभिषिच्यताम् ॥

प्रकृतयः ऊचुः ।

यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ॥"

इति मात्स्ये ३४ । ३३ अध्यायौ ॥ * ॥

सत्पुत्रोत्पत्तिमात्रेण पुन्नामनरकत्राणं स्वर्ग-
गमनञ्च । यथा,—
"सत्पुत्रेणैव सुशिक्षिताः सत्पुत्रेणैव दुर्म्मतिः ।
उत्तारयेत् पितॄन् सर्व्वान् पुन्नामनरकाद्गतम् ॥"
इत्यादिपुराणम् ॥

अपि च ।
"सत्पुत्त्रेण च जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥"
इति विष्णुपुराणे । १ । १३ । ४९ ॥ * ॥
विद्यादिरहितस्य पुत्त्रस्य निन्दा यथा,—
"तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ।
कोऽर्थः पुत्त्रेण जातेन यो न विद्वान्न धार्म्मिकः ॥
एकेनापि सुपुत्त्रेण विद्यायुक्तेन धीमता ।
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वनं सुवासितं सर्व्वं सुपुत्त्रेण कुलं यथा ॥
एको हि गुणवान् पुत्त्रो निर्गुणेन शतेन किम् ।
चन्द्रो हन्ति तमांस्येको न च ज्योतिःसहस्रशः ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्त्रं मित्रवदाचरेत् ॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम् ।
म्रियमाणो हरेत् प्राणान्नास्ति पुत्त्रसमो रिपुः ॥
शौर्य्ये तपसि दाने वा यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥"
इति गारुडे ११४।११५ अध्यायौ ॥ * ॥
स च मध्यमोत्तमाधमभेदेन त्रिविधः । यथा,—
"यदुपात्तं यशः पित्रा धनं वीर्य्यमथापि वा ।
तन्न ह्रापयते यस्तु स नरो मध्यमः स्मृतः ॥
तद्वीर्य्याभ्यधिकं यस्तु पुनरन्यत् स्वशक्तितः ।
निष्पादयति तं प्राज्ञा वदन्ति नरसत्तमम् ॥
यः पित्रा समुपात्तानि धनवीर्य्ययशांसि च ।
न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अपि च ।
"उत्तमश्चिन्तितं कुर्य्यात् प्रोक्तकारी च मध्यमः ।
अधमोऽश्रद्धया कुर्य्यादकर्त्तोच्चरितं पितुः ॥"
इति महाभारतम् ॥
(अनुरूपपुत्त्रप्राप्त्युपायो यथा,—
"ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनु परिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राज्यशेषं प्राश्नीयात् । पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवशेषयेत् । ततस्तौ सह संवसेतामष्टरात्रं तथाविधपरिच्छदावेव तथेष्टं पुत्त्रं जनयेताम् । या तु स्त्री श्यामं लोहिताक्षं व्यूढोरस्कं महाबाहुं पुत्त्रमाशासीत । या वा कृष्णं कृष्णमृदुदीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्यं स्यात् पुत्त्रवर्णानुरूपस्तु यथाशीरेव तयोः परिवर्होऽन्यः कार्य्यः स्यात् । द्विजेभ्यः शूद्रा तु नमस्कारमेव कुर्य्यात् देवगुरुतपस्विसिद्धेभ्यश्च । या या च यथाविधं पुत्त्रमाशासीत तस्यास्तस्यास्तां पुत्त्राशिषमनुनिशम्य तांस्तान् जनपदान् मनसानुपरिक्रामयेत् । ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्त्रमाशासीत सा सा तेषां तेषां जनपदानामाहारविहारोपचारपरिच्छदाननुविधीयस्वेति वाच्या स्यात् । इत्येतत् सर्व्वं पुत्त्राशिषां समृद्धिकरं कर्म्म व्याख्यातम् ।"
"यथा च गुर्व्विणी शनैः शनैः पूर्व्वं प्रवाहेत ततोऽनन्तरं बलवत्तरमिति तस्याञ्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाता प्रजाता धन्यं धन्यं पुत्त्रमिति तथास्या हर्षेणाप्यायन्ते प्राणाः ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)

पुत्त्रकः, पुं, (पुत्त्र + स्वार्थे संज्ञायामनुकम्पायां वा कन् ।) पुत्त्रः । (यथा, विष्णुपुराणे ।२।१३।२९।
"तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्त्रक ! ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥")
शरभः । धूर्त्तः । शैलविशेषः । वृक्षभेदः । इति मेदिनी । के, १२४ ॥ पतङ्गकः । अनुकम्पान्वितसुतः । इति शब्दरत्नावली ॥

पुत्त्रकन्दा, स्त्री, (पुत्त्रप्रदो कन्दोऽस्याः । अस्याः कन्दस्य गर्भदोषनाशेन पुत्त्रदातृत्वात् तथात्वम् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

पुत्त्रका, स्त्री, (पुत्त्र + स्वार्थे संज्ञायां वा कन् । टाप् । "न यासयोः ।" ७ । ३ । ४५ । इत्यस्य "वृत्तकापुत्त्रिकावृन्दारकाणां वेति वक्तव्यम् ।" इति वार्त्तिकोक्त्या ङीत्व इकारस्य पक्षेऽकारः ।) पुत्त्रिका । इति शब्दरत्नावली ॥

पुत्त्रजीवः, पुं, (पुत्त्रं गर्भं जीवयतीति । जीवि + अण् ।) वृक्षविशेषः । जियापुता इति भाषा । तत्पर्य्यायः । श्लीपदापहः २ । इति त्रिकाण्डशेषः ॥ कुमारजीवः ३ पुत्त्रञ्जीवकः ४ । इति रत्नमाला ॥ पवित्रः ५ गर्भदः ६ सुतजीवकः ७ ॥ अस्य गुणाः । हिमत्वम् । वृष्यत्वम् । श्लेष्मगर्भजीवदातृत्वम् । चक्षुष्यत्वम् । पित्तशमनत्वम् । दाहतृष्णानिवारणत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । वातकारित्वम् । सृष्टमूत्रमलत्वम् । स्वादुत्वम् । पटुत्वम् । कटुत्वम् । इति भावप्रकाशः ॥

पुत्त्रञ्जीवकः, पुं, (पुत्त्रं गर्भं जीवयतीति । जीवि + ण्वुल् । द्वितीयाया अलुक् ।) पुत्त्रजीवकवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने १८ अध्याये ।
"अनेनैव विधानेन पुत्त्रञ्जीवकजं रसम् ।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित् ॥")
पुत्त्रस्य जीवके, त्रि ॥

पुत्त्रदा, स्त्री, (पुत्त्रं गर्भं ददाति सेवनेनेति । दा + कः ।) वन्ध्याकर्कोटकी । लक्ष्मणाकन्दः । गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

पुत्त्रदात्री, स्त्री, (पुत्त्रं ददाति सेवनेनेति । दा + तृच् + ङीप् । वन्ध्यादोषनाशित्वादस्यास्तथात्वम् ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । वातारिः २ भ्रमरी ३ श्वेतपुष्पिका ४ वृत्तपत्त्रा ५ अतिगन्धालुः ६ पेशीकाता ७ दुग्धहरी ८ । अस्या गुणाः । वातकटुत्वकफनाशित्वम् । सुरभित्वम् । सर्व्वदा पथ्यत्वम् । वन्ध्यादोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुत्त्रप्रदा, स्त्री, (पुत्त्रं प्रददाति सेवनेनेति । प्र + दा + कः । टाप् ।) चविका । इति राजनिर्घण्टः ॥

पुत्त्रभद्रा, स्त्री, (पुत्त्रस्य भद्रमस्या इति ।) वृहज्जीवन्ती । इति राजनिर्घण्टः ॥

पुत्त्रशृङ्गी, स्त्री, (पुत्त्रं पवित्रं शृङ्गमिव पुष्पमस्याः । गौरादित्वात् ङीष् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥

पुत्त्रश्रेणी स्त्री, (पुत्त्राणां तनसन्तानानां श्रेणिरिव । ङीप् ।) मूषिकपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये ।
"श्यामा महाश्यामा वृश्चिकाली शङ्खिनी तिल्वककम्पिल्लकरम्यकक्रमुकपुत्त्रश्रेणीगवाक्षीराजवृक्षकरञ्जद्वयगुडूचीसप्तलाछगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥")

पुत्त्रसूः, स्त्री, (पुत्त्रं सूते इति । सू + क्विप् ।) पुत्त्रजनिका । यथा,—
"पुत्त्रसूः पुण्यभूमिः स्याद्गनसः पुत्त्रिकाप्रदः ॥"
इति शब्दरत्नावली ॥

पुत्त्रान्नादः, त्रि, (पुत्त्रस्य अन्नं तदुपहृतमन्नमत्तीति । अद् + अण् ।) पुत्त्रान्नभोजी । तत्पर्य्यायः । कुटीचकः २ । इति त्रिकाण्डशेषः ॥

पुत्त्रिका, स्त्री (पुत्त्री + स्वार्थे कन् टाप् । "केऽणः ।" ७ । ४ । १३ । इति ह्रस्वः ।) कन्या । तत्पर्य्यायः । आत्मजा २ दुहिता ३ पुत्त्री ४ तनुजा ५ सुता ६ अपत्यम् ७ पुत्त्रका ८ स्वजा ९ तनया १० नन्दिनी ११ । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे । ३ । २२१ ।
"पुत्त्रिकाब्रवीत् । तात ! अनिर्द्दहनात्मकोऽयं नाहमेनमभिलषामि ।" पुत्त्रीव प्रतिकृतिरस्या इति । पुत्त्री + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ह्रस्वश्च ।) पुत्तलिका । यावतूनकः । इति मेदिनी । के, १२४ ॥ (यथा, सुश्रुते सूत्रस्थाने । १६ अध्याये ।
"पीठोपमपालिरुभयतः क्षीणपुत्त्रिकाश्रितो निर्व्वेधिमः शुष्काशुष्कसमविषमपालिर्या योगिमः ॥"
पुत्त्रस्वरूपत्वेन कृता कन्या । तद्गर्भजातः पुत्त्रस्तु कन्यादातुः पुत्त्रो भवतीति । यथा, मनौ । ९ । १२७–१२८ ।
"अपुत्त्रोऽनेन विधिना सुतां कुर्व्वीत पुत्त्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम् ॥"
यथा च महाभारते । १ । ६६ । १२ ।
"ताः सर्व्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः ।
पुत्त्रिकाः स्थापयामास नष्टपुत्त्रः प्रजापतिः ॥")

पुत्त्रिकापुत्त्रः, पुं, (पुत्त्रिकायाः जातोऽस्याः पुत्त्रो स हि मदीयः पुत्त्रो भविष्यतीति पुत्त्रस्वरूपत्वेन कृतायाः सुतायाः पुत्त्रः ।) पुत्त्रिकायाः सुतः । स च औरससमः । यथाह वशिष्ठः ।
"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्त्रः स मे पुत्त्रो भवेदिति ॥
अथवा पुत्त्रिकैव सुतः पुत्त्रिकासुतः, सोऽप्यौरससम एव पितृवयवानामल्पत्वात्त्ववयवानां

कानुन्याय । यथाह वशिष्ठः । द्वितीयः पुत्रिकेवेति । द्वितीयः पुत्रः कन्यैवेत्यर्थः ।" इति मिताक्षरा ॥

पुत्रिकाप्रसूः, स्त्री, (पुत्रिकायाः कन्यायाः प्रसूः जननी ।) पुत्रिकाजननी । तत्पर्य्यायः धनसूः २ । इति शब्दरत्नावली ॥

पुत्रिकासुतः, पुं, (पुत्रिकायाः सुतः ।) पुत्रिकायाः पुत्रः । पुत्रिकैव पुत्रः । अस्य प्रमाणं पुत्रिकापुत्रशब्दे द्रष्टव्यम् ॥

पुत्रिणी, स्त्री, (पुत्रोऽस्या अस्तीति । पुत्र + इनिः + ङीप् ।) पुत्रवती । यथा,—
"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्म्मनुः ॥"
इति दायभागधृतमनुवचनम् ॥

पुत्री, [न्] पुं, (पुत्रोऽस्यास्तीति । पुत्र + इनिः ।) पुत्रयुक्तः । पुत्रशब्दादस्त्यर्थे इन्प्रत्ययनिष्पन्नः ॥ यथा,—
"ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात् सर्व्वमर्हति ॥"
इति मनुः ॥

पुत्री, स्त्री, (पुत्र + "शार्ङ्गरवाद्यञो ङीन् ।" ४ । १ । ७३ । इति ङीन् । यद्वा, गौरादित्वात् ङीष् ।) सुता । इति हलायुधः ॥ अस्याः पर्य्यायः पुत्रिकाशब्दे द्रष्टव्यः । वृक्षविशेषः । इति शब्दचन्द्रिका ॥

पुत्रीयं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० । इति छः ।) पुत्रार्थम् । (यथा, महाभारते १ । ६७ । १६६ ।
"धर्म्मं प्रशस्तं पुत्रीयमायुष्यं विजयावहम् ।
इदमंशावतरणं श्रोतव्यमनसूयता ॥"
यथा च रघौ । १० । ४ ।
"ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥"
"पुत्रीयां पुत्रनिमित्ताम् ।" इति तट्टीकायां मल्लिनाथः ॥") पुत्रसम्बन्धि । पुत्रस्येदमित्यर्थे ईयप्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥

पुत्रेष्टिः, स्त्री, (पुत्रनिमित्तिका इष्टिरिति मध्यपदलोपी समासः ।) पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥ यथा,—
"अधीत्य पञ्चवर्षीयं पुत्रेष्टिं प्रथमञ्चरेत् ॥"
इति स्मृतिः ॥
(अस्याः क्रियाविधिर्यथा,—
"ततः पुत्रकामा पश्चिमतोऽग्निं दक्षिणतो ब्राह्मणमन्वारभ्याभिजुहुयात् सह भर्त्रा यथेष्टं पुत्रमाशासाना । यस्तस्या आशासनाया अभिप्रजापतिमभिनिर्दिश्य योनौ तस्याः कामपरिपूरणार्थं काम्यामिष्टिं निर्व्वर्त्तयिष्यामीति कृत्वा लिङ्गधारयान्तं तत्त्वेनाज्येन स्थालीपाकमभिसंगृह्य त्रिर्जुहुयात् । यथाम्नायमन्त्रोदमभिमन्त्रयतुराय दद्यात् सर्व्वोदकार्थान् कुरुष्वेति । ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिक्रम्य प्रदक्षिणमग्निमनुपरिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राज्यशेषं प्राश्नीयात् । पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवशेषयेत् ततस्तौ सह संवसेतामष्टरात्रं तथाविधपरिच्छदावेव भवेतां पुत्रं जनयेताम् ।
या तु स्त्री श्यामं लोहिताक्षं व्यूढोरस्कं महाबाहुं पुत्रमाशासीत । या वा कृष्णं कृष्णदुर्गीधकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिबर्हवर्णवर्ज्ज्यं स्यात् पुत्रवर्णानुरूपस्तु यथाशीरेव तयोः परिबर्होऽन्यः कार्य्यः स्यात् ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)

पुत्रेष्टिका, स्त्री, (पुत्रेष्टि + स्वार्थे कन् टाप् च ।) पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥

पुत्रौ, पुं, (दुहिता च पुत्रश्च पुत्रौ इत्येकशेषः ।) पुत्रदुहितरौ । इत्यमरः । २ । ६ । ३७ ॥ द्विवचनान्तोऽयम् ॥

पुत्र्यं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० । चकाराद् यत् ।) पुत्रीयम् । पुत्रनिमित्तसंयोगः पुत्रनिमित्तोत्पातो वा । इति पाणिनिः ॥

पुथ, इ कृत्यै । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । इ, पुन्थ्यते । अस्तःस्थप्रथमादिरयमित्यन्ये । पुन्थति । इति दुर्गादासः ॥

पुथ, क लिखि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पोथयति । लिखि दीप्तौ । इति दुर्गादासः ॥

पुथ, य हिंसे । इति कविकल्पद्रुमः ॥ (दिवा०-पर० सक० सेट् ।) य, पुथ्यति पुपोथ । इति दुर्गादासः ॥

पुद्गलः, पुं (पूरणात् पुत् गलनात् गलः । ततः कर्म्मधारयः । पृषोदरादित्वादस्य तथात्वम् ।) देहः । (यथा, पार्श्वनाथचरिते । १० । ११० ।
"चक्षुः शिरसि भाले च नेत्रे सर्व्वाङ्गपुद्गले ।") आत्मा । इति शब्दरत्नावली ॥ परमाणुः । यथा,—
"स्थूला मध्यास्तथा सूक्ष्माः सूक्ष्मात् सूक्ष्मतराश्च ये ।
देहभेदा भवान् सर्व्वे ये केचित् पुद्गलाश्रयाः ॥"
इति विष्णुपुराणे ५ अंशे २० अध्यायः ॥
"पूरयन्ति गलन्ति चेति पुद्गलाः । सङ्घातभावो भेदभावाकारास्तथा देहभेदाः । यथाहुः । पूरणाद्गलनाद्वै पुद्गलाः परमाणव इति ।" इति तट्टीकायां श्रीधरस्वामी ॥

पुद्गलः, त्रि, (पुत् चङ्क्रमशीलः गलो रूपवर्णोऽस्येति कर्म्मधारयः ।) सुन्दराकारः । इति शब्दरत्नावली ॥ रूपादिमद्द्रव्यम् । इति हेमचन्द्रः ॥

पुनः, [र्] व्य, (पनायते स्तूयते इति । पन + बाहुलकात् अर् अस्य उत्वञ्च ।) अप्रथमः । (यथा, मनुः । २ । १२० ।
"ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥")
भेदः । पक्षान्तरम् । इत्यमरः । ३ । ४ । ११ ॥ अधिकारः । पश्चात्तरम् । इति मेदिनी । रे, ७२ ॥ (यथा, रघुः । २ । ४८ ।
"भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ ! पितेव पासि ॥")

पुनःपुनः, [र्] व्य, (पुनर् + वीप्सायां द्वित्वम् ।) वारंवारम् । तत्पर्य्यायः । मुहुः २ शश्वत् ३ अभीक्ष्णम् ४ असकृत् ५ । इत्यमरः । ३ । ४ । १ ॥ वारंवारेण ६ पौनःपुन्यम् ७ प्रतिक्षणम् ८ । इति शब्दरत्नावली ॥ (यथा, चाणक्ये ।
"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च ।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः ॥")

पुनःपुना, स्त्री, नदीविशेषः । पनपुना इति भाषा । यथा,—
"कीकटेषु गया पुण्या पुण्यं राजगृहं वनम् ।
च्यवनस्याश्रमः पुण्यो नदी पुण्या पुनःपुना ॥"
इति वायुपुराणे गयामाहात्म्यम् ॥

पुनःसंस्कारः, पुं, (पुनः पुनर्वारेण संस्कारः ।) द्वितीयवारोपनयनादिसंस्कारः । यथा,—
"पुनर्व्वसौ हतो विप्रः पुनःसंस्कारमर्हति ॥"
इति ज्योतिस्तत्त्वम् ॥

पुनरागमनं, क्ली, (पुनः पुनर्व्वारमागमनम् ।) द्वितीयवारागमनम् । फिरे आसा इति भाषा ॥ यथा,—
"संवत्सरव्यतीते तु पुनरागमनाय च ॥"
इति दुर्गोत्सवपद्धतिः ॥

पुनरुक्तं, क्ली, (वच + भावे क्तः । पुनः पुनर्व्वारं उक्तम् ।) पुनर्व्वारकथनम् । यथा,—
"आपाततो यदर्थस्य पौनरुक्त्येन भासनम् ।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ॥"
इति साहित्यदर्पणः ॥
(यथाह गौतमः । ५ । १४—१५ ।
"शब्दार्थयोः पुनर्व्वचनं पुनरुक्तमन्यत्रानुवादात् ॥"
"पुनर्व्वचनं पुनरुक्तं तच्च विभागार्थं शब्दार्थयोरिति । तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते । अनुवादे त्वपुनरुक्तमनेन अनुवादान्यत्रेत्यर्थः । निष्प्रयोजनं हि पुनरभिधानं पुनरुक्तं अनुवादस्तु सप्रयोजनक एवेति भावः । तत्राद्यं यथा पूर्व्वोक्तपूर्व्वोक्तशब्दप्रयोगः । द्वितीयं यथा समानार्थकभिन्नपूर्व्वोक्तशब्दस्य निर्द्देशः पुनरभिधानमर्थपुनरुक्तम् । आद्यं यथा घटो घट इति । द्वितीयं यथा, घटः कलश इति । एतच्च प्रमादादिना भवति ।"
पुनरुक्तभेदान्तरमाह ।
"अर्थादापन्नस्य स्वशब्देन पुनरभिधानम् ॥"

"पुनरुक्तमित्यनुवर्त्तते । यस्मिन्नुक्ते यस्यार्थस्यौत्सर्गिकी प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम् । इदमेव च अर्थपुनरुक्तमिति गीयते । यथा वह्निरुष्ण इति पूर्व्वपदाभिप्रोक्तिरियम् । उष्णो वह्निरिति उत्तरपदाभिप्रोक्तिः । एवं वह्निरस्ति गेहे नास्तीति विध्याभिप्रोक्तिः । जीवन् गेहे नास्ति वहिरस्तीति निषेधाभिप्रोक्तिः । पुनरुक्तमेवं विध्यर्थेदं भाष्यादि सम्मतम् । तस्यैव शब्दस्य पुनरभिधानं पर्य्यायेणाभिधानम् अन्यत् पुनरर्थपुनरुक्तमित्याहुः ॥"* ॥ पुनर् + वच + कर्म्मणि क्तः । पुनःकथिते, त्रि । यथा, महाभारते ।५।४।१३।
"ब्रूहि सञ्जय ! तत्त्वेन पुनरुक्तां कथामिमाम् ॥")

पुनरुक्तजन्मा, [न्] पुं, (पुनरुक्तं जन्म यस्य । "द्वितीयं मौञ्जीबन्धने ।" इति मनूक्तेरस्य तथात्वम् ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

पुनर्जन्म, [न्] क्ली, (पुनर्भूयो जन्म ।) पुनश्शरीरोत्पत्तिः । यथा,—
"आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्ज्जुन ! ।
मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते ॥"
इति श्रीभगवद्गीतायाम् । ८ । १६ ॥

पुनर्नवः, पुं, (पुनरपि छिन्ने भूयोऽपि नवः ।) नखः । इति हेमचन्द्रः ॥

पुनर्नवा, स्त्री, (छिन्नायां पुनरपि नवा । यद्वा, पुनर्भूयोभूयः नूयते स्तूयते इति । णु स्तुतौ + "ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् । ततष्टाप् । क्षुभ्नादित्वात् न णत्वम् ।) शाकविशेषः । तत्पर्य्यायः । शोथघ्नी २ वर्षाभूः ३ शाठपर्णी ४ कठिल्लकः ५ । एता अरुणायाः श्वेतायाः पर्य्यायः । वृश्चीरः २ चिराटिका ३ । इति रत्नमाला ॥ विशाखः ४ कठिल्लः ५ शशिवाटिका ६ पृथ्वी ७ सितवर्षाभूः ८ घनपत्रः ९ कठिल्लकः १० । अस्या गुणाः । उष्णत्वम् । तिक्तत्वम् । कफकासहृद्रोगशूलास्रपाण्डुशोथानिलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेदकत्वम् । रसायनत्वम् । आमदुर्नामशोथोदरनाशित्वञ्च । इति राजवल्लभः ॥ * ॥
"पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ।
कटुः कषाया रुच्योष्णा पाण्डुघ्नी दीपनी परा ॥
शोथानिलगरश्लेष्महरी ब्रध्नोदरप्रणुत् ॥ * ॥
पुनर्नवापरा रक्ता रक्तपुष्पा शिलाटिका ।
शोथघ्नी क्षुद्रवर्षाभूर्वर्षकेतुः कठिल्लकः ॥
पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥"
इति भावप्रकाशः ॥

पुनर्भवः, पुं, (छिन्नोऽपि पुनर्भवतीति । भू + अप् ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (पुनर् + भू + भावे अप् । पुनरुत्पत्तिः । यथा, महाभारते । १ । १ । २५५ ।
"धर्म्मान्निवृत्तिश्च धर्म्मात्तद्वत्पुनर्भवः ॥"* ॥ पुनर्भवतीति । भू + अप् ।) पुनर्ज्जाते, त्रि ॥

पुनर्भवी [न्] पुं, (पुनर्भवः पुनःपुनरुत्पत्तिरस्त्यस्येति । पुनर्भव + इनिः ।) आत्मा । इति हेमचन्द्रः । ६ । २ ॥

पुनर्भूः, स्त्री, (पुनर्भवति जायात्वेनेति । भू + क्विप् ।) द्विरूढा । तत्पर्य्यायः । दिधिषूः २ । इत्यमरः । २ । ६ । २३ ॥ "अक्षतयोनित्वाद्विधवा पुनरुह्यते । इत्यसावन्यस्य भूत्वा अन्यस्य पुनर्भवतीति क्विपि पुनर्भूः । धीयते लिङ्गमनया शब्दाते द्विधिषुः धिष शब्दे नाम्नीति कूः निपातनाद्दित्वम् ।" इति तट्टीकायां भरतः ॥ सा त्रिविधा । यथा,—
"परपूर्व्वास्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा ॥
देशधर्म्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्तिता ॥
उत्पन्नसाहसा उत्पन्नव्यभिचारा ।
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता ॥"
इति मिताक्षरा ॥ * ॥
पुनर्ज्जाते, त्रि ॥

पुनर्यात्रा, स्त्री, (पुनरप्रथमा यात्रा ।) निवर्त्तयात्रा । सा तु आषाढ़शुक्लपक्षीयरथद्वितीयानन्तरं नवमदिवसविहिता श्रीजगन्नाथदेवस्य दक्षिणमुखयात्रा । फिरे रथ इति उल्टा रथ इति च भाषा । अस्या इतिकर्त्तव्यता यात्राशब्दे द्रष्टव्या ॥

पुनर्व्वसुः, पुं, (पुनः पुनः शरीरेषु वसति क्षेत्रज्ञरूपेणेति । पुनर् + वस + उः ।) विष्णुः । (यथा महाभारते । १३ । १४९ । ३९ ।
"अमरो विजयो जेता विश्वयोनिः पुनर्व्वसुः ॥")
शिवः । कात्यायनमुनिः । लोकभेदः । धनारम्भः । इति शब्दरत्नावली ॥ नक्षत्रविशेषः । स च धनुराकृतिपञ्चतारात्मकः । यथा,—
"मध्यवर्त्तीनि शरासनाकृता-
वमरस्य गुरुमाश्रिता गताः ।
त्रित्रिकाः श्रुतियुगे । पञ्चतारके
पञ्चपावकमिता घटोद्भवात् ॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥
तस्याधिष्ठात्री देवता अदितिः । इति जातकः ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।
"प्रभूतमित्रः कृतशास्त्रयत्नः
सदङ्गकामी वरभूषणाढ्यः ।
दाता प्रतापी वसुधाधिपश्रीः
पुनर्व्वसौ यस्य भवेत् प्रसूतिः ॥"

पुनर्व्वसु, पुं, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतसप्तमनक्षत्रम् । तत्पर्य्यायः । यामकौ २ आदित्यौ ३ । इति हेमचन्द्रः ॥ द्विवचनान्तोऽयम् ॥

पुन्नागः, पुं, (पुमान् नाग इव श्रेष्ठत्वात् ।) स्वनामख्यातवृक्षपुष्पवृक्षविशेषः । तत्पर्य्यायः । पुरुषः २ तुङ्गः ३ केशरः ४ देववल्लभः ५ । इत्यमरः । २ । ४ । २५ ॥ कुम्भीकः ६ रक्तकेशरः ७ । इति रत्नमाला ॥ पुन्नामा ८ पाटलद्रुमः ९ रक्तपुष्पः १० रक्तरेणुः ११ अरुणः १२ । अस्य पुष्पगुणाः । मधुरत्वम् । शीतलत्वम् । सुगन्धित्वम् । पित्तनाशित्वम् । भूरितो हारकत्वम् देवताप्रसादनत्वञ्च । इति राजनिर्घण्टः ॥ कषायत्वम् । कफरक्तनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ सितोत्पलः । जातीफलः । नरश्रेष्ठः । पाण्डुनागः । इति मेदिनी । गे, ४६ ॥

पुन्नाटः, पुं, (पुन्नाड + पृषोदरादित्वात् डस्य टः ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ।
पद्माटः स्यादेडगजश्चक्री पुन्नाट इत्यपि ॥")

पुन्नाडः, पुं, (पुमांसं नाडयतीति । नड भ्रंशे + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥

पुन्नामनरकः, पुं, (पुदिति नाम यस्य स पुन्नामा । पुन्नामा चासौ नरकश्चेति कर्म्मधारयः ।) पुत् इतिनामकनरकविशेषः । तत्र षोड़शविधपापैः पतति । यथा,—
मत्स्य उवाच ।
"परदाराभिगमनं पायसाद्योपसेवनम् ।
पारुष्यं सर्व्वभूतानां प्रथमं नरकं स्मृतम् ॥
फलस्तेयं महापापं फलार्हस्य च पाटनम् ।
पाटनं दृश्यजातीनां द्वितीयं परिकीर्त्तितम् ॥
मर्य्यादाभङ्गं तथा द्विष्टमवध्यवधबन्धनम् ।
विवादित्वमहेतुत्वं तृतीयं नरकं स्मृतम् ॥
भयदं सर्व्वसत्त्वानां नरभूतिविनाशनम् ।
भ्रंशनं निजधर्म्माणां चतुर्थं नरकं स्मृतम् ॥
मारणं मित्रकौटिल्यं मिथ्याभिशपनञ्च यत् ।
मिष्टैकाशनमित्युक्तं पञ्चमञ्च निपातनम् ॥
फलोद्भवं यन्त्रकरं षष्ठं योगनाशनम् ।
यानशुल्कस्य हरणं षष्ठमुक्तं शुभापनम् ॥
राजभागस्य हरणं राजजायाभिषेवणम् ।
राज्ये त्वहितकारित्वं सप्तमं नरकं स्मृतम् ॥
कामत्वं लोलुपत्वञ्च लब्धधर्म्मार्थनाशनम् ।
नानाकर्म्मकरं प्रोक्तमष्टमं नरकं स्मृतम् ॥
ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम् ।
विरोधो ब्राह्मणैश्चोक्तो नवमो नरकाश्रयम् ॥
शिष्टाचारविनाशश्च मित्रद्वेषं शिशोर्वधम् ।
शास्त्रस्तेयं धर्म्मशून्यो दशमं परिकीर्त्तितम् ॥
षडङ्गनिधनं घोरं षाड़्गुण्यप्रतिषेधनम् ।
एकादशममेवोक्तं नरकं सद्भिरुत्तमम् ॥
सद्भिरुक्तं सदा चैवमनाचारमसत्क्रिया ।
संस्कारपरिहीनत्वमिदं द्वादशमं स्मृतम् ॥
जातिधर्म्मार्थकामानामपवर्गस्य वारणम् ।
सर्व्वदैव मतिरं त्रयोदशमसुच्यते ॥
समलं धर्म्महीनञ्च यद्दर्थं यच्च दीपनम् ।
चतुर्द्दशकमेवोक्तं नरकं श्रुतिभिरितम् ॥
अज्ञानञ्चाप्यनिष्टत्वमशौचमशुभावहम् ।
सर्व्वं तत् पञ्चदशकमसत्यवचनानि च ॥

व्यास्यं वै पौड्रकमाक्रीयच विरोधतः ।
बलस्य चाननायिक्षमयागैर्व्यपिदापनम् ॥
इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्ष्यासारञ्च सर्व्वेषु चौद्वदल्तु विगर्हितम् ॥
एतैस्तु पापैः पुरुषः पुन्नामनरके पतेत् ।
पुन्नामनरकं घोरं विनाशं प्राह सत्तम ॥
एतस्मात् कारणात् साध्वनामः पुत्त्रो निगद्यते ॥”
इति वामने ५८ अध्यायः ॥

पुपूकरः, पुं, (पुपकुम । पृषोदरादित्वात मस्य लत्वम् । उदरस्थधातुः । इति भूरिप्रयोगः ॥

पुप्फुसः, पुं, (पुप्फुसवत् आकृतिरस्यास्तीति । अच् ।) पद्मबीजाधारः । तत्पर्य्यायः । बीजकोषः २ वराटकः ३ । (पुप्फुस इति शब्दो- ऽप्यस्त्रीति ।) वामपार्श्वस्थमलाशयः । फोंफड़ा इति फुलधरा इति च भाषा । तत्पर्य्यायः । क्लोमः २ । इति शब्दचन्द्रिका । रक्तफेनजः २ । इति हेमचन्द्रः ॥ तिलकम् ४ क्लोम ५ । इत्य- मरः । क्लोमम् ६ । इति भरतः ॥ पुप्फुषोऽपि पाठः ॥ (पुप्फुसशब्देऽस्य विषयो ज्ञातव्यः ॥)

पुमान् [स्] पुं, (पाति रक्षतीति । पा + “पाते- र्डुम्सुन् ।” उणा० । ४ । १७७ । इति डुम्सुन् । डित्वात् टिलोपः ।) मनुष्यजातिपुरुषः । तत्- पर्य्यायः । पञ्चजनः २ पुरुषः ३ पूरुषः ४ ना ५ । इत्यमरः । २ । ६ । १ ॥ (यथा, —
“व्यर्थेषु जातस्य जनस्य लोके
गुणाधिके पुंसि भवत्यवज्ञा ।
विनाङ्गना यद्यपि रूपराशि-
स्तथापि पुंसां परदारवेष्टा ॥”
इत्युद्भटः ॥)
मनुष्यजातिः । इति केचिदिति भरतः ॥ पुंलिङ्ग- मात्रञ्च ॥ (कूटस्थपुरुषः । यथा, विष्णुपुराणे । १ । २ । २ ।
“परस्मै यस्य च ईश्वरः पुमान्
गुणोर्म्मिसर्गस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥”
“अक्षरमिति विकारं निराकरोति पुमान् कूटस्थः ।” इति तट्टीकायां श्रीधरस्वामी ॥)

पुर, श अग्रगत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०- पर०-सक०-सेट् ।) श, पुरति ऋषिः कविरस्य अग्रे गच्छतीत्यर्थः । पोरिता । इति दुर्गादासः ॥

पुरं, क्ली (पिपर्त्ति पूरयति इति । पॄ पालनपूर्त्त्योः + कः ।) गेहः । देहः । पाटलिद्रुमः । पुष्पादीनां रक्ता- वलिः । इति मेदिनी । रे, ५८—५८ ॥ नागर- मुस्ता । इति रत्नमाला ॥ चर्म्म इति शब्दरत्ना- वली ॥ गर्भोपरिवेष्टनम् । इति विश्वः ॥

पुरं स्त्री क्ली, (पिपर्त्तीति । पॄ + मन्दविजुरादि- त्वात् कः । यद्वा, पुरति अग्रे गच्छतीति । पुर + “इगुपधज्ञाप्रीकिरः कः ।” ३ । १ । १३५ । इति कः ।) चतुरादिविभिन्नस्थानम् । इति श्रीधरस्वामी ॥ बहुप्रासादयुक्तनगरस्थानम् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । पूः २ पुरी ३ नगरम् ४ पत्तनम् ५ स्थानीयम् ६ कटकम् ७ पट्टम् ८ निगमः ९ पुटभेदनम् १० । इति शब्दरत्ना- वली ॥ तस्य लक्षणादि यथा, —
मनुरुवाच ।
“राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानम्रसामन्तं मध्यमं देशमावसेत् ॥
वैश्यशूद्रजनप्रायमनाहार्य्यं तथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्म्मकरं तथा ॥
अदेवमातृकं रम्यमनुरक्तजनान्वितम् ।
करैरपीडितं वापि बहुपुष्पफलं तथा ॥
अगम्यं परचक्राणां तद्वासगृहमापदि ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥
सरीसृपविहीनञ्च व्याघ्रतस्करवर्ज्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥
तत्र दुर्गं नृपः कुर्य्यात् षण्णामेकतमं बुधः ।
धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैव च ॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च भार्गव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ॥
गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम् ।
सपताकं गजारूढो येन राजा विशेत् पुरम् ॥
चतस्रश्च तथा कार्य्या वीथयः सर्व्वगोपुराः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥
द्वितीये चापि वीथ्यग्रे राजवेश्म विधीयते ।
धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके ॥
चतुर्थे चैव वीथ्यग्रे गोपुरन्तु विधीयते ।
आयतं चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ।
मुक्तिहीनं त्रिकोणञ्च यवमध्यं तथैव च ॥
अर्द्धचन्द्रप्रकारञ्च वज्राकारञ्च कारयेत् ।
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्विदः ।
अन्यत्र तन्न कर्त्तव्यं प्रयत्नेन विजानता ॥
राज्ञा कोशगृहं कार्य्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥
गजानां प्राङ्मुखी शाला कर्त्तव्या वाप्युदङ्मुखी ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥
महानसञ्च धर्म्मज्ञ ! कर्म्मशालास्तथापराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ।
मन्त्रिवेदविदाञ्चैव चिकित्साकर्त्तुरेव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥
गवां स्थानं तथैवात्र तुरगाणां तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः ॥
कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ॥
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कर्त्तव्यं देवदेवे दिवाकरे ॥
तत्रतत्र यथास्थानं राजा विज्ञाय सारथिम् ।
दद्यादावसथार्थं च सर्व्वेषामनुपूर्व्वशः ॥
योधानां शिल्पिनाञ्चैव सर्व्वेषामविशेषतः ।
दद्यादावसथान् दुर्गे मन्त्रकालविदां शुभान् ।
गोवैद्याश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत भृशं राजा दुर्गे प्रबलरोगिणः ।
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।
न बहूनामतो दुर्गे विना कार्य्यं तथा भवेत् ।
सर्व्वं निरर्थकं कार्य्यं विना दुर्गं महीपते ! ।
दुर्गे यन्त्राः प्रकर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तेस्तु रक्षा विधीयते ।
दुर्गद्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा ।
सञ्चयश्चात्र सर्व्वेषामायुधानां विधीयते ।
धनुषां क्षेपणीयानां तोमराणाञ्च भार्गव ! ।
शराणामथ खड्गानां कवचानां तथैव च ।
लगुडानाञ्च कुन्तानां परिघैः सह भार्गव ! ।
अश्मनाञ्च प्रभूतानां मुद्गराणां तथैव च ।
त्रिशूलानां पट्टिशानां कुठाराणाञ्च भार्गव ! ।
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम ! ।
परश्वधानां चक्राणां चर्म्मणां चर्म्मभिः सह ।
कुद्दालक्षुरवेत्राणां पिटकानां तथैव च ।
तुषकाष्ठानाञ्च दात्राणामङ्गारस्य च सञ्चयः ।
सर्व्वेषां शिल्पभाण्डानां सञ्चयश्चात्र इष्यते ।
वादित्राणाञ्च सर्व्वेषामौषधीनां तथैव च ।
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ।
गुडानां सर्व्वतैलानां गोरसानां तथैव च ।
वसानामथ मज्जानां स्नायूनामस्थिभिः सह ।
गोचर्म्मपटहानाञ्च धान्यानां सर्व्वतस्तथा ।
तथैव पर्पटानाञ्च यवगोधूमयोरपि ।
रत्नानां सर्व्ववस्त्राणां लौहानामप्यशेषतः ।
कलायमुद्गमाषाणां चणकानां तिलैः सह ।
तथा च सर्व्वशस्यानां पांशुगोमयपोरपि ।
शणसर्ज्जरसं भूर्ज्जं जतु लाक्षाञ्च टङ्कणम् ।
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥
कुम्भाश्चाशीविषाः कार्य्या व्यालसिंहादयस्तथा ।
मृगाश्च पक्षिणश्चैव विरुद्धा ये परस्परम् ।
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्त्तव्यानि महाभाग ! यत्नेन पृथिवीक्षिता ।
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्य्याज्जनानां हितकाम्यया ।
जीवकर्षभकाकोलीश्यामलक्षः मधूकम् ।
शालपर्णी पृश्निपर्णी मुद्गपर्णी तथैव च ।
माषपर्णी च मेदे द्वे सारिवे द्वे बलात्रयम् ।
वीरा श्वदंष्ट्रा वृश्चीरा बृहती कण्टकारिका ।
शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्दर्भरेणुका ।
मधुपर्णी विदार्य्यौ द्वे महाक्षीरा महातपाः ।
धन्वना सह देवाह्वा कटुकैरण्डकं विषम् ।
पर्णासभागकाकोली पद्मपुष्करसूपिका ।
शुक्लातिशुक्लकाशश्च यावानलपटोलकाः ।
इक्ष्विक्षुविकाराश्च फाणिताद्याश्च सर्व्वशः ।
सिंही च सहदेवी च विश्वेदेवाश्वगन्धिका ।
मधूकं पुष्पकं माषा शतपुष्पा मधूलिका ।
शतावरीमधूकं च पिप्पल्यस्तालमेव च ।
आत्मगुप्ता कट्फलाख्या दारदा राजसर्षपाः ।
इत्येतत्संग्रहः कार्य्यः ... तथैवान्या ।

कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका।
शीतपाकी कुलिङ्गाक्षी काकजिह्वोत्पलिका॥
इक्षुवालकपुष्पी चोभौ गुञ्जारकपुनर्नवे।
कशेरुका तु काश्मीरी बिल्वशालूकसेश्वरम्॥ *॥
शूकधान्यानि सर्व्वाणि शमीधान्यानि यानि च।
क्षीरं क्षौद्रं तथा शुक्रं मज्जा तैलं वसा घृतम्॥
निकोचाभिषुकास्फोटं वातामामाक्षमालकम्।
एवमादीनि चान्यानि विज्ञेयो मधुरो गणः॥
राजा सञ्चिनुयात् सर्व्वं पुरे निरवशेषतः।
दाड़िमाम्रातकाम्राश्च तिन्तिड़ीकाम्लवेतसम्॥
भव्यं कर्कन्धु लकुचं करमर्द्दकरूषकम्।
बीजपूरककाण्डीरं मालती राजबन्धुकम्॥
कौटकद्वयपर्णानि द्वयोरम्लिकयोरपि।
पारेवतं नागरकं प्राचीनारुकमेव च॥
कपित्थामलकी चुक्रं फलं दन्तशठस्य च।
जम्बीरं नवनीतञ्च सौवीरकतुषोदके॥
सुरासवञ्च मद्यानि मण्डतक्रदधीनि च।
शुक्तानि चैव सर्व्वाणि ज्ञेयाम्लगणं द्विजाः॥
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे॥
सैन्धवोद्भिदपाठेयपाक्यसामुद्ररोमकम्।
कुप्यसौवर्च्चलविटं वालकेयं यवाह्वयम्॥
औषधारं कालभस्म विज्ञेयो लवणो गणः।
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे॥
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्।
कुबेरकं समरिचं शिग्रुभल्लातसर्षपाः॥
कुष्ठाजमोदा किणिही हिङ्गुमूलकधान्यकम्।
कारवी कुञ्चिकाजाज्यः सुमुखः कालमालिका॥
फणिज्झकोऽथ लशुनं भूस्तृणं सुरसस्तथा।
कायस्था च वयःस्था च हरितालं मनःशिला॥
अमृता च रुदन्ती च रोहिषं कुङ्कुमं तथा।
जया एरण्डकाण्डीरं शल्लकी हपुषा तथा॥
सर्व्वपित्तानि मूत्राणि प्रायो हरितकानि च।
मञ्जर्य्यो च मूलानि यष्टिकारिविधाणि च॥
फलानि चैव च तथा सूक्ष्मैला हिङ्गुपत्रिका।
एवमादीनि चान्यानि गणः कटुकसंज्ञकः।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम!॥*॥
मुस्ताचन्दनह्रीवेरकृतमालकदारवः।
हरिद्रामलकोशीरं रक्तमालकवस्तुकम्॥
दूर्व्वापटोलकटुकादन्तिलत्वक्प्रमक्कचुराः।
किरातत्तिक्तकं निम्बं विषा चातिविषा तथा॥
तालीशपत्रं तगरं सप्तपर्णविकङ्कताः।
काकोडुम्बरकोदीच्यसुपत्वः किणिही तथा॥
महूपस्था रोहिणी मांसी पर्पटं मदयन्तिका।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम्॥
दुग्धशां सुवर्णी कामा श्यामाकं गन्धनाकुली।
मधुपर्णी वायनवत्ससम्बका चतुरङ्गुला॥
रम्भा चैव कृपापुष्पी तारास्फोता हरेणुका।
वैदाग्री वैतसस्तुम्बी विषाणी लोहशालनम्॥
मालती करमिकाख्या विषाग्नी शिक्किका तथा।
पर्पटश्च गुडूची च गणस्तिक्तकसंज्ञकः॥
एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे।
अश्मन्तकं चोभि तथैव च विभीतकम्॥
प्रियङ्गुधातकीपुष्पं मोचकोशार्ज्जुनासनाः।
अनन्तास्त्री सुरामङ्गा श्योनाकं कट्फलं तथा॥
भूर्जपत्रं शिलोद्भेदं पाटलापत्रलोमकम्।
समङ्गा त्रिवृतामूलं कार्पासा गैरिकाञ्जनम्॥
विद्रुमं समधूच्छिष्टं कुम्भीकाकुमुदोत्पलम्।
न्यग्रोधोदुम्बराश्वत्थकिंशुका शिंशपा शमी॥
पियालपिलुका शालशिरीषं पद्मकन्तथा।
बिल्वोऽग्निमन्थः प्लक्षश्च श्यामाकयवकोद्रवम्॥
राजादनं करीरञ्च धान्यकप्रियकौ तथा।
शाकोटाशोकबदराः कदम्बखदिरद्वयम्॥
एषां पत्राणि साराणि मूलानि कुसुमानि च।
एवमादीनि चान्यानि कषायाख्यो गणो मतः॥
प्रयत्नेन नृपश्रेष्ठ! राजा सञ्चिनुयात् पुरे।
कीटाश्च मारणे योग्या व्यङ्गताधास्तथैव च॥
वातधूमाम्बुमार्गाणां दूषणानि तथैव च।
धार्य्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि भारत!॥
विषाणान्धारणं कार्य्यं प्रयत्नेन महीभुजा।
विचित्राश्च गदा धार्य्या विषप्रशमनास्तथा॥
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्द्धनाः।
कलाविदश्च पुरुषाः पुरे धार्य्याः प्रयत्नतः॥
भीतान् प्रमत्तान् कुपितान् तथैव च विमानि-
तान्।
कुभृत्यान् पापशीलांश्च न राजा वासयेत् पुरे॥
यन्त्रायुधाट्टालचयोपपन्नं
समग्रधान्यौषधिसंप्रयुक्तम्।
वणिग्जनैश्चाभिसमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव॥"
इति मात्स्ये राजधर्मे दुर्गसम्पत्तिर्नाम २१९
अध्यायः॥ *॥ पुरे वर्णनीयानि यथा,—
"पुरे घट्टप्रतोली च परिखातोरणध्वजाः।
प्रासादाध्वप्रपारामवापीवेश्याः सती सरी॥"
इति कविकल्पलता॥
अवशिष्टं नगरशब्दे द्रष्टव्यम्॥
पुरः, पुं. (पिपर्त्तीति। पॄ+कः।) गुग्गुलुः।
इत्यमरः।२।४।१२६॥ (अस्य पर्य्यायो यथा,—
"गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः।
कुम्भोलूखलकं क्लीवे महिषाक्षः पलङ्कषः॥"
"अन्यं तीक्ष्णमजीर्णं च श्वासं अश्ममास्तपम्।
मद्यं रोषमध्वेत् सम्यग्गुणार्थी पुरसेवकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
पीतझिण्टी। इति शब्दचन्द्रिका॥
पुरः, [स्] अ, (पूर्व्वस्मिन् पूर्व्वस्मात् पूर्व्वो वा
एतं पूर्व्वस्याः पूर्व्वस्यामित्यादि। पूर्व्व+"पूर्व्वा-
धरावराणामसि पुरधवश्चैषाम्।"५।३।३९।
इति असि तद्योगेन पुर् इत्यादेशश्च।) अग्रतः।
इत्यमरः।३।४।७॥ (यथा, कुमारे।४।३।
"अयि जीवितनाथ! जीवसी-
त्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति क्षितौ
हरकोपानलभस्म केवलम्॥")
प्राच्यां दिशि। प्रथमे काले। (यथा, अभि-
ज्ञानशकुन्तलायाम्।७ अङ्के।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं विधि-
स्तव प्रसादस्य पुरस्तु सम्पदः॥")
पुरार्थे। अतीते। इति तट्टीकायां भरतः॥
पुरःसरः, त्रि, (पुरोऽग्रे सरति गच्छतीति। सृ+
"पुरोऽग्रतोऽग्रेषु सर्त्तेः।"३।२।१८।इति
टः।) अग्रगामी। इत्यमरः।३।१।७२॥ (यथा,
महाभारते।४।१६।२२।
"यस्याः पुरःसरा आसन् इहतश्चानुयायिनः।
साहमद्य सुदेष्णायाः पुरःपश्चाच्च गामिनी॥")
अस्य पर्य्यायः अग्रसरशब्दे द्रष्टव्यः॥
पुरञ्जनः, पुं, (पुरं देहक्षेत्रं जनयतीति। जनि+
बाहुलकात् खः।) जीवः। यथा,—
"पुरुषं पुरञ्जनं विद्यात् यद्व्यनक्त्यात्मनः पुरम्।
एकद्वित्रिचतुष्पादं बहुपादमपादकम्॥"
इति श्रीभागवते।४।२९।२।
पुरञ्जनी, स्त्री, (पुरञ्जन+गौरादित्वात् ङीष्।)
बुद्धिः। यथा,—
"न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ!।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम्॥
राजन्! मदीदाः सर्व्वे ते मामाहुश्च पुरञ्जनीम्॥"
"बुद्धिन्तु प्रमदां विद्यान्ममाहमिति यत् कृतम्।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षभि-
र्गुणान्॥"
इति श्रीभागवते।४ स्कन्धे।२५।२९ अध्यायौ॥
पुरञ्जयः, पुं, (पुरं शत्रुपुरं जयतीति। जि+खच्।)
सूर्य्यवंशीयराजविशेषः। तत्पर्य्यायः। काकुत्स्थः
२। इति त्रिकाण्डशेषः॥ (यथा, भागवते।
९।६।१२।
"पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम्।
शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः।
ककुत्स्थ इति चाप्युक्तः शृणु नामानि
कर्म्मभिः॥"
पूरुवंशीयः सृञ्जयपुत्रः। यथा, हरिवंशे।
३१।१८।
"सृञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः।
जनमेजयो महाराज! पुरञ्जयसुतोऽभवत्॥"
पुरं जयतीति। पुर+जि+खच्।) पुरजय-
कर्त्तरि, त्रि॥ (यथा, महाभारते।१।
१०२।४५।
"आत्मनैऽपि राष्ट्राणि जग्मुः परपुरञ्जय!॥")
पुरटं, क्ली, (पुरति अग्रे गच्छतीति। पुर+
बाहुलकात् अटन्।) सुवर्णम्। यथा,—
"हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः॥"
इति विदग्धमाधवः॥
पुरणः, पुं, (पिपर्त्ति पूर्य्यते वेति। पॄ पालनादौ+
"कॄपॄवृजिमन्दिनिधाञ्भ्यः क्युः।" उणा० २।८१।
इति क्युः। उत्वं रपरत्वञ्च।) समुद्रः। इत्युणा-
दिकोषः॥

पुरतः, [स्] अ, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अतसुच् ।) अग्रतः । इत्यमरः ।३।४।७। (यथा, राजतरङ्गिण्याम् । ६ । १०७ ।
"निर्गते मन्त्रिकुञ्जादपमात् पुरतस्ततः ।
तस्थौ गौलमिपोऽश्रिव्यो स केचिचारलोचने ।")

पुरतटी, स्त्री, (पुरस्थिता तटीव ।) हट्टी । क्षुद्रहट्टः । इति हारावली । १६४ ।

पुरद्वारं, क्ली, (पुरस्य द्वारम् ।) नगरद्वारम् । तत्पर्य्यायः । गोपुरम् २ । इत्यमरः ।२।२।१६। (यथा, मनुः । ५ । ९२ ।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः ।")

पुरद्विट्, [ष्] पुं, (पुरं द्वेष्टीति । द्विष् + क्विप् । मयनिर्म्मितानां पुरत्रिपुराख्यानां दाहकत्वादस्य तथात्वम् ।) शिवः । इति जटाधरः । (यथा, भागवते । ४ । ६ । ७ ।
"स इत्थमादिश्य सुरानजस्तु तैः
समन्वितः पितृभिः सप्रजेशैः ।
ययौ स्वधिष्ण्यान्निलयं पुरद्विषः
कैलासमद्रिप्रवरं प्रियं प्रभोः ।")

पुरन्दरं, क्ली, (पुर् + दारि + खच् ।) चविकम् । इति शब्दचन्द्रिका ।

पुरन्दरः, पुं, (अरीणां पुरो दारयतीति । दॄ + णिच् + "पूःसर्व्वयोर्दारिसहोः ।" ३ । २ । ४१ । इति खच् । "वाचंयमपुरन्दरौ च ।" ६।३।६९। इति निपातितः ।) इन्द्रः । इत्यमरः ।१।१।४४। (यथा, महाभारते । ३ । १०१ । ८ ।
"कालेयभयसन्त्रस्तो देवः साक्षात् पुरन्दरः ।
जगाम शरणं श्रीशं तन्तु नारायणं प्रभुम् ।"
पुरं गेहं दारयतीति । दारि + खच् । निपातितः ।) चौरः । यथा,—
"क्षमाक्षमोघा यदि भावमाला
नमाकमोघा इह धेनवः स्युः ।
पुरन्दरस्यापिवयं यदि स्यात्
पुरन्दरस्यापि पुरं न यायि ।"
इत्युद्भटः ।

पुरन्दरा, स्त्री, (पुरं दारयति प्रवाहैरिति । दारि + खच् । निपातनात् साधुः । ततष्टाप् ।) गङ्गा । इति हारावली ।

पुरन्ध्रिः, } स्त्री, (मङ्गलान्वितं पुरं धारयतीति ।
पुरन्ध्री } धृ + खच् । गौरादित्वात् ङीष् । पृषोदरादित्वात् साधुः वा ।) पतिपुत्रवृद्धिशालिनी । इति भरतः । तत्पर्य्यायः । कुटुम्बिनी । इत्यमरः ।२।६।६। (यथा, रघुः ।७।१०।
"तौ स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थौ
आर्द्राक्षतारोपणमन्वभूताम् ।")
व्योमाचम् । इति राजनिर्घण्टः ।

पुरश्चर्य्या, स्त्री, (पुरोऽग्रतश्चरणं मन्त्रजपादिकर्म्मानुष्ठानमिति ।) पुरश्क्रिया । सा तु सोद्देश्यमन्त्रसिद्ध्यर्थं तद्देवतापूजापूर्व्वकं तन्मन्त्रजपहोमतर्पणाभिषेकब्राह्मणभोजनरूपपञ्चाङ्गसाधना । यथा, योगिनीहृदये ।
"गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः ।
ततः पुरश्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया ॥
जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः ॥
तस्मादादौ स्वयं कुर्य्यात् गुरुं वा कारयेद्बुधः ।
गुरोरभावे विप्रं वा सर्व्वप्राणिहिते रतम् ।
स्निग्धं शास्त्रविदं विप्रं नानागुणसमन्वितम् ॥
स्त्रियं वा सद्गुणोपेतां सपुत्रां विनियोजयेत् ॥
आदौ पुरश्क्रियां कर्त्तुं स्थाननिर्णय उच्यते ।"
योगिनीहृदये ।
"पुण्यक्षेत्रं नदीतीरं गुहापर्व्वतमस्तकम् ।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम् ॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः ॥
तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम् ॥
अश्वत्थामलकीमूलं गोशालाजलमध्यतः ।
देवतायतनं कूलं समुद्रस्य निजं गृहम् ॥
साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् ।
अथवा निवसेत्तत्र यत्र चित्तं प्रसीदति ॥"* ।
तथा ।
"गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत् ।
कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ ॥
म्लेच्छदुष्टमृगव्यालशङ्कातङ्कविवर्ज्जिते ।
एकान्तपावने निन्दारहिते भक्तिसंयुते ॥
सुदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे ।
रम्ये भक्तजनस्थाने निवसेत् तापसः प्रिये ! ॥
गुरूणां सन्निधाने च चित्तैकाग्रस्थले तथा ।
एषामन्यतमस्थानमाश्रित्य जपमाचरेत् ॥
यत्र ग्रामे कर्म्मकर्त्ता तत्र कूर्म्मं विचिन्तयेत् ।"
गौतमीये ।
"पर्व्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे ।
यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत् ।"
विश्वसारोद्धारेऽपि कूर्म्मचिन्ता नास्ति तदुक्तं वैशम्पायनसंहितायाम् ।
"पुण्यक्षेत्रं नदी तीर्थं देवतायतनं शुभम् ।
नदीतीरं तथा सिन्धुसङ्गमोऽतिमनोहरः ॥
पर्व्वतस्य गुहा चैव तथा पर्व्वतमस्तकम् ।
बिल्वमूलं सागरश्च वनमुद्यानमेव च ॥
एतु स्थानेषु विप्रेन्द्र ! कूर्म्मचक्रं न चिन्तयेत् ।
ग्रामे वा यदि वा वास्तौ गृहे तत्र विचिन्तयेत् ।"

अथ पुरश्चरणे भक्ष्यादिनियमः ।
गौतमीये ।
"पुरश्चरणसम्पन्नो भक्ष्याभक्ष्यं विचारयेत् ।
अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते ॥
भक्ष्याणां च मन्त्रीयात् मन्त्रसिद्धिनमोऽन्यथा ।
तत्रादिष्टं प्रयत्नेन ब्रह्मचारी भवेन्नरः ।"
अगस्त्यसंहितायाम् ।
"दधि क्षीरं घृतं मधुं शर्करं गुडवर्ज्जितम् ।
तिलाश्चैव विना शुद्धाः कन्दः केमुकवर्ज्जितः ॥
नारिकेलफलञ्चैव कदली लवली तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकी ।
व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः ।"
व्रतान्तर इति ।
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ।
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
पिप्पली जीरकञ्चैव नागरङ्गञ्च तिन्तिडी ।
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥
शुक्लान्नो वा हविष्यान्नं शाकं यावकमेव वा ।
पयो मूलं फलं वापि यत्र यत्नोपलभ्यते ।
रम्भाफलं तिन्तिडीकं कमला नागरङ्गकम् ।
फलान्येतानि भोज्यानि हविष्ये नात्र निश्चयः ।"
यत्तु योगिनीतन्त्रे ।
"चिञ्चाञ्च नालिकाशाकं कलायं मकुष्ठं तथा ।
कदम्बं नारिकेलञ्च भ्रष्टं कृष्माण्डकं त्यजेत् ।"
तत्तु व्रतान्तरे बोध्यम् । चिञ्चा तिन्तिडी ॥ * ॥
अथ वर्ज्यानि ।
"विवर्ज्जयेन्मधु क्षारलवणं तैलमेव च ।
ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च ।"
तथा ।
"क्षारञ्च लवणं मांसं गृञ्जनं कोद्रभोजनम् ।
माषाढ़कीमसूरांश्च कोद्रवांश्चणकानपि ॥
अन्नं पर्य्युषितञ्चैव निःस्नेहं कीटदूषितम् ।"
रामार्च्चनचन्द्रिकायाम् ।
"मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्ज्जयेत् ।
ऋतुकालं विना मन्त्री स्वस्त्रियं नैव गच्छति ।
सरघञ्च पणञ्चैव क्षारं क्षौद्रं दशाननम् ।
कौटिल्यं क्षौरमभ्यङ्गमनिवेदितभोजनम् ॥
असङ्कल्पिततत्त्वञ्च वर्ज्जयेद् गारिकम् ।
स्नायाच्च पञ्चगव्येन बिल्वामलकैन वा ।
मन्त्रजमार्जनतर्पणैः स्नानाचमनभोजनम् ।
कुर्य्यादुपयोक्तविधिना नित्यं देवार्च्चनम् ।
अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा ।
प्रलपन् प्रजपेद्यावत्तावत् निष्फलमुच्यते ।"
नारदीये ।
"मद्यु क्षौद्रं लवणञ्च कुर्य्यात् लघु भोजनम् ।
निर्भिक्षायां यथा वृत्तिरपा शालीन साधकः ।"
कुलार्णवेऽपि ।
"यज्ञमयाचकुलार्णः कुली धर्म्मसत्तमम् ।
अवसरात् यत्नार्हं कर्त्तव्यं न संशयः ॥
तस्मात् सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत् सुधीः ।
पुरश्चरणकालेषु सर्व्वकर्म्मसु साधकः ।
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनश्चाभिमानो दग्धं कथं सिद्धिर्वरानने ।"
परान्नं भिक्षितेतरविषयम् । भिक्षायां तस्य कर्म्मोपकारात् । तथा च ।
"वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम् ।
अनुकम्पाकमाताद्भिक्षाशी भागवताम् ।

विहाय वह्निं यदि वस्तु किञ्चित्
ग्राह्यं परेभ्यः सति सम्भवे च ।
असम्भवे तीर्थवहिर्विशुद्धात्
धर्मातिरिक्तं प्रतिगृह्य जप्यात् ॥
तत्रासमर्थोऽनुदिनं विशुद्धात्
याचेत यावद्दिनमात्रभैक्ष्यम् ।
गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतैरमुष्य ॥ * ॥
सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ।
प्रोक्ते पारुष्ये शब्दे प्राणायामं समाचरेत् ॥
बहुप्रलापी चाचम्य न्यस्याङ्गानि ततो जपेत् ।
क्षुतेऽप्येवं तथाश्रुस्थानानां स्पर्शनेन च ॥
एवमादींश्च नियमान् पुरश्चरणकृच्चरेत् ॥
विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म्म करोति यत् ।
जपार्च्चनादिकं सर्व्वमपवित्रं भवेत्प्रिये ! ॥
मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥ * ॥
एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसंख्यं जपं कुर्य्यात् पुरश्चरणसिद्धये ॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ।
जपेदेकमनाः प्रातःकालं मध्यन्दिनावधि ॥
यत्सङ्ख्यया समारब्धं तत् कर्त्तव्यं दिने दिने ।
यदि न्यूनाधिकं कुर्य्यात् व्रतभ्रष्टो भवेन्नरः ॥”
मुण्डमालायाम् ।
“यत्सङ्ख्यया समारब्धं तत् जप्तव्यं दिने दिने ।
न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत् ॥
प्रजपेदुक्तसङ्ख्यायाश्चतुर्गुणजपं कलौ ॥”
अन्यत्रापि ।
“कृते जपस्तु कल्पोक्तस्त्रेतायां द्विगुणो मतः ।
द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ ॥”
कुलार्णवेऽपि ।
“न्यूनातिरिक्तकर्म्माणि न फलन्ति कदाचन ।
यथाविधिकृतान्येव सत्कर्म्माणि फलन्ति हि ॥
भूशय्या ब्रह्मचारित्वं मौनमाचार्य्यसेविता ।
नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनम् ॥
नित्यं त्रिषवणं स्नानं क्षुद्रकर्म्मविवर्ज्जनम् ।
नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदेवयोः ॥
जपनिष्ठा द्वादशैते धर्म्माः स्युर्मन्त्रसिद्धिदाः ॥
स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ।
असत्यभाषणं जिह्मभाषणं परिवर्ज्जयेत् ॥
सङ्गेनापि न भाषेत जपहोमार्च्चनादिषु ।
अन्यथानुष्ठितं सर्व्वं भवत्येव निरर्थकम् ॥
पुरश्चरणकाले तु यदि स्यान्मृतसूतकम् ।
तथा च कृतसङ्कल्पो व्रतं नैव परित्यजेत् ॥”
योगिनीहृदये ।
“शयीत कुशशय्यायां शुचिवस्त्रधरः सदा ।
प्रत्यहं क्षालयेत् शय्यामेकाकी निर्भयः स्वपेत् ॥
असत्यभाषणं वार्त्तां कुटिलां परिवर्ज्जयेत् ।
वर्ज्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनम् ॥
अभ्यङ्गं गन्धलेपञ्च पुष्पधारणमेव च ।
त्यजेदुष्णोदकस्नानमन्यदेवप्रपूजनम् ॥”
तत्रैव ।
“नैकवासा जपेन्मन्त्रं बहुवासाकुलोऽपि वा ॥”
वैशम्पायनसंहितायाम् ।
“विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः ।
उपर्य्यधो बहिर्व्वस्त्रे पुरश्चर्य्यापरो नरः ॥
पतितानामन्त्यजानां दर्शने भाषणे श्रुते ।
क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥
तथा तस्य च सम्प्राप्तौ प्राणायामं षडङ्गकम् ।
कृत्वा सम्यक् जपेत् शेषं यद्वा सूर्य्यादिदर्शनम् ॥”
आदिशब्दाद्वह्निं ग्राह्यञ्च ॥ * ॥ तन्त्रान्तरे ।
“मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यग्रत्वमनिर्व्वेदो जपसम्पत्तिहेतवः ॥ * ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणावृतः ।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित् ॥
अनासनः शयानो वा गच्छन् भुञ्जान एव वा ।
अप्रावृतौ करौ कृत्वा शिरसा प्रावृतोऽपि वा ॥
चिन्ताव्याकुलचित्तो वा क्रुद्धो भ्रान्तः क्षुधा-
न्वितः ।
रथ्यायामशिवस्थाने न जपेत्तिमिरालये ॥
उपानद्गूढपादो वा यानशय्यागतोऽपि वा ।
प्रसार्य्य न जपेत् पादावुत्कटासन एव च ।
न यज्ञकाष्ठे पाषाणे न भूमौ शयने स्थितः ॥”
तथा ।
“मार्ज्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं कपिं खरम् ।
दृष्ट्वाचम्य जपेत् शेषं स्पृष्ट्वा स्नानं विधीयते ॥”
सर्व्वत्र जपे त्वयं नियमः । मानसे तु नियमो
नास्त्येव । तथा च ।
“अशुचिर्वा शुचिर्व्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव सदाभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥”
श्यामादिजपे तु तत्तन्मन्त्रे विशेषो वक्तव्यः ॥
जपफलमाह शिवधर्म्मे ।
“जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्व-
तीम् ॥”
माघे ।
“यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥”
पाद्मनारदीययोः ।
“यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥
माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥”
तथा तन्त्रे ।
“मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥”
गौतमीये ।
“शृणु त्रिविधं ध्यानमन्यथा हि सतत्त्व वा ।
त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं तदुपमं भवेत् ॥”
सन्ध्यात्रये पूजाशक्तावयमष्टोत्तरशतमितजपः ॥
“एकदा वा भवेत् पूजा न जपेत् पूजनं विना ।
जपान्ते वा भवेत् पूजा पूजान्ते वा जपेन्मनुम् ॥
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥”
मध्यन्दिनावधीति न नियमपरं किन्त्वधिककाल-
व्यवच्छेदपरम् । अन्यथा तत्समयजपनियमे
कदाचित् निद्रया व्याधानादिना वा प्रति-
नियतदिवसीयजपसङ्ख्याया अपूर्णत्वे आधिक्ये
वा नियमभङ्गः स्यात् ॥ * ॥
“मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपंक्तिवत् ॥ * ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेण्यां वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥”
मन्त्रनिर्णये ।
“मानसं मन्त्रवर्णस्य चिन्तनं मानसः स्मृतः ।
जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥
किञ्चित् श्रवणयोग्यः स्यात् उपांशुः स जपः
स्मृतः ।
मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ॥”
प्रकारान्तरम् ।
“निजकर्णगोचरो यो मानसः स जपः स्मृतः ।
उपांशुर्निजकर्णस्य गोचरः स प्रकीर्त्तितः ॥
निगदस्तु जनैर्वेद्यस्त्रिविधोऽयं जपः स्मृतः ॥”
तन्त्रान्तरे ।
“उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः ।
उत्तमो मानसो देवि ! त्रिविधः कथितो जपः ॥”
जिह्वाजपस्तु ।
“जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैरिति ।
अतिविलम्बातिशीघ्रजपे दोषमाह ।
“अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥
मनसा यः स्मरेत् स्तोत्रं वचसा वा मनुं जपेत् ।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा ॥”
गौतमीये ।
“पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
सौषुम्नध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवन्ति ते ॥”
पाद्मनारदीययोः ।
“मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव परमव्योम्नि परमामृतवृंहिते ॥
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्व्विनेति ॥”
गौतमीये दशमपटले ।
“मूलमन्त्रं प्राणबुद्ध्या सुषुम्नामूलदेशके ।
मन्त्रार्थं तस्य चैतन्यं जीवं ध्यात्वा पुनः पुनः ॥
कुलार्णवेऽपि ।
“मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः
न सिद्ध्यति वरारोहे ! कल्पकोटिशतैरपि ॥
जातसूतकमादौ स्यादन्ते च मृतसूतकम् ।
सूतकद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति ॥
गुरोरुपदिष्टं कृत्वा मन्त्रं यावन्तेविधा ।

शतकद्वयविमुक्तः स मन्त्रः सर्व्वसिद्धिदः ।
आगमागमक्रमादौ स्यात् शतकमन्ततः ।
शतकद्वयविमुक्तो मन्त्रः सिद्ध्यति नान्यथा ॥"
तत्रैव ।
"तस्माद्देवि ! प्रयत्नेन कुर्य्यात् पुटितं मनुम् ।
अष्टोत्तरशतं चापि सप्तवारं जपादितः ॥
जपान्ते च तथा जप्यात् चतुर्व्वर्गफलाप्तये ॥"
तत्रैव ।
"मातृकां मनोर्हत्वा चाद्यन्ते परमेश्वरि ! ।
सप्तवारं जपेन्मन्त्रं शतकद्वयमुक्तये ॥ * ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥
कुल्लुकाख्य ये मन्त्रा न जानन्ति फलं प्रिये ! ॥
मन्त्राश्चैतन्यसहिताः सर्व्वसिद्धिकराः स्मृताः ।
चैतन्यरहिता मन्त्राः प्रोक्ता वर्णास्तु केवलम् ।
फलं नैव प्रयच्छन्ति लक्षकोटिजपैरपि ॥
मन्त्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ।
शते सहस्रे लक्षे वा कोटिजापे न तत्फलम् ॥
हृदये ग्रन्थिभेदश्च सर्व्वावयववर्द्धनम् ।
आनन्दाश्रूणि पुलको देहावेशः कुलेश्वरि ! ॥
गद्गदोक्तिश्च सहसा जायते नात्र संशयः ।
सकृदुच्चरितेऽप्येवं मन्त्रे चैतन्यसंयुते ॥
दृश्यन्ते प्रत्यया यत्र पारम्पर्य्यं तदुच्यते ॥ * ॥
मायामायं जपेन्मन्त्रं भूतलिप्या तु संपुटम् ।
क्रमोत्क्रमात् सप्तसप्त तस्य सिद्धो भवेन्मनुः ॥"
तत्र भूतलिपिः ।
"अथ ह्रस्वाः सन्धिवर्णा होमारादिकलन्धराः ।
अन्त्यमाद्यं द्वितीयञ्च चतुर्थं मध्यमं क्रमात् ॥
पञ्चवर्गाक्षराणि स्युर्भूतलिप्यैरिन्द्रभिः सह ।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥
मतान्तु ।
अ इ उ ऋ ऌ ए ऐ ओ औ ह य र व ल ङ
क ख घ ग ञ च छ झ ज ण ट ठ ढ ड न त
थ ध द न प फ भ ब म श ष साः ।
अतः वैदं मन्त्रपुटितं पुनः क्रमेणोत्क्रमम् ॥ * ॥
गौतमीये ।
"एवं जपं पुरा कृत्वा नित्योदयं समर्पयेत् ।
देवस्य दक्षिणे हस्ते कुङ्कुमाम्भोजादिभिः ॥
ततश्च तद्दिनाधेन प्राणायामं समाचरेत् ।
जपाद्यौ जपान्ते च नियतं नियतं चरेत् ॥" * ॥
ध्वान्तविषये दैवात् वामहस्ते । तथा च ।
"एवं जपं पुरा कृत्वा गन्धाक्षतकुशोदकैः ।
जपं समर्पयेद्देव्या वामहस्ते विचक्षणः ॥ * ॥
जपान्ते प्रजपेन्मन्त्री होमं तत्तद्दशांशतः ।
तर्पणञ्चाभिषेकञ्च तद्दशांशेन शुभे ! ॥
प्रत्यहं गोत्रविधानात् स्वाधिकप्रमाणके ।
अथवा सर्व्वपूर्त्तौ च होमादिकमथाचरेत् ॥
सम्पूर्णे प्रतिज्ञायां तर्पणादिकमाचरेत् ॥"
मुण्डमालायाम् ।
"यत्र मासान् जपः होमस्तद्दशांशक्रमात् ।
तत्तद्दिनेऽवसाने होमं कुर्य्याद्दिने दिने ॥"
अवच्छायां विधिमाह मुण्डमालायाम् ।

मात्स्यैर्मांसैरन्यैर्वा न धान्यैर्न च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसङ्ख्यां तु कारयेत् ॥
लाक्षाकुशीदसिन्दूरं गोमयञ्च करीषकम् ।
विलोड्य गुटिकां कृत्वा जपसङ्ख्यां तु कारयेत् ॥"
पुरश्चरणचन्द्रिकायाञ्च ।
"ततो जपदशांशेन होमं कुर्य्याद्दिने दिने ।
अथवा जपसङ्ख्यायां पूर्णायां होममाचरेत् ॥"
तथा । होमाद्यशक्तौ च सनत्कुमारीये ।
"यद्यदङ्गं भवेद्भग्नं तत्सङ्ख्याद्विगुणो जपः ।
होमाभावे जपः कार्य्यो होमसङ्ख्याचतुर्गुणः ॥
विप्राणां क्षत्रियाणाञ्च रससङ्ख्यागुणः स्मृतः ।
वैश्यानां वसुसङ्ख्याकमेषां होममयं विधिः ॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिं चरेत् ।
अनाश्रितस्य शूद्रस्य दिक्सङ्ख्याकः समीरितः ।
शूद्रस्य विप्रभक्तस्य तत्समताः षड्गुणो जपः ॥"
अत्राप्युक्तमेतत् योगिनीहृदये ।
"होमकर्म्मण्यशक्तानां विप्राणां द्विगुणो जपः ।
इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः ॥"
त्रिगुणादिः होमसङ्ख्यात्रिगुणजपः क्षत्रियेण कार्य्यः । वैश्येन चतुर्गुणः । शूद्रेण पञ्चगुणः ।
तदुक्तं कुलार्णवे ।
"यद्यदङ्गं विहीनं स्यात्तत्सङ्ख्याद्विगुणो जपः ।
कुर्य्युस्त्रिचतुःपञ्च यथासङ्ख्यं द्विजादयः ॥"
एतेन स्त्रीशूद्राणां होमाधिकारः । तथा च ।
"अविचारमहं यथाग्न्याद्यकीयं चारुं भवति शूद्राणाम् ।"
इति नागभट्टनिबन्धे ॥
शूद्राणां चाग्निमपि कृत्यप्रकरणे शारदायाम् ॥
स्त्रीणां होमाधिकारश्च तत्र ।
"नारीत्थमपुरीचैत्यर्होमः कर्त्ता प्रयच्छति ।
अनेन विधिना कृत्वा परमाप्नोति वाञ्छितम् ॥"
अतः स्त्रीणां होमाधिकारः । तच्च ब्राह्मणद्वारा । तथा च मनुः ।
"ओङ्कारोच्चारमाद्योमात् ग्रामयामधिकार्य्यन्नाम् ।
आद्यहोममनाद्येन शूद्रस्याप्यनलो भवेत् ॥"
इति शान्तिविधानात् ।
तथा स्त्रीणामपि सर्व्ववैदिककर्म्मसु शूद्रतुल्यप्रतिपादनात् ।
स्त्रीशूद्रकर्णपथगो वचपातकमो मम ।
इति भगवद्वचनात् । तथा च नारायणकल्पे ।
"अन्नाशनी महामन्त्रः प्राह्नः शूद्रगोविन्दः ।
प्रणवादिश्च यो मन्त्रो न स्त्रीशूद्रे प्रयच्छते ॥"
इति मतेन स्त्रीणां शूद्रवद्व्यवहारः ॥ * ॥
शूद्रस्यापि स्वकर्त्तृकहोमः । तथा च वाराहीतन्त्रे ।
"यदि कामी भवेच्चैव शूद्रोऽपि होमकर्म्मणि ।
वह्निजायां परित्यज्य हृदयान्तेन होमयेत् ॥"
सर्व्वेषां वा द्विगुणो जपः । तथा च वाशिष्ठे ।
"यद्यदङ्गं विहीनं तु तत्सङ्ख्याद्विगुणो जपः ।
कर्म्मणश्चाङ्गविध्वंसे तदङ्गत्वेन भक्तितः ॥
न वेदाङ्गं विहीनेन तद्विद्विजमथानुयात् ।

विप्रभोजनमात्रेण साङ्गं साध्यं भवेत् ध्रुवम् ।
यत्र यदुक्तं द्विजाराधनं तत्र तदुक्तं सदा ध्रुवम् ॥"
तथा स्वच्छन्दसंहितायाम् ।
"यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा ।
तावत्सङ्ख्याजपेनैव ब्राह्मणाराधनेन च ।
भवेदङ्गद्वयेनैव पुरश्चरणमात्रं वै ॥" * ॥
वीरतन्त्रे ।
"नियमः पूर्व्वतो ज्ञेयो न योगिनां कदाचन ।
न न्यासो योगिनामत्र न ध्यानं न च पूजनम् ।
केवलं जपमात्रेण मन्त्राः सिद्ध्यन्ति योगिनाम् ॥"
तत्र च ।
"गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः ।
गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम् ॥" * ॥
तथा च योगिनीहृदये ।
"गुरोरभावे पुत्राय तत्पत्न्यै वा निवेदयेत् ।
तयोरभावे देवेशि ! ब्राह्मणेभ्यो निवेदयेत् ॥
सम्यक्सिद्धैकमन्त्रस्य मन्त्रोपासनेन च ।
षड्भिः समाप्य सिद्ध्यन्ति तत्प्रसादात् कुलेश्वरि ॥
गुरुक्रमेणेदं सर्व्वमित्याहुस्तन्त्रवेदिनः ।
एकग्रामे स्थितो नित्यं गत्वा वसेत वै द्रुतम् ॥
गुरुदेवं परं प्राज्ञ तत्पादादौ समर्पयेत् ।
तदन्ते महतीं पूजां कुर्य्यात् साधकसत्तमः ॥
शुभाचिन्तीं कुमारीश्च भक्त्या तदनु भोजयेत् ।
मिष्टान्नं बहुधा कार्य्यं भुञ्जीत बन्धुभिः सह ।
एवं सिद्धमनुर्मन्त्री साधयेत् सर्व्वसिद्धिताम् ॥" * ॥
अथ सद्यःपुरश्चरणम् ।
तन्त्रे ।
"अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्व्वमुपोषितः ।
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ।
ग्रासादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥" * ॥
यदि नद्यादिदूषिता नदी भवति तदा तु कर्त्तव्यं तदाह वक्ष्यामहे ।
"अपि शुद्धोदकैः स्नात्वा शुचौ देशे समाहितः ।
ग्रासादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ।
इति कृत्वा न सन्देहो जपस्य फलमाप्नुयात् ॥"
तदभावे ।
"यद्वा पुण्योदकैः स्नात्वा शुचिः पूर्व्वमुपोषितः ।
ग्रहणादिविमोक्षान्तं जपेन्मन्त्रमनन्यधीः ॥" * ॥
वचनान्तरमपि तु तत्रैव ।
अथवान्यप्रकारेण पौरश्चरणिको विधिः ।
चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः ।
स्पर्शादिविमोक्षान्तं जपेन्मन्त्रं समाहितः ।
जपाद्दशांशतो होमं तथा होमात्तु तर्पणम् ।
एवं कृत्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥" * ॥
गोपालमन्त्रविषये तु होमसप्तकान्तं यथा,—
"इह गोपालमन्त्रस्य तर्पणं होमसङ्ख्यया ।
मर्द्दितानिह सर्व्वेषामित्याहुस्तत्त्ववेदिनः ।
ग्रहे स्नात्वा शुभं दृष्ट्वा विमोक्षान्तं जपेत्ततः ।
तावद्दशांशतः कुर्य्याद्दशांशतः शुचिः पुनः ।
एवं जपात्तत्सिद्धिर्भवेत्तु न संशयः ॥" * ॥

ग्रहणे जपस्य आवश्यकत्वम् ।
"श्राद्धादेरनुरोधेन यदि जप्यं त्यजेन्नरः ।
स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः ॥"
इति सनत्कुमारीयवचनात् ॥
वस्तुतस्तु आरब्धपुरश्चरणविषयमिदम् ।
तथाहि ।
"आरब्धे पुरश्चरणे यदि च ग्रहणं भवेत् तदा श्राद्धाद्यनुरोधेन जपं न त्यजेत् । एवं रात्रावपि पुरश्चरणविशेषे बोद्धव्यम् ।" इति सर्व्वसमञ्जसम् ॥ * ॥ योगिनीहृदये ।
"कल्पोक्तविधिना मन्त्री कुर्य्याद्धोमादिकन्ततः ।
अथवा तद्दशांशेन होमादींश्च समाचरेत् ॥"
तथा ।
"अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणभोजनम् ॥
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत् ।
एवञ्च मन्त्रसिद्धिः स्यात् देवता च प्रसीदति ॥"
अत्र ब्राह्मणभोजनमावश्यकमेव ।
"सर्व्वथा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये ।
विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवम् ॥"
क्रियासारे ।
"दीक्षाहीनान् पशून् यस्तु भोजयेद्वा स्वमन्दिरे ।
स याति परमेशानि ! नरकानेकविंशतिम् ॥
एवं यः कुरुते देवि ! पुरश्चरणकं प्रिये ! ।
सर्व्वपापविनिर्म्मुक्तो देवीसायुज्यमाप्नुयात् ॥"
यद्यपि पुरश्चरणपदं पञ्चाङ्गपरम् । तथा च ।
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमुच्यते ॥"
तथापि ग्रहणादौ पुरश्चरणपदं गौणं जपमात्रपरम् ।
"सूर्य्योदयं समारभ्य यावत् सूर्य्योदयान्तरम् ॥"
इत्यादौ तथादर्शनात् तत्र होमादेरभावात् । तर्हि कथं ग्रहणपुरश्चरणे होमादि इति चेत् वचनादेव । न च पुरश्चरणस्य पञ्चाङ्गत्वात् सर्व्वत्र तदेव स्यादिति वाच्यम् । ग्रहणे पुनरुक्तिभागमनर्थकं स्यात् । किञ्च ग्रहणे होमादिनियमात् नान्यत्र होमादिः । ग्रहणपुरश्चरणे होमादिविधानन्तु प्रकृतीभूतपञ्चाङ्गपुरश्चरणतुल्यतावोधनाय । अतएव ग्रहणे पञ्चाङ्गस्वरूपपुरश्चरणे कृते मुख्यप्रयोगेऽप्यधिकार इति प्रकटीकृतम् । तदकरणे पुनः केवलजपमात्रपुरश्चरणे कृते नाधिकार इति सर्व्वसमञ्जसमिति ।
पुरश्चरणकालस्तु धारादीपे ।
"चन्द्रतारानुकूले च शुक्ले पक्षे शुभेऽहनि ।
आरभेत पुरश्चर्य्यां हरौ सुप्ते न चाचरेत् ॥"
प्रतिप्रसवः । रुद्रयामले ।
"कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके ।
फाल्गुने श्रावणे दीक्षा पुरश्चर्य्या प्रशस्यते ॥"
शुक्रास्ते शुक्रोदये च दीक्षापुरश्चरणयोर्निषेधमाह तन्त्रान्तरे ।
"शुक्रास्ते दुर्दिने नैव कुर्य्याद्दीक्षां जपं प्रिये ! ।
कृते नाशो भवेत्तस्य आयुःश्रीसुतसम्पदाम् ॥"

अथ पुरश्चरणप्रयोगः ।
तत्र तावत् भूमेः परिग्रहं कृत्वा पुरश्चरणप्राक्तनीयदिवसे क्षौरादिकं विधाय वेदिकायाश्चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रम् आहारादिविहारार्थं परिकल्प्य तत्र कूर्म्मचक्रानुरूपं मण्डलं विधाय एकभक्तं कुर्य्यात् । ततः परदिने स्नानादिकं विधाय शुद्धः सन् वेदिकायाश्चतुर्दिक्षु अश्वत्थोडुम्बरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दश कीलकान्, ॐ नमः सुदर्शनाय अस्त्राय फडिति मन्त्रेणाष्टोत्तरशताभिमन्त्रितान् वेदिकाया दशदिक्षु.
ॐ ये चात्र विघ्नकर्त्तारो भुवि दिव्यन्तरीक्षगाः ।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु ॥
मयैतत् कीलितं क्षेत्रं परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्व्वे निर्व्विघ्नं सिद्धिरस्तु मे ॥
इत्यनेन निखन्य तेषु ॐ नमः सुदर्शनाय अस्त्राय फडिति मन्त्रेणास्त्रं संपूज्य पूर्व्वादिक्रमेण इन्द्रादिलोकपालान् पूजयेत् । तद्यथा । ॐ भूर्भुवःस्वरिन्द्रलोकपाल इहागच्छ इत्यावाह्य पञ्चोपचारैरन्यांश्च पूजयेत् । तथा च मुण्डमालायाम् ।
"पुण्यक्षेत्रादिकं गत्वा कुर्य्याद्भूमेः परिग्रहम् ।
तथा त्वमुकमन्त्रस्य पुरश्चरणसिद्धये ।
मयेयं गृह्यते भूमिर्म्मन्त्रोऽयं सिध्यतामिति ॥"
तथा ।
"ग्रामे क्रोशमितं स्थानं नद्यादौ स्वेच्छया मतम् ।
नगरादावपि क्रोशं क्रोशयुग्ममथापि वा ॥
क्षेत्रं वा यावदिष्टन्तु विहारार्थं प्रकल्पयेत् ।
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् ॥
खादिरोद्भवान् कीलान् अस्त्रमन्त्राभिमन्त्रितान् ।
निखनेद्दशदिग्भागे तेष्वस्त्रञ्च प्रपूजयेत् ॥
लोकपालान् पुनस्तेषु गन्धाद्यैः पूजयेत् सुधीः ।
ततो मध्यस्थाने क्षेत्रपालं वास्तीशञ्च संपूज्य सर्व्वविघ्नविनाशार्थं गणपतिं पूजयेत् । ॐ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा मत्कर्त्तव्यामुकमन्त्रपुरश्चरणकर्म्मणि सर्व्वविघ्नविनाशार्थं गणेशपूजामहं करिष्ये । इति सङ्कल्प्य वेदिकामध्ये पञ्चोपचारैर्गणेशं पूजयेत् । तदुक्तम् ।
"क्षेत्रपालादिकं तत्र पूजयेत् विधिवत्ततः ।
क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्च्चयेत् ॥
दिक्पालेभ्यो बलिं दद्यात् ततः क्षेत्रं समाविशेत् ॥"
ततो माषभक्तादिना पूजितदेवताभ्यो बलिं दद्यात् । ततः ।
"ॐ ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननिवासिनः ।
मातरोऽप्युग्ररूपाश्च गणाधिपतयश्च ये ॥
विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ।
सर्व्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥"
इत्यनेन दशदिक्षु भूतेभ्यो बलिं दद्यात् । ततो गायत्रीं जपेत् । तथा च ।

"प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो जपेत् ।
ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः ॥"
इति विद्याधराचार्य्यः ॥ * ॥
अत्र प्रातः स्नात्वा तु गायत्र्या अयुतं प्रयतो जपेत् इति । तत्र पुनरन्यपापशङ्कया । ॐ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रगायत्रीजपमयुतगायत्रीजपं वा अहं करिष्ये । इति सङ्कल्प्य जपेत् । तत उपवासं हविष्यं वा कुर्य्यात् ॥ * ॥
तत्परदिने उषसि स्नानादिकं कृत्वा स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । यथा विष्णुः ओम् अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवताया अमुकमन्त्रसिद्धिप्रतिबन्धककृताशेषदुरितक्षयपूर्व्वकतन्मन्त्रसिद्धिकामोऽद्यारभ्य यावता कालेन संसेत्स्यति तावत्कालममुकदेवताया अमुकमन्त्रस्य इयत्संख्यजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये । इति सङ्कल्प्य भूतशुद्धिप्राणायामादिकं कृत्वा स्वस्तिसूत्रं बद्ध्वा स्वस्वपूजापद्धत्युक्तक्रमेण देवतां संपूज्य दीपे प्रज्वलिते देवतां हृदये प्रातःकालं समारभ्य मध्यन्दिनं यावत् जपं कुर्य्यात् । ततस्तद्दशांशहोम-तद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनं कुर्य्यात् । तथा च । सनत्कुमारतन्त्रे ।
"प्रणवं तत्पदञ्चोक्त्वा मासपक्षतिथावपि ।
अमुकामुकगोत्रोऽहं मूलमुच्चार्य्य तत्परम् ॥
सिद्धिकामोऽस्य मन्त्रस्य इयत्सङ्ख्यं जपन्ततः ।
दशांशं हवनं होमाद्दशांशं तर्पणं ततः ॥
दशांशं मार्ज्जनं तस्माद्दशांशं विप्रभोजनम् ।
पुरश्चरणमेवं हि करिष्ये प्रागुदङ्मुखः ॥"
तथा ।
"दीपस्य ज्वलितस्यात्र जपकर्म्म प्रशस्यते ।
तद्दीपस्थानमाश्रित्य शालातपघरां कुट्टिमम् ॥
निर्म्माय विधिवत् कुर्य्यात् जपं तत्र शुभे दिने ॥"
ततो होमजलतर्पणम् ॥ * ॥
तन्त्रान्तरे ।
"तर्पणन्तु ततः कुर्य्यात्तोयैश्चन्द्रमिश्रितैः ।
जले देवं समावाह्य पाद्याद्यैरुपचारकैः ॥
सम्पूज्य विधिवद्भक्त्या परिवारसमन्वितम् ।
एकैकमञ्जलिं तोयं परिवारान् प्रतर्पयेत् ॥
ततो होमदशांशेन तर्पयेत् परदेवताम् ।
संपूर्णायान्तु सङ्ख्यायां पुनरेकैकमञ्जलिम् ।
अङ्गादिपरिवारेभ्यो दत्त्वा देवं विसर्ज्जयेत् ॥" * ॥
तर्पणवाक्यन्तु मूलमुच्चार्य्य श्रीअमुकं तर्पयामि नमः । इति विष्णुविषयम् । तथा च गौतमीये ।
"आदौ मन्त्रं समुच्चार्य्य श्रीपूर्व्वं नाममित्यपि ।
तर्पयामि पदस्यान्ते नमोऽन्तं तर्पयेन्नरः ॥"
अन्यत्र मूलमुच्चार्य्य अमुकदेवतां तर्पयामि ।

तथा च ।
"गमयामि परश्चोक्ता मन्त्राणि सिद्धु नामतः ।
द्वितीयाभिर्यु विधिवं गर्भनस्य मनुमीतः ॥"
मत्स्ति:विषये पूर्णसूत्रमुखार्थे अमुकी गर्मयामि स्वाहा । सौमगर्भयोः स्वाहेति तत्तत्क-प्रचनात् । गौतमकी ।
"मन्त्राणि नाम योधार्थं गमयामि तमः परम् ।
कुम्भांचैव वरारोहे ! स्वाहान्तं तर्पये मनम् ॥"
इत्यादि । विशुद्धेश्वरतन्त्रे ।
"विद्धा पूर्वं मत्स्यार्थं तदन्ते देवताभिधाम् ।
तर्पयामीति मन्त्रोक्ता स्वाहान्तार्पणतो मनः ॥"
अभिषेकवाक्यम् । अमोरिणं गलसुधार्थं अमुक-देवतामहमभिषिञ्चामि इति कलसमुद्रया मस्तके अभिषिञ्चेत् । तथा च । गौतमीये ।
"अमोरिणं गलसुधार्थं तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु ।
अभिषिञ्चेत् स्वमूर्द्धानं तोयैः कुम्भाग्रमुद्रया ॥"
मत्स्यविषये गौतमीये ।
"मन्त्राणि नाम योधार्थं सिञ्चामीति नमः परम् ॥"
इति । ततो ब्राह्मणान् भोजयित्वा पूजां कुर्य्यात् ॥ ॥ ततो दक्षिणा । अद्येत्यादि कृतै-तदमुकमन्त्रपुरश्चरणकर्म्मणः साङ्गतार्थं दक्षिणा-मिदं काञ्चनं वह्निदैवतं अमुकगोत्राय गुरवे तुभ्यमहं सम्प्रददे । ततोऽच्छिद्रावधारणं कुर्य्यात् ।
अथ सङ्क्षेपपुरश्चरणप्रयोगः ।
तद्यथा,
ओम् अद्येत्यादि राहुग्रस्ते निशाकरे दिवाकरे वा अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवताया अमुकमन्त्रसिद्धिकामो ग्रासादिमुक्तिपर्य्यन्तं अमुकदेवताया अमुकमन्त्रजपरूपपुरश्चरणमहं करिष्ये । इति सङ्कल्प्य जपेत् । ततस्तद्दिने तत्परदिने वा स्नानादिकं विधाय ॐ अद्ये-त्यादि अमुकदेवताया अमुकमन्त्रस्य कृतैतत् ग्रहणकालीन-जपकर्म्मणः साङ्गतार्थं होमतद्-दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मण-भोजनकर्म्माण्यहं करिष्ये । इति सङ्कल्प्य होमादिकं कुर्य्यात् । दक्षिणादिकन्तु पूर्व्ववत् ।"
इति तन्त्रानन्दतरङ्गसारः ॥ ७ ॥
(अथ नक्षत्र पुरश्चरणम् ।
श्रीपार्व्वत्युवाच ।
"कथयस्व महादेव ! सिद्धिकारकमुत्तमम् ।
येन सिद्धिं करायाति सर्व्वमन्त्राश्च सिद्धिदाः ॥
येषु येषु च कार्य्येषु पुरश्चर्य्यां भवेद्ध्रुवम् ॥
श्रीशिव उवाच ।
कथयामि समासेन शृणुष्व सर्व्वतामसि ! ।
मेषराशौ रवावश्च प्रसर्व्वफलमुत्तमम् ॥
पुरश्चरणकेनापि शृणुष्व सुरवान्दिते ! ।
वृषराशौ यदा मन्त्री दाहुर्णं प्रजपेत् सुधीः ।
तेन तस्य सुसिद्धिः स्यात् नात्र कार्य्या विचा-रणा ॥
मिथुने च यदा मन्त्री सहस्रं समनुत्तमम् ।
प्रजपेत् प्रयतो नित्यं पुरश्चरणमुच्यते ।
कर्कटे च यदा मन्त्री सहस्रं प्रत्यहं जपेत् ।
तेन मन्त्रार्थसिद्धिः स्यात् पुरश्चरणजं भवेत् ॥
सिंहे च सर्व्वसन्ध्यासु युगानां दृढं जपेत् ।
धर्म्मार्थकाममोक्षाणां फलभाग्भवति ध्रुवम् ॥
कन्यायाञ्च यदा मन्त्री मन्त्रं मकरराशयः ।
सहस्रं द्वादशश्चैव जपेन्नियतमानसः ॥
पुरश्चरणमेतद्धि सर्व्वकामार्थसाधनम् ।
एवं सति तुलां प्राप्य चान्ते देवीपदं भवेत् ॥
तुलायां प्रत्यहं मन्त्री सहस्रं साधको जपेत् ।
अनेन विधिना देवि ! पुरश्चरणकृद्भवेत् ॥
वृश्चिके चायुतं मन्त्रं प्रत्याया प्रजपेत् सुधीः ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चर्य्यार्पणं भवेत् ॥
धनुषि च यदा मन्त्रं जपेदयुतमादरात् ।
स एव कन्दर्पसमो धनवान् मानवान् सुखी ॥
मकरे च यदा मन्त्रं जपेत् साधकसत्तमः ।
अयुतामयुतं देवि ! प्रत्यहं यतमानसः ॥
धर्म्मार्थी भावयेन्नित्यं पुरश्चरणमुच्यते ।
कुम्भे चैव यदा मन्त्रं जपेदयुतमादरात् ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद् भवेत् ॥
मीने चैव यदा देवि ! प्रजपेदयुतं द्वयम् ।
तेन पुरश्चरणमित्याहुः सर्व्वागमविशारदाः ॥
सर्व्वत्र जपनं प्रोक्तं रात्रौ वा मैथुनेऽपि वा ।
अश्विन्यायाम् विधिना पर्य्योषितुमनागमे ॥
भरिण्यायां यदा देवि ! जपेन्नियतमानसः ।
एवंविधं जपं कृत्वा दशांशञ्च तदाचरेत् ॥
दक्षिणां गुरवे दत्त्वा सिद्धिभाग् भवति ध्रुवम् ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
रविवारादिनक्षत्रेषु वारसंख्यानयमकम् ।
जप्त्वा मन्त्रं यदा देवि ! साधकः सिद्धिभाग् भवेत् ॥
पुरश्चरणमेतद्धि नात्र कार्य्या विचारणा ।
एवंविधं समाचर्य्य दशांशञ्च तदाचरेत् ।
गुरवे दक्षिणां दत्त्वा सर्व्वकाममवाप्नुयात् ॥
केवलं जपमात्रेण पुरश्चरणमुच्यते ।
येषु येषु च कार्य्येषु जायते सिद्धिरुत्तमा ।
कथयामि समासेन शृणुष्व सर्व्वतामसे ! ।
अश्विन्यां जपते मन्त्रं साधकैश्च सहस्रकम् ।
तेन सिद्धिमवाप्नोति साधको नात्र संशयः ।
द्विसहस्रं जपेन्मन्त्रं भरण्याञ्च यदा सुधीः ।
सप्तलोकं परिक्रम्य भवेत च धनाधिपः ।
कृत्तिकायां जपेन्मन्त्रं त्रिसहस्रञ्च साधकः ॥
रोहिण्याञ्च यदा मन्त्रं जपेत् साधकसत्तमः ।
सहस्रं वा शतं वापि सर्व्वकामार्थमाप्नुयात् ॥
मृगशीर्षे यदा मन्त्रं नियतं प्रजपेत् सुधीः ।
सहस्रपञ्चकञ्चैव इन्द्रतुल्यसमो भवेत् ॥
आर्द्रायां जपते मन्त्रं साधकैः सुसमाहितैः ।
षट्सहस्रं यदा देवि ! सर्व्वकामार्थसिद्धये ॥
पुनर्व्वसुसमायोगे यदा सहस्रमुत्तमम् ।
जपते साधको नित्यं सप्तमे च सुरोत्तमम् ॥
पुष्यायाञ्च जपेन्मन्त्रं सप्तःसाष्ट सहस्रकम् ।
तेन सर्व्वसुसिद्धिः स्यात् पुरश्चर्य्याधिको विधिः ॥
अश्लेषायां यदा देवि ! मन्त्री मन्त्रं दशायुतम् ।
सहस्रनवकञ्चैव जपेत् सर्व्वार्थसिद्धये ।
दशसहस्रं मघायाञ्च जप्त्वा मन्त्रं वरानने ।
पुरन्दरसमो भूत्वा साधको विचरेद् भुवि ।
एकादशसहस्रन्तु पूर्व्वफल्गुन्यां जपेन् सुधीः ।
कुबेर इव विलासी जायते नात्र संशयः ।
उत्तरफल्गुन्यां देवि ! सहस्रं द्वादशं तथा ।
जपती साधकैर्नित्यं सर्व्वकामार्थसिद्धये ।
हस्तायाञ्च जपेद्देवि ! सहस्रं त्रयोदश ।
कुबेरस्यैव समो भूत्वा विचरेद् भुवि मानवः ।
चित्रायाञ्च जपेन्मन्त्रं द्विसहस्रञ्च साधकैः ।
नानाभोगसमायुक्तो भवेद् भुवि सुरवत् ।
स्वात्यां सर्व्वार्थसिद्धिः स्यात् द्विसहस्रसम-न्वयः ।
साधकोऽभ्यासनरोगितार्थी नात्र संशयः ।
विशाखायां यदा मन्त्रं चतुःसहस्रं जपेत् ।
जपेत साधको नित्यं गोमयनु प्रियदर्शनः ।
अनुराधायां यदा देवि ! मन्त्री मन्त्रं जपेत् ।
पुत्रपौत्रसमायुक्तः जीवते जायते ध्रुवम् ।
ज्येष्ठायाञ्च यदा मन्त्रं द्विसहस्रं विचक्षणः ।
प्रजपन् लभते सिद्धिं नात्र कार्य्या विचारणा ।
मूलायाञ्च जपेन्मन्त्रं सहस्रं पञ्चकं प्रिये ।
नानासिद्धिमवाप्नोति साधको नात्र संशयः ।
धनधान्यसमो भूत्वा जायते साधको भुवि ।
पूर्व्वाषाढायां यदा मन्त्रं द्विसहस्रं जपेत् सुधीः ।
महापातकमुक्तोऽपि फलभाग्भवति ध्रुवम् ।
उत्तराषाढाञ्च यदा मन्त्रं चापि सहस्रं तथा ।
जप्त्वा श्रवणे यदा देवि ! भोगमोक्षमवाप्नुयात् ।
रात्रौ वा मैथुने वापि धनिष्ठायां वरानने ।
प्रजपेत् साधको नित्यं साधयेदयुतो दिनम् ।
सर्व्वदा प्रजपेन्मन्त्रं शतभिषायां दिवा निशि ।
दक्षिणां गुरवे दद्यात् यथा विभवविस्तरम् ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
आदित्यादिवारयोगे मन्त्रादिविधिरीरितः ।
तत्तत्त्व जपेन्मन्त्रं सहस्रपञ्चकं प्रिये ! ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद् भवेत् ।
प्रतिपत्तिथिमारभ्य शुक्लपक्षे भवेत् प्रिये ! ।
तिथिसंख्या समारभ्य पर्य्यन्तेन सहस्रकम् ।
जप्त्वा मन्त्रं यदा मन्त्री सर्व्वकाममवाप्नुयात् ।
पुरश्चरणमेतद्धि कथितं ते वरानने ! ।
प्रतिपत्तिथिमारभ्य यावत् पावत् भवेत् प्रिये ! ।
तावत्कालं प्रजपेन् तिथिसंख्याक्रमेण तु ।
सर्व्वैश्वर्य्यसमायुक्तो जायते भाग्यवान् नरः ।
इत्येव सुसिद्धिः स्यात् नात्र कार्य्या विचारणा ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
दशादिकरणे देवि ! यदा विद्यामनन्तरम् ।
करणादुत्कादीनैव सहस्रैव सहस्रकम् ।
पुरश्चरणमेतद्धि सर्व्वमन्त्रे च कीर्त्तितम् ।
साधकस्य हितार्थाय कथितं तव सुन्दरि ! ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
दिक्षु आदिषु भौमेषु यो जपेत् सिद्धिदर्शनम् ।

सहस्रं साधको नित्यं सर्व्वसिद्धिपरायणः ।
पुरश्चरणमेतद्धि तन्त्रे तन्त्रे निरूपितम् ॥
संक्रान्त्यादिषु सर्व्वासु विषुवादिषु पार्व्वति ! ।
संक्रान्त्यनुसारेणैव वर्द्धयेच्च सहस्रकम् ॥
पूर्व्वमुखो जपेन्मन्त्रं घनायां सर्व्वदा प्रिये ! ।
प्रत्युषाद्याय सततं दक्षिणाभिमुखो जपेत् ॥”
इति स्वतन्त्रे तन्त्रे हरगौरीसंवादे रहस्यपुरश्चरणविधिः ॥ ७ ॥) अत्र आगमकल्पद्रुमोक्त-कूर्म्मचक्रं तच्छब्दे द्रष्टव्यम् । हरिभक्तिविलासीय-पुरश्चरणन्तु तद्ग्रन्थे सप्तदशविलासे दर्शनीयम् ॥

श्छदः, पुं, (पुरश्छदनि छादयतीति । छद् + अच् । यद्वा, पुरोऽग्रतश्छदाः पत्राण्यस्य ।) तृणविशेषः । उलु इति भाषा । तत्पर्य्यायः । दर्भः २ शरः ३ सौमपत्रः ४ मरातृप्रियः ५ । इति शब्द-चन्द्रिका ॥

स्कारः, पुं, (पुरस्करणमिति + पुरस् + कृ + भावे घञ् ।) पुरस्क्रिया । अभिशापः । परिग्रहणम् । अग्रकरणम् । (पुरः क्रियतेऽनेनेति ।) पूजनम् । (“तस्य बहुमानपुरस्कारं कृत्वा ।” इति हितोपदेशः ॥) स्वीकारः । सेकः । इति पुरस्कृतशब्दार्थदर्शनात् ॥

स्कृतः, त्रि, (पुरः क्रियते स्मेति । पुरस् + कृ + क्तः ।) अभिशस्तः । परिग्रस्तः । अग्रकृतः । पूजितः । इति मेदिनी । ते, २१२ ॥ स्वीकृतः । सिक्तः । इति हेमचन्द्रः ॥

रस्तात्, अ, (पूर्व्वस्मिन् पूर्व्वस्यां पूर्व्वस्मात् पूर्व्वस्याः वा पूर्व्वः पूर्व्वा वेति । पूर्व्व + “दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्-देशकालेष्वस्तातिः ।” ५ । ३ । २७ । इति अस्तातिः । “अस्ताति च ।” ५ । ३ । ४० । इति पूर्व्वस्य पुरादेशः ।) प्राच्यां दिशि । यथा, पुरस्तात् सूर्य्य उदेति । प्रथमे काले । यथा, पुरस्ताद्दृष्टम् । पुरार्थे । अतीते । यथा, पुरस्तादासीद्भूत् । अग्रतः अग्रे देशे । यथा, पुरस्तादायाति । इत्यमरभरतौ ॥ (यथा च रघौ । २ । ४४ ।
“भाष्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्ने-
र्नश्यत् पुरस्तादनुपेक्षणीयम् ॥”)

पुरा, अ, (पुरति अग्रे गच्छतीति । पुर + बाहु-लकात् का ।) प्रबन्धः । वाक्यरचना पुराणादिः । यथा, पुराविदः । चिरम् । चिरन्तनम् । पुराण-मित्यर्थान्तरम् । अतीतम् । भूतम् । चिरातीत-मित्येकम् । यथा इतिहासः पुरावृत्तमिति केचित् ॥ निकटः । सन्निहितः । आगामिकम् । अनागतम् । निकटागामिकः । भविष्यदासत्तिः । इति केचित् । इत्यमरभरतौ ॥ भीतः । इति शब्दरत्नावली ॥ (प्राक् । इति हेमचन्द्रः । ६ । १७१ । यथा, पञ्चदश्याम् । २ । १४ ।
“इदं सर्व्वं पुरा सृष्टेरेकमेवाद्वितीयकम् ।
सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः ॥”)

पुरा, स्त्री, (पुरतीति । पुर + क + टाप् ।) पूर्व्व-दिक् । सुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । गन्ध-वती २ दिव्या ३ गन्धाढ्या ४ गन्धमादिनी ५ सुरभिः ६ भूरिगन्धा ७ कुटी ८ गन्धकुटी ९ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । शीत-त्वम् । कषायत्वम् । कफपित्तश्वासासविष-दाहार्त्तिभ्रमभूर्च्छालक्ष्मीनाशित्वञ्च । इति राज-निर्घण्टः ॥

पुराकृतं, त्रि, (पुरा पूर्व्वं पूर्व्वस्मिन् काले वा कृतम् ।) प्रारब्धकर्म्म । पूर्व्वकालकृतपुण्यादि । यथा,—
“अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥”
इति स्मृतिः ॥

पुराणं, क्ली, (पुरा भवमिति । पुरा + “सायं-चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।” ४ । ३ । २३ । इति ट्युः । “पूर्व्वकालैकसर्व्वजरत्पुराणनव-केवलाः समानाधिकरणेन ।” २ । १ । ४९ । इति निपातनात् तुडभावः । यद्वा, “पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।” ४ । ३ । १०५ । इति निपा-तितः । यद्वा, पुरा नीयते इति । नी + ड । णत्वञ्च ।) व्यासादिमुनिप्रणीतवेदार्थवर्णित-पञ्चलक्षणान्वितशास्त्रम् । तत्पर्य्यायः । पञ्चलक्ष-णम् २ । इत्यमरः । १ । ६ । ५ ॥ पञ्चलक्षणानि यथा, सर्गः १ प्रतिसर्गः २ वंशः ३ मन्वन्तरम् ४ वंशानुचरितम् ५ ॥ महापुराणस्य दश लक्ष-णानि । यथा, सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंशानुचरितम् ७ संस्था ८ हेतुः ९ अपाश्रयः १० ॥ अथाष्टादशमहा-पुराणानि तेषां श्लोकसंख्यानि च तथा । ब्राह्मं दशसहस्रम् १ पाद्मं पञ्चपञ्चाशत्सहस्रम् २ वैष्णवं त्रयोविंशतिसहस्रम् ३ शैवं चतुर्व्विंशति सहस्रम् ४ भागवतम् अष्टादशसहस्रम् ५ नार-दीयं पञ्चविंशतिसहस्रम् ६ मार्कण्डेयं नवसह-स्रम् ७ आग्नेयं चतुःशताधिकपञ्चदशसहस्रम् ८ भविष्यं पञ्चशताधिकचतुर्द्दशसहस्रम् ९ ब्रह्मवैवर्त्तम् अष्टादशसहस्रम् १० लैङ्गं एका-दशसहस्रम् ११ वाराहं चतुर्व्विंशतिसहस्रम् १२ स्कान्दं शताधिकैकाशीतिसहस्रम् १३ वामनं दशसहस्रम् १४ कौर्म्मं सप्तदशसहस्रम् १५ मात्स्यं चतुर्द्दशसहस्रम् १६ गारुडं ऊन-विंशतिसहस्रम् १७ ब्रह्माण्डं द्वादशसहस्रम् १८ । समुदायेन चतुर्लक्षश्लोकाः । इति श्रीभागवतीय-द्वादशस्कन्धः ॥ (अपि च देवीभागवते १ स्कन्धे ३ अध्याये तथा मत्स्यपुराणे ५३ अध्याये एतद्विवरणं द्रष्टव्यम् ॥) अपि च ।

सूत उवाच ।

“विस्तराणि पुराणानि चेतिहासश्च शौनक ! ।
संहिताः पञ्चरात्राणि कथयामि यथागमम् ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं विप्र ! पुराणं पञ्चलक्षणम् ॥
एतदुपपुराणानां लक्षणञ्च विदुर्बुधाः ।
महताञ्च पुराणानां लक्षणं कथयामि ते ॥ ॥
सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ॥
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम् ।
संख्यानञ्च पुराणानां निबोध कथयामि ते ॥
परं ब्रह्मपुराणञ्च सहस्राणां दशैव च ।
पञ्चोनषष्टिसाहस्रं पाद्ममेव प्रकीर्त्तितम् ॥
त्रयोविंशतिसाहस्रं वैष्णवञ्च विदुर्बुधाः ।
चतुर्विंशतिसाहस्रं शैवमेव निरूपितम् ॥
ग्रन्थोऽष्टादशसाहस्रं श्रीमद्भागवतं विदुः ।
पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्त्तितम् ॥
मार्कण्डं नवसाहस्रं पुराणं पण्डिता विदुः ।
चतुःशताधिकं पञ्चदशसाहस्रमेव च ॥
परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम् ।
चतुर्द्दशसहस्राणि परं पञ्चशताधिकम् ॥
पुराणप्रवरञ्चैव भविष्यं परिकीर्त्तितम् ।
अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीप्सितम् ॥
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः ।
एकादशसहस्रञ्च परं लिङ्गपुराणकम् ॥
चतुर्व्विंशतिसाहस्रं वाराहं परिकीर्त्तितम् ।
एकाशीतिसहस्रञ्च परमेव शताधिकम् ॥
परं स्कन्दपुराणञ्च सद्भिरेवं निरूपितम् ।
वामनं दशसाहस्रं कौर्म्मं सप्तदशैव तु ॥
मात्स्यं चतुर्द्दशं प्रोक्तं पुराणं पण्डितैस्तथा ।
ऊनविंशतिसाहस्रं गारुडं परिकीर्त्तितम् ॥
परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्त्तितम् ।
एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम् ॥
अष्टादशपुराणानामेवमेव विदुर्बुधाः ।
एवञ्चोपपुराणानामष्टादश प्रकीर्त्तिताः ॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च ।
पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यपूर्व्वकम् ॥
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥
पञ्चम्यः संहितानाञ्च कृष्णभक्तिसमन्विताः ।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च ॥
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः ।
इति ते कथितं सर्व्वं क्रमेण च पृथक् पृथक् ।
अस्तीदं विपुलं शास्त्रं समापि च यथागमम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३९ अः ॥

पद्मपुराणमते तु ।
“निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ॥
यत्नाच्छ्रवणाद्येषां कुर्य्यात् पापक्षयो भवेत् ।
धर्म्माधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम् ॥
भक्तिश्च परमा सद्भक्तिर्भगवति प्रभौ ।
तानि ते कथयिष्यामि यत्प्रमाणानि भूतले ॥”
पुराणसंख्यान्तरमाह ।
“पुराणानि चतुर्लक्षाण्येतानि धरणीतले ।
तथा महाभारतञ्च सपादं प्रकीर्त्तितम् ॥
पञ्चलक्षमिदं राजन् ! कथितं मया केवलम् ।
वेदः सप्तमतामेव लोकनिस्तारकः परः ॥

तत्र पद्मपुराणञ्च प्रथमं च प्रकीर्त्तितम्।
ततोऽन्यानि पुराणानि कृत्वा षोडश तु क्रमात् ।
अष्टादशं भागवतं सारमाकृष्य सर्व्वतः ।
कृतवान् भगवान् व्यासः शुकञ्चाध्यापयत् सुतम् ॥"

इति पातालखण्डे ७१ अध्यायः ॥ * ॥

आख्यानादिभिः सह व्यासः पुराणं चक्रे ।
यथा,—
"आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः ।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः ॥"
अस्य टीका यथा,—
आख्यानादिभिः सह पुराणं चक्रे व्यास इत्यन्वयः । तत्र च ।
स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः ।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते ॥
गाथास्तु पितृपृथ्वीप्रभृतिगीतयः । कल्पशुद्धिः श्राद्धकल्पादिनिर्णयः ॥ * ॥
"सुमतिश्चाग्निवर्च्चाश्च मित्रायुः शांशपायनः ।
अकृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन् ॥"
टीका । सुमत्यादयस्तु रोमहर्षणस्य षट् शिष्यास्ततस्ताः षट् संहिता अपठुः ॥ * ॥
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ।
लौमहर्षणिका चान्या तिसृणां मूलसंहिता ॥"
टीका । अकृतव्रण एव काश्यपः काश्यपोऽकृतव्रण इति वायूक्तेः । लौमहर्षणिका चान्या रोमहर्षणेन पुनः संक्षेपेण प्रोक्ता ॥ * ॥
"चतुष्टयेनाप्येतेन संहितानामिदं मुने ! ।"
टीका । एतासां काश्यपादिकृतानां संहितानामर्थचतुष्टयेनापि मूलभूतेन तत्सारोद्धारात्मकं इदं श्रीविष्णुपुराणं शृणु ! मैत्रेय ! मया कृतमिति शेषः ॥ * ॥
"आद्यं सर्व्वपुराणानां पुराणं ब्राह्ममुच्यते ।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥*॥
तेषां नामोच्चारणादिमाहात्म्यं यथा,—
"अष्टादशपुराणानां नामधेयानि यः पठेत् ।
त्रिसन्ध्यं जपते नित्यं सोऽश्वमेधफलं लभेत् ॥"

इति मार्कण्डेयपुराणम् ॥ * ॥

तामसपुराणानि यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयञ्च षडेतानि तामसानि निबोधत ॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुड़ञ्च तथा पाद्मं वाराहं शुभदर्शने ! ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः ।
तथैव तामसा देवि ! निरयप्राप्तिहेतवः ॥"

इति पाद्मोत्तरखण्डे ४३ अध्यायः ॥ * ॥

अष्टादशोपपुराणानि यथा,—
"आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम् ॥
कापिलं वामनञ्चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च ॥
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम् ।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥"

इति गारुड़े २२७ अध्यायः ॥ * ॥

कौर्म्मोक्तान्येतानि उपपुराणशब्दे द्रष्टव्यानि । पुराणपाठक्रमस्तु पारायणशब्दे पाठशब्दे च द्रष्टव्यः । अथाष्टादशमहापुराणानामनुक्रमणिका अर्थात् तेषां श्लोकसंख्याखण्डभागोपाख्यानश्रवणदानफलानि लिख्यन्ते ।

सूत उवाच ।

"एतच्छ्रुत्वा नारदस्तु कुमारस्य वचो मुदा ।
पुनरप्याह सुप्रीतो जिज्ञासुः श्रेय उत्तमम् ॥

नारद उवाच ।

साधु साधु महाभाग ! सर्व्वलोकोपकारकम् ।
महात्मन् त्वया प्रोक्तं सर्व्वतन्त्रोत्तमोत्तमम् ॥
अधुना श्रोतुमिच्छामि पुराणाख्यानमुत्तमम् ।
यस्मिन् यस्मिन् पुराणे तु यद्यदाख्यानकं मुने ! ।
तत्तत् सर्व्वं समाचक्ष्व सर्व्वज्ञो यतो मतः ॥
तच्छ्रुत्वा वचनं विप्रा नारदस्य शुभावहम् ।
पुराणाख्यानसंप्रश्नं कुमारः प्रत्युवाच ह ॥

सनत्कुमार उवाच ।

पुराणाख्यानकं विप्र ! नानाकल्पसमुद्भवम् ।
नानाकथासमायुक्तमद्भुतं बहुविस्तरम् ॥
ऋषिः सनातनश्चायं यथा वेद तथापरः ।
न वेद तस्मात् पृच्छ त्वं बहुकल्पविदाम्वरम् ॥
श्रुत्वेत्थं नारदो वाक्यं कुमारस्य महात्मनः ।
प्रणम्य विनयोपेतः सनातनमथाब्रवीत् ॥
ब्रह्मन् ! पुराणविच्छ्रेष्ठ ! ज्ञानविज्ञानतत्पर ! ।
पुराणानां विभागं मे साकल्येनानुकीर्त्तय ॥
यस्मिन् श्रुते श्रुतं सर्व्वं ज्ञाते ज्ञातं कृते कृतम् ।
वर्णाश्रमाचारधर्म्मा याथात्म्यकारणमेव हि ॥
कियन्ति च पुराणानि कियत्सङ्ख्यानि मानतः ।
किं किमाख्यानयुक्तानि तद्वदस्व मम प्रभो ! ॥
चातुर्व्वर्ण्याश्रया नाना व्रतादीनां कथान्तरा ।
सृष्टिक्रमेण वंशानां कथाः सम्यक् प्रकाशय ॥
त्वत्तोऽधिको न चान्योऽस्ति पुराणाख्यानवित् प्रभो ! ।
तस्मादाख्याहि मह्यं त्वं सर्व्वसन्देहभञ्जन ॥
ततः सनातनो विप्राः श्रुत्वा नारदभाषितम् ।
नारायणं च ध्यात्वा प्रोवाच विदांवरः ॥

सनातन उवाच ।

साधु साधु मुनिश्रेष्ठ ! सर्व्वलोकोपकारक ! ।
पुराणाख्यानविज्ञाने यज्जाता नैष्ठिकी मतिः ॥
तुभ्यं तदभिधास्यामि यत् प्रोक्तं ब्रह्मणा पुरा ।
मरीच्यादिऋषिभ्यस्तु पुत्त्रेभ्यः शाश्वतात्मना ॥
एकदा ब्रह्मणः पुत्त्रो मरीचिर्नाम विश्रुतः ।
स्वाध्यायश्रुतसम्पन्नो वेदवेदाङ्गपारगः ॥
उपगम्य स्वपितरं ब्रह्माणं लोकभावनम् ।
प्रणम्य भक्त्या पप्रच्छ इदमेव मुनीश्वर ! ।
पुराणाख्यानममलं यत्त्वं पृच्छसि नारद ! ।

मरीचिरुवाच ।

भगवन् ! देवदेवेश ! लोकानां प्रभवाप्यय ! ।
सर्व्वज्ञ ! सर्व्वकृन्नाथ सर्व्वाध्यक्ष नमोऽस्तु ते ।
पुराणबीजमाख्याहि मह्यं शुश्रूषवे विभो ! ।
लक्षणञ्च प्रमाणञ्च वक्तारं श्रोतृकं तथा ॥

ब्रह्मोवाच ।

शृणु वत्स ! प्रवक्ष्यामि पुराणानां समुच्चयम् ।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम् ।
पुराणमेकमेवासीत् सर्व्वकल्पेषु मानद ! ।
चतुर्व्वर्गस्य बीजञ्च शतकोटिप्रविस्तरम् ॥
प्रवृत्तिः सर्व्वशास्त्राणां पुराणादभवत्ततः ।
कालेनाग्रहणं दृष्ट्वा पुराणस्य महामते ! ।
हरिर्व्यासस्वरूपेण जायते च युगे युगे ।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ।
तदष्टादशधा कृत्वा भूर्लोकेऽस्मिन् प्रभाषते ।
अद्यापि देवलोके तु शतकोटि प्रविस्तरम् ।
अस्त्यत्र तस्य सारस्तु चतुर्लक्षेण वर्ण्यते ॥
ब्राह्मम् १ पाद्मम् २ वैष्णवञ्च ३ वायवीयम् तथैव च ।
भागवतम् ५ नारदीयम् ६ मार्कण्डेयम् ७ कीर्त्तितम् ।
आग्नेयञ्च ८ भविष्यञ्च ९ ब्रह्मवैवर्त्त-१० लिङ्गके ११ ।
वाराहञ्च १२ तथा स्कान्दम् १३ वामनम् १४ कूर्म्म-१५ संज्ञकम् ।
मात्स्यञ्च १६ गारुड़म् १७ तद्वद्ब्रह्माण्डा-१८ मिति त्रिषट् ।
एवं कथानकं सर्व्वं वक्तुः श्रोतुः समाश्रयम् ।
प्रवक्ष्यामि समासेन निशामय समाहितः ॥"॥
तत्र प्रथमं ब्रह्मपुराणम् ।
"ब्राह्मं पुराणं तवादौ सर्व्वलोकहिताय वै ।
व्यासेन वेदविदुषा समाख्यातं महात्मना ।
तद्वै सर्व्वपुराणाग्र्यं धर्म्मकामार्थमोक्षदम् ।
नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते ॥"
तत्पूर्व्वभागे ।
"देवानामसुराणाञ्च यत्रोत्पत्तिः प्रकीर्त्तिता ।
प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर ! ।
ततो लोकेश्वरस्याथ सूर्य्यस्य परमात्मनः ।
वंशानुकीर्त्तनं पुण्यं महापातकनाशनम् ॥
यत्रावतारः कथितः परमानन्दरूपिणः ।
श्रीमतो रामचन्द्रस्य चतुर्व्यूहावतारिणः ।
ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम् ।
कृष्णस्य जगदीशस्य चरितं कल्मषापहम् ॥
द्वीपानाञ्चैव सिन्धूनां वर्षाणाञ्चाप्यशेषतः ।
वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते ।
नरकाणां समाख्यानं सूर्य्यस्तुतिकथानकम् ।

पार्व्वत्याश्च तथा जन्म विवाहश्च निगद्यते ।
दक्षाख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम् ।
पूर्व्वभागोऽयमुदितः पुराणस्यास्य मानद ! ।"*।
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम् ।
विस्तरेण समाख्यातं तीर्थयात्राविधानतः ॥
अत्रैव कृष्णचरितं विस्तरात् समुदीरितम् ।
वर्णनं यमलोकस्य पितृश्राद्धविधिस्तथा ॥
वर्णाश्रमाणां धर्म्माश्च कीर्त्तिता यत्र विस्तरात् ।
विष्णुधर्म्मगुणाख्यानं प्रलयस्य च वर्णनम् ॥
योगानाञ्च समाख्यानं सांख्यानाञ्चापि वर्णनम् ।
ब्रह्मवादसमुद्देशः पुराणस्य च शंसनम् ॥
एतद्ब्रह्मपुराणन्तु भागद्वयसमाचितम् ।
वर्णितं सर्व्वपापघ्नं सर्व्वसौख्यप्रदायकम् ॥"*॥
तत्फलश्रुतिः ।
"सूतशौनकसंवादं भुक्तिमुक्तिप्रदायकम् ।
लिखित्वैतत् पुराणं यो वैशाख्यां हेमसंयुतम् ॥
जलधेनुयुतञ्चापि भक्त्या दद्याद्द्विजातये ।
पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः ।
स वसेद्ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् ॥
यः पठेच्छृणुयाद्वापि ब्रह्मानुक्रमणीं द्विज ! ।
सोऽपि सर्व्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत् ॥
शृणोति यः पुराणन्तु ब्राह्मं सर्व्वं जितेन्द्रियः ।
हविष्याशी च नियमात् स लभेद्ब्रह्मणः परम् ॥
किमत्र बहुनोक्तेन यद्यदिच्छति मानवः ।
तत् सर्व्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे ९२ अध्यायः ॥१॥
द्वितीयं पद्मपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु पुत्त्र ! प्रवक्ष्यामि पुराणं पद्मसंज्ञकम् ।
महत्पुण्यप्रदं नॄणां शृण्वतां पठतां सदा ॥
यथा पञ्चेन्द्रियः सर्व्वः शरीरीति निगद्यते ।
तथेदं पञ्चभिः खण्डैरुदितं पापनाशनम् ॥"*।
तत्र प्रथमे सृष्टिखण्डे ।
"पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज ! ।
नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्म्मविस्तरः ॥
पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम् ।
ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम् ॥
दानानां कीर्त्तनं यत्र व्रतानाञ्च पृथक् पृथक् ।
विवाहः शैलजायाश्च तारकाख्यानकं महत् ॥
माहात्म्यञ्च गवादीनां कीर्त्तितं सर्व्वपुण्यदम् ।
कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक् ॥
ग्रहाणामर्च्चनं दानं यत्र प्रोक्तं द्विजोत्तम ! ।
तत्सृष्टिखण्डमुद्दिष्टं व्यासेन सुमहात्मना ॥"*।
द्वितीये भूमिखण्डे ।
"पितृमात्रादिपूज्यत्वे शिवशर्म्मकथा पुरा ।
सुव्रतस्य कथा पश्चात् वृत्रस्य च वधस्तथा ॥
पृथोर्वेणस्य चाख्यानं धर्म्माख्यानं ततः परम् ।
पितृशुश्रूषणाख्यानं नहुषस्य कथा ततः ॥
ययातिचरितञ्चैव गुरुतीर्थनिरूपणम् ॥
राज्ञा जैमिनिसंवादो बह्वाश्चर्य्यकथायुतः ॥
कथा ह्यशोकसुन्दर्य्या हुण्डदैत्यवधाश्रिता ।
कामोदाख्यानकं तत्र विहुण्डवधसंयुतः ॥
कुञ्जलस्य च संवादश्च्यवनेन महात्मना ।
सिद्धाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोदनम् ॥
सूतशौनकसंवादं भूमिखण्डमिदं स्मृतम् ॥"*।
तृतीये स्वर्गखण्डे ।
"ब्रह्माण्डोत्पत्तिरुदिता यत्रर्षिभिश्च सौतिना ।
सभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम् ॥
नर्म्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक् ।
कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः ॥
कालिन्दीपुण्यकथनं काशीमाहात्म्यवर्णनम् ॥
गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम् ।
वर्णाश्रमानुरोधेन कर्म्मयोगनिरूपणम् ॥
व्यासजैमिनिसंवादः पुण्यकर्म्मकथाचितः ।
समुद्रमथनाख्यानं व्रताख्यानं ततः परम् ॥
ऊर्ज्जपञ्चाहमाहात्म्यं स्तोत्रं सर्व्वापराधनुत् ।
एतत्स्वर्गाभिधं विप्र ! सर्व्वपातकनाशनम् ॥"
चतुर्थे पातालखण्डे ।
"रामाश्वमेधे प्रथमं रामराज्याभिषेचनम् ।
अगस्त्याद्यागमश्चैव पौलस्त्यान्वयकीर्त्तनम् ॥
अश्वमेधोपदेशश्च हयचर्य्या ततः परम् ।
नानाराजकथाः पुण्या जगन्नाथानुवर्णनम् ॥
वृन्दावनस्य माहात्म्यं सर्व्वपापप्रणाशनम् ।
नित्यलीलानुकथनं यत्र कृष्णावतारिणः ॥
माधवस्नानमाहात्म्ये स्नानदानार्च्चने फलम् ।
धरावराहसंवादो यमब्राह्मणयोः कथा ॥
संवादो राजदूतानां कृष्णस्तोत्रनिरूपणम् ।
शिवशम्भुसमायोगो दधीच्याख्यानकन्ततः ॥
भस्ममाहात्म्यमतुलं शिवमाहात्म्यमुत्तमम् ।
देवरातसुताख्यानं पुराणज्ञप्रशंसनम् ॥
गौतमाख्यानकञ्चैव शिवगीता ततः स्मृता ।
कल्पान्तरी रामकथा भरद्वाजाश्रमाश्रिता ॥
पातालखण्डमेतद्धि शृण्वतां ज्ञानिनां सदा ।
सर्व्वपापप्रशमनं सर्व्वाभीष्टफलप्रदम् ॥"
पञ्चमे उत्तरखण्डे ।
"पर्व्वताख्यानकं पूर्व्वं गौर्य्यै प्रोक्तं शिवेन वै ।
जालन्धरकथा पश्चाच्छ्रीशैलाद्यनुकीर्त्तनम् ॥
सगरस्य कथा पुण्या ततः परमुदीरितम् ।
गङ्गाप्रयागकाशीनां गयायाश्चाधिपुण्यकम् ॥
आम्रादिदानमाहात्म्यं तन्महाद्वादशीव्रतम् ।
चतुर्व्विंशैकादशीनां माहात्म्यं पृथगीरितम् ॥
विष्णुधर्म्मसमाख्यानं विष्णुनामसहस्रकम् ।
कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः ॥
जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम् ।
साभ्रमत्याश्च माहात्म्यं नृसिंहोत्पत्तिवर्णनम् ॥
देवशर्म्मादिकाख्यानं गीतामाहात्म्यवर्णने ।
भक्ताख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य च ॥
इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथाचितम् ।
मन्त्ररत्नाभिधानञ्च त्रिपाद्भूत्यनुवर्णनम् ॥
अवतारकथा पुण्या मत्स्यादीनामतः परम् ।
रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव ! ॥
परीक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च ।
इत्येतदुत्तरं खण्डं पञ्चमं सर्व्वपुण्यदम् ॥"*।
तत्फलश्रुतिः ।
"पञ्चखण्डयुतं पाद्मं यः शृणोति नरोत्तमः ।
स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान् ॥
एतद्वै पञ्चपञ्चाशत्सहस्रं पद्मसंज्ञकम् ।
पुराणं लेखयित्वा वै ज्यैष्ठ्यां स्वर्णाब्जसंयुतम् ॥
यः प्रदद्यात् सुसत्कृत्य पुराणज्ञाय मानद ! ।
स याति वैष्णवं धाम सर्व्वदेवनमस्कृतः ॥
पद्मानुक्रमणीमेतां यः पठेत् शृणुयात् तथा ।
सोऽपि पद्मपुराणस्य लभेत् श्रवणजं फलम् ॥"*
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे ९३ अध्यायः ॥ २ ॥
तृतीयं विष्णुपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं वैष्णवं महत् ।
त्रयोविंशतिसाहस्रं सर्व्वपातकनाशनम् ॥
यत्रादिभागे निर्द्दिष्टाः षडंशाः शक्तृजेन ह ।
मैत्रेयायादिमे तत्र पुराणस्यावतारिका ॥"
तत्र प्रथमभागस्य प्रथमांशे ।
"आदिकारणसर्गश्च देवादीनाञ्च सम्भवः ।
समुद्रमथनाख्यानं दक्षादीनां ततोऽन्वयाः ॥
ध्रुवस्य चरितं चैव पृथोश्चरितमेव च ।
प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम् ॥
पृथग्राज्याधिकाराख्या प्रथमोऽंश इतीरितः ॥"
प्रथमभागस्य द्वितीयांशे ।
"प्रियव्रतान्वयाख्यानं द्वीपवर्षनिरूपणम् ।
पातालनरकाख्यानं सप्तस्वर्गनिरूपणम् ।
सूर्य्यादिचारकथनं पृथग्लक्षणसंयुतम् ॥
चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् ।
निदाघऋतुसंवादो द्वितीयोंऽश उदाहृतः ॥"
प्रथमभागस्य तृतीयांशे ।
"मन्वन्तरसमाख्यानं वेदव्यासावतारकम् ।
नरकोद्धारकं कर्म्म गदितञ्च ततः परम् ॥
सगरस्यौर्व्वसंवादे सर्व्वधर्म्मनिरूपणम् ।
श्राद्धकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धने ।
सदाचारश्च कथितो मायामोहकथा ततः ।
तृतीयोंऽशोऽयमुदितः सर्व्वपापप्रणाशनः ॥"
प्रथमभागस्य चतुर्थांशे ।
"सूर्य्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम् ।
चतुर्थोंऽशे मुनिश्रेष्ठ ! नानाराजकथाचितम् ॥"
प्रथमभागस्य पञ्चमांशे ।
"कृष्णावतारसंप्रश्नो गोकुलीया कथा ततः ।
पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम् ॥
कैशोरे कंसहननं माथुरं चरितं तथा ।
ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा ॥
सर्व्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः ।
यत्र स्थित्वा जगन्नाथः कृष्णो योगीश्वरेश्वरः ॥
भूभारहरणं चक्रे परस्वहननादिभिः ।
अष्टावक्रीयमाख्यानं पञ्चमोंऽश इतीरितः ॥"

प्रथमभागस्य षष्ठांशे ।
"कलिजं चरितं प्रोक्तं चातुर्व्विध्यं लयस्य च ।
ब्रह्मज्ञानसमुद्देशः खाण्डिक्यस्य निरूपितः ।
केशिध्वजेन चेत्येष षष्ठोऽंशः परिकीर्त्तितः ॥"
तस्य द्वितीयभागे ।
"अतःपरन्तु सूतेन शौनकादिभिरादरात् ।
पृष्टेन चोदिताः शश्वद्विष्णुधर्म्मोत्तराह्वयाः ॥
नानाधर्म्मकथाः पुण्या व्रतानि नियमा यमाः ।
धर्म्मशास्त्रं चार्थशास्त्रं वेदान्तं ज्योतिषं तथा ॥
वंशाख्यानं प्रकरणात् स्तोत्राणि मनवस्तथा ॥
नानाविद्याश्रयाः प्रोक्ताः सर्व्वलोकोपकारकाः ।
एतद्विष्णुपुराणं वै सर्व्वशास्त्रार्थसंग्रहम् ॥" * ।
तत्फलश्रुतिः ।
"वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह ।
यो नरः पठते भक्त्या यः शृणोति च सादरम् ।
तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ ॥
तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना ।
सहितं विष्णुभक्ताय पुराणार्थविदे द्विज ! ।
स याति वैष्णवं धाम विमानेनार्कवर्च्चसा ॥
यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ! ।
कथयेच्छृणुयाद्वापि स पुराणफलं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ९४ अध्यायः ॥ ३ ॥
चतुर्थं वायुपुराणम् ।

ब्रह्मोवाच ।

"शृणु विप्र ! प्रवक्ष्यामि पुराणं वायवीयकम् ।
यस्मिन् श्रुते लभेद्धाम रुद्रस्य परमात्मनः ॥
चतुर्व्विंशतिसाहस्रं तत् पुराणं प्रकीर्त्तितम् ।
श्वेतकल्पप्रसङ्गेन धर्म्मानत्राह मारुतः ॥
तद्वायवीयमुदितं भागद्वयसमाचितम् ॥" * ।
तस्य पूर्व्वभागे ।
"सर्गादिलक्षणं यत्र प्रोक्तं विप्र ! सविस्तरम् ।
मन्वन्तरेषु वंशाश्च राज्ञां ये यत्र कीर्त्तिताः ।
गयासुरस्य हननं विस्तराद्यत्र कीर्त्तितम् ॥
मासानाञ्चैव माहात्म्यं माघस्योक्तं फलाधिकम् ।
दानधर्म्मा राजधर्म्मा विस्तरेणोदितास्तथा ॥
भूपातालककुब्व्योमचारिणां यत्र निर्णयः ।
व्रतादीनाञ्च पूर्व्वोऽयं विभागः समुदाहृतः ॥"
तदुत्तरभागे ।
"उत्तरे तस्य भागे तु नर्म्मदातीर्थवर्णनम् ।
शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर ! ॥
यो देवः सर्व्वदेवानां दुर्व्विज्ञेयः सनातनः ।
स तु सर्व्वात्मना यस्यास्तीरे तिष्ठति सन्ततम् ॥
इदं ब्रह्मा हरिरिदं साक्षादिदं परो हरः ।
इदं ब्रह्म निराकारं कैवल्यं नर्म्मदाजलम् ॥
ध्रुवं लोकहितार्थाय शिवेन स्वशरीरतः ।
शक्तिः कापि सरिद्रूपा रेवेयमवतारिता ॥
ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते ।
वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम् ॥
ओङ्कारेश्वरमारभ्य यावत् पश्चिमसागरम् ।
सङ्गमाः पञ्च च त्रिंशन्नदीनां पापनाशनाः ॥
दशैकमुत्तरे तीरे त्रयोविंशति दक्षिणे ।
पञ्चत्रिंशत्तमः प्रोक्तो रेवासागरसङ्गमः ॥
सङ्गमैः सहितान्येवं रेवातीरद्वयेऽपि च ।
चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि ।
षष्टितीर्थसहस्राणि षष्टिकोट्यो मुनीश्वर ! ।
सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे ॥
संहितेयं महापुण्या शिवस्य परमात्मनः ।
नर्म्मदाचरितं यत्र वायुना परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"लिखित्वेदं पुराणन्तु गुडधेनुसमन्वितम् ।
श्रावण्यां यो ददेद्भक्त्या ब्राह्मणाय कुटुम्बिने ॥
रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्द्दश ।
यः श्रावयेद्वा शृणुयाद्वायवीयमिदं नरः ।
नियमेन हविष्याशी स रुद्रो नात्र संशयः ॥
यश्चानुक्रमणीमेतां शृणोति श्रावयेत वा ।
सोऽपि सर्व्वपुराणस्य फलं श्रवणजं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ९५ अध्यायः ॥ ४ ॥
पञ्चमं श्रीभागवतपुराणम् ।

ब्रह्मोवाच ।

"मरीचे ! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् ।
श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥
तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम् ।
सुरपादपरूपोऽयं स्कन्धैर्द्वादशभिर्युतः ॥
भगवानेव विप्रेन्द्र ! विश्वरूपी समीरितः ॥"
तस्य प्रथमस्कन्धे ।
"तत्र तु प्रथमे स्कन्धे सूतर्षीणां समागमः ।
व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च ॥
पारीक्षितमुपाख्यानमितीदं समुदाहृतम् ॥"
द्वितीयस्कन्धे ।
"परीक्षिच्छुकसंवादे सृतिद्वयनिरूपणम् ।
ब्रह्मनारदसंवादेऽवतारचरितामृतम् ॥
पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः ।
द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ॥"
तृतीयस्कन्धे ।
"चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः ।
सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः ॥
कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥"
चतुर्थस्कन्धे ।
"सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः ।
पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः ।
इत्येष तुर्य्यो गदितो विसर्गे स्कन्ध उत्तमः ॥"
पञ्चमस्कन्धे ।
"प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम् ।
ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः ॥
नरकस्थितिरित्येष संस्थाने पञ्चमो मतः ॥"
षष्ठस्कन्धे ।
"अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् ॥
वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् ।
षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे ॥"
सप्तमस्कन्धे ।
"प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् ।
सप्तमो गदितो वत्स ! वासनाकर्म्मकीर्त्तने ॥"
अष्टमस्कन्धे ।
"गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् ।
समुद्रमथनञ्चैव बलिवैभवबन्धनम् ॥
मत्स्याद्यवतारचरितमष्टमोऽयं प्रकीर्त्तितः ॥" * ।
नवमस्कन्धे ।
"सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम् ।
वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते ! ॥"
दशमस्कन्धे ।
"कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः ।
कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः ।
भूभारहरणञ्चात्र निरोधे दशमः स्मृतः ॥"
एकादशस्कन्धे ।
"नारदेन तु संवादो वसुदेवस्य कीर्त्तितः ।
यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च ॥
यादवानां मिथोऽन्तश्च मुक्तावेकादशः स्मृतः ॥"
द्वादशस्कन्धे ।
"भविष्यकलिनिर्द्देशो मोक्षो राज्ञः परीक्षितः ॥
वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् ।
सौरी विभूतिरुदिता सात्वती च ततः परम् ।
पुराणसंख्याकथनमाश्रये द्वादशो ह्ययम् ।
इत्येवं कथितं वत्स ! श्रीमद्भागवतं तव ॥" * ।
तत्फलश्रुतिः ।
"वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च ।
साहाय्यकर्त्तुर्गदितं भक्तिभुक्तिविमुक्तिदम् ॥
प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम् ।
देयं भागवतञ्चेदं द्विजाय प्रीतिपूर्व्वकम् ॥
संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता ।
योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा ।
स पुराणश्रवणजं प्राप्नोति फलमुत्तमम् ॥" * ।
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ९६ अध्यायः ॥ ५ ॥
षष्ठं नारदीयपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम् ।
पञ्चविंशतिसाहस्रं बृहत्कल्पकथाश्रयम् ॥" * ।
तत्र पूर्व्वभागे प्रथमपादे ।
"सूतशौनकसंवादः सृष्टिसंक्षेपवर्णनम् ।
नानाधर्म्मकथाः पुण्याः प्रवृत्ते समुदाहृताः ॥
प्राग्भागे प्रथमे पादे सनकेन महात्मना ॥"
पूर्व्वभागे द्वितीयपादे ।
"द्वितीये मोक्षधर्म्माख्ये मोक्षोपायनिरूपणम् ।
वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात् ।
सनन्दनेन गदिता नारदाय महात्मने ॥" * ।
पूर्व्वभागे तृतीयपादे ।
"महातन्त्रे समुद्दिष्टं पशुपाशविमोचनम् ।
मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारश्च पूजनम् ।
प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च ।
गणेशसूर्य्यविष्णूनां शिवशक्त्योरनुक्रमात् ॥
सनत्कुमारमुनिना नारदाय तृतीयके ॥"
पूर्व्वभागे चतुर्थपादे ।
"पुराणलक्षणञ्चैव प्रमाणं दानमेव च ।
पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम्

चैत्रादिसर्व्वमासेषु तिथीनाञ्च पृथक् पृथक् ।
प्रोक्तं प्रतिपदादीनां व्रतं सर्व्वाघनाशनम् ।
सनातनेन मुनिना नारदाय चतुर्थके ॥
पूर्व्वभागोऽयमुदितो वृहदाख्यानसंज्ञितः ॥"
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु प्रश्न एकादशीव्रते ।
वशिष्ठेनाथ संवादो मान्धातुः परिकीर्त्तितः ।
रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म्म च ॥
वसुशापश्च मोहिन्यै पश्चादुद्धरणक्रिया ।
गङ्गाकथा पुण्यतमा गयायात्रानुकीर्त्तनम् ॥
काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम् ।
यात्राविधानं क्षेत्रस्य बह्वाख्यानसमन्वितम् ॥
प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य तत्परम् ।
हरिद्वारस्य चाख्यानं कामोदाख्यानकं तथा ॥
वदरीतीर्थमाहात्म्यं कामाख्यायास्तथैव च ।
प्रभासस्य च माहात्म्यं पुराणाख्यानकं ततः ॥
गौतमाख्यानकं पश्चाद्वेदपादस्तवस्ततः ।
गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा ॥
सेतुमाहात्म्यकथनं नर्म्मदातीर्थवर्णनम् ।
अवन्त्याश्चैव माहात्म्यं मथुरायास्ततः परम् ॥
वृन्दावनस्य महिमा वसोर्ब्रह्मान्तिके गतिः ।
मोहिनीचरितं पश्चादेवं वै नारदीयकम् ॥"६॥
तत्फलश्रुतिः ।
"यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः ।
स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा ॥
यस्त्वेतदिषपूर्णायां धेनूनां सप्तकान्वितम् ।
प्रदद्याद्द्विजवर्य्याय स लभेन्मोक्षमेव च ॥
पश्चादनुक्रमणीमेतां नारदीयस्य वर्णयेत् ।
शृणुयाद्वैकचित्तेन सोऽपि स्वर्गगतिं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने
चतुर्थपादे ९७ अध्यायः ॥ ६ ॥
सप्तमं मार्कण्डेयपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डेयाभिधं मुने ! ।
पुराणं सुमहत् पुण्यं पठतां शृण्वतां सदा ॥
यत्राधिकृत्य शकुनीन् सर्व्वधर्म्मनिरूपणम् ।
मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् ॥
पक्षिणां धर्म्मसंज्ञानां ततो जन्मनिरूपणम् ।
पूर्व्वजन्मकथा चैषां विक्रिया च दिवस्पतेः ॥
तीर्थयात्रा बलस्यातो द्रौपदेयकथानकम् ।
हरिश्चन्द्रकथा पुण्या युद्धमाडीवकाभिधम् ॥
पितापुत्रसमाख्यानं दत्तात्रेयकथा ततः ।
हैहयस्याथ चरितं महाख्यानसमन्वितम् ॥
मदालसाकथा प्रोक्ता ह्यलर्कचरिताश्रिता ।
सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् ॥
कल्पान्तकालनिर्द्देशो यक्षसृष्टिनिरूपणम् ।
रुद्रादिसृष्टिरप्युक्ता द्वीपचर्य्यानुकीर्त्तनम् ॥
मनूनाञ्च कथा नाना कीर्त्तिताः पापहारिकाः ।
तासु दुर्गाकथात्यन्तं पुण्यदा चाष्टमेऽन्तरे ॥
तत्पश्चात् प्रणवोत्पत्तिस्त्रयीतेजःसमुद्भवः ।
मार्त्तण्डस्य च जन्माख्या तन्माहात्म्यसमाश्रिता ॥
वैवस्वतान्वयश्चापि वत्सप्राश्चरितं ततः ॥"

वत्सप्रीस्थाने वत्सश्री च पाठः ।
"खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः ॥
अविक्षिच्चरितं चैव किमिच्छव्रतकीर्त्तनम् ।
नरिष्यन्तस्य चरितं इक्ष्वाकुचरितं ततः ॥
तुलस्याश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा ।
कुशवंशसमाख्यानं सोमवंशानुकीर्त्तनम् ॥
पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता ।
ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् ॥
श्रीकृष्णबालचरितं माथुरं चरितं ततः ।
द्वारकाचरितञ्चाथ कथा सर्व्वावतारजा ॥
ततः सांख्यसमुद्देशः प्रपञ्चासत्त्वकीर्त्तनम् ।
मार्कण्डेयस्य चरितं पुराणश्रवणे फलम् ॥"७॥
तत्फलश्रुतिः ।
"यः शृणोति नरो भक्त्या पुराणमिदमादरात् ।
मार्कण्डेयाभिधं वत्स ! स लभेत् परमां गतिम् ॥
यस्तु व्याकुरुते चैतच्छैवं स लभते पदम् ॥
तत् प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम् ।
कार्त्तिक्यां द्विजवर्य्याय स लभेद्ब्रह्मणः पदम् ॥
शृणोति श्रावयेद्वापि यश्चानुक्रमणीमिमाम् ।
मार्कण्डेयपुराणस्य स लभेद्वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने
चतुर्थपादे ९८ अध्यायः ॥ ७ ॥
अष्टमं अग्निपुराणम् ।
श्रीब्रह्मोवाच ।
"अथातः संप्रवक्ष्यामि तवाग्नेयपुराणकम् ।
ईशानकल्पवृत्तान्तं वशिष्ठायानलोऽब्रवीत् ॥
तत् पञ्चदशसाहस्रं नाम्ना चरितमद्भुतम् ।
पठतां शृण्वताञ्चैव सर्व्वपापहरं नृणाम् ॥
प्रश्नपूर्व्वं पुराणस्य कथा सर्व्वावतारजा ।
सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः ॥
अग्निकार्य्यं ततः पश्चान्मन्त्रमुद्रादिलक्षणम् ।
सर्व्वदीक्षाविधानञ्च अभिषेकनिरूपणम् ॥
लक्षणं मण्डलादीनां कुशापामार्ज्जनं ततः ।
पवित्रारोपणविधिर्द्देवालयविधिस्ततः ॥
शालग्रामादिपूजा च मूर्त्तिलक्ष्म पृथक् पृथक् ।
न्यासादीनां विधानञ्च प्रतिष्ठा पूर्त्तकं ततः ॥
विनायकादिदीक्षाणां विधिर्द्दैवस्ततः परम् ।
प्रतिष्ठा सर्व्वदेवानां ब्रह्माण्डस्य निरूपणम् ॥
गङ्गादितीर्थमाहात्म्यं जम्ब्वादिद्वीपवर्णनम् ।
ऊर्द्धाधोलोकरचना ज्योतिश्चक्रनिरूपणम् ॥
ज्योतिषञ्च ततः प्रोक्तं शास्त्रं युद्धजयार्णवम् ।
षट्कर्म्म च ततः प्रोक्तं मन्त्रयन्त्रौषधीगणः ॥
कुब्जिकादिसमर्चा च षोढान्यासविधिस्तथा ।
कोटिहोमविधानञ्च मन्वन्तरनिरूपणम् ॥
ब्रह्मचर्य्यादिधर्म्माश्च श्राद्धकल्पविधिस्ततः ।
ग्रहयज्ञस्ततः प्रोक्तो वैदिकस्मार्त्तकर्म्म च ॥
प्रायश्चित्तानुकथनं तिथीनाञ्च व्रतादिकम् ।
वारव्रतानुकथनं नक्षत्रव्रतकीर्त्तनम् ॥
मासिकव्रतनिर्द्देशो दीपदानविधिस्तथा ।
नवव्यूहार्च्चनं प्रोक्तं नरकाणां निरूपणम् ॥
व्रतानाञ्चापि दानानां निरूपणमिहोदितम् ।
नाडीचक्रसमुद्देशः सन्ध्याविधिरनुत्तमः ॥

गायत्र्यर्थस्य निर्द्देशो लिङ्गस्तोत्रं ततः परम् ।
राज्याभिषेकमन्त्रोक्तिर्धर्म्मकृत्यञ्च भूभुजाम् ॥
स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम् ।
मण्डलादिकनिर्द्देशो रत्नदीक्षाविधिस्ततः ॥
रामोक्तनीतिनिर्द्देशो रत्नानां लक्षणं ततः ।
धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम् ॥
देवासुरविमर्द्दाख्या ह्यायुर्व्वेदनिरूपणम् ।
गजादीनां चिकित्सा च तेषां शान्तिस्ततः परम् ॥
गोनरादिचिकित्सा च नानापूजास्ततः परम् ।
शान्तयश्चापि विविधाश्छन्दःशास्त्रमतः परम् ॥
साहित्यञ्च ततः पश्चादेकार्णादिसमाह्वयाः ।
शिष्टानुशिष्टिश्च कोषः स्वर्गादिवर्गके ॥
प्रलयानां लक्षणञ्च शारीरकनिरूपणम् ।
वर्णनं नरकाणाञ्च योगशास्त्रमतः परम् ॥
ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम् ।
एतदाग्नेयकं विप्र ! पुराणं परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् सुवर्णकमलान्वितम् ।
तिलधेनुयुतं वापि मार्गशीर्ष्यां विधानतः ।
पुराणार्थविदे सोऽथ स्वर्गलोके महीयते ॥
एषानुक्रमणी प्रोक्ता तवाग्नेयस्य भक्तिदा ।
शृण्वतां पठताञ्चैव भुक्त्यै चेह परत्र च ॥"८॥
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने
चतुर्थपादे ९९ अध्यायः ॥ ८ ॥
नवमं भविष्यपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि पुराणं सर्व्वसिद्धिदम् ।
भविष्यं भरतः सर्व्वलोकाभीष्टप्रदायकम् ॥
यत्राहं सर्व्वदेवानामादिकर्त्ता समुद्यतः ।
सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा ॥
स मां प्रणम्य पप्रच्छ धर्म्मं सर्व्वार्थसाधकम् ।
अहं तस्मै तदा प्रीतः प्रावोचं धर्म्मसंहिताम् ॥
पुराणानां यदा व्यासो व्यासञ्चक्रे महामतिः ।
तदा तां संहितां सर्व्वां पञ्चधा व्यभजन्मुनिः ॥
अघोरकल्पवृत्तान्तनानाश्चर्य्यकथान्विताम् ॥"
तत्र प्रथमपर्व्वणि ।
"तत्रादिमं स्मृतं पर्व्व ब्राह्मं यत्राप्युपक्रमः ।
सूतशौनकसंवादे पुराणप्रश्नसंक्रमः ।
आदित्यचरितः प्रायःसर्व्वाख्यानसमाचितः ॥
सृष्ट्यादिलक्षणोपेतः शास्त्रसर्व्वस्वरूपकः ।
पुस्तलेखकलेखानां लक्षणञ्च ततः परम् ॥
संस्काराणाञ्च सर्व्वेषां लक्षणञ्चात्र कीर्त्तितम् ।
पक्षत्यादितिथीनाञ्च कल्पाः सप्त च कीर्त्तिताः ॥
अष्टम्याद्याः शेषकल्पा वैष्णवे पर्व्वणि स्मृताः ।
शैवे च कामतो भिन्नाः सौरे चान्त्यकथाचयः ॥
प्रतिसर्गाह्वयं पश्चान्नानाख्यानसमाचितम् ।
पुराणस्योपसंहारसहितं पर्व्व पञ्चमम् ॥
एषु पञ्चसु पूर्व्वस्मिन् ब्रह्मणो महिमाधिकः ॥"
द्वितीयतृतीयचतुर्थपञ्चमपर्व्वसु ।
"धर्म्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च ।
द्वितीये च तृतीये च सौरो वर्गश्चतुर्थके ।
प्रतिसर्गाह्वयं त्वन्त्यं प्रोक्तं सर्व्वकथान्वितम् ।

समस्तिर्यं विनिर्दिष्टं पर्व्व व्यासेन धीमता ।
चतुर्द्दशसहस्रन्तु पुराणं परिकीर्त्तितम् ।
भविष्यं सर्व्वदेवानां साम्यं यत्र प्रकीर्त्तितम् ॥
गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः ।
गुडधेनुयुतं हेमवस्त्रमाल्यविभूषणैः ॥
वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः ।
गन्धाद्यैर्भक्ष्यभोज्यैश्च कृत्वा नीराजनादिकम् ।
यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः ॥
अथ वै यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि ।
स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् ॥
योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम् ।
पठेद्वा शृणुयाद्वैतौ भुक्तिं मुक्तिञ्च विन्दतः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०० अध्यायः ॥ ९ ॥
दशमं ब्रह्मवैवर्त्तपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि पुराणं दशमं तव ।
ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम् ॥
सावर्णिर्यत्र भगवान् साक्षाद्देवर्षयेऽर्थितः ।
नारदाय पुराणार्थं प्राह सर्व्वमलौकिकम् ॥
धर्म्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे ।
तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम् ॥
रथन्तरस्य कल्पस्य वृत्तान्तं यन्मयोदितम् ।
शतकोटिपुराणे तत् संक्षिप्य प्राह वेदवित् ॥
व्यासश्चतुर्द्धा संव्यस्य ब्रह्मवैवर्त्तसंज्ञितम् ।
अष्टादशसहस्रन्तु पुराणं परिकीर्त्तितम् ॥
ब्रह्मप्रकृतिविघ्नेशकृष्णखण्डसमाचितम् ।
तत्र सूतर्षिसंवादे पुराणोपक्रमो मतः ॥"
तत्र प्रथमे ब्रह्मखण्डे ।
"सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः ।
विवादः सुमहान् यत्र द्वयोरासीत् पराभवः ॥
शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवान्मुनेः ।
शिववाक्येन तत्पश्चात् मरीचे ! नारदस्य च ॥
गमनञ्चैव सावर्णेर्ज्ञानार्थं सिद्धसेविते ।
आश्रमे सुमहत्पुण्ये त्रैलोक्याश्चर्य्यकारिणि ।
एतद्धि ब्रह्मखण्डं हि श्रुतं पापविनाशनम् ॥"
द्वितीये प्रकृतिखण्डे ।
"ततः सावर्णिसंवादो नारदस्य समीरितः ।
कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः ॥
प्रकृतेरंशभूतानां कलानाञ्चापि वर्णितम् ।
माहात्म्यं पूजनाद्यञ्च विस्तरेण यथास्थितम् ॥
एतत्प्रकृतिखण्डं हि श्रुतं भूतिविधायकम् ॥"
तृतीये गणेशखण्डे ।
"गणेशजन्मसंप्रश्नः सपुण्यकमहाव्रतम् ।
पार्व्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः ॥
चरितं कार्त्तवीर्य्यस्य जामदग्न्यस्य चाद्भुतम् ।
विवादः सुमहान् पश्चाज्जामदग्न्यगणेशयोः ॥
एतद्विघ्नेशखण्डं हि सर्व्वविघ्नविनाशनम् ॥"

चतुर्थे श्रीकृष्णजन्मखण्डे ।
"श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतम् ।
गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः ॥
बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः ।
रासक्रीड़ा च गोपीभिः शारदी समुदाहृता ।
रहस्ये राधया क्रीड़ा वर्णिता बहुविस्तरा ॥
सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः ।
कंसादीनां वधे वृत्ते सात्वस्य द्विजसंस्कृतिः ॥
काश्यसान्दीपनेः पश्चाद्विद्योपादानमद्भुतम् ।
यवनस्य वधः पश्चाद्द्वारकागमनं हरेः ॥
नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः ।
कृष्णखण्डमिदं विप्र ! नृणां संसारखण्डनम् ॥"
तत्फलश्रुतिः ।
"पठितञ्च श्रुतं ध्यातं पूजितं चाभिवन्दितम् ।
इत्येतद्ब्रह्मवैवर्त्तं पुराणं चाह्यलौकिकम् ॥
व्यासोक्तं चादिसम्भूतं पठन् शृण्वन् विमुच्यते ।
विज्ञानज्ञानशमनात् घोरात् संसारसागरात् ॥
लिखित्वैतच्च यो दद्यान्माघ्यां धेनुसमाचितम् ।
ब्रह्मलोकमवाप्नोति स मुक्तोऽज्ञानबन्धनात् ॥
यश्चानुक्रमणीं चापि पठेद्वा शृणुयादपि ।
सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०१ अध्यायः ॥ १० ॥
एकादशं लिङ्गपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु पुत्र ! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम् ।
पठतां शृण्वताञ्चैव भुक्तिमुक्तिप्रदायकम् ॥
यच्च लिङ्गाभिधं तिष्ठन् वह्निलिङ्गे हरोऽभ्यधात् ।
मह्यं धर्म्मादिसिद्ध्यर्थमाग्नेयकल्पकथाश्रयम् ॥
तदेव व्यासदेवेन भागद्वयसमाचितम् ।
पुराणं लिङ्गमुदितं बह्वाख्यानविचित्रितम् ॥
तदेकादशसाहस्रं हरमाहात्म्यसूचकम् ।
परं सर्व्वपुराणानां सारभूतं जगत्त्रये ॥
पुराणोपक्रमे प्रश्नः ऋषिसंघैः कृतः पुरा ॥"
तत्र पूर्व्वभागे ।
"योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततः परम् ।
लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततः परम् ।
सनत्कुमारशैलादिसंवादश्चाथ पावनः ॥
ततो दधीचिचरितं युगधर्म्मनिरूपणम् ।
ततो भुवनकोषाख्या सूर्य्यसोमान्वयस्ततः ॥
ततश्च विस्तरात् सर्गस्त्रिपुराख्यानकं तथा ।
लिङ्गप्रतिष्ठा च ततः पशुपाशविमोक्षणम् ॥
शिवव्रतानि च तथा सदाचारनिरूपणम् ।
प्रायश्चित्तान्यरिष्टानि काशीश्रीशैलवर्णनम् ॥
अन्धकाख्यानकं पश्चाद्वाराहचरितं पुनः ।
नृसिंहचरितं पश्चाज्जलन्धरवधस्ततः ॥
शैवं सहस्रनामाथ दक्षयज्ञविनाशनम् ।
कामस्य दहनं पश्चात् गिरिजायाः करग्रहः ॥
ततो विनायकाख्यानं नृत्याख्यानं शिवस्य च ।
उपमन्युकथा चापि पूर्व्वभाग इतीरितः ॥"*
तदुत्तरभागे ।
"विष्णुमाहात्म्यकथनमम्बरीषकथा ततः ।
सनत्कुमारनन्दीशसंवादश्च पुनर्मुने ॥
शिवमाहात्म्यसंयुक्तः स्नानयागादिकं ततः ।
सूर्य्यपूजाविधिश्चैव शिवपूजा च मुक्तिदा ।
दानानि बहुधोक्तानि श्राद्धप्रकरणं ततः ।
प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम् ।
व्रजेश्वरी महाविद्या गायत्त्रीमहिमा ततः ।
त्र्यम्बकस्य च माहात्म्यं पुराणश्रवणस्य च ।
एतस्योपरिभागस्ते लैङ्गस्य कथितो मया ।
व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचिनः ॥"
तत्फलश्रुतिः ।
"लिखित्वैतत् पुराणन्तु तिलधेनुसमाचितम् ।
फाल्गुन्यां पूर्णिमायां यो दद्याद्भक्त्या द्विजातये ।
स लभेच्छिवसायुज्यं जरामरणवर्ज्जितः ॥
यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नरः ।
स भुक्तभोगो लोकेऽस्मिन्नन्ते शिवपुरं व्रजेत् ॥
लिङ्गानुक्रमणीमेतां पठेद्यः शृणुयात्तथा ।
तावुभौ शिवभक्तौ तु लोकद्वयभोगिनौ ।
जायेतां गिरिजाभर्त्तुः प्रसादान्नात्र संशयः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०२ अध्यायः ॥ ११ ॥
द्वादशं वराहपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि वाराहं वै पुराणकम् ।
भागद्वययुतं शश्वद्विष्णुमाहात्म्यसूचकम् ।
मानवस्य तु कल्पस्य प्रसङ्गं मत्कृतं पुरा ।
निबबन्ध पुराणेऽस्मिंश्चतुर्व्विंशसहस्रके ॥
व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि ।
तत्रादौ शुभसंवादः स्मृतो भूमिवराहयोः ॥"
तत्र पूर्व्वभागे ।
"अथादिकृतवृत्तान्ते रैभ्यस्य चरितं ततः ।
दुर्ज्जयाय च तत्पश्चाच्छ्राद्धकल्प उदीरितः ।
महातपस आख्यानं गौर्य्युत्पत्तिस्ततः परम् ।
विनायकस्य नागानां सेनान्यादित्ययोरपि ।
गणानाञ्च तथा देव्या धनदस्य वृषस्य च ।
आख्यानं सत्यतपसो व्रताख्यानसमन्वितम् ।
अगस्त्यगीता तत्पश्चाद्रुद्रगीता प्रकीर्त्तिता ।
महिषासुरविध्वंसे माहात्म्यञ्च त्रिशक्तिजम् ।
पर्व्वाध्यायस्ततः श्वेतोपाख्यानं गोप्रदानिकम् ।
इत्यादिकृतवृत्तान्ते प्रथमोद्देशनामकम् ।
भगवद्धर्म्मके पश्चाद्व्रततीर्थकथानकम् ।
द्वात्रिंशदपराधानां प्रायश्चित्तं शरीरकम् ।
तीर्थानाञ्चापि सर्व्वेषां माहात्म्यं पृथगीरितम् ।
मथुरायां विशेषेण श्राद्धादीनां विधिस्ततः ।
वर्णनं यमलोकस्य ऋषिपुत्रप्रसङ्गतः ।
विपाकः कर्म्मणाञ्चैव विष्णुव्रतनिरूपणम् ।
गोकर्णस्य च माहात्म्यं कीर्त्तितं पापनाशनम् ।
इत्येष पूर्व्वभागोऽस्य पुराणस्य निरूपितः ॥"
उत्तरभागे ।
"उत्तरे प्रविभागे तु पुलस्त्यकुरुराजयोः ।
संवादे सर्व्वतीर्थानां माहात्म्यं विस्तरात् पृथक् ।
अशेषधर्म्माश्चाख्याताः पौष्करं पुण्यपर्व्व च ।
इत्येवं तव वाराहं प्रोक्तं पापविनाशनम् ॥"

तत्फलश्रुतिः ।
"पठनात् श्रवणाच्चैव भगवद्भक्तिवर्द्धनम् ।
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ॥
लिखित्वैतच्च यो दद्याच्चैत्र्यां विप्राय भक्तितः ।
स लभेद्वैष्णवं धाम देवर्षिगणवन्दितः ॥
यो वानुक्रमणीमेतां शृणोत्यपि पठत्यपि ।
सोऽपि भक्तिं लभेद्विष्णोः संसारोच्छेदकारिणीम् ॥" * ॥
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०२ अध्यायः ॥ १२ ॥
त्रयोदशं स्कन्दपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स मरीचे ! त्वं पुराणं स्कान्दसंज्ञितम् ।
यस्मिन् प्रतिपदं साक्षान्महादेवो व्यवस्थितः ॥
पुराणे शतकोटौ तु यच्छैवं वर्णितं मया ।
तस्मिंस्तदर्थसारस्य सारो व्यासेन कीर्त्तितः ॥
स्कान्दाह्वयस्तत्र खण्डाः सप्तैव परिकल्पिताः ।
एकाशीतिसहस्रन्तु स्कान्दं सर्व्वाघकृन्तनम् ॥
यः शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः ।
यत्र माहेश्वरा धर्म्माः षण्मुखेन प्रकाशिताः ॥
कल्पे तत्पुरुषे वृत्ताः सर्व्वसिद्धिविधायकाः ॥"
तत्र प्रथमे माहेश्वरखण्डे ।
"तस्य माहेश्वरस्याद्यः खण्डः पापप्रणाशनः ॥
किञ्चिन्न्यूनार्कसाहस्रो बहुपुण्यो बृहत्कथः ।
सुचरित्रशतैर्युक्तः स्कन्दमाहात्म्यसूचकः ॥
यत्र केदारमाहात्म्ये पुराणोपक्रमः पुरा ।
दक्षयज्ञकथा पश्चाच्छिवलिङ्गार्च्चने फलम् ॥
समुद्रमथनाख्यानं देवेन्द्रचरितं ततः ।
पार्व्वत्याः समुपाख्यानं विवाहस्तदनन्तरम् ॥
कुमारोत्पत्तिकथनं ततस्तारकसङ्गरः ।
ततः पशुपताख्यानं चण्डाख्यानसमन्वितम् ॥
द्यूतप्रवर्त्तनाख्यानं नारदेन समागमः ।
ततः कुमारमाहात्म्ये पञ्चतीर्थकथानकम् ॥
धर्म्मवर्म्मनृपाख्यानं नदीसागरकीर्त्तनम् ।
इन्द्रद्युम्नकथा पश्चान्नाडीजङ्घकथान्विता ॥
प्रादुर्भावस्ततो मह्याः कथा दमनकस्य च ।
महीसागरसंयोगः कुमारेशकथा ततः ॥
ततस्तारकयुद्धञ्च नानाख्यानसमन्वितम् ।
वधश्च तारकस्याथ पञ्चलिङ्गनिवेशनम् ॥
द्वीपाख्यानं ततः पुण्यं ऊर्द्ध्वलोकव्यवस्थितिः ।
ब्रह्माण्डस्थितिमानञ्च वर्करेशकथानकम् ॥
महाकालसमुद्भूतिः कथा चास्य महाद्भुता ।
वासुदेवस्य माहात्म्यं कोटितीर्थं ततः परम् ॥
नानातीर्थसमाख्यानं गुप्तक्षेत्रे प्रकीर्त्तितम् ।
पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम् ॥
तीर्थयात्रासमाप्तिश्च कौमारमिदमद्भुतम् ।
अरुणाचलमाहात्म्ये सनकब्रह्मसंकथा ॥
गौरीतपःसमाख्यानं तत्तत्तीर्थनिरूपणम् ।
महिषासुरजाख्यानं वधश्चास्य महाद्भुतः ॥
शोणाचले शिवास्थानं नित्यदा परिकीर्त्तितम् ।
इत्येष कथितः स्कान्दे खण्डो माहेश्वरोऽद्भुतः ॥"

द्वितीये वैष्णवखण्डे ।
"द्वितीयो वैष्णवः खण्डस्तस्याख्यानानि मे शृणु ।
प्रथमं भूमिवाराहसमाख्यानं प्रकीर्त्तितम् ॥
यत्र वेङ्कटकूटस्य माहात्म्यं पापनाशनम् ।
कमलायाः कथा पुण्या श्रीनिवासस्थितिस्ततः ॥
कुलालाख्यानकञ्चात्र सुवर्णमुखरीकथा ।
नानाख्यानसमायुक्ता भारद्वाजकथाद्भुता ॥
मतङ्गाञ्जनसंवादः कीर्त्तितः पापनाशनः ।
पुरुषोत्तममाहात्म्यं कीर्त्तितं चोत्कले ततः ॥
मार्कण्डेयसमाख्यानमम्बरीषस्य भूपतेः ।
इन्द्रद्युम्नस्य चाख्यानं विद्यापतिकथा शुभा ॥
जैमिनेः समुपाख्यानं नारदस्यापि वाडव ! ।
नीलकण्ठसमाख्यानं नारसिंहोपवर्णनम् ॥
अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ।
रथयात्राविधिः पश्चाज्जन्मस्नानविधिस्तथा ॥
दक्षिणामूर्त्त्युपाख्यानं गुण्डिचाख्यानकं ततः ।
रथरक्षाविधानञ्च शयनोत्सवकीर्त्तनम् ॥
श्वेतोपाख्यानमत्रोक्तं वह्न्युत्सवनिरूपणम् ।
दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥
पूजा च कामिभिर्विष्णोरुद्दालकनियोगकः ।
मोक्षसाधनमत्रोक्तं नानायोगनिरूपणम् ॥
दशावतारकथनं स्नानादिपरिकीर्त्तनम् ।
ततो बदरिकायाश्च माहात्म्यं पापनाशनम् ॥
अग्न्यादितीर्थमाहात्म्यं वैनतेयशिलाभवम् ।
कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥
पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा ।
ततः कार्त्तिकमाहात्म्ये माहात्म्यं मदनालसम् ॥
धूम्रकेशसमाख्यानं दिनकृत्यानि कार्त्तिके ।
पञ्चभीष्मव्रताख्यानं कीर्त्तितं भुक्तिमुक्तिदम् ॥
तद्व्रतस्य च माहात्म्ये विधानं स्नानजं तथा ।
पुण्ड्रादिकीर्त्तनं चात्र मालाधारणपुण्यकम् ॥
पञ्चामृतस्नानपुण्यं घण्टानादादिजं फलम् ।
नानापुष्पार्च्चनफलं तुलसीदलजं फलम् ॥
नैवेद्यस्य च माहात्म्यं हरिवासरकीर्त्तनम् ।
अखण्डैकादशीपुण्यं तथा जागरणस्य च ॥
मत्स्योत्सवविधानञ्च नाममाहात्म्यकीर्त्तनम् ।
ध्यानादिपुण्यकथनं माहात्म्यं मथुराभवम् ॥
मथुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम् ।
वनानां द्वादशानाञ्च माहात्म्यं कीर्त्तितं ततः ॥
श्रीमद्भागवतस्यात्र माहात्म्यं कीर्त्तितं परम् ।
वज्रशाण्डिल्यसंवादं अन्तर्लीलाप्रकाशकम् ॥
ततो माघस्य माहात्म्यं स्नानदानजपोद्भवम् ।
नानाख्यानसमायुक्तं दशाध्याये निरूपितम् ॥
ततो वैशाखमाहात्म्ये शय्यादानादिजं फलम् ।
जलदानादिविधयः कामाख्यानमतः परम् ॥
श्रुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ।
तथाक्षयतृतीयादेर्विशेषात् पुण्यकीर्त्तनम् ॥
ततस्त्वयोध्यामाहात्म्ये चक्रब्रह्माह्वतीर्थके ।
ऋणपापविमोक्षाख्ये तथाधारसहस्रकम् ॥
स्वर्गद्वारं चन्द्रहरिधर्म्महर्य्युपवर्णनम् ।
स्वर्णवृष्ट्युपाख्यानं तिलोदा सरयूयुतिः ॥
सीताकुण्डं गुप्तहरिः सरयूघर्घरायुतिः ।

गोप्रचारञ्च दुग्धोदं गुप्तकुण्डादिपञ्चकम् ।
घोषार्कादीनि तीर्थानि त्रयोदश ततः परम् ।
गयाकूपस्य माहात्म्यं सर्व्वाघविनिवर्त्तकम् ॥
माण्डव्याश्रमपूर्व्वाणि तीर्थानि तदनन्तरम् ।
अजितादिमानसादितीर्थानि गदितानि च ॥
इत्येष वैष्णवः खण्डो द्वितीयः परिकीर्त्तितः ॥"
तृतीये ब्रह्मखण्डे ।
"अतःपरं ब्रह्मखण्डं मरीचे ! शृणु पुण्यदम् ।
यत्र वै सेतुमाहात्म्ये फलं स्नानेक्षणोद्भवम् ॥
गालवस्य तपश्चर्य्या राक्षसाख्यानकं ततः ।
चक्रतीर्थादिमाहात्म्यं देवीपत्तनसंयुतम् ॥
वेतालतीर्थमहिमा पापनाशादिकीर्त्तनम् ।
मङ्गलादिकमाहात्म्यं ब्रह्मकुण्डादिवर्णनम् ।
हनूमत्कुण्डमहिमागस्त्यतीर्थभवं फलम् ॥
रामतीर्थादिकथनं लक्ष्मीतीर्थनिरूपणम् ।
शङ्खादितीर्थमहिमा तथा साध्यामृतादिजः ॥
धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्डादिजं तथा ।
गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्त्तितम् ॥
रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम् ।
यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥
धर्म्मारण्यस्य माहात्म्यं ततः परमुदीरितम् ।
स्थाणुः स्कन्दाय भगवान् यत्र तत्त्वमुपादिशत् ॥
धर्म्मारण्यसुसंभूतिस्तत्पुण्यपरिकीर्त्तनम् ।
कर्म्मसिद्धेः समाख्यानं ऋषिवंशनिरूपणम् ।
अप्सरातीर्थमुख्यानां माहात्म्यं यत्र कीर्त्तितम् ।
वर्णानामाश्रमाणाञ्च धर्म्मतत्त्वनिरूपणम् ॥
देवस्थानविभागश्च बकुलार्ककथा शुभा ।
छत्रा नन्दा तथा शान्ता श्रीमाता च मतङ्गिनी ॥
पुण्यदाद्याः समाख्याता यत्र देव्यः समास्थिताः ।
इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥
लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम् ।
श्रीरामचरितञ्चैव सत्यमन्दिरवर्णनम् ॥
जीर्णोद्धारस्य कथनं शासनप्रतिपादनम् ।
जातिभेदप्रकथनं स्मृतिधर्म्मनिरूपणम् ॥
ततस्तु वैष्णवा धर्म्मा नानाख्यानैरुदीरिताः ।
चातुर्म्मास्ये ततः पुण्ये सर्व्वधर्म्मनिरूपणम् ॥
दानप्रशंसा तत्पश्चाद्व्रतस्य महिमा ततः ।
तपसश्चैव पूजायाः सच्छिद्रकथनं ततः ॥
प्रकृतीनां भिदाख्यानं शालग्रामनिरूपणम् ।
तारकस्य वधोपायो गव्याग्नेर्महिमा तथा ॥
विष्णोः शापश्च वृक्षत्वं पार्व्वत्यनुनयस्ततः ।
हरस्य ताण्डवं नृत्यं रामनामनिरूपणम् ॥
हरस्य लिङ्गपतनं कथायै पैजवस्य च ।
पार्व्वतीजन्मचरितं तारकस्य वधोऽद्भुतः ॥
प्रणवैश्वर्य्यकथनं तारकाचरितं पुनः ।
दक्षयज्ञसमाप्तिश्च द्वादशाक्षररूपणम् ॥
ज्ञानयोगसमाख्यानं महिमा द्वादशार्कजः ।
श्रवणादिकपुण्यञ्च कीर्त्तितं शर्म्मदं नृणाम् ॥"
तृतीये ब्रह्मखण्डस्योत्तरभागे ।
"ततो ब्रह्मोत्तरे भागे शिवस्य महिमाद्भुतः ।

पञ्चाग्नेश्च महिमा गोकर्णमहिमा ततः ।
शिवरात्रेश्च महिमा प्रदोषव्रतकीर्त्तनम् ।
सोमनाथव्रतञ्चापि सोमसिन्धोः कथानकम् ।
भद्रायूत्पत्तिकथनं सदाचारनिरूपणम् ।
शिवधर्म्मसमुद्देशो भद्रायूद्वाहवर्णनम् ।
भद्रायुमहिमा चापि भस्ममाहात्म्यकीर्त्तनम् ।
शवराख्यानकञ्चैव उमामाहेश्वरव्रतम् ।
रुद्राक्षस्य च माहात्म्यं रुद्राध्यायस्य पुण्यकम् ।
श्रवणादिकपाठाच्च ब्रह्मखण्डोऽयमीरितः ॥” *॥
चतुर्थे काशीखण्डे ।
“अतः परं चतुर्थस्य काशीखण्डस्य सत्तमम् ।
विन्ध्यनारदयोर्यत्र संवादः परिकीर्त्तितः ।
सत्यलोकप्रभावश्चागस्त्यावासे सुरागमः ।
पतिव्रताचरित्रञ्च तीर्थचर्य्याप्रशंसनम् ।
ततश्च सप्तपुर्य्याख्या संयमिन्या निरूपणम् ।
ब्रध्नस्य च तथेन्द्राग्न्योर्लोकाप्तिः शिवशर्म्मणः ।
अग्नेः समुद्भवश्चैव क्रव्यादवरुणोद्भवः ।
गन्धवत्यलकापुर्य्योरीश्वर्य्याश्च समुद्भवः ।
चन्द्रोडुबुधलोकानां कुजेज्यार्कभुवां क्रमात् ।
सप्तर्षीणां ध्रुवस्यापि तपोलोकस्य वर्णनम् ।
ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ।
स्कन्दागस्त्यसमालापो मणिकर्णीसमुद्भवः ।
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् ।
वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ।
दण्डपाणिज्ञानवाप्योरुद्भवः समनन्तरम् ।
ततः कलावत्याख्यानं सदाचारनिरूपणम् ।
ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च ।
कृत्याकृत्यविनिर्द्देशो ह्यविमुक्तेशवर्णनम् ।
गृहस्थयोगिनां धर्म्माः कालज्ञानं ततः परम् ।
दिवोदासकथा पुण्या काशीवर्णनमेव च ।
योगिचर्य्या च लोलार्कोत्तरसाम्बार्कजा कथा ।
द्रुपदार्कस्य तार्क्ष्याख्यार्कस्योदयस्ततः ।
दशाश्वमेधतीर्थाख्या मन्दराच्च गणागमः ।
पिशाचमोचनाख्यानं गणेशप्रेषणन्ततः ।
मायागणपतेश्चात्र भुवि प्रादुर्भवस्ततः ।
विष्णुमायाप्रपञ्चोऽत्र दिवोदासविमोक्षणम् ।
ततः पञ्चनदोत्पत्तिर्बिन्दुमाधवसम्भवः ।
ततो वैष्णवतीर्थाख्या शूलिनः काशिकागमः ।
जैगीषव्येण संवादो ज्येष्ठेशाख्या महेशितुः ।
क्षेत्राख्यानं कन्दुकेशव्याघ्रेश्वरसमुद्भवः ।
शैलेशरत्नेश्वरयोः कृत्तिवासस्य चोद्भवः ।
देवतानामधिष्ठानं दुर्गासुरपराक्रमः ।
दुर्गाया विजयश्चाथ ओङ्कारेशस्य वर्णनम् ।
पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः ।
केदाराख्या च धर्म्मेशकथा विश्वभुजोद्भवा ।
वीरेश्वरसमाख्यानं गङ्गामाहात्म्यकीर्त्तनम् ।
विश्वकर्म्मेशमहिमा दक्षयज्ञोद्भवस्तथा ।
सतीशस्यामृतेशादेर्भुजस्तम्भः पराशरेः ।
क्षेत्रतीर्थकदम्बश्च मुक्तिमण्डपसंकथा ।
विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः ॥” *॥
पञ्चमे अवन्तीखण्डे ।
“अतः परं त्ववन्त्याख्यं शृणु खण्डञ्च पञ्चमम् ।
महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ।
प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः ।
देवदीक्षा शिवस्तोत्रं नानापातकनाशनम् ।
कपालमोचनाख्यानं महाकालवनस्थितिः ।
तीर्थं कलकलेशस्य सर्व्वपापप्रणाशनम् ।
कुण्डमप्सरसं प्रोक्तं सरो रुद्रस्य पुण्यदम् ।
कुटुम्बेशश्च विद्याक्षं मर्कटेश्वरतीर्थकम् ।
स्वर्गद्वारं चतुःसिन्धुतीर्थं शङ्करवापिका ।
शङ्करार्कं गन्धवतीतीर्थं पापप्रणाशनम् ।
दशाश्वमेधैकानंशतीर्थं च हरिसिद्धिदम् ।
पिशाचकादियात्रा च हनूमत्क्रथकेश्वरौ ।
महाकालेशयात्रा च वल्मीकेश्वरतीर्थकम् ।
शुक्रेशमेशोपाख्यानं कुशस्थल्याः प्रदक्षिणम् ।
अक्रूरमन्दाकिन्यङ्कपादचन्द्रार्कवैभवम् ।
करभेशकुक्कुटेशलड्डुकेशादितीर्थकम् ।
मार्कण्डेशं यज्ञवापी सोमेशं नरकान्तकम् ।
केदारेश्वररामेशसौभाग्येशनरार्ककम् ।
केशार्कं शक्तिभेदश्च स्वर्णक्षुरसकानि च ।
ओङ्कारेशादितीर्थानि अन्धकस्तुतिकीर्त्तनम् ।
कालारण्ये लिङ्गसंख्या स्वर्णशृङ्गाभिधानकम् ।
कुशस्थल्या अवन्त्याश्चोज्जयिन्या अभिधानकम् ।
पद्मावती कुमुद्वत्यमरावतीति नामकम् ।
विशालाप्रतिकल्पाभिधाने च ज्वरशान्तिकम् ।
शिप्रास्नानादिकफलं नागोक्तिः शिवस्तुतिः ।
हिरण्याक्षवधाख्यानं तीर्थं सुन्दरकुण्डकम् ।
नीलगङ्गा पुष्कराख्यं विन्ध्यावासनतीर्थकम् ।
पुरुषोत्तममाधिमासं तीर्थञ्चाघनाशनम् ।
गोमतीवामने कुण्डे विष्णोर्नामसहस्रकम् ।
वीरेश्वरसरः कालभैरवस्य च तीर्थके ।
महिमा नागपञ्चम्यां नृसिंहस्य जयन्तिका ।
कुटुम्बेश्वरयात्रा च देवसाधककीर्त्तनम् ।
कर्कराजाख्यतीर्थञ्च विघ्नेशादिसुरोहनम् ।
रुद्रकुण्डप्रभृतिषु बहुतीर्थनिरूपणम् ।
यात्राष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ।
धर्म्मपुत्रस्य वैराग्ये मार्कण्डेयेन सङ्गमः ।
प्राग्लयानुभवाख्यानं अमृतापरिकीर्त्तनम् ।
कल्पे कल्पे पृथक् नाम नर्म्मदायाः प्रकीर्त्तितम् ।
स्तवमार्षं नार्म्मदञ्च कालरात्रिकथा ततः ।
महादेवस्तुतिः पश्चात् पृथक्कल्पकथाद्भुता ।
विशल्याख्यानकं पश्चाज्जालेश्वरकथा तथा ।
गौरीव्रतसमाख्यानं त्रिपुरज्वालनन्ततः ।
देहपातविधानञ्च कावेरीसङ्गमस्ततः ।
दारुतीर्थं ब्रह्मवर्त्तं यमेश्वरकथानकम् ।
अग्नितीर्थं रवितीर्थं मेघनादं दिदारकम् ।
देवतीर्थं नर्म्मदेशं कपिलाख्यं करञ्जकम् ।
कुण्डलेशं पिप्पलादं विमलेशञ्च शूलभित् ।
शचीहरणमाख्यानमन्धकस्य वधस्ततः ।
शूलभेदोद्भवो यत्र दानधर्म्माः पृथग्विधाः ।
आख्यानं दीर्घतपस ऋष्यशृङ्गकथा ततः ।
चित्रसेनकथा पुण्या काशिराजस्य मोक्षणम् ।
ततो देवशिलाख्यानं शबरीचरितान्वितम् ।
व्याधाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम् ।
आदित्येश्वरतीर्थञ्च शक्रतीर्थं करोटिकम् ।
कुमारेशमगस्त्येशं च्यवनेशञ्च मातृजम् ।
लोकेशं धनदेशञ्च मङ्गलेशञ्च कामजम् ।
नागेशञ्चापि गोपारं गौतमं शङ्खचूडकम् ।
नारदेशं नन्दिकेशं वरुणेश्वरतीर्थकम् ।
दधिस्कन्दादितीर्थानि हनूमन्तेश्वरन्ततः ।
रामेश्वरादितीर्थानि सोमेशं पिङ्गलेश्वरम् ।
ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम् ।
चण्डार्कं यमतीर्थञ्च कल्होडीशञ्च नान्दिकम् ।
नारायणञ्च कोटीशं व्यासतीर्थं प्रभासिकम् ।
नागेशं सङ्कर्षणकं मन्मथेश्वरतीर्थकम् ।
एरण्डीसङ्गमं पुण्यं सुवर्णशिलतीर्थकम् ।
करञ्जं कामदं तीर्थं भाण्डीरं रोहिणीभवम् ।
चक्रतीर्थं धौतपापं स्कान्दमाङ्गिरसाह्वयम् ।
कोटितीर्थमयोन्याख्यमङ्गारासं त्रिलोचनम् ।
इन्द्रेशं कम्बुकेशञ्च सोमेशं कोहनेशकम् ।
नार्म्मदं चार्कमाग्नेयं भार्गवेश्वरमुत्तमम् ।
ब्राह्मं दैवञ्च मार्गेशमादिवाराहमेव च ।
रामेशमथ सिद्धेशमाहल्यं कङ्कटेश्वरम् ।
शाक्रं सौम्यञ्च नान्दीशं तापेशं रुक्मिणीभवम् ।
योजनेशं वराहेशं द्वादशीशिवतीर्थके ।
सिद्धेशं मङ्गलेशञ्च लिङ्गवाराहतीर्थकम् ।
कुण्डेशं श्वेतवाराहं भार्गवेशं रवीश्वरम् ।
शुक्लादीनि च तीर्थानि हुङ्कारस्वामितीर्थकम् ।
सङ्गमेशं नारकेशं मोक्षं सार्पञ्च गोपकम् ।
नागं साम्बञ्च सिद्धेशं मार्कण्डाक्रूरतीर्थके ।
कामोदशूलारोपाख्यौ माण्डव्यं गोपकेश्वरम् ।
कपिलेशं पिङ्गलेशं भूतेशं गाङ्गगौतमे ।
आश्वमेधं भृगुकच्छं केदारेशञ्च पापहृत् ।
कनखलेशं जालेशं शालग्रामं वराहकम् ।
चन्द्रप्रभासमादित्यं श्रीपत्याख्यञ्च हंसकम् ।
मूलस्थानञ्च शूलेशमाग्नेयं चित्रदैवकम् ।
शिखीशं कोटितीर्थञ्च दशकन्यं सुवर्णकम् ।
ऋणमोक्षं भारभूतिरथाख्यं पुंसवाशिकम् ।
व्यामवेशं कपालेशं भृङ्गिरवोभवन्ततः ।
कोटितीर्थं लोटनेशं फलस्तुतिरतः परम् ।
कृमिजङ्गलमाहात्म्ये रोहिताश्वकथा ततः ।
धुन्धुमारसमाख्यानं वधोपायकृतोऽस्य च ।
वधो धुन्धोस्ततः पश्चात् चित्रवहसमुद्भवः ।
महिमास्य ततश्चण्डीशप्रभावो रतीश्वरः ।
केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम् ।
मुखारं च्यवनान्धाख्यं ब्रह्मणश्च सरस्ततः ।
चक्रारं ललिताख्यानं तीर्थञ्च बहुगोमयम् ।
रुद्रावर्त्तञ्च मार्कण्डं तीर्थं पापप्रणाशनम् ।
रावणेशं शुद्धपटं देवान्धुपतितीर्थकम् ।
जिह्वोदतीर्थसम्भूतिः शिवोद्भेदं फलस्तुतिः ।
एष खण्डो ह्यवन्त्याख्यः शृण्वतां पापनाशनः ।
षष्ठे नागरखण्डे ।
“अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते ।
लिङ्गोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा ।
विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा ।
हाटकेश्वरमाहात्म्ये वृत्रासुरवधस्तथा ।

नागबिलं शङ्खतीर्थमचलेश्वरवर्णनम् ।
चमत्कारपुराख्यानं चमत्कारकरं परम् ।
गयशीर्षं बालशाख्यं बालमण्डं मृगाह्वयम् ॥
विष्णुपादञ्च गोकर्णं युगरूपं समाश्रयः ।
सिद्धेश्वरं नागसरः सप्तार्षेयं ह्यगस्त्यकम् ॥
भूणगर्त्तं नलेशञ्च भीष्मं दुर्व्वासंकेकम् ।
शर्मिष्ठं सोमनाथञ्च दौर्गमानर्त्तकेश्वरम् ॥
जमदग्निवधाख्यानं नैःक्षत्रियकथानकम् ।
रामह्रदं नागपुरं षड्लिङ्गञ्च यज्ञभूः ॥
मुण्डीरादित्रिकार्कञ्च सतीपरिणयस्तथा ।
बालखिल्याश्च यागेशं बालखिल्याश्च गारुडम् ॥
लक्ष्मीशापः साप्तविंशः सोमप्रासादमेव च ।
अम्बावृद्धं पादुकाख्यमाग्नेयं ब्रह्मकुण्डकम् ॥
गोमुखं लोहयष्ट्याख्यमजापालेश्वरी तथा ।
शानैश्चरं राजवापी रामेशो लक्ष्मणेश्वरः ॥
कुशेशाख्यं लवेशाख्यं लिङ्गं सर्व्वोत्तमोत्तमम् ।
अष्टषष्टिसमाख्यानं दमयन्त्यास्त्रिजातकम् ॥
ततोऽम्बा रेवती चात्र भर्तृकातीर्थसम्भवम् ।
क्षेमङ्करी च केदारं शुक्लतीर्थं मुखारकम् ॥
सत्यसन्धेश्वराख्यानं तथा कर्णोत्पलाकथा ।
अटेश्वरं याज्ञवल्क्यं गौर्य्यं गाणेशमेव च ॥
ततो वास्तुपदाख्यानमजागृहकथानकम् ॥
सौभाग्यान्धुकशूलेशं धर्म्मराजकथानकम् ।
मिष्टान्नदेश्वराख्यानं गाणपत्यत्रयं ततः ॥
जाबालिचरितञ्चैव मकरेशकथा ततः ।
कालेश्वर्य्यन्धकाख्यानं कुण्डमाम्बरसंस्तथा ॥
पुष्यादित्यं रौहिताश्वं नागरोत्पत्तिकीर्त्तनम् ।
भार्गवं चरितं चैव वैश्वामित्रं ततः परम् ॥
सारस्वतं पैप्पलादं कंसारीशञ्च पैण्डिकम् ।
ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम् ॥
रैवतं भर्तृयज्ञाख्यं मुख्यतीर्थनिरीक्षणम् ।
कौरवं हाटकेशाख्यं प्रभासं क्षेत्रकत्रयम् ॥
पौष्करं नैमिषं धार्म्ममरण्यत्रितयं स्मृतम् ।
वाराणसी द्वारकाख्यावन्त्याख्येति पुरीत्रयम् ॥
वृन्दावनं खाण्डवाख्यमद्वैकाख्यं वनत्रयम् ।
कल्पः शालस्तथा नन्दो ग्रामत्रयमनुत्तमम् ॥
असिशुक्लपितृसंज्ञं तीर्थत्रयमुदाहृतम् ।
आर्ब्बुदो रैवतश्चैव पर्व्वतत्रयमुत्तमम् ॥
नदीनां त्रितयं गङ्गा नर्म्मदा च सरस्वती ।
सार्द्धकोटित्रयफलमेकैकञ्चैषु कीर्त्तितम् ॥
कूपिका शङ्खतीर्थञ्चामरकं बालमण्डनम् ।
हाटकेशक्षेत्रफलप्रदं प्रोक्तं चतुष्टयम् ॥
शाम्बादित्यं श्राद्धकल्पं यौधिष्ठिरमथान्धकम् ।
जलशायि चतुर्म्मास्यमशून्यशयनव्रतम् ॥
मङ्कणेशं शिवरात्रिस्तुलापुरुषदानकम् ।
पृथ्वीदानं वाणकेशं कपालमोचनेश्वरम् ॥
पापपिण्डं सप्तलिङ्गं युगमानादिकीर्त्तनम् ।
निम्बेशशाकम्भर्य्याख्या रुद्रैकादशकीर्त्तनम् ॥
दानमाहात्म्यकथनं द्वादशादित्यकीर्त्तनम् ।
इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते ॥”
सप्तमे प्रभासखण्डे ।
“सोमेशो यत्र विश्वेशोऽर्कस्थलं पुण्यदं महत् ।
सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्त्तितम् ॥
अग्नितीर्थं कपर्द्दीशं केदारेशं गतिप्रदम् ।
भीमभैरवचण्डीशभास्कराङ्गारकेश्वराः ॥
बुधेज्यभृगुसौरेन्दुशिखीशा हरविग्रहाः ।
सिद्धेश्वराद्याः पञ्चान्ये रुद्रास्तत्र व्यवस्थिताः ॥
वरारोहा ह्यजापाला मङ्गला ललितेश्वरी ।
लक्ष्मीशो वाड़वेशश्चार्घ्येशः कामेश्वरस्तथा ॥
गौरीशवरुणेशाख्यमुषीशञ्च गणेश्वरम् ।
कुमारेशञ्च शाकल्यं शकुलोतङ्कगौतमम् ॥
दैत्यघ्नेशं चक्रतीर्थं सन्निहत्याह्वयं तथा ।
भूतेशाद्यानि लिङ्गानि आदिनारायणाह्वयम् ॥
ततश्चक्रधराख्यानं शाम्बादित्यकथानकम् ।
कथा कण्टकशोधिन्या महिषघ्न्यास्ततः परम् ॥
कपालीश्वरकोटीशबालब्रह्मकसत्कथा ।
नरकेशसम्वर्त्तेशनिधीश्वरकथा ततः ॥
बलभद्रेश्वरस्याथ गङ्गाया गणपस्य च ।
जाम्बवत्याख्यसरितः पाण्डुकूपस्य सत्कथा ॥
शतमेधलक्षमेधकोटिमेधकथा तथा ।
दुर्व्वासार्कयदुस्थानहिरण्यासङ्गमोत्कथा ॥
नगरार्कस्य शाम्बस्य सङ्कर्षणसमुद्रयोः ।
कुमार्य्याः क्षेत्रपालस्य ब्रह्मेशस्य कथा पृथक् ॥
पिङ्गलासङ्गमेशस्य शङ्करार्कघटेशयोः ।
ऋषितीर्थस्य नन्दार्कत्रितकूपस्य कीर्त्तनम् ॥
शशपानस्य पर्णार्कन्यङ्कुमत्योः कथाद्भुता ।
वाराहस्वामिवृत्तान्तं छायालिङ्गाख्यगुल्फयोः ॥
कथा कनकनन्दायाः कुन्तीगङ्गेशयोस्तथा ।
चमसोद्भेदविदुरत्रिलोकेशकथा ततः ॥
मङ्कणेशत्रैपुरेशषण्डतीर्थकथा तथा ।
सूर्य्यप्राचीत्रिनयनयोरुमानाथकथा तथा ॥
भूद्वारशूलस्थलयोच्यवनार्केशयोस्तथा ।
अजापालेशबालार्ककुबेरस्थलजा कथा ॥
ऋषितोयाकथा पुण्या सङ्गालेश्वरकीर्त्तनम् ।
नारदादित्यकथनं नारायणनिरूपणम् ॥
तप्तकुण्डस्य माहात्म्यं मूलचण्डीशवर्णनम् ।
चतुर्व्वक्त्रगणाध्यक्षकलम्बेश्वरयोः कथा ॥
गोपालस्वामिबकुलस्वामिनोर्म्मरुतीकथा ।
क्षेमार्कोन्नतविघ्नेशजलस्वामिकथा ततः ॥
कालमेघस्य रुक्मिण्या दुर्व्वासेश्वरभद्रयोः ।
शङ्खावर्त्तमोक्षतीर्थगोष्पदाच्युतसद्मनाम् ॥
जालेश्वरस्य हुङ्कारकूपचण्डीशयोः कथा ।
आशापुरस्थविघ्नेशकलाकुण्डकथाद्भुता ॥
कपिलेशस्य च कथा जरद्गवशिवस्य च ।
नलकर्कोटेश्वरयोर्हाटकेश्वरजा कथा ॥
नारदेशमन्त्रभूषा दुर्गकूटगणेशजा ।
सुपर्णैलाख्यभैरव्योर्भल्लतीर्थभवा कथा ॥
कीर्त्तनं कर्द्दमालस्य गुप्तसोमेश्वरस्य च ।
बहुस्वर्णेशशृङ्गेशकोटीश्वरकथा ततः ॥
मार्कण्डेश्वरकोटीशदामोदरगृहोत्कथा ।
स्वर्णरेखा ब्रह्मकुण्डं कुन्तीभीमेश्वरौ तथा ॥
मृगीकुण्डञ्च सर्व्वस्वं क्षेत्रे वस्त्रापथे स्मृतम् ।
दुर्गाबिल्वेशगङ्गेशरैवतानां कथाद्भुता ॥
ततोऽर्ब्बुदे चक्रकथा अचलेश्वरकीर्त्तनम् ।
नागतीर्थस्य च कथा वशिष्ठाश्रमवर्णनम् ॥
भद्रकर्णस्य माहात्म्यं त्रिनेत्रस्य ततः परम् ।
केदारस्य च माहात्म्यं तीर्थागमनकीर्त्तनम् ॥
कोटीश्वररूपतीर्थहृषीकेशकथा ततः ।
सिद्धेशशुक्रेश्वरयोर्म्मणिकर्णीशकीर्त्तनम् ॥
पङ्गुतीर्थयमतीर्थवाराहतीर्थवर्णनम् ।
चन्द्रप्रभासपिण्डोदश्रीमाताशुक्लतीर्थकम् ॥
कात्यायन्याश्च माहात्म्यं ततः पिण्डारकस्य च ।
ततः कनखलस्याथ चक्रमानुषतीर्थयोः ॥
कपिलाग्नितीर्थकथा तथा रक्तानुबन्धजा ।
गणेशपार्थेश्वरयोर्यात्रायामुद्गलस्य च ॥
चण्डीस्थानं नागभवं शिवः कुण्डमहेशजा ।
कामेश्वरस्य मार्कण्डेयोत्पत्तेश्च कथा ततः ॥
उद्दालकेशसिद्धेशगततीर्थकथा पृथक् ।
श्रीदेवमातोत्पत्तिश्च व्यासगौतमतीर्थयोः ॥
कुलसन्तारमाहात्म्यं रामकोट्याह्वतीर्थयोः ।
चन्द्रोद्भेदेशानशृङ्गब्रह्मस्थानोद्भवोद्धनम् ॥
त्रिपुष्कररुद्रह्रदगुहेश्वरकथा शुभा ।
अविमुक्तस्य माहात्म्यमुमामाहेश्वरस्य च ॥
महौजसः प्रभावश्च जम्बुतीर्थस्य वर्णनम् ।
गङ्गाधरमिश्रकयोः कथा चाथ फलस्तुतिः ॥
द्वारकायाश्च माहात्म्ये चन्द्रशर्म्मकथानकम् ।
जागराद्याख्यानञ्च व्रतमेकादशीभवम् ॥
महाद्वादशिकाख्यानं प्रह्लादर्षिसमागमः ।
दुर्व्वाससः उपाख्यानं यात्रोपक्रमकीर्त्तनम् ॥
गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम् ।
चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः ॥
सनकादिह्रदाख्यानं नृगतीर्थकथा ततः ।
गोप्रचारकथा पुण्या गोपीनां द्वारकागमः ॥
गोपीसरःसमाख्यानं ब्रह्मतीर्थादिकीर्त्तनम् ।
पञ्चनद्यागमाख्यानं नानाख्यानसमाचितम् ॥
शिवलिङ्गमहातीर्थकृष्णपूजादिकीर्त्तनम् ।
त्रिविक्रमस्य मूर्त्त्याख्या दुर्व्वासःकृष्णसंकथा ॥
कुशदैत्यवधोऽन्वाख्या विशेषार्च्चनजं फलम् ।
गोमत्यां द्वारकायाञ्च तीर्थागमनकीर्त्तनम् ॥
कृष्णमन्दिरसंप्रेक्षा द्वारवत्यभिषेचनम् ।
तत्र तीर्थावासकथा द्वारकापुण्यकीर्त्तनम् ॥
इत्येष सप्तमः प्रोक्तः खण्डः प्राभासिको द्विज ! ।
स्कान्दे सर्व्वोत्तरकथा शिवमाहात्म्यवर्णने ॥”
तत्फलश्रुतिः ।
“लिखित्वैतत्तु यो दद्याद्धेमशूलसमन्वितम् ।
माघ्यां सत्कृत्य विप्राय स शैवे मोदते पदे ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे १०४ अध्यायः ॥ १३ ॥
चतुर्द्दशं वामनपुराणम् ।
श्रीब्रह्मोवाच ।
“शृणु वत्स ! प्रवक्ष्यामि पुराणं वामनाभिधम् ।
त्रिविक्रमचरित्राढ्यं दशसाहस्रसंख्यकम् ॥
कूर्म्मकल्पसमाख्यानं वर्गत्रयकथानकम् ।
भागद्वयसमायुक्तं वक्तृश्रोतृशुभावहम् ॥” * ॥
तत्र पूर्व्वभागे ।
“पुराणप्रश्नः प्रथमं ब्रह्मशीर्षच्छिदा ततः ।

कपालमोचनाख्यानं दक्षयज्ञविहिंसनम् ।
हरस्य कालरूपाख्या कामस्य दहनं ततः ।
प्रह्लादनारायणयोर्युद्धं देवासुराह्वयम् ।
सुकेश्यर्कसमाख्यानं ततो भुवनकोषकम् ।
ततः काम्यव्रताख्यानं श्रीदुर्गाचरितं ततः ।
तपतीचरितं पश्चात् कुरुक्षेत्रस्य वर्णनम् ।
सत्योमाहात्म्यमतुलं पार्व्वतीजन्मकीर्त्तनम् ।
तपस्तस्या विवाहश्च गौर्य्युपाख्यानकं ततः ।
ततः कौशिक्युपाख्यानं कुमारचरितं ततः ।
ततोऽन्धकवधाख्यानं साध्योपाख्यानकं ततः ।
जाबालिचरितं पश्चादरजायाः कथाद्भुता ।
अन्धकेश्वरयोर्युद्धं गणत्वं चान्धकस्य च ।
मरुतां जन्मकथनं बलेश्च चरितं ततः ।
ततस्तु लक्ष्म्याश्चरितं त्रैविक्रममतः परम् ।
प्रह्लादतीर्थयात्रायां प्रोच्यन्ते तत्कथाः शुभाः ।
ततश्च धुन्धुचरितं प्रेतोपाख्यानकं ततः ।
नक्षत्रपुरुषाख्यानं श्रीदामचरितं ततः ।
त्रिविक्रमचरित्रान्ते ब्रह्मप्रोक्तः स्तवोत्तमः ।
प्रह्लादबलिसंवादे सुतले हरिशंसनम् ।
इत्येष पूर्व्वभागोऽस्य पुराणस्य तवोदितः ।”
तदुत्तरे भागे बृहद्वामनाख्ये ।
“शृणु तस्योत्तरं भागं बृहद्वामनसंज्ञकम् ।
माहेश्वरी भागवती सौरी गाणेश्वरी तथा ।
चतस्रः संहिताश्चात्र पृथक् साहस्रसंख्यया ।
माहेश्वर्य्यान्तु कृष्णस्य तद्भक्तानाञ्च कीर्त्तनम् ।
भागवत्यां जगन्मातुरवतारकथाद्भुता ।
सौर्य्यां सूर्य्यस्य महिमा गदितः पापनाशनः ।
गाणेश्वर्य्यां गणेशस्य चरितञ्च महेशितुः ।
इत्येतद्वामनं नाम पुराणं सुविचित्रकम् ।
पुलस्त्येन समाख्यातं नारदाय महात्मने ।
ततो नारदतः प्राप्तं व्यासेन सुमहात्मना ।
व्यासात्तु लब्धवान् वत्स ! तच्छिष्यो रोमहर्षणः ।
स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च ।
एवं परम्पराप्राप्तं पुराणं वामनं शुभम् ।” * ।
तत्फलश्रुतिः ।
“ये पठन्ति च शृण्वन्ति तेऽपि यान्ति परां गतिम् ।
लिखित्वैतत् पुराणन्तु यः शरद्विषुवेऽर्पयेत् ।
विप्राय वेदविदुषे घृतधेनुसमन्वितम् ।
स समुद्धृत्य नरकान्नयेत् स्वर्गं पितॄन् स्वकान् ।
देहान्ते शुभभोगोऽसौ याति विष्णोः परं पदम् ।”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०५ अध्यायः ॥ १६ ॥
पञ्चदशं कूर्म्मपुराणम् ।
श्रीब्रह्मोवाच ।
“शृणु वत्स ! मरीचेऽद्य पुराणं कूर्म्मसंज्ञितम् ।
लक्ष्मीकल्पानुचरितं यत्र कूर्म्मवपुर्हरिः ।
धर्म्मार्थकाममोक्षाणां माहात्म्यञ्च पृथक् पृथक् ।
इन्द्रद्युम्नप्रसङ्गेन प्राहर्षिभ्यो दयान्वितः ।
तत्सप्तदशसाहस्रं सुचतुःसंहितं शुभम् ।
यत्र ब्राह्मी पुरा प्रोक्ता धर्म्मा नानाविधा मुने ! ।
नानाकथाप्रसङ्गेन नृणां सद्गतिदायकाः ।” * ।
तत्पूर्व्वभागे ।
“तत्र पूर्व्वविभागे तु पुराणोपक्रमः पुरा ।
लक्ष्मीप्रद्युम्नसंवादः कूर्म्मर्षिगणसङ्कथा ।
वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम् ।
कालसंख्या समासेन लयान्ते स्तवनं विभोः ।
ततः सङ्क्षेपतः सर्गः शाङ्करं चरितं तथा ।
सहस्रनाम पार्व्वत्या योगस्य च निरूपणम् ।
भृगुवंशसमाख्यानं ततः स्वायम्भुवस्य च ।
देवादीनां समुत्पत्तिर्दक्षयज्ञाहतिस्ततः ।
दक्षसृष्टिकथा पश्चात् कश्यपान्वयकीर्त्तनम् ।
आत्रेयवंशकथनं कृष्णस्य चरितं शुभम् ।
मार्कण्डकृष्णसंवादो व्यासपाण्डवसङ्कथा ।
युगधर्म्मानुकथनं व्यासजैमिनिकी कथा ।
वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम् ।
त्रैलोक्यवर्णनञ्चैव वेदशाखानिरूपणम् ।” * ।
तदुत्तरभागे ।
“उत्तरेऽस्य विभागे तु पुरा गीतेश्वरी ततः ।
व्यासगीता ततः प्रोक्ता नानाधर्म्मप्रबोधिनी ।
नानाविधानां तीर्थानां माहात्म्यञ्च पृथक् ततः ।
नानाधर्म्मप्रकथनं ब्राह्मीयं संहिता स्मृता ।
अतः परं भागवती संहितार्थनिरूपणे ।
कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता ।”
तदुत्तरभागीयभागवत्याख्यद्वितीयसंहितायाः पञ्चपादेषु ।
“पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यवस्थितिः ।
सदाचारात्मिका वत्स ! भोगसौख्यविवर्द्धिनी ।
द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक् प्रकीर्त्तिता ।
यया त्वाश्रितया पापं विधूयेह व्रजेद्दिवम् ।
तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्व्विधा ।
यया चरितया सम्यक् लभते गतिमुत्तमाम् ।
चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता ।
यया सन्तुष्यति श्रीशो नृणां श्रेयोविवर्द्धनः ।
पञ्चमेऽस्यास्ततः पादे वृत्तिः सङ्करजोदिता ।
यया चरितमाप्नोति भाविनीमुत्तमां गतिम् ।
इत्येषा पञ्चपद्युक्ता द्वितीया संहिता मुने ! ।
तृतीयात्रोदिता सौरी नृणां कामविधायिनी ।
षोढा षट्कर्म्मसिद्धिं सा बोधयन्ती च कामिनाम् ।
चतुर्थी वैष्णवी नाम मोक्षदा परिकीर्त्तिता ।
चतुष्पदी द्विजादीनां साक्षाद्ब्रह्मस्वरूपिणी ।
ताः क्रमात् षट्चतुर्द्वौद्विसाहस्राः परिकीर्त्तिताः ।”
तत्फलश्रुतिः ।
“एतत्कूर्म्मपुराणन्तु चतुर्व्वर्गफलप्रदम् ।
पठतां शृण्वतां नृणां सर्व्वोत्कृष्टगतिप्रदम् ।
लिखित्वैतत्तु यो भक्त्या हेमकूर्म्मसमन्वितम् ।
ब्राह्मणायायने दद्यात् स याति परमां गतिम् ।”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०६ अध्यायः ॥ १५ ॥
षोडशं मत्स्यपुराणम् ।
श्रीब्रह्मोवाच ।
“अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम ! ।
यत्रोक्तं सप्तकल्पानां वृत्तं संक्षिप्य भूतले ।
व्यासेन वेदविदुषा नारसिंहोपवर्णनम् ।
उपक्रम्य तदुद्दिष्टं चतुर्दशसहस्रकम् ।
मनुमत्स्यसुसंवादो ब्रह्माण्डवर्णनन्ततः ।
ब्रह्मदेवासुरोत्पत्तिर्म्मारुतोत्पत्तिरेव च ।
मदनद्वादशी तद्वत् लोकपालाभिपूजनम् ।
मन्वन्तरसमुद्देशो वैन्यराज्याभिवर्णनम् ।
सूर्य्यवैवस्वतोत्पत्तिर्ब्बुधसङ्गमनं तथा ।
पितृवंशानुकथनं श्राद्धकालस्तथैव च ।
पितृतीर्थप्रचारश्च सोमोत्पत्तिस्तथैव च ।
कीर्त्तनं सोमवंशस्य ययातिचरितं तथा ।
कार्त्तवीर्य्यस्य चरितं वृष्णिवंशानुकीर्त्तनम् ।
भृगुशापस्तथा विष्णोर्दशधा जन्म च क्षितौ ।
कीर्त्तनं पुरुवंशस्य वंशो हौताशनः परः ।
क्रियायोगस्ततः पश्चात् पुराणं परिकीर्त्तितम् ।
व्रतं नक्षत्रपुरुषं मार्त्तण्डशयनं तथा ।
कृष्णाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम् ।
तडागविधिमाहात्म्यं पादपोत्सर्ग एव च ।
सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च ।
तथानन्ततृतीयाया रसकल्याणिनीव्रतम् ।
तथैवानन्दकर्य्याश्च व्रतं सारस्वतं पुनः ।
उपरागाभिषेकश्च सप्तमीशयनं तथा ।
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा ।
अशून्यशयनं तद्वत् तथैवाङ्गारकव्रतम् ।
सप्तमीसप्तकं तद्वद्विशोकद्वादशीव्रतम् ।
मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च ।
ग्रहस्वरूपकथनं तथा शिवचतुर्द्दशी ।
तथा सर्व्वफलत्यागः सूर्य्यवारव्रतं तथा ।
संक्रान्तिस्नपनं तद्वद्विभूतिद्वादशीव्रतम् ।
षष्ठिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः ।
प्रयागस्य तु माहात्म्यं द्वीपलोकानुवर्णनम् ।
तथान्तरीक्षचारश्च ध्रुवमाहात्म्यमेव च ।
भवनानि सुरेन्द्राणां त्रिपुरोद्योतनं तथा ।
पितृप्रवरमाहात्म्यं मन्वन्तरविनिर्णयः ।
चतुर्युगस्य सम्भूतिर्युगधर्म्मनिरूपणम् ।
वज्राङ्गस्य तु सम्भूतिस्तारकोत्पत्तिरेव च ।
तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्त्तनम् ।
पार्व्वतीसम्भवस्तद्वत्तथा शिवतपोवनम् ।
अनङ्गदेहदाहश्च रतिशोकस्तथैव च ।
गौरीतपोवनं तद्वच्छिवेनाथ प्रसादनम् ।
पार्व्वतीऋषिसंवादस्तथोद्वाहमङ्गलम् ।
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा ।
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ।
पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम् ।
वाराणस्यास्तु माहात्म्यं नर्म्मदायास्तथैव च ।
प्रवरानुक्रमस्तद्वत् पितृगाथानुकीर्त्तनम् ।
तथोभयमुखीदानं दानं कृष्णाजिनस्य च ।
ततः सावित्र्युपाख्यानं राजधर्म्मास्तथैव च ।
विविधोत्पातकथनं ग्रहशान्तिस्तथैव च ।

याचानिमित्तकथनं स्वप्नमङ्गलकीर्त्तनम् ।
वामनस्य तु माहात्म्यं वाराहस्य ततः परम् ।
समुद्रमथनं तद्वत् कालकूटाभिशान्तनम् ।
देवासुरविमर्द्दश्च वास्तुविद्या तथैव च ।
प्रतिमालक्षणं तद्वद्देवतास्थापनं तथा ।
प्रासादलक्षणं तद्वन्मण्डपानाञ्च लक्षणम् ।
भविष्यराजोद्देशो महादानानुकीर्त्तनम् ।
कल्पानुकीर्त्तनं तद्वत् पुराणेऽस्मिन् प्रकीर्त्तितम् ।"
तत्फलश्रुतिः ।
"पवित्रमेतत् कल्याणमायुःकीर्त्तिविवर्द्धनम् ।
यः पठेच्छृणुयाद्वापि स याति भवनं हरेः ।
लिखित्वैतत्तु यो दद्याद्धेममत्स्यगवान्वितम् ।
विप्रायाभ्यर्च्य विषुवे स याति परमं पदम् ।"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०७ अध्यायः । १६ ।
सप्तदशं गरुड़पुराणम् ।

श्रीब्रह्मोवाच ।

"मरीचे शृणु वक्ष्यामि पुराणं गारुड़ं शुभम् ।
गरुड़ायाब्रवीत् पृष्टो भगवान् गरुड़ासनः ।
एकोनविंशसाहस्रं तार्क्ष्यं कल्पकथान्वितम् ।"
तत्र पूर्व्वखण्डे ।
"पुराणोपक्रमो यत्र सर्गः सङ्क्षेपतस्ततः ।
सूर्य्यादिपूजनविधिर्दीक्षाविधिरतः परम् ।
आदिपूजा ततः पश्चान्नवव्यूहार्च्चनं द्विज ! ।
पूजाविधानञ्च तथा वैष्णवं पञ्जरं ततः ।
योगाध्यायस्ततो विष्णोर्नामसाहस्रकीर्त्तनम् ।
ध्यानं विष्णोस्ततः सूर्य्यपूजा मृत्युञ्जयार्च्चनम् ।
मालामन्त्राः शिवार्च्चाथ गणपूजा ततः परम् ।
गोपालपूजा त्रैलोक्यमोहनश्रीधरार्च्चनम् ।
विष्ण्वर्च्चा पञ्चतत्त्वार्च्चा चक्रार्च्चा देवपूजनम् ।
न्यासादिसन्ध्योपास्तिश्च दुर्गार्च्चाथ सुरार्च्चनम् ।
पूजा माहेश्वरी चातः पवित्रारोहणार्च्चनम् ।
मूर्त्तिध्यानं वास्तुमानं प्रासादानाञ्च लक्षणम् ।
प्रतिष्ठा सर्व्वदेवानां पृथक्पूजाविधानतः ।
योगोऽष्टाङ्गो दानधर्म्मः प्रायश्चित्तं विधिक्रिया ।
द्वीपेशनरकाख्यानं सूर्य्यव्यूहश्च ज्योतिषम् ।
सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम् ।
माहात्म्यमथ तीर्थानां गयामाहात्म्यमुत्तमम् ।
ततो मन्वन्तराख्यानं पृथक् पृथग्विभागशः ।
पित्राख्यानं वर्णधर्म्मा द्रव्यशुद्धिः समर्पणम् ।
श्राद्धं विनायकस्यार्च्चा ग्रहयज्ञस्तथाश्रमाः ।
जननाख्या प्रेताशौचं नीतिसारो व्रतोक्तयः ।
सूर्य्यवंशः सोमवंशोऽवतारकथनं हरेः ।
रामायणं हरिवंशो भारताख्यानकन्ततः ।
आयुर्व्वेदे निदानं प्राक् चिकित्साद्रव्यजा गुणाः ।
रोगघ्नं कवचं विष्णोर्गारुड़ं त्रैपुरो मनुः ।
प्रश्नचूड़ामणिश्चान्ते हयायुर्व्वेदकीर्त्तनम् ।
औषधीनामकथनं ततो व्याकरणोहनम् ।
छन्दःशास्त्रं सदाचारस्ततः स्नानविधिः स्मृतः ।
तर्पणं वैश्वदेवञ्च सन्ध्या पार्व्वणकर्म्म च ।
नित्यश्राद्धं सपिण्डाख्यं धर्म्मसारोऽघनिष्कृतिः ।
प्रतिसंक्रम उक्तोऽस्माद्युगधर्म्माः कृतेः फलम् ।
योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः ।
माहात्म्यं वैष्णवञ्चाथ नारसिंहस्तवोत्तमम् ।
ज्ञानामृतं गुह्याष्टकं स्तोत्रं विष्ण्वर्च्चनाह्वयम् ।
वेदान्तसांख्यसिद्धान्तं ब्रह्मज्ञानं तथात्मकम् ।
गीतासारः फलोत्कीर्त्तिः पूर्व्वखण्डोऽयमीरितः ।"
उत्तरखण्डे प्रेतकल्पे ।
"अथास्यैवोत्तरे खण्डे प्रेतकल्पः पुरोदितः ।
यत्र तार्क्ष्येण संपृष्टो भगवानाह बाड़व ! ।
धर्म्मप्रकटनं पूर्व्वं योनीनां गतिकारणम् ।
दानादिकं फलञ्चापि प्रोक्तमत्रौर्द्ध्वदेहिकम् ।
यमलोकस्य मार्गस्य वर्णनञ्च ततः परम् ।
षोड़शश्राद्धफलकं वृत्तान्तञ्चात्र वर्णितम् ।
निष्कृतिर्यममार्गस्य धर्म्मराजस्य वैभवम् ।
प्रेतपीड़ाविनिर्द्देशः प्रेतचिह्ननिरूपणम् ।
प्रेतानां चरिताख्यानं कारणं प्रेततां प्रति ।
प्रेतकृत्यविचारश्च सपिण्डीकरणोक्तयः ।
प्रेतत्वमोक्षणाख्यानं दानानि च विमुक्तये ।
आवश्यकोत्तमं दानं प्रेतसौख्यकरं हितम् ।
शारीरकविनिर्द्देशो यमलोकस्य वर्णनम् ।
प्रेतत्वोद्धारकथनं कर्म्मकर्त्तृविनिर्णयः ।
मृत्योः पूर्व्वक्रियाख्यानं पश्चात् कर्म्मनिरूपणम् ।
मध्यं षोड़शकं श्राद्धं स्वर्गप्राप्तिक्रियोहनम् ।
सूतकस्याथ सङ्ख्यानं नारायणबलिक्रिया ।
वृषोत्सर्गस्य माहात्म्यं निषिद्धपरिवर्ज्जनम् ।
अपमृत्युक्रियोक्तिश्च विपाकः कर्म्मणां नृणाम् ।
कृत्याकृत्यविचारश्च विष्णुध्यानं विमुक्तये ।
स्वर्गतौ विहिताख्यानं स्वर्गसौख्यनिरूपणम् ।
भूर्लोकवर्णनञ्चैव सप्तधा लोकवर्णनम् ।
पञ्चोर्द्ध्वलोककथनं ब्रह्माण्डस्थितिकीर्त्तनम् ।
ब्रह्माण्डानेकचरितं ब्रह्मजीवनिरूपणम् ।
आत्यन्तिकलयाख्यानं फलस्तुतिनिरूपणम् ।
इत्येतद्गारुड़ं नाम पुराणं भुक्तिमुक्तिदम् ।"
तत्फलश्रुतिः ।
"कीर्त्तितं पापशमनं पठतां शृण्वतां नृणाम् ।
लिखित्वैतत् पुराणन्तु विषुवे यः प्रयच्छति ।
सौवर्णहंसयुग्माढ्यं विप्राय स दिवं व्रजेत् ।"* ।
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०८ अध्यायः । १७ ।
अष्टादशं ब्रह्माण्डपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम् ।
यच्च द्वादशसाहस्रं भाविकल्पकथायुतम् ।
प्रक्रियाख्योऽनुषङ्गाख्य उपोद्घातस्तृतीयकः ।
चतुर्थ उपसंहारः पादाश्चत्वार एव हि ।
पूर्व्वपादद्वयं पूर्व्वो भागोऽत्र समुदाहृतः ।
तृतीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः ।"* ।
तत्र पूर्व्वभागे प्रक्रियापादे ।
"आदौ कृत्यसमुद्देशो नैमिषाख्यानकं ततः ।
हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च ।
एष वै प्रथमः पादो द्वितीयं शृणु मानद ! ।"
पूर्व्वभागे अनुषङ्गपादे ।
"कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम् ।
मानसीसृष्टिकथनं रुद्रप्रसववर्णनम् ।
महादेवविभूतिश्च ऋषिसर्गस्ततः परम् ।
अग्नीनां विजयश्चाथ कालसद्भाववर्णनम् ।
प्रियव्रतान्वयोद्देशः पृथिव्यायामविस्तरः ।
वर्णनं भारतस्यास्य ततोऽन्येषां निरूपणम् ।
जम्ब्वादिसप्तद्वीपाख्या ततोऽधोलोकवर्णनम् ।
ऊर्द्ध्वलोकानुकथनं ग्रहचारस्ततः परम् ।
आदित्यव्यूहकथनं देवग्रहानुकीर्त्तनम् ।
नीलकण्ठाह्वयाख्यानं महादेवस्य वैभवम् ।
अमावास्यानुकथनं युगतत्त्वनिरूपणम् ।
यज्ञप्रवर्त्तनं चाथ युगयोरन्त्ययोः कृतिः ।
युगप्रजालक्षणञ्च ऋषिप्रवरवर्णनम् ।
वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम् ।
शेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः ।
चाक्षुषेऽद्यतने सर्गो द्वितीयोऽङ्घ्रिः पुरोदितः ।"
मध्यमभागे उपोद्घातपादे ।
"अथोपोद्घातपादे तु सप्तर्षिपरिकीर्त्तनम् ।
प्राजापत्यान्वयस्तस्माद्देवादीनां समुद्भवः ।
ततो जयाभिव्याहारो मरुदुत्पत्तिकीर्त्तनम् ।
काश्यपेयानुकथनमृषिवंशनिरूपणम् ।
पितृकल्पानुकथनं श्राद्धकल्पस्ततः परम् ।
वैवस्वतसमुत्पत्तिः सृष्टिस्तस्य ततः परम् ।
मनुपुत्रान्वयश्चातो गान्धर्व्वस्य निरूपणम् ।
इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः ।
अमावसोरन्वयश्च रजेश्चरितमद्भुतम् ।
ययातिचरितञ्चाथ यदुवंशनिरूपणम् ।
कार्त्तवीर्य्यस्य चरितं जामदग्न्यं ततः परम् ।
वृष्णिवंशानुकथनं सगरस्याथ सम्भवः ।
भार्गवस्यानुचरितं तथा कार्य्यवधाश्रयम् ।
सगरस्याथ चरितं भार्गवस्य कथा पुनः ।
देवासुराहवकथा कृष्णाविर्भाववर्णने ।
इन्द्रस्य च स्तवः पुण्यः शुक्रेण परिकीर्त्तितः ।
विष्णुमाहात्म्यकथनं बलिवंशनिरूपणम् ।
भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे ।
एवमुद्घातपादोऽयं तृतीयो मध्यमे दले ।"
उत्तरभागे उपसंहारपादे ।
"चतुर्थमुपसंहारं वक्ष्ये खण्डे तथोत्तरे ।
वैवस्वतान्तराख्यानं विस्तरेण यथातथम् ।
पूर्व्वमेव समुद्दिष्टं सङ्क्षेपादिह कथ्यते ।
भविष्याणां मनूनाञ्च चरितं हि ततः परम् ।
कल्पप्रलयनिर्द्देशः कालमानं ततः परम् ।
लोकाश्चतुर्द्दश ततः कथिता मानलक्षणैः ।
वर्णनं नरकाणाञ्च विकर्म्माचरणैस्ततः ।
मनोमयपुराख्यानं लयः प्राकृतिकस्ततः ।
शैवस्याथ पुरस्यापि वर्णनञ्च ततः परम् ।
त्रिविधाद्गुणसम्बन्धाज्जन्तूनां कीर्त्तिता गतिः ।
अनिर्द्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः ।
अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम् ।
इत्येष उपसंहारः पादो वृत्तः स चोत्तरः ।
चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतम् ।
अष्टादशमनौपम्यं सारात्सारतरं द्विज ! ।

तदेव व्यस्तं गदितमत्राष्टादशधा पृथक् ।
पाराशर्य्येण मुनिना सर्व्वेषामपि मानद ! ॥
वस्तुदृष्ट्वाय तेनैव मुनीनां भावितात्मनाम् ।
मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे ॥
मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः ।
मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम् ॥
तेन शक्तिसुतायोक्तं जातूकर्णाय तेन च ।
व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनमुखोद्गतम् ॥
प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम् ॥”
तत्फलश्रुतिः ।
“य इदं कीर्त्तयेद्वत्स ! शृणोति च समाहितः ।
स विधूयेह पापानि याति लोकमनामयम् ॥
लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम् ।
पत्रेणाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति ॥
स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा ।
मरीचेऽष्टादशैतानि मया प्रोक्तानि यानि ते ।
पुराणानि तु संक्षेपाच्छ्रोतव्यानि च विस्तरात् ॥
अष्टादशपुराणानि यः शृणोति नरोत्तमः ।
कथयेद्वा विधानेन नेह भूयः स जायते ॥
सूत्रमेतत् पुराणानां यन्मयोक्तं तवाधुना ।
नित्यं संशीलनीयं हि पुराणफलमिच्छता ॥
न दाम्भिकाय पापाय देवगुर्व्वनुसूयवे ।
देयं कदापि साधूनां द्वेषिणे न शठाय च ॥
शान्ताय शमचित्ताय शुश्रूषाभिरताय च ।
निर्म्मत्सराय शुचये देयं सद्वैष्णवाय च ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०९ अध्यायः ॥ १८ । ७ ॥
इत्यष्टादशमहापुराणानुक्रमणिका समाप्ता ॥०॥
(अष्टादशमहापुराणानां निरुक्तिर्यथा शिवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये ।
“यत्र वक्ता स्वयं तक्षे ! ब्रह्मा साक्षात् चतुर्मुखः ।
तस्माद्ब्राह्मं समाख्यातं पुराणं प्रथमं मुने ! ॥” १ ॥
तक्षे इति मुनिसम्बोधनम् ।
“पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम् ॥ २ ॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम् ।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः ॥ ३ ॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥ ४ ॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं ननु देवीपुराणकम् ॥ ५ ॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते ॥ ६ ॥
यत्र वक्ताभवत्तक्षे ! मार्कण्डेयो महामुनिः ।
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम् ॥ ७ ॥
अग्निनोक्तं तथाग्नेयं ८ भविष्योक्तेर्भविष्यकम् ॥ ९ ॥
विवर्त्तनात् ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते ॥ १० ॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते ॥ ११ ॥
वराहस्य च वाराहं पुराणं द्वादशं मुने ! ॥ १२ ॥
यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षात् महेश्वरः ।
तत्तु स्कान्दं समाख्यातम् १३ वामनस्य तु वामनम् ॥ १४ ॥
कौर्म्मं कूर्म्मस्य चरितम् १५ मात्स्यं मत्स्यस्य कीर्त्तितम् ॥ १६ ॥
गरुड़स्तु स्वयं वक्ता यत्तद् गारुड़संज्ञकम् ॥ १७ ॥
ब्रह्माण्डचरितोक्तत्वात् ब्रह्माण्डं परिकीर्त्तितम् ॥” १८ ॥

पुराभवः वेदः । सृष्ट्यादिप्रतिपादको ग्रन्थः । यथा, शतपथब्राह्मणे । १४ । ६ । १० । ६ ।
“ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि ।”
तथा च बृहदारण्यकोपनिषदि ।
“अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणम् ।”
“इदं वा अग्रे नैव किञ्चिदासीदित्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् ।” इति ऋग्वेदोपोद्घाते । ७ ।)

पुराणः, पुं, (पुरा पूर्व्वस्मिन् काले भव इति । पुरा + “सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।” ४ । ३ । २३ । इति ट्युः । निपातनात् तुड़भावः ।) पणः । (शिवः । यथा, महाभारते । १३ । १७ । १०६ ।
“बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ॥”)
पुरातने, त्रि । (यथा, मनुः । ५ । २३ ।
“बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम् ।
पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥”)
कार्षापणे, पुं क्ली । इति शब्दरत्नावली ॥
(यथा, मनुः । ८ । १३६ ।
“ते षोड़श स्याद्धरणं पुराणश्चैव राजतम् ।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥”)

पुराणगः, पुं, (पुराणैर्गीयते इति । गै + घञर्थे कः । यद्वा, पुराणं वेदं गायतीति । गै + “आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) ब्रह्मा । इति हेमचन्द्रः । २ । १२६ ॥ पुराणगायके, त्रि ॥

पुराणपुरुषः, पुं, (पुराणैर्व्वेदादिभिरुपस्तुतः पुरुषः इति मध्यपदलोपिसमासः । यद्वा, पुराणः पुरुषः इति कर्म्मधारयः ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥ (यथा, पाद्मोत्तरखण्डे ११९ अध्याये विष्णोरष्टोत्तरशतनामकीर्त्तने ।
“पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥”)

पुरातनः, पुं, (पुरा भवः । पुरा + ट्युल् तुट् च ।) पुराणः । तद्वैदिकपर्य्यायः । प्रत्नम् १ प्रदिवः २ प्रवयाः ३ सनेमि ४ पूर्व्यम् ५ अह्नाय ६ । इति षट् पुराणनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ६६ ।
“उद्भवो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥”)

पुरातनः, त्रि, (पुरा पूर्व्वस्मिन् काले भवः । पुरा + “सायंचिरेति ।” ४ । ३ । २३ । इति ट्युट् तुट् च ।) पूर्व्वकालभवः । पुराण इति भाषा । तत्पर्य्यायः । पुराणः २ प्रतनः ३ प्रत्नः ४ चिरन्तनः ५ । इत्यमरः । ३ । १ । ७७ ॥ चिरः ६ इति जटाधरः ॥ (यदुक्तं नीतिशास्त्रे ।
“नवं वस्त्रं नवं छत्रं नव्या स्त्री नूतनं गृहम् ।
सर्व्वत्र नूतनं शस्तं सेवकान्ने पुरातने ॥”)

पुराध्यक्षः, त्रि, (पुरस्य पुराधिकृतो वा अध्यक्षः ।) नगराधिकृतः । (यथा, महाभारते । ११ । २३५ । ११ ।
“चिकित्सकः काण्डपृष्ठः पुराध्यक्षः पुरोहितः ।
सांवत्सरो वृथाध्यायी सर्व्वे ते शूद्रसम्मिताः ॥”)
अन्तःपुराध्यक्षलक्षणम् । यथा,—
“वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥”
इति युक्तिकल्पतरुः ॥

पुरारिः, पुं, (पुरस्य त्रिपुरस्य अरिः शत्रुः ।) शिवः । इति त्रिकाण्डशेषः ॥ (यथा, अध्यात्म-रामायणे । १ । १ । ५ ।
“पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता ।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम् ॥”)

पुरार्द्धविस्तरः, पुं, (पुरार्द्धं पूर्व्वार्द्धं विस्तरो विस्तृतिरस्येति ।) विटः । इति हेमचन्द्रः । ३ । १९ ॥

पुरावसुः, पुं, (पुरा पूर्व्वकाले उत्पत्तेः प्रागेव वसुः ।) भीष्मः । इति त्रिकाण्डशेषः ॥

पुरावृत्तं, क्ली, (पुरा पुराणं वृत्तं चरितं यत्र ।) पूर्व्ववृत्तान्तनिबन्धनम् । तत्पर्य्यायः । इतिहासः २ । इत्यमरः । १ । ६ । ४ ॥ पूर्व्वचरितम् ॥ इति स्वामी ॥ (यथा, महाभारते । ७ । १९८ ॥
“शृणु गुह्यमिदं पार्थ ! पुरावृत्तं यथाभवत् ॥”)

पुराशिनी, स्त्री, (पुरं नगरमश्नाति व्याप्नोति । अश + णिनिः + ङीप् ।) सहदेवीलता । इति राजनिर्घण्टः ॥

पुरासुहृत्, [द्] पुं, (पुरस्य त्रिपुरस्य असुहृत् शत्रुः ।) शिवः । इति हेमचन्द्रः । २ । ११२ ॥

पुरिः, स्त्री, (पूर्य्यते इति । पॄ + “कॄगॄशॄपॄकुटीति ।” उणा० ४ । १४२ । इति इः । स च किन् ।) पुरी । इत्यमरटीकायां भरतः ॥ नदी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (शरी-रम् । इति पुरीतत्-शब्दटीकायां भरतः ॥)

पुरिः, पुं, (पूर्य्यते प्रजाभिर्धनादिभिरिति । पॄ + इः । स च किन् ।) राजा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (शब्दातिदेशः । मतुरपार्द्ध- शिष्टलोटकस्य शिरसि अन्तर्मात्याः- सुधाधिपतेः । इति केचित् । तमाचष्टे यथा, प्राणतोषिण्यागमवचनम् ।
“ज्ञानमन्त्रेण संपूर्णः पूर्णतत्त्वपदे स्थितः ।
परब्रह्मरतो नित्यं पुरिश्चाभा न पश्यति ॥”
तथा च तन्त्रशास्त्रे २ पटले ।
“देवनाथाः कदा भार्य्यं वीरौः पूर्णं तथा ।
आनन्दीनिन्द्रो निजः स वीरः पुरिरेव च ॥”)

पुरी, स्त्री, (पुरि+वा ङीष्।) नगरी। इत्यमरः। २। २। १॥ (यथा, श्रीधरस्वामिधृतभृगुवचनम्।
"नृपावासः पुरी प्रोक्ता विप्रा पुरमपीष्यते॥")
अस्या लक्षणादि पुरशब्दे नगरशब्दे च लिखितम्। तद्वर्णनं यथा, महाभारते। ३। १५। ५—८।
"पुरी समन्ताद्विहिता सपताका सतोरणा।
सचक्रा सहुडा चैव सयन्त्रखनका तथा॥
सोपशल्यप्रतोलीका साट्टाट्टालकगोपुरा।
सचक्रग्रहणी चैव सोल्कालातावपोथिका॥
सोद्घिका भरतश्रेष्ठ! सभेरीपणवानका।
सतोरणाङ्कुशा राजन्! सशतघ्नीकलाङ्गला॥
सभुशुण्ड्यश्मगुडका सायुधा सपरश्वधा।
लोहचर्म्मवती चापि साग्निः सगुडशृङ्गिका॥"
"पताका ध्वजाञ्चलः। तोरणानि बहिर्द्वाराणि। चक्राणि योधगणाः। हुडास्तदाश्रयस्थानानि भाषायां बुरुजसंज्ञानि। अन्ये तु विशूचीनुसर्ज्जनप्रशृङ्गाणि हुडा इत्याहुः उदाहरन्ति च।
'कल्पान्ते हुडशृङ्गाणि रथस्योपरि सूरिभिः।
विशूचनसर्पशृङ्गार्थं करादिस्पर्शं उच्यते॥'
इति॥
यन्त्राणि आग्नेयौषधबलेन दृषत्पिण्डोत्क्षेपकानि महान्ति भाषायां कामानसंज्ञकानि। क्षुद्राणि सीसगुलिकोत्क्षेपकयन्त्राणि बन्दुकसंज्ञकानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः॥ उपशल्याः लोहसूच्यः कीलाः तद्युक्ताः प्रतोल्यो रथ्यामार्गा यस्यां सा। अट्टालकाः उपरिगृहाः। गोपुराणि पुरद्वाराणि। साट्टानि अट्टेन अन्नेन सहितानि अट्टालकादीनि यस्यां सा। साट्टेति विशेषणं उपशल्यस्य ग्रामान्तस्य रथ्यायाश्चाट्टवा सम्बध्यते। चक्रग्रहणी सैन्यनिग्राहिका मोर्चा इति म्लेच्छप्रसिद्धा। सोल्कालातावपोथिका सोल्कमलातं ज्वालासहितमुल्मुकं यस्यां सा सोल्कालाता इति केचित्। अवबद्धाः पोथिका यन्त्रबद्धाः काष्ठपाषाणादयो रिपूणामुपरिपातनाय यस्यामिति प्राचः। उल्केवोल्का प्राणहरत्वात् यन्त्रोत्क्षिप्तो गोलः। अलातं सकाष्ठदण्डलोहमयमाग्नेयं प्रहरणं बाण इति भाषायां प्रसिद्धम्। तयोरश्मवर्षणयोरपि पोथिका पातयितारः मन्त्रमयाः शक्तयः कर्णायेन्द्रदत्तशक्तिसदृशा तद्युक्ताः सोल्कालातावपोथिका॥ ● ॥ उष्ट्रिका उष्ट्रचर्म्ममयानि भाण्डानि। वर्द्धिकेति पाठे काष्ठ आयुधविशेषाः॥ ● ॥ अश्मगुडकाः वर्त्तुलीकृताः पाषाणाः। लोहमयानि चर्म्माणि कमठपृष्ठाकाराणि प्रहारवारकाणि ढाल इति प्रसिद्धानि। साग्निः आग्नेयौषधसहिता गुडाः गोलकाः। शृङ्गिकास्तदुत्क्षेपकयन्त्राणि। शत्रूणामुपरि पातनाय तन्त्रे गुडो द्रवीभूतो यत्र शिखरे स्थाप्यते तत्सहितश्चैति।" इति गोनकण्ठकृतभारतभावदीपनामटीका॥

पुरीतत्, पुं क्ली, (पुरीं शरीरं तनोतीति। तन दुष् विस्तारे+क्विप्। "गमः क्वौ।" ६।४।४०। इत्यत्र "गमादीनामिति वक्तव्यम्।" इति वार्त्तिकोक्त्या अनुनासिकलोपः। तुगागमश्च। पुरिं तनोतीति वाक्ये "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।" ६। ३। ११६। इति पूर्व्वपदस्य दीर्घः।) अन्त्रम्। अांत इति ख्यातम्। अमति बध्नाति कालखण्डादि अन्त्रं अतिबन्धे नामीति रः। पुरिः शरीरं तनोतीति पुरीतत् क्विप् वनतनाद्यनिनामिति नलोपे तस्य तनिति तन् निपातनादिकारस्य दीर्घः। अन्त्रसाहचर्य्यात् क्लीवत्वम्। पुरीतदस्त्रियामिति वाचस्पतिः। इत्यमरभरतौ॥

पुरीमोहः, पुं, (पुरीं शरीरं मोहयतीति। मुह+णिच्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) धुस्तूरः। इति शब्दमाला॥

पुरीषं, क्ली, (पिपर्त्ति शरीरमिति। पॄ+"पॄभूभ्यां किच्च।" उणा०४।२७। इति ईषन्। स च कित्।) विष्ठा। इत्यमरः। २। ६। ६८॥ तदुत्सर्गविधिर्यथा,—
"मुहूर्त्ते ब्राह्म उत्थाय रात्रिवासं परित्यजेत्।
परिधायापरं वस्त्रं शयनस्थानतोऽन्वहम्॥
सुखाद्विहस्तान् प्रक्षाल्य शिरोऽभ्य तसो द्विजः।
तृणं तृणं स्तृतिं कृत्वा खनित्वा नैरृतीं दिशम्॥
खनित्रखननेनैव द्वादशाङ्गुल्यधोऽन्तरम्।
गृहीत्वोदकपात्रञ्च मितं गच्छेद्गुःशतम्॥
ग्रामाद्वा शरविक्षेपमाचामशुद्दिते रवौ।
मैत्रमावश्यकं कर्म्म नगराच्च चतुर्गुणम्॥
तस्मिंस्तद्धायतं गर्त्तं तथा कृत्वा गभीरकम्।
कृत्वा तद्भिः खनित्रेण कुशैराच्छाद्य तत्पुनः॥
शुष्कैः काष्ठैरयज्ञीयैर्भूगर्त्तमवगुण्ठितः।
संवीताङ्गो वेणुदलैः पत्रैर्स्तृणमयभाजनैः॥
छन्नं खनित्रं संस्थाप्य वारिपात्रसमान्वितौ।
ततो द्विजः समुपविशेदस्त्रेणाच्छाद्य मस्तकम्॥
यज्ञोपवीतं कर्णेऽस्य कृत्वा मौनी च दक्षिणे।
आगतो द्विजमपि नोपश्यन् सम्यक् भास्करम्॥
गुरुं समीरणं सर्व्वदेवताम्भक्तिमेव च।
मातरं पितरं चन्द्रं सर्व्वं गुरुजनं स्त्रियम्॥ ● ॥
उदङ्मुखश्चिसन्ध्यासु दिवसे च यदा निशि।
दक्षिणामुख उत्सर्गं कुर्य्यान्मूत्रपुरीषयोः॥
पूर्व्वाह्णे तु द्विजः कुर्य्यात् पश्चिमाभिमुखोऽथवा।
अपराह्णे पूर्व्वमुखो मूत्रमूत्रविसर्ज्जनम्॥
मध्याह्ने प्रयतः कुर्य्यादथवाप्युत्तरामुखः।
दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नतः॥
निशायामन्धकारे तु छायायां दिवसे तथा।
यथेच्छमुखो भूत्वा मैत्रं कुर्य्यात् द्विजो भयात्॥
दिग्भ्रमाच्च मनोद्वेगाद्व्याधिमूत्रस्य विसर्ज्जनम्।
ओष्ठाद्वाधोमुखः कुर्य्यादथवाक् प्रयतो द्विजः॥
सन्न्यासी ब्रह्मचारी च वानप्रस्थो गृही द्विजः।
शास्त्राध्यायी च देशानां सर्व्वयज्ञेषु दीक्षितः॥
मुनिश्च सर्व्वधर्म्मज्ञो दान्तः शान्त उदारधीः।
सदोत्तरमुखः कुर्य्याद्दिवसे रात्र एव च॥
प्रातस्तु मैत्रं सायाह्ने दक्षिणाभिमुखो निशि।
योगिनान्तु यथा स्त्रीणां शूद्रादीनामयं क्रमः॥
न देवायतने वृक्षमूले च न जले नदे।
न नदीकूलमार्गेषु न वापीगोष्ठमस्तसु॥
न चितायिश्मशानेषु नोषरे न द्विजालये।
नाम्भःसमीपे न पुष्पे नाकाशे न च शाद्वले॥
न समुद्रे न कार्ष्ये च न तीर्थे न द्विजालये।
न यज्ञवृक्षमूलेषु नोपहारे चतुष्पथे॥
न शस्यक्षेत्रे न खले पुष्पोद्याने न चत्वरे।
सोपानतुको न नग्नश्च न रथ्यासेव्यभूतले॥
न वेश्यालये गोष्ठे न सूर्य्याभिमुखस्तथा।
न चालकृष्टकेदारे न तिष्ठंश्च कदाचन॥
न गच्छंश्च च वल्मीके न च पर्व्वतमस्तके।
न जलं न दिशो भागाश्चाकाशमवलोकयन्॥
न गोब्रजे नदीतीरे नित्यस्थाने न गोमठे।
न यज्ञभूमौ न शवे न पवित्रीकृतस्थले॥
द्विजो न देवच्छायायां शकृन्मूत्रविसर्ज्जनम्।
कुर्य्याद्यज्ञेष्टकाकूटे न च सप्राणिगर्त्तके॥
उद्धृताम्भोमृत्तिकाभ्यामित्थं नारद! यत्नतः।
कृत्वोत्सर्गं ततः कुर्य्यात् शौचं मूत्रपुरीषयोः॥
शुष्ककाष्ठेन लोष्ट्रेणायज्ञीयेन तृणेन वा।
प्रमार्ज्य गुह्यमुत्तिष्ठेत् शिश्नञ्चैव विशेषतः॥
विधृत्य वामहस्तेन शिश्नमूर्द्धविशेषितम्।
चेद्विश्वासः सन्ध्यां द्विवोत्तरमुखस्तदा॥
पूतिगन्धिजलं दुष्टं सफेनञ्च सबुद्बुदम्।
तीर्थोदकं सलवणं पायो वर्णान्तरस्तथा॥
असुरगानदीवारः सामुद्रञ्च सकर्द्दमम्।
यवनान्त्यजखाताम्भः समुद्रगनगोदकम्॥
धान्यक्षेत्रस्य सलिलं सकीटञ्च परित्यजेत्।
मानवो देवखाताम्भः सकृच्चे शौचकर्म्मणि॥ ● ॥
मृदः सकीटास्तीर्थानां देवायतनगोष्ठयोः।
नदोदधिनदीदेवखाततीरस्य मृत्तिकाः॥
महीतलोद्भवाः चैत्रकूपयोः सिकताश्च याः।
अन्तर्जला धूलिमृदो वल्मीकस्य च कर्द्दमाः॥
कृषराश्च हलोत्खाता मृत्तिका भवनस्य च।
अश्वत्थतुलसीधात्रीबिल्वादीनाञ्च या मृदः॥
श्मशानभूमेः शैलस्य तथा पूतस्थलस्य च।
शौचावशिष्टमार्गस्य आखूत्खाताश्च मृत्तिकाः॥
यज्ञस्थानस्य विप्राणां साधूनामालयस्य च।
मृत्तिका वर्ज्जयेदेता देवर्षे! शौचकर्म्मणि॥
पवित्रस्थानतो ग्राह्या द्वादशाङ्गुलधोमृदः।
द्विजैः सकलशौचार्थं शर्करादिविवर्ज्जिताः॥ ● ॥
प्रथमेऽङ्गिरसः शौचं कुर्य्यान्मृद्भिरतः परम्।
पुनर्मलैः पुरीषस्य यथा गन्धक्षयो भवेत्॥
मृत्तिका प्रथमा शौचे स्वर्द्धप्रसृतिसम्मिता।
पूर्णप्रसृतिमात्रा तु द्वितीया मृत्तिका तथा॥
तृतीया प्रमिता शौचे सार्द्धप्रसृतमृत्तिका।
चतुर्थ्यादा क्रमादेवमर्द्धप्रसृतिवर्द्धिता॥
यथा मृत्तिकया पूर्णं चिपर्वं शौचकारिणः।
अर्द्धप्रसृतिमात्रा सा मुनिभिः परिकीर्त्तिता॥
गुदे दद्यान्मृदालिङ्गः पञ्च वा षट् वा तथा।
मृदमेकां तथा द्विजे त्रिसो वा मृत्तिका इदम्॥

अथ ग्रामकरे दद्यान्मृत्खण्डांश्चतुर्दश ।
लिङ्गे वा हस्तयोः सप्त चतुर्दश च पादयोः ॥
पादयोरेकां मृदं दृष्टे दद्यात् तिस्रश्च मृत्तिकाः ।
हस्तद्वयस्योश्चैका तिस्रश्च एकमृद्धस्तयोः ॥ ० ॥
मैथुने रेतःपतने मूत्रोत्सर्गे च मृद्द्वयम् ।
दद्याल्लिङ्गस्य शिश्नैका तिस्रो वामकरे मृदः ॥
हस्ते च मृद्द्वयं दद्यात्तिस्रो वा शुद्धितत्परः ।
पदैकैकं द्विगुणो गृहीत्वा शौचमाचरेत् ॥
गृहिणो द्विगुणं शौचं यमतो ब्रह्मचारिणाम् ।
गृहस्थवानप्रस्थानां प्रोक्तं त्रिगुणमेव च ॥
सन्न्यासिनां वैष्णवानां शौचं ज्ञेयं चतुर्गुणम् ।
जलपात्राद्युपेतानां मृद्भिरद्भिश्च गोमयैः ॥
दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत् ।
एतदर्द्धमशौचे तु आतुरे सूतकेऽपि च ॥
चौरादिबाधिते मार्गे शौचमल्पार्द्धमाचरेत् ।
योषितामेतदर्द्धन्तु शूद्राणाञ्च नारद ! ॥
व्याधिभिश्चातुरो मर्त्त्यश्चार्त्तो यदि यथाबलम् ।
शौचं कुर्य्यात् सदा यत्र स्थानं शोधयेज्जलैः ॥
वेदस्मृतिपुराणानि धर्म्मशास्त्राणि नैष्ठिकम् ।
नैत्यादिकर्म्म यः कुर्य्याद्विहाय मन्दधीरिह ॥
प्रतिष्ठामायुश्च प्रज्ञां हन्ति यशः श्रियम् ।
चलमाधारहीनस्य सदा तस्यापवित्रता ॥ ० ॥
भावनाचोदिता भूपा वैश्यशूद्रान्त्यजाः स्त्रियः ।
कुर्व्वन्ति शौचं यत्नेन यावच्चेतःपवित्रता ॥
यथा कृष्णस्य भजनं तथा नामप्रजल्पनम् ।
तदेव स्मरणं भागवतानां साधुसेवनम् ॥
भक्तिमद्धीनमनसां गोविन्दार्पितकर्म्मणाम् ।
बाह्यान्तःशुद्धचित्तानां शुचिता सहधर्म्मिणाम् ।
मृद्गोमयजलैः शौचमन्यैः कुरुते यदि ।
मनोऽपवित्रता यस्य कदाचिदपि न शुध्यति ॥
गोविन्दाचरणं नास्ति यस्य लोकस्य जन्मनि ।
सोऽपि देहाशुचिः कृत्वा शौचं नैत्यादिकर्म्मसु ॥
जलधारा यदि देवर्षे शौचं कुर्य्यात् सहस्रधा ।
महाग्निशौचशेषोऽपि भावदुष्टो न शुध्यति ॥
सदा चित्तापवित्रत्वकार्य्यो शुचि यो नरः ।
तस्य तु स्नानं नैत्यादिकर्म्मणैव न शुध्यति ॥
धर्म्मणाकारकूटैश्च गोविन्दसमर्चनैः ।
शौचं कृत्वा न शुध्येत दुष्टचित्तो भवेद्यदि ॥"
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
(उदकम् । इति निघण्टुः । १ । १२ ॥ "पूरयति जगत् प्रलयकाले पूर्य्यते अनेन तडागादि पात्रकं वा जगत् अस्मांगृणातिहेतुत्वात् । पौनादिको वाहुलकात् कीषप्रत्ययः ईकारस्योकारादेशः स च पकारात् परो रेफः ।" इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । १६१ । ८ ।
"चरकुम्भः प्रथमं आषमान
उदक्तसमुदाहृत वा पुरीषात् ॥"
"पुरीषात् सर्व्वकामानां पूरकाद्रसवात् ॥"
इति तद्भाष्ये सायनः ॥)
पुरीषणः, पुं, (पुरीं देहात् [illegible] पुरीषम् ।
पुरी + [illegible]
त्रिकाण्डशेषः ॥

पुरीषमः, पुं, (पुरीषं मिमीते इति । मा + कः ।) माषः । इति त्रिकाण्डशेषः ॥
पुरुः, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ + "पृभिदिव्यधिगृधिधृषिहृषिभ्यः ।" उणा० १ । २४ । इति कुः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् । "उरण् रपरः ।" १ । १ । ५१ । इति रपरत्वम् ।) देवलोकः । नृपभेदः । स च ययातेः कनिष्ठपुत्रः । (पूरुरित्यपि पाठः ।) परागः । इति मेदिनी । रे, ५८ ॥ दैत्यः । इत्युणादिकोषः ॥ नदीभेदे, त्रि । इति शब्दरत्नावली ॥ (राजविशेषः । यथा, महाभारते । २ । ४ । २० ।
"सुकर्म्मा चेकितानश्च पुरुश्चामित्रकर्षणः ॥"
चाक्षुषमनोः पुत्रभेदः । यथा, मार्कण्डेये । ७६ । ५५ ।
"ऊरुपुरुशतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
पर्व्वतभेदः । यथा, महाभारते । ३ । ९० । २२ ।
"पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः ।
भृगुर्यत्र तपस्तेपे महर्षिगणसेविते ॥"
शरीरम् । यथा, शङ्करविजये । १३ अध्याये ।
"पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥")
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६२ ॥ (यथा, नैषधे । १९ । ५ ।
"स्फुरति तिमिरस्तोमः पञ्चषाश्च दृशोचकैः
पुरुसितगरुच्छच्छदपुटस्फुटचुम्बितः ॥")
पुरुकुत्सः, पुं, इन्द्ररिपुविशेषः । यथा,—
"इन्द्रो विभक्तिदेवानां तद्रिपुः पुरुकुत्सकः ।
जघान हस्तिरूपेण भगवान्मधुसूदनः ॥"
इति गारुडे ८० अध्यायः ॥
पुरुदंशकः, पुं, (पुरु बहुलं यथा स्यात्तथा दशतीति । दन्श + क्वुन् ।) हंसः । इति त्रिकाण्डशेषः ॥
पुरुदंशा, [स्] पुं, (पुरुं दैत्यविशेषं दशति हिनस्तीति । दन्श + असुन् ।) इन्द्रः । इति जटाधरः ॥
पुरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर + "पुरः कुषन् ।" उणा० ४ । ७४ । इति कुषन् ।) पिपर्त्ति पूरयति बलं यः, पुरि देहे शेते य इति वा । पुमान् । (यथा, मनौ । १ । ३२ ।
"द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥")
तत्पर्य्यायः । पूरुषः २ ना ३ नरः ४ पञ्चजनः ५ पुमान् ६ अथान्यः ७ अधिकारी ८ कर्म्माङ्गः ९ जनः १० अर्थवान् ११ । इति राजनिर्घण्टः ॥ मनुष्यः १२ मानवः १३ मर्त्त्यः १४ मानुषः १५ मनुजः १६ । इति शब्दरत्नावली ॥ रतिकरासः १७ धनकामपरमा १८ मदनमादकाङ्गः १९ [illegible] २० । इति कविकल्पलता ॥
[illegible] दः । यथा,—
[illegible] । इमां व्याप्तिचतुष्टयम् ॥"

"मृदुवचनसुशीलः कोमलाङ्गः सुवेशः
सकलगुणनिधानः सत्यवादी शशोऽयम् ॥ १ ॥
वहति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ॥ २ ॥
बहुगुणबहुबन्धुः शीघ्रकामी गणाढ्यः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥ ३ ॥
उदरकठिनगात्रः स्थूलवक्त्राधरौष्ठो
हयवदनगात्रो घोरदीर्घो हि वाजी ॥" ४ ॥
इति रतिमञ्जरी ॥ ० ॥
तस्य पञ्चविधत्वं यथा,—
"भावे त्यागी गुणे रागी भोगी परिजने सह ।
शास्त्रे बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः ॥"
इति प्राचीनाः ।
जितेन्द्रियस्य पुरुषत्वं यथा,—
"या स्त्रीयां न मदं कुर्य्यात् स सुखी पुरुषो जितेन्द्रियः ।
तस्मिंश्च यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुडे १६ अध्यायः ॥ ० ॥
(अस्य लक्षणादिकं यथा,—
"उन्मानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनूकमादौ ।
क्षेत्रं मृजाञ्च विधिवत् कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतञ्च ॥
अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ सुनिगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥
शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ।
मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छित्तिदौ
ब्रह्मघ्नौ परिपक्वमृद्द्युतितलौ पीतावगम्यारतौ ॥
प्रविरलतनुरोमवृत्तजङ्घा
द्विरदकरप्रतिमैर्वरोरुभिश्च ।
उपचितसमजानवश्च भूपा
धनरहिताः श्वशृगालतुल्यजङ्घाः ॥
रोमैकैकं कूपके पार्थिवानां
द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
त्र्याद्यैर्निःस्वा मानवा दुःखभाजः
केशाश्चैवं निन्दिताः पूजिताश्च ॥
निर्म्मांसजानुर्म्रियते प्रवासे
सौभाग्यमल्पैर्विकटैर्दरिद्राः ।
स्त्रीनिर्जिताश्चापि भवन्ति निम्नै
राज्यं समांसैश्च महद्भिरायुः ॥
लिङ्गेऽल्पे धनवानपत्यरहितः स्थूलेऽपि हीनो धनै-
र्मेढ्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान् ।
दारिद्र्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते
मूत्रग्रन्थियुते सुखी मृदु करोत्यन्तं प्रमेहादिभिः ॥

कोशनिगूढैर्भूपा दीर्घैर्भग्नैश्च वित्तपरिहीनाः ।
ऋजुवृत्तशेफसो लघुशिरालशिश्नाश्च धनवन्तः ॥
जलमृत्युरेकवृषणो विषमैः स्त्रीचञ्चलः समैः क्षितिपः ।
ह्रस्वायुश्चोद्बद्धैः प्रलम्बवृषणस्य शतमायुः ॥
रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च ।
सुखिनः सशब्दमूत्रा निःस्वा निःशब्दधाराश्च ॥
द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्त्तवलितमूत्राभिः ।
पृथ्वीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः ॥
एकैव मूत्रधारा वलिता रूपप्रधानसुतदात्री ।
स्निग्धोन्नतसममणयो धनवनितारत्नभोक्तारः ॥
मणिभिश्च मध्यनिम्नैः कन्यापितरो भवन्ति निःस्वाश्च ।
बहुपशुभाजो मध्योन्नतैश्च नात्युल्बणैर्धनिनः ॥
परिशुष्कबस्तिशीर्षैर्धनरहिता दुर्भगाश्च विज्ञेयाः ।
कुसुमसमगन्धशुक्रा विज्ञातव्या महीपालाः ॥
मधुगन्धे बहुवित्ता मत्स्यसगन्धे बहून्यपत्यानि ।
तनुशुक्रः स्त्रीजनको मांससगन्धो महाभोगी ॥
मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्रः ।
शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाल्पायुः ॥
निःस्वोऽतिस्थूलस्फिक् समांसलस्फिक् सुखान्वितो भवति ।
व्याघ्रान्तोऽध्यर्धस्फिग् मण्डूकस्फिग् नराधिपतिः ॥
सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः ।
समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः ॥
अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसन्त्यक्ताः ।
समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः ॥
उन्नतकुक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकुक्षाः ।
सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव ॥
परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः ।
स्वल्पा त्वदृश्यनिम्ना नाभिः क्लेशावहा भवति ॥
वलिमध्यगता विषमा शूलाबाधं करोति नैःस्वञ्च ।
शाठ्यं वामावर्त्ता करोति मेधां प्रदक्षिणतः ॥
पार्श्वायता चिरायुषमुपरिष्टाच्चेश्वरं गवाढ्यमधः ।
शतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते ॥
शस्त्रान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथासङ्ख्यम् ।
एकद्वित्रिचतुर्भिर्वलिभिर्विद्यान्नृपं त्वबलिम् ॥
विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः ।
ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव ॥
मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्त्तरोमभिर्भूपाः ।
विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः ॥

सुभगा भवन्त्यनुद्बद्धचूचुका निर्धना विषमदीर्घैः ।
पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः सुखिनः ॥
हृदयं समुन्नतं पृथु न वेपनं मांसलञ्च नृपतीनाम् ।
अधनानां विपरीतं खररोमचितं शिरालञ्च ॥
समवक्षसोऽर्थवन्तः पीनैः शूरास्त्वकिञ्चनास्तनुभिः ।
विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च ॥
विषमैर्विषमो जत्रुभिरर्थविहीनोऽस्थिसन्धिपरिणद्धैः ।
उन्नतजत्रुर्भोगी निम्नैर्निःस्वोऽर्थवान् पीनैः ॥
चिपिटग्रीवो निःस्वः शुष्का सशिरा च यस्य वा ग्रीवा ।
महिषग्रीवः शूरः शस्त्रान्तो वृषसमग्रीवः ॥
कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षको भवति ।
पृष्ठमभग्नमरोमशमर्थवतामशुभदमतोऽन्यत् ॥
अस्वेदनपीनोन्नतसुगन्धिसमरोमसङ्कुलाः कक्षाः ।
विज्ञातव्या धनिनामतोऽन्यथार्थैर्विहीनानाम् ॥
निर्मांसौ रोमचितौ भग्नावल्पौ च निर्धनस्यांसौ ।
विपुलावव्युच्छिन्नौ सुश्लिष्टौ सौख्यवीर्यवताम् ॥
करिकरसदृशौ वृत्तावाजानुविलम्बिनौ समौ पीनौ ।
बाहू पृथिवीशानामधनानां रोमशौ ह्रस्वौ ॥
हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम् ।
मेधाविनाञ्च सूक्ष्माश्चिपिटाः परकर्मनिरतानाम् ॥
स्थूलाभिर्धनरहिता बहिर्नताभिश्च शस्त्रनिर्याणाः ।
कपिसदृशकरा धनिनो व्याघ्रोपमपाणयः पापाः ॥
मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिर्भूपाः ।
हीनैर्हस्तच्छेदः श्लथैः सशब्दैश्च निर्द्रव्याः ॥
पितृवित्तेन विहीना भवन्ति निम्नेन करतलेन नराः ।
संवृतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः ॥
विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाक्षाभैः ।
पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः ॥
तुषसदृशनखाः क्लीबाश्चिपिटैः स्फुटितैश्च वित्तसन्त्यक्ताः ।
कुनखविवर्णैः परतर्ककाश्च ताम्रैश्च भूपतयः ॥
अङ्गुष्ठयवैराढ्याः सुतवन्तोऽङ्गुष्ठमूलगैश्च यवैः ।
दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥
स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निःस्वानाम् ।
विरलाङ्गुलयो निःस्वा धनसञ्चयिनो घनाङ्गुलयः ॥
तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः ।

मीनयुगाङ्कितपाणिर्नित्यं सत्रप्रदो भवति ॥
वज्राकारा धनिनां विद्याभाजान्तु मीनपुच्छनिभाः ।
शङ्खातपत्रशिबिकागजाश्वपद्मोपमा नृपतेः ॥
कलशमृणालपताकाङ्कुशोपमाभिर्भवन्ति निधिपालाः ।
दामनिभाभिश्चाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ॥
चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा रेखाः ।
कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ॥
मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः ।
वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ॥
वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः ।
अङ्गुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः सूक्ष्माः ॥
रेखाः प्रदेशिनीगाः शतायुषां कल्पनीयमूनाभिः ।
छिन्नाभिर्द्रुमपतनं बहुरेखारेखिणो निःस्वाः ॥
अतिकृशदीर्घैश्चिबुकैर्निर्द्रव्या मांसलैर्धनोपेताः ।
बिम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरस्वाः ॥
ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः ।
स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ॥
जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां ज्ञेया ।
श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु ॥
वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समञ्च भूपानाम् ।
विपरीतं क्लेशभुजां महामुखं दुर्भगाणाञ्च ॥
स्त्रीमुखमनपत्यानां शाठ्यवतां मण्डलं परिज्ञेयम् ।
दीर्घं निर्द्रव्याणां भीरुमुखाः पापकर्माणः ॥
चतुरस्रं धूर्त्तानां निम्नं वक्रञ्च तनयरहितानाम् ।
कृपणानामतिह्रस्वं सम्पूर्णं भोगिनां कान्तम् ॥
अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्नतञ्चैव ।
रक्तैः परुषैश्चौराः श्मश्रुभिरल्पैश्च विज्ञेयाः ॥
निर्मांसैः कर्णैः पापमृत्यवश्चिपिटैः सुबहुभोगाः ।
कृपणाश्च ह्रस्वकर्णाः शङ्कुश्रवणाश्च भूपतयः ॥
रोमशकर्णा दीर्घायुषश्च धनभागिनो विपुलकर्णाः ।
क्रूराः शिरावनद्धैर्व्यालम्बैर्मांसलैः सुखिनः ॥
भोगी त्वनिम्नगण्डो मन्त्री सम्पूर्णमांसगण्डो यः ।
सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ॥
छिन्नानुरूपयागम्यगामिनो दीर्घया तु सौभाग्यम् ।
आकुञ्चितया चौरः स्त्रीमृत्युः स्याच्चिपिटनासः ॥
धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षकाः क्रूराः ।
ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सभाग्यानाम् ॥

धनिनां शुभं सकृद् द्विचिपिच्छिन्नं क्षादि मान-
नादय ।
दीर्घायुषां प्रयुक्तं विज्ञेयं संहनमेव ॥
मद्यदलाभैर्धनिनो रक्तान्तविलोचनाः श्रियो-
भाजः ।
मधुपिङ्गलैर्महार्थाः मार्जारविलोचनाः पापाः ॥
हरिणाक्षा मण्डललोचनाश्च जिह्मैश्च लोचनै-
श्चौराः ।
क्रूराः केकरनेत्रा गजसदृशदृशश्च भूपतयः ॥
ऐश्वर्यं गम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः ।
अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवति ॥
मन्त्रित्वं स्थूलदृशां श्यावाक्षाणाञ्च भवति
सौभाग्यम् ।
दीना दृष्टिःस्वानां स्निग्धा विपुलार्थभोगव-
ताम् ॥
अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरति-
सुखिनः ।
विषमभ्रुवो दरिद्रा बालेन्दुनतभ्रुवः सधनाः ॥
दीर्घासंसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीनाः ।
मध्यविनतभ्रुवो ये ते सक्ताः स्त्रीष्वगम्यासु ॥
उन्नतविपुलैः शङ्खैर्धन्या निम्नैः सुतार्थसन्त्यक्ताः ।
विषमललाटा विधना धनवन्तोऽर्द्धेन्दुसदृशेन ॥
शुक्तिविशालैराचार्यता शिरासन्ततैरधर्म-
रताः ।
उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ॥
निम्नललाटा वधबन्धभागिनः क्रूरकर्मनिर-
ताश्च ।
अभ्युन्नतैश्च भूपाः कृपणाः स्युः सङ्कटललाटाः ॥
रुदितमदीनमनस्त्रं स्निग्धञ्च शुभावहं मनुष्या-
णाम् ।
रूक्षं दीनं प्रचुराश्रु चैव न शुभप्रदं पुंसाम् ॥
हसितं शुभदमकम्पं सनिमीलितलोचनञ्च
पापस्य ।
दुष्टस्य हसितमसकृत् सोन्मादस्यासकृत्प्रान्ते ॥
तिस्रो रेखाः शतजीविनां ललाटायताः स्थिता
यदि ताः ।
चतसृभिरवनीशत्वं नवतिश्चायुः सपञ्चाब्दा ॥
विच्छिन्नाभिश्चागम्यगामिनो नवतिरप्यरेखेण ।
केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ॥
पञ्चभिरायुः पञ्चाशदेकया चाविच्छिन्नाभिरपि षष्टिः ।
बहुरेखेण शतार्द्धं चत्वारिंशच्च वक्राभिः ॥
त्रिंशद्भ्रूलग्नाभिर्विंशतिकश्चैव वामवक्राभिः ।
क्षुद्राभिः स्वल्पायुर्न्यूनाभिश्चान्तरे कल्प्यम् ॥
परिमण्डलैर्गवाढ्याश्छत्राकारैः शिरोभिरव-
नीशाः ।
चिपिटैः पितृमातृघ्नाः करोटिशिरसां चिरा-
न्मृत्युः ॥
घटमूर्द्धा ध्वानरुचिर्द्विमस्तकः पापकृद्धनैस्त्यक्तः ।
निम्नन्तु शिरो महतां बहुनिम्नमनर्थदं भवति ॥
एकैकभवैः स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः ।
मृदुभिर्न चातिबहुभिः केशैः सुखभाग् नरेन्द्रो
वा ॥

बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रपरुष-
ह्रस्वाश्च ।
अतिकुटिलाश्चातिघनाश्च मूर्द्धजा वित्तहीना-
नाम् ॥
यद्यद्गात्रं रूक्षं मांसविहीनं शिरावनद्धञ्च ।
तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम् ॥
त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः ।
सप्तसु रक्तो राजा पञ्चसु दीर्घश्च सूक्ष्मश्च ॥

नाभिः स्वरः सत्त्वमिति प्रदिष्टं
गम्भीरमेतत्त्रितयं नराणाम् ।
उरो ललाटं वदनञ्च पुंसां
विस्तीर्णमेतत्त्रितयं प्रशस्तम् ॥
वक्षोऽथ कक्षा नखनासिकास्यं
कृकाटिका चेति षडुन्नतानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठं
ग्रीवा च जङ्घे च हितप्रदानि ॥
नेत्रान्तपादकरताल्वधरोष्ठजिह्वा
रक्ता नखाश्च खलु सप्त सुखावहानि ।
सूक्ष्माणि पञ्च दशनाङ्गुलिपर्वकेशाः
सार्द्धं त्वचा कररुहाश्च न दुःखितानाम् ॥
हनुलोचनबाहुनासिकाः
स्तनयोरन्तरमत्र पञ्चमम् ।
इति दीर्घमिदं तु पञ्चकं
न भवत्येव नृणामभूभृताम् ॥
इति चैत्रम् ।
छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान् बहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥
स्निग्धद्विजत्वङ्नखरोमकेश-
छाया सुगन्धा च महीसमुत्था ।
तुष्ट्यर्थलाभाभ्युदयान् करोति
धर्मस्य चाहन्यहनि प्रवृत्तिम् ॥
स्निग्धा सिताच्छहरिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जननीव चाप्या
छाया फलं तनुभृतां शुभमादधाति ॥
चण्डाधृष्या पद्महेमाग्निवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आग्नेयीति प्राणिनां स्याज्जयाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥
मलिनपरुषकृष्णा पापगन्धानिलोत्था
जनयति वधबन्धव्याधिनाशार्थनाशान् ।
स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा
निधिरिव गगनोत्था श्रेयसां नभ्यसत्त्वा ॥
छायाः क्रमेण कुजलाग्न्यनिलाम्बरोत्थाः
केचिद्वदन्ति दश ताश्च यथानुपूर्व्या ।
धर्म्यासनाम्बुरवसूतमनोऽनुमानां
तुल्यास्तु लक्षणफलैरिति तत्समासः ॥
इति छाया ।
करिवृषरथौघभेरीमृदङ्गसिंहाब्दनिःस्वना
भूपाः ।

गर्दभजर्जररूक्षस्वराश्च धनसौख्यसन्त्यक्ताः ॥
इति स्वरः ।
सप्त भवन्ति च सारा मेदोमज्जास्थि-
शुक्राणि ।
रुधिरं मांसं चेति प्राणभृतां तत्समासफलम् ॥
ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥
स्निग्धत्वक्का धनिनो मृदुभिः सुभगा विच-
क्षणास्तनुभिः ।
मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुताः ।
स्थूलास्थिरस्थिसारो बलवान् विद्यान्तगः सुरू-
पश्च ।
बहुगुरुशुक्राः सुभगा विद्वांसो रूपवन्तश्च ।
उपचितदेहो विद्वान् धनी सुरूपश्च मांस-
सारो यः ।
इति सारः ।
संहात इति च सुश्लिष्टसन्धिता सुखभुजां ज्ञेया ।
इति संहतिः ।
स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंज्ञः ।
सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ।
इति स्नेहः ।
द्युतिमान् वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थ-
वताम् ।
रूक्षो धनहीनानां शुद्धः शुभदो न सङ्कीर्णः ।
इति वर्णः ।
साध्यमनूकं वक्त्राद् गोवृषशार्दूलसिंहगरुडमुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ।
वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुख-
भाजः ।
गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वसुख-
दुःखम् ।
अष्टशतं षण्णवतिः परिमाणं चतुरशीतिरिति
पुंसाम् ।
उत्तमसमहीनानामङ्गुलसङ्ख्यास्वमानेन ।
इत्युन्मानम् ।
भारार्द्धतनुः सुखभाक् तुलितोऽतो दुःखभाग्
भवति ।
भारोऽतीवाढ्यानामध्यर्द्धः सर्वधरणीशः ।
विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभि-
रब्दैः ।
अर्हति मानोन्मानं जीवितभागे चतुर्थे वा ।
इति मानम् ।

भूजलशिखिवायुगगन-
सुरनरराक्षसपिशाचतिर्यगाम् ।
सत्त्वेन भवति पुरुषो
लक्षणमेतद्भवति तेषाम् ॥
महीस्वभावः शुभपुष्पगन्धः
सम्भोगवान् सुश्वसनः स्थिरश्च ।
तोयस्वभावो बहुतोयपायी
प्रियाभिभाषी रसभोजनश्च ॥
अग्निप्रकृत्या चपलोऽतितीक्ष्ण-
श्चण्डः क्षुधालुर्बहुभोजनश्च ।

वायोः स्वभावेन चलः कृशश्च
शीघ्रं च कोपस्य वशं प्रयाति ।
स्त्रप्रकृतिर्निपुणो विहृतास्यः
शब्दगतेः कुशलः सुषिराङ्गः ।
त्यागयुतो पुरुषो मृदुकोपः
स्नेहरतश्च भवेत्सुरसत्त्वः ॥
मर्त्यसत्त्वसंयुतो गीतभूषणप्रियः ।
संविभागशीलवान्नित्यमेव मानवः ॥
तीक्ष्णप्रकोपः खलचेष्टितश्च
पापश्च सत्त्वेन निशाचराणाम् ।
पिशाचसत्त्वश्चपलो मलाक्तो
बहुप्रलापी च समुल्वणाङ्गः ॥
भीरुः क्षुधालुर्बहुभुक् च यः स्यात्
ज्ञेयः स सत्त्वेन नरस्तिरश्चाम् ।
एवं नराणां प्रकृतिः प्रदिष्टा
यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् ॥
इति प्रकृतिः ॥
शार्दूलहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनाञ्च भूपाः ।
येषाञ्च शब्दरहितं स्तिमितञ्च यातं
तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः ॥
इति गतिः ।
श्रान्तस्य यानमशनञ्च बुभुक्षितस्य
पानं तृषापरिगतस्य भयेषु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले
धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ॥
पुरुषलक्षणमुक्तमिदं मया
मुनिमतान्यवलोक्य समासतः ।
इदमधीत्य नरो नृपसम्मतो
भवति सर्व्वजनस्य च वल्लभः ॥"
इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पुरुषलक्षणं नामाष्टषष्टितमोऽध्यायः ॥ * ॥)
कृष्णभक्तपुरुषस्य गोविन्दपदाश्रयत्वं यथा,—
"स्त्रियो वा पुरुषो वापि ह्याततायी नपुंसकः ।
भक्तत्वे गणनीयश्चेद्गोविन्दपदमाश्रयेत् ॥"
इति पाद्मोत्तरखण्डे ६६ अध्यायः ॥
पुरुषार्थो मध्ये गुरवो यथा,—
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
आत्मा । इत्यमरः । ३ । ३ । २१८ ॥ (यथा, भागवते । ७ । १४ । ३७ ।
"पुराण्यनेन सृष्टानि नृतिर्य्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥"
यथा च शङ्करविजये २६ अध्याये ।
"पुरुषं हि शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥")
नागन्नागवृक्षः । पुन्नागपादपः । इति मेदिनी । षे, ३१ ॥ (तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कुम्भीकः पुन्नागस्तुङ्गः पुन्नागो रक्तकेशरः ॥")
विष्णुः । इति शब्दरत्नावली ॥ (स हि पुराणपुरुष एव । यथा, हरिवंशे । १२८ । २० ।
"एवं पुराणः पुरुषो विष्णुर्वेदेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ॥"
शिवः । यथा, महाभारते । १४ । ८ । १४ ।
"याम्यायाव्यक्तरूपाय सद्वृत्ते शङ्कराय च ।
क्षेम्याय हरिकेशाय स्थाणवे पुरुषाय च ॥"
जीवः । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे । ४ । १६ ।
"प्रकृतिः क्षरमित्युक्तं पुरुषोऽक्षर उच्यते ।
ताविमौ प्रेरयत्यन्यः स परः परमेश्वरः ॥")
दुर्गा । यथा,—
"महानिति च योगेषु प्रधानश्चैव कथ्यते ।
त्रिगुणा व्यतिरिक्ता सा पुरुषश्चेति चोच्यते ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्य पञ्चविंशतितत्त्वात्मकत्वं जड़त्वञ्च यथा,—
"एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः ।
ईश्वरेच्छावशः सोऽपि जड़ात्मा कथ्यते बुधैः ॥"
इति मात्स्ये तत्त्वकथनावसरे ७ अध्यायः ॥
(गन्धस्थानकभेदः । यथा, माघे । ५ । ५६ ।
श्लोकटीकायां मल्लिनाथधृतवचनम् ।
"पश्चिमेनाग्रपादेन भुवि स्थित्वाग्रपादयोः ।
ऊर्द्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥")
मेषमिथुनसिंहतुलाधनुःकुम्भराशयः । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
पुरुषग्रहा यथा,—
"भौमार्कजीवाः पुरुषाः क्लीवौ सोमजभानुजौ ।
स्त्र्याख्यौ भार्गवचन्द्रौ द्वौ सत्पतित्वात्तथोच्यते ॥"
पुरुषनक्षत्राणि यथा,—
"हस्तो मूलश्रवणपुनर्व्वसुमृगशिरस्तथा पुष्यः ।
गर्भाधानादिकार्य्येषु पुन्नामायं गणः शुभदः ॥"
इति ज्योतिस्तत्त्वम् ॥
तद्वैदिकपर्य्यायः । मनुष्याः १ नरः २ धवाः ३ जन्तवः ४ विशः ५ क्षितयः ६ कृष्टयः ७ चर्षणयः ८ नहुषः ९ हरयः १० मर्य्याः ११ मर्त्त्याः १२ मर्त्ताः १३ व्राताः १४ तुर्व्वशाः १५ द्रुह्यवः १६ आयवः १७ यदवः १८ अनवः १९ पूरवः २० जगतः २१ तस्थुषः २२ पञ्चजनाः २३ विवस्वन्तः २४ पृतनाः २५ । इति वेदनिघण्टौ २ अध्यायः ॥
पुरुषकं, क्ली, पुं, (पुरुष एवेति । पुरुष + स्वार्थे कन् ।) घोटकानामूर्द्ध्वस्थितिः । इति त्रिकाण्डशेषः ॥ शीसपांओ इति हिन्दीभाषा ॥ (यथा, माघे । ५ । ५६ ।
"श्रोटयकौ पुरुषकोन्नमितात्यकायः ।"
"पुरुषकोऽश्वानां स्थानकभेदः । यदुक्तम्,—
'पश्चिमेनाग्रपादेन भुवि स्थित्वाग्रपादयोः ।
ऊर्द्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥'
पुरुष एव पुरुषकस्तेन पुरुषकेण स्थानकेनोन्नमित ऊर्द्ध्वस्थितोऽग्रकायः पूर्व्वकायो यस्य स तथोक्तः ।" इति तट्टीकायां मल्लिनाथः ॥)
पुरुषकारः, पुं, (पुरुषस्य कारः करणम् ।) पुरुषस्य कृतिः । पौरुषम् । चेष्टा । यथा,—
मनुरुवाच ।
"दैवे पुरुषकारे च किं ज्यायस्तं ब्रवीहि मे ।
अत्र मे संशयो देव छेत्तुमर्हस्यशेषतः ॥
मत्स्य उवाच ।
स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्ज्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलन्तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशीलिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ! ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्ज्जिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवं न सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगाद्दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं नृभिः ।
एवन्ते प्राप्नुवन्तीह परलोकफलं ध्रुवम् ॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सर्व्वप्रयत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्त्वालसान् दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नाद्वृणुते नृपेन्द्र !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"
इति मात्स्ये दैवपुरुषकारको नाम १९५ अध्यायः ॥
(यथा च नीतिशास्त्रे ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")
पुरुषकुञ्जरः, पुं, (पुरुषेषु कुञ्जरः श्रेष्ठ इति । पुरुषः कुञ्जर इवेत्युपमितसमासो वा ।) पुरुषश्रेष्ठः । यथा, अमरे । ३ । १ । ५९ ।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ॥"
(यथा, रामायणे । २ । १० । ५ ।
"हन्तानार्य्ये ! ममामित्रे ! सकामा भव केकयि ! ।
मृते मयि गते रामे वनं पुरुषकुञ्जरे ॥")
पुरुषत्रा, व, (द्वितीयासप्तम्यर्थवृत्तेः पुरुषशब्दात् "देवमनुष्यपुरुषपुरुमर्त्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ।" ५ । ४ । ५६ । इति त्रा ।) पुरुषम् । पुरुषौ । पुरुषान् । पुरुषे । पुरुषयोः । पुरुषेषु ॥ देवादिशब्देभ्योऽप्युक्तविधित्रा आणप्रत्ययनिष्पन्नम् । देवादिस्तु देवमनुष्यपुरुषपुरुमर्त्त्यबहु इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः । (यथा, ऋग्वेदे । १ । ३१ । ८ ।

"उरुष्येषु कारो प्रति नो युवस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥"
"पुरुषत्रा पुरुषेषु ।" इति तद्भाष्ये सायनः ।)

पुरुषत्वं, क्ली, पुरुषस्य भावः । पुरुषशक्तिरसाधारणधर्मः । पुरुषशब्दात् भावार्थे त्वप्रत्ययः । (यथा, महाभारते । ५ । १९८ । १३ ।
"इतिष्यसि रटे वियं पुरुषत्वञ्च लप्स्यसे ॥")
पुंस्त्वञ्च ॥

पुरुषदघ्नः, त्रि, पुरुषपरिमाणः । पुरुषशब्दात् परिमाणार्थे दघ्नट्प्रत्ययः । इति व्याकरणम् ॥

पुरुषदन्तिका, स्त्री, (पुरुषस्य दन्त इव आकृतिर्यस्याः । कप् । कापि अत इत्वम् ।) मेदा । इति राजनिर्घण्टः ॥ (मेदाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

पुरुषद्वयसः, त्रि, पुरुषपरिमाणः । पुरुषशब्दात् परिमाणार्थे द्वयसट्प्रत्ययनिष्पन्नः । इति व्याकरणम् ॥

पुरुषद्वेषी, [न्] त्रि, पुरुषद्वेषशीलः । पुरुषशब्दोपपदाद्द्विषधातोर्णिनिप्रत्ययनिष्पन्नः । इति व्याकरणम् ॥

पुरुषनागः, पुं, (पुरुषो नाग इव ।) पुरुषश्रेष्ठः । इत्यमरः । ३ । १ । ५९ ॥

पुरुषपुङ्गवः, पुं, (पुरुषः पुङ्गव इव ।) पुरुषश्रेष्ठः । इत्यमरः । ३ । १ । ५९ ॥

पुरुषपुण्डरीकः, पुं, (पुरुषेषु पुण्डरीकः श्रेष्ठ इत्यर्थः । यद्वा, पुरुषः पुण्डरीको व्याघ्र इवेत्युपमितसमासः ।) पुरुषव्याघ्रः । नरश्रेष्ठः । इत्यमरः । ३ । १ । ५९ ॥ जिनराजविशेषः । इति हेमचन्द्रः । ३ । ३६० ॥

पुरुषमात्रः, त्रि, पुरुषपरिमाणः । पुरुषशब्दात् परिमाणार्थे मात्रट्प्रत्ययः । इति व्याकरणम् ॥ (यथा, तैत्तिरीयसंहितायाम् । ५ । २ । ५ । १ ।
"पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितः ॥")

पुरुषर्षभः, पुं, (पुरुष ऋषभ इव ।) पुरुषश्रेष्ठः । इत्यमरः । ३ । १ । ५९ ॥

पुरुषव्याघ्रः, पुं, (पुरुषो व्याघ्र इव ।) पुरुषश्रेष्ठः । इत्यमरः । ३ । १ । ५९ ॥ (यथा, महाभारते । ३ । १९ । ३३ ।
"एवमेते पुरुषव्याघ्राः पाण्डवा युद्धशालिनः ॥")

पुरुषशार्दूलः, पुं, (पुरुषः शार्दूल इव ।) पुरुषश्रेष्ठः । इत्यमरः । ३ । १ । ५९ ॥ (यथा, महाभारते । ३ । ८१ । ६ ॥
"तत्र च भ्रातरं वीरमपश्यं धनञ्जयम् ।
प्रकृत्यार्थहितं तत्र मे विनयो महान् ।
आसीत् पुरुषशार्दूल ! दृष्ट्वा पार्थं तपान्वितम् ॥")

पुरुषसिंहः, पुं, (पुरुषः सिंह इव पुरुषेषु सिंहः श्रेष्ठो वा ।) पुरुषश्रेष्ठः । इत्यमरः । ३।१।५९॥ जिनराजविशेषः । सत्पुरुषाभ्रातृविशेषः । इति हेमचन्द्रः । ३ । ३६० ॥

पुरुषादः, पुं, (पुरुषाणां जिनपुरुषाणामादः प्रथमः ।) आदिनाथनामा जिनदेवः । इति धनञ्जयः ॥ (पुरुषेषु जीवेषु आद्यः प्रथमः । पुरुषाणामाद्य इति वा ।) विष्णुः ॥

पुरुषाधमः, पुं, (पुरुषेषु अधमोऽतिनिकृष्टः ।) निकृष्टनरः । यथा, शान्तिशतके ।
"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति । यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥"

पुरुषार्थः, पुं, (पुरुषस्य अर्थः ।) पुरुषस्य प्रयोजनम् । स च चतुर्विधः । यथा, अग्निपुराणे ।
"धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः ॥"
(यथा, मनुः । ७ । १०० ।
"एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् ॥")
गोस्वामिमते भक्तिः पञ्चमपुरुषार्थः ॥ (पुरुषकारः । यथा, महाभारते । ३ । १७९ । २७ ।
"दैवं पुरुषकारेण को वञ्चयितुमर्हति ।
दैवमेव परं मन्ये पुरुषार्थो निरर्थकः ॥")

पुरुषास्थिमाली, [न्] पुं, (पुरुषाणामस्थीनि तेषां माला अस्यास्तीति । पुरुषास्थिमाला + व्रीह्यादित्वात् इनिः ।) शिवः । इति हेमचन्द्रः । २ । ११२ ॥

पुरुषोत्तमः, पुं, (पुरुषेषु उत्तमः ।) विष्णुः । इत्यमरः ।१।१।२१॥ (यथा, रघुः । ३ । ४९ ।
"हरिर्यथैकः पुरुषोत्तमः स्मृतः
महेश्वरस्त्र्यम्बक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं
द्वितीयगामी न हि शब्द एष नः ॥"
एतन्निरुक्तिर्यथा, महाभारते । ५ । ७० । १० ।
"पुरान्न सदनाच्चापि ततोऽसौ पुरुषोत्तमः ॥")
जिनराजविशेषः । तत्पर्यायः । सोमभूः २ । इति हेमचन्द्रः । ३ । ३५९ ॥ पुरुषेषु मध्ये उत्तमः । यथा, धर्मपुराणे ।
"विधेयस्य मभावस्य पुरुषस्यात्मवस्य च ।
अरिमित्रोदासीनेषु समो यस्य सदा भवेत् ॥
समो धर्मः समः स्वर्गः समो हि परमं तपः ।
यस्यैव मानसं नित्यं स नरः पुरुषोत्तमः ॥"
(पुरुषोत्तमो जगन्नाथोऽस्यास्तीति । अच् । उत्कलदेशैकदेशः । स तु नीलाचलानामन्तरम् । तत्र भगवती विमलाख्यैव विराजते । यथा, देवीभागवते । ७ । ३० । ६४ ।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥"
पत्रकर्तृविशेषः । स तु प्रयोगरत्नमालाव्याकरणस्य त्रिकाण्डशेषहारावलीकोषयोश्च कर्त्ता । अस्य कतिपयग्रन्था प्रथिताः ।)

पुरुहं, त्रि, (पुरु प्रचुरं हन्ति गच्छतीति । पुरु + हन गतौ + अन्येभ्योऽपीति डः ।) प्रचुरम् । इत्यमरः । ३ । १ । ६३ ॥

पुरुहु, त्रि, (पुरु प्रचुरं हन्ति गच्छतीति । हन गतौ + बाहुलकात् डुः ।) प्रचुरम् । इत्यमरटीकायां स्वामी ॥ (पुरुहूरित्यपि पाठः ॥)

पुरुहूतः पुं, (पुरु प्रचुरं हूतमाह्वानं यज्ञेषु यस्य । पुरु यथा स्यात्तथा हूयते यज्ञेष्विति वा । यद्वा, पुरूणि बहूनि हूतानि नामानि यस्य ।) इन्द्रः । इत्यमरः ।१।१।४५॥ (यथा, महाभारते । १ । १२३ । २५ ।
"पुरुहूतादयं जज्ञे कुन्त्यामेव धनञ्जयः ॥"
प्रचुरनामविशिष्टे, त्रि । यथा, भागवते । ८ । १ । १३ ।
"स विश्वकायः पुरुहूत ईशः
सत्यः स्वयंज्योतिरजः पुराणः ॥"
स्त्री, भगवती । सा तु पुष्करे पीठस्थाने तिष्ठति । यथा, देवीभागवते । ७ । ३० । ५५ ।
"त्रिसन्ध्ये त्रिपुरेश्वरीं प्राहुः पुरुहूता च पुष्करे ।")

पुरूरवाः [स्] पुं, (पुरु प्रचुरं यथा स्यात्तथा रौतीति । "पर्जन्यश्च पुरूणां च यच्चक्रे पुरूरवाः ।" ३।६०।२४। इति महाभारतोक्तत्वात् पुरौ पर्वते रौतीति वा । पुरु + रु + "पुरूरवाः ।" उणा० ४ । २३१ । इति असिप्रत्ययेन निपातनात् साधुः ।) बुधस्य पुत्रः । स तु चन्द्रवंशीयादिराजः । तत्पर्यायः । सौमः १ ऐलः २ उर्वशीरमणः ३ । इति हेमचन्द्रः ।
यथा, अग्निपुराणे ।
"ततो बुधात्मजं प्राप्य ततः ख्यातिं तु सोऽगमत् ।
बुधेनाप्सरसामध्ये मेधुनायोपलालिता ।
सोमपुत्रादबुधात्तस्यां जज्ञे पुरूरवाः ।
जनयित्वा ततः सा तं पुनः सुद्युम्नतां गता ॥"
अपि च ।
"इलोदरे च धर्मिष्ठं बुधः पुत्रमजीजनत् ।
अश्वमेधशतं साग्रमकरोद्यः महीपतिः ।
पुरूरवा इति ख्यातः सर्वलोकनमस्कृतः ।
हिमवच्छिखरे रम्ये आराध्य स जनार्दनम् ।
लोकैश्वर्यमवाप्याग्र्यं सप्तद्वीपपतिस्तदा ।
केशिप्रभृतयो दैत्याः सहस्रशः ।
उर्वशी यस्य पत्नीत्वमगात् रूपसौन्दर्ययोः ।
सप्तद्वीपा वसुमती सशैलवनकानना ।
धर्मेण पालिता तेन सर्वलोकहितैषिणा ।
चामरग्राहिणी कीर्तिः सर्वदैवाङ्गवाहिनी ।
विष्णुप्रसादाद्देवेन्द्रो ददावर्द्धासनं तदा ।
धर्मार्थकामान्धर्मेण समभेनाभ्यपालयत् ।
धर्मार्थकामास्तं द्रष्टुमाजग्मुः कौतुकात् पुरा ॥"
इति मात्स्ये २४ अध्यायः ॥
(अस्य विशेषविवरणन्तु हरिवंशे २६ अध्याये द्रष्टव्यम् ॥) विश्वदेवः । इति धराधरपार्वणश्राद्धदेवः । यथा,—
"पुरूरवा माद्रवाश्च पार्वणे समुदाहृतौ ।"
इति श्राद्धतत्त्वे ब्रह्मोक्तः ।

पुरोगः, त्रि, (पुरोऽग्रे गच्छतीति । पुरस् + गम + डः ।) अग्रगामी । इत्यमरः । ३ । १ । ८३ ॥
(यथा, रघुः । ६ । ५५ ।
"ज्यावातरेखे सुभुजो भुजाभ्यां
बिभर्ति यश्चापभृतां पुरोगः ॥")
प्रधानः । इति हेमचन्द्रः । ६ । ८३ ॥

पुरोगतिः, पुं, (पुरोऽग्रे गतिर्गमनमस्य ।) कुक्कुरः । इति धरणिः ॥ अग्रगे, त्रि ॥

पुरोगमः, त्रि, (पुरोऽग्रे गच्छतीति । गम + अच् ।) अग्रगामी । इत्यमरः । ३ । ८ । ७२ ॥ (यथा, महाभारते । ६ । १९ । १० ।
"यं दृष्ट्वा पार्थिवाः सर्व्वे दुर्य्योधनपुरोगमाः ।
निवर्त्तिष्यन्ति संत्रस्ताः सिंहं क्षुद्रमृगा यथा ॥"
कुक्कुरे, पुं । इति हेमचन्द्रटीका ॥)

पुरोगामी, [न्] त्रि, (पुरोऽग्रे गच्छतीति । गम + णिनिः ।) अग्रगामी । तत्पर्य्यायः । पुरोगः २ अग्रेसरः ३ प्रष्ठः ४ अग्रतःसरः ५ पुरःसरः ६ पुरोगमः ७ । इत्यमरः । ३।८।७२॥ नायीरः ८ प्रसरः ९ । इति शब्दरत्नावली ॥

पुरोटिः, पुं, (पुरोऽटतीति । अट + इन् ।) पत्रभङ्गारः । इति त्रिकाण्डशेषः ॥ रायभाटि इति भाषा ॥ (पुरसंस्कारः । इति हारावली ॥ १६४ ॥)

पुरोडाः, [श्] पुं, (पुर अग्रे दाश्यते दीयते इति । पुरस् + दाश्ट दाने + क्विप् । निपातनात् दस्य डः ।) हविः । इति मुग्धबोधव्याकरणम् ॥

पुरोडाशः, पुं, (पुरोऽग्रे दाश्यते दीयते इति । दाश + कर्म्मणि घञ् । निपातनात् दस्य डः ।) हविर्भेदः । स तु यवचूर्णनिर्म्मितरोटिकाविशेषः । (यथा, मनुः । ६ । ११ ।
"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत् पृथक् ॥")
पिष्टकचमसौ । हुतशेषः । इति मेदिनी । शे, ३८ ॥ सोमरसः । इति हेमचन्द्रः ॥

पुरोडाश्यं, त्रि, (पुरोडाशाय हितमिति । पुरोडाश + यत् ।) पुरोडाशीयम् । हविर्योग्यम् । पुरोडाशाय हितम् । यथा, भट्टिः । ५ । १२ ।
"आमिक्षीयं दधि क्षीरं पुरोडाश्यं तथौषधम् ।
हविर्हैयङ्गवीनञ्च नाप्युपघ्नन्ति राक्षसाः ॥"

पुरोद्भवा, स्त्री, (पुरे उद्भवो यस्याः ।) महामेदा । इति रत्नमाला ॥

पुरोधाः, [स्] पुं, (पुरोऽग्रे दधाति मङ्गलमिति । पुरस् + धा + "पुरसि च ।" उणा० ४ । २३० । इति असिः । स च डित् ।) पुरोहितः । इत्यमरः । २ । ८ । ५ ॥ (यथा, रघुः । ३ । १८ ।
"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते ॥")

पुरोभागी, [न्] त्रि, (पुरः पूर्व्वमेव भजते इति । पुरस् + भज + णिनिः ।) दोषमात्रदर्शी । इत्यमरः । ३ । १ । ४६ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ८३ ।
"कुपितोऽपि न यत्नेनो न्यवधीदागमोचितः ।
तैनेवागान् पुरोभागिविस्तर्कातिङ्गपामताम् ॥")
अपकारी च ॥

पुरोहितः, पुं, पुरो दृष्टादृष्टफलेषु कर्म्मसु धीयते आरोप्यते यः । (यद्वा, पुर आदावेव हितं मङ्गलं यस्मात् ।) शान्त्यादिकर्त्ता । तत्पर्य्यायः । पुरोधाः २ । इत्यमरः । २ । ८ । ५ ॥ धर्म्मकर्म्मादिकारकः ३ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा, चाणक्ये ।
"वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादवचोयुक्त एष राजपुरोहितः ॥"
तस्य वर्ज्जनीयलक्षणं यथा,—
"काणं यज्ञमपुत्त्रं यानभिज्ञमजितेन्द्रियम् ।
न ह्रस्वं व्याधितं वापि नृपः कुर्य्यात् पुरोहितम् ॥"
इति कालिकापुराणम् ॥ * ॥
पुरोहिते वर्णनीयानि यथा,—
"पुरोहितो हितो वेदस्मृतिज्ञः सत्यवाक् शुचिः ।
ब्रह्मण्यो विमलाचारः प्रतिकर्त्तापदामृजुः ॥"
इति कविकल्पलता ॥
(यथा च ।
"दोषागमज्जन्तुभ्यो रक्षमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥
ब्रह्मा वेदाङ्गमष्टाङ्गमायुर्व्वेदमभाषत ।
पुरोहितमते तस्माद्वर्त्तेत भिषगात्मवान् ॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)

पुर्व्व, पूर्त्तौ । पूर्णीकरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । पुः पुरौ पुरः । पुर्व्वति पयसा कुम्भं चेटी । इति दुर्गादासः ॥

पुल, क उच्छ्रितौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) उच्छ्रितिरुच्चीभावः । क, पोलयति पर्व्वतः । इति दुर्गादासः ॥

पुल, ज महत्त्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ज, पोलः पुलः । पोलति । इति दुर्गादासः ॥

पुल, श महत्त्वे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) श, पुलति पुलिनं शरदि महत् स्यादित्यर्थः । पोलिता । इति दुर्गादासः ॥

पुलः, पुं, (पोलति उच्छ्रितो भवतीति । पुल + कः ।) पुलकः । विपुले, त्रि । इति मेदिनी । ले, २३ ॥

पुलकं, क्ली, (पुलतीति । पुल + कः । ततः संज्ञायां कन् ।) कङ्कुष्ठम् । गज पर्व्वतीयमृत्तिकाविशेषः । इति राजनिर्घण्टः ॥

पुलकः, पुं, (पुल + स्वार्थे कन् ।) रोमाञ्चः । तत्पर्य्यायः । रोमोद्भेदः २ त्वक्पुष्पम् ३ रोमाङ्कुरः ४ । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशत्याम् । ३७९ ।
"प्रेमलघूकृतकेशववक्षोभरविपुलपुलककुचकलशा ।
गोवर्द्धनगिरिगुरुतां सुभ्रुवधूर्विभ्रतमुपहसति ॥")
शरीरान्तर्व्विद्भवकीटः । इति हेमचन्द्रः ॥ (तुच्छधान्यम् । यथा, पञ्चतन्त्रे । ३ । ९९ ।
"पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्त्येषु येषां धर्म्मो न कारणम् ॥")
प्रस्तरविशेषः । तस्य परीक्षा यथा,—
"पुण्येषु पर्व्वतवरेषु च निम्नगासु
स्थानान्तरेषु च तथोत्तरदेशमध्यात् ।
संस्थापिताश्च नखरा भुजगैः प्रकामं
संपूज्य दानवपतिं प्रथिते प्रदेशे ॥
दाशार्णवागदवमेकलकालगादौ
गुञ्जाञ्जनक्षौद्रमृणालवर्णाः ।
गन्धर्व्ववह्निकदलीसदृशावभासा
एते प्रशस्ताः पुलकाः प्रसूताः ॥
शङ्खाब्जभृङ्गार्कविचित्रभङ्गा
सूत्रैरुपेताः परमाः पवित्राः ।
मङ्गल्ययुक्ता बहुभक्तिचित्रा
वृद्धिप्रदास्ते पुलका भवन्ति ॥
काकश्वरासभशृगालवृकोग्ररूपै-
र्गृध्रैः समांसरुधिरार्द्रमुखैरुपेताः ॥
मृत्युप्रदास्तु विदुषा परिवर्ज्जनीया
मूल्यं पलस्य कथितञ्च शतानि पञ्च ॥"
इति गारुडे ७० अध्यायः ॥
मणिदोषविशेषः । हरितालम् । गन्धाश्मपिण्डम् । गन्धर्व्वविशेषः । इति मेदिनी । के, १२१ ॥ असुराजी । गल्वर्कः । इति हेमचन्द्रः ॥

पुलकी, [न्] पुं, (पुलकोऽस्यास्तीति । पुलक + इनिः ।) धाराकदम्बः । इति राजनिर्घण्टः ॥

पुलस्तिः, पुं, (पुल महत्त्वे + क्विप् । पुलं महत्त्वं अस्यते गच्छतीति । अस् + तिः । इत्युज्ज्वलदत्तः । ४ । १७९ ।) पुलस्त्यमुनिः । इत्युणादिकोषः ॥

पुलस्त्यः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः । इति शब्दरत्नावली ॥ स ब्रह्मणः कर्णाभ्यां जातः । तस्य भार्य्या हविर्भूः कर्द्दमकन्या । तस्य पुत्त्रः अगस्त्यः विश्रवाश्च । इति श्रीभागवतम् ॥ यथा, हरिवंशे । ७ । ८ ।
"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः ।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः ॥"

पुलहः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः । इति शब्दरत्नावली ॥ स च ब्रह्मणो नाभितो जातः तस्य भार्य्या कर्द्दममुनिकन्या गतिः । तस्य पुत्त्राः कर्म्मश्रेष्ठः वरीयान् सहिष्णुश्च । इति श्रीभागवतम् ॥

पुलाकः, पुं, (पोलति उच्छ्रितो भवतीति । पुल + "बलाकादयश्च ।" इति आकप्रत्ययेन निपातनात् साधुः ।) तुच्छधान्यम् । आगडा इति ख्यातम् ॥ (यथा, मनुः । १० । १२५ ।
"पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥")
संक्षेपः । अस्रावणम् । भक्तसिक्थकम् । भक्तगुलिका । इत्यमरभरतौ ॥ क्षिप्रम् । यथा पुलाककारी । इति स्वामी ॥

पुलाकी, [न्] पुं, (पुलाकः क्षिप्रता दृष्टौ विषये अस्त्यस्येति । पुलाक + इनिः ।) वृक्षः । इति हेमचन्द्रः । ४ । १८० ॥

पुलायितं, क्ली, (पुल + क्यङ् + क्तः ।) अश्वगतिः । तत्पर्य्यायः । विक्रान्तिः २ । इति त्रिकाण्डशेषः ॥

पुलिनं, क्ली, (पोलतीति । पुल महत्त्वे + "तलिपुलिभ्याञ्च ।" उणा० २ । ५३ । इति इनन् । स च कित् ।) तोयोत्थितनटम् । इत्यमरः । १ । १० । ९ ॥ चर इति चड़ा इति च भाषा ॥

(यथा, रामायणे । २ । ९५ । ९ ।
"क्वचित्क्षौमनिकाशोदां क्वचित् पुलिनशालिनीम् ।
क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥")
जलाद्विनिर्गतोत्थितं तटम् । इति भरतः ॥ तन्-मध्यतोयपुलद्वीपम् । इति सुभूतिः ॥ जलेनो-त्थितं तटम् । इति स्वामी ॥ जलमध्यसमुत्थितं तटम् । इति मल्लिका ॥ द्वीपम् । इति त्रिकाण्ड-शेषः ॥ (यवनविशेषे, पुं । यथा, महाभारते । १ । १२ । १९ ।
"उलूकश्चवनाभ्याश्च निमिषेण च पार्थिवराट् ।
प्रवर्षेण च संग्रामं चकार पुलिनेन च ॥")

पुलिन्दः, पुं, (पुल महत्त्वे + "कुलिपुल्योः किन्दच् ।" उणा० ४ । ८५ । इति किन्दच् ।) चण्डाल-भेदः । स च म्लेच्छशब्दवाच्यः । इत्यमरभरतौ ॥ तस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच ।
"एवं गतेषु त्रैलोक्यं दानवेषु पुरन्दरः ।
जगाम ब्रह्मसदनं सह देवैः शचीपतिः ॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम् ।
ऋषिभिः सार्द्धमासीनं पितरं स्वं च काश्यपम् ॥
ततो ननाम शिरसा शक्रः सुरगणैः सह ।
ब्रह्माणं काश्यपञ्चैव तांश्च सर्वांस्तपोधनान् ॥
प्रोवाचेन्द्रः सुरैः सार्द्धं देवनाथं पितामहम् ।
पितामह ! हृतं राज्यं बलिना बलिना मम ॥
ब्रह्मा प्रोवाच शक्रैतत् भुज्यते स्वकृतं फलम् ।
शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम् ॥
काश्यपोऽप्याह देवेश ! भ्रूणहत्या कृता त्वया ।
दितेरुदरस्थाया गर्भः कृत्तो वै बहुधा बलात् ॥
पितरं प्राह देवेन्द्रो मातुर्दोषवतो विभो ! ।
कर्त्तनं प्राप्तवान् गर्भो मदशौचा हि साभवत् ॥
ततोऽब्रवीत् काश्यपस्तु मातुर्दोषे सदा सताम् ।
गतघातो विनिहतो दोषोऽपि कुलिशेन भोः ॥
तच्छ्रुत्वा काश्यपवचः प्राह शक्रः पितामहम् ।
विनाशं पाप्मनो ब्रूहि प्रायश्चित्तं विभो ! मम ॥
ब्रह्मा प्रोवाच देवेशं वशिष्ठः काश्यपस्तथा ।
हितं सर्वस्य जगतः शक्रस्यापि विशेषतः ॥
शङ्खचक्रगदापाणिर्माधवः पुरुषोत्तमः ॥
तं प्रपद्य शरण्यं स ते श्रेयो विधास्यति ॥
सहस्राक्षोऽपि वचनं गुरूणां स निशम्य वै ।
प्रोवाच स्वल्पकालेन कस्मिन् प्राप्यो मधूदयः ॥
ता ऊचुर्देवता मर्त्ये स्वल्पकाले मधूदयः ॥
इत्येवमुक्तः सुरराड्विरिञ्चिना
मरीचिपुत्रेण च काश्यपेन ।
तथैव मित्रावरुणात्मजेन
धीताङ्गकोऽदृश्यमवाप्य तस्थौ ॥
कालञ्जरस्योत्तरतः सुपुण्य-
स्तथा हिमाद्रेरपि दक्षिणस्याम् ।
कुब्जाम्रकात् पूर्वत एव विष्णो-
र्यशोः पुरात् पश्चिमतोऽवसत्सौ ॥
यत्राश्च चक्रे भगवान् मुरारि-
र्वराहमास्थाय तनुं करालाम् ।
स्थातिं जगामाथ गदाधरेति
महाघवृन्दस्य शितः कुठारः ॥
यस्मिन् द्विजेन्द्राः श्रुतिशास्त्रसंयुताः
समागतो यान्ति पितामहेन ।
महत्पितॄन् यत्र च संप्रपूज्य
भक्त्या त्वमर्त्या नहि चैतसेव ।
जलस्य दानैर्धनदस्य मानवा
लभन्त्यनन्तं भगवत्प्रसादात् ॥
महानदी यत्र सुरर्षिकन्या
वालापदेशाद्धिमशैलमेत्य ।
चक्रं जगत् पापविमुक्तमग्र्यं
संदर्शनस्पर्शनमज्जनेन ॥
तत्र शक्रः समभ्येत्य महानद्यास्तटे शुभे ।
आराधनाय देवस्य तत्राश्रममवस्थितः ॥
प्रातःस्नायी त्वधःशायी एकभक्तो ह्ययाचितः ।
तपश्चेदे सहस्राक्षः स्तुवन् देवं गदाधरम् ॥
तस्यैवं तप्यतः सम्यक् जितसर्वेन्द्रियस्य च ।
कामक्रोधविहीनस्य साग्रः संवत्सरो गतः ॥
ततो गदाधरः प्रीतो वासवं प्राह नारद ! ।
गच्छ प्रीतोऽस्मि भवतो मुक्तपापोऽसि साम्प्रतम् ॥
निजं राज्यञ्च देवेश ! प्राप्स्यसि त्वचिरादिव ।
यतिष्यामि यथा शक्र ! भाविश्रेयो यथा तव ॥
इत्येवमुक्तोऽथ गदाधरेण
विसर्जितः प्राप्य मनोहरायाम् ।
स्नातस्य देवस्य ततः पुरस्तात्
संप्रोदुरस्नानशुभाश्रयस्य ॥
प्रोचुश्च तं भीषणकर्मकाराः
माया पुलिन्दा मम पापसम्भवाः ।
वसाम मेघाम्बरमन्दिरस्थयो-
र्हिमाद्रिकालाञ्जरयोः पुलिन्दाः ॥
इत्येवमुक्ता सुरराट् पुलिन्दान्
विमुक्तपापः सुरसिद्धयक्षैः ।
संपूज्यमानोऽभ्यगमाम चाश्रमं
मातुस्तदा धर्मनिवासमादिम् ॥"
इति वामने ७३ अध्यायः ॥

पुलोमजा, स्त्री, (पुलोम्नो दैत्यात् जायते इति । जन + डः ।) शची । इत्यमरः । १ । १ । ४८ ॥ (यथा, काशीखण्डे १० अध्याये ।
"नित्यमूर्ध्वं करुद्यतं यः कश्चित् कुरुतेऽवनौ ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम् ॥")

पुलोमजित्, पुं, (पुलोमानं जयतीति । जि + क्विप् तुगागमश्च ।) इन्द्रः । इति केचित् ॥

पुलोमद्विट्, [ष्] पुं, (पुलोम्नो दैत्यविशेषस्य द्विट् शत्रुः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८८ ॥

पुलोमभित्, [द्] पुं, (पुलोमानं भिनत्तीति । भिद् + क्विप् ।) इन्द्रः । इति भूरिप्रयोगः ॥

पुलोमा, [न्] पुं, असुरविशेषः । स इन्द्रस्य श्वशुरः । इति पुलोमजाशब्दटीकायां भरतः ॥ (अयं दनिलम्बिय [illegible] । यथा, हरि-वंशे । ९० । ११६ ।
"हत्वा यमन्यर्थं यानि विमथेच्छुना नहि ।
पुलोमानं कथानाभौ जामाता यस्य शत-क्रतुः ॥")

पुलोमारिः, पुं, (पुलोम्नोऽरिः शत्रुः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

पुष, पुष्टौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पोषति तातः पुत्रम् । इति दुर्गादासः ॥

पुष, ऌ य श्रौ पुष्टौ । पोषणे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट् ।) ऌ, अपुषत् । य, पुष्यति । श्रौ, पोष्टा । इति दुर्गादासः ॥

पुष, क धृतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पोषयति । इति दुर्गादासः ॥

पुष, श पुष्टौ । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) श, पुष्णाति पुपोष । इति दुर्गादासः ॥

पुषा, स्त्री, (पुष्णातीति । पुष पुष्टौ + कः । टाप् ।) लाङ्गलिकीवृक्षः । इति शब्दचन्द्रिका ॥

पुषितं, त्रि, (पुष्यते स्मेति । पुष + क्तः । भावे गर्हीयत्वात् इट् ।) पुष्टम् । [illegible] । इत्यमरः । ३ । १ । ९० ॥

पुष्करं, क्ली, (पुष्णातीति । पुष पुष्टौ + "पुषः कित् ।" उणा० ४ । ४ । इति करन् । स च कित् ।) हस्तिशुण्डाग्रम् । (यथा, माघे । ५ । १ ।
"आलोलपुष्करमुखोल्लसितैरभीक्ष्ण-
मुक्षाम्बभूवुरभितो वपुरम्बुवर्षैः ॥")
वाद्यभाण्डमुखम् । (यथा, रघुः । १० । ११ ।
"नदद्भिः स्निग्धगम्भीरं तूर्यैराहतपुष्करैः ॥") "पुष पुष्टौ । पुषः कित् । इति करन् । पुष्यत्याननमित्यर्थः । पोषयति भूतान्याप्यायन-प्रदानेन उदकदानादुपकारेण च । पुष्क इति रातीति पुष्करं इति क्षीरस्वामी । पुष्कर-र्थान् स्कन्दकुषिपुषिभिदः किन् । इति निश्चितः करन्प्रत्ययो बाहुलकात् भवति । स्तुहलपर्वीपोद्वीविस्फुरेभ्यः किन् । इति कर इति श्रीभोजदेवः । पोषयति भूतानि । पुष्कोमपरादित्वात् आतोऽनुपसर्गे कः । यद्वा, वपुरिव स्फुरत्कमलं गत् भर्तुं शोभमानेन । तथो हेतुनाप्नोत्यालोम्येषु । इति दः । पुष्करं यत् यकारलोपेन पुष्करम् । पृषोदरादित्वात् ।" इति भरतटीका ।) जलम् । (यथा, ऋग्वेदे पद्मपुराणे । ६ । ४ । ५ । ५ ।
"आपो वै पुष्करं प्राणोऽपरां प्राप्ते वा ॥")
व्योम । (यथा, वारीष्टि पवनपादे चतुर्थेऽध्याये ।
"मेघाः सर्वाश्रितायमानदश्वो पुष्करस्य-खगाः
हंसाश्रीकमनाविर्भावितमशः पञ्जरः
शोभते ।
नीरविरमनभूतपर्णविमजा सार्न्द्रोनी
दीपते
विना धर्मविवर्जितोऽपि जनः ज्ञातिकेन
पुष्करम् ॥")

खड्गफलम् । पद्मम् । (यथा, रामायणे । २ । ९५ । १४ ।
"सखीवच्च विगाहस्व सीते ! मन्दाकिनीं नदीम् ।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि ! ॥")
तीर्थभेदः । (यथा, महाभारते । १ । ३६ । ३ ।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥"
अस्य अन्यद्विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम् ॥) कुष्ठौषधम् । इत्यमरः । २ । ४ । १८५ ॥
(यथास्य पर्य्यायः ।
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
खड्गकोषः । इत्यमरटीकायां मथुरेशः ॥
काण्डम् । द्वीपभेदः । इति मेदिनी । रे, १८७ ॥
(अस्य विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम् ॥)
युद्धम् । इति नानार्थरत्नमाला ॥ * ॥

पुष्करः, पुं, (पुष + "पुषः कित् ।" उणा० ४ । ४ । इति करन् । स च कित् ।) रोगविशेषः । नागविशेषः । सारसपक्षी । नृपभेदः । स तु नलराजभ्राता । (यथा, महाभारते । ३ । ५९ । ४ ।
"स समाविश्य च नलं समीपं पुष्करस्य च ।
गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै ॥"
अयं हि कलिसाहाय्येन अक्षद्यूते नलं विजित्य निषधाधिपोऽभवत् । एतद्वृत्तान्तं महाभारते वनपर्व्वणि ५९ अध्याये द्रष्टव्यम् ॥) वरुणपुत्त्रः । इति मेदिनी । रे, १८७ ॥ (वाद्यविशेषः । यथा, मार्कण्डेये । १०६ । ६९ ।
"प्रावाद्यन्त ततस्तत्र वेणुवीणादिदर्दुराः ।
पणवाः पुष्कराश्चैव मृदङ्गाः पटहानकाः ॥")
पर्व्वतविशेषः । इति शब्दरत्नावली ॥ * ॥
सप्तद्वीपानां मध्ये द्वीपविशेषः । पुष्करद्वीपवर्णनं यथा,—

सूत उवाच ।

"शाकद्वीपस्य विस्ताराद्द्विगुणेन समन्ततः ।
क्षीरार्णवं समाश्रित्य द्वीपः पुष्करसंज्ञितः ॥
एक एवात्र विप्रेन्द्राः पर्व्वतो मानसोत्तरः ।
योजनानां सहस्राणि चोर्द्ध्वं पञ्चाशदुच्छ्रितः ॥
तावदेव च विस्तीर्णः सर्व्वत्र परिमण्डलः ।
स एव द्वीपो पश्चार्द्धमानसोत्तरसंज्ञितः ॥
एक एव महासानुः सन्निवेशाद्द्विधाकृतः ।
तस्मिन्द्वीपे स्मृतौ तु द्वौ पुण्यौ जनपदौ शुभौ ॥
अपरौ मानसस्याथ पर्व्वतस्यानुमण्डलौ ।
महावीतं स्मृतं वर्षं धातकीखण्डमेव च ॥
स्वादूदकेनोदधिना पुष्करः परिभावितः ।
तस्मिन्द्वीपे महावृक्षो न्यग्रोधोऽमरपूजितः ॥
तस्मिन्निवसति ब्रह्मा विश्वात्मा विश्वभावनः ।
तत्रैव मुनिशार्दूलाः शिवनारायणालयम् ॥
वसत्यत्र महादेवो हरार्द्धो हरिरव्ययः ।
संपूज्यमानो ब्रह्माद्यैः कुमाराद्यैश्च योगिभिः ॥
गन्धर्व्वैः किन्नरैर्यक्षैरीश्वरः कृष्णपिङ्गलः ।
स्वस्थास्तत्र प्रजाः सर्व्वा ब्राह्मणाः सहस्रत्विषः ॥
निरामया विशोकाश्च रागद्वेषविवर्ज्जिताः ।
सत्यानृते न तत्रास्तां नोत्तमाधममध्यमाः ॥
न वर्णाश्रमधर्म्माश्च न नद्यो न च पर्व्वताः ।
परेण पुष्करस्याथ समावृत्य स्थितो महान् ॥
स्वादूदकः समुद्रस्तु समन्ताद्द्विजसत्तमाः ।
परेण तस्य महती दृश्यते लोकसंस्थितिः ॥"
इति कौर्म्मे ४७ अध्यायः ॥ * ॥

पुष्करद्वीपस्थराजा । तस्य रथः । यथा,—
"लोकेश्वरः सोऽपि नृभिर्म्मुनीन्द्रै-
र्देवैः सहेन्द्रैरथ सञ्चचार ।
द्वीपे शुभे पुण्यजनैरुपेते
उवास राजा स तु पुष्करस्थः ॥
तेनैव नाम्ना स तु पुष्करोऽपि
सदोच्यते देवगणैः ससिद्धैः ।
तेनैव यानेन तथाम्बुजेन
बभूव नाम्ना समथाक्षयन्ति ॥"
इत्यग्निपुराणम् ॥ * ॥

ब्रह्मकृततीर्थविशेषः । तस्य नामान्तरम् । रूपतीर्थम् २ सुखदर्शनम् ३ । तत्र ज्येष्ठपुष्करमध्यमपुष्करकनिष्ठपुष्करनामकास्त्रयो ह्रदाः । तस्य परिमाणं शतयोजनमण्डलम् । इति पद्मपुराणम् ॥ * ॥ योगविशेषे गङ्गादीनां पुष्करत्वं यथा,—
"मकरस्थो यदा भानुस्तदा देवगुरुर्यदि ।
पूर्णिमायां भानुवारे गङ्गा पुष्कर ईरितः ॥
गङ्गोत्तर्य्यां प्रयागे च कोटिसूर्य्यग्रहैः समः ।
सिंहसंस्थे दिनकरे तथा जीवेन संयुते ॥
पूर्णिमायां गुरोर्व्वारे गोदावर्य्यान्तु पुष्करः ।
तत्र स्नानञ्च दानञ्च सर्व्वं कोटिगुणं भवेत् ॥
मेषसंस्थे दिवानाथे देवानाञ्च पुरोहिते ।
सोमवारे सिताष्टम्यां कावेरी पुष्करो मतः ॥
कर्कटस्थे दिवानाथे तथा जीवेन्दुवासरे ।
अमायां पूर्णिमायां वा कृष्णा पुष्कर उच्यते ॥"
इति स्कन्दपुराणे पुष्करखण्डे श्रीशैलमाहात्म्यम् ॥
मेघनायकविशेषः । तत्परिज्ञानं यथा,—
"त्रियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात् ।
आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम् ॥"
इति ज्योतिस्तत्त्वम् ॥
तस्य फलम् । यथा,—
"पुष्करे दुष्करं वारि शस्यहीना वसुन्धरा ।
विग्रहोपहता लोकाः पुष्करे जलदाधिपे ॥"
इति ज्योतिषम् ॥ * ॥
क्रूरवार-भद्रातिथि-समपादनक्षत्र-घटिताशुभजनकयोगविशेषः । यथा,—
"पुनर्व्वसूत्तराषाढा कृत्तिकोत्तरफल्गुनी ।
पूर्व्वभाद्रं विशाखा च रविभौमशनैश्चराः ॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च ।
एतेषामेकदा योगे भवतीति त्रिपुष्करः ॥ * ॥
जाते तु जातको योगो मृते भवति पुष्करः ।
त्रिगुणं फलदो दृष्टो नष्टे हृते मृते तथा ॥
प्रथमे मासि वर्षे वा कुटुम्बमपि पीडयेत् ।
देवोऽपि यदि वा रक्षेत् तदा पुत्रो न जीवति ॥
अतस्तद्दोषशान्त्यर्थं होमयेदयुतं बुधः ।
अशक्तश्च सुवर्णादिदानं कुर्य्याद्यथाविधि ॥"
असमर्थश्चेद् वराहसंहितोक्तं अयुतहोमादिकं कुर्य्यात् । वाक्यं यथा,—
श्रीविष्णुरोम् तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणस्त्रिपुष्करयोगकालीनमरणजन्यदोषशमनकामः इदं काञ्चनं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे । ततो दक्षिणां दद्यात् । अन्यच्च पूजाहोमकर्म्मणी करिष्ये । इति विशेषः । एतत् सर्व्वमशौचेऽपि कर्त्तव्यम् । यथा दक्षः ।
"सुस्थकाले त्विदं सर्व्वं सूतकं परिकीर्त्तितम् ।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम् ॥"
इति शुद्धिकारिका ॥ * ॥
अपि च ।
"पुनर्व्वसूत्तराषाढा कृत्तिकोत्तरफल्गुनी ।
पूर्व्वभाद्रं विशाखा च षडेते वै त्रिपुष्कराः ॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च ।
शनिर्भौमो रविश्चैव वाराश्चैते त्रिपुष्कराः ॥
एते त्रिपुष्करा ज्ञेयास्तथा द्वादशमासिके ।
द्विमासे च तथा प्राप्ते षण्मासे च चतुर्थके ॥
षोड़शे मासि संपूर्णे कुटुम्बं पीडयेद्ध्रुवम् ।
अन्तेऽप्युपान्ते मध्ये च पुष्करो हन्ति नान्यथा ॥
तद्दोषप्रशमार्थन्तु होमयेदयुतं बुधः ।
तिलव्रीहियवांश्चैव कृत्वाज्येन समन्ततः ॥
क्षीरेणैव तथाचार्य्यो जुहुयाद्भक्तिभावतः ।
चरुञ्च श्रपयेत्तत्र प्राज्ञो कुर्य्याद्बलिन्तथा ॥
भेकखोडुम्बराश्वत्थैः प्रत्येकाष्टोत्तरं शतम् ।
एकैकं त्रित्रिसंयुक्तं दर्भेण परिवेष्टितम् ॥
यमाय वकुलेन धर्म्मायोडुम्बरेण च ।
अश्वत्थैश्चित्रगुप्ताय जुहुयात् क्रमशस्तथा ॥
तद्वद् घृततिलांश्चैव तथा समिधमेव च ।
एकीकृत्य समं सर्व्वं चरुमाश्रित्य होमयेत् ॥
यवव्रीहितिलैर्युक्तं सक्षुपं श्रपयेच्चरुम् ।
दधिमध्वाज्यसंयुक्तं होमः सहस्रसंख्यया ॥
भेकखाडुम्बराश्वत्थैर्होमयेद्विधिपूर्व्वकम् ।
यमं धर्म्मं चित्रगुप्तं पुष्करं पुरुषं तथा ॥
तिथिं वारं तथा भञ्च पूजयित्वा तु होमयेत् ।
पञ्चवर्णेन चूर्णेन कुर्य्याद्धि पद्ममण्डलम् ॥
यमं धर्म्मं चित्रगुप्तं स्थापयेत् क्रमशस्ततः ।
तिलप्रपूरिते पात्रे लौहे च कृष्णवाससा ॥
वेष्टयित्वा यमं तत्र स्थापयेल्लौहनिर्म्मितम् ।
घृतप्रपूरिते पात्रे कांस्यपात्रे निरञ्जनम् ॥
रौप्याकृतिं शुक्लवस्त्रवेष्टितं तत्र पूजयेत् ।
गुड़प्रपूरिते पात्रे ताम्रपात्रे च मन्त्रिणम् ॥
स्वर्णाकृतिं रक्तवस्त्रवेष्टितं तत्र पूजयेत् ।
क्षीरप्रपूरिते पात्रे प्रस्तरपात्रे च पुष्करम् ॥
ताम्राकृतिं कृष्णवस्त्रवेष्टितं तत्र पूजयेत् ।
शक्तिस्तत्रमहे वा अथवा शक्तिभावतः ॥
प्रतिमास्तु समाः सर्व्वाः क्रमात्तत्र नियोजिताः
गोदौ पञ्च तथा धान्यं क्रमात् पापक्षयन्ततः ।

कलशे च क्रमात् पीठे स्थापयेद्विधिपूर्व्वकम् ।
मण्डलस्य चतुर्द्दिक्षु चतुःकुम्भांश्च स्थापयेत् ॥
दधिगुड़ौदनपूर्णान् पक्वान्नसंयुतांस्ततः ।
अथवा तन्मध्यदेशे चतुष्पलकांशया ॥
पीतवस्त्रेण संयुक्तं कुर्य्याद्घटचतुष्टयम् ।
चन्द्रातपं तदुपरि विचित्रं परिकल्पितम् ॥
कुम्भाग्रांश्च चतुःपार्श्वे वर्त्तिलेपैस्तलस्थितान् ।
स्थापयेयुः क्रमात्तत्र पूजाकाले द्विजोत्तमाः ॥
मण्डलस्य तथा पूर्व्वे वारुणं घटमर्पयेत् ।
नानादेवान् गणेशादीन् यथार्हांश्च समर्च्चयेत् ॥
कृत्वा यथाक्रमं तत्र बलिं दद्याद्विचक्षणः ।
पयोघृतेन क्षीरेण स्नापयित्वा यथाक्रमम् ॥
तेन मन्त्रेण मन्त्रेण पूजयित्वा च होमयेत् ॥
एवं विधिप्रकारेण यः प्रेतं न तु होमयेत् ।
पुष्करादिप्रदोषेषु चतुष्पात्तस्य सम्भवेत् ॥
संवत्सरे तथा पूर्णे षोड़शे मासि वै तथा ।
षण्मासाभ्यन्तरे तस्य तुलादानं विनिर्द्दिशेत् ॥
अथवा मासिकं चान्ते द्वितीयं भास्करस्तथा ।
तृतीयं सर्व्वशान्तिः स्यात् तुलावित्तविनाशनम् ॥
प्रेतादिदोषनाशाय यमादीन् यो न होमयेत् ।
सर्व्वाणि तस्य नश्यन्ति गोमहिष्यादीनि सर्व्वतः ॥
एवंविधितरं होमं यः कर्त्तुमक्षमो भवेत् ।
होमं कृत्वा यथाशक्त्या धेनुमेकां प्रदापयेत् ॥
अस्मिन् कृते न सन्देहः प्रेतादिदं न पीड़येत् ।
न विघ्नो यजमानस्य न चारिष्टं प्रजायते ॥
इत्थं होमं विनिर्द्दिष्टं यजन्तो न करोति यः ।
न इच्छति यमस्तस्य अभिमांसैश्च बन्धनम् ॥
सुतो भ्राता तथा जाया पतिः श्वशुर एव च ।
माता पिता स्वसा चापि पितृव्यो भगिनीपतिः ॥
ज्येष्ठभ्राता पतिश्चापि स्वामी चापकलेव च ।
एकैकं सर्व्वसंपूर्णं कुटुम्बं पीड़येद्ध्रुवम् ॥
षोड़शे मासि संपूर्णे बान्धवान् परिपीड़येत् ।
बान्धवानामभावे च वास्तुदग्धो न जीवति ॥
त्रिपुष्करे मृता योऽपि यः प्रेतं न तु होमयेत् ।
दैवता यदि वा रक्षेत् तस्य पुत्रो न जीवति ॥
यदुक्तिश्चिद्दानमुत्सृज्य गृही भवति मानवः ।
न इच्छति यमस्तस्य यदि होमं न कारयेत् ॥
तस्मात् विधिप्रकारेण पुष्करादिदेशान्तरे ।
यतं धर्म्मं त्रिवर्गं पूजयित्वा च होमयेत् ॥
मण्डले घटमारोप्य पूजयित्वा यथाक्रमम् ।
विधिपूर्व्वं तथा कृत्वा प्रान्ते दद्याद्बलिं बुधः ॥
प्रभाते च तथा रात्रावप्योषाम्भसि तथा ।
आचार्य्यैश्च प्रकुर्व्वीत यत्नेन चरुं ततः ॥
त्रिपत्रिमध्ये रेखाभिः विहेतैरिव निर्म्मितम् ।
भक्ष्य सोमदेवादि प्रतिमां दापयेत्ततः ॥
दत्त्वा मधुशतार्द्धञ्च चरुं पश्चात् दापयेत् ।
ततोऽदितः प्रमाणात् स्वागतो होमं समापयेत् ॥
संकल्प्य विधिना पूर्व्वं तत्पूर्णेन यत्नतः ।
कारयेद्द्रव्यमानेन यथाशक्तिक्रमेण च ॥"
इति वराहसंहितोक्तपुष्करप्रायश्चित्तमानम् ॥

पुष्करकर्णिका, स्त्री, (पुष्करं पद्मं कर्णयति भाड़-लेव आत्मीयोऽन । कर्ण+ण्वुल् । टापि अत इत्वम् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ (स्थलपद्मिनीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पुष्करनाड़ी, स्त्री, (पुष्करं पद्मं नाड़यति सौन्दर्य्येण भ्रंशयतीति । नाड़+अण् । ततो ङीप् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

पुष्करमूलं, क्ली, (पुष्करस्य मूलमिव मूलमस्य । पुष्करस्यास्य मूलं वा ।) पुष्करदेशप्रसिद्धौषधिविशेषः । अस्य स्थाने कुष्ठं योजयन्ति । तत्पर्य्यायः । मूलम् २ पुष्करम् ३ पद्मपत्रकम् ४ पुष्करिणी ५ वीरम् ६ पौष्करम् ७ पुष्कराह्वयम् ८ काश्मीरम् ९ ब्रह्मतीर्थम् १० श्वासारिः ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करशिफा १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरश्वासारोचककासशोफपाण्डुनाशित्वञ्च । इति राजनिर्घण्टः ॥ "विशेषात् पार्श्वशूलनुत् ।" इति भावप्रकाशः ॥ (अस्य व्यवहारोऽस्य यथा,—
"भार्गीं पुष्करमूलञ्च रास्नां बिल्वं यवानिकाम् ।
नागरं दशमूलञ्च पिप्पलीञ्चाम्बु साधयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे भार्ग्यादिक्वाथे ॥)

पुष्करमूलकं, क्ली, (पुष्करस्य कुष्ठस्य मूलम् । ततः संज्ञायां कन् ।) कुष्ठकस्य मूलम् । इति त्रिकाण्डशेषः ॥ (कुष्ठशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पुष्करशिफा, स्त्री, (पुष्करस्य शिफा जटेव ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

पुष्करस्रजौ, पुं, (पुष्करस्य पद्मस्य स्रक् ययोरिति ।) अश्विनीकुमारौ । द्विवचनान्तोऽयम् । इति शब्दरत्नावली ॥ (अश्विनीकुमारतुल्ये, त्रि । यथा, वाजसनेयसंहितायाम् । ८ । ३३ ।
"आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥"
"किम्भूतं कुमारं पुष्करस्रजं पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ अश्विनौ अश्विनीकुमारौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । तद्रूपः कुमारः पुष्करस्रक् तम् । अश्विसमानरूपेण रोगहीनं सुन्दरञ्च पुत्रमर्पयतेति ध्वनितम् ॥" इति तत्र वेददीपः ॥)

पुष्कराक्षः, पुं, (पुष्करवदक्षिणी यस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) विष्णुः । यथा, [illegible] ।
"पुष्कराक्ष ! निमग्नोऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता ॥"
([illegible] । यथा, महाभारते । १ । १२० । १६ ।
"अतापयीत् पुष्कराक्षः प्रतपन्निव भारत ! ॥")

पुष्कराह्वः, पुं, (पुष्करस्य आह्वा आह्वा यस्य ।) सारसपक्षी । इत्यमरः । २ । ५ । २५ ॥ (पुष्करं आह्वा यस्य । पुष्करमूलम् । यथा, सुश्रुते चिकित्सितस्थाने ३ अध्याये ।
"कुमुदपुष्कराह्वयनालमधुकेनैव [illegible] मधुकादीन दातुं प्रयच्छेत् ॥")

पुष्कराह्वयं, क्ली, (पुष्करं आह्वो यस्य ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (यथा,—
"शुण्ठीवचा नागरपुष्कराह्वैः
कृतः कषायः कफमारुतोत्थे ।
सक्षारकाभातविषाघ्यदारुकं
ज्वरे त्रिदोषप्रभवे च शस्तः ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

पुष्करिणी, स्त्री, (पुष्कराणि सन्त्यस्यामिति । पुष्कर+इनिः । ततो ङीप् ।) स्थलपद्मिनी । पुष्करमूलम् । इति राजनिर्घण्टः ॥ (पुष्करं शुण्डाग्रमस्त्यस्या इति । इनिः ।) हस्तिनी । सरोजिनी । (पुष्कराणि पद्मानि सन्त्यत्र । इनिः ।) जलाशयः । इति मेदिनी । णे, १०९ ॥ हस्तशतपरिमितसमचतुरस्रजलाधारः । पुकुर इति पुखुर इति च भाषा । तत्पर्य्यायः । खातम् २ । इत्यमरः । १ । १० । २८ ॥ खातकूपी ३ । इति जटाधरः ॥ पौष्करिणी ४ । इति शब्दरत्नावली ॥ सा तु दक्षिणोत्तरायता कार्य्या । यथा,—
"कूपवापीपुष्करिण्यो दीर्घिका द्रोण एव च ।
तड़ागः सरसी चैव सागरश्चाष्टमो मतः ।
एतज्जलाशयः कार्य्यो यत्नाद्याम्योत्तरायतः ॥"
इति कल्पतरौ वायुपुराणम् ॥ *
तस्या लक्षणं यथा । "पुष्करिणीतड़ागादिप्रतिष्ठासंहितायाम् ।
'चतुर्व्विंशत्यङ्गुलो हस्तो धनुश्चतुष्करः ।
शतधन्वन्तरञ्चैव तावत् पुष्करिणी मता ।
इत्यनुवचनात् प्रोक्तकूप इति विश्वः ।'
तेन चतुर्द्दिक्षु विंशतिहस्तप्रमाणो चतुःशतहस्तान्तराभ्यन्तरेण पुष्करिणी । एतच्च प्रमाणपरं न तु उपरितनम् । अतैव बहुषु पुष्करिणी । इति मत्स्यपुराणवचनात् श्रीदत्तः ॥ तड़ागेऽपि वास्तुयागः कर्त्तव्यः । मत्स्याचार्य्यवचनम् ।
'जलाधारयज्ञार्थेञ्च यथोक्तं विहितः ।
प्रकारादिविधिवर्ज्जिताः पक्वान्नशर्करायुताः ।
सर्व्वेषां किल वास्तूनां मायकाः परिकीर्त्तिताः ॥
वास्तुपूजा हि तान् सर्व्वान् प्रासादादीन् वारयेत् ।'
अनिष्पत्तिविनाशः स्याद्भयोत्पत्तिश्च कीर्त्तिता ।
प्रकारादिनियमेषु इति वचनात् । देवपुराणेऽपि वास्तुदेवस्य एव कर्त्तव्यो । सर्व्वप्रतिष्ठादिक्रियाभिः । तद्दर्शनात् उत्सर्गादिषेऽपि वास्तुयागः ।
यथा,—
'प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशे च सर्व्वदोषापनुत्तये ॥
वास्तुपूजनकं कृत्वा ततः क्वचिद्वदेत् ।
वास्तुपूजामकुर्व्वाणस्तवाहारो भविष्यति ॥'
इति मत्स्यपुराणे पुरवेश्मशब्दे वास्तुयागार्थं पूर्व्वोक्तवचने प्रासादधर्म्मादिदर्शनाद्वचनात् प्रतिष्ठादिष्वपि वास्तुयागस्य करणम् ॥ * ॥

तदारम्भे तद्यथादि दीपिकायाम् ।
'पुष्यात्रिमकरौत्तरश्रवणत्वाष्ट्रानुपित्र्येन्दुभि:
प्रस्तोर्के शुभयोगवारतिथिषु क्रूरेष्ववीर्येषु च ।
पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये
प्रारम्भ: सलिलाश्रयस्य शुभदो जीवेन्दुपुत्रोदये ।'
पुष्यानुराधा-हस्तोत्तरात्रय-धनिष्ठा-शतभिषा-
रोहिणी-पूर्व्वाषाढ़ा-मघा-मृगशिरोभि: ।
मात्स्ये ।
'चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
वज्रव्याघातशूले च व्यतीपातातिगण्डयो: ।
विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ॥
आदित्यभौमवर्ज्जन्तु सर्व्वे वारा: शुभावहा: ।
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।'
ज्योतिषे । गुरोर्भृगोरस्तवाल्ये स्वभिधाय
प्रतिष्ठारम्भणे देवकूपादेर्वर्ज्जयन्ति हि ॥ * ॥
उत्सर्गफलमाह । कपिलपञ्चरात्रे ।
'संक्षेपात्तु प्रवक्ष्यामि जलदानफलं शृणु ।
पुष्करिण्यादिदानेन विष्णु: प्रीणाति विश्वधृक् ।'
जलाश्रयकरणार्थभूमिदानफलमाह चित्रगुप्त: ।
'जलाशयार्थं यो दद्यात् वारुणं लोकमाप्नुयात् ।'
भूमिमिति शेष: ॥ * ॥ तत्प्रतिष्ठाकालमाह ।
मत्स्यपुराणम् ।
'शृणु राजन् ! महाबाहो ! तड़ागादिषु यो
विधि: ।
चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ।
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ।'
अतीते प्रवृत्ते । तथा च प्रतिष्ठासमुच्चये ।
'माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढकयोर्व्वापि प्रवृत्ते चोत्तरायणे ।'
ब्राह्मणवाचनं पुण्याहस्वस्तिऋद्धिवाचनम् ॥*॥
'पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ।
आषाढ़े द्वे तथा मूलमुत्तराद्वयमेव च ।
ज्यैष्ठाश्रवणरोहिण्य: पूर्व्वभाद्रपदा तथा ।
हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥*॥
बुधो बृहस्पति: शुक्रस्त्रय एते शुभावहा: ।
एतन्निरीक्ष्य सल्लग्नं नक्षत्रञ्च प्रशस्यते ॥
ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च ।
निमित्तं शकुनं ज्ञात्वा सर्व्वाण्यद्भुतादिकम् ॥
शुभयोगे शुभर्क्षे च क्रूरग्रहविवर्ज्जिते ।
लग्ने चाढ्ये च कुर्व्वीत प्रतिष्ठादिकमुत्तमम् ॥*॥
अयने विषुवे तद्वत् षड़शीतिमुखे तथा ।
एतेषु स्थापनं कार्य्यं विधिदृष्टेन कर्म्मणा ।'
भविष्ये ।
'प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।

दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ।
सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुध: ।
एते सौम्यग्रहा: प्रोक्ता: प्रतिष्ठायागकर्म्मणि ।'
प्रतिष्ठाधिकारे व्यवहारसमुच्चय: ।
'कृष्णपक्षे च पञ्चम्यामष्टम्याञ्चैव शस्यते ।'
दीपिकायाम् ।
'पुष्याश्विशक्रभगदैवतवासवेषु
सौम्यानिलेशमघरोहिणिमूलहस्ते ।
पौष्णानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ।'
वासवं धनिष्ठा । ईशं आर्द्रा । आर्द्रायाञ्चैव
सौभाग्यमिति प्रतिष्ठासारसमुच्चयात् ॥ * ॥
वापीत्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकार-
माह जातूकर्ण्य: ।
'वापीकूपतड़ागादि देवतायतनानि च ।
अन्नप्रदानमारामा: पूर्त्तमित्यभिधीयते ॥
अग्निहोत्रं तप: सत्यं वेदानामनुपालनम् ।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्ते द्विजातीनां धर्म्म: सामान्य उच्यते ॥
अधिकारी भवेत् शूद्र: पूर्त्ते धर्म्मे न वैदिके ।'
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-
कर: । एवं स्त्रीणामपि पूर्त्ताधिकार: । यथा,
गारीव्रहृत्तौ बृहस्पति: ।
'पितृश्वशुरदौहित्रान् भर्त्तु: स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रिय: ।'
अस्य पूर्त्तत्वात् वृद्धिश्राद्धमग्न्यादौ कर्त्तव्यम् ।
यथा, गोभिल: । 'वृद्धि: पूर्त्तेषु युग्मा नाशयेत्
प्रदक्षिणमुपचार: । यवैस्तिलार्थ इति ।' * ।
हयशीर्षपञ्चरात्रे ।
'वापीकूपतड़ागानां पश्चिमे यागमण्डपम् ।
कुर्य्याद्यथाक्रमेणैव कन्यसं मध्यमुत्तमम् ॥
कन्यसं दशहस्तन्तु कूपे प्रशस्तं तथानघ ! ।
द्विषट्कं कारयेद्वाप्यां पुष्करिण्यां चतुर्द्दश ।
द्विरष्टहस्तं कुर्व्वीत तड़ागे मण्डपं शुभम् ।'
कन्यसं कनीयांसम् ॥ * ॥ यज्ञयूपविधिमाह
भविष्ये ।
'गृहीत्वौडुम्बरं पात्रं वारिपूर्णं गुणान्वितम् ।
दर्भैश्चयं सायमूलं फलपुष्पसमन्वितम् ॥
जलाशयारामकूपे यज्ञत्वे पूर्व्वदिङ्मुख: ।
साधारणे चोत्तरास्य ऐशान्यां निखनेत्तय: ।'
मत्स्यपुराणे ।
'प्रागुदक्प्रवणे देशे तड़ागस्य समीपत: ।
चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मुखीम् ।'
कारयेदित्यर्थ: । तथा,—
'सर्व्वत: समवर्णा: स्यु: पताका ध्वजसंयुता: ।'
समवर्णा वस्त्रमाल्यलोकपालवर्णा: ।
'अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च ।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ।'
तथा ।
'कुलशीलसमापन्न: स्थापक: स्याद्द्विजोत्तम: ।'
स्थापक आचार्य्य इति रत्नाकर: ॥ * ॥

'सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ ।
ताम्रौ कुलीरमण्डूकावायस: शिशुमारक: ॥
एवमासाद्य तान् सर्व्वानादौ चैव विशाम्पते ! ।
शुक्लमाल्याम्बरधर: शुक्लगन्धानुलेपन: ॥
सर्व्वौषध्युदकस्नानस्नापितो वेदपुङ्गव: ।
यजमान: सपत्नीक: पुत्रपौत्रसमन्वित: ।
पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम् ॥
ततो मङ्गलशब्देन भेरीणां नि:स्वनेन च ।
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ॥
षोड़शारं ततश्चक्रं पद्मगर्भं चतुर्म्मुखम् ।
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ॥
वेद्याश्चोपरि तत् कृत्वा ग्रहांल्लोकपतींस्तथा ।
विन्यसेन्मन्त्रत: सर्व्वान् प्रतिदिक्षु विचक्षण: ।
झषादीन् स्थापयेन्मध्ये वारुणं मन्त्रमाश्रित: ।'
झषादीन् कूर्म्मादीन् ।
'ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुध: ।
विनायकञ्च विन्यस्य कमलामम्बिकान्तथा ।'
पूजयेदिति शेष: । तथा,—
'नवग्रहमखं कृत्वा तत: कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ।'
ग्रहपूजामण्डलं शान्तिदीपिकायाम् ।
'वर्त्तुलो भास्कर: कार्य्यो ह्यर्द्धचन्द्रो निशाकर: ।
अङ्गारकस्त्रिकोणस्तु बुधश्चापाकृतिस्तथा ॥
पद्माकृतिर्गुरु: कार्य्यश्चतुष्कोणस्तु भार्गव: ।
खड्गाकृति: शनि: कार्य्यो राहुस्तु मकराकृति: ।
सर्पाकृतिस्तथा केतु: कार्य्यो मण्डलपूजने ।'
मत्स्यपुराणे ।
'देवतानां तत: स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्य: सोमस्तथा भौमो बुधजीवसितार्कजा: ॥
राहु: केतुरिति प्रोक्ता ग्रहा लोकहिते रता: ।
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥
उत्तरेण गुरुं विद्याद्बुधं पूर्व्वोत्तरेण तु ।
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ॥
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ।
पश्चिमोत्तरत: केतुं स्थापयेत् शुक्लतण्डुलै: ॥*॥
भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्यापि तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्विद्यात् शुक्रस्यापि शचीपतिम् ।
शनैश्चरस्य तु यमं राहो: कालमथैव च ।
केतूनाञ्चित्रगुप्तञ्च सर्व्वेषामधिदेवता: ॥ * ॥
अग्निराप: क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवता: ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवता: ॥ * ॥
विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥
संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ॥
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदु: ।
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥
धूमामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत् प्राज्ञ: फलपुष्पसमन्वितम् ॥
गुड़ौदनं रवे: कुर्य्यात् सोमाय घृतपायसम् ।
संयावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे ॥

दध्योदनन्तु सोमाय शुक्राय च घृतौदनम् ।
शनैश्चराय कृशरमाजमांसञ्च राहवे ।
चित्रौदनन्तु केतुभ्यः सर्व्वभक्ष्यैः समर्च्चयेत् ॥'
स्कन्दपुराणम् ।
'जन्मभूर्व्विषये वर्णाः पर्य्यन्तान्युत्तराणि च ।
योऽयमाद्यो भुवनैः स्थानैर्यज्ञार्थिनाम्नामभिताः ॥
उत्पन्नोऽर्कः कलिङ्गेषु यमुनायाञ्च चन्द्रमाः ।
अङ्गारकस्त्ववन्त्याश्च मगधे तु हिमांशुजः ॥
सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा ।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिकापुरे ।
अन्तर्वेद्यां तथा केतुरित्येता ग्रहभूमयः ॥
आदित्यः काश्यपो गोत्र आत्रेयश्चन्द्रमा भवेत् ।
भारद्वाजो भवेद्भौम आत्रेयश्च सोमजः ॥
सुरपूज्याङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा ।
शनिः काश्यपः स्यात् राहुः पैठीनसिस्तथा ।
जैमिनी जैमिनश्चैव तथा लोकहिते रताः ॥'
कालप्रक्षः ।
'अदृष्टेश्चन्द्रो यस्तारा भौमं यः कुरुते नरः ।
न तस्य प्रग्रहं यान्ति न भुञ्जन्ति देवताः ॥
न भूतं न च संस्कारो न च यज्ञफलं लभेत् ।
ब्राह्मणौ भार्गवाचार्य्यौ क्षत्रियाङ्गारकोऽथ च ।
वैश्यौ सोमबुधौ चैव शूद्रान् शूद्रान् विनि-
र्द्दिशेत् ॥'
ग्रहाणां जातिज्ञानम् ।
'शुक्रार्कौ प्राङ्मुखौ स्याप्यौ भौमाङ्गारकौ च दक्षिणौ ।
उत्तराभ्यां गुरुबुधौ पश्चिमाशाधिपावरे ॥'
अधिष्ठानमन्तरं ग्रहाधाहनमाह मत्स्यपुराणः ।
'अधिदेवतं तथा पश्चादावाहयेत् सुरान् ।
मध्ये तु भास्करं विद्यालोहितं दक्षिणेन तु ॥'
यद्यपि ग्रहादीनां बहवः शब्दा वाचकाः सन्ति शब्दोपादानस्यार्थोपादानः शब्दो वा देवता उभयथापि शब्दनियमात् अविनियमकः स्यात् तथापि यद्यत् इदमात् सर्व्वादितश्चेव ग्रहाणां देवतानाम् । तेन सूर्य्यसोमभूमिपुत्रबुधबृहस्पतिशुक्रशनैश्चरराहुकेतुभिर्देवतानाम् । अधिदेवतानाम् ईश्वरोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्ताख्यैरेव पदैः । तथा प्रत्यधिदेवतानाञ्च अग्न्यप्पृथिवीविष्णुश्रचीप्रजापतिसर्पब्रह्मभिरेव पदैः । तथा विनायकदुर्गावाय्वाकाशाश्विनामभिरेव । इति ग्रहप्रदीपः ॥
ग्रहाणां पीठयोजनमाह मत्स्ये ।
लोकपालमावाहनमाह भविष्ये ।
'आवाहनार्थं वक्ष्ये लौकिकमन्त्रकानिह ।
एहत्रु महाग्रो देवः सर्व्वदेवाधिपो महान् ।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
आग्नेयः पुरुषो रक्तः सर्व्वदेवमयोऽव्ययः ।
धूम्रकेतुरजोध्यक्षस्तस्मै नित्यं नमो नमः ॥
यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् प्रभुः ।
धर्म्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥
निर्ऋतिस्तु पुमान् कृष्णः सर्व्वरक्षोऽधिपो महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
वरुणो धवलो विष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥
वायुश्च सर्व्ववर्णोऽयं सर्व्वगन्धवहः शुभः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥
गौरो यस्तु पुमान् सौम्यः सर्व्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥
ईशानः पुरुषः शुक्लः सर्व्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥
पद्मयोनिश्चतुर्म्मूर्त्तिर्वेदवासाः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः ।
ओँकारपूर्व्वका ह्येते न्यासे सन्निवेदने ।
मन्त्राः स्युः सर्व्वकार्य्याणां हरिपुष्टिफलप्रदाः ॥'
यथाऽऽत्रेयपुराणे ।
'अथवा कामतः कुर्य्यात् मत्स्यकूर्म्मादिनिर्म्मितम् ।
द्विभुजं शङ्खचक्रार्द्धं दक्षिणेनाभयप्रदम् ॥
वामेन मालपाशञ्च धारयन्तं सुभोगिनम् ।
सौम्यं वा महाभागं कारयेद्यादसां पतिम् ।
वामे तु कारयेद्दृष्टिं दक्षिणे पुष्करं शुभम् ।
नागैर्नदीभिर्यादोभिः समुद्रैः परिवारितम् ॥
कृत्वैवं वरुणं देवं प्रतिष्ठाविधिमाचरेत् ॥'
पुष्करं सम्पुटम् । तथा प्रणवपरमिति ध्यानं वक्ष्यते । वरुणमन्त्रोद्धारस्तु तथैव ।
'चन्द्रविम्बासनस्थेन चतुर्द्दशयुतेन च ।
अर्द्धेन्दुविन्दुयुक्तेन प्रणवोद्दीपितेन च ॥'
तेन ॐ वौं इति मन्त्रः ।
'प्रतिमायां स्थितिं कृत्वा प्रणवेन निरोधयेत् ।
पूजयेत् गन्धपुष्पाद्यैः सान्निध्यं याचयेत् ततः ॥'
स्थितिं प्राणप्रतिष्ठाम् । निरोधयेत् अङ्गुष्ठाङ्गुलाभ्यां निरोधमुद्रां दर्शयेत् । दानकल्पतरलोकयोर्म्मत्स्यपुराणपरिशिष्टम् । अथातो वरुणविधिं वापीकूपतडागमखं व्याख्यास्यामः । पुण्ये तिथिकरणे शुभे नक्षत्रे प्रतीच्यां दिशि गामध्याय प्राक्प्रवणे उदक्प्रवणे वा उदकसमीपे अग्निमुपसमाधाय वारुणं चरुं श्रपयित्वा आज्यभागान्तं हुत्वा चतस्र आज्याहुतीर्जुहुयात् । समुद्रज्येष्ठा इति प्रत्यृचं ततो श्रपिता च हविर्भिर्जुहुयात् । तत्त्वायामि ब्रह्मणा वन्दमान इति च । अयोऽप्यहरहस्तु [illegible] इति ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशाः इमं मे वरुण श्रुधी तत्त्वायामि इति च [illegible] एष वै प्रजाः प्राण इव आपः सखाया दशमो वरुणैर्जुहोति ॥ ८ ॥ गावं सार्व्वं धेनुमवतारयेत् । अवतारणमाचार्य्यायानुमन्त्रयेत् । इदं सलिलं पवित्रं कुरुष्व शुद्धाः पूता अमृताः सन्तु नित्यं तारयन्तो सर्व्वतीर्थाभिषिक्तं लोकालोकं तरन्ते तीर्थेनैव च । एवमेव पुष्करस्य यजमानः कर्षं तत्र आचार्य्यो दक्षिणाम् अथ पश्चात् आरोहणाचारः पुष्करमध्ये स्थापयेत् दिशि उत्पापयेत् । सुवर्णस्य मत्स्यमेकं कूर्मं पं च हिरण्मयं दिशि कारयेत् तदा हिरण्मयौ मत्स्यकूर्म्मौ ग्रहाणामिति यावत् । तौ प्रतिमायां स्थापयित्वा प्रथमतो शुचित्वे कांस्योदके वा निधाय दद्यात् इत्यादि वा । यथाशक्ति दक्षिणां दद्यात् इति । तत्र चतुष्कर्म्मं कुर्य्यात् । देवमनुष्याः पीयन्तां इत्यादि पठेत् । वंशन्ते नाककामान् सौवर्णिकां सर्व्वां गायत्रीञ्च अस्त्रार्थं । निधायैतां शुभं पूर्व्वदक्षिणे देयम् । इत्यत्र विधिर्नान्यथा तरङ्गेण कर्म्मसिद्धान्तात् अद्यतीति ।
'यजन्ते यं यथाशास्त्रं यज्ञैर्मरुदिभिश्च वा ।
विहितं सादृश्येनमनिषेधोपादि कर्म्मवत् ॥'
इति छन्दोगपरिशिष्टम् ।
तत्र अग्निमुपसमाधायेति वरुणहोमादि सर्व्वं संस्थाप्य वारुणं चरुं श्रपयित्वा आज्यभागान्तं हुत्वा इति छन्दोगसम्मतम् । स तु निवृत्ताश्वरूपः कुशध्वजो भवति महाव्याहृतिभिर्वा सर्व्वं कर्म कुर्य्यात् । तत्र प्रथमतः हिरण्मयं इत्यादि पुराणीयं ध्यानं अपि न कर्त्तव्यमिति नाम कुर्य्यात् ।
'प्रतिष्ठायां रोहिणाद्यं वारुण्यां प्रशस्यते ।
जलाशयप्रतिष्ठायां वरुणः प्रशस्यते ॥'
इति श्रुतिः ।
तत्र आचार्य्य पूजयित्वा अग्निरहितेन महाव्याहृतिहोमं कृत्वा आज्यं हुत्वा इति चतुर्भिर्मन्त्रैराज्याहुतीर्जुहुयात् । ॐ भूः स्वाहेति ॐ भुवः स्वाहेति ॐ स्वः स्वाहेति ॐ भूर्भुवः स्वः स्वाहा इति ॐ वा नाममिति पठन्ति ॐ नमोऽस्तु इति इत्यं ॐ इमां वरुण इति एवं ध्यायतीति । ततो ग्रहकृत्याभिमन्त्रणं समाप्य गोरो भार्गवकस्य पश्चात् सुखां कुर्य्यात् । शतशः स्थितिकीर्त्ते च । ततः कुशविधेन पिण्डिकां देवं समापयेत् । तथा हि ग्रहां हि नक्षत्रनिमुक्तिः । मार्गशाल इति वचनादिकः । तदिदानीं मत्स्यपुराणे ।
'जलाशयस्यास्यो नक्षत्राणां शतोऽस्तु ।
महसारात् कुर्य्यात् प्रतिदेवतायाम् ।
गोरोचनाय निधायैव तत्पश्चात् धृतकुम्भे च ।
अर्पयं तत्र कार्य्यं दशमङ्गलमेवम् ।
पूर्णकर्म्मादीनामेव कृत्वा विधानम् ॥'
यजमानाय प्रतिपत्तौ दक्षिणामपि ददात् ।
'अभ्यर्च्च मत्स्यलं कुम्भं यजतः ॥'
गायत्र्यैः । प्रतिमानामिति दिक्पतयः ।
अनुपदं कुर्य्यात् । कालिके ।
'प्रतिमायां स्थापयेद्वरुणं मन्त्रेण वरुणाय ।
यजमानं निवेशयेत् सर्व्वार्थे प्रतिमाम् ।
पूजयित्वा तु वरुणं वरदं इष्टं प्रयच्छति ॥'
शास्त्रे ।
'आदरेणामी पूजः स्यात् रोहिताचार्य्य [illegible]

यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ।'
कौरित्यमोऽश्वत्यादि: । ततो धेनुं सचेलकण्ठां
कांस्यादुक्तविशेषणयुक्तां जलाशयेऽवतारयेत् ।
तथा हयशीर्षपञ्चरात्रे ।
'गां सवत्सां समानीय सुशीलाञ्च पयस्विनीम् ।
कांस्योपदोहां घण्टादिवस्त्रपुष्पोपशोभिताम् ।
स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां सुशोभनाम् ।
* लाङ्गूलन्यस्तहस्तोऽसौ यजमान: सबान्धव: ।
शनै: सन्तारयित्वा तामाचार्याय निवेदयेत् ।'
कांस्योपदोहां कांस्यक्रोडामिति यावत् ।
कापिले ।
'अञ्जलिं जलसुनपाद्य यजमान: सभार्यक: ।
तटे प्राङ्मुखो भूत्वा कृतगोलाङ्गुलाङ्गुलि: ।'
इदं सलिलं पवित्रं इतिमन्त्रेणावतार्य्यमाणा-
मनुमन्त्रयेत् । तत: प्राङ्मुख: समवतारयेत् ।
सा च गौ: पश्चिमतोऽवतार्य्या । तत: कूल-
समीपं गत्वा तर्पयेत् । यथा कापिलम् ।
'पुन: पुष्कोदकेनाथ अतिलेन कुशेन तु ।
शुचेनैवापसव्येन पितृतीर्थेन तर्पयेत् ॥
गताश्चागमिष्यन्ति ये कुले मम बान्धवा: ।
ते सर्व्वे तृप्तिमायान्तु मया दत्तजलेन वै ।
ततो मुञ्चामि मन्त्रेण सुचिरं वत्ससंयुताम् ।'
आचार्य्येणान्वारब्ध उत्तीर्य्य आपोऽस्मान्मातर:
शुन्धयन्त्वितिमन्त्रेण ऐशान्यां स्थापयेत् । सुय-
वसा भगवतीह भूया इति जपात् । सा यदि
हिंकारं करोति तदा हिं कृण्वतीत्यादि जपेत् ।
तत उक्तविशेषणयुक्तां धेनुमाचार्य्याय ब्राह्मणाय
दद्यात् । ततो यथाशक्ति दक्षिणाञ्च दद्यात् ।
एतत्पर्य्यन्तं न कूपे अवाच्यत्वेऽप्यभावात् ॥*॥
तत उत्सर्गं कुर्य्यात् । अत्र विशेषमाह रत्ना-
करधृतमत्स्यपुराणम् ।
'पलाश्यासिन्य मनसा विविधानि शुभानि च ।
प्रदद्यात् सर्व्वभूतेभ्यो जलपूर्णं जलाशयम् ।'
कापिलञ्च ।
'ततस्तत्पश्चिमं तीरं गत्वा पूर्व्वाननस्थित: ।
जलोत्सर्गं प्रकुर्व्वीत सर्व्वसत्त्वार्थकं शुभम् ।'
सर्व्वसत्त्वार्थकं सर्व्वभूतप्रयोजनकम् । सर्व्वभूतेभ्य
उत्सृजामीत्यर्थ: । देवपितृमानुष्या: प्रीयन्ता-
मिति पठेदिति शेष: । उत्सृज्य यजमानो
ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति
शेष: । एतत्पर्य्यन्तं कूपेऽपि । जलाशयोत्सर्गस्य
सर्व्वभूतोद्देशकत्वेन अपकृष्टचेतनोद्देशकत्वेऽपि
त्यागत्वमपि । ततश्च कीटादेर्भेदमिति लौका-
चारोपगत्वेन वेदभेयोद्देश्यतात्मानगकत्यागत्व-
मत्यात् अस्य यागत्वम् । अतएव जलाशयोत्-
सर्गमुपक्रम्य मत्स्यपुराणेऽपि । प्राप्नोति सद्-
यागफलेन भूय इति यागत्वेनाभिहितम् । ततश्च
तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधा-
रणीकृतम् । अतएव
'सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम् ।
रमन्तु सर्व्वभूतानि स्नानपानावगाहनै: ।'
इति मन्त्रलिङ्गेन उपादानं विना कस्यापि न

स्वत्वमिति । ततश्चास्य यागवदुत्तराप्रतिपत्तेर-
शृतत्वात् साधारणजनस्य परिगृह्यमाणेन गोत-
मोक्तेन स्वामित्वस्थैर्य्यमनासंस्यापि तथात्वेन
स्वामित्वात् तत्र स्नानादावदोष इति तत्त्वम् ।
यथा गौतम: । स्वामी रिक्थक्रयसंविभाग-
परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्त्रि-
यस्य विजितं निर्व्विष्टं वैश्यशूद्रयोरिति । परि-
ग्रहोऽनन्यपूर्व्वस्य जलतृणकाष्ठादे: स्वीकार
इति मिताक्षरा । ऋक्थाधिकारे यज्ञमाहा-
पञ्चम: । दायाद्यं शिलोञ्छौ चान्यचापरि-
गृहीतमिति । अपरिगृहीतमन्यास्वीकृतमस्वा-
मिकमिति यावत् । निर्व्विष्टं वेतनलब्धं निर्व्वेशो
भृतिभोगयोरित्यमरकोषत्रिकाण्डशेषयो: ॥
हयशीर्षे ।
'आपोहिष्ठेति तिसृभि: पञ्चगव्यं विनि:क्षिपेत् ।
तीर्थतोयं तथा पुण्यं शान्तितोयं द्विजै: कृतम् ॥
गोकुलं पाययेत् पश्चात् द्विजान् वेदविदस्तथा ।
ततोऽन्नं भोजयेद्विप्रान् दद्यात्तेभ्यश्च दक्षिणाम् ॥'
एतत्पर्य्यन्तं कूपेऽपि ॥ * ॥ कापिले ।
'नागानामष्ट नामानि लिखितानि पृथक् पृथक् ।
तत: कुम्भे च नि:क्षिप्य गायत्र्या च विलोड्य वै ॥
उद्धरेत् पत्त्रिकामेकां तस्मैव नाम नीक्ष्येत् ।
यस्य नामोद्धरेत्तत्र स वै जलाधिप: स्मृत: ॥
तत्र संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम् ।'
मत्स्यपुराणस्य योगीश्वरधृतवचनाद्यथा ।
'अष्टौ नामान्याम्रपत्त्रे कृत्वा चैव प्रयत्नत: ।'
तानि च गारुडे ।
'अनन्तो वासुकि: पद्मो महापद्मोऽथ तक्षक: ।
कुलीर: कर्कट: शङ्खो ह्यष्टौ नागा: प्रकीर्त्तिता: ।'
एतानि नामानि आम्रपत्त्रे लिखित्वा कलस-
मध्ये नि:क्षिप्य गायत्र्या छन्दसा मथ्नामि इति
रघुनाथधृतमन्त्रेणालोड्य यस्य नामोत्तिष्ठति तं
यष्ट्यां समावाह्यानेन नागेनास्य जलस्य रक्षा
कर्त्तव्या इति ब्राह्मणान् श्रावयेत् । हयशीर्षे ।
'वैष्णवं वारुणञ्चैव पुन्नागं नागकेशरम् ।
वकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम् ॥
एतेषामेव दारूणां नागयष्टि: प्रकीर्त्तिता ।
मत्स्यकोटरं यत्ना तस्मात् कुर्य्याद्यथेप्सितम् ।'
तथा च बृहस्पति: ।
'शूलचक्राङ्कितां कृत्वा स्थापयित्वा जलाशये ।
द्वादशाङ्गुलमानन्तु वापीचक्रं प्रकल्पयेत् ॥
षोडशं पुष्करिण्यान्तु विंशतिञ्च सरोवरे ।
सागरे हस्तमात्रन्तु लौहं ताम्रन्तु पैत्तलम् ॥
चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम् ।
शतहस्ता भवेद्वापी द्विगुणा पुष्करिण्यपि ॥
त्रिगुणन्तु सरो मानमत ऊर्द्ध्वन्तु सागर: ।'
ततो द्वादशपञ्चदशविंशत्येकविंशत्यन्यतमकनि-
ष्ठाङ्गुलावच्छिन्नपञ्चहस्तमानां यष्टिं वरुणमाय-
मन्त्रेण स्नापयेत् । ॐ गन्धद्वारेति गन्धवारिणा
ॐ भद्रं कर्णेभिरिति तैलहरिद्रया ॐ काण्डात्
काण्डादिति दूर्व्वाभि: ॐ इमदादिव इत्यादिना
सन्निहितकारादिभि: ॐ मधुवातेति पञ्चाम्रतेन

या: फलिनीरिति फलोदकेन ॐ शुद्धवालसा
इति क्षुद्रघण्टिकायुतां पताकां यष्ट्यां बध्नीयात् ।
ॐ यष्ट्यै नम: इतिमन्त्रेण पूजयेत् । पुष्पाद्यल-
ङ्कृतां यष्टिं कन्दरसमीपं नयेत् । गुरुस्तु शङ्खादि-
नि:स्वनै राजतवरुणप्रतिमां उत्तिष्ठेति मन्त्राख्याय
प्रदक्षिणत्रयं कृत्वा आपोहिष्ठा इत्यादिना
मन्त्रेण वरुणस्योत्तम्भनमसि इतिमन्त्रेण च
जले क्षिपेत् । ततस्तत्रैव खाते शाड्वलगोमय-
दधिमधुकुशभस्मानदीजलपञ्चरत्नानि ॐ येते-
वापी रोचने दिव इतिमन्त्रेण क्षिपेत् । ॐ ध्रुवं
ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ
यूपस्वेतिमन्त्रेण जलमध्ये आरोपयेत् । ततो
जलमातृ: पूजयेत् । यथा ह्रीं पूर्व्वस्याम् ।
श्रियं आग्नेय्याम् । शचीं दक्षिणस्याम् । मेधां
नैर्ऋत्याम् । श्रद्धां पश्चिमायाम् । विद्यां वाय-
व्याम् । लक्ष्मीं उत्तरस्याम् । सरस्वतीं ऐशा-
न्याम् । अधो शिवाम् । ऊर्द्ध्वं लक्ष्मीम् । पाद्या-
दिभि: संपूज्य अग्निं प्रदक्षिणीकृत्य स्वर्ध्यादि-
द्वात्रिंशद्देवता: पूजयेत् । चमस्वेति चरुं
चामयेत् । कापिलम् ।
'प्रकृतूर्य्यादिनिनदैस्तथा वै क्षीरधारया ।'
जलाशयं प्रवेष्टयेदिति शेष: । प्रतिष्ठानन्तरं
मात्स्ये ।
तत: सहस्रं विप्राणामथवाष्टशतन्तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम् ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

पुष्करी, [न्] पुं, (पुष्करमस्यास्तीति । पुष्कर+
इनि: ।) हस्ती । इति त्रिकाण्डशेष: ॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति । पुष+
"कलंश ।" उणा० ४ । ५ । इति कलन् स च
कित् ।) चतुःप्रस्थात्मकभिक्षा । यथा,—
"भिक्षामाहुर्ग्रासमात्रमन्नं तत्स्याच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥"
इति कौर्म्मे उपविभागे १७ अध्याय: ॥
अष्टकुञ्चिपरिमाणम् । यथा, प्रायश्चित्ततत्त्वे ।
"अष्टमुष्टिर्भवेत् कुञ्चि: कुञ्चयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि आढ़क: परिकीर्त्तित: ॥"
(नगरविशेष: । यथा, रामायणे । ७ । ११४ । ११ ।
"एतेषु तेषु सर्व्वेषु भरत: केकयीसुत: ।
निवेशयामास तदा सम्हृष्टे द्वे पुरोत्तमे ॥
तक्षं तक्षशिलायान्तु पुष्कलं पुष्कलावते ।
गन्धर्व्वदेशे रुचिरे गान्धारविषये च स: ॥")

पुष्कल:, त्रि, (पुष्कं महत्त्वं लातीति । ला+क: ।
यद्वा, पुष्कं पुष्टिमंहत्त्वमिति यावत् तदस्या-
स्तीति । पुष्क+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ ।
इति लच् ।) श्रेष्ठ: । इत्यमर: । ३ । १ । ५८ ॥
बहु: । इति हेमचन्द्र: ॥ (यथा, महा-
भारते । १ । ३ । १० ।
"राजानो हि महात्मानो योनिकर्म्मविशो-
धिता: ।
उद्धरन्ति प्रजा: धर्म्मात्तत्र आशाद पुष्कलम् ॥")
सम्पूर्ण: । इति जटाधर: ॥

पुष्टं, त्रि, (पुष+क्तः।) कृतपोषणम्। तत्पर्य्यायः। पुषितम् २। इत्यमरः। ३।१।६७॥ पुतम् ३। इति जटाधरः॥ (यथा, मनुः। ७।१७१।

"यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
परस्य विपरीतञ्च तदा यायाद्रिपुं प्रति॥")

पुष्टिः, स्त्री, (पुष+भावे क्तिन्।) पोषणम्। वृद्धिः। इति मेदिनी। टे, ५९॥ (यथा, मार्कण्डेये। २२।११।

"वैदिकैर्धारणैर्मन्त्रैः प्रजानां पुष्टिहेतुकैः॥")

अश्वगन्धा। इति राजनिर्घण्टः॥ षोडशमातृकान्तर्गतदेवताविशेषः। इति श्राद्धतत्त्वम्॥ (सा तु दक्षकन्यानामन्यतमा। यथा, मार्कण्डेये।

"प्रसूत्याञ्च तथा दक्षश्चतस्रो विंशतिस्तथा।
ससर्ज्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा।"

गणपतेः पत्नी। यथा, ब्रह्मवैवर्त्तपुराणे। ५। १। ६८।

"पुष्टिर्गणपतेः पत्नी पूजिता जगतीतले।
यया विना परिक्षीणाः पुमांसो योषितोऽपि च॥"

खड्गविशेषः। यथाह भोजः।

"मङ्गला विजया पुष्टिः क्षमा तुष्टिः शुभावहम्।
प्रचण्डा सर्व्वतोभद्रा खड्गानामष्टकं विदुः॥"

मन्त्रोक्तचन्द्रकलाया नामान्तरम्। यथा, रुद्रयामले।

"अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा।
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः॥")

पुष्टिका, स्त्री, (पुष्ट्यै कं जलं यस्याः।) जलशुक्तिः। इति राजनिर्घण्टः॥

पुष्टिकान्तः, पुं, (पुष्टेः कान्तः।) गणेशः। इति शब्दरत्नावली॥

पुष्टिदा, स्त्री, (पुष्टिं ददातीति। दा+कः।) अश्वगन्धा। वृद्धिः। इति राजनिर्घण्टः॥ पुष्टिदात्री च॥

पुष्प, य विकसने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) पञ्चमस्वरी। दन्त्योपधः। पुष्पणं विकसनम्। य, पुष्प्यति कुन्दकोरकम्। इति दुर्गादासः॥

पुष्पं, क्ली, पुष्प्यति विकसति यः। (पुष्प विकसने+अच्।) तरुलतादीनां प्रसवः। फुल इति भाषा। तत्पर्य्यायः। प्रसूनम् २। कुसुमम् ३ सुमनसः ४। इत्यमरः। २।४।१७॥ सूनम् ५ प्रसवः ६ सुमनः ७। इति शब्दरत्नावली॥ स्वहस्तपुष्पचयनफलं यथा,—

"उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः।
यो मासमानयेद्भूमे मम कर्म्मपथे स्थितः॥
पुष्पाणि तत्र यावन्ति मम मूर्द्ध्नि धारयेत्।
स तावत् पुष्कलं कर्म्म मम लोकाय गच्छति॥"

अकर्म्मण्यपुष्पदाने दोषो यथा,—

वराह उवाच।

"अकर्म्मण्येन पुष्पेण यो मामर्च्चयते भुवि।
पातनं तस्य वक्ष्यामि तच्छृणु त्वं वसुन्धरे!॥
नाहं तत् प्रतिगृह्णामि न च ते वै मम प्रियाः।
मूर्खा भागवतैर्दृष्टं मम विप्रियकारिणः॥
पतन्ति नरके घोरे रौरवे तदनन्तरम्।
अज्ञातस्य च दोषेण दुःखान्यनुभवन्ति च॥
वानरो दश वर्षाणि मार्जारस्त्रयोदश।
मूषकः पञ्च वर्षाणि बलीवर्द्दश्च द्वादश॥
छागश्चैवाष्ट वर्षाणि मासं वै ग्रामकुक्कुटः।
त्रीणि वर्षाणि महिषो भवत्येव न संशयः॥
एतत्ते कथितं भद्रे! पुष्पं यच्च न रोचते।
अकर्म्मण्यं विशालाक्षि! पुष्पं ये न ददन्ति वै॥"

इति वराहपुराणम्॥ *॥

देवीप्रियपुष्पाणि यथा,—

"पुष्पाणि देव्या वैष्णव्याः प्रियाणि शृणु संप्रति।
बकुलैश्चैव मन्दारैः कुन्दपुष्पकुरण्टकैः॥
करवीरार्कपुष्पैश्च शाल्मलैश्चापराजितैः।
दमनैः सिन्धुवारैश्च सुरभीमदनकैस्तथा॥
लताभिर्मरुपैश्च दूर्व्वाङ्कुरैश्च कोमलैः।
मञ्जरीभिः कुशाग्राश्च बिल्वपत्रैः सुशोभनैः॥
पूजयेद्वैष्णवीं देवीं कामाख्यां त्रिपुरां तथा।
अन्याश्च याः शिवामोदाः जायन्ते पुष्पजातयः॥
ता इमाः शृणु कीर्त्यन्ते मया वेतालभैरव!॥
मालती मल्लिका जाती यूथिका माधवीलता।
पाटला करवीरश्च जवा यावन्तिका तथा।
कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः॥
चम्पकाम्रातकौ बाणो बर्व्वरा मल्लिका तथा।
अशोको लोध्रतिलकौ अटरूषशिरीषकौ॥
शमीपुष्पञ्च द्रोणञ्च पद्मोत्पलकदम्बकाः।
श्वेतार्को त्रिसन्ध्या च पलाशः खदिरस्तथा॥
वनमाला च सेवन्ती कुरुदोऽथ कदम्बकः।
बकं कोकनदश्चैव भण्डिलो गिरिकर्णिका॥
नागकेशरपुन्नागौ केतक्यञ्जलिका तथा।
दोहदा बीजपूरश्च नमेरुः शालमेव च॥
मधुकी चक्रविन्दश्च झिण्टी पञ्चविधा तथा।
एवमादिकुसुमैः पूजयेत् वरदां शिवाम्॥"*॥

वर्ज्जनीयपुष्पं यथा,—

"पुष्पञ्च कृमिसम्भिन्नं विशीर्णं भग्नसङ्गतम्।
सकेशं मूषिकाघ्रातं यत्नेन परिवर्ज्जयेत्॥
याचितं परकीयञ्च तथा पर्य्युषितञ्च यत्।
अन्त्यस्पृष्टं पदास्पृष्टं यत्नेन परिवर्ज्जयेत्॥"

इति कालिकापुराणे। ६८। ५४। अध्यायौ॥

केशवपूजने प्रशस्तपुष्पाणि यथा,—

"मालती मल्लिका चैव यूथिका चातिमुक्तकः।
पाटला करवीरश्च जवा सेवन्तिरेव च॥
कुब्जकस्तगरश्चैव कर्णिकारः कुरण्टकः।
चम्पकस्तगरः कुन्दो बाणा बर्व्वरमल्लिका॥
अशोकस्तिलकश्चम्पस्तथा चैवाटरूषकः।
अमी पुष्पप्रकारास्तु शस्ताः केशवपूजने॥
केतकीपत्रपुष्पञ्च पुष्पं भृङ्गारकस्य च।
तुलस्यामलकौ चैव सद्यस्तुष्टिकरं हरेः॥
पद्मान्यम्बुसमुत्थानि रक्तनीले तथोत्पले।
सितोत्पलञ्च छन्दस्य दयितानि सदा हर!॥
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे॥"

इत्यग्निपुराणम्॥*॥

अपि च।

"जाती शताह्वा सुमना कुन्दं बहुपुटं तथा।
बाणश्च चम्पकाशोकं करवीरञ्च यूथिका॥
पारिभद्रं पाटला च बकुलं गिरिशालिनी।
तिलकं वनजञ्चैव पीतकं तगरन्त्वपि॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने।
सुरभीणि तथान्यानि वर्ज्जयित्वा तु केतकीम्॥
येषामपि हि पुष्पाणि प्रशस्तान्यच्युतार्च्चने।
पल्लवान्यपि तेषां तु प्रशस्तानि महासुर!॥
ओषधीनां प्रधानेन बर्हिषाचार्च्चयेत्तथा।
नानारूपैश्चाम्बुभवैः कमलेन्दीवरादिभिः।
प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्वरैः॥
वनस्पतीनामर्च्चेत तथा दूर्व्वाग्रपल्लवैः॥"

इति वामने ९१ अध्यायः॥*॥

विष्णौ पुष्पविशेषदानस्य फलं यथा,—

"आरामप्रभवैः पुष्पैरच्छिन्नैः कीटवर्जितैः।
तथाप्युषितैस्त्वाहृत्य कार्त्तिके विष्णुमर्च्चयेत्।
सर्व्वेषां हि यथा विप्रस्तीर्थानां जाह्नवी यथा।
देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा॥
मालतीमालया देवं योऽर्च्चयेद्गरुडध्वजम्।
जन्मदुःखजरारोगैः कर्म्मभिर्मुक्तिमाप्नुयात्।
मालतीमालया येन पूजितः कार्त्तिके हरिः।
पापलक्षायुतं तस्य वत्स! शौरिः प्रमार्ष्टि।
मालतीपुष्पमालाभिः कार्त्तिके पुष्पमण्डपम्।
विष्णोर्गृहे कृतं येन ते यान्ति परमां गतिम्॥
जातिपुष्पैर्विरचितां मालां यः संप्रयच्छति।
विष्णवे विधिवद्ब्रह्मन् तस्य पुण्यफलं शृणु।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः।
यः स्वयं केतकीपुष्पैः पूजयेद्गरुडध्वजम्।
अब्दकोटिशतं यावत्तुष्टः स्यात्तस्य वै हरिः।
दामोदरं पूजयेद्यः कुसुमैः केतकोद्भवैः।
स याति विष्णुनिलये देवेन सह मोदते॥
मल्लिकाकुसुमैर्देवं योऽर्च्चयेत्त्रिदशेश्वरम्।
कार्त्तिके परया भक्त्या दहेत् पापं त्रिजन्मजम्।
सुगन्धमल्लिकापुष्पैरच्युतं योऽर्च्चयेन्मुने!।
स सर्व्वपापनिर्मुक्तो विष्णुलोके महीयते।
वैदधर्म्मैश्च केशवं संप्राप्ते मधुमाधवे।
योऽर्च्चयेत् स मुनिश्रेष्ठ! लभते वैष्णवं पदम्।
यः पुनः पाटलापुष्पैरर्च्चयेद्गरुडध्वजम्।
सुपुष्पयानं परं स्थानं स प्रयाति हरेर्मुने!॥
अगस्त्यपुष्पैर्देवेशं योऽर्च्चयन्ति जनार्द्दनम्।
देवर्षे! दर्शनात्तेषां नरकाग्निः प्रशाम्यति।
न तत् करोति विप्रेन्द्र! तपसा तोषितो हरिः।
यत् करोति हृषीकेशो मुनिपुष्पैरलङ्कृतः।
विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम्।
कार्त्तिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत्।
मुनिपुष्पकृतां मालां ये यच्छन्ति जनार्द्दने।

शक्रोऽपि तैः समं वत्स ! कुरुते ह्यभिभाषणम् ।
ददात्यभीप्सितान् कामान् इन्द्रचिन्तामणिर्यथा ।
कार्त्तिके मुनिपुष्पेण पूजितो गरुडध्वजः ।
गवामयुतदानेन यत्फलं कार्त्तिके मुने ! ।
मुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं स्मृतम् ।
येऽर्च्चयन्ति सुराध्यक्षं करवीरैः सितासितैः ।
तेषां वर्षशतं यावत् प्रभुर्भवति केशवः ।
वकुलाशोककुसुमैर्येऽर्च्चयन्ति जगत्पतिम् ।
निःशङ्कास्ते भवन्तीह यावच्चन्द्रदिवाकरौ ।
अशोककुसुमै रम्यैस्त्वशोकभयापहम् ।
पूजयित्वा हरिं याति पदं विष्णोरनामयम् ।
शुभगन्धैः सितैर्वत्स ! कुसुमैः पद्मयोद्भवैः ।
अधोक्षजं समभ्यर्च्य नरो याति हरेः पदम् ।
अभ्यर्च्य कौसुमैः पुष्पैः केशवं क्लेशनाशनम् ।
प्रयाति भवनं विष्णोर्व्वन्द्यस्त्रिदशैरपि ।
अटरूषकपुष्पेण पूजयेद्यो जगत्पतिम् ।
स पुण्यवान्नरो याति तद्विष्णोः परमं पदम् ।
कार्त्तिके योऽर्च्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः ।
माधवे योऽर्च्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स यत्नं शक्यो न किङ्करैः ।
माधवे योऽर्च्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवैः ।
धूतपापो निरातङ्कः स विष्णोर्याति तत् पदम् ।
समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
शूद्रानीतैश्च हरेः पूजां कुर्व्वन् व्रजत्यधः ।
तस्माद्विप्रो मुनिश्रेष्ठ ! शिष्येण स्वयमेव वा ।
पुष्पादीनि समाहृत्य पूजयेत् परमेश्वरम् ।
विप्रो दूर्व्वामयैः पुष्पैस्तथा काशकुशोद्भवैः ।
तुलसीविल्वपत्रैश्च पूजयेद्देवताः पितॄन् ।
नार्च्चयेत्तगरैः सूर्य्यं धूर्त्तपुष्पेण केशवम् ।
देवीं लकुचपुष्पेण शङ्करं नागकेशरैः ।"
कालविशेषे तस्य पर्य्युषितत्वं यथा,—
"प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका ।
त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम् ।"
आम्रमञ्जरीविल्वपत्रदानफलं यथा,—
"मञ्जरीं सहकारस्य ये प्रयच्छन्ति वैष्णवाः ।
कार्त्तिके सफलाक्ते स्वर्गकोटिफलभागिनः ।
कार्त्तिके योऽर्च्चयेद्भक्त्या विल्वपत्रेण केशवम् ।
ददात्ययुतफलं केशवस्तस्य वै मुने ! ।
विल्वपत्रेण ये लक्ष्मीं कार्त्तिके कलिमर्द्दनम् ।
पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता ।
नागकेशरपुष्पैर्यः पूजयेद्गरुडध्वजम् ।
स याति वैष्णवं स्थानं यत्र गत्वा न शोचति ।
कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम् ।
जन्मायुतार्ज्जितं पापं स्फोटितं तेन नारद ! ।
न तथा केतकीपुष्पैर्मालतीकुसुमैस्तथा ।
तोषमायाति देवेशः कदम्बकुसुमैर्यथा ।
दृष्ट्वा कदम्बपुष्पाणि तोषमायाति माधवः ।
किं पुनः पूजितो देवः सर्व्वकामप्रदो हरिः ।
हरिं किंशुकपुष्पैर्यः पूजयेत्त्रिदशाधिपम् ।
वैकुण्ठे रमते सम्यक् विष्णुना सह वैष्णवः ।
पर्व्वकाले च देवेशं कुसुमैश्चन्दनार्च्चितैः ।
योऽर्च्चयेत् परमं विष्णुं संसारे न पुनर्व्विशेत् ।
कुन्दपुष्पेण विप्रर्षे ! योऽर्च्चयेद्गरुडध्वजम् ।
कोटिजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ।
शमीपुष्पेण देवेशं पूजयेदसुरार्द्दनम् ।
यमं न पश्यति विप्रर्षे ! न याति दुर्गतिं नरः ।"

इति पाद्मोत्तरखण्डे १११ अध्यायः ॥ * ॥

लक्ष्मीतुष्टिप्रियपुष्पाणि यथा, नारदीयपञ्चमसहस्रे ।
"मालतीवकुलाशोकशेफालिनवमालिकाः ।
आम्रातकतगराह्वोडमल्लिकामधुपिण्डिकाः ।
यूथिकाष्टापदं कुन्दं कदम्बं मधुपिप्पलम् ।
पाटला चम्पकं हृद्यं लवङ्गमतिमुक्तकम् ।
केतकं कुरवकं विल्वं कह्लारकारकं द्विजम् ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुष्टिप्रियाणि मे ।"
केशवार्च्चने निषिद्धपुष्पाणि यथा, विष्णुधर्म्मोत्तरे ।
"उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत् ।
अन्यायतनजातानि कण्टकीनि तथैव च ।
रक्तानि यानि धर्म्मज्ञ ! चैत्यवृक्षोद्भवानि च ।
श्मशानजातान्यन्यानि यानि चाकालजानि च ।"
तथा ।
"कुटजं शाल्मलीपुष्पं शिरीषञ्च जनार्द्दने ।
निवेदितं भयं रोगं निःस्वत्वञ्च प्रयच्छति ।
बन्धुजीवकपुष्पाणि रक्तान्यपि च दापयेत् ।
आहृत्य रक्तकुसुमदानात् दौर्भाग्यमाप्नुयात् ।"
परारोपितवृक्षस्य पुष्पग्रहणे दोषः । अगस्त्यः ।
"परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्च्चयेत् ।
अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम् ।"
एतद्द्विजेतरपरम् ।
"द्विजस्त्वेधःपुष्पाणि सर्व्वतः स्वयमाहरेत् ।"
इति याज्ञवल्क्यात् ।
"देवार्थञ्च कुसुममस्तेयं मनुरब्रवीत् ।"
इति वचनात् ।
"गोऽर्थे तृणमेधांसि वीरुद्वनस्पतीनाम् ।
पुष्पाणि स्ववदाददीत फलानि चापरिवृतानि ।"
इति गौतमवचनाच्च ।
द्विजेतरस्य दण्डोऽपि ।
"तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् ।
अपृच्छन्नियमानो हस्तच्छेदनमर्हति ।"
इति स्मृतेः ॥ * ॥
दैवोपरि धृतं मस्तकोपरि धृतं अधोवस्त्रधृतं अन्तर्जलप्रक्षालितञ्च पुष्पं दुष्टमिति हरिभक्तिनामके ग्रन्थे । अभिवाद्याभिवादककरस्थपुष्पं शौचवात् कर्म्मेरयम् । इति केचित् ॥ * ॥
याचितादिपुष्पदानस्य निष्फलत्वम् । याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलमिति वदन्ति ।
वामहस्तधृतादिपुष्पस्यादेयत्वं यथा,—
"न पुष्पच्छेदनं कार्य्यं देवार्थे वामहस्ततः ।
न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्ततः ।"
समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीतशातातपौ ।
"समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् पतत्यधः ।"
क्रये प्रतिप्रसवमाह मत्स्यपुराणम् ।
"पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयक्रियाहृतैः ।"
वीरक्रयो वीरवत् यावन्मात्रमूल्येन विक्रेतुरभ्यस्तमूल्येन क्रयः ॥ * ॥ पुष्पदानप्रकारो ज्ञानमालायाम् ।
"पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् ।
पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पणम् ।"
मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा,—
"स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ।"
एतत्तु द्वितीयस्नानाभिप्रायम् । इति रत्नाकरः ।
पाद्मे मनुष्यखण्डे ।
"स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः ।
तत्पुष्पस्तवनै देवि ! रौरवे परिपच्यते ।"
पुष्पाभावे देयानि यथा, विष्णुधर्म्मोत्तरे ।
"पुष्पाभावेऽपि देयानि पत्राणि च जनार्द्दने ।
पत्राभावे जलं दद्यात्तेन पुण्यमवाप्स्यति ।" ॥ * ॥
पुष्पदानमाहात्म्यं यथा,—
"न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा ।
तथा प्रसादमायाति यथा पुष्पैर्जनार्द्दनः ॥ * ॥
देवताविशेषे वर्ज्जनीयपुष्पं यथा, शातातपः ।
"शिवे विवर्ज्जयेत् कुन्दमुन्मत्तञ्च हरेस्तथा ।
देवीनामर्कमन्दारौ सूर्य्यस्य तगरन्तथा ।" *
पुष्पविशेषाणां कालिकपर्य्युषितत्वम् । भविष्ये ॥
"पद्मानि सितरक्तानि कुमुदान्युत्पलानि च ।
एषां पर्य्युषिताशङ्का कार्य्या पञ्चदिनोत्तरम् ।"
पुष्पविशेषस्यापर्य्युषितत्वं यथा,—
"तुलस्यगस्त्यविल्वानां न च पर्य्युषितात्मता ।"
योगिनीतन्त्रे ।
"विल्वपत्रञ्च माध्यञ्च तमालामलकीदलम् ।
कह्लारं तुलसी चैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिकात्मकम् ।"
कलिकात्मकं प्रस्फुटयोग्यम् । इत्येकादशीतत्त्वम् ॥ रामभट्टमते पुष्पविशेषाणां कालिकपर्य्युषितत्वं यथा,
"विल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्गदूर्व्वा
मन्दाम्भोजाब्जदर्भा हरितिलतगरब्रह्मकह्लारमल्ली ।
चम्पाश्वारातिकुम्भीदमनमरुवका विष्णुतोऽहानि मासा-
र्द्धं पक्षोऽर्क्कषडीशोनिधिनिधि-वसु-भू भू यमा भूय एवम् ।"
अस्यार्थः । शता शतावरी । मन्दः मन्दारः । अर्हिमांसकेसरः । हरिर्मरुवः । अश्वारातिः करवीरः । कुम्भी पाटला । विल्वमारभ्य चाह्निमधीन्तं गणयित्वा दर्भमारभ्य पुनर्व्विंशदादि गणयेत् । एतद्दिनोत्तरं पर्य्युषितत्वमित्यर्थः । इति पदार्थादर्शः ॥ * ॥ पुष्पकीटस्यादर्शनीयादि यथा,

पुष्पचयनम् १ पुष्पार्थैर्वा इचिताचित्ता २ माला ३ गोभरत्नलनेर्थंता ४ वक्रोक्तिः ५ सम्भ्रमार्थैः ६। इति कविकल्पलता ॥ (घोटकलक्षणविशेषः। यथा, अश्ववैद्यके। ३। ८२—९२।

"आगन्तवस्तुरङ्गस्य ये भवन्त्यशुभाङ्गगाः।
बिन्दवः पुष्पसंज्ञास्तु ते हिताहितसंज्ञकाः ॥
तेषां प्रदेशभेदेन लक्षणं यद्व्यवस्थितम्।
तत्तथैव समासेन विस्पष्टं कीर्त्त्यतेऽधुना ॥
अपाने च ललाटे च भ्रुवोर्मूर्द्धनि कर्णयोः।
निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् ॥
स्कन्धे वक्षसि कचे च सृक्कयोर्वाहुकक्षयोः।
दन्तोः पृष्ठे च वाहानां पुष्पं स्वामिहित-
प्रदम् ॥
नाभौ केशे तथा कण्ठे दन्ते चैव हि वाजिनाम्।
पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्व्वार्थसाधकम् ॥
अप्रशस्तानि दृष्टानि यानिभिर्यानि वाजिनाम्।
तानि सम्यक् प्रवक्ष्यामि पुष्पाण्यागमदर्शनात् ॥
अधरोष्ठे कटे प्रोथे उत्तरोष्ठे तथैव च।
घोणायां गण्डयोश्चैव शङ्खयोश्च तथा भ्रुवोः ॥
ग्रीवायाश्च वधे चैव वङ्क्षणोः स्फिके स्फिचि।
पायौ क्रोडे च पुष्पाणि निन्दितानीति निश्चयः ॥
रक्तं पीतं तथा श्यामं पुष्पं सर्व्वत्र नेष्यते।
शुभप्रदेशसञ्जातं भवेत् साधारणं ततः ॥
पुत्रलाभं धनप्राप्तिमारोग्यं विजयं तथा।
विन्द्यात् पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम् ॥
सर्व्वाङ्गपुष्पितो वाजी मरिष्यत्यो न संशयः ॥")

स्त्रीरजः। (यथा, मार्कण्डेये। ५१। ४२।
"स्त्रीणां पुष्पं प्रवत्यन्या प्रदत्तं या तु कन्यका ॥")
विकाशः। इति मेदिनी। पे, ८। धनदस्य विमानम्। नेत्ररोगविशेषः। इति हेमचन्द्रः ॥ फुली इति भाषा ॥ अस्यौषधं यथा,—

"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च।
विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला।
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ॥
नाशयेत्तिमिरं कण्डू पटलान्यर्व्वुदानि च।
अधिकानि च मांसानि यश्च रात्रौ न पश्यति ॥
अपि त्रिवार्षिकं पुष्पं मासेनैकेन साधयेत्।
वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी ॥"
इति चक्रपाणिदत्तः ॥

(अस्य चिकित्सान्तरं यथा,—
"पूर्व्वाहारविहारैस्तु नेत्रे पुष्पञ्च जायते।
प्रथमं सुखसाध्यं स्यात् द्वितीयं कष्टसाध्यकम् ॥
तृतीयं यत्नसाध्यन्तु चतुर्थमसाध्यकम्।
शङ्खपुष्पं तथा रोध्रं शङ्खनाभिर्मनःशिला ॥
काञ्जिकेन तु संपेष्य छायाशुष्का विधारयेत्।
वातिके काञ्जिकेनापि पैत्तिके पयसा हिता ॥
श्लैष्मिके मधुसंयुक्ता पुष्पस्याञ्जनतो हिता।"
इति हारीते चिकित्सितस्थाने चतुश्चत्वारिंश-
त्तमेऽध्याये ॥)

पुष्पकं, क्ली, (पुष्पमिव पुष्पैर्वा कायति प्रकाशते इति। कै+कः। पुष्प+संज्ञायां कन् वा।) रीतिपुष्पम्। (पुष्पमिव प्रतिकृतिः। पुष्प+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) धनदस्य विमानम्। (कालपर्य्ययेण धनदं विजित्य रावणेन हृतोऽभूत् रावणस्यैव आसन्। यथा, रघौ। १०। ४६।

"वैमानिकाः पुण्यकृतः त्यजन्तु मरुतां पथि।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥")

नेत्ररोगः। रत्नकङ्कणम्। रसाञ्जनम्। लोह-कांस्यम्। मृद्गारशकटी। इति मेदिनी ॥ कासीसम्। इति हेमचन्द्रः ॥ (पुष्प+स्वार्थे कन्। पुष्पम्। यथा, गारुडे १८८ अध्याये।

"समाभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम्।
स्त्रीणामग्रे भ्रामयेच्च चयाहे भा यथा भवेत् ॥")

पुं, निर्व्विषसर्पजातिभेदः। यथा, सुश्रुते कल्प-स्थाने। ४ अध्याये।

"निर्व्विषास्तु गलगोली शूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः क्षीरिकः पुष्पकोऽहिपताकोऽन्धाहिको गौरा-हिको वृक्षेशय इति।" ॥ पर्व्वतभेदः। यथा, मार्कण्डेये। ५५। १३।

"स्वर्णशृङ्गो धातुशृङ्गो पुष्पको मेघपर्व्वतः ॥"

प्रासादस्य मण्डपभेदः। यथा विश्वकर्म्मप्रकाशे। ६ अध्याये।

"अथातः संप्रवक्ष्यामि मण्डपानाञ्च लक्षणम्।
मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥
विविधा मण्डपाः कार्य्याः ज्येष्ठमध्यकनीयसः।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ॥
पुष्पकः पुष्पभद्रश्च सुव्रतो ऽमृतनन्दनः।
कौशल्यो बुद्धिसंकीर्णो गजभद्रो जयावहः ॥")

पुष्पकरण्डकं, क्ली, (पुष्पाधार करण्ड इव काय-तीति। कै+कः। बहुतरमनोरमपुष्पाधारक-त्वादस्य तथात्वम्।) उज्जयिन्यां शिवस्य उद्या-नम्। यथा, शब्दमाला।

"महाकालस्त्वोज्जयनी विशालावन्तिका तथा।
तस्य उद्यानकं प्रोक्तं नाम्ना पुष्पकरण्डकम् ॥"

पुष्पकरण्डिनी, स्त्री, (पुष्पकरण्डकं शिवोद्यान-मस्त्यस्या इति। इनिः। स्त्रियां ङीप्।) उज्जयिनी। यथा, हेमचन्द्रः। ४। ४१ ॥

"उज्जयिनी स्याद्विशालावन्ती पुष्पकरण्डिनी ॥"

पुष्पकासीसं, क्ली, (पुष्पमिव कासीसम्।) पीत-वर्णकासीसम्। यथा, भावप्रकाशे।

"अथ कासीसं भक्षयन्नम्लिकाञ्च।
कासीसं धातुकासीसं पांशुकासीसमित्यपि।
तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते ॥
कासीसमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा।
वातश्लेष्महरं केश्यं नेत्र्यं कण्डूविषप्रणुत् ॥
मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम् ॥"

तत्पर्य्यायः। कंसकम् १ नेत्रौषधम् २। इति हेमचन्द्रः ॥ वतुपकम् ४ लोमशम् ५ हंसम् ६ विमदम् ७ नीलज्योतिका ८। अस्य गुणाः। तिक्तत्वम्। शीतत्वम्। नेत्रामयापहत्वम्। लेपेन पामाकुष्ठादिनानात्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः ॥

पुष्पकीटः, पुं, (पुष्पप्रियः कीटः।) भ्रमरः। इति त्रिकाण्डशेषः ॥ कुसुममध्यमिमात्रञ्च ॥

पुष्पकेतनः, पुं, (पुष्पं केतनं ध्वजो यस्य।) कामदेवः। इति हेमचन्द्रः। २। १४२ ॥

पुष्पकेतु, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य केतुरिव विनाशकत्वात्।) कुसुमाञ्जनम्। इत्यमरः। २। ९। १०३ ॥

पुष्पघातकः, पुं, (हन्तीति। हन+ण्वुल्। घातकः। पुष्पाणां पुष्पशाखानां घातकः नाशकः।) वंशः। इति शब्दमाला ॥

पुष्पचापः, पुं, (पुष्पमेव पुष्पमयो वा चापोऽस्य।) कामदेवः। इति हेमचन्द्रः। २। १४१ ॥ (यथा, कथासरित्सागरे। १४। ७८।

"स संमोहनवायव्यवारुणाद्यैर्निरन्तरैः।
विद्धेव पुष्पचापेन सतृष्णं समलक्ष्यत ॥")

पुष्पाणां चापः। पुष्पधनुः। यथा, रघौ। ११। ४५।

"तातलव्यमकरोत् स संसदा
विस्मयस्तिमितनेत्रमीक्षितः।
शैलसारमपि नातियत्नतः
पुष्पचापमिव पेशलं स्मरः ॥")

पुष्पचामरः, पुं, (पुष्पं चामरं इवास्य।) दमन-वृक्षः। इति त्रिकाण्डशेषः ॥ केतकवृक्षः। इति शब्दमाला ॥

पुष्पदः, पुं, (पुष्पं ददातीति। दा+कः।) वृक्षः। इति हेमचन्द्रः। ४। १८० ॥ पुष्पदातरि, त्रि ॥

पुष्पदन्तः, पुं, (पुष्पमिव शुक्लो दन्तोऽस्य।) वायु-कोणस्थदिग्गजः। इत्यमरः। १। ३। ४ ॥ विद्याधर-विशेषः। इति मेदिनी। ते, २१३ ॥ जिनभेदः। इति हेमचन्द्रः ॥ नागभेदः। इति धरणिः ॥ (यथा, महाभारते। ५। १०३। ९०।

"कर्णौ हस्तिपदश्च पुष्पदन्तश्च वामनः ॥")

पार्व्वतीप्रदत्तः कार्त्तिकेयस्यानुचरविशेषः। यथा, महाभारते। ९। ४५। ४९।

"उन्मादं पुष्पदन्तञ्च शङ्कुकर्णं तथैव च।
प्रददावग्निपुत्राय पार्व्वती शुभदर्शना ॥"

विष्णोरनुचरविशेषः। यथा, भागवते। ८। २१। १७।

"जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥"

शिवगणभेदः। यथा, कथासरित्सागरे। १। ५४।

"प्रसादवितरः शम्भोः पुष्पदन्तो गणोत्तमः।
अपेक्षि च प्रविष्टोऽस्य नन्दिना द्वारि तिष्ठता ॥")

पुष्पदन्तकः, पुं, गन्धर्व्वविशेषः। स च महिम्नः स्तवकर्त्ता। इति शब्दरत्नावली ॥

पुष्पद्रवः, पुं, (पुष्पाणां द्रवः।) पुष्परसः। तत्-पर्य्यायः। पुष्पसारः २ पुष्पस्वेदः ३ पुष्पजः ४ पुष्पनिर्य्यासकः ५ पुष्पाम्बुजः ६। अस्य गुणाः। सुरभित्वम्। शीतत्वम्। कषायत्वम्। सौख्य-त्वम्। दाहभ्रमार्त्तिवमिमोहशान्तिमयक्षयार्त्ति-पित्तकफदोषविकारदोषकनाशित्वम्। रुच्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः ॥

पुष्पधन्वा, [न्] पुं, (पुष्पं धनुरस्येति। "धनुषश्च।" ५। ४। १३२। इति अनङादेशः।)

कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, कुमारसम्भवे । ३ । ६४ ।
"सह्यचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ।")

पुष्पलिहः, पुं, (पुष्पं लिहति चुम्बतीति । पुष्प+लिह+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पुष्पन्धयः, पुं, (पुष्पं धयतीति । धेट पाने+खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६।३।६७। इति मुम् ।) भ्रमरः । इति राजनिर्घण्टः ॥ पुष्परसपानकर्त्तरि, त्रि । पुष्पशब्दाद्धेटधातोः कर्त्तरि खश्प्रत्ययनिष्पन्नत्वात् । इति मुग्धबोधव्याकरणम् ॥

पुष्पपथः, पुं, (पुष्पस्य स्त्रीरजसः पन्थाः सरणिः ।) योनिः । इति त्रिकाण्डशेषः ॥

पुष्पपुरं, क्ली, (पुष्पवत् पाटलिपुष्पयुक्तं सदत् शोभाजनकं वा पुरम् ।) पाटलिपुत्त्रनगरम् । इति भूरिप्रयोगः ॥ (यथा, रघौ । ६ । २४ ।
"अनेन चेदिच्छसि गृह्यमाणं
पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥"
"पुष्पपुराङ्गनानां पाटलिपुराङ्गनानाम् ।" इति तट्टीकायां मल्लिनाथः ॥)

पुष्पफलः, पुं, (प्रापयुक्तं फलं यस्य ।) कुष्माण्डः । इति शब्दमाला ॥ कपित्थः । इत्यमरः ।२।४।२१॥

पुष्पमासः, पुं, (पुष्पाणां मासः पुष्पप्रधानो मासो वा ।) वसन्तः । इति राजनिर्घण्टः ॥ (यथा, हरिवंशे । ५६ । ४ ।
"मासान् वै पुष्पमासादीन् गणयन्तु मम स्त्रियः ।
परिणामे तु गर्भस्य शेषं ज्ञास्यामहे वयम् ॥")

पुष्परक्तः, पुं, (पुष्पे पुष्पावच्छेदे रक्तं रक्तवर्णमस्य । यद्वा, पुष्पं रक्तमस्य ।) सूर्य्यमणिद्रुमः । इति शब्दचन्द्रिका ॥

पुष्परसः, पुं, (पुष्पाणां रसः ।) मकरन्दः । इत्यमरः । २ । ४ । १७ ॥ (यथा, भावप्रकाशे क्वाथाधिकारे ।
"पलं पलञ्चापि कटुत्रयञ्च
तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
त्रिनिःसितेनाथ विमिश्रयेच्च ॥")

पुष्परसाह्वयं, क्ली, (पुष्परस इत्याह्वय आख्या यस्य ।) मधु । इति राजनिर्घण्टः ॥

पुष्परागः, पुं, (पुष्पस्येव रागो वर्णोऽस्य ।) मणिविशेषः । पुखराज इति भाषा । तत्पर्य्यायः । मञ्जुमणिः २ वाचस्पतिवल्लभः ३ । इति भावप्रकाशः ॥ पीतः ४ पीतस्फटिकः ५ पीतरक्तः ६ पीताश्म ७ गुरुरत्नम् ८ पीतमणिः ९ पुष्पराजः १० ॥ (यथा, रघौ ।१८।३२।
"तस्य प्रभा निर्ज्जितपुष्परागं
पौष्यान्तिमौ पुष्यमसूत पत्नी ॥"
"प्रभया निर्ज्जितः पुष्परागो मणिविशेषो येन ।" इति तट्टीकायां मल्लिनाथः ॥) अस्य गुणाः । अम्लत्वम् । शीतत्वम् । वातनाशित्वम् । दीपनत्वञ्च ॥ ० ॥ तस्य धारणगुणः । आयुःश्रीप्रज्ञाकारित्वम् ॥ ० ॥ तस्य लक्षणं यथा,—
"स्वच्छायपीतगुरुगात्रसुरङ्गशुद्धं
स्निग्धञ्च निर्म्मलमतीव सुवृत्तशीतम् ।
यः पुष्परागसकलं कलयेत्तस्य
पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान् ॥" ० ॥
तस्य कुलक्षणं यथा,—
"लघ्वबिन्दूद्धितं रूक्षं धवलं मलिनं लघु ।
विच्छायं शर्कराकारं पुष्परागं सदोषकम् ॥"
तस्य परीक्षालक्षणं यथा, राजनिर्घण्टे ।
"घृष्टो विकाशयेत् पुष्परागमधिकमात्मीयम् ।
न खलु पुष्परागो व्यक्ततया परीक्षकैरुक्तः ॥"
तस्योत्पत्त्यादि यथा,—
सूत उवाच ।
"पतिता या हिमाद्रौ हि त्वचस्तस्य सुरद्विषः ।
प्रादुर्भवन्ति ताभ्यस्तु पुष्परागा महागुणाः ॥
आपीतपाण्डुरुचिरः पाषाणः पुष्परागसंज्ञस्तु ।
कौरण्टकनामा स्यात् स एव यदि लोहितापीतः ॥
आलोहितस्तु पीतः स्वच्छः काषायकः स एवोक्तः ।
आनीलशुक्लवर्णः स्निग्धः सोमालकः स्वगुणैः ॥
अत्यन्तलोहितो यः स एव खलु पद्मरागसंज्ञः स्यात् ।
अपि चेन्द्रनीलसंज्ञः स एव कथितः सुनीलः सन् ॥
मूल्यं वैदूर्य्यमणेरिव गदितं ह्यस्य रत्नशास्त्रविदा ।
धारणफलञ्च तद्वत् किन्तु स्त्रीणां सुतप्रदो भवति ॥"
इति गारुडे ७५ अध्यायः ॥ ० ॥
प्रकारान्तरम् ।
"शणपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः ।
पुत्त्रदो धनदः पुण्यः पुष्परागमणिर्ध्रुवः ॥
हैमधातुसमुद्भूतः पुष्परागमणिर्द्विधा ।
पद्मरागाकरे कश्चित् कश्चित्ताम्रोपलाकरे ॥
ईषत्पीतच्छविच्छायास्वच्छं कान्त्या मनोहरम् ।
पुष्परागमिति प्रोक्तं रत्नशोभमहीसुजा ॥
ब्रह्मादिजातिभेदेन तद्विशेषं चतुर्व्विधम् ।
छाया चतुर्व्विधा तस्य सिता पीता सितासिता ॥"
इति युक्तिकल्पतरुः ॥

पुष्परेणुः, पुं, (पुष्पाणां रेणुः ।) परागः । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ३८ ।
"सेव्यमानौ सुखस्पर्शैः शालनिर्य्यासगन्धिभिः ।
पुष्परेणूत्किरैर्व्वातैराधूतवनराजिभिः ॥")

पुष्परोचनः, पुं, (पुष्पं रोचनमस्य । पुष्पेषु रोचनः रुचिप्रदो वा ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

पुष्पलावः, पुं, (पुष्पं लुनाति अपचिनोतीति मालाकारः । "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) मालाकारः । इति जटाधरः ॥ (स्त्रियां ङीष् । मालाकारपत्नी । यथा, मेघदूते । २८ ।
"गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानाम् ॥")

पुष्पलावी, [न्] पुं, (पुष्पं लुनातीति । लूञ् छेदने+णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पलिट्, [ह्] पुं, (पुष्पं लेढीति । लिह+क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥

पुष्पवती, स्त्री, (पुष्पमस्त्यस्या इति । पुष्प+मतुप् । मस्य वः । ततो ङीप् ।) रजस्वला । इत्यमरः । २ । ६ । २० ॥ (यदुक्तं,—
"काममेही भवेत् सोऽपि पुष्पवत्याश्च सङ्गमात् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । १२ ।
"पुष्पवत्यामुपस्पृश्य त्रिरात्रोपषितो नरः ।
गोसहस्रफलं लब्ध्वा पुनाति स्वकुलं नृप ! ॥")
पुष्पविशिष्टे, त्रि ॥ (यथा, रामायणे ।२।९४।१०।
"पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥")

पुष्पवन्तौ, पुं, (पुष्प विकाशे+भावे घञ् । पुष्पो विकासोऽस्त्यनयोरिति । पुष्प+मतुप् । मस्य वः ।) एकयोक्त्या चन्द्रसूर्य्यौ । इत्यमरः ।१।४।१०॥
"एकया उक्त्या अपृथग्वचनेन चन्द्रार्कौ पुष्पवच्छब्दवाच्यौ न तु पुष्पवानिन्दुः सूर्य्यो वेत्यभिधीयते । सान्ते । एकयोक्त्येति भिन्नप्रयोगे नैवेत्यर्थः । अतएव द्वार्थकत्वात् सदा द्विवचननियमः । पुष्पो विकाशस्तद्योगात्तुः । पुष्पवच्छब्दोऽयमो रूढोऽपि रविशशिनौ पुष्पवन्तावाख्याविति नाममाला ।" इति तट्टीकायां भरतः ॥

पुष्पवाटी, स्त्री, (पुष्पाणां वाटी ।) पुष्पोद्यानम् । फुलवागान इति भाषा ॥ यथा, हेमचन्द्रः । ४ । १७९ ॥
"वाटी पुष्पादिवाटाद्यौ क्षुद्रारामः प्रसेलिका ।"

पुष्पवाहनः, पुं, (पुष्पं पुष्करं वाहनमिव यस्य ।) पुष्कराजः । यथा, अग्निपुराणे ।
"राजा यथोक्तञ्च पुनरकरोत् पुष्पवाहनः ।
विभूतिद्वादशीं कृत्वा स गतः परमां गतिम् ॥"

पुष्पशकटी, स्त्री, आकाशवाणी । यथा,—
"चित्रोक्तिः पुष्पशकटी दैवप्रश्न उपश्रुतिः ॥"
इति त्रिकाण्डशेषः ॥

पुष्पशरः, पुं, (पुष्पाणि शरा यस्य ।) कन्दर्पः । कुसुमेषुशब्दात् ॥

पुष्पशरासनः, पुं, (पुष्पं शरासनं धनुर्यस्य ।) कन्दर्पः । पुष्पधन्वशब्देनास्य ॥

पुष्पशून्यः, पुं, (पुष्पेण शून्यः ।) उदुम्बरः । इति राजनिर्घण्टः ॥ कुसुमरहिते, त्रि ॥

पुष्पसमयः, पुं, (पुष्पाणां समयः ।) वसन्तः । इत्यमरः ॥

पुष्पसारः, पुं, (पुष्पस्य सारः ।) पुष्परसः । इति राजनिर्घण्टः ॥ (पुष्पश्रेष्ठे, त्रि । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"पुष्पसारां मल्लिकेव गुणश्री लक्ष्मीशगोम् ।")

पुष्पसौरभा, स्त्री, (पुष्पे सौरभं यस्याः । सौर-गन्धवत्त्वादेव तथात्वम् ।) कलिकारीक्षुपः । इति राजनिर्घण्टः ॥

पुष्पस्वेदः, पुं, (पुष्पाणां स्वेदः ।) पुष्पद्रवः । इति राजनिर्घण्टः ॥

पुष्पहासा, स्त्री, (पुष्पं स्त्रीरजः हास इव यस्याः ।) रजस्वला । इति शब्दरत्नावली ॥

पुष्पहीना, स्त्री, (पुष्पेण हीना ।) उडुम्बर-वृक्षः । इति शब्दचन्द्रिका । निष्फला । रजः-शून्या । इति हेमचन्द्रः ॥

पुष्पा, स्त्री, (पुष्पं अभिधेयत्वेनास्त्यस्या इति । अच् । टाप् ।) कर्णपुरी । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । चम्पा २ मालिनी ३ । इति त्रिकाण्डशेषः ॥

पुष्पाजीवः, पुं, (पुष्पैराजीवति जीविकां निर्व्वा-हयतीति । आ + जीव + अच् ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पाजीवी, [न्] पुं, (पुष्पैराजीवतीति । आ + जीव + णिनिः ।)मालाकारः । इति जटाधरः ॥

पुष्पाञ्जनं, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य अञ्ज-नम् ।) अञ्जनभेदः । तत्पर्य्यायः । पुष्पकेतु २ कौसुम्भम् ३ कुसुमाञ्जनम् ४ रीतिकम् ५ रीति-पुष्पम् ६ पौष्पकम् ७ । तस्य गुणाः । हिम-त्वम् । पित्तहिक्कास्रदाहविषकासाभिष्यन्दनेत्रा-मयनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुष्पाञ्जलिः, पुं, (पुष्पाणामञ्जलिः ।) कुसुमा-ञ्जलिः । प्रसूनाञ्जलिः । यथा,—

"पञ्च पुष्पाञ्जलीन्दत्त्वा परिवारार्च्चनञ्चरेत् ।"

इति तन्त्रसारधृतभट्टः ॥

पुष्पावचायी, [न्] पुं, (पुष्पं अवचिनोतीति । अव + चि + णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पासवं, क्ली, (पुष्पस्य आसवम् ।) मधु । इति राजनिर्घण्टः ॥ (यथा, ऋतुसंहारे । ५ । ५ ।

"गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः ॥")

पुष्पास्त्रः, पुं, (पुष्पमस्त्रमस्य ।) कन्दर्पः । इति शब्दरत्नावली ॥

पुष्पाह्वा, स्त्री, (पुष्पैराह्वयते स्पर्द्धते इति । आ + ह्वे + कः । ततष्टाप् ।) शतपुष्पा । इति राज-निर्घण्टः ॥

पुष्पिका, स्त्री, (पुष्पाति विकसतीवेति । पुष्प + ण्वुल् । टापि अत इत्वम् ।) दन्तमलम् । इति हारावली । १८५ ॥ लिङ्गमलम् । इति हेम-चन्द्रः । ३ । २९८ ॥ अध्यायान्ते तत्प्रति-पादितोक्तिः ॥

पुष्पितः, त्रि, (पुष्प + क्तः । पुष्पं जातमस्येति । पुष्प + तारकादित्वात् इतच् वा ।) जातपुष्पः । पुष्पविशिष्टः । कुसुमितः । यथा,—

"एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा ॥"

इति चाणक्यः ॥

पुष्पिताग्रा, स्त्री, (पुष्पितं विकसितमिवाग्रं यस्याः ।) छन्दोविशेषः । तस्य लक्षणम् । यथा,—

"अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥"

उदाहरणम् ।

"करकिसलयशोभया विभान्ती
कुचफलभारविनम्रदेहयष्टिः ।
स्मितरुचिरविलासपुष्पिताग्रा
व्रजयुवतिव्रततौ हरेर्मुदेऽभूत् ॥"

इति छन्दोमञ्जरी ॥

पुष्पेषुः, पुं, (पुष्पं इषुर्यस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥ (यथा, कथासरित्-सागरे । ७ । १६ ।

"पुष्पाभिलापामालोक्य स चैकां मुनिकन्यकाम् ।
यथावकाशात् पुष्पेषुशराघातरयाकुलाम् ॥")

पुष्यः, पुं, (पुष्यन्त्यस्मिन्नर्थाः इति । पुष + "पुष्य-सिद्धौ नक्षत्रे ।" ३ । १ । ११६ । इति क्यप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टमनक्षत्रम् । तत्तु मालाकारैकतारात्मकम् । इति ज्योति-षम् ॥ तत्पर्य्यायः । सिध्यः २ तिष्यः ३ । इत्य-मरः । १ । ३ । २२ ॥ पुष्या ४ । इति भरतः ॥ (यथा, मनुः । ४ । ९६ ।

"पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्ज्जनं द्विजः ॥")

तस्य स्वरूपं यथा,—

"शरणपीठकठिनीरजःप्रभे
मध्यमाश्रितविहायसे गुरौ ।
तौलिकात् पृथगस्थावलोचने
लोचनादिकुमिताग्रगाः कलाः ॥" २ । ५२ ॥

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ ७ ॥

तत्र जातस्य फलम् ।

"प्रशान्तगात्रः पितृमातृभक्तः
स्वधर्म्मयुक्तोऽभिनयाभियुक्तः ।
भवेन्मनुष्यः खलु पुष्यजन्मा
सम्मानचामीकरवाहभाग्यः ॥"

इति कोष्ठीप्रदीपः ॥

तत्पर्व्वणि गङ्गास्नानफलं यथा,—

"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः ।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत् ॥"

इति ब्रह्माण्डपुराणम् ॥ * ॥

पौषमासः । कलियुगः । इति मेदिनी । ये, ३८ ॥ (सूर्य्यवंशीयनृपविशेषः । यथा, रघुः । १८ । ३२ ।

"तस्य प्रभानिर्ज्जितपुष्परागं
पौष्यां तिथौ पुष्यमसूत पत्नी ।
तस्मिन्नपुष्यन्नुदिते समग्रां
पुष्टिं जनाः पुष्य इव द्वितीये ॥"

पुष + भावे क्यप् । पुष्टिः । यथा, ऋग्वेदे । १ । १६१ । १२ ।

"नि: षम विद्युजिह्वका विदस्य पुष्यमग्नन् ।"

"विदस्यासादावरकस्य पुष्यं पोषमग्नन् ।" इति तद्भाष्ये सायनः ॥)

पुष्यरथः, पुं, (पुष्य इव रथः । पुष्ये यात्रोत्-सवादौ रथो वा ।) यत् चक्रयानं युद्धार्थं न भवति किन्तु यात्रोत्सवादौ सः । तत्पर्य्यायः । चक्रयानम् २ । इत्यमरः । २ । ८ । ५१ ॥ (यथा, माघे । ३ । २२ ।

"सञ्चारयः पुष्यरथं रथाङ्गी
क्षिप्रं प्रयाणाय इवाधिरूढः ॥")

पुष्यलकः, पुं, (पुष्यं पुष्टिं लकति आस्वादयति वा । लक + अच् ।) गन्धमृगः । (यथा,—

"केशेषु चमरीं हन्ति सीम्नि पुष्यलको हतः ॥"

इति व्याकरणम् ।)

चपणकः । कीलः । इति मेदिनी । के, १९९ ।

पुष्यस्नानं, क्ली, (पुष्ये पुष्यनक्षत्रकाले स्नानम् ।) पुष्याभिषेकः । तस्य विधिर्यथा,—

और्व्व उवाच ।

"शृणु राजन् ! प्रवक्ष्यामि पुष्यस्नानविधिक्रमम् ।
येन विघ्नाश्चमायान्ति विघ्ना नश्यन्ति सन्ततम् ।
पौषे पुष्यसंयोगे चन्द्रे पुष्यस्नानं समाचरेत् ।
सौभाग्यकल्याणकरं दुर्भिक्षमरकापहम् ।
विप्रादिदुष्टकरणे व्यतीपाते च वैधृतौ ।
षष्ठे शूले व्यतीपाते योगे यदि न लभ्यते ।
तृतीययुक्तपुष्यर्क्षे रविभौमादिकेऽपि च ।
तदा समस्तदोषाणां तत्स्नानं शान्तिकारकम् ।
ग्रहदोषाश्च जायन्ते यदि राष्ट्रेषु चेतयः ।
तदा पुष्यसमायोगे तु कुर्य्यान्मासान्तरेऽपि तत् ।
इदन्तु ब्रह्मणा शान्तिरुद्दिष्टा गुरवे पुरा ।
शक्रार्थं सर्व्वदेवानां शान्त्यर्थञ्च जगत्पते ! ॥ ॥
तुषकेशास्थिवल्मीककीटदंशादिवर्ज्जिते ।
शर्कराहमिभस्मादिदोषैश्च परिवर्ज्जिते ।
काकोलूककङ्कैश्च काकोलैर्गृध्रकैस्तथा ।
वर्ज्जिते कण्टकिवनविभीतकविवर्ज्जिते ।
शिशुश्लेष्मातकाभ्याञ्च अर्णोकाद्यैर्विवर्ज्जिते ।
सुस्थाने चम्पकाशोकबकुलादिविभूषिते ।
हंसकारण्डवाकीर्णे सरस्तीरेऽथवा शुचौ ।
पुष्यस्नानाय नृपतिर्योजयेत् स्थानमुत्तमम् ।
ततः पुरोहितो राजा नानावादित्रनिःस्वनैः ।
प्रदोषसमये गच्छेत्तत्स्थानं पूर्व्ववासरे ।
तस्य स्थानस्य कौबेर्य्यां दिशि स्थित्वा पुरोहितः ।
सुगन्धचन्दनैः माल्यैः कर्पूराद्यधिवासितैः ।
गोरोचनाभिः सिद्धार्थैरक्षतैश्च फलादिभिः ।
गन्धद्वारेत्यादिभिस्तु मन्त्रैः सर्व्वाधिवासिकैः ।
अधिवास्य तु तत् स्थानं पूजयेत्तत्र देवताः ।
शचीशं केशवं शक्रं ब्रह्माणञ्चापि शङ्करम् ।
उमया सहितं देवं सर्व्वाश्च ग्रहदेवताः ।
मातृश्च पूजयेत्तत्र नृपतिः सपुरोहितः ।
मङ्गलान् सकलान् दत्त्वा नानानैवेद्यसञ्चयम् ।
प्रदद्यात् पायसं स्वादु फलं मोदकपायसौ ।
अधिवास्य तु तत् स्थानं दूर्व्वासिद्धार्थकाक्षतैः ।
तस्मात् स्थानात्तु भूतानि सारयेन्मन्त्रमीरयन् ।
अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन स्नानमेतत् करोम्यहम् ।
ततः करौ पुटीकृत्य मन्त्रेणानेन पार्थिवः ।
आवाहयेदिमान्देवान् पूज्यान् पुष्याभिषेकतः ।
आगच्छन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः ।

दिशोऽभिपालकाः सर्व्वे ये चान्येऽप्यंशभागिनः ।
ततः पुष्पाञ्जलिं दत्त्वा पुनर्मन्त्रं पठेदिमम् ॥
अद्य तिष्ठन्तु विबुधाः स्थानमाधाय मामकम् ।
श्वः पूजां प्राप्य यातारो दत्त्वा शान्तिं महीभुजे ॥
तत्र तां नृपतौ रात्रिं नयेत्तु सपुरोहितः ।
स्वप्ने शुभाशुभं विद्यान्नृपस्तु सपुरोहितः ॥
कृत्वा पूजान्तु देवानां रात्रौ स्थाने नृपः स्वपेत् ।
शुभाशुभफलं स्वप्ने ज्ञेयं दोषप्रशमते ॥
दुःस्वप्नदर्शनं चेत् स्यात्तदा पुष्याभिषेचने ।
होमं चतुःशतं कुर्य्याद्दद्याद्वापि गवां शतम् ॥
गोवाजिकुञ्जराणाञ्च प्रासादस्य गिरेस्तरोः ।
आरोहणं शुभकरं राज्यश्रीवृद्धिकारकम् ॥
दधिदेवसुवर्णानां भुजगस्य च दर्शनम् ।
वीणादूर्व्वाक्षतफलपुष्पच्छत्रविलेपनम् ॥
शितांशुच्छत्रशङ्खानां पद्मस्य सुहृदां तथा ।
लाभः जयकरः शत्रोरलङ्कारस्य भूभृतः ॥
दर्शनञ्चोपरागस्य निगडेनास्य बन्धनम् ।
मांसस्य भोजनञ्चैव पर्व्वतस्य विवर्त्तनम् ॥
नाभिमध्ये तरूत्पत्तिर्व्वृत्तं प्रभुगुरोदनम् ।
अगम्यागमनं कूपपङ्कगर्त्तावतीर्णता ॥
पर्व्वतस्य तथा नद्याः प्रोत्तारः शत्रुकर्त्तनम् ।
स्वपुत्त्रमरणञ्चैव पानं रुधिरमद्ययोः ॥
भोजनं पायसस्यापि मनुष्यारोहणं तथा ।
कल्याणसुखसौभाग्यराज्यशत्रुजयांस्तथा ।
एते स्वप्नाश्च कुर्व्वन्ति नृपस्य नृपसत्तम ! ॥
खरोष्ट्रमहिषाणान्तु आरोहो राज्यनाशकः ।
नृत्यं गीतं तथा हास्यं पाठश्चाप्यशुभप्रदः ॥
रक्तवस्त्रपरीधानं रक्तमाल्यानुरञ्जनम् ।
रक्तां कृष्णां स्त्रियञ्चैव कामयन् मृत्युमाप्नुयात् ॥
कूपान्तरे प्रवेशश्च दक्षिणाशागतिस्तथा ।
पङ्के निमज्जनं स्नानं भार्य्यापुत्त्रविनाशनम् ॥
नाभौ यस्य भवेत् स्वप्ने तरूत्पत्तिर्नृपस्य च ।
आदाय गर्भनाडीन्तु शकुनो याति खं द्रुतम् ।
स तु राज्यान्तरं प्राप्य महाकल्याणमाप्नुयात् ॥
दीर्घं विंशतिहस्तन्तु हस्तषोडशविस्तृतम् ।
कुर्य्यात्तु लक्षणोपेतं यज्ञमण्डपमुत्तमम् ॥
ततोऽपरेऽह्नि पूर्व्वाह्णे मातृणां पूजनञ्चरेत् ।
शुभलग्ने वसोर्धारां वृद्धिश्राद्धं तथैव च ॥
चन्दनागुरुकस्तूरीधूपकर्पूरपूर्व्वकैः ।
सम्पूज्य मण्डलस्थानं तस्मिन् ह्रौं शम्भवे नमः ॥
पश्चाय हुं फडित्येवं लिखेन्मण्डलं बुधः ।
मन्त्रविन्मण्डलञ्चैव चूर्णैः कमलसम्भवैः ॥
कौबेर्य्यां स्वस्तिकाख्यं प्रथमं मण्डलं लिखेत् ।
चतुर्हस्तप्रमाणन्तु मण्डलं विलिखेत्ततः ॥
हस्तप्रमाणं पद्मन्तु मण्डलस्य प्रकीर्त्तितम् ।
द्वाराणि सार्द्धहस्तानि कर्णिकाकेशरोज्ज्वलम् ॥
चित्रं रक्तञ्च पीतञ्च कृष्णं हरितमेव च ।
शालिचूर्णैस्तु कौसुम्भैर्हारिद्रैर्हरिद्रकैः ॥
कुर्य्यात्तपाञ्जनैश्चूर्णै राजा मण्डलकल्पने ।
पद्मान्तात् समारभ्य नालीं पश्चिमगामिनीम् ॥
पश्चिमद्वारमध्येन शतहस्तां विनिर्द्दिशेत् ।
मध्यैकद्वारमध्ये तु पद्मञ्चैवाष्टपत्रकम् ॥
कुर्य्यान्मण्डलभागे तु चूर्णैरेव पृथक् पृथक् ।
चूर्णैस्तु मण्डलं कृत्वा शेषाण्युत्सारयेत्ततः ॥
उत्साय्य सूत्रं प्रथमं मण्डलं पूजयेत्ततः ।
भवनाय नम इति ततो हस्तं वियोजयेत् ॥
सव्यावलम्बहस्तस्तु रजःपातं समारभेत् ।
मध्यमानामिकाङ्गुष्ठैरुपरिष्टाद्यथेच्छया ॥
अधोमुखाङ्गुलिं कृत्वा पातयेत् सुविचक्षणः ।
समरेखा तु कर्त्तव्या विच्छिन्ना पुष्पवर्ज्जिता ।
अङ्गुष्ठपर्व्वमेयाना समा कार्य्या विजानता ॥
संसक्तं विषमं स्थूलं विच्छिन्नं कृशराहतम् ।
पर्य्यन्तमर्पितं वृत्तमालिखेन्न कदाचन ।
संसक्ते कलहं विद्याद्दूरे रेखे तु विग्रहम् ।
अतिस्थूले भवेद्व्याधिर्नित्यपीड़ा विभिन्नति ॥
विन्दुभिर्भयमाप्नोति शत्रुतश्च न संशयः ।
कृशायां चार्थहानिः स्याच्छिन्नायां मरणं ध्रुवम् ॥
वियोगो वा भवेत्तस्य इष्टनयसुतस्य वा ॥
आविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ॥
सितसर्षपदूर्व्वाढ्या रेखाः कार्य्याः प्रमाणतः ।
विमलं विजयं भद्रं विमानं शुभदं शिवम् ॥
वर्द्धमानञ्च देवञ्च रताख्यं कामदायकम् ।
चक्रकं स्वस्तिकाख्यञ्च द्वादशैते तु मण्डलाः ॥
यथास्थानं यथायत्नं योजनीया विचक्षणैः ॥
सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः ।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलां कलास्तु देवानामर्पिता ते पृथक् पृथक् ।
यतः कृतास्तु कलसास्तस्मात् परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत ।
गोह्योपगोह्यौ मरुतो मयूखश्च तथापरः ॥
मनोहा सुविभद्रश्च विरजस्तनुशोषकः ।
इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्भूप ! नव नामानि यानि तु ।
द्रष्टु साम्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः ।
पवनाग्नी ततो द्वौ तु यजमानस्ततः परः ॥
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ।
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः ।
विजयो नाम कलसो योऽसौ नवम उच्यते ।
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक् ॥
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयम्भुवा ।
यथाकाष्ठास्थितः सम्यक् वामदेवादिनामतः ।
मण्डलस्य च पद्मान्तः पञ्चवक्त्रं घटं न्यसेत् ॥
क्षितीन्द्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम् ।
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ॥
नैरृत्यां यजमानन्तु ऐशान्यां कोषसम्भवम् ।
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्यैवं कलसांश्चैव तेषु चैतान् विचिन्तयेत् ।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः ॥
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वा वेष्टयन्ति दिशो दश ।
कुक्षौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ।
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ॥
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च ।
कलसेषु स्थिताः सर्व्वे तेषु तानपि चिन्तयेत् ॥
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ।
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः ॥
सर्व्वधाममयं विल्वं नागरोडुम्बरं तथा ।
बीजपूरकजम्बीरकाश्मीराम्रातदाडिमान् ॥
यवं शालिञ्च नीवारं गोधूमं सितसर्षपम् ।
कुङ्कुमागुरुकस्तूरीमदनं रोचनं तथा ॥
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ।
कर्पूरं पञ्चपत्रञ्च जलं निर्यासकाम्बुदम् ॥
शैलेयं वदरं जातीपत्रपुष्पे तथैव च ।
काकशाकं तथा रक्ता देवी पूर्व्वकमेव च ॥
वचा धात्री समाङ्गा च तुरुष्कं मङ्गलाष्टकम् ।
दूर्व्वा मोहनिका भद्रा शतमूली शतावरीम् ॥
पर्णानां बलां मुद्गां सहदेवां गजाह्वयाम् ।
पूर्णकोषां सितां पाठां शुभ्रां शिरसिकामलौ ॥
श्यामकं गजदन्तञ्च शतपुष्पीं पुनर्नवाम् ।
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसन्धानिकां तथा ।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथादेशं विधिं शम्भुं गदाधरम् ।
यथाक्रमं पूजयित्वा शम्भुं सुरसया यजेत् ॥
प्रासादेन तु मन्त्रेण शम्भुं तत्त्वेन शङ्करम् ।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ।
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ॥
पूर्व्वं वहिःस्थापितेषु ग्रहाणां कलसेषु च ।
नवग्रहान् पूजयेत्तु मातॄर्मातृघटेषु च ॥
सर्व्वे देवा घटे पूज्या घटस्थास्ते पृथक् पृथक् ।
नवैव तव पूर्व्वोक्ताः सदा सुखमया नृप ! ॥६॥
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ।
चारुकैः पायसैश्चापि यथासम्भवयोजितैः ।
पुष्यस्नानाय नृपतिः पूजयेत् सकलान् सुरान् ॥
दक्षिणे मण्डलस्याथ कुण्डं निर्म्माय पार्थिवः ।
समिद्भिः शालिसिद्धार्थैस्तिलैर्दर्भाक्षतैस्तथा ।
केवलैश्च तथैवाज्यैः पूजयेत् सकलान् सुरान् ॥
होमान्ते तोषयेद्द्रव्यैर्नृपः सार्द्धं पुरोहितम् ॥
होमान्ते मण्डलोदीच्यां वेदिकायां सपट्टकम् ।
दीपनाद्यमलङ्कारान् तथा सर्व्वान्नियोजयेत् ॥
हस्ता अङ्गुलमङ्गुष्ठं द्विरंशाङ्गुलयावधि ।
वृत्तं वा चतुरस्रं वा पद्मकर्णिकसंस्थितम् ।
इतिमान् पद्ममध्ये तु सोमस्वस्तिकविनायकैः ॥
श्रीः श्रीरूपो वरारोहा स्वामी देवी शुभान्विता ।
रत्नैः सर्व्वैरलङ्कारैः पट्टं कार्य्यं द्विहस्तकम् ।
हस्तविस्तारसुश्लक्ष्णं कर्त्तव्यन्तु दशाङ्गुलम् ॥
आनायं सार्द्धहस्तन्तु पट्टं कृत्ताश्मान्वितम् ।
शय्या चतुर्गुणा दीर्घा चतुर्मानन्तु पीठकम् ॥
गर्भसिंहलताटोपं हेमरत्नविभूषितम् ।
सिंहाख्यं भाद्रशिलाराहृत्यासनमथापि वा ।
आर्द्रचित्रकपट्टैर्वा उपधानानि कारयेत् ।
अन्येषां निर्म्मितैश्चर्म्मतूलकपूरिताम् ।
शय्या दैर्घ्यार्द्धविस्तीर्णा चतुर्हस्ता सुलक्षणा ।

वितस्त्यधिकमिच्छन्ति नृपस्य गुरुविद्यया ॥
अर्द्धचन्द्रसमं कुर्य्यादासनं चतुरस्रकम् ।
उपधानानि शय्यायाः कर्णादिस्थलदेशतः ॥
षोडशैवात्र कार्य्याणि वर्णचित्रयुतानि च ।
यानं सिंहासनं भद्रं शय्योपकरणादिकम् ॥
द्वाभ्यां सूत्रनयोग्यं सद्वेदी उत्तरतो भवेत् ।
तस्याः पश्चिमे स्वर्णरत्नौघनिचिते वरे ॥
पर्य्यङ्के चन्दनाद्यैर्विनिर्म्मिते महदास्तरे ।
अर्द्धाच्छादनसंयुक्तं चर्म्माण्यत्र चतुष्टयम् ॥
वृषभस्य तथोष्ट्राया: सिंहशार्दूलयोरपि ।
पादपीठे रत्नयुते पादावारोप्य पार्थिवः ॥
तस्मिन् पर्य्यङ्कपृष्ठस्थे चर्म्मखण्डचतुष्टये ।
नानालङ्कारभूषाढ्यं नृपतिं रत्नमालिनम् ॥
स्नापयेद्ब्राह्मणैः सार्द्धं राजानं सुखसङ्गतम् ।
सौवर्णकलसं कृत्वा रत्नवस्त्रावशोभितम् ॥
कलसैर्व्वलिपुष्पाद्यैः शान्तिपूर्णैश्च स्नापयेत् ॥
अष्टौ षोडशविंशत्यष्टाधिकशतानि वा ।
कलसानां समाख्याता अधिकस्योत्तरोत्तरम् ॥
अयकल्याणदैर्मन्त्रैर्मङ्गल्यैश्च शास्त्रजैः ।
वैष्णवैरैन्द्रविष्णुपार्थैर्मन्त्रैश्च मातृकैः ॥
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् ।
आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ॥
भौमान्तरीक्षं दिव्यं वा यत्ते कल्मषमागतम् ।
सर्व्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥
ततोऽपनीय गात्राणि कम्बलं वस्त्रमेव च ।
कलसैः स्नापयेद्भूपं पुष्यस्नानार्थपूरितैः ।
एभिर्मन्त्रैर्नरश्रेष्ठ ! तत्तत्कार्य्यसाधकैः ॥ * ॥
सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः ॥
आदित्या वसवो रुद्रा अश्विनेयौ भिषग्वरौ ।
अदितिर्देवमाता च स्वाहा लक्ष्मीः सरस्वती ॥
कीर्त्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रुरेव च ॥
देवपत्न्यश्च याः प्रोक्ता देवमातर एव च ।
सर्व्वास्त्वामभिषिञ्चन्तु सर्व्वे चाप्सरसो गणाः ॥
नक्षत्राणि मुहूर्त्ताश्च पक्षाहोरात्रसन्धयः ।
संवत्सरो दिवा रात्रिः कलाः काष्ठाः क्षणाः लवाः ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाश्च ये ।
वैमानिकाः सुरगणा मनवः सागरैः सह ॥
सरितश्च महाभागा यक्षाः किंपुरुषास्तथा ।
वैखानसा महाभागा द्विजा वैहायसाश्च ये ॥
सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि तु ।
मरीचिरत्रिः पुलहः पुलस्त्यो भृगुरङ्गिराः ॥
क्रतुः सनत्कुमारश्च सनकोऽथ सनन्दकः ।
सनातनश्च दक्षश्च जैगीषव्योऽथ नन्दनः ॥
एकतश्च द्वितश्चैव त्रितो जाबालिकाश्यपौ ।
दुर्व्वासा दुर्व्विनीतश्च कण्वः कात्यायनस्तथा ॥
मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः ।
और्व्वः संवर्त्तकश्चैव च्यवनोऽत्रिः पराशरः ॥
द्वैपायनो यवक्रीतो देवरातः सहानुजः ।
एते चान्ये च बहवो देवव्रतपरायणाः ॥
सशिष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधनाः ।
पर्व्वतास्तरवो नद्यः पुण्यान्यायतनानि च ।
प्रजापतिः दितिश्चैव गावो विश्वस्य मातरः ॥
वाहनानि च दिव्यानि सर्व्वलोकाश्चराचराः ।
अग्नयः पितरस्तारा जीमूताः खं दिशो जलम् ॥
एते चान्ये च बहवः पुण्यसङ्कीर्त्तनाः शुभाः ।
तोयैस्त्वामभिषिञ्चन्तु सर्व्वोत्पातनिबर्हणाः ॥
इत्येवं शुभदैर्मन्त्रैर्दिव्यैस्तथापरैः ।
शैवैर्नारायणै रौद्रैः समन्त्रैश्च महत्तरैः ॥
आपो हिष्ठा हिरण्येति सम्भवेति सुरेति च ।
मानस्तोकेतिमन्त्रेण गन्धद्वारेतिमेन च ॥
सर्व्वमङ्गलमङ्गल्यैः श्रीसूक्तैः शक्तियोगिभिः ।
इत्येवं स्नानमासाद्य गात्रमार्ज्य कम्बलैः ॥
सर्व्वमङ्गलसन्तेन वस्त्रं कार्पासकं दधानः ।
आचम्य च ततो देवान् गुरुं विप्रांश्च पूजयेत् ॥
ध्वजं छत्रं चामरञ्च घण्टाभरणान् यथाक्रमात् ।
मन्त्रं जप्त्वा धारयेत्तु ततो गच्छेद्धुताशनम् ॥
तत्र गत्वा वह्निमध्ये वह्निशौर्य्यञ्च पार्थिवः ।
अनिमित्तनिमित्तानि लक्षयेत्तत्र चिह्नभिः ॥
दैवज्ञकञ्चुकामात्यमन्त्रिपौरजनैर्वृतः ।
वादित्रघोषैस्तुमुलैस्तथा तौर्य्यत्रिकैः शुभैः ॥
कृत्वा शेषे पुनः शान्तिमाशीर्व्वाद्य च वै
द्विजान् ।
पूर्व्वां विधाय विधिवद्दिक्षां कनकाम्बुत ॥
भागानि चाथ यानीह दत्त्वा कुर्य्याद्विसर्जनम् ।
ततः शिवजलैः सर्व्वानमात्यादीन् पुरोहितः ।
सिञ्चयेच्चतुरङ्गञ्च बलञ्चापि सराष्ट्रकम् ॥
एवं कृत्वा नृपः पश्चाच्छिरश्च संयतो भवेत् ।
मासैस्तु गतयोनश्च कुर्य्याच्छान्तस्त्रियं यमम् ॥
पुष्यनक्षत्रयुक्ता तु तृतीया यदि लभ्यते ।
तस्यां पुण्या सदा देवी चण्डिका शङ्करेण च ॥
मघानिशाविशाखाद्यैः शिवमूर्त्तौ कौतुकैस्तथा ।
वैवाहिकेन विधिना मोदयेच्चण्डिकां शिवाम् ॥
चतुष्पथेषु सर्व्वेषु देवदेवीव्यवेषु च ।
पताकाभिरलङ्कुर्य्याद्देवं क्षुन्नेन सीदति ॥
एवं कृत्वा शान्तिचार्गं सदा पुष्याभिषेचनम् ।
चतुरङ्गैः समं राजा भार्य्याभिस्तनयैः सह ।
राज्यमण्डलसंयुक्तः परत्रेह न सीदति ॥
नातः परतरो यज्ञो नातः परतरोत्सवः ।
नातः परतरा शान्तिर्नातः परतरं शिवम् ॥
अनेनैव विधानेन नृपतेरभिषेचनम् ।
युवराज्याभिषेकञ्च कुर्य्याद्राजपुरोहितः ॥
नृपाभिषेककार्य्यमादौ यदि समाचरेत् ।
अनेनैव विधानेन स्थिरः स्यात् सर्व्वदा ।
अयं यज्ञः सुरेन्द्रेण प्रकाशं मरुता पुरा ।
एवं यज्ञं नृपो कृत्वा परत्रेह न सीदति ॥"

इति कालिकापुराणे पुष्याभिषेकः ८९ अध्यायः ॥

पुष्या, स्त्री, (पुष्णाति कार्य्यमिति । पुष + क्यप् मन् वा । निपातनात् साधुः । ततष्टाप् ।) पुष्य-नक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, ह-लायुधसंग्रहे ।
"अश्विनीमृगशिराश्च पुष्या पुनर्वसुस्तथा ।
पक्ष्याकर्माणि कर्त्तव्यं कारयेच्च सदा बुधः ॥")

पुस्त, क, बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट् ।) पञ्चमस्वरी । इन्द्रोपधः । क, पुस्तयति । इति दुर्गादासः ॥

पुस्तं, क्ली, (पुस्यते इति । पुस्त बन्धादरयोः + घञ् ।) लेप्यादिशिल्पकर्म्म । आदिना काष्ठ-पुत्तलिकादिनिर्म्माणादि कर्म्म गृह्यते । इति सुभूत्यादयः ॥
"मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्म्मणा ।
लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते ॥"
इत्यमरटीकायां भरतः ।
(यथा, वाभटे सूत्रस्थाने । १ ।
"पुस्तन्यीत्यानदक्षास्तत्रतोषीरभारति ॥"
पुस्तपत्रे सञ्चरति गच्छति इत्यर्थः ॥ आदिष्टे वेति+पुस्त + घञ् ।) पुस्तकम् । इति मेदिनी । (पुस्त + गौरादित्वात् ङीष् ।) स्त्रियां पुस्ती ।

पुस्तकम्, क्ली, स्त्री, (पुस्त + स्वार्थे कन् ।) पुस्तम् । पुति इति भाषा । (यथा, हरि-वंशे । ७५६ । ७६ ।
"शुक्लाम्बरधरः श्रीमान् शुचिर्भूत्वा समाहितः ।
अर्च्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ॥
संहितापुस्तकान् राजन् ! प्रयतः शिरसा नतः ॥")
तस्य परिमाणं यथा,—
"मानं वक्ष्ये पुस्तकस्य शृणु देवि ! समाहिता ।
मानेनापि फलं विन्द्यादमाने श्रीहता भवेत् ॥
हस्तमात्रं सुविस्तीर्णमाबाहुद्वादशाङ्गुलम् ।
दशाङ्गुलं तथाष्टौ च ततो न्यूनं न कारयेत् ॥"
तस्य वेधो यथा,—
"वेधद्वयं सुविस्तीर्णं शङ्कुमात्रे निरन्तरम् ।
समभागे भवेद्वाणि ! हस्ताद्यौ सूत्ररन्ध्रकम् ॥
अष्टाङ्गुलं परित्यज्य मध्ये वेधं न कारयेत् ।
प्रादेशादौ भवेल्लक्ष्मीः ह्यङ्गुले वा समाचरेत् ॥
पुस्तकस्य च यावन्तो ग्रन्थयस्तान् विवर्जयेत् ।
भार्य्याहानिर्भवेदग्रे धनार्थी वा च यो भवेत् ॥
द्व्यधरन्ध्रे भवेत् पीडा वर्त्तुले भ्रमरं भवेत् ।
चतुष्कोणे विपत्तिश्च त्रिकोणे मरणं भवेत् ॥"
पुस्तकाधारस्थानं यथा,—
"भूर्ज्जे वा तैजपत्रे वा ताले वा ताडिपत्रके ।
अगुरुणापि देवेशि ! पुस्तकं कारयेत् प्रिये ! ॥
सम्भवे स्वर्णपत्रे च ताम्रपत्रे च शङ्करि ! ।
अन्यवृक्षत्वचि देवि ! तथा केतकिपत्रके ॥
मार्त्तण्डपत्रे रौप्ये वा वटपत्रे वरानने ! ।
अन्यपात्रे वसुधे लिखित्वा यः समर्च्चयेत् ।
स दुर्गतिमवाप्नोति धननाशिं भवेद्ध्रुवम् ॥"
पुस्तके वेदलिखननिषेधो यथा,—
"वेदस्य लिखनं कृत्वा यः पठेद्ब्रह्मवित् क्वचित् ।
पुस्तकं यदि स्थाप्यं स पापी भवेद्ध्रुवम् ॥"
शुभेदं पुस्तकाधारस्थाने यथा —
"खड्गोपरि स्थितः शम्भुः शूलपाणिस्त्रिलोचनः ।
प्रजापतिस्तदुपरि च वेतालो धर्म्म एव च ।
तदुपरि युगे पिनाकी च तथा शिखरे हरिः ॥"

सलेखकपुस्तकदानफलं यथा,—
"आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत् ।
हरिञ्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः ॥
यावदक्षरसंख्यानं प्रतिपत्ने च सुन्दरि ! ।
तावद्युगसहस्राणि ब्रह्मलोके वसेच्चिरम् ॥"
वेतनग्रहणे लेखकस्य दोषो यथा,—
"वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं स तु ।
यावदक्षरसंख्यानं तावच्च नरके वसेत् ॥"
भूमौ पुस्तकलेखनस्थापननिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत् ।
न सुप्ता पुस्तकं स्थाप्यं न सुप्तमाहरेत् तत् ॥
भूकम्पग्रहणे चैव अक्षरं वाच पुस्तकम् ।
भूमौ तिष्ठति देवेशि ! जन्मजन्मसु मूर्खता ।
सदा भवति देवेशि ! तस्मात्तत् परिवर्ज्जयेत् ॥"
इति योगिनीतन्त्रे तृतीयभागे सप्तमपटलः ॥ *॥
तस्य दानफलं यथा,—
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज ! ।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात् ॥
शास्त्रदृष्ट्या जगत् सर्व्वं सुशुभञ्च शुभाशुभम् ।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके ॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते ॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती ॥"
इति पाद्मोत्तरखण्डे ११७ अध्यायः ॥ *॥
वेदशास्त्रादिदानफलं यथा,—
"वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येन लेखयित्वा यो दद्याद्याति स वैदिकम् ॥
इतिहासपुराणानि लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम् ॥"
इति गारुड़े २१५ अध्यायः ॥ *॥
भागवतदानविधानं तु भागवतशब्दे द्रष्टव्यम् ॥

पुस्तकर्म्मा, त्रि, (पुस्तं लिखनादिकं कर्म्म यस्य ।) लेप्यादिशिल्पकर्म्मकर्त्ता । इति हलायुधः ॥

पू, ङ शोधे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) शोध इह शुद्धीकरणम् । ङ, पवते पापिनं गङ्गा । इति दुर्गादासः ॥

पू, ङ य शोधे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट् ।) अयं केश्चिन्न मन्यते । ङ य, पूयते । इति दुर्गादासः ॥

पू, ञ शि शोधे । इति कविकल्पद्रुमः ॥ (क्र्या०-प्वा०-उभ०-सक०-सेट् ।) ञ शि, आशुवो मः पुनातु । पुनीते । कश्चित् शोधप्रयस्यापि प्वादित्वात् ह्रस्व इति वररुचिः । तेन ।
"कारणात् पुनते पापं धारणात् पुण्यसञ्चितम् ।
दर्शनात्तभते मोक्षमेतद्योगस्य लक्षणम् ॥"
इति दुर्गादासः ॥

पूगं, क्ली, (पूयते सुखमनेनेति । पू ञ पवने + "छापूखडिभ्यः कित् ।" उणा० । १ । १२३ । इति गन् किच्च ।) गुवाकफलम् । इत्यमरटीकायां रायमुकुटः ॥ (यथा, भविष्यपुराणे । सप्तमीव्रतकथायाम् ।
"पिण्डखर्ज्जूरं जातिञ्च एला चैव हरीतकी ।
नारिकेलं तथा पूगं रम्भापक्वफलन्तथा ।
सप्त सुखं प्रदातव्यं तासाञ्च फलमुत्तमम् ॥")

पूगः, पुं, (पूयतेऽनेनेति । पूञ् + "छापूखडिभ्यः कित् ।" उणा० । १ । १२३ । इति गन् । स च कित् ।) गुवाकः । सङ्घः । इत्यमरः ॥ (यथा, महाभारते । ६ । २१ । १४ ।
"अनन्ततेजा गोविन्दः शत्रुपूगेषु निर्व्यथः ।
पुरुषः सनातनतमो यतः कृष्णस्ततो जयः ॥")
छन्दः । भावः । कण्टकिवृक्षः । इति शब्दरत्नावली ॥

पूगपात्रं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य आधारभूतं पात्रम् ।) पूगपीठम् । पिकदानी । इति भाषा । तत्पर्य्यायः । करङ्कम् २ । इति हारावली ॥

पूगपीठं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य पीठमाधारपात्रम् ।) पूगपात्रम् । तत्पर्य्यायः । कटखोलः २ पतद्ग्रहः ३ । इति त्रिकाण्डशेषः ॥

पूगपुष्पिका, स्त्री, (पूगसहितं पुष्पमत्रेति । पूगपुष्प + कप् । कापि अत इत्वम् ।) विवाहसम्बन्धिपुष्पताम्बूलम् । तत्पर्य्यायः । कुड्मलिः २ । इति त्रिकाण्डशेषः ॥

पूगफलं, क्ली, (पूगस्य गुवाकस्य फलम् ।) गुवाकफलम् । तत्पर्य्यायः । पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ श्लोणकम् ६ उद्वेगम् ७ क्रमुकफलम् ८ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कषायमीषन्मधुरं किञ्चित् पूगफलं सरम् ॥")

पूगरोटः, पुं, (पूगवृक्ष इव रोटयति दीप्यते प्रकाशते इति । रुट् + अच् ।) हिन्तालवृक्षः । इति त्रिकाण्डशेषः ॥

पूच, क पूजे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) मङ्खरी । क, पूजयति गुरुं लोकः । इति दुर्गादासः ॥

पूजकः, त्रि, (पूजयतीति । पूज + ण्वुल् ।) पूजाकर्त्ता । यथा, तिथ्यादितत्त्वे ।
"यत्रैव भानुस्तु दिवमुदेति
प्राचीति तां वेदविदो वदन्ति ।
तथा पुरः पूजकपूज्ययोश्च
तदागमज्ञाः प्रवदन्ति तान्तु ॥"

पूजनं, क्ली, (पूज + भावे ल्युट् ।) पूजा । अर्च्चनम् । यथा,—
"क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च ।
मत्पूजनं विधानेन यदीच्छेत् परमां गतिम् ॥"
इति वराहपुराणम् ॥

पूजनी, स्त्री, (पूज्यते इति । पूज + कर्म्मणि ल्युट् । ङीप् ।) चटका । इति भरतः ॥ (ब्रह्मदत्तगृहस्थितशकुनिविहङ्गमस्त्रीविशेषः । यथा, महाभारते । १२ । १३९ । ४—१० ।
"शृणुष्व राजन् ! यद्वृत्तं ब्रह्मदत्तनिवेशने ।
पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः ॥
काम्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी ।
पूजनी नाम शकुनिर्दीर्घकालं सहोषिता ॥
रुतज्ञा सर्व्वभूतानां यथा वै जीवजीवकः ।
सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गतापि सा ॥
अभिप्रजाता सा तत्र पुत्त्रमेकं सुवर्च्चसम् ।
समकालञ्च राज्ञोऽपि देव्यां पुत्त्रो व्यजायत ॥
तयोरर्थे कृतज्ञा सा खेचरी पूजनी सदा ।
समुद्रतीरं सा गत्वा आजहार फलद्वयम् ॥
पुष्ट्यर्थञ्च सपुत्त्रस्य राजपुत्त्रस्य चैव ह ।
फलमेकं सुतायादाद्राजपुत्त्राय चापरम् ॥
अमृतास्वादसदृशं बलतेजोऽभिवर्द्धनम् ।
आदायादाय सैवाशु तयोः प्रादात् पुनःपुनः ।
ततोऽगच्छत् परां वृद्धिं राजपुत्त्रः फलाशनात् ॥"
इत्यादि तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

पूजा, स्त्री, (पूजनमिति । पूज + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च ।" ३ । ३ । १०५ । इति अङ् । ततष्टाप् ।) पूजनम् । तत्पर्य्यायः । नमस्या २ अपचितिः ३ सपर्य्या ४ अर्च्चा ५ अर्हणा ६ । इत्यमरः । २ । ७ । ३५ ॥ नुतिः ७ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ५ । १५ ।
"अपि रामे महाभागा मम माता यशस्विनी ।
अन्वैत्यपाहरत् पूजां पूजार्हे सर्व्वदेहिनाम् ॥")
तस्याः सामान्यानुष्ठानं यथा,—
"आदावृष्यादिविन्यासः करशुद्धिस्ततः परम् ।
अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च ॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम् ।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः ॥"
इति तन्त्रसारे यामलः ॥
शक्तिविषये चतुःषष्टिउपचारा यथा,—
आसनारोपणम् १ सुगन्धितैलाभ्यङ्गः २ मज्जनशालाप्रवेशनम् ३ मज्जनमणिपीठोपवेशनम् ४ दिव्यस्नानीयम् ५ उद्वर्त्तनम् ६ उष्णोदकस्नानम् ७ कनककलसस्थितसकलतीर्थाभिषेकः ८ धौतवस्त्रपरिमार्ज्जनम् ९ अरुणदुकूलपरिधानम् १० अरुणदुकूलोत्तरीयम् ११ आलेपमण्डपप्रवेशनम् १२ आलेपमणिपीठोपवेशनम् १३ चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिव्यगन्धसर्व्वाङ्गानुलेपनम् १४ केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुहरीपुन्नागकह्लारयूथीसर्व्वर्त्तुकुसुममालाभूषणम् १५ भूषणमण्डपप्रवेशनम् १६ भूषणमणिपीठोपवेशनम् १७ नवमणिमुकुटम् १८ चन्द्रशकलम् १९ सीमन्तसिन्दूरम् २० तिलकरत्नम् २१ कालाञ्जनम् २२ कर्णपालीयुगलम् २३ नासाभरणम् २४ अधरयावकः २५ प्रथमभूषणम् २६ कनकचिन्तापदकम् २७ महापदकम् २८ मुक्तावलिः २९ एकावलिः ३० देवच्छन्दकः ३१ केयूरयुगलचतुष्टयम् ३२ वलयावलिः ३३ ऊर्म्मिकावलिः ३४ काञ्चीदाम ३५ कटिसूत्रम् ३६ शोभाख्याभरणम् ३७ पादकटकम् ३८ रत्ननूपुरम् ३९ पादाङ्गुरीयकम् ४० एककरे

माय:४१ वामकरेऽङ्कुशम् ४२ दक्षकरे पुष्पेक्षुचाप: ४३ वामकरे पुष्पबाणा: ४४ श्रीमन्मालिन्यपादुका ४५ समानवेषाभिरावरणदेवताभि: सह सिंहासनारोहणम् ४६ कामेश्वरपर्य्यङ्कोपवेशनम् ४७ अमृतासवचषकम् ४८ आचमनीयम् ४९ कर्पूरवटिका ५० आनन्दोल्लासविलासहासम् ५१ मङ्गलारात्रिकम् ५२ श्वेतच्छत्रम् ५३ चामरयुगलम् ५४ दर्पण: ५५ तालवृन्तम् ५६ गन्ध: ५७ पुष्पम् ५८ धूप: ५९ दीप: ६० नैवेद्यम् ६१ पुनराचमनीयम् ६२ ताम्बूलम् ६३ वन्दनञ्च ६४ । इति तन्त्रसारे सिद्धयामल: ॥ * ॥ षट्त्रिंशदुपचारा यथा,—

"आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरूक्षणे ।
सम्मार्ज्जनं सर्पिरादिस्नपनावाहने तथा ॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्क्ककौ ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके ॥
अलङ्कारो गन्धपुष्पधूपदीपास्तथैव च ।
ताम्बूलादिकनैवेद्यं पुष्पमाला तथैव च ॥
अनुलेपनञ्च शय्या च चामरव्यजनं तथा ।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्ये च गानानि स्तुतिहोमप्रदक्षिणम् ।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्ज्जनम् ।
उपचारा इमे ज्ञेया: षट्त्रिंशत् सुरपूजने ॥"
इत्येकादशीतत्त्वम् ॥

अष्टादशोपचारा यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्व्वश: ॥
गन्धं पुष्पं तथा धूपं दीपमन्नञ्च दर्पणम् ।
माल्यानुलेपनञ्चैव नमस्कारविसर्ज्जने ॥
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् ॥"
अथ षोडशोपचारा: ।
"पाद्यमर्घ्यं तथाचामं स्नानं वसनभूषणे ।
गन्धपुष्पधूपदीपनैवेद्याचमनन्तत: ॥
ताम्बूलमर्च्चना स्तोत्रं तर्पणञ्च नमस्क्रिया ।
प्रपूजयेत् प्रपूजायां उपचारांस्तु षोडश ॥"
(अन्यप्रकारषोडशोपचारा यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्क्काचमनस्नानं वसनाभरणानि च ।
गन्धपुष्पधूपदीपनैवेद्यं वन्दनं तथा ॥")
अथ दशोपचारा: ।
"पाद्यमर्घ्यं तथाचामं मधुपर्क्काचमनं तथा ।
गन्धादयो नैवेद्यान्ता उपचारा दश क्रमात् ॥"
अथ पञ्चोपचारा: ।
"गन्धादयो नैवेद्यान्ता: पूजा: पञ्चोपचारिका: ॥"
इति तन्त्रसार: ॥

अशुच्यादे: पूजानिषेधमाह ।
"अशुचिर्न्न महामायां पूजयेत्तु कदाचन ।
अवशस्तु स्मरेन्मन्त्रं सोऽनिर्म्माल्ययुतो नर: ॥
दन्तदर्शे सहोत्पन्ने मरणे च न विद्यते ।
सर्व्वेषामेव मन्त्राणां स्मरणादरणं भजेत् ॥
जातूर्द्ध्वं जनने जाते नित्यकर्म्म न चाचरेत् ।
नैमित्तिकञ्च तदध:प्रवक्तो न चाचरेत् ॥
शौतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने ।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत् ॥
मद्ये भुक्ते त्वजीर्णे च नैव भुक्त्वा च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजाद्येन कल्पितम् ।
कथादिनिष्पन्नन्तच्च फलं भुक्त्वा न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनादृभिषगाङ्गती ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकै: सदा ॥
जलौका गण्डपादश्च क्रिमिगण्डूपदादिकम् ।
कामादृम्भेन संस्पृश्य नित्यकर्म्माणि संत्यजेत् ॥
विशेषत: शिवापूजां प्रणीतपिष्टको नर: ।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत् ॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं वैश्वदेवञ्च यत् ॥
गुरुमालिङ्ग्य विप्रञ्च प्रणश्येन्न च पाविना ।
न कुर्य्यान्नित्यकर्म्माणि रेत:पाते च भैरव ! ॥
आसनञ्चार्घ्यपात्रञ्च भस्मनाच्छादयेन्न यत् ।
कन्दरे कृमिसंयुक्ते स्थाने दृष्टेऽपि नार्च्चयेत् ॥
नीरैरासाद्य तत्स्थानं शुचि: प्रयतमानस: ।
अर्च्चयेच्चण्डिकां देवीं देवमन्यञ्च भैरव ! ॥
दक्षिणभागे तु कौबेरी दिक् शिवाप्रीतिकारिणी ।
तस्मात्तन्मुखमासीन: पूजयेच्चण्डिकां सदा ॥"
पूजास्थानानि यथा,—
"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च ।
स्थण्डिलस्थां महामायां पादुके प्रतिमासु च ॥
चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत् ।
महानदस्थलं खड्गं त्रिशिखञ्च त्रिशूलकम् ॥
शिलायां पर्व्वतस्याग्रे गङ्गायामपि तत्समा ।
आर्य्यावर्त्ते मध्यदेशे तथा पर्व्वतगह्वरे ॥
देवीं संपूजयेन्नित्यं भक्तिश्रद्धासमन्वित: ।
वाराणस्यां यदा पूजा सम्पूर्णफलदायिनी ॥
ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ ।
ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषत: ॥
सर्व्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा ।
विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा ॥
आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च ।
विन्ध्यवत्फलदा पूजा प्रयागे पुष्करे तथा ॥
ततश्चतुर्गुणं प्रोक्तं करतोयानदीजले ।
तस्माच्चतुर्गुणफला नन्दिकुण्डे च भैरव ! ॥
तस्माच्चतुर्गुणा प्रोक्ता जल्पीशेश्वरसन्निधौ ।
तथ सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता ॥
ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपाथसि ।
तत्समा कामरूपे तु सर्व्वमेव जले स्थले ॥
सर्व्वश्रेष्ठो यथा विष्णुर्लक्ष्मी: सर्व्वोत्तमा यथा ।
देवीपूजा तथा शस्ता कामरूपे सुरालये ॥
देवीक्षेत्रं कामरूपं विद्यतेऽन्यन्न तत्समम् ।
अन्यत्र विरला देवी कामरूपे गृहे गृहे ॥
तत: शतगुणं प्रोक्तं नीलकूटस्य मस्तके ।
ततोऽपि द्विगुणं प्रोक्तं हेरुके शिवलिङ्गके ॥
ततोऽपि द्विगुणा प्रोक्ता क्षेत्रपुत्रादियोनिषु ।
तत: शतगुणं प्रोक्तं कामाख्यायोनिमण्डले ॥"
इति कालिकापुराणे ।५४।५७। अध्यायौ ॥

पूजासनानि तत्फलानि च यथा,—
"उपविश्यासने रम्ये कम्बलाजिनकुशोत्तरे ।
राङ्कवे कम्बले वापि काष्ठादौ वाश्मचर्म्मणि ।
न कुर्य्याद्दर्शनं विष्णो: शिवे काष्ठासनादिषु ।
काष्ठासने वृथा पूजा पाषाणे रोगसम्भव: ।
भूम्यासने गतिर्नास्ति वस्त्रासने दरिद्रता ।
कुशासने ज्ञानवृद्धि: कम्बले सिद्धिरुत्तमा ॥
व्याघ्राजिने धनी मुक्ती मोक्ष: स्यादाक्षचर्म्मणि ।
मन्त्रयोगं प्रकुर्व्वीत भोगार्थं शुक्लासने ॥"
इति पाद्मोत्तरखण्डे ७४ अध्याय: ।
पूजाधिकारिता प्रयोजकदेवषट्कपूजा यथा,—
"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्य देवषट्कञ्च सोऽधिकारी च पूजने ।
गणेशं विघ्ननाशाय निष्पापाय दिवाकरम् ।
वह्निं शुद्धाय विष्णुञ्च मुक्तये पूजयेन्नर: ।
शिवं ज्ञानाय ज्ञानेशं शिवाञ्च बुद्धिवृद्धये ।
संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोऽन्यथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्याय: ।
द्वादशमासे विष्णुपूजाविधिर्यथा,—
"प्रत्यहं कार्त्तिके मासि मालतीपुष्पै: समर्च्चयेत् ।
दत्वाद्दशखण्डदीपञ्च नियतात्मा दृढव्रत: ।
ब्राह्मणान् भोजयित्वाथ सद्य:सायुज्यमाप्नुयात् ।
मार्गशीर्षे नवान्नेन बकपुष्पैश्च केशवम् ।
समर्च्च्य भोजयेद्विप्रान् वैकुण्ठपदमाप्नुयात् ॥
बहुपुष्पैश्च देवेशं मासमेकं निरन्तरम् ।
अर्च्चयेदुपवासेन करवीरै: सितासितै: ।
धूपैर्दीपैश्च नैवेद्यैश्चाज्ञया निवेदयेत् ।
समाप्तौ भोजयेद्विप्रान् महाभागवतोत्तमान् ॥
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशय: ॥
तपोमास्युदिते भानौ स्नात्वा नद्यां विशेषत: ।
अर्च्चयेन्माधवीपुष्पैरुत्पलैश्च शुभानने ! ॥
पायसं विविधं दिव्यं भक्त्या तत्र निवेदयेत् ।
माघान्ते वैष्णवान् विप्रान् भोजयेत् शक्तितो द्विज: ।
तपस्ये च तथा देवि ! माधवै: कुसुमै: शुभै: ।
स्नात्वा संपूजयेद्विष्णुं मासमेकं निरन्तरम् ।
शर्कराम्बु घृतं नित्यमपूपांश्च निवेदयेत् ।
वैष्णवान् भोजयेद्भक्त्या मासान्ते शुभदर्शने ! ॥
मधुमासि तथा नित्यं बकुलैश्चम्पकैरपि ।
पूजयेज्जगतामीशं गुडान्नञ्च ! निवेदयेत् ॥
मासान्ते वैष्णवान् विप्रान् भोजयेत् सुदृढव्रत: ।
षण्मासाधिकं पूजाफलं नित्यमवाप्नुयात् ।
माधवे पूजयेद्विष्णुं शतपत्रैर्मनोत्पलै: ।
पूजयित्वा विधानेन दध्यन्नफलसंयुतम् ।
गुडोदकञ्च भक्त्या वै दक्षिणां देवि ! निवेदयेत् ।
अप्सरा सुखी जगन्नाथ: प्रीतो भवति शाम्भवि ! ॥
ज्यैष्ठे तु मुक्तकमलै: पाटलै: कुमुदोत्पलै: ।
अर्च्चयित्वा हृषीकेशमन्नं चूतफलैर्युतम् ।
निवेदयित्वा भक्त्या वै नरा कोटिफलो भवेत् ।
वैष्णवान् भोजयेन्नित्यं मासान्ते भक्तवत्सल: ।
माधवाय शिवे ! सर्व्वं फलमाप्नोत्यनुत्तमम् ।

आषाढ़े देवताधीशं लक्ष्मीभर्त्तारमच्युतम् ।
श्रीपुष्पैरर्च्चयेन्नित्यं पायसान्नं निवेदयेत् ॥
मासान्ते भोजयेद्विप्रान् महाभागवतोत्तमान् ।
षष्टिवर्षसहस्रस्य पूजां प्राप्नोत्यसंशयम् ॥
नभोमासेऽर्च्चयेद्विष्णुं पुन्नागैः केतकीदलैः ।
अर्च्चयित्वाच्युतं भक्त्या न भूयो जन्मभाग्भवेत् ॥
दद्यात् पिष्टकान् भक्त्या शर्कराघृतमिश्रितान् ।
ब्राह्मणान् भोजयित्वा तु सर्व्वमाप्नोत्यमानुषे ॥
नभस्यऽर्च्चयेद्देवं कुन्दैः कुरबकैरपि ।
क्षीरान्नं गुड़मिश्रन्तु भक्त्या तत्र निवेदयेत् ।
गवां कोटिप्रदानस्य प्रत्यहं समवाप्नुयात् ॥
इषे नीलोत्पलैर्मासि पूजयेन्मधुसूदनम् ।
भक्त्या निवेदयेत्तस्मिन् क्षीरमाज्यविमिश्रितम् ॥
कन्याकोटिसहस्राणि कन्याकोटिशतानि च ।
वैष्णवं लोकमाप्नोति सहितः स्वजनैर्वृतः ॥
ऊर्ज्जमासे स्वयं देवि ! कोमलैस्तुलसीदलैः ।
पूजयित्वाच्युतं भक्त्या ततृषाग्र्यमवाप्नुयात् ॥"

इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥

द्वादशमासादौ दुर्गापूजादि देवीपुराणे द्रष्टव्यम् ॥

अथ देवपूजाविधिः ।

प्रातः स्नानावसाने आर्द्रवाससा कृतगात्र-मार्ज्जनादिर्गृहसमीपं गत्वा प्राङ्मुख उदङ्मुखो वा प्रक्षालितपादः शुचिर्दिवासाः कुशहस्तः स्वाचान्तः सर्व्वत्र पीठासनोपविष्टः प्राङ्मुखः रात्रावुदङ्मुख एव मौनी ध्यानपरायणः काम-रागभय-दम्भक्रोध-मात्सर्य्यत्वरा-रहितस्वमनाः सुमना वा शुची समुपविष्टोऽनिष्टगन्ध-रहिते देशे दक्षिणपार्श्वे नैवेद्याद्युपकरणानि च वामपार्श्वे जलं पुरतो धूपदीपौ ताम्रादि-पात्रञ्च यथासन्निवेशं पाद्यार्घ्याचमनीयपात्रं जलादिपूर्णमग्रतः स्थापयित्वा यथालाभं यज्ञोप-वीतवस्त्रालङ्कारादि संस्थाप्य ।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म्म करोम्यहम् ॥

इत्युच्चार्य्य अस्त्राय फडिति सव्यांगुष्ठयोग-ध्वनिच्छोटिकया दशदिग्बन्धनं कुर्य्यात् ॥ * ॥ नादेवो देवमर्च्चयेदिति श्रुतेर्धात् सर्व्वदेवार्च्चनेषु भूतशुद्धिमाहुरागमिकाः । सा यथा,—

सोऽहमिति मन्त्रेण जीवात्मानं नाभितो हृदिस्थ-परमात्मनि संयोज्य ततः पृथिवीं जले जलं तेजसि तेजो वायौ ततो वायुमाकाशे प्रवेश्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा यमिति वायुबीजेन षोड़शवारजप्तेन वायुकर्म्मकरूप-पूरकसंज्ञया वायुचिन्तनरूपया वायव्याधार-णया देहं शोषयित्वा ततो नासापुटाङ्गुष्ठा-नामिकाभ्यां धृत्वा रमिति वह्निबीजेन चतुः-षष्टिवारजप्तेन कुम्भकरूपकुम्भकसंज्ञया अग्नि-चिन्तनरूपया आग्नेय्या धारणया देहं दाह-यित्वा लमितीन्द्रबीजेन द्वात्रिंशद्वारजप्तेन वामनासापुटेन वायुनिःसारणरूपया रेचक-संज्ञया ऐन्द्रध्यानरूपया ऐन्द्रधारणया शिरो-स्थ वमिति वरुणबीजेन चतुःषष्टिवारजप्तेन जलाधिपध्यानरूपया जलाधिपधारणया चन्द्र-मण्डलादमृतं स्रावयित्वा तेनाप्लाव्य प्रथमेन सर्व्वाङ्गं संघटितं पुनर्नवीभूतं चिन्तयित्वा वाय्वादिभूतानि व्योमादिभ्यो व्युत्क्रमेण बहिः कृत्वा हंस इति मन्त्रेण परमात्मनो जीवं नाभि-पद्मे न्यसेत् ॥ * ॥

तत ऋष्यादिन्यासः ।

गोपालमन्त्रे तु नारदाय ऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । श्रीकृष्णाय देवाय नमो हृदि । एवमन्यत्रोहनीयम् ॥ * ॥

ततः प्राणायामः ।

ततो मूलमन्त्रेण षोड़शवारजप्तेन अङ्गुष्ठेन दक्षिणनासापुटं धृत्वा वामनासया वायुं पूर-येत् । अङ्गुष्ठानामिकाभ्यां नासापुटौ धृत्वा चतुःषष्टिवारजप्तेन वायुं कुम्भयेत् । वामनासाम-नामिकया धृत्वा दक्षिणनासया द्वात्रिंशद्वार-जप्तेन वायुं त्यजेत् । पुनर्द्दक्षिणनासया पूरयेत् । उभाभ्यां कुम्भयेत् । वामनासया रेचयेत् । पुनर्वामया पूरयेत् । उभाभ्यां कुम्भयेत् । दक्षि-णया रेचयेदिति ॥ * ॥

ततो बाह्यमातृकान्यासः । न्यासग्रन्थे द्रष्टव्यः ॥ अनेकदेवपूजने तु भूतशुद्धिमातृकान्यासयोर-विशेषात् सकृदेवानुष्ठानम् ॥ * ॥

ततः करन्यासः ।

यथा गोपाले । ॐ क्लां अङ्गुष्ठाभ्यां नमः अङ्गु-ष्ठयोः । ॐ क्लीं तर्ज्जनीभ्यां स्वाहा तर्ज्जन्योः । ॐ क्लूं मध्यमाभ्यां वषट् मध्यमयोः । ॐ क्लैं अनामिकाभ्यां हूं अनामिकयोः । ॐ क्लौं कनिष्ठाभ्यां वौषट् कनिष्ठयोः । ॐ क्लः करतल-पृष्ठाभ्यां फट् करतलपृष्ठयोः । एवमन्यत्राप्यूह्यम् ।

ततोऽङ्गन्यासः ।

ॐ क्लां हृदयाय नमः हृदये हस्ततलेन । ॐ क्लीं शिरसे स्वाहा अङ्गुष्ठाङ्गुलिभिः शिरसि । ॐ क्लूं शिखायै वषट् अधोमुखाङ्गुलिमुष्टिना शिखायाम् । ॐ क्लैं कवचाय हूं वक्षःकर-तलाभ्यां आशिरःपादपर्य्यन्तरूपसर्व्वाङ्गे । ॐ क्लौं नेत्राभ्यां वौषट् तर्ज्जनीमध्यमाभ्यां नेत्रयोः । ॐ क्लः अस्त्राय फट् स्वाङ्गावच्छालनजयं छोटि-काभिर्दशदिग्बन्धनञ्च कुर्य्यात् । एवमन्यत्राप्यूह-नीयम् । अग्रमोक्षादिपूजने तु भूतशुद्ध्यादि-नियमः अन्यत्र त्वनियमः ॥ * ॥

ततोऽर्घ्यस्थापनम् ।

वामतोऽर्घ्यपाद्याद्याचमनीयपात्राणि संस्थाप्य अर्घ्यपात्रं जलगन्धपुष्पैः संपूज्य तत्तद्देवता-मूलमन्त्रं सर्व्वदेवतासाधारणे तु प्रणवं वा अष्टधा जप्त्वा धेनुमुद्रया अमृतीकृत्य तदुदकं पात्रान्तरे किञ्चित् कृत्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षयेत् । प्रणवादितत्तद्देवता-चतुर्थ्यन्तनाम्ना नमोऽन्तेन मूलमन्त्रेण वा आत्मानं गन्धादिभिरभ्यर्च्य तद्रूपं ध्यात्वा तत्-सान्निध्ये चन्दनादिरचिताष्टदलपद्मे सम्बो-धनान्तदेवतानाम्ना इहागच्छेत्यावाह्य स्थाप-यित्वा मूलेन चतुर्थ्यन्तनाम्ना आसनं दत्त्वा सम्बोधनान्तनाम्ना स्वागतं ते इति पृच्छेत् । दीक्षितस्तु मूलमन्त्रमुच्चार्य्य प्रणवादिचतुर्थ्यन्त-नाम्ना नमोऽन्तेन दद्यादिति विशेषः । एवं पाद्यार्घ्याचमनीयादीनि दद्यात् । पाद्यार्घ्ययोः पौर्व्वापर्य्ये त्वनियमः । ततो घृतमधुदधिमेलक-मजमितं कांस्यपात्रस्थं पिहितञ्च मधुपर्कं पुन-राचमनीयञ्च दद्यात् । ततो लौकिकयज्ञाधिक-शतचषलोलकान्यूनवैदिकाष्टोत्तरशतपलान्यून-जलेन तदभावे षष्टिरत्तिकमाषद्वयाधिकत्रयो-दशतोलकरूपवैदिकपलचतुष्टयान्यूनजलेन इदं स्नानीयं एवं दुग्धादिनापि । घृतादिस्नाने तु गन्धद्रव्यपूर्व्वकपिष्टकयवचूर्णोदकेन क्षालनं चाङ्गं ततः पुनराचमनीयं वाससी पुनराचमनीयं दद्यात् । प्रत्येकमलङ्कारं यज्ञोपवीतं गन्धं पुष्पं धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दत्त्वा मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य त्रिः प्रदक्षिणी-कृत्य अष्टाङ्गप्रणिपातेन पञ्चाङ्गप्रणिपातेन वा शिरसि करद्वयसंयोगेन च प्रणम्य स्तुत्वा प्रण-वादिसम्बोधनान्तनाम्ना क्षमस्वेति विसर्ज्जयेत् । यत्र यदुपचारद्रव्यासम्भवस्तदर्थं जलं देयम् । प्रतिष्ठितस्थिरतरप्रतिमायां तत्तदावाहनविस-र्ज्जने न स्तः । एवं शालग्रामे जले वा सर्व्व-देवपूजनेऽपि यथालाभं पाद्यादिरुपचारैः । गन्धपुष्पधूपदीपनैवेद्यैः पञ्चोपचारैः गन्ध-पुष्पाभ्यां वा केवलेन पुष्पेण वैतदलाभ-तेन केवलेन जलेन मानसिकेन वा पूज-येत् । तत्र सामान्यदेवताधूपः शारदायाम् ।

सगुग्गुल्वगुरूशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवाय देशिकः ॥

एतैर्मिलितैर्यथालाभं वा । इति सर्व्वदेवता-साधारणो विधिः ॥ * ॥

ततः प्रथमं सूर्य्यपूजा ।

ॐ सूर्य्याय नमः इति पूजयेत् । तत्र गन्धाः । चन्दनागुरुकर्पूरचौरकमलपद्मकादरक्तचन्द-नानि । पुष्पाणि । मल्लिकामालतीकरवीरचम्पक-पाटलाबकुलनगरपीतभिण्टीकुन्दनवमल्लिका-शोकपद्मागस्त्यजपापुष्पाणि विहितानि । तुलसी-शम्यतुलसीदूर्व्वाबिल्वपत्राणि दार्जितालकोरक-दलतगरसुमनांसि विहितानि । धूपाश्च । गुग्-गुल्वगुरुदेवदारुविहितानि । दीपस्तु घृतेन तैलेन वा । नैवेद्यानि विविधभक्ष्याणि ॥ * ॥

अथ गणेशपूजा ।

तदावाहने । ॐ भूर्भुवःस्वर्गणेश इहागच्छ इति दूर्व्वापुष्पाक्षतैरावाह्य ॐ गणेशाय नम इत्यनेन पूजयेत् । तत्र तुलसी निषिद्धा । रक्त-चन्दनरक्तपुष्पादिकं विहितम् । देवनाभरप्रसिद्धं अन्यत् शुक्लादिकं न देयम् ॥ * ॥

अथ दुर्गापूजा ।

ॐ भूर्भुवःस्वर्दुर्गे इहागच्छ इति दूर्व्वाक्षतैरा-वाह्य ॐ दुर्गायै नम इत्यनेन पूजयेत् । तत्र

गन्धाः चन्दनागुरुकर्पूरकुङ्कुमानि। पुष्पाणि मल्लिकोत्पलपुन्नागशमीचम्पकाशोककर्णिकारकरवीरतुलसीबिल्वपत्रादीनि विहितानि। धुस्तूरार्कमन्दारपुष्पाणि निषिद्धानि। धूपाः कृष्णागुरुसहितघृतमहिषाक्षगुग्गुलुविल्वाम्रसम्भवानि चीरवृक्षजचन्दनेऽपि। दीपस्तु घृतेन तैलेन वा। नैवेद्यानि आम्रनारिकेलखर्ज्जूरकदलीबीजपूरादीनि। क्वथितं बिल्वं फलं निषिद्धम्। पनसकदलीफलमपि विहितम्। *।

अथ शिवपूजा।

उदङ्मुखः ॐ नमः शिवाय नमः इति मन्त्रेण पूजयेत्। तत्र गन्धः अगुरुचन्दने। पुष्पाणि च अर्ककरवीरजातीबकुलपाटलाश्वेतमन्दारनागकेशरचम्पक-धुस्तूरबिल्वामलक-तुलसीपत्राणि विहितानि। केतकीमाधवीपुष्पकुन्दयूथीमल्लिकाशिरीषसर्ज्जबन्धूकसुकुलमालानि निषिद्धानि। धूपस्तु घृतगुग्गुलुबिल्वफलानि उशीरागुरुचन्दनानि च। दीपस्तु घृतेन तैलेन सर्षपादिना वा। नैवेद्यानि गुडखण्डघृतपक्वमाषशुद्धफलादीनि। *।

अथ पार्थिवशिवलिङ्गपूजाविधिः।

ॐ हराय नम इति मृदाहरणम्। ॐ महेश्वराय नम इति घटनम्। ॐ शूलपाणे इह सुप्रतिष्ठितो भव इति प्रतिष्ठा। ध्यानात् ध्यायेन्नित्यमित्यादिना प्रागुक्तं ध्यायेत्। पिनाकधृक् इहागच्छ इत्यावाहनम्। ॐ पशुपतये नम इति स्नपनम्। एतत् पाद्यं ॐ नमः शिवाय नम इति पाद्यादिभिः संपूज्य पाशावशेन वेद्यां प्राच्यादिषु ॐ सर्व्वाय क्षितिमूर्त्तये नमः ॐ भवाय जलमूर्त्तये नमः ॐ रुद्राय अग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः ॐ भीमाय आकाशमूर्त्तये नमः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्य्यमूर्त्तये नमः। इत्यष्टमूर्त्तीः पुष्पैः पूजयेत्। ततो मुखवाद्यं कृत्वा महादेव क्षमस्वेति संहारमुद्रया विसर्ज्जयेत्। स्त्रीशूद्रस्तु नमः शिवायेति मन्त्रेण पूजयेत्। *।

अथ विष्णुपूजा।

अर्घ्यपात्रं पुरतो निधाय त्रिभागजलेनापूर्य्य वमिति धेनुमुद्रया अमृतीकृत्य ॐ विष्णवे नम इत्यष्टधा जपित्वा तेनोदकेनात्मानं पूजोपकरणांश्चाभ्युक्षेत्। पीठस्य तु तत्तन्मन्त्रैः सम्पूज्य पूजयेत् अङ्गावरणञ्च पूजयेत्। शालग्रामे मणौ प्रतिमादिस्थलयन्त्रकादिषु। तत्र शालग्रामे आवाहनविसर्ज्जने न स्तः। ध्येयः सदेत्यादिना ध्यात्वा ॐ भगवन् विष्णो इहागच्छेत्यावाहनपूर्व्वकमासनाद्य इदमासनं ॐ श्रीविष्णवे नमः ॐ विष्णो स्वागतमिति पृच्छेत् एतत् पाद्यं ॐ विष्णवे नमः आचमनीयं इदमर्घ्यं ॐ विष्णवे नमः इति वदेत्। सर्व्वत्रैव एवोऽर्घ्ये इति विशेषः। तत्र द्रव्याणि कुशपुष्पाक्षतसिद्धार्थचन्दनतोयानि यथालाभं वा अर्घ्यपाद्यार्थे तु मौर्व्वापयर्यैण नियमः। आचमनीये सुगन्धिद्रव्ययुक्तजलं केवलं वा प्रशस्तजलम्। घृतमधुदध्यात्मको मधुपर्कः तदभावे केवलं वा मधु। पूर्व्ववदिदमाचमनीयं इदं स्नानीयं तत्र लौकिकवस्त्राधिकसुरभियवतोलकान्यूनं जलम्। पुनराचमनीयं इदं वस्त्रं पुनराचमनीयं इदमाभरणं पुनराचमनीयं गन्धस्तु अङ्गुष्ठयुक्तकनिष्ठया गन्धमुद्रया तत्र चन्दनागुरुकर्पूरकुङ्कुमगोरोचनामृगमदकाष्ठविकङ्करक्तचन्दनकस्तूरिकाजातीफलानि घृष्टानि एतच्चूर्णानि वा एतद्द्रवान्तरसो वा पुष्पाणि च तर्ज्जन्यङ्गुष्ठयोगरूपपुष्पमुद्रया तत्र मल्लिका-मालतीजाती-केतक्यशोक-चम्पकनागकेशरबकुल-पद्मोत्पलतुलसी विल्वकरवीरपारिभद्रपाटलाश्वेतापराजिताकुन्ददमनकमरुबकजवारक्ताशोककर्णपुष्पभूमिचम्पकशेफालीनवमालिकायूथिकाकदम्बकुन्दलवङ्गमाधवीपुष्पचम्पक-कुरुबकबिल्वपुष्प-बन्धूकक-कह्लारद्रोणपलाशपुष्पाणि विहितानि। नरसिंहेतरावतारे केतकी निषिद्धा। पर्य्युषितमच्छिद्रशीर्णवित्वमपतितोपहतमधाङ्गस्पृष्टोत्तरत्रुटितपद्मचम्पकेतरकलिकातुलसीतरशुष्कपत्रपरिहृत-पुष्पविहितेतररक्तपुष्पश्मशानोद्भवमशानजात-कुटज-शाल्मलीशिरीषपुष्पाणि निषिद्धानि। मान्दारेतरस्य वनोद्भवानि च। विहितपत्राणि तुलसीबिल्वशमीभृङ्गराजतमालामलककेतकीपत्राणि। पद्मकुन्दोत्पलानि पञ्चदिनात् परतः पर्य्युषितानि। तुलस्यगस्त्यबिल्वानि कदापि न पर्य्युषितानि। धूपस्थानञ्च देवस्य वामे पुरतो वा। तर्ज्जन्यङ्गुष्ठयोगरूपधूपमुद्रया वामहस्तेन घण्टां वादयन् देयः। स च भूमौ न देयः। धूपश्च जटामांसीमहिषाक्षगुग्गुलुकर्पूरागुरुसिह्लकदेवदारुजातीफलघृतशर्करामिश्रितगुग्गुल्वादयः। दीपस्थानं देवस्य दक्षिणतः पुरतो वा। मध्याङ्गुष्ठयोगरूपदीपमुद्रया एष दीपः घृतेन तैलेन वा भूमौ न देयः। नैवेद्यस्थानञ्च देवस्य पुरतः। अनामिकाङ्गुष्ठयोगरूपनैवेद्यमुद्रया एतन्नैवेद्यं तत्र कदली-पनस-जम्बूफलकी-करमर्द्दक-दधि-संस्कृततिलमाषमुद्गयवगोधूमशालिषष्टिकाद्यन्नं विहितम्। निषिद्धन्तु अजामहिषीक्षीरदधिघृतं पञ्चनखवराह-मनुष्य-मृग-छागेतरमांस हिरण्योदकपर्य्युषितचाक्षुषजदर्शितवाद्याघ्रातस्पृष्ट-दत्त-पर्य्युषितेतरभक्ष्यम्। खण्डादीनि पक्वगोधूमक्षीरविकाराश्च न पर्य्युषिताः। ततः पुनराचमनीयं ताम्बूलञ्च दत्त्वा अष्टोत्तरशतं शतं दश वा उत्तरीयवस्त्रेण छादितहृदये स्थिततिर्य्यग्भूतदक्षिणकरः यथाशक्ति मूलमन्त्रं जपित्वा ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव! त्वत्प्रसादात् त्वयि स्थिते॥ इत्यर्घ्योदकेन देवहस्ते जलं दद्यात्। ततोऽर्घ्योदकं गृहीत्वा त्रिः प्रदक्षिणीकृत्य,

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ! आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष! ते चरणारविन्दम्॥

इति स्तुत्वा ॐ प्रसीद भगवन्निति दण्डवत् प्रणमेत्।

ॐ यत् किञ्चित् क्रियते देव मया सुकृतदुष्कृतम्।
तत् सर्व्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥

इत्यनेन सर्व्वं समर्पयेत्।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत् पूजितं मया देव! परिपूर्णं तदस्तु मे॥

इति प्रार्थयेत्। ततः संहारमुद्रया निर्म्माल्यपुष्पमादाय भूमौ क्षिपेत् विसर्ज्जनपक्षे ॐ भगवन् विष्णो क्षमस्वेति विसर्ज्जयेत् तदपक्षे निर्म्माल्यपुष्पमादाय।

ॐ तिष्ठ देव परे स्थाने स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयः सर्व्वे सुरास्तिष्ठन्ति मे हृदि॥

इति मन्त्रेण देवं हृदि स्थापयेत्। तत्र ॐ विष्वक्सेनाय नम इति गन्धपुष्पनैवेद्यं दद्यात्। ततो वैष्णवाय सनिर्म्माल्यं चतुर्थांशं नैवेद्यञ्च किञ्चिद्दत्त्वा शिरसि निर्म्माल्यं धार्य्यं सर्व्वाङ्गेष्वनुलेपनं कृत्वा यथाशक्ति पादोदकं नैवेद्यञ्चोपभुञ्जीत। तत्र पादोदकग्रहणे मन्त्रः।

ॐ कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे॥

तत्तत्कृष्णनामादौ परोदितेष्टदेवतानाम युक्त्वा स्वयं निरूढार्थं पादोदकं पीत्वा तच्छिवम्।

अकालमृत्युशमनं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥

इति शिरसि धारयेत्। नैवेद्यभक्षणे मन्त्रः।

ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण हिरण्याक्षो निपातितः॥

इत्युक्त्वा भक्षयेत्। *। यथालाभं दशोपचारैर्वा पूजयेत्। तत्र दशोपचाराः। अर्घ्यपाद्याचमनीयमधुपर्काचमनगन्धपुष्पधूपदीपनैवेद्यानि। पञ्चोपचाराः। गन्धपुष्पधूपदीपनैवेद्यानि। गन्धपुष्पाभ्यां वा केवलपुष्पेण केवलजलेन वा पूजयेत् ततोऽपि अशक्तश्चेत् लौकिकीभ्यां पूजनम् इत्याह्निकप्रयोगतत्त्वम्। *। तत्तोऽप्यामपूजा कथावतीशब्दे द्रष्टव्या।

पूजार्हः, त्रि, (पूजामर्हतीति। पूजा+अर्ह+"अर्हः।" ३।२।१२। इत्यच्।) पूजायोग्यः। मान्यः। इति शब्दरत्नावली॥ (यथा, मनुः। ८।२६।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन॥")

पूजितः, त्रि, (पूज+क्तः।) प्राप्तपूजः। अर्च्चितः। तत्पर्य्यायः। अपचितः २। इत्यमरः। ३।१।१०२॥ (यथा, भट्टिः। ४।१।

"निवृत्ते भरते धीमानत्रे रामस्तपोधनम्।
प्रविष्टे पूजितस्तस्मिन् दण्डकारण्यमीयिवान्॥")

पूजितव्यः, त्रि, पूजनीयः। पूजधातोः कर्म्मणि तव्यप्रत्ययनिष्पन्नः॥

पूजिलः, पुं, (पूज्यते इति। पूज+"गुपादिभ्यः कित्।" उणा॰ १।५७। इति इलच्। स च कित्।) देवता। इति संक्षिप्तसारोणादिवृत्तिः॥ पूज्ये, त्रि। इत्युणादिकोषः॥

पूज्यः, पुं, (पूजयितुमर्हः। पूज+"अर्हे कृत्यतृचश्च।" ३।३।१६९। इति यत्।) श्वशुरः। पूजनीये, त्रि। तत्पर्य्यायः। प्रतीक्ष्यः २। इत्यमरः। ३।३।१५०॥ यथा,—

"अहं हि पूज्यो वयसा भवद्भ्य-
स्तेनाभिवादं भवतां न युक्तम्।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम्॥
अष्टक उवाच।
अवादीश्चेद्वयसास्मि प्रवृद्ध
इति वैराणाभ्यधिकः कथञ्चित्।
यो वै विद्वांस्तपसा न वृद्धः
स एव पूज्यो भवति द्विजानाम्॥"
इति मात्स्ये ३९ अध्यायः॥

पूष, क संघाते। राशीकरणे। इति कविकल्पद्रुमः॥ (चुरा॰-पर॰-सक॰-सेट्।) वष्ठस्वरी। क, पूषयति धान्यं लोकः। राशीकरोतीत्यर्थः। इति दुर्गादासः॥

पूर्त्तं, क्ली, (पूयते स्मेति। पू+कर्म्मणि क्तः।) अपनीततुषधान्यम्। वच्छोयान धान इति भाषा॥ तत्पर्य्यायः। बहुलीकृतम् २। इत्यमरः। २।९।२२॥

पूतः, त्रि, (पूञ् शोधे+क्तः।) जलादिना शुद्धः। तत्पर्य्यायः। पवित्रः २ प्रयतः ३। इत्यमरः। २।७।४५॥ शुद्धः। यथा,—
"दधिगोमयादि सामान्यं पवित्रं स्वभावपवित्रं वा।" इति भरतः॥ तत्पर्य्यायः। पवित्रम् २। मेध्यम् ३। इत्यमरः। ३।१।५५॥ यथा,—
"चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्।
सत्यपूतं वदेद्वाक्यं बुद्धिपूतं विचिन्तयेत्॥"
इति मार्कण्डेयपुराणम्॥
सत्यम्। इति जटाधरः॥

पूतः, पुं, (पूयते स्म येनेति। पू+करणे क्तः। यद्वा, पवते स्मेति गत्यर्थेति कर्त्तरि क्तः।) शङ्खः। श्वेतकुशः। विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

पूतक्रतायी, स्त्री, (पूतक्रतोरिन्द्रस्य स्त्री। पूतक्रतु+"पूतक्रतोरै च।" ४।१।३६। इति ङीप् ऐकारादेशश्च।) इन्द्रपत्नी। शची। इति जटाधरः॥

पूतक्रतुः, पुं, (पूतः क्रतुर्यैन।) इन्द्रः। इति जटाधरः॥

पूतगन्धः, पुं, (पूतः पवित्रो गन्धो यस्य।) बर्व्वरः। इति राजनिर्घण्टः॥

पूततृणम्, क्ली, (पूतं पवित्रं तृणमिति नित्यकर्म्मधारयः।) श्वेतकुशः। इति राजनिर्घण्टः॥

पूतद्रुः, पुं, (पूतः पवित्रो द्रुः।) पलाशवृक्षः। इति राजनिर्घण्टः॥

पूतधान्यं, क्ली, (पूतं धान्यमिति नित्यकर्म्मधारयः।) तिलः। इति राजनिर्घण्टः॥

पूतना, स्त्री, (पूतं करोतीति। तत्करोतीति णिच्। ततो बहुलमन्यत्रापीति युच्।) हरीतकी। इत्यमरः। २।४।४९॥ सिन्धुदेशजा स्वल्पत्वक् वृहदस्थिहरीतकी लेपने प्रशस्ता। इति राजवल्लभः॥ (उत्पत्तिस्थानस्वाकृतिव्याख्या यथा,—
"पूतना मगधोद्भवा।" "पूतना चतुरस्रका।"
"पूतना चतरङ्कुला————————।"
इति हारीते कल्पस्थाने प्रथमेऽध्याये॥) गन्धमांसी। इति राजनिर्घण्टः॥ दानवीभेदः। सा बकासुरभगिनी जिघांसया स्तनकालकूटप्रदानात् श्रीकृष्णेन हता। (एतद्‌वृत्तान्तस्तु हरिवंशे ६२ अध्याये द्रष्टव्यः॥) रोगभेदः। इति मेदिनी। ने, ८३॥ स च क्षुद्रपूतनानामबालरोगः। तस्य निदानं यथा,—
"पद्मवर्णो महापद्मो बाले दोषत्रयोद्भवः।
शङ्खाभ्यां हृदयं यो वा हृदयाद्वा गुदं व्रजेत्॥
क्षुद्ररोगे च कथिते अजगल्लादिपूतने॥"
क्षुद्ररोगोक्तं यथा,—
"शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्।
स्विन्ने वा स्नाप्यमाने वा कण्डूरक्तकफोद्भवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्॥"
इति माधवकरः॥ ०॥
(अस्य बालरुजा यथा,—
"स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ
विड्भिन्नं सृजति च काकतुल्यगन्धिः।
छर्द्द्यार्त्तो हृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः॥"
इति सुश्रुतेनोत्तरतन्त्रे सप्तविंशेऽध्याय उक्तम्॥
चिकित्सास्या यथा,—
"कपोतवङ्कारलुकौ वरुणः पारिभद्रकः।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने॥
वचा वयस्था गोलोमी हरितालं मनःशिला।
कुष्ठं सर्ज्जरसश्चैव तैलार्थं वर्ग इष्यते॥
हिङ्गुं घृतं तुगाक्षीर्य्यां सिद्धं मधुरकेषु च।
कुक्कुटालीप्रखदिरे चन्दनस्यन्दने तथा॥
देवदारु वचा हिङ्गु कुष्ठं गिरिकदम्बकः।
एलाहरेणवश्चापि योज्याः सद्धूपने सदा॥
गन्धनाकुलिकुम्भीका सव्यानी वदरस्य च।
कर्कटास्थि घृतश्चैव धूपनं सर्पिषः सह॥
काकादनीं चित्रफलां बिम्बीं गुञ्जाश्च धारयेत्।
मत्सौदनञ्च कुर्व्वीत शरावे पललन्तथा॥
शरावसम्पुटे हत्वा बलिं शून्यगृहे हरेत्।
उच्छिष्टेनाभिषेकेण शिरसि स्नापयेच्छिशुम्॥
पूज्या च पूतना देवी बलिभिः सोपहारकैः।
मलिनाम्बरसंवीता मलिनारूक्षमूर्द्धजा॥
शून्यागाराश्रिता देवी दारकं पातु पूतना।
दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका॥
भिन्नागाराश्रया देवी दारकं पातु पूतना॥"
इति चोत्तरतन्त्रे द्वात्रिंशत्तमेऽध्याये सुश्रुतेनोक्तम्॥) बालमातृकाविशेषः। यथा,—
"तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः॥ गात्रमुद्वेजयति स्तन्यं न गृह्णाति दृष्टिं बध्नाति क्रन्दति ऊर्द्ध्वं निरीक्षते। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। नद्युभयतटमृत्तिकां गृहीत्वा गन्धं ताम्बूलं रक्तपुष्पं रक्तचन्दनं रक्तसप्तध्वजाः सप्तप्रदीपाः सप्तस्वस्तिकाः मत्स्यमांससुराः अन्नभक्तञ्च दक्षिणस्यां दिशि मध्याह्ने चतुष्पथे बलिर्द्दातव्यः शिवनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत्। ॐ नारायणाय नमः चल चल मुच मुच हुं फट् स्वाहा स्वाहा। चतुर्थे दिवसे ब्राह्मणं भोजयेत् ततः सम्पद्यते शुभम्।" इति चक्रपाणिदत्तः॥

पूतनारिः, पुं, (पूतनाया अरिः शत्रुः।) श्रीकृष्णः। इति शब्दरत्नावली॥

पूतनासूदनः, पुं, (पूतनां सूदयति हन्ति [illegible] वा। सूद+ल्युः।) श्रीकृष्णः। इति [illegible]॥

पूतनाहा, [न्] पुं, (पूतनां हन्तीति। हन+क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः॥

पूतपत्रः, पुं, (पूतानि पवित्राणि पत्राण्यस्य।) पनसः। इति राजनिर्घण्टः॥ (पनसशब्देऽस्य विवरणं ज्ञातव्यम्॥)

पूता, स्त्री, (पूत+टाप्।) दूर्व्वा। इति राजनिर्घण्टः॥

पूतात्मा, [न्] पुं, (पूतः पवित्र आत्मा स्वभावः।) पवित्रस्वभावः। (पूत आत्मा स्वरूपं यस्य विष्णुः। यथा, महाभारते। १३। १४९। १५।
"पूतात्मा परमात्मा च मुक्तानां परमा गतिः॥")
शुद्धदेहे, त्रि। यथा,—
"शाम्बोऽपि कालरात्रेण स्नात्वा सम्यगघापहम्।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान्॥"
इति शाम्बपुराणे सूर्य्यस्तवः॥

पूति, क्ली, (पुनातीति। पू+कर्त्तरि क्तिन्।) रोहिषतृणम्। इति राजनिर्घण्टः॥

पूतिः, स्त्री, (पू+भावे क्तिन्।) पवित्रता। दुर्गन्धः। इत्यमरटीकायां रायमुकुटः॥ (यथा, मार्कण्डेये १८० अध्याये।
"मेघमूत्रमलैश्चाप्यो कर्णेर्भवत्यार क्रियः।
कर्णयोः पूतिनासः स्यात् स्त्रीमभावे विसर्गिनः॥")
खट्वाशपुष्पः। खाटाशी इति भाषा। तत्पर्य्यायः। [illegible] पूतिगन्धः। परजातीरतीव गन्धवत् [illegible]॥
इति राजवल्लभः॥ (अस्या विशेषः यथा,—
"यथाकाममवामार्गं सर्व्वादिभ्यो [illegible]।
ताम्रस्नैन संक्षिप्त पूतिं निर्मीयते ॥
रोमाञ्चकं पचेत् पश्चात् [illegible]।
[illegible]

क्वाथशोभाञ्जनजलैर्भावयेच्च पुनः पुनः ।
शिग्रुमूलेन तैलक्याः पुष्पचञ्चपुटे च तम् ॥
पचेदेवं विशुद्धः सन् स्वर्णमाभिसमो भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे धात्वाद्यधिकारे ॥
दुर्गन्धविशिष्टे, त्रि । यथा, भगवद्गीतायाम् ।
१७ । १० ।
"यातयामं गतरसं पूति पर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥")

पूतिकं, क्ली, (पूत्या दुर्गन्धेन कायतीति । कै + कः ।) विष्ठा । इति राजनिर्घण्टः ॥ (दुर्गन्धविशिष्टे, त्रि । यथा, महाभारते ।१३।८।११।
"किं त्वया पापकं पूर्व्वं कृतं कर्म्म सुदारुणम् ।
यस्त्वं श्मशाने स्तनकान् पूतिकानत्सि कुत्सितान् ॥")

पूतिकः, पुं, (पूत्या कायतीति । कै + कः ।) पूतिकरञ्जवृक्षः । इत्यमरः । २ । ४ । ४८ ॥ (अस्य पर्य्यायादिकं पूतिकरञ्जशब्दे ज्ञातव्यम् ॥)

पूतिकरजः, पुं, (पूतियुक्तः करजः ।) करञ्जभेदः । इत्यमरः ।२।४।४८॥ यथा, "अथ कटुकरञ्जघोराकरञ्जनामगुणाः ।
करञ्जो नक्तमालश्च करजश्चिरबिल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ॥
स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ।
करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषहृत् ॥
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ।
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ॥
भेदनं कटुकं पाके वीर्य्योष्णं पित्तलं लघु ।
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् ॥
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिकरञ्जः, पुं. (पूतियुक्तः करञ्जः ।) करञ्जविशेषः । नाटाकरञ्ज इति भाषा । कठकरेज इति हिन्दी भाषा । तत्पर्य्यायः । प्रकीर्य्यः २ पूतिकरजः ३ पूतीकरजः ४ पूतिकः ५ पूतीकः ६ कलिकारकः ७ कलिमालकः ८ कलहनाशनः ९ । इत्यमरभरतौ ॥ प्रकीर्णः १० रजनीपुष्पः ११ सुमनाः १२ पूतिकर्णिकः १३ सोमवल्कः १४ कलिमाल्यः १५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्त्तिकण्डूविचर्च्चिकाकुष्ठत्वग्दोषनाशित्वञ्च ।
इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,
"स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिकर्णः, पुं. (पूतिर्दुर्गन्धः कर्णो यस्मात् ।) कर्णरोगविशेषः । तल्लक्षणं यथा,—
पूतिकर्णमाह ।
"कर्णविद्रधिपाकाद्वा स्यार्द्धा वारिपूरणात् ।
पूयं स्रवति यद् पूति स ज्ञेयः पूतिकर्णकः ॥"
कर्णस्रावादेरौषधमाह ।
पूर्णेनि नियमेन पूति यथा स्यादेवं स्रवति ॥
तच्चिकित्सा यथा,—
"कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥
सर्ज्जिकाचूर्णसंयुक्तबीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥१॥
आम्रजम्बुप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥२॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥३॥
घृष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थे तत् स्रावाढ्ये पूतिकर्णके ॥४॥
कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम् ॥
कुष्ठादितैलम् ॥५॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति ॥६॥
चूर्णेन गन्धकशिलारजनीभवेन
सर्षपप्रभवेन कटुतैलमलाबुके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाडीं जयेच्चिरभवामपि कर्णजाताम् ॥
शुद्धिः फलम् ॥७॥
कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥"
इति भावप्रकाशः ॥
(चिकित्सास्य यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजो गुडः ।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ॥"
इत्युत्तरतन्त्रे एकविंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिकर्णकः, पुं, (पूतिः कर्णो यस्मात् । कप् ।) कर्णरोगभेदः । तस्य लक्षणम् । यथा,—
"कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात् ।
पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः ॥"
इति माधवकरः ॥
(अस्यापरलक्षणं यथा,—
"स्थिते कफे स्रोतसि पित्ततेजसा
विलाय्यमाने भृशसम्प्रतापवान् ।
अवेदनो वाप्यथवा सवेदनो
घनं स्रवेत् पूति स पूतिकर्णकः ॥"
इत्युत्तरतन्त्रे विंशेऽध्याये सुश्रुतेनोक्तम् ॥)
औषधं यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजोगुडः ।
पूरणात् पूतिकर्णस्य शमनो मधुसंयुत. ॥"
अथवा ।
"बकुलार्ककपित्थाम्रजम्बुपत्रक्वसाधितम् ।
पूतिकर्णापहं तैलं जातीपत्ररसेन वा ॥"
इति चक्रपाणिदत्तः ॥
(चिकित्सास्य यथा,—
"घृष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थेऽपि सास्रावे पूतिकर्णके ॥"
इति चोत्तरतन्त्रे एकविंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिका, स्त्री, (पूत्या कायतीति । कै + कः । टाप् ।) मार्जारी । इति राजनिर्घण्टः ॥ (कीटविशेषः । यथा, पञ्चतन्त्रे । ३ । ११ ।
"पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्त्येषु येषां धर्म्मो न कारणम् ॥")
शाकविशेषः । इत्यमरटीकायां भरतः ॥ पुँइ इति भाषा ॥ अस्याः पर्य्यायगुणौ उपोदकीशब्दे ज्ञातव्यौ ॥ दाराणां तद्भक्षणे दोषो यथा । पूतिका भक्ष्यशाकिका । यदपि ।
'कुसुम्भं नालिकाशाकं वृन्ताकं पौतिकीं तथा ।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः ॥'
इत्युशनसा सामान्येनाभिहितम् । अत्र नालिका कलम्बीति कल्पतरुः । पूतिका च दारग्रामधिकदोषाय मूत्रविषयिका वा ।" इति तिथितत्त्वम् ॥ (इयं हि सोमांशुनो चाप्रेति सोमस्याभावे प्रतिनिधित्वेन ग्राह्या । यथा, महाभारते । ३ । ३५ । ३३ ।
"अस्ति माघः प्रतिनिधिर्यथा प्राहुर्मनीषिणः ।
पूतिकामिव सोमस्य तथेदं क्रियतामिति ॥")

पूतिकामुखः, पुं, (पूतिकाया मुखमिव मुखं यस्य ।) शम्बूकः । इति शब्दमाला ॥ (शम्बूकशब्देऽस्य विषयो ज्ञेयः ॥)

पूतिकाष्ठं, क्ली, (पूति काष्ठमिति कर्म्मधारयः ।) देवदारु । सरलवृक्षः । इत्यमरः । २ । ४ । ५३, २ । ४ । ६० ॥ पवित्रदारु च ॥

पूतिकाष्ठकं, क्ली, (पूतिकाष्ठ + स्वार्थे कन् ।) सरलवृक्षः । इति शब्दचन्द्रिका ॥

पूतिगन्धं, क्ली, (पूतिर्गन्धो यस्य ।) रङ्गम् । इति राजनिर्घण्टः ॥

पूतिगन्धः, पुं, (पूतिर्गन्धो यस्य ।) गन्धकः । इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥ दुर्गन्धे, त्रि । (यथा, मनुः । ४ । १०७ ।
"नित्यानध्याय एव स्यात् ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥")

पूतिगन्धिः, त्रि, (पूतिर्गन्धो यस्य । "उपसर्गाच्च पूतिसुसुरभिभ्यः ।" ५ । ४ । १३५ । इति इः ।) दुर्गन्धः । इत्यमरः । १ । ५ । १२ ॥
पूतिविट् पूतिरिव गन्धोऽस्य । इति रायमुकुटः ॥
(यथा, महाभारते । ५ । ६० । २८ ।
"पय्याशिनं कटुकं तीक्ष्णगन्धं
यशोमुषं परुषं पूतिगन्धि ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज ! पिब प्रशाम्य ॥")

पूतिगन्धिकः, त्रि, (पूतिगन्धि + स्वार्थे कन् ।) दुर्गन्धः । इति हेमचन्द्रः । ६ । २० ॥

पूतिगन्धिका, स्त्री, (पूतिगन्धोऽस्त्यस्या इति । पूतिगन्ध + ठन् ।) वाकुची । इति राजनिर्घण्टः ॥

पूतितैला, स्त्री, (पूति दुर्गन्धं तैलं यस्याः ।) ज्योतिष्मती । इति रत्नमाला ॥ लताफटकी इति भाषा ॥ (पर्य्यायोऽस्या यथा,—
"पारावतपदी पिण्या कङ्गणीस्फुटबन्धनी ।
ज्योतिष्मती पूतितैला कैभिताभिस्फुटी स्मृता ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूतिनस्यः, पुं, (पूतिर्दुर्गन्धो नस्यः नासिकाभवो रोगः ।) नासारोगभेदः । तस्य लक्षणम् । यथा,
"दोषैर्विदग्धैर्गलतालुमूले
संमूर्च्छितो यस्य समीरणस्तु ।
निरेति पूतिर्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम् ॥"
इति माधवकरः ॥
औषधं यथा,—
"व्याघ्रीदन्तीवचाशिग्रुसुरसव्योषसम्भवैः ।
पाचितं लावणं तैलं पूतिनासागदं जयेत् ॥"
अथवा ।
"त्रिकटुविडङ्गसैन्धवबृहतीफलशिग्रुसुरसदन्तीभिः ।
तैलं गोमूत्रसिद्धं नस्यं स्यात् पूतिनस्यस्य ॥"
इति चक्रपाणिदत्तः ॥
(अस्य व्याख्याने श्रीकण्ठदत्तेन यद्विदेहवचनमाहृतं तद्यथा । "नासिकाभवो यस्य पूतिगन्धो वायुर्येन सं पूतिनस्यम् ।" इत्येव विदेहः ।
"कफपित्तमरुद्रक्तैः सञ्चितं मूर्द्ध्नि देहिनाम् ।
शिरस्सुस्रणोद्गाढं वक्त्रं तत्ताभिभञ्जनाम् ॥
ततः प्रस्यन्दते घ्राणात् सरक्तं पूति पीतकम् ।
पूतिनस्यन्तु तं विद्याद्घ्राणकण्डूत्वप्रदम् ॥"
चिकित्सान्तरमस्य यथा,—
"पूर्व्वोद्दिष्टे पूतिनस्ये च जन्तोः
स्नेहस्वेदौ छर्द्दनं स्रंसनञ्च ।
युक्तं भक्तं तीक्ष्णमल्पं लघुष्णं
दुष्णं तोयं धूमपानञ्च कार्य्यं ॥"
इत्युत्तरतन्त्रे चतुर्विंशोऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिपत्रः, पुं, (पूति पत्रं यस्य ।) श्योनाकभेदः । इति राजनिर्घण्टः ॥

पूतिपुष्पिका, स्त्री, (पूति पुष्पमस्याः । कापि अत इत्वम् ।) मातुलुङ्गः । इति रत्नमाला ॥ मच्छुरसेउ इति मौटा वा इति च भाषा ॥ (गुणादयोऽस्या मातुलुङ्गशब्दे ज्ञातव्याः ॥)

पूतिफला, स्त्री, (पूति फलं यस्याः ।) सोमराजी । इति रत्नमाला ॥

पूतिफली, स्त्री, (पूति फलं यस्याः । ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ९६ ॥ (अस्याः पर्य्यायो यथा,—
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिमयूरिका, स्त्री, (पूतिर्मयूरीव । ततः स्वार्थे कन् ह्रस्वश्च ।) अजगन्धा । इति राजनिर्घण्टः ॥

पूतिमेदः, पुं, (पूतिर्मेदोऽस्य ।) अरिमेदः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य अरिमेदशब्दे बोद्धव्यः ॥)

पूतिवातः, पुं, (पूतये पावित्र्याय वातो यस्य ।) बिल्ववृक्षः । इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा,
"बिल्वो महाकपित्थाख्यः श्रीफलो गोहरीतकी ।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥
(पूतिर्वातः ।) दुर्गन्धवायुश्च ॥

पूतिवृक्षः, पुं, (पूतिर्वृक्षः ।) श्योनाकः । इति रत्नमाला ॥ पवित्रदुर्गन्धी तरुश्च ॥

पूतिशारिका, स्त्री, (पूतिः शारिरिव शायते इति । शम् + डः । टाप् ।) खट्टाशी । इति त्रिकाण्डशेषः ॥

पूतीकः, पुं, (पूति + वा ङीष् । तद्वत् कायतीति । कै + कः ।) पूतिकरञ्जः । इत्यमरटीकायां भरतः ॥ (यथास्य पर्य्यायः ।
"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा च सुश्रुते । १ । ३९ ।
"पूतीकश्चित्रकः पाठा विडङ्गैलाहरेणवः ॥")
गन्धमार्जारः । इति राजनिर्घण्टः ॥

पूतीकरञ्जः, पुं, (पूतीयुक्तः करञ्जः ।) पूतिकरञ्जः । इति रत्नमाला ॥ नाटा इति भाषा ॥ (पर्य्यायोऽस्य यथा,—
"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूतीका, स्त्री, (पूत्या दुर्गन्धेन कायतीति । कै + कः ।) पूतिका । इत्यमरटीकायां भरतः ॥

पूत्यण्डः, पुं, (पूति दुर्गन्धमण्डमस्य ।) गन्धकीटः । गँदोपोका इति भाषा ॥ (यथा, महाभारते । १२ । १४२ । ७ ।
"पुलाका इव धान्येषु पूत्यण्डा इव पक्षिषु ।
तद्विधास्ते मनुष्येषु येषां धर्म्मो न कारणम् ॥")
जन्तुभेदः । इति मेदिनी । डे, १९ ॥ खटाशी इति भाषा ॥

पूनः, त्रि, (पू + क्तः । "पूञो विनाशे ।" ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) नष्टः । इति मुग्धबोधव्याकरणम् ॥

पूपः, पुं, (पू + क्विप् । पुवं पवित्रं पाति रक्षतीति । पा + कः ।) पिष्टकः । इत्यमरः । २ । ९ । ४८ ॥ (यथा, मार्कण्डेये । १५ । २४ ।
"मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ॥"
(पिष्टकशब्देऽस्य विवृतिर्ज्ञेया ॥)

पूपली, स्त्री, (पूपं तदाकारं लातीति । ला + कः ।) पोलिका । इति हेमचन्द्रः । ३ । ६२ ॥

पूपाली, स्त्री, (पूपाय अलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पोली । इति त्रिकाण्डशेषः ॥

पूपाष्टका, स्त्री, (पूपद्रव्यप्रधानी अष्टका अष्टमी ।) अग्रहायणीपूर्णिमायाः परतः कृष्णाष्टमी । तद्विवरणं अष्टकाशब्दे द्रष्टव्यम् । "तत्र नित्यं श्राद्धं पूपाष्टकं कर्त्तव्यम् । यथा गोभिलः । अष्टका योर्द्ध्वमाग्रहायण्यास्तामिस्राष्टमी । ब्रह्मपुराणे ।
पितृदानाय सृष्टे सुरश्चास्मिन् एव च ।
लक्ष्मणे वदिता हि पूर्व्वा चैन्द्री विभाव्यते ।
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ।
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
इति तिथितत्त्वम् ॥

पूपिका, स्त्री, (पूपः पूपाकारोऽस्त्यस्या इति ठन् । ततष्टाप् ।) पूलिका । इति हेमचन्द्रः । ३ । ६२ ॥

पूय, ई ङ दुर्गन्धे । शीर्ण्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् । निष्ठायामनिट् ।) षड्खरी । ई, पूतः । ङ, पूयते मांसः दुर्गन्धः स्यादित्यर्थः । शीर्णिर्भेदनम् । इति दुर्गादासः ॥

पूयं, क्ली, (पूयते दुर्गन्धो भवतीति । पूय + अच् ।) पक्वव्रणादिसम्भवघनीभूतस्रुतवर्णविकृतरक्तम् । पूँय इति भाषा । तत्पर्य्यायः । चतषम् २ मलजम् ३ पूयनम् ४ । प्रसितम् ५ । इति शब्दचन्द्रिका ॥ (यथा, महाभारते । ३ । १९९ । ५४ ।
"ये च दुष्कृतकर्म्माणः पूयं तेषां विधीयते ॥")
पूयवर्द्धनद्रव्याणि यथा,—
नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्ललवणकटुकगुडपिष्टविकृतिवल्लूरशुष्कशाकाजाविकानूपौदकमांसवसाशीतोदककृशरापायसदधिदुग्धतक्रप्रभृतीन् परिहरेत् ।
"तक्रान्तैर्नवधान्याद्यैर्योऽयं वर्गे उदाहृतः ।
दोषसञ्जननो ह्येष विज्ञेयः पूयवर्द्धनः ॥"
इति सुश्रुतः ॥
(अस्य विषयो यथा,—
"वातादृते नास्ति रुजा न पाकः
पित्तादृते नास्ति कफाच्च पूयः ॥"
इति सुश्रुते सूत्रस्थाने सप्तदशेऽध्याये ॥)

पूयनं, क्ली, (पूयतेऽनेनेति । पूय + ल्युट् ।) पूयम् । इति शब्दचन्द्रिका ॥

पूयरक्तः, पुं, (पूयविशिष्टं रक्तमत्रेन ।) नासारोगभेदः । तस्य लक्षणम् । यथाह माधवकरः ।
"दोषैर्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः ।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥"
(क्षीरसिक्तेऽपि दृश्यते । यथा,—
"निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥"
इति वाभटे उत्तरस्थाने ऊनविंशोऽध्याये ॥
चिकित्सास्य यथा,—
"यस्यामङ्गं रक्तपित्तोपशान्तिं
नाडीव्रणात् पूयरक्ते चिकित्सा ।
वाम्नं सम्यक् पावनीये वदन्ति
तीक्ष्णं धूमं शोधनञ्चात्र शस्तम् ॥"
इत्युत्तरतन्त्रे चतुर्विंशोऽध्याये सुश्रुतेनोक्तम् ॥)

पूयारिः, पुं, (पूयमारिः शत्रुर्नाशकत्वात् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (विवरणमस्य निम्बशब्दे ज्ञातव्यम् ॥)

पूयालसः, पुं, (पूयः अलस इव यत्र । यद्वा पूयेन चिरात् निर्गमनाद्वा अलसम् ।) सन्धिगतरोगभेदः । तस्य लक्षणं यथा,—

"मकः प्रोक्तः सम्भिन्नः संसर्पेद्रूपः
सान्द्रं पूयं पूतिपूयालसः सः ॥"

इति सुश्रुतः ॥

("पूयालसः सोपनाहः स्रावाश्चत्वार एव च ।
पर्व्वणीकालजी चानुयन्त्यिसन्धौ न यामयाः ॥"
"पूयालसस्तु सं विद्यात् सन्धौ कानीनके भृशम्-
मिति वचनात् ॥" इति भावप्रकाशस्य मध्यखण्डे
चतुर्थे भागे ॥)

पूर, ई य ङ पूर्त्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-
आत्म०-सक०-सेट् । निष्ठायामनिट् ।) दीर्घी ।
ई, पूर्णः । य ङ, पूर्य्यते पितरस्तर्पितिरिति हला-
युधः । पूर्त्तिरिहाप्यायनम् । इति दुर्गादासः ॥

पूर, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-सक०-सेट् ।) दीर्घी । क, पितॄन् पूरयति
श्राद्धे द्रव्यैः कश्चेच्य यः सदा । इति हलायुधः ॥
इति दुर्गादासः ॥

पूरं, क्ली, (पूरयति सौगन्ध्येनेति । पूर+कः ।)
दाहागुरु । इति राजनिर्घण्टः ॥

पूरः, पुं, (पूरयतीति । पूर+कः ।) जलसमूहः ।
(यथा, रघौ । ३ । १७ ।
"महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
व्रणसंशुद्धिः । खाद्यविशेषः । इति मेदिनी । रे,
५० ॥ (प्राणायामादिकर्त्तुर्नासारन्ध्रेण बहिः-
पवनाकर्षणम् । यथा, भागवते । ३ । २८ । ९ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलम् ॥"
बीजपूरः । तत्पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
रुचकः पूरकः पूरो बीजपूर्णोऽम्बुकेसरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूरकः, पुं, (पूरयतीति । पूरि+ण्वुल् ।) बीज-
पूरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो
यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
रुचकः पूरकः पूरो बीजपूर्णोऽम्बुकेसरः ॥"
इति वैद्यकरत्नमालायाम् ॥)
गुणकाङ्कः । इति लीलावती ॥ ध्यानादिकर्त्तु-
र्नासिकायतोच्छ्वासः । अथ ध्यानपूर्व्वकप्राणाया-
मान्तर्गतमानं जपन् वामनासिकया वायुना
देहपूरणम् । (यथा, हठयोगप्रदीपिकायाम् ।
२ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥")
यथाच व्यासः ।
"आदाय बीजत्रितयं वायोश्चिन्वि: समभ्यसेत् ।
यथायं केवलं शम्भुं ध्यायेद्वागगुरुमात् ॥
पूर्व्ववचने त्रिसंख्यमात्राभिधानादत्र त्रिस्त्रिरिति
वीप्सा अध्याहार्य्येत्यथा ।
तत्स्थानं केवलं शम्भुं ध्यायन् सुधीत यत्नतः ॥
इति योगियाज्ञवल्क्यः ।
'भूर्भुवःस्वर्मह जन्तपः सत्यं तथैव च ।
प्रणवोच्चारसमायुक्तं तथा तत् सवितुः परम् ॥
ॐ आपो ज्योतिरित्येतच्छिरः पश्चात्तु योज-
येत् ।
त्रिरावर्त्तनयोगात्तु प्राणायामस्तु शब्दितः ॥
पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते ॥
कुम्भको निश्चलः श्वासो मुच्यमानस्तु रेचकः ॥
मोचनं विधिरयति विष्णुपुराणम् ।
नाधं ह्रस्वमसौ नुभेद्धानकाशौ च गर्ज्जयेत् ।
मोचयेद्वेगेनानुत्सृष्टं न त्वरेत् पवनं बुधः ॥"
इत्याह्निकाचारतत्त्वम् ॥
षोडशपञ्चमुखान्तरसंख्यकप्रणवबीजाद्यनन्तरजपे-
नैकमात्रापुटकारणकमात्राधामाङ्गवायुपूरणम् ।
यथा, षट्शमस्य बीजस्य प्रणवस्य वा षोडश-
वारजपेन वामनासापुटे वायुपूरकं कुर्य्यादिति
तन्त्रसारः ॥ * ॥ क्ली, प्रेतदेहनिष्पादकाशौच-
कालदेयदशपिण्डम् । यथा,—
"पूरकेण तु पिण्डेन देहो निष्पाद्यते यतः ।
तस्य करणायोगात् पुनर्नानिवर्त्तयेत् क्रियाम् ॥"
इति वायुपुराणम् ॥
कल्पतरुः ।
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके ।
नाचैतेसव वै पिण्डं यद्दत्तस्य पूरकम् ॥"
अत्र नामगोत्रविधौ एतन्नुपिण्डं यद्ददतस्य पूरक-
मित्येतावन्मात्रश्रुतेः शिरःपूरकमित्यादिविशे-
षोल्लिखे प्रमाणं नास्ति । इति वाचस्पतिमिश्रा-
चार्य्याः । प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्ग-
वेति विष्णुधर्म्मोत्तरे देहस्तद्देहपूरकमिति
प्रयोगापत्तेश्च । तस्मादनिरुद्धभट्टाद्युक्तः केवल-
पूरकप्रयोग एव युक्त इति । शातातपः ।
"भर्त्तुः पिण्डप्रदाने तु साध्वी स्त्री चेदशक्ता ।
वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्याच्च पूरकम् ॥"
इति शुद्धितत्त्वम् ॥ * ॥

पूरणकर्त्तरि, त्रि । इति शब्दरत्नावली ॥ (यथा,
मनुः । ९ । २८९ ।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥")

पूरणं, क्ली, (पूर्य्यते अनेनेति । पूर+करणे
ल्युट् ।) पिष्टकभेदः । इति मेदिनी । णे, ६७ ॥
वृष्टिः । कुटन्नटम् । इति शब्दमाला ॥ अङ्कानां
गुणनम् । इति शुभङ्करः ॥ वापतन्तुः । इति
हेमचन्द्रः ॥

पूरणः, पुं, (पूर्य्यतेऽनेनेति । पूरि+करणे ल्युट् ।)
विष्णुतैलम् । इति धरणिः ॥ सेतुः । इति तारा-
वली ॥ (पूरयतीति । पूरि+कर्त्तरि ल्युः ।)
समुद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूरके,
त्रि । इति मेदिनी । णे, ६३ ॥ (यथा, हरि-
वंशे । १२८ । ५२ ।
"अश्मनः सन्तरः साधनानां
अङ्गावतो भाद्रपदप्रसंगा ।
पतिर्मघानां मघवा वसूनां
पायात् पूरणः षड्गुणानाम् ॥")

पूरणी, स्त्री, (पूर्य्यते अनयेति । पूरि+ल्युट्+
ङीप् ।) शाल्मलिवृक्षः । इत्यमरः । २ । ४ । ४६ ॥
(अस्या पर्य्यायान्तरं यथा, भावप्रकाशस्य पूर्व्व-
खण्डे प्रथमे भागे ।
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥")
पूर्य्यतेऽनया पूरणी । यथा पञ्चानां पूरणी पञ्चमी ।

पूरार्द्धं, क्ली, (पूरं पूरकमर्द्धमस्य ।) दशाङ्गम् ।
इति राजनिर्घण्टः ॥

पूरिका, स्त्री, (पूर्य्यते इति । पूरि+कः । स्त्रियां
ङीप् । पूरी । ततः स्वार्थे कन् । टाप् पूर्व्व-
ह्रस्वश्च ।) पिष्टकभेदः । पूरी इति कचुरी इति
च भाषा । यथा,—
"माषाणां पिष्टिकां शुद्धां लवणार्द्रकहिङ्गुभिः ।
तया पिष्टिकया पूर्णा समिता हस्तलोपिका ।
तप्ततैले विपक्वा सा पूरिका कथिता बुधैः ॥"
अस्या गुणाः ।
"बल्या स्वाद्वी गुरुः स्निग्धा वातपित्तास्रदूषिका ।
चक्षुस्तेजोहरी चोष्णा पाके नातिबलाग्निदी ।
तथैव घृतपक्वापि चक्षुष्या रक्तपित्तनुत् ॥"
इति भावप्रकाशः ॥
(अस्या गुणान्तरं यथा,—
"पूरिकाघृतपूरन्तु त्रिदोषशमनं परम् ।
शस्तं संवर्द्धनं स्वादु चलचलनिवारणम् ॥"
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥)

पूरितः, त्रि, (पूर्य्यते स्मेति । पृ पूरि वा+क्तः ।
"वा दान्तशान्तपूर्णेति ।" ७ । २ । २७ । इति
पक्षे इट् ।) तृप्तपूरणम् । तत्पर्य्यायः । पूर्णम्
२ । इत्यमरः । ३ । १ । ९८ ॥ गुणितश्च ।

पूरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर+"पुरः
कुषन् ।" उणा० ४ । ७४ । इति कुषन् । "अन्येषा-
मपि दृश्यते ।" ६ । ३ । १३७ । इति निपातनात्
दीर्घः ।) पुरुषः । पुमान् । इत्यमरः । २ । ६ । १ ॥

अथ पूरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रद्वयं कुक्षिर्द्वौ तु नासा तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवाथ कर्णौ पृष्ठञ्च ह्रस्वे जङ्घे सुपूजिते ।
चत्वारि यस्य ह्रस्वानि पूज्यो भवति नित्यशः ॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचम् ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते ॥
कटिविशाला बहुपुत्रभागी
विशालहस्तो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥

न जीर्य्यजति रक्तास्यं नार्थः कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचिताधकम् ॥
कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशः सुखी ।
कदाचित्तुन्दिलो दुःखी कदाचिच्चपला सती ॥
नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् ।
त्वक्स्नेहेन चैश्वर्य्यं पादस्नेहेन वाहनम् ॥
अकर्म्मकठिनौ हस्तौ पादावध्वनि कोमलौ ।
यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्द्दिशेत् ॥
दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः प्रियमाप्नोति कृष्णाभिर्लोकपूजितः ॥
अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
उत्तमं भोजनं तस्य शतं जीवति मानवः ॥
अङ्कुशं कुलिशं छत्रं यस्य पाणितले भवेत् ।
ऐश्वर्य्यञ्च विनिर्द्दिष्टमशीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं चाथ तोरणम् ।
तस्यैश्वर्य्यञ्च राज्यञ्च अशीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्ज्जनीं यावत् रेखा भवति चायता ।
निःशब्दाधिकशतं नरा जीवन्त्यनामयाः ॥
कनिष्ठामध्यमां यावत् रेखा भवति चायता ।
शताब्दं चाथ चाशीतिर्नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायाञ्चेत् रेखा भवति चायता ।
षष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता ।
तावती पुरुषाणान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा धुवा ऊर्द्ध्वम्भवेद्यदि ।
नृपो वा नृपतुल्यो वा चिरं ख्यातोऽथवापि वा
भवेत् ॥
मत्स्यपुच्छप्रकीर्णेन विद्याविभवसंयुतः ।
पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
तदाप्यर्ज्जितं वित्तं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्यापि चक्रमङ्गुष्ठे यथापूर्व्वञ्च दृश्यते ।
तदा वै पामरादीनामर्ज्जितं धनमाप्नुयात् ॥
सर्व्वेष्वामय चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतस्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतस्तु व्ययो भवति निश्चितम् ॥
अनामायां भवेत् चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतस्तु व्ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतस्तु व्ययो भवति निश्चितम् ॥ ० ॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
अशीत्यायुः समाप्नोति पञ्चरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रकर्णञ्च दृश्यते ।
रेखाहीनञ्च करञ्च स चोत्पातो भवेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्व्वदा ।
भोगी भवति निर्ल्लोभः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य जीवयन्नोपकर्म्महृत् ।
यत्नभो दम्भरः पश्चं वेदान्तपारगो भवेत् ॥"

प्रकारान्तरम् ।
"दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तेन वित्तवान् ॥
दीर्घलिङ्गे च सौभाग्यं स्वल्पलिङ्गे नृपो भवेत् ।
वक्रास्थकठिनैर्लिङ्गैः प्रमाणाद्विगतैः सदा ॥
रमते च सदा दास्या निर्धनो भवति ध्रुवम् ।
कृशलिङ्गेन स्वर्णेन रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।
राज्यं सुखञ्च दिव्याद्याः कन्यकायाः पतिर्भवेत् ॥
यस्य पादतले पद्मं चक्रं चाप्यथ तोरणम् ।
अङ्कुशं कुलिशं चापि स राजा भवति ध्रुवम् ॥
कृशनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः ।
कातरा श्यामजिह्वाश्च ते दरिद्रा न संशयः ।
कपिला मलिनाङ्गाश्च वृक्षाश्चैव दृढनखाः ॥
कृशातिदीर्घा मनुष्यास्ते दरिद्रा न संशयः ।
चिबुके श्मश्रुशून्या ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः सामुद्रवचनं यथा ॥
स्थूलोष्ठका भग्नपृष्ठाः श्यामदन्ताः कुचेलकाः ।
वक्रनासा वक्रभाषाश्च नरा दुःखभाजनाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्णा मानवाः स्मृताः ॥"
इति सामुद्रके पुरुषलक्षणम् ॥ ० ॥
दानवीरदयावीरयुद्धवीरसत्यवीरसंज्ञकपुरुष-
लक्षणन्तु पुरुषपरीक्षाग्रन्थे द्रष्टव्यम् ॥

पूर्णः, त्रि, (पूर्य्यते स्मेति । पॄ पूरि वा + क्तः ।
"वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।" ७ ।
२ । २७ । इति इडभावो निपात्यते च ।)
पूरितः । सकलः । इत्यमरः । ३ । १ । ८८ ॥
(यथा, पञ्चदश्याम् । ७ । ७७ ।
"तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥")
शक्तः । इति मेदिनी । णे, २२ ॥ स्त्रीयसुखेच्छा-
मदन्यः । इति गदाधरभट्टाचार्य्यः ॥ (प्रधानाः
युद्धभेदः । यथा, महाभारते । १ । ६५ । ४७ ।
"सिद्धः पूर्णश्च बर्हौ च पूर्णायुश्च महायशाः ॥"
नागभेदः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसः पूर्णः शलः पालो हलौ-
मकः ॥")

पूर्णकः, पुं, (पूर्ण + "संज्ञायां कन् ।" ५ । ३ ।
७५ । इति कन् ।) स्वर्णचूडपक्षी । इति मेदिनी ।
के, १२५ ॥ (देवयोनिविशेषः । यथा, महा-
भारते । ७ । ५५ । ४ ।
"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्वर्द्धमानकैः ।
नित्योद्योगैश्च क्रीडद्भिस्तत्र स्म परिचर्य्यते ॥")

पूर्णकुम्भः, पुं, (सलिलादिभिः पूर्णः कुम्भः ।)
जलपूरितघटः । तत्पर्य्यायः । भद्रकुम्भः २ ।
इत्यमरः । २ । ८ । ३२ ॥ (यथा, मनुः । ११ ।
१८७ ।
"दासघटं तु चरिते पूर्णकुम्भमपां नव ।
तेनैव सार्द्धं प्राश्नीयुः स्नात्वा पुण्ये जलाशये ॥")
पूर्णकलसादिश्च । इति भरतः ॥ (अपिवाहु-
भिर्या हस्ताभ्यां परस्परस्य पीडनं पूर्णकुम्भः ।
इति नीलकण्ठः ॥ यथा, महाभारते । २ ।
२३ । १७ ।
"बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥")

पूर्णकोष्ठा, स्त्री, (पूर्णं कोष्ठमस्याः ।) नागर-
मुस्ता । इति राजनिर्घण्टः ॥

पूर्णपात्रं, क्ली, (पूर्णञ्च तत् पात्रञ्चेति नित्यकर्म्म-
धारयः ।) वस्त्रपूर्णपात्रम् । वर्द्धापकः । इति
मेदिनी । रे, २८४ ॥ उत्सवकाले हर्षात्
गृहीतवस्त्रालङ्कारादि । तत्पर्य्यायः । पूर्णा-
नकम् २ । यथा,—
"हर्षादुत्सवकाले यदलङ्कारांशुकादिकम् ।
आकृष्य गृह्णते पूर्णपात्रं पूर्णानकञ्च तत् ॥"
इति जटाधरः ॥
(यथा, अनर्घराघवे । ३ । ४५ ।
"प्राभवे चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यते ॥")
होमकर्म्मणि ब्रह्मदक्षिणा । यथा, गोभिलेनापि
दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मणे
दद्यादित्युक्तम् । आन्ततेऽपि पुंस्त्वं छान्दसम् ।
तस्य प्रमाणन्तु छन्दोगपरिशिष्टे शतपार्श्वपरिशिष्टयोः ।
अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥
अत्र षट्पञ्चाशदधिकशतद्वयमुष्टिमितं पूर्ण-
पात्रम् । अथवाष्टे तु छन्दोगपरिशिष्टम् ।
यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन जायते ।
नावरार्द्धमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥"
इति संस्कारतत्त्वम् ॥

पूर्णबीजः, पुं, (पूर्णं बीजं यस्य ।) बीजपूरः ।
इति राजनिर्घण्टः ॥ (विवरणमस्य बीजपूरशब्दे
ज्ञातव्यम् ॥)

पूर्णमा, स्त्री, (पूर्णं कलापूर्णश्चन्द्रं पूरयं वा
माति । मा + कः । टाप् ।) पूर्णिमा । इत्य-
मरटीकायां भरतः ॥

पूर्णमासः, पुं, (पूर्णमासी पूर्णिमा साधनत्वेनास्त्य-
स्येति । अच् ।) पौर्णमासयागः । इति जटा-
धरः ॥ (यथा, तैत्तिरीयसंहितायाम् । २ । २ ।
१० । २ ।
"ये तिष्यः सोमः पूर्णमासः साम्नादेव प्रज्ञा-
पर्य्ययमवरुन्धे ॥")
पूर्णो मासो यस्येति । पूर्णिमा । यथा, महा-
भारते । १२ । २८ । ११३ ।
"दर्शे च पूर्णमासे च चातुर्मास्ये पुनः पुनः ।
अयजद्धयमेधेन सहस्रं परिवत्सरान् ॥")

पूर्णमासी, स्त्री, (पूर्णो माषश्चन्द्रमाषो यत्र ।
गौरादित्वात् ङीष् ।) पूर्णिमा । इति शब्द-
माला ॥

पूर्णा, स्त्री, (पूर्ण + टाप् ।) पञ्चमी । दशमी ।
पूर्णिमा । अमावस्या । यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः
क्रमात् ॥"

तत्र स्त्रीसंसर्गनिषेधो यथा,—
"पूर्णासु योषित् परिवर्ज्जनीया ।"
इति तिथितत्त्वम् ।
"गुरौ पूर्णा च संयुक्ता शिवयोगाः प्रकीर्त्तिताः ।"
इति ज्योतिःसारसंग्रहः ।

पूर्णानकं, क्ली, पात्रांयनामम् । तत्पर्य्यायः । पूर्णपात्रम् २ । इति त्रिकाण्डशेषः । पूर्णालकमपि पाठः ॥

पूर्णावतारः, पुं, (पूर्णः अवतारः ।) नृसिंहः । रामः । यथा,—
"पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड्विभुः ।
परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम् ॥
वैकुण्ठे कमलाकान्तो रूपभेदाच्चतुर्भुजः ।
गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम् ॥
अस्यैव तेजो नित्यञ्च चिन्तां कुर्व्वन्ति योगिनः ।
भक्ताः पादाम्बुजं तेजः कुतस्तेजस्विना विना ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९ अध्यायः ॥

पूर्णिका, स्त्री, नासाच्छिन्नीनामकपक्षी । इति त्रिकाण्डशेषः ॥

पूर्णिमा, स्त्री, (पूर्णिः पूरणम् । पूर्णिं मिमीते इति । मा + कः । टाप् ।) पञ्चदशी तिथिः । तत्पर्य्यायः । पौर्णमासी २ । निशाकरे कलाहीने सा अनुमतिः ३ पूर्णे निशाकरे सा राका ४ । इत्यमरः ।१।४।७-८ । चित्रा ५ चान्द्री ६ पूर्णमासी ७ अनन्ता ८ चन्द्रमाता ९ निरञ्जना १० । इति शब्दरत्नावली ॥ पूर्णिमा ११ । इति शब्दचन्द्रिका ॥ ज्योत्स्नी १२ इन्दुमती १३ सिता १४ । इति राजनिर्घण्टः ॥ सा द्विविधा । यथा,—
"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
पूर्णोदितकलाहीने पौर्णमास्यां निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चादस्तमिते भास्करे ॥
यस्यामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सा तदा राका राकानुमतिपूर्णिमा ॥
राकायामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥"
इति देवीपुराणम् ॥ * ॥
सा चन्द्रस्य तिथिः । यथा,—
"तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीं तिथिं प्रभुः ।
तस्यामुपोषयेद्दानं समर्थं प्रतिपादयेत् ॥
स चाभाहारश्च भवेत्तस्य धान्यं प्रयच्छति ।
कान्तिं पुष्टिञ्च राज्यञ्च धर्म्मं धान्यञ्च केवलम् ॥"
इति वराहपुराणे सोमोत्पत्तिर्नामाध्यायः ॥ * ॥
तस्यां जातफलम् ।
"कन्दर्पतुल्यो युवतीप्रियश्च
व्यायामवित् सततं सगर्व्वः ।
शूरो वली शास्त्रविचारदक्ष-
श्चेत् पूर्णिमा जन्मनि यस्य जन्तोः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

सा चतुर्द्दशीयुक्ता ग्राह्या युग्मात् । यमः ।
"भूतान्ते योऽपि स्नायात्तेन नायाति मनु-पुरम् ॥"
विष्णुः ।
"दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती प्रोक्ता संवत्सरे तु सा ॥
तस्यां स्नानोपवासाभ्यामक्षयं परिकीर्त्तितम् ॥"
सहितौ माघसंज्ञाविशेषनिमित्ततत्तिकादिनक्षत्रगतौ । महाकार्त्तिक्यादिदर्शनात् । तथा च राजमार्त्तण्डे ।
"माघसंज्ञे यदा ऋक्षे चन्द्रः संपूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥"
स्कान्दमात्स्ययोः ।
"पौर्णमासीषु चैतासु माघसंज्ञहितासु च ।
एतासां स्नानदानाभ्यां फलं दशगुणं स्मृतम् ॥"
वैशाखीमधिकृत्य यमः ।
"गौरान् वा यदि वा कृष्णांस्तिलान् क्षौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितृन्देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अब्दायुतञ्च तिष्ठेच्च स्वर्गलोके न संशयः ॥" * ॥
ब्रह्मपुराणे ।
"महाज्यैष्ठ्यान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ॥ * ॥
ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता ॥"
अनुराधायुतायामपि ।
"ऐन्द्रे मैत्रे यदा जीवस्तत्पञ्चदशके रविः ।
पूर्णिमा शक्रचन्द्रेण महाज्यैष्ठी प्रकीर्त्तिता ॥"
अनुराधायुक्तचन्द्रेऽपि । व्यासभूतिः ।
"ऐन्द्रर्क्षे तपना मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥"
राजमार्त्तण्डे ।
"ज्यैष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा ।
ज्यैष्ठायोग समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता ॥"
ज्यैष्ठसंवत्सरञ्च ।
"ज्यैष्ठाश्लेषोपगे जीवे वर्षं स्याज्ज्यैष्ठदैवतम् ॥"
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः । संवत्सरोऽत्र वत्सरो बोध्यः । न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्यैष्ठ इति विशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यादिति पाठः काल्पनिकः । प्रपञ्चस्तु मलमासतत्त्वेऽनुसन्धेयः ॥ * ॥
विष्णुधर्म्मोत्तरब्रह्मपुराणयोः ।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्दिजाः ॥
तस्मिन् काले तु ये मर्त्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति परमं पदम् ॥"
स्कन्दपुराणे ।
"ज्यैष्ठ्यामथाषाढीगतपुण्यं जन्मवासरम् ।
तस्यां मे स्नपनं कुर्य्यात् स्नानविधानतः ॥
ज्यैष्ठ्यां प्रातःस्नानकाले प्रभया सहितञ्च माम् ।
रामं सुभद्रां संपश्य मम लोकमवाप्नुयात् ॥"

विष्णुधर्म्मोत्तरे ।
"पौर्णमासी तथा माघी भाद्री च कार्त्तिकी ।
प्रौष्ठपद्याममीताथा तथा कृष्णा चतुर्द्दशी ।
एतास्तु भाद्रकालाद्वै नियमाच्च प्रशं-सिताः ॥"
तत्र पूर्व्वदिने सङ्गवलाभे रौहिणकालेऽपरदिने सङ्गवालाभे पूर्व्वदिने ग्राह्यम् ।
"कृष्णपक्षस्य पूर्व्वाह्णे श्राद्धं कुर्य्याद्विचक्षणः ।
कृष्णपक्षापराह्णे तु रौहिणन्तु न लङ्घयेत् ॥"
इति वायुपुराणवचनात् ।
उभयदिने सङ्गवलाभे परदिने ।
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥"
इति विष्णुधर्म्मोत्तरात् ।
एवमयनचतुर्थीयादावपि ॥ * ॥ आषाढ़ीकार्त्तिकीमाघपौर्णमासीषु दानमाहात्म्यम् । तथा अयोध्याकाण्डे भरतप्रश्ने ।
"आषाढ़ी कार्त्तिकी माघी तिथयः शुक्लपक्षगाः ।
अप्रदानवती याश्च यस्यार्थोऽनुमतो गतः ॥"
अप्रदानवती दानरहिततिथिविशिष्टा इ-त्यर्थः । श्रीरामचन्द्रो गतो यस्यानुमत इ-त्यन्वयः । उत्तरवाक्ये यच्छब्दात् तच्छब्दानयनम् ।
अथ कोजागरकृत्यम् । कल्पतरौ ब्रह्मपुराणे ।
"आश्वयुज्यां पौर्णमास्यां निकुम्भो [illegible]
[illegible] ।
आयाति ईश्वरा माघे [illegible] ।
तस्मात्तत्र नरैस्तांतः [illegible] ।
प्रोषितव्याः प्रयत्नेन भूषिताश्च भूषणैः ।
पुष्पार्घ्यफलभूषणाभरणप्रकरैस्तथा ।
वेश्मानि भूषितानि नानावर्णैर्विशेषतः ।
सुजातैरङ्गुलैश्च नरैर्भोज्यं समाचरेत् ।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विशेषतः ।
स्त्रीबालवृद्धमर्त्यैश्च भोक्तव्यं पूजिते हरौ ॥"
पूजितैः सुरैरिति विशेषणं [illegible]
सुरैरित्यर्थः ।
"पूर्व्वाह्णे तपसः पत्रैस्तथा [illegible]
[illegible] सम्पूर्णो [illegible] ।
यथा [illegible] ।
संपूजितश्च पूर्णेन्दुः [illegible] ।
[illegible] ।
गोमद्भिः सुरभिः पुष्पैः [illegible] ।
उत्सवश्च [illegible] ।
पूर्व्वः [illegible] ।
ततः पूर्णो [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
ततश्च [illegible]
पूर्णा । इति
। [illegible]
देकः ।
[illegible]

चता रेवन्तः । सर्व्वैरेव निकुम्भः पूज्यः । सहा-
र्णवे लिङ्गपुराणम् ।
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सद्वेशो अक्षैर्जागरणञ्चरेत् ॥"
तथा,—
"निशीथे वरदा लक्ष्मीः को जागर्त्तीतिभाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ।
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्च्चयेत् ।
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् ॥"
अत्र निशीति निशीथ इति चाभिधानादान्नि-
शत्यमिदम् ।
"ततः प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
प्रदोषोऽस्तमयादूर्द्ध्वं घटिकाद्वयमिष्यते ॥"
इति संवत्सरप्रदीपधृतवत्सवचनात् ॥
यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी
तद्दिने कोजागरकृत्यम् । उभयथाप्यनुरोधात् ।
यदा तु पूर्व्वदिने निशीथव्याप्तिः परदिने प्रदोष
व्याप्तिस्तदा परेद्युस्तत्कृत्यम् । प्रधानपूजाकाल-
व्याप्त्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथव्याप्तिः
परेद्युर्न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्-
कृत्यम् ।
"अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥"
इति वचनात् ॥
वर्णयेदिव्यनुकृतौ मत्स्यसूक्ते ।
"महालक्ष्म्यास्तु तुलसीं भिक्षिकां काञ्चन-
मया ॥"
लक्ष्मीध्यानमादित्यपुराणे ।
"पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययोः ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ।
रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु ॥"
पाशेति । दक्षिणे पाशाक्षमालाभ्यां वामे पद्मा-
ङ्कुशाभ्यां भूषितां वामकरे हेमपद्मं दक्षिणकरे
वरं दधतीमित्यर्थः । ततः पाद्यादिभिः संपूज्य,—
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ॥
इन्द्रध्यानमादित्यपुराणे ।
"चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः ।
शचीपतिश्च ध्यातव्यो नानाभरणभूषितः ॥"
पाद्यादिभिः संपूज्य,—
"ॐ विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः ॥"
इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् । ततः कुबेरः
संपूज्यः । इति रत्नधरः ॥ तं पाद्यादिभिः
संपूज्य,—
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ॥"
इति प्रणमेत् ॥

अत्र प्रदोषे सर्व्वेषां पूजेति रत्नधरप्रभृतयः ॥ न
च निकुम्भपर्य्यन्तानां पूर्व्वाह्न एव पूजनं निरप-
वादमिति वाच्यम् । दिवा तत्र न भोक्तव्यं
इत्युपक्रम्य पूज्याश्च सफलैः पत्रैरित्यादिना
विशिष्य पूजामभिधाय भोक्तव्यमित्यभिधानात्
रात्रावेव पूजाभोजने अवगम्येते । अतएवा-
शक्तानामेव भोक्तव्यं पूजितैः सुरैरित्यनेन
विशिष्य दिवा पूजाभोजने विहिते ॥ * ॥
योगिनीतन्त्रे ।
"विरिञ्चेस्तु गृहे ढक्कां घण्टां लक्ष्मीगृहे त्यजेत् ।
सर्व्ववाद्यमयी घण्टा वाद्याभावे तु वादयेत् ॥" * ॥
लक्ष्मीवाक्यम् ।
"प्रकीर्णभाण्डामनवेक्ष्य कारिणीं
सदा च भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्ज्जयामि ॥"
मार्कण्डेयः ।
"शिरः सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
मातुर्यासि गृहे यत्र अहोरात्रञ्च तिष्ठति ।
तत्रालक्ष्मि ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥
सर्पदाद्यादिकं यत्र पदाकर्षेत्तथासनम् ॥"
हरिवंशे ।
"यत्र ह्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ॥"
मत्स्यपुराणे ।
"स्थिरो हि यो हि पुरुषः स्थिरश्रीरेव जायते ।
दक्षिस्तु नैव प्राप्नोति चपलश्चपलां श्रियम् ॥"
तथा,—
"अवाप्तसद्योगवती श्रीरपारा भवेत् सदा ।
अक्षप्रोत्साहिता देवा ममन्थुः पुनरम्बुधिम् ॥"
तत्त्वकौमुद्याम् ।
"नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि ।
तस्मै वित्तं प्रयच्छामि को जागर्त्ति महीतले ॥"
अक्षक्रीडायां चात्र युधिष्ठिरसंवादः प्रचरति ।
तत्क्रीडा चतुरङ्गशब्दे द्रष्टव्या ॥ * ॥ वैष्णवा-
मृते स्कन्दपुराणम् ।
"पौष्यान्तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य देवेन्द्र ! पूजा विष्णोर्विधीयते ॥"
इति । पौर्णमास्यन्तमासमुपक्रम्य ।
"पितृभ्यो दैवतानाञ्च मूलकं नैव दापयेत् ।
ददन्नरकमाप्नोति भुञ्जीत ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।
अन्यथा नरकं याति क्षत्रो विट् शूद्र एव च ॥
वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितं मधु ।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥" * ॥
फाल्गुने दोलयात्रामाह सौपर्दिनामणौ ब्रह्म-
पुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"

स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये जगन्निंशा-
ध्याये ।
"फाल्गुन्यां क्रीडनं कुर्य्यात् दोलायां मम
भूमिप ! ॥"
इति तिथितत्त्वम् ॥ * ॥
तस्याः पर्व्वत्वं पर्व्वशब्दे द्रष्टव्यम् ॥
पूर्त्तं, क्ली, (पॄ पालने + भावे क्तः । "न ध्याख्या-
पूर्मूर्च्छिमदाम् ।" ८ । २ । ५७ । इति निष्ठा-
तस्य न नत्वम् ।) पालनम् । इति शब्दरत्ना-
वली ॥ (पिपर्त्ति पालयत्यनेन जीवानिति ।
पॄ + करणे क्तः ।) खातादिकर्म्म । इत्यमरः ।२।
७ । २८ ॥ आदिना देवकुल्यादि । तदुक्तम् ।
"पुष्करिण्यः सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्त्तं कर्म्म विनिर्द्दिशेत् ॥"
इति भरतः ॥

तत्करणफलम् ।
"इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्ते मोक्षञ्च विन्दति ॥
वापीकूपतडागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥"
इति वराहपुराणम् ॥ * ॥
वाप्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकार-
माह जातूकर्ण्यः ।
"वापीकूपतडागादि देवतायतनानि च ।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ।
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके ॥"
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-
करः ॥ एवं स्त्रीणामपि पूर्त्ताधिकारः । यथा
नारीत्वगुरुत्तौ बृहस्पतिः ।
"पितृश्वशुरदौहित्रान् भर्त्तुः स्वीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः ॥"
इति मलमासतत्त्वम् ॥
(पूर्त्तं खातादिकर्म्म अङ्गत्वेनास्त्यस्येति । अच् ।
धर्म्मविशेषे, पुं । यथा, मार्कण्डेये । १३ । १५ ।
"यतस्ते विप्रस्य याजिन विश्वस्य यज्ञमेधिनः ।
तस्मादिष्टश्च पूर्त्तश्च धर्म्मौ द्वावपि नश्यतः ॥")
पूर्त्तः, त्रि, (पॄ + कर्म्मणि क्तः) पूरितः । छन्नः ।
इति विश्वः ॥ (यथा, भागवते ।१।२४।२१।
"ऐश्वर्य्यवैराग्ययशोऽवबोध-
वीर्य्यश्रिया पूर्त्तमहं प्रपद्ये ।")
पूर्त्तिः, स्त्री, पूरणम् । पृधातोर्भावे क्तिः । इति
व्याकरणम् ॥ (यथा, ऋग्वेदे । ६ । १३ । ६ ।
"विश्वाभिर्गीर्भिरभि पूर्त्तिमश्यां
मदेम शतहिमाः सुवीराः ॥")
पूर्त्त, क निकेतने । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-निमन्त्रणे सक०-निवासे अक०-सेट् ।)
[illegible] । निकेतनमिह निमन्त्रणं निवासो वा ।
क, पूर्त्तयति द्विजान् भोक्तुं सुधीः । पूर्त्तयति
तीर्थेषु साधुः । इति दुर्गादासः ॥ वर्त्तेवाको-
ऽयम् ।

पू(र्व्व)र्व्वः, त्रि, (पूर्व्व निमन्त्रणे निवासे वा+अच् ।) प्रथमः । (यथा, कुमारे । १ । ५३ ।
"यदैव पूर्व्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज्ज ।
तदा प्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरिग्रहोऽभूत् ॥"
यथाच मनुः । २ । १८४ ।
"गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत् ॥")
आदिः । (यथा, मनुः । २ । ७४ ।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा ।
स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यति ॥")
प्राग्दिग्-देशकालाः । इत्यमरः ॥ (यथा, मनुः । ५ । ९२ ।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः ॥")
अग्रगम् । इति तट्टीकायां स्वामी ॥ अग्रः । इति शब्दायुधः ॥ (यथा, मनुः । २ । ५० ।
"चिरायामेदमः पूर्व्वं द्विः प्रमृज्यात्ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥")

पूर्व्वगङ्गा, स्त्री, (पूर्व्वा प्राची गङ्गा चेति ।) नर्म्मदानदी । इति हेमचन्द्रः । ४ । १४९ ॥

पूर्व्वजः, पुं, (पूर्व्वं जायते इति । पूर्व्व+जन+डः ।) ज्येष्ठभ्राता । इत्यमरः ।२।६।४३। (पूर्व्वकालोत्पन्ने, त्रि । यथा, महाभारते ।१।१०५।२६ ।
"तामद्भिः परिषिच्यार्त्तां महर्षिरभिवाद्य च ।
मातरं पूर्व्वजः पुत्रो व्यासो वचनमब्रवीत् ॥")

पूर्व्वजाः, पुं, (पूर्व्वं पूर्व्वस्मिन् काले जायन्ते इति । जन+डः ।) दिव्यपितृगणः । तत्पर्य्यायः । पितरः २ चन्द्रगोलस्थाः ३ व्यक्तभक्ष्याः ४ स्वधाभुजः ५ कव्यवालादयः ६ । बहुवचनान्तोऽयम् । इति त्रिकाण्डशेषः ॥

पूर्व्वजा, स्त्री, (पूर्व्वं जायते इति । जन+डः । टाप् ।) अग्रजा । ज्येष्ठा भगिनी । पूर्व्वज इत्यमरदर्शनात् ॥

पूर्व्वजिनः, पुं, (पूर्व्वो जिनः ।) अतीतजिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अष्टारचक्रवान् ७ स्थिरचक्रः ८ वज्रधरः ९ प्रज्ञाकायः १० वादिराट् ११ नीलोत्पली १२ महाराजः १३ नीलः १४ शार्द्दूलवाहनः १५ धियाम्पतिः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥

पूर्व्वदिक्, स्त्री, (पूर्व्वा दिक् ।) प्राची दिक् । यस्यान्दिशि सूर्य्य उदेति । तदधिपतिरिन्द्रः । तस्याः पर्य्यायादिः पूर्व्वाशब्दे द्रष्टव्यः ॥

पूर्व्वदिक्पतिः, पुं, (पूर्व्वदिशः पतिरधिपतिः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ ॥

पूर्व्वदेवः, पुं, (पूर्व्वस्याः देवश्चेति । यद्वा, पूर्व्वं देव इति सुप्सुपेति समासः ।) असुरः । इत्यमरः । १।१।१२ ॥ (नरनारायणाख्यौ । तत्र द्विवचनान्तोऽयम् । यथा, महाभारते । ५ । ४९ । ५ ।
"तेषां मनश्च तेजश्चाप्यादाय वीर्य्यमसा ।
पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥")

पूर्व्वदेशः, पुं, (पूर्व्वो देशः ।) प्राचीदिगवस्थितजनपदः । तत्पर्य्यायः । वर्णनिः २ । इति त्रिकाण्डशेषः ॥ यथा,—
"प्राच्यां मागधशोणौ च वारेन्द्रीगौडराढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः ॥"
इति ज्योतिस्तत्त्वम् ॥

पूर्व्वपक्षः, पुं, (पूर्व्वः पक्षः ।) शुक्लपक्षः । इत्यमरः ॥ (यथा, मनुः । ३ । २७८ ।
"यथा चैवापरः पक्षः पूर्व्वपक्षाद्विशिष्यते ॥")
शास्त्रीयप्रश्नः । सिद्धान्तविरुद्धकोटिः । तत्पर्य्यायः । चोद्यम् २ । इति त्रिकाण्डशेषः ॥ देश्यम् ३ पञ्जिका ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १ । ३ ।
"पूर्व्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् ॥"
अधिकरणावयवभेदो व्यवहारविशेषः । यथा, याज्ञवल्क्ये । २ । १७ ।
"पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥")

पूर्व्वपक्षपादः, पुं, (पूर्व्वपक्ष एव पादः ।) चतुष्पाद्‌व्यवहारान्तर्गतः प्रथमः पादः । तस्य संज्ञान्तरम् । भाषा २ प्रतिज्ञा ३ पक्षः ४ । इति मिताक्षरा ॥ तत्र बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥
मिथ्योक्तौ च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राङ्‌न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु ॥"
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्याङ्गीकृतत्वेन क्रियासाध्यो न भवतीति द्विपादित्युक्ता ॥ * ॥
अथ भाषापादः । तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती ।
"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्म्मुक्तो विरोधिप्रतिरोधकः ॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषैः परधर्मविरुद्धार्थत्वादिभिर्व्यक्तम् । साध्यं साधनाद्यभिमतार्थं पक्षं विदुः । अन्यथा प्रतिज्ञादोषैरिव साध्यदोषः स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
अध्यङ्गरेष वक्तव्ये व्यवहारेषु वादिभिः ॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते । नारदेनापि ।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥"
उत्तरो विजयी यदाप्यत्र साध्यं साध्यसाधनविशिष्टधर्म्मी पक्ष इति भेदः । तथाप्यत्र वाक्प्रकाश्यार्थादिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधनर्णादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम् । अतएव उपसंहारे च दर्शितः पक्ष इति मिताक्षरायान्तु भाषा प्रतिज्ञा च इति नामान्तरमित्युक्तम् । भाषार्थकथा भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति । निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः ।
"अथ द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति ॥"
इति महाभारतवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत् । तच्छोधनमाह बृहस्पतिः ।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥"
तल्लिखनप्रकारमाह व्यासः ।
"पाण्डुलेख्येन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
फलकं काष्ठादिपट्टकम् । कात्यायनः ।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेख्येन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्तिः शोधनं भवेत् ॥
अन्यदुक्तं लिखेदन्यो योऽर्थिप्रत्यर्थिनोर्वचः ।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः ॥"
स्वभावोक्तमकृत्रिमम् । एतच्च सर्व्वविषयादिसूचनम् । अतएव याज्ञवल्क्यः ।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥"
भूतं तत्त्वार्थसम्बद्धम् । यदाह नारदः ।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम् ।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता ।
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधुता ।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति ।
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि वादी हीयते इति । अनयोरुदाहरणं पशुस्त्र्यादि । अर्थविवादपदव्यतिरिक्तविवादेषु प्रमादाभिधाने प्रकृतार्थाद्धीयत इति गम्यते । यथाहमनेन शिरसि पादेन ताडित इत्यभिधाय केवलं दण्डेन ताडित इति वदन् न केवलं दण्ड्यः पराजीयते च । तथा च त्वं भूतं मह्यं धनं धारयसि मत्पक्षेण गृहीतमावस्थकत्वादित्यादि भाषादोषाः । एतच्च संस्कृतदेशभाषान्तरेण यथाबोधं स्वयं लेख्यं वा न तु संस्कृतमपि वादिप्रतिवादिनोरज्ञानात् । अतएवाध्यापनेऽपि तथोक्तम् । विष्णुधर्म्मोत्तरे ।
"संस्कृतैः प्राकृतैर्व्वाक्यैः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥

पूर्व्वपदं, क्ली, (पूर्व्वं पदम् ।) समासप्रथमशब्दः । विभक्त्यन्तप्रकृतिः । यथा पूर्व्वपदात् संज्ञायामगः । इति व्याकरणम् ॥

पूर्व्वपर्व्वतः, पुं, (पूर्व्वः पूर्व्वदिक्स्थः पर्व्वतः । इति नियतकर्म्मधारयः ।) उदयाचलः । इत्यमरः । २ । ३ । २ ॥

पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीति कर्म्मधारयः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकादशनक्षत्रम्। तत्तु खट्वाङ्गतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति ज्योतिषतत्त्वचिन्तामणिः। अपि च।

"दक्षिणोत्तरगते दितारके
योनिभे मिलति मस्तकोपरि।
कीटतः स्फुटशरीररुहाभने!
निःसृता ३१८ गगनराशिलिप्तिकाः॥"

इ० ४।२८। इति कालिदासकृतरात्रिलग्ननिरूपणम्॥ *। तत्र जातफलम्।

"शूरस्त्यागी साहसी भूमिभर्त्ता
कोपाक्रान्तः स्याच्छिरालोऽतिदक्षः।
धूर्त्तः क्रूरोऽश्वत्थासाधिकः प्राक्-
फल्गुन्यर्क्षे जन्मकाले च यस्य॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू+अच्।) बृहस्पतिः। इति शब्दमाला॥

पूर्व्वभद्रपदः, पुं, पूर्व्वभद्रपदा, स्त्री, पूर्व्वभाद्रपदा, स्त्री, } अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदा २। इत्यमरः॥ "द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदाख्ये। प्रोष्ठो गौः भद्रश्च गौः तस्येव पाद आसां ताःप्रोष्ठपदाः। भद्रपदा इव भद्रपादा इत्यतो राजेव्याख्यामञ्जरी शेषाद्भद्रपदाशब्दो ह्रस्वादिः भाद्रपदाशब्दो दीर्घादिरपीति केचित्। दीर्घादिपाठः प्रामादिक इति मुकुटादयः॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वात् द्विवचनम्। फल्गुनीप्रोष्ठपदाशब्दो द्वित्वे बहुत्वे च भद्रपदा देऽपीति केचित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति केचित्।" इति तट्टीकायां भरतः॥ *॥ तां तु दक्षिणोत्तरवर्त्तिखट्वाकृतितारकाद्वयात्मिकाः। भारात्कृतितारकाद्वयरूपा वा। तदधिदेवता अजपादः आसां अजम्पगुणः। इति ज्योतिषम्॥ अपि च।

"भारग्रतिर्ष्यतिकोपरिस्थिते
पूर्व्वभाद्रपदभे दितारके।
लिप्तिकाः करिकराश्च ३२८ संमिता
निःसरन्ति वृषभोदयात् प्रिये॥"

इ० ३।४८। इति कालिदासकृतरात्रिलग्ननिरूपणम्॥ *॥

तत्र जातफलम्।

"जितेन्द्रियः सर्व्वकलासु दक्षो
जितारिपक्षः खलु तस्य नित्यम्।
भवेत्कलीयान् सुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रसूतौ॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वयक्षः, पुं, (पूर्व्वश्चासौ यक्षश्चेति। पूर्व्वं पूर्व्वस्मिन् काले यक्षो वा।) जिनविशेषः। तत्पर्य्यायः। मणिभद्रः २ जम्भलः ३ जलेन्द्रः ४। इति त्रिकाण्डशेषः॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रज्यतेऽस्मिन्निति। रञ्ज+अधिकरणे घञ्।) नाट्योपक्रमः। इति हेमचन्द्रः। २।१९६॥ तत्पर्य्यायः। प्राक्संगीतम् २ शुष्कनिका ३। इति जटाधरः॥ (अस्य लक्षणं यथा, साहित्यदर्पणे। ६।१०।

"यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते॥")

पूर्व्वरागः, पुं, (पूर्व्वः पूर्व्वजातो रागोऽनुरागः।) नायकनायिकयोर्दशाविशेषः। यथा,—

"श्रवणाद्दर्शनाद्वापि मिथःसंरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥"

इति साहित्यदर्पणम्॥

पूर्व्वरात्रः, पुं, (रात्रेः पूर्व्वो भागः। अच् समासे। "रात्राह्नाहाः पुंसि।" २।४।२९। इति पुंस्त्वम्।) रात्रेः पूर्व्वभागः। इति मुग्धबोधव्याकरणम्॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"——————प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टञ्च। सामान्यं येन दोषदूष्यसम्मूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। श्रमो रतिर्विवर्णत्वमिति। तथा वालगुरुवाक्यप्रद्वेषादि। सामान्याभिप्रायेणैव तन्त्रान्तरं यथा। व्याधेर्जातिर्बुभूषा च पूर्व्वरूपेण लक्ष्यते। भावः किमात्मकत्वञ्च लक्ष्यते लक्षणेन तु इति॥ तथाह पराशरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। ज्वरादौ लिङ्गान्येव वातादिजान्यव्यक्तानि। यदुक्तं तत्रैव। अव्यक्तं लक्षणं तेषां पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनमिति॥

हारीतेऽप्युक्तम्। इति पूर्व्वरूपप्रकारान्तरायां सामान्यतो विशेषात्तु जृम्भाङ्गमर्द्दभूयिष्ठं ज्वरयोर्हि वातजमिति। प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह दक्षितः। येन प्रमादिना उत्पित्सुः सामर्थ्योपाकत्वादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्याधाधारणचिह्नप्रमादिना अनधिष्ठितोऽसम्बद्धो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह स एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अव्यक्तं नातिव्यक्तं तत्र हेतुरल्पत्वात् न त्वापरकादियोगादव्यक्तत्वमित्यर्थः यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः। अन्ये तु पूर्व्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते॥ इति॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसमीपे प्रागावेदनम्। यथा,—

"पूर्व्ववादम्परित्यज्य योऽन्यमालम्बते पुनः।
पदसंक्रामणाज्ज्ञेयो हीनवादी स वै नरः॥"

इति मिताक्षरा॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्यास्तीति। पूर्व्ववाद+इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्द्दिशेत् क्रियाम्।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत्॥"

इति मिताक्षरा॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः॥

पूर्व्वसरः, त्रि, (पूर्व्वः सन् सरतीति। पूर्व्व+सृ+"पूर्व्वे कर्त्तरि।" ३।२।१९। इति टः।) अग्रगामी। यथा, भट्टिः। ५।९७।

"द्विषन् वनेचराग्र्याणां त्वमादाय चरो वने।
अग्रेसरो जघन्यानां माभूत् पूर्व्वसरो मम॥"

पूर्व्वसारः, त्रि, पूर्व्वं देशं सरतीति कर्त्तरि णप् (अण्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम्॥

पूर्व्वा, स्त्री, (पूर्व्व+टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माघोनी ४ ऐन्द्री ५ माघवती ६। तद्दिग्भववायुगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः।
गुरुर्विदाहशमनो वातदः पित्तनाशनः॥"

इति राजनिर्घण्टः॥

अपि च। राजवल्लभः।

"प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः।
वैरस्यमोरवोष्ण्यानि करोत्यम्लोषमौष च॥
भग्नोत्पिण्डक्षताद्येषु रागश्चयमुदाहृतम्।
सन्निपातश्वासश्लेष्मदोषार्शोविषक्रिमीन्॥
कोदर्पेदामवातञ्च जनसंतापकारणम्।"॥*॥

तद्दिगधिपतयः मेषसिंहधनूराशयः। यथा,—

"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिरावृत्तिपरिभ्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः॥३।४।२३३॥ (यथा, रघुः।१।६७।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते॥")

पूर्व्वाद्रिः, पुं, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। दिनमूर्द्धा २। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। १।१८।

"चित्रोत्तुङ्गजटाजूटगतो मकरकेतुरि मनः।
सन्ध्यापिङ्गपूर्व्वाद्रिशृङ्गस्थचन्द्रकं प्रभोः॥")

पूर्व्वाषाढ़ा, स्त्री, (पूर्व्वा चासावाषाढ़ा चेति ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतविंशनक्षत्रम् । सा सूर्पाकृतिचतुस्तारात्मिका । गजदन्ताकृतिद्वितारात्मिका वा । अस्या अधिष्ठातृदेवता तोयम् । इति ज्योतिषम् ॥ अपि च ।

"सूर्पमूर्त्तिनि शिरोगते चतु-
स्तारके करिकरोदतारिभे ।
अन्त्यभाद्दलपाथि । निर्मला:
खेचरामरधराङ्घ्रिलिप्तिका: ॥"

इ० १।४६ ॥ इति कालिदासकृतरात्रिचिन्तामणिरूपम् ॥०॥ तत्र जातफलम् ।

"भूयो भूयस्तूयमानाङ्गरक्तो
भक्तो देवे बन्धुमान्योऽतिदक्ष: ।
पूर्व्वाषाढ़ा जन्मकाले यदि स्या-
दाषाढ़: स्यादेदिवर्गे नितान्तम् ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वाह्णः, पुं, (अह्नः पूर्व्वम् । पूर्व्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति समासः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । "अह्नोऽदन्तात् ।" ८ । ४ । ७ । इति णत्वम् । "रात्राह्नाहाः पुंसि ।" २ । ४ । २९ । इति पुंस्त्वम् ।) त्रिधाविभक्तदिनप्रथमभागः । स च त्रिंशद्दण्डदिनमाने सूर्य्योदयावधिदशदण्डकालः । यथा, पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम् । इति श्रुतिः ॥ अपि च । त्रिधाविभक्तदिनभागाभिप्रायेण तु लौकाक्षिः ।

"पूर्व्वाह्णे मध्यमे वापि यदि पर्व्व समाप्यते ।
तदोपवासः पूर्व्वे तु प्रातरिष्टियाग इष्यते ॥
अपराह्णेऽथवा रात्रौ यदि पर्व्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥"

उपोष्येति नाहोरात्राभोजनपरं किन्तु व्रते अग्न्याधाने देवा यजमानस्य समीपमुपवसन्तीति उपवासशब्देनाग्न्याधानमुच्यते । सूर्य्योदयावधिप्रहरद्वयम् । द्विधाविभक्तदिनपूर्व्वभागः । यथा । पूर्व्वाह्णापराह्णरूपद्विधाविभक्तदिनस्यावधित्वेनावर्त्तनमाह स्कन्दपुराणम् ।

"आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततः परः ॥"

आवर्त्तनात् वासरस्य छायापरिवर्त्तनात् प्रागिति मत्स्यपुराणे ।

"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये ।
अत ऊर्द्ध्वं न वन्देत अश्वत्थन्तु कदाचन ॥"

इति मलमासतत्त्वम् ॥

पूर्व्वाह्णेतनः, त्रि, (पूर्व्वाह्णे भव इति । पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४।३।२४ । इति ट्युट्युलौ तुट् च । "घकालतनेषु कालनाम्नः ।" ६ । ३ । १७ । इति विभाषया सप्तम्या अलुक् ।) पूर्व्वाह्णे भवः । इति सिद्धान्तकौमुदी ॥

पूर्व्वेद्युः, [स्] अ, (पूर्व्वस्मिन्नहनीति । पूर्व्व + "सद्यःपरुत्परार्य्यैषमःपरेद्यव्यद्यपूर्व्वेद्युरन्येद्युः ।" ५।३।२२। इत्येद्युसुप्रत्ययो निपात्यते ।) पूर्व्वदिवा । इत्यमरः ।३।४।२१ ॥ प्रातःकालः । धर्म्मवासरः । इति मेदिनी । अव्ययवर्गे, ८४ ॥ (यथा, मनौ । ३ । १८७ ।

"पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते ।
निमन्त्रयेत त्र्यवरान् सम्यग्विप्रान् यथोदितान् ॥")

पूर्व्व, क निकेतने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) षष्ठस्वरी । निकेतनमिह निमन्त्रणं निवासो वा । क, पूर्व्वयति द्विजान् भोक्तुं यज्वी । पूर्व्वयति तीर्थेषु साधुः । इति दुर्गादासः ॥ अन्त्यवान्तोऽयम् ॥

पूल, कि संहतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) षष्ठस्वरी । कि, पूलयति पूलति । संहती राशीकरणम् । इति दुर्गादासः ॥

पूष, वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) षष्ठस्वरी । पूषति । इति दुर्गादासः ॥

पूषः, पुं, (पूषति वर्द्धते इति । पूष + कः ।) ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ६१ ॥ तुत इति भाषा ॥ (ब्रह्मदारुशब्देऽस्य विषयो ज्ञेयः ॥)

पूषकः, पुं, (पूष + स्वार्थे कन् ।) ब्रह्मदारुवृक्षः । इति राजनिर्घण्टः ॥ पलाशभिषक इति हिन्दीभाषा ॥ अस्य पर्य्यायगुणाः तूलशब्दे द्रष्टव्याः ॥

पूषभासा, स्त्री, (पूषेव सूर्य्य इव भासते इति । भास + अच् । टाप् ।) इन्द्रनगरी । तत्पर्य्यायः । सुरपुरी २ । इति शब्दरत्नावली ॥

पूषदन्तहृत्, [द्] पुं, (पूष्णोऽदन्तहृत् । शिवो हि स्वाश्रजवीरभद्रेणास्य दन्तानुत्पाटयामास अतोऽस्य तथात्वम् ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥

पूषा, [न्] पुं, (पूषतीति । पूष वृद्धौ + "श्वन्नुक्षन्पूषन्प्लीहन्निति ।" उणा० १ । १५८ । इति कनिन्प्रत्ययान्तो निपात्यते ।) सूर्य्यः । इत्यमरः । १ । ३ । २८ ॥ (यथा, मार्कण्डेये । १०९ । ६४ ।

"आदित्यं भास्करं भानुं सवितारं दिवाकरम् ।
पूषाणमर्य्यमाणञ्च स्वर्भानुं दीप्तदीधितिम् ॥"

स तु द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५—१६ ।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥")

पृ, ञ पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) पूर्त्तिः पूर्णीकरणम् । ञ, पारयति पयसा कुम्भं लोकः । इति दुर्गादासः ॥

पृ, न प्रीतौ । इति कविकल्पद्रुमः ॥ (स्वा०-पर०-सक०-अनिट् ।) न, अतिथीन् पृणोति । इति दुर्गादासः ॥

पृ, लि पालने । इति कविकल्पद्रुमः ॥ (ह्वा०-पर०-सक०-अनिट् ।) लि, पिपर्त्ति । इति दुर्गादासः ॥

पृ, ङ ञ व्यायामके । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-अनिट् ।) व्यायामको व्यापारः । ङ ञ, धर्म्मे व्याप्रियते सुधीः । इति दुर्गादासः ॥

पृक्का, स्त्री, (पृच्यते इति । पृच् + बाहुलकात् कक् । पृषोदरादित्वात् साधुः ।) शाकविशेषः । पिड़िं इति भाषा ॥ तत्पर्य्यायः । मरुन्माला १ पिशुना २ देवी ३ लता ४ लघुः ५ समुद्रान्ता ६ वधूः ७ कोटिवर्षा ८ लङ्कोपिका ९ । इत्यमरः ॥ मरुत् १० माला ११ स्पृक्का १२ कोटी १३ वर्षा १४ लङ्कापिका १५ वर्षाङ्गारिका १६ । इति शब्दरत्नावली भरतश्च ॥ तस्करः १७ चोरकः १८ चकः १९ । इति रत्नमाला ॥ अस्य गुणाः । पाके मधुरत्वम् । हृद्यत्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥

पृक्तं, क्ली, (पृच्यते स्म संबध्यते स्मेति । पृच् सम्पर्के + क्तः ।) धनम् । इति हेमचन्द्रः । २ । १०६ ॥ सम्पर्कयुक्ते, त्रि ॥ (यथा, रघौ । ४ । ३१ ।

"पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी ॥")

पृक्तिः, स्त्री, (पृच् + भावे क्तिन् ।) सम्पर्कः । स्पर्शः । तत्पर्य्यायः । स्पृष्टिः २ । इत्यमरः । ३ । २ । ९ ॥

पृच, ई ल ङ सम्पर्के । इति कविकल्पद्रुमः । (अदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ई, पृक्तः । ल ङ, पृक्ते । मरीपृच्यते । स चेह सम्पृक्तीभावः । सम्पृक्ते नाभिसङ्क्लेयं इति हलायुधः । सम्पृक्ते मधुना चूर्णं मिश्रयति तु अनाभूतस्यार्थत्वादिति चतुर्भुजः । इति दुर्गादासः ।

पृच, कि संयमने । सम्पर्के । इति कविकल्पद्रुमः । (चुरा० पक्षे भ्वा० पर०-सक० सेट् ।) संयमनं बन्धनम् । कि, पर्चयति पर्चति दुष्टं राजा । इति दुर्गादासः ॥

पृच, ध ई सम्पर्के । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-अक० च सेट् । निष्ठायामनिट् ।) सम्पर्क इह संपृक्तीकरणं सम्पृक्तीभावश्च । ध, पृणक्ति मधुना चारुम् । संपृणक्ति च मामिमियं इति हलायुधः । ई, पृक्तः । मरुर्च । इति दुर्गादासः ॥

पृच्छा, स्त्री, (प्रच्छ ज्ञीप्सायाम् + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः ।) प्रश्नः । इत्यमरः । १ । ६ । १० ॥ (यथा, नैषधचरिते । १८ । ६० ।

"इह किमुषसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष दृष्टः ।
अथ परिभवशङ्की तारकः स्वामिनोक्ता
विततिविहितकुर्व्वाणागुनरः कौशिकोऽभूत् ॥"

"पृच्छा तस्मात् यथान्यायं विधिना प्रश्न उच्यते ।"

इति च वैद्यकचरके सूत्रस्थाने विंशाध्याये ।)

पृज, इ र ङ सम्पर्के । इति कविकल्पद्रुमः । (अदा०-आत्म०-अक०-सेट् ।) वर्गान्तः । इ, पृञ्जते । र ङ, पृक्ते । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

पृड, श सुदि। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) सुदि हर्षीकरणे। श, पृडति दीनं दाता। पर्डिता। इति दुर्गादासः॥

पृण, श तर्पे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-सेट्।) तर्पि तर्पीकरणे। श, अर्थिनं पृणति यो द्विजः। पर्णिता। इति दुर्गादासः॥

पृतना, स्त्री, (प्रियते इति। पृङ् व्यायामे+बाहुलकात् तनन् गुणाभावश्च।) सेना। सेनाभेदः। इति मेदिनी। ने, ६४॥ वाहिनीत्रयम्। अत्र गजाश्चिचत्वारिंशदधिकशतद्वयम् २४३। रथाश्चिचत्वारिंशदधिकशतद्वयम् २४३। अश्वा ऊनत्रिंशदधिकसप्तशतम् ७२९। पदातिकाः पञ्चदशाधिकशतद्वयाधिकसहस्रम् १२१५। समुदायेन त्रिंशदधिकचतुःशताधिकसहस्रद्वयम् २४३०। इत्यमरभरतौ॥ (यथा, महाभारते। १।२।२१।
"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥"
"आप्रियन्तेऽत्र योद्धारः इति। पृङ् व्यायामे। 'पृपूर्षां कित्।' इति तनन्प्रत्ययः।" इति निघण्टौ देवराजयज्वा। संग्रामः। इति निघण्टुः। यथा, ऋग्वेदे। १।८५।८।
"शूरा इवेद्युयुधयो न जग्मयः
श्रवस्यवो न पृतनासु येतिरे॥"
"पृतनासु संग्रामेषु येतिरे।" इति तद्भाष्ये सायनः॥)

पृतनाषाट्, [साह्] पुं, (पृतनां सहते इति। सह+"छन्दसि सहः।" ३।२।६३। इति ण्विः। सहेरिति षः।) इन्द्रः। इति त्रिकाण्डशेषः॥

पृथ, क प्रक्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, पर्थयति गुडमौषधे जनः। इति दुर्गादासः॥

पृथक्, व्य, (प्रथयतीति। प्रथ विक्षेपे+"प्रथः कित् सम्प्रसारणञ्च।" उणा० १।१३६। इति अजिः कित् सम्प्रसारणञ्च धातोः।) भिन्नम्। तत्पर्यायः। विना २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६ पर्जनम् ७। इत्यमरः।३।४।३॥ (यथा, मार्कण्डेये। १४। ६६।
"तेषामेतैः स्थितैः प्राणैर्मुहुर्विसपतां स्वचः।
पृथक् कुर्वन्ति ये याम्याः शरीरादतिदारुणाः॥")

पृथक्क्षेत्राः, पुं, (पृथक् भिन्नं क्षेत्रं उत्पत्तिस्थानं येषामिति।) एकस्मात् नानावर्णस्त्रीजातपुत्राः। इति मिताक्षरा॥

पृथक्त्वं, क्ली, (पृथगित्यस्य भावः। पृथक्+भावे त्व।) चतुर्विंशतिगुणान्तर्गतसप्तमगुणः। तस्य लक्षणम्। पृथक्प्रत्ययासाधारणकारणत्वम्। यथा, भाषापरिच्छेदे।
"संख्यावच्च पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम्।
अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते॥
अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा॥"
"पृथक्त्वं निरूपयति संख्यावदिति पृथक्प्रत्ययासाधारणकारणं पृथक्त्वम्। तन्नित्यत्वादिकं संख्यावत् यथा हि नित्येषु एकत्वं नित्यं अनित्ये त्वनित्यम् आश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

पृथक्त्वचा, स्त्री, (पृथक् त्वग् यस्याः। टाप्।) मूर्व्वा। इति रत्नमाला॥ (विषयोऽस्या मूर्व्वाशब्दे ज्ञातव्यः॥)

पृथक्पर्णी, स्त्री, (पृथक् पर्णानि यस्याः। "पाककर्णपर्णपुष्पफलेति।" ४।१।६४। इति ङीष्।) क्षुद्रक्षुपविशेषः। चाकुल्या इति भाषा। तत्पर्यायः। पृश्निपर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४। इत्यमरः। २।४।९२॥ (यथा, सुश्रुते। १। ३६।
"पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता।
काकोल्यादिश्च योज्यः स्यात्प्रशस्तो रोपणे घृते॥"
पर्य्यायान्तरमस्या यथा, वैद्यकरत्नमालायाम्।
"पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टुपुच्छिका।
धावनिः कलशी लम्वी गुहाक्रोष्टुकमेखला॥
दीर्घा शृगालविन्नासा शृपर्णी सिंहपुच्छिका।
दीर्घपत्रा त्वतिगुहा घृतिला चित्रपर्णिका॥")

पृथगात्मता, स्त्री, (पृथक् आत्मा स्वरूपं यस्य। तस्य भावः। तल्।) विवेकः। इत्यमरः। २।७।३८॥

पृथगात्मिका, स्त्री, (पृथक् आत्मा स्वरूपं यस्याः। कापि अत इत्वम्।) व्यक्तिः। यथा,—
"जातिर्जातिश्च सामान्यं व्यक्तिस्तु पृथगात्मिका॥"
इति जटुधरनन्दकाभिधानादिश्लोकोत्तरं क्वचिदमरकोषे पाठः॥

पृथग्जनः, पुं, (पृथक् सज्जनेभ्यो विभिन्नो जनः।) मूर्खः। नीचः। इत्यमरः। २।१०।१६॥ (यथा, मनुः। ७। १२७।
"यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥")
पापी। इति शब्दरत्नावली। भिन्नलोकश्च॥

पृथग्बीजः, पुं, (पृथक् विभिन्नानि बीजानि यस्य।) भल्लातकः। इति राजनिर्घण्टः॥

पृथग्विधः, त्रि, (पृथक् विभिन्ना विधा प्रकारो यस्य।) नानारूपः। इत्यमरः। ३।१।८९॥ (यथा, मनुः। १। ४०।
"सर्व्वञ्च दंशमशकं स्थावरञ्च पृथग्विधम्॥")

पृथवी, स्त्री, (प्रथते विस्तारमेतीति। प्रथ+"प्रथेः षिवन् सम्प्रसारणञ्च।" उणा० १। १५०। इत्यत्र 'षवन् इत्येके।' इत्युज्ज्वलदत्तोक्त्या षवन् सम्प्रसारणञ्च। षित्वात् ङीष्।) पृथिवी। यथा,
"पृथवी पृथिवी पृथ्वी धरा सर्व्वसहा रसा।"
इति भरतधृतवाचस्पतिः॥

पृथा, स्त्री, कुन्ती। इति जटाधरः॥ (इयं हि शूरस्य कन्या वसुदेवस्य भगिनी। अस्याः पिता शूरस्तु कुन्तिभूपाय निजवान्धवायापुत्रायैनां दत्तकन्यकारूपेण दत्तवान्। तत्र कुन्तिराजवेश्मनि निवसन्ती दुर्व्वाससं सन्तोष्य तस्मात् मन्त्रवरं लब्ध्वा कन्यावस्थायामेव सूर्य्यात् कर्णं वीरवरं प्रसूतवती। ततो गच्छति काले कुरुवंशावतंसः पाण्डुभूपतिरेनां परिणीतवान्। भर्त्तादिष्टा धर्म्मात् युधिष्ठिरं वायोर्भीमं इन्द्रादर्ज्जुनं प्रसूतवती। अनन्तरं भर्त्तादेशेन सपत्न्यै मद्रसुतायै मन्त्रं प्रदत्तवती तेन माद्री अश्विभ्यां नकुलसहदेवौ लेभे। इत्येषा कथा भागवते ९ स्कन्धे २४ अध्याये द्रष्टव्या॥)

पृथाजः, पुं, (पृथाया जायते इति। जन+डः।) कुन्तीपुत्रः। अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥

पृथापतिः, पुं, (पृथायाः पतिः।) पाण्डुराजः। इति त्रिकाण्डशेषः॥

पृथिका, स्त्री, शतपदी। इति शब्दमाला॥

पृथिविः, स्त्री, (पृथिवी। ङीषो वा ह्रस्वः।) पृथिवी। इति संक्षिप्तसारोणादिवृत्तिः॥

पृथिवी, स्त्री, (प्रथते विस्तारं यातीति। प्रथ+"प्रथेः षिवन् संप्रसारणञ्च।" उणा० १। १५०। इति षिवन् सम्प्रसारणञ्च। ङीष्।) सर्व्वाद्याधिष्ठानभूता। तत्पर्य्यायः। भूः २ भूमिः ३ अचला ४ अनन्ता ५ रसा ६ विश्वम्भरा ७ स्थिरा ८ धरा ९ धरित्री १० धरणी ११ क्षोणी १२ ज्या १३ काश्यपी १४ क्षितिः १५ सर्व्वंसहा १६ वसुमती १७ वसुधा १८ उर्व्वी १९ वसुन्धरा २० गोत्रा २१ कुः २२ पृथ्वी २३ क्ष्मा २४ अवनिः २५ मेदिनी २६ मही। इत्यमरः। २। १। २—३॥ भूर् २८ भूमी २९ धरणिः ३० क्षोणिः ३१ क्षोणी ३२ क्षौणिः ३३ क्षमा ३४ अवनी ३५ महिः ३६ रत्नगर्भा ३७ सागराम्बरा ३८ अब्धिमेखला ३९ भूतधात्री ४० रत्नावती ४१ देहिनी ४२ पारा ४३ विपुला ४४ मध्यमलोकवर्त्मा ४५। इति भरतः॥ धरणीधरा ४६ धारणी ४७ महाकान्ता ४८ जगद्वहा ४९ गन्धवती ५० खगवती ५१ गिरिकर्णिका ५२ धारयित्री ५३ धात्री ५४ सागरमेखला ५५ सहा ५६ अचलकीला ५७ गौः ५८ अब्धिद्वीपा ५९ इरा ६० इडा ६१ इडिका ६२ इला ६३ इलिका ६४। इति शब्दरत्नावली॥ उदधिवस्त्रा ६५ इरा ६६ आदिमा ६७ ईला ६८ वरा ६९ उर्व्वरा ७० आद्या ७१ जगती ७२ पृथुः ७३ भुवनमाता ७४ निश्चला ७५ बीजप्रसूः ७६ श्यामा ७७ क्रोडकान्ता ७८। इति राजनिर्घण्टः॥ जगती ७९ अदितिः ८०। इति जटाधरः॥ ८१ (पृथवी ८२। इति शब्दार्णवः।) न्यायमते अस्या धर्म्मः। गन्धवत्त्वलक्षणयोगित्वम्। इयं गुर्व्वी रूपवती च। अस्यां द्रवत्वं नैमित्तिकम्। अस्या गुणाः। स्पर्शः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२

रसः १३ गन्धः १४। इयं गन्धकार्य्यं नानारूपवती षड्रसयुक्ता। गन्धस्तु द्विविधः सौरभं असौरभम्। तस्याः स्पर्शः अनुष्णाशीतपाकजः। सा द्विविधा नित्या अनित्या च। परमाणुरूपा नित्या सावयवा अनित्या। सा त्रिविधा देहेन्द्रियविषयरूपा। देहरूपा योनिजादिः इन्द्रियात्मिका घ्राणरूपा विषयात्मिका द्व्यणुकादिब्रह्माण्डपर्य्यन्ता। यथा,—

"रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमत्रिकम्।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः॥"
"स्पर्शादयोऽष्टौ वेगश्च द्रवत्वञ्च गुरुत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्द्दश॥
स्नेहहीना गन्धयुता क्षितावेते चतुर्द्दश।
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः।
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः॥
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देहमिन्द्रियं घ्राणलक्षणम्॥
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः॥"
इति भाषापरिच्छेदे। २८—३८॥

तस्या अध्यात्मादि यथा,—
"पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते।
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥

(यथा, मार्कण्डेये। ५४। ४।
"शताद्धकोटिविस्तारा पृथिवी कृत्स्नशो द्विज!।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत्॥")

तस्या उत्पत्तिकारणं यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्वदन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी पयसा संवृतेति च॥
तयोर्जीवनकालेन प्रत्यक्षा साभवत् स्फुटम्।
ततो बभूव मेदश्च मरणस्यान्तरेणयोः॥
मेदिनीति च विख्यातिमुक्ता यैस्तन्मतं शृणु।
जलधौता कृता पूर्व्वं वर्द्धिता मेदसा यतः॥
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्।
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे॥
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्।
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्॥
स च प्रविष्टः सर्व्वेषां तल्लोम्नां विवरेषु च।
कालेन महता तस्माद्बभूव वसुधा मुने!॥
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता।
आविर्भूता तिरोभूता सा जले च पुनः पुनः॥
आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥
प्रतिविश्वेषु वसुधा शैलकाननसंयुता।
सप्तसागरसंयुक्ता सप्तद्वीपमिता सती॥
हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता।
ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैस्तथाज्ञया॥
पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता।
पातालसप्तकं तदधस्तदूर्द्ध्वं ब्रह्मलोककः॥
ब्रह्मलोकश्च तत्रैव सर्व्वविश्वञ्च तत्र वै।
एवं सर्व्वाणि विश्वानि पृथिव्यां निर्म्मितानि च॥
ऊर्द्ध्वं गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ।
नश्वराणि च विश्वानि सर्व्वाणि कृत्रिमाणि च॥
प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने।
महाविराडादिसृष्टौ सृष्टः कृष्णेन चात्मना॥
नित्यैः स्थिता च प्रलये काष्ठाकाशेश्वरैः सह।
क्षित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरैः॥
मुनिभिर्मनुभिर्विप्रैर्गन्धर्व्वादिभिरेव च।
विष्णोर्वराहरूपस्य पत्नी सा श्रुतिसम्मता।
तत्पुत्रो मङ्गलो ज्ञेयो घटेशो मङ्गलात्मजः॥

नारद उवाच।
पूजिता केन रूपेण वाराहे च सुरैर्मही।
वराहेण च वाराही सर्व्वैः सर्व्वाश्रया सती॥
तस्याः पूजाविधानञ्चाप्यधश्चोहरणक्रमम्।
मङ्गलं मङ्गलस्यापि जन्म व्यासं वद प्रभो!॥

श्रीनारायण उवाच।
वाराहे च वराहश्च ब्रह्मणा संस्तुतः पुरा।
उद्दधार महीं हत्वा हिरण्याक्षं रसातलात्॥
जले तां स्थापयामास पद्मपत्रं यथा ह्रदे।
तत्रैव निर्म्ममे ब्रह्मा सर्व्वं विश्वं मनोहरम्॥
दृष्ट्वा तदधिदेवीञ्च सकामां कामुको हरिः।
वराहरूपी भगवान् कोटिसूर्य्यसमप्रभः॥
कृत्वा रतिकरीं शय्यां मूर्त्तिञ्च सुमनोहराम्।
क्रीडाञ्चकार रहसि दिव्यं वर्षमहर्निशम्॥
सुखसम्भोगसंस्पर्शात् मूर्च्छां संप्राप सुन्दरी।
विदग्धाया विदग्धेन सङ्गमोऽतिसुखप्रदः॥
विष्णुस्तदङ्गसंस्पर्शात् बुबुधे न दिवानिशम्।
वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम्॥
पूर्व्वरूपञ्च वाराहं दधार चावलीलया।
पूजाञ्चकार भक्त्या च ध्यात्वा च धरणीं सतीम्॥
धूपैर्दीपैश्च नैवेद्यैः सिन्दूरैरनुलेपनैः।
वस्त्रैः पुष्पैश्च बलिभिः संपूज्योवाच तां हरिः॥

श्रीमहावराह उवाच।
सर्व्वाधारा भव शुभे! सर्व्वैः संपूजिता सुखम्।
मुनिभिर्मनुभिर्देवैः सिद्धैश्च मानवादिभिः॥
अम्बुवाचीत्यागदिने गृहारम्भप्रवेशने।
वापीतडागारम्भे च गृहे च कृषिकर्म्मणि॥
तव पूजां करिष्यन्ति मद्वरेण सुरादयः।
मूढा ये न करिष्यन्ति यास्यन्ति नरकञ्च ते॥

वसुधोवाच।
वहामि सर्व्वं वाराहरूपेणाहं तवाज्ञया।
लीलामात्रेण भगवन्! विश्वञ्च सचराचरम्॥
मुक्तां शुक्तिं हरेरर्च्चां शिवलिङ्गं शिलां तथा।
शङ्खं प्रदीपं मन्त्रञ्च माणिक्यं हीरकं मणिम्॥
यज्ञसूत्रञ्च पुष्पञ्च पुस्तकं तुलसीदलम्।
जपमालां पुष्पमालां कर्पूरञ्च सुवर्णकम्॥
गोरोचनां चन्दनञ्च शालग्रामजलं तथा।
एतान् वोढुमशक्ताहं क्लिष्टा च भगवन्! शृणु॥

श्रीभगवानुवाच।
द्रव्याण्येतानि मूढा ये अर्पयिष्यन्ति सुन्दरि!।
ते यास्यन्ति कालसूत्रं दिव्यं वर्षशतं त्वयि॥
इत्येवमुक्त्वा भगवान् विरराम च नारद!।
बभूव तेन गर्भेण तेजस्वी मङ्गलग्रहः॥
पूजां चक्रुः पृथिव्याश्च ते सर्व्वे चाज्ञया हरेः।
काण्वशाखोक्तध्यानेन तुष्टुवुः स्तवनेन च॥
ददुर्मूलेन मन्त्रेण नैवेद्यादिकमेव च।
संस्तुता त्रिषु लोकेषु पूजिता सा बभूव ह॥

नारद उवाच।
किं ध्यानं स्तवनन्तस्या मूलमन्त्रञ्च किं परम्।
गूढं सर्व्वपुराणेषु श्रोतुं कौतूहलं मम॥

श्रीनारायण उवाच।
आदौ च पृथिवी देवी वराहेण च पूजिता।
ततः सर्व्वैर्मुनीन्द्रैश्च मनुभिर्मानवादिभिः॥
ध्यानञ्च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद!॥
ओँ ह्रीं श्रीं क्लीं वसुन्धरायै स्वाहा।
इत्यनेनैव मन्त्रेण पूजिता विष्णुना पुरा॥
श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम्।
चन्दनोक्षितसर्व्वाङ्गीं रत्नभूषणभूषिताम्॥
रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम्।
वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे॥
ध्यानेनानेन सा देवी सर्व्वैश्च पूजिता भवेत्।
स्तवनं शृणु विप्रेन्द्र! काण्वशाखोक्तमेव च॥

श्रीविष्णुरुवाच।
जये जये जयाधारे जयशीले जयप्रदे!।
यज्ञसूकरजाये च जयं देहि जयावहे॥
मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रिये।
मङ्गलाढ्ये मङ्गलेशे मङ्गलं देहि मे भवे॥
सर्व्वाधारे सर्व्वबीजे सर्व्वशक्तिसमन्विते।
सर्व्वकामप्रदे देवि सर्व्वेष्टं देहि मे भवे॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि।
पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥
रत्नाधारे रत्नगर्भे रत्नाकरसमन्विते।
स्त्रीरत्नरूपे रत्नाढ्ये रत्नसारप्रदे भवे॥
सर्व्वशस्यालये सर्व्वशस्याढ्ये सर्व्वशस्यदे।
सर्व्वशस्यहरे काले सर्व्वशस्यात्मिके भवे॥
भूमे भूमिपसर्व्वस्वे भूमिपालपरायणे।
भूपाहङ्काररूपे च भूमिं देहि च भूमिदे॥
इदं पुण्यं महास्तोत्रं तां संपूज्य च यः पठेत्।
कोटि कोटि जन्म जन्म स भवेद्भूमिपेश्वरः॥
भूमिदानकृतं पुण्यं लभते पाठकाज्जनः।
भूमिदानहरात् पापान्मुच्यते नात्र संशयः॥
अम्बुवाचीभूखनने पापात् स मुच्यते ध्रुवम्।
अन्यकूपे कूपखनात् पापात् स मुच्यते ध्रुवम्।
परभूम्यपहारात् पापान्मुच्यते नात्र संशयः॥
भूमौ वीर्य्यपरित्यागात् भूमौ दीपादिस्थापनात्।
पापेन मुच्यते प्राज्ञः स्तोत्रस्य पठनाद्ध्रुवम्॥
अश्वमेधशतं पुण्यं लभते नात्र संशयः॥

नारद उवाच ।
भूमिदानकृतं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ श्राद्धपापं कूपे कूपदजं तथा ॥
अम्बुवाचीभूखननं वीर्य्यत्यागजमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नतः ॥
अन्यं वा पृथिवीजन्यं पापं मत्प्रश्नतः परम् ।
यदस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥
श्रीनारायण उवाच ।
वितस्तिमात्रां भूमिञ्च यो ददाति च भारते ।
सन्ध्यापूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति यः ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थितिः ॥
ग्रामं भूमिञ्च धान्यञ्च यो ददात्याददाति च ।
सर्व्वपापविनिर्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुञ्च यत्काले यः साधुश्चानुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वितः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्त्रपौत्त्रप्रभृतिर्भूमिहीनः श्रिया हतः ।
पुत्त्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृष्य यश्च शस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोष्ठं तडागं निष्कृष्य मार्गं शस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्द्दश ॥
न पञ्चपिण्डमुद्धृत्य परकूपे च स्नाति यः ।
प्राप्नोति नरकं नैव स्नानजं फलमेव च ॥
कामी भूमौ च रहसि वीर्य्यत्यागं करोति यः ।
जिघ्ररेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
अम्बुवाच्यां भूखननं यः करोति च मानवः ।
स याति कृमिदंशञ्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयलुप्तकूपे कूपं मूढः प्रयच्छति ।
पुष्करिण्याञ्च लुप्तायां पुष्करिणीं यो ददाति च ॥
सर्व्वं फलं परस्यैव तप्तकुम्भे व्रजेत्तु सः ।
तत्र तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्द्दश ॥
परकीयतडागे च पङ्कमुत्सृज्य नोत्सृजेत् ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नरः ॥
पिण्डं पित्रे भूमिभर्त्तुर्न प्रदाय च मानवः ।
श्राद्धं करोति यो मूढो नरकं याति निश्चितम् ॥
भूमौ दीपं योऽर्पयति स चान्धः सप्तजन्मनि ।
भूमौ शङ्खञ्च संस्थाप्य कुष्ठं जन्मान्तरे लभेत् ॥
मुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिन्तथा ।
यश्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पुष्पमालां कर्पूरं रोचनान्तथा ।
यो मूढः स्थापयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने ! चन्दनकाष्ठञ्च रुद्राक्षं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यज्ञसूत्रञ्च भूमौ संस्थापयेत्तु यः ।
न भवेद्विप्रयोनौ च तस्य जन्मान्तरे जनिः ॥
ब्रह्महत्यासमं पापमतुलञ्च लभेद्ध्रुवम् ।
ग्रन्थियुक्तं यज्ञसूत्रं पूज्यञ्च सर्व्ववर्णकैः ॥
यज्ञं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तप्तभूमिञ्च सन्तप्तः सप्तजन्मसु ॥

भूकम्पे ग्रहणे यो हि करोति खननं भुवः ।
जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र सर्व्वेषां भूर्भूमिस्तेन कीर्त्तिता ।
वसुरत्नं या दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकीर्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
इज्या च यागाधाराच्च क्षौणी क्षीणालये च या ।
महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी कश्यपस्येयमचला स्थिररूपतः ।
विश्वम्भरा तद्भरणादनन्तानन्तरूपतः ॥
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वान्महामुने ! ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्यानं ७ अध्यायः ॥ * ॥
तस्या भारा यथा,—
क्षितिरुवाच ।
“कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः ।
तेषां महापातकिनामशक्ता भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यकृत्यविवर्ज्जिताः ।
श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीडिता ॥
पितृमातृगुरुस्त्रीणां पोषणं पुत्त्रपोष्ययोः ।
ये न कुर्व्वन्ति तेषाञ्च न शक्ता भारवाहने ॥
ये मिथ्यावादिनस्तात ! दयासत्यविहीनकाः ।
निन्दका गुरुदाराणां तेषां भारेण पीडिता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्षिप्रदायकः ।
विश्वासघ्नः स्थाप्यहारी तेषां भारेण पीडिता ॥
कल्याणसूक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीडिता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ।
शवदाही शूद्रभोजी तेषां भारेण पीडिता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढा विहन्तारस्तेषां भारेण पीडिता ॥
सदा द्विषन्ति ये पापा गोविप्रसुरवैष्णवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीडिता ॥
शङ्खादीनाञ्च भारेण पीडिताहं यथा विधे ! ।
ततोऽधिकेन दैत्यानां तेषां भारेण पीडिता ॥
इत्येवमुक्त्वा वसुधा रुरोद च मुहुर्मुहुः ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥
भारं तवापनेष्यामि दस्यूनामप्युपायतः ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ! ॥
मन्त्रं मङ्गलकुम्भञ्च शिवलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाशङ्खतुलसीप्रतिमामलम् ।
शङ्खप्रदीपमालाञ्च शिलार्च्चां तुलसीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिदत्तमभिक्षया ।
ग्रन्थियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च मुक्ताञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां वह्निं कर्पूरं परमं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशमूलं तीर्थतोयं शङ्खं गोमूत्रगोमयम् ॥

त्वयि ये स्थापयिष्यन्ति मूढाश्चैतानि सुन्दरि ! ।
प्रयान्ति कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥
तस्या रूपान्तरं यथा,—
“इति तस्य वचः श्रुत्वा जनकस्य तदा क्षितिः ।
मुनीनां सन्निधौ रूपं दर्शयामास भूभृते ॥
नीलोत्पलदलश्यामामक्षमालाब्जधारिणीम् ।
बाहुयुग्मेन शुभ्रेण मृणालायतशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा प्रश्रयनृपोऽनयत् ॥”
इति कालिकापुराणे ३६ अध्यायः ॥
पृथिव्या ग्रामशस्याद्युत्पत्तिकारणं यथा,—
प्रजा ऊचुः ।
“अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधीः ।
ग्रस्तास्ततः क्षयं यान्ति प्रजाः सर्व्वाः प्रजेश्वर ! ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः ॥
श्रीपराशर उवाच ।
ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽभ्यधावद्वसुन्धराम् ॥
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादींस्त्रासादगमन्मही ।
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्बाणपरित्राणपरायणा ॥
पृथिव्युवाच ।
स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥
श्रीपृथुरुवाच ।
एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥
पृथिव्युवाच ।
प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥
पृथुरुवाच ।
त्वां हत्वा वसुधे ! बाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥
श्रीपराशर उवाच ।
ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।'
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
तस्माद्वदाम्युपायन्ते तं कुरुष्व यदीच्छसि ॥
समस्ता या मया जीर्णा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तत्तु वत्सं प्रयच्छस्व क्षरेयं येन वत्सला ॥
समाञ्च कुरु सर्व्वत्र येन क्षीरं समन्ततः ।
वरौषधीबीजभूतं वीर ! सर्व्वत्र भावये ॥
श्रीपराशर उवाच ।
तत उत्सारयामास शैलान् शतसहस्रशः ।
धनुष्कोट्या तदा वैण्यस्तेन शैला विवर्द्धिताः ॥
नहि पूर्व्वविसर्गे वै विषमे पृथिवीतले ।

रस: १३ गन्ध: १४। इयं गन्धकारणं नाना-रूपवती षड्रसयुक्ता। गन्धस्तु द्विविध: सौरभं असौरभम्। तस्या: स्पर्श: अनुष्णाशीत-पाकज:। सा द्विविधा नित्या अनित्या च। पर-माणुरूपा नित्या सावयवा अनित्या। सा त्रिविधा देहेन्द्रियविषयरूपा। देहरूपा योनि-जादि: इन्द्रियात्मिका घ्राणरूपा विषयात्मिका द्व्यणुकादिब्रह्माण्डपर्य्यन्ता। यथा,—
"रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमञ्चिकम्।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रव:॥"
"स्पर्शादयोऽष्टौ वेगाख्य संस्कारो गुरुत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्द्दश॥
स्नेहहीना गन्धयुता क्षितावेते चतुर्द्दश।
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मत:।
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकज:॥
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देहमिन्द्रियं घ्राणलक्षणम्॥
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृत:॥"
इति भाषापरिच्छेदे। २८—३८॥
तस्या अध्यात्मादि यथा,—
"पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते।
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व।
(यथा, मार्कण्डेये। ५४। ४।
"शताद्धकोटिविस्तारा पृथिवी कृत्स्नशो द्विज!।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत्॥")
तस्या उत्पत्तिकारणं यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्वदन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी पाथसा संवृतेति च॥
तयोर्जीवनकाले न प्रत्यक्षा साभवत् स्फुटम्।
ततो बभूव मेदश्च मरणानन्तरन्तयो:॥
मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु।
जलधौता कृता पूर्व्वं वर्द्धिता मेदसा यत:॥
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्।
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे॥
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्।
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्॥
स च प्रविष्ट: सर्व्वेषां तल्लोम्नां विवरेषु च।
कालेन महता तस्माद्बभूव वसुधा मुने!॥
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता।
आविर्भूता तिरोभूता सा जले च पुन: पुन:॥
आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥
प्रतिविश्वेषु वसुधा शैलकाननसंयुता।
सप्तसागरसंयुक्ता सप्तद्वीपमिता सती॥
हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता।
ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैस्तदालये॥
पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता।
पातालसप्ततदधस्तदूर्द्ध्वं ब्रह्मलोकक:॥
ब्रह्मलोकश्च तत्रैव सर्व्वविश्वञ्च तत्र वै।
एवं सर्व्वाणि विश्वानि पृथिव्यां निर्म्मितानि च॥
ऊर्द्ध्वं गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ।
नश्वराणि च विश्वानि सर्व्वाणि कृत्रिमाणि च॥
प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने।
महाविराडादिसृष्टौ सृष्ट: कृष्णेन चात्मना॥
नित्यौ स्थिता च प्रलये काष्ठाकाशेश्वरै: सह।
क्षित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरै:॥
मुनिभिर्म्मनुभिर्व्विप्रैर्गन्धर्व्वादिभिरेव च।
विष्णोर्व्वराहरूपस्य पत्नी सा श्रुतिसम्मता॥
तत्पुत्रो मङ्गलो ज्ञेयो घटेशो मङ्गलात्मज:॥
नारद उवाच।
पूजिता केन रूपेण वाराहे च सुरैर्म्मही।
वराहेण च वाराही सर्व्वै: सर्व्वाश्रया सती॥
तस्या: पूजाविधानञ्चाप्यधश्चोद्धरणक्रमम्।
मङ्गलं मङ्गलस्यापि जन्म व्यासं वद प्रभो!॥
श्रीनारायण उवाच।
वाराहे च वराहश्च ब्रह्मणा संस्तुत: पुरा।
उद्दधार महीं हत्वा हिरण्याक्षं रसातलात्॥
जले तां स्थापयामास पद्मपत्रं यथा ह्रदे।
तत्रैव निर्म्ममे ब्रह्मा सर्व्वं विश्वं मनोहरम्॥
दृष्ट्वा तदधिदेवीञ्च सकामां कामुको हरि:।
वराहरूपी भगवान् कोटिसूर्य्यसमप्रभ:॥
कृत्वा रतिकरीं शय्यां मूर्त्तिञ्च सुमनोहराम्।
क्रीडाञ्चकार रहसि दिव्यं वर्षमहर्निशम्॥
सुखसम्भोगसंस्पर्शात् मूर्च्छां संप्राप सुन्दरी।
विदग्धाया विदग्धेन सङ्गमोऽतिसुखप्रद:॥
विष्णुस्तदङ्गसंस्पर्शात् बुबुधे न दिवानिशम्।
वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम्॥
पूर्व्वरूपञ्च वाराहं दधार चावलीलया।
पूजाञ्चकार भक्त्या च ध्यात्वा च धरणीं सतीम्॥
धूपैर्दीपैश्च नैवेद्यै: सिन्दूरैरनुलेपनै:।
वस्त्रै: पुष्पैश्च बलिभि: संपूज्योवाच तां हरि:॥
श्रीमहावराह उवाच।
सर्व्वाधारा भव शुभे! सर्व्वै: संपूजिता सुखम्।
मुनिभिर्म्मनुभिर्द्देवै: सिद्धैश्च मानवादिभि:॥
अम्बुवाचीत्यागदिने गृहारम्भप्रवेशने।
वापीतडागारम्भे च गृहे च कृषिकर्म्मणि॥
तव पूजां करिष्यन्ति मद्वरेण सुरादय:।
मूढा ये न करिष्यन्ति यास्यन्ति नरकञ्च ते॥
वसुधोवाच।
वहामि सर्व्वं वाराहरूपेणाहं तवाज्ञया।
लीलामात्रेण भगवन्! विश्वञ्च सचराचरम्॥
मुक्तां शुक्तिं हरेरर्च्चां शिवलिङ्गं शिलां तथा।
शङ्खं प्रदीपं यन्त्रञ्च माणिक्यं हीरकं मणिम्॥
यज्ञसूत्रञ्च पुष्पञ्च पुस्तकं तुलसीदलम्।
जपमालां पुष्पमालां कर्पूरञ्च सुवर्णकम्॥
गोरोचनां चन्दनञ्च शालग्रामजलं तथा।
एतान् वोढुमशक्ताहं क्लिष्टा च भगवन्! मम॥
श्रीभगवानुवाच।
द्रव्याण्येतानि मूढा ये अर्पयिष्यन्ति सुन्दरि!।
ते यास्यन्ति कालसूत्रं दिव्यं वर्षशतं त्वयि॥
इत्येवमुक्त्वा भगवान् विरराम च नारद!।
बभूव तेन गर्भेण तेजस्वी मङ्गलग्रह:॥
पूजां चक्रु: पृथिव्याश्च ते सर्व्वे चाज्ञया हरे:।
काण्वशाखोक्तध्यानेन तुष्टुवु: स्तवनेन च॥
ददुर्म्मूलेन मन्त्रेण नैवेद्यादिकमेव च।
संस्तुता त्रिषु लोकेषु पूजिता सा बभूव ह॥
नारद उवाच।
किं ध्यानं स्तवनन्तस्या मूलमन्त्रञ्च किं वद।
गूढं सर्व्वपुराणेषु श्रोतुं कौतूहलं मम॥
श्रीनारायण उवाच।
आदौ च पृथिवी देवी वराहेण च पूजिता।
तत: सर्व्वैर्म्मुनीन्द्रैश्च मनुभिर्म्मानवादिभि:।
ध्यानञ्च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद!॥
ॐ श्रीं ह्रीं क्लीं वसुन्धरायै स्वाहा।
इत्यनेनैव मन्त्रेण पूजिता विष्णुना पुरा॥
श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम्।
चन्दनोक्षितसर्व्वाङ्गीं रत्नभूषणभूषिताम्॥
रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम्।
वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे॥
ध्यानेनानेन सा देवी सर्व्वैश्च पूजिता भवेत्।
स्तवनं शृणु विप्रेन्द्र! काण्वशाखोक्तमेव च॥
श्रीविष्णुरुवाच।
जये जये जयाधारे जयशीले जयप्रदे!।
यज्ञसूकरजाये च जयं देहि जयावहे॥
मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रदे।
मङ्गलार्थे मङ्गलेशे मङ्गलं देहि मे भवे॥
सर्व्वाधारे सर्व्वबीजे सर्व्वशक्तिसमन्विते।
सर्व्वकामप्रदे देवि सर्व्वेष्टं देहि मे भवे॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि।
पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥
रत्नाधारे रत्नगर्भे रत्नाकरसमन्विते।
स्त्रीरत्नरूपे रत्नाढ्ये रत्नसारप्रदे भवे॥
सर्व्वशस्यालये सर्व्वशस्याढ्ये सर्व्वशस्यदे।
सर्व्वशस्यहरे काले सर्व्वशस्यात्मिके भवे॥
भूमे भूमिपसर्व्वस्वे भूमिपालपरायणे।
भूपाहङ्काररूपे च भूमिं देहि च भूमिदे॥
इदं स्तोत्रं महापुण्यं तां संपूज्य च य: पठेत्।
कोटि कोटि जन्म जन्म स भवेद्भूमिपेश्वर:॥
भूमिदानकृतं पुण्यं लभते पठनाज्जन:।
भूमिदानहरात् पापान्मुच्यते नात्र संशय:॥
अम्बुवाचीभूखनने पापात् स मुच्यते ध्रुवम्।
अन्यकूपे कूपदानात् पापात् स मुच्यते ध्रुवम्॥
परभूम्यपहारात् पापान्मुच्यते नात्र संशय:॥
भूमौ वीर्य्यपरित्यागात् भूमौ दीपादिस्थापनात्।
पापेन मुच्यते प्राज्ञ: स्तोत्रस्य पठनान्मुने!॥
अश्वमेधशतं पुण्यं लभते नात्र संशय:॥

नारद उवाच ।
भूमिदानकृतं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ श्राद्धपापं कूपे कूपदजं तथा ॥
अम्बुवाचीभूखननं वीर्य्यत्यागजमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नतः ॥
अन्यं वा पृथिवीजन्यं पापं मत्प्रश्नतः परम् ।
यदस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥
श्रीनारायण उवाच ।
वितस्तिमात्रां भूमिञ्च यो ददाति च भारते ।
सन्ध्यापूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति यः ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थितिः ॥
ग्रामं भूमिञ्च धान्यञ्च यो ददात्याददाति च ।
सर्व्वपापविनिर्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुश्च यत्काले यः साधुश्चानुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वितः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्रपौत्रप्रभृतिर्भूमिहीनः श्रिया हतः ।
पुत्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृष्य यश्च शस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोष्ठं तड़ागं निष्कृष्य मार्गं शस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्द्दश ॥
न पञ्चपिण्डमुद्धृत्य परकूपे च स्नाति यः ।
प्राप्नोति नरकं नैव स्नानजं फलमेव च ॥
कामी भूमौ च रहसि वीर्य्यत्यागं करोति यः ।
क्षितिरेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
अम्बुवाच्यां भूखननं यः करोति च मानवः ।
स याति कृमिदंशञ्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयलुप्तकूपे कूपं मूढ़ः प्रयच्छति ।
पुष्करिण्याञ्च लुप्तायां पुष्करिणीं यो ददाति च ।
सर्व्वं फलं परस्यैव तप्तसूर्म्मिं व्रजेत्तु सः ।
स च तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्द्दश ॥
परकीयतड़ागे च पङ्कमनुद्धृत्य नोत्सृजेत् ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नरः ॥
पिण्डं पित्रे भूमिभर्त्तुर्न प्रदाय च मानवः ।
श्राद्धं करोति यो मूढ़ो नरकं याति निश्चितम् ॥
भूमौ दीपं योऽर्पयति स चान्धः सप्तजन्मनि ।
भूमौ शङ्खञ्च संस्थाप्य कुष्ठं जन्मान्तरे लभेत् ॥
मुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिन्तथा ।
यश्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पुष्पमालां कर्पूरं रोचनान्तथा ।
यो मूढ़ः स्थापयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने ! चन्दनकाष्ठञ्च रुद्राक्षं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यज्ञसूत्रञ्च भूमौ संस्थापयेत्तु यः ।
न भवेद्विप्रयोनौ च तस्य जन्मान्तरे गतिः ॥
ब्रह्महत्यासमं पापमसुत्र च लभेद्ध्रुवम् ।
ग्रन्थियुक्तं यज्ञसूत्रं पूज्यञ्च सर्व्ववर्णकैः ॥
यज्ञं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तप्तभूमिञ्च सन्तप्तः सप्तजन्मसु ॥
भूकम्पे ग्रहणे यो हि करोति खननं भुवः ।
जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र सर्व्वेषां भूर्भूमिस्तेन कीर्त्तिता ।
वसुरत्नं या दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकी-
र्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
इज्या च यागाधाराच्च क्षौणी क्षीणालये च या ।
महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी कश्यपस्येयमचला स्थिररूपतः ।
विश्वम्भरा तद्भरणादनन्तानन्तरूपतः ॥
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वान्महामुने ! ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्यानं ७ अध्यायः ॥ * ॥
तस्या भारा यथा,—
क्षितिरुवाच ।
"कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः ।
तेषां महापातकिनामशक्ता भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यकृत्यविवर्ज्जिताः ।
श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीड़िता ॥
पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः ।
ये न कुर्व्वन्ति तेषाञ्च न शक्ता भारवाहने ॥
ये मिथ्यावादिनस्तात ! दयासत्यविहीनकाः ।
निन्दका गुरुदाराणां तेषां भारेण पीड़िता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्ष्यप्रदायकः ।
विश्वासघ्नः स्थाप्यहारी तेषां भारेण पीड़िता ॥
कल्याणसूक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ।
शवदाही शूद्रभोजी तेषां भारेण पीड़िता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढ़ा विहन्तारस्तेषां भारेण पीड़िता ॥
सदा द्विषन्ति ये पापा गोविप्रसुरवैष्णवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता ॥
शङ्खादीनाञ्च भारेण पीड़िताहं यथा विधे ! ।
ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता ॥
इत्येवमुक्त्वा वसुधा रुरोद च मुहुर्मुहुः ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥
भारं तवापनेष्यामि दस्यूनामप्युपायतः ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ! ॥
मन्त्रं मङ्गलकुम्भञ्च शिवलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाञ्चैव तुलसीप्रतिमामलम् ।
शङ्खप्रदीपमालाञ्च शिलाञ्चाङ्गुलकीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिदत्तं मणिन्तथा ।
ग्रन्थियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च मुक्ताञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां पट्टं कर्पूरं चरणं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशद्विजं तीर्थतोयं गव्यं गोमूत्रगोमयम् ॥
त्वयि ये स्थापयिष्यन्ति मूढ़ाश्चैतानि सुन्दरि ! ।
पच्यन्ते कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥
तस्या रूपान्तरं यथा,—
"इति तस्य वचः श्रुत्वा जनकस्य तदा क्षितिः ।
मुनीनां सन्निधौ रूपं दर्शयामास भूभृते ॥
नीलोत्पलदलश्यामामक्षमालाब्जधारिणीम् ।
बाहुयुग्मेन सुश्रेण्या मृणालायतशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा प्रश्रयोऽलपत् ॥"
इति कालिकापुराणे ३६ अध्यायः ॥
पृथिव्या ग्रामशस्याद्युत्पत्तिकारणं यथा,—
प्रजा ऊचुः ।
"अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधीः ।
ग्रस्तास्ततः क्षयं यान्ति प्रजाः सर्व्वाः प्रजेश्वर ! ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः ॥
श्रीपराशर उवाच ।
ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽभ्यधावद्वसुन्धराम् ॥
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादीन् सन्त्रासादगमन्मही ॥
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैन्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्बाणपरित्राणपरायणा ॥
पृथिव्युवाच ।
स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥
श्रीपृथुरुवाच ।
एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥
पृथिव्युवाच ।
प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥
पृथुरुवाच ।
त्वां हत्वा वसुधे ! बाणैर्म्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥
श्रीपराशर उवाच ।
ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
तस्माद्वदाम्युपायन्ते तं कुरुष्व यदीच्छसि ॥
समस्ता या मया जीर्णा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तत्तु वत्सं प्रयच्छस्व क्षरेयं येन वत्सला ॥
समाञ्च कुरु सर्व्वत्र येन क्षीरं समन्ततः ।
वरौषधीबीजभूतं वीर ! सर्व्वत्र भावये ॥
श्रीपराशर उवाच ।
तत उत्सारयामास शैलान् शतसहस्रशः ।
धनुष्कोट्या तदा वैन्यस्तेन शैला विवर्द्धिताः ॥
नहि पूर्व्वविसर्गे वै विषमे पृथिवीतले ।

प्रविभागः पुराणां वा ग्रामाणां वा पुराभवत् ।
न शस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैन्यात् प्रभृति मैत्रेय ! सर्व्वस्यैतस्य सम्भवः ॥
यत्र यत्र समं त्वस्या भूमेरासीद्द्विजोत्तम ! ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ॥
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुम् ।
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥
शस्यजातानि सर्व्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात ! वर्त्तन्तेऽद्यापि नित्यशः ॥
प्राणप्रदानात् स पृथुर्यस्माद्भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥
तत्तत्पात्रमुपादाय तत्र दुग्धं मुने ! पयः ।
वत्स ! दोग्धृविशेषाश्च तेषां तद्योनयोऽभवन् ॥
सैषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥
एवंप्रभावः स पृथुः पुत्त्रो वेणस्य वीर्य्यवान् ।
जज्ञे महीपतिः पूर्व्वो राजाभूज्जनरञ्जनात् ॥”
इति श्रीविष्णुपुराणे १ अंशे पृथुचरितं १३ अध्यायः ॥ * ॥
तस्या नामगोत्पत्तिदोहनानां कारणानि यथा,—

ऋषय ऊचुः ।

“बहुभिर्धरणी भुक्ता भूपालैः श्रूयते पुरा ।
पार्थिवाः पृथिवीयोगात् पृथिवी कस्य योगतः ॥
किमर्थञ्च कृता संज्ञा भूमिः किं पारिभाषिकी ।
गौरितीयञ्च विख्याता सूत ! कस्माद्ब्रवीहि नः ॥

सूत उवाच ।

वंशे स्वायम्भुवे ह्यासीदङ्गो नाम प्रजापतिः ।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्मुखी ॥
सुनीथा नाम तस्यास्तु वेणो नाम सुतः पुरा ।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः ॥
लोकेऽप्यधर्म्मकृज्जातः परभार्य्यापहारकः ।
धर्म्माचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्द्दिताः ।
ममन्थुर्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः ॥
तत्कायान्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः ॥
शरीरे मातुरंशेन कृष्णाञ्जनसमप्रभाः ।
पितुरंशस्य चांशेन धार्म्मिको धर्म्मचारिणः ॥
उत्पन्नो दक्षिणाद्धस्तात् सधनुः सशरो गदी ।
दिव्यतेजोमयवपुः सरत्नकवचाङ्गदः ॥
पृथुरेवाभवद्यस्मात्ततः पृथुरजायत ।
स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुश्चरम् ॥
विष्णोर्वरेण सर्व्वस्य प्रभुत्वमगमत् प्रभुः ।
निःस्वाध्यायवषट्कारं निर्धर्म्मं वीक्ष्य भूतलम् ॥
दग्धुमेवोद्यतः कोपाच्छरेणामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुपाद्रवत् ॥
पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततः स्थित्वैकदेशे तु किं करोमीति चाब्रवीत् ॥
पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते ! ।
सर्व्वस्य जगतः शीघ्रं स्थावरस्य चरस्य च ।
तथैव साब्रवीद्भूमिर्दुदोह च नराधिपः ।
स्वे स्वे पाणौ पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुम् ॥
तदन्नमभवत् शुद्धं प्रजा जीवन्ति तेन वै ।
ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तदाभवत् ॥
दोग्धा बृहस्पतिरभूत् पात्रं वेदस्तपो रसः ।
देवैश्च वसुधा दुग्धा दोग्धा मित्रस्तदाभवत् ॥
इन्द्रो वत्सः समभवत् क्षीरमूर्ज्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतन्तदा ॥
अन्तकश्चाभवद्दोग्धा यमो वत्सः स्वधारसः ।
अलाबुपात्रं नागानां तक्षको वत्सकोऽभवत् ॥
विषं क्षीरं ततो दोग्धा धृतराष्ट्रोऽभवत् पुनः ।
असुरैरपि दुग्धेयमायसे शक्रपीडनीम् ॥
पात्रे मायामभूद्वत्सः प्राह्लादिश्च विरोचनः ।
दोग्धा द्विमूर्द्धा तत्रासीन्माया येन प्रवर्त्तिताः ॥
यक्षैश्च वसुधा दुग्धा पुरान्तर्द्धानमीप्सुभिः ।
कृत्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥
प्रेतरक्षोगणैर्दुग्धा धरा रुधिरमुल्वणम् ।
रौप्यनाभोऽभवद्दोग्धा सुमाली वत्स एव तु ॥
गन्धर्व्वैश्च पुनर्दुग्धा वसुधा साप्सरोगणैः ।
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मदले तथा ॥
दोग्धा च सुरुचिर्नाम नाट्यवेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाचलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः ॥
वृक्षैश्च वसुधा दुग्धा क्षीरं छिन्नप्ररोहणम् ।
पालाशपात्रे दोग्धा तु शालः पुष्पलताकुलः ॥
प्लक्षोऽभवत्ततो वत्सः सर्व्ववृक्षगणाधिपः ।
एवमन्यैश्च वसुधा तदा दुग्धा यथेप्सितम् ॥”

इति मत्स्यपुराणे १० अध्यायः ॥ * ॥

अन्यद्विवरणं भूगोलशब्दे द्रष्टव्यम् । पृथ्वी । तद्वैदिकपर्य्यायः । गौः १ ग्मा २ ज्मा ३ क्ष्मा ४ क्षा ५ क्षमा ६ क्षोणी ७ क्षितिः ८ अवनिः ९ उर्व्वी १० पृथ्वी ११ मही १२ रिपः १३ अदितिः १४ इला १५ निरृतिः १६ भूः १७ भूमिः १८ पूषा १९ गातुः २० गोत्रा २१ । इत्येकविंशतिपृथिवीनामधेयानि । इति वेदनिघण्टौ १ अध्यायः ॥ (अन्तरिक्षम् । इति निघण्टुः ।१।३ । यथा, ऋग्वेदे ।१०।१२१।१ ।

“स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥”

“पृथिवीमन्तरिक्षनाम ।” इति तद्भाष्ये सायनः ॥)

पृथिवीगीता, स्त्री, (पृथिव्या गीता ।) पृथिवीकथा । यथा,—

“मैत्रेय ! पृथिवीगीताः श्लोकांश्चात्र निबोध तान् ।
यानाह धर्म्मध्वजिने जनकायासितो मुनिः ॥

श्रीपृथिव्युवाच ।

कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन केन सधर्म्माणोऽप्यतिविश्वस्तचेतसः ॥
पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥
समुद्रावरणं याति मन्मण्डलमथो वशम् ।
कियदात्मजयादेतन्मुक्तिरात्मजये फलम् ॥
उत्सृज्य पूर्व्वे यां याता यां नादाय गतः पिता ।
तां मामतीव मूढत्वाज्जेतुमिच्छन्ति पार्थिवाः ॥
मत्कृते पितृपुत्राणां भ्रातॄणाञ्चापि विग्रहाः ।
जायन्तेऽत्यन्तमोहेन ममत्वाहतचेतसाम् ॥

पृथ्वी ममेयं सकला ममेयं
ममेति चैषा मम शाश्वतेयम् ।
यो यो मृतोऽत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥
दृष्ट्वा ममत्वाहतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्थश्च कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥
पृथ्वी ममैषाशु परित्यजैनां
वदन्ति ये दूतमुखैः स्वशत्रुम् ।
नराधिपास्तेषु ममातिहासः
पुनश्च मूढेषु दयाभ्युपैति ॥

श्रीपराशर उवाच ।

इत्येते धरणीगीताः श्लोका मैत्रेय यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हिमम् ॥”

इति विष्णुपुराणे ४ अंशे २४ अध्यायः ॥

पृथिवीपतिः, पुं, (पृथिव्याः पतिः ।) राजा । (यथा, मनुः । ७ । १०७ ।

“सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥”)

ऋषभनामौषधिः । इति मेदिनी । ते, ११ । यमः । इति हेमचन्द्रः ॥

पृथिवीपालः, पुं, (पृथिवीं पालयतीति । पृथिवी + पालि + अण् ।) राजा । यथा,—

“शशास पृथिवीपालः पृथिवीमेव केवलाम् ॥”

इति रघुः ॥

पृथिवीशक्रः, पुं, (पृथिव्याः शक्र इव ।) राजा । इति हेमचन्द्रः । ३ । ३५६ ॥

पृथुः, पुं, (प्रथते विख्यातो भवतीति । प्रथ + “प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।” उणा० १ । २९ । इति कुः सम्प्रसारणञ्च ।) त्रेतायुगे सूर्य्यवंशीयपञ्चमनृपः । वेणस्य दक्षिणकरमथनाज्जातः । प्रजारञ्जनात् राजोपाधिं प्राप्तः । यथा,—

“अथ ते ऋषयः सर्व्वे सम्प्रमन्त्र्य ततः ।
शतक्रतुसमं तं जातं वेणं दृष्ट्वोत्तमम् ॥
ममन्थुर्दक्षिणं पाणिं तस्यैव च तदाहरः ।
मथिते तस्य पाणौ च सञ्जाते रुद्रमेव हि ॥
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणिमेव च ।
तस्मात् पुरुषो जज्ञे द्वादशादित्यसन्निभः ॥
तप्तकाञ्चनवर्णाङ्गो दिव्यमाल्याम्बरावृतः ।
दिव्याभरणशोभाढ्यो दिव्यगन्धानुलेपनः ।

मुकुटेन सुवर्णेन कुण्डलाभ्यां विराजते ।
महाकायो महाबाहू रूपेणाप्रतिमो भुवि ।
खड्गबाणधरो धन्वी कवची च महाप्रभः ।
सर्व्वलक्षणसम्पन्नः सर्व्वालङ्कारभूषितः ।
तेजसा रूपभावेन साक्षादग्निरिव ज्वलन् ॥
आद्यमाजगवं नाम धनुर्गृह्य महावरम् ।
इन्द्रो दिवि यथा भाति भुवि वेणात्मजस्तथा ॥
तस्मिन् जाते महाभागे देवाश्च ऋषयोऽमलाः ।
उत्सवं चक्रिरे सर्व्वे वेणस्य तनयं प्रति ॥
दीप्यमानः स्ववपुषा वर्णैरेव महामतिः ।
शरांश्च दिव्यान् चापं च कवचञ्च महाप्रभम् ॥
ददाविन्द्रः सहस्राक्षो मालाञ्चाम्लानपुष्पिकाम् ।
जाते तस्मिन्महाभागे पृथौ वीरे महात्मनि ।
संप्रहृष्टानि भूतानि समस्तानि द्विजोत्तमाः ।
सर्व्वतीर्थानि तोयानि पुण्यानि विविधानि च ॥
स्थावराणि चराण्येव अभ्यषिञ्चन्नराधिपम् ।
महावीरं प्रजापालं पृथुमेवं द्विजोत्तमाः ॥
पृथुं वैण्यं महाराज्ये अभिषिक्तं चराचरैः ।
देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महामनाः ॥
राज्ये चैवाधिकारे वै पृथुर्वैण्यः प्रतापवान् ।
तदा पित्रा प्रजाः सर्व्वाः कदा नैवानुरञ्जिताः ॥
तेनानुरञ्जिताः सर्व्वाः सुखैर्मुमुदिरे तदा ।
अनुरागात्तु वीरस्य नाम राजेत्यभाषत ॥
प्रयातस्य सुधीरस्य समुद्रस्य द्विजोत्तमाः ।
आपस्तस्तम्भिरे सर्व्वा प्रयातस्य महात्मनः ॥
प्रयातस्य रथस्यापि तस्यैव च महात्मनः ।
दुर्गमार्गं विलोक्यैव सुमार्गं पर्व्वता ददुः ॥
ध्वजभङ्गं न चक्रुस्ते गिरयः सर्व्व एव ते ।
अकृष्टपच्या पृथिवी सर्व्वत्र कामधेनवः ॥
पर्ज्जन्यः कामवर्षी च वेदघ्रान् महोत्सवान् ।
कुर्व्वन्ति ब्राह्मणाः सर्व्वे क्षत्त्रियाश्च तथापरे ॥
सर्व्वकामफला वृक्षास्तस्मिन् शासति राजनि ।
न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणाम् ॥
सर्व्वे सुखेन जीवन्ति लोका धर्म्मपरायणाः ।
तस्मिन् शासति दुर्द्धर्षे राजराजे महात्मनि ॥"
इति पाद्मोत्तरखण्डे २८ अध्यायः ॥ * ॥
तस्य माहात्म्यं यथा,—
"पृथुना प्रविभक्ता च शोभिता च वसुन्धरा ।
शस्यरत्नवती स्फीता पुरपत्तनशालिनी ॥
एवं प्रभावो वैण्यश्च राजासीद्राजसत्तमः ।
नमस्यश्चैव पूज्यश्च भूतिकामैर्नरोत्तमैः ॥
ब्राह्मणैर्वेदकामैश्च पृथुर्वैण्यः प्रतापवान् ।
आदिकर्त्ता रथानाञ्च योधानां प्रथमो नृपः ॥
यो हि योद्धा रणं याति कीर्त्तयित्वा पृथुं नृपम् ।
घोररूपात् स संग्रामात् क्षेमी तरति कीर्त्ति-मान् ॥
वैश्यैरपि हि शूद्रैश्च स्वाः स्वा वृत्तीरनुस्थितैः ।
पृथुरेव नमस्कार्य्यः सर्व्वसिद्धिकरस्तु यः ॥
एवं पृथुरभूत् पूर्व्वं प्रजाराजकपालिनः ।
सार्व्वभौमो महातेजा मुनिवन्द्यः सुरासुरैः ॥"
तस्य पुत्रौ द्वौ । यथा,—
"पृथोः पुत्रौ तु धर्म्मज्ञौ जज्ञातेऽन्तर्द्धिपालिनौ ।
शिखण्डी च हविर्द्धानमन्तर्द्धानाद्व्यजायत ॥"
अनेनाभूपस्य पुत्रः । यथा, अग्निपुराणे ।
"अयोधस्तस्य पुत्रोऽभूत् कक्कुत्स्थो नाम वीर्य्य-वान् ।
कक्कुत्स्थस्य अनेनाभूत्तस्य पुत्रः पृथुः स्मृतः ॥"
ऋषिः । इति मेदिनी । थे, १० ॥ (प्रियव्रत-वंशोद्भवस्य विभोः पुत्रः । यथा, विष्णुपुराणे । २ । १ । ३८ ।
"भुवनस्तस्मात् तथोद्गीथः प्रस्तारस्तत्सुतो विभुः ।
पृथुस्ततोऽभवत्तस्मात् नक्तस्यापि गयः सुतः ॥"
तामसमन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये । ७४ । ५९ ।
"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् ! सप्त सप्तर्षयोऽभवन् ॥")
पृथुः, स्त्री, (प्रथते विस्तारमेतीति । प्रथ + कुः सम्प्रसारणञ्च ।) कृष्णजीरकः । इत्यमरः । २ । ९ । ३७ ॥ (एतत्पर्य्यायो यथा,—
"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च बृहज्जीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
त्वक्पत्री । हिङ्गुपत्री । इति मेदिनी । थे, १० ॥ (पर्य्यायोऽस्या यथा,—
"हिङ्गुपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अहिफेनः । इति शब्दरत्नावली ॥
पृथुः, त्रि, (प्रथ + कुः सम्प्रसारणञ्च ।) महत् । इत्यमरः । ३ । १ । ६० ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।
"उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचि-राङ्गि ! ।
चपला अपि न महान्तः के चपलभाव-मानीताः ॥")
निपुणः । इति शब्दरत्नावली ॥
पृथुकः, पुं, (पृथुरेव । पृथु + संज्ञायां कन् । यद्वा, प्रथते इति । प्रथ + "अर्भकपृथुकेति ।" उणा० ५ । ५३ । इति कुकन् संप्रसारणञ्च ।) चिपिटकः । इत्यमरः । स्त्रीपुंलिङ्गोऽप्ययम् । यथा,—
"द्विःस्विन्नमन्नं पृथुकं शुद्धं देशविशेषके ।
नात्यन्नप्रत्तं विप्राणां भक्ष्ये च निवेदने ।
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः ॥
(यथास्य गुणाः ।
"पृथुका गुरवो बल्या कफविष्टम्भकारिणः ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ।
"पृथुका गुरवो भृष्टान् भक्षयेदल्पशस्तु तान् ।
यावा विष्टभ्य जीर्य्यन्ति सरसा भिन्नवर्च्चसः ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ।
"पृथुका गुरवः स्निग्धा बृंहणाः कफवर्द्धनाः ।
बल्याः सक्षीरभावात्तु वातघ्ना भिन्नवर्च्चसः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
चाक्षुषमन्वन्तरे देवगणभेदः । यथा, हरि-वंशे । ७ । ३२ ।
"आद्या प्रभूता ऋभवः पृथुकाश्च दिवौकसः ॥")
पृथुकः, त्रि, (प्रथते इति । प्रथ + "अर्भकपृथुक-पाका वयसि ।" उणा० ५ । ५३ । इति कुकन् सम्प्रसारणञ्च । यद्वा, पृथु यथा स्यात् तथा कायति शब्दायते इति । कै शब्दे + कः ।) बालकः । इति मेदिनी । के, १२६ ॥ (यथा, माघे । ३ । ३० ।
"प्रक्रीडितान् रेणुभिरेत्य तूर्णं
निन्युर्जनन्यः पृथुकान् पथिभ्यः ॥")
पृथुका, स्त्री, (पृथुः स्थूलेव । पृथु + कन् + टाप् ।) हिङ्गुपत्री । इति शब्दचन्द्रिका ॥ (अस्याः पर्य्यायो यथा,—
"हिङ्गुपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
बालिका च ॥
पृथुकोलः, पुं, (पृथुः कोलः ।) राजबदरः । इति राजनिर्घण्टः ॥
पृथुच्छदः, पुं, (पृथवश्छदाः पत्राणि यस्य ।) दर्भः । इति राजनिर्घण्टः ॥ बृहत्पत्रे, त्रि ॥
पृथुपत्रः, पुं, (पृथूनि पत्राणि यस्य ।) रक्तलशुनः । इति राजनिर्घण्टः ॥
पृथुपलाशिका, स्त्री, (पृथूनि पलाशानि यस्याः । कप् । टापि अत इत्वम् ।) शटी । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धवधूर्व्वधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृथुरोमा, [न्] पुं, (पृथूनि रोमाणि लोम-स्थानीयानि शल्कान्यस्येति ।) मत्स्यः । इत्य-मरः । १ । १० । १७ ॥ बृहल्लोमयुक्ते, त्रि ॥
पृथुलं, त्रि, (पृथुं पृथुत्वमस्त्यस्येति । पृथु + सिध्मादित्वात् लच् । यद्वा, पृथुं लातीति । ला + कः ।) महत् । इत्यमरः । ३।१।६० ॥ (यथा, माघे । १० । ६५ ।
"श्रोणिषु प्रियकरः पृथुलासु
स्पर्शमाप सकलेन तलेन ॥")
पृथुला, स्त्री, (पृथुल + टाप् ।) हिङ्गुपत्री । इति जटाधरः ॥ (गुणादयोऽस्या हिङ्गुपत्रीशब्दे ज्ञातव्याः ॥)
पृथुशिम्बः, पुं, (पृथुः शिम्बा यस्याः ।) श्योनाक-भेदः । इति राजनिर्घण्टः ॥ (पर्य्यायान्तर-मस्य यथा,—
"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ॥
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृथुशेखरः, पुं, (पृथु महत् शेखरं शृङ्गं यस्य ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥
पृथुस्कन्धः, पुं, (पृथुः स्थूलः स्कन्धो यस्य ।) शूकरः । इति राजनिर्घण्टः ॥

पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य ।) तीर्थभेदः । यथा,—
"ते श्रुत्वा ऋषयः सर्व्वे तीर्थमाहात्म्यमुत्तमम् ।
कपालमोचनमिति नाम चक्रुः समागताः ॥
तथापि समस्ततीर्थं विश्वामित्रस्य विश्रुतम् ।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः ॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम् ।
ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात् ॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः ।
तत्र सिद्धस्तु ब्रह्मर्षी रुषङ्गुर्नाम नामतः ॥
जातिस्मरो रुषङ्गुस्तु गङ्गाद्वारे सदा स्थितः ।
अन्तकालं ततो दृष्ट्वा पुत्त्रान् वचनमब्रवीत् ॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् ।
विज्ञाय तस्य तद्भावं रुषङ्गोस्ते तपोधनाः ॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ।
स तैः पुत्त्रैः समानीतः सरस्वत्यां समाप्लुतः ॥
स्मृत्वा तीर्थगुणान् सर्व्वान् प्राहेदमृषिसत्तमः ।
सरस्वत्युत्तरे तीर्थे यस्त्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत् ।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता ॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ।
चातुर्व्वर्ण्यस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ॥
तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्त्रियास्तथा ॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् ततस्ततः ॥
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम् ।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ।"
इति वामनपुराणे ३८ अध्यायः ॥
(यथा च महाभारते । ३ । ८३ । १४२—१४८ ।
"ततो गच्छेत राजेन्द्र ! तीर्थं त्रैलोक्यविश्रुतम् ।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप ! ॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः ।
अज्ञानात् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना ।
तत् सर्व्वं नश्यते तत्र स्नातमात्रस्य भारत ! ॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च ।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वती ॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम् ।
उत्तमं सर्व्वतीर्थानां यस्त्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो न तस्य मरणं भवेत् ।
गीतं सनत्कुमारेण व्यासेन च महात्मना ॥
वेदे च नियतं राजन्नभिगच्छेत् पृथूदकम् ।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह ! ॥
तन्मेध्यं तत् पवित्रञ्च पावनञ्च न संशयः ।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृतो नराः ।
पृथूदके नरश्रेष्ठ ! एवमाहुर्म्मनीषिणः ॥")

पृथूदरः, पुं, (पृथु महदुदरं यस्य ।) मेषः । इति हारावली । ८० ॥ वृहत्कुक्षौ, त्रि ॥

पृथ्वी, स्त्री, (पृथुः स्थूलगुणयुक्ता । "वोतो गुणवचनात् ।" ४।१।४४। इति ङीष् ।) पृथिवी । (यथा, देवीभागवते । १ । १२ । ८ ।
"मधुकैटभयोर्मेदःसंयोगात् मेदिनी स्मृता ।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः ॥")
पृथोर्दुहितृत्वस्वीकारादेतन्नाम । यथा, वह्निपुराणे ।
"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते ।"
हिङ्गुपत्त्री । कृष्णजीरकः । इत्यमरः । २ । ९ । ३७, ३९ । ४० ॥ (एतस्याः पर्य्यायो यथा,—
"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वृहदेला । इति हेमचन्द्रः ॥ पुनर्नवा । स्थूलैला । इति राजनिर्घण्टः ॥ (सप्तदशाक्षरपादकच्छन्दोभेदः । इति छन्दोमञ्जरी ॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

पृथ्वीका, स्त्री, (पृथ्वी + स्वार्थे कन् ।) वृहदेला । इत्यमरः । २ । ४ । १२५ ॥ (अस्याः पर्य्यायो यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला वृहदेला च चन्द्रबाला च निष्कुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
कृष्णैला । कृष्णजीरकः । इति रत्नमाला ॥ हिङ्गुपत्त्री । इति राजनिर्घण्टः ॥

पृथ्वीकुरवकः, पुं (पृथ्व्यां भूमौ कुरवक इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति । जन + डः ।) गडलवणम् । इति राजनिर्घण्टः ॥

पृदाकुः, पुं, (पर्द्दते इति । पर्द्द अपानशब्दे + "पर्द्देर्नित् सम्प्रसारणमल्लोपश्च ।" उणा० ३ । ८० । इति काकुः रेफस्य सम्प्रसारणं अल्लोपश्च ।) सर्पः । इत्यमरः । १ । ८ । ६ ॥ (यथा, महाभारते । ६ । १०८ । २० ।
"स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम् ।
जग्राहाजगरो ग्राहो भुजयोरुभयोर्बलात् ॥")
वृश्चिकः । व्याघ्रः । चित्रकः । इति मेदिनी । के, १२५ ॥ कुञ्जरः । वृषः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पृश्निः, त्रि, (स्पृश्यते इति । स्पृश संस्पर्शे + "घृणिपृश्नीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) अल्पतनुः । इत्यमरः । २ । ६ । ४८ । (यथा, महाभारते । १२ । २६ । ८६ ।
"दृष्ट्वा पृश्निं हरतीं विसृष्टां
श्रियान्वितां भगिनीं सुप्रसन्नाम् ।
विभावरीं सर्व्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते ॥")
ऋत्वेदुर्म्भिक्षाख्यासिः । इति भरतः ॥ (शुक्लवर्णः । यथा, ऋग्वेदे । १ । १६० । १ ।
"धेनुश्च पृश्निं वृषभं सुरेतसम् ।"
"पृश्निं शुक्लवर्णां धेनुम् ।" इति तद्भाष्ये सायनः ॥
भ्रामतैषाः । यथा, ऋग्वेदे । १० । १८९ । १ ।
"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ॥")

पृश्निः, स्त्री, (स्पृशति प्रजाकामं स्पृश्यते इति वा । स्पृश + "घृणिपृश्नीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) रश्मिः । इति शब्दरत्नावली ॥ (अन्नम् । वेदाः । जलम् । अमृतम् । इति महाभारतम् । १२ । ३४१ । ४४ ।) सुतपोराजपत्नी । सैव जन्मान्तरे देवकी भूता । इति श्रीभागवते १० स्कन्धः ॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति । कै + कः । यद्वा, पृश्नि स्वल्पं कं जलं यत्र ।) कुम्भिका । इति शब्दमाला ॥

पृश्निगर्भः, पुं, (पृश्निर्देवक्या गर्भो यस्य । यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भं रूपतिस्थानत्वेनास्त्यस्येति । अच् ।) श्रीकृष्णः । इति हारावली । ९ ॥ (अस्य निरुक्तिर्यथा महाभारते । १२ । ३४१ । ४४ ।
"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ।
ममैतानि सदा गर्भः पृश्निगर्भस्ततो ह्यहम् ॥")

पृश्निपर्णी, स्त्री, (पृश्नि स्वल्पं पर्णमस्याः । ङीष् ।) लताविशेषः । चाकुलिया इति भाषा । चकरीन् इति हिन्दी भाषा । तत्पर्य्यायः । पृथक्पर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलशिः ७ धावनिः ८ गुहा ९ । इत्यमरः । २ । ४ । ९२ ॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम् । क्रोष्टुविन्नादिपञ्चकं चिरालहाँर इति ख्यातायामित्याहुः । एतत्तु वैद्या न मन्यन्ते । ते हि कलश्यादिशब्देन पृश्निपर्णीमेव मन्यन्ते । पृश्निपर्णी सिंहपुच्छी चित्रपर्णी कटुर्विंटपुच्छी अनयोरल्पभेदाद्वैकार्थ्यं इति केचित् । इति भरतः ॥ अपि च ।
पिष्टपर्णी १० लाङ्गली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलशी १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालवृन्ता १७ त्रिपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ घृष्टिला २२ चित्रपर्णिका २३ । इति शब्दरत्नमाला ॥ महागुहा २४ शृगालविन्ना २५ धमनी २६ मेखला २७ लाङ्गूलिका २८ पृथक्पर्णी २९ दीर्घपर्णी ३० । इति राजनिर्घण्टः ॥ अङ्घ्रिपर्णी ३१ धावनी ३२ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । वातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च । इति राजनिर्घण्टः ॥ त्रिदोषघ्नत्वम् । वृष्यत्वम् । मधुरत्वम् । सरत्वम् । श्वासरक्तातीसारतृड्दाहनाशित्वञ्च । इति भावप्रकाशः ॥ ग्राहित्वञ्च । इति राजवल्लभः ॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य ।) श्रीकृष्णः । इति शब्दमाला ॥

पृश्निशृङ्गः, पुं, (पृश्निर्वेदात्मकं शृङ्गमिव यस्य ।) विष्णुः । इति शब्दमाला ॥ (पृश्नि स्वल्पं शृङ्गमिव मुखाग्रं यस्य ।) गणेशः । इति त्रिकाण्डशेषः ॥

पृश्नी, स्त्री, (स्पृशति जलमिति । स्पृश+निः । ततो वा ङीष् ।) वारिपर्णी । इति शब्दरत्नावली । (विवरणमस्या वारिपर्णीशब्दे ज्ञातव्यम् ।) कुम्भिका । इति भूरिप्रयोगः ॥

पृष, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, पर्षित्वा पृष्ट्वा । इति दुर्गादासः ॥

पृषत्, स्त्री, (पर्षति सिञ्चतीति । पृष सेचने +"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा० २ । ८४ । इति । अतिप्रत्ययो गुणाभावश्च निपात्यते । शतृवदस्य कार्य्यं विज्ञेयम् ।) जलविन्दुः । इत्यमरः ॥१।१०।६॥ यथा, "पृषत्परुषविषाणाग्नेय लुठति ।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः ॥ "पृषत् जलविन्दुस्तद्वत् अपरुषेण मृदुना विषाणाग्नेण लुठति सङ्कूयति ।" इति तट्टीकायां श्रीधरस्वामी । इदं द्विवचनवहुवचनान्तमपि भवति ॥

पृषतः, पुं, (पर्षतीति । पृषि सेके+"पृषिरञ्जिभ्यां कित् ।" उणा० ३ । ११० । इति अतच् । स च कित् ।) विन्दुः । इत्यमरः । १।१०।६ ॥ (यथा, रघौ । ३ । ३ ।

"करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥")

श्वेतविन्दुयुक्तमृगः । इति मेदिनी । ते, १३५ । तत्पर्य्यायः । रङ्कुः २ शबलपृष्ठकः ३ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "हरिणैणकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करन्यङ्कुमातृकाप्रभृतयो जङ्गाला मृगाः । कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च ॥") द्रुपदराजस्य पिता । यथा, महाभारते । १ । १३१ । १७ ।

"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥"

मण्डलिसर्पान्तर्गतसर्पविशेषः । यथा,—

"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्प इत्यादिषु ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ।)

पृषताम्पतिः, पुं, (पृषतां विन्दूनां पतिर्नेता इत्यलुक्समासः ।) वायुः । इति जटाधरः ॥ (यथा, माघे । ६ । ५५ ।

"गजपतिद्वयसीरपि हैमन-
स्तुहिनयन् सरितः पृषताम्पतिः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतातनुतापकृतं दृशाम् ॥")

पृषताश्वः, पुं, (पृषतो मृगविशेषोऽश्व इव गतिसाधनं वाहनो वा यस्य ।) वायुः । इत्यमरटीकायां भरतः ।

पृषती, स्त्री, (पृषत+स्त्रियां ङीप् ।) श्वेतविन्दुयुक्ता मृगी । इति मेदिनी । ते, १३५ । (यथा, रघुः । ८ । ५८ ।

"पृषतीषु विलोलमीक्षितं
पवनाधूतलतासु विभ्रमाः ॥")

पृषतकः, पुं, (पृष्यते सिच्यते सिप्यते इति । पृष+अतिः । ततः संज्ञायां कन् ।) वाणः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, रघौ । ७ । ४५ ।

"अथार्द्धभागे परवाणलूना
धनुर्भृतां हस्तवतां पृषत्काः ॥")

पृषदश्वः, पुं, (पृषन् मृगविशेषोऽश्व इव वाहको यस्य ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ (यथा, ऋग्वेदे । १ । ८७ । ४ ।

"स हि स्वसृत् पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः ॥"

राजर्षिभेदः । यथा, महाभारते ।२।८।१२ ।

"अश्वः सदश्वो वध्र्यश्वः पृथुवेगः पृथुश्रवाः ।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः ॥"

विरूपस्य पुत्त्रः । यथा, भागवते । ९ । ६ । १ ।

"विरूपः केतुमान् शम्भुरम्बरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् तत्पुत्त्रस्तु रथीतरः ॥")

पृषदाज्यं, क्ली, (पृषद्भिः दधिविन्दुभिः सहितमाज्यम् ।) सदध्याज्यम् । दधिमिश्रितघृतम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, ऋग्वेदे । १० । ९० । ८ ।

"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"

"पृषदाज्यं दधिमिश्रमाज्यम् ।" इति तद्भाष्ये सायनः ॥)

पृषद्वलः, पुं, (पृषद्देव बलमस्य ।) वायुश्वः । यथा,—

"ध्रुविश्वमरुदान्दोलः कुबेरश्चामरानिलः ।
पृषद्वलस्तु वायुश्वः कुबेरे तु प्रमोदितः ॥"

इति शब्दमाला ॥

पृषन्तिः, पुं, (पर्षति सिञ्चतीति । पृष सेचने+अतिप्रत्ययः । निपातनात् साधुः ।) विन्दुः । यथा,—

"पयःपृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनैः ॥"

इति भरतधृतनामचतीविजयकाव्यम् ॥

पृषभाषा, स्त्री, (पर्षतीति । पृष सेके+कः । पृषास्तत्सम्बन्धिनी भाषा यत्र ।) अमरावती । इति शब्दरत्नावली ॥

पृषाकरा, स्त्री, (पृष+भावे क्विप् । पृषि सेचनाय आकीर्य्यते इति । आ+कृ+अप्+टाप् । प्रातः सन्ध्यायाञ्चास्या उपरि जलसेचनादेव तथात्वम् ।) क्षुद्रशिला । इति शब्दचन्द्रिका । बाटखारा इति भाषा ॥

पृषातकं, क्ली, (पृषन्तं पृषदाज्यम् आतकते इत्यतीति । तक+अच् । पृषोदरादित्वात् साधुः ।) दधियुक्तघृतम् । इति हेमचन्द्रः ॥

पृषोदरः, त्रि, पृषदुदरं यस्य । ("पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति तलोपः ।) मनीषादित्वात् तलोपः । इति दुर्गादासः ।

"भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्य्ययात् ।
वर्णादेशाच्च गूढात्मा वर्णलोपात् पृषोदरः ॥"

इति गोपीचन्द्रधृतकारिका ॥

पृषोद्यानं, क्ली, क्षुद्रोपवनम् । मनीषादित्वात् पृषत्तकारलोपः । इति मुग्धबोधटीकायां दुर्गादासः ॥

पृष्ठं, क्ली, (पृष्यते सिच्यते इति । पृष "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्-प्रत्ययेन निपातनात् सिद्धम् ।) शरीरपश्चाद्भागः । इत्यमरः । २ । ६ । ७८ ॥ पीठ इति भाषा ॥ (यथा, मनौ । ४ । ७२ ।

"न विगर्ह्य कथां कुर्य्याद्बहिर्माल्यं न धारयेत् ।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥")

चरमभागः । इति मेदिनी । ठे, ७ ॥ (स्तोमविशेषः । यथा, शतपथब्राह्मणे । ८ । १ । १ । ५ ।

"त्रिवृत्स्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥")

पृष्ठग्रन्थिः, पुं, (पृष्ठस्य ग्रन्थिः ।) गडुः । इति हेमचन्द्रः । ३ । ४४६ ॥ कुँज इति भाषा ।

पृष्ठतः, [स्] व्य, (पृष्ठ+"प्रतियोगे पञ्चम्यास्तसिः ।" ५ । ४ । ४४ । इत्यस्य "आद्यादिभ्य उपसंख्यानम् ।" इति वार्त्तिकोक्त्या तसिः ।) पश्चात् । यथा, भट्टिः । १ । २४ ।

"तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्रास्त्रधरः कुमारः ॥"

पृष्ठदेशे । (यथा, मनौ । ८ । ३०० ।

"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम् ॥")

पृष्ठदृष्टिः, पुं, (पृष्ठे दृष्टिर्दर्शनं यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥

पृष्ठमांसादः, त्रि, (पृष्ठे परोक्षे मांसाद इव । असमक्षमनिष्टजनकवाक्यकथनादस्य तथात्वम् ।) वाक्याभिधायी । इति त्रिकाण्डशेषः ॥ चोगोलखोर इति पारस्यभाषा । (पृष्ठमांसमत्तीति । अद् । पृष्ठमांसभक्षके, त्रि ॥)

पृष्ठमांसादनं, क्ली, (पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनस्याप्यनिष्टजनकत्वात् ।) परोक्षे दोषकीर्त्तनम् । इति हेमचन्द्रः । ३ । २६५ ॥ तद्वति, त्रि ॥ (पृष्ठमांस+अद्+कर्त्तरि ल्युः । पृष्ठमांसभक्षके, त्रि ।)

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दण्ड इत्यर्थः ।) पृष्ठास्थि । पिठेर दाँड़ा इति भाषा ॥ तत्पर्य्यायः । रीढकः २ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते शारीरस्थाने ६ अध्याये ।

"तत्र पृष्ठवंशमुभयतः प्रतिश्रोणी काण्डमस्थिनी कटीतरुणे नाम मर्म्मणी ।") स तु प्राणमात्रेण भवति । इति सुखबोधः ॥

पृष्ठवाट्, } [ह्] पुं, (पृष्ठं युगपार्श्वं वहपृष्ठवाह्, } तीति । वह+ण्वि ।) युगपार्श्वगद्दृषः । पाँटे बाँधा वृष इति भाषा । इत्यमरः ॥ (पृष्ठं पृष्ठभागं वहतीति । वह+ण्वि । भारवाहकः । यथा, हरिवंशे भविष्यपर्व्वणि । ६१ । ११ ।

"दारुकं पृष्ठवाहञ्च हत्वा कैटभ ईश्वरः ।

पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य ।) तीर्थभेदः । यथा,—
"ते श्रुत्वा ऋषयः सर्वे तीर्थमाहात्म्यमुत्तमम् ।
कपालमोचनमिति नाम चक्रुः समागताः ॥
तत्रापि सुमहत्तीर्थं विश्वामित्रस्य विश्रुतम् ।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः ॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम् ।
ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात् ॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः ।
तत्र सिद्धस्तु ब्रह्मर्षी रुषद्गुर्नाम नामतः ॥
जातिस्मरो रुषद्गुस्तु गङ्गाद्वारे सदा स्थितः ।
अन्तकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत् ॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् ।
विज्ञाय तस्य तद्भावं रुषद्गोस्ते तपोधनाः ॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ।
स तैः पुत्रैः समानीतः सरस्वत्यां समाप्लुतः ॥
स्मृत्वा तीर्थगुणान् सर्व्वान् प्राहेदमृषिसत्तमः ।
सरस्वत्युत्तरे तीर्थे यः त्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत् ।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता ॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ।
चातुर्व्वर्ण्यस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ॥
तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा ॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् ततस्ततः ॥
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम् ।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ॥"

इति वामनपुराणे ३८ अध्यायः ॥

(यथा च महाभारते । ३ । ८३ । १४२—१४८ ।
"ततो गच्छेत राजेन्द्र ! तीर्थं त्रैलोक्यविश्रुतम् ।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप ! ॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः ।
अज्ञानात् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना ।
तत् सर्व्वं नश्यते तत्र स्नातमात्रस्य भारत ! ॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च ।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वती ॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम् ।
उत्तमं सर्व्वतीर्थानां यस्त्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो न तस्य मरणं भवेत् ।
गीतं सनत्कुमारेण व्यासेन च महात्मना ॥
वेदे च नियतं राजन्नभिगच्छेत् पृथूदकम् ।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह ! ॥
तन्मेध्यं तत् पवित्रञ्च पावनञ्च न संशयः ।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृतो नराः ।
पृथूदके नरश्रेष्ठ ! एवमाहुर्मनीषिणः ॥")

पृथूदरः, पुं, (पृथु महदुदरं यस्य ।) मेषः । इति हारावली । ८० ॥ बृहत्कुक्षौ, त्रि ॥

पृथ्वी, स्त्री, (पृथुः स्थूलत्वगुणयुक्ता । "वोतो गुणवचनात् ।" ४।१।४४। इति ङीष् ।) पृथिवी । (यथा, देवीभागवते । १ । १३ । ८ ।
"मधुकैटभयोर्मेदःसंयोगेन मेदिनी स्मृता ।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः ॥")
पृथोर्दुहितृत्वस्वीकारादेनन्नाम । यथा, अग्निपुराणे ।
"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते ॥"
हिङ्गुपत्री । कृष्णजीरकः । इत्यमरः । २ । ९ । ३७, ३९ । ४० ॥ (एतस्याः पर्य्यायो यथा,—
"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च बृहज्जीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
इलायचीमाला । इति हेमचन्द्रः ॥ पुनर्नवा । स्थूलैला । इति राजनिर्घण्टः ॥ (अष्टदशाक्षरपादकच्छन्दोभेदः । इति छन्दोमञ्जरी ॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

पृथ्वीका, स्त्री, (पृथ्वी + स्वार्थे कन् ।) बृहदेला । इत्यमरः । २ । ४ । १२५ ॥ (अस्याः पर्य्यायो यथा,—
"एलास्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सूक्ष्मैला । कृष्णजीरकः । इति रत्नमाला ॥ हिङ्गुपत्री । इति राजनिर्घण्टः ॥

पृथ्वीकुरवकः, पुं, (पृथ्व्यां भूमौ कुरवक इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति । जन + डः ।) गडलवणम् । इति राजनिर्घण्टः ॥

पृदाकुः, पुं, (पर्द्दते इति । पर्द्द अपानशब्दे + "पर्द्देर्नित् सम्प्रसारणमल्लोपश्च ।" उणा० ३ । ८० । इति काकुः रेफस्य सम्प्रसारणं अल्लोपश्च ।) सर्पः । इत्यमरः । १ । ८ । ६ ॥ (यथा, महाभारते । ६ । १०८ । २० ।
"स भीमं सहसाभ्येत्य पृदाकुः कुपितो यथा ।
व्यादाय आननं घोरो सृक्वणी लेलिहन्मुहुः ॥")
वृश्चिकः । व्याघ्रः । चित्रकः । इति मेदिनी । के, १२५ ॥ कुञ्जरः । वृक्षः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पृश्निः, त्रि, (स्पृश्यते इति । स्पृश संस्पर्शे + "घृणिपृश्नीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) अल्पतनुः । इत्यमरः । ३ । १ । ६८ ॥ (यथा, महाभारते । १३ । ९६ । ८६ ।
"दद्यां पृश्निं हरतां बिसस्तैन्यं
धिग्वान्वन्ती भगिनी शुभप्रणाम् ।
विभावरी धर्म्मभूतप्रतिष्ठा
गङ्गां गता ये त्रिदिवं गतास्ते ॥")
धर्म्मदुर्भिक्षाल्पाङ्गः । इति भरतः ॥ (शुक्लवर्णः । यथा, ऋग्वेदे । २ । १६० । ३ ।
"धेनुञ्च पृश्निं वृषभं सुरेतसम् ॥"
"पृश्निं शुक्लवर्णां धेनुम् ।" इति तद्भाष्ये सायनः ॥ नानावर्णः । यथा, ऋग्वेदे । १० । १८९ । १ ।
"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ॥")

पृश्निः, स्त्री, (स्पृशति भवयात्रां स्पृश्यते इति वा । स्पृश + "घृणिपृश्नीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) रश्मिः । इति शब्दरत्नावली ॥ (अन्नम् । वेदाः । जलम् । अमृतम् । इति महाभारतम् । १२ । ३४२ । ४४ ॥) सुतपोराजपत्नी । सैव जन्मान्तरे देवकी स्मृता । इति श्रीभागवते १० स्कन्धः ॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति । कै + कः । यद्वा, पृश्नि अल्पं कं जलं यत्र ।) कुम्भिका । इति शब्दमाला ॥

पृश्निगर्भः, पुं, (पृश्निर्वेदादयो गर्भे यस्य । यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भे उत्पत्तिस्थानत्वेनास्त्यस्येति । अच् ।) कृष्णः । इति हारावली । ९ ॥ (अस्य निरुक्तिर्यथा, महाभारते । १२ । ३४२ । ४४ ।
"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ।
ममैतानि सदा गर्भः पृश्निगर्भस्ततो ह्यहम् ॥")

पृश्निपर्णी, स्त्री, (पृश्नि अल्पं पर्णमस्याः । ङीष् ।) लताविशेषः । चाकुलिया इति भाषा । पिठवन इति हिन्दी भाषा । तत्पर्य्यायः । पृथक्पर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलशिः ७ धावनिः ८ गुहा ९ । इत्यमरः । २ । ४ । ९२ ॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम् । क्रोष्टुविन्नादिपञ्चकं चिरालकाँटा इति ख्यातायामित्याहुः । एतत्तु वैद्या न मन्यन्ते । किन्तु कलश्यादिशब्देन पृश्निपर्ण्येव गृह्यते । पृश्निपर्णी सिंहपुच्छी चित्रपर्णी शृगालविन्ना । पुष्पी अनयोरल्पभेदाभ्यामेकार्थता इति वैद्याः । इति भरतः ॥ अपि च ।
सिंहपर्णी १० शाकली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलशी १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालवृन्ता १७ त्रिपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ घृष्टिला २२ चित्रपर्णिका २३ । इति शब्दरत्नमाला । महागुहा २४ शृगालिका २५ धमनी २६ मेखला २७ शाकुनिका २८ पृथक्पर्णी २९ दीर्घपर्णी ३० । इति राजनिर्घण्टः ॥ अङ्घ्रिपर्णी ३१ धावनी ३२ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । वातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च । इति राजनिर्घण्टः ॥ त्रिदोषघ्नत्वम् । वृष्यत्वम् । मधुरत्वम् । सरत्वम् । श्वासकासातीसारतृड्दाहनाशित्वञ्च । इति भावप्रकाशः ॥ अतिसारघ्नत्वञ्च । इति राजवल्लभः ॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य ।) श्रीकृष्णः । इति शब्दमाला ॥

पृश्निशृङ्गः, पुं, (पृश्निर्वेदादयः शृङ्गमिवास्य ।) विष्णुः । इति शब्दमाला ॥ (पृश्नि अल्पं शृङ्गमिव मुखाग्रं यस्य ।) गणेशः । इति त्रिकाण्डशेषः ॥

पृश्नी, स्त्री, (स्पृशति जलमिति । स्पृश+निः । सनो वा ङीष् ।) वारिपर्णी । इति शब्दरत्नावली । (विवरणमस्या वारिपर्णीशब्दे ज्ञातव्यम् ।) कुम्भिका । इति भूरिप्रयोगः ॥

पृष, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, पर्षित्वा पृष्ट्वा । इति दुर्गादासः ॥

पृषत्, क्ली, (पर्षति सिञ्चतीति । पृष सेचने + "वर्त्तमाने पृषद्बृहन्महदिति ।" उणा० २ । ८४ । इति । अतिप्रत्ययो गुणाभावश्च निपात्यते । शत्रवरस्य कार्य्यं विज्ञेयम् ।) जलविन्दुः । इत्यमरः । १ । १० । ६ ॥ यथा, "पृषदपत्तपविषाणाग्रेण लुठति ।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः ॥ "पृषत् जलविन्दुस्तद्वत् अपरुषेण मृदुना विषाणाग्रेण लुठति सङ्कर्षयति ।" इति तट्टीकायां श्रीधरस्वामी । इदं द्विवचनबहुवचनान्तमपि भवति ॥

पृषतः, पुं, (पर्षतीति । पृषि सेके+"पृषिरञ्जिभ्यां कित् ।" उणा० ३ । १११ । इति अतच् । स च कित् ।) विन्दुः । इत्यमरः । १ । १० । ६ ॥ (यथा, रघौ । २ । ३ ।

"करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥")

श्वेतविन्दुयुक्तमृगः । इति मेदिनी । ते, १३५ ॥ तत्पर्य्यायः । रङ्कुः २ शवलपृष्ठकः ३ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "हरिणैणकुरङ्गकरालकृतमालशरभश्वदंष्ट्रा पृषतचारुष्करम्यगमातृकाप्रभृतयो जङ्गाला मृगाः । कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च ।"*। द्रुपदराजस्य पिता । यथा, महाभारते । १ । १३१ । १७ ।

"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥"

मण्डलिसर्पान्तर्गतसर्पविशेषः । यथा,—

"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्प इत्यादिषु ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ।)

पृषताम्पतिः, पुं, (पृषतां विन्दूनां पतिर्नेता इत्यलुक्समासः ।) वायुः । इति जटाधरः ॥ (यथा, माघे । ६ । ५५ ।

"गजपतिद्वयसीरपि हैमन-
स्तुहिनयन् सरितः पृषताम्पतिः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतातनुतापकृतं दृशाम् ॥")

पृषताश्वः, पुं, (पृषती मृगविशेषोऽश्व इव गतिसाधनं वाहनो वा यस्य ।) वायुः । इत्यमरटीकायां भरतः ॥

पृषती, स्त्री, (पृषत+स्त्रियां ङीप् ।) श्वेतविन्दुयुक्ता मृगी । इति मेदिनी । ते, १९५ ॥ (यथा, रघुः । ८ । ५९ ।

"पृषतीषु विलोलमीक्षितं
पवनाधूतलतासु विभ्रमाः ॥")

पृषतुकः, पुं, (पृष्यते सिच्यते सिच्यते इति । पृष+अतिः । ततः संज्ञायां कन् ।) वायुः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, रघौ । ७ । ३५ ।

"अप्यर्द्धभागे परवाणलूना
धनुर्भृतां हस्तवतां पृषत्काः ॥")

पृषदश्वः, पुं, (पृषन् मृगविशेषोऽश्व इव वाहको यस्य ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ (यथा, ऋग्वेदे । १ । ८७ । ४ ।

"स हि स्वसृत् पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः ।"

राजविशेषः । यथा, महाभारते । २ । ८ । १२ ।

"अश्वः सदश्वो वध्राश्वः पृथुवेगः पृथुश्रवाः ।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः ॥"

विरूपस्य पुत्त्रः । यथा, भागवते । ९ । ६ । १ ।

"विरूपः केतुमान् शम्भुरम्बरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् तत्पुत्त्रस्तु रथीतरः ॥")

पृषदाज्यं, क्ली, (पृषद्भिः दधिविन्दुभिः सहितमाज्यम् ।) सदध्याज्यम् । दधिमिश्रितघृतम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, ऋग्वेदे । १० । ९० । ८ ।

"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्ताश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"
"पृषदाज्यं दधिमिश्रमाज्यम् ।" इति तद्भाष्ये सायनः ॥)

पृषद्बलः, पुं, (पृषदेव बलमस्य ।) वायुश्वः । यथा,—

"ध्रुविभ्रमद्दान्दोलः कुबेरश्चामरानिलः ।
पृषद्बलस्तु वायुश्वः कुबेरे तु प्रमोदितः ॥"
इति शब्दमाला ॥

पृषन्तिः, पुं, (पर्षति सिञ्चतीति । पृष सेचने+अतिप्रत्ययः । निपातनात् साधुः ।) विन्दुः । यथा,—

"पयःपृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनैः ॥"
इति भरतधृतमाधवतीविजयकाव्यम् ॥

पृषभाषा, स्त्री, (पर्षतीति । पृष सेके+कः । पृषान्सवर्षिणी भाषा यत्र ।) अमरावती । इति शब्दरत्नावली ॥

पृषाकरा, स्त्री, (पृष+भावे क्विप् । पृषी सेचनाय आकीर्यते इति । आ+कृ+अप्+टाप् । प्रातः सन्ध्यायाश्चास्या उपरि जलसेचनादेव तथात्वम् ।) क्षुद्रशिला । इति शब्दचन्द्रिका । वाट्खारा इति भाषा ॥

पृषातकं, क्ली, (पृषन्तं पृषदाज्यम् आतङ्कते कसतीति । तक+अच् । पृषोदरादित्वात् साधुः ।) दधियुक्तघृतम् । इति हेमचन्द्रः ॥

पृषोदरः, त्रि, पृषदुदरं यस्य । ("पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति तलोपः ।) मनीषादित्वात् तलोपः । इति दुर्गादासः ॥

"भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्य्ययात् ।
गूढात्मा वर्णविकृतेर्वर्णनाशात् पृषोदरः ॥"
इति मोपीचन्द्रधृतकारिका ॥

पृषोद्यानं, क्ली, क्षुद्रोपवनम् । मनीषादित्वात् पृषतकारलोपः । इति मुग्धबोधटीकायां दुर्गादासः ॥

पृष्ठं, क्ली, (पृष्यते सिच्यते इति । पृष "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्प्रत्ययेन निपातनात् सिद्धम् ।) शरीरपश्चाद्भागः । इत्यमरः । २ । ६ । ७८ ॥ पीठ इति भाषा ॥ (यथा, मनौ । ४ । ७२ ।

"न विगर्ह्य कथां कुर्य्याद्बहिर्माल्यं न धारयेत् ।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥")

चरमभागम् । इति मेदिनी । ठे, ७ ॥ (स्तोत्रविशेषः । यथा, शतपथब्राह्मणे । ८ । १ । १ । ५ ।

"त्रिवृतस्तोमादथन्तरं पृष्ठं निरमिमीत ॥")

पृष्ठग्रन्थिः, पुं, (पृष्ठस्य ग्रन्थिः ।) गडुः । इति हेमचन्द्रः । ३ । ४४६ ॥ कुँज इति भाषा ॥

पृष्ठतः, [स्] व, (पृष्ठ+"प्रतियोगे पञ्चम्यास्तसिः ।" ५ । ४ । ४४ । इत्यस्य "आद्यादिभ्य उपसंख्यानम् ।" इति वार्त्तिकोक्त्या तसिः ।) पश्चात् । यथा, भट्टिः । १ । २४ ।

"तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीक्षाभ्रधरः कुमारः ॥"

पृष्ठदेशे । (यथा, मनौ । ८ । ३०० ।

"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम् ॥")

पृष्ठदृष्टिः, पुं, (पृष्ठे दृष्टिर्दर्शनं यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥

पृष्ठमांसादः, त्रि, (पृष्ठे परोक्षे मांसाद इव । अयमत्यन्तमनिष्टजनकवाक्यकथनादस्य तथात्वम् ।) वाक्याभिघाती । इति त्रिकाण्डशेषः ॥ चोगोलखोर इति पारस्यभाषा । (पृष्ठमांसमत्तीति । अद्+अण् । पृष्ठमांसभक्षके, त्रि ॥)

पृष्ठमांसादनं, क्ली, (पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनस्यास्यानिष्टजनकत्वात् ।) परोक्षे दोषकीर्त्तनम् । इति हेमचन्द्रः । ३ । २६५ ॥ तद्वति, त्रि । (पृष्ठमांस+अद्+कर्त्तरि ल्युः । पृष्ठमांसभक्षके, त्रि ।)

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दृढ इत्यर्थः ।) पृष्ठास्थि । पिठेर दाँड़ा इति भाषा ॥ तत्पर्य्यायः । रीढ़कः २ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते शारीरस्थाने ६ अध्याये ।

"तत्र पृष्ठवंशमुभयतः प्रतिश्रोणी काण्डमभितो कटीतरुणे नाम मर्म्मणी ।") स तु नामभेदेन भवति । इति शब्दबोधः ॥

पृष्ठवाट्, } [ह्] पुं, (पृष्ठं वृषपार्श्वं वहतीति । वह+ण्वि ।) वृषनर्त्तनकरः ।
पृष्ठवाह्, }

पाँटे बोझा बर इति भाषा । इत्यमरः ॥ (पृष्ठं पृष्ठभागं वहतीति । वह+ण्वि । भारवाहकः । यथा, हरिवंशे भविष्यपर्व्वणि । ५१ । ११ ।

"दारवं पृष्ठवाडेन ध्वजा वैमल ईश्वरः ।

श्यामेयमस्त्रं मंयोच्य प्रते कर्ण्णमिदिरीश्वरः ।
अनेन त्वां द्रष्टाम्यद्य यदि प्रक्रोऽसि वारय ॥")

पृष्ठवाह्यः, पुं, (पृष्ठे वाह्यं वहनीयद्रव्यमस्य ।) भारवाहकवृषः । तत्पर्य्यायः । स्थौरी २ पृष्ठ्यः ३ । इति हेमचन्द्रः । ४ । ३२८ ॥

पृष्ठशृङ्गः, पुं, (पृष्ठे शृङ्गमस्य । शृङ्गस्य वक्रभावेन पृष्ठगमनात् तथात्वम् ।) वनच्छागः । इति हेमचन्द्रः । ३ । ३४४ ॥

पृष्ठशृङ्गी, [न्] पुं, (पृष्ठे शृङ्गमिव अस्यास्तीति । शृङ्ग + इनिः ।) भीमसेनः । नपुंसकम् । महिषः । इति मेदिनीशब्दरत्नावल्यौ ॥

पृष्ठोदयः, पुं, (पृष्ठेनोदयोऽस्य ।) मेषवृषकर्कट-धनुर्म्मकरमीनलग्नाः । यथा, ज्योतिस्तत्त्वे ।
"अजो गोपतियुग्मश्च कर्किधन्विमृगास्तथा ।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञा विमिथुनाः स्मृताः पृष्ठोदयास्तथा ।
शेषाः शीर्षोदया ज्ञेया मीनश्चोभयसंज्ञकः ॥"

पृष्ठ्यं, स्त्री, (पृष्ठानां स्तोत्रविशेषाणां समूह इति । पृष्ठ + "खलगोरथात् ।" ४ । २ । ५० । इत्यस्य "इनित्रकट्यचश्च" "पृष्ठाद्युपसंख्यानम् ।" इति वार्त्तिकोक्त्या यत् ।) पृष्ठानां समूहः । इत्यमरः । १ । २ । ४२ ॥

पृष्ठ्यः, पुं, (पृष्ठेन वहतीति । पृष्ठ + यत् ।) पृष्ठेन भारवाहकाश्वः । तत्पर्य्यायः । स्थौरी २ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, महाभारते । १ । २२२ । ४९ ।
"पृष्ठ्यानामपि चाश्वानां वाह्लिकानां जनार्द्दनः ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥"
धारके, त्रि । यथा, ऋग्वेदे । ४ । ३ । १० ।
"ऋतेन हि ष्मा वृषभश्चिदक्तः
पुमाँ अग्निः पयसा पृष्ठ्येन ॥"
"पृष्ठ्येन धारकेण पयसाक्तः ।" इति तद्भाष्ये सायनः ।)

पृष्णिः, त्रि, (पृश्निः । पृषोदरादित्वात् साधुः ।) अल्पः । इत्यमरटीकायां भरतः ॥ पार्ष्णिः । तत्र ऋषौलिङ्गः । इत्युणादिकोषः ॥

पॄ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पारयति । इति दुर्गादासः ॥

पॄ, लि ङि लि पालने । पूर्त्तौ । इति कविकल्पद्रुमः ॥ (क्र्या०-ह्वा०-च-पर०-सक०-सेट् ।) लि, पूर्णोऽसि । सस्ताद्योऽदिरिदन्त पूर्व्वणत्वाय लिङ्गानुबन्धः । लि, पृणाति । स्त्री तु पूर्त्तिरित्येव सत्त्वादित्वान् निः । लि, पिपर्त्ति । इति दुर्गादासः ॥

पेचकः, पुं, (पचति पच्यते वा । पच + "पचिमच्योरिच ।" उणा० ५ । ३७ । इति वुन् । उपधाया अत इत्त्वं ।) पक्षिविशेषः । पेंचा इति भाषा । तत्पर्य्यायः । उलूकः २ वायसारातिः ३ । इत्यमरः । २ । ५ । १४ ॥ प्रकाशः ४ दिवान्धः ५ रक्तनासिकः ६ घरिनैशः ७ दिवाभीतः ८ महाक्षी ९ घोघुः १० धर्म्मरः ११ काकभीरुः १२ नक्तचारी १३ । इति त्रिकाण्डशेषः ॥ निशाचरः १४ कौशिकः १५ कम्बलाक्षः १६ पेचः १७ रक्तनासिकः १८ भीरुकः १९ । इति शब्दरत्नावली ॥ करिपुच्छमूलोपान्तः । गुदाच्छादकमांसपिण्डविशेषः । इत्यमरः । ३ । ३ । ६ ॥ पर्य्यङ्कः । यूकः । इति विश्वः ॥ मेघः । इति शब्दरत्नावली ॥

पेचकी, [न्] पुं, (पेचकोऽस्यास्तीति । पेचक + इनिः ।) हस्ती । इति शब्दरत्नावली ॥

पेचिलः, पुं, (पच + बाहुलकात् इलच् अत इत्त्वं ।) हस्ती । इति त्रिकाण्डशेषः ॥

पेचु, स्त्री, (पच्यते इति । पच + उन् । अत इत्त्वं ।) पेचुली । इति त्रिकाण्डशेषः ॥

पेचुली, स्त्री, (पच्यते इति । पच + उलच् । अत इत्त्वं गौरादित्वात् ङीष् ।) शाकभेदः । कचु इति ख्यातः । यथा,—
"कञ्चुकं पेचुली पेचु नाडीचो विश्वरोचनः ॥"
इति त्रिकाण्डशेषः ॥

पेटः, पुं, (पेटतीति । पिट + अच् ।) प्रसृतः । इति राजनिर्घण्टः ॥ पेटके, स्त्री । इत्यमरः । २ । १० । ३० ॥

पेटकः, पुं, (पेटतीति । पिट + ण्वुल् ।) वेणु-वेत्रादिमयवस्तुरक्षणाधारः । पेटारी इति पेटी इति पेड़ा इति च ख्यातः । तत्पर्य्यायः । पिटकः २ पेड़ा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ अन्त्यौ स्वल्पपेटिकायाम् । परौ महापेटिकायामिति स्वामी ॥ समूहः । इति मेदिनी । के, ११७ ॥

पेटाकः, पुं, (पेटक + पृषोदरादित्वात् साधुः ।) पेटकः । इति भरताद्विरूपकोषः ॥

पेटिका, स्त्री, (पिटतीति । पिट + ण्वुल् । कापि अत इत्त्वम् ।) द्रव्यविशेषः । पेटारि इति भाषा । तत्पर्य्यायः । कुवेराक्षी २ कुलिङ्गाक्षी ३ लम्बटम्भिका ४ । इति रत्नमाला ॥ (यथा,—
"पेटिकामलवेपाश्च योनिभिन्ना प्रशाम्यति ॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥)

पेटी, त्रि, (पेट + गौरादित्वात् ङीष् ।) पेटकः । इत्यमरः । २ । १० । ३० ॥

पेड़ा, स्त्री, (पेटा । पृषोदरादित्वात् साधुः ।) मञ्जूषा । महापेटिका । इत्यमरभरतौ ॥

पेल, ऋ गैधे । गतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-क्षेपे अक०-सेट् ।) ऋ, अपिपेलत् । पेलति । इति दुर्गादासः ॥

पेत्वं, क्ली, (पीयते इति । पा पाने + "अम्येभ्यो ऽपि दृश्यन्ते ।" उणा० ४ । १०५ । इति त्वन् ।) अमृतम् । घृतम् । इत्युणादिकोषः ॥ (पुं, पतनशीलः पशुः । छागः । यथा, वाजसनेयसंहितायाम् । २९ । ५८ ।
"आग्नेयो धावन्द्वः छाग एकादशिवयातु पेत्वः ॥"
"पेत्वः पतनशीलो मेषवान् पशुः ॥" इति तद्भाष्ये महीधरः ॥ तथाच ऋग्वेदे । ७ । १८ । १७ ।
"सिंहं चित् पेत्वेना जघान ।"
"पेत्वेन छागेन जघान घातयामास ।" इति तद्भाष्ये सायनः ।)

पेयं, क्ली, (पीयते यदिति । पा पाने + "अचो यत्" । "ईद्यति ।" ६ । ४ । ६५ । इति अत ईत् ततो गुणः ।) जलम् । इति मेदिनी । ये, ३९ ॥ दुग्धम् । इति शब्दचन्द्रिका । चतुर्विधाहारान्तर्गताहारविशेषः । यथा,—
"भोज्यं पेयं तथा चूष्यं लेह्यं खाद्यञ्च चर्व्वणम् ।
निष्पेयश्चेव भक्ष्यं खाद्यमष्टविधं स्मृतम् ॥"
इति राजनिर्घण्टः ।
पातव्ये, त्रि । इति मेदिनी । ये, ३९ ॥ (यथा, महाभारते । १४ । ४४ । १० ।
"सर्व्वेषां भक्ष्यभोज्यानामन्नं परममुच्यते ।
द्रवाणाञ्चैव सर्व्वेषां पेयानामाप उत्तमाः ॥")

पेया, स्त्री, (पीयते इति । पा + यत् । ततष्टाप् ।) सिक्थसमन्वितपेयद्रव्यम् । अस्या गुणाः ।
"पेया स्वेदाग्निजननी लघ्वी चोष्णानुलोमनी ।
क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा ॥"
इति राजवल्लभः ।
मिश्रेया । इति शब्दचन्द्रिका ॥ यवागूः । यव-मण्डम् । इति मेदिनी । ये, ३९ ॥

पेयूषः, पुं, क्ली, (पीय पाने + "पीयेरूषन् ।" उणा० ४ । ७६ । इति ऊषन् बहुलवचनात् गुणः ।) अभिनवं पयः । इत्यमरः । नव-प्रसूतायाः गोः सप्तदिनाभ्यन्तरीणदुग्धम् । यथा,
"आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते ।"
इति हारावली ।
"पीयते पेयूषः पीङ् पाने नाम्नीति वृषः अई-न्तान्तः क्लीवञ्च । पीयूषश्च पीयूषेषूपि पं सप्तदीर्घादयोपीति शब्दार्णवः ।" इति तट्टीकायां भरतः ॥ (यथा, मनुः । ५ । ६ ।
"क्षीरञ्च गव्यं पेयूषं प्रयत्नेन विवर्ज्जयेत् ।")
अमृतम् । अभिनवघृतम् । इत्युणादिकोषः ।

पेरुः, पुं, (पीयते रसानिति । पीङ् पाने + "मि-पीभ्यां रुः ।" उणा० ४ । १०१ । इति रुः ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥ समुद्रः । इति त्रिकाण्डशेषः ॥ (त्रि, रक्षकः । यथा, ऋग्वेदे । ८ । ७४ । ४ ।
"नरो हितमवमेहन्ति पेरवः ।"
"नरो नेतारः पेरवः । पा रक्षणे । पालयितारमिति यावत् ।" इति तद्भाष्ये सायनः ॥ पूरकः । यथा, ऋग्वेदे । ५ । ८३ । २ ।
"प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ।")

पेरोजं, क्ली, प्रस्तरविशेषः । पीरोजा इति भाषा । तत्पर्य्यायः । हरिताश्मकम् २ पेरुजं ३ । तद्विधम् । भस्माङ्गं हरितं । अस्य गुणाः ।
"पेरुजं शुकवर्णं स्यात् मधुरं दीपनं परम् ।
कामदं भवमनेव संवीर्य्यवर्धनं स्मृतम् ।
तत् सर्व्वं नाशयेत् श्रीमान् शूलभूतादिनाशनम् ॥"

पाठान्तरं यथा,—
"पिच्छं तुकषायं स्यान्मधुरं दीपनं हयोः ।
स्थावरादिविषघ्नं स्याद्रतिदत्वापरं प्रदम् ॥
शोताङ्गं नाशयेच्छीघ्रं मूलं तिमिरभूतजम् ॥"
इति राजनिर्घण्टः ।

पेल, ऋ चाले । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-चाले अक०-गतौ सक०-सेट् ।) ऋ, अपिपेलत् पिपेलतुः । चालः कम्पः । इति दुर्गादासः ॥

पेलं, क्ली, (पेलति सदा चलतीति । पेल + अच् ।) अण्डकोषः । इति हेमचन्द्रः । ३ । २७५ ॥

पेलवं, त्रि, (पेलं कम्पनं वातीति । वा + कः ।) विरलम् । अत्र वावकाशत्वं प्रकारः । इत्यमरभरतौ ॥ कृशः । इति हेमचन्द्रः । ६ । ११२ ॥ कोमलम् । इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । ५ । ४ ।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥")

पेव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अपिपेवत् । ङ, पेवते । इति दुर्गादासः ॥

पेशलः, त्रि, (पिश अवयवे + भावे घञ् । पेशं लातीति । ला + कः । यद्वा, पेशोऽस्यास्तीति । सिध्मादित्वात् लच् ।) चारुः । (यथा, देवीभागवते । ५ । ८ । ५८ ।
"महिषस्य वचः श्रुत्वा पेशलं मन्त्रिसत्तमः ।
जगाम तरसा कामं गजाश्वरथसंयुतः ॥")
सुन्दरः । (यथा, रघुः । ८ । ४० ।
"युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम् ॥")
दक्षः । चतुरः । कोमलः । इत्यमरभरतौ ॥ (यथा, मुकुन्दमालायाम् । २९ ।
"इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धि जर्जरम् ।
किमौषधैः क्लिश्यसि मूढ दुर्मते ।
निरामयं कृष्णरसायनं पिब ॥")
धूर्तः । इति शब्दरत्नावली ॥

पेशस्कृत्, पुं, (पेशो रूपान्तरं करोतीति । पेशस् + कृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमः । अनेन यद्गृहीतस्य कीटस्य रूपान्तरं भवति इत्यतोऽस्य तथात्वम् ।) कीटविशेषः । कुमिरके इति भाषा । यथा,—
"कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः ।
याति तत्सात्मतां राजन् पूर्व्वरूपमसंत्यजन् ॥"
इति श्रीभागवते । ११ । ९ । २३ ॥

पेशि, पुं, (पिश + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११८ । इति इन् ।) वज्रकोटिः । इत्युणादिकोषः ॥ अण्डे मांसपिण्डे च स्त्री । इति संक्षिप्तसारे हरन्मादः ॥

पेशी, स्त्री, (पिश + इन् । वा ङीष् ।) अण्डम् । इत्यमरः । ३ । ३ । १७ ॥ (गर्भवेष्टनचर्म्मणकोषः । यथा, सुश्रुते । १ । २९ ।
"धमनीमांसास्थिसन्धिवस्तिपेशीप्रभृतिषु वा शरीरप्रदेशेषु ॥") सुपक्वकलिका । (यथा, सुश्रुते उत्तरतन्त्रे । ४० अध्याये ।
"मधुकं बिल्वपेश्यश्च शर्करामधुसंयुताः ।
अतीसारं निहन्युश्च शालीषष्टिकयोः कणाः ॥")
मांसी । खड्गपिधानकम् । मांसपिण्डी । इति मेदिनी । षे, १२ ॥ (यथा, महाभारते । १ । ११५ । १९ ।
"तां स मांसमयीं पेशीं ददर्श जगतां वरः ॥"
(अस्याः संख्याव्याख्यानादयो यथा,—
"पञ्च पेशीशतानि भवन्ति । तासां चत्वारिशतानि शाखासु । कोष्ठे षट्षष्टिः । ग्रीवां प्रत्यूर्द्धं चतुस्त्रिंशत् । एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश । दश प्रपदे । पादोपरि कूर्च्चसन्निविष्टास्तावत्य एव । दश गुल्फतलयोः । गुल्फजान्वन्तरे विंशतिः । पञ्च जानुनि । विंशतिरूर्वौ । दश वङ्क्षणे । शतमेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थि बाहू च व्याख्यातौ । तिस्रः पायौ । एका मेढ्रे । सेवन्यां चापरा । द्वे वृषणयोः । स्फिचोः पञ्च पञ्च । द्वे बस्तिशिरसि । पञ्चोदरे । नाभ्यामेका । पृष्ठोर्द्ध्वसन्निविष्टाः पञ्च पञ्च दीर्घाः । षट् पार्श्वयोः । दश वक्षसि । अक्षकांसौ प्रति समन्तात् सप्त । द्वे हृदयामाशययोः । षट् यकृत्प्लीहोण्डुकेषु । ग्रीवायाञ्चतस्रः । अष्टौ हन्वोः । एकैका काकलकगलयोः । द्वे तालुनि । एका जिह्वायाम् । ओष्ठयोर्द्वे । घोणायां द्वे । द्वे नेत्रयोः । गण्डयोश्चतस्रः । कर्णयोर्द्वे । चतस्रो ललाटे । एका शिरसीत्येवमेतानि पञ्च पेशीशतानि ।
सिरास्नाय्वस्थिपर्व्वाणि सन्धयश्च शरीरिणाम् ।
पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः ॥
स्त्रीणान्तु विंशतिरधिकाः । दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः । अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते बाह्ये च वृत्ते द्वे । गर्भच्छिद्रसंश्रितास्तिस्रः । शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव । पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति । तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिसिरास्नायुप्रच्छादका यथाप्रदेशं स्वभावत एव भवन्ति । भवति चात्र ।
पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षणमुष्कजाः ।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ।)
नदीभेदः । पिशाचीविशेषः । राक्षसीविशेषः । इति शब्दरत्नावली । (वाद्यविशेषः । यथा, महाभारते । ६ । ४५ । ३ ।
"तथा भेर्य्यश्च पेश्यश्च क्रकचा गोविषाणिकाः ।
बहुशैलाश्च सहसा स शब्दस्तुमुलोऽभवत् ॥")

पेषणं, क्ली, पिषधातोर्भावे ल्युट्प्रत्ययनिष्पन्नम् । चूर्णनम् । (यथा, मार्कण्डेये । १३ । ८० ।
"अयं हतघ्नो निःपातामरकारौ सुदुर्मतिः ।
तप्तकुम्भे निपतति ततो यास्यति पेषणम् ॥")
खलम् । शतगुणा । इति शब्दचन्द्रिका ॥ तेकांटाविद्य इति भाषा ॥

पेषणिः, पेषणी, स्त्री, (पिष्यतेऽनयेति । पिष + करणे अणिः । वा ङीष् ।) पेषणशिला । शिल इति भाषा । तत्पर्य्यायः । पेषणी २ पट्टः ३ दृशाश्मा ४ दृढकच्छपः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ३ । ६८ ।
"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥")

पेषलः, त्रि, (पेषोऽस्यास्तीति । पेष + सिध्मादित्वात् लच् ।) पेशलः । इत्यमरटीकायां भरतरमानाथौ ॥

पेषाकः, पुं, (पिष + आकन् ।) पेषणिः । इत्युणादिकोषः ॥

पेस, ऋ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अपिपेसत् पिपेसतुः । इति दुर्गादासः ॥

पेसलः, त्रि, (पेशलः । पृषोदरादित्वात् शस्य सत्वम् ।) पेशलः । इत्यमरटीकायां भरतः ॥

पै, शोषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) पायति धान्यमातपेन । इति दुर्गादासः ॥

पैशुनः, पुं, (पिशुने साधुः । अण् ।) कर्णः । इति हेमचन्द्रः । ३ । २३० ॥

पैठरं, त्रि, (पिठरे संस्कृतं पक्वम् । पिठर + अण् ।) स्थालीपक्वमांसादि । इत्यमरः । २ । ९ । ४५ ॥ (यथा, गो० रामायणे । २ । १०० । ६२ ।
"प्रतप्तैः पैठरैश्चैव मार्गमायूरतैत्तिरैः ॥")

पैठीनसिः, पुं, मुनिविशेषः । स च स्मृतिशास्त्रयोः कारकः । इति पुराणम् ॥

पैच्छिन्यं, क्ली, (पिच्छं परपिण्डं भक्षयत्यस्यास्तीति । पिच्छ + इन् । ततः ष्यञ् ।) भैक्षजीविका । इति त्रिकाण्डशेषः ॥

पैतामहं, त्रि, (पितामहस्येदम् । पितामह + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) पितामहसम्बन्धिधनादि । यथा, कात्यायनः ।
"पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्ज्जितम् ।
दायादानां विभागेषु सर्व्वमेतद्विभज्यते ॥"
बृहस्पतिः ।
"पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्ज्जितम् ।
विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः
स्मृतम् ॥"
इति दायभागः ॥

पैतृकं, त्रि, (पितुरागतं पितुरिदं वेति । पितृ + ठञ् ।) पितृसम्बन्धि । इति शब्दमाला ॥ यथा, मनुः ।
"ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥"
महर्षिः ।
"पैतृकन्तु यदा द्रव्यमनवाप्तमवाप्नुयात् ।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम् ॥"

पैठीनसिः ।
"पैतृके विभज्यमाने दायादौ समो विभागः ।"
नारदः ।
"शौर्य्यभार्य्याधने हित्वा यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ।"
इति दायभागः ॥

पैतृकभूमिः, स्त्री, (पैतृकी पितृसम्बन्धिनी भूमिः ।) पितृसम्बन्धिस्थानम् । तस्या माहात्म्यं यथा,—
श्रीभगवानुवाच ।
"भवांश्च यादवैः सार्द्धं प्रविश द्वारकापुरीम् ।
मत्पित्रा मातृभिः सार्द्धं मातृभिश्च सखे द्रुतम् ॥
उद्धव उवाच ।
वासुदेव न यास्यामि भूमिं तां पैतृकीं पुनः ।
सर्व्वतीर्थपरां शुद्धां दैवे कर्म्मणि पैतृके ॥
मातृकं भूमिदेशं च पितृणां निर्म्मितं तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म निषिध्यते ॥
पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम् ।
किञ्चिन्नृपस्य दद्यैव सम्पूर्णं पैतृके स्मृते ॥
पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा ।
दुर्लभा पैतृकी भूमिः पितुर्मातुर्गरीयसी ॥
तत्र प्रयत्य यविशत् दैवे कर्म्मणि पैतृके ।
कीर्त्तेश्च मही दानं यद्दत्तमप्युदकम् ॥
म्रियते पैतृकीभूम्यां तीर्थतुल्यफलं लभेत् ।
गङ्गाजलसमं पूतं पितृस्थानोदकं स्मरे ॥
तत्र स्नात्वा नरो पूतो गङ्गास्नानफलं लभेत् ।
पितॄणां तर्पणं तत्र पवित्रं देवपूजनम् ॥
पैतृकी जन्मभूमिश्चेत् फलं तद्द्विगुणं लभेत् ।
पैतृकीभूमितुल्या च दानभूमिः धनाम्यपि ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥

पैतृष्वसेयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति । पितृष्वसृ+"ढकि लोपः ।" ४ । १ । १३३ । इति ज्ञापकत्वात् ढक् अन्त्यलोपश्च ।) पितृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ । पिसतुतभाइ इति भाषा । (स्त्रियां ङीप् । पितृभगिनीपुत्री । यथा, मनुः । ११ । १७२ ।
"पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणञ्चरेत् ॥")

पैतृष्वस्रीयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति । "पितृष्वसुश्छण् ।" ४ । १ । १३२ । इति छण् ।) पितृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ । पिसतुत भाइ इति भाषा ।

पैत्तः, त्रि, (पित्तात् आगतं पित्तस्य प्रकोपनं वेति । पित्त+अण् ।) पित्तव्याधिः । इति राजनिर्घण्टः । (यथा, माधवनिदाने शुक्राधिकारे ।
"कट्वम्लोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताशसेवा ।
व्यायामभिघातो वधिरञ्च दुष्टं
पैत्तस्य शुक्रस्य निमित्तमुक्तम् ॥")

पैत्तिकः, त्रि, (पित्तेन निर्वृत्त इति । पित्त+ठञ् ।) पित्तव्याधिः । इति राजनिर्घण्टः । (यथा, चरके चिकित्सास्थाने १९ अध्याये ।
"सततं कासमानश्च ज्योतींषीव च पश्यति ।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके ॥")

पैत्रं, क्ली, (पितुरिदमिति । पितृ+अण्) पितृतीर्थम् । अङ्गुष्ठतर्ज्जन्योर्मध्यम् । इत्यमरः । २ । ७ । ५१ ॥ पितृसम्बन्धिनि, त्रि । (यथा, महाभारते । ७ । १८८ । ७१ ।
"ऐन्द्रं याम्यं वारुणं वैष्णवाख्यं
पैत्रं त्वाष्ट्रं कर्म्म सौम्यञ्च शुभ्रम् ।
रूपं ज्योतिः शब्दमाकाशवायुः
स्पर्शः स्वाद्यं सलिलं गन्ध उर्व्वी ॥")

पैत्राहोरात्रः, पुं, (पैत्रः अहोरात्रः ।) पितृलोकस्य दिवारात्रिः । स तु मनुष्यमाने मासेनैव भवति । यथा —
"मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ।"
इत्यमरः । १ । ४ । २१ ॥

पैलः, पुं, (पीलाया अपत्यमिति । पीला+"पीलाया वा ।" ४ । १ । ११८ । इति अण् ।) मुनिविशेषः । स च ऋग्वेदी यथा,—
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥
अथर्व्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ।
इतिहासपुराणानां पिता मे रोमहर्षणः ॥"
इति श्रीभागवते १ स्कन्धे ४ अध्यायः ॥

पैशाचः, पुं, (पिशाचस्यायमिति । पिशाच+अण् ।) अष्टप्रकारविवाहान्तर्गताष्टमविवाहः । यथा याज्ञवल्क्यः । "पैशाचः कन्यका छलात् ।" छलमाह मनुः । ३ । ३४ ।
"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥"
इत्युद्वाहतत्त्वम् ।
पिशाचसम्बन्धिनि, त्रि । (राजयक्ष्मान्तर्गतकायविशेषः । तल्लक्षणं यथा,—
"उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा ।
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचकायलक्षणम् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

पैशुन्यं, क्ली, (पिशुनस्य भावः । पिशुन+ब्राह्मणादित्वात् ष्यञ् ।) पिशुनता । खलता । तच्च दशविधपापान्तर्गतवाङ्मयपापविशेषः । इति तिथितत्त्वम् ॥ यथा,—
"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥")
इति मनौ । ७ । ४८ ॥
अस्य विवरणं पातकशब्दे द्रष्टव्यम् ॥

पैष्टः, त्रि, (पिष्टस्येदमिति । पिष्ट+अण् ।) पिष्टमयी । यथा,—
"यद्यपरस्तः पूत्रा पैष्टमपि वदा पशुम् ।
अनीन्धनयोमान्तरात्कुलोऽपि विधीयते ॥"
इति तिथ्यादितत्त्वम् ॥

पैष्टिकं, क्ली, (पिष्ट+ठञ् ।) पिष्टानां समूहः । इति भानुदीक्षितकृतामरटीकायां भरतः ॥ मद्यविशेषः । यथा । तच्चमाध्वीकादिरूपनि मद्याने ज्ञेयं पैष्टिकादि मद्य मद्यं वैद्यशास्त्रोक्तमेव ॥ इति स्मृतिचन्द्रिका ॥ (यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"पानकाः शैशवजाताः सम्भुक्ता कषायकाः ।
गौड्याः पैष्टिका भक्ताः कषायमण्डा-
भवाः ।")

पैष्टी, स्त्री, (पिष्टेन निर्वृत्तेति । पिष्ट+अण्+ङीप् ।) विविधधान्यविकारजा मदिरा । तद्गुणाः ।
"पैष्टी कट्वम्लोष्णा स्वादोत्कटोष्णमधुरा ।
वातघ्नी कफकारी पित्तजनी च वा ।"
इति राजनिर्घण्टः ।
(यथा च कातीये प्रथमे स्थाने एकादशोऽध्याये ।
"गौडी माध्वी तथा पैष्टी विज्ञेया त्रिविधा-
सुरा ।
इति चतुर्विधा ज्ञेया सुरापाणादयोषका ।"
"पैष्टी मन्दीपनी रूक्षा कफहृदग्निवर्धिनी ।
पित्तला पाण्डुरोगार्च्चा कारिणी बहुधा
मता ।")

पोगण्डः, पुं, (पुनातीति । पू+डिच् । पोः गण्डो यस्य ।) दशवर्षीयबालकः । यथा,—
"रोगो डष्टस्तु पोगण्डः कुर्य्यात् पैत्रे स्मरः ।"
इति प्रायश्चित्ततत्त्वे ब्रह्मपुराणम् ।

पोगण्डः, त्रि, (पोः गण्ड एकदेशोऽस्य ।) अपोगण्डः । स्वभावतो न्यूनाधिकाङ्गः । न्यूनाङ्गुलीकोऽधिकाङ्गुलीकादिश्च । यथा । पोगण्डो विकलाङ्गः स्यादिति वाचस्पतिः ॥ पोगण्डो विकलाङ्गकः । इति शब्दकोषः । इत्यमरटीकायां भरतः ॥

पोटः, पुं, (पुटत्यस्मिन्निति । पुट संश्लेषे+आधारे घञ् ।) गेहभूमिः । इति जटाधरः । (पुट संश्लेषे+भावे घञ् ।) संश्लेषः । इति पोटल-शब्दटीकायां भरतः ॥

पोटगलः, पुं, (पोटेन संश्लेषेण गलतीति । गल+अच् ।) नलः । काशः । इत्यमरः । २ । ४ । १६२ (अस्य पर्य्यायो यथा,—
"पोटगलो इक्षुकाण्डः काशेक्षुः च च झटः ।"
इति वैद्यकरत्नमालायाम् ॥)
मत्स्यः । इति मेदिनी । ले, ११० ॥ (अजगरान्तर्गतः सर्पभेदः । "दर्व्विकर मण्डली राजिमन्तो वा बालाः पोटगलाः ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

पोटलिका, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली+कः । ततः स्वार्थे कन् टाप् अत इत्वञ्च ।) ग्रन्थिबन्धादि । इति केचित् । पुंटुलि इति भाषा ॥

पोटा, स्त्री, (पुटति ओष्ठयुगमस्यां संश्लिष्यतीति । पुट+अच् । टाप् च ।) स्त्रीपुंसलक्षणा । इत्यमरः । २ । ६ । १६ । स्त्रीपुंसलक्षणं श्मश्रुयुक्ताधिकलोमशा वा । इति भरतः ॥

पोटिकः, पुं, (पोटः संश्लेषोऽस्त्यस्येति ठन् ।) विस्फोटकः । इति केचित् ॥ (विस्फोटकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

पोट्टली, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली + डः । पृषोदरादित्वात् साधुः । ङीप् ।) पोट्टलिका । वस्त्रबद्धद्रव्यम् । पुँटुलि इति भाषा । यथा,—
"शुद्ध्यर्थं त्रिफलाक्वाथे गुडूच्याः क्वाथ एव वा ।
दोलायन्त्रे पुरः पाच्यः पोट्टल्या वस्त्रबद्धया ॥"
इति वैद्यकम् ॥

पोडुः, पुं, (पुडतीति । पुड + उन् ।) कपालाश्रितत्तम् । इति राजनिर्घण्टः ॥

पोतः, पुं, स्त्री, (पुनातीति । पू + "हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् ।" उणा० ३ । ८६ । इति तन् ।) शिशुः । इत्यमरः । २ । ५ । ३८ ॥ (यथा, कथासरित्सागरे । १२ । १२३ ।
"तत्रस्थात् स्वर्णमूलाख्याद् गिरेः संप्रेष्य राघवान् ।
आनाययत् पक्षिपोतं गरुडान्वयसम्भवम् ॥")

पोतः, पुं (पुनाति इति । पू + "इसीति ।" उणा० ३ । ८६ । इति तन् ।) वहित्रम् । जलयानम् । पोत इति भाषा । वस्त्रम् । इति मेदिनी । ते, ३० ॥ दशवर्षीयहस्ती । इति हेमचन्द्रः ॥ समुद्रयानम् । जाहाज इति भाषा ॥ (यथा, देवीभागवते । १ । ३ । ४२ ।
"सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवसमुत्तरणाय कामम् ।
सम्प्राप्य वाचकमहो न शृणोति मूढः
सो वञ्चितोऽत्र विधिना सुतरं पुराणम् ॥")
यथा,—
"समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
युक्तेन सह संप्राप्तो महार्णं लवणार्णवम् ।
पोतारूढास्ततः सर्वे पोतवाहैरुपासिताः ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन निर्भयाः ॥"
इति वाराहे गोकर्णमाहात्म्याध्यायः ॥

पोतकी, स्त्री, (पोत इवेति । पोत + इवार्थे कन् । स्त्रियां ङीप् ।) पूतिका । इति शब्दमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—
"पोतक्युपोदिका सा तु मालवाऽमृतवल्लरी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥
अकण्ठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत् पथ्या बृंहणी तृप्तिकारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ग्रामाधमनो । इति राजनिर्घण्टः ॥

पोतजः, पुं, (पोतः सन् न तु जरायादिरूप इति भावः । जायते इति । जन + डः ।) कुञ्जरादिः । यथा, हेमचन्द्रः । ४ । ४२१ ।
"कलभाः पञ्चिसर्प्पाद्याः पोतजाः कुञ्जरादयः ॥"

पोतवणिक्, पुं, (पोतेन वणिक् ।) वाहित्रेण वाणिज्यकर्त्ता । नौवाणिज्यकरः । तत्पर्य्यायः । सांयात्रिकः २ । इत्यमरः । १ । १० । १२ । समुद्रयानपारी ३ । इति जटाधरः ॥ नौवाणिज्यकरः ४ । इति शब्दरत्नावली ॥

पोतरक्षः, पुं (पोतं रक्षतीति । रक्ष + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) केनिपातकः । इति शब्दमाला ॥ हालि इति भाषा ॥

पोतलकप्रियः, पुं, (पोतलकः पर्व्वतविशेषः प्रियोऽस्य ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

पोतवाहः, पुं, (पोतं नावं वहतीति । वह + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) वहित्रवाहकः । दाँड़ि इति भाषा । तत्पर्य्यायः । नियामकः २ । इत्यमरः । १ । १० । १२ ॥

पोता, [ऋ] पुं, (पुनातीति । पू + "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन निपात्यते ।) विष्णुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ऋत्विक् । इति भूरिप्रयोगः ॥ (यथा, ऋग्वेदे । ४ । ९ । ३ ।
"स सद्म परि णीयते होता मन्द्रो दिविष्टिषु ।
उत पोता नि षीदति ॥")

पोताच्छादनं, क्ली, (पोतमिवाच्छादयतीति । आ + छादि + ल्युः ।) वस्त्रकुट्टिमम् । इति हारावली ॥

पोताधानं, क्ली, (आधीयतेऽत्रेति । ल्युट् । आधानम् । पोतानां क्षुद्रमत्स्यानामाधानम् ।) क्षुद्राण्डमत्स्यसंघातः । इत्यमरः ।१।१०।१९॥ पोना इति भाषा । अस्य गुणाः । सुस्निग्धत्वम् । लघुत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

पोतिका, स्त्री, (पोतोऽस्त्यस्या इति । पोत + ठन् । यद्वा, पूतिका पृषोदरादित्वात् साधुः ।) पूतिका । इत्यमरटीकायां भरतः ॥ शतपुष्पा ॥ सूक्ष्मपोती । इति राजनिर्घण्टः ॥

पोतासः, पुं, (पोतेभ्यः शिशुभ्यः अस्यति क्षिपति इति । अस + घञ् ।) कर्पूरविशेषः । इति राजनिर्घण्टः ॥

पोत्रं, क्ली, (पूयतेऽनेनेति । पू + "हलसूकरयोः पुवः ।" ३ । २ । १८३ । इति ष्ट्रन् ।) सूकरमुखाग्रम् । लाङ्गलमुखाग्रम् । वस्त्रम् । इति मेदिनी । रे, ११ ॥ वहित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पोतृनामर्त्विजः पात्रभेदः । यथा, ऋग्वेदे । १ । १५ । २ ।
"मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन ।
यूयं हि ष्ठा सुदानवः ॥" "पोत्रात् पोतृनामकस्य ऋत्विजः पात्रात् सोमं पिबत ।" इति तद्भाष्ये सायणः ॥)

पोत्रायुधः, पुं, (पोत्रं तन्मुखाग्रमेव आयुधं यस्य ।) सूकरः । इति राजनिर्घण्टः ॥

पोत्रिरथा, स्त्री, (पोत्री सूकरः रथ इव गतिसाधकोऽस्याः ।) वित्रशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

पोत्री, [न्] पुं, (पोत्रमस्यास्तीति । पोत्र + इनिः ।) सूकरः । इत्यमरः । २ । ५ । २ ॥ पोत्रविशिष्टे, त्रि ॥

पोलिन्दः, पुं, (पोतस्य अलिन्द इवेति । पृषोदरादित्वात् साधुः ।) नौकावयवभेदः । तत्पर्य्यायः । मादारकः २ । इति त्रिकाण्डशेषः ॥

पोलिका, स्त्री, (पोली + स्वार्थे कन् टाप् । पूर्व्वह्रस्वश्च ।) पिष्टकविशेषः । पातुया रोटी इति हिन्दी भाषा । यथा,—
"कुर्य्यात् समितयातीव तन्वी पर्प्पटिका ततः ।
स्वेदयेत्तप्तके ताञ्च पोलिकां तां वदन्त्यधाः ॥
तां खादेत् सितकायुक्तां तस्या मण्डकवद्गुणाः ।
तप्तकं तावा इति लोके ।" इति भावप्रकाशः ॥
तत्पर्य्यायः । पूलिका २ पौलिः ३ पूपिका ४ पूपका ५ । इति हेमचन्द्रः ॥

पोली, स्त्री, (पोलति महत्त्वं गच्छतीति । पुल + ज्वलादित्वात् णः । ङीष् ।) पिष्टकविशेषः । तत्पर्य्यायः । पूपाली २ चर्पटी ३ । इति त्रिकाण्डशेषः ॥

पोषः, पुं, पोषणम् । पुषधातोर्भावे घञ्प्रत्ययनिष्पन्नः । यथा, भट्टिः ।
"यः सर्व्वदाख्यानपुषत् स्वपोषम् ॥"
(यथा, च भागवते । २ । १० । १० ।
"अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् ।
पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥")

पोषणं, क्ली, (पुष् + ल्युट् ।) पुष्टिः । वृद्धिः । पुषधातोर्भावेऽनट्प्रत्ययनिष्पन्नः ॥ (यथा, मार्कण्डेये । ९८ । ८ ।
"तदहिंसातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्मास्त्विमे प्रोक्ताः शृणुष्वाश्रममाश्रयाः ॥")

पोषयित्नुः, पुं, (पोषयतीति । पुष + णिच् + "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।" उणा० ३ । २९ । इति इत्नुच् ।) कोकिलः । भर्त्ता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पोषणकर्त्तरि, त्रि ॥

पोष्टा, [ऋ] पुं, (पुष्णातीति । पुष + तृच् ।) पूतीकः । इति शब्दचन्द्रिका ॥ कांटाकरञ्ज इति भाषा ॥ पोषणकर्त्तरि, त्रि ॥ (यथा, हरिवंशे । २५ । १० ।
"तामिर्धार्य्यमाणो लोकाः प्रजाश्चैव चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो जगतीपते ॥")

पोष्टवरः, त्रि, पोषकश्रेष्ठः । पोष्टृषु वर इति सप्तमी तत्पुरुषसमासः ॥

पोष्यः, त्रि, (पुष्यते इति । पुष + ण्यत् ।) पोषणीयः । पोषितव्यः । पुषधातोः कर्म्मणि यत्प्रत्ययनिष्पन्नः ॥ (यथा, रामायणे चतुर्दशपटले ।
"नन्दगोपस्य देवेशि । हन्यस्तु सर्व्वदा प्रियः ।
आत्मना जायते यस्तु आत्मजः स उदाहृतः ।
पोष्यः पुत्र इति ख्यातो नन्दस्य वरवर्णिनि ॥")

पोष्यपुत्रः, पुं, (पोष्यः पुत्रः । पोषणेनैव पुत्रनाम इत्यर्थः ।) पालनादिना सुतस्थानः । यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे १३ अध्याये ।
"अनुना सलिलाराव रक्षां सर्वोपदुःखकः ।
तस्मात् सन्तुष्टाः प्रमुदा कार्त्तिकपोषिताः कौतुकात् ॥"

अथ तस्य व्यवस्था।

"तत्राह मनुः।

'अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च॥'

अत्रिश्च।

'अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः॥'

शौनकः।

'अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च॥'

इति। तेन पुत्रोत्पत्त्या।

'प्रजैस्तु जायमानेन पुत्रो भवति मानवः।
पितॄणामनृणश्चैव स तस्मात् सर्व्वमर्हति॥'

इति मनुवचनात् गम्यते ऋणपरिहारेऽपि तत्पुत्र-मरणे पिण्डोदकार्थं पुनः पुत्रकरणमावश्यकम्। अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम्। तयोरपि पिण्डदातृत्ववंशकरत्वाविशेषात्। अन्यथा सत्यपि पौत्रे मृतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तेः। पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते॥ ●॥ स्त्रिया भर्त्तुरनुज्ञया तदधिकारः। यथाह वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्राऽनुज्ञानाद्भर्त्तुः।' इति॥ ●॥ प्रतिनिधिरिति च क्षेत्रजादि-दैकादशविधः। यथाह मनुः।

'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥'

बृहस्पतिः।

'पुत्राश्चयोदश प्रोक्ता मनुना येऽनुपूर्व्वशः।
सन्तानकारणं तेषामौरसः पुत्रिका तथा॥
आज्यं विना यथा तैलं सद्भिः प्रतिनिधीकृतम्।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना॥'

तत्रापि कलौ न सर्व्वेषामभ्युपगमनम्।

'अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः।
न शक्यास्तेऽधुना कर्त्तुं शक्तिहीनतया नरैः॥'

इति वचनात्॥

'दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः।'

इत्याद्यभिधाय।

'इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः।'

इति दत्तकेतरप्रतिनिधिनिषेधात्॥ ●॥ अतो दत्तकविधिर्विविच्यते। तत्र शौनकः।

'ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्॥'

सपिण्डेष्विति सामान्यवचनात् समानासमानगोत्रेष्वित्यर्थः। तथा च सपिण्डाभावेऽसपिण्डः समानगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह दाक्षः।

'सपिण्डापत्यकञ्चैव सगोत्रजमथापि वा।
अनुत्पन्ने द्विजो यस्मात् पुत्रत्वे परिकल्पयेत्॥
समानगोत्रजाभावे पालयेदन्यगोत्रजम्।
दौहित्रं भागिनेयञ्च मातृष्वसृसुतं विना॥' इति

अन्यत्र तु न कारयेदिति शाब्दान्तरित-क्षत्रियादिरसमानजातीयो दत्तको नार्होऽस्ति। तदाह मनुः।

'माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः॥'

आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयम्। यत्तमाह वृद्धयाज्ञवल्क्यः।

'सजातीयः सुतो ग्राह्यः पिण्डदाता स ऋक्थभाक्।
तदभावे विजातीयो वंशमात्रकरः स्मृतः॥'

ग्रासाच्छादनमात्रन्तु स लभेत तदृक्थिन इति। दौहित्रं भागिनेयञ्चेति दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः। तथा च शौनकः।

'क्षत्रियाणां स्वजातौ च गुरुगोत्रसमेऽपि वा।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु॥
सर्व्वेषामेव वर्णानां जातिष्वेव न चान्यतः।
दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्॥'

जातिष्वेव न चान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः। अन्यथा प्रागुक्तकात्यायनविरोधः स्यात्॥ ●॥ तत्रापि सन्निहितसपिण्डेषु सति भ्रातृपुत्रे स एव पुत्रीकार्य्य इत्याह मनुः।

'सर्व्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्।
सर्व्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥'

बृहस्पतिः।

"यद्येकजाता बहवो भ्रातरश्च सहोदराः।
एकस्यापि सुते जाते सर्व्वे ते पुत्रिणः स्मृताः॥'

इति। अत्र वचनद्वयेऽपि भ्रातृसुते च पुत्र-प्रतिनिधितया कथञ्चित् सम्भवत्यन्यो न प्रतिनिधिः कार्य्य इत्यवगम्यते॥ ●॥ भर्त्तुर्वंशमन्तरेण चास्या वंशान्तराभावेन तस्यैव स्वर्वंशकरत्व-चित् यतः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकाद्युपादानम्॥ ●॥ केन पुत्रो देय इत्याह शौनकः।

'नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन।
बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः॥'

द्विपुत्रस्यापि पुत्रदाने अपरपुत्रनाशे वंश-विच्छेदसम्भवात् बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमतेः प्रोषिते मृते वा तद-नुज्ञां विनापि। यथा वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः।' इति। अनुमतिश्चाप्रतिषेधेऽपि भवति। अप्रतिषिद्धं परमतमनुमतं भवतीति न्यायात्॥ ●॥ पितृदानमाह याज्ञवल्क्यः।

'दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥'

तथा 'मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वेति॥'

अथ पुत्रपरिग्रहविधिमाह शौनकः।

'शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमम्॥
अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च॥'

उपोष्य इत्यत्र पूर्व्वदिने उपोषणम्। वृद्धगौतमः।

'वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम्।
आचार्य्यं धर्म्मसंयुक्तं वैष्णवं वेदपारगम्॥
मधुपर्केण संपूज्य राजानञ्च द्विजान् सुधीः॥'

राज्ञो विप्रकृतत्वे ग्रामस्वामिनम्। 'बन्धूनाहूय सर्व्वांस्तु ग्रामस्वामिनमेव च॥' इत्यादौ। द्विजानिति बहुत्वं त्रित्वसंख्यासिद्धं कपिञ्जलन्यायात्।

'बर्हिः कुशमयञ्चैव पालाशञ्चेध्ममेव च।
एतानाहृत्य बन्धूंश्च ज्ञातीनाहूय यत्नतः॥
बन्धूनन्नेन सम्भोज्य ब्राह्मणांश्च विशेषतः।
अन्वाधानादिकं तत्र कृत्वाज्यान्तं यथाक्रमम्॥
दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्।
दाने समर्थो दातास्मै यो यज्ञेनेति पञ्चभिः॥'

दद्यादिति शेषः। बन्धून् ज्ञातीनाहूयेत्यत्र बन्धून् ज्ञातीन् सपिण्डान्। तथा।

'देवस्येति त्वमित्यञ्च हस्ताभ्यां परिगृह्य च।
अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिशुमूर्द्धनि॥
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्॥'

पुत्रच्छाया पुत्रसादृश्यं नियोगादिना अयुक्तपादपोष्यत्वमिति यावत्। तथा।

'नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्।
गृहमध्ये समासाद्य चरुं हुत्वा विधानतः॥
यस्त्वाहृदेत्यृचा चैव तुभ्यमग्रे ऋचैकया।
सोमो ददद्वित्येताभिः प्रत्यृचं पञ्चभिस्तथा॥'

वृद्धगौतमः।

'पायसं तत्र साज्यञ्च प्रत्यंशञ्च होमयेत्।
प्रजापते न त्वदेतान्युद्दिश्य प्रजापतिम्॥'

इति।

वशिष्ठः। 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्। सन्देहे चोत्पन्ने दूरबान्धवं शूद्रमिव स्थापयेत्। विज्ञायते ह्येकेन बहूंस्त्रायत इति।' निवेदनं दानात् प्रागेव इति। दूराद्बान्धवमसन्निकृष्टं देशभाषादिप्रकर्षादिना कुलशीलादिसन्देहे सति तदापि निर्णयपर्य्यन्तं न स्वपुत्रं यत् शूद्रवदेवेति। अथवा विचारयेत्। एतद्वचनं विधिरावश्यकः॥ ●॥ तत्र शौनकः।

'दक्षिणां गुरवे दद्याद्यथाशक्ति द्विजोत्तमः।
नृपो राज्यार्द्धमेवाथ वैश्यो वित्तशतत्रयम्॥
शूद्रः सर्व्वस्वमेवापि अशक्तश्चेद्यथावसु॥'

राज्यार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयमन्नम्। अर्द्धराज्योत्पन्नैकवर्षसंग्रहं धनमिति वृद्धीश्वराद्यर्थात्। तत्समसंख्यमाधमर्यं च वित्ता शूद्रः सर्वस्वमत्यन्ताभावात् इति शेषम्।

'प्रतिग्रहं ब्राह्मणानां दीक्षणञ्च राजतम्।
प्रदद्याच्छक्तितो वापि उत्तमादिक्रमक्रमात्॥'

इति वृद्धगौतमवचनात्।

सर्व्वत्रैकवर्षदत्तिमर्थमिति यावत्॥ ●॥ तैत्तिरीयाणां विधिविशेषमाह बौधायनः। अथ पुत्रपरिग्रहविधिं व्याख्यास्यामः। शोणितशुक्रसम्भवो हि पुरुषो मातापितृनिमित्तकः तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः। न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषाम्। न स्त्री दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः। पुत्रं प्रतिग्रहीष्यन् उपकल्पयति द्वे वाससी द्वे कुण्डले अङ्गुलीयकञ्चाचार्य्याय च वेदपारगं कुशमयं बर्हिः पर्णमयमिध्ममिति। अथ बन्धूनाहूय मध्ये राज्ञश्च निवेद्य परिषदि आगारमध्ये

वागालम्भनं उपवेश्य 'पुण्याहं स्वस्ति ऋद्धिमिति वाचयित्वा यद्देवयजनोल्लिखितप्रभृति आग्नेयी-ताभ्यः कृत्वा दातुः समक्षं गत्वा मे पुत्रं देहीति भिक्षेत् ददानीतीतर आह तं परिगृह्णीत धर्म्माय त्वा परिगृह्णामि सन्तत्यै त्वा परिगृह्णामीत्यथैनं वस्त्रकुण्डलादिभिरलङ्कृत्य परिधान-प्रभृत्यग्निमुखं कृत्वा पक्वा जुहोति यस्त्वा हृदा कीरिणा मन्यमान इति पुरोऽनुवाक्यमनूद्य यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोति अथ व्याहृतिभिर्हुत्वा स्विष्टकृत्प्रभृति सिद्ध-माधेनुवरप्रदानात् दक्षिणां दद्यादिति च यद्यपि एते कुण्डले एतथाङ्गुरीयकमेवं त्वौरस उत्-पन्ने तुरीयभागे समावर्त्तीति आह स्म बौधायन इति । ● । एवमुक्तविध्यभावे परिगृहीतस्य तु विवाहोचितधनमात्रभागित्वं न त्वंशभागि-त्वमित्यग्रे वक्ष्यते । तथा च मनुः ।

'गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति ।'

एतेन दातृधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्रिमस्य स्वत्वनिवृत्तिर्द्दातृगोत्रनिवृत्तिश्च भव-तीत्युच्यते । तथा च गोत्रादिनिवृत्तेरेव दर्शनात् संस्कुर्यात् स्वसुतान् पितेति स्मरणात् प्रदत्ता जनकेन सम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिग्रहीत्रा कार्या न पुनर्जनकेन कृतपूर्व्वा अपि निवर्त्तनीयाः । ● । यदि च तत्पूर्व्व-भाविनोऽपि संस्कारा जनकेन न कृतास्तदा बीजगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिग्रहीत्रैव ते समाधेयाः । ● । एवमुप-नयनमात्रकरणेऽपि प्रतिग्रहीतुर्दत्तकपुत्रसिद्धिः ।

'अप्रयातोऽन्यो दत्तः पुत्रश्चेदुपनायितः ।
सगोत्रेण स्वधात्रोक्तविधिना स स्वधाक्सभाक् ।'

इति वशिष्ठस्मरणात् ।

एतत्रायमाभ्युदयिकादिनामाभ्यन्तरवर्त्ति-परिपाटी बोध्यम् । अन्यथा मुख्यकाले अधिकार-योग्यताभावे गौणकाले अनधिकारात्तत्सिद्धि-रिति । ● । अत्र च जनकप्रतिग्रहीत्रोरुभयो-रपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्या-यणत्वेनोभयगोत्रभागित्वं विशेषतो वक्ष्यते ।

'चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ।'

एतच्च चूडाद्या इत्यतद्गुणसंविज्ञानबहु-व्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य विवाहलाभः । ● । तथा पैठीनसिः । अथ दत्तकक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणा-र्षेण येन जातास्तेऽप्यद्व्यामुष्यायणा भवन्तीति । आर्षेण आमुष्येण परि-ग्रहेण । जनकग्रहीत्रोः स्वीकारेण द्व्यामुष्या-यणा भवन्तीत्यर्थः । ● । अथ तत्पुत्रांश-भागनिर्णयः । तत्र पितुः स्वोपार्जितकामा-शेषवपाशे दत्तकस्य पूर्व्वग्रहीतस्यापि स्वौ-रसे नाधिकारः । औरसे पुत्र उत्पन्ने तेषु ज्येष्ठ्यं न विद्यते । इति देवलेन ज्येष्ठ्यप्रतिषेधात् ।

'पिण्डदोंऽशहरश्चैषां पूर्व्वाभावे परः परः ।'

इति याज्ञवल्क्यवचनाच । अन्यत्र सर्व्वमौरस-वत् । तथापि तु विशेषो यथा कात्यायनः ।

'औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन तु ।
प्रकुर्व्यातामितरे कुर्युरेकोद्दिष्टं सुता दश ।'

इतरे दत्तकादयः । ● । अथ दत्तकाशौचादि-निर्णयः । तत्र शुद्धदत्तकस्य तु जनककुले पर-स्परमशौचं नास्त्येव गोत्रनिवृत्त्याशौचनिवृत्ते-रवसिद्धत्वात् । द्व्यामुष्यायणस्य तु उभयत्रैवा-शौचमिति । ब्रह्मपुराणे ।

'दत्तकश्च स्वयं दत्तः कृत्रिमः क्रीत एव च ।
अपविद्धाश्च ये पुत्रा भरणीयाः सदैव ते ।
भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः ।
जनने मरणे चैव त्र्यहाशौचस्य भागिनः ।'

पराशरः ।

'भिन्नगोत्रः सगोत्रो वा क्रीतः संस्कृत्य चेच्छया ।
जनने मरणे तस्य त्र्यहाशौचं विधीयते ।'

तथा ।

'औरसं वर्ज्जयित्वा च सर्व्ववर्णेषु सर्व्वदा ।
क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च ।
अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः ।'

अथ दत्तकविभागः । मनुः ।

'पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ।
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवास्तु षट् ।
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः ।'

बौधायनः ।

'औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ ।
गूढञ्चैवापविद्धञ्च रिक्थभाजः प्रचक्षते ।
कानीनञ्च सहोढञ्च क्रीतं पौनर्भवन्तथा ।
स्वयं दत्तं निषादञ्च गोत्रभाजः प्रचक्षते ।'

औरस पुत्रिकापुत्र-क्षेत्रज-कानीन-गूढोत्पन्ना-पविद्ध-सहोढ पौनर्भव-दत्तक-स्वयमुपागत-कृत्रिम-क्रीतानभिधाय देवलः ।

'एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा याद‍ृच्छिकास्तथा ।
तेषां षड्बन्धुदायादाः पूर्व्वेऽन्ये पितुरेव षट् ।
विशेषं चापि पुत्राणामानुपूर्व्व्याद्विबोधत ।
सर्व्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न विद्यते ।
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ।'

वशिष्ठः । तस्मिंश्चेत् प्रतिगृहीते औरस उत्-पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात् । स प्रतिगृहीतपुत्रः आभ्युदयि-केषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रयुक्तं प्रयमिति शेषः । अतश्च दत्तकपुत्रा-नन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वशि-ष्ठोक्तो दत्तकविषयो ज्ञेयः । तथा देवलकात्या-यनवचने तृतीयांशप्रदत्तविधिरिर्गुणवद्गुण-दत्तकविषयो बोध्यः ।

'उपपन्नो गुणैः सर्व्वैः पुत्रो यस्य हि दत्रिमः ।
स हरेतैव तद्रिक्थं सम्प्राप्तोऽप्यन्यगोत्रतः ।'

इति मनुवचनैकवाक्यत्वात् । गुणैर्जातिविद्या-चारैः । तथा केनापि मुनिना दत्तकस्य बन्धु-दायादत्वमन्येन चादायादत्वमुक्तं तत् गुणवद्-गुणवद्भेदेन समाधेयं एवं दत्तकस्य धनपक्षपाते मुनिभेदेन पूर्व्वापरोक्तिवैषम्यं गुणागुणविवेके-नापास्तं दत्तौरसस्य भागादिधने येनैव भाव-त्वादिना समत्वेन अधिकारित्वं तादृशेनैव समत्वेन तादृशदत्तकस्यापि यथाक्रमानुशुचि-तांशभागित्वमवधेयम् । एवं च निजः पुत्रान्तर-सत्त्वे न सपिण्डदत्तकपौत्रस्यापि दत्तको-चितांशभागित्वम् । तदभावे सर्व्वहरत्वमपीति । न च पौत्रस्य सपिण्डयोग्यांशभागित्वं नियमात् दत्तकपत्नीतुः पितामहौरससत्त्वे तादृशपितृव्य-सुतापेक्षयास्य तद्योग्यत्वात् दत्तकपौत्रः पितृव्यसुतसमेषांशं लभतामिति वाच्यम् । पुत्र-कस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तदाशे समानांश इति वैषम्यात् । ततश्च स्वसमान-रूपस्य पितुर्यादृशांशः प्राप्यस्तादृशस्यैव सपिण्डयोग्यांशतेति यथोक्तमेव साधु । एवं रीतिः प्रपौत्रेऽप्यनुसन्धेयेति । ● ।

'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे ।
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षडिमे पुत्रपांशनाः ।
अभावे पूर्व्वपूर्व्वेषां परान् समभिषेचयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ।'

तथा ।

'न क्षेत्रभागौरसयोस्तु राज्ये राज्येऽभिषेचयेत् ।
पितॄणां श्रेयसे निन्द्यमौरसं तनये सति ।' इति ।

एतावता प्रकरणेनाभिहितो योऽयं क्षेत्रजदत्त-कादीनामौरसेन सह विभागप्रकारः स तु शूद्रस्य न सम्भवति तस्य तु ।

'दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्म्मो व्यवस्थितः ।'

इति मनुवचनेन जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।

'मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनम् ।
अभ्रातृको हरेत् सर्व्वं दुहितॄणां सुतादृते ।'

इति याज्ञवल्क्येन च दासीपुत्रस्यापौरसत्वेन समीकृताभिधानेन पितुरनन्तरं भ्रातृविहित-तस्यैव दौहित्रैश्च सह विभागदर्शनेन च दत्ता-द्युपायित्वं सति पितरि क्षेत्रजदत्तकादीना-मौरसेन समादोऽर्थ तु तदर्हाः अन्यथा तच्च क्षेत्रजदत्तकादीनामौरसचतुर्थांशत्वं तच्च तदौरसाद्धि ... दासी-पुत्रस्यौरसत्वमाहिरत्नमिति सन्देहे ... दत्ते बहुत पित्रादिव्य बक्षेश

दौहित्राधिकारे कृत्रमाधिकारविधिबाधापत्ति-भयेन दौहित्रधर्मस्याधिकारित्वेऽप्रवृत्तायां तदेक-तमे यद्यपि न दासीपुत्रस्य धनहरत्वं किन्तु तत्पुत्रमात्रः। अतएव।
'दासपुत्रे यथा जाते कदाचिच्चौरसो भवेत्।
पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ॥'
इत्यपि वचनं शूद्रविषय एव योजनीयम्॥ ●॥
अपाल्पपहूप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तद्दत्तकपुत्रादेः पितामहधनाधिकारः किन्तु भरणमात्रं अन्यादिभार्य्याणां भरणविधानेन तद्धरणस्य दृष्टापूर्त्तायितत्वात्। तथा अन्य-पद्मादीनामधिकारिपुत्राभिधानाच्च।
'औरसक्षेत्रजास्त्वेषां निर्द्दोषा भागहारिणः।
अपुत्रपौत्रितत्रेषां भर्त्तव्याः साधुवृत्तयः॥
सुताद्येषां प्रभर्त्तव्या यावद्वै भर्त्तृतां गताः॥'
एवं दत्तकपट्यानेनौरसीप्रमौरसेन सह दत्त-कस्य विभागदर्शनात् यत्रौरसो यदीरस्य तु भांशभागित्वमिति। तथा विधानं विना परि-गृहीतस्यापि भांशभागित्वमित्याह।
'तस्मिन् जाते सुते दत्ते न सते च विधानके।
तत्सुतस्यास्य वित्तस्य यः स्वामी पितुरन्यथा॥'
मनुः।
'अविधाय विधानं यः परिगृह्णाति पुत्रकम्।
विभागविधिभाजं तं न कुर्य्याद्ब्रह्मभाजनम्॥'
इति।
अन्यजातीयदत्तकस्यापि भांशभागित्वमित्याह
'यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्।
अंशभाजं न तं कुर्य्यात् शौनकस्य मतं हि तत्॥'
इत्युक्तप्रायमित्यारको विचारः॥" इति दत्तक-चन्द्रिका॥
पौष्यवर्गः, पुं, (पोष्याणां प्रतिपालनीयानां वर्गः।) प्रतिपालनीयगणः। स तु मात्रादिः। यथा,—
"माता पिता गुरुः पत्नी अपत्यानि समाश्रिताः।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गा अमी नव॥"
इति कार्म्मोपचरम्॥
अपि च।
"माता पिता गुरुर्भ्राता प्रजा दीनः समाश्रिताः।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः॥
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्।
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत्॥"
इति गारुडे २१५ अध्यायः॥
पौमनं, क्ली, (पुंसवनमेव। स्वार्थे अण्।) पुंस-वनसंस्कारः। इति भूरिप्रयोगः॥
पौंसं, क्ली, (पुंस इदम्। पुंस्+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।" ४।१।८७। इति स्नञ्।) पुंस्त्वम्। इति शब्दमाला। (पौरुषम्। यथा, भागवते। ७। २६। २६।
"का ईदृशं पदगतं कुशमाश्रवेक-
विद्वत्पौंसहतमतो न समेत लक्ष्मे।"
त्रि, पुंस भवः। पुंस आगतः। यथा, भाग-वते। ६। १६। ३६।

"पौंस्नं वपुर्दर्शयानमनन्यसिद्धै-
रौत्पत्तिकैः समगृणन् युतमष्टभोगैः॥"
स्त्रियां ङीप्। पुरुषयोग्या। पुरुषहिता। यथा, भट्टिः। ५। ८१।
"मनुष्य पौंस्नि! स्त्रैणं मां युवानं तरुणी शुभे॥")
पौगण्डं, क्ली, (पोगण्डस्य भावः। पोगण्ड+ अण्।) अवस्थाविशेषः। यथा,—
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्॥"
इति दशमस्कन्धीयद्वादशाध्यायस्थसप्तत्रिंश श्लोक-टीकायां श्रीधरस्वामिधृतवचनम्॥ (पोगण्डा-वस्थायामिति तदवस्थापन्नमिति च त्रि। यथा, भागवते। ३। ११। २८।
"इत्थं स्मरंस्तस्य सुधा दुःखं पौगण्डमेव च॥")
पौण्डरीकं, क्ली, (पुण्डरीकमिव। पुण्डरीक+ "शर्करादिभ्योऽण्।" ५। ३। १०७। इत्यण्।) प्रपौण्डरीकम्। इति राजनिर्घण्टः॥ (कुष्ठ-विशेषः। यथा, सुश्रुते निदानस्थाने ५ अध्याये।
"तत्र वातेनारुणं पित्तेनौडुम्बरर्ष्यजिह्वकपाल-काकणकानि। श्लेष्मणा पौण्डरीकं दद्रुकुष्ठ-ञ्चेति॥" पुं, यज्ञविशेषः। यथा, महा-भारते। १३। १०७। २६-३०।
"यस्तु संवत्सरं पूर्णं भुङ्क्ते ऽष्टमके नरः।
देवकार्य्यपरो नित्यं जुह्वानो जातवेदसम्॥
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम्।
पद्मवर्णनिभञ्चैव विमानमधिरोहति॥")
पौण्डर्य्यं, क्ली, (पुण्डर्य्यमेव। स्वार्थे ष्यञ्।) पुण्ड-र्य्यम्। इत्यमरटीकायां भरतः॥ (यथास्य पर्य्यायो गुणाश्च।
"प्रपौण्डरीकं पौण्डर्य्यं चक्षुष्यं पौण्डरीयकम्।
पौण्डर्य्यं मधुरं तिक्तं कषायं शुक्रलं हिमम्।
चक्षुष्यं मधुरं मासे वर्ण्यं पित्तकफप्रणुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
पौण्ड्रः, पुं, देशभेदः। पेंड्रेड इति ख्यातः। इति शब्दरत्नावली॥ (पौण्ड्रस्य अभिजनस्य राजा वा। अण्। तद्देशनृपः। यथा, हरिवंशे।
"पाण्ड्यं पौण्ड्रं कलिङ्गञ्च ताम्रलिप्तं जनार्द्दनः।
जघान सहितान् सर्व्वान्————॥"
पौण्ड्रदेशोद्भवे, पुंभूमि। यथा, हरिवंशे। ११६। ५९।
"वङ्गाङ्गकलिङ्गैश्च साङ्गैः पौण्ड्रैश्च वीर्य्यवान्।
निर्ज्जितो वैदिराजस्तु भ्रातृभिः च महारथैः॥")
भीमसेनस्य शङ्खः। यथा,—
"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः॥"
इति भगवद्गीतायाम्। १। १५।
(पुष्टि साधने+"स्फायितञ्चीति।" उणा० २। १३। इति रक्। ततःप्रज्ञाद्यण्।) इक्षुभेदः। इति रत्नमाला॥ पुँडि इति भाषा॥
पौण्ड्रकः, पुं, (पौण्ड्र इव। स्वार्थे कन्।) इक्षु-भेदः। पुँडि आक इति भाषा। (यथा,—
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः॥

नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्थौल्यादृगुणान् वक्ष्याम्यतः-परम्॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये।)
अस्य गुणाः। शीतलत्वम्। रुच्यत्वम्। स्निग्-धत्वम्। मधुरत्वम्। बृंहणत्वञ्च। इति राजवल्लभः॥
(गुणान्तरमस्य यथा,—
"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो बृंहणो बल्यः पौण्ड्रको भीरुकस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।
पौण्ड्रदेशीयनृपः। यथा, महाभारते।२।१३।१।
"पौण्ड्रको वासुदेवश्च वङ्गः कालिङ्गकस्तथा॥")
जातिविशेषः। पुँडो इति भाषा। स च क्षत्रि-कायां वैश्याज्जातः। इति ब्रह्मवैवर्त्तपुराणम्॥
(पौण्ड्रदेशोद्भवक्षत्रियविशेषः। स तु क्रियालोपा-दिना शूद्रत्वमापन्नः। यथा, मनुः। १०। ४४।
"पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः॥")
पौण्ड्रवर्द्धनः, पुं, (पौण्ड्राणामिक्षुविशेषाणां वर्द्धनं यत्र।) देशभेदः। इति शब्दरत्नावली। पेंडुआर इति ख्यातः॥ (यथा, कथासरित्सागरे। १८। १०।
"अभवत्तस्य भार्य्या च नगरात् पौण्ड्रवर्द्धनात्॥")
पौण्ड्रिकः, पुं, (पुण्ड्र+स्वार्थे ठञ्।) इक्षुभेदः। पुँडि इति भाषा। तत्पर्य्यायः। पुण्ड्रः १ पुण्ड्रः २ ईषः ३ कान्तारः ४ मधुः ५। इति शब्दमाला॥
पौतवं, क्ली, परिमाणम्। इति पौतवस्यटीकायां भरतः॥
पौतिकं, क्ली, (पुत्तिकाभिर्मधुमक्षिकाविशेषैः कृतम्। पुत्तिका+"संज्ञायाम्।" ४। ३। ११७। इति अण्।) पिङ्गलवर्णपुत्तिकाख्य-मक्षिकाकृतमधु। इति चरकवाग्भटसारौ॥ (यथा, सुश्रुते। १। ४५।
"पौतिकं भ्रामरं क्षौद्रं माक्षिकं छात्रकं च।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः॥")
पौ(प)त्रः, पुं, (पुत्रस्यापत्यम्। पुत्र+"तस्या-पत्यम्। विशादिभ्योऽञ्।" ४। १। १०४। इति अण्।) पुत्रस्य पुत्रः। नाति इति भाषा। तत्पर्य्यायः। नप्ता २। इति हेमचन्द्रः। यथा,—
"पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥"
इति दायभागधृतमनुप्रभृतिस्मृतिवाक्य-वचनम्॥
पौत्री, स्त्री, (पुत्रस्यापत्यं स्त्री। पुत्र+अण्। ङीप्।) पुत्रकन्या। तत्पर्य्यायः। नप्त्री। इत्यमरः। २। ६। २८॥
पौनःपुनिकः, त्रि, (पुनः पुनर्भवः। पुनःपुन+ ठञ्। टिलोपः।) पुनःपुनर्भवः। इति द्रव्य-गोमप्रकाशकम्॥
पौनःपुन्यं, क्ली, (पुनःपुन+स्वार्थे ष्यञ्। टिलोपः।) पुनर्भावः। तत्पर्य्यायः। वारंवारम् १ पुनः

शश्वत् ४ असकृत् ५ पुनःपुनः ६ वारंवारेण ७ अभीक्ष्णम् ८ प्रतिक्षणम् ९। इति शब्दरत्नावली ॥

पौनर्भवः, पुं, (पुनर्भुवोऽपत्यमिति। पुनर्भू+"अनृष्यानन्तर्य्ये बिदादिभ्योऽञ्।" ४।१।१०४। इति अञ्।) द्वादशविधपुत्त्रान्तर्गतपुत्त्रविशेषः। इति जटाधरः॥ पुनर्भूपुत्त्रः। स तु भर्त्तृपरित्यक्तविधवयोरन्येनोत्पादितः। तस्य लक्षणं यथा,—

"या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते॥"

इति मानवे। ९। १७५॥

"येति। या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्य्या भूत्वा यमुत्पादयेत् स उत्पादकस्य पौनर्भवः पुत्त्र उच्यते।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ भर्त्तृविशेषः। अक्षतयोन्योर्भर्त्तृपरित्यक्तविधवयोः पौनर्भवेन भर्त्रा सह विवाहविधिः एवं कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनरागतायास्तेन कौमारेण भर्त्रा सह विवाहविधिर्यथा,—

"सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा।
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति॥"

इति मानवे। ९। १७६॥

"सा चेदिति। या स्त्री यद्यक्षतयोनिः सती अन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति। यद्वा कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ कन्याविशेषे, स्त्री। सप्तविधपौनर्भवाः कन्या वर्ज्जनीयाः। यथा,—

"सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥
उदकस्पर्शिता या च या च पाणिगृहीतिका।
अग्निं परिगता या च पुनर्भूप्रभवा च या॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्॥
कृतकौतुकमङ्गला बद्धकङ्कणा। उदकस्पर्शिता उदकपूर्ब्बं दत्तेति रत्नाकरः।" इत्युद्वाहतत्त्वम्॥

पौरं, क्ली, (पुरे भवम्। पुर+"तत्र भवः।" ४। ३। ५३। इत्यण्।) रोहिषतृणम्। इत्यमरः। २। ४। १६६॥ रामकर्पूर इति ख्यातम्॥ (अस्य पर्य्यायो यथा,—

"कतृणं रौहिषं देवजग्धं सौगन्धिकस्तथा।
भूतीकं ध्यामपौरञ्च श्यामकं धूमगन्धिकम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) पुरोद्भवे, त्रि। इति मेदिनी॥ (यथा, रघुः। १। ८५।

"इति प्रगुणयोगादपि तपस्य पौराः
प्रकटकटु कृपासामेकवाक्यं विवव्रुः॥"

पुं, उदरपूरकः। यथा, ऋग्वेदे। ८। ३। १२।

"इन्द्रो नो अस्य वह पौरमाविथ धिय इन्द्र सिषासतः॥"

पुरः पूरक एव। स्वार्थे अण्। उदरपूरके, त्रि। यथा, तत्रैव। २। ११। ११।

"पृथन्तस्ते कुक्षी वर्द्धयन्त्वित्था सुतः पौर इन्द्र माव॥")

पौरकः, पुं, (पौर इव कायतीति। कै+कः।) गृहबाह्योपवनम्। यथा,—

"निष्कुटस्तु गृहारामो वाह्यारामस्तु पौरकः॥"

इति हेमचन्द्रः। ४। १७८॥

पौरवः, पुं, (पुरोरपत्यमिति। पुरु+अण्।) पुरुवंशः। यथा,—

"यदोस्तु तनया भोजा अनोस्तु म्लेच्छजातयः।
पुरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"

इति मात्स्ये ३४ अध्यायः॥

(देशविशेषः। यथा, मार्कण्डेये। ५८। ५९।

"त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम!।
पूर्ब्बोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः॥"

पुरुवंशीये, त्रि। (यथा, शकुन्तलायां प्रथमे अङ्के।

"कः पौरवे वसुमतीं शासति शासितरि दुर्व्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु॥")

पौरस्त्यः, त्रि, (पुरो भवः। पुरस्+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ९८। इति त्यक्।) प्रथमः। इत्यमरः। ३। १। ८०॥ (पूर्ब्बदिग्भवः। यथा, रघुः। ४। ३४।

"पौरस्त्यानेवमाक्रामन् तांस्तान् जनपदान् जयी॥")

पौराणिकः, त्रि, (पुराणमधीते वेद वा। पुराण+"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च।" ४। २। ६०। इत्यस्य वार्त्तिकोक्त्या ठक्।) पुराणवेत्ता। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १। ४। १। "लोमहर्षणपुत्त्र उग्रश्रवाः सौतिः पौराणिको शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे॥" यथा च भागवते। १२। ७। ५।

"त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः।
वैशम्पायनहारीतौ षड़्वै पौराणिका इमे॥")

पौरुषं, क्ली, (पुरुष+अण्।) पुरुषस्य भावः। पुरुषस्य कर्म्म। पुरुषस्य तेजः। इति मेदिनी॥

"क्लीबा हि दैवमेवैकं प्रशंसन्ति न पौरुषम्।
दैवं पुरुषकारेण घ्नन्ति शूराः यशोद्धमाः॥"

इत्यग्निपुराणम्॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥"

इति हितोपदेशः॥

पौरुषं, त्रि, (पुरुष+अण्।) ऊर्द्ध्वविस्तृतदोःपाणिनृमानम्। पुरुषपरिमाणम्। इत्यमरः। ३। ३। २२२॥ (पुरुषसम्बन्धि। यथा, मनुः। ८। ३०४।

"यदहं यातं तरे दाप्यं पौरुषोऽर्द्धपणं तरे॥")

पौरुषेयः, पुं, (पुरुष+"सर्व्वपुरुषाभ्यां णढञौ।" ५। १। १०। इत्यत्र "पुरुषाद्वधविकारसमूहतेन कृतेषु" इत्यर्थेषु ढञ्।) समूहः। (यथा, माघः। २। ४।

"एकाकिनोऽपि परितः पौरुषेयवृता इव॥")

वधः। पुरुषस्य पदान्तरम्। इति मेदिनी॥

पौरुषेयः, त्रि, (पुरुष+ढञ्।) पुरुषकृतः। पुरुषविकारः। इति मेदिनी॥ (पुरुषसम्बन्धिनि। यथा, ऋग्वेदे। १०। ८७। १६।

"यः पौरुषेयेण क्रविषा समङ्क्ते॥")

पौरोगवः, पुं, स्त्री, (पुरोऽग्रे गौर्गमनं यस्येति पुरोगुः। ततः प्रज्ञाद्यण्।) पाकशालाध्यक्षः। इत्यमरः। २। ८। २७॥ (यथा, हरिवंशे। १४६। ५८।

"इष्वास्त्रसौवर्णयुक्तपूर्णान्
पौरोगवोक्तानुपचक्रुरेषाम्॥")

पौरोडाशः, पुं, (पुरोडाश एव। प्रज्ञाद्यण्।) पुरोडाशः। पुरोडाशसहचरितो मन्त्रः। इति सिद्धान्तकौमुदी॥

पौरोडाशिकः, पुं, (पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः। तस्य व्याख्यानस्तत्र भवो वा। "पौरोडाश-पुरोडाशात् ष्ठन्।" ४। ३। ७०। इति ष्ठन्।) पुरोडाशिकः। इति सिद्धान्तकौमुदी॥

पौर्णमासः, पुं, (पौर्णमास्यां भवः। पौर्णमासी+"सन्धिवेलादृतुनक्षत्रेभ्योऽण्।" ४। ३। १६। इत्यण्।) यागविशेषः। इत्यमरः। २। ७। ४८॥ (यथा, मनुः। ४। २५।

"दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि॥")

तथा हि। अमावस्यायाममावस्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मसमुदायात्मकयोस्तत्प्रतिपत्तौ समामनन्ति। यथा। आग्नेयाष्टाकपालोऽमावस्यायां पौर्णमास्याञ्चाच्युतो भवति। उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायच्छत् ऐन्द्रं दधि अमावास्यायामैन्द्रं पयो अमावास्यायामिति। ताभ्यामाग्नेयाष्टाकपालोपांशुयाजाभ्याम्। तेन आग्नेयाष्टाकपालोपांशुयाजाग्नीषोमीयैकादशकपालास्त्रयः पौर्णमास्याम्। आग्नेयाष्टाकपालैन्द्रदधिपायोग्नयागत्रयोऽमावास्यायामित्यर्थः। अत्र श्रुतिः अमावास्यापौर्णमासीशब्दावपि प्रतिपत्पूर्वदिनपरावपि। तत्र पूर्णयोपांशुरम्भः प्रतिपद्योर्यागः। तथा च ये वै पौर्णमासी ये अमावास्ये तस्मात् प्रतिपद्युपवसत् पर्वतामवेदुरिति श्रुतिः। अत्रार्थः। यावच्छौचिक्योर्दर्शपौर्णमास्योः प्रतिपन्मूलत्वे सिनीवालीमूलो दर्शपौर्णमासौ कौहुकावितामककौ यागौ यष्टव्यौ कर्तव्यौ।" इति मलमासतत्त्वम्॥

पौर्णमासी, स्त्री, (पूर्णो माश्चन्द्रः अस्यां वर्त्तते इति। पूर्णमास+अण्। ततो ङीप्।) पूर्णिमा। इत्यमरः। १। ४। ७॥

पौर्व्वाह्णिकः, त्रि, (पूर्व्वाह्ण—"विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४ । ३ । २४ । इति ठञ् ।) पूर्व्वाह्णे भवः । पूर्व्वाह्णसम्बन्धी । इति सिद्धान्तकौमुदी ॥

पौलस्ती, स्त्री, (पुलस्तेः स्वापत्यम् । पुलस्ति + अण् । ङीप् । यलोपः ।) शूर्पणखा । इति व्याकरणम् ॥

पौलस्त्यः, पुं, (पुलस्तेरपत्यमिति । पुलस्ति + गर्गादित्वात् यञ् ।) कुबेरः । इत्यमरः । १ । १ । ७२ ॥ रावणः । इति मेदिनी ॥ (यथा, हरिवंशे । ४१ । ६६ ।
"सुमोच रक्षः पौलस्त्यं पुलस्त्येनाद्ययाचितः ॥")
विभीषणः । इति शब्दरत्नावली ॥

पौलिः, पुं, (पोलतीति । पुल महत्त्वे + ज्वलादित्वात् णः । पोलेन निर्वृत्तः । सुतङ्गमादित्वात् इञ् ।) पाकावस्थागतकलायादिः । व्यारक्षमाकयवमकेषादिः । भञ्जिका इंषत्पक्वपुरुपुट-शब्दवान् । इति केचित् । इररम्भः । इति श्रीधरः । इति भरतः ॥ तत्पर्य्यायः । व्यानकम् २ अभ्यूषः ३ । इत्यमरः ॥ अभ्युषः ४ आभ्योषः ५ । इति भरतः ॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति । पुलोमन् + अण् । अनो लोपः ।) शची । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । ७ । ६ ।
"विराजमानः पौलोम्या सहार्द्धासनया भृशम् ॥")

पौषः, पुं, (पौषी पौर्णमास्यस्मिन्निति । सास्मिन् पौर्णमासीत्यण् ।) हैमन्तादिद्वादशमासान्तर्गतदशममासः । पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । तत्पर्य्यायः । तैषः २ सहस्यः ३ । इत्यमरः ॥ पौषिकः ४ हैमनः ५ । इति राजनिर्घण्टः ॥ तिष्यः ६ तिष्यकः ७ । इति शब्दरत्नावली ॥ अयं धनुःस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः । कृष्णप्रतिपदादिपौर्णमास्यन्तश्च गौणचान्द्रः । धनूराशिस्थरविकः सौरः । इति स्मृतिः ॥ * ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।
"विशुद्धसत्त्वः सुतमातृपक्षः
परोपकारी विगतान्यदोषः ।
कलाभिमानी वणिजः
पौषप्रसूतः पुरुषः सुधीरः ॥"

पौषी, स्त्री (पुष्य + "नक्षत्रेण युक्तः ।" इत्यण् । तिष्यपुष्ययोरिति यलोपः ।) पुष्ययुक्ता पौर्णमासी । इत्यमरः ॥ पुष्येण युक्ता रात्रिः । इति मुग्धबोधव्याकरणम् ॥

पौष्करं, क्ली, (पुष्करस्येदमिति । पुष्कर + अण् ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ॥"
अस्य प्रतिनिधिर्यथा,—
"पौष्कराभावतः कुष्ठम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

पौष्करमूलं, क्ली, (पौष्करं मूलम् ।) पुष्करमूलम् । यथा,—
"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।"
इत्यमरः ॥
"मौलि पुष्करमूले । पुष्करं सुगन्धिद्रव्यविशेषः तस्य इदं पौष्करं च । पौष्करे मूले पुष्करादीन्यत्रयः ।" इति भरतः ॥

पौष्करिणी, स्त्री, (पौष्करं पुष्करसम्बन्धि जलमस्यामस्तीति । पौष्कर + इनि । स्त्रियां ङीप् ।) पुष्करिणी । इति शब्दरत्नावली ॥

पौष्टिकं, क्ली, (पुष्टेः वृद्धेः हितमिति । पुष्टि + ठञ् ।) चौलसमये नाभ्यामादरवस्त्रविशेषः । कामाइ इति भाषा ॥ अस्य गुणाः । पवित्रत्वम् । आयुष्यत्वम् । रुचितत्वम् । ज्वरविनाशनत्वञ्च । इति राजवल्लभः ॥ धन्यं धनवृद्धिकृत् । वस्त्रमिति वा पाठः । पुष्टिर्नाम धनादीनां वृद्धिरित्यभिधीयते । तद्धेतुभूतं कर्म्म । इति दुर्गाभद्रः ॥ (पुष्टिदाते, त्रि । यथा, महाभारते । १२ । १८६ । ७८ ।
"सर्वां शान्तमधिष्ठाय नित्यैनामुत्थितोत्थितः ।
मङ्गल्यानि च कुर्व्वन्ति कुर्व्वाणाः पौष्टिकीः क्रियाः ॥")

पौष्पं, त्रि, (पुष्पेण निर्वृत्तम् । पुष्पस्येदं वेति । पुष्प + अण् ।) पुष्पनिर्म्मितम् । पुष्पसम्बन्धि । यथा, कालिकापुराणे ६७ अध्याये ।
"आसनं परमं दद्यात् पौष्पं दारुजमेव वा ।
वाल्वं वा चार्म्मणं कौषं मङ्गलाग्रोपरि स्थितम् ॥"

पौष्पकं, क्ली, (पुष्पेव कायतीति । कै + कः । पुष्पक + स्वार्थे अण् ।) कुसुमाञ्जनम् । इत्यमरः ॥

पौष्पी, स्त्री, (पुष्पस्य इयं इति । पुष्प + अण् । गौरादित्वात् ङीष् । पुष्पाख्यया प्रसिद्धत्वात् तथात्वम् ।) देशविशेषः । यथा,—
"अथ पुष्पपुरं पौष्पी तथा पाटलिपुत्रकम् ।"
इति शब्दरत्नावली ॥

पौष्यः, पुं, (पुष्पोऽपत्यमिति । पुष्य + अण् ।) पुष्यपुत्रः । स च करवीरपुरस्य राजा । तस्य वृत्तः शिवाद्रिपत्नीप्रसरः । यथा,—
"पुष्यः पुत्रोऽभवत् पौष्यः सर्व्वधर्म्मार्थपारगः ।
स पुत्रहीनो राजाभूत् पौष्यो दुर्न्नियतात्मकः ॥
ततः पुत्रार्थिनं भूपं प्रददौ च महाभुजः ।
अनुरागवशं दृष्टा तथेदं तद्वदाच च ॥
इदं वचं प्रकरणं विशन्ति कुरुते । पिता ।
भीष्मवेलाः शम्भवास्तं प्रकुर; शुद्धमानसः ॥
ततः वचे वर्ष्ये देवः प्रविवेश च तद्भवः ।
तत्प्रसादात् वचं भूतं विभाय्य शक्तेन हि ॥
ततः कस्मिंश्चित् काले प्राप्ते नारीकृत्य भृशम् ।
तद्वच्च देवमादृत्य । शर्म्मासाक्षाचिताः शुभाः ॥
वस्तूनि सर्व्वाणि तु सर्व्वेशः समवाहरत् ।
कल्याणं प्रथम् राजा यदा भर्त्ता आहितम् ॥
तत्र तत्पदं पौष्यो यथाख्यातं विवेन च ।
एवं विदं भवनान् तत्र पुत्रो दशरथः ।
सच नामकरोद्राजा प्रकम्पः सोऽपि पुत्रितः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमः प्रभुः ॥
गङ्गायमुनयोर्मध्ये करवीराख्ये पुरे ।
चन्द्रशेखरसौधेषु राजा भूत्वा तमीरत ॥"
इति कालिकापुराणे ४६ अध्यायात् संगृहीतः ॥
(क्षत्रियः । स तु गुरुपत्नीविधानमनुसृत्य प्रदाय कुण्डले दत्तवान् । यथा, महाभारते । १ । ३ । ११४ ।
"तच्छ्रुत्वा पौष्यः प्रत्युवाच भगवन्निति च तत् माध्यायते भवांश्च गुणवानतिथिस्तदिच्छे कर्तुं क्रियतां यत्र इति ।" इत्यादिवैशिष्ट्यसंगतं सर्वेष्वदस्यम् ॥)

प्याट्, अ, वै । भोः । इत्यमरः । ३ । ४ । ७ ॥

प्याय, ओ ई ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ओ ई, श्रौतं गतम् । उभयत्रापि प्रथमम् । अत्राप्तिप्रभ्याः पीनः स्फीतः । ङ, प्यायते । इति दुर्गादासः ॥

प्युष, क उत्सर्गे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क्षमाःशापाङ्गः । क, प्युषयति उत्सर्गे । क, प्योषयति धनं दाता । इति दुर्गादासः ॥

प्युष, य इर् भागे । दाहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) क्षमाःशापाङ्गः । य, प्युष्यति धनं दायादः । इर्, अप्युषत् अप्योषीत् । अप्याक् पुष्पादित्वादिदं ङ इत्यर्थे । इति दुर्गादासः ॥

प्युस, य इर् विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) क्षमाःशापाङ्गः । य, प्युस्यति धनं दायादः । इर्, अप्युसत् अप्योसीत् । अप्याक् पुष्पादित्वात् नित्यं ङ इत्यर्थे । इति दुर्गादासः ॥

प्रै, ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् ।) क्षमाःशापाङ्गः । ङ, प्रायते । इति दुर्गादासः ॥

प्र, अ, (प्रथयतीति । प्रथ + डः ।) विकृष्टगत्याद्यर्थपथमोपसर्गः । अस्यार्थाः । गति । आरम्भः । उत्कर्षः । सर्व्वतोभावः । प्राथम्यम् । ख्यातिः । उत्पत्तिः । व्यवहारः । इति दुर्गादासकृतसूत्रधृतधमः ॥

प्रकट, त्रि, (प्रकटतीति । प्र + कट + अच् ।) स्फुटम् । अस्य पर्य्यायः प्रकाशशब्दे द्रष्टव्यः ।
"प्रकटाप्रकटा चेति द्विधा वेदे विनिश्चिता ।"
इति भागवतामृतम् ॥
(यथा च, देवीभागवते । ६ । ७ । २८ ।
"जानन्ति ये न तव देवि ! परं प्रभावं
ध्यायन्ति ते हरिहरावपि मन्दचित्ताः ।
मातर्न सत्यमथ वक्ति ! प्रकटं प्रमाणं
यद्दिव्यरूपमनिशं विजयेत देवि ॥")

प्रकटितं, त्रि, (प्र + कट + क्त ।) प्रकाशितम् । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ३ । ७४ ।

"दृष्ट्वाद्य मां भगवति ! प्रविनाशितुं चे-
न्निच्छासि तेन कुरुष्यां परिह्रत्य मौनम् ।
कस्मादिमौ प्रकटितौ किल कालरूपौ
यद्वा भवानि ! दर्शितुं नु किमिच्छसि त्वम् ॥")

प्रकम्पनः, पुं, (प्रकम्पयतीति । प्र+कपि+णिच्+ल्यु ।) वायुः । इति हेमचन्द्रः ॥ (यथा, माघे । १ । ६१ ।
"निशान्तनारीपरिधानधूनन-
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेव यस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥")
नरकविशेषः । इति शब्दरत्नावली ॥ (राक्षसविशेषः । इति रामायणम् ॥ प्र+कपि+ल्युट् ।) कम्पातिशये, क्ली ॥

प्रकरं, क्ली, (प्रकीर्य्यते इति । प्र+कॄ+कर्म्मणि अप् ।) अगुरु । इति मेदिनी । रे, १०९ ॥

प्रकरः, पुं, (प्रकिरतीति । प्र+कॄ+अच् ।) समूहः । (प्रकीर्य्यते इति । प्र+कॄ+"ॠदोरप् ।" ३ । ३ । ५७ । इति अप् ।) विकीर्णकुसुमादिः । इति मेदिनी । रे, १०८ ॥ (यथा, अमरुशतके । ३ ।
"यमाश्रयो लगति तमात्मना वपतु कुसुमापि
निस्तुलमुक्ता
ग्रामकाञ्चनलक्षमावनप्रकरसुगायकारि-
चरणा ।
स्वागिलातिरपचमीभिरामगुणभिन्नामरीषम-
धूः
कुचाभ्रहनूमविविधिचालतिः स्फुरितपुत्रादि-
दानविपुणा ॥")

प्रकरणं, क्ली, (प्रक्रियते अस्मिन्निति । प्र+कृ+आधारे ल्युट् ।) प्रस्तावः । (वृत्तान्तः । इत्यमरः । १ । ६ । ३३ ॥ यथा, महाभारते । ३।२०४।२९ ।
"एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठिर ! ।
पतिव्रतानां नियतं धर्म्मश्चावहितः शृणु ॥")
अभिनेयप्रकारः । रूपकभेदः । इति हेमचन्द्रः ॥ ग्रन्थसन्धिः । इति त्रिकाण्डशेषः ॥ पादः । स तु एकार्थावच्छिन्नग्रन्थसमूहः । इति मुग्धबोधटीकायां दुर्गादासः ॥ (नाटकोक्तप्रकरणं तल्लक्षणादिर्यथा, साहित्यदर्पणे । ६।२४०—२४१ ।
"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा
वणिक् ।
सापायधर्म्मकामार्थपरो धीरप्रशान्तकः ॥
विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं
क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥
कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गवृत्ते । द्वे
अपि मृच्छकटिके । अस्य नाटकप्रतिकृतित्वात्
शेषं नाटकवत् ॥")

प्रकरी, स्त्री, (प्रकीर्य्यते अनेनेति । प्र+कॄ+अप् । गौरादित्वात् ङीष् ।) नाट्याङ्गम् । चत्वरभूमिः । इति शब्दरत्नावली ॥

प्रकर्षः, पुं, (प्र+कृष्+भावे घञ् ।) उत्कर्षः । यथा, काव्यप्रकाशे ।
"गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"
(यथा च महाभारते । १ । १५६ । १४ ।
"बालोऽपि यौवनं प्राप्य मानुषेषु विशाम्पते ! ।
सर्व्वाक्षेपु परं वीरः प्रकर्षमगमद्बली ॥")

प्रकाण्डः, पुं क्ली, (प्रकृष्टः काण्डः इति प्रादिसमासः ।) मूलादारभ्य शाखावधिस्कन्धभागः । गुँड़ी इति भाषा ॥ तत्पर्य्यायः । स्कन्धः २ । इत्यमरः । २ । ४ । १० ॥ काण्डम् ३ । इति शब्दरत्नावली ॥ दण्डः ४ । इति राजनिर्घण्टः ॥ विटपः । प्रशस्तः । इति मेदिनी । डे, ३१ ॥ (यथा, अमरे । १ । ४ । २७ ।
"मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमूनि अयः शुभावहो विधिः ॥")
प्रकाण्ड+स्वार्थे कन्प्रत्ययेन प्रशस्तार्थे । यथा, भट्टौ । ५ । ६ ।
"इच्छकामप्रवालौ यौ वीर ! रघुप्रकाण्डकौ ।
कृत्वा संख्येऽथ तौ सख्यौ भूमिवर्द्धनौ ॥"
"रघुःप्रकाण्डकौ प्रशस्तौ राघवौ ।" इति तट्टीकायां जयमङ्गलः ॥)

प्रकाण्डरः, पुं, (प्रकाण्डं राति गृह्णातीति । रा+कः ।) वृक्षः । इति शब्दचन्द्रिका ॥

प्रकामं, त्रि, (प्रगतं काममिति प्रादिसमासः ।) पर्य्याप्तम् । इत्यमरः ॥ (यथा, महाभारते । ४ । १६ । २९ ।
"चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता ।
कामं प्रकामं सेवस्व मया सह विलासिनि ! ॥")

प्रकारः, पुं, (प्रभेदकरणं प्रकटकरणं वेति । प्र+कृ+घञ् ।) भेदः । (यथा, मनुसंहितायाम् । ७।१४४ ।
"अयाति वा तथायाति सहृद्भो वा स्वेच्छया-
न्यथा ।
येन केन प्रकारेण स्वामामपि न नीयति ॥")
सादृश्यम् । इत्यमरः । ३ । ३ । ५० ॥

प्रकाशं, क्ली, (प्रकाशते इति । प्र+काश+अच् ।) कांस्यम् । इति हेमचन्द्रः ॥ (दीप्तिः । यथा, महाभारते । ३ । १०१ । २० ।
"पुनः प्रकाशमभवत् तमसा ग्रस्यते पुनः ।
भयव्याकुलो लोकः पुनरप्यद्य भविष्यति ॥")

प्रकाशः, पुं, (प्रकाशते इति । प्र+काश+अच् ।) दीप्तिः । तत्पर्य्यायः । द्योतः २ आतपः ३ । इत्यमरः । १ । ३ । ३४ ॥ राजनिर्घण्टोक्तपर्य्यायाः प्रभाशब्दे द्रष्टव्याः ॥ (यथा, मनुसंहितायाम् । २ । १८ ।
"निर्म्मोहो निरहङ्कारेण प्रकाशतमसौ विना ।
न हर्षं न शोकं कर्ते न प्रकाशं विषम् ॥")
प्रदीप्तः । तत्पर्य्यायः । स्फुटम् २ स्पष्टम् ३ प्रकटम् ४ उल्वणम् ५ व्यक्तम् ६ । इति हेमचन्द्रः ॥ प्रथमम् ७ उदितम् ८ । इति जटाधरः ॥ प्रहासः । इति मेदिनी । शे, २१ ॥ अतिप्रसिद्धः । इति शब्दरत्नावल्यमरौ ॥

प्रकाशकः, त्रि, प्रकाशकर्त्ता । प्रकाशयतीत्यर्थे (ण्वुल्) अकप्रत्ययः ॥ (यथा, भगवद्गीतायाम् । १४ । ६ ।
"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥")

प्रकाशकज्ञाता, [ऋ] पुं, (प्रकाशकस्य आतपस्य ज्ञाता ।) कुक्कुटः । इति शब्दचन्द्रिका ॥ प्रकाशकज्ञातरि, त्रि ॥

प्रकाशात्मा, [न्] पुं, (प्रकाश आत्मा स्वरूपं देहो वा यस्य ।) सूर्य्यः । इति शब्दचन्द्रिका ॥ उज्ज्वलस्वभावे, त्रि ॥

प्रकाशितं, त्रि, (प्रकाशो जातोऽस्येति । प्रकाश+तारकादित्वात् इतच् । यद्वा, प्र+काश+णिच्+क्त ।) प्रकाशविशिष्टम् । तत्पर्य्यायः । दर्शितम् २ आविष्कृतम् ३ प्रकटितम् ४ । इति हेमचन्द्रः ॥

प्रकीर्णं, क्ली, (प्रकीर्य्यते स्मेति । प्र+कॄ विक्षेपे+क्तः ।) ग्रन्थविच्छेदः । इति जटाधरः ॥ चामरम् । इति त्रिकाण्डशेषः ॥

प्रकीर्णः, पुं, (प्रकीर्य्यते दुर्गन्धमनेनेति । प्र+कॄ+क्तः ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥

प्रकीर्णः, त्रि, (प्रकीर्य्यते स्मेति । प्र+कॄ+क्तः ।) विक्षिप्तः । विस्तृतः । यथा,—
"प्रकीर्णभाण्डामनवेक्ष्यकारिणीं
सदैव भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्ज्जयामि ॥"
इति लक्ष्मीचरित्रम् ॥
नानाप्रकारमिश्रितः । यथा,—
"प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥"
इति वेणीसंहारः ।

प्रकीर्णकं, क्ली, (प्रकीर्ण+स्वार्थे कन् ।) चामरम् । इत्यमरः । २ । ८ । ३१ ॥ विस्तारः । इति मेदिनी । के, १९६ ॥ ग्रन्थविच्छेदः । इति हेमचन्द्रः ॥ पापविशेषः । तथा विष्णुः । यदनुक्तं तत् प्रकीर्णकम् ।
"प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमतो सदा ॥"
अनुक्तं अनुक्तनिष्कृतिकं पापम् ।
"अतिपातकादप्यतमसेन विशुद्धोऽनुक्तकम् ॥"
इति प्रायश्चित्तविवेकः ॥

प्रकीर्णकः, पुं, (प्रकीर्ण+संज्ञायां कन् ।) तुरङ्गमः । इति मेदिनी । के, १९६ ॥ (यथा, महाभारते । ७ । ११ । १७ ।
"आच्छादय शिविनैर्वणैः प्रकृष्टिपाद-
मोचिभिः ।
विमलचामरक्रूपान् विचित्रप्रकीर्णकान् ॥")

प्रकीर्त्तितं, त्रि, (प्रकीर्त्यते स्मेति । प्र+कॄत्+क्तः ।) कथितम् । यथा,—

पौर्व्वाह्णिक:, त्रि, (पूर्व्वाह्ण+"विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४ । ३ । २४ । इति ठञ् ।) पूर्व्वाह्णे भव: । पूर्व्वाह्णसम्बन्धी । इति सिद्धान्तकौमुदी ॥

पौलस्ती, स्त्री, (पुलस्ते: अपत्यम् । पुलस्त+यञ् । ङीप् । यलोप: ।) शूर्पणखा । इति व्याकरणम् ॥

पौलस्त्य:, पुं, (पुलस्तेरपत्यमिति । पुलस्ति+गर्गादित्वात् यञ् ।) कुबेर: । इत्यमर: । १ । १ । ७२ ॥ रावण: । इति मेदिनी ॥ (यथा, रघुवंशे । ११ । २१ ।
"शमीव रघ: पौलस्त्यं पुष्पर्थेनाद्याचित: ॥")
विभीषण: । इति शब्दरत्नावली ॥

पौलि:, पुं, (पोलतीति । पुल महत्त्वे+ज्वलादित्वात् ण: । पोलेन निर्वृत्त: । सुतङ्गमादित्वात् इञ् ।) पाकावस्थागतकलायादि: । आरब्धपाकयवस्तेयादि: । वह्निना ईषद्भ्रष्टयवक्षुद्रशस्यानाम् । इति केचित् । दरदग्ध: । इति श्रीधर: । इति भरत: ॥ तत्पर्य्याय: । आपक्वम् १ अभ्यूष: ३ । इत्यमर: ॥ अभ्युष: ४ अभ्योष: ५ । इति भरत: ॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति । पुलोमन्+अण् । अनो लोप: ।) शची । इति हेमचन्द्र: ॥ (यथा, भागवते । ५ । ७ । ६ ।
"विराजमान: पौलोम्या सहार्द्धासनया भृशम् ॥")

पौष:, पुं, (पौषी पौर्णमास्यस्मिन्निति । सास्मिन् पौर्णमासीत्यण् ।) वैशाखादिद्वादशमासान्तर्गतनवममास: । पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासि स: । तत्पर्य्याय: । तैष: २ सहस्य: ३ । इत्यमर: ॥ पौषिक: ४ हैमन: ५ । इति राजनिर्घण्ट: ॥ तिष्य: ६ तिष्यक: ७ । इति शब्दरत्नावली ॥ अयं मनु:स्वरविसारङ्गगुरुप्रतिपदादिदर्शान्तचान्द्रो मुख्यचान्द्र: । तत्प्रतिपदादिपौर्णमास्यन्तकालो गौणचान्द्र: । धनूराशिगतरविक: सौर: । इति स्मृति: ॥ ७ ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।

"निगूढमन्त्र: सुतमातृवर्ज्जित:
परोपकारी चिरचिन्तशील: ।
करालिकापार्थिवलब्धवित्त:
पौषप्रसूत: कृश: सुधीर: ॥"

पौषी, स्त्री (पुष्य+"नक्षत्रेण युक्त: ।" इत्यण् । तिष्यपुष्ययोरिति यलोप: ।) पुष्ययुक्ता पौर्णमासी । इत्यमर: ॥ पुष्येण युक्ता रात्रि: । इति मुग्धबोधव्याकरणम् ॥

पौष्करं, क्ली, (पुष्करस्येदमिति । पुष्कर+अण् ।) पुष्करमूलम् । इति राजनिर्घण्ट: ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगु: ॥
पौष्करं कटुकन्तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलकम् ॥"
अस्य प्रतिनिधिर्यथा,—
"पौष्कराभावत: कुष्ठम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

पौष्करमूलं, क्ली, (पौष्करं मूलम् ।) पुष्करमूलम् । यथा,—
"शठी पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।"
इत्यमर: ॥
"शठी पुष्करमूले । पुष्करं सुगन्धिद्रव्यं कश्मीरख्यातं तस्य इदं पौष्करं मूल: पौष्करे शठी पुष्करादीत्यन्वय: ।" इति भरत: ॥

पौष्करिणी, स्त्री, (पौष्करं पुष्करसम्बन्धि जलादिकं अस्त्यस्या इति । पौष्कर+इनि । स्त्रियां ङीप् ।) पुष्करिणी । इति शब्दरत्नावली ॥

पौष्टिकं, क्ली, (पुष्टेः हेतो हितमिति । पुष्टि+ठञ् ।) चौरसमये शाखाच्छादनवस्त्रविशेष: । कामारे इति भाषा ॥ अस्य गुणा: । धर्म्मवृद्धत्वम् । आयुष्यत्वम् । शुचित्वम् । रूपविरोधनत्वञ्च । इति राजवल्लभ: ॥ धर्म्यं धर्म्मवृद्धम् । वज्ञ्यमिति वा पाठ: । पुष्टिर्धनजनादीनां वृद्धिरभिधीयते । तद्धेतुभूतं कर्म्म । इति दुर्गाभट्ट: ॥ (पुष्टिहिते, त्रि । यथा, महाभारते । १३ । १२९ । ४८ ।
"सतां वृत्तमधिष्ठाय निवृत्ताश्चाशिवीर्य्यत: ।
मन्त्रवर्ज्जं न कुर्व्वन्ति कुर्व्वाणा: पौष्टिकी:
क्रिया: ॥")

पौष्पं, त्रि, (पुष्पेण निर्वृत्तम् । पुष्पस्येदं वेति । पुष्प+अण् ।) पुष्पनिर्म्मितम् । पुष्पसम्बन्धि । यथा, कालिकापुराणे ६० अध्याये ।
"आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा ।
वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे न्यसेत् ॥"

पौष्पकं, क्ली, (पुष्पेण कायतीति । कै+क: । पुष्पक+स्वार्थे अण् ।) कुसुमाञ्जनम् । इत्यमर: ॥

पौष्पी, स्त्री, (पुष्पस्य इयं इति । पुष्प+अण् । गौरादित्वात् ङीष् । पुष्पाख्यया प्रसिद्धत्वात् तथात्वम् ।) देशविशेष: । यथा,—
"अथ पुष्पपुरं पौष्पी तथा पाटलिपुत्रकम् ।"
इति शब्दरत्नावली ॥

पौष्य:, पुं, (पूष्णोऽपत्यमिति । पूषन्+ष्यञ् ।) पूषपुत्र: । स च करवीरपुरस्य राजा । तस्य पुत्र: शिवाद्यन्द्रशेखर: । यथा,—
"पूष्ण: पुत्रोऽभवत् पौष्य: धर्म्मशास्त्रार्थपारग: ।
स कुमदीप्ती राजाभूत् पौष्यो नृपतिसत्तम: ॥
तत: पुत्रार्थिनं भूयं प्रणम्य वृषभध्वज: ।
मकरन्दवर्द्ध इति लब्ध्वेदं तपसा च ॥
इदं वन्दं मकरन्दं विभज्य पुनरे । प्रिया ।
भीमवेषा: सभापास्ते प्रभव: सुखमागत: ॥
तत: सर्व्वे सर्व्वे देवा: प्रविवेश इवाभव: ।
तत्पश्चात् वर्त्त भूतं विभाग्य काष्ठैव हि ।
तत: सर्व्वेति चारे ग्रामे तानिसु मन्दितम् ।
स च वर्त्तं कुमारादूर्द्ध्वं । सर्व्वाश्चाप्रा: ।
वसुरूढं सर्व्वतोऽर्द्धं तु सर्व्वेन्द्र: समभावत ।
तत्पश्चात् एवञ्च राजा तथा भवैव भाविनम् ।
तत्र स तु पर्व्वं पौष्यो यथाकाम्यं विशेष च ।
एवं विद्यं चकाराशु तत्र पुत्रं च कारत ।
तस्य नामाकरोद्राजा प्राकृते: से: तु तोरितो ।
चन्द्रशेखर इत्येवं नाम्ना चन्द्रशेखर: ॥
महावर्णोदये रम्ये करवीराह्वये पुरे ।
दयदत्तोभरतोभोरे राजा भूत्वा सुरेन्द्र च ॥"
इति कालिकापुराणे ॥ (अयमार्यं वदन्ति ।
(नृपभेद: । स तु गुरुदक्षिणार्थमागताय उत्तङ्काय कुण्डले ददौ । यथा, महाभारते । १ । ३ । ११५ ।
"तमुवाच पौष्य: प्रतुष्य भगवन्निह उपाध्यायाये भवान् गुणवानतिथिस्तदिच्छे दातुं श्राद्धं क्रियतां क्षण इति ॥" एतद्विवरणन्तु तत्रैव द्रष्टव्यम् ॥)

प्याट्, अ, हे । भो: । इत्यमर: । ३ । ४ । ७ ॥

प्याय, ओ ई ङ वृद्धौ । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ओ ई, ईदित्त्वात् । उपसर्गात्तु प्याय: । अधिपूर्व्वे पीन: वृद्ध: । ङ, प्यायते । इति दुर्गादास: ॥

प्युष, क उत्सर्गे । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-सक०-सेट् ।) अन्त:स्थादिपूर्व्व: । प्योषयति उत्सर्गे । क, प्योषयति मर्त्यं दाता । इति दुर्गादास: ॥

प्युष, य इर् भागे । दाहे । इति कविकल्पद्रुम: ॥ (दिवा०-पर०-सक०-सेट् ।) अन्त:स्थादि: । य, प्युष्यति धनं दायाद: । इर्, अप्युषत् अप्योषीत् । अमरात् पुषादिमध्यादिषं व इच्छे । इति दुर्गादास: ॥

प्युस, य इर् विभागे । इति कविकल्पद्रुम: ॥ (दिवा०-पर०-सक०-सेट् ।) अन्त:स्थादि: । य, प्युस्यति धनं दायाद: । इर्, अप्युसत् अप्योसीत् । अमरात् पुषादित्वात् नित्यं व इच्छे । इति दुर्गादास: ॥

प्यै, ङ वृद्धौ । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-अनिट् ।) अन्त:स्थादि: । ङ, प्यायते । इति दुर्गादास: ॥

प्र, अ, (प्रथयतीति । प्रथ+ड: ।) विंशत्युपसर्गान्तर्गतप्रथमोपसर्ग: । अस्यार्था: । प्रकर्ष: । आरम्भ: । उत्कर्ष: । सर्व्वतोभाव: । प्राथम्यम् । ख्याति: । उत्पत्ति: । व्यवहार: । इति दुर्गादासधृतपुरुषोत्तम: ॥

प्रकट, त्रि, (प्रकटतीति । प्र+कट+अच् ।) व्यक्तम् । अस्य पर्य्याय: प्रकाशशब्दे द्रष्टव्य: ।
"प्रकटाप्रकटा चेति शोभा द्वेधा निरूप्यते ।"
इति भावप्रकाश: ॥

(यथा च, देवीभागवते । १ । ७ । १८ ।
"जानन्ति मे न ऋषय: सुरा सर्व्वे ।
व्याप्तं त्वया विश्वमिदं भवानि ।
प्रकटं सदा वसति । अन्तर्दृशां
मदं ब्रह्मसदा निशं निखिलं वदन्ति ॥")

प्रकटितं, त्रि, (प्र+कट+क्त ।) प्रकाशितम् । इति हेमचन्द्र: ॥ (यथा, देवीभागवते । १ । ७ । ११ ।

"सद्भाव मां भगवति ! प्रतिनामितुं चे-
प्रेच्छसि ते कुरु दयां परिहृत्य मौनम् ।
कभादिमौ प्रकटितौ किल कालरूपौ
यद्वा भवानि ! कथितुं तु किमिच्छसे त्वम् ॥")
प्रकम्पनः, पुं, (प्रकम्पयतीति । प्र+कपि+णिच्+ल्यु ।) वायुः । इति हेमचन्द्रः ॥ (यथा, माघे । १ । ६१ ।

"निशान्तनारीपरिधानधूनन-
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥")

नरकविशेषः । इति शब्दरत्नावली ॥ (राक्षसविशेषः । इति रामायणम् ॥ प्र+कपि+ल्युट् ।) कम्पातिशये, क्ली ॥

प्रकरं, क्ली, (प्रकीर्य्यते इति । प्र+कॄ+कर्म्मणि अप् ।) अगुरु । इति मेदिनी । रे, १७६ ॥

प्रकरः, पुं, (प्रकिरतीति । प्र+कॄ+अप् ।) समूहः । (प्रकीर्य्यते इति । प्र+कॄ+"ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) विकीर्णकुसुमादिः । इति मेदिनी । रे, १७८ ॥ (यथा, अम्बाष्टके । ३ ।

"यत्राशयो लगति तत्रागजा भवतु कुत्रापि
निस्तुलशुका
सुत्रामकालमुखसत्रासकप्रकरसुत्राणकारि-
चरणा ।
छत्रानिलातिरयपत्राभिरामगुणमित्रामरीसम-
वधूः
कुत्रासहन्मणिविचित्राकृतिः स्फुरितपुत्रादि-
दाननिपुणा ॥")

प्रकरणं, क्ली, (प्रक्रियते अस्मिन्निति । प्र+कृ+आधारे ल्युट् ।) प्रस्तावः । (वृत्तान्तः । इत्यमरः । ३ । ३ । ६३ । यथा, महाभारते । ३।२०४।२९ ।

"एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठिर ! ।
पतिव्रतानां नियमं धर्म्मव्याधविदः स्मृतः ॥")

अभिनेयप्रकारः । रूपकभेदः । इति हेमचन्द्रः ॥ धर्म्मसन्धिः । इति त्रिकाण्डशेषः ॥ पादः । स तु एकार्थावच्छिन्नसूत्रसङ्ग्रहः । इति मुग्धबोधटीकायां दुर्गादासः ॥ (नाटकोक्तप्रकरणं तल्लक्षणादिर्यथा, साहित्यदर्पणे । ६।२४०—२४१ ।

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा
वणिक् ।
सापायधर्म्मकामार्थपरो धीरप्रशान्तकः ॥
विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं
मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं
क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥
कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गवृत्ते । द्वे
अपि मृच्छकटिके । अस्य नाटकप्रतिकृतित्वात्
शेषं नाटकवत् ॥")

प्रकरी, स्त्री, (प्रकीर्य्यते असाविति । प्र+कॄ+अप् । गौरादित्वात् ङीष् ।) नाट्याङ्गम् । चत्वरभूमिः । इति शब्दरत्नावली ॥

प्रकर्षः, पुं, (प्र+कृष्+भावे घञ् ।) उत्कर्षः । यथा, काव्यप्रकाशे ।

"गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"

(यथा च महाभारते । १ । १५६ । ३४ ।

"बालोऽपि यौवनं प्राप्य मानुषेषु विशाम्पते ! ।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥")

प्रकाण्डः, पुं क्ली, (प्रकृष्टः काण्डः इति प्रादिसमासः ।) मूलादारभ्य शाखावधिस्तम्भभागः । गुँडी इति भाषा ॥ तत्पर्य्यायः । स्कन्धः २ । इत्यमरः । २ । ४ । १० ॥ काण्डम् ३ । इति शब्दरत्नावली ॥ दण्डः ४ । इति राजनिर्घण्टः ॥ विटपः । प्रस्तः । इति मेदिनी । डे, २१ ॥ (यथा, अमरे । १ । ४ । २७ ।

"मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमूनि यः शुभावहो विधिः ॥")

प्रकाण्ड+स्वार्थे कन्प्रत्ययेन प्रशस्तार्थे । यथा, भट्टौ । ५ । ६ ।

"दण्डकामध्यवास्तां यौ वीर ! रक्षःप्रकाण्डकौ ।
शूर्पणखां संक्लेशयातो तौ सभ्यौ भूमिवर्द्धनौ ॥"

"रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ ।" इति तट्टीकायां जयमङ्गलः ॥)

प्रकाण्डरः, पुं, (प्रकाण्डं राति गृह्णातीति । रा+कः ।) वृक्षः । इति शब्दचन्द्रिका ॥

प्रकामं, त्रि, (प्रगतं काममिति प्रादिसमासः ।) यथेप्सितम् । इत्यमरः ॥ (यथा, महाभारते । ४ । १६ । २८ ।

"चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता ।
कामं प्रकामं सेवत्वं मया सह विलासिनि ! ॥")

प्रकारः, पुं, (प्रभेदकरणं प्रकृष्टकरणं चेति । प्र+कृ+घञ् ।) भेदः । (यथा, पञ्चतन्त्रम् । ७।१४४ ।

"अयाति वा नयात्याति संहर्त्ते वा स्वेच्छया-
न्यथा ।
येन केन प्रकारेण सुधामननिशीयति ॥")

सादृश्यम् । इत्यमरः । ३ । ६ । ५७ ॥

प्रकाशं, क्ली, (प्रकाशते इति । प्र+काश+अच् ।) कांस्यम् । इति हेमचन्द्रः ॥ (दीप्तिः । यथा, महाभारते । ३ । १०१ । १७ ।

"पुनः प्रकाशमभवत् तमसा ग्रस्तते पुनः ।
भवमरणं नो लोकः पुनरद्य विनश्यति ॥")

प्रकाशः, पुं, (प्रकाशते इति । प्र+काश+अच् ।) दीप्तः । तत्पर्य्यायः । द्योतः २ आतपः ३ । इत्यमरः । १ । ३ । ३४ ॥ रावणिर्वचोल-पर्य्यायाः प्रभावन्ते इत्येवाः ॥ (यथा, पञ्चदश्याम् । ५ । १८ ।

"विद्वेषणेन मित्रत्वेन प्रकाशमन्तरौ दिवा ।
न हर्ष विच ते पचे न प्रकाशं विपद् सतु ॥")

प्रदीपः । तत्पर्य्यायः । स्फुटम् २ स्पष्टम् ३ प्रकटम् ४ उत्तानम् ५ व्यक्तम् ६ । इति हेमचन्द्रः ॥ प्रथत्नम् ७ उदित्तम् ८ । इति जटाधरः ॥ प्रहासः । इति मेदिनी । शे, २४ ॥ अतिप्रसिद्धः । इति शब्दरत्नाकरः ॥

प्रकाशकः, त्रि, प्रकाशकर्त्ता । प्रकाशयतीत्यर्थे (ण्वुल्) कप्रत्ययः ॥ (यथा, भगवद्गीतायाम् । १४ । ६ ।

"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥")

प्रकाशकज्ञाता, [ऋ] पुं, (प्रकाशकस्य आतपस्य ज्ञाता ।) कुक्कुटः । इति शब्दचन्द्रिका ॥ प्रकाशकर्त्तरि, त्रि ॥

प्रकाशात्मा, [न्] पुं, (प्रकाश आत्मा स्वरूपं देहो वा यस्य ।) सूर्य्यः । इति शब्दचन्द्रिका ॥ पत्तसभावे, त्रि ॥

प्रकाशितं, त्रि, (प्रकाशो जातोऽस्येति । प्रकाश+तारकादित्वात् इतच् । यद्वा, प्र+काश+णिच्+क्त ।) प्रकाशविशिष्टम् । तत्पर्य्यायः । दर्शितम् २ आविष्कृतम् ३ प्रकटितम् ४ । इति हेमचन्द्रः ॥

प्रकीर्णं, क्ली, (प्रकीर्य्यते स्मेति । प्र+कॄ विक्षेपे+क्तः ।) ग्रन्थविच्छेदः । इति जटाधरः ॥ चामरम् । इति त्रिकाण्डशेषः ॥

प्रकीर्णः, पुं, (प्रकीर्य्यते दुर्गन्धमनेनेति । प्र+कॄ+क्तः ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥

प्रकीर्णः, त्रि, (प्रकीर्य्यते स्मेति । प्र+कॄ+क्तः ।) विक्षिप्तः । विस्तृतः । यथा,—

"प्रकीर्णाभाक्तामनवेलकारिणी
सदैव भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्ज्जयामि ॥"

इति लक्ष्मीचरित्रम् ॥

नानाप्रकारमिश्रितः । यथा,—

"प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥"

इति वेणीसंहारः ।

प्रकीर्णकं, क्ली, (प्रकीर्ण+स्वार्थे कन् ।) चामरम् । इत्यमरः । २ । ८ । ३१ ॥ विस्तारः । इति मेदिनी । के, १६६ ॥ ग्रन्थविच्छेदः । इति हेमचन्द्रः ॥ पापविशेषः । तथा विष्णुः । यदनुक्तं तत् प्रकीर्णकम् ।

"प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमते सदा ॥"

अनुक्तं यदुक्तनिष्कृतिकं पापम् ।

"दानमात्रकाञ्चनमणिविधितोऽधुनकम् ॥"

इति प्रायश्चित्तविवेकः ॥

प्रकीर्णकः, पुं, (प्रकीर्ण+संज्ञायां कन् ।) तुरङ्गमः । इति मेदिनी । के, १५६ ॥ (यथा, महाभारते । ७ । ११ । १० ।

"आददाम द्विपानेकैः प्रकीर्णकै-
र्मोक्षितान् ।
विनदद्वानदकूलात् विनिवृत्तकीर्णकान् ॥")

प्रकीर्त्तितं, त्रि, (प्रकीर्त्यते स्मेति । प्र+कॄत्+क्तः ।) कथितम् । यथा,—

"प्रभूतमल्पं कार्य्यं वा यो नरः कर्त्तुमिच्छति ।
सर्व्वारम्भेण तत् कुर्य्यात् सिंहादेकं प्रकीर्त्तितम् ॥"
इति चाणक्यसंग्रहः ॥

प्रकीर्य्यः, पुं, (प्रकीर्य्यते इति । प्र + कॄ + अघ्न्यादित्वात् यक् ।) करञ्जभेदः । इत्यमरः ॥ नाटाकरञ्ज इति भाषा ॥ पूतिकरञ्जः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"उक्तपूतिकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ।
स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रकुर्ण्णं, क्ली, (प्रकर्षेण कोमलं राज्ञीकरोति मेघीकरोति वा । प्र + कुण + कः ।) प्रशस्तवस्तु । इति त्रिकाण्डशेषः ॥

प्रकृतः, त्रि, (प्रक्रियते स्मेति । प्र + कृ + क्त ।) प्रकरणप्राप्तः । यथा । प्रकृतमनुसरामः । प्रकर्षेण कृतः । आरब्धः । अपूर्व्वकृतधातोः कर्म्मणि क्तप्रत्ययः ॥ (प्रक्रान्तः । यथा, माघे । ११ । ३४ ।
"प्रकृतजपविधीनामास्यमुद्रितदन्त-
स्फुरदपि विरतमोष्ठैरन्तरेणाप्यमन्त्रैः ॥")

प्रकृतिः, स्त्री, (प्रक्रियते कार्य्यादिकमनयेति । प्र + कृ + क्तिन् ।) स्वभावः । (यथा चरके विमानस्थाने प्रथमेऽध्याये ।
"तत्र प्रकृतिरुच्यते स्वभावो यः स पुनराहारौषधद्रव्याणां स्वाभाविको गुर्व्वादिगुणयोगः । तद्यथा माषमुद्गयोः शूकरैणयोश्च ।") योनिः । लिङ्गम् । स्वामी । अमात्यः । सुहृत् । कोषः । राष्ट्रम् । दुर्गम् । बलम् । (यथा, मनौ । ९ । २९४ ।
"स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा ।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥"
धर्म्माध्यक्षादिसप्तप्रकृतयो यथा,—
"धर्म्माध्यक्षो धनाध्यक्षः कोषाध्यक्षश्च भूपतिः ।
दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोऽभवन् ॥")
पौराणां श्रेणयः । इत्यमरः । ३ । ३ । १८ ।
(यथा, मार्कण्डेये । १९ । २० ।
"प्रविवेश ततस्तस्मै दत्ताभिषेकमोऽर्थितः ।
आगम्य प्रकृतीः सम्यगभिषिक्तमहोत्सवे ॥"
अष्टावयवा । यथा, हितोपदेशे । २ । १५६ ।
"कीर्त्तितो मन्त्रिभिश्चैव शत्रुभिः परिवेष्टितः ।
राजा दानमभिर्वर्द्धैः स्तब्धः प्रकृतिं गतः ॥")
स्त्री । इति हेमचन्द्रः । शक्तिः । (यथा,—
"प्रयाणं प्रकृतिः शक्तिर्निकायाश्चाविकृतिस्तथा ।
सर्व्वाणि तस्या नामानि द्विजकाधिक या:
स्थिताः ॥"
इति कूर्म्मपुराणे चतुर्थेऽध्याये दाक्षायणीकोपम् ॥)
योनिः । इति शब्दरत्नावली । परमात्मा । इति धरणिः । पञ्चभूतानि । करणम् । शुक्रम् । अन्तः । सर्व्वाविंशत्यन्तरात्मकोऽभिहितः । माता । इति बालार्थरत्नमाला । प्रकृतात् प्रत्ययः । स च द्विधा धातुर्नाम च । इति व्याकरणम् ॥ (प्रकर्षेण करोतीति । प्र + कृ + कर्त्तरि क्तिच् ।) प्रकर्षो महतः सा प्रकृतिः । सा च नानारूपैव द्विधा । यथा,—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥" ५ ॥
इति श्रीभगवद्गीतायां ७ अध्यायः ॥

"एवं योगारम्भनिष्ठोऽस्य इदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेन ईश्वरतत्त्वं प्रतिपादयन् निरूपयिष्यन् प्रकृतिद्वयमाह भूमिरिति द्वाभ्याम् । भूम्यादीनि पञ्चभूतसूक्ष्माणि मनःशब्देन तत्कारणभूतोऽहङ्कारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहङ्कारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना । यद्वा भूम्यादिशब्दैः पञ्च महाभूतानि स्थूलैः सह एकीकृत्य गृह्यन्ते । अहङ्कारशब्देनैवाहङ्कार इति तत्कार्य्याणि इन्द्रियाण्यपि गृह्यन्ते बुद्धिरिति महत्तत्त्वम् । मनःशब्देन तु मनसैवोन्नेयम् अव्यक्तरूपं प्रधानमित्यनेन प्रकारेण मे प्रकृतिर्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता । चतुर्विंशतिभेदभिन्नाया अष्टस्वेवान्तर्भाव-विवक्षयाष्टधा भिन्नेत्युक्तम् । तथा च क्षेत्राध्याये इमामेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपञ्चयिष्यति ।
'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥'
इति ॥ ४ ॥
अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेयमिति । अष्टधा प्रकृतिर्येयं इयमपरा निकृष्टा जडत्वात् परार्थत्वाच्च । इतः सकाशात् परां प्रकृष्टामन्यां जीवभूतां जीवस्वरूपां मे प्रकृतिं जानीहि । परत्वे हेतुः यया चेतनया क्षेत्रज्ञस्वरूपया स्वकर्म्मद्वारेणेदं जगद्धार्य्यते ॥" ५ ॥ इति तट्टीकायां श्रीधरस्वामी ॥
सत्त्वरजस्तमसां साम्यावस्था । यथा,—
"सत्त्वं रजस्तम इति गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता ॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः ।
एतदेव प्रजासृष्टिं करोति विकरोति च ॥"
इति सांख्ये १ अध्यायः ॥
तत्पर्य्यायः । प्रधानम् २ । इत्यमरः । माया ३ शक्तिः ४ चैतन्यम् ५ । इति राजनिर्घण्टः ॥
तस्या नामान्तराणि यथा,—
"तमोऽव्यक्तं शिवो धाम रजो योनिः सनातनः ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ।
अनुद्रिक्तमनूनं चाप्यकम्पमचलं ध्रुवम् ।
सदसच्चैव तत् सर्व्वमव्यक्तं त्रिगुणं स्मृतम् ।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः ॥
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्व्वाणि गतीश्च केवलाः ।
विमुक्तदेहः प्रविभागतत्त्ववित्
स मुच्यते सर्व्वगुणैर्निरामयः ॥"
इति महाभारते आश्वमेधिकपर्व्वणि ॥
सा पञ्चविधा ।

"गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चधा
स्मृता ॥" * ॥
तासां गुणनिर्णयः,—
"प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता ॥
गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ ।
मध्यमे रजसि कृश्च तिशब्दस्तामसः स्मृतः ॥
त्रिगुणात्मस्वरूपा या सर्व्वशक्तिसमन्विता ।
प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते ॥
प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टेरादौ च या देवी प्रकृतिः सा प्रकीर्त्तिता ॥" * ॥
तासामुत्पत्तिः तल्लक्षणं यथा,—
"योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः ।
पुमांश्च दक्षिणार्द्धाङ्गो वामाङ्गः प्रकृतिः
स्मृता ॥
सा च ब्रह्मस्वरूपा च माया नित्या सनातनी ।
यथात्मा च यथाशक्तिर्यथाग्नौ दाहिका स्मृता ॥
अतएव हि योगीन्द्रैः स्त्रीपुम्भेदो न मन्यते ।
सर्व्वं ब्रह्ममयं ब्रह्मन् ! शश्वत् पश्यति नारद ! ॥
स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य सिसृक्षया ।
आविर्बभूव सहसा मूलप्रकृतिरीश्वरी ।
तदाज्ञया पञ्चविधा सृष्टिकर्म्मणि भेदतः ॥"
दुर्गोत्पत्तिर्यथा,—
"अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा ।
गणेशमाता दुर्गा या शिवरूपा शिवप्रिया ।
नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ।
ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तुता ।
सर्व्वाधिष्ठातृदेवी सा सर्व्वरूपा सनातनी ।
धर्म्मसत्यपुण्यकीर्त्तियशोमङ्गलदायिनी ।
सुखमोक्षहर्षदात्री शोकार्त्तिदुःखनाशिनी ।
शरणागतदीनार्त्तपरित्राणपरायणा ॥
तेजःस्वरूपा परमा तदधिष्ठातृदेवता ।
सर्व्वशक्तिस्वरूपा च शक्तिरीशस्य सन्ततम् ।
सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी ।
बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया
स्मृतिः ।
जातिः क्षान्तिश्च शान्तिश्च कान्तिर्भ्रान्तिश्च
चेतना ।
तुष्टिः पुष्टिस्तथा लक्ष्मीर्धृतिर्माता तथैव च ।
सर्व्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः ।
उक्तः श्रुतौ श्रुतिगणैरतिस्वल्पं यथागमम् ।
गुणोऽस्त्यनन्तोऽनन्ताया अपरां च निशामय ॥"
लक्ष्म्युत्पत्तिर्यथा,—
"शुद्धसत्त्वस्वरूपा या पद्मा च परमात्मनः ।
सर्व्वसम्पत्स्वरूपा या तदधिष्ठातृदेवता ।
कान्ता दान्ता च शान्ता च सुशीला सर्व्वम-
ङ्गला ।
लोभमोहकामरोषमदाहङ्कारवर्ज्जिता ।
भक्तानुरक्ता पत्युश्च सर्व्वाभ्यश्च पतिव्रता ।
प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा ।

सर्व्वशस्यात्मिका सर्व्वजीवनोपायरूपिणी ।
महालक्ष्मीश्च वैकुण्ठे पतिसेवारता सती ॥
स्वर्गे च स्वर्गलक्ष्मीश्च मर्त्यानां गृहिणां तथा ।
सर्व्वप्राणिषु द्रव्येषु शोभारूपा मनोहरा ॥
प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च ।
वाणिज्यरूपा वणिजां पापिनां कलहाङ्कुरा ॥
दयामयी भक्तिमतो भक्तानुग्रहकातरा ।
चपले चपला भक्ता सम्पदे च धनाय च ॥
जगज्जीवं मृतं सर्व्वं यया देव्या विना मुने ! ।
शक्तिर्द्वितीया कथिता वेदोक्ता सर्व्वसम्मता ॥
सर्व्वपूज्या सर्व्ववन्द्या चान्यां मत्तो निशा-
मय ॥" २ ॥

सरस्वतीप्रकृतिर्यथा,—
"वाग्बुद्धिविद्याज्ञानाधिदेवता परमात्मनः ।
सर्व्वविद्या सर्व्वरूपा सा च देवी सरस्वती ॥
सद्बुद्धिः कविता मेधा प्रतिभा स्मृतिदा सताम् ।
नानाप्रकारसिद्धान्तभेदार्थकल्पनाप्रदा ॥
व्याख्या बोधस्वरूपा च सर्व्वसन्देहभञ्जिनी ।
विचारकारिणी ग्रन्थकारिणी शक्तिरूपिणी ॥
स्वरसङ्गीतसन्धानतालकारणरूपिणी ।
विषयज्ञानवाग्रूपा प्रतिविश्वेषु जीविनाम् ॥
व्याख्यामुद्राकरा शान्ता वीणापुस्तकधारिणी ।
शुद्धसत्त्वस्वरूपा च सुशीला श्रीहरिप्रिया ॥
हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभा ।
जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया ॥
तपःस्वरूपा तपसां फलदात्री तपस्विनी ।
सिद्धिविद्यास्वरूपा च सर्व्वसिद्धिप्रदा सदा ॥
यया विना च विप्रौघो मूको मृतसमः सदा ।
देवी तृतीया गदिता श्रुत्युक्ता जगदम्बिका ॥
यथागमं यथाकिञ्चिदपरां संनिबोध मे ॥" ३ ॥
सावित्री प्रकृतिर्यथा,—
"माता चतुर्णां वेदानां वेदाङ्गानाञ्च छन्दसाम् ।
सन्ध्यावन्दनमन्त्राणां तन्त्राणाञ्च विचक्षणा ॥
द्विजातिजातिरूपा च जपरूपा तपस्विनी ।
ब्रह्मण्यतेजोरूपा च सर्व्वसंस्कारकारिणी ॥
पवित्ररूपा सावित्री गायत्री ब्रह्मणः प्रिया ।
तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छन्ति शुद्धये ॥
शुद्धस्फटिकसङ्काशा शुद्धसत्त्वस्वरूपिणी ।
परमानन्दरूपा च परमा च सनातनी ॥
परब्रह्मस्वरूपा च निर्व्वाणपददायिनी ।
ब्रह्मतेजोमयी शक्तिस्तदधिष्ठातृदेवता ॥
यत्पादरजसा पूतं जगत् सर्व्वञ्च नारद ! ।
देवी चतुर्थी कथिता पञ्चमीं वर्णयामि ते ॥" ४ ॥
राधाप्रकृतिर्यथा,—
"प्रेमप्राणाधिका देवी या पञ्चप्राणरूपिणी ।
प्राणाधिकप्रियतमा सर्व्वाभ्यः सुन्दरी वरा ॥
सर्व्वसौभाग्ययुक्ता च मानिनी गौरवान्विता ।
वामाङ्गार्द्धस्वरूपा च गुणेन तेजसा समा ॥
परा वरा सारभूता परमाद्या सनातनी ।
परमानन्दरूपा च धन्या मान्या च पूजिता ॥
रासक्रीडाधिदेवी च कृष्णस्य परमात्मनः ।
रासमण्डलसम्भूता रासमण्डलमण्डिता ॥
रासेश्वरी सुरसिका रासवासनिवासिनी ।
गोलोकवासिनी देवी गोपीवेशविधायिका ॥
परमाह्लादरूपा च सन्तोषहर्षरूपिणी ।
निर्गुणा च गुणाकारा निर्लिप्तात्मस्वरूपिणी ॥
निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा ।
वेदानुसारध्यानेन विज्ञाता या विचक्षणैः ॥
दृष्टिदृष्टा न सर्व्वेषां सुरेन्द्रैर्मुनिपुङ्गवैः ।
वह्निशुद्धांशुकाधाना रत्नालङ्कारभूषिता ॥
कोटिचन्द्रप्रभाजुष्टपुष्टश्रीयुक्तविग्रहा ।
श्रीकृष्णभक्तिदा सैव दात्री च सर्व्वसम्पदाम् ॥
अवतारे च वाराहे वृषभानुसुता च या ।
यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा ॥
ब्रह्मादिभिरदृष्टा या सर्व्वदृष्टा च भारते ।
स्त्रीरत्नसारसम्भूता कृष्णवक्षःस्थलोज्ज्वला ॥
यथा घने नवघने लोला सौदामिनी मुने ! ।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा ॥
यत्पादपद्मनखरदृष्टये चात्मशुद्धये ।
न च दृष्टापि स्वप्नेऽपि प्रत्यक्षस्यापि का कथा ॥
तेनैव तपसा दृष्टा भुवि वृन्दावने वने ।
कथिता पञ्चमी देवी सा राधा परिकीर्त्तिता ॥
अंशरूपा कलारूपा कलांशांशसमुद्भवा ।
प्रकृतिः प्रतिविश्वेषु देव्यश्च सर्व्वयोषितः ॥
परिपूर्णतमा पञ्चविधा देवी प्रकीर्त्तिता ।
या याः प्रधानांशरूपा वर्णयामि निशामय ॥" ५ ॥
गङ्गा यथा,—
"प्रधानांशस्वरूपा या गङ्गा भुवनपावनी ।
विष्णुविग्रहसम्भूता द्रवरूपा सनातनी ॥
पापिपापेन्धदाहाय ज्वलदिन्धनरूपिणी ।
सुखस्पर्शस्नानपाने निर्व्वाणपददायिनी ॥
गोलोकस्थानप्रस्थानसुखसोपानरूपिणी ।
पवित्ररूपा तीर्थानां सरिताञ्च परा वरा ॥
शम्भुमौलिजटामेरुमुक्तापंक्तिस्वरूपिणी ।
तपःसम्पादिनी सद्यो भारते च तपस्विनाम् ॥
चन्द्रपद्मक्षीरनिभा शुद्धसत्त्वस्वरूपिणी ।
निर्म्मला निरहङ्कारा साध्वी नारायण-
प्रिया ॥" ६ ॥
तुलसी यथा,—
"प्रधानांशस्वरूपा च तुलसी विष्णुकामिनी ।
विष्णुभूषणरूपा च विष्णुपादस्थिता सती ॥
तपःसङ्कल्पपूजादिसद्यःसम्पादिनी मुने ! ।
सारभूता च पुष्पाणां पवित्रा पुण्यदा सदा ॥
दर्शनस्पर्शनाभ्याञ्च सद्यो निर्व्वाणदायिनी ।
कलौ कलुषशुष्केध्मदाहायाग्निस्वरूपिणी ॥
यत्पादपद्मसंस्पर्शात् सद्यः पूता वसुन्धरा ।
यत्स्पर्शदर्शं वाञ्छन्ति तीर्थानि चात्मशुद्धये ॥
यया विना च विश्वेषु सर्व्वकर्म्मातिनिष्फलम् ।
मोक्षदा या मुमुक्षूणां कामिनां सर्व्वकामदा ॥
कल्पवृक्षस्वरूपा च भारते वृक्षरूपिणी ।
त्राणाय भारतानाञ्च प्रजानां परदेवता ॥" ७ ॥
मनसा यथा,—
"प्रधानांशस्वरूपा या मनसा कश्यपात्मजा ।
शङ्करशिष्या च महाज्ञानविशारदा ॥
नागेश्वरस्यानन्तस्य भगिनी नागपूजिता ।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी ॥
नागेन्द्रगणयुक्ता सा नागभूषणभूषिता ।
नागेन्द्रैर्व्वन्दिता सिद्धयोगिनी नागशायिनी ॥
विष्णुरूपा विष्णुभक्ता विष्णुपूजापरायणा ।
तपःस्वरूपा तपसां फलदात्री तपस्विनी ॥
दिव्यं त्रिलक्षवर्षञ्च तपस्तप्तं यया हरेः ।
तपस्विनीषु पूज्या च तपस्विषु च भारते ॥
सर्व्वमन्त्राधिदेवी च ज्वलन्ती ब्रह्मतेजसा ।
ब्रह्मस्वरूपा परमा ब्रह्मभावेन तत्परा ॥
जरत्कारुमुनेः पत्नी कृष्णांशस्य पतिव्रता ।
आस्तीकस्य मुनेर्म्माता प्रवरस्य तपस्वि-
नाम् ॥" ८ ॥
षष्ठी यथा,—
"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ।
पुत्त्रपौत्त्रप्रदात्री च धात्री च जगतां सती ॥
सुन्दरी युवती रम्या सततं भर्त्तुरन्तिके ।
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ॥
पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम् ॥
पूजा च सूतिकागारे परा षष्ठदिने शिशोः ।
एकविंशतिमे चैव पूजा कल्याणहेतुकी ॥
शश्वन्नियमिता चैषा नित्या काम्या ततः परा ।
मातृरूपा दयारूपा शश्वद्रक्षणरूपिणी ॥
जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे ॥" ९ ॥
मङ्गलचण्डी यथा,—
"प्रधानांशस्वरूपा च देवी मङ्गलचण्डिका
प्रकृतेर्मुखसम्भूता सर्व्वमङ्गलदा सदा ॥
सृष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥
प्रतिमङ्गलवारेषु प्रतिविश्वेषु वन्दिता ।
पञ्चोपचारैर्विद्वद्भिर्भक्त्या च परिपूजिता ॥
पुत्त्रपौत्त्रधनैश्वर्य्ययशोमङ्गलदायिनी ।
शोकसन्तापपापार्त्तिदुःखदारिद्र्यनाशिनी ॥
परितुष्टा सर्व्ववाञ्छाप्रदात्री सर्व्वयोषिताम् ।
रुष्टा क्षणेन संहर्त्तुं शक्ता विश्वं महेश्वरी ॥" १० ॥
काली यथा,—
"प्रधानांशस्वरूपा च काली कमललोचना ।
दुर्गाललाटसम्भूता रणे शुम्भनिशुम्भयोः ॥
दुर्गार्द्धांशस्वरूपा सा गुणेन तेजसा समा ।
कोटिसूर्य्यप्रभाजुष्टपुष्टज्वलितविग्रहा ॥
प्रधाना सर्व्वशक्तीनां वरा बलवती परा ।
सर्व्वसिद्धिप्रदा देवी परमा सिद्धयोगिनी ॥
कृष्णभक्ता कृष्णतुल्या तेजसा विक्रमैर्गुणैः ।
कृष्णभावनया शश्वत् कृष्णवर्णा सनातनी ॥
संहर्त्तुं सर्व्वब्रह्माण्डं शक्ता निःश्वासमात्रतः ।
रणं दैत्यैः समं तस्याः क्रीडया लोकरक्षया ॥
धर्म्मार्थकाममोक्षांश्च दातुं शक्ता च पूजिता ।
ब्रह्मादिभिः स्तूयमाना मुनिभिर्म्मनुभिर्नरैः ॥" ११ ॥

[illegible]

पृथिव्यां प्रथमे देवी सुयज्ञेनैव पूजिता ।
शङ्करेणोपदिष्टेन पुण्यक्षेत्रे च भारते ॥
त्रिषु लोकेषु तत्पश्चादाज्ञया परमात्मनः ।
पुष्पधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः ॥
कलया याः समुद्भूताः पूजितास्ताश्च भारते ।
पूजिता ग्रामदेवश्च ग्रामे च नगरे मुने ! ॥
एवं ते कथितं सर्व्वं प्रकृतेश्चरितं शुभम् ।
यथागमं लक्षणञ्च किं भूयः श्रोतुमिच्छसि ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे प्रकृतिचरितं नामानुक्रमः प्रथमोऽध्यायः ॥ * ॥ पुरुषनाम्नोऽपि प्रकृतिनाम्न उच्चार्य्यता यथा,—
नारद उवाच ।
"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः ।
निमित्तमस्य मां भक्तं वद भक्तजनप्रिय ! ॥
श्रीनारायण उवाच ।
निमित्तमस्य त्रिविधं कथयामि निशामय ।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता ।
गरीयसीति जगतां माता शतगुणैः पितुः ॥
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः ।
कृष्णराधेशगौरीति लोके न च कदा श्रुतः ॥
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम ।
गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर ! ॥
प्रसीद कमलाकान्त गृहाण मम पूजनम् ।
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम ! ॥
राशब्दोच्चारणादेव स्फीतो भवति माधवः ।
धाशब्दोच्चारतः पश्चाद्धावत्येवससम्भ्रमः ॥
आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत् ।
स भवेन्मातृगामी च वेदातिक्रमणे मुने ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५० अध्यायः ॥

प्रकृष्टं, त्रि, (प्रकृष्यते स्मेति । प्र + कृष + क्त ।) प्रकर्षयुक्तम् । तत्पर्य्यायः । मुख्यम् २ प्रमुखम् ३ प्रवर्हम् ४ वर्य्यम् ५ वरेण्यम् ६ प्रवरम् ७ पुरोगम् ८ अनुत्तरम् ९ प्राग्रहरम् १० प्रवेकम् ११ प्रधानम् १२ अग्रेसरम् १३ उत्तमम् १४ अग्र्यम् १५ ग्रामणीः १६ अग्रणीः १७ अग्रिमम् १८ आद्यम् १९ अग्रम् २० अनुत्तमम् २१ अनवराद्ध्यम् २२ श्रेष्ठम् २३ पराद्ध्यम् २४ परम् २५ । इति हेमचन्द्रः । ६ । ७४ ॥ (यथा, मनुः । ७ । १७० ।
"यदा प्रकृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥"
आकृष्टम् । यथा, देवीभागवते । १ । ९ । ८२ ।
"रथाग्रेण गदा क्षिप्ता विष्णुना प्रभविष्णुना ।
तयोरुपरि वेगेन प्रकृष्टे शिरसी तयोः ॥")

प्रकोष्ठः, पुं, (प्रकुष्यतेऽनेनेति । प्र + कुष निष्कर्षे + "उषिकुषीति ।" उणा° २ । ४ । इति थन् ।) कफोणेरधोमणिबन्धपर्य्यन्तहस्तभागः । इत्यमरः । २ । ६ । ८० ॥ (यथा, रघुः । ६ । ६८ ।
"तस्याः प्रकोष्ठे हरिचन्दनाङ्के
प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्द्धमुखेन पत्रिणा
शरासनज्यामलुनाद्विडौजसः ॥")
गृहद्वारपिण्डकम् । वीथी इति विद्यौन्द इति च ख्यातम् । इति प्रधानशब्दटीकायां भरतमुकुटमथुरेशौ ॥ (यथा, मानवे । ७ । २२३ । श्लोकटीकायां कुल्लूकभट्टः ।
"ततः सन्ध्योपासनं कृत्वा तस्मात् प्रदेशात् कक्षान्तरं विविक्तप्रकोष्ठापकामन्यद्गत्वा गृहाभ्यन्तरे कृतभक्तो रहस्याभिधायिनां चराणां व्यापारं शृणुयात् ॥")

प्रक्खरः, पुं, (प्रखर + पृषोदरादित्वात् साधुः ।) अश्वकवचः । इति शब्दमाला ॥ प्रखर इति च पाठः ॥

प्रक्रन्ता, [न्तृ] त्रि (प्र + क्रम + तृच् ।) उपक्रमकर्त्ता । आरम्भकर्त्ता । इति व्याकरणम् ॥

प्रक्रमः, पुं, (प्र + क्रम + भावे घञ् ।) क्रमः । अवसरः । इति मेदिनी । मे, ४९ ॥ प्रथमारम्भः । तत्पर्य्यायः । उपक्रमः २ । इत्यमरः । ३ । २ । २६ ॥ (यथा, कथासरित्सागरे । १८ । ६३ ।
"पूर्व्वजैरपि हि प्राची प्रक्रमेण जिता दिशः ।
गङ्गोपकण्ठे वासश्च विहितो हस्तिनापुरे ॥")

प्रक्रान्तः, त्रि, (प्र + क्रम + क्तः ।) प्रकरणस्थः । आरब्धः । यथा, भट्टिः । ४ । ११ ।
"आतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् ।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम् ॥"

प्रक्रिया, स्त्री, (प्र + कृ + शः ।) नृपदीनां चामरधूननच्छत्रधारणादिव्यापारः । तत्पर्य्यायः । अधिकारः २ । इत्यमरः । २ । ८ । ३१ ॥ अधीकारः ३ नियमविधिः ४ । इति शब्दरत्नावली ॥ प्रकृष्टकार्य्यम् ॥ (यथा, महाभारते । १२ । १११ । ५८ ।
"नोच्छ्रितं सहते कश्चित् प्रक्रिया वैरकारिका ।
गुरोरपि हि युक्तस्य दोष एव निपात्यते ॥")

प्रक्लिन्नः, त्रि, (प्र + क्लिद् + क्त ।) ऋतः । इति जटाधरः ॥ प्रकर्षेण क्लेदयुक्तश्च ॥

प्रक्वणः, पुं, (प्र + क्वण शब्दे + "क्वणो वीणायाञ्च ।" ३ । ३ । ६५ । इति अप् ।) वीणायाः क्वणितः । वीणाशब्दः । तत्पर्य्यायः । प्रवाणः २ । इत्यमरः । १ । ६ । २४ ॥ सुवाणः ३ सुक्वणः ४ उपक्वाणः ५ उपक्वणः ६ । इति भरतः ॥

प्रक्वाणः, पुं, (प्र + क्वण + घञ् ।) प्रक्वणः । इत्यमरः । १ । ६ । ८४ ॥

प्रचरः, पुं, (प्रकर्षेण चरति सञ्चलतीति । प्र + चर + अच् ।) अश्वसन्नाहः । इति हेमचन्द्रः । ४ । ३१० ॥

प्रक्षालनं, क्ली, (प्र + क्षालि + ल्युट् ।) धावनम् । मार्ज्जनम् । यथा,—
"धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥"
इति हितोपदेशे १ परिच्छेदः ॥

प्रक्षालितः, त्रि, (प्र + क्षालि + क्तः ।) धौतः । मार्ज्जितः । इति हलायुधः ॥

प्रक्षेपः, पुं, (प्र + क्षिप + घञ् ।) औषधादिषु क्षिप्यमाणद्रव्यम् । यथा,—
"प्रक्षेपः माषिकः क्वाथात् स्नेहे कल्कसमो मतः ।
स्नेहप्रस्थचतुर्भागं क्वाथमित्यपराणि तु ॥
चौद्रं कषाये दातव्यं विपरीता तु शर्करा ।
माषा क्षौद्रघृतादीनां स्नेहे क्वाथे च चूर्णवत् ।
माषिकं हिङ्गु सिन्धूत्थं जरणाद्यास्तु शाणिकाः ॥"
इति वैद्यकपरिभाषा ॥
विक्षेपः । यथा, "अग्निप्रक्षेपान्तं कर्म्म कृत्वा ।" इति भवदेवभट्टः ॥ (प्रहरणम् । यथा, भागवते । ४ । २९ । १९ ।
"मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः ।
पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥")

प्रक्षेपणं, क्ली, (प्र + क्षिप + ल्युट् ।) प्रकर्षेण क्षेपः । निक्षेपणम् । (यथा, याज्ञवल्क्ये । २ । २६४ ।
"अर्घप्रक्षेपणात् विंशं भागं शुल्कं नृपो हरेत् ॥")

प्रक्ष्वेडनः, पुं, (प्रक्ष्वेडतीति । प्र + क्ष्विड अव्यक्तशब्दे + ल्युः ।) नाराचः । इत्यमरः । २ । ८ । ८७ ॥

प्रक्ष्वेडना, स्त्री, (प्रक्ष्वेडन + टाप् । यद्वा, प्रक्ष्वेडनं अव्यक्तशब्दोऽस्त्यस्या इति । अच् । टाप् ।) नाराचः । इत्यमरटीकायां भरतः ॥

प्रक्ष्वेदनः, पुं, (प्रक्ष्वेदतीति । प्र + क्ष्विद अव्यक्तशब्दे + ल्युः ।) नाराचः । इत्यमरटीकायां भरतः ॥

प्रक्ष्वेदना, स्त्री, (प्रक्ष्वेदन + टाप् ।) नाराचः । इत्यमरटीकायां भरतः ॥

प्रखरः, पुं (प्रकृष्टः खरः ।) हयसन्नाहः । कुक्कुरः । अश्वतरः । अत्यन्तखरे, त्रि । इति मेदिनी ॥

प्रख्यः, त्रि, (प्रख्यातीति । प्र + ख्या ख्यातौ + कः ।) उत्तरपदे तुल्यार्थवाचकः यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ॥"
इति हेमचन्द्रः ॥
(यथा, महाभारते । १ । २०८ । ३१ ।
"हिमपाण्डुरप्रख्यैर्हारैः सौधैश्च शोभितम् ।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः ॥"
श्रेष्ठः । यथा, तत्रैव । १२ । २०४ । ८ ।
"ग्रामसमूहवद्दृष्टी पुंसां स्वप्नान् भावयत्यसौ ।
यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ॥")

प्रख्यातः, त्रि, (प्र + ख्या + क्त ।) प्रकृष्टख्यातियुक्तः । विख्यातः । यथा,—
"यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽपि तिथिनिर्णीतार्थ-
मेकोऽद्भुतः ॥"
इति मुग्धबोधटीकायां अस्विलपदम् ।

प्रख्यातवप्तृकः, पुं, (प्रख्यातो वप्ता जनयिता यस्य । कप् ।) विख्यातपितृकः । यथा,—
"स्यादाभिजनवानोऽभिजनः प्रख्यातवप्तृकः ॥"
इति हेमचन्द्रः । ३ । १६६ ॥

प्रख्यातिः, स्त्री, प्रकृष्टकीर्त्तिः । विख्यातिः । पद्मभाषायां स्तुतिः ॥

प्रगण्डः, पुं, (प्रगाढः गण्डो यत्र ।) कूर्परोपरिबाहुपर्य्यन्तभागः । इत्यमरः । २ । ६ । ८० ॥ बाहुर उपरि भाग इति भाषा ॥

प्रगण्डी, स्त्री, (प्रगण्ड + गौरादित्वात् ङीष् ।) बहिःप्राकारः । दुर्गप्राकारभित्तौ शूराणां अवस्थितिस्थानादि । (यथा, महाभारते । १२ । ६९ । ४१ ।
"प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तथा ॥")

प्रगतजानुः, त्रि, (प्रगते संश्लिष्टे जानुनी यस्य ।) प्रगतजानुकः । इत्यमरटीकायां रमानाथः ॥

प्रगतजानुकः, त्रि, (प्रगते जानुनी यस्य । कप् ।) यस्य जानुनोर्मध्ये नित्यं कायादिकृतं वा व्यवधानं सः । पायाराक् जानि इति भाषा ॥ तत्पर्य्यायः । प्रज्ञुः २ । इत्यमरः । २ । ६ । ४७ ॥ प्रज्ञः ३ प्रगतजानुः ४ । इति भरतः ॥

प्रगन्धः, पुं, (प्रकृष्टो गन्धो यस्य ।) पर्पटः । इति राजनिर्घण्टः ॥

प्रगल्भः, त्रि, (प्रगल्भते इति । प्र + गल्भ धार्ष्ट्ये + पचाद्यच् ।) प्रत्युत्पन्नमतिः । तत्पर्य्यायः । प्रतिभान्वितः २ । इत्यमरः । ३ । १ । २१ ॥ (यथा, महाभारते । १२ । ६८ । ५८ ।
"प्रज्ञा प्रगल्भं कुरुते मनुष्यं
राजा ह्यशक्तान् वै कुरुते मनुष्यान् ॥")

प्रगल्भता, स्त्री, प्रगल्भस्य भावः । (प्रगल्भ + तल् ।) प्रागल्भ्यम् । तत्पर्य्यायः । उत्साहः २ अभियोगः ३ उद्यमः ४ प्रौढिः ५ उद्योगः ६ कियदेतिका ७ अध्यवसायः ८ ऊर्ज्जः ९ । इति हेमचन्द्रः । २ । २२३ ॥ तस्य लक्षणम् । यथा,
"निःसाध्वसत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता ॥"
इत्युज्ज्वलनीलमणिः ॥
(यथा, कुमारे । ६ । ३२ ।
"आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति ।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता ॥")

प्रगल्भा, स्त्री, (प्रगल्भते धृष्टा भवतीति । प्र + गल्भ धार्ष्ट्ये + पचादित्वादच् । ततष्टाप् ।) नायिकाभेदः । अस्या लक्षणम् । प्रतिमात्रविषयेर्विकलाकोविदा । अस्याश्चेष्टा रतिप्रीतिः । आनन्दसंमोहः । रतिप्रीतिर्यथा,—
"संकुचत् कायमाकम्य वक्षः संपिष्य कुचयोः
[illegible]
[illegible]
विधुरे ॥"

आनन्दसंमोहो यथा,—
"कस्मिन् प्रस्तावे ...
[illegible]
... विधिः ॥"

सा मानदशायां त्रिविधा । धीरा अधीरा धीराधीरा च । व्यङ्ग्यकोपप्रकाशिका धीरा । व्यक्तकोपप्रकाशिका अधीरा । व्यङ्ग्याव्यङ्ग्यकोपप्रकाशिका धीराधीरा । प्रौढ़ाधीरा रत्यां उदास्ते । अधीरा तर्ज्जनताडनादि । धीराधीरा उदासीनत्वं तर्ज्जनादि च कोपस्य प्रकाशकम् । प्रौढ़ाधीरा यथा,—
"नो तल्पं भजते न जल्पति सुधाधाराभिरामां गिरो
दृक्पातं कुरुते न वा परिजने कोपप्रकाशच्छलात् ।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव यदि पुनः प्रहरती कुर्वीत वा कथं भिन्नम् ॥"

प्रगल्भा अधीरा यथा,—
"प्रतिपक्षसखीक कोपभिन्दोः कलायां
चरणौ इति परमा यमाद्रमाणा ।
गिरिजामवधूतकम्पा सर्वपामाय कम्प
प्रणवनयदेवतान्तिमाया करोतु ॥"

प्रगल्भा धीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे पाश्चात्यपौशया
काञ्च्या कुलवाव धावद्वलितस्फुर्ज्जतुक्षोभया ।
दत्तव्यक्तकरे पुनर्मुकलया व्यापारयापाकर-
प्रोद्धोऽपद्मयूखसालनखतो विन्यासितो हृदयः ॥"
इति रसमञ्जरी ॥
(लक्षणञ्च यथा साहित्यदर्पणे । ३ । १०१ ।
"स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका ॥"
तस्या उदाहरणभेदादिकं तत्रैव विशेषतो द्रष्टव्यम् ॥)

प्रगाढ़ं, त्रि, (प्रकर्षेण गाह्यते स्मेति । प्र + गाह + क्तः । "यस्य विभाषा ।" ७ । २ । १५ । इति न इट् ।) भृशम् । दृढ़म् । इत्यमरः । ३ । ३ । ३३ ॥ (यथा, महाभारते । ४ । ५८ । २६ ।
"अर्ज्जुनेनाहृतां सृष्टिं प्रगाढ़ां तत्र प्रपश्यताम् ।
यथाहि तुमुलं विकृतमभवत्सर्वं महीपतेः ॥")
कष्टम् । इति भरतः ॥ (यथा, महाभारते । ७ । ९७ । ३८ ।
"तवाप्यतीव चास्मिन् प्रगाढ़ाम् विश्रान्ते ।
संवर्षेण महार्थिश्चात् भारत भयशासन ॥")
कठिनम् । यथा, सुश्रुते चिकित्सितस्थाने ५ अः ।
"सूचीवन्मुखैः संशमनयत्नेन पाचयेत्
विस्मितादिवर्णं वा विकृतव्यवहारप्रगाढ़ं नहि तेनोपशमनम्पदेत् ॥")

प्रगाता, [ऋ] त्रि, (प्र + गै + तृच् ।) प्रगायकः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ९२ । ८ ।
"तत्रो वीणाः प्रगातारः सूतश्च कुशलानिति ।
प्राणायामसंगीतैश्च कथयेत् यावद्गताः ॥")

प्रगुणः, त्रि, (प्रकर्षेण गुणो यस्य ।) ऋजुः । इत्यमरः । ३ । १ । ७२ ॥ (प्रशस्तगुणवान्, त्रि । यथा, रघौ । ९ । ३९ ।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम् ।
श्रमजयात् प्रगुणाञ्च करोत्यसौ
तनुमतोऽनुमतः सचिवैर्ययौ ॥")

प्रग्रहं, त्रि, (प्रगृह्यते इति । प्र + ग्रह + "पदास्वैरिबाह्यापक्ष्येषु च ।" ३ । १ । ११९ । इति क्यप् । "ग्रहिज्यावयिव्यधि" ६ । १ । १६ । इति सम्प्रसारणम् ।) प्लुतप्रगृह्याः अचि नित्यम् । इति मुग्धबोधव्याकरणम् ॥ यस्य स्वरस्य सन्धिर्न भवति तस्य प्रगृह्यसंज्ञा भवति । यथा, अहो अहं मम सौ च समूहामणी । इति मुग्धबोधः । "आलोके गन्तुं भारत ।" इत्यमरः ॥ अस्य स्वराः प्रकृत्या तिष्ठन्ति अचः परस्मिन् आदेशः न सन्धीयन्ते न क्षरन्ति । अहो कार्य्ये यथा । अहो श्लाघ्यं न कलासुदेवः । सखि इदं खा इदं भवति । इति भरतः ॥

प्रगे, व्य, (प्रकर्षेण गीयतेऽस्मिन् । प्र + गै + के ।) प्रातः । इत्यमरः । ३ । ४ । १९ । (यथा, माघे । १६ । ६ ।
"दिनं दयान्वेषिविवादिकोऽन्त्यो
गतो नृपालापक गोचरार्थिनः ।
प्रयोजनान्नम्रमनेकश्रवसा
कथनयैनमुदीर्णवाक्यम् ॥")

प्रगेतनः, त्रि, (प्रगे प्रातर्भवः इति । प्रगे + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।" ४ । ३ । २३ । इति ट्युः तुट् च ।) प्रगे भवः । प्रातस्तनः । तत्पर्य्यायः । प्रातिकः २ । इति राजनिर्घण्टः ॥

प्रग्रहः, पुं, (प्रगृह्यते इति । प्रग्रहाणस्मृतिषु प्र + ग्रह + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । "विभाषा ग्रहः ।" ३ । १ । १४३ । इति णप्रत्ययाभावे "अप् ।" तुलाहंसकम् । लग्नासूत्रम् । इत्यमरः । ३ । ३ । २३६ । नियमनम् । (यथा, महाभारते । ३ । १९८ । २६ ।
"नहि मे सुमते कश्चित् कथञ्चिद् वर्त्तते क्वचित् ।
सर्वोदयालुर्व्वीय यत्नं कर्त्तुं समर्थः ॥")
रश्मिः । रज्जुः । (यथा, मीमांसावृत्ते । ७ ।
"दत्तीः प्रभ्यो भवति तर्कैः प्रग्रहः किं च वात् ॥")
सुवर्णालुकवृक्षः । इति हैमचन्द्रः ॥ कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (सप्तदशी यथा,
"आदित्यो वाक्यथा प्रग्रहवाप्रग्रहः ।
आरम्भोऽपि उद्भासः ललाम सुवर्णः ॥"
इति वैद्यकरत्नमालायाम् ॥)
प्र + ग्रह + भावे अप् । स्वीकारोक्ति विषयः । यथा, हरिवंशे भविष्यपर्व्वणि । ७ । ४८ ।
"सर्व्वे हि देवदानवयक्षगन्धर्वा विद्याधराः ।
सप्तर्षयः प्रग्रहेण नित्यं इष्ट्वा भक्तितः ॥"
धारणम् । यथा, हरिवंशे भविष्यपर्व्वणि ७२ । ३ ।
"पद्मयोनेः सर्वसुदीपनीये प्रग्रहः ।
शर्म्मे च वायवः सर्व्वे वरुणायै स्मः ॥"
बन्धनम् । यथा, हरिवंशे । ८६ । २६ ।
"ईश्वर प्रग्रहेषु अबध्नादस्य कृष्णः ।
पक्षेण विंशेषैः कृतं तत्र ...
... विरोधनः ..."

एवं कष्टमनुप्राप्ताः कलिसन्ध्यांशके तदा ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ९४ ।
"प्रग्रहो निग्रहो व्यग्रोऽनेकशृङ्गो गदाग्रजः ॥"
प्रकृष्टाधिष्ठानादौ, त्रि । यथा, रामायणे । २ । ८२ । १ ।
"तामार्य्यगणसम्पूर्णां भरतः प्रग्रहां सभाम् ।
ददर्श बुद्धिसम्पन्नः पूर्णचन्द्रो निशामिव ॥"
"प्रग्रहा प्रकृष्टैर्वशिष्ठादिभिर्गृहीताऽधिष्ठानं यस्याः सा ।" इति तट्टीका ॥ उद्यतबाहुः । यथा, रामायणे । ७ । ९५ । १४ ।
"एवमुक्तस्तु मुनिना प्राञ्जलिः प्रग्रहो नृपः ।
अभ्यवादयत प्राज्ञस्तमृषिं सत्यशालिनम् ॥")

प्रग्राहः, पुं, (प्रगृह्यते इति । प्र + ग्रह + "प्रे वणिजाम् ।" ३ । ३ । ५२ । "रश्मौ च ।" ३ । ३ । ५३ । इति च घञ् ।) प्रग्रहः । इत्यमरः । ३ । ३ । २३६ ॥ ("प्रे लिप्सायाम् ।" ३ । ३ । ४६ । इति घञ् । प्रग्रहणम् । "पात्रप्रग्राहेण चरति भिक्षुः ।" इति सिद्धान्तकौमुदी ॥)

प्रग्रीवः, पुं क्ली, (प्रकृष्टा ग्रीवा ग्रीवाकृतिरस्य ।) गृहादौ प्रान्ते धार्य्यं दारुपङ्क्तिः । वातायनम् । इति सुभूतिः । शुक्रशाला । इत्येके । अश्वशाला । इति केचित् । हर्म्यशीर्षकम् । इति गोवर्द्धनः । इत्यमरटीकायां भरतः ॥

प्रघटावित्, [द्] त्रि, (प्रघटां आडम्बरं वेत्तीति । प्रघटा + विद् + क्विप् ।) शास्त्रगण्डः । इति त्रिकाण्डशेषः ॥

प्रघणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + "अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७९ । इति कर्म्मणि अप् । णत्वञ्च ।) बहिर्द्वारप्रकोष्ठकम् । तत्पर्य्यायः । प्रघाणः २ अलिन्दः ३ । इत्यमरः । २ । २ । १२ ॥ आलिन्दः ४ । इति भरतः ॥ ताम्रकुम्भः । लौहमुद्गरः । इति मेदिनी । णे, १० ॥ (गृहाभ्यन्तरशय्यार्थपिण्डिका । यथा,—
"प्रघाणप्रघणालिन्दा द्वारबाह्यप्रकोष्ठके ।
गृहाभ्यन्तरशय्यार्थपिण्डिकायामपि चयम् ॥"
इति शब्दरत्नावली ॥)

प्रघनः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । न णत्वम् ।) प्रघणः । इति मुकुटः ॥

प्रघसः, पुं, (प्रकर्षेण अत्तीति । प्र + अद + अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घस्लादेशः ।) असुरः । दैत्यः । इति त्रिकाण्डशेषः ॥ (राक्षसभेदः । यथा, महाभारते । ३ । २८४ । २ ।
"पर्व्वणः पूतनो जम्भः खरः क्रोधवशो हरिः ।
प्ररुजश्चारुजश्चैव प्रघसश्चैवमादयः ॥")

प्रघाणः, पुं, (प्रहन्यते इति । प्र + हन् + "अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७९ । अप् । पक्षे वृद्धिश्च ।) प्रघणः । इत्यमरः । २ । २ । १२ ॥ (यथा, माघे । १८ । ११ ।
"नयति भवतामम्भोधिप्रांशिवनन्नवाहनः
दिमपि सदनमायान्तस्य प्रघाणमुपघ्नम् ।
अपसरदरिध्वान्तश्यामयिषन्नृपमण्डली
सगनफलरश्मान्तरिक्षावलम्बमविक्रमः ॥")

प्रघातः, पुं, (प्रकर्षेण हन्यते यत्रेति । प्र + हन् + घञ् ।) युद्धम् । इति हेमचन्द्रटीका ॥

प्रघानः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । वृद्धिः । न णत्वम् ।) प्रघणः । इति मुकुटः ॥

प्रघूर्णः, पुं, (प्रघूर्णति भ्रमतीति । प्र + घूर्ण + अच् ।) अतिथिः । इति हेमचन्द्रः ॥ प्रकृष्टघूर्णयुक्ते, त्रि ॥

प्रघोषकः, पुं, (प्र + घुष + भावे घञ् । ततः कन् ।) ध्वनिः । इति जटाधरः ॥

प्रचक्रं, क्ली, (प्रगतञ्चक्रमिति प्रादिसमासः ।) चलितसैन्यम् । प्रस्थितसेना । इत्यमरः । २ । ८ । ९६ ॥

प्रचक्षाः, [स्] पुं, (प्रकर्षेण चष्टे वक्तीति । प्र + चक्ष + असिः । न ख्यादेशः ।) बृहस्पतिः । इत्युणादिकोषः ॥

प्रचण्डः, पुं, (प्रकर्षेण चण्डः उग्रगुणत्वात् ।) श्वेतकरवीरः । इति मेदिनी ॥ (चतुर्भुजीनामगुपतेः सुनन्दागर्भजातः पुत्रभेदः । यथा, मार्कण्डेये । ११८ । २ ।
"वलीवलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥")

प्रचण्डः, त्रि, (प्रकर्षेण चण्डः ।) दुर्व्वहः । दुर्द्धर्षः । प्रगल्भः । (यथा, आर्य्यासप्तशत्याम् । ३३० ।
"नाहं वदामि सुतनु क्षमशीला वा प्रचण्डचरिता वा ।
प्रेमस्वभावसुलभं भयमुदयति मम तु हृदयस्य ॥")
प्रतापी । इति मेदिनी नानार्थरत्नमाला च ॥ (यथा, भागवते । १ । ७ । २१ ।
"ततः प्रादुष्कृतं तेजः प्रचण्डं सर्व्वतोदिशम् ।
प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥")

प्रचण्डमूर्त्तिः, स्त्री, (प्रचण्डा मूर्त्तिर्यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥ प्रतापयुक्तशरीरे, त्रि ॥

प्रचण्डा, स्त्री, (प्रकर्षेण चण्डा ।) दुर्गाया अष्टनायिकान्तर्गतनायिकाभेदः । इति कालीपुराणम् ॥ (सा तु छगलण्डे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३० । ७३ ।
"छगलण्डे प्रचण्डा तु चण्डिकामरकण्टके ॥")
श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

प्रचयः, पुं, (प्रचीयते इति । प्र + चिञ् चयने + "एरच् ।" ३ । ३ । ५६ । इत्यच् ।) समूहः । इति शब्दचन्द्रिका ॥ (द्विविधारब्धसंयोगः । स च परिमाणजनकः । यथा,—
"संख्यातः परिमाणाच्च प्रचयादपि जायते ।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ।
परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः ॥"
इति भाषापरिच्छेदः ॥
(हस्तादिजनककर्तृकचयनदोषे चये । यथा,
"हस्तादानार्थे चयने प्रचयं करोति ।"
इति सिद्धान्तकौमुदी । ३ । ३ । ४० ॥)

प्रचरः पुं, (प्रचरन्त्यस्मिन्निति । प्र + चर + आधारे अप् ।) पन्थाः । इति धरणिः ॥ प्रकर्षेण गमनञ्च ॥

प्रचरद्रूपः, त्रि, व्यक्तरूपः । प्रकारविशिष्टः । प्रचरत् प्रकाशमानं रूपं स्वरूपं यस्य सः ॥

प्रचलाकः, पुं, (प्रकर्षेण चलतीति । प्र + चल + आकन् ।) शराघातः । शिखण्डः । भुजङ्गमः । इति मेदिनी । के, १९६ ॥

प्रचलाकी, [न्] पुं, (प्रचलाकः शिखण्डोऽस्यास्तीति । प्रचलाक + इनिः ।) मयूरः । इति मेदिनी ॥ (यथा, उत्तररामचरिते । २ अङ्के ।
"कूजत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥")

प्रचलायितं, त्रि, (प्रचल इवाचरतीति । "कर्त्तुः क्यङ् सलोपश्च ।" ३ । १ । ११ । इति क्यङ् । प्रचलाय-नामधातोः कर्त्तरि क्तः ।) निद्रादिना घूर्णितम् । इत्यमरः । ३ । १ । ३९ ॥

प्रचारः, पुं, (प्रचरणमिति । प्र + चर + भावे घञ् ।) प्रचरणम् । व्यक्तः । प्रकाशः । यथा,
"दमनकमयशाखावलिहोलप्रसूनं
सुहिमकिरणबिम्बे खञ्जरीटप्रचारः ॥"
इति शङ्कराचार्य्यः ॥
(प्रचरन्त्यस्मिन्निति । प्र + चर + आधारे घञ् । गवादेश्चरणस्थानम् । यथा, महाभारते । १ । ३० । १८ ।
"परिश्रान्तः पिपासार्त्तो आरण्याद मुनिं वने ।
गवां प्रचारेष्वासीनं फेनमापिबतो पयः ॥"
अश्वानां नेत्ररोगविशेषः । तच्चिकित्सादिकं यथा, अश्ववैद्यके । ३० । ११—१६ ।
"प्रच्छादयति यद्दृष्टिं मांसं पर्य्यन्तवर्त्तितम् ।
प्रचारकाख्यं तं विद्यात् नेत्ररोगं कफात्मकम् ॥
चित्तौ निपात्य तुरगं ततो नेत्रं प्रसारयेत् ।
लतकर्म्मा भिषग् विद्वान् बडिशेनापि कर्षयेत् ॥
तमस्थोष्ठेन शस्त्रेण छिन्द्यात् सारकं बुधः ।
तारकस्य यथा पीडा जायेत न मनागपि ॥
सूक्ष्मं तत् पूरयेन्नित्यं मधुना सैन्धवेन वा ।
प्रक्षाल्य चोष्णेन ततः श्लक्ष्णां वेष्टयेत् स्थिराम् ।
कुष्ठेन वचया चव्या तथा त्रिकटुकेन च ।
पञ्चाणं प्रदातव्यं हस्ता लवणैः सह ।
त्रिरात्रं विहितं स्नानं पाने दूर्व्वा च घृतिका ।
गुडभक्तं च दातव्यं मधुरं च विधिकः ॥")

प्रचुरं, त्रि, (प्रचोरतीति । प्र + चुर + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । यद्वा, प्रकर्षं चुराया इति प्रादिसमासः ।) अनेकम् । तत्पर्य्यायः । प्रभूतम् २ प्राज्यम् ३ अदभ्रम् ४ बहुलम् ५ बहु ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ६३ ॥ यथा, मार्कण्डेये । ५ । ११ । ११ ।

"अथो इयमात्मनमनवद्योमर्थं
किं नकमिहाददरे व्यभ्राद्दिन।
न यत् पुधीशमपदःकुलाम्बुजो
महात्मनो यः प्रचुरः समागमः।")

प्रचुरपुरुषः, पुं, (प्रचोरयतीति। प्र+चुर स्तेये +कः। प्रचुरश्चासौ पुरुषश्चेति।) चौरः। इति त्रिकाण्डशेषः। (प्रचुरो बहुलः पुरुषश्चेति कर्मधारये।) बहुजनश्च॥

प्रचेतसी, स्त्री, (प्रचेतयति मस्तिष्कमिति। प्र+चित्+णिच्+असुन्। गौरादित्वात् ङीष्।) कट्फलः। इति राजनिर्घण्टः॥ प्रचेतसः कन्या च॥

प्रचेता, [ऋ] पुं, (प्रचेतति बुद्ध्यादिप्रयोगे चौरान् लक्षयतीति। प्र+चित्+तृच्।) सारथिः। इति हेमचन्द्रः॥

प्रचेताः, [स्] पुं, (प्रचेतयतीति। प्र+चित+असुन्।) वरुणः। इत्यमरः। १। १। ६१॥ (यथा, रघौ। १। ८०।
"हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति॥"
मुनिविशेषः। (यथा, मनौ। १। ३५।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च॥"
प्रकृष्टं चेतोऽस्य।) प्रकृष्टबुद्धि, त्रि। इति मेदिनी॥ प्राचीनबर्हिरात्मजः। यथा,—
"प्राचीनबर्हिर्भगवान् सर्वशस्त्रभृतां वरः।
समुद्रतनयायां वै दश पुत्रानजीजनत्॥
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः॥"
इति कौर्म्मे १४ अध्यायः॥
अपि च।
"प्राचीनबर्हिर्भगवान् पृथिव्यामेकराड्वशी।
उपयेमे समुद्रस्य तनयान्तु वै सुताम्॥
तस्यात् सुषाव सामुद्री दश प्राचीनबर्हिषः।
सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः॥
अपृथग्धर्मचरणास्तेऽतप्यन्त महत्तपः।
दश वर्षसहस्राणि समुद्रसलिले शयाः॥
प्रजापतित्वं संप्राप्य भार्य्या तेषाञ्च मारिषा।
अभवद्दक्षपत्नीन तस्यां दक्षोऽभवत् ततः॥"
इति मार्कण्डेये ४ अध्यायः॥
(प्रकृष्टचेतस्के, त्रि। यथा, ऋग्वेदे। १।४१।१।
"देवाविद् ते ऋतुं प्रचेतसो रुद्रस्य देवस्य
भगस्यावसः॥"
"हे इन्द्र! प्रचेतसः प्रकृष्टज्ञानाः सत्यवेदिनः देवाविद् देवा अपि।" इति तद्भाष्ये
सायणः॥)

प्रचेलं, क्ली, (प्रचेलयतीति। प्र+चेल्+अच्।) पीतकाष्ठम्। इति शब्दचन्द्रिका॥

प्रचेलकः, पुं, (प्रकर्षेण चेलति कम्पतीति। प्र+चेल्+ण्वुल्।) घोटकः। इति शब्दमाला॥

प्रचोदनी, स्त्री, (प्रचोदयते रोगं मयेति। प्र+चुद्+णिच्+ल्युट्। ङीप्।) कण्टकारी। इत्यमरः। २। ४। ९३॥

प्रचोदितः, त्रि, (प्र+चुद्+क्तः।) प्रेरितः। यथा,—
"प्रचोदिता येन पुरा सरस्वती।"
इति श्रीभागवते २ स्कन्धे ४ अध्यायः॥

प्रच्छ, ज्ञी प्स ईप्से। इति कविकल्पद्रुमः॥ (तुदा०-पर०-द्विक०-अनिट्।) ज्ञीप्सा ज्ञातुमिच्छा। ग्रह कम इच्छायां ज्ञानमपि विषयत्वात्। ज्ञी, अप्राक्षीत्। प्र, पृच्छति यशो गुरुं शिष्यः। इति दुर्गादासः॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति। प्र+छद+णिच्+करणे घः। "छादेर्घेऽद्व्युपसर्गस्य।" ६। ४। ९६। इति उपधाया ह्रस्वः।) आच्छादनम्। इति शब्दरत्नावली॥ (यथा, रघुः। १९। २२।
"प्रच्छदान्तगलिताश्रुबिन्दुभिः
क्रोधभिन्नवलयैर्विवर्त्तनैः॥")

प्रच्छदपटः, पुं, प्रकर्षेण छाद्यतेऽनेन स चासौ पटश्चेति। आच्छादनपटः। पाछुड़ इति ख्यातः। तत्पर्य्यायः। निचोलः २। इत्यमरः। २।६।११६॥ निचुलः ३। इति त्रिकाण्डः॥ निचोलम् ४। इति रभसः॥ निचोली ५। इति राजदेवः॥ इत्यमरटीकायां भरतः॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे।
"पत्नीभङ्गाभोगैरलक्तकमिलैः सौपैर्कुसुमैः
स्त्रियाः सर्व्वावस्थं कथयति रतं प्रच्छदपटः॥")

प्रच्छना, स्त्री, (प्रच्छ+भावुककात् युच्। टाप्।) आमन्त्रणा। इति जटाधरः॥

प्रच्छन्नं, क्ली, (प्र+छद्+क्त।) अन्तर्द्वारम्। इत्यमरः। २। २। १८॥ आच्छन्ने, त्रि॥ (यथा, महाभारते। १। ७९। ११।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्॥")

प्रच्छर्द्दिका, स्त्री, (प्र+छर्द्द वमने+"रोगाख्यायां ण्वुल् बहुलम्।" ३। ३। १०८। इति ण्वुल्। स्त्रियां टापि अत इत्वम्।) वमिः। इत्यमरः। २। ६। ५५॥ (वमनकारके, त्रि।)

प्रच्छादनं, क्ली, (प्रच्छाद्यतेऽनेनेति। प्र+छद्+णिच्+ल्युट्।) उत्तरीयवस्त्रम्। तत्पर्य्यायः। प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४। इति हेमचन्द्रः। ३। ३३५॥ (गोपनम्। यथा, अथर्व्वेदे। ५। १०।
"प्रच्छादनं भविष्यं व्याधिभूतानां परम्॥"
"वसं निवसनं प्रच्छादनं प्रच्छादनवस्त्रमयं भवेत्। वसं विवस्त्रोऽप्यपरोऽसता॥" इति
मङ्गीलः॥ भावे ल्युट्। गोपनम्। यथा, महाभारते। १। १६५। २०।
"प्राच्छन्नप्रच्छादनार्थे वै वायुरोर्ध्वमुपागतम्।
विस्तार्य विधार्य्यं सर्व्वं तत्र प्रति इत्यपि॥")

प्रच्छादितं, त्रि, (प्र+छद्+णिच्+क्तः।) आच्छादितम्। इति हलायुधः॥

प्रजः, पुं, (प्रजायते जायायामिति। प्र+जन्+ड।) पतिः। "भर्तारं प्रजनं कुर्य्यात् पुत्रवत्यपि पतिं
के प्रजः पतिः।" इति प्रजानाथेमन्नरटीकायां
भरतः॥

प्रजनः, पुं, (प्रजायतेऽनेनेति। प्र+जन्+करणे घञ्। "जनिवध्योश्च।" ७। ३। ३५। इति न
वृद्धिः।) उपसरः। इत्यमरः। २। ९। ४३॥
हे स्त्रीगवादिषु पुंपश्वादीनां प्रथमगर्भग्रहणार्थं
मैथुनाभियोगः। प्रजनं प्रजननं तेन।
प्रसूतौ गर्भग्रहणकामः। इति स्वामी। स्त्री
प्रथमगर्भग्रहणाभियोगः। इति दुर्गः।
स्त्रीगवीषु पुङ्गवादीनां प्रथमगर्भार्थमेव कीर्त्तनम्।
किन्तु गौणत्वमुपसरं वदन्ति भट्टाः। इत्यमरटीकायां भरतः॥ (मैथुनार्थमभियोगमात्रम्।
यथा, मनुः। १४। १२१।
"आश्रमे मिथुनीभावे प्रजने च प्रजार्थिनाम्।"
प्र+जन्+भावे घञ्। पुत्रोत्पादनम्। यथा,
मनुः। ९। ६१।
"उत्पन्नेऽर्थे प्रधानस्य प्रजने पौनरुक्तिः।
विना प्रयोगे प्रजने तद्वाद्गलि न भवेत्॥"
जन्मयितरि, त्रि। यथा, भागवते। ५। ६। ३।
"इमौ जनानां प्रजनः प्रजानां
प्रतीकतां यः स महाविभूतिः॥"
यथा, भगवद्गीतायाम्। १०। २८।
"प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥")

प्रजननं, क्ली, (प्रजायतेऽनेनेति। प्र+जन्+ल्युट्।) योनिः। (यथा, सुश्रुते। १। २१।
"मिश्रकमाध्यावन्तस्रावात्कारविष्टकाट्य-
कोष्ठोदरसमुत्थान्पकाटर्का: मुन्नाहिन्
प्रजाः॥" प्र+जन्+भावे ल्युट्।) जन्म।
इति मेदिनी। ने, १९९॥ (यथा, रामायणे। २। ४१।
"यथा: सन्ति पुत्रवन्तेन मनोरमाणां
मिथो: प्रजननेन सन्ततौ च॥"
गर्भोत्पत्तिः। यथा, सुश्रुते शारीरस्थाने। १०
अध्याये। "ततः सम्यग्भावे चतुर्थे
मासे स्थिरामाहात्म्यगर्भोत्पत्तिकाले
यतः स्त्रियः परिहर्तव्याः प्रजननं
कर्त्तव्यतः परिचर्येत्।") जन्म। इति
विश्व॥ (यथा, महाभारते। ।१।१०४।१८।
"तस्मात् प्रतिष्ठाप्य मां वीरः प्रजायते
करवाणि
महान्तं नैवमी धर्मं विहाय च मर्त्यतः॥"
प्रजनयतीति। प्र+जन+णिच्+ल्यु। जनयितरि,
त्रि। यथा, वाजसनेयसंहितायाम्। ११।१०।
"इदं हविः प्रजननं मे अस्तु॥")

प्रजविनी, स्त्री, (प्रजवति। प्र+जन+णिच्+ल्युट्। इति जत इत्वम्।) जननी।
इति जटाधरः॥

प्रजल्पः, पुं, (प्र+जल्प+भावे घञ्।) प्रजल्पितः। यथा,—
"असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया।
प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते॥"
इत्युज्ज्वलनीलमणिः॥

(वसुभाष्यम्। यथा, हठयोगप्रदीपिकायाम्। १। १५।
"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति॥")

प्रजवः, पुं, (प्रजवनमिति। प्र+जु वेगगतौ+ "ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) प्रकृष्टवेगः। प्रपूर्व्वजुधातोर्भावेऽल्प्रत्ययनिष्पन्नः॥ (यथा, ऋग्वेदे। ७। ३३। ८।
"वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वे-
तवे वः।")

प्रजवी, त्रि, (प्रजवतीति। प्र+जु वेगगतौ+ "प्रजोरिनिः।" ३। २। १५६। इति इनिः।) प्रकृष्टवेगयुक्तः। इत्यमरः। २। ८। ७३॥

प्रजा, स्त्री, (प्रजायते इति। प्र+जन्+"उपसर्गे च संज्ञायाम्।" ३। २। ९९। इति डः।) सन्ततिः। पितृमातृगुणदोषैश्च प्रजा विभिन्ना भवति। यथा, अग्निपुराणे।
"मातृणां शीलदोषेण पितृशीलगुणेन च।
विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवशीलि-
नाम्॥"
जनः। इत्यमरः। ३। ३। ४२॥ (यथा, रघुः। १। २४।
"प्रजानां विनयाधानात् रक्षणात् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥"
उत्पत्तिः। यथा, ऋग्वेदे। १०। ७२। ८।
"प्रजायै मृत्यवे त्वत्पुनर्मार्त्ताण्डमाभरत्॥")

प्रजागरः, पुं, (प्र+जागृ+"ऋदोरप्।"३।३।५७। इति भावे अप्।) प्रकर्षेण जागरणम्। इति हलायुधः॥ यथा, अग्निपुराणे।
"देवतानां पितॄणाञ्च घोरं कृत्वा प्रजागरम्।
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात्।
रामं दाशरथिं प्राप्य सगणः क्षयमीयिवान्॥"
(विष्णुः। यथा, महाभारते। १३। १४९। ११५।
"आधारनिलयो धाता पुष्पहासः प्रजागरः॥"
"नित्यप्रबुद्धस्वरूपत्वात् प्रजागरः।" इति तद्भाष्यम्॥ प्राणः। यथा, भागवते। ४। २९। १५।
"ते चण्डवेगानुचराः पुरञ्जनपुरं यदा।
हर्त्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः॥"
"प्रजागरः प्राणः।" इति तट्टीकायां स्वामी॥)

प्रजाता, स्त्री, (प्रजातं प्रजननं सुतादीनामुत्पत्तिरित्यर्थः। तदस्या अस्तीति। अच्। ततष्टाप्।) जातापत्या। प्रसूता। इत्यमरः। २। ६। १६॥ (यथा, सुश्रुते निदानस्थाने ८ अध्याये।
"स्त्रीणामप्रजातानां प्रजातानां तथाहितैः।
दारुणरक्तो घोरो जायते रक्तविद्रधिः॥"
"नमोऽनन्तरं वक्तव्यमिति तस्याश्च प्रजाया मातायाः स्त्रियः प्रश्नं कुर्य्युः प्रजाता प्रजाता धर्म्म धर्म्म पुत्रमिति तदास्या अर्थकामायामर्हाः। यदा च प्रजाता स्यात् तदैनामवेक्षेत कालेऽस्याः अपरा प्रपन्ना नापन्ना वेति॥"
इति चरके शारीरस्थाने ८मेऽध्याये॥)

धर्म्मविशेषे, पुं। यथा, कात्यायनश्रौतसूत्रे। २०। ३। २०।
"प्रजाते वायव्यम्।" "वडवायां कृतरेतःस्कन्दनः प्रजात इत्युच्यते।" इति तद्भाष्यम्॥)

प्रजादा, स्त्री, (प्रजां गर्भदोषनिवारणेन सन्ततिं ददातीति। दा+कः। टाप्।) गर्भदात्रीक्षुपः। इति राजनिर्घण्टः॥ प्रजादातरि, त्रि॥

प्रजादानं, क्ली, (प्रजातो जन्मतो दानं शुद्धिरस्य।) रजतम्। इति शब्दचन्द्रिका॥ (प्रजाया दाने आदाने अदाने च॥)

प्रजानती, स्त्री, (प्रजानातीति। प्र+ज्ञा+शतृ+ङीप्।) पण्डिता। प्राज्ञी। इति हेमचन्द्रः। ३। १८६॥ (विशेषवेत्तरि, त्रि। यथा, रामायणे। २। ७२। १४।
"तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम्।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता॥")

प्रजापः, पुं, (प्रजाः पातीति। पा रक्षणे+कः।) राजा। इति हेमचन्द्रः। ३। ३५७॥

प्रजापतिः, पुं, (प्रजानां पतिः।) ब्रह्मा। इत्यमरः। १। १। १७॥ (यथा, महाभारते। १। १। ३२।
"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥")
दक्षादिः। (यथा,—
"द्वितीये हि युगे धर्म्मपादोऽपक्रमात्कालक्रमेण।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः॥
तपोविघ्नं शमीकर्त्तुं तपोविघ्नं महात्मनाम्।
पश्यन् समर्थश्चोपेक्षाञ्चक्रे दक्षः प्रजापतिः॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षप्रजापतिः।
भावो न कल्पयामास प्रोच्यमानः सुरैरपि॥"
इति चरके चिकित्सास्थाने तृतीयेऽध्याये॥)
महीपालः। इति मेदिनी। ते, २०८॥ (इन्द्रः। यथा, महाभारते। ३। १८५। १६।
"अयमेव विधाता हि तथैवेन्द्रः प्रजापतिः॥")
जामाता। दिवाकरः। वह्निः। त्वष्टा। इति हेमचन्द्रः॥ (यथा, वाजसनेयसंहितायाम्। १२। ६१।
"तां विश्वैर्देवैरृतुभिः संविदानः
प्रजापतिर्विश्वकर्म्मा विमुञ्चतु॥"
मनुः। यथा, मनौ। १०। ७८।
"न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजा-
पतिः॥")
दश प्रजापतयो यथा, आह्निकतत्त्वे।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च।
देवान् सर्व्वानृषीन् सर्व्वान् कर्णधारानिमान् स्मरेत्॥"
एकविंशतिप्रजापतयो यथा,—
"ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्म्मस्तथा यमः।
मरीचिरङ्गिरात्रिश्च पुलस्त्यः पुलहः क्रतुः॥
वसिष्ठः परमेष्ठी च विवस्वान् सोम एव च।
कर्दमश्चापि यः प्रोक्तः क्रोधोऽर्व्वाक् क्रीत एव च।
एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः॥"
इति महाभारते मोक्षधर्म्मः॥०॥
पिता। यथा,—
"जनको जन्मदानाच्च रक्षणाच्च पिता स्मृतः।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥०॥
स्वनामख्यातकीटविशेषश्च॥

प्रजावती, स्त्री, (प्रजाऽस्त्यस्या इति। प्रजा+मतुप्। मस्य वः। स्त्रियां ङीप्।) भ्रातृजाया। इत्यमरः। २। ६। ३०॥ ज्येष्ठभ्रातृपत्नी। इति केचित्। इति भरतः॥ (यथा, रघुः। १४। ४५।
"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव।
स त्वं रथी तद्व्यपदेशनेयां
प्रापय्य वाल्मीकिपदं त्यजैनाम्॥"
प्रियव्रतपत्नी। यथा, मार्कण्डेये। ५३। १३।
"प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत॥")
सन्तानविशिष्टा। (यथा, मार्कण्डेये। ९०। १८।
"साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजा-
वतीम्॥")

प्रजाहितं, क्ली, (प्रजायै हितम्।) जलम्। इति शब्दमाला॥ प्रजोपकारी, त्रि॥

प्रजिनः, पुं, (प्रकर्षेण जयतीति। प्र+जि+बाहुलकात् नक्।) वायुः। इति शब्दमाला॥

प्रजेश्वरः, पुं, (प्रजानामीश्वरः।) राजा। इति त्रिकाण्डशेषः॥ (यथा, रघुः। ३। ६८।
"तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः॥")

प्रज्ञः, त्रि, (प्रकर्षेण जानातीति। प्र+ज्ञा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः।) पण्डितः। इति शब्दरत्नटीकायां भरतः॥ (यथा, माण्डूक्योपनिषदि। ७।
"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्॥") प्रज्ञायुक्तः। इति प्रज्ञुशब्दटीकायां भरतः पठति च॥

प्रज्ञप्तिः, स्त्री, (प्र+ज्ञा+णिच्+क्तिन्।) सङ्केतम्। इति त्रिकाण्डशेषः॥ (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम्।
"विष्णोः प्रज्ञप्तिरेवैका शब्दैरन्यैर्वदोदिते।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा॥"
ज्ञापनम्। ज्ञानम्। यथा, भागवते। ३। २६। ११।
"कपिलस्तत्त्वसंख्याता भगवानात्ममायया।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम्॥"
विद्यादेवीविशेषः। इति हेमचन्द्रः। २। १५३॥)

प्रज्ञप्ती, स्त्री, (प्रज्ञप्ति+वा ङीष्।) विद्यादेवीविशेषः। इति हेमचन्द्रः। २। १५३॥

प्रज्ञा, स्त्री, (प्र+ज्ञा+कः। टाप्।) बुद्धिः। (यथा, रघुः। १। १५।
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः॥"
एकाग्रता। यथा, रघुवंशम्। ७। ५०।
"तस्थौ धीरो विज्ञाय प्रज्ञां पुनीत चाक्षुषः॥")
प्रज्ञो। प्रकर्षेण जानाति या। इत्यमरः॥

"[illegible]
[illegible]
[illegible]
[illegible] ।")

प्रचुरपुरुषः, पुं, (प्रचोरयतीति । प्र + चुर [illegible] + कः । प्रचुरश्चासौ पुरुषश्चेति ।) चौरः । इति त्रिकाण्डशेषः ॥ (प्रचुरो बहुलः पुरुषश्चेति कर्म्मधारये ।) बहुजनः ॥

प्रचेतकी, स्त्री, ([illegible] । प्र + चित् + णिच् + [illegible] । गौरादित्वात् ङीष् ।) [illegible] । इति राजनिर्घण्टः ॥ [illegible] च ॥

प्रचेता, [स्] पुं, (प्रचेतति [illegible] । प्र + चित् + असुन् ।) वरुणः । इति हेमचन्द्रः ॥

प्रचेताः, [स्] पुं, (प्रचेतयतीति । प्र + चित + असुन् ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, रघौ । १ । ८० ।
"[illegible]
[illegible] ।"
मुनिविशेषः । (यथा, मनौ । १ । ३५ ।
"[illegible]
[illegible] ॥"
[illegible] ।) प्रकृष्टहृदि, त्रि । इति मेदिनी ॥ प्राचीनबर्हिषोऽपत्यानि । यथा,—
"प्राचीनबर्हिषः [illegible] ।
[illegible] ॥
[illegible] ॥"
इति कौर्म्मे १९ अध्यायः ॥
अपि च ।
"प्राचीनबर्हिर्भगवान् [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥"
इति मार्कण्डेये ९ अध्यायः ॥
(प्रकृष्टज्ञानयुक्ते, त्रि । यथा, ऋग्वेदे । [illegible] ।
"[illegible] ।"
"[illegible] ।" इति महाभारते [illegible] ।)

प्रचेलं, क्ली, (प्रचेलति [illegible] । प्र + चेल + अच् ।) पीतकाष्ठम् । इति शब्दचन्द्रिका ॥

प्रचेलकः, पुं, (प्रकर्षेण चेलति [illegible] । प्र + चेल + ण्वुल् ।) घोटकः । इति शब्दमाला ॥

प्रचोदनी, स्त्री, (प्रचोदयति [illegible] । प्र + चुद् + णिच् + ल्युट् । ङीप् ।) कण्टकारी । इत्यमरः । २ । ४ । ९३ ॥

प्रचोदितः, त्रि, (प्र + चुद् + क्तः ।) प्रेरितः । यथा,—
"प्रचोदिता येन पुरा सरस्वती ।"
इति श्रीभागवते २ स्कन्धे ४ अध्यायः ॥

प्रच्छ, ज्ञी प्स जीप्से । इति कविकल्पद्रुमः । (तुदा०-पर०-द्विक०-अनिट् ।) ज्ञीप्सा ज्ञातुमिच्छा । [illegible] । ज्ञी, अप्राक्षीत् । प्र, पृच्छति गां गुरुं शिष्यः । इति दुर्गादासः ॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति । प्र + छद + णिच् + करणे घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति उपधाया ह्रस्वः ।) आच्छादनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १६ । २१ ।
"प्रच्छदान्तगलिताश्रुबिन्दुभिः
क्रोधभिन्नवलयैर्विवर्त्तनैः ॥")

प्रच्छदपटः, पुं, प्रकर्षेण छादयतीति य आसौ पटश्चेति । आच्छादनपटः । पाछुड़ि इति भाषा । तत्पर्य्यायः । निचोलः २ । इत्यमरः । २ । ६ । ११६ ॥ निचुलः ३ । इति भरतः ॥ निचोलम् ४ । निचोली ५ । इति शब्दरत्नावली ॥ [illegible] । (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"[illegible]
[illegible] ॥")

प्रच्छना, स्त्री, (प्रच्छ + बाहुलकात् युच् । टाप् ।) आप्रच्छना । इति जटाधरः ॥

प्रच्छन्नं, क्ली, (प्र + छद् + क्त ।) अन्तर्द्वारम् । इत्यमरः । २ । २ । १७ ॥ आच्छन्ने, त्रि । (यथा, महाभारते । १ । ७६ । ६१ ।
"प्रच्छन्ना हि महाप्राज्ञा [illegible] ।")

प्रच्छर्द्दिका, स्त्री, (प्र + छर्द वमने + "रोगाख्यायां ण्वुल् बहुलम् ।" ३ । ३ । १०८ । इति ण्वुल् । स्त्रियां टापि अत इत्वम् ।) वमिः । इत्यमरः । २ । ६ । ५५ ॥ (वमनकारके, त्रि ।)

प्रच्छादनं, क्ली, (प्रच्छादयतीत्यनेनेति । प्र + छद् + णिच् + ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः । ३ । ३३६ ॥ (वेष्टनम् । यथा, मनौ । ३ । १० ।
"[illegible] ।"
"[illegible] ॥" इति [illegible] । भावे ल्युट् । गोपनम् । यथा, महाभारते । १ । १६६ । ३० ।
"[illegible]
[illegible] ॥")

प्रच्छादितं, त्रि, (प्र + छद् + णिच् + क्तः ।) आच्छादितम् । इति जटाधरः ॥

प्रजः, पुं, (प्रजायते भार्य्यायामनेन इति । प्र + जन् + डः ।) पतिः । "[illegible]" इति [illegible] ॥

प्रजनः, पुं, (प्रजायतेऽस्मिन्निति । प्र + जन् + आधारे घञ् । "[illegible]" ७ । ३ । ३५ । इति न वृद्धिः ।) उपसरः । इत्यमरः । २ । ९ । ४३ ॥ [illegible] ॥ [illegible] ॥ ("[illegible]" इति [illegible] । यथा, मनुः । ९ । १२१ ।
"[illegible] ॥"
प्र + जन् + भावे घञ् । [illegible] । यथा, मनुः । ८ । ३९९ ।
"[illegible]
[illegible] ॥"
अर्थविशिष्टे, त्रि । यथा, भागवते । ४ । २२ । ३४ ।
"[illegible]
[illegible] ॥"
यथा, अमरटीकायाम् । १० । २५ ।
"[illegible] ॥")

प्रजनं, क्ली, (प्रजायतेऽनेनेति । प्र + जन् + ल्युट् ।) योनिः । (यथा, सुश्रुते । ६ । ९१ ।
"[illegible]
[illegible] ।" प्र + जन् + भावे ल्युट् ।) गर्भः । इति मेदिनी । ने, १२१ ॥ (यथा, हरिवंशे । [illegible] ।
"[illegible]
[illegible] ॥"
[illegible] । यथा, सुश्रुते [illegible] ।
"[illegible]
[illegible] ॥" [illegible] । (यथा, महाभारते । [illegible] ।
"[illegible]
[illegible] ॥"
[illegible] । प्र + जन + ल्युट् । [illegible] । त्रि । यथा, [illegible] ।
"[illegible] ॥")

प्रजनिका, स्त्री, (प्रजनयतीति । प्र + जन् + णिच् + ण्वुल् । [illegible] ।) [illegible] । इति जटाधरः ॥

प्रजवः, पुं, (प्र + जव + [illegible] ।) [illegible] । यथा,—
"[illegible]
[illegible] ।"
[illegible] ।

(मल्लभाष्यम् । यथा, हठयोगप्रदीपिकायाम् । १ । १५ ।
"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥")

प्रजवः, पुं, (प्रजवनमिति । प्र + जु वेगगतौ + "ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) प्रकृष्टवेगः । प्रपूर्व्वजुधातोर्भावेऽल्प्रत्ययनिष्पन्नः ॥ (यथा, ऋग्वेदे । ७ । ३३ । ८ ।
"वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥")

प्रजवी, त्रि, (प्रजवतीति । प्र + जु वेगगतौ + "प्रजोरिनिः ।" ३ । २ । १५६ । इति इनिः ।) प्रकृष्टवेगयुक्तः । इत्यमरः । २ । ८ । ७३ ॥

प्रजा, स्त्री, (प्रजायते इति । प्र + जन् + "उपसर्गे च संज्ञायाम् ।" ३ । २ । ९९ । इति डः ।) सन्ततिः । पितृमातृगुणदोषैश्च प्रजा विभिन्ना भवति । यथा, अग्निपुराणे ।
"मातृणां शीलदोषेण पितृशीलगुणेन च ।
विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवशीलिनाम् ॥"
जनः । इत्यमरः । ३ । ३ । ३२ ॥ (यथा, रघुः । १ । २४ ।
"प्रजानां विनयाधानात् रक्षणात् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥"
उत्पत्तिः । यथा, ऋग्वेदे । १० । ७२ । ८ ।
"प्रजायै मृत्यवे त्वत्पुनर्मार्त्ताण्डमाभरत् ॥")

प्रजागरः, पुं, (प्र + जागृ + "ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) प्रकर्षेण जागरणम् । इति हलायुधः ॥ यथा, अग्निपुराणे ।
"देवतानां पितृणाञ्च घोरं कृत्वा प्रजागरम् ।
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य सगणः क्षयमीयिवान् ॥"
(विष्णुः । यथा, महाभारते । १३ । १४९ । १२५ ।
"आधारनिलयो धाता पुष्पहासः प्रजागरः ।"
"नित्यबुद्धस्वरूपत्वात् प्रजागरः ।" इति तद्भाष्यम् ॥ प्राणः । यथा, भागवते । ४ । २९ । १५ ।
"ते चण्डवेगानुचराः पुरञ्जनपुरं यदा ।
हर्त्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः ॥"
"प्रजागरः प्राणः ।" इति तट्टीकायां स्वामी ॥)

प्रजाता, स्त्री, (प्रजातं प्रजननं सुतादीनामुत्पत्तिरित्यर्थः । तदस्या अस्तीति । अच् । ततष्टाप् ।) जातापत्या । प्रसूता । इत्यमरः । २ । ६ । १६ ॥ (यथा, सुश्रुते निदानस्थाने ८ अध्याये ।
"स्त्रीणामप्रजातानां प्रजातानां तथाहितैः ।
दारुणस्तरुणो घोरो जायते रक्तविद्रधिः ॥"
"अतोऽनन्तरं वलासकमिति तस्याश्च प्रजाद मासायां स्त्रियः सर्व्वे कुर्युः प्रजाता प्रजाता सर्व्वं यर्द्धं पूर्णमिति तदस्याः सर्व्वेषाञ्चायन्तीनां वाचः । यदा च प्रजाता स्यात् तदैनामभ्युपेत्य वाचिदृशां अमृता प्रजा वायवमा वैति ॥"
इति चरके शारीरस्थाने २ अध्याये ॥

स्वविशेषे, पुं । यथा, कात्यायनश्रौतसूत्रे । २० । ३ । २० ।
"प्रजाते वायवम् ।" "वडवायां अश्वरेतःस्कन्दनं प्रजात इत्युच्यते ॥" इति तद्भाष्यम् ॥)

प्रजादा, स्त्री, (प्रजां गर्भदोषनिवारणेन सन्ततिं ददातीति । दा + कः । टाप् ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥ प्रजादातरि, त्रि ॥

प्रजादानं, क्ली, (प्रजातो जन्मतो दानं शुद्धिरस्य ।) रजतम् । इति शब्दचन्द्रिका ॥ (प्रजाया दाने आदाने च ॥)

प्रजानन्ती, स्त्री, (प्रजानातीति । प्र + ज्ञा + शतृ + ङीप् ।) पण्डिता । प्राज्ञी । इति हेमचन्द्रः । ३ । १८६ ॥ (विशेषवेत्तरि, त्रि । यथा, रामायणे । २ । ७२ । १४ ।
"तं प्रत्युवाच कैकेयी प्रियवद्‌घोरमप्रियम् ।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता ॥")

प्रजापः, पुं, (प्रजाः पातीति । पा रक्षणे + कः ।) राजा । इति हेमचन्द्रः । ३ । ३५७ ॥

प्रजापतिः, पुं, (प्रजानां पतिः ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, महाभारते । १ । १ । ३२ ।
"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥")
दक्षादिः । (यथा,—
"द्वितीये हि युगे धर्म्ममक्रोधत्रसमाश्रितम् ।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः ॥
तपोविघ्नं शमीकर्त्तुं तपोविघ्नं महात्मनाम् ।
पश्यन् समर्थश्चापि चाचक्रे दक्षः प्रजापतिः ॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षप्रजापतिः ।
भागो न कल्पयामास प्रोच्यमानः सुरैरपि ॥"
इति चरके चिकित्सास्थाने तृतीयेऽध्याये ॥)
महीपालः । इति मेदिनी । ते, २०८ ॥ (इन्द्रः । यथा, महाभारते । ३ । १८५ । २६ ।
"अयमेव विधाता हि सवितेन्द्रः प्रजापतिः ॥")
जामाता । दिवाकरः । वह्निः । त्वष्टा । इति हेमचन्द्रः ॥ (यथा, वाजसनेयसंहितायाम् । १२ । ६१ ।
"तां विश्वैर्देवैरृतुभिः संविदानः
प्रजापतिर्विश्वकर्म्मा विमुञ्चतु ॥"
मनुः । यथा, मनौ । १० । ७८ ।
"न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजापतिः ॥")
दश प्रजापतयो यथा, आह्निकतत्त्वे ।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ।
देवान् सर्व्वानृषीन् सर्व्वान् सर्व्वकर्म्मेश्वरोऽसृजत् ॥"
एकविंशतिप्रजापतयो यथा,—
"ब्रह्मा स्थाणुर्म्मनुर्दक्षो भृगुर्धर्म्मस्तथा यमः ।
मरीचिरङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च ।
कर्द्दमश्चापि यः प्रोक्तः क्रोधोऽर्व्वाक् क्रीत एव च ।
एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः ॥"
इति महाभारते मोक्षधर्म्मः ॥ ० ॥

पिता । यथा,—
"जनको जन्मदानाच्च रक्षणाच्च पिता स्मृतः ।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥ ० ॥
स्वनामख्यातकीटविशेषश्च ॥

प्रजावती, स्त्री, (प्रजाऽस्त्यस्या इति । प्रजा + मतुप् । मस्य वः । स्त्रियां ङीप् ।) भ्रातृजाया । इत्यमरः । २ । ६ । ३० ॥ ज्येष्ठभ्रातृपत्नी । इति केचित् । इति भरतः ॥ (यथा, रघुः । १४ । ४५ ।
"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां
प्रापय्य वाल्मीकिपदं त्यजैनाम् ॥"
प्रियव्रतपत्नी । यथा, मार्कण्डेये । ५३ । ११ ।
"प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत ॥")
सन्तानविशिष्टा ॥ (यथा, मार्कण्डेये । ८७ । १८ ।
"साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजावतीम् ॥")

प्रजाहितं, क्ली, (प्रजायै हितम् ।) जलम् । इति शब्दमाला ॥ प्रजोपकारे, त्रि ॥

प्रजिनः, पुं, (प्रकर्षेण जयतीति । प्र + जि + बाहुलकात् नक् ।) वायुः । इति शब्दमाला ॥

प्रजेश्वरः, पुं, (प्रजानामीश्वरः ।) राजा । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ३ । ६८ ।
"ततः परं तत्प्रभवः प्रपेदिरे
प्रजेश्वरः शासनहारिणा हरेः ॥")

प्रज्ञः, त्रि, (प्रकर्षेण जानातीति । प्र + ज्ञा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) पण्डितः । इति शब्दरत्नावल्यां भरतः ॥ (यथा, माण्डूक्योपनिषदि । ७ ।
"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् ।") प्रज्ञतत्त्वज्ञः ।
इति शब्दरत्नावल्यां भरतः परम्परा ॥

प्रज्ञप्तिः, स्त्री, (प्र + ज्ञा + णिच् + क्तिन् ।) सङ्केतम् । इति त्रिकाण्डशेषः ॥ (यथा, सर्व्वदर्शनसंग्रहे पूर्व्वप्रज्ञदर्शनम् ।
"विष्णोः प्रज्ञप्तिरेवैका शब्दैरन्यैरुदीर्य्यते ।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा ॥"
ज्ञानम् । ज्ञापनम् । यथा, भागवते । ३ । २५ । ११ ।
"कपिलस्तत्त्वसंख्याता भगवानात्ममायया ।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥"
विद्यादेवीविशेषः । इति हेमचन्द्रः । २ । १५३ ॥)

प्रज्ञप्ती, स्त्री, (प्रज्ञप्ति + वा ङीष् ।) विद्यादेवीविशेषः । इति हेमचन्द्रः । २ । १५३ ॥

प्रज्ञा, स्त्री, (प्र + ज्ञा + कः । टाप् ।) बुद्धिः । (यथा, रघुः । १ । १५ ।
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ॥"
इत्यादि । यथा, पञ्चतन्त्रम् । ५ । १०६ ।
"तदेव बीजं विशालं प्रज्ञा पुरुषेण कारकम् ॥")
प्राज्ञी । प्रकर्षेण जानाति या । इत्यमरः ॥

सरस्वती। इति शब्दरत्नावली॥ बुद्धेरष्टाङ्ग-
सन्धिः। शिशुः १ शिवः २ शिवः ३ शिवम् ४
मनुः ५ मनः ६ धीः ७ धृतिः ८ माया ९
बालम् १० ऋमिता ११। इत्यष्टादशप्रज्ञा-
नामानि। इति वैदिकनिघण्टौ ३ अध्यायः॥

प्रज्ञाकाय:, पुं, (प्रज्ञा काये यस्य।) मञ्जुघोषः।
इति त्रिकाण्डशेषः॥

प्रज्ञाचक्षुः, पुं, (प्रज्ञा एव चक्षुर्यस्य।) धृत-
राष्ट्रः। इति शब्दरत्नावली॥ (यथा, महा-
भारते। १। १। १६०।
"तथा तु मम वाक्यानि बुद्धियुक्तानि शंसतः।
ततो ह्याचष्ट मां मौनि प्रज्ञाचक्षुर्नराधिप॥")

प्रज्ञानं, क्ली, (प्रज्ञायतेऽनेनेति। प्र + ज्ञा + ल्युट्।)
बुद्धिः। (यथा, महाभारते। ३। १५६। २६।
"नमेव सुहृदं मोहान् न प्रज्ञानं तथाऽस्ति च॥")
चिह्नम्। इत्यमरः। ३। ३। ११०॥ (यथा, महा-
भारते। ५। ३१। २६।
"नामं एको कुमुखुक्ते महार्थे
तत् प्रज्ञानं परमं महितस्य॥"
चैतन्यम्। तत्पर्य्यायः यथा, पञ्चदश्याम्। १। ३।
"येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च।
स्वाद्वस्वादू विजानाति तत् प्रज्ञानमुदीरितम्॥")
पण्डिते, त्रि। इति शब्दरत्नावली॥

प्रज्ञी, [न्] त्रि, (प्रज्ञाऽस्त्यस्येति। प्रज्ञा + इनिः।)
पण्डितः। इति शब्दरत्नावली॥

प्रज्ञुः, पुं, (प्रगते जानुनी यस्य। "प्रसम्भ्यां जानु-
नोर्ज्ञुः।" ५। ४। १२९। इति ज्ञुः।) प्रगत-
जानुकः। इत्यमरः। २। ६। ४७। यस्य
जानुनोर्मध्ये विस्तं काष्ठादिकं वा अधस्ता-
दूर्ध्वं संयातु इत्यम्। इति भरतः॥

प्रज्वलित:, त्रि, (प्र + ज्वल + क्तः।) प्रकृष्टज्वलन-
विशिष्टः। यथा,—
"अर्चिं प्रज्वलितं वह्नि भास्करं तुल्यप्रभम्।
सुवर्णकर्णितामं नमितं कर्णोत्सुकम्॥"
इति मार्कण्डेयम्॥

प्रडीनं, क्ली, (प्र + डी पक्षिगतौ + क्तः।) पक्षिणां
गतिविशेषः। इत्यमरः। २। ५। ३६। यथा-
योगं प्रडीनं उड्डीनसण्डीनाद्यम्। निर्मम-
प्रयाणम्। इत्यपि। इति भरतः॥

प्रणः, पुं, (प्र + "नश पुराणे च।" ५। ४। २
इत्यस्य वार्त्तिकं। इति नः।) पुराणः। "पुरा-
णार्थे प्रकारादपि प्रणमन्तो वा भवन्ति।" इति
सिद्धान्तकौमुदी।

प्रणत:, त्रि, (प्र + नम + क्तः।) प्रकर्षेण नतः।
प्रणतिविशिष्टः। यथा,—
"छेदं मदाः प्रणतवत्सलमीशमीशं
मौत्कुंमते दिवि दिवि शिवदं शरण्यम्।
मन्दाकिन्यं कमलनाभसमाधिरोमं
वन्दे महागुरुम् ? तं प्रणतान्तिकम्॥"
इति दीपाननम्॥

प्रणति:, स्त्री, (प्रणमनं प्रणतिरिति। प्र + नम +
भावे क्तिन्।) प्रणामः। अनुनयः। प्रति-
पातः १। अनुनयः २। इति हैमचन्द्रः॥ (यथा,
रघौ। ११। ८९।
"राघवोऽपि चरणौ तपोनिधेः
क्षम्यतामिति वदन् समस्पृशत्।
निर्ज्जितेषु तरसा तरस्विनां
शत्रुषु प्रणतिरेव कीर्त्तये॥")

प्रणयः, पुं, (प्रणयनम्। प्र + नी + "एरच्।"
३। ३। ५६। इति अच्।) प्रीत्या प्रार्थनम्।
तत्पर्य्यायः। प्रश्रयः २। इत्यमरः। ३। २। ५४॥
प्रणतः ३। इति भरतः॥ (यथा, रघौ। २। ५८।
"संबन्धमाभाषणपूर्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्वनान्ते।
तद्भूतनाथानुग नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम्॥")
प्रेम। (यथा, भगवद्गीतायाम्। ११। ४१।
"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि॥")
याच्ञा। विश्रम्भः। निर्व्वाणः। इति मेदिनी।
ये, ८८॥

प्रणयी, पुं, (प्रणयोऽस्त्यस्येति। प्रणय + इनिः।)
स्वामी। इति हेमचन्द्रः॥ प्रणययुक्ते, त्रि।
(यथा,—
"प्रणयिनि विकलापि लज्जया मौनभाजी
प्रति विमिव कथोद्रीं रीति विरोकिपात॥"
इत्युद्भटः॥)

प्रणयिनी, स्त्री, (प्रणयिन् + ङीप्।) भार्य्या।
इति हेमचन्द्रः॥

प्रणवः, पुं, (प्रकर्षेण नूयते स्तूयते अनेन ईश्वरेण
इति वा नवेनेति। प्र + णु स्तुतौ + "ऋदो-
रप्।" ३। ३। ५७। इति अप्। "उपसर्गा-
दसमासेऽपि णोपदेशस्य।" ८। ४। १४। इति
णत्वम्। यद्वा, प्रकर्षेण नूयते स्तूयतेऽनेन प्रण-
वति इति। प्र + णम + कर्म्मणि अप्। संज्ञा-
पूर्व्वकत्वात् वृद्ध्यभावः। पृषोदरादित्वात् साधु-
रपि।) ओङ्कारः। इत्यमरः। १। ६। ४॥
तस्य पर्य्यायो यथा,—
"ओङ्कारः प्रणवस्तारो वेदादिर्मूलमो ध्रुवः।
वेदमुखं त्रिमूर्त्तिः ब्रह्म बीजं सम्पार्द्दिरव्ययः॥
समवेदं त्रिवर्णं च प्रणवाशिर्वादेनः॥"
इति वीजवर्णाभिधानम्॥
अपि च।
"ओङ्कारो वर्त्तुलकारो वामन पञ्चारणम्।
मकारः प्रणवः पत्रं त्रिमूर्त्तिस्त्रिदैवतम्॥
सर्व्वमौरोऽग्रतरश्च प्रणवो ध्रुवप्रियः।
त्रिदिवो त्रिशिरो ब्रह्म त्रिधुमो धुर्यबीजकः॥
आद्यबीजं वेदसारो वेदबीजम्भा परम्।
पञ्चरश्मिस्त्रिकूटं च त्रिभवं भवनाशनः॥
गायत्री बीजपञ्चांशो मन्त्रविद्याप्रभुः प्रभुः।
अक्षरं मातृकासूर्य्यादिरनादिरनन्तरी॥"
इति तन्त्रम्॥
(यथा, महानिर्व्वाणतन्त्रे। ३। ३१।
"अकारेण जगत्पाता संहर्त्ता स्यादुकारतः।
मकारेण जगत्स्रष्टा प्रणवार्थ उदाहृतः॥"
यथा च।
"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥"
देवीभागवतकारस्य अध्यक्षपक्षो च रामः
तस्य ओङ्कारोपासनेनैवमुक्तं यथा पद्मे,
९। ७३।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा।
स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यते॥")
अस्योङ्कारकर्त्री यथा,—
"एकमेवाक्षरं ब्रह्म मायया तु चतुष्टयम्।
रौहिणीतनयो रामः अकाराक्षरसम्भवः॥
तैजसात्मकप्रद्युम्न उकाराक्षरसम्भवः।
प्राज्ञात्मको निरुद्धो वै मकाराक्षरसम्भवः॥
अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठि-
तम्॥"
इति गोपालतापनीयोपनिषत्॥ ०॥
स च मातृकविद्धः। यथा,—
"ओङ्कारस्य च हृद्ये शक्तौ शम्भवः स्मृतः।
सर्व्वं मित्रा त्रिविस्वांशो हि मातृविशाष्टः॥"
इति मुग्धबोधटीकायां दुर्गादासः॥ ०॥
अस्य माहात्म्यं यथा,—
"विश्वादिस्त्रितयोपरि त्रिभिरं विश्वतरम्।
चतुर्भागं सङ्कुचितीति भावयं भोः।
तद्वैवाक्षरं तत्र परमं परमः परः।
अकारश्च उकारो मकारश्चेति कथम्॥
त्र्यालिङ्गः श्रुतामात्राः कालान्वितः।
त्रिगुणा यौगिकमात्रा अर्द्धमात्रा तु वाञ्छ्य।
मात्रातीतेति च विद्वद्भिर्मात्रार्णवं शिवः।
त्रिगोचितामतिग्रहां तुरीया तत् परम्॥
यदा तुर्य ओङ्कारः प्रतियोगिति यदा।
तदेह्यावस्था चान्ते अश्वरे ममतो भवेत्।
प्राणो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।
ओमित्येकाक्षरं ब्रह्म ध्येयं सर्व्वैर्मुमुक्षुभिः।
त्रिगुणमात्रयाधेय आत्मनादिष्ट तन्त्र च॥
मात्रावर्ज्जितस्तु विज्ञेयः सर्व्वैः।
तत्र तुल्य यो योगी न शक्यतपुनः।
अकारस्य भूर्लोक उकारोऽन्तरिक्षम्।
सव्यञ्जनो मकारस्य स्वर्लोकः परिकल्पते।
प्रथमा तु प्रथमा मात्रा द्वितीयामन्तरिक्ष।
मध्यमा स्तोत्रा विश्वाद्वितीयात्मा सर्वं तस्यै।
अर्द्धेव सदैवेशा विमिता वैश्वरूपः।
ओमित्युच्चारणात् सर्वं प्रणवं क्रमतः।
प्रथमा तु प्रथमा मात्रा द्वितीया दीर्घिका।
तृतीया तु प्लुताख्या स्वरः क्रमाद्वेति।
इत्थं यत् तत्र सर्वोऽक्षरमित्युक्तः।
सर्व्वं वै सः क्रमात् तथा मन्त्र तत्।
ओङ्कारप्रभृतीनां सर्व्वतिरवस्थाः।
प्रणवमेव यावतिर्थं यदर्थं तस्य।

क्षीणकर्म्मबन्धस्तु ज्ञात्वा त्वङ्कारमुपस्थितम् ।
उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति ॥
तस्मादसिद्धयोगेन सिद्धयोगेन वा पुनः ।
ज्ञेयान्यरिष्टानि सदा येनोत्क्रान्तौ न सीदति ॥"
इति श्रीमार्कण्डेयपुराणे ओँकारमाहात्म्यम् ॥ * ॥
"यन्न्यूनञ्चातिरिक्तञ्च यच्छिद्रं यदयज्ञियम् ।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत् ।
तदोङ्कारप्रयुक्तेन सर्व्वञ्चाविकलं भवेत् ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
"ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥"
इति श्रीभगवद्गीतायाम् । ८ । १३ ॥

प्रणादः, पुं, (प्रणदनमिति । प्र + णद + घञ् ।) अनुरागजशब्दः । इत्यमरः । १ । ६ । ११ ॥ "प्रीतिजनितो सुखकण्ठादिशब्दः । प्रीतिर्न्न प्रीतृत्वम् । 'अनुरागकृते शब्दे प्रणादः प्रीतृतं तृणाम् ।' इति शब्दार्णवः ॥ गुणानुरक्तलोकप्रभवः शब्दः । इति मधुमाधवः । अनुरागजन्मा जनशब्दः । इति कलिङ्गः ।" इत्यमरटीकायां भरतः ॥ तारशब्दः । (यथा, रामायणे । २ । ६८ । २ ।
"तेन तत्र प्रणादेन दुःखितः स महीपतिः ।
विच्छेद जीविते श्रद्धां धर्म्मे यशसि चात्मनः ॥")
अश्वनासयः । इति मेदिनी । दे, २६ ॥ रोगस्य नामान्तरं कर्णनादः । यथा,—
"कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान् ।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते ॥"
इति माधवकरः ॥

प्रणामः, पुं, (प्र + नम + भावे घञ् ।) प्रणतिः । प्रणिपातः । भक्तिश्रद्धातिशययुक्तनमस्कारः । स तु स्वापकर्षबोधकव्यापारविशेषः । इति मुग्धबोधटीकायां दुर्गादासः ॥ स चतुर्व्विधः । अभिवादनम् १ अष्टाङ्गः २ पञ्चाङ्गः ३ करशिरःसंयोगश्च ४ । प्रथमस्य लक्षणं तच्छब्दे द्रष्टव्यम् ॥ द्वितीयो यथा,—
"पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा ।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥"
तस्य फलम् ।
"भूमौ निपत्य यः कुर्य्यात् कृष्णेऽष्टाङ्गनतिं सुधीः ।
शतजन्मार्ज्जितं पापं त्यक्त्वा वैकुण्ठमाप्नुयात् ॥"
तृतीयो यथा,—
"बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥" * ॥
एकत्रैव मतम् । तद्विधिर्यथा, कालिकापुराणे ।
"शिरोमध्यपादयोः कृत्वा बाहुभ्याञ्च परस्परम् ।
प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥"
विष्णुयामले ।
"दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ ॥"
इति ॥ * ॥
"गारुड़ं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः ।
अवश्यञ्च प्रणामांस्त्रीन् शक्तश्चेदधिकाधिकान् ॥" * ॥
तथा च नारदपञ्चरात्रे ।
"वह्निं वीक्ष्य हरिं पाद्यं गृह्णन् स्वगुरुमेव च ।
द्विचतुर्व्विंशदथवा चतुर्व्विंशतदर्द्धकम् ।
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वदा नमेत् ॥" * ॥
विष्णुधर्म्मोत्तरे ।
"देवार्च्चादर्शनादेव प्रणमेन्मधुसूदनम् ।
स्थानापेक्षा न कर्त्तव्या दृष्टार्थो द्विजसत्तमाः ॥
देवार्च्चादृष्टिपूतं हि शुचि सर्व्वं प्रकीर्त्तितम् ॥" * ॥
अथ नमस्कारमाहात्म्यम् । नारसिंहे ।
"नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥"
स्कान्दे ।
"दण्डप्रणामं कुरुते विष्णवे भक्तिभावतः ।
रेणुसङ्ख्यं वसेत् स्वर्गे मन्वन्तरशतं नरः ॥"
तत्रैव ब्रह्मनारदसंवादे ।
"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥"
तत्रैव श्रीशिवोमासंवादे ।
"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि ।
प्रणमेद्यो हि देवेशं सोऽश्वमेधफलं लभेत् ॥"
तत्रैवान्यत्र ।
"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥
शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्वने ।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ॥
रेणुमण्डितगात्रस्य कणा देहे भवन्ति ये ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥"
विष्णुधर्म्मोत्तरे ।
"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत् ।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी ॥
जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात् ॥"
विष्णुपुराणे ।
"अनादिनिधनं देवं दैत्यदानवदारणम् ।
ये नमन्ति नरा नित्यं न हि पश्यन्ति ते यमम् ॥
ये जना जगतो नाथं नित्यं नारायणं द्विजाः ।
नमन्ति न हि ते विष्णोः स्थानादन्यत्र गामिनः ॥"
नारदीये ।
"एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥"
हरिभक्तिसुधोदये ।
"विष्णोर्दण्डप्रणामार्थं भक्तेन पतता भुवि ।
पातितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह ॥"
स्कान्दे देवदूतविकुण्डलसंवादे ।
"तपस्तप्त्वा नरो घोरमरण्ये नियतेन्द्रियः ।
यत् फलं स समाप्नोति तन्नत्वा गरुड़ध्वजम् ॥
कृत्वापि बहुशः पापं नरो मोहसमन्वितः ।
न याति नरकं नत्वा सर्व्वपापहरं हरिम् ॥"
तत्रैव वेदनिधिस्तुतौ ।
"अपि पापं दुराचारं नरं त्वत्प्रणतं हरे ।
नेक्षन्ते किङ्करा याम्या उलूकास्तपनं यथा ॥"
विष्णुपुराणे श्रीयमस्य निजभटानुशासने ।
"हरिममरगणार्च्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्त्यः ।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम् ॥"
ब्रह्मवैवर्त्ते ।
"शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः ।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ ॥"
अष्टमस्कन्धे च बलिवाक्ये ।
"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः ।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपसदेऽसुरेऽर्पितः ॥"
अतएव नारायणव्यूहस्तवे ।
"अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम् ।
येषां हरिपदाम्भोजे शिरो न्यस्तं यथा तथा ॥"
किञ्च । नारसिंहे श्रीयमोक्तौ ।
"तस्मै वै नारसिंहस्य विष्णोरमिततेजसः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥"
भविष्योत्तरे च जलधेनुप्रसङ्गे ।
"विष्णोर्देवजगद्धातुर्जनार्द्दनजगत्पतेः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥"
इत्यादि ॥ * ॥
अथ प्रणामनिषिद्धता । वृहन्नारदीये सुध-कोपाख्यानारम्भे ।
"सहसा न नमेद्यस्तु विष्णवे धर्म्मकारिणे ।
शवोपमं विजानीयात् कदाचिदपि नालपेत् ॥"
किञ्च । पाद्मे वैशाखमाहात्म्ये यमब्राह्मणसंवादे ।
"पश्यन्तो भगवद्द्वारं नाम द्रव्यशरीरकम् ।
अकृत्वा नमस्कारमादौ यान्ति ते नरकौकसः ॥" * ॥
अथ नमस्कारे निषिद्धानि । विष्णुस्मृतौ ।
"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत् ।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात् ॥"
वाराहे ।
"वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
श्वित्री स जायते मूर्खः सप्तजन्मानि भामिनि ॥"
किञ्चान्यत्र ।
"अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान् न कुर्य्यात् केशवालये ॥"

अपि च ।
"महद्भूमौ निपतितो न शक्तः प्रणमेत्तु यः ।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
नतिविशेषस्तु यामले ।
"त्रिकोणाकारा सर्व्वेषु नतिः शक्तेः समीरिता ।
दक्षिणादायतीं गत्वा दिशं तस्याश्च प्राग्भवीम् ॥
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत् ।"॥
एकहस्तप्रणामनिषेधो यथा,—
"एकहस्तप्रणामञ्च एकं वापि प्रदक्षिणम् ।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"
इति तन्त्रसारः ॥ ॥
कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः ।
यथा, कालिकापुराणे ७० अध्याये ।
"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ॥
प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ।
जानुभ्यां क्षितिं संस्पृश्य शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ।
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ॥
अस्पृश्य जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ।
यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्वैदिकैर्वा मन्त्रैर्या क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥
इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
मननं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ॥"॥
शूद्रपूजितदेवताप्रणामनिषेधो यथा,—
"यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि ।
निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि ॥"
इति कर्म्मलोचनम् ॥

प्रणाय्यः, त्रि, (प्रणीयते इति । प्र + नी + ण्यत् ।
"प्रणाय्योऽसम्मतौ ।" ३ । १ । १२८ । इति
साधुः ।) असम्मतः । (यथा, भट्टिः । ६।६६ ।
"न प्रणाय्यो जनः कश्चित् निकाय्यं तेऽधि-
तिष्ठति ।")
अभिलाषविवर्ज्जितः । इति मेदिनी । ये, ६१ ।
साधुः । इति सिद्धान्तकौमुदी । प्रियः । इति
मुग्धबोधव्याकरणम् ॥
प्रणालः, पुं, (प्रणल्यते जलादिभिःसार्थेऽनेनेति ।
प्र + णल + घञ् ।) जलनिःसरणमार्गः । इत्य-
मरः । १ । १० । ३५ । पयनाला इति भाषा ॥
प्रणाली, स्त्री, (प्रणाल + गौरादित्वात् ङीष् ।)
जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ।
पयनाला इति भाषा ॥ (यथा, रामायणे ।
५ । ६२ । १० ।
"तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौशल्या व्यसृजद्बाष्पं प्रणालीव नवोदकम् ॥")
प्रणिधानं, क्ली, (प्रणिधीयतेऽनेनेति । प्र + नि +
धा + ल्युट् ।) प्रयत्नः । (यथा, महाभारते ।
५ । १०३ । २१ ।
"प्रणिधानेन धैर्य्येण रूपेण वयसा च मे ।
मनःप्रविष्टो देवर्षे ! गुणकेश्याः पतिर्वरः ॥")
समाधिः । (यथा, रघुः । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकार-
णम् ॥")
प्रवेशनम् । इति मेदिनी । ने, १८३ ॥ (यथा,
सुश्रुते शारीरस्थाने ८ अध्याये ।
"वस्तुशः शता हीनशस्त्रप्रणिधानेनापविद्धा ॥")
प्रणिधिः, पुं, (प्रणिधीयते इति । प्र + नि + धा +
कि ।) चरः । (यथा, देवीभागवते । ५।११८ ।
"प्रणिधिं प्रेषयामास दयारिस्तु शचीपतिम् ॥")
प्रार्थनम् । इत्यमरः । ३ । ३ । ९९ ॥ अवधानम् ।
इति भरतः ॥ (दूतदयपुत्रः । यथा, महा-
भारते । ३ । २१९ । ९ ।
"हृदयस्य प्रणिधिः सायपस्य हृदयरः ।
भानुरङ्गिरसो धीर ! पुत्रो वर्धस्व सौरभः ॥")
प्रणिपातः, पुं, (प्र + नि + पत + घञ् ।) प्रणतिः ।
इति हेमचन्द्रः ॥ (यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")
प्रणिहितं, त्रि, (प्र + नि + धा + क्तः ।) स्थापि-
तम् । प्राप्तम् । समाहितम् । इति मेदिनी ।
ते, २०३ ॥ (मिलितम् । यथा, रामायणे ।
४ । २५ । ३४ ।
"ततः प्रणिहिताः सर्व्वा वानर्य्योऽस्य वशानुगाः ।
चुक्रुशुर्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम् ॥")
प्रणीतं, त्रि, (प्र + नी + क्त ।) उपसम्पन्नम् ।
पाकेन रूपरसादिसम्पन्नमांसादि । इत्यमर-
भरतौ । क्षिप्तम् । विहितम् । प्रवेशितम् । इति
मेदिनी । ते, १२४ ॥ कृतम् । इति हेमचन्द्रः ॥
प्रणीतः, पुं, (प्रणीयते इति । प्र + नी + क्त ।)
संस्कृतानलः । यज्ञे मन्त्रादिना संस्कृताग्निः ।
इत्यमरः । २ । ७ । २० ॥
प्रणीता, स्त्री, (प्रणीत + टाप् ।) यज्ञपात्र-
विशेषः । इति मेदिनी । ते, १२४ ॥
प्रणुतं, त्रि, (प्र + णु + क्त ।) स्तुतम् । इत्यमरः ।
३ । १ । १०९ ॥
प्रणेयः, त्रि, (प्रकर्षेण नेतुं शक्यः । प्र + नी +
"अचो यत् ।" ३ । १ । ९७ । इति यत् ।)
वश्यः । इत्यमरः । ३ । १ । २५ ॥ (यथा,
महाभारते । १२ । ५६ । ४० ।
"असत्प्रणेयो राजेन्द्र लोकास्येव चर-
मयुत ॥")
प्रततिः, स्त्री, (प्रतनोतीति । प्र + तन + क्तिच् ।)
विस्तृतिः । वल्ली । इति मेदिनी । ते, ११८ ॥
प्रतती, स्त्री, (प्रतति + ङीष् ।) वल्ली । इत्य-
मरटीकायां भरतः ॥
प्रतनः, त्रि, (प्र + "नश्च पुराणे प्रात् ।" ५ । ४ ।
२५ । इत्यस्य वार्त्ति० इति नकारात् प्रत्यय-
श्च ।) पुरातनः । इत्यमरः । ३ । १ । ७७ ॥
प्रतर्कणं, क्ली, (प्र + तर्क + भावे ल्युट् ।) विमर्शः ।
तत्पर्य्यायः । तर्कः २ वितर्कः ३ ऊहः ४ रहः ५
ऊहः ६ वितर्कणम् ७ अध्याहारः ८ अप-
करणम् ९ ऊहनम् १० । इति शब्दरत्नावली ॥
प्रतलं, क्ली, (प्रकृष्टं तलम् ।) पातालभेदः । इति
मेदिनी । ले, १०६ ॥
प्रतलः, पुं, (प्रकृष्टं तलमस्य ।) विस्तृताङ्गु-
लिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८३ ॥
प्रतानः, पुं, विस्तृतः । प्रपूर्व्वतनधातोर्भावघञ-
निष्पन्नः ॥ (तन्तुः । यथा, रघुः । २ । ८ ।
"लताप्रतानोद्ग्रथितैः स केशै-
रधिज्यधन्वा विचचार दावम् ॥")
वायुरोगविशेषः । तस्य संज्ञाकारं अपतान-
कम् । यथा,—
"हर्षं संज्ञां च संज्ञां च हत्वा करोति दूषितः ।
हृदि तृष्णं नरः स्तब्धं वाति मोहं शीते दृष्टः ।
वायुना दारुणं प्राहुरेके तदपतानकम् ॥"
इति माधवकरः ॥
प्रतानिनी, स्त्री, (प्रतानो विस्तारोऽस्त्यस्या इति ।
प्रतान + इनिः ।) प्रतानवती । विस्तृतलतादिः ।
इत्यमरभरतौ ॥
प्रतापः, पुं, (प्र + तप + घञ् ।) कोषदण्डज-
तेजः । कोषो धनं दण्डो दमः तदुत्पन्नं तेज-
अपि इत्यः ताभ्यां यत्तेजो जायते सः । इति
भरतः ॥ तत्पर्य्यायः । प्रभावः २ । इत्यमरः ।
२ । ८ । २० ॥ (यथा, मनुः । ९ । ३१० ।
"प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु ।"
पौरुषम् । यथा, रामायणे । १ । १ । ११ ।
"समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।"
"प्रतापः शत्रुनिवारणक्षमो दुष्टनिग्रहकारकः
पौरुषं तद्वान् । 'प्रतापी पौरुषवान् ।' इति
कोषः ।" इति तट्टीकायां रामानुजः ।) तापः ।
(यथा, रघुः । ४ । १२ ।
"यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")
तेजः । इति मेदिनी । पे, २० ॥ अर्कवृक्षः । इति
राजनिर्घण्टः ॥ (पुरराजस्य सुते, क्ली । यथा
भोजराजकृतयुक्तिकल्पतरौ ।
"सौम्यो दृश्यश्च शस्यश्च शिरःकुम्भस्तु कारकः ।
गौरवं पुरराजस्य प्रतापं नाम विश्रुतम् ॥")
प्रतापनं, क्ली, (प्र + तप + णिच् + भावे ल्युट् ।)
पीडनम् । इति शब्दरत्नावली ॥ (यथा,
रघुवंशे । १ । ५६ ।
"हावकं दारुणं तापं दीनकं च पीडनम् ।
विरहव्याधिकोपयत्तो विलिप्तेजः प्रतापनात् ॥")

प्रतापनः, पुं, (प्रतापयतीति । प्र+तप्+णिच्+ल्युः ।) नरकविशेषः । इति शब्दरत्नावली ॥ स च कुम्भीपाकः । इति श्रीभागवतम् ॥ (क्लेशदायके, त्रि । यथा, सुश्रुते उत्तरतन्त्रे ६९ अध्याये ।
"रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रतापनः ॥")

प्रतापसः, पुं, (प्रतापं चक्षुस्तेजः स्यति नाशयतीति । षो+कः ।) शुक्लार्कवृक्षः । इत्यमरः । २ । ४ । ८१ ॥ (यथा, भावप्रकाशे ।
"श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।
श्वेतपुष्पो सदापुष्पः स चालार्कः प्रतापसः ॥"
प्रतापसश्च ॥)

प्रतारकः, त्रि, (प्रतारयतीति । प्र+तॄ+णिच्+ण्वुल् ।) वञ्चकः । धूर्त्तः । यथा । यो यस्य प्रतारकः स तस्याधमकः ॥ (यथा च ब्रह्मवैवर्त्ते प्रकृतिखण्डे २० अध्याये ।
"शश्वत्तार्क्कीति वादी यो मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥")

प्रतारणं, क्ली, (प्र+तॄ+णिच्+भावे ल्युट् ।) प्रतारणा । तत्पर्य्यायः । वञ्चनम् २ व्यलीकम् ३ अभिसन्धानम् ४ । इति हेमचन्द्रः । ३ । ४३ ॥ (यथा, राजतरङ्गिण्याम् । ६ । १५० ।
"ह्रदे दामोदरीये यत्तस्यासीत् स्वकृतं पुरम् ।
सेतुना तेन तच्चेष्टन् कर्त्तुं सोऽभ्यःप्रतारणम् ॥")

प्रतारणा, स्त्री, (प्र+तॄ+णिच्+युच् । टाप् ।) वञ्चना । यथा,—
"यदीच्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा ।
उपास्यतां कलौ कल्पलता देवी प्रतारणा ॥"
इत्युद्भटः ॥

प्रतारितः, त्रि, (प्र+तॄ+णिच्+क्तः ।) लब्धप्रतारणः । तत्पर्य्यायः । वञ्चितः २ । इति त्रिकाण्डशेषः ॥

प्रति, व्य, (प्रथते इति । प्रथ विख्यातौ+बाहुलकात् डति ।) विप्सालक्षणभागेत्थम्भूतप्रतिदानप्रतिनिधिमध्यर्थेः । बोपदेवेनास्य निर्देशो कृतः । व्याप्तिः । प्रतिनिधिः । मुख्यसदृशः । यथा प्रद्युम्नः कृष्णात् प्रति । वीप्सा । व्याप्तुमिच्छा । यथा वृक्षं वृक्षं प्रति सिञ्चति ॥ लक्षणम् । चिह्नम् । यथा वृक्षं प्रति विद्योतते विद्युत् ॥ इत्थम्भूताख्यानम् । कथञ्चित् प्रकारमापन्नं इत्थम्भूतं तदाख्यानम् । यथा साधुर्विप्रो मातरं प्रति ॥ भागः । स्वीकारो भागोऽंशः । यथा हरं प्रति हलाहलम् ॥ प्रतिदानम् । गृहीतस्य प्रतिदानम् । यथा भक्तिः प्रद्युम्नं शम्भोः । तिलेभ्यः प्रति माषान् यच्छति । तिलान् गृहीत्वा माषान् ददातीत्यर्थः ॥ स्तोकम् । अल्पम् । यथा । शाकप्रति सूपप्रति । दैन्यः । निश्चयः । इत्यमरभरतमेदिनीकाराः ॥ आवृत्तिः । प्रमाणम् । विरोधः । समाधिः । इति मुग्धबोधटीकायां दुर्गादासः ॥ अभिमुखम् । अभावः । इति शब्दरत्नावली ॥

प्रतिकः, त्रि, कार्षापणेन क्रीतः । "कार्षापणाट्टिठन् प्रतिरादेशश्च वा ।" ५ । १ । २५ । इत्यस्य वार्त्तिकोक्त्या टिठन् । कार्षापणिकः । इति सिद्धान्तकौमुदी ॥

प्रतिकर्म्म, [न्] क्ली, (प्रत्यङ्गं प्रतिव्याप्तं वा कर्म्म । शाकपार्थिवादिवत् समासः ।) प्रसाधनम् । वेशः । इत्यमरः । २ । ६ । ९९ ॥ (यथा, माघे । ५ । २० ।
"आस्तीर्णतल्परचितावसथः क्षणेन
वेश्याजनः कृतनवप्रतिकर्म्मकाम्यः ॥"
प्रतीकारः । यथा, महाभारते । ४ । ५६ । १८ ।
"उषिताः स्मो वने वासं प्रतिकर्म्मचिकीर्षवः ।
कोपं नार्हसि नः कर्त्तुं सदा समरदुर्ज्जय ॥"
अङ्गसंस्कारः । इति कश्चिदमरे । २ । ६ । ९९ ।)

प्रतिकायः, पुं, (प्रतिगतः कायो यत्र ।) शरव्यम् । प्रतिरूपकम् । इति जटाधरः ॥

प्रतिकारः, पुं, (प्रति+कृ+घञ् ।) प्रतीकारः । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ४० ।
"प्रतिकारविधानमायुषः
सति शेषे हि फलाय कल्पते ॥")

प्रतिकाशः, त्रि, (प्रति+काश+घञ् ।) प्रतीकाशः । इत्यमरटीकायां भरतदीक्षितः ॥

प्रतिकासः, त्रि, (प्रति+कास+घञ् ।) प्रतीकाशः । इत्यमरटीकायां रमानाथः ॥

प्रतिकूपः, पुं, (प्रतिरूपः कूपः ।) परिखा । इति हारावली । १०४ ॥

प्रतिकूलं, त्रि, (प्रतीपं कूलादिति ।) अननुकूलम् । विपक्षः । तत्पर्य्यायः । प्रसव्यम् २ अपसव्यम् ३ अपष्ठु ४ । प्रतीपम् । इत्यमरः । ३ । १ । ८४ ॥ (यथा, मनुः । ९ । २७५ ।
"राज्ञः कोशापहर्त्तॄंश्च प्रतिकूलेषु च स्थितान् ।
घातयेद्विविधैर्द्दण्डैररीणाञ्चोपजापकान् ॥")

प्रतिकृतिः, स्त्री, (प्रकृष्टा कृतिः ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ प्रतिनिधिः । (यथा, रघुः । ८ । ९२ ।
"तेनाष्टौ परिगमिताः समाः कथञ्चिद्
बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥"
प्रति+कृ+भावे क्तिन् ।) प्रतिकारः । इति मेदिनी । ति, ३१० ॥ (यथा, हरिवंशे । १६० । २३ ।
"अद्यप्रभृति देवताः सर्व्वाः प्रभुप्रतिकृतिं पराम् ।
अवध्या दानवाः सर्व्वे यान्ति प्रकृतमव्ययम् ॥")

प्रतिकृष्टं, त्रि, (प्रति कृष्यते स्मेति । प्रति+कृष्+क्तः ।) गर्हितम् । द्विराकृष्टाकर्षितम् । इति मेदिनी । टे, ६४ ॥

प्रतिक्षणं, व्य, (क्षणं क्षणं प्रति ।) पौनःपुन्यम् । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । १० ।
"प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्व्वनिबद्धया तया
सरागमस्या रसनागुणास्पदम् ॥")

प्रतिक्षयः, पुं, (प्रतिक्षियति हिनस्ति विपदादीनिति । प्रति+क्षि+अच् ।) रक्षकः । इति शब्दरत्नावली ॥

प्रतिक्षिप्तः, त्रि, (प्रतिक्षिप्यते स्मेति । प्रति+क्षिप+क्तः ।) वारितः । प्रेषितः । इति मेदिनी । ते, २०५ ॥ अधिक्षिप्तः । इत्यमरः । ३ । १ । ४२ ॥ "क्षि लताधिक्षेपे । धर्हणम मरगुणं प्रति दुर्व्वचनमधिक्षेपः अधिक्षिप्यते स्म अधिक्षिप्तः क्तः एवं प्रतिक्षिप्तः । कस्यचित् शौर्य्यादिकं प्रति अर्हमाप्तेन दुर्व्वचनमधिक्षेपः स यस्य जातः सोऽधिक्षिप्तः । इति मुकुटोऽपि । केचित्तु । द्वे प्रेषिते । आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते । इति कल्पतरुः । इत्याहुः ।" इति भरतः ॥

प्रतिगतं, क्ली, (प्रतिरूपं गतं गमनम् ।) पक्षिगतिविशेषः । यथा,—
"गतागतप्रतिगतसम्पातांश्च पक्षिणाम् ।
गतिभेदाः पक्षिरूढं कुलायो भीरुमक्षियाम् ॥"
इति जटाधरः ॥
(प्रति+गम+कर्त्तरि क्तः । प्रतियाते, त्रि ॥)

प्रतिग्रहः, पुं, (प्रतिग्रहणमिति । प्रति+ग्रह+"ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति भावे अप् ।) स्वीकरणम् । सैन्यपृष्ठम् । (प्रतिगृह्णाति निक्षेपादिकमिति । प्रति+ग्रह+"विभाषा ग्रहः ।" ३ । १ । १४३ । इति पचे अच् ।) पतद्ग्रहः । (प्रतिगृह्यते इति । प्रति+ग्रह+अप् ।) द्विजेभ्यो विधिवद्देयम् । तद्ग्रहः । ग्रहभेदः । इति मेदिनी । हे, ११ ॥ ॥ ब्राह्मणस्यार्थः प्रतिग्रहार्ज्जितः । यथा,—
"प्रतिग्रहार्ज्जिता विप्रे क्षत्रिये शस्त्रनिर्ज्जिताः ।
वैश्ये न्यायार्ज्जितार्थाः शूद्रे शुश्रूषयार्ज्जिताः ॥"
अयाचितप्रतिग्रहे दोषाभावो यथा,—
"अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे ।
अमृतं तं विदुर्देवास्तस्मान्नैव निवर्त्तयेत् ॥ ॥
गुरून् भृत्यांश्चोज्जिहीर्षन्नर्च्चिष्यन् देवतातिथीन् ।
सर्व्वतः प्रतिगृह्णीयात् न तु तृप्येत् स्वयं ततः ॥
साधुतः प्रतिगृह्णीयादथवासाधुतो द्विजः ।
गुणवानन्यदोषस्य निर्दहो हि निमज्जति ॥
एवं तस्करहस्ताद्वा हस्ता भरद्वाजकः ।
कुर्य्यादिशुद्धिं यत्नतः प्रायश्चित्तं द्विजोत्तमः ॥"
इति मार्कण्डे ११५ अध्यायः ॥ ॥
तीर्थे प्रतिग्रहनिषेधो यथा,—
"सुवर्णमथ धान्यञ्च तथैवान्यत्प्रतिग्रहम् ।
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्च्चनेऽपि वा ॥
निष्फलं तस्य तत्तीर्थं यावत्तद्धनमश्नुते ।
अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च ॥"
इति कौर्म्मे ३९ अध्यायः ॥ ॥
राजादितः प्रतिग्रहनिषेधो यथा,—
"न राज्ञः प्रतिगृह्णीयात् शूद्रात्पतितादपि ।
न चान्यस्मादशक्तश्च निन्दिताद्वर्ज्जयेद्-
बुधः ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥ ॥
[illegible] प्रतिग्रहनिषेधो यथा,—
"देव भूमिं निकाम् [illegible] परिग्रहाद्भवति नः ।
अल्पोऽपि [illegible] दोषः [illegible]

तस्मादविद्वान् बिभियाद्यस्मात्तस्मात् प्रतिग्रहात्।
स्वल्पकेनाप्यविद्वान् हि पङ्के गौरिव सीदति ॥" ॥

गर्हितप्रतिग्रहादिर्यथा,—

"कृष्णाजिनादयस्तु गर्हिता ये प्रतिग्रहाः।
गृह्णानस्तान् महीयान्सस्तमसस्तु पतन्ति ते।
कृष्णाजिनप्रतिग्राही ह्यानां शुक्रविक्रयी।
नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥" ॥

आपदि गर्हितप्रतिग्रहकर्त्तव्यता यथा,—

"जीवप्रतिग्रहाभावे जीवार्था ह्यवसीदति।
विप्रोऽपन्नः प्रतिग्रहन्तु वा यतस्ततोऽपि नाधमाक्।
सुर्व्यादिभोग्यमर्थार्थं देवाद्यर्थं च सर्व्वतः।
प्रत्यादद्यादद्भिजो यस्तु अत्यर्थमात्मनोऽपि च ॥
दधिक्षीराण्यमांसानि गन्धपुष्पाम्बुमत्स्यकान्।
शय्याशनापणं शाकं प्रत्याख्येयं न कर्हिचित् ॥
अपि दुष्कृतकर्म्मभ्यः समादद्यादयाचितम्।
पतितेभ्यस्तथान्येभ्यः प्रतिग्राह्यमसंशयम् ॥" ॥

प्रतिग्रहीतुं शक्तस्य लभ्यमानपरित्यागेन स्वर्गो भवति। यथा,—

"शक्तः प्रतिग्रहीतुं यो वेदस्नातः सुसंयतः।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम् ॥
प्रतिग्रहस्यं चापि याचितं यो न यच्छति।
तत्कोटिगुणितं पुण्यं दातुस्तस्य प्रयच्छति ॥
दाता च न स्मरेद्दानं प्रतिग्राही न याचयेत्।
तावुभौ नरकं यातो दाता चैव प्रतिग्रही ॥
वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति।
प्रत्यर्थं निन्द्यमेवेह दानयाचकयोर्मितम् ॥
दाता हन्तो भवेद्दुर्मधासक्तेन प्रतिग्रही।
यद्दानं प्रतिगृह्णीयात् प्रतिग्राही महाभयः ॥" ॥

प्रतिग्रहप्रकारो यथा,—

"भूमेः प्रतिग्रहं कुर्य्याद्भूमिं कृत्वा प्रदक्षिणम्।
करे गृह्य तथा कन्यां दासदास्यौ तथा द्विजः ॥
करं दि शुद्धि निन्द्य धर्मज्ञ स्पृशः प्रतिग्रहः।
आरुह्य च तथाश्वोष्ट्रं कर्णं स्पृष्ट्वा कौशिनः ॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः।
प्रतिगृह्णीत गां स्पृष्ट्वा पुच्छे कृष्णाजिनं तथा ॥
आरुह्य पश्वः सर्वे याप्याः पुच्छे निष्फलाः।
प्रतिग्रहमपोद्दृश्य आरुह्यैव तु दापयेत्।
ईशायाञ्च रथो वाहनश्वे इदन्तु धारयेत्।
दुमानामथ सर्व्वेषां मूले आशाकरो भवेत् ॥
आयुधानि समादाय तथा भुक्त्वा विभूषणम्।
धर्म्मध्वजौ तथा स्पृष्ट्वा पवित्रं च तथा गृहम् ॥
धनमौघं तु सर्व्वाणि धनधान्यानि चैव हि।
उपविश्य च शय्यायां पर्य्यंयित्वा करेण वा ॥
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा साधनं पठेत्।
कन्यादाने न तु पठेद्द्व्यामि च पृथक् पृथक् ॥
प्रतिग्रहा हि मन्त्रेण सर्व्वे वाग्नसंबम्धि ते।
इत्यादाय गर्व्वेषां इदमंशयतान्नरः ॥
वामयेन्यसमादाय करेण च प्रतिग्रहम्।
प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम् ॥
स इदंतेऽधर्म्मयुक्तो नरकं प्रतिपद्यते।
यथापि हि प्रवक्तानि विधिं मन्त्रैः प्रति-
गृह्यात् ॥" ॥

यानिप्रदानेन प्रतिग्रहे वा
दातुग्रहीत्रोरपि येन पुण्यम्।
स्वर्गं प्रजायेत मरुत्प्रमेतत्
प्रदीतयोर्वै विधिवद्द्विजेन्द्र ॥
कुर्य्यादयो पञ्चदिनानि पूर्व्वं
पञ्चोपचारैर्युतविष्णुपूजाम्।
कृशानुमन्त्रैर्घृतदुग्धहोमं
यद्द्यान इत्यादि मवाप्तसोमम् ॥
ओङ्कारपूर्व्वादिभिरन्वितं तं
प्रत्येकमष्टौ जुहुयाद्द्विजेन्द्रः।
सूर्य्यस्य मन्त्रेण च गदद्दौ
यदा मयूखं निखतं जुहोति ॥
कुर्य्याच्च गायत्रिजपं सदस्रं
पश्चात् प्रयच्छेत् तुरगं द्विजाय ॥
सद्गतयाप्तानमयं मवेति
दातापि चेतद्दमसमाविदध्यात् ॥
द्विजाप्यावत् मात्तमयापशुद्धौ
द्वावप्यमू सूर्य्येणनं लभेताम् ॥"

इति हलायुधधृते। ३। ८। अध्यायः ॥ ॥

अपि च। विष्णुधर्म्मोत्तरे।

"ओषधीनां शुचिमादाय इत्याद्यादाय सर्व्वतः।
वस्त्रं दद्यात्ममाद्यात् परिधाय तथा पुनः ॥
आरुह्योपानहौ चैव यानमारुह्य पादुके।
प्रतिग्रहीता सावित्रीं सर्व्वमेव प्रकीर्त्तयेत् ॥
ततस्तु चाङ्गं मन्त्रेण नस्य दद्यात् दैवतम्।
समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् ॥
विधिं धर्म्मसमर्थो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम्।
दाता याति नरकेऽपि नाशाद्दुर्गतिकर्त्ता द्विजः ॥"

मत्स्यपुराणे।

"ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा।
अयज्ञमपि मासद्वितमसौ होत्र पर्य्ययेत् ॥
कृष्णाजिनतिलग्राही न भूयः पुरुषो भवेत् ॥
शय्यालङ्कारवस्त्रादि प्रतिग्राह्य मनसा च।
नरकान् निवर्त्तन्ते धेनुं तिलमयीं तथा ॥"

तथा।

"अप्रतिग्रह्या दुरात्मानमपि स्तोयं तरिष्यति।
आतुरान्नदद्यहीतन्न तत् कथं मे तरिष्यति ॥"

एतद्वादिनमद्दानं प्रतिग्रहीतुर्दोषजनकम् ॥ ॥

एतदभिप्रायेण विद्यादिरहितलोभात्मगपात्र च दातुरपि दोषजनकमाह स एव।

"न देवः पि तद्दाति विप्रस्य न भजति।"

सद्वृद्धम्। अतएव याज्ञवल्क्यः।

"विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥"

अधो नरकम् ॥ ॥ एतद्दानप्रतिग्रहीतारयुक्तलोभदादिभिरात्मतत्त्वप्रभाव अनिच्छया प्रतिग्रहीते दाने न दोषाय इत्याह विष्णुः।

"यत्तानि प्रतिग्रहाति अनिच्छयाप्यर्थिनो न तु।
ततो दाने न दोषोऽस्ति यस्मात्तानेव तारयेत् ॥"

तारणप्रकारमाह हारीतः।

"शक्यापोगतादीनां प्रतिगृह्य यदिच्छादवदयं भवेत् ॥" ॥ देवलः।

"प्रतिग्रहं समर्थो हि सतां विप्रो दयान्वितः।
निस्तारयति दातारमात्मानञ्च सदैव सः ॥"

स्कान्दे।

"वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम्।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥"

महाभारते।

"तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च।
निमित्तेषु च सर्व्वेषु न प्रमत्तो भवेन्नरः ॥"

प्रतिग्रहसमर्थस्य गदकर्षि यथाविधि यदा।

याज्ञवल्क्यः।

"प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम्।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥"

अपवादमाह स एव।

"कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः।
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥"

अन्यच्च।

"शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन् दधि।
मत्स्यान् धाना: पयो मांसं शाकञ्चैव न निर्णुदेत् ॥"

मणीन् विषादिनिवारकान्।

"एधोदकं फलं मूलमन्नमभ्युद्यतञ्च यत् ॥"

अभ्युद्यतमप्रार्थितं दानम्।

"सर्व्वतः प्रतिगृह्णीयात् मध्वथाभयदक्षिणाम् ॥"

किमिति न प्रत्याख्येयमित्याह मनुः।

"अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः।
अन्यत्र कुलटाषण्डपतितेभ्यस्तथा द्विषः ॥"

प्रतिग्रहनाम प्रयोगपारे।

"प्रतिग्रहं न गृह्णीयादात्मभोगविधित्सया।
देवतातिथिपूजार्थं यज्ञार्थमुपार्ज्जयेत् ॥"

अङ्गिराः।

"कुटुम्बार्थं द्विजः शूद्रात् प्रतिगृह्णीत याचितम्।
कल्पमाना चैव न हि याचेत कर्हिचित् ॥"

यज्ञार्थं याचने निन्दामाह याज्ञवल्क्यः।

"याचमानो नाम ते यज्ञार्थमपूर्णमिति तदा"

इति शुद्धितत्त्वम् ॥

प्रतिग्राहकः, पुं, (प्रतिगृह्णाति भिक्षावस्त्रादिकमिति। प्रति + ग्रह + "विभाषा ग्रहः।" ३। १। १४३। इति णः।) महाप्रदः। इत्यमरः। २। ७। १६॥ (प्रति + ग्रह + भावे घञ्।) प्रतिग्रहणम्।

प्रतिघः, पुं, (प्रतिहन्यतेऽनेनेति। प्रति + हन् + "अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्।) क्रोधः। इत्यमरः। १। ७। २६॥ (यथा, माघे। १६। ३९।

"प्रतिघः कुरुतेऽपि कस्यचित्
सदपि विषमं समाचरन् ॥"

प्रतिघमर्षसमर्थ।) प्रतिघातः। इति मेदिनी। घे, १०॥ मूर्च्छा। इति शब्दरत्नावली॥

प्रतिघातनं, क्ली, (प्रति + हन् + णिच् + भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११३॥

प्रतिघं, क्ली, (प्रतिघ्नन्त्यनेनेति। प्रति + हन् + घञर्थे कः।) अङ्गम्। इति हेमचन्द्रः॥

प्रतिच्छन्दः, [स्] क्ली, (छन्दोऽभिप्रायः । प्रतिगतं छन्दः इति प्रादिसमासः ।) प्रतिरूपम् । इति त्रिकाण्डशेषः । (अकारान्तोऽपि दृश्यते । यथा, राजतरङ्गिण्याम् ।३ । ७७ ।
"रघःशिरःप्रतिच्छन्दैः स्थिरप्रतिसृचकः ।
घनाधशिरसरान् प्रादात् तस्मै रघःप्रति-
ध्वंजान् ॥")

प्रतिच्छाया, स्त्री, (प्रतिगता छायामिति।) प्रतिकृतिः। पाषाणकाष्ठमृच्छिलादिनिर्म्मितप्रतिरूपम् । इत्यमरभरतौ ॥ (यथा, हरिवंशे । १५२ । ६० ।
"मायया तु प्रतिच्छाया दृश्यते हि नटालये ।
देहार्द्धेन तु कौरव्य ! सिषेवे च प्रभावतीम् ॥")

प्रतिजङ्घा, स्त्री, (प्रतिगता जङ्घाम् ।) अग्रजङ्घा । इति हेमचन्द्रः । ३ । ६१५ ॥

प्रतिजल्पः, पुं, (प्रतिगतो जल्पम् ।) वाक्यविशेषः । यथा,—
"दृष्ट्वयङ्गभावेऽस्मिन् प्राप्तिर्मार्द्वयमुद्धतम् ।
दूतसम्माननेनोक्तं यत्र स प्रतिजल्पकः ॥"
इत्युज्ज्वलनीलमणिः ॥

प्रतिजागरः, पुं, (प्रतिजागरणमिति । प्रति+जागृ+घञ् । "जाग्रोऽविचिण्णल्ङित्सु ।" ७ । ३ । ८५ । इति गुणः ।) प्रत्यवेक्षणम् । तत्पर्य्यायः । अवेक्षा २ । इत्यमरः । ३ । २ । २८ ॥ जागर-प्रतिविधि: प्रतिजागरः । हे यत्नमवेक्षस्व इत्यादिनियोगस्य इति रायमुकुटः ॥

प्रतिजिह्वा, स्त्री, (प्रतिरूपा जिह्वा ।) तालुमध्यस्थमृदुजिह्वा । आलजिभ इति भाषा । तत्पर्य्यायः । प्रतिजिह्विका २ साध्वी ३ इधम-वाक्ः ४ अलिजिह्विका ५ । इति शब्दरत्नावली ॥

प्रतिजिह्विका, स्त्री,(प्रतिजिह्वा+स्वार्थे कन् । टापि अत इत्वम् ।) प्रतिजिह्वा । इति त्रिकाण्डशेषः ॥

प्रतिज्ञा, स्त्री, (प्रतिज्ञायते इति । प्रति+ज्ञा+ "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) कर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः । इदमहं करिष्यामीत्यादिरूपः । साध्यनिर्देशः । इति गौतमसूत्रम् । साध्याभिधायिका वाक् । इति व्यवहारतत्त्वम् । तत्पर्य्यायः । आमु २ प्रतिज्ञानम् ३ अङ्गीकारः ४ प्रतिश्रवः ५ ऊरी ६ समाधिः ७ संवित् ८ आगूः ९ आश्रवः १० संश्रवः ११ नियमः १२ अभ्युपगमः १३ वाढम् १४ आज्ञा १५ । इति शब्दरत्नावली ॥ अस्त्र १६ अङ्गरः १७ संगरः १८ उररीकारः १९ सवः २० । इति जटाधरः ॥ * ॥ (यथा, श्री० रामायणे । २ । ११० । ४ ।
"पूर्व्वन्तु रामस्तमिहाग्रजन्म
श्रुत्वा च वाक्यं भरतस्य तस्य ।
विज्ञीडमानो रघुनन्दनस्तौ
पितुः प्रतिज्ञां स बभूव तूष्णीम् ॥")
प्रतिज्ञातोऽपि न कर्त्तव्यः । यथा,—
"अदत्वा देवतापित्रोर्यच्चान्यत् साम यत्नो वचनम् ।
प्रतिज्ञा सा परोऽप्यस्य यस्य केऽपि च वस्तुनि ॥"
इत्यग्निपुराणम् ॥

प्रतिज्ञातं, त्रि, (प्रतिज्ञायते स्मेति । प्रति+ज्ञा+ क्तः ।) अङ्गीकृतम् । इत्यमरः । ३ । २ । १०८ ॥ (यथा, मनुः । ८ । १९९ ।
"कथं देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥")

प्रतिज्ञानं, क्ली, (प्रति+ज्ञा+ल्युट् ।) प्रतिज्ञा । इत्यमरः । १ । ५ । ५ ॥

प्रतिज्ञेयः, पुं, (प्रतिज्ञानात्यनेनेति । प्रति+ज्ञा+ यत् ।) स्तुतिपाठकः । इति भूरिप्रयोगः ॥ (प्रतिज्ञातुं शक्यः ।) प्रतिज्ञातव्ये, त्रि ॥

प्रतितालः, पुं, (प्रतिगतस्तालम् ।) तालविशेषः । यथा, सङ्गीतदामोदरे ।
"कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा ।
कथिताः शङ्करेणैव चत्वारः प्रतितालकाः ॥
कान्तारो यथा,—
कान्तारः प्रतितालस्तु चन्द्रकोऽद्रुतद्वयम् ।
दयावरपदेनायं श्रृङ्गारे वर्त्तते रसे ॥ १ ॥
समराख्यो यथा,—
लघुद्रुतौ लघुश्चान्ते द्रुपताल उदाहृतः ।
रुद्रसंख्याक्षरपदः समरे वीरके रसे ॥ २ ॥
वैकुण्ठो यथा,—
रुद्रत्रयस्तु वैकुण्ठे प्रतिताले समीरितः ।
अर्कसंख्याक्षरैः पादो हास्ये त्रिपुटतालके ॥ ३ ॥
वाञ्छितो यथा,—
वाञ्छितस्तृतीये ताले लघुरेको द्रुतस्तथा ।
वयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः ॥" ४ ॥

प्रतिताली, स्त्री, (प्रतिगता तालमिति । गौरादित्वात् ङीष् ।) तालकोद्घाटनयन्त्रम् । इति हेमचन्द्रः ॥ चावि इति भाषा ॥

प्रतिदानं, क्ली, (प्रतिदत्तस्य दानं प्रतिरूपं दानं वा ।) विनिमयः । न्यस्तार्पणम् । इत्यमरः । २ । ९ । ८२ ॥

प्रतिदारणं, क्ली, (प्रतिदार्य्यतेऽस्मिन्निति । प्रति+दृ +णिच्+आधारे ल्युट् ।) युद्धम् । इति शब्दमाला ॥

प्रतिदिनं, क्ली, दिनं दिनं प्रति । प्रत्यहम् । यथा,
"ततः प्रतिदिनं धेका वर्द्धते चिपकालिका ॥"
इति चतुरचिन्तामणौ ॥

प्रतिदिवा, [न्] पुं. (प्रतिदीव्यतीति । प्रति+ दिव+"कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।" उणा० १ । १५६ । इति कनिन् ।) सूर्य्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ प्रतिदिवस ॥

प्रतिदीवा, [न्] पुं. (प्रतिदिवन् । पृषोदरादित्वात् साधुः ।) सूर्य्यः । इति शब्दरत्नावली ॥

प्रतिदेयं, त्रि, (प्रति+दा+यत् ।) क्रीतद्रव्यस्य दुष्टत्वादिना परावर्त्य देयम् । यथा,—
"क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाह्न्यविक्षतम् ॥"
इति मिताक्षरा ॥

प्रतिध्वनिः, पुं, (प्रतिरूपो ध्वनिरिति ।) प्रतिशब्दः । इत्यमरः । दूरस्थ इति भाषा ॥ तत्पर्य्यायः । प्रतिश्रुत् २ प्रतिध्वानम् ३ । इति शब्दरत्नावली ॥ (यथा, नैषधे । १९ । १० ।
"यदलकदरैश्वर्य्यभूतामयं तदुदयति
श्रुतिपदमयप्लोषमेव प्रतिध्वनिरध्वनि ।")

प्रतिध्वानं, क्ली, (प्रतिध्वननमिति । प्रति+ध्वन +घञ् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ । २५ ॥

प्रतिनप्ता, [ऋ] पुं, (प्रतिरूपो नप्ता नप्तुः पुत्र इत्यर्थः ।) प्रपौत्रः । इति हेमचन्द्रः ॥

प्रतिनवं, त्रि, (प्रतिगतं नवं नवतामिति ।) नूतनम् । इति जटाधरः ॥ (यथा, मेघदूते । ३८ ।
"पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ॥")

प्रतिनिधिः, पुं, (प्रतिनिधीयते सदृशीक्रियते इति । प्रति+नि+धा+"उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः ।) प्रतिमा । इत्यमरः ।२।१०।३६। सदृशः । (यथा, रघौ । १ । ८१ ।
"सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥")
तस्य विशेषणं यथा । "अथ छागलेयस्य छन्द-पुराणम् ।
'पुत्रं वा विनयेदेनं भगिनीं भ्रातरं तथा ।
एषामभावे एवान्यं ब्राह्मणं विनियोजयेत् ॥'
गरुडपुराणे ।
'भार्य्या भर्त्तृव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा ।
असामर्थ्ये तयोस्ताभ्यां व्रतभङ्गो न जायते ॥'
वराहपुराणे ।
'पितृमातृपतिभ्रातृश्वश्रूगुर्व्वादिसुहृत्सु च ।
ब्राह्मणेभ्योऽपि दिस्या यस्य पुण्यभाग्भवेत् ॥'
अत्रैव विषये कात्यायनः ।
'दक्षिणा नात्र कर्त्तव्या शुश्रूषा विहिता न या ।'
अत्र प्रतिनिधौ मयैव इदमाचरणमन्यद्यत्र कुर्य्यामिति चेत् प्रधान एव । तथा च प्रारोहिकभाष्ये श्रुतिः । 'यो वै कामयमानमित्र व्याधितमाह्वयते यजमानायैव तामाशिषं इति होताव इति ।' ब्राह्मणसन्निधौ तु यथा-भावाधिकारी यजमानश्चैव होति पाठे विशेषः । तथा च श्राद्धे एतम् । 'यो वै धातवयद-श्रतिनादि-नाम्नाशे वा यजमानश्चैवेति ।' अन्यित्सुयजमानमहं प्रतिनिधिव्रतपत्यदे आचा-र्य्यत्वादिति । अतएव प्रतिनिधित्वादिनाम्ना-यानु यः स्थित इत्यादिरसत्यद्व हृत् मन्ये वाक्यस्य कालनियमाच्च न तयोरिति ॥ * ॥ अत्र प्रतिनिधिप्रकरणे व्याख्यानात् किञ्चि-ल्लिख्यते । कात्यायनः ।
'काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः ।
काम्येष्वप्युपक्रान्तेष्वन्ये प्रतिनिधिं विदुः ॥'
अङ्गार्थेषु अनुष्ठानार्थेनाधिकारिणः । अतः नित्यनैमित्तिके प्रतिनिधित्वानुष्ठानं कारयेत् । काम्येषु समारब्धे प्रतिनि-धिं नेतरस्य कुर्य्यात् । असामर्थ्ये तु उपक्रान्ते प्रतिनिधि-र्नास्ति तत्रात्मनैव । इतरत्र कार्य्यं प्रतिनिधिना । कामनापूर्व्वं च कर्म्माधिकारानुष्ठानं कुर्य्यात् । तथा च वराहपुराणेऽपि धारणा ।

'श्रौतं कर्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः॥'
अन्ततः उपक्रमात् परतः। अन्यथा नित्य-नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदेनोपादानं व्यर्थं स्यात्तयोरविशेषादेव प्रतिनिधिलाभात्। अतएव भारतपाठादौ तथा समाचारः॥ * ॥ वस्त्वर्थसारे।
'नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।'
सजातीयमप्यभावान्तरमभावस्य प्रतिनिधिर्नेष्यते। भावस्तु कदाचित्। यथोपवासादौ ब्राह्मणभोजनादि।
'नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्।
श्रोत्रियाणामभोज्यश्च यद्द्रव्यं तदपीष्यतः।
ग्राह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित्॥
द्रव्यं वैकल्पिकं किञ्चिद्यत्र सङ्कल्पितं भवेत्।
तदलाभे यदन्यग्राह्यं न तु वैकल्पिकान्तरम्॥
उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि।
तत्र मुख्यमनादृत्य गौणेनैव समापयेत्॥
संस्काराणामयोग्योऽपि मुख्य एव हि यज्यते।
न तु संस्कारयोग्योऽन्यो यज्यते प्रतिरूपकः॥
मुख्ये कार्य्यासमर्थे तु तस्मिंस्तस्य नादरः।
प्रतिरूपमुपादाय शक्तमेवोपयुज्यते॥
काष्ठे स्तम्बैस्तथा पर्णैः क्षीरैः पुष्पैः फलैस्तथा।
गन्धे रसैः सदृशाख्यं घृतालाभे परं परम्॥
गव्याभावात्तु भवेद्ग्राह्यमारण्यानामगव्यकम्।
यवाभावे तु गोधूमास्तथा वेणुयवादयः॥
हविष्ये गोघृतं ग्राह्यं तदलाभे तु माहिषम्।
आजं वा तदलाभे तु साक्षात्तैलं प्रयुज्यते॥
तैलाभावे ग्रहीतव्यं तैलजं तिलसम्भवम्॥'
तैलजं तिलसम्भवं तैलभ्रष्टतिलपिष्टम्।
'तदभावे तु सर्षपं कौसुम्भं सर्षपोद्भवम्॥
वृक्षस्नेहोऽथवा ग्राह्यः पूर्व्वाभावे परः परः।
तदभावे यवादीनां क्रमात् क्षीरं विधीयते॥
तदलाभे दधि ग्राह्यमलाभे तिल इष्यते।
यत्र मुख्यं दधि क्षीरं तत्रापि तदभावतः॥
अजादेः क्षीरदध्यादि तदलाभे तु गोरसम्।
मुख्यापायेऽथवा ग्राह्यः कार्य्यकारकमन्ततः॥
अतएव घृताभावे पूर्व्वं दधि ततः पयः॥'
तथा।
'सर्व्वत्र गौणकालेषु कर्म्मचोदितमाचरेत्।
प्रायश्चित्तं चाहुतिभिर्हुत्वा कर्म्म समाचरेत्॥'
स्मार्त्ते।
'घृतं न लभ्यते यत्र शुष्कक्षीरेण होमयेत्।
क्षीरस्य च दधि प्रियं मधुनश्च गुडो भवेत्॥'
आयुर्वेदेऽपि।
'मधु यत्र न विद्येत तत्र क्षौद्रगुडो भवेत्॥'
पैठीनसिः। 'काञ्चनरत्नपुष्पचन्दनरोचनमन्त्रादीनां यथाद्रव्येण प्रतिनिधिं कुर्य्यात्। धर्म्मालाभे दर्भः प्रतिनिधिर्भवति।' काशं वा प्रतिनिधौ कुशः। 'दर्भालाभे धर्भ' इति कल्पतरुः। अथवा इति नारायणोपाध्यायाः। प्रदीपिकायां नारदीयवचनम्।

'अभावे चैव धातूनां रजतं प्रशस्यते।
सौवर्णानामप्यलाभे तु यव एको विधीयते॥
औषधीनामलाभे तु सहदेवा प्रशस्यते।
रत्नानामप्यलाभे तु मुक्तायवमनुत्तमम्॥
क्षौमाणामप्यलाभे तु हेममात्रं प्रकल्पयेत्॥'
सौत्रामण्यां तैलमाषाणाम्। न्यायमालाप्रतिनिधिमधिकृत्य जैमिनिः।
'न देवताग्निमन्त्रक्रियाणामिति।' अस्यार्थः। देवताया अग्नेश्च आहवनीयादेः मन्त्रस्य अन्यस्य क्रियायाः प्रयाजादृष्टार्थकर्म्मण्यथादृष्टमात्रार्थकत्वेन आरादुपकारकत्वात् प्रतिनिधिः। व्रीह्यादीनान्तु सन्निपत्योपकारकाणां पुरोडाशसाधनं द्रव्यमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम्।" इत्येकादशीतत्त्वम्॥ * ॥ "आरब्धकार्त्तिकादिव्रते तु व्याध्यादिनासामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यत्वात् एव तद्विधानादिति।" इति मलमासतत्त्वम्॥ * ॥ स्वयंकरणासामर्थ्ये अन्यद्वारा। यथा,—"दक्षः।
'स्वयं होमे फलं यत्र तदन्येन न जायते।
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि॥'
विट्पतिर्जामाता। एतच्च ऋत्विगादीनाञ्च सम्भूतता॥ * ॥ अत्राशौचाशङ्कया बोधनदिनात् पूर्व्वं शुचितत्कालजीवित्वाद्यधिकाराभावेऽपि ग्रहणादिकं क्रियते तत् कर्म्मकाले तस्य नारदोक्तमयं प्रवर्त्तनात् प्रवर्त्तनाय न तु तदर्थं प्रतिनिधीयते। अथवा।
'निःस्पृहाणि यदारेषु परिकल्प्याथ कामया।
प्रददेत् कार्य्यवान् विप्रो दुर्यैव न चिरं वसेत्॥'
इति छन्दोगपरिशिष्टवचनादपि प्रतिनिधीयते। एवं वरणं विनापि कश्चिद्यदि ऋत्विक् प्रवर्त्तते तथापि समृद्धर्म्मसिद्धिः। दक्षिणा च तस्मै शुचिकाले दातव्येति। तथा च नारदः।
'ऋत्विक् च त्रिविधो दृष्टः पूर्व्वोढः स्वयंकृतः।
यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्व्वकम्॥'
यदृच्छया स्वेच्छया।" इति तिथ्यादितत्त्वम्॥

प्रतिपः, पुं, (प्रतिपाति पालयतीति। प्रति+पा+कः।) शान्तनुराजपिता। इति शब्दरत्नावली॥

प्रतिपक्षः, पुं, (प्रतिकूलः पक्ष इति प्रादिसमासः।) शत्रुः। इति हेमचन्द्रः। ३।३९९। (यथा, मृच्छकटिके १० अङ्के।
"अमोघं प्रतिपक्षं दलितमिदं शोकाग्निमोचय-
ति कौमुदि मृगयमसटिकान्यायपक्षो
विधिः॥")
सादृश्यम्। यथा,—
"प्रतिबिम्बप्रतिनिधिप्रतीकप्रतिरूपकाः।"
इति काव्यचन्द्रिका॥
प्रतिवादी च॥

प्रतिपत्, [द्] स्त्री, (प्रतिपद्यते उपक्रम्यतेऽनयेति। प्रति+पद्+करणे क्विप्।) [illegible]। इति त्रिकाण्डशेषः॥ बुद्धिः। तिथिविशेषः। तत्पर्य्यायः। पक्षतिः २। इत्यमरः। १।४।१॥ सा च चन्द्रस्य प्रथमकलाक्रियारूपा। वृद्धिरूपा चेत् शुक्ला; एकाङ्कबोधिता। क्षयरूपा चेत् कृष्णा १७ अमदाङ्कबोधिता॥ * ॥ तस्या व्यवस्था यथा। "सा च कृष्णा द्वितीयायुक्ता ग्राह्या प्रतिपत् सद्वितीया ख्यातिकारसम्मतीयात्। शुक्ला अमावास्यायुता ग्राह्या। प्रतिपदमावास्ययेति वचनात्। विद्धकालिकोक्ते तु कर्म्मणि न युग्मादरः। तथा च दादरः।
'विद्धव्यापिनी या तु सैव पूज्या यदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥' * ॥
तथापि उपवासे द्वितीयायुता न ग्राह्या। तथा च वृद्धवशिष्ठः।
'द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी।
चतुर्द्दशी चोपवासे हन्युः पूर्व्वोत्तरे तिथी॥'
द्वितीया वेधात् योगात् प्रतिपत्तृतीये हन्तीत्यर्थः। एवमन्यत्र। अत्रोपवासपरेण विशेषविधानात् व्यापकत्वीयसामान्यवचनस्य सङ्कोचः॥ * ॥ कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम्।
'वीर! प्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरनार्य्यश्च हृष्टाः पुष्टाः स्वलङ्कृताः।
पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः॥'
तत्र मन्त्रः।
'बलिराज! नमस्तुभ्यं विरोचनसुत प्रभो!
भविष्येन्द्र सुराराते पूजेयं प्रतिगृह्यताम्॥'
प्रतिपदा प्रातिपदिका। अत्र प्रातरिति। ब्रह्मपुराणे तु बलिरात्रेतिमस्य पूर्व्वम्।
'मध्यरात्रेण राजेन्द्र! महती शर्व्वरी तिथिः।'
इत्यर्थः॥
पद्मादपि।
'एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः।'
इत्युक्तमिति।
पुनर्ब्रह्मपुराणे।
'शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे च प्रथमेऽहनि भूपते!॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी नित्यं गौरी सुखोषिता।
तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः।
पराजयो विरुद्धश्च लब्धनाशकरो भवेत्॥'
द्यूतप्रायाविधिः कौतुकम्। अथ तत्रैव।
'अश्वाभिभवन् क्रियते तत्रैव द्यूतवन्ती।' * ॥
तत्तिथिमधिकृत्य भविष्योत्तरे।
'यो यो यादृशभावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि॥'
तथा।
'महाहुत्तर त्रिविधिदं बलिराज्यप्रदीपे।

स्नानं दानं प्रमाणं कार्त्तिक्यां तिथौ भवेत्।" प्रतिपद्दोर्द्वितीयायोगो यथा। भविष्ये।
"रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा। गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा॥" ॥ तस्याः संज्ञा नन्दा। तत्राभ्यङ्गनिषेधो यथा,—

"नन्दासु नाभ्यङ्गमुपाचरेच्च
क्षौरञ्च रिक्तासु जयासु मांसम्।
पूर्णासु योषित् परिवर्ज्जनीया
भद्रासु सर्व्वाणि समाचरेच्च॥" ॥

नन्दादिक्रममाह ज्योतिषे।
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्॥" प्रतिपदादितिथिषु भक्ष्यद्रव्यभक्षण-निषेधमाह स्मृतिः।
"कुष्माण्डे चार्थहानिः स्यात् बृहत्यां न स्मरे-द्धरिम्।
बहुशत्रुः पटोले स्याद्धनहानिश्च मूलके॥
कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके। ताले शरीरनाशः स्यान्नारिकेले च मूर्खता॥
तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका। शिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका॥
वार्त्ताकौ सुतहानिः स्याच्चिररोगी च माषके। महापापकरं मांसं प्रतिपदादिषु वर्ज्जयेत्॥" ॥
तत्र क्षौरनिषेधो यथा। "क्षौरं विप्रस्य प्रति-पत्सु वर्ज्ज्यम्।" इति तिथ्यादितत्त्वम्॥ ॥
तत्र चान्द्रफलम्।

"सकलकलङ्कविभूषणसंयुतचारुकान्ति-
र्निजकुलकमलोद्घाटमार्त्तण्डबिम्बः।
प्रतिपदि शशिपूर्णो लब्धजन्मा प्रतापी
भवति विमलवेश्मश्वासकेशः प्रकेशः॥"
इति कोष्ठीप्रदीपः॥ ॥

सा धर्म्मेष्वनतिथिः। यथा,—
महातपा उवाच।
"विप्रोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गतः। तिथीनां शृणु माहात्म्यं कथ्यमानं मया नृप॥ इत्यस्तौ महामतिर्ब्रह्मोत्थो महान्। उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो॥ यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम्॥
ब्रह्मोवाच।
देवानाम् यज्ञानां मन्त्रमात्रस्य पावक॥ आदौ प्रतिपदा चैव त्वमाद्योऽसि पावक॥ त्वन्मदात् प्रतिपदिकं संभविष्यन्ति देवताः। अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति॥ तस्यां तिथौ हविष्येण प्राशयन्ते ब्रह्मिणा। प्रीयन्ति देवाः प्रीताः स्युः पितरः सर्व्वदेवताः॥ चतुर्विधानि भूतानि मनुष्याः पशवोऽसुराः। देवाः सर्व्वे चन्द्रमर्ज्ज्ञाः प्रीताः स्युस्तर्पिते त्वयि॥ ब्रह्मोपवासं कुर्व्वीत मद्गतः प्रतिपद्दिने। आहारमथवा यस्तु तस्य पुण्यं महत्॥ चतुर्युगानि षड्विंशत्कोटयो महीयते। तेजस्वी रूपवान् शूरो ह्यवाप्नोति नरः॥ इह जन्मनि राजा स्वर्गलोके महीयते। पूर्णोऽभवत् सोऽप्यमृतंकरतामवाप्य वसौ॥

य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः। सर्व्वपापैः स मुच्येत नात्र संशयः॥"
इति वराहपुराणे महातपोपाख्याने अग्न्युत्-पत्तिर्नामाध्यायः॥ ॥ प्रतिपदि चन्द्रदर्शन-कारणम्। यथा, ज्योतिषे।
"अमावस्यापटीशेषा यदा स्याद्दर्शसंयुता। सूर्य्यादाद्भुत्वटीभ्यश्चेदधिका दृश्यते शशी॥"

प्रतिपत्तिः, स्त्री, (प्रतिपदनमिति। प्रति+पद्+ क्तिन्।) प्रवृत्तिः। (यथा, कुमारे। ५। ४२।
"मनस्विनीनां प्रतिपत्तिरीदृशी॥")
प्रागल्भ्यम्। गौरवम्। (यथा, युक्तिकल्पतरौ चारलक्षणे।
"शुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान्॥")
संप्राप्तिः। (यथा, रघुः। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")
प्रबोधः। (यथा, भागवते। ३। ६। १४।
"चक्षुर्वाहेन रूपाणां प्रतिपत्तिर्यतो भवेत्॥")
पदप्राप्तिः। इति मेदिनी। ते, २०८॥ मीमां-सकमते धर्मशून्यकर्म्माङ्गम्। यथा। देव-तोद्देशेन यागादौ स्रुक्स्रुवविरादेर्यो विन्धेषः। पूजितप्रतिमादिर्जले विसर्जनमित्यादि। याहादौ सर्व्वप्रयाङ्गकर्म्म यथा। प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः। इति तिथ्यादि-तत्त्वम्॥ ॥ निर्माल्यादिप्राङ्गकारककाङ्गत्वं प्रतिपत्तिरूपकर्म्माङ्गत्वम्। प्रतिपत्तिकर्म्म उत्तरा क्रिया। यत्र एकेन प्रयोग कर्म्म-द्वयं निर्म्मीयते तत्र उत्तरं कर्म्म प्रतिपत्तिकर्म्म। तन्निर्व्वाहकत्वं प्रतिपाद्यम्। इति सङ्ग्रीकायां काशीरामवाचस्पतिः॥ ॥ अथ प्रतिपत्त्यधि-करणम्। प्रकृतिरस्ति लोहितं निर-स्यति पुरोभोपयनति धर्म्मं कुर्व्वीत। इद-मीशोमीययागो श्रूयते। प्रकृतिरस्तीति हृदा-न्नायेभ्य। यथा पशोरुदरवर्त्तिमलत् अर्पति तथा लोहितमपि अर्पति। अत्र पशोः प्रोवेर्माभोपकमेन होमः। अथ तु पुरमासोप-क्रमेति। तत्र च यज्ञेवस्त्विज्भ्यो ददातीति परिभाषया मांसशेषस्य प्रतिपत्तिः प्रायः। अत्र सर्व्वश्रवणेन प्रतिपत्त्याभावात् कर्म्मगुरुत्वं स्यादिति। अत्र सिद्धान्तः। परिकारादुपपत्ति रिति। यदि प्रतिपाद्यं स्यात् तदा प्रतिपत्तिः रङ्गमित्यर्थः। इति रामकृष्णाधिकरण-कौमुदी॥ ॥ अपि च।
"उपांशुयाजदर्शेषु प्रैककार्य्यं भवेन्न वा। भवेत्पदिन्धैः सर्व्वस्य रङ्गुत्का प्राधिनता॥ उत्ताभ्यदर्शविषयु आतुरुत्तरधाविदिणम्। बादी च प्रतिपदर्थः प्रैककार्य्यं ततः कथम्॥" इति माधवीयाधिकरणमालायाम् ६ पादे प्रथ-माधिकरणम्॥

प्रतिपत्तिपटहः, पुं, (प्रतिपत्तौ पटहः।) वाद्य-विशेषः। नागरा इति भाषा। तत्पर्य्यायः। सन्धानस्थः २। इति हारावली॥

प्रतिपत्सूर्य्यं, क्ली, (प्रतिपदे संविदे सूर्य्यम्।) हरड्वादम्। इति त्रिकाण्डशेषः॥

प्रतिपत्फला, स्त्री, (प्रतिपन्नं फलमस्याः।) सुद्र कारवेल्ली। इति राजनिर्घण्टः॥

प्रतिपन्नं, त्रि, (प्रतिपद्यते स्मेति। प्रति+पद्+ क्तः।) अवगतम्। इत्यमरः। ३। १। १०८॥ (यथा, कुमारे। ४। ३३।
"प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि॥")
अङ्गीकृतम्। इति मेदिनी। ने, १८४॥ विक्रान्तः। इति हेमचन्द्रः॥

प्रतिपर्णशिफा, स्त्री, (प्रतिपर्णं शिफा जटा यस्याः।) द्रवन्ती। इति राजनिर्घण्टः॥

प्रतिपादकः, त्रि, (प्रतिपादयतीति। प्रति+पद्+ णिच्+ण्वुल्।) प्रतिपत्तिजनकः। बोधकः। (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शने। "अत्र सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्व-मिति प्रतिपादकेषु वेदान्तेषु जागरूकेषु कथ-मप्रमाणमिति॥") यथा च। प्रतिपाद्यप्रति-पादकभावश्च सम्बन्धः। इति दिनकरी॥

प्रतिपादनं, क्ली, (प्रति+पद्+णिच्+भावे ल्युट्।) दानम्। प्रतिपत्तिः। बोधनम्। इति मेदिनी। ने, ११८॥ (निष्पादनम्। यथा, महाभारते। १२। १४१। ६४।
"त्रेता विमोक्षसमये द्वापरप्रतिपादने॥")

प्रतिपालकः, त्रि, (प्रति+पा+णिच्+ण्वुल्।) पालनकर्त्ता। प्रतिपालयतीति प्रतिपूर्व्व-पालधातोर्णकप्रत्ययेनिष्पन्नः॥

प्रतिपालनं, क्ली, (प्रति+पा+णिच्+भावे ल्युट्।) रक्षणम्। पोषणम्। यथा। "कृष्णा पक्षतस्य कर्म्मस्य रागाप्रतिपालनात् राधिका मक्षयते॥" इति दुर्गादासः॥

प्रतिपाल्यं, त्रि, (प्रति+पा+णिच्+कर्म्मणि यत्।) प्रतिपालनीयम्। प्रतिपालितव्यम्। प्रतिपूर्व्वपालधातोः कर्म्मणि यत्प्रत्यये निष्पन्नम्। (यथा, महाभारते। १३। ४५। २।
"स पुत्रकस्य सदृशः प्रतिपाल्या तदा भवेत्। अपवित्रां दर्शयेत् मुख्यं प्रीता गुणवत्कथा वा॥")

प्रतिप्रसवः, पुं, (प्रति प्रतिविरुद्धं प्रसवो इति, प्रति+प्र+सू+अप्।) निषिद्धस्य पुनर्विधा-नम्। यथा, प्रायश्चित्ततत्त्वे।
"हविष्ट्रदिने चैव सहराग्निं प्राङ्ग्यामरे। इत्यादिना निषिद्धस्य तिलतर्पणस्य शोधैतस्य प्रतिप्रसवमाह स्मृतिः।
अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च॥"

प्रतिप्रपन्नः, त्रि, (प्रतिप्रपद्यते स्मेति। प्रति+प्र+ पद्+क्तः।) प्रतिपन्नवद्विशेषः। इति प्रव-माधिकारम्॥ पुनः प्रयात्नः। यथा,—
"पतनाद्वि प्रतिप्रकाशि दुःखभ्रमानिवानि च। अवेरिन्दरयेनापि प्रीत्यात्वाक्षिष कोऽपि च॥" इति जनुश्रहपत्रावली॥

प्रतिफलं, क्ली, (प्रतिफलतीति । प्रति+फल्+अच् ।) प्रतिबिम्बम् । यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलापी
धरणिरपि भवत्या वासमायाति माना ।"
इति रसमञ्जरी ॥
तुल्यफलम् । फले फलञ्च ॥
प्रतिफलनं, क्ली, (प्रति+फल्+ल्युट् ।) प्रतिबिम्बम् । यथा,—
"न बिम्बं त्वद्बिम्बप्रतिफलनलाभादरुणितं
तुलामध्यारोढुं कथमपि न लज्जेत कलया ।"
इत्यानन्दलहरी । ६९ ॥
प्रतिफलितं, त्रि, (प्रति+फल्+क्त ।) प्रतिबिम्बितम् । यथा,—
"मीढ्वातीतो विशुद्धो मुनिभिरभिहितो मोह-
संक्रान्तमूर्त्तिः
साक्षी स्वात्मा तदुत्थे प्रतिफलितवपुः—— ॥"
इत्यादि सूक्तिपादनामाधरी ॥
प्रतिफुल्लकः, त्रि, (प्रतिफुल्लति विकसतीति । प्रति+फुल्ल+ण्वुल् ।) प्रफुल्लः । इति शब्दचन्द्रिका ॥
प्रतिबद्धः, त्रि, प्रतिबन्धविशिष्टः । प्रतिपूर्वबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥
प्रतिबध्यः, त्रि, (प्रति+बन्ध+यत् ।) प्रतिबन्धनीयः । प्रतिबन्धार्हः । यथा । वह्नौ हेतुमत्त्वाभावप्रतियोगितावच्छेदकत्वप्रकारिता-शून्यत्वाभावप्रकारितानिरूपणरूपेणैव प्रतिबध्यत्वं निवेशनीयमिति व्याप्त्यनुगमप्रकरणदीधितिः ॥
प्रतिबन्धः, पुं, (प्रति+बन्ध+घञ् ।) कार्य्यप्रतिघातः । तत्पर्य्यायः । प्रतिष्टम्भः २ । इत्यमरः । १ । २ । २७ ॥ (यथा, रघौ । ८ । ८० ।
"स ततःप्रतिबन्धमज्ञा
प्रसूत्याभिबन्धनावधिश्रमाम् ।
अयमद्भुतपरमाप्नोति सो
प्रमदेवाप्रतयोऽमिना शुचि ॥")
प्रतिबन्धकः, पुं, (प्रतिबध्नातीति । प्रति+बन्ध+ण्वुल् ।) विटपः । इति शब्दचन्द्रिका ॥ प्रतिरोधके, त्रि ॥ (यथा, राजतरङ्गिण्याम् । ३ । २८८ ।
"स्वामिनो निम्नगङ्गस्य को दोषोऽस्य महीपतेः ।
ममापुण्यानां सन्निम्नं यद्दैवः प्रतिबन्धकम् ॥")
प्रतिबन्धिः, पुं, (प्रतिबध्नात्यनेनेति । प्रति+बन्ध+इन् ।) अभिप्रायान्तरप्रयुक्तं वाक्यम् । प्रतिबन्धः । यथा । प्रतिबन्धिरनुपपत्त्यादावेवेति विधिस्वरूपविवेकदीधिती ॥
प्रतिबलः, त्रि, (प्रतिगतं बलमस्य ।) समर्थः । शक्तः । इति त्रिकाण्डशेषः ॥ (प्रतिरूपं बलमस्य ।) तुल्यबलः । (यथा, महाभारते । १ । १९३ । ८ ।
"नायं प्रतिबलो भीम ! राजामात्यपदो मम ।
योद्धुं युधि परिक्रम्य प्रभवा समरोद्धताः ॥")
प्रतिभयं, त्रि, (प्रतिगतं भयं यस्य ।) भयङ्करम् । इत्यमरः । १ । ७ । २० ॥ (यथा, रामायणे । ६ । ८० । ३६ ।
"दिशश्च प्रदिशश्चैव बभूवुः शरसङ्कुलाः ।
समभाविद्दृशं सर्व्वमाधोत् प्रतिभयं महत् ॥")
भये, क्ली । इति मेदिनी । ये, १२२ ॥
प्रतिभा, स्त्री, (प्रतिभाति शोभते इति । प्रति+भा+कः । टाप् ।) बुद्धिः । इति हेमचन्द्रः ॥ प्रत्युत्पन्नमतित्वम् । इति प्रतिभान्वितशब्द-टीकायां भरतः ॥ नवनवोन्मेषशालिनी प्रज्ञा । यथाह, रुद्रः ।
"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ॥"
(यथा च, महाभारते । १२ । २५९ । १ ।
"धर्म्मं साधु समुद्दिष्टं नियतं धर्म्मलक्षणम् ।
प्रतिभा त्वस्ति मे काचित् तां ब्रूयामनुमानतः ॥"
प्रतिभायते इति । प्रति+भा+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् ।) दीप्तिश्च ॥
प्रतिभान्वितः, त्रि, (प्रतिभया अन्वितः ।) प्रगल्भः । प्रत्युत्पन्नमतियुक्तः । इत्यमरः । ३ । १ । २५ ॥
प्रतिभामुखः, त्रि, (प्रतिभान्वितं मुखमस्य ।) प्रगल्भः । इति हेमचन्द्रः । ३ । ७ ॥
प्रतिभावान्, [त्] त्रि, (प्रतिभा विद्यतेऽस्य । प्रतिभा+मतुप् । मस्य वः ।) प्रतिभान्वितः । प्रागल्भ्ययुक्तः । प्रतिभाशब्दादस्त्यर्थे मतुप्प्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे । ७ । ६४ ।
"आगच्छन्तीव तापत्री कुमारस्यैव यत्नात् ।
अप्रदोषस्य साध्विमतीचन्तु प्रतिभावती ॥")
प्रतिभाहानिः, स्त्री, (प्रतिभाया हानिः ।) बुद्धिनाशः । इति शब्दमाला ॥
प्रतिभूः, पुं, (प्रतिरूपः प्रतिनिधिर्वा भवतीति । प्रति+भू+"भुवः संज्ञान्तरयोः ।" ३ । २ । १७९ । इति क्विप् । "अधिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः ।" इति सिद्धान्तकौमुदी ।) लग्नकः । इत्यमरः । २ । १० । ४४ ॥ जामिन् इति पारस्यभाषा ॥ (यथा, प्रद्युम्नविजये । १ अङ्के ।
"यद्येकः प्रतिभूः भवेद्य क्षतिमो यस्तेषु यस्तेऽपरो
विश्वस्तोऽस्त्वसमर्पयतन्यः कोऽपि कश्चित्
कौरवः ॥")
तस्य कर्त्तव्यं यथा,—
"सभापतिः कार्य्यमाह कात्यायनः ।
'अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनोः ।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम् ।'
प्रतिभवति तत्कार्य्ये तद्भवतीति प्रतिभूर्लग्नकः । वादयोग्यः विवादपदस्य साधिसाधनादिदानस्य दण्डदानस्य च क्षमः । वादिनोः भाषावादिनः उत्तरवादिनश्च । तथा च याज्ञवल्क्यः ।
'उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ।
प्रतिभुवभावे च राज्ञा संरक्षणं तयोः ।'
राज्ञा संरक्षणं दण्डपुरुषाधिकरणम् । निर्णयस्य कार्य्ये धनादिदाने दण्डदानादिना कार्य्य-प्रतिरूपपूर्णाभिधानात् । भक्तदानरहितो राजनियुक्तः ।" इति व्यवहारतत्त्वम् ॥
प्रतिमः, त्रि, (प्रतिमातीति । प्रति+मा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) उत्तरपदस्थो सदृशवाचकः । यथा,—
"सुवर्णप्रतिमे वस्त्रः प्रकारः प्रतिमो मितः ।"
इति वैद्यकम् ॥
(यथा, रामायणे । ५ । ३० । १९ ।
"आयसं हृदयं नूनं राममातुरसंशयम् ।
यद्दिव्यगर्भप्रतिमे भर्त्तर्यपि न भिद्यते ॥")
प्रतिमा, स्त्री, (प्रतिमीयते इति । प्रति+मा+अङ् । टाप् ।) अङ्गुलिः । गजदन्तबन्धः । इति मेदिनी । मे, ३८ ॥ (प्रतिबिम्बम् । यथा, रघुः । ७ । ६४ ।
"विमोहितानामिव सैन्यानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥"
तथा च कुमारे । ७ । ११ ।
"आत्मानमालोक्य च शोभमानं
आदर्शबिम्बे स्तिमितायताक्षी ॥")
प्रतिमीयते अनयेति करणे अङ् ।) काष्ठप्रस्तरमृत्तिकादिनिर्म्मितप्रतिकृतिकम् । तत्पर्य्यायः । प्रतिमानम् २ प्रतिबिम्बम् ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृतिः ६ अर्च्चा ७ प्रतिनिधिः ८ । इत्यमरः । २ । १० । ३५ ॥ प्रतिच्छन्दः ९ प्रतिकायः १० प्रतिरूपम् ११ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ११ । ८६ । ७० ।
"गिरिदुर्गे तु मां तर्हि किल मायेन्द्रजालिका ।
विभ्राजमाना श्रुत्वैव प्रतिमेव हिरण्मयी ॥")
देवप्रतिमाघटनप्रमाणादि यथा,—
"विष्णोः शास्त्रप्रमाणानि यावन्मात्रं प्रकीर्त्तितम् ।
हृदयपद्मं प्रमाणं मध्यमं महामुने ।
कृत्वाकारं शिरस्तस्य कण्ठोपरि तथैव च ।
मुखमध्यं ललाटञ्च प्रमाणेनैव चोच्यते ।
अक्षिदत्ताद्यं द्विधामुखमात्रं वा ।
विस्तारं चापि कर्त्तव्यं भवन्ति यदि धा ॥"
देवस्य स्थानस्य यथाकार्य्यं विधीयते ।
बाहू द्वौ सदा सुतः पादौ देवे दक्षिणो करौ ।
पद्मञ्च तेजस्वरं प्रकर्त्तव्यं च वामतः ॥
चतुर्भुजस्य वक्ष्यामि यथेष्टां पूर्णतस्तनी ।
दक्षिणेन सदा पद्मं शङ्खं वामे करोदरे ।
वामतः चक्रञ्च कर्त्तव्यं भूमिस्थिता ।
अष्टबाहौ तु सदा वामतोऽस्य प्रकर्त्तयेत् ।
यथेच्छया प्रचक्रमुपरिष्टात् प्रकल्पयेत् ।
अधस्तात् पृथिवी तस्य कर्त्तव्या पादमध्यतः ।
दक्षिणे प्रणतं तद्वत् गरुत्मन्तं निवेशयेत् ।
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता शुभानना ।
गरुत्मानग्रतो वापि संस्थाप्यो भूतिमिच्छता ।
श्रीश्च पुष्टिश्च कर्त्तव्ये पार्श्वयोः पङ्कजैर्युते ।
तोरणञ्चोपरिष्टाच्च विद्याधरसमन्वितम् ।
देवदुन्दुभिसंयुक्तं गन्धर्व्वमिथुनान्वितम् ।
पत्रवल्लीसमोपेतं सिंहव्याघ्रसमन्वितम् ।
तथा कल्पलतोपेतं स्तुवद्भिरमरेश्वरैः ।
एवंविधो भवेद्विष्णुस्त्रिभागेनास्य पीठिका ।
नवतालप्रमाणस्तु देवदानवकिन्नराः ।
अतःपरं प्रवक्ष्यामि प्रमाणं विधिना तव ।
जालान्तरप्रविष्टानां भानूनां यद्रजः स्फुटम् ।

त्रसरेणुः स विज्ञेयो वालाग्रैस्तैस्तथाष्टभिः ।
तदष्टकेन लिक्षा तु यूका लिक्षाष्टकैर्मता ।
यवो यूकाष्टकं तद्वदष्टभिस्तैस्तदङ्गुलम् ।
स्वकीयाङ्गुलमानेन मुखं स्याद्द्वादशाङ्गुलम् ।
मुखमानेन कर्त्तव्या सर्व्वावयवकल्पना ॥ ३ ॥
सौवर्णी राजती वापि ताम्री रत्नमयी शुभा ।
शैलदारुमयी चापि लौहसीसमयी तथा ।
रीतिका धातुयुक्ता वा ताम्रकांस्यमयी तथा ।
शुभदारुमयी वापि देवतार्च्चा प्रशस्यते ॥ ४ ॥
अङ्गुष्ठपर्व्वादारभ्य वितस्तिर्यावदेव तु ।
गृहेषु प्रतिमा कार्य्या नाधिका शस्यते बुधैः ।
आषोडशात्तु प्रासादे कर्त्तव्या नाधिका ततः ।
मध्यमेन कनिष्ठा तु कार्य्या वित्तानुसारतः ।
द्वारोच्छ्रायस्य यन्मानमष्टधा तत्तु कारयेत् ।
भागद्वयेन प्रतिमा त्रिभागीकृत्य तत् पुनः ।
पीठिका भागतः कार्य्या नातिनीचा न
चोच्छ्रिता ।
प्रतिमामुखमानेन नव भागान् प्रकल्पयेत् ।
चतुरङ्गुला भवेद्ग्रीवा भागेन हृदयं पुनः ।
नाभिस्तस्मादधः कार्य्या भागेनैकेन शोभिता ।
निम्नत्वे विस्तरत्वे च अङ्गुलं परिकीर्त्तितम् ।
नाभेरधस्तथा मेढ्रं भागेनैकेन कल्पयेत् ।
द्विभागेनायतावूरू जानुनी चतुरङ्गुले ।
जङ्घे द्विभागे विख्याते पादौ तु चतुरङ्गुलौ ।
चतुर्द्दशाङ्गुलस्तद्वन्मौलिरस्य प्रकीर्त्तितः ।
ऊर्द्ध्वमानमिदं प्रोक्तं पृथुत्वञ्च निबोधत ।
सर्व्वावयवमानेषु विस्तरं शृणुत द्विजाः ॥ ५ ॥
चतुरङ्गुलं ललाटं स्यादूर्द्ध्वं नासा तथैव च ।
द्व्यङ्गुलं तु हनुर्ज्ञेय ओष्ठस्त्वङ्गुलसम्मितः ।
अष्टाङ्गुलं ललाटन्तु तावन्मात्रे भ्रुवौ मते ।
अर्द्धाङ्गुला भ्रुवोर्लेखा मध्ये धनुरिवानता ।
उन्नताग्रा भवेत् पार्श्वे श्लक्ष्णा तीक्ष्णा प्रशस्यते ।
अक्षिणी द्व्यङ्गुलायामे तदर्द्धञ्चैव विस्तरे ।
उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे ।
तारका च त्रिभागेन दृष्टिः स्यात् पञ्चभागिकी ।
द्व्यङ्गुलं भ्रुवोर्मध्यं नासामूलमथाङ्गुलम् ।
नासाग्रविस्तरं तद्वत् पुटद्वयमथानतम् ।
नासापुटबिलं तद्वदर्द्धाङ्गुलमुदाहृतम् ।
कपोले द्व्यङ्गुले तद्वत् कर्णमूलाद्विनिर्गते ।
हन्वग्रमङ्गुलं तद्विस्तारो द्व्यङ्गुलो भवेत् ।
अर्द्धाङ्गुला भ्रुवो राजी प्रणालसदृशी समा ।
अर्द्धाङ्गुलः समस्तद्वदुत्तरौष्ठस्तु विस्तरे ।
निष्पावसदृशं तद्वन्नासापुटदलं भवेत् ।
सृक्कणी ज्योतिषुक्ते च कर्णमूलात् षडङ्गुले ।
कर्णौ तु भ्रूसमौ ज्ञेयावूर्द्ध्वञ्च चतुरङ्गुलौ ।
द्व्यङ्गुलौ कर्णपाशौ तु मात्रामेकान्तु विस्तृतौ ।
कर्णयोरुपरिष्टाच्च मस्तकं द्वादशाङ्गुलम् ।
ललाटं पृष्ठतोऽर्द्धेन प्रोक्तमष्टादशाङ्गुलम् ।
षट्त्रिंशदङ्गुलश्चास्य परिणाहः शिरोगतः ।
सकेशनिचयस्याथ द्विचत्वारिंशदङ्गुलः ।
केशान्ताद्धनुकं तद्वदङ्गुलानि तु षोडश ।
ग्रीवामध्यपरीणाहश्चतुर्व्विंशतिरङ्गुलः ।

अष्टाङ्गुला भवेद्ग्रीवा पृथुत्वेन विशिष्यते ।
स्तनग्रीवान्तरं प्रोक्तमेकतालं स्वयम्भुवा ।
स्तनयोरन्तरं तद्वद्द्वादशाङ्गुलमिष्यते ।
स्तनयोर्म्मण्डलं तद्वद्द्व्यङ्गुलं परिकीर्त्तितम् ।
चूचुके मण्डलस्यान्तर्यवमात्रे उभे स्मृते ।
द्वितालञ्चापि विस्तारादुरःस्थलमुदाहृतम् ।
कक्षे षडङ्गुले प्रोक्ते बाहुमूलस्तनान्तरे ।
चतुर्द्दशाङ्गुलौ पादावङ्गुष्ठस्तु त्रिरङ्गुलः ।
पञ्चाङ्गुलपरीणाहमङ्गुष्ठाग्रं तथोन्नतम् ।
अङ्गुष्ठकसमा तद्वदायामे स्यात् प्रदेशिनी ।
तस्याः षोडशभागेन हीयते मध्यमाङ्गुली ।
अनामिकाष्टभागेन कनिष्ठा चापि हीयते ।
पर्व्वत्रयेण चाङ्गुल्यो गुल्फौ द्व्यङ्गुलकौ मतौ ।
पार्ष्णिर्द्व्यङ्गुलमाना तु कलयोक्ता प्रकीर्त्तिता ।
द्विपर्व्वाङ्गुष्ठकः प्रोक्तः परीणाहश्च द्व्यङ्गुलः ।
प्रदेशिनीपरीणाहस्त्र्यङ्गुलः समुदाहृतः ।
अन्यासामष्टभागेन हीयते क्रमशो द्विजाः ।
अङ्गुष्ठेनोच्छ्रयः कार्य्यः अङ्गुष्ठस्य विशेषतः ।
तदर्द्धेन तु शेषाणामङ्गुलीनामथोच्छ्रयः ।
जङ्घाग्रे परिणाहस्तु अङ्गुलानि चतुर्द्दश ।
जङ्घामध्ये परीणाहस्तथैवाष्टादशाङ्गुलः ।
जानुमध्ये परीणाह एकविंशतिरङ्गुलः ।
जानूच्छ्रायोऽङ्गुलः प्रोक्तो मण्डलं त्र्यङ्गुलं पुनः ।
ऊरुमध्ये परीणाहश्चाष्टाविंशतिकाङ्गुलः ।
एकत्रिंशोपरिष्टाच्च वृषणौ त्र्यङ्गुलौ पुनः ।
द्व्यङ्गुलञ्च तथा मेढ्रं परीणाहे षडङ्गुलम् ।
मणिबन्धोदयौ विद्यात् केशरेखा तथैव च ।
मणिकोषपरीणाहश्चतुरङ्गुल इष्यते ।
विस्तारेण भवेत्तद्वत् कटिरष्टादशाङ्गुला ।
द्वाविंशतिस्तथा स्त्रीणां स्तनौ च द्वादशाङ्गुलौ ।
नाभिमध्ये परीणाहो द्विचत्वारिंशदङ्गुलः ।
पुरतः पञ्चपञ्चाशत् कट्याश्चैव तु वेष्टनम् ।
कक्षयोरुपरिष्टात्तु स्कन्धौ प्रोक्तौ षडङ्गुलौ ।
अष्टाङ्गुलाश्च विस्तारे ग्रीवायैव तु निर्द्दिशेत् ।
परीणाहे तथा ग्रीवां कला द्वादश निर्द्दिशेत् ।
आयामो भुजयोस्तद्वद्द्विचत्वारिंशदङ्गुलः ।
कार्य्यन्तु बाहुशिखरं प्रमाणे षोडशाङ्गुलम् ।
ऊर्द्ध्वं यद्बाहुपर्य्यन्तं विद्यादष्टादशाङ्गुलम् ।
तथैकाङ्गुलहीनन्तु द्वितीयं पर्व्व उच्यते ।
बाहुमध्ये परीणाहो भवेदष्टादशाङ्गुलः ।
षोडशोक्तः प्रबाहुस्तु षट्कलोपकरो मतः ।
सप्ताङ्गुलं करतलं पञ्चमध्याङ्गुली मता ।
अनामिका मध्यमायाः सप्तभागेन हीयते ।
तस्यास्तु पञ्चभागेन कनिष्ठा परिहीयते ।
मध्यमायास्तु हीना वै पञ्चभागेन तर्ज्जनी ।
अङ्गुष्ठस्तर्ज्जनीमूलादधः प्रोक्तस्तु तत्समः ।
अङ्गुष्ठपरिणाहस्तु विज्ञेयश्चतुरङ्गुलः ।
द्विपर्व्वाङ्गुलीनान्तु भागो भागेन हीयते ।
मध्यमामध्यपर्व्वन्तु अङ्गुलद्वयमायतम् ।
यवो यवस्तु सर्व्वासां तासां नखा उदीर्यते ।
अङ्गुष्ठपर्व्वमध्यन्तु तर्ज्जन्या द्व्यङ्गुलं भवेत् ।
यवपर्व्वाधिकं नखरमथ द्व्यङ्गुलम् ।

पञ्चार्द्धेन नखान् विद्यात् क्रमशोऽपि समन्ततः ।
शिश्नं प्रलम्बं प्रकुर्व्वीत ईषदूनं यथायतम् ।
निम्नवृत्तं भवेन्मध्ये पार्श्वतः कलयोच्छ्रितम् ।
तथैव केशपर्य्यन्तः स्कन्धोपरि दशाङ्गुलः ।
स्त्रियः कार्य्यास्तु तद्वत्तु श्रोणीस्तनजघनाधिकाः ।
चतुर्द्दशाङ्गुलायाममुदरं तासु निर्द्दिशेत् ।
नानाभरणसम्पन्नाः किञ्चिदुत्तुङ्गमुखाननाः ।
किञ्चिद्दीर्घं भवेद्वक्त्रमलकावलिरुत्तमा ।
नासा ग्रीवा ललाटञ्च निर्द्दिशेत् सार्द्धकाङ्गुला ।
अर्द्धाङ्गुलिविस्तारः शस्तोऽधरपल्लवः ।
अधिकं नेत्रयुग्मन्तु चतुर्भागेन निर्द्दिशेत् ।
ग्रीवावलिश्च कर्त्तव्या किञ्चिदर्द्धाङ्गुलोच्छ्रया ।
एवं नारीषु सर्व्वासु देवानां प्रतिमासु च ।
नवतालमिदं प्रोक्तं लक्षणं पापनाशनम् ॥ ६ ॥
अतः परं प्रवक्ष्यामि देवाकारान् विशेषतः ।
दशतालः स्मृतो रामो बलिर्वैरोचनिस्तथा ।
वराहो नरसिंहश्च सप्ततालश्च वामनः ।
मत्स्यकूर्म्मौ तु निर्द्दिष्टौ यथाशोभं स्वयम्भुवा ।
अतः परं प्रवक्ष्यामि रुद्राद्याकारमुत्तमम् ।
आपीनोरुभुजस्कन्धस्तप्तकाञ्चनसप्रभः ।
शुक्लार्करश्मिसङ्घातचन्द्राङ्कितजटो विभुः ।
जटामुकुटधारी च द्व्यष्टवत्सराकृतिः ।
बाहुवारणहस्ताभो वृत्तजङ्घोरुमण्डलः ।
ऊर्द्ध्वकेशस्तु कर्त्तव्यो दीर्घायतविलोचनः ।
व्याघ्रचर्म्मपरीधानः कटिसूत्रत्रयान्वितः ।
हारकेयूरसम्पन्नो भुजङ्गाभरणस्तथा ।
बाहवश्चापि कर्त्तव्या नानाभरणभूषिताः ।
पीनोरुगण्डफलकः कुण्डलाभ्यामलङ्कृतः ।
आजानुलम्बबाहुश्च सौम्यमूर्त्तिः सुशोभनः ।
खेटकं वामहस्ते तु खड्गञ्चैव तु दक्षिणे ।
शक्तिं दण्डं त्रिशूलञ्च दक्षिणे तु निवेशयेत् ।
कपालं वामपार्श्वे तु नागं खट्वाङ्गमेव च ।
एकश्च वरदो हस्तस्तथाक्षवलयोऽपरः ।
वैशाखं स्थानकं कृत्वा नृत्याभिनयसंस्थितः ।
नृत्ये दशभुजः कार्य्यो गजासुरवधे तथा ।
तथा त्रिपुरदाहे च बाहवः षोडशैव तु ।
शङ्खं चक्रं गदां शार्ङ्गं घण्टा तत्राधिका भवेत् ।
तथा धनुः पिनाकञ्च शरो विष्णुमयस्तथा ।
चतुर्भुजोऽष्टबाहुर्वा ज्ञानयोगेश्वरो मतः ।
तीक्ष्णनासाग्रदशनः करालवदनो महान् ।
भैरवः शस्यते लोके प्रत्यायतनसंस्थितः ।
न मूलायतने कार्य्यो भैरवस्तु भयङ्करः ।
नारसिंहो वराहो वा तथान्येऽपि भयङ्कराः ।
न हीना नाधिकाङ्गा च कर्त्तव्या देवता क्वचित् ।
स्वामिनं घातयेन्न्यूना करालवदना तथा ।
अधिका शिल्पिनं हन्यात् कृशा चैवार्थनाशिनी ।
कृशोदरी तु दुर्भिक्षं निर्म्मांसा धननाशिनी ।
वक्रनासा तु दुःखाय संक्षिप्ताङ्गी भयङ्करी ।
चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी ।
दुःखदा हीनवक्त्रा तु पाणिपादकृशा तथा ।
हीनाङ्गा हीनजङ्घा च भ्रमोन्मादकरी नृणाम् ।
शुष्कवक्त्रा तु राजानं कटिहीना च या भवेत् ।

पाणिपादविहीनायां जायते मरको महान्।
जङ्घाजानुविहीना च शत्रुकल्याणकारिणी॥
पुत्त्रमित्रविनाशाय हीना वक्षःस्थलेन या।
सम्पूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा।
एवं लक्षणमासाद्य कर्त्तव्यः परमेश्वरः॥ ०॥
स्तूयमानः सुरैः सर्व्वैः समन्तादर्द्धयेद्भवम्।
शक्रेण नन्दिना चैव महाकालेन शङ्करम्॥
प्रणता लोकपालाश्च पार्श्वे तु गणनायकाः।
नृत्यद्भृङ्गिरिटिश्चैव भूतवेतालसंवृतः।
सर्व्वे तुष्टाश्च कर्त्तव्याः स्तुवन्तः परमेश्वरम्॥

गन्धर्व्वविद्याधरकिन्नराणा-
मथाप्सरोगुह्यकनायकानाम्।
गणैरनेकैः शतशो महेन्द्र-
मुनिप्रवीरैरभिवन्द्यमानम्॥
धृतातपत्रैः प्रमथैः प्रवाल-
पुष्पोपहारप्रचयं ददद्भिः।
संस्तूयमानं भगवन्तमीश-
मेवम्प्रयत्नादमरैश्च पूज्यम्॥ ०॥

सूत उवाच।

अधुना संप्रवक्ष्यामि अर्द्धनारीश्वरं परम्।
अर्द्धेन देवदेवस्य नारीरूपं सुशोभनम्॥
ईशार्द्धे तु जटाभारो बालेन्दुकलया युतः।
उमार्द्धे तु प्रदातव्यौ सीमन्ततिलकावुभौ॥
वासुकिं दक्षिणे कर्णे वामे कुण्डलमादिशेत्।
बालिका चोपरिष्टात्तु कपालं दक्षिणे करे॥
त्रिशूलं वापि कर्त्तव्यं देवदेवस्य शूलिनः।
वामतो दर्पणं दद्यादुत्पलं वा विशेषतः॥
वामबाहुश्च कर्त्तव्यः केयूरवलयान्वितः।
उपवीतञ्च कर्त्तव्यं मणिमुक्तामयन्तथा॥
स्तनभारन्तथार्द्धे तु वामे पीनं प्रकल्पयेत्।
परार्द्धं शुक्लमतुलं कुर्य्यात् श्रोण्यर्द्धन्तु तथैव च॥
लिङ्गार्द्धमूर्द्ध्वं कर्त्तव्यं व्यालाजिनकृताम्बरम्।
वामे लम्बपरीधानं कटिसूत्रत्रयान्वितम्॥
नानारत्नसमोपेतं दक्षिणं भुजगान्वितम्।
देवस्य दक्षिणं पादं पद्मोपरिसमास्थितम्॥
किञ्चिदूर्द्ध्वं तथा वामं भूषितं नूपुरेण च।
रत्नैर्विभूषितान् कुर्य्यादङ्गुलीष्वङ्गुलीयकान्॥
सालक्तकं तथा पादं पार्व्वत्या दर्शयेत् सदा।
अर्द्धनारीश्वरस्येदं रूपमस्मिन्नुदाहृतम्॥ ०॥
उमामहेश्वरस्यापि लक्षणं शृणुत द्विजाः।
संस्थानन्तु तयोर्वक्ष्ये लीलाललितविभ्रमम्।
चतुर्भुजं द्विबाहुं वा जटाभारेन्दुभूषितम्।
लोचनत्रयसंयुक्तमेकवक्त्रप्रतापिनम्॥
दक्षिणेनोत्पलं शूलं वामं कुचभरे करम्।
नीलोत्पलपरीधानं नानारत्नोपशोभितम्॥
सुप्रतिष्ठं सुवेषञ्च तथार्द्धेन्दुकृताननम्।
वामे तु संस्थिता देवी तस्योरौ बाहुगूहिता।
शिरोभूषणसंयुक्तैरलकैर्ललितानना।
सवालिका कर्णवती ललाटतिलकोज्ज्वला॥
मणिकुण्डलसंयुक्ता कर्णिकामालिका क्वचित्।
हारकेयूरबहुला हरवक्त्रावलोकिनी॥
वामांसं दक्षदेवस्य स्पृशन्ती लीलया क्वचित्।
दक्षिणन्तु वहिः कृत्वा बाहुं दक्षिणतोऽथवा।
स्कन्धे वा दक्षिणे कुक्षौ स्पृशन्त्यङ्गुलिभिः क्वचित्।
वामे च दर्पणं दद्यादुत्पलं वा सुशोभनम्।
कटिसूत्रत्रयञ्चैव नितम्बे स्यात् प्रलम्बकम्।
जया च विजया चैव कार्त्तिकेयविनायकौ॥
पार्श्वयोर्दर्शयेत्तत्र प्रतोरणमनुत्तमम्।
मालाविद्याधरास्तत्र वीणावाद्यपरायणाः।
एतद्रूपमुमेशस्य कर्त्तव्यं भूतिमिच्छता॥ ०॥
शिवनारायणं वक्ष्ये सर्व्वपापप्रणाशनम्।
वामार्द्धे माधवं कुर्य्याद्दक्षिणे शूलपाणिनम्॥
बाहुद्वयञ्च कृष्णस्य मणिकेयूरभूषितम्।
शङ्खचक्रधरं शान्तमारक्ताङ्गुलिविभ्रमम्॥
चक्रस्थाने गदां वापि पाणौ दद्याद्गदाभृतः।
शङ्खञ्चैवेतरे दद्यात् कट्यर्द्धे भूषणोज्ज्वलम्॥
पीतवस्त्रपरीधानं चरणं मणिभूषितम्।
दक्षिणार्द्धे जटाभारमर्द्धेन्दुकृतलक्षणम्॥
भुजङ्गहारवलयं वरदं दक्षिणं करम्।
द्वितीयञ्चापि कुर्व्वीत त्रिशूलवरधारिणम्॥
व्यालोपवीतसंयुक्तं कट्यर्द्धं कृत्तिवाससम्।
मणिरत्नैश्च संयुक्तपादं नागविभूषितम्।
शिवनारायणस्यैवं कल्पयेद्रूपमुत्तमम्॥ ०॥
महावराहं वक्ष्यामि पद्महस्तं गदाधरम्।
तीक्ष्णदंष्ट्राग्रघोरास्यं मेदिनीवामकूर्परम्॥
दंष्ट्राग्रेणोद्धृतां दान्तां धरणीमुत्पलान्विताम्।
विस्मयोत्फुल्लनयनामुपरिष्टात् प्रकल्पयेत्॥
दक्षिणं कटिसंस्थन्तु करं तस्य प्रकल्पयेत्।
कूर्म्मोपरि तथा पादमेकं नागेन्द्रमूर्द्धनि।
संस्तूयमानं लोकेशैः समन्तात् परिकल्पयेत्॥ ०॥
नारसिंहञ्च कर्त्तव्यं भुजाष्टकसमन्वितम्।
रौद्रसिंहाननं तद्वद्विदारितमुखेक्षणम्॥
स्तब्धपीनसटाकर्णं दारयन्तं दितेः सुतम्।
विनिर्गतान्त्रजालञ्च दानवं परिकल्पयेत्॥
वमन्तं रुधिरोद्गारं भ्रुकुटीकुटिलेक्षणम्।
युध्यमानश्च कर्त्तव्यः क्वचित् करणबन्धनैः॥
परिश्रान्तेन दैत्येन तर्ज्जमानो मुहुर्मुहुः।
दैत्यं प्रदर्शयेत्तत्र खड्गखेटकधारिणम्।
स्तूयमानं तथा विष्णुं दर्शयेदमराधिपैः॥ ०॥
तथा त्रिविक्रमं वक्ष्ये ब्रह्माण्डाक्रमणोत्कटम्।
वामपार्श्वे तथा राहुमुपरिष्टात् प्रकल्पयेत्॥
अधस्ताद्वामनं तावत् कल्पयेत् सकमण्डलुम्।
दक्षिणे छत्रिकां दद्यान्मुखं दीनं प्रदर्शयेत्।
भृङ्गारधारिणं तद्वद्बलिनाग्रेव पार्थिवः॥
बन्धनञ्चापि कुर्व्वीत गरुडेनास्य दर्शयेत्॥ ०॥
मत्स्यरूपं यथा मत्स्यं कौर्म्मं कूर्म्माकृतिं न्यसेत्।
एवं रूपस्तु भगवान् कार्य्यो नारायणो हरिः॥ ०॥
ब्रह्मा कमण्डलुधरः कर्त्तव्यः स चतुर्मुखः॥
हंसारूढः क्वचित् कार्य्यः क्वचिच्च कमलासनः।
वर्णेन पद्मगर्भाभश्चतुर्बाहुः शुभेक्षणः॥
कमण्डलुं वामकरे स्रुवं हस्ते च दक्षिणे।
वामे दण्डधरं तद्वत् स्रुचञ्चापि प्रदर्शयेत्॥
मुनिभिर्द्देवगन्धर्व्वैः स्तूयमानं समन्ततः।
कुर्व्वाणमिव लोकांस्त्रीन् शुक्लाम्बरधरं विभुम्॥
मृगचर्म्मधरञ्चापि दिव्ययज्ञोपवीतिनम्।
आज्यस्थालीं न्यसेत् पार्श्वे वेदांश्च चतुरः पुनः।
वामपार्श्वेऽस्य सावित्री दक्षिणे च सरस्वती।
अग्रे च ऋषयस्तद्वत् कार्य्याः पैतामहे रथे॥
कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्यसन्निभम्।
कमलोदरवर्णाभं सुकुमारं कुमारकम्॥
गण्डकैश्चीरकैर्युक्तं मयूरवरवाहनम्।
स्थानीयखेटनगरे भुजान् द्वादश कल्पयेत्।
चतुर्भुजः कर्व्वटे स्याद्वने ग्रामे द्विबाहुकः।
शक्तिः पाशस्तथा खड्गः शरः शूलन्तथैव च।
वरदश्चैव हस्तः स्यादभयश्चापरो भवेत्॥
एते दक्षिणतो ज्ञेयाः केयूरकटकोज्ज्वलाः।
धनुः पताका मुष्टिश्च तर्ज्जनी च प्रसारिता।
खेटकं ताम्रचूडञ्च वामहस्ते प्रशस्यते।
द्विभुजस्य करे शक्तिर्वामे स्यात् कुक्कुटोऽपि वा।
चतुर्भुजे शक्तिपाशौ वामतो दक्षिणे त्वसिः।
वरदोऽभयदो वापि दक्षिणः स्यादथापरः॥
विनायकं प्रवक्ष्यामि गजवक्त्रं त्रिलोचनम्।
लम्बोदरं चतुर्बाहुं व्यालयज्ञोपवीतिनम्॥
स्रस्तकर्णं बृहत्तुण्डमेकदंष्ट्रं पृथूदरम्।
स्वं दन्तं दक्षिणकरे उत्पलञ्च तथापरे।
लड्डुकं परशुञ्चैव वामतः परिकल्पयेत्।
बृहत्तुण्डविषाणञ्च पीनस्कन्धाङ्घ्रिपाणिकम्।
युक्तं बुद्धिकुबुद्धिभ्यामधस्तान्मूषकान्वितम्॥
कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजं तथा।
त्रयाणामपि देवानामनुकारानुकारिणीम्॥
जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम्॥
त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं क्रमेण च।
तीक्ष्णबाणं तथा शक्तिं दक्षिणेषु विचिन्तयेत्॥
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च।
घण्टां वा परशुं वापि वामतः सन्निवेशयेत्॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत्।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्॥
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम्।
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम्॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्।
सपाशवामहस्तेन धृतकेशञ्च दुर्गया॥
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम्॥
किञ्चिदूर्द्ध्वं तथा वाममङ्गुष्ठं महिषोपरि।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत्॥ ०॥
इदानीं सुरराजस्य रूपं वक्ष्ये विशेषतः।
सहस्रनयनं देवं मत्तवारणसंस्थितम्॥
पृथूरुवक्षोवदनं सिंहस्कन्धं महाभुजम्।
किरीटकुण्डलधरं पीवरोरुभुजेक्षणम्॥
वज्रोत्पलधरं तद्वन्नानाभरणभूषितम्।
पूजितं देवगन्धर्व्वैरप्सरोगणसेवितम्॥

छत्रचामरधारिण्यौ स्त्रियौ पार्श्वे तु कारयेत् ।
सिंहासनगतं चापि गन्धर्व्वगणसंयुतम् ॥
इन्द्राणीं वामतश्चास्य कुर्य्यादुत्पलधारिणीम् ॥
सूत उवाच ।
प्रभाकरस्य प्रतिमामिदानीं शृणुत द्विजाः ।
रथस्थं कारयेद्देवं पद्महस्तं सुलोचनम् ॥
सप्ताश्वञ्चैकचक्रञ्च रथन्तस्य प्रकल्पयेत् ।
मुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥
नानाभरणभूषाढ्यं भुजाभ्यां धृतपुष्करम् ।
स्कन्धस्थे पुष्करे ते तु लीलयैव धृते सदा ॥
चोलकच्छन्नवपुषं क्वचिच्चित्रेषु दर्शयेत् ।
वस्त्रयुग्मसमोपेतं चरणौ तेजसावृतौ ॥
प्रतीहारौ च कर्त्तव्यौ पार्श्वयोर्दण्डिपिङ्गलौ ।
कर्त्तव्यौ खड्गहस्तौ च पार्श्वयोः पुरुषावुभौ ॥
लेखनीकृतहस्तञ्च पार्श्वे धातारमव्ययम् ।
नानादेवगणैर्युक्तमेवं कुर्य्याद्दिवाकरम् ॥
अरुणः सारथिश्चास्य पद्मिनीपत्रसन्निभः ।
अश्वौ च वल्लिसुग्रीवावश्वस्यौ तस्य पार्श्वयोः ॥
भुजङ्गरज्जुभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः ।
पद्मस्थं वा हयस्थं वा पद्महस्तं प्रकल्पयेत् ॥ * ॥
वह्नेस्तु लक्षणं वक्ष्ये सर्व्वकामफलप्रदम् ।
दीप्तं सुवर्णवपुषमर्द्धचन्द्रासनस्थितम् ॥
बालार्कसदृशं तस्य वदनञ्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बकूर्च्चधरन्तथा ॥
कमण्डलुं वामकरे दक्षिणे त्वक्षसूत्रकम् ।
ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलम् ।
कुण्डस्थञ्चापि कुर्व्वीत मूर्द्ध्नि सप्तशिखान्वितम् ॥ * ॥
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ।
महामहिषमारूढं भिन्नाञ्जनचयोपमम् ॥
सिंहासनगतञ्चापि दीप्ताग्निसमलोचनम् ।
महिषं चित्रगुप्तञ्च करालान् किङ्करांस्तथा ॥
समन्ताद्दर्शयेत्तस्य सौम्यासौम्यांस्तथा सुरान् ॥
राक्षसेन्द्रं तथा वक्ष्ये लोकपालञ्च नैरृतम् ।
नरारूढं महाकायं रक्षोभिर्बहुभिर्वृतम् ॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
नरयुक्तविमानस्थं पीताभरणभूषितम् ॥ * ॥
वरुणञ्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शुद्धस्फटिकवर्णाभं हारकेयूरसंवृतम् ॥
झषाधिरूढं वरदं पताकाध्वजसंयुतम् ।
भूषणायुतं शान्तं किरीटवरधारिणम् ॥ * ॥
वायुरूपं प्रवक्ष्यामि धूम्रञ्च मृगवाहनम् ।
चित्राम्बरधरं शान्तं युवानं कुञ्चितभ्रुवम् ।
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ॥ * ॥
कुबेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं सदा ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं निध्यष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरैस्तथा ॥ * ॥
तथेशं सम्प्रवक्ष्यामि धवलं धवलेक्षणम् ।
त्रिशूलपाणिनं देवं त्र्यक्षं वृषगतं विभुम् ॥ * ॥

मातृणां लक्षणं वक्ष्ये यथावदनुपूर्व्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्व्वक्त्रा चतुर्भुजा ।
हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमण्डलुः ॥ * ॥
महेश्वरस्य रूपेण तथा माहेश्वरी मता ।
जटामुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपालशूलखट्वाङ्गवरदाढ्या चतुर्भुजा ॥ * ॥
कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा ॥
हारकेयूरसम्पन्ना कृकवाकुधरा तथा ॥ * ॥
वैष्णवी विष्णुसदृशी गरुडे च समास्थिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासनगता चापि बालकेन समन्विता ॥ * ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरि संस्थिताम् ।
वराहसदृशीं देवीं घण्टाचामरधारिणीम् ।
गदाचक्रधरान्तद्वद्दानवेन्द्रविनाशिनीम् ॥ * ॥
इन्द्राणीमिन्द्रसदृशीं वज्रशूलगदाधराम् ।
गजासनगतान्देवीं लोचनैर्बहुभिर्वृताम् ।
तप्तकाञ्चनवर्णाभां सर्व्वाभरणभूषिताम् ॥ * ॥
तीक्ष्णखड्गधरान्तद्वद्वक्ष्ये योगेश्वरीमिमाम् ।
दीर्घजिह्वामूर्द्ध्वकेशीमस्थिखण्डैश्च मण्डिताम् ।
दंष्ट्राकरालवदनां कुर्य्याच्चैव कृशोदरीम् ॥ * ॥
कपालमालिनीं देवीं मुण्डमालाविभूषिताम् ।
कपालं वामहस्ते तु मांसशोणितपूरितम् ॥
मस्तिष्कञ्च शिरो न्यस्त शक्तिका दक्षिणे तथा ।
शवस्था वायसस्था वा निर्म्मांसा विगतोदरी ।
करालवदना तद्वत् कर्त्तव्या सा त्रिलोचना ॥ * ॥
चामुण्डा बद्धघण्टा च द्वीपिचर्म्मधरा शिवा ।
दिग्वासा कालिका तद्वद्रासभस्था कपालिनी ॥
सुरक्तपुष्पाभरणा वर्द्धनी ध्वजसंयुता ।
विनायकञ्च कुर्व्वीत मातृणामन्तिके सदा ॥
वीरेश्वरश्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्तत्रिशूली च मातृणामग्रतो भवेत् ॥ * ॥
श्रियन्देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगण्डां रक्तोष्ठीं कुञ्चितभ्रुवम् ॥
पीनोन्नतस्तनतटीं मणिकुण्डलधारिणीम् ।
सुमण्डलं मुखं तस्याः शिरः सीमन्तभूषितम् ॥
पद्मस्वस्तिकशङ्खैर्वा भूषितां कुण्डलालकैः ।
कञ्चुकाबद्धगात्रौ च हारभूषौ पयोधरौ ।
नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ ।
पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे ।
मेखलाभरणान्तद्वत्तप्तकाञ्चनसुप्रभाम् ।
नानाभरणसम्पन्नां शोभनाम्बरधारिणीम् ॥
पार्श्वे तस्याः स्त्रियः कार्य्याश्चामरव्यग्रपाणयः
पद्मासनोपविष्टान्तु पद्मसिंहासनस्थिताम् ॥
करिभ्यां स्नाप्यमाना सा भृङ्गाराभ्यामनेकशः ।
प्रक्षालयन्तौ करिणौ भृङ्गाराभ्यां तथापरौ ॥
स्तूयमाना च लोकेशैस्तथा गन्धर्व्वगुह्यकैः ॥ * ॥
तथैव यक्षिणी कार्य्या सिद्धासुरनिषेविता ।
पार्श्वयोः कलशौ तस्यास्तोरणे देवदानवाः ॥
नागाश्चैव तु कर्त्तव्याः खड्गखेटकधारिणः ।
अधस्तात्प्रकृतिस्तेषां नाभेरूर्द्ध्वञ्च पौरुषी ॥
फणाश्च मूर्द्ध्नि कर्त्तव्या द्विजिह्वा बहवः शुभाः ।

पिशाचा राक्षसाश्चैव भूतवेतालजातयः ।
निर्म्मांसाश्चैव ते सर्व्वे रौद्रा विकृतरूपिणः ।
क्षेत्रपालश्च कर्त्तव्यो जटिलो विकृताननः ॥
दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः ।
कपालं वामहस्ते तु शिरः केशसमावृतम् ।
दक्षिणे शक्तिकां दद्यादसुरक्षयकारिणीम् ॥ * ॥
अथातः संप्रवक्ष्यामि द्विभुजं कुसुमायुधम् ।
पार्श्वे चाश्वमुखं तस्य मकरध्वजसंयुतम् ॥
दक्षिणे पुष्पबाणञ्च वामे पुष्पमयं धनुः ।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ॥
रतिस्तु वामपार्श्वे च शयनोपस्करान्विता ।
पटश्च पटहश्चैव खरः कामातुरस्तथा ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च ।
सुशोभनश्च कर्त्तव्यो भगवान् कुसुमायुधः ॥
संस्थानमीषदुक्तं स्यादिकार्य्यं विघ्नमेचकम् ।
एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया ॥
विस्तरेण न शक्नोति बृहस्पतिरपि द्विजाः ॥”
इति मत्स्यपुराणे देवार्च्चानुकीर्त्तने प्रतिमालक्षणं नाम २६१ । २६२ । २६४ । २६५ अध्यायाः ॥ * ॥ सा द्विविधा । स्थापनरूपा स्वयं चालरूपा च । यथा,—

श्रीसदाशिव उवाच ।

“शृणु देवि ! प्रवक्ष्यामि तत्संस्थापनकं हरेः ।
स्थापनञ्च स्वयं चालं द्विविधं तत् प्रकीर्त्तितम् ॥
शिलाश्मदारुलौहाद्यैः कृत्वा प्रतिकृतिं हरेः ।
श्रौतस्मार्त्तागमैः प्रोक्ता क्रियासंस्थापना हि तत् ॥
तत्स्थापनमिति प्रोक्तं स्वयं चालं हि मे शृणु ।
यस्मिंस्तु निहितो विष्णुः स्वयमेव स्थितो भुवि ॥
पाषाणदार्व्वोरात्मीयः स्वयं चालं हि तत् स्मृतम् ।
स्वयं चाले स्थापने वा पूजयेच्चाधुनावरम् ॥
देवतानां महर्षीणामर्च्चनार्थं जनार्द्दनः ।
स्वयमेव जगन्नाथः प्रतिमां याति केशवः ॥
यस्य यदिच्छते भाग्यं सदैवाविरभूद्भुवि ।
तदैव पूजयेन्नियमात्तत्रैव रमेत् सदा ॥
शिवोऽद्भुतात्मा देवेशो विधिरर्च्चेः शुभानने ।
स एवाकृतमायानां तपसाविरभूद्भुवि ॥
यथापि काश्यां संपूज्यो माधवः बिन्दुमाधवः ।
दक्षिणोदधितीरे तु नीलाद्रौ पुरुषोत्तमः ॥
दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः पुरा ।
स एव पूज्यः सर्व्वेषां लोकानां सर्व्वकामिनि ॥
नरनारायणः साक्षात् पूज्यो बदरिकाश्रमे ।
मराधरो मयावन्तु हयग्रीवो माधवस्तथा ॥
माधवो विविधः पूज्यो मङ्गलायतने शुभे ।
कपालमोचने तीर्थे बलिङ्गेश्वरी हरिप्रिया ॥
विष्णुश्च कपिलाङ्गे तु भीमनर्म्मा हरिः स्वयम् ।
द्वारवत्यां वासुदेवः कुरुक्षेत्रे रथेश्वरः ॥
वाराहो बदरीदारे पूज्यो विन्ध्ये गदाधरः ।
अयं विष्णुः स्वयं तीर्थे याति दृष्टावते भुवि ॥
डौरिकः वैकुण्ठो चक्रवर्त्तीश्वरो विभुः ।
पूज्यो नरनारायणः श्रीरङ्गनाथोऽथ वा ॥
चतुर्भुजो वैकुण्ठे महामायावतीर्णो हरिः ॥

कालिन्दीनद्विनीतीरे महापातकवर्ज्जिते ।
उद्देश साल्ग्रिकर्ष्यः सीतोपीतवचकम ।
यत्र यत्र हरेरर्च्चा यपं यत्ता शुभानने ! ।
स्नानं तीर्थं तथा पीतं पचदानमहोत्सवम् ।
संकीर्त्तनं सर्व्वभक्तिलपा कार्य्यादिकं जनम् ।
कायेन मनसा वाचा भक्त्या देवि ! पुनः पुनः ।
तत्र तत्र समागम्य दृम्भोऽहं संध्यवस्थितः ।
नारायणीयनं प्राप्तमर्च्चायां विन्दते ध्रुवाम् ।
अष्टुवीविंशं प्राप्य ददाति फलमीप्सितम् ।
सर्व्वास्वपि तु पौरुषमर्च्चायां लभते नरः ।
अनुप्रागमपि सान्निध्यं सर्व्वदा उपचीयते ।
जम्बुद्वीपे महापुण्ये वर्षे वै भारते शुभे ।
अर्च्चायां सन्निधिर्वैष्णोर्नेतरेषु कदाचन ।
तस्मादे भारते वर्षे मुनिभिर्विबुधैरपि ।
पूजितं सततं सुभ्रु ! तपोयज्ञक्रियादिभिः ।
भारतेऽपि महावर्षे नित्यं सन्निहितो हरिः ।
एकस्तुम्बे तथा कौर्म्मे शिंशपौ बदरीवने ।
काशीं प्रयागे गोमे च शालग्रामाचले तथा ।
नारायणाश्रमे गोमे वराहे वामनाश्रमे ।
दृष्टमाधाः स्वयं व्यक्ताः धर्म्मकामफलप्रदाः ।
स्वयमेव हि सान्निध्यं यस्मिन् याति जनार्द्दनः ।
तस्मिन्नेव स्वयं व्यक्तं वदन्ति मुनयः शुभाः ।
महाभागवतश्रेष्ठो विधिना स्थाप्य केशवम् ।
सन्निध कुर्य्यात् सान्निध्यं स्थापनं तदिहिष्यति ।
न तु प्राकारादिभिः कार्य्यं सुकृत्स्थापकादिकम् ।
यो नरेरर्च्चनं कर्म्म यामोनृपवमपाश्वरम् ।
यत्किञ्चिद्रैष्णवैः कार्य्यमपरं मन्दिरादिकम् ।
कुर्वे विष्णवे यच्चाति तत्सेतद्विमुक्तये ।"

इति पाद्मोत्तरखण्डे ७१ अध्यायः ॥ ७ ॥

भगवत्याः प्रतिमाराधनविधिर्यथा,—

ब्रह्मोवाच ।

"अथ तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्वं शक्रादैः सवसुभिः ।
कथयिष्ये देवेश ! तथा त्वमपि पूजय ।
शम्भुः पूजयते देवीं मणिशलमयीं शुभाम् ।
अणिमाद्यष्टकरो नित्यं तेनासौ त्रिपुरेश्वरः ।
अहं हेममयीं देवीं नमामि सुरसत्तम ! ।
तेन ब्रह्मत्वमेतेदं मया प्राप्तं सुदुर्लभम् ।
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन अतुलैश्वं सनातनम् ।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ।
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ।
विश्वेदेवा महाभागा रौप्यां देवीं मनोहराम् ।
अर्च्चन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ।
वायुः पूजयते भक्त्या देवीं पित्तलमयीम् ।
वायुत्वं तेन तु प्राप्तमनौपम्यं सुखावहम् ।
वसवः कांस्यकीं देवीं पूजयन्ति विधानतः ।
प्राप्तवन्तो महाभागा वसुत्वं सुमहोदयम् ।
अश्विनौ पार्थिवीं देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं समापुतौ ।
स्फाटिकीं शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन वरुणा यशस्विनम् ।
देवीमदमयीं पुण्यामग्निरर्च्चयति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ।
ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चयेत्तु सम्प्राप्तं तेन सूर्य्यत्वमुत्तमम् ।
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ।
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम् ।
लौहत्रपुमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
दानवाश्च महाभागास्तेन तेऽमितविक्रमाः ।
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन अहिवलोपेताः प्रयान्ति परमं पदम् ।
वैलोहिकीं सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगवतोपेताः प्रयान्त्यीश्वरमन्दिरम् ।
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ।
एवं देवाः सगन्धर्व्वाः पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्च्चिकां सुरनायिकाम् ।
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शुभां मणिमयीं पूज्य लभते मनसेप्सितान् ।
कामान् सुरवराध्यक्ष ! कामिकैः पूजिता सदा ।
ददाति धर्म्मकामार्थान् निष्कामानिर्वृतिं यथा ॥"

अपि च ।

"हेमताम्रा च अश्मार्च्चा शैलाविचारजापि वा ।
शक्तिमूर्त्तिः स्थिता देवी धर्म्मकामफलप्रदा ।
यो मयि आयुधः प्रोक्तलिङ्गान्तो प्रतिपूजयेत् ।
देवी प्रसादिता पुंसां कामान् सुरसत्तम ददात् ।
भूमौ संपूजिता वत्स ! सर्व्वं भवति पूजितम् ।
पार्थिवीं वा प्रवृत्तां वापि रत्नधातुमयीमपि ।
विधिना शास्त्रदृष्टेन दृष्टकाकुञ्चिकोपमाम् ।
कारयेत् प्रतिमां यस्तु देवीं शास्त्रविशारदः ।"

स्थापनविधिर्यथा,—

"सर्वत्रैवैककालोत्थं यद्वं वास्तुविभाजितम् ।
वलभीमयं वत्स ! तत्रापि स्थापने शुभम् ।
गन्धैर्धूपेन बलिमाल्यविभूषणैः ।
अधिवासनपूर्व्वास्तु स्थापनीयास्तु तद्दिने ।
वेदमन्त्रसमायोगैः श्रीसूक्तोपवनोभिनाम् ।
कर्त्तव्यं स्थापनं तासां वहुवादित्रनादितम् ।
रात्रौ जागरणं तत्र देव्याः पूजार्थं कथयेत् ।
सर्व्वलक्षणसम्पूर्णं गन्धोपकरणान्वितम् ।
नानाकुसुमदामादिपताकावनवीजितम् ।
देवनाट्योपपन्नं च स्रग्वस्त्रविभूषितम् ।
पञ्चतारैर्वदीपादि देयं मन्त्रं निवेशितम् ।
यज्ञिका तत्र कर्त्तारि नित्यं कार्यं विशेषतः ।
कर्त्तव्या सदैवं वा यथाकालप्रदिष्टवत् ।
अनेन विधिना यस्तु मातरः स्थापयेन्नरः ।
इहाथ पूजयीत्तस्तु अन्ते याति परां गतिम् ॥"

इति देवीपुराणे मातृप्रतिष्ठालक्षणाध्यायः ॥ ७ ॥

अष्टप्रकारा प्रतिमाप्य देवस्य यथा,—

"अष्टौ क्रियावतां देवो हरिर्देवो तपोविदाम् ।
प्रतिमा स्वल्पबुद्धीनां ज्ञानिनां सर्व्वतो हरिः ॥"

अपि च ।

"अष्टौ क्रियावतामग्नौ हरिर्ध्यायं मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां सर्व्वत्र विदितात्मनाम् ॥
प्रतिमां वधलनौ च कुर्य्यादैव भारत ।
कैवल्यं परं लोकमवाप्नोति ततो नरः ।
प्रतिष्ठायां स्थापयेद्देवि वरप्रासादे प्रयाति ॥
क्रीडते देवयानैश्च अप्सरोभिः सहितः ।
यः स्थापयेद्दैवतां पुरस्तात् विधिवत् ।
पूजयन् सततं कल्पमेव परमं पदम् ॥
संस्थाप्य प्रतिमां विष्णोर्वैकुण्ठे मुदते यथा ।
इच्छया दैत्यनी चापि वाहनोदं प्रतिदिनम् ।
महाकालेन गोविन्दं क्षमया संकाल भारत ।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम् ।"

इति भविष्यपुराणम् ।

प्रतिमानं, क्ली, (प्रतिमीयतेऽनेनेति । प्रति + मि + मा + ल्युट् ।) प्रतिबिम्बम् । हस्तिललाटदेशः । इत्यमरः । ३ । १० । ११ । २।९।८ । "हस्तिदन्तयोर्मध्यभागो दन्तयोर्मध्यं प्रतिमानम् उच्यते प्रतिमीयते अनेन प्रतिमानं तु हस्तिदन्तयोर्मध्ये प्रतिमानं भवदूणिग्भ्यामिति ना । प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोरिति दृः ।" इति भरतः ॥ (यथा, महाभारते । ७ । १५ । ११ ।

"प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
निगृहीता भृशं नागाः प्राकोशन्
प्रतिमं ॥"

हस्तिललाटदेशः । इति महाभारतटीकायां नीलकण्ठः । ६ । ९१ । ३० । ७ । सादृश्यम् । यथा, ऋग्वेदे । १ । ५२ । ७ ।

"इन्द्रो यदि प्रतिमानं दुर्भृत्यः ।
पुरुवा दुष्टो अप्रतिष्ठाः ।"

"प्रतिमानं सादृश्यम् ।" इति तद्भाष्ये सायनः । प्रतिनिधिः । यथा, ऋग्वेदे । ६ । १८ । १२ ।

"नास्य शत्रुर्न प्रतिमानमस्ति ।"

"प्रतिमानं प्रतिनिधिर्नास्ति ।" इति तद्भाष्ये सायनः ॥ ७ ॥ प्रमाणम् । यथा, भट्टौ ।
७ । ४ । ११ ।

"तं यातुमाशावदति दिशोऽपि तदा द्रुः ।
प्रतिमानं प्रकुर्वन्ति विष्टवान्दे सदाश्रयाः ।"

तथा च महाभारते । ८ । ९ । ११ ।

"तथायुधाश्च विन्यस्ताः प्रतिमानं महारथाः ।"

भाण्डादिपरिमाणविशेषार्थतुलादिः ।
यथा, मार्कण्डेये । ४ । १०० ।

"तुलाधारक्रियादिभिः वणिग्जनैः ।
प्रतिमानपदीभूतो देशो वनचराधिपः ।"

मनुसंहितायाम् । ८ । ४०३ । प्रतिमानम् इत्येव दृश्यते ।)

प्रतिमानंड., पुं, (प्रतिरूपं मानं यस्य । बहु ।) दुर्विधः । यथा,—

"सोमवाचिद्वं सोमहसः संपर्णः ।"
इति कालः ।

"हरिवत्सरं सोमहसः संपर्णः ।"
इति त्रिकाण्डशेषः ।

प्रतियुक्तः, त्रि, (प्रतियुज्यते स्मेति । प्रति+युज्+क्तः ।) परिहितवस्त्रादिः । इत्यमरः । ३।१।९५ ॥ (परित्यक्तः । यथा, रघुः । ४ । ४१ ।
"गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥"
बद्धः । यथा, भागवते । ३ । १८ । १० ।
"न ब्रह्मपाशैः प्रतिमुक्तस्य वीरा
विकर्षणं तव गृह्णन्तमद्य ॥"
प्रतिनियुक्तः । विन्यस्तः । यथा, मार्कण्डेये ।१५।१।
"नरकात् प्रतियुक्तस्तु कृमिः पतिसदायकः ॥"
प्रत्यर्पितः । यथा, रघुः । १६ । ५८ ।
"महार्घ्यशीभिर्मदरागशोभा
विलोचनेषु प्रतियुक्तमासाम् ॥")

प्रतियत्नः, पुं, (प्रतियत्यते इति । प्रति+यत् प्रयत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति नङ् ।) लिप्सा । वाञ्छा । उपग्रहः । बन्दी । इत्यमरः । ३ । ३ । १०६ ॥ निग्रहादिः । सतो गुणान्तराधानम् । इति भरतः ॥ संस्कारः । इति स्वामी ॥ (यथा, माघे ।३।५४ ।
"सुगन्धितामप्रतियत्नपूर्व्वां
बिभ्रन्ति यत्र प्रमदाय पुंसाम् ॥"
"यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वो यस्यास्ताम् ।" इति तट्टीकायां मल्लिनाथः ॥) यत्नादिः । इति रामाश्रमः ॥ प्रतियत्नः । इति मुकुटः ॥
"प्रतियत्नस्तु संस्कारलिप्सोपग्रहलिप्सु च ॥"
इति मेदिनी । ने, १८६ ॥
रचना । इति जटाधरः ॥ प्रयत्नवति, त्रि । इति त्रिकाण्डशेषः ॥

प्रतियातना, स्त्री, (प्रतियात्यते अनया इति । प्रति+यत्+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ (यथा, माघे ।३।३४ ।
"अभिर्मिता या विदधे विधात्रा
दृश्यो दधिया प्रतियातनेव ॥")
तुल्ययातना च ॥

प्रतियोगः, पुं, प्रतियुज्यते इति । प्रति+युज्+भावे घञ् ।) विरोधः । (युक्तदोषः । यथा, भागवते । ४ । १० । २२ ।
"इति ब्रुवंश्चित्ररथः स्वसारथिं
यत्तः परेषां प्रतियोगशङ्कितः ।
शुश्राव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥"
"प्रतियोगः युक्तदोषः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

प्रतियोगी, [न्] त्रि, (प्रतिरूपं युज्यते इति । प्रति+युज्+घिनुण् ।) विरोधी । यथा,—
"अभावप्रतियोगित्वमभावविरोधित्वमभावाधिकरणम् ।" इति चिन्तामणिः ॥ सम्प्रतियुक्तः । यथा,—
"प्रतियोगिनं दृष्ट्वा प्रतियोगी निवर्त्तते ।" इति न्यायोक्तिका ॥

प्रतिरम्भः, पुं, (प्रति+लभ+भावे घञ् । लस्य रः ।) प्रतिलम्भः । इति द्विरूपकोषः ॥

प्रतिरूपं, क्ली, (प्रतिगतं प्रतिकृतं वा रूपमिति प्रादिसमासः ।) प्रतिमा । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ७ । १० । २१ ।
"भवान् मे खलु भक्तानां सर्व्वेषां प्रतिरूपधृक् ॥"
त्रि, प्रतिगतं रूपमस्य । अनुरूपः । यथा, महाभारते । १ । १०२ । ४१ ।
"व्यायामः प्रतिरूपोऽसौ तस्य पतिरिति स्थिते ।
विचित्रवीर्य्यं कल्याण्यौ पूजयामासतुः शुभे ॥"
दानवविशेषे, पुं । यथा, महाभारते । १२ । २२७ । ५२ ।
"विप्रचित्तिः प्रतिरूपश्च हयग्रीवो विभावसुः
[मधुः ॥")

प्रतिरूपकं, क्ली, (प्रतिरूप+स्वार्थे कन् ।) प्रतिबिम्बम् । इति जटाधरः ॥ (यथा, महाभारते । १२ । ५८ । ४८ ।
"अभिदेशदेशेषु प्रतिरूपककारकैः ।
श्रेष्ठीसद्योपचारेण चौरधर्म्मेरणेन च ॥")

प्रतिरोधः, पुं, (प्रतिरुध्यते अनेनेति । प्रति+रुध्+करणे घञ् ।) तिरस्कारः । इति पुरुषोत्तमस्वटीकायां भरतः ॥ (प्रति+रुध्+कर्त्तरि घञ् ।) सत्प्रतिपक्षः । यथा । यत्र साध्यसाधनाप्रसिद्धिस्वरूपा सिद्धिबाधप्रतिरोधानां निरासः । इति सव्यभिचारशिरोमणिः ॥

प्रतिरोधकः, पुं, (प्रतिरुणद्धि प्रतिरुध्य चौर्य्यं करोतीति । प्रति+रुध्+ण्वुल् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥

प्रतिरोधी, [न्] पुं, (प्रतिरुणद्धीति । प्रति+रुध्+णिनिः । प्रतिरोधस्तिरस्कारोऽस्त्यस्येति वा । प्रतिरोध+इनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

प्रतिलम्भः, पुं, (प्रति+लभ+भावे घञ् ।) लाभः । तत्पर्य्यायः । लम्भनम् २ । इति हेमचन्द्रः । यथा, श्रीहर्षे ।
"नैव नः प्रियतमोभयथासौ
यद्यमुं न वृणुते वृणुते वा ।
एकको हि विरहय्यमुष्यामन्यतः कथमरः प्रतिलम्भः ॥"

प्रतिलोमः, त्रि, (प्रतिगतं लोम आनुकूल्यं यस्मादिति । "अच् प्रत्यन्ववपूर्व्वात् सामलोम्नः ।" ५ । ४ । ७५ । इति समासान्तोऽच्प्रत्ययः ।) वामः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १९७ । १९ ।
"वपूंषि प्रतिलोमानि पुरा न कथयाम्यहं ।
सर्व्वो नारद योऽपि भातीति स महायशः ॥")
विलोमः । यथा,—
"तानुमानुजकं ज्ञात्वाथ सर्व्वो धर्म्मकाः ।
वैगुण्यादन्वयः पूर्व्वे उत्तरः प्रतिलोमजः ॥"
इति मानवे । ८ । ६८ ॥

प्रतिलोमजः, त्रि, (प्रतिलोमात् जायते इति । प्रतिलोम+जन्+डः ।) प्रतिलोमजातः । उत्तमवर्णायां अधमवर्णाज्जातः । यथा,—
"संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥"
इति मानवे १० अध्याये ॥

प्रतिवचः, [स्] क्ली, (प्रतिरूपं वचः ।) प्रत्युत्तरम् । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । १ । ११ । ५४ ।
"सोमः श्रुत्वा वचः शुभ्रा किञ्चित् क्रोधसमाकुलः ।
भक्त्या प्रतिवचः प्राह प्रकटं तदा प्रभो ॥")

प्रतिवचनं, क्ली, (प्रतिरूपं वचनम् ।) प्रतिवाक्यम् । उत्तरम् । इति त्रिकाण्डशेषः ॥ (यथा, कलाविलासे । २ । ८ ।
"न ददाति प्रतिवचनं विक्रयकाले शठो वणिग्मौनी ।
निर्देशयाचितपुरुषं दृष्ट्वा सम्भाषणं कुरुते ॥"
प्रतिनिर्देशः । इति निरुक्तम् । ६ । ३ । ६ ।)

प्रतिवसथः, पुं (प्रतिवसन्त्यस्मिन्निति । प्रति+वस्+बाहुलकात् अथ ।) ग्रामः । इति हेमचन्द्रः । ४ । २७ ॥

प्रतिवाच्, [च्] स्त्री, (प्रतिरूपा वाक् ।) उत्तरम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ७९ । ७१ ।
"तामुक्तवाक्यं चेद्वा प्रतिवाचो विवर्जनम् ।
एतदर्थंसमारावस्तौ युद्धं प्रवर्त्तत ॥")

प्रतिवाक्यं क्ली, (प्रतिरूपं वाक्यम् ।) उत्तरम् । इत्यमरः । १ । ६ । १० ॥

प्रतिवाणिः, स्त्री, (प्रतिरूपा वाणिः ।) प्रत्युक्तिः । प्रत्युत्तरम् । इति भूरिप्रयोगः ॥

प्रतिवादी, [न्] त्रि, (प्रतिवादोऽस्यास्तीति इनिः । यद्वा, प्रतिकूलं वदतीति । प्रति+वद्+णिनिः ।) प्रतिपक्षः । यथा,—
"यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
इति व्यवहारतत्त्वे हारीतवचनम् ॥

प्रतिवासरः, पुं, (प्रतिगतो वासरम् ।) प्रतिदिनम् । अहन्यहन्यहनि । इति शब्दावली । १६८ ॥ (क्ली, वासरे वासरे इतीति समासे । प्रतिदिनम् । यथा, राजतरङ्गिण्याम् । २ । १५७ ।
"भूतिमद्वेमनि प्रतिवेशिशास्त्रमानः ।
नियमो राजकार्येषु तस्याभूत् प्रतिवासरम् ॥")

प्रतिवासी, [न्] त्रि, (प्रत्यासन्नं वसतीति । प्रति+वस्+णिनिः ।) आसन्नवासी । निकटस्थायी । पड्सि इति भाषा । प्रतिवेशीति शब्दादिप्यासिद्धत्वेऽप्यस्य ॥

प्रतिबिम्बं, क्ली, (प्रतिरूप बिम्बमिति । "कुगतिप्रादयः ।" २ । २ । १८ । इति समासः ।) प्रतिमा । प्रतिच्छाया । इत्यमरः । ३।१०।३६ ॥ (यथा, पञ्चतन्त्रम् । १ । १५ ।
"विराजमानमण्डलतलबिम्बवर्णितया ।
ममोरस्थलमद्गताश्च प्रतिबिम्बिता च का ॥")

प्रतिविषा, स्त्री, (प्रतीपं विषं यस्याः ।) अतिविषा । इत्यमरः । २।४।९८ ॥ आतइच इति भाषा । (यथा, सुश्रुते उत्तरतन्त्रे । ४० अः ।

"मश्चीयं प्रतिविषा सुक्तं पैत्तासमपाचना ।"
अस्याः पर्य्यायो यथा,—
"विषा अतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

प्रतिविष्णु, व्य, विष्णुं विष्णुं प्रति । इति मुग्धबोधव्याकरणम् ।

प्रतिविष्णुकः, पुं, (प्रतिगतो विष्णुर्मूर्त्तिरिति । प्रतिविष्णुर्मुचुकुन्दो वृपतिः । तमाख्या कायति प्रकाशते इति । कै + कः ।) मुचुकुन्दवृक्षः । इति राजनिर्घण्टः । (पर्य्यायोऽस्य यथा,—
"मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

प्रतिवेशः, पुं, (प्रत्यासन्नो वेशो निवेशः । प्रतिविशन्त्यस्मिन्निति आधारे घञ् वा ।) प्रतिवासिगृहम् । आसन्नपार्श्वस्थो गृहम् । इति शब्दरत्नावली । (त्रि, आसन्नवर्त्ती । यथा, ऋग्वेदे ।१०।६६।१३।
"देवस्य पर्त्तं प्रतिवेशमीमहे ।"
"प्रतिवेशं समीपे वर्त्तमानम् ।" इति तद्भाष्ये सायनः ।)

प्रतिवेशवासी, [न्] त्रि, (प्रतिवेशे वसतीति । वस् + णिनिः ।) प्रतिवासी । यथा,—
"यो जाने प्रतिवेशवासिनि गुरोः किं भावि सम्भावितम् ।"
इत्यलङ्कारकौस्तुभम् ।

प्रतिवेशी, [न्] त्रि, (प्रतिवेश आसन्नगृहमस्यास्तीति । इनिः ।) प्रतिवासी । इति शब्दरत्नावली । (यथा, चण्डकौशिके १ अङ्के ।
"दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषोच मे वदति कस्मैचि कौशिकाय ।")

प्रतिव्याहरणं, क्ली, (प्रति + व्याहृ + भावे ल्युट् ।) आहृय भक्षादीनां कार्य्ये प्रेरणम् । इत्यमरः ॥

प्रतिव्यूढं, त्रि (प्रतिगतं विरुद्धमुद्दिष्टम् ।) प्रत्याख्यातम् । (प्रति + व्यूह् + क्तः ।) प्रेषितम् । इति त्रिकाण्डशेषः ॥

प्रतिश्या, स्त्री, (प्रतिश्यायते इति । प्रति + श्यैङ् गतौ + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । टाप् ।) प्रतिश्यायः । इति शब्दरत्नावली ॥

प्रतिश्यायः, पुं, (प्रतिक्षणं श्यायते इति । प्रति + श्यै + "श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ।" ३ । १ । १४१ । इति णः ।) पीनसरोगः । इत्यमरः ।२।६।५१। (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये ।
"सर्व्वेष्वेव प्रतिश्याये मारुतो मलभयी ।"
अस्य प्रकारलक्षणं सम्प्राप्तिश्च यथा,—
"सन्धारणाजीर्णरजोऽतिभाष्य-
क्रोधर्त्तुवैषम्यशिरोऽभितापैः ।
प्रजागरातिस्वप्नाम्बुशीत-
रवश्यया मैथुनबाष्पधूमैः ॥
संस्त्यानदोषे शिरसि प्रवृद्धो
वायुः प्रतिश्यायमुदीरयेत्तु ।
चयाभिनीरैः पृथगेकशश्च
सर्व्वैर्विकारैः असृजश्च दोषैः ।
माधोऽविलायुशीतलमातः
श्लेष्मोऽवगीतशमतानि पिबाम् ।
कषायविश्राववचनवर्ज्जिताः
क्षयाद्गुरुः शोधयि चापि कल्पः ॥
यथाविधि सम्यगिति तु भविष्यताम्
स्तु: पीनसे तीक्ष्णसेऽतिपुःखे ।
सर्व्वोऽतिवृद्धोऽहितभोजनात्तु
दुष्टप्रतिश्याय उपेक्षितः स्यात् ॥"
इति चरके चिकित्सास्थाने षड्विंशेऽध्याये ।)

प्रतिश्रयः, पुं (प्रतिश्रीयते आश्रीयतेऽत्रेति । प्रति + श्रि + आधारे अच् ।) यज्ञशाला । इति जटाधरः । सभा । आश्रयः । इति मेदिनी । ये, १२७ । घोकः । इति हेमचन्द्रः । (यथा, महाभारते । १ । १६६ । ४ ।
"स सम्यक् पूजयित्वा तं विप्रं विप्रवत्सला ।
ददौ प्रतिश्रयं तस्मै सदा सर्व्वातिथिव्रता ।"
निवासः । यथा, मनौ । १० । ५१ ।
"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।"
"प्रतिश्रयो निवासः ।" इति मेधातिथिः ।)

प्रतिश्रवः, पुं, (प्रति + श्रु + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) अङ्गीकारः । इत्यमरः । (यथा, राजतरङ्गिण्याम् । ६ । ४२४ ।
"इति सोऽभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् ।
दूरसुराकामम्र्य्यादः प्रश्नं समपादत ।")

प्रतिश्रुत्, स्त्री, (प्रतिशब्दं शृणुते इति । प्रति + श्रु + सम्पदादित्वात् क्विप् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ । २५ । (यथा, रघौ । १६ । ४० ।
"प्रस्थापयन्तःकिङ्गपोधभाजः
प्रत्यक्षमङ्गीतमृदङ्गघोषः ।
निपहतः पुष्पकपुष्पमाला:
चर्व्वं प्रतिश्रुन्मुखराः करोति ।")

प्रतिश्रुतः, त्रि, (प्रतिश्रूयते स्मेति । प्रति + श्रु + क्तः ।) अङ्गीकृतः । इत्यमरः । ३ । १ । १०८ ।

प्रतिषिद्धः, त्रि, (प्रति + षिध् + क्तः ।) प्रतिषेधविषयः । निषिद्धः । यथा । अप्रतिषिद्धमनुमतं भवतीति दत्तकचन्द्रिका । (यथा च,—
"सर्व्वेषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ।"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ।)

प्रतिषेद्धा, [ऋ] त्रि, (प्रति + षिध् + तृच् ।) प्रतिषेधकर्त्ता । तत्पर्य्यायः । नामान्तिकः २ । इति त्रिकाण्डशेषः । (यथा, महाभारते । १ । १८२ । १० ।
"यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् ।
तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्म्मसु ।")

प्रतिषेधः, पुं, (प्रति + षिध् + भावे + घञ् ।) निषेधः । यथा, मलमासतत्त्वे ।
"बाधाय न विधिस्तत्र प्रतिषेधोऽप्रधानता ।
वर्ज्जनात् स निषेधो यथोक्तरदेन चर् ।"

प्रतिषेधकः, त्रि, (प्रतिषेधतीति प्रति + षिध् + ण्वुल् ।) प्रतिषेधकर्त्ता । यथा आयिदुराशिः ।
"अदिवर्गेषु यावज्जीवं बहूनि सर्व्वदोषाणि ।
योऽनुमन्तारि भवति निरये प्रतिषेधकः ।"

प्रतिष्कः, पुं, (प्रतिष्कन्दति प्रतिस्कन्दतीति । प्रति + स्कन्द + बाहुलकात् डः ।) दूतः । इति शब्दरत्नावली ।

प्रतिष्कषः, पुं, (प्रतिकषतीति । प्रति + कष् + अच् । बाहुलकात् सुट् ।) सहायः । अग्रेसरः । पुरोगः । इति मेदिनी । षे, १६ ।

प्रतिष्कशः, पुं, (प्रतिकशत्यैवैति । प्रति + कश् शिक्षायाम् + अच् । बाहुलकात् सुट् ।) चर्म्मरज्जुः । इति जटाधरः ।

प्रतिष्कसः, पुं, (प्रतिकसति प्रतिगच्छतीति । प्रति + कस् + अच् । सुट् ।) चरः । इति शब्दरत्नावली ।

प्रतिष्टम्भः, पुं, (प्रतिष्टम्भनमिति । प्रति + स्तम्भ + भावे घञ् । षत्वम् ।) प्रतिबन्धः । इत्यमरः । ३ । २ । २७ । (यथा, रघौ । ५ । ३१ ।
"बाहुप्रतिष्टम्भविवृद्धमन्यु-
रभ्यर्णमागस्कृतमस्पृशद्भिः ।")

प्रतिष्ठः, पुं, (प्रतिष्ठा आस्त्यस्येति । अच् ।) सुपार्श्वनामकरुनाकस्य पिता । इति हेमचन्द्रः । १ । ३६ । प्रतिष्ठायुक्ते, त्रि । (यथा, महाभारते । ५ । ३६ । ३० ।
"आसीन स्वार्थ मम बन्ध भाता
लोकयोतोऽदमन्दः प्रतिष्ठः ।)

प्रतिष्ठा, स्त्री, (प्रतितिष्ठतीति । प्रति + स्था + "आतश्चोपसर्गे ।" ३।३।१०६ । इति भावे अङ् । टाप् ।) गौरवः । (यथा, कथासरित्सागरे । ९ । ६८ ।
"किन्न व्याकरणं लोके प्रतिष्ठां प्राप्स्यति ।")
स्थितिः । स्थानम् । (यथा, रघुः । १६ । ३१ ।
"वीरप्रतिष्ठान् पितृनामधाराभ्
पुनाशयन्नश्रवगाधो रघूणाम् ।"
आश्रयः । यथा, मार्कण्डेये । ८३ । १० ।
"गौरी लक्ष्मीव प्रतिष्ठौनिखलप्रतिष्ठा ।")
यागनिष्पत्तिः । चतुरक्षरपदम् । इति मेदिनी, ठे, ११ । ० । (क्षितिः । यथा, हरिवंशे । ९८ । १० ।
"स इदं आयनं व्यायाम्यतिष्ठाय इमकृते ।
मनुष्याहारपैवाति न स दीर्घमायुषम् ।"
शरीरम् । यथा, ऋग्वेदे । १० । ७१ । ६ ।
"अर्द्धं प्रतिष्ठा प्रथा कर्षव ।")
संस्कारविशेषः । (यथा, आह्निकतत्त्वाद् । स्मृतिः ।
"पूजा विना प्रतिष्ठां नासौ न सर्वं निर्
दर्शितां च ।
तदुभयविरतिपक्षः यावत् श्रीमोक्षकारादयः ।"
आह्निकादि यथा,—
मत्स्यपुराणे ।
"चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ।
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ।

प्रतिष्ठा सर्व्वदेवानां केशवस्य विशेषतः ।
उत्तरायणमापन्ने शुक्लपक्षे शुभे दिने ॥
कृष्णपक्षे च पञ्चम्यामष्टम्याश्चैव शस्यते ॥' ॥
भुजबलभीमे ।
'शुभादायने पुण्ये कर्त्तव्यं विबुधालये ।
चन्द्रसूर्य्यग्रहे चापि दिने पुण्येऽथ पर्व्वसु ॥
या तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्त्तिता ।
यक्षागमविधिश्चैव प्रतिष्ठा शक्तिदायिनी ॥' ॥
पद्मपुराणे ।
'प्रतिपद्धनदस्योक्ता पवित्रारोपणे तिथिः ।
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा स्मृता ॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ।
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी तथा ।
मातृणां नवमी प्रोक्ता दशमी वासुकेस्तथा ।
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी ।
मम चैव मुनिश्रेष्ठ ! पौर्णमासी तिथिः स्मृता ॥'
कल्पतरौ देवीपुराणम् ।
'महिषासुरदलनाञ्च प्रतिष्ठा दक्षिणायने ।
यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे ॥
गर्त्तापूरशिलान्यासे शुभदस्तस्य पूजितः ॥
यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभदस्तस्य गर्त्तापूरशिलान्यासे यज्ञारम्भे स कालः पूजित इत्यर्थः ॥ ॥ प्रतिष्ठासमुच्चये ।
'माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढ़कयोर्वापि प्रतिष्ठा शुभदा भवेत् ॥' ॥
भविष्ये ।
'सोमो बृहस्पतिश्चैव शुक्रश्चैव बुधस्तथा ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यज्ञकर्म्मणि ॥
मत्स्यपुराणम् ।
'आषाढ़े द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्यैष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदस्तथा ॥
हस्ताश्विनी रेवती च पुष्या मृ रस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥'
दीपिकायाम् ।
'प्राजेशश्रवणधनिष्ठादितिभाश्विनीषु
पौष्णामरेज्यमृगभेषु तथोत्तरेषु ।
कर्त्तुः शुभे शशिनि केन्द्रगते च जीवे
कार्य्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा ॥'
प्राजेशाद्यः । रोहिणीज्येष्ठाश्रवणापुनर्व्वसुधनिष्ठारेवतीपुष्याश्विनीमृगशिरउत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदस्वाति ॥ ॥ धर्म्मसङ्ग्रहसारे देवीपुराणम् ।
'यथा द्वादशमे जीवे अष्टमे वाथ भास्करे ।
प्रतिष्ठा कारिता विष्णोर्भङ्गभयदा मता ॥'
कल्पतरौ देवीपुराणम् ।
'चतुर्भिर्वत्सरा विष्णुः प्रतिष्ठाप्यः सुरादिभिः ।'
प्रतिष्ठा शास्त्रमार्गेण कर्त्तव्या ।
'कर्त्तुर्निपतति यः पुण्यं मम यत्नेन निष्ठया ॥
कर्म्मदोषप्रतापांश्चैव सचकसंयुतः ।
ब्राह्मणः सर्व्ववर्णानां यत्र दायविशारदः ।
मान्यानामभावे तु क्षत्रियो वैश्यशूद्रयोः ।
क्षत्रियाणामभावे तु वैश्यः शूद्रस्य कल्पितः ।
कदाचिदपि शूद्रस्तु न च कार्य्यार्पणमर्हति ॥' ॥
वृहन्नारदीये ।
'प्रणवेनार्च्चयेल्लिङ्गं लिङ्गं वा हरिमेव वा ।
स सर्व्वपातकाभोगी यावदाहूतसंप्लवम् ॥'
यावदाहूतसंप्लवं प्रलयपर्य्यन्तम् ॥ तथा ।
'स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर ! ।
स्पर्शने नाधिकारोऽस्ति विष्णौ वा शङ्करेऽपि वा ॥' ॥
प्रतिष्ठाप्रकारस्तु मत्स्यपुराणादावुक्तः । तदसम्भवे विद्याकरवाजपेयिप्रभृतिसम्मतो भविष्याद्युक्तः । यथा भविष्यपुराणम् ।
'जपनादि यथाशक्ति कृत्वा तन्मूलमन्त्रकम् ।
विन्यस्य हृदयाम्भोजे प्रतिमायां कृती भवेत् ॥'
आदिपदात् पूजोत्सवहोमादि महाकपिलपञ्चरात्रोक्तकर्म्म च कर्त्तव्यम् । तद्यथा,—
'सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके ।
अष्टवारं जपेन्मूलमष्टोत्तरशतोत्तरम् ॥
ततो मन्त्रेण गन्धादिपीठान्तं संप्रपूजयेत् ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
पूजाञ्च महतीं कुर्य्यात् स्वमन्त्रोक्तां यथाविधि ।
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ॥'
लिपिन्यासस्तु मातृकान्यासः । उक्तञ्च ।
'जपादौ सर्व्वमन्त्राणां विन्यसेन्न लिपिं विना ।
कृतं तन्निष्फलं विद्यात्तस्मात् पूर्व्वं लिपिं न्यसेत् ॥'
कादिमतेऽपि ।
'मातृकायाः षडङ्गञ्च मातृकान्यासमेव च ।
सर्व्वादौ प्रथमं कृत्वा पश्चादन्योदितं न्यसेत् ॥
एतद्वचनाच्च मातृकान्यासः पूर्व्वं पश्चात्तत्त्वन्यासः ॥'
क्रमदीपिकायामप्येवं क्रमः । मन्त्रन्यासश्च तत्तन्मन्त्रविधिप्रोक्तषडङ्गन्यासः । तदभावे स्वकमन्त्रेण शिरसि हस्तन्यासः । तत्त्वन्यासस्तु विष्णुविषयक एव । न्यासप्रमाणानि शारदाक्रमदीपिकोक्तान्यनुसन्धेयानि ॥ ॥ प्राणप्रतिष्ठामन्त्रस्तु शारदात्रयोविंशतिपटलोक्तः । यथा,—
'पाशाङ्कुशपुटा शक्तिर्नादबिन्दुविभूषिता ।
याद्याः सप्त सकारान्ता व्योमवह्नीन्दुसंयुतम् ॥
हमन्ते हंसमन्त्रः स्यात्ततोऽमुष्यपदं भवेत् ।
प्राणा इति वदेत् पश्चात् इह प्राणास्ततः परम् ।
अमुष्य जीव च इह स्थितोऽमुष्यपदं भवेत् ।
सर्व्वेन्द्रियाण्यमुष्यान्ते वाङ्मनश्चक्षुरन्ततः ।
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम् ।
तिष्ठन्त्वग्निवधूरन्ते प्राणमन्त्रोऽयमीरितः ॥
प्रणवाद्यन्तरा पूर्व्वं पाशाद्यानि प्रयोजयेत् ।
प्रयोगेषु समाचारात् तान्त्रिकैर्मन्त्रवित्तमैः ॥'
पाशाङ्कुशपुटाशक्तिरित्यनेन प्रथमं पाशबीजं आं ततः शक्तिबीजं ह्रीं ततोऽङ्कुशबीजं क्रों नादो चकारः बिन्दुविभूषितो यं । याद्याः सप्त सकारान्ताः यकारादिसकारान्ताः सप्त वर्णाः तदिहं चोर्ज्जं पूर्व्वं दत्त्वादास्तु प्रकाशाद्यते सबिन्दुताज्ञापकम् । अङ्कुशबीजमकारादि- रहवर्ण्णबीजानीयुक्तम् । अत्र पाशबीजषष्ठेकार्थं बीजत्वेन सर्व्वेषां सबिन्दुकत्वं यत्नम् । राघवभट्टोऽप्येवम् । अन्यस्तु नादबिन्दुविभूषिता इति पठित्वा नादबिन्दुविभूषिता इति व्याख्यातं मात्रा इत्यस्य विशेषणं वदति । व्योम हकारः वह्निः ओकारः इन्दुर्बिन्दुः तेन ह्रौं । अतएव पाशाङ्कुशाभ्यां पुटितशक्तिमन्त्रः परस्तादुपाधियादिसप्तवर्णयुक्तं षडर्णमिति प्रथमसारप्रतिपाद्युपयुक्तमत्यन्तेन ह्रौमिति पद्मपादाचार्य्यव्याख्यातम् । अग्निवधूः स्वाहा । तेनायं मन्त्रः ।
आं ह्रीं क्रों यं रं लं वं शं षं सं हों हं सः
अमुष्य प्राणा इह प्राणाः आमित्यादि अमुष्य जीव इह स्थितः आमित्यादि अमुष्य सर्व्वेन्द्रियाणि आमित्यादि अमुष्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । अमुष्य इति षष्ठ्यन्तदेवतानामोपलक्षणम् ।
'अदःपदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते ।
अमुष्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ॥'
इति नारदीयात् ।
वशिष्ठसंहितायाम् ।
'शुद्धिं कृत्वा सन्निधाय प्राणस्थापनमाचरेत् ॥' ॥
प्रागुक्तभविष्यपुराणवचनेन तन्मूलमन्त्रकं तत्तद्देवतामन्त्रकं स च वैदिकस्तान्त्रिकश्च ।
'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥'
ब्रह्मपुराणे ।
'ओङ्कारादिनमोऽन्तेन चतुर्थ्यन्तवह्निवाताम-
कर्म्मो वा ।"
कालिकापुराणे ।
'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा मन्त्रञ्च मन्त्रवित् ।
अभिमर्न्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् ।
अस्मै प्राणाः प्रतिष्ठन्तु अस्मै प्राणाः चरन्तु च ।
अस्मै देवत्वसंख्यायै स्वाहेति यजुरीरयन् ।
अङ्गमन्त्रैः सुमन्त्रैर्वैदिकैस्तान्त्रिकैश्च च ।
प्राणप्रतिष्ठां कुर्व्वीत प्रतिमासु समाचरेत् ॥'
अङ्गमन्त्रैः अङ्गन्यासमन्त्रैः । आङ्गमन्त्रैः मूलमन्त्रैः वैदिकैर्मन्त्रैस्तान्त्रिकैरित्यादि ॥ ॥
अथवा पूर्व्वं पञ्चोक्तविधानादिभिरस्यैः पाद्ममाह हयशीर्षपञ्चरात्रम् ।
'हस्ते कर्णिकाभिस्तु मोक्षदैव समन्वया ।
चालयेच्चिन्तयेद्देवदारान्मत्स्यान्ते ।
आवेशयन्नोऽस्य शक्त्या तु वैदिकः ।
मन्त्रेषु तु धातोः सर्वोऽपि विश्वकर्म्मा ।
प्रमाणितां दैवत्वमाह ! पूर्व्वं वदी यतः ।
सर्व्वं संपूजयामीह नारायणमनादिमम् ।
इति तान्त्रिकवैदिकमन्त्रैः पूजा कार्य्या ॥' ॥
इत्थं कथ्यते तत्कालादुत्पन्नत्वात् पूर्व्व
नष्टमन्त्रोच्चारणैव देवताया विशेषतः
प्रतिष्ठेति । रामकृष्णानन्दविरचिता दीपि-
केति ।

'प्रतिष्ठामन्त्रसंसिद्धिः प्रतिपूर्व्वाच्च तिष्ठतेः ।
मन्त्रसंस्कारविधानानां संस्कारादौ मतिः स्थितिः ॥
अथोच्चारणमेतस्य गीयते मान्त्रिकैर्नरैः ।
बिम्बमन्त्रविधानं तु क्रियते साधकस्य तु ॥
सम्पूर्णा भावनामन्त्रैः प्रतिष्ठा साभिधीयते ॥'॥
सम्भावना गौरवमाना ।
'यशोवरं पञ्चमं स्थाने देयं च धर्मदा ॥'
यसस्याह मनुः ।
'पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ।'
पलं सुवर्णाश्चत्वारः । तैजसादिकमाधिक-लौकिकमाषद्वयाधिकतोलकचयेन पलं भवति एवंविधाष्टोत्तरपलशतेन लौकिकपञ्चाधिकपल-चपलोनका इति । एवं बलीवर्द्दादिपालने गायत्र्या सस्नीकमदा स्थापयेत् । तथापि यदा तत्रासमर्थः सूत्रार्थाविशिष्टमभ्यायात् । गायत्र्या मन्त्रमन्त्रेण वा मन्त्रोदकदाने यद्वधया एतोऽभिन्नमित्यादि स्वकृष्णाभिकमा देवको सुवर्णसमानो मा विधः नमोऽस्तु इत्यादिमन्त्रो देवनामान्ते च तत्तद्देवतानामोहः । स्त्रीलिङ्ग-स्थापयोत्स्थात् स्त्रीलिङ्गमविरुद्धम् ॥ ॥ यमः ।
'कृत्वा देवकुलं सम्यक् प्रतिष्ठाप्य च देवताम् ।
विधाय विविधं चित्रं तल्लोकं विन्दते ध्रुवम् ॥'
नारसिंहे ।
'प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत् ।
सर्व्वपापाद्विमुच्येत स तु विष्णुपुरं व्रजेत् ॥
प्रतिष्ठा नरसिंहस्य यः करोति यथाविधि ।
निष्कामो नरशार्दूल । देवस्थानं प्रपश्यति ।
सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते ॥
विधिवत् स्थापयेद्यस्तु कारयित्वा जनार्द्दनम् ।
न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्चन ॥'
माधवभाष्यधृताणि ।
'देवस्य प्रतिमायान्तु यावन्तः परमाणवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥'
रामार्च्चने ।
'पुरोऽपि वा यदा प्राङ्गमप्रासादिके तथा ।
चतुरश्रार्च्चं व्रते चैव नाशि प्रजवलेऽपि च ॥
शान्तिपर्ह्वं प्रतिष्ठायां यत्नेन सवतेऽन्ततः ।
एतदूर्द्धतरं नाम यत्नकाले विधीयते ॥'
इत्थ तथाच ।
'ऊर्द्ध्वे चैतावदप्यैव प्रतिष्ठां सम्यक्सिद्धाम् ।
सम्यक्सेवापरैश्चापि सङ्कल्पासिद्धिमर्थितैः ॥'
तथा ।
'सिद्धं निर्म्मितं प्रतिमाम् कुर्य्यादभ्युदयं ततः ।
विधाय संपूजयित्वाय ततो धामपुरं व्रजेत् ॥
तत्रैव स्वस्तिकपत्रात् प्रतिकुम्भेन पूजयेत् ।
तदन्ते विधिवत्पूर्वं प्रतिरोहणकं यजेत् ॥
स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि ।
पञ्चामृतैः पञ्चगव्यैः पञ्चरत्नैस्तथैव ॥
निम्ननैतैश्च कोष्ठैश्च कषायैरपि सप्तमाः ।
पञ्चपुष्पोदकैश्चापि विधानैरपि सप्तमाः ॥
तुलसीकुसुमाद्भिश्च गन्धाद्भिश्च विधानकम् ।
चन्दनाक्षतमिश्रैश्च शरीरैश्च ततःपरम् ॥

प्रतिष्ठा करिष्यामि सर्व्वतापहरस्य च ।
कुम्भवह्नीकसम्भूतं सदा पञ्चकमीरितम् ॥१॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
कुर्य्यात् प्राणप्रतिष्ठाञ्च होमं कुर्य्याद्यथाविधि ।
दक्षिणां विधिवद्दद्यात् पूर्णां हरस्तदनन्तरम् ॥'
इति भविष्यपुराणे तृतीयभागे ८ अध्यायः ॥ ॥
'चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि ।
पताका योजनाकारा ह्यन्ते प्रकीर्त्तिताः ।
पञ्चहस्ताश्च ये दण्डाः पताकानां प्रकीर्त्तिताः ॥'
ज्योतिषि ।
'दुग्धं यवकञ्चैव घृतं दधि तथा मधु ।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥' ॥
प्रतिष्ठानन्तरं मात्स्ये ।
'ततः सहस्रं विप्राणामष्टोत्तरशतं तथा ।
भोजयेच्च यथाशक्त्या यथाविद्याय विप्रान्नम् ॥'
षोडशोपचाराः पाद्यादि । दशोप-चाराः पाद्यादि । पञ्चोपचारा गन्धादि ।
'सर्व्वोपचारवस्तूनामभावे भावनैव हि ।
निर्म्मितैर्दीर्घकोणाद्युपर्य्युपर्य्याह नारदः ॥' ॥
नारसिंहे ।
'याने यज्ञे च वैवस्ते दद्यादाचमनीयकम् ॥'
कालिकापुराणम् ।
'दद्यीयते च देवेभ्यो गन्धपुष्पादिकं तथा ।
धर्म्मरत्नविशेषैश्चापि पराभिषिच्य तत्तु प्रयच्छेत् ॥'
देवीपुराणम् ।
'होमो महादिपूजायां प्रथमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥'
कात्यायनः ।
'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ॥'
अथ नीराजनमाह पूजारत्नाकरे देवीपुराणम् ।
'सुदर्शनादिभिर्देवमन्त्रमन्त्रैश्च पुष्पकैः ।
यावन्तो दिवसान् वीर । देव्या नीराजनं कृतम् ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
भक्त्या निवेदयेदेवं दीपैर्वाद्यादिमङ्गलैः ।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः ॥
बद्ध्वा यज्ञकाण्डे पापकाले विधिवत् ।
यः कुर्य्याच्छ्रद्धया वीर । देव्या नीराजनं नरः ।
स तु कुर्य्यात् प्रदीपेन सर्व्वलोकं स गच्छति ॥'
धर्म्मस्थान एतद्वचनात् । देव्या इति स्त्रीलिङ्ग-निर्द्देशे वस्तुतो विष्णवादेरपि नीराजनाद् व्याख्यातम् ॥ ॥ अथ प्रतिष्ठितमूर्त्तौ कदा-चित् पूजाभावेन महाभिषेचनपूजनम् ।
'एकाहपूजाविहतौ कुर्य्याद्द्विगुणमर्च्चनम् ।
त्रिरात्रे च महापूजां संप्रोक्षणमतः परम् ।
मासादूर्द्धमनेकाहपूजा यदि विहन्यते ।
प्रतिष्ठैवास्ते केचित् केचित् संप्रोक्षणम् ॥'
संप्रोक्षणं तु देवस्य मैत्रादिना ।
'अथो दशैव संस्नाप्य दशैर्पञ्चविधैश्च च ।
प्रोक्षयेत् प्रोक्षणीतोयैर्दिनाष्टोत्तरं शतम् ।
सहस्रं सहस्रं वापि कर्त्तव्यं सदाशिवे ।
गन्धाद्यैः पञ्चमहापूजादिनोत्तरम् ।
ततो यजेत पञ्चगव्याविशीतायां संदृष्टेऽपि ।

तत्स्थार्थं लिपिस्थार्थं सकल्पासह विवर्त्तेत् ।
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ।
पूजाञ्च महतीं कुर्य्यात् यथाशक्त्या बलानि च ।
ग्रामहोमादिषु प्रायः संक्षेपोऽयं विधिः स्मृतः ॥'
अप्रमाणे तु वोधायनः । नात्रो इदम् ततयोनानां देवानां भूयः प्रतिष्ठापनम् ।
तासामप्रतिष्ठितानाम् । प्रतिष्ठापनं यथाक्रमं संक्षेपेण कृत्वा पुनः प्रतिष्ठां कारयेदिति रत्नाकरः । तदा पुनःप्रतिष्ठापन इत्यादि रत्नाकरः ॥ ॥ आदित्यपुराणे ।
'खण्डिते स्फुटिते दग्धे भ्रष्टमानविवर्ज्जिते ।
योगहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ।
अन्यमन्त्रार्च्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ।
इति सर्व्वगतो विष्णुः परिमोहात् जनार्द्दनः ।'
उपचारेष्वपि नारदादितन्त्रे ।
'पाद्यं श्यामाकदूर्व्वाब्जविष्णुक्रान्ताभिरिष्यते ।
तद्दद्यात्पद्यमिति दिक् ।
'गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ।
सदूर्व्वैः सर्व्वदेवानामर्घ्यमेतदुदीरितम् ॥
जातीलवङ्गकक्कोलैः संमतमाचमनीयकम् ।
आज्यं दधिमधून्मिश्रं मधुपर्कं निवेदयेत् ॥'
कात्यायनः ।
'मधुपर्कं दधिमधुघृतसम्पृक्तमिति कांस्ये
कांस्येन ।'
गन्धचन्दनकर्पूरकालागुरुभिरीरितः । इत्यपि
देवदेवायां ।
'गुग्गुलुगुग्गुलुधीरमकैरामगुरुचन्दनैः ।
धूपं दद्यान्नियमेनैवेद्येषु देवेशः ।
तत्र तत्र जलं दद्यादुपचारान्तरान्तरे ॥'
अथ शक्तिवृत्ती नमस्कारो यथाशक्ति वि-धानात् ॥ ॥ तथा चाक्षयपात्रे एष-मक्षयेन विनापि पूजामाह विष्णुधर्म्मोत्तर-प्रथमकाण्डम् ।
'पूजा कार्य्या हविषैर्द्दा सतता भगवत्प्रे ।
न सम्भवति वैभर्म्मैरिह बरानन ।
विष्णुं देवविकाषणं यथाशक्त्यानिमम् ॥
तथा पूजयेन्नित्यं तथाप्यन्यतो परः ॥'॥
प्रदेशादौ देवप्रतिष्ठापूजापद्धत्यादिप्रयोगा तत्रैव द्रष्टव्याः कुर्य्यात् । प्रयासः विस्तरा-भिधित्सया ॥ ॥ अथ दक्षिणादिः स्वर्ण-होमद्रव्यं विषयम् । एतद्वाप्यवरेणोदात्र-पक्षे तत्रैव दक्षिणादिकमाह शौचित्य-तथैव परिकल्पनाविका यदिंचदेव-मास्थाभावादिति ॥ ॥ पूजादिषु दक्षैः मत्स्यपुराणे ।
'देवानां प्रतिमा यत्र हृष्टानुदिता भवेत् ।
यत्रापि हाटकैर्दत्ता नरपति: ।
कर्त्तव्यतया कार्ये देवतां यजेत् ॥'
नारसिंहे ।
सर्व्वोपकारैर्दाक्षिण्यैर्मालिका ।
प्रयाणं देवदेवस्य स्वार्थं कोशतापूर्वं ॥

प्रतिस
प्रतिस

पादपीठन्तु यो दद्यात् विश्वमग्निविघर्षणम् ।
उपानहौ च प्रदत्त्वा सर्व्वपापैः प्रमुच्यते ॥"
इति प्रतिष्ठातत्त्वम् ॥ * ॥
प्रकारान्तरं गारुडे ४८ अध्याये मत्स्यपुराणे च द्रष्टव्यम् ॥

प्रतिष्ठानं, क्ली, (प्रतितिष्ठत्यस्मिन्निति । प्रति+स्था+अधिकरणे ल्युट् ।) नगरविशेषः । विठोर इति ख्यातः । तत्र पुरूरवा राजचक्रवर्त्ती आसीत् । इति महाभारतम् ॥ (यथा, देवीभागवते । १ । १३ । १-२ ।
"सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ।
सगुणश्च सुरूपश्च प्रजारञ्जनतत्परः ॥
प्रतिष्ठाने पुरे रम्ये राज्यं सर्व्वनमस्कृतम् ।
चकार सर्व्वधर्म्मज्ञः प्रजारक्षणतत्परः ॥"
इदं हि गङ्गातीरस्थम् । यथा, हरिवंशे । २६ । ४७—४८ ।
"एवं प्रभावो राजासीदैलस्तु पुरुषोत्तमः ।
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ।
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥")

प्रतिष्ठितः, त्रि, (प्रतिष्ठा जातास्येति । तारकादित्वात् इतच् ।) प्रतिष्ठायुक्तः । (यथा, देवीभागवते । १ । ६ । ७२ ।
"यद्भूतस्त्वहङ्कारयोगार्थं कारणं प्रिया ।
अहङ्कारश्च मे कार्य्यं त्रिगुणोऽसौ प्रतिष्ठितः ॥")
गौरवान्वितः । यथा,—
"प्रतिष्ठितामाप्याकीर्त्तिमैश्वर्य्यादतिरिच्यते ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे १४ अध्यायः ॥
निष्पन्नयागः । संस्कृतः । इति प्रतिष्ठाशब्दार्थदर्शनात् ॥

प्रतिसरः, पुं, (प्रतिसरतीति । प्रति+सृ+अच् ।) मन्त्रभेदः । माल्यम् । कङ्कणम् । व्रणशुद्धिः । चमूपृष्ठम् । इति मेदिनी । रे, २०६ ॥ प्रातःकालः । इति शब्दमाला ॥

प्रतिसरः, पुं क्ली, (प्रतिसरतीति । प्रति+सृ+अच् ।) मण्डलम् । आरक्षम् । करसूत्रम् । नियोज्ये, त्रि । इति मेदिनी । रे, २०६ ॥

प्रतिसर्गः, पुं, (प्रतिरूपः सर्गः ।) प्रलयः सर्गान्तरं एषादीनां सृष्टिः । स च पुराणलक्षणान्तर्गतलक्षणविशेषः । यथा,—
वसव ऊचुः ।
"आदिसर्गस्त्वया सूत ! कथितो विस्तरेण च ।
प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः ॥
सूत उवाच ।
यदाभिषिक्तः सकलाधिराज्ये
पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपञ्चकार
यज्ञव्रतानां तपसाञ्च सोमम् ॥
नक्षत्रताराद्विजवृक्षगुल्म-
लतावितानस्य च रुक्मगर्भः ।
अपामधीशं वरुणं धनानां
राज्ञां प्रभुं वैश्रवणञ्च तद्वत् ॥
विष्णुं रवीनामधिपं वसूना-
मग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपञ्च दक्षं
चकार शक्रं मरुतामधीशम् ॥
दैत्याधिपानामथ दानवानां
प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षःपशुभूतयक्ष-
वेतालराजञ्च शूलपाणिम् ॥
प्रालेयशैलञ्च पतिं गिरीणा-
मीशं समुद्रं सरितां नदानाम् ।
गन्धर्व्वविद्याधरकिन्नराणा-
मीशं पुनश्चित्ररथञ्चकार ॥
नागाधिपं वासुकिमुग्रवीर्य्यं
सर्पाधिपं तक्षकमादिदेश ।
दिग्वारणानामधिपञ्चकार
गजेन्द्रमैरावतनामधेयम् ॥
सुपर्णमीशं पततामथाश्व-
राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च
प्लक्षं पुनः सर्व्ववनस्पतीनाम् ॥
पितामहः पूर्व्वमथाभ्यषिञ्च-
देतान् पुनः पूर्व्वदिगाधिपानाम् ।
पूर्व्वेण दिक्पालमथाभ्यषिञ्च-
न्नाम्ना सुधर्म्माणमरातिकेतुम् ॥
ततोऽधिपं दक्षिणतश्चकार
सर्व्वेश्वरं शङ्खपदाभिधानम् ।
सकेतुमन्तं दिगधीशमीश-
श्चकार पश्चाद्भुवनाण्डगर्भः ॥
हिरण्यरोमाणमुदग्दिगीशं
प्रजापतिं मेरुसुतञ्चकार ।
अद्यापि कुर्व्वन्ति दिशामधीशाः
शत्रुं वहन्तस्तु भुवोऽभिरक्षाम् ॥
चतुर्भिरेभिः पृथुनामधेयो
नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
मन्वन्तरे चापि गते स एव
वैवस्वतश्चारमं पृथिव्याम् ॥
गतेऽन्तरे चाक्षुषनामधेये
वैवस्वताख्ये च पुनः प्रवृत्ते ।
प्रजापतिः सोऽस्य चराचरस्य
बभूव सर्व्वाधिपतिप्रसिद्धः ॥"
इति मात्स्ये आधिपत्याभिषेचनं मन्वन्तराधिपत्यं नाम ८ अध्यायः ॥ * ॥ अपि च ।
मार्कण्डेय उवाच ।
"नारायणोऽयं भुवः सर्गो वराहाद्यभिहितो गतः ।
प्रतिसर्गः श्रुतः यो वै एतादृशैः कृतः पृथक् ॥
ब्रह्मा विराट् महरन्तो मरीच्याद्यास्तु मानवाः ।
स्वं स्वं सर्गं पृथक् चक्रुः प्रतिसर्गः स च स्मृतः ॥
विराड्ब्रह्मणोऽवयवात् मनून् वैविध्यं जगत् ।
मनुः सप्त मनून् सृष्ट्वा चकार बहुधाः प्रजाः ॥
प्रजाः विराजः स मनुर्योऽसौ स्वायम्भुवाह्वयः ।
कल्पयन् प्रथमं सर्गं मनून् चतुर्दश प्रभुः ॥
ब्राह्मणादींश्च वर्णान् स आश्रमांश्च तथैव च ।
वासुकिञ्च महातेजा विषमान् पन्नगांस्तथा ॥
यक्षरक्षःपिशाचांश्च नागगन्धर्व्वकिन्नरान् ।
विद्याधरानप्सरसः सिद्धान् भूतगणान् बहून् ॥
मेघान् सविद्युतो वृक्षान् नगान् गुल्मलतादिकान् ।
मत्स्यान् मृगांश्च कीटांश्च जलजान् स्थलजां-
स्तथा ॥
एतान्यन्यानि सर्व्वाणि मनुः स्वायम्भुवः सुतैः ।
सहितः सृष्टवान् सोऽस्य प्रतिसर्गः प्रकीर्त्तितः ॥
अन्ये मन्वन्तरे ये ये तेऽपि ते चान्तरेऽन्तरे ।
प्रतिसर्गं स्वयं कृत्वा प्रासृजन्ति चराचरम् ॥
यज्ञश्च संभृतं यस्मात् यूपं प्रागंशमेव च ।
धर्म्माधर्म्मौ गुणान् सर्व्वान् वराहः सृष्टवान्
पुरा ॥
सुतान् बहून् समुत्पाद्य दक्षो देवर्षिसत्तमान् ।
महर्षीन् सोमपादींश्च बहून् पितृगणांस्तथा ॥
सृष्टिं प्रवर्त्तयामास प्रतिसर्गोऽस्य च स्मृतः ।
अत्रापरः सुतात् पितरः पञ्चिया बाहुपुष्पतः ॥
ऊर्म्मोर्न्मिजाः परः सृष्टाश्चतुर्वेदाश्चतुर्मुखात् ।
ब्रह्मणः प्रतिसर्गोऽयं आद्यः सर्गेषु स्मृतः ॥
मरीचेः काश्यपो जातः काश्यपात् सकलं जगत् ।
देवा दैत्या दानवाश्च तस्य सर्गः प्रकीर्त्तितः ॥
अत्रेर्ब्रह्मभूश्चन्द्रश्चन्द्रवंशस्ततोऽभवत् ।
तेन सर्गं जगत्स्थानं सोमवर्गः प्रकीर्त्तितः ॥
अथर्व्वाङ्गिरसो जाता पुत्राश्च बहवोऽपरे ।
मन्वन्तरादयो ये वै ते सर्गेऽङ्गिरसः स्मृताः ॥
आप्ययातः पुलस्त्यस्य पुत्राश्चापि च
राक्षसाः ।
प्रतिसर्गाः पुलस्त्यस्य कथ्यन्ते समन्विताः ।
काद्रवेया सर्पा अन्या प्रजा बहुतराश्च याः ।
सर्वे पुलहस्य सर्गे सर्गस्तस्य प्रकीर्त्तितः ॥
क्रतोः पुत्रा वालखिल्याः सर्व्वज्ञा भूरितेजसः ।
अष्टाशीतिसहस्राणि ज्वलद्भास्करसन्निभाः ॥
प्रचेतसः सुताः सर्व्वे ये वै प्राचेतसाः स्मृताः ।
वह्नयोऽतिसहस्राणि तावन्तोऽपि च नैष्ठिकाः ॥
शुक्रादयो वसिष्ठस्य पुत्राश्चान्ये च योगिनः ।
आत्मजैताः पराशराद्याश्च सर्गा श्रुतौ
भवेच्च भार्गवा जाता ये वै दैत्यपुरोहिताः ॥
कश्यपो महाभागात्सर्व्वमखिलं जगत् ।
नारदाद्यास्तथा जाता विमानानि तथैव च ।
प्रचेतसाद् दैत्यान् वृक्षं लोकश्च कौतुकम् ॥
एते दशमहर्षीणाः कन्यकाश्च बहुन् सुतान्
समुत्पाद्योत्पाद्य दिवसे दिवस स्वयमुद्भवम् ॥
देवा सुरेभ्यश्च सुरास्तु सुरेभ्यः परे तथा ।
सप्तसुताः सर्व्वेऽपि देवानि सुरेषु वै ।
विप्रोऽपि वह्नयः सर्व्वे मन्वन्तरेषु सम्भवः ।
लोकाद्यः सप्तद्वीपाः सुमेरुरपि काञ्चनः ।
प्रतिसर्गं कृतं विप्रोऽस्य च यदि शक्रो इह ।
इत्यर्थं वक्तुं तद्वाचं मे वक्तारं ताम् ।
भास्करः चक्रवर्त्तिनो मार्कण्डेय धर्म्मवित् ।
इमाश्च वदति जाता पुण्या आर्ष्टिषेणाः ।
नरनारायणाश्च ब्रह्मर्षयोऽपि स्वयम्भुवः ।
चन्द्रमाश्चतुर्विंशः शिवप्रभृतयः सते ॥

नानायुधधराः सर्वे नानारूपा महाबलाः ।
यत्र वः प्रतिहर्त्तारोऽपि कथितो हिमवत्सुताः ॥"
इति कालिकापुराणे ५६ अध्यायः ॥

प्रतिहतं, त्रि, (प्रतिगतं हतं नाममिति ।) प्रतिकूलम् । इति जटाधरः ॥

प्रतिहास्थानिकः, पुं, (प्रतिहास्थानं प्रयोजनमस्येति । प्रतिहास्थान+ठञ् ।) मागधः । स्तुतिपाठकः । इति शब्दरत्नावली ॥

प्रतिसीरा, स्त्री, (प्रतिसिनोति प्रतिबध्नातीति । प्रति+सि+"सुसिचिप्रियां दीर्घश्च ।" उणा० २ । २५ । इति क्रन् दीर्घश्च । ततष्टाप् ।) यवनिका । पटधारककपटः । इत्यमरः ।२।६।१२० ॥

प्रतिसूर्यः, पुं, (प्रतिरूपः सूर्यः इति प्रादिसमासः ।) कृकलासः । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । कल्पस्थानेऽष्टमाध्याये ।
"प्रतिसूर्यः पिङ्गभासो बहुवर्णो महाशिराः ।"
उपसूर्यकमण्डलम् । यथा, वृहत्संहितायाम् । ३७ । १ ।
"प्रतिसूर्यकोऽपि नाम
दण्डभयातङ्ककृत्कृत्स्नो ।")

प्रतिसूर्यकः, पुं, (प्रतिसूर्य+स्वार्थे कन् ।) कृकलासः । (यथा, उत्तररामचरिते द्वितीयेऽङ्के ।
"श्रीमान् कन्दरोदरेषु विलसत्प्रस्वापभाजो
मा स्वयं
शुष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥"
मद्दृष्ट्या चिकित्सा सुश्रुते कल्पस्थाने ८ अध्याये उक्ता । यथा,—
"प्रतिसूर्यकदष्टानां सर्वदष्टवदाचरेत् ॥")
उपसूर्यकमण्डलम् । इति त्रिकः ॥ (अस्य शुभाशुभलक्षणम् । यथा, वृहत्संहितायाम् ।३७।९-१।
"प्रतिसूर्यकः प्रशस्तो
दिवसकृदृतुवर्णमधुः स्निग्धः ।
वैदूर्यनिभः स्वच्छः
शुक्लश्च क्षेमसुभिक्षः ॥
पीतो व्याधिं जनय-
त्यशोकरूपश्च शस्त्रकोपाय ।
प्रतिसूर्याणां माला
दस्युभयातङ्कनृपहन्त्री ॥
दिवसकृतः प्रतिसूर्यो
जलकृदुदग्दक्षिणे स्थितोऽनिलकृत् ।
उभयस्थः सलिलभयं
नृपमुपरि निहन्त्यधो जनहा ॥")

प्रतिसृतः, त्रि, (प्रति+सृ + कर्मणि क्तः ।) प्रेरितः । प्रख्यातः । इति मेदिनी । ते, ६६ । रतः । इति धरणिः ॥

प्रतिसोमा, स्त्री, (प्रतिरूपः सोमः सोमरसो यस्याः ।) महिषवल्ली । इति राजनिर्घण्टः ॥

प्रतिस्पर्द्धा, स्त्री, (प्रति+स्पर्द्ध+भावे अङ् ।) प्रतिस्पर्धा । स्पर्द्धा । इति शब्दरत्नावली ॥

प्रतिहतः, त्रि, (प्रतिहन्यते स्मेति । प्रति+हन्+क्तः ।) द्विष्टः । प्रतिस्खलितः । बद्धः । इति मेदिनी । ते, ८२ । (प्रतिरुद्धः । यथा,—

"मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥"
इति शुद्धाङ्कितामरकोषपाठः । ३ । १ । ४१ ।

प्रतिहस्तकः, पुं, (प्रतिगतः हस्तोऽवलम्बनरूपो यस्य । कप् ।) प्रतिनिधिः । यथा,—
"आपद्गतानां भर्तॄणां स्वामिकार्यं धर्मचिन्तने ।
दुष्यन्तोऽपाकृते चैव न सन्ति प्रतिहस्तकाः ॥"
इति हितोपदेशे कौशिकाख्ये सन्धिविग्रहो नाम द्वितीयकथाप्रबन्धः परिच्छेदः ॥

प्रतिहारः, पुं, (प्रतिविषयं प्रत्येकं वा ह्रियते स्वामिसमीपमानयतीति । प्रति+हृ+अण् ।) द्वारपालः (यथा, देवीभागवते । १ । १८ । १० ।
"द्वारस्थो हि प्रतिहारेण द्वारी कश्चिद् द्विजो
नृप ॥"
प्रति+हृ+आधारे घञ् ।) द्वारः । इति शब्दरत्नावली । (यथा, रघौ । ६ । २० ।
"ततो नृपाणां श्रुतवृत्तवंशा
पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक् सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ॥"
प्रतिरूपं हरतीति । हृ+अच् ।) मायाकारः । इत्यमरटीकायां भरतः । ७ । १० । ११ । (परमेष्ठिनः पुत्रः । यथा, विष्णुपुराणे । २ । १ । ३७ ।
"परमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ॥")

प्रतिहारकः, पुं, (प्रतिरूपं हरतीति । हृ+ण्वुल् ।) मायाकारः । इत्यमरटीकायां भरतः । २ । १० । ११ ॥

प्रतिहासः, पुं, (प्रतिरूपो हासो यस्य ।) करवीरः । इत्यमरः । २ । ४ । ७६ ॥ हासकल्पपुष्पत्वात् ॥

प्रतीकः, पुं, (प्रतीयते प्रतीतिर्वा अनेनेति । प्रति+इ+बाहुलकात् कीकन् इति उज्ज्वलदत्तः ।) एकदेशः । अङ्गम् । (यथा, ऋग्वेदे । ७ । ६६ । १ ।
"त्रि यातुना हविषो मम जन्मौ पुष्प प्रतीक
मथिषि आयः ॥"
"तथापि पृथु त्रिभौमं प्रतीकं हविषा आप-
यम् ॥" इति तद्भाष्ये सायणः ।) शरीरावयवः । यथा, कौर्मे १६ अध्याये ।
"न स्पृशेदुदकं कुर्यात्प्रतीकं विरेत् ॥"
अपि च, मत्स्यपुराणे ।
"स्पृष्टे मौञ्जि च वादं चरति जवनतः पीठक-
स्थापि मत्स्यीम् ॥"

प्रतिकूले, त्रि । इत्यमरः ।३।१।७० । विलोमः । इति मेदिनी । के, ११२ ॥

प्रतीकारः, पुं, (प्रतिक्रियतेऽनेनेति । प्रति+कृ+घञ् । उपसर्गस्येति पक्षे दीर्घः ।) कृतापकारस्य प्रतिकारः । वैरनिर्यातनम् । वैरशुद्धिः । वैरप्रतिक्रिया । इत्यमरः । २ । ८ । ११० ॥ (यथा, देवीभागवते । १ । १६ । १ ।
"राज्ञां तौ स्वर्गौ नाभि भावराघौ प्रमाणे वे ।
कल्पाकालभिरपि प्रतीकारो न विद्यते ॥")
चिकित्सा । इति शब्दरत्नावली ॥

प्रतीकाशः, पुं, (प्रतिकाशते इति । प्रति+काश+अच् । उपसर्गस्य दीर्घः ।) उपमा । इत्यमरः । ३ । ३ । १९८ । (यथा, महाभारते । १ । ११३ । १९ ।
"अथ त्वां भामिनी दृष्टा सुलभामं सुरासुराः ।
कलशक्रियमतीकाशं विशेषेण महाजनम् ॥")

प्रतीक्षा, स्त्री, (प्रति+ईक्ष+अङ् ।) अपेक्षणम् । अपेक्षा । प्रतिपूर्वकपालनीयो वा-
क्यार्थेन निश्चयः । (यथा महाभारते । ७ । ० । ११ ।
"मिथ्याभीषणा युक्ता स्वार्थं द्रक्ष्याम्यवेक्षितः ।
अवधारयितुं तथा प्रतीक्षामिरपि कौरव ॥")

प्रतीक्ष्यः, त्रि, (प्रतीक्ष्यते इति । प्रति+ईक्ष+ण्यत् ।) पूज्यः । इत्यमरः । ३ । १ । ५३ । (यथा, रघौ । ५ । १४ ।
"मतिः प्रतीक्ष्येषु कृतोऽसि मे
पूर्वाङ्गमहात्मा । तथापि हि
आशीर्वादकर्मप्रयुक्त
कामविभावयितुं मे विचारः ॥")
प्रतीक्षणीयः । (यथा, माघे । २ । १०७ ।
"प्रतीक्ष्यं तत्प्रतीक्ष्यायै प्रतिपक्षे प्रतिपूजः ॥")

प्रतीची, स्त्री, (प्रतिदिशमं प्रतिदिनं सूर्यं अञ्चति गच्छतीति । अञ्च प्रतिपूर्वकात् + "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च ।" ३ । २ । ५९ । इति क्विन् ङीप् च । "उगितश्च ।" ४ । १ । ६ । इति ङीप् ।) पश्चिमदिक् । इत्यमरः । १ । ३ । १ । (यथा, महाभारते । ५ । ११० । १० ।
"यत्रायो वरुणः राजा प्रतीचीं दिशमास्थितः ।
अपाम्पतिरिव तस्याधीशुद्धात्मा प्रतिपद्यते ॥"
त्रि, पश्चिमाभिमुखी । यथा, ऋग्वेदे । १ । ११२ । ४ ।
"विश्वानि देवी भुवनाभिचक्ष्या
प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती
विश्वस्य वाचमविदन्मनायोः ॥"
"भुवना भुवनानि भूतजातानि अभिचक्ष्या
प्रकाश्य प्रकाशयित्वा अवस्थिता प्रतीची प्रत्य-
ङ्मुखी भवति ।" इति तद्भाष्ये सायणः । ६ ।
विमुखगामी । यथा, ऋग्वेदे । १ । ११३ । ८ ।
"अथ परावत ईत बन्ति प्रतीची अन्वेति पश्चात्
धूमावतीम् ।"
"अधिकारिणः प्रति प्रत्यावर्त्तमाना पश्चात् गच्छन्तीति
प्रतीचीत्युच्यते प्रतिनिवृत्ताः ।" इति तद्-
भाष्ये सायणः ॥)

प्रतीचीनं, त्रि, (प्रतीचि भवम् । प्रतीची +
"विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ । इति
खः । अलोपो दीर्घश्च ।) पश्चिमदेशभवम् । पश्चा-
द्भवः । इति हेमचन्द्रः । ६ । ७२ । (पश्चाद्-
गतम् । यथा, ऋग्वेदे । १ । ११ । ७ ।
"सूर्यस्येव वक्षथो ज्योतिरेषां
[illegible] ॥"
"विश्वं भुवनानि प्रतीचीनं प्रत्यक्त्वं प्राप्तं दृष्ट्वा
इति तद्भाष्ये सायणः ॥)

प्रतीच्य:, त्रि, प्रतीच्यां भव: । प्रतीचीशब्दाद्भवार्थे यत्प्रत्ययविधान: । पश्चिमदिग्जात: । (यथा, महाभारते । २ । ३२ । १२ ।
"रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपा: ।
तान् सर्व्वान् स वशे चक्रे शासनादेव पाण्डव: ॥")

प्रतीत:, त्रि, (प्रतीयते स्म प्रत्येकमगाद्वेति । प्रति + इण् + कर्म्मणि कर्त्तरि वा क्त: ।) ख्यात: । इत्यमर: । ३ । १ । ६ ॥ (यथा, रामायणे । २ । ८ । १० ।
"प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषम् ।
उपस्थास्यसि कौशल्यां दासीवत्त्वं कृताञ्जलि: ॥")
सादर: । ज्ञात: । हृष्ट: । इति मेदिनी । ते, १०५ ॥ (पुं, विश्वेदेवानामन्यतम: । यथा, महाभारते । १३ । ९१ । ३१ ।
"अनुकर्म्मा प्रतीतश्च प्रदातायांशुमांस्तथा ॥")

प्रतीति:, स्त्री, (प्रति + इण् + भावे क्तिन् ।) ज्ञानम् । इति जटाधर: ॥ (यथा, मायापरिच्छेदे । ११४ ।
"कार्य्योत्पादाभावतो नास्य परिमाणमनुमितौ ।
अमात एवमिदं मेति प्रतीतिर्हि विलक्षणा ॥")
ख्याति: । आदर: । हर्ष: । इति प्रतीतशब्दार्थदर्शनात् ॥

प्रतीपं, त्रि (प्रतिकूला आपो यस्मात् । "ऋक्पूरब्धू:पथामानक्षे ।" ५ । ४ । ७४ । इति अप्रत्यय: । "द्व्यन्तरुपसर्गेभ्योऽप ईत् ।"६ । ३ । ९७ । इति ईत् ।) प्रतिकूलम् । इति हेमचन्द्र: । ६ । १०९ । (यथा, भागवते । ३ । १ । १३ ।
"स एष यस्मै प्रतिदातुमिच्छ
दास्या: सुतं यद्बलिमेव पुष्ट: ।
तस्मिन् प्रतीप: परकृत्य आस्ते
निर्व्वास्यतामाशु पुरात् श्वसान: ॥"
स्त्री, अर्थालङ्कारभेद: । तत्र तल्लक्षणादिकं साहित्यदर्पणे १० परिच्छेदे उक्तम् । यथा,—
"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम् ।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ॥
क्रमेण उदाहरणं यथा,—
यल्लोचनमाभावातिसर्व्वतिमिरे मयं तविन्दीवरं
मेघैरन्तरितं प्रिये । तव मुखच्छायानुकारी शशी ।
केऽपि त्वद्गमनानुकारिगतय: ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥
गर्व्वं यदि वहसि कामिनि कृष्णा वा केवला वा
मेदुरद्युति-
स्तत्सदृशेऽपि हारिणि कुवलयं सखि किं वा
सुधा ।
सिन्धुस्तदानीं यदि च ते किं वा बहु मन्यसे
सत्यं सुन्दरवस्तुनिचय: कल्पक्रमो वेधस: ॥
अत्र रूपादिमिरेव वन्वादीनां सोमादिकरणस्य नैर्थ्क्यवाक्यम् ।
"तद्वक्त्रं यदि मुद्रिता शशिकथा तच्चेत् स्मितं का सुधा
सौन्दर्य्यसाम्यसमये भवतीह कैवल्पम्बो॥

यथा,—
अहमेव गुरु: सुदारुणानामिति हालाहल ! तात ! मास्म दृप्य: ।
ननु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन् वचनानि दुर्ज्जनानाम् ॥
अत्र प्रथममादे उत्कर्षातिशय उक्त: । तदनुक्तौ तु नायमलङ्कार: ॥")

प्रतीप:, पुं, चन्द्रवंशीय नृपराजपुत्र: । शान्तनुराजपिता च । इति पुराणं शब्दरत्नावली च ॥ (यथा, महाभारते । १ । ९५ । ४४ ।
"प्रतीप: शान्तनुं पुत्रं यौवनस्थं ततोऽभ्यगात्" एतस्य विवरणं तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

प्रतीपदर्शिनी, स्त्री, (प्रतीपं प्रतिकूलं वामं वा पश्यतीति । दृश् + णिनि: । ङीप् ।) स्त्री । इत्यमर: । २ । ६ । २ ॥

प्रतीरं, क्ली. (प्रतीरयति अकालतिकर्म्मसमाप्तिं नयतीति । प्र + तीर कर्म्मसमाप्तौ + क: ।) तटम् । इत्यमर: । १ । १० । ७ ॥

प्रतीवाप:, पुं, (प्रक्षिप्यते प्रवाप्यते अथवा निक्षिप्यतेऽस्मिन्निति । प्रति + वप निक्षेपणे + घञ् ।) धातुनस्य स्वर्णादेर्द्द्रव्यान्तरेणावघूर्णनम् । इति स्वामी । व्यथनम् । नि:क्षेपणमिति यावत् । इति सुभूति: । उपद्रव: । इति मुकुट: ॥
"आवापस्तु प्रतीवापो मारीरोगोऽपद्रव: ॥"
इति राजनिर्घण्ट: ॥
इत्यनुबन्धशब्दटीकायां भरत: । पानीयौषधविशेष: । यथा,—
"शर्करादि प्रतीवापं पिबेत् संशमनाय वै ॥"
इति विषचिकित्सायां चक्रपाणिदत्त: ॥
(यथा च सुश्रुते सूत्रस्थाने । ३९ अध्याये ।
"मदकलायचूर्णं वा पिप्पल्यादि प्रतीवापं तक्रं वा निम्बकषायका कषाययोरन्यतरेण धन्वपेयं कषायाधिकम् ॥")

प्रतीवेश:, पुं, (प्रतिविशति इति । प्रति + विश् + घञ् । उपसर्गस्य दीर्घ: ।) प्रतिवेश: । इति शब्दरत्नावली ॥

प्रतीवेशी, [न्] त्रि, (प्रतीवेशोऽस्त्यस्येति । प्रतिवेश + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनि: ।) प्रतिवेशी । इति शब्दरत्नावली ॥

प्रतीहार:, पुं, (प्रतिह्रियते अनेनेति । प्रति + हृ + घञ् । उपसर्गस्य दीर्घ: ।) द्वार: । (प्रतिहरतीति । कर्त्तरि घञ् ।) द्वारपाल: । इत्यमर: । २ । ८ । ६ ॥ तस्य लक्षणम् । यथा,—
"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शन: ।
अप्रमादी सदा दक्ष: प्रतीहार: स उच्यते ॥"
इति कामन्दकीयनीति: ॥
अपि च । मात्स्ये १८९ अध्याय: ।
"प्रांशु: सुरूपो दक्षश्च प्रियवादी न चोद्धत: ।
चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते ॥"
अभिनिवेशित: । यथा, कादम्बर्य्याम् ।
"महाकोपदहनं दुर्मनस्कोऽयमित्याति ।
इति स: किम्बी कस्तिन्: प्रतीहार: स उच्यते ॥"

प्रतीहारी, [न्] त्रि, (प्रतिहरति स्वामिसमीपे सर्व्वविषयमिति । प्रति + हृ + णिनि: । उपसर्गस्य दीर्घ: । यद्वा, प्रतीहारो द्वारमस्यास्तीति । इनि: ।) द्वारी । द्वारपालप्रतीहारशब्दाद्यर्थे इनप्रत्ययेन विग्रह: ॥

प्रतीहारी, स्त्री, (प्रतीहारोऽस्त्यस्या: इति । अच् । गौरादित्वात् ङीष् ।) द्वा:स्थिता । इति मेदिनी । रे, १८० ॥

प्रतीहास:, पुं, (प्रतिरूपो हासोऽस्य । उपसर्गस्य दीर्घ: ।) करवीर: । इत्यमर: । २ । ४ । ७८ ॥

प्रतुद:, पुं, (प्रतुदतीति । प्र + तुद् + क: ।) श्येनादि: । आदिना शशि: । गृध्र: । काक: । द्रोणकाक: । उलूक: । मयूर: । इति राजनिर्घण्ट: ॥ अथ्यामांसगुणा: ।
"लावाद्या विष्किरो वर्ग: प्रतुदा आकृता: खगा: ।
लघव: शीतमधुरा: कषायाश्च हिता नृणाम् ॥"
इति राजवल्लभ: ॥
(यथा च चरके सूत्रस्थाने सप्तविंशाध्याये ।
"शतपत्रो भृङ्गराज: कोयष्टी जीवजीवक: ।
कैरात: कोकिलोऽत्यूहो गोपापुत्र: प्रियात्मज: ॥
लट्टा लट्टूषको बभ्रुर्वटहा डिण्डिमानक: ।
जटी दुन्दुभिपाक्कारलोहपृष्ठकुलिङ्गका: ॥
कपोतशुकसारङ्गचिरिटीकङ्कयष्टिका: ।
सारिकाकलविङ्कश्च चटकोऽङ्गारचूडक: ॥
पारावत: पाण्डविक इत्युक्ता: प्रतुदा द्विजा: ॥"
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कपोतपारावतभृङ्गराजपरभृतकोयष्टिकुलिङ्गगृहकुलिङ्गगोक्ष्वेडकडिण्डिमाणवकशतपत्रमातृनिन्दकभेदाशिशुकसारिकाबल्गुलीगिरिशालट्वालट्टूषकसुगृहाखञ्जरीटहारीतदात्यूहप्रभृतय: प्रतुदा: ॥")

प्रतोद:, पुं, (प्रतुद्यतेऽनेनेति । प्र + तुद् + करणे घञ् ।) अश्वादिताडनदण्ड: । चाबुक इति भाषा । तत्पर्य्याय: । प्राजनम् १ प्रवयणम् २ तोदनम् ३ तोत्रम् ४ । इति जटाधर: ॥ (यथा, महाभारते । ४ । ४४ । ७ ।
"प्रकाशविदित: कर्णा: प्रतोदैरेव वारित: ।
प्रकल्पितविधं दीर्घा निवृत्तमेतदम ॥")

प्रतोली, स्त्री, (प्रतुल्यते परिमीयते इति । प्र + तुल् परिमाणे + घञ् । गौरादित्वात् ङीष् ।) रथ्या । इत्यमर: । २ । २ । ३ ॥ (यथा, रामायणे । २ । ७० । १७ ।
"बहुपर्णकवृक्षादिवातिर्गदितेवादिना: ।
हर्म्यप्रासादसम्बाधा: प्रतोलीभिरलङ्कृता: ॥")
इत्यमरटीकायां । गाछ इति ख्याते । कुत्रो इति च ख्याते । मुकुटस्तु प्रासादादिसंनिवेशेन कथयति । दुर्गवर्त्मद्वारं इति केचित् । इति भरतोक्तो भरत: ॥

प्रत्तं, त्रि, (प्रदीयते स्मेति । प्र + दा + क्त: । "अच उपसर्गात्त: ।" ७ । ४ । ४७ । इति तादेश: ।) दत्तम् । इति शब्दरत्नावली दृश्यम् ॥

प्रत्नः, त्रि, (प्र + "नश्च पुराणे प्रात्।" इति वक्तव्यात् त्नप्।) पुरातनः। इत्यमरः। ३।१।७७॥ (यथा, भागवते। ५।१०।५।
"प्रत्नस्य विष्णो रूपं यत् सत्त्वज्ञानैकलक्षणम्।
अव्यक्तस्य च स्थानेषु सर्वमात्मानमीमहि॥")

प्रत्यक्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति + अञ्च् + क्विन्।) पश्चिमदिक्। पश्चिमदेशः। (यथा, मनुः। २।२१।
"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥")
पश्चिमकालः। इति मेदिनी। चे, १६। (च, प्रतीच्यां दिशि प्रतीच्या दिशः प्रतीची दिक् रम्यं देशे काले च। "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः।" ५।३।२७। इति अस्तातिः। "अञ्चेर्लुक्।" ५।३।३०। इति अस्तातेर्लुक्। "लुक् तद्धितलुकि।" १।२।४९। इति लुक्। दिग्देशकाले। इति मेदिनी। चे, १६। प्रतिलोमम्। यथा, भागवते। ३।२२।३७।
"यः पीडितप्रणयया हृदि निम्नगानि
प्रत्यक् चलन्ति भवतां क्षमयैव सोऽसि॥"
प्रतिकूलम्। यथा, महाभारते। ५।८४।६।
"प्रत्यगूर्मिर्महानद्यः प्राङ्मुखाः सिन्धुसत्तमाः।
विपरीता दिशः सर्वा न प्राज्ञायत किञ्चन॥")

प्रत्यक्पर्णी, स्त्री, (प्रत्यञ्चि पर्णानि यस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २।४।८८॥ (अस्याः पर्यायो यथा, भावप्रकाशस्य पूर्वखण्डे १ भागे।
"इन्द्राह्वा नन्दिनी इन्द्रवल्ली धामार्गवोऽपि च।
प्रत्यक्श्रेणी वृषपर्णी कथिता कपिपिप्पली॥")
इन्द्रवल्ली), इति राजनिर्घण्टः॥ (अस्याः पर्यायो यथा, भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।
"द्रवन्ती शम्बरी चित्रा प्रत्यक्पर्ण्युपचित्रिका।
निकुम्भाख्या प्रत्यक्श्रेणी दन्ती च वृषपर्ण्यपि॥")

प्रत्यक्पुष्पी, स्त्री, (प्रत्यञ्चि पुष्पाण्यस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २।४।८८॥ (यथा, सुश्रुते। १।११।
"प्रत्यक्पुष्पीमहावृक्षौ तिलकाच्छामलकारग्वध-मूषकशाल्मलीकुटजकदम्ब..................दापयित्वा दहेत्॥" पर्यायान्तरमस्याः। यथा,—
"अपामार्गः शैखरिकः प्रत्यक्पुष्पी मयूरकः।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्श्रेणी, स्त्री, (प्रतीची श्रेणी यस्याः। अस्याः पर्णानि पश्चिमाभिमुखानि इति भावः।) दन्तीवृक्षः। मूषिकपर्णी। इत्यमरः। २।४।१०७॥ (अस्याः पर्यायो यथा,—
"मूषककर्णी दन्ती च पुत्रश्रेण्युन्दुरुकर्णिका।
द्रवन्त्याखुरयी च कथिता काचिनीत्यपि॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्षं, त्रि, (प्रतिगतमक्षम् इन्द्रियम्। समासे अक्ष्णः "अव्ययीभावे" इति अच्। यद्वा, प्रत्यक्षमस्त्यस्येति अर्श आद्यच्।) इन्द्रियग्राह्यम्। तत्पर्यायः। ऐन्द्रियकम् २। इत्यमरः। ३।१।८८। (यथा, मार्कण्डेये। ८।१।५४।
"अनुमानप्रमाणस्य दृष्टेव पाकगृहे।
न च दृश्यते वह्निरपि प्रत्यक्षस्यापि का कथा॥")
अनुभवविशेषः। तत् षड्विधम्। घ्राणजम् १ रासनम् २ चाक्षुषम् ३ त्वाचम् ४ श्रावणम् ५ मानसम् ६। निर्विकल्पकसविकल्पकभेदेन प्रत्येकं द्विविधम्। निर्विकल्पकन्तु अतीन्द्रियम्। सविकल्पकं मनोग्राह्यम्। षड्विधप्रत्यक्षे आत्मनः महत्त्वं कारणम्। इन्द्रियं करणम्। विषयेण सह इन्द्रियसन्निकर्षः। अस्य व्यापारः। यथा, भाषापरिच्छेदे।
"घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः।
उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्।
क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम्।
गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः।
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्।
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः।
ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्।
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः॥"
(यथा, विष्णोरष्टाविंशतिनाम्नि।
"ईशानश्च यथाप्रतिदिनं पुण्यानि जन्मा-
न्तरे
ज्ञानाय प्रयतो महाक्रतुविधौ यज्ञैश्च सिंशौ
धुव।
रत्नं वक्षसि कौस्तुभोऽपि प्रमदा तुङ्गस्तने मा-
त्रिदा-
... पद्मनाभोऽवतु॥"
क्ली, अक्षि अक्षं प्रतीति प्रत्यक्षम्। अव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः।" ५।४।१०७। इत्यत्र "प्रतिपरसमनुभ्योऽक्ष्णः।" इति टच्। इन्द्रियगोचरम्। समक्षम्। "लक्षणाभिप्रती आभिमुख्ये।" २।१।१४। इत्यव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः।" ५।४।१०७। इत्यत्र "प्रतिपरसमनुभ्योऽक्ष्णः।" इति टच्। इन्द्रियगोचरम्। समक्षम्। यथा, मनुः। ८।६९।
"ब्राह्मणान्... वीक्षिता साक्षिणा... वा।
प्रत्यक्षं ... ॥")

प्रत्यक्षदर्शन, त्रि, (प्रत्यक्षं पश्यतीति। प्रत्यक्ष + दृश् + ल्युः। प्रत्यक्षं दर्शनं यस्येति वा।) साक्षी। इति शब्दमाला॥ (क्ली, प्रत्यक्षं दर्शनम्। यथा, महाभारते। ३।१२०।१६।
"प्रत्यक्षदर्शनं यस्य कौन्तेयस्य महात्मनः।
... हरो ... ॥")

प्रत्यक्षवादी, [न्] पुं, (प्रत्यक्षमेव प्रमाणं वदतीति। वद् + णिनिः।) बौद्धः। प्रत्यक्षमिति तन्मतम्। (प्रत्यक्षं वदति ... त्रि।)

प्रत्यक्षी, [न्] त्रि, (प्रत्यक्षमस्त्यस्येति। प्रत्यक्ष + इनिः।) साक्षादर्शी। इति त्रिकाण्डशेषः॥

प्रत्यगात्मा, पुं, (प्रत्यगात्मा ... अधिकरणम्।) जीवः। इति हलायुधः॥

प्रत्यग्रः, त्रि, (प्रतिगतमग्रं येन प्रत्यग्रं आरभ्यते इति।) नूतनः। इत्यमरः। ३।१।७७॥ (यथा, महाभारते। ५।१९।१८।
"वराणीं विभ्रद्ध्वजाणां मालाभिर्वर्मसंवृता।
प्रत्यग्रवस्त्रा ... ॥")
शोधितः। इति जटाधरः॥ (पुं, उपरिचरवसोः पुत्राणामन्यतमः। यथा, भारते। १।६३।३०।
"बृहद्रथः कुशश्चैव ... प्रत्यग्रहः ... ॥")

प्रत्यग्रथः, पुं, (प्रतीची रथ इव।) अहिच्छत्रदेशः। इति हेमचन्द्रः। ४।१६॥

प्रत्यङ्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति + अञ्च् + क्विन्।) पश्चिमदिक्। पश्चिमदेशः। पश्चिमकालः। प्रतिकूलाभिमुखगतिः कर्त्री निष्पन्नः। इति व्याकरणम्। (यथा, मार्कण्डेये। १९।८।२१।
"अनन्तः सर्वे पराञ्चः सर्वे प्रत्यञ्चः।")
प्रतिगतः। अभिमुखः। यथा, ऋग्वेदे। १।५०।५।
"प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान्।
प्रत्यङ् विश्वं स्वर्दृशे॥"
"हे सूर्य त्वं देवानां विशः मरुदादीन् प्रत्यङ् उदेषि। मनुष्यान् प्रत्यङ् उदेषि। ... प्रत्यभिमुखं यथा भवति तथोदेषि। तथा ... प्रत्यङ् उदेषि। किं ... प्रत्यभिमुखमेव उदेषि। यथा सर्वोऽपि लोकः ... मदभिमुखमेव सूर्यं पश्यति।" इति तद्भाष्ये सायनः॥ अन्तर्गतः। इति वैद्यकम्। यथा, भागवते। ६।९।४१।
"प्रत्यगात्मस्वरूपेण दृश्यरूपेण ... ॥")

प्रत्यञ्चा, स्त्री, (प्रत्यञ्चति इति।) ज्यानामविशेषः। यथा, रामायणे ...
"प्रत्यञ्चा धनुषो विशिखाः ... ॥"
(यथा, रामायणे। २।४१।१६।
"अतुलस्य ... पुत्रो ... वने ...
... विषादः ... ॥"
"... प्रत्यञ्चा ... ।
... दृष्ट्वा ... ॥"

रङ्गुलयः। सीवनीश्च वक्ष्यमाणानि। एष प्रत्यङ्गविभाग उक्तः॥" इति सुश्रुते शारीरस्थाने पञ्चमोऽध्याये॥ अप्रधानम्। यथा, निरुक्ते। ७। १। ५।
"एक आत्मा बहुधा स्तूयते एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि॥" अङ्गं अङ्गं प्रति। यथा, गीतगोविन्दे। ११। २१।
"आर्त्तं नीलनिचोलचारुसुदृशां प्रत्यङ्गमालिङ्गति॥"
तथा च मनुः। ८। २०८।
"यस्मिन् कर्म्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः।
स एव ता आददीत भजेरन् सर्व्व एव वा॥"
नृपविशेषे, पुं। यथा, महाभारते। १।१।२३५।
"महापुराणसम्भाव्यः प्रत्यङ्गः परहा श्रुतिः।
एते चान्ये च राजानः शतशोऽथ सहस्रशः।
श्रूयन्तेऽयुतशश्चान्ये संख्याताश्चैव पद्मशः॥")

प्रत्यङ्गिरा, स्त्री, देवीविशेषः। तस्या ध्यानम्। यथा,—
"सर्व्वोपरिसमासीनां रक्ताम्बरसुच्छदाम्।
सर्व्वाभरणसंयुक्तां गुञ्जाहारविभूषिताम्॥
षोड़शाब्दाञ्च युवतीं पीनोन्नतपयोधराम्।
कपालकर्त्तृकाहस्तां परमानन्दरूपिणीम्।
सामर्षिवधयोगेन ध्यायेत्कालविहङ्गमाम्॥"
इति प्रत्यङ्गिरास्तोत्राभ्यन्तरम्॥

प्रत्यनीकः, पुं, (प्रतिगतः अनीकं युद्धमिति।) शत्रुः। इति हेमचन्द्रः। ३। ३९२॥ (प्रतिपक्षः। विरोधी। यथा, महाभारते। ७। १०। ६६।
"यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः॥"
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
"अलोचनममात्सु यथा येषूक्तेषु स्मृताः।
तेषु तत्प्रत्यनीकादिः शुक्लोदमानस्य तु॥"
क्ली, प्रतिपक्षसैन्यम्। यथा, भगवद्गीतायाम्। ११। ३२।
"ऋतेऽपि त्वां न भविष्यन्ति सर्व्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥"
अलङ्कारविशेषः। यदुक्तं काव्यप्रकाशे।
"प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥"
उदाहरणं यथा,—
"त्वं विनिर्जितमनोभवरूपः
सा च सुन्दर! भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां
तापयत्यनुशयादिव कामः॥")

प्रत्यन्तः, पुं, (प्रतिगतोऽन्तमिति। अत्यादयः क्रान्ताद्यर्थे। इति समासः।) म्लेच्छदेशः। इत्यमरः। २। १। ७॥ (प्रान्तदेशः। यथा, रघुः। ४। ८६।
"स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥"
गुप्तौ मूलं प्रत्यन्तश्च निजराष्ट्रसीमान्तं प्रत्यन्तः प्रान्तदुर्गं च येन सः।" इति तट्टीकायां मल्लिनाथः॥
तद्देशवासिनि, त्रि॥ यथा, वराहसंहितायाम्। ४। २१।
"प्रत्यन्तान् कुरुपाञ्चालानृन्पुत्रपतिः प्रहन्ति कुलिनापुरे॥")
सन्निकृष्टे च त्रि॥

प्रत्यन्तपर्व्वतः, पुं, (प्रत्यन्तः सन्निकृष्टः पर्व्वतः।) महापर्व्वतसमीपवर्त्तिक्षुद्रपर्व्वतः। इत्यमरः। २। ३। ७॥

प्रत्यभियोगः, पुं, (प्रतिरूपोऽभियोगः।) प्रत्यपराधः। यथा,—
"अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्।
अभियुक्तञ्च नान्येन नोक्तं विप्रकृतिं नयेत्॥"
"अभियुज्यत इति अभियोगोऽपराधस्तमभियोगमनिस्तीर्य्यानपहृत्यैनमभियोक्तारं न प्रत्यभियोजयेदपराधेन न संयोजयेत्। यद्यपि प्रत्यभिस्कन्दनं प्रत्यभियोगरूपत्वादपि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः। अतः स्वाभियोगानुपमर्द्दनरूपस्य प्रत्यभियोगस्यायं निषेधः।" इति मिताक्षरा॥

प्रत्यभिवादः, पुं, (प्रति+अभि+वद्+णिच्+भावे घञ्।) अभिवादस्य गुरोराशीर्व्वचनम्। इति गोयीचन्द्रः॥

प्रत्यभिवादनं, पुं, (प्रति+अभि+वद्+णिच्+भावे ल्युट्।) अभिवादस्य गुरोराशीर्व्वचनम्। इति गोयीचन्द्रः॥

प्रत्ययः, पुं, (प्रति+इण्+भावकरणादौ यथायथं अच्।) अधीनः। शपथः। ज्ञानम्। (यथा, गारुड़े २१६ अध्याये।
"आत्मनुपसंस्कारसम्भूतः प्रत्ययो विषयान्वितः॥")
विश्वासः। (यथा, कुमारे। ४। ४५।
"इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत् सुचरितार्थपदैर्व्वचोभिः॥")
हेतुः। (यथा, रघुः। १०। ६।
"अनिच्छन् प्रत्ययापेक्षसन्ततिः स चिरं नृपः॥")
रन्ध्रम्। शब्दः। इत्यमरः। ३। ३। १४०॥
प्रथितत्वम्। आचारः। इति मेदिनी। ये, ५८॥
निर्णयः। (यथा, मनुः। ८। २३१।
"यदि संशय एव स्यात् लिङ्गानामपि दर्शने।
आकिञ्चन एव स्यात् सीमायाः विनिर्णयः॥")
स्वादुः। इति हेमचन्द्रः। धर्म्मपरत्वादिनः। योगदर्शनाद अर्थज्ञा तथा। प्रत्ययमन्तीति शुचिस्मर्णिनाः प्रत्ययाः। इति व्याकरणसारसंग्रहम्। (यथा, रघुः। ११। ५६।
"ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थताम्।
सोऽभवद्वरवधूसमागमः
प्रत्ययप्रकृतियोगसन्निभः॥")
सहकारी। इति शिवादर्शः॥

प्रत्ययकारिणी, स्त्री, (प्रत्ययस्य विश्वासस्य कारिणी।) मुद्रा। इति त्रिकाण्डशेषः॥ मोहर इति पारस्यभाषा॥

प्रत्ययितः, त्रि, (प्रत्ययो विश्वासः सञ्जातोऽस्येति। प्रत्यय+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) आप्तः। विश्वस्तः। इत्यमरः। ३। १। १६॥ (यथा, कथासरित्सागरे। १५। १८।
"तत् श्रुत्वा वत्सराजः सोऽथ प्रत्ययितान् हितान्॥")

प्रत्यर्थी, [न्] त्रि, (प्रतिरोधं प्रतिकूलं वा अर्थयते इति। प्रति+अर्थ+णिनिः।) शत्रुः। इत्यमरः। २। ८। ११॥ (यथा, साहित्यदर्पणे। ३ परिच्छेदे।
"मेरौ सम्भ्रमगम्भीरे सरभसगलदर्थे वाक्येऽपि
प्रत्यर्थी कविकुम्भिविभ्रमकरो नक्षत्रपातं
गच्छतः॥")
पुं, प्रतिवादी। इति शब्दरत्नावली॥ (यथा, मनुः। ८। ७९।
"सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ।
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन्॥")
अर्थिप्रतिपक्षः। यथा,—
"प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना।
समामासतदर्द्धाहर्नामजात्यादिचिह्नितम्॥"
"अर्थ्यते इत्यर्थः साध्यः। सोऽस्यास्तीत्यर्थी। तत्प्रतिपक्षः प्रत्यर्थी।" इति मिताक्षरा॥

प्रत्यर्पितं, त्रि, (प्रति+ऋ+णिच्+क्तः।) प्रतिदत्तम्। यथा। "अर्थमपहारोऽपि एकस्मिन् कतुर्दये कनुपयाकं यदुक्तं सत्यं यैन दत्तीतं प्रत्यर्पितमपीति। पुनरन्दिनान् सन्मते तद्दत्तं तत्स्वल्पाकं तत्क्षणेन गृहीतं याच्यमानोऽपि यदि न दद्याद् यद्य गृहीतं प्रत्यर्पितमपीति अनन्तरकाले गृहीतं प्रत्यर्पितञ्च मांसादि मनुमर इत्युपयुज्यते।" इति मिताक्षरा॥

प्रत्यवसानं, क्ली, (प्रति+अव+षो+ल्युट्।) भोजनम्। इति हेमचन्द्रः। ३। ८७॥ (पर्य्यायान्तरमस्य यथा,—
"जग्धिः प्रत्यवसानञ्च भक्षणं भोजनादने॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यवसितं, त्रि, (प्रति+अव+षो+क्तः।) भक्षितम्। इत्यमरः। ३। १। ११०॥

प्रत्यवस्कन्दः, पुं, (प्रति+अव+स्कन्द्+घञ्।) चतुर्विधोत्तरान्तर्गतोत्तरविशेषः॥

प्रत्यवस्कन्दनं, क्ली, (प्रति+अव+स्कन्द्+ल्युट्।) चतुर्विधोत्तरान्तर्गतोत्तरविशेषः। यथा,—
"प्रत्यवस्कन्दनं नाम अर्थं दत्तीनं प्रतिरूपं
प्रतिग्रहणमर्थस्य वा यथाह नारदः।
अर्थिना लिखितो योऽर्थः प्रत्यर्थी यदि तं तथा
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम्॥"
इति मिताक्षरा॥

क्वचित् च ।

"यदि कामभिनिवेशो यो गतः प्रत्यर्थी यदि तन्मया ।
तस्य कारणं ब्रूयात् प्रत्यक्षदर्शनं हि तत् ॥"

इति व्यवहारतत्त्वे हरस्मृतिवचनम् ॥

प्रत्यवस्थाता, [ऋ] त्रि, (प्रतिपक्षतया अव-तिष्ठते इति । प्रति+अव+स्था+तृच् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३९४ ॥

प्रत्यवायः, पुं, (प्रत्यवायते इति । प्रति+अव+अय गतौ+अच् ।) पापम् । दुरदृष्टम् । यथा,
"सर्वं केचिदुपायास्य दुरितस्य प्रणाशने ।
अदृष्टपापं तथा चान्ये प्रत्यवायस्य मन्यते ॥"

इति प्रायश्चित्ततत्त्वे आपस्तम्बवचनम् ॥

प्रत्यश्मा [न्] पुं, (प्रतिरूपः अश्मा ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

प्रत्यहं अ, (अहः अहः प्रति । "अव्ययं विभक्ति-" २ । १ । ६ । इति टच् ।) प्रतिदिनम् । यथा, कुमारसम्भवे ।
"तिरोदधे प्रत्यहमर्चितां सा तु ॥"

प्रत्याकारः, पुं, (प्रतिरूपः खड्गेन सदृश आकारो यस्य ।) खड्गकोषः । इति हेमचन्द्रः । ३ । ४४७ ॥ खाप् इति भाषा ॥

प्रत्याख्यातः, त्रि, (प्रति+आ+ख्या+क्तः ।) दूरीकृतः । तत्पर्यायः । प्रत्यादिष्टः २ निरस्तः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ । इत्यमरः । ३ । १ । ४० ॥ क्वचित् पुस्तके प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृतः इति पाठः । प्रत्याख्यातं प्रत्यादिष्टे । मरणतुल्यं निरस्यते । इति महेश्वरः-सुन्दरी ॥ (यथा, महाभारते । १ । १५६ । ७ ।
"कोऽहं कामं यथा यथैव कामं च दास्यामि ॥
प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते ॥")

प्रत्याख्यानं, क्ली, (प्रति+आ+ख्या+भावे ल्युट् ।) निराकरणम् । तत्पर्यायः । निर-सनम् २ प्रत्यादेशः ३ निराकृतिः ४ । इत्यमरः । १ । ५ । ३१ ॥ (यथा, मार्कण्डेये । ६१ । ७२ ।
"प्रत्याख्यानादहं तस्य तव पापस्य भाविनि")

प्रत्यागमः, पुं, (प्रत्यागमनमिति । प्रति+आ+गम्+अप् ।) प्रत्यागमनम् । फिरे आसा इति भाषा । यथा,—
"गोबधमायमनारम्भे गोदंशनादिषु च ॥"

इति प्रायश्चित्ततत्त्वम् ॥

(यथा, कथासरित्सागरे । १८ । ४६ ।
"कियद्भूमि विरोध्य चाचिरात् प्रत्यागमो हि वः ॥")

प्रत्यादिष्टः, त्रि, (प्रत्यादिश्यते स्मेति । प्रति+आ+दिश्+क्तः ।) प्रत्यादेशविशिष्टः । तत्-पर्यायः । निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ । इत्यमरः । ३ । १ । ४० ॥

प्रत्यादेशः, पुं, (प्रत्यादेशनमिति । प्रति+आ+दिश्+घञ् ।) निराकरणम् । प्रत्याख्यानम् । इत्यमरः । १ । ५ । ३१ ॥ (यथा, नैषधे । ८ । ६ ।
"प्रत्यादेशादिह च मनुजो दिव्यमूर्तिर्भवेत्-यत् ॥")

प्रत्यष्टीवनम् । इति हलायुधः ॥ यथा, मनुः । ८ । २८३ ।
"पिष्ट पिष्ट यथाद्रीव तीक्ष्णो इव विविच्यते ।
तस्यैव हरेणाय प्रत्यादेशाय पार्थिवः ॥")
अतः प्रति देवानामादेशश्च ॥

प्रत्याध्मानः, पुं, (प्रतिगतमाध्मानमाध्मानवत्-साम्यं यस्य ।) वातव्याधिविशेषः । तस्य लक्षणमाह ।
"विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम् ॥"
विमुक्तपार्श्वहृदयं पार्श्वे हृदये विहाय जातं तदेवाध्मानम् । कफव्याकुलितानिलं कफेनाव-रुद्धवातम् ॥ २ ॥ अथ तस्य चिकित्सा ।
"प्रत्याध्माने वमनमपि कुर्यात् वातलङ्घने ।
दीपनादि निषुञ्जीत चूर्णवर्तिकनौ च ॥"

इति भावप्रकाशः ॥

प्रत्यालीढं, क्ली, (प्रति+आ+लिह्+क्तः ।) धन्विनां पादसंस्थानविशेषः । सव्योऽरुत्य वाम-पादप्रसारे दक्षिणपादसङ्कोचः । इत्यमर-टीकायां भरतः ॥ धन्विनामवस्थानविशेषः । यथा,—
"स्यात् प्रत्यालीढमालीढं मतं पादं तथाविधम् ।
वैशाखं मण्डलं चेति धन्विनां स्थानपञ्चकम् ॥
स्याद्दक्षपादसङ्कोचात् वामपादप्रसारणात् ।
प्रत्यालीढमिति प्रोक्तमालीढं तद्विपर्ययात् ॥
तुल्यौ पादयुगौ यत्र मतं पादसमाख्यकम् ।
वितस्त्यन्तरितौ पादौ वैशाखमुच्यते ।
मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"

इति शब्दरत्नावली ॥

(यथा च धनुर्वेदः ।
"स्थानानि धन्विनां पञ्च तत्र वैशाखमुत्तमम् ।
वितस्त्यन्तरितौ पादौ मण्डलं तोरणाकृती ॥
समपादौ स्यात् समपदमालीढं दक्षिणागतः ।
दक्षिणं वाममाकुञ्च्य प्रत्यालीढं विपर्ययः ॥")
वाच्यलिङ्गे, त्रि । इति मेदिनी । ढे, १२ ॥

प्रत्याशा, स्त्री, (प्रति किञ्चित् वस्तु लब्धेऽपि च सम्यग्रूपेण अश्नुते व्याप्नोतीति । प्रति+आ+अश्+अच् । टाप् ।) आकाङ्क्षा । यथा, शाकुन्तले ।
"गाढोत्कण्ठ सरोजिनीव पत्रवत् प्रत्याशया धारयति ॥"

प्रत्यासन्नः, त्रि, (प्रति+आ+सद्+क्तः ।) निकटवर्ती । इति जटाधरः ॥ (यथा, प्रबोध-चन्द्रोदये २ अङ्के ।
"आसीत् प्रत्यासन्नो महारम्भः । तत्प्रत्युत्थानम-पेक्ष संभावनामात्रेण ।")

प्रत्यासारः, पुं, (प्रत्यासिच्यते इति । प्रति+आ+सृ+"ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) सैन्यपृष्ठः । इति शब्दरत्नावली ॥

प्रत्याहारः, पुं, (प्रत्याह्रियते इति । प्रति+आ+हृ+घञ् ।) सूत्रस्य प्रत्याहारः । सूत्रस्य वर्णानां संक्षेपेण ग्रहणम् । तत्पर्यायः । सूत्रसंक्षेपः २ । इत्यमरभरतौ ॥

प्रत्याहरणं, क्ली, (प्रति+आ+हृ+भावे ल्युट् ।) प्रत्याहारः । इति शब्दरत्नावली ॥

प्रत्याहारः, पुं, (प्रति+आ+हृ+भावे घञ् ।) अवस्थितेभ्य इन्द्रियार्थेभ्यः । इन्द्रियाणां प्रत्याहरणम् २ । इत्यमरः ॥ प्रत्याहरणम् । इति शब्दरत्नावली ॥ स च योगाङ्गविशेषः । यथा,
"प्रत्याहारस्तु सर्वेषां स्वाभाविकमनीषिणाम् ।
समाधिसिद्धिदं मतं यदृष्टो योगवेदिभिः ॥"

इति गरुडपुराणम् ॥

प्रत्याहारमाह ।
"इन्द्रियाणामवस्थानि विषयेभ्यश्च योगिनः ।
कूर्मोऽङ्गानीव सङ्कोच्य प्रत्याहारः स उच्यते ॥"

इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥

अपि च ।
"इन्द्रियाणीन्द्रियार्थेभ्यः प्रत्याहृत्य स्थितो हि यः ।
मनसा सह बुद्ध्या च प्रत्याहारे स उच्यते ॥"

इति गारुडे ४९ अध्यायः ॥

(यथा च मालतीमाधवे ।
"प्रत्याहारसमाहितमनाः प्राणायामादिभिः सदा [illegible]
[illegible]" ५१ ॥
"आत्मविषयविषयाणामपि [illegible]
[illegible] प्रत्याहारः ।" ४४ ॥)
व्याकरणे वर्णानां सङ्ग्रहम् । यथा, अण् इति
हायनेन वर्णसमाम्नायग्रहणम् । इति भरतः ॥

प्रत्युक्तिः, स्त्री, (प्रतिवचनमिति । प्रति+वच्+भावे क्तिन् ।) प्रतिवचनम् । प्रत्युत्तरम् । इति शब्दरत्नावली ॥

प्रत्युत, अ, (प्रति च उत च इति द्वन्द्वः ।) वैपरीत्यम् । यथा । कुमारिकाखण्डे तु न केवलं तमाशापयामास प्रत्युत दण्डयामास इति । इति विष्णुस्मृतिटीकायाम् ॥
(यथा मार्कण्डेये । ८४ । १० ।
"विक्रियावत्तया द्विजा विप्रेषु ।
वासो गृहे यो वशी प्रत्युतापकारिणः ॥")

प्रत्युत्क्रमः, पुं, (प्रत्युत्क्रमणमिति । प्रति+उत्+क्रम्+घञ् ।) उपायस्य प्रथमारम्भः । युद्धस्य प्रथमारम्भः । तत्पर्यायः । प्रयोगः २ । इत्यमरः ॥ प्रत्युद्योगः । इति मेदिनी ॥ युद्धार्थं प्रस्थानः । प्रयोगः । प्रक्रमः । इति मेदिनी ॥ युद्धे प्रयोगः प्रयुक्तः । इति मेदिनी ॥ प्रत्यु-त्क्रमः पुरातने इति भाषा । [illegible]
कालिकः । इत्यमरे । अर्थान्तरे प्रत्युत्क्रम प्रयोगः । इत्यमरे । इति भरतः ॥

प्रत्युत्क्रान्तिः, स्त्री, (प्रति+उत्+क्रम्+क्तिन् ।) प्रत्युत्क्रमः । इत्यमरटीकायां नीलकण्ठः ॥

प्रत्युत्तरं, क्ली, (प्रतिरूपमुत्तरम् ।) उत्तरं प्रति उत्तरम् । यथा । [illegible]
इति [illegible]
[illegible] इति [illegible] ॥

प्रत्युत्थानं, क्ली, (प्रत्युत्थीयते इति । प्रति+उत्+स्था+ल्युट् ।) अभ्युत्थानम् । [illegible]
यथा,—

"दीयमानमसेवचापि प्रियया चोद्धवेन च ।
पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥"
इति श्रीभागवते । १० । ५८ । २० ॥

प्रत्युत्पन्नः, त्रि, (प्रति+उत्+पद्+क्तः ।) उत्पत्तिविशिष्टः । प्रत्युत्पूर्व्वपद्धातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः ॥

प्रत्युत्पन्नमतिः, त्रि, (प्रत्युत्पन्ना मतिर्यस्य ।) तत्कालबुद्धियुक्तः । तत्पर्य्यायः । कुशाग्रीयमतिः २ सूक्ष्मदर्शी ३ तत्कालधीः ४ । इति हेमचन्द्रः ॥ प्रतिभान्वितः । इति जटाधरः ॥ (यथा,—
"प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक्पाद उच्यते ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ।)

प्रत्युद्गमनीयं, क्ली, (प्रति+उत्+गम्+अनीयर् ।) धौतांशुकद्वयम् । इति मेदिनी । ये, ११४ ॥ (यथा, कुमारे । ७ । ११ ।
"सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा ॥"
क्वचित् प्रत्युद्गमनीयवस्त्रा इत्यपि पाठः ।) प्रत्युत्थानयोग्ये पूजनीये च, त्रि । इति शब्दरत्नावली ॥

प्रत्युद्गमः, पुं, (प्रति+उत्+गम्+अप् ।) प्रत्युत्थानम् । यथा, साहित्यदर्पणे तृतीयपरिच्छेदे । ७१ ।
"एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्-
दूरतः ॥"

प्रत्युद्गमनं, क्ली, (प्रति+उत्+गम्+ल्युट् ।) प्रत्युत्थानम् । (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्य ! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभावयतामार्य्यः ॥")

प्रत्युषः, पुं, (प्रत्योषति विनाशयति अन्धकारमिति । प्रति+उष् दाहे+"इगुपधेति ।" ३ । १ । १३५ । इति कः ।) प्रत्यूषः । प्रातः । इत्यमरटीकायां मथुरेशः ॥ (यथा, पञ्चतन्त्रे । १ । २१९ ।
"प्रत्युषे च स्वशयनमभ्युपेत्य द्वारदेशस्थितोऽपि विविधपौरलोकोत्सुकतया तामाह्वयति ॥")

प्रत्युषः, [स्] क्ली, (प्रत्योषति नाशयत्यन्धकारमिति । प्रति+उष्+"उषः कित् ।" उणा० ४ । २३३ । इति असिः । स च कित् ।) प्रत्यूषः । इत्यमरः । १ । ४ । २ ॥ यथा, भरतधृतपद्यमेतत् ।
"यानि यस्मिन् पुरस्तादरुणकिसलये प्रत्युषः-
पादिस्थानि ॥"

प्रत्यूषः, पुं, (प्रत्यूषति रुजति अन्धकारमिति । प्रति+ऊष् रोगे+कः ।) प्रभातम् । इत्यमरः । १ । ४ । २ ॥ (यथा, मेघदूते । ३१ ।
"दीर्घीकुर्व्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ॥")
वसुः । इति शब्दरत्नावली ॥ वसुभेदः । इति जटाधरः ॥ (यथा, विष्णुपुराणे । १ । १५ । ११० ।
"वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम् ।
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः ॥")

प्रत्यूषः, [स्] क्ली, (प्रति+ऊष्+असिः ।) प्रभातम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । ६ । २१ ।
"प्रत्यूषस्यपराह्ने तु जीर्णेऽन्ने च प्रकुप्यति ॥")

प्रत्यूहः, पुं, (प्रत्यूहनमिति । प्रति+ऊह्+घञ् ।) विघ्नः । इत्यमरः । १ । ७ । २८ ॥ (यथा, मार्कण्डेये । १६ । ५५ ।
"भर्त्तृशुश्रूषयादैव मया प्राप्तं महत् फलम् ।
धर्म्मकामार्थलाभाय प्रत्यूहाः परिवर्ज्जिताः ॥")

प्रत्येकं, क्ली, एकं एकं प्रति । यथा, कर्पूरस्तवस्तोत्रे ।
"प्रत्येकं वा द्वयं वा त्रयमपि च परं बीज-
मत्यन्तगुह्यम् ॥"
(यथा च कुमारे । २ । ३१ ।
"एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥")

प्रथ, क प्रक्षेपे । ख्यातौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अक०-च सेट् ।) रेफयुक्तः । क, प्राथयति । इति दुर्गादासः ॥

प्रथ, ङ ष ऋ ख्यातौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) रेफयुक्तः । ङ, प्रथयति । ष, प्रथा । ऋ, प्रथते गुणी प्रसिद्धः ख्यात इत्यर्थः । इति दुर्गादासः ॥

प्रथमः, त्रि, (प्रथते प्रसिद्धो भवतीति । प्रथ्+"प्रथेरमच् ।" उणा० ५ । ६८ । इति अमच् ।) प्रधानम् । (यथा, रघुः । १० । ६७ ।
"राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥")
आदिमः । तत्पर्य्यायः । आदिः २ पूर्व्वः ३ पौरस्त्यः ४ आद्यः ५ । इत्यमरः ॥ आदिमः ६ इति जटाधरः ॥ प्राक् ७ । इत्यव्ययवर्गे अमरः ॥ (यथा, विष्णुपुराणे । १ । ११ । ५२ ।
"बाह्यार्थानखिलांश्चित्तं त्याजयेत् प्रथमं नरः ॥")

प्रथा, स्त्री, (प्रथ्+"षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । ततष्टाप् ।) ख्यातिः । इत्यमरः । १ । २ । ८ ॥ (यथा) राजतरङ्गिण्याम् । ५ । १२ ।
" या यथागममतेति याति वाच्यप्रकाशने ॥")

प्रथितः, त्रि, (प्रथ्+क्तः ।) ख्यातः । इत्यमरः । ३ । १ । ९ ॥ (यथा, रघुः । ९ । ७६ ।
"तेनावतीर्य्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः ॥"
आरोपितममरोः पुंसि, पुं । यथा, हरिवंशे । ७ । १३ ।
"हविः प्राप्तनिर्णीतिरायो नाभिरयः स्मृतः ।
प्रथितश्च महायशास्तस्यैव च ।
आरोपितश्च पुत्रास्ते सप्त महात्मनः ॥")

प्रथितिः, स्त्री, (प्रथ्+"स्त्रियां क्तिन् ।" ३ । ३ । ९४ । इति क्तिन् ।) ख्यातिः । प्रथधातोर्भावे क्तिप्रत्ययेन निष्पन्ना । इति व्याकरणम् ॥

प्रथिमा, [न्] पुं, (पृथोर्भावः । "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "रऋतो हलादेर्लघोः ।" ६ । ४ । १६१ । इति रः । "टेः ।" ६ । ४ । १५५ । इति टिलोपः ।) पृथोर्भावः । पृथुत्वम् । इति सिद्धान्तकौमुदी ॥ यथा,—
"प्रथिमानन्दधानेन घनेन जघनेन सा ॥"
इति भट्टिः । ४ । १७ ॥
त्रि, अतिशयेन पृथुः । पृथुशब्दादतिशयार्थे इमनुप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

प्रथिमिनी, स्त्री, (प्रथिमास्त्यस्या इति । प्रथिमन्+"संज्ञायां मन्माभ्याम् ।" ५ । २ । ११० । इति इनिः ।) प्रथमप्रसूतस्त्री । इति सिद्धान्तकौमुदी ॥

प्रथिष्ठः, त्रि, अतिशयेन पृथुः । (पृथु+इष्ठन् ।) अतिबृहत् । इति मुग्धबोधव्याकरणम् ॥

प्रथुकः, पुं, पृथुकः । इत्यमरटीकायां रायमुकुटः ॥

प्रभुभक्तः, पुं, (प्रभोर्भक्तः ।) उत्तमघोटकः । यथा,
"प्रभुभक्ता भक्तिमाश्च कुलीनेषु कुलोद्भवाः ॥"
इति शब्दचन्द्रिका ॥
स्वामिभक्ते, त्रि । यथा, चाणक्यशतके ।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रो लघुचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥"

प्रभूतं, त्रि, (प्र+भू+क्तः ।) प्रचुरम् । इत्यमरः । ३ । १ । ६३ ॥ (यथा, कथासरित्सागरे । १।८।
"तथाभूदभिभूतप्रभूतमायानिकायप्रसर्पिभिः ।
सकलकलानिपुणानां धुर्य्यः श्रीमल्लदेवाख्यः ॥")
उद्गतम् । इति मेदिनी । ते, १२१ ॥ भूतम् । उन्नतम् । इति शब्दरत्नावली ॥

प्रभूष्णुः, त्रि, (प्रभवतीति । प्र+भू+"ग्लाजिस्थश्च ग्स्नुः ।" ३ । २ । १३९ । इति ग्स्नुः ।) क्षमः । शक्तः । इति हेमचन्द्रः । ३ । १५५ ॥

प्रभृति, व्य (प्र+भृ+क्तिन् ।) तदादि । यथा,
"ततःप्रभृति पितरः पितृसंज्ञास्तु लेभिरे ।"
इति तिथ्यादितत्त्वम् ॥

प्रभेदः, पुं, (प्र+भिद्+घञ् ।) भेदः । तत्पर्य्यायः । प्रकारः २ विधिः ३ भिदा ४ अन्तरम् ५ । इति जटाधरः ॥ (यथा, सुश्रुते निदानस्थाने १० अध्याये ।
"विनाशको दुष्टगतिर्ज्वरदाहपाक-
स्फोटप्रभेदबहुलः शतपोनकाख्यः ॥"
स्फोटनम् । यथा, रघुः । ३ । ३७ ।
"बभूव तेनातितरां सुदुःसहः
कटप्रभेदेन करीव पार्थिवः ॥")

प्रभ्रष्टकं, क्ली, (प्र+भ्रंश्+क्तः । ततः स्वार्थे कन् ।) शिखालम्बिमाल्यम् । चूडातो लम्बमानमाल्यम् । इत्यमरभरतौ । २ । ६ । १३५ ॥

प्रमत्तः, त्रि, (प्रमाद्यति स्मेति । प्र+मद्+गत्यर्थेति क्तः । मध्यस्येति नलाभावः ।) प्रमादी । अनवधानतायुक्तः । यथा,—
"मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ।
प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्म्मवित् ॥"
इति श्रीभागवते १ स्कन्धे ७ अध्यायः ॥
"मत्तं मद्यादिना । प्रमत्तमनवहितम् । उन्मत्तं ग्रहवातादिना । जडं अनुद्यमम् । प्रपन्नं शरणागतम् । विरथं भयरथम् ।" इति श्रीधरस्वामी ॥
अपरप्रमत्तो यथा,—
"सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
स च दाता नाकामयतिथः । यथा,—
"मत्तोन्मत्तप्रमत्तार्त्तभृत्यबालाद्यनागसः ॥"
इति मिताक्षरा ॥

प्रमथः, पुं, (प्रमथ्नातीति । प्र+मथ्+अच् ।) घोटकः । शिवपारिषदः । इति शब्दरत्नावली ॥ स च षट्त्रिंशत्कोटिसंख्यकः । यथा,
"षट्त्रिंशत्तु सहस्राणि प्रमथा हिमवत्समाः ।
तथैव च सहस्राणि भानि कोटयः संमिताः ॥
नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः ।
ते सर्वे सकलैश्वर्य्ययुक्ता ध्यानपरायणाः ॥
योगिनो मदमात्सर्य्यमायाहङ्कारवर्जिताः ।
योगेश्वरा महाभागाः शम्भोः प्रीतिकराः
सदा ॥
न ते इच्छन्ति राज्यं काङ्क्षन्ति न वराङ्गनाः ।
संसारविमुखाः सर्वे सततं शिवमानसाः ।
ध्यायन्तो महादेवं संसारार्णवतारकम् ।
इत्थं परिवृते दृष्ट्वा निहन्ति निरन्तरम् ॥
यदेव परमं ज्योतिर्विमलं ब्रह्मकारणम् ।
तदेव ते पारिषदाः सर्वे संवेदयन्ति सम् ॥
ते योऽङ्गमप्रमाणाः कोटयो ये प्रमथाः ।
निःस्पृहाः परिषदाख्या अणिमादिगुणान्विताः ॥
अपरे कामिनः शम्भोः सुकर्म्मफलविदः सदा ।
त्रिविधरूपाभरणा जटाचन्द्रार्द्धमण्डिताः ॥
हरस्य तुल्या रूपेण त्रिनेत्रा वृषभध्वजाः ।
उमाश्रयप्रसादाभिः प्रमदाभिः समागताः ॥
त्रिविधमाल्याभरणा दिव्यगन्धप्रभूषणाः ।
उमासहायं क्रीडन्तमनुगच्छन्ति भूषिताः ।
शृङ्गारवेशाभरणा अष्टौ ते कोटयो गणाः ॥
अर्द्धनारीश्वराश्चापि ह्यर्द्धनारीश्वरं परम् ।
अनुयान्ति महाभागास्तुल्यरूपा हरस्य ये ॥
उमासहायो हि यदा रमते स सुरैर्हरः ।
अर्द्धनारीशरीरास्तु तारयन्तो भवन्ति ते ॥
आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः ।
ध्यानस्थं परिचर्च्चन्ति सलिलादिभिरीश्वरम् ॥
नानायुधधराः शम्भोर्गणास्तु प्रमदाः स्मृताः ।
प्रमथन्ति च युद्धेषु युध्यमानान्सुरारिपून् ।
ते वै महाबलाः शूराः संख्यया नवकोटयः ॥
अपरे गायनाश्चान्ये नृत्यवाद्यादिभिः ।
कुर्व्वन्ति वाद्यं कुर्व्वन्तो गायन्ति मधुरस्वरम् ॥
नानारूपधरास्ते वै संख्यया कोटयोऽष्ट च ।
सततं चानुगच्छन्ति विचरन्तं महेश्वरम् ॥
सर्व्वे मायाविनः शूराः सर्व्वे शास्त्रार्थपारगाः ।
सर्व्वे सर्व्वज्ञ सर्व्वस्थाः सर्व्वे सर्व्वगताः सदा ॥
चतुर्णाम् सर्व्वभुवनं गत्वा यान्ति पुनः पुनः ।
अणिमादिकैश्वर्य्ययुक्तास्ते वै महारथाः ॥
अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः ।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा ॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः ।
कुर्व्वन्ति हि यदा देवाः हरस्य सततं गणाः ॥
विनाशयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति
च ।
अनुगच्छन्ति सततं ध्यानयुक्तमनामयम् ।
विशेषेण सततं ध्नन्ति योगिनां प्रणताश्रयाम् ।
षट्त्रिंशत् कोटयस्ते हरस्य बलिनो गणाः ॥
वराहमवतारादौ हिताय जगतां तथा ।
पुरन्दरस्य च देवानां सहायार्थं इमे गणाः ॥
वराहस्य गतान् दृष्ट्वा नरसिंहं तथा हरिम् ।
तथं परमेशः प्रभु ध्यायन् मार्गं गणोश्वरोन् ॥
तस्योदरात् गणो जाताः सततं बहुरूपिणः ।
शूरदत्ता शूरदैः शूरदैरयमान् महान् ।
वराहस्य तर्जनेन यत्र दीर्घं चकार्द्दिवा ।
तेनके शूरधर्म्मार्थः प्रसादाय महेश्वराः ॥
न यदा शूरधर्म्माद्भि ते पुर्यम् महौजसः ।
हरिमाज्ञया ते शूराः शूरप्रयाय कार्य्यतः ॥
यत्र यत्र तदा दृष्टं तत्र तत्र महेश च ।
विबेरितानि सर्व्वाणि दर्शयन्त्याशु ॥
आत्मशक्तिं च सुवन्ति वर्षं दृष्ट्वा च महेश ।
अग्रेश्वरस्य सहिताः ज्योतिर्भिः महौजसः ॥
आमन्त्र्य वांश्च वाक्यानि प्रियाणि पैशवेन्द्रोणिः ।
सवर्णितो पुरे पुच्छं चतुर्थ्यां तथा ...

[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
इति च [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।"
इति [illegible] ।
(प्रमदायाः [illegible] । यथा, महाभारते । १ । १२० । १९ ।
"[illegible]।")

प्रमदनं, क्ली, (प्र + मद + भावे ल्युट् ।) [illegible] ।

प्रमदवनं, क्ली, (प्रमदाभिः वनमिव । [illegible]) [illegible] ।
"[illegible]"
[illegible] ।

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति । प्र + मद + णिच् + अच् । टाप् ।) उत्तमस्त्री । इति मेदिनी । दे, ११ । (यथा, कुमारे । ३ । १९ ।
"[illegible]
[illegible]
[illegible]
प्रमदानामपुत्रा विद्रुमता ॥")
[illegible] ।
"[illegible] प्रमदा ॥")

प्रमदाकाननं, क्ली, (प्रमदायाः काननम् ।) प्रमदवनम् । [illegible] ।

प्रमदावनं, क्ली, (प्रमदायाः वनम् ।) प्रमदवनम् । इति शब्दरत्नावली ।

प्रमना:, [स्] त्रि, (प्रकृष्टं मनोऽस्य ।) हृष्टमनाः । इत्यमरः । ३ । १ । ७ । (यथा, महाभारते । ८ । ३० । ३६ ।
"इति बहुविधं प्रमापति
प्रमनसि [illegible] ॥")

प्रमयः, पुं, (प्र + मी वधे + भावे अच् ।) वधः । इति हेमचन्द्रः । ३ । ३३ । (यथा, राघवपाण्डवीयम् । १ । ८ ।
"[illegible]
[illegible] ॥")

प्रमा, स्त्री, (प्रमीयते इति । प्र + माङ् माने + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) यथार्थज्ञानम् । तत्पर्यायः । प्रमितिः २ । इत्यमरः । १ । ५ । १० ॥ प्रमाणम् ३ । इति शब्दरत्नावली । (यथा, प्रबोधचन्द्रोदये । ५ अङ्के ।
"[illegible]
[illegible] ॥"
यथा च ऋग्वेदे । १० । १३० । ३ ।
"कासीत् प्रमा प्रतिमा किम् ॥"
"[illegible] ॥"
इति [illegible] ।) [illegible] ।
यथा,—
"[illegible]
[illegible]
[illegible]
[illegible] ॥

[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।"
इति भाषापरिच्छेदे । [illegible]
[illegible]

प्रमाणं, क्ली, (प्रमीयते [illegible] ।) [illegible] । यथा,—
"[illegible]
इति महाभारते [illegible] ।
[illegible]
[illegible] ।) [illegible] ।
(प्र + मा + भावे ल्युट् ।) [illegible] ।
[illegible] इति मेदिनी । [illegible]

इति शब्दरत्नावली ॥ निश्चयैककारणमयं शब्दः । यथा वेदाः प्रमाणं स्मृतयः प्रमाण-मित्यादि ॥ प्रमायाः करणम् । न्याये तु प्रत्यक्षा-नुमानोपमानशब्दाः प्रमाणानि । इत्यत्र बहु-वचनान्तोऽपि ॥ (यथा, मनौ । २ । १३ ।
"अर्थकामेष्वसक्तानां धर्म्मज्ञानं विधीयते ।
धर्म्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"
वेदान्तसारे च । "वेदान्तो नाम उपनिषत्-प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ॥"
"उपनिषच्छब्दो ब्रह्मात्मैक्यविद्याप्रतिपादकविषयः । सैव उपनिषत् प्रमाणं यस्याः प्रमाणस्याया: करणभूता ।" इति विद्वन्मनोरञ्जनीटीका ॥)

प्रमाणबाधितार्थकः, पुं, (प्रमाणेन बाधितः अर्थो यस्य । ततः कप् ।) तर्कविशेषः । तस्य लक्षणम् । आत्माश्रयादिचतुष्कान्यप्रसञ्जनत्वम् । स द्विविधः । आनिष्टप्रसञ्जकः विषयपरिशोधकश्च । तत्राद्यो यथा । धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यात् । द्वितीयस्तु पर्व्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यात् । इति तर्कवागीशी ॥

प्रमातामहः, पुं, (प्रकृष्टो मातामहस्तस्यापि जनकत्वादिति । प्रादिसमासः ।) मातामह-पिता । यथा, अमरे ।
"पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"

प्रमातामही, स्त्री, (प्रकृष्टा मातामही ।) प्रमाता-महपत्नी । इति स्मृतिः ॥

प्रमाथः, पुं, (प्र + मथ् + भावे घञ् ।) प्रम-थनम् । बलात् हरणम् । इति पुराणम् ॥ (निपात्य भूमौ पेषणम् । यथा, महाभारते । ४ । १९ । २७ ।
"हस्तपादतलैश्चैव जानुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्माथनैस्तथा ॥"
अत्र टीकायां नीलकण्ठेन प्रमाथोन्माथयोः स्व-लक्षणमुक्तम् । यथा,—
"निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते ॥"
कुमारस्यानुचरभेदः । यथा, महाभारते । ९ । ४५ । ३५ ।
"ततः पारिषदौ प्रादात् यमः कालोपमावुभौ ।
उन्माथञ्च प्रमाथञ्च महावीर्यौ महाद्युती ॥"
शिवपारिषदगणभेदः । यथा, हरिवंशे । १०८ । ६६ ।
"ते प्रतीक्ष्यमाणा देवदानवराक्षसाः ।
प्रमाथगणमुख्याश्च प्रादुर्भूता महाबलाः ॥")

प्रमाथी, [न्] त्रि, प्रपूर्व्वमथधातोः कर्त्तरि णिन् । क्षोभकर्त्ता । मारकर्त्ता । मथनशीलः । देवैर्मथ्यते इति । इति श्रीधरस्वामी ॥ यथा,—
"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।"
अपि च ।
"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।"
इति श्रीभगवद्गीता ॥

प्रमादः, पुं, (प्र + मद् + भावे + घञ् ।) अनव-धानता । इत्यमरः । १ । ७ । ३० ॥ यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुडे नीतिसारे ११५ अध्यायः ॥

प्रमादवान्, [त्] त्रि, (प्रमादोऽस्यास्तीति वा । प्रमाद + मतुप् । मस्य वः ।) प्रमादयुक्तः । तत्-पर्य्यायः । अज्ञः १ असमीक्ष्यकारी २ मूढः ३ । इति जटाधरः ॥ (यथा, याज्ञ-वल्क्ये । १ । १२८ ।
"निर्दयः क्रूरलुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेन्निर्ग्रन्थ तामसः ॥")

प्रमादिका, स्त्री, (प्रमादोऽनवधानतास्त्यस्या इति । प्रमाद + ठन् । टाप् ।) दूषिता कन्या । तत्पर्य्यायः । संवेदा १ दूषिता २ धर्षकारिणी ३ । इति शब्दरत्नावली ॥

प्रमादी, [न्] त्रि, (प्रमादोऽस्यास्तीति । प्रमाद + इनिः ।) प्रमादविशिष्टः । अनवधानतायुक्तः । यदुक्तम् ।
"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"

प्रमापणं, क्ली, (प्र + मी ञ हिंसायाम् + स्वार्थे णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११० ॥ (यथा, मनुः । ११ । १४१ ।
"अस्थिमतान्तु सत्त्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतञ्चरेत् ॥")

प्रमितः, त्रि, (प्र + मि + क्तः । यद्वा, प्र + मा + क्तः । "द्यतिस्यतिमास्थेति ।" ७ । ४ । ४० । इतीत्वम् ।) ज्ञातः । इति जटाधरः ॥ (अल्प-तमम् । इति विश्वयाचितः ॥ यथा, निदाने चर्म्मरोगाधिकारे ।
"प्रमिताशनापनं तीव्रं मद्यं मैथुनवर्जनम् ।"
परिमितम् । यथा, ऋक्संहितायाम् । १० । ४ । १० ।
"प्रमितापराणि वदन् ॥")

प्रमितिः, स्त्री, (प्र + मा वा मि + क्तिन् ।) प्रमा । इत्यमरः । १ । ५ । १ ॥

प्रमीढः, त्रि, (प्र + मिह सेचने + क्तः ।) घनः । मूत्रितः । इति मेदिनी । ढे, ८ ॥ (यथा,—
"अमूर्वलीढा प्रमीढाया निर्व्याभिस्त्विह वि-
भाम् ।
शिशिरे कठिनं तुष्टमपि वा नतिकारिणाम् ॥"
इति चरके सूत्रस्थाने हारिद्राध्याये ॥)

प्रमीतः, त्रि, (प्र + मी ञ हिंसायाम् + क्तः ।) मृतः । यज्ञार्थहतपशुः । इत्यमरः । २ । ७ । २७ ॥

प्रमीला, स्त्री, (प्रमीलनमिति । प्र + मील सङ्को-चने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । ततष्टाप् ।) तन्द्री । इत्यमरः । १ । ७ । ३७ ॥

प्रमुखं, क्ली, (प्रकृष्टं मुखमारम्भः ।) तत्कालम् । तत्क्षणः । इति त्रिकाण्डशेषः ॥ (सम्मुखम् । यथा, भगवद्गीतायाम् । २ । ६ ।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥")

प्रमुखः, पुं, (प्रकृष्टं मुखं अग्रभागो यस्य ।) पुन्नागवृक्षः । इति शब्दचन्द्रिका ॥ वरदः । इति शब्दरत्नावली ॥

प्रमुखः, त्रि, (प्रकृष्टं मुखमाद्यं यस्य ।) प्रधा-नम् । (यथा, कुमारसम्भवे । २ । ३८ ।
"व्यवस्थितविधिश्चायमं वायुविप्रमुखा दिवि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः मर्त्त्यपावके ॥")
श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, हितोपदेशे । १ । १२४ ।
"सर्वेषु प्रमुखो दक्षो न तदन्यो महीपतिः ॥")
प्रथमः । इति मेदिनी । खे, १० ॥ (यथा, महाभारते । २ । ६ । २ ।
"नारदप्रमुखास्तत्र अन्ये च महात्मनः ।
समासीनाः शुभैरेव सह राजर्षिभिस्तथा ॥")
मान्यः । इति शब्दरत्नावली ॥

प्रमुत्, [द्] त्रि, (प्रकृष्टा मुत् प्रीतिर्यस्य ।) हृष्टः । इत्यमरः । ३ । १ । १०२ ॥ (प्रकृष्टा मुदिति विग्रहे प्रकृष्टानन्दे, स्त्री । यथा, महाभारते । १४ । ७ । ६ ।
"श्रुत्वा तु पार्थिवश्रेष्ठो धर्म्मात्मा प्रमुदं ययौ ॥")

प्रमुदितः, त्रि, (प्र + मुद + क्तः । "उदुपधा-दिति ।" १ । २ । २१ । इति पक्षे किन् ।) हृष्टः । इत्यमरः । ३ । १ । १०२ ॥ (यथा, देवीभागवते । ६ । १९ । ४७ ।
"शाश्वतो परिरभ्येकं दयालिकामं
भारावतिं प्रमुदितः पुनः पुनः ॥")

प्रमेहः, पुं, (प्रकर्षेण मेहति क्षरति वीर्य्यादिकमनेनेति । प्र + मिह सेचने + करणे घञ् ।) रोगविशेषः । तत्पर्य्यायः । मेहः १ मेहरोगः २ । इति राजनिर्घण्टः ॥ बहुमूत्रता ३ । इति हेमचन्द्रः । ४ । १११ ॥ अस्य निदानम् ।
"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुडवैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्व्वम् ॥" ७ ॥
अस्य सम्प्राप्तिर्यथा,—
"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो बस्तिगतः प्रदूष्य ।
करोति मेहान् समुदीर्णमुष्णै-
स्तानेव पित्तं परिदूष्य चापि ॥" ७ ॥
वातिकस्य तस्य लक्षणम् ।
"क्षीणेषु दोषेष्ववकृष्य धातून्
सन्धूक्ष्य मेहान् कुरुतेऽनिलश्च ॥" ७ ॥
तत्र कफादिभिरेव वातादिक्रमः । यथा,
"साध्याः कफोत्था दश पित्तजाः षट्
याप्या न साध्याः पवनाच्चतुष्काः ।
समक्रियत्वाद्विषम-
क्रियत्वान्महात्ययत्वाच्च यथाक्रमं ते ।
कफः सपित्तः पवनश्च दोषा
मेदोऽस्रशुक्राम्बुवसालसीकाः ।

ततः सर्व्वे गणास्तत्र भुञ्जन्ते प्रतलान्यपि ।
एते षडाढ्यस्य गति भर्गमाषाद्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमप्रकेषां चतुर्भागवतां तदा ।
तत्त्वात् पञ्चजातस्य भूतग्रामाकृती मताः ।
यो लोकनिर्दिग्ः पूर्व्वं भूतग्रामश्चतुर्व्विधः ।
यस्तेभ्योऽधिका यस्मैत्तद्दृढग्राम उच्यते ॥
इति चः सर्व्वमाख्यातं भूताः प्रमथगणा यथा ।
यदाचारा यदाकारा यत्प्रभावाश्च महौजसः ॥
य इदं प्रथमपापाच्छ्रमाख्यानं योगमुत्तमम् ।
स दीर्घायुः महोत्साही योगयुक्तश्च जायते ॥"

इति कालिकापुराणे पारिषदोत्पत्तिर्नाम ४९ अध्यायः ॥ (धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते । १ । ११७ । १२ ।

"प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् ॥")

प्रमथनं, क्ली, (प्र + मथ + भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ (यथा, रामायणे । १ । ३ । २४ ।

"वालिप्रमथनञ्चैव सुग्रीवप्रतिपादनम् ॥"

क्षोभनम् । विलोडनम् । इति मथधात्वर्थदर्शनात् ॥ (प्रकर्षेण मथतीति । प्र + मथ् + ल्युः । प्रमाथके, त्रि । यथा, महाभारते । १ । १९० । २६२ ।

"स चाश्विरूपसदृशो देवतुल्यपराक्रमः ।
मर्म्माघातैव नारीणां चित्तप्रमथनो रहः ॥")

प्रमथा, स्त्री, (प्रमथति पित्तदोषानिति । प्र + मथ् + अच् ।) हरीतकी । इति मेदिनी । थे, २१ ॥ (गुणादिकमस्य हरीतकीशब्दे ज्ञातव्यम् ॥)

प्रमथाधिपः, पुं, (प्रमथानां अधिपः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥

प्रमथितं, क्ली, (प्रकर्षेण मथितम् ।) निर्जलतक्रम् । इति राजनिर्घण्टः ॥

प्रमदः, पुं, (प्र + मद् + "प्रमदसंमदौ हर्षे ।" ३ । ३ । ६८ । इति अप् ।) हर्षः । इत्यमरः । १ । ४ । २४ ॥ (यथा, कथासरित्सागरे । ६ । १६२ ।

"तच्छ्रुत्वा मम राज्ञश्च विषादप्रमदौ हृदोः ।
अभूतां मेघमालोक्य हंसचातकयोरिव ॥"

प्रमाद्यत्यनेनेति । प्र + मद् + करणे अप् ।) धुस्तूरफलम् । इति शब्दचन्द्रिका ॥ (दानवविशेषः । यथा, हरिवंशे । ३ । ८० ।

"प्रमदो मयः क्रथनो हयग्रीवश्च वीर्य्यवान् ॥"

वशिष्ठतनयानामन्यतमः । स तु उत्तममन्वन्तरे सप्तर्षिप्रभेदः । यथा, भागवते । ८ । १ । २३ ।

"वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥")

प्रमाद्यतीति । प्र + मद् + कर्त्तरि अच् । यद्वा प्रकर्षेण मदोऽस्य ।) मत्ते, त्रि । इति मेदिनी । दे, ७५ ॥ (यथा, रघौ । १९ । ६० ।

"प्रावृषि प्रमदबर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः ॥")

प्रमदकाननं क्ली, (प्रमदानां काननम् । "ङ्यापोः संज्ञाछन्दसोर्बहुलम् ।" ६ । ३ । ६३ । इति ह्रस्वः । यद्वा, प्रमदाय हर्षाय यत् काननम् ।) प्रमदावनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदवनं, क्ली, (प्रमदानां वनमिति । "ङ्यापोरिति ।" ६ । ३ । ६३ । इति ह्रस्वः ।) राज्ञोऽन्तःपुरोचितवनम् । इत्यमरः । २ । ४ । ३ ॥

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति । प्र + मद हर्षे + णिच् + अच् । यद्वा, प्रमदो हर्षोऽस्त्यस्या इति अच् । टाप् ।) उत्तमयोषित् । इति मेदिनी । दे, ५ ॥ (यथा, कुमारे । ४ । १२ ।

"नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना ॥")

चतुर्द्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम् ।

"ननभजला गुरुश्च भवति प्रमदा ॥")

प्रमदाकाननं क्ली, (प्रमदानां काननम् ।) प्रमदवनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदावनं, क्ली, (प्रमदानां वनम् ।) प्रमदवनम् । इति शब्दरत्नावली ॥

प्रमनाः, [स्] त्रि, (प्रकृष्टं मनोऽस्य ।) हर्षयुक्तः । इत्यमरः । ३ । १ । ७ ॥ (यथा, महाभारते । ८ । ३० । ४१ ।

"इति मद्रपतिं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ॥")

प्रमयः, पुं, (प्र + मी वधे + भावे अच् ।) वधः । इति हेमचन्द्रः । ३ । ३३ ॥ (यथा, राजतरङ्गिण्याम् । १ । ९ ।

"दृष्टं दृष्टं नृपोदन्तं बद्धा प्रमयमीयुषाम् ।
अर्व्वाक्कालभवैर्वार्त्ता यत्प्रबन्धेषु पूर्य्यते ॥")

प्रमा, स्त्री, (प्रमीयते इति । प्र + माङ् माने + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) यथार्थज्ञानम् । तत्पर्य्यायः । प्रमितिः २ । इत्यमरः । ३ । २ । १० ॥ प्रमाणम् ३ । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । २य अङ्के ।

"प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥"

यथा च ऋग्वेदे । १० । १३० । ३ ।

"कासीत् प्रमा प्रतिमा किम् ॥"

"यस्य प्रमा प्रमाणमियत्ता का कथम्भूतासीत् ।" इति तद्भाष्ये सायनः ।) न्यायमते तद्वति तत्प्रकारकज्ञानम् । भ्रमभिन्नज्ञानम् । अस्याः कारणं गुणः । स च प्रत्यक्षे विशेष्ये विशेषणस्य सम्बन्धः । अनुमितौ साध्यविशिष्टपक्षे परामर्शः । शाब्दबोधे योग्यतायाः तात्पर्य्यस्य वा यथार्थज्ञानम् । उपमितौ पक्षे सादृश्यबुद्धिः । यथा,—

"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ।
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा ।
गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ।
अथवा तत्प्रकारं यत् ज्ञानं तद्वद्विशेष्यकम् ॥"

इति भाषापरिच्छेदे । १३१-१३५ ।

("दोषः इति । अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्र पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमा ज्ञानगतकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमिति वाच्यम् । पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् पित्तप्रमाविरहात् अनन्तदोषाभावस्य कारणत्वापेक्षया गुणकारणतायां लाघवात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धात् शङ्खे न पीतज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च गुणस्य हेतुत्वकल्पनमेवेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः । एवं अत्र प्रति गुणाभावः कारणमित्यस्यापि सम्भवात् । तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति । क्वचित् पीतादिभ्रमे पित्तं दोषः क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः । क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं दोषा नानाविधा इत्यर्थः । अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्ष इति । प्रत्यक्षे विशेषणवत् विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण इति वचनमपेऽप्यूह्यः । प्रमां निरूपयति भ्रमभिन्नमिति । ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवेति । तद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः । इदन्तु बोध्यम् । येन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः ॥" * ।)

प्रमाणं, क्ली, (प्रमीयते विषयमनेनेति । प्र + मा + ल्युट् ।) हेतुः । यथा,—

"प्रमाणं प्राणविषयः प्राणवत् प्राणवीरः ।"

इति महाभारते शान्तिपर्व्वणि दानधर्म्मः । नित्यम् । मर्य्यादा । शास्त्रम् । यथा,—

"आसत्र ख्यातिकेऽस्मिन् विभागविदो विदेशुपसादयविंशच । तैर्नामैवहुतपोऽनाश वर्षं सत् प्रमाणम् । अथ मार्ग्य प्रमेयमौख वर्षं सत्तद्भ्यातु दुद्धरणमिति ।" इति चरके विमानस्थाने चतुर्थेऽध्याये ।) इयत्ता । हेतुः । (प्र + मा + भावे ल्युट् ।) इयत्ता । हेतुः । (प्रमिमीतेऽनेनेति । प्र + मा + कर्त्तरि ल्युट् ।) प्रमाता । इति मेदिनी । णे, ११ ॥ प्रमा ।

इति शब्दरत्नावली । निश्चितैकत्वबोधकं शब्दः । यथा वेदाः प्रमाणं स्मृतयः प्रमाणमित्यादि । प्रमायाः करणम् । न्याये तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । इत्यत्र बहुवचनान्तोऽपि । (यथा, मनौ । २ । १३ ।
"अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"
वेदान्तसारे च । "वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ॥"
"उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः । सैव उपनिषत् प्रमाणं यस्याः प्रमाकरणायाः करणभूता ।" इति विद्वन्मनोरञ्जनीटीका ।)

प्रमाणबाधितार्थकः, पुं, (प्रमाणेन बाधितः अर्थो यस्य । ततः कप् ।) तर्कविशेषः । तस्य लक्षणम् । व्याप्यस्याप्यारोपात् व्यापकस्याप्यारोपः । स द्विविधः । व्याप्तिग्राहकः विषयपरिशोधकश्च । तत्राद्यो यथा । धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यात् । द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यात् । इति तर्कभाषादीपिका ।

प्रमातामहः, पुं, (प्रकृष्टो मातामहस्तस्यापि जनकत्वादिति । प्रादिसमासः ।) मातामहपिता । यथा, अमरे ।
"पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"

प्रमातामही, स्त्री, (प्रकृष्टा मातामही ।) प्रमातामहपत्नी । इति स्मृतिः ॥

प्रमाथः, पुं, (प्र+मथ्+भावे घञ् ।) प्रमथनम् । बलात् हरणम् । इति पुराणम् । (निपात्य भूमौ पेषणम् । यथा, महाभारते । ४ । १९ । ५० ।
"सन्नतिहतेषिवाङ्कुभिन्न इभहेटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥"
अत्र टीकायां नीलकण्ठेन महाभाष्यात् एतल्लक्षणमुद्धृतम् । यथा,—
"निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते ।"
कुमारस्यानुचरभेदः । यथा, महाभारते । ९ । ४५ । ५८ ।
"तमः प्रासादनुचरौ ददौ कालोन्मथावुभौ ।
उच्छ्रायञ्च प्रमाथञ्च महावीर्यौ महाद्युती ॥"
धृतराष्ट्रपुत्रभेदः । यथा, हरिवंशे । १०८ । ११ ।
"ते प्रमाथश्च दुर्दर्शो दुराधर्षो दुरासदः ।
प्रमाथश्चात्मनश्चैव प्राद्युम्नान् समुपाद्रवन् ॥")

प्रमाथी, [न्] त्रि, प्रपूर्वमथधातोः कर्त्तरि णिन् । पीडनकर्त्ता । मारणकर्त्ता । मन्थनशीलः । ईरितविक्षोभश्च इत्यर्थः । इति श्रीधरस्वामी । यथा,—
"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।"
अपि च ।
"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥"
इति श्रीभगवद्गीता ॥

प्रमादः, पुं, (प्र+मद्+भावे+घञ् ।) अनवधानता । इत्यमरः । १ । ७ । ३० ॥ यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुडे नीतिसारे ११५ अध्यायः ॥

प्रमादवान्, [त्] त्रि, (प्रमादोऽस्यास्तीति वा । प्रमाद+मतुप् । मस्य वः ।) प्रमादयुक्तः । तत्पर्यायः । जाल्मः २ असमीक्ष्यकारी ३ प्रमादी ४ । इति जटाधरः ॥ (यथा, याज्ञवल्क्ये । १ । ३३८ ।
"निर्दयाः क्रूरलुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्य्यग्गु तामसः ॥")

प्रमादिका, स्त्री, (प्रमादोऽनवधानतास्त्यस्या इति । प्रमाद+ठन् । टाप् ।) दूषिता कन्या । तत्पर्य्यायः । धर्षिता २ दूषिता ३ धर्षकारिणी ४ । इति शब्दरत्नावली ।

प्रमादी, [न्] त्रि, (प्रमादोऽस्यास्तीति । प्रमाद+इनिः ।) प्रमादविशिष्टः । अनवधानतायुक्तः । यदुक्तम् ।
"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"

प्रमापणं, क्ली, (प्र+मी ञ हिंसायाम्+स्वार्थे णिच्+भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११० ॥ (यथा, मनुः । ११ । १४९ ।
"अविज्ञाताद्व चाधानो कृच्छ्रस्य प्रमापणे ।
पूर्व्वे चान्द्रायणद्धान्तु शूद्रहत्याव्रतञ्चरेत् ॥")

प्रमितः, त्रि, (प्र+मि+क्तः । यद्वा, प्र+मा+क्तः । "द्यतिस्यतिमास्थेति ।" ७ । ४ । ४० । इतीत्वम् ।) ज्ञातः । इति जटाधरः ॥ (अल्पतमम् । इति विश्वप्रकाशः । यथा, विदग्धे आग्नेयीनामाधिकारे ।
"प्रमिताल्पायनं तीक्ष्णं मन्दं मैथुनकैश्यम् ।"
परिमितम् । यथा, ऋतुसंहितायाम् ।१० ।१०७ ।
"प्रमिताक्षराभिः वदन् ।")

प्रमितिः, स्त्री, (प्र+मा वा मि+क्तिन् ।) प्रमा । इत्यमरः । १ । ५ । १० ॥

प्रमीढः, त्रि, (प्र+मिह सेचने+क्तः ।) घनः । मूत्रितः । इति मेदिनी । ढे, ८ ॥ (यथा,—
"प्रमूढोविशा प्रमीढाभो विम्बाभिष्यन्दिनाहि-
ताम् ।
छिद्रिते लब्धं प्रस्तमपि वातविकारिणाम् ॥"
इति चरके उत्तरार्द्धे वातविद्रध्यधाये ॥)

प्रमीतः, त्रि, (प्र+मी ञ हिंसायाम्+क्तः ।) मृतः । यज्ञार्थहतपशुः । इत्यमरः ।२।७।२७॥

प्रमीला, स्त्री, (प्रमीलनमिति । प्र+मील संमीलने+"गुरोश्च हलः ।" ३ । ३ । १०३ । इति । अ । ततष्टाप् ।) तन्द्रा । इत्यमरः । १ । ७ । १४९ ॥

प्रमुखं, क्ली, (प्रकृष्टं मुखमारम्भः ।) तत्क्षणम् । तद्गुणकः । इति त्रिकाण्डशेषः । (सम्मुखम् । यथा, भगवद्गीतायाम् । १ । २५ ।
"भीष्मद्रोणप्रमुखतः सर्वेषाञ्च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥")

प्रमुखः, पुं, (प्रकृष्टं मुखं उपभागो यस्य ।) पुन्नागवृक्षः । इति शब्दचन्द्रिका । श्रेष्ठः । इति शब्दरत्नावली ।

प्रमुखः, त्रि, (प्रकृष्टं मुखमाद्यं यस्य ।) प्रथमम् । (यथा, कुमारसम्भवे । ५ । ३८ ।
"त्वमक्षविस्तिरत्नपरिष्कृतां वपुस्तिः प्रमुखा निधिः ।
स्थिरप्रदीपतामेत्य भुजङ्गाः प्रमुखं भवन्ति ॥")
श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, हितोपदेशे । १ । १२४ ।
"कथेषु प्रमुखो दक्षो न तदाज्ञो महीपतिः ॥")
प्रथमः । इति मेदिनी । खे, १० ॥ (यथा, महाभारते । २ । ६ । २ ।
"नारदप्रमुखास्तस्यामन्तर्वेद्यां महात्मनः ।
समासीनाः शुशुभिरे सह राजर्षिभिस्तथा ॥")
मान्यः । इति शब्दरत्नावली ॥

प्रमुत्, [द्] त्रि, (प्रकृष्टामुत् प्रीतिर्यस्य ।) हृष्टः । इत्यमरः । ३ । १ । १०२ ॥ (प्रकृष्टा मुदिति विग्रहे प्रकृष्टानन्दे, स्त्री । यथा, महाभारते । १४ । ७ । ६ ।
"श्रुत्वा तु पार्थिवस्त्वेतद् धर्मात्मा प्रमुदं गतः ॥")

प्रमुदितः, त्रि, (प्र+मुद्+क्तः । "उदुपधात्-दिति ।" १ । २ । २१ । इति पक्षे किन् ।) हृष्टः । इत्यमरः । ३ । १ । १०२ ॥ (यथा, देवीभागवते । ६ । १५ । ४७ ।
"कामयन्ते वरारोहे रमणीकामं
मारातुरं प्रमुदितः पुरुषः पुरातनः ॥")

प्रमेहः, पुं, (प्रकर्षेण मेहति क्षरति मूत्रादिरनेनेति । प्र+मिह क्षरणे+करणे घञ् ।) रोगविशेषः । तत्पर्य्यायः । मेहः २ मधुरोगः ३ । इति राजनिर्घण्टः ॥ बहुमूत्रता ४ । इति हेमचन्द्रः । ३ । १३४ ॥ अस्य निदानम् ।
"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुडवैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्वम् ॥" ० ॥
अस्य सम्प्राप्तिर्यथा,—
"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो बस्तिगतः प्रदूष्य ।
करोति मेहान् समुदीर्णमुष्णै-
स्तानेव पित्तं परिदूष्य चापि ॥" ० ॥
वातिकस्य तस्य लक्षणम् ।
"क्षीणेषु दोषेष्ववकृष्य धातून्
सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥" ० ॥
तस्य कफादिभेदेन कारणान्युक्तानि । यथा,
"कफकः सतोऽत्र दश पित्तकृतः षट्
कफात्तु वाताः स्वसदागुणाः ।
मर्म्मसन्धिरसादुष्टाः
असाध्यत्वमायान्ति यथाक्रमेण ।
कफः स्वैरम् स्थानञ्च दोषा
दोषोऽनुबन्धानुसारतरतोऽपि ॥

मज्जा रसौजः पिशितञ्च दूष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥” * ॥
तस्य पूर्व्वरूपम् ।
“दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे तृट् स्वाद्वास्यञ्च जायते ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः ।
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ॥” * ॥
क्रमेण कफजानां दशानां लक्षणानि ।
“अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम् ।
मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम् ॥
इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ।
सान्द्रो भवेत् पर्य्युषितं सान्द्रमेहेन मेहति ॥
सुरामेही सुरातुल्यमुपर्य्यच्छमधो घनम् ।
संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सितम् ॥
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ।
मूर्त्ताणून् सिकतामेही सिकतारूपिणो मलान् ॥
शीतमेही सुबहुशो मधुरं भृशशीतलम् ।
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥”
क्रमेण पित्तजानां षण्णां लक्षणानि ।
“गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ।
नीलमेहेन नीलाभं कालमेही मसीनिभम् ।
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् ॥
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ।
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥” * ॥
क्रमेण वातजानां चतुर्णां लक्षणानि ।
“वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः ।
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ॥
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्ज्जितम् ।
सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति ॥” * ॥
कफजादिभेदेन तेषामुपद्रवाः ।
“अविपाकोऽरुचिश्छर्द्दिर्निद्राकासः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥
वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाम्लिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥
वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः ।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥”
अरिष्टलक्षणम् ।
“यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव च ।
पिडकापीडितं गाढं प्रमेहो हन्ति मानवम् ॥
जातः प्रमेही मधुमेहिनो वा
न साध्यरोगः स हि वीजदोषात् ।
ये चापि केचित् कुलजा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥ * ॥
सर्व्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि ॥
मधुमेहे मधुसमं जायते स किल द्विधा ।
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ।
आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयेत् ।
क्षीणः क्षणात् क्षणात् पूर्णो भजते कृच्छ्र-साध्यताम् ॥
मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।
सर्व्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥ * ॥
प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम् ।
विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥”
इति माधवकरः ॥
अस्य दशविधपिडकाः पिडकाशब्दे द्रष्टव्याः ॥
अथ प्रमेहस्य चिकित्सा ।
“श्यामाककोद्रवोद्दाला गोधूमचणकाढकी ।
कुलत्थाः कथिता भोज्ये पुराणा मेहिनो हिताः ॥
यवान्नविकृतिर्मुद्गाः शालयः षष्टिकास्तथा ।
तथा तिक्तानि शाकानि जाङ्गलाः पक्षिणो मृगाः ॥
उद्दालो वनकोद्रवः ॥ * ॥
प्रमेही गुडदुग्धाम्लतैलमत्स्यसुराः सदा ।
धूम्रेक्षुरसपिष्टान्नानूपमांसानि वर्ज्जयेत् ॥ * ॥
मुस्ताहरीतकीलोध्रैः कट्फलेन शृतं जलम् ।
पीतं मधुयुतं हन्ति प्रमेहं कफहेतुकम् ॥ * ॥
पटोलनिम्बामलकामृतानां
पिबेत् कषायं मधुना समेतम् ।
उशीरलोध्रार्ज्जुनचन्दनानां
तथा पिबेत् पित्तनिमित्तमेही ॥ * ॥
पाठाशिरीषदुःस्पर्शाशितिन्दुककिंशुकैः ।
कपित्थस्य भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥
पाठादिभिः सहितस्य कपित्थस्य क्वाथम् ।
गुडूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित् ।
हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥
मधुना सेवितं चूर्णमभयामलकोद्भवम् ।
लोहचूर्णं साभयोत्थं वा तिल्वाम्बुमेहनिहतये ॥ * ॥
चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्ती पत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संग्रहीयात् पृथक् पृथक् ।
द्विकर्षं हतलोहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
चतस्रश्चाश्मरीर्जन्तूनानाहांश्चोदरम् ।
अण्डवृद्धिं पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नाद्गुटिकामिमाम् ।
प्राप्तवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥
चन्द्रप्रभा कर्पूर इति लोके । व्योषं त्रिकटु । द्वौ क्षारौ सर्जिकायवक्षारौ । लवणत्रयम् । सैन्धवं रुचकञ्चापि विडञ्च लवणत्रयमिति चन्द्रप्रभादिर्वटिका ॥ * ॥
प्रमेहपिडकानां प्राक् कार्य्यं रक्तविमोक्षणम् ।
पाटनञ्च विपक्कानां ततो व्रणविधिः स्मृतः ॥”
इति भावप्रकाशः ॥
(अस्य सकारणपूर्व्वरूपसम्प्राप्त्युपशयादि । यथा,—
“त्रिदोषकोपनिमित्ता विंशतिप्रमेहविकारा श्चापरेऽपरिसङ्ख्येयाः । तत्र यथा त्रिदोषप्रकोपः प्रमेहानभिनिर्व्वर्त्तयन्ति तथानुव्याख्यास्यामः ।
इह खलु निदानदोषदूष्यविशेषेभ्यो विकारा विघातभावाभावप्रतिविशेषा भवन्ति । यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्ति अथवा कालप्रकर्षादबलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्व्वृत्तिः । चिराद्वाप्यभिनिर्व्वर्त्तन्ते तनवो भवन्त्ययथोक्तसर्व्वलिङ्गा वा विपर्य्यये तु विपरीता इति सर्व्वविकारविघातभावाभावप्रतिविशेषाभिनिर्व्वृत्तिहेतुर्भवत्युक्तः ।
तत्र इमे निदानादि विशेषाः श्लेष्मनिमित्तानां प्रमेहाणामाश्वभिनिर्व्वृत्तिकराः । तद्यथा हायनकयवचीनकोद्दालकनैषधोत्कटमुकुन्दकमहाव्रीहिप्रमोदकसुगन्धकानां नवानामतिवेलमतिप्रमाणेनोपयोगः । तथा सर्पिष्मतां नवहरेणुमाषसूपानां ग्राम्यानूपौदकानां मांसानां शाकतिलपललपिष्टान्नपायसकृशरविलेप्येक्षुविकाराणां क्षीरमन्दकदधिद्रवमधुरतरुणप्रायाणाञ्चोपयोगो मृजाव्यायामवर्ज्जनं स्वप्नशयनासनप्रसङ्गो यश्च कश्चिद्विधिरन्योऽपि श्लेष्ममेदोमूत्रसंजननः सर्व्वः स निदानविशेषः ।
बह्वबद्धश्लेष्मा दोषविशेषः बहुबद्धं मेदः मांसं शरीरक्लेदः शुक्रं शोणितञ्च वसा मज्जा लसीका रसश्चौजः संख्यात इति दूष्यविशेषाः ।
त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मा प्रकोपमापद्यते प्रागतिभूयस्त्वात् । स प्रकुपितः क्षिप्रमेव शरीरे विसर्पं लभते । शरीरशैथिल्यात् स विसर्पन् शरीरे मेदसैवादितो मिश्रीभावं गच्छति । मेदसश्चैव गुणबहुलाबद्धत्वादस्य गुणानां गुणैः समानगुणभूयिष्ठत्वात् स मेदसा मिश्रीभावं गच्छन् दूषयत्येनं विकृतत्वात् स विकृतो दुष्टेन मेदसोपहितः शरीरक्लेदमांसाभ्यां संसर्गं गच्छति । क्लेदमांसयोरतिप्रमाणाभिवृद्धत्वात् स मांसे मांसप्रदोषात् पूतिमांसपिडकाः शराविका कच्छपिकाद्याः सञ्जनयत्यप्रकृतिभूतत्वात् शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति । मूत्रवहानां स्रोतसां वङ्क्षणबस्तिप्रभवाणां मेदःक्लेदोपहितानि गुरूणि मुखान्यासाद्य प्रतिरुध्यते । ततः स्थैर्य्यं साध्यतां वा जनयति प्रकृतिविकृतिभूतत्वात् ।
शरीरक्लेदस्तु श्लेष्ममेदोमिश्रः प्रविशन् मूत्राशयं मूत्रत्वमापद्यमानः श्लैष्मिकैरेभिर्दशभिर्गुणैरुपसृज्यते वैषम्ययुक्तैः श्वेतशीतमूर्त्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्दैः तत्र येन गुणेनैकेनानेकेन वा भूयस्तर-

सृज्यते। तत्प्रमाणं गौर्यं नामविशेषं प्राप्नोति। ते तु खल्विमे दश प्रमेहा नाम विशेषेण भवन्ति। तद्यथा उदकमेहश्चेक्षुवालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्लमेहश्च शुक्रमेहश्च शीतमेहश्च सिकतामेहश्च शनैर्मेहश्च आलालमेहश्चेति।

ते दश प्रमेहाः साध्याः समानगुणमेदःस्थानत्वात् कफस्य प्राधान्यात् समानक्रियत्वाच्च।"

"उष्णाम्ललवणक्षारकटुकाजीर्णभोजनोपसेविनस्तथातितीक्ष्णातपाग्निसन्तापश्रमक्रोधविषमाहारोपसेविनश्च तथात्मकशरीरस्यैव क्षिप्रं पित्तं प्रकोपमापद्यते।

तत् प्रकुपितं तयैवानुपूर्व्या प्रमेहानिमान् षट् क्षिप्रमभिनिर्वर्त्तयति। तेषामपि च पित्तगुणविशेषेण नामविशेषाः। तद्यथा,— क्षारमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च माञ्जिष्ठमेहश्च हारिद्रमेहश्चेति ते षड्भिरेव चाम्ललवणकटुकविस्रोष्णैः पित्तगुणैः पूर्ववत् समन्विताः। सर्व एव ते याप्याः संसृष्टदोषमेदःस्थानत्वात् विरुद्धोपक्रमत्वाच्चेति।"

"कटुकषायतिक्तरूक्षलघुशीतव्यवायव्यायामवमन-विरेचनास्थापन-शिरोविरेचनातियोगसन्धारणानशनाभिघातातपोद्वेगशोकशोणितातिषेकजागरणविषमशरीरन्यासानुपसेवमानस्य तथात्मकशरीरस्यैव क्षिप्रं वायुः प्रकोपमापद्यते। स प्रकुपितस्तथाविधे शरीरे विसर्पन् यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहमभिनिर्वर्त्तयति ॥ ० ॥ यदा पुनर्मज्जानं मूत्रवस्तावाकर्षति तदा मज्जमेहमभिनिर्वर्त्तयति ॥ ० ॥ यदा तु लसीकां मूत्राशयेऽभिवहन् मूत्रमनुबन्धं च्यावयति। लसीकातिबहुत्वाद्विक्षेपणाच्च वायोः खल्वस्यातिमूत्रप्रवृत्तिसङ्गं करोति। तदा स मत्त इव गजः क्षरत्यजस्रं मूत्रमवेगं तं हस्तिमेहिनमाचक्षते ॥ ० ॥ ओजः पुनर्मधुरस्वभावं तद्रौक्ष्याद्वायुः कषायत्वेनाभिसंसृज्य मूत्राशयेऽभिवहति तदा मधुमेहं करोति ॥ ० ॥

तानिमांश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते। महात्ययिकत्वाद्विरुद्धोपक्रमत्वात् तेषामपि च पूर्ववत् गुणविशेषेण नामविशेषाः। तद्यथा,—वसामेहश्च मज्जमेहश्च हस्तिमेहश्च मधुमेहश्चेति।"

"अथ तु रोगाः प्रकुपिताः प्रमेहानभिनिर्वर्त्तयिष्यन्त इमानि पूर्वरूपाणि दर्शयन्ति। तद्यथा,—जटिलीभावं केशेषु माधुर्यमास्ये करपादयोः सुप्ततादाहौ मुखतालुकण्ठशोषं पिपासामालस्यं मलं काये कायच्छिद्रेषूपदेहं परिदाहं सुप्ततां चाङ्गेषु षट्पदपिपीलिकाभिश्च शरीरमूत्राभिसरणं मूत्रे च मूत्रदोषान् शरीरगन्धं निद्रां तन्द्राञ्च सर्वकालमिति।

उपद्रवास्तु खलु प्रमेहिणां तृष्णातीसारज्वर-दाहदौर्बल्यारोचकाविपाकाः पूतिमांसपिडका-

अपचीविद्रध्यादयश्च तत् प्रसङ्गाद्भवन्ति। तत्र साध्यान् प्रमेहान् संशोधनोपशमनैर्यथार्हं उपपादयेच्चिकित्सेदिति।" इति चरके निदानस्थाने चतुर्थेऽध्याये।)

प्रमोचनी, स्त्री, (प्रकर्षेण मुच्यतेऽनयेति। प्र + मुच् + ल्युट् + ङीप्।) गवाक्षी। गोडुम्बा। इति जटाधरः॥ प्रकर्षमोचनकर्त्तरि, त्रि॥ (यथा, महाभारते। १।८४।१४।

"सद्यायने यदिन्द्राग्निं सर्वपापप्रमोचने॥")

प्रमोदः, पुं, (प्र + मुद् हर्षे + भावे घञ्।) हर्षः। इत्यमरः। १।४।२४॥ (यथा, देवीभागवते। ४।२४।५५।

"उत्पाद्य पुत्रजननप्रभवं प्रमोदं
दत्त्वा पुनर्विरहजं किल दुःखभारम्।
त्वं क्रीडसे सुललितैः खलु नैर्विकारै-
र्मौनैतु कथं मम सुखाप्तिरतिर्वृथा स्यात्॥"

आमोदः। स तु गन्धविशेषः। यथा, भागवते। २।६।२।

"अभिमोदोऽधोरराश घ्राणो मोदप्रमोदयोः॥"

"मोदप्रमोदयोः सामान्यविशेषगन्धयोः घ्राणेन्द्रियं घ्राणायतनम्।" इति तट्टीकायां श्रीधरस्वामी॥ नागविशेषः। यथा, महाभारते। १।५७।११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥"

स्कन्दानुचरविशेषः। यथा, तत्रैव। ९।४५।६३।

"आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा॥")

प्रमोदितः, पुं, (प्र + मुद् हर्षे + क्तः। "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्।" १।२।२१। इति किद्भावः। प्रमोदोऽस्य जातः इति तारकादित्वात् इतच् वा।) कुवेरः। इति शब्दमाला। प्रमोदयुक्ते, त्रि॥

प्रमोदिनी, स्त्री, (प्रमोदयतीति। प्र + मुद् + णिच् + णिनिः। ङीप्।) जिङ्गिनीवृक्षः। इति भावप्रकाशः॥ प्रकृष्टहर्षयुक्ता च॥

प्रम्लोचा, स्त्री, (प्रम्लोचति तापसादीन् प्रति गच्छतीति। प्र + म्लुच् गतौ + अच्। टाप्।) अप्सरोविशेषः। यथा, मार्कण्डेये ८० अध्याये।

"तत्र सप्तानदीमध्यात् वल्गुलक्ष्मी मनोरमा।
प्रम्लोचा नाम तन्वङ्गी नृपमौर्व्वे वराप्सराः॥"

प्रयतः, त्रि, (प्र + यम् + क्तः। यद्वा, प्रयतो धर्म्मार्थं यतिरस्य। प्र + यत् + अच्।) पवित्रः। इत्यमरः। ३।१।५५॥ (यथा, मनुः। २।१८३।

"ब्रह्मचार्याहरेद्भैक्ष्यं गृहेभ्यः प्रयतोऽन्वहम्॥"

नतः। इति रामायणटीकायां रामानुजः॥ यथा, रामायणे। १।७।१४।

"शान्तोऽभिवाद्य तं विप्र गङ्गाकोऽनघ राघवः।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ प्रमुखतः स्थितः॥"

यतचित्ते च।)

प्रयत्नः, पुं, (प्र + यत् यत्ने + "यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३।३।९०। इति नङ्।) उद्यमः। (यथा, मनुः। ७।६८।

"बुद्ध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत्॥")

न्यायमते स च त्रिविधः। यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम्॥
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्॥
निवृत्तिस्तु भवेद्द्वेषा द्विष्टसाधनताधियः।
यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्॥
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्तितम्॥"

इति भाषापरिच्छेदः॥

(तत्पर्यायं यथा, शाब्दिकरत्ने।

"प्रयत्नस्तु मनोव्यापारोऽतिशयान्वितः॥")

प्रयत्नवान्, [त्] त्रि, (प्रयत्नोऽस्त्यस्येति। प्रयत्न + मतुप्। मस्य वः।) प्रकृष्टयत्नविशिष्टः। तत्पर्यायः। प्रतिपन्नः २। इति त्रिकाण्डशेषः॥

प्रयस्तं, त्रि, (प्र + यस् प्रयत्ने + क्तः।) एतच्च-क्वाथादिना यत्नेन प्रयत्नसंस्कृतमन्नादि। इत्यमरः। २।९।४५॥

प्रयागः, पुं, (प्रकृष्टो यागो यत्र। यत्र यज्ञः प्रकर्षेण भवतीत्यर्थः।) तीर्थभेदः। (प्रकृष्टो यागः।) यज्ञः। (प्रकृष्टा यागाः यज्ञा यस्य यस्मात् वा।) इन्द्रः। अश्वः। इति मेदिनी। गे, ३६ ॥ ० ॥

अथ प्रयागमाहात्म्यम्।

"ततो गच्छेत धर्म्मज्ञ! प्रयागमृषिसंस्तुतम्।
यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः॥
लोकपालाश्च सिद्धाश्च पितरो लोकसम्मताः।
सनत्कुमारप्रमुखास्तथैव च महर्षयः॥
तथा नागाः सुपर्णाश्च सिद्धाश्च सनातनाः।
गन्धर्व्वाप्सरसश्चैव हरिश्च भगवानास्ते प्रजापतिपुरस्कृतः।
तत्र त्रीण्यग्निकुण्डानि येषां मध्ये तु जाह्नवी।
प्रयागादभिनिष्क्रान्ता सर्व्वतीर्थपुरस्कृता॥
तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता।
यमुना गङ्गया सार्द्धं सङ्गता लोकभाविनी॥
गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम्।
प्रयागं जघनस्यान्तरुपस्थमृषयो विदुः॥
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ।
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः॥
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो महामते।
प्रजापतिमुपासन्ते ऋषयश्च महाव्रताः॥
यजन्ते क्रतुभिर्द्देवास्तथा चक्रधराः नृपाः।
ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत॥
प्रयागः सर्व्वतीर्थेभ्यः प्रभवत्यधिकं विभो।
श्रवणात्तस्य तीर्थस्य नामसङ्कीर्त्तनादपि।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते॥
तत्राभिषेकं यः कुर्य्यात् सङ्गमे संशितव्रतः।
पुण्यं स फलमाप्नोति राजसूयाश्वमेधयोः॥
एषा यजनभूमिर्हि देवानामपि सत्कृता।
तत्र दत्तं सूक्ष्ममपि महद्भवति भारत॥
न वेदवचनात्तात न लोकवचनादपि।
मतिरुत्क्रमणीया ते प्रयागमरणं प्रति॥

दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः ।
तेषां सान्निध्यमत्रैव कीर्त्तितं कुरुनन्दन ॥
यत् पुण्यं त्रिषु लोकेषु वेदविद्यासु यत् फलम् ।
स्नानमात्रेण तत् पुण्यं गङ्गायमुनसङ्गमे ॥"
इति पाद्मे भूमिखण्डे १२७ अध्यायः ॥ ० ॥
अपि च ।
"पुत्रकामः प्रयागे हि स्नायात् पुण्ये सितासिते ।
धनकामः पुरा शक्रः स्नातो ह्यत्र द्विजोत्तम ॥
धनदस्य निधीन् सर्व्वान् लब्धवांश्चार मायया ।
नारायणो नरेणैव वर्षाणामयुतं पुरा ॥
अनाहारः प्रयागेऽस्मिन् स्नानात् पुण्यस्य गमम् ।
विष्णुश्च साधका यान्ति प्रयागेऽस्मिन् द्विजो-
त्तम ॥"
इति पाद्मोत्तरखण्डे २३ अध्यायः ॥ ० ॥
अपि च ।
युधिष्ठिर उवाच ।
"भगवन् ! श्रोतुमिच्छामि प्रयागगमने फलम् ।
मृतानां का गतिस्तत्र स्नातानामपि किं फलम् ॥
ये वसन्ति प्रयागे तु ब्रूहि तेषान्तु किं फलम् ।
भवता विदितं ह्येतत् तन्मे ब्रूहि नमोऽस्तु ते ॥
मार्कण्डेय उवाच ।
कथयिष्यामि ते वत्स ! या चेष्टा यच्च तत्
फलम् ।
पुरा महर्षिभिः सम्यक् कथ्यमानं मया श्रुतम् ॥
यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ।
यत्र ब्रह्मादयो देवा रक्षां कुर्व्वन्ति सङ्गताः ॥
बहून्यन्यानि तीर्थानि सर्व्वपापहराणि च ।
कथितुं नेह शक्नोमि बहुवर्षशतैरपि ॥
संक्षेपेण प्रवक्ष्यामि प्रयागस्येह कीर्त्तनम् ।
षष्टिर्धन्विसहस्राणि यानि रक्षन्ति जाह्नवीम् ॥
यमुनां रक्षति सदा सविता सप्तवाहनः ।
प्रयागन्तु विशेषेण स्वयं रक्षति वासवः ॥
मण्डलं रक्षति हरिः सर्व्वदेवैश्च सम्मितम् ।
न्यग्रोधं रक्षते नित्यं शूलपाणिर्महेश्वरः ॥
स्थानं रक्षन्ति वै देवाः सर्व्वे पापहरं शुभम् ।
स्वकर्म्मणावृता लोका नैव गच्छन्ति तत्पदम् ॥
स्वल्पमल्पतरं पापं यदा तस्य नराधिप ! ।
प्रयागं स्मरमाणस्य सर्व्वमायाति संक्षयम् ॥
दर्शनात्तस्य तीर्थस्य नामसङ्कीर्त्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ॥
पञ्चकुण्डानि राजेन्द्र ! येषां मध्ये तु जाह्नवी ।
प्रयागं विशतः पुंसः पापं नश्यति तत्क्षणात् ॥
योजनानां सहस्रेषु गङ्गां यः स्मरते नरः ।
अपि दुष्कृतकर्म्माणो लभते परमां गतिम् ॥
कीर्त्तनान्मुच्यते पापात् दृष्ट्वा भद्राणि पश्यति ॥
व्याधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः ।
गङ्गायमुनमासाद्य त्यजेत् प्राणान् प्रयत्नतः ॥
दीप्तकाञ्चनवर्णाभैर्विमानैर्भानुवर्णिभिः ।
ईप्सितान् लभते कामान् वदन्ति ऋषिपुङ्गवाः ॥
सर्व्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः ।
वराङ्गनासमाकीर्णैर्मोदन्ते शुभलक्षणैः ॥
गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते ।
यावन्न स्मरते जन्म तावत् स्वर्गे महीयते ॥
तस्मात् स्वर्गात् परिभ्रष्टः क्षीणकर्म्मा नरोत्तमः ।
हिरण्यरत्नसंपूर्णे समृद्धे जायते कुले ॥
तदेव स्मरते तीर्थं स्मरणात्तत्र गच्छति ।
देशस्थो यदि वारण्ये विदेशे यदि वा गृहे ॥
प्रयागं स्मरमाणस्तु यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकमवाप्नोति वदन्ति मुनिपुङ्गवाः ॥
सर्व्वकामफला वृक्षा मही यत्र हिरण्मयी ।
ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति ॥
स्त्रीसहस्राकुले रम्ये मन्दाकिन्यास्तटे शुभे ।
मोदते मुनिभिः सार्द्धं स्वकृतेनेह कर्म्मणा ॥
सिद्धचारणगन्धर्व्वैः पूज्यते दिवि दैवतैः ।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
ततः शुभानि कर्म्माणि चिन्तयानः पुनः पुनः ।
गुणवान् वित्तसम्पन्नो भवतीह न संशयः ॥
कर्म्मणा मनसा वाचा सत्यधर्म्मप्रतिष्ठितः ॥
गङ्गायमुनयोर्मध्ये यस्तु ग्रामं प्रयच्छति ।
सुवर्णमथ मुक्तां वा तथैवान्यत् प्रतिग्रहम् ॥
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्च्चनेऽपि वा ।
निष्फलं तस्य तत्तीर्थं यावत् तद्धनमश्नुते ॥
अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च ।
कपिलां पाटलाभान्तु यस्तु धेनुं प्रयच्छति ।
यावद्रोमाणि तस्या वै सन्ति गात्रेषु सत्तम ! ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥"
इति कौर्म्मे प्रयागमाहात्म्ये ३३ अध्यायः ॥ ० ॥
तत्र मुण्डनविधिर्यथा,—
"गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥"
इति स्मृतिमहार्णवलिखितवचनं प्रयागावच्छिन्न-
गङ्गायां विधायकम् । भास्करक्षेत्रं प्रयागः ।
अपि च । प्रयागमधिकृत्य ।
"केशानां यावती संख्या छिन्नानां जाह्नवीजले ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"
प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां द्व्यङ्गुल-
च्छेदनमात्रम् । यथा,—
"केशमूलान्युपाश्रित्य सर्व्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तान् वापयेत् ॥"
प्रयागे मुण्डनाकरणे दोषोऽपि ।
"गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् ।
स कोटिकुलसंयुक्त आकल्पं रौरवे पतेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

प्रयागभवः, पुं, (प्रयागात् प्रकृष्टयागकारिणकात् बिभेति स्वपदपरिपन्थित्वशङ्कयेति । भी + अच् ।) इन्द्रः । इति शब्दरत्नमाला ॥

प्रयाणं, क्ली, (प्र + या + ल्युट् । णत्वम् ।) गमनम् । इति हलायुधः । २ । २६० । यथा,—
"उद्घाटितनवद्वारे पञ्जरे विहगोऽनिलः ।
यत्तिष्ठति तदाश्चर्य्यं प्रयाणे विस्मयः कुतः ॥"
उद्भटः ॥
तत्पर्य्यायः । प्रस्थानम् २ गमनम् ३ व्रज्या ४ अभिनिर्य्याणम् ५ प्रयाणकम् ६ । इति हेमचन्द्रः । ३ । ४६६ । अथ राज्ञां युद्धादिप्रयाणे वर्ज्जनीयानि यथा । भेरीनिस्वनः १ मूत्रम् २ बलधूलिः ३ करभः ४ रथः ५ अश्वः ६ हस्ती ७ वणिक् ८ शकटम् ९ रथः १० । इति कविकल्पलता ॥

प्रयातः, पुं, (प्रकर्षेण यातः । प्र + या + कर्त्तरि क्तः ।) भौरिकः । भृगुः । इति वैजयः ।
गते, त्रि । (क्ली, भावे क्तः । गमनम् । प्रस्थानम् । यथा, छन्दोमञ्जर्य्याम्
"मया कोपितः कालियेश्च कुरु त्वं
भवन्तु । प्रयातं तूर्णं सारयाय ॥")

प्रयामः, पुं, (प्र + यम् + घञ् ।) नीवाकः । इत्यमरः । २ । ९ । ७१ । महार्घ्यदेशोऽभिकारित् सस्यानामादरातिशये सुखाधरत्वाधिक्यम् । इति केचित् । मूल्यादरः । इति केचित् । मूल्याधिक्यहेतोर्निक्षयेण परिच्छेदनम् । इति केचित् । इति भरतः ॥

प्रयासः, पुं, (प्र + यस प्रयत्ने + भावे घञ् ।) प्रयत्नः । तत्पर्य्यायः । श्रमः २ क्लमः ३ खेदः ४ परिश्रमः ५ आयासः ६ व्यायामः ७ । इति हेमचन्द्रः । २ । २३४ ॥ (यथा, पञ्चदशीप्रदीपिकायाम् । १ । १५ ।
"अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥")

प्रयुक्तं, त्रि, (प्र + युज् + क्तः ।) प्रकर्षेण युक्तम् । यथा,—
"गुणप्रयुक्ताः परमार्थभेदिनः
भवा भवार्णवभवा भवन्ति हि ।
तथाविधा ये तु विशुद्धवंशजा
व्रजन्ति चापा इव तेऽतिसत्कृताम् ॥"
उद्भटः ।
प्रकर्षसमाधियुक्तम् । प्रकर्षसंयोगविशिष्टम् । प्रकर्षनिन्दायुक्तम् । प्रकर्षसंयमविशिष्टम् । प्रयुक्तं युगधात्वर्थदर्शनात् । चैतौ स्त्री । यथा । न च समवायिनिमित्ताभावप्रयुक्तो निदर्शन कार्य्याभावः किन्त्वसमवायिकारणाभावप्रयुक्तोऽपि । इति रक्षितः ॥

प्रयुक्तिः, स्त्री, प्रयोजनम् । प्रयुज्यते प्रयुक्तिः (क्तिन्) । यथा,—
"सहायो वृषली भार्य्या प्रवीरे पुत्रकामिनि ।
आहृत्य रामसाम्राज्ये इति न तु प्रयुक्तः ॥"
इति प्राचः ।
(प्रयोगः । यथा, ऋग्वेदे । १ । १११ । ८ ।
"पुर्वी यष्टीः प्रथमा गोभिरक्तां सजाता
मनवो न प्रयुक्तिषु ॥"
"प्रयुक्तिषु प्रयोगेषु ।" इति तद्भाष्ये सायणः ।)

प्रयुतं, क्ली, (प्रकर्षेण युतम् ।) नियुतम् । इति हेमचन्द्रः । ३ । ५३० ॥ (दशलक्षसंख्या । "दश शतसहस्राणि प्रयुतमुक्तं बुधैः ।" इति लीलावती । यथा च महाभारते । १ । १५ । १९ ।
"बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
अयुतान्येव संख्यातुं पतङ्गानां नराधिप ॥")

प्रयुक्तार्थः, पुं, (प्रयुक्तः अर्थो यस्य सः ।) प्रत्युत्क्रमः । इति प्रयोगार्थशब्दटीकायां रमानाथः । ३ । २ । २६ ।

प्रयोक्ता, [ऋ] पुं, (प्रयुनक्तीति । प्र+युज्+तृच् ।) उत्तमर्णः । यथा,—
'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ॥' इत्यमरः । २ । ९ । ५ ॥
त्रि, प्रयोगकर्त्ता । (यथा रघुः । ५ । ५७ ।
"संमोहनं नाम सखे ! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्वमादत्स्व यतः प्रयोक्तु-
र्न चारिहिंसा विजयश्च हस्ते ॥"
अनुष्ठाता । यथा, रघुः । ६ । ७६ ।
"पुत्रो रघुस्तस्य पदं प्रशास्ति
महाक्रतोर्विश्वजितः प्रयोक्ता ॥"
नियोगकर्त्ता । यथा, महाभारते । १३ । २३ । ६२ ।
"परदाराभिहर्त्तारः परदाराभिमर्षिणः ।
परदारप्रयोक्तारस्ते वै निरयगामिनः ॥"
नाट्याचार्य्यः । यथा, रघुः । १९ । ३६ ।
"स प्रयोगनिपुणः प्रयोक्तृभिः
सञ्जघर्ष सह मित्रसन्निधौ ॥")

प्रयोगः, पुं, (प्र+युज्+भावकर्म्मादौ यथायथं घञ् ।) कार्म्मणम् । वशीकरणम् । प्रयुक्तिः । (यथा, रघुः । २ । ४२ ।
"प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्व्वभङ्गे वितथप्रयत्नः ॥")
निदर्शनम् । इति मेदिनी । गे, ४४ ॥ (यथा, पञ्चदश्याम् । ६ । ४१ ।
"लयमाप्नोति पर्य्यायस्तेन लोके तयोः सह ।
प्रयोगो गम्यतः स्वल्पमात्मत्वं चान्यवारकम् ॥"
घोटकः । इति शब्दमाला ॥ (सामाद्युपायानुष्ठानम् । यथा, माघे । ११ । ६ ।
"अपशयितविबुधाः कल्पयन्तः प्रयोगा-
नुदयति रात्र्ये काव्यवद्दुर्विगाहे ॥"
अभिनयः । यथा, रघुः । १९ । ३६ ।
"स प्रयोगनिपुणः प्रयोक्तृभिः
सञ्जघर्ष सह मित्रसन्निधौ ॥"
ऋणे वृद्ध्यादानम् । स तु धनप्राप्त्युपायेषु सप्तमः । यथा, मनुः । १० । ११५ ।
"सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥")

प्रयोगार्थः, पुं, (प्रयोगः अर्थः प्रयोजनं यस्य ।) प्रधानप्रयोगानुकूलं प्रयोजनमनुष्ठानम् । तत्पर्य्यायः । प्रत्युत्क्रमः २ । इत्यमरः । ३ । २ । २६ ।

प्रयोगी, [न्] त्रि, (प्रयोगोऽस्त्यस्येति । प्रयोग+"अत इनिठनौ ।" ५।२।११५ । इति इनिः ।) प्रयोक्ता । (यथा, अमरे । २ । ७ । १० ।
"सप्तसूत्रः परिव्राजोऽध्यापनात्मको प्रयोगिनः ॥")

प्रयोजकः, त्रि, (प्रयुनक्ति प्रेरयति कार्य्यादौ व्यापारयतीति । प्र+युज्+ण्वुल् ।) प्रयोगकर्त्ता । नियोगकर्त्ता । उत्तमर्णः प्रयोजको धनी । इति सुपद्मव्याकरणम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । ११८ ।
"यान् द्रोहभीरून् सम्भाव्य संविभेजे यशस्करः
तस्य तत्तनयोच्छेदे त एवासन् प्रयोजकाः ॥"
नियन्ता । यथा, याज्ञवल्क्ये । १ । ५ ।
"शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥")

प्रयोजनं, क्ली, (प्रयुज्यते इति । प्र+युज्+ल्युट्) कार्य्यम् । (प्रयुज्यतेऽनेनेति । प्र+युज्+करणे ल्युट् ।) हेतुः । इति मेदिनी । ने, १८२ ॥ यथा,
"सर्व्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित्
यावत् प्रयोजनं नोक्तं तावत् केन गृह्यते ॥
सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"
इति भाट्टः ॥
('प्रयोजनञ्च द्विविधं मुख्यं गौणञ्च । तत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम् । तत्राद्यं सुखं तद्भोगो दुःखाभावश्च । द्वितीयं तदुपकारि शयनभोजनादि । तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छाया विषयत्वात्तथात्वम् ।" इति मुक्तिवादे गदाधरः ॥ उद्देशः । यथा "अथ प्रयोजनम् । प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः । यथा यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्यैरुपचरिष्याम्यनायुष्यैः परिहरिष्यामि कथं न मामकालमृत्युः प्रसहेतेति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

प्रयोज्यः, त्रि, (प्र+युज्+ण्यत् । 'प्रयोज्यनियोज्यौ शक्यार्थे ।' ७।३।६८ । इति निपातनात् साधुः । प्रयोक्तुं शक्यः । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । १५९ ।
"वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्म-
मिच्छता ॥")
मूलधने, क्ली ॥

प्ररूढ़ः, पुं, (प्ररोहत्यत्रेति । प्र+रुह+क्तः ।) जठरम् । इति मेदिनी । ढे, ८ ॥ (क्वचित् जरठोऽपि पाठः ॥)

प्ररूढ़ः, त्रि, (प्र+रुह्+क्तः ।) बद्धमूलः । इति मेदिनी । ढे, ८ ॥ (यथा भागवते । ४ । ११ । १ ।
"प्ररूढभावो भगवत्यधोक्षजे
प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥")
जातः । (यथा, रघुः । १३ । ६ ।
"नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा ॥")
प्रवृद्धः । इति शब्दरत्नावली ॥

प्ररोहः, पुं, (प्ररोहतीति । प्र+रुह्+अच् ।) अङ्कुरः । इति हेमचन्द्रः । ४ । १८२ ॥ (यथा, कुमारे । ५ । ६० ।
"[illegible]
[illegible]
[illegible]
[illegible] ॥"
नन्दीवृक्षः । तत्पर्य्यायो यथा,—
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

प्रलपितः, त्रि, प्रपूर्व्वलपधातोः कर्म्मणि क्तः । कथितः । यथा, काव्यप्रकाशे ।
"अलस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ॥"

प्रलम्बः, पुं, (प्रलम्बते इति । प्र+लम्ब+अच् । अतिदीर्घत्वादेव तथात्वम् ।) दैत्यभेदः । स च दनुपुत्रः मनुष्यवध्यः । यथा,—
"एकाक्षः वृषभोऽरिष्टः प्रलम्बनरकौ तथा ।
इन्द्रबाधनकेशी च पुरः शङ्कोऽथ धेनुकः ॥
गविष्ठिको गवाक्षश्च तालकेतुश्च वीर्य्यवान् ।
एते मनुष्यवध्यास्तु दनोः पुत्रास्तथा स्मृताः ॥"
इत्यग्निपुराणम् ॥
(अयं हि बलदेवेन निहतः । यथा, भागवते १० स्कन्धे १८ । अध्याये ।
"तत्रोपाहूय गोपालान् कृष्णः प्राह विहार-
वित् ।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥
तत्र चक्रुः परिवृढौ गोपा रामजनार्द्दनौ ।
कृष्णसङ्घट्टिनः केचिदासन् रामस्य चापरे ॥
आचेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥"
"उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥
अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः ।
वहन् द्रुततरं प्रागादवरोहणतः परम् ॥
"अथागतस्तु निरभयो रिपुं बली
विहाय सार्थमिव हरन्तमात्मनः ।
रुषाहनच्छिरसि दृढेन मुष्टिना
सुराधिपो गिरिमिव वज्ररंहसा ॥
स आहतः सपदि विशीर्णमस्तको
मुखाद्वमन् रुधिरमपस्मृतोऽसुरः ।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः ॥")
अम्बुदः । पयोधरः । नवाङ्कुरः । शाखा । हार-भेदः । (भावे घञ्) प्रलम्बनम् । इति मेदिनी । बे, ११ ॥ (दीर्घे त्रि । यथा, रामायणे । [illegible]
"[illegible] प्रलम्बघोणं वनं ।
[illegible] मालिनीम् ॥"
लम्बमाने, त्रि । यथा, महाभारते । १ । १८४ । १० ।
"शुद्धोत्तरीयान् भुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान् ॥")

प्रलम्बघ्नः, पुं, (प्रलम्बं हन्तीति । हन्+टक् ।) बलरामः । इत्यमरः । १ । १ । २४ ॥

प्रलम्बभित्, पुं, (प्रलम्बं भिनत्तीति । भिद्+क्विप् ।) बलरामः । इति हेमचन्द्रः । २ । १३८ ॥

प्रलम्बाण्डः, पुं, (प्रलम्बौ लम्बमानौ अण्डौ यस्य ।) दीर्घाण्डकोषविशिष्टः । [illegible] । मुष्कः । इति हेमचन्द्रः । ३ । ११९ ॥

प्रलम्बितः, त्रि, प्रपूर्व्वलम्बधातोः कर्त्तरि क्तः ॥ प्रकर्षेण लम्बितमाल्यादिः ॥

प्रलयः, पुं, (प्रलीयते क्षीयते जगदस्मिन्निति । प्र+ली+"एरच् ।" ३ । ३ । ५६ । इत्यच् ।) प्रलयः । तत्पर्य्यायः । संवर्त्तः २ कल्पः ३ क्षयः ४ कल्पान्तः ५ । इत्यमरः । १ । ४ । २२ ॥ लयः ६ संक्षयः ७ विलयः ८ । इति शब्दरत्नावली ॥ प्रतिसर्गः ९ प्रतिसञ्चरः १० । स च नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्द्धा । यथा,—

कूर्म्म उवाच ।

"नित्यं नैमित्तिकश्चैव प्राकृतात्यन्तिकौ तथा ।
चतुर्द्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः ॥"*

नित्यो यथा,—

"योऽयं सदृश्यते नूनं नित्यं लोके क्षयस्त्विह ।
नित्यं संकीर्त्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः ॥"

नैमित्तिको यथा,—

"ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति ।
त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः ॥"

प्राकृतो यथा,—

"महदाद्यं विशेषान्तं यदा संयाति सङ्क्षयम् ।
प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः ॥"

आत्यन्तिको यथा,—

"ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि
प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः ॥
आत्यन्तिकश्च कथितः प्रलयो लयसाधनः ॥"*

नैमित्तिकप्रलयविस्तारो यथा,—

"नैमित्तिकमिदानीं वः कीर्त्तयिष्ये समासतः ॥
चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे ।
स्वात्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः ॥
ततो भवत्यनावृष्टिस्तीव्रा सा शतवार्षिकी ।
भूतक्षयकरी घोरा सर्व्वभूतभयङ्करी ॥
ततो यान्यल्पसाराणि सत्त्वानि पृथिवीतले ।
तानि चादौ प्रलीयन्ते भूमित्वमुपयान्ति च ॥
सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः ।
असह्यरश्मिर्भवति पिबन्नम्भो गभस्तिभिः ॥
तस्य ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे ।
तेनाहारेण ते सूर्य्याः दीप्ताः सप्त भवन्ति हि ॥
तस्य ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्द्दिशम् ।
चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा ।
व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वञ्चाधश्च रश्मिभिः ।
दीप्यन्ते भास्कराः सप्त दहन्तोऽग्निप्रतापिनः
ते सूर्य्या वारिणा दीप्ता बहुसाहस्ररश्मयः ।
खं समावृत्य तिष्ठन्ति निर्द्दहन्तो वसुन्धराम् ॥
ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा ।
साद्रिनद्यर्णवद्वीपा निःस्नेहा समपद्यत ॥
दीप्ताभिः सन्तताभिश्च ज्वालाभिश्च समावृताः ।
अधश्चोर्द्ध्वञ्च तिर्य्यक् च समावृत्य सहस्रशः ॥
सूर्य्याग्निना प्रदग्धानां संसृष्टानां परस्परम् ।
एकत्वमुपयातानामेकज्वालो भवेत् प्रभुः ।
सर्व्वलोकप्रणाशश्च सोऽग्निर्भूत्वातिकुण्डली ।
चतुर्लोकमिदं कृत्स्नं निर्द्दहत्यात्मतेजसा ॥
ततः प्रलीने सर्व्वस्मिन् जङ्गमे स्थावरे तथा ।
निर्व्वृक्षा निस्तृणा भूमिः कूर्म्मपृष्ठं प्रकाशते ॥
अम्बरीशमिवाभाति सर्व्वमापूरितं जगत् ।
सर्व्वमेव तदार्च्चिर्भिः पूर्णं जाज्वल्यते नभः ॥
पाताले यानि तीर्थानि महोदधिगतानि तु ।
तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै ॥
द्वीपांश्च पर्व्वतांश्चैव वर्षाण्यथ महोदधीन् ।
तान् सर्व्वान् भस्मसात् कृत्वा सप्तात्मा पावकः प्रभुः ॥
समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः ।
पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत् ।
ततः संवर्त्तकः शैलानतिक्रम्य महांस्तथा ।
लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः ॥
स दग्ध्वा पृथिवीं देवो रसातलमशोषयत् ।
अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्ध्वं दहिष्यति ॥
योजनानां शतानीह सहस्राण्ययुतानि च ।
उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्त्तकस्य च ॥
गन्धर्व्वांश्च पिशाचांश्च सयक्षोरगराक्षसान् ।
तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः ॥
भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः ।
दहेदशेषं कालाग्निः कालो विश्वतनुः स्वयम् ॥
व्याप्तेषु तेषु लोकेषु तिर्य्यगूर्द्ध्वमथाग्निना ।
तत्तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः ॥
अयोगुडनिभं सर्व्वं तदैवैकं प्रकाशते ।
ततो गजकुलोन्नादाः स्तनितैः समलङ्कृताः ॥
उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः
केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः
धूम्रवर्णास्तथा केचित् केचित् पीताः पयोधराः ।
केचिद्रासभवर्णाश्च स्थूलाः क्षारनिभास्तथा ॥
शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे ।
मनःशिलाभास्त्वन्ये कपोतसदृशाः परे ॥
केचिद्धारिद्रवर्णाभास्तथान्ये चौरसन्निभाः ।
तथा कर्च्चूरवर्णाभा भिन्नाञ्जननिभास्तथा ॥
इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा ।
काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि
केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः ।
कूटागारनिभाश्चान्ये केचिन्मीनकुलोद्वहाः ॥
बहुरूपा घोररूपा घोरस्वरनिनादिनः ।
तदा जलधराः सर्व्वे पूरयन्ति नभस्तलम् ॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः
सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥
ततस्ते जलदा वर्षं वर्षन्तीह हि मोघवत् ।
सुघोरमशिवं सर्व्वं नाशयन्ति च पावकम् ॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते जगत् ।
अद्भिस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः ॥
नष्टे चाग्नौ वर्षशतैः पयोदाः क्षयसम्भवाः ।
प्लावयन्तोऽथ भुवनं महाजलपरिस्रवैः ॥
धाराभिः पूरयन्तीदं चोद्यमानाः स्वयम्भुवा ।
उत्पन्नाः सलिलौघश्च वेला इव महोदधेः ॥
साद्रिद्वीपा तथा पृथ्वी जलैः संछाद्यते शनैः ।
आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति ॥
पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः ।
ततः समुद्राः स्वां वेलामतिक्रान्तास्तु कृत्स्नशः
पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति ।
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
योगनिद्रां समास्थाय शेते देवः प्रजापतिः ॥
चतुर्युगसहस्रान्तं कल्पमाहुर्महर्षयः ।
वाराहो वर्त्तते कल्पो यस्य विस्तार ईरितः ।
असङ्ख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः
कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः ।
सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।
तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः ।
सोऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः ।
अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः ।
ध्यानन्तपस्तथा ज्ञानं लब्ध्वा तेष्वेव योगिनः ।
आराध्य गिरिशं मत्तो यान्ति तत् परमं पदम् ।
सोऽहं सत्त्वं समाधाय मायी मायामयं स्वयम् ।
एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु ।
मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः ।
जनलोके वर्त्तमानास्तपसा योगचक्षुषा ।
अहं पुराणपुरुषो भूर्भुवः प्रभवो विभुः ॥
सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात् ।
मन्त्रोऽग्निर्ब्राह्मणा गावः कुशाश्च समिधो ह्यहम्
प्रोक्षणी च स्रुवश्चैव सोमो घृतमथोऽस्म्यहम् ।
संवर्त्तको महानात्मा पवित्रं परमं यशः ।
वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्रह्मणो मुखम् ।
अनन्तस्तारको योगी गतिर्मतिमतां वरः ।
हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः ।
क्षेत्रज्ञः प्रकृतिः कालो जगद्वीजमथामृतम् ।
माता पिता महादेवो मत्तो ह्यन्यन्न विद्यते ।

आदित्यवर्णो भुवनस्य गोप्ता
नारायणः पुरुषो योगमूर्त्तिः ।
मां पश्यन्ति यतयो योगनिष्ठा
ज्ञात्वात्मानममृतत्वं व्रजन्ति ।"*

प्राकृतप्रलयविस्तारो यथा,—

कूर्म्म उवाच ।

"अतः परं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम् ।
प्राकृतं प्रसमासेन शृणुध्वं गदतो मम ॥
गते परार्द्धद्वितये काले लोकप्रकालकः ।
कालाग्निर्भस्मसात् कर्त्तुं करोति निखिलं मतिम् ।
स्वात्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः ।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ।
तमाविश्य महादेवो भगवान्नीललोहितः ।
करोति लोकसंहारं भीषणं रूपमाश्रितः ।
प्रविश्य मण्डलं सौरं कृत्वासौ बहुधा पुनः ।
निर्द्दहत्यखिलं लोकं सप्तसप्तिस्वरूपधृक् ।
स दग्ध्वा सकलं सत्त्वं अस्त्रं ब्रह्मशिरो महत् ।
देवतानां शरीरेषु क्षिपत्यखिलदाहकम् ।
दग्धेष्वशेषदेवेषु देवी गिरिवरात्मजा ।
एका सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः ।
शिरःकपालैर्द्देवानां कृतस्रग्वरभूषणः ।
आदित्यचन्द्रादिगणैः पूरयन् व्योममण्डलम् ।

सहस्रनयनो देवः सहस्राकृतिरीश्वरः ।
सहस्रहस्तचरणः सहस्रार्च्चिर्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूली कृत्तिवसनो योगमैश्वरमास्थितः ॥
पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम् ।
करोति ताण्डवं देवीमालोक्य परमेश्वरः ॥
पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला ।
योगमास्थाय देवस्य देहमायाति शूलिनः ॥
स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम्
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरशेषैः पृथिवी विलयं याति वारिषु ।
स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः ॥
तैजसं गुणसंयुक्तं वायौ संयाति संक्षयम् ।
आकाशे सगुणो वायुः प्रलयं याति सत्तमाः ॥
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ।
इन्द्रियाणि च सर्व्वाणि तैजसे यान्ति संक्षयम् ॥
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः ।
वैकारिकस्तैजसश्च भूतादिश्चेति सत्तमाः ॥
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ।
महान्तमेभिः सहितं ब्रह्माणमतितेजसम् ॥
अव्यक्तं जगतो योनिः संहरेदेकमव्ययम् ।
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः ॥
वियोजयति चान्योन्यं प्रधानं पुरुषं परम् ।
प्रधानपुंसोरजयोरेष संहार ईरितः ॥
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः ।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते ॥
प्रधानं जगतो योनिर्मायातत्त्वमचेतनम् ।
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः ॥
गीयते मुनिभिः साक्षी महानेकः पितामहः ।
एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा ॥
प्रधानाद्यं विशेषान्तं दहेद्रुद्र इति श्रुतिः ।
योगिनामथ सर्व्वेषां ज्ञानविन्यस्तचेतसाम् ।
आत्यन्तिकञ्चैव लयं विदधातीह शङ्करः ॥"

इति कौर्म्मे ४२।४३। अध्यायौ ॥ ० ॥

आत्यन्तिकप्रलयविस्तारो यथा,—

श्रीपराशर उवाच ।

"आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः ॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥
कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्य्यादिमयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ।
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः ॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा ।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥
तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म्म चोक्तं महामुने ! ॥
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥
अन्धन्तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्य्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ! ।
तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः ।
परया त्वक्षरप्राप्तिरृग्वेदादिमयापरा ॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्यव्याप्यं यतः सर्व्वं तं वै पश्यन्ति सूरयः ॥
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम् ।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ॥
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः ॥
एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम् ॥
अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज ! ।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ॥
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते ।
मैत्रेय ! भगवच्छब्दः सर्व्वकारणकारणे ॥
सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः ॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा ।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः ॥
भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत् ।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥

स सर्व्वभूतप्रकृतिविकार-
गुणांश्च दोषांश्च मुने ! व्यतीतः ।
अतीतसर्व्वावरणोऽखिलात्मा
तेनास्तृतं यद्भुवनान्तराले ॥
समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्य्यमहावबोध-
सुवीर्य्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपो-
ऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्व्वेश्वरः सर्व्वदृक् सर्व्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥
स ज्ञायते येन तदस्तदोषं
शुद्धं परं निर्म्मलमेकरूपम् ।
संदृश्यते वाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥"

इति विष्णुपुराणे ६ अंशे आत्यन्तिकप्रलयविस्तारो नाम ५ अध्यायः ॥०॥ अपि च ।

नारद उवाच ।

"कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
दिव्यमेकयुगं चैव तत्र या चैकसप्ततिः ॥
मन्वन्तरन्तु तज्ज्ञेयं ते तु यत्र चतुर्द्दश ।
स कल्पो नाम वै कालस्तदन्ते प्रलयस्तु यः ॥
स ब्रह्मरात्रो राजेन्द्र ! तत्र शेतेऽम्बुजासनः ।
त्रयो लोकास्तदा राजन् लीयन्ते तन्निमित्ततः ॥
नैमित्तिको लयो नाम दैनन्दिन इतीर्य्यते ॥
एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम् ।
आयुः पूर्व्वपरार्द्धं तु परार्द्धं द्वे प्रकीर्त्तिते ॥
द्विपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः ।
तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप ! ॥
लयः प्राकृतिको ह्येष प्रोक्तो ब्रह्मणि भूपते ! ।
अण्डकोटिष्वपि सकलः प्रलयं याति सर्व्वतः ॥
पूर्व्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते ! ।
शतवर्षाणि भूमौ हि पर्ज्जन्यो नैव वर्षति ॥
दुर्भिक्षे निजने लोके प्रजाः सर्व्वाः क्षुधार्द्दिताः ।
परस्परं भक्षमाणाः क्षयं यान्ति भूमिप ! ॥
समुद्रे च पल्वलाद्ये हृदेषु च सरःसु च ।
देहे च यो रसस्तं हि रविर्हरति रश्मिभिः ॥
ततः संवर्त्तको नाम ज्वालामाली हुताशनः ।
सङ्कर्षणमुखोत्पन्नो दहत्यखिलपार्थिवम् ॥
सप्त ब्रह्माण्डमध्ये ये [illegible] ।
एवं दग्ध्वा महाराज ! ब्रह्माण्डं भगवानतः ॥
दग्ध्वा लोकत्रयं ब्रह्माण्डं भास्वरीकृतम् ।
प्रचण्डपवनो राजंस्ततो ववृते पुनः ॥
संवर्त्तको नाम महान् ब्रह्माण्डं प्लावयिष्यति ।
ततो मेघा महाघोरा नानारूपा भयङ्कराः ॥
शतं वर्षाणि वर्षन्ति गर्ज्जन्ति च महास्वनाः ।
एकोदकं ततो विश्वं निर्गुणं निर्व्विकारकम् ॥
भूमिर्गन्धगुणं राजन् ! [illegible] ।
गुणनाशात् जलं पश्चात् प्रलयं याति तदा ॥
तेजश्चापो रसगुणं ग्रसते विश्वं महान् ।
ततः प्रलयमायान्ति राजन्नापोऽपि तद्वशात् ।
तेजस्तु ततो रूपं रसगन्धसमन्वितम् ।
वायुर्हरति वेगाद्वै तेज प्रलयमृच्छति ॥
आकाशन्तु ततो वायोः स्पर्शं हरते पुनः ।
प्रलये महाराज ! वायुरप्यत्र लीयते ॥
आकाशस्य गुणं शब्दं भूतादिः ग्रसतेऽखिलम् ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

न तस्याः कालदोषेण परिणामो मरणं भ ॥
आद्यन्तरहिता सा हि नित्यं कारणमव्ययम्॥
शक्तिर्भगवतः सा हि तदेकपरमा च सा।
इत्युक्तः प्रलयो राजन्! विस्मयास्य महामते !॥
यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा ॥"
इति पाद्मे स्वर्गखण्डे ३८ अध्यायः ॥
(सात्त्विकविकारान्तर्गतविकारविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ३।१६७।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः॥")

प्रलापः, पुं, (प्रलपनमिति। प्र + लप् + भावे घञ्।) प्रलपनम्। अनर्थकवाक्यम्। निष्प्रयोजनमुक्तादिवचनम्। इत्यमरभरतौ। १। ६। १५ ॥ रोगाणामुपसर्गोऽयम् ॥ (यथा, भावप्रकाशे।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः।
उपद्रवा भवन्त्येते मृतिश्च रसशोषतः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
स्वहेतुकुपितात् वातादसम्बद्धनिरर्थकम्।
वचनं यत्तरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताभीदतिक्ता
नलदतुरगगन्धा भारती हारहूरा।
मलयजदमयूलीयष्टिपुष्पी सुपक्वा
प्रलपनमपहन्त्युः पानतो नातिदूरात् ॥
वरतिक्तोऽत्र पर्पटः नलदसुशीरं भारती ब्राह्मी हारहूरा द्राक्षा।" इति भावप्रकाशस्य मध्यखण्डे प्रथमे भागे ॥)

प्रलापहा, [न्] पुं, (प्रलापं हन्तीति। हन् + क्विप्।) कुलत्थाञ्जनम्। इति राजनिर्घण्टः ॥

प्रलीनता, स्त्री, (प्रलीनस्य निश्चेष्टस्य भावः। प्रलीन + तल्।) प्रलयः। तत्पर्यायः। इन्द्रियस्वापः २ चेष्टानाशः ३। इति राजनिर्घण्टः ॥

प्रलेहः, पुं (प्रलिह्यते इति। प्र + लिह् + घञ्।) व्यञ्जनविशेषः। इति पाकराजेश्वरः। दम्पोक्त कोरमा इत्यादि पारस्यभाषा ॥)विस्तारशो घृत प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च वारिणा।
तस्यां हे विनिक्षिप्य दर्व्यां सञ्चालयन् पचेत्॥
तासां तत्र विनिःक्षिप्य लवणं लक्ष्मलक्षकम्।
पचेत् पटपटायच्चं तस्मिन् मांसे प्रकुर्वति ॥
प्रक्षिपेद्दाडिमीनीरं बहुलेन पचेत् पुनः।
मांसपिण्डेषु सिद्धेषु देया शुण्ठी समीरका ॥
ततयोत्ताय्यं तन्मांसं पृथक् कुर्य्यात् प्रलेहतः।
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
हिङ्गुना घृतयुक्तेन धूपेन तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु।
"हिङ्ग्वार्द्रबीजपूरैलालवणैः सधूपेन तु।
कुट्टितामिषपिष्टेन तत्र दाडिमबीजतः ॥
शोषणाबेसवारेण प्रलेहो गौड़देशजः ॥
प्रलेहो रुचिदो बल्यः कफानिलरुजापहः।
रूपाद्यो पित्तकृत् किञ्चिच्चिरसाधनगदान् जयेत् ॥"
पूर्णप्रलेहस्तु।
"मांसपूरणयोगेन कोष्ठाकारं विधाय च।
सिद्धं क्षतं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरणस्य प्रलेहोऽयं विशेषो वातनाशनः।
हृद्यास्तकारकश्चैव सुखवैरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः।
"घृते वेसरधान्याकहिङ्गुसद्दधिसंयुते।
वस्त्रपूतेऽर्द्धसम्पक्वं क्षिप्तं मांसं विनिःक्षिपेत्॥"
पीतवर्णस्तु।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत्।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि।
"तस्यां हि क्षिपेद्धिङ्गुसंयुक्तं कामवर्द्धकम्।
धान्यकं लवणाजाजीधौतं मांसञ्च तत् क्षिपेत्
ततोऽर्द्धस्फुटिते मांसे दाडिमीबीजसंयुते।
सम्पक्वे चातिमृदुले तक्रं शुण्ठीञ्च निःक्षिपेत्॥
तत उत्तार्य्य वस्त्रे च गालयेद्ध पचेदपि।
रक्तवर्णप्रलेहस्य संसिद्ध्यर्थं विनिःक्षिपेत् ॥
करमर्द्दं दाडिमस्य स्थाने शेषन्तु पूर्व्ववत् ॥"
हरितवर्णस्तु।
"मेथिकाकासमर्दाम्लकल्केन चलकारिते।
घृते मांसं विनिःक्षिप्य पचेच्छुक्लप्रलेहवत् ॥
सिद्धे च गालयेद्धस्ते कृत्वा वर्णप्रयोजनम्।
ताम्बूलं कटसक्षारं देयं हरितहेतुना ॥
अरुचौ रुचिदः सद्यो नानावर्णप्रसाधितः।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि।
"माषस्य पिष्टिका सूक्ष्मा वेसवारेण संयुता।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रबिम्बीफलाकारं लड्डुकावटकादिकम्।
शृङ्गाटकफलाकारं यथारुचिप्रकारकम् ॥
कृत्वा हि बहुधाधारे स्वेदितं घृतभावितम्।
सवेसवारके तक्रे क्वथिते च मनोरमे ॥
निःक्षिप्य चालयेद्दीपदुत्तार्य्यैलादिवासिते।
एवन्तु बहुधा कार्य्यो माषमुद्गप्रलेहकः ॥
प्रलेहो वातजिद्बल्यः शुक्रमांसप्रदो रसः।
शोषणः प्राणयुक्तानां प्रमदः क्षीणरेतसाम् ॥"
मत्स्यप्रलेहस्तु।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः।
आदौ तैले परं पक्वं सर्व्वमन्यत्तु पूर्व्ववत् ॥
वर्णस्य करणे देयं पूर्व्वोक्तं द्रव्यकं हि यत्।
उद्धूलनं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥
मत्स्यखण्डप्रलेहस्तु।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम्
समतैले क्षिपेत् खण्डं हिङ्गुसैन्धवमिश्रितम्।
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥"

प्रवक्ता, [ऋ] त्रि, प्रकर्षेण वक्ति यः (प्र + वच् + तृच्।) वेदादिवाचकः। यथा,—
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
इति मनुः ८ अध्यायः ॥

प्रवचनं, क्ली, (प्रकर्षेण उच्यते इति। प्र + वच् + ल्युट्) वेदः। (यथा, अमरकोषे। २।७।१०।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः।
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते ॥"
वेदाङ्गम्। यथा, मनुः। २। १८४।
"अपाङ्क्त्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनाङ्गानि तेषु अपाङ्क्त्याः षडङ्गविदः।" इति तत्र कुल्लूकभट्टः ॥ तथा च हरिवंशे। १६७। १८।
"उवाच वेदांश्चतुरो मन्त्रप्रवचनार्चितान्।"
प्रकृष्टं वचनमिति कर्म्मधारयः। प्रकृष्टवाक्यम्। इति मेदिनी। ने, १८१ ॥ (यथा, मुण्डकोपनिषदि। ३। २। ३।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

प्रवचनीयः, त्रि, (प्रवक्तीति। प्र + वच् + "भव्यगेयप्रवचनीयेति।" ३।४।६८। इति कर्त्तरि अनीयर्।) प्रवक्ता। (प्रोच्यते इति। प्र + वच् कर्म्मणि अनीयर्।) प्रवाच्यः। इति मेदिनी, ये १३२।

प्रवणः, पुं, (प्रवन्ते गच्छन्ति जना अनेनेति प्रु गतौ + करणे ल्युट्) चतुष्पथः। इत्यमरः ३।३।५६।

प्रवणः, त्रि, (प्रवतेऽस्मेति। प्रु + अधिकरणे ल्युट्) क्रमनिम्नभूमिः। (यथा, मनुः। ३। २०६।
"दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत् ॥"
उदरम्। प्रह्वः। इति मेदिनी। णे,५८॥ (यथा, मार्कण्डेये। २१। ८८।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥")
आयतः। प्रगुणः। क्षणः। इति विश्वः ॥
द्रुतः। क्षिग्धः। इति शब्दरत्नावली ॥
आसक्तः। इति हेमचन्द्रः। ३।४८ ॥ (यथा, विष्णुपुराणे। ६। १। ११।
"प्रशास्ता ब्राह्मणा यत्राचारवर्णव्यवस्थितौ।
धर्म्मकृत्यहारवता चारप्रवणा मुनिसत्तम ॥")
क्षीणः इति धरणिः।

प्रवत्स्यत्पतिका, स्त्री, (प्रवत्स्यन् प्रवासं गमिष्यन् पतिर्यस्याः। कप्।) नायिकाभेदः। अस्या लक्षणम्। यस्याः पतिरविमर्शे देशान्तरं यास्यत्येव सा अस्यारम्भ इष्टा। अस्याश्चेष्टाः आकुलत्वनिःश्वासरोदनगमनविघ्नोत्पादनपश्चात्तापादयः ॥ मुग्धा प्रवत्स्यत्पतिका यथा,—
"प्राणेश्वरे किमपि जल्पति निर्गमाय
वामोदरी वदनमानमयाञ्चकार।
यातो पुनर्निभृतमिन्दु शशाङ्कमुष्ण-
सुम्भत्कोकिलकलध्वनिमातताम ॥ ॥

मध्या प्रवत्स्यत्पतिका यथा,—
"गन्तुं प्रिये ! वदति निःश्वसितं न दीर्घ-
मार्मोच वा नयनयोर्जलमाविरासीत् ।
चातुर्लिपिं पठितुमिच्छति यः परन्तु
मासस्त्वरी किमु करः समुपाजगाम ॥"२॥
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं मुञ्चति सुभ्रुवामपि तनुत्यागे वियोगज्वर-
स्तेनाहं विदिताश्वसिर्यदुदिते । पृच्छामि सत्यं वद
ताम्बूलं कुसुमं पटीरसुदकं यच्चम्भुभिर्दीयते
तत् स्यादेव परत्र वा किमु वियज्ज्वालावलो-
दुःसहम् ॥"३॥
परकीया प्रवत्स्यत्पतिका यथा,—
"न्यस्तं पन्नगमूर्द्धि पादयुगलं भक्तिर्विमुक्ता गुरौ,
त्यक्ता भीतिरकारि किं न भवतो हेतोर्मया
दुष्कृतम् ।
यहाना गतयातता नयनयोः कोपक्रमो रौरवः
कुम्भीपाकपराभवश्च मनसो युक्तं त्वयि
गच्छति ॥"४॥
सामान्यप्रवत्स्यत्पतिका यथा,—
"मुद्रां प्रदेहि वलयाय भवद्वियोग-
मासाद्य यास्यति वहिः सहसा यदेतत् ।
इत्थं निगद्य विगलन्नयनाम्बुधारा
धाराङ्गना प्रियतमं करयोर्बभार ॥"५॥
इति रसमञ्जरी ॥
प्रवयणं, क्ली, (प्रवीयतेऽनेनेति । प्र + वज गतौ
क्षेपणे च + ल्युट् । "वा यौ ।" २ । ४ । ५७ ।
इति वी । "कृत्यचः ।" ८ । ४ । २९ । इति
णत्वम् ।) प्रतोदः । इति हेमचन्द्रः । ३ । ५५७ ॥
(प्र + वय गतौ + भावे ल्युट् । प्रकर्षेण गम-
नम् । इति केचित्) ॥
प्रवयाः, [स्] त्रि, (प्रगतं वयो यस्य ।) वृद्धः ।
इत्यमरः २ । ६ । ४२ ॥ (यथा, रघुः । ८ । १९ ।
"नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा ।
परिचेतुमुपांशुधारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥"
पुराणः । इति निघण्टुः । ३ । २७ ॥ यथा,
ऋग्वेदे । २ । १० । ४ ।
"य था यो विश्वा भुवनानि मल्यमिमागतत-
प्रवया वाश्वर्णन ॥")
प्रवरं, क्ली, (प्रव्रियते इति । प्र + वृ + अप् ।)
अगुरु । इति शब्दमाला ॥ गोत्रम् । श्रेष्ठे,
त्रि । इति मेदिनी । रे, १०६ ॥ (यथा, मनुः ।
१० । २० ।
"अतो यद् महान् वर्णान् जनयन्ति वाटोनियु ।
सावकाश्या प्रसूयन्ते प्रवरासु च योनिषु ॥")
प्रवरः, पुं, (प्र + वृ + अप् ।) सन्ततिः । इति
मेदिनी । रे, १०६ ॥ गोत्रप्रवर्त्तकमुनिव्यावर्त्तको
मुनिगणः । तथा च जमदग्निगोत्रस्य
प्रवराः जमदग्न्यौर्ववशिष्ठाः । भरद्वाजगोत्रस्य
भरद्वाजाङ्गिरसबार्हस्पत्याः । विश्वामित्र-
गोत्रस्य विश्वामित्रमरीचिकौशिकाः । अत्रि-
गोत्रस्य अत्र्यात्रेयशातातपाः । गौतमगोत्रस्य
गौतमवशिष्ठबार्हस्पत्याः । वशिष्ठगोत्रस्य
वशिष्ठः । केषाञ्चित् वशिष्ठात्रिसांकृतयः ।
काश्यपगोत्रस्य काश्यपाप्सारनैध्रुवाः । अगस्त्य-
गोत्रस्य अगस्तिदधीचिजैमिनयः । मौकालिन-
गोत्रस्य मौकालिनाङ्गिरसबार्हस्पत्याप्सार-
नैध्रुवाः । सौकालिगोत्रस्य और्व्वच्यवनभार्गव-
जामदग्न्याप्नुवतः । पराशरगोत्रस्य पराशर-
शक्तिवशिष्ठाः । बृहस्पतिगोत्रस्य बृहस्पतिकपिल-
पार्व्वणाः । कात्यनगोत्रस्य अत्यदेवलदेव-
राजाः । विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः ।
कौशिकगोत्रस्य कौशिकात्रिजमदग्नयः । कात्या-
यनगोत्रस्य अत्रिभृगुवशिष्ठाः । आत्रेयगोत्रस्य
आत्रेयशातातपसांख्याः । काण्वगोत्रस्य काण्वा-
श्वत्थदेवलाः । कृष्णात्रेयगोत्रस्य कृष्णात्रेया-
त्रेयाप्लवाः । सांकृतिगोत्रस्य अयाहारावि-
सांकृतयः । कौण्डिन्यगोत्रस्य कौण्डिन्यस्ति-
मिककौत्साः । गर्गगोत्रस्य गार्ग्यकौस्तुभ-
माण्डव्याः । आङ्गिरसगोत्रस्य आङ्गिरस-
वशिष्ठबार्हस्पत्याः । अनावृकाचगोत्रस्य गार्ग्य-
गौतमवशिष्ठाः । पव्यगोत्रस्य पव्यवसिष्ठार-
स्ताः । जैमिनीगोत्रस्य जैमिन्यतथ्यसांकृतयः ।
हरिगोत्रस्य कुरसहाङ्गिरोबार्हस्पत्याः ।
शाण्डिल्यगोत्रस्य शाण्डिल्यासितदेवलाः ।
वात्स्यगोत्रसावर्णगोत्रयोः और्व्वच्यवनभार्गव-
जामदग्न्याप्नुवतः । आलम्बायनगोत्रस्य आल-
म्बायनशाकटायनशाकटायनाः । वयाघ्रपद्य-
गोत्रस्य सांकृतिः । घृतकौशिकगोत्रस्य कुशिक-
कौशिकघृतकौशिकाः । केषाञ्चित् कुशिक-
कौशिकबन्धुलाः । शक्तिगोत्रस्य शक्तिपराशर-
वशिष्ठाः । कात्यायनगोत्रस्य कात्यायनाङ्गिरस-
बार्हस्पत्यभरद्वाजाजमीढ़ाः । मार्कण्डगोत्रस्य
अयोभ्यानकाशुकयः । गौतमगोत्रस्य गौत-
माप्सराङ्गिरसबार्हस्पत्यनैध्रुवाः । केषाञ्चित्
गौतमाङ्गिरसावास्याः । शुनकगोत्रस्य शुनक-
शौनकगृत्समदाः । सौपायनगोत्रस्य प्रवराः
और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । इति
धनञ्जयकृतधर्म्मप्रदीपे गोत्रप्रवरविवेकः ॥
प्रवर्गः, पुं, (प्रकृष्टं निःक्षिप्यते हविरादिक-
मस्मिन्निति । प्र + वृज् + अधिकरणे घञ् ।)
होमाग्निः । इति हेमचन्द्रः । ३ । ४०० ॥ (यथा,
हरिवंशे । ४१ । ३४ ।
"दक्षिणाहृदयो योगी महामखमयो महान् ।
उपाकर्म्मोष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः ॥"
प्रवर्ग्य इति पाठोऽपि दृश्यते ॥)
प्रवर्त्तकः, त्रि, (प्रवर्त्तयतीति । प्र + वृत् + णिच् +
ण्वुल् ।) प्रवर्त्तनकारी । प्रवर्त्तयिता । यथा,
"प्रवर्त्तकं वाक्यसुधानपोरुषी
निवर्त्तकं मित्रमुखाब भाषणम् ।
ततश्च विद्रो नहि वोदमस्ति वा
प्रवर्त्तिका ता न प्रवर्त्तिनि स्त्रियः ॥"
इति कवेश्यारीरकम् ॥
(यथा च देवीभागवते । १ । १४ । ४२ ।
"प्रथमं पठिताः वेदा मया विस्तारिताश्च मे ।
हिंसामयास्ते पठिताः कर्म्ममार्गप्रवर्त्तकाः ॥"
प्रयोजकः । यथा, भागवते । ८ । १० । ४ ।
"धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः ।
यज्ञभुग् वासुदेवांशः स्मृतिमात्रार्त्तिनाशनः ॥")
प्रवर्त्तनं, क्ली, (प्र + वृत् + णिच् + ल्युट् ।)
प्रवृत्तिः । यथा,—
"नैःस्वैर्व्वान्तं समच्छन्ति परोत्सर्गञ्च भुञ्जते ।
इतरार्थवद्दे येषां कर्म्मणां स्यात् प्रवर्त्तनम् ॥"
इति काव्यप्रकाशः ॥
आरम्भः । यथा,—
"मृते तु स्वामिनि पुनस्तद्वंश्ये चापि मानवे ।
राजाज्ञमानस्य ततः कुर्य्यात् सेतुप्रवर्त्तनम् ॥"
इति मिताक्षरा ॥
प्रवर्त्तना, स्त्री, (प्र + वृत् + णिच् + युच् ।) प्रवृत्ति
प्रेरणम् । यथा, नैषधे । २ । ६१ ।
"अथवा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि नः ।
स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥"
प्रवर्त्तितः, त्रि, (प्र + वृत् + णिच् + क्तः ।) ज्वालितः ।
यथा, रघुवंशे । ५ । ३७ ।
"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वात् विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥"
प्रवर्हणं, क्ली, प्रपूर्व्वहवधातोर्भावे अनट् (ल्युट् ।)
विवर्हणम् । कर्त्तरि(ल्यु)अनप्रत्यये, इष्टिकारके,
त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये ।
"इदमोत्तं समधुरं कषायानुगम कृतम् ।
वातश्लेष्मप्रशमनं गुरु शुक्रप्रवर्हणम् ॥")
प्रवर्हः, त्रि, (प्रवर्हति प्रवर्हते इति । प्र + वृह +
अच् ।) प्रधानम् । श्रेष्ठः । इत्यमरः । ३ । १ । ५८ ॥
प्रवल्लाको, पुं सुक्त्रः । त्रिविधश्चक्षः । इति
त्रिकाः ॥
प्रवहः, पुं, (प्र + वह + आ + अच् ।) गृह-
मगरादेर्व्वहिर्गमनम् । इत्यमरः । ३ । २ । १९८ ॥
(प्रवहतीति । प्र + वह् + अच् ।) वायुः ।
इति हेमचन्द्रः ॥ भगवदुक्तसप्तविधवायुः ।
स तु आवहाद्यपेक्षयोर्द्ध्वस्थितः । इति सिद्धान्त-
शिरोमणिः ॥
"अयस्कान्तोऽपि वहति प्रवहः न न स्तनः ।"
इति विष्णुपुराणे ॥ अंशे ९ अध्याये ॥
तस्य टीका । "अयस्कान्तोऽपि प्रवहः इति
हि न वायुः प्रवहः स्तनः प्रवहसैव स्थिरः वर्त्त
वायुरुप्याः ॥" (विश्वदेवः । यथा क्वचित्
वहोदिखण्डे । ९ । ६ ।
"आवहः प्रवहश्च उद्वहः संवहस्तथा ।
परीवहः परावह विवह एव तथा ॥")
प्रवहणं, क्ली (प्रोह्यते अनेनेति । प्र + वह् +
करणे ल्युट् ।) कर्णीरथः । स्त्रीयानविशेषः ।

मुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः । इत्यमरभरतौ । २ । ८ । ५२ ॥ (यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के । “प्रविश्य सप्रवहणचेट इति ॥”)

प्रवह्लिः, स्त्री, (प्रवह्लते आच्छादयतीति । प्र + वह्ल + इन् ।) प्रवह्लिका । इत्यमरटीकायां भरतः ॥

प्रवह्लिका, स्त्री, (प्र + वह्ल + खुल् । टाप् अत इत्वम् ।) प्रहेलिका । इत्यमरः । १ । ६ । ६ ।

प्रवह्ली, स्त्री, (प्रवह्लि + पक्षे ङीप् ।) प्रवह्लिका । इति भरतः ॥

प्रवाक्, [च्] त्रि, (प्रकृष्टा वाग् यस्य ।) वाग्मी युक्तिपटुः यथा,—
“वावी युक्तिपटुर्वाग्मी वचोज्ञः प्रवचाः प्रवाक् ॥”
इति जटाधरः ॥
(स्त्री, प्रकृष्टा वागिति प्रादि समासः ।) प्रकृष्टवाक्यञ्च ॥

प्रवाचकः, त्रि, (प्रकृष्टं वक्तीति । प्र + वच् + ण्वुल् ।) प्रकृष्टवक्ता । प्रपूर्व्ववचधातोः कर्त्तरि ण्वकप्रत्ययः ॥

प्रवाणिः, स्त्री, (प्रकर्षेण ऊयतेऽनयेति । प्र + वे + करणे ल्युट् । ङीप् । निपातनात् ङीपो ह्रस्वः ।) तन्त्रशलाका । इति निष्प्रवाणिशब्दटीकायां भरतः ॥ माकु इति भाषा ॥

प्रवाणी, स्त्री, (प्र + वे + ल्युट् + ङीप् ।) तन्त्रशलाका । इति निष्प्रवाणिशब्दटीकायां भरतः ॥ माकु इति भाषा ॥

प्रवादः, पुं, (प्रकृष्टो वादः । प्र + वद् + घञ् वा ।) परस्परवाक्यम् । यथा, भट्टिः । २ । ३६ ।
“इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू राममिथाधिकारौ ।
दृष्णाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्यत् ॥”
जनरवः । यथा,—
“प्रियाप्तोऽहं स्वसपि च मम प्रेयसीति प्रवादस्त्वं मे माता वहमपि तवास्मीति हन्त प्रलापः, त्व मे तेऽकामवनपि च यत्तव मो साधु राधे । व्याहारं मो नहि समुचितो युष्मदस्मत्प्रयोगः ॥”
इत्यलङ्कारकौस्तुभः ॥

प्रवारः, पुं, (प्रव्रियतेऽनेनेति । प्र + वृ + करणे घञ् ।) प्रवरः । वस्त्रम् । प्रपूर्व्ववृधातोर्घञ् । इति संक्षिप्तसारव्याकरणम् ॥

प्रवारणं, क्ली, (प्र + वृ + णिच् + ल्युट् ।) काम्यदानम् । इत्यमरः । ३ । २ । ३ ॥ काम्यस्य कमनीयस्य वस्तुनो वस्त्रोरजादिनो दानम् । काम्येन कामनया वा दानं प्रवारणमुच्यते । काम्यशब्दोऽत्र तन्त्रेणोभयार्थः । प्रकर्षेण वार्य्यते संवाय्यते प्रवारणं तच्च महादानम् । प्रवारणं महादानमिति विकाण्डशेषः । इति टीकायां भरतः ॥ (प्रकर्षेण वारणमिति ।) निषेधः । इति मेदिनी । णे, १०१ ॥

प्रवासः, पुं, (प्रवसन्त्यस्मिन्निति । प्र + वस् + “हलश्च ।” ३ । ३ । १२१ । इति घञ् ।) विदेशः । विदेशस्थितिः । यथा,—
“कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना ।
रामप्रवासे व्यमृशद्दोषं
जनापवादं सनरेन्द्रमृत्युम् ॥”
इति भट्टिः । ३ । ७ ॥ ० ॥
द्वादशवर्षाणुप्रवास्तकर्मोपितस्य तत्प्रवासावदिने श्राद्ध कर्त्तव्यम् । यथा,—
“प्रवासवासरे श्रेयं मासेन्दुघट्येऽथवा ॥”
इति मिताक्षरा । १ । ७ ॥ ० ॥
प्रवासागतेन गुर्व्वाद्यभिवादनं कर्त्तव्यम् । यथा,
“विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ।
सम्पूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य भूप ! संग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥”
इति कौर्म्मे उपविभागे १२ अध्यायः ॥

प्रवासनं, क्ली, (प्र + वास च्छेदे + ल्युट् ।) वधः । इत्यमरः ॥ (प्र + वस् + णिच् + ल्युट् ।) प्रवासना । यथा, उत्तररामचरिते ।
“सीताप्रवासनपटोः करुणा कुतस्ते ॥”

प्रवासी, त्रि, (प्रवसितुं शीलमस्येति । प्र + वस् + “व्रे लपचतुद्भवदस्रः ।” ३।२।१४५ । इति घिनुण् ।) प्रवासविशिष्टः । प्रोषितः । विदेशस्थः । यथा,—
“अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ प्रवासी तद्गणो हारिः पाथेयं शम्बलं समे ॥”
इति हेमचन्द्रः । ३ । १५७ ॥
(यथा, मार्कण्डेये । १८ । ३१ ।
सम्प्रीतस्तोषितो नेता कण्ठस्था कण्ठभूषणम् । चाभीष्टमभ्युदारेव सयाग्रेयं प्रवासिभिः ॥”)

प्रवाहः, पुं, (प्र + वह् + भावे घञ् ।) प्रवृत्तिः । (यथा, भागवते । ७ । ८ । ८ ।
“सत्त्वे कतानगतयो वचसां प्रवाहैः ॥”
जलस्रोतः । इति मेदिनी । हे, ११ ॥ (यथा, रघौ । ५ । ४६ ।
“पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥”)
व्यवहारः । इति विश्वः ॥ प्रकृष्टाश्वः । इति नानार्थरत्नमाला ॥ (पुरीषादेर्निर्गमः । यथा, सुश्रुते उत्तरतन्त्रे । ४० अध्याये ।
“प्रवाहेण गुदभ्रंशो मूत्राघातो कटिग्रहः ।
मधुराम्लयुतं तैलं सर्पिर्वाप्यनुवासनम् ॥”)

प्रवाहकः, पुं, (प्रवहतीति । प्र + वह् + ण्वुल् ।) राक्षसः । इति शब्दमाला ॥ प्रकृष्टवहनकर्त्तरि, त्रि ॥

प्रवाहिका, स्त्री, (प्रवहति मुहुर्मुहुः मलमत्रेति । प्र + वह् + ण्वुल् । टाप् अत इत्वम् ।) ग्रहणीरुक् । इत्यमरः । २ । ६ । ५५ ॥ (यथा, सुश्रुते सूत्रस्थाने । ११ अध्याये ।
“प्रवाहिका शिरःशूले कोष्ठशूले च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥”
अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम् । अस्याः स्वरूपमाह चरकः ।
“अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता ।
अपक्वं धारयेत् तच्च पक्वं सृजति चाप्यधः ॥”
सुश्रुतोऽपि ।
“षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता
आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते ॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः ।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति ॥
तस्मात् कार्य्यः परीहारो ह्यतिसारे विरिक्तवान् ॥” ० ॥
अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यान्तु सामस्य मलस्य प्रवृत्तिरिति तयोर्भेदः ॥ ० ॥ अथ रोगस्य भेदं संग्रहग्रहणीरोगमाह ।
“द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत् ।
आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् ।
पक्षान्मासाद्दशाहाद्वा नित्यं वापि विमुञ्चति ।
अन्त्रकूजनमालस्यं दौर्ब्बल्यं सदनं भवेत् ॥
दिवा प्रकोपो भवति रात्रौ शान्तिश्च गच्छति
दुर्व्विज्ञेया दुर्निवारा चिरकालानुबन्धिनी ।
सा भवेदामवातेन संग्रहग्रहणी मता ॥”
अथ घटीयन्त्राख्यं ग्रहणीरोगमाह ।
“प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः ।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ॥”
अथ ग्रहणीरोगस्यारिष्टमाह ।
“येऽसंभवैः सिध्यति नातिसार-
स्तैः साध्य साध्यो ग्रहणीगदोऽपि ।
वृद्धस्य जायेत यदा गदोऽयं
देहं तदा तस्य विनाशयत्येव ॥” ० ॥
अथ सामान्यग्रहणीरोगस्य चिकित्सामाह ।
ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्दीपनीयैश्च मन्दाग्नीसारभेषजैः ।
दोषं साम निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पिबेदपि पटु सघृतं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्राणि ग्रहण्यां योजयेद्भिषक् ॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि ॥”
संवर्त्तयति घनीकरोति ॥
अथ षड्यूषः ।
“मुद्गयूषं रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात् षड्यूषमिति कीर्त्तितम् ॥”
इदं सद्यःपाचिकमामग्नम् ॥ ० ॥
“कर्षं गन्धकमर्द्धपारदयुगं कुर्य्यात्तयोः कज्जली
तावत् सूतकञ्च पञ्चलवणं क्षारं च कर्ष त्रयं

भृष्टं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धभागान्वितं
खादेदङ्गमितं प्रहृत्तिगदवांस्तक्रस्य विल्वेन च।
लशुनायिकाचूर्णमित्ययं ॥ इति लशुनाद्यचूर्णम्॥
त्रिकटु त्रिफला चैव विडङ्गं जीरकद्वयम्।
भल्लातकं यवानी च हिङ्गुलवणपञ्चकम् ॥
गृहधूमो वचा कुष्ठं रसो गन्धकमभ्रकम् ॥
क्षारद्वयाजमोदे च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम्।
समभागकृतश्चैषां चूर्णं शस्तं विनिर्म्मितम् ॥
सञ्जातमनस्य चर्णन्तु चूर्णतुल्यं प्रदापयेत्।
मन्दाग्निकासदुर्नामशोथपाण्डुरुचिज्वरान् ॥
विष्टम्भं सपक्षं शूलं हन्यात्तानातिसारजित्
आमवातापहं सद्य सूतिकादोषनाशनम् ॥
वर्ज्जयेन्मासमन्त्रश्च स्नानं पिष्टितभोजनम्।
पथ्यं काञ्जिकमत्रापि दधितक्रमथापि वा ॥
हृहच्छार्द्दचूर्णमिदं सार्द्धमापितमुत्तमम् ॥"
इति बृहच्छार्द्दचूर्णम्। हृहच्छायिकाचूर्णमिति
प्रसिद्धम् ॥ * ॥
"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीशपिप्पलीपथ्यास्थूलजीरकचित्रकैः।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गाश्च तावतीम्।
सर्व्वचूर्णसमानांशा प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादेन्मधुना प्लावितं जनः।
नाशयेद्ग्रहणीं कासं क्षयं श्वासमरोचकम् ॥"
इति जातीफलादिचूर्णम् ॥*॥
चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम्।
व्योषं हिङ्ग्वजमोदाश्च चव्यञ्चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्वा दाड़िमस्य वा।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥
क्षारौ सर्जिका यवक्षारश्च। लवणपञ्चकमिति।
"सैन्धवं रुचकञ्चैव विड् सामुद्रकं गड़म्॥" इति॥
व्योषं शुण्ठीपिप्पलीमरिचानि। अजमोदाच
यवानिका। मातुलुङ्गं बीजपूरकम्। इति चित्र-
कादिवटिका ॥*॥
"श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः
सगुड़ः।
ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति ॥"
श्रीफलशलाटुः बिल्वस्यामं फलम्। गुड़स्यात्र
भागद्वयम्। इति बिल्वकल्कः ॥ * ॥
"चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम्।
वार्त्ताकोः कुडवञ्चार्कमूलाद्बिल्वे तथाष्टमात्
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम्।
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम्॥"
इति वार्त्ताकुगुटिका ॥*॥
"मुस्तकातिविषाबिल्वकौटजं सूक्ष्मचूर्णितम्।
मधुना च समालीढ़ं ग्रहणीं सर्व्वजां त्यजेत्॥"
कौटजं इन्द्रयवः। मुस्तकादिचूर्णम् ॥*॥
"सितो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥"
सर्ज्जः शालः। सर्ज्जरसचूर्णम् ॥ * ॥
"विल्वाब्दशक्रयववालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण।
सोऽतिप्रहृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥"
मोचो मोचरसः। क्षिणोति हन्ति ॥*॥
"प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहवुषाजमोदैः ॥
विड़ङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम्।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् चित्रदभ्रष्टा त्रिसुगन्धि पलं पलम्
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥"
इति कल्याणकगुड़ः ॥*॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकञ्च विड़ङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी जीरकस्तथा।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विड़म् ॥
आरग्वधत्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
गुड़ूच्याः पलान्यत्र चत्वारि कथिता निषिः।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु।
प्रस्थत्रयमिदं सर्व्वं शनैर्म्मृद्वग्निना पचेत् ॥
श्रौड़म्बरं चामलकं बादरं वा यथा फलम्।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम्
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्मृतिम्।
पिशुपाठान्वयार्शांसि रक्तपित्तञ्च विड्ग्रहम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुड़ः ॥"
इति महाकल्याणकगुड़ः ॥*॥
कुष्माण्डानां सुपक्वानां छिन्नानां निष्कुलत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकानि विड़ङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्।
एकैकस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च।
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु ॥
धात्रीफलरसस्यात्र प्रस्थत्रयमुदीरितम्।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्
यावद्दर्व्वीप्रलेपः स्यात्तथैनमवतारयेत्।
औड़म्बरस्यामलकं बादरं वा यथा फलम्
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम्।
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान्।
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ॥
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम्।
वातशोणितवीसर्पदद्रुचर्म्मदलीमकान् ॥
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत्।
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः ॥
तेभ्यो हितो गुडोऽयं स्याद्वन्ध्यानामपि पुत्रदः
हृद्यो वृष्यो हि हणश्च वयसः स्थापनः परः ॥"
इति कुष्माण्डकल्याणकगुड़ः ॥*॥
अतीसाराधिकारलिखितं बिल्वतैलञ्चात्र हि-
तम्। इति भावप्रकाशे ग्रहणीरोगाधिकारः ॥
(चिकित्सान्तरमस्या यथा,—
"बालं बिल्वं गुड़ं तैलं पिप्पली विश्वभेषजम्।
लिह्याद्वाते प्रतिहते सशूले सप्रवाहिके ॥
पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः।
त्र्यहात् प्रवाहिकां हन्ति चिरकालानुबन्धि-
नीम् ॥
कल्कः स्यादामबिल्वानां तिलकल्कश्च तत्समः।
दध्नः सराम्लः सस्नेहः खड़ो हन्यात् प्रवाहि-
काम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥
प्रवाही, स्त्री, (प्रोह्यते इति। प्र+वह्+
घञ्। गौरादित्वात् ङीष्) वालुका। इति
राजनिर्घण्टः ॥
प्रविख्यातिः, स्त्री, (प्र+वि+ख्या+क्तिन्।)
अतिप्रसिद्धिः। तत्पर्य्यायः विश्रावः २। इत्य-
मरः। १। २।२८ ॥
प्रविदारणं, क्ली, (प्रविदारयत्यत्रेति। प्र+वि+
दृ+णिच्+आधारे ल्युट्।) युद्धम्। इत्यमरः।
२।८।१०२ ॥ (प्र+वि+दृ+णिच्+भावे
ल्युट्।)अवदारणम्। इति मेदिनी। णे,११२॥
भाक्षोधम्। इति शब्दरत्नावली ॥ (प्र+वि+
दृ+णिच्+कर्त्तरि ल्युः। प्रविदारके, त्रि ॥)
प्रविदः, पुं, पीतकाष्ठम् इति। शब्दचन्द्रिका ॥
प्रविश्लेषः, पुं, (प्रकृष्टो विश्लेषो यस्य।) प्रकृष्ट-
विश्लेषः। तत्पर्य्यायः। विधुरम् २। इत्यमरः।
३। २। १० ॥ यथा,—
"वैकल्येऽपि प्रविश्लेषे विधुरं विकले त्रिषु ॥"
इति भरतधृतत्रिकाण्डशेषः ॥
प्रविषा, स्त्री, (प्रकृतं विषमनया।) अतिविषा।
इति शब्दचन्द्रिका। २। ४। ९८ ॥ (अतिविषा-
शब्देऽस्य विवरणं ज्ञातव्यम् ॥)
प्रविष्टः, त्रि, (प्र+विश्+कर्त्तरि क्तः।) प्रवेश-
विशिष्टः। यथा,—

मुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः । इत्यमरभरतौ । २ । ८ । ५२ ॥ (यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के । "प्रविश्य सप्रवहणचेट इति ॥")

प्रवह्लिः, स्त्री, (प्रवह्लते आच्छादयतीति । प्र + वह्ल् + इन् ।) प्रवह्लिका । इत्यमरटीकायां भरतः ॥

प्रवह्लिका, स्त्री, (प्र + वह्ल् + ण्वुल् । टाप् अत इत्वम् ।) प्रहेलिका । इत्यमरः । १ । ६ । ६ ।

प्रवह्ली, स्त्री, (प्रवह्लि + पक्षे ङीप् ।) प्रवह्लिका । इति भरतः ॥

प्रवाक्, [च्] त्रि, (प्रकृष्टा वाग् यस्य ।) वाग्मी युक्तिपटुः यथा,—

"वाग्मी युक्तिपटुर्वाग्मी वचोग्रः प्रवचाः प्रवाक् ॥"

इति जटाधरः ॥

(स्त्री, प्रकृष्टा वागिति प्रादि समासः ।) प्रकृष्टवाक्यञ्च ॥

प्रवाचकः, त्रि, (प्रकृष्टं वक्तीति । प्र + वच् + ण्वुल् ।) प्रकृष्टवक्ता । प्रपूर्व्ववचधातोः कर्त्तरि णकप्रत्यय. ॥

प्रवाणिः, स्त्री, (प्रकर्षेण ऊयतेऽनयेति । प्र + वे + करणे ल्युट् । ङीप् । निपातनात् ङीपो ह्रस्वः ।) तन्त्रशलाका । इति निष्प्रवाणिशब्दटीकायां भरत. ॥ माकु इति भाषा ॥

प्रवाणी, स्त्री, (प्र + वे + ल्युट् + ङीप् ।) तन्त्रशलाका । इति निष्प्रवाणिशब्दटीकायां भरतः ॥ माकु इति भाषा ॥

प्रवादः, पुं, (प्रकृष्टो वादः । प्र + वद् + घञ् वा ।) परस्परवाक्यम् । यथा, भट्टिः । २ । ३६ ।

"इत्थं प्रवादं युधि सम्प्रहारं
प्रचक्रतू रामनिशाविहारौ ।
क्षणाद्य मत्वा रघुनन्दनोऽथ
चापेन रक्षः प्रधनान्निरास्थत् ॥"

जनरवः । यथा,—

"प्रेयांस्तेऽहं त्वमपि च मम प्रेयसीति प्रवादस्त्वं मे प्राणा अहमपि तवास्मीति हन्त प्रलापः, त्वं मे तेऽस्म्यहमपि च यत्तच्च नो साधु राधे ! व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः ॥"

इत्यलङ्कारकौस्तुभः ॥

प्रवारः, पुं, (प्रव्रियतेऽनेनेति । प्र + वृ + करणे घञ् ।) प्रवरः । वस्त्रम् । प्रपूर्व्ववृधातोर्घञ् । इति संक्षिप्तसारव्याकरणम् ॥

प्रवारणं, क्ली, (प्र + वृ + णिच् + ल्युट् ।) काम्यदानम् । इत्यमरः । ३।२।३ ॥ काम्यस्य कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानम् । काम्येन कामनया वा दानं प्रवारणमुच्यते । काम्यशब्दोऽत्र सन्देहोभयार्थः । प्रकर्षेण वार्य्यते संव्रियते प्रवारणं तच्च महादानम् । प्रवारणं महादानमिति त्रिकाण्डशेषः । इति तट्टीकायां भरतः ॥ (प्रकर्षेण वारणमिति ।) निषेधः । इति मेदिनी । णे, १०१ ॥

प्रवासः, पुं, (प्रवसन्त्यस्मिन्निति । प्र + वस् + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) विदेशः । विदेशस्थितिः । यथा,—

"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना ।
रामप्रवासे व्यमृशन्नदोषं
जनापवादं सनरेन्द्रमृत्युम् ॥"

इति भट्टिः । ३ । ७ ॥ ० ॥

द्वादशवर्षाश्रुतवार्त्तकप्रोषितस्य तत्प्रवासादिने श्राद्धं कर्त्तव्यम् । यथा,—

"प्रवासवासरे श्राद्धं तस्यैन्दुक्षयेऽथवा ॥"

इति मिताक्षरा । ३ । ७ ॥ ० ॥

प्रवासागतेन गुर्वाद्यभिवादनं कर्त्तव्यम् । यथा,

"विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ।
सम्पूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य भूप ! संग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥"

इति कौर्म्मे उपविभागे १३ अध्यायः ॥

प्रवासनं, क्ली, (प्र + वास छेदे + ल्युट् ।) वधः । इत्यमरः ॥ (प्र + वस् + णिच् + ल्युट् ।) प्रवासना । यथा, उत्तररामचरिते ।

"सीताप्रवासनपटोः करुणा कुतस्ते ॥"

प्रवासी, त्रि, (प्रवसितुं शीलमस्येति । प्र + वस् + "प्रे लपसृद्रुमथवदवसः ।" ३।२।१४५ । इति घिनुण् ।) प्रवासविशिष्टः । प्रोषितः । विदेशस्थः । यथा,—

"अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ प्रवासी तद्गणो हारिः पाथेयं सम्बलं समे ॥"

इति हेमचन्द्रः । ३ । १५७ ॥

(यथा, मार्कण्डेये । १८ । ३१ ।

अद्यौर्धमचोचना श्रेष्ठा कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारैश्च तथाद्येयं प्रवासिभिः ॥")

प्रवाहः, पुं, (प्र + वह् + भावे घञ् ।) प्रवृत्तिः । (यथा, भागवते । ७ । ६ । ८ ।

"सत्त्वं कृतागमगतयो वचसा प्रवाहैः ॥"

जलस्रोतः । इति मेदिनी । हे, ११ ॥ (यथा, रघौ । ५ । ४६ ।

"पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥")

व्यवहारः । इति विश्वः ॥ प्रकृष्टाश्वः । इति नानार्थरत्नमाला ॥ (पुरीषादेर्निर्गमः । यथा, सुश्रुते उत्तरतन्त्रे । ४० अध्याये ।

"प्रवाहेण गुदभ्रंशे मूत्राघाते कटिग्रहे ।
मधुराम्लशृतं तैलं सर्पिर्वाप्यनुवासनम् ॥")

प्रवाहकः, पुं, (प्रवहतीति । प्र + वह् + ण्वुल् ।) राक्षसः । इति शब्दमाला ॥ प्रकृष्टवहनकर्त्तरि, त्रि ॥

प्रवाहिका, स्त्री, (प्रवहति मुहुर्मुहुः इत्यर्थे इति । प्र + वह् + ण्वुल् । टाप् अत इत्वम् ।) ग्रहणीरुक् । इत्यमरः । २ । ६ । ५१ ॥ (यथा, सुश्रुते सूत्रस्थाने । ३१ अध्याये ।

"प्रवाहिका शिरःशूले कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥"

अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम् । अस्याः स्वरूपमाह चरकः ।

"अन्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता ।
अपक्वं धारयेत् तच्च पक्वं सृजति चाप्यधः ॥"

सुश्रुतोऽपि ।

"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ।
पक्वामाशयमध्यस्था ग्रहणी साभिधीयते ॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः ।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति ॥
तस्मात् कार्य्यः परीहारो ह्यतिसारे विरिक्तवत् ॥" ० ॥

अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यास्तु मलस्य प्रवृत्तिरिति तयोर्भेदः ॥ ० ॥ ग्रहणीरोगस्य भेदं संग्रहग्रहणीरोगमाह ।

"द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत् ।
आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् ॥
पक्षान्मासाद्दशाहाद्वा नित्यं वाप्यथ मुञ्चति ।
अन्त्रकूजनमालस्यं दौर्ब्बल्यं सदनं भवेत् ॥
दिवा प्रकोपो भवति रात्रौ शान्तिश्च गच्छति ।
दुर्व्विज्ञेया दुर्न्निवारा चिरकालानुबन्धिनी ।
सा भवेदामवातेन संग्रहग्रहणी मता ॥"

अथ घटीयन्त्राख्यं ग्रहणीरोगमाह ।

"प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः ।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ॥"

अथ ग्रहणीरोगस्यारिष्टमाह ।

"सैकतसैः सिध्यति नातिसार-
स्तैः स्याच्च साध्यो ग्रहणीगदोऽपि ।
वृद्धस्य कायेन यदा गदोऽयं
देहे तदा तस्य विनाशमच्छेत् ॥" ० ॥

अथ सामान्यग्रहणीरोगस्य चिकित्सामाह ।

"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः ॥
दोषं सामं निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि ॥"

संवर्त्तयति घनीकरोति ॥

अथ षड्यूषः ।

"सुरूपं रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात् षड्यूषमिति कीर्त्तितम् ॥"

रसे लघुपाकिमांसमयम् ॥ ० ॥

"कर्षे गन्धकमर्द्धपारदमुभे कुर्य्यात् कुम्भी इत्थं
मात्रं शूलघ्नं पञ्चपदं चाङ्गेरं दत्त्वा हरेत् ।

भृष्टं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धभागान्वितं खादेद्दद्मितं प्रवृत्तिगदवांस्तक्रस्य बिल्वेन च ॥ लघुनायिकाचूर्णमित्यर्थः ॥ इति लघुलाईचूर्णम् ॥

त्रिकटु त्रिफला चैव विडङ्गं जीरकद्वयम् ।
भल्लातकं यवानी च हिङ्गुलवणपञ्चकम् ॥
गृहधूमो वचा कुष्ठं रसो गन्धकमभ्रकम् ॥
क्षारत्रयाजमोदे च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागकृतञ्चैषां चूर्णं सूक्ष्मं विनिर्म्मितम् ॥
शक्राशनस्य चार्द्धन्तु चूर्णतुल्यं प्रदापयेत् ।
मन्दाग्निकासदुर्नामशोथपाण्डुरुचिज्वरान् ॥
विष्टम्भं सग्रहं शूलं हन्यादामातिसारजित्
आमवातापहं श्रेष्ठं सूतिकादोषनाशनम् ॥
वर्ज्जयेच्चाम्लमत्स्यञ्च स्नानं पिशितभोजनम् ।
पथ्यं चाज्यिकमत्रापि दधितक्रमथापि वा ॥
बृहल्लाईचूर्णमिदं लाईभाषितमुत्तमम् ॥"

इति बृहल्लाईचूर्णम् । बृहन्नायिकाचूर्णमिति प्रसिद्धम् ॥ * ॥

"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीशपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गाञ्च तावतीम् ।
सर्व्वचूर्णसमानांशा प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादेन्मधुना प्लावितं जनः ।
नाशयेद्ग्रहणीं कासं क्षयं श्वासमरोचकम् ॥"

इति जातीफलादिचूर्णम् ॥ * ॥

चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
व्योषं हिङ्ग्वजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्वा दाडिमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥

क्षारौ सर्जिका यवक्षारश्च । लवणपञ्चकमिति । "सैन्धवं रुचकञ्चैव विडं सामुद्रकं गडम् ॥" इति । व्योषं शुण्ठीपिप्पलीमरिचानि । अजमोदाश्च यवानिका । मातुलुङ्गं बीजपूरकम् । इति चित्रकादिवटिका ॥ * ॥

"श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः सगुडः ।
ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति ॥"

श्रीफलशलाटुः बिल्वश्यामं फलम् । गुडस्य च भागद्वयम् । इति बिल्वकल्कः ॥ * ॥

"चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम् ।
वार्त्ताकोः कुडवञ्चार्कमूलाद्विपले तथानलात् ।
दग्धं द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥"

इति वार्त्ताकुगुटिका ॥ * ॥

"मुस्तकातिविषाबिल्वकौटजं सूक्ष्मचूर्णितम् ।
मधुना च समालीढं ग्रहणीं सर्व्वजां त्यजेत् ॥"

कौटजं इन्द्रयवः । मुस्तकादिचूर्णम् ॥ * ॥

"शीतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः ।
गङ्गाधिकसञ्ज्ञेन भक्षितेनाशु नश्यति ॥"

सर्ज्जः रालः । सर्ज्जरसचूर्णम् ॥ * ॥

"बिल्वाब्दशक्रयववालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥"

मोची मोचरसः । क्षिणोति हन्ति ॥ * ॥

"प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहपुषाजमोदैः ॥
विडङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः ॥
तैले मनाक् चिपिटभृष्टा त्रिसुगन्धि पलं पलम्
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्व्वके ॥"

इति कल्याणकगुडः ॥ * ॥

"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकञ्च विडङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी जीरकस्तथा ।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विडम् ॥
आरग्वधत्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका ।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
स्नुहीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुडस्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
औडुम्बरं चामलकं बादरं वा यथा फलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम्
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्मरम् ।
विधुपाठान्वयाद्धन्ति रक्तपित्तञ्च विड्ग्रहम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुडः ॥"

इति महाकल्याणकगुडः ॥ * ॥

कुष्माण्डानां सुपक्वानां स्विन्नानां निष्कुलत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विडङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलञ्चैव त्रिवृतोऽष्टौ पलानि च ।
तैलस्य च पलान्यष्टौ गुडात् पञ्चाशदेव तु ॥
आमलक्या रसस्याथ प्रस्थत्रयमुदीरितम् ।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्
यावद्दर्व्वीप्रलेपः स्यात्तथैनमवतारयेत् ।
औडुम्बरश्चामलकं बादरं वा यथा फलम्
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ।
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ।
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ॥
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ।
वातशोणितवीसर्पदद्रुचक्कलोमकान् ॥
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समाचरेत् ।
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये नराः ॥
तेभ्यो हितो गुडोऽयं स्याद्वन्ध्यानामपि पुत्रदः
धन्यो बल्यो वृंहणश्च वयसः स्थापनः परः ॥"

इति कुष्माण्डकल्याणकगुडः ॥ * ॥

अतीसाराधिकारलिखितं बिल्वतैलञ्चात्र चिन्त्यम् । इति भावप्रकाशे ग्रहणीरोगाधिकारः ॥ (चिकित्सान्तरमस्या यथा,—

"बालं बिल्वं गुडं तैलं पिप्पली विश्वभेषजम् ।
लिह्याद्वाते प्रतिहते सशूले सप्रवाहिके ॥
पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः ।
त्र्यहात् प्रवाहिकां हन्ति चिरकालानुबन्धिनीम् ॥
कल्कः स्याद्बालबिल्वानां तिलकल्कश्च तत्समः ।
दध्नः सराम्लः सस्नेहः खडो हन्यात् प्रवाहिकाम् ॥"

इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥

प्रवाही, स्त्री, (प्रोह्यते इति । प्र+वह्+घञ् । गौरादित्वात् ङीष्) वालुका । इति राजनिर्घण्टः ॥

प्रविख्यातिः, स्त्री, (प्र+वि+ख्या+क्तिन् ।) अतिप्रसिद्धिः । तत्पर्य्यायः विश्रावः २ । इत्यमरः । ३ । २ । २८ ॥

प्रविदारणं, क्ली, (प्रविदारयन्त्यत्रेति । प्र+वि+दृ+णिच्+आधारे ल्युट् ।) युद्धम् । इत्यमरः । २ । ८ । १०३ ॥ (प्र+वि+दृ+णिच्+भावे ल्युट् ।) अवदारणम् । इति मेदिनी । णे, ११२ ॥ आकीर्णम् । इति शब्दरत्नावली ॥ (प्र+वि+दृ+णिच्+कर्त्तरि ल्युः । प्रविदारके, त्रि ।)

प्रविरः, पुं, पीतकाष्ठम् इति । शब्दचन्द्रिका ॥

प्रविश्लेषः, पुं, (प्रकृष्टो विश्लेषो यस्य ।) प्रकृष्टविश्लेषः । तत्पर्य्यायः । विधुरम् २ । इत्यमरः । ३ । २ । १० ॥ यथा,—

"वैकल्येऽपि प्रविश्लेषे विधुरं विकले त्रिषु ॥"

इति भरतधृतत्रिकाण्डशेषः ॥

प्रविषा, स्त्री, (प्रकृष्टं विषमस्याः ।) अतिविषा । इत्यमरः । २ । ४ । ८८ ॥ (अतिविषा-शब्देऽस्य विवरणं ज्ञातव्यम् ॥)

प्रविष्टः, त्रि, (प्र+विश्+कर्त्तरि क्तः ।) प्रवेशविशिष्टः । यथा,—

"स तं प्रविष्टं वृतमाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

प्रवीणः, त्रि, (प्रकृष्टा संसाधिता वीणाऽस्य । यद्वा, प्रवीणयति वीणया प्रगायतीति । प्र+वीण+णिच्+अच् । वीणया गायकस्य नैपुण्यप्रसिद्धेस्तत्तुल्यनैपुण्यात् तथात्वम् ।) प्रकृष्टं वेत्ति यः तत्पर्य्यायः । निपुणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृतमुखः ८ कृती ९ कुशलः १० । इत्यमरः । ३ । १ । ४ ॥ (यथा कुमारे । ७ । ४८ ।
"विश्वावसुप्राग्रहरैः प्रवीणैः
सङ्गीयमानत्रिपुरावदानः ।
अध्वानमध्वान्तविकारलङ्घ्य-
स्ततार ताराधिपखण्डधारी ॥")

प्रवीरः, पुं, (प्रकृष्टो वीरः ।) सुभटः । (यथा, कथासरित्सागरे । २५ । १४५ ।
"इति तस्या वचः श्रुत्वा स प्रवीरोऽप्युवाच ताम् ॥"
भौत्यस्य मनोः पुत्त्रभेदः । यथा, हरिवंशे । ७ । ८८ ।
"अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥"
अत्र क्वचित् प्रवीणोऽपि पाठः ॥ पूरुवंशीयस्य प्रचिन्वतः पुत्त्रः । यथा, तत्रैव । ३१ । ५ ।
"प्रचिन्वतः प्रवीरोऽभून्मनस्युस्तस्य चात्मजः ॥"
धर्म्मनेत्रस्य उपदानवीगर्भजातः पुत्त्रभेदः । यथा, तत्रैव । ३२ । ७—८ ।
"तंसोः सुरोधो राजर्षिर्धर्म्मनेत्रः प्रतापवान् । ब्रह्मवादी पराक्रान्तस्तस्य भार्य्योपदानवी ॥ उपदानवी सुतान् लेभे चतुरस्तान् सुयोधतः । दुष्मन्तमथ सुमन्तं प्रवीरमनघं तथा ॥"
चण्डालपुरुषविशेषः । यथा, मार्कण्डेये । ८ । ८६ ।
"चण्डालोऽहमिहायातः प्रवीरेति पुरोत्तमे । विख्यातो वध्यवधको मृतकम्बलहारकः ॥")
उत्तमे, त्रि । इति धरणिः ॥ (यथा, देवीभागवते । २ । ५ । २० ।
"कुरु प्रवीरं कुरु मां पतिं त्वं
यथा न गच्छेदनु यौवनं ते ॥")

प्रवृत्तः, त्रि, (प्रवर्त्तते स्मेति । प्र+वृत्+क्तः ।) प्रवृत्तिविशिष्टः । यथा,—
"प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टुं भुवनद्विषामसि ।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ॥"
इति शिशुपालवधे । १ । ४० ॥
आरब्धः । यथा,—
"प्रवृत्तमन्यथा कुर्य्यात् यदि मोहात् कथञ्चन । यतस्तदन्यथा भूतं तत एव समापयेत् ॥"
इति छन्दोगपरिशिष्टम् ॥
प्रकटवर्त्तनविशिष्टश्च ॥ (यथा रामायणे । ७ । ८० । १ ।
"अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो रघुनन्दनम् । रामस्य चरणं विप्र ववन्द यथाक्रमम् ॥

प्रवृत्तिः, स्त्री, (प्रवर्त्तते इति । प्र+वृत्+क्तिन् ।) प्रवाहः । उदन्तः । (यथा, मेघदूते । ४ ।
"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ॥"
प्रवर्त्तनमिति । प्र+वृत्+क्तिन् ।) प्रवर्त्तनम् । (यथा, महाभारते । १२ । ३० । १६ ।
"प्रवृत्ते हि ततस्तस्य हृदि कामो महात्मनः । यथा शुक्लस्य पक्षस्य प्रवृत्तौ चन्द्रमाः शनैः ॥"
प्रवर्त्तते व्याप्नोति प्रसिद्धत्वेनेति । प्र+वृत्+क्तिच् ।) यज्ञादिव्यापारः । यथा, महाभारते । १ । १ । २५५ ।
"असच्च सदसच्चैव यस्माद्विश्वं प्रवर्त्तते । सन्ततिश्च प्रवृत्तिश्च जन्ममृत्युपुनर्भवाः ॥"
"सन्ततिर्व्वाहादिः । प्रवृत्तिर्यज्ञादिः ॥" इति तट्टीकायां नीलकण्ठः ॥") अवन्त्यादिदेशः । इति मेदिनी । ति, १३० ॥ हस्तिमदः । इति हेमचन्द्रः । ४ । २८० ॥ न्यायमते यत्नविशेषः । अस्याः कारणम् । चिकीर्षा । कृतिसाध्यताज्ञानम् । इष्टसाधनताज्ञानम् । उपादानप्रत्यक्षम् । यथा,—
"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् । एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम् ॥ चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा । उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥"
इति भाषापरिच्छेदः ॥
(यथा, पञ्चदश्याम् । ६ । १०२ ।
"देहादि पञ्जरं यन्त्रं तदारोहोऽभिमानिता । विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"
प्रयत्नसहितादन्तःकरणात् प्रवृत्तिर्जायते । यदुक्तं कामन्दकीये नीतिसारे । १ । ३३—३५ ।
"आत्मा मनश्च तद्द्वयोरन्तःकरणमुच्यते । आभ्यान्तु सदसद्भ्यां सङ्कल्प उपजायते ॥ आत्मा बुद्धीन्द्रियाण्यर्था बहिष्करणमुच्यते । सङ्कल्पाध्यवसायाभ्यां सिद्धिरस्य प्रकीर्त्तिता ॥ उभे एते हि कार्य्ये यत्नानन्तर्य्यके स्मृते । तस्मात् प्रवृत्तिसंरोधाद्यत्नवद्भिर्विमुक्तताम् ॥"
"आत्ममनोबुद्धिकर्म्मेन्द्रियाणां लक्षणमभिधाय वृत्तेरन्तःपरिकल्पनया कारणविभागमभिधातुमाह । आत्मा मनश्चेति । अभिहितेन लक्षणेनेति प्रतिपाद्यते यया विद्यया साऽन्वयविद्या सा विद्यते येषां ते तद्विदाः कणादाक्षपादादयः तैः तद्विद्भिः आत्मा मनश्च अन्तःकरणमुच्यते । आभ्यां आत्ममनोभ्यां प्रयत्नसहिताभ्यां सङ्कल्पः प्रवृत्तिः इन्द्रियप्रवर्त्तनं उपजायते । बहिःकरणमभिधातुमाह । आत्मा बुद्धीति । आत्मा उक्तलक्षणः । बुद्धिः मनः । इन्द्रियाणि बाह्यरूपाणि । अर्थाः शब्दादयः । कर्म्मेन्द्रियाणां हि वचनादिका अर्थाः प्रयोजनानि । एतत् सर्व्वं बहिःकरणम् । सङ्कल्पः सम्यग्भूतार्थकल्पनं अध्यवसायः प्रयत्नविशेषः ताभ्यां अस्य आत्मनः सुखाद्युभयलक्षणा सिद्धिः प्रकीर्त्तिता । तदेवं अन्तःकरणप्रवृत्तिः प्रयत्नादेव बहिःकरणप्रवृत्तिरपि प्रयत्नादेवेति दर्शितं भवति एतदेव स्पष्टयन्नाह । उभे एते इति । उभे एते अन्तर्बहिःकरणे हि स्फुटं कार्य्ये अन्तर्बहिःकारणके यत्नानन्तर्य्यके प्रयत्नानन्तरं भवतः प्रयत्नोत्पादित्यर्थः । तस्मादिति । यस्मादेवं तस्मात् प्रवृत्तिसंरोधात् उभयात्मकस्य प्रयत्नस्य संरोधं कृत्वा निर्म्मुक्ततां भावयेत् निर्म्मुक्ततां अभ्यस्येत् यावत् प्रयत्न एव निवृत्तो भवति तावदात्मा मनसा न युज्यते तत्र निष्प्रयत्नमपि मनो नात्मनैव मनःकार्य्यकारणात् । अन्तःकरणविरोधात् प्रवृत्तिर्नोपपद्यते । तदन्तःकरणप्रवृत्त्यभावात् बहिःकरणप्रवृत्त्यभावः । तदभावात् इन्द्रियाणां विषयसम्बन्ध एव न स्यात् इति भावः" इति तट्टीका ।)

प्रवृत्तिज्ञः, पुं, (प्रवृत्तिं वृत्तान्तं जानातीति । ज्ञा+कः ।) चारभेदः । तत्पर्य्यायः । वार्त्तिकः २ वार्त्तायनः ३ । इति त्रिकाण्डशेषः ॥

प्रवृद्धः, त्रि, (प्रवर्द्धते स्मेति । प्र+वृध्+क्तः ।) वृद्धियुक्तः । तत्पर्य्यायः । प्रौढः २ एधितः ३ । प्रसारितः । तत्पर्य्यायः । प्रसृतः २ इत्यमरः । ३ । १ । ७६ ॥ (यथा, देवीभागवते । ३ । ८ । ३८ ।
"यस्य समुत्सृष्टं ज्ञातं प्रवृद्धं पापदर्शनात् । वैराग्यं तत्फलं ज्ञातं तामसार्थं तु नारद ॥")

प्रवेकः, त्रि, (प्रविच्यते पृथक् क्रियते इति । प्र+विच्+कर्म्मणि घञ् ।) उत्तमः । प्रधानम् । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भागवते । २ । ९ । ११ ।
"श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्व्वे चतुर्बाहव उन्मिषन्मणि-
प्रवेकनिष्काभरणाः सुवर्च्चसः ॥")

प्रवेटः, पुं, (प्रवीयते खाद्यते इति । प्र+वी+बाहुलकात् टः ।) यवः । इति त्रिकाण्डशेषः ॥

प्रवेणिः, स्त्री, (प्रकर्षेण वीयते इति । प्र+वी गतौ+"वीज्याज्वरिभ्यो निः" उणा० ४ । ४८ । इति निः । णत्वम् । यद्वा, प्रवेणति सौन्दर्यं प्राप्नोतीति । प्र+वेण गतौ+इन् ।) (कुथः ।) वेणी । इति मेदिनी । णे, ४१ ॥)

प्रवेणी, स्त्री, (प्रकर्षेण वीयते इति । प्र+वी गतौ+"वीज्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । णत्वम् । कृदिकारादिति पाक्षिको ङीप् ।) वेणी । (यथा, रघौ । १५ । ३० ।
"तत्र सौधगतः पश्यन् यमुनां चक्रवाकिनीम् । हेममक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥") गजपृष्ठस्थचित्रकम्बलम् । इत्यमरः । २ । ८ । ४३ ॥ (यथा, महाभारते । १५ । २० । १३ ।
"अजिनानि प्रवेणीश्च [illegible]
[illegible]
नदीविशेषः । यथा, महाभारते । ३ । ८८ । ३ ।
"प्रवेण्युत्तरपार्श्वे तु पुण्ये कण्वाश्रमे तथा । तापसानामरण्यानि कीर्त्तितानि यथाश्रुति ॥"

प्रवेलः, पुं, (प्र+वेल्+अच् ।) पीतमुद्गः । इति हेमचन्द्रः । ४ । २३८ ॥
प्रवेशः, पुं, (प्र+विश्+"हलश्च ।" ३ । ३ । १२१ । इति भावे घञ् ।) अन्तर्विगाहनम् । इति हेमचन्द्रः । ६ । १०६ ॥ (यथा, कामन्दकीये नीतिसारे । ७ । ३९ ।
"निर्गमे च प्रवेशे च राजमार्गे समन्ततः ।
प्रोत्सारितजनं गच्छेत् सम्यगाविष्कृतोन्नतिः ॥")
प्रवेशनं, क्ली, (प्रविश्यतेऽनेनेति । प्र+विश्+करणे ल्युट् ।) सिंहद्वारम् । इति हेमचन्द्रः । ४ । ५८ ॥ (प्र+विश्+भावे ल्युट् ।) प्रवेशः । यथा हरिवंशे । १७४ । ११२ ।
"तव योगप्रभावेन शक्यं तत्र प्रवेशनम् ।
किं मे बहुविलापेन श्रूयतां सखि । कारणम् ॥"
प्रवेष्टः, पुं, (प्रवेष्टते इति । वेष्ट् वेष्टने+घञ् ।) बाहुः । इत्यमरः । २ । ६ । ८० ॥ बाहुनोचभागः । इति शब्दचन्द्रिका ॥ हस्तिदन्तमांसम् इति हारावली । ३० ॥ गजपृष्ठतल्पनम् । इति त्रिकाण्डशेषः ॥
प्रव्यक्तं, त्रि, प्रव्यज्यते स्मेति । प्र+वि+अन्ज्+क्तः ।) स्फुटम् । इत्यमरः । ३ । १ । ८१ ॥ (यथा सुश्रुते निदानस्थाने द्वितीयाध्याये ।
"जातेष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति")
प्रव्रजितः, पु, (प्र+व्रज्+क्तः ।) वृद्धभिक्षुशिष्यः । तत्पर्य्यायः । चेलुकः २ श्रामणेरः ३ महापाशकः ४ गोमी ५ इति त्रिकाण्डशेषः ॥ त्रि, प्रव्रज्याश्रमविशिष्टः ॥ (यथा पराशरसंहितायाम् । ४ । २६ ।
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥"
प्र+व्रज्+भावे क्तः । क्ली सन्न्यासः । यथा, महाभारते । ५ । १७६ । ५ ।
"अलं प्रव्रजितेनेह भद्रे ! शृणु हितं वचः ।
इतो गच्छस्व भद्रन्ते पितुरेव निवेशनम् ॥")
प्रव्रजिता, स्त्री, (प्रव्रजितस्य लिङ्गमिव जटादिकमस्त्यस्या इति । अर्श । टाप् ।) मांसी । मुण्डीरी । (प्रव्रजित+टाप् । तापसी । इति मेदिनी । ते, २१० ॥
प्रव्रज्या, स्त्री, (प्र+व्रज+"व्रजयजोर्भावे क्यप् ।" ३।३।९८ । इति भावे क्यप्प्रत्ययः ।) सन्न्यासः ॥ (यथा, महाभारते । ३ । १७७ । ७ ।
"शापवेगं हि कस्तस्य शक्तः सोढुं महात्मनः ।
प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभ ॥"
यथा च कुमारे । ६ । ६ ।
"मुखायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ॥"
"अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते 'अङ्कः परिपञ्चोष्टा प्राजापत्यास्तपस्विनः' इति सप्तर्षीणामभिधानात् 'इतविग्नस्तपस्वीकः तथा वानुगतोऽपि सन्, इति वानप्रस्थोभयथा स्मरणात् ॥" इति मल्लिनाथः ॥ तथाप्रव्रज्यान्वितानां निन्दनीयत्वमुक्तम् । यथा, मनौ । ५ । ८९ ।
"वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनाञ्चैव निवर्त्ततोदकक्रिया ॥"
क्ली, प्रव्रजनम् । यथा, महाभारते ।४।१७।११।
"कोऽहि राज्यं परित्यज्य सर्व्वस्वं चात्मनासह ।
प्रव्रज्यायैव दीव्येत विना दुर्य्यूतदेविनम् ॥")
प्रव्रज्यावसितः, पुं, (प्रव्रज्याया अवसितो विच्युतः सन्न्यासभ्रष्टः । यथा,—
"तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥"
इति दायभागवचनव्याख्यायां क्रमसंग्रहः ॥
(यथा, कात्यायनवचनम् ।
"प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः ।
निर्व्वासं कारयेद्विप्रं दासत्वं क्षत्त्रवैश्ययोः ॥")
प्रशंसा, स्त्री, (प्र+शन्स+भावे अः । स्त्रियां टाप् ।) प्रशंसनम् । तत्पर्य्यायः । वर्णना २ ईड़ा ३ स्तवः ४ स्तोत्रम् ५ स्तुतिः ६ नुतिः ७ श्लाघा ८ अर्थवादः ९ । इति हेमचन्द्रः । २ । १८४ ॥ (यथा, मनुः । १० । १२७ ।
धर्म्मेप्सवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः ।
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥")
आत्मप्रशंसानिषेधो यथा ;—
"न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत् ।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्ज्जयेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
प्रशमः, पुं, (प्रशमनमिति । प्र+शम्+भावे घञ् ।) शमता । उपशमः यथा,—
"एतानि दशपापानि प्रशमं यान्तु जाह्नवि !"
इति तिथ्यादितत्त्वम् ॥
(यथा च हरिवंशे । ९८ । ८१ ।
"स तेन वारिणा वह्निस्तत्क्षणात्प्रशमं ययौ ॥"
प्रशमनं, क्ली, (प्र+शम्+णिच्+ल्युट् ।) मारणम् । वधः इति हेमचन्द्रः ॥ (प्र+शम्+ल्युट् ।) शमता । प्रशान्तिः । यथा,—
"सर्व्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ! ।
एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनम् ॥"
इति मार्कण्डेयपुराणम् । ९१ । ३५ ।
(प्रतिपादनम् । दानम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ७ । ५६ ।
"तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥"
स्थिरीकरणम् । प्रशमनेन स्थिरीकरणेन । यथा रघुः । ४ । १४ ।
"लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥")
इति मल्लिनाथः ॥
प्रशस्तं, त्रि, ((प्रशस्यते स्मेति । प्र+शन्स+क्तः ।) क्षेमम् । इति शब्दरत्नावली ॥ प्रशंसनीयम् । अतिश्रेष्ठम् । इति मतल्लिकादिशब्दटीकायां भरतः ॥ (यथा, रघुः । ५ ।२१।
"स त्वं प्रशस्ते महिते मदीये
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ॥")
प्रशस्यः, त्रि, प्रशंसनीयः । प्रपूर्व्वशन्सधातोः कर्म्मणि क्यप्प्रत्ययेन निष्पन्नः ॥ (यथा, कामन्दकीयनीतिसारे । ११ । ५५ ।
अपवात् तापकस्सम्यगनुरक्तिफलप्रदः ।
अदीर्घकालोऽभीष्टश्च प्रशस्यो मन्त्र इष्यते ॥")
प्रशान्, [म्] त्रि, प्रकर्षेण शाम्यति यः । (प्र+शम्+क्विप् । "अनुनासिकस्य क्विझलोः क्ङिति ।" ६ । ४ । १५ । इति दीर्घः ।) शान्तः । इति मुग्धबोधव्याकरणम् ॥ (सामर्थ्ये शान्तोऽव्ययोऽयम् ॥)
प्रशान्तः, त्रि, (प्रकर्षेण शान्तः ।) प्रकृष्टशमताविशिष्टः । यथा,—
"प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥"
इति मार्कण्डेयपुराणे । ८१ । ९ ।
प्रशास्ता, [ऋ] त्रि, (प्रशास्तीति । प्र+शास्+तृच् । "प्रसितस्कभितेति ।" ७ । २ । ३४ । इति निपातनादिड़भावः । यद्वा, "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ" ... शंसिक्षदादिभ्यः संज्ञायाञ्चानिटौ । उणा० २ । ९४ । इति तृण् इट् च न ।) ऋत्विक् । मित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ शासनकर्त्ता ॥ (यथा, कामन्दकीयनीतिसारे । १२ । ४५ ।
"प्रशास्तध्यक्षसेनानां मन्त्रामात्यपुरोधसाम् ।
सम्यक्प्रचारविज्ञानं दुष्टानाञ्चावबोधनम् ॥"
प्रश्नः, पुं, (प्रच्छनमिति । प्रच्छ+"यजयाचयतेति ।" ३ । ३ । ९० । इति नङ् । "च्छ्वोः शूड़िति ।" ६ । ४ । १९ । इति शः । "प्रश्ने चेति" ३ । २ । ११७ । इति ज्ञापकात् न सम्प्रसारणम् ।) जिज्ञासा । तत्पर्य्यायः । अनुयोगः २ पृच्छा ३ । इत्यमरः । १ । ६ । १० ॥ (यथा, मनुः । १ । ११५ ।
"साक्षिप्रश्नविधानञ्च धर्म्मं स्त्रीपुंसयोरपि ॥"
"पृच्छा तत्त्वाद्यथाम्नायं विधिना प्रश्न उच्यते ॥"
इति चरके सूत्रस्थाने त्रिंशोऽध्याये ॥)
प्रश्नदूती, स्त्री, प्रश्नस्य दूतीव ।) प्रहेलिका । इति त्रिकाण्डशेषः ॥
प्रश्नी, स्त्री, (पृश्निः पृषोदरादित्वात् रः । वा ङीप् ।) कुम्भिका । इति त्रिकाण्डशेषः ॥
प्रश्रयः, पुं, (प्रश्रयणमिति । प्र+श्रि+भावे अच् ।) प्रणयः । इत्यमरः । ३ । २ । २५ ॥ (यथा कामन्दकीयनीतिसारे । ८ । ८ ।
'अदीर्घसूत्रताशौर्य्यं प्रश्रयः स्वप्रधानता ।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः ॥')
प्रश्रितः, त्रि, (प्र+श्रि+क्तः ।) विनीतः । इत्यमरः । ३ । १ । २५ ॥ (यथा, रामायणे । १ । १३ । २ ।
"अब्रवीत् प्रश्रितं वाक्यं प्रश्नार्थं द्विजोत्तमम् ॥)
प्रश्रयः, त्रि, (प्रकृष्टः श्रयः ।) शिथिलः । इति त्रिकाण्डशेषः ॥
प्रष्टा, [ऋ] त्रि, (पृच्छतीति । प्रच्छ+तृच् । "व्रश्चेति ।" ८ । २ । ३६ । इति षः ।) प्रश्नकर्त्ता । तत्पर्य्यायः । कर्यर्थिकः २ । इति

त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ७१ । २८ ।
"विवेश सङ्गिनामर्थं वै प्रष्ठारं प्राह हव्यभुक् ॥")

प्रष्ठः, त्रि, (प्रतिष्ठते अग्रतो गच्छतीति । प्र + स्था + "सुपि स्थः ।" ३।२।४। इति कः । "प्रष्ठोऽग्रगामिनि ।" ८ । ३ । ९२ । इति षत्वम् ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, रघुः । १५ । १० ।
"आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥")

प्रष्ठवाट्, [ह्] पुं, प्रष्ठः अग्रगामी सन् वहतीति । प्रष्ठ + वह् + "वहश्च ।" ३ । २ । ६४ । इति ण्विः ।) युगपार्श्वगः । इत्यमरः । २ । ९ । ६३ ॥ शिक्षार्थं युगादिपार्श्वयोजितः । इति भरतः ॥ योजितं युगपार्श्वे दमनार्थं यं वाहिका भ्रामयन्ति सः । इति मधुः ॥ युगे शौर्दमनाय योजितः । इत्यन्ये ॥

प्रष्ठी, स्त्री, (प्रष्ठ + ङीष् ।) प्रष्ठभार्य्या । अग्रगामिपत्नी । इति जटाधरः ॥

प्रष्ठौही, स्त्री, (प्रष्ठवाह् + "वाहः ।" ४ । १ । ६१ । इति ङीष् ।) बालगर्भिणी । प्रथमगर्भवती गौः । प्रष्ठं प्रथमगर्भं वहति या सा । बाला सती गर्भिणी प्रथमगर्भेत्यर्थः । इति भरतः ॥ (यथा, महाभारते । १३।८३।३३ ।
प्रष्ठौहीनां पीवराणाञ्च तावद्
यथा गृह्यो धेनवः सुव्रताय ॥")

प्रस, म प ङ प्रसवे । सतौ । इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक०-सेट् । रेफयुक्तादिः । म, प्रसयति । प, प्रसा । ङ, प्रसते कीर्त्तिं विद्या । प्रसते विस्तारयति इत्यर्थः । इति दुर्गादासः ॥

प्रसक्त, क्ली, (प्र + सन्ज + क्त ।) नित्यम् । इति जटाधरः ॥ (यथा माधवकृतरुग्विनिश्चयस्य कासाधिकारे ।
"प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव ॥"
"प्रसक्तवेगः सततकासवेगः ।" इति तट्टीकायां विजयरक्षितः ।) तद्वति, त्रि ॥ (आसक्तः । यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥")

प्रसक्तिः, स्त्री, (प्र + सन्ज + भावे क्तिन् ।) प्रसङ्गः । (यथा, किराते । ५ । ५० ।
"मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसक्तिम् ॥")
अनुमितिः । व्याप्तिः । इति सव्यभिचारशिरोमणिः ॥

प्रसङ्गः, पुं, (प्र + सन्ज + घञ् ।) सङ्गतिविशेषः । यथा,—
"स प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते ॥"
तस्य लक्षणम् । स्मृतस्योपेक्षानर्हत्वम् । तद्धर्म्म अतिविषयतापत्तौ सति द्वेषविषयताभावत्वम् । इत्यनुमितिग्रन्थे गदाधरभट्टाचार्य्यः ॥ १ ॥ "प्रकरणान्तरेण समापनं प्रसङ्गः । यथा प्रकारान्तरितो योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति स खल्वेष कर्म्म पुरुषश्चिकित्सायामधिकृतः ॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ।") अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः । यथा,—
"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥"
इति प्रायश्चित्ततत्त्वम् ॥ २ ॥
(यथा च देवीभागवते । ३ । ८ । ४२ ।
"अन्यदर्थमपि तन्नाम प्रसङ्गेनापि भाषितम् ।
ददाति वाञ्छितानर्थान् दुर्लभानपि सर्व्वथा ॥")
प्रसक्तिः । यथा,—
"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता
स्वर्णद्रावणमायया न च कथं रामाङ्गसङ्गीकृतम् ।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्व्वादलश्यामलं
तुच्छं सद्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः ॥"
इति नाटकम् ॥ ३ ॥
प्रस्तावः । यथा,—
"तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
इति पौराणिकाः ॥ ४ ॥
मैथुनम् । यथा । प्रसङ्गनित्यहृतपृष्ठयानादिति रुग्विनिश्चयवचनटीकायां विजयरक्षितः ॥ (यथा च देवीभागवते । १ । १२ । २० ।
"रूपयोरपि तयोर्वीक्ष्य प्रसङ्गं रतिमापयोः ।
परिहृत्य वपुस्तूर्णं नरनारायणाश्रमम् ॥")

प्रसज्यप्रतिषेधः, पुं, (प्रसज्य प्रसक्तिं सम्पाद्य प्रतिषेधो निषेधः ।) निषेधविशेषः । तल्लक्षणं यथा,
"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥"
अस्योदाहरणम् । भोजराजः ।
"पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेल्लक्ष्मान्तरे रोगी पितृणां नोपतिष्ठते ॥"
अत्र रोगीतिनिन्दाश्रवणात् प्रसज्यता । नोपतिष्ठते इति श्रवणात् पर्य्युदासता । इति मलमासतत्त्वम् ॥

प्रसत्तिः, स्त्री, (प्र + सद् + क्तिन् ।) प्रसन्नता । नैर्म्मल्यम् । इति जटाधरः ॥

प्रसत्वरी, स्त्री, (प्रसत्वन् + "वनो र च ।" ४ । १ । ७ । इति ङीप्रौ ।) प्रतिपत्तिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रसत्वा, [न्] पुं, (प्रसीदतीति । प्र + सद् + क्वनिप् ।) धर्म्मः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रसन्नः, त्रि, (प्रसीदतीति । प्र + सद् + कर्त्तरि क्तः ।) निर्म्मलः । तत्पर्य्यायः । अच्छः २ । इत्यमरः । १ । १० । १४ ॥ (यथा, महाभारते । ४ । २७ । २४ ।
"रसाः स्वर्गाय गन्धाय प्रसन्नाश्चापि सुस्थिताः ।
हृद्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥")
सन्तुष्टः । इति मेदिनी । ने, ८६ ॥ (यथा, रघुः । ५ । १० ।
"अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय ॥")

प्रसन्नता, स्त्री, (प्रसन्न + तल् ।) प्रसन्नस्य भावः । तत्पर्य्यायः । प्रसादः २ । इत्यमरः । १।३।१६ ॥ (यथा, हठयोगप्रदीपिकायाम् । २ । ७८ ।
"वपुः कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले ॥"

प्रसन्ना, स्त्री, (प्रसन्न + टाप् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ सुराविशेषः । तस्य गुणाः ।
"प्रसन्ना शूलवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
इति राजवल्लभः ॥
प्रसादविशिष्टा । यथा, मार्कण्डेये । ८१ । ११ ।
"सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥"

प्रसन्नेरा, स्त्री, (प्रसन्ना निर्म्मला इरा जलमिव ।) मदिरा । इत्यमरटीकायां भरतः । २।१०।४० ॥

प्रसभः, पुं, (प्रगता सभा समाधिकारो यस्मात् ।) बलात्कारः । इत्यमरः । २ । ८ । १०८ ॥ (यथा, श्रीकण्ठचरिते । ५ । ४२ ।
"यस्मिन् विनिर्भिन्नतयति प्रसभं प्रकोपा-
दत्युपनिषद्गवानुभवोपदेशम् ॥")

प्रसरः, पुं, (प्र + सृ + भावादौ यथायथं अप् ।) तन्तुगणविटपादेर्विस्तरणम् । प्रणयेन विवादे सरणं सर्पणम् । तत्पर्य्यायः । विसर्पः २ । इत्यमरभरतौ । ३।२।२१ ॥ (यथा, रघुः । ११ । २१ ।
"तिरस्क्रियन्ते क्षमितस्तुषारै-
र्विच्छिन्नधूमप्रसरा गवाक्षाः ॥"
प्रणयः । वेगः । इति मेदिनी । रे, १८२ ॥ (यथा, कलाविलासे । १ । ४१ ।
"इति विनयनम्रशिरसा तेन वचो दुस्तर-
प्रसरार्थे ।
तमुवाच मूलदेवः प्रीतिपरः प्रणतिको-
शाय ॥")
समूहः । इति शब्दरत्नावली ।) (यथा, आर्य्यासप्तशत्याम् । ४८८ ।
"स्तनकलशलग्नसेवाशम्बो [illegible]
[illegible] ।
चामाति यद्दये प्रतिमाविव मौक्तिकदाम ॥"
प्रहरणप्रसरणम् । यथा,—
भल्ल सार्थं प्रसरं चलामः । [illegible]
विविधैः प्रवृत्तिनाशं [illegible]
प्रसरस्य सर्व्वाभिजाता [illegible]
संनिमग्नत्वात् प्रसरत्वहेतुः [illegible]

रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्व्वभावानाम् । यथा महानुदकसञ्चयोऽतिवृद्धः सेतुमवदार्य्यापरेणोदकेन व्यामिश्रः सर्व्वतः प्रधावत्येवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति ।" इति सुश्रुते सूत्रस्थाने २१ अध्यायः ॥) युद्धम् । इति विश्वः । आसारः । इति भूरिप्रयोगः ॥

प्रसरणं, क्ली, (प्र + सृ + भावे ल्युट् ।) सैन्यानां सर्व्वतो व्याप्तिः । तत्पर्य्यायः । आसारः २ । इत्यमरः । २ । ८ । ९६ ॥ प्रसरणी ३ प्रसरणिः ४ प्रसारणी ५ । इति रामाश्रमः ॥ सैन्यानां तृणकाष्ठादिहेतवे इतस्ततो गमनम् इति हेमचन्द्रः । ३ । ४५५ ॥ (गमनमात्रम् । यथा, मृच्छकटिके । ३ अङ्के ।
"मार्ज्जारः क्रमणे मृगः प्रसरणे श्येनो ग्रहालुञ्चने
सुप्तासुप्तमनुष्यवीर्य्यतुलने श्वा सर्पणे पन्नगः ॥"
अभ्युत्थानादिकम् । यथा, भागवते । ५ । १ । २९ ।
"वर्द्धयत्यायानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिरिति ॥")

प्रसरणी, स्त्री, (प्र + सृ + "अर्त्तिसृधृत्यनिः ।" इति अनिः । कृदिकारादिति वा ङीष् ।) प्रसरणम् । इत्यमरटीकायां भरतः । २ । ८ । ९६ ।

प्रसर्पणं, क्ली, (प्र + सृप् + ल्युट् ।) गमनम् । प्रसरणम् । प्रपूर्व्वसृपधातोर्भावेऽनट्प्रत्ययः ॥ (यथा महाभारते । ३ । १२८ । ६ ।
"प्रसर्पणं महीपाल ! सौम्यायाममितौजसः ।"
गतिसाधने, त्रि । यथा, ऋग्वेदे । १० । ६० । ७
"इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥"
वर्त्तमानेदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनम् ॥" इति तद्भाष्ये सायनः ॥)

प्रसवः, पुं, (प्र + सू + "ऋदोरप् ।" ३ । ३ । ५७ इत्यप् ।) गर्भमोचनम् । तत्पर्य्यायः । प्रसूतिः २ इत्यमरः । ३ । २ । १० ॥ यथा, रघुः । ३ । १२ ।
"पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥"
गर्भग्रहणम् यथा, मनुः । ९ । ७० ।
"यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात् सकृत्सकृदृतावृतौ ॥")
उत्पादः । (जन्म । यथा, रघुः । १ । २२ ।
"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥"
"सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव ।" इति तट्टीकायां मल्लिनाथः ॥) अपत्यम् । (यथा, रघुः । ८ । ३० ।
"ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥")
फलम् । कुसुमम् । इति मेदिनी । वे, ४२ ॥ (यथा, रघुः । ४ । २३ ॥
"प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥"
आज्ञा । यथा, वाजसनेयसंहितायाम् । १० । २१ ।
"मरुतां प्रसवेन जय ।" "हे धुर्य्य मरुतां देवानां प्रसवेनाज्ञया त्वं जय शत्रूनिति शेषः ॥" इति तद्भाष्ये महीधरः ॥) प्रसवस्य मासनियमो यथा,—
"नवमे दशमे मासि नारी गर्भं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ॥"
इति भावप्रकाशः ॥ * ॥
प्रसूतिकारकौषधादि यथा,—
"पौलस्त्य काञ्जिकं रुद्र ! कथितं शरपुङ्खया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥"
इति गारुडे १८६ अध्यायः ॥ * ॥
अपि च
"पाठालाङ्गलिसिंहास्यमयूरकजटैः पृथक् ।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते ॥
पाठायास्तु शिफा योनौ या नारी संप्रधारयेत् ।
उपः प्रसवकाले तु सा सुखेन प्रसूयते ॥
तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत् ।
लाङ्गल्याश्चरणौ सूते क्षिप्रमेतेन गर्भिणी ॥
मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम् ।
घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥"
इति चक्रपाणिदत्तः ॥ * ॥
सुखप्रसवमन्त्रो यथा,—
"अस्ति गोदावरीतीरे जम्भला नाम राक्षसी ।
तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥"
सुखप्रसवचक्रं यथा,—
"पञ्चरेखाः समुल्लिख्य तिर्य्यगूर्द्ध्वं क्रमेण हि ।
पदानि षड्दशापाद्य त्वङ्कमाद्ये शुभे नवम् ॥
नवमे सप्त दद्यात्तु चाद्यं पञ्चदशे तथा ।
द्वितीयेऽष्टावष्टमे षड्दिशि द्वौ षोडशे स्मृतिः ॥
एकादिना समं प्रेयमिच्छाद्याद्यं त्रिकोष्ठके ।
सदा शान्तिं सदादिः स्यात्तत्कोष्ठेषु सर्व्वतः ॥
दर्शनाद्धारणात्तासां शुभं स्यादेषु कर्म्मसु ।
शान्तिं शतं प्रसवे नार्य्यास्तुष्टिं शस्ये स्मृताम् ॥
भूताविष्टेषु पञ्चाशन्मृतापत्यासु ये शतम् ।
द्वासप्ततिस्तु वन्ध्यायां चतुःषष्टी रणाध्वनि ॥
विषे विंशी धान्यकीटेष्वधाविंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिताः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
तस्य वैकृतं यथा,—
गर्ग उवाच ।
"अकालप्रसवा नार्य्यः कालातीतप्रजास्तथा ।
विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा ॥
अमानुषा अत्यङ्गाश्च सञ्जातव्यञ्जनास्तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्द्दिशेत् ॥
निर्व्वासयेत्तां नृपतिः स्वराष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
किमिच्छकैर्ब्राह्मणतर्पणैश्च
लोके ततः शान्तिमुपैति पापम् ॥"
इति मात्स्ये अद्भुतशान्तिस्त्रीप्रसववैकृतो नाम २०८ अध्यायः ॥ * ॥
प्रसवाद्भुतत्वं यथा,—
"एको द्वयस्त्रयो गावः ससाम्ना भवदग्निनः ।
सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातकाः ॥"
तिस्र इति वक्तव्ये छान्दसत्वात् त्रय इत्युक्तम् । सिंहप्रसूताश्च स्त्रियो बोध्याः ।
"भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥ *
अत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"
व्याहृतिभिश्चायं होमः ।
"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
अपि च ।
"सिंहराशौ गते सूर्य्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ॥
तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै शान्तिकञ्चरेत् ।
अस्य वामेतिसूक्तेन तद्विष्णोरितिमन्त्रतः ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ॥"
इत्यद्भुतसागरे नारदः ॥

प्रसवकः, पुं, (प्रसवेन पुष्पादिना कायति शोभते इति । कै + कः ।) पियालवृक्षः । इति शब्दमाला ॥ (विवृतिरस्य पियालशब्दे ज्ञातव्या ॥)

प्रसवबन्धनं, क्ली, (प्रसवानां पुष्पफलानां बन्धनं यत्र ।) वृन्तम् । इत्यमरः । २ । ४ । १५ ॥

प्रसवस्थली, स्त्री, (प्रसवस्य स्थलीव ।) माता । यथा, महानाटके ।
"इयमियं मयदानवनन्दिनी
त्रिदशनाथजितः प्रसवस्थली ॥"

प्रसविता, [ऋ] पुं, (प्रसूते जनयतीति । प्र + सू + तृच् ।) पिता इति शब्दरत्नावली ॥ (अनुज्ञाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ७ । ६३ । २
"उदेति प्रसविता जनानां महान् केतुरर्णवः सूर्य्यस्य ।"
"जनानां सर्व्वेषां प्रसविता सर्व्वेषु कर्म्मसु अनुज्ञाता ॥" इति तद्भाष्ये सायनः ॥)

प्रसविनी, स्त्री, (प्रसूते इति । प्र + सू + तृच् + ङीप् ।) जननी । (यथा, महाभारते । १२ । २६१ । ८ ॥

त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ८१ । २८ ।
"विवेश वह्निगात्रं वै प्रष्ठारं प्राह हव्यभुक् ॥")
प्रष्ठः, त्रि, (प्रतिष्ठते अग्रतो गच्छतीति । प्र + स्था + "सुपि स्थः ।" ३ । २ । ४ । इति कः । "प्रष्ठोऽग्रगामिनि ।" ८ । ३ । ९२ । इति षत्वम् ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, रघुः । १५ । १० ।
"आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥")
प्रष्ठवाट्, [ह्] पुं, प्रष्ठः अग्रगामी सन् वहतीति । प्रष्ठ + वह् + "वहश्च ।" ३ । २ । ६४ । इति ण्विः ।) युगपार्श्वगः । इत्यमरः । २ । ९ । ६३ ॥ शिक्षार्थं युगपार्श्वयोजितः । इति भरतः ॥ योजितं युगपार्श्वे दमनार्थं यं चालिका भ्रामयन्ति सः । इति मधुः ॥ युवा गौर्दमनाय योजितः । इत्यन्ये ॥
प्रष्ठी, स्त्री, (प्रष्ठ + ङीप् ।) प्रष्ठभार्य्या । अग्रगामिपत्नी । इति जटाधरः ॥
प्रष्ठौही, स्त्री, (प्रष्ठवाह् + "वाहः ।" ४ । १ । ६१ । इति ङीप् ।) बालगर्भिणी । प्रथमगर्भवती गौः । प्रष्ठं प्रथमगर्भं वहति या सा । बाला सती गर्भिणी प्रथमगर्भेत्यर्थः । इति भरतः ॥ (यथा, महाभारते । १३ । ८२ । ११ ।
प्रष्ठौहीनां पीवराणाञ्च तावद्
अपरा गृष्टी धेनवः सुव्रताश्च ॥")
प्रस, म प ङ प्रसवे । तनौ । इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक०-सेट् । रेफयुक्ताद्यः । म, प्रसयति । प, प्रसा । ङ, प्रसते कीर्त्तिं विद्या । प्रसते विस्तारयति चेत्यर्थः । इति दुर्गादासः ॥
प्रसक्तं, क्ली, (प्र + सन्ज + क्त ।) नित्यम् । इति जटाधरः ॥ (यथा माधवकृतहस्तिनिदानस्य कासाधिकारे ।
"प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव ॥"
"प्रसक्तवेगः सततकासवेगः ।" इति तट्टीकायां विजयरक्षितः ।) आसक्ते, त्रि ॥ (आसक्तः । यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥")
प्रसक्तिः, स्त्री, (प्र + सन्ज + भावे क्तिन् ।) प्रसङ्गः । (यथा, किराते । ५ । १४ ।
"सा भूधरपयःकराशोर्वेङ्गितस्याः
समापि टिगतु श्रियः श्रियां प्रसक्तिम् ॥")
अनुमितिः । व्याप्तिः । इति सव्यभिचारशिरोमणिः ॥
प्रसङ्गः, पुं, (प्र + सन्ज + घञ् ।) सङ्गतिविशेषः । यथा,—
"स प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्वाहकैककार्य्यत्वे षोढा सङ्गतिरिष्यते ॥"
तत्र प्रसङ्गस्य लक्षणम् । स्मृतस्योपेक्षानर्हत्वम् । तदर्थेषु च तिविडगतापक्षे सति हेयविषयतानाश्वत्वम् । इत्यनुमितिपक्षे गदाधरभट्टाचार्य्यः ॥०॥ "प्रकरणान्तरेण समापनं प्रसङ्गः । यथा प्रकारान्तरेण योऽर्थोऽभिरुद्धः स समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् योऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति स खल्वेष कर्म्मपुरुषश्चिकित्सायामधिकृतः ॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥") अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः । यथा,—
"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥"
इति प्रायश्चित्ततत्त्वम् ॥०॥
(यथा च देवीभागवते । १ । ८ । ४२ ।
"अस्पष्टमपि तन्नाम प्रसङ्गेनापि भाषितम् ।
ददाति वाञ्छितानर्थान् दुर्लभानपि सर्व्वदा ॥")
प्रसक्तिः । यथा,—
"आनीता भरता यदा पतिरता साध्वी धरित्रीसुता
स्फुर्ज्जद्वायसमायया न च कथं रामाङ्गसङ्गोज्झतम् ।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्व्वादलश्यामलं
तुच्छं मङ्गलदं भवेत् परवधूसङ्गप्रसङ्गः कुतः ॥"
इति नाटकम् ॥०॥
प्रस्तावः । यथा,—
"तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
इति पौराणिकाः ॥०॥
मैथुनम् । यथा । प्रसङ्गनिवृत्तहृदयामार्दिति हस्तिनिदानटीकायां विजयरक्षितः ॥ (यथा च देवीभागवते । १ । १२ । ३० ।
"शापयोऽपि तयोर्दैव प्रसङ्गं रममाणयोः ।
परिहृत्य ययुर्भूपं नरनारायणाश्रमम् ॥")
प्रसज्यप्रतिषेधः, पुं, (प्रसज्य प्रसक्तिं सम्पाद्य प्रतिषेधो निषेधः ।) निषेधविशेषः । तल्लक्षणं यथा,
"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥"
अस्योदाहरणम् । भोजराजः ।
"पौषे चैत्रे कुलपथे मासार्द्धं नाचरेद्बुधः ।
अचेत्त्वमात्रे रोगी पितृणां नोपतिष्ठते ॥"
अत्र रोगीतिनिर्द्देशश्रवणात् प्रसज्यता । नोपतिष्ठते इति श्रवणात् पर्य्युदासता । इति मलमासतत्त्वम् ॥
प्रसत्तिः, स्त्री, (प्र + सद् + क्तिन् ।) प्रसन्नता । नैर्म्मल्यम् । इति जटाधरः ॥
प्रसत्वरी, स्त्री, (प्रसत्वन् + "वनो र च ।" ४ । १ । ७ । इति ङीपौ ।) प्रतिपत्तिः । इति संक्षिप्तसारोणादिवृत्तिः ॥
प्रसत्वा, [न्] पुं, (प्रसीदतीति । प्र + सद् + क्वनिप् ।) धर्म्मः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥
प्रसन्नः, त्रि, (प्रसीदतीति । प्र + सद् + कर्त्तरि क्तः ।) निर्म्मलः । तत्पर्य्यायः । अच्छः । इत्यमरः । १ । १० । १४ ॥ (यथा, महाभारते । ४ । २७ । २४ ।
"रसाः स्फीताय गन्धाय पन्द्राषाणि सुखावहाः ।
हृत्तानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥")
सन्तुष्टः । इति मेदिनी । ने, ५५ ॥ (यथा, रघुः । ५ । १० ।
"अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय ॥")
प्रसन्नता, स्त्री, (प्रसन्न + तल् ।) प्रसन्नस्य भावः । तत्पर्य्यायः । प्रसादः २ । इत्यमरः । १ । ३ । १६ ॥ (यथा, हठयोगप्रदीपिकायाम् । २ । ७८ ।
"वपुः कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले ॥")
प्रसन्ना, स्त्री, (प्रसन्न + टाप् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ सुराविशेषः । तस्य गुणाः ।
"प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
इति राजवल्लभः ॥
प्रसादविशिष्टा । यथा, मार्कण्डेये । ८१ । ११ ।
"सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥"
प्रसन्नेरा, स्त्री, (प्रसन्ना निर्म्मला इरा जलम् ।) मदिरा । इत्यमरटीकायां भरतः ॥ [illegible]
प्रसभं, क्ली, (प्रगता सभा सभाधिकारो यत्र ।) बलात्कारः । इत्यमरः । ३ । ४ । १०८ ॥ (यथा, श्रीकण्ठचरिते । ५ । ३२ ।
"यस्मिन् विनिर्गतवति प्रसभं प्रदोष-
दन्तुपनिषद्वनजानुभरीषपदेशम् ॥")
प्रसरः, पुं, (प्र + सृ + भावादौ यथायथं अप् ।) सन्तुणविटपादेर्विसर्पणम् । प्रवेगेन विसरणं सर्पणम् । तत्पर्य्यायः । विसर्पः २ । इति सरसरती । ३ । ३ । २२ ॥ (यथा, रघुः । ११ । ७० ।
"तिरश्चियन्ते क्रमितम्बुवार्य-
विच्छिन्नधूमप्रसरा गवाक्षाः ॥")
प्रणयः । वेगः । इति मेदिनी । रे, ५१ ॥ (यथा, कलाविलासे । १ । २१ ।
"इति विनयनम्रमिरया हिन्न यशो मुहुर्मुहुः प्रसार्य ।
तत्कथाय मूलदेवः प्रोतिकरः प्रसारितो-
ऽर्हः ॥")
समूहः । इति शब्दरत्नावली ॥) यथा, मालत्यां
मससस्याम् । १८८ ।
"कुसुमस्तबकम्लानिसमपि पाकाशी ... कर्दमित्-
हर्षः ।
आमाति पायुग्ने प्रविन्दिव मौक्तिकदाम ।"
प्रसरणम् । यथा,—
यत्र क्वचन प्रसरं दधाम । ... वितर्कैः प्रसुदितानां प्रसारितानां ... समवाय ... प्रसरन्ती ... नतिमत्त्वात् प्रसरहेतु ...

रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्व्वभावानाम् । यथा महानुदकसञ्चयोऽतिवृद्धः सेतुमवदार्य्यापरेणोदकेन व्यामिश्रः सर्व्वतः प्रधावत्येवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति ।" इति सुश्रुते सूत्रस्थाने २१ अध्यायः ॥) युद्धम् । इति विश्वः । नाराचः । इति भूरिप्रयोगः ॥

प्रसरणं, क्ली, (प्र+सृ+भावे ल्युट् ।) सैन्यानां सर्व्वतो व्याप्तिः । तत्पर्य्यायः । आसारः २ । इत्यमरः । २ । ८ । ९६ ॥ प्रसरणी ३ प्रसरणिः ४ प्रसारणी ५ । इति शब्दरत्नावली ॥ सैन्यानां तृणकाष्ठादिहेतवे इतस्ततो गमनम् इति हेमचन्द्रः । ३ । ४५५ ॥ (गमनमात्रम् । यथा, मृच्छकटिके । ३ अङ्के ।
"मार्ज्जारः क्रमणे मृगः प्रसरणे श्येनो ग्रहालुञ्चने
सुप्तासुप्तमनुष्यवीर्य्यतुलने श्वा सर्पणे पन्नगः ॥"
अभ्युत्थानादिकम् । यथा, भागवते । ५ । १ । २९ ।
"वर्द्धिष्यत्यायानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिरिति ॥")

प्रसरणी, स्त्री, (प्र+सृ+"अर्त्तिसृधृत्यनिः ।" इति अनिः । कृदिकारादिति वा ङीष् ।) प्रसरणम् । इत्यमरटीकायां भरतः । २ । ८ । ९६ ।

प्रसर्पणं, क्ली, (प्र+सृप्+ल्युट् ।) गमनम् । प्रसरणम् । अपूर्व्वसृपधातोर्भावेऽनट्प्रत्ययः ॥ (यथा महाभारते । १ । १२८ । ६ ।
"प्रसर्पणं महीपाल । रौप्यायाममितौजसः ।"
गतिसाधने, त्रि । यथा, ऋग्वेदे । १० । ६० । ७
"इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥"
वर्त्तमानेदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनम् ॥" इति तद्भाष्ये सायनः ॥)

प्रसवः, पुं, (प्र+सू+"ऋदोरप् ।)" ३ । ३ । ५७ इत्यप् ।) गर्भमोचनम् । तत्पर्य्यायः । प्रसूतिः २ इत्यमरः । ३ । २ । १० ॥ यथा, रघुः । ३ । १२ ।
"पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥"
गर्भग्रहणम् यथा, मनुः । ८ । ७० ।
"यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात् सकृत्सकृदृतावृतौ ॥")
उत्पादः । (जन्म । यथा, रघुः । १ । २२ ।
"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥"
"सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव ।" इति तट्टीकायां मल्लिनाथः ॥) अपत्यम् । (यथा, रघुः । ८ । ३० ।
"अपि देवगणस्वधाभुजां
ऋणमार्गप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥"
फलम् । कुसुमम् । इति मेदिनी । वे, ४१ ॥ (यथा, रघुः । ४ । २१ ॥
"प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥"
आज्ञा । यथा, वाजसनेयसंहितायाम् । १० । २१ ।
"मरुतां प्रसवेन जय ।" "हे धृष्टे मरुतां देवानां प्रसवेनाज्ञया त्वं जय शत्रूनिति शेषः ॥" इति तद्भाष्ये महीधरः ॥) प्रसवस्य मासनियमो यथा,—
"नवमे दशमे मासि नारी गर्भं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ॥"
इति भावप्रकाशः ॥ *॥
प्रसूतिकारकौषधादि यथा,—
"पीतन्तु काञ्जिकं यद्द । कथितं शरपुङ्खया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्त्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥"
इति गारुडे १८६ अध्यायः ॥ *॥
अपि च
"पाठालाङ्गलिसिंहास्यमयूरकजटैः पृथक् ।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते ॥
पाठायास्तु शिफा योनौ या नारी संप्रधारयेत्
उपः प्रसवकाले तु सा सुखेन प्रसूयते ॥
तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत् ।
लाङ्गल्याश्चरणौ सूते क्षिप्रमेतेन गर्भिणी ॥
मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम् ।
घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥"
इति चक्रपाणिदत्तः ॥ *॥
सुखप्रसवमन्त्रो यथा,—
"अस्ति गोदावरीतीरे जम्भला नाम राक्षसी ।
तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥"
सुखप्रसवचक्रं यथा—
"अष्टरेखाः समुल्लिख्य तिर्य्यगूर्द्ध्वक्रमेण हि ।
पदानि षड्दशापाद्य स्वे कमाद्ये सुनौ नयम् ।
नवमे सप्त दद्यात्तु बाणं पञ्चदशे तथा ।
द्वितीयेऽष्टाष्टमे षट्‌दिशि द्वौ षोडशे श्रुतिः ॥
एकादिना समं श्रेयमिष्टाहार्हं त्रिकोष्ठके ।
तदा द्वाविंशदादिः स्यात्चतुष्कोष्ठेषु सर्व्वतः ॥
दर्शनाद्धारणात्तासां शुभं स्यादेषु कर्म्मसु ।
द्वात्रिंशत् प्रसवे नार्य्याश्चतुस्त्रिंशत्तमे नृणाम् ॥
भूताविष्टेषु पञ्चाशन्मृतापत्यासु वै शतम् ।
द्वासप्ततिस्तु वन्ध्यायां चतुःषष्टी रणाध्वनि ॥
विषे विंशा धान्यकीटेष्वधाविंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिताः ॥"
इति ज्योतिस्तत्त्वम् ॥ *॥
तस्य वैकृतं यथा,—
गर्ग उवाच ।
"अकालप्रसवा नार्य्यः कालातीतप्रजास्तथा ।
विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा ॥
अमानुषा अत्यङ्गाश्च न जातव्यञ्जनास्तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा
स्त्रियः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्द्दिशेत् ॥
निर्व्वासयेत्तां नृपतिः स्वराष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
किमिच्छकैर्मोक्षणतर्पणश्च
लोके ततः शान्तिमुपैति पापम् ॥"
इति मात्स्ये अद्भुतशान्तिस्त्रीप्रसवविकृतौ नाम २०८ अध्यायः ॥ *॥
प्रसवाद्भुतत्वं यथा,—
"एको द्वयस्त्रयो गावः समाख्या अपदर्म्मिनः ।
सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातकाः ॥"
तिस्र इति वक्तव्ये छान्दसत्वात् त्रय इत्युक्तम् ।
सिंहप्रसूताश्च स्त्रियो बोध्याः ।
"भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥ *
अत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तैः राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"
व्याहृतिभिरयं होमः ।
"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
अपि च ।
"सिंहराशौ गते सूर्य्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ॥
तदानिष्टं भवेत्किञ्चित् तच्छान्त्यै शान्तिमाचरेत्
अस्य वामेतिसूक्तेन तद्विष्णोरितिमन्त्रतः ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ॥"
इत्यद्भुतसागरे नारदः ॥

प्रसवकः, पुं, (प्रसवेन पुष्पादिना कायति शोभते इति । कै+कः ।) पियालवृक्षः । इति शब्दमाला ॥ (विवृतिरस्य पियालशब्दे ज्ञातव्या ॥)

प्रसवबन्धनं, क्ली, (प्रसवानां पुष्पफलानां बन्धनं यत्र ।) वृन्तम् । इत्यमरः । २ । ४ । १५ ॥

प्रसवस्थली, स्त्री, (प्रसवस्य स्थलीव ।) माता । यथा, महानाटके ।
"इयमियं मयदानवनन्दिनी
त्रिदशनाथजितः प्रसवस्थली ॥"

प्रसविता, [ऋ] पुं, (प्रसूते जनयतीति । प्र+सू+तृच् ।) पिता इति शब्दरत्नावली ॥ (अनुज्ञाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ७ । ६३ । २
"उदेति प्रसविता जनानां महान् केतुरर्णवः
सूर्य्यस्य ।"
"जनानां सर्व्वेषां प्रसविता सर्व्वेषु कर्म्मसु अनुज्ञाता ॥" इति तद्भाष्ये सायनः ॥)

प्रसविनी, स्त्री, (प्रसूते इति । प्र+सू+णिनि+ङीप् ।) जननी । (यथा, महाभारते । १२ । २६३ । ८ ॥

"सावित्री प्रसवित्री च हविर्धानी मनमीततः॥" माता। प्रपूर्वकसूधातोः कर्त्तरि तृच् ङीप् च॥

प्रसह्यं, त्रि, (प्रगतं सह्यादिति।) प्रतिकूलम्। इत्यमरः। ३। १। ८४॥ प्रदक्षिणम्। यथा, रामायणे। २। ७१। २०॥

"प्रसव्यश्चापि तच्चक्रुस्त्रिलोऽग्निचितं नृपम्" प्र + सू + कर्म्मणि यत्। प्रसवनीये च॥)

प्रसहः, पुं, (प्रसहत इति। प्र + सह् + अच्।) बलात्कारेण भक्षकपक्षी। स च कुरर-श्येनादिः। यथा,—

"प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः॥"

अस्य मांसगुणाः।

"गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।"

इति राजवल्लभः।

अपि च भावप्रकाशे।

"काको कङ्कः उलूकश्च चिल्लश्च शशघातकः।

चाषो भासश्च कुररः इत्याद्याः प्रसहाः स्मृताः॥"

शशघातकः बाज इति लोके।

"प्रसहाः कीर्त्तिता एते प्रसह्य छित्त्वा भक्षणात्।

प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये॥

ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि॥"

प्रसहनः, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।) हिंस्रपशुः। यथा,—

शार्द्दूलसिंहशरभर्क्षतरक्षुमुख्या

ये ऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।

ते कीर्त्तिताः प्रसहनाः पललं तदीय-

मर्शःप्रमेहजठरामयजाड्यहारि॥"

इति राजनिर्घण्टः॥

आलिङ्गने, स्त्री। यथा,—

"परस्परप्रसहनचुम्बमातिकाः

शची सुखे बहुलविधा भिदा मताः॥"

इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी॥

(प्र + सह् + भावे ल्युट्।) सहने, क्ली। तद्वति, त्रि॥

प्रसहा, स्त्री, (प्र + सह् + अच्। टाप्।) वृह-तिका। इति रत्नमाला॥ (गुणादयोऽस्या वृहतीशब्दे ज्ञातव्याः॥)

प्रसह्य, अ, (प्रकर्षेण सोढ्वा इति। प्र + सह् + क्त्वो ल्यप्।) हठार्थकम्। बलात्कारार्थम्। इत्यमरः। ३। ४। १०॥ (यथा, माघे।१।२९।

"प्रसह्य तेजोभिरसङ्ख्यतां गते-

रदस्तया मुख्यमनुत्तमं तमः॥"

प्रसोढुं शक्य इति। प्र + सह् + यत्। प्रकर्षेण सोढुं शक्ये त्रि। यथा, रघुः। १४। ६२।

"मनैव जन्मान्तरपातकाना

विपाकविस्फूर्जथुरप्रसह्यः॥")

प्रसह्यचौरः, पु, (प्रसह्य बलात्कारेण चौरः।) हठात् चौर्य्यकारी। डाकायत इति डाकैत इति च भाषा॥ तत्पर्य्यायः। बन्दीकारः २ साहसः ३ विलाभः ४। इति त्रिकाण्डशेषः॥

प्रसातिका, स्त्री, (प्रो सातिः + भावे क्तिन्। प्रगता सातिर्नाशो यस्याः। कन्।) अणुब्रीहिः। सूक्ष्मधान्यम्। इति रत्नमाला॥ (यथा, मार्क-ण्डेये। ३२। ८॥

"श्यामाकराजश्यामाकौ तद्वचैव प्रसातिका।

नीवाराः पौष्कलाद्याश्च धान्यानां पितृतृप्तये॥"

प्रसादः, पुं, (प्र + सद + घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमरः। १। १। १६॥ (यथा, "प्रबोधचन्द्रोदये प्रस्तावनायाम्॥

"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः।

स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः॥")

अनुग्रहः। (यथा, रघुः। २। ६८।

"तस्याः प्रसन्नेन्दुमुखः प्रसादं

गुरुर्नृपाणां गुरवे निवेद्य।

प्रहर्षचिह्नानुमितं प्रियायै

शशंस वाचा पुनरुक्तयेव॥")

काव्यगुणः। स्वास्थ्यम्। प्रसत्तिः। इति मेदिनी। दे, १५॥ वैदर्भीरीतियुक्तकाव्यगुणः। तस्य लक्षणम्। ग्राम्यशब्दभिन्नव्यक्तार्थपद-वत्त्वम्। यथा,—

"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः।

गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः।

व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः॥"

इति काव्यचन्द्रिका॥ ०॥

(तथा च साहित्यदर्पणे ८ परिच्छेदे।

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।

स प्रसादः समस्तेषु रसेषु रचनासु च॥"

देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषश्च। यथा,

"पार्थोऽहं गध्वजो राजा प्रजापालनतत्परः।

प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः॥"

इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा॥

प्रसादनं, क्ली, (प्रसादयतीति। प्र + सद् + णिच् + ल्युः।) अन्नम्। इति त्रिकाण्डशेषः॥ (प्र + सद् + णिच् + ल्युट्।) प्रसन्नताकारकम्। यथा, प्रसवर्णप्रसादनमिति राजवल्लभः॥ (यथा च महाभारते। ४। ६८। २२।

"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये॥")

प्रसादना, स्त्री, (प्र + सद् + णिच् + युच् + टाप्) सेवा। परिचर्य्या। इति हेमचन्द्रः।३।१६०॥

प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र + साध् + ल्युट्।) वेशः। इत्यमरः। २। ६। ९९॥ (यथा, मनुः। २। २११।

"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।

गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥"

कङ्कतिका। इति भरतधृतामरमाला॥ प्रकृष्ट-निष्पत्तिश्च॥(प्र + साध् + णिच् + ल्युः। प्रसा-धयितरि, त्रि। यथा, ऋग्वेदे। १०।५१।२।

"को यजस्य प्रसाधनस्तुर्दैवयानतः॥")

प्रसाधनी, स्त्री,(प्रसाध्यतेऽनयेति। प्र + साध् + ल्युट्। ङीप्।) सिद्धिः। इति मेदिनी।ने,१८४॥ कङ्कतिका। इत्यमरः। २। ६। १३८॥(यथा, रघुवंशे विधिविमतस्थाने। २४॥

"केशप्रसाधनी केशा रत्नीसमुपसाधनी॥")

तद्गुणविशेषः,—

"प्रसाधनी दिङ्नरनागदन्त-

सहजाभिरस्त्रास्थिभिः क्रमेण।

चतुर्विधानां परिकीर्त्तिताना

सम्पत्तिसौभाग्ययशःप्रसिद्धिः॥

काष्ठजा धातुजा चैव शृङ्गजा च दन्तजा।

शार्ङ्गमात्प्रधानस्यदेवतानां महीभृताम्।

वरदणवदुर्वेयः काष्ठजाया विधिग्रहः।

कनकं रजतं ताम्रं पित्तलं शीसकं तथा।

लौहं सर्व्वत्र सर्व्वार्थमादित्यादिदमानुरम्।

राज्ञामिवोपयुज्येत कालकीर्त्तिप्रसाधनी।

मृगाणां महिषाणाञ्च शिङ्गजाता प्रसाधनी।

गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते।

अथापि रत्नविन्यासो न यथासारदर्शनात्॥"

इति युक्तिकल्पतरुः।

प्रसाधिका, स्त्री, (प्रसाध्यति नियारनीति। प्र + साध् + ण्वुल्। टापि अत इत्वम्।) नीवारः। यथा,—

"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतः"

अस्या गुणाः।

"नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्॥"

इति भावप्रकाशः॥

(प्रसाधयति अलङ्करोतीति प्र + साध् + णिच् + ण्वुल्।) वेशकारिणी। यथा,—

"प्रसाधिकालम्बितमग्रपाद-

माक्षिप्य काचित् द्रवरागमेव॥"

इति कुमारसम्भवे सप्तमः सर्गः।

(धान्यविशेषः यथा। "श्यामाकाः प्रसा-धिका।" इति वैद्यकरत्नमालायाम्॥)

प्रसाधितः, त्रि, (प्र + साधि + क्तः।) अलङ्कृतः। इत्यमरः। ३। १। १००॥ प्रकर्षेण निष्पादितः। यथा, भारतमहे।

"ततः प्रसाधितं चक्रं दृष्ट्वा लोकगुरुं हरेः।

चोरे प्रसाधितं तेजः चक्री मनसंहरः॥"

प्रसारः, पुं, (प्र + सृ + घञ्।) प्रसरणम्। इति हेमचन्द्रः। ३। ४८८॥ (यथा, सुश्रुते।[illegible]

प्रसाराकुञ्चनाङ्गनं निःप्राणमिति विद्धि ...)

प्रसारणं, क्ली, (प्र + सृ + णिच् + ल्युट्।) चि-कित्सकर्म्मान्तर्गतकर्म्मविशेषः। तत्तु विस्तारणम्। यथा, भाषापरिच्छेदे।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।

प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥"

(परिवर्द्धनम्। यथा, कामन्दकीयनीतिसारे।

११। ३५।

"मित्रामित्रविरक्तानां भूमीनाञ्च प्रसारणं"

प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र + सृ + णिच् + ल्युट्। ङीप्।) लताविशेषः। गन्धभादालिया इति भाषा॥ अस्य गुणाः। वातविनाशित्वम्। ... ।

राजवल्लभः॥ ... अस्य तैलं प्रसारणीतैलं यथा

प्रसारणप्रस्टीकायां ज्ञातः॥

प्रसारिणी, स्त्री, प्रसरतीति। प्र + सृ + णिनि + ङीप्। कुब्जप्रसारणी। प्रसारणी। ...

लिया इति भाषा ॥ तत्पर्य्यायः । सुप्रसरा २ सारिणी ३ प्रसरा ४ सरा ५ चारुपर्णी ६ राजबला ७ भद्रपर्णी ८ प्रतानिका ९ प्रबला १० राजपर्णी ११ चन्द्रपर्णी १२ भद्रबला १३ चन्द्रवल्ली १४ प्रभद्रा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । तिक्तत्वम् । वातार्शःश्वयथुमलविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥

प्रसारी, [न्] त्रि, (प्रसरतीति । प्र + सृ + णिनिः) प्रसरणशीलः । तत्पर्य्यायः । विसृत्वरः २ विसृमरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १७ । ४४ ।

"प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ॥")

प्रसितं, क्ली, (प्र + सो + क्तः ।) पूयम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३ । १ । ८ ॥ (यथा, रघौ । ८ । २३ ।

"इति शत्रुषु चेन्द्रियेषु च
प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयो-
रुभयीं सिद्धिमुभाववापतुः ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र + सि + करणे क्तिन् ।) बन्धनसाधनरज्जुनिगडादिः । इत्यमरः । ३ । २ । १४ ॥ (ज्वाला । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अग्नेरिव प्रसितिर्नाह वर्त्तवे ।"
"प्रसीयते बध्यतेऽनयेति । प्रसितिर्ज्वाला ।"
इति तद्भाष्ये सायनः ॥ * ॥ भावे क्तिन् । प्रबन्धनम् । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"शूरस्येव प्रसितिः क्षातिरग्नेः ॥")

प्रसिद्धः त्रि, (प्रसिध्यतीति । प्र + सिध् + गत्यर्थेति क्तः ।) भूषितः ख्यातः । इति मेदिनी । धे, ३४ ॥ (यथा, पञ्चदश्याम् । ४ । ५७ ।

"काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥")

प्रसिद्धिः, स्त्री, प्र + सिध् + क्तिन् ।) उद्धारः । ख्यातिः । इति त्रिकाण्डशेषः (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्यायतस्य एवैता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्धत्वं यासु लोको व्यवस्थितः ॥")

भूषा । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसूः, स्त्री, (प्रसूते इति । प्र + सू + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) माता । इत्यमरः । २ । ६ । २८ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"पितॄणां मानसी कन्या मेनका साम्बिकाप्रसूः ॥")

घोटकी । इत्यमरः । ३ । ३ । १२८ ॥ कदली । वीरुत् । इति मेदिनी । स, ४ ॥ (प्रसवकर्त्री । यथा सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।

"प्रसंसिनी स्यन्दते तु क्षोभिता दुःप्रसूश्च या ॥")

प्रसूका, स्त्री, (प्रसूरेव । प्रसू + स्वार्थे कन् ।) वाजिनी । इति राजनिर्घण्टः ॥

प्रसूतं, क्ली, (प्रसूयते इति । प्र + सू + क्त ।) कुसुमम् । इति मेदिनी । ते, १२४ ॥

प्रसूतः, त्रि, (प्र + सू + क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")

सूतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र + सू + कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूता स्त्री स्नेहपानं विवर्ज्जयेत् ॥"
यथा च हरिवंशे । ८४ । १०१ ।
"श्रूयन्ते हि स्त्रियो बह्व्यो व्यभिचारव्यतिक्रमैः
प्रसूता देवसद्भावान् पुत्त्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री, (प्रसूयते इति । प्र + सू + क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"कृष्णा वचा चापि जलेन पिष्टा
सैरण्डतैला खलु नाभिलेपात् ।
सुखं प्रसूतिं कुरुतेऽङ्गनानां
निपीडितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र + सू + भावे क्तिन्) उद्भवः । (यथा, शकुन्तलायाम् ४ अङ्के ।

"आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ति, १२८ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कच्चिन्मृगीणामनघा प्रसूतिः ॥"

कारणम् । यथा, रघुः । २ । ६३ ।

"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २३३ । १४ ।

"त्वं सर्व्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने । भवसि प्रतिष्ठा ॥"

दक्षपत्नी । सा तु सतीजननी । यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"देवहूतिः कर्द्दमस्य प्रसूतिर्दक्षकामिनी ॥")

प्रसूतिका, स्त्री, प्रसूतः सुतोऽस्या अस्तीति । ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिजं, क्ली, (प्रसूतेरुद्भवमारभ्य स्वयं जायते इति । जन् + डः ।) दुःखम् । इत्यमरः । १ । ८ । ३ ।

प्रसूनं, क्ली, (प्रसूयते स्मेति । प्र + सू + क्तः । "षोदित्वात् निष्ठातस्य नः ।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अवाकिरन् बाललताः प्रसूनै-
राचारलाजैरिव पौरकन्याः ॥")

फलम् । इत्यमरः । ३ । ४ । १३ ॥ जाते, त्रि । इति मेदिनी, ने । ८० ॥

प्रसूनेषुः, पुं, (प्रसूनं पुष्पं इषुर्वाणो यस्य । कामदेवः । इति त्रिकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र + सृ + क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६

"कृष्णतिलप्रसृतं प्रकुञ्चं वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम् ॥"
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

प्रसृतः, पुं, (प्र + सृ + क्तः ।) निकुब्जपाणिः । अर्द्धाञ्जलिः । इत्यमरः । २ । ६ । ८५ ॥ (यथा, शतपथब्राह्मणे । ४ । ५ । १० । ७ ।

"यद्यनुलभेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥"

प्रसृतः, त्रि, (प्र + सृ + क्तः ।) प्रहृष्टः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा, देवीभागवते । १ । १४ । ५ ।

"न शशाक नियन्तुञ्च स व्यासः प्रसृतं मनः ॥")

विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति त्रिकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । ३६० ॥

प्रसृता, स्त्री, (प्र + सृ + क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते, १२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र + सृ + क्तिन् ।) प्रसृतः । आकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयम् ॥"

सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।

"वर्द्धितानि प्रसृत्या वै विनताकुलकर्त्तृभिः ॥"

प्रसूत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,

"पलाभ्यां प्रसृतिर्ज्ञेया——॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

प्रसेकः, पुं, (प्रसेचनमिति । प्र + सिच् + घञ् ।) सेचनम् । च्युतिः । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥"

रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।

"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्तिमूलकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १७८ ॥ प्रसीदिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्व्वसदधातोः कर्त्तरि क्वसुप्रत्ययनिष्पन्नः ॥

प्रसेवः, पुं, (प्रसीव्यते स्मेति । प्र + सिव + "अकर्त्तरि चेति ।" ३ । ३ । १९ । इति घञ् ।) वीणाङ्गम् । स्यूतः । इति मेदिनी । वे, ४२ ॥

प्रसेवकः, पुं, (प्र + सिव + ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) वीणाप्रान्तवक्रकाष्ठम् । दण्डाधः शब्दगाम्भीर्य्यार्थे दारुमयं भाण्डं चर्म्मणा आच्छाद्य दीयते सः । इत्यन्ये । वीणाशिलालावूकम् । इत्यपरे । इति भरतः ॥

"सावित्री प्रसवित्री च वह्निर्वाक् प्रसवीतत:॥"
माता। प्रपूर्वकसूधातोः कर्त्तरि तृण् ङीप् च॥
प्रसव्यं, त्रि, (प्रगतं सव्यादिति।) प्रतिकूलम्। इत्यमरः। ३।१।८४॥ प्रदक्षिणम्। यथा, रामायणे। २।७३।२०॥
"प्रसव्यञ्चापि तञ्चक्रुर्ऋत्विजोऽग्निचितं नृपम्"
प्र+सू+कर्म्मणि यत्। प्रसवनीये च॥)
प्रसहः, पुं, (प्रसह्यत इति। प्र+सह्+अच्।) बलात्कारेण भक्षकपक्षी। स च कुरर-श्येनादिः। यथा,—
"प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः॥"
अस्य मांसगुणाः।
"गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।"
इति राजवल्लभः।
अपि च भावप्रकाशे।
"काको गृध्र उलूकश्च चिल्लश्च शशघातकः।
चाषो भासश्च कुररः इत्याद्याः प्रसहाः स्मृताः॥"
शशघातकः बाज इति लोके।
"प्रसहाः कीर्त्तिता एते प्रसह्य छित्त्वा भक्षणात्।
प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये।
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि॥"
प्रसहनः, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।) हिंस्रपशुः। यथा,—
शार्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।
ते कीर्त्तिताः प्रसहनाः पललं तदीय-
मर्शःप्रमेहजठरामयजाड्यहारि॥"
इति राजनिर्घण्टः॥
आलिङ्गने, क्ली। यथा,—
"परस्परप्रसहनचुम्बनादिकाः
शुचौ सुखे बहुविधा भिदा मताः॥"
इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी॥ (प्र+सह्+भावे ल्युट्।) सहने, क्ली। तद्वति, त्रि॥
प्रसहा, स्त्री, (प्र+सह्+अच्। टाप्।) वृह-तिका। इति रत्नमाला॥ (गुणादयोऽस्या वृहतीशब्दे ज्ञातव्याः॥)
प्रसह्य, व्य, (प्रकर्षेण सोढ्वा इति। प्र+सह्+क्त्वो ल्यप्।) हठार्थकम्। बलात्कारार्थम्। इत्यमरः। ३।४।१०॥ (यथा, माघे।१।२७
"प्रसह्य तेजोभिरसङ्ख्यतां गतै-
रदस्त्वया नुन्नमनुत्तमं तमः॥"
प्रसोढुं शक्य इति। प्र+सह्+यत्। प्रकर्षेण सोढुं शक्ये त्रि। यथा, रघुः। १४।६२।
"प्रसह्य जन्मान्तरपातकानां
विपाकविस्फूर्ज्जथुरप्रसह्यः॥")
प्रसह्यचौरः, पुं, (प्रसह्य बलात्कारेण चौरः।) हठात् चौर्य्यकारी। डाकाइत इति लुटेरा इति च भाषा॥ तत्पर्य्यायः। वन्दीकारः २ माथलः ३ चिह्नाभः ४। इति त्रिकाण्डशेषः॥
प्रसातिका, स्त्री, (सो नाशे+भावे क्तिन्। प्रगता सातिर्नाशो यस्याः। कप्।) अणुव्रीहिः। सूक्ष्मधान्यम्। इति रत्नमाला॥ (यथा, मार्क-ण्डेये। ३२।८॥
"श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिकाः।
नीवाराः पौष्कलाद्यैश्च धान्यानां पितृतृप्तये॥"
प्रसादः, पुं, (प्र+सद्+घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमरः। १।३।१६॥ (यथा, "प्रबोधचन्द्रोदये प्रस्तावनायाम्॥
"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः॥")
अनुग्रहः। (यथा, रघुः। २।६८।
"तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव॥")
काव्यगुणः। स्वास्थ्यम्। प्रसत्तिः। इति मेदिनी। दे,२५॥ वैदर्भीरीतियुक्तकाव्यगुणः। तस्य लक्षणम्। शब्दभिन्नव्यक्तार्थपद-वत्त्वम्। यथा,—
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः।
व्यक्तार्थपदमध्यास्य प्रसादः परिकीर्त्तितः॥"
इति काव्यचन्द्रिका॥ ०॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे।
"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च॥"
देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषञ्च। यथा,
"आसीद्धंशध्वजो राजा प्रजापालनतत्परः।
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा
प्रसादनं, क्ली,(प्रसादयतीति। प्र+सद्+णिच् +ल्युः।) अन्नम्। इति त्रिकाण्डशेषः॥ (प्र+सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा, बलवर्णप्रसादनमिति राजवल्लभः॥ (यथा च महाभारते। ४।६८।२२।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये॥")
प्रसादना,स्त्री, (प्र+सद्+णिच्+युच्+टाप्) सेवा। परिचर्य्या। इति हेमचन्द्रः।३।१६०॥
प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र+साध्+ ल्युट्।) वेशः। इत्यमरः।२।६।९९॥
(यथा, मनुः।२।२११।
"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥"
कङ्कतिका। इति भरतधृतामरमाला॥ प्रसाद-निष्पत्तिश्च॥(प्र+साध्+णिच्+ल्युः। प्रसा-धयितरि, त्रि। यथा, ऋग्वेदे। १०।५३।२।
"यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः॥")
प्रसाधनी,स्त्री,(प्रसाध्यतेऽनयेति। प्र+साध्+ ल्युट्। ङीप्।) सिद्धिः। इति मेदिनी।नि,१८१॥ कङ्कतिका। इत्यमरः।२।६।११९॥(यथा, सुश्रुते चिकित्सितस्थाने। २४॥
"केशप्रसाधनी केश्या रजोजन्तुमलापहा॥")
तद्युक्तिर्यथा,—
"प्रसाधनी दिङ्नवमादस-
सङ्ख्याभिरङ्गुलिभिः क्रमेण।
चतुर्विधानां प्रथिवीपतीनां
सम्पत्तिसौभाग्यय-शस्करी॥
काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम्।
आङ्गुलानुपशाखान्यदेशजानां महीभुजाम्॥
स्कन्धदण्डचतुष्केषु काष्ठजाया विनिश्चयः।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा॥
लौहं सर्व्वञ्च सर्व्वार्हमादित्यादिरयाक्रमात्।
राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी।
मृगाणां महिषाणाञ्च शिङ्गाला प्रसाधनी।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते॥
अत्रापि रत्नविन्यासो यथाशरदक्षणम्॥"
इति युक्तिकल्पतरुः।
प्रसाधिका, स्त्री, (प्रसाध्यति निष्पादयतीति। प्र+साध्+ण्वुल्। टापि अत इत्वम्।) नीवारः। यथा,—
"प्रसाधिका तु नीवारस्तृणधान्यमिति च स्मृतम्"
अस्या गुणाः।
"नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्"
इति भावप्रकाशः।
(प्रसाधयति अलङ्करोतीति।प्र+साध्+णिच् +ण्वुल्।) वेशकारिणी। यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् द्रवरागमेव॥"
इति कुमारसम्भवे सप्तमः सर्गः।
(धान्यविशेषः यथा। "श्यामाकैः प्रसा-धिका।" इति वैद्यकरत्नमालायाम्॥)
प्रसाधितः, त्रि, (प्र+साधि+क्तः।) अलङ्कृतः। इत्यमरः। २।६।१००॥ प्रकर्षनिष्पन्नः। निष्पादितः। यथा, घटकर्परे।
"ततः प्रसाधितं कल्कं दत्त्वा तोयचतुर्गुणे।
क्षीरे प्रसाधितं तैलं अचिरात् बलवर्द्धनम्॥"
प्रसारः, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति हेमचन्द्रः। ३।४९८॥ (यथा, सुश्रुते।१।११।
प्रसाराकुञ्चनगमनं निःशब्दमिति निर्द्दिशेत्।
प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) अव-विधकर्म्मान्तर्गतकर्म्मविशेषः। स तु विस्तार-रूपः। यथा, भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥"
(परिवर्द्धनम्। यथा, कामन्दकीयनीतिसारे। १२।३५।
"मित्रामित्रहिरण्यानां भूमीनाञ्च प्रसारणम्॥")
प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सारि+ ल्युट्। ङीप्।) लताविशेषः। गन्धभादालिया इति भाषा॥ अस्य गुणाः। वातपित्तास्र-त्वम्। उष्णत्वम्। बलवृष्यकारित्वञ्च। इति राजवल्लभः॥ सैन्यानां सर्व्वतो व्याप्तिः। इति प्रसरणशब्दटीकायां भरतः॥
प्रसारिणी, स्त्री, प्रसरतीति। प्र+सृ+णिनि+ ङीप्। लज्जालुलता। प्रसारणी। इत्यमरः

लिया इति भाषा ॥ तत्पर्य्यायः । सुप्रसरा २ सारिणी ३ प्रसरा ४ सरा ५ चारुपर्णी ६ राजबला ७ भद्रपर्णी ८ प्रतानिका ९ प्रबला १० राजपर्णी ११ चन्द्रपर्णी १२ भद्रबला १३ चन्द्रवल्ली १४ प्रभद्रा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । तिक्तत्वम् । वातार्शःश्वयथुमलविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥

प्रसारी, [न्] त्रि, (प्रसरतीति । प्र+सृ+णिनिः) प्रसरणशीलः । तत्पर्य्यायः । विसृत्वरः २ विसृमरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १७ । ४४ ।

"प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ॥")

प्रसितं, क्ली, (प्र+सो+क्तः ।) पूयम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३।१।८॥ (यथा, रघौ । ८ । २३ ।

"इति शत्रुषु चेन्द्रियेषु च
प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयो-
रुभयीं सिद्धिमुभाववापतुः ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र+सि+करणे क्तिन् ।) बन्धनसाधनरज्जुनिगडादिः । इत्यमरः । ३ । २ । १४ ॥ (ज्वाला । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अग्नेरिव प्रसितिर्नाह वर्त्तवे ।"
"प्रसीयते बध्यतेऽनयेति । प्रसितिर्ज्वाला ।"
इति तद्भाष्ये सायनः ॥*॥ भावे क्तिन् । प्रबन्धनम् । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"शूरस्येव प्रसितिः क्षातिरग्नेः ॥")

प्रसिद्धः, त्रि, (प्रसिध्यतीति । प्र+सिध्+गत्यर्थेति क्तः ।) भूषितः ख्यातः । इति मेदिनी । धे, ४४ ॥ (यथा, पञ्चदश्याम् । ४ । ५७ ।

"काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥")

प्रसिद्धिः, स्त्री, प्र+सिध्+क्तिन् ।) टङ्कारः । ख्यातिः । इति त्रिकाण्डशेषः (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्यायतस्य पवेता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्धार्थं यासु लोको व्यवस्थितः ॥")

भूषा । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसूः, स्त्री, (प्रसूते इति । प्र+सू+"सत्सूद्विषेति ।" ३।२।६१ । इति क्विप् ।) माता । इत्यमरः । २ । ६ । २८ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"पितॄणां मानसी कन्या मेनका साम्बिकाप्रसूः ॥")
घोटकी । इत्यमरः । ३ । ३ । २२८ ॥ कदली । वीरुत् । इति मेदिनी । से, ४ ॥ (प्रसवकर्त्री । यथा सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।

"प्रसंसिनी स्यन्दते तु चोभिता दुःप्रसूश्च या ॥")

प्रसूका, स्त्री, (प्रसूरिव । प्रसू+स्वार्थे कन् ।) वाजिनी । इति राजनिर्घण्टः ॥

प्रसूतं, क्ली, (प्रसूयते इति । प्र+सू+क्त ।) कुसुमम् । इति मेदिनी । ते, १२४ ॥

प्रसूतः, त्रि, (प्र+सू+क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")
सूतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र+सू+कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूता स्त्री स्नेहपानं विवर्ज्जयेत् ॥"
यथा च हरिवंशे । ८४ । १०१ ।
"श्रूयन्ते हि स्त्रियो बह्व्यो व्यभिचारव्यतिक्रमैः
प्रसूता दिशसद्रामान् पुत्त्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री, (प्रसूयते इति । प्र+सू+क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"कृष्णा वचा चापि जलेन पिष्टा
सैरण्डतैला खलु नाभिलेपात् ।
सुखं प्रसूतिं कुरुतेऽङ्गनानां
निपीडितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र+सू+भावे क्तिन्) उद्भवः । (यथा, शकुन्तलायाम् ४ अङ्के ।

"आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ति, १२८ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कच्चिन्मृगीणामनघा प्रसूतिः ॥"
कारणम् । यथा, रघुः । २ । ६३ ।

"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २३१ । १४ ।

"त्वं सर्व्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने ! भवसि प्रतिष्ठा ॥"

दक्षपत्नी । सा तु सतीजननी । यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"देवहूतिः कर्द्दमस्य प्रसूतिर्दक्षकामिनी ॥")

प्रसूतिका, स्त्री, प्रसूतः सूतोऽस्या अस्तीति । ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिजं, क्ली, (प्रसूतेर्जन्मसमारभ्य त्वर्थः जायते इति । जन्+डः ।) दुःखम् । इत्यमरः।१।८।३॥

प्रसूनं, क्ली, (प्रसूयते स्मेति । प्र+सू+क्तः । ओदित्वात् निष्ठातस्य नः ।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अवाकिरन् बाललताः प्रसूनै-
राचारलाजैरिव पौरकन्याः ॥")

फलम् । इत्यमरः । ३ । ४ । १०॥ जाते, त्रि । इति मेदिनी, ने । ८० ॥

प्रसूनेषुः, पुं, (प्रसूनं पुष्पं इषुर्बाणो यस्य । कामदेवः । इति त्रिकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र+सृ+क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ ।

"कृष्णतिलप्रसृतं प्रकुञ्चं वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम् ॥"
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

प्रसृतः, पुं, (प्र+सृ+क्तः ।) निकुब्जपाणिः । अर्द्धाञ्जलिः । इत्यमरः । २ । ६ । ८५ ॥ (यथा, शतपथब्राह्मणे । ४ । ५ । १० । ७ ।

"यद्यनुलभेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥"

प्रसृतः, त्रि, (प्र+सृ+क्तः ।) प्रहृष्टः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा, देवीभागवते । १ । १४ । ५ ।

"न शशाक नियन्तुञ्च स व्यासः प्रसृतं मनः ॥")
विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति त्रिकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । २६० ॥

प्रसृता, स्त्री, (प्र+सृ+क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते, १२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र+सृ+क्तिन् ।) प्रसृतः । आकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संस्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयम् ॥"
सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।
"वर्द्धितानि प्रसृत्या वै विनताकुलकर्त्तृभिः ॥"
प्रसूत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,
"पलाभ्यां प्रसृतिर्ज्ञेया———॥"
इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

प्रसेकः, पुं, (प्रसेचनमिति । प्र+सिच्+घञ् ।) सेचनम् । क्षरितः । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥"
रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।
"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १७८ ॥ प्रसीदिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्व्वसदधातोः कर्त्तरि क्वसुप्रत्ययनिष्पन्नः ॥

प्रसेवः, पुं, (प्रसीव्यते स्मेति । प्र+सिव+"अकर्त्तरि चेति ।" ३ । ३ । १९ । इति घञ् ।) वीणाङ्गम् । स्यूतः । इति मेदिनी । वे, ४३ ॥

प्रसेवकः, पुं, (प्र+सिव+ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) वीणाप्रान्तवक्रकाष्ठम् । दस्ताथः मन्दगाम्भीर्य्यार्थे दारुमयं भाण्डं यच्चर्म्मणा आच्छाद्य दीयते सः । इत्यन्ये । वीणाशिलाशाबूफलम् । इत्यपरे । इति भरतः ॥

तत्पर्य्यायः । काकुभः २ । इत्यमरः । १।७।७ ॥ स्रवरचितभाण्डम् । धोकड़ा इति ख्यातः । तत्पर्य्यायः । स्यूनः २ स्योनः ३ धौतकटः ४ स्यूतिः ५ स्यूतः ६ । इति भरतः ॥ (यथा, सुश्रुते । १ । ८ ।

"इतिवस्तिप्रसेवकप्रभृतिपूदकापङ्कपूर्णेषु भेद्यशीप्याम् ॥") प्रभ्रष्टतन्तुसन्तानकर्त्ता च ॥

प्रस्कण्वः, पुं, (प्रगतं कण्वं पापं यस्मादिति । "प्रस्कण्वहरिश्चन्द्राहषौ ।" ६।१।१५३ । इति सुट् ।) ऋषिविशेषः । स च वैदिकसन्ध्यान्तर्गतसूर्य्योपस्थानमन्त्रस्य ऋषिः । (यथा, ऋग्वेदे । १ । ४४ । ६ ।

"प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥")

प्रस्कन्दनं, क्ली, (प्र+स्कन्द+ल्युट् ।) विरेकः । इति रत्नमाला ॥ (यथा, महाभारते । १ । ८४ । २६ ।

"अग्निप्रस्कन्दनपरस्त्वञ्चाप्येवं भविष्यसि ॥")

प्रस्कन्नः, त्रि, (प्रकर्षेण स्कन्नः ।) पतितः, त्रि । इति हेमचन्द्रः ॥

प्रस्तरः, पुं, प्रस्तृणाति आच्छादयति यः । (प्र+स्तृ+पचाद्यच् ।) शिला । पाथर इति भाषा । तत्पर्य्यायः । ग्रावा २ पाषाणः ३ उपलः ४ अश्मा ५ दृषत् ६ दृषत् ७ पारावकः ८ पारटीटः ९ मुसकः १० काचकः ११ शिला १२ ॥ पल्लवादिरचितशय्या । यथा,—

"पल्लवाद्यैर्विरचिते शयनीये तु संस्तरः ।
प्रस्तरः प्रस्तिरश्चेति प्रस्तारोऽपि च कुत्रचित् ॥"
इति शब्दरत्नावली ॥

(यथा, मनुः । २ । २०४ ।

"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥")

मणिः । इति मेदिनी । रे, १८१ ॥

प्रस्तरिणी, स्त्री, (प्रस्तरस्तदाकारोऽस्त्यस्या इति प्रस्तर+इनिः ङीप् ।) गोलोमिका । इति राजनिर्घण्टः ॥ (विषयोऽस्या गोलोमिकाशब्दे ज्ञेयः ॥)

प्रस्तारः, पुं, (प्र+स्तृ+घञ् ।) तृणवनम् । तत्पर्य्यायः । तृणाटवी २ कक्षः ३ । इति हेमचन्द्रः । ४ । १७७ ॥ पल्लवादिविरचितशयनीयम् । इति शब्दरत्नावली ॥ शय्या । इति हारावली ॥ छन्दःप्रभृतीनां प्रभेदज्ञापकसङ्केतविशेषः । यथा,—

"पादे सर्वगुरावाद्यात् लघु न्यस्य गुरोरधः ।
यथोपरि तथा शेष भूयः कुर्य्यादमुं विधिम् ॥
ऊने दद्याद्गुरूनेव यावत् सर्व्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥"
इति वृत्तरत्नावली ॥ ७ ॥

अपि च । अथ पत्थार । पढम गुरु हेट्ठ ठाणे लहुआ परिठवउ अप्पबुद्धी ए । सरिसा सरिसा पन्ती उव्वरिआ गुरुलहू देहु ॥ अस्य टीका । एतद्दृष्टान्तं प्रस्तारप्रकारमाहेति प्रस्तारं दर्शयति । प्रथमं गुरोरधःस्थाने लघुकं स्थापय आत्मबुद्ध्या सदृशी सदृशी पङ्क्तिरुद्धृत्तो गुरुलघू देहि सदृशी पङ्क्तिर्दक्षिणे कार्य्या वामे गुरुलघुभिः पूरणं कार्य्यं इदन्तु मात्राप्रस्तारविषयं तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः अपरत्र लघुर्देयः । वर्णप्रस्तारे तु गुरुणैव पूरणं कार्य्यं तत्रायं प्रकारः आदौ गुरुर्लेख्यः तत्र प्रथमं गुरोरधःस्थाने लघुर्लेख्यः तद्दक्षिणे चोपरिस्थितपङ्क्तेः सदृशो कार्य्या वामे च गुरुलघुभिः पूरणं कार्य्यं वामे चेक एकलघुः पतति वर्णप्रस्तारे तु वामे लघुस्पर्शो नास्ति यथा विकलप्रस्तारे । ६६ । प्रथमगुरोरधो लघुर्वामतश्च कलार्द्धपूरणं गुरुणैव कार्य्यं दक्षिणे च पङ्क्त्यभावः ततो गुरोरधो लघुर्लेख्यः दक्षिणे च लघोरधो लघुर्लेख्यः वामे च कलापूरणं एकेन लघुना कार्य्यं एवं चतुष्कला-६६दावपि बोध्यं यथा चतुरच्छन्दसि६६एवमन्यत्रापि बोध्यम् ॥ अथ सकलप्रस्तारसंख्या । दव्वीसा सत्तसआतहं सत्तावह सहस्साइं वासालिसह लक्खइं तेरहकोड़ी समग्गाइं । अस्य टीका । अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती संख्येत्यत आह । १३४,२१७,७२६,षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षास्त्रयोदशकोट्यः समग्राणि चइस्य वामा गतिरित्यङ्काः स्थाप्याः । इति पिङ्गलः शीघ्रबोधभूषणश्च ॥

प्रस्तार्य्यर्म्म, [न्] क्ली, नेत्ररोगभेदः । तस्य लक्षणम् ।

"प्रस्तार्य्यर्म्म तनुस्तीर्णं श्यावं रक्तनिभं सिते ॥"
इति माधवकरः ॥

अपि च ।

"समन्तादिस्तृतः श्यावो रक्तो वा मांससञ्चयः सन्निपातेन दोषाणां प्रस्तार्य्यर्म्म तदुच्यते ॥"
इति रचितष्टतनिमिः ॥

तस्यौषधम् ।

"कतकस्य फलं शङ्खं त्रपुषं सैन्धवान्वितम् ।
फेनो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ॥
कुक्कुटाण्डकपालानि वर्त्तिरेषा व्यपोहति ।
तिमिरं पटलं काचमर्म्मार्ब्बुदं तथैव च ॥
कण्डूक्लेदार्ब्बुदं हन्ति प्रस्तमाशु सुखावती ॥"
इदि चक्रपाणिदत्तः ॥

प्रस्तावः, पुं, (प्र+स्तु+"प्रे द्रुस्तुस्रुवः ।" ३।३। २७ । इति घञ् ।) अवसरः । इत्यमरः । ३ । २ । २४ ॥ प्रसङ्गस्तुतिः ॥ इति भरतः ॥ प्रसङ्गः इति भानुदीक्षितः ॥ (यथा, मृच्छकटिके । ८मङ्के । "प्रस्तावेनाधिकरणिकास्त्वां द्रष्टुमिच्छन्तीति ॥") प्रकरणम् । यथा,—

"प्रस्तावदेशकालादेर्वशेनाप्रतिमात्मनाम् ॥"
इत्यत्रार्थे काव्यप्रकाशः ॥

प्रस्तावना, स्त्री, (प्रस्तावयति विज्ञापयति कार्य्यादिकमिति । प्र+स्तु+णिच्+युच् । टाप् ।) आरम्भः । इति जटाधरः ॥ सूत्रधारेण सह नटीविदूषकादीनां परस्परविचित्रभाषणम् । तस्या लक्षणम् । यथा,—

"नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥"
इति साहित्यदर्पणम् ॥

प्रस्तिरः, पुं, (प्रस्तरः । निपातनात् इत्वम् ।) पल्लवादिरचितशय्या । इति शब्दरत्नावली ॥

प्रस्तीतः, } त्रि, (प्र+स्त्यै+क्तः । "प्रस्त्योऽन्यतरस्याम् ।" ८ । २ । ५४ । इति
प्रस्तीमः, } निष्ठातस्य मो वा ।) संहतः । ध्वनितः । प्रपूर्व्वस्त्यैधातोः कर्म्मणि क्तप्रत्ययः । इति मुग्धबोधव्याकरणम् ॥

प्रस्तुतः, त्रि, प्रस्तूयते स्मेति । प्र+स्तु+क्तः ।) प्रकरणप्राप्तः । यथा,—

"अप्रस्तुतप्रशंसा सा या सैव प्रस्तुताश्रया ॥"
इति काव्यप्रकाशः ॥

प्राकरणिकः । प्रासङ्गिकः । इत्यलङ्कारकौस्तुभः ॥ निष्पन्नः । यथा । प्रस्तुतस्तेऽधरः । अयं प्रस्तुतं अत्रमयम् । यथाक्रुः प्रस्तुता प्रस्तुमयो । इति कलापतद्धितः ॥ प्रकर्षस्तुतियुक्तः । प्रपूर्व्वस्तुधातोः कर्म्मणि क्तः । उपस्थितः । प्रतिपन्नः । उद्युक्तः । इति सोजन्तधारदर्शनात् ॥

प्रस्तृतः, त्रि, (प्र+स्तृ+क्तः ।) प्रसारितः । इति त्रिकाण्डशेषः ॥

प्रस्थः, पुं, (प्रकर्षेण तिष्ठतीति । प्र+स्था+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । यद्वा, प्रतिष्ठतेऽस्मिन्नेन चेति प्रस्थे कः ।) परिमाणविशेषः । स तु चतुःकुडवरूपः । इति भरतः ॥ आढकचतुर्थांशः । इति लीलावती ॥ द्विशरावपरिमाणम् । इति वैद्यकपरिभाषा ॥ (यथा, सुश्रुते शारीरस्थाने । ५ । अध्याये ।

"वसिनो वसुदोषस्य ययस्वस्य शरीरिणः ।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे ॥")

प्रस्थः, पु, क्ली, (प्र+स्था+कः ।) अद्रेः समभूभागः । अद्रेरेकदेशः । इति भरतः ॥ तत्पर्य्यायः । स्नुः २ सानुः ३ । इत्यमरः । २ । ३ । ५ ॥ (यथा, कुमारे । १ । ५४ ।

"प्रस्थं हिमाद्रेर्मृगनाभिगन्धि
किञ्चित् क्वणत्किन्नरमध्युवास ॥")

उच्छ्रितवस्तु । इति मेदिनी ॥ विस्तारः । यथा,

"दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः ॥

प्रस्थस्थितिविशिष्टे, त्रि ॥

प्रस्थपुष्पः, पुं, (प्रस्थमितं पुष्पमस्य ।) मरुवकः । इत्यमरः । २ । ४ । ७८ ॥ (तत्पर्य्यायो यथा,— भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"मारुतोऽथो मरुवको मरुवकः फणिज्झकः ।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥")

स्वल्पपत्रतुलसी । जम्बीरभेद: । इति केचित् ॥ जम्बीरसामान्यम् । इति केचित् । इति तट्टीकायां भरत: ॥

प्रस्थानं, क्ली, (प्र + स्था + ल्युट् ।) विजिगीषो: प्रयाणम् । इत्यमर: । २ । ८ । ९५ ॥ (यथा, देवीभागवते । ५ । ४ । १२ ।
"सेनाभियोगं प्रस्थानं बलसंख्या यथार्थत: ।
घोराणाञ्च परित्राणं कृत्वा यान्तु त्वरान्वित: ॥")
गमनमात्रम् । यथा, पदाङ्कदूते ।
"प्रस्थानन्ते कुलिशकलनाद्विश्चितं पण्डिताग्र्यै: ।")

प्रस्थानविघ्न:,पुं, (प्रस्थानस्य विघ्न: ।) गमनव्याघात: । यथा । य: पुनर्विवाहावसरे मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानीपयिकं कर्म्म प्रागङ्गीकृत्य तदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति तदसौ द्विगुणां दृतिं दाप्य: । इति मिताक्षरा ॥

प्रस्थापित:, त्रि, (प्र + स्था + णिच् + क्त: ।) प्रेषित: । इति हेमचन्द्र: ॥ प्रकर्षेण स्थापितश्च ॥

प्रस्थिका, स्त्री, (प्रस्थस्तदाकारोऽस्त्यस्या इति । प्रस्थ + ठन् ।) अम्बष्ठा । इति भावप्रकाश: ॥

प्रस्फुट:, त्रि, (प्रस्फुटति विकशतीति । प्र + स्फुट् + क: ।) प्रफुल्ल: । इति शब्दरत्नावली ॥ (सुस्पष्ट: । यथा, मार्कण्डेये । २७ । २१ ।
"निष्कृष्य शासनं तस्माद्ददृशे प्रस्फुटाक्षरम् ॥")

प्रस्फोटनं,क्ली, (प्रस्फोट्यतेऽनेनेति । प्र + स्फुट् + णिच् + करणे ल्युट् ।) सूर्पम् । इत्यमर: । २ । ८ । २६ ॥ (प्र + स्फुट् । भावे ल्युट् ।) ताड़नम् । विकाशनम् । इति मेदिनी । ने, १८२ ॥ पवनम् । तुषादिशोधनम् । इति हेमचन्द्र: । ४ । ८३ ॥

प्रस्रवणं,क्ली,(प्रस्रवति जलमस्मादस्मिन्निति वा । प्र + स्रु + अपादाने अधिकरणे वा ल्युट् । यत्र स्थाने स्रुत्वा जलं गलति तत् । इति भरत: ॥ अविच्छेदेन सजलं यत्र स्थाने पतति यत्र निपत्य च बहुलीभवति तत् । इति स्वाम्यादय: ॥ गिरेरुपरि निर्झरादिप्रभवजलसंघात: इति साध्व: ॥ (यथा, हरिवंशे । ८ । ५४ । ११ ।
"पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गत: ।
प्रभावञ्च सरस्वत्या: प्लक्षप्रस्रवणं वस: ॥")
अजस्रं मन्दवेगेन सवज्जलम् । इति कोक्कट: ॥ तत्पर्याय: । उत्स: २ । इत्यमर: । २ । ३ । ५ ॥ जलप्रवाह: ३ । यथा, मनु: । ४ । २०३ ।
"स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥")
अस्य गुणा: । प्रस्रवणजलं स्वच्छं लघु मधुरं रोचनञ्च दीपनकृत् ॥ इति राजनिर्घण्ट: ॥ (प्र + स्रु + भावे ल्युट् ।) प्रकर्षेण क्षरणम् ॥

प्रस्रवण:,पुं,(प्रस्रवति जलमस्मादिति । प्र + स्रु + अपादाने ल्युट् । माल्यवत्पर्वत: । इति हेमचन्द्र: । ४ । ९५ ॥ स्वेद: । इति त्रिकाण्डशेष: ॥

प्रस्राव:, पुं, (प्रस्रूयते इति । प्र + स्रु + 'उदुन्नुद्रु:' ३ । ३ । २७ । इति घञ् ।) मूत्रम् । इत्यमर: । २ । ६ । ६७ ॥ गोप्रस्रावमाहात्म्यं यथा, वराहपुराणे ।
"प्रस्रावेण तु य: स्नायात् रोहिण्यां मानवो द्विज: ।
सर्व्वपापकृतान्दोषान् दहत्याशु न संशय: ॥")
(गुणादयोऽस्य मूत्रशब्दे ज्ञातव्या: ॥)

प्रस्वान:, पुं, उच्चै:शब्द: । प्रपूर्व्वस्वनधातोर्घञ्प्रत्ययेन निष्पन्न: ॥

प्रस्वेद:,पुं,(प्र + स्विद् घर्म्मच्युतौ + घञ् ।)अतिशयघर्म्म: । (यथा, मार्कण्डेये । १२४ । १३ ।
"नरेन्द्रपुत्रा प्रस्वेदजलक्लिन्नानना: समम् ॥")
तस्यौषधं यथा,—
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीककोलपुगानां लवङ्गस्य फलानि च ॥
अगुरुर्गोरकाश्मर्य्य: कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥
सरल: सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्व्वुरक: पद्मकञ्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ।
पुमान् युवा स्यात् शक्राभ: स्त्रीणाञ्चातिवल्लभ: ॥
स्त्रीगतं गच्छते रुद्र ! वन्ध्यापि लभते सुतम् ॥"
इति गारुड़े १९८ अध्याय: ॥
(विषयोऽस्य यथा,—
"स्तैमित्यं मधुरास्यता च जड़ता निद्रा च तन्द्रा भृशं
गात्राणां गुरुताऽरुचिर्विरसता रोमोद्गम: शीतता ।
प्रस्वेद: श्रुतिशोधनञ्च कुरुते नेत्रे च पाण्डुच्छविविट्स्रावमलहत्तिका च वमनं श्लेष्मज्वरे वै विदु: ॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

प्रहत, त्रि, (प्रहन्यते स्मेति । प्र + हन् + क्त: ।) विततम् । क्षुण्णम् । इति शब्दरत्नावली ॥ प्रकर्षेण हिंसितम् । (यथा, महाभारते । ८ । ३० । ६ ।
"प्रहतरथमनागाश्वकुञ्जरं
प्रतिभयदर्शनमुल्वणव्रणम् ।
तदहितहतमाबो बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥")
प्रकर्षेण गतश्च ॥ (विताड़ितम् । यथा, भागवते । १० । ७२ । ३८ ।
"इत्थं तयो: प्रहतयोर्गदयोर्नृवीरौ
क्रुद्धौ स्वमुष्टिभिरय:स्पर्शैरपिष्टाम् ॥"
वादितम् । यथा, रघु: । १८ । १४ ।
"स स्वयं प्रहतपुष्कर: कृती
लोलमाल्यवलयो हरन् मन: ।
नर्त्तकीरभिनयातिलङ्घिनी:
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥")

प्रहनेमि:,पुं, (प्रहाणां नेमिरिव । निपातनात् अस्य म: ।) चन्द्र: । इति त्रिकाण्डशेष: ॥ (ग्रहनेमिरिति वा पाठ: ॥)

प्रहर:, पुं, (प्रह्रियते दण्डादिरस्मिन्निति । प्र + हृ + अप् । घञ् वा ।) वासरस्याष्टभागैकभाग: । पहर इति हिन्दीभाषा । तत्पर्याय: । याम: २ । इत्यमर: । १ । ४ । ६ ॥ (यथा, कथासरित्सागरे । ४ । ३७ ।
"सद्वितर्कं द्वितीयेऽस्मिन् प्रहरे पर्य्यकल्पयत् ॥")

प्रहरकुटुम्बी,स्त्री,(प्रहरस्य कुटुम्बी कुटुम्बिनीव") कुटुम्बिनीक्षुप: । इति राजनिर्घण्ट: ॥

प्रहरणं, क्ली, (प्रह्रियतेऽनेनेति । प्र + हृ + करणे ल्युट् ।) अस्त्रम् । इत्यमर: । २ । ८ । ८२ ॥ (यथा, महाभारते । १२ । १६६ । २ ।
"धनु: प्रहरणं श्रेष्ठमतोवाच पितामह ! ॥")
कर्णीरथ: । इति तट्टीका सारसुन्दरी ॥ (यथा, भागवते । ४ । २६ । २ ।
"पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥"
प्रह्रियतेऽस्मिन्निति ।) युद्धम् । इति हलायुध: । २ । २९८ ॥ (प्र + हृ + भावे ल्युट् ।) प्रहार: ॥ (यथा, महाभारते । ४ । ४ । ७ ।
"यानि प्रहरणे चैव तथैवास्तिषु भारत ! ॥")

प्रहरी, [न्] त्रि, यामिक: । प्रहरो विद्यते अस्येतिप्रहरशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्न: ॥

प्रहर्षण:, पुं,(प्रहर्षयतीति । प्र + हृष् + णिच् + ल्यु: ।) बुधग्रह: । इति त्रिकाण्डशेष: ॥ हर्षविशिष्टे, हर्षकारके च, त्रि ॥ यथा, महाभारते । १ । २० । ८ ।
"नानापक्षिरुतं रम्यं कद्रुप्रहर्षणम् ॥"
प्र + हृष् + भावे ल्युट् । आनन्दे क्ली । यथा, महाभारते । १२ । ३३६ । २५ ।
"अथ व्रतस्यावभृते वागुवाचाशरीरिणी ।
स्निग्धगम्भीरया वाचा प्रहर्षणकरी विभो !")

प्रहर्षणी,स्त्री,(प्रहर्षयतीति । प्र + हृष् + णिच् + ल्यु: । ङीप् ।) हरिद्रा । इति शब्दावली । त्रयोदशाक्षरपादच्छन्दोभेद: । तस्या लक्षणं यथा । छन्दोमञ्जर्य्याम् । "त्र्याशाभिर्मनजरगा प्रहर्षणीयम् ।" तस्या उदाहरणं यथा,—
"गोपीनामधरसुधारसस्य पानै-
रुत्तुङ्गस्तनकलशोपगूहनैश्च ।
आश्चर्य्यैरपि रतिविभ्रमैर्म्मुरारि:
संसारे मतिरभवत् प्रहर्षणीषु ॥"

प्रहसनं,क्ली (प्र + हस् + भावे ल्युट् ।) प्रहास: । (प्रहसन्ति जना अनेन वा । प्र + हस् + आधारे करणे वा ल्युट् ।) रूपकभेद: । परिहास: । इति मेदिनी । ने, १८० ॥ आक्षेप: । इति हेमचन्द्र: ॥ रूपकभेदस्य लक्षणं यथा,—
"भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गैर्विनिर्म्मितै ।
भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम् ॥
तत्र नारभटीनापि विष्कम्भकप्रवेशकौ ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा ॥
तपस्विभगवद्विप्रप्रभृतिष्वत्र नायक: ।
एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते ॥"
इति साहित्यदर्पणम् ॥

प्रहसन्ती,स्त्री, (प्रहसति प्रकर्षेण विकसतीति । प्र + हस् + शतृ + ङीप् ।) यूथी । इति त्रिकाण्डशेष: ॥ वासन्ती । इति राजनिर्घण्ट: ॥ महाटाङ्गधरेशी च ॥

प्रहस्तः, पुं, (प्रततः प्रसृतो वा हस्तो यत्र ।) विस्तृताङ्गुलिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८४ ॥ रावणसेनापतिविशेषः । यथा—
"ततो नीलाम्बुदप्रख्यं प्रहस्तो नाम राक्षसः ।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥"
इति रामायणे लङ्काकाण्डे ८ सर्गः ॥

प्रहारः, पुं, (प्रहरणमिति । प्र+हृ+घञ् ।) आघातः । यथा, मार्कण्डेये ।
"करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥"

प्रहारणं, क्ली, (प्र+हृ+णिच्+ल्युट् ।) काम्यदानम् । इति प्रहारणशब्दटीकायां सारसुन्दरी ॥

प्रहारवल्ली, स्त्री, (प्रहारोपशमा आघातजन्यवेदनादिनाशिका वल्ली लता । शाकपार्थिवादित्वात् मध्यपदलोपः ।) मांसरोहिणी । इति भावप्रकाशः ॥ (पर्य्यायोऽस्या यथा,—
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी कृशा ।
प्रहारवल्ली विकषा वीरवत्यपि कथ्यते ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

प्रहासः, पुं, (प्रकृष्टो हासो यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ९ । ४५ । ६६ ।
"रणोत्कटः प्रहासश्च श्वेतसिद्धश्च नन्दकः ॥"
नागविशेषः । यथा तत्रैव । १ । ५७ । १५ ।
"पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्दरिः ॥"
प्रकृष्टो हासो यस्मात् ।) नटः । इति धरणिः ॥ (प्रकृष्टो हासः प्रकाशो यस्य ।) सोमतीर्थम् । इति जटाधरः ॥ (प्रकृष्टो हास इति ।) अट्टहासः । इति शब्दरत्नावली ॥ (यथा, कामन्दकीये । ५ । २० ।
"न मर्म्मसचिवैः सार्द्धं किञ्चिदप्यप्रियं वदेत् ।
ते हि मर्म्माण्यभिघ्नन्ति प्रहासेनापि संसदि ॥"

प्रहासी,[न्]पुं,प्रकृष्टं हासयति हसति च यः । (प्र+हस्+णिच् वा+णिनिः ।) हास्यकारकः भाँड़ इति भाषा । तत्पर्य्यायः । वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रीतिदः ६ । इति हेमचन्द्रः । २ । २४५ ॥ (हास्यकारिणि, त्रि । यथा, अथर्व्ववेदे । ८।६।१४ ।
"आपाकेस्थाः प्रहासिनस्तम्बे ये कुर्व्वते ॥")

प्रहिः, पुं, (प्रकर्षेण ह्रियतेऽस्मादिति । प्र+हृ+ "प्रहरतेः कूपे ।" उणा० ४ । १३४ । इति इण् । स च डित् ।) कूपः । इत्यमरः ।१।१०।२६

प्रहितं, क्ली, (प्रधीयते स्मेति । प्र+धा+क्तः ।) सूपः । इति हेमचन्द्रः । ३ । ६१ ॥ (प्र+हि प्रेरणे+क्त ।) क्षिप्ते, त्रि । इति निरुक्तशब्दटीकायां भरतः ॥

प्रहीणः, त्रि, (प्र+ओ हा त्यागे+क्त । "ध्रुमास्थागेति ।" ६ । ४ । ६६ । इति आत ईत् । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः । ततो णत्वम् ।) परित्यक्तः । प्रपूर्व्वहाधातोः कर्म्मणि क्तः । इति मुग्धबोधव्याकरणम् ॥ यथा,—
"प्रहीणपूर्ब्बध्वनिनाधिरूढ-
स्तुलामधारेण प्रहसनेन ॥"
इति रघुकाव्यम् ॥

प्रहुतं, क्ली, (प्रहूयते स्मेति । प्र+हु+क्तः ।) भूतयज्ञः । इति जटाधरः ॥ (यथा, मनुः । ३ । ७३—७४ ।
"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च ।
ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते ॥
जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ।
ब्राह्म्यं हुतं द्विजाग्र्यार्च्चा प्राशितं पितृतर्पणम् ॥")

प्रहेणकं, क्ली, (प्रहेलकम् । पृषोदरादित्वात् लस्य णः ।)पिष्टकविशेषः । तत्पर्य्यायः । वाचनम् २ व्रतोपायनम् ३ । इति त्रिकाण्डशेषः ॥ प्रहेलकम् ४ वायनकम् ५ । इति हारावली १५२

प्रहेलकं, क्ली, (प्रहिलति स्वादादिना अभिप्रायं सूचयतीव । प्र+हिल भावसूचने+ण्वुल् । प्रहिलति वेष्टयतीति । प्र+हेल ण्वुल् वा ।) प्रहेणकम् । इति हारावली । १५२ ॥

प्रहेलिका, स्त्री, (प्रहिलति अभिप्रायं सूचयतीति । प्र+हिल अभिप्रायसूचने+क्वुन् । टापि अत इत्वम् ।)दुर्व्विज्ञानार्थप्रश्नः । कूटार्थभाषिता कथा । हेयालि इति भाषा । तत्पर्य्यायः । प्रवह्लिका २ । इत्यमरः ।१।६।६ ॥ प्रवल्हिका ३ प्रवह्लिः ४ प्रवह्ली ५ प्रहेलिः ६ इति भरतः ॥ प्रश्नदूती ७ प्रवह्लीका ८ । इति शब्दरत्नावली ॥ तस्य लक्षणम् ।
"व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने
आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य
भङ्गतः ॥"
आर्थी । यथा,—
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ॥"
पानीयकुम्भ इति ॥ शाब्दी यथा,—
"सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयन्तु ॥"
सारिका । इति विदग्धमुखमण्डनम् ॥

प्रह्लादः, पुं, (प्रह्लादते इति । प्र+ह्लाद शब्दे+अच् । यद्वा, प्रह्लादयतीति । प्र+ह्लाद+णिच्+अच् । रलयोरैक्यात् । प्रह्लादः । स च हिरण्यकशिपोः पुत्रः परमवैष्णवः । (यथा, हरिवंशे । ३ । ७१ ।
"हिरण्यकशिपोः पुत्त्रश्चत्वारः प्रथितौजसः ।
अनुह्रादश्च ह्रादश्च प्रह्लादश्चैव वीर्य्यवान् ॥")
तस्य चरित्रादिकं प्रह्लादशब्दे द्रष्टव्यम् ॥ (जनपदविशेषः । यथा, महाभारते ।६।९।४६
"मल्लाः सुदेष्णाः प्रह्लादा माहिकाः शशिकास्तथा ॥")

प्रह्लत्तिः, स्त्री, (प्र+ह्लाद्+क्तिन् । ह्रस्वः ।) प्रीतिः । ("ह्लादेः स्वः क्तौ च ।") इति मुग्धबोधव्याकरणम् ॥

प्रह्लन्नः, त्रि, (प्र+ह्लाद+क्त । "ह्लादो निष्ठायाम् ।" ६ । ४ । ९५ । इति ह्रस्वः ।) प्रीतः । इत्यमरः । ३ । १ । १०३ ॥

प्रह्लादः,पुं,(प्रह्लादयतीति । प्र+ह्लाद्+णिच्+अच् ।) प्रह्लादः । स च पूर्व्वजन्मनि हिरण्यकशिपोः पुत्त्रः सोमशर्म्मनामाभूत् ततो दैत्यभावनया मृतः अनन्तरं कमलायां हिरण्यकशिपोः सकाशाद्दैत्यभावेन जातः । यथा,
सूत उवाच ।
"स लोहेन समं भिन्ने काञ्चनं भूषणं पुनः ।
जिताहारः स धर्म्मात्मा निद्रया परिवर्ज्जितः ॥
विषयान् स परित्यज्य एकान्तमपि सेवते ।
योगासनसमारूढो निराशो निष्परिग्रहः ॥
तस्य वेला सुसंप्राप्य मृत्युकालः समागतः ।
आगतान् दानवान् विप्रः सोमशर्म्मा ददर्श ह ।
मृत्युकाले तु संप्राप्ते माधवाख्यामवर्त्तते ।
शालग्रामे महाक्षेत्रे कपीनामेव सन्निधौ ।
केचिद्वदन्ति वै दैत्याः केचिद्वदन्ति दानवाः ।
एवंविधो महाशब्दः कर्णरन्ध्रगतस्तदा ॥
तस्यैव विप्रवर्य्यस्य सुविप्राः सोमशर्म्मणः ।
मानध्यानात् प्रचलतः प्रविष्टं दैत्यजं भयम् ।
तेन ध्यानेन तस्यापि दैत्यभूतेन वै तदा ।
सत्वरं तस्य वै प्राणा गतास्तस्य महात्मनः ॥
दैत्यभावेन संयुक्तः स हि मृत्युवशं गतः ।
तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा ॥
देवासुरे महायुद्धे निहतश्चक्रपाणिना ।
युध्यमानेन तेनापि प्रह्लादेन महात्मना ।
सुधर्म्मं वासुदेवं तद्विश्वरूपं विचिन्तितम् ।
योगाभ्यासेन पूर्व्वेण ज्ञानमासीन्महात्मनः ।
सस्मार पौर्व्विकं सर्व्वं चरितं द्विजसत्तम ।
सोऽप्यहं सोमशर्म्मा वै प्रविष्टो दानवीं तनुम् ।
कस्य कार्य्यं कदा पुण्यं वैष्णवं ध्यानमुत्तमम् ।
प्रयामि च महापुण्यैर्योगाभ्यासैर्मदादिभिः ।
समरे प्रीयमाणेन प्रह्लादेन महात्मना ।
एवं चिन्ता कृता पूर्व्वं श्रूयतां द्विजसत्तम ॥
एतत्ते सर्व्वमाख्यातं सर्व्वसन्देहनाशनम् ॥"
सूत उवाच ।
"प्रह्लादे तु हते संख्ये देवदेवेन चक्रिणा ।
संह्रादे च महावीर्य्ये तस्मिंश्च कालनेमिनि ॥
प्रह्लादस्य तु या माता हिरण्यकशिपोः प्रिया ।
प्रह्लादस्य महाशोकेर्दिवा रात्रौ प्रशोचति ।
पतिव्रता महाभागा कमला नाम दुःखिता ।
खिद्यमाना दिवा रात्रौ नारदस्तामुवाच ह ।
मा शुचस्त्वं महाभागे पुत्रार्थे पुत्रभामिनि ।
निहतो वासुदेवेन तव पुत्रः समेष्यति ॥
तद्रूपसत्त्वोपेतस्त्वोदरे महामतिः ।
प्रह्लादेति च वै नाम पुनरस्य भविष्यति ॥
विष्णोस्तु वासुदेवस्याथ ध्यानेन समन्वितः ।

इन्द्रत्वं भोक्ष्यते भद्रे । सर्वदेवैर्नमस्कृतः ॥
सुखीभव महाभागे । पुत्रेण तेन वै सदा ।
न प्रकाश्या त्वया देवि । स्ववार्त्तेयञ्च कस्यचित् ।
कर्त्तव्यमज्ञानभावैः सुगोप्यं त्वं सदा कुरु ।
एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः ॥
कमलायाश्चोदरे वै आसीत् तज्जम चोत्तमम् ।
पुत्रः प्रह्लादो वै नाम तस्यां जातो महात्मनः ॥
आश्रमार्थं गतो विप्र क्षणं एवं विचिन्त्य च ।
नरसिंहप्रसादेन देवराजोऽप्यभूत् स हि ॥"
इति पाद्मे भूमिखण्डे ५ अध्यायः ॥ *॥
(धर्मेन सह नरनारायणयोर्युद्धमासीत् । एत-
द्विवरणन्तु देवीभागवते चतुर्थस्कन्धे नवमा-
ध्याये द्रष्टव्यम् ॥) प्रमोदः । इति विश्वः ॥
(यथा, महाभारते । १ । ७० । ३ ।
"मन प्रह्लादजननं दृष्टिकान्तमतीव च ॥")
शब्दः । इति धरणिः ॥ (नागविशेषः । यथा,
महाभारते । २ । १० ।
"प्रह्लादो मूषिकादश्च तथैव जनमेजय: ॥")
प्रह्वः, त्रि,(प्रह्वयते इति । प्र+ह्वे+"सर्व्वनि-
घृष्वरिष्वेति ।" उणा० १ । १५२ । इति वन् ।
आलोपश्च ।) नम्रः । इत्युणादिकोषः ॥ (यथा,
रघुः । १६ । ८० ।

"विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ॥")

आसक्तिः । इति हेमचन्द्रः । ३ । ४८ ॥
प्रा, ल पूर्त्तौ । (अदा०-पर०-सक०-अनिट् ।)
ल, प्राति घटं जलेन लोकः । इति दुर्गा-
दासः ॥
प्राक्, व्य, पूर्व्वदिग्देशकालाः । इत्यमरः । ३ ।
४ । २३ ॥ प्राची दिक् प्राङ् देशः कालो वा
प्राक् । एवं प्राच्या दिशः प्राचो देशात्
कालाद्वा आगतः प्रागागतः । एवं प्राच्यां
दिशि प्राचि देशे वा वसति प्राग्वसति । दिक्-
शब्दाद्दिग्देशकाले इति प्रथमापञ्चमीसप्तमीनां
स्तात् अचो लुमिति स्तातो लुक् । इति तट्टी-
कायां भरतः ॥ ("दिक्शब्देभ्यः सप्तमीपञ्चमी-
प्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।" ५।३।२७
इति अस्तातिः । "अञ्चेर्लुक् ।" ५ । ३ । ३० ।
अस्तातेर्लुक् । "लुक् तद्धितलुकि ।" १ । २ ।
४९ । इति स्त्रीप्रत्ययस्य लुक् ।)पूर्व्वम् । (यथा,
मनुः । २ । २९ ।
"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते॥")
प्रभातम् । अवान्तरम् । अतीतम् । अग्रम् ।
इति हेमचन्द्रः मेदिनी च । चे, ७॥ क्रम-
प्राप्तिः । इति शब्दरत्नावली ॥
प्राक्पिकः, पुं, (प्राक्पति हिनस्तीति । प्र+
आ+क्षप् हिंसायाम्+"प्राक्षि पनिकयः ।"
उणा० २ । १४ । इति किकन् ।) पिङ्गः ।
भायागर्त्तकः । इत्युणादिकोशः ॥ (परदारोप-
जीवी । इत्युज्ज्वलदत्तः ॥)

प्राकाम्यं, क्ली, (प्रकामस्य भावः प्रकाम+
ष्यञ् ।)शिवस्याष्टविधैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः
तच्च इच्छानभिघातः । इत्यमरटीकायां भरतो
हेमचन्द्रश्च । २।१११ ॥ (यथा,तत्त्वकौमुद्याम् ।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता ॥")
स्वाच्छन्द्यानुमतिः । तत्पर्य्यायः । अवसर्गः २
स्वाच्छन्द्यानुमननम् ३ । इति त्रिकाण्डशेषः ॥
(यथा, कुमारे । २ । ११ ।
"व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु॥")
प्राकारः, पुं, (प्रक्रियते इति । प्र+कृ+घञ् ।
उपसर्गस्य घञीति दीर्घः ।) वप्रोपरि अन्यच्च
वा इष्टकादिरचितवेष्टनम् । (यथा, महा-
भारते । १ । २०८ । २९ ।
"प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता ॥")
तत्पर्य्यायः । वरणः २ सालः ३ । इत्यमरः ।२।
२ । ३ ॥ शालः ४ । इति भरतः ॥ वप्रः ५ ।
यथा,—
"प्राकाररोधसोर्वप्रः पितृकेदारयोरपि ॥"
इति रत्नकोषः ॥
तस्य परिमाणं यथा,—
"ऊर्द्ध्वं षोडशहस्तेभ्यो नैव कुर्य्याद्गृहं गृही ।
ऊर्द्ध्वं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥"
तस्य द्वारमानम् ।
"प्रस्थे हस्तद्वयात् पूर्णं दैर्घ्ये हस्तचयन्तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः ॥
प्राकृतः, त्रि,(प्रकृष्टमकृतमकार्य्यं यस्य ।) नीचः ।
इत्यमरः ॥ (यथा, देवीभागवते ।१।१५।३१ ।
"अश्रुपातं करोत्यद्य विवशः प्राकृतो यथा ॥"
अविकारकः । यथा, भावप्रकाशे अजीर्ण-
रोगाधिकारे ।
"वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥
प्राकृतं अविकारख्यम् ॥"*॥) प्रकृतिसम्बन्धी ।
यथा,—
"इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥"
इति श्रीभागवते दशमस्कन्धे ३ अध्यायः ॥
(यथाच मार्कण्डेये । ४५ । ७३ ।
"इत्येष प्राकृतः सर्गः क्षेत्रज्ञाधिष्ठितस्तु सः ॥"
यथा च मनौ । ११ । ११८ ।
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ॥"
"प्राकृतं प्राजापत्यं प्रकृतौ भवं प्राकृतं सर्व्व-
कृच्छ्राणां प्रकृतित्वादेवमुच्यते ।" इति तद्भाष्ये
मेधातिथिः ॥*॥ प्रकृतौ भवस्तत आगतो वा ।
प्रकृति+"तत्र भवः ।" ४ । ३ । ५३ । "तत
आगतः ।" ४ । ३ । ७४ । इति वा अण् ।)
भाषाभेदे, क्ली । स च संस्कृतप्रकृतिकः । यथा,
अथ प्राकृतम् । अथशब्द आनन्तर्य्यार्थोऽधि-
कारार्थश्च । प्रकृतिः संस्कृतं तत्र भवं तत

आगतं वा प्राकृतम् । संस्कृतानन्तरं प्राकृत-
मधिक्रियते । संस्कृतानन्तरं प्राकृतस्यानुशास-
नम् । सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य
लक्षणं न देश्यस्य इति ज्ञापनार्थम् । संस्कृत-
समन्तु संस्कृतलक्षणेनैव गतार्थम् । प्राकृते
प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृ-
तवद्वेदितव्याः । लोकादिति च वर्त्तते । तेन ऋ
ॠ ऌ ॡ ऐ औ ङ ञ श ष विसर्ज्जनीयप्लुतवर्ज्जो
वर्णसमाम्नायो लोकादवगन्तव्यः । ङञौ स्ववर्ग्य-
संयुक्तौ भवत एव । ऐदौ तौ च केषाञ्चित् ।
कैतवं कैअवम् । सौन्दर्य्यं सौअरिअम् । कौरवाः
कौरवा । तथा स्वरव्यञ्जनं द्विवचनं चतुर्थी-
बहुवचनञ्च न तु भवति । अवद्यमं अद्युम-
मित्यधिकृतं वेदितव्यमाशास्त्रपरिसमाप्तेः ।
ततश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्-
विभाषा क्वचिदन्यदेव भवति । इति हेमचन्द्र-
कृतशब्दानुशासनवृत्तौ अष्टमाध्यायस्य चतुर्थः
पादः ॥*॥ (यथा च प्राकृतचन्द्रिकायाम् ।
"प्रकृतिः संस्कृतं तत्र भवत्वात् प्राकृतं स्मृतं
तद्भवं तत्समं देशीत्येवमेतत् त्रिधा मतम् ॥"
चण्डाचार्य्यादयस्तु आर्षप्राकृतभेदेन प्राकृतं
द्विविधं कल्पयन्ति । जैनबौद्धानां शास्त्रेषु
प्राचीनतमनाटकादिषु च आर्षप्राकृतप्रयोगः
प्रायशो दृश्यते ॥ कानिचित् विशेषलक्षणानि
प्राकृतचन्द्रिकायामुक्तानि । यथा,—
"तत्रार्षं मागधी शौरसेनी पैशाचिकी तथा ।
चूलिका पैशाचिकञ्चापभ्रंशश्चेति षड्विधम् ॥
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः ।
आकरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥"
नाटकादौ उत्तमस्यापि नायकादेः कदाचित्
मत्तादिदोषोपहतस्य प्राकृतकथनं नैव दोषाय
यदुक्तं तत्रैव ।
"ऐश्वर्य्यादिप्रमत्तस्य दारिद्र्योपद्रुतस्य च ।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीडार्थं नृपतेरिष्टं प्राकृतञ्च द्विजन्मनाम् ।
भरतेनोदितं प्राज्ञमत्राधिकमिदं वचः ॥"
नाटकादौ बालस्त्रीवृद्धादीनामगुणान्वितानां
प्राकृतकथनमेव युक्ततरम् । यथाह भरद्वाजः ।
"गाथासु तु महाराष्ट्रा अन्या भाषाश्रया
मताः ।
बालस्त्रीवृद्धमिश्राणां श्रावकस्याल्पलिङ्गिनाम् ।
ग्रहोपसृष्टमत्तानां प्राकृतं पञ्चरूपिणाम् ॥"*
प्रलयविशेषे, पुं । यथा, विष्णुपुराणे । १।७ ।
३८—३९ ।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः ।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥"
प्राकृतज्वर,पुं,(प्राकृतः प्रकृतिसम्बन्धी ज्वरः ।
वर्षाशरद्वसन्तेषु त्रिषु. ऋतुषु क्रमेण वातपित्त-
कफज्वरः । यथा, माधवकरः ।
"वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥"

प्राकृतदोषः, पुं, (प्राकृतो दोषः ।) वर्षाशरद्-
वसन्तेषु क्रमेण कुपितो वातः पित्तं कफश्च ।
यथा, रक्षितः ।
"चयप्रकोपप्रशमाः पित्तस्य प्रावृडादिषु ।
श्लेष्मणः शिशिराद्येषु वायोर्घर्म्मादिषु त्रिषु ॥"
प्राकृतप्रलयः, पुं, (प्राकृतः प्रकृतिसम्बन्धी प्रलयः)
प्रकृतेर्लयः । तस्य विवरणम् । यथा,—
"निर्गुणस्य च नित्यस्य चाद्यन्तरहितस्य च ।
निमेषार्द्धं महर्त्तेण प्रकृतेर्लय उच्यते ॥
षष्टिदण्डात्मकस्तस्य वासरश्च प्रकीर्त्तितः ।
मासस्त्रिंशद्दिवारात्रैर्वर्षं द्वादशमासकैः ॥
एवं शते, शताब्दे च श्रीकृष्णे प्रकृतेर्लयः ।
प्रकृत्याश्च प्रलीनायां तदेव प्राकृतो लयः ॥
सर्व्वाः संहृत्य सा चैका महाविष्णोः प्रसूश्च या
कृष्णवक्षसि लीना च मूलप्रकृतिरीश्वरी ॥
शाक्ता वदन्ति तां दुर्गां विष्णुमायां सनातनीम्
सर्व्वशक्तिस्वरूपाञ्च परां नारायणीं सतीम् ॥
बुद्ध्यधिष्ठातृदेवीञ्च कृष्णस्य त्रिगुणात्मिकाम् ।
यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः ॥
वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ।
यदर्द्धाङ्गा महालक्ष्मीः प्रिया नारायणस्य च ॥
प्राणाधिष्ठातृदेवीञ्च प्रेम्णा प्राणाधिकां पराम्
शश्वत् प्रेममयीं शक्तिं निर्गुणां निर्गुणस्य च ॥
नारायणश्च शम्भुश्च संहृत्य स्वगणान् बहून् ।
शुद्धसत्त्वस्वरूपौ च कृष्णे लीनश्च निर्गुणे ॥
गोपा गोप्यश्च गावश्च सुरभ्यश्च नराधिप ! ।
सर्व्वे लीनाः प्रकृत्याञ्च प्रकृतिः प्रकृतीश्वरे ॥
महाविष्णौ विलीनाश्च सर्व्वे ते क्षुद्रविष्णवः ।
महाविष्णुः प्रकृत्याञ्च सा चेयं परमात्मनि ॥
प्रकृतिर्योगनिद्रा च श्रीकृष्णनेत्रपद्मयोः ।
अधिष्ठानं चकारेयं मायया चेश्वरेच्छया ॥
प्रकृतेर्व्वासरं यावन्मितं कालं प्रकीर्त्तितम् ।
तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः ॥
अमूल्यरत्नतल्पे च वह्निशुद्धांशुकान्विते ।
गन्धचन्दनमाल्याढ्ये वायुना सुरभीकृते ॥
पुनः प्रजागरे तस्य सर्व्वसृष्टिर्भवेत् पुनः ।
एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥*॥
अपि च ।
"प्रकृतौ संस्थितो यस्मात् सर्व्वस्तस्मात्तत्क्षयः ।
अहङ्कारमहत्तत्त्वगतो यत् प्राकृतो लयः ॥
प्रकृतौ संस्थितो व्यक्तमतीतप्रलयस्तु यत् ।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः ॥
अयं यः कथितो विप्राः प्राकृताख्यो महालयः ॥"
इति कालिकापुराणे २४ अध्यायः ॥
प्राकृतमानुषः पुं, (प्राकृतः सामान्यो मानुषः)
सामान्यमनुष्यः । यथा महाभारते गदापर्व्वणि ।
"एकादशचमूनाथं भीम ! पादेन मा स्पृश ।
पञ्चानामपि यो भर्त्ता नासौ प्राकृतमानुषः ॥"
प्राकृतमित्रं, क्ली, (प्राकृतं स्वाभाविकं मित्रं
सुहृत् ।) स्वदेशव्यवहितदेशावस्थितराजादिः ।
यथा, माघे । २ । ३६ ।
"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः
स्यातामित्रौ मित्रे च सहजप्राकृतावपि ॥"
अस्य टीका । "ननु चैद्योऽयं चैद्यः किं नः
करिष्यतीत्याशङ्क्य तस्य बलवत्त्वं वक्तुं मित्रा-
मित्रबलाबलविवेकं तावत् करोति । सखेति ।
क्रियया उपकारापकाराभ्यतररूपया निर्वृत्तः
कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं
शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ
कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकार-
रूपकार्य्यवशात् निर्वृत्ताविति शेषः । उक्तकार्य्यो-
पाधेर्यावज्जीवमनपायादनयोर्मित्रामित्रभावो-
ऽपि अनपायीति गरीयस्त्वमिति भावः । सहज-
प्राकृतौ तु नैवमित्याह स्यातामिति । सह-
जातः सहजः एकशरीरावयवत्वात् तत्र सहजं
मित्रं मातृष्वसेयपितृष्वसेयादि, सहजशत्रुस्तु
पितृव्यतत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः
पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः । तत्र
विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं
मित्रं अपि त्वर्थे तौ सहजप्राकृतौ शत्रुमित्रे च
स्यातां न त्वात्मकार्य्यवशादनियमेनोभयरूपता-
मापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रु-
रेव मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ
गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः ।
अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम् ।" इति
मल्लिनाथः ॥
प्राकृतशत्रुः, पुं, (प्राकृतः स्वाभाविकः शत्रुः ।)
स्वदेशाव्यवहितदेशावस्थितराजादिः । यथा ।
"विषयानन्तरः प्राकृतः शत्रुः ।" इति माघ-
टीकायां मल्लिनाथः ॥
प्राकृतिकः, त्रि, (प्रकृति + ठञ् ।) प्रकृति-
विकारः । प्रकृतिसम्बन्धी । यथा,—
"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
(प्रलयविशेषे, पुं । यथा विष्णुपुराणे १ । ७ । ३८ ।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्विधः ॥")
प्राक्तनः, त्रि, (प्राक् प्राचि काले देशे प्राच्यां
दिशि वा भवः । प्राक् + कालवाचिनोऽ-
व्ययात् ट्युट्युलौ ।) प्राग्भवः । यथा । "प्रपेदिरे
प्राक्तनजन्मविद्याः ॥" इति कुमारसम्भवम् ॥
अन्यच्च ।
"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवश्चिरम् ।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च साम्प्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४ अध्यायः ॥
अपि च तत्रैव १२८ अध्याये ।
"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते ।
नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ॥"
प्राक्तनकर्म्म, क्ली, (प्राक्तनं पुराभवं कर्म्म अत्रास्य
तज्जनकत्वादपि तज्जन्यत्वारोपः ।) भाग्यम् ।
अदृष्टम् । इति जटाधरः ॥ पुराकृतकार्य्यञ्च ॥
प्राक्फलः, पुं, (प्राक् फलं यस्य ।) पनसः । इति
जटाधरः ॥
प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी ।) पूर्व्व-
फल्गुनी । यथा । प्राक्फल्गुन्यां व्ययकाले च
यस्य । इति कोष्ठीप्रदीपः ॥
प्राक्फल्गुनीभवः, पुं, (प्राक्फल्गुन्यां भव उत्-
पत्तिर्यस्य ।) बृहस्पतिः । इति हारावली । १ ॥
पूर्व्वफल्गुन्यां जाते, त्रि ॥
प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति ।
प्राक्फल्गुनी + अण् ।) बृहस्पतिः । इति शब्द-
रत्नावली ॥
प्राक्फाल्गुनेयः, पुं, (प्राक्फल्गुन्यां भव इति ।
प्राक्फल्गुनी + ढक् ।) बृहस्पतिः । इति
त्रिकाण्डशेषः ॥
प्राखर्य्यं, (प्रखरस्य भावः । प्रखर + ष्यञ् ।) प्रखर-
त्वम् । तीक्ष्णता । प्रखरशब्दात् भावार्थे ष्य-
प्रत्ययः ॥
प्रागभावः, पुं, (प्राग्वर्त्ती अभावः ।) संसर्गा-
भावविशेषः ॥ (यथा, भाषापरिच्छेदे । १२ ।
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च ।
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥")
तस्य लक्षणम् । विनाश्यभावत्वम् । इति
सिद्धान्तमुक्तावली ॥
प्रागल्भ्यं, क्ली, प्रगल्भस्य भावः । प्रगल्भ +
ष्यञ् ।) प्रगल्भता । यथा,—
प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ।
न तुष्टिमुत्पादयते शरीरे
अन्धस्य दारा इव दर्शनीयाः ॥"
इति ज्योतिस्तत्त्वम् ॥
स्त्रीणामयत्नजभावविशेषः । यथा,—
"प्रागल्भ्यौदार्य्यमाधुर्य्यशोभाधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावा हावहेलाद्ययोऽङ्गजाः ॥"
इति हेमचन्द्रः । ३ । १७१ ।
(यथा च साहित्यदर्पणे । ३ । १०२ ।
"निःसाध्वसत्वं प्रागल्भ्यम् ॥" यथा,—
"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि ।
दष्टाश्च दशनैः कान्तं दासीकुर्व्वन्ति योषितः ॥")
प्रागुदीची, स्त्री, (प्राची उदीची च दिगिति कर्म्म-
धारयः ।) पूर्व्वोत्तरदिक् । ऐशानकोणः । यथा
ततोत्कीर्णञ्चलिकाः प्रागुदीच्यां दिशि क्षिपेत्"
इति भवदेवभट्टः ॥
प्राग्ज्योतिषः, पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र ।
तदुक्तं कालिकापुराणे ।
"अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज ह ।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा ॥"
कामरूपदेशः । इति हेमचन्द्रः । ४ । २२ ।
स तु नरकराजपुरम् । यथा,—
श्रीभगवानुवाच ।
"करतोया सत्यगङ्गा पूर्व्वभागावधिश्रिता ।
यावल्ललितकान्तास्ति तावद्देशं पुरं तदा ॥
तत्र देवी महामाया योगनिद्रा जगत्प्रसूः ।
कामाख्यारूपमादाय सदा तिष्ठति शोभना ॥

अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः ।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः ॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा ।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्त्रक ! ॥
पूर्व्वं क्रीडार्थमायाता रहस्यदेशमुत्तमम् ।
अत्र श्रीः सर्व्वतो भद्रा भोग्यमत्र सदा बहु ॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह ।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा ॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम् ।
ततो विदर्भराजस्य पुत्त्रीं मायाह्वयां हरिः ।
पुत्त्रार्थे वरयामास नरकस्य स मां शुभैः ॥"
इति कालिकापुराणे ३७ अध्यायः ॥
(इदानीं प्रसिद्धमासामप्रदेशस्थितकियदंशकुचविहार)
कामरूपं पुराप्राग्ज्योतिषाख्ययाभिहितम् ॥"

प्राग्भारः, पुं, (प्रकृष्टो भारो यत्र ।) पर्व्वताग्रभागः । इति त्रिकाण्डशेषः ॥ क्वचित् प्राग्भाव इति च पाठः ॥

प्राग्रहरः, त्रि, (प्राग्रं प्रकृष्टमग्रं ह्रियतेऽनेनेति । हृ+अप् ।) श्रेष्ठः । इत्यमरः । ३ । १ । ५८ ॥ (यथा, रघौ । १६ । २३ ।
"तथेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहीत्प्राग्रहरो रघूणाम् ।
पुरप्यभिव्यक्तमुखप्रसादा
शरीरबन्धेन तिरोबभूव ॥")

प्राघाटं, क्ली, (प्राघं अटतीति । अट्+अच् ।) उपमदधि । इति त्रिकाण्डशेषः ॥

प्राग्र्यं, त्रि, (प्रकर्षेणाग्रे भव इति । प्राग्र+यत्) श्रेष्ठः । इत्यमरः । ३ । १ । ५८ ॥ (यथा, महाभारते । ८ । ५८ । ११ ।
"कृत्वा हि सुमहत् कर्म्म हत्वा भीष्ममुखान् कुरून् ।
जयः प्राप्तो यशःप्राग्र्यं वैरञ्च प्रतियाचितम् ॥")

प्राग्वंशः, पुं, (प्राञ्चतीति । प्र+अञ्च+क्विन्प्राक् प्राक् वंशः सपत्नीकयजमानादिगृहोऽत्र ।) हविषां होतव्यानां आधारो यद्गृहं ततः प्राक् पूर्व्वदेशे यजमानसदस्यादिस्थित्यर्थे गृहम् इत्यमरभरतौ ॥ (यथा, हरिवंशे । ४१ । ७ ।
"यूपं समित्स्रुवं दर्व्वीम्पात्रीमुलूखलानि च ।
प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत् ॥"
प्राक् चासौ वंशश्चेति कर्म्मधारयः ॥) पूर्व्वकुलञ्च ॥

प्राघातः, पुं, (प्रकृष्ट आघातोऽत्रेति । यद्वा, प्राक् अघ्यतेऽस्मिन्निति । प्र+आ+हन्+आधारे घञ् ।) युद्धम् । इति हेमचन्द्रः । ३ । ४६१ ॥

प्राघारः, पुं, (प्राघरणमिति । प्र+घृ प्रस्रवणे+घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इत्युपसर्गस्य दीर्घः ।)घृतादिक्षरणम् । तत्पर्य्यायः । प्रोतः २ । इत्यमरः । ३ । २ । १० ॥

प्राघुणः, पुं, (प्राघूर्णते भ्राम्यतीति । प्र+आ+घुण+कः ।) अतिथिः । इति त्रिकाण्डशेषः ॥ (अन्प्राघुन+स्वार्थे । प्राघुणकस्तत्रार्थे । यथा, पञ्चतन्त्रे चतुर्थतन्त्रे ।
"तदागच्छ प्राघुणकन्यायेनास्मदावासम ॥")

प्राघुणिकः, पुं, (प्राघुण+स्वार्थे ठक् ।) अतिथिः । यथा, नैषधे । २ । ५६ ।
"अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः ।
मदनानलबोधनेऽभवत्
खग धाय्या धिगधैर्य्यधारिणः ॥"

प्राघूर्णिकः, पुं, (प्र+आ+घूर्ण+भावे घञ् । प्राघूर्णो भ्रमणम् । तत्र साधु इति ठञ् ।) अतिथिः । इति हेमचन्द्रः । २ । ३३४ ॥

प्राङ्, च, (प्रकर्षेण अञ्चतीति । प्र+अन्च+"ऋत्विग्दधृक्स्रगिति ।" ३ । २ । ५९ । इति क्विन् । "अनिदितां हल उपधायाः क्ङिति ।" ६ । ४ । २४ । इति नलोपः । "उगिदचाम् ।" इति नुम् । संयोगान्तस्य लोपः । नुमो नकारस्य । "क्विन् प्रत्ययस्य कुः ।" ८ । २ । ६२ । इति कुत्वेन ङकारः ।) पूर्व्वदिक् । पूर्व्वदेशः । पूर्व्वकालः । इति मेदिनी चे, ७ ॥

प्राङ्गः, पुं, (प्रकृष्टमङ्गं यस्य ।) पणवनामवाद्यम् । इति शब्दरत्नावली ॥

प्राङ्गणं, क्ली, (प्रकृष्टमङ्गनमङ्गं यस्य ।) पणववाद्यम् । इति शब्दरत्नावली ॥ (प्रकर्षेण अङ्गनं गमनं यत्र । णत्वम् ।) गृहभूमिः । आङ्गिना इति उठान इति च भाषा । तत्पर्य्यायः । अजिरम् २ चत्वरम् ३ अङ्गनम् ४ । इति हेमचन्द्रः । ४ । ७० ॥ (यथा, भविष्योत्तरे ।
"प्रदीपसमये स्त्रीभिः पूज्यो जीमूतवाहनः ।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम् ॥")
सूर्य्यविद्धस्य तस्य दोषो यथा,—
"अभद्रदं सूर्य्यवेधं प्राङ्गनस्य तथैव च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अः ॥

प्राङ्न्यायः, पुं, (प्राक् न्यायः ।) चतुर्थोत्तरान्तर्गतोत्तरविशेषः । यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तु तत्र चार्थं व्यवहारमार्गेण पराजित इति । उक्तञ्च कात्यायनेन ।
"आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्व्वं प्राङ्न्यायश्च स उच्यते ॥"
इति मिताक्षरा ॥

प्राचिका, स्त्री, (प्राचतीति । प्र+अच+ण्वुल् । टापि अत इत्वञ्च ।) वनमक्षिका । इत्यमरभरतौ । ३ । ५ । ८ ॥ डाँश इति भाषा ॥

प्राची, स्त्री, (प्रथमं अञ्चति सूर्य्यं प्राप्नोतीति । प्र+अञ्च+"ऋत्विग्दधृक्स्रगिति ।" ३ । २ । ५९ । इत्यादिना क्विन् । "अञ्चतेश्च ।" ४ । १ । ६ । इति ङीप् ।) पूर्व्वा दिक् इत्यमरः । १ । ३ । १ ॥ (यथा, महाभारते । १ । ८५ । १२ ।
"जनमेजयः खल्वनन्तो नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् । यः प्राचीं दिशं जिगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचिन्वत्त्वम् ॥") पूजकपूज्ययोरग्रम् । यथा,—
"देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः ॥"
इति ।
"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति ।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तन्त्रे ॥"
इति तिथ्यादितत्त्वम् ॥

प्राचीनः, त्रि, (प्रागेवेति । प्राक्+"विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ इति खः खस्येनादेशः ।) पूर्व्वदिग्देशकालभवः तत्पर्य्यायः । प्राक् २ । (यथा, आर्य्यासप्तशत्याम् । ३५१ ।
"प्राचीनाचलमौलेर्यथा यथा गगनमध्यमधिवसति ।
त्वां सखि ! पश्यामि तथा छायामिव संकुचन्मानाम् ॥"
यथा च भागवते । ४ । २४ । १० ।
"प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम् ॥")
प्रागग्रम् । यथा, ऋग्वेदे । १ । १८८ । ४ ।
"प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् ॥"
"प्राचीनं प्रागग्रम् ।" इति तद्भाष्ये सायनः ॥
प्रकृष्टगन्ता । अपराङ्मुखः । यथा, ऋग्वेदे । १ । ५४ । ५ ।
"प्राचीनेन मनसा बर्हणावता ।"
"प्राचीनेन प्रकर्षेण गन्त्रा अपराङ्मुखेनेत्यर्थः ॥"
इति तद्भाष्ये सायनः ॥)
पुं, प्राचीरम् । तत्पर्य्यायः प्रावेष्टकः २ वृतिः ३ । इति हेमचन्द्रः । ४ । ४८ ॥

प्राचीनपनसः, पुं, (प्राचीनः पनस इति नित्यकर्म्मधारयः ।) बिल्वम् । इति त्रिकाण्डशेषः ॥

प्राचीनबर्हिः, [स्] पुं, इन्द्रः । इति हेमचन्द्रः । २ । ८५ ॥ (यथा, रघौ । ४ । २८ ॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्ज्जयन्निव केतुभिः ॥")
राजविशेषः । (यथा, महाभारते । १२ । २०८ । ६ ॥
"अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः ।
प्राचीनबर्हिर्भगवांस्तस्मात् प्रचेतसो दश ॥")
यथा च ।
"हविर्द्धानात् षडाग्नेयी पुत्त्रानजनयद्गुणम् ।
प्राचीनबर्हिषं शुक्लं गयं कृष्णं प्रजाजिनौ ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः ।
हविर्द्धानात् द्विजश्रेष्ठ ! येन संवर्द्धिताः प्रजाः ॥
प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने ।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः ॥
समुद्रतनयायान्तु कृतदारो महीपतिः ।
महतस्तपसः पारे सवर्णायां महीपतिः ॥
सुषुवे दश पुत्त्रांश्च सवर्णा वै प्रचेतसः ।
दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥"
इति वह्निपुराणे वरमणी नामाध्यायः ॥

प्राचीना, स्त्री, (प्राचीन+टाप् ।) वनतिक्तिका । इत्यमरः । २ । ४ । ८५ ॥ आकनादि इति भाषा ॥ रास्ना । इति शब्दचन्द्रिका ॥ (प्राचि भवेति । प्राच्+खः । टाप् ।) प्राग्भवा च ॥ (पाठा ।

तत्पर्य्यायो यथा,—
"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका।
एकाष्ठीला रसा श्रेया पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
प्राचीनामलकं, क्ली, (प्राचीनमामलकमिति नित्य-
कर्म्मधारयः।) पानीयामलकम्। पानी यामला
इति भाषा। तत्पर्य्यायः। वारिवदरम् २।
इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १।
२०८। ४१।
"प्राचीनामलकैर्लोध्रै रङ्कोलैश्च सुपुष्पितैः॥")
अस्य गुणः। दोषत्रयगरनाशित्वम्। इति भाव-
प्रकाशः॥ (यथा च।
"गरदोषहरं नीपं प्राचीनामलकन्तथा॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
प्राचीनावीतं, क्ली, (प्राचीनं प्रदक्षिणं आवीयते
अनेन। आ+वी गत्यादौ+क्तः। यद्वा,
प्राचीनं आवेतीति। "गत्यर्थेति।" क्तः।)
न्यायादौ वामकरे वहिष्कृते सति दक्षिणस्क-
न्धार्पितयज्ञसूत्रम्। इत्यमरभरतौ।२।७।५०॥
तथाच कौर्म्मे उपविभागे १० अध्याये।
"सव्यं वाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः।
प्राचीनावीतमित्युक्तं पित्रे कर्म्मणि योजयेत्॥"
प्राचीनावीती, [न्] पुं, (प्राचीनावीतमस्त्यस्येति।
प्राचीनावीत+इनिः।) प्राचीनावीतविशिष्टः।
यथा। सव्यं वाहुमुद्धृत्य शिरोऽवधाय दक्षिणे-
ऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति
एवं प्राचीनावीती भवतीति। इति गोभिलः॥
प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। इत्या-
ह्निकतत्त्वम्॥
प्राचीपतिः, पुं, (प्राच्याः पूर्व्वस्या दिशः पतिः।)
इन्द्रः। इति त्रिकाण्डशेषः॥
प्राचीरं, क्ली, (प्राचीयते इति। प्र+आ+
चिञ् चयने+"शुसिचिमिनां दीर्घश्च।" उणा०
२।२५। इति क्रन् दीर्घश्च।) प्रान्ततो वृतिः।
इत्यमरः। २। २। ३॥ पाँचील इति भाषा॥
दुर्गादेः नगरादेः प्रान्तभागे वेणुकण्टकवेष्टादि-
मयी वृतिर्वेष्टनिका। इति भरतः॥ इष्टक्या-
मपि कृतौ प्राचीरमुपचारादिति स्वाम्यादयः॥
तत्पर्य्यायः। वृतिः २। इति भट्टः॥ प्राची-
नम् ३। इति मुकुटः।
"प्राचीरं प्रावरोऽपि स्यात् प्राहतिः प्रान्ततो
वृतिः ६।
इष्टकारचिताच्चैव सुरयाप्यादिवेष्टने॥"
इति शब्दरत्नावली॥०॥
अथ प्राचीर निर्णयः।
"गजैरभेद्या मनुजैरलङ्घ्या:
प्राचीरसंज्ञा नृपतेर्भवन्ति॥
राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः।
विंशतिस्ते तु पञ्चापि पार्श्वयोः पञ्च पञ्च च॥
पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः
सर्व्वमान्ते स्तावरथो नाम प्राचीर उच्यते॥
प्रतिप्राकारसंस्थानं द्वारं नाभिमुखस्थितम्॥"॥
तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः।
तद्यथा,—
"राजच्छत्राम्बरे पञ्च राजद्वारे महीपतेः।
राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः॥
अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः।
एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति॥
राजच्छत्रद्वयं सार्द्धमायामे जयवास्तुनि।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः॥
राजपट्टाभिधानेन स्थानमेतद्विगद्यते।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते॥
अन्यानाद्दृश्यतो राजा योऽन्यत्र गृहमारभेत्।
सोऽचिरान्मृत्युमाप्नोति रोगं शोकं भयन्तथा॥
यमदण्डोदयदण्डौ कोपाश्चतिरुपद्रवः॥
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाय ये पुनः
न स्पृशन्ति राजपट्टस्थैः सर्व्वे खड्गो यथा।
द्विगुणादिरतोऽपि स्यात् क्रमाद्रङ्गादि वास्तुषु
राजच्छत्रमितेऽप्येवं प्राचीरे गुणदोषकौ॥"
इति युक्तिकल्पतरुः॥
प्राचेतसः, पुं, (प्रचेतसोऽपत्यमिति। प्रचेतस्+
अण्।) वाल्मीकिमुनिः। इति हेमचन्द्रः।
३।५१०॥ (यथा, रघुः। १५। ६३॥
"अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगदुर्गुरुचोदितौ॥"
प्रचेतसोऽपत्यमात्रम्। विष्णुः। यथा, हरिवंशे।
२०२। १४॥
"प्रश्रया तेजसा योगात्तस्मात् प्राचेतसः प्रभुः।
विष्णुरेव महायोगी कर्म्मणामन्तरङ्गतः॥"
दक्षः। यथा, महाभारते। १। ७५। ५।
"वीरिण्यां स तु सञ्जज्ञे दक्षः प्राचेतसो मुनिः।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान्॥")
प्राचेतसः, [स्] पुं, प्राचीनवर्हीराजपुत्राः।
सान्तनित्यबहुवचनान्तोऽयम्। यथा,—
"एवमुक्तास्तु ते पुत्रास्ततः प्राचेतसो दश।
पयोधिसलिले मग्नास्तपस्तेपे सुदारुणम्॥
पतन्निरागमारूढं शीतोत्पलदलच्छविम्।
दृष्ट्वा प्राचेतसः सर्व्वे शिरोभिरवनीं गताः॥"
इति वह्निपुराणम्॥
प्राच्यः, पुं, (प्राचि भवः। प्राच्+"द्युप्रागपागु-
दक्प्रतीचो यत्।" ४। २। १०१। इति यत्।)
शरावत्याः प्राग्दक्षिणदेशः। इत्यमरः। २।
१। ७॥ (पूर्व्वदिग्भवे, त्रि। यथा मार्कण्डेये।
५७। ४२—४४।
"——प्राच्यान् देशान् निबोध मे।
अन्धारका मुद्गरका अन्तर्गिर्य्या वहिर्गिराः॥
यथा प्रवङ्गा वङ्गेया मालदा मालवर्त्तिकाः।
ब्रह्मोत्तराः प्रविजया भार्गवा ज्ञेयमल्लकाः॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः।
मल्ला मगधगोमन्ताः प्राच्या जनपदाः स्मृताः॥"
पूर्व्वदेशीये च, त्रि॥ (यथा, महाभारते।
८। ४५। १८॥
"प्राच्या दासा वृषला दाक्षिणात्याः।
स्तेना वाह्लीकाः सङ्करा वै सुराष्ट्राः॥")
प्राजकः, पुं, (प्राजयति प्रकर्षेण गमयति घोट-
कादीनिति। प्र+अज्+णिच्+ण्वुल्।)
सारथिः। यथा, मनुवचने। ८। २९१॥
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥"
"यत्र सारथेरकौशलाद्युग्यमन्यथा गच्छति
तत्र हिंसायां अशिक्षितसारथिनियोगात्
स्वामी द्विशतं दण्डं दण्ड्यः स्यादिति कुल्लूक-
भट्टः।" इति प्रायश्चित्ततत्त्वम्॥
प्राजनं, क्ली, (प्रजीयतेऽनेनेति। प्र+अज्+
ल्युट्। "वा यौ।" २। ४। ५७। इति वी-
भावाभावः।) तोदनम्। इत्यमरः। २। ८। १२॥
पाचनीवाड़ी इति भाषा॥
प्राजापत्यं, क्ली, (प्रजापतिर्देवताऽस्येति। प्रजा-
पति+"दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।"
४।१।८५। इति ण्यः।) द्वादशाहसाध्यव्रतविशेषः।
तत्र दिवसत्रयं रात्रिमात्रभोजनम् २२ ग्रासाः।
दिवसत्रयं दिवामात्रभोजनम् २६ ग्रासाः।
दिवसत्रयं अयाचितभोजनम् २४ ग्रासाः।
दिवसत्रयं उपवासः। यथा,—
"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचि-
तम्।
त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः॥"
ग्राससंख्या पराशरेणोक्ता।
"सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा
अयाचिते चतुर्व्विंशः परन्त्वनशनं स्मृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥॥
तत्तु अगम्यागमनादिप्रायश्चित्तम्। यथा,—
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्व्विशुध्यति॥
प्रायश्चित्ते कृते दद्याद्गां ब्राह्मणभोजनम्॥"
इति गारुडे २२६ अध्यायः॥॥
रोहिणीनक्षत्रम्। यथा—
"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता॥"
इति प्रायश्चित्ततत्त्वम्॥
(प्रजापतेरपत्यमिति। ण्यः। प्रजापतिपुत्रः।
यथा, कुमारे। ६। ३४॥
"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीड़ां प्राजापत्यास्तपस्विनः॥"
प्रजापतेरिदमिति। प्रजापतिसम्बन्धिनि, त्रि।
यथा, मार्कण्डेये। ३८। ८७॥
"प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रिया-
वताम्।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम्॥")
प्राजापत्यः, पुं, (प्रजापतेरपत्यमिति। प्रजापति+
ण्यः। "प्रजापतेश्च शाखाश्च प्रजाः।" इति
महाभारतीय। १। ६६। १। वचनात् तथा-
त्वम्।) प्रयागः। इति त्रिकाण्डशेषः॥ केत-
राजभेदः। तत्पर्य्यायः। त्रिपुरः २। इति
हेमचन्द्रः। २। ३८॥ व्यापनामकविशेषः।

सह धर्म्मं चरतां इति नियमं कृत्वा कन्या-दानम्। यथा,—
"इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने।
स कायः पावयेत्तज्जः षट् षड़् वंश्यान् सहा-त्मना ॥"
इति मिताक्षरा ॥
कायः कः प्रजापतिर्देवता यस्येति प्राज पत्य इत्यर्थः। इत्युद्वाहतत्त्वम् ॥ (तथा च मनुः। ३।३०।
"सहोभौ चरतां धर्म्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्च्य प्राजापत्यो विधिः स्मृतः ॥")
प्राजापत्या, स्त्री, (प्रजापतिर्देवतास्या इति। प्रजापति+ण्यः। स्त्रियां टाप्।) प्रव्रज्या-ग्रहणपूर्व्वककर्त्तव्यप्रजापतिदेवताकसर्व्वस्वदक्षिणा इष्टिः। यथा, मानवे ६ अध्याये।
"प्राजापत्यां निरूप्येष्टिं सर्व्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्-गृहात् ॥"
प्राजिता, [ऋ] पुं, (प्राजतीति। प्र+अज्+तृच्। वीभावाभावः।) सारथिः। इत्यमरः। २।८।५९॥ प्रकृष्टगन्तरि, त्रि ॥
प्राज्ञः, पुं, (प्रकर्षेण जानातीति। प्र+ज्ञा+कः। ततः प्रज्ञ एव स्वार्थे अण्।) कल्कि-देवस्य ज्येष्ठभ्राता। यथा,—
"कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च शम्भले।
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम् ॥"
इति कल्किपुराणे द्वितीय अध्यायः ॥
पण्डितः। इत्यमरः। २।७।५॥ (यथा,—
"पण्डिते च गुणाः सर्व्वे मूर्खे दोषा हि केवलम्।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते ॥"
इत्युद्भटः ॥)
राजशुकः। इति राजनिर्घण्टः ॥ (प्रकर्षेण अज्ञः इति विग्रहे मूर्खोऽपि ॥)
प्राज्ञः, त्रि, (प्रज्ञ+स्वार्थे अण्। यद्वा, प्रज्ञा-स्यस्येति। अच्।) पण्डितः। (यथा, महा-भारते। १।१४६।१९॥
"पौरेषु विनिवृत्तेषु विदुरः सर्व्वधर्म्मवित्।
बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ॥
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः ॥")
दक्षः। इति शब्दरत्नावली ॥ (विज्ञः। यथा, मनुः। २।१२३।
"नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च ॥")
प्राज्ञमानी, [न्] त्रि, (आत्मानं प्राज्ञं मन्यते इति। प्राज्ञ+मन्+णिनिः।) पण्डिताभि-मानी। यथा, चरके।
"दुःखिताय शयानाय श्रद्दधानाय रोगिणे।
यो भेषजमविज्ञाय प्राज्ञमानी प्रयच्छति ॥"
प्राज्ञा, स्त्री, (प्रज्ञास्त्यस्या इति। अण्। टाप्।) बुद्धिमती। तत्पर्य्यायः। धीमती २। इत्य-मरः। २।६।१२॥ बुद्धिः। यथा,—
"प्रज्ञा प्राज्ञा धरा ज्ञप्तिः चण्डा संवेदनं विदा"
इति रायमुकुटधृतशब्दार्णवः ॥
प्राज्ञी, स्त्री, (प्राज्ञ+स्वार्थे अण्। ङीप्।) स्वयं प्राज्ञी। तत्पर्य्यायः। प्रज्ञा २। इत्यमरः।२।६।१२॥ पण्डितपत्नी। इति प्राज्ञशब्दटीकायां भानुदीक्षितः ॥
प्राज्यं, त्रि, प्रचीयते इति। प्र+अज्+ण्यत्। वीभावाभावः।) प्रचुरम्। इत्यमरः।३।१।६३॥ (यथा, कुमारे। २।१८।
"स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥"
प्रभूतं आज्यं घृतं यस्येति विग्रहे प्रचुरघृत-सम्पन्नः। प्रकृष्टमाज्यमिति विग्रहे प्रकृष्ट-घृते, क्ली ॥)
प्राञ्जलः, त्रि, (प्र+अञ्ज+बाहुलकात् अलच्।) सरलः। यथा,—
"ऋजावजिह्मप्रगुणौ प्राञ्जलः सरलोऽपि च।"
इति जटाधरः ॥
प्राट्, [छ्] पुं, पृच्छति यः। (प्रच्छ+"क्विप् वचिप्रच्छीति।" उणा० २।५७। इति क्विप् दीर्घः सम्प्रसारणाभावश्च।) प्रश्नकर्त्ता। इति मुग्धबोधव्याकरणम् ॥
प्राड्विवाकः, पुं,(पृच्छतीति प्राट् विविच्य वक्तीति विवाकः। ततः कर्म्मधारयः।) व्यवहारद्रष्टा। जज् इति इङ्गरेजी भाषा। तत्पर्य्यायः। अक्ष-दर्शकः २। इत्यमरः। २।८।५॥ व्यवहार-दर्शी ३। इति शब्दरत्नावली ॥ हे व्यव-हाराणां ऋणादानादिविवादानां द्रष्टरि निर्ण-तरि धर्म्माध्यक्षे इत्यर्थः। पृच्छति वादिप्रति-वादिवाक्यं प्राट् दृडज्जुहवाक् प्राडिति निपातः विविच्य वक्ति विवाकः कर्म्मधारयः इति घञ् प्राट् चासौ विवाकश्चेति प्राड्विवाकः।
"विवादानुगतं पृष्ट्वा पूर्व्ववाक्यं प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥"
इति स्मृतिः। इति भरतः ॥
अपि च। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्व्वचनं विरुद्धाविरुद्धञ्च सभ्यैः सह विवि-नक्ति विवेचयति येति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः। उक्तञ्च।
"विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥"
इति मिताक्षरा ॥
प्राणः, पुं, (प्राणिति जीवति बहुकालमिति। प्र+अन्+अच्। प्राणित्यनेनेति करणे घञ् वा।) ब्रह्मा। इति त्रिकाण्डशेषः ॥ हृत्स्था-वृतः। (यदुक्तम्।
'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः')
बोलः। काव्यजीवः। अनिलः। बलम्। (यथा, हरिवंशे। ८६। ३६।
"बाहुप्राणेन शूराणां समाजोत्सवसंविधौ ॥")
पूरिते, त्रि। इति मेदिनी ॥ सुखमरोरमध्या-वहितचेतन्यम् ॥ प्रागगमनवान् नासाग्रस्थान-वर्त्ती वायुः। इति वेदान्तसारः ॥ तस्य कर्म्म बहिर्गमनम्। इति श्रीधरस्वामी ॥ तस्य रूपं स्थानानि च यथा,—
"इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्।
आस्यनासिकयोर्म्मध्ये हृन्मध्ये नाभिमध्यगे ॥
प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन ॥"
इति योगार्णवः ॥
(यथा महाभारते। १२। ३२८। ३५।
"प्राणिनां सर्व्वतो वायुश्चेष्टां वर्त्तयते पृथक्।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते ॥")
पञ्चप्राणविवरणं बहुवचनान्तप्राणशब्दे द्रष्ट-व्यम् ॥ धातुः पुत्रः। यथा,—
"आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ॥"
इति मार्कण्डेये रुद्रसर्गाध्यायः ॥
(वरपुत्रविशेषः। यथा मत्स्यपुराणे।५।२३-२४
"द्रविणो हव्यवाहश्च नरपुत्रावुभौ स्मृतौ।
कल्याणिन्यां ततः प्राणो रमणः शिशिरोऽपि च ॥
मनोहरा धरात् पुत्रानवापाथ हरेः सुता ॥")
प्राणकः,पुं,(प्राणैः प्राणेन वा कायतीति। कै+कः।) सत्त्वजातीयः। प्राणिमात्रम्। जीवक-द्रुमः। चोलः। इति मेदिनी। के, ११५॥
प्राणथः, पुं, (प्राणित्यनेनेति। प्र+अन् प्राणने +"शीङ्शपिरुगमीति।"उणा० ३।११३। इति अथः।) वायुः। (प्राणितीति। कर्त्तरि अथः।) बलवान् इत्युणादिकोषः ॥ प्रजा-पतिः। तीर्थम्। इति संक्षिप्तसारोणादिवृत्तिः ॥
प्राणदं, क्ली, (प्राणं प्राणनं बलं वा ददातीति। प्राण+दा+"आतोऽनुपेति।" ३।२।३। इति कः।) जलम्। रक्तम्। इति हेमचन्द्रः। ४।१३६॥ (प्राणदातरि, त्रि। यथा, कथा-सरित्सागरे। २८।८॥
"धर्म्मप्रदानमेवाहुः संसारे सुमहत् तपः।
अर्थदः प्राणदः प्रोक्तः प्राणा ह्यर्थेषु कीलिताः ॥").
प्राणदः, पुं, (प्राणं ददातीति। दा+कः।) जीवकवृक्षः। इति राजनिर्घण्टः ॥
प्राणदा,स्त्री,(प्राणं जीवनं बलं वा ददातीति। दा कः। टाप्।) ऋद्धिवृक्षः। हरीतकी। इति राजनिर्घण्टः ॥ (प्राणदात्री। यदुक्तम्।
"दशोऽहं किमाधर्म्य प्राणदा यमदूतिका ॥")
प्राणनं, क्ली, (प्र+अन प्राणने+ल्युट्।) जीव-नम्। इति जटाधरः ॥ (यथा, भागवते। ३। २६। ४१।
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ॥"
चेष्टनम्। यथा, ऋग्वेदे। १। ४८। १०।
"विश्वस्य हि प्राणनं जीवनं त्वे वियदुच्छसि सूनरि ॥"
"हे सूनरि उषोदेवि विश्वस्य सर्व्वस्य प्राणि-जातस्य प्राणनं चेष्टनं जीवनं प्राणधारणञ्च।"

इति तन्त्राख्ये सायनः ॥ प्राणित्यनेनेति करणे ल्युट्) गले, पुं । (इति शब्दचन्द्रिका ॥

प्राणनाथः, पुं, (प्राणानां नाथः ।) पतिः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥"
स्त्रियां टाप् । पत्नी । यथा, विष्णुस्तोत्रे । ८ ।
"धात्रीं स्वात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥")

प्राणन्तः, पुं, (प्राणित्यनेनेति । प्र+अन्+"तृभि नन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणा० ३ । १२७ । इति झच् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ रसाञ्जनम् । इत्युणादिकोषः ॥

प्राणन्ती, स्त्री, (प्र+अन् झच् । स च षित् । षित्वात् ङीष् ।) क्षुत् । हिक्का । इत्युणादिकोषः ॥

प्राणप्रदा, स्त्री, (प्राणं प्रददातीति । प्र+दा+कः ।) ऋद्धिनामकौषधम् । इति रत्नमाला ॥ (प्राणदातरि, त्रि । यथा, कथासरित्सागरे । २२ । ८८ ।
"स्वामि इत्थमुत्पन्नोयो देवि ! प्राणप्रदः सुहृत्
सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्मृतः ॥")

प्राणभास्वान्, [त्] पुं, (प्राणेन वायुना जलेन वा भास्वान् उद्दीप्तः ।) समुद्रः । इति शब्दरत्नावली ॥

प्राणमयकोषः, पुं, (प्राणमयः कोषः आच्छादकः ।) कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदान्तसारः ॥

प्राणसंयमः, पुं, (प्राणानां संयमः ।) प्राणायामः । यथा, "तदयन्तौ नवसुर्यमेवं प्राणस्य संयमः ॥" इति तन्त्रसारः ॥

प्राणसद्म, [न्] क्ली, (प्राणानां सद्म गृहम् ।) शरीरम् । इति केचित् ॥

प्राणसमा, स्त्री, (प्राणानां समा ।) पत्नी । इति हेमचन्द्रः । ३ । १८० ॥ (यथा, गीतगोविन्दे । १ । १८ ।
"मौपसे पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥"
प्राणतुल्ये, त्रि । यथा, रामायणे । १ । १ । २६ ।
"रामस्य दयिता भार्य्या नित्यं प्राणसमा
हिता ॥"
तथा च तत्रैव । २ । ३१ । १० ।
"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे ॥"
पत्नौ, पुं । इति हेमचन्द्रः । ३ । १८० ॥)

प्राणहारकं, क्ली, (प्राणान् हरतीति । हृ+ण्वुल् ।) वत्सनाभः । इति राजनिर्घण्टः ॥ प्राणनाशके, त्रि ॥

प्राणाः, पुं, (प्राणित्येभिरिति । प्र+अन+करणे घञ् ।) असवः । इत्यमरः । २ । ८ । ११९ ॥
"हृदि पञ्चसन्निविष्टेषु पञ्चवायुषु । अथवा असवः प्राणन्तीति उः । प्राणिति एभिः प्राणाः घञ् । एवमिति असवः प्राणा अपि पुं बहुत्वे इत्यर्थः असुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणादय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम् अतएव प्राणोऽपान इत्युक्तं हृदि प्राणो गुदेऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां भरतः ॥ (यथा, हितोपदेशे । १ । ७३ ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्व्वन्ति साधवः ॥")
शरीरस्थपञ्चप्राणा यथा,—
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥"
शरीरस्था इमे——————॥"
इत्यमरः । १ । १ । ६७ ॥
"इमे प्राणादयः पञ्च वायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः ॥ यदाहुः ।
"हृदि प्राणो गुदेऽपानः समानो नाभि-
संस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥"
एषां तद्व्यापारश्च यथा,—
अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"
इति च भरतः ॥
प्राणकराणि यथा,—
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
प्राणहराणि यथा,—
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यकर्म्मलोलोचने ॥
प्राणवियोगकालकर्त्तव्यं यथा,—
कण्ठस्थाने गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र गोघ्नं निःसारयेद्गृहात् ॥
कुमारस्मरणशायी च दिशः सर्व्वा न पश्यति ।
लब्धस्मृतिमनुष्यस्तु यावज्जीवो न नश्यति ॥
याचयेत् स्वं स्वभावेन भूमौ देवा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोक्तेन माधवि ॥
परलोकहितार्थाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गाव ईश्वरेणावतारिताः ॥
अघस्तं चरन्त्यश्च प्रचरन्ति महीतले ।
एतासामेव दानेन गोघ्नं मुच्येत किल्विषात् ॥
पश्चात् स्मृतिपथं दिव्यमुल्कर्षेण च धारयेत् ।
यावत्प्राणान् प्रमुच्येत कृत्वा कर्म्म सुदुष्करम् ॥
दृष्ट्वा च विह्वलं क्षीणं मम मार्गानुसारिणम् ।
प्राणान्तकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोक्षणम् ।
मधुपर्कं त्वरन् श्रद्धा इदं मन्त्रमुदाहरेत् ॥"
मन्त्रः ।
"गृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवन्-प्रियार्थं
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
तत एतेन मन्त्रेण दद्याद्वै मधुपर्ककम् ।
पुरुषो मृत्युकाले तु परलोकसुखावहम् ॥
एवं विधिं कृतात् प्राणात् संसारञ्च न गच्छति
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशं गतम् ॥
महावनस्थलीं गत्वा गङ्गाया विविधान्तरे ।
घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥
तेजोऽव्ययकरं चास्य तत्कर्म्म परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च ॥
तीर्थस्यावाहनं कृत्वा स्नापनं तस्य कारयेत् ।
यथादौनि च तीर्थानि ये च पुण्याः शिलो-
च्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ।
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयूर्न्नर्म्मदा तथा ।
वनानि नवखण्डानि तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत् ।
प्राणान्तकन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ।
देवानग्निमुखान् ध्यात्वा गृह्य हस्ते हुताशनम्
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदाहरेत् ॥"
मन्त्रः ।
"कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
दहेयं तस्य गात्राणि दिव्यलोकाय गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवम्भवति पुत्रक ॥
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ।
मृतनाम समुद्दिश्य दद्यात् पिण्डं महीतले ।
तदाप्रभृति चाशौचं देवकर्म्म न कारयेत् ॥"
इति वराहपुराणे प्राणोत्क्रान्तिनामाध्यायः ॥

प्राणा, स्त्री, (प्राणिति बहुकालमिति । प्र+अन् +अच् । टाप् ।) पक्षिणीविशेषः । सा चारुणगरुडयोः श्वश्रूः । यथा,—
"पुलहस्यात्मजः शर्मः प्राणायास्तु निबोधत ।
कन्याः षडिति विख्याताः प्राणाया वै द्विजोत्तम
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुकी ...
अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिसत्तमौ ।
सम्पातिर्जनयत् पुत्रान् काकाः पुत्रा जटायुषः
भार्य्या गरुडस्यापि भासी क्रौञ्ची शुकी शनैः ॥"
इत्यग्निपुराणम् ॥

प्राणाधिनाथः, पुं, (प्राणानामधिनाथः ।) पतिः । इति हलायुधः । २ । ३१२ ॥

प्राणापानौ, पुं, (प्राणश्च अपानश्च तौ ।) शरीरस्थौ वायू । यथा, विष्णुपुराणे । १ । ७ । ३१ ।
"परस्परेणाभिभवं प्राणापानौ यथानिलौ ।")
अश्विनीकुमारौ । यथा,—
"प्राणापानौ कर्णदेशावमिमौ सम्मुखम् ।"
इति महाभारते ॥

महातपा उवाच ।
"तस्यां त्वाष्ट्रामश्वरूप्यां मार्त्तण्डस्तीव्रतेजसा ।
वीजं निर्व्वापयामास तज्जलं तद्विधापतत् ॥
तत्र प्राणस्त्वपानश्च योनौ चालजितौ पुरा ।
वरदानेन च पुनर्मुर्त्तिमन्तौ बभूवतुः ॥
तौ त्वाष्ट्रामश्वरूपिण्यां जातौ येन नरोत्तमौ ।
ततस्तावश्विनौ देवौ कीर्त्त्यते रविनन्दनौ ॥"
इति वाराहे अश्विनोत्पत्तिनामाध्यायः ॥
प्राणायामः, पुं, (प्राणस्य वायुविशेषस्य आयामो रोधः । यद्वा, प्राण आयम्यतेऽनेनेति । आ + यम् + करणे घञ् ।) योगाङ्गविशेषः । (यथा, भागवते । ३ । २८ । ११ ।
"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥")
तत्राङ्गुलिनियमो ज्ञानार्णवे ।
"कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्ज्जनीमध्यमे विना ॥"
स द्विविधः । सगर्भो निर्गर्भश्च । तथा च ।
"सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेदिति"
मात्रा च ।
वामजानुनि तद्धस्तभ्रामणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"
अथ प्राणायामः । मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोड़शवारजपेन वामनासापुटे वायुं पूरयेत् तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत् । तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत् । पुनर्दक्षिणेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् । पुनर्वामेनापूर्य्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत् । तथा च कालीहृदये ।
"प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेन वा ।
अथवा मन्त्रवीजेन यथोक्तविधिना सुधीरिति ॥"
सारसमुच्चयेऽपि ।
"विपरीतमतो विदधीत बुधः
पुनरेव तु तद्विपरीतकमिति ॥"
यौगिके पुनर्मात्रानियमः । तथा च गौतमीये ।
"अथ प्राणायामः प्रोक्तो यौगिकं कथयामि ते
पूरयेदिड़या विद्वान् मात्रायोड़शसंख्यया ॥"
यद्वा, चतुःषोड़शाष्टवारजपेन पूरकादिकं कुर्य्यात् । अथवा एकचतुर्द्विवारेण । तथा च तन्त्रान्तरे ।
"पूरयेत् षोड़शभिर्वायुं धारयेत्तच्चतुर्गुणैः ।
रेचयेत् कुम्भकार्द्धेन अशक्त्या तत्तुरीयकैः ॥"
तदशक्तौ तच्चतुर्थमेव प्राणस्य संयमः । अस्य नित्यत्वमाह तत्रैव ।
"प्राणायाम विना मन्त्रपूजने न हि योग्यता ॥"
गोपाले तु विशेषो यथा, —
कामबीजस्यैकवारजपेन दक्षिणनासया वायुं रेचयेत् । पुनः सप्तवारजपेन वामनासया वायुं पूरयेत् । नासापुटौ धृत्वा विंशतिवारजपेन वायुं कुम्भयेत् । पुनर्वामेन रेचयेत् । दक्षिणेन पूरयेत् । उभाभ्यां कुम्भयेत् पुनर्दक्षिणेन रेचयेत् । वामेनापूर्य्य उभाभ्यां कुम्भयेत् । तथा च ।
"एकेन रेचयेत् कामबीजेनैव पृथक् पृथक् ।
पूरयेत् सप्तजप्तेन विंशत्या तेन धारयेत् ।
सर्व्वेषु कृष्णमन्त्रेषु बीजेनानेन रेचयेत् ॥"
यद्वा मूलमन्त्रेणैव प्राणायामः । तथा च ।
"पवनसंयममन्त्रमुनाचरेत् ।
यमिह जन्तुमनो मनुमिच्छति ।"
यदि दशाक्षरं जपति तदा दशाक्षरेण चेत्तच्चाष्टाविंशतिवारं रेचयेत् ।
"पूरयेदिड़या तद्वद्धारयेत्तत्प्रमाणतः ।
प्राणायामो भवेदेको रेचपूरककुम्भकैः ॥
अष्टादशाक्षरेण चेत् द्वादशैवं समाचरेत् ॥"
अन्यमनुभिर्वर्णानुरूपमित्युक्तत्वात् ।
तत्तन्मन्त्रवर्णसंख्याकै रेचकादित्रयं कुर्य्यात् ।
क्रमदीपिकायाम् । रेचयेत्तावतं दशया दक्षिणः । पूरयेदिड़या मध्यमाद्या पुनर्धारयेदित्यादि एतत्तु गोकृष्णमन्त्रविषयं नान्यत्र । इति तन्त्रसारः ॥ * ॥ अपि च ।
"आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ।
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ॥
अगर्भात्तु सगर्भस्थः प्राणायामस्ततोऽधिकः ।
एष द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ॥
कुम्भको निश्चलत्वात् स रेचनाद्रेचकस्त्रिधा ।
लघुर्द्वादशमात्रः स्याच्चतुर्व्विंशतिकः परः ॥
षट्त्रिंशन्मात्रिकःश्रेष्ठः प्रत्याहारश्च रोधनम् ॥"
इति गारुड़े ४८ अध्यायः ॥ * ॥
तस्य फलं यथा, —
"प्रथमे जनयेत् स्वेदं मध्यमेन च वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥"
इति तत्रैव २३० अध्यायः ॥ * ॥
अन्यच्च ।
"यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमे जनयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहशार्द्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वन्निषिद्धः पवनः किल्बिषं न नृणां तनुम् ।
तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत्
श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्राप्तिस्तथा सम्वित्प्रसादश्च महीपते ! ।
स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणामिष्टदुष्टानां जायते फलसंचयः ।
चेतसो विकषायत्वं यत्र सा ध्वस्तिरुच्यते ॥"
इष्टदुष्टानां पुण्यपापानाम् ।
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्वकालिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विज्ञानन्तीन्दुसूर्य्यर्क्षग्रहाणां ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति सम्विदम् ।
तदा सम्विदिति ख्याता प्राणायामस्य सा स्थितिः ॥
यान्ति प्रसादं येनास्य मनः पञ्च च वायवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युञ्जतश्च यथायोगं यादृग्विहितमासनम् ॥"
इति मार्कण्डेयपुराणे योगिचिकित्सानामाध्यायः ॥ * ॥ अन्यच्च ।
"प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥"
एतेषां टीका । "प्राणायाममाह प्राणाख्यमिति सबीजः सालम्बनो भगवन्मूर्त्तिध्यानमन्त्रजपसहितः । द्विविधस्यापि तस्य पुनस्त्रैविध्यमाह परस्परेणेति । उच्छ्वासेन मुखनासिकाभ्यां बहिर्निर्गच्छति वायुः स प्राणः । निश्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणस्यापानवृत्तेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानस्यापि प्राणवृत्तेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन स प्राणायामो द्विधा तयोर्युगपत्संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः यद्वा । सद्विधानेनेत्येकमेव पदम् । तत्र चायमर्थः । सद्विधानेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूतं द्वयं तत्र कुम्भकेनोभयोः सहाभिभवः । एवमभिभवत्रयेणैव प्राणायाम इति । सबीजमालम्बनमाह । तस्य चेति । स्थूलं वक्ष्यमाणं हिरण्यगर्भादिरूपम् ।" इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥ गायत्री-प्राणायामो यथा, —
"सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः ।
अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः ॥
सर्व्वपापहरं प्रोक्तं प्राणायामं द्विजन्मनाम् ।

ततस्त्वभ्यधिकं नास्ति तपः परमपावनम् ॥
प्राणसंधारणं मासं कुशाग्रेण जलबिन्दुना ।
यः कुर्य्यात् प्रयतो नित्यं प्राणायामस्तु तत्समः ॥
शिरोधाम्नायतं वायुस्तस्मादग्निस्ततो जलम् ।
त्रिभिः शरीरं सकलं प्राणायामैन शुध्यति ॥
आकेशादानखाग्राच्च तपस्तप्येत् सुदारुणम् ।
आत्मानं शोधयेद्यस्तु प्राणायामैः पुनः पुनः ॥
श्रावण्यां पौर्णमास्याञ्च सोपवासो जितेन्द्रियः ।
प्राणायामशतं कृत्वा मुच्यते सर्व्वकिल्विषैः ॥"
इत्यग्निपुराणम् ॥

प्राणिद्यूतं, क्ली, (प्राणिभिर्मेषादिभिः कृतं द्यूतमिति मध्यपदलोपी समासः ।) पणपूर्व्वकमेषकुक्कुटादियुद्धम् । तत्पर्य्यायः । समाह्वयः २ । इत्यमरः । २ । १० । ४६ ॥ साह्वयः । ३ । इति शब्दरत्नावली ॥

प्राणिमाता, स्त्री, (प्राणिनां मातेव गर्भदातृत्वात् ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

प्राणिहिता, स्त्री, (प्राणिनां हिता ।) पादुका । इति त्रिकाण्डशेषः ॥ लोकहितकारिणी च ॥

प्राणी, [न्] त्रि, (प्राणाः सन्त्यस्येति । प्राण + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) प्राणविशिष्टः । मनुष्यादिः । तत्पर्य्यायः । चेतनः २ जन्मी ३ जन्तुः ४ जन्युः ५ शरीरी ६ । इत्यमरः । १ । ४ । ३० ॥ (यथा, मनौ । १ । २२ ।
"कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः ।
साध्यानाञ्च गणं सूक्ष्मं यज्ञञ्चैव सनातनम् ॥")

प्राणीत्यं, क्ली, (प्रणीतस्य प्रयोजितस्य भावः । प्रणीत + ष्यञ् ।) ऋणम् । यथा, त्रिकाण्डशेषः ।
"प्राणीत्यमृणमर्य्यानां प्रयोगः स्यात् कलाम्बिका ॥"

प्राणेशः, पुं, (प्राणानामीशः ।) पतिः इति जटाधरः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"स्वामिन् ! भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥")

प्राणेशा, स्त्री, (प्राणानामीशा ।) भार्य्या । इति हेमचन्द्रः ॥

प्रातः, [र्] अव्य, (प्राततीति । प्र + अत् + "प्रातररन् ।" उणा० ५ । ५८ । इति अरन् ।) प्रभातम् । तत्पर्य्यायः । प्रगे २ । इत्यमरः । ३ । ४ । १८ ॥ सूर्य्योदयादवधित्रिमुहूर्त्तकालः । यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु ।"
इति तिथ्यादितत्त्वम् ॥
(यथा, रघौ । १ । ८० ।
"प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥")

प्रातःकृत्यं, क्ली, (प्रातः प्रभातकालस्य कृत्यं कर्त्तव्या क्रिया ।) प्रभातकर्त्तव्यकर्म्म । तदनुष्ठानं यथा,
"ब्राह्मे मुहूर्त्ते उत्थाय धर्म्ममर्थञ्च चिन्तयेत् ।
कायक्लेशमतदुद्भूतं ध्यायेत मनसीश्वरम् ॥
उषःकालेऽथ संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन शुध्यन्ति येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं शुभम् ।
ऋषीणां ऋषिता नित्यं प्रातःस्नानान्न संशयः ॥
मुखे सुप्तस्य सततं लालाद्याः प्रस्रवन्ति हि ।
ततो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम् ।
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ॥
न च स्नानं विना पुंसां पावनं प्रत्यहं स्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत् ॥
अशक्तावशिरस्कं वा स्नानमस्य विधीयते ।
आर्द्रेण वाससा चाथ मार्जनं कायिकं स्मृतम् ॥
असामर्थ्ये समुत्पन्ने स्नानमेव समाचरेत् ।
ब्राह्मादीनि यथाशक्ति स्नानान्याहुर्मनीषिणः ॥
आग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च ।
वारुणं यौगिकं तद्वत् षोढ़ा स्नानं प्रकीर्त्तितम् ॥
ब्राह्मन्तु मार्ज्जनं मन्त्रैः कुशैः सोदकबिन्दुभिः ।
आग्नेयं भस्मना पादमस्तकादिविधूननम् ॥
गवां हि रजसा प्रोक्तं वायव्यं स्नानमुत्तमम् ।
यत्तु सातपवर्षेण स्नानन्तद्दिव्यमुच्यते ॥
वारुणञ्चावगाहन्तु मानसन्त्वात्मवेदनम् ।
यौगिकं स्नानमाख्यातं योगो विष्णुविचिन्तनम् ॥
आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः ॥
मनःशुचिकरं पुंसां नित्यन्तत्स्नानमाचरेत् ।
शक्तश्चेद्वारुणं विद्वान् प्राजापत्यन्तथैव च ॥
प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा विधानतः ।
आचम्य प्रयतो नित्यं स्नानं प्रातः समाचरेत् ॥
मध्याङ्गुलिसमस्थौल्यं द्वादशाङ्गुलसम्मितम् ।
सत्वचं दन्तकाष्ठं स्यात्तस्याग्रेण च धावयेत् ॥
क्षीरिवृक्षसमुद्भूतं मालतीसम्भवं शुभम् ।
अपामार्गञ्च बिल्वञ्च करवीरं विशेषतः ॥
वर्ज्जयित्वा निन्दितानि गृहीत्वैकं यथोदितम् ।
परिहृत्य दिनं पापं भक्षयित्वा विधानतः ॥
नोत्पाटयेद्दन्तकाष्ठं नाङ्गुल्या धावयेत् क्वचित् ।
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः ॥
स्नात्वा सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा ।
सम्प्रोक्ष्य मन्त्रैरात्मानं कुशैः सोदकबिन्दुभिः ॥
आपोहिष्ठाव्याहृतिभिः सावित्र्या वारुणैः शुभैः ।
ओँकारव्याहृतियुतां गायत्रीं वेदमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक्कूलेषु समासीनो दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत् सन्ध्यामिति श्रुतिः ।
या सन्ध्या सा जगत्सूतिर्मायातीता च निष्कला ।
ऐश्वरी तु परा शक्तिस्तत्त्वत्रयसमुद्भवा ॥
ध्यात्वार्कमण्डलगतां विप्रः सन्ध्योपासनमाचरेत् ।
प्राङ्मुखः सततं विप्रः सन्ध्योपासनमाचरेत् ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
यदन्यत् कुरुते किञ्चित् न तस्य फलमाप्नुयात् ॥
अनन्यचेतसः शान्ता ब्राह्मणा वेदपारगाः ।
उपास्य विधिवत् सन्ध्यां प्राप्ताः परां गतिम् ॥
योऽन्यत्र कुरुते यत्नं धर्म्मकार्य्ये द्विजोत्तमः ।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम् ॥
तस्मात् सर्व्वप्रयत्नेन सन्ध्योपासनमाचरेत् ।
उपासितो भवेत्तेन देवो योगतनुः परः ॥
सहस्रपरमां नित्यं शतमध्यां दशावराम् ।
सावित्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः स्थितः ॥
अथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैः ऋग्यजुःसामसम्भवैः ॥
उपस्थाय महायोगं देवदेवं दिवाकरम् ।
कुर्व्वीत प्रणतिं भूमौ मूर्द्ध्ना नित्यञ्च मन्त्रतः ॥
ॐ खद्योताय च शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
नमस्ते घृणये तुभ्यं सूर्य्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम् ॥
भूर्भुवः स्वस्त्वमोङ्कारः सर्व्वे रुद्राः सनातनाः ।
पुरुषः सन्महोऽन्तस्त्वां प्रणमामि कपर्द्दिनम् ॥
त्वमेव विश्वं बहुधा सदसत् सूयसे च यत् ।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः ॥
प्रचेतसे नमस्तुभ्यमुमायाः पतये नमः ।
नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ॥
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ।
नम उमापतये तुभ्यमादित्याय नमोऽस्तु ते ॥
नमस्ते वज्रहस्ताय त्र्यम्बकाय नमोऽस्तु ते ।
प्रपद्ये त्वां विरूपाक्ष ! महान्तं परमेश्वरम् ॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परामृतम् ॥
विश्वं पशुपतिं भीमं नरनारीशरीरिणम् ।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने ॥
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥"
एतद्वै सूर्य्यहृदयं जप्त्वा स्तवमनुत्तमम् ।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम् ॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये ।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम् ॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम् ।
ब्राह्मणानां हितं पुण्यं ऋषिसङ्घैर्निषेवितम् ॥
यस्तु नित्यं पठेद्धीमान् मेषवादिसमन्वयान् ।
महापातकयुक्तोऽपि पूयते नात्र संशयः ॥
अथापस्मारकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि यः ।
जप्त्वा शतगुणं स्तोत्रं स व्याधी भवति ध्रुवम् ॥
भूतप्रेतपिशाचादिभीत्यव्ययसमर्पिभिः ।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात् ।
अथागत्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसम् ॥
ऋत्विक्पुत्रोऽथ पत्नी वा शिष्यो वापि सहोदरः ।
प्राप्यानुज्ञां विशेषेण जुहुयुर्वा यथाविधि ॥
पवित्रपाणिः पूतात्मा शुक्लाम्बरधरोत्तरः ।
अनन्यमानसो भूत्वा जुहुयात् संयतेन्द्रियः ॥
विना दर्भेण यत् कर्म्म विना सूत्रेण वा पुनः ।
राक्षसं तद्भवेत् सर्व्वं नामुत्रेह फलप्रदम् ॥

देवतानि नमस्कुर्य्यादीयमाराविवेदयेत् ।
दद्यात् पुष्पादिकं तेषां वृद्धांश्चैवाभिवादयेत् ॥
गुरुञ्चैवाप्युपासीत हितञ्चास्य समाचरेत् ।
वेदाभ्यासं ततः कुर्य्यात् प्रयत्नाच्छक्तितो द्विजः ॥
जपेदध्यापयेच्छिष्यान् धारयेच्च विचारयेत् ।
अवेक्षेत च शास्त्राणि धर्म्मादीनि द्विजोत्तमः ॥
वैदिकांश्चैव नियमान् वेदाङ्गानि विशेषतः ।
उपेयादीश्वरञ्चाथ योगक्षेमप्रसिद्धये ॥
साधयेद्विविधानर्थान् कुटुम्बार्थे ततो द्विजः ॥"
इति कौर्म्मे उपविभागे १८ अध्यायः ॥ * ॥
अपि च ।
"प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
प्रसन्नवदनं शान्तं स्मरेत्तन्नामपूर्व्वकम् ॥"
ॐ नमो गुरवे तस्मै इष्टदेवस्वरूपिणे ।
यस्य वागमृतं हन्ति विषं संसारसंज्ञकम् ॥"
इति पठेत् ॥
"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥"
इति भावयेत् ।

"लोकेश ! चैतन्यमयादिदेव
श्रीकान्त विष्णो भवदाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये ॥
जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः ।
त्वया हृषीकेश ! हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥"

विष्णुपुराणे ।
"प्रबुद्धश्चिन्तयेद्धर्म्ममर्थञ्चास्याविरोधिनम् ।
अपीडया तयोः काममुभयोरपि चिन्तयेत् ॥"
धर्म्मलक्षणन्तु भविष्ये ।
"धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनम् ॥"
अतएव जैमिनिः । चोदनालक्षणोऽर्थो धर्म्म इति । तेन वैदिकलिङ्प्रतिपाद्योऽर्थो धर्म्मः । श्रेयोऽर्थो योऽभ्युदयाय इति तु भविष्ये ॥ * ॥ ततः ॐ प्रियदत्तायै भुवे नमः । इति नमस्कृत्य दक्षिणं चरणं न्यसेत् । छन्दोगपरिशिष्टम् ।
"श्रोत्रियं सुभगामग्निं गाञ्चैवाग्निचितं तथा
प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते ॥
पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत् स कलेरुपलक्षणम् ॥"
अतएव व्यासः ।
"धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥"
महाभारते ।
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम् ॥"
मात्स्ये ।
"कार्त्तवीर्य्यार्ज्जुनो नाम राजा बाहुसहस्रभृत् ।
योऽस्य संकीर्त्तयेन्नाम कल्यमुत्थाय मानवः ॥
न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः ॥"

कल्यं प्रातः ॥ * ॥
अथ विण्मूत्रोत्सर्गः । विष्णुधर्म्मोत्तरे ।
"निद्रां जह्याद्दुष्टघ्नो राम ! नित्यमेवारुणोदये
वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम् ॥
स्नानं समाचरेत् प्रातः सर्व्वकल्मषनाशनम् ॥"
अरुणोदयकालमाह स्कन्दपुराणम् ।
"उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः ।
तत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतम् ॥"
नाडिका दण्डः । विष्णुधर्म्मोत्तरे ।
"वेगरोधं न कर्त्तव्यमन्यत्र क्रोधवेगतः ।"
आयुर्व्वेदीयेऽपि । न वेगितोऽन्यकार्य्यः स्यान्नाजित्वा साध्यमामयम् । अङ्गिराः ।
"उत्थाय पश्चिमे रात्रेस्तत आचम्य चोदकम् ।
अन्तर्द्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥
वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्ज्जितः ।
कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः ॥"
विष्णुपुराणम् ।
"ततः कल्यं समुत्थाय कुर्य्यान्मूत्रं नरेश्वर ! ।
नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत् ॥"
कल्यमुषःकालम् । नैवं मित्रदेवताकवायुसम्बन्धात् पुरीषोत्सर्गः । नैरृत्यामुत्थानदेशमारभ्य उत्थायेत्यनेन उपस्थितेः इषुप्रक्षेपयोग्यदेशाद्बहिः । तद्देशपरिमाणमाह पितामहः ।
"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम् ।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः ॥"
आपस्तम्बः ।
मूत्रपुरीषोत्सर्गं कुर्य्याद्दक्षिणां दिशं दक्षिणापरां वेति ।" दक्षिणापरां नैरृतीम् । मनुः ।
"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥"
यत्तु यमवचनम् ।
"प्रत्यङ्मुखस्तु पूर्व्वाह्णे अपराह्णे च प्राङ्मुखः ।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥"
इति तदिच्छाविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात् । तथा च देवलः ।
"सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः ।
विण्मूत्रमाचरेन्नित्यं सन्ध्यायां परिवर्ज्जयेदिति"
अत्र प्रातःसायाह्नशब्दौ दिवारात्रिपरौ पूर्व्वोक्तमनुवचनैकवाक्यत्वात् । सन्ध्यायां परिवर्ज्जयेदिति तु पीडितेतरपरम् ॥ * ॥ यमः ।
"कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम् ।
विण्मूत्रे च गृही कुर्य्याद्यद्वा कर्णे समाहितः ॥"
पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतं तत् पृष्ठलम्बितं निवीतमापृष्ठदेशावलम्बं आश्वधर्म्मे-क्षितिनियमपरिशिष्टवचनात् ।
"नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ॥"
इति मनुवचनाच्च ॥
अत्र संवीतं निवीतं संवीतं मानुष इति तैत्तिरीयश्रुतेः । मानुषे सनकादिकृत्ये । पृष्ठलम्बितं निवीती वेति बौधायनीयाच्च । ततश्च कारवत्

कृत्वा पृष्ठलम्बितं स्कन्धे इत्यर्थः । एकवस्त्रतापक्षे व्यवस्थामाह सांख्यायनः । यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति । कर्णे दक्षिणे । पवित्रं दक्षिणे कर्णे विण्मूत्रमाचरेदिति स्मृतौ तथा दर्शनात् । अवगुण्ठितः कृतशिरोऽवगुण्ठनः । मनुः ।
"छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च ॥"
महाभारते ।
"प्रत्यादित्यं प्रतिजलं प्रति गाञ्च प्रति द्विजम् ।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः ॥"
प्रतिः सांमुख्ये ॥ * ॥ मनुः ।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ।
न फालकृष्टे न जले न चित्यां न च पर्व्वते ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः ॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके ।
वाय्वग्निविप्रानादित्यमपः पश्यंस्तथैव च ॥
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्ज्जनम् ॥"
ससत्त्वेषु प्राणिमत्सु । संस्थित उत्थितः । पर्व्वतनिषेधादेव मस्तकनिषेधे सिद्धे पुनर्निषेधो यत्र पर्व्वतोऽप्यपरीहारस्तत्रापि मस्तकवर्ज्जनार्थः । अथवा । पर्व्वतमस्तकनिषेधोऽधिकदोषाय ॥ * ॥ वशिष्ठः ।

"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः ।
वाग्बुद्धिगुप्ती च तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये ॥"

निर्हारो मूत्रपुरीषोत्सर्गः । विहारः स्त्रीसंभोगः । योगः समाधिः । वाग्गुप्तिरसभ्यभाषणत्यागः । बुद्धिगुप्तिरनिष्टचिन्तात्यागः । हारीतः ।
"आहारन्तु रहः कुर्य्यान्निर्हारञ्चैव सर्व्वदा ।
गुप्ताभ्यां लक्ष्मापतेः स्यात् प्रकाशे हीयते तया ॥"
विष्णुपुराणम् ।
"सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न संमुखम् ।
कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः ॥"
आपस्तम्बः । "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति ।" हस्तमनुः ।
"करटकोलपात्रे च कृत्वा मूत्रपुरीषके ।
मूत्रकृच्छ्रन्तु पानीयं पीत्वा चान्द्रायणं चरेत् ॥"
भरद्वाजः ।
"अथावकाशविण्मूत्रे कीटकाष्ठदलादिना ।
उदस्तवाससा चलितदृढं विष्णुमीहनः ॥" * ॥
उदस्तवाससः कटिदेशादूर्द्ध्वक्षिप्तवस्त्रः ।
अथ शौचम् । देवलः ।
"धर्म्मविद्दक्षिणं हस्तमधःशौचे न योजयेत् ।
तथैव वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत् ।
प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया ॥"
कारणाद्रोगादेः । ब्रह्माण्डपुराणम् ।
"ततः सोदकमादाय मृत्तिकाञ्चैव वाग्यतः ।
उदङ्मुखो दिवा कुर्य्याद्रात्रौ चेद्दक्षिणामुखः ॥
सुनिर्मले मृदं दद्यात्सुदत्ते तच्च च ॥"

कुर्य्याच्छौचमिति शेषः। शुनिर्मिष्ठे भरद्वाजोक्तलोष्टादिमृष्टे गुदे। उदकपात्राभावे करेण जलमानयेत् उदकग्रहणमाह आदित्यपुराणम्।
"रश्मिमात्रं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते।
पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्॥"
तस्मिन् देशे शौचं कर्त्तव्यं यस्माद्रश्मिमात्रव्यवहितं जलं तत्स्वक्रमेण तीर्थं जलसमीपत्वात्॥०॥
विष्णुपुराणम्।
"वल्मीकमूषिकोत्खातां मृदमन्तर्जलात्तथा।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम्॥
अन्तःप्राण्यवपन्नाञ्च हलोत्खातां न कर्द्दमाम्॥"
मनुदक्षौ।
"एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश।"
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥"
उभयोः करयोः। वामहस्ते दशदानानन्तरं तत्पृष्ठे षड्दानमाह हारीतः। दशमध्ये च षट् पृष्ठे इति। मनुदक्षौ।
"तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम्
तिस्रस्तु पादयोर्देया शुद्धिकामेन नित्यशः॥"
नखशोधनं तृणादिना नखान्तर्मलशोधनम्। तिस्र इति हस्तयोरिति शेषः॥०॥
पादप्रक्षालनं न कांस्ये कर्त्तव्यमित्याह विष्णुधर्म्मोत्तरम्।
"दर्भेण मार्ज्जयेत् पादौ न च कांस्ये प्रधावयेत्॥"
दक्षः।
"लिङ्गे तत्र समाख्याता त्रिपर्व्वी पूर्य्यते यया
अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥
द्वितीया च तृतीया च तदर्द्धं परिकीर्त्तितम्॥"
यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्।
"गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः॥"
इति याज्ञवल्क्यवचनात्॥
गुदादन्यत्र परिमाणमाह यमः।
"मृत्तिका तु समुद्दिष्टा त्रिपर्व्वी पूर्य्यते यया।
त्रिपर्व्वी तर्ज्जनीमध्यमानामिकानामपर्व्वत्रयम्॥०॥ मूत्रमात्रे तु स्मृतिः।
"एकां लिङ्गे मृदं दद्यात् वामहस्ते तु मृद्द्वयम्
उभयोर्हस्तयोर्द्वे तु मूत्रशौचं प्रकीर्त्तितम्॥"
ब्रह्मपुराणे।
"पादयोर्द्वे गृहीत्वा च सुप्रक्षालितपाणिमान्
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्"
पादयोर्द्वे एकैका। इदं मूत्रे पुरीषोत्सर्गे तिसृणां विधानात्॥०॥ दक्षः।
"यदुदितं दिवा शौचमर्द्धं रात्रौ विधीयते।
आतुरे च तदर्द्धं स्यात् तदर्द्धन्तु पथि स्मृतम्॥"
यथोक्तकरणाशक्तावेवेदं न तु निद्रादिपुरस्कारेण नाशक्त्याद्युत्थापत्तेः॥०॥ आपस्तम्बः।
"पथि पादन्तु विक्षेप्य पासौ कुर्य्यादयथाबलम्
अनयोर्विरोधस्तु आशौचाशौचाभ्यां परिहरणीयः॥ दक्षः।
"देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत्॥"

ब्रह्मपुराणे।
"न यावदुपनीयते द्विजः शूद्रस्तथाङ्गना।
गन्धलेपक्षयकरं शौचं तेषां विधीयते॥
प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते।
यावच्च शुद्धिं मन्येत तावत् शौचं समाचरेत्॥"
दक्षः।
"न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता।
प्रायश्चित्तं प्रसज्येत विहितातिक्रमे कृते॥
शौचाचारविहीनस्य समस्ता निष्फलाः
क्रियाः॥"
गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं पूर्व्वोक्तयाज्ञवल्क्याविरोधात्। गन्धलेपाक्षये त्वधिकसंख्यापि। याज्ञवल्क्यवचनमनुपनीतादिपरं वा पूर्व्वोक्तब्रह्मपुराणैकवाक्यत्वात्॥०॥
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम्॥"
इदन्तु द्विगुणादिकं संख्यामात्रे तदनन्तराभिधानात्। व्याघ्रपादः।
"शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथापरम्॥
गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः।
आमृत्योः स्नातकश्चैव भावदुष्टो न शुध्यति॥"
स्मृतिः।
"धावतश्च प्रमत्तस्य मूत्रोच्चारकृतस्तथा।
भुञ्जानमाचमानञ्च नास्तिकं नाभिवादयेत्।
जन्मप्रभृति यत्किञ्चित् चेतसा धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"
मत्स्यसूक्तः।
"यस्मिन् स्थाने कृतं शौच वारिणा तद्विशोधयेत्।
न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्॥"
शौचानन्तरं हारीतः। गोमयेन मृदा वा कमण्डलुं प्रमृज्य पूर्व्ववदुपस्पृश्य आदित्यसोमम् अग्निं वा वीक्षेतेति। अत्र मार्ज्जनानन्तरं क्षालनं पश्चात् तथादर्शनात्। आचमनानन्तरं आदित्यादिदर्शनं यथासम्भवम्। शौचं कृत्वा मूत्रोच्चारं न पश्येत् दृष्टादित्यमग्निं सोमं वा पश्येदिति॥०॥ अथाचमनविधिः। दक्षः।
"प्रक्षाल्य पाणी पादौ च त्रिः पिबेदम्बु वीक्षितम्।
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥"
पादप्रक्षालनं विशेषयति देवलः।
"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् शनैः
उदङ्मुखो वा दैवत्ये पैत्रके दक्षिणामुखः॥"
गणेश्वरः। देवपैत्रेतरत्रापस्तम्बः। प्रत्यक्पादावसेचनमिति। प्रत्यक् पश्चिमाभिमुखः। क्रममाह गोभिलः। सव्यं पादमवनिज्य इति

सव्यं पादं प्रक्षालयेत्। दक्षिणं पादमवनेनिज्य इति दक्षिणं पादं प्रक्षालयेदिति अन्यत्र तथादर्शनात् सर्व्वत्र तथा कल्पते। गणेश्वरः। सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीतिश्रुतेः प्राक् सव्यपादप्रक्षालने सिद्धे सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र सव्यपदग्रहणं सामान्यार्थे तेनान्यस्यापि पादप्रक्षालने प्रथमं दक्षिणम् अन्यार्थं पुनर्व्वचनमिति न्यायात् प्रक्षालनविकार्य्यम्। ब्राह्मणश्चेद्दक्षिणं प्रथममिति एवं तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं प्रथममिति न सव्यम्। यथा प्रक्षालयतीत्यनुवृत्तौ आपस्तम्बः। दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत् सव्यं शूद्रायेति। स्वयं प्रक्षालने सव्यस्यैव प्राथम्यमिति पर्य्यवसितार्थः। आचमने पाणिपादप्रक्षालनं मूत्राद्युत्सर्गे। यथा छन्दोगपरिशिष्टे।
"कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च सुव्रतः।
निबद्धशिख आसीनो द्विज आचमनञ्चरेत्।
कृत्वोपवीतं सव्यांशे वाङ्मनःकायसंयतः॥"
आपस्तम्बः।
"हस्तौ चमद्विराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामणिबन्धाभ्यां यथादानीत संयतः॥"
आजानु आमणिबन्धाभ्यामित्यत्र पादाग्रतः पर्य्यन्ताशुचिलग्नायां अवश्यमापत्तेः अतिप्रयत्नशौचाय वा। अनयोक्तं अङ्गमर्दनं फलप्रकर्ष इति॥०॥ शिखाबन्धने विधिमाह ब्रह्मपुराणम्।
"गायत्र्या तु शिखां बद्ध्वा नैरृत्यां ब्रह्मरन्ध्रतः।
जूटिकाञ्च ततो बद्ध्वा ततः कर्म्म समाचरेत्॥"
विविदिक्ष्वासनं चाह याज्ञवल्क्यः।
"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥
अन्तर्जानु जानुनोर्म्मध्ये हस्तौ कृत्वेति शेषः।
यायव्द्यादीशानाभिमुखः।
ईशानाभिमुखो भूत्वोपस्पृशेत् यथाविधि॥"
इति शातातपः।
ब्राह्मेण तीर्थेन अङ्गुष्ठमूलेन।
"कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥"
इति याज्ञवल्क्यात्।
देशिनी तर्ज्जनी। करस्य दक्षिणस्य। तथा मार्कण्डेयपुराणम्।
"अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै॥"
अत्र द्विजो न स्त्रीशूद्राविति मिताक्षरा। अत एव।
"स्त्रियाश्चैव दक्षिणं तोयं शूद्रस्यापि च वै।
सकृदाचमनात्तस्य हितयोरिव धर्मतः॥"
आस्यतीर्थावरोधे तु मनुः।
"कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन।"
ब्रह्मतीर्थस्य प्रजापतिसुपरोधे कायेन॰

काष्ठेनापि । एवञ्च सर्व्वाविरोधे सुवर्णादिपात्रेणाप्याचमनं कार्य्यं स्वयमसामर्थ्येऽन्येनाचमनं कारयितव्यम् । याज्ञवल्क्यः ।
"अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ।
हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ॥
शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः ॥"
अन्ततः ओष्ठोपान्ते । उत्तरोत्तरमपकर्षात् । अतएव स्पृष्टाभिरित्युक्तं न तु भक्षिताभिरिति । स्त्री शूद्रो वाथ नित्यार्थः आन्ननाञ्च करोष्ठयोः इति ब्रह्मपुराणाञ्च । आचमनार्थं पाणिपादप्रक्षालनमेवेत्येके । इति शूद्राधिकारे गौतमोक्तेश्च । आचमनार्थजलाभावे इदमित्याचाराध्यायः । मनुः ।
"हृद्गाभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः ।
वैश्योऽद्भिः प्राशिताभिश्च शूद्रः स्पृष्टाभिरन्ततः ॥"
अत्र वस्त्रावधिप्राशनमुक्तम् अनुपनीतानान्तु स्त्रीशूद्रवदाचमनं न यावदुपनीयेत । इति प्रागुक्तशौचे तथादर्शनात् । मिताक्षरादयोऽप्येवम् । अत्र विशेषयति बौधायनः । पादप्रक्षालनोच्छेषेण नाचामेत् यद्याचामेत् भूमौ स्रावयित्वाचामेदिति । उशनाः ।
"कांस्यायसेन पात्रेण त्रपुसीसकपित्तलैः ।
आचान्तः शतकृत्वोऽपि न कदाचिच्छुचिर्भवेत् ॥"
कांस्यादिपात्रकरणकाचमनं कांस्यायसेनेत्यादिना निषिद्धमिति केचित् । हस्तेनाचमनेऽपि कांस्यादिपात्रावर्ज्जितं तन्निषिद्धमित्यपरे । आचमनजलनिषेधे शङ्खलिखितौ । न शूद्राशुच्येकपाण्या वर्ज्जितेनेति अत्राशुचिपदम् आचमनकर्त्तृभिन्नपरम् । शूद्रमाहचर्य्यात् एकपाणिपदमपि आचमनकर्त्तृभिन्नपाणिपरम् । तेन स्वीयवामपाण्यावर्ज्जितमनिषिद्धम् । तथा च कमण्डल्वधिकारे बौधायनः । मूत्रपुरीषे कुर्व्वन् दक्षिणहस्तं न गृह्णाति सव्येनाचमनीयमिति । गृह्णाति जलपात्रमिति शेषः । आचामेदित्यनुवृत्तौ देवलः ।
"शिखां बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे ।
तूष्णीं भूत्वा समादाय नोद्ध्वञ्चावलोकयन् ॥"
एकवस्त्रः प्राचीनावीति न इत्यादिपारस्करदर्शनात् यत्र प्रेतस्नानतर्पणादौ एकवस्त्रत्वं विहितं तत्र तदङ्गत्वादेकवासा एवाचमनं कुर्य्यात् । प्रचेताः ।
"अनुष्णाभिरफेनाभिः पूताभिर्वीक्ष्य चक्षुषा ।
हृद्गताभिरशब्दाभिस्त्रिश्चतुर्व्वाद्भिराचमेत् ॥"
चतुर्व्वेति मार्ज्जनार्पणया विकल्पः । न तु फलभूयस्त्वार्थं कल्पनागौरवापत्तेः । बौधायनसूत्रयोर्भेदस्याचमाधर्वाचार्य्यकृतपरागरभाष्ये यौरपवादमाह यमः ।
"रात्रावपीक्षितेनापि शुद्धिरुक्ता मनीषिभिः ।
उदके मातुरार्णाञ्च तयोष्णे नोष्णपायिनाम् ॥"
आचामेदित्यनुवृत्तौ वशिष्ठः । प्रदरादपि या गोस्तर्पणाय स्युर्न वर्णरसदुष्टाभिर्याश्च स्युरशुभागमा इति । प्रदरो विदीर्णभूभागः । अशुभागमाः अशुचिदेशादागताः । यस्मिन् देशे वर्णादिदुष्टमेव तोयं तत्र तदपि ग्राह्यम् । तथा च मरीचिः ।
"येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः ।
तत्र तन्नावमन्येत धर्म्मस्तत्रैव तादृशः ॥
येषु स्थानेषु ये देवा येषु देशेषु ये द्विजाः ।
येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका ॥"
आचमने उदकग्रहणप्रकारं परिमाणञ्चाह भरद्वाजः ।
"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिवत् करम् ।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनञ्चरेत् ।
माषमज्जनमात्रास्तु सङ्गृह्य त्रिः पिबेदपः ॥"
पाणिना दक्षिणेन । त्रिः पिबेद्विधिनापि इत्यादिपुराणोक्तेः । मार्कण्डेयः ।
"नगविन्नेण हस्तेन कुर्य्यादाचमनक्रियाम् ।
नोच्छिष्टं तत्पिबन्तु भुक्तोच्छिष्टन्तु वर्ज्जयेत् ॥"
मदनपारिजाते हारीतः ।
"अन्वियंस्य पवित्रस्य न तेनाचमनञ्चरेत् ॥"
अध्ययनादृपस्थितिरिति समुद्रकरेऽपि । आचमनानुवृत्तौ देवलः ।
"न गच्छन् शयानश्च न चलन्न परान् स्पृशन् ।
न हसन्नैव संजल्पन्नात्मानञ्चैव वीक्षयन् ॥"
चलन् कम्पमान इति रत्नाकरः ॥ आत्मानं आत्मस्थानं हृदयम् । वीक्षयन्निति स्वार्थे णिच् ।
"केशान्नीवीमधःकायं न स्पृशन् धरणीमपि ।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम् ॥"
अधःकायं नाभेरधःप्रदेशम् । करं दक्षिणम् । आचमनानुवृत्तौ गोभिलः ।
"नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ॥"
अन्तरीयमधःपरिधानं तदेकदेशमुत्तरीयं कृत्वा मरीचिः ।
"न बहिर्जानुरुत्वरया नागमस्थो न चोत्थितः ।
न पादुकास्थोऽप्यचितः शुचिः प्रयतमानसः ॥
उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः ।
भुक्तासनस्थो नाचामेदन्यकाले कदाचन ॥
जलस्थलोभयकर्म्मानुष्ठानार्थन्तु जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । अन्तरुदके आचान्तोऽन्तरेव शुद्धः स्यात् तस्मादन्तरैकं बहिरेकञ्च कृत्वा पादमाचरेत् सर्व्वत्र शुद्धो भवतीति । जले तूत्तिष्ठन्नाचामेत् । जानोरूर्द्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्यतीति विद्यात् । हारीतः ।
"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम् ।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम् ॥"
कात्यायनः ।
"स्नानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढपादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढपादः स उच्यते ॥"
आसनारूढपादः आसनारोपितपादतलः । जानुनोर्जङ्घयोः कृतावसक्थिको वस्त्रादिना कृतपृष्ठजानुबन्धावस्थः । तृतीयेन भेदप्रतीतेः प्रौढपादस्य त्रिविधत्वं प्रतीयते ॥०॥ अत्र च अनेकोद्धान्तौ दारुशिले भूमिसमे इष्टकाञ्च सङ्कीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढपादोऽपि कुर्य्यात् । व्यासः ।
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ॥"
तथा ।
"अपः पाणिनखाग्रेण आचामेद्यस्तु ब्राह्मणः ।
सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥"
संवृत्येति मुखं संवृत्य सलोमकोष्ठस्पर्शो यथा न भवतीति तात्पर्य्यम् । तथा च वशिष्ठः ।
"आचान्तः पुनराचामेद्वासो विपरिधाय च ।
ओष्ठौ च संस्पृश्य तथा यत्र स्यातामलोमकौ ॥"
एतच्च प्रागुक्तहारीतवचने ओष्ठयोर्म्मार्ज्जनमुक्तं तत् सलोमकयोरेवेति । एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिनाभ्युक्षयेत् । तथा च कामधेनावापस्तम्बः । त्रिराचामेत् द्वाभ्यामोष्ठौ परिमृजेत् द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेति । गोभिलः । त्रिराचामेत् द्विः परिमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्षयेदिति इन्द्रियाण्यद्भिः । स्पृशेत् अक्षिणी नासिके कर्णाविति । इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाणाममूर्त्तत्वात् तिसृभिरिति तर्ज्जनीमध्यमानामिकाभि ॥०॥ सर्व्वत्राङ्गुष्ठयोगेन आचमनकारणमाह पैठीनसिः । अनिरङ्गुष्ठाग्रमात्रेणापि सर्व्वाणि स्थानानि स्पृशेत् । निष्ठीवनादावाचमनं यथा । वायुपुराणे ।
"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने ।
उच्छिष्टस्य च सम्भाषादशुच्युपहतस्य च ॥
सन्देहेषु च सर्व्वेषु शिखां मुक्त्वा तथैव च ।
विना यज्ञोपवीतेन नित्यमेव उपस्पृशेत् ॥
उष्ट्रवायसंस्पर्शे दर्शने चान्त्यवासिनाम् ॥"
हारीतः ।
"स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने-देवमभिगन्तुकाम आचामेदिति ।" याज्ञवल्क्यः
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥"
ब्रह्मपुराणे ।
"होमे भोजनकाले च सन्ध्ययोरुभयोरपि ।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत् ॥
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम् ॥"
स्मृतिः ।
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थ एषु नाचामेत् दक्षिणं श्रवणं
स्पृशेत् ॥"

अत्र हेतुमाह पराशरः ।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
सांख्यायनः ।
"आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट् ।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः ॥"
पुराणसारवायुपुराणयोः ।
"यः कर्म्म कुरुते मोहाद्दन्तधावनवर्ज्जितः ।
भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न
संशयः ॥" ० ॥
अथ दन्तधावनम् । वृद्धशातातपः ।
"मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥"
श्राद्धदिनादौ तस्य वर्ज्यत्वं यथा । विष्णुः ।
"श्राद्धे जन्मदिने चैव विवाहेऽजीर्णसम्भवे ।
व्रते चैवोपवासे च वर्जयेद्दन्तधावनम् ॥"
दन्तधावनमकुर्व्वन्नुदङ्मुखः प्राङ्मुखो वेति ॥ ० ॥
दन्तलग्नस्य दन्ततुल्यत्वं यथा । गौतमः ।
दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिमर्षणात् प्राक्
च्युतेरित्येके । च्युतेरास्राववद्विद्यान्निगिरन्नेव
तच्छुचिरिति । जिह्वाभिमर्षणायोग्यं दन्तलग्नं
अशौचजनकं न भवतीत्यर्थः । रसत्वानुपलभ्य-
मानरसविषयम् । दन्तवद्दन्तलग्नेषु रसवर्ज्ज-
मिति मनुवचनात् । जिह्वाभिमर्षेऽपि अश-
क्योद्धरणे न दोषः ।
"भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत् ।
दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ॥
न तत्र कुर्य्याद्बहुशो यत्नमुद्धरणे पुनः ।
भवेदशौचमत्यर्थं व्रणवैधाद्व्रणे कृते ॥"
इति देवलवचनात् ॥
च्युतेरित्युपलभ्यमानरसविषयम् । आस्रावो
लाला तद्वन्निगरणीयार्थः अतएव शोणितं
यथा न भवति तथा तृणादिना दन्तलग्न-
निःसारणाचरणम् ॥ ० ॥ छन्दोगपरिशिष्टम् ।
"नारदाद्युक्तवार्क्षं यमष्टाङ्गुलमपाटितम् ।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः ।
परिजप्य तु मन्त्रेण भक्षयेद्दन्तधावनम् ॥
आयुर्बलं यशो वर्च्चः प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते ॥"
शुचिर्भूत्वा द्विराचमनेनेति शेषः ॥ ० ॥ नर-
सिंहपुराणम् ॥
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
प्रमाणं सोऽप्याह विष्णुः ।
"कनीन्यग्रसमस्थौल्यं सकूर्च्चं द्वादशाङ्गुलम् ।
प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम् ॥
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः ॥"
सकूर्च्चं इति दर्शितम् । द्वादशाङ्गुलन्तु छन्दोगेत-
राणाम् ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्
अष्टाङ्गुलन्तु वैश्यानां शूद्राणान्तु षडङ्गुलम् ।
भक्षयेत् प्रातरुत्थाय पर्व्वस्वपि च वर्जयेत् ॥"
तिथिविशेषे तस्य वर्जनं यथा । नृसिंहपुरा-
णम् ।
"प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सत्तमाः ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥
अलाभे दन्तकाष्ठानां प्रतिषिद्धदिने तथा ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"
गण्डूषस्य दन्तकाष्ठकार्य्यकारित्वेऽपि न तत्र
मन्त्रान्वयः । शातातपः ।
"प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम् ।
पर्णैरन्यत्र काष्ठे च जिह्वोल्लेखः सदैव हि ॥"
गुवाकादिपत्रैर्दन्तधावनं निषिद्धं यथा । क्रिया-
कौमुद्यां नन्दिः ।
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गां नैव पश्यति ॥"
पराशरभाष्ये याज्ञवल्क्यः ।
"नेष्टकालोष्टपाषाणैरितराङ्गुलिभिस्तथा ।
त्यक्त्वानामिकाङ्गुष्ठौ वर्ज्जयेद्दन्तधावनम् ॥"
प्रचेताः ।
"मध्याह्नस्नानकाले तु यः कुर्य्याद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह ॥"
स्मृतिः ।
"वसन्तं कृष्णमाणस्य कुर्व्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसञ्चैव स्नातं नैवाभिवादयेत् ॥"
हारीतः ।
"शुचिं देवाभिरक्षन्ति पितरः शुचिमन्विषुः ।
शुचेर्बिभ्यति रक्षांसि ये चान्ये दुष्टचारिणः ॥"
तथा ।
"स्नानं दानं तपश्चाग्नौ सन्ध्याकर्म्मविधिक्रियाः
मङ्गलाचारनियमाः शौचभ्रष्टस्य निष्फलाः ॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा ।
मृज्जलाभ्यां भवेत् बाह्यं भावशुद्धिस्तथापरम् ॥"
अथ प्रातःस्नानसन्ध्ये । ब्रह्मपुराणम् ।
"प्रातःस्नानं ततः कृत्वा संक्षेपेण यथोदितम् ।
सन्ध्यादीनपि तथा कुर्य्यात् नित्यनैमित्तिकं तथा ॥"
कात्यायनः ।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥
दन्तान् प्रक्षाल्य प्रातरनातुरः स्नायात् ॥ ० ॥
आतुरं विशेषयति आयुर्व्वेदोक्ते ।
"छायामर्द्दितनेत्रास्यकर्णरोगातिसारिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥"
तत्कालमाह विष्णुः । प्रातःस्नानकर्त्तव्य-
मस्तो प्राचीमवलोक्य स्नायात् । इति समुद्र-
करधृतम् ॥ ० ॥
"स्नात्वा तिलकं कुर्य्यात् स्नात्वा हुत्वा च
भक्तमा ।
दृष्टदोषविघातार्थं चाण्डालाद्यादिदर्शने ॥"
अथवा ।
"अभावे गृहदेवादि विप्रदेवतमर्च्चयेत् ॥"
ब्रह्माण्डपुराणे ।
"कर्म्मादौ तिलकं कुर्य्याद्रूपं तद्वै सदा स्मृतम् ।
गोप्रदानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
भस्मीभवति तत्सर्व्वमूर्द्ध्वपुण्ड्रं विना कृतम् ॥"
प्राद्ये ।
"अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमा पुष्टिदा भवेत् ।
अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी ॥"
व्यासः ।
"गाङ्गेयतीरसम्भूतां मृदं मूर्द्ध्नि बिभर्त्ति यः ।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम् ॥"
गोपीचन्दनमाह शातातपः ।
"गोमतीतीरसम्भूतां गोपीदेहसमुद्भवाम् ।
मृदं मूर्द्ध्नि वहेद्यस्तु सर्व्वपापैः प्रमुच्यते ॥"
ब्रह्माण्डपुराणे ।
"ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया ।
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः ॥" ० ॥
आगमाः ।
"अमिरक्तं भवेत् स्नानं स्नानमन्त्रौ च वर्जि-
ताम् ।
आर्द्रं च वाससा वापि मार्ज्जनं दैविकं विदुः"
इति सावात्वचनात् शिरो विहाय मार्ज्जा-
लनम् । तदशक्तावार्द्रवाससा मार्ज्जनं
कुर्य्यात् तदनन्तरं सन्ध्यां कुर्य्यात् । अतएव
प्रातःसन्ध्यां ततः कुर्य्याद्दन्तधावनपूर्व्वकमिति
याज्ञवल्क्यवचनम् । इत्याह्निकाचारतत्त्वम् ॥
प्रातःसन्ध्या, स्त्री, (सन्ध्या सन्धा । तत् प्रातः । ततः
प्रातः प्रथमादीया सन्ध्या ।) सन्ध्यादिकर्म्मोचित-
तदुत्थितिर्या ।
"तस्मिन् गिरौ चन्द्रभागी पुण्योदितनीरगा
सन्ध्यां दृष्ट्वाथ पप्रच्छ वशिष्ठः सादरन्तदा ॥
वशिष्ठ उवाच ।
किमर्थमागता भद्रे ! निर्म्मितं त्वं मनोहरम् ।
कस्य वा तनया गौरि ! किं वा तव चिकीर्षितम्
एतदिच्छाम्यहं श्रोतुं यदि गुह्यं न ते भवेत् ।
वदनं पूर्णचन्द्राभं निःश्रीकं वा कथं तव ॥
श्रीमार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य वशिष्ठस्य महात्मनः ।
दृष्ट्वा च तमथात्मानं ज्वलन्तमिव पावकम् ॥
शरीरधृग्ब्रह्मचर्य्यमहो तं जटाधरम् ।
सादरं प्रणिपत्याथ सन्ध्योवाच तपोधनम् ॥
सन्ध्योवाच ।
यदर्थमागता शैलं सिद्धं तन्मे तपोधन !।
तव दर्शनमात्रेण तन्मे सेत्स्यति वा विभो !॥
तपः कर्त्तुमहं ब्रह्मन् ! निर्ज्जनं शैलमागता ।
ब्रह्मणोऽहं तनोर्जाता सन्ध्या नाम्ना च विश्रुता
नोपदेशमहं जाने तपसो मुनिसत्तम !।
यदि ते युज्यते गुह्यं मां त्वं समुपदेशय ॥
एतच्चिकीर्षितं गुह्यं नान्यत् किञ्चन विद्यते ।
अज्ञात्वा तपसो भावं तपोवनमुपाश्रिता ॥
चिन्तया परिशुष्योऽहं वेपते च मनः सदा ।

श्रीमार्कण्डेय उवाच ।
आकर्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्व्वतत्त्वज्ञो नान्यत् किञ्चन पृष्टवान् ॥
अथ तां नियतात्मानं तपसेऽतिधृतोद्यमाम् ।
वशिष्ठो मन्त्रयाञ्चक्रे गुरुवत् शिष्यवत्तदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्ष्यास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येन्द्रियं ददौ तस्यै वाचं दिव्ये च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिक्षीणं जटाव्रातैःपवित्रं मूर्द्धि राजितम् ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम् ॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहस्तु ते तव ।
स सद्यः क्लीवतां प्राप्य दुर्व्वलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
सप्तकल्पान्तजीवी च भविष्यति सह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्व्वं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्व्वमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे मुनेर्द्वादशवार्षिके ।
घृतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं छन्न मुनिभिर्नोपलक्षिता ।
मत्प्रसादाद्वह्निजाता तस्य पुत्री भविष्यसि ॥
यस्ते वा वाञ्छनीयोऽस्ति स्वामी मनसि कश्चन
तन्निधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ॥
नारायणः स्वयं सन्ध्यां वसन्नाथावपाणिना ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निदग्धायाः शरीरं तद्गन्धा सूर्य्यस्य मण्डले ।
यत् प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रवेः ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्द्धभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा यदा ।
उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी ॥
इति कालिकापुराणे २२ अध्यायः ॥

प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः
वैदिके तदनुष्ठानानि यथा । मार्ज्जनम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्ज्जनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्रीध्यानम् १० सावित्रीजपः ११ सावित्रीविसर्ज्जनम् १२ आदित्यशुक्रप्रोक्षणम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८ ॥ तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम् १ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ हस्तक्षालनम् ६ आचमनम् ७ सूर्य्यार्घदानम् ८ गायत्त्रा जलदानम् ९ तर्पणम् १० गायत्त्रीध्यानम् ११ गायत्त्रीजपः १२ जपसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ मूलमन्त्रजपः १६ जपसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति स्मृतितत्त्वे ॥

प्रातःस्नानं, क्ली, (प्रातः प्रभातकाले यत् स्नानम् ।) प्रभातकर्त्तव्यावगाहनादि । यथा, गारुडे ५० अः ।
"उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।
सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि ॥
अतो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ।
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्व्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ।
न च स्नानं विना पुंसां प्राशस्त्यं कर्म्मसंश्रुतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्
अशक्तावशिरस्कन्तु स्नानमस्य विधीयते ॥"
अपि च गारुडे २१५ अध्याये ।
"प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् ।
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥
यतेस्त्रिसवनं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥"
अपि च ।
"उपस्थुपसि यत्स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥
यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् ।
प्रातःस्नायी तदाप्नोति वर्षेण श्रद्धयान्वितः ॥
य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥
यदृच्छया माघमासन्तु प्रातःस्नायी हविष्यभुक्
अतिपापं महाघोरं मासादेव व्यपोहति ॥
मातरं पितरञ्चापि भ्रातरं सुहृदं गुरुम् ।
समुद्दिश्य निमज्जेत द्वादशांशं लभेत् सः ॥"

प्रातराशः, पुं, (अशनमिति । अश+भावे घञ् । आशः । प्रातः प्रातःकाले आशो भोजनम् ।) प्रातःकालीनभोजनम् । तत्पर्य्यायः । कल्यवर्त्तः २ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ कल्यजग्धिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ ।
"यः पञ्चहायनो मात्रा प्रातराशाय याचितः ।
तन्नैच्छद्रचयन् यस्य सपर्य्यां बाललीलया ॥")

प्रातर्गेयः, पुं, प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेषः ॥ प्रभातगातव्ये, त्रि ॥

प्रातर्भोक्ता, [ऋ] पुं, (प्रातर्भुङ्क्ते इति । भुज+तृच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥

प्रातर्भोजनं, क्ली, (प्रातः प्रातःकाले भोजनम् ।) प्रातराशः । इति जटाधरः ॥

प्रातिका, स्त्री, (प्रातनोतीति । प्र+अत्+ण्वुल्-टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥

प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद्+"कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,—
"इत्यद्भुतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ।
ब्रह्मोवाच ।
देवानामथ यक्षाणां गन्धर्व्वाणाञ्च सत्तम ! ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! ॥
त्वत्पदात् प्रातिपदिकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥"
इति वराहपुराणम् ॥
(प्रतिपदे धातुभिन्नपदे भव इति । प्रतिपद+ठञ् ।) नाम्नि, क्ली, । यथा, अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम्

प्रातिभाव्यं, क्ली, (प्रतिभू+ष्यञ् । द्विपदवृद्धिः ।) प्रतिभुवो भावः । जामिनी इति भाषा । यथा,
"साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥

प्रातिस्विकं, त्रि, (प्रतिस्वं भवः । प्रतिस्व+ठक् ।) असाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेणिकम् ३ । इति त्रिकाण्डशेषः ॥

प्रातिहारः, पुं, (प्रतिहार एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥

प्रातिहारकः, पुं, (प्रतिहारक एव, स्वार्थे अण् ।) प्रातिहारिकः इत्यमरटीकायां भरतः ॥

प्रातिहारिकः, पुं, (प्रतिहारः प्रतिहरणं व्याज इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार+"प्रयोजनम् ।" ५ । १ । १०९ । इति ठञ् ।) मायाकारः । इत्यमरः । २ । १० । ११ ॥

प्रातीपः, पुं, (प्रतीपस्यापत्यं प्रतीपस्यायमिति वा । प्रतीप+अण् ।) प्रतीपपुत्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १४८ । २ ।
"प्रातीपः शान्तनुस्तात ! कुरूणामे यशोऽन्वितः)

अत्र हेतुमाह पराशरः ।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
सांख्यायनः ।
"आदित्या वसवो रुद्रा वायुरग्निश्च धर्म्मराट् ।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः ॥"
पुराणसारवायुपुराणयोः ।
"यः कर्म्म कुरुते मोहादनाचम्यैव नास्तिकः ।
भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न संशयः ॥" * ॥

अथ दन्तधावनम् । वृद्धशातातपः ।
"मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥"
श्राद्धदिनादौ तस्य वर्ज्यत्वं यथा । विष्णुः ।
"श्राद्धे जन्मदिने चैव विवाहेऽजीर्णसम्भवे ।
व्रते चैवोपवासे च वर्ज्जयेद्दन्तधावनम् ॥"
दन्तधावनमथादुदङ्मुखः प्राङ्मुखो वेति ॥ * ॥
दन्तलग्नस्य दन्ततुल्यत्वं यथा । गौतमः ।
दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिघर्षणात् प्राक् च्युतेरित्येके । च्युतेरास्राववद्विद्यान्निगिरन्नेव तच्छुचिरिति । जिह्वाभिघर्षणायोग्यं दन्तलग्नं अशौचजनकं न भवतीत्यर्थः । इदञ्चानुपलभ्यमानरसविषयम् । दन्तवद्दन्तलग्नेषु रसवर्ज्जमिति शङ्खवचनात् । जिह्वाभिघर्षणेऽपि अशक्योद्धरणे न दोषः ।
"भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत् ।
दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ॥
न तत्र कुर्य्याद्बहुशो यत्नमुद्धरणे पुनः ।
भवेदशौचमत्यर्थं व्रणवेधाद्व्रणे कृते ॥"
इति देवलवचनात् ॥
च्युतेरित्युपलभ्यमानरसविषयम् । आस्रावो लाला तद्वन्निगरन्नित्यर्थः अतएव शोणितं यथा न भवति तथा तृणादिना दन्तलग्ननिःसारणाचरणम् ॥ * ॥ छन्दोगपरिशिष्टम् ।
"नारदाद्युक्तवार्क्षं यदष्टाङ्गुलमपाटितम् ।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः ।
परिजप्य तु मन्त्रेण भक्षयेद्दन्तधावनम् ॥
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते ॥"
शुचिर्भूत्वा द्विराचमनेनेति शेषः ॥ * ॥ नरसिंहपुराणम् ।
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
प्रमाणं त्वस्याह विष्णुः ।
"कनीन्यग्रसमस्थौल्यं सकूर्च्चं द्वादशाङ्गुलम् ।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम् ॥
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः ॥"
सकूर्च्चं दलिताग्रम् । द्वादशाङ्गुलन्तु छन्दोगेतरेषाम् ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्त्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलन्तु वैश्यानां शूद्राणान्तु षडङ्गुलम् ।
भक्षयेत् शास्त्रदृष्टानि पर्व्वस्वपि च वर्ज्जयेत् ॥"
तिथिविशेषे तस्य वर्ज्जनं यथा । नृसिंहपुराणम् ।
"प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सत्तमाः ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥
अलाभे दन्तकाष्ठानां प्रतिषिद्धदिने तथा ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"
गण्डूषस्य दन्तकाष्ठकार्य्यकारित्वेऽपि न तत्र मन्त्रान्वयः । शातातपः ।
"प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम् ।
पर्णैरन्यत्र काष्ठैश्च जिह्वोल्लेखः सदैव हि ॥"
गुवाकादिपत्रैर्द्दन्तधावनं निषिद्धं यथा । क्रियाकौमुद्यां वशिष्ठः ।
"गुवाकतालहिन्तालास्तथा ताडी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरःपत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गां नैव पश्यति ॥"
पराशरभाष्ये याज्ञवल्क्यः ।
"नेष्टकालोष्टपाषाणैरितराङ्गुलिभिस्तथा ।
त्यक्त्वा चानामिकाङ्गुष्ठौ वर्ज्जयेद्दन्तधावनम् ॥"
प्रचेताः ।
"मध्याह्नस्नानकाले तु यः कुर्य्याद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह ॥"
स्मृतिः ।
"वमन्तं जृम्भमाणञ्च कुर्व्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसञ्चैव स्नातं नैवाभिवादयेत् ॥"
हारीतः ।
"शुचिं देवाभिरक्षन्ति पितरः शुचिमन्वियुः ।
शुचेर्बिभ्यति रक्षांसि ये चान्ये दुष्टचारिणः ॥"
तथा ।
"स्नानं दानं तपस्त्यागो मन्त्रकर्म्मविधिक्रियाः ।
मङ्गलाचारनियमाः शौचभ्रष्टस्य निष्फलाः ॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा ।
मृज्जलाभ्यां भवेत् बाह्यं भावशुद्धिस्तथापरम् ॥"
अथ प्रातःस्नानसन्ध्ये । ब्रह्मपुराणम् ।
"प्रातःस्नानं ततः कृत्वा संक्षेपेण यथोदितम् ।
सन्ध्याञ्चापि तथा कुर्य्यात् नित्यनैमित्तके तथा ॥"
कात्यायनः ।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥
दन्तान् प्रक्षाल्य प्रातरनातुरः स्नायात् ॥ * ॥
आतुरं विशेषयति आयुर्व्वेदे ।
"स्नानमर्द्दितनेत्रास्यकर्णरोगातिसारिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥"
तत्कालमाह विष्णुः । प्रातःसूर्य्यकिरणप्रसूतां प्राचीमवलोक्य स्नायात् । इति समुद्रकरधृतम् ॥ * ॥
"मृत्तिकातिलकं कुर्य्यात् स्नात्वा हुत्वा च भस्मना ।
दृष्टदोषविघातार्थं चाण्डालाद्यादिदर्शने ॥"
उशनाः ।
"अभावे तूदकेनापि पितृदैवतमर्च्चयेत् ॥"
ब्रह्माण्डपुराणे ।
"कर्म्मादौ तिलकं कुर्य्याद्रूपं तद्दैवतं परम् ।
गोप्रदानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
भस्मीभवति तत्सर्व्वमूर्द्ध्वपुण्ड्रं विना कृतम् ॥"
ब्राह्मे ।
"अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् ।
अनामिकार्थदा नित्यं मुक्तिदा च प्रदेशिनी ॥"
व्यासः ।
"जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्नि बिभर्त्ति यः ।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम् ॥"
गोपीचन्दनमाह शातातपः ।
"गोमतीतीरसम्भूतां गोपीदेहसमुद्भवाम् ।
मृदं मूर्द्ध्नि वहेद्यस्तु सर्व्वपापैः प्रमुच्यते ॥"
ब्रह्माण्डपुराणे ।
"ऊर्द्ध्वपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया ।
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्त्रियश्च त्रिपुण्ड्रकम्
अर्द्धचन्द्रन्तु वैश्यश्च वर्त्तुलं शूद्रयोनिजः ॥" * ॥
आतुराणान्तु ।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥"
इति जाबालवचनात् शिरो विहाय गात्रप्रक्षालनम् । तदशक्तावार्द्रवाससा गात्रमार्ज्जनं कुर्य्यात् तदनन्तरं सन्ध्यां कुर्य्यात् । एतत्पाठेन प्रातःसन्ध्यां ततः कुर्य्याद्दन्तधावनपूर्व्वकमिति याज्ञवल्क्यवचनम् । इत्याह्निकाचारतत्त्वम् ॥

प्रातःसन्ध्या, स्त्री, (सन्धौ भवा । यत् प्रत्यय । टाप् । प्रातः प्रथमा या सन्ध्या ।) अस्या देवपूर्व्वं तदुत्पत्तिर्यथा ।
"तस्मिन् गिरौ चन्द्रभागे बृहल्लोहिततीरगाम् ।
सन्ध्यां दृष्ट्वाथ पप्रच्छ वशिष्ठः सादरन्तदा ॥
वशिष्ठ उवाच ।
किमर्थमागता भद्रे ! निर्जनं त्वं महीधरम् ।
कस्य वा तनया गौरि ! किं वा तव चिकीर्षितम् ।
एतदिच्छाम्यहं श्रोतुं यदि गुह्यं न ते भवेत् ।
वदनं पूर्णचन्द्राभं निश्रीकं वा कथं तव ॥
श्रीमार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य वशिष्ठस्य महात्मनः ।
दृष्ट्वा च तं महात्मानं ज्वलन्तमिव पावकम् ।
शरीरधृग्ब्रह्मचर्य्यमहो तं जटाधरम् ।
सादरं प्रणिपत्याथ सन्ध्योवाच तपोधनम् ॥
सन्ध्योवाच ।
यदर्थमागता शैलं सिद्धं तन्मे तपोधन ! ।
तव दर्शनमात्रेण तन्मे सेत्स्यति वा विभो ! ॥
तपः कर्त्तुमहं ब्रह्मन् ! निर्जनं शैलमागता ।
ब्रह्मणोऽहं मनोजाता सन्ध्या नाम्ना च विश्रुता ॥
नोपदेशमहं जाने तपसो मुनिसत्तम ! ।
यदि ते युज्यते गुह्यं मां त्वं समुपदेशय ॥
एतदधिकीर्षितं गुह्यं नान्यत् किञ्च न विद्यते ।
अज्ञात्वा तपसो भावं तपोवनमुपाश्रिता ॥
चिन्तया परिशुष्येऽहं वेपते च मनः सदा ॥

श्रीमार्कण्डेय उवाच ।
आकर्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्वकृत्यज्ञो नान्यत् किञ्चन पृष्टवान् ॥
अथ तां नियतात्मानं तपसेऽतिष्ठतीद्यमाम् ।
वशिष्ठो मन्त्रयाञ्चक्रे गुरुवत् शिष्यवत्तदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
अम्बेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्ष्यास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येन्द्रियं ददौ तस्यै वाचं दिव्ये च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिधीर्षं जटाव्रातैः पवित्रं मूर्द्धि राजितम् ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम् ॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहकृते तव ।
स सद्यः क्लीवतां प्राप्य दुर्बलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
सप्तकल्पान्तजीवी च भविष्यति सह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्वं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्व्वमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे मुनेर्द्वादशवार्षिके ।
हुतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं छन्नं मुनिभिर्नोपलक्षिता ।
मत्प्रसादाद्वह्निजाता तस्य पुत्त्री भविष्यसि ॥
यस्ते वा वाञ्छनीयोऽस्ति स्वामी मनसि कश्चन
तन्निधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ।
नारायणः स्वयं सन्ध्यां पञ्चशौयावपाचिना ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले ।
शुद्धं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रवौ ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्द्ध्वभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्य्योदयात् प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी ॥
इति कालिकापुराणे २२ अध्यायः ॥

प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः वैदिके तदनुष्ठानानि यथा । मार्जनम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्जनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्रीध्यानम् १० सावित्रीजपः ११ सावित्रीविसर्जनम् १२ आदित्यशुक्रप्रीणनम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८ ॥ तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम् १ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ हस्तक्षालनम् ६ आचमनम् ७ सूर्य्यार्घदानम् ८ गायत्त्र्या जलदानम् ९ तर्पणम् १० गायत्त्रीध्यानम् ११ गायत्त्रीजपः १२ जपसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ मूलमन्त्रजपः १६ जपसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति स्मृतितन्त्रे ॥

प्रातःस्नानं, क्ली, (प्रातः प्रभातकाले यत् स्नानम् ।) प्रभातकर्त्तव्यावगाहनादि । यथा, गारुडे ५० अः
"उष काले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्ट करं हि तत् ।
सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि ॥
अतो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ।
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्व्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ।
न च स्नानं विना पुंसां प्राशस्त्यं कर्म्मसंस्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्
अशक्तावशिरस्कन्तु स्नानमस्य विधीयते ॥"
अपि च गारुडे २१५ अध्याये ।
"प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् ।
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥
यतेस्त्रिषवनं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥"
अपि च ।
"उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥
यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् ।
प्रातःस्नायी तदाप्नोति वर्षं च श्रद्धयान्वितः ॥
य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥
षट्तिलो माघमासन्तु प्रातःस्नायी हविष्यभुक्
अतिपापं महाघोरं मासादेव व्यपोहति ॥
मातरं पितरञ्चापि भ्रातरं सुहृदं गुरुम् ।
समुद्दिश्य निमज्जेत द्वादशांशं लभेत् सः ॥"

प्रातराशः, पुं, (अशनमिति । अश+भावे घञ् । आशः । प्रातः प्रातःकाले आशो भोजनम् ।) प्रातःकालीनभोजनम् । तत्पर्य्यायः । कल्यवर्त्तः २ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ कल्यजग्धिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ ।
"यः पञ्चहायनो मात्रा प्रातराशाय याचितः ।
तन्नैच्छद्रचयन् यस्य सपर्य्यां बाललीलया ॥")

प्रातर्गेयः, पुं, प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेषः ॥ प्रभातगातव्ये, त्रि ॥

प्रातर्भोक्ता, [ऋ] पुं, (प्रातर्भुङ्क्ते इति । भुज+तृच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥

प्रातर्भोजनं, क्ली, (प्रातः प्रातःकाले भोजनम् ।) प्रातराशः । इति जटाधरः ॥

प्रातिका, स्त्री, (प्रातलोति । प्र+अत्+ण्वुल्-टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥

प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद्+"कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,—
"इत्यभुतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ।
ब्रह्मोवाच ।
देवानामथ यक्षाणां गन्धर्व्वाणाञ्च सत्तम ! ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! ॥
त्वत्पदात् प्रातिपदिकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥"
इति वराहपुराणम् ॥
(प्रतिपदे धातुभिन्नपदे भव इति । प्रतिपद+ठक् ।) नाम्नि, क्ली, । यथा, अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम् ॥

प्रातिभाव्यं, क्ली, (प्रतिभू+ष्यञ् । द्विपदवृद्धिः ।) प्रतिभुवो भावः । जामिनी इति भाषा । यथा,
"साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥

प्रातिस्विकं, त्रि, (प्रतिस्वं भवः । प्रतिस्व+ठक् ।) असाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेणिकम् ३ । इति त्रिकाण्डशेषः ॥

प्रातिहारः, पुं, (प्रतिहार एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥

प्रातिहारकः, पुं, (प्रतिहारक एव । स्वार्थे अण् ।) प्रातिहारिकः इत्यमरटीकायां भरतः ॥

प्रातिहारिकः, पुं, (प्रतिहारः प्रतिहरणं व्याज इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार+"प्रयोजनम् ।" ५ । १ । १०९ । इति ठञ् ।) मायाकारः । इत्यमरः । २ । १० । ११ ॥

प्रातीपः, पुं, (प्रतीपस्यापत्यं प्रतीपस्यायमिति वा । प्रतीप+अण् ।) प्रतीपपुत्त्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १४८ । २ ।
"प्रातीपः शान्तनुस्तात ! कुरूणां यदोद्भितः ।)

प्राथमकल्पिकः, पुं, (प्रथमकल्प आद्यारम्भः प्रयोजनं यस्य । "प्रयोजनम् ।" ५।१।१०८। इति ठञ् । यद्वा, प्रथमकल्पमधीते इति । विद्यालक्षणकल्पान्ताच्चेति वक्तव्यमिति ठक् ।) प्रथमारब्धवेदाध्ययनः । प्रथमं शिक्षणीयकल्पं शास्त्रमधीते यः इत्यर्थे पिशकः । तत्पर्य्यायः । शैक्षः २ । इत्यमरभरती ॥

प्राथमिकः, त्रि, (प्रथमे भवः । प्रथम + ठञ् ।) प्रथमभवः । यथा । यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्त्यर्थं द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु किमर्थम् । इति पक्षताशिरोमणिः ॥

प्राथम्यं, त्रि, (प्रथम + ष्यञ् ।) प्रथमस्य भावः । यथा, "अस्माभिरेव प्राथम्येन नानामुनीनां वचनैरेवं विधौ निबन्धः क्रियते ।" इति विजयरक्षितः ॥

प्रादुः [स्] अव्य, (प्रात्तीति । प्र + अद् + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्" इति । "लकादेरप्युसिप्रत्ययः ।" उणा० २ । ११८ । इत्यत्र उज्ज्वलदत्तोक्त्या उसिः ।) नाम । प्राकाश्यम् । स्फुटत्वम् । तत्पर्य्यायः । आविः २ । यथा । प्रादुरासीत् । आविर्भूतः । इत्यमरभरती ॥ (यथा, रघुः । ११ । १५ ।

"ज्यानिनादमथ गृह्णती तयोः
प्रादुरास बहुलक्षपाच्छविः ।
ताड़का चलकपालकुण्डला
कालिकेव निविड़ा बलाकिनी ॥")

प्रकाशः । सम्भाव्यम् । हर्त्तिः । इति शब्दरत्नावली ॥

प्रादुर्भावः, पुं, (प्रादुस् + भू + भावे घञ् ।) आविर्भावः । यथा,—

"वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा ॥"
इति कुवलयानन्दः ॥

प्रादेशः पुं, (प्रदिश्यते इति । प्र + दिश् + हलश्चेति घञ् । "उपसर्गस्य घञि" इति दीर्घः ।) तर्ज्जनीसहितविस्तृताङ्गुष्ठः । इत्यमरः २ । ६ । ८३ ॥ (यथा, महाभारते । ५ । ५१ । १९ ।

"प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्ज्जुनात् ॥"
प्रदेश एव । स्वार्थे अण् ।) देशमात्रम् । यथा,
"प्रादेशो देशमात्रे च तर्ज्जन्यङ्गुष्ठसम्मिते ॥"
इति मेदिनी ॥
"अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते ॥"
इति देवीपुराणञ्च ॥

प्रादेशनं, क्ली, (प्र + आ + दिश् + ल्युट् ।) दानम् इत्यमरः । २ । ७ । ३० ॥

प्रादोषं, त्रि, (प्रदोषस्यायमिति । प्रदोष + अण् ।) प्रदोषसम्बन्धी । इति सिद्धान्तकौमुदी ॥ (प्रदोषे व्याहरतीति । "व्याहरति मृगः ।" ४।३।५१ । इति अण् । प्रादोषो मृगः । प्रदोषसहचरितं अध्ययनं सोढमस्य । "तदस्य सोढम् ।" ४ । ३ । ५२ । इति अण् । प्रादोषः शिष्यः । इति व्याकरणम् ॥)

प्रादोषिकः, त्रि, (प्रदोषस्यायमिति । प्रदोष + "निशाप्रदोषाभ्याञ्च ।" ४ । ३ । १४ । इति ठञ् ।) प्रदोषसम्बन्धी । इति सिद्धान्तकौमुदी ॥

प्राधान्यं, क्ली, प्रधानस्य भावः । (प्रधान + भावे ष्यञ् ।) प्रधानत्वम् । यथा, धर्म्मदीपिकायाम् ।
"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम् ॥"

प्राध्वं, अव्य, (प्राध्वनतीति । प्र + आ + ध्वन + डम् ।) अनुकूलम् । इत्यमरः । ३ । ४ । ४ ॥ (यथा, रघुः । १३ । ४१ ।
'सभाजने मे भुजमूर्द्ध्वबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥")

प्राध्वः, त्रि, (प्रगतोऽध्वानमिति । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) बहुदूरगामि-रथादिः । इति वोपदेवः ॥ दूरपथः । प्रह्वः । बन्धः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । १६२ । २७ ।
"ततः शक्तिं गदां खड्गं धनुश्च भरतर्षभः ।
प्राध्वं कृत्वा नमश्चक्रे कुबेराय वृकोदरः ॥")

प्रान्तः, पुं, (प्रकृष्टोऽन्तः ।) अन्तभागः । शेषसीमा । यथा, कुमारे । ३ । ४६ ।
"प्रान्तेषु संसक्तनमेरुशाखं
ध्यानास्पदं भूतपतेर्विवेश ॥"

प्रान्ततः, [स्] अव्य, (प्रान्त + तसिल् ।) प्रान्तभागे । यथा, प्राचीरं प्रान्ततो वृतिः । इत्यमरः । २ । २ । ३ ॥

प्रान्तरं, क्ली, (प्रकृष्टमन्तरमवकाशो व्यवधानं वा यत्र ।) दूरशून्योऽध्वा । इत्यमरः २।१।१७॥ छायातरुजलादिरहिते पथि प्रान्तरं दूरं शून्यो दूरशून्यः दूरगामी शून्यश्चेति वा दूरशून्यो जलादिवर्जितत्वात् ईदृक् योऽध्वा स प्रान्तरमित्यन्वयः । प्रकृष्टमन्तरं व्यवधानमवकाशो वा यत्रेति प्रान्तरम् । इति भरतः ॥ (यथा, महानिर्व्वाणतन्त्रे । १ । ५४ ।
"ह्रदे गर्त्ते प्रान्तरे च प्रासादात् पर्व्वतादपि ।
पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः ॥")
विपिनम् । कोटरम् । इति मेदिनी ॥

प्रान्तशून्यं, क्ली, (प्रान्ते शून्यमस्य ।) दूरशून्यपथः । छायादिरहितपथः । इति शब्दरत्नावली ॥

प्रापणं, क्ली, (प्र + आप् + ल्युट् ।) नयनम् । प्राप्तिः । (यथा, मनुः । २ । ९५ ।
"प्रापणात् सर्व्वकामानां परित्यागो विशिष्यते ॥")
प्राप्तिप्रेरणा । प्रकर्षेण व्यापनम् । आप्लृ-दजाप्ताद्य प्रपूर्व्वोपधातोर्भावे अनट् प्रत्ययः ॥

प्रापणिकः, पुं, (प्रापणाय्यते इति । प्र + आ + पण व्यवहारे + "प्राङ्गि पणिकषः ।" उणा० २।४१ । इति किकन् ।) पण्यविक्रयी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, माघे । ४ । ११ ।
"आच्छादिताः प्रापणिकादजस्र
जग्राह रत्नान्यमितानि लोकः ॥")

प्रापणीयं, त्रि, प्राप्यते यत् । (प्र + आप् + अनीयर् ।) प्राप्यम् (यथा, मेघदूते । ५ ।
"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ॥")

प्रापेयः, पुं, गन्धर्व्वगणविशेषः । यथा, वह्निपुराणे
"प्रजास्य जगतः पुत्त्रान् दिव्यान् वैशाखनीकमात् ।
षड्विंश देवगन्धर्व्वाः प्रापेयाः परिकीर्त्तिताः ॥"

प्राप्तः, त्रि, (प्र + आप् + क्त ।) प्रत्यासितः । तत्पर्य्यायः । प्रणिहितः २ । लब्धः । तत्पर्य्यायः विन्नः २ भावितः ३ आसादितः ४ भूतः ५ । इत्यमरः । ३ । १ । ८६, ३ । १ । १०४ ॥ (उत्पन्नः । समुपस्थितः । यथा, मनुः । ११ । १२२ ।
"एतस्मिन्नेनसि प्राप्ते वसित्वा गर्द्दभाजिनम् ।
सप्तागारांश्चरेद्भैक्ष्यं स्वकर्म्म परिकीर्त्तयन् ॥")

प्राप्तपञ्चत्वं, त्रि, (प्राप्तं पञ्चत्वं मरणं येन ।) मृतम् । इत्यमरः । २ । ८ । ११७ ॥

प्राप्तभावः, पुं, (प्राप्तो भावो येन ।) आलोच । इति शब्दचन्द्रिका ॥ (प्राप्तभार इत्यपि क्वचित् पाठः ॥) लब्धसत्तादौ, त्रि ॥

प्राप्तरूपः, त्रि, (प्राप्तं रूपं येन ।) पण्डितः । मनोज्ञः । इत्यमरः । ३ । ३ । १३१ ॥ रूपवान्

प्राप्तव्यं, त्रि, प्राप्यते यत् । प्रपूर्व्वापधातोः कर्म्मणि तव्यप्रत्ययः । प्राप्यम् । (यथा, रामायणे । २ । २९ । १० ।
"आदेशो वनवासस्य प्राप्तव्यः स मया किल ॥")

प्राप्तिः, स्त्री, (प्र + आप् + क्तिन् ।) उदयः । (यथा, महाभारते । १४ । ४८ । ३ ।
"गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम् ॥")
धनादिवृद्धिः । अधिगमः । लाभः । इत्यमरभरती ॥ प्रापणम् । (यथा, मनुः । ८ । १०३ ।
"एष स्त्रीपुंसयोरुक्तो धर्म्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत ॥")
संहतिः । इति शब्दरत्नावली ॥ अणिमाद्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । स च सर्व्वोत्कृष्टप्रापणम् । इति हेमचन्द्रो भरतश्च ॥

प्राप्यं, त्रि, (प्र + आप् + ण्यत् ।) प्रापणीयम् । तत्पर्य्यायः । गम्यम् २ समासाद्यम् ३ । इत्यमरः । ३ । १ । ९२ ॥ (यथा, मार्कण्डेये । ९३ । २० ।
"मयैषा सानुरागेण बहुशः प्रार्थिता सती ।
निराकृतवती सैषमद्य प्राप्या भविष्यति ॥"
अव्य, प्र + आप् + ल्यप् । यथा, मेघदूते ।
'प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान् ॥')

प्राबोधिकः, पुं, (प्रबोधाय हितः प्रबोध + ठञ्) उषःकालः । इति शब्दमाला ॥ प्राबोधकोऽपि पाठः ॥

प्राभवं, क्ली, (प्रभोर्भावः । प्रभु + अण् ।) प्रभुत्वम् । इति शब्दचन्द्रिका ॥

प्राभाकरः पुं, (प्रभाकरस्यायं तत्कृतं वेत्तीति । प्रभाकर + अण् ।) मीमांसकविशेषः । यथा,
"व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्व्वकं

स्वमतेन तदुपष्टोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना ।" इति व्याप्तिपञ्चोपायशिरोमणिः ॥ प्राभाकरमते व्याप्तेः सकृद्दर्शनगम्यत्वं यथा, तस्मात् परिशेषेण सकृद्दर्शनगम्या सा । इति व्याप्तिपञ्चोपायचिन्तामणिः ॥

प्राभृतं, क्ली, (प्राभ्रियते यच्चेति । प्र+आ+भृ+क्त ।) उपढौकनम् । इत्यमरः ॥ (यथा, कथासरित्सागरे । १७ । ११४ ।
"तं दत्तप्राभृतं दूतं स संमान्य व्यसर्जयत् ॥")

प्राभृतकं, क्ली, (प्राभृत+स्वार्थे कन् ।) प्राभृतम् तत्पर्य्यायः । कौशलिका २ । इति हारावली १५८ ॥

प्रामाद्यः, पुं, (प्रमाद्यत्यनेनेति । प्र+मद्+ण्यत् ।) वासकः । इति शब्दचन्द्रिका ॥ स्वार्थे ष्यञ् प्रमादः । तस्य भावे, क्ली ।

प्रामाणिकः, त्रि, (प्रमाणादागतः । प्रमाण+ठक् ।) हैतुकः । मर्य्यादार्हः । शास्त्रज्ञः । परिच्छेदकः । प्रमाणकर्त्ता । इति प्रमाणशब्दात् कर्त्तरि ष्णिकप्रत्ययः ।

प्रामाण्यं, क्ली, (प्रमाणस्य भावः । प्रमाण+ष्यञ् ।) प्रमाकरणत्वम् । प्रमाणशब्दाद्भावार्थे ष्यञ्प्रत्ययः ॥ (यथा, मार्कण्डेये । १५ । ४३ ।
"सत्यंभूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनम् ।
गुरुदेवर्षिसिद्धर्षिपूजनं साधुसङ्गमः ॥")

प्रामाण्यवादः, पुं, (प्रामाण्यस्य वादः कथनम् ।) प्रमाकरणताकथनम् । तद्वतितत्प्रकारकत्वप्रमात्वकथनम् । चिन्तामणिन्यायग्रन्थविशेषः । इति पूर्व्वाचार्य्याः ॥ स यथा । अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशसु विद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय । तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत् । तेषु प्रमाणाधीना सर्व्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते । इत्यादि गङ्गेशोपाध्यायः ॥

प्रामीत्यं, क्ली, (प्रमयनमिति । प्र+मी वधे+भावे क्त । तत्र प्रमीते मरणे साधु इति ष्यञ् । अस्य वधतुल्यत्वात्तथात्वम् ।) ऋणम् । इति त्रिकाण्डशेषः ॥ (प्रमीतस्य भाव इति । प्रमीत+ष्यञ् ।) मृतत्वञ्च ॥

प्रायः, पुं, (प्रकृष्टमयनमिति । प्र+अय+घञ् यद्वा, प्र+इ+"एरच् ।" ३ । ३ । ५६ । इत्यच् ।) मरणम् । मरणार्थमनशनम् । (यथा, रामायणे । ४ । ५३ । १२ ।
"अहं वः प्रतिजानामि न गमिष्याम्यहं पुरीम्
इहैव प्रायमासिष्ये श्रेयो मरणमेव च ॥")
तुल्यम् । बाहुल्यम् । इति मेदिनी । ये, ३६ ॥ (यथा, साहित्यदर्पणे । ३ । १११ ।
"तस्कराः पथकाः मूर्खाः शुद्धप्रायधनास्तथा ।
विहितव्यवसायाद्या भाषां (वैश्यानाम्) प्रायेण वहमाः ॥")
शयः । इति हेमचन्द्रः ॥ (पापम् । तपः । इति स्मृतिः ॥ क्ली, प्रवेशः । युद्धम् । यथा, ऋग्वेदे । २ । १८ । ८ ।
"उप ज्येष्ठे वरूथे गभस्तौ
प्राये प्राये जिगीवांसः स्याम ॥"
"किञ्च प्राये प्राये सोमपानार्थमिन्द्रस्य यज्ञशालायां प्रवेशे प्रवेशे जिगीवांसः शत्रूणां जेतारो भवेम । यद्वा, प्राये प्राये प्रकर्षेण इयते गम्यते योद्धृभिरिति प्रायं युद्धम् । तस्मिन् युद्धे जिगीवांसः शत्रून् जितवन्तो भवेम ॥" इति तद्भाष्ये सायनः ॥ त्रि, गमकः । यथा, मनौ । ३ । २६४ ।
"प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ।
ज्ञातिभ्यः सत्कृतं दत्त्वा बान्धवानपि भोजयेत् ॥"
"प्रक्षाल्येति । तदनु हस्तौ प्रक्षाल्याचम्य ज्ञातिप्रायमन्नं कुर्य्यात् । ज्ञातीन् प्रैति गच्छतीति ज्ञातिप्रायं कर्म्मण्यण् । ज्ञातीन् भोजयेदित्यर्थः ॥" इति कुल्लूकभट्टः ॥)

प्रायः, [स्] व्य, (प्र+अय गतौ+असुन् ।) बाहुल्यम् । इत्यमरः । ३ । ४ । १७ ॥ (यथा, कथासरित्सागरे ६ । १२३ ।
"ततोऽहं शर्व्ववर्म्मा च ज्ञातवन्तौ क्रमेण ताम्
अथान्तरे न च प्रायः पर्य्यहीयत वासरः ॥")

प्रायश्चित्तं, क्ली, (प्रायस्य पापस्य चित्तं विशोधनं यस्मात् । यदुक्तं स्मृतौ ।
"प्रायः पापं समुद्दिष्टं चित्तं तस्य विशोधनम् ॥"
यद्वा, प्रायस्य तपसः चित्तम् निश्चय इति । "पारस्करप्रभृतीनि च संज्ञायाम् ।" ६ । १ । १५७ । इत्यत्र । "प्रायस्य चित्तिचित्तयोः ।" इति वार्त्तिकोक्त्या सुट् निपात्यते च । निरुक्तिस्तु निम्ने द्रष्टव्या ।) पापक्षयमात्रसाधनं कर्म्म । यथा, हारीतः । प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तम् ॥ * ॥ (प्रायश्चित्तमिति । यत्तपःप्रभृतिकं कर्म्म उपचितं सञ्चितमशुभं पापं नाशयतीति क्त-तत्-तत्कर्म्मभिः कर्त्तुः प्रयतत्वाद्वा शुद्धत्वादेव तत् प्रायश्चित्तम् । तथाच पुनर्हारीतः । यथा, क्षारोपस्वेदघण्डनिर्णेजनप्रक्षालनादिभिर्वासांसि शुध्यन्ति एवं तपोदानयज्ञैः पापकृतः शुद्धिमुपयान्ति । शुद्धिं पापक्षयम् । यथा, महाभारते ।
"अद्भिर्गात्रान् मलमिव तमो ह्यग्निप्रभा यथा
दानेन तपसा चैव सर्व्वपापमपोहति ॥"
तेन पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म्म प्रायश्चित्तम् । मात्रार्थलाभस्तु प्रयतत्वाद्वेत्येवकारार्थवाशब्दात् । तथाच विश्वः ।
"वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये ।"
अपच ।
"अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे ।"
इति विष्णूक्त्याश्वमेधस्यापि प्रायश्चित्तत्वम् । पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम् । प्रायश्चित्तस्य स्वर्गसाधिजनकत्वेऽपि तदंशे विधिबोधितत्वाभावाद्यासम्भवः ॥ इति प्रायश्चित्ततत्त्वम् ॥) तस्य व्युत्पत्तिर्यथा । अङ्गिराः ।
"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥"
निश्चयसंयुक्तस्यापक्षयसाधनत्वेन निश्चितमित्यर्थः ॥ * ॥ पापन्तु वैदिकप्रतिपाद्योऽनर्थः अनर्थयानिष्टसाधनम् । पापकारणमुक्तं याज्ञवल्क्येन । यथा,—
"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥" ७ ॥
पापविशेषेणावस्थाविशेषमाह मनुः ।
"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥
इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा ।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम् ॥"
यमः ।
"सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकृन्नरः ।
पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः ।
एते पतन्ति सर्व्वेषु नरकेष्वनुपूर्व्वशः ॥" ७ ॥
प्रायश्चित्तमाहात्म्यं यथा । अङ्गिराः ।
"उद्यन्नहन् यद्वदादित्यस्तमः सर्व्वं व्यपोहति
तद्वत् कल्याणमातिष्ठन् सर्व्वं पापं व्यपोहति ॥
पापस्त्वेव पुरुषः कृत्वा कल्याणमभिपद्यते ।
मुच्यते पातकैः सर्व्वैर्महाभ्रैरिव चन्द्रमाः ॥
कल्याणं प्रायश्चित्तम् ॥" ७ ॥ तस्यावश्यकर्त्तव्यत्वमाह यमः ।
"तपसोऽन्ते विशुध्यन्ति कर्म्मणां वा परिक्षयात्
तस्मात् कर्त्तव्यमेतेषु प्रायश्चित्तं विशुद्धये ॥"
कर्म्मणां भोगेन परिक्षयादित्यर्थः ॥ * ॥ प्रायश्चित्तार्हत्वमाह मनुः ।
"अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन् ।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥ * ॥
अज्ञानाद्यदि वा ज्ञानात् कृत्वा कर्म्म विगर्हितम् ।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत् ॥"
प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथा । जाबालः ।
"काम्यानां सफलार्थञ्च दोषघातार्थमेव च ।
अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः ॥
चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ।
निन्द्यैर्हि लक्षणैर्युक्ता जायन्ते निष्कृतैनसः ॥ * ॥
ज्ञानाज्ञानकृतपापयोः प्रायश्चित्तभेदो यथा । अङ्गिराः ।
"अकामतः कृते पापे प्रायश्चित्तं न कामतः ।
स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्व्वके ॥" *
अथ प्रायश्चित्तिस्पर्शादुपस्थानम् ।
महाङ्गिराः ।
"कृते निःसंशये पापे न भुञ्जीतानुपस्थितः ।
भुञ्जानो वर्द्धयेत् पापमसत्यं पर्षदि ध्रुवम् ॥
सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः ।

उपस्थाय ततः शीघ्रमार्त्तिमान् धरणीं गतः ।
गात्रैश्च शिरसा चैव न च किञ्चिदुदाहरेत् ॥”
उपस्थानञ्च ब्राह्मणान् वस्त्रादिना तोषयित्वा कार्य्यम् । महत्सु पापेषु राज्ञोऽप्युपस्थितिः कार्य्येत्याह देवलः ।
“स्वयं वा ब्राह्मणैः कृच्छ्रमल्पदोषे विधीयते ।
राज्ञा च ब्राह्मणैश्चैव महत्सु परिचर्य्यते ॥”*
परिषदमाहाङ्गिराः ।
“एकविंशतिसंख्याकैर्मीमांसावेदपारगैः ।
वेदाङ्गकुशलैश्चैव परिषत् संप्रकल्पयेत् ॥
चातुर्विद्यो विकल्पी च षडङ्गविद्धर्म्मपाठकः ।
त्रयश्चाश्रमिणो वृद्धाः पर्षत् स्यात्तु दशावरा ॥”
मनुः ।
“त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे पर्षत् स्यात्तु दशावरा ॥”
अङ्गिराः ।
“एषा तु लघुकार्य्येषु मध्यमेषु तु मध्यमा ।
महापातकिशोध्येषु शतशो भूय एव वा ॥”
प्रदर्शनार्थमिदम् । यावद्भिरेव निरूपणं तावद्भिरेव परिषत् । दृष्टार्थत्वादेव तस्याः । तथा च यमः ।
“एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्म्मपाठकाः ।
स धर्म्म इति विज्ञेयो नेतरेषां सहस्रशः ॥”*
प्रायश्चित्ताकथने दोषो यथा,—
“आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः ॥
अनर्च्चितैरनाहूतैरपृष्टैश्चैव संसदि ।
प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः ॥
न्यायतो मार्गमाणस्य क्षत्रियादेः प्रणामिनः ।
अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत् ॥”
हारीतः ।
“यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे ।
प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः ॥
तस्मात् कृच्छ्रमथाप्यर्द्धं पादं वापि विधानतः ।
ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत् ॥”
अशक्तावनुग्रहमाह पराशरः ।
“दुर्ब्बलेऽनुग्रहः कार्य्यस्तथा वै शिशुवृद्धयोः ।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहो भवेत् ॥”
स्नेहादिनानुग्रहे दोषो यथा,—
“स्नेहाद्वा यदि वा लोभात् मोहादज्ञानतोऽपि वा ।
कुर्व्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति ॥”
शास्त्रीयप्रायश्चित्तमुदाहृत्य पश्चादनुग्रहः कार्य्य इत्याहाङ्गिराः ।
“कृत्वा पूर्व्वमुदाहारं यथोक्तं धर्म्मवक्तृभिः ।
पश्चात्कार्य्यानुसारेण शक्त्या कुर्व्वन्त्यनुग्रहम् ॥”
वृद्धत्वादिभेदात् प्रायश्चित्तं यथा,—
“अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥”
अथ पापनिष्कृत्यादिः ।
तत्र मनुः ।

“ख्यापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥”
आपदीत्यनेन अध्ययनतपसोर्दानमनुकल्पत्वमुक्तम् । एतद्धिंसाव्यतिरिक्तविषयम् । हिंसायान्तु दानं मुख्यम् । यथा, भविष्ये ।
“हिंसात्मकानां सर्व्वेषां कीर्त्तितानां मनीषिभिः
प्रायश्चित्तकदम्बानां दानं प्रथम उच्यते ॥”
तथा मनुः ।
“दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् ।
एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये ॥”*॥
सामान्यप्रायश्चित्तानि यथा, संवर्त्तः ।
“हिरण्यदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥”
यमः ।
“शोषणेन शरीरस्य तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात् दानेन च दमेन च ॥”
मनुः ।
“कृत्वा पापं हि सन्तप्य तस्मात् पापात् प्रमुच्यते ।
नैतत् कुर्य्यां पुनरिति निवृत्त्या पूयते नरः ॥”
विष्णुपुराणम् ।
“प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥”
यमः ।
“गवाह्निका देवपूजा वेदाभ्यासः सरिद्द्रवः ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥”
गोतमः । “हिरण्यं गौर्व्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि । एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि ।” विष्णुपुराणम् ।
“एवं विषयभेदाद्धि व्यवस्थाप्यानि पृथक् ।
प्रायश्चित्तानि सर्व्वाणि गुरूणि च लघूनि च ॥
अन्यथा हि महावादो लघूनामुपदेशतः ।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत् ॥”
महाभारते ।
“यद्यकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम् ।
सर्व्वं दहति गङ्गाम्भस्तूलराशिमिवानलः ॥”
व्रतानि शुद्धिकारणान्याह विश्वामित्रः ।
“कृच्छ्रं चान्द्रायणादीनि शुद्ध्यभ्युदयकारणम् ।
प्रकाशे वा रहस्ये वा संशयेऽशुभके स्फुटे ॥
प्राजापत्यः सान्तपनः शिशुकृच्छ्रः पराककः ।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥
महासान्तपनः षष्ठे तप्तकृच्छ्रस्तु पावनः ।
जलोपवासकृच्छ्रश्च ब्रह्मकूर्च्चस्तु शोधकः ॥
एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नतः ॥
कार्य्याश्चान्द्रायणेयुक्ताः केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ।
उपवासस्त्रिरात्रं वा मासपक्षस्तदर्द्धकम् ॥
षड्द्वादशाहादि कार्य्यं शुद्धिफलार्थिना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥

प्रकाशे च रहस्ये च अभिसन्ध्यापरेक्षया ।
जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा ॥
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥”
प्रकाशकृते पापे व्रतानि मुख्यानि । रहस्ये जपादीनि । यथा प्राजापत्यादीन्यभिधाय मनुः ।
“एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः ।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् ॥”
देवलः ।
“प्रकाश वर्णं यल्लिखित् त्रिंशभागो रहस्यके ।
त्रिंशभागः षष्टिभागः कल्प्यो आत्मापेक्षया ॥”
इति प्रायश्चित्तविवेकः ।
अथ प्रायश्चित्तपूर्व्वाङ्गकृत्यम् । मदनपारिजाते ।
“वाप्य केशनखान् पूर्व्वं घृतं प्राश्य यथाविधि ।
प्रत्येकं नियतो वाग्यतात्मा व्रतमादिशेत् ।
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिषवणं स्पृशेत् ॥”
केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः ।
“राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ॥
केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत् ।
द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत् ॥”
विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥”
सधवास्त्रीणां विशेषमाह भवदेवभट्टधृतं वचनम् ।
“वपनं नैव नारीणां नानुव्रज्या जपादिकम् ।
न गोष्ठे शयनं तासां न च दद्युर्गवाजिनम् ॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
सर्व्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम् ॥”
अथ धेनुमूल्यव्यवस्था । तत्र संवर्त्तः ।
“प्राजापत्यव्रताशक्तो धेनुं दद्यात् पयस्विनीम् ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥”
पयस्विनीमिति विशेषणं दुग्धोपयोगाय । तच्च वत्सं विना न सम्भवति । अतः सवत्साया एव दानं मुख्यम् । तदभावे यथोचितं मूल्यम् । तच्च मूल्यं पुराणत्रयम् । “पुराणत्रयमितिशास्त्रविद्भिर्गदितो यतः पौराणिको भवेदिति कात्यायनस्मरणात् षट्त्रिंशन्मतमिति कृत्वा पठन्ति ।
“धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिकी ।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता ॥”
प्रायश्चित्तोत्तरञ्च संख्यानि । यथा भविष्ये ।
“क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम् ।
शुद्धयर्थमिति तत् प्रोक्तं वैनतेय मनीषिभिः ॥”
जाबालः ।
“आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषतः ।
आज्यं नैव हि शालाग्नौ जुहुयाद्दाहुतीश्च षट् ।
श्राद्धं कुर्य्याद्व्रतस्यान्ते गोहिरण्यादिदक्षिणाम् ॥”
प्रायश्चित्तानन्तरं गोभ्यो यवसं दद्यात् । यदि तु गावस्तद्भक्षणं न कुर्य्युस्तदा पुनः प्रायश्चित्तमनुतिष्ठेत् । यथा हारीतः । प्रायश्चित्ते यवसमादाय गोभ्यो दद्यात् यदि ताः प्रतिगृह्णीयुरथैनं प्रवर्त्तयेयुः । एवं कृत्वा तस्मिन् कृतार्थी भवति । इति प्रायश्चित्ततत्त्वम् ॥

अथ प्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि लिख्यन्ते ।

अथातिपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
ब्राह्मणस्य मातृगमनं दुहितृगमनं स्नुषागमनञ्च ।	अज्ञानतो द्विगुणद्वादशवार्षिकव्रतम् । तत्तु महापातके द्रष्टव्यम् । ज्ञानत एतद्द्विगुणम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
क्षत्रियवैश्यशूद्राणां मातृदुहितृस्नुषागमनम् ।	हुताशनप्रवेशेन मरणम् । चतुर्विंशतिवार्षिकव्रतं वा । एतत्तु अकामतः कामतस्तद्द्विगुणम् । मातृदुहितृस्नुषाणामपि एतद्व्रतादिकं करणीयम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।

अथ महापातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
अकामतो ब्राह्मणकर्तृकब्रह्मवधः ।	द्वादशवार्षिकव्रतम् । यथा मनुः । "ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् । भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् । भिक्षाशी विचरेद्ग्रामं वन्यैर्यदि न जीवति ॥"	१८० धेनवः ।	५४० कार्षापणाः । तत्तुल्यहिरण्यादिकं वा ।	१०० गावः । तदशक्तौ १०० कार्षापणाः ।
कामतो ब्राह्मणकर्तृकब्रह्मवधः ।	याज्ञवल्क्योक्तप्रकारेण मरणम् । तथा । लोमभ्यः स्वाहेति ऋचा लोमप्रभृति वै तनुम् । मज्जान्तां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम् । एतत्तु कलौ ब्राह्मणेतरपरम् । तदशक्तौ द्विगुणद्वादशवार्षिकव्रतम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
ज्ञानतो ब्राह्मणकर्तृकब्राह्मणीगर्भवधः ।	ब्रह्मवधप्रायश्चित्तम् । अज्ञानत एतदर्द्धम् । अनुपनीतबालकवधेऽप्येवम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
अकामतः सवनस्थब्राह्मणवधः	द्विगुणद्वादशवार्षिकव्रतम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
कामतः सवनस्थब्राह्मणवधः ।	तद्द्विगुणम् । ४८ अष्टचत्वारिंशद्वार्षिकव्रतम् ।	७२० धेनवः ।	२१६० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	४०० गावः । अशक्तौ ४०० कार्षापणाः ।
ब्राह्मणकर्तृकमातृसोदरभ्रातृगुर्वोर्भिर्याहिताग्नीनां वधः ।	४८ अष्टचत्वारिंशद्वार्षिकव्रतम् । एतच्च कामतः । अकामत एतदर्द्धम् ।	७२० धेनवः ।	२१६० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	४०० गावः । अशक्तौ ४०० कार्षापणाः ।
ज्ञानतो ब्राह्मणकर्तृकवेदपारगाततायिब्राह्मणवधः ।	१२ वार्षिकव्रतम् ।	१८० धेनवः ।	५४० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
अज्ञानतस्तस्य वधः ।	तदर्द्धम् । ६ वार्षिकव्रतम् ।	९० धेनवः ।	२७० कार्षापणाः ।	५० गावः । तदशक्तौ ५० कार्षापणाः ।
ज्ञानतोऽज्ञानतो वा ब्राह्मणकर्तृकपतितब्राह्मणवधः ।	तथा ।	तथा	तथा ।	तथा ।
अकामत आत्मशारिकादिब्राह्मणवधः ।	एकवार्षिकव्रतम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	८ गावः । तदशक्तौ ८/१५ कार्षापणाः ।
कामतस्तस्य वधः ।	तद्द्विगुणम् ।	तद्द्विगुणम् ।	तद्द्विगुणम् ।	तद्द्विगुणम् ।
अकामतः क्षत्रियकर्तृकब्रह्मवधः ।	ब्राह्मणकर्तृकब्रह्मवधप्रायश्चित्तद्विगुणम् । तथा २४ वार्षिकव्रतम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तत्तुल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ स्वर्णदानम्।	दक्षिणा।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो वैश्यकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तत्रिगुणम्। तच्च ३६ वार्षिकव्रतम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।
कामतो वैश्यकर्तृकब्रह्मवधः।	७२ वार्षिकव्रतम्।	१०८० धेनवः।	३२४० कार्षापणाः।	६०० गावः। अशक्तौ ६०० कार्षापणाः।
अकामतः शूद्रकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तचतुर्गुणम्। तच्च ४८ वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो ब्राह्मणकर्तृकब्राह्मणीवधः।	ब्रह्मवधप्रायश्चित्तार्द्धम्। तच्च ६ वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्। क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्तृकवधप्रायश्चित्त-द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्। अनेकब्राह्मणवधे प्रायश्चित्तस्यैकत्वम्। यदेव साक्षाद्वधकर्तुः प्रायश्चित्तं तदेव स्वल्पप्रहर्त्तुरनुग्राहकस्य अप्रहर्त्तृप्रवर्त्तकरूपप्रयोजकस्य च पादहीनम्। वध्यप्रतिरोधकस्य अनुग्राहकस्य प्रहर्त्तृप्रवर्त्तकरूपप्रयोजकस्य च अर्द्धम्। अनुमन्तुर्निमित्तिनश्च पादः। अशक्तौ स्त्रीबालवृद्धानां सर्व्वत्रार्द्धम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
ज्ञानतो ब्राह्मणस्य पैष्टीसुरापानम्। हिरण्यस्तगौड़ीमाध्वीपानञ्च।	अग्निसमस्वर्णानां सुरागोमूत्रजलदुग्धघृतगोमयरसानामन्यतमस्यामरणात् पानम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो ब्राह्मणस्य तासां पानम्।	एतदर्द्धम्। तत्तु द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतः क्षत्रियस्य पैष्टीसुरापानम्।	नववार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्।	१३५ धेनवः।	४०५ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
अज्ञानतो वैश्यस्य पैष्टीसुरापानम्।	षाड्वार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम् स्त्रीबालवृद्धानामर्द्धादिकम्।	९० धेनवः।	२७० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	५० गावः। अशक्तौ ५० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयम्।	अपहृतद्रव्यं तत्समानरूपं मूल्यं वा स्वामिने दत्वा द्वादशवार्षिकव्रतं चरणीयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतस्तत्कर्तृकतत्स्तेयम्।	एतद्द्विगुणं २४ वार्षिकव्रतम्। गुणवद्ब्राह्मणकर्तृके तु सर्वत्रार्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ज्ञानतः क्षत्रियवैश्यशूद्रकर्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयम्।	राजकर्तृकमुषलाघातेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ सुवर्णदानम्।	दक्षिणा।
अज्ञानतस्तत्कृतस्वामिकतत्सुवर्णस्तेयम्।	द्वादशवार्षिकव्रतं स्त्रीबालवृद्धानामर्द्धम्। एकस्योभयधर्म्मवत्त्वे पादः।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतो गुर्व्वङ्गनागमनम्। अर्थात् विप्राङ्गनागमनम्। शूद्रस्य ब्राह्मणीगमनञ्च।	गुरुतल्पगः पापमभिभाष्य तप्ते लौहमयीं शय्यात्। ज्वलन्तीं लौहप्रतिमां मृण्मयीं प्रतिमां वा आलिङ्ग्य म्रियेत। अथवा शिश्नवृषणावुत्कृत्य अञ्जलौ निधाय आमरणात् नैर्ऋतीं दिशमातिष्ठेत्। चतुर्विंशतिवार्षिकव्रतं वा कुर्य्यात्। गुर्व्वङ्गनयापि एतत् करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो गुर्व्वङ्गनागमः।	द्वादशवार्षिकव्रतम्। बालवृद्धयोरर्द्धम्। एतच्चातुर्व्वर्ण्यविषयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
चतुर्णां महापातकिनां संसर्गः।	ज्ञानतः सकृत् प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
तत्र गुरुसंसर्गो यथा। पतिताचार्य्यात् वेदाध्ययनम्।१। पतितशिष्याय वेदाध्यापनम्।२। पतितेन ऋत्विजा ज्योतिष्टोमादियजनम्।३। पतितस्य ज्योतिष्टोमादिनिष्पादनरूपयाजनम्।४। पतितेन पतितया वा परिणयनम्।५। स्तेयादिपतितान्यब्राह्मणीगमनम्।६। पतितान्नस्य पतितेन सहैकपात्रे भोजनम्।७।	अज्ञानतःसकृत्प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतो द्वितीयसंसर्गिणः नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतो द्वितीयसंसर्गिणः सार्द्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३८॥० कार्षापणाः।
	ज्ञानतस्तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः!
	अज्ञानतस्तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः। ब्रह्मघातिनां क्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण एतस्य द्विगुणं त्रिगुणं चतुर्गुणं ज्ञेयम्।			
तत्र लघुसंसर्गो यथा। उपनयनं विना पतिताय वेदाध्यापनम्।१। पतितात्साङ्गाध्ययनम्।२। पतितयजमानस्य अष्टकादियज्ञयाजनम्।३। पतितेन ऋत्विजाऽष्टकादियज्ञयजनम्।४ पतितब्राह्मणीगमनम्।५। पतितशूद्रागमनम्।६। अपतितान्नस्य पतितेन सहैकपात्रे भोजनम्।७। पतितोच्छिष्टभोजनम्।८।	ज्ञानतः षण्माससंसर्गिप्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतः षण्माससंसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतः षण्माससंसर्गे द्वितीयसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतः षण्माससंसर्गे द्वितीयसंसर्गिणः सार्द्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३८॥० कार्षापणाः।
	ज्ञानतः षण्माससंसर्गे तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतः षण्माससंसर्गे तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	चतुर्थसंसर्गिणो ज्ञानाज्ञानतः प्रायश्चित्ताभावः।			

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
महापातकिनां लघुतरसंसर्गो यथा। एकशय्यासनयानादिः। ततो लघुतर आलापस्पर्शनिःश्वासादिः।	एभिश्च त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः।			
	ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम्। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतो वत्सरद्वयेन।	तथा।	तथा।	तथा।
	ज्ञानत एकैकशो वत्सरत्रयेण।	तथा।	तथा।	तथा।
	अज्ञानाद्वत्सरषट्केन।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमत्वात् ज्ञानतो वत्सरत्रयेण पातः।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमत्वादज्ञानाद्वर्षषट्केन पातः। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	ज्ञानादेकैकशो वत्सरनवकेन।	तथा।	तथा।	तथा।
	अज्ञानादेकैकशोऽष्टादशवत्सरैः पातः ॥०॥ नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः स तस्य व्रतं पादहीनं कुर्यात् ॥ एतच्च प्रथमसंसर्गिणाम्। द्वितीयसंसर्गिणां द्विपादहीनम्। तृतीयसंसर्गिणां त्रिपादहीनं सर्व्वत्र ज्ञेयम् ॥ * ॥ संसर्गाणामुक्तकालस्य नाधिक्ये भागहारेण प्रायश्चित्तस्य नाधिक्यं ज्ञेयम् ॥ * ॥ रघुनन्दनभट्टाचार्य्यमते कलौ लघुसंसर्गेषु प्रतिग्रहादिषु पातित्याभावात् तत्प्रायश्चित्ताभावः।	तथा।	तथा।	तथा।
पतितोत्पन्नस्यापि महापातकिसंसर्गविशेषः।	यस्य पतितस्य यत् प्रायश्चित्तं तस्य पातित्यदशायां जातस्य पुत्रस्य तत् तृतीयभागप्रायश्चित्तम्। तदानीं सञ्जातायाः कन्यायाः पतितोत्पन्नपुत्रप्रायश्चित्तचतुर्थभागप्रायश्चित्तम्।			

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ। धेनुदानम्।	तदशक्तौ। चूर्णीदानम्।	दक्षिणा।
समुत्कर्षे अनृतम्। तत्र समुत्कर्षनिमित्तं वाचा क्रियया वा अन्यथा प्रतिपादनं यथा शूद्रस्य ब्राह्मणोऽहमिति वचनं यज्ञोपवीतधारणञ्च। अथवा परस्य सम्यग्जातिविद्योत्कर्षे सति नायं ब्राह्मणो न च किञ्चिदयं जानीते इत्यनृतवचनम् ।१। राजगामिपैशुनम्। तत्तु राजनि निर्दोषस्य दोषख्यापनम् ।२। गुरोरलीकनिर्बन्धः। स तु गुरोर्मिथ्यादोषाभियोगः ।३।	द्वादशवार्षिकव्रतम्। एतच्च ज्ञानात्यन्ताभ्यासतः ॥ * ॥ एतन्मध्याद्यदुपपातके दृश्यते तदज्ञानादिना लघुविषयत्वादित्यवध्येयम् ॥ * ॥ यत्र वशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यात्। विष्णुः। समुत्कर्षानृतं गुरोरालीकनिर्बन्धं तदाचारे च मासं पयसा वर्त्तेत। व्याकारणं परदारगमनाभिशापः। वशिष्ठः। गुरोरालीकनिर्बन्धे सचेलस्नातो गुरुं प्रसादयेत् प्रसादात् पूतो भवति। एतानि प्रमादादिकृते बोध्यानि।	१८० धेनवः।	५४० कार्षापणाः	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
एतानि त्रीणि ज्ञानतः अत्यन्ताभ्यासे अज्ञानकृतब्रह्महत्यासमानि। यागस्थयोः क्षत्रियवैश्ययोर्वधः। ४। गर्भिणीवधः। ५। रजस्वलावधः। ६। अत्रिगोत्रावधः। ७। ब्राह्मणव्यतिरिक्ताविज्ञातगर्भवधः। ८। शरणागतवधः। ९। एतानि च अज्ञानकृतब्रह्महत्यासमानानि।				
ब्रह्मोज्झता। सा च असच्छास्त्राभियोगेन अधीतवेदविस्मरणम्। १। वेदनिन्दा। अर्थतो ग्रन्थतश्च।२। कौटसाक्ष्यम्। ३। सुहृद्वधः। स च ब्राह्मणव्यतिरिक्तमित्रवधः। ४। गर्हितान्नजग्धिः। सा च ज्ञानतोऽत्यन्ताभ्यासेन अन्त्यजान्नभोजनम्। ५। गर्हितान्नजग्धिः। ज्ञानतोऽत्यन्ताभ्यासेन छत्राकलशुनादिभोजनम्। ६। एतानि षट् अज्ञानकृतसुरापानसमानि।	द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणसम्बन्धिनिःक्षेपहरणम्। १। नरा२श्व३रजत४भूमि५वज्र६मणीनां७ चाभ्यासेन हरणम्। एतानि सप्त ब्राह्मणस्वामिकानीतिरिक्तापरिमितसुवर्णस्तेयसमानि।	ज्ञानतो द्वादशवार्षिकव्रतम्। अज्ञानतस्तदर्धम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
सपिण्डस्त्रीगमनम्। १। ब्राह्मणकुमारीगमनम्। २। चाण्डालादिस्त्रीगमनम्। ३। सवर्णमित्रस्त्रीगमनम्। ४।	ज्ञानतो महापातकोक्तप्रकारेण मरणं तदशक्तिश्चेत् चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
पुत्रस्यासवर्णस्त्रीगमनम्। ५। औरसेतरपुत्रभार्यागमनम्। ६। पितृष्वसृगमनम्। ७।	अज्ञानतो१२ द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
मातृष्वसृगमनम्। ८। गुर्वाचारमपेक्ष्य हीनवर्णपितृपत्नीगमनम्। ९। पितृव्य-	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्धसप्तधेनुसंक्रमणात्।	यथाशक्ति।
पत्नीगमनम्। १०। मातामहपत्नीगमनम्। ११। मातुलपत्नीगमनम्। १२। स्नु-	अभ्यासव्यभिचारिण्याः सकृद्गमने षष्ठात् सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
षागमनम्। १३। स्वसृगमनम्। १४। ज्येष्ठभ्रातृपत्नीगमनम्। १५। राजपत्नीगमनम्। १६। श्रोत्रिय-	षष्ठमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्।	४ धेनवः।	११।० कार्षापणाः। पादोनधेनुचतुष्टयस्य बाहुल्यात्।	यथाशक्ति।

अथानुपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
पत्नीगमनम् ।१७। ऋत्विक्पत्नीगमनम् ।१८। उपाध्यायपत्नीगमनम् ।१९।	अज्ञानादारोहणमात्रे सम्बन्धविप्रकर्षे वा पराकसान्तपनकृच्छ्रौ वा ।			
मित्रपत्नीगमनम् ।२०। स्वसृसखीगमनम् ।२१। सवर्णाकन्यादुहितृगमनम् ।	ज्ञानतो महापातकोक्तप्रकारेण मरणम् । तद्वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ ३०० कार्षापणाः ।
२२ । आचार्यपत्नीगमनम् । २३ । शरणागतागमनम् । २४ । प्रव्रजितागमनम् ।२५।	अज्ञानतो द्वादशवार्षिकव्रतम् ।	१८० धेनवः ।	५४० कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
धात्रीगमनम् । २६ । मातृसखीगमनम् । २७ । निक्षिप्तस्त्रीगमनम् । २८ । वर्णोत्तमागमनम् ।२९।	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम् ।	८ धेनवः ।	२२५ कार्षापणाः । सार्द्धसप्तधेनुसङ्कलनात् ।	यथाशक्ति ।
एतानि गुरुतल्पगमनसमानि ।४।	अव्यभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः ।	५ धेनवः ।	१५ कार्षापणाः	यथाशक्ति ।
इति चतुःप्रकाराण्यनुपातकानि मिलित्वा एकपञ्चाशत्संख्येयानि ।	षष्ठमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः ।	११।० कार्षापणाः । पादोनधेनुचतुष्टयस्य प्राप्तत्वात् ।	यथाशक्ति ।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतब्राह्मणस्वामिकगोवधः ।	त्रैमासिकव्रतम् । तद्यथा । कृतसर्वाङ्गवपनो व्याघ्रादिहताया गोश्चर्मणा कृतपरिधानोत्तरीयगुण्ठनो मासमेकं गोमूत्रेण यवागूकृतान् यवान् पिबन् गोष्ठे वसेत् । अपरमासद्वये उपोष्यापरदिने सायं स्वल्पं भुञ्जीत । जितेन्द्रियो गोमूत्रेण स्नानं चरेत् । दिवा गवानुगमनं कृत्वा तिष्ठन् गोरजःपानञ्च चरेत् । गोः शुश्रूषां नमस्कारञ्च कुर्यात् । रात्रौ वीरासनं वसेत् । तिष्ठन्तीषु गोष्वनुतिष्ठेत् । व्रजन्तीषु तास्वनुव्रजेत् । आसीनासु तास्वासीनः । वीतमत्सरः । आतुरामभिशस्तां पतितां पङ्कलग्नां भयनिमित्तैश्चौरव्याघ्रादिभिराक्रान्ताञ्च गां सर्वशक्तिभिर्विमोचयेत् । शीतवर्षातपेषु मारुते भृशं वाति वा गोस्त्राणमकृत्वा आत्मत्राणं न कुर्यात् आत्मनः अन्येषां वा गृहक्षेत्रखलेषु भक्षयन्तीं पिबन्तीं वत्सञ्च निवारणाभिप्रायेण न कथयेत् । एतद्विधानेन यो गामनुगच्छति स गोहत्याकृतपापात् प्रमुच्यते । एकं वृषं दश गाश्च दक्षिणां दद्यात् । एतदशक्तौ वेदविद्भ्यः सर्वस्वं दद्यात् । एतत्तु ब्राह्मण्यादिविषयम् । [illegible] ।	१२ धेनवो भवदेवभट्टसम्मताः । १७ धेनवो दक्षसम्मताः ।	३६ कार्षापणाः । तन्मूल्यस्वर्णादि वा । ५१ कार्षापणाः	१ वृषः १० गावः अशक्तौ ११ कार्षापणाः । तथा ।

गवोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकब्राह्मणस्वामिकाज्ञानकृतगवीवधः।	सार्द्धमासिकव्रतम्। तद्यथा। गोष्ठे गोसमीपे गोघ्नः स्थितिं कुर्य्यात्। तत्रैव स्थितौ शयनञ्च। प्रसृतियावकपयोदधिसर्पिर्गोमयानां भक्षणं क्रमशः कुर्य्यात्। नखरोमविवर्जितस्त्रिसवनस्नानमाचरेत्। जितेन्द्रियो वीतमत्सरश्च भवेत्। यथाशक्ति गायत्रीञ्च जपेत्। सार्द्धमासे पूर्णे सति विप्रान् भोजयेत्। गां तन्मूल्यं वा दक्षिणां दद्यात्। अनेन विधानेन गोघ्नः पापान्मुच्यते। एतद्व्रतं गोस्वामिने तत्तातरूपं गवान्तरं यथोक्तमूल्यं वा दत्त्वा कर्त्तव्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धं प्रायश्चित्तम्।	६ धेनवो भवदेवभट्टसम्मताः। ८ धेनवो बहुसम्मताः।	१८ कार्षापणाः। तदभ्यस्तस्वर्णादि वा। २५॥० कार्षापणाः। बहुसम्मताः। सार्द्धाष्टधेनुसद्भावात्।	१ गौः। अशक्तौ १ कार्षापणः। स्मार्त्तमते ७॥० कार्षापणाः।
अज्ञानकृतशूद्रकर्त्तृक-ब्राह्मणस्वामिकगवीवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्।	६ धेनवो भवदेवभट्टसम्मताः। ८ धेनवो बहुसम्मताः।	१८ कार्षापणाः। २५॥० कार्षापणाः। बहुसम्मताः। तदभ्यस्तस्वर्णादि वा।	१ गौः। अशक्तौ १ कार्षापणः।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकक्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतम्। तद्यथा। षण्मासान् तच्चर्म्मणा परिहृतो गाग्रासाहर्त्ता गाश्नतो यथाशी गाभिरिव सञ्चरन् तत्पापात् विमुच्येत।	१२ धेनवः।	३६ कार्षापणाः। तदभ्यस्तस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तदभ्यस्तस्वर्णादि वा।	यथाशक्ति।
शूद्रकर्त्तृकाज्ञानकृत-क्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तदभ्यस्तस्वर्णादि वा।	यथाशक्ति।
तत्कर्त्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतद्व्रतार्द्धम्। स्त्रीशूद्रबालवृद्धानां सर्व्वत्रार्द्धम्।	३ धेनवः।	९ कार्षापणाः। तदभ्यस्तस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतवैश्यस्वामिक-गवीवधः।	द्विगुणं मासव्रतम्। मासव्रतं यथा। मासिकं पञ्चगव्यपानं गोष्ठे वासः गवानुगमनं गोप्रतिश्रयः।	१० धेनवः।	३० कार्षापणाः। तदभ्यस्तस्वर्णादि वा।	यथाशक्ति।
तत्कर्त्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतदर्द्धम्।	५ धेनवः।	१५ कार्षापणाः। तदभ्यस्तस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतशूद्रस्वामिकगवीवधः।	४ प्राजापत्यानि।	४ धेनवः।	१२ कार्षापणाः। तदभ्यस्तस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः।	२ प्राजापत्ये। स्त्रीशूद्रबालवृद्धानां सर्व्वत्रार्द्धम्। एकस्य स्त्रीशूद्रस्याप्युभयधर्म्मवत्त्वे प्रायश्चित्तपादः।	२ धेनू।	६ कार्षापणाः। तदभ्यस्तस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतवधः।	द्विगुणं त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२४ धेनवो भवदेवभट्टसम्मताः। ३४ धेनवो बहुसम्मताः।	७२ कार्षापणाः। १०२ कार्षापणाः। बहुसम्मताः।	५ हयो १० गावः। अशक्तौ ३० कार्षापणाः।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्त्तृकज्ञानकृतवधः।	त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१२ धेनवः। १७ धेनवो बहुसम्मताः।	३६ कार्षापणाः। ५१ कार्षापणाः। बहुसम्मताः।	१० हयः १० गावः। अशक्तौ १५ कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	द्विगुणं षाण्मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२४ धेनवः।	७२ कार्षापणाः।	यथाशक्ति।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१२ धेनवः।	३६ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	चतुर्गुणं मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२० धेनवः।	६० कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	द्विगुणं मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१० धेनवः।	३० कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	८ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्।	८ धेनवः।	२४ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	४ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकाधमशूद्रस्वामिकगवीवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अज्ञानकृतशूद्रकर्तृकाधमशूद्रस्वामिकगवीवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	४ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्वामिकाया गोरत्यल्पमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतपादः। अज्ञानतस्तदर्द्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्कलनात्।	३॥० कार्षापणाः।
ब्राह्मणस्वामिकाया गोर्गात्रसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२५॥० कार्षापणाः। सार्द्धाष्टधेनुसङ्कलनात्।	७॥० कार्षापणाः।
ब्राह्मणस्वामिकाया गोर्भिन्नावयवसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतपादत्रयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम्।	१२ धेनवः।	३८।० कार्षापणाः। पादोनत्रयोदशधेनुसङ्कलनात्।	११।० कार्षापणाः।
क्षत्रियस्वामिकाया गोरत्यल्पमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादः। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्णीदानम्।	दक्षिणा।
क्षत्रियस्वामिकाया गोर्गातसम्भितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
क्षत्रियस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादत्रयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। चैतन्ययुक्तगर्भवधे क्षतृघ्नमेव प्रायश्चित्तम्।	९ धेनवः।	२७ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	द्विगुणमासव्रतस्य पादः। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	७॥० कार्षापणाः। सार्द्धद्वयधेनुसङ्कलनात्।	यथाशक्ति।
वैश्यस्वामिकाया गोर्गातसम्भितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकवधः।	द्विगुणमासव्रतस्य पादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	द्विगुणमासव्रतस्य पादत्रयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
शूद्रस्वामिकाया गोरुत्पन्नगर्भस्य अर्थात् गर्भग्रहणदिनात् सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकाया गोर्गातसम्भितगर्भस्य अर्थात् मासद्वयोपरि सावनमासद्वयानतिक्रान्तगात्राद्यवयवोत्पन्नगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य अर्थात् चतुर्थमासोपरि सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	३ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। चैतन्ययुक्तगर्भवधे क्षतृघ्नमेव प्रायश्चित्तम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	९ धेनवः।	२५॥० कार्षापणाः। सार्द्धाष्टधेनुसङ्कलनात्।	७॥० कार्षापणाः।
क्षत्रियस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	१ मासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।

यथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	कर्त्तृकयदृच्छवधे यदुक्तप्रायश्चित्तमुक्तं अमहत्तप्रवर्त्तकरूपप्रयोजकस्य तत्तत्प्रायश्चित्तस्य पादत्रयम्। महत्तप्रवर्त्तकरूपप्रयोजकस्य पादद्वयम्। स्वल्पप्रवर्त्तकरूपानुग्राहकस्य पादत्रयम्। वध्यप्रतिरोधकरूपानुग्राहकस्य पादद्वयम्।			
ब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रेतरस्वामिकगवापालननिमित्तवधः।	इतिकर्त्तव्यताकप्राजापत्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। इति कर्त्तव्यता यथा। सशिखं वपनं कार्य्यं त्रिसन्ध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलमथपादिभिः॥ आर्द्रमेव हि तच्चर्म्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्॥ ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्। अनडुत्सहितां गाश्च दद्याद्विप्राय दक्षिणाम्॥ इति पराशरोक्ता।	३ धेनू।	६ कार्षापणाः।	१ हयः १ गौः। षष्टी। कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रस्वामिकगवापालननिमित्तवध।	प्राजापत्यद्वयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकशूद्रेतरस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। अप्राप्तदम्यावस्था तु विहायणपर्य्यन्तम्।	इतिकर्त्तव्यताकप्राजापत्यपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः।	१॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकशूद्रस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः।	प्राजापत्यव्रतद्वयपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः।	यथाशक्ति।
उत्सृष्टवृषवत्सतर्य्यादिवधः।	भूतपूर्वस्वामिकगववधप्रायश्चित्तद्विगुणम्। पूर्व्वस्वाम्यभावे ब्राह्मणस्वामिकगववधद्विगुणप्रायश्चित्तम्।			
गवां शृङ्गभङ्गास्थिभङ्गचर्म्मनिर्म्मोचनलाङ्गूलच्छेदनम्।	दशरात्रं पञ्चव्रतम्। मासार्द्धं यवपानम्। प्राजापत्यं वा। पञ्चव्रतं यथा। गोमूत्रेण समायुक्तं यावकञ्चोपयोजयेत्। एकाहमेव कृच्छ्रोऽयमुक्तपाणिरक्षा क्षयम्। सर्व्वपापहरो दिव्यो नाम्ना पञ्च इति स्थितः॥*॥ शृङ्गभङ्गादिना पक्षमासाभ्यन्तरे गोमरणे चान्द्रमं वधप्रायश्चित्तं करणीयम्। गुरुणा समेन वा तेन प्रायश्चित्तेन शृङ्गभङ्गादिप्रायश्चित्तसिद्धिः। पक्षमासोत्तरमरणे शृङ्गभङ्गादिप्रायश्चित्तमात्रं कर्त्तव्यम्॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
गवां मुष्कमोक्षः।	यत्कर्त्तृकयत्स्वामिकगववधे यत्प्रायश्चित्तमुक्तं तत्कर्त्तृकतत्स्वामिकगवमुष्कमोक्षे तत्प्रायश्चित्तम्। शल्यनिष्कर्षणदयोश्चप्यस्वाभिमानात्। अत्र प्रयोजकभेदस्यार्द्धं पादोनञ्च।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
वृषस्य स्वयं ब्राह्मणकर्तृकहलशकटादियोजनम्।	प्राजापत्यद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
योषिद्गवां ब्राह्मणकर्तृकहलशकटादियोजनम्।	४ प्राजापत्यानि। ब्राह्मणेतरेषां प्राजापत्यद्वयम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
उत्कृष्टवृषस्य कपिलायाश्च ब्राह्मणकर्तृकहलशकटादियोजनम्।	यतिचान्द्रायणद्वयम्। ब्राह्मणेतरेषां यतिचान्द्रायणैकम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
गोमांसखादके गोविक्रयविनिमयादिः।	विक्रयादिमात्रे अज्ञानकृततत्तत्कर्तृकतत्तत्स्वामिकगववधप्रायश्चित्तार्द्धम्। गोमांसखादककर्तृककृतगववधे तु अज्ञानकृततत्तत्कर्तृकतत्तत्स्वामिकगववधोक्तसंपूर्णप्रायश्चित्तम्।			

अथ गोवधापवादः।

तत्र पराशरः।

"धूर्येषु वृषभेषु दण्डेनाभिहतेषु च। काष्ठेन लेष्टुना वापि पाषाणेन तु ताडितः॥ मूर्च्छितः पतितश्चैव मृतो वा सद्य एव च। एवंगतानां धूर्याणां प्रवक्ष्यामि यथाविधि॥ उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशापि वा। ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते॥" सम्वर्त्तः। "यन्त्रणे गोचिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते॥ औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च। प्राणिनां प्राणहत्यर्थं प्रायश्चित्तं न विद्यते॥ दाहच्छेदशिराभेदप्रयत्नैरुपकुर्व्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते॥" याज्ञवल्क्यः। "क्रियमाणोपकारे तु मृते विप्रे न पातकम्। विपाके गोवृषाणाञ्च भेषजाग्निक्रियासु च॥" मिताक्षराधृतपराशरवचनम्। "कूपे खाते च धर्म्मार्थे गृहदाहे च ये मृताः। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते॥" भवदेवभट्टधृतवचनम्। "शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च। यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते॥" सम्वर्त्तः। "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च। एषु गोषु प्रपन्नासु प्रायश्चित्तं न विद्यते॥" देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगह्वरम्। विहारो गवां मैथुनम्। आयतनं सीमानिबन्धनस्थानम्। अत्र कूपायतनकर्त्तुर्दोषाभावो न तु गोस्वामिनः। इति प्रायश्चित्तविवेकप्रायश्चित्ततत्त्वस्मृतिसारसंग्रहसम्मतं गोवधप्रायश्चित्तं समाप्तम्॥०॥

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृतक्षत्रियवधः।	अज्ञानकृतब्रह्महत्याप्रायश्चित्तपादः। स तु त्रैवार्षिकव्रतरूपः।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकज्ञानकृतक्षत्रियवधः।	सार्द्धवार्षिकव्रतम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतक्षत्रियवध	षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
वैश्यकर्तृकज्ञानकृतक्षत्रियवध	त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतक्षत्रियवध.	नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
शूद्रकर्तृकज्ञानकृतक्षत्रियवध	सार्द्धचतुर्वार्षिकव्रतम्।	सार्द्धसप्तषष्टिधेन्वसम्भवात् ६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवैश्यवधः।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्धवार्षिकव्रतरूपः।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यवधः।	ब्रह्महत्याव्रतषोडशभागः। स च नवमासिकव्रतरूपः।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।

उपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ अर्थदानम्।	दक्षिणा
शूद्रकर्तृकज्ञानकृतवैश्यवधः।	ब्रह्महत्याव्रतचतुर्थभागः। स च त्रैवार्षिकव्रतरूपः।	४५ धेनवः।	१३५ कार्षापणाः।	२२ गावः। अथवा ११ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतवैश्यवधः।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्धवार्षिकव्रतरूपः।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	११ गावः। अथवा ३३॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकज्ञानकृतशूद्रवधः।	ब्रह्महत्याव्रतषोडशभागः। स च नवमासिकव्रतरूपः।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	६ गावः। अथवा १६॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाज्ञानकृतशूद्रवधः।	ब्रह्महत्याव्रतद्वात्रिंशत्तमभागः। स च सार्द्धचतुर्मासिकव्रतरूपः। सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः।	पादाधिकपञ्चधेन्वसम्भवात् ६ धेनवः।	१६॥० कार्षापणाः।	३ गावः। अथवा ८॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकज्ञानकृतवृत्तस्थशूद्रवधः।	ब्रह्महत्याव्रतद्वादशभागः। स च वार्षिकव्रतरूपः। अज्ञानतस्त्वेतदर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अथवा २२॥० कार्षापणाः।
सर्व्ववर्णकर्तृकज्ञानकृतप्रतिलोमजातवधः अर्थात् अपकृष्टशूद्रवधः।	चान्द्रायणव्रतम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
सर्व्ववर्णकर्तृकाज्ञानकृतापकृष्टशूद्रवधः।	पराकव्रतम्। सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकज्ञानकृतब्राह्मणीवधः।	षाड्वार्षिकं महाव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। ५० कार्षापणा वा।
क्षत्रियकर्तृकज्ञानकृतब्राह्मणीवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। १०० कार्षापणा वा।
वैश्यकर्तृकज्ञानकृतब्राह्मणीवधः।	अष्टादशवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। १५० कार्षापणा वा।
शूद्रकर्तृकज्ञानकृतब्राह्मणीवधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्। सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वाद्युभयधर्म्मवत्त्वे पादः।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अथवा १०० कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकज्ञानकृतक्षत्रियावधः।	त्रैवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२२ गावः। २२ कार्षापणा वा।
वैश्यकर्तृकज्ञानकृतक्षत्रियावधः।	षाड्वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। ५० कार्षापणा वा।
शूद्रकर्तृकज्ञानकृतक्षत्रियावधः।	नववार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्। सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वाद्युभयधर्म्मवत्त्वे पादः।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अथवा ३३ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यावधः।	वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। ८॥१३ कार्षापणा वा।
शूद्रकर्तृकज्ञानकृतवैश्यावधः।	द्विवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्। स्त्रीबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः।	३० धेनवः।	९० कार्षापणाः।	१० गावः। अथवा १५॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकज्ञानकृतशूद्रावधः।	वार्षिकव्रतम्। अज्ञानतस्तु एतदर्द्धम्। स्त्रीबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अथवा ८॥० कार्षापणाः।
आत्रेयीवधः। आत्रेयी त्रिविधा। अत्रिगोत्रा ऋतुस्नाता गर्भिणी च। *	यत्कर्तृकयद्वर्णस्त्रीवधे यत्प्रायश्चित्तं तद्द्विगुणम्।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणकर्तृकाज्ञानकृतसवर्णाव्यभिचरितब्राह्मणीवधः।	वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६ कार्षापणाः।
क्षत्रियकर्तृकाज्ञानकृतसवर्णाव्यभिचरितब्राह्मणीवधः।	द्विवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	३० धेनवः।	९० कार्षापणाः।	१० गावः। अशक्तौ १६॥/१३ कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतसवर्णाव्यभिचरितब्राह्मणीवधः।	त्रैवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतसवर्णाव्यभिचरितब्राह्मणीवधः।	चतुर्वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्। बालवृद्धस्त्रीणामर्द्धम्। एकस्य उभयधर्म्मवत्त्वे पादः।	६० धेनवः।	१८० कार्षापणाः।	३४ गावः। अशक्तौ ३३।/६ कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च ब्राह्मण्या वधः।	दृतिदानम्। ज्ञानकृते तु द्वैगुण्यम्। क्षत्रियस्य एतद्द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्।	•	•	यथाशक्ति।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च क्षत्रियाया वधः।	धनुर्दानम्। कामतो द्वैगुण्यम् वैश्यस्य एतद्द्विगुणम्। शूद्रस्य त्रिगुणम्।	•	•	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च वैश्याया वधः।	छागदानम्। कामतस्त्वेतद्द्विगुणम्। शूद्रस्य एतद्द्विगुणम्।	•	•	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाज्ञानकृतोभूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च शूद्राया वधः।	मेषदानम्। कामतो द्वैगुण्यम्। सर्वत्र स्त्रीबालवृद्धानामर्द्धम्। एकस्य उभयधर्म्मवत्त्वे पादः। प्रयोजकादीनां पादपादहानिः।	•	•	यथाशक्ति।
ब्राह्मणकर्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानकृतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानकृत वैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २२ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानकृत शूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियकर्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
क्षत्रियकर्तृकाज्ञानकृतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
क्षत्रियकर्तृकाज्ञानकृतवैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २२ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
क्षत्रियकर्तृकाज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	षट्त्रिंशद्वार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ स्वर्णदानम् ।	दक्षिणा ।
वैश्यकर्तृकज्ञानकृतक्षत्रियागर्भवधः ।	षाड्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	८० धेनवः ।	२७० कार्षापणाः ।	५० गावः । अशक्तौ १० कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतवैश्यागर्भवधः ।	सार्द्धवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सार्द्धद्वाविंशतिधेन्वसमर्थात् २१ धेनवः ।	६७॥० कार्षापणाः ।	१२ गावः । अशक्तौ ११॥० कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतशूद्रागर्भवधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सपादैकादशधेन्वसमर्थात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ४१० कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतब्राह्मणीगर्भवधः ।	अष्टचत्वारिंशद्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	७२० धेनवः ।	२१६० कार्षापणाः ।	४०० गावः । अशक्तौ १०० कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतक्षत्रियागर्भवधः ।	नववार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	१३५ धेनवः ।	४०५ कार्षापणाः ।	७५ गावः । अशक्तौ ८१ कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतवैश्यागर्भवधः ।	त्रैवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ ११ कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतशूद्रागर्भवधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्द्धम् । ब्राह्मण्यादिगर्भे पुंस्त्वे न ज्ञाते विशेषेणाज्ञाते चोक्तं प्रायश्चित्तम् । स्त्रीत्वेन ज्ञाते सर्व्वत्रार्द्धं प्रायश्चित्तं ज्ञेयम् । सर्व्वत्र स्त्रीबालवृद्धानामर्द्धम् । प्रयोजकादीनां पादपादह्रानिः ।	सपादैकादशधेन्वसमर्थात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ४१० कार्षापणाः ।
यद्यपि गजाश्वादिवधः सङ्करीकरणपापमिदं तथापि हिंसाबाहुल्यादुपपातकप्रकरणे तत्प्रायश्चित्तं निरूप्यते ।				
इष्टसामान्यपशुघातः । इष्टेतिपदग्रहणात् यागाद्यर्थे प्रायश्चित्ताभावः ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
राजमत्तवन्ध्युत्तमगजवधः ।	पञ्चनीलवृषदानम् ।	०	२५ कार्षापणाः ।	यथाशक्ति ।
अत्युत्तमवाजिरासभवधः ।	चान्द्रायणम् ।	८ धेनवः । सार्द्धगवधेन्वसमर्थात्	२२॥० कार्षापणाः ।	यथाशक्ति ।
अश्ववधः ।	वासोयुगदानम् । एतच्च ज्ञानतः । अज्ञानतस्तदर्द्धम् ।	०	०	यथाशक्ति ।
मृगमहिषवराहकुक्कुरगण्डकवत्सुकलवानरसिंहव्याघ्रऋक्षतरक्षुकादीनां वधः ।	अहोरात्रोपवासान्ते घृतघटदानम् । एतच्चाज्ञानत सकृद्वधविषयम् । ज्ञानतो द्विगुणम् ।	०	सपादमाषाधिकाष्ट पणाः ।	यथाशक्ति ।
अजाश्वादिवधः ।	त्रिरात्रोपवासः । एतदज्ञानतोऽभ्यस्तधार्मिकब्राह्मणकर्तृकसकृद्वधे वेदितव्यम् ।	०	११० कार्षापणाः ।	हिरण्यं वस्त्रं वा ।
	ग्राम्यस्य पञ्चहायनवृषदानम् ।	०	इदमूल्यम् ५ कार्षापणाः ।	यथाशक्ति ।
	अग्राम्यस्य धेनुदानम् । तदशक्तौ प्राजापत्यव्रतम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अभ्यासे मासं यावकपानम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
मार्जारगोधानकुलमण्डूकश्वपक्षिमूषिकसर्पवधः । मतद्वौ ग्रहपक्षौ ।	त्र्यहं क्षीरपानम् । पादकृच्छ्रं वा । एतदज्ञानविषयम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
	ज्ञानतोऽभ्यासे द्वादशरात्रं कृच्छ्रम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	किञ्चिदधिकसपादधेन्वसमर्थात् २ धेनू ।	४ कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	कृष्णसर्पवधे तीक्ष्णायसलौहकीलिकादानमादौ कर्त्तव्यम्। सर्पजातीयषण्ढवधे पलालभारः सीसकमाषश्च दातव्यः। एतदज्ञानतः। एतदशक्तौ व्रतादिकं कर्त्तव्यम्।			
अथ सामान्यपक्षिवधः।	नक्तव्रतम्। हिरण्यपरिमितरौप्यदानं वा।	•	⁄१३।— पणौ। नक्तव्रतस्योपवासतृतीयभागत्वात्।	यथाशक्ति।
	कामतोऽत्यन्ताभ्यासे शूद्रहत्याव्रतम्। गुरुगोवधव्रतं वा। स्त्रीशूद्रबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः।	१२ धेनवः।	३६ कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
अथ विशेषपक्षिवधः। बकबलाका-हंससारसकारण्डवचक्रवाककुररटभश्येनखञ्जरीटटिट्टिभोलूकशुकशारिकातित्तिरिमयूरकाककलविङ्कानन्त्रकमद्गुकपोतपारावतादीनां वधः।	अहोरात्रोपवासः सर्वबीजदानञ्च। एतदज्ञानविषयम्।	•	उपवासानुकल्पः ३० पणाः। सर्व्वबीजमूल्यम् ।० पणाः।	यथाशक्ति।
	ज्ञानकृते सार्द्धोपवासः। शक्तस्य गोदानम्। तत्रायं विशेषः। शुकवधे द्विहायनगवदानम्। क्रौञ्चवधे त्रिहायणगवदानम्। क्रौञ्चशुकभासमयूरश्येनगृध्रवधे वत्सतरीदानम्। अत्र वृषदानवत्सतरीदानयोर्व्यवस्था शक्ताशक्तविषयिका। एतद्दानाशक्तानां व्रतादिकम्।	•	१॥० कार्षापणः।	यथाशक्ति।
कोकिलशुककपोतकपिञ्जलकुक्कुटटिट्टिभखञ्जरीटानां पुरुषभारपरिमितानां वधः।	उत्कृष्टशूद्रहत्याव्रतम्।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
भासामण्डूकमकरशिशुमारादिजलचरवधः।	मार्जारवधप्रत्याव्रतम्। एतदज्ञानतः सकृद्वधे।	•	१ कार्षापणः।	⁄११॥—पणौ।
	अहोरात्रोपवासः यथाशक्तिलवणदानञ्च। एतत् कामतः सकृत्। अभ्यासात्यन्ताभ्यासयोस्तु मत्स्यवधप्रायश्चित्ते दर्शयिष्यते।	•	३० पणाः उपवासानुकल्पः। १॥०कार्षापणः। लवणमूल्यम् ।२।	⁄२॥=पणाः।
अथ सास्थ्यनस्थिप्राणिवधः।				
सहस्रसंख्यकानां अस्थिमतां क्रकलासादीनां ज्ञानकृतवधः।	षाब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
अनस्थ्नां कृमिकीटपतङ्गभ्रमरदंशमशकमक्षिकादीनां शकटपूरितमितानां ज्ञानकृतवधः।	षाब्दिक शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
अस्थिमतां प्रत्येकं वधः।	पणदानम्।	•	•	यत्किञ्चित्।
अनस्थ्नां प्रत्येकं वधः।	प्राणायामः। पणदानं वा।	•	•	तथा।
अथ फलादिगुल्मादिसर्वरसफलपुष्पजातमात्रविवधः।	दिनैकं घृतमात्रभोजनम्। एतदज्ञाने ज्ञाने तद्द्विगुणम्।	•	३० पणाः।	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२।० कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८कार्षापणाः।	यथाशक्ति।
फलवद्वृक्षलतागुल्मच्छेदनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ धूर्णीदानम् ।	दक्षिणा ।
अफलवतामितेषां छेदनम् ।	अष्टाहसाध्यहस्तकृच्छ्रम् ।	०	२ कार्षापणौ ।	यथाशक्ति ।
अन्यस्त्रीत्सृष्टफलवद्वृक्षच्छेदनम् ।	चान्द्रायणम् ।	८ धेनवः ।	२२४० कार्षापणाः ।	यथाशक्ति ।
अभ्यासादन्यस्त्रीत्सृष्टफलवद्वृक्षच्छेदनम् ।	आब्दिकव्रतम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	८ गावः । अशक्तौ २४ कार्षापणाः ।
चैत्यद्रुमश्मशानसीमपुण्यस्थानसुरालयजातवृक्षच्छेदनम् । विंशतिसंख्यकोपजीव्यवृक्षच्छेदनम् । श्यामवृक्षच्छेदनञ्च ।	पूर्वोक्तवृक्षच्छेदनप्रायश्चित्तद्वैगुण्यादि । सर्वत्र स्त्रीशूद्रबालवृद्धानामर्द्धम् ।			
वापीकूपारामसेतुसभातडागप्रपादेवतायतनभेदनम् ।	ब्राह्मणेभ्यो निवेद्य चतस्र आहुतीर्जुहुयात् । इदं विष्णुरिति प्रथमां मानस्तोके इति द्वितीयां विष्णोः कर्म्माणीति तृतीयां पादोऽस्येत्यामिति चतुर्थीं यां देवतामुत्सादयति तस्यै देवतायै । ब्राह्मणान् भोजयेत् । एतत् सकृदल्पोपघातविषयम् । अभ्यासे महोपघाते च प्राजापत्यम् । दण्डश्च । यथा । सकृदल्पोपघाते प्रथमसाहसः २५० पणाः । अभ्यासे महोपघाते उत्तमसाहसः । १००० पणाः ।			
देवताया उत्कृष्टप्रतिमाभेदनच्छेदनदहनहरणानि ।	चान्द्रायणम् । वाप्यादिभेदनोक्ताहुतयः । उत्तमसाहसो दण्डश्च । १००० पणाः ।	सार्द्धसप्तधेन्वभावात् ८ धेनवः ।	२२४० कार्षापणाः ।	यथाशक्ति ।
देवताया अपकृष्टप्रतिमाभेदनच्छेदनदहनहरणानि ।	प्राजापत्यम् । पूर्वोक्तचतुराहुत्यादिदानम् । प्रथमसाहसो दण्डश्च । २५० पणाः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अथाभिचारः । स तु परहिंसार्थं श्येनहोमादिकर्म ।	अतिकृच्छ्रम् । एतत् सकृदाचरणे । अभ्यासे प्रायश्चित्तावृत्तिः । इति हिंसाप्रायश्चित्तम् ।१०।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
आत्मयाजनम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
मूल्येन मृतस्य दहनवहनादिकम् ।	सान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
अथाभक्ष्यभक्षणम् । अभक्ष्यं षड्विधम् । जातिदुष्टम् १ क्रियादुष्टम् २ कालाश्रयविदूषितम् ३ संसर्गाश्रयदुष्टम् ४ सहृल्लेखम् ५ स्वभावतो दुष्टम् ६ । जातिदुष्टं लशुनगृञ्जनपलाण्डुच्छत्राकश्लेष्मातकीनालिकालाबुकादिकम् १ क्रियादुष्टं पतितसंसृष्टम् २ कालदुष्टं पर्युषितं चिरसंस्थितञ्च ३ संसर्गदुष्टं सुरालशुनपेयूषादियुक्तम् ४ सहृल्लेखं विचिकित्सितान्नम् ५ स्वभावदुष्टं पुरीषादि ६ ।	चान्द्रायणम् । एतद्गुरुतरविषयम् । विशेषनिर्देशोऽयम् ।	सार्द्धसप्तधेन्वभावात् ८ धेनवः ।	२२४० कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
अपरञ्च। संघातान्नम्। शूद्रोपनीतान्नम्। पतितोपनीतान्नम्। शूद्रवेश्मस्थान्नञ्च।				
शूद्रस्य पक्वान्नभक्षणम्।	ब्राह्मणस्य अहोरात्रोपवासः। एतदज्ञानतः।	१ धेनुः। अर्द्धधेन्वसम्भवात्।	१॥कार्षापणः।	यथाशक्ति।
	ज्ञानतः प्राजापत्यम्। आपदि भक्षणे मनस्तापः द्रुपदां शतजपो वा। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभ्यासात् शूद्रस्य पक्वान्नभक्षणम्	ब्राह्मणस्य मासयावकपानम्। क्षत्रियादीनां पादपादहानिः।	२धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्यामान्नभक्षणम्।	उक्तप्रायश्चित्ततुरीयभागः। आपदि भक्षणे प्रायश्चित्ताभावः।			
अथ रजकशैलूषवेणुचर्म्मोपजीविकैवर्त्तादान्त्यजान्नभक्षणम्।	चान्द्रायणम्। एतत् ज्ञानाभ्यासविषयम्। अज्ञाने तदर्द्धम्।	८ धेनवः सार्द्धसप्तधेन्वसम्भवात्	२२॥० कार्षापणाः।	यथाशक्ति।
	ज्ञानतोऽष्टधाभ्यासे कृच्छ्राब्दम्।	३० धेनवः।	९०कार्षापणाः।	१० गावः। अशक्तौ १६।४११॥ कार्षापणाः।
	अज्ञानतोऽष्टधाभ्यासे एतदर्द्धम्। एतत्तु ब्राह्मणविषयम्। क्षत्रियादीनां पादपादहानिः।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/८॥ कार्षापणाः।
सकृदज्ञानकृतान्त्यजोच्छिष्टाशनम्।	ब्राह्मणस्य चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	क्षत्रियस्य तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य तप्तकृच्छ्रार्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य तप्तकृच्छ्रपादः।	१धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ज्ञानत एतद् द्विगुणम्।			
कापालिकान्नभक्षणम्।	ज्ञानात् कृच्छ्राब्दम्।	३० धेनवः।	९० कार्षापणाः।	१० गावः। अशक्तौ १६।४११॥ कार्षापणाः।
	अज्ञानात् चान्द्रायणद्वयम्। एतदष्टधाभ्यस्तविषयम्। एतत् सर्वं ब्राह्मणस्य। क्षत्रियादौ पादपादहानिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
चाण्डालश्वपचक्षत्तृसूतवैदेहकमागधायोगवानामन्यावसायिनामन्नभक्षणम्।	ब्राह्मणस्य कामतः सकृद्भोजने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	बलाद्भोजने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अज्ञानतोऽष्टचत्वारिंशद्वारभोजने द्वादशवार्षिकव्रतम्। ज्ञानतश्चतुर्विंशतिवारभोजने एतदेव।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	ज्ञानतोऽष्टचत्वारिंशद्वारभोजने चतुर्विंशतिवार्षिकव्रतं अन्यच्छायैता च।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	सकृत्ज्ञानत आमान्नभोजने त्रिरात्रोपवासः। सर्वत्र क्षत्रियादीनां पादपादहानिः।		१॥० कार्षापणः।	यथाशक्ति।
	आपदि पक्वान्नभोजने क्षत्रियस्य सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य षड्रात्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य त्रिरात्रम्।	•	१॥०कार्षापणः।	यथाशक्ति।
चाण्डालपतितादीनामुच्छिष्टान्नभक्षणम्।	द्विजस्य पराकः।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
	शूद्रस्य कृच्छ्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयं कामतो द्विगुणादिकम्।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अथ सामान्याभोज्यान्नभोजनम्।	त्र्यहोपवासः। एतत् सकृदज्ञानविषयम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादह्रानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभोज्यान्नानि यथा। अनधीतवेदाध्ययनान्नम्। ग्रामयाजिहोतृकयज्ञान्नम्। स्त्रीक्लीबबहुनरयज्ञान्नम्। मत्तक्रुद्धातुराणामन्नम्। केशेन कीटेन वा सह पक्वान्नम्। कामतः पादस्पृष्टमन्नम्। भ्रूणघ्नादिपतितावेक्षितान्नम्। रजस्वलास्पृष्टान्नम्। पतत्रिणावलीढमन्नम्। शुना स्पृष्टमन्नम्। गवाघ्रातमन्नम्। घुष्टान्नम्। घोषणया दत्तमन्नमित्यर्थः। गणान्नम्। मठशालागणसंघान्नमित्यर्थः। गणिकान्नम्। विद्वज्जुगुप्सितान्नम्। स्तेनान्नम्। गायनान्नम्। तक्षान्नम्। वार्द्धुषिकान्नम्। दीक्षितान्नम्। दीक्षणीययागानन्तरं यज्ञसमाप्तिपर्यन्तं तद्यागकर्तुरन्नमित्यर्थः। कदर्य्यान्नम्। रज्ज्वादिना बद्धस्यान्नम्। पायोनिगडयुक्तस्यान्नम् अभिशस्तस्यान्नम्। क्लीबान्नम्। पुंश्चल्यन्नम्। दाम्भिकान्नम्। छद्मना धर्मचारिणोऽन्नमित्यर्थः। शुक्तान्नम्। पर्य्युषितान्नम्। शूद्रोच्छिष्टान्नम्। चिकित्सकान्नम्। व्याधान्नम्। क्रूरान्नम्। उच्छिष्टभोजिनामन्नम्। उग्रान्नम्। दारुणकर्मणो जातिविशेषस्य वा अन्नमित्यर्थः। सूतिकोद्देशेन पक्वान्नम्। पर्य्याचान्तम्। आचमनव्यवहितान्नमित्यर्थः एकपंक्तिस्थानन्यानश्नतः यत्रार्थे भुञ्जाने केनचिदाचमनं क्रियते तत् पर्य्याचान्तमिति कुल्लूकभट्टः। अनर्चितान्नम्। [illegible]वज्ञया दत्तमन्नमित्यर्थः। वृथामांसम्। अवीरान्नम्। द्विषदन्नम्। नगराधिपान्नम्	एतेषामभोज्यानामन्यतमान्नभक्षणे पूर्वोक्तस्त्र्यहोपवासः। एष सकृदज्ञानविषयः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादह्रानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
पतितान्नम्। अवधूतान्नम्। अवधूसहितान्नमित्यर्थः। पिशुनान्नम्। अनृतिनामन्नम्। कूटसाक्ष्यादानमित्यर्थः। यज्ञफलविक्रायकान्नम्। शैलूषान्नम्। तुन्नवायान्नम्। कृतघ्नान्नम्। कर्म्मारान्नम्। निषादान्नम्। रङ्गावतारकान्नम्। स्वर्णकारान्नम्। वेणुजीविनामन्नम्। लौहविक्रायकान्नम्। श्ववतामन्नम्। आखेटकाद्यर्थं शुनः पोषकाणामन्नमित्यर्थः। शौण्डिकवृत्तिद्विजान्नम्। चैलनिर्णेजकस्यान्नम्। वस्त्रधावकस्यान्नमित्यर्थः। रञ्जकान्नम्। कुसुम्भादिना वस्त्ररागकारकस्यान्नमित्यर्थः। नृशंसान्नम्। गृहस्थितोपपतिकान्नम्। उपपतिमर्षकान्नम्। गेहे जातं भार्य्याजारं यो सहते तेषामन्नमित्यर्थः। स्त्रीजितान्नम्। अनिर्द्दशं प्रेतान्नम्। अनिर्गताशौचस्य सूतिकान्नमित्यर्थः। अतुष्टिकरान्नञ्च ॥३०॥	एतेषामभोज्यानामन्यतमान्नभक्षणे पूर्व्वोक्तत्र्यहोपवासः। एष सकृदज्ञानविषयः।	•	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
चाण्डालादिपतितसृष्टान्नभक्षणम्। अत्र पतितपदं सर्व्वधर्म्मबहिष्कृतपरं तथापि यवनादिम्लेच्छपरं उच्छिष्टान्नभोजनप्रकरणे तथा लिखनात् अतएव चाण्डालसृष्टान्नभक्षणप्रतिज्ञायां पतितपदं पृथक् न लिखितम्।	प्राजापत्यम्। एतत्सकृदज्ञाने ब्राह्मणविषयम्। ज्ञाने द्विगुणम्। अभ्यासे तु प्रायश्चित्तावृत्तिः। क्षत्रियादीनां पादपादहानिः। एतत्कुम्भादिष्वपि ज्ञेयम्। रजकादिसृष्टान्नभक्षणे तु एतदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
पतितस्पर्शे अज्ञातस्यान्नभोजनम्।	याज्ञवल्क्योक्तचतुरहःसाध्यं तप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	१॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः।			
	अत्यन्ताभ्यासे चान्द्रायणम्। क्षत्रियादीनां पादपादहानिः। चाण्डालादिस्पर्शे एतद्बोधितव्यम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
शूद्रादिस्पृष्टान्नस्य केशकीटोपहतान्नस्य च भक्षणम्।	एकोपवासः।	•	१० पणाः।	यथाशक्ति।
स्वपाकान्नभक्षणम्। तत्र देवतापितृतिथिभ्यश्चावर्जितान्नम्।	प्राणायामत्रयम् घृतमात्रभोजनञ्च। एतदज्ञानतः। ज्ञानतो द्विगुणम्।	•	१० पणाः।	यथाशक्ति।

अघोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
हयमांसभक्षणम् । तत्तु पितृदेवार्सनरहितं मांसम् ।	प्राजापत्यव्रतम् । एतद्ब्राह्मणस्य । क्षत्रियादीनां पादपादह्रानिः । अभ्यासे प्राजापत्यावृत्तिः । एतत् रोगिदैवपित्र्यकर्मनिमन्त्रितेतरविषयम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
सामान्याभक्ष्यमांसभक्षणम् ।	सप्तरात्रयवागूपानम् । एतत् सकृदज्ञाने । ज्ञानतो द्वैगुण्यम् । क्षत्रियादीनां पादपादह्रानिः । एतदभ्यासे प्रायश्चित्तावृत्तिः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
अश्वगोकुञ्जरोष्ट्रशशकादिपञ्चनखातिरिक्तपञ्चनखक्रव्यादग्राम्यकुक्कुटानां मांसभक्षणम् । विड्वराहनरमांसभक्षणञ्च ।	ब्राह्मणानां सकृदज्ञानतः प्राजापत्यम् । पुनरुपनयनञ्च । ज्ञाने तु द्वैगुण्यम् । अभ्यासे उपनयनसहितप्रायश्चित्तावृत्तिः । उपनयनाशक्तौ चान्द्रायणं तदशक्तौ धेन्वष्टकम् । क्षत्रियादीनां पादपादह्रानिः ।	१ धेनुः ।	३ कार्षापणाः ।	अनडुद्वत्सतरौ । ६ कार्षापणाः । वासो
हंसमद्गुकाकोलकाकचञ्चरीटमत्स्यादबलाकाशुकसारिकाचक्रवाकप्लवकोकिलविष्करजालपादसारसदात्यूहभासकोकिलखञ्जनभुजगानामन्यतमस्य मांसभक्षणम् ।	विप्रस्याज्ञानतः सकृद्भोजने त्रिरात्रोपवासः । ज्ञानतो द्वैगुण्यम् । ज्ञानाभ्यासे प्रायश्चित्तावृत्तिः । क्षत्रियादीनां पादपादह्रानिः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
मत्स्यभक्षणम् ।	विप्रस्य कामतस्त्र्यहोपवासः । अकामत एतदर्द्धम् । क्षत्रियादीनां पादपादह्रानिः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
शुष्कमांस-गर्भशय्याभूम्यन्तर्गतपक्वमांसजीर्णपक्वमांससूनामांसशुष्कमांसानामन्यतमस्य भक्षणम् । सूना घातनस्थली तद्भवं मांसम् ।	कामतः सकृद्भक्षणे त्र्यहोपवासः । अकामत एतदर्द्धम् । अभ्यासे प्रायश्चित्तावृत्तिः । एतत् ब्राह्मणस्य । क्षत्रियादीनां पादपादह्रानिः ।	० ०	१॥० कार्षापणः । ॥० पणाः ।	यथाशक्ति । यथाशक्ति ।
चटकां पञ्चपर्णेषु च कौलिकमांससम्भोगः क्षुरकर्म च ।	एकाहोपवासः । अभ्यासे प्रायश्चित्तावृत्तिः । एतद्ब्राह्मणस्य । क्षत्रियादीनां पादपादह्रानिः ।	०	॥० पणाः ।	यथाशक्ति ।
वृथापायसपूपशष्कुलीकृसरसंयावशिग्रुलोहितव्रश्चनिर्यासशिग्रुप्रसवानां भक्षणम् ।	कामतस्त्र्यहोपवासः । अज्ञानतस्तदर्द्धम् । एतद्ब्राह्मणस्य । क्षत्रियादीनां पादपादह्रानिः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
एकाकिमिष्टान्नभक्षणम् ।	एकाहोपवासः । अभ्यासे द्वैगुण्यम् ।	०	॥० पणाः ।	यथाशक्ति ।
पक्वे शाकपर्युषितादधिवर्ज्ज्यमक्षारलवणभक्षणम् ।	अज्ञानत एकाहोपवासः । ज्ञानतस्त्र्यहोपवासः । अभ्यासे द्वैगुण्यम् ।	० ०	॥० पणाः । १॥० कार्षापणः ।	यथाशक्ति । यथाशक्ति ।
वाग्दुष्टभावदुष्टभाजनपक्वद्रव्यभक्षणम् ।	अभ्यासे त्रिरात्रयावकपानम् ।	०	॥० पणाः ।	यथाशक्ति ।
शूद्रभाजने भिन्नकांस्ये च भोजनम् ।	अहोरात्रोपवासः पञ्चगव्यपानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
मूर्व्वीभक्षणम् ।	द्वादशरात्रं पयःपानम् ।	सपादधेन्वसम्भवात् १ धेनुः ।	३॥० कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ घूर्णिदानम् ।	दक्षिणा ।
लशुनपलाण्डुगृञ्जनभक्षणम् । कवकरसादिभिर्लशुनादितुल्यद्रव्यभक्षणञ्च ।	ज्ञानतश्चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	अज्ञानात्तप्तकृच्छ्रम् ।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः ।	११।० कार्षापणाः ।	यथाशक्ति ।
	चिरतराभ्यासे संवत्सरयावकपानम् । एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रकृतव्रतस्य पादः ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
सजातीयमृतसूतकिनां पक्वान्नभक्षणम् ।	ज्ञानतः प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अज्ञानात् त्र्यहोपवासः ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	अभ्यासे द्वैगुण्यादिकम् ।			
मृतसूतकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम् ।	विप्रस्यामान्ने प्राणायामः । क्षत्रियस्यामान्ने शतगायत्रीजपः । वैश्यस्यामान्ने पञ्चशतगायत्रीजपः । शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः । अभ्यासे द्वैगुण्यम् ।			
मृतकिसूतकिजलपानम् ।	ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः । एतत् सकृदज्ञाने ज्ञाने तु द्वैगुण्यम् । अभ्यासे त्वावृत्तिः । तज्जलस्पर्शे स्नानमात्रम् । क्षत्रियादीनां पादपादहानिः ।	•	॥० पणाः ।	यथाशक्ति ।
नवश्राद्धान्नभोजनम् । नवश्राद्धन्तु साग्नीनां चतुर्थपञ्चमनवमैकादशाहक्रियमाणं निरग्नीनान्तु आद्यश्राद्धमात्रम् ।	चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
प्रथममासिकश्राद्धान्नभोजनम् ।	पराकः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
त्रिपक्षे प्रेतश्राद्धान्नभोजनम् ।	अतिकृच्छ्रम् ।	३ धेनवः ।	८ कार्षापणाः ।	यथाशक्ति ।
द्विमासादिषण्मासपर्य्यन्तं प्रेतश्राद्धान्नभोजनम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
षण्मासादूर्द्ध्वमब्दपर्य्यन्तं प्रेतश्राद्धान्नभोजनम् ।	पादकृच्छ्रम् ।	•	१ कार्षापणः ।	यथाशक्ति ।
पुनराब्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम् । एतत् स्मार्त्तमतं शूलपाणिमते तु द्वितीयसांवत्सरिकान्नभोजनम् ।	एकाहोपवासः ।	•	३० पणाः ।	यथाशक्ति ।
ब्रह्मचार्यन्तरितहस्तदत्तानां पक्वहस्तदत्तानां शूद्रादत्तामाषमूलतैललवणव्यञ्जनपानीयपायसमाक्षिकक्षीरगोरसमात्राणां भक्षणम् ।	द्वादशाह्यमातपनम् । एतत् ज्ञानतः । अज्ञानादर्द्धम् । लोहपात्रेण परिवेशनेऽप्येतदेव प्रायश्चित्तं ज्ञेयम् । एतद् ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः ।	•	१ कार्षापणः ।	यथाशक्ति ।
अकृतापोशानस्य अकृतमौनस्य च भोजनम् ।	अष्टोत्तरशतगायत्रीजपः । एतद्विज्ञानाभावविषयम् ।	•	•	•
अकृताचमनस्य पानभोजनम् ।	अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा । अभ्यासे द्विगुणादि । एतत् कटुकषायताम्बूलेक्षुव्यतिरिक्तभोजनविषयम् ।	•	३० पणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ सुवर्णदानम्।	दक्षिणा।
यज्ञोपवीतरहितकर्त्तृकान्नभोजनम्।	स्नानं मनसा गायत्रीजपः उपवासश्च।	०	॥० पणाः।	यथाशक्ति।
रेतोमूत्रपुरीषाणामन्यतमस्य भक्षणम्।	ज्ञानतश्चान्द्रायणम्।	८ धेनवः। सार्द्धसप्तधेन्वसम्भवात्	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११॥० कार्षापणाः।	यथाशक्ति।
	बलात्कारे प्राजापत्यम्। सर्व्वत्र द्विजातीनां पुनः संस्कारश्च।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
विण्मूत्रादिदूषितफलादिभक्षणम्।	संसर्गमात्रे कृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सन्निकृष्टे अर्थात् भक्ष्यसंसर्गे कृच्छ्रार्द्धम्। एतत् रसाद्यास्वादनानुपलम्भपक्षे अज्ञानतः सकृद्विषयम्। ज्ञानतो द्विगुणम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	रसाद्युपलम्भे तु गौतमोक्तमहत्कृच्छ्रं द्वादशाहसाध्यम्। अज्ञानत उपलम्भे अर्द्धम्। क्षत्त्रियादीनां पादपादहानिः।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११॥० कार्षापणाः।	यथाशक्ति।
मृत्कीटभोजनम्।	अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे याज्ञवल्क्योक्तचतुरहसाध्यतप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः	यथाशक्ति।
ब्रह्मचारिणां मधुमांसभोजनम्।	ज्ञानतः प्राजापत्यम्। अज्ञानात् अर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणामामिषभाण्डपक्वान्नभोजनम्।	त्र्यहं कुशमूलविपक्वक्षीरपानमात्रम्। एतदज्ञानतः।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्विगुणम्।	०	२ कार्षापणौ।	यथाशक्ति।
देवतातिथिभृत्यादिवर्जनभोजनम्।	अभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अस्थ्यादिदूषितान्नभोजनम्। अस्थि दोऽत्राभ्यास्थिमात्रवर्जनम्।	घ्रात्वार्कमर्शयित्वा घृतमात्रप्राशनम्।	०	॥० पणाः।	यथाशक्ति।
मत्स्यकण्टकशम्बूकशङ्खशुक्तिकपर्द्दकभक्षणम्।	पञ्चगव्यमात्रभक्षणम्।	०	॥० पणाः।	यथाशक्ति।
पुंसवनसीमन्तोन्नयनकर्म्मणि भोजनम्।	ज्ञानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	अज्ञानाभ्यासे तदर्द्धम्।	८ धेनवः।	११।०कार्षापणाः	यथाशक्ति।
	सकृदज्ञाने विप्रस्य कृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सकृज्ज्ञाने द्विगुणं कृच्छ्रार्द्धम्।	०	१॥०कार्षापणः।	यथाशक्ति।
जातकर्म्मादिसंस्कारान्नभोजनम्।	अज्ञानतोऽसपिण्डानां दशाहमध्ये सान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्विगुणम्।	०	२ कार्षापणौ।	यथाशक्ति।
भोजनकाले गुदस्रावः।	अहोरात्रमुषित्वा पञ्चगव्यपानम्। एतत् सकृद्विशीर्णमात्रे।	०	॥० पणाः।	यथाशक्ति।
	पायुस्रावागमने त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
भोजनकाले मृतसूतकाद्यशौचे तदन्नभक्षणम्।	ग्रासभोजने अहोपवासः।	०	॥० पणाः।	यथाशक्ति।
	समस्तान्नभोजने त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
	अभोजने स्नानमात्रम्।			
तैलाभ्यङ्गादियागार्थस्नातकस्य भोजनम्।	स्नात्वा अष्टोत्तरशतगायत्रीजपः। अन्यार्थे प्रायश्चित्ताहुतिः।	०		

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णिदानम् ।	दक्षिणा ।
परिहितनीलीवस्त्रस्य भोजनम् ।	अज्ञानतस्त्रिरात्रोपवासः ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
स्वकीयोच्छिष्टभोजनम् ।	कृच्छ्रपादः । एतत् सकृदज्ञानतः ।	•	॥० पणाः ।	यथाशक्ति ।
	अभ्यासे द्वैगुण्यादिकम् । त्यक्तभाजने भोजनेऽप्येवम् ।			
ब्राह्मणकर्तृकब्राह्मणोच्छिष्टभोजनम् ।	महाव्याहृतिभिरामन्त्र्य जलं पीत्वा उपवसेत् ।	•	॥० पणाः ।	यथाशक्ति ।
	एतत् सकृदज्ञानतः ।			
	ज्ञानात् द्वैगुण्यम् ।	•	१ कार्षापणः ।	यथाशक्ति ।
ब्राह्मणकर्तृकक्षत्रियोच्छिष्टभोजनम् ।	सकृदज्ञाने त्र्यहं ब्राह्मीरसविपक्वक्षीरपानमात्रम् ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	ज्ञाने द्वैगुण्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणकर्तृकवैश्योच्छिष्टभोजनम् ।	सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चलापानञ्च ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणकर्तृकशूद्रोच्छिष्टभक्षणम् ।	सकृदज्ञाने षड्रात्रोपवासः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम् ।			
	ज्ञानाभ्यासे चान्द्रायणम् ।	८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	क्षत्रियादीनां पादपादहानिः ।			
	एतच्च पितृज्येष्ठभ्रातॄणामुच्छिष्टव्यतिरिक्तविषयं तेषामुच्छिष्टस्यभोज्यत्वात्			
बिडालकाकमूषिकनकुलश्वगवां उच्छिष्टभोजनम् ।	त्र्यहोपवासः ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	एतत् सकृज्ज्ञानतः ।			
	अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः ।	•	॥० पणाः ।	यथाशक्ति ।
	ब्रह्मसुवर्चला तु पीतकुसुमसूर्य्यावर्त्तः ।			
	अत्यन्ताभ्यासे अतिकृच्छ्रम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्य कुत्सितपङ्क्तौ भोजनम् । पङ्क्तेः कुत्सितत्वन्तु निन्दितब्राह्मणाद्युपवेशनेन बलादिना पङ्क्तिभेदमन्तरेण च भवति ।	अहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च ।	•	॥० पणाः ।	यथाशक्ति ।
	एतत् ज्ञानतः ।			
	क्षत्रियपङ्क्तौ भोजने नक्तव्रतम् ।	•	।० पणाः ।	यथाशक्ति ।
	वैश्यपङ्क्तौ एकरात्रोपवासः ।	•	॥० पणाः ।	यथाशक्ति ।
	शूद्रपङ्क्तौ त्रिरात्रोपवासः ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
पङ्क्तिषु एकस्योत्थाने भोजनम् ।	द्वादशसाध्यमालापनम् ।	•	१ कार्षापणः ।	यथाशक्ति ।
	एतद्ब्राह्मणस्य ।			
	क्षत्रियादीनां पादपादहानिः ।			
	एतज्ज्ञानतः सकृत् । अज्ञानतोऽर्द्धम् ।			
सुराभाजनस्थजलपानम् ।	पक्षं यावकपानम् । एतज्ज्ञानतः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अज्ञानतोऽर्द्धम् ।			
मद्यभाण्डस्थजलपानम् ।	सप्तरात्रं यावकपानम् । एतज्ज्ञानतः ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	अज्ञानतोऽर्द्धम् ।			
	सुरासंस्पृष्टरेतोमूत्रादिदूषितजलादिपाने तु चतुरहसाध्यं तप्तकृच्छ्रम् ।	सपादधेन्वसम्भवात् २ धेनू ।	३॥० कार्षापणाः ।	यथाशक्ति ।
	एतदपि ज्ञानपूर्वकाभ्यासे ।			
चण्डालकूपभाण्डोदकपानम् ।	ब्राह्मणस्य सान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	क्षत्रियस्य प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	वैश्यस्य प्राजापत्यार्द्धम् ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	शूद्रस्य प्राजापत्यपादः ।	•	॥० पणाः ।	यथाशक्ति ।
	एतत् सर्व्वं ज्ञानतः ।			
	अज्ञानादेतस्यार्द्धम् ।			
	आपत्काले तु पूर्व्वमुपोष्य पञ्चगव्यपानम्	•	॥० पणाः ।	यथाशक्ति ।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णिदानम्।	दक्षिणा।
चण्डालस्पृष्टक्षीरजलादिपानम्।	त्रिरात्रमुपोष्य पञ्चगव्यपानम्। एतत् ज्ञानत.।	•	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानात् द्वादशमाध्यमात्मपनम्।	•	१ कार्षापणः।	यथाशक्ति।
अन्त्यजखानितकूपादिजलपानम्।	उपवासपूर्वकपञ्चगव्यपानम्। एतदज्ञानत:	•	॥० पणाः।	यथाशक्ति।
	ज्ञानात् द्विगुणम्।	•	१ कार्षापणः।	यथाशक्ति।
अन्त्यजभाण्डस्थजलादिपानम्	ब्राह्मणस्य द्वादशसाध्यं ब्रह्मकूर्चं व्रतम्। एतत् अज्ञानत:। ज्ञानतो द्विगुणम्।	•	१ कार्षापणः।	यथाशक्ति।
	शूद्रस्य नोपवासः पञ्चगव्यपानमात्रम्। ब्रह्मकूर्चं यथा। "अहोरात्रोषितोभूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चविधिः स्मृतः॥" पञ्चगव्यं यथा। "गोमूत्रं द्विगुणं मूत्रं सर्पिर्विद्याच्चतुर्गुणम्। क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि॥" अथवा। "गोमूत्रमापकान्यष्टौ गोमयस्य तु षोड़श। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्त्तिताः॥ गोमूत्रवद्घृतस्योक्तास्तदर्द्धेन कुशोदकम्॥"	•	॥० पणाः।	यथाशक्ति।
शूद्रोदकपानम्।	उपोष्य बिल्वपद्मपलाशकुशानामुदकमात्रपानम्। एतद्द्वादशसाध्यं ज्ञानतः सकृत्पाने। अज्ञानादर्द्धम्। नवभाण्डोदकपाने प्रायश्चित्ताभावः।	•	१ कार्षापणः।	यथाशक्ति।
धीतशेषपानीयपानम्। केवलवामहस्तेन जलपानञ्च।	त्रिरात्रोपवासः। एतच्च ज्ञानतः।	•	१॥०कार्षापणः।	यथाशक्ति।
	अज्ञानतोऽर्द्धम्।	•	॥० पणाः।	यथाशक्ति।
	एतत् प्रायश्चित्तं आचमनागमनादिष्वपि ज्ञेयम्।			
	शूद्रपीतशेषजलपाने तु ब्राह्मणस्य चान्द्रायणम्।	साद्धैसप्तधेन्वस-म्भवाम्ल्धेनवः।	२२॥०, कार्षापणाः।	यथाशक्ति।
मद्यादिजलपानम्।	सचेलस्नानम्। उपवासश्च।	•	॥० पणाः।	यथाशक्ति।
आपदि। कूपजलाहरणार्थं चर्मस्थजलं द्रोणीजलं स्नानादिकोपस्थजलञ्च।	एतत् सकृज्ज्ञानतः। आपदि दोषाभावः।			
विण्मूत्रसंस्पृष्टकूपजलपानम्।	त्रिरात्रोपवासः। एतदज्ञानतः।	•	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञानतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	तथा।
विण्मूत्रसंसृष्टकुम्भस्थजलपानम्।	अज्ञानतः सान्तपनम्। ज्ञानतो द्विगुणम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
मद्यदूषितजलपानम्। एतत् मानुषेतरास्थिपञ्चनखशवदूषितकूपजलपानपरम्।	ब्राह्मणस्य त्रिरात्रोपवासः।	•	१॥० कार्षापणः।	यथाशक्ति।
	क्षत्रियस्य द्व्यहोपवासः।	•	१ कार्षापणः।	यथाशक्ति।
	वैश्यस्यैकाहोपवासः।	•	॥० पणाः।	यथाशक्ति।
	शूद्रस्य नक्तम्।	•	।० पणाः।	यथाशक्ति।
	सर्व्वेषां व्रतान्ते पञ्चगव्यपानम्। एतत् ज्ञानतः। अज्ञानतोऽर्द्धम्। एतदक्लिन्नशवे।			
	ज्ञानतः क्लिन्ने षड्रात्रोपवासः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतत् सर्व्वं मानुषशवेतरपरम्। मानुषशवे द्विगुणम्।			
	ज्ञानाभ्यासे पराकः।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अज्ञानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२४॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णिदानम्।	दक्षिणा
अपेयक्षीरपानम्। तत्क्षीरविकारपानञ्च। अपेयक्षीरं यथा। अनिर्दशानां गोमहिष्यजागीनां क्षीरम्। औष्ट्रं ऐकशफं आविकञ्च। सन्धिनीक्षीरम्। सन्धिनी वृषाक्रान्ता। विवत्साक्षीरम्। अरण्यमृगीक्षीरम्। स्त्रीक्षीरम्। सवत्साक्षीरम्। यमसूक्षीरम्। विवत्साया अन्यवत्सायाश्च क्षीरम्। मथितक्षीरम्। कागवञ्जं हस्तिनीक्षीरम्। अमेध्यभुजः क्षीरम्। मद्यादिदूषितस्तनीक्षीरञ्च।	ज्ञानतोऽभ्यासे पक्षं यावकपानम्। अज्ञानतोऽर्द्धम्। क्षत्रियादौ पादपादहानिः। अत्र उष्ट्रीक्षीरमानुषीक्षीरपाने पुनरुपनयनञ्च। इति अभक्ष्यभक्षणप्रायश्चित्तम् ॥०॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ स्तेयम्। मणिमुक्ताप्रवालताम्रमयलौहकांस्योपलानां हरणम्।	द्वादशाहं कणभक्षणम्। तत् षडुपवासात्मकम्। अपहृतद्रव्यं स्वामिने दत्त्वैतत् करणीयम्। अत्र च सकृदभ्यासकालदेशद्रव्यस्वाम्यपहर्तृगुणदैन्याद्यपेक्षया उत्कृष्टापकृष्टद्रव्ययोर्वैषम्यदोषः समयनीयः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
रजताश्वगोभूमिकन्यानां सकृत् हरणम्। एतत् ब्राह्मणसम्बन्धिविषयम्। अत्र कन्यापदं अधमकन्यापरम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२४० कार्षापणाः।	यथाशक्ति।
उक्तेतरक्षुद्रपशुहरणम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे चान्द्रायणम्।	८ धेनवः।	२४० कार्षापणाः।	यथाशक्ति।
धान्यान्नधनानां हरणम्। अन्नं कृतान्नम्। धनं गवादि।	अब्दकृच्छ्रम्। एतत् ब्राह्मणकर्तृकब्राह्मणस्वामिकदशकुम्भाधिकधान्यस्तेये ज्ञेयम्। कुम्भपरिमाणं यथा। दशद्रोणं भवेत् खारी कुम्भोऽपि द्रोणविंशतिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
		•	१२० कार्षापणः।	यथाशक्ति।
	द्विकालभोजनोचितभक्ष्यभोज्यान्नहरणे त्रिरात्रं पञ्चगव्यपानमात्रम्। भक्ष्यं मोदकादि। भोज्यमन्नादि।			
	एककालभोजनोचितान्नहरणे एकरात्रं पञ्चगव्यमात्रपानम्। धनमपि एतत्परिमाणधान्यमूल्यमवसेयम्।	•	३० पणाः।	यथाशक्ति।
मनुष्यादिस्तेयम्। तथा दासदासीक्षेत्रगृहकूपवापीजलानां हरणम्।	चान्द्रायणम्। क्षेत्रादीनामु उपयोगातिशयाद्भ्यासापेक्षयास्यैव प्रायश्चित्तं गुरुलाघवमिति।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२४० कार्षापणाः।	यथाशक्ति।
गुडादिस्तेयम्। आदिना कार्पासमणिचर्मधान्यवस्त्रादी मधुतैलगव्यायस्कोपानत्काष्ठलौहताम्रसीसकादयः।	कृच्छ्रपादः। एतत् सकृद्धरणविषयम्। अभ्यासे द्विगुणम्। अत्र किञ्चिदधिकद्रोणमात्रस्य धान्यस्य तावद्धान्यमूल्यगवाद्येर्वापि हरणे एतद्[illegible]म्।	•	३० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
धान्यादिस्तेयम्। धान्यादिना काष्ठतृणवेणुचर्मामिषेक्षुतक्रमूलपुष्पवेदलमूलगन्धानां ग्रहणम्। वेदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्यादिः। अस्यापवादः। धान्येयमनये काष्ठमन्येयच्च तृणं गवे।	त्रिरात्रोपवासः। धान्यादीनां हरणे मासैकव्रतम्। मासार्द्धव्रतञ्च। अङ्गमुनिना यदुक्तं तत् कालदेशापहर्तृस्वामिगुणदोषतारतम्यात् न्यूनाधिक्यापेक्षया द्रव्यापहारे च वेदितव्यम्।	•	१।० कार्षापणः।	यथाशक्ति।
जीविकाहरणम्।	यस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्।			
	अल्पहस्त्यपहारे चान्द्रायणम्। अत्र शीतमाधवमते मणिमुक्तादिकं समुद्भवाणि प्रागाधानि च संयोज्य यथोक्तपादाद्यंशादिव्यवस्थोहनीया।	सार्द्धसप्तधेन्वशक्तौ वात् ८ धेनवः।	१२।० कार्षापणाः।	यथाशक्ति।
देवद्रव्यापहरणम्।	संवत्सरमप्सु मज्जनं पयसमर्पणावसानञ्च। यत्र गुरुप्रायश्चित्तं मुन्यन्तरोक्तं तदत्यन्ताभ्यास उत्तमसन्न्यादपेक्षया समूह्यम्। इति स्तेयप्रायश्चित्तम् ॥७॥			
अथ अगम्यागमनम्। तत्र सवर्णासु अन्यजनस्त्रीगमनम्। तत्र ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्।	प्रथमगमने त्रैवार्षिकव्रतम्। द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ ११ कार्षापणाः।
	अश्रोत्रियनिर्गुणभार्य्यागमने द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ ११।/११ कार्षापणाः।
क्षत्रियस्य क्षत्रियभार्य्यागमनम्।	द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे वैगुण्यादिकम्।	३० धेनवः।	९० कार्षापणाः।	१० गावः। अशक्तौ ११।/११ कार्षापणाः।
वैश्यस्य वैश्यभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८/७ कार्षापणाः।
शूद्रस्य पञ्चयज्ञानुष्ठायिन्यायहतशूद्रभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८/७ कार्षापणाः।
शूद्रस्यान्यशूद्रागमनम्।	षाण्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/।।। कार्षापणाः।
ब्राह्मणस्य क्षत्रियागमनम्।	सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२३ धेनवः।	६७॥० कार्षापणाः।	११ गावः। अशक्तौ १।।। कार्षापणाः।
ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च।	षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/।।। कार्षापणाः।
ब्राह्मणस्याधमशूद्रागमनम्।	चातुर्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२ धेनू।	११/० कार्षापणाः।	१ गौः। अशक्तौ १ कार्षापणः।
क्षत्रियस्य वैश्यभार्य्यागमनं सच्छूद्रागमनञ्च।	नवमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	१२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ५।० कार्षापणाः।
क्षत्रियस्याधमशूद्रागमनम्।	त्रैमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	४ धेनवः।	११।० कार्षापणाः।	२ गावौ। अशक्तौ २ कार्षापणौ।
वैश्यस्य सच्छूद्रागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८/७ कार्षापणाः।
वैश्यस्याधमशूद्रागमनम्।	सार्द्धचातुर्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	६ धेनवः।	१६॥/० कार्षापणाः।	३ गावः। अशक्तौ ३/१ कार्षापणाः।
अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याधमस्य ब्राह्मणीगमनम्।	द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्व्वङ्गनागमनोक्तकारेणमरणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्। एतद्ब्राह्मण्यापि करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
वैश्यस्याज्ञानतो ब्राह्मणीगमनम्।	नववार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। ब्राह्मण्यापि एतत् कार्य्यम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
क्षत्रियस्याज्ञानतो ब्राह्मणीगमनम्।	षाड्वार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। ब्राह्मण्यापि एतत् कार्य्यम्।	८० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
यद्यपि शूद्रस्य ब्राह्मणीगमनं महापातकत्वेन तथा क्षत्रियवैश्ययोर्ब्राह्मणीगमनमनुपातकत्वेन प्रोक्तं तथाप्यनुलोमगमनं तावदुपपातकमेव तत्प्रसङ्गादसवर्णत्वेन प्रतिलोमस्त्रीगमनप्रायश्चित्तमप्युक्तमतो न वैयर्थ्यमिति।				
शूद्रस्याज्ञानतः क्षत्रियागमनम्।	नववार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। क्षत्रियाया अप्येतत्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
वैश्यस्याज्ञानतः क्षत्रियागमनं शूद्रस्याज्ञानतो वैश्यागमनञ्च।	नवमासाधिकषाड्वार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। क्षत्रियाया वैश्यायाश्चाप्येतत्।	१०२ धेनवः।	३०६।० कार्षापणाः।	५७ गावः। अशक्तौ ५६।० कार्षापणाः।
अथ समोत्तमवर्णद्विजपुरुषव्यभिचरितसवर्णासवर्णस्त्रीगमनम्।				
तत्र ब्राह्मणस्य समोत्तमवर्णद्विजपुरुषव्यभिचरितशूद्रागमनम्।	सकृद्गमने मासार्द्धं गोमूत्रसिद्धयावकपानम्	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मासं गोमूत्रसिद्धयावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अस्या गुणाः । तुवरम् । स्वादुत्वम् । शीत- लत्वम् । वातलत्वम् । कफपित्तास्रनाशित्वं च । इति

रामवल्लभः । वेदभेदः । फागु इति प्रसिद्धः । मिथ्यावाक्यम् । इति शब्दरत्नावली ॥ मध- मार्त्तः । इति जटाधरः ॥

फल्गुदा, स्त्री, (फल्गुरिति नाम ददाति धारय- तीति । दा धारणे + कः ।) गयानदी । यथा,

"तत्र देशे गया नाम पुण्यदेशोऽतिविश्रुतः ।
नदी च फल्गुदा नाम पितृणां स्वर्गदायिनी ॥"

इति बृहद्धर्म्मपुराणे ५६ अध्यायः ॥

फल्गुनः, पुं, (फलति कार्य्यसिद्धिमवाप्नोतीति । फल निष्पत्तौ + "फलेर्गुक् च ।" उणा० ३ । ५६ । इति उनन् गुगागमश्च । फल्गुन्यां फल्गुनीनक्षत्रे जातः इति वा । "सन्धि- फल्गुन्यषाढाभ्यः ।" ४ । ३ । ३४ । इति जातार्थे- प्रत्ययस्य लुक् । "लुक् तद्धितलुकि ।" १।२।४९। इति स्त्रीप्रत्ययस्य च लुक् । सर्व्वमवशिष्टन्तु फाल्गुनशब्दे द्रष्टव्यम् ।) अर्ज्जुनः । फाल्गुन- मासः । इत्यमरटीकायां भरतः ॥ (फल्गुनी- भवे, त्रि । इति सिद्धान्तकौमुदी ॥)

फल्गुलालः, पुं, (फल्गुनीव अलतीति । अल + अच् ।) फाल्गुनमासः । इति भूरिप्रयोगः ॥

फल्गुनी, स्त्री, (फल्गुन + गौरादित्वात् ङीष् ।) नक्षत्रविशेषः । तत्र पूर्व्वफल्गुनी उत्तर- फल्गुनी च । इति भरतधृतगोवर्द्धनाचार्य्यः ॥ (यथा, महाभारते । ४ । ४४ । १६ ।

"उत्तराभ्याञ्च पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा ।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः ॥")

काकोडुम्बरिका । इति राजनिर्घण्टः ॥ (फल्- गुन्यां जाता । श्रविष्ठाफल्गुनीति अणो लुकि लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य च लुकि फल्- गुन्यषाढाभ्यां टानौ वक्तव्यौ इति वार्त्तिकोक्त- टः । टित्वात् ङीप् ।)

फल्गुवाटिका, स्त्री, (फल्गुर्वाटीव इवार्थे कन् ।) काकोडुम्बरिका । इति राजनिर्घण्टः ॥ ("गुणाद्योऽस्याः काकोडुम्बरिकाशब्दे ज्ञेयाः ॥")

फल्गुस्थाकः, पुं, (फल्गुना हस्तेनाकारेण शोभते इति । स्था + कै + कः ।) क्षीरोक- प्रभेदः । इति राजनिर्घण्टः ॥

फल्गूत्सवः, पुं, (फल्गूनामुत्सवः ।) फल्गु- करणकर्म्मविशेषोत्सवः । होलयात्रा इति ख्यातः । यथा, होलयात्रापद्धतिः ।

"गोविन्दाग्रतो फल्गु आचाहं तत् फलोत्सवम् ।
फल्गूत्सवं प्रकुर्व्वीत यथावच्च यथाविधि ॥"

फल्लं, क्ली, (फलाय निर्व्वृत्तमिति । फल + लच् ।) कुसुमम् । इति शब्दचन्द्रिका ॥

फलकी [न्] पुं, (फलकः चर्म्मवदावरणोऽस्त्यस्येति । इनि ।) मत्स्यविशेषः । इति शब्द- माला ॥ 'फलुइ' इति भाषा ।

फल्लफलः, पुं, शूर्पवातः । इति जटाधरः ॥ 'कुलार बातास' इति भाषा ॥

फाः, पुं, जम्भणः । निष्फलभाषणम् । यथा,—

"फः फौ धाम स्फारेऽपि नदा निष्फलभाषणे ॥"

इति शब्दरत्नावली ॥

हरिः । वर्द्धकः । यथा "फा रुद्रो वर्द्धकः पुमान् ।" इति विश्वः ॥

फाटकी, स्त्री, (स्फुट + ण्वुल् । ङीप् । पृषोदरा- दित्वात् साधुः ।) स्फटी । इति राजनिर्घण्टः ॥

फाणिः, स्त्री, (फाणयतीति । फण गतौ + णिच् + इन् ।) गुडः । करम्भः । इत्युणादिकोषः ॥

फाणितं, क्ली, (फण गतौ + णिच् + क्तः ।) इक्षु- वर्त्तितगुडः । चिटीति ख्यातम् । इत्यमर- भरतौ ॥ (यथा, महाभारते । १३ । ६१ । ५२ ।

"फल्गुनौ पूर्व्वसमये ब्राह्मणानामुपोषितः ।
भक्ष्यान् फाणितसंयुक्तान् दत्त्वा सौभाग्य- मृच्छति ॥")

अस्य गुणाः । गुरुत्वम् । अभिष्यन्दित्वम् । बृंहणत्वम् । कफशुक्रत्वम् । वातपित्तश्रमापह- त्वम् । मूत्रवस्तिविशोधकत्वञ्च ॥ * ॥

"इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः ।
स इक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥"

इति भावप्रकाशः ॥

(यथा च ।

"पिण्डाकर्णेऽग्नं कुर्य्यात् फाणितं मधुसंयुतम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे मेदरोगाधिकारे ॥

"फाणितं प्रस्थः सर्पिः दधिमस्तोऽक्षरामृतम् ।
तथैव सम्यगुत्तरं पिबेत् ॥"

इति चरके सूत्रस्थाने २६ अध्याये ॥)

फाण्टं, त्रि, (फणति स्मेति । फण गतौ + "क्षुब्ध- स्वान्तध्वान्तेति ।" ७ । २ । १८ । इति निपा- तनात् साधुः ।) अनायासकृतम् । इत्यमरः । ३ । १ । ८४ । कषायभेदः । यथा,—

"पिप्पल्यादौ ज्वरितः फाण्टं दद्यादिपीडिते ॥"

अपि च ।

"क्षुण्णद्रव्यपले सम्यग् जलमुष्णं विनिःक्षिपेत् ।
मृत्पात्रे कुडवोन्मितं ततस्तु स्रावयेत् पटात् ।
सोऽयं चूर्णद्रवः फाण्टो निगदितोऽभिधीयते ॥"

इति वैद्यकपरिभाषा ॥

(तथाच प्रयुक्तविधिः ।

"कषायोऽभिषुतस्तु फाण्टनामाभिधीयते ॥"

इति वाग्भटकल्पस्थाने षष्ठेऽध्याये ॥)

फालं, क्ली, (फलाय हितम् दिनम् । फल + अण् । यद्वा, फलति निष्पद्यते इति । फल + घञ् ।) फलोत्पादकम् । इति मेदिनी । ल, ११ ॥

फालः, पुं, (फलति विदार्य्यते भूमिरनेनेति । फल + करणे घञ् ।) लाङ्गलाग्रभूमिविदारक- लौहः । फलति विदीर्णैव मृत्तिकाऽनेनेति वा । तत्पर्य्यायः । कुशिकः २ । इत्यमरः । २ । ९ । १३ ॥ कृषकः ३ । फलम् ४ । इति भरतः ॥ कुशिका ५ । फालम् ६ । इति शब्दरत्नावली ॥ कुटकम् ७ । इति हेमचन्द्रः । ३ । ५५५ । महादेवः । बल- देवः । कार्पासवस्त्रे, त्रि । इति मेदिनी । ल, ११ ॥ कर्पासवसनाच्छादनादिवत् । अस्य विधि- र्यथा । [illegible] ।

"कालेषु द्वादशपञ्चपलं फालमुष्ट्वा ।
कराग्रेषु कोटिषु [illegible] ॥"

कोकिलवद् मधुरं तस्य विलापं शृण्वन्ति लोकाः।
न तत्रापि दुःखितो भवति स्म॥"
कौरीम सौवीर: । मांसोदन पश्यतां तन्-
मात्रं दैवमनिति व्यासिनिति सोऽचिन्तः॥
अथापि ममापि इत्यादिमध्ये वचनं आपस्तं
वैशम्पायन (विज्ञाति मनोऽदनीयमिति विना-
शकोऽपि: प्राग्निर्वाहोऽपाश्वावमध्यानित्यं
कार्यम्॥१॥ तत्र प्रयोगः। कौशिकवचनादिकं
नो॥ हविर्नीचवर्णसमस्तमध्यात्मकापूर्वार्ध-
होमं तदादिवत्पूर्वकुम्भपक्षादेः फाल्गुनी यात-
येत्। तत्र दाक्षिणात्यो धर्मोपास्यमादिवचनात्
यथा तथा इतिहासे एवम्,—
'ॐ मम पि वैराग्यात्माय मदेव पुनरपि।
मे मुने मर्मवेध्यां मे मुने प्रमापादिवाम्॥
भवत्कोटीनि पुरापि मतो वेदपि मुमापुरम्।
मायं पुनानि वै यथाप्यात्र मावव अथवे॥
माधेव दर्शनपातमपि विदात भव माधव॥
अथवा मुमनसैव प्रीतो भव पुनायन॥
ममापि सर्वमुनातमनावरति भाविदम्।
मत्य एव आर्षेषु म विद्यांपि मायवाः॥
अपशात्वामिमत्कोपं माधवः मुक्तिमिच्छति।
मत्वेव भञ्जयाच्याहमैतत्वापुनर्भवि॥'
इत्येवं कालनमपि अपमाधवेद्। कौशल
प्रतिवादवं विरति विषाय।
'ममपि कर्मचक्रायामनावति माधव॥
मालिदम् पुण्यदाडिलो इति मकं वरं मम।'
इत्यनेकामिमपा आदिवर्षं यासं विद्वया वन-
विहार् य इत्यव्यया युग।" इति तिथि-
तत्त्वम्॥

फाल्गुनः, त्रि, (फाल्गुन अदः।) फाल्गुनी सम्बन्धि-
भूत्यादिः। यथा, माघे। ३। २६।
"न सर्व यदि कुर्मोऽपि न भवति न मोघति।
न फाल्गुने च यदि च विदा न च वर्मते॥"

फाल्गुनः, पुं, (फालयति। फल+णिच्+उनन्।)
अर्जुनवृक्षादि। इति मुग्धबोधटीका-
भूषणम्॥

फाल्गुनः, पुं, (फल्गुनि विदारयतीति। फल्+
"फलेर्गुक् च।" उणा० ३।५६। इति उनन्
गुगागमश्च। यद्वा, फल्गुनीनक्षत्रयुक्ता पौर्णमासी
फाल्गुनी तस्यां जातः फाल्गुनः।) अर्जुनः। यथा,
महाभारते ४।४४।१६।
"उत्तराभ्यां च पूर्वाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥")
कुकुभवृक्षः। नदीभवः। मासविशेषः। अरुण-
मासः। यथा,—
"फाल्गुनस्य तु मासस्य पूर्णिमायां वरूथिनी।
सम्भूता फाल्गुने मासि सम्पूर्णे मासमासके॥"
इति कृत्यतत्त्वधृतवचनम्।
अपि च।
"फाल्गुने मासि देवी च कल्पान्तरितनि वसिष्ठः।"
इति कविपकल्पः। अथ फाल्गुनकृत्य-
कर्माणि फाल्गुनकृत्ये आलम्बनम्॥ ॥

(फाल्गुनी पौर्णमासी अस्मिन्निति। "विभाषा
फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः।" ४।२।२३।
इति अणि अस्तु।)

चैत्रादिमासिकपञ्चमासभाव्यास्त्रिकाद्यनुमासः।
फल्गुनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे
सः। इति तु प्रासिकमिदम्। अ च विशेषः।
इत्यन्याथो गौणचान्द्रः सौरश्च। यथा।
कुम्भादर्कसंस्थमध्यप्रतिपदादिदर्शान्तो मासो
गौणचान्द्रः। कुम्भस्थमादिमध्योदयार्कनक्षत्रारम्भ-
गतिकः मध्यमतिथ्यादिको मासो मौन-
चान्द्रः। कुम्भराशिस्थसूर्यसंक्रान्तिमध्यगतास्तिथयो
मासो मासः सौरः। इति मलमासतत्त्वम्॥॥
तत्पर्यायः। तपस्यः २ फाल्गुनिकः ३ फल्गुनः
४। इत्यमरभरतौ। तपस्यः ५। इति
राजनिर्घण्टः॥ ॥ तत्र मासफलम्।
"दिव्यांशः कलावतमय
मतीवचारी विमलाशयश्च।
दाता विलासी धनवानिलावी
स्यात् फाल्गुने यस्य जननं नरस्य॥"
इति कोष्ठीप्रदीपः॥
अथ फाल्गुनकृत्यम्। तत्र मासकृत्ये
फाल्गुनकृत्यमारभ्यामावास्यान्तं गोविन्द-
वत्पादानि माहं कर्तव्यम्॥ ॥ गोविन्दादि-
मासफलमन्यत्पूर्वका दिवतिथिकम्। यदि
मतीक्षितमहोत्सवकादिको महतीयो नांश्च
प्रवृत्तनवचनाप्रवर्तनात्। यदा पूर्णिमायां वा
पादिको यदि पूर्णिमात्रयादिको यदा पूर्णि-
माया प्रवृत्तसात्वापाथहादीनाम्। यदा तु
पूर्णिमायां विनायकादि यदि प्रदोषव्यापिनी
तदा यदि प्रदोषव्यापिनीति वक्तव्या॥ ॥
फाल्गुनकृष्णचतुर्दश्यां शिवरात्रिः।
"फाल्गुने कृष्णपक्षे पूर्णके द्वादशी यदि।
गोविन्दद्वादशी नाम महापातकनाशिनी॥"
महापातकनाशनी द्वादशी फाल्गुने
भविष्यति। अथ मदनद्वादशी यथा।
"महापातकनाशिनी पापि पावनि भक्ति दे।
गोविन्दद्वादशी याम्या नादि दे पुण्य वाद्भवि॥"
फाल्गुनपौर्णमास्यां दोलयात्रा। गौरचन्द्र-
जन्मो त्सवम्।
"मधौ दोलायां गतः गोविन्दं पुण्डरीकाक्षम्।
फाल्गुन्यां संगतो यात्रा गोविन्दस्य पूर्व दर्शनम्॥"
चान्द्रमसोऽप्युपकल्पितकाले विंशत्यामि॥
"फाल्गुन्यां पौर्णम्यां कुर्वीत दोलायां वा
भुले॥"
इति कृत्यतत्त्वम्॥

फाल्गुनानुजः, पुं, (फाल्गुनस्यानुजः। फाल्गुन
इति। अनु+जन्+ड।) वसन्तकालः। इति
शब्दरत्नावली॥ अर्जुनस्य कनिष्ठभ्राता च॥

फाल्गुनिकः, पुं, (फाल्गुनी पौर्णमास्यस्मिन् मासे
इति। "विभाषा फाल्गुनीश्रवणेति।" ४।२।
२३। इति ठक्।) फाल्गुनमासः। इत्यमरः।
१।४।१५॥

फाल्गुनी, स्त्री, (फल्गुनीयुक्ता पौर्णमासी।
"नक्षत्रेण युक्तः कालः।" ४।२।३।)
अण्। तत्रो ङीप्।) नक्षत्रविशेषः। पूर्वफल्गुनी।
इति मेदिनी। ३, ८८। पूर्वफाल्गुनी,
उत्तरफाल्गुनीनक्षत्रे। [illegible]
मासः॥

फि, पुं, वाक्। क्रियाद्यात्मा। क्रोधः। कोपः।
कोपः। कोपः। इति मेदिनी॥

फिरङ्गः, पुं, (फिरङ्ग इति प्रसिद्धः फिरङ्ग-
देश इति। पृ+अङ्ग।) फिरङ्गदेशः। इति
इति भरतः। मलमोदः। सुरीन्द्रः। वारा
न मुक्तः॥ इति शब्दरत्ना। वा॥
इत्यमरः॥

फिरङ्गः, पुं, (यो व्याधिः फिरङ्गदेशे
जातः।) व्याधिविशेषः। यथा,—
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः।
व्याधिरागन्तुजो ह्येष दोषाणामत्र सङ्क्रमः।
शेयस्तं लक्षयेत्तज्ज्ञ भेषजं लक्षयेत्ततः॥"
इति भैषज्यरत्नावली।
तल्लक्षणम्। अथ फिरङ्गस्य निदानम्।
"फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत्।
तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः॥
तत्र लक्षणम्॥
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः।
व्याधिरागन्तुजो ह्येष दोषाणामत्र सङ्क्रमः।
शेयस्तं लक्षयेत्तज्ज्ञ भेषजं लक्षयेत्ततः॥"
फिरङ्गस्य भेदः।
"फिरङ्गस्त्रिविधो ज्ञेयो बाह्य आभ्यन्तरस्तथा।
बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे॥"
"तत्र बाह्यः फिरङ्गः स्याद्विस्फोटसदृशोऽल्परुक्।
स्फुटितो व्रणवद्वैद्यैः सुखसाध्योऽपि स स्मृतः॥"
सन्धिष्वाभ्यन्तरः स स्यादामवातवदाचरेत्।
शोथं शूलं च कुर्यात् फिरङ्गः खलु दुःसाध्यः
पुनः॥ मुनिभिः फिरङ्गस्तु शोथ च वातो सह

शुद्धपूर्वं लवङ्गस्य तां वटीमवधूनयेत् ।
दन्तस्पर्शो यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत् पश्चाच्छाकाम्लवर्ज्यलवणं त्यजेत् ।
श्रममातपमध्वानं विधिवत् स्त्रीनिषेवणम् ।
इति कर्पूररसः ॥ १ ॥
पारदटङ्कमानः स्यात् खदिरटङ्कसम्मितः ।
आकारकरभश्चापि स्याच्चट्टङ्कयोन्मितः ॥
टङ्कयर्धमितं चौद्रं क्षौद्रं सर्वं विनिःक्षिपेत् ।
संमर्द्य तस्य सर्वस्य कुर्य्यात् सप्त वटीर्भिषक् ॥
स रोगी भक्षयेत् प्रातरेकैकामनुवा वटीम् ।
वर्ज्जयेल्लवणवौ फिरङ्गस्तस्य नश्यति ॥
इति सप्तशालिकावटी ॥ २ ॥
पारदः कर्षमात्रः स्यात्तावदेव हि गन्धकः ।
तत्तुल्या चपमात्राः स्युस्तैर्वा कुर्य्याच्च कज्ज-
लीम् ॥
तस्याः सप्त वटीः कुर्य्यात्ताभिर्धूमं प्रयोजयेत् ।
दिनानि सप्त हन्ति स्यात् फिरङ्गाख्यो न संशयः ॥
इति धूमप्रयोगः ॥ ३ ॥
गोलपुष्पबलापत्ररसैर्वै दृढमर्दितं रसम् ।
चक्राभ्यां मर्दयेत्तावत् यावत् सतो न दृश्यते ॥
ततः संस्वेदयेत्क्षारैर्वै वासरत्रयम् ।
अयेत्रयमभ्रश्च फिरङ्गस्तेन नश्यति ॥ ४ ॥
चूर्णमिश्रमथाथ यवानी निम्बाश्वमारिकाम् ।
धात्रीं च तावतीं दार्विं निम्बबीजप्रमाणिकाम् ॥
भाव्यमानमिदं चूर्णमष्टौ यावदम्भसा सह ।
फिरङ्गं नाशयत्येव बाह्यमाभ्यन्तरं तथा ॥ ५ ॥
सोपचीनिभवं चूर्णं प्राश्यमानं यथाविधिकम् ।
फिरङ्गव्याधिनाशाय भक्षयेल्लवणं त्यजेत् ॥
लवणं यदि वा त्यक्तुं न शक्नोति तदा जनः ।
सैन्धवं स हि भुञ्जीत मधुरोपरसं हि तत् ॥ ६ ॥
अष्टकर्षमितं सत्तं कुरण्टकदधेः सह ।
सम्मिश्रमर्दयेत्तत्र मधाहं गुग्गुलुं पिबेत् ॥
तथाकेकरभं कुष्ठं त्रिफलाच पृथक् पृथक् ।
अर्द्धकर्षमितं सर्वं चूर्णयित्वा तु निःक्षिपेत् ॥
तत् सर्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् पृथक् ।
मर्दयेत्तत् खादेत्कर्षमितं रसम् ॥
अतः फिरङ्गरोगोऽयमत्यायशं विनश्यति ।
अन्योऽपि फिरङ्गजोऽपि प्रशाम्यति महागदः ॥
पनहयपतः शोफो गुल्मश्च न जायते ।
वर्जयेच्च लवणमेवोपरितनिवापरम् ॥ ७ ॥
इति फिरङ्गाधिकारः ।" इति भावप्रकाशः ॥

फिरङ्गरोटी, स्त्री, (फिरङ्गप्रिया रोटी । फिर-ङ्गाणां रोटीति वा ।) रोटिकाविशेषः । पाउरोटी इति पाँउरुटि इति च भाषा । सा तु गोधूमचूर्णं तक्ररात् कृत्वा हस्तेन मर्द्दिका-कृतेन वा निर्मितं शोधनकलिकाविशेषं आच्छाद्य संमर्द्य शीघ्राकारं कृत्वा अग्निमध्ये तन्दूरपाकेन निष्पादिता भवति । इति डाक्तरबिन्दुः ॥

फिरङ्गिणी, स्त्री, (फिरङ्गदेशो जन्मस्थानत्वेना-स्त्यस्या इति । फिरङ्ग + इनि । ङीप् ।) फिरङ्गदेशोद्भवनारी । यथा,—

"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणोऽङ्गसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥"
इति भावप्रकाशः ॥

फिरङ्गी [न्] पुं, (फिरङ्ग + इनिः ।) फिरङ्ग-देशोद्भवपुरुषः । अस्य प्रमाणं पूर्वशब्दे द्रष्टव्यम् ॥

फुः, पुं, मन्त्रकम् । तुच्छवाक्यम् । इति विश्वः ॥

फुकः, पुं, (फुगित्यव्यक्तशब्देन कायति शब्दायते इति । फु + कै + क ।) पक्षी । इति शब्दचन्द्रिका ॥

फुटः, त्रि, (स्फुटतीति । स्फुट + कः । पृषोदरा-दित्वात् साधुः ।) सर्पफणा । इति हेमचन्द्रः । ४ । ३८१ ॥

फु(फू)त्, अ, अनुकरणशब्दः । इति फुत्कारशब्द-दर्शनात् । (यथा, "बालः सबला दध्नो दध्यपि फुत्कृत्य भक्षयति ।" इति प्राचः ।) तुच्छ-भाषणम् । इति केचित् ॥

फुत्करः, पुं, (फुदित्यव्यक्तशब्दं करोतीति । कृ + टः ।) अग्निः । इति शब्दचन्द्रिका ॥

फुत्कारः, पुं, (कृ + भावे घञ् । फुदित्यव्यक्तशब्दस्य कारः करणम् ।) फुत्करणम् । फु इति फुँक् इति च भाषा । फुत्कारवति पावके आहुति-निषेधो यथा, तिथ्यादितत्त्वे ।

"अकरे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठैः सञ्छन्ने फुत्कारवति पावके ॥
तद्वर्षेऽपि गुरुर्धर्म्मे तदा तिष्ठति मेदिनीम् ।
आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद्-ध्रुवम् ॥"

फुत्कृतिः, स्त्री, (फुदित्यव्यक्तशब्दस्य कृतिः कर-णम् ।) फुत्कारः । यथा, काव्यचन्द्रिका ।
"स्फुर्जत्फुत्कृतिभीतिसम्भ्रमचमत्कारस्फुरत्-सम्भ्रमाः ॥"

फुप्फुसः, पुं, फुस्फुसः । कोष्ठविशेषः । स च हृदय-वामदिक्स्थांसलमांसविशेषः । श्यामला फुल्का कापादि इति च लोके । इति सुश्रुतः । यथा,—
"शोणिताच्छ्लेष्मप्रभवानां स्थूलस्य रुधिरस्य च ।
तद्वृक्कः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥"
इति भावप्रकाशः ॥

अस्य व्याख्या । "श्यामस्य स्थानं श्यामाशयः । नाभिस्तनान्तरम् । अग्नेः स्थानं पक्वामाशयः नाभिमध्यम् । पक्वस्य स्थानं पक्वाशयः वाति-रन्ध्रः । मूत्रस्य स्थानं वस्तिः । रुधिरस्य स्थानं यकृत्प्लीहानौ । तत् हृदयं रसरक्तवाहकम-स्तुहः श्रोणितमलरूपं, फुप्फुसः च वामदिक्-स्थश्लेष्मः पुरीषाशयम् । फुफ्फुसः हृदयस्य वामपार्श्वे फुस्फुस इति ख्यातः ।" इति विजय-रक्षितः । (यथा च ।
"तदधो फुप्फुसः प्रोक्तः रक्तवाहिं च स्वच्छनम् ।
उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः ॥"
इति पूर्वखण्डे गर्भप्रकरणे शार्ङ्गधरोक्तम् ॥)

फुल्लि:, स्त्री, (फल + क्तिन् । "ति च ।" ७।४।८९ इति अत उत् ।) फलनम् । इति हेमचन्द्र-व्याकरणम् ॥

फुल्ल, विकासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) इमौ । मनयाकः । विकास इह क्रमश्च मतावपि दन्त्यान्तस्य पत्ति सत्यम् । विपूर्व्वस्मिन्नायांश्लेषरचनया विकसमित्यर्थः । फुल्लति महीकलिका । इति दुर्गादासः ॥

फुल्लः, त्रि, (फुल्लतीति । फुल्ल + अच् । यद्वा, फलतीति । ञि फला विशरणे + क्तः । "आदि-तश्च ।" ७।२।१६ । इति इडभावः । "ति च ।" ७।४।८९ । इति उत्वम् । "अनुपसर्गात् फुल्लक्षीबेति ।" ८।२।५५ । इति निष्ठा तस्य लः ।) विकसितः । इत्यमरः । ३।१।५८ । (यथा, महा-भारते । १ । १४८ । ३१ ।
"जलञ्च कुसुमैः कान्तं फुल्लैर्नलिनिराया ।")
पुष्पम् । फुल इति भाषा । यथा,—
"श्रीपञ्चम्यां श्रियं देवीं फुल्लैः संपूजयेत् सदा ।"
इति कालिकापुराणम् ॥

फुल्लदाम, [न्] स्त्री, (फुल्लानां पुष्पाणां दाम इव ।) छन्दोभेदः । यथा,—
"मो गो गो तो गो शरहयतुरगैः फुल्लदाम प्रसिद्धम् ।"
उदाहरणं यथा,—
"प्रत्यग्रोद्भासी प्रकटितकचं चञ्चलामोद कान्तं पुष्पश्रेणीभिश्छादितनलिनीभिर्व्योमसङ्गोपि-गुप्तम् ।
गुञ्जभोगैर्व्याकिरन्मणिरामीलमाकुलमध्यं मौलौ देवाराज्ये प्रतरतु परमं माधवीः फुल्लदाम ॥"
इति छन्दोमञ्जरी ॥

फुल्लफाल, पुं, (फुल्लं फलतीति । फल + अण् ।) शूर्पवातः । इति त्रिकाण्डशेषः ॥

फुल्लरीकः, पुं, (फल + "पर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकनप्रत्ययेन निपातनात् साधुः ।) देशः । सर्पः । इति संक्षिप्तसारो-णादिवृत्तिः ॥

फुल्ललोचनः, पुं, (फुल्ले विकसिते लोचने यस्य ।) मृगविशेषः । इति शब्दचन्द्रिका । प्रफुल्ल-नेत्रे, त्रि ॥

फुल्लि:, स्त्री, विकासः । इत्युणादिकोषे निष्पन्न-मा इति संक्षिप्तसारधातौ भावे ञ्यप्रत्ययेन निष्पन्नः ॥

फेनः, पुं, (स्फायते वर्द्धते इति । स्फाय + "फेन-मीनौ ।" उणा० ३ । ३ । इति नक् पे-फादे-शश्च । उणादौ नकम् । इत्यत्रापि प्रकृ-तित्वात् ।) फेनः । तरङ्गयोद्भूतिमच्छरुदार-कारवत् । फेना इति भाषा । यथा,—
"स्वःफेनबिभ्रा यस्मात् सागरं स्वर्गसिन्धवः ।"
इति पुराणम् ॥
डिण्डीरः । इत्यमरः । १ । १० । ४२ ॥ वाड़-फेना इति भाषा । अस्य पर्यायान्तरं यथा,—
"दन्तशठो व्यतीतो डिण्डीरः संप्रकीर्तितः ।
फेनो कालकानन् प्राक्तः कलाहस्तकश्च कथ्यते ॥"
इत्यायुर्वेदीयो द्रव्यगुणः ॥

[illegible]

पेचः, पुं, (पि इति रवो यस्य ।) शृगालः । इत्यमरः ।२।५।५ ॥ (यथा, कथासरित्सागरे । ४० । ५१ ।
"शृण्वती तरलौ रात्रौ वदतां चोत्सवाय सः ।
भूरायां पेचयायाश्च भूतानामाभवन्नदः ॥")
रावणः । इति मेदिनी । वे, ४४ ॥ धूर्ते त्रिलिङ्गे च, त्रि । इति शब्दरत्नावली ॥

पेचकः, पुं, (पे इति शब्देन रौतीति । रु शब्दे + मितद्र्वादित्वात् डुः ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥ (यथा, भागवते ।८।१६।७।
"यत्रैव पेच्वतिपयो मार्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं पेचराजपदोपमाः ॥")

पेल, ऋ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अपिपेलत् पिपेलतुः । इति दुर्गादासः ॥

पेलं, क्ली, (पेल्यते दूरे निक्षिप्यते इति । पेल + घञ् ।) शुक्लधातुस्फुरितम् । उच्छिष्टम् । इति शब्दरत्नावली ॥

पेलकः, पुं, (पेल + स्वार्थे संज्ञायां वा कन् ।) शुक्लधातुस्फुरितम् । इति जटाधरः ॥

पेला, स्त्री, (पेल्यते इति । पेल + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) शुक्लधातुस्फुरितम् । इत्यमरः । २ । ६ । ७६ ॥

पेलिः, स्त्री, (पेल + इन् ।) उच्छिष्टम् । इति जटाधरः ॥

पेलिका, स्त्री, (पेलिरेव । स्वार्थे कन् ।) उच्छिष्टम् । पेलाशब्दात् स्वार्थे ष्णिकप्रत्ययेन निष्पन्ना ॥

पेली, स्त्री, (पेलि + "कृदिकारादक्तिनः ।" इति पक्षे ङीष् ।) शुक्लधातुस्फुरितम् । इति शब्दरत्नावली ॥

ब

ब, बकारः । व ब अयोर्विषयाभेदत्वम् । (पवर्गस्य तृतीयवर्णश्च ।) अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं शिक्षायामौपुत्रम् । "उपूपध्मानीयानामोष्ठौ ।") तस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"बकारं शृणु चार्वङ्गि ! चतुर्वर्गप्रदायकम् ।
शरच्चन्द्रप्रतीकाशं पञ्चदेवमयं सदा ।
पञ्चप्राणमयं वर्णं त्रिबिन्दुसहितं सदा ॥"
(बकारवर्णस्याभिधानान्यत्र अवगमाय ।)
"त्रिकोणरूपिणी रेखा विश्वेशब्रह्मरूपिणी ।
मात्रा शक्तिः परा देवी आत्मतत्त्वप्रकाशिनी ॥"
अस्य ध्यानं यथा,—
"नीलवर्णां त्रिनयनां नीलाम्बरधरां पराम् ।
नानालङ्कारभूषाढ्यां देवीं द्विभुजां वरप्रदाम् ।
एवं ध्यात्वा बकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तद्वर्णनाममन्त्रो यथा,—
"सिद्धिप्रदाभिर्वर्णं दर्ध्वसिद्धिदायकदेविनाम् ।
स्वयं कुण्डलिनी देवी सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ७ ॥

अस्य नामानि यथा,—
"बो वनी भूधरो मार्गो बर्बरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्दिनी ॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः ॥
क्लेदिनी तापिनी भूमिसुगन्धिर्वलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
षष्ठापुरं वपटा च मोदको गगनं प्रति ।
पूर्वाषाढामध्यलिङ्गौ शनिः कुम्भकलोदकौ ॥"
इति नानातन्त्रशास्त्रम् ॥

बंहिष्ठः, त्रि, (अयमेषामतिशयेन बहुलः । बहुल + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति बंहि-आदेशः ।) अतिशयबहुलः । इत्यमरः ॥ (यथा, महाभारते । १२ । १२८ । १८ ।
"योऽद्रिः संपोष्य नीमत्तान् पर्यन्याय प्रय च्छति ।
उद्यतो नाम बंहिष्ठस्तृतीयः स सदागतिः ॥")

बंहीयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुलः । बहुल + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "प्रियस्थिर-स्फिरोरुबहुलेति ।" ६ । ४ । १५७ । इति बंहि-आदेशश्च ।) अतिशयबहुलः । अयमनयो-रतिशयेन बहुः इत्यर्थे बहुशब्दादीयसुप्रत्ययेन निष्पन्नः । इति मुग्धबोधमतम् ॥

बः, पुं, वरुणः । कुम्भः । इति शब्दरत्नावली ।
"बः पुमान् वरुणे सिन्धौ भगे तोये गतेऽपि च ।
गन्धने वपने तन्तुसन्ताने पुंस्त्वे वपने स्मृतः ॥"
इति मेदिनी । वे, १ । ७ ॥

तस्य साङ्केतिकनामानि यथा । युगन्धरः १ सुरभिः २ मुखविष्णुः ३ संहारः ४ वसुधाधिपः ५ । इति वीजवर्णाभिधानम् । भूधरः ६ पृष्ठवंशः ७ । इति रुद्रयामलोक्तवीजाभिधानम् ॥
अपि च ।
"बो वनी भूधरो मार्गो बर्बरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्दिनी ॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः ।
क्लेदिनी तापिनी भूमिसुगन्धिर्वलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
षष्ठापुरं वपटा च मोदको गगनं प्रति ।
पूर्वाषाढामध्यलिङ्गौ शनिः कुम्भकलोदकौ ॥"
इति तन्त्रान्तरम् ॥

बंहि, र ह वृद्धौ । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् ।) वृद्धिरत्र कुण्ठीभावः कुण्ठीकरणञ्च । र, बंहते । ह, बंहते बार्ह कुण्ठितं मान्द्यकरं । बंहते बार्ह कुण्ठितं करोतीत्यर्थः । इति दुर्गादासः ॥

बकः, पुं, (बंहते कुण्ठीभवतीति । बंह + अच् । पृषोदरादित्वात् साधुः ।) स्वनाम-ख्यातपक्षिविशेषः । तत्पर्यायः । कङ्कः २ । इत्यमरः । २ । ५ । ३३ ॥ तापसच्छद् ३ कपोतः ४ शुक्लवायसः ५ दीर्घकण्ठः ६ बकोटः ७ मत्स्यनिग्रहः ८ । इति शब्दरत्नावली ॥ दिविष्ठः ९ निस्तीरः १० चन्द्रविहङ्गमः ११ । इति त्रिकाण्ड-शेषः ॥ तीर्थसेवी १२ तापसः १३ मीन-घाती १४ गङ्गाध्यायी १५ निश्चलाङ्गः १६ दाम्भिकः १७ । इति राजनिर्घण्टः ॥ अस्य मांसस्य गुणाः ।
"शरारिवककाकाश दाबूहाः मवभावकाः ॥"
इति रत्नावली ॥
अपि च ।
"कुम्भकारककाकाकुबककौञ्चशरारिकाः ।
नन्दीमुखीमन्त्राद्याः शुनकाद्याः प्रभाः स्मृताः ॥
प्रवर्णे सलिले भ्रमात् इति तस्मात् प्रभाः स्मृताः ॥
कुक्कुटाः प्रभाश्चापि श्रोतस्याः वाहिनस्तथा ।
मनुष्या यत्र भक्ष्याश्च तस्मादनूपवासिनः ।
आनूपा मधुराः स्निग्धा गुरवो वह्निसादकाः ।
श्लेष्मलाः पिच्छलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः ॥"
इति भावप्रकाशः ॥

बकाभयालोत्पन्नः । तत्पर्यायः । द्विज-वर्णी १ पाण्डवः २ एकाकीनः ३ बकः ४ । इत्यमरः । एकाष्ठीला ६ वृकः ७ बकुलः ८ बकसः ९ । इति सहीधा । बकपुष्पः १० शिवमल्ली ११ । इति शब्दरत्नावली । काक-शीर्षः १२ मधुपुष्पः १३ शिवप्रियः १४ काक-नामा १५ बकाकुः १६ सुरक्तः १७ इस-पुष्पः १८ सुविषयः १९ वर्णवित् २० बकु-लिकः २१ । इति रत्नमाला । अगस्त्यः २२ मोहपुष्पः २३ मुनिद्रुमः २४ वङ्गारिः २५ दीर्घफलकः २६ वक्रपुष्पः २७ सुरप्रियः २८ ।
"विप्रपीतकरौचवीजिनकुसुमसंत्राहबन्धसौ-
रभ्यः ।
मधुरतिक्तरौक्षमवकाण्डवातजन्म भूगः ॥"
तथा च ।
"अस्ति द्विविधं शीर्ष त्रिदोषशं भयावहम् ।
बलावहमकेर्वेचश्च नवकावम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"अर्थाभिधुगुर्म सीर्ष वातपित्तकफापहम् ।
मलाप्रनाशयं नित्यं कषायं कटुकाञ्च च ।
दीपनं दीर्घं वात शुचिशिलीनम् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"तावत्प्र च पुष्पाणि बहुशस्तत्र चैव हि ।
बहुधाणि निर्गत्य कामुकाचरण च ॥"
इति राजतरङ्गः ॥
"बकः काहलस्थौ द्विजश्रेष्ठ इत्यपि ।
बहूनाम् द्विजानाञ्च द्विधा अशुभः ।
द्विजन्मेति दिवजार्तिः क्रुध्वते राजधर्म ॥"

[illegible]

स्माटकैरेकाशीत्या विनिहतः पूरितो भवनस्य बन्धः दीर्घप्रस्तारमिलितचक्राः स्वर्ग्यं समुद्रंख्यानं सुमशरैकनिघ्नं द्विपञ्चाशदुत्तरशतपूरितम् एकीकृतं पूर्व्वाङ्केन मिलितं इषमिश्राकरयुग्मयुक्तशेषं षोड़शाधिकद्विशतष्टताषष्टिः तत्संख्यानं पिष्टपदसंज्ञं यद्दस्य भवति तदुदयभूमिधमाङ्कपिष्टपदं यतलोचनरन्ध्रगजैः । अष्टद्विनवाष्टभिर्यथाक्रमं गुणितं पूरितं यथाक्रमं रविभूधराब्धिशरद्युयोगक्तं हारस्वप्नश्चिन्द्रतुषरविंशतिभिर्हृतं यच्छ्रम यथाक्रममायव्ययतिथिनक्षत्रपदं भवतीत्यर्थः ।

"इन्द्रचन्द्रमिति बन्धे भरण्या योगतो यथा ।
आयादयो भवन्त्यत्र यद्युमट्सिधिगुद्धिताः ॥
अथ गम्भं दीयते यद्यातदेवायाति ।
प्रत्यकृदशिवयोर्भं द्विवादं विरिसु इहमादि ।
पूर्व्वोत्तरयोर्द्वयोरश्विन्यादिभानि स्युः ।
यत्र तु शेषो नास्ति तत्र हारकाङ्कः शेषः ।
शेषाङ्केन मखे शोध्ये शेषाभावे तु हारकात् ।
अङ्कादेव गतं शोध्यमिति तत्त्वविदाम्मतम् ॥
इत्युक्तत्वात् ॥
अथाधिकं न कर्त्तव्यं व्ययमायाधिकं शुभम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥

षोड़शप्रकारा रतिबन्धा यथा, रतिमञ्जर्य्याम् । ४०—४१ ।
"पद्मासनो नागपदो लतावेष्टोऽर्द्धसम्पुटः ।
कुलिशं सुन्दरश्चैव तथा केशर एव च ॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः ।
क्षुब्धो वै धेनुकश्चैव ह्युत्कण्ठश्च ततः परः ।
सिंहासनो रतिनागो विद्याधरस्तु षोड़श ॥"
(एतेषां लक्षणानि तत्रैव । ४२-५७ । उक्तानि । यथा,—
"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि ।
रमेद्गाढं समाकृष्य बन्धोऽयं पद्मसंज्ञकः ॥
पादौ स्कन्धयुगे यस्याः विन्यस्य भगे लघु ।
प्रवेशयेत् कामुको नारीं बन्धो नागपदो मतः ॥
बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम् ।
लघु लिङ्गं ताड़येद् योनौ लतावेष्टोऽयमुच्यते ॥
ऊरुपादाधरौ चैव तु क्षिप्त्वा कुम्भौ च पाणिना ।
स्तनयोर्मर्द्दनं पीड़ा बन्धोऽयं अर्द्धसम्पुटः ॥
ऊरुपादद्वयमास्फाल्य वराङ्गिन्यास्तु ताड़नम् ।
योनिमापीड़येत् कामी बन्धः कुलिशसंज्ञकः ॥
नारीपादद्वयं कामी धारयेदूर्द्ध्वदेशतः ।
कुचौ धृत्वा पीड़येत् बन्धोऽयं रतिसुन्दरः ॥
क्षिप्त्वा पद्मे समारोप्य दोर्भ्यां गाढञ्च मर्द्दनम् ।
पुनः प्रपीड़येद् योनिं बन्धः केशरसंज्ञकः ॥
भुवि न्यस्य स्त्रियः पादौ कराभ्यां धारयेत् करौ ।
कर्षेत् ताड़येत् योनिं बन्धो हिल्लोलसंज्ञकः ॥
पादौ संयोज्य योनौ च वराङ्गिप्रवेशनम् ।
हस्तयोर्बन्धनं गाढं बन्धो नृसिंहसंज्ञकः ॥
धारयेत् हृदये कृत्वा द्वितीयं कटिं प्रियाम् ।
नारीव सुरमेत् कामी विपरीतस्तु बन्धकः ॥
पार्श्वोपरि स्त्रीं कृत्वा योनौ लिङ्गेन ताड़येत् ।
बाहुभ्यां ताड़येद्गाढं क्षुब्धको बन्ध एव सः ॥
सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः ।
पतिलिङ्गं चालयेत् योनौ बन्धोऽयं धेनुकः स्मृतः ॥
नारीपादौ च स्कन्धे धारयेत् गलके पुनः ।
स्तनार्पितकरो कामी बन्धश्चोत्कण्ठसंज्ञकः ॥
स्वयं अधःपादं बाहौ कृत्वा योनिपदद्वयम् ।
स्तनौ धृत्वा रमेत् कामी बन्धः सिंहासनो मतः ॥
पीड़येदूरुयुग्मेन कामुकः कामिनीं यदि ।
रतिनागः समाख्यातः कामिनीनां मनोहरः ॥
नाभ्याधोरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः ।
रमयेन्निर्भरं कामी बन्धो विद्याधरो मतः ॥"
इति ।)

संज्ञाप्रभेदेन अन्योऽपि बन्धोऽस्ति । यथा,—
"कामध्वजो विपरीतो नागरो रतिनायकः ।
केयूरः स्थिततोयश्च ततः समपदस्तथा ॥
ततश्चैकपदो ज्ञेयः सम्पुटश्चोर्द्धसम्पुटः ।
ततः स्तम्भश्चैव ततो तु रतिसुन्दरः ॥
उत्पीड़कोरुचक्रौ ततश्चोत्क्रमः स्मृतः ।
वेष्टको हंसकीलस्तु ततो लीलाधनस्तथा ॥
अष्टादशक्रमादन्याः ज्ञेया बहुसुखप्रदाः ।
पुंसां सुखकराश्चैव कथितास्तु क्रमागताः ॥"
इति स्मरदीपिका ॥ * ॥

अनभिसन्धितकर्म्मकर्त्तुर्बन्धाभावो यथा,—
"पञ्चभिरिन्द्रियार्थैरशुभं शुभतोऽनभिसन्धितैः ।
यथैवोपभोगैश्च पूर्व्वकर्म्मशुभाशुभैः ॥
एवं न बन्धो भवति कुर्व्वतः कारणं विना ।
न च बन्धाय तत् कर्म्म भवत्यनभिसन्धितम् ॥"
इति मार्कण्डेयपुराणम् ॥

(हठयोगप्रदीपोक्ता योगसाधकबन्धा यथा, तत्रैव । ३ । ५५—५७ ।
अथोड्डीयानबन्धः ।
"बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ।
तस्मादुड्डीयनाख्योऽयं योगिभिः समुदाहृतः ॥
उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः ।
उड्डीयानं तदेव स्यात् तत्र बन्धोऽभिधीयते ॥
उदरे पश्चिमं तानं नाभेरूर्द्धञ्च कारयेत् ।
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेशरी ॥"
अथ मूलबन्धः । तद्यथादिकमुक्तं तत्रैव । ३ । ६१—६२ ।
"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम् ।
अपानमूर्द्ध्वमाकृष्य मूलबन्धोऽभिधीयते ॥
अधोगतिमपानं वा ऊर्द्ध्वगं कुरुते बलात् ।
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः ॥"
अथ जालन्धरबन्धः । तस्य लक्षणादिकमुक्तं तत्रैव । ३ । ७०—७१ ।
"कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढम् ।
बन्धो जालन्धराख्योऽयं जरामृत्युविनाशकः ॥
बध्नाति हि शिराजालमधोगामि नभोजलम् ।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ॥")

बन्धकं, क्ली, (बध्नातीति । बन्ध + ण्वुल् ।) ऋणाय स्थापितं वस्तु । बेन्धा इति भाषा । इति आधिशब्दार्थे अमरः ॥ इदानीमाधिर्निरूप्यते । आधिर्नाम यद्दीयते ऋणस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयत इत्याधिः । स च द्विविधः । कृतकालोऽकृतकालश्च । पुनश्चैकैको द्विविधः गोप्यो भोग्यश्च । यथाह नारदः ।
"अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः ।
कृतकालापनेयश्च यावद्देयोद्यतस्तथा ॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च ।"
कृते काले आनयनकाले एतावति काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते आरोपणीयः आनेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः । यावद्देयम् उद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः । गोप्यो रक्षणीयः । एतच्चतुर्विधस्याधेर्विशेषमाह ।
"आधिः प्रणश्येत् द्विगुणे धने यदि न मोक्ष्यते ।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति ॥"
प्रयुक्ते धने स्वकृततया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन मोक्ष्यते तदा नाशमधमर्णस्य धनं प्रयोक्तुः स्वम्भवति । कालकृतः कृतकालः आहिताग्न्यादिषु पाठात् कालशब्दस्य पूर्व्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात् प्रागूर्द्ध्वं वा । फलभोग्यः फलं भोग्यं यस्याधेः स फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति । अकृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः । काले कालकृतो नश्येदिति । अकृतकालस्य भोग्यस्य नाशाभाव उक्तः फलभोग्यो न नश्यतीति पारिशेष्यादाधिः प्रणश्येदित्येतत् कृतकालगोप्याधिविषयमवतिष्ठते द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशि चतुर्विधविषयतोक्तं कर्त्तव्यं इत्यतिवचनात् ।
"हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च ।
तदन्तराधनं दत्त्वा ऋणी बन्धमवाप्नुयादिति ॥"
किञ्च ।
"गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते ।
नष्टो देयो विनष्टश्च दैवराजकृतादृते ॥"
गोप्याधेस्ताम्रकटाहादेरुपभोगेऽपि वृद्धिर्न भवति । अल्पोऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्द्दताम्रकटाहादौ भोग्याधौ वृद्धिर्हापिते हानिं प्रापिते विकारमुपगमिते नो वृद्धिरिति सम्बन्धः । नष्टो विकृतिं गतस्ताम्रकटाहादिश्छिद्रभेदादिना पूर्व्ववत् कृत्वा देयः तत्र सीसावशेषश्च पूर्व्ववत् कृत्वा देयः । अत्यन्तनष्टोऽपि चेत् वृद्धिरपि त्याज्या भोग्याधिरपि पूर्व्ववत् कृत्वा देयः । वृद्धिरहिते वृद्धिं त्यक्त्वा । विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण तदाह दैवो गङ्गादिदैवेन तद्राजकृतं नाशं वर्ज्ज्य

यदि न ददाति तदा धनस्वाम्यः । 'विनष्टे धन-नाशः स्याद्दैवराजकृतादृते ।' इति नारदवच-नात् । दैवराजकृतादृते । दैवमग्न्युदकदेशो-पप्लवादि । दैवकृताद्विनाशादिना । तथा स्वाप-राधरहितराजकृतात् । दैवराजकृते तु विनाशे सदृशमन्यं दातव्यमाधिं धनं वा यथाह ।

"योगमापन्नुते पूर्वे दाता दैवमहापदि ।
आधिरन्योऽथ कर्तव्यो देयं वा धनिने धनमिति ।"

तत्र योगमापन्नुत इति दैवराजोपद्रवम् ।

अपि च ।

"आधेः स्वीकरणात् सिद्धी रक्ष्यमाणोऽप्यसार-ताम् ।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥"

आधीनामस्य भोग्यस्य च स्वीकरणादुपभोगा-त्सिद्धिरवधिकरणमाधिस्वीकरणमात्रेण नाप्नु-वेदनागतेन यथाह नारदः ।

"आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥"

अन्यच्च वचनम् ।

"आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ।"

या भोगान्तरा क्रिया सा पूर्वा बलवती भोगरहिता तु पूर्वापि न बलवतीति च आधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यदा-सारतामसिताम एव सवृद्धिकमूल्यद्रव्यपर्याप्तता-नवच्छादितत्वः यदीयः । धनिने वा धनं देयं रक्ष्यमाणोऽप्यसारतामिति वदता आधिः प्रय-त्नेन रक्षणीयो धनिनेति ज्ञापितम् । आधिः प्रकर्षेणैवाप्रयुज्य रक्षणात्परिहाराय ।

"चरित्रं बन्धककृतं सवृद्ध्या दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥"

चरित्रं शोभनाचरितम् । चरित्रेण बन्धकं चरित्रबन्धकम् । तेन यत् द्रव्यमात्मसात् कृतं यदाधीनं वा कृतम् । एतदुक्तं भवति धनिकः स्वात्मनिष्ठेन बहुमूल्यमपि अल्पाधीनेषु समर्पितमाधिं द्रव्यमादाय कृतम् । यदि वाध-मर्णेन प्रत्यायकत्वेनात्मनः प्रमाणमाधिं यदीया बहुमूल्यमेव यत्किञ्चिदल्पमर्थं धनमिति तद्धनं वृद्धौ सत्यां तत्र नाम्ना अवमान्यः एतादृशं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणं दातव्यमिति । तथा सत्यङ्कार-कृतं द्रव्यं यथा व्यवहारे भवेत् तत्र सत्यङ्कार: कार्ये व्यभिचरितेऽपि द्विगुणं सत्यङ्कारस्य द्रव्यं दातव्यम् । अयमर्थः । यदा बन्धकार्यबन्धमेव द्रव्यं परिभाषितं द्विगुणी-भूतेऽपि द्रव्ये तदा द्विगुणं द्रव्यमेव दातव्यम् । नाधिनाश इति तदा सद्विगुणं दातव्यमिति । अन्योऽर्थः । चरित्रबन्धकमङ्गाकारादि-योजयित्वा विनिरूप्य आधीकृत्य तत्र सद्विनाधी-कृत यत् द्रव्यमाहृतम् तस्य तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति । आधि-प्रयुक्तारम्भयुक्ते । सत्यङ्कारकृतमिति व्यव-

विक्रयादिव्यवस्थानिर्वाहकाय यदङ्गुलीयकादि-परस्परं द्रव्यं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तथाहि येनाङ्गुलीयकादर्पितं स एव चेद्व्यव-स्थातिक्रमी तेन तदेव त्याज्यम् । इतरश्चेद्व्यव-स्थातिक्रमी तदा तदेवाङ्गुलीयकादि द्विगुणं प्रति-दापयेदिति । किञ्च ।

"उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् ।
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ॥"

धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना वृद्धिलोभेन न स्थापयितव्यः । अन्यथा अमोक्षणे स्तेनचौरवद्दण्ड्यो भवेत् अथासन्निहिते पुनःप्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् । अथ प्रयोक्तापि सन्निहितदातापत्यमरणाद्धनस्य ग्रहीतारो न सन्ति यदि वा अप्रतिहिते प्रयोक्तरि आधि विक्रीय धनदिक्तापयतीत्यत्र किं कर्त्तव्य-मित्यपेक्षित आह ।

"तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ।"

सन्निधि आधि तत्काले मूल्याधिक्यतः तत् प्रतिबन्ध तथैव धनिनि तत्राधिं वृद्धिरहितं स्थापयेत तत्र ऊर्ध्वं धनं वर्द्धते यावद्धनी धनं गृह्णीत तदाधि-ग्रहणं यावदा तत्कृतमूल्यमधिकं प्रवेशयति । यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश इति विचारितमस्य-मध्यकाले एव यदा द्विगुणीभूते द्रव्ये धनदि-हितेऽपि वा यावद्धनी धनिना किं कर्त्तव्यमित्यत आह ।

"विना धारणकाद्वापि विक्रीणीत ससाक्षिकम् ।"

धारणकादधमर्णाद्विना अधमर्णे असन्निहिते चापि निक्षेपादेव यद्वा तमाधिं विक्रीय सद्धनं गृह्णीयादधमर्णो साक्षिकम् सम्यक्तदतिक्रमार्थम् । चरित्रबन्धकादौ द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं न त्वाधिनाश इति न विचारितम् । तदा आधिः प्रकर्षेण्युक्त एवाधिनाशः । विचारितो नष्टं यत्र इति १० । भोग्याधौ विशेषमाह ।

"यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ।"

यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं तदाधौ हृते तदुत्पन्ने चाधुत्पन्ने द्विगुणे प्रविष्टे धनिहस्ते धनिनाधिर्मोक्तव्यः । यदि भागवेशात् धने द्विगुणीभूते द्रव्ये अप्रयाधिर्मोक्तव्य इति परि-भाषया कालान्तरेण वा भोगाभावेन तदा द्विगुणीभूतधनमादायी भोग्यमधिकं धनिकं यदिदं मत्सत्के द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । आधि-भोगभोगे सदृशं देयम् । अर्थात् सवृद्धिकमा-धिमाकरणादिसम्बन्धाद्विनिर्दिष्टं दातव्यम् । एतेन सत्याधिमाक्रम्य वोपिकादत्त तु तदार्थे सम्बुद्धीय इति परिभाषा तत्र वैद्युक्तमित्यस्मादपि यावत्सुदत्तं तावद्भुक्तं तदाधिः सदैव स्वीकर्त्तुं अवस्थितम्

* ———— अत्रौ बलमध्यात् धातु ।

धनभोग्यं पूर्वकालं दत्वा स्वत्वं धारकम् ।
यदि प्रकाशितं तत् स्थानदाता न धनभाग्धनी ।
अतो न च लभेद् धनं यदुभयमते विना ॥"

अस्यार्थः । धनं भोग्यं यस्यासौ धनभोग्यो यत्र आधिः स च द्विविधः । सवृद्धिकमूल्यदानावधिकरणादो वृद्धिमात्रापाकरणार्थश्च तत्र च वृद्धिमात्रापा-करणार्थं धनं पूर्वकाले पुनः कालो दातारो पूर्वदानकालाद् धारको । यदा सवृद्धिकं धनं स्थानदातैव यदि पूर्वः प्रविष्टमादाय बन्धकादुपादा-यार्थं वृद्धिमात्रापाकरणार्थेषु धनं धारकं दत्त्वानुधारको । अतो गमे धनस्यैव धारकम् । अपराधपरायणाय । यदि प्रकाशितं तत् स्थान-दत्तं प्रकाशितमतिप्राप्तिं वृद्धिरधिकधनं यदि स्थानदा न धनभाग्धनी । धारकं न लभेद्धनं तत्राप्यदत्तेनाशौ बन्धकधानुपादिति भावः । अथापकर्षितं तद्धनके वृद्धिरधि-मध्येऽप्रमादात् धारकं दत्वापि धनं कर्त्तापमर्दः वृद्धिर्विमदस्यैव तथैकार्थः । पुनरभयधार-णमाह । परस्परार्थं विना अपणादेव-गयेभ्योः परस्परानुमतभावे यदि प्रकाशितं दत्तानुगतम् । परस्परानुमतौ पूर्वकमपि बन्धकं धारकं कारयामानुपादत्ते धनी विक्र-यमपि गमनमावदाने वैवाधमर्णो लभते । इति मिताक्षरा ।

बन्धकः, पुं, (बन्ध + स्वार्थे कन् ।) विनिमयः । इति हेमचन्द्रः । आधिः । इति शब्दरत्ना-वली । दर्पबन्धकः । इति भावार्थदीपिका । (बध्नातीति । बन्ध + ण्वुल् । बन्धनकर्त्तरि, त्रि । यथा, देवीभागवते । ६ । १ । १८ ।

"न नारी न धनं गेहं न पुत्रा न सहोदराः ।
इत्यर्थं प्राणिनां संसारेषु बन्धकाः ।")

बन्धकी, स्त्री, (बध्नाति भावमिति । बन्ध + ण्वुल् । गौरादित्वात् ङीष् ।) पुंश्चली । इत्य-मरः । २ । ६ । १० । (यथा, मार्कण्डेय-पुराणे । ६९ । ८८ ।

"न बन्धकीभिर्मे स्पृष्टैर्मन्त्रौषधिनिभा यथा ।")
करिणी । इति मेदिनी । भगवत्का-मिनी । (यथा, महाभारते । १ । १२१ । ७ ।

"चातुर्थ्ये प्रसवेऽप्याहु स्वैरिणी ।
अतःपरं बन्धकी स्यात् पञ्चमे भवेत् ।")

बन्धनं, क्ली, (बन्ध + भावे ल्युट् ।) बन्धक्रिया । बाँधा इति भाषा । तत्पर्यायः । उद्दानम् २ । इत्यमरः । २ । ८ । २६ । सन्दानम् ३ बन्धः ४ संयमनम् ५ । इति शब्दरत्नावली । (यथा, हितोपदेशे । १ । ४९ ।

"आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ।")
वधः । इति मेदिनी । ने, ६८ । हिंसा । इति शब्दरत्नावली । रज्जुः । इति वैद्य-कम् । बध्यतेऽनेनेति करणे ल्युट् । कारा-गारम् । बन्धशालाम् । यथा, भागवते । १ । ५ । ४१ ।

"वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ।"
बन्ध+कर्म्मणि ल्युट् । महादेवस्य नामभेदे, पुं । यथा, महाभारते । १३ । १७ । १०० ।
"बन्धनो बन्धकर्त्ता च सुबन्धनविमोचनः ।"
बन्धनकर्त्तरि, त्रि । यथा, तत्रैव ।१४।१७।६१।
"बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ।")

बन्धनवेश्म, [क्ली], (बन्धनाय बन्धनस्य वा वेश्म सद्म ।) कारागारम् । इति हारावली ।१६६।

बन्धनालयः, पुं, (बन्धनाय बन्धनस्य वा आलयः ।) कारागारम् । इत्यमरः । २ । ८ । ११६ ।

बन्धस्तम्भः, पुं, (बन्धाय स्तम्भः ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । आलानम् २ । इत्यमरः । २ । ८ । ४१ । शङ्कुः ३ आयोगः ४ । इति शब्दरत्नावली ।

बन्धित्रं, क्ली, (बन्ध+इत्र ।) कामदेवः । इत्यु-णादिकोषः । चर्म्मव्यजनम् । इति संक्षिप्त-सारोणादिवृत्तिः ।

बन्धुः, पुं, (बन्ध बन्धने + "शॄस्वृस्निहित्रप्यसीति ।" उणा० १।११। इति उः ।) स्नेहेन मनो बध्नाति यः । तत्पर्य्यायः । सगोत्रः २ बान्धवः ३ ज्ञातिः ४ स्वः ५ स्वजनः ६ । इत्यमरः । २ । ६ । ३४ । दायादः ७ गोत्रः ८ । इति शब्दरत्नावली । बन्धवश्च त्रिविधाः । आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति । यथोक्तम् ।
"आत्मपितृष्वसुः पुत्त्रा आत्ममातृष्वसुः सुताः ।
आत्ममातुलपुत्त्राश्च विज्ञेया ह्यात्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्त्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्त्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुःपितृष्वसुः पुत्त्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्त्राश्च विज्ञेया मातृबान्धवाः ॥"
तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः । बन्धूनामभावे आचार्य्यः । इति मिताक्षरा । ० । (यथा, मनुः ।२।१३६।
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥"
"बन्धुः पितृव्यादिः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) बन्धूकः । (यथा, ऋतुसंहारे । ३ । ५ ।
"बन्धूकपुष्परजसारुणिता ...") [illegible]
"बभ्रन्तो बन्धुपुष्पमालादेवि ।")
मित्रम् । (यथा, मेघदूते । ३३ ।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।")
भ्राता । इति मेदिनी । (यथा, रघुः । १२ । १२ ।
"सपत्नीकः प्रजगमो मातृबन्धुनिवासिनम् ।
सौमित्रिरप्यानुजगाम रम्यं लक्ष्मणोऽनुगः ।")

बन्धुकः, पुं, (बन्ध+उकः । यद्वा, बन्धुर्बन्धूकस्य एव । बन्धु+स्वार्थे कन् ।) बन्धूकवृक्षः । इति शब्दरत्नावली ।

बन्धुजीवः । बन्धुरिव जीवयति रक्तादिनेति । बन्धु + जीव + अच् ।) बन्धूकवृक्षः । इति शब्दरत्नावली । (यथा, रघुः । ११ । २५ ।
"तौ सुकेतुसुतया खिलीकृते
बन्धुजीवसदृशैः प्रभूतैरिव ।")

बन्धुजीवकः, पुं, (बन्धुवत् जीवयति रक्तादिना इति । बन्धु+जीव+ण्वुल् । यद्वा, बन्धुजीव एव । स्वार्थे कन् ।) बन्धूकवृक्षः । इत्यमरः । २ । ४ । ७३ ।

बन्धुता, स्त्री, (बन्धोर्भावः बन्धूनां समूहो वा इति । "ग्रामजनबन्धुभ्यस्तल् ।" ४।२।४३। इति तल् ।) बन्धूनां समूहः । बन्धोर्भावः । इत्यमरः ।२।६।३५। (यथा, ऋग्वेदे । ४ । ४ । ११ ।
"महो रुजामि बन्धुता वचोभिः ।")

बन्धुदत्तम्, क्ली, (बन्धुना दत्तम् ।) पितृमातृभ्यां दत्तं स्त्रीधनम् । यथा । याज्ञवल्क्यः ।
"बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च ।
अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः ॥"
बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते । इति दायभागः ॥

बन्धुरं, क्ली, (बन्ध बन्धने+"मद्गुरादयश्च ।" उणा० १ । ४२ । इति उरप्रत्ययेन निपातनात् साधुः ।) मुकुटम् । इति शब्दरत्नावली । (रथ-बन्धनम् । यथा, महाभारते । ६ । ३२ । ३१ ।
"अश्वो छत्रं ध्वजश्चैव बन्धुरञ्च तथापरे ।
सन्धर्वा बहुपादद्याश्लिष्टो यथनृपम् ॥"
तथा च भागवते । ४ । २६ । १ ।
"दीर्घं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ।")

बन्धुरः, पुं, (बन्ध+"मद्गुरादयश्च ।" उणा० १।४२। इति उरः निपातनात् साधुः ।) खलिनद्रुम् । तिलकल्कम् । बन्धूकः । बधिरः । हंसः । इति मेदिनी । रे, १८८ । विडङ्गः । इति हेमचन्द्रः । ऋषभौषधम् । इति राजनिर्घण्टः । बकः । विहङ्गः । इति शब्दरत्नावली ।

बन्धुरः, त्रि, (बन्ध+उरः ।) रम्यम् । (यथा, महा-गणपतिस्तोत्रे । १५ ।
"ध्येयः श्रेयः स देयाज्जलदविमलरुचो बन्धुरं
सिन्धुरास्यः ।")
नम्रम् । इति मेदिनी । रे, १८८ । उन्नता-नतम् । इत्यमरः । (यथा, रघुः । ११ । ६७ ।
"बभासि मे बन्धुरगात्रि ! चन्द्र-
केशः सकुम्भाविव चित्रकूटः ।")

बन्धुरा, स्त्री, (बन्धुर+टाप् ।) पण्यस्त्री । इति मेदिनी । रे, १९० ।

बन्धुराः, पुं, सुखः । इति मेदिनी । रे, १९० । बहुवचनान्तोऽयम् ।

बन्धुलः, पुं, (बन्धुं लातीति । बन्धु+ला+क ।) असतीसुतः । इत्यमरः । २ । ६ । ३६ । (यथा, मृच्छकटिकनाटके चतुर्थे अङ्के ।
"परगृहललिताः पराद्भपुष्टाः
परपुरुषैर्जनिताः पराङ्गनासु ।
परधननिरता गुणेष्ववाच्या
गजकलभा इव बन्धुला ललामः ॥")
बन्धूकः । इति शब्दरत्नावली ।

बन्धुलः, त्रि, (बन्धून् लाति स्नेहेन गृह्णातीति । बन्धु+ला+क ।) सुन्दरः । नम्रः । इत्यन्ये । इति शब्दरत्नावली ॥

बन्धूकः, पुं, (बध्नाति सौन्दर्य्येण चित्तमिति । बन्ध+"उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊकः ।) पीतशालकः । इति मेदिनी । के, १२८ । पुष्पवृक्षविशेषः । बांदुली इति वङ्गभाषा । दोपहरिया इति हिन्दी भाषा । तत्पर्य्यायः । रक्तकः २ बन्धुजीवकः ३ । इत्यमरः ।२।४।७३। बन्धुकः ४ बन्धुः ५ बन्धुलः ६ बन्धुजीवकः ७ बन्धुजीवः ८ बन्धूलिः ९ बन्धुरः १० । इति शब्दरत्नावली । रक्तः ११ माध्याह्निकः १२ । इति भावप्रकाशः । ओष्ठपुष्पः १३ अर्क-वल्लभः १४ मध्यन्दिनः १५ रक्तपुष्पः १६ राग-पुष्पः १७ हरिप्रियः १८ । अस्य गुणाः ।
"असितसितपीतलोहितपुष्पविशेषात् चतुर्विधो
बन्धूकः ।
ज्वरहारी विविधग्रहपिशाचशमनः प्रसादनः
सवितुः स्यात् ॥"
इति राजनिर्घण्टः ।
"बन्धूकः कफकृद्ग्राही वातपित्तहरो लघुः ।"
इति भावप्रकाशः ।
स्त्रियाम्, स्त्री । बन्दूक इति ख्यातम् । यथा,—
"बन्धूको बन्धुजीवे स्यात् स्त्रियां स्यान्नपुंसकम् ।"
इति चतुर्भुजः ।

बन्धूकपुष्पः, पुं, (बन्धूकस्य बन्धूकवृक्षस्य पुष्पमिव पुष्पं यस्य ।) पीतशालः । इत्यमरः ।२।४।४४। बीजकः । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"बीजकः पीतसारश्च पीतशालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥")

बन्धूरः, पुं, (बन्ध बन्धने । बन्ध+"मद्गुरादयश्च ।" उणा० १ । ४१ । इत्यत्र खर्ज्जूरादित्वादूरप्रत्य-येन सिद्धम् इत्युज्ज्वलदत्तः ।) छिद्रम् । इत्यु-णादिकोषः ।

बन्धूरः, त्रि, (बन्ध+खर्ज्जूरादित्वादूरप्रत्ययः ।) रम्यः । नम्रः । यथा, रभसः ।
"बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः ।"
उन्नतानतम् । समानात् धनुर्मतं उपाधि-वद्यादीनामतं यत् । क्वचिदुन्नतं क्वचिदानतं च्छत्रादिकम् । इति केचित् । इत्यमरटीकायां भरतः ॥

बन्धूलिः पुं, (बन्ध बन्धने । बन्ध+ऊलि ।) बन्धूक-वृक्षः । इति शब्दरत्नावली ।

बन्ध्यः, त्रि, (बन्ध+यत् ।) ऋतुकालावच्छिन्न-फलितशून्यादिः । (यथा, रघुः । १ । ७० ।
"सिक्तं स्वयमिव स्नेहाद्बन्ध्यमाश्रमवृक्षकम् ।")
तत्पर्य्यायः । अफलः २ अवकेशी ३ । इत्यमरः । २ । ४ । ७ । विफलः ४ निष्फलः ५ । इति राजनिर्घण्टः । बन्धनीयः । इति बन्धधातोः कर्म्मणि यत्प्रत्ययः । (यथा, याज्ञवल्क्यः ।२।२६१।
"अवध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।"
पुं, विंशतिनक्षत्रेः केतुः । यथा, विष्णुधर्म्मोत्तरे ।
"केतुश्च त्रिविधो ज्ञेयः शिखी बन्ध्यस्तथैव च ।
दोषप्रकर्षात् शिखी बन्ध्यः ख्यातिमत्तथा ॥")

वन्ध्या, स्त्री, (वन्ध+"अघ्न्यादयश्च।" उणा० ४।११२। इति यक्।) अप्रसूता स्त्री। इति मेदिनी। बाँझा इति भाषा। (यथा, भागवते। ६। १४। १२।
"रूपौदार्य्यवयोजन्मविद्यैश्वर्य्यश्रियादिभिः।
सम्पन्नस्य गुणैः सर्व्वैश्चिन्ता वन्ध्यापतेरभूत्॥"
वन्ध्या स्त्री अष्टमे वर्षे अधिवेत्तव्या भवति यदाह मनुः। ९। ८१।
"वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा।")
अश्वगन्धमूली। तत्पर्य्यायः। वशा २। इत्यमरः। २। ९। (६९ बालाप्रसवनम्। इति शब्दचन्द्रिका। स्त्रीविशेषः। यथा,—
"वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा।
अपरा वृषली ज्ञेया कुमारी या रजस्वला॥"
इति प्रायश्चित्तविवेके उशनसो वचनम्॥ ४॥ योनिरोगविशेषः। यथा,—
"उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता।
वातला योनिजा रोगा वातदोषेण पञ्चधा॥"
तस्या लक्षणं यथा,—
"या फेनिलमुदावर्त्ता रजःकृच्छ्रेण मुञ्चति।
वन्ध्या विनष्टार्त्तवा ज्ञेया विप्लुता नित्यवेदना॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम्।
वातला कर्कशा स्तब्धा शूलनिस्तोदपीडिता॥"
तस्याश्चिकित्सा यथा,—
"वन्ध्या शिफा पातिवता मधूकं
वटस्य शुङ्गं नवकेशरञ्च।
एतत्सुपिष्टं पयसा निपीय
वन्ध्या सुतम् विमलं प्रसूते॥
अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम्।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि॥
पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया।
पिष्टं पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः॥
कुष्ठकर्षं पालताः कुसुमानि वटाङ्कुराः।
नीलोत्पलं पयोयुक्तमेभिर्गर्भं ध्रुवम्॥
या नवा सितपार्श्वनिम्नां
नीरेण सहितं हिताशया।
नैतया [illegible] पुत्रं
सा पुत्रं लभतेऽचिरादपि॥"
इति भावप्रकाशः॥
(विदुराख्यानमध्ये यथा,—
"म्रियन्ते मनुष्यैरिव मरणं दैत्यजाया।
शृणु यद् यान्ति वन्ध्यापि लभते सुतम्॥"
इति देवीभागवतमाहात्म्ये कौशिकायनोपाख्याने।
"अन्या चापि च कन्या दर्शिता मधुरस्वरा।
वन्ध्यापत्नी सीता नाम भार्य्या शिवाश्रया॥"
इति मेरुतन्त्रे चतुर्थाधिकारे॥)

वन्ध्याकर्कोटकी, स्त्री, (वन्ध्यायाः कर्कोटकी। वृषत्वनाशकत्वात् वन्ध्याया अपि अपत्योत्पादकत्वात्।) विषकर्कोटकी। बाँझ-काँकरोल इति भाषा। इति बाँझकाँकरोल इति च हिन्दीभाषा। तत्पर्य्यायः। वन्ध्या १ देवी २ नागारातिः ३ नागहन्त्री ४ मनोज्ञा ५ पथ्या ७ दिव्या ८ पुत्रदा ९ कन्या १० श्रीकन्दा ११ कन्दवल्ली १२ ईश्वरी १३ सुगन्धा १४ सर्पदमनी १५ विषकण्टकिनी १६ मता १७ कुमारी १८ भूतघ्नी १९। अस्या गुणाः। लघुत्वम्। कटुत्वम्। उष्णत्वम्। कफापहत्वम्। स्थावरादिविषघ्नत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः। तत्पर्य्यायगुणाः।
"वन्ध्याकर्कोटकी देवी कन्या योगीश्वरीति च।
नागारिर्नागदमनी विषकण्टकिनी तथा॥
वन्ध्याकर्कोटकी लघ्वी कफशुद्व्रणशोधिनी।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी॥"
इति भावप्रकाशः॥

व(ब)भ्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) व(ब)कारादिः। ओष्ठ्यवर्गपञ्चमोपधः। व(ब)भ्रति। इति दुर्गादासः॥

बभ्रवी, स्त्री, (बभ्रोः शिवस्येयं पत्नी। बभ्रु+अण् +ङीप्। न वृद्धिः।) दुर्गा। इति भूरिप्रयोगः॥

बभ्रिः, पुं, (बभ्र+इन्।) वसनम्। इति केचित्॥ (भरणकर्त्तरि धारके च त्रि। यथा, ऋग्वेदे। ६। २३। ४।
"गन्तेयान्ति सवना हरिभ्यां
बभ्रिर्वज्रं पपिः सोमं ददिर्गाः॥")

बभ्रुः, पुं, (बिभर्त्ति भरति वा। भृ+"कुर्भ्रश्च।" उणा० १। २३। इति कुः द्वित्वञ्च।) अग्निः। शिवः। (यथा, महाभारते १३। महादेवस्य सहस्रनामकथने। १७। १४८।
"बभ्रौ बभ्रुप्रियो बभ्रुः राजराजो निरामयः॥")
विष्णुः। (यथा, महाभारते १३। विष्णोः सहस्रनामकथने। १४९। ८६।
"धनी बभ्रुरिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः॥")
विशालः। नकुलः। इति मेदिनी॥ (यथा, मार्कण्डेये। ११। ९।
"बभ्रावर्त्ते महावक्रो यज्ञिको बभ्रुविक्रमः॥")
मुनिविशेषः। इति हेमचन्द्रः॥ देशभेदः। इति शब्दरत्नावली॥ पिङ्गलवर्णः। इति राजनिर्घण्टः॥ कपिलः। इति हेमचन्द्रः। ३। ११०॥ (कपिलो वर्णः। इति सिद्धान्तकौमुदी॥ तद्वद्वस्तुनि तु वाच्यलिङ्गः। यथा, मनुः। ३। १९०।
"वाक्यार्थिनान्नप्रवाही बभ्रुर्लोहितक एव च॥"
लोमवाचकः। यथा, भारते ॥९।४३।१।
"रोमवाहः तथा बभ्रुर्लोहितकोऽपि च॥"
देवाधवपाः। यथा, तत्रैव। ९। ४३। ९।
"बभ्रुर्बाणक्षुतश्चैव कौशी बभ्रुवाण॥"
यदुविशेषस्य पुत्रो नृपः। यथा, तत्रैव। ९। ४१। १४।
"पुत्रौ च तस्या बभ्रुः वैशुकच्छाटकपराः॥"
सम्भवनक्षत्रेषु अन्यतमः। यथा, रामायणे। ४। ४१। ३४।
"तत्र बभ्रुदेवयाः कष्टरूपिणाः परमः।
दैत्यौ वामनोः नित्यः सुतो बभ्रुस्तैव च॥"
विश्वामित्रपुत्रविशेषः। यथा, महाभारते। १३। ४। ५०।
"दन्तौ च मधुकाय बभ्रुः शालङ्कायनः॥"
विश्वामित्रस्य पुत्रः। स तु पाराशर्य्यमतम्।
यथा, हरिवंशे। ९४। ४८।
"बभ्रुर्वेणुः सुदेवश्च सभाषदैव वीर्य्यवान्।
यदुप्रवीरा विख्याता लोकपाला इवापरे॥"
यथा च भागवते। ९। २४।
"श्वफल्कस्य च बभ्रोश्च ग्राह्यमानान् द्वारावतीम्॥"
स च विनष्टप्राये द्वारकायां यदि सभां रक्षतीत्यत्र दृश्यते। तत्कथा च महाभारते। १६। मौषलपर्व्वणि द्रष्टव्या॥ स्त्री, कपिला गौः। सा च विधि अयातता एकेव स्वृति गता। यथा, भागवते। ९। २। ६।
"तङ्क्षमादाय तस्याः प्रणीतोऽद्भुतमिवं निशि।
अजानता प्रचण्डाभोः शिरः शार्दूलशङ्कया॥")
बभ्रुः, त्रि, (बिभर्त्ति। भृ+"कुर्भ्रश्च।" उणा० १। २३। इति कुः द्वित्वञ्च।) पिङ्गलः। इत्यमरः॥ (यथा, कुमारे। १। ८।
"यस्य बालातपमपि बभ्रु
पयोधरोन्नतविघटितच्छविः॥"
यथा च रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः॥")
बभ्रुधातुः, पुं, (बभ्रुः पिङ्गलो धातुः।) सुवर्णगैरिकम्। इति राजनिर्घण्टः॥
बभ्रुवाहनः, पुं, मणिपुरस्य राजविशेषः। स च चित्राङ्गदायां अर्ज्जुनाज्जातः। यथा,—
"चित्राङ्गदायां तनयो चित्रवीर्य्यः तथार्ज्जुनः।
उलूप्यामिरावान् वै सुतायां बभ्रुवाहनम्।
मणिपुरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः॥"
इति श्रीभागवते। ९। २२। ३२।
अपि च।
वैशम्पायन उवाच।
"श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः।
निर्य्ययौ विनयेनाथ ब्राह्मणार्घ्यपुरःसरः॥
मणिपुरेश्वरं लोकज्ञं मनस्विनं धनञ्जयम्।
नाभ्यनन्दत् स मेधावी क्षात्रधर्म्ममनुस्मरन्॥"
"ममार्त्त्वं विसदृशं पुत्र धर्म्मं परिहरसि।
त्रियामुखं परिभवन् प्रविष्टः कथमिहानघ॥"
इति महाभारते। १४। ७९ अध्यायः॥
(अस्यार्ज्जुनादिना युद्धादिकं तत्रैव विस्तरशो द्रष्टव्यम्।)
बर्ह, मते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) बर्हति। इति दुर्गादासः॥
बर्ह्ह, गती। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) बर्ह्हति। इति दुर्गादासः॥
बर्ह्हुरः, पुं, (बर्ह्ह+अटन्।) राजमाषः। इति शब्दचन्द्रिका॥ बर्ह्हुरी इति भाषा। (विवृतिरस्य राजमाषशब्दे ज्ञेया।)
बर्ह्हुरी, स्त्री, (बर्ह्हुर+गौरादित्वात् ङीष्।) अश्वगन्धा। औषधिभेदः। इति मेदिनी। टे, ११॥
बर्हे, ङ स्तुतौ। हिंसायाम्। दाने। वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-

सेट् ।) रेफोपधः । ङ, बर्हते । इति दुर्गादासः ॥

बल, क ङ निरूपणे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, बालयते धर्म्मं धीरः । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

बल, क म जीवने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) बलयति । इति दुर्गादासः ॥

बल, ङ दाने । वधे । निरूपणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, बलते । इति दुर्गादासः ॥

बल, ञ धान्यावरोधे । जीवने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक०-च-सेट् ।) बालः बलः । धनस्य भावो धान्यं सम्पन्नस्य अवरोधः प्रतिबन्धः धान्यावरोधः । बलति पुण्यक्षीणं विधिः । पुण्यक्षीणस्य सम्पत्तिं प्रतिबध्नाति इत्यर्थः । अयमर्थो अन्यैर्न मन्यते । बलत्यन्नेन लोकः । इति दुर्गादासः ॥

ब(व)लं, क्ली, (बलते विपक्षान् हन्तीति । बल + पचाद्यच् ।) सैन्यम् । (यथा, भगवद्गीतायाम् ।१।१०।
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम् ॥")
ओजः । सामर्थ्यम् । अस्य शक्तेः पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ शौर्य्यम् ५ स्थाम ६ शुष्मम् ७ शक्तिः ८ पराक्रमः ९ प्राणः १० । इत्यमरः ।२।८।१०२। सहः ११ शुष्म १२ । इति शब्दरत्नावली ॥ ऊर्ज्जः १३ । इति जटाधरः ॥ तद्वैदिकपर्य्यायः । ओजः १ पा(बा)जः २ शवः ३ तरः ४ तवः ५ भ्वसः ६ भर्गः ७ बाधः ८ नृम्णम् ९ तविषी १० शुष्मम् ११ शुष्णम् १२ शूष्म् १३ दक्षः १४ वीळु १५ च्यौत्नम् १६ सहः १७ यहः १८ वधः १९ वर्गः २० वृजनम् २१ वृक् २२ मज्मना २३ पौंस्यानि २४ धर्णसिः २५ द्रविणम् २६ स्यन्द्रासः २७ शम्बरम् २८ । इत्यष्टाविंशतिर्बलनामानि । इति वेदनिघण्टौ । २ । ९ । (यथा, मनुः । २ । ५५ ।
"पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति ॥")
तत्तु गर्भस्थबालकस्य षष्ठे मासि भवति । इति सुखबोधः ॥ गन्धरसः । रूपम् । इति मेदिनी । ले, १० ॥ स्थौल्यम् । इति हेमचन्द्रः ।६।८३। (यथाह सुश्रुतः । "धातूनां यत्परं तेजस्तत् श्लेष्म एव बलमित्युच्यते ॥") वपुः । इति जटाधरः ॥ (यथा, रामायणे । ७ । १ । ११ ।
"कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः ॥")
मसरम् । इति शब्दरत्नावली ॥ रसः । इति शब्दचन्द्रिका ॥ (बलमस्यास्तीति । बल + अर्श आद्यच् ।) बलयुक्ते, त्रि । इति मेदिनी ॥ बलोत्कटबलानि बलवन्ति च यथा,—
"बलोत्कटबलाढ्योऽपि मत्तमातङ्गभीषणम् ।
बलोत्कटबलाढ्योऽपि अश्वानां भेत्तुं क्षमः ॥"

बलकारकौषधं यथा, गारुडे । ११५।१८६ अः ।
"त्रिफलामलकचूर्णं वै मधुना उदकेन वा ।
बलानि कुर्य्यात्प्रायाया प्रत्यहं भक्षयं शिव ॥"
पारिभाषिकबलानि । यथा,—
"विद्याभिजनमित्राणि बुद्धिसत्त्वधनानि च ।
तपःसहायवीर्य्याणि दैवञ्च दशमं बलम् ॥"
इति महाभारते आपद्धर्म्मः ॥
अपि च ।
"अबलस्य बलं राजा बालस्य रुदितं बलम् ।
बलं मूर्खस्य मौनन्तु तस्करस्यानृतं बलम् ॥" ॥
अपि च ।
"क्षत्त्रियाणां बलं युद्धं व्यापारश्च बलं विशाम् ।
भिक्षा बलं भिक्षुकाणां शूद्राणां विप्रसेवनम् ॥
हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः ।
हिंसा बलं खलानाञ्च तपस्या च तपस्विनाम् ॥
बलं वेशश्च वेश्यानां योषितां यौवनं बलम् ।
बलं प्रतापो भूपानां बालानां रुदितं बलम् ॥
सतां सत्यं बलं मिथ्या बलमेवासतां सदा ।
अनुगानामनुगमः स्वस्वत्वानाञ्च सञ्चयः ॥
विद्या बलं पण्डितानां वाणिज्यं वणिजां बलम् ।
प्रत्युत्कर्म्मणीनां गाम्भीर्य्यं साहसं बलम् ॥
धनं बलञ्च धनिनां शुचीनाञ्च विशुद्धता ।
बलं विवेकः प्राज्ञानां गुणिनां बलमेकता ॥
गुणो बलञ्च गुणिनां चौराणां चौर्य्यमेव च ।
विप्रवाक्यञ्च कापट्यमधर्म्मज्ञिनां बलम् ।
हिंसा च हिंस्रजन्तूनां सतीनां पतिसेवनम् ।
वरदानं सुराणाञ्च शिष्याणां गुरुसेवनम् ॥
बलं धर्म्मो गृहस्थानां भृत्यानां राजसेवनम् ।
बलं ज्ञानं तापसानां ब्रह्म च ब्रह्मचारिणाम् ॥
यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम् ।
पापं बलं पातकिनां सुमत्तानां हरिर्बलम् ॥
पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम् ।
फलं बलञ्च वृक्षाणां जलजानां जलं बलम् ॥
अर्थं बलञ्च प्रजानां मनुष्याणाञ्च धनं बलम् ।
शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६१ अध्यायः ॥

ब(व)लः, पुं, (बलते निरूपयति स्वेष्टमिति । बल + अच् । बलदेवपदे नामैकदेशग्रहणादपि सिध्यति भीमादिवत् ।) काकः । (यथा, महाभारते । ७ । ६ । २५ ।
"यथा श्येना बलाः कङ्का वायसाश्च सहस्रशः ॥")
बलदेवः । इत्यमरः ॥ (यथा, भागवते ।४।५।१५।
"पूष्णो ह्यपातयत् दन्तान् कलिङ्गस्य यथा बलः ॥")
अस्य पत्न्या रेवत्या नामादि यथा,—
"रेवतीं नाम तनयां रेवतस्य महीपतेः ।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ ॥"
इति विष्णुपुराणे । ५ । २५ । १९ ॥
बकवृक्षः । इति शब्दचन्द्रिका ॥ (वायुना दत्तः कार्त्तिकेयानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ४९ ।
"बलञ्चातिबलञ्चैव महावक्त्रौ महाबलौ ।
प्रददौ कार्त्तिकेयाय वायुर्भरतसत्तम ॥"
दानपुत्रस्य कृष्णस्यान्वये जातस्य पारियात्रस्य पुत्रविशेषः । यथा, भागवते । ९ । १२ । २ ।
"देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ।
ततो बलः स्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः ॥"
दनायुषः पुत्रविशेषः । यथा, महाभारते । १ । ६५ । ३३ ।
"दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः ।
विक्षरो बलवीरौ च वृत्रश्चैव महासुरः ॥"
मेघः । इति निघण्टुः । १ । १० ॥) दैत्यविशेषः । इति मेदिनी । ले, १० ॥ तस्य विवरणं यथा,—
"आसीद्दैत्यो बलो नाम महाबलपराक्रमः ।
देवगन्धर्व्वयक्षाणां सर्व्वेषां भयकारकः ॥
येन विष्णुर्यमः सर्व्वे भयत्रस्ताः प्रपीड़िताः ।
अनिलानलरुद्राश्च वरुणश्च वशीकृताः ॥
संयम्य येन नागेन्द्रा महाभोगा महाविषाः ।
गरुड़श्च हतो भग्नः सदाग्राममभिवर्त्तिनः ॥
येन संजित्य देवेन्द्रः कन्दुकाकारकारितः ।
क्रीड़ार्थं येन विप्रेन्द्र ! गिरयः पतिता भुवि ॥
तेन देवाः समाक्रान्ता दिवः सर्व्वे पलायिताः ।
इत्थं ज्ञात्वा तु पातालं सभयं प्रययौ गतम् ।
तदा ते भयमापन्ना मार्गं ब्रह्मा गता गुरुम् ।
पृच्छन्ति विनयात् सर्व्वे शक्रस्य हितकारिणः ॥
केनोपायेन देवानां स्वर्गवासो भवेदिह ! ।
भवान् हि नयवेत्ता च उपायं वद पृच्छताम् ॥
त्वमेव शास्त्रवेत्ता च हितः शक्रस्य नित्यशः ।
महोदधिनिमग्नानामतिपोतो भव द्विज ! ॥
एवं पृष्टः स देवैस्तु गुरुर्व्वचनमब्रवीत् ॥
बृहस्पतिरुवाच ।
अवध्यं दानवः शक्र ! न युद्धे भवतो बलः ।
यः स्यात् कटकटाशब्दो दन्तानां छिन्नमस्तके ।
भयाय पशुपक्ष्यादिग्राहादीनाञ्च रोगदः ॥
लोतकं पशुयोर्जातं यदि स्रवति मस्तके ।
छिन्ने नरस्य राज्यस्य सदा हानिं विनिर्द्दिशेत् ॥
माहिषे मस्तके नेत्राद्यदि स्रवति लोतकम् ।
छिन्ने निवेदिते वैरिभूपस्य तु तदादिशेत् ॥
अन्येषाञ्च पश्वादीनां शिरसोऽर्द्दितात् ।
निर्गतं लोतकं धत्ते मरीं भीतिं गदन्तथा ॥
हसति छिन्नशीर्षं चेद्धीरं स्यात्तु रिपुक्षयः ।
नौरुद्धिरायुषो वृद्धिः सदा दातुरसंशयः ॥
यद्युद्वाक्यं निगदति तदा भवति चाचिरात् ।
हुङ्काराद्राज्यहानिः स्यात् श्लेष्ममात्राच
पयसाम् ॥
देवानां यदि नामानि भाषते छिन्नमस्तकः ।
विभूतिमतुलां विन्द्यात् षण्मासाभ्यन्तरे तदा ॥
रुधिरादानकाले तु पशुर्गन्धं यदि चरेत् ।
चार्यं तदाशयोर्हि वा दातुः स्यान्मरणं तथा ॥
व्याधिपाशाम्भपादस्य महारोगः प्रजायते ।
अन्यथाप्येषु अचैः कल्याणमुपजायते ॥ ० ॥
महिषस्य तु रक्तस्य मानुषस्याथ साधकः ।
चहुडामानिकाभ्याञ्च विधिवद्दूरभूतये ॥
महाकौशिकमन्त्रेण निवेदनमनुत्तमम् ।
देवेभ्यः पूतनादिभ्यो नैर्ऋत्यां दिशि पूर्व्ववत् ॥
महिषः पञ्चवर्षो यः पञ्चविंशतिवार्षिकः ।
वलिर्देयो नरो देव्यै तस्य रक्तन्तु भूतये ॥
निवेदनञ्च कामबोधं चाल्यात् प्रजायते ।
चाद्विरौघं यदुत्पन्नाद्यो संस्कृत तथापरः ॥
न च देनाक्षयेनाचराद्विनाञ्जसंयुत ।
बहुमान्यमाविशुद्धचतुरूलक्षणापरः ।
द्विवार्षिको वेपकालः कौशिकोऽभिमन्त्रणम् ।
एष बलिः स्मार्त्ते च अन्योऽयं कौशिकः स्मृतः ॥
क्षमो वैरिवलिं दद्यात् षट्समामात्रपूर्व्वतः ॥
महिषं चापदा व्याप्तं वैरिणोऽभिमन्त्रा च ।
एवैव यदं सद्यः छित्वा तस्य च मस्तके ।
छित्वा तन्नोऽसमाहन्तु देव्यै दद्यात् प्रयत्नतः ॥
तदा तदा रिपोर्वीर्य्यं विदारं तदापरम् ।
दयावधो द्विरभिभ्या रिपोरास्य एवाद्य च ॥

प्रायप्रतिष्ठाञ्च रिपोः कुर्य्यात्तस्मिन् पशावथ ।
तस्मिन् चीर्णे रिपुप्राणाः क्षीयन्ते विपदा युताः ॥
ध्यादौ विश्वरूपिणी च चण्डिकेति ततः परम् ।
वैरिणमस्तकचेति खादयेति तं पुनः ॥
वह्निभार्य्या ततः पश्चात् खड्गमन्त्रं प्रकीर्त्तितम् ।
खयं स वदी यो देहि तमिमं पशुरूपिणम् ॥
विनाशय महामारि ! खेँ खेँ खादय खादय ॥
इत्यनेन तु मन्त्रेण वलेः शिरसि पुष्पकम् ।
दद्यात्ततस्तद्रुधिरं कामदाभ्यां निवेदयेत् ।
महानवम्यां शरदि यद्येवं दीयते वलिः ।
सदा सदाष्टाङ्गभवैर्मांसैर्होमं समाचरेत् ॥
दुर्गातन्त्रेण मन्त्रेण प्रयोते दहने शुभौ ।
एवं दत्वा वलिं मर्त्यो रिपुक्षयमवाप्नुयात् ॥ ० ॥
नाभिदेशस्तद्रुधिरं दक्षभागस्य च प्रिये ! ।
स्तनाच्च रुधिरं दद्यान्न कदाचन साधकः ।
गोष्ठस्य चिबुकस्यापि नैत्रियाचाच मानवः ।
कण्ठाधो नाभितश्चोर्द्ध्वं बाह्वोः पार्श्वमते तथा ॥
वक्षसो रुधिरं धार्त्तं नातिकुर्य्याच्च साधकः ।
गण्डयोश्च ललाटस्य भ्रुवोर्मध्यस्य शोणितम् ॥
कर्णयोश्च च बाह्वोश्च स्तनयोरुदरस्य च ।
कण्ठाधो नाभितश्चोर्द्ध्वं गुह्यस्य प्रयत्नतः ।
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ॥
न गुल्फतोऽसृक् प्रदद्यात् जङ्घोर्वोरपि च साधकः ।
न च रोमाविलाद्गात्रात्स्वधाताच्च भैरव ! ॥
तदर्द्धं च क्षतापातात् सम्यक् शुभमावह ।
एतं दद्यं प्रदद्यात्तु पद्मपुष्पस्य पत्रके ॥
सौवर्णे राजते पात्रे कांस्ये पात्रे च मानव ।
निधाय देव्यै दद्यात्तु तदक्तं पत्रकाञ्चकैः ॥
स्वयमे छुरिकाखड्गं संकुलादि पदस्थकम् ।
घातेन हस्तदण्डस्य महाफलमवाप्नुयात् ॥
पद्मपुष्पस्य पत्रन्तु यावद्व्याप्नोति शोणितम् ।
तत्प्रमाणचतुर्भागाधिकं रक्तन्तु साधकः ।
न कदाचित् प्रदद्यात्तु नाप्रच्छेदं समाचरेत् ॥
यः स्वपुरपर्य्यन्तं मांसं मासमात्रतः ।
तिलगुडसमाहारं देव्यै दत्वा तु भक्तितः ।
षण्मासाभ्यन्तरे तस्मात् काममिष्टमवाप्नुयात् ॥
बाह्वोश्च स्कन्धयोर्वापि यो दद्याद्दीपवर्त्तिकाम् ।
हृदये वा घृतपात्रं विना भक्त्या तु साधकः ।
चक्षमात्रेण तद्दीपदाहकस्य कर्म यत ॥
शुक्रा च विपुलान् भोगान् देवीभिः यथेच्छया ।
कल्पकल्पन्तु संप्राप्य शार्वभौमो नृपो भवेत् ॥
महिषस्य शिरश्छिन्नं सप्रदीपं निधापुरः ।
हस्ताभ्यां यः समादाय अहोरात्रञ्च तिष्ठति ॥
स चिरायुः पुत्रपौत्रैर्हि भुक्त्वा भवेदिमान् ।
भोगान्ते च सदुत्पत्तौ मम्मकामाधिपो भवेत् ॥
नरस्य शीर्षमादाय साधको दक्षिणे करे ।
वामे च रुधिरं पात्रं प्रदीप्तं निहिं चापनः ॥
यावदायुः स्थिरो भवे राजा भवति चैव है ।
अन्ते मम पुरं प्राप्य गणानामधिपो भवेत् ॥
चक्रमाणं वसेद्यः शिरोरत्नं करद्वये ।
हृदीमां विनाडिदेशी पूर्णेश्वरीं कामदः ॥
स कामाधिपं संप्राप्य देवलोके महीयते ॥

महामाये ! जगन्माये ! सर्व्वकामप्रदायिनि ! ।
ददामि देहरुधिरं प्रसीद वरदा भव ॥
इत्युक्त्वा मूलमन्त्रेण गतिपूर्व्वं विचक्षणः ।
स्वगात्ररुधिरं दद्यात्साधकः सिद्धसन्निभः ॥
येनात्ममांसं सद्यश्च ददामीश्वरि ! भूतये ।
निर्व्वाणं तेन मन्त्रेण देहि हुं हुं नमो नमः ॥
इत्यनेन तु मन्त्रेण स्वमांसं वितरेद्बुधः ।
सौभाग्यं सुखसम्पत्तं प्रदीपं परमं शुचिम् ॥
दीपयत् मांसमिदञ्च दीपं श्रीं श्रीं नमो नमः ।
इत्यनेन तु मन्त्रेण दीपं दद्याद्विचक्षणः ॥
महानवम्यां शरदि रात्रौ स्कन्दविशाखयोः ।
यवपूर्णमयं कृत्वा रिपुं स्मरणमेव वा ॥
शिरश्छित्त्वा वलिं दद्यात् कृत्वा तस्य तु मन्त्रतः ।
अनेनैव तु मन्त्रेण खड्गमभिमन्त्र्य यत्नतः ॥
दलं किलकिलो घोरघोरा धारविषांसकः ।
मलछिन्नाम्भिकाधिरुममलुकचारिवतमम् ।
भान्तो विसर्गयुक्तः स च बिन्दुयुतोऽपरः ।
अद्यामिषोगश्चान्तेन बिन्दुना च समन्वितः ।
शिरश्छित्त्वा वलिं दद्यात् कृत्वा तत्रतु मन्त्रतः ॥
अनेनैव तु मन्त्रेण बिन्दुना च समन्वितः ।
षड्भ्यो वलिप्रोक्तः स्कन्दविशाखयोः ॥
रक्तदवैः प्रेषयित्वा लक्षितं तं रिपुं वलिम् ।
कृष्णचन्द्रस्य तिलकं ललाटेऽभिनिवेशयेत् ॥
रक्तमाल्याम्बरं कृत्वा रक्तगन्धधरन्तथा ।
कण्ठे बद्धा रक्तसूत्रैर्नाभौ दृढञ्च तथैव तम् ।
दक्षोत्तरशिरः कृत्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय तं समस्ततः ।
चतुर्द्दशस्वरादिभ्यां संयुतः स परः पराः ॥
परनः परतः पूर्व्वं चन्द्रबिन्दुसमन्वितः ।
स्कन्दस्य मन्त्रमन्त्रोऽयं तेन तस्मै वलिं चरेत् ॥
चतुर्द्दशस्वरादिभ्यां पञ्चमीयम् पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्मै वलिं
चरेत् ।
कुटिलाक्षौ हयपिङ्गलौ रक्ताम्बुधारिणौ ।
त्रिशूलं करयोश्च पाणिभ्यां दधतौ सदा ॥
शिखिनौ कुक्कुटाक्ष कर्णकुण्डलि वाससा ।
त्रिनेत्रौ महावर्णौ मालासुरभि शिखिनौ ॥
विकटौ दशनैर्भीमैर्द्दंष्ट्रौ हारमालिनौ ।
ध्यानेन चिन्तयेद्धार्य्यौ पुरतः संस्थितौ सदा ॥
चैत्रे मासि सिते पक्षे चतुर्द्दश्यां निवेदनः ।
वलिमिमं विशेषेण त्रैलोक्यसमं भैरवविक्रमम् ।
लोहपिष्टमृन्मयेनैव कुर्य्यात्कृत्स्नं सुतौ ।
अभिचारान्निधायेव वलेः शीर्षं छेदयेन्तु ।
अभिषिच्य तु मन्त्रेण खड्गेनैव निवेदयेत् ॥
ईदृक् पालनं बहुधा चाभिनं पूर्व्वनिर्णयम् ।
वीरेन्द्र कामदा विधिवत् निहतस्य साधकः ॥
त्रिनवैर्वा रक्तलिप्तं दीपपीठस्थ वलिभः ।
ध्यायेद्देवाङ्ग महामायां विधिं वीक्षते बलः ।
अन्येषामपि च शीर्षे च विराट्पुरे देवी ।
तत्कार्य्येषु तदा निर्द्दिशेच्च रिपुक्षयात् ॥
एवं दद्यात् वीरैः वशीकरं विधिवत्सुधीः ।
वलिदानादिः चतुर्वर्गसाधकमुत्तमम् ॥

एवं बलिप्रदानस्य क्रमो व्यक्तस्तथैव च ।
कथितो रुधिराध्याय उपचारान् शृणुष्व मे ॥"
इति कालिकापुराणे ६६ अध्यायः ॥
बलिदाननिषेधो यथा,—
"जीवानुकम्पां विस्मृत्य यतो दुर्गां सदाशिवः ।
प्रयच्छ परमप्रीत्या गूढमेतद्वचो सदा ॥
सर्वे विष्णुमया जीवास्तत्कथं तद्वधं प्रिये ! ।
श्रुतं मया नयोद्दिष्टे कुर्युः कामनया वधम् ।
महान् सन्देह इति मे ब्रूहि भद्रे ! सुनिश्चितम् ॥
शङ्करी तद्वचः श्रुत्वा शिववक्त्रविनिर्गतम् ।
भीतात्यन्तं हि सर्वेषे ! प्रत्युवाच सदाशिवम् ॥
श्रीपार्वत्युवाच ।
ये मदार्थमविज्ञाय प्राणिहिंसनतत्पराः ।
तत्पूजनं समायेष्वं यद्दोषात्तदधोगतिः ॥
मदर्थे शिव ! कुर्वन्ति तामसा जीवघातनम् ।
आकल्पकोटिनिरये तेषां वासो न संशयः ॥
मम नाम्नायथा यज्ञे पशुहत्यां करोति यः ।
कापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् ॥
दैवे पैत्रे तथात्मार्थे यः कुर्यात् प्राणिहिंसनम् ।
कल्पकोटिशतं शम्भो ! रौरवे च वसेत् ध्रुवम् ॥
यो मोहात्काममोहैर्वा हत्यां कुर्यात् सदाशिव ! ।
एकविंशतिजन्मस्य तत्तद्योनिषु जायते ॥
यज्ञे यज्ञे पशून् हत्वा कुर्यात् शोणितकर्दमम् ।
स पचेन्नरके तावद्यावल्लोमानि तस्य वै ॥
हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च ।
तुल्या भवन्ति सर्वे ते ध्रुवं नरकगामिनः ॥
ममोद्देशे पशून् हत्वा नरकं यात्रसुतस्थेत् ।
यो मूढः स तु पूयोदे वसेद्रुयदि न संशयः ॥
दैवतान्तरमुद्दिश्याज्ञानेन स्वेच्छया तथा ।
हत्वा जीवांश्च यो भक्षेत् नित्यं नरकमाप्नुयात् ॥
यूपे बद्ध्वा पशून् हत्वा यः कुर्याद्रक्तकर्दमम् ।
तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते ॥
उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी ।
उत्सर्गकर्त्ता जीवानां सर्वेषां नरकं भवेत् ॥
मध्यस्थस्य वधायापि प्राणिनां क्रयविक्रये ।
तथा सदृष्ट घातायां कुम्भीपाको भवेद्ध्रुवम् ॥
स्वयं कामाश्रयो भूत्वा योऽज्ञानेन विमोहितः ।
हन्यध्यान् विविधान् जीवान् कुर्यान्नाशाम
शङ्कर ! ॥
तदान्तर्विघ्नसम्पत्तिदारादिसम्पदाम् ।
अचिराद्वै भवेन्नाशो ध्रुवं स नरकं व्रजेत् ॥
दैवयज्ञे पितृयज्ञे तथा मातृकाकर्मणि ।
तत्रैव नरके वासो यः कुर्याज्जीवघातनम् ॥"
तथा ।
"मद्याग्रेण पशून् हत्वा यो भक्षेन्मम
बन्धुभिः ।
तज्जानलोमसंख्यान्देरसिपत्रवने वसेत् ।
आरब्धोऽप्यत्तरदेवानां नाम्ना च यज्ञकर्मणि ।
यः संयोज्य पशून् हन्यात् सोऽप्यतामिस्रमा-
प्नुयात् ।
पशून् हत्वा तथा मां मां योऽर्चयेज्जीवयो-
क्तिः ।
तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ ।
निर्विघ्नवाञ्छितं तत् बहुतन्त्रेषु यत् कृतम् ।
यस्मिन् यज्ञे प्रभो शम्भो ! जीवहत्या भवेद्
ध्रुवम् ।
यज्ञमारभ्य चेत् शक्तः कुर्यादि पशुघातनम् ।
स तदाघोरतिं गच्छेदिमरेषाय का कथा ।
मायया: पूजनं मोहादये कुर्युर्मांसशोणितैः ।
पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः ॥
पशुकामास्तु वेदोक्तैः पशोरालभनं मते ।
पुनस्तत् फलं भुक्त्वा ये कुर्वन्ति पतन्त्यधः ॥
स्वर्गकामोऽश्वमेधं यः करोति निगमाश्रया ।
सद्भोगान्ते परीहृयः स भ्राम्यति भवार्णवे ॥
ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः ।
ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर ! ॥
आत्मपुत्रकलत्रादिसुसम्पत्तिकुशेच्छया ।
यो दुरात्मा पशून् हन्याद्वात्मादीन् घातयेत्
स तु ॥
जानन्ति नो वेदपुराणतत्त्वं
ये कर्मठाः पण्डितमानयुक्ताः ।
लोकाधमास्ते नरके पतन्ति
कुर्वन्ति सर्वाः पशुघातनञ्चेत् ॥
येऽज्ञानिनो मन्दधियोऽसतार्था
मखे पशुं घ्नन्ति न धर्मशास्त्रम् ।
जानन्ति नाकं नरकं न मुक्तिं
गच्छन्ति घोरं नरकं नरास्ते ॥
शुद्धा धकाख्या न विदन्ति शास्त्रा
न धर्ममार्गं परमार्थतत्त्वम् ।
पापं न पुण्यं पशुघातका ये
पूयोदवासो भवतीह तेषाम् ॥
जीवानुकम्पां न विदन्ति मूढा
आत्मात्र येऽसत्पथिनो न धर्मम् ।
ज्ञात्वां मखे प्राणिवधं न कुर्यु-
स्ते यान्ति मत्वाः खलु रौरवाख्यम् ॥
ततस्तु खलु जन्तूनां घातनं नो करिष्यति ।
शुद्धात्मा धर्मवान् ज्ञानी प्राणान्ते नैव मानवः ॥
यदीच्छेदात्मनः क्षेमं त्यक्त्वा ज्ञानं तदा नरः ।
जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् ॥
सम्पत्तौ च विपत्तौ वा परलोकोन्मुखः पुमान् ।
कदाचित् प्राणिनो हत्यां न कुर्यात्तत्त्ववित्
सुधीः ॥
मानवो यः परत्रेह सर्वमिच्छेत् सदाशिव ! ।
सर्वविष्णुमयत्वेन न कुर्यात् प्राणिनां वधम् ॥
वधामत्यति यो मर्त्यो जीवान् तत्त्वधर्मवित् ।
किं पुनं तस्य वक्ष्येऽहं मखाख्यं न तु दृश्यति ॥
यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दया-
परः ।
सत्यप्रियमतो नित्यं सर्वदया करोति यः ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं तेन रक्षितम् ।
वधात् शङ्कर ! वै येन तत्तामसेन घातयेत् ॥"
तथा —
"पशुहिंसा विधिर्येन पुराणे निगमे तथा ।
उक्तो रजस्तमोभ्यां च केवलं तमसापि वा ॥
नरकस्वर्गसेवार्थं संसारेय प्रवर्त्तितः ।
यतस्तत्कर्मभोगेन गमनागमनं भवेत् ॥
तस्मैव शाक्ततन्त्रे च विधिर्नैव शङ्कर ! ।
प्रवृत्तिर्नो निवृत्तिस्तु यथापि सात्त्विकी क्रिया ।
एवं नानाविधं कर्म पशोरालभनादिकम् ।
कामाश्रयः फलाकाङ्क्षी त्वज्ञानेन मानवः ॥
पश्चात्ज्ञानोदिता क्रिया मान्याश्च तामसी
सदा ।
यमभीतिभ्रष्टं भक्ता यदि गोविन्दमाश्रयेत् ॥"
इति पाद्मोत्तरखण्डे । १०४।१०५ । अध्यायौ ॥
ब(व)लिः, स्त्री, (बलति संवृणोतीति । वल संवरणे + इन् ।) जरया श्लथचर्म । तत्-पर्य्यायः । चर्मतरङ्गः २ त्वग्भिः ३ त्वक्-तरङ्गः ४ । इति राजनिर्घण्टः ॥ जठरा-वयवः । (यथा, कुमारे । १ । ३८ ।
"मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला ।")
गृहदारुप्रभेदः । इति मेदिनी । लि, ५ ॥ गुदा-ङ्कुरः । यथा,—
"पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रयम् ।
सर्व्व एव प्रकुप्यन्ति गुदजानां सम्भवे ॥
तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च ।
सर्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥०॥
गात्रायामस्तु वली जातार्धकदोषोत्थानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ॥
द्वन्द्वजानि द्वितीयायां वलौ याप्यान्यमितानपि ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ।
सहजानि त्रिदोषाणि यानि चाभ्यन्तरा वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दि-
शेत् ॥"
इति माधवकरः ॥
(यथा च । "तत्र स्थूलान्त्रप्रतिबद्धमर्धपञ्चाङ्गुलं गुदमाहुस्तस्मिन् वलयस्तिस्रोऽध्यर्धाङ्गुलान्तर-भूताः प्रवाहणी विसर्जनी संवरणी चेति ।
चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः ।
शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः ।
गजतालुनिभाश्चापि वर्णतः संप्रकीर्त्तिताः ॥"
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ।
गन्धकः । तत्पर्य्यायो यथा,—
"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्वेलरश्चापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥).
बलिका, स्त्री, (बलैव । बला + स्वार्थे कन् । टापि अत इत्वञ्च ।) अतिबला । इति राज-निर्घण्टः ॥
बलिदानं, क्ली, (बलेः पूजोपकरणस्य देवतो-द्देशेन संकल्पितस्य त्यागविशेषः दानम् ।) षोडश-पादैर्देवतानिवेदितनैवेद्यादिदानम् । यथा,—
अथ बलिदानम् ।
"ततो यथोक्तं विद्यानपदार्थं यथाविधि ।
विष्वक्सेनाय भगवन्नैवेद्यांशं निवेदयेत् ।
यथा च प्रवराणि दीपादर्पणकम् ।

विष्वक्सेनाय दातव्यं नैवेद्यं तच्छताशकम् ।
पादोदकं प्रसादञ्च लिङ्गे चण्डेश्वराय च ॥ * ॥
तद्विधिश्चोक्तः ।
कृष्णादीन्प्रार्च्य तत् पात्रान्नैवेद्यांशं समुद्धरेत् ।
सर्व्वदेवस्वरूपाय पराय परमेष्ठिने ।
श्रीकृष्णसेवायुक्ताय विष्वक्सेनाय ते नमः ।
इत्युक्ता श्रीहरेर्वामे तीर्थैर्लिप्तं समर्पयेत् ।
शतांशं वा सहस्रांशमन्यथा निष्फलं भवेत् ॥
पश्चाच्च बलिरित्यादिश्लोकाद्युक्तार्थं वैष्णवः ।
सर्व्वेभ्यो वैष्णवेभ्यस्तं शतांशं विनिवेदयेत् ॥ * ॥
तौ च श्लोकौ ।
बलिर्विभीषणो भीष्मः कपिलो नारदोऽर्ज्जुनः ।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः शिवः ॥
विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः ।
श्रीकृष्णस्य प्रसादोऽयं सर्व्वे गृह्णन्तु वैष्णवाः ॥ इति ।
इदं यद्यपि मुख्येन दर्पणार्थं कृतः परम् ।
तथापि भक्तवात्सल्यात् सख्यस्यार्थापि सम्भवेत् ।
अथ बलिदानमाहात्म्यम् । नारसिंहे ।
सततञ्चान्नदीपैश्च पार्श्वेभ्यः समन्ततः ।
पुष्पाद्यर्त्तैर्विमिश्रैश्च बलिं यस्तु प्रयच्छति ॥
बलिना वैष्णवेनाथ तस्मात् धन्यो दिवौकसः ।
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

देवोद्देशेन यथाविधिपूर्णोपहारत्यागः । दुर्गादिदेवगोद्देशेन सङ्कल्पपूर्व्वकच्छागादिपशुघातनम् । यथा,—
"बलिदानेन सततं जयेच्छत्रून् नृपान् नृप ! ।"
इति कालिकापुराणम् ॥
अस्य विधिनिषेधौ बलिशब्दे द्रष्टव्यौ ॥ * ॥
अथ बलिदानक्रमः । यजमानोत्तराभिमुखः पूर्व्वाभिमुखं बलिं अभ्यर्च्यवयवं सुन्दरं सुपुष्टं माल्यं कण्ठे वेष्टयित्वा स्नानं समानीय कृताञ्जलिः पठेत् ।
"ॐ वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुभैरवसागराः ॥
पशुस्नानविधानाय सान्निध्यमिह कल्पय ॥"
इति तीर्थान्यावाह्य ॐ अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयत्तस्मिन्नग्निः स ते लोको भविष्यति तं स्थास्यसि पिबैता अपः । ॐ वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयत्तस्मिन् वायुः स ते लोको भविष्यति तं स्थास्यसि पिबैता अपः । ॐ सूर्य्यः पशुरासीत्तेनायजन्त स एतं लोकमजयत्तस्मिन् सूर्य्यः स ते लोको भविष्यति तं स्थास्यसि पिबैता अपः । ॐ प्राणन्ते शुन्धामि प्राणाशी शुन्धामि चोषन्ते शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि । मनस्त आप्यायतां वाक् त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायतां श्रोत्रन्त आप्यायताम् यत्ते क्रूरं यदा स्थितं तत्त आप्यायतां तत्ते निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः स्वाहा । इति मन्त्रैः स्नापयित्वा ॐ दिवाकारसदृशमर्च्चे पशुं बध्नय बध्नय मूढहृदयद पशुं बध्नय बध्नय

मृत्युश्च सत्यरूपस्त्वमेव पशुं बध्नय बध्नय हुं फट् स्वाहा ॐ ह्रीं श्रीं हूं फों चण्डिकायै इमं पशुं प्रोक्षामि स्वाहा । इति प्रोक्षणम् । ततः शक्तत्राणवरं पशुं मोक्षं कुरु कुरु स्वाहेति मोक्षं कृत्वा पशुम्नेति ललाटे सिन्दूरं दत्त्वा ॐ छागपशवे नम इति पाद्यादिकं दत्त्वा एतदधिपतये ॐ अग्नये नमः एतत्सम्प्रदानीयायै ह्रीं दुर्गायै नमः इति पुष्पं दत्त्वा पश्वोरङ्गदेवताः पूजयेत् । यथा, शिरसि ॐ रुधिरचन्दनायै नमः ललाटे ॐ शाङ्करिण्यै नमः भ्रूमध्ये ॐ भद्रायै नमः चक्षुषोः ॐ त्रिनेत्रायै नमः कर्णयोः ॐ पार्व्वत्यै नमः नासायां ॐ गौर्य्यै नमः चिबुके ॐ चण्डिकायै नमः दन्तपङ्क्तौ ॐ उग्रचण्डिकायै नमः जिह्वायां ॐ चण्डघण्टायै नमः मुखे ॐ विरूपाक्षायै नमः ग्रीवायां ॐ चण्डायै नमः । पृष्ठे ॐ महाभैरव्यै नमः उदरे ॐ वैष्णव्यै नमः चतुष्पदे ॐ चण्डप्रियायै नमः पार्श्वयोः ॐ सर्व्वमङ्गलायै नमः कटिदेशे ॐ विरूपाक्षायै नमः गुदाग्रे ॐ कौशिक्यै नमः लाङ्गूले ॐ ग्रहविंशत्यै नमः सर्व्वाङ्गेषु पञ्चाशद्वर्णदेवताभ्यो नमः । इति संपूज्य उत्सृजेत् । विष्णुः ॐ तत् सदद्याश्विने मासि शुक्ले पक्षे अमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य दुर्गाप्रीतिकामनया दुर्गादेव्यै इमं पशुं वह्निदैवतं तुभ्यमहं घातयिष्यामि इत्युत्सृज्य कृताञ्जलिः पठेत् ।
"ॐ छाग ! त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम् ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥
पशुयोनिगतस्तोऽसि पूजाहोमादिकर्म्मसु ।
तुष्टा भवतु सा देवी तव रक्तैर्निमित्तैश्च ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशन ।
चामुण्डाबलिरूपाय बले । तुभ्यं नमोऽस्तु ते ॥"
ततः "पशुपाशाय विद्महे शिरश्छेदाय धीमहि । तन्नः पशुः प्रचोदयात् ।" इति कर्णे जपेत् । ततः खड्गमानीय ह्रीं इति बीजाक्षरं लिखित्वा ध्यायेत् ।
"कृष्णं पिनाकपाणिञ्च कालरात्रिस्वरूपिणम् ।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥
रक्ताम्बरधरञ्चैव पाशहस्तं कुटुम्बिनम् ।
पिबमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम् ॥"
एवं खड्गं ध्यात्वा मन्त्रोक्त,
"ॐ रसनात्वं चण्डिकायाः सुरलोकप्रसाधकः ।"
इत्यभिमन्त्र्य ऐं ह्रीं खड्गाय नम इति माल्यादिभिः संपूज्य खड्गाग्रे ॐ महादेवाय नमः । धारे ॐ ब्रह्मणे नमः । मध्ये ॐ जनार्दनाय नमः ।
"ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्म्मपाल ! नमोऽस्तु ते ॥

इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्दनः ।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः ।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥"
ॐ तीक्ष्णदंष्ट्राय नम इति पुष्पं दत्त्वा आं ह्रीं फट् इति खड्गमादाय ॐ कालि कालि वज्रेश्वरि लौहदण्डायै नम इति जपित्वा छागस्य ग्रीवायां खड्ग ! त्वं शीघ्रं छिन्धि छिन्धि फट् फट् स्वाहा । इति पूर्व्वाभिमुखं बलिं यजमानः उत्तराभिमुखं बलिं स्वयं पूर्व्वाभिमुखो वा एकप्रहारेण छिन्द्यात् । ततो मृन्मयादिपात्रे रुधिरमादाय चतुर्भागं कृत्वा पैशाच्यो ॐ विदारिकायै नमः आग्नेय्यां ॐ पूतनायै नमः नैर्ऋत्यां ॐ पापराक्षस्यै नमः वायव्यां ॐ कौशिक्यै नमः । ॐ तत् सदद्याश्विने मासि अमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य इष्टवर्गाप्त्यकामः श्रीदुर्गाप्रीतिकामः श्रीदुर्गादेव्यै छागपशुरुधिरं दास्यामि इति सङ्कल्प्य ।
ॐ कालि कालि महाकालि कालिके पापहारिणि ।
शोणितञ्च बलिं चैव गृहाण वामलोचने ॥"
एष रुधिरबलिः ॐ इत्यनेन मन्त्रेण दद्यात् । ततः ऐं ह्रीं श्रीं कौशिकि रुधिरेणाप्यायतामिति वदेत् । ततः शिरसि प्रदीपं दत्त्वा ॐ तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य श्रीमद्दुर्गादेवीप्रीतिकामः श्रीमद्दुर्गादेवीप्रीतिकामो धनधान्यायुरारोग्यपुत्रपौत्रादिपूर्ण्णपूर्व्वाधिकपुण्यप्राप्तिकामो दुर्गादेव्यै सप्रदीपच्छागपशुशीर्षं दास्यामीति सङ्कल्प्य एष सप्रदीपच्छागपशुशीर्षबलिः ह्रीं दुर्गायै नम इत्युत्सृजेत् ।
"ॐ अद्य मे सफलं जन्म सर्व्वभूतसमाहरे ।
एष मां विघ्नभूतेभ्यो बलिं गृह्णन् नमोऽस्तु ते ॥
ततः खड्गमर्द्धधिरमादाय ।
"ॐ यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा ।
स स मे वशगो यातु यदि शक्रसमो भवेत् ॥"
इति ललाटे तिलकं कुर्य्यात् । वैष्णवानां तु दैवकृतेन योज्यम् । वैष्णवधर्मे तु दक्षपक्षं विमुक्त्वा दुर्गाप्रीतिकामः । प्रधानबलिदाने तु दो वा वीर् वा बलिः कृत्वा संकल्प्य तत्तद्द्रव्यै नम इति संपूज्य छाग बलिदानवाक्येन प्रयोगः । इत्यनारोऽधिकम् । वाक्ये तु इमान् पशून् तुभ्यमहं घातयिष्ये । रुधिरदाने तु इमान् रुधिराणि दास्यामि इति सङ्कल्प्य पृथगेव दद्यात् शीर्षदानमप्येवम् । इत्यो नान्यत् यथादृष्ट अन्यत् कर्त्तव्यं प्रकृतिरिति वाक्यशेषराद्द्रव्योत्सर्गः ॥ * ॥

अथ तान्त्रिकबलिदानविधिः । "तत्र सुलक्षणं पशुं देवाये संस्थाप्य वक्ष्यमाणविधिना उत्सृजेत् । तदुक्तं यामले ।
'देव्यग्रे स्थापयित्वा तु पशुं लक्षणसंयुतम् ।
स्नानयित्वाभिषेकात् भृङ्गारजलधारया ॥'
अर्घ्योदकेन संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्य गन्धपुष्पाक्षतैः पशुं संपूज्य मूलेन पशुगायत्र्या प्रोक्षणं कृत्वा कर्णे इमं मन्त्रं पठेत् । पशुपाशाय विद्महे विश्वकर्मणे धीमहि तन्नो जीवः प्रचोदयात् । ततो ह्रीं क्लीं काली कालि वज्रेश्वरि लौहदण्डायै नम इति मन्त्रेण खड्गं पूजयेत् । ततः खड्गस्याग्रमध्यमूलं क्रमेण पूजयेत् । यथा, ह्रूं वागीश्वरीब्रह्मभ्यां नमः । ह्रूं लक्ष्मीनारायणाभ्यां नमः । ह्रूं उमामहेश्वराभ्यां नमः । ततो ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः इति मन्त्रेण पूजयित्वा प्रणमेत् ।
'खड्गाय खरदण्डाय शक्तिकार्यार्थतत्पर ।
पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ ! नमोऽस्तु ते ॥'
ततो महावाक्यं, अमुकदेवताप्रीतिकामः अमुकदेव्यै इमं पशुं तुभ्यमहं संप्रददे । ततो निवेदयेत् ।
'यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम् ॥'
ततो बलिं छिन्द्यात् । ततो रुधिरं समांसं देव्यै दद्यात् । ततोऽवशिष्टं वटुकादिभ्यो बलिं दद्यात् यथा ह्रूं वं वटुकाय नमः । इति गन्धादिभिः संपूज्य पूर्ववत्कल्पेन वायव्ये बलिं दद्यात् । ह्रूं यां योगिनीभ्यो नमः इति संपूज्य पूर्ववत्कल्पेन नैरृते बलिं दद्यात् । ह्रूं क्षां क्षेत्रपालाय नमः इति संपूज्य पूर्ववत्कल्पेन ऐशान्यां बलिं दद्यात् । ह्रूं गां गणपतये नमः इति संपूज्य पूर्ववत्कल्पेन आग्नेय्यां गणेशाय बलिं दद्यात् ।" इति तन्त्रसारः ॥ * ॥ (ननु "मा हिंस्यात् सर्वा भूतानि" "अहिंसा परमो धर्मः ।" इत्यादि वचनात् कर्मणैव सर्वथा हिंसा कथं तर्हि हिंसाप्रवृत्तिः सुभाद्वचनकर्मेण शास्त्रेषूपदिष्टा अतोऽत्रोच्यते । अथ वैधहिंसाविचारः । 'मा हिंस्यात् सर्वाभूतानि' इत्यत्र सर्वशब्दस्य व्यापकार्थपरतया एतद्विधिमूलका 'वायव्यं श्वेतमालभेत' इत्यादि विधिविषयाप्रामाण्यता वैधातिरिक्तविषयत्वं अर्थाः अर्थानि छन्दांसि केवलेन लभ्यन्ते ऽत्रिक्तम् । यदपि नाना दर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्याम् अभिहितं न च 'मा हिंस्यात् सर्वाभूतानि' इति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेत' इत्यनेन बाध्यते इति वाच्यं विरोधाभावात् । विरोधे हि बलीयसा दुर्बलं बाध्यते । न चास्ति विरोधः भिन्नविषयत्वात् । तथाहि 'मा हिंस्यात्' इति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थत्वमपि । न चानर्थहेतुत्वक्रतूपकारकत्वयोः काचिदस्ति विरोधः । हिंसा हि पुरुषस्य दोषमारक्ष्यति क्रतोश्चोपकरिष्यतीत्यनेन तदपि साङ्ख्यमते । मीमांसकमते तु विरोध एव तथाहि गुरुमते न खलु सर्वभूतहिंसाभावविषयकं कार्य्यं इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थं उपपद्यते । भट्टमते तु यद्यपि यथा तथास्तु । न च तत्रापि ज्योतिष्टोमयागे पुरुषार्थकपशुहिंसनस्यार्थसाधनत्वं अनर्थसाधनत्वञ्चोपपद्यते विरोधात् । वस्तुतस्तु अत्रापि विरोधोऽस्त्येव क्रतो विधेरेव स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाङ्गानां प्रयाजोपकारकत्वमपि नाप्नोति । अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति । अतएवोक्तं 'तस्मादयज्ञे वधोऽवधः' इति । अन्यैरुक्तं 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतं 'अभिचारो मूलकर्म च ।' ११।६३। इति मनुना उपपातकगणमध्ये पाठात् अनिष्टसाधनत्वमवगतम् । तदेतत्कथमुपपद्यतामिति चेन्नैवं 'आततायिनमायान्तं हन्यादेवाविचारयन् ।' ८। ३५०। इत्यनेनापवादतया आततायिवधे इष्टसाधनत्वं अनाततायिवधे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध एव ।" इति सिद्धान्तः ॥),

ब(व)लिध्वंसी, [न्] पुं, (बलिं तदाख्यया प्रसिद्धं दैत्यविशेषं ध्वंसयतीति । बलि+ध्वंस+णिनि । वामनरूपेण बलेः सर्वस्वग्रहणादस्य तथात्वम् । यद्वा, बलिना पूजोपहारेण अविद्यां ध्वंसयितुं शीलमस्य ।) विष्णुः । इत्यमरः । १ । १ । २१ ॥ (भगवता वामनरूपधरेण बलिछलनप्रसङ्गमनपूर्वकं तत्कृपया सर्वस्वं गृहीतमित्येतत्कथा बलिशब्दे द्रष्टव्या ॥)

ब(व)लिनः, त्रि, (बलिः त्रिवलिः चर्म्म अस्यास्तीति । बलि+पामादित्वात् नः ।) बलिभः । जरया श्लथचर्मयुक्तः । इत्यमरः । २ । ६ । ४२ ॥

ब(व)लिनन्दनः, पुं,(बलेस्तदाख्यया प्रसिद्धस्य दैत्यस्य नन्दनः पुत्रः ।) बाणासुरः । इति शब्दरत्नावली ॥ (अयं खलु यादवश्रेष्ठेन भगवता कृष्णेन सह युद्धमकरोत् । तपःप्रभावप्रीतस्तो महादेवश्च बाणस्य दौवारिकत्वमकरोत् । तद्विवरणादिकं हरिवंशे १७६ अध्यायमारभ्य १८२ अध्यायपर्य्यन्तं द्रष्टव्यम् । बलेः यथानिर्देशो यस्य राज्ञः नन्दनः पौत्रः पुत्रः इति व्युत्पत्त्या अङ्गवङ्गकलिङ्गादयः । यदुक्तं, विष्णुपुराणे । ४ । १८ । १ । "इमान् प्राच्यान् बलिः क्षत्रे दैर्घ्यतमसा अङ्गवङ्गकलिङ्गसुह्मपुण्ड्राख्यं बालेयं क्षत्रमजनयत ।")

ब(व)लिनी, स्त्री, (बलं देवबलेनास्त्यस्या इति इनिः । ङीप् ।) वाट्यालकः । इति शब्दचन्द्रिका ॥

ब(व)लिपुष्टः, पुं, (वैश्वदेवेन बलिना पुष्टः ।) काकः । इत्यमरः । २ । ५ । २० ॥

ब(व)लिपोदकी, स्त्री, (बलेः पोदकी उपोदकी ।) उपोदकी । इति राजनिर्घण्टः ॥

ब(व)लिप्रियः, पुं, (बलिमुपहारं प्रीणातीति । बलि+प्री+क ।) लोध्रवृक्षः । इति शब्दचन्द्रिका ॥ (बलिर्वैश्वदेवबलिः प्रियो यस्य इति व्युत्पत्त्या काकः । उपहारप्रिये वाच्यलिङ्गः ।)

ब(व)लिभः, त्रि, (बलिश्चर्मसङ्कोचोऽस्यास्तीति । बलि+"तुन्दिवलिवटेर्भः ।" ५ । २ । १३९ । इति भः ।) बलिनः । इत्यमरः । २ । ६ । ४५ ॥

ब(व)लिभुक्, [ज्] पुं, (बलिं वैश्वदेवबलिं गृहस्थदत्तमन्नं वा भुङ्क्ते इति । भुज्+क्विप् ।) काकः । इत्यमरः । २ । ५ । २० ॥ (यथा, भागवते । १ । १८ । ३३ ।
"अहो अधर्म्मः पालानां पीव्नां बलिभुजा-
मिव ।")

ब(व)लिमन्दिरं, क्ली, (बलेः तदाख्यदैत्यस्य राज्ञो मन्दिरमाश्रयः । बलिर्हि वामनरूपाय विष्णवे सर्वस्वं दत्त्वा प्रभृतिन अत्र पाताले निवसति इति पौराणिकी कथाऽत्रानुसन्धेया ।) अधोलोकः । पातालम् । इति शब्दमाला ॥

ब(व)लिमान्, [त्] त्रि, (बलिश्चर्मसङ्कोचोऽस्यास्तीति । बलि+मतुप् ।) बलिनः । जरया श्लथचर्मयुक्तः । इत्यमरटीका ॥ (बलिः पूजोपहारं विद्यतेऽस्येति व्युत्पत्त्या उपहारविशिष्टः । यथा, रघुः । १४ । १५ ।
"वाप्यायमानो बलिमत्निकेत-
मालेख्यशेषस्य पितुर्विवेश ॥")

ब(व)लिमुखः, पुं, (बलिर्मुखे यस्य । यद्वा, बलिश्चर्मसङ्कोचस्तद्युक्तं मुखं यस्य ।) वानरः । इत्यमरटीकायां रायमुकुटः ॥

ब(व)लिष्ठः, पुं, (अतिशयेन बलवान् + बलवत् + इष्ठन् । विन्मतोर्लुगिति मतुपो लुक् । प्रभूतभारवाहकत्वादस्य तथात्वम् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (धर्म्मसावर्णिकमन्वन्तरान्तर्गत अधिपतिः । यथा, मार्कण्डेये । ९४ । १९ ।
"हविष्मांश्च बलिष्ठश्च अदिरश्चापराजितः ।
निश्चरश्चाग्रधश्चैव विदिषामो महाद्युतिः ॥
सप्तर्षयोऽन्तरे तस्मिन्निदेवश्च यमः ।"
इत्यनयोरेकतम् कश्चित् वरिष्ठश्चेति पाठो दृश्यते ॥)

ब(व)लिष्ठः, त्रि, (अतिशयेन बलवान् । बलवत् + इष्ठन् । विन्मतोर्लुगिति मतुपो लुक् ।) अतिशयबलवान् । यथा,—
"प्रायश्चित्तं विना पूता भवेत् गृह्यमाणया ।
अकामा या बलिष्ठेन न स्त्री जारेण दुष्यति ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥
बलिष्ठा यथा । वायुः १ विष्णुः २ गरुडः ३ हनुमान् ४ यमः ५ महावीरादः ६ शरभः ७ सम्मतिकृत् ८ यक्षः ९ रघुनाथः १० बलरामः ११ वाली १२ बलिः १३ भीमः १४ सती १५ सिंहः १६ सुराहतम् २०। इति कविकल्पलता ॥

बलिध्वंसी, त्रि, (बलवान् मथ्यते इति । मथ+इष्णुः ।) अपमानितः । इत्युणादिकोषः ॥

ब(व)लिसद्म, [न्] क्ली, (बलेर्दानवस्य सद्म निकेतनम् ।) रसातलम् । इत्यमरः ।१।८।१ ॥

ब(व)लिहा, [न्] पुं, (बलिं हन्ति इति । बलि+हन्+क्विप् । वामनरूपेण बलेः सर्वस्वग्रहणादस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

ब(व)ली, [न्] पुं, (बलमस्यास्तीति । बल+"बलादिभ्यो मतुबन्यतरस्याम् ।" ५ । २ । १३६ । इति पक्षे इनिः ।) बलरामः । इति शब्दरत्नावली ॥ उष्ट्रः । महिषः । वृषभः । शूकरः । माषः । कुन्दवृक्षः । इति जटाधरः ॥ माषः । (स्वनामख्यातो बलशौर्य्ययुतः । यथा, मार्कण्डेये । ११८ । २ ।
"बली बलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥")

बलयुक्ते, त्रि । तत्पर्य्यायः । अंसलः २ सिंहंनः ३ मांसलः ४ ऊर्जस्वलः ५ । इति हेमचन्द्रः । ३ । ११२ ॥ (यथा, मार्कण्डेये । ३४ । ८९ ।
"सार्द्धं न बलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः ॥")

ब(व)ली, स्त्री, (बलि+पक्षे ङीष् ।) बलिः । जरया श्लथचर्म्म । इत्यमरटीकायां भरतः ॥ (यथा,—
"कुष्ठं सपूर्व्वं स कृत्वा घृतमाक्षिकसंयुतम् ।
भक्षयात् स्वप्नवेलायां बलीपलितनाशनम् ॥"
इति वैद्यकभैषज्यधन्वन्तरौ रसायनाधिकारे ॥)

ब(व)लीकं, क्ली, (बलति संवृणोतीति । बल संवरणे+"अलीकादयश्च ।" उणा० ४ ।२५। इति कीकन् ।) पटलप्रान्तम् । इत्यमरः । २ । २ । १४ ॥ ओलति इति भाषा ॥ (यथा, माघे । ३ । ५३ ।
"यस्यामजिह्मा महतीमपङ्क्ति
धर्म्मं बधूभिर्वलभीर्युवानः ॥")

ब(व)लीमुखः, पुं, (बलीयुक्तं मुखं यस्य ।) वानरः । इत्यमरः । २ । ५ । ३ ॥

ब(व)लीयान्, [स्] त्रि, (अतिशयेन बलवान् । बलवत्+ईयसुन् ।) अतिशयबलयुक्तः । यथा,—
"आगमादेशयोर्मध्ये बलीयानागमो विधिः ॥"
इति दुर्गादासटीका ॥

ब(व)लीवर्द्दः, पुं, (ईलेर्वोः वर् वरणम् । वर् ईषायां क्विप् । ईषा वर् च ईवरौ तौ ददातीति ईवर्दः । बलमस्यास्तीति बली । ततो बली च ईवर्द्दश्च इति ।) वृषः । इत्यमरः ।२।९।५९॥ (यथा, कथासरित्सागरे । २० । २७ ।
"संयोज्याथ बलीवर्द्दयुगं रचितमङ्गलः ।
कृत्वा बलिं तत्र तरोरारेभे कर्षितुं सः ॥")
तीर्थबावापी महादण्डरोपो यथा,—
"बलीवर्द्दसमारूढः प्रदृ नश्यापि यत् वदम् ।
मरके पचते घोरे यावत् कोपि हि दारुणे ।
पतितश्च न गृह्णन्ति पितरस्तस्य देहिनः ॥"
इति मात्स्ये ८८ अध्यायः ॥

ब(व)ल्यं, क्ली, (बलाय हितम् । बल+"उगवादिभ्यो यत् ।" ५।१।२ ।) इति प्रधानधातुः । शुक्रम् । बलकरे, त्रि । इति मेदिनी । ये, ४० ॥ (यथा,—
"कटुस्तीर्व्योष्णो लघुर्नो हितश्च
स्निग्धो गुरुस्वादुरसोऽथ बल्यः ॥"
इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥)

बल्यः, पुं, (बलाय सुक्तये हितः । बल+यः ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

बल्या, स्त्री, (बलाय हिता । बल+"पुष्कद् कठेति ।" ४ । ४ । ८० । इति यः । ततष्टाप् ।) अतिबला । अश्वगन्धा । प्रियङ्गोत्सुपः । प्रसारिणी । इति राजनिर्घण्टः ॥

बल्ह, ङ क्ली । हिंसायाम् । दाने । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीयोपधः । ङ, बल्हते । इति दुर्गादासः ॥

बष्कयणी } स्त्री, (बष्कयस्तरुणवत्सः । सोऽस्ति
बष्कयिणी } अस्याः । बष्कय+पामादित्वात् पक्षे इनिः । अष्टकपालादिति अलम् । ततो ङीप् ।) चिरप्रसूता गौः । इत्यमरभरतौ ॥ (यथा, सिद्धान्तकौमुद्याम् । २ । १ । ६५ ।
"पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः ॥")

बहु, त्रि, (बंहति इति । बहि वृद्धौ+"लङ्घिबंह्योर्नलोपश्च ।" उणा० १ ।३०। इति कुर्नलोपश्च ।) त्र्यादिसंख्या । अनेकम् । विपुलः । इति मेदिनी । हे, ६ ॥ तत्पर्य्यायः । प्रभूतम् २ प्रचुरम् ३ प्राज्यम् ४ अदभ्रम् ५ बहुलम् ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फारम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ६३ ॥ तद्वैदिकपर्य्यायः । उरु १ तुवि २ पुरु ३ भूरि ४ शश्वत् ५ विश्वम् ६ परीणसा ७ व्यानशिः ८ शतम् ९ सहस्रम् १० सलिलम् ११ कुविन् १२ । इति द्वादश बहुनामानि । इति वेदनिघण्टौ । ३ । १ ॥ (यथा, मनुः । ७ । ८६ ।
"अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम् ॥"
तथा, तत्रैव । ८ । ७७ ।
"एकोऽलुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योऽपि न स्त्रियः ॥"
बहुमतम् । बहुमानम् । यथा, रघुः ।१२। ८९ ।
"रामस्तुलितकैलासमरातिं बह्वमन्यत ॥")

बहुकः पुं, (बहु+संज्ञायां कन् ।) कर्कटः । अर्कः । दात्यूहः । जलखातकः । इति मेदिनी । के, १४९ ॥ ("संख्यायाः अतिशदन्तायाः कन् ।" ५। १ ।२२। इति कन् । बहुभिः क्रीतः, त्रि ।)

बहुकण्टकः, पुं, (बहूनि कण्टकान्यस्य ।) क्षुद्रगोक्षुरः । यवासः । हिन्तालः । इति राजनिर्घण्टः ॥

बहुकण्टका, स्त्री, (बहूनि कण्टकान्यस्याः ।) क्षुद्रदमनी । इति राजनिर्घण्टः ॥

बहुकन्दा, स्त्री, (बहवः कन्दाः कन्दकानि यस्याः ।) कर्कारी । इति राजनिर्घण्टः ॥ (विवरणमस्याः कर्कारीशब्दे ज्ञातव्यम् ॥)

बहुकन्दः, पुं, (बहवः कन्दा यस्य ।) शूरणः । इति राजनिर्घण्टः ॥

बहुकन्दा, स्त्री, (बहवः कन्दा यस्याः ।) कर्कटी । इति राजनिर्घण्टः ॥

बहुकरः, पुं (बहु कार्य्यं करोतीति । बहु+कृ+"दिवाविभानिशाप्रभेति ।" ३ ।२ । २१ । इति टः ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

बहुकरः, त्रि, (बहु करोति खलं संमार्ष्टि इति । बहु+कृ+टः ।) मार्ज्जनकारी । तत्पर्य्यायः । खलपूः २ । इत्यमरः । ३ । १ । १७ ॥ भूमिसम्मार्ज्जकः ३ । इति शब्दरत्नावली ॥ बहुकार्य्यकर्त्ता । यथा, भट्टिः । ५ । ७८ ।
"निहन्ता वैरकाराणां यतो बहुकरः सदा ।
पारश्वधिकरामस्य प्रकर्षेरुणकरो रवौ ॥"

बहुकरी, स्त्री, (बहु करोति खलं संमार्ष्टि इति । बहु+कृ+टः । ङीप् ।) सम्मार्ज्जनी । इति हेमचन्द्रः । ४ । ८२ ॥

बहुकर्णिका, स्त्री, (बहवः कर्णा इव पत्राणि यस्याः ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुकूर्चः, पुं, (बहूनि कूर्चानि यस्य ।) मधुनारिकेलिकः । इति राजनिर्घण्टः ॥

बहुगन्धं, क्ली, (बहुर्गन्धो यस्मात् ।) त्वचम् । इति राजनिर्घण्टः ॥ (दारचिनी इति भाषा ॥)

बहुगन्धः, पुं, (बहुर्गन्धो यस्मात् ।) कुन्दरुकः । इति राजनिर्घण्टः ॥ (उग्रगन्धे, त्रि ।)

बहुगन्धदा, स्त्री, (बहुगन्धं ददाति या । बहुगन्ध+दा+कः ।) कस्तूरी । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः कस्तूरीशब्दे ज्ञातव्याः ॥)

बहुगन्धा, स्त्री, (बहुर्गन्धो यस्याम् ।) चम्पककलिः । यूथिका । कृष्णजीरकः । इति राजनिर्घण्टः ॥

बहुगर्ह्यवाक्, [च्] त्रि, (बहु गर्ह्या बहु निन्दिता वाग् यस्य ।) कुत्सितबहुभाषी । इत्यमरः ॥

बहुग्रन्थिः, पुं, (बहवो ग्रन्थयो यस्य ।) झावुकः । इति शब्दचन्द्रिका । (झाउ इति भाषा ।)

बहुच्छिन्ना, स्त्री, (बहु यथा स्यात्तथा छिद्यते स्मेति । बहु+छिद्+क्तः ।) रुद्रजटा । इति राजनिर्घण्टः ॥

बहुतः, [स्] अ, (बहुभ्य इत्यर्थे बहुशब्दात् "पञ्चम्यास्तसिल् ।" ५।३।७। इति तसिल्प्रत्ययः ।) बहुभ्यः ॥

बहुतिथः, त्रि, (बहवस्तिथयो यस्य ।) बहुतमविशिष्टः । यथा । बहुतिथः कालः । बहुतिथो यौवा । बहुतिथि आयम् । यथा च । विमध्य बलं दिवमधान्नितिष्ठति विराजे दुर्मेधाराज्ञ तस्मिन्नस्य प्रयोगः । इति कविकल्पद्रुमः ॥

बहुतन्त्री, त्रि, (बहवस्तन्त्र्यो यस्य ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रीर्ग्रीवा बहुतन्त्री धमनी । इति सिद्धान्तकौमुदी । एवं बहुतन्त्रीः कायः । बहुतन्त्रि शरीरम् ॥

बहुतन्त्रीकः, त्रि, (बहुतन्त्री+स्वार्थे कन् ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रीका वीणा ।

इति सिद्धान्तकौमुदी । एवं बहुतन्त्रीकः पटः । बहुतन्त्रीकं वस्त्रम् ॥

बहुतरकणिशः, पुं, (बहुतराणि कणिशानि धान्यशीर्षाणि यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

बहुता, स्त्री, बहूनां भावः । बहुशब्दात् तलौ भावे इति तप्रत्ययः ॥

बहुतिक्ता, स्त्री, (बहुस्तिक्तो रसो यस्याः ।) काकमाची । इति राजनिर्घण्टः ॥

बहुतिथः, त्रि, (बहु + "बहुपूगगणसङ्घस्य तिथुक्" । ५ । २ । ५२ । इति तिथुक् । मुग्धबोधमते "बहुगणपूगसंघातात्तिथट् तमोपच ।" ७ । ४२ । इति तिथट् ।) बहूनां पूरणः । इति व्याकरणम् ॥ (यथा, मार्कण्डेयपुराणे । २२ । १ ।
"ततः काले बहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छाशु विप्राणां त्राणाय चर मेदिनीम् ॥")

बहुत्र, व्य, (बहु + "सप्तम्यास्त्रल् ।" ५ । ३ । १० । इति त्रल् ।) बहुषु । इति सिद्धान्तकौमुदी ॥

बहुत्वं, क्ली, बहूनां भावः । बहुशब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ३५ । ४ ।
"बहुत्वान्नामधेयानि पन्नगानां तपोधन ! ॥")

बहुत्वक्, [च्] पुं, (बह्व्यस्त्वचो यस्य ।) भूर्जवृक्षः । इति शब्दरत्नमाला ॥

बहुत्वचः, पुं, (बहुत्वगिव । बहुत्वच् + स्वार्थे कन् ।) भूर्जवृक्षः । इति हेमचन्द्रः । ४ । २१० ॥

बहुदक्षिकः, त्रि, (बह्वो दक्षाः सन्त्यस्य । बहुदक्ष + ठन् ।) बहुदक्षविशिष्टः । यथा । बहुदक्षिकस्य नगरी बाहुदक्षिको ग्रामः । इति सिद्धान्तकौमुदी ॥

बहुदुग्धः, पुं, (बहूनि दुग्धानि अपक्वावस्थायां यस्य । यद्वा, बहूनि दुग्धानीव शुक्लवर्णान्यस्य ।) गोधूमः । इति राजनिर्घण्टः ॥

बहुदुग्धा, स्त्री, (बहु दुग्धं यस्याः ।) बहुक्षीरा गौः । तत्पर्य्यायः । मञ्जुला २ । इति हेमचन्द्रः । ४ । ३३५ ॥ (स्नुहीवृक्षः । बहुदुग्धविशिष्टत्वात् ॥)

बहुदुग्धिका, स्त्री, (बहुदुग्धा + स्वार्थे कन् । टाप् । अत इत्वम् ।) स्नुहीवृक्षः । इति शब्दचन्द्रिका ॥

बहुधा, व्य, (बहु + "विभाषा बहोर्धाऽविप्रकृष्टकाले ।" ५ । ४ । २० । इति धा ।) बहुप्रकारम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । ४६ ।
"एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"
तथा, गीतायाम् । ९ । १५ ।
"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥"
"केचित्तु त्रिमतो मुख्यं धर्मात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेणोपासते ॥" इति तट्टीकायां श्रीधरस्वामी ॥)

बहुधारं, क्ली, (बह्व्यो धारा यस्य ।) वज्रम् । इति राजनिर्घण्टः ॥

बहुनाडिकः, त्रि, (बहुनाडि + कप् ।) कायः । इति सिद्धान्तकौमुदी ॥

बहुनाडीकः, त्रि, (बह्व्यो नाड्यो यस्मिन् । बहुनाडी + कप् ।) दिवसः । इति संक्षिप्तसारः ॥ स्तम्भः । इति सिद्धान्तकौमुदी ॥

बहुनादः, पुं, (बहुर्महान् नादः शब्दो यस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

बहुपटुः, त्रि, ईषदूनः पटुः । इति व्याकरणम् ॥ बहुच् कर्म्मणि रूपम् ।

बहुपत्रं, क्ली, (बहूनि पत्राण्यस्य ।) अभ्रकम् । इति राजनिर्घण्टः ॥

बहुपत्रः, पुं, (बहूनि पत्राणि दलान्यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपत्रा, स्त्री, (बहुपत्र + टाप् ।) तरुणीपुष्पम् । इति राजनिर्घण्टः ॥ (भूम्यामलकी । तत्पर्य्यायो यथा,—
"भूम्यामलकिका प्रोक्ता शिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्य्याजटापि च ॥")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपत्रिका, (बहुपत्रा + संज्ञायां स्वार्थे वा कन् । टापि अत इत्वम् ।) भूम्यामलकी । मेथिका । (अस्याः पर्य्यायो यथा,
"मेथिका मिथिनिर्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्या मिश्रपुष्पा च कैरवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) महाशतावरी । इति राजनिर्घण्टः ॥

बहुपत्री, स्त्री, (बहुपत्र + गौरादित्वात् ङीष् ।) निङ्गिणी । बृहत्कन्या । तुलसी । जतुका । वृहती । गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

बहुपर्णः, पुं, (बहूनि पर्णानि पत्राणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपर्णिका, स्त्री, (बहुपर्ण + संज्ञायां कन् । टापि अत इत्वम् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुपर्णी, स्त्री, (बहुपर्ण + गौरादित्वात् ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा,—
"मेथिका मिथिनिर्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ।
वल्लरी चैव कामन्या मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा पृथग्विधा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपात्, [द्] पुं, (बहवः पादा यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इत्यमरः । २ । ४ । ३२ ॥

बहुपादः, पुं, (बहवः पादा यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अनेकपादविशिष्टे, त्रि । यथा, भागवते । ४ । २९ । २ ।
"पुरञ्च पुरञ्जनं विद्यात् यदाऽभावयतः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"
तथा च महाभारते । १४ । ४२ । १० ।
"द्विपादबहुपादानि तिर्य्यग्गतिमतीनि च ॥")

बहुपुत्रः, पुं, (बहवः पुत्राः सन्ततयो यस्य ।) सप्तपर्णः । इति शब्दचन्द्रिका ॥ अनेकसुतविशिष्टे, त्रि ॥ (यथा, हरिवंशे । ३ । ६१ ।
"बहुपुत्रस्य विदुषश्चतस्रो विद्युतः सुताः ॥")

बहुपुत्री, स्त्री, (बहवः पुत्राः पुत्रवदुद्गतानि यस्याः ।) शतमूली । इति रत्नमाला ॥ (शतमूलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

बहुपुष्पः, पुं, (बहूनि पुष्पाणि यस्य ।) पारिभद्रवृक्षः । इति राजनिर्घण्टः ॥

बहुपुष्पिका, स्त्री, (बहुपुष्पा + संज्ञायां कन् । अत इत्वम् ।) धातकी । इति राजनिर्घण्टः ॥

बहुप्रजः, पुं, (बह्व्यः प्रजा यस्य ।) मुञ्जतृणम् । इति राजनिर्घण्टः ॥ शूकरः । इति हेमचन्द्रः । ४ । ३५४ ॥ बहुसन्ततिविशिष्टे, त्रि ॥ (छन्दसि तु "बहुप्रजाश्छन्दसि ।" ५ । ४ । १२३ । इति अस्प्रत्ययः । यथा, सिद्धान्तकौमुद्यां वैदिकप्रक्रिया ।
"बहुप्रजा निर्ऋतिमाविवेश ॥")

बहुप्रतिज्ञः, त्रि, (बह्व्यः प्रतिज्ञाः यस्मिन् ।) अनेक-पदसङ्कीर्ण-पूर्व्वपक्ष-विशिष्ट-व्यवहारः । यथा । "यत्तु अनेकपदसङ्कीर्णः पूर्व्वपक्षो न सिद्ध्यतीति । तत्र यद्यनेकवस्तुसङ्कीर्णं इत्युच्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूप्यकादि चापहृतमित्येवंविधस्याप्युक्तत्वात् । अथ नानादानपदसङ्कीर्णे व्यवहारे इति चेत् तदपि न मदीया रूप्यका अनेन गृहीताः सुवर्णं चास्य दत्तं निक्षिप्तं मदीयं क्षेत्रमपहरति चैत्यादीनां व्यवहारमियन्ते एव । किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येतावत् । यथाह कात्यायनः ।
'बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् ।
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया ॥'
तस्मादनेकपदसङ्कीर्णः पूर्व्वपक्षो युगपन्न सिध्यतीति तस्यार्थः ॥" इति मिताक्षरा ॥ अनेकप्रतिज्ञायुक्ते, त्रि ॥

बहुप्रदः, त्रि, (प्रददातीति प्रदः । प्र + दा + क । बहूनां प्रदः ।) प्रचुरदाता । तत्पर्य्यायः । वदान्यः २ स्थूललक्ष्यः ३ दानशौण्डः ४ । इत्यमरः । ३ । १ । ६ ॥ बहुप्रदः ५ दानवीरः ६ दानशूरः ७ । इति शब्दरत्नावली ॥ (पुं, महादेवः । यथा, महाभारते १३ । शिवसहस्रनामकथने । १७ । १०८ ।
"कुलहारी कुलकर्त्ता बहुविद्यो बहुप्रदः ॥")

बहुप्रसूः, स्त्री (बहून् प्रसूते इति । बहु+प्र+सू+क्विप् ।) बहुसन्तानप्रसवकारिणी । तत्पर्य्यायः । सुमिता २ । इति हेमचन्द्रः ।३।२४२।

बहुफलः, पुं, (बहूनि फलानि यस्य ।) कदम्बवृक्षः । इति मेदिनी । ले, १५० । विकङ्कतः । तैल-फलः । इति राजनिर्घण्टः ।

बहुफला, स्त्री, (बहूनि फलानि यस्याः ।) चविका । माषपर्णी । काकमाची । त्रपुषी । क्षुद्राम्बुनी । क्षुद्रकारवेल्ली । इति राजनिर्घण्टः ॥ भूम्यामलकी । इति भावप्रकाशः ॥

बहुफलिका, स्त्री, (बहुफला+संज्ञायां कन् । अत इत्वम् ।) भूवदरी । इति राजनिर्घण्टः ।

बहुफली, स्त्री, (बहुफल+ङीप् ।) वर्त्मशोधः । इति राजनिर्घण्टः ॥ आमलकी । इति मेदिनी । ले, १५० ॥

बहुफेना, स्त्री, (बहुः फेनो यस्याः ।) सातला । इति राजनिर्घण्टः ॥

बहुबलः, पुं, (बहु अतिशयं बलं यस्य ।) सिंहः । इति राजनिर्घण्टः ॥ अतिशयबलयुक्ते, त्रि ॥

बहुमञ्जरी, स्त्री, (बह्व्यो मञ्जर्य्यो यस्याः ।) तुलसी । इति भावप्रकाशः ॥

बहुमलः, पुं, (बहूनि मलानि यस्य ।) सीसकम् । इति रत्नमाला ॥ अनेकमलयुक्ते, त्रि ॥

बहुमार्गी, स्त्री, (बहवो मार्गा यत्र । चतुर्दिक्षु गमनत्वात् तथात्वम् ।) चत्वरम् । इति हेमचन्द्रः ।४।५३॥ अनेकपथयुक्ते, त्रि ॥

बहुमूर्त्तिः, स्त्री, (बह्व्यो मूर्त्तयो यस्याः ।) वनकार्पासी । इति शब्दचन्द्रिका ॥ नानाकारश्च ॥ (बहुमूर्त्तिधरे त्रि । पुं, सकलात्मत्वात् अस्य तथात्वम् ।) विष्णुः । बहुरूपो इति ख्यातः ॥ विष्णुः । यथा, महाभारते । १३ । १४९ । ८० ।

"अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः शतानन: ।"

बहुमूर्द्धा, [न्] पुं, (बहवो मूर्द्धानो यस्य । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।" इति श्रुतेस्तथात्वम् ।) विष्णुः । इति शब्दरत्नावली ॥

बहुमूलः, पुं, (बहूनि मूलानि यस्य ।) शरः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा,—

"शरतो बहुमूलश्च काण्डोऽक्षीवः शरस्तथा ।"

इति वैद्यकरत्नमालायाम् ।)

शिग्रुः । मूलकः । इति राजनिर्घण्टः ॥ अनेकमूलयुक्ते, त्रि ॥

बहुमूल्यं, क्ली, (बहुमूल+यत् ।) उशीरम् । इति भावप्रकाशः ॥ (वीरणम् । तत्पर्य्यायो यथा,—

"स्यादीरणं वीरणमवीरणं बहुमूलकम् ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

बहुमूलकः, पुं, (बहुमूल इव । बहुमूल+स्वार्थे कन् ।) शरतः । इति जटाधरभूरिप्रयोगौ ।

बहुमूला, स्त्री, (बहुमूल+टाप् ।) शतावरी । इति राजनिर्घण्टः ॥

बहुमूली, स्त्री, (बहुमूल+ङीप् ।) माकन्दी । इति राजनिर्घण्टः ॥

बहुमूल्यं, त्रि, (बहूनि मूल्यानि यस्य ।) महार्घवस्तु । तत्पर्य्यायः । महाधनम् २ । इत्यमरः । २ । ६ । ११६ ॥

बहुरश्मिका, स्त्री, (बहूनि रश्मीनि यस्याः । बहुरश्मि+टाप् । संज्ञायां कन् । टापि अत इत्वम् ।) मेदा । इति राजनिर्घण्टः ॥

बहुरसा, स्त्री, (बहु रसो यस्याः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (रसवती स्त्री ।)

बहुरुहा, स्त्री, (बहु यथा तथा रोहतीति । रुह्+क । टाप् ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

बहुरूपः, पुं, (बहूनि रूपाणि यस्य ।) सर्ज्जरसः । इत्यमरः । २ । ६ । १२८ ॥ शिवः । विष्णुः । कामदेवः । शरटः । इति मेदिनी । पे, २० ॥ ब्रह्मा । केशः । इति शब्दरत्नावली ॥ (शिवः । यथा, भागवते । ६ । ६ । १८ ।

"अजैकपादहिर्ब्रध्नो बहुरूपो महानिति ।"

प्रियव्रतपुत्रस्य मेधातिथेः पुत्रभेदो वर्षभेदश्च । यथा, भागवते ।५।२०।२५। "तस्यापि प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव-मनोजव-पवमान-धूम्रानीक-चित्ररेफ-बहुरूप-विश्वाधारसंज्ञान् ।" इति ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥ नानारूपयुक्ते, त्रि ॥ (यथा, मनुः । १ । ४९ ।

"तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना ॥")

बहुरूपकः, पुं, (बहुरूप+स्वार्थे कन् ।) जाहकजन्तुः । इति राजनिर्घण्टः ॥

बहुरूपा, स्त्री, (बहुरूपस्य शिवस्य स्त्री । टाप् ।) दुर्गा । यथा,—

"अरूपा परभावत्वाद्बहुरूपा क्रियात्मिका ।

जाता शैलेन्द्रगेहे सा शैलराजसुता ततः ॥"

इति देवीपुराणे ४५ अध्यायः ॥

बहुरेखा, स्त्री, (बह्व्यो बहुला रेखा करस्यादिचिह्नम् ।) प्रचुरदीर्घचिह्नम् । बहुरेखायुक्तानां दोषो यथा,—

"रेखाभिर्बहुभिः क्लेशं स्वल्पाभिर्धनहीनताम् ।

रक्ताभिः सुखमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत् ॥"

इति गारुडे ६४ अध्यायः ॥

बहुरेताः, [स्] पुं, (बहु रेतो यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

बहुरोमा, [न्] पुं, (बहूनि लोमानि यस्य ।) मेषः । इति हारावली । ८० ॥ लोमशे, त्रि ॥

बहुलं, क्ली, (बंहते वृद्धिं गच्छतीति । बंहि वृद्धौ कुलच् । नलोपश्च ।) आकाशम् । इति मेदिनी ॥ सितमरीचम् । इति राजनिर्घण्टः ॥

बहुलं, त्रि, (बहून् अर्थान् लातीति । बहु+ला+क ।) प्रचुरम् । (यथा, मनुः । ३ । ६० ।

"नानाभिर्न्नैर्वधूपाणां नवाधिनपुदेश्यमम् ।")

कृष्णवर्णः । इति मेदिनी । ले, ११८ ॥

बहुलः, पुं, (बहून् अर्थान् लातीति । बहु+ला+क ।) अग्निः । कृष्णपक्षः । इति मेदिनी । ले, ११८ ॥ (यथा, कुमारे । ४ । १३ ।

"बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग ! मोक्ष्यति ॥"

महादेवः । यथा, महाभारते ।१३। १७ ।१४७ ।

"मन्त्रवित् बहुलो वायुः सकलः सर्व्वलोचनः ॥")

बहुलगन्धा स्त्री, (बहुलो गन्धो यस्याः ।) एला । इति राजनिर्घण्टः ॥

बहुलच्छदः, पुं, (बहुलानि च्छदानि यस्य ।) रक्तशिग्रुः । इति राजनिर्घण्टः ॥

बहुलवणं, क्ली, (बहूनि लवणानि यस्मिन् ।) औषरकम् । इति राजनिर्घण्टः ॥

बहुला, स्त्री, (बहून् अर्थान् लाति या । बहु+ला+क । टाप् ।) नीलिका । एला । (यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च ।

भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

गौः । इति मेदिनी । ले, ११७ ॥ देवीविशेषः । यथा,—

"इदा वा तेन सुमिता निःसृत्य रविमण्डलात् ।

बहुला आगता तूर्णं प्रसुं मानसभूधरः ॥

प्रत्यहं तत्र वासिनी गायत्री बहुला तथा ।

सरस्वती च द्रुपदा चक्रेता मानसाचले ॥"

इति कालिकापुराणे । २१ अध्यायः ॥

(नदीभेदः । यथा, मार्कण्डेये । ५७ । ३८ ।

"सोमावैव सुधाराच बहुला वाह्लमी नदाः ॥"

उत्तमरायजननी । यथा, तत्रैव ।

६८ । ६ ।

"नाभवत् बहुला नाम तस्येष्टे च धर्म्मवित् ।

उत्तानपादतनयः सर्व्वोत्तम इवोत्तमः ॥")

बहुलाः, स्त्री, कृत्तिकानक्षत्रम् । निकरबहुवचनान्तोऽयं शब्दः । इति मेदिनी । ले, ११७ ॥

बहुलीकृतं, त्रि, (अबहुलं बहुलं कृतम् । अभूततद्भावे च्विः ।) अपनीततुषधान्यादि । कर्षीकृत इति भाषा । तत्पर्य्यायः । पूतम् २ । इत्यमरः । २ । ९ । २२ ॥ (विस्तारितम् । यथा, मार्कण्डेये । २१ । ८२ ।

"यदाकमसता वीर ! लया महद्बहुलीकृतम् ॥")

बहुवल्कः, पुं, (बहूनि वल्कानि यस्य ।) प्रियालः । इति राजनिर्घण्टः ॥

बहुवल्ली, स्त्री, कोविदारः । इति राजनिर्घण्टः ॥

बहुवारः, पुं, (बहूनि वारयतीति । बहु+वृ+णिच्+अण् ।) वृक्षविशेषः । बहुयार इति ख्यातः । तत्पर्य्यायः । शितुः २ श्लेष्मातकः ३ शेलुः ४ उद्दालः ५ उद्दालकः ६ । इति शब्दरत्नावली । शेलुः ७ । इत्यमरटीकायां भरतः ॥ अस्य गुणाः । हिमत्वम् । स्वादुत्वम् । कफकारित्वम् । गुरुत्वम् । दुर्जरत्वम् । मधुरत्वञ्च । इति राजवल्लभः ॥

बहुवारकः, पुं, (बहून् व्याधीन् वारयतीति कर्त्तरि णिच् । बहु+वृ+णिच्+ण्वुल् ।) वृक्षविशेषः । (अ

गुणा बहुधारशब्दे उक्ताः। बहुधार इति ख्यातः। यथा, मनुसंहितायाः ।५।६। टीकायां कुल्लूकभट्टः। "धेनुं बहुधारकपलं गोभवं पेयुषं नवप्रसूताया गोः क्षीरमग्निसंयोगात् कठिनं भवति एतान् वर्जयेत् ॥")

बहुविधः, त्रि, (बहवो विधा यस्य।) नानाप्रकारः। तत्पर्य्यायः। विविधः २ नानारूपः ३ पृथग्विधः ४। इत्यमरः। ३।१।८२॥ (यथा, गीतायाम्। ४।३२।
"एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥")

बहुविस्तीर्णा, स्त्री, (बहु यथा स्यात् तथा विस्तीर्णा।) क्षुपिकाक्षुपः। इति शब्दचन्द्रिका॥ क्षुपट इति भाषा॥

बहुवीजं, क्ली, (बहूनि वीजानि यस्य।) शलाटाम्नम्। इति शब्दचन्द्रिका॥ आता इति भाषा॥ अस्य गुणा आतृप्यशब्दे द्रष्टव्याः॥

बहुवीर्य्यः, पुं, (बहु वीर्य्यं तेजो यस्य।) विभीतकः। इति जटाधरः॥ तण्डुलीयशाकः। शाल्मलिवृक्षः। मरुवः। इति राजनिर्घण्टः॥

बहुवीर्य्या, स्त्री, (बहु वीर्य्यं तेजो यस्याः।) भूम्यामलकी। इति राजनिर्घण्टः॥

बहुव्रीहिः, पुं, षट्समासान्तर्गतसमासविशेषः। (मुग्धबोधमते।) अस्य पाणिनिकसंज्ञा चः। यथा, अन्यार्थानां द्वयोर्वा चः। उदाहरणं यथा। पीतमम्बरं यस्यासौ पीताम्बरो हरिः। इति वोपदेवः॥ स च तुल्याधिकरणानां पदानामन्यार्थत्वे स्यादिति बोध्यम्। यथा पीताम्बरादिः। भिन्नाधिकरणानान्तु पुत्रस्य धनमस्य भिन्नाय दिदा अस्य इत्यादौ न स्यात्। क्वचिदेष इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानामपि स्यात् धर्म्मे इतिर्यस्यासौ धर्म्मइतिः। एवं कामइतिः उरसि लोमा कण्ठे काल इत्यादि। एवं पीताम्बर इत्युदाहरणे विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितम्। तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। एवं चित्रगुः चतुर्भुजः दीर्घकेशीत्यादि। एवं पीताम्बर इत्युदाहरणे क्वचित् क्तान्तविशेषणं पूर्व्वं स्यात् क्वचित् परं वा स्यात् इति सूचितम्। तेन अग्न्याहितस्तैलपीतीति। अहितेऽग्न्याहितोऽग्निरिति। न तु गडुकण्ठकण्ठेकालादि इत्यादि। सुराजानः सुरापीतो इत्यादौ मात्राधारक इति। एवं जातदन्तः दन्तजातः कृतमुखः मुखकृतः वीरसेनः सेनावीरः पीतश्वेतः श्वेतपीतः कृतभार्यः भार्याकृतः आत्तपात्रः पात्रात्तः भार्यागतः गतभार्यः गतार्थः अर्थगतः अध्यापितः आहिताग्निः अग्न्याहितः पुत्रजातः जातपुत्रः जातदासः दासजातः दुःखजातः जातमधुरः मधुरजातः कण्ठेकालः इत्यादि बोध्यम्। उद्गतकन्धरः कन्धरोद्गतः उच्चनासिकः नासिकोच्चः उद्गतस्तनः स्तनोद्गतः उद्गतभ्रूः भ्रूद्गतः बाहूद्गत इति। सापेक्षो नित्यं पूर्व्वमिति वोपदेवः। यथा उद्गतभ्रू इत्यादि। एवं धर्म्मोत्तमस्य

त्वात् पूर्व्वम्। सर्व्वज्ञेन:। संख्यायाश्चसमासे: संख्यापूर्व्वं स्यात्। द्विपदः त्रिपूर्व्वः। सप्तम्यन्तमत्रादेः। सप्तम्यन्तं पदं पूर्व्वं स्यात् चन्द्रादेः। धर्म्मे इतिर्यस्यासौ धर्म्मइतिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् किरीटः। चन्द्रादेस्तु चन्द्रशेखरः चक्रधरः पद्मनाभः शूलपाणिः कुशहस्तः। प्रियो वा। गुडप्रियः प्रियगुडः। त्रिभ आरूढो वानरो यं स आरूढवानरो वृक्षः। ढः ढक्की येन स ढक्कनयो भक्तः। दशा भूमिर्यस्मै स दशभूमिर्जिनः। निर्गताः पत्रिणो यस्मात् तस्मात् स निर्गतपत्री वृक्षः। चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः। बहूनि नखानि यत्र तद्बहुनखमाकाशम्। इति द्वितीयाद्यन्यपदार्थे बहुव्रीहयः। सर्व्वसंज्ञकाः। समासे तु प्रथमान्तान्यपदार्थोऽपि यथा यत्र माता वर्त्तते योऽसौ समाहकः एवं अपचक: चनाभकं मांसमानीत्यादि। इति दुर्गादासः॥ * ॥ (बहवो व्रीहयो यस्येति व्युत्पत्त्या) प्रचुरधान्ययुक्ते, त्रि। यथा,—

"इन्द्रो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष! कर्म्म धारय येनाहं स्यां बहुव्रीहिः॥"
इति प्राचीनाः॥

बहुश्रुत्रुः, पुं, (बहवः शत्रवो यस्य।) चटकः। इति शब्दचन्द्रिका॥ (बहुशत्रुविशिष्टे, त्रि। कत्रीयायां स्त्रियां पटोलभक्षणेन, बहुशत्रुः स्यात्। यथा, तिथितत्त्वे।
"कुष्माण्डे चार्थहानिः स्याद्बृहत्यां न स्मरेद्धरिम्।
बहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके॥")

बहुशः, व, (बहूनि दत्तानि करोत्यादि वा। बहु + "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्।" ५।४।४२। इति शस्।) बहुधा। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ५२।३८।
"कथयन्ति बहुशोऽपि पिता पुत्रमयज्ञ यत्॥")

बहुशल्यः, पुं, (बहु शल्यं यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अनेकशल्ययुक्ते, त्रि॥

बहुशालः, पुं, (बहुभिः शालते इति। बहु + शाल + अच्।) स्नुही। इति राजनिर्घण्टः॥

बहुशिखा, स्त्री, (बह्वी शिखा यस्याः।) जलपिप्पली। इति राजनिर्घण्टः॥ (बह्वी शिखा इति कर्म्मधारयसमासः।) अनेकशिखा च॥

बहुसन्ततिः, पुं, (बह्वी सन्ततिर्विस्तारोऽन्वयो वा यस्य।) यवफलः। इति शब्दचन्द्रिका॥ बेड़वाँस इति भाषा॥ अनेकसन्तानयुक्ते, त्रि॥

बहुसम्पुटः, पुं, (बहुः सम्पुटो यस्य।) विष्कन्दः। इति राजनिर्घण्टः॥

बहुसारः, पुं, (बहुः सारः स्थिरांशो यस्य।) खदिरः। इति राजनिर्घण्टः॥ (बहुसारविशिष्टे, त्रि। यथा, शतपथब्राह्मणे। ११।७।३।१। "स य एव बहुसारः॥")

बहुसुता, स्त्री, (बहवः सुताः सन्तानिभूताः यस्याः।) शतमूली। इत्यमरः। २।४।१०१॥

बहुसूः, स्त्री, (बहून् सूते या। बहु + सू + क्विप्।) शूकरी। इति शब्दरत्नावली॥ बहुप्रसवा च॥

बहुसूतिः, स्त्री, (बह्वी सूतिः प्रसवो यस्याः।) बहुप्रसवा गौः। इत्यमरः। २।९।७१॥ बहुसन्तानप्रसवा च॥

बहुस्रवा, स्त्री, (बहु यथा स्यात् तथा स्रवति वा। बहु + स्रु + अच्। टाप्।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥ अनेकक्षरणशीला च॥

बहुस्वनः, पुं, (बहुः प्रचुरः स्वनः शब्दो यस्य।) पेचकः। इति केचित्॥ अनेकशब्दयुक्ते, त्रि॥

बह्वपत्यः, पुं, स्त्री, (बहूनि अपत्यानि यस्य।) शूकरः। मूषकः। इति राजनिर्घण्टः॥ बहुसन्तानयुक्ते, त्रि॥

बह्वाशी, [न्] त्रि, (बहु अश्नातीति। बहु + अश् + णिनि।) बहुभोजनशीलः। यथा, चाणक्ये। १९।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः॥"
(बह्वी आशा यस्य।) बह्वाशाविशिष्टः। (धृतराष्ट्रपुत्रविशेषे, पुं। यथा, महाभारते। १।११७।११।
"आदित्यकेतुर्बह्वाशी नागदत्तोऽग्रयायपि॥")

बह्वृक्, स्त्री, ऋग्वेदः (बह्व्य ऋचो यस्मिन्।) ऋक्, स्त्री। इति मुग्धबोधव्याकरणम्॥ "बह्व्य ऋचोऽधीतवान् येन इति व्युत्पत्त्या ऋग्वेदाध्यायी ब्राह्मणे, पुं। यथा, मनुः। ३।१४५।
"यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम्॥"
केचित् बह्वृच इत्यकारान्तमिच्छन्ति॥)

बह्वृची, स्त्री, (बह्वृचस्य ब्राह्मणस्य पत्नी। बह्वृच + ङीप्।) ऋग्वेदज्ञस्य पत्नी। इति जटाधरः॥ (बह्व्य ऋचोऽधीतवान् यया इति विग्रहे ऋग्वेदाध्यायिनी स्त्री। "बह्वृचबह्वृचाध्यायिनीत्येव वचनात्। "बह्वृचपुरस्तुपदामाश्वे।" ४।४।७४। इत्यत्रापवादः समाधानः। "गोत्रच चरणैः सह" इति जातिलक्षणत्वात् ङीष्। यद्यपि स्त्रीणां वेदाध्ययनं निषिद्धं तथापि युगान्तरे तदासीदिति। यथाच यमः।
"पुराकल्पेतु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥"
इति।)

बा(वा)ड़, ऋ ङ आप्लावे। स्नाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) बाड़ते उन्मज्जनम्। इति दुर्गादासः॥) दीर्घईषेन अन्त्यस्थवकारादिर्मतान्तरे। (ऋदित्त्वात् नित्यं न ह्रस्वः। अबाड़त्॥)

बा(वा)ड़वं, क्ली, (बड़वानां समूहः। बड़वा + "खण्डिकादिभ्यश्च।" ४।२।४५। इत्यञ्।) बड़वासमूहः। इत्यमरः॥ (बड़वाया इद-

मिति। वडवा+अण्। वडवासम्बन्धिनि, त्रि। यथा, सुश्रुते। १। ४५।

"दीपनीयमचक्षुष्यं वाडवं दधि वातलम्॥")

वा(बा)डवः, पुं, (वाडं मुखाग्निस्थानं वाति प्राप्नोतीति। वाड+वा+कः।) ब्राह्मणः। (वडवायां घोटक्यां जातः। वडवा+अण्।) वडवानलः। इत्यमरः॥ तत्पर्य्यायः। और्व्वः २ संवर्त्तकः ३ अब्धाग्निः ४ वडवामुखः ५। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ८८। ६४।

"महोदधेर्जठरगतश्च वाडवो

भवान् विमुक्ता भवता करे स्थितः॥")

वा(बा)डवाग्निः, पुं, (वडवा समुद्रस्था घोटकी तत्सम्बन्ध्यग्निः।) वडवानलः। इति जटाधरः॥ (यथा, माघे। ११। ४५।

"पयसि सलिलराशेर्नक्तमन्तर्निमग्नः

स्फुटमनिशमतापि ज्वालया वाडवाग्निः॥")

वा(बा)डवाग्र्यः, पुं, (वाडवेषु ब्राह्मणेषु अग्र्यः श्रेष्ठः।) ब्राह्मणश्रेष्ठः। यथा,—

"इत्याकर्ण्य वचस्तस्य वाडवाग्र्यस्य धीमतः।

पप्रच्छ हृष्यमाणस्तत्तीर्थयात्राविधिं मुनिम्॥"

इति पाद्मे पातालखण्डे १८ अध्यायः॥

वा(बा)डवेयौ, पुं, (वडवाया घोटकरूपधारिण्याः सूर्य्यपत्न्या अपत्ये पुमांसौ। वडवा+ढक्।) अश्विनीकुमारौ। इति शब्दमाला॥

वा(बा)डव्यं, क्ली, (वाडवानां ब्राह्मणानां समूहः। वाडव+"ब्राह्मणमाणववाडवाद् यत्।" ४।२।४२। इति यत्।) ब्राह्मणसमूहः। इत्यमरः॥

वाडिशनः, पुं, (वाड. प्राचनं तस्मै इच्छति इति। वाड.+इष+क्यु।) वाल्मीकिः। इति हेमचन्द्रः॥

वाढ़,-क्ली, (वाह प्रयत्ने+क्तः। "क्षुब्धस्वान्तध्वान्तेति।" ७।२।१८। इति निपातनात् साधुः।) अतिशयः। (यथा, कथासरित्सागरे। ४४। ६८।

"वाढं मया वा नगरी दृष्टा विद्याधरैः सता॥")

प्रतिज्ञा। इत्यमरः। ३। ३। ४०॥ वाढ़मित्यङ्गीकारे। इति भरतः॥

"वाढं सिद्ध वदे ओमनुमत्यामथ सिद्ध॥"

इति भाषार्णवमाला॥

(बलम्। यथा, रघुः। १८। ५२।

"वाढमेषु दिवसेषु पार्थिवः

कर्म्म साधयति पुत्रजन्मने॥")

वा(बा)णः, पुं, (वणनं वाणः शब्दस्तदस्यास्तीति। वाण+अच्।) अस्त्रविशेषः। तीर इति भाषा। तत्पर्य्यायः। पृषत्कः २ विशिखः ३ अजिह्मगः ४ खगः ५ आशुगः ६ कलम्बः ७ मार्गणः ८ शरः ९ पत्री १० रोपः ११ इषुः १२। इत्यमरः। २। ८। ८६॥ चित्रपुङ्खः १३ सायकः १४ वीरतरुः १५ शुकच्छदः १६ काण्डः १७ विपर्व्वकः १८ ध्वजः १९ वाणी २० पत्रवाहः २१ अस्त्रकण्टकः २२। जिह्मगवाणस्य पर्य्यायः। प्रक्ष्वेडनः १ लोहनालः २ नाराचः ३। निरस्तवाणस्य पर्य्यायः। प्रक्ष्वेडितः १ निरस्तः २। विषाक्तवाणस्य पर्य्यायः। लिप्तकः १ दिग्धः २ लिप्तकः ३। सीरो निम्नसायके। इति शब्दरत्नावली॥ * (यथा, ऋग्वेदे। ६। ७५। १७।

"यत्र वाणाः संपतन्ति कुमारा विशिखा इव।

तत्रा नो ब्रह्मणस्पतिरदितिः शर्म्म यच्छतु

विश्वहा शर्म्म यच्छतु॥")

बलिराजस्य ज्येष्ठपुत्रः। यथा,—

"बलेः पुत्रशतं त्वासीद्वाणज्येष्ठन्ततो द्विजाः।

वाणः सहस्रबाहुः स्यात् सर्व्वास्त्रगुणसंयुतः॥

तपसा तोषितो यस्य पुरे वसति शूलधृक्।

महाकालत्वमगमत् साम्यं यस्य पिनाकिनः॥"

इति मत्स्यपुराणे ५ अध्यायः॥

(अस्य जन्मादिविवरणन्तु वाणयुद्धशब्दे द्रष्टव्यम्। विस्तृतिस्तु हरिवंशे विष्णुपर्व्वणि १७३ अध्यायमारभ्य द्रष्टव्या॥) गोस्तनः। केवलः। इति मेदिनी। णे, २७॥ अग्निः। इति त्रिकाण्डशेषः॥ काण्डावयवः। इति विश्वः॥ भद्रमुञ्जः। इति राजनिर्घण्टः॥ (पुं, स्त्री, नीलझिण्टी। इति वैद्यकम्॥ यथा, माघे। ६। ४६।

"विकचवाणदलावलयोऽधिकं

रुरुचिरे रुचिरेक्षणविभ्रमाः॥"

वण्यते शब्द्यते इति। वण शब्दे+"अकर्त्तरि च कारके संज्ञायाम्।" ३। ३। १९। इति घञ्। वाक्। इति निघण्टुः॥ इक्ष्वाकुवंशीयोऽयोध्याराजः स्वनामख्यातो विकुक्षेः पुत्रः। यथा, रामायणे। १। ७०। २२—२३।

"इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः।

कुक्षेरथात्मजः श्रीमान् विकुक्षिरुदपद्यत॥

विकुक्षेस्तु महातेजा वाणः पुत्रः प्रतापवान्।

वाणस्य तु महातेजा अनरण्यः प्रतापवान्॥"

कादम्बरीप्रणेता कविविशेषः। यथा, कादम्बर्य्यां कविवंशवर्णने।

"सरस्वतीपाणिसरोजसम्पुट-

प्रसुप्तहंसीमधमस्तीकराम्भसः।

शुचेः शुचिः श्रौतसमाविस्मात्

ततः सुतो वाण इति व्यजायत॥

द्विजेन तेनाक्षतकण्ठकौण्ठ्यया

महामनोमोहमलीमसान्धया।

अलब्धवैदग्ध्यविलासमुग्धया

धिया निबद्धेयमतिद्वयी कथा॥"

अस्यैव हर्षचरितरचना इति केचित्॥)

वा(बा)णगङ्गा, स्त्री, (वाणेन प्रकटिता गङ्गा नदीविशेषः॥) रावणवाणविभिन्नसोमेश्वरगिरिभवनदीविशेषः। यथा,—

"सोमेश्वरादृक्षिणे भागे वाणेनाद्रिं विभिद्य वै।

रावणेन प्रकटिता वनधारातिपुण्यदा॥

वाणगङ्गेति विख्याता या स्नानदशाहरिणी।

तस्यां तु वाणगङ्गायां स्नात्वा सोमेश्वरं विभुम्।

सम्पूज्याश्वमेधं प्राप्नोति सोमेश्वरं द्वितीयाद्रिव॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमावसुलिङ्गेश्वरमहिमा त्रिवेण्यादिमहिमा नामाध्यायः॥

वा(बा)णदण्डः, पुं, (वाणस्य दण्डः।) वायदण्डः। तत्पर्य्यायः। वेमा २। इति हेमचन्द्रः॥

वा(बा)णपुङ्खा, स्त्री, (वाणस्य+पुङ्खा।) शरपुङ्खा। इति राजनिर्घण्टः॥

वा(बा)णपुरं, क्ली, (वाणस्य राज्ञः पुरं नगरम्।) वाणराजनगरम्। तत्पर्य्यायः। देवीकोटः २ कोटीवर्षम् ३ ऊषावनम् ४ शोणितपुरम् ५। इति त्रिकाण्डशेषः॥ आग्नेयम् ६ उमावनम् ७ कोट्टवीपुरम् ८। इति शब्दरत्नावली॥

वा(बा)णभट्टः, पुं, ग्रन्थकारविशेषः। (स तु कादम्बर्य्यादिग्रन्थप्रणेता।) "ननु मङ्गलं कथं क्रियते मङ्गलाद्विघ्नध्वंसः विघ्नध्वंसात् प्रारिप्सितसिद्धिरिति चेन्न। वाणभट्टादेर्मङ्गले सत्यपि ग्रन्थसमाप्त्यभावात् माघादौ मङ्गलाभावेऽपि समाप्तिदर्शनात्।" इति मुग्धबोधटीकायां दुर्गादासः।

वा(बा)णयुद्धं, क्ली, (वाणेन सह युद्धम्।) वाणराजेन सह श्रीकृष्णस्य संग्रामः। तस्य विवरणम्। यथा,—

श्रीशुक उवाच।

"वाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः।

येन वामनरूपाय हरयेऽदायि मेदिनी॥

तस्यौरसः सुतो वाणः शिवाराधनतत्परः॥

मान्यो वदान्यो धीमांश्च सत्यसन्धो दृढव्रतः।

शोणिताख्ये पुरे रम्ये स राज्यमकरोत् पुरा॥

तस्य शम्भोः प्रसादेन किङ्करा इव तेऽमराः।

सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृडम्॥

भगवान् सर्व्वभूतेशः शरण्यो भक्तवत्सलः।

वरेण च्छन्दयामास स तं वव्रे पुराधिपम्॥

स एकदाह गिरिशं पार्श्वस्थं वीर्य्यदुर्मदः।

किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम्॥

नमस्ये त्वां महादेव! लोकानां गुरुमीश्वरम्।

पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम्॥

दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत्।

त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम्॥

कण्डूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम्।

आद्यायां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवुः॥

तत् श्रुत्वा भगवान् क्रुद्धः केतुस्ते भज्यते यदा।

त्वद्दर्पघ्नं भवेन्मूढ! संयुगं मत्समेन ते॥

इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप!।

प्रतीक्षन् गिरिशादेशं स्ववीर्य्यनशनं कुधीः॥

तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्।

कन्यालभत कान्तेन प्रागदृष्टश्रुतेन सा॥

सा तत्र तमपश्यन्ती क्वासि कान्तेति वादिनी।

सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम्॥

वाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता।

सख्यपृच्छत् सखीमूषां कौतूहलसमन्विता॥

कं त्वं मृगयसे! सुभ्रु! कीदृशस्ते मनोरथः।

हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये॥

ऊषोवाच।

दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः।

पीतवासा बृहद्बाहुर्योषितां हृदयङ्गमः॥

तमहं मृगये कान्तं पाययित्वाधरं मधु।

क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे॥

चित्रलेखोवाच ।
व्यसनं तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते ।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥
इत्युक्त्वा देवगन्धर्वसिद्धचारणपन्नगान् ।
दैत्यविद्याधरान् यक्षान् मनुजांश्च यथालिखत् ॥
मनुजेषु च सा वृष्णीन् शूरमानकदुन्दुभिम् ।
व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥
अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी ह्रिया ।
सोऽसावसाविति प्राह स्मयमाना महीपते ! ॥
चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् ! द्वारकां कृष्णपालिताम् ॥
तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता ।
गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥
सा च तं सुन्दरवरं विलोक्य मुदितानना ।
दुष्प्रेक्ष्ये स्वगृहे पुम्भी रेमे प्राद्युम्निना समम् ॥
परार्द्ध्यवासःस्रग्गन्धधूपदीपासनादिभिः ।
पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषणार्चितः ॥
गूढः कन्यापुरे शश्वत् प्रवृद्धस्नेहया तया ।
नाहर्गणान् स बुबुधे ऊषयापहृतेन्द्रियः ॥
तां तथा यदुवीरेण भुज्यमानां हतव्रताम् ।
हेतुभिर्लक्षयाञ्चक्रुराप्रीतां दुरवच्छदैः ॥
भटा आवेदयाञ्चक्रू राजंस्ते दुहितुर्वयम् ।
विचेष्टितं लक्षयामः कन्यायाः कुलदूषणम् ॥
अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ! ।
कन्याया दूषणं पुम्भिर्दुष्प्रेक्ष्याया न विद्महे ॥
ततः प्रव्यथितो वाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहम् ॥
कामात्मजं तं भुवनैकसुन्दरं
श्यामं पिशङ्गाम्बरमम्बुजेक्षणम् ।
बृहद्भुजं कुण्डलकुन्तलत्विषा
स्मितावलोकेन च मण्डिताननम् ॥
दीव्यन्तमक्षैः प्रिययाभिनृम्णया
तदङ्गसङ्गस्तनकुङ्कुमस्रजम् ।
बाह्वोर्दधानं मधुमल्लिकाश्रितां
तस्याग्र आसीनमवेक्ष्य विस्मितः ॥
स तं प्रविष्टं वृतमाततायिभि-
र्भटैरनीकैरवलोक्य माधवः ।
उद्यम्य मौर्वं परिघं व्यवस्थितो
यथान्तको दण्डधरो जिघांसया ॥
जिघृक्षया तान् परितः प्रसर्पतः
शुनो यथा शूकरयूथपोऽहनत् ।
ते हन्यमाना भवनाद्विनिर्गता
निर्भिन्नमूर्द्धोरुभुजाः प्रदुद्रुवुः ॥
तं नागपाशैर्बलिनन्दनो बली
घ्नन्तं स्वसैन्यं कुपितो बबन्ध ह ।
ऊषा भृशं शोकविषादविह्वला
बद्धं निशम्याश्रुकलाक्ष्यरौदीत् ॥”
इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे वाणयुद्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीशुक उवाच ।
“अपश्यतां चानिरुद्धं तद्बन्धूनाञ्च भारत ! ।
चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥
नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म च ।
प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥
प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः ।
नन्दोपनन्दभद्राद्या रामकृष्णानुवर्त्तिनः ॥
अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतो दिशम् ।
रुरुधुर्वाणनगरं समन्तात् सात्वतर्षभाः ॥
भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ।
प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥
वाणार्थे भगवान् रुद्रः ससुतः प्रमथैर्वृतः ।
आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥
आसीत् सुतुमुलं युद्धमद्भुतं लोमहर्षणम् ।
कृष्णशङ्करयो राजन् ! प्रद्युम्नगुहयोरपि ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगम् ।
साम्बस्य वाणपुत्रेण वाणेन सह सात्यकेः ॥
ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ।
गन्धर्व्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥
शङ्करानुचराञ्छौरिर्भूतप्रमथगुह्यकान् ।
डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ॥
प्रेतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्षसान् ।
द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥
पृथग्विधानि प्रायुङ्क्त पिनाक्यस्त्राणि शार्ङ्गिणे ।
प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्व्वतम् ।
आग्नेयस्य च पार्ज्जन्यं नैजं पाशुपतस्य च ॥
मोहयित्वा तु गिरिशं जृम्भणास्त्रेण जृम्भितम् ।
वाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥
स्कन्दः प्रद्युम्नवाणौघैरर्द्यमानः समन्ततः ।
असृग्विमुञ्चन् गात्रेभ्यः शिखिनापक्रमद्रणात् ॥
कुम्भाण्डः कूपकर्णश्च पेततुर्मुषलार्द्दितौ ।
दुद्रुवुस्तदनीकानि हतनाथानि सर्व्वतः ॥
विशीर्य्यमाणं स्वबलं दृष्ट्वा वाणोऽत्यमर्षितः ।
कृष्णमभ्यद्रवत् संख्ये रथी हित्वैव सात्यकिम् ॥
धनूंष्याकृष्य युगपद्वाणः पञ्चशतानि वै ।
एकैकस्मिन् शरौ द्वौ द्वौ सन्दधे रणदुर्म्मदः ॥
तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ।
सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥
तन्माता कोटरी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥
ततस्तिर्य्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः ।
वाणश्च तावद्विरथश्छिन्नधन्वाविशत् पुरम् ॥
विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ।
अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥
अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥
माहेश्वरः समाक्रन्दन् वैष्णवेन बलार्द्दितः ।
अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः ।
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥

ज्वर उवाच ।
नमामि त्वानन्तशक्तिं परेशं
सर्व्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्सङ्घातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्नै-
र्देवान् साधून् लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहन्ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥
श्रीभगवानुवाच ।
त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ।
यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।
वाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्द्दनम् ॥
ततो बाहुसहस्रेण नानायुधधरोऽसुरः ।
मुमोच परमक्रुद्धो वाणांश्चक्रायुधे नृप ! ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ।
चिच्छेद भगवान् बाहून् शाखा इव वनस्पतेः ॥
बाहुषु छिद्यमानेषु वाणस्य भगवान् भवः ।
भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥
श्रीरुद्र उवाच ।
त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मान आकाशमिव केवलम् ॥
नाभिर्नभोऽग्निर्मुखमम्बु रेतो
द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्व्वी ।
चन्द्रो मनो यस्य दृगर्क आत्मा
अहं समुद्रो जठरं भुजेन्द्रः ॥
रोमाणि यस्यौषधयोऽम्बुवाहाः
केशा विरिञ्चो धिषणा विसर्गः ।
प्रजापतिर्हृदयं यस्य धर्म्मः
स वै भवान् पुरुषो लोककल्पः ॥
तवावतारोऽयमकुण्ठधामन्
धर्म्मस्य गुप्त्यै जगतो भवाय ।
वयञ्च सर्व्वे भवतानुभाविता
विभावयामो भुवनानि सप्त ॥
त्वमेक आद्यः पुरुषोऽद्वितीय-
स्तुर्य्यः स्वदृग्घेतुरहेतुरीशः ।
प्रतीयसेऽथापि यथा विकारं
स्वमायया सर्व्वगुणप्रसिद्ध्यै ॥
यथैव सूर्य्यः पिहितश्छायया स्वया
छायाञ्च रूपाणि च सञ्चकास्ति ।
एवं गुणेनापिहितो गुणांस्त्व-
मात्मप्रदीपो गुणिनश्च भूमन् ॥

यन्मायामोहितधियः पुत्रदारगृहादिषु ।
उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ॥
देवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्म-
वञ्चकः ॥
यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् ।
विपर्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजेत् ॥
अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ।
सर्व्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥
तं त्वां जगत्स्थित्युदयान्तहेतुं
समं प्रशान्तं सुहृदात्मदैवम् ।
अनन्यमेकं जगदात्मकेतुं
भवापवर्गाय भजाम देवम् ॥
अयं ममेष्टो दयितोऽनुवर्त्ती
मयाभयं दत्तममुष्य देव ।
सम्पाद्यतां तद्भवतः प्रसादो
यथा हि ते दैत्यपतौ प्रसादः ॥
श्रीभगवानुवाच ।
यदात्थ भगवंस्त्वं नः करवाम प्रियन्तव ।
भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥
अवध्योऽयं ममाप्येष वैरोचनिसुतोऽसुरः ।
प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥
दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ।
सूदितञ्च बलं भूरि यच्च भारायितं भुवः ॥
चत्वारोऽस्य भुजाः शिष्टा भविष्यत्यजरामरः ।
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥
इति लब्ध्वाभयं कृष्णं प्रणम्य शिरसासुरः ।
प्राद्युम्निं रथमारोप्य सवध्वा समुपानयत् ॥
अक्षौहिण्या परिवृतं सुवासःसमलङ्कृतम् ।
सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥
स राजधानीं समलङ्कृतां ध्वजैः
सतोरणैरुक्षितमार्गचत्वराम् ।
विवेश शङ्खानकदुन्दुभिस्वनै-
रभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥
य एतत् कृष्णविजयं शङ्करेण च संयुगम् ।
संस्मरेत् प्रातरुत्थाय न तस्य स्यात् पराजयः ॥"
इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणासुरसंग्रामे श्रीकृष्णविजयस्त्रिषष्टितमोऽध्यायः ॥

बा(वा)णलिङ्गं, क्ली, (बाणार्च्चनार्थं कृतं लिङ्गम् । अस्यास्य विवरणकला शैवागमे । यथा,—
"बाणः सदाशिवो देवो बाणो बाणासुरोऽपि च ।
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ॥")
नर्म्मदादिनदीप्रभवलिङ्गम् । तस्य विवरणम् । यथा,—
"नर्म्मदाजलमध्यस्थं बाणलिङ्गमिति स्मृतम् ।
बाणलिङ्गे स्वयम्भूते चन्द्रकान्तमये स्थितम् ॥
चान्द्रायणशतं कार्य्यं सम्भवेद्वैष्णवाद्यनात् ।
माहात्म्याद्धरिभामोऽयं बाणलिङ्गे न विद्यते ।
नर्म्मदायां भवं बाणं ज्ञेयं यत्नाद्विशेषतः ॥
द्विवर्णाभमयं लिङ्गं यदा पूज्यं गदाधरैः ।
एतच्च सर्व्वलिङ्गेभ्यस्त्वहि पूज्यतमं मतम् ॥
चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं मध्यञ्च सुसमाधितम् ॥
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधरं स्मृतम् ।
तस्य न्यूनं पूजनीयं न कदापि न तत्फलम् ॥
कदाचं शिवलिङ्गञ्च स्थूलस्थूलं प्रशस्यते ।
शालग्रामो नार्म्मदश्च स्वयम्भुवो विशिष्यते ॥"
पार्थिवादिलिङ्गापेक्षया बाणलिङ्गस्य श्रेष्ठत्वम् यथा,—
"कोमलेषु तु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।
कठिनेषु तु पाषाणं पाषाणात् स्फाटिकं परम् ॥
स्फाटिकात् पद्मरागञ्च काश्मीरं पद्मरागतः ।
काश्मीरात् पुष्परागोत्थमिन्द्रनीलोद्भवं ततः ॥
इन्द्रनीलाच्च गोमेदं गोमेदाद्विद्रुमोद्भवम् ।
विद्रुमान्मौक्तिकं श्रेष्ठं तस्मात् श्रेष्ठन्तु राजतम् ॥
हैरण्यं राजतात् श्रेष्ठं हैरण्याद्धीरकं परम् ।
हीरकात् पारदं श्रेष्ठं बाणलिङ्गं ततः परम् ॥"
इति मेरुतन्त्रे ८ प्रकाशः ॥
अथ बाणलिङ्गलक्षणम् । वीरमित्रोदयधृत-कालोत्तरे ।
"बाणलिङ्गं तथा ध्येयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शिवतः शृणु ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुख ! ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ।
इन्द्रलिङ्गानि तान्याहुः सान्ध्यान्यार्थप्रदानि च ॥"
इन्द्रलिङ्गलक्षणम् ॥
"आरक्तं हिमकोमालसुच्छवर्णं कारोत्सम् ।
आग्नेयं तत्स्फुलिङ्गनिभमथवा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत् ॥"
इत्याग्नेयलिङ्गलक्षणम् ॥
"दण्डाकारं भवेद्याम्यमथवा रथनासति ।
यद्यद्दृष्टं स्वप्ने तैर्निर्मितं ज्ञायते तदा ।
निर्मितं विधवन्मेन क्रियते स्थापितेन तु ॥"
इति याम्यलिङ्गलक्षणम् ॥
"राक्षसं खड्गमद्धं स्थानदोषबलप्रदम् ।
कर्क्कटादिपनिभन्तु कृष्णकुषितुलं तदा ।
राक्षसं निर्ऋतौ लिङ्गं शात्रवे न सुखप्रदम् ॥"
इति नैर्ऋतलिङ्गलक्षणम् ॥
"वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्णकम् ।
वृष्टिं सुसादवैस्तत्सम्भोगाभन्तु साधनी ॥"
इति वारुणलिङ्गलक्षणम् ॥
"वायव्यं धूम्रं मरालाभं ध्वजाभं ध्वजलक्षम् ।
महाङ्के स्थापितं तच्च नूनमूर्द्धमिनन्नतः ॥"
इति वायुलिङ्गलक्षणम् ॥
"कुबेराख्यगदाकारं हृदिकेषद्ध मध्यगम् ॥"
इति कुबेरलिङ्गलक्षणम् ॥
"शिवं बाणश्च राजं ब्रह्मार्द्धवरवैक्षम् ।
अग्निश्मशानस्थं दीर्घं त्रिशूलकलावतैर्नम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥
"चतुर्व्वर्णमयं चाति वैष्णवं शाश्वतोऽनतः ।
वैष्णवं शङ्खचक्राद्यङ्गदाद्यादिविभूषितम् ॥
श्रीवत्सकौस्तुभाद्यैश्च सर्व्वसिंहासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ।
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ॥"
इति वैष्णवलिङ्गलक्षणम् ॥
"शालग्रामादिसंस्थन्तु शङ्खाङ्कं श्रीविवर्द्धनम् ।
मत्स्याङ्कं कालिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इत्यपि वैष्णवलिङ्गलक्षणम् ॥
हेमाद्रिधृतलक्षणकाण्डे ।
नारद उवाच ।
"अथ वक्ष्यामि ते शिवलिङ्गमेकादशं परम् ।
यस्य दर्शनमात्रेण पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं स्फटिकस्फुलिङ्गाकुलम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटाजूटसमन्वितम् ।
स्वयम्भुवाख्यं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं लक्षबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रमोदनम् ॥
व्यक्तलिङ्गं जटाजूटं शुभ्राभं सर्व्वसिद्धिदम् ।
कालाग्निरुद्रमाख्यातं सर्व्वशत्रुनिषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ।
प्रलयानलसमायुक्तं त्रिपुरादिनिनाशनम् ।
शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ॥
त्रिशूलडमरुधरं नुपुरस्वर्णभासनः ।
अर्द्धनारीश्वराकारं सर्व्वदेवेश्वरेश्वरम् ॥
ईषद्रक्तमयं कान्तं स्थूलं दीर्घं समुज्ज्वलम् ।
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ॥
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महर्षिभिः ।
एकैकेन जगार्थः स्यात् बहुभिः किं सुव्रत ! ॥"
इति बाणलिङ्गचिह्नानि ॥
वीरमित्रोदयधृतकालोत्तरे ।
"उत्कृष्टं चैव योग्यं यदीक्षितं विवर्ज्जयेत् ।
मध्यवर्णन्तु यल्लिङ्गं मधाङ्कं वा कमलध्वजम् ।
दण्डाङ्कं शक्तिचिह्नं वा श्वेताभाभिनं मतम् ।
अग्निवर्णं महाकालं चन्द्रोथं महारोगदम् ॥
पद्मरागनिभं रक्तं महाभं सिद्धिपूजितम् ।
मौक्तिकाभं नीलनिभं हस्तादिकैः समूदितम् ॥
बहुदैः केनचिल्लिङ्गकैर्नित्याक्तैः ।
बाणाख्यमेतत् नीलं समाढमकलम् ॥"
इति बाणलिङ्गलक्षणम् ॥
वीरमित्रोदयधृतम् ।
"दक्षिणं मध्यमं श्रेष्ठं मरीचामलकोत्करैः ।
निःशब्दवधारं वा पूजायां न शस्यते ।
तदा बाणं महाप्राज्ञ दिव्यं पापाङ्कुशमम् ॥"
तुलापरीक्षा उक्तैव । करदमनादिनु स्फुल-
मदर्शनाः तुलया तल्लिङ्गं दांष्ट्रा पूज्य-
मावाहनं लिङ्गवेदिकं महादेवेनुत्तम-

दिति किंवदन्तीति हेमाद्रिधृतव्रतखण्डे ॥
सूतसंहितायाम् ।
"सतण्डुलतुलायान्तु वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं शेषं नार्म्मदमुच्यते ॥
त्रिसप्तवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥"
वीरमित्रोदये ।
"यद्वा वा प्रतिपत्तुर्यो यदा तत्तुल्यलभ्यते ।
बाणलिङ्गं तदा विद्धि ध्रुवं सुखविवर्द्धनम् ॥"
इति बाणलिङ्गपरीक्षा ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
"अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः ।
बाणः सदाशिवो देवो बाणो बाणासुरोऽपि च ॥
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितश्चात्र शिवः सर्व्वार्थदायकः ॥
तत्प्रसिद्धं तल्लिङ्गं बाणाख्येन शिवेन च ।
मधूकस्य फलाकारं कुक्कुटस्य समाकृति ॥"
मधूकवर्णं मधुवीजम् ॥ पक्वजम्बूफलाकारं कुक्कु-टाण्डसमाकृतीति हेमाद्रिधृतव्रतखण्डे पाठः ॥
"भक्तिमुक्तिप्रदश्चैव बाणलिङ्गमुदाहृतम् ॥"
याज्ञवल्क्यसंहितायां देवीं प्रति शिववाक्यम् ।
"प्रशस्तं बाणमिदं लिङ्गं पक्वजम्बूफलाकृति ।
मधुवर्णं तथा शुभ्रं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनार्थं प्रशस्यते ।
स्वयं संभवते लिङ्गं गिरितो नर्म्मदाजले ॥
पुरा बाणासुरेणार्थं प्रार्थितो नर्म्मदातटे ।
अविवासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्च्यं जगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्त्यो बाणलिङ्गैकपूजनात् ॥"
तथा ।
"ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥
पञ्चके योऽर्च्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
वैदिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥"
इति प्रशस्तबाणलिङ्गपूजाफलम् ॥
सूतसंहितायाम् ।
"संस्थाप्य शैलजं लिङ्गं रत्नकोटिगुणं भवेत् ।
रत्नलिङ्गात्तथा बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करः ।
सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ॥"
केदारखण्डे ।
"रत्नधातुमयान्येव लिङ्गानि भावनान्यपि ।
पवित्राण्येव पुण्यानि सर्व्वकामप्रदानि च ॥
तथेमान्यपि सर्व्वाणि काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजकेभ्यः प्रयच्छति ॥"
इति बाणलिङ्गप्रशंसा ॥
सिद्धलिङ्गमाह तत्रैव ।
"कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते लिङ्गे पुत्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिर्मृत्युमेव च ॥
छिन्नलिङ्गेऽर्च्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिका दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतविशाले तु भोगनाशो भवेत् ॥"
हेमाद्रिधृतम् ।
"तीक्ष्णाग्रं वक्रशीर्षञ्च त्र्यस्रलिङ्गं विवर्जयेत् ।
अतिस्थूलं चातिकृशं स्वल्पं वा भूषणान्वितम् ।
गृही विवर्जयेत्तादृक् तद्धि मोक्षार्थिनो हितम् ॥"
इति दुष्टबाणलिङ्गलक्षणम् ॥
शुभलिङ्गमाह वीरमित्रोदये ।
"अथेदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्च्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्त्तुलं भ्रमरोपमम् ।
सम्पत्पीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रसादपीठगम् ॥"
इति शुभबाणलिङ्गलक्षणम् ॥
सूतसंहितायां भैरववाक्यम् ।
"बाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः ।
जितः क्रोधोऽसुरश्च शिवपूजाविधौ रतः ॥
बहुज्ञो लिङ्गवच्चैव शिवज्ञो लक्षणान्वितः ।
दिने दिने स्वयं कृत्वा लिङ्गं स्नाप्य प्रपूजयेत् ॥
एवं वर्षशतं देवि ! दिव्यमानेन पूजयेत् ।
तदा महालिङ्गतनुः प्रसन्नः शङ्करो भवेत् ॥
शङ्कर उवाच ।
तुष्टोऽहं तव हे बाण ! वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि चेशान मह्यं त्वं मन्दभागिने ।
लिप्सोऽहं तव देवेश ! लिङ्गं स्नात्वा दिने दिने ।
सततं स्वर्णलिङ्गमयं ब्राह्मनिर्म्मितम् ।
ज्ञातार्थो दुर्लभो देव ! लिङ्गस्यापि च दुर्लभः ॥
तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् ।
सर्व्वकामफलार्थेषु सर्व्वभक्तानुकम्पनम् ।
सर्व्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर ! ॥
इत्येवं वचनं तस्य शिवः परमकारणम् ।
श्रुत्वा कैलासशृङ्गे शङ्करेण विनिर्म्मिताः ॥
लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश ।
सिद्धलिङ्गं तदा तस्मै ब्रह्म यदीदृशं स्वयम् ।
अयोध्ये तु गुणस्यूतं बाणस्य च समर्पितम् ॥
स्वयम्भवनादं बाणं स्थाप्यमानञ्च विस्मयः ।
संपूज्य बाणः सद्भावे कृत्वा प्रजपनं तदा ॥
तद्भावं स्वपुरं नीत्वा पूजं विन्यसते सुधीः ।
अप्रमं यदि संलिङ्गं स्थाप्यमानं दिने दिने ॥
कल्यानां विंशतिलक्षं बाणस्थाने सुसंस्थे ।
लिङ्गानां कालिकागर्त्ते स्थितानां त्रिकोटयः ।
श्रीशैले कोटयस्तिस्रः कोटिका कन्यकाश्रमे ।
याजेश्वरे च कोटिस्तु कन्यातीर्थे तु कोटिका ॥
महेन्द्रे चैव नेपाले एकैका कोटिरेव च ।
बाणार्थेऽर्द्धे कृतं लिङ्गं बाणलिङ्गमतः स्मृतम् ॥
बाणो वा दिव्यरक्तकपूजनं बाणमुच्यते ।
तत्त्वात्येषु प्रदेशेषु पुण्यस्थानेषु तेषु वा ।
स्थितं तच्चिह्नसम्भावं शिवसाक्षात्कृतिप्रदे ॥"
देवीतन्त्रान्तरमन्त्रसमुच्चयेऽपि ।
"स्वयम्भूलिङ्गवद्बाणलिङ्गं सुखं सदाश्रये ।
यद्ब्रह्मपत्नमध्यमाद्यथा स्थापनपूजने ॥
श्रीशैले कालिकागर्त्ते लिङ्गानां कन्यकाश्रमे ।
कन्यातीर्थे वने याने महेन्द्रे वा सुरेश्वरे ।
स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु ॥"
लिङ्गार्च्चनतन्त्रे बाणलिङ्गान्यधिकृत्य ।
"तदनेकप्रकारं स्याद्द्रव्यवर्णप्रभेदकम् ।
लक्षणैर्विविधैश्चैव बाणं तत्प्रकाशकम् ॥"
बाणलिङ्गस्यावाहनादि न कर्त्तव्यम् । तदुक्तं भविष्ये ।
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥" इति योगसारे प्रथमपरिच्छेदे ।
"बाणे मुहूर्त्तं संस्थाप्य यः करोति शिवार्च्चनम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥"
अथ बाणलिङ्गध्यानं तत्रैव ।
ॐ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं जपेत् ॥"
तथा ।
"प्राणायामं ततः कृत्वा बाणलिङ्गं तु तोषयेत् ।
सादिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ॥
ततोऽर्घ्यं समाधाय स्तवेनानेन तोषयेत् ॥"
अथ स्तवः ।
"ॐ बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो ॥
नमस्ते योगरूपाय नमस्ते सत्ययोनये ॥
संसारतारिणे तुभ्यं नमस्ते सत्यरूपिणे ।
प्रमथाय महेशाय कालरूपाय वै नमः ॥
दक्षाय नमस्तुभ्यं नमस्ते योगकारिणे ।
योगिनां योगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कामस्वरूपिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ।
बाणस्य वरदात्रे च रावणस्य वराय च ।
रामस्यानुग्रहार्थाय रामाय भरताय च ।
सुग्रीवयोगदात्रे च राघवाणां जयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ह्रीं दाक्षिणात्यलिङ्गाय महामायाप्रियाय च ।
भगप्रियाय धर्म्माय वैदिको विप्रकाय च ।
पश्चिमाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ।
कुलमताय वीराय नमो नारायणाय च ।
मधुमांसमत्स्याय वीराय नमो नमः ॥
कुलविद्याप्रकाशाय कौलिकानां सुखाय च ।
कुलयोगाय सिद्धाय गुह्याय परमात्मने ।
परमात्मस्वरूपाय सिद्धमन्त्रप्रदाय च ।
सर्व्वेश्वराय धर्म्माय शिवाय निर्गुणाय च ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ! ॥

यः पठेत् साधकश्रेष्ठो वाञ्छितं लभते सः ।
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ।
शत्रूणां साधनं देव ! कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ।
वाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ।
महाभये महापत्सु राजद्वारे कुलेश्वर ! ।
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ।
वाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य स्मरणमात्रेण नरो मोक्षमवाप्नुयात् ।
वाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे मन्त्रिणां मन्त्रसिद्धये ।
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ।”

इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीश्वरसंवादे वाणलिङ्गस्तोत्रं समाप्तम् ।

वा(बा)णवारः, पुं, (वाणं परमुक्तशरं वारयतीति । वृ + णिच् + अण् ।) भटादेश्चोलाकृतिसन्नाहः । तत्पर्य्यायः । वारवाणः २ वारणः ३ । इति शब्दरत्नावली । चोलकः ४ । इति हारावली । १६० । (क्लीवेऽपि दृश्यते । यथा, रघुः । ४ । ५४ ।
“वाणवारं महावर्त्तैर्बलविवर्द्धनम् ।”)

वा(बा)णसुता, स्त्री, (वाणस्य वाणासुरस्य सुता ।) ऊषा । इति शब्दरत्नावली ।

वा(बा)णहा, [न्] पुं, (वाणं वाणासुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ।

वा(बा)णा, स्त्री, पुं, (वणति शब्दायते इति । वण + घञ् । टाप् ।) नीलझिण्टी । इत्यमरः । २ । ४ । ७४ ।

वा(बा)णा, स्त्री, वाणमूलम् । इति मेदिनी । णे, २० ।

वा(बा)णारिः, पुं, (वाणस्य वाणासुरस्य अरिः ।) विष्णुः । इति केचित् ।

वा(बा)णाश्रयः, पुं, (वाणस्याश्रयः ।) धनुः । इति हलायुधः ।

वा(बा)णाधनं, क्ली, (वाणस्य आधानम् ।) तूणः । इति हलायुधः ।

वा(बा)णिजः, पुं, (वणिगेव । वणिज् + स्वार्थे अण् ।) वणिक् । इत्यमरः । वाड़वाग्निः । इति त्रिकाण्डशेषः ।

वा(बा)णिजिकः, पुं, (वणिगेव । वणिज् + ठञ् ।) वाड़वाग्निः । वणिक् । इति मेदिनी । (वाणिजकोऽप्यत्र । यथा, मनुः । ९ । १८८ ।
“वस्तु वाणिजके दत्तं नैव नाशय लङ्घयेत् ।”)
धूर्त्तः । इति शब्दरत्नावली ।

वा(बा)णिज्यं, क्ली, (वणिजो भावः कर्म्म वा । वणिज् + ष्यञ् ।) वैश्यवृत्तिविशेषः । इत्यमरः । वणिजः कर्म्म भावो वा । वाणिज्येऽपि दृश्यते । इति भरतः । तत्पर्य्यायः । सत्यानृतम् २ वाणिज्या ३ वणिक्पथः ४ । इति जटाधरः । (यथा, मार्कण्डेये । ९१ । ५४ ।
“कृष्यां वाणिज्यलाभे च प्राप्तिं कुर्व्वन्तु मे सदा ।”)

क्रयविक्रयरूपस्य तस्य विवरणादि यथा,—
“मानेन तुलया वापि योऽंशमष्टमकं हरेत् ।
द्वयं च दाप्यो द्विगुणं वृद्धौ हानौ च कल्पितम् ।”
यः पुनर्वणिक् व्रीहिकार्पासादेः पण्यस्याष्टमभागं कूटमानेन कूटतुलया वान्यथापहरत्यसौ पञ्चाशतं द्विगुणं दण्डनीयः । अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये ।
“भेषजस्नेहलवणगन्धधान्यगुड़ादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोड़श ।”
भेषजमौषधद्रव्यं स्नेहो घृतादिः गन्धद्रव्यमुशीरादि धान्यमन्नादि गुड़मिक्ष्वादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोड़शपणो दण्डः ।
किञ्च ।
“मृच्चर्म्ममणिसूत्रायःकाष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ।”
न विद्यते वस्तुगत्या जातिर्यस्मिन् मृच्चर्म्मादिके तदजातिः तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन वस्तुसजातीयसादृश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन मृत्तिकायां सुगन्धामलकमिति । मार्जारचर्म्मणि वर्णोत्कर्षाधानेन व्याघ्रचर्म्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कालायसे वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कटोले त्वगार्थे लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य द्रव्यस्य मूल्यादष्टगुणो दण्डो वेदितव्यः ।
“समुद्रपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ।
भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ।”
मुद्रं पिधानं तद्युक्तं यत् भवति इति समुद्रं करण्डकम् । परिवर्त्तनं व्यत्यासः । योऽन्यदेव रत्नानां पूर्णं करण्डकं दर्शयित्वा रत्नाभावेऽन्यदेव स्फटिकानां पूर्णं करण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वस्तुमूल्यापेक्षया वेदितव्या । तत्र कस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने पञ्चाशत्पणो दण्डः । पणमूल्ये पुनः शतं द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरूह्या । ७ । वणिजः प्रत्याह ।
“सम्भूय कुर्व्वतामर्घं सबाधं कारुशिल्पिनाम् ।
अर्घस्य ह्रासं वृद्धिं वा जानतो दम उत्तमः ।”
राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानन्तोऽपि वणिजः सम्भूय मिलित्वा कारूणां रजकादीनां शिल्पिनां चित्रकरादीनां सबाधं पीड़ाकरमर्घान्तरं लाभलोभात् कुर्व्वन्तः पणसहस्रं दण्डनीयाः । ८ । किञ्च ।
“सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ।”
ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो विहितो दण्डो मन्वादिभिः । ९ । केन पुनरर्घेण वणिक्तव्यमित्याह ।
“राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः ।
क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृत् स्मृतः ।”
राजनि सन्निहिते सति योऽर्घः स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्य्यः । निस्रवः यो निस्रवोऽवशेषः तस्माद्राजनिरूपितादर्घो निस्रवः स एव वणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितात् । अमुना चार्थकरणे निर्देशो दर्शितः ।
“पञ्चरात्रे पञ्चरात्रे पक्षे मासि तथा गते ।
कुर्व्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप ! ।”
इति ।

किञ्च ।
“स्वदेशपण्ये च शतं वणिक् गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ।”
स्वदेशप्राप्तपण्यं गृहीत्वा यो विक्रीणीतेऽसौ पञ्चकं शतं पणशते पणपञ्चकं लाभं गृह्णीयात् । परदेशप्राप्ते पुनः पण्ये शतपणे दशपणान् लाभं गृह्णीयात् । यस्य पण्यग्रहणदिवस एव विक्रयः सम्पद्यते । यः पुनः कालान्तरेऽपि विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः । एवञ्च यथार्घे निरूपिते पणशते पणपञ्चको लाभो भवति तथैवार्घो राज्ञा स्वदेशपण्यविषये स्थापनीयः । १० । परदेशपण्ये चार्घनिरूपणप्रकारमाह ।
“पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत् कार्य्यः क्रेतुर्विक्रेतुरेव च ।”
देशान्तरादागते पण्ये देशान्तरगमनागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिकल्प्य पण्यमूल्येन सह मेलयित्वा यथा पणशते दशपणो लाभः सम्पद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्य्यर्घो राज्ञा स्थापनीयः । ११ । वाणिज्ये परिसमाप्ते पुनः विक्रीतानुशयमाहानुशयमते । तदुक्तं नारदेनाभिहितम् ।
“क्रीत्वा मूल्येन यत् पण्यं क्रेता न बहुमन्यते ।
क्रीतानुशय इत्येष विवादपदमुच्यते ।”
तत्र विक्रेतुरपि पश्चात्तापे विशेषमाह ।
दत्त्वा पुनः क्व विलम्बं तेनैव प्रकारमाह ।
“क्रेताऽपि दिवसे [illegible]
दद्यात् ।”

षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ।
गणिमं तुलिमं मेयं क्रियया रूपतः श्रिया ॥"

इति ।

गणिमं क्रमुकफलादि । तुलिमं कुङ्कुमादि । मेयं शाल्यादि । क्रियया वाहदोहादिरूपया उपलक्षितमश्वमहिष्यादि । रूपतः पण्याङ्गनादि । श्रिया दीप्त्या मरकतपद्मरागादि ॥*॥ एवंविधमनेकप्रकारमपि पण्यं विक्रीयार्थमप्रयच्छतो दण्डमाह ।

"गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥"

गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद्गृहीतमूल्यं तद्यदि विक्रेता प्रार्थयमानाय स्वदेशवणिजि क्रेत्रे न समर्पयति । तत्र पण्यं यदि क्रयकाले यन्मूल्यं यत् कालान्तरेऽल्पमूल्येनैव लभ्यते तदार्घह्रासकृतो य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः । यदा गच्छद्दानतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यात्तावदेव तदा तत्पण्यमादाय तस्मिन् देशे विक्रीयमाणस्य यो लाभस्तेनोदयेन सहितं द्विगुणं विक्रयिकादि प्रतिग्राहितदेशोदयेन वा सहितं क्रेत्रे दापनीयः ॥*॥ यथाह नारदः ।

"अर्घश्चेदवहीयेत सोदयं पण्यमावहेत् ।
स्थायिनामेष नियमो दिग्लाभं दिग्विचारिणाम् ॥"

इति ।

यदा अर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये पशुधान्यादिके य उपभोगः तदाश्रयेण गृहक्षेत्रादिरूपो विक्रेतृकृतः पण्यसमो दाप्यः । यथाह नारदः ।

"विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति ।
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम् ॥"

इति ।

विक्रेतुरुपभोगः स्वयं उपभोगे । क्रेतुः समर्पितेन त्वयमानस्य पुनः कृषिपालनसस्यादि । तत्र तु ।

"उपहन्येत वा पण्यं दह्येतापह्रियेत वा ।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः ॥"

[illegible]

यदा तु क्रीतं देशान्तरात् पण्यप्रवासेनानीतं तत् पण्यमादाय देशान्तरे विक्रीयमाणस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः । यत्र क्रीतमूल्येन समर्पणे नियमोऽनुशयाभावे द्रष्टव्यः । यदि अनुशये क्रीत्वा विक्रीय वा किञ्चिदिदमसम्यक् वेदितव्यम् ॥*॥ किञ्च ।

"विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति ।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥"

यदा तु क्रीतमपि पण्यं क्रेता न गृह्णाति तदा विक्रेता तदन्यत्र विक्रेयम् । यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च

पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत् । यस्मात् क्रेतृदोषेण क्रेतुरेव हानिर्जाता ॥*॥ अपि च ।

"राजदैवोपघातेन पण्ये दोषमुपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥"

यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अथानाशयोऽपि तत्र राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेवातोऽन्यदुष्टं पण्यं विपद्यमानं क्रेत्रे देयम् ॥ किञ्च ।

"अन्यहस्ते च विक्रीतं दुष्टं वा दुष्टवद्यदि ।
विक्रीणीते दमस्तत्र तन्मूल्याद्द्विगुणो भवेत् ॥"

यः पुनरेकेनात्मत्वमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्रच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्याद्द्विगुणो दमो वेदितव्यः ॥*॥ नारदेनाप्यत्र विशेषो दर्शितः ।

"अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति ।
द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥
निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु ॥"

इति ।

सर्वत्रायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाङ्मात्रकृते क्रेतृविक्रेत्रोर्नियमकारिणः समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः ॥*॥ यथाह नारदः ।

"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रमः ॥" इति ।

विक्रयानुशयोऽभिहितः क्रीतानुशयमधुना तु प्राक् प्रदर्शितमप्युक्त तदुभयसाधारणं धर्ममाह ।

"क्षयं वृद्धिं च वणिजा पण्यानामविजानता ।
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक् ॥"

परीक्षितक्रीतपण्यानां क्रयोत्तरकालं प्रयाणकालादिसमयेऽर्घहानौ वृद्धिमपश्यता क्रेत्रानुशयो न कार्यः । विक्रेत्रा च महार्घविलक्षणं पण्यं वृद्धिमपश्यता नानुशयितव्यम् । वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तं भवति । अनुशयकालावधिश्च नारदेनोक्तः ।

"क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम् ॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमा-
वहेत् ।
द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥"

इति ।

अपरीक्षितक्रयविषये पुनः सप्तावधिः परीक्षकाः । तथा परीक्षाविषये दर्शितः कालः दर्शित एव । तद्यथा भाषो युक्ता परीक्षितपरीक्षणकालावधिप्रकारमनुनाह । यथा यत्पदार्थोऽत्रावधिस्तत्र तत्त्वदोषाभावे यत्र यत्पदार्थे

तद्दृष्टं हि सम्प्रकारत्वयितव्यभावेनानुष्ठानमतिकान्तकालेऽपि यद्यनुशयं करोति तदा षड्भागं दण्डनीयः । अनुशयकालाभ्यन्तरेऽपि अनुशयकालाविशेषेणानुशयं कुर्वतोऽप्ययमेव दण्डः । उपभोगेनापि नष्टेषु विक्रयार्थं अनुशयकालातिक्रमेणानुशयं कुर्वतो मनुक्तो दण्डो द्रष्टव्यः ।

"परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥"

इति मिताक्षरायां विक्रीयासम्प्रदानं नाम प्रकरणम् ।

अथ कृषवणिक् ।

"कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयं कृतम् ।
आपत्काले स्वयं कुर्वन् नैनसा युज्यते द्विजः ॥
लक्ष्मलाभः पितृन् देवान् ब्राह्मणांश्चैव पूजयेत् ।
ते तृप्तास्तस्य तं दोषं शमयन्ति न संशयः ॥
वणिक् कुसीदी दद्यात्तु स्वर्णगोकाञ्चनादिकम् ।
वणिक् कृषीवलोऽपि स्यात् ब्राह्मणांश्च पूज-
येत् ॥"

इत्याह्निकतत्त्वम् ।

वा(बा)णिज्या, स्त्री, (वाणिज्य + टाप् । अभिधानात् स्त्रीत्वम् ।) वाणिज्यम् । इति जटाधरः ।

बा(वा)ध, ऋ ङ विलोडने । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अबबाधत् । ङ, बाधते । कर्ब न ससिम्बधिको बबाधे । इति रघुः । ८ । १४ । इति दुर्गादासः ।

बा(वा)धः, पुं, (बाधनमिति । बाध + भावे घञ् ।) प्रतिबन्धकः । बाधनम् । (यथा, भट्टिः । ६ । १६ । "यदीममर्थं मन्यते वा विनाशो बाधे शरणं भाग्यपरं हिताम् ।") व्याप्यमत्ते साध्याभावव्याप्यवत्ता । यथा । ह्रदो वह्निमान् । इति न्यायविवर्तितात्पर्यो ।

बा(वा)धकः, पुं, (बा(वा)धते इति । बाध + ण्वुल् ।) स्त्रीरोगविशेषः । यथा,—

"रक्तमात्री तथा षष्ठी अङ्कुरो जलकुमारकः ।
चतुर्विधो बाधकः स्यात् स्त्रीणां तु विविधात्मकः ॥
तेषां स्वभावं वक्ष्यामि यथावत्तं विधानतः ।
दर्शयेत् पूर्वरूपं वा यत्नेः प्रसवकारिभिः ॥
नितम्बे नाभिदेशे च बलदान्तं शनकाः ।
कर्णयोः शुष्कवाक्येन तथा हस्ते विपद्यते ॥
चतुर्विधो बाधकस्तु बाधते बहुकालतः ॥"

तस्य लक्षणं यथा,—

"यथा कन्या तथा नारीयः प्राप्ते वा भवेत्
च ।

रक्तमात्रीप्रदोषेण बाधते षष्ठीपदा ।
मासमेकं द्वयं वापि ऋतुर्नाशो भवेद्यदि ।
रक्तमात्रीप्रदोषेण बन्ध्या तदा भवेत् ॥"

इति रसमञ्जरी ।

"षष्ठी स्यात् भवेद्वन्ध्या योनौ चैव विशेषतः ।
तावन्निदानरूपं च दृष्टवान् कमलोचनः ॥
साधितेन भवेद्देवी ऋतुस्नातं यथा ।
बन्ध्या रक्तस्रावः स्यात् षष्ठीबाधकलक्षणम् ॥"

इति वचनम् ।

"उद्दिष्टो गुरुता देहे स्तब्धशूलो भवेद्यदि ।
नाभेरधो भवेत् शूलं पाण्डुरः स तु वाधकः ॥
ऋतुहीना चतुर्मासं त्रिमासं वा भवेद्यदि ।
कृशाङ्गी करपादे च ज्वाला पाण्डुरयोगतः ॥"
इति पाण्डुरस्य ।
"सशूला च सगर्भा च शुष्कदेहाल्परक्तिका ।
जलकुमारस्य दोषेण जायते मलयोगतः ॥
या कृशाङ्गी भवेत् स्थूला बहुकालमृतुस्तथा ।
गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात् ॥"
इति जलकुमारस्य ।
इति वैद्यकम् ॥ बाधाजनके, त्रि । (यथा, मार्कण्डेये । १४ । १६ ।
"धर्म्मो धर्म्मानुबन्धार्थो धर्म्मो नात्मार्थ-
बाधकः ॥")
बा(वा)धनं, क्ली, (बाध + ल्युट् ।) पीडा । इति शब्दरत्नावली ॥ प्रतिबन्धकञ्च ॥ (बाधते इति । बाध + ल्युः । पीडादातरि प्रतिबन्धके च त्रि । यथा, हरिवंशे । ८५ । ५१ ।
"श्रूयतां कथयिष्यामि यथोभौ प्रभुबाधनौ ॥")
बा(वा)धा, स्त्री, (बाध + टाप् ।) पीडा । इत्यमरः । १ । ८ । ३ ॥ (यथा, मार्कण्डेये । २९ । ३ ।
"दुर्वृत्ताः सन्ति सततो दानवाः पापयोनयः ।
तेभ्यो न स्यात् यथा बाधा प्रजानां त्वं तथा
कुरु ॥")
निषेधः । इति हेमचन्द्रः ॥
बा(वा)धितः, त्रि, (बाध + क्त ।) बाधायुक्तः । निषेधः । यथा । सकृद्गतविप्रतिषेधेन यद्बाधितं तद्बाधितमेव । इति मुग्धबोधटीकायां दुर्गादासः ॥
बाधिर्य्यं, क्ली, (बधिरस्य भावः । बधिर + ष्यञ् ।) बधिरस्य भावः । कर्णरोगविशेषः । तस्य निदानम् । यथा,—
"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।
शुद्धः श्लेष्माश्रितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकरः ।
तस्यौषधं यथा,—
"शुष्कमूलकखण्डानां क्षारो हिङ्गुसमन्वितः ।
शुक्तं चतुर्गुणं दत्त्वा तैलेनैकेन पाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
कृमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"
अपि च ।
"दशो द्वे नवमालायां स्थापयेद्दिवसत्रयम् ।
चतुर्भागावशेषेण तैलमस्यां विपाचयेत् ।
कलिङ्गकल्कपादं च दत्त्वा विश्वेन्दाणि दापयेत् ॥
दुर्गन्धं लोध्रकं चैव कुष्ठं च तथा ।
नरकं एरण्डकञ्च हरिद्रे कटुकाथिका ॥
मज्जापाठस्तवेत् कर्णशूलं सुदुस्तरम् ।
बाधिर्य्यं कर्णरोगञ्च पञ्चत्वाद् अपि चेत् ॥"
इति गारुडे १८८ अध्यायः ॥
(अस्योपचिकित्सान्तरं यथा,—
"स एव शब्दाभिवहा यदा शिराः
कफानुयातो व्यनुपद्य तिष्ठति ।
तदा नरस्याप्रतिकारसेविनो
भवेत्तु बाधिर्य्यमसंशयं खलु ॥"
इत्युत्तरतन्त्रे विंशतितमेऽध्याये सुश्रुतेनोक्तम् ।
अस्य चिकित्सा यथा,—
"सामान्यतो विशेषेण बाधिर्य्ये पूरणं शृणु ।
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
चित्रामयुक्तबिल्वोभिः सिद्धं वापि पयस्यपि ॥
सिद्धं वा दिश्यतिःसार्थे शीतीभूतं तदुद्धृतम् ।
पुनः पचेद्दृश्योरं सितामधुकचन्दनैः ॥
विल्वान्तु गाढं सतैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ।
वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ॥"
इति च तत्रैकविंशतितमेऽध्याये तेनैवोक्तम् ॥)
बाध्यं, त्रि, (बाध + ण्यत् ।) बाधनीयम् । बाधितव्यम् । निवर्त्त्यम् । यथा । धातुचिन्तासिद्धरूपयोगात् प्रकरणमिदं बाध्यम् । इति भगवत्पदस्य चमत्कारवृत्तिः ॥ (यथा, मार्कण्डेये । ६६ । ४० ।
"नाहं धारोदिवस्तुल्यः स्त्रीबाध्यो वा कथं-
चन ॥")
बाध्यता, स्त्री, (बाध्यस्य भावः । बाध्य + तल् ।) बाध्यत्वम् । बाध्यस्य भावः इत्यर्थे तलप्रत्ययनिष्पन्नोऽयं शब्दः ॥
बान्धकिनेयः, त्रि, (बन्धक्या अपत्यं पुमान् । बन्धकी + "कल्याण्यादीनामिनङ् ।" ४ । १ । १२६ । इति ढक् इनङ् च ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥
बान्धवः, पुं, (बन्धुरेव । बन्धु + "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) ज्ञातिः । इत्यमरः । २ । ६ । ३४ ॥ सुहृत् । इति मेदिनी । वे, ३५ ॥ (यथा, मनुः । ५ । ७० ।
"नास्य कार्य्योऽग्निसंस्कारो नापि कार्य्योदकक्रिया ।")
अस्य विवरणं बन्धुशब्दे द्रष्टव्यम् ॥
बान्धवी, स्त्री, (बन्धोर्महादेवस्य पत्नी । बन्धु + अण् + ङीष् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ८६ । ९१ ।
"मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।")
बारकीरः, पुं, द्वारपालः । बालकः । युका । वैधिपीधिनी । पीठाकिपादपः । इति मेदिनी । रे, २८१ ॥
बार्बटीरः, पुं, वपुः । आम्रास्थि । अङ्कुरः । गणिकासुतः । इति हेमचन्द्रः ॥
बार्हतं, त्रि, बृहतीसम्बन्धि । बृहत्या इदम् इत्यर्थे (अण्) प्रत्ययेन निष्पन्नम् ॥
बार्हद्रथः, पुं, (बार्हद्रथं बृहद्रथसम्बन्धि माल्यं यस्य सोऽस्य सम्भवति । अत्र व्युत्पत्ति-भेदः ।) मालिकः । यथा, हेमचन्द्रः ।
"माहारराष्ट्राभेदः मालाकारस्तु पौष्पिकः ।
गौदायिकश्चैत्ररथो बार्हद्रथस्तु मालिकः ।
वैदेहिकः पारसीको बार्हद्रथस्तु मालिकः
चार्माणो गोदावरिकश्चैव वदन्ति नार्हकाः ॥"
(बृहत्याश्रित पीठानिमित्तम् । बृहती + अण् ।)
बौद्धदेवे, स्त्री । इति मेदिनी ॥ बृहत्यादिरिद-
मिति वा । बृहती + "द्विगौ प्रमाणे" इत्यादि "ऋष्यन्धकवृष्णिकुरुभ्यश्च ।" ४ । १ । ११४ । इति अण् ।)
बृहत्प्रतिसम्बन्धिनि, त्रि ॥
बालं, क्ली, पुं, (बलतीति । बल + णः ।) गन्धद्रव्यविशेषः । बाला इति ख्यातम् । इति मेदिनी ॥ तत्पर्य्यायः । ह्रीवेरम् २ बर्हिष्ठम् ३ उदीच्यम् ४ केशनामकम् ५ अम्बुनामकम् ६ इत्यमरः । २ । ४ । १२३ ॥ ह्रिवेरम् ७ वर्हिष्ठम् ८ । इति भरतः ॥ बालकम् ९ वारिदम् १० इति शब्दरत्नावली ॥ वरम् ११ ह्रीवेरकम् १२ केश्यम् १३ जलम् १४ पिङ्गम् १५ ललनाप्रियम् १६ कुन्तलोशीरम् १७ कचामोदम् १८ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । पित्तवान्तिहृल्लासकुष्ठातिसारश्लेष्मकृमिनाशित्वम् । केशहितत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"बाला ह्रीबेरबर्हिष्ठमुदीच्यं केशनाम-
पि च ।
सुगन्धि हरिवेरं च बालकं केशनामकम् ।
ततोऽन्यास्तिवला अप्यपरा सकुलिकाप्यथ ।
गाङ्गेरुकी नागबला झषा ह्रस्वा गवेधुका ।
अस्य गुणाः ।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥
बलाचतुष्टयविशेषगुणाः ।
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशयः ॥
हन्यान्महाबला कृच्छ्रं भवेद्वातानुलोमनी ।
हन्यादतिबला मेहं पयसा सितया सह ॥"
इति भावप्रकाशः ॥
बालः, त्रि, (बलतीति । बल प्राणने + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः ।) मूर्खः ॥ (यथा, मनुः । २ । १५३ ।
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥"
"शैशवादाषोडशाब्दं यावत् स बालो भवति
पञ्चवर्षपर्यन्तः ।" इति मलीकायां कुल्लूकभट्टः ।)
अर्भकः । इति मेदिनी । ले, ३० ॥ शिशोर्बाल्य
पर्य्यायः । माणवकः २ । इत्यमरः । २ । ६ । ४२ ॥
बालकः ३ माणवः ४ किशोरः ५ वटुः ६ सुतः
७ स्तनन्धयः ७ वटुकः ८ किशोरकः ९ । इति शब्दरत्नावली ॥ पाकः १० अर्भः ११ डिम्भकः १२ पृथुकः १३ डिम्भः १४ शावः १५ अर्भकः १६ शिशुकः १७ शिशुः १८ । इति राजनिर्घण्टः ॥
न तु षोडशवर्षपर्य्यन्तः प्रथमवयस्कः । यथा,—
"आषोडशाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम् ॥"
इति स्मृतिः । इति भरतः ॥
तस्य रक्षकाः कर्णदेवताः । यथा,—
"अनाथबालवृद्धानां रक्षकाः कर्णदेवताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः ॥
अथ बालस्य प्रतिपालनं यथा, १८० ।
"बालमद्य पूर्णं दशाहे तेन कर्णवेधं कारयेत् ।

सहसा बोधयेदेनं कार्याण्युत्थापयेत् ।"
[illegible] ।
"शाहन्त्र स्नापयेत् क्रोडे न स्थिरं शयने स्थितम् ।
गोदयेन चलितं कार्यं विधिमाचरतं विना ।"
कारयन्नी विधिः [illegible] ।
नविकलमनुवर्त्तेत तं सदैवानुमोदयेत् ।
संक्षिप्तमना एवं नित्यमेवाभिवर्द्धयेत् ।
वातातपमहिद्युद्दीप्रभाजनतलादितः ।
निम्नौष्ठ्याचापि रक्षेद्बालं प्रयत्नतः ।"
बालस्य [illegible] ।
"अब्दमोदयैरे बालं नेत्रयो रञ्जनं तथा ।
बालं सद्दु यत्न तदा [illegible] ।
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्वदा ।"
बालस्य कवलादि गमनमाह ।
"कवलः पञ्चमाद्वर्षाद्विंशतिर्वै मैथुनम् ।"
बाल्यादेरवधिमाह सुश्रुतः ।
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ।
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक् ।
दुग्धाशी वत्सरं यावत् दुग्धान्नाशी शरद्द्वयम् ।
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ।
मध्यो षोडशसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्धा मध्यमं प्राहुः [illegible] मतः ।
चत्वारिंशत्तमा [illegible] ।
ततः क्षीयेत धीरः [illegible] ।
[illegible] ।
[illegible] । धीरः सर्वधातिन्द्रिय-
[illegible] ।
ततस्तु सप्ततेरूर्द्धं क्षीणधात्वादिकः ।
[illegible] क्षीयते दिने दिने ।
[illegible] कर्मसु चाक्षमः ।
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ।
[illegible] ।
[illegible] ।
[illegible] । तत्रान्तरे तु ।
[illegible] ।
[illegible] ।"
इति भावप्रकाशः ।
(अथ बालाशौचम् ।
"[illegible]
मरणे मातापित्रोरशौचं [illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । अन्नप्राशनात् परं [illegible]
[illegible] । [illegible]
[illegible] ।
लौकिककर्माधिकारः ।
[illegible] । कन्यायास्तु [illegible]
[illegible] वैदिककर्माधिकारः ।
[illegible] । कन्याजन्मनि
लौकिककर्माधिकारः वैदिककर्मणि तु मातो-
[illegible] । एतत् धर्मं कन्यापुत्रयो-
[illegible] ।
[illegible] अन्नप्राशनात् [illegible]
मरणे मातापित्रोरेकाहः । [illegible]
[illegible] । अन्नप्राशनादूर्ध्वं [illegible]
मरणे मातापित्रोस्त्र्यहः । [illegible] ।
[illegible] । [illegible]
[illegible] ।
[illegible]
[illegible] मरणे मातापित्रादिसपिण्डानां त्र्यहः ।
[illegible] मरणे दशाहः । [illegible]
[illegible] मरणे पित्रादिसपिण्डानां
दशाहः ।
[illegible] मरणे
[illegible] । [illegible]
[illegible] ।
[illegible] । [illegible]
[illegible] मरणे [illegible] । [illegible]
[illegible] मासो यावद्भवति बहुवर्षोपरि-
मासः ॥ ॥ "बालकजन्मनः [illegible]
वैद्यके । यथा,—"[illegible]
[illegible] पायवेत् । पौत्र-
[illegible] ।
[illegible] ।
धूपनैश्च रक्षोघ्नैः । रक्षोघ्नानि चास्य
[illegible] तिलातसी-
सर्षपकणांश्चात्र प्रकिरेत् । [illegible]
[illegible] ।
ततो दशमेऽहनि मातापितरौ कृतमङ्गल-
कौतुकौ [illegible]
[illegible] ॥
ततो यथावर्णं [illegible]
[illegible]
[illegible]
[illegible]
[illegible] भूमि
[illegible]
बालस्य । तथोर्द्धमतो कराणं कुर्यात् । [illegible]
[illegible]
[illegible] । ततः प्रशस्ते तिथौ [illegible]
[illegible]
[illegible]
[illegible] ।
[illegible] ।
[illegible] बालस्य [illegible] ।
[illegible] कुमारस्य शुभावहे ।
दीर्घमायुरवाप्नोति तेजः प्राज्ञत्वमेव च ॥
[illegible]
[illegible]
[illegible]
[illegible] । तस्मादेनं विधिं
सम्यं न पायवेत् ।"
"बालं पुनर्गात्रसुखं गृह्णीयात् चैनं तर्जयेत्
सहसा न प्रतिबोधयेद्वित्रासभयात् सहसा
[illegible]
[illegible] कौमारभृत्यं नित्यमेवमनुवर्त्तेत [illegible]
[illegible] । [illegible]
[illegible] शुभवहश्च
भवति । [illegible]
[illegible] दुर्गहोमवर्ह
तथ बालं रक्षेत् ।
बालश्चो [illegible] विदधे न च ।
[illegible] ।
[illegible] ।
[illegible] ।"
इति सुश्रुते शारीरस्थाने दशमोऽध्यायः ॥
बा(वा)लः, पुं, (बलति प्राणान् धारयति संवृणोति
वा । बल + णः ।) शिरोभवाल्पावयवविशेषः ।
चुल इति भाषा । तत्पर्य्यायः । चिकुरः २ कचः
३ केशः ४ कुन्तलः ५ कुञ्जरः ६ शिरोरुहः ७
शिरसिजः ८ शिरोरुट् ९ शिरजः १० । इति
शब्दरत्नावली । घोटकादिपुच्छः । तत्पर्य्यायः ।
किशोरः २ । इत्यमरः । [illegible] । वार-
बालधिः । वालधिः । इति मेदिनी । बे, १८ ।
पञ्चवर्षीयशिशुः । यथा,—
"पञ्चवर्षो भवेद्बालः [illegible] ।"
इति हेमचन्द्रः ।
(यथा, भागवते । ८ । १० । ६ ।
"यो लोकवीरसमितौ धनुरैश्वरं
श्रीतास्वयंवरगृहे त्रिपुरोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं
सज्जीकृतं नृप ! विकृष्य बभञ्ज मध्ये ।")
पुष्पः । इति शब्दरत्नावली । (यथा, कुमारे ।
१ । ३८ ।
"[illegible] यदि पीतपि त्ता-
[illegible] ।
तं [illegible] प्रवालोऽत्र कुर्यु-
[illegible] ।")
मत्स्यविशेषः । इति शब्दचन्द्रिका ।
बालकं, क्ली, (बाल + स्वार्थे कन् ।) ह्रीवेरम् ।
इति राजनिर्घण्टः । (अस्य गुणा यथा,—
"बालकं शीतलं रूक्षं लघुदीपनपाचनम् ।
हृल्लासारुचिवीसर्पकृष्ठमास्रातिसारजित् ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
अङ्गुलीयकम् । पारिहार्य्यम् । इति विश्वः ॥
बालकः, पुं, (बाल एव । बाल + स्वार्थे कन् ।)
शिशुः । (यथा, मार्कण्डेये । ११ । १२ ।
"भूतानां मातृभिः सार्द्धं बालकानान्तु
[illegible] ।")
अश्वः । अश्वबालधिः । हस्तिबालधिः । अङ्गुरी-
यकम् । ह्रीवेरम् । बलयम् । इति मेदिनी ।
के, ११७ । केशः । इति विश्वः ॥ ॥

बालाशौचं यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥
यदि गर्भो विपद्येत स्रवते वापि योषितः ।
यावन्मासान् स्थितो गर्भस्तावद्दिनानि सूतकम् ॥
आ नामकरणात् सद्य आ चूडान्नादहर्निशम् ।
आ व्रतस्थात्रिरात्रेण तदूर्द्ध्वं दशभिर्दिनैः ॥"
इति गारुडे १०६ अध्यायः ॥
बालकस्य रक्षा यथा,—
"आदाय कृष्णं संत्रस्ता यशोदापि ततो द्विज ! ।
गोपुच्छभ्रामणेनाथ बालदोषमपाकरोत् ॥
गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके ।
कृष्णस्य प्रददौ रक्षां कुर्व्वन्निदमुदीरयन् ॥
नन्द उवाच ।
रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः ।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत् ॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् ।
वराहरूपधृग् देवः स त्वां रक्षतु केशवः ॥
नखाङ्कुरविनिर्भिन्नवैरिवक्षःस्थलो विभुः ।
नृसिंहरूपी सर्व्वत्र स त्वां रक्षतु केशवः ॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभूत् ।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः ॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः ।
गुह्यं सजठरं विष्णुर्जङ्घापादौ जनार्द्दनः ॥
मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥
शार्ङ्गचक्रगदापाणेः शङ्खनादहताः क्षयम् ।
गच्छन्तु प्रेतकूष्माण्डराक्षसा ये तवाहिताः ॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः ।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः ॥
एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः ।
शायितः शकटस्याधो बालपर्य्यङ्किकातले ॥"
इति विष्णुपुराणे । ५ । ५ ॥
बालकप्रिया, स्त्री, (बालकानां प्रिया ।) इन्द्रवारुणी । कदली । इति राजनिर्घण्टः ॥
बालकृमिः, पुं, (बालस्य केशस्य कृमिः ।) केशकीटः । इति जटाधरः ॥
बालक्रीडनं, क्ली, (बालस्य क्रीडनम् । क्रीड + भावे ल्युट् ।) बालक्रीडा । यथा,—
"बालक्रीडनमिव शैलधनुर्भङ्गापवि प्रकृतः ।"
इत्यादि महानाटकम् ॥
बालक्रीडनकः, पुं, (बालानां क्रीडनकः क्रीडनसाधनम् । बालका हि वराटकैः क्रीडन्तीति प्रसिद्धत्वात् ।) कपर्द्दः । इति राजनिर्घण्टः ॥
बालखिल्यः, पुं, बालखिल्यमुनिः । यथा,—
"विविक्ता विविक्ता पूर्व्वं वैरो परमपावनी ।
अर्थिन्याः त्रिदशो बालखिल्याश्रयः क्रियाः ॥"
इति हलायुधे त्रिकाण्डमालायां १ सर्गः ॥
(बालखिल्यास्तु अङ्गुष्ठपरिमिताः ऋषिविशेषाः । यथा, मार्कण्डेये । ४९ । ४३ ।
"क्रतोश्च सन्नतिर्भार्य्या बालखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
अङ्गुष्ठपरिमितत्वमेतेषां देहपरिमाणम् ।
यथा, महाभारते । १ । ३१ । ८—९ ।
"अथापश्यदृषीन् ह्रस्वान् अङ्गुष्ठोदरपर्व्वणः ।
पलाशवर्त्तिकामेकां सहितान् वहतः पथि ॥
क्लिश्यमानान् मन्दबलान् गोष्पदे सम्प्लुतोदके ॥")
बालगर्भिणी, स्त्री, प्रथमगर्भवती गौः । तत्पर्य्यायः । प्रष्ठौही २ । इत्यमरः । २ । ९ । ७० ॥ पलौही ३ । इति जटाधरः । बालगर्भवती ४ । इति शब्दरत्नावली ॥
बालगोपालः, पुं, (बालः शिशुर्मूर्त्तिधरो गोपालः ।) श्रीकृष्णमूर्त्तिविशेषः । यथा,—
"क्षीरपयोनिधिवन्दितपादं
कालकटाक्षवर्षिविनोदम् ।
श्यामलसुन्दरशुभ्रविलासं
तं प्रणमामि च बालगोपालम् ॥"
इति नारदपञ्चरात्रे गोपालाष्टकम् ॥
बालग्रहः, पुं, (बालानां बालकानां ग्रहः ।) बालकग्रहणग्रहविशेषः । (यथा, मार्कण्डेये । ५१ । १०७ ।
"बालग्रहाभिभूतानां बालानां शान्तिकारकम् ॥")
एतेषां विवरणम् । यथा,—
"बालं यदा बलाकारात् पीडयन्ति शिशुं ग्रहाः ।
तस्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः ॥"
अथ बालग्रहाणां नामान्याह ।
"स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च ।
शकुनी रेवती चैव पूतना गन्धपूतना ॥
पूतना शीतपूर्व्वा च तथैव मुखमण्डिका ।
नवमो नैगमेयश्च प्रोक्ता बालग्रहा अमी ॥"
अथ ग्रहाणामुत्पत्तिमाह ।
"स्कन्दादयः प्रोक्ता बालानां ये ग्रहा अमी ।
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः ॥
एते स्कन्दस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः ।
सृष्टाः शरवणस्थस्य रक्षितस्य स्वतेजसा ॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा ।
बिभर्त्ति चापरां संज्ञां कुमार इति संग्रहः ॥"
अयं हि कार्त्तिकेयाख्यः ।
"स्कन्दापस्मारसंज्ञो यः सोऽग्निना सदृशद्युतिः ।
स च स्कन्दसखो नाम्ना विशाख इति चोच्यते ॥
ग्रहाः स्त्रीविग्रहा ये ते नानारूपाः प्रकीर्त्तिताः ।
तेषां शान्तिकार्य्यं ते भागा रावणतामथ ॥
नैगमेयस्तु पार्व्वत्या सृष्टो छागाननो ग्रहः ।
कुमारस्य हि देवस्य गुरुत्वात्स्वमतोऽस्ति वै ॥
ततो भगवति स्कन्दे सुरसेनापतौ कृते ।
उपतस्थुर्ग्रहा ह्येते दीप्तशक्तिधरं गुहम् ॥
ऊचुः प्राञ्जलयश्चैनं वृत्तिर्नो दीयतामिति ।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत् ॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहा ।
तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत् ॥
परस्परोपकारेण वर्त्तते धार्य्यते तथा ।
देवा मनुष्यान् प्रीणन्ति तिर्य्यग्योनींस्तथैव च ॥
यथाकालं वृष्टयस्तु यथाशीतोष्णमारुतैः ।
इज्याञ्जलिनमस्कारैर्जपहोमैस्तथैव च ॥
सम्यक् प्रयुक्तैश्च नराः प्रीणयन्त्यपि देवताः ।
भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते ।
तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति ॥"
अथ बालग्रहाणां बालग्रहणकारणमाह ।
"कुलेषु येषु नेज्यन्ते देवाः पितर एव च ।
ब्राह्मणाः साधवो नापि गुरवोऽतिथयस्तथा ॥
निवृत्ताचारशौचेषु तथा कृतबलिष्वपि ।
निरुक्तभिक्षाबलिषु भग्नकांस्यगृहेषु च ॥
गृहेषु तेषु बालांस्तान् यूयं विस्रब्धमाहिताः ।
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति ॥
एवं ग्रहाः समुत्पन्ना बालान् हिंसन्ति चाद्य च ।
ग्रहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः ॥"
अथ सामान्यग्रहजुष्टानां बालानां लक्षणमाह ।
"क्षणादुद्विजते बालः क्षणात्त्रस्यति रोदिति ।
नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च ॥
ऊर्द्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते ।
भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति चासकृत् ॥
क्षामोऽतिनिशि जागर्त्ति शूनाक्षो भिन्नविट्स्वरः ।
मांसशोणितगन्धश्च न चाश्नाति यथा पुरा ॥
दुर्ब्बलो मलिनाङ्गश्च गर्धनोऽपि च जायते ।
सामान्यग्रहजुष्टस्य लक्षणं समुदाहृतम् ॥"
अथ विशिष्टग्रहजुष्टानां लक्षणमाह ।
"एकाक्षः चलनयनश्चिक्कणास्यहृद्-
वक्त्राक्षो हतपक्ष्मैकपक्ष्मेव ।
उद्विग्नः स्फुरति करौ रुदन्
स्कन्दार्त्तो भवति च गाढमुष्टिबर्च्चाः ॥
निःसंज्ञो भवति पुनर्भवेत् ससंज्ञो
संरब्धः करचरणैश्च नृत्यतीव ।
विण्मूत्रे सृजति विनद्य जृम्भमाणः
फेनं वा वमति च तत्सखाभिपन्नः ॥"
तत्सखाभिपन्नः स्कन्दापस्मारग्रस्तः ।
"स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
स्रावार्त्तव्रणपरिपीडितः समन्तात् ।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥
रक्तास्यो हरितमलोऽतिपाण्डुदेहः
श्यावो वा ज्वरमुखपाकवेदनार्त्तः ।
सद्यास्त्रिरपि... कर्णघातं
रेवत्या भृशमभिपीडितः कुमारः ॥
प्रस्रस्ताङ्गः स्वपिति च सुखं च रात्रौ
भिन्नविट् विसृजति काकतुल्यगन्धिः ।
छर्द्यार्त्तो हृषितततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनाभिपन्नः ॥
यो द्वेष्टि स्तनमपि च वाऽतिसार-
काशश्वासैर्लुलितविलाभिरद्दिमानः ।
दुर्वर्णः शवसमगन्धिदीर्घकाय-
स्तं ब्रूयादभिहतमन्धपूतनाख्याम् ॥
उद्विग्नः विचलति च पृष्ठतस्तथा
संवेपी भवति भृशं च कूजनः ।

यस्माद्ग्रो भ्रमर्मानिमार्गेति च यो वै
तं मूढाद्विजाय शीघ्रपूजयेत् ।
मासाद्य: सदश्चिरपोऽपिपादवह्नी
पञ्चामी बलुर्वर्षिताङ्गोऽरो यः ।
स श्वेतः शिशुरप रक्तमांसकर्णैः
गोहिंसो भवति च मन्तुमानसिः ।
यः पीतं वमति विवर्णो च मध्ये
मोहिंसो विकरति घोरमीघमाप: ।
स्तूपेष्व प्रततमयो यथाप्रति-
र्निर्घ्नो भवति स नैगमेयजुष्टः ।"

अथ नामान्ययजुष्टानां चिकित्सामाह ।
महाप्रतिकौष्ठोध्वायपानं यथामयम् ।
भेदा माषपर्णी ।
"भस्त्रदामयविद्यापन्त्रेत्रावृपीपयेत् ।
सर्वेभ्यः श्रुतं मधा गर्भपादिवसा: ।
विकालविङ्कालोगमेयभङ्गौ यथा मधु ।
धूपः शिरोऽभ्यं ग्लोपसमयपवद्वाहन: ।
बालग्रहाणोद्वमैंहि कार्याणि यदयालये ।
यथा कुर्ह तथा कालो विद्यापकापि च ।
सार्षपा धैर्यदेव पिष्यौ एतमदभम् ।
सिद्धं स्तनमिदं मेध्यं पिवेत् प्रातर्दिने दिने ।
बृहस्पति: शिरमेधा कुमारो बुद्धिमान् भवेत् ।
न पिशाचा न रक्षांसि न भूता न च मातरः ।
न भवन्ति कुमाराणां पिबतामिदमुत्तमम् ।"
अथ मेधाम् घृतम् ।
अथ शिशुपयग्रजुष्टानां चिकित्सामाह ।
"सोमवल्लीमिन्द्रवल्लीं वलां विकर्ष शमीम् ।
मत्सादन्याश्च मूलानि पयसानि विधापयेत् ।"
तत्र स्कन्दग्रहजुष्टस्य चिकित्सामाह ।
"स्कन्दग्रहोपसृष्टस्य कुमारस्य प्रशस्यते ।
वातघ्नद्रुमपत्राणां क्वाथेन परिषेचनम् ।
देवदारुणि रास्नायां मधुरेषु द्रुमेषु च ।
सिद्धं सर्पिश्च क्षीरे पानमस्य प्रदापयेत् ।
सर्षपाः सर्पनिर्मोको वचा काकादनी घृतम् ।
उष्ट्राजाविगवां चापि रोमाण्युद्धूपनं भवेत् ।"
काकादनी श्वेतगुञ्जा ।
सोमवल्लीमिन्द्रवल्लीं शमीं बिल्वं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ।"
सोमवल्ली सोमलता । इन्द्रवल्ली वलुषम् ।
मृगादनी इन्द्रवारुणी ।

रक्तानि माल्यानि तथा पताका
रक्ताश्च गन्धान् विविधांश्च भक्ष्यान् ।
घण्टाश्च देवाय बलिं निवेद्य
कुक्कुटं स्कन्दगृहे निधाय ।
स्नानं त्रिरात्रं त्रिषु चत्वरेषु
कुर्यात् पुरे शालियवैर्नवैश्च ।
मन्त्रैरवेक्षस्य निरीक्षणं च(?)
पञ्चाननदेवाङ्गुलिभिश्च श्रीमान् ।

रक्षामन्त्रं प्रवक्ष्यामि बालानां पापनाशिनीम् ।
अहन्यहनि कर्त्तव्या भिषजा प्रयतात्मना ।
तपसां तेजसां चैव यशसां वपुषां तथा ।
निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ।

ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु मां भगवान् गुहः ।
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानां च स ते शर्म प्रयच्छतु ।
रक्तमाल्याम्बरधरो रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्देवः पातु मां क्रौञ्चसूदनः ।"
अथ स्कन्दापस्मारग्रहजुष्टस्य चिकित्सामाह ।
"बिल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेकः प्रयोक्तव्यः स्कन्दापस्मारशान्तये ।"
गोलोमी श्वेता दूर्वा । सुरसादिको यथा,—
"सुरसा श्वेतसुरसा पाठा फञ्जी फणिज्झकः ।
सौगन्धिकं भूस्तृणको राजिका श्वेतमञ्जरी ।
कट्फलं खरपुष्पा च कासमर्दश्च क्षवकः ।
विडङ्गमथ निर्गुण्डी कर्णिकार उदुम्बरः ।
फञ्जी च काकमाची च तथा च विषमुष्टिका ।
कफक्रिमिहरः ख्यातः सुरसादिरयं गणः ।"
सुरसा कृष्णतुलसी । श्वेतसुरसा श्वेततुलसी । फञ्जी भार्गी । फणिज्झकः मरुवकः । सौगन्धिकं कह्लारम् । भूस्तृणकः सुगन्धतृणम् । खरपुष्पा बर्बरी । कासमर्दः कसौंदी । विषमुष्टिका वकायनि । * ।
"अपस्मारविषघ्नश्च तैलमभ्यञ्जने हितम् ।"
तत्प्रकारमाह ।
"गोमांसविद्बिषगन्धाभ्यां सरीसृपरिबहुलमया ।
मन्नापकमिति ख्यातं सर्वग्रहाऽक्षि समासृतम् ।
क्षीरीवृक्षकषायेण काकोल्यादिगणेन च ।
विपक्वं घृतं पश्चाद्दुग्धं पयसा पचेत् ।
काकोल्यादिगणेन कल्कीकृतेन तैलं पक्वम् ।
काकोल्यादिगणो यथा,—
"काकोली क्षीरकाकोली जीवकर्षभकावुभौ ।
ऋद्धिश्छिन्नरुहा मेदा महामेदा गुडूचिका ।
मुद्गपर्णी माषपर्णी मधुकं वंशरोचना ।
शृङ्गी प्रपौण्डरीकञ्च जीवन्ती मधुयष्टिका ।
द्राक्षा चेति गणो नाम्ना काकोल्यादिरुदीरितः ।
वातपित्तहरश्चैष शिरोरोगनिवारणः ।
उन्मादघ्नं वचा हिङ्गु शस्तमथ पयोलितम् ।
गृध्रोलूकपुरीषाणि केशा हस्तिनखो घृतम् ।
वृषभस्य च रोमाणि धूपनार्थं सदा ।
अनन्ता कुक्कुटी बिम्बी मर्कटी चापि धारयेत् ।"
अनन्ता यवासा इति लोके । कुक्कुटी शाल्मली ।
"पक्वामामानि मांसानि शस्तं रुधिरं पयः ।
शरीरार्थं निवेदाय स्कन्दापस्मारिणे वटे ।"
वटे वटपत्रे बलिं निवेदयेदित्यर्थः ।
तेन स्कन्दापस्मारिणः स्नानं कारयेदित्यन्वयः ।
"चतुष्पथे कारयेच्च स्नानं तेन तथा पठेत् ।
स्कन्दापस्मारिणे यः स्कन्दस्य दयितः सखा ।
विशाखः स विशाखोऽस्य शिशोरस्तु शुभाननः ।"
अथ शकुनीग्रहजुष्टस्य चिकित्सामाह ।
"शकुनीग्रहजुष्टस्य कार्यं वैद्येन जानता ।
वैतसाम्रकपित्थानां क्वाथेन परिषेचनम् ।
औषधैर्मधुकोशीरैस्तालीशोत्पलपद्मकैः ।

लोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम् ।"
प्रदिहेत् लिम्पेत् । व्रणादिहरार्थमाह ।
"स्कन्दपदोक्ता धूपाश्च हिता अत्र भवन्ति हि ।
स्कन्दापस्मारशमनं घृतमत्रापि पूजितम् ।
शतावरी नागबलाबहुपुत्रीभिरिक्षिका: ।
लताश्चैव सहदेवाख्या हस्तीपादि धारयेत् ।"
अतिबला: बडो दन्तवारुणी । हस्तिपादी हाथ शुंडी इति लोके प्रसिद्धा ।
"तिलतण्डुलकं माल्यं हरितालं मनःशिलाम् ।
बलिरेष विनिर्दिष्टो निवेद्यो विनताश्रया ।
निकटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ।
श्वेतार्करीकण्टकार्कगुग्गुलुचूर्णपैः ।
विद्ध्यमब्धये नित्यं धारयं पुष्पमेव तु ।
शकुनीपदमाल्यं च परेयं कारयेद्धितम् ।
कुर्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः
दिक्षूत्तरे विविधा वासयेच्च तान् पचेत् ।
अन्तरीक्षचरा देवी सर्वालङ्कारभूषिता ।
अयोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु ।
दुर्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु ।"*।
अथ रेवतीग्रहजुष्टस्य चिकित्सामाह ।
"अश्वगन्धाजशृङ्गी च सारिवाय पुनर्नवा ।
सहा विदारी चैताभ्यां क्वाथेन परिषेचनम् ।
अजशृङ्गी मेढ्रशृङ्गी । सहा श्वेतमुद्गपर्णी ।
तैलमभ्यञ्जने कार्यं कुष्ठसर्जरसे तथा ।
पञ्चकषायां महति तथा क्षीरकदम्बके ।
सर्जरसः धूनः । धनञ्जया गुग्गुलुः । बवई त्वगल्पकगुडीरत्वीतस्करि । क्षीरकदम्बकः पारिशः । कदुया कदम इति लोके ।
धवाश्वकर्णककुभधातकीतिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः ।
अश्वकर्णः शालः इति लोके प्रसिद्धः ।
कृशत्वाः शुद्धमेव परेदः मातृगणिताः ।
गृध्रोलूकपुरीषाणि यवान् यवपदे घृतम् ।
सन्ध्ययोरुभयोः कार्यमेतदुद्धूपनं शिशोः ।
यवको वंशाङ्कुरः ।
कृशराः सुमनसो मालाः पयःशाल्योदनं दधि ।
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ।
गोतीर्थे गोष्ठे ।
स्नानं चापि कुमारस्य सङ्गमे कारयेद्भिषक् ।
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ।
उपासते यां सततं देव्यो विविधभूषणाः ।
लम्बा करालाविनता तथैव बहुपुत्रिका ।
रेवती शुष्कनामा च सा ते देवी प्रसीदतु ।"*।
अथ पूतनाग्रहजुष्टस्य चिकित्सामाह ।
"कपोतवङ्काऽरलुको वरुणः पारिभद्रकः ।
आस्फोता चैव योक्तव्या क्वाथार्थं परिषेचने ।
कपोतवङ्का ब्राह्मी इति लोके । पारिभद्रो निम्बः । आस्फोता अपराजिता ।
वचा हरेणुका गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्जरसश्चैव तैलार्थमुपकल्पयेत् ।

वचा पयस्या मूसला चीरविदारी । गोलोमी श्वेतदूर्वा ।
हितं घृतं तथा चोष्ण्या सर्पिषं मधुकेऽपि च ।
कुष्ठतालीशखदिराः स्यन्दनोऽर्जुन एव च ।
धवश्च ककुभश्चापि मञ्जागो वदरस्य च ।
कुक्कुटास्थि घृतञ्चापि धूपनं सह सर्षपैः ।
स्यन्दनः स्यन्दन इत्येव नाम्ना प्रसिद्धः ।
काकादनीं चित्रफलां विम्बीं गुञ्जाञ्च धारयेत् ।
काकादनी श्वेतगुञ्जा । चित्रफला इन्द्रवारुणी ।
मत्स्यौदनं बलिं दद्यात् शष्कुलीं पललं तथा ।
शरावसंपुटं कृत्वा तस्मै शून्ये गृहे भिषक् ।
उत्सृजेत्तामभिनितस्य शिशोः स्नपनमिष्यते ।
कुष्ठतालीशखदिरं चन्दनं स्यन्दनं तथा ।
दिवसान् सप्त शिशु कुष्ठं गिरिकदम्बकः ।
एता यथैवञ्चापि योज्या उद्भूपने सदा ।
मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा ।
शून्यागारसमया देवी दारकं पातु पूतना ॥७॥
अथ गन्धपूतनायस्तकुष्ठस्य चिकित्सामाह ।
लिकद्रमाका पञ्च कार्यं कार्येऽभिषेचने ।
लिकद्रमानाह ।
निम्बः पटोलः सुरा च गुडूची वासकस्तथा ।
विषपक्कुष्ठत् स्यात्तो गन्धोऽयं पञ्चतिक्तकः ॥
पिप्पली पिप्पलीमूलं मर्यो मधुरको मधु ।
शालपर्णीहती च घृतार्थं समुपाहरेत् ॥
सर्वगन्धैः प्रदेहश्च गात्रे चास्योपशीतलैः ।
सर्वगन्धैः कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनैः ।
चत्वारोस्तु शीतलैः चन्दनकर्पूरैः न तु कस्तूरी-कुङ्कुमागुरुभिस्तेषामुष्णत्वात् ।
पुराणं कौक्कुटं कैशञ्च सर्पभस्त्वचा ।
जीर्णञ्चाभोलश्वाथो नापो धूपनायोपकल्पयेत् ।
कुक्कुटीं मर्कटीं विम्बीमनन्ताञ्चापि धारयेत् ।
मांसमामं तथा पक्वं शोणितञ्च चतुष्पथे ।
निवेदयन्तश्च शिशोः स्नपनमिष्यते ॥
कराला पिङ्गला मुण्डा कषायाम्बरसंवृता ।
देवी बालमिमं प्रीता रक्षतु गन्धपूतना ॥८॥
अथ शीतपूतनायस्तकुष्ठस्य चिकित्सामाह ।
मोद्गर्भं रसलक्षश्च सुखाम्बरसाश्च च ।
कुर्यात् कर्त्तमस्तीभ्य लोहादंमवधारयेत् ॥
सर्वगन्धात् चकारीयेत् ।
रोहिणीनिम्बखदिरपलाशककुभत्वचः ।
निःक्वाथ्य तत्क्वाथे शरीरे निषेचेद्दृतम् ।
मधोत्कपुरीषाणि वचिरस्या मांसखण्डम् ।
निम्बपत्राणि च तथा धूपनार्थं समाहरेत् ।
धारयेदपि गुञ्जाञ्च वचां काकादनीं तथा ।
नद्यां शुद्धोदनेनापि तर्पयेच्छीतपूतनाम् ॥
जलाशयान्ते बालस्य स्नपनञ्चोपदिश्यते ।
जलाशयान्ते जलाशयनीरे ।
देवि देवासुरैर्वन्द्ये बालको रक्षितं तथा ।
शीतं रक्तादिभिः देवी शरावोलितचारिणी ।
जलाशयरता नित्यं पातु मां शीतपूतना ॥९॥
अथ मुखमण्डिकायस्तकुष्ठस्य चिकित्सामाह ।

कपित्थं बिल्वतर्कारीवाशागन्धर्वहस्तकाः ।
कुबेराक्षी च योज्याः स्युर्बालानां परिषेचने ।
तर्कारी गणियारि इति लोके । गन्धर्वहस्तकः श्वेत एरण्डः । कुबेराक्षी पाकरि इति लोके ।
स्वरसैर्भृङ्गराजस्य तथैव पयसाम्भसा ।
तैलं पचाच्च संयोज्य पचेदभ्यञ्जनं शिशोः ।
भृङ्गराजः भगरा इति लोके ।
वचा सर्जरसं कुष्ठं सर्पिश्चोद्भूपने हितम् ।
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा ।
मनःशिलाञ्चोपहरेत् गोष्ठमध्ये बलिन्ततः ।
पायसं सपुरोडाशं तद्व्यर्थमुपाहरेत् ।
मन्त्रपूताभिरद्भिश्च तथैव स्नपनं हितम् ।
जलाभिमन्त्रणमन्त्रमाह ।
अलङ्कृता कामवती सुभगा कामरूपिणी ।
गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका ॥१०॥
अथ नैगमेयग्रहजुष्टस्य चिकित्सामाह ।
बिल्वाग्निमन्थपूतीकैः कार्यं स्यात् परिषेचनम् ।
पूतीकः घोराकरञ्ज इति लोके प्रसिद्धः ।
प्रियङ्गुसरलानन्ताशतपुष्पाकुटन्नटैः ।
पचेत्तैलं सगोमूत्रं दधिमस्त्वम्लकाञ्जिकैः ।
कुटन्नटं विशुनकनाम्नी इत्यपि विशेषस्य त्वक् ।
गुडत्वची इति लोके प्रसिद्धा । शुद्धाहृतिः श्योनाको वा ।
वचां वयस्थां जटिलां गोलोमीं चापि धारयेत् ।
वयस्था आमलकी गुडूची वा ।
उत्सादनं हितञ्चाथ स्नानापधारमाचरम् ।
मर्कटोलूकगृध्राणां पुरीषाणि विष्टयपि ।
धूमः शुभकृते कार्यो बालस्य हितमिच्छता ।
पिष्टयपि नैगमेयस्य ।
तिलतण्डुलकं माल्यं भक्ष्याश्च विविधानपि ।
कौमारपितृमेषाय प्रयत्नेन निवेदयेत् ॥
मेषाय नैगमेयग्रहाय ।
चतुष्पथात् चौरस्थले स्नपनञ्चोपदिश्यते ।
अजाननश्चलाक्षिभ्रुः कामरूपी महायशाः ।
बालं पालयिता देवो नैगमेयोऽभिरक्षतु ॥”

इति भावप्रकाशः ।

(तथास्य तन्त्रान्तरं चिकित्सितञ्च यथा,—
“बलिप्रान्तोदकमेतानि कार्याणि यत्नतोऽपि ।
मन्त्रश्चायं प्रयोक्तव्यस्तारो सर्वकामिकः ।
ॐ नमो भगवते गरुडाय त्र्यम्बकाय सदाकार हुन हुन स्वाहा । ॐ कं खं गं घं ङं वैनतेयाय नमः । ॐ ह्रीं ह्रूं फं ।
रक्तदेहप्रमादेन दृश्यमानानु मन्त्रेण ।
प्रयत्न शुक्लकामलवर्णैर्वस्तु प्रार्थिकः ।
ॐकारो सुदर्शनयो बालकं रक्ष रक्ष स्वाहा ।
ॐ नारायणाय नमः ।”
“प्रथमे दिवसे मासे वर्षे वा गृह्णाति नन्दा नाम मातृका तया गृहीतमात्रस्य प्रथमं भवति ज्वरः । चक्षुरुन्मीलयति गात्रमुद्वेजयति न देते क्रन्दति स्तन्यं न गृह्णाति । चीत्कारञ्च भवति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्त-

लिकां कृत्वा शुक्लौदनं शुक्लपुष्पं सप्तध्वजाः सप्तप्रदीपाः सप्तस्वस्तिकाः सप्तघटकाः । सप्त-शष्कुलिकाः सप्तपूलिकाः गन्धताम्बूलं मत्स्यमांसं सुरामपमांसञ्च पूर्वस्यान्दिशि चतुष्पथे मध्याह्ने बलिर्दातव्यः । अश्वत्थपत्रं जलकुम्भे निक्षिप्य शान्त्युदकेन स्नापयेत् । रसोनसिद्धार्थक-मेषशृङ्गीनिम्बपत्रशिवनिर्माल्यैर्बालकं धूपयेत् । ॐ नमो नारायणाय चतुरात्मने सार्धं हन हन मुञ्च मुञ्च स्वाहा एवं दिनत्रयं बलिं दत्त्वा चतुर्थे दिवसे ब्राह्मणं भोजयेत् । ततः सम्पद्यते शुभम् ।
द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दा-नाम मातृका । तया गृहीतमात्रस्य प्रथमं भवति ज्वरः । चक्षुरुन्मीलयति गात्रमुद्वेजयति न शेते क्रन्दति स्तन्यं न गृह्णाति चीत्कारञ्च भवति ।
बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
तण्डुलं हस्तपृष्ठैकं गृहीत्वा दधिगुडघृतमिश्रितं शरावैकं गन्धताम्बूलं पीतपुष्पं पीतसप्त-ध्वजाः । चत्वारः प्रदीपाः दशस्वस्तिकाः मत्स्यमांससुरादिकपूर्वेण पश्चिमस्यान्दिशि चतुष्पथे बलिर्दातव्यः । दिनानि त्रीणि नित्यशः ततः शान्त्युदकेन स्नापयेत् । शिवनिर्माल्य-सिद्धार्थमार्जारलोम सर्पनिर्मोककृतधूपं दद्यात् । ॐ नमो नारायणाय चतुरात्मने सार्धं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।
तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतनानाम-मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति स्तन्यं न गृह्णाति मुष्टिं बध्नाति क्रन्दति ऊर्द्ध्वं निरीक्षते ।
बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा रक्तचन्दनं गन्धताम्बूलं रक्तसप्तध्वजाः । सप्त-प्रदीपाः सप्तस्वस्तिकाः । पश्चिमायामुत्तरायमनं दक्षिणस्यान्दिशि अपराह्णे चतुष्पथे बलि-र्दातव्यः । शिवनिर्माल्यगुग्गुलुसर्षपनिम्बपत्रैश्च मार्जारविष्ठया धूपयेत् । ॐ नमो नारायणाय चतुरात्मने सार्धं हन हन मुञ्च मुञ्च स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्प-द्यते शुभम् ।
चतुर्थे दिवसे मासे वर्षे वा गृह्णाति मुख-मण्डिकानाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । ग्रीवां नामयति चक्षु-रुन्मीलयति स्तन्यं न गृह्णाति रोदिति स्वपिति मुष्टिं बध्नाति बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा चतुरङ्गुलं गन्धं ताम्बूलं दश ध्वजाः दीपाश्चत्वारः । चत्वारि स्वस्तिकाः मत्स्य-मांससुरामपमांसञ्च बलिरेषा दिशि अपराह्णे बलिर्देयः चतुष्पथे । ॐ नमो नारायणाय चतु-रात्मने सार्धं हन हन मुञ्च मुञ्च स्वाहा । चतुर्थे

दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कटपूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति स्तन्यं न गृह्णाति मुष्टिं बध्नाति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं पुष्पं सुरौद्रं पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च-वटकाः ऐशान्यां दिशि बलिर्दातव्यः । शान्ति-उदकेन स्नापयेत् । शिवनिर्माल्यसर्पनिर्मोक-गुग्गुलु- निम्बपत्रमक्षतैर्धूपं दद्यात् । ॐ नमो नारायणाय चतुर्भुजाय चूर्णय चूर्णय हन हन स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् । षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिकानाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रभेदं दर्शयति दिवारात्रावुत्थानं भवति । ऊर्द्ध्वं निरीक्षते । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पिष्टेन पुत्तलिकां कृत्वा शुक्लपीतरक्तपुष्पगन्धताम्बूलानि दश दीपाः । दश पीतध्वजाः दश स्वस्तिकाः दश वटकाः । पौरवमुद्रिकाः । मत्स्यमांससुरा चापि पश्चिमायां दिशि निशायां मध्याह्ने बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्माल्यसर्पनिर्मोक-गुग्गुलुमयूरपिच्छकनिम्बपत्रैर्धूपं दद्यात् । ॐ नमो नारायणाय चतुर्भुजाय चूर्णय चूर्णय हन हन स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

सप्तमे दिवसे मासे वर्षे वा गृह्णाति शुष्करेवती नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति मुष्टिं बध्नाति रोदिति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । रक्तपुष्पं गन्धताम्बूलरक्तौदनं लवणाक्तपीतत्रयोदश स्वस्तिकाः त्रयोदश वर्त्तिका: मृत्पुत्तलिका मत्स्यमांससुराः त्रयोदश ध्वजाः पञ्च प्रदीपाः । पश्चिमस्यां दिशि ग्रामनिष्क्रा-मेऽपराह्णे श्मशाने बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । गुग्गुलुमेषशृङ्गसर्पनिर्मोक-वानरपत्रैर्धूपं दद्यात् । ॐ नमो नारायणाय दीनदैत्याय हन हन शुष शुष स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

अष्टमे दिवसे मासे वर्षे वा गृह्णाति अर्य्यका नाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । दशनक: पूतिगन्धश्च जायते । आहारं न गृह्णाति गात्रमुद्वेजयति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । रक्तपीतध्वजाः अक्षतं पौष्टिकं पूर्णकुम्भः कनकं शर्करा मत्स्य-मांससुरा: अमूर्द्धिका: घृतेन बलिं दद्यात् । ॐ नमो नारायणाय चैलोक्यविस्फराय चतु-र्भिर्याम्यमार्गाय चार्धं हन हन शुष शुष स्वाहा हन हन ॐ ह्रीं फट् स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

नवमे दिवसे मासे वर्षे वा गृह्णाति सूतिका नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । नित्यं कूर्दयति गात्रभेदं दर्शयति मुष्टिं बध्नाति । निशान्तिकरा स्नानजलिकस्य प्रव-क्ष्यामि येन सम्पद्यते शुभम् । मधुमधुकस्थलिका यमीतां पुत्तलिकां विधाय रक्तवस्त्रेण वेष्ट-येत् । गुग्गुलुं सुरौद्रं गन्धताम्बूलं पुष्पाः त्रयोदश ध्वजाः त्रयोदश प्रदीपाः त्रयोदश स्वस्तिका: त्रयोदश मत्स्यमांससुराः । उत्तर-दिग्भागे ग्रामनिष्क्रामे बलिं दापयेत् । शान्त्यु-दकेन स्नापयेत् । गुग्गुलुनिम्बपत्रगोधूमगोशृङ्ग-श्वेतसर्षपवल्लैर्धूपं दद्यात् । ॐ नमो नारायणाय चतुर्भुजाय हन हन शुष शुष स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम् ।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति चीत्कारं करोति पुरीषमूत्रञ्च बहु भवेत् । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पारावारस्य मृत्तिकया पुत्तलिकां कृत्वा रक्तचन्दनगन्ध-ताम्बूलादिभिर्भूषयित्वा पञ्च वर्णाः पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च स्वस्तिकाः पञ्च पुत्तलिका मत्स्यमांससुराः वायव्यां दिशि बलिन्दद्यात् । काकविष्ठागोमांसगोशृङ्गपीतसर्षपारग्वध-निम्बपत्रैर्धूपयेत् । ॐ नमो नारायणाय पूर्णेन्दुरूपाय हन हन शुष शुष स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम् ।

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मातृका । तया गृहीत-मात्रेण प्रथमं भवति ज्वरः । आहारं न गृह्णाति । ऊर्द्ध्वदृष्टिर्भवति गात्रभङ्गश्च भवति चीत्कारञ्च भवति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पिष्टेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तं गन्धाः शुभ्रं पुष्पेण सिञ्चेत् पीतपुष्पं गन्धताम्बूलं अष्ट प्रदीपाः अष्टौ वटकाः अष्टौ स्वस्तिकाः अष्टौ पूरिका मत्स्यमांस-सुराः पूर्वस्यां दिशि बलिर्दातव्यः । शान्त्यु-दकेन स्नापयेत् । शिवनिर्माल्य गुग्गुलु गोमहिषपर्वतनिर्मोकपत्रैर्धूपयेत् । ॐ नमो नारा-यणाय शुष शुष स्वाहा । चतुर्थदिवसे विप्रान् भोजयेत्तेन सम्पद्यते शुभम् ।

द्वादशे दिवसे मासे वर्षे वा यदा गृह्णाति कालिका नाम मातृका । तया गृहीतमात्र-स्तारी जायते ज्वरः । पतितश्च रोदिति चतुष्का-तर्जनीति सामति विलम्बते । आमूर्द्ध-स्फुरयति । आहारं न करोति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पीतेन पुत्त-लिकां कृत्वा शुक्लपुष्पं गन्धताम्बूलं मुक्ताः सप्त ध्वजाः । सप्त स्वस्तिकाः । सप्त प्रदीपाः । सप्तैव मत्स्यमांसेन बलिं दद्यात् पूर्वस्यां दिशि धूपयेत् । शान्त्युदकेन स्नापयेत् । श्वेतसर्षपदरदाम्मृतशङ्खलघुनिम्बपत्र-निर्मोकसर्षपैर्धूपयेत् । ॐ नमो नारायणाय चार्धं शुष शुष हन हन स्वाहा । चतुर्थ-दिवसे विप्रान् भोजयेत् । ततः सम्पद्यते शुभम् ।

इति रावणकृतं बालतन्त्रं समाप्तम् ।

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारः ।)

बालचर्य्यः, पुं, (बालस्य बालकस्येव चर्य्या यस्य ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥ बालकस्य चरित्रे, क्ली ॥

बालतनयः, पुं, (बालानि नवोद्गतपत्राणि तनया इव यस्य ।) खदिरवृक्षः । इत्यमरः ।२।४।४९ ॥ (गुणादयोऽस्य खदिरशब्दे ज्ञातव्याः ।) बालकपुत्रश्च ॥

बालतन्त्रं, क्ली, (बालाय बालकरक्षार्थं तन्त्रमनुष्ठानं शास्त्रं वा ।) गर्भिणीचर्य्या । तत्पर्य्यायः । कुमारभृत्या २ गर्भिण्यवेक्षणम् ३ । इति त्रिकाण्डशेषः ॥ (अस्य विवरणन्तु सुश्रुते सूत्र-स्थाने १ अध्याये । यथा, "कुमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुप-शमनार्थम् ।" बालतन्त्रमपि खल्वष्टाङ्ग-तन्त्रेषु कौमारभृत्यं नाम । "कौमार-भृत्यं नाम कुमारभरणधात्रीक्षीरदोष-शोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याध्युप-शमनार्थम् ।" बालतन्त्रमपि खल्वष्टाङ्ग-तन्त्रेषु ६ अध्याये ।

"बालस्याकाशनिष्क्रान्ते स्कन्दस्य च विशेषतः ।
परदारादेन्मूर्ध्नि देवस्य पुनः पुनः ॥
पूतनामारसस्यापि शकुना शीतपूतना ।
मुखमण्डितिका च यवोन्मुखिकाः रेवती ॥
कौमारतन्त्रमित्येतत् प्रोक्तं पिशाचकीर्तितम् ॥"

एतेषां विवरणन्तु बालग्रहशब्दे द्रष्टव्यम् ।)

बालतृणं, क्ली, (बालं नवजातं तृणम् ।) शष्पम् । तत्पर्य्यायः । शष्पम् २ । इत्यमरः ।२।४।१६७ ॥ (यथा, रघौ ४।२६ स्टोकटीकायां मल्लिनाथः । महाधाराः प्रपातस्थानानि कदलीवने विलुठन्ति बालतृणानि बालकवाति यानि तानि ।")

बालपत्रकः, पुं, (बालानि नवानि पत्राणि यस्य । यद्वा बाल इव पत्रं दलं यस्य । ततः स्वार्थे कन् ।) खदिरवृक्षः । इत्यमरटीकायां भरतः ॥

बालधिः, पुं, (बालाः केशाः धीयन्तेऽत्र । बाल + धा + कि ।) केशयुक्तलाङ्गूलम् । इत्यमरः ।२।८ ४० ॥ (यथा, किराते । १५ । ३० ।

"चमरीकेशः शिवबलस्य
बबाधे गतिं पुच्छवालधिः ।
ऊर्द्धवलिताः विशसया-
धिपवाणप्रतिविसारणैर्बतिः ॥")

बालपत्र, पुं, (बाल इव पत्रं यस्य ।) खदिर-वृक्षः । इत्यमरटीकायां भरतः ॥ यवासः । इति राजनिर्घण्टः ॥ (बालं नवमिव पिण्डं यस्य ।) क्ली । मूलपत्रकम् । (अस्य पर्य्यायः ॥

"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बालपत्रकः, पुं, (बालपत्र एव । स्वार्थे कन् ।) खदिरवृक्षः । इति त्रिकाण्डशेषः ॥

बालपाश्या, स्त्री, (बालपाशे केशसमूहे साधुः तत्र साधुरिति यत् ।) सीमन्तिकास्थितस्वर्णादिरचितपट्टिका । सिंथी इति भाषा । तत्पर्य्यायः । पारितथ्या २ । इत्यमरः । २ । ६ । १०४ ॥ बालपाशस्थितमणिः । इति तट्टीकायां सर्व्वधारीयः ॥

बालपुष्पिका, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः । ततः स्वार्थे कन् कापि अत इत्वम् ।) यूथिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या यूथिकाशब्दे विज्ञेया ॥)

बालपुष्पी, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः सा ।) यूथिका । इति जटाधरः ॥

बालभद्रकः, पुं, (बालेऽपि भद्र इव । ततः स्वार्थे कन् ।) विषभेदः । तत्पर्य्यायः । ब्राह्मणः २ । इति शब्दचन्द्रिका ॥

बालभैषज्यं, क्ली, (बालं भैषज्यम् (यद्वा, बालस्य शिशोर्भैषज्यम् ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ बालकस्यौषधञ्च ॥ (तद्यथा,—
"भैषज्यं पूर्व्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
कार्य्यं तदेव बालानां मात्रा तस्य कनीयसी ॥"
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

बालभोज्यः, पुं, (बालानां भोज्यः ।) चणकः । इति राजनिर्घण्टः ॥ बालकभक्ष्यद्रव्ये, त्रि ॥

बालमूषिका, स्त्री, (बाला क्षुद्रा मूषिका इन्दुरः ।) क्षुद्रमूषिका । छिटका इन्दुर इति भाषा । तत्पर्य्यायः । गिरिका २ । इत्यमरः । २ । ५ । १२ ॥ गिरिः ३ बालमूषिकः ४ गिरिका ५ । इति शब्दरत्नावली ॥

बालयज्ञोपवीतकं, क्ली, (बालं यज्ञोपवीतम् । ततः स्वार्थे कन् ।) उपवीतविशेषः । तत्पर्य्यायः । उरस्पटः २ पञ्चवटः ३ । इति त्रिकाण्डशेषः ॥

बालराजं, क्ली, (बालः स्वल्पोऽपि राजते इति । राज + पचाद्यच् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥ बालकश्रेष्ठे, पुं ॥

बालरोगः, पुं, (बालस्य रोगः ।) बालकस्य व्याधिः । तस्य निदानं लक्षणानि चाह ।
"धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा ।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति ॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः ।
दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः ॥
वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः ।
क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः ॥
स्विन्नो भिन्नमलो बालः कामलापित्तरोगवान् ।
तृष्णालुरुष्णसर्व्वाङ्गः पित्तदुष्टं पयः पिबन् ॥
कफदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान् ।
निद्रार्दितो जडः शूनवक्त्राक्षश्छर्द्दनः शिशुः ॥
ज्वराद्या व्याधयः सर्व्वे महतां ये भवन्ति हि ।
बालानामपि ते तद्वज्ज्ञेया भिषगुत्तमैः ॥
बालानामेव ये रोगा भवन्ति महतां न च ।
तालुकण्टकमुख्यांस्तानवधारय यत्नतः ॥"
तत्रादौ तालुकण्टकमाह ।
"तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् ।
तेन तालुप्रदेशस्य निम्नता मूर्द्ध्नि जायते ॥
तालुपातात् स्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम् ।
तृड्वमिकण्ठास्यरुजा ग्रीवादुर्द्धरता वमिः ॥"
पानं स्तन्यस्य । शकृद्द्रवं द्रवरूपम् ॥
अथ महापद्ममाह ।
"विसर्पस्तु शिशोः प्राणनाशनः शीर्षसम्भवः ।
पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः ।
शङ्खाभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत् ॥"
पद्मवर्णः लोहितवर्णः तत्र शीर्षजो विसर्पः शङ्खाभ्यां हृदयं याति हृदयात् गुदं व्रजेत् । एवं वस्तिजो गुदं याति । गुदतो हृदयं हृदयाच्छिरो याति इति बोद्धव्यम् ।
अथ कुकूणकमाह ।
'कुकूणकः क्षीरदोषात् शिशूनामेव वर्त्मनि ।
जायते तेन तन्नेत्रं कण्डुरं स्रवेन्मुहुः ॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासावघर्षणम् ।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः ॥'
कुकूणकः कोथुया इति लोके ख्यातः ॥ * ॥
अथ गुदपाकमाह ।
'शातिमात्रासिता नाभिः यस्य गुदिपच्यते ।
बालस्य गुदपाकाख्यो व्याधिः पित्तेन जायते ॥'
अथाहिपूतनमाह ।
'शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् ।
स्विन्ने वा स्नाप्यमानस्य कण्डू रक्तकफोद्भवा ॥
कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम् ॥'
स्विन्ने स्वेदिते ॥ * ॥ अथाजगल्लीमाह ।
'स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥'
ग्रथिता गुम्फितेव । मुद्गसन्निभा । मुद्गाकृतिः ॥
अथ पारिगर्भिकमाह ।
'मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि ।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः ॥
युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिकम् ।
रोगं परिभवाख्यञ्च तत्र युञ्ज्यात्तु दीपनम् ॥'
गर्भिणीस्तन्यपानादपि पारिगर्भिकः ।
आलोड़ी इति लोके ।
परिभवाख्यं परिभवेति नामान्तरम् ॥ * ॥
अथ दन्तोद्भेदजान् रोगानाह ।
'दन्तोद्भेदः शिशोः सर्व्वरोगाणां कारणं मतम् ।
विशेषाज्ज्वरविड्भेदकासच्छर्द्दिशिरोरुजम् ॥
अभिष्यन्दस्य पोथक्या विसर्पस्य च कारणम् ॥'
कारणमित्यन्वयः । पोथक्याः पक्ष्मरोगविशेषस्य ॥
अथ बालरोगाणां चिकित्सा ।
'भैषज्यं पूर्व्वमुद्दिष्टं महतां यज्ज्वरादिषु ।
तदेव कार्य्यं बालानां किन्तु दाहादिकं विना ॥'
दाहादिकं विना अग्निदाहादिपाचनमर्द्दविरेचनशिरोवेधादिकं विना । मध्याह्ने पीतपत्रे समर्द्दविरेकाद्यं दद्यात् । यत आह सुश्रुतः ।
'विरेकवर्जितमनादृते कुर्य्यान्न नावनादिति ।
आत्ययात् विनाशकरत्वात् ऋते विना ।
'त एव दोषा दूष्याश्च ज्वराद्या व्याधयश्च ते ।
अतस्तदेव भैषज्यं मात्रा त्वस्य कनीयसी ॥'
अस्य बालस्य । कनीयसीमात्रामाह विश्वामित्रः ।
'विडङ्गफलमात्रन्तु जातमात्रस्य भेषजम् ।
अनेनैव प्रमाणेन मासि मासि प्रवर्द्धयेत् ॥'
विडङ्गपरिमितं भेषजं पूर्व्वोक्तं किंवा कल्कोत्सादयवावलेहोऽथ इत्यादिकर्द्दः । तन्त्रान्तरे त्वन्यथाभिहितम् ।
'प्रथमे मासि बालाय देया भेषजरक्तिका ।
अवलेह्या तु कर्त्तव्या मधुक्षीरसितापृतैः ॥
एकैका वर्द्धयेत्तावद्यावत् संवत्सरो भवेत् ।
तदूर्द्ध्वं माषवृद्धिः स्याद्यावत् षोडशवत्सराः ॥'
एकैकां रक्तिकां तदूर्द्ध्वं वर्षोपरि माषवृद्धिः प्रतिवर्षं पञ्चगुञ्जात्मकस्य माषस्य वृद्धिर्भवति । गुञ्जाः पञ्चाद्यमाषक इत्यमरसिंहः ॥
'ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः ।
ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः ॥'
ततः षोडशवत्सरोपरि ।
'पूर्व्वोक्तवातवैद्यानामियं मात्रा प्रकीर्त्तिता ।
कषायस्य पुनः सैव विज्ञातव्या चतुर्गुणा ॥
क्षीरपस्य शिशोर्दद्यादौषधं क्षीरसर्पिषा ।
धात्र्यास्तु केवलं देयं न क्षीरेणापि सर्पिषा ॥'
क्षीरान्नादस्य पूर्व्ववत् क्षीरसर्पिषा । अन्नादस्यौषधपानमाह सुश्रुतः ।
'एषां महतां ये दोषाः पचन्त्येते गदातुराः ।
तैस्तु तत्कल्कदिग्धौ पाययेत शिशुं स्तनौ ॥'
अवस्थायां बालानामव्यक्तव्याधिज्ञानोपायमाह ।
'अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते ।
मुहुर्मुहुः स्पृशति तं स्पृश्यमाने च रोदिति ॥
निमीलिताक्षो मूर्द्धस्थे रोगे यो धारयेच्छिरः ।
वस्तिस्थे मूत्रसङ्गार्त्तौ तृष्णाक्षो मूर्च्छति ॥
विण्मूत्रसङ्गवैवर्ण्यच्छर्द्दिराध्मानकूजनैः ।
कोष्ठे जानीत विद्वान्वा सर्व्वस्थाने च रोदनैः ॥'
अथादौ ज्वरस्य चिकित्सामाह ।
'घनं विश्वौषधी धात्री पत्रं चैव निशाद्वयम् ।
मात्रया कल्कवेदाद्यैः शिशोर्ज्वरनिबर्हणम् ॥'
मात्रया मधुना मधु योजयेत् ।
'भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः ।
क्वाथः कोष्णः शिशोरेष निःशेषज्वरनाशनः ॥'
भद्रमुस्तादिक्वाथः ॥ * ॥
'वचादेवदारुमहौषधं पीतं च चन्दनम् ।
शिशोर्ज्वरातिसारघ्नं क्वाथं काथं स्वर्णं पाययेत् ॥'
अथवा चर्व्वितम् । चतुर्थिका ज्वरादिकारेषु ॥

'विलय पुष्पाणि च मालतीनां
फलं फलानां सकलानि तानि च ।
मायावतेरी मधुना विमिश्रो
कार्येषु योज्यास्तानिर्णयादिषु ॥'

अर्त माला । विकारादिमायायवैद्ये अतीसारेऽ
'अमड्डाम्रबीजमालादिभिः पृतं कृतम् ।
दुर्वैरेऽपि विषीसैनमनीसारे कमाधिकम् ॥'
अमड्डा कल्पाङ्कुमम् । अमड्डादिपाको दुर्ध-
रेऽतीसारे ॥ ● ॥
'बिल्वशाल्मलीदत्ता च विल्वबीजकुष्ठानि च ।
मधामालौटा चूर्णानि हुतं तत्रैव वारिणा ।
न्यापि महतोऽतीसारे कुमारं पाययेद्भिषक् ॥'
बिल्वादिचूर्णमतीसारे ॥ ● ॥
'मोचरसः समङ्गा च धातकी पद्मकेसरम् ।
पिष्टैरेतैर्यवागूः स्यादतीसारनाशिनी ॥'
मोचरसमाद्गमलावेपुनरमलपिप्पल्याद्रि-
सतीला १ तन्दुलपोतदुग्धतीला १ जलतोला
११ सर्वमेकीकृत्य यवागूः पाकर्णीया । मोच-
रसादियवागू रक्तातिसारे ॥ ● ॥
'कासरोगविशाङ्कारसवैर्मधुभि: मतम् ।
कुमारं पाययेत् प्रातः सर्वातीसारनाशनम् ॥'
कासरादिकादः सर्वातीसारे ॥ ● ॥
'मासापर्यादिमधुना मर्दिता चौरमेव च ।
तन्दुलोदकयोगेन पिबेत् हन्ति प्रवाहिकाम् ॥'
मासादिचूर्णं प्रवाहिकायाम् ॥ ● ॥
'रजनी सरलो दारुबृहती गजपिप्पली ।
मण्डूकपर्णी मधुका च सौद्रं मागधिकाण्विता ॥
लेहयं पञ्चमी हन्ति मावागर्भिकामलाम् ।
ज्वरातीसारयोऽक्त्रं कासश्वासं सर्वरोगनुत् ॥'
रजन्यादिचूर्णं मलक्ष्मारी ॥ ● ॥
'पीतबरादिविकासङ्गोमामधीयमयावहे: ।
हृतं चूर्णं तु कपौर्वं विमूर्त्ता पक्वकालिषु ॥'
पीतकरादिचूर्णं कासेषु ॥ ● ॥
'पीतबरादिविकासबङ्गमायकुठीरसे सितम् ।
मधुना लभते वाचः काके: सवाभिबिन्दुने: ॥'
तुलसारसेनः कासेषु ॥ ● ॥
'कासीकुषुमर्ज्जमारसैरेकवैर्विका ।
मधुना विष्टक्षालाय छिदो: कासान् मनो-
हरेति ॥'

कासे ॥ ● ॥
'पार्श्व मर्दयता मूलं तण्डुलोदकसंयुतम् ।
मायमेतन् प्रदायं कासश्वासार्द्धं हिदो: ॥'
कासादिपार्श्व कासश्वासयो: ॥ ● ॥
'हरिद्रासामलकाशकचूर्णं पीतिके मर्दितम् ।
सौद्रं कासं हिक्कास्यान् मासव दत्तकं तथा ॥'
समर्थं कासयेत् ; काकादिचूर्णं कासश्वासयो: ।
'चूर्णं कटुकरोहिण्या मधुना सह योजयेत् ।
हिक्का सम्नयेत् पिबं हरिं बालान् पिशो-
हिकाम् ॥'

हिक्कायां कटुकाया ॥ ● ॥
'काकादिकाजानिमूलं कपौर्वं हरिद्रकेऽ ॥'
कटुकेषु ॥ ● ॥

'सीमं सीमं समेतुग्रमु स्यार्थं सं मधुमयिका ।
हिक्कायोङ्की वनरसं यवक्षीरसं देहयेत् ॥'
हिक्कायोङ्कं दुग्धोद्गमम् ॥ ● ॥
'मधुक्षीरानि विमलीविमली-
मनमपर्णीवित्वमागधिकाणि ॥'
नौरक्षदोम् ॥ ● ॥
'श्रीवेरमर्करयाणोनं सौद्रं प्रशस्तं परम् ।
वृषेन विमुदिप्येकाविकुमाणौदवोलितम् ॥
मामाहं वानिकं मूत्रं दयाद्धोबैव वा शिशुः ॥'
कामादौ वातमूत्रे च ॥ ● ॥
'कक्षोलमागधिकापौरवल्लीकासैन्धवैः सह ।
मध्ये प्रमोहयः शिशूनां मेह प्रणम् ॥'
मूत्राघाते ॥ ● ॥
'यदा तु दुर्बलो बाल: शास्त्रविद च वहिमान् ।
विडारीकन्दगोधूममयचूर्णं घृतप्लुतम् ॥
सारपीत्वा धीरं सतं समधुशर्करम् ॥'
कार्श्ये ॥ ● ॥
'नुरुतुण्डाकवर्षाभि मनदाबबलिद्धाम् ।
मिद्य तीर्थेन संविष्टेयोऽयं शोषघ्नीमिदो: ॥'
शोषे ॥ ● ॥
'पटोलस्य समादिचन्दनविभार्थितं पिबेत् ।
मायगीर्षं विस्फोटज्वरशान्तये शिशुः ॥'
मायगीर्षं विस्फोटज्वरेषु ॥ ● ॥
'मयशुक्तिमुरङ्गरविकेषयवैः पिबेत् ।
वैकप्रतेन बल्यात् विषमामयवर्धिनाम् ॥
मारिवादिकल्कसंमतो बुधयो मधुकम् च ।
संघातिथि तृषि कृशी धात्वापैः शिरोः सदा ॥'
तृषापाने ॥ ● ॥
'कायसलम्बृकवशौर्मूत्रयाने प्रवेशनम् ॥'
तृषापाने ॥ ● ॥
'विषमीविकसापूर्णं पृतपीदर्शनदुतम् ।
सामो रोदिति यत्नो मेदू ददात् तृषा-
वहम् ॥'

रोदने ॥ ● ॥
'हरीतकी बचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीला कुमारः कल्पेन लभते तासुकण्टकान् ॥'
तालुकण्टके ॥ ● ॥
'मनःशिलां जोमूतकं च
समङ्कुरं हरीतकम् ।
मारेचनं गैरिकं समोषं
कुकूणके कामभृताहरति ॥'
कुकूणके ॥ ● ॥
'मालिकेषाधिराज्ञैव पौरविलेव कोदता ।
मंदैषर्जितां मार्गं सीषलेनोपदाव्यते ॥'
नाभिरोपे ॥ ● ॥
'नाभिपाके विडालोदिमकुमद्गुके: मतम् ।
तैलमप्यन्तरं मदकेर्निर्वपयुलनम् ॥
दशैव वृक्तमलारा नाभिवाककैरपृ्टकम् ।
सहदुमैः गौरिका नाति कुमारवन्द्र-
देवता ॥'

नाभिपाके ॥ ● ॥
'गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।

रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥
दत्तवस्त्रास्त्रयैर्मूर्खै शिशूनां गुदपाकनुत् ॥'
सर्वतुं रसाञ्जनम् । गुदपाके ॥ ● ॥
'शङ्खनीलोपलप्रभे सैनैर्दिहेदगुदम् ॥'
सर्वाङ्गमने ॥ ● ॥
'मारिजमेकैदीनि तु सूचते वहिदोषकम् ॥'
मारिजमेके ॥ ● ॥
'दुष्पयोजिन्मु मधुना पूर्वेण प्रतिवादयेत् ।
मातवौदुम्बरियोर्नीवकरयेव वा ॥
रक्तोत्पलावभ्या दीयाः पीतुषन्ति च वाचकम् ।
भाले हन्ति हि याग्यनि मानवाहेतुकर
सदा: ॥'

दन्तोद्गमेदन्तरोगेषु ॥ ● ॥
'सौवर्ण सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ।
अर्कपुष्पीमधु घृतं चूर्णितं कनकं वचा ।
स्वेमवूर्णं कैटर्यं श्वेता दूर्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राशा अर्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलबुद्धिकरा: शुभाः ॥'
मासवर्णचूर्णम् । चतुर्णमपि योगेषु प्रास-
वर्णचूर्णम् । मत्स्याक्षक: ब्राह्मी इति लोके
शङ्ख हुंली । अर्कपुष्पी अर्कपत्रपुष्पवता ।
कैटर्यं कट्फलम् । श्वेता कृष्णविशिष्टं बचेति
केचित् । अर्द्धश्लोकं बारदेवे श्लोकः प्रयोज्याः
द्वारसमर्थीवेति केचित् ॥ ● ॥
'बालानाथ वपुर्मेधाबलबुद्धिकरा: सदा ।
प्रायावदी वचे तैलं महतुष्टय चतुर्धकं ॥
दाचादमहपुराकाचायोगमार्मिकपूते: ।
समाडाराययद्यादापार्श्वनाशाम्रेदाभि: ॥
संवित्तं स्वरदयोषं बलदुःखं शिरो: ॥'
मायादितैलं वालेषु ॥ ● ॥ इति भावप्रकाशे
बालरोगाधिकार: ॥

मालामालं स्त्री, (मालवादि देशमस्वते देश-
विशिष्ट मालवे इति । अन्+च ।) वैदूर्यम् ।
इति शिकाण्डशेषः ॥ (विहिविंदेशात्
वैदूर्यमस्थं येषः ॥)

मालवाक: [म्] स्त्री, (मालाना नौक्वा काके
शैविष्ट वा वाक: ।) वैहविलिगरवम् ।
मालवाच बसाक । इति केचित् ॥

मालवाक्ष: पुं, (मालाः लिकरसी वाक्षा वस्य ।
इति बाहु बर्तिपिकुपविति अस्ति विकृतदिये
शिवाय मदाबल इति प्रसिद्धमालम् ।)
दधन्नाश: । इति भारती । च। ॥ वाक-
वदबौटे वि ॥

मालमल्लं, स्त्री, (मालाय मनसीकृत्य वार्हैन
वा निर्मितं कवनम् ॥) वालम् । नटवर्ति: ।
सीमगुणः ९ प्रकीर्णतम् ॥ । इति हैमचन्द्र: ॥
(यथा, कुमारे । १ । ११ ।
"माङ्गलिकैनविविधेर्मै-
रिशरतनबलरीमित्रौ: ।
बलार्थकूर्चं विरिद्रावद्धं
कुर्योतिन काकबजेवमर्मे: ॥")

बालकस्य वचनञ्च ।
"बालव्यजनमेतद्धि मक्षिकादीन् व्यपोहति ।"
इति द्रव्यगुणः ।
बालव्रतः, पुं, मञ्जुघोषनामकबुद्धविशेषः । इति त्रिकाण्डशेषः ।
बालसन्ध्याभः, पुं, (बालसन्ध्या इव आभा यस्य ।) अरुणवर्णः । इति हेमचन्द्रः ।
बालसूर्य्यं, क्ली, (बालः सूर्य्य इव) वैदूर्य्यमणिः । इति त्रिकाण्डशेषः । प्रातःकालीनसूर्य्ये, पुं ।
बालसूर्य्यकं, क्ली, (बालसूर्य्य इव । बालसूर्य्य + स्वार्थे कन् ।) वैदूर्य्यम् । इति शब्दरत्नावली ।
बालहस्तः, पुं, (बाला हस्त इव मक्षिकादीनां निवारकत्वात् ।) बालधिः । लोमयुक्तलाङ्गूलम् । इत्यमरः । (केशानां हस्तः समूहः इति । केशसमूहश्च इत्युज्ज्वलदत्तः ।)
बाला, स्त्री, (बालाः केशा इव पदार्थाः विद्यन्ते यस्याः । बाल + अर्श आद्यच् ततष्टाप् ।) नारिकेलः । हरिद्रा । मल्लिकाभेदः । अलङ्कारभेदः । मेध्यम् । त्रुटिः । स्त्री । इति सुनाहिता मेदिनी । घृतकुमारी । ह्रीवेरम् । इति शब्दचन्द्रिका । अमला । नीलझिण्टी । इति राजनिर्घण्टः । एकवर्षवयस्का गौः । यथा,—
"वर्षमात्रा तु बाला स्यात्तरुणा द्विवार्षिकी ।"
इति प्रायश्चित्ततत्त्वम् ।
षोडशवर्षीया स्त्री । सा षोडशवत्सरात् च प्रहर्षणीया सर्वदा च । इति राजवल्लभः । (यथा, रतिमञ्जर्य्याम् ।
"बाला स्त्री प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥"
यथा, मेघदूते । ८२ ।
"गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥"
कन्यायामपि । यथा, मार्कण्डेये । २१ । ६८ ।
"इयञ्च गन्धर्व्वसुत कार्य्यं मम प्रयच्छ तत् ।
अपि प्रीतिमती बाला दर्शनादेव मानद ! ॥"
पञ्चवर्षा स्मृता बाला । इति हारीते । १ । ११ ।)
अजातार्त्तवा कन्या । तस्याश्चालिङ्गनादौ च अधिकाराविषयो यथा,—
"अप्राप्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥"
इति गारुडे १०७ अध्यायः ।
बालाची, स्त्री, (बालाः केशा इवाचितमग्रं च पुष्पं यस्याः ।) बिन्दुम्पारवः । तत्पर्य्यायः । मालवीरः दुग्धनी २ देवपारिपी ३ । इति शब्दचन्द्रिका ।
बालार्कः, पुं, (बालो नवोदितोऽर्कः सूर्य्यः ।) प्रातःकालीनसूर्य्यः । यथा,—
"रक्तवस्त्रपरीधाना बालार्कसदृशी तनुः ।"
इत्यादि तिथ्यादितत्त्वे बगलाध्यानम् ।
कन्याराशिस्थसूर्य्यः । यथा,—
"शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यम् ।
बालिः, पुं, (बाले केशे जातः । बाल + इञ् ।) कपिविशेषः । तत्पर्य्यायः । ऐन्द्रिः २ बाली ३ । इति त्रिकाण्डशेषः । (अयमेव श्रीरामेण हतः । अस्य जन्मादिकविवृतिस्तु बालिन् शब्दे द्रष्टव्या ।)
बालिका, स्त्री, (बाला एव । बाल + स्वार्थे कन् । टाप् अत इत्वम् ।) बाला । कन्या । बालुका । पत्रकाहला । कर्णभूषणम् । इति मेदिनी । के, ११० । एला । इति शब्दरत्नावली । कन्यास्वरूपपक्षे यथा,—
"कन्या देया स्वयं प्रोक्ता कन्यारूपा तु शूलिनी ।
यावदप्रत्ययोनिः स्यात्तावद्देवी सुरार्चिता ॥"
इति देवीपुराणम् ।
बालखिल्याः, पुं, पुलस्त्यकन्यायां सन्नत्यां क्रतोः षष्टिसहस्रसंख्यकपुत्रा ऋषिविशेषाः । यथा,—
"प्रोक्तो पुलस्त्यो भगवान् दत्तामिमसवत् प्रभुः ।
पूर्व्वजन्मनि सोऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ॥
वेदबाहुं तथा कन्यां सन्नतिं नाम नामतः ।
पुत्राणां षष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः ॥
ते चोर्द्ध्वरेतसः सर्व्वे बालखिल्या इति स्मृताः ॥"
इति कौर्म्मे १२ अध्यायः ।
अपि च ।
"क्रतोश्च सन्नतिर्भार्य्या बालखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
इति मार्कण्डेयपुराणे ५२ । २४ ।
तेषामङ्गुष्ठपरिमाणस्य प्रमाणं यथा,—
"अपश्यद्वालखिल्यांस्तानङ्गुष्ठोदरवर्ष्मणः ।
पलाशवृन्तिकामेकां सहितान् वहतः पथि ॥
प्रलीनान् स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् ।
ह्रियमाणान् मन्दबलान् गोष्पदे सम्प्लुतोदके ॥"
इति महाभारते । १ । ३१ ।
बालखिल्योऽपि पाठः । यथा, "अमेध्यान्तर्गत-बालखिल्यमेघावसक्तं बालखिल्याः पश्यन्ति प्राणा वै बालखिल्याः ।" इति चरकसूत्रभाष्यम् ।
बालिनी, स्त्री, अश्विनीनक्षत्रम् । इति हेमचन्द्रः ।
बालिशं, क्ली, (बालाः सन्ति यस्य इति बाली, मत्वर्थे इनि । बाली केशः शेते यत्र । शी + आधारे ड ।) उपधानम् । इति शब्दमाला । (काकवादि-दर्शनात् । इति पाणिनिः । ६ । १ । १२९ ।)
बालिशः, त्रि, (बाड + इश् । डस्य लः । बालि दाढ्र्यं श्यतीति । बालि + शो + आतोऽनुपसर्गे इति कः ।) शिशुः । (यथा, भागवते । ३ । १ । ४२ ।
"बालिशा बत यूयं वा अधर्मे धर्ममानिनः ।"
बालिशा शिशुवत् इत्यर्थः ।) मूर्खः । इति मेदिनी । शे, २६ । (यथा, मनुः । ३ । १७६ ।
"यथाऽङ्गतो ब्राह्मणः मूढत्वात् सत्पात्रमनु-पश्यति ।
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥"
"बालिशोऽज्ञः ।" इति कुल्लूकः ।)
बालिहन्ता, पुं, (बालिनो वा वानरराजस्य हन्ता ।) श्रीरामचन्द्रः । इति शब्दरत्नावली । (बालिवधकथा यथा, रामायणे । ४ । १६ । २०—३६ ।
"सूर्य्यपुत्रो महावीर्य्यः सुग्रीवः पर्य्यदृश्यत ।
बालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ॥
बालिनं प्रति सामर्षो दर्शयामास राघवम् ।
वृक्षैः सशाखैः शिखरैर्वज्रकोटिनिभैर्नखैः ॥
मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः ।
तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव ॥
तौ शोणिताक्तौ युध्यन्तौ वानरौ वनचारिणौ ।
मेघाविव महाशब्दैस्तर्जमानौ परस्परम् ॥
हीयमानमथापश्यत् सुग्रीवं वानरेश्वरम् ।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥
ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।
स शरं वीक्षते वीरो बालिनो वधकाङ्क्षया ॥
ततो धनुषि सन्धाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं कालचक्रमिवान्तकः ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः ।
प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥
मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ।
राघवेण महाबाणो बालिवक्षसि पातितः ॥
ततस्तेन महातेजा वीर्य्योत्सिक्तः कपीश्वरः ।
वेगेनाभिहतो बाली निपपात महीतले ॥")
अस्य देहान्तर्गतयामविवरणञ्च ।
बाली, [न्] पुं, (बालः केशः तदुत्पत्तिस्थानत्वेन विद्यते यस्य । बाल + इनिः । नामनिरुक्तिश्च यथा, रामायणे ।
"अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव सः ॥")
इन्द्रपुत्रवानरराजविशेषः । स तु श्रीरामचन्द्रेण हतः । तस्योत्पत्तिर्यथा,—
"मेरुशृङ्गचरः श्रीमान् वानरसत्तमः प्रभुः ।
तस्य मध्यमं शृङ्गं सर्व्वदेवप्रपूजितम् ॥
तस्मिन् दिव्या सभा रम्या ब्रह्मणः शतयोजना ।
तस्यामास्ते सदा देवः पद्मयोनिश्चतुर्मुखः ॥
योगमभ्यसतस्तस्य नेत्राभ्यां पतितं जलम् ।
तद्गृहीत्वा भगवता पाणिना मार्जितं तदा ॥
निःश्वसमानं तद्भूमौ ब्रह्मणा कोशलाकृता ।
तस्मिन्नुत्पन्ने राम ! वानरः सम्बभूव ह ॥
उवाच मेघमिश्रं प्रणम्य च वरं प्रभुः ।
नानाविधवर्णबृहत् प्रवरचित्तं वरः ॥
आहूय वानरश्रेष्ठं बहु वानरकेशरः ।
अत्युग्रं तपस्तेपे द्विजप्राङ्गणेषु यथा पुरा ॥
लक्षितेव वधी राम ! क्षीणं प्राप्य स वानरः ।
सद्यस्तद्दर्शनं दृष्ट्वा सान्त्वितो मेधसाग्रतः ॥
सलज्जो धृतैश्च मार्गे स्थितः पालिनम् ।
अवरात्रेदस्तौ नारी कपिश्चैवाभवत् ॥
ततः स वासवश्चापि अदृष्टे वानरीश्वरम् ।
अमोघरेतसस्तस्य वासवस्य महात्मनः ॥
बालेषु पतितं बीजं बाली नाम बभूव ह ।
भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना ।

भीमं विविक्तं भीतायां विश्वरसमदुर्गमम् ।
भीतायां पतितं भीमं सुग्रीवः समवारयत् ॥"
इति रामायणे उत्तरकाण्डे । १० सर्गः ॥
अपि च ।
"रामरेण्वं महेन्द्रमभिमतो वालिनमाक्रमत् ।
सुग्रीवं अवधायाथ लपक्षपतां गतः ॥"
इति रामायणे बालकाण्डे १० सर्गः ॥
"तत: शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥"
इति किष्किन्धाकाण्डे १० सर्गः ॥
(वाला: केशाः सन्त्यस्य ।) वालविशिष्टे, त्रि ॥
वालीशः, पुं, मत्स्यकच्छुरोगः । इति शब्दरत्नावली ॥
वा(बा)लुः, स्त्री, (वलते अनेन । वल प्राणने । वल + उण् ।) एलवालुकाभिधगन्धद्रव्यम् । एलुकादिशोषः ॥
वा(बा)लुकं, क्ली, (वालुरेव । स्वार्थे कन् ।) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥
वा(बा)लुकः, पुं, पानीयामलः । इति राजनिर्घण्टः ॥
वा(बा)लुका, स्त्री, (वालुक + टाप् ।) रेणुविशेषः । बालि इति भाषा । तत्पर्यायः । सिकता २ शिका ३ शीतला ४ वन्यप्रवेरा ५ प्रवाही ६ महासूक्ष्मा ७ सुपा ८ पानीयवर्णिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्तापश्रमनाशित्वञ्च ।
"शीतस्पर्शोऽतवेव ग्रामादिवायिनीयता ॥"
इति राजनिर्घण्टः ॥
भाषा कर्कटी इत्यादि । कर्कटी । इति जटाधरः । कर्पूरः । बालविशेषः । इति शब्दचन्द्रिका ॥
वा(बा)लुकागडः, पुं, (वालुकायाः गडनोति गड्डात् गच्छति यः । वालुका + गड्डगतौ + कर्त्तरि डः । वालुकाखननजातत्वात् तथात्वम् ।) मत्स्यविशेषः । वालिया इति भाषा । तत्पर्यायः । शिलाङ्कुः २ । इति जटाधरः । १८० ॥
वा(बा)लुकात्मिका, स्त्री, (वालुकायाः आत्मा स्वरूपो यस्याः । बहु कप् टाप् ।) शर्करा । इति शब्दचन्द्रिका ॥ (वालुका आत्मा यस्य ।) वालुकामये, त्रि ॥
वा(बा)लुकाप्रभा, स्त्री, (वालुकावालुकाभिर्यत्प्रभा यस्याम् । बहुव्रीहिः । वालुकाप्रभान्मारस्य तथात्वम् ।) नरकविशेषः । इति हेमचन्द्रः । ५ । ६ ॥
वा(बा)लुकामयं, त्रि, (वालुका + मयट् ।) सिकतामयम् । इति वैद्यकपरिभाषायां भरतः ॥
वा(बा)लुकायन्त्रं, क्ली, (वालुकायाः यन्त्रम् ।) औषधपाकार्थयन्त्रविशेषः । यथा,—
"भाण्डे निधाय कूपीं मृत्स्ने विनिहितपूरये ।
कूपिकाकण्ठपर्यन्तं वालुकाभिश्च पूरयेत् ॥
भेषजं कूपिकास्यं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतन्त्रविदो विदुः ॥"
इति भावप्रकाशः ॥

वा(बा)लुकास्वेदः, पुं, (वालुकाभिर्विहितः स्वेदः ।) तप्तवालुकाभिस्वेदनम् । यथा,—
"वालुकापूरितैः स्वेदान् कारयेदयथाविधिना ।
स्विन्नः स्वेदो विविधश्च विना वैद्यवातवान् ॥
सर्वेद्रवपटस्थितवाष्पकर्मनिवालुकामर्दनैः ।
प्रशमयति वातकफामयमरुजशूलाङ्गमर्दादीन् ॥
शीतार्त्तं मार्दवं कृत्वा भीमा मायकमारयत् ।
यथा वातकफशमं स्वेदो ज्वरमपोहति ॥"
इति भावप्रकाशः ॥
वा(बा)लुकी, स्त्री, (वलति वालयति वा । वल-प्राणने + उण् । स्त्रियां ङीष् ।) कर्कटीभेदः । तत्पर्यायः । मधुफला २ स्निग्धफला ३ पीतकर्कटी ४ पीतफला ५ वालिका ६ फलता ७ । अस्या गुणाः ।
"वालुकी वातशमनी शीता रुच्या श्रमापहा ।
पित्ताश्मघ्नी रुच्या कृशतां वातशोषहा ॥
"वालुकी शरदि पर्वकरोषवर्षी
पैत्तिकाश्च शमु पित्तहरा च रुच्या ।
पित्तं करोति खलु मीनधराहंपका
पक्वा मतीव मधुरा कफकारिणी च ॥"
इति राजनिर्घण्टः ॥
वा(बा)लुङ्की, स्त्री, कर्कटी । इति त्रिकाण्डशेषः ॥
वा(बा)लुङ्किका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
वा(बा)लुङ्गी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
वा(बा)लूकः, पुं, (वलते प्राणान् हन्ति यः । वल ह वधे + ऊक ।) विषभेदः । इति हेमचन्द्रः । ४ । २ । १ ॥
वा(बा)लेयः, पुं, (वलये वहनकरणाय साधुः । बलि + "छदिरुपधिबलेर्ढञ् ।" ५ । १ । १३ । इति ढञ् ।) रासभः । इत्यमरः । २ । ९ । ७७ ॥ (यथा, माघे । १२ । ८६ ।
"इत्थमत्र विततक्रमवर्त्मवर्त्ति पथि मामिहितम् ।
अहर्पतं समरतो हर्षं च जातशोभम् ॥"
बले: आकामस्यापत्यं रेणुमुदर्थकं पुमान् । बलि + ढक् ।) दैत्यविशेषः । इति धरणिः ॥ (बलि: विरोचनपुत्रस्तस्य वानन्दनं पुत्रशतं बाणम् हि च वालेयसंज्ञा विख्याताः । अङ्गवङ्गादि-पुत्राः ।
"विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ।
बलेः पुत्रशतं त्वासीत् राजानः सर्व एव ते ॥
तेषां प्रधानाश्चत्वारो विख्याताः सुमहाबलाः ।
अङ्गस्तथा ज्येष्ठ वङ्गः सुह्मः च बलेः सुताः ॥
बलेः पुत्रास्तु पौण्ड्रश्च कलिङ्गश्च तथैव च ।
वालेयो नाम विख्यातो अस्यां विख्यातवीर्यवान् ॥"
आसीत्क्षत्रियोऽभवत् सुतपसो राजा: पुत्रो बलिनामा तस्य पुत्राश्च वालेयाः । यथा, हरिवंशे । ३१ । ३०—३१ ।
"केवलं हन्यते कुर्वे कुर्वे कुमारो बलि: ।
आसीत् मानुषरूपेण तु स राजा महायोगवित् ॥
महायोगी स तु बलिर्बन्धनान्मुक्तः कृतः ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ॥

अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा वालेयं क्षत्रमुच्यते ॥
वालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
बलेस्तु ब्रह्मणा दत्ता वराः प्रीतेन भारत ॥")
अपामार्गवृक्षे । इति शिवः ॥ चाणक्य-मूलम् । इति राजनिर्घण्टः ॥
वालेयः, त्रि, (वालाय हितः । वाल + ढञ् ।) मृदुः । बालहितः । इति मेदिनी ॥
(बलये उपचाराय हितः । बलि + छदिरुपधिबलेर्ढञ् ।" ५ । १ । १३ । इति ढञ् । मृदुः ।)
यथा, सिद्धान्तकौमुद्याम् । "वालेयास्तण्डुलाः ।" बलियोग्यः । यथा, रघौ । ११ । ७७ ।
"इमं अनन्तानभवारभुमतो
बालेय वाचेयमहंदरोषि ।
त्रिलोकमिन्द्रिया बलिभुजा-
सुदारणायो वितमन्दवाचाम् ॥"
पितृसत्ताभ्यो बलये हीय स्त्री । तत्पर्यायो यथा,—
"कुठमट्टं दारुपूर्वं वालेयं मरिचेन्द्रम् ।
प्रपौण्डरीकं दैत्यौरुस्सवाणि च ॥
सुपालम् वैपथुरुटं सुवार्थं बालेयतुष्टकम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
वालेयशाकः, पुं, (वालेयः बलिहितः शाकः ।) आप्तरर्षिका । इत्यमरः । २ । ४ । ९० ॥
वालेरः, पुं, (वालानां रङ्क: प्रियः ।) बदरः । इति राजनिर्घण्टः ॥ बालकाभिलषिते, त्रि ॥
वालोपवीतं, क्ली, (वालानां वालकानां उपवीतम् ।) बालकनरितपवित्रम् । तत्पर्यायः । प्रचारकम् २ उरस्कम् ३ । इति त्रिकाण्डशेषः । ३४ । (इत्युपनयनकार्ये यज्ञसूत्रम् ।)
वाल्मीकिः, पुं, वल्मीकजातत्वम् । (वल्मीक + इञ् ।) वल्मीकप्रभवो वल्मात् तस्मात्कौशि-कविलो इति शब्दरत्नावली: । वल्मीकसमस्ति जीवो प्रचारिकीयकस्य वल्मीकजातत्वं वल्मीकपरिचयादेः । अस्य वल्मीक इति नाम-विशेषः कश्चित्कारुः । मुनिविशेषः । यथा,—
"ततःशापाभिपन्नं सन्तो वाल्मीकिरादरम् ।
कारयं बरिमपूजां वाल्मीकिर्मुनिसत्तमः ॥"
इति रामायणबालकाण्डे ॥
अपि च । तपस्तपसमम्ब्यं रामचरितं चकार मुनिवरेस्वं तत्तचारकैव समद् निगद । मूलोऽत्यान्विषा अद्वैतं वर्णात्म आश्वकोशि-कवत्स वर्णान्धकान् तत्र प्रकाशं द्रष्टव्यो वाल्मीकि: ब्रह्मसत्योऽभिरामायणस्याद्भूतं चतुर्विंशतिसाहस्रसंख्यकश्लोकात्मकं सर्व-भूतं रामायणं चतुर्विंशतिसहस्रश्लोकात्मकं पुराकल्पान्तरमयादिकम् । इति लुप्तिः । अपि च ।
"वाराणसीकृता: कर्णे नैषां वाल्मीकिर्नैव भाग्य ।
दशकाण्डकारी रामाः कथा वेदवर्णकः ॥
वाल्मीकिवृत्तं चरितं कर्णे मार्कण्डेयः ॥"
इति मात्स्ये ११ अध्यायः ॥

बाल्यं, (बालस्य भावः कर्म्म वा । बाल+"पत्यन्तपुरोहितादिभ्यो यक् ।" ५ । १ । १२८ । इति यक् ।) बालस्य भावः । तत्पर्य्यायः । शिशुत्वम् २ शैशवम् ३ । इत्यमरः ॥ तच्च षोडशवर्षपर्य्यन्तम् । आषोडशाद् भवेद्बाल इत्युक्तेः । इति भरतः ॥ (यथा मनुः । ५ । १४८ ।
"बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।"
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकन्तथा ।
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

बा(वा)ष्पः (ष्मः) पुं, (बाधते नेत्रे इति । बाध+"खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः ।" उणां । ३ । २८ । इति पः । निपात्यते च ।) ऊष्म । अश्रु । इत्यमरः । ३ । ३ । १३० ॥ (यथा, रघौ । ८ । ७० ।
"अकरोत् पृथिवीरुहानपि
स्रुतशाखारसबाष्पदूषितान् ॥")

बाहः, पुं, } (बाहुरेव । पृषोदरादित्वात् साधुः ।) बाहा, स्त्री, } बाहुः । इत्यमरटीकायां रमानाथः ॥ (यथाह उज्ज्वलदत्तः । १ । १८ ।
"अकारान्तोऽपि बाहशब्दो भुजवाचकः । यथा च । बाहोऽभ्युदययोः पुमानिति दामोदरः । टाबन्तोऽप्ययं । बाहुर्बाहा भुजाश्रयः । भुजाबाहा इति वाचस्पतौ शब्दभेदः ।")

बाहाबाहवि, अ, बाहुभिर्बाहुभिः प्रहृत्य यद् युद्धं तत् । इति मुग्धबोधव्याकरणम् ॥

बाहुः पुं, स्त्री, (बाधते शत्रून् इति । बाध+"अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च ।" उणा० १ । २८ । इति कुप्रत्ययो धकारस्य हकारादेशश्च ।) कक्षाद्यङ्गुल्यग्रपर्य्यन्तावयवविशेषः । तत्पर्य्यायः । भुजः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० । दोषः ५ बाहः ६ । इति जटाधरशब्दरत्नावल्यौ ॥ तद्विशेषपर्य्यायाः । आयती १ अप्नस्वान् २ अभीशू ३ अप्नवाना ४ विनंगृसौ ५ गभस्ती ६ करस्नौ ७ बाहू ८ भुरिजौ ९ क्षिपस्ती १० शक्वरी ११ भरित्रे १२ । इति द्वादश बाहुनामानि । इति वेदनिघण्टौ २ अध्यायः ॥ (यथा ऋग्वेदे । [illegible] ।
"अदृणो वो मरुतो यंवयोरधि
वच योषो बाह्वोर्वां वर्त्त वितम् ॥"
शुभाशुभलक्षणम् । यथा,
"निर्मांसौ देव भयाक्तौ हिंस्रौ च निर्धनौ सुखौ ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ धनेश्वरे ॥"
इति गारुडे ६५ अध्यायः ।
(अस्य शुभाशुभलक्षणं यथा [illegible] ।
"उरुबाहुः पुरुषो धनधान्यसुखान्वितः ।
दीर्घबाहुर्भवेद्राजा बहुरत्नं धनं तथा ।
धनवान् पृथुबाहुश्च बाहुबाहुवर्द्धनम् ।
ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरस्तथा ।
वामावर्त्तभुजा ये तु ये च रोमभुजा नराः ।
ते दुःखदायका ये तु दारिद्र्येण समर्दिताः ॥

पुरुषस्य दक्षिणबाहुस्पन्दने स्त्रियो वामबाहुस्पन्दने शुभं तद्विपरीते तु अशुभम् । यथा शाकुन्तले १ अङ्के ।
"शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥"
बाहुर्दक्षिणबाहुः । फलं वरस्त्रीलाभरूपम् ॥
"वामेतरभुजस्पन्दो वरस्त्रीलाभसूचकः ॥"
इतिवचनात् ॥)
कूर्परस्य ऊर्द्ध्वभागः । यथा,—
"सत्त्वं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥"
अस्य टीका । बाहू प्रबाहू च कूर्परस्य ऊर्द्ध्वाधोभागौ । इति विष्णुपुराणे । ५ । ५ ॥

बाहुकः, पुं, नलराजा । तत्पर्य्यायः । पुण्यश्लोकः २ अश्ववित् ३ नैषधः ४ । इति त्रिकाण्डशेषः ॥ (पुष्करेण हृतराज्यो हि नलः अक्षवैगुण्यात् विपिने दमयन्तीमपहाय भ्राम्यन् दावानलपरीतमनलभयादाक्रोशन्तं कर्कोटकनामानं नागमवलोक्य तत उद्धृतवान् । अथ प्रसन्नस्यास्य भुजगस्योपदेशात् ऋतुपर्णस्य राज्ञो नगरं गत्वा बाहुक इत्यभिहितसंज्ञेन राज्ञः घोटकपरिचर्य्यायां नियुक्तोऽभवत् । यदुक्तं महाभारते । ३ । ६७ । १-७ ।
"तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः ।
ऋतुपर्णस्य नगरं प्राविशद्दशमेऽहनि ॥
स राजानमुपातिष्ठत् बाहुकोऽहमिति ब्रुवन् ।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः ॥
अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च ।
अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः ॥
यानि शिल्पानि लोकेऽस्मिन् यच्चैवान्यत् सुदुष्करम् ।
सर्व्वं यतिष्ये तत् कर्त्तुमृतुपर्ण ! भरस्व माम् ॥
ऋतुपर्ण उवाच ।
वस बाहुक ! भद्रन्ते सर्व्वमेतत् करिष्यसि ।
शीघ्रयाने सदा बुद्धिर्ध्रियते मे विशेषतः ॥
स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम ।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः ॥
त्वामुपस्थास्यतश्चेमौ नित्यं वार्ष्णेयजीवलौ ।
एताभ्यां रंस्यसे सार्द्धं वस वै मयि बाहुक ! ॥"
कौरव्यकुलोद्भवो नागविशेषः । यथा महाभारते । १ । ५७ । ११ ।
"बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ ।
कौरव्यकुलजानेतान् [illegible] ॥")

बाहुकुब्जः, त्रि, (बाहौ बाह्वोर्वाऽग्रभागे कुब्जः ।) कुञ्चितबाहुयुक्तः । कोणा इति भाषा । तत्पर्य्यायः । कुण्टः २ दोःकुब्जः ३ इति जटाधरः ॥

बाहुकुन्त्रः, पुं, (बाहुरिव कुन्त्राणि आचरतीति । बाहु+कुन्त्र+अचादिः ।) पक्षः । यथा,—
"अवनतपक्षाः सर्व्वे पतन्ति तरवः ।
ऐरावतकुलोद्भवे बाहुकुन्त्रस्य पक्षतौ ॥"
इति [illegible] ।

बाहुजः, पुं, (ब्रह्मणो बाहुभ्यां जायते यः । बाहु+जन्+ड । "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत ॥" इति श्रुतेर्व्याख्यानम् ।) क्षत्रियः । इत्यमरः । २ । ८ । १ ॥ (यथा,—
"वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ।
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
कीरः । स्वयंजाततिलः । इति मेदिनी । जे, १७ ॥ बाहुजाते त्रि ॥

बाहुत्राणं क्ली, (त्रै+भावे+ल्युट् । बाहोस्त्राणं यस्मात् ।) अश्वारोहादिवारणार्थबाहुबद्धलौहादि । तत्पर्य्यायः । बाहुलम् २ । इति हेमचन्द्रः । ३ । ४३३ ॥

बाहुदन्ती, [न्] पुं, (बहवो दन्ता यस्य स बहुदन्त ऐरावतः स एव बाहुदन्तः । स्वार्थे अण् । बाहुदन्तोऽस्यास्तीति इनिः ।) इन्द्रः । इति भूरिप्रयोगः ॥

बाहुदा, स्त्री, (बाहू दत्तवती या । बाहु+दा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । लिखितस्य मुनेर्बाहुप्रदानादस्यास्तथात्वम् ।) नदीविशेषः । तत्पर्य्यायः । सैतवाहिनी २ । इत्यमरः ॥ शङ्खलिखिताख्ययोर्मुन्योर्मध्यात् भ्रातुः शङ्खस्य शून्याश्रमे फलभक्षणात् राज्ञा बाहू छिन्नौ तौ यस्यां नद्यां तपस्तप्यमानस्य पुनर्जाताविति । इत्यमरटीकायां भरतः ॥ (एतत्कथा यथा, महाभारते । १२ । २३ । १७—४० । व्यास उवाच ।
"अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शङ्खश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ ॥
तयोरावसथावास्तां रमणीयौ पृथक् पृथक् ।
नित्यं पुष्पफलैर्वृक्षैरुपेतौ बाहुदामनु ॥
ततः कदाचिल्लिखितः शङ्खस्याश्रममागमत् ।
यदृच्छयाथ शङ्खोऽपि निष्क्रान्तोऽभवदाश्रमात् ॥
सोऽभिगम्याश्रमं भ्रातुः शङ्खस्य लिखितस्तदा ।
फलानि पातयामास सम्यक्परिणतान्युत ॥
तान्युपादाय विस्रब्धो भक्षयामास स द्विजः ।
तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागमत् ॥
भक्षयन्तं तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत् ।
कुतः फलान्यवाप्तानि हेतुना केन खादसि ॥
सोऽब्रवीद् भ्रातरं ज्येष्ठमुपस्पृश्याभिवाद्य च ।
इत एव गृहीतानि मयेति प्रहसन्निव ॥
तमब्रवीत्तदा शङ्खस्तीव्ररोषसमन्वितः ।
स्तेयं त्वया कृतमिदं फलान्याददता स्वयम् ॥
गच्छ राजानमासाद्य स्वकर्म्म कथयस्व वै ।
अदत्तादानमेवं हि कृतं पार्थिवसत्तम ॥
स्तेनं मां त्वं विदित्वा च स्वधर्ममनुपालय ।
शीघ्रं धारय चौरस्य मम दण्डं नराधिप ॥
इत्युक्तस्तस्य वचनात् सुद्युम्नं स नराधिपम् ।
अभ्यगच्छन्महाबाहो लिखितः संशितव्रतः ॥
सुद्युम्नस्त्वन्तपालेभ्यः श्रुत्वा लिखितमागतम् ।

अभ्यगच्छन् महाप्राज्ञः पद्भ्यामेव नरेश्वरः ।
तमब्रवीत् समागम्य स राजा धर्मवित्तमम् ।
किमागमनमाचक्ष्व भगवन् ! कृतमेव तत् ॥
एवमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत् ।
प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्तुमर्हसि ॥
अनिसृष्टानि गुरुणा फलानि मनुजर्षभ ! ।
भक्षितानि महाराज ! तत्र मां शाधि मा चिरम् ॥

सुद्युम्न उवाच ।

प्रमाणञ्चेन्मतो राजा भवतो दण्डधारणे ।
अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ ! ॥
स भवानभ्यनुज्ञातः शुचिकर्मा महाव्रतः ।
ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वचः ॥
व्यास उवाच ।
स च्छन्द्यमानो ब्रह्मर्षिः पार्थिवेन महात्मना ।
नान्यं स वरयामास तस्माद्दण्डादृते वरम् ॥
ततः स पृथिवीपालो लिखितस्य महात्मनः ।
करौ प्रच्छेदयामास धृतदण्डो जगाम सः ॥
स गत्वा भ्रातरं शङ्खमार्त्तरूपोऽब्रवीदिदम् ।
धृतदण्डस्य दुर्बुद्धेर्भगवन् क्षन्तुमर्हसि ॥
शङ्ख उवाच ।
न कुप्ये तव धर्मज्ञ ! न त्वं दूषयसे मम ।
धर्मस्तु ते व्यतिक्रान्तस्ततस्ते निष्कृतिः कृता ॥
स गत्वा बाहुदां शीघ्रं तर्पयस्व यथाविधि ।
देवानृषीन् पितॄंश्चैव मा चाधर्मे मनः कृथाः ॥
तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा ।
अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे ॥
प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ ।
ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ॥"

नदीयं पुरा प्रसेनजिद्भार्या गौरी नाम आसीत् । ततः क्रुद्धेन भर्त्राभिशप्ता नदीरूपा जाता । यथा, हरिवंशे । १२ । ९ ।
"प्रसेनजिद्भार्याऽभूद्गौरी नाम पतिव्रता ।
अभिशप्ता तु सा भर्त्रा नदी वै बाहुदा कृता ॥"
पूरुवंशोद्भवस्य परीक्षितो पुत्रस्य भार्यापि बाहुदा । यथा, महाभारते । १ । ९५ । ४० ।
"परीक्षित् खलु बाहुदामुपयेमे सुयशां नाम तस्यामस्य जज्ञे भीमसेनः ।") बाहुदापि च ॥

बाहुभूषा, स्त्री, (बाहोर्भूषणम्भूषा भूषणम् ।) केयूरम् । इति हेमचन्द्रः । ३ । ३२६ ॥ बाहुभूषणमप्यत्र ॥

बाहुमेरी, [न्] पुं, (बाहू मिनत्ति ; बाहु + मिद् + णिनिः ।) विष्णुः । इति भूरिप्रयोगः ॥ बाहुमेदिके त्रि ॥

बाहुमूलं, क्ली, (बाहोर्मूलम् ।) कक्षः । बगल इति भाषा । इत्यमरः । २ । ६ । ७८ ॥ (यथा माधिकरवैधे । १ । १२२ ।
"बाति कृष्णवर्णबाणममरवैरिदन्तः ।
बाहुमूलं शस्त्रौ मातिरद्भुतं रिपोर्वैश्मन्यनुदम् ॥")

बाहुयुद्धं, क्ली, (बाह्वोः बाहुभ्यां वा युद्धम् ।) मुष्टामुष्टि युद्धम् । मल्लयुद्धम् । तत्पर्यायः । नियुद्धम् २ । तत्र शब्दो यथा,—

"तलशब्दैर्विषमैर्बाहुभिश्च सकङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ॥
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टितैः ॥
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥"
इति विराटपर्व्वणि १३ अध्यायः ।
सकङ्कटैः कङ्कटः करबन्धनः किञ्चाङ्गुलिभि- र्निर्विवदैः । तलशब्दैः करतलप्रदत्तशब्दैः । विषमैर्विषमैरङ्गैरिति शेषः । सन्निपातैरित्यादि । दृढौ सन्निपातौ इत्यादिविशेषाः । सन्निपातैः परस्परसङ्घातैः । अवधूतैर्दूरादेवमुत्सारणैः । प्रमाथैः भूमिनिपात्य पेषणैः । उन्माथनैः अव- रोधे भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रच्यावनैः । वराहोद्धूतनिःस्वनो ध्वनिः ।
"पराङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव च ।
निपात्य भूमौ न भवेद्वराहोद्धूतनिःस्वनः ॥
तर्ज्जन्यङ्गुष्ठमध्यस्थ प्रसारितकरो हि यः ।
सम्प्रहारस्तथा तस्य संयतो वज्रनिपातः ॥"
अर्द्धचन्द्रतुल्यमाकृतिरेव प्रसृष्टः ।
"प्रसृताङ्गुलिहस्तेन प्रहारः प्रसृतिः स्मृता ।
हिमकोलनखात्पूर्वे वरदोषांघ्रं यथावदम् ॥
प्रहारः स तथा स्यात् पादोद्धूतः परा- हननम् ॥"
जानुभिश्चाश्मनिर्घोषैः अश्मनिर्घोषस्तुल्य- निभिः करैर्जानुभिर्युतानि तैः । अवघट्टितैः वक्षोगतैश्च । इति नीलकण्ठः ॥ (यथा, मार्क- ण्डेयपुराणे । ८३ । २६ ।
"ततः सिंहः महानादं सकृत्कृत्वासुरं हतः ।
बाहुयुद्धेन युद्धे तेनोच्चैस्त्रिदशारिणा ॥")

बाहुलं, क्ली, बाहुत्राणम् । इति हेमचन्द्रः । ३ । ४४१ । (बहुल + अण् ।) बहुलभावश्च ॥

बाहुलः, पुं, अग्निः । इति शब्दरत्नावली ॥ (बहुला कृत्तिका तत्र जातः प्रत्ययेन बाहुली । बाहुलो पौर्णमासी अस्मिन् । तान् पौर्णमासीयुक्त ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥

बाहुलेयः, पुं, (बहुलानां कृत्तिकानामपत्यं पुमान् बहुला + ढक् ।) कार्त्तिकेयः । इत्य- मरः । १ । १ । ४० ॥

बाहुशब्दम्, पुं, (बाहुभ्यां शब्दं विजयत इति । क्विप् । "स्कन्दश्च विनि च्छिति गुप् । ६ । १ । ८१ । इति सूत्र च ।) कार्त्तवीर्य्यार्ज्जुनः । इति त्रिकाण्डशेषः । (अत्र बाहुसहस्रादिकथा यथा, महाभारते । १२ । ४९ । ४५ ।
"स वरेणाऽऽज्ञन्मेव कृतो वरसहस्रवान् ।
चकवर्त्ती भुवि ह्येवं समग्रे रथः स वा ॥
मम बाहुसहस्रस्य बलमेको दीपितः स्थित ।
विकटेन मही सर्वा कर्षेत् वक्षस्तरः ॥"
तरस्वरामो हि अत्र बाहुसहस्रं परशुना

विचर्वित । अत्र विरचयितृं वार्त्तिकेन्द्रमिदं दृष्टदम् ।)

बाह्वाबाहवि च, बाहुभिर्बाहुभिरिदं युद्धं वृत्तं यत्र । हाताहाति इति भाषा । इति मुग्धबोधव्याकरणम् ॥

बिट इ शब्दे । ध्वनौ शब्दः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ विण्ट्यते । विण्टिरिति सन्दिग्धपाठेनैवार्थे धातुपाठपक्षम् । इति दुर्गादासोक्तटीका ॥

बिन्द क प्र विभेदने । इति कविकल्पद्रुमः । (चुरा०-चुरा० प-पर०-सक०-सेट् ।) क, बिन्दयति । प्र बिन्दति । इति दुर्गादासः ॥

बिल इर् य भेदे । इति कविकल्पद्रुमः । (दिवा०-पर०-सक०-सेट् ।) य बिल्यति । इर् अबिलत् अबेलीत् । अयमात् पुष्पादिमाविशं इ इत्यर्थं । इति दुर्गादासः ॥

बीभत्सुः, पुं, (बीभत्सतीति ; बध + सन् + कर्त्तरि उः ।) अर्ज्जुनः । इति मेदिनी । से, ४८ ॥

बीभत्सः, त्रि, (बीभत्सा घृणा अस्त्यस्य । अर्श- आद्यच् ।) क्रूरः । (यथा महाभारते । १ । २ । २२० ।
"यत्रापश्यद्बीभत्सुरभिमन्यो- र्वधात् पाञ्चालान् दीप्तदिवौ रणाय ।
कृतं बीभत्सुमसह्यमत्र कर्म
नरा यान्ति विस्मयं ददृशुः ॥")
घृणाकरः । (यथा, मार्कण्डेये । १६ । १८ ।
"तथापि उत्तमा भार्य्या तमाप्नोति दैवतम् ।
तं तथाप्यतिबीभत्सं भर्त्तारं सा स्म पूजयेत् ॥")
विकृतः । इति मेदिनी । से, ४८ । (यथा,—
"कुरुते इव एतद्बीभत्सकोमलारिभिः ॥"
इति मालतीमाधवटीकायां जगद्धरः ।)
बीभत्सनामकं रसविशेषमिति रसतरङ्गिण्यां विभावादिभिर्युक्तम् ।) पार्थः । इत्यमरः । महाराष्ट्रभाषाभरणम् । तद्भावः । विकृतम् २ । इत्यमरः । तस्य उदाहरणं यथा, मालतीमाधवे । ५ । १६ ।
"उत्कृत्य कृत्तिं प्रथमं पृथूच्छोफ- भूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्त्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का- दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥"
अत्र रसाद्विशेषरूपत्वं यथा तत्रैव ।
"उत्पक्ष्मोत्तुङ्गगण्डं ...
... भूयांसि मांसा
... शरीरात्
... ॥")

वेष्टनम् । यथा । अतिधौतिमपायस्यमभि-
घ्रिणितैलतमित्यभिमन्दः । इयमिदं इति
ओवम् । तदालमने तु मांसपौषितादौ विद्र ।
इति तट्टीकायां भरतः ॥

बीभत्सुः, पुं, (बीभत्सतीति । बध+सन्+उ ।
युद्धे न्यायपथेन प्रवृत्तत्वादस्य तथात्वम् ।
यतनिवर्त्तित्वात् । यथा, महाभारते ४ ।
४२ । १८ ।
"न कुर्य्यां कर्म्म बीभत्सं युध्यमानः कथञ्चन ।
तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः ॥")
अर्ज्जुनः । यथा,—
अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेत-
वाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥
इति महाभारते । ४ । ४२ । ८ ॥

बुक्क, कि श्वादिशब्दे । इति कविकल्पद्रुमः ॥
(चुरा०-पक्षे भ्वा०-पर०-सक०-पक्षे अक०-
सेट् ।) पञ्चमस्वरी ओपधः । बुक्कादिपक्षे कथने
श्वादिपक्षे कुक्कुरादिशब्देऽयमिति रमानाथः ।
कि, बुक्कयति वाचा बहुलोकः । बुक्कति श्वा ।
इति दुर्गादासः ॥

बुक्कं, त्रि, (बुक्कयति बुक्बुक् इत्यव्यक्तशब्दं करो-
तीति । बुक्क+पचाद्यच् ।) वक्षोऽभ्यन्तरमांस-
विशेषः । तत्पर्य्यायः । अग्रमांसम् २ हृदयम् ३
हृत् ४ । इत्यमरः । २ । ६ । ६४ ॥ केचित्तु
बुक्कात् पृथगेव हृदयान्तर्गतमांसविशेषे पद्मा-
कारे हृदयादिकमाहुः । धातोरनेकार्थत्वात्
बुक्कति व्याकुलात् जन्मते बुक्कं बुक्क कि श्वादि-
शब्दे पच् । मान्तः पुंलिङ्गोऽप्ययम् । स्त्रीलि-
ङ्गोऽपीच्छन्ति । इति स्वामी ॥ बुक्का स्त्री बुक्कः
पुमानपि । शोणितेषु स्त्रियां बुक्का बुक्कस्तु
समये स्मयोरिति रभसात् । मदादित्वात् स्त्रियां
बुक्कास्त्री । बुक्कानां श्रेयमनुष्यमिति तद्-
कलिङ्गादयः ॥ उरस्यपि च बुक्कायां हृदयं
मानसेऽपि चेति विश्वप्रकाशः ॥ बुक्कशब्दस्य
उकारस्य वकारादेशे तथैव हकारादिरपि ।
अपरञ्च तन्त्रान्तरेति अग्रमांसं बुक्कस्याग्रं
संमुखीभूतं मांसं बुक्काग्रमांसमित्येके नामे
जगौ । इति तट्टीकायां भरतः ॥

बुक्कः, पुं, (बुक्कयति शब्दायते इति । बुक्क+
अच् ।) छागः । इति त्रिकाण्डशेषः ॥ समये
पुं, स्त्री । इति रभसः ॥

बुक्कनं, क्ली, (बुक्क कि श्वादिशब्दे+भावे ल्युट् ।)
कुक्कुरशब्दः । तत्पर्य्यायः । भषणम् २ । इति
हेमचन्द्रः । ६ । ३६ ॥

बुक्का, स्त्री, (बुक्क+टाप् ।) बुक्कम् । इत्य-
मरटीकायां भरतः । शोणितम् । इति
रभसः ॥

बुक्कन्, [न्] (बुक्क+कनिन् ।) पुं, बुक्कम् । इत्यमर-
टीकायां भरतः ॥

बुक्काग्रमांसं, क्ली, (बुक्कस्याग्रमांसं ।) हृदयम् ।
इत्यमरटीकायां रायमुकुटः ॥

बुक्कारः, पुं, (बुक्क कि श्वादिशब्दे भावे घञ् । बुक्कं
सिंहनादस्तस्य कारः करणम् । "एकवर्ण्यमध्ये
पञ्च मध्यमस्य लुप्यते" इति न्यायात् मध्यस्य
ककारस्य लोपः ।) सिंहध्वनिः । इति हारा-
वली । १६४ ॥

बुक्की, स्त्री, (बुक्क+गौरादित्वात् ङीष् ।) बुक्कम् ।
इत्यमरटीकायां भरतः ॥

बुट, कि हिंसे । इति कविकल्पद्रुमः ॥ (चुरा०-
पक्षे भ्वा०-पर०-सक०-सेट् ।) कि बोटयति
बोटति । इति दुर्गादासः ॥

बुड, श्रि उत्सर्गे । संवृतौ । इति कविकल्प-
द्रुमः ॥ (कुटा०-तुदा०-पर०-सक०-सेट् ।)
श्रि बुडति अबुडीत् बुबोड इति दुर्गादासः ॥

बुद, इर् ञ उ निशामने । इति कविकल्पद्रुमः ॥
(भ्वा०-उभ०-सक०-सेट् ।) पञ्चमस्वरी । इर्
अबुदत् अबोदीत् । ञ बोदति बोदते । उ
बोदित्वा बुत्त्वा । निशामनमालोचनं प्रणि-
धानमिति यावत् । इति दुर्गादासः ॥

बुद्धः, पुं, (बुध्यते स्म इति । बुध+क्त । यद्वा भावे
क्त बुद्धं ज्ञानमस्यास्तीति अर्श‌आद्यच् ।)
भगवदवतारविशेषः । स तु दशावतारान्तर्गत-
नवमावतारः । यथा,—
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति ॥"
इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥
अञ्जनस्य सुतः । अजिनसुत इति पाठे अजि-
नोऽपि स एव । कीकटेषु मध्ये गयाप्रदेशे ।
इति श्रीधरस्वामी ॥ तत्पर्य्यायः । सर्व्वज्ञः २
सुगतः ३ धर्म्मराजः ४ तथागतः ५ समन्त-
भद्रः ६ भगवान् ७ मारजित् ८ लोकजित् ९
जिनः १० षडभिज्ञः ११ दशबलः १२ अद्वय-
वादी १३ विनायकः १४ मुनीन्द्रः १५ श्रीघनः १६
शास्ता १७ मुनिः १८ । इत्यमरः । १ । १ । १४ ॥
धर्म्मः १९ त्रिकालज्ञः २० धातुः २१ बोधि-
सत्त्वः २२ महाबोधिः २३ आर्य्यः २४ पञ्च-
ज्ञानः २५ दशार्हः २६ दशभूमिगः २७ चतु-
स्त्रिंशज्जातकज्ञः २८ दशपारमिताधरः २९
द्वादशाक्षः ३० त्रिकायः ३१ संगुप्तः ३२ दया-
कूर्च्चः ३३ खजित् ३४ विज्ञानमातृकः ३५
महामैत्रः ३६ । इति हेमचन्द्रः । २ । १४६ ॥
धर्म्मचक्रः ३७ महामुनिः ३८ असमः ३९
खसमः ४० मैत्री ४१ बलः ४२ गुणाकरः ४३
अकनिष्ठः ४४ त्रिशरणः ४५ बुधः ४६ वक्री ४७
वागीशः ४८ जिनार्कः ४९ अर्हन् ५०
अर्हम् ५१ महासुखः ५२ । इति शब्दरत्ना-
वली ॥ महाबलः ५३ । इति जटाधरः ॥
ईश्वरविरुद्धपक्षे बुद्धिविशेषानाममाह । यथैष
इति श्रीमन्तः ॥ विदारस्य इति हेमचन्द्रः ।
लोकव्यवहारसिद्ध इति चार्व्वाकाः ॥ शरीरादन्यः
देहवान् बौद्धाः आत्मानमाहुरित्येव मोर
कल्पनारचनोः आत्मस्वाभिकल्पनाहमहा-
रिति चार्व्वाकाणां मतम् । तेषां मते अन्ततः
साक्षात्कारं नमस्तु अक्षमस्य पूर्व्वबुद्धाबोधार-
बुद्धोत्पत्तिक्षणे च बुद्धसिद्ध एव कुत्रेत्य-
न्यायमालिविशेषः कारकलकतावच्छेदक
इति न दोषः । इति कुसुमाञ्जलिप्रथमस्तबक-
टीकायां रामभद्रः ॥ ७ ॥ बुद्धानां दशविध-
मतभेदमाह ।
"वदन्ति पुत्र आत्मेति १ तद्यास्ततुष्टयः ।
देह आत्मेति २ चार्व्वाका इन्द्रियाण्यपरे ३
च ते ।
तेऽन्ये प्राण ४ स्तथेऽन्ये तु मन ५ आत्मेति
वादिनः ।
बुद्धिरात्मेति ६ बौद्धा वै शून्यमात्मेति ७ तेऽपरे ।
माध्यमिका सप्तपुरुषं सर्व्वज्ञं ८ गौतमा विदुः ।
निरावरणं ९ माहुर्ये दिगम्बरमतानुगाः ।
चार्व्वाकास्त्वपि लोकानां व्यवहारप्रसिद्ध-
कम् १० ॥"
इत्यात्मप्रकाशः ॥ ७ ॥
पण्डितः । बुधिते, त्रि । इति मेदिनी । धे, १० ॥
(बुद्धावतारस्य विवरणं यथा,—
इह खलु बौद्धशास्त्रमतेषु सर्व्वेभ्यः
पञ्चविंशतिर्बुद्धा जाताः । तेषां शुद्धोदनौरसात्
मायादेवीगर्भजातः शाक्यसिंहसर्व्वार्थसिद्धार्क-
बन्धुगौतमेति नामचतुष्टयेन प्रसिद्धोऽन्तिम-
तमः लोकविश्रुतो बुद्धः कपिलवस्तुनगरे
कलेः कतुःपञ्चदशोत्तरैकविंशतिशतवर्षातीतेषु गत-
वर्षेषु शुक्लपक्षे वैशाखी पूर्णिमायां
साक्षाद्विवेकमूर्त्तिः सौम्याकृतिरेव प्रादुर्बभूव ।
अथ च यथा सह कालेन प्रौढयुवत्वादय-
सम्पौदार्य्यबलवीर्य्यादिभिर्ववृधे स । अहिते पौरस्ये
पितामहा च प्राज्ञानवती मनोज्ञा रूप-
लावण्यवती इन्द्रावतिमपि गोपाभिधानम्-
मतामुपयेमे ।
अनन्तमपरेऽसौ तत्कालाद्भुततनु बोधनः
शुद्धोदनः आधिपत्यभराक्रान्तराज्याधिकारतन-
यस्यानिर्व्वेदात्मनः पुत्रस्ते इदं वनमव-
लोकि । तस्मात् महात्मनः राजा प्रियवृति-
वनवनपरिहृतं सुरम्यं रम्यं हर्म्म्यवनं भुक्तवं
निर्म्मापयामास । तत्रासौ सुखेनोपनतविविध-
सुखपश्चिमं विलासिनीगणपरितं तथा विहग-
विसंसजनम् आनन्दोत्सवास्तत्र । अथ प्रत्यास
कामिनो द्विविधोऽभूत् भोगकामः । ततः
कारागारमिव शरीरमात्रं विभूतिरहितं विशा-
याक्षत्वं शुभमात्रमिच्छापि बभूवत ।
ततः कोऽपि दिने शुद्धोदनाय बन्धोक्ता
माय सर्व्वस्य मतं प्रभाववान्हितकामाय निर्वो-
णमिति कामक्रं मे वक्तवोऽति । राजा तदनं
विचारयितुमिव कर्मार्थैव । स चैव स
तदा विरराम । अथ विहाय विनये गुणाय
सर्व्वकमारेदिन, कुमारे द्वात्रिंशे वर्षेऽनु-
मारेऽपि राज्ञे वरानुग्रहमाशिर्व्वाद्यमनवता
ऐश्वर्य्येण राज्येव राजकर्मैव संशोधनरूपाणि
विशेषेषु । तथाप्येते कुमारः इन्द्रियैः

[illegible] बोधिसत्त्व [illegible] । [illegible] प्राप्नोति । [illegible] तामपात् ।

अथ च [illegible] मारदेवं [illegible] । [illegible] बोधिसत्त्वं [illegible] मारोऽपि यदाह । तदुक्तं यथा,—

"किं मारमे ! [illegible]
[illegible] ।
[illegible]
[illegible] ॥"

मार उवाच ।

[illegible] ।
[illegible]
[illegible] ॥

बोधिसत्त्व आह ।

[illegible]
[illegible] ।
[illegible]
[illegible] ॥

मार उवाच ।

[illegible] ।
[illegible]
[illegible] ॥"

बोधिसत्त्व आह ।

[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

इति ललितविस्तरे १८ अध्यायः ।

अथ [illegible] मारोऽपि [illegible] । [illegible] । तत: स मारोऽपि [illegible] । तदुक्तं यथा,—

"किं मारमे ! [illegible]
[illegible] ।
[illegible]
[illegible] ॥"

मार उवाच ।

[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

बोधिसत्त्व आह ।

"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

अथ खलु भिक्षवो बोधिसत्त्वः [illegible] ।

इति हि भिक्षवो बोधिसत्त्वो [illegible] । [illegible] बोधिसत्त्वो [illegible] मारमिदमवोचत् ।

"किं मारमे ! [illegible]
[illegible] ।
[illegible]
[illegible] ॥"

मार उवाच ।

"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

बोधिसत्त्व आह ।

"[illegible]
[illegible] ।
[illegible]
[illegible] ॥

[illegible] ॥

अथ खलु भिक्षवो बोधिसत्त्वः [illegible] । इति हि भिक्षवो बोधिसत्त्व [illegible] । [illegible] मारमिदमवोचत् ।

"किं मारमे ! [illegible]
[illegible] ।
[illegible]
[illegible] ॥

मार उवाच ।

[illegible]
[illegible] ।
[illegible]
[illegible] ॥

बोधिसत्त्व आह ।

[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

इति ललितविस्तरे १८ अ: ।

ततः [illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] ।

"तत्र [illegible] ॥" तत्रैतदुच्यते ।

"[illegible]
[illegible] ।
[illegible]
[illegible] ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

इति ललितविस्तरे । २१ अध्यायः ।

[illegible] ।

सिद्धार्थं प्राह ।

"विवर्जिता धर्मगिरा यथा पुरे-
र्विगर्हिता मोहघटा यथाशुचिः ।
विनाशका धर्मसुखस्य छन्दक
ज्ञात्वा हि कामान्न विषायते रतिः ॥"

छन्दक मह्यं याति दुःखप्रसाधिता पूर्व-
जन्मान्तरे ।
वस्त्रावस्त्रगन्धाङ्गनाद्याश्चैता: कामधेनो-
र्मेघा गो च निर्मितभूत् ।
संकल्पमात्रं प्रभवत्यनन्तं
मोहाकुलं हरिमालाशतम् ।
स्वप्नभूतं पुरा आत्मसम्भा-
महाकारका पिङ्गाचीतिहता इमे ॥
धर्मोपागतः समभूता चलचपला-
निलमेघैः यथा विद्युतः चञ्चलाः ।
ओषविन्दूपमा कामगुणा असाराः
अनाथा च शून्यसमाना इमे सर्वतः ॥
अमृतपदमभिवन्द्य भाषामिमामात्मनावतीर्य
संसार ओघेरर्थं तारयिष्येऽहमेवं जगत् ।
योगसंसारकान्तारशोकैर्गिरावत्त्मा-
आकुले वैराग्ये दुस्तरे एव चित्तं मम ।
महाकाव्योपि इदं भवार्थं
श्वेतद्विपैर्हस्तिराजपम् ।
कथं तरिता च अयन्तरं कगत्
सर्वेऽन्तरीद्यि अजरामरे शिवे ।"

ललितविस्तरे १५ अध्याये ।

अतश्छन्दक ! प्रसादाच्छुभैव अश्वरत्नमानयाशम् । तथाप्युक्तेऽपि सिद्धार्थोऽसौ श्रीतलपञ्चवनगात् सर्वाय राज्यमैश्वर्येषु विद्यामाश्रमाय निर्गतः । विजनपदाद्वारमपीन दूरस्थितं मनराज्यं प्राप्य तत्रैव वसिष्ठाश्रमसन्निधौ छन्दकमश्वमपि निवर्त्य कौपीनमपहाय विधाय अन्वकषायमेकाकी वैशालीं नाम नगरीमुपगतो । तत्र आराडकालामनामा विमुक्तशिक्षासन्नियमयादृशैः, सिद्धार्थोऽस्य शिष्योऽभूत् । ध्यानेनैव पुनः, परित्यज्य तदुपदेशमात्र पुनः राजगृहं ब्रह्मचर्यं चरितुम्, अक्षुब्ध धर्मैश्वर्यम् । बुद्धि यस्य विमलो विमानपदीपः परीक्ष्य मनःशोभनपरपट्टभैरव । न तत्र सुयत्नैमर्मवित्तिभिरुद्रकपरम् । ततः समयतो निरञ्जनानदीधारमस्य उरुबिल्वाः ग्रामे: मरीचे तथा समाजेन समाधयं गय- शीर्षं नगाम । तत्रोद्घातिनमनेन षड् वत्सराः अनशनं बोधमदर्पं स्वभुमविशुद्धे कायमानर्थं निरोधयन्ति तदनिस्त्रवादविमुमारेकादशुष- वांशमिव देवलं भवति । तत्रकाङ्क्षलपरव- वर्धेन यथा अस्मसोरमा मायावाहम् बालमपनोवैशृयो: कर्णा: जलत बोध- लाभः इत्यः । तत्रसमतो बोधिवृक्षो मता बालतपस्विनाद् विवर्ण तर्हेऽपि भवो इवे । अवमहदेवमेव बालहुर्ष विचक्षिय विराम आत्माश्वयाद् दुर्धर ध्यानं दधार ।

अत्रान्तरे कश्चिद्द्विजस्य दुहितेभिका कश्चि- सिद्धा तस्तुलमेकं कदाचिद्देवमार्गं कषायं नयविता कश्चिद्दुग्धेवशैन वा कालं विकलत्र मुख्याच्छविर्मनोवत्ती बभूव । ततोऽसौ देहमित्यं विभज्य न्यङ्कुं सबोधं न समर्थोभवेय- मिति विचिन्त्य पोषयकरमाधारं जग्राह ।

दिवसेऽस्मिन् सुखोत्तरः स्वप्नं ददर्श पित: पुत्रो मे मणिमुक्तादिविभूषितराज्यश्रियं उद्दाल- तममारुरोह । नैऋतोऽश्वमेधाः पूजनायाचा- गच्छन्तीव, यशोधरापि शोभापरमाङ्गी ददर्श स्वप्नं विविधम् स्वयं प्राकारमिथ्या पथ, यथा अमरदृश्यं प्रस्थान मे, विस्मयमिव सुमेरु- शिखरतुपमानीभूतं मे, कामरूपिणं करदर्थं मे प्राप्य पश्चिमसमुद्रोपरि पादाङ्गुली मे दक्षि- णाम्भो भवन्ति, नाभिकमलात् मे समुत्थितैः तिर्यक्काष्ठेनापूरितमखिलं नभः । ततश्चो- श्चायात्तो श्वेतविस्तीर्णतायाः शुभालामाभि- नाया चार्या: स्वाश्रमात् भिक्षां जगाम ।

इतः सिद्धार्थो ध्यानं दधार, किन्तापि पश्चि तस्य सततं परिपन्थी महदपि दुर्निवारो मारः परा- जितो ध्यानवीरेण योगिशिरस्थितेन पलायनं चक्रे । ततस्तस्यैव अन्तर्मुख समये यतीते सन्ध्या इव च योगिप्रवरस्य मोक्षमाय, विपत्तानि तु ताता- स्वरूपोमैत्रेयानि । ततः सर्वेभ्यः सन्तुभ्यो विमुक्तः सिद्धार्थो बोधिं विमलं लेभे । तदानी- मशिखयोगः समस्तस्य सुकृते प्रतिबिम्बितं प्रकाशमखिलं जगत् । ततः स्वमायामात्र सः: जीवानां सत्त्वं, तेषु च जीवस्य संयोगो वियोग- श्चैव दुःखदुःखान्यन्तानि । न जानीते मानवस्तु मोहजालेनावृतो दुर्निवर्त्यं दुःखं पश्यत इति । ततः कस्मादागतं जरामरणमिति चेतसा जातो यत्नैन्नैव विचिन्त्यते यः, यत्नज्ञान इहागच्छति जरामरणमिति, पुनरपि जातं जन्म किमस्य वा कारणम् ? संसारादन्यज्जाति- रित्यत्र भव एव कारणमत्र । भवस्यापि पुन- र्भावतः किमस्य वा कारणं ? उपादानादागमो भवस्तदुपादानमेवास्य कारणम् । तस्यापुपा- दानमागमनयोर्हि किमस्य वा कारणं ? तृष्णया आगतमुपादानमतस्तृष्णैव कारणमस्तीति । तर्हि पुनः आगता तृष्णा कारणं वा किमस्याः ? वेदनाया आगता तृष्णा अतो वेदनैव कारण- मस्याः । पुनः आगता वेदना, अस्या वा किं कारणम् ? स्पर्शादागता वेदना, अतः स्पर्श एव कारणं वेदनाया इति । स्पर्शस्यापि पुनः आगमः किं वा कारणमस्य ?। षडायतना- दागतः स्पर्शस्तस्मात् कारणं च इतीति । पुनः आगतं षडायतनं कारणं वा किमस्य ? नामरूपाभ्यामागतं षडायतनम् अतस्तयोः कारणमेव नान्यत् । पुनरेतयोर्नाम रूपयोः कारणं वा किमनयोः ? विज्ञानादागतो नाम- रूपोत्पत्त्योः कारणं विज्ञानमिति । पुन- रागतं विज्ञानमपि कारणं वा किमस्य ?

संस्कारादागतं विज्ञानमतोऽस्य कारणं च स एवेति । संस्कारस्यापि पुन आगतः कारणं वा किमस्य ? अविद्याया आगतः संस्कार- स्ततोऽस्य कारणमविद्यैवेति ।

स्फुटमिदानीमविद्यैव कारणं समस्तस्य विश्वस्य । ततो विशेषेण प्रकटीभूतं यत् अविद्यायाः संस्कारः संस्काराद् विज्ञानम्, विज्ञानान्नाम- रूपे ताभ्यां नामरूपाभ्यां षडायतनम्, षडाय- तनात् स्पर्शः, स्पर्शाद् वेदना, वेदनायास्तृष्णा तृष्णाया उपादानम् उपादानात् भवः भवाज्जातिः जातेर्जरामरणमिति ।

प्रकारेणानेनोत्पन्नो दुःखसमूहो जीवानाम् । तदिदानीं प्रतिभातं अविद्यैव समस्तस्य मार- णस्य निरन्तरमविद्यायां क्षीणो दुःखप्रपञ्च- क्षयेऽव तस्मात् जन्मजरामरणं दुःखं विनश्य- तीति: पीडा च सर्वे दूरे पलायन्ते । एवं जीवानामुद्देशेन चिन्तयाः धर्मोन्नेतः । उदिते तस्मिन् मनःसंयोगेन ज्ञानं दृष्टेन विद्या समुत्तिर्विहिता सर्वं प्रत्यक्षीभवति । तत इदानीं सिद्धार्थो बुद्धः सञ्जातः ।

ततश्चागतोऽस्य विम्बिसारनामा राजा बुद्धस्य श्रीपादपद्मदर्शनाय । सोऽपरे सुपरिदेश "अहिंसा परमो धर्मः ।" इत्युपदेशमनुनिष्ठ तद्धर्मं विश्वासमोक्षकान्तिपदेति ।

ततोऽसौ बुद्धो वैशम्पायनी नदीं निरिका- यनस्य यात्रा उत्तरकायपदं प्रगतो । यत्र च जम्बूद्वीपस्य मगधराज्यस्य पौराणिकभगवान् । तत सुवर्णान् कामान्निर्गम्य इवा नागानां पुरंदिरं जीवितमुखं मन्दरं पादधिष्ठाय प्रणेत्र तथा यथा च कान्निकायतनं, एतस्य जीवितः सिद्धः शिष्योऽभूत् बुद्धस्य नाना धानकीर्तिमत्तं चकार । तस्मिन् चतु- र्वर्णका लोका नानादेश बुद्धस्य शिष्या अभवन् ।

ततः शाक्यनाथः स वाहीकाभ्रमणं निरो- धातवं नानां प्रदत्तो यत्र वैशालीनगरे वास्य- पुनर्विनाशकस्य: प्रबोधितविहितेषु: पद- यात्राप्रियेणानेन: प्रतिवादि च । योगात् प्रव- र्तनमन्वेति । बुद्धो तत्राप्य सर्वोदं प्रका- शतो धर्मोपदेशं विमलं त्रिविधं नं चकार । इत्थं प्रतिपन्नोऽपि स्वयं लोका निर्विण्णा सर्वे बोधं प्रवीणवन्तः ।

तदा निर्वाणरो भगवतः बुद्धस्य स्वयमिह बुद्धेन: प्राप इति । तथा सर्वोदं प्राप्य च दशमताः सन्धाय निर्वाणं कोऽलभत् । ततो भावी लोका नारो एवं विश्वसंसार तत् । कपिलवस्तु च बुद्धः । तदेव शुद्धो- दनोऽपि दिव्योऽभवत् ।

गृहस्य लोकाचारे: सैवमित्थं बुद्धो देवो राजपुरी वैशाली इत्यस्याद्वयेति । तत्र च तत्र भारत दुःखविनाशनाय, पूर्वकाले: दरिद्रान् लोकान्न: वैराग्यमुन्नत्य: स्वस्थिरेषु:

[illegible]

"[illegible] प्रभां [illegible]
[illegible] प्रविश्य [illegible]।
गुहः स [illegible]
[illegible] पदं [illegible]॥
[illegible]
[illegible]।
[illegible]
[illegible] धैर्यं [illegible] ॥"

[illegible]

गुहरुं, क्ली, ([illegible]) [illegible]।

गुहिः, स्त्री, ([illegible] गुह + इन् ।) [illegible]

[illegible]

तस्याः पञ्च गुणा यथा,—
"इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता।
संशयः प्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः॥"
इति महाभारते मोक्षधर्म्मः॥
इष्टानिष्टविपत्तिः इष्टानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्राख्या वृत्तिरित्यर्थः। व्यवसायः उत्साहः। समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः। संशयः कोटिद्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः। इति तट्टीका॥ * ॥ तस्याः अष्ट गुणा यथा—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥"
इति हेमचन्द्रः॥ * ॥
तस्या वृत्तिः पञ्चधा यथा। प्रमाणम् १ विपर्य्ययः २ विकल्पः ३ निद्रा ४ स्मृतिः ५। इति पातञ्जलम्॥ * ॥ बुद्धिक्षयकरा यथा,—
"शोकः क्रोधश्च लोभश्च कामो मोहः परासुता।
ईर्ष्या मानो विचिकित्सा कृपाऽसूया जुगुप्सता॥
द्वादशैते बुद्धिनाशहेतवो मानसा मलाः॥"
इति कालिकापुराणे १८ अध्यायः॥ * ॥
अपि च।
"बुद्धिक्षयकरा एते मावकाशवर्त्तिकाः॥"
बुद्धिवृद्धिकरा यथा,—
"तिलाटरूषकस्यापि बुद्धिर्वृद्धिकरा मताः।
बुद्धिक्षयकराणीमं वर्जनीयाश्च भोजने।
भोजनीयमयं बुद्धिवृद्धिहेतुं नृपोत्तम॥"
इति कालिकापुराणे ८९ अध्यायः॥ * ॥
न्यायमते सा विभुगुणः बुद्धिर्द्विविधा अनुभूतिः स्मृतिश्च। यथा,—
"विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे॥"
इति भाषापरिच्छेदः॥
बुद्धिमान्, [त्] त्रि, (बुद्धिर्विद्यते यस्य। बुद्धि+मतुप्।) बुद्धियुक्तः। ज्ञानवान्। यथा,—
"तद्बुध्यते पण्डितयुक्तदीर्घं
स बुद्धिमान् यो न करोति पापम्॥"
इति गारुडे ११५ अध्यायः॥
बुद्धिसहायः, पुं. (बुद्धौ बुद्ध्या सह कार्य्ये इति भावः। सहायः।) मन्त्री। इति हलायुधः॥ सखा; सहायकर्त्ता च॥
बुद्धीन्द्रियं, क्ली, (बुद्धेर्ज्ञानस्य वा इन्द्रियम्।) ज्ञानेन्द्रियम्। यथा,—
"त्वक् कर्णौ तथा नेत्रे रसना नासिका इति।
बुद्धीन्द्रियाणि प्राहुः शब्दकोशविचक्षणाः॥"
इति शब्दरत्नावली॥
(यथा मनुः। २।९०-९१।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वशः।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते॥

प्रकारद्वयं मनो ज्ञेयं सगुणेभोऽभयात्मकम्।
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ॥"
बुद्बुदः, पुं. वर्त्तुलाकारजलविकारः। जलविम्बो इति भाषा इति च ख्यातः। बुद्बुदोऽम्बुस्फोट इत्यन्यः। इत्यमरभरतौ॥ अन्यच्च।
"अभ्रच्छाया तृणादग्निर्नीचसेवा पथे जलम्।
वेश्यारागः खले प्रीतिः षडेते बुद्बुदोपमाः॥"
इति गारुडे ११५ अध्यायः॥
गर्भस्यावस्थाविशेषः। यथा,—
"पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्॥"
इति सुखबोधः॥
(यदुक्तं यथा,—
"प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत्।
जायते बुद्बुदाकारं शोणितञ्च दशाहनि॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये॥)
बुध इर् अ न बोधने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्। ज्वलादिरयम्।) इर् अबुधत् अबोधीत्। अ बोधः बुधः। न बोधति बोधते। इति दुर्गादासः॥
बुध, औ विज्ञापने। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-अनिट्।) औ बोद्धा। बोधति गुरुः। इति दुर्गादासः॥
बुध, य ङ औ बोधने। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) य ङ बुध्यते शास्त्रं सुधीः। औ बोद्धा। इति दुर्गादासः॥ (ज्ञानार्थे अकर्म्मकोऽपि। यथा, रघौ।१०।६।
"ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः॥"
"आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां जहौ इत्यर्थः॥" इति तट्टीका॥)
बुधः, पुं. (बुध्यते यः। "बुध+इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) पण्डितः। तत्पर्य्यायः। विद्वान् २ विपश्चित् ३ दोषज्ञः ४ सन् ५ सुधीः ६ कोविदः ७ धीरः ८ मनीषी ९ ज्ञः १० प्राज्ञः ११ संख्यावान् १२ पण्डितः १३ कविः १४ धीमान् १५ सूरिः १६ कृती १७ कृष्टिः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२। इत्यमरः।२।७।५॥ विदग्धः २३ दूरदृक् २४ सूरी २५ वैदी २६ वृद्धः २७ बुद्धः २८ विधानज्ञः २९ प्रदीप्तः ३०। इति शब्दरत्नावली॥ मतः ३१ मानसः ३२ ज्ञातः ३३ अभिरूपः ३४ कुशलः ३५ कविताद्वैती ३६ कृष्टः ३७ विदितः ३८ कविः ३९। इति जटाधरः॥ (यथा, मनौ।१।१।
"अबुधं स्तुतिभिर्बुधैः मर्म्माणि भिन्दती वचोभि-
र्मैव
विद्यां रक्षितं रक्षेत् दौर्देव कुर्य्यां-
द्रदम्॥")
सप्तग्रहान्तर्गतग्रहविशेषः। स च चन्द्रात् भार्य्यातारायाम् जातः। तत्पर्य्यायः। रौहिणेयः २ सौम्यः ३। इत्यमरः।१।३।२६॥ हेमा ४ विद् ५ ज्ञः ६ बोधनः ७ इन्दुपुत्रः ८। इति ज्योतिस्तत्त्वम्॥ * ॥ तस्य उत्पत्ति-

इत्याख्यं यथा। "महातेजास्तु सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार। बहुशश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच। तस्य बृहस्पतेर्विद्वेषादुशना पार्ष्णिग्राहोऽभूत्। अङ्गिरसश्च सकाशादुपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत्। यतश्चोशना ततो हि जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यममकुः। बृहस्पतेरपि सकलदेवसैन्ययुतः सहायः शक्रोऽभवत्। एवं तयोरतीवोग्रः संग्रामस्तारानिमित्तस्तारकामयो नामाभवत्। ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवाः देवेषु चाशेषदानवा मुमुचुः। एवञ्च देवासुराहवसंक्षोभक्षुब्धहृदयमशेषमेव जगद् ब्रह्माणं शरणं जगाम। ततश्च भगवानप्युशनसं शङ्करमसुरान् देवांश्च निवार्य्य बृहस्पतये तारामदात्। तामन्तःप्रसवामवलोक्य बृहस्पतिराह। नैष मम क्षेत्रे भवत्यान्यस्य सुतो धार्य्यः समुत्सृजैनमलमलमतिधार्ष्ट्येनेति। सा च तेनैवमुक्ता पतिव्रता भर्त्तृवचनानन्तरमिषीकास्तम्बे गर्भमुत्ससर्ज। स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप। बृहस्पतिमिन्दुञ्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः। सत्यं कथयास्माकमिति सुभगे! कस्यायमात्मजः सोमस्याथ बृहस्पतेरिति वा तारा ह्रिया न किञ्चिदुवाच। बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे ततः स कुमारस्तां शप्तुमुद्यतः प्राह च। दुष्टाम्ब! कस्मान्मम तातं नाख्यासि। अद्यैव ते व्यलीकलज्जावत्यास्तथा शास्तिमहमेवं करोमि। यथा नैवमद्याप्यतिमन्थरवचना भविष्यसीति। अथ भगवान् पितामहस्तं कुमारं संनिवार्य्य स्वयमपृच्छत्ताराम्। कथय वत्से! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्युक्ता लज्जावत्याह सोमस्येति। ततः स्फुरदुच्छूनामितामलकपोलकान्तिर्भगवानुडुपतिरपि कुमारं साधु साधु वत्स! प्राज्ञोऽसीति बुध इति नाम चक्रे। इति विष्णुपुराणे ४ अंशे ६ अध्यायः॥ मत्स्यपुराणे चतुर्विंशाध्याये विशेषवादः। अत्र द्रष्टव्यः।
"ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः।
दिव्यपीताम्बरधरः दिव्याभरणभूषितः॥
सर्व्वार्थशास्त्रविद्विद्वान् हस्तिशास्त्रप्रवर्त्तकः।
राज्ञः सोमस्य पुत्रत्वाद्राजपुत्रो बुधः स्मृतः॥
जातमात्रः स तेजांसि सर्व्वाण्येवाजयद्बली।
ब्रह्माद्यास्तत्र ते जग्मुर्देवा देवर्षिभिः सह॥
बृहस्पतिगृहे सर्व्वे जातकर्म्मोत्सवे तदा।
अपृच्छंस्ते सुरास्तारां केन जातः कुमारकः॥
ततः सा लज्जिता तेषां न किञ्चिदवदत्तदा।
पुनः पुनस्तदा पृष्टा लज्जयन्ती वराङ्गना।
सोमस्येति चिरादाह ततोऽगृह्णाद्विधुः सुतम्।

[illegible]

बुन्द्, इर्, म, उ निशामने। (इति कविकल्पद्रुमः।) (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर्, अबुन्दीत्। म बुन्दति बुन्दते। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ७२।
"सधर्मं प्रदबन्देन दिव्येनैव बुबुन्द सः॥")

बुन्ध, इर्, म उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर्, अबुधत् अबुन्धीत्। म बुन्धति बुन्धते। उ बुन्धित्वा बुद्धा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

बुन्ध, क बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी। क बुन्धयति। इति दुर्गादासः॥

बुबुधानः, पुं, आचार्य्यः। देवः। पण्डितः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ७। ४४। ६।
"दधिक्राव्याणं बुबुधानो
अग्निमुपब्रुव उषसं सूर्य्यं गाम्॥")

बुभुक्षा, स्त्री, (भोक्तुमिच्छा। भुज धौ भक्षे + "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३। १। ७। इति सन्। ततः "अः प्रत्ययात्।" ३। ३। १०२। इत्यप्रत्ययः। टाप्।) क्षुधा। इत्यमरः। २। ९। ५४॥ (यथा, रामायणे। २। ६८। १८।
"अतीव बालमतिमिदं बुभुक्षा बाधते मम।
भयानि च महान्त्यत्र ततो दुःखतरं वनम्॥")

बुभुक्षितः, त्रि, (बुभुक्षा भोक्तुमिच्छा सञ्जाताऽस्य। बुभुक्षा + "तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षुधितः। इत्यमरः। ३। १। १०॥ (यथा, मनुः। १०। १०५।
"अजीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन्॥")

बुल, क मज्जने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बोलयति प्रलवः पयसि। नावकर्णाद्यारिरयमिति केचित्। इति दुर्गादासः॥

बुलि, स्त्री, (बुल + इन् किच्।) भयम्। इति हैमचन्द्रः। ४। ७०६।

बुषं, क्ली, (बुस्यते उत्सृज्यते यत्। बुसिर् उत्सर्गे + "इगुपधेति।" ३। १। १३५। इति कः। पृषोदरादित्वात् सस्य षत्वं विभाषया।) बुसम्। तुच्छधान्यम्। आगड़ा इति भाषा। यथा,—
"[illegible]
देवतुषादरोषाः।" इति [illegible]।
इति भरतः॥

बुस, य इर् त्यागे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) य बुस्यति धनं दैवः प्रकाशीकरणे। इर् अबुसत् अबोसीत्। [illegible] इति दुर्गादासः॥

बुसं, क्ली, (बुस्यते तुच्छत्वात्त्यज्यते इति। बुस + "इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) तुच्छधान्यम्। आगड़ा इति भाषा। तत्पर्य्यायः। कडङ्गरः २। इत्यमरः। २। ९। २२॥ बुषम् ३। इति भरतः॥ बूसम् ४। इति शब्दरत्नावली॥ (उदकम्। यथा, ऋग्वेदे। १०। २७। २४।
"आविः स्वः कृणुते गूहते बुसम्।"
"बुसमुदकम्।" इति सायणः॥)

बुस्त क अनादरे। आदरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बुस्तयति खलं लोकः। बुस्तयति धीरं साधुः। इति दुर्गादासः॥

बुस्तं, क्ली, (बुस्तति अनादियते यत्। बुस्त क अनादरे + घञ्। यद्वा बुस्यते त्यज्यते स्म इति। बुसउत्सर्गे कर्म्मणि क्तः।) मांसविकारविशेषः। स्थालीभृष्टमांसम्। मत्स्यादिफलाद्याधारभागः। इत्यमरभरतौ॥ भाँता इति ख्यातः॥

बूकं, त्रि, (बुक्कयति शब्दायते इति। बुक्क + अच्। पृषोदरादित्वाद्दीर्घः।) बुक्कम्। हृदयम्। इत्यमरटीकायां रमानाथः॥

बृक्कं, त्रि, (बुक्कयति शब्दायते इति। बुक्क + अच्। पृषोदरादित्वादृकारः।) बुक्कम्। इत्यमरटीकायां सारसुन्दरी॥

बृ ञि वरणम्। भरणम्। इति कविकल्पद्रुमः॥ (स्वादि, क्र्यादि०-पर०-सक०-सेट्।) ञि बृणोति बूर्णः बूर्णिः। इति दुर्गादासः॥

बेकटः, पुं, मणिकारः। तरुणः। विदूषकः। इति शब्दरत्नावली॥

बोकड़ी, स्त्री, बसाक्षी। इति राजनिर्घण्टः॥

बोद्धा, त्रि, (बुध्यते यः। बुध् + तृच्।) बोधकर्त्ता। यथा,—
"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥"
इति भर्तृहरिः॥

बोधः, पुं, (बोधनमिति। बुध् + भावे घञ्।) ज्ञानम्। इति त्रिकाण्डशेषः॥ (यथा मार्कण्डेये। २६। १।
"बहुभार्य्यं सुतं सा तु राजपत्नी दिने दिने।
ससुल्लापादिना बोधमनयन्निर्ममात्मकम्॥"
अयं हि बुद्धेर्जातः। यथाहि मार्कण्डेये। ५०। २८।
"बोधं बुद्धिरूपाया? लब्ध्वा [illegible]।
[illegible]॥"
अविद्येषः। यथा मार्कण्डेये। ७६। २८।
"तदाच सुतो [illegible] दत्तवा च [illegible] वा।
बोधस्य [illegible] स्वे [illegible]॥"
धर्म्मस्य पत्निः। यथा, मार्कण्डेये। १०। १८।
"बोधस्य [illegible]
[illegible]॥"
आरमिकाम्? [illegible]। यथा, मार्कण्डेये। ८६। ६०।
"[illegible] बोधनमङ्गलो मम।
बोधय [illegible] महासुरी॥")

बोधकः, पुं, (बोधयतीति। बुध् + णिच् + ण्वुल्।) सूचकः। इति शब्दमाला। [illegible]

बाधकोऽपि पाठः। बोधकवत् त्रि। (यथा, साहित्यदर्पणे। २। ३।
"[illegible] बोधकाः॥")

बोधकरः, पुं, (करोतीति करः। कृ + ट। बोधस्य प्रबोधस्य करः।) निशान्ते बोधकारकः। तत्पर्य्यायः। वैतालिकः २। इत्यमरः। २। ८। ९७॥

बोधज्ञः, पुं, (बोधं अभिप्रायं जानातीति। बोध + ज्ञा + क।) अभिप्रायवेत्ता। [illegible] यथा,—
"सर्व्वभावविदो भृत्यो बोधज्ञः [illegible]।
कामिनीं बोधयामास [illegible]॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः॥

बोधनं, क्ली, (बुध् + णिच् + ल्युट्।) गन्धदीपनम्। इति मेदिनी। ने, ९९॥ वेदनम्। विज्ञापनम्। इति बुधधात्वर्थदर्शनात्॥ (उद्दीपनम्। यथा माघे। ९। ३७।
"समयेन तेन चिरसुप्तमनो-
भवबोधनं समबोधि तव।"
"मनोभवस्य कामस्य बोधनं उद्दीपनं यस्मिन्।" इति तट्टीकायां मल्लिनाथः। ज्ञानम्। यथा, रघौ। ९। ४९।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।"
"तेषां चललक्ष्याणां इङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानं च करोति।" इति तट्टीकायां मल्लिनाथः।) दुर्गाया बोधनं यथा। देवीपुराणे।
"इषे मास्यसिते पक्षे कन्याराशिगते रवौ।
नवम्यां बोधयेद्देवीं क्रीडाकौतुकमङ्गलैः॥"
अत्र [illegible]।
अतएव कालकौमुद्यादिधृतम्। यथा,—
"कर्किस्थे [illegible]।
तुलायां बोधयेद्देवीं [illegible]॥"
इति।
[illegible] बोधनं [illegible] तथैव [illegible]। एवं [illegible] बोधनादिकार्य्यम्। [illegible]।
तथा च लिङ्गपुराणम्।
"[illegible]।
[illegible]॥"
[illegible]।
"[illegible]।
[illegible]॥"
[illegible]।
तथा च लिङ्गपुराणम्।
"[illegible]।
[illegible] बोधयेद्देवीं [illegible]॥"
[illegible]।
"[illegible]।

[illegible]

इति मत्स्यसूक्तम् ।

[illegible]

"...बोधयिष्यामि बोधने ..." [illegible]

इति तिथ्यादितत्त्वम् ।

बोधनी, स्त्री, (बुध् + णिच् + ल्युट् । ङीप् ।) [illegible]

यथा,—

[illegible]

इति तिथ्यादितत्त्वम् ।

अपि च ।

[illegible]

बोधनीयः, त्रि, (बुध + अनीयर् ।) बोद्धव्यः । बोधितव्यः । [illegible]

बोधयानः, पुं, [illegible]

यथा,—

[illegible]

बोधानः, पुं, (बुध + आनच् ।) धीमान् । विज्ञः । बुधः । [illegible]

बोधिः, पुं, (बुध + "सर्वधातुभ्य इन्" ।) [illegible]

बोधितः, त्रि, (बुध + णिच् + क्त ।) ज्ञापितः । [illegible]

यथा,—

[illegible]

इति तिथ्यादितत्त्वम् ।

बोधितरुः, पुं, (बोधेः तरुः ।) अश्वत्थवृक्षः । [illegible]

बोधिद्रुमः, पुं, (बोधेः द्रुमः ।) अश्वत्थवृक्षः । [illegible]

बोधिसत्त्वः, पुं, (बोधिः बोधनं सत्त्वम् ।) [illegible]

बौद्धः, पुं, (बुद्ध एव । बुद्ध + अण् ।) बुद्धमतावलम्बी । [illegible]

इति ।

[illegible]

कार्याभावो कारणाभावमनुमापयेत इति सिद्धम् ।

यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्यात् तं प्रति ब्रूयात् अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा । न प्रथमः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात् । नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया साधनवचनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात् । किञ्च प्रमाणतदाभासव्यवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम् । परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्यलिङ्गकमनुमानम् अनुपलब्ध्या कश्चिदर्थं प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम् । तथाचोक्तं तथागतैः ।

“प्रमाणान्तरसामान्यस्थितेरन्यधियो गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥”
इति ।

पराक्रान्तमत्र सूरिभिरित्युपरम्यते ।

ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति । ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते । यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्क इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुध्यन्ते । सर्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम् । तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति । न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति न्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च । तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति परस्परविरोधे हि न प्रकारान्तरस्थितिः नैकतापि विरुद्धानामुक्तिमात्रविरोधत इति न्यायेन व्याघातस्योद्भटत्वात् । तौ च क्रमाक्रमौ स्थिरात् भावाद्व्यावर्त्तमानावर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकसत्त्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम् ।

ननु अक्षणिकस्याप्यर्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् । तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति न वा । आद्ये तयोर्निराकरणमनुपपन्नं समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत् करोत्येव यथा सामग्री स्वकार्यं समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च । द्वितीयेऽपि कदापि न कुर्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि शिलाशकलमङ्कुरे न चैष वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्ययाच्च । ननु क्रमवत्सहकारिलाभात् स्थायिनः अतीतानागतयोः क्रमेण करणमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्वन्ति न वा । न चेत् नापेक्षणीयास्ते अकिञ्चित्कुर्वतां तेषां तादर्थ्यायोगात् । उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते न वा । भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्यस्य । तदुक्तम् ।

“वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः
फलम् ।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः ॥”
इति ।

अथ भावस्तैः सहकारिभिः सहैव कार्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा हठात् कार्यं कुर्यात् स्वभावस्यानपायात् । किञ्च सहकारिभ्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणपाषाणवर्षप्रसङ्गः । अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादौस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्यन्तरापेक्षायां तत्परम्परापात इत्येकावस्थाऽऽस्थेया तथा हि सहकारिभिः सलिलपवनादिभिः पदार्थेनाधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजञ्चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत । तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे तथाच तस्मिन्नप्युपकारे पूर्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिजन्याद्बीजगतातिशयानवस्था प्रथमा व्यवस्थिता । अथोपकारः कार्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्यं जनयति तदा बीजादेरहेतुत्वमापद्येत । द्वितीये अपेक्षमाणैव बीजादिना उपकारे अभिनव आधेयः एवं तत्र तत्रापीति बीजादिजन्योपकारनिष्ठानवस्थापरम्परापात इति द्वितीयानवस्था स्थिता भवेत् । एवमपेक्षमाणैरुपकारैः बीजादौ धर्मिण्युपकारान्तरमाधेयमित्युपकारातिशयबीजादिनिष्ठा अनवस्थापरम्परापात इति तृतीयानवस्था दुरवस्था स्यात् । अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्वद्रूपादिपदवेदनीयो जायत इति फलितं ममापि मनोरथद्रुमेण ।

तस्मादक्षणिकस्यार्थक्रिया दुर्घटा नाप्यक्रमेण घटते विकल्पासहत्वात् । तथा हि युगपत्सकलकार्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा । प्रथमे तस्मिन्नेव काले कालान्तरेऽपि तावत् कार्यकरणमापतेत् । द्वितीये स्थायित्वप्रत्याशा गर्भभक्षितबीजाङ्कुरादिजननप्रार्थनामनुसरेत् । यद् विरुद्धधर्माध्यस्तं तन्नाना यथा शीतोष्णे । विरुद्धधर्माध्यस्तश्चायमिति जलधरे प्रतिबन्धसिद्धिः । न चायमसिद्धो हेतुः स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्ययसिद्धत्वात् तत्रासामर्थ्यसाधकौ प्रसङ्गतद्विपर्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यद् यदा यज्जननासमर्थं तत्तदा तन्न करोति यथा शिलाशकलमङ्कुरम् असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यद् यदा यत् करोति तत्तदा तत्र समर्थं यथा सामग्री स्वकार्यं करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसङ्गव्यत्ययः विपर्ययः । तस्मादिदमपि क्रमयौगपद्ययोरक्षणिकात् व्यापकानुपलम्भबाधितव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्ययवत्त्वात् अतीतान्यथापि सत्त्वं क्षणिकत्वपक्ष एव व्यवतिष्ठत इति सिद्धम् । तदुक्तं ज्ञानश्रिया ।

“यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्च
भावा अमी
सत्ताशक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा
न सा ।
नाप्येकैव विधान्यथा परकृतेनापि क्रियादिर्भवेत्
द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति ॥” इति ।

न च कणभक्षाक्षचरणादिपक्षकक्षीकारेण सत्तायोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यादिष्वसत्त्वप्रसङ्गात् । न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः प्रयोजकगौरवापत्तेः अनुगतत्वाननुगतत्वविकल्पपराहतेश्च सत्तायोगित्वासिद्धेः विलक्षणेषु सर्वेष्वनुगताकारस्य मतिश्च उपचरितत्वेऽपि गुणवत्त्वादिमात्रमवलम्बते । किञ्च सामान्यं सर्वगतं स्वाश्रयसर्वगतं वा । प्रथमे सर्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन स्वविषयसर्वगतमिति । किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत् सम्बध्यते अनागच्छद्वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः । किञ्च विनष्टे घटे सामान्यमवतिष्ठते विनश्यति स्थानान्तरं गच्छति वा । प्रथमे निराधारमवस्थानं द्वितीये नित्यत्वव्याघातः

[illegible]

समर्पितेन चाकारेण तदर्थस्यानुमेयत्वोपपत्तेः; अत एव पर्यनुयोगपरिहारौ समगृह्यताम्।
"भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्॥"

इति।

तथा च यथा पुष्ट्या भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण स्नेहः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्। तदुक्तम्
"अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम्।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता॥"

इति।

न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् तां तु सारूप्यमाविशत् सरूपयेद् घटयेदिति च। तथा च बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविवक्षति अजिगमिषति मयि वचनगमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथा च विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखा इति। तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम्। यथोक्तम्
"तत् स्यादालयविज्ञानं यद् भवेदहमास्पदम्।
तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्॥"

इति।

तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम्। विज्ञानवादिनये हि वासना नामैकसन्तानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्योन्मुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्तिपूर्वक्षणः कथ्यते सन्तानान्तरानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्तिनः क्षणाः समर्था एवेति वक्तव्यं न चेदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्त इति चतुर्विधसाध्यमानतया सानुभवमन्वयात् परिच्छेदनम्। ते चत्वारः प्रत्ययाः आलम्बनसमनन्तरसहकार्यधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य नीलाद्याभासस्य चित्तस्य नीलादालम्बनप्रत्ययान्नीलाकारता समनन्तरप्रत्ययात् प्राचीनज्ञानाद् बोधरूपता सहकारिप्रत्ययादालोकाच्चक्षुषः स्पष्टार्थता अधिपतिप्रत्ययाच्चक्षुषो विषयग्रहणप्रतिनियमः। उदितस्य ज्ञानस्य रसादिसाधारण्ये प्राप्ते नियामकं चक्षुरधिपतिर्भवति लोके नियामकस्याधिपतित्वदर्शनात्। एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि एवं चित्तचैत्तात्मकः स्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्त एभिर्विषया इति रूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिसविकल्पप्रत्ययप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः।

तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं दुःखसमुदायनिरोधमार्गाश्चत्वार आर्यस्य बुद्धस्याभिमतानि तत्त्वानि। तत्र दुःखं प्रसिद्धं समुदायो दुःखकारणं तद् द्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् इदं कार्यं ये अन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषामयमानां हेतूनां भावः प्रत्ययः कारणसमवायः तस्यायं फलं न चेतनस्य कस्यचिदिति सूत्रार्थः; यथा बीजहेतुरङ्कुरो धातूनां षण्णां समवायाज्जायते। तत्र पृथिवीधातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति अब्धातुः स्नेहं रसञ्च जनयति तेजोधातुः रूपमौष्ण्यञ्च वायुधातुः स्पर्शं चलनञ्च आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषा धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्यसमुत्पादानुलोमतेति। तथागतानां बुद्धानां मते धर्माणां कार्यकारणरूपाणां या धर्मता कार्यकारणभावरूपा स्वोत्पादादनुत्पादाद्वा स्थिता यस्मिन् सति यदुत्पद्यते तत्तस्य कारणस्य कार्यमिति धर्मिता धर्मस्य कार्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्तल्प्रत्ययः धर्मस्य कारणस्य कार्यं प्रति नियामकता। ननु कार्यकारणभावश्चेतनमन्तरेण न सम्भवतीत्यत उक्तं कारणे सति तत्सामीप्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या चैव धर्मता उत्पादादनुत्पादाद्वा धर्माणां स्थिता न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा हेतोः समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालः नालाद् गर्भः ततः शूकं ततः पुष्पं ततः फलमिति न चात्र बाह्ये समुदाये कारणं बीजादि कार्यमङ्कुरादि वा चेतयते अहमङ्कुरं निर्वर्तयामि अहमनेन निर्वर्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयतत्त्वे सकलोऽपि विस्तरनाडम्बरः। तदुक्तं विवेके तदनन्तरं निरोधो निरोधो वा मुक्तिः तन्निरोधोपायो मार्गः स च तत्त्वज्ञानं तच्च प्राचीनभावनाबलाद्भवतीति परमं रहस्यं सूत्रान्तं पृच्छतां कथितं भगवता सूत्रस्यान्तः इत्यतः सौत्रान्तिका भवन्तीति भगवताभिहिततया सौत्रान्तिकसंज्ञा सञ्जातेति। केचन बौद्धा बाह्येषु गन्धादिषु आन्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्रानास्थामुत्पादयितुं सर्वं शून्यमिति प्राथमिकान् विनेयानचीकथद्भगवान् द्वितीयांस्तु विज्ञानमात्रग्रहाविष्टान् विज्ञानमेवैकं सदिति तृतीयानुभयं सत्यमित्यास्थितान् विज्ञेयमनुमेयमिति सेयं विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः। एषा हि तेषां परिभाषा समुन्मिषति विज्ञेयानुमेयत्ववादे प्रत्यक्षस्य कस्यचिदप्यर्थस्याभावेन व्याप्तिसंवेदनस्थानाभावेनानुमानप्रवृत्त्यनुपपत्तिः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तम्।
"कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्।
विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः॥"

इति।

"ग्राह्यं वस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा।
न तद्वस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिजम्॥"

इति च।

ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येतामिति चेन्न तदुक्तं मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति मन्तव्यं यतो भणितं बोधिचित्तविवरणे
"देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा।
भिन्ना हि देशना भिन्ना शून्यताद्वयलक्षणा॥"

इति।

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्।
"अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै।
परितः पूजनीयानि किमन्यैरिह पूजितैः॥
ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च।
मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥"

इति।

विवेकविलासे बौद्धमतमित्थमभ्यधायि।
"बौद्धानां सुगतो देवो विश्वं च क्षणभङ्गुरम्।
आर्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात्॥
दुःखमायतनं चैव ततः समुदयो मतः।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः॥
दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥

[illegible]

तस्य टीका। ब्रह्मणः स्वरूपमत्यन्ताविस्तर-कार्यमाह। ब्रह्मतेजोमयमिति। तेजोमयं ज्ञानात्मकम्। शुक्लं बीजभूतम्। यस्य सर्व-मिदं द्रव: द्रवणीयं ध्येयं सर्वं यस्यैकस्य भूतं सत्त्वं च तु विवर्तवादिनामिवावस्थं भूतस्य विद्रुतस्य यथाविप्लवस्य तत्र सर्वं स्वाधारत्वमूर्मो-पाधिकत्वात् द्वयं द्वैधा। तच सगुणनिर्गुण-भेदेन द्विविधं यथा,

"ब्रह्मैकं भागिभेदस्तु गुणभेदेन शाश्वतम्।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव॥
मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवानिच्छया विकरोति च॥
इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रदः सदा।
केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्॥
केचिद्वदन्ति द्विविधं ब्रह्म प्रकृतिपूर्वकम्।
यस्य ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्॥
तथापि वदति तौ द्वौ च तद्ब्रह्म सर्वकारणम्।
यथैकं परं ब्रह्म द्विविधं भवतीच्छया॥
इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रदः सदा।
तथा सगुणः स शरीरी च प्राकृतः॥
निर्गुणस्तत्र निर्लिप्तः अशरीरी निरङ्कुशः।
स आत्मा भगवानिशः सर्वाधारः सनातनः॥
सर्वेश्वरः सर्वसाक्षी सर्वज्ञश्च फलप्रदः।
शरीरं द्विविधं ब्रह्मन्! नित्यं प्राकृतमेव च॥
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
यद्यपि तथापि भगवन्मायायोर्मिथ्याविषयः॥
आवयोरंशभूता ये प्राकृता भवविग्रहाः।
वराहपक्षांशाश्च महांशा विष्णुरूपिणः॥
समांशेन द्विधा रूपं द्विभुजश्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह॥
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं मे वदन्त्येवं द्वौ प्रधानौ तु तत्वतः॥
पुरुषश्च यदा नित्यो नित्या प्रकृतिरीश्वरी।
यदा तौ द्वौ च संश्लिष्टौ सर्वेषां पितरौ शिव॥
सशरीरौ निःशरीरौ स्वेच्छया सर्वरूपिणौ।
यथात्मा च यथा शुक्लः प्रकृतिश्च तथा सदा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४३ अध्यायः॥

भक्तयोगं प्रति श्रीकृष्णवाक्यं यथा,—
"मामेव परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुनर्ध्याहि ब्रह्मा यत्र परं पदम्॥"
इति तत्रैव १२० अध्यायः॥

अनुकल्पं तस्य भक्ता यद्रूपं यथा,—
"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्॥ ५
वेदा वदन्ति सत्यं यं नित्यमाद्यं विचक्षणाः।
यं वदन्ति सुराः सर्वे परं स्वेच्छामयं प्रभुम्॥ ६
सिद्धेन्द्रा मुनयः सर्वे सर्वरूपं वदन्ति यम्॥ ६
यमनिर्वचनीयञ्च योगीन्द्रः शङ्करो वदेत्॥ ७
स्वयं धाता च वदेत् कारणानाञ्च कारणम्॥
शेषो वदेदनन्तं यं ब्रह्मा सर्वमयीश्वरम्॥ ८
तर्कानामेव सर्वार्थं वदन्ति सर्वतोमुखम्।
वैकल्पकादिरूपं वेदानामेकमेव च॥
पुराणानामेकरूपं तत्त्वानामविधं स्तुतम्।
न्यायो निर्मलनीयश्च सम्मतं शङ्करोऽब्रवीत्॥
नित्यं वैशेषिकाद्यन्तं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्वरूपश्च वेदान्ताः सर्वकारणम्।
पातञ्जलोऽप्यनन्तश्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणश्च भक्ताश्च नित्यविग्रहम्॥"
इति तत्रैव १२८ अध्यायः॥

सगुणनिर्गुणभेदेन तस्य चतुर्धा रूपं यथा,—
"चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्दनः॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान्।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः॥
कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः।
इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितो विष्णुः करोति परिपालनम्।
मन्वादिरूपी चान्येन कालरूपी परेण च॥
सर्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणसमाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः।
रुद्रस्वरूपी भगवानेकांशेन भवत्यजः॥
अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपी भागोऽन्यः सर्वभूतानि चापरः॥
विनाशं कुर्वतस्तस्य चतुर्द्धैवं महात्मनः॥"
इति विष्णुपुराणे १ अंशे २२ अध्यायः॥

ब्रह्मध्यानं यथा,—
"ब्रह्मध्यानं प्रवक्ष्यामि भायातम्यविमर्द्दकम्।
यक्षेष्वपि प्राणपदं पक्षिणामपि वाजिनि॥
स्थानं भजति संयमी इव इच्छेत् स्वैव चात्मनि।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूततन्मात्रैर्गुणजन्मादिभिः।
स्वप्रकाशं निराकारं सदानन्दमनादिमत्॥
नित्यं शुद्धं बुद्धरूपं सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्त्वविज्ञानवान् भवति युक्तेन मनसा सदा॥
न च तत्पदमाप्नोति युक्तेन मनसा तदा।
स तत्पदमवाप्नोति न हि भूयो न जायते॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिनियमः स्मृतः।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जपः प्रोक्तो ध्यानमीश्वरचिन्तनम्।
मनोधृतिर्धारणं स्यात् समाधिर्ब्रह्मणि स्थितिः॥"
साकारस्य तस्य ध्यानं यथा,—
"कमले वेदै स्थितो न स्मार्त्तो नमो नित्य-
मादेषु।
कृपानुवर्त्तितामध्ये तन्तुवत्तेजसाः॥
श्रीवत्सकौस्तुभयुतो वनमाली श्रिया युतः।
नित्यः शुद्धो बुद्धियुतः नित्यानन्दात्मकः परः॥
आत्माहं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्विंशतिमूर्त्तिः स शालग्रामशिलास्थितः॥
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा
हरिः॥
ममध्योऽप्यस्मिन् प्राप्य देवो वैमानिको भवेत्।
निष्कामो मुक्तिमाप्नोति मत्तोऽधिकस्य स्तुवन्
जपन्॥"
इति गारुडे गरुडोपनिषदि ४४ अध्यायः॥

ब्रह्मपदप्राप्तिकारणं यथा,—
"ब्रह्मण्याधाय कर्माणि निःसङ्गः कामवर्जितः।
प्रसन्नेनैव मनसा कुर्वाणो याति तत्पदम्॥"
इति कूर्मपुराणे २ अध्यायः॥

सर्वं ब्रह्म यथा,—
"ब्रह्मैवेदं जगत् सर्वं ब्रह्मणोऽन्यत्र विद्यते।
ब्रह्माव्यद्भाति वैभिन्न्या यथा मरुमरीचिका॥"
इति ज्ञानबोधः॥

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पुं, ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।
"ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं सरो वरम्।) ब्रह्मणा निर्म्मितसरोवरविशेषः। यथा,
"मानुषाचलनीरस्थो ब्रह्मकुण्डाश्रयं नरः।
ब्रह्मणा निर्मितं पूर्वं स्नानाय सर्वदानिनाम्॥
स्नानमेव शतधामं विद्धीति मदर्हकम्।
सर्वपापहरं पुण्यं देवलोकात् समानतम्॥
तत्र स्नानमन्त्रः।
ब्रह्मकुण्डसमुद्भूत ब्रह्मकुण्डाभिनन्दन!
हर मे सर्वपापानि पुण्यं स्नानेन साधय॥
इत्यनेन तु मन्त्रेण स्नाति तस्मिन् नरोत्तमे।
पाण्डुनाथं प्रपूज्य विष्णुसायुज्यमाप्नुयात्॥
ब्रह्मकुण्डजले स्नात्वा पूर्वस्मिन् उमानन्दनम्।
ब्रह्मकूटं समारुह्य हरिमेवानुपश्यतः॥"
इति कालिकापुराणे ८१ अध्यायः॥

ब्रह्मकूटः, पुं, (ब्रह्मा कूटे शिखरे यस्य।) पर्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥
"ब्रह्मकुण्डजले स्नात्वा पूर्वस्मिन् उमानन्दनम्।
ब्रह्मकूटं समारुह्य हरिमेवानुपश्यतः॥"

ब्रह्मकूर्च्चं, क्ली, (ब्रह्मणो ब्राह्मणस्य कूर्च्चमिव।) व्रतविशेषः। यथा। याज्ञवल्क्यः।
"इत्यर्थे तु वै माध्याह्निकं पञ्चगव्यं जलं।
नवमैः समाप्त्य ब्रह्मकूर्च्चमुदाहृतम्॥"
पञ्चगव्यानां ग्रहणे विशेषस्तः। ब्रह्मकूर्च्च-
प्राह जावालः,
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च ब्रह्मकूर्च्चं विशोधनम्॥"

मर्व्वक्रियासु शब्दाद्या विषयाः पञ्च मानसम् ।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि ।
आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः ॥
क्षणिकाः सर्व्वसंस्कारा इति या वासना
स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा ।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः ॥
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते ।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता ।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः ॥
रागादिज्ञानसन्तानवासनाच्छेदसम्भवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥
कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्व्वाह्णभोजनम् ।
सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिः ॥"
इति ॥

इति सर्व्वदर्शनसंग्रहे बौद्धदर्शनम् ॥)

(बुद्धेरिदमिति बुद्धप्रणीते वाच्यलिङ्गः । बुद्धसम्बन्धि वस्तु ॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति । बुद्ध + अण् ।) बुद्धशास्त्रावलम्बी । तत्पर्य्यायः । भिक्षुः २ क्षपणकः ३ अर्हतः ४ वैनाशिकः ५ । इति त्रिकाण्डशेषः ॥

बौधः, पुं, (बुधस्यापत्यं पुमान् । बुध + अण् ।) बुधस्य पुत्रः । स च पुरूरवाः । इति हेमचन्द्रः । ३ । ३६५ ॥

ब्यध, श ग्री ताडे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट् ।) श विध्यति शत्रुं शूरः । ग्री अव्यात्सीत् । कश्चित्तु दन्त्यसवर्गादिकारो-भयवकारस्य मध्यवकारी वर्ग्यः अन्यस्य दन्त्यः इति मन्वानः सवि विध्यतीत्याह । इति दुर्गादासः ॥

ब्युष, क उत्सर्गे । उत्सर्ज्जे । (चुरा०-पर०-सक०-सेट् ।) क ब्योषयति धनं दाता । अबुबुषत् । इति दुर्गादासधृतधातुदीपिकायां गोविन्दभट्टः ॥

ब्रस, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ब्रसति । इति दुर्गादासः ॥

ब्रततिः, स्त्री, (बृहती ततिर्विस्तारो यस्याः । पृषोदरादित्वात् साधुः । यद्वा, प्रतनोतीति । उज्ज्वलदत्ते "प्रतन् तनौ च संज्ञायाम् ।" ४ । १ । १०४ । इति तिच् । पृषोदरादित्वात् पस्य बः ।) लता । विस्तारः । इत्यमरः ॥

ब्रध्नः, पुं, (बध्नाति + "बन्धेर्ब्रधिबुधी च । उणा० ३ । ५ । इति नक् ब्रधादेशश्च ।) सूर्य्यः । (यथा, ऋग्वेदे । १ । ६ । १ ।
"युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः ।
रोचन्ते रोचना दिवि ॥")
मूलम् । अर्कवृक्षः । इत्यमरः । ३ । ३ । १५२ । दिनः । इति हेमचन्द्रः ॥ [illegible]

बकारादौ लिखितोऽयं शब्दः ॥ (दिनम् । ध्रुवः । इति निघण्टुः । चतुर्द्दशमनोर्भौत्यस्य पुत्रभेदः । यथा, मार्कण्डेये । १०० । ३२ ।
"गुरुगम्भीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा ।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ॥")
रोगविशेषः । तस्य लक्षणं यथा,
"वाय्वभिष्यन्दिगुर्व्वामसेवनादित्ययं नरः ।
करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्द्दिशेत् ॥"
इति माधवकरः ॥

तस्य चिकित्सा ।
"ब्रध्ने चैरण्डतैलेन सम्यक् कल्कोऽभयाभवः ।
क्षाराद्र्द्रकसंयुक्तो ब्रध्नरोगहरः परः ॥
चणकाद्यैर्घृतपक्वं गोमेदवदराग्निनम् ।
नारिकेलेन तु संपिष्टं सलेपो ब्रध्नजित् परः ॥"
गोमेदं पद्मम् । तथा च निघण्टौ ग्रन्थान्तरे ।
"पद्मं रक्ताब्जं तामं गोमेदं रक्तपद्मम् ॥"
इति भावप्रकाशः ॥
(अस्य सम्प्राप्तिलक्षणं यथा,—
"यस्य वायुः प्रकुपितः शोथशूलकरश्चरन् ।
वंक्षणाद्वृषणौ याति ब्रध्नस्तस्योपजायते ॥"
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये ॥)

ब्रह्म, क्ली, (बृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः । बृहि वृद्धौ + "बृंहेर्नोऽच्च ।" उणा० ४ । १४५ । मनिन् नकारस्याकारः । रत्वञ्च ।) वेदः । (यथाह श्रुतिः ।
"तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते ॥"
तथा च भागवते । १ । १ । १ ।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः
स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्
सूरयः ॥"
वेदान्तमते 'वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजडसमूहोऽवस्तु ।' 'ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यम् ।' तथाहि,—
"यस्मादर्व्वाक् संवत्सरोऽहोभिः परिवर्त्तते ।"
तद्देवा ज्योतिषां ज्योतिः । नित्यं विभुं सर्व्वगतं सुसूक्ष्मम् । आकाशवत् सर्व्वगतश्च नित्यः । अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातिर्दातुः परायणं यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतम् ।" इत्यादि श्रुतिभ्यो ब्रह्मैव नित्यं विशुद्धचैतन्यं पुनः प्रतिभाति । तथा, नैव किञ्चनाग्र आसीत् सदेव सोम्येदमग्र आसीत् । आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेति नेह नानास्ति किञ्चन यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्त्यम् ।" इत्यादि श्रुतिभ्यो ब्रह्मणोऽन्यत् मिथ्याभूतमित्यवगम्यते तदेव पुनः प्रतिभाति । तथाहुर्मायावादिनः यथा, विमलोऽद्वैतस्वरूपो नित्यो विभुश्चात् पदार्थभा-

सितम् इति । अनेन हि विभक्तस्याविभक्तं-ऽवगते सच्चिदानन्दस्वरूपस्य ब्रह्मणो-विमलस्य निष्कलमपि स्वरूपं प्रकाशते । इति वेदान्तसारे विद्वन्मनोरञ्जनीटीका । तत्र श्रुतिवाक्यानि यथा, "सत्यं ज्ञानमनन्तं ब्रह्म । विज्ञानमानन्दं ब्रह्म ।" "आनन्दो ब्रह्मेति व्यजानात् आनन्दस्वरूपममृतं यद् विभाति, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तत् विजिज्ञासस्व तद्ब्रह्मेति ।" इत्यादयश्चैवं श्रुतिवचनमनुसन्धेयम् ॥")
तत्त्वम् । तपः । इत्यमरः । ३ । ३ । ११४ ।
ब्रह्म चतुर्व्विधं यथा । विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४ । इति वेदान्तसारः ॥
अस्य लक्षणम् । यथा, आत्मबोधे ।
"यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥
तिर्य्यगूर्द्ध्वमधःपूर्णं सच्चिदानन्दमद्वयम् ।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम् ।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥"
अपि च । "यत्प्रमाणैकगम्यमप्रतर्क्यं वाङ्मनसोऽगोचरं सर्व्वगं सर्व्वातीतं निर्व्विशेषं देशकालापरिच्छिन्नमपारमपि सोऽहमस्मीति च सर्व्वपदमपश्यदपि सर्व्वदृक् अणोरणीयो महतोऽपि महीयः सर्व्वमपि सर्व्वेषां सर्व्वभूतेषु सर्व्वेषां दर्शनानि नियन्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति ।" गुहाशयमात्मनः मायोपनिषदः । १ । आदिविद्वान् सिद्ध इति कापिलाः । २ । क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः । ३ । लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः । ४ । शिव इति शैवाः । ५ । पुरुषोत्तम इति वैष्णवाः । ६ । पितामह इति पौराणिकाः । ७ । यज्ञपुरुष इति याज्ञिकाः । ८ । सर्व्वज्ञ इति सौगताः । ९ । निरावरण इति दिगम्बराः । १० । उपास्यत्वेन देशित इति मीमांसकाः । ११ । लोकव्यवहारसिद्ध इति चार्व्वाकाः । १२ । यावदुक्तोपपन्न इति नैयायिकाः । १३ । विश्वकर्म्मेति शिल्पिनः । १४ । इति कुसुमाञ्जलिकृतः ॥ मोक्षधर्म्मे ।
"ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं जगत् ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥"
इति महाभारते मोक्षधर्म्मः ॥

तस्य टीका। ब्रह्मणः स्वरूपमक्षराविकार-
त्वात्मकम्। ब्रह्मतेजोमयमिति। तेजोमयं
ज्ञानात्मकम्। शुक्रं बीजभूतम्। यस्य सर्व-
मिदं रवः इयतीयं प्रियं सर्वं यस्यैकस्य भूतं
सत्यं न तु विवर्त्तवादिनामिवासत्यं भूतस्य
सिद्धस्य यथाक्रियतस्य तस्य सर्वं स्थावरजङ्गमो-
पाधिमत्वात् इयं द्वैधा। तत्र सगुणनिर्गुण-
भेदेन द्विविधं यथा,
"ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सम्मतम्।
तदब्रह्म द्विविधं वस्तु सगुणं निर्गुणं प्रिय!।
मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवानिच्छया विकरोति च।
इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा।
केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्।
केचिद्वदन्ति द्विविधं ब्रह्म प्रकृतिपूर्व्वकम्।
ब्रह्म ये च वदन्त्येवं प्रकृतिपुरुषयोः परम्।
तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्व्वकारणम्।
तथैवैकं परं ब्रह्म द्विविधं भवतीच्छया।
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
तयायुक्तश्च सगुणः स शरीरी च प्राकृतः।
निर्गुणश्चैव निर्लिप्तः अशरीरी निरङ्कुशः।
स चात्मा भगवान्नित्यः सर्व्वाधारः सनातनः।
सर्व्वेश्वरः सर्व्वसाक्षी सर्व्वेषामपि भक्तप्रदः।
शरीरं द्विविधं शम्भो! नित्यं प्राकृतमेव च।
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
सन्ति अद्यापि भगवत्प्रकृत्योर्नित्यविग्रहाः।
आवयोरंशभूता ये प्राकृता नश्वरा अपि।
दशारूपश्चाहमंशेन सदंशा विष्णुरूपिणः।
ममाप्येवं द्विधा रूपं द्विभुजश्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह।
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं ये वदन्त्येवं द्वौ प्रधानौ तु सम्मतौ।
पुरुषश्च सदा नित्यो नित्या प्रकृतिरीश्वरी।
सदा तौ द्वौ च संश्लिष्टौ सर्व्वेशौ पितरौ प्रिय!।
अशरीरी निःशरीरी स्वेच्छया सर्व्वरूपिणौ।
मायाश्च यथा देवः प्रकृतिश्च तथा सदा।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४१ अध्यायः।
सत्यपरोऽपि श्रीकृष्णवाक्यं यथा,—
"ध्यायेत् परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुनर्मुक्तिं ददौ जन्म परं पदम्।"
इति तत्रैव १३० अध्यायः।
वादिनस्तत्र बहुधा रूपं यथा,—
"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्॥
वेदा वदन्ति सत्यं यं नित्यमाद्यं विचक्षणाः॥
यं वदन्ति सुराः सर्व्वे परं स्वेच्छामयं प्रभुम्॥
सिद्धेन्द्राश्च मुनयः सर्व्वे सर्व्वरूपं वदन्ति यम्॥
यमनिर्व्वचनीयञ्च योगीन्द्रः शङ्करो वदेत्॥
स्वयं धाता च वदेत् कारणानाञ्च कारणम्॥
शेषो वदेदनन्तं यं नाना रूपमभीश्वरम्॥
तर्कानामेव वर्णो यं वदन्ति सर्व्वरूपिणम्।
वैष्णवानामेवरूपं वैराग्यमेवमेव च।
पुराणानामेकरूपं तथात्मविधं स्मृतम्।
न्यायो निर्व्वचनीयञ्च यमनं शङ्करोऽमवोत्॥
नित्यं वैशेषिकाश्चान्तं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्व्वरूपञ्च वेदान्तः सर्व्वकारणम्।
पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्॥"
इति तत्रैव १२८ अध्यायः।
सगुणनिर्गुणभेदेन तस्य चतुर्धा रूपं यथा,—
"चतुर्व्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्द्दनः॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान्।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः।
इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितो विष्णुः करोति परिपालनम्।
मन्वादिरूपी चान्येन कालरूपो परेण च॥
सर्व्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः॥
अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपो भागोऽन्यः सर्व्वभूतानि चापरः॥
विनाशं कुर्व्वतस्तस्य चतुर्द्धैवं महात्मनः॥"
इति विष्णुपुराणे १ अंशे २२ अध्याय.।
ब्रह्मध्यानं यथा,—
"ब्रह्मध्यानं प्रवक्ष्यामि मायातत्त्वविमर्द्दकम्।
यज्ज्ञात्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः॥
ध्यानं भवति संयमेन इच्छेत् मेव व्याप्नोति।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूतशब्दाद्यैर्गन्धरूपादिभिः।
अप्रकाशं निराकारं सदानन्दमनादिमम्॥
नित्यं शुद्धं बुद्धं सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेति यद्ध्यानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्तु विज्ञानवानात्मा युक्तेन मनसा सदा॥
स तु तत्पदमाप्नोति युक्तेन मनसा सदा।
स तत्पदमवाप्नोति न हि भूयो न जायते।
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिनियमः स्मृतः।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम्॥
मनोधृतिर्धारणं स्यात् समाधिर्ब्रह्मणः स्मृतः॥"
बाराहेऽपि तस्य ध्यानं यथा,—
"अकर्त्ते देहे स्थितो न शक्नोति रूपं विचि-
न्तयेत्।
पुरुषं परं विनाशमद्वैतं द्वन्द्वरहिताक्षरम्॥
पीताम्बरकौस्तुभयुतो वनमाली धिया युतः।
नित्यः शुद्धो बुद्धियुतः दिव्यानन्दात्मकः परः॥
आत्मानं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्व्विंशतिमूर्त्तिः स शालग्रामशिलास्थितः॥
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा
हरिः।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत्॥
निष्कामो मुक्तिमाप्नोति मर्त्यो ध्यायन् स्तुवन्
जपन्॥"
इति गारुडे ब्रह्मध्यानं ४४ अध्यायः।
ब्रह्मपदप्राप्तिकारणं यथा,—
"ब्रह्मण्याधाय कर्म्माणि निःसङ्गः कामवर्जितः।
प्रसन्नेनैव मनसा कुर्व्वाणो याति तत्पदम्॥"
इति कूर्म्मपुराणे २ अध्याय.।
सर्व्वं ब्रह्म यथा,—
"ब्रह्मैवेदं जगत् सर्व्वं ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका॥"
इत्यात्मबोधः।

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पुं, ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।
"ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं जलाशयम्।) ब्रह्मणा निर्म्मिततीर्थविशेषः। यथा,
"शालग्रामगिरौ कुण्डं ब्रह्मकुण्डाह्वयं नरः।
ब्रह्मणा निर्म्मितं पूर्व्वं स्नात्वा सर्व्वाभिलाषकम्॥
आत्मानं पावयेन्नित्यं विष्णोरेव तदर्हकम्।
सर्व्वपापहरं पुण्यं देवलोकात् समागतम्॥
तत्र स्नानमन्त्रः।
ब्रह्मकुण्डसमुद्भूत ब्रह्मकुण्डाम्बुसम्भव।।
हर मे सर्व्वपापानि पुण्यं मोक्षं च साधय॥
इत्यनेन तु मन्त्रेण स्नानं तस्मिन् करोति यः।
प्राजापत्यञ्च संपूज्य विष्णोः पादमवाप्नुयात्॥
ब्रह्मकुण्डाद्बहिर्यात्वा पूर्व्वस्मिन् समाश्रितम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"
इति कालिकापुराणे ८१ अध्यायः॥

ब्रह्मकूटः, पुं, (ब्रह्मा कूटे शिखरे यस्य।) पर्व्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥
"ब्रह्मकुण्डाद्बहिर्यात्वा पूर्व्वस्मिन् समाश्रितम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

ब्रह्मकूर्च्चं, क्ली, (ब्रह्मणो ब्राह्मणस्य कूर्च्चमिव।) व्रतविशेषः। यथा। याज्ञवल्क्यः।
"इयमेव तु वै नाम्ना ब्रह्मकूर्च्चं तदुच्यते।
...ब्रह्मकूर्च्चमनुत्तमम्॥"
...ब्रह्मकूर्च्च-
माह जाबालः,
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
...॥"

न्दादशी पुराणोक्तं दानफलम्। इति प्रायश्चित्त-तत्त्वम्॥ (ब्रह्मपुराणेऽपि अस्य प्रशंसा यथा। नरस्तु चतुर्दश्यां पूर्णिमायाममावास्यायाम। पञ्चगव्यं चविग्धाणं वा भक्षयेत्। यस्तु पौर्ण-मास्यां ब्रह्मकूर्चं कुर्य्यात् तस्य सर्व्वपापक्षयो भवेत्। यस्तु मासेन द्विःकुर्य्यात् स पचेदाग्नि-माप्नुयात्॥)

ब्रह्मकोषी, स्त्री, (ब्रह्मणः कोषीव।) अजमोदा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या अज-मोदाशब्दे ज्ञेयाः॥)

ब्रह्मगर्भा, स्त्री, (ब्रह्मैव गर्भो यस्याः।) आदित्य-भक्ता। इति राजनिर्घण्टः॥

ब्रह्मगिरिः, पु, (ब्रह्मणो गिरिः पर्व्वतः।) ब्रह्म-शैलः। इति शब्दरत्नावली॥ (नीलकूटाभि-धेयकामाख्यापीठस्य पूर्व्वभागे स्थितोऽयम्।) यथा, कालिकापुराणे ८१ अध्याये।

"तस्मात् नीलकूटाख्यं कामाख्यापीठं परम्।
तत्पूर्व्वभागे वसति ब्रह्मा ब्रह्मगिरिं पुनः॥"

ब्रह्मघ्नी, स्त्री, गृहकन्या। इति राजनिर्घण्टः॥ (ब्रह्माणं प्रजापतिं हन्तीति। ब्रह्मन्+हन्+टक्। स्त्रियां ङीप्।) ब्रह्मघातिनी च॥

ब्रह्मचर्य्यं, क्ली, (ब्रह्मणे वेदार्थं चर्य्यं आचरणीयम्।) आश्रमविशेषः। यथा, गारुडे ९४ अध्याये।

"ब्रह्मचर्य्यस्थितो नैकमन्नमद्यादनापदि।
ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन्॥
मधुमांसं तथाश्लीलमित्यादि परिवर्ज्जयेत्।
प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा॥
ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे॥"

(ब्रह्मचर्य्ये अष्टाङ्गमैथुनप्रतिषेधः। यदुक्तम्।

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥"

एतच्च स्त्रीपुरुषयोः साधारणम्। पुंसः स्त्रीस-ङ्गादि शून्यत्वम्। स्त्रियाश्च पुरुषसङ्गादि-राहित्यम् अत एवाह मनुः। ५। १६०॥

"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्त्रापि यथा ते ब्रह्मचारिणः॥"
"ब्रह्मचर्य्यं धृतवता ब्रह्मयज्ञपरायणा॥"
इति कुल्लूकभट्टः॥

यमभेदः। यथा, पातञ्जले। २। ३०।
"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः॥"
"ब्रह्मचर्य्यमुपस्थसंयमः।" [illegible] इति भाष्यम्॥ एतत्तु कलियुगे नास्ति। यथाह [illegible]।

"ब्रह्मचर्य्यसमो नास्ति तावदन्योऽपि न क्षितौ।
गार्हस्थ्यो भैक्षुकश्चैव आश्रमौ द्वौ मतौ बुधैः॥")

ब्रह्मचारिणी, स्त्री, (ब्रह्मणा वेदेन चरति आचरतीति। ब्रह्म+चर+ताच्छील्ये णिन्+स्त्रियां ङीप्।) भार्गी। इति रत्नमाला॥

ब्रह्मचारिणी, स्त्री, (ब्रह्मणि वेदे चरतीति, ब्रह्म+चर+णिनिः। स्त्रियां ङीप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी॥"

करुणीवृक्षः। इति राजनिर्घण्टः॥ ब्राह्मीशाकः। इति रत्नमाला॥ ब्रह्मचर्य्यव्रतधारिणी। यथा,

"आसीतामरणात् क्षान्ता नियता ब्रह्म-चारिणी।
यो धर्म्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥"
इति मनुः। ५। १५८॥

ब्रह्मचारी, [न्] पुं, (ब्रह्म वेदं तपो वा आच-रति अर्ज्जयतीत्यर्थः। ब्रह्म+चर+आवश्यके णिनिः।) प्रथमाश्रमी। इति भरतः॥ उपनयनानन्तरं नियमं कृत्वा गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति यः। स द्विविधः। उपकुर्व्वाणः नैष्ठिकश्च। तस्य नियमा यथा,—

"यदस्य विहितं चर्म्म यत्सूत्रं या च मेखला।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि॥
सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन्।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥
नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्।
देवताभ्यर्च्चनञ्चैव समिदाधानमेव च॥
वर्ज्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥
अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम्।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च॥
एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्।
कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्।
आहरेद्यावदर्थानि भैक्ष्यञ्चाहरहश्चरेत्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्ष्यं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥
सर्व्वं वापि चरेद्ग्रामं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत्॥
दूरादाहृत्य समिधः सन्निदध्याद्विहायसि।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः॥
अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत्॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥
व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत्।
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते॥
ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः।
राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते॥
चोदितो गुरुणा नित्यमप्रचोदित एव वा।
कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च॥
शरीरञ्चैव वाचञ्च बुद्धीन्द्रियमनांसि च।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम्॥
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंवृतः।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः॥
हीनान्नवस्त्रवेशः स्यात् सर्व्वदा गुरुसन्निधौ।
उत्तिष्ठेत् प्रथमं चास्य चरमञ्चैव संविशेत्॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः॥
आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः॥
पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥
नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्॥
नोदाहरेदस्य नाम परोक्षमपि केवलम्।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम्॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥
परीवादात् खरो भवति श्वा वै भवति निन्दकः।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत्॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह।
असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्॥
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु।
प्रतिषेधत्सु चाधर्म्माद्धितञ्चोपदिशत्स्वपि॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत्।
गुरुपुत्त्रेषु चार्य्येषु गुरोश्चैव स्वबन्धुषु॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति॥
उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्य्याद्गुरुपुत्त्रस्य पादयोश्चावनेजनम्॥
गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता॥
स्वभाव एष नारीणां नराणामिह दूषणम्।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः॥
अविद्वांसमलं लोके विद्वांसमपि वा पुनः।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम्॥
मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥
कामन्तु गुरुपत्नीनां युवतीनां युवा भुवि।
विधिवद्वन्दनं कुर्य्यादसावहमिति ब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखा-
जटः।
नैनं ग्रामेऽभिनिम्लोचेत् सूर्यो नाभ्युदियात्
क्वचित्॥
तं चेदभ्युदियात् सूर्यः शयानं कामचारतः।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम्॥
सूर्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः।
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा॥
आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः।
शुचौ देशे जपन् जप्यमुपासीत यथाविधि॥"
इति मानवे। २। १७४-२२२॥

अपि च। श्रीविष्णुरुवाच।
"बालः कृतोपनयनो वेदाहरणतत्परः।
गुरुगेहे वसेद्भूप! ब्रह्मचारी समाहितः॥
शौचाचारवता तत्र कार्यं शुश्रूषणं गुरोः।
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना॥
उभे सन्ध्ये रविं भूप! तथैवाग्निं समाहितः।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरप्यभिवादनम्॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति।
शिष्यो गुरौ नृपश्रेष्ठ! प्रतिकूलं न सञ्चरेत्॥
तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः॥
अवगाहेदपः पूर्व्वमाचार्य्येणावगाहिताः।
समिज्जलादिकञ्चास्य कल्यं कल्यमुपानयेत्॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै।
गार्हस्थ्यमाविशेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः॥"
इति विष्णुपुराणे। ३। ९। १-७॥

अपि च। गारुडे ४९ अध्याये।
"भिक्षाचर्य्याथ शुश्रूषा गुरोः स्वाध्याय एव च।
सन्ध्याकर्म्माग्निकार्य्यञ्च धर्म्मोऽयं ब्रह्मचारिणः॥"
स तु द्विविधः। यथा, कौर्म्मे २ अध्याये।
"ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः।
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्॥
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः॥"
(तन्त्रविशेषः। यथा महाभारते। १। १२३। ४४।
"ब्रह्मचारी बहुगुणः शुभचर्येति विश्रुतः।
विभाण्डकश्चैव सुवर्णश्च महायशाः॥")

ब्रह्मजज्ञः, पुं, (ब्रह्मणो जायते इति ब्रह्मजः।
ब्रह्म+जन्+डः। जानातीति ज्ञः। ज्ञा+कः।
...ततः कर्म्मधारयः।) सर्व्वज्ञत्वेनाभिमानि-
विराट्। स च हिरण्यगर्भाज्जातः सर्व्वज्ञः।
यथा, कठोपनिषदि। १। १७।
"त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत् तरति जन्ममृत्यू।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति॥"
इत्यस्य कर्म्मप्रतिपादनपरस्य विवेकिनः। त्रिणा-
चिकेतः त्रिःकृत्वो नाचिकेतोऽग्निः चितो येन स
त्रिणाचिकेतः तद्विज्ञानतदध्ययनतदनुष्ठानवान्
वा। त्रिभिर्मातृपितृगुरुभिरेत्य सन्धिं
सम्बन्धं मात्राद्यनुशासनं यथावत् प्राप्येत्येतत्।
मातृ मातापित्रादिभ्यः प्रमाणं
यथा मातृमातृपित्रादेः। वेदस्मृतिशिष्टेभ्यो
वा प्रमाणानुग्राहकत्वेन तेभ्यो हि विशुद्धिः
प्रख्याता। त्रिकर्म्मकृत् इज्याध्ययनदानानां कर्त्ता
तरति अतिक्रामति जन्म च मृत्युञ्च जन्ममृत्यू।
किञ्च ब्रह्मजज्ञमिति। ब्रह्मजं ब्रह्मणो
हिरण्यगर्भाज्जातो ब्रह्मजः ब्रह्मजश्चासौ
ज्ञश्चेति ब्रह्मजज्ञः सर्व्वज्ञो ह्यसौ तं देवं द्योतन-
ज्ञानादिगुणवन्तं ईड्यं स्तुत्यं विदित्वा शास्त्रतः
निचाय्य दृष्ट्वा च आत्मभावेन इमां स्वबुद्धि-
प्रत्यक्षां शान्तिं उपरतिं अत्यन्तमेति अतिशये-
नैति वैराजं पदं ज्ञानकर्म्मसमुच्चयानुष्ठानेन
प्राप्नोतीत्यर्थः। इति शङ्कराचार्य्यकृतभाष्यम्॥

ब्रह्मजटा, स्त्री, (ब्रह्मणो जटेव संज्ञाऽस्याः।)
दमनकवृक्षः। इति राजनिर्घण्टः॥

ब्रह्मजीवी, [न्] पुं, (ब्रह्मणा वेदेन वेदोक्त-
याजनादिकर्म्मणा इत्यर्थः जीवतीति। ब्रह्म+
जीव्+णिनिः।) द्विजकार्य्येषु मूल्येन परि-
चारकः। यथा। अनृतवाक् तस्करो राजभृत्यो
...दोऽपि...
...ब्रह्मोपजीवी ग्रामयाजकः गूढोपाध्यायो
वृषलीपतिर्भार्य्याजितो मद्योपजीवी पतित-
सेवाजीवी चिकित्सको देवलकः पुरोहितः
कितवो मद्यपः कूटकारकोऽपत्यविक्रयी मनुष्य-
पशुविक्रेता चेति तान् वर्ज्जयेत् यद्येते स्युः
ब्राह्मणाधमास्तथा धर्म्मपत्नीषु चतुर्थकाला-
हाराः सम्वत्सरं विमलतुषमन्त्रैर्युक्तास्त्री
ईश्वरपिहितमेषं तथान्येऽपि वर्ज्ज्याः।
इति मिताक्षरायां प्रायश्चित्ताध्याये प्रचेतसो
वचनम्॥

ब्रह्मज्ञः, पुं, (ब्रह्म जानातीति। ब्रह्म+ज्ञा+कः।)
श्रीगोपालः। यथा,—
"वासुदेवो वासुदेवो वासुदेवो वासुदेव-
रूपकः।
ब्रह्मज्ञो ब्रह्मकृत् ब्रह्मा ब्रह्मकर्म्मप्रकाशकः॥"
इति नारदपञ्चरात्रे गोपालसहस्रनामस्तोत्रे ८
अध्यायः॥
(विष्णुः। यथा महाभारते। १३। १४९। ८३।
"ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः॥"
कार्त्तिकेयः। यथा, महाभारते। ३। २३१। ११।
"ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविच्च
ब्रह्मेशयो ब्रह्मवतां वरिष्ठः।
ब्रह्मप्रियो ब्राह्मणसर्व्वमन्त्री त्वं
ब्रह्मणां ब्राह्मणानाञ्च नेता॥")

ब्रह्मज्ञ, त्रि, (ब्रह्म जानातीति। ब्रह्म+ज्ञा+कः।)
ब्रह्मवेत्ता। यथा,—
"न ब्रह्मज्ञः स वेदज्ञः सोऽपि देवो न दैविकः।
योऽभ्यासकाले वेदार्थं परिज्ञाता भवेन्नरः॥"
इति बौधायनवचनसिद्धिः॥

ब्रह्मज्ञानं, क्ली, (ब्रह्मणि ब्रह्मविषये ज्ञानम्।)
ब्रह्मविषयकज्ञानम्। इति शब्दार्थचिन्तामणिः॥ ॥
तत्त्वमस्यादिवाक्यजनितनिर्व्विकल्पकज्ञानम्। इति वेदान्तपरिभाषा॥ "निष्प्रा-
माण्यकवित्तिर्यक्षितम्बस्माल्लभिन्नाभिन्नज्ञानम्॥"
इति स्मृतिसारः॥ ॥ "अविद्याकर्म्मविपाकाद्य-
निवर्त्तकहिरण्यगर्भविषयकं ज्ञानम्॥" इति
वैशम्पायनपातञ्जलमतम्॥ ॥ "प्रकृतिपुरु-
षयोर्व्विवेकविषयज्ञानम्॥" इति तस्यैव सांख्य-
मतम्॥ तथा च।
सूत उवाच।
"वेदान्तार्थस्य सिद्धान्तमर्थज्ञानं वदाम्यहम्॥
अहं ब्रह्म परं ज्योतिर्विष्णुरित्येव चिन्तयेत्।
सर्व्वं सूक्ष्मोऽग्निर्यथा च ज्योतिरेकं त्रिधा
स्थितम्॥
यथा नाग्निः शरीरस्थो गन्धं न कुरुते बलम्।
निर्व्वितं कर्म्मसंयुक्तं दग्धं नात्मा महाबलम्॥
तथा विष्णुः शरीरस्थो न करोति हितं शुभम्।
विनाशश्च यथा देवः सर्व्वगः परमेश्वरः॥
आनन्दरूपमद्वैतमात्मकं ज्ञानमव्ययम्।
आत्मदृष्टिगतव्याधि ज्ञानं ज्ञानः परं मतम्॥
ज्ञातुमिच्छति द्वन्द्वादीन् रागद्वेषोऽपि जायते।
लोभो मोहः क्रोध एतैर्युक्तः पापं समाचरेत्॥
हस्ताद्युपस्थमुदरं वाक् चक्षुर्नी चतुष्टयम्।
एतत् सुसंयतं यस्य स विप्रः कथ्यते बुधैः॥
परवित्तं न गृह्णाति हिंसां न कुरुते तथा।
नाक्रोशकारको यस्तु तस्य हस्तौ सुसंयतौ॥
परस्त्रीषु कलत्रस्थोऽपि यस्तूपस्थं सुसंयतम्॥
अलोलुपो मितं भुङ्क्ते जठरं तस्य संयतम्॥
सत्यं हितं मितं ब्रूते यः सदा तस्य वाग् यता।
यस्य संयतान्येतानि तस्य किं तपसाध्वरैः॥
एवं सद्बुद्धिमान् भूत्वा इन्द्रियासक्त धर्म्मदा।
विश्वेश्वरे परे देवे ध्यानमेतत् प्रकीर्त्तितम्॥
भुवोर्मध्ये स्थितो बुद्धिं विषयेषु करोति यः।
जीवो ज्ञानदशायामेव समाहूय विवर्जितः॥
इन्द्रियाणामुपरमे मनसि स्थापयित्वा।
तस्मात् पापरतो जीवो बाह्यानाभ्यन्तरात् च॥
हृदि स्थितः न तृप्ता शोषितो न करोति।
यदा यश्च कृतो येन हृद्यभिहितं कथ्यते॥
आत्मनो यस्य यो नारीं भीतो न भयतस्तथा।
उपद्रवं न जानाति द्वन्द्वादिविषयात् यतो॥
इन्द्रियाणि समाहृत्य विषयेभ्यो समस्तथा।
सुखदुःखद्वयोरपि च समता बुद्धिरेव च॥
संकल्प एतानि यानि विज्ञाय देहं स्थितः।
सत्त्वरजस्तमोवाक्यसमाक्रान्तं प्रकाशकम्॥
चिद्रूपमन्तं शुद्धं निर्व्विशेषं मायया स्थितम्।
तुरीयावस्थाज्ञानमाविर्भावोऽपि न संशयः॥
द्वन्द्वादयो गुणाः सर्व्वे मनसाद्याः गुणाश्रयाः।
दुःखबन्ध यद्धेतुः समाधयो च नास्ति हि॥
आत्मापि मुक्तः सुखदुःखस्वरूपकर्त्ता।
कर्त्ता बद्धो जीवो देवे विद्यते न हि॥
दुर्व्वृत्तं संचरन्त्य प्रभवेत् दुःखमवाप्य।
यदा यानि तदा जीवो ज्ञानं ज्ञानं न संशयः॥
शरीरं चतुर्भोगः कर्मे पूर्व्वे कथयामि च।
विमलं निरञ्जनं शान्तं सूक्ष्मं परम्।
कर्म्मकर्त्तैव जीवेन योऽहं वै हि इति भावात्॥

प्राणायामो जपश्चैव प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येते षड् योगस्य प्रसाधकाः ॥
नापस्त्यो ईश्वराणां प्रीतिरिन्द्रियसंयमः ।
मनसः स्थिरता तेनस्तत्त्वालोकश्च सर्वदा ॥
गायत्र्या प्रणवेनाथ मात्रया प्राणसंयमः ।
जपध्यानयुतो गर्भस्तेन हीनस्त्वगर्भकः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठश्चतुर्विंशतिमात्रिकः ।
मध्यो द्वादशमात्रस्तु ॐकारं सततं जपेत् ॥
श्रुत्वा यथाक्षरं सम्यक् शब्दं यौयाति संसृतौ ।
प्रणवे च स्थिते ब्रह्म परं ब्रह्म न संशयः ॥
धारके प्रणवे सर्वे परं ब्रह्म प्रवीयते ।
व्याहृतस्य जपो गायत्री द्वादशाक्षरा ॥
सर्वेषामिन्द्रियाणान्तु प्रवृत्तिर्विषयेषु या ।
निवृत्तिर्मनसा तस्याः प्रत्याहारः प्रकीर्तितः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः समाहृत्य स्थितो हि यः ।
मनसा सह बुद्ध्या च प्रत्याहारेषु संस्थितः ॥
प्राणायामैर्द्वादशभिर्यावत् कालकृतो भवेत् ।
यस्तावत् कालपर्यन्तं मनो ब्रह्मणि धारयेत् ॥
तदेव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
तुष्टे तु नियतो युक्तः समाधिः सोऽभिधीयते ॥
ध्यायन्न चलते यस्य मनोऽभिध्यायते भ्रमम् ।
ध्यानावधिकृतं कालं यावत् सा धारणा स्थिता ।
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्तितम् ॥
ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तद् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्वत्र ध्येयस्तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥
मनः संकल्परहितमिन्द्रियार्थांस्तु चिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्तितः ॥
चित्तस्यास्थिरता भ्रान्तिर्दौर्मनस्यं प्रमादता ।
योगिनो कथिता दोषा योगविघ्नप्रवर्त्तकाः ॥
स्थिरत्वं मनसः यत्नं स्थूलरूपं विचिन्तयेत् ।
तद्वत् निश्चलीभूतं सूक्ष्मे स्थिरतां व्रजेत् ॥
न विना परमात्मानं किञ्चिच्छक्नोति विद्यते ।
विश्वरूपं तमेवेह इति ज्ञात्वा च मुच्यति ॥
ॐकारं परमं ब्रह्म ध्यायेदव्यक्तं विभुम् ।
योगवैकल्परहितं सर्वकारणवर्जितम् ॥
हरिं संचिन्तयेत् पूर्वं प्रधानं तस्य चोपरि ।
ततो द्वयसमा वर्णं मण्डलत्रितयं क्रमात् ॥
तन्मध्यस्थापितं तस्मिन् पुरुषं जीवसंज्ञितम् ।
तस्योपरि तु केशवं तत्पदं परोक्षकम् ॥
ध्यानन्तु कथितं तत्र विज्ञानं वैभवं ज्ञानम् ।
वैराग्यं ज्ञानं तद्वत्तौ वैष्णवो धर्म उत्तमः ॥
कर्णिकायां स्थितं शुद्धं जीवसंस्थितं विभुम् ।
ध्यायेदुरसि संयुक्तमोङ्कारं मुक्तिदायकम् ॥
कलात्रयं च पुरुषाद्यो मात्राः प्रकीर्तिताः ।
अर्द्धमात्रा परं ब्रह्म ध्येयो ध्यानविदुत्तमैः ॥
ध्यायन् यदि म्रियेत् साक्षात् याति ब्रह्मपद-
मक्षयम् ।
हरिं संस्थाप्य हृत्पद्मे ध्यायन् योगी च
मुक्तिभाक् ।
आत्मानमात्मना किञ्चित् पश्यन्ति ध्यानचक्षुषः ।
सांख्ययुक्त्या तथैवान्ये योगेनान्ये तु योगिनः ॥
ब्रह्मप्रकाशकं ज्ञानं भवबन्धविभेदकम् ।
तमेकचित्ततायोगो मुक्तिदो नात्र संशयः ॥
जितेन्द्रियान्तःकरणो ज्ञानदक्षो हि यो भवेत् ।
स मुक्तः कथ्यते योगी परमात्मन्यवस्थितः ॥
आसनस्थानविधयो न योगस्य प्रसाधकाः ।
विलम्बजनकाः सर्वे विस्तराः परिकीर्तिताः ॥
शिशुपालः सिद्धिमाप्तः स्मरणाभ्यासगौरवात् ।
आपन्नाः सर्व एवेह पूर्वराज्ये परे तथा ॥
योगाभ्यासं प्रकुर्वन्तः पश्यन्त्यात्मानमात्मना ।
धर्मभूतेषु कारुण्यं विद्वेषं विषयेषु च ॥
गुरुभिन्नोदरादेव क्रमेण योगी विशुध्यति ।
इन्द्रियैरिन्द्रियार्थांस्तु न जानाति नरो यदा ॥
तावत् स ब्रह्मसंलीनो योगयुक्तस्तदा भवेत् ॥
सर्वे वर्णाः स्त्रियः सर्वाः हत्वा पापानि
भक्तितः ।
ध्यानाग्निनाशिताः सन्तो लभन्ते परमां गतिम् ।
भगवान् दृश्यते चाविकाङ्क्षस्तु ध्यानेन वै हरिः ॥
ब्रह्मात्मनोरेकत्वं स योगश्चोत्तमोत्तमः ॥
बाह्योपायैर्मुक्तिर्न नान्तःस्थैः स्वाध्यायादिभिः ।
सांख्यमार्गेण योगेन वेदान्तश्रवणेन च ।
ब्रह्मचैतन्यात्मनो या हि सा मुक्तिरभिधीयते ॥
घटाकाशमठाकाशमहत् सत्तुल्यता ।
दुःखाभावे तथा जीवात्मा विद्याविना-
शिनी ॥"

इति गारुडे ब्रह्मज्ञाने २४० अध्यायः ॥

ब्रह्मज्ञानी, त्रि, (ब्रह्मज्ञानं विद्यतेऽस्य । ब्रह्म-ज्ञान + इन् ।) ब्रह्मज्ञानविशिष्टः । यथा,—
"कुशलाकुशलातिरहितः धर्मदर्शकः ।
निष्प्रत्यूहपरित्यागी ब्रह्मज्ञानी निगद्यते ॥"

इति ब्रह्मानन्ददीपिका ॥

तेनापि सत्यभक्तिः कर्त्तव्या । यथा,—
ब्रह्मानन्देन पूर्णोऽहं तेनानन्देन पूर्णधीः ।
तथापि शून्यमात्मानं मन्ये त्वद्रतिं विना ॥"
इति पाद्मे पातालखण्डे जाबालिं प्रति ब्रह्मविद्यावचनम् ॥

ब्रह्मण्यः, पुं, (ब्रह्मणि हितः । ब्रह्मन् + "खलयवमाषतिलवृषब्रह्मणश्च ।" ५ । १ । ७ । इति यत् । "ये चाभावकर्म्मणोः ।" ६ । ४ । १६८ । इति प्रकृतिभावः ।) विष्णुः । यथा, महाभारते १३ । १४९ । ८१ ।
"ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥"
अपि च ।
"ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥"

इत्याह्निकचन्द्रिका ॥

ब्रह्मदारुः । इत्यमरः । २ । ४ । ४१ । तूद-वृक्षः । तूलवृक्षः । इति राजनिर्घण्टः ॥ ब्रह्मेश्वरः । (स्त्री । दुर्गा । यथा महाभारते ६ । २३ । २१ ।
"वेदश्रुतिमहापुण्ये ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ॥")
ब्रह्मणि साधौ त्रि । इति मेदिनी । ये, ८१ ॥

ब्रह्मण्यदेवः, पुं, (ब्रह्मण्यो देवः ।) श्रीकृष्णः । यथा,—
"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥"

इति नारदीयपुराणम् ॥

(यथा च भागवते । ४ । २१ । ३० ।
"ब्रह्मण्यदेवः पुरुषः पुरातनो
नित्यं हरिर्यच्चरणाभिवन्दनात् ॥")

ब्रह्मतालः, पुं, चतुर्मुखतालः । स तु, दशतालात्मकः । तत्र ७ मात्राः । मात्रा तु, क च ट त प इति पञ्चाक्षरोच्चारणकालः । वेदचतुर्भागः । तदर्द्धं द्रुतमात्रा । तदर्द्धे लघवः ६ द्रुताः । ० । ०० । ००० । यथा,—
"चतुर्मुखाभिधे ताले आघातस्त्वन्तरं द्रुतः ।"

इति सङ्गीतदामोदरः ॥

ब्रह्मतीर्थं, क्ली, (ब्रह्मणस्तीर्थम् ।) पुष्करक्षेत्रम् । इति राजनिर्घण्टः ॥ पुष्करतीर्थे । (तत्र स्नानफलम् । यथा, महाभारते । ३ । ८२ । १०५ ।
"ततो गच्छेत राजेन्द्र ! ब्रह्मणस्तीर्थमुत्तमम् ।
तत्र वर्णावरः स्नात्वा ब्राह्मण्यं लभते नरः ।
ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम् ॥")

ब्रह्मत्वं, क्ली, ब्रह्मणो भावः । ("ब्रह्मत्वा ।" ५ । १ । १३६ । इति त्वः ।) तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मसायुज्यम् ३ । इत्यमरः । २ । ७ । ५२ । ब्रह्मसायुज्यम् ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ५७ । ६० ।
"ब्रह्मत्वममरेशत्वं ऐश्वर्यं भवतस्तथा ॥")

ब्रह्मदण्डः, पुं, (ब्रह्मणो ब्राह्मणस्य दण्डः नियन्ता ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥ वशिष्ठस्य निग्रहयष्टिः । यथा,—
"धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ।
एकेन ब्रह्मदण्डेन बहवो नाशिता मम ॥"

इति रामायणे विश्वामित्रवाक्यम् ॥

(ब्रह्मणो ब्राह्मणस्य शापरूपो दण्डः ।) ब्रह्मशापः । यथा,—
"ब्रह्मदण्डहता ये च विद्युद्भिर्निहताश्च ये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥"

इति तिथ्यादितत्त्वम् ॥

(अयं हि राजधर्म्मे प्रभुशासनोपायः । यदुक्तं महाभारते । २ । ५ । १२६ ।
"कच्चिदङ्गानि धर्म्माणि ब्रह्मदण्डस्य तैजस ! ।
विधोयमानाः सर्वे विदिताः प्रभुणा त्वया ॥")

ब्रह्मदण्डी, स्त्री, (ब्रह्मणि ब्रह्मोपासनाय दण्डीभूतो दण्डः ।) क्षुपविशेषः । तत्पर्य्यायः । अजदण्डी २ कण्टकपत्रा ३ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कफशोथवातविनाशित्वम् ।

इति राजनिर्घण्टः ॥ (यथा गारुडे १८६ अध्याये ।
"ब्रह्मदण्डी तु कुष्ठेन सर्व्वे मासे यथोदिता ॥")
ब्रह्मदत्तः, पुं, इक्ष्वाकुवंशीयराजविशेषः । तत्पर्य्यायः । ब्रह्मचन्द्रः २ । इति हेमचन्द्रः । ३ । ३५८ ॥ (यथा महाभारते । २ । ८ । २० ।
"ब्रह्मदत्तस्त्रिशतञ्च राजोपरिचरस्तथा ॥"
कृष्णामध्यातो नीपपुत्रः । यथा, भागवते । ९ । २१ । २५ ।
"पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ।
स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥"
ब्रह्मणा दत्त इति विग्रहे वाच्यलिङ्गः । यथा, रामायणे । १ । १८ । १८ ।
"धर्म्मोऽयं दक्षवचसे ब्रह्मदत्ताः सुतिमत्ताः ।
दत्ता मह्यं महेन्द्रेण तुभ्यं वाच्यप्रयायकौ ॥")
ब्रह्मदर्भा, स्त्री, (ब्रह्मणि हितो दर्भो यस्याः ।) यमानिका । इत्यमरः । २ । ४ । १४६ ॥ (यथास्याः पर्य्यायः ।
"यमानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।
सैवोक्ता दीप्यका दीप्या तथा स्यादुग्रगन्धिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ब्रह्मदारु, क्ली, (ब्रह्मणो ब्राह्मणस्य हितकरो दारुः ।) ब्रह्मयज्ञतनत्याकारवृक्षविशेषः ॥ तत्पर्य्यायः । तूदः २ यूपः ३ क्रमुकः ४ ब्रह्मण्यः ५ तूतम् ६ । इत्यमरः । २ । ४ । ३६ ॥ ब्रह्मकाष्ठम् ७ । इति वाचस्पतिः ॥ तूलम् ८ । इति भरतः ॥ तूतः ९ पूषः १० । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,
"तूतः क्रमुकश्च यूपश्च क्रमुको ब्रह्मदारु च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ब्रह्मदेशः, पुं, (ब्रह्मा माजकवणो देशः ।) भेतघोविभागभाजनः ॥ इतिख्यातम् ॥
ब्रह्मनालं, क्ली, (ब्रह्मणो ब्रह्मलोकमार्गे नालमिव ।) काश्यां मणिकर्णिकायाः पूर्व्वभागे पितामहेश्वरलिङ्गस्याधस्तीर्थविशेषः यथा,—
"पितामहेश्वरं लिङ्गं ब्रह्मनालोपरिस्थितम् ।
पूर्व्वाभिमुखो यत्र ब्रह्मा ब्रह्मलोकमवाप्नुयात् ॥
ब्रह्मनालसमीपे तु यत् कर्म्म शुभाशुभम् ।
तदानन्त्यमिति शुभमेव तदाचरेत् ॥
अन्यत्रापि यत् कर्म्म कृतञ्च शुभाशुभम् ।
ब्रह्मतीर्थे न तत्रापि ब्रह्मणो सुविस्तरम् ॥
नाभिनालेऽपि प्रोक्तं ब्रह्मणोऽपि मम स्थितिः ।
अपि ब्रह्मलोकस्य नाभिरेषा शुभोदया ।
या मणिकर्णिकातीर्थे नाभिनालोपसंस्थिता ।
ब्रह्मनालोदकं यत्र पश्यामीति स्थितोदयम् ॥
ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तत्र स्नात्वा नरः सम्यक् कोटिजन्मकृतं हरेत् ॥
ब्रह्मनाले नरो देवान् पितॄंश्चैव प्रतर्प्य च ।
... ॥"
इति काशीखण्डे ... पितामहेश्वरादिमाहात्म्यं नाम ... ॥

ब्रह्मनिर्व्वाणं, क्ली, (ब्रह्मणि परमात्मनि निर्व्वाणं लयः ।) ब्रह्मणि निर्वृतिः । यथा, श्रीभगवद्गीतायाम् । २ । ७२ ।
"एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥"
ब्रह्मपत्रं, क्ली, (ब्रह्मवृक्षस्याख्यया प्रसिद्धस्य वृक्षस्य पत्रम् ।) पलाशपत्रम् । यथा,—
"भोजनं ब्रह्मपत्रेषु कुर्य्यादालोचनं हरेः ।
इदं व्रतं वैष्णवानां महापातकनाशनम् ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११८ अः ॥
ब्रह्मपर्णी, स्त्री, (ब्रह्मेव विस्तीर्णानि आमूलं स्थितानि पर्णानि यस्याः ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥
ब्रह्मपवित्रः, पुं, (ब्रह्मणि वेदोक्तकर्म्मणि पवित्रः ।) कुशः । इति राजनिर्घण्टः ॥
ब्रह्मपादपः, पुं, (ब्रह्मा तदाख्यया प्रसिद्धः पादपः ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥
ब्रह्मपुत्रः, पुं, विषभेदः । इत्यमरः । १ । ८ । १० ॥ तस्य लक्षणं यथा,—
"वर्णतः कपिलो यः स्यात्तथा भवति सारकः ।
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ॥"
इति भावप्रकाशः ॥
(पर्य्यायोऽस्य यथा,
"हालाहली गरलः पुण्ड्रो ब्रह्मनाभः प्रदीपनः ।
सौराष्ट्रिको ब्रह्मपुत्रो विषं स्याद्गरलो विषः ॥"
इति वैद्यकरत्नमालायाम् ॥
ब्रह्मणः पुत्रः । यथा । धर्म्मः । मरीच्यादिः । मनुः । यथा मार्कण्डेये । ९४ । ११ ।
"मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः ।
सुधामानो विरुद्धाश्च द्विःप्रकाराः सुराः
स्मृताः ॥"
नारदः । वशिष्ठः ।) क्षेत्रभेदः । नदभेदः ।
इति मेदिनी । रे, २८२ ॥ तस्य पर्य्यायः । अमोघानन्दनः २ लौहित्यः ३ लोहितः ४ । इति शब्दरत्नावली ॥ अस्य नदस्योत्पत्तिर्माहात्म्यं यथा,—
सगर उवाच ।
"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः ।
कथं प्राप्तश्च भाग्येन तीर्थं च कमलासनः ॥
पापस्यैतद्गुणो वा कथं मर्द्दे निरामयात् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ॥
और्व्व उवाच ।
शृणु त्वं नृपशार्द्दूल ! कथयामि सविस्तरम् ।
आख्यानं ब्रह्मपुत्रस्य लौहित्यस्य महात्मनः ॥
शन्तनुर्मुनिरासीत् प्राक् पुण्यकर्म्मा तपोधनः ।
तस्य भार्य्या महाभागा अमोघाख्या महासती ॥
विरराज महाभूमौ तुषारक्ष्मावधौ द्विजः ।
तपः कर्त्तुं च कैलासं... ।
लौहित्याख्यं सरःश्रेष्ठं ... ।
... ॥

आगाम यत्र मध्यन्तु विन्दुं सरुपलाद्रि च ।
तस्मिन्नवसरे ब्रह्मा धर्म्मलोकपितामहः ।
तपाश्रमाय प्रायाति अमोघा यत्र सा प्रिया ॥
तां दृष्ट्वा देवगर्भाभां द्रुतलीलितसुन्दरीम् ।
मोहितो मदवेगात्तु तथाभूद्विजितेन्द्रियः ॥
धरीरितेन्द्रियो भूत्वा विहस्तस्तां महासतीम् ।
अथाधावत्तदा ब्रह्मा स्मरार्त्तो मदमार्द्दितः ॥
धावमानं विधातारं दृष्ट्वामोघा महासती ।
नैव नैवमिति प्रोक्ता पर्णशालां समाविशत् ॥
इत्युवाच धातारममोघा कुपिता तदा ।
पर्णशालाभ्यन्तरगता द्वारमावृत्य तत्क्षणात् ॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।
बलात् प्रसह्य यद्यहं त्वया त्याज्यं प्रयाम्यहम् ॥
अमोघया चैवमुक्तो विधातुश्च तदा नृप ! ।
रेतश्चस्कन्द च तदेवाश्रमे शान्तनोर्मुनेः ॥
च्युते रेतसि धातापि हंसयानं समास्थितः ।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥
गते पितरि शान्तनुर्निजाश्रममागतः ।
आगत्य दृष्टः हंसानां पदचिह्नं तथा भुवि ॥
रेतश्च पतितं भूमौ विधातुर्ज्वलनोपमम् ।
अमोघां परिपप्रच्छ सर्व्वं शान्तनुरादितात् ॥
किमेतदत्र सुभगे ! प्रदृष्टं दृश्यते तु यत् ।
पदचिह्नं परं चैव मध्ये चैतद्दृश्यतेऽद्भुतम् ॥
सा तस्य वचनं श्रुत्वा शान्तनुं सुविस्तरम् ।
अमर्षितैव आगतसङ्कुला विलज्जिता ॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः ।
कामलुब्धो भोक्तुं रतिं मां समयाचत ॥
ततो मया भर्त्सितः स कुटीमाश्रितया ।
प्रयाच तेजः स यातो मया दहनमार्द्दितः ॥
कुरु यच्चोचितं वाच्यं यदि रक्षोऽसि शान्तनो ! ।
न हि मां धर्षितां योद्धं शक्नोतु सकोऽपि चेत्-
मत् ॥
स तस्या वचनं श्रुत्वा सद्यः ब्रह्मा समागतः ।
इति विदित्वा तस्याः तव ध्यानरतोऽभवत् ॥
हिमवानिव स ध्याने देवगर्भं समास्थितम् ।
सोऽपि विज्ञायेदमपि विधातुः कारणं मुनिः ।
धातोर्वेद्यं विज्ञाय अमोघां निजगृहमेत्य ।
इदं तेजो ब्रह्मणो विधात्रीषि ! महाद्भुतम् ।
विज्ञाय धर्म्मतस्तन्ते देवकार्यं विनिश्चितम् ॥
भवत्या विहितं धत्स्व ध्यानेन समाश्रितः ।
लोकानां च महात्मा ब्रह्मवर्त्तः स सर्व्वदा च ।
सुतो विधात्रीं तस्यां वर्त्तमर्हति सत्तमः ॥
तत् श्रुत्वा शान्तनोः प्रियममोघा पतिव्रता ।
शान्तनोरिव तं प्राह वीर्य्यं ब्रह्म महासती ॥
नान्यस्य तेजो धारयामि न देवे सिद्धयाचना ।
अस्मान् यदि कर्त्तव्यं नीता मे तस्य योजय च ।
तपस्विना वचः श्रुत्वा द्रुतं तस्य शान्तनुः ।
ततः शीघ्रं च स्वर्णमयं ... ।
... शान्तनुः ... ।
... ॥
तस्य काले तु ... ।
... ॥

रक्तमाल्याम्बरधरो रक्तगौरश्च महान् ।
चतुर्भुजः पद्मविद्याकरशक्तिपरश्वधः ।
शिशुमारशिरश्चास्य तुल्यकायो जलोत्करैः ॥
तं चानय तथाभूतं ब्रह्मकुण्डोदकाम्बुनः ।
चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत् ॥
कैलासाच्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्वे सम्बर्त्तकाह्वयः ॥
तेषां मध्ये स्वयं कुण्डं पर्वतानां विधेः सुतः ।
सलिलैर्वर्द्धयेन्नित्यं शरदीव निशाकरः ॥
तं लोहितसरः पुण्यमासाद्य दक्षिणः स्वयम् ।
क्रमतस्य संस्कारानकरोद्विधिसुदये ॥
अथ काले बहुतिथे गतेऽति ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण ववृधे पञ्चयोजनान् ॥
तावान् देशः पृथुः सम्यङ् मध्युरिन्तोय इव सागरे ।
ओतासमज्जने कुण्डे देवशाम्बरयो गतैः ॥
सप्तिश्रयमरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमनुर्वं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय सपितुर्वोपदेशतः ।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यामपानयत् ।
तीर्थं परशुना कृत्वा तस्य क्षामवतारयत् ॥
अपि च ।
ब्रह्मकुण्डात् ततः सोऽयं कासारे लोहिता-ह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि चरमतीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदमुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लोहितात् सरसो जातो लौहित्याख्यस्ततो-ऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां स ब्रह्मा ब्रह्मणः सुतः ।
पुनः मनसि लौहित्ये मत्वा वाद्यपोषणम् ॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥"
इति कालिकापुराणे ८२ । ८५ अध्यायः ॥
अन्यच्च ।
मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
पितृदेवोचिताः कालाः ... शिवतादिशि ॥
पुनर्वसौ बुधे जाते चैत्रे मासि सिताष्टमीम् ।
लौहित्ये विधिवत् स्नात्वा कर्मपाशैः प्रमुच्यते ॥
वाचस्पतौ यथा,—
"पृथिव्यां यानि तीर्थानि सरितः सागरादयः ।
तानि लौहित्यमायान्ति चैत्रे मासि सिताष्टमीम् ॥
ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ।
अमोघागर्भसम्भूत पापं लौहित्य मे हर ॥"
इति तिथ्यादितत्त्वधृतब्रह्मपुराणवचनम् ॥

ब्रह्मपुत्री, स्त्री, (ब्रह्मणः पुत्री कन्या ।) सरस्वती नदी । इति हेमचन्द्रः । ४ । १५१ ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥

ब्रह्मपुरी, स्त्री, (ब्रह्मणः पुरी ।) विधातृधाम । यथा । भूर्लोकान्तरीक्षस्वर्लोकादि महाजनो-तपःसत्यलोकदर्शनं च ब्रह्मपुरीनामकं त्रैलोक्यस्वरूपं मम हृदयमध्ये चाक्षि च सर्वमेकत्वमध्यवर्त्ति तेजश्च एकीभूतं ज्योतिरहमिति चिन्तयन् जपं कुर्य्यात् । इति गायत्रीव्याख्या ॥ काशी । यथा,—
"विद्याप्रबोधोदयजन्मभूमि-
र्वाराणसी ब्रह्मपुरी दुरत्यया ।"
इति प्रबोधचन्द्रोदयनाटकम् ॥

ब्रह्मबन्धुः, पुं, (ब्रह्मणो बन्धुरिव ।) अधिक्षेपः । निन्दितब्राह्मणः । निर्द्देशः । अधमब्राह्मणक-ब्राह्मणः । इत्यमरः । ३ । ४ । १०३ ॥ तथा हि । अधिक्षेपे निन्दायां गम्ये अधिक्षेप्यो ब्रह्मबन्धुः । यथा ब्रह्मबन्धो ! किमेतत्ते इति । अधिक्षिप्यते-ऽसौ अधिक्षेपोऽधिक्षेप्यः कर्म्मणि घञ् वा । ब्रह्मैव बन्धुरस्य नान्यः । ब्रह्मकर्म्माभावात् निन्दा अधिक्षेपे समासोऽभिधानात् । ब्रह्मबन्धुः निर्द्देशे यस्य देशनाम न स्फुटी स ब्रह्मबन्धुरिति निर्द्दि-श्यते इत्यर्थः । स्त्रियां ("ऊङुतः ।" ४ । १ । ६६ । इति ऊङ् ।) ब्रह्मबन्धूः । ब्रह्मबन्धुर्माध्यमजाति-विशेषे च । माध्यमजातिविशेषे निर्द्देशे ब्रह्म-बन्धुरधिक्षेपे इति गोपालितः । इति भरतः ॥ (यथा, मार्कण्डेये । ७५ । ६० ।
"ब्रह्मबन्धोः सुता न त्वं वाले ! नैव तपस्विनः ।
सुता त्वं मम यो देवात् कर्तुमस्मान् समुद्यतः ॥")
तस्य दैहिकधर्मविधौ । यथा, भागवते १ स्कन्धे ।
"वपनं द्रविणादानं स्थानान्निर्यापणं तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥"

ब्रह्मभूतिः, स्त्री, (ब्रह्मणो भूतिरुत्पत्तिरिव भूतिर्यस्याः ।) सन्ध्या । इति शब्दरत्नावली । (ब्रह्मणो भूतिरुत्पत्तिर्यस्याः इति विग्रहे वाच्यलिङ्गः ।)

ब्रह्मभूमिजा, स्त्री, (ब्रह्मभूमौ जायते या । ब्रह्म-भूमि+जन+ड । टाप्) सिंहली । इति राज-निर्घण्टः ॥

ब्रह्मभूयं, क्ली, (ब्रह्मणो भावः । ब्रह्म+भू+"भुवो भावे ।" ३ । १ । १०७ । इति क्यप् ।) ब्रह्मत्वम् । इत्यमरः । ३ । ७ । १२ । (यथा मनुः । १२ । १०२ ।
"वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥"
"अस्मिन्नेव लोके तिष्ठन् ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ।" इति तट्टीकायां कुल्लूकभट्टः ।) मोक्षः । यथा गीतायाम् । १४ । २६ ।
"माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥"
"ब्रह्मभूयाय ब्रह्मभावाय मोक्षाय कल्पते समर्थो भवति ।" इति तट्टीकायां स्वामी ॥)

ब्रह्ममूर्द्धभृत्, पुं, (ब्रह्मणो मूर्द्धभृत् शिरोधारी ।) शिवः । इति वटुकभैरवस्य ब्रह्मादिकृत-नामाष्टशतनाम ॥

ब्रह्ममेखलः, पुं, (ब्राह्मणो ब्रह्मचारी मेखला तद्भावः ।) मुञ्जः । इति केचित् ॥

ब्रह्मयज्ञः, पुं, (ब्रह्मणो ब्रह्मणे वा यज्ञः ।) विधिवद्वेदस्याध्ययनम् । शिष्याणामध्यापनञ्च । इत्यमरभरतौ । यथा, मनौ । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

ब्रह्मयष्टिः, स्त्री (ब्रह्मणो यष्टिरिव ।) भार्गी । इति शब्दरत्नावली । (वृक्षविशेषः । यथा, गारुडे १६७ अध्याये ।
"ब्रह्मयष्टिदलं पिष्टं पारिभद्र तिल वैदर्भः ।
तैल दृष्टं रक्तदोषः प्रणश्यति न संशयः ॥"
ब्रह्मणो ब्राह्मणस्य यष्टिर्गुरुः । विग्रहे ।)

ब्रह्मयोनिः, पुं, (ब्रह्मणो योनिरुत्पत्तिस्थानम् ।) ब्रह्मगिरिः । इति शब्दरत्नावली ॥ (ब्रह्मयोनि कारणमध्ययनम् । यथा मनुः । १० । ७४ ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट् कर्म्माणि यथाक्रमम् ॥"
"ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्माणि वक्ष्य-माणान्यध्ययनादीनि क्रमेण सम्यगनुतिष्ठेयुः ।" इति तट्टीकायां कुल्लूकभट्टः । अपरस्य ब्रह्मो योनिरुत्पत्तिकारणम् । यद्वा ब्रह्म यत् योनिः सर्व्वेषामुत्पत्तिकारणं ब्रह्म । यथा, मुण्डको-पनिषदि । ३ । १ । ३ ।
"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।"
तीर्थविशेषः । यथा महाभारते । ३ । ८३ । १३१ ।
"ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।
तत्र स्नात्वा नरव्याघ्र ! ब्रह्मलोकं प्रपद्यते ॥"
ब्रह्मा योनिरुत्पत्तिकारणं यस्य इति विग्रहे वाच्यलिङ्गः । यथा रघौ । २ । ६४ ।
"तथैव विद्यमानस्य गुरुणा ब्रह्मयोनिना ।
आहुवन्या चापि न रुषः कम्पते मे निरादरः ॥"
यथा च मार्कण्डेये । ८६ । १० ।
जगद्धात्रीमिदं देवो मातरीत्यभिहितः शुभाम् ।
लोके भवान् शिरसा ब्रह्मयोनिं चराचरीम् ॥")

ब्रह्मयोनी, स्त्री, (ब्रह्मा योनिरुत्पत्तिकारणं यस्याः । स्त्रियां पक्षे ङीप् ।) कुरुक्षेत्रे नरकतीर्थे पृथूदकनिकटे तीर्थविशेषः । तत्र ब्रह्मणा चत्वारो वर्णाः सृष्टाः । यथा,—
"सरस्वत्यास्तु तीरे यः संन्यसेदात्मनस्तनुम् ।
पृथूदके जप्यपरो नैनं श्वो मरणं स्पृशेत् ॥
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिताः ।
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ।
चातुर्वर्ण्यस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ।
तस्याभिध्यायतः सृष्टिं सर्व्वतो ब्रह्मव्यक्तः ॥

सुप्रभो नामया याता शम्भुर्भक्त्या चरिष्य-
त्यथा ।
कुरुक्षेत्रे ब्रह्मतीर्थः सङ्गतो गृहात्ततोऽभवत् ॥
चातुर्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुलोचनः ।
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम् ।
तत्र गत्वा मुक्तिकामः पुनर्योनिं न पश्यति ।"
इति वामनपुराणे ३८ अध्यायः ॥

ब्रह्मरन्ध्रं, क्ली, (ब्रह्मणः परमात्मनः अधिष्ठानाय रन्ध्रं आकाशः यद्वा, ब्रह्मणि ब्रह्मप्राप्तये रन्ध्रम् । यद्रन्ध्रेण प्राणोत्क्रमणे ब्रह्मलोकप्राप्तिरस्य तथात्वम् ।) उत्तमाङ्गम् । ब्रह्मतालु इति भाषा । यथा । "ॐ नमः ब्रह्मरन्ध्रे ।" इति तन्त्रसारः ॥ अपि च । ब्रह्मरन्ध्रसरसीरुहोदरे इत्यादि गुरुपादुकास्तोत्रम् ॥ (यथा च हठयोगप्रदीपिकायाम् । ४ । १६ ।
"यस्मिन् सुषुम्णामध्ये शक्ता वायुश्च मध्यगम् ।
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रं निरोधयेत् ॥")

ब्रह्मराक्षः, पुं, (राक्षेरयं राक्षः । ब्रह्मणो राक्षः ।) राक्षसमूर्तिः । इति श्रीधरस्वामी ॥ यथा,—
"ब्रह्मराक्ष यथारण्ये वासुदेवानुमोदिताः ।
अविश्रान्तो यमुनोपि स्वयशान् भावयन्प्रियाः ॥"
इति श्रीभागवते । १० । ८९ । ६८ ॥

ब्रह्मरात्रिः, पुं, ब्राह्मणस्याश्रुतिः । इति हेमचन्द्रः ॥ सर्वज्ञानं राति ददाति यः । ब्रह्मणस्तान् राधातोर्नानीति निपातनसिद्धोऽयम् । इति तट्टीका ॥ ब्रह्मणो निशायां स्त्री । सा दैवयुगसहस्रेण भवति । इति पुराणम् ॥ (मनुष्यकालपरिमाणतो ब्रह्मणो रात्रिपरिमाणमुच्यते । निमेषादिक्रमेणकालो निमेषः । अष्टादशनिमेषास्तु काष्ठा । त्रिंशत् काष्ठास्तु कला । त्रिंशत् कलास्तु क्षणः । क्षणास्तु द्वादश मिलित्वा एको मुहूर्तः ।
"तास्तु त्रिंशत्क्षणे तु मुहूर्तो द्वादशा-
स्त्रियाम् ॥"
इत्यमरः । १ । ४ । ११ ॥
मनुमते तु त्रिंशत्कला मिलित्वा एको मुहूर्तः स्यात् यदुक्तं तत्रैव । १ । ६४ ।
"त्रिंशत्कला मुहूर्तः स्यादहोरात्रस्तु तावतः ।"
ते त्रिंशन्मुहूर्ता एकोऽहोरात्रः । अहोरात्रास्तु पञ्चदशसंख्यका एकः पक्षः । पक्षस्तु शुक्लकृष्णभेदात् द्विविधः । ताभ्यामुभाभ्यां पक्षाभ्यां मासः स्यात् । मासस्तु पित्र्ये रात्र्यहनी । अयनन्तु पितृमानेन षण्मासस्तु ऋतवः । षड्भिर्मासैरेकं भवेत् । अयनन्तु दक्षिणोत्तरभेदात् द्विविधम् । ताभ्यामयनाभ्यां वत्सरः स्यात् । वत्सरस्तु दैवे रात्र्यहनी । उत्तरायणं देवानामहः दक्षिणायनन्तु रात्रिः । मानुषाणां वत्सरादिकमनुसृत्य तद्दैवं युगं वेदत् । एवं दैवयुगसहस्रेण ब्रह्मणोऽहः दैवयुगसहस्रेण च रात्रिर्भवति । तथा च मनौ । १ । ७१ । कोकस्य दैवानां युगानुक्रमः ।
"चिन्तायां नाडिकाचतुर्युगसंख्यया ब्रह्माण-
कीर्तनात्मनामनुचतुर्युगेनैव दिव्ययुगानुमन्यमान् ।
तथा च विष्णुपुराणम् ।
"कृतं त्रेताद्वापरञ्च कलिश्चेति चतुर्युगम् ।
प्रोच्यते तत्सहस्रञ्च ब्रह्मणो दिवसो मुने ॥"
तथा च मनुः । १ । ६८-७१ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥
चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्तन्ते सहस्राणि शतानि च ॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः ॥"
"यद्देतदिति । एतस्य प्रोक्तस्यादौ यदेतन्मानुषं चतुर्युगं परिगणितं एतद्देवानां युगमुच्यते । चतुर्युगसहस्रेण सन्ध्यासन्ध्यांशयोरप्यभिप्रायाशाच्च एतद्द्वादशसाहस्रमिति स्यादौचित्य् । चतुर्युगैरेव द्वादशवर्षसहस्रैर्दिव्यं युगमिति तु मेधातिथिधर्मो नादर्तव्यः मनुनानन्तरं दिव्ययुगसहस्रेण ब्रह्माहस्याभिधानात् ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मराक्षसः, पुं, (आदौ ब्रह्मा ब्राह्मणः पश्चात् राक्षसः कुकर्मभिः राक्षसयोनिं गतः ।) भूतविशेषः । यथा,—
"संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥"
इति मानवे । १२ । ६० ॥
(स च यज्ञविनाशकारी भूतयोनिगतत्वात् । यथा, रामायणे । १ । ११ । २१ ।
"ब्रह्मोऽप्यनुसमं यज्ञो नाममन्त्रैश्च मयोदिता ।
मन्त्रैराबद्धमानैश्च आत्मरक्षितैश्च ।
छिद्रं हि अन्वेषयन्त यज्ञा ब्रह्मराक्षसाः ।")
ग्रहादिवत् गणविशेषः । यथा,—
"डाकिनीनां सुधानाञ्च वैतालानाञ्च विद्ययात् ।
भूतमातृपिशाचानां कूष्माण्डानां ब्रह्मराक्ष
साम् ॥"
इति श्रीभागवते षष्ठस्कन्धे ६१ अध्यायः ॥
पारिभाषिकब्रह्मराक्षसः । यथा,—
"नक्षं यो ब्रह्मवधे याति बधिर एव च ।
प्रतीयाथे न कथयति भवेद्ब्रह्मराक्षसः ॥"
इति अष्टादशस्मृतिः ॥

ब्रह्मरीतिः, स्त्री, (ब्रह्मणां रीतिः ।) पित्तलविशेषः । यथा, हेमचन्द्रः । ४ । ११४ ।
"पित्तलारीतिकापुत्रः कपिलोर्ध्वं सुवर्णकम् ।
रीती रीतिं च रीतिश्च पीतलोहं दुर्लोहकम् ।
ब्राह्मी तु राजी कपिला ब्रह्मरीतिर्महेश्वरी ॥"
राजरीतिः । इति राजनिर्घण्टः ॥ (तथाप्तम्
वर्णवाचकम् ।
"पित्तलाद्वारकूटं स्याद्दारो रीतिश्च कथ्यते ।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलापि च ॥"
इति वैद्यकरत्नमालायाम् ।
ब्रह्मणो मातृकस्य रीतिश्च ॥)

ब्रह्मर्षिः, पुं, (ब्रह्मा ब्राह्मणः ऋषिः । यद्वा, ब्रह्म वेदं परब्रह्म वा ऋषति वेत्ति इति । वसिष्ठादिमुनिगणः । इति हेमचन्द्रः ॥ (यथा, रामायणे । १ । ६३ । २०—२१ ।
"ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ।
यदि मे भगवानाह ततोऽहं विजितेन्द्रियः ॥"
तथा च महाभारते । १३ । १८ । ६० ।
"ततो वैश्रवणोऽध्यास्त वटारण्यमनिन्दितम् ।
विधिवत् कुशलं पृष्ट्वा ततो ब्रह्मर्षिसत्तमान् ॥")

ब्रह्मर्षिदेशः, पुं, (ब्रह्मर्षीणां देशः वासयोग्यस्थानम् ।) कुरुक्षेत्रादिदेशचतुष्टयम् । यथा,
"कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥"
इति मानवे । २ । १९-२० ॥

ब्रह्मलोकः, (ब्रह्मणो लोको भुवनम् ।) ब्रह्मणो भुवनम् । यथा,—
"सप्तमस्तु परमो लोको ह्यपुनर्भववासिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥"
इति देवीपुराणम् ॥
अपि च ।
"बहुयुग तपोलोकात् ब्रह्मलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥"
अस्य टीका । सत्यलोकापेक्षैव बहुयुगं द्वादशको कुम्भकेन तपोलोकात्सत्यं ब्रह्मलोकः । न तु तपोलोकात् बहुयुगमिति सत्यम् । तथाभ्यासवत्वादिपत्यो कुम्भस्य ब्रह्माण्डे तस्यावस्थानाभावात् । सत्यादिलोकयोरन्तः कोटिः स्युः पञ्चविंशतिरिति तत्वोक्तेः । सत्यलोक एव कल्पान्तेऽपि ब्रह्मविनाशात् परं वैकुण्ठलोकादि ज्ञेयम् । इत्थं भूतत्वादूर्ध्वं पञ्चदशपञ्चोत्तराणि योजनानि लोको भवति । ब्रह्मलोकादूर्ध्वं पञ्चदशकोटियोजनानि वैकुण्ठादीनाम् इति ज्ञेयम् । अपुनर्मारकाः पुनर्जन्मरहिताः । इति विष्णुपुराणे । २ खं । ७ अः ॥ (ब्रह्मैव लोकः । तुरीयब्रह्मपदम् । यदुक्तं सनत्सुजाते । १३ । ७ । १ । ११ ।
"एवं हि तस्य लोके वर्तते सर्व आत्मन् इत्यभिधायान्त्यानामपि भूतानि मायासमा मोहितानि । न तत्र सूर्यो भाति न चन्द्रतारकं ब्रह्मलोकः सर्वलोकोत्तमः । न तत्र सूर्यो भाति नक्षत्राणि । अत्र वै एतं विज्ञायाहं पतनात् । न तत्र विद्या विवादादिना । अत्र वै एतं विदुः विमुक्ताः परं ब्रह्मन्

कर्म्मदेवानामानन्दः ये कर्म्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्म्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं आजानदेवानामानन्दाः। स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं देवलोक आनन्दाः। स एको गन्धर्व्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं गन्धर्व्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं प्रजापतिलोक आनन्दाः। स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अतः ब्रह्मलोकः सम्राट्। शिवः यथा, महाभारते। १५। १०। १३२।
"निर्म्मायं श्राद्धमेव ब्रह्मलोकः परागतिः॥")

ब्रह्मवद्यं, क्ली, (ब्रह्म वेदस्तस्य वदनम्। "वद सुपि क्यप् च।" ३।१।१०६। इति भावे यत्।) ब्रह्मणो वाक्यम्। इति सुपद्मकरणे मुग्धबोधटीकायां दुर्गादासः॥

ब्रह्मवद्या, त्रि, (ब्रह्मणा वेदेन उद्यते या। "वदः सुपि क्यप् च।" ३।१।१०६। इति कर्म्मणि यत् स्त्रियां टाप्।) कथा। इति मुग्धबोधव्याकरणे व्याकरणम्॥

ब्रह्मवर्च्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्च्चः। "ब्रह्महस्तिभ्यां वर्च्चसः।" ५।४।७८। इति अच्।) ब्राह्मणस्य व्रताध्ययनर्द्धिः। इत्यमरः। २।७।४८। अस्य टीका। वेदाधिगमाचारस्य परिपालनं व्रतम्। व्रतसहकृतं गुरुमुखेन वेदाभ्यासोऽध्ययनम्। तयोर्व्रतानुपरिपालनजनितो य उपचयो ब्रह्मवर्च्चसं स्यात्। ब्रह्महस्तिभ्यामिति अच्। इति भरतः॥ तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्च्चसम्। इति जटाधरः॥ (तथा च मनुः। ४।९४।
"ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः।
प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्च्चसमेव च॥")

ब्रह्मवर्त्तः, पुं, (ब्रह्मणो ब्राह्मणानां वर्त्तः वर्त्तनं यस्मिन्।) ब्रह्मावर्त्तदेशः। इति शब्दरत्नावली। (सरस्वतीदृषद्वत्यो र्देवनद्यो र्मध्यगतोऽयं प्रदेशः॥)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्म अन्नं तस्य वर्द्धनं यस्मात्।) ताम्रम्। इति हेमचन्द्रः। ४। १०६॥

ब्रह्मवादः, पुं, (ब्रह्मणो वेदस्य वादो यत्र पठनमिति यावत्।) वेदपाठः। तत्पर्य्यायः। श्रुताध्ययनम् २। इति हारावली। २२१॥ (यथा भागवते। ३। १२। ४१।
"इतिहासपुराणानि ब्रह्मवादे सर्व्वं हरिः॥"
ब्रह्मणो ब्रह्मनिर्णयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्णयवादनम्। ब्रह्मवादो वेदपाठोऽस्त्यस्येति ब्रह्मवादिन्प्रतिपादिते। त्रि। यथा कथितेऽपि। ८। ३१।
"ब्रह्मणैकपादेन पुराणोऽयं हि गीयते॥")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति। ब्रह्मवाद + इनि।) वेदवक्ता। तत्पर्य्यायः। वेदान्ती २। इति जटाधरः॥ यथा, गीतायाम्। १७। २४।
"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥")

ब्रह्मवादिनी, स्त्री, गायत्री। यथा,—
"आयाहि वरदे देवि! त्र्यक्षरे ब्रह्मवादिनि!॥"
इत्यादि गायत्र्या आवाहनम्॥

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या।) ब्रह्मज्ञानम्। यथा,—
"आत्मायामपरः शान्तो ब्रह्मविद्यापरायणः।
स्वधर्म्मपालको नित्यं सोऽमृतत्वाय कल्पते॥"
इति कौर्म्मे ३ अध्यायः॥
(दुर्गा। यथा, महाभारते। ६। २३। २०।
"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति! दुर्गे कान्तारवासिनि!॥")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः।) वेदपाठे मुखनिःसृतविन्दुः। इति भरतः॥

ब्रह्मवृक्षः, पुं, (तदात्मना प्रसिद्धो वृक्षः। यद्वा, ब्रह्मणे वेदकर्म्मार्थं यो वृक्षः।) पलाशवृक्षः। इति हलायुधः॥ उडुम्बरः। इति रत्नमाला॥

ब्रह्मवृत्तिः, स्त्री, (ब्रह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः।) ब्राह्मणस्य जीवनोपायः। यथा,—
"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥"
इति श्रीभागवतम्॥

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम्।) ब्रह्मज्ञानम्। यथा,—
"प्राणायामः परं ब्रह्म परमात्मा चतुर्मुखः।
प्राणायामः परं विष्णोर्ब्रह्मवेदस्वरूपकम्॥"
इति गीतासारः॥

ब्रह्मवेदिः, स्त्री, (ब्रह्मणो वेदिरिव।) देशविशेषः। यथा,—
"ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्॥"
इति हेमचन्द्रः। ४। १६॥

ब्रह्मवैवर्त्तं, क्ली, (विवृतिरेव वैवर्त्तम्। स्वार्थे ष्यञ्। ब्रह्मणो वैवर्त्तं विवृतिर्यत्र विवृतिर्यत्र।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १। ५८।
"विवृतं ब्रह्म कार्त्स्न्येन कृष्णेन यत्र शौनक।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः॥")
अष्टादशमहापुराणान्तर्गतदशमपुराणम्। यथा,
"अष्टादशकमध्ये च ब्रह्मवैवर्त्तमीरितम्।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्ब्बुधाः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३३ अः॥

ब्रह्मशल्यः, पुं, (ब्रह्मेव शल्यं कण्टकमयभागो यस्य। अनिष्टप्रापकत्वात्तथात्वम्।) कौमवलः। इति रत्नमाला। बाबला इति भाषा॥

ब्रह्मसत्त्रं, क्ली, (ब्रह्मणः सत्त्रं नियमो यत्रैको वा यज्ञः।) ब्रह्मविषयकयज्ञम्। तत्पर्य्यायः। धर्म्मनिरूपणः २। इति शब्दरत्नावली। ब्रह्म व्याख्या। भगवदीयस्य पूर्व्वदर्शितश्लोके ब्रह्मादि

ब्रह्मसावित्रि, पुं। (ब्रह्मणो विधानः ब्राह्मणम्। वेदः। प्रतिपादितमेतत् ब्रह्मवादीवे। सर्व्वे १०१ अध्याये।)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता।) ब्रह्मसिद्धान्तप्रतिपादकपद्यग्रन्थविशेषः। यथा,—
"अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता।
छन्दोपनिषदां सारैः सञ्चिता ब्रह्मणोदिता॥"
इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे पञ्चमाध्यायस्य श्रीजीवगोस्वामिकृतटीका॥

ब्रह्मसम्भवः, पुं, द्विपृष्ठनामककृष्णविशेषः। इति हेमचन्द्रः॥

ब्रह्मसर्पः, पुं, (ब्रह्म इवात् सर्पः।) सर्पविशेषः। तत्पर्य्यायः। जलव्यालः २ अलगर्दः ३। इति त्रिकाण्डशेषः॥

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युक्। "सत्सूद्विषेति।" ३। २। ६१। क्विप्। ततः "हेत्र सहेति।" २। २। २८। इति बहुव्रीहिः। "वोपसर्ज्जनस्य।" ६। ३। ८२। इति सहस्य सः। ततः सयुजस्य भावः सायुज्यं। यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप्। ततो बहुव्रीहिस्ततः सयुजो भावः। ततः ब्रह्मणः सायुज्यं योजनम्।) ब्रह्मणो भावः। तत्पर्य्यायः। ब्रह्मभूयम् २ ब्रह्मत्वम् ३। इत्यमरः। २। ७। ५२। ब्रह्मसायुज्यम् ४। इति शब्दरत्नावली॥ (मुग्धबोधमतेऽस्य पुंस्त्वमपि दृश्यते।) ब्रह्मणो भवनं तादृश्यं ब्रह्मभूयं भुवः कर्म्मणि क्यप्। त्वम् भावे इति त्वे ब्रह्मत्वं। योजनं युक् तत्सहितः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विषयः। इति भरतः॥

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्रो सावर्णिः।) दशम मनुः। अस्मिन् मन्वन्तरे विश्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुवासनविरुद्धाद्या देवाः। हविष्मदादयः सप्तर्षयः। भूरिषेणाद्या मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्। ८। १३। २१-२४। अन्यच्च।
"ब्रह्मणाद्य दशमे ब्रह्मपुत्रस्य धीमतः।
सुवर्णा विरुद्धाश्च द्विशतास्तु स्मृताः।
शतसंख्या हि ते देवा भविष्यन्ति च वै द्विजाः।
तत्कालाधी शतं भावि तद्देवानां तथा बलम्॥
भवितारश्च भावी धर्म्मेन्द्रप्रमुखेश्वराः।
सप्तर्षयः हि निवोध त्वं ये भविष्यन्ति वै तदा॥
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वासिष्ठश्चैव सप्तमः॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणः प्रवीर्य्यवान्।
शतानीकोऽथ वृषभो अनमित्रो जयद्रथः।
भूरिद्युम्नः सुपर्णाश्च सप्तैते तनया मनोः॥"
इति ब्रह्मसावर्णिकम्॥
इति मार्कण्डेयपुराणे। ९४। ११-१६॥

ब्रह्मसूः, पुं, प्रद्युम्नः। इत्यमरः।१।१।२८॥ कामदेवः। इत्यमरमाला। अनिरुद्धपक्षे ब्रह्माणं सूतवान् ब्रह्मसूः। (सूङ प्रसवे। "सत्सूद्विषेति।" ३।२।६१। क्विप्।) कल्पान्तरे विष्णोरनिरुद्धमूर्त्तेर्नाभिकमलतो ब्रह्मा जातः। तथा च ब्रह्मपुराणम्। अनिरुद्धात्ततो ब्रह्मा तन्नाभि-कमलोद्भवः॥ कामदेवपक्षे। ब्रह्म तपः सुवति प्रेरयति ब्रह्मसूः। षूङ् प्रेरणे ("सत्सूद्विषेति" ३।२।६१ इति) क्विप्। इति भरतः। (कामदेव सर्वतपःसु प्रवर्त्तकस्य तथात्वम्॥)

ब्रह्मसूत्रं, क्ली, (ब्रह्मणि वेदपाठककाले उपनयनसमये इत्यर्थः धृतं यत् सूत्रम्।) यज्ञसूत्रम्। तत्पर्यायः। पवित्रम् २ यज्ञोपवीतम् ३ द्विजायनी ४। इति त्रिकाण्डशेषः। उपवीतम् ५ यावित्रम् ६ सावित्रीसूत्रम् ७। इति शब्द-रत्नावली। (यथा भागवते। ८।१८।१४।
"तस्योपनीयमानस्य सावित्रीं सविताब्रवीत्।
बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात्॥"
तदात्मप्रतिपादकं उपनिषद्वाक्यम्। ब्रह्मनिर्णय-सूत्रम्। यथा गीतायाम्।१३।४।
"ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥"
अस्य व्याख्याने श्रीधरस्वामिना यदुक्तं तदुच्यते।
"ऋषिभिर्वशिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराग्यादिसाधनत्वेन बहुधा गीतं निरूपितम्। विविधैर्विशिष्टैश्छन्दोभिर्नित्यनैमित्तिककाम्यकर्मादिविषयैर्ऋग्यजुःसामभिर्वेदैर्याज्ञिकोपयोगि-देवतारूपेण गीतं ब्रह्म; यतः यद्वेद यस्मात् सूत्राणि ब्रह्मसूत्राणि पदानि वा इत्यादीनि तदात्मप्रतिपादकानि पदं ब्राह्मणं ब्रह्मसूत्राणि तैरपि बहुधा गीतम्। किञ्च हेतुमद्भिः यद्वेव सोम्येदमग्र आसीत् कथमसतः सज्जायेत इति। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयातीत्यादि युक्तिमद्भिः। अथवा अथातो ब्रह्म जिज्ञासेत्यादिभिर्ब्रह्मसूत्रपदैः ब्रह्मसूत्रपदैर्वा चः कुर्यादिति युक्तिपद्योरर्थः। विनिश्चितैरसन्दिग्धार्थप्रतिपादकैः। तदेवमेतैर्विस्तरेणोक्तं दुःखं सुखं वेदनामात्रं मया पद्मसंक्षेपेण कथयिष्यामि तत् शृणु इत्यर्थः। यद्वा "अथातो ब्रह्मजिज्ञासा" इत्यादीनि ब्रह्मसूत्राणि यद्यपि तानि च ब्रह्म पदानि निर्णीतं इत्यादीनि पदानि तैर्हेतुमद्भिरेव-तैर्यां इत्थं आनन्दमयोऽभ्यासादित्यादि युक्तिमद्भिर्विनिश्चितार्थैः॥)

ब्रह्मस्थः, पुं, (ब्रह्मणः स्थः वृक्षः।) तूदवृक्षः। तूदविशेषः। तत्पर्यायः। ब्रह्मदारुः २। इति हेमचन्द्रः।४।२१०॥ (ब्रह्मणि ब्रह्मचारिणि च।)

ब्रह्मस्वं, क्ली, (ब्रह्मणो ब्राह्मणस्य स्वं धनम्।) ब्राह्मणसम्बन्धि धनम्। तस्य हरणे दोषो यथा,
"ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वापि यो हरेत्।
स हन्ता इति ज्ञेयो महापापी च भारते॥
अवश्येष्टं यदि कोऽपि याचितः प्राप्तं व्रतम्।
ततो भवेत् सुरापीतो सतः शूद्रवत् शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः॥

ब्रह्महत्या, स्त्री, ब्रह्मणो वधनम्॥ ("हनस्त च।"३।१।१०८। इति भावे क्यप् तकारोऽन्तादेशश्च। स्त्रीत्वं लोकात्।) ब्राह्मणवधः। यथा,
"एकदा च गुरोः कोपात् प्रकृतिरवहेलनात्।
ब्रह्महत्या अवभृतो बभूव शतक्रतुः॥"
तस्या रूपं यथा, —
"रक्तवस्त्रपरीधाना वृद्धा स्त्रीवेशधारिणी।
बभ्रुतानपृष्ठाद्या सा शुष्ककण्ठौष्ठतालुका॥
देहप्रमाणवदना महाभीतवत् भास्वरम्।
धावन्तं परितो यन्ती बलिता शतपेतनम्॥
खड्गहस्ता कृताञ्जलिं तं दृष्टाभीता च मूर्च्छितम्॥
दृष्टो इन्द्र च तां घोरां ध्यात्वं ध्यात्वं गुरोः पदम्॥
विवेश मानसंघटो ब्रह्मालयस्थवदनः।
तत्र गत्वा न मुक्ता सा ब्रह्मणः पापकारणात्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ४७ अः॥
आतिदेशिकब्रह्महत्या यथा,—
यम उवाच।
"शिलां च तदर्चायां यतस्त्री प्रकृत्यौ यथा।
शिवे च शिवलिङ्गे वा सूर्ये सूर्यमणौ यथा॥
गणेशे वा तदर्चायामेवं सर्वत्र सुन्दरि!।
यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत्तु सः॥
स्वगुरौ स्वेष्टदेवे च जन्मदातरि मातरि।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः॥
वैष्णवेष्वन्यभक्तेषु ब्राह्मणेष्वितरेषु च।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
हरेः पादोदकेष्वन्यदेवपादोदके तथा।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
यो नष्टो विष्णुनैवेद्ये चान्यनैवेद्यके तथा।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
सर्वेश्वरेश्वरे कृष्णे सर्वकारणकारणे।
सर्वाद्ये सर्वदेवानां सेव्ये सर्वान्तरात्मनि॥
मायया निजरूपे च ह्येक एव हि निर्गुणे।
करोत्यन्येन समतां ब्रह्महत्यां लभेत्तु सः॥
पितृदेवार्चने पौषादौ वेदविनिर्मितम्।
यः करोति निषेधञ्च ब्रह्महत्यां न विन्दति॥
ये निन्दन्ति हृषीकेशं तन्मन्त्रोपासकं तथा।
पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते॥
ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम्।
सर्वाद्यां शिवमव्यां च प्रवरां सर्वमङ्गलाम्॥
सर्वदेवीयमन्याञ्च सर्वाद्यां सर्वपावनाम्।
सर्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते॥
कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम्।
शिवरात्रिं तथा चैकादशीं वारं रवेस्तथा॥
पञ्च पर्वाणि पुण्यानि ये न कुर्वन्ति मानवाः।
लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः॥
अम्बुवाच्यां भूखननं जले शौचादिकञ्च ये।
कुर्वन्ति भारते सर्वे ब्रह्महत्यां लभन्ति ते॥
गुरुञ्च मातरं तातं साध्वीं भार्यां सुतं सुताम्।
अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत्तु सः॥
विवाहो यस्य न भवेत् न पश्यति सुतस्तु यः।
हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत्तु सः॥
हरेरनैवेद्यभोजी नित्यं विष्णुं न पूजयेत्।
पूज्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत्तु सः॥
अशौचान्नं यो भुङ्क्ते यो निषेधो च ब्राह्मणः।
पतितस्त्राविहीनश्च ब्रह्महत्यां लभेत्तु सः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।१०।१४३-१४५॥
तथा च मनुः।११।५५-५८।
"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥
अनृतञ्च समुत्कर्षे राजगामि च पैशुनम्।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया॥"
तथा च विष्णुमाहात्म्यसंबोधावस्थवचनम्।
"निद्राभङ्गः कथाच्छेदो दम्पत्योः प्रीतिभेदनम्।
शिशुमातृविभेदश्च ब्रह्महत्या समं स्मृतम्॥")
ब्रह्महत्याप्रायश्चित्तं प्रायश्चित्तशब्दे महापातक-प्रायश्चित्तप्रस्तावे द्रष्टव्यम्॥

ब्रह्महा, [न्] पुं, (ब्रह्माणं ब्राह्मणं हतवान्। ब्रह्मन्+हन्+"ब्रह्मभ्रूणवृत्रेषु क्विप्।" ३।२।८७। इति क्विप्।) ब्रह्मणः ब्राह्मणस्य हन्ता। यथा,—
"ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्।
भिक्षाशात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्॥
भिक्षार्थी विचरेद्ग्रामं वन्यैर्जीवेन्न कोशात्।
ब्रह्महत्यापनोदाय मितभुक् संयतेन्द्रियः॥
स सर्वस्वं वेदविदे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं गृहं वा सपरिच्छदम्॥"
इति प्रायश्चित्तविवेकः॥
तस्य नरकभोगान्ते जन्मानि यथा,—
"श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्।
चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति॥"
इति मानवे।१२।५५॥

ब्रह्महुतिः, [इ] स्त्री, (ब्रह्मैव हुतिर्दानमाहवनम्।) अतिथिपूजा। यथा,—
"ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥"
इति श्रीभगवद्गीतायाम्।४।२४॥

ब्रह्महूतं, क्ली, (ब्रह्मणि ब्राह्मणे हूयते दत्तम्। ब्राह्मणमुखे उपस्थापितं यद्धूयते इत्यर्थः।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः। स तु पूजा अतिथिपूजारूपः। इति मनुः॥

ब्रह्मा, [न्] पुं, (बृंहति वर्द्धते यः। बृंह वृद्धौ + "बृंहेर्नोऽच्च" उणा० ४।१४६। मनिन् नकारस्याकारश्च।) चतुर्मुखः। स च सृष्टि-स्थितिकर्त्ता। तत्र पद्मेऽस्य पुराणानां पुराणं ब्रह्माण्डं कुर्वाणः। ब्रह्माण्डस्थाण्डयोनिगर्भस्थितं विचित्रं ब्रह्माणं मन्त्रि रचयति ब्रह्मणं वा इव

मृगरोमजं वा कमण्डलुं वा मस्तकेन परिधृत्वा धारामविच्छिन्नरूपमाद्यं यथोक्ता अविच्छिन्नतः प्रभृति दक्षिणावर्त्तेन दक्षिणवृद्धं यथा कारयितामाभ्यन्तरे देवि पूर्वाभिमुखीं नारिधारां दत्त्वा तदुपरि प्राग्ग्रान् कुशानास्तीर्य पश्चिमाभिमुखोऽग्रभिदर्भाग्रे लिखेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामालोड्य कुशमेकं यथोक्ता प्रजापतिर्ऋषिर्विराट् छन्दोऽग्निर्देवता 'ब्रह्मशिरसे विनियोगः। ॐ निरस्तः परावसुः [illegible] दक्षिणपाणिमध्येऽपि प्रक्षिपेत्। तत अप उपस्पृश्य दक्षिणपादेन अन्यपादमवष्टभ्य उत्तराभिमुखोभूय न्यासोत्कृष्टान्विहिरण्मय प्रजापतिर्ऋषिर्विराट् छन्दोऽग्निर्देवता ब्रह्मोपवेशने विनियोगः ॐ आवसोः सदने सीद इति। काकचञ्चपक्षे तु आसन एव सीदामीति ब्रूयात् अनेन कुशोपरि पूर्णान्तं कुशमासनं मावलकपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा वह्निरभ्युक्ष कुशमुत्तमेर्धीयेत्। तन्मध्ये यथा प्रश्नस्य व्याख्ये पूर्वाभिमुख उपविष्टो भूमिजमादिकं कुर्यात्। यदि तु यजमानारोपितो ब्रह्मा अपक्षीयमाणं वदेत् तदा इदं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्री छन्दो विष्णुर्देवता अपक्षीयमाणस्य निमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे इति जपेत्। कुशादिब्रह्मपक्षे तु कर्मकर्त्तैव तत्तत्स्थापनवादिब्रह्मकार्यं कर्त्तव्यं यस्मादपक्षीयमाणजपादिनिमित्तं एव जपेत्। इति भवदेवभट्टः॥ ७॥ योगभेदः। स तु विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चविंशयोगः। तत्र जातफलम्।

"नानाशास्त्राभ्यासधीमत्कलावी
सत्कार्यैः संयुक्तपारकीर्त्तिः।
ब्राह्मी दाक्षो मानवेश प्रसूती
ब्रह्मो यस्य ब्रह्मयोगप्रयोगः॥"

इति कोष्ठीप्रदीपः॥

(शिवः। इति मेदिनी। अर्ककृपापकदेशिनः। इति हेमचन्द्रः। ऋत्विक्पुरोहितादिविशेषः।) इति [illegible]। तत्पर्य्यायः। आत्मभूः २ सुरज्येष्ठः ३ परमेष्ठी ४ पितामहः ५ हिरण्यगर्भः ६ लोकेशः ७ स्वयम्भूः ८ चतुराननः ९ धाता १० अब्जयोनिः ११ द्रुहिणः १२ विरिञ्चिः १३ कमलासनः १४ स्रष्टा १५ प्रजापतिः १६ वेधाः १७ विधाता १८ विश्वसृक् १९ विधिः २०। इत्यमरः॥१।१।१६-१७॥ द्रुघणः २१ विरिञ्चः २२ [illegible] २३ पद्मयोनिः २४ [illegible] २५ विश्वनिधिः २६। इति भरतः। [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ [illegible] ३२ [illegible] ३३ [illegible] ३४ [illegible] ३५ [illegible] ३६ लोकनाथः ३७ [illegible] ३८ [illegible] ३९ [illegible] ४० नाभिजन्मा ४१ [illegible] ४२ [illegible] ४३ [illegible] ४४ [illegible] ४५ [illegible] ४६ [illegible] ४७ पद्मशायिः ४८ पुराणगः ४९ आदिकर्त्ता ५० हंसरथः ५१ सर्वकर्त्ता ५२ चतुर्मुखः ५३। इति शब्दरत्नावली। कः ५४। इत्येकाक्षरकोषः। धाः ५५ [illegible] ५६ स्वायम्भुवमनुपिता ५७। इति जटिकल्पलता। [illegible] ५८। इति [illegible]। (नाभिजन्मा ५९। अण्डजः ६०। पूर्व्वः ६१। निधनः ६२। कमलोद्भवः ६३। सदानन्दः ६४। रजोमूर्त्तिः ६५। सत्यकः ६६। हंसवाहनः ६७। इति क्वचित्पुस्तकामरकोषे दृश्यते॥१।१।१७॥)

तस्य स्वरूपं यथा,—

मार्कण्डेय उवाच।

"ततो ब्रह्माण्डसंस्थानं दर्शयामास [illegible]।
यस्मिन् लोकरचितं ब्रह्माण्डं च यथा पुरा॥
तन्मध्ये पद्मगर्भाभं ब्रह्माणं कमलः स्थितम्।
ज्योतिःस्वरूपं प्रकाशार्थं स्वदायेव एकमुद्गतम्॥
दक्षिणे च हृदये ब्रह्माण्डान्तर्गतं मुहुः।
चतुर्मुखं प्रकाशान्तं ज्योतिर्भिः कमलासनम्॥
तस्यैव च त्रिधाभूतं चतुर्मुखं ददर्श सः।
कर्म्मध्यानसमायुक्तं ब्रह्मविष्णुशिवात्मकम्॥
अधोर्द्धभागो चतुर्धा ब्रह्मरूपमनामया।
मध्ये यथा विष्णुभूतो ददर्शास्य सम्मुखाम्॥
एकमेव शरीरस्थं त्रिधाभूतं मुहुर्मुहुः।
ततो ददर्श स गर्भे तथा सर्व्वमिदं जगत्॥
कदाचिद्दैव्यं कार्यं ब्राह्मे कार्ये जपं चरेत्।
ब्राह्मे तथा वैष्णवे च शाम्भवे वैष्णवं तथा॥
शाम्भवं वैष्णवे कार्ये ब्राह्मं चाप्यथ शाम्भवम्।
एकरूपं लोकानां प्रभुरेकोऽथ मुहुर्मुहुः॥
इत्थं बाह्यरूपोऽपि भिन्नं चाप्यपृथग्गतम्।
परमात्मनि सम्प्राप्तं लोकानां तद्वृत्तं मनुः॥"

इति कालिकापुराणे १४ अध्यायः॥ ७॥

तस्य पूजाविधिर्यथा।

"अथ ते सम्प्रवक्ष्यामि ब्रह्मणः पूजनक्रमम्।
ब्रह्मणोऽर्घं पुरा प्रोक्तं यत्नात्तं पूर्व्वमन्त्रतः।
तेनैव तस्य संपूज्य परं निर्माल्यमानुयात्॥
एतस्य चाह्नमन्तं यथा मरीच मानिनम्।
देवान्पूर्वादयाद्वा एवं यत्र भूमिप!॥

तस्य महोत्कारो यथा,—

"पद्मलोचन चतुःशिरः विकासकमलासनः।
[illegible] कमलापुष्पो भगवान् पद्मयोनिः॥
ध्यात्वैव तु मन्त्रेण ब्रह्माणं यः प्रपूजयेत्।
स कामानिष्टान् संप्राप्य ब्रह्मलोके प्रमोदते॥"

तस्य ध्यानं यथा,—

"ब्रह्मा कमलपत्राक्षश्चतुर्वक्त्रश्चतुर्भुजः।
कदाचिद्रक्तकमले हंसारूढः कदाचन॥
वर्णेन रक्तगौरांशुः प्रांशुस्तुङ्गाङ्ग उन्नतः।
कमण्डलुर्वामकरे स्रुवो हस्ते तु दक्षिणे॥
दक्षिणाधस्तथा माला वामाधश्च तथा स्रुवः।
आज्यस्थाली वामपार्श्वे वेदाः सर्व्वेऽग्रतः स्थिताः॥
सावित्री वामपार्श्वस्था दक्षिणस्था सरस्वती।
सर्व्वे च ऋषयो ह्यग्रे कुर्य्यादेभिश्च चिन्तनम्॥
चतुर्भ्योऽपि [illegible]।
चतुर्म्मोहे यद्गतन्तु [illegible]।
कुम्भादिकारिकं सर्व्वं धात्वाख्याः प्रतिष्ठिताः।
धाता उत्तरतश्चोक्ता योगपीठेऽग्रगादिका॥"

तस्य पूजाक्रमो गायत्री च यथा,—

"आधारशक्तिप्रमुखान् तथा सर्व्वान् प्रपूजयेत्।
अष्टपत्रे पद्मध्याने दिक्पालान् प्रपूजयेत्॥
चतुराननाय विद्महे हंसारूढाय धीमहि।
तन्नो ब्रह्मेति पदं तस्मात् प्रचोदयात्॥
एषा तु ब्रह्मगायत्री पूजयेत्तया विधिम्।
निर्माल्यधारी चैतस्य वसन्तकुमार उच्यते॥
उपचाराः पूर्ववत्तु देवरूपकरस्थिताः।
रक्तकौषेयवस्त्रन्तु ब्रह्मप्रीतिकरं परम्॥
धान्यं कषायकं सार्द्धं तिलचूर्णस्य भोजनम्।
सिन्दूरमनमायुक्तं चन्दनं परिकीर्त्तितम्॥
पार्श्वयोः शङ्करं विष्णुं पूजयेत् पूजकेश्वरः।
सुवर्णेन कलशान्तस्य मध्ये तांश्च पूजयेत्॥
सरस्वतीञ्च सावित्रीं चैव पद्मामध्ये च।
अर्घ्यं विशेषः कथितः प्रणामस्याप्य दक्षतः॥
पद्मबीजभवा माला जपकर्म्मणि कीर्त्तिता।
पूजावश्यं निशी [illegible] पूजाकर्म्मणि सम्मता॥
गोरोचनाकं प्रदद्यात् धर्म्मदा ब्रह्मणे नृप!।
अयन्ते कथितो भूप! यथा भक्त्या भाविनः॥
इष्टं यत्ता [illegible] कामरूपाख्यं शुभम्।
यत्र तत्र विधिनैव साधकः परिपूजयेत्॥
पीठे ध्यायन् पूजयित्वा परं निर्माल्यमाप्नुयात्॥"

इति कालिकापुराणे ८२ अध्यायः॥

तस्याप्युत्तमवन्दनम् यथा। मोहिन्युवाच।

"उत्तिष्ठ जगतीनाथ! पापं कुरु सदाऽव्यये।
निमग्ना दुस्तरे घोरे कर्णधार! महापदि॥
ध्यानैकनिष्ठमन्त्रे सर्व्वजन्तुविदारिणि।
शुभमिश्रमनुना रक्ष पुरुषोत्तमजगती॥
यश्च त्वं [illegible] दासी भव्यामि भक्ति।
[illegible]॥
रक्षा लोहिनी भद्रो धातुवन्द्य भक्तः।
विवदे वरं यथा दयिता कामविह्वला॥
विहाय भक्तं ध्याना नाथवत्त्व महानुरः।
यो पुरश्चरणं वरं [illegible]॥"

ब्रह्मोवाच।

"मातृ मोहिनि! सदाऽऽख्यं धर्म्मं वादं हितं
[illegible] स्फुटम्।
न कुरु मम त्रैलोक्ये [illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।

तत्राथ मोहिनी प्रोक्तं प्रोक्तया कमलोद्भवम् ।
तमोवाच जगद्धाता ब्रह्मासमयान्वितश्च सा ।
प्रविष्टुर्मुखपक्तस्य भक्तिमच्चात्मभक्तपरा: ॥
ध्यानिवं सुपुचे ब्रह्मा भाषयामास तान् प्रभु: ।
तेषु मध्ये प्रकल्पान यथा तारासु चन्द्रमा: ॥
पप्रच्छुर्मुनयो देवं कथमेषा तवान्तिके ।
धर्मेंप्रामाय प्रवरा मोहिन्येदितमेव च ॥
श्रुत्वा तमीनां वचनमुवाच तान् प्रजापति: ॥

ब्रह्मोवाच ।

अपूर्वं नृत्यगीतञ्च चिरं कृत्वा शुभाक्षरा ।
वचाधियं परिश्रान्ता यथा कन्या पितु: पुर: ॥
इत्युक्ता जगतां धाता जहास मुनिसंसदि ।
जहसुर्मुनय: सर्वे मर्म्मज्ञास्तत्र राधिके ।॥
मर्म्म रहस्यं विज्ञाय जगत्पत्युश्च मानसम् ।
चत्तुकोप कुलटा हास्यबाधेन संसदि ।
सर्व्वाङ्गकम्पमाना सा कुलटा कुटिलानना ।
रक्तपङ्कजनेत्रा च कोपप्रस्फुरिताधरा ।
उत्थाय च सभामध्ये तस्थौ च पुरत: स्थिता ।
संपृच्छोवाच ब्रह्माणं मद्गुकथा यथा यथा ॥

मोहिन्युवाच ।

अये ब्रह्मन् ! जगन्नाथ ! वेदकर्त्ता त्वमेव च ।
किंवा वेदप्रविहितं कर्म्म त्रिजगद्विपर्ययम् ॥
विचारं मनसा स्वेन कुरु वेदविदां गुरो ! ।
ब्रह्माण्डे यत्प्रवृत्ता च कथं चयति मर्त्तकीम् ॥
निर्म्मितावभीष्टेव सर्म्मज्ञा धर्म्मगामिनी ।
यतो कर्म्म विरुद्धं यत्प्रस्थमाविक्रमणम् ॥
दापीतुकां विनोदाय देवेन शरणागताम् ।
यतो चपति कर्म्मैव ततोऽपूज्यो भवाचिरम् ॥
अचिरादर्थभङ्गन्ते करिष्यति हरि: स्वयम् ।
विनोद कटमं ब्रह्मन् ! वैश्वानरेण वाघृतम् ॥
तवैव वचनं चोदं मर्म्म यन्नाति यो नर: ।
भविता तस्य विम्बश्च बाधस्पदाश्रितम् ॥
भविता वार्षिको पूजा देवतानां युगे युगे ।
सर माघाख संक्रान्त्यां न भविष्यति वा पुन: ॥
कल्पान्तरेऽथ कल्पे वा दैवे देवान्तरेऽथ वै ।
इप: पूजा न भविता वा यता वा यतेव च ॥
इत्युक्ता मोहिनी क्रोधं जगाम मदनालयम् ।
तेन कार्ड्ड दर्शि तदा बभूव विकटा पुन: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे मोहिनीशाप-
ब्रह्मदर्पभङ्गप्रस्ताव: ३१ अध्याय: ॥
तस्य सृष्टिक्रमो यथा । मनुरुवाच ।
"चतुर्मुखमभवत् बलात् लोकपितामह: ।
कथय लोकानयदृक्षा ब्रह्मविदांवर: ॥"

मनुरुवाच ।

"तत्रचकार प्रथममभवत्रो पितामह: ।
आविर्भूतास्ततो वेदा: साङ्गोपाङ्गपदक्रमा: ।
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनि:सृता: ।
मीमांसा न्यायविद्या च प्रमाणाष्टकसंयुता ।"
तस्य मानसपुत्रसृष्टिर्यथा,—
"वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसा: ।

मनस: पूर्व्वसृष्टा वै जाता ये तेन मानसा: ।
मरीचिरभवत् पूर्व्वं ततोऽत्रिर्भगवानृषि: ।
अङ्गिराश्चाभवत् पश्चात् पुलस्त्यस्तदनन्तरम् ॥
तत: पुलहनामा वै तत: क्रतुरजायत ।
प्रचेताश्च तत: पुत्रो वशिष्ठश्चाभवत् पुन: ॥
पुत्रो भृगुरभूत्तस्य नारदोऽपि चिरादभूत् ।
दशेमान् मानसान् ब्रह्मा अजनत् पुत्रानजो-
जनत् ॥"
तस्य शारीरदक्षप्रजाष्टिर्यथा,—
"शारीरानथ वक्ष्यामि मातृहीनान् प्रजापते: ।
अङ्गुष्ठाद्दक्षिणाद्दक्षप्रजापतिरजायत ।
धर्म्मस्तनान्तादभवद्धृदयात् कुसुमायुध: ।
भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भव: ॥
बुद्धेर्मोह: समभवदहङ्कारादभूत्मद: ।
प्रमोदश्चाभवत् कण्ठान्मृत्युर्लोचनतो नृप ! ॥
हस्तञ्च: करमध्यात्तु ब्रह्मपुत्रस्तत: ।
एते नव सुता राजन् ! कन्या च दशमी पुन: ।
अङ्गजा इति विख्याता दशमी ब्रह्मण: सुता ॥"
तस्य चतुर्मुखत्वस्य कारणं यथा,—
"तत: सर्द्देवकन्या तामात्मजामिन्द्रकन्यपत् ।
दृष्ट्वा तां चपितस्तावत् कामबाणार्द्दितो विभु: ।
अहो रूपमहो रूपमिति चाह प्रजापति: ॥
ततो वशिष्ठप्रमुखा भगिनीमिति चुक्रुशु: ।
ब्रह्मा न किञ्चिद्ददृशे तन्मुखालोकनादृते ।
अहो रूपमहो रूपमिति प्राह पुन: पुन: ।
तत: प्रणामनम्रां तां पुनस्तामभ्यलोकयत् ।
अथ प्रदक्षिणचक्रे सा पितुर्वरवर्णिनी ।
पुत्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया ।
आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ।
विस्मयस्फुरदोष्ठञ्च पाश्चात्त्यमुद्गतं तत: ।
चतुर्थमभवत् पश्चाद्वामं कामशरातुरम् ॥
ततोऽन्यदभवत्तस्य कामातुरतया तथा ।
उत्पतन्त्यास्तदाकाशमालोकनकुतूहलात् ॥
सृष्ट्यर्थं यत् कृतं तेन तप: परमदारुणम् ।
तत् सर्व्वं नाशमगमत् स्वसुतोपगमेच्छया ॥
तेनोर्द्ध्वं वक्त्रमभवत् पञ्चमन्तस्य धीमत: ।
आविर्भवज्जटाभिश्च तद्वक्त्रञ्चावृणोत् प्रभु: ॥"

इति मत्स्यपुराणे ३ अध्याय: ॥ ० ॥

अथ ब्रह्माणो वया, मार्कण्डेयपुराणे ।
"अयु: कृतकं तृतकं ब्रह्ममित्तिरन्वना ।
मरीचिं रक्षमत्रिश्च वसिष्ठञ्चेव मानवम् ।
सब्रह्माण इत्येते पुराणे निश्चयं गता: ॥"
वसिष्ठे ब्रह्म तत्त्वाति यथा,—
"अतो वि मानवं ब्रह्म दशमं त्रिजगद्धितम् ।
चायुषं वै द्वितीयं वै ब्रह्म चाश्वोत् पुरातनम् ॥
अन्धकारात्तु वै ब्रह्म तृतीयं वाचिकं मतम् ।
तत: चतुर्थं चापि चतुर्थं ब्रह्म वै विभो ! ॥
नावश्चापि वै ब्रह्म तत: पञ्चमत्वसौ ।
चाक्षुषं चापि वै ब्रह्म तत: षष्ठं विनिर्म्मितम् ।
इदञ्च सप्तमं ब्रह्म पद्मजमिति वै प्रभो ! ।
वर्षे वर्षे पूर्वं पुरस्तात् पितृमत्वोन ! ॥"
इति महाभारते शान्तिपर्व्वणि मोक्षधर्म्मे

अनिरुद्धरूपविष्णुं प्रति मार्कण्डेयवचन-
मम् ॥ ० ॥ तस्य परमायुर्यथा,—
"द्वाविंशत्सहस्रोऽपिस्तु तथा कल्पादयं भवेत् ।
शतैर्नवयं त्रिदशमेव प्रकृत्यपुटं तथा ॥
पद्मभेदं मनुश्च अयो ब्रह्मणमागते ।
ब्रह्मा विष्णुस्तथैव: प्रलये वर्त्तन्ते वै ॥
ममोविकासतथा विष्णुरत्युत्तम् महेश्वर: ।
ईश्वरत्व तथा चाब्दौ स भक्तिमतोऽभ्यागा ॥
अत: परं परे धानि कालसंख्या न विद्यते ।
ब्रह्मणोऽत: परं संख्या नास्ति चेतनानां हि च: ॥"
अपि च ।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मक: ।
भोगिशय्यागत: शेते त्रैलोक्यग्रासबृंहित: ॥
जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भव: ।
यतोऽतावान् धर्म्मं च पुन: ...
एवन्तु ब्रह्मणो वर्षं तथा वर्षशतं भवेत् ।
शतं वर्षं ब्रह्मा परमायुरपि कीर्त्यते ॥"

इति वह्निपुराणम् ॥

ब्रह्माण्ड:, पुं, (ब्रह्मणोऽपि उष्णुते भवतीति । भू+
क्विप् । अथार्थं ब्रह्मणो दैवात् जनभाजामभाम् ।)
घोटक: । इति हारावली । ५९ ॥
ब्रह्माञ्जलि:, पुं, (ब्रह्मणि वेदपाठार्थं कृतो यो-
ऽञ्जलि: ।) पाठवेदपाठे हरविभागार्थं यो-
ऽञ्जलि: क्रियते स: । अध्ययनप्रारम्भे च
गुरवे प्रणवोच्चारणपूर्व्वकोऽञ्जलि: क्रियते स: ।
तत्पाठार्थमात् ब्रह्मणोऽञ्जलि: । इत्यमर-
टीकायां भरत: ॥ २ । ७ । १८ ॥ (यथा, मनु: ।
२ । ७०—७१ ।
"अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुख: ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जिते-
न्द्रिय: ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरो: सदा ।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलि: स्मृत: ॥")
ब्रह्माणी, स्त्री, (ब्रह्माणमानयति जीवयतीति ।
अन प्राणे अचेतनम् । ङीप् ।, यद्वा, ब्रह्माण-
मानयति चोदयतीति । अनपुंसकावे स्त्रिया-
मिति ब्रह्मेति अपि इति "वेदनिष्टि ।४ । १ ।
४९ । इति निर्देश: "डिदूटिति ।" ४।१।१५।
इति ङीष् पूर्वपदात् त्विति णत्वम् ।) ब्रह्मण: शक्ति: ।
इति शब्दमाला । ब्रह्मणोऽर्द्धशरीरात् तस्या
उत्पत्तिर्मात्स्ये यथा,—
"तत: संजपतस्तस्य भित्त्वा देहमकल्मषम् ।
स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् ॥
शतरूपा च सा ख्याता सावित्री च निगद्यते ।
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! ॥"

इति मत्स्यपुराणे ३ अध्याय: ॥ ० ॥

अपि च ।
"संवृत्तविमानार्थे कालपञ्चकतन्तुक: ।
आरूढा ब्रह्मण: शक्तिरक्षसूत्रकमण्डलु: ॥"

इति मार्कण्डेयपुराणे । ७५ । १६ । ७ ॥

(इयं हि शुम्भवधे शिवा: ब्रह्माणी । दृश्यं
मार्कण्डेये । ८० । १५ ।)

देव्युवाच ।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट ! मय्येव विशन्त्यो मद्विभूतयः ॥
ततः समस्तास्ता देव्यो ब्रह्माणी-प्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥")
दुर्गा । यथा,—
"ब्रह्माणी ब्रह्मजननाद्ब्रह्माण्डपरता मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥३॥
देवकार्यासमानत्वम् । इति रत्नमाला । राम-रीतिः । इति राजनिर्घण्टः ॥

ब्रह्माण्डं, क्ली, (ब्रह्मणो जगत्स्रष्टुरण्डम् । चतुर्द्दश-भुवनगोलकः । यद्वा, ब्रह्मणा विधात्रा कृत-मण्डम् ।) भुवनकोषः । विश्वगोलकः । यथा,—
"ब्रह्माण्डरचनाख्यानं शृणुतां सावधानतः ।
ब्रह्माण्डरचनादेव भक्ता जानन्ति यत्नतः ॥
शृणुध्वं सुराः सर्वे किञ्चिज्जानामि दुःखतः ।
जानाति विश्वमन्त्रार्थं ब्रह्मात्मा सर्व्वेश्वरः ॥
धर्म्मः सनत्कुमारश्च नरनारायणावृषी ।
कपिलश्च गणेशश्च दुर्गा लक्ष्मीः सरस्वती ॥
वेदाश्च वेदमाता च सर्व्वज्ञा राधिका स्वयम् ।
एते जानन्ति विश्वार्थं नान्यो जानाति कश्चन ॥
वेदव्यासादयश्च सुधियः सर्व्वे विश्वानुसन्धमाः ।
विश्वाकारौ यथात्मा च तथा नित्या दिशो दशः ॥
यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ।
गोलोकश्च यथा नित्यस्तथा वैकुण्ठ एव च ॥
एकदा मयि गोलोके रासे शून्यं प्रकुर्व्वति ।
आविर्भूता च वामाङ्गाद्राधा षोडश-वार्षिकी ॥
श्वेतचम्पकवर्णाभा शरच्चन्द्रसमप्रभा ।
चलोचकुन्दरी रम्या रम्भोर्व्वी मनोहरा ॥
देवश्रेष्ठा प्रसन्नास्या कोमलाङ्गी मनोहरा ।
वह्निशुद्धांशुकाधाना रत्नाभरणभूषिता ॥
यथा कल्पद्रुमश्चैव कलाकाभिर्विभूषिता ।
सिन्दूरबिन्दुना चारुचन्दनचन्द्रबिन्दुभिः ॥
कस्तूरीबिन्दुभिः सार्द्धं सीमन्ताधःस्थलोज्ज्वला ।
चारुस्वर्णमणिश्रेणीसहितचित्रकोज्ज्वला ॥
रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वला ।
कुङ्कुमाक्तकपोलाभ्यां चन्दनचर्चिताङ्गैः ॥
सिन्दूरैश्च सुचित्रैश्च सुकपोलस्थलोज्ज्वला ।
मणीन्द्रखचितमाला चार्व्वी सुशोभिता ॥
मणीन्द्रसारविर्म्मितरत्नाभूषणभूषिता ।
सुमध्या नितम्बश्रोणीनतसद्गजेन्द्रमनोहरा ॥
वङ्किमा नितरामेव पक्वबिम्बाधरा वरा ।
रत्नपूर्णेन्दुबिम्बाभ्यां कर्णाभ्यां मनोहरा ॥
कज्जलरेखाभिर्मण्डितचारुचक्षुर्ज्वलोज्ज्वला ।
समकालोचनाभ्यां भ्रूयुगलोज्ज्वला ॥
सर्व्वाङ्गसुन्दरी गौरी मन्दस्मितसमुज्ज्वला ।
रत्नाङ्गुरीयकैर्नित्यं रत्नाङ्गुलिभूषिता ॥
रत्नमञ्जीरनादेन कल्कटीतरङ्गिता ।
रत्नचामरवारीभिः नानालङ्कारभूषिता ।
मन्वन्तरप्रकृतिभिर्वरमालामनोज्ज्वला ॥
मन्दिरगामिनी रामा कामिनी वामलोचना ।
मां दृष्ट्वा कटाक्षेण रमणी रमणोत्सुका ॥
रासे संभूय रामा सा रमाय पुरतो मम ।
तेन राधा समाख्याता पुराविद्भिः प्रपूजिता ॥
प्रकृष्टप्रकृतिराद्यासैव प्रकृतिरीश्वरी ।
शक्ता स्यात् सर्व्वकार्य्येषु तेन शक्तिः प्रकी-र्त्तिता ॥
सर्व्वाधारा सर्व्वरूपा मङ्गलार्हा च सर्व्वतः ।
सर्व्वमङ्गलदक्षा या तेन स्यात् सर्व्वमङ्गला ॥
वैकुण्ठे सा महालक्ष्मीर्मूर्त्तिभेदे सरस्वती ।
प्रसूय वेदान् विदिता वेदमाता च सा सदा ॥
सावित्री सा च गायत्री धात्री त्रिजगतामपि ।
पुरा संहत्य दुर्गञ्च सा दुर्गा च प्रकीर्त्तिता ॥
तेजःसु सर्व्वदेवानामाविर्भूता पुरा सती ।
तेनाद्यप्रकृतिर्द्देया सर्व्वासुरविमर्द्दिनी ॥
सर्व्वानन्दा च सानन्दा दुःखदारिद्र्यनाशिनी ।
शत्रूणां भयदात्री च भक्तानां भयहारिणी ॥
दक्षकन्या सती या च शैलजा सैव पार्व्वती ।
सर्व्वाधारस्वरूपा या कलया सा वसुन्धरा ॥
कलया तुलसी गङ्गा कलया सर्व्वयोषितः ।
रतिं करोमि च यया तया सार्द्धं पुनःपुनः ॥
दृष्ट्वा तां रासमध्यस्थां मम क्रीडा तया सह ।
बभूव सुचिरं तात ! यावद्वै ब्रह्मणः शतम् ॥
कल्पद्रुमं कौतुकञ्च महाश्रृङ्गारसौष्ठवम् ।
तयोर्द्देवोर्म्मिराशिः सुखाय रासमण्डले ॥
तत्रात्मनोद्भवं कर्म्म नान्यः कामशरोत्करम् ।
प्रयाति सर्व्वाधारायां वैतेन विश्वगोलके ॥
बभूव जलपूर्णञ्च महाण्डानाञ्च गोलकम् ।
जलपूर्णं पुरा सर्व्वं सर्व्वशून्यं ब्रह्मेश्वर ! ॥
महाराज्ञी च तस्याश्च वीर्य्याधानं मया कृतम् ।
दधार गर्भं सा राधा यावद्वै ब्रह्मणः शतम् ॥
सुषाव सा तदन्ते च डिम्भं तत् परमाद्भुतम् ।
चुकोप देवी तं दृष्ट्वा रुरोद विचकार सा ॥
चक्षेप डिम्बमाशु तमपो विश्वगोलके ।
स प्रयात जले तात ! सर्व्वाधारो महान् विराट् ॥
तद्राज्ञर्ध्वं जलस्य यथा क्षमा च सा पुरा ।
अपत्यता च सा राधा मत्प्रसादेन पुरा विभो ! ॥
तेन प्रकृता प्रकृतौ दुर्गा लक्ष्मीः सरस्वती ।
जगतः सर्व्वरूपा सा प्रकृत्या सुविस्तृतम् ॥
देव्योऽन्याश्चापि कामिन्यो च प्रकृत्या ब्रह्मेश्वर ! ॥
कलया प्रभवो यासां कलांशेन वा ब्रज ।
यद्वि महान् विराट् तेन डिम्भेन जलाशयः ॥
जलशायी डिम्बोद्भूतो मया दृष्टं यथोक्त मे ॥
सर्व्वे सागरस्थस्य मे देहे विश्वकर्म्मणः ।
जगदाधारं सर्व्वं तस्य लोमकूपेषु च ॥
तत्र लोमाञ्च कूपानि असंख्यातानि सन्ततम् ।
एकैकं ब्रह्माण्डं देहे क्षुद्रविराट् पुनः ॥
पद्मजपदं कमलं तस्य नाभिजं भाति ।
तत्र जातं सर्व्वं ब्रह्मा वेदानां कारकोऽभवत् ॥
तस्याविर्भूतं च विधिविधानात् सा बभूव च ।
महाविष्णुः स आत्मा मे पिता वा स च नाम्नतः ॥
दिव्यं विनश्वरं चैव ब्रह्माण्डं कमलान्तरे ।
ततो वक्त्रे पञ्चत्वं प्रकारं तथा च मान् ॥
तदा मया दृष्टमत्र प्रकारं कमलान्तरे ।
दिव्यं सप्तवर्षं चापं वियतं सततः शुभः ॥
तदा मत्तो वरं लब्ध्वा महा सृष्टिचकार सः ।
मानसा मनिसकाश्च सप्तर्षिसुतान्वितः ॥
दिक्पाला दादशादित्या रुद्राश्चैकादशाः सह ।
नव ग्रहाश्च वसवो देवाः कोटित्रयस्तथा ॥
ब्राह्मणादयः सृष्टा यथाजन्मकर्म्मतः ।
भूतान्यो राक्षसाद्यैश्च सर्व्वं चराचरम् ॥
भिन्ने भिन्ने विनिर्म्मितं स्वर्गाः सप्त श्रेष्ठ वै ।
सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ॥
काञ्चनीभूमिसंयुक्ता तमोयुक्तपदं ततः ।
पातालादि तथा सप्त ब्रह्माण्डे भिन्ने च ॥
भिन्ने भिन्ने च ब्रह्माणौ पृथक्चैव सागरम् ।
तीर्थान्यनेकानि सर्व्वत्र गङ्गादीनि ब्रह्मेश्वर ! ॥
यावन्ति लोमकूपानि महाविष्णोः कलेव च ।
विश्वान्येव हि तावन्ति कृष्णस्यापि विराड्ढ्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८।१।१९-१०।
अपि च ।
"देवीशुवनमाविर्भवत् कोटिविस्तरम् ।
ब्रह्मादिस्तम्बपर्य्यन्तसृष्टं सचराचरम् ॥
अण्डे हिरण्मयमस्य चतुर्द्दश भवेदितम् ।
अधोमुखमिदं लोकपापि दौर्म्मती भवेत् ॥
अधोर्द्धं काञ्चनमयचतुरस्रोऽञ्चितो महान् ।
अनुपमः स चतुःसत्रो मेरुर्देवालयः ॥
पृथिवी पद्माकृतं चैतं मेरुस्तस्य तु कर्णिका ।
मुमायकोटिविस्तीर्णं तत्र ब्रह्मा रथं रविः ॥
देवीप्रसन्नो देवेदीति तस्य प्रदक्षिणम् ॥"
इति देवीपुराणम् ॥
अथ ब्रह्माण्डमानम् ।
"भूर्भुवर्वियदादशमारभ्य कोटा
ये याश्च शिष्टाःसर्वपरचक्रकयाः ।
लोकपरिवृतसमुत्परिवृता
ब्रह्माण्डमाकल्परे सरिदं वदतम् ॥"
अथाप्योक्तिं ब्रह्माण्डमानं पूर्व्वमपि प्र-कारदर्शनम् ।
कोटिघ्नैर्नखनन्दषट्कनखभूभृद्भूजङ्गेन्दुभि-र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं
केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः सूरयः ॥
करतलकलितामलकवदमलं
सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहततमसो
नभसः परिधिरुदितस्तैः ॥
ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये टरपत्रौ (?) ।

ब्रह्माण्डदानविशेषः। यथा,—

मत्स्य उवाच।

"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम्।
यच्छ्रेष्ठं सर्व्वदानानां महापातकनाशनम्।
पुण्यं दिनमथासाद्य तुलापुरुषदानवत्।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्।
लोकेशावाहनं तद्वदधिवासनकं तथा।
कुर्य्याद्विंशपलादूर्द्ध्वमासहस्राच्च शक्तितः।
कलशद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः।
दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम्।
लोकपालाष्टकोपेतं मध्यस्थितचतुर्म्मुखम्।
शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम्।
वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम्।
वितस्तेर्द्व्यङ्गुलशतं यावदायामविस्तरम्।
कौषेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत्।
तथाष्टादश धान्यानि समन्तात् परिकल्पयेत्।
पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम्।
पश्चिमे चतुरो वेदाननिरुद्धमतः परम्।
अग्निमुत्तरतो हैमं वासुदेवमतःपरम्।
समन्ताद्गुडपीठस्थानर्च्चयेत् काञ्चनान् बुधः।
स्थापयेद्वस्त्रसंयुक्तान् पूर्णकुम्भान् दशैव तु।
दशैव धेनवो देयाः सहेमाम्बरदोहनाः।
पादुकोपानहच्छत्रचामरासनदर्पणैः।
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः।
होमाधिवासनान्ते तु स्नापितो वेदपुङ्गवैः।
इममुच्चारयेन्मन्त्रं त्रिः कृत्वा प्रदक्षिणम्।
नमोऽस्तु विश्वेश्वर! विश्वधाम
जगत्सवित्रे भगवन्नमस्ते।
सप्तर्षिलोकामरभूतलेश!
गर्भेण सार्द्धं वितरामि रक्षाम्।
ये दुःखितास्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम्।
त्वद्दानशस्त्राहतपातकानां
ब्रह्माण्डदोषाः प्रशमं व्रजन्तु।
एवं प्रणम्यामरविश्वगर्भं
दद्याद्द्विजेभ्यो दशधा विभज्य।
भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण।
स्वल्पे तु होमे गुरुरेक एव
कुर्य्याद्द्विजेन्द्रानधिवासयुक्तान्।
स एव संपूज्यतमोऽथवित्तै-
र्व्वस्त्राम्बराभरणादिकेन।
इत्थं स एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम्।
निर्धूतकल्मषविशुद्धतनुर्म्मुरारे-
रानन्दकृत्पदमुपैति सहाप्सरोभिः।
सन्तारयेत् पितृपितामहपुत्त्रपौत्त्र-
बन्धुप्रियातिथिकलत्रशताष्टकं सः।
ब्रह्माण्डदानशकलीकृतपातकौघ-
मानन्दयेच्च जननीकुलमप्यशेषम्।
इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्म्मिकाणाम्।
मतिमपि च ददाति मोदतेऽसा-
वमरपतेर्भवने सहाप्सरोभिः।"

इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्डदानको नाम २५० अध्यायः ।*। अपि च।

"इदानीं कार्त्तिकी चेयं वर्त्ततेऽद्य नराधिप!।
ब्रह्माण्डं सर्व्वसम्पन्नं भूतग्रामैरधिष्ठितम्।
देवदानवयक्षैश्च युक्तमेतत् सदा विभो!।
एतद्धेममयं कृत्वा सर्व्वशोभासमन्वितम्।
वरदं पुरुषं कृत्वा कार्त्तिक्यां द्वादशीदिने।
अथवा पञ्चदश्यां वै कार्त्तिक्यामेव नान्यतः।
पुरोहिताय गुरवे दापयेद्भक्तिमान्नरः।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव!।
तानि दत्तानि तेन स्युः समासात् कथितं तव।
यो यज्ञैर्यजते राजन्! सहस्रवरदक्षिणैः।
येकोद्दिष्टो यथैतस्य ब्रह्माण्डस्य विधिक्रमः।
यः पुनः सकलञ्चेदं ब्रह्माण्डं दातुमिच्छति।
तेन सर्व्वं कृतं दत्तं पठितं कीर्त्तितं भवेत्।"

वराह उवाच।

"एतत् कृत्वा ततो राजा हेमकुम्भे प्रकल्पनम्।
ब्रह्माण्डमपि प्रादात् अभिधानच तत्पुनः।
धर्म्मकामैः शुभमतो ययौ स्वर्गं नराधिपः।"

इति वराहपुराणम्।

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति। ब्रह्मात्मन्+भू+क्विप्।) अश्वः। इति शब्दमाला। (अस्य ब्रह्मशरीरजातत्वमुक्तं बृहदारण्यकोपनिषदि ।१।२।६-७। तद्यथा,— "प्राणा वै यशो वीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत तस्य शरीर एव मन आसीत्। सोऽकामयत मेध्यं म इदं स्यादात्मन्व्यनेन स्यामिति। ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्।" अस्य शाङ्करभाष्यं यथा,— "प्राणाश्चक्षुरादयः। ते यशो यशोहेतुत्वात्तेषु हि सत्सु ख्यातिर्भवति। तथा वीर्य्यं बलमस्मिन् शरीरे। न ह्युत्क्रान्तप्राणो यशस्वी बलवान् भवति। तस्मात् प्राणा एव यशो वीर्य्यं चास्मिन् शरीरे। तदेवं प्राणलक्षणं यशोवीर्य्यमुदक्रामत् उत्क्रान्तवत्। तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावं गन्तुममेध्यञ्चाभवत्। तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत्। यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत्। स तस्मिन्नेव शरीरे मनस्यन् किमकरोदिति। उच्यते। सोऽकामयत कथं मेध्यं मेधार्हं मे ममेदं शरीरं स्यात्। किञ्चात्मन्वी आत्मवांश्चानेन शरीरेण शरीरवान् स्यामिति प्रविवेश। यस्मात्तच्छरीरं तद्वियोगात् गतयशोवीर्य्यं सदश्वत् अश्वयत् ततोऽश्वः समभवत्। ततोऽश्वनामा प्रजापतिरेव साक्षादिति स्तूयते। यस्माच्च पुन-स्तत्प्रवेशात् गतयशोवीर्य्यममेध्यं सन्मेध्यमभूत् तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनाम लाभः।")

ब्रह्मादनी, स्त्री, हंसपदी। इति राजनिर्घण्टः।

ब्रह्मादिजाता, स्त्री, (ब्रह्मणः आदिजाता सम्भूता। क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते।) गोदावरी। इति राजनिर्घण्टः।

ब्रह्मापितः, पुं, (ब्रह्माणं ब्रह्मतेजःस्वरूपं सूर्य्यं अपितः उपगतः ततः पृषोदरात् साधुः।) माघमासि सूर्य्यनिकटस्थितराक्षसः। यथा,—

"तक्षा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः।
माघमासे वसन्त्येते सप्त मैत्रेय! भास्करे।"

इति विष्णुपुराणे। २। १०। १५।

ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव।) वेदपाठभूमिः। इति त्रिकाण्डशेषः।

ब्रह्मार्पणं, क्ली, (ब्रह्मैवार्पणमिति विग्रहे यदर्पणं तद्ब्रह्मैव। यथा, गीतायाम्। ४। २४।

"ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।"

"ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्धविरग्नावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तद्वदुच्यते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकैवेति। अत्र अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः। इति शाङ्करभाष्यम्।) ब्रह्मणि समर्पणम्। तत्प्रकारो यथा,

"ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते।
ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम्।
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा।
एतद्ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः।
प्रीणातु भगवानीशः कर्म्मणानेन शाश्वतः।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम्।
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे।
कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम्।"

इति कूर्म्मपुराणे ३ अध्यायः।

ब्रह्मावर्त्तः, पुं, (ब्रह्मणो ब्रह्मनिष्ठानामावर्त्त इव। बहुतराश्रयत्वादस्य तथात्वम्।) देशविशेषः। तत्पर्य्यायः। सवोटः २। इति त्रिकाण्डशेषः॥ तत्सीमादि यथा,—

"सरस्वतीदृषद्वत्योर्द्देवनद्योर्यदन्तरम्।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते।
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते।
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः।"

इति मानवे। २। १७-२०।

(तीर्थविशेषः। यथा, महाभारते ३।८३।५०।

"ततो गच्छेत धर्म्मज्ञ! ब्रह्मावर्त्तं नराधिप!।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात्।")

चरणस्य तथैव । ९ । ८३ । ३० ।
"अक्षासनं ततो गच्छेत् ब्रह्मचारी समाहितः ।
अश्वमेधमवाप्नोति सोमलोकञ्च गच्छति ॥")

मक्षासनं, क्ली, (मक्षवत् मक्षपादैः आसनम् ।) ध्यानासनम् । योगासनम् । इत्यमरः ।२।७।३० ॥ ध्यानं परमात्मचिन्तनम् । योगश्चित्तवृत्तिनिरोधमात्रम् । ध्यानं निराकारभावनम् । योगः साकारभावनमिति वा । तयोः पद्मस्वस्तिकाद्यासनं यत् तत्र मक्षासनं स्यात् । इति भरतः । (आसनविशेषः । तल्लक्षणं यथा,—
"मक्षासनं तदा बध्वा मनुजस्य भ्राजको भवेत् ।
तत्कालात् दृशा निर्दिष्टकालातिभवेत् ॥"
अत्र आसनमिति विधिना मक्षासनम् ॥)

मक्षाली, स्त्री, (मक्षस्य ...) मक्षस्य पात्रम् । यथा, देवीपुराणे ।
"तदा रामेण कुपितेन मक्षाल्यं प्रति राघवे ।
नारायणविनाशाय चिक्षिपे चतुराननम् ॥
शुक्लैश्च सम्वृताश्च पुनरर्भतातिमम् ।
कृष्णासारस्य कुसुमामल पुरतः स्थितम् ॥"

मक्षिका, स्त्री, (अतिशयेन मक्ष । मक्ष+इकन्+टाप् च ।) दूर्वा । यथा,—
"मक्षिका मिदमाहत्य मानसी भवत्यापवा ।
वेदेषु भवति यशस्वी मक्षचारिणो ॥"
इति देवीपुराणे ४५ अध्यायः ॥

मक्षी, स्त्री, (मेधाजनकत्वात् मक्षति हिता । मक्ष+अच् । बाहुलकात् न वृद्धिः । ततो ङीप् ।) पञ्चाङ्गकमनुष्यः । इति त्रिकाण्डशेषः ॥ पाखाण इति भाषा । कर्णिकारवृक्षः । शाकभेदः । मक्षी इति भाषा । इति मेदिनी । दे, १९ ॥ मक्षीदारकस्य पर्य्यायः । मधुस्रावी १ सुरसा २ ममता ३ मक्षचारिणी ४ । इति रत्नमाला । (यथा, भैषज्यरत्नावल्यां कुष्ठरोगचिकित्सायाम् ।
"तैलतुल्यं प्रदातव्यं सरसस्य पृथक् पृथक् ।
महाचामरधारको कुष्ठविवर्द्धिका ॥")
अस्याः गुणाः । पित्तघ्नम् । सरकारित्वम् । विलक्षणादिकत्वञ्च । इति राजवल्लभः ॥ अस्याः पर्य्यायान्तरं पुनाश्च माछीदक्षे द्रष्टव्याः ॥

मक्षीवर्त्तं, क्ली, (मक्षीणां वृतम् ।) औषधविशेषः । वायुनाशनमिति ख्यातम् । यथा,—
"समननवातुम्याय मक्षी प्रपाल्य वारिका ।
चतुष्कं चोरदिका द्वौं दल्भिश्च गात्रयेत् ।
दशे चतुर्थे तस्मिन् प्रवद्यां विपाचयेत् ।
हरिता मांसरी कुष्ठं दन्ती मञ्चरीतथी ।
चतेनी वांपकै भांजी: देवास्तु वार्षिकाः सुताः ।
नियमोद्देश्य विशुद्धानि देवाय दर्शना यथा ।
कर्षेदेषु समानांच प्रतेभेर्पथा भवेत् ।
मन्त्रानिलमाचेव वांमनुष्ठि: प्रचापने ।
मसारवर्षोत्तित विचरे: चव अीतये ।
चाईंराजर्षीमित्र मारो भवति कौशिकः ।
सावदेर्व दर्शीष भवेत् भुंतथो भरः ।
वद कुष्ठान् प्रमेहांश्च वायं धन्वन्तरि भवेत् ।
मध्यानाचैव नारीणां नराणामल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णाग्निवर्द्धनम् ॥"
इति जयनारायणसङ्कलितचिकित्सासंग्रहः ॥
(अपरञ्च ।
"मक्षोदधि यथा कुष्ठस्फुटन्त्यौभिरेवच ।
पुराणं मेघस्वादल्प मांदकारमतायम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातरोगाधिकारे ॥)

मक्षोतं, त्रि, मक्षवि वा सम्यक् प्रकारेण कृतं वर्धितम् । ("लोपोऽव्योर्वलि ।" इति सूत्रेण वकार लोपः ।) इति मुग्धबोधव्याकरणम् ॥

मक्षोत्तरं, त्रि, मक्षा माक्षम् उत्तरः प्रधानं यत्र । माक्षकमधिकभूम्यादि । इति व्यवहार प्रतिहम् । (दिगभेदः । इति मात्स्यम् ।१२०।५०।)

मक्षोदं, क्ली, (अक्षणो वेदस्य वदनम् । मक्ष+वद्+क्यप् ।) मक्षणो वाक्यम् । इति मुग्धबोधव्याकरणम् ॥

मक्षोदा, त्रि, (मक्ष+वद्+क्यप्+टाप् ।) मक्षणः कथा । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २११ ।
"मक्षोदाश्च कथाः कुर्य्यात् पितृणामेतदीप्सितम् ॥"
"सदा मक्षिवद्भवपरः कथाश्च कुर्य्यात् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

मक्षोपनिषत्, [द्] पुं, (मक्षाणं माक्षणं उपनयति इति । मक्ष+उप+नी+क्विप् । उपनयनवैदिककर्मप्रधानम् ।) मक्षाग्रदूतः । इति राजनिर्घण्टः ॥ माक्षणोपनयनकर्त्ता च ॥

मक्षौदनं, क्ली, (मक्षणे वेदमोदनम् ।) यत्र ऋत्विग्भ्यो दानमन्नम् । इति वैदिकाः । (यथा, अथर्ववेदे । ४ । ३५ । ७ ।
"मक्षौदनं निर्मितं पचामि प्रयत्नु मे मह-मानस्य देवाः ॥")

माक्षं, क्ली, (मक्षस्य इदम् । मक्षन्+"तस्येदम् ।" ४।३।१२० । इत्यण् । 'नस्तद्धिते ।' ६।४।१४४ । इति टिलोपः ।) मक्षतीर्थं । तत्तु अङ्गुष्ठस्य मूले वर्तते । इत्यमरः । २ । ७ । ५१ ॥ अनेन तीर्थेन द्विजस्याचमनं यथा, आह्निकतत्त्वे ।
"अन्तर्जानुः शुचौ देश उपविष्ट उदङ्मुखः ।
प्राग्वा माक्षेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ।
अङ्गुष्ठोत्तरतो रेखा या मार्द्दोविकस्य च ।
तत्तु माक्षमिति ख्यातं तीर्थमाचमनाय वै ॥"
मक्षपुराणम् । यथा,—
"माक्षं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मत्स्यपुराणमार्कण्डेयपुराणवचनम् ॥
(मक्षसम्बन्धि, त्रि । यथा, मनुः । ३ । २८ ।
"माक्षश्च तु सवाहन्ना ददुर्यावरं समाप्तः ।
एकैकशः पुमाणान् क्रमश्छन्दतिवोधत ॥"
मक्षा देवताऽस्य इति । मक्षन्+"साऽस्य देवता ।" ४ । २ । २४ । इत्यण् । टिलोपः ।
मक्षदेवताकमन्त्रादि । यथा, रघुः ।१५ । ६० ।
"अमोघं सन्दधे चास्मै धनुष्येकधनुर्द्धरः ।
माक्षमस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥")

माक्षः, पुं, (मक्षणोऽपत्यं पुमान् इति । मक्षन्+"तस्यापत्यम् । ४ । १ । ९२ । इत्यण् । 'नस्तद्धिते ।' ६ । ४ । १४४ । इति टिलोपः ।) नारदः । इति जटाधरः ॥ (मक्षणः इदमिति अण् ।) विवाहविशेषः । यथा,—
"इदमाहुय यथाशक्त्यलङ्कृता कन्या यत्र दीयते सः ।"
यथा,—
"आच्छाद्य चार्च्चयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया माक्षो धर्म्मः प्रकीर्त्तितः ॥"
इत्युद्वाहतत्त्वम् ।
("रात्रिश्च पश्चिमे यामे मुहूर्त्तो माक्ष उच्यते ।"
इति वचनात् रात्रिशेषयामार्द्धितोऽवश्यात् प्राक्दण्डद्वयात्मको कालविशेषः । यथा, मनुः । ४ । ९२ ।
"माक्षे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥")

माक्षण्यं, क्ली, (मक्षन्+ष्यञ् न टिलोपः ।) मक्षसंघातः । माक्षणसमूहः । वेदमार्गः । इति मेदिनी । ये, ६० ॥

माक्षणः, पुं, माक्षणो विप्रस्य प्रथमवर्णे अपत्यम् । मक्ष वेदस्तमधीते वा सः । इति भरतः । (मक्षन् + अण् "माक्षोऽजातौ ।" ६ । ४ । १७१ । इति नटिलोपः ।) तत्पर्य्यायः । द्विजातिः १ अग्रजन्मा २ भूदेवः ३ वाडवः ४ विप्रः ५ । इत्यमरः । २ । ७ । ४ ॥ द्विजः ७ सूत्रकण्ठः ८ ज्येष्ठवर्णः ९ अग्रजातकः १० द्विजन्मा ११ वक्त्रजः १२ मैत्रः १३ वेदवासः १४ नयः १५ गुरुः १६ । इति शब्दरत्नावली ॥ मक्षा १७ षट्कर्मा १८ द्विजोत्तमः १९ । इति राजनिर्घण्टः ॥ ० ॥ अयं सर्व्ववर्णश्रेष्ठः । मक्षणो मुखाज्जातः । प्रथमवर्णे तस्य संज्ञा वर्णः । माक्षणवीर्य्ये सुतिधरः । क्षत्रवीर्य्ये क्षत्रः । वैश्यवीर्य्ये गुरुः । माक्षणवीर्य्ये चरणः । पुष्करवीर्य्ये सर्व्वं दक्षयः । अथ माक्षणविरुद्धसर्व्वाध्ययनं अध्ययनं यजनं दानञ्च । श्रीविष्णुः आध्यापनं याजनं प्रतिग्रहञ्च । अयमाश्रमचतुष्टयान् भवति । यथा । ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च । चतुर्विधोऽस्तु मक्षणः एवैकमात्रयोर्व्वमाचित शेषम् । इति वेदान्तसारः । ० ॥ माक्षणोत्पत्तिः वैष्णवे माक्षणस्त्वणी माक्षणः । यथा,—
"माक्षणो माक्षणात्पन्नो माक्षणः सत्यसंवृतः ।
अविद्यायां तथैव स्याद्वैश्यायामपि वैश्य हि ॥"
इति महाभारते अनुशासने । ४७ । १८ ।
तत्र लक्षणं यथा,—
"जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते ॥"
इति वह्निपुराणम् ॥
अपि च ।
"न कुलेन न जात्या वा क्रियाभिर्म्माक्षणो भवेत् ।
चण्डालोऽपि हि वृत्तस्थो माक्षणः स युधिष्ठिर ॥

अहेरिव गणाद्भीतः सौहित्यान्नरकादिव ।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥
येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः ॥
विमुक्तं सर्व्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम् ।
असमेकचरं शान्तं तं देवा ब्राह्मणं विदुः ॥
जीवितं यस्य धर्म्मार्थं धर्म्मो रत्यर्थमेव च ।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्म्माणं तं देवा ब्राह्मणं विदुः ॥"
इति महाभारते मोक्षधर्म्मः ॥ ० ॥

अपि च । विश्वावसुरुवाच ।
"विप्रस्य लक्षणं ब्रूहि त्वद्भक्तिः का च तत्फला ।
यतस्त्वयानुपदेश्य पावनाः ब्राह्मणाः कृताः ॥
कल्किरुवाच ।
वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत् परम् ।
ते वेदा ब्राह्मणमुखे नाना धर्म्माः प्रकाशिताः ॥
यो धर्म्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला ।
तयाहं तोषितः श्रीशः सम्भवामि युगे युगे ॥
ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥
मृद्भस्मचन्दनाद्यैस्तु धारयेत्तिलकं द्विजः ।
भाले त्रिपुण्ड्रं कर्म्माङ्गं केशपर्य्यन्तमुज्ज्वलम् ॥
पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधाकृतम् ।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम् ॥
ब्राह्मणानां करे स्वर्गा वाचो वेदाः करे हरिः ।
गात्रे तीर्थानि यागाश्च नाडीषु प्रकृतिस्त्रिवृत् ॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसंज्ञितम् ।
तेषां स्तनान्तरे धर्म्मः पृष्ठेऽधर्म्मः प्रकीर्त्तितः ॥
भूदेवा ब्राह्मणा राजन् ! पूज्या वन्द्याः सदुक्तिभिः ।
चातुराश्रम्यकुशला मम धर्म्मप्रवर्त्तकाः ॥
बालाश्चापि ज्ञानवृद्धास्तपोवृद्धा मम प्रियाः ।
तेषां वचः पालयितुमवताराः कृता मया ॥
महाभाग्यं ब्राह्मणानां सर्व्वपापप्रणाशनम् ।
कलिदोषहरं श्रुत्वा मुच्यते सर्व्वतो भयात् ॥"
इति कल्किपुराणे ४ अध्यायः ॥ ० ॥

अपि च ।
"कर्म्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम् ।
स्वधर्म्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ११ अध्यायः ॥ ० ॥

अपि च ।
"जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारस्थितो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथाद्रोह आनृशंस्यं क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥ ० ॥

तस्य धर्म्मो यथा,—
"ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज ! धर्म्ममाहुः पुरातनम् ॥
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ।
तञ्चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि ॥
अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् ।
कुर्व्वीतापत्यसन्तानमथो दद्याद्यजेत च ॥
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ॥
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥"
इति पाद्मे स्वर्गखण्डे २६ अध्यायः ॥ ० ॥

तस्य माहात्म्यादि यथा,—
"सर्व्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः ।
तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः ॥
सर्व्वदेवाग्रजो विप्रः प्रत्यक्षत्रिदशो भुवि ।
स तारयति दातारं दुस्तरे विश्वसागरे ॥
हरिशर्म्मोवाच ।
सर्व्ववर्णगुरुर्विप्रस्त्वया प्रोक्तः सुरोत्तम ! ।
तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते ॥
ब्रह्मोवाच ।
सर्व्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि ।
अविद्या वा सविद्या वा नात्र कार्य्या विचारणा ॥
कोपादिदोषरहिता ये ब्राह्मणा ब्राह्मणोत्तम ! ।
आत्मभ्यो देवतेभ्योऽपि परेभ्यो न कदाचन ॥
सदाचारा द्विजाः पूज्या न च शूद्रा जितेन्द्रियाः ॥
अभक्ष्यभक्षका गावः कोलाः सुमतयो न च ॥
ब्राह्मणां भूमिदेवानां विधिनाप्युच्यते यथा ।
तव क्षेत्रादिकमिह ! विप्रमेव समाश्रितः ॥
क्षत्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः ।
अन्योन्यं गुरवो ज्ञेयाः पूजनीयाश्च भूसुर ! ॥
ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तमः ।
आयुः पुत्रांश्च कीर्त्तिञ्च सम्पत्तिञ्चापि वर्द्धते ॥
न च नौति द्विजं यस्तु मद्यपो मांसपो भुवि ।
सुदर्शनेन तच्छीर्षं कर्त्तुमिच्छति केशवः ॥"
पुष्पादियुक्तब्राह्मणस्य प्रणामनिषेधो यथा,—
"पुष्पहस्तं पयोहस्तं तैलहस्तञ्च भूसुर ! ।
न नमेद्ब्राह्मणं प्राज्ञस्तैलाभ्यङ्गितविग्रहम् ॥
जलस्थं देवपूजास्थं ध्यानमन्त्रितचेतसम् ।
देवपूजाञ्च कुर्व्वन्तं न नमेद्ब्राह्मणं बुधः ॥
अतिथिभ्यो ह्यकर्म्मणं सुस्नानञ्च द्विजोत्तम ! ।
तथा कामादि शास्त्रं न नमेद्ब्राह्मणं बुधः ॥
ब्राह्मणा यत्र तिष्ठन्ति वसते द्विजसत्तम ! ।
तद्वैकन्तु नमस्कारस्तत्र कार्य्यो न शोभना ॥
कलाभिवाद्यं द्विजं भक्त्या यो नाभिवादयेत् ।
न चाज्ञाकरणो दैवे नाभिवादः करोति च ॥
सम्प्रकामं तस्य यदीयं तिष्ठति न च ।
समस्तकामाः कर्म्मापि ब्रह्मणो द्विजोत्तमाः ॥
समरोपणं द्विजान् नाम न द्विजोत्तिव विज्ञ-
प्रजाः ।
द्विजेभ्यः सर्व्वं मौनेन तेषां वदः वदा यदि ॥
ब्राह्मणात् ब्राह्मणाद् यस्तु चौरवधा समर्पणं ।
सर्व्वोपद्रवपूर्णं तस्य गेहयोः कुरुते यमः ।
विप्रविप्रेभ्यो धनं गत्वा देव वञ्चकं कुरुते ।
तस्मिन् यज्ञे यमलक्षं लौहपिण्डं ददाति वै ॥
ब्राह्मणो यद्गृहे भुङ्क्ते तद्गृहे केशवः स्वयम् ।
देवताः सकला एव पितरश्च सुरर्षयः ॥"
तस्य पादोदकादिमाहात्म्यम् यथा,—
"विप्रपादोदकं यस्तु सम्मान्य पिबेद्बुधः ।
देहस्थं पातकं तस्य सर्व्वमेवाशु नश्यति ॥
कोटिब्राह्मणमध्ये तु सन्ति तीर्थानि यानि वै ।
तीर्थानि तानि सर्व्वाणि सन्ति द्विजपादयोः ॥
विप्रपादोदकैर्मिश्रं चिरं स्यादस्य मस्तकम् ।
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ॥
सर्व्वपापानि घोराणि ब्रह्महत्यादिकानि च ।
सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात् ॥
आयाता व्याधयः सर्व्वे परमक्लेशदायकाः ।
नश्यन्ति विलयं यान्ति विप्रपादाम्बुभक्षणात् ॥
पिबन्ति यानि तोयानि दोषघ्ने विप्रपादयोः ।
तेऽक्षयाः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम् ॥
प्रणम्य विप्रचरणौ दूर्व्वाभिर्योऽर्च्चयेद्बुधः ।
तेनार्च्चितो जगन्नाथो विष्णुः सर्व्वसुरोत्तमः ॥
विप्राणां पादनिर्म्माल्यं यो मर्त्त्यः शिरसा वहेत् ।
सत्यं सत्यं वदामि तस्य मुक्तिर्वै प्रजायते ॥"
तस्य प्रदक्षिणफलम् ।
"विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥"
तस्य पादसेवनफलम् ।
"यो दद्यात् पञ्चताम्बूलं विप्राणां पादसेवने ।
इह लोके सुखं तस्य परलोके ततोऽधिकम् ॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
मोक्षार्थी लभते मोक्षं विप्रपादस्य सेवनात् ॥
रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात् ।
मुच्येत बन्धनाद्बद्धो विप्राणां पादसेवनात् ॥
अपुत्राश्च या नार्य्यो मृतापत्याश्च याः स्त्रियः ।
बहुपुत्रा जीवपुत्राः स्युर्विप्रपादसेवनात् ॥"
इति पाद्मे क्रियायोगसारे ९० अध्यायः ॥
तस्य अस्पृश्यत्वे दोषो यथा,—
"नीचस्पृष्टेन कः पूर्व्वं नीचास्पृष्टं यस्तु परिक्षमात् ।
न शूद्रवर्त्ती कर्त्तव्यः सर्व्वजातिविवर्ज्जितः ॥"
तस्य अभ्यासात्मकत्वं यथा,—
"पारक्यं स्वपरैर्नित्यं हरिकर्म्म करोति च ।
न च सर्व्वकामो विप्रत्वेषु तपसा वृतः ॥
तदुपाददृढेकका भवेत् पुत्रा वहुनरा ।
चौरत्वं न दैवतो वच्चापि विद्योद्विजः ॥
तीर्थेषु च स्पर्शाङ्गे तस्य संस्पृष्टं माचरन् ।
ततः यानापि कार्य्येषु वेदवेदाङ्गपारगाः ॥
अस्पृश्यता अवश्यं दोषो यथा,—
"न हर्षन्ति सुराः पित्रः पितरः पितृसप्तकम् ।
अग्न्यग्नं च द्विजातीव विपन्नाद्विजश्च च ॥"
तस्य निन्दनकर्म्म यथा,—
"विष्णुब्राह्मणद्वेषी च विप्रबन्धविनो द्विजः ।
ब्रह्मद्वेषी नरोत्तमः विप्रभिर्दद्धोरः ।
सर्व्वदेववैरी न ब्राह्मणः शरणाः ॥

शूद्रान्नभोजी विप्रश्च विषभोजी यथोरगः ।
शूद्रशवदाही च शूद्राणां यो विप्रो वृषलीपतिः ।
शूद्राणां सूपकारश्च शूद्रयाजी च यो द्विजः ।
अवीरान्नभोजी (?) मत्स्यभोजी विषभोजी यथोरगः ।
यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः ।
भगभोजी कार्द्दभिको विषभोजी यथोरगः ।
यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी ।
यो विद्याविक्रयी विप्रो विषभोजी यथोरगः ।
सूर्य्योदये च द्विर्भोजी मत्स्यभोजी च यो द्विजः ।
शिलापूजादिरहितो विषभोजी यथोरगः ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥०॥
अपि च ।
"यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ।
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ।
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणम् ।
तत्पितॄणां सुराणाञ्च पूजने तत्समं यतः ।
कोटिजन्मार्ज्जितं पुण्यं सन्ध्यार्च्चातपसार्ज्जितम् ।
द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः ।
ब्राह्मणश्च सुरापीती विड्भोजी वृषलीपतिः ।
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ।"
अपि च ।
"करोति ग्रहणे यस्तु सन्ध्यां वा न करोति यः ।
विकर्म्म सर्व्वदुष्टो वा सन्ध्याहीनश्च यो द्विजः ।"
नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहदोषो यथा,
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां बदर्य्याञ्च गङ्गासागरसङ्गमे ।
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे बदरपाचने ।
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये ।
एतेष्वेव यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ।"
शालिग्रामशिलाप्रतिग्रहका यथा,—
"शूद्रस्त्रीजितलाभी यो ग्रामयाजीति कीर्त्तितः ।
देवोपजीवी विप्रश्च देवलश्च प्रकीर्त्तितः ।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः ।
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ।
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥०॥
विप्राणामाद्यनैवेद्यं पूर्व्वकृत्यं यथा,—
"आदौ कर्त्तुमर्हन्ति स्वयमन्यथा हि ध्रुवम् ।
पूर्व्वकृत्यं कृतो विप्रायोर्निवेद्य ध्रुवम् ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः ।
ब्राह्मणस्य प्रणम्यत्वं यथा,—
"ब्राह्मणञ्च प्रपश्येच्च [illegible] परेः ।
तपसोऽर्थेऽपि हि नमस्कृत्य दयादिकम् ।
कर्म्म दिशा अथ [illegible] ।
अदृष्टे शूद्रस्य कर्म्म ब्राह्मणा यदि स्मृतौ ।
सायाह्ने गुरवे गिरा दयायां च भुङ्क्ते ।
[illegible] देवि विप्रदाने प्रतिदिनम् ।
तथा दानवराज्याय यथा तः पुष्करान्तरे ।
ब्राह्मणानां प्रसादेन कपिलो ब्रह्मणा सुत ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५८ अध्यायः ॥
ब्रह्मचर्य्याश्रमनियमा यथा,—
"वेदं वेदौ तथा वेदान् विन्द्यादधीत्य तु समाहितः ।
तदर्थञ्चाभिगम्याथ तत्र स्नायाद्द्विजोत्तमः ।
गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ।
चीर्णव्रतोऽथ युक्तात्मा स शक्तः स्नातुमर्हति ।
वैणवीं धारयेद्यष्टिमन्तर्व्वासस्तथोत्तरम् ।
यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम् ।
छत्रञ्चोष्णीषममलं पादुके चाप्युपानहौ ।
रौक्मे च कुण्डले धार्य्ये कृत्तकेशनखः शुचिः ।
स्वाध्याये नित्ययुक्तः स्याद्बहिर्म्माल्यं न धारयेत् ।
अन्यत्र काञ्चनाद्विप्रो न रक्तां बिभृयात् स्रजम् ।
शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ।
न रक्तमुल्बणञ्चान्यधृतं वासो न कुण्डिकाम् ।
नोपानहौ स्रजं चाथ पादुके च प्रयोजयेत् ।
उपवीतकराद्दर्भान् तथा कृष्णाजिनानि च ।
नापसव्यं परीदध्याद्वासो न विकृतञ्च यत् ।
आहरेद्विधिवद्दारान् सदृशानात्मनः शुभान् ।
रूपलक्षणसंयुक्तान् योनिदोषविवर्ज्जिताम् ।
अमातृगोत्रप्रभवामसमानर्षिगोत्रजाम् ।
आहरेद्ब्राह्मणो भार्य्यां शीलशौचसमन्विताम् ।
ऋतुकालाभिगामी स्याद्यावत् पुत्रोऽभिजायते ।
वर्ज्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु ।
षष्ठ्यष्टमी पञ्चदशी द्वादशी च चतुर्द्दशी ।
ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मत्रयाहनि ।
आदधीतावसथ्याग्निं जुहुयाज्जातवेदसम् ।
व्रतानि स्नातको नित्यं पावनानि च पालयेत् ।
वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः ।
अकुर्व्वाणः पतत्याशु नरकानतिभीषणान् ।
अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान्न हापयेत् ।
क्रिम्यस्थि शल्यसङ्गवकपवाय-
प्रवाहणाग्नुत्कटकाश्वपृष्ठैः ।
गुदस्य पार्श्वे पिड़का भवार्त्तिः
पक्वप्रभिन्ना तु भगन्दरः स्यात् ।
विरेचनप्रेषणपाटनञ्च
विशुद्धमार्गस्य च तैलदाहः ।
स्यात् क्षारमत्रैव तथाचितेन
हितस्य चास्य व्रणवच्चिकित्सा ॥"
इति चरके चिकित्सास्थाने पञ्चदशेऽध्याये ॥)
भगभक्षकः, पुं, (भगं योनिसम्भवमिव भक्षयति कौशिको निर्माणयतीति । भक्ष + ण्वुल् ।) कुट्टनी । इति महाभारते दानधर्मः ॥ कोट्ना इति भाषा । तस्याभक्ष्यविशेषो यथा,—
"यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुट्टनी यस्य गच्छाति शुभा चान्द्रायणं चरेत् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
भगवती, स्त्री, (भगः ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इत्युक्तलक्षणम् अडैश्वर्यमस्त्यस्या इति । भग + "तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ । इति मतुप् । मस्य वः ।
"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥"
इति कारिकोक्तेर्नित्ययोगेऽत्र मतुप्प्रत्ययः । ततः स्त्रियां ङीप् ।) दुर्गा । गौरी । इति मेदिनी । ते, ११९ ॥ (सा च प्रसिद्धविषयो महामाया देवी । यथा, मार्कण्डेये । ८१ । ४४ ।
"ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥")
सरस्वती । यथाह गौराविका ।
"सा मां पातु सरस्वती भगवती निःशेष-जाड्यापहा ॥"
गङ्गा । यथा, दशहरास्तोत्रगङ्गास्तोत्रे ।
"भगवति ! भवतीतीरे नीरमात्राशनोऽहं विगतविषयतृष्णः कृष्णमाराधयामि ।"
तस्याः पार्श्वं यथा,—
"यथा शिवो हि भगवान् शिवा भगवती तथा ।
अनयोर्न भेदोऽस्ति तथैव कार्य्यतः कवे ।
आत्मविज्ञानमर्वेन्तं कर्म्म विधेयं जगदिदम् ।
इदं सकलजगदा का शक्तिर्मन्त्रात्मके सदा ।
चिदेवमनेकमेव कर्म्म व्यवहारैः पुरे पुरे ।
शिवात्मकं जगत् देवदेवेन भगवती स्मृता ॥"
इति देवीभागवते दशमस्कन्धे ४१ अध्यायः ॥

अपि च ।
"सेव्यते या सुरैः सर्व्वैर्भावयेत् भक्तितो जनः ।
धातुर्भवेति देवानां भगवत्येव सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्याः प्रतिमाविशेषस्य पूजने फलविशेषो यथा,
ब्रह्मोवाच ।
"अथ तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शङ्कराद्यैः सुरर्षिभिः ।
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ।
शम्भुः पूजयते देवीं महाद्युतिमयीं शुभाम् ।
अक्षमालाकरो नित्यं तेनासौ विबुधेश्वरः ।
अहं हेममयीं देवीं यजामि सुरसत्तम ! ।
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ।
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन अद्भुतं सनातनम् ।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ।
तेनासौ धनदो देवो धनेशत्वमवाप्नुयात् ।
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ।
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन सम्प्राप्तमनौपम्यं गुणावहम् ।
वसवः कांस्यजां देवीं पूजयन्ति विधानतः ।
प्राप्नुवन्ति महात्मानो वसुत्वं सुमनोरमम् ।
अश्विनौ पार्थिवां देवीं पूजयन्तौ विधानतः ।
तेन ताविश्विनौ देवौ दिव्यदेहौ महाप्रभौ ।
स्फाटिकीं शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि सम्प्राप्तं तेन चाद्भुतमुत्तमम् ।
देवीमग्निमयीं पुण्यामर्च्चयेदग्निर्भावितः ।
अग्नित्वं प्राप्तवांस्तेन देवोऽसौ धर्म्मवित्तमम् ।
ताम्रीं देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चते तेन सम्प्राप्तं तेन सूर्य्यत्वमुत्तमम् ।
मुक्ताफलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि सम्प्राप्तः सोमत्वं सततोज्ज्वलम् ।
प्रवालकमयीं देवीं यजन्ति पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्राप्नुवन्ति परं पदम् ।
लवणसारमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महाकायास्तेन ते भीमविक्रमाः ।
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन अद्भुतवीर्यास्ते प्रयान्ति परमं पदम् ।
लौहमयीं सदा देवीं यजन्ति गुह्यकाश्च ते ।
तेन भोगवतीं ते प्राप्ता नित्योत्सवमन्दिरम् ।
वज्रलोहमयीं देवीं यजन्ति मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ।
सर्व्वे देवाः सगन्धर्व्वाः सिद्धविद्याधरोरगाः ।
पूजयन्ति सदाकालं कन्यैका सुरसत्तमाः ।
तथा त्वमपि देवेश ! भक्तिमान् परां भावम् ।
दिव्यां कन्यामयीं पूज्य भवति श्रीमन्महान् ।
कामान् सुरवराश्रय ! कान्तिस्तेजो बलं यशः ।
ददाति सर्व्वलोकानां चिन्तामणिरिवेप्सितम् ॥"
इत्यादि देवीपुराणे दशमीपूजाप्रयोगनाम्नि ५७ अध्यायः ॥ अन्यत् इतराश्रयं सर्व्वं यथा,—

ईश्वर उवाच ।
"देवी यजन्तु ये शुक्लाष्टम्यां तथा च शोभनम् ।
सर्व्वोपचारैर्युक्तं नवम्यां चार्च्चितम् ।
तस्मिन् षष्ठ्यां अर्घ्यं दत्त्वा दिवा अर्चयेत्ति च ।
दत्त्वा सुरभिगन्धादि नित्यं पक्वान्नकानि च ।
देवीप्रासादवेतारं पूजयन् भवेत् शुभम् ।
एवं प्रवर्त्तेत यस्तु तस्य पुण्यफलं शृणु ।
दशपूर्व्वापरान्तं च आत्मानं चैव तारितम् ।
उद्धृत्य च कुलं याति ब्रह्मलोके महीपते ।
गच्छेत् भगवती यत्र सदा परमपूजिता ।
तत्र कल्पान्तरं यावद् भुक्त्वा भोगान् मनोरमान् ।
पुनः कालात् क्षितौ पापः पृथिव्यामेकराड् भवेत् ।
सर्व्वकामसमोपेतः शान्तः पुरश्चरेश्वरः ।
पुनर्देवा दिवालोके महाभागो शिवो भवेत् ।
कल्पान्तस्थितो नित्यं देवीप्रासादकारकः ।
लभते परमां पुष्टिं दत्त्वा दिवसं भवेत् ।
देवी यजन्तु ये शुक्ल ! कृष्णाष्टम्यां विशेषतः ।
स भवेन्नराणां श्रीमान् सर्व्वकामसमन्वितः ।
तदा संवत्सरे जातोऽस्य कर्म्मकामफलपदम् ।
देवी यजन्तु ये शुक्ल ! सोमदेवाद्देवर्षयः ।
स्त्रियो वा यदि वा पुंसः कल्पान्तं तु विचक्षणम् ।
स सर्व्वेषामपि कामान् देवी प्रीतश्च प्रयच्छति ॥"
इत्यादि देवपुराणे ४२ अध्यायः ॥
भगवद्भक्तः, पुं, (भगवतो भक्तः वा भक्तः ।) विष्णुभक्तिमान् । अथ भगवद्भक्तानां लक्षणादि । सामान्यतः केचित् ।
"विष्णुरेव हि यस्यैव देवता वैष्णवः स्मृतः ॥"
अथ विशेषः ।
"स्मरणकीर्तनपादसेवनार्चनादिषु भक्त्यापि ।
देवेष्वपि च तस्यैव भक्ताः सन्ति तथा तथा ॥"
तत्र श्रीमद्भागवते भगवद्भक्तलक्षणम् । तथा च स्कान्दे श्रीमार्कण्डेय-भगीरथसंवादे ।
"एकादशीव्रतं दिव्यं वैष्णवानाम् ।
कुर्वन्ति महीपाल ! ते वै भागवता नराः ।
प्रातःकाले न यात्रेति दिनं प्राप्य हरेर्व्रतम् ।
कुर्व्वन्ति चाग्रतः रात्रौ सदा भागवता हि ते ।
यस्येष्टा द्वादशी पुण्या रात्रौ जागरणं तथा ।
अस्माकं नाभिदेवस्य न वै भागवतो नरः ।
संसारे विपुला देवी न जन्मादि व्रतादि च ।
एवं च वैष्णवा ये ते पुण्यं कुर्वन्ति सदा नराः ॥"
स्कान्दे भगवद्भक्तलक्षणं मार्कण्डेयभगीरथ-संवादे एव ।
"एकादशीपरं दिव्यं वैष्णवानां च दैवतम् ।
स्वयं विष्णुकान्तं देवदेवं देवतानां सदा ।
उपवासं दिवा रात्रौ जागरे च व्रतानि च ।
योऽस्मिन् पूजयेद्भक्त्या केशवं न च संशयः ।
महादानानि दिवा रात्रौ भक्त्या सम्पूजयन्ति ।
हरिवासरादयो ये सदा भागवता हि ते ॥"

[illegible] ।
यथा,—
"[illegible] ।
[illegible] ॥"
इति च ।
"[illegible] ।
[illegible] ॥"
[illegible]
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
यथा,—
"[illegible] ।
[illegible] ॥"
[illegible] । यथा,
"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"
[illegible] ।
यथा,—
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥"
[illegible] । यथा,—
"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"
[illegible] । यथा,—
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
[illegible] । यथा,—
"[illegible] ।
[illegible] ॥"
[illegible]

[illegible] । यथा,—
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"

[illegible] ।
"[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible] ।"
[illegible] ।
"[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
इति च ।
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible] ।
[illegible] ।
"[illegible] ॥"

खल्वर्थः। भाग श्रीतत्त्वसारोक्तादि। तत्र:
श्रीगुरोः सकाशात् मन्त्रग्रहणम्। यागः होम-
पूर्व्वकयथाविधिदीक्षाग्रहणमित्यर्थः। तत्र इत्या-
कर्म्माणि पूजाकर्म्मविशेषाणि भगवादीनि
पाद्योक्तार्घ्यादीनि वा सर्व्वेषां तेषां पूजाङ्ग-
त्वात्। तानि च तत्रैवोक्तानि। यथा,—
"अर्च्चनं मन्त्रपठनं यागयोगौ महात्मनः।
नामसङ्कीर्त्तनं सेवा तच्चिह्नैरङ्कनं तथा।
तदीयाराधनं चर्च्या नवधा भिद्यते शुभे ॥"
अर्च्चनञ्च पञ्चारो पञ्चारो धर्म्मारय: पुर-
षार्थः पञ्चमपुरुषार्थश्च भक्तिः। यदा पञ्च-
तत्त्वानि भगवानात्मपरमात्मपरमेश्वरनन्दात्मानो
यायार्थानि। इति तट्टीका ॥ ७ ॥
एकान्तिता नारदे।
"एकान्तेन सदा विष्णौ यस्मादेवे परायणाः।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥"
तद्विशिष्टैकान्त्यपरता एकादशे उद्धवप्रश्नोत्तरे।
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥"
भागवते। ११। ११। ३०।
"न कामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥"
सा च एकान्तिता चतुर्द्धा। तत्र धर्म्मावार-
रेव श्रीमदुद्धवप्रश्नोत्तरे एव।
"आज्ञायैवं गुणान् दोषान् मयादिष्टानपि
स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च
सत्तमः ॥"
गीतायाञ्च।
"सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥
यदा यस्यानुगृह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥"
अनवरतैकनिष्ठता भागवते श्रीमद्भरत-
संवादे देवोपाख्याने।
"सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।
निर्म्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः ॥"
तथैव तत्रैव श्रीकपिलदेवहूतिसंवादे।
"न इसे याचन्त कामि। सर्व्वतद्विनिर्म्मिताः।
बहुलभवं ते यान्ति वशीवरता हि ते ॥"
निष्कामत्वेऽपि मनोऽभिरतो स्यादि।
"यस्य इन्द्रमदादि वैन्द्रे रमते रमः।
न विमुखा न भर्तो न वै भागवतो वरः।
वासनाप्रबलेन भक्तव्याभिचारिणो।
वासव इन्द्रे विनं न वै भागवतो वरः ॥"
प्रेमैकपरता च भक्तस्य तत्रमत्तमे श्रीकपिल-
देवस्य पुत्राद्वारवे।
"न वा मयीव मनोऽनुगताः
अन्येषु देवकारादिवेषु।
इत्येषु भावाजनाकृतिमत्सु
न प्रोक्तपुना भगवान् वैर्दे ॥"

इति मिश्रं परं वा।
"मिश्रा प्रेमैकपरता प्रेम: स्नातात्मत्मनः।
उत्तमा मध्यमा चान्यौ कनिष्ठा चेति भेदतः ॥"
तत्रोत्तमा यथा एकादशे हरियोगीश्वरोत्तरे।
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः।
स्वेष्टदेवस्य भावं यः सर्व्वभूतेषु पश्यति।
भावयन्नि च तान्यपि चिन्ताद्यैः सततः सताम् ॥"
तृतीये श्रीकपिलदेवहूतिसंवादे।
"मय्यनन्येन भावेन भक्तिं कुर्व्वन्ति ये दृढाम्।
मत्कृते त्यक्तकर्म्माणस्त्यक्तस्वजनबान्धवाः ॥"
एकादशे श्रीहरियोगीश्वरोत्तरे च।

"विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरशनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥"

तत्रैव मध्यमाह हरियोगीश्वरोत्तरेव।
"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
कनिष्ठा तत्रैव।
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥
श्रद्धया पूजनं प्रेमपोषकं भक्त इत्यपि।
प्रेमको हि करोत्यत्र मत्तं भक्तार्थसञ्चयात्।
तथापि च साम्यपि भक्तेर्न्यासि सान्ति।
यस्मादेवापि विदन्ति येषु भागवता हि ते।
एतानि सततानन्दं श्रीमत्कृष्णादिभिर्मतः।
स्पृष्टानि सततं सत्त्वे विशेषानि परात्मनि।
देवस्तववरतः स्मृर्द्धम्भा वन्दो यमाः।
दिवा हि मनसो यज्ञं न वर्त्ति इतस्ततः ॥"
अनन्योक्तं मोक्षधर्म्मे नारदीये।
"आवमार्द्द हि दृष्टं वं यस्य मधुसूदन।
सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चयः ॥"
इति श्रीहरिभक्तिविलासे १० विलासः।
भगवान्, [त्] (भगः "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य
यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग
इतीङ्गना।" इत्युक्तषड्विधैश्वर्य्यमस्त्यस्येति।
भग + मतुप्। मस्य वः।) १ बुद्धः।
इत्यमरः। १। १। १३। ईश्वरः। यथा,—
"भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः।
पूज्ये त्रि। इति मेदिनी। भगवत्पूज्यार्थे यथा,
"मधुरगाह वैरागे धामा चतुर्विधेषु।
तदेतत् प्रवदाम्यहं धर्म्मे शरणं मम।
है भगवन्ति देवेषु प्रसाद परम मम।
इन्द्रकर्म्मादि विचार्य वां प्रकाशिनमपि।
है रिद्धे देवेन्द्र वै इति चारुमेधो मुनिः।
ददर्श भगवन्तश्च तदा देवतारः।
समुद्रस्य इव प्राणिभिः सर्व्वहनम्।
अदितिं प्रणम्य च र्त्तिकाराय संजयम्।
दिर्घे वासवं स्थाने भूषतौ वसवाचम्।

आत्मप्रयत्नसापेक्षा यतः कर्म्म तं वै पश्यन्ति सूरयः।
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिभिः।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः।
एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्।
अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते।
मैत्रेय भगवच्छब्दः सर्व्वकारणकारणे।
सम्भर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने।
ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा।
वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः।
एवमेष महाशब्दो मैत्रेय भगवानिति।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः।
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।
शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः।
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति।
ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः।
अपि च।
"परमात्मा च भगवान् विश्वरूपी जनार्द्दनः।
महद्विभाव् भागवतो वासुदेवो हि कथ्यते।
भगवत्वाद्यवानमो गमनश्चापगतिः।
भगवद्भक्तिमाहात्म्य ... भागवतो भवे।
भगवान् कृष्णदेवो मूर्त्तिरूपधरोऽव्ययः।
भावेन तं भजेद्दं भगवत्त्वं हरिम्।
भक्त्या भावेन विशं भगवन्तं महेश्वरम्।
तयोर्भागवतो भूत्वा भगवान् दर्शितेन ॥"
इत्यादि ब्रह्मपुराणे वैष्णवविवेकोक्ते
ब्राह्मणो नामाध्यायः। अन्यच्च।
"भगवान् पुरुषश्रेष्ठः सर्व्वेषां कीर्त्तिदो भवेत्।
यदा नाम च प्राहर् च भगवान् वर्णाभिदितः।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७२ अध्यायः।
षड्ऐश्वर्य्यान्वितः। स च हरीश्वरः। तदा-
दिदेवस्य ध्येयं यथा,—
"अथ श्रीभगवान्नाम यदा देवेन कर्म्मणः।
तदा तादृश्य विग्रहं कृत्वैव च विश्वते।
अथ श्रीभगवत्तामहिदेवस्य च वैभवम्।
कविभिः वर्णितं भगवत्त्वमनुष्यकल्पनात् ॥"
भगवानादिदेव श्रीभगवन्नामविभावैविलास
कृतम्। तत्र भागवतार्थे श्लोकं। यथा,—
"विष्णुगुणं भजनमूर्त्ति
भगवान्तुष्यत्त्वं हि।
किः भवति भगवान्
कर्म्म विष्णुपादेन निःसङ्गात् ॥"

[illegible]

कल्पित्वा बालमिति।" उत्तरा० १।७६। बाहुलकात् भज्ञेरपीति उज्ज्वलदत्तः इति भासनम्। महादेवात् कुत्सच।) इकरोटि:। यथा। भगालं नरमस्तकम्। इति कश्चित् जटाधरः। भगस्य महादेवस्य अलं भूषणमितिव्युत्पत्तिः॥

भगाली, [न्] पुं, (भगालं इकपालं भूषणत्वेनास्यास्तीति इनिः।) शिवः। इति त्रिकाण्डशेषः॥ (चण्डीकाल्यौ भगाली च। इति उज्ज्वलदत्तधृतो राजशेखरश्च।)

भगिनी, स्त्री, सहोदरा। तत्पर्यायः। स्वसा २। इत्यमरः।२।६।२९। भगं यत्नः पित्रादितो रक्षणे पितृतोऽस्या इति इनिप्रत्ययेन भगिनी। इति तट्टीकायां भरतः॥ (भगं योनिरस्त्यस्या इति। भग+इनिः ङीप्।) स्त्रीमात्रम्। यथा,—
"परियद्धा च वामाङ्गी भगिनी प्रशस्तिनंदी॥"
इति शब्दचन्द्रिका॥

भगिनीपतिः, पुं, (भगिन्याः पतिः।) स्वसृभर्त्ता। तत्पर्यायः। आवुत्तः २ भामः ३। यथा,—
"भगिनीपतिरावुत्तो भावो विद्वानथावुकः॥"
इति शब्दरत्नाकरः।३।७।१२॥
"यस्तो भगिन्यस्ते भाम। यथा ते वत पाप्मना।
पुत्रवान् इवायसं सुहृदोऽपि हिता: सुता:॥"
इति श्रीभागवते १० स्कन्धे ४ अध्याय:॥

भगीरथः, पुं, (भं ज्योतिर्मण्डलं गीर्वाङ्मुखं तत्र रथ इन्द्रियाणि इव यस्य।) दिलीपराजपुत्रः। कपिलशापेन भस्मीभूतानामधःपतितानां पितृणामुद्धरणायानेन गङ्गा आनीता। यथा, मात्स्ये १२ अध्यायः।
"असमञ्जस्य तनयो अंशुमान्नाम विश्रुतः।
तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः॥
येन भागीरथी गङ्गा तपः कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुतः॥"

भगोः, पुं, } हे भगवन्!। इति मुग्धबोधव्याकरणम्। सम्बोधनार्थश्च॥ (सम्बोधन-
भगोःच, } वाचकाविमौ।)

भगोलः, पुं, (भानां नक्षत्राणां गोलः। नक्षत्र-चक्रमेव विरचितः गोलाकारः पदार्थ इत्यर्थः।) भचक्रम्। नक्षत्रचक्रम्। यथा। इदानीं भगोलमाह।
"याम्योत्तरक्षितिजवत् द्वयं विदध्या-
दाधारवृत्तयुगलं ध्रुवयष्टिविद्धम्।
बहिश्च भासमवलयवदनोर्ध्वं
भाधारवच्च विषुवद्वलयं तदेव॥"
अत्र भगोले द्विविधं याम्योत्तरवृत्तं तदाकारमवरमाधारवृत्तयुगलं ध्रुवयष्टिविद्धं कृत्वा तद्बहिश्चोर्ध्वं समवलयवत् परोधस्तात् आधुनिकार्यं तथाधोऽपि विषुवद्वृत्तकम्॥ ७॥
इदानीं क्रान्तिवृत्तमाह।
"क्रान्तिवृत्तं दद्यात् द्विविधं मत-
स्य भाद्रभ मार्गे कृत्वा भाहनः।
क्रान्तिपातः कर्षेत् तथा तत्र वृत्त-
ऐन्द्राय तत्तुल्योत्तरक्रान्त्यादिभिः॥

अथान्यत्तद्वृत्तमात्रमेव वृत्तं कृत्वा तत्र
मेषादीन् प्रकल्प्य द्वादशराशयोऽङ्ग्याः॥"
तद्क्रान्तिवृत्तसंज्ञम्। तस्मिन् वृत्ते रविर्भ्रमति तथा रवेर्भार्द्धान्तरे भूभा च। तथा तत्र क्रान्तिपातौ मेषादिविलोमं भ्रमति। तथा यदायां विक्षेपपाताः सम्फुटा विलोमं भ्रमन्ति। अतः क्रान्तिपातादीनि स्थानानि तत्राङ्कानि॥ इदानीं क्रान्तिवृत्तनिवेशमाह।
"क्रान्तिपातं च पाताङ्कषट्कान्तरे
नाडिकावृत्तसम्पातं विदध्याद्दिशम्।
पाततः प्राक् त्रिभे सिद्धभागैर्द्युतम्
दक्षिणे तैश्च भागैर्विभागान्तरे॥"
क्रान्तिपातचिह्नात् षड्भिरन्तरेऽपरचिह्नं कार्यम्। ते चिह्ने नाडीवृत्तेन संसक्ते कृत्वा पातचिह्नादग्रतः त्रिभान्तरे नाडीवृत्तादुत्तरतश्चतुर्विंशत्या उत्तरतो यथा भवति। अपरभागे त्रिभान्तरे दक्षिणतश्च तैर्भागैर्यथा भवति तथा बध्नीयात्॥ ७॥ इदानीं विमण्डलमाह।
"नाडिकामण्डले क्रान्तिवृत्तं यथा
क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्।
क्षेपवृत्तस्तु राशयङ्कितं तत्र च
क्षेपपातेषु चिह्नानि कृत्वोत्तरम्॥
क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च
क्षेपपाते षडृक्षे च कृत्वा युतिम्।
क्षेपपातायनः स्वत्रय त्रिभे
क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्॥
प्रोक्तवर्त्मेन भक्तादिमध्या युता:
स्युः परक्षेपभागा यथायां स्फुटाः।
क्षेपवृत्तानि बद्धा विदध्यात् पृथक्
समवृत्ते ध्रुवानीतपूर्वा यथा:॥"
अत्र श्लोकस्य समस्तस्य व्याख्यानम्। यथा क्रान्तिवृत्तं पृथक् कृतं दत्तं विमण्डलमपि राशयङ्कं पृथक् पृथक् कृत्वा तत्र मेषादयः सम्फुटक्षेपपातं दद्यात् चिह्नं कार्यम्। अथ क्रान्तिवृत्तस्य विमण्डलस्य च क्षेपपातचिह्नयोः सम्पातं कृत्वा तस्मात् षड्भान्तरे अपरसम्पातं कृत्वा क्षेपपातायनत्रिभान्तरे क्रान्तिवृत्तादुत्तरतः स्फुटैः क्षेपभागैः एवमन्य त्रिभान्तरे तैरेव भागैर्दक्षिणतः स्थिरं कृत्वा विमण्डलं निवेशयेत्॥ अथ यतिना ये विक्षेपभागाख्ये विना युताः प्रोक्तवर्त्मेन भक्ताः स्फुटा क्षेपाः ॥७॥ यथाप्रसारः। यदि कश्चित् पर्याप्तरूपार्थं तर्हि विस्तारे विवादिति। अतो भगोले विस्तरेण धानादर्थम्। एवं चन्द्रादीनामपि विमण्डलानि कार्याणि। समविमण्डले यथा धाराच्छ॥ इदानीं क्रान्तिं विशिनष्टि।
"नाडिका मण्डला निर्देशनाग्रतः
क्रान्तिसूत्राश्रितः क्रान्तिसूत्राश्रयः।
क्षेपवृत्तार्धसन्देहेन स्फुटैः
नाडिकासन्धिराश्यन्तरस्थितः॥
क्रान्तिसूत्रे कक्षुप्तवद्वार्थं तत्र
नाडीकातृतीयनिर्देशार्थं वा क्रान्तिः॥"

अथ विमण्डले च यद्यपिच्छायार्थं तत्र क्रान्तिवृत्तात् पतितोऽभ्यन्तरं च विदित:। अथ विमण्डलत्रयस्य नाडीवृत्तादुत्तरितोऽन्तरं या स्फुटा क्रान्तिः॥ ७॥ इदानीं क्रान्तिपातमाह। विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात्। तद्भगणाः सौरोक्ता अयुतत्रयं कल्पे। अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्। तत्पक्षे तद्भगणाः कल्पे गोऽङ्गऋतु-नन्दगोचन्द्राः १९९६६९। तत् सञ्जातं पातं क्षिप्त्वा खेटेऽपमः साध्यः। क्रान्तिवशात् चरसाधनदलनदलमाप्ते ततः शेषाः॥ क्रान्तपातः क्रान्तिपातः। पातो नाम सम्पातः कयोः विषुवत्क्रान्तिवलययोः। यदि तयोर्मेषादावेव सम्पातः। किन्तु तत्रापि चलनमस्ति। ये अयनचलनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः। मेषादेः पृष्ठतस्तावद्भागान्तरे क्रान्तिवृत्ते विषुवद्वृत्ते तत्र निर्दधे। यदि क्रान्तिपातोऽस्तीति वक्तुं न शक्यते। प्रत्यक्षेण तद्योदयप्रकाशात्। उपलब्धिप्रकारमपि वक्ष्यति। स कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत्। तदा स्वल्पान्तरोपलम्भः। इदानीं बहूनां साम्प्रतिकचलनम्। अन्यदेव तत्र प्रतिदर्शितमतम्। यदिदमयनचलनोऽपि सौरसिद्धान्तोक्तप्रकारमशक्यत्वेन भगणपरिध्यादिकम् कथं तैर्नोक्तः। सत्यम्। अत्र यदि तत्स्थि उपपत्तिमार्गेणागमः प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं नोक्ता इति न वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावप्राप्तावपि प्रत्यक्षेणोपलभ्यमानो तावेव मन्दोच्चप्राप्तावपि दायेव विक्षेपाभावप्राप्तौ तादेव पातप्राप्तावपि किन्तु तेषां प्रतिदिनं नास्ति वेति वक्तव्यम्। तत्र मन्दोच्चपातानां गतिरस्ति। अल्पमन्दोच्चपातगतिग्रहवशाद्विद्धा। सा च क्रियते तद्वत्। येऽर्धचक्रे चलितान्यपि नापि प्रतिदिनमस्ति। नहि ममस्थिता वार्षिकी दैवसिकी वा प्रतिदिवसा। एवम् इदमेव मतं कान्तिकल्पायामपि आनयन्ति। तदा कल्पस्थाः कथं दामोदरम्। एवम् तर्हि सम्प्रतिकल्पकाद्यकोऽपि वास्ति इन्द्रयोः कर्णदा। यदा पूर्वाङ्गनाः वाक्य महदन्तं प्रदर्शयन्ति तदा महामन्दिरं ब्रह्मगुप्तादीनां कथनार्थं सिद्ध एव वचनम्। तदुपपत्त्युक्तात्यादि प्रतिपादिताः प्रकारान्ति वारंवारं दशैन। अथ यथा प्रतिपन्नयो तद्वान्तर्दशः यत् कथाद्धानि वाक्यानि विश्वर्ध न वापि। अत्रैवं तावदस्य वाचकाः वर्षादिषु पक्षापूर्ववत् प्रोक्तानि अत्राभ्य। यथा गुरुणा इदैवदत्तवत्सम्भृतं न एव कल्पितम्। ये सौरपूर्णसमत्वोऽस्मान् अन्तरान्ते। अत्र च वेदाद्य वा प्रहरा प्रमत्। यदा वेदाद्या विषुवे रविमध्ये तम् न एव कल्प-

[illegible]

"विवर्त्तिते पार्श्वगतञ्च नीता-
स्तिर्य्यग्गते दीर्घगतो भवन्ति ।
क्षिप्तेऽतिमूलं विषमञ्च सन्ध्योः
क्षिप्ते लघौ दक् विघटञ्च सन्धेः ॥"

विवर्त्तिते सन्धावसुक्ते । अस्थिद्वयोपरिवर्त्तिते पार्श्वगतः अन्यस्थितास्थिसन्धिद्वयपार्श्वयोर्गतः । तिर्य्यग्गते सन्धिगते । एकास्थिमस्थि अन्विष्यार्थं कृत्वा तिर्य्यग्गते क्षिप्ते सन्ध्योः अवसन्नयोः । एकास्थिमस्थि परस्मात् उपरिगते । सन्ध्योः अतिमूलं तत्र विषमं कदाचिदधिकं कदाचिन्न्यूनम् । अधःक्षिप्ते अन्विष्टे एकास्थिमस्थि अधोगते । दक् सर्व्वविघटः विघटनञ्च ॥ ० ॥ काण्डभग्नमाह । भग्नञ्च काण्डे बहुधा प्रयाति विधितो नामभिरेव तुल्याम् । भग्नं काण्डे काण्डविषये बहुधा बहुभिः प्रकारैः प्रयाति । अत्र बहुविधत्वं द्वादशविधत्वं बोद्धव्यम् । बहुविधस्य काण्डभग्नस्य पृथक् लक्षणं नोक्तं किन्तु काण्डनामभिरेव तुल्यत्वम् । कर्कटकादिनामानुरूपमेव लक्षणं किन्तु नामभिरेव बोद्धव्यम् ॥ ० ॥ तान् प्रकारानाह ।

"काण्डे त्वतः कर्कटकाश्वकर्णौ
विचूर्णितं पिच्चितमस्थिच्छल्लितम् ।
काण्डेषु भग्नं ह्यतिपातितञ्च
मज्जागतं विस्फुटितञ्च वक्रम् ।"

छिन्नं द्विधा द्वादशधा च काण्डे । अतः परं भग्नान्तरं काण्डे काण्डभग्नं तदाह । कर्कटकः अस्थिविद्धिवर्त्तुलो मध्ये प्रोन्नतः पार्श्वयोरवनतः कर्कटतुल्यत्वात् कर्कटः । अश्वकर्णः अश्वकर्णवदुन्नतास्थिनिर्गमादश्वकर्णः । विचूर्णितं चूर्णितमस्थि तत्र शब्दस्पर्शाभ्यां बोद्धव्यम् । पिच्चितमस्थि पिच्चितं बहुशोथम् । छल्लितं विदीर्णं त्वक्छल्लवत् । काण्डेषु भग्नं काण्डभग्नम् । यदपि कर्कटकादि भग्नमेव काण्डभग्नं तथापि एवं काण्डभग्नं सामान्यविशेषात् । अत्र भग्नं भग्नः भुटितं नैव भग्नया भुटितं पृथग्भूतं अपि च्छिन्नं यत्र काण्डे तदतिपातभग्नम् । अतिपातितं अस्थ्येव छित्त्वा पातितमस्थि । मज्जागतं अस्थ्यवयवोऽस्थिमध्ये प्रविश्य मज्जानं गतम् । विस्फुटितं कोकिलेरोर्णं वक्रं ह्रस्वं भग्नं कृत्वा कृशीभूतम् । छिन्नं द्विधा एकं द्विधा अनुभग्नं अपरं विदीर्णं द्विधाभूतम् । द्वादशधा च काण्डे । काण्डे च भग्नं द्वादशविधमपि । नवोक्तेव कर्कटादि ॥ ० ॥ काण्डभग्नस्य सामान्यं लक्षणमाह ।

"श्वयथुर्नां बहुशो वेदनायाः
स्पन्दनमभावे मरणोऽपि रुजः ।
पद्मोत्पलं स्पर्शने रुक्
सम्पीड्यमाने च सशब्दता च ।"

भग्नस्य काण्डे सम्यक् लिङ्गमेतत् ।"

काण्डभग्नस्य विशेषं लक्षणं सम्यगेतत् सामान्यं सर्व्वं भग्नस्य सूत्रेण सम्यग्भवत् । कथं कर्कटकादि ॥ ० ॥

सामान्या पीडा । सर्व्वासवस्थासु प्रपन्नायामपि ॥ कष्टसाध्यमाह ।

"अल्पाशिनोऽनात्मवतो जन्तोर्वाताभकस्य च ।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥"

अनात्मवतो रोगप्रतीकारे यत्नरहितस्य । वाताभकस्य च वातप्रकृतेः । उपद्रवैः ज्वराध्मानमोहमलमूत्रपुरीषसङ्गादिभिः ॥ ० ॥ असाध्यमाह ।

"भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतम् ।
जघनं प्रतिपिष्टञ्च वर्ज्जयेत्तद्विचिकित्सकः ॥"

कपालं जानुनितम्बांसगण्डतालुमस्तकशिरो ऽस्थीनि कपालानि तथा च्युतं तथा पिष्टम् । प्रतिपिष्टं चूर्णितम् । कृच्छ्रसाध्यमाह ।

"असंश्लिष्टकपालञ्च ललाटे चूर्णितञ्च यत् ।
भग्नं स्तने शङ्खे पृष्ठे मूर्द्ध्नि च तद्विवर्ज्जयेत् ॥"

असंश्लिष्टकपालमिति भग्नविशेषणम् । स्तने स्तनयोरन्तरे उरसि । शङ्खे चूर्णे चूर्णमात्रे ॥ ० ॥ सम्यक्सन्धानाह ।

"सम्यक् संहितमप्यस्थि दुर्न्यासाद्दुर्निबन्धनात् ।
संक्षोभाद्वापि यत् पश्चाद्विक्रियां तच्च वर्ज्जयेत् ॥"

सम्यक्संहितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दुःस्थापनात् दुर्निबन्धनात् दुःखबन्धनात् संक्षोभात् अभिघातादिना चलनात् पश्चाद्विक्रियां गच्छेत् विकृतं भवति तद्वर्ज्जयेत् ॥ अस्थिविशेषेण भग्नविशेषमाह ।

"तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु ।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ।"

तरुणास्थीनि नासाकर्णाक्षिपुटेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति । तैनाम नखतामसदृशं मतम् । नलकानि नलाकीनि नाडीवत् सच्छिद्राण्यस्थीनि भिद्यन्ते अवमानादनुप्रवेशादिदीर्घीभवन्ति । कपालानि जानुनितम्बांसगण्डतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि दन्ताः स्फुटन्ति त्रुटन्ति । अस्थीनि तरुणनलककपालरुचकवलयभेदात् पञ्चविधानि । तत्र रुचकानि दन्ताः । वलयास्थीनि पार्श्वादौ त्रुट्यन्तीति बोद्धव्यम् ।

"वलयानि पार्श्वयोर्हस्ते वक्षोजरपादयोः ।
पाद्योरपि वक्रीणि स्फुटन्ति विभजन्ति ।"

अथ भग्नस्य चिकित्सा ।

"भग्नं नैवाद्य संक्षुण्णमनुत्पन्नमनुपेत्य ।
दत्त्वौषधं नीत्वैव श्रवसि निर्भयं वैद्यम् ।"

वैद्यः स्निग्धप्रस्थेनौषधः कल्याणाज्यं वा । कषोष्णमिश्रधान्य तस्मात् उपचारः कर्त्तव्यः ।

"क्षतजस्थिभङ्गं सर्व्वं तत्रास्थिमवत्यल्पम् ।
अस्थिभङ्गं सत्त्वं विनिश्चित्य विदध्यात् तत्र सदा ।"

इति भग्नचिकित्सा वर्ज्जयेत् ॥ तत्र योगः अस्थिसंहारः एवमिति ।

"प्रपौण्डरीकं मधुकं काकोलीद्वयमेव च ।
क्षीरसिद्धं पिबेत् सम्यक् भग्नसन्धानकृत् परम् ॥"

"लाक्षास्थिसंहृत् ककुभाश्वगन्धा
चूर्णीकृता नागबला पुरश्च ।
संभग्नमुक्तास्थिरुजो निहन्या-
दङ्गानि कुर्य्यात् कुलिशोपमानि ॥"

अस्थिसंहृत् हड़जोड़ । लाक्षादिगुग्गुलुः ॥

"मांसं मांसरसः क्षीरं सर्पिर्यूषः सतीनजः ।
बृंहणञ्चान्नपानञ्च देयं भग्नाय जानता ॥
लवणं कटुकं क्षारं मद्यं मैथुनमातपम् ।
रूक्षमन्नं भग्नत्वापि भग्नः सेवेत न क्वचित् ॥"

इति भावप्रकाशे भग्नाधिकारः ॥

(अथास्य निदानं यथा । पतनपीडनप्रहाराक्षेपव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुमानमात्रं द्विविधमेवोपदिष्टं सन्धिमुक्तं काण्डभग्नञ्च । इति सुश्रुते निदानस्थाने पञ्चदशेऽध्याये ॥

अथ भग्नचिकित्सा ।

"भग्नास्थिच परं बद्ध्वा तस्य वक्ष्यामि निश्चयम् ।
प्रतिलम्बे कूर्पंरे च जानौ अपि कटौ तथा ॥
एकैकं विसृजेत् पादाभ्यामपि सन्धय ॥
गोपाद्वैर्द्धि दन्तको योजितो कूर्परादयः ॥
जङ्घाकूर्परमध्ये च तथा च विषमोन्नतः ।
उरसि क्रोडके चैव विभग्नं तद्वयच्छकम् ॥
विभग्नञ्च परं बद्ध्वा वैद्यस्तत्र समन्वयेत् ।
प्रसवेस्थपनोतीवैरशक्तबेष वेदयेत् ॥
उष्मामला उपदेश स्नेहेन सद्य बन्धयेत् ।
प्रसार्य्य बन्धमानो वक्षणं काष्ठिकैष तु ॥
पिष्ट्वा स्थितः पवेमण नैव भोज्यं प्रभावते ।
सप्तदेशादि योजयेत् आनार्थं कारयेत् पुनः ॥
एवं क्रिया समाप्ता तस्य वर्ज्यं विमोक्षयेत् ॥
एकाहाद्यान्तरे नापि चूर्णकम् समन्वयेत् ॥
यावद्दृढत्वं न यात्यास्थि तावत् बध्नीयात् ॥"

इति हारीते चिकित्सितस्थाने । ३६ अः ।

अथ पथ्यविधिः ।

"शालीनामोदनं मधुरैर्वा सन्धवर्ज्जिता ।
शालिपिष्टकृतोत्पन्ना दृष्टौ हस्ततीक्ष्णैः ॥
मत्स्योदनं पक्वं क्षीरं तैलं माषश्च मधु ।
क्षीरं पक्वं विधु दक्षो बालकवत् ॥
हासा हास्यो सम्यक् तथा पवनादि इत्येवम् ।
मधुकं भिक्षा विष्टं देयं भग्नाय जानता ॥"

अथ भग्नस्य पथ्यम् ।

"लवणं कटुकं क्षारमम्लं मैथुनमातपम् ।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च ॥"

इत्यायुर्व्वेदपारम्पर्य्यात् भग्नाङ्गवान्? ॥ भग्नदशायाम्, स्त्री (भग्नं दशमम् ।) इत्यमरोक्त मध्यमपदम् । यथा,—

"दुःखेनानेन तप्ता तत्र भग्नदशा ततो ।
दूर्व्वाकाण्डं विहाय च वहेत् द्युतिः अङ्गनाः ॥
भवनाद्रे संज्ञायां पृथ्वीवः दृष्टौ चित्रं ।
वक्रौ कार्य्यमार्गे वाक्यं वाक्यं वदन् ॥"

इति कोषानुकथनम् ।

भग्नपृष्ठः, पुं, (भग्नं पृष्ठमस्मिन् ।) सम्मुखः । इति त्रिकाण्डशेषः । त्रुटितमेरुदण्डः । यथा,—
"भग्नपृष्ठकटिग्रीवं स्तब्धदृष्टिमधोमुखम् ।
कष्टेन लिखितं पुस्तं यत्नेन परिपालयेत् ॥"
इति प्राचीनवाक्यम् ।
(भग्नं पृष्ठं यस्य । त्रुटितमेरुदण्डे, त्रि ।)

भग्नसन्धिः, पुं, (भग्नः सन्धिरस्मात् वा ।) शरीरस्य सन्धिस्थानभङ्गरोगविशेषः । तदौषधं यथा,—
"अभया त्रिफला व्योषः समैरेभिः समीकृतैः ।
तुल्यो गुग्गुलुना योज्यो भग्नसन्धिप्रसाधकः ॥"
इति गारुडे १७५ अध्यायः ।

भग्नसन्धिकं, क्ली, (भग्नो विश्लिष्टः दधः सन्धिः संघातोऽत्र ।) घोलम् । इति शब्दचन्द्रिका ।

भग्नात्मा, पुं, (भग्नः क्रमेण क्षीण आत्मा देहो यस्य । कृष्णप्रतिपदादिकमेणैकैककलाच्छेदेन भग्नदेहत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दचन्द्रिका ।

भग्नाशः, त्रि, (भग्ना आशा यस्य । हताशः । दीर्घसूत्राभङ्गयुक्तः । यथा,—
"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥"
इत्याह्निकतत्त्वम् ।

भग्नी, स्त्री, (भगिनी । पृषोदरादित्वात् साधुः ।) भगिनी । इति द्विरूपकोषः ।

भङ्कारी, स्त्री, (भमित्यव्यक्तशब्दं करोतीति । कृ+अण् । गौरादित्वात् ङीष् ।) दंशः । इति त्रिकाण्डशेषः ।

भङ्क्ता, [ऋ] त्रि, भङ्गकर्त्ता । भञ्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः । (यथा, मनौ ।९।२८९।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥"

भङ्गः, पुं, (भज्यते इति । भञ्ज+कर्म्मणि घञ् ।) तरङ्गः । इत्यमरः । १ । १० । ५ । पराजयः । (भञ्ज्+भावे घञ् ।) भेदः । रोगविशेषः । इति मेदिनी । गे, १६ । (रोगविशेषार्थे यथा,—
"पतनपीडनप्रहाराक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदेक्ष्यामः ।"
"पातघातादिभिर्द्वेधा भङ्गोऽस्थ्नां सन्धयस्तथा ।
प्रसारणाकुञ्चनयोरशक्तिः सन्धिमुक्तता ॥
इतरस्मिन् भृशं शोफः सर्व्वावस्थास्वतिव्यथा ।
अशक्तिश्चेष्टितेऽल्पोऽपि पीड्यमाने सशब्दता ॥
समासादिति भङ्गस्य लक्षणं बहुधा तु तत् ।
भिद्यते भङ्गभेदेन तस्य सर्व्वस्य साधनम् ॥
यथास्थानसुपरीताय तथा तद्भङ्गदेशतः ।
प्रच्यावनादि यत्रास्थि यत्र शब्दं करोति यत् ।
यत्रास्थिशेषः प्रविशेत्यक्षमस्थ्नो विदारितः ।
भग्नं यथाभिन्नातेन स्विन्नदेशावपीडितम् ॥
उन्नम्यमानं नमति यच्च नम्यति गच्छति ।
तदुःसाध्य स्थानादवनामनाक्षेपिणामपि ॥
(भग्नं अस्थ्न यस्य सन्धिमुक्तं चलत्य यत् ।
अपनं प्रतिपिडनं भग्नं यन्त्रादिभिर्न्ययेत् ॥
अमंश्लिष्टकपालन्तु ललाटे चूर्णितन्तथा ।
यच्च भग्नं भवेच्छङ्खशिरः पृष्ठस्तनान्तरे ।
सम्यग्यमितमप्यस्थि दुर्न्यासाद्दुर्निबन्धनात् ।
संक्षोभादपि यद्गच्छेद्विक्रियां तद्विवर्ज्जयेत् ।
बालवृद्धौ च दुर्बलस्य सन्धिरुग्णापि वा ।
तरुणास्थीनि भुज्यन्ते भज्यन्ते नलकानि तु ।
कपालानि विभिद्यन्ते स्फुटन्त्यन्यानि भूयसा ।
अथावनतमुन्नम्यमुन्नतञ्चावपीडयेत् ।
आञ्छेदतिक्षिप्तमधो गतञ्चोपरि वर्त्तयेत् ।
आञ्छनोत्पीडनोन्नामचर्म्मसंक्षेपबन्धनैः ।
सन्धीन् शरीरगान् सर्व्वान् चलानप्यचलानपि ।
इत्येतैः स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम् ।
पट्टैः प्रभूतसर्पिर्भिर्वेष्टयित्वा तदुपरि ततः ।
कदम्बोदुम्बराश्वत्थसर्ज्जार्ज्जुनपलाशजैः ।
वंशोद्भवैर्वा पृथुभिस्तनुभिः सुनिवेशितैः ।
सुश्लक्ष्णैः सुप्रतिक्षिप्तैर्वल्कलैः शकलैरपि ।
कुशाह्वयैः समं बन्धं पट्टस्योपरि योजयेत् ।
शिथिलेन हि बन्धेन सन्धेः स्थैर्य्यं न जायते ।
गाढेनातिरुजादाहपाकश्वयथुसम्भवः ।
आषाढ्यादावतौ घर्म्मे सप्ताहान्मोचयेद्धिमे ।
साधारणे तु पञ्चाहाद्भङ्गदोषवशेन वा ।
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत् ।
तं पञ्चमूलपक्वेन पयसा तु सवेदनम् ।
सुखोष्णं वापचार्य्य स्थापकतैलं विजानता ।
विभज्य देशं कालञ्च वातघ्नौषधसंयुतम् ।
प्रततं सेकलेपांश्च विदध्याद्भग्नशीतलान् ।
गृष्टिक्षीरं च सर्पिष्कं मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्भग्नः शीतलं लाक्षया युतम् ।
सवणस्य तु भग्नस्य व्रणो मधुघृतोत्तरैः ।
कषायैः प्रतिसार्य्योऽथ शेषो भग्नोदितः क्रमः ।
जम्बूनि व्रणमांसानि प्रलिप्य मधुसर्पिषा ।
सम्बधीत प्रयात् वैद्यो बन्धनैश्चोपपादयेत् ।
तान् समान् सुस्थितान् ज्ञात्वा फलिनीरोध-
कट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ।
धातकीरोध्रचूर्णैर्वा रोहन्त्याशु तथा व्रणाः ।
इति भग्न उपक्रान्तः स्थिरधातोर्ऋतौ हिमे ।
मांसलस्याल्पदोषस्य सुसाध्यो दारुणोऽन्यथा ।
पूर्व्वमध्यान्त्यवयसामेकद्वित्रिचतुर्भिः क्रमात् ।
मासैः स्थैर्य्यं भवेत् सन्धेर्यथोक्तं भजतो विधिम् ।
कटीजङ्घोरुभग्नानां कपाटशयनं हितम् ।
यन्त्रणार्थं तथा कीलाः पञ्च कार्य्या निबन्धनाः ।
जङ्घोर्व्वोः पार्श्वयोर्द्वौ द्वौ तलस्थश्च कीलकः ।
श्रोण्यां वा पृष्ठवंशे वा वक्षस्यक्षकयोस्तथा ।
विमोक्षे भग्नसन्धीनां विशेषेण समाचरेत् ।
सर्व्वश्चिरविमुक्तांश्च चिरश्लिष्टान् स्वरूक्षतान् ।
उक्तैर्विधानैर्बुद्ध्या च यथास्वं स्थानमाचरेत् ।
अधस्थिभग्ने रूढे तु विषमोल्वणसाधिते ।
आपोथ्य भङ्गं यमवित्ततो भग्नवदाचरेत् ।
भग्नं नैति यथा पाकं प्रयतेत तथा भिषक् ।
पक्वमांससिरास्नायुसन्धिः श्लेषं न गच्छति ।
वातव्याधिविनिर्द्दिष्टान् स्नेहान् भग्नस्य
योजयेत् ॥"
इति वाभटे उत्तरस्थाने । २७ अध्यायः ।)
कौटिल्यम् । भयम् । विच्छित्तिः । इति हेमचन्द्रः । (विच्छेदार्थे व्यवहारो यथा,—
"सह धातुविभागो वियोगः सम्बोधरागिः समावनिरोधः स भङ्गः सत्त्वोज्झभावः । इति चरके शारीरस्थाने पञ्चमेऽध्याये ।)
रोगमात्रम् । इति राजनिर्घण्टः । गमनम् । जलनिर्गमः । इत्युज्ज्वलदत्तः । (नाशः । यथा, महाभारते । १ । ५७ । ८ ।
"उच्छ्रितः शरभो भङ्गो विक्लवैश्च विरोहणः ।")

भङ्गवासा, स्त्री, (भङ्गेन वासः सौरभमस्याः ।) हरिद्रा । इति शब्दरत्नावली ।

भङ्गसार्थः, त्रि, (भङ्गं वक्रभावं अमार्थ्यवसमिर्थ्यं गच्छति प्रवर्त्तते यत् या क्रिया इति यावत् भङ्गसमर्थयतीति सार्थ+अच् । कौटिल्यव्यवहारक्रियार्थित्वादस्य तथात्वम् ।) कुटिलः । इति हारावली ।

भङ्गा, स्त्री, (भज्यते इति । भञ्ज्+"हलश्च ।" ३ । ३ । १२१ । इति बाहुलकाद् घञ् टाप् ।) शणविशेषः । तत्पर्य्यायः । मातुलानी २ । इत्यमरः ।२।९।२०। (अस्याः पर्य्याया गुणाश्च यथा,
"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्द्धिनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
द्वे भङ्गायां भङ्गा काश्मीरेषु स्वनामख्याता । इति सुभूत्यादयः । इति भरतः । एतस्याः फलं कलायपरिमाणमिति सर्व्वस्वम् । इति सारसुन्दरी । शणस्यापरश्शणम् । यथा,—
भङ्गा शस्ते शणाह्वये । इति मुकुटधृततदः । सिद्धिः । गेउकी इति भाषा । यथा,—
"विभन्ती रेवती भङ्गा कलिङ्गा परिचारिणी ।"
इति शब्दचन्द्रिका ।
औषधविशेषः । भाङ् इति सिद्धि इति च भाषा । यथा,—
"त्रैलोक्यविजया भङ्गा विजयेन्द्राशनं जया ।"
इति शब्दचन्द्रिका ।
अस्या गुणाः विजयाशब्दे द्रष्टव्याः ।

भङ्गानः, पुं. (भङ्गेन अनिति इति । अन्+अच् ।) मत्स्यविशेषः । भाङ्गन इति भाषा । तत्पर्य्यायः । दीर्घभङ्गनः २ । इति शब्दमाला ।

भङ्गारी, स्त्री, (भङ्कारी पृषोदरात् साधुः ।) दंशः । इति त्रिकाण्डशेषः ।

भङ्गिः, स्त्री,(भज्यतेइति । भञ्ज+इन् । न्यङ्क्वादित्वात् कुत्वम् ।) विच्छेदः । (यथा, रघौ ।१३।५४।
"यावादवातारदूरमतीतेन
मार्गेन भङ्गिरचितस्फटिकेन रामः ।")
कौटिल्यभेदः । इत्यमरभरतौ । विन्यासः । इति कलिङ्गः । (भङ्गं करोतीति । भञ्ज+णिच्+इः ।) कल्लोलः । इत्यमरदत्तः । भङ्गः । इत्यर्थे आजः । छलनिभः । इति रमसः ।

भङ्गिमा, [न्] पुं, (भङ्ग+बाहुलकात् भावे इमनिच् ।) भङ्गिः । यथा,—

"भचरे कमलं चारु हृष्टोत्तममूलरश्मिमा ।
प्राप्नुयाम् ! किमेतन्ते पैशविम्बापमद्रिमा ।"

इति काव्यचन्द्रिका ।

भङ्गी, स्त्री, (भङ्गि + कृदिकारादक्तिन इति पक्षे ङीष् ।) भङ्गिः । यथा,—

"आयासि मानमलयाद्रि ! कथो विभङ्गी
भङ्गीधनं भयभयोरपि चातुरीव ।
आभीरमन्दमदशास्मुरणप्रसंगी
वंशीरवो यदि न मामवशीकरोति ।"

उद्भटः ।

भङ्गुरः, त्रि, (भज्यते स्वयमेवेति । भञ्ज + "भञ्ज-भासमिदो घुरच् ।" ३ । २ । १६१ । इति कर्म-कर्तरि घुरच् । चित्वात् कुत्वमिति काशिका ।) स्वयं भङ्गशीलः । यथा, भागवते । ७ । ७ । ४४ ।

"कामान् कामयते काम्यैर्यदर्थमिह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ।")

कुटिलः । इति जटाधरः ।

भङ्गुरः, पुं, (भञ्ज + घुरच् । कुत्वञ्च ।) नदीवङ्कः । इति शब्दमाला । नदीर बाँक इति भाषा ।

भङ्गुरा, स्त्री, (भङ्गुर + टाप् ।) अतिविषा । प्रियङ्गुः । इति राजनिर्घण्टः । (अतिविषा-पक्षे विषभङ्गकत्वात् चास्य विषयो ज्ञेयः ।)

भङ्ग्यं, क्ली, (भङ्गाया भवनं क्षेत्रमिति । भङ्गा + "विभाषा तिलमाषोमाभङ्गाणुभ्यः ।" ५ । २ । ४ । इति पक्षे यत् ।) भङ्गाक्षेत्रम् । तत्पर्यायः । भाङ्गीनम् २ । इत्यमरभरतौ । (भङ्गमर्हतीति । भङ्ग + दण्डादित्वात् यत् । भङ्गार्हे त्रि ।)

भचक्रं, क्ली, (भानां राशीनां चक्रम् । भानां नक्षत्राणां ग्रहादिभिरेवोद्दिष्टो गोलाकारः पदार्थः ।) राशिचक्रम् । यथा,—

"भगानां भचक्रे स्थितौ युक्तो यामौ च्युतः ।
कालचक्रे स्थितोऽभौ शुक्लोदयगेचराः ।
राहुः केतुश्चरंश्च यथाशास्त्रं ग्रहाः ।
यदा दिवा च भवन्ति मेरोर्भूगोलकोद्भवा ।
छाया भवेत्तदा रात्रिः स्वाच्च तदिदद्दा-

दिवम् ।

यदेन्दोश्चरान्तु गोलच्छायया भवेत् ।
अन्तोऽभ्यगोऽथोरव आपयोरेव कारणात् ।
पाशगोपौ तु यात्रेते तथातः पूर्णपर्वणि ।
तत्र प्रवहवाद्यात् भवेत् राहोः विमुक्तः ।"
इत्यादि ब्रह्मदर्शं ब्रह्मवैवर्ते सोमाध्यायः ।९।
अथ भचक्रभ्रमणकारणम् ।

"नित्यचन्द्रे दिनतिमक्षणोयतो
कुतो वदः चरन्ति राशिचोदरी ।
तदोदितं हि भचक्रवद् यदा
अग्रहणं दिवसराश्योर्भवेत् ।
उदयनदितं यान्ति यथा यथा त-
था तथा तदस्तमनन्तमाप्नुवन् ।
तदनन्तरं यान्ति चोदयं दिवे-
कसरो नोचकथा दर्शनात् ।
गोलदर्शका कादि ।५।११।
भूमोदिब्रह्मा ।५८ भचक्रं दा ।

भूमौ कक्षायां या भागेभ्यो
योजनानि च यत्तम् ।"

इति सिद्धान्तशिरोमणौ गोलाध्यायः ।

(भानां नक्षत्राणां चक्रमिति विग्रहे नक्षत्र-चक्रम् । नक्षत्रमण्डलञ्च ।)

भज, इक् भाषे । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) इक् भञ्जयति । भाषि दीप्तौ । इति दुर्गादासः ।

भज, ञ पाके । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) ञ भाजयति । विश्राणने इति प्राञ्चः । विश्राणनं दानम् । इति दुर्गादासः ।

भज, ञ श्री सेवायाम् । इति कविकल्पद्रुमः । (भ्वा०-उभ०-सक०-अनिट् ।) ञ भजति भजते धनं भाता । श्री अभाक्षीत् छात्रं वायुः । इति दुर्गादासः ।

भजत् [त्] त्रि, (भजति विभजतीति जः । भज + शतृ: प्रत्ययः ।) भागकर्त्ता । सेवा-कर्त्ता । इति भजधातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम् ।

भजनं, क्ली, (भज + भावे ल्युट् ।) भागः । सेवा । इति भजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ।

"दारादौ ये भजनकथायाः
कुमारे ये तद्वत्कायाः ।
भजनमपि तद्गुणमिश्चनार्थं
नो पैदैनं वर्णं चार्थं ।"

इति मोहमुद्गरः ।

भजमानः, त्रि, (भजति अनसुक्ष्मानीति । भज + "ताच्छील्यवयोवचनशक्तिषु चानश् ।" ३ । २ । १२९ । इति चानश् । मानच् वा ।) न्याय्यम् । न्यायागतद्रव्यादि । इत्यमरः । ३ । १ । ५३ । भागकर्त्ता । सेवाकर्त्ता । इति भजधातोः कर्त्तरि शानच्प्रत्ययेन निष्पन्नम् । (यादवराजविशेषः । यथा, भागवते । ९ । २४ । ६ ।
"पृश्निश्चित्ररथो दुन्दुभिः प्रभवसुतः ।
भजमानो भविर्दिवो वृष्णिः स्वायम्भुवोऽन्धकः ।")

भञ्जकः, त्रि, (भञ्ज + ण्वुल् ।) भङ्गकर्त्ता । भनक्ति यः इत्यर्थे भञ्जधातोः कर्त्तरि अकप्रत्य-येन निष्पन्नः ।

भञ्जनः, त्रि, भङ्गकारकः । इति भञ्ज-धातोः कर्त्तरि अनटप्रत्ययेन निष्पन्नम् ।

भञ्जनं, क्ली, मोटनम् । इति भञ्जधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् । (यथा, महाभारते । १२ । १८ । २९ ।
"बभञ्ज तिरिटायेव विपादविनाश सदनैः ।
अपाङ्गैः प्रमोदाप्तः पैतृकान्यप्य भञ्जनम् ।")

भञ्जनकः, पुं, (भनक्ति आत्मरूपमिति । भञ्ज + ल्युः । ततः स्वार्थे संज्ञायां वा कन् ।) मुखरोग-विशेषः । तस्य निदानादि यथा,—
"वक्त्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञक ।"

इति माधवकरः ।

भट्टकः, पुं, (भटतीति । भट्ट + स्वार्थे कन् इति प्रत्ययः ।) देवकुलोद्भवः । तत्पर्यायः । कायिकः २ । इति त्रिकाण्डशेषः ।

भट्टा, स्त्री, (भटति भटादिकमिति । भट + अच् । टाप् ।) धान्यपूर्णा । यथा,—
"मौलिका भटरूपा च भावनाबहुवर्णिनी ।
सौमायशालिनी भट्टा भित्तिसंस्थितिमहिनी ।"
इति ब्रह्मयामले महाविद्यारहस्यम् ।

भट, भृतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) भटति पोषणम् । कर्मेत्यन्त-मिति गोविन्दभट्टः । भटति भर्त्तं दासी । इति दुर्गादासः ।

भट म भाषणे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् घटादिः ।) म भटयति । भाषणं कथनम् । इति दुर्गादासः ।

भटः, पुं, (भटति भ्रियते इति । यद्वा भटतीति । भट + अच् ।) योद्धा । इत्यमरः । २ । ८ । ६१ । (यथा, भागवते । ८ । १० । ८ ।
"उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ,
केचिद्गौरमुखैः ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ।"
म्लेच्छभेदः । इति हेमचन्द्रः । चोरः । (यथा, मेघदूते । ९ । १३४ ।
"पदे पदे सन्ति भटा रणोद्भटा
न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते ! कुविक्रमं
कृपाश्रये यः कृपणे पतत्रिणि ।")
दासविशेषः । इति मेदिनी । टे, ११ । रजनीचरः । इति शब्दरत्नावली । वर्णसङ्कर-विशेषः । यथा,
"नटंकाराद्भटी नाम्नी नाटिकां बटराजकः ।"
इति पराशरपद्धतिः ।

भटा, स्त्री, (भट + टाप् ।) इन्द्रवारुणी । इति शब्दमाला । राखालशशा इति भाषा ।

भटित्रं, क्ली, (भटति भज्यते इति । भट् + इत्र ।) शूलपक्वमांसादि । इत्यमरः । २ । ९ । ४४ । काबाब इति वा भाषा ।

भट्टः, पुं, (भटतीति । भट् + बाहुलकात् तट् ।) वर्णसङ्करविशेषः । भाट इति भाषा । तदुत्-पत्तिर्यथा,—
"वैश्यायां शूद्रवीर्येण पुमानेको बभूव ह ।
स भट्टो वावदूकश्च सर्वेषां स्तुतिपाठकः ।"
इति ब्रह्मवैवर्ते ब्रह्मखण्डे १० अध्यायः ।
अपि च ।
"क्षत्त्रियादविप्रकन्यायां भट्टो जातोऽनुवादकः ।"
इति वृहद्धर्म्मपुराणोत्तरखण्डे वर्णसङ्कर-कथनम् । विदुषामुपाधिविशेषः । स्वामी । नृपः । यथा,
"भट्टेवां पण्डितं देवं भट्टकं भट्टं गुरुम् ।
भट्टं भेदं नृपवरं भट्टारकेत्यभिधानके ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १०१ अ० ।

भट्टाचार्य्यः, पुं, (भट्टः पूज्यश्चासौ आचार्य्यश्च, कुमारिलभट्टः श्री भट्टाचार्य्य इत्यादिः ।

त्यस्तीति । अच् ।) तुतातभट्टमतं न्यायशास्त्रम् उदयनाचार्य्यमतं न्यायशास्त्रम् एतदुभयशास्त्रवेत्ता । एतद्वयमतं जानाति यः इत्यर्थे टचैकादिति कारकात् कर्म्मणि अणिति अप्रत्ययेन निष्पन्नः ॥

भट्टारः, त्रि, (भटतीति । भट्+क्विप् । भट् चासौ तारश्चेति कर्म्मधारयः । पृषोदरादित्वात् साधुः । यद्वा भट्टं स्वामित्वं ऋच्छतीति । अण् ।) पूज्यः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ७ । ८६७ ।
"सोमसिङ्गारभट्टारप्रशस्तकलशादयः ।
वद्धाय हर्षदेवेन कारागारं प्रवेशिताः ॥")

भट्टारकः, पुं, (भट्टार । संज्ञायां कन् ।) नाट्योक्तौ राजा । इत्यमरः ।१।७।१३॥ देवः । तपोधनः । इति मेदिनी । के, २५० ॥ पूज्ये त्रि । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।६।१४०।
"प्रविष्टेषु ततः कोशान् पुरं शुभधरादिषु ।
भट्टारकामठे दिद्दा भूयः पुत्रं न्यवर्णयत् ॥")

भट्टारकवारः, पुं, (भट्टारः संज्ञायां कन् । भट्टारकः सूर्य्यः तस्य वारः ।) रविवारः । यथा,—
"सखे ! फाल्गुनिर्म्मितमासान्तदव भट्टारकवारे वायमेतान् दन्तैः खण्डयामि ।" इति हितोपदेशे १ परिच्छेदे व्याघ्रं प्रति जम्बुकवाक्यम् ॥

भट्टिः, पुं, स्वनामख्यातरामकथाप्रथमहाकाव्यम् । तत्तु श्रीधरस्वामिसूनुभट्टस्वामिना महावैयाकरणेन कृतम् । इति जयमङ्गलकृता टीका । एतत् काव्यं भर्त्तृहरिणा कृतमिति भरतमल्लिकेन लिखितम् ॥

भट्टिनी, स्त्री, (भट्टं स्वामित्वमस्या अस्तीति । भट्ट+इनिः+ङीप् ।) नाट्योक्तौ अकृताभिषेका राजपत्नी । इत्यमरः । १ । ७ । १३ ॥ ब्राह्मणभार्य्या । इति मेदिनी । ने, ३१ ॥

भड इक् प्रिये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । इदित् ।) प्रियं कल्याणक्रिया वेदेश्चेव । प्रतारणे प्रसिद्धोऽयम् । इक् भण्डयति प्रतारको मुग्धं धनदानाङ्गीकारेण । इति दुर्गादासः ॥

भड इ ङ वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) परिभाषण इति गोविन्दभट्टः । परिहास इति चतुर्भुजः । ङ भण्डते इ भण्ड्यते विड्गौं लोकः । इति दुर्गादासः ॥

भड्ः, पुं, (भडतीति । भड इड परिहासे परिभाषणे वा+अच् ।) वर्णसङ्करजातिविशेषः । स तु वेटात् तीवरकन्यायां जातः । यथा,—
"वेटस्तीवरकन्यायां जनयामास षट्सुतान् ।
-माल्लं मल्लं मातरञ्च भड्डं कोलञ्च कन्दरम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

भड्रिलः, पुं, (भड्रतीति । भड्रि+"सलिकल्यनिमहिभडिभण्डीति ।" उणा०-१ । ५५ । इति इलच् ।) वीरः । शूरः । इत्युणादिकोषः ॥

भण शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-द्विक०-सेट् ।) च अवीभणत् अबभाणत्

स एव वक्तृवाक्यम् । श्रीजयदेवकमलाहरिवेदे भणति परमरमणीयम् । इति दुर्गादासः ॥

भणितं, त्रि, (भण+क्तः ।) शब्दितम् । कथितम् । यथा,—
"श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।"
इति गीतगोविन्दः ॥

भणितिः, स्त्री, (भण्यते इति । भण+क्तिन् ।) वाक्यम् । इति भूरिप्रयोगः त्रिकाण्डशेषश्च ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५४ ।
"नियन्त्रिता यद्भणितिस्तद्गुणीदीरयादियम् ।
अतिप्रसङ्गभङ्गात्तन्नैयत्तावासितः पुनः ॥")

भण्टाकी, स्त्री, (भण्यते भण्यते वा । भट् भर्त्तौ भणशब्दे वा+"पिनाकादयश्च ।" उणा० । ४ । १५ । इति आक । निपात्यते च । गौरादित्वात् ङीष् ।) वार्त्ताकी । इत्यमरः । २ । ४ । ११४ ॥ हट्टसी । इति रत्नमाला ॥ (वृन्ताकम् । तत्पर्य्यायो यथा,—
"वृन्ताकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टिकापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भण्डुकः, पुं, (भडतीति । भडि-उकन् ।) स्योनाकवृक्षः । इति रत्नमाला ॥ क्वचित् भण्डुकोऽपि पाठः ॥

भण्डः, पुं, (भण्डते इति । भडि प्रतारणे+अच् ।) अश्लीलभाषी । भाँड इति भाषा । इति संक्षिप्तसारोणादिवृत्तिः ॥ तत्पर्य्यायः । चाटुपटुः २ । इति भूरिप्रयोगः ॥

भण्डकः, पुं, (भण्ड+संज्ञायां कन् ।) खञ्जनपक्षी । इति जटाधरः ॥

भण्डनं, क्ली, (भडि+भावादौ ल्युट् ।) खलीकारः । कवचम् । युद्धम् । इति मेदिनी । ने, १०० ॥

भण्डहासिनी, स्त्री, (भण्डेन खलीकारेण हसति या । हस्+णिनिः । ङीप् ।) नर्त्तकी । इति शब्दरत्नावली ॥

भण्डिः, स्त्री, (भडि+इन् ।) वीचिः । इति हारावली ॥

भण्डिका, स्त्री, मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डिरः, पुं, (भण्डिल+रलयोरैक्यम् ।) शिरीषवृक्षः । यथा । भण्डिलो भण्डिरो मेमीति भरतधृतवाचस्पतिः ॥

भण्डिलः, पुं, (भण्डते परिहसतीवेति भाषते इवेति वा । भडि+"सलिकल्यनिमहिभडिभण्डीति ।" उणा० १ । ५५ । इति इलच् ।) शिरीषवृक्षः । इत्यमरः । २ । ४ । ६१ ॥ (तत्पर्य्यायो यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भण्डिलः, त्रि, (भडि+इलच् ।) शुभः । दूतः । इत्युणादिकोषः ॥ शिल्पी । इति संक्षिप्तसारोणादिवृत्तिः ॥

भण्डी, स्त्री, (भण्डते इति । भडि-इन् ।) कृदिकारादिति पक्षे ङीप् ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ९१ ॥ (पर्य्यायोऽस्या यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी गण्डीरी च मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥"
श्वेतत्रिवृता । तत्पर्य्यायो यथा,—
"श्वेतात्रिवृता भण्डी स्यात् त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भण्डीतकी, स्त्री, (भण्डी सती तकतीति । तक+अच् । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इति भावप्रकाशः ॥

भण्डीरः, पुं, (भडि+बाहुलकात् ईरन् ।) समष्ठिलक्षुपः । तण्डुलीयशाकः । (यथा,—
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुली वीजो विषघ्नश्चाल्पमारिषः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (वटवृक्षः । यथा, रामायणे । ६ । ७५ । २४ ।
"मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥"
"भण्डीरो वटः ।" इति तट्टीकायां रामानुजः ।)

भण्डीरलतिका, स्त्री, (भण्डीर इव लतति इति । लतिः सौत्रो धातुः+अच् । स्वार्थे कन् । टाप् अत इत्वम् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

भण्डीरी, स्त्री, (भण्डीर । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इत्यमरः ॥

भण्डील:, पुं, (भण्डीर । रलयोरैक्यम् ।) मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डूकः, पुं, (भडि+ऊक् ।) मत्स्यविशेषः । भाकुर इति भाषा । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । हृद्यत्वम् । श्लेष्मकरत्वम् । गुरुत्वम् । विष्टम्भित्वम् । रक्तपित्तहरत्वञ्च । इति भावप्रकाशः ॥ स्योनाकवृक्षः । इति रत्नमाला ॥

भद इक् शुभे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इक् भन्दयति शुभं कल्याणक्रिया । इति दुर्गादासः ॥

भद इ ङ हर्षे । दीप्तौ । शुभे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्-इदित् ।) ङ भन्दते । इ भन्द्यते पण्डितः सदा । इति दुर्गादासः ॥

भदन्तः, पुं, (भन्दते इति । भदि कल्याणे+"भन्देर्नलोपश्च ।" उणा० ३ । १३० । इति झच् । नलोपश्च ।) सौगतादिसाधुः । इति हेमचन्द्रः ॥ मायादेवीसुतः । सुगतः । पूजिते, त्रि । इत्युणा-

दिक्कोदः। (भद्रमः भ्रभिन्नः। इत्युणादौ। ३।१६०। उज्ज्वलदत्तः।) यथा, कथासरित्सागरे। ४६। १०८।
"तदान्विष्य यथावत् तं भद्रमभिगम्य च।
परिचर्य्यापरो भद्रा चौक्षि वर्णाङ्कचिह्नितः॥")

भद्राकः, पुं, क्ली, (भन्दते इति। भदि+"पिनाकादयश्च।" उणा०। ४। १५। इति आकः। नलोपश्च।) मङ्गलम्। इत्युणादिकोषः॥

भद्रं, क्ली, (भन्दते इति। भदि कल्याणे+"ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रेति।" उणा०। २। २८। इति रन्। निपात्यते च।) मङ्गलम्। (यथा, ऋग्वेदे। २। २६। २।
"यजस्व वीर! प्रविहि मनायतो भद्रं मनः
कृणुष्व वृत्रतूर्य्ये।"
यथा च कामन्दकीयनीतिसारे। १३। १२।
"किरीटमणिचित्रेषु मद्देषु चापहारिषु।
मालया विहितां पादे पूजयां भद्रमश्नुते॥")
मुस्तम्। काञ्चनम्। इति मेदिनी। रे, ५१॥

भद्रं, क्ली, स्त्री, (भदि+रन् निपात्यते च।) करणविशेषः। इति मेदिनी। रे, ५२। तत्तु विष्टिभद्रामेव प्रसिद्धमनुभद्रम्। इति ज्यौतिषम्॥

भद्रः, पुं, (भन्दते इति भदि+रन् निपातितश्च।) शिवः। खञ्जरीटः। वृषभः। कदम्बः। करिजातिविशेषः। इति मेदिनी। रे, ५०॥ मेरु-[illegible]। रामचरः। सुमेरुः। इति हेमचन्द्रः॥ खञ्जो। इति राजनिर्घण्टः॥ (चन्दनम्। तत्पर्य्यायो यथा,—
"श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
बाद्यमौखिकानां गतिविशेषः। यथा,—
[illegible] भद्रः।
इति कृष्णाचार्य्यकारिका॥ (वसुदेवस्य पुत्रभेदः। यथा, भागवते। ९। २४। ४७।
"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन्॥"
कोविदारविशेषः। यथा, महाभारते। १। १२४। ४६।
"[illegible] मानवञ्च विनोदं भद्रदर्शितम्।
[illegible] वर्षाणि च नदानि च॥"
क्रौञ्चद्वीपस्य [illegible] बहुप्रव-चालीयम्। यथा, भागवते। ५। २०। २१।
"[illegible]
[illegible]"
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

"भरतः शिशिरीतश्च भद्रो वैदूर्य्यपर्व्वतः।
कपिलः पिङ्गलो भद्रः सुरश्च महाबलः॥"
एकादशमन्वन्तरस्थो महेश्वरस्य अवतार-विशेषः। यथा, मत्स्ये। ४० अध्याये।
"एकादशद्वापरे तु यावत् त्रिदशो यदा।
तदाप्यहं भविष्यामि गङ्गाद्वारे कुशान्तिके॥
भद्रो नाम महातेजास्तत्रापि मम पुत्रकाः।
भविष्यन्ति महात्मानो ब्रह्मणा वेदपारगाः॥")

भद्रः, त्रि, (भन्दते इति। भदि कल्याणे रन्। निपात्यते च।) श्रेष्ठः। साधुः। इति मेदिनी। रे, ५२॥ (यथा, पञ्चतन्त्रे। १। २६।
"भद्र! करटक! अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य्य स्थितः॥")

भद्रकं, क्ली, (भद्र+संज्ञायां स्वार्थे वा कन्।) भद्रमुस्तकम्। इति रत्नमाला॥ (देवदारुशब्देऽस्य विषयोऽभिहितः॥) मनोज्ञे, त्रि। इति त्रिकाण्डशेषः॥

भद्रकः, पुं, (भद्र+संज्ञायां कन्।) देवदारुः। इति शब्दरत्नावली॥

भद्रकण्टः, पुं, (भद्रः कण्टो यस्य।) गोक्षुरः। इति राजनिर्घण्टः॥

भद्रकाली, स्त्री, (भद्रा मङ्गलमयी चासौ काली चेति कर्म्मधारयः। यद्वा, भद्रं कल्याणं कालयतीति। भद्र+कल+"कर्म्मण्यण्।" ३। २। १। इति अण्। ङीप्।) गन्धोली। कात्यायनी। इति मेदिनी। ले, १६८॥ तस्या उत्पत्तिर्यथा,—
श्रीधौम्य उवाच।
"शृणु त्वं नृपशार्द्दूल! भद्रकाली यथा पुरा।
प्रादुर्भूता महाभागा महिषस्य वधेन तु॥
महिषासुर महावीर्य्यो विख्यातो विधिवर्म्मितः।
स्वप्ने ददर्श घोरां स राक्षसं घोरदर्शनम्॥
महामाया भद्रकाली हत्वा खड्गेन वाहनम्।
पपौ तस्य च रक्तानि [illegible]॥
ततः प्रातः समुत्थाय स देवो महिषासुरः।
तामेव पूजयामास रुचिरैः कामरूपया॥
आराधिता तदा देवी महिषेणासुरेण वै।
प्रादुर्भूता भद्रकाली मुनेः षोडशभिर्भुजा॥
ततः प्रणम्य महिषो महामायां जगन्मयीम्।
उवाचेदं वचो नम्रः स्वैर्भक्तिविनतो हरः॥
महिष उवाच।
देवि! [illegible] शिरो मम।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

क्षीमन्निमौ विनायं ते करिष्यति न संशयः॥
पुरा मुनिं तपस्यन्तं रौद्राख्यं नाम चोत्तमम्।
मुनेः कात्यायनस्यास्य शिष्यं हिमवतान्तिके॥
दिव्यस्त्रीरूपमतुलं धृत्वाहं कौतुकात्तदा।
मया संमोहितो विप्रो [illegible] तदा॥
न दूरात् संस्थितेनाहं मुनिना कामसंयुता।
ज्ञात्वा मायां तदा शप्ता शिष्यार्थे कोपविह्वला॥
यस्मात्त्वया मे शिष्योऽयं मोहितस्तपसश्च्युतः।
[illegible]॥
इति मां शप्तवान् पूर्व्वं मुनिः कात्यायनः पुरा।
तस्य शापस्य कालोऽयमागतश्च समुपस्थितः॥
[illegible]
[illegible]
[illegible]
तदेहि देवि दुर्गे! त्वं [illegible] नमो नमः॥
श्रीदेव्युवाच।
"प्रार्थयेऽपि वरो यस्ते तं वृणु त्वं महासुर।
ददामि ते वरं प्राप्तं संशयो नात्र विद्यते॥"
महिष उवाच।
"यज्ञभागमहं भोक्तुमिच्छामि सुरसत्तमे।
यथा यज्ञेषु सर्व्वेषु पूज्योऽहं स्यां तथा कुरु।
त्वत्पादसेवी न त्यजे यावत् सूर्य्यः प्रवर्त्तते।
एवं वरद्वयं देहि यदि देवी वरो मम॥"
श्रीदेव्युवाच।
"यज्ञभागाः सुरैश्चान्ये कल्पिता वै पृथक्
पृथक्।
भागो न विद्यते चान्यो यद्दातव्यं महासुर।
किन्तु त्वमपि मया युद्धे निहतो महिषासुर॥
[illegible]
मम यत्रैव पूजा वै तत्र च त्वं हि।
[illegible]
इति श्रुत्वा वचस्तस्याः [illegible] महिषासुरः।
[illegible]
[illegible] भद्रकालि! दुर्गे देवि! नमोऽस्तु ते।
[illegible]
[illegible]
[illegible]"
श्रीदेव्युवाच।
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]"
इति कालिकापुराणे [illegible] अध्यायः॥
[illegible]

भद्रकाशी, स्त्री, (भद्राय काशते इति । काश+ अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

भद्रकुम्भः, पुं, (भद्रस्य भद्राय वा कुम्भोऽथवा भद्रः कुम्भः ।) पूर्णकुम्भः । इत्यमरः । २ । ८ । ३२ ॥

भद्रगन्धिका, स्त्री, (भद्रो गन्धोऽस्त्यस्या इति । ठन् । टाप् ।) मुस्तकम् । इति रत्नमाला ॥

भद्रङ्करः, त्रि, (भद्रं करोतीति । कृ+"क्षेमप्रियमद्रेऽण् च ।" इत्यत्र भद्रात् खच् । मुम् च ।) मङ्गलकारकः । तत्पर्य्यायः । क्षेमङ्करः २ क्षेमकारः ३ भद्रङ्करः ४ शुभङ्करः ५ अरिष्टतातिः ६ शिवतातिः ७ शङ्करः ८ । इति भूरिप्रयोगः ॥

भद्रचूडः, पुं, (भद्रा चूडास्य ।) लज्जालुशायी । इति शब्दचन्द्रिका । लज्जाविल इति भाषा ॥

भद्रजः, पुं, (भद्राय जायते इति । जन+डः ।) इन्द्रयवः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य इन्द्रयवशब्दे ज्ञातव्याः ॥)

भद्रतरुणी, स्त्री, (भद्रा तरुणीव ।) कुब्जकवृक्षः । इति राजनिर्घण्टः ॥ (तस्यास्तु अन्यतरः पर्य्यायः ।
"कुब्जको भद्रतरुणी वृत्तपुष्पोऽतिकेशरः ।
महा सहा कण्टकाढ्या नीलालिकुल-
सङ्कुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भद्रतुरगं, क्ली, (भद्रा तुरगा यत्र ।) जम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । यथा,—
"माल्यवज्जलधिमध्यवर्त्ति यत्तु भद्रतुरगं
जगुर्बुधाः ।"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

भद्रदन्तिका, स्त्री, (भद्रा दन्तिका ।) दन्तीवृक्षभेदः । भद्रदन्ती इति ख्याता । तत्पर्य्यायः । केशरुहा २ भिषग्भद्रा ३ जयावहा ४ व्याघ्रतेजौ ५ ज्वराङ्गी ६ जयाह्वा ७ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रेचनत्वम् । कृमिशूलकुष्ठामदोषगुल्मामयनाशित्वञ्च । इति राजनिर्घण्टः ॥

भद्रदारु, क्ली, पुं, (भद्रं दारु ।) देवदारु । इत्यमरभरतौ । सरलकाष्ठम् । इति रत्नमाला ॥

भद्रदार्व्वादिकः, पुं, (भद्रदारु आदौ यस्य कप् ।) औषधगणविशेषः । यथा । भद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीबलातिबलार्त्तगलकच्छुराशल्लकीकुबेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्येरण्डाश्मभेदकालर्कशतावरीपुनर्नवावसुकवशिरकाञ्चनकभार्गीकार्पासीवृश्चिकालीपत्तूरबदरयवकोलकुलत्थप्रभृतीनि । इति सुश्रुतसूत्रस्थानस्य संशोधनसंशमनीयाध्यायः ॥ ७ ॥
अपिच ।
"देवदारु हरिद्रे द्वे वरुणः कुष्ठमेव च ।
महानिम्बं शाल्मलता श्यामला गन्धसोऽपरः ॥
पाटला चाश्मगुप्ता च मुण्डी पाषाणभेदिका ।
हलारसी चार्कद्वयं गुडूची नीलकारिका ॥
पुनर्नवा च वाट्यालकर्णपर्णकवासकम् ।
गोक्षुरं शरपुङ्खा च कुष्ठमूलं शतावरिकम् ॥
जलपत्रारिंशद्द्रव्यैर्भद्रदार्व्वादिको गणः ।"
इति शब्दचन्द्रिका । ७ ।
एतन्मध्ये चतुर्दशद्रव्याणि न प्राप्तानि ॥

भद्रनामा, [न्] पुं, (भद्रं नाम यस्य ।) काष्ठकुट्टपक्षी । इति त्रिकाण्डशेषः । काठठोकरा इति भाषा ॥

भद्रनामिका, स्त्री, (भद्रं नामास्याः । कप् । टाप् । अत इत्वम् ।) त्रायन्तीक्षुपः । इति रत्नमाला । बचला इति भाषा ॥

भद्रनिधिः, स्त्री, (भद्रा निधयोऽत्र ।) महादानविशेषः । यथा,—
इन्द्र उवाच ।
"विधानं ब्रूहि मे ब्रह्मन् ! दानस्यास्य महानिधेः ।
यथा देव ! विशेषेण विष्णोरानन्दकारकम् ॥"
ब्रह्मोवाच ।
"पुण्यां तिथिं प्राप्य तु पौर्णमास्यां
तथोपरागे शशिभास्करयोर्वा ।
चतुर्थमादित्यदिनद्वये वा
प्रबोधने प्रस्वपनेऽथ विष्णोः ॥
कुर्य्यात्सुधीरम्बरमेव कुम्भं
हिरण्मयमानेन यथाक्रमेण ।
तथा पिधानञ्च सुराजतं स्याद्-
हिरण्यभारेण तु पूरयेत्तत् ।
तदर्द्धतोऽर्द्धेन तदर्द्धतो वा
स्वशक्तितः स्वर्णपलैः शतेन ।
तदर्द्धमध्येन तु वित्तशक्त्या
पलत्रयादूनमथो न कुर्य्यात् ॥
तत्ताम्रभाण्डे कनकं निधेयं
रत्नप्रभौक्तिकपद्मरागम् ।
सुमुक्तवैदूर्य्यविद्रुमञ्च
महानसं पात्रमधोमुखं स्यात् ॥
एवन्तु तं भद्रनिधिं सुविद्वान्
हस्त्यासने प्रावरणोपयुक्ते ।
कुशोत्तरे दर्भचयाम्बरार्द्रे
सपादुकोपानहचक्रयुक्तम् ।
तं चामरच्छत्रमुखप्रयुक्तं
सम्पूजयेत्कल्पवरै रथैतम् ।
आदौ तु यथान्तमाप्य विष्णुं
संस्थाप्य संसारतरं समर्च्य ।
तथेश्वरं पात्रकमेव कृत्वा
आमन्त्रयेद्भद्रनिधिं ततस्तम् ॥
नीलाक्षकर्पूरचन्दकुङ्कुमेन
यथाक्षरं नाम शिवः प्रसिद्धः ।
नमस्तथोद्धारहुतस्य पार्श्वे
तथापरेऽप्येवमथार्च्चयेताम् ॥
तथा नमस्कारसिद्धयक्ष-
विद्याधरैश्चोरगकिन्नरैश्च ।
गन्धर्व्वदिव्यामरदानवेन्द्र-
र्नुतं त्वयं विश्वमिदं नमस्ते ।
समस्तसंसारकरी त्वमेव
विभोः सदानन्दमयी च माया ।
समस्तकल्याणनिधिः सदाधि-
हरिप्रिये ! भद्रनिधे ! नमस्ते ॥
एवं संपूज्य विधिना ततो विप्रमथार्च्चयेत् ।
किरीटाङ्गदनिष्काद्यैः कुण्डलाङ्गुलिभूषणैः ॥
अलंकृत्य हरिं यद्वत् पीताम्बरधरं ततः ।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान् ॥
भूदेवोऽसि विभो ! नित्यं नित्यानन्दमयो
हरे ! ।
हर मे दुष्कृतं सर्व्वं ! कृपाकर ! नमोऽस्तु ते ॥
भूदेव ! भगवान् भर्गो भवभङ्गकरेश्वर ! ।
भवभूतिकरो विष्णो ! प्रभविष्णो नमोऽस्तु ते ॥
एवं पूज्य हृदि ध्यात्वा तं दिव्यं मन्त्ररूपिणम् ।
ततो भद्रनिधिं दद्यान्मन्त्रेणानेन माधव ! ॥
सगोत्रोच्चारणेनादौ विप्रनाम तथात्मनः ।
यवदर्भतिलैः साक्षतकं संपरिक्षिपेत् ॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये ।
धर्म्माधौघविघाताय विष्णोर्दानं मया कृतम् ॥
तदनेन घटस्थेन धातुत्रययुतेन च ।
पट्टाम्बरयुतेनैव सहोपानत्पादुकेन च ।
आसनेन सच्छत्रेण चामरोपानहेन च ।
सदानन्दनिधानेन प्रीयतां विष्णुरीश्वरः ॥
एवमुच्चार्य तं दद्याद्विप्राय हरिरूपिणे ।
गोप्येन विधिना दद्याद्विमर्शं तो न कीर्त्तयेत् ॥
प्रकीर्त्तितं कोटिगुणायुतं फलं
प्रगोपितं कल्पगणैर्न संचयः ।
इतीयमर्थो न तु कीर्त्तयेत् सुधी-
र्निधानमध्ये निहितञ्च यद्वसु ॥
एवं कृते ब्रह्मसुतः कृतात्मा
तपैन च स्वामरत्वं कदाचित् ।
प्रयाति विष्णोः परमपदं तत्
नित्याक्षयानन्दमयं सदाक्षयम् ॥"
इत्याद्ये वह्निपुराणे भद्रनिधिदाननामाध्यायः ॥

भद्रपदा, स्त्री, (भद्रं पदमासाम् ।) भाद्रपदा । पूर्व्वभाद्रपदोत्तरभाद्रपदानक्षत्रम् । इत्यमरटीकायां रायमुकुटः ॥ (यथा, बृहत्संहितायाम् । ८ । ९ ।
"नभा तु पवनयाम्या
नभास्विपैतामहात् त्रिभात्रिभः ।
गोपीत्यामित्यः
पौष्णं ते चापि भद्रपदे ॥")

भद्रपर्णा, स्त्री, (भद्राणि पर्णान्यस्याः । टाप् ।) कटम्भरावृक्षः । इति शब्दमाला ॥ (गुणादिकमस्याः कटम्भराशब्दे विज्ञेयम् ॥)

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः । गौरादित्वात् ङीष् ।) गाम्भारी । इत्यमरः । २ । ४ । ३५ ।
(अस्याः पर्य्यायो यथा,—
"गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मिरी काश्मरी पीता काश्मर्य्यः पीत-
रोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च ॥")
प्रसारिणी । इति जटाधरः ॥ (अस्याः पर्य्यायो यथा,—

"प्रसारणी राजबला भद्रपर्णी प्रतानिनी ।
सरणी सारणी भद्रा बला चापि कटम्भरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"प्रसारणी च गन्धाली भद्रपर्णी कटम्भरा ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा, शतपथब्राह्मणे ।३।४।१।१६। तस्य भाष्ये
"काश्मर्य्यां भद्रपर्ण्यां प्रशस्तां यज्ञाद्यपेक्षया-
दीनामेभ्यश्चकमादश्च नियमविधिः ॥")

भद्रबलनः, पुं, (भद्रं मङ्गलजनकं बलमस्य ।) बलरामः । इति शब्दमाला ॥

भद्रमल्लिका, स्त्री, (भद्रा मल्लिका ।) गवाक्षी । इति शब्दमाला ॥

भद्रमुञ्जः, पुं, (भद्रो मुञ्ज इति कर्म्मधारयः ।) मुञ्जभेदः । रामशर इति शरपत इति च भाषा । तत्पर्य्यायः । शरः १ बाणः २ तेजनः ३ इक्षुवेष्टनः ४ । अथ मुञ्जस्य पर्य्यायः । मुञ्जः १ मुञ्जातकः २ बाणः ३ स्थूलदर्भः ४ सुमेधसः ५ । एतयोर्गुणाः ।
"मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित् ॥
दोषत्रयहरं वृष्यं मेखलास्पयुज्यते ॥"
इति भावप्रकाशः ॥

भद्रमुस्तकः पुं, (भद्रो मुस्तकः ।) नागरमुस्तकः । इत्यमरः ।२।४।१६०। (तत्पर्य्यायो यथा,—
"भेदान्तं मुस्तकं मुस्ता ग्राह्यं भद्रमुस्तकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

भद्रमुस्ता, स्त्री, (भद्रा मुस्ता ।) नागरमुस्तकः । तत्पर्य्यायः । वाराही १ मुस्ता २ ग्रन्थिः ३ भद्रकाशी ४ कशेरुः ५ क्रोडेष्टा ७ कुरुविन्दाख्या ८ सुगन्धिः ९ ग्रन्थिका १० हिमा ११ वन्या १२ राजकसेरुः १३ कच्छोत्था १४ सुस्ता १५ वलोदः १६ वारिदः १७ अम्भोदः १८ मेघः १९ जीमूतः २० अब्दः २१ नीरदः २२ अभ्रम् २३ घनः २४ ग्राहिकः २५ । अस्या गुणाः । कषायत्वम् । तिक्तत्वम् । शीतत्वम् । पाचनत्वम् । पित्तज्वरकफादिहरम् । संग्राहित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मुस्तकं न स्त्रियां मुस्ता त्रिषु वारिदनामकः ।
कुरुविन्दश्च ग्रन्थिकोऽपरः क्रोडकशेरुकः ॥
भद्रमुस्ता च मुस्ता च तथा नागरमुस्तकः ।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम् ॥
कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुजित् ।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम् ॥"
इति भावप्रकाशः ॥

भद्ररथः, पुं, स्त्री, (भद्रः सुन्दरो रथः ।) स्यन्दनम् । इत्यमरः । २ । ८ । ५१ । (विरथस्य रथवाहनं ज्ञातव्यम् ।)

भद्ररेणुः, पुं, (भद्रा रेणवोऽस्य ।) ऐरावतहस्ती । इति त्रिकाण्डशेषः ॥

भद्रवत्, स्त्री, (भद्रमस्त्यस्येति । मतुप् मस्य वः ।) देवदारु । इति राजनिर्घण्टः ॥

भद्रवती, स्त्री, (भद्रं विद्यतेऽस्याम् । भद्र + मतुप् । मस्य वः । ङीप् ।) भद्रपर्णी । इति जटाधरः ॥ (कट्फलः । अस्य पर्य्यायो यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णी श्रीकुमुदिका भद्रा भद्रवतीति च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
कल्याणविशिष्टे, त्रि । यथा, महाभारते । ४ । ५४ । १८ ।
"इमाश्च नः प्रियो वीर ! वाचं भद्रवतीं
शृणु ॥"
श्रीकृष्णस्य माद्रिगर्भजाता कन्या । यथा, हरिवंशे । १६० । १०-११ ।
"मित्रबाहुः सुनीथश्च माद्रिजाताः प्रजाः स्मृताः ।
भद्रकारो भद्रविन्दः कन्या भद्रवती तथा ॥"
मधोमाता । यथा, हरिवंशे । २६ । १ ।
"माद्रीजनयत् सुतः पुत्रान् पुरुषोत्तमः ।
मधुकंशोऽथ वैदर्भी भद्रवत्यां कुशद्वय ! ॥")

भद्रवर्म्मा, [न्] पुं, (भद्रं वृणोति आच्छादयतीति । वृ + मनिन् ।) नवमल्लिका । इति शब्दचन्द्रिका ॥ (विवरणं नवमल्लिकाशब्दे ज्ञातव्यम् ॥)

भद्रवला, स्त्री, (भद्रा बला ।) लताविशेषः । गन्धभादालिया इति भाषा । तत्पर्य्यायः । सरणी १ प्रसारणी २ कटम्भरा ३ राजबला ४ । इत्यमरः । २ । ४ । ११६ ॥ अस्याः पर्य्यायान्तरं गुणाश्च प्रसारिणीशब्दे द्रष्टव्याः ॥ बला । इति राजनिर्घण्टः ॥

भद्रवल्लिका, स्त्री, (भद्रा वल्लिका ।) गोपवल्ली । इति रत्नमाला ॥ अनन्तमूल इति भाषा ॥

भद्रवल्ली, स्त्री, (भद्रा चासौ वल्ली चेति कर्म्मधारयः ।) मल्लिका । माधवीलता । इति राजनिर्घण्टः ॥ लताविशेषः । मदनमालती इति कामरमालती इति च भाषा । तत्पर्य्यायः । मालतीवः १ भूमिमण्डपा २ अतिमुक्तिका ३ । इति रत्नमाला ॥

भद्रश्रयं, क्ली, (भद्राय श्रीयते सङ्गते इति । श्रि + कर्म्मणि अच् ।) चन्दनम् । इति रत्नमाला ॥

भद्रश्रीः, पुं, (भद्रा श्रीरस्य ।) चन्दनवृक्षः । इत्यमरः । २ । ६ । १३१ ॥

भद्रसोमा, स्त्री, (भद्रः सोम इवास्या इव इति । टाप् ।) गङ्गा । इति शब्दमाला ॥ (कुरुवर्षस्थनदीविशेषः । यथा, मार्कण्डेये । ५९ । २१ ।
"तथैव कुरुवर्षे तु नद्यश्च चन्द्रकान्तिका ।
भद्रसोमा स्वादुमयी पुण्योदकवती नदी ॥")

भद्रा, स्त्री, (भद्र + अजादित्वात् टाप् ।) रास्ना । अनन्ता । जीवन्ती । निसिन्धिः । सा तु द्वितीया सप्तमी द्वादशी च । प्रसारिणी । (अस्याः पर्य्यायो यथा,—
"प्रसारिणी राजबला भद्रपर्णी प्रतानिनी ।
सरणी सारणी भद्रा बला चापि कटम्भरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कट्फलम् । अनन्ता । इति मेदिनी । दे, ७१ ॥ क्षीरिणी । अपराजिता । नीली । बला । दूर्व्वा । वचा । दन्ती । हरिद्रा । श्वेतदूर्व्वा । काश्मरी । (पर्य्यायोऽस्या यथा,—
"श्रीपर्णी काश्मरी भद्रा गम्भारी सोमभद्रिका ।
कृष्णा च वराभद्रा कट्फला सर्व्वतोभद्रिका ॥"
इति वैद्यकरत्नमालायाम् ॥
चन्द्रशूरः । तत्पर्य्यायो यथा,—
"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
धात्रीविशेषः । गौः । इति राजनिर्घण्टः ॥ काकोदुम्बरिका । इति रत्नमाला ॥ (भद्राश्ववर्षस्थनदीविशेषः । यथा, मार्कण्डेये । ५९ । ७ ।
"सीता सुचक्षुर्भद्रा चक्रावर्त्तादिका-
स्तथा ॥")
सूर्य्यादिग्रहयोगोत्पन्नयोगविशेषः । तत्तु उक्तं गुरुवर्षीयमतम् । इति पुराणं शब्दमाला च । मुहूर्त्तविशेषः । तत्पर्य्यायः । तारा १ महाविः २ चौहारा ३ आद्या ४ ... ५ ...ः ६ मनोरमा ७ तारिणी ८ जया ९ अमला १० शिवा ११ जीवितारामया १२ मधुर-भाषिणी १३ वैद्या १४ जीवनधारिणी १५ प्रतिभी १६ महातारा १७ वसुधारा १८ धरन्धरा १९ विलोचना २० जीवना २१ । इति त्रिकाण्डशेषः । छायागर्भजाता सूर्य्यकन्या । यथा,—
"ददृशे तु मनस्वी वै अवधानेन भास्करः ।
दृष्टेवाश्च भद्राय ज्ञापयामास तं ततः ।
तथा च वैवस्वतो विलोक्य चक्षुर्दृशम् ।
तदर्थनिरतौ दृष्टौ शनिनात्रापि कोपिता ।
तद्विनी सुताः भद्रा विष्णोर्वै विनाशिता ॥"
इति वह्निपुराणे देवनादृष्टोत्पत्तिः ॥
शुभदा । यथा,—
"आरोहस्व शिवे रथे त्रिनेत्रा पुष्पवृष्टा ।
एतां रथे समारोप्य हासं मां भद्रा भव ॥"
इति महाभारते भद्रदुःशासनम् । ७ ॥
विष्टिभद्रा यथा,—
"एकादश्यां चतुर्थ्यां च दैवात् शुक्लपक्षे ।
अष्टमीपौर्णमास्योः पूर्वार्द्धे विष्टिकारणः ॥
कृष्णपक्षे तृतीयायां दशम्याञ्च परार्द्धेन ।
सप्तम्याञ्च चतुर्दश्याः पूर्वार्द्धे विष्टिरिष्यते ॥
विष्ट्यां विवाहादि शुभं कर्म्म वर्जयेत् ।
विष्टिर्हि विघ्ने हि पुच्छे कार्य्यं कारयेत् ॥"
अथोच्यते तस्या अङ्गविभागो यथा,—
"आस्ये तु घटिकाः पञ्च कण्ठे
एकां हृदये नाभौ चतस्रः ।
कट्यां षट् पञ्च पुच्छे च तिस्रो
विष्टेर्घटिकाः पुच्छे शुभाः ॥"
अङ्गविभागे कार्य्यसिद्धिरुक्ता यथा,—
"मुखे कार्य्यहानिः कण्ठे प्राणनाशः
हृदये सर्व्वनाशः कट्यां बुद्धिनाशः ।

कलिवर्षीभीदृशी विजयमथ पुच्छे च भगदुः
शरीरे भद्रायाः पृथगिति फलं पर्व्वसुजयः॥"
भद्रश्वसुनिधियुगमदशशियगुणसंख्यासु तिथिषु पूर्व्वाश्चाश्लेषम्। प्राग्यानि शिशिरेषा एवं सुभद्रा पुरस्तात्तु। चतुर्द्दश्यादिषु पूर्व्वाग्न्यादिसूर्य्य-भरणीत्यर्थः। इति ज्योतिस्तत्त्वम्॥

भद्राकरणं, क्ली, (भद्र+डाच्। कृ+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः॥

भद्रात्मजः, पुं, (भद्रः हितकर आत्मज इव रक्षाकरत्वात्।) खड्गः। इति त्रिकाण्डशेषः॥

भद्रारकः पुं, अष्टादशक्षुद्रद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला॥

भद्रालपत्रिका, स्त्री, (भद्राय अलति पर्य्याप्नोतीति। अल्+अच्। भद्रालं पत्रं यस्याः। कप्। टाप्। अत इत्वम्।) गन्धाली। इति शब्दमाला॥

भद्राली, स्त्री, (भद्र+अल्+अच्। भद्राल+गौरादित्वात् ङीष्।) गन्धाली। इति शब्दमाला॥

भद्रावती, स्त्री, (भद्रमस्या अस्तीति। मतुप्। मस्य वः। संज्ञायां पूर्व्वपदस्य दीर्घः।) कट्फलवृक्षः। इति राजनिर्घण्टः॥

भद्राश्रयः, पुं, (भद्रस्याश्रयः।) चन्दनम्। इति शब्दचन्द्रिका॥

भद्राश्वं, क्ली, (भद्रा अश्वा अत्र।) भुवि जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः॥ तद्विवरणं यथा। माल्यवतः पूर्व्वपार्श्वे पूर्व्वगण्डिका एकत्रिंशद्योजनसहस्राणि मानतश्च भद्राश्वा नाम जनपदाः भद्रशालवनञ्च तत्र कालाम्रश्च महावृक्षः। पुरुषाः श्वेताः महासत्त्वाः स्त्रियः कुमुदवर्णाः दशवर्षसहस्राणि च तेषामायुष्यञ्च पञ्च कुलपर्व्वताः तद्यथा, शैलवर्णः मालाख्यः कोरञ्जः त्रिपर्णो नीलश्चेति तद्विनिर्गता नद्यो नदशतसहस्राणि तेषां देशानां नामानि ते च देशाः एताः नदीः पिबन्ति। तद्यथा, सीता सुवाहिनी हंसवती कावेरी एरसा शाखावती इन्द्रनदी अङ्गारवाहिनी हरितोया सोमावर्त्ता शतह्रदा वनमाला वसुमती हंसा पर्णा पञ्चगङ्गा धनुष्मती मणिवप्रा सुब्रह्मभागा विलासिनी कृष्णतोया पुण्योदा नागवती शिवा शैवालिनी मणितटा क्षीरोदा वरुणावती विष्णुपदी महानदी हिरण्यस्कन्धवाहा सुरावती वामोदा पताकाश्चेति महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः आजन्मान्तं पापं विनाशयन्ति क्षुद्रनद्यश्च कोटिशस्ताश्च नद्योऽपि पिबन्ति ते दशवर्षसहस्रमायुषः नदीमाश्रिता इति। इति वाराहे भुवनकोषे दृष्टीना॥ अपि च। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानील-निषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते। मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्द्दिशमवष्टम्भगिरय उपक्लृप्ताः। चतुर्षु

एतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः। ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति। येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति। मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि निपतन्ति। तेषां विशीर्य्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति। यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति। एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनदी नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति। तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति। यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति यो ह्युपयुञ्जानानां मुखनिर्व्वासितो वायुः समन्तात् शतयोजनमनुवासयति। एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्य्यजारुधिहंसर्षभनागकालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपक्लृप्ताः। जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः। एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरावष्टभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः। मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति तामनु परितो लोकपालानामष्टौ पुरो यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः। इति श्रीभागवते ५ स्कन्धे भुवनकोषवर्णने १६ अध्यायः॥

भद्रासनं, क्ली, (भद्राय लोकहिताय आसनम्।) नृपासनम्। इत्यमरः। २। ८। ३१॥ (योगिनामासनविशेषः। यथा, तन्त्रसारे।
"सीवन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चलम्।
भद्रासनं समुद्दिष्टं योगिभिः परिकीर्त्तितम्॥")

भद्रेश्वरः, पुं, (भद्रः शुभदश्चासावीश्वरश्चेति भद्रा भक्तः मङ्गलमय ईश्वरो वेति।) कल्याणमस्थः शिवः। यथा,—
"उत्तिष्ठ कान्त! गच्छावः कल्याणमे सुशोभनम्।
तथा सार्द्धं जगामाथ कल्याणमं महेश्वरे!॥
भद्रेश्वरनिमित्तं हि क्षेत्रञ्च कथितं शुभम्।
नित्यञ्च शुभ्रसे यत्र पात्रद्रव्यं समर्पितम्॥
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं लभेत्।
कल्याणमाश्रमसुखं चक्रतीर्थे महेश्वरे!॥"
इति वाराहे मथुरामाहात्म्ये चक्रतीर्थप्रभावो नामाध्यायः॥
शिवमाहात्म्ये कुमारीधृतहिमालयस्थापितशिवलिङ्गम्। यथा,—
"तथापीह गमिष्यामि भद्रवीर्य्यं हिमपदद्वये।
यत्रैव वरमीशस्य श्मशानेश्वरः स्मृतः॥
असौ भद्रेश्वरेत्येव ख्यातिं लोके भविष्यति।
देवदानवगन्धर्व्वा यक्षकिन्नरपोरगाः॥
पूजयिष्यन्ति सततं मानवाश्च शुभेश्वरः॥"
इति वामनपुराणे ७६ अध्याये उमां प्रति शिववाक्यम्॥ गङ्गायाः पश्चिमतीरे नन्दिकाश्रमस्योत्तरे पाषाणमयशिवलिङ्गविशेषो ग्रामविशेषश्च॥

भद्रेला, स्त्री, (भद्रा एला।) स्थूलैला। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला इन्द्ररेला च चन्द्रवाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भद्रोदनी, स्त्री, (भद्रं उदनिति प्राणयति। अन्+अच्। गौरादित्वात् ङीष्।) बला। नागबला। इति राजनिर्घण्टः॥

(भन्द, ङ औ ध श्वौ श्रेष्ठे। इति कविकल्पद्रुमः॥ वधा॰॰पर॰॰धक॰॰अनिट्। थ, भद्रति॥)

भन्दिलं, क्ली, (भदि+इलच्।) शुभम्। इत्युणादिकोषः॥ कम्पः। दूतः। इति संक्षिप्तसारोणादिवृत्तिः॥

भनुकः, पुं, भारतवर्षान्तर्गतदेशविशेषः। यथा,
"अथापरास्त्र इवापि यामार्या भनुकाः
स्मृताः॥"
इति ब्राह्मे कूर्म्माविभागे कविवरगामाख्या-नामाध्यायः॥

भपञ्जरं, क्ली, (भानां नक्षत्राणां पञ्जरम्।) नक्षत्रचक्रम्। इति सिद्धान्तशिरोमणिः॥

भगनिः, पुं, (भागो मगस्थानां पतिः ।) चन्द्रः । इति हेमचन्द्रः ।

भक्षः, पुं (भम् दृश्यवस्त्वमिव भातीति । भा + कः ।) मक्षिका । इति शब्दरत्नावली । धूमः । इति त्रिकाण्डशेषः ।

भम्भरालिका, स्त्री, (भम्भित्यव्यक्तशब्देन भरं बाहुल्यमालाति गृह्णातीति । आ + ला + कः । गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्व्वस्य ह्रस्वत्वम् ।) मक्षिका । इति त्रिकाण्डशेषः । डाँश इति भाषा ।

भम्भराली, स्त्री, (भम्भित्यव्यक्तशब्देन भरमालातीति । आ + ला + कः । गौरादित्वात् ङीष् ।) मक्षिका । इति त्रिकाण्डशेषः ।

भम्भासारः, पुं, मगधराजविशेषः । तत्पर्य्यायः । श्रेणिकः २ । इति हेमचन्द्रः ।

भयं, क्ली, (भी + "एरच् ।" ३ । ३ । ५६ । इत्यच् "भयादीनामुपसंख्यानं नपुंसके क्तादिनिरासार्थम् ।" इति वार्त्तिकोक्त्या अपादाने अच् ।) बिभेत्यस्मात् तत् । इति भरतः । अस्य लक्षणं यथा, "रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ।" इति साहित्यदर्पणे ३ परिच्छेदः । अपि च । दाम्पत्यस्य विवाहकं सप्तपदिकाकृतिविदितम् [illegible] अभिदेयं तदितरदेवा-[illegible] भयम् । इति भगवद्-गीतायां २ अध्याये मधुसूदनसरस्वती । अन्यच्च । परतः स्यादिष्टप्राप्तिः भयम् । यथा । व्याघ्रादिभिरपि [illegible] सोमवदयं प्रभावयति । इति २ सुभाषितादौ गदाधर-भट्टाचार्य्यः । तत्पर्य्यायः । दरः २ त्रासः ३ भीतिः ४ भीः ५ साध्वसम् ६ । इत्यमरः । १ । ७ । २१ । दराः ७ आतुर्व्वभयः ८ प्रतिभयम् ९ । इति शब्दरत्नावली । आतङ्कः १० आशङ्का ११ भिया १२ । इति हेमचन्द्रः । आपत्ते भये अभीतस्य कर्त्तव्यम् । यथा,—

"तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
आगतं तु भयं वीक्ष्य प्रहर्त्तव्यमशङ्कया ॥"

इति मार्कण्डेये चाणिक्ये १११ अध्यायः ।
कुङ्कुमपुष्पम् । भीरे, त्रि । इति मेदिनी । ये, २१ । पुं रोगः । इति राजनिर्घण्टः । (विश्वामित्रः कुमारः । यथा, महाभारते । १ । ६६ । ५४-५६ ।

"नवात्र चिरं निर्माणं नैर्ऋता दैवराक्षसाः ।
घोरास्तस्यात्मजाः पुत्राः प्रावर्त्तन्त निशाचराः ॥
भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा ।
न तस्य भार्य्या पुत्रो वा कश्चिदस्त्यन्तको हि सः ॥"

[illegible] भयः कुमारः । यथा, भागवते । ४ । ८ । ११ ।

"[illegible] प्रभवेश्वरः ॥"

[illegible] । यथा, भागवते ॥ ४ । २७ । २१ ।

"[illegible]
[illegible] ॥")

भयङ्करं, त्रि, (भयं करोतीति । भय + कृ + "मेघर्त्तिभयेषु कृञः ।" ३ । २ । ४३ । इति खच् । मुमश्च ।) भयजनकम् । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भीमम् ७ भयानकम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ भयावहम् १० । इति हेमचन्द्रः । (यथा, मार्कण्डेयपुराणे । ८४ । ८६ ।
"एकैर्भयङ्करैः एवं विश्वमन्यैरपश्यत ॥")
पुं, कुकुभपक्षी । इति राजनिर्घण्टः ।

भयडिण्डिमः, पुं, (भयाय शत्रुभयजननाय डिण्डिमः ।) संग्रामपटहः । इति पुराणम् ।

भयद्रुतः, त्रि, (द्रु + कर्त्तरि क्तः । भयेन द्रुतः ।) भीत्या पलायितः । तत्पर्य्यायः । कान्दिशीकः २ । इत्यमरः । ३ । १ । ४२ ।

भयनाशिनी, स्त्री, (भयं रोगभयं नाशयतीति । भय + नश् + णिच् + णिनिः ।) त्रायमाणा लता । इति राजनिर्घण्टः । भयनाशकर्त्री च ।

भयभीतः, त्रि, (भयेन भीतः ।) भाविभयादुद्विग्नः । यथा, वह्निपुराणे शिविराज्ञोपाख्याने ।

"एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ।
नातो गुरुतरो धर्म्मः कश्चिदन्योऽस्ति भूपते ॥"

भयभ्रष्टः, त्रि, (भयेन भ्रष्टः ।) भयद्रुतः । इति जटाधरः ।

भयानकः, पुं, (बिभेत्यस्मादिति । भी + "आनकः शीङ्भियः ।" उणा० । ३ । ८२ । इति आनकः ।) व्याघ्रः । राहुः । रसविशेषः । इति मेदिनी । के, २०३ । स तु शृङ्गारादिनवरसान्तर्गतरसः । तस्य लक्षणं यथा,—

"भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिमृत्य्वाद्या व्यभिचारिणः ॥"

उदाहरणं यथा,—

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।"

इति साहित्यदर्पणे ३ परिच्छेदः ।

भयानकः, त्रि, (भी + आनकः ।) भयङ्करः । इत्यमरः । १ । ७ । २० । (यथा, भगवद्-गीतायाम् । ११ । २७ ।

"वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥")

भयापहः, पुं (भयं अपहन्तीति । अप + हन् + "अपे क्लेशतमसोः ।" ३ । २ । ५० । इति डः ।) राजा । इति त्रिकाण्डशेषः । (भयनाशके, त्रि ।)

भयावहः, त्रि, (आवहतीति । आ + वह + अच् । भयस्यावहः इति ।) भयङ्करः । इति हेमचन्द्रः । (यथा, भगवद्गीतायाम् । ३ । ३५ ।
"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥")

भरः, पुं, (भरतीति । भृ + पचाद्यच् ।) अति-शयः । इत्यमरः । ३ । ५ । ६८ । (यथा, गीत-गोविन्दे । ३१ ।
"पीनपयोधरभारभरेण हरिं परिरभ्य सरा-गम् ॥")
भारः । यथा, भागवते । १ । ३ । २१ ।
"एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥")

भरणकर्त्तरि, त्रि । (यथा, ऋग्वेदे ॥ १० । १०० । १ ।
"भराय सु भरत भागमृत्वियं
प्र वायवे शुचिपे क्रन्ददिष्टये ॥"
"भराय सर्व्वस्य पोषकाय ।" इति तद्भाष्ये सायनः ॥ संग्रामः । यथा, ऋग्वेदे ॥ १ । ८ । ४ ।
"त्वं युजेमं वज्रमिन्द्र बाहु
र्मन्युकोष्टान्त वि नमो भरेषु ॥"
"भरेषु संग्रामेषु ।" इति तद्भाष्ये सायनः ॥)

भरटः, पुं, (बिभर्त्तीति । भृ + "अविशाल्युपिरुहि-शकिनिसिभ्यः टच् ।" इत्यतः टनिति ।" उणा० । ४ । १०४ । इति अटच् ।) कुम्भकारः । इत्युणादि-कोषः ।

भरणं, क्ली, (बिभर्त्तिभरिति । भृ + करणे ल्युट् ।) वेतनम् । भृतिः । इति मेदिनी । णे, ६८ । (भृ + भावे ल्युट् ।) पोषणम् । यथा,—

"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् ॥"

इति दायभागः ॥

भरण्यः, पुं, (भरतीति । भृ + क्युः ।) भरणीनक्षत्रम् । इति शब्दरत्नावली ।

भरणी, स्त्री, (भरण + गौरादित्वात् ङीष् ।) घोषकलता । इति मेदिनी । णे, ६८ । अश्व-न्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वितीयनक्षत्रम् । तत्पर्य्यायः । यमदैवता २ । इति हेमचन्द्रः । सा तारात्रयमिलितयोन्याकृतिः । तस्या अधिष्ठात्री देवता यमः । यथा,—

"नारकाकृतिमिथोनिके
[illegible] ।
[illegible] ।
[illegible] ॥"

[illegible] । इति [illegible] । [illegible] । [illegible] । [illegible] ।

"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

इति [illegible]

भरणीभूः, पुं, (भरणी भूरुत्पत्तिस्थानं यस्य ।) राहुग्रहः । इति हेमचन्द्रः ॥

भरणीयः, त्रि, भरणयोग्यः । पोष्यः । भृधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ५ । १५० । १७ ।
"सर्व्वं भवतु ते राज्यं पञ्च ग्रामान् विसर्ज्जय ।
अवश्यं भरणीया हि पितुस्ते राजसत्तम ! ॥")

भरण्डः, पुं, (बिभर्त्तीति । भृ + "अण्डन्कृसृभृवृञः ।" उणा० । १ । १२८ । इति अण्डन् ।) स्वामी । । भूपालः । वृषः । इत्युणादिकोषः ॥ भूः । कृमिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भरण्यं, क्ली, (भरणे साधु । "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) मूल्यम् । वेतनम् । इत्यमरः । २ । १० । ३८ ॥

भरण्यभुक्, त्रि, (भरण्यं वेतनं भुङ्क्ते इति । भुज् + क्विप् ।) कर्म्मकरः । मूल्यं गृहीत्वा कर्म्मकारकः । इत्यमरः । २ । १० । १५ ॥

भरण्या, स्त्री, (भरण्य + अजादित्वात् टाप् ।) वेतनम् । इत्यमरटीकायां स्वामी ॥

भरण्याह्वा, स्त्री, (भरण्या आह्वा आख्या यस्याः ।) पर्म्मपुष्पी । इति शब्दचन्द्रिका । रामतूलीति ख्याता ॥

भरण्युः, पुं, (कण्ड्वादिगणीयभरण्यधातुः । ततो बाहुलकात् उण् ।) शरण्युः । मित्रम् । इति शब्दमाला ॥ अग्निः । चन्द्रमाः । ईश्वरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भरतः, पुं, (बिभर्त्ति भावमिति । बिभर्त्ति लोकानिति वा । भृ + "भृमृदृशियजीति ।" उणा० ३ । ११० । इति अतच् ।) नाट्यशास्त्रम् । मुनिविशेषः । स तु नाट्यशास्त्रादिग्रन्थस्य कर्त्ता । (भरतस्य शिष्यः । तस्येदमित्यण् । अणो लुक् ।) नटः । रामानुजः । दौष्मन्तिः । इति मेदिनी । ते, ११७-१८ ॥ शबरः । तन्तुवायः । इति विश्वः ॥ क्षेत्रम् । भरताश्रमः । इति हेमचन्द्रः ॥ दुष्मन्तराजपुत्त्रभरतस्य पर्य्यायः । शाकुन्तलेयः २ दौष्मन्तिः ३ सर्व्वदमनः ४ । इति त्रिकाण्डशेषः ॥ यस्त्रयस्त्रिंशच्छतमश्वमेधं कृतवान् । पञ्चाशदाश्चर्य्यं यज्ञमन्त्रान् नानाविधान् यज्ञानकरोत् । सप्तविंशतिसहस्रवत्सरानेकच्छत्रं राज्यं कृतवान् । तस्योत्पत्त्यादिर्यथा,—

"दुष्मन्तो मृगयां यातः कण्वाश्रमपदं गतः ।
तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥
विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ।
बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥
तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ।
पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा ॥
का त्वं कमलपत्राक्षि ! कस्यासि हृदयङ्गमे ! ॥
किं स्विच्चिकीर्षितं तत्र भवत्या निर्जने वने ॥
व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ! ॥
न हि चेतः पौरवाणामधर्म्मे रमते क्वचित् ॥

श्रीशकुन्तलोवाच ।
विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद्भगवान् कण्वो वीर ! किं करवाम ते ॥
आस्यतां ह्यरविन्दाक्ष ! गृह्यतामर्हणञ्च नः ।
भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥

श्रीदुष्मन्त उवाच ।
उपपन्नमिदं सुभ्रु ! जातायाः कुशिकान्वये ।
स्वयं हि वृणुते राज्ञां कन्यकाः सदृशं वरम् ॥
ओमित्युक्ते यथाधर्म्ममुपयेमे शकुन्तलाम् ।
गान्धर्व्वविधिना राजा देशकालविधानवित् ॥
अमोघवीर्य्यो राजर्षिर्महिष्यां वीर्य्यमादधे ।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥
कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः ।
बद्ध्वा मृगेन्द्रं तरसा क्रीडति स्म स बालकः ॥
तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ।
हरेरंशांशसम्भूतं भर्त्तुरन्तिकमागमत् ॥
यदा न जगृहे राजा भार्य्यापुत्त्रावनिन्दितौ ।
शृण्वतां सर्व्वभूतानां खे वागाहाशरीरिणी ॥
माता भस्त्रा पितुः पुत्त्रो येन जातः स एव सः ।
भरस्व पुत्त्रं दुष्मन्त ! मावमंस्थाः शकुन्तलाम् ॥
रेतोधाः पुत्त्रो नयति नरदेव ! यमक्षयात् ।
त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥
पितर्य्युपरते सोऽपि चक्रवर्त्ती महायशाः ।
महिमा गीयते तस्य हरेरंशभुवो भुवि ॥
चक्रं दक्षिणहस्तेऽस्य पद्मकोषोऽस्य पादयोः ।
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्‌विभुः ॥
पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः ।
मामतेयं पुरोधाय यमुनामनु च प्रभुः ॥
अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद्वसु ।
भरतस्य हि दौष्मन्तेरग्निः साचीगुणे चितः ॥
सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे ।
त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् ॥
दौष्मन्तिरत्यगान्मायां देवानां गुरुमाययौ ।
मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् ॥
अदात् कर्म्मणि मष्णारे नियुतानि चतुर्द्दश ।
भरतस्य महत् कर्म्म न पूर्व्वे नापरे नृपाः ॥
नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ।
किरातहूणान् यवनान् पौण्ड्रान् कङ्कान्
खशाञ्छकान् ॥
अब्रह्मण्यनृपांश्चाहन् म्लेच्छान् दिग्विजये
ऽखिलान् ।
जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे ॥
देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ।
सर्व्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी ॥
समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्त्तयत् ।
स सम्राट् लोकपालाख्यमैश्वर्य्यमधिराट्‌श्रियम् ॥
चक्रञ्चास्खलितं प्राणान् मृषेत्युपरराम ह ।
तस्यासन् नृप ! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः ॥
जघ्नुस्त्यागभयात् पुत्त्रान् नानुरूप इतीरिते ॥"

इति श्रीभागवते ९ स्कन्धे २० अध्यायः ॥ ऋषभदेवात् इन्द्रदत्तजयन्त्यां कन्यायां जातशतपुत्त्राणां ज्येष्ठपुत्त्रः । यथा । "अथ ह भगवान् ऋषभदेवः स्वं वर्षं कर्म्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्म्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म्म समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास । येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति ।" इति श्रीभागवते ५ स्कन्धे ४ अध्यायः ॥ पावकपुत्त्रः । यथा,—

"पावको लौकिको ह्यग्निः प्रथमो ब्रह्मणः सुतः ।
ब्रह्मौदनाग्निस्तत्पुत्त्रो भरतो नाम विश्रुतः ॥"

इति मात्स्ये अग्निवंशो नाम ४८ अध्यायः ॥ रामानुजभरतस्य जन्म यथा,—

"भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षाद्विष्णोश्चतुर्भागः सर्व्वैः समुदितो गुणैः ॥"

तस्यानुगतः शत्रुघ्नः । यथा,—

"भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ।
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥"

स कुशध्वजकन्यां माण्डवीं परिणीतवान् । यथा,

"भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः ।
अस्य धर्म्मात्मनो राजन् ! रूपेणाप्रतिमं भुवि ॥
सुताद्वयं नरश्रेष्ठ ! पत्न्यर्थं वरयामहे ।
तमेवमुक्त्वा जनको भरतञ्चाभ्यभाषत ॥
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ! ॥"

स नन्दिग्रामे राज्यं कृतवान् । यथा,—

"स वल्कलजटाधारी मुनिवेशधरः प्रभुः ।
नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा ॥
सबालवृद्धं कृत्स्नं पालयामास स स्वयम् ।
भरतः शासनं सर्व्वं पादुकाभ्यां निवेदयन् ॥
ततस्तु भरतः श्रीमानभिषिच्यार्य्यपादुके ।
तदधीनस्तदा राज्यं कारयामास सर्व्वदा ॥"

इति रामायणे बालकाण्डे । १८ । ७२ । ७३ अध्यायाः । अयोध्याकाण्डे ११४ अध्यायश्च ॥ तस्य द्वौ पुत्त्रौ । यथा,—

"भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च ।
मातुलेन सुगुप्तौ तु धर्म्मेण सुसमाहितौ ॥
भरतश्चापि तः कृत्वा कुमारौ सकलाङ्गमौ ।
निहत्य गन्धर्व्वसुतान् द्वे पुरे विनिवेशितः ॥"

इति रामायणे उत्तरकाण्डे १०१ अध्यायः ॥

भरतखण्डं, क्ली, भारतवर्षान्तर्गतकुमारिकाखण्डम् । यथा,—

"कुमारिकेति विख्याता यस्या नाम्ना प्रवर्त्तते ।
इदं कुमारिकाखण्डं चतुर्व्वर्गफलप्रदम् ॥
यथा तथावनीयेन नावायामादिकं यथा ।
इदं भरतखण्डञ्च यथा सम्यक् प्रकाशितम् ॥"

इति स्कान्दे कुमारिकाखण्डे भूसंस्थितिनामाध्यायः ॥

भरतपुत्त्रकः, पुं, (भरतस्य नाट्यशास्त्रप्रणेतुः पुत्त्रकः ।) नटः । इति हेमचन्द्रः ॥

भरतप्रसूः, स्त्री, (प्रसूते इति । प्र + सू + क्विप् । प्रसूः । भरतस्य प्रसूः ।) कैकेयी । इति शब्दरत्नावली ॥

भरताग्रजः, पुं, (भरतस्य अग्रजः ।) श्रीरामचन्द्रः । यथा, श्रीमद्देवः ।

"प्रीते न विजयते मम मोहकूर्म-
कोलोऽभयमृगवरियामनवमत्स्याः ।
योऽभूदभूत भरताग्रजलक्ष्मणः
कल्की यताष भविता प्रहरिष्यतीऽरीन् ।"

भरथः, पुं, (बिभर्त्तीति । भृञ् + "भृञविश् ।" उणा० ३ । ११५ । इति अथप्रत्ययः । स च कित् ।) लोकपालः । इत्युणादिकोषः ।

भरद्वाजः, पुं, (द्वाभ्यां जायते इति । जन् + डः । ततः पृषोदरादित्वात् साधुः । बिभर्ति भरद्विरिति । भृ + अप् । भरः । भरश्चासौ द्वाजश्चेति कर्म्मधारयः ।) मुनिविशेषः । स च उतथ्यपत्न्यां ममतायां बृहस्पतिवीर्य्याज्जातः । तस्य जन्मविवरणं यथा । "तस्याथ वितथे पुत्रजन्मनि पुत्रार्थिने मरुद्भिः सोमयाजिने दीर्घतमसः पार्ष्णिप्रहारादपास्तशुक्रो बृहस्पतिवीर्य्यादुतथ्यपत्न्यां ममतायामुत्पन्नो भरद्वाजाख्यो नाम पुत्रो मरुद्भिर्दत्तः । अत्रापि नामनिर्वचनश्लोकः पठ्यते । 'मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते । यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ।' इति । भरद्वाजस्य तस्य वितथे पुत्रजन्मनि मरुद्भिर्दत्तो वितथसंज्ञामवाप ।" ॥ अस्य टीका । वितथे व्यर्थे सति । अयमभिप्रायः । बृहस्पतेरुतथ्यभ्रातुर्भार्य्यायां ममतायां गर्भिण्यामेव तस्यां बृहस्पतिः कामाभिभूतो वीर्य्यं व्यसृजत् । तत्र गर्भे प्रविष्टस्यैव तमसः पार्ष्णिप्रहारेणापास्तं बहिः पतितमपि तद्वीर्य्यं बृहस्पतेर्भरद्वाजनामा पुत्रोऽभूत् । गर्भस्थस्य बृहस्पतिना तमादेवापराधान्तको भवेति शप्तो दीर्घतमा नामाभवत् । तच्च भरद्वाजनामनिर्वचनम् । तदुपरि श्लोकोऽपि । एवं मूढे ममते इमं द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्रं त्वं भर पुष्ण । एवं बृहस्पतिनोक्तापि ममता तमाह हे बृहस्पते । द्वाजं द्वाभ्यां जातमिममेतादृशं विनिश्चयं भरिष्यामि । भरितं भरेति परस्परमुक्त्वा तं पुत्रं त्यक्त्वा यस्मात् पितरौ ममताबृहस्पती यातौ । ततो भरद्वाजाख्योऽयम् । यावान्ते एवं पितरभ्यां । बहुकालात् वितथात् पुत्रात् पितरौ मरुतो विमर्शः । मरुद्भिर्दत्तो मरुद्दत्तः । मरुद्भिर्दत्तैव च । वितथसंज्ञामवाप वितथे पुत्रजन्मनि दत्तत्वाद्वितथसंज्ञामवाप । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ * ॥ (द्रोणाचार्य्यस्यैव नाम । यथा, देवीभागवते । ६ । १ । ९८ ।

"भरद्वाजेन पितरो भरद्वाजस्ततस्त्वयम् ।
कथोरके नाभ्यां ... धर्मत्वात् भरद्वाजः ।"
तथा च महाभारते ... ।
"ततोऽन्ये कर्णकार्य्यस्य ... देवस्य

भरद्वाजः ।

भरद्वाजः, पुं, (भरद्वाज + स्वार्थे कन् ।) ... ।

बला दन्तियमप्रक्षिप्तमदवराः मर्म्माप्रपीडा-
कराः ।
धर्म्मार्थैरविकामान्तिम्र महाविप्रबलपा
बलात्
प्राप्याशाशु हरन्ति सन्ति यदि ते पीमं कुतः
प्राणिनाम् ।
तस्यैषां प्रशमाय कश्चन विधिर्विवक्षो भवद्भिर्बुधैः
र्योग्योऽयमभिधाय संसदि भरद्वाजं मुनिं
तोऽनुवन् ।
सं योग्यो भगवन् । मदहयवनं यस्य लभं
प्रसा-
दायुर्वैदमधीस्व यं गदभयाकुला भवामो
वयम् ।")

पक्षिविशेषः । भारद्द इति भाषा । तत्पर्य्यायः । व्याघ्राटः २ । इत्यमरः । २ । ५ । १९ । भरद्वाजः ३ । इति शब्दरत्नावली । (गोत्रभेदः । यथा, तन्त्रे ।

"धान्विकाः काम्यपेव यात्राः मात्र्यैकञ्चया ।
भरद्वाजो गौतमस्य शौनकोऽपि कलपावराः ।"
इत्यादि गोत्रप्रवरे द्रष्टव्यम् । भ + शब्द ।
भरत् + वाजः । संभियमाणहविर्लक्षणान्नयुक्त-
मानार्थो, त्रि । यथा, ऋग्वेदे । १ । ११६ । १८ ।
"यदयातं दिवोदासाय वर्त्तिर्भरद्वाजायाश्विना
हयन्ता ।"
"भरद्वाजाय संभियमाणहविर्लक्षणान्नाय यज-
मानाय ।" इति तद्भाष्ये सायणाचार्य्यः ।)

भरद्वाजकः, पुं, (भरद्वाज + स्वार्थे कन् ।) व्याघ्राट-
पक्षी । इति शब्दरत्नावली ।

भरिण्डी, स्त्री, (भरं बिभर्त्ति इत्यर्थे । भ + डिन् । गौरादित्वात् ङीष् । पृषोदरादित्वात् पूर्व्वस्य दीर्घः ।) हरिद्रा । इत्युणादिकोषः ।

भरितः, त्रि, (हरितः । पृषोदरादित्वात् वस्य भः ।) हरिद्वर्णः । इत्युणादिकोषः । पुष्टः । भरयुक्तः ।
भरोऽस्य जात इत्यर्थे इतचप्रत्ययेन सिद्धः ।

भरिमा, [न्] पुं, (भृ + "हृभृधृसृस्तृशृभ्य इम-
निच् ।" उणा० ४ । १४७ । इति भावे इम-
निच् ।) भरणम् । इत्युणादिकोषः । (बिभर्त्ति
इति । कुटुम्बः । इत्युज्ज्वलदत्तः ।)

भरुः, पुं, (भरति बिभर्त्ति वा जगदिति । भृञ् धारणे +
"भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः ।"
उणा० १ । ७ । इति उः ।) विष्णुः । इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः । शङ्करः । स्वामी ।
इति संक्षिप्तसारोणादिवृत्तिः । स्वर्णम् । सिन्धुः
इति मेदिनी । रे, ४९ ।

भरुजः, पुं, (भिन्ने उत्पन्ने ... । जन् + डः ।)
शृगालः । इति हेमचन्द्रः ।

भरुटकं, क्ली, (भ + बाहुलकात् उटः । संज्ञायां
कन् ।) भृष्टामिषम् । इति हेमचन्द्रः ।

भर्गः, पुं, (भृज्यन्ते पापान्यनेनेति । भ्रस्ज् +
"पचज् ।" इति घञ् ।) शिवः । इत्यमरः ।
(यथा, महाभारते । १ । ४४ ।

"प्रभुरायतनो भर्गः पुरा हरदत्तावतः ।
इति । अथ तथाप्य ... ।
स मह भर्गो प्रादात् धर्म्मादिभ्योऽपरा-
श्च ताः ।
वीतिहोत्रस्य पुत्रः । यथा, भागवते । ९ । १७ । ९ ।
"वीतिहोत्रोऽस्य भर्गोऽतो भार्गभूमिरभूत् नृप ।")
आदित्यान्तर्गततेजः । यथा,—
"आदित्यान्तर्गतं यच्च भर्गाख्यं तमुमुक्षुभिः ।
जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च ।
ध्यानेन पुरुषो यश्च द्रष्टव्यः सूर्य्यमण्डले ।"
इत्याह्निकतत्त्वम् ।

भर्गः, [स्] क्ली, (भर्ज्यते इति । भ्रस्ज पाके +
"अञ्च्यञ्जियुजिभृजिभ्यः कुश्च ।" उणा० ४ ।
२१६ । इति असुन् कवर्गान्तादेशः ।)
ज्योतिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
(यथा, ऋग्वेदे । ३ । ६२ । १० ।
"तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।")

भर्जः, पुं, (भ्रस्ज् + "अकर्त्तरि च ।" ३ । ३ । १९ ।
इति घञ् । चजोरिति कुत्वम् ।) भर्गः । इत्य-
मरटीकायां भरतधृतशुद्धी ।

भर्जनं, क्ली, (भ्रस्ज् + ल्युट् ।) भर्जः । इति शब्द-
माला । भाजा इति भाषा ।

भर्जितं, त्रि, (भ्रस्ज + क्त ।) भृष्टम् । पोडकीयम् ।
यथा, रायमुकुटीकाधृतवचनम् ।
"हस्ती च मातापितरौ साध्वी भार्य्या सुतः
शिशुः ।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ।"

भर्त्ता, [ऋ] पुं, (बिभर्त्ति पुष्णाति रक्षति धारय-
तीति वा । भृञ् धारणपोषणयोः + "ण्वुल्-
तृचौ ।" ३ । १ । १३३ । इति तृच् ।) अधि-
पतिः । (यथा, रघौ । १ । ७५ ।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्त्तुरथैनं प्रत्यबोधयत् ।")
तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परि-
वृढः ५ अधिभूः ६ पतिः ७ इनः ८ स्वामी ९
नाथः १० आर्य्यः ११ प्रभुः १२ ईश्वरः १३
विभुः १४ ईशिता १५ इनः १६ नायकः १७ ।
इति हेमचन्द्रः । (विष्णुः । यथास्य सहस्र-
नामस्तोत्रे भरतात् ।) धारके पोषके च त्रि ।
इति मेदिनी । ते, १७ । (यथा, ऋग्वेदे । १० ।
७२ । ६ ।

"भर्त्ता ... ... किमु पुरुषेभ्य विश्वम् ।"
विवाहितपतिः स्वामी । यथा, मनुसंहितायाम् ।
९ । १०४ । ४८ ।
"भर्त्तारं लङ्घयेद्या तु स्त्री ... ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ।
... ... ।")

भर्त्तृघ्नी, स्त्री, (भर्त्तारं हन्तीति । हन् + टक् ।
ङीप् ।) पतिघातिनी । इति शब्दरत्नावली ।

भर्त्तृदारकः, पुं, (भर्त्तुः पितुः दारकः । ... ।
... कन् । ... ।) युवराजः ।
इत्यमरः । १ । ७ । १२ ।

भर्त्तृदारिका, स्त्री, (भर्त्तृदारक+टापि अत इत्वम् ।) नाट्योक्तौ राजसुता । इत्यमरः । १ । ७ । १३ ॥

भर्त्तृहरिः, पुं, स्वनामख्यातः कान्यकुब्जराजविशेषः । इति जटाधरः । स च विक्रमादित्यभ्राता । (अयमेव गन्धर्व्वसेनात् दासीगर्भजातः । यथा, राजावल्याम् । ३ । १-२ ॥
"अथ कालेन कियता रममाणो महीतले ।
दास्यां गन्धर्व्वसेनस्तु पुत्त्रमेकमजीजनत् ॥
तस्य भर्त्तृहरीत्येवं नाम चक्रे महामतिः ॥")

भर्त्स, क ङ न भर्त्सि । इति कविकल्पद्रुमः । (चुरा०-आत्म०-उभ० च-सक०-सेट् ।) रेफयुक्तः । इन्त्यवर्गाद्योपधः । भर्त्सो भर्त्सनम् । भर्त्सनन्त्वपकारगीरित्यमरः । १ । ६ । १४ ॥ क ङ, भर्त्सयते खलं राजा । न, भर्त्सयति भर्त्सयते । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो णकारः । इति दुर्गादासः ॥

भर्त्सनं, क्ली, (भर्त्स+ल्युट् ।) अपकारगीः । इत्यमरः । १ । ६ । १४ ॥ चौरोऽसि त्वां घातयिष्यामि इत्याद्यपकारार्थं वचनम् । इति भरतः ॥ तत्पर्य्यायः । कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ परीवादः १० जुगुप्सनम् ११ आक्षेपः १२ अपवादः १३ निर्व्वादः १४ अपक्रोशः १५ । इति शब्दरत्नावली ॥ (भर्त्स+युच् । भर्त्सनाप्यत्रार्थे । यथा, कथासरित्सागरे । १९ । ५३ ।
"इत्यादि भर्त्सना तत्र गच्छन्निष्ठैः समं स च ।
विवशः प्रययौ विद्युल्लतास्त्री बभूव च ॥")

भर्त्सपत्रिका, स्त्री, (भर्त्सयतीति । भर्त्स+ण्वुल् । भर्त्सं निन्दितं पत्रं यस्याः । कप् । टाप् । अत इत्वम् ।) महानीली । इति राजनिर्घण्टः ॥ (भर्त्स्यपत्रिकापि पाठः ॥)

भर्म्म, क्ली, (भ्रियतेऽनेनेति । भृ+बाहुलकात् मन् ।) सुवर्णम् । भृतिः । नाभिः । इति विश्वकोषः ॥

भर्म्मन्, [न्] क्ली, (भरति ध्रियते वेति । भृञ्+"सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) वेतनम् । इति हेमचन्द्रः ॥ स्वर्णम् । धुस्तूरम् । इत्यमरः । २ । ९ । ९४ ॥ नाभिः । इति विश्वः ॥ (भरणम् । यथा, ऋग्वेदे । १० । ८८ । १ ।
"हविष्पान्तमजरं स्वर्व्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त ॥"
"भर्म्मणे भरणाय ।" इति तद्भाष्ये सायनः ॥)

भर्म्मण्या, स्त्री, (भर्म्मणि भरणे साधुरिति । भर्म्मन्+यत् । टाप् ।) वेतनम् । इति हेमचन्द्रः ॥

भर्व्व, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफोपधः । भर्व्वति । इति दुर्गादासः ॥

भर्व्व, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सक०-सेट् ।) भर्व्वति । अन्तःस्थवर्गीयोऽयम् । इति दुर्गादासः ॥

भल, क ङ निरूपणे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म० सक०-सेट् ।) क ङ, भालयते । इति दुर्गादासः ॥

भल, ङ दानवधनिरूपणेषु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, भलते । इति दुर्गादासः ॥

भलता, स्त्री, (भातीति । भा+बाहुलकात् डः । भा चासौ लता चेति कर्म्मधारयः ।) राजबला । इति शब्दरत्नावली ॥

भलन्दनः, पुं, कान्यकुब्जदेशीयनृपविशेषः । यथा,
"कलावती कान्यकुब्जे बभूवायोनिसम्भवा ।
अतिसारा महाभाग्या सुन्दरी कमला कला ॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उवाच मः ।
स तां संप्राप योगान्ते ब्रह्मकुण्डसमुत्थिताम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

भल्ल, ङ दानवधनिरूपणेषु । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट् ।) लद्वयान्तः । ङ, भल्लते । इति दुर्गादासः ॥

भल्लः, पुं, (भल्लते इति । भल्ल+अच् ।) भल्लूकः । इत्यमरः । २ । ५ । ४ ॥ (देशभेदः । यथा, बृहत्संहितायाम् । १४ । ३० ।
"नखपुरदार्व्वामर-
यवनाम्बरकिरातचीनकौणिन्दाः ।
भल्लापलोलजटासुर-
कुनटखसघोषकुचिकाख्याः ॥")

भल्लः, पुं स्त्री, (भल्लते वध्नातीति । भल्ल+अच् ।) अस्त्रभेदः । इति मेदिनी शब्दमाला च । भाला इति भाषा ॥ (यथा महाभारते । ९ । १४० । ६ ।
"प्रगृह्य सुदृढं भल्लं पावकं पेषणे तथा ।
सुरसाराणभल्लास्ते विपाठाश्च तत्त्ववित् ॥"
अनेन देहविद्धशल्यादिकमुद्धरति । यथा,—
"स च शल्योद्धरणकः प्रोक्ते वैद्यकागमे ।
नाराचनालशल्यादेर्भल्लः कुर्व्वीत सौकरे ॥"
इति हारीते प्रथमे स्थाने द्वितीयाध्याये ॥)

भल्लकः, पुं, (भल्ल+स्वार्थे कन् ।) भल्लूकः । इति हिरूपकोषः ॥ (पक्षिभेदः । यथा, भागवते । ३ । १० । २३ ।
"काकगृध्रवकश्येनभासभल्लकवर्हिणः ।
हंससारसचक्राह्वकाकोलूकादयः खगाः ॥")

भल्लपुच्छी, स्त्री, (भल्लस्य पुच्छमिव पुष्पं यस्याः ।) गवेधुका । इति शब्दचन्द्रिका ॥ गोरक्षतण्डुला इति ख्याता ॥

भल्लाटं, क्ली, शक्तिभल्लराजपुरम् । यथा,—
"शैनालो परितः शक्तिभल्लराजस्य प्रभुः ।
भल्लाटनगरं प्रायात् सकृद्गर्भ्य अभिवासनः ॥"
इति कल्किपुराणे । २५ अध्यायः ॥
(इक्ष्वाकुवंशीयनृपविशेषे, पुं । यथा, हरिवंशे । २० । १५ ।
"विश्वक्सेनस्य पुत्त्रोऽभूत् दक्षसेनो महीपतिः ।
भल्लाटो तत्कुमारोऽभूत्पौरवेण हतः पुरा ॥")

भल्लातः, पुं, (भल्लं भल्लास्त्रमिव अतति आत्मानं दापयतीति । अत+अच् ।) भल्लातकवृक्षः । इति रत्नमाला ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"भल्लाताभावतश्चित्रं मलयेचीरभारतः ॥")

भल्लातकः, पुं, (भल्ल इवातन्तीति । अत+ण्वुल् । यद्वा, भल्लात+स्वार्थे कन् ।) वृक्षविशेषः । भेला इति भाषा । तत्पर्य्यायः । अरुष्करः २ भल्लातः ३ वीरवृक्षः ४ अग्निमुखः ५ वीरतरुः ६ तपनः ७ भूतनाशनः ८ । इति रत्नमाला ॥ भल्लातकी ९ अग्निमुखी १० वीरवृक्षः ११ । इत्यमरः ॥ निर्द्दहनः १२ तपनः १३ अनलः १४ क्रमिघ्नः १५ शैलबीजः १६ वातारिः १७ स्फोटबीजकः १८ पृथग्बीजः १९ धनुर्वृक्षः २० बीजपादपः २१ वह्निः २२ । (यथा, सुश्रुते । सूत्रस्थाने । ४६ ।
"उष्णोदकानुपानञ्च स्नेहानामथ शस्यते ।
ऋते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । क्रमिकफवातोदराध्मानमेहदुर्नामनाशित्वञ्च । तत्फलगुणाः । कषायत्वम् । मधुरत्वम् । कोष्णत्वम् । कफार्शोऽग्निमान्द्यनाशित्वम् । विबन्धशूलगुल्मानाहशमनकारित्वञ्च । तन्मज्जगुणाः । विशेषेण दाहशमनत्वम् । पित्तापहत्वम् । तर्पणत्वम् । वातारोचकारित्वम् । दीपनवर्द्धकत्वम् । पित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् ॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रिमीन् ॥
तन्मज्जा मधुरो वृष्यो बृंहणो वातपित्तहा ।
वृन्तमाध्मानकृत् स्वादु पित्तघ्नं केशवर्द्धनम् ॥
भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ॥
हन्ति गुल्मज्वरं श्वित्रवह्निमान्द्यकृमिव्रणान् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"भल्लातकफलं स्निग्धं क्रिमिदुर्नामनाशनम् ।
हन्त्यस्मैष्मकरं याति कषायं मधुरञ्च तत् ॥
भल्लातपुष्पं मधुरं कषायं वातकोपनम् ॥"
इति राजवल्लभः ॥

भल्लातकी, स्त्री, (भल्लातक+गौरादित्वात् ङीष् ।) भल्लातकवृक्षः । इत्यमरः ॥

भल्लिका, स्त्री, (भल्ल+अच् । स्वार्थे कन् । टाप् । अत इत्वम् ।) भल्लातकः । इति शब्दचन्द्रिका ॥

भल्ली, स्त्री, (भल्ल+गौरादित्वात् ङीष् ।) भल्लातकः । इति शब्दरत्नावली ॥ (अस्याः पर्य्यायः ।

"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भल्लुकः, पुं, (भल्लूक+पृषोदरादित्वात् ह्रस्वः ।) भल्लूकः । इत्यमरः ॥
भल्लूकः, पुं, (भल्लते इति । भल्ल+"उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊकप्रत्ययेन साधुः ।) पशुविशेषः । भालुक इति भाषा । तत्पर्य्यायः । ऋक्षः २ अच्छः ३ भल्लः ४ दुर्नामा ५ भल्लुकः ६ एककटिः ७ शाविदः ८ दीर्घकेशः ९ चिरायुः १० दुघरः ११ दीर्घदर्शी १२ । इति राजनिर्घण्टः ॥ भालुकः १३ भालूकः १४ अच्छः १५ भाल्लूकः १६ भौल्लुकः १७ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १२ । ११६ । ६ ।
"सिंहव्याघ्रवृकाः क्रूरा भल्लाश्चैव महाबलाः ।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः ॥"
कोषकारविशेषः । तद्यथा,—
"मुखमण्डलाङ्गुलिमुखभल्लूकध्वजः कोष्ठकाः ।" इति सुश्रुते सूत्रस्थाने ८ अध्यायः ॥)
श्योनाकवृक्षः । (यथास्य पर्य्यायः ।
"श्योनाकः शुकनाशः स्यात् पुटिवृक्षो शुकिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकष्टुण्टुकोऽरलुः ॥"
इति वैद्यकरत्नमाला ॥)
कुक्कुरः । इति राजनिर्घण्टः ॥
भव, स्त्री, (भवति भूयते वा । भू + अच् अप् वा ।) भवम् । इति राजनिर्घण्टः ॥ चालता । इति भाषा ॥
भवः, पुं, (भूयते इति । भू + भावे अप् ।) जन्म । (यथा, याज्ञवल्क्ये । ३ । १६४ ।
"भवो जातिश्चतसृषु प्रियाप्रियविवर्ज्जनः ॥"
भवत्यस्मादिति । भू + अपादाने अप् ।) शिवः । इत्यमरः ॥ यथा, हरिवंशे ।६।२।६।२।
"तमब्रवीद् भवो ज्ञानी गङ्गातरणकारणात् । करोत्युग्रतपस्यध्वन्यवसत् पशुपतो वै भवः ॥")
स च जगत्कर्त्ता । यथा,—
"भवाय जगदुत्पत्तौ नमः ।"
इति शार्ङ्गधरपद्धत्युद्धृतवाक्यम् ॥
(भवति उत्पद्यतेऽस्मिन् । भू + अप् ।) लोकः । (यथा, महाभारते । १ । ७४ । १२ ।
"को हि नाम भवेत्कार्य्यं वाञ्छन् स्वभावेन ॥"
भवति अस्मिन् सर्व्वमिति । भू + आधारे अप् ।) संसारः । (यथा, मार्कण्डेये । ६८ । ७ ।
"भवभयं स्मरेदेवं देवी सर्व्वभवार्त्तिहा ॥")
सत्ता । प्राप्तिः । इति मेदिनी ॥
भवकः, पुं, (भवति आशिषि । भू + वुन् ।) आशीर्व्वचनम् । इति संक्षिप्तसारः ॥
भवकेतुः, पुं, (भवस्य हरस्य केतुः चिह्नम् ।) उत्पातकेतुः । इति ज्योतिषम् ॥
भवत्, त्रि, (भाति दीप्यते इति । भा + डवतु प्रत्ययः ।) युष्मदर्थम् । अयं भवत्शब्दो युष्मदर्थे प्रयुज्यते । तस्य त्रिलिङ्गत्वे रूपम् । भवान् भवती भवत् । (यथा, मार्कण्डेये देवीमाहात्म्ये । ८१ । ५ ।
"भवतां साहाय्यमिच्छामि तत्पुनस्त्रैलोक्यसम्पदः ॥")
वर्त्तमानार्थम् । इति मेदिनी । ते, ११० ॥ अथ भूधातोः शतृप्रत्ययेन निष्पन्नम् । तस्य लिङ्गत्रये रूपं भवन् भवन्ती भवत् ॥ (यथा, मनौ । १२ । ९० ।
"चातुर्व्वर्ण्यं त्रयो लोका चत्वारश्चाश्रमाः पृथक् ।
भूतं भवद्भविष्यच्च सर्व्वं वेदात् प्रसिध्यति ॥")
भवती, स्त्री, (भवत् + ङीप् ।) कालभेदः । स तु विषाक्तः । इति शब्दरत्नावली । दीप्तिमती ।
यथा । वाल्मीकिकृतगङ्गाष्टकम् ।
"खर्व्वीरोघखर्व्वयन्ति भवती भागीरथी
प्रार्थये ॥"
भवदाव, स्त्री, (भवात्मकं भवप्रियं वा दारु ।) देवदारुवृक्षः । इति राजनिर्घण्टः ॥
भवदीय, त्रि, (भवत् + "भवतष्ठक्छसौ ।" ४ । २ । ११५ । इति छस् ।) भवत इदम् । युष्मत्सम्बन्धि । यथा, उद्भटे ।
"शुचातिदूरे भवदीयकीर्त्ति
कर्णौ च शुष्टौ न च चक्षुषी मे ।
द्वयोर्विवादं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय ॥"
(यथा, मालत्याम् । ९ । १८ । ३९ ।
"त्वया भवदीयेन दग्धे कलिमयाः क्षमाः ॥")
भवनं, क्ली, (भवन्त्यस्मिन्निति । भू + अधिकरणे ल्युट् ।) गृहम् । (यथा, मनौ । ११ । १८ ।
"न जातु तं कटं यातु प्रविश्य भवनं स्वकम् ॥"
प्राकारः । यथा, महाभारते ।३।४३।८६ ।
"देवराजस्य भवनं दिव्यशालि शुभप्रिये ॥"
भू + भावे ल्युट् ।) भावः । इति मेदिनी ॥ (यथा,
"यत्र प्रासभवो भवस्य भवनं सृष्टौ ॥"
इति तार्किकाः ॥)
भवनाच्छिदी, स्त्री, (भवं संसारं जन्मादिकं वा नाशयति छिनत्ति यद्वा भवच्छिदं कीर्त्तयति वा । भव + छिद् + क्विप् ।) गङ्गा । इति पुराणम् ॥
भवभीरु, त्रि, (भविष्यद्भवतीति । भू + अतीतरः ।) भविष्यम् । भव्यम् । भविष्यत्कालः । इति सुश्रुते वोपकालयावत् ॥
भवन्तः, पुं, (भवन्तीति । भू + "तृभूवहिवसिभासिसाधि" उणा० ३ । १२८ । इति झच् । स च निदूरति ।) कालविशेषः । स तु वर्त्तमानः । वर्त्तमानकालः । [illegible] ... उपमानकृतश्चायमुदाहृतम् । (यथा, महाभारते । ३ । ६३ । ९ ।
[illegible])
भवन्तिः, पुं, (भू + "भुवोझिच्" उणा० ४ । ३० । इति झिच् ।) वर्त्तमानकालः । [illegible]
भवभूतिः, पुं, (भवेन शिवेन भूतिः ऐश्वर्य्यं यस्य वा । [illegible])
भवभूतिः ... गिरिजामुखोत्पन्नो गङ्गामहादेवः । [illegible]
सम्प्रदायविशेषः । [illegible]
भवस्य महादेवस्य भूतिरिति विग्रहे तु ।)
महादेवस्य ऐश्वर्य्यम् ॥
भवरुद्, [द्] स्त्री, (भवे जन्मादिक्लेशे संसारे रोदिति जनैरिति भवे जन्मान्ते रोदिति जनैर्येन इति । रुद् + क्विप् ।) प्रेतपटहः । इति त्रिकाण्डशेषः ॥
भवाग्रजा, स्त्री, (भवस्य शिवस्य अग्रजा ।) मनसादेवी । इति शब्दमाला ॥
भवादृक्, [श्] त्रि, युष्मादृशः । भवानिव दृश्यते स इति युष्मदस्मदोः भवदस्मदोः पूर्व्वपदस्य स्वरान्तर्भावत्वे कर्म्मणि कञेव टक्सकृपप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥
भवादृशः
भवादृक्षः
भवानी, स्त्री, भवस्य भार्य्या । (भव + "इन्द्रवरुणभवशर्व्वेति ।" ४ । १ । ४९ । इति ङीषि ङीष् ततः आनुक् आगम इति ।) दुर्गा । इत्यमरः ।१।१।३९। एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारकारकः ।
भवः कामतया सर्व्वसंसारो यस्योक्तीर्णा ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । २६ । ६ ।
"भवानी त्वं हि देव! प्रदिश्य नरामरम् ॥") ॥
भवानीगुरुः, पुं, (भवान्याः हिमवत्सुतायाः गुरुः पिता ।) हिमालयपर्व्वतः । इति हेमचन्द्रः ॥
भवाभीष्टः, पुं, (भवे अभीष्टः ।) गुग्गुलुः । इति राजनिर्घण्टः ॥
भवार्णवः, पुं, (भवः अर्णव इव तीर्य्यते दुस्तरत्वात् । भव इव अर्णवः ।) संसारसमुद्रः । यथा,
"इदं वदा परिभवप्रमादीवदाद्य
लोकान्तरं दिवं परिचितं वद्धरम् ।
भवार्णवं प्रलयतापदावानिलदीर्णं
चन्द्रं तदाधरत! दे भवार्णवमिदम् ॥"
इति देवीभागवते ११ स्कन्धे ५ अध्यायः ॥
भवायना, स्त्री, (भवः शिवः अयनं यस्याः भवायनत्वेन । शिवलिङ्गस्थितेरत्र शिवपदवास्यत्वात् ।) गङ्गा । इति शब्दरत्नावली ॥ (अस्याः व्युत्पत्तिर्यथा ।)
भवित्री, स्त्री, (भव इत्यत्र देवकीर्त्तिस्फुटिकर्षः पृथक्त्वेनाक्तः इति यत् ।) कृष्णः । गङ्गा ।
इति । इत्यमरः ॥
भवितव्य, त्रि, (भवितुं योग्यं कर्त्तव्यम् वा भविष्यतीति वा तव्यत् ।) भवितव्यम् । भाव्यम् ।
इति जटाधरः ॥
भवितव्यता, स्त्री, भवितव्यस्य भावः । भाविता । इति भवितव्यता कर्म्मफलं दैवम् । सा च पूर्व्वजन्मकृतशुभाशुभकर्म्मजनितं भाग्यं पुरुषकारश्च समुच्चयेन निश्चयः । इति व्याकरणम् ॥ यथा, पञ्चतन्त्रे ।

"न भवद्भ्यामहं शीघ्रो मार्यं राज्यमराध्यति ।
भविनयमनेनैव येनाहं निधनं गतः ॥"

भवितव्यता, स्त्री, (भवितव्य+भावे तल् ।) भाव्यम् । इति जटाधरः ॥ (यथा, कथासरित्सागरे । २० । ८६ ।
"तदभावय तावत् त्वं कथयिष्याम्यहञ्च ते ।
यदस्तु कोऽन्यथा कर्त्तुं शक्तो हि भवितव्यताम् ॥")

भविता, [ऋ] त्रि, (भू+शीलार्थे तृन् ।) भवनशीलः । इति भरतः ॥ साधु भवनशीलः । इति मुकुटः । तत्पर्य्यायः । भूष्णुः १ भविष्णुः २ । इत्यमरः ॥ (भविष्यदर्थेऽपि तृन्प्रत्ययः स्यात् यथा, मार्कण्डेये । २१ । २८ ।
"नान्या भार्य्या भवित्रीति वर्म्मयित्वा महा-सयाम् ।")

भविलः, पुं, (भवाय कार्य्यादिप्रकाशाय इलः सर्व्वः इव । ततः पृषोदरादित्वात् साधुः ।) कार्य्यकर्त्ता । इति त्रिकाण्डशेषः ॥

भविलः, पुं (भू+"सलिकल्यनिमहिभडिभण्डि-शण्डिपिण्डितुण्डिकुकिभूभ्य इलच् ।" उणा० । १ । ५५ । इलच् ।) विटः । इति त्रिकाण्डशेषः । भव्यः । इति सिद्धान्तकौमुद्यामुणादि-पादः ॥

भविष्णुः, त्रि, (भू+"भुवश्च ।" ३।२।१३८ । इति इष्णुच् । भवतिधातोरप्यस्मिन् विषये छन्दोवा-दिषु इष्णुच् प्रत्ययो भवतीति काशिका ।) भविता । इत्यमरः ॥

भविष्यः, त्रि, (भू+लृटः स्यैति शतृलृट् च तस्य विभाषायां पृषोदरात् तस्य लोपः ।) भविष्यत्-कालः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । ८१ । १८ ।
"अयं भविष्ये कथितो भविष्यकुशलैर्द्विजैः ॥")
पुराणविशेषे, क्ली । यथा,—
"चतुर्द्दशं भविष्यं स्यात्तथा पञ्चशतानि च ॥"
इति श्रीभागवते १२ स्कन्धे १३ अः ॥
(धर्म्मविशेषे, क्ली ॥)

भविष्यत्, त्रि, (भू+लृटः शतृलृट् च ।) काल-विशेषः । तस्य लक्षणम् । वर्त्तमानध्वंसाभाव-प्रतियोगित्वम् । इति कारकमञ्जरी ॥ वर्त्तमान-कालोत्तरकालीनोत्पत्तिकत्वम् । इति शिरो-मणिकृतपदार्थटीकालक्षणम् ॥ तत्पर्य्यायः । अनागतम् २ भवनम् ३ प्रगेतनम् ४ चर्य्यन्तम् ५ वर्त्तिष्यमाणम् ६ आगामि ७ भावि ८ । इति राजनिर्घण्टः ॥ अद्यतने भवि वो पुरमध्ये नौ । इति वोपदेवः । यथा त्वौ भविता वत्सरान्तरे भविष्यति । इति दुर्गादासः ॥

भव्यं, क्ली, (भवतीति भूयते इति वा । भू+"भव्यगेयेति ।" ३ । ४ । ६८ । इति यत् । अचारयः शब्दाः कर्त्तरि वा निपात्यन्ते । इति काशिका ।) फलविशेषः । चालता इति भाषा ॥ तत्पर्य्यायः । भव्यम् १ भविष्यम् २ भावनम् ३ वक्त्रशोधनम् ४ लोमफलम् ५ पिच्छिलशीतम् ७ । अस्य गुणाः । अम्लत्वम् । कटुत्वम् । उष्णत्वञ्च । बालस्य तस्य गुणः । वातकफापहत्वम् । पक्वस्य तस्य गुणः । मधु-राम्लत्वम् । रुचिकारित्वम् । आमशूलहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भव्यं स्यादु कषायाम्लं गुरुमास्यविशोधनम् ।
तदेव पक्वं दोषघ्नं गुरु ग्राहि विषापहम् ॥"
इति राजवल्लभः ॥
अस्थि । इति मेदिनी । ये, ४१ ॥

भव्यः, त्रि, (भवतीति । भू+कर्त्तरि निपातनात् वा यत् ।) शुभम् । (यथा, भागवते । ३ । १४ । १० ।
"भवाय भव्यपत्न्याय तस्मै विदुर! शुश्रुधुः ॥")
सत्यम् । योग्यम् । भावि । इति मेदिनी शब्द-रत्नावली च ॥ (यथा, मार्कण्डेये । ८८ । ७ ।
"भूतभव्यभवन्नाथाः सृजु चैतत् वचं द्विज ॥"
श्रेष्ठम् । यथा, भागवते । १ । १५ । १० ।
"यत्पादपद्ममभवाय भजन्ति भव्याः ।"
"भव्याः श्रेष्ठाः ।" इति तट्टीकायां स्वामी ॥
प्रसन्नम् । यथा, रामायणे । १ । ६२ । ७ ।
"स मे नाथो ह्यनाथस्य भव भव्येन चेतसा ।"
भव्येन प्रसन्नेन चेतसेति तट्टीकायां रामानुजः ॥)

भव्यः, पुं, (भवति उत्पद्यते भू+निपातनात् कर्त्तरि वा यत् ।) कर्म्मरङ्गवृक्षः । इति मेदिनी । ये, ४२ ॥ रसभेदे, पुं क्ली । इति शब्दरत्ना-वली ॥

भव्या, स्त्री, (भव्य+टाप् ।) उमा । गजपिप्पली । इति मेदिनी । ये, ४२ ॥

भष, कुत्से । निर्भर्त्सने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अकर्म्म० अक० निर्भर्त्सनार्थे सक०-सेट् ।) कुत्सः कुक्कुरादिकर्त्तृकशब्दः । भषति श्वा । भवाम्भरीये स्नान्तः स्वपतीत्यर्थः । भर्त्-सने इति भावः । भषति श्वा चान्द्रं शब्देन निर्भर्त्सयतीत्यर्थः । इति रमानाथः । इति दुर्गादासः ॥

भषः, पुं, (भषतीति । भष कुक्कुरादि शब्दे+अच् ।) कुक्कुरः । इति रत्नमाला ॥

भषकः, पुं, स्त्री, (भषतीति । भष+"कुन् शिल्पि-संज्ञयोरपूर्व्वस्यापि ।" उणा० २ । ३२ । इति कुन् ।) कुक्कुरः । इत्यमरः । २ । १० । २२ ॥

भषणं, क्ली, (भष्+ल्युट् ।) बुक्कनम् । कुक्कुर-शब्दः । इति हेमचन्द्रः ॥

भषा, स्त्री, स्वर्णक्षीरी । इति रत्नमाला ।

भषी, स्त्री, (भष+स्त्रियां जातित्वात् ङीष् ।) शुनी । इति शब्दरत्नावली ।

भस, इ भि दीप्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (जु०-पर०-सक०-अक० च सेट् ।) इ वैदिकः । भि, बभस्ति । इति दुर्गादासः ॥

भसत्, क्ली, (बभस्तीति । भस्+"दृदुभसो अदिः ।" उणा० १ । १३० । इति अदिः ।) काष्ठम् । अश्मान्तम् । जघनम् । इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥

भसत्, [द्] स्त्री, (भस+अदिः ।) भास्करः । योनिः । इति मेदिनी ॥ मांसम् । कालख-पणी । प्लवः । इत्युणादिकोषः ॥ कालः । इति त्रिकाण्डशेषः ॥

भसनः, पुं, (बभस्तीति । भस्+ल्युः ।) भ्रमरः । इति भूरिप्रयोगः ॥

भसन्तः, पुं, (बभस्तीति । भस+बाहुलकात् झच् ।) कालः । इति त्रिकाण्डशेषः ॥

भसितं, क्ली, (भस्+क्त ।) भस्म । इति हेम-चन्द्रः ॥ (यथा, शिवपुराणे वायुसंहितायाम् । २८ । ४१ ।
"चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे ।
ईशाने भसितं केचिदालेपनमितीदृशम् ॥")

भसूचकः, पुं, (भानां नक्षत्राणां सूचकः ।) दैवज्ञः । इति शब्दरत्नावली ॥

भस्त्रका, स्त्री, (भस्त्री इति । भस दीप्तौ+ष्ट्रन्+टाप् । भस्त्रा ततः स्वार्थे कन् । "भस्त्रैषा-जाज्ञेति ।" ७।३।४७ । इति इत्त्वं न । अत्र त्याने पौरुषाकारस्य इत्वं न भवति उदीच्या-माचार्य्याणां मतेन । इति काशिका ।) चर्म्म-प्रसेविका । इति शब्दरत्नावली ॥

भस्त्रा, स्त्री, (भस्यतेऽनयेति । भस+"हुयामाश्रु-भसिभ्यस्त्रन् ।" उणा० ४ । १६७ । इति ष्ट्रन् अजादित्वात् टाप् ।) अग्निदीपकचर्म्मनिर्म्मित-यन्त्रविशेषः । भाथी इति यांता इति च भाषा । तत्पर्य्यायः । चर्म्मप्रसेविका २ । इत्य-मरः । २ । १० । ३३ ॥ चर्म्मप्रसेवकः ३ । इति भरतः ॥ भस्त्राका ४ भस्त्रका ५ भस्त्री ६ । इति शब्द-रत्नावली ॥ भस्त्रिका ७ । इति व्याकरणम् ॥ (यथा, भागवते । ९ । २० । २१ ।
"माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलाम् ॥")

भस्त्राका, स्त्री, भस्त्रा । इति शब्दरत्नावली ।

भस्त्री, स्त्री, (भस्यतेऽनयेति । भस्+ष्ट्रन् । गौरा-दित्वात् ङीष् ।) भस्त्रा । इति शब्दरत्नावली ।

भस्म, [न्] क्ली, (बभस्तीति । भस् भर्त्सनदीप्त्योः+"सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् । इन्धनकाष्ठादिविकारः ।) शिवाङ्ग-भूषणम् । छाइ इति भाषा । यथा,—
"भस्माङ्गभूषणं भस्म विभूतिर्भूतिरस्त्र तु ।"
इति शब्दरत्नावली ।
तद्धि कामदेवशरीरजम् । यथा,—
"प्रदीप्य सर्व्वभूतेश ! भस्मना ज्वलता वपुः ।
कृत्वा सन्तोषयामास उमाकान्तं महेश्वरम् ॥
धारणायाशु गत्वा तं जगाम ब्रह्मणोऽन्तिकम् ।
ततो भगीरथः प्राह गङ्गा मे दीयतां विभो ॥
स तच्छ्रुत्वा वचस्तस्य सम्मान्य विबुधप्रियम् ।
गङ्गां प्रस्थापयामास आपतद्ब्रह्मणोऽन्तिकात् ॥
वायुना प्रेर्य्यमाणापि आकाशपथगा नदी ।
विख्याताकाशगङ्गेति तत्र संसेविता गणैः ॥
विष्णोः पदं समायाता तस्माद्विष्णुपदीति सा ।
पूज्यमाना सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥
सुरालयमनुप्राप्ता तस्माद्देवनदी तु सा ।
तस्मात् प्रपतिता गङ्गा शम्भोः शिरसि संस्थिता ॥
छत्रेणैकेनैव तेनापि शम्भुना योगमायया ।
दिव्यं वर्षशतं सार्द्धं पुनरारोधितेन वै ॥
मुक्ता भगीरथेनैव मलहन्त्री विनिर्गता ।
जटाजूटात् पपातोर्व्व्यां मेरोस्तस्मात्ततोऽगमत् ॥
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम् ।
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम् ॥
तामायान्तीं तु रोधाय स्वर्णाभो नाम दानवः ।
पार्व्वतं रूपमास्थाय वर्षाणाञ्च शतैर्दिवाः ॥
ततो भगीरथो राजाराधयामास कौशिकम् ।
स तुष्टः प्रददौ नागं वाहनं वै भगीरथः ॥
समारुह्यागमत्तत्र यत्र रुद्धा भगीरथी ।
तेन नागेन तं दैत्यं संविदार्य्य स सत्वरः ॥
शतधा तां समाधाय गङ्गयैरावणो गजः ।
महीतलं समापेदे स यावन्नागसाह्वयम् ॥
तस्माद्व्यावर्त्तिताभिप्रा बभूव नागपुरं वरम् ।
प्लावयन्ती महीं गङ्गा जह्नोराश्रममभ्यगात् ॥
तां दृष्ट्वाथ पपौ सोऽपि भक्त्या कुपितो मुनिः ।
जह्नुना नाशितां दृष्ट्वा गङ्गां त्रिपथगां नदीम् ॥
सन्तोषयामास जह्नुं भगीरथो मुनिम् ।
मुमोच कर्णरन्ध्रेण गङ्गां स दक्षिणेन ताम् ॥
एतस्माज्जाह्नवी भूता सुता तस्य मुनेस्तथा ।
ततः सा विविधान् देशान् पर्व्वतांश्च तथा-
ऽभ्रमात् ॥
संप्राप्य वारिणा भूयो जगाम पूर्व्वसागरम् ।
यत्र तथोदकं तस्यौ तस्याः पुण्यमभूद्द्विजाः ।
सुतीर्थं सर्व्वमर्थानां तारकं पापनाशनम् ॥
ततः सम्पूरयामास सप्तदं सर्व्वतो दिशम् ।
प्रपन्नं सागरैः सर्व्वं ततः पातालमाविशत् ॥
सागरान् सनोलक्षात् पूर्व्वेशाच्च पारिता ततः ।
देवैः संपूज्यमानापि जगाम ब्रह्मणोऽन्तिकम् ॥
अम्भुस्ते सागराः स्वर्गं ब्रह्मणोपहतास्च ये ।
एवन्नास्ते विनिर्द्दिष्टा गङ्गाया मयका स्वयम् ॥
भवद्भिरनिशं नत्वा कर्त्तव्यं विघ्ननाशनम् ॥
सूत उवाच ।
एतद्वः कथितं सर्व्वं यथावत्तरणं द्विजः ।
गङ्गायाश्चैव माहात्म्यं श्रूयतां गदतो मम ॥"
इत्याद्ये वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
तस्या मुख्यनामानि यथा,—
वराह उवाच ।
"धर्म्मस्तु द्रवरूपेण ब्रह्मणा निर्म्मितः पुरा ।
वरे गङ्गेति विख्याता स्तव स्तोत्रं वसुन्धरे ! ॥
किन्नैर्नामभवद्धेतु सुख्यासख्यैः सुविस्तरैः ।
यानि नामानि मुख्यानि तानि वक्ष्याम्यनुक्रमात् ॥
गङ्गा भागीरथी पुण्या जाह्नवी सुरनिम्नगा ।
विष्णुपादाब्जसम्भूता शम्भोः शिरसि संस्थिता ॥
सुमेरुमस्तकसंसृष्टा हिमाचलकृताश्रया ।
शुभ्रकुन्देन्दुसङ्काशा महापातकनाशिनी ॥
नदीश्वरी त्रिपथगा वैष्णवी सुरसुप्रिया ।
धर्म्मद्रवी भोगवती विश्वमायाप्रदायिनी ॥
क्षमा शान्तिः प्रभाशान्तिः पुण्यदा पूतिका
शिवा ।
महानदी शतमुखी शुभा मकरवाहिनी ॥
ब्रह्मदत्तात् परिभ्रष्टा सौम्यरूपातिशोभना ।
मुनिभिः पूजिता सर्व्वैः सर्व्वदेवैर्नमस्कृता ॥
महापुण्यमयी देवी सर्व्वाशासुप्रकाशिनी ।
सर्व्वत्र दुर्लभा गङ्गा त्रिभिः स्थानैर्विशेषतः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
इदं स्तोत्रं मया ख्यातं पूर्व्वमुक्तं स्वयम्भुवा ।
यः पठेत् प्रातरुत्थाय तस्य नश्यति दुर्गतिः ॥
यत् पापं यौवने वास्ये कौमारे वार्द्धके च यत् ।
तत् सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
कीर्त्तिं प्रीतिं महालक्ष्मीमायुरारोग्यसम्पदम् ।
ददाति जाह्नवी तुष्टा सर्व्वभावेन माधवि ! ॥"
इति वाराहे सर्व्वपापप्रशमनगङ्गास्तवः ॥
अपि च ।
ब्रह्मोवाच ।
"श्रोतुमिच्छामि देवेश ! लक्ष्मीकान्त ! जगत्
प्रभो ! ।
विष्णो ! विष्णुपदीस्तोत्रं पावनं पुण्यकारणम् ॥
श्रीनारायण उवाच ।
शिवसङ्गीतसंमुग्ध श्रीकृष्णाङ्गद्रवोद्भवाम् ।
राधाङ्गद्रवसंयुक्तां तां गङ्गां प्रणमाम्यहम् ॥
या जन्मसृष्टेरादौ च गोलोके रासमण्डले ।
सन्निधाने शङ्करस्य तां गङ्गां प्रणमाम्यहम् ॥
गोपैर्गोपीभिराकीर्णे शुभे राधामहोत्सवे ।
कार्त्तिकीपूर्णिमाजातां तां गङ्गां प्रणमाम्यहम् ॥
कोटियोजनविस्तीर्णा दैर्घ्ये लक्षगुणा ततः ।
समावृता या गोलोकं तां गङ्गां प्रणमाम्यहम् ॥
षष्टिलक्षयोजना या ततो दैर्घ्ये चतुर्गुणा ।
समावृता या वैकुण्ठं तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या ततो दैर्घ्ये चतुर्गुणा ।

आहृता ब्रह्मलोकं या सा गङ्गा प्रथमाभ्यधम् ।
विष्णुपादोद्भवा या देवी पञ्चगुणा ततः ।
आहृता शिवलोकं या सा गङ्गा प्रथमाभ्यधम् ।
लक्ष्मीभर्त्तृविलीना देवी सप्तगुणा ततः ।
आहृता पुण्यलोकं या सा गङ्गा प्रथमाभ्यधम् ।
सप्तयोजनविस्तीर्णा देवी ध्रुवगुणा ततः ।
आहृता चन्द्रलोकं या सा गङ्गा प्रथमाभ्यधम् ।
हरिपादपयोजन्मा या देवी दशगुणा ततः ।
आहृता सूर्य्यलोकं या सा गङ्गा प्रथमाभ्यधम् ।
सप्तयोजनविस्तीर्णा देवी च षड्गुणा ततः ।
आहृता सत्यलोकं या सा गङ्गा प्रथमाभ्यधम् ।
दशलक्षयोजना या देवी पञ्चगुणा ततः ।
आहृता या तपोलोकं सा गङ्गा प्रथमाभ्यधम् ।
षड्लक्षयोजनायामा देवी दशगुणा ततः ।
आहृता जनलोकं या सा गङ्गा प्रथमाभ्यधम् ।
अष्टलक्षयोजनायामा देवी अष्टगुणा ततः ।
आहृता या च कैलासं सा गङ्गा प्रथमाभ्यधम् ।
शतयोजनविस्तीर्णा देवी दशगुणा ततः ।
मन्दाकिनी येन्द्रलोके सा गङ्गा प्रथमाभ्यधम् ।
पाताले या भोगवती विस्तीर्णदशयोजना ।
ततो दशगुणा देवी सा गङ्गा प्रथमाभ्यधम् ।
क्रोशैकमात्रविस्तीर्णा ततः क्षीणा च कुत्रचित् ।
क्षितौ चालकनन्दा या सा गङ्गा प्रथमाभ्यधम् ।
सत्ये या क्षीरवर्णा च त्रेतायामिन्दुसन्निभा ।
द्वापरे चन्दनाभा च सा गङ्गा प्रथमाभ्यधम् ।
जलप्रभा कलौ या च नान्यत्र पृथिवीतले ।
स्वर्गे च नित्यं क्षीराभा सा गङ्गा प्रथमाभ्यधम् ।
यत्तत्र प्रभावमतुलं पुराणे च श्रुतौ श्रुतम् ।
या पुण्यदा पापहर्त्री सा गङ्गा प्रथमाभ्यधम् ।
यत्तोयकणिकास्पर्शः पापिनाञ्च पितामह ! ।
जन्मकोटिकृतं पापं कोटिजन्मार्जितं दहेत् ।
इत्येवं कथितं ब्रह्मन् ! गङ्गापद्यैकविंशतिः ।
स्तोत्रसारञ्च परमं पापघ्नं पुण्यकारकम् ।
नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ।
अश्वमेधफलं नित्यं लभते नात्र संशयः ।
अपुत्रो लभते पुत्रं भार्य्याहीनो लभेत् प्रियाम् ।
रोगात् प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पण्डितः ।
यः पठेत् प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ।
शुभं भवेत् दुःस्वप्नं गङ्गास्नानफलं लभेत् ।"
इति गङ्गास्तोत्रम् ।

नारायण उवाच ।
"भगीरथोऽनेन स्तोत्रेण स्तुत्वा गङ्गाञ्च
नारद ! ।
जगाम तां गृहीत्वा च यत्र नष्टाश्च सागराः ।
वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ।
भगीरथेन सानीता तेन भागीरथी स्मृता ।
इत्येवं कथितं सर्व्वं गङ्गोपाख्यानमुत्तमम् ।
पुण्यदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्यानेऽध्यायः ।

भागुरिः, पुं, स्मृतिशास्त्रकर्त्तादिमुनिविशेषः । तत्पर्य्यायः । हरलम्बुकः २ । इति जटाधरः । (यथा । "वष्टि भागुरिरल्लोपमवाप्योरुप-सर्गयोः ।" इति सिद्धान्तकौमुदी ।)

भाग्यं, क्ली, (भज्यतेऽनेन इति । भज + "ऋहलो-र्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) प्राक्तनशुभाशुभकर्म्म । तत्पर्य्यायः । दैवम् २ दिष्टम् ३ भागधेयम् ४ नियतिः ५ विधिः ६ । इत्यमरः । १ । ४ । २८ ॥ प्राक्तनकर्म्म ७ भागः ८ भवितव्यता ९ । इति जटाधरः । अदृष्टम् १० । इति शब्दरत्नावली । जन्मान्तरीयसुकृतपूर्व्वैर्दृष्टजन्यमागुभं कर्म्म । इति सन्नमाल-तत्त्वम् । (यथा,—
"अयुक्तमत्यन्ते हे श्वासले नी यदो विषम् ।
भाग्यं फलति सर्व्वत्र न विद्या न च पौरुषम् ॥"
इति प्राचः ।)
उत्तरफल्गुनीनक्षत्रम् । यथा, बृहत्संहि-तायाम् । १० । १ ।
"अनयालिलङ्कलाभ्रा-
भरणोभाग्यैरमः सुतोऽंशस्य ।
प्रचुरमतिकिलोपमृत्
करोति यार्थी यदि चिरः ॥"
भाजो ब्रह्मादिरविषु दीयते इति । भाग + "भागाद्यच ।" ५ । १ । ४९ । इति यत् ।) भागिके, त्रि । इति सिद्धान्तकौमुदी । (भाग-मर्हति । भाग + "दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) भागार्हम् । (भज + ण्यत् । भजनीयम् ।)

भाग्नेयं, त्रि, (भङ्गाया भवनं क्षेत्रमिति । "विभाषा तिलमाषोमाभङ्गाणुभ्यः ।" ५।२।४ । इति यत् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गीनम् २ । इत्यमरभरतौ । (यथा, शब्दरत्नावल्याम् ।
"स्यात् माषम्यं माषीणं कौद्रवं कोद्रवीणवत् ।
तथा भाङ्गच भाङ्गीनमुद्भयोमीणमित्यपि ॥")

भाज, त ञ पृथक्कृत्याम् । इति कविकल्पद्रुमः । (अदन्तचुरा०-पर०-सक०-सेट् ।) अबभाजत् धनं भ्रातरः । इति दुर्गादासः ।

भाजनं, क्ली, (भाज्यते इति । भाज पृथक्करणे + ल्युट् ।) पात्रम् । इत्यमरः । २ । ९ । ३३ । (यथा, महाभारते । १३ । १११ । १०२ ।
"राजतं भाजनं कृत्वा कपोतः संप्रयाति ॥")
योग्यम् । इति मेदिनी । ने, १०१ । (यथा, कथासरित्सागरे । ६१ । ४०६ ।
"तत्राल्पिनाभा राजा भ्रातृहन्तारो विवेक-
विन् ।
पक्वाद्वरमाधैवे हि च मवेद्भाजनं श्रियः ॥")
"यः संचारयते नित्यं योऽभिवाद्याभिलिखति ।
यच तपो न तपति दर्पे योऽधर्त्त भाजनम् ॥"
इति मत्स्यपुराणम् ।
आढकपरिमाणम् । इति वैद्यकपरिभाषा ।

भाजितं, त्रि, (भाज्यते स्मेति । भाज + क्त ।) पृथक्कृतम् । विभक्तम् । इति भाजधातोरर्थदर्शनात् सपदमेव विवक्षतम् । (भाजि + क्त ।) भाजी, स्त्री ।

भाजी, स्त्री, (भाज्यते इति । भाज + कर्म्मणि घञ् । भाज + "जानपदकुण्डगोणस्थलभाज-नागेति ।" ४ । १ । ४२ । इति ङीष् ।) व्यञ्जन-विशेषः । अन्यच भाजा । इति भोजदीपिका-दुर्गादासः ।

भाज्यं, त्रि, भागार्हम् । भाजनीयम् । इति भाज-धातोः कर्म्मणि यत्प्रत्ययेन निष्पन्नम् ।

भाटकः, पुं,स्त्री, (भटतीति । भट भृतौ + ण्वुल् ।) व्यवहारार्थं गृहप्रकटादिजन्यधनम् । इति हलायुधः । भाड़ा इति भाषा । अथ गृहादि-भाटकम् ।
"परभूमौ गृहं कृत्वा भाटयित्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥
शोभं विना स्वामिना तु परभूमावनिष्ठतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥"
कात्यायनः ।
"गृहवाप्यापणादीनि गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत्तावद्दाप्यः स भाटकम् ॥"
स्वामी परतः प्रतिष्ठितेति विवक्षितम् ।
"गृहपण्यगोकरोद्गारीन् गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत् तावद्दाप्यः स भाट-
कम् ॥"
बृहस्पतिः ।
"यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति ।
भाटं न दद्यात् दाप्योऽसावनूढस्यापि भाटकम् ॥"
शकटं हस्त्यश्वादेरप्युपलक्षणम् । अनूढस्या-वाहितस्यापि शकटादेः । इति विवादचिन्ता-मणिः ।

भाणः, पुं, (भणतीवेति । भण + आधिकरणे घञ् ।) नाटकादिदृश्यकाव्यान्तर्गतरूपक-विशेषः । इति हेमचन्द्रः । २ । १९८ । तस्य लक्षणादि यथा,—
"भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥
रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितैः ॥
सूचयेद्वीरशृङ्गारौ शौर्य्यसौभाग्यवर्णनैः ।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ॥
मुखनिर्व्वहणे सन्धी लास्याङ्गानि दशापि च ।
अत्राकाशभाषितरूपं परवचनमपि स्वयमेवा-नुवदन्नुत्तरप्रत्युत्तरं कुर्य्यात् । शृङ्गारवीरयो-श्च सौभाग्यशौर्य्यवर्णनया सूचनम् । प्रायेण भारतीवृत्तिरपि कैशिक्यपि वृत्तिर्भवति । उदाहरणं लीला-मधुकरः ॥" इति साहित्यदर्पणे ६ परिच्छेदः ।

भाण्डं, क्ली, (भण्यते भणति वेति । भण् शब्दे + "ञमन्ताड्डः ।" उणा० १ । ११३ । इति डः । ततः प्रज्ञादित्वात् अण् ।) भाजनम् । (यथा, महा-भारते । १२ । ११ । १०९ ।
"कृत्वा तु भाण्डं भाण्डं क्षत्रियोऽभ्यवहारयेत् ॥")
अश्वादिभूषणम् । मूलम् । वणिग्मूलधनम् । इति मेदिनी । डे, २१ । (यथा, महाभारते । ७ । २६ । २१ ।

"विप्रविद्धकुथावल्गाभिन्नभाण्डाः परासवः ।
धारोहास्तुरगाः पेतुर्मथिताः पार्थमार्गणैः ॥")

गजभाण्डस्य रक्षादिविधिर्यथा,—

"अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ।
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥
भाण्डं व्यसनमागच्छेत् यदि वाहकदोषतः ।
दाप्यो यत् तत्र नश्येत्तु दैवराजकृताद्दृते ॥"
इति मिताक्षरायां नारदः ॥

नदीकूलद्वयमध्यम् । इति हेमचन्द्रः । ४ । ९९ ॥ (भण्डते इति । भडि+अण् । भण्डस्य भावः इत्यण् ।) भण्डवृत्तिः । इत्यजयपालः ॥ भाँड़ामि इति भाषा ।

भाण्डः, पुं, गर्द्दभाण्डवृक्षः । इति शब्दचन्द्रिका ॥

भाण्डपुटः, पुं, (भाण्डे पुटा यस्य ।) नापितः । इति जटाधरः ॥

भाण्डपुष्पः, पुं, सर्पविशेषः । तत्पर्य्यायः । कौकुटिकन्दलः २ । इति त्रिकाण्डशेषः ॥

भाण्डागारः, पुं, (भाण्डानां पात्रादीनामागारः ।) गृहविशेषः । भाँड़ार इति भाषा ॥ तत्पर्य्यायः । मन्थरः २ । इति शब्दमाला ॥ (यथा, महाभारते । १२ । ६९ । ५४ ।
"भाण्डागारायुधागारान् योधागारांश्च सर्व्वशः ।
अश्वागारान् गजागारान् बलाधिकरणानि च ॥")

भाण्डारी, [न्] पुं, (भाण्डारोऽधिकारित्वेनास्त्यस्येति । भाण्डार+इनिः ।) भाण्डाराध्यक्षः । भाँड़ारी इति भाषा । यथा, व्यवहारप्रदीपे ।
"क्षुधितस्तृषितः कामी विद्यार्थी ह्यधिकारकः ।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥"

भाण्डिः, पुं, (भडि+इन् । पृषोदरादित्वात् साधुः ।) नापितस्य क्षुराद्याधारः । भाँड़ि इति भाषा । इति भाण्डिवाहशब्ददर्शनात् ॥

भाण्डिकः, पुं, (भाण्डिरस्त्यस्येति । भाण्डि+ठन् ।) नापितः । इति शब्दमाला ॥

भाण्डिवाहः, पुं, (भाण्डिं क्षुराद्याधारं वहतीति । वह+अण् ।) नापितः । इति शब्दमाला ॥

भाण्डीरः, पुं, (भण्ड+ईरन् । पृषोदरादित्वात् साधुः ।) वटवृक्षः । इति जटाधरः ॥ व्रजमण्डलान्तरे श्रीवृन्दावनमध्ये द्वितीयवटवनम् । यथा,—
"सङ्केतवटमादौ तु भाण्डीराख्यं वटं द्वयम् ।"
इति नारायणभट्टकृतव्रजभक्तिविलासः ॥

भातं, क्ली, (भा दीप्तौ+क्तः ।) प्रभातम् । इति शब्दमाला ॥ (भा+भावे क्तः ।) दीप्तिः ॥ तद्वति, त्रि ॥

भातिः, स्त्री, (भा+क्तिन् ।) शोभा । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ८ । १८ । १२ ।
"यत्तद्वपुर्भातिविभूषणायुधै-
रव्यक्तचिद्व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः
संपश्यतोर्दिव्यगतिर्यथा नटः ॥")

भातुः, पुं, (भातीति । भा+"कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ दीप्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भाद्रः, पुं, (भाद्री पौर्णमास्यस्मिन्निति । भाद्री+"साऽस्मिन् पौर्णमासीति ।" ४ । २ । २१ । इत्यण् ।) भाद्रपदनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासि सः । वैशाखादिद्वादशमासान्तर्गतपञ्चममासः । तत्पर्य्यायः । नभस्यः २ प्रौष्ठपदः ३ भाद्रपदः ४ । इत्यमरः । १ । ४ । १७ ॥ स च द्विविधः । सिंहस्थरविकालः सौरः । १ । सिंहस्थरव्यारम्भशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः । कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणचान्द्रः । २ । इति मलमासतत्त्वम् ॥ * ॥ तत्र जातफलम् ।

"नभस्यमासे खलु जन्म यस्य
धीरो मनोज्ञश्च वराङ्गनानाम् ।
रिपुप्रमाथी कुटिलोऽतिमर्म्मा
प्रपन्नभर्त्ता च भवेत् सहायः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

तत्र गोः प्रसवे नारदः ।
"भानौ सिंहगते चैव यस्य गौः सम्प्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"
व्याहृतिभिश्चायं होमः ।
"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
इति ॥

तथा ।
"सिंहराशौ गते सूर्य्ये गोः प्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ।
तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै शान्तिकं चरेत् ॥
अस्य वामेतिसूक्तेन तद्विष्णोरिति मन्त्रतः ।
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
त्र्यम्बकविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ।
मध्यरात्रौ निशीथे वा यदा गौः क्रन्दते तदा ।
ग्रामे वास्य गृहे वापि शान्तिकं पूर्व्ववद्दिशेत् ॥"

संक्रमणोत्तरषोडशदण्डात्मकपुण्यकालाभ्यन्तरे गोः प्रसवे विप्रसम्प्रदानकगोप्रदानपूर्व्वकशान्तिः कार्य्या इति विशेषः । तदतिरिक्तसिंहस्थरवौ गोः प्रसवे शान्तिमात्रं कर्त्तव्यं न गोः प्रदानम् । निर्णयसिन्धुधृताद्भुतसागरपद्मीयवचनज्योतिर्मीमांसादिसारादिति ॥ * ॥ अथ भाद्रकृत्यम् । तत्र जन्माष्टमीव्रतममावस्मिलितत्वेऽप्यनुष्ठेयम् । श्रावणपौर्णमास्यनन्तरितभाद्रकृष्णाष्टम्यां रात्रिमध्ये मुहूर्त्तमपि रोहिणीयोगरूपजयन्तीयोगाभावे सर्व्वैरुपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यभावे तु रोहिणीयुक्ताष्टम्यां उभयदिने रोहिणीयुक्ताष्टम्यभावे परदिने । रोहिण्यभावे तु निशीथसम्बन्धाष्टम्याम् । उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति ।

तत्र प्रयोगः पूर्व्वदिने संयमं विधाय तद्दिने कृतप्रातःस्नानादिराचान्तः । ॐ सूर्य्यः सोम इति पठित्वा ॐ तद्विष्णोः परमं पदमित्यादिमन्त्रेण नारायणं संस्तुत्य ॐ तत् सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तस्ताम्रपात्रे कुशतिलजलान्यादाय ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा विष्णुलोकप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं करिष्ये इति संकल्पयेत् । षष्ठप्रमाणदिने प्रातः सप्तमी तदष्टम्यां तिथौ इत्यत्र सप्तम्यां तिथावारभ्य इति वक्तव्यम् । ततः सामगस्तु ॐ देवो वो द्रविणोदा पूर्णां विवष्ट्वासिचं उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते । इति पठेत् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य

"ॐ वासुदेवं समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्ररोहिणीम् ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्द त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
इति पठेत् ।

तत आह्निकं समाप्यार्द्धरात्रे तत्तत्प्रतिमासु पटादिषु वा आवाहनविसर्ज्जनरहितं प्राणाभावे घटादिस्थजले वा आवाहनविसर्ज्जनरहितं पूजयेत् । ततो ध्यानम् ।
"मातापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षःपूर्णाङ्गं नीलोत्पलदलच्छविम् ॥"
इति ध्यात्वा श्रीकृष्ण स्वागतं इति पृच्छेत् । इदमासनं ॐ कृष्णाय नमः । इत्यासनं दत्त्वा एतत् पाद्यम् ॐ श्रीकृष्णाय नमः ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य इदमर्घ्यम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । ततो दधिमधुघृतात्मकं मधुपर्कमानीय एष मधुपर्कः ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । लौकिकवद्दधिघृतपयस्तोयकपरिमितान्यं जलमानीय ॐ योगाय योगेश्वराय योगपतये योगसम्भवाय गोविन्दाय नमो नमः । इदं स्नानीयजलम् ॐ श्रीकृष्णाय नमः । इदं वस्त्रं इदमाभरणम् एष गन्धः इदं पुष्पम् एष धूपः एष दीपः इदं नैवेद्यम् ॐ विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः । इत्यनेन नैवेद्यं दद्यात् आचमयेच्च । ततो नमो देव्यै श्रियै नमः । इति मन्त्रेण श्रियं पूजयेत् । ततः षष्ठ्योक्तविधिनापि संस्थाप्य हुतशिवाभ्याम् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय

गोविन्दाय नमो नमः स्वाहा । इत्यनेनाष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात् । ततो गुडघृतेन वसोर्धारां भित्तौ दद्यात् । ततो षष्ठीदेवीं भावयेत् । ॐ षष्ठ्यै नम इति षष्ठीं पूजयेत् । ततो भगवतः श्रीकृष्णस्य नामकरणान्नप्राशनचूडाकरणोपनयनादिसंस्कारान् भावयेत् । ततः प्रणवादिनमोऽन्तेन तत्तन्नामभिः पूजयेत् । ॐ देवक्यै नमः एवं वसुदेवाय यशोदायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय दक्षाय गर्गाय चतुर्भुजाय इत्यनेन यथाशक्ति यथोपचारैः पूजयेत् । ततः शङ्खेन कुसुमकुशचन्दनजलान्यादाय भूमौ जानुभ्यां पातयित्वा,

ॐ क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥

ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय गोविन्दाय नमो नमः । इत्यर्घ्यं दद्यात् । ततः प्रणाममन्त्रौ ।

"ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते ॥
नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः ।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे ॥"

ततश्च ।

"अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं देवमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं दिव्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ।
प्रपद्येऽहं सदा देवं सर्वकामार्थसिद्धये ॥"

इति स्तवः ।

ततः प्रणमेत् ।

"प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ।
त्राहि मां सर्वदेवेश हरे । संसारसागरात् ॥"

ततः प्रार्थयेत् ।

"ॐ त्राहि मां धर्मयज्ञेश दुःखशोकार्णवाद्धरे ।
कर्मलोकेश्वर त्राहि पतितं मां भवार्णवे ।
देवकीनन्दन श्रीश हरे संसारसागरात् ।
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे ।
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां दुःखसागरात् ।
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता ॥"

इति प्रार्थयेत् ।

"यद्बाल्ये यच्च कौमारे वार्द्धके यच्च यौवने ।
तत् पुण्यं वृद्धिमायातु पापं दह हलायुध ॥"

इति पठेत् ।

ततो कृष्णगीतवादित्रनृत्यैः जागरं कुर्यात् । परदिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्यः । ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात् सुवर्णादि यत् किञ्चिद्दत्तम् श्रीकृष्णो मे प्रीयतामिति ।

"ॐ यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तं विसर्जयेत् ॥"

ततश्चोपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम् । यदा तु महानिशायाः पूर्वमेकतरस्यावसाने अन्यतरस्य महानिशायां तदनन्तरं वा तदैकतरावसाने पारणम् । यदा तु महानिशायामुभयस्थितिः तदा उत्सवान्ते पारणं कुर्यात् । तत्र मन्त्रः । ॐ सर्वाय सर्वेश्वराय सर्वपतये सर्वसम्भवाय गोविन्दाय नमो नमः । पारणानन्तरञ्च समापनमन्त्रः । ॐ भूताय भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय नमो नमः । इत्यनेन व्रतं समापयेत् ॥ ० ॥

भाद्रशुक्लपञ्चमीकृत्यं भविष्योत्तरे ।

"तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः ।
यस्त्वालिख्य नरो नागान् कृष्णवर्णादिवर्णकैः ।
पूजयेद्गन्धपुष्पैश्च सर्पिर्गुग्गुलुपायसैः ॥
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः ।
आसप्तमात् कुलात्तस्य न भयं सर्पतो भवेत् ॥
तस्मात् सर्वप्रयत्नेन नागान् संपूजयेन्नरः ॥

इयमेवाशेषनागपञ्चमीति वाचस्पतिमिश्राः । अष्टनागाः कर्कोटकादयः पूर्वलिखिताः । पूजा च पाद्यपञ्चमीविहितेति बोध्यम् ॥ ० ॥

अथ हरेः पार्श्वपरिवर्त्तनम् । तच्च द्वादश्यां श्रवणाभावेऽपि । आभाद्रसितपक्षे प्रथमपर्व्वणोदितमिति कल्पतरात् । भाद्रशुक्लद्वादश्यां श्रवणमध्ययुक्तायां सन्ध्यासमये तत्प्रतिपदाभावे यथादृष्टादि पारणेऽपि तस्मादेव द्वादश्यां वैष्णवी वा कृताह्निकः सार्धं सन्ध्यायां देवं संपूज्य ।

"ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ॥"

इति प्राञ्जलिः पठेत् ।

"त्वयि सुप्ते जगन्नाथ । जगत् सुप्तं भवेदिदम् ।
प्रबुद्धे त्वयि बुध्येत जगत् सर्वं चराचरम् ॥"

इत्यनेन पूजयेत् ॥ ० ॥

अथ सिंहार्के चतुर्थ्यां चन्द्रदर्शननिषेधनम् । सिंहार्कमधिकृत्य मत्स्यपुराणम् ।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु ।
सिंहचतुर्थ्यामदृष्टानि मद्याभावाच्च यः ॥
चतुर्थ्यां चन्द्रमुत्पन्नं प्रमादाद्दृष्टवान् यदि ।
एकेनैव विशालाक्षं ध्रुवमुक्तौ यात्युपद्रवः ॥"

अभिशप्तो मिथ्याभिशापदिग्दोषयुक्तः । सोऽभि-शापः अस्यापि मद्धवात् भवेत् । अतश्च भाद्रस्य शुक्लचतुर्थ्यां वा कृष्णचतुर्थ्यामादाय

ॐ भद्रैकादि सिंहार्कचतुर्थीचन्द्रदर्शनजन्यपापक्षयकामो धार्मिकोपाख्यानं श्रोष्ये । इति संकल्प्य ।

"ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक । मा रोदीस्तव ह्येष स्यमन्तकः ॥"

इति विष्णुपुराणोक्तं धार्मिकोपाख्यानं पठेत् ॥ ० ॥

अथागस्त्यार्घ्यम् । तच्च यद्दिने पूर्व्वाह्णास्तयदि दिने गतम् । उभयदिने चेत् परदिने कुर्यात् । तदनुष्ठानविधिस्तु यथा स्मृतिः ॥ ० ॥ अथागस्त्यार्घ्यदानम् । प्रभातेऽस्तु तिथिनक्षत्रोल्लेखेन सिंहस्थरविकर्कत्वेन गौरमासादरः । कन्याऽऽगते संक्रान्तिपूर्व्वदिवसप्राप्यमाने तत्सप्तरात्रात्पूर्व्वदिनक्रमप्रयाणवारणाय ॐ तत् सविदुर्वार्थ ॐ भद्रैकादि सर्व्वाभिलषितसिद्धिकामोऽगस्त्यपूजनमहं करिष्ये इति संकल्प्य ताम्रपात्रे वंशे वा दक्षिणाभिमुखः दद्यात् पाद्यम् ॐ अगस्त्याय नमः । विलिप्याखण्डपुष्पं चन्दं दत्त्वा मन्त्रेणानेन दद्यार्घ्यम् ।

ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ।

ॐ अगस्त्याय नमः । इत्यागस्त्यायार्घ्यगन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात् ।

ॐ आतापिर्भक्षितो येन वातापिश्च महासुरः ।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥"

इति प्रार्थयेत् । इति तत्त्वम् ।

भाद्रपदः, पुं, (भाद्रपदानक्षत्रयुक्ता पौर्णमासी भाद्रपदी सा, अस्मिन् मासे इति । भाद्रपदी + अण् ।) भाद्रमासः । इत्यमरः ।१ । ४ । १७ ।(यथा,—

"ते तु भाद्रपदाद्येन द्विमासिकेन चान्यताः ।
तद्यथा । भाद्रपदाश्वयुजौ वर्षाः ।" इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ।)

भाद्रपदा, स्त्री, पूर्व्वभाद्रपदानक्षत्रम् । उत्तरभाद्रपदानक्षत्रम् । तत्पर्य्यायः । प्रोष्ठपदा २ । इत्यमरः । १ । ३ । २२ ।

भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति । भद्रमातृ + "मातुरुत्संख्यासम्भद्रपूर्व्वायाः ।" ४ । १ । ११५ । इति अण् । "उकारादेशाच्चान्तादेशः ।" इति काशिका ।) सतीनन्दनः । "सत्यास्तु तनये भाद्रमातुरत्वाद्भद्रमातुरः ।" इति हेमचन्द्रः । ३ । १९०

भाद्रः, पुं, (भाति सर्वैः देवताविशेषैः यस्मात् तत्तैः इति । भा + "दाभाभ्यां नुः ।" उणा० ३ । ३२ । इति नुः ।) सूर्य्यः । (यथा, महाभारते । ३ । ३ । २५ ।

"अनन्तः कपिलो भानुः कामदः सर्वतोमुखः ।"
लिङ्गः । यथा, तत्रैव । १२ । १६८ । २४ ।
"सर्व्वेषां सर्व्वविद्भानुर्विभूतीनां प्रकाशकः ।"
प्राकाशाः दृश्याः । यथा, तत्रैव । ११ । १३ । ०७
"दिव्यानुसाम भानुश्च सुतस्थो दृश्यतामता ।
तथैव देवशर्म्मा प्राकाशः संकीर्त्तिताः ।"
कर्णिकारकुसुमः सूर्य्यैः । यथा, तत्रैव ।
३ । ५२० । ७ ।

"तमप्यथ मनुं पुत्रं भानुमत्याङ्गिराः सृजत् ।"
यादवविशेषः । यथा, हरिवंशे । १४० । २ ।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप ! ।
जहाराक्रमयाकाङ्क्षी निकुम्भो नाम दानवः ।")
किरणः । (यथा, ऋग्वेदे । ६ । ६४ । २ ।
"भद्रादृक्षत उर्विया विभास्युत्ते शोचिर्भानवो
द्यामपप्तन् ।"
"भानवो रश्मयः ।" इति तद्भाष्ये सायनः ।)
अर्कद्रुमः । इत्यमरः । २ । ४ । ३२ । प्रभुः ।
राजा । इति धरणिः । इन्द्राह्वतुपिल्लविशेषः ।
इति हेमचन्द्रः । २ । १४ ।
भानुः, स्त्री, (भातीति । भा+नुः) भानुमती ।
इति शब्दरत्नावली । (दक्षकन्याभेदः । यथा,
मत्स्यपुराणे । ५ । १५ ।
"अरुन्धती देवमातृका प्रजाविसर्गमादिता ।
मरुत्वती वसुर्यामी लम्बा भानुररुन्धती ।")
भानुफला, स्त्री, (भानुरिव दीप्तिमत् फलमस्याः ।)
कदली । इति जटाधरः ।
भानुमती, स्त्री, (भानु+मतुप्+ङीप् ।) विक्र-
मादित्यराजपत्नी । यथा,—
"देवगुरोः प्रसादेन जिह्वाग्रे मे सरस्वती ।
तेनाहं नृप ! जानामि भानुमत्यास्तिलं यथा ।"
इति वररुचिः ।
(कृतवीर्यस्य दुहिता । सा च अहंयातेः पत्नी ।
"यथा, महाभारते । १ । ९५ । १५ ।
"अहंयातिः खलु कृतवीर्यदुहितरमुपयेमे भानु-
मतीं नाम । तस्यामस्य जज्ञे सार्व्वभौमः ।"
अङ्गिरसः प्रथमा सुता । यथा, महाभारते ।
३ । २१७ । ३ ।
"प्रजासु तासु सर्व्वासु रूपेणाप्रतिमाभवत् ।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता ।"
यादवभानोः कन्या । यथा, हरिवंशे ।१४०।२।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप ! ।"
दुर्य्योधनपत्नी । यथा, वेणीसंहारनाटके २
अङ्के ।
"आर्य्ये ! एषा भानुमती देवी यत्नः समर-
विजयार्थिन्या निर्व्वर्त्तितगुरुपादवन्दनाद्यप्रभृति
आरब्धनियमा बालोद्याने तिष्ठतीति ।"
गङ्गा । यथा, काशीखण्डे । २९ । १२६ ।
"भुक्तिमुक्तिप्रदा भिक्षा भक्तस्वर्गापवर्गदा ।
भागीरथी भानुमती भाग्यं भोगवती भृतिः ।")
भानुमान्, [त्] पुं. (भानवः सन्त्यस्येति । भानु+
मतुप् ।) सूर्य्यः । इति शब्दरत्नावली । (यथा,
कुमारसम्भवे । ३ । ५५ ।
"अथोपनिन्ये गिरिशाय गौरी
तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखै-
र्म्मन्दाकिनी पुष्करबीजमालाम् ।"
कलिङ्गदेशस्य नृपतिविशेषः । यथा, महाभारते ।
६ । ५१ । ३३ ।
"भानुमांस्तु ततो भीमं शरवर्षेण दारयन् ।
ननाद बलवन्नादं नादयानो नभस्तलम् ।"
केशिध्वजस्य पुत्रः । यथा, भागवते ।९।१३।२१।
"भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्-
सुतः ।")
दीप्तियुक्ते, त्रि । (यथा, महाभारते।१।३०।४७।
"सर्व्वाण्यपि च गात्राणि भानुमन्ति कृतानि च ।")
भानुवारः, पुं,(भानोर्वारः ।) रविवारः । यथा,—
"अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ।
अत्र स्नानं जपो होमो देवतानाञ्च पूजनम् ।
उपवासस्तथा दानमेकैकं पावनं स्मृतम् ।"
इति तिथितत्त्वे यमवचनम् ।
भानेमिः, पुं, (भानां प्रभाचक्राणां नेमिरिव ।)
सूर्य्यः । इति त्रिकाण्डशेषः ।
भाम, ङ क्रोधे । इति कविकल्पद्रुमः । (भ्वा०-
आत्म०-अक०-सेट् ।) ङ, भामते । इति दुर्गा-
दासः ।
भाम, त्रृ क कोपने । इति कविकल्पद्रुमः । (अदन्त-
चुरा०-पर०-अक०-सेट् ।) अबभामत् । इति
दुर्गादासः ।
भामः, पुं, (भामनमिति । भाम क्रोधे+घञ् ।)
क्रोधः । (यथा, ऋग्वेदे । ५ । २ । १० ।
"मदेचिदस्य प्ररुजन्ति भामा
न वरन्ते परिबाधो अदेवीः ।"
"भामाः क्रोधा दीप्तयो वा ।" इति तद्भाष्ये
सायनः । भातीति । भा + "अर्त्तिस्तुसुहुसृधृ-
क्षिक्षुभायावापदीति ।" उणा० १ । १३९। इति
मन् ।) सूर्य्यः । (भा+भावे मन् ।) दीप्तिः । इति
मेदिनी । मे, २१ । भगिनीपतिः । इति शब्द-
रत्नावली । (यथा, देवीभागवते ।६।१६।४९।
"गुरुं मित्रं तथा भामं पुत्रञ्च भगिनीं तथा ।")
भामकः, पुं, (भाम एव । स्वार्थे कन् ।) भगिनी-
पतिः । इति शब्दरत्नावली ।
भामा, स्त्री, (भामते इति । भाम्+अच्+टाप् ।)
कोपना स्त्री । इति शब्दरत्नावली ।
भामिनी, स्त्री, (भामते इति । भाम्+णिनिः+
ङीप् ।) कोपना स्त्री । इत्यमरः ।२। ६ । ४ ।
स्त्रीमात्रम् । इति राजनिर्घण्टः । (यथा,
भागवते । ९ । १८ । ६ ।
"एकदा दानवेन्द्रस्य शर्म्मिष्ठा नाम कन्यका ।
सखी सहस्रसंयुक्ता गुरुपुत्री च भामिनी ।"
सुनयनामकगन्धर्व्वस्य दुहिता । यथा, मार्क-
ण्डेयपुराणे । १०८ । ७ ।
"राजपुत्र ! सुतेयं मे भामिनी नाम मानिनी ।
अभिशापादगस्त्यस्य विशालतनयाभवत् ।")
भामिनीविलासः, पुं, (भामिन्या विलासो यत्र ।)
जगन्नाथपण्डितराजकृतकाव्यग्रन्थविशेषः ।
तस्याद्यश्लोकोऽयम् ।
"दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ।"
तस्य पुष्पिका । इति श्रीमत्पण्डितराजजग-
न्नाथविरचिते भामिनीविलासे प्रास्ताविकः
प्रथमो विलासः । शृङ्गारवर्णनं द्वितीयो
विलासः । श्रीकृष्णगुणाश्रयवर्णनं तृतीयो विला-
सश्च ।
भामी, [न्] त्रि, (भामः क्रोधोऽस्यास्तीति । भाम+
"अत इनिठनौ ।" ५ । २ ।११५। इति इनि ।)
क्रोधी । (तेजस्वी । यथा, ऋग्वेदे ।१।७०। ११।
"कया दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने
गीः ।"
"भामिने तेजस्विने ।" इति तद्भाष्ये सायनः ।)
भारः, पुं, (ध्रियते इति । भृञ् भरणे+"अकर्त्तरि
च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति
घञ् ।) विंशतितुलापरिमाणम् । इत्य-
मरः । तत्तु अष्टसहस्रतोलकात्मकमिति यावत् ।
वीवधः । यथा,—
"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात् ।"
इति चाणक्यम् ।
विष्णुः । इति मेदिनी । रे, ७२ । गुरुत्वञ्च ।
(गुरुत्वगुणवद्वस्तु ।)
भारङ्गः, पुं, उत्तरकुरुदेशजशकुनपक्षी । इति
पुराणम् ।
भारतं, क्ली, (भरतान् भरतवंशीयानधिकृत्य कृतो
ग्रन्थ इत्यण् । यद्वा, भारं चतुर्वेदादिशास्त्रे-
भ्योऽपि सारांशं तनोतीति । तन्+डः ।)
ग्रन्थभेदः । इति मेदिनी । ते, १३८ । तत्तु
व्यासप्रणीतलक्षश्लोकात्मकमहाभारतसंज्ञकेति-
हासः । तस्य श्रवणादिफलं यथा,—
"भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ।
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुबहुश्रुताय ।
पुण्याञ्च भारतकथां शृणुयाच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव ।
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ।
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठचतुष्पदाम् ।
यथैतानीतिहासानां तथा भारतमुच्यते ।
यश्चैनं श्रावयेत् श्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ।
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ।
भ्रूणहत्याकृतञ्चापि पापं जह्यादसंशयः ।"
इति महाभारतम् ॥
तदुत्पत्तिर्यथा,—
मत्स्योवाच ।
"भारतं संप्रवक्ष्यामि भारावतरणं शुभः ।
चक्रे लक्ष्मीं सुध्यमानः पाण्डवादिनिमित्ततः ।
विष्णुनाभ्यब्जतो ब्रह्मा ब्रह्मपुत्रोऽत्रिरत्रितः ।
सोमस्ततो बुधस्तस्मादिलायाञ्च पुरूरवाः ।
तस्मादायुस्ततः पुत्रोऽभूद्ययातिर्भरतः कुरुः ।
शान्तनुस्तस्य वंशेऽभूद्गङ्गायां शान्तनोः सुतः ।

भीष्मः धर्म्मगुणैर्युक्तो ब्रह्मचर्य्यपरायणः।
शान्तनोः सत्यवत्याञ्च द्वौ पुत्रौ सम्बभूवतुः।
चित्राङ्गदस्तु गन्धर्व्वः पूर्व्वं चित्ररथोऽवधीत्।
अन्यो विचित्रवीर्य्योऽभूत् काशिराजसुतापतिः।
विचित्रवीर्य्ये स्वर्य्याते व्यासात्तत्क्षेत्रजोऽभवत्।
धृतराष्ट्रोऽम्बिकायाञ्च पाण्डुरम्बालिकासुतः।
भुजिष्यायान्तु विदुरो गान्धार्य्यां धृतराष्ट्रतः।
दुर्य्योधनप्रधानास्तु शतसंख्या महाबलाः।
पाण्डोः कुन्त्याञ्च माद्र्याञ्च पञ्च पुत्राः प्रजज्ञिरे।
युधिष्ठिरो भीमसेनः अर्ज्जुनो नकुलस्तथा।
सहदेवश्च पञ्चैते महाबलपराक्रमाः।
कुरुपाण्डवयोर्व्वैरं दैवयोगाद्बभूव ह।
दुर्य्योधनेन वीरेण पाण्डवाः सम्प्रदुताः।
दग्धा जतुगृहे घोरात् हताः स्वविमानताः।
ततश्च एकचक्रायां ब्राह्मणस्य निवेशने।
निवेश्य महाकायो निहत्य बकराक्षसम्।
ततः पाञ्चालविषये द्रौपद्याश्च स्वयंवरम्।
विज्ञाय वीर्य्यशुल्कां तां पाण्डवा उपयेमिरे।
द्रोणभीष्मानुमत्या च धृतराष्ट्रः समाह्वयत्।
अर्द्धं राज्यं ततः प्राप्य इन्द्रप्रस्थे पुरोत्तमे।
राजधर्म्मं ततश्चक्रुः सभां सभा पतव्रताः।
अर्ज्जुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् स्त्रियम्।
वासुदेवस्य भगिनीं प्रियां देवकिनन्दनम्।
गाण्डीवं चाप नह्यं दिव्यं सोऽपि निषङ्गकम्।
अवाप्य दाहयाञ्चैव तर्पयित्वा हुताशनम्।
स तेन प्रभुणा वीरः पाण्डवो जातवेदसम्।
सव्यसाचीति वीभत्सुरजय्योऽपि कीर्त्तिमान्।
कृतान् दिग्विजये जित्वा रत्नान्याहृत्य वै ददौ।
युधिष्ठिराय महते भ्रात्रे कीर्त्तिविद्धि शुभः।
युधिष्ठिरोऽपि धर्म्मात्मा भ्रातृभिः परिवारितः।
जितो दुर्य्योधनेनैव मायाद्यूतेन पापिना।
अक्षैः शकुनिना तेन मन्त्रयित्वा समेत्य च।
अथ द्वादशवर्षाणि वने तेपुर्महातपः।
धौम्येन सह वीरास्ते ऋषिवर्य्याभिसंवृताः।
षट्त्रिंशत्सहस्रं सहस्रेण च संस्थिताः।
वर्षमेकं महात्मानो गोपशालिमपालयन्।
ततो जाताः स्वकं राज्यं प्रार्थयामासुरोजसा।
यच्च पञ्चसहं राज्यं वीरः दुर्य्योधनं नृपम्।
नाप्रयच्छत् कुरुश्रेष्ठं गृहयुद्धं प्रवर्त्तिताः।
अक्षौहिणीभिर्दशभिः सप्तभिः परिवारिताः।
एकादशभिरप्याहतोऽपि दुर्य्योधनस्य।
आसीद्युद्धं महाघोरं देवासुररणोपमम्।
भीष्मः सेनापतिरभूत् कौरवेऽथ बले।
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह।
अस्त्राद्यैर्युद्धं चक्रुस्तत्र रणे सुदारुणम्।
शिखण्ड्यर्ज्जुनबाणैश्च भीष्मः शरशय्यागतः।
शरतल्पमभीप्साय भीष्मे शेते महात्मनि।
उक्ता धर्म्मान् बहून् भीष्मोऽसौ विष्णुं

ययौ।
आरब्धे तु वधे द्रोणो निमग्नो धृष्टद्युम्नहस्ते।
ततः शल्यो हतो दैत्यः युधिष्ठिरेण वीर्य्यवान्।
दिवसेन च तदन्त्यं महद्युद्धमभूत् पुनः।
स हते हरिणीपाला हताः पाण्डवसागरे।
द्रोणस्याद्यात् पुत्रेण द्रोणोऽपि कर्णमाहुयान्।
ततः कर्णो हतो योद्धमर्ज्जुनेन महात्मना।
दिवसं महद्युद्धं कृत्वा पाण्डवसागरे।
निशः कृत्वोऽथ तु ततः शल्य च वीर्य्यवान्।
ततः शल्यो हतो योद्धुं धर्म्मराजेन धीमता।
दिवार्द्धेन ततः शल्यो सहदेवेनशकुनिर्हतः।
दुर्य्योधनोऽपि तेनैव गदामादाय वीर्य्यवान्।
अभ्यधावत वै भीमं कालान्तकयमोपमम्।
अथ भीमेन वीरेण गदया विनिपातितः।
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि।
जघान पाण्डुपुत्रांश्च पितुर्वधमनुस्मरन्।
हृतपुत्रं समादाय द्रौपद्यर्थेऽथ वीर्य्यवान्।
द्रौपदी रोदमानाथ मामध्यास्थः शिरोमणिम्।
ऐषीकास्त्रेण तं जित्वा अग्राह्यार्ज्जुन उत्तमम्।
युधिष्ठिरः समाश्वास्य स्त्रीजनं शोकव्याकुलम्।
स्नात्वा सम्प्रदेवांश्च पितॄंश्च पितामहान्।
भीष्माच्छ्रुत्वाथ धर्म्मान् स राज्यं चैवाकरोन्नृपः।
विष्णुरीशो ह्यश्वमेधेन विधिवद्दक्षिणावता।
राज्ये परीक्षितं स्थाप्य यादवानां विनाशनम्।
श्रुत्वा तु मौषले राजा जप्त्वा नामसहस्रकम्।
विष्णोः पदं समासाद भ्रातृभिः सहितः सुखी॥"

इति गारुडे १४० अध्यायः॥

वर्षभेदः। इति मेदिनी॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षः। तद्विवरणं यथा,—

"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने॥
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः॥
अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने॥
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते।
न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते॥
भारतस्यास्य वर्षस्य नव भेदान्निशामय।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान्॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात्।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः।
इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः॥
शतद्रुचन्द्रभागाद्या हिमवत्पादनिर्गताः।
वेदस्मृतिमुखाद्याश्च पारियात्रोद्भवा मुने॥
नर्म्मदासुरसाद्याश्च नद्यो विन्ध्याद्रिनिर्गताः।
तापीपयोष्णीनिर्व्विन्ध्याप्रमुखा ऋक्षसम्भवाः॥
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः॥
कृतमाला ताम्रपर्णीप्रमुखा मलयोद्भवाः।
त्रिसामा चार्य्यकुल्याद्या महेन्द्रप्रभवाः स्मृताः॥
ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसम्भवाः।
आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः।
तास्विमे कुरुपाञ्चालमध्यदेशादयो जनाः।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः॥
पौण्ड्राः कलिङ्गा मगधा दाक्षिणात्याश्च कृत्स्नशः।
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्व्वुदाः।
कारूषा मालवाश्चैव पारियात्रनिवासिनः।
सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः॥
मद्रा रामास्तथाम्बष्ठाः पारसीकादयस्तथा।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा॥
समीपतो महाभाग! हृष्टपुष्टजनाकुलाः।
चत्वारि भारते वर्षे युगान्यत्र महामुने!॥
कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित्।
तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः।
दानानि चात्र दीयन्ते परलोकार्थमादरात्।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते।
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा।
अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!॥
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम!॥
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात्॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः॥

नववर्षन्तु मैत्रेय! जम्बुद्वीपमिदं मया।
लक्षयोजनविस्तारं संक्षेपात् कथितं तव॥
जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः।
मैत्रेय! वलयाकारः स्थितः क्षारोदधिर्बहिः॥"

इति विष्णुपुराणे २ अंशे ३ अध्यायः॥

भारतवर्षे जन्मवाञ्छा तद्वासवत्त्वं यथा,—

"प्रजावन्तश्च तथा अत्रैव भारते सदा।
करोति सततं यत्र पुमान् धर्म्ममनुत्तमम्।
धर्म्मं तथा तपस्यं च उत्तमं च।
कार्य्यं कौबेरं प्रयत्नमनुष्ठितम्।
विश्वस्य कस्य राज्यं परत्र भक्तिलक्षणम्।
करोति कार्य्यं यत्र धर्म्मार्थं च भारते॥"

अतः पुण्यवर्षं कर्म्मभूमिश्च भारतवर्ष यथा,—

"अन्येषां जन्मनामत्र कर्म्मणां फलमश्नुते।
देव सर्व्वे च गायन्ति भारतीयं जन्म शुभम्।
स्वर्गापवर्गफलदं कर्म्म पुण्यवर्षे च भारते।
जायन्ते मनुजाः सुरास्तत्र कर्म्मभिरीप्सितान्।

हिमालयाद्यावसृष्टं पुण्यक्षेत्रञ्च भारतम् ।
क्षेत्रं कर्म्मफलानाञ्च सुकीर्त्तेश्च तपःस्थलम् ॥
लब्ध्वा तत्र जन्म जीवो वञ्चितो विष्णुमायया ।
प्रयत्नं करोति विषयं विहाय सेवनं हरेः ॥
लब्ध्वा तत्र महत् पुण्यं स्वर्गं गच्छति पुण्यवान् ।
यद्दीक्षा स्वर्गकन्याश्च चिरं स्वर्गे प्रमोदते ॥
स्वर्गमागच्छति नरो विहाय मानवीं तनुम् ॥”
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे ।१५६।
अध्यायः ॥

भारतः, पुं, (भरतस्य मुनेरयमिति । भरत + अण् ।) नटः । इति जटाधरः ॥ अग्निः । इति त्रिकाण्डशेषः ॥ (भरतस्य गोत्रापत्यमिति । भरत + अण् ।) भरतस्य गोत्रापत्यम् ॥ (यथा, महाभारते । ३ । ११ । ७३ ।
“तथार्थौधमहर्षे तत् कर्म्म भीमस्य भारत ! ॥”)

भारतवर्षं, क्ली, (भारतं भरतसम्बन्धि वर्षमिति ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । यथा,—
“हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥”
तस्य नव भागा यथा,—
“भारतस्यास्य वर्षस्य नवभेदान्निबोध मे ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वो वारुणस्तथा ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज ! ॥
इज्यायुद्धवणिज्याद्यैः कर्म्मभिः कृतपावनाः ।
तेषां संव्यवहारश्च एभिः कर्म्मभिरिष्यते ॥
स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तथा ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥
विस्तारोच्छ्रयिणो रम्या विपुलाश्चित्रसानवः ।
कोलाहलः सवैभ्राजो मन्दरो दर्दुराचलः ॥
वातन्धमो वैद्युतश्च मैनाकः सुरसस्तथा ।
तुङ्गप्रस्थो नागगिरिर्गोधनः पाण्डुराचलः ॥
पुष्पश्चोर्ज्जयन्तश्च रैवतोऽर्ब्बुद एव च ।
ऋष्यमूकः सगोमन्तः कूटशैलः कृतस्मरः ॥
श्रीपर्व्वतश्चकोरश्च शतशोऽन्येऽपि पर्व्वताः ।
तैर्विमिश्रा जनपदा म्लेच्छाश्चार्य्याश्च भागशः ।
तैः पीयन्ते सरिच्छ्रेष्ठा यास्ताः सम्यङ्निबोध मे ॥
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापगा ।
यमुना च शतद्रुश्च वितस्तैरावती कुहूः ॥
गोमती धूतपापा च बाहुदा च दृषद्वती ।
विपाशा देविका रङ्क्षुर्निश्चीरा गण्डकी तथा ।
कौशिकी चापगा विप्र ! हिमवत्पादनिःसृताः ॥
वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेण्णा च सानन्दा चैव सदानीरा मही तथा ॥
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥
शोणो महानदश्चैव नर्म्मदा सुरसा क्रिया ।
मन्दाकिनी दशार्णा च चित्रकूटा तथापगा ॥
चित्रोत्पला च तमसा करतोया पिशाचिका ।
तथान्या पिप्पला श्रोणी विपाशा वञ्जुला नदी ॥
सुमेरुजा शुक्तिमती मकुणी त्रिदिवा क्रतुः ।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ॥
शिप्रा पयोष्णी निर्व्विन्ध्या तापी च निषधावती ।
वेणा वैतरणी चैव सिनीवाली कुमुद्वती ॥
तोया चैव महागौरी दुर्गा चान्तःशिवा तथा ।
विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥
गोदावरी भीमरथी कृष्णवर्णा तथापगा ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्य्यथापगा ।
सह्यपादविनिष्क्रान्ता इत्येताः सरिदुत्तमाः ॥
शतमाला ताम्रपर्णी पुष्पजात्युत्पलावती ।
मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः ॥
पितृसोमर्षिकुल्या च इक्षुका त्रिदिवा च या ।
लाङ्गूलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥
ऋषिका च कुमारी च मन्दगा मन्दवाहिनी ।
कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥
सर्व्वाः पुण्याः सरस्वत्यः सर्व्वा गङ्गाः समुद्रगाः ।
विश्वस्य मातरः सर्व्वाः सर्व्वाः पापहराः स्मृताः ॥
अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ! ।
प्रावृट्कालवहाः सन्ति सर्व्वकालवहाश्च याः ॥
मत्स्याः कुशूकाः कुल्याश्च कुन्तलाः काशिकोशलाः ।
अर्ब्बुदाश्च पुलिन्दाश्च अश्मकाश्च वृकैः सह ।
मध्यदेशे जनपदाः प्रायशोऽमी प्रकीर्त्तिताः ॥
सह्यस्य चोत्तरे यत्र यत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः ॥
गोवर्द्धनपुरं रम्यं भार्गवस्य महात्मनः ।
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ॥
अपरान्ताश्च शूद्राश्च पह्लवाश्चर्म्मखण्डिकाः ।
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥
शतद्रवः कलिङ्गाश्च पारदा हारभूषिकाः ।
माठरा बहुभद्राश्च कैकेया दशमालिकाः ॥
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ।
काम्बोजा दरदाश्चैव बर्ब्बरा अङ्गलौकिकाः ॥
चीनाश्चैव तुषाराश्च पह्लवा बाह्यतोदराः ।
आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः ॥
लम्पकाः स्तनकाराश्च पूलिका जाङ्गलैः सह ।
अयधाश्चानिमद्राश्च किरातानाञ्च जातयः ॥
तामसा हंसमार्गाश्च काश्मीरास्तङ्गणास्तथा ।
चूलिका हूहुकाश्चैव ऊर्णा दार्व्वास्तथैव च ॥०॥
एते देशा ह्युदीच्यास्तु प्राच्यान् देशान्निबोध मे ।
अन्ध्रवाका मुद्गरका अन्तर्गिरिबहिर्गिराः ॥
तथा प्रवङ्गा वङ्गेया मलदा मलवर्त्तिकाः ।
ब्रह्मोत्तराः प्रविजया भार्गवाज्ञेयमर्द्दकाः ॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः ।
मल्ला मगधगोमेदाः प्राच्या जनपदाः स्मृताः ॥
अथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥
सेतुका मूषिकाश्चैव कुमारा वनवासिकाः ।
महाराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्व्वशः ॥
आभीराः सह चैषीका आटव्याः शबराश्च ये ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ।
सैजिकाः कुन्तला अन्ध्रा उद्भिदा नल-कारकाः ॥०॥
दाक्षिणात्यास्त्विमे देशा अपरान्तान्निबोध मे ।
सौर्पारकाः कालनदा दुर्गाः कालीतकैः सह ॥
कारस्करा लोहजङ्घा वानेया राजभद्रकाः ।
तापसाः कोशलाश्चैव त्रैपुरा विदिशास्तथा ॥
तुषारास्तुम्बराश्चैव पाटवो नैषधैः सह ।
पुलिन्दाश्च सुग्रीवाश्च रूपपास्तामसैः सह ॥
तथा कुरुमिनश्चैव सर्व्वे चैव करस्कराः ।
नासिकाद्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः ।
भानुकच्छाः समाहेयाः सर्व्वे सारस्वतैः सह ।
कच्छीयाश्च सुराष्ट्राश्च आवन्त्याश्चार्ब्बुदैः सह ॥
इत्येते ह्यपरान्तास्तु शृणु विन्ध्यनिवासिनः ।
मलदाश्च करूषाश्च मेकलाश्चोत्कलैः सह ।
उत्तमर्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ।
अनूपास्तुण्डिकेराश्च वीतिहोत्रा ह्यवन्तयः ॥
एते जनपदाः सर्व्वे विन्ध्यपृष्ठनिवासिनः ॥
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ॥०॥
निहारा हंसमार्गाश्च कुपथास्तङ्गणाः खशाः ।
कुशाः प्रावरणाश्चैव ऊर्णा दार्व्वाः सहूहुकाः ॥
त्रिगर्त्ता मालवाश्चैव किरातास्तामसैः सह ।
कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ॥०॥
एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितम् ॥
दक्षिणे परतो ह्यस्य पूर्व्वेण च महोदधिः ।
हिमवानुत्तरेणास्य कार्म्मुकस्य यथा गुणः ॥
तदेतद्भारतं वर्षं सर्व्वबीजं द्विजोत्तम ! ।
देवत्वममरेशत्वं दैवत्वं मरुतां तथा ॥
मृगपश्वप्सरोयोनीस्तद्वत् सरीसृपाः ।
स्थावराणाञ्च सर्व्वेषामतो ब्रह्मन् ! शुभाशुभैः ॥
प्रयान्ति कर्म्मभूर्ब्रह्मन्नान्या लोकेषु विद्यते ।
देवानामपि विप्रर्षे ! सदैवैष मनोरथः ॥
अपि मानुष्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ ।
मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः ॥
स्वकर्म्मनिगडग्रस्तैः स्वकर्म्मक्षपणोन्मुखैः ।
न किञ्चित् क्रियते कर्म्म सुखलेशोपबृंहितैः ॥”
इति श्रीमार्कण्डेयपुराणे भारतवर्षवर्णन-नामाध्यायः । ५७ । अपि च ।
“भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः । मलयो मङ्गलप्रस्थो मैनाकश्चित्रकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिरृष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुखः

भीष्मः सर्व्वगुणैर्युक्तो ब्रह्मवेदविपारगः ।
शान्तनोः सत्यवत्याञ्च द्वौ पुत्रौ संबभूवतुः ॥
चित्राङ्गदस्तु गन्धर्व्वः युद्धे चित्ररथोऽवधीत् ।
अन्यो विचित्रवीर्य्योऽभूत् काशिराजसुतापतिः ॥
विचित्रवीर्य्ये स्वर्य्याते व्यासात्तत्क्षेत्रजोऽभवत् ।
धृतराष्ट्रोऽम्बिकापुत्रः पाण्डुरम्बालिकासुतः ।
भुजिष्यायान्तु विदुरो गान्धार्य्यां धृतराष्ट्रतः ।
दुर्य्योधनप्रधानास्तु शतसंख्या महाबलाः ॥
पाण्डोः कुन्त्याञ्च माद्र्याञ्च पञ्च पुत्राः प्रजज्ञिरे ।
युधिष्ठिरो भीमसेनः अर्ज्जुनो नकुलस्तथा ।
सहदेवश्च पञ्चैते महाबलपराक्रमाः ।
कुरुपाण्डवयोर्व्वैरं दैवयोगाद्बभूव ह ।
दुर्य्योधनेन वीरेण पाण्डवाः बहूपद्रुताः ।
दग्धा जतुगृहे वीरास्ते सुताः सुधियामताः ॥
ततश्च एकचक्रायां ब्राह्मणस्य निवेशने ।
निवेश्य महात्मानो निहत्य वकराक्षसम् ॥
ततः पाञ्चालविषये द्रौपद्यास्ते स्वयंवरम् ।
विज्ञाय वीर्य्यशुल्कां तां पाण्डवा उपयेमिरे ॥
द्रोणभीष्मानुमत्या च धृतराष्ट्रः समानयत् ।
अर्द्धं राज्यं ततः प्राप्ता इन्द्रप्रस्थे पुरोत्तमे ॥
राजसूयं ततश्चक्रुः सभां कृत्वा यतव्रताः ।
अर्ज्जुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् प्रियाम् ॥
वासुदेवस्य भगिनीं नित्यं देवकिनन्दनम् ।
गाण्डीवं नाम तद्दिव्यं त्रिषु लोकेषु विश्रुतम् ।
अक्षयान् सायकांश्चैव तथाभेद्यञ्च दंशनम् ॥
स तेन धनुषा वीरः पाण्डवो जातवेदसम् ।
सव्यसाचीयो बीभत्सुस्तर्पयन् वीर्य्यवान् ॥
नृपान् दिग्विजये जित्वा रत्नान्यादाय वै ददौ ।
युधिष्ठिराय महते भ्रात्रे कीर्त्तिविदे तदा ॥
युधिष्ठिरोऽपि धर्म्मात्मा भ्रातृभिः परिवारितः ।
जितो दुर्य्योधनेनैव मायाद्यूतेन पापिना ।
कर्णदुःशासनमते स्थितेन शकुनेर्मते ।
अथ द्वादशवर्षाणि वने तेपुर्महत्तपः ॥
सधौम्या द्रौपदीयुक्ता मुनिवृन्दाभिसंवृताः ।
ययुर्व्विराटनगरं गुप्तरूपेण संस्थिताः ॥
वर्षमेकं महात्मानो गोधनादिमपालयन् ।
ततो याताः स्वकं राष्ट्रं प्रार्थयामासुरादृताः ॥
पञ्च ग्रामानर्द्धराज्यं वीरा दुर्य्योधनं नृपम् ।
नाप्नुवन्तः कुरुक्षेत्रे युद्धञ्चक्रुर्बलान्विताः ॥
अक्षौहिणीभिर्दशभिः सप्तभिः परिवारिताः ।
एकादशभिरद्भुताभिरपि दुर्य्योधनादयः ॥
आसीद्युद्धं महाघोरं देवासुररणोपमम् ।
भीष्मः सेनापतिरभूदादौ दौर्य्योधने बले ॥
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ।
शस्त्राशस्त्रि महाघोरं दशरात्रं शरासिभिः ॥
शिखण्ड्यर्ज्जुनबाणैश्च भीष्मः शरशतैश्चितः ।
उत्तरायणमीक्षाप्य ध्यात्वा देवं गदाधरम् ॥
उक्त्वा धर्म्मान् बहून् सर्व्वांस्तर्पयित्वा पितॄन्
ययौ ।
आपन्ने तु गते भीष्मे विमर्द्दे शरतल्पगे ॥
ततो द्रोणो ययौ योद्धुं धृष्टद्युम्नेन वीर्य्यवान् ।
दिनानि पञ्च तद्युद्धमासीत् परमदारुणम् ।

ये हताः पृथिवीपाला हताः पार्थास्त्रसागरे ।
शोकमाधाय पुत्रस्य द्रोणोऽपि स्वर्गमाप्नुयात् ॥
ततः कर्णो ययौ योद्धुमर्ज्जुनेन महात्मना ।
दिनद्वयं महद्युद्धं कृत्वा पार्थास्त्रसागरे ॥
निमग्नः सूर्य्यलोकन्तु ततः प्राप स वीर्य्यवान् ।
ततः शल्यो ययौ योद्धुं धर्म्मराजेन धीमता ॥
दिनार्द्धेन हतः शल्यो बाणैस्तैः समसन्निभैः ।
दुर्य्योधनोऽथ वेगेन गदामादाय वीर्य्यवान् ॥
अभ्यधावत वै भीमं कालान्तकयमोपमम् ।
अथ भीमेन वीरेण गदया विनिपातितः ॥
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि ।
जघान बाहुवीर्य्येण पितुर्व्वधमनुस्मरन् ॥
धृष्टद्युम्नं जघानाथ द्रौपदेयांश्च वीर्य्यवान् ।
द्रौपद्या रोदमानायाः अश्वत्थाम्नः शिरोमणिम् ।
ऐषीकास्त्रेण तं जित्वा जग्राहार्ज्जुन उत्तमम् ॥
युधिष्ठिरः समाश्वास्य स्त्रीजनं शोकविह्वलम् ।
स्नात्वा सन्तर्प्य देवांश्च पितॄंश्चैव पितामहान् ।
आश्वासितोऽथ भीष्मेण राज्यञ्चैवाकरोदृतम् ॥
विष्णुमीजेऽश्वमेधेन विधिवद्दक्षिणावता ।
राज्ये परीक्षितं स्थाप्य यादवानां विनाशनम् ॥
श्रुत्वा तु मौषले राजा जप्त्वा नामसहस्रकम् ।
विष्णोः पदं जगामाथ भीमाद्यैर्भ्रातृभिर्युतः ॥"

इति गारुडे १५० अध्यायः ॥०॥

वर्षभेदः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षः । तद्विवरणं यथा,—

"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः ॥
अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च ।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने ! ॥
इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते ॥
भारतस्यास्य वर्षस्य नव भेदान्निशामय ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ॥
ब्राह्मणाः क्षत्त्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुद्धवणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः ॥
शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः ।
वेदस्मृतिमुखाद्याश्च पारिपात्रोद्भवा मुने ! ॥
नर्म्मदासुरसाद्याश्च नद्यो विन्ध्याद्रिनिःसृताः ।
तापी पयोष्णी निर्व्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।
त्रिसामा चार्य्यकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥
ऋषिकुल्याकुमार्य्याद्याः शुक्तिमत्पादसम्भवाः ।
आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ॥
तास्विमे कुरुपाञ्चालमध्यदेशादयो जनाः ।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ॥
औड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्व्वशः ।
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्ब्बुदाः ॥
मालवा मालवाश्चैव पारिपात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः ॥
मद्रा रामास्तथाम्बष्ठाः पारसीकादयस्तथा ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
समीपतो महाभाग ! हृष्टपुष्टजनाकुलाः ।
चत्वारि भारते वर्षे युगान्यत्र महामुने ! ॥
कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् ।
तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः ॥
दानानि चात्र दीयन्ते परलोकार्थमादरात् ।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ॥
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ।
अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ॥
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ॥
कदाचिल्लभते जन्तुर्म्मानुष्यं पुण्यसञ्चयात् ॥

गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति ॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ॥

नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया ।
लक्षयोजनविस्तारं संक्षेपात् कथितं तव ॥
जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्बहिः ॥"

इति श्रीविष्णुपुराणे २ अंशे ३ अध्यायः ॥०॥

अत्रापि वर्षे जन्मकारणे तद्गाथाश्च यथा,—

"स्वल्पमल्पः कृत्वा कर्म्मेदं भारते जनः ।
करोति सफलं जन्म श्रुत्वा हरिकथामृतम् ॥
अर्च्चनं वन्दनं समवायः श्रवणेन च ।
स्मरणं कीर्त्तनं श्रद्धायुक्तमनसोचितम् ॥
निवेदनं चात्म दास्यं नवधा भक्तिलक्षणम् ।
करोति सफलं जन्म कर्म्मैतानि च भारते ॥" इति ।

अस्य पुण्यप्रदत्वं कर्म्मभूमित्वं परिकल्पनञ्च यथा,—

"कर्म्मणां फलमोक्षस्य सर्व्वेषां हरसुन्दरि ! ।
नैव कर्म्म न नाशाये नान्यद्वीपे श्रुतौ श्रुतम् ॥
कृत्वा शुभाशुभं कर्म्म पुण्यक्षेत्रे च भारते ।
अन्यत्र मनुजा भुञ्जन्ति कर्म्मणोऽनन्तरात् ।

हिमालयाश्रयमिदं पुण्यक्षेत्रञ्च भारतम्।
मेरुं धर्म्मस्थानानाञ्च सुकीनाञ्च तपःस्थलम्॥
लब्ध्वा तत्र जन्म जीवो यद्यसौ विष्णुमायया।
भ्रान्तः करोति विषयं विहाय सेवनं हरेः॥
कृत्वा तत्र महत् पुण्यं स्वर्गं गच्छति पुण्यवान्।
भुक्त्वा स्वर्गसुखञ्च चिरं स्वर्गे प्रमोदते॥
स्वर्गमागच्छति नरो विहाय मानवीं तनुम्॥"
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे ।११५८। अध्यायौ॥

भारतः, पुं, (भरतस्य मुनेरयमिति। भरत + अण्।) नटः। इति जटाधरः॥ अग्निः। इति त्रिकाण्डशेषः॥ (भरतस्य गोत्रापत्यमिति। भरत + अण्।) भरतस्य गोत्रापत्यम्॥ (यथा, महाभारते। १। ११। ७४।
"तथाश्रौषमहं चैतद्धर्म्मं भीमस्य भारत!॥")

भारतवर्षं, क्ली, (भारतं भरतसम्बन्धि वर्षमिति।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। यथा,—
"हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः॥"
तस्य नव भागा यथा,—
"भारतस्यास्य वर्षस्य नवभेदान्निबोध मे।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम्॥
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान्।
नागद्वीपस्तथा सौम्यो गान्धर्व्वो वारुणस्तथा॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात्॥
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज!॥
इज्यायुद्धवणिज्याद्यैः कर्म्मभिः कृतपावनाः।
तेषां संव्यवहारश्च एभिः कर्म्मभिरिष्यते॥
स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तथा।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः॥
विस्तारोच्छ्रयिणो रम्या विपुलाश्चित्रसानवः।
कोलाहलः सवैभ्राजो मन्दरो दर्दुराचलः॥
वातन्धमो वैद्युतश्च मैनाकः सुरसस्तथा।
तुङ्गप्रस्थो नागगिरिर्गोधनः पाण्डुराचलः॥
पुष्पगिरिर्वैजयन्तो रैवतोऽर्व्वुद एव च।
ऋष्यमूकः सगोमन्तः कूटशैलः कृतस्मरः॥
श्रीपर्व्वतश्चकोरश्च शतशोऽन्येऽपि पर्व्वताः।
तैर्व्विमिश्रा जनपदा म्लेच्छाश्चार्य्याश्च भागशः॥
तैः पीयन्ते सरिच्छ्रेष्ठा यास्ताः सम्यङ्निबोध मे।
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापरा॥
यमुना च शतद्रुश्च वितस्तैरावती कुहूः।
गोमती धूतपापा च बाहुदा च दृषद्वती॥
विपाशा देविका रक्षुर्निश्चीरा गण्डकी तथा।
कौशिकी चापगा विप्र! हिमवत्पादनिःसृताः॥
वेदस्मृतिर्वेत्रवती वृत्रघ्नी सिन्धुरेव च।
वेणा च सन्दना चैव सदानीरा मही तथा॥
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः॥
शोणो महानदश्चैव नर्म्मदा सुरसा क्रिया।
मन्दाकिनी दशार्णा च चित्रकूटा तथापरा॥
चित्रोत्पला च तमसा करतोया पिशाचिका।
तथान्या पिप्पला श्रोणी विपाशा वञ्जुला नदी॥
सुमेरुजा शुक्तिमती मङ्कुणी त्रिदिवा क्रतुः।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी॥
शिप्रा पयोष्णी निर्व्विन्ध्या तापी च निषधावती।
वेणा वैतरणी चैव सिनीवाली कुमुद्वती॥
तोया चैव महागौरी दुर्गा चान्तःशिवा तथा।
विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः॥
गोदावरी भीमरथी कृष्णवर्णा तथापरा।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्य्यथापगा।
सह्यपादविनिष्क्रान्ता इत्येताः सरिदुत्तमाः॥
कृतमाला ताम्रपर्णी पुष्पजात्युत्पलावती।
मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः॥
पितृसोमर्षिकुल्या च इक्षुका त्रिदिवा च या।
लाङ्गुलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः॥
ऋषिका च कुमारी च मन्दगा मन्दवाहिनी।
कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः॥
सर्व्वाः पुण्याः सरस्वत्यः सर्व्वा गङ्गाः समुद्रगाः।
विश्वस्य मातरः सर्व्वाः सर्व्वाः पापहराः स्मृताः॥
अन्याः सहस्रशः प्रोक्ताः क्षुद्रनद्यो द्विजोत्तम!।
प्रावृट्कालवहाः सन्ति सर्व्वकालवहाश्च याः॥
मत्स्याः कुशूलाः कुल्याश्च कुन्तलाः काशिकोशलाः।
अर्व्वुदाश्च कलिङ्गाश्च मलकाश्च वृकैः सह।
मध्यदेश्या जनपदाः प्रायशोऽमी प्रकीर्त्तिताः॥
सह्यस्य चोत्तरे यत्र यत्र गोदावरी नदी।
पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः॥
गोवर्द्धनपुरं रम्यं भार्गवस्य महात्मनः।
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः॥
अपरान्ताश्च शूद्राश्च पह्लवाश्चर्म्मखण्डिकाः।
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः॥
शतद्रुहाः कलिङ्गाश्च पारदा हारभूषिकाः।
माठरा बहुभद्राश्च कैकेया दशमालिकाः॥
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च।
काम्बोजा दरदाश्चैव बर्व्वरा अङ्गलौकिकाः॥
चीनाश्चैव तुषाराश्च पह्लवा बाह्यतोदराः।
आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः॥
लम्पकाः स्तनपाराश्च चूलिका जाहुडैः सह।
अपथाश्चालिमद्राश्च किरातानाञ्च जातयः॥
तामसा हंसमार्गाश्च काश्मीरास्तङ्गणास्तथा।
चूलिका हूहुकाश्चैव ऊर्णा दार्व्वास्तथैव च॥०॥
एते देशा उदीच्यास्तु प्राच्यान् देशान्निबोध मे।
अन्ध्रवाका मुद्गरका अन्तर्गिरिबहिर्गिराः॥
तथा प्रवङ्गवङ्गेया मलदा मलवर्त्तिकाः।
ब्रह्मोत्तराः प्रविजया भार्गवाङ्गेयमर्द्दकाः॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः।
मल्ला मगधगोमेदाः प्राच्या जनपदाः स्मृताः॥
अथापरे जनपदा दक्षिणापथवासिनः।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च॥
सेतुका मूषिकाश्चैव कुमारा वनवासिकाः।
महाराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्व्वशः॥
आभीराः सह चैषीका आटव्याः शबराश्च ये।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह॥
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः।
नैषिकाः कुन्तला अन्ध्रा उद्भिदा नलकारकाः॥०॥
दाक्षिणात्यास्त्विमे देशा अपरान्तान्निबोध मे।
शौर्पारकाः कालनदा दुर्गास्तालीकटैः सह॥
कारस्करा लोहजङ्घा वानेया राजभद्रकाः।
तोषलाः कोशलाश्चैव त्रैपुरा वैदिशास्तथा॥
तुषारास्तुम्बराश्चैव पाटवो नैषधैः सह।
पुलिन्दाश्च सुमीनाश्च रूपपालामसैः सह॥
तथा कुरुमिणश्चैव सर्व्वे चैव करस्कराः।
नासिक्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः।
भारुकच्छाः समाहेयाः सर्व्वे सारस्वतैः सह॥
कच्छीयाश्च सुराष्ट्राश्च आवन्त्याश्चार्व्वुदैः सह॥
इत्येते ह्यपरान्ताश्च शृणु विन्ध्यनिवासिनः।
मलजाश्च करूषाश्च मेकलाश्चोत्कलैः सह॥
उत्तमर्णा दशार्णाश्च भोजाः किष्किन्धकैः सह।
अनूपास्तुण्डिकेराश्च वीतिहोत्रा ह्यवन्तयः॥
एते जनपदाः सर्व्वे विन्ध्यपृष्ठनिवासिनः॥
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये॥०॥
निहारा हंसमार्गाश्च कुपथास्तङ्गणाः खसाः।
कुशाः प्रावरणाश्चैव ऊर्णा दार्व्वाः सहूहुकाः॥
त्रिगर्त्ता मालवाश्चैव किरातास्तामसैः सह।
कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः॥०॥
एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितम्।
दक्षिणे परतो ह्यस्य पूर्व्वेण च महोदधिः।
हिमवानुत्तरेणास्य कार्म्मुकस्य यथा गुणः॥
तदेतद्भारतं वर्षं सर्व्वबीजं द्विजोत्तम!।
देवत्वममरेशत्वं देवत्वं मरुतां तथा॥
मृगयक्षाप्सरोयोनीस्तद्वत् सरीसृपाः।
स्थावराणाञ्च सर्व्वेषामितो ब्रह्मन्! शुभाशुभैः॥
प्रयान्ति कर्म्मभूर्ब्रह्मन्नान्या लोकेषु विद्यते।
देवानामपि विप्रर्षे! सदैवैष मनोरथः॥
अपि मानुष्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ।
मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः॥
तत्कर्म्मनिगडग्रस्तैः स्वकर्म्मक्षपणोन्मुखैः।
न किञ्चित् क्रियते कर्म्म सुखलेशोपबृंहितैः॥"
इति श्रीमार्कण्डेयपुराणे भारतखण्डवर्णननामाध्यायः॥ ५७ ॥ ० ॥ अपि च।
"भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुखः

इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नद्यो नदाश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिरृषि-कुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोधस्वती सप्त-वती सुषोमा शतद्रुश्चन्द्रभागा मरुद्-वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहित-कृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारक-गतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्ग-श्चापि भवति। योऽसौ भगवति सर्वभूतात्मनि अनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागति-निमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महा-पुरुषपुरुषप्रसङ्गः। एतदेव हि देवा गायन्ति।

"अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकं स्पृहा हि नः॥
किं दुष्करैर्नः क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कज-
स्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात्॥
कल्पायुषां स्थानजयात् पुनर्भवात्
क्षणायुषां भारतभूजयो वरः।
क्षणेन मर्त्त्येन कृतं मनस्विनः
संन्यस्य संयान्त्यभयं पदं हरेः॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रयाः।
न यत्र यज्ञेशमखा महोत्सवाः
सुरेशलोकोऽपि न वै स सेव्यताम्॥
प्राप्ता नृजातिं त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम्।
न वै यतेरन्नपुनर्भवाय ते
भूयो वनौका इव यान्ति बन्धनम्॥
यैः श्रद्धया बर्हिषि भागशो हवि-
र्निरुप्तमिष्टं विधिमन्त्रवस्तुतः।
एकः पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्णः स्वयमाशिषां प्रभुः॥
सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम्॥
यद्यत्र नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्म नः स्या-
द्वर्षे हरिर्यद्भजतां शं तनोति॥

श्रीशुक उवाच। जम्बूद्वीपस्य च राजन्नुपद्वीपा-नष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान्। तद्यथा। स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति। एवं तव भारतोत्तम जम्बूद्वीपवर्षविभागो यथोप-देशमुपवर्णित.॥" इति श्रीभागवते महापुराणे ५ स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्यायः॥ (विष्णुपुराणे च। २ अंशे ३ अध्याये।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र सन्ततिः॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने!।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्॥"२॥
अपरञ्च।
"अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने!॥४॥
इतः स्वर्गश्च मोक्षश्च मध्यमश्चान्तगम्यते।
न खल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते॥"५॥
अपि च।
"चत्वारि भारते वर्षे युगान्यत्र महामुने!।
कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित्॥१९॥
तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः।
दानानि चात्र दीयन्ते परलोकार्थमादरात्॥"२०॥
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥२२॥
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम!।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥२३॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात्॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति॥२५॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः॥"२६॥)

भारती, स्त्री, (भृ + अतच्। स्त्रियां ङीप्।) वचनम्। (यथा, कुमारे। ६। ७९।
"समर्थमिव भारत्या सुतया योक्तुमर्हति॥")
सरस्वती। (यथा, कालिदासः।
"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि! नमस्ते॥")
पक्षिभेदः। वृत्तिभेदः। इति मेदिनी। ते, १६८। यथा,—
"मङ्गारे कौशिकी तीरे बालचारभटो नृपः।
रत्नं होरे च नौसृष्टिं वृत्तिः कर्णेन भारती॥"
भारती इत्यत्र भारती अंशत्रयो वाग्-आरम्भी नराश्रयः। इति साहित्यदर्पणस्य ६ परिच्छेदः। ब्राह्मी। इति राजनिर्घण्टः॥ (शङ्कराचार्य्यशिष्यतोटकस्य शिष्यावान्तर-समस्य उपाधिविशेषः। यथा, प्राणतोषिण्या-मवधूतप्रकरणे।
"विद्याभारेण सम्पूर्णः सर्व्वभारं परित्यजेत्।
दुःखभारं न जानाति भारती परिकीर्त्तिता॥"
नदीविशेषः। यथा, महाभारते। ६।९।२८॥
"भारती सुप्रयोगा च कावेरी मुर्म्मुरा तथा॥")

भारद्वाजं, क्ली, अस्थि। इति हेमचन्द्रः।३।२८८॥

भारद्वाजः, पुं, (भरद्वाजस्य अपत्यं गोत्रापत्य-मिति वा। भरद्वाज + "ऋष्यन्धकवृष्णिकुरु-भ्यश्च।" ४।१।११४। इति अण्।) द्रोणाचार्य्यः। (यथा, महाभारते।७।१।२६।
"ततः प्रयाते सहसा भरद्वाजे महारथे।
आर्त्तनादेन घोरेण वसुधा समकम्पत॥")
ऋषिभेदः। इति मेदिनी। जे, १७। अगस्त्य-मुनिः। इति शब्दरत्नावली। मङ्गलग्रहः। इति ज्योतिषतत्त्वम्। व्याघ्राटपक्षी। हस्ति-पुच्छः। इति हेमचन्द्रः॥ (देशभेदः। यथा, "सकलपर्व्वतान् भारद्वाजे।" ४।२।१४५। इति उक्ते "भारद्वाजशब्दोऽपि देशवाच एव नदीवाचकः।" इति काशिका। भर-द्वाजवंशीये, त्रि। यथा, महाभारते।१। १३१।१।
"इति संचिन्त्य गाङ्गेयस्तदा भारतसत्तम!।
द्रोणाय वेदविदुषे भारद्वाजाय धीमते।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ!॥")

भारद्वाजी, स्त्री, वनकार्पासी। इति शब्दरत्ना-वली॥ (नदीभेदः। यथा, महाभारते।६। ९।२८।
"गोदाञ्च पिच्छलाञ्चैव भारद्वाजीञ्च निम्न-गाम्।
कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्र-माम्॥")

भारयः पुं, (भां दीप्तिं रयते प्राप्नोतीति। रय गतौ + पचाद्यच्।) भारद्वाजपक्षी। इति शब्दचन्द्रिका। भारुइ इति भाषा॥

भारयष्टिः, स्त्री, (भारस्य यष्टिः।) भारवहन-दण्डः। बाँक इति भाषा। तत्पर्य्यायः। विह-ङ्गिका २। इत्यमरः।२।१०।३०॥

भारवं, क्ली, (भारं वातीति। भार + वा + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) धनुर्गुणः। इति त्रिकाण्डशेषः॥

भारवाहः, पुं, (भारं वहतीति। वह् + "कर्म्म-ण्यण्।" ३।२।१। इत्यण्।) भारिकः। इत्यमरः।२।१०।१५॥ (यथा, महाभारते। १।११२।१।
"अन्धस्य यथा बधिरस्य यथा
क्लिष्टस्य यथा भारवाहस्य यथा॥")

भारवाही, स्त्री, (भारवाह + गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥

भारविः, पुं, कविविशेषः । स च किरातार्ज्जुनीय-नामकग्रन्थकर्त्ता । तत्पर्य्यायः । प्रतपुष्पः २ । इति त्रिकाण्डशेषः । तस्य ग्रन्थस्य प्रथम-श्लोकोऽयम् ।

"श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥"

भारवाः, पुं, कार्म्मुकनामकग्रन्थबन्धनम् । इति शब्दचन्द्रिका ॥

भारवहः, पुं, (वहतीति । वह+पचाद्यच् । भारस्य वहः ।) भारवाहकः । इति शब्दरत्नावली ॥

भारहारः, पुं, (भारं हरतीति । हृ+अण् ।) भारवाहकः । इति शब्दरत्नावली ॥

भारिः, पुं, (इभस्य अरिः । पृषोदरादित्वात् इलोपः ।) सिंहः । इति हेमचन्द्रः ॥

भारिकः, पुं, (भारोऽस्ति वाह्यतयास्य । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) भार-वाहकः । भारी इति ख्यातः । तत्पर्य्यायः । भारवाहः २ । इत्यमरः । २ । १० । १५ ॥ भारहरः ३ भारहारः ४ । इति शब्दरत्ना-वली ॥ (यथा, कथासरित्सागरे ।६० । ५६ ।

"तत्र चापागताः केचित् तमूचुः काष्ठ-
भारिकाः ॥")

भारिटः, पुं, पक्षिविशेषः । तत्पर्य्यायः । ग्राम-चटकः २ धूम्रिरः ३ कणभक्षकः ४ । इति राजनिर्घण्टः ॥

भारी, [न्] पुं,(भारोऽस्यास्तीति । भार+इनिः।) भारवाहकः । इत्यमरटीकायां रमा-नाथः ॥ (यथा, मनौ । २ । १३८ ।

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः ।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥")
भारयुक्ते, त्रि ॥

भारोही, स्त्री, (भारं वहतीति । वह+णिनि । स्त्रियां ङीप् । ततः पृषोदरादित्वात् अट् ।) भारवाहिका । इति मुग्धबोधव्याकरणम् ॥

भार्गवः, पुं, (भृगोरपत्यम् तद्गोत्रापत्यमिति । भृगु+अण् ।) परशुरामः । शुक्राचार्य्यः । (यथा, महाभारते । १ । ६६ । ४५ ।

"तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे ।
अभ्यषेचयामास पुत्रं भृगुरनिन्दितम् ॥")

धन्वी । गजः । इति मेदिनी । वे, ४५ ॥ भारत-वर्षमध्ये प्राच्यदेशान्तर्गतदेशविशेषः । यथा,—

"भद्रोत्तराः प्रविजया भार्गवा ज्ञेयमल्लकाः ।"
इति मार्कण्डेयपुराणम् ।

(कुलालः । यथा, महाभारते ।२ । १६२ । १ ।

"गत्वा तु तां भार्गवकर्म्मशालां
पार्थौ पृथां प्राप्य महानुभावौ ।"

"भृगुः सघट्टनिः जीविकार्थं भृगुणा चर-तीति भार्गवः कुलालः ।" इति तट्टीकायां नीलकण्ठः । मार्कण्डेयः । यथा, महाभारते । १३ । २२ । १५ ।

"इत्युक्ता ते जग्मुरास्तु यथागतमितस्ततः ।
पृथिवीकाममवाप्य प्रशशाश च भार्गवः ॥"

शौनकः । यथा, महाभारते । १ । १८ । ६ ।

"सर्वेति चाब्रवीद्विष्णुर्मद्वचां सह भार्गवः ॥"

भृगुवंशीये, त्रि ॥ (यथा, महाभारते । ३ । ९९ । ४१ ।

"भव रामस्य राजेन्द्र ! भार्गवस्य च धीमतः ॥")

भार्गवप्रियः, पुं, (भार्गवस्य प्रियः ।) हीरकः । शुक्राधिष्ठातृदेवताकत्वात् ॥

भार्गवी, स्त्री, (भार्गव+ङीप् ।) पार्व्वती । (भृगोरपत्यं स्त्री । भृगु+अण्+ङीप् ।) लक्ष्मीः । (अस्या भृगुसुतात्वसूक्तं यथा, विष्णु-पुराणे । १ । ९ । १४६ ।

"एतत् ते कथितं ब्रह्मन् ! यन्मां त्वं परि-
पृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्व्वं भृगुसुता सती ॥")

दूर्व्वा । इति मेदिनी । वे, ४५ ॥ (यथा, वैद्यक-रत्नमालायाम् ।

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी
सहा ॥")

नीलदूर्व्वा । इति शब्दरत्नावली । (यथास्याः पर्य्यायः ।

"नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका ।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ (भृगुवंशीय-स्त्रीमात्रे । यथा, महाभारते । १ । ७२ । ९३ ।

"कथाचिदरथितोऽधीति दृष्ट्वा तामाह भार्ग-
वीम् ।
गतोऽहमिति चारब्धौ दृष्टो ब्राह्मण-
कन्यया ॥")

भार्गी, स्त्री, (भृज्+घञ् । भर्गोऽस्त्यस्या इति । "ज्योत्स्नादिभ्य उपसंख्यानम् ।" ५ । २ । १०३ । इत्यस्य वार्त्ति० । इति अण् । ततो ङीप् ।) वृक्षविशेषः । बामनहाटी इति भाषा । तत्-पर्य्यायः । गर्द्दभशाकी २ फञ्जी ३ अङ्गार-वल्लरी ४ ब्राह्मी ५ ब्राह्मणयष्टिः ६ वाह्नारिः ७ भृङ्गजा ८ पद्मा ९ यष्टिः १० भारङ्गी ११ वातारिः १२ ब्राह्मणित् १३ सुरूपा १४ अमरेशा १५ ब्रह्ममाता १६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कासश्वास-शोफव्रणकृमिदाहज्वरनाशित्वञ्च । इति राज-निर्घण्टः ॥ अन्यत् ब्राह्मणयष्टिकाशब्दे द्रष्टव्यम् ॥

भार्हाणी, स्त्री, (भारहाणी । पृषोदरादित्वात् साधुः ।) भारहाणी । ब्रह्मकार्पासी । इति शब्दरत्नावली ॥

भार्य्या, स्त्री, (भर्त्तव्या इति । भृ+"ऋहलो-र्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । टाप् । यद्वा भर्त्ता रोप्या भार्य्या ।) वेदविधा-नेनोढा । विधिपूर्व्वकविवाहिता । तत्पर्य्यायः । पत्नी २ पाणिगृहीती ३ द्वितीया ४ सह-धर्म्मिणी ५ जाया ६ दाराः ७ सहधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० कलत्रम् ११ कलत्रकम् १२ । इति शब्दरत्नावली ॥ अस्याः प्रशंसा यथा,—

"सा भार्य्या या प्रियं ब्रूयात् स पुत्रो यस्तु
जीवति ।
स जीवति गुणा यस्य धर्म्मो यस्य स जीवति ॥
गुणधर्म्मविहीनो यो निष्फलं तस्य जीवनम् ॥
सा भार्य्या या गृहे दक्षा सा भार्य्या या
प्रियंवदा ।
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-
व्रता ।
नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी ।
अल्पभुक् स्वल्पभाषी च सततं मङ्गलैर्युता ।
सततं धर्म्मबहुला सततञ्च पतिप्रिया ॥
सततं प्रियवक्त्री च सततं ऋतुकामिनी ।
पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी ॥
यस्येदृशी भवेद्भार्य्या देवेन्द्रो न स मानुषः ॥"

अस्या दोषा यथा,—

"यस्य भार्य्या विरूपाक्षी कश्मला कलहप्रिया ।
उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा ॥
यस्य भार्य्याश्रितान्यत्र परवेश्माभिकाङ्क्षिणी ।
कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा ॥"
"यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी ।
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया ॥
दुष्टा भार्य्या शठं मित्रं भृत्याश्चोत्तरदायकाः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ।
आपदर्थे धनं रक्षेत् दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥"
भार्य्याश्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम् ॥"

इति गारुडे नीतिसारे १०८।१०९ अध्यायौ ॥ (तथा च महाभारते । १ । ७४ । ३९—४५ ।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या
प्रजावती ।
सा भार्य्या या पतिप्राणा सा भार्य्या या
पतिव्रता ॥
अर्द्धं भार्य्या मनुष्यस्य भार्य्या श्रेष्ठतमः सखा ।
भार्य्या मूलं त्रिवर्गस्य भार्य्या मूलं तरिष्यतः ॥
भार्य्यावन्तः क्रियावन्तः सभार्य्या गृहमेधिनः ।
भार्य्यावन्तः प्रमोदन्ते भार्य्यावन्तः श्रियान्विताः ॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्म्मकार्य्येषु भवन्त्यार्त्तस्य मातरः ॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै ।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः ॥
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम् ।
भार्य्यैवान्वेति भर्त्तारं सततं या पतिव्रता ॥
प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते ।
पूर्व्वं मृतञ्च भर्त्तारं पश्चात् साध्व्यनुगच्छति ॥")

हठयोगप्रदीपिकायाम् ।

"यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
सुशीला सुन्दरी भार्य्या गता यस्य यशोदरात् ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ।
माता यस्य गृहे नास्ति भार्य्या च प्रियवादिनी ।

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ।
दैवेनापहृता यस्य पतिशाख्या पतिव्रता ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
प्रियाशून्यं गृहं यस्य पूर्णं जीवनबन्धुभिः ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
भार्य्यामूलाः कलसंभाः समारम्भाश्च यस्य यथा ।
यद्विना न गृहं प्रोक्तं न गृहं गृहमुच्यते ॥
अशुचिः स्त्रीविहीनश्च दैवे पैत्रे च कर्म्मणि ।
यदह्ना कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
दाहिकाशक्तिहीनश्च यथा वह्नी हुताशनः ।
प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी ॥
शक्तिहीनो यथा जीवो यथात्मा च तनुं विना ।
विनाधारं यथा धेयो यथेशः प्रकृतिं विना ॥
न च शक्तो यथा यज्ञः फलदां दक्षिणां विना ।
कामिनीं च फलं दातुं सामर्थ्यौफलमेव च ॥
विना स्वर्णं स्वर्णकारो यथाशक्तः स्वकर्म्मणि ।
यथाशक्तः कुलालश्च मृत्तिकाञ्च विना क्रियाः ॥
तथा गृही न शक्तश्च सततं सर्व्वकर्म्मणि ।
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहाश्रमा ।
भार्य्यामूलं सुखं शश्वद्यत्र स्वस्त्री गृहे सदा ।
भार्य्यामूलः सदा हर्षो भार्य्यामूलञ्च मङ्गलम् ।
भार्य्यामूलश्च संसारो भार्य्यामूलञ्च गौरवम् ।
यथा रथश्च रथिना गृहिणा च तथा गृहम् ।
सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया ॥
सर्व्वरत्नप्रधानश्च स्त्रीरत्नं दुष्कुलादपि ।
सा गृहीता प्रयत्नेनेत्याह कमलोद्भवः ॥
यथा जलं विना पद्मं पद्मं शोभां विना यथा ।
तथैव च गृहं शश्वदृहिणी गृहिणीं विना ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥
तस्या अत्याज्यत्वं यथा,—
"अनपत्याञ्च युवतीं कुलजाञ्च पतिव्रताम् ।
त्यक्ता भवेद्यः सन्यासी ब्रह्मचारी यतीति वा ॥
वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति यः ।
तीर्थाय तपसे वापि मोक्षार्थं धर्म्म सञ्चितुम् ॥
न मोक्षस्तस्य भवति धर्म्मस्य स्खलनं ध्रुवम् ।
अभिशापेन भार्य्याया नरकञ्च परत्र च ॥
इहैव च यशोनाशं इत्याह कमलोद्भवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११७ अः ॥
बहुभार्य्यस्यैकस्या भजने दोषादि यथा,—
"तरुणी यत् श्रुतं पूर्व्वं नारदाय निगृह्यते ।
दक्षस्य धर्म्मशास्त्रार्थं तत् शृणुष्व निशापते ॥
बहुदारः पुमान् यस्तु रागाद्धेकां भजेत् स्त्रियम् ।
स पापभाक् स्त्रीनिन्द्यश्च तस्याघौघं महातमम् ॥
यद्दुःखं जायते स्त्रीणां स्वाम्यसम्भोगजं यथा ।
न तस्य परमं दुःखं किञ्चिदन्यद्धि विद्यते ॥
सर्व्वेषु गुणवर्ती भार्य्यां यो नेयात् पुरुषाधमः ।
अनुतापेन सद्धेष भूकदा न हि जायते ॥
भार्य्या स्यादपराधेषी तावत् त्याज्यं विरोधकम् ।
तस्मात्तु बहुमे किञ्चित् विनिमयापि माचरेत् ।
बहुभार्य्यस्य भार्य्याणामृतुमैथुनमाश्रमम् ।
न किञ्चिदिष्यते कर्म्म प्राच्यैर्वापि यदीरितम् ॥
तोषयेत् सततं भार्य्या विधिवत् पालयेद्धृताः ।
साध्वी दुष्टा तु कल्याणमकल्याणमथोऽथवा ॥
असुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
यदा विरज्यते स्वामी सौभाग्यमदगर्व्वया ।
अपकीर्त्तिमर्थं कर्त्तुं या स्यादेखा भयान्तरे ।
इहापि कीर्त्तिं नाप्नोति समधर्म्मञ्चापि विन्दति ।
न च पितृकुलं स्वामिकुलं तस्याः प्रमोदते ॥
विरुध्यमाने पत्यौ यत् यपत्रा वा प्रवर्त्तिते ।
अतीव दुःखं भवति तदकल्याणकारणैः ॥"
इति कालिकापुराणे ९० अध्यायः ॥
रजस्वला भार्य्या अस्पृश्या । यथा,—
"न पिबेतीह यो दारान् रजसा समुपीडितः ।
शैनपैत्राहते कुक्षे रेतसाञ्च पिबत्यसौ ॥
यो गच्छति रजःस्नातां पितरं स्वं रेतसा नरः ।
योऽश्नाति पलमर्घ्यं यो न दद्याद्धेतुं पुनः ॥
यो निमर्षे न मत्तो वै बहुनो रक्षति स्थितः ।
रेतः पिबति तस्यापि पितरो योऽप्यपि तद्वदः ॥
यो गच्छति हि निर्द्दोषां भार्य्यामेव रजस्वलाम् ।
शुद्धिमान् संयतः स्नातगर्भस्य दुरितं वहेत् ॥"
इति वह्निपुराणम् ॥
कालविशेषे तद्गमननिषेधो यथा,—
"न दिवापि स्त्रियं गच्छेत् कदाचिदिच्छयापि च ।
न पर्व्वसु न सन्ध्यासु नाद्यर्त्तुचतुराहिषु ॥
नोदक्यां न दिवा गच्छेत् न सगर्भां न प्रतक्लिताम् ।
अभिगच्छेदविज्ञातां यज्ञदाराःस्वपत्नेव च ॥
सन्ध्यादये परिक्षीणा मध्ये च जलप्रजा ।
एकादशी स्त्रीजननी यज्ञत्वाप्रियवादिनी ॥
न गच्छेऽभिगमं कुर्य्यात् पार्थिवाहो तु योषितः ।
कुर्य्याच्चेत् पितरस्तस्य पतन्ति रेतसोशुचः ॥
भार्य्याधीनं सुखं पुंसां भार्य्याधीनो धनागमः ।
भार्य्याधीना मनोऽभिरतिर्भार्य्याधीनः सुतोदयः ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनो यदि वसेत् ।
न सर्व्वेषु यशस्यः स्याद्भार्य्यया कथ्यते गृही ॥"
इति पराशरस्मृतिः ॥

भार्य्याटः, पुं, (भार्य्यया अटति वर्त्तते इति । अट गतौ + पचाद्यच् ।) अन्यार्थं पुत्त्रोदाता । इति त्रिकाण्डशेषः ॥

भार्य्याटिकः, पुं, (अट गतौ + भावे घञ् । भार्य्यया आटो मतिर्म्मतं वा अस्यास्तीति । भार्य्याट + ठन् ।) जोषितः । ऋषिविशेषः । इति मेदिनी । के, २०५ ॥ (मुनिविशेषः । इति हेमचन्द्रः ॥)

भार्य्यापती, पुं, (भार्य्या च पतिश्च तौ । "राजदन्तादिषु परम् ।" २ । २ । ३१ । इति सूत्रः ।) योषित्पती । नित्यद्विवचनान्तोऽयं शब्दः । तत्पर्य्यायः । दम्पती २ जम्पती ३ जायापती ४ । इत्यमरः । २ । ६ । ३८ ॥

भार्य्यारुः, पुं, (भार्य्यां ऋच्छतीति । ऋ गतौ + उण् ।) मृगभेदः । क्रीडया परभार्य्यायां पुत्रोत्पादकः । शैलभेदः । इति मेदिनी । रे, १८९ ॥

भार्य्यावृक्षः, पुं, (भार्य्यावत् प्रियो वृक्षः ।) कदम्बवृक्षः । इति राजनिर्घण्टः ॥

भालं, क्ली, (भाल दीप्तौ + भावे क्विप् । भां कान्तिं लातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भ्रुवोरूर्द्ध्वभागः । कपाल इति भाषा । तत्पर्य्यायः । ललाटम् २ अलिकम् ३ गोधिः ४ । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ।")
तेजः । इति मेदिनी । ले, ३७ ॥

भालदर्शनं, क्ली, (भाले ललाटे दर्शनमस्येति ।) सिन्दूरम् । इति शब्दचन्द्रिका ॥

भालदृक्, [श्] पुं, (भाले ललाटे दृक् नेत्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥

भालाङ्कः, पुं, (भाल इव अङ्को यत्र भाले अङ्को यस्येति वा ।) करपत्रम् । शाकभेदः । रोहितमत्स्यः । महालक्षणसम्पन्नपुरुषः । कच्छपः । हरः । इति मेदिनी । के, १९६ ॥ (भालस्य अङ्कः ।) ललाटचिह्नञ्च ॥

भाललोचनः, पुं, (भाले ललाटे लोचनं नेत्रं यस्य ।) शिवः । इति भालदृक्शब्ददर्शनात् ॥ (यथा, कथासरित्सागरे । ४८ । १६० ।
"भाललोचनभावस्था भूतभवभयापहः ।")

भालुकः, पुं, (भलते हिनस्ति प्राणिनः इति । भल हिंसायाम् + बाहुलकात् उकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा, भरतधृतकोषान्तरे ।
"भल्लूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुकः ।"

भालूकः, पुं, (भलते हिनस्ति जीवानिति । भल + "उलूकादयश्च ।" उणा० । ४ । ४१ । इति ऊकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा,—
"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुकः ।"
इति भरतधृतकोषान्तरम् ॥

भाल्लुकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भाल्लूकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भावः, पुं, (भावयति चिन्तयति पदार्थानिति । भू + णिच् + पचाद्यच् । भवतीति । भू + "भव तेश्चेति वक्तव्यम् ।" इति काशिकोक्तौ वा ।) आत्मोक्ती विद्वान् । मानसविकारः । सत्ता । (यथा, श्रीमद्भगवद्गीतायाम् । २ । १६ ।
"नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥")
स्वभावः । अभिप्रायः । (यथा, रामायणे । २ । ९ । ११ ।

“तस्य धर्म्मार्थविदुषो भावमाज्ञाय सर्व्वशः ।
ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ॥”)
चेष्टा । आत्मा । जन्म । इत्यमरः ।३।३।२०६ ॥
(चित्तम् । यथा, मनुः । ४ । २२७ ।
“दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम् ।
परितुष्टेन भावेन पात्रमासाद्य भक्तितः ॥”)
क्रिया । लीला । पदार्थः । (यथा, रघुः ।३।४१।
“अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥”)
विभूतिः । बुधः । जन्तुः । इत्यादिः । इति मेदिनी ।
वे, २१ ॥ गौरवितः । अभिनयान्तरम् । इति
त्रिकाण्डशेषः ॥ (विषयः । यथा, हितोपदेशे ।
“अवश्यम्भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥”
मर्म्मालोचना । यथा मनुः । ६ । ८० ।
“यदा भावेन भवति सर्व्वभावेषु निःस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥”
प्रेम । यथा, गीतायाम् । १० । ८ ।
“इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥”)
धात्वर्थः । (यथा, मुग्धबोधे वोपदेवः ।
“देवाद्यवाजभावे चाटेः ॥” क्रियान्तरापेक्षि-
क्रियाविशिष्टः तत्र सप्तमी विहिता तथा च
मुग्धबोधटीकायां रामतर्कवागीशः । “यस्य
क्रियया क्रियान्तरमपेक्ष्यते स इह भावः ॥”)
योनिः । उपदेशः । इति धरणिः । संसारः ।
इत्यनेकार्थकोषः ॥ जन्मपत्र्यां प्रथमादिद्वादश-
वेश्म । यथा,—
“प्रथमश्चोपवेशश्च नैधनाख्यः प्रकाशनम् ।
गमनं गमनेच्छा च सभायां वसतिस्तथा ॥
आगमनं भोजनञ्च नृत्यलिप्सा च कौतुकम् ।
निद्रा ग्रहाणां भावाश्च द्वादशैते प्रकीर्त्तिताः ॥”
भावानयनक्रमो यथा,—
“यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत् ।
पुरःशेषं संपूर्य खर्व्वं तत्र नियोजयेत् ॥
आतदङ्कं तथा लग्नमेकीकृत्य सदा बुधैः ।
इष्टिका भागहारेण शेषं कार्य्यं नियोजयेत् ॥
अंशेन नवसंख्यया । खर्व्वं ग्रहाणां जन्म-
भवनम् । तद्यथा,—
“निशाकरानलतोयानि वेदाश्च भानुदेवतम् ।
पुष्या पौष्णो यमः सर्प्पो जन्मभान्यपि तः क्रमात् ॥”
अत्रो राशिः । यदा मेषे ग्रहस्तदा १ एक-
पूरितग्रहसंख्याङ्कः । यदा वृषे ग्रहस्तदा २
द्विपूरितो ग्रहसंख्याङ्कः कार्य्यः ॥ ० ॥ आया-
लग्नचतुर्थसप्तमदशमत्रिकोणस्थानस्थितपापग्रहाणां
निद्रायनभावयोः फलम् ।
“निद्रायाञ्च यदा पापो जायास्थाने शुभं वदेत् ।
यदि पापः शुभैर्दृष्टो नाशुभैश्च कदाचन ॥
यदि वा शुभगेहस्थो स्वाच्छयने यदि वीक्षितः ।
तदा नारीसमं तस्य भाग्यो भवति निश्चितम् ॥
शुभाशुभैर्यदा दृष्टः शुभपक्षसमन्वितः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥
सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदाशुभं भवेत्तस्य नात्र कार्य्या विचारणा ॥
तुङ्गस्थाने स्वगृहे वा त्रिकोणे वा यदा भवेत् ।
अपत्यस्य तदा नाशो जायते नात्र संशयः ॥
शुभपक्षो यदा तत्र क्रूरो वा यदि वीक्षितः ।
तदा प्रथमापत्यस्य नाशो भवति निश्चितम् ॥
मृत्युस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदाल्पायुरपमृत्युः स्वामाज्ञतोऽपरतोऽपि वा ॥
शुभपक्षो यदा तत्र मृत्युस्थानेऽपि संस्थितः ।
तदा च मरणं तस्य मृत्युस्थाने विशेषतः ॥
पापपक्षैर्यदा दृष्टः शुभो वा प्रशुभैरीक्षितः ।
तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः ॥
एवं क्रमेण बोद्धव्यं ग्रहभावे सुबुद्धिना ।
बलाबलविचारेण जायते च शुभाशुभम् ॥
ज्योतिर्विदाञ्च सर्व्वेषु परिहारः कृतो मया ।
शयनादिकभावेषु ज्ञातव्यश्चोपदेशतः ॥
एकादशे वा दशमालये वा
धनालये वा यदि वा विलग्ने ।
पापैर्युतो न शुभपक्ष-
स्तथापि सिद्धिं महतीं वदन्ति ॥”
फलं यथा,—
“मन्दाग्निः पित्तशूली च जायते शयने नरः ॥१॥
उपवेशे भवेच्छिल्पी श्यामवर्णस्तथा नरः ॥२॥
नैधनाख्ये भवेत् क्रूरो ज्वररोगी भवेन्नरः ॥३॥
पुण्यवान् धार्म्मिकश्चैव धनवांश्च प्रकाशने ॥४॥
गमने च रवेर्जातः कृपणो धनसंयुतः ।
बहुभाषी यमी क्रोधी शुभ्रचित्तः सदा
भवेत् ॥ ५ ॥
अल्पभोक्ता शीघ्रगामी दीर्घायुर्यशःप्रभः ।
शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः ॥६॥
सभायाञ्च रवेर्जातः सुखी दाता यमी भवेत् ।
दयालुः पण्डितो धीमान् गुणवान् पण्डित-
प्रियः ॥ ७ ॥
आगमने भवेन्मूर्खः कुरूपो धनवान् भवेत् ॥८॥
भोजने भक्षको मांसलुब्धो महापूर्व्वकः ॥९॥
नृत्यलिप्सौ सुन्दरो वाग्मी पण्डितश्च महा-
धिपः ॥१०॥
उत्साही च महाभोगी कौतुके च दिवाकरे ॥११॥
दाता भोक्ता प्रियः पुत्रकलत्राणां न संशयः ।
लिङ्गे देहे करे चैव गुदे रोगी तथैव च ।
निद्रायाञ्च भवेद्रागी क्रोधनो रक्तनेत्रकः ॥१२॥
इति रवेस्तुङ्गादुङ्गे बलाबले वा बोध्यम् ॥०॥
“शयने च विधौ क्रोधी दरिद्रो बहुलम्पटः ॥१॥
उपवेशे महारोगी धनवांश्च भवेन्नरः ॥ २ ॥
नैधनाख्ये नेत्ररोगी शीघ्रदो बहुभाषकः ।
मूर्खः खलोऽतिमूर्खश्च जायते च विधौ तदा ॥३॥
प्रकाशने विशालार्थं धनवांश्च भवेन्नरः ।
दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ॥४॥
अरोगी विनयी चैव क्रूरकर्म्मा धनान्वितः ।
शिरोरोगी दन्तशूली जायते गमने विधौ ॥५॥
नानामतिर्महाक्रोधी लम्पटो च भवेन्नरः ।
गमनेच्छुविधौ जातो धनहीनो भवेत्तदा ॥६॥
दाता च धार्म्मिकश्चैव राजमान्यो भवेत् सदा ।
सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः ॥७॥
नित्यक्रोधी महादुःखी भवेदागमने विधौ ॥८॥
भोजने च भवेल्लुब्धो मत्तकश्च महासुरः ॥९॥
यो जातो नृत्यलिप्सायां गुणवान् धार्म्मिको
भवेत् ।
बहुभाषी धनी दाता जायते नात्र संशयः ॥१०॥
कौतुके च भवेद्भोगी नानाविद्यासु तत्परः ।
उत्साही च महाक्रोधी जायते च सुनिश्चि-
तम् ॥११॥
निद्रायां दद्रुरोगी स्यात् क्षेमपापजनान्वितः ।
पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम् ॥१२
इति चन्द्रस्य ॥ ० ॥
शयने च कुजे जातो [illegible] ।
अतिक्रोधी महादक्षः कृपणो जायते नरः ॥१॥
उपवेशे यदा भौमे जायते च नराधमः ।
धनवान् क्रूरकर्म्मा च निष्ठुरो जातिवर्ज्जितः ॥२॥
नैधनाख्ये च यो जातः अग्निरोगी भवेन्नरः ।
पुत्रदारधनैर्युक्तो दारिद्र्येणैव दह्यते ॥ ३ ॥
प्रकाशने कुजे जातो धनवान् पण्डितः सुखी ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥४॥
गमने च यदा जातः प्रवासी नित्यदुःखितः ।
शरीरे च भवेद्रोगः कण्ड्वादिकुष्ठदद्रुकः ॥५॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः ।
धनहीनः कुकर्म्मा च जायते क्षितिजस्य च ॥६॥
सभायाञ्च यदा जातो धार्म्मिको बहुसम्पदः ।
गुणवांश्च महादाता शिरोरोगी भवेद्ध्रुवम् ॥७॥
कुजस्यागमने नित्यं खञ्जो भवति नान्यथा ।
कर्णरोगी पित्तशूली जायते च नराधमः ॥८॥
भोजने भूमिजस्यापि यो जातो मांसलुब्धकः ।
दृढकायो महाक्रोधी नित्योत्साही धना-
न्वितः ॥ ९ ॥
कुजस्य नृत्यलिप्सायां यो जातो धनवान् भवेत् ।
दाता भोक्ता सदा मानी राजमान्यो भवेच्च
सः ॥ १० ॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः ।
नानाधनेन संयुक्तो बहुपुत्रो हितार्थकः ॥११॥
निद्रायां भूमिपुत्रस्य यो जातो मूर्ख एव सः ।
कलहो बान्धवैः सार्द्धं शोकसंयुतान्वितः ॥१२
इति मङ्गलस्य ॥
“बुधस्य शयने जातो धनवान् सुखिनः सदा ।
अङ्गच्छेदो भवेत्तस्य खञ्जो भवति नान्यथा ॥१॥
उपवेशे च यो जातः प्रवासी जायते ध्रुवम् ।
कविताशुभधीयुक्तो गौरवर्णो महाशयः ॥२॥
नैधनाख्ये च यो जातः शीघ्रदादिरुजान्वितः ।
चक्षूरोगी विशिष्टात् स्यात् पुत्रनाशो भवेद्-
ध्रुवम् ॥ ३ ॥
प्रकाशने भवेज्जातो राजमान्यो धनान्वितः ।
नानाधनेन संयुक्तो जायते वेदपारगः ॥ ४ ॥
गमने यो नरो जातः प्रवासी नित्यदुःखितः
शरीरे पतनमाप्नोति निर्मन्दो भवेच्च सः ॥५॥
यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः ।
कौतुकी दुष्टभार्य्यश्च कातरो बहुभाषकः ॥६॥

समायाञ्च बुधे जातो गर्व्वी भवति पण्डितः ।
धनवान् धार्म्मिकश्चैव स्थिररोगी भवेत्तु सः ॥७॥
क्रूरः खलो हतारातिः पशुहीनो भवेन्नरः ।
बुधस्यागमने नित्यं जायते च नराधमः ॥८॥
भोजने च भवेत् सौम्ये धनहीनो भवेन्नरः ।
परद्वेषी प्रवासी च शीतज्वरभयान्वितः ॥९॥
यो जातो नृत्यलिप्सायां धनवान् पण्डितः कविः ।
उत्साही च महाहृष्टो शृणोति सुख-
सङ्गमम् ॥ १० ॥
कौतुके च यदा जातो भवेत् सर्व्वजनप्रियः ।
चर्म्मरोगी दृढाङ्गश्च धनवानश्वसञ्चयः ॥११॥
निद्रायाञ्च यदा जातः सर्व्वदुःखैकभाजनम् ।
नानाक्लेशमवाप्नोति रोगशोकभयान्वितम् ॥१२॥"
इति बुधस्य । ● ।
"धनवान् लम्पटः ख्यातः म्लानो ग्रन्थकलान्वितः ।
जीवस्य शयने जातो मानवो नात्र संशयः ॥१॥
उपवेशे गुरोर्जातो बहुभाषी च रोगवान् ।
पशुपालो महाधूर्त्तो श्लीपदी रोगसंयुतः ॥२॥
नेत्रपाणौ गुरोर्जातः कामरोगी धनी भवेत् ।
नृत्यादिश्रवणे नित्यं जायते नात्र संशयः ॥३॥
गुरोः प्रकाशे धनवान् लिङ्गगुह्ये दयान्वितः ।
दाता लम्पटपापी च श्यामवर्णो कलान्वितः ॥४॥
सर्व्वभोगी मृदुश्चैव साहसी गमनोन्मुखे ।
परवित्तेन धनवान् पुमान् भवति वाक्पटुः ॥५॥
गुरोश्च गमनेच्छायां जातो भवति मानवः ।
शूरो धनी प्रवासी च सेवाकर्म्मणि तत्परः ॥६॥
सभा दाता च धनवान् राजपैत्र्यान्वितो नरः ।
शूलरोगी भवेन्नित्यं पञ्चायां वाक्पतौ स्थिते ॥७॥
धार्म्मिकस्तीर्थविख्यातो धनी चागमने गुरोः ।
परदारेषु संलुब्धो जायते नात्र संशयः ॥८॥
भोजने बहुभोग्याढ्यो मांसलुब्धो महाशयः ।
कामुकः प्रियवाक्यश्च जायते नात्र संशयः ॥९॥
नृत्यलिप्से पटो मानी धनवान् सात्त्विकस्तथा ।
महदैश्वर्यसंयुक्तो श्रीमांश्च भवेन्नरः ॥१०॥
कौतुके च गुरोर्जातो धनवान् धार्म्मिकः सदा ।
कुलोत्पन्नो महत्सङ्गो भुनक्ति सुखमद्-
भुतम् ॥ ११ ॥
निद्रायाञ्चैव यो जातश्चक्षूरोगी भवेच्च सः ।
कृपणो बहुभाषी च दुःखितो भ्रमते
महीम् ॥ १२ ॥"
इति गुरोः । ● ।
"शुक्रस्य शयने जातो लम्पटो बहुभाषकः ।
दन्तरोगी महाक्रोधी भीरुर्भवति निश्चयः ॥१॥
उपवेशे तथा जातो बलवान् दाम्भिकः सदा ।
निष्प्रवासी रोगी च जायते भौमधर्म्मिते ॥२॥
नेत्रपाणौ भृगोर्वृत्तो रोगशोकसमन्वितः ।
धनहीनो महारोगी मानवः स्यान्न संशयः ॥३॥
भृगोः प्रकाशने जातो विद्याधनसमन्वितः ।
दाता च धार्म्मिकश्चैव कीर्त्तिमान् जायते नरः ॥४॥
शुक्रस्य गमने जातः पादपद्मे दयान्वितः ।
विशीर्णगण्डो महादुःखी भवेत्तीर्थगामी
नरः ॥ ५ ॥
गमनेच्छौ यदा जातो भारवाहो भवेद्ध्रुवम् ।
माता च म्रियते तस्य शैशवे व्याधिसंयुतः ॥६॥
सभायाञ्च भृगोर्जातो राजपूज्यो महाधनी ।
कुलश्रेष्ठो महादक्षः केवलं शूलरोगवान् ॥७॥
भृगोरागमने जातो दुःखितो बहुलम्पटः ।
दद्रुरोगी पुत्रशोकी जायते च नराधमः ॥८॥
शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा ।
महाधनी भवेन्नित्यं वाणिज्येन विशेषतः ॥९॥
यो जातो नृत्यलिप्सायां स मान्यो जायते ध्रुवम् ।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ।
यदि चैव भवेन्नीचे मूर्खो भवति निश्चितम् ।
गुह्यस्थाने विशेषेण राजपूज्यो महाधनी ।
कामुको बहुकामश्च परयोषित्प्रियः सदा ।
ग्रामवर्द्धनपरो मानी याज्ञिको बहुभा-
षकः ॥१०॥
शुक्रस्य कौतुके जातो धनवान् सात्त्विकः सदा ।
महाहृष्टो महाबन्धुः कौतुकी च भवेत् सदा ।
बहुपुत्रकलत्रश्च नानासुखसमन्वितः ।
नीचे तद्विपरीतः स्यात् दुःखशोकसम-
न्वितः ॥ ११ ॥
निद्रायाञ्च भृगोर्जातो भवेद्रोगी स निश्चितम् ।
निन्दकोऽपि महादुःखी जायते नात्र संशयः ।
आयायाञ्च शुभस्थाने यदि निद्रा भृगोर्भवेत् ।
तदा सर्व्वविनाशः स्यादित्युक्ता परिकी-
र्त्तितः ॥१२॥"
इति शुक्रस्य । ● ।
"शयने च शनेर्जातो लम्पटो बहुभाषकः ।
गुह्यस्थाने भवेद्रोगी कोपवृद्धिश्च जायते ।
सम्यक् नराधमे चैव शयनस्थः शनैश्चरः ।
सदा निष्प्रवासी स्याल्लक्षणार्थी भवेच्च सः ॥१॥
उपवेशे यदा जातः श्लीपदी दद्रुसंयुतः ।
धनहीनो भवेत्तस्य पीड़ा भवति निश्चयः ॥२॥
नेत्रपाणौ यदा जातो गर्व्वी भवति पण्डितः ।
धनवान् धार्म्मिकश्चैव द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो राजपूज्यो भवेच्च सः ।
नानागुणेन गुणवान् धार्म्मिकः पण्डितः शुचिः ॥४॥"
मतान्तरे ।
आगमस्थाने च सभे च प्रकाशने यदा शनिः ।
तदा सर्व्वविनाशः स्यात् आत्मातिध्वंसो भवेद्-
ध्रुवम् । ● ।
गमने च यदा जातः पादपद्मे दयान्वितः ।
चौर्य्ये च शक्तिमान्नित्यं पुत्रदारैर्विवर्ज्जितः ॥५॥
यो जातो गमनेच्छायां श्लीपदी रोगसंयुतः ।
दन्ताघाती महाक्रोधी लघवः परनिन्दकः ॥६॥
सभायाञ्च शनेर्जातः पुत्रदारधनैर्युतः ।
सर्व्वञ्च लभते नित्यं नानारत्नसमन्वितम् ॥७॥
आगमने यदा जातो महाक्रोधी दयान्वितः ।
सर्व्वादिभिश्च संदष्टो आढ्यभाग्यो भवेद्ध्रुवम् ॥८॥
भोजने चैव यो जातो मन्दाग्निश्च महामतिः ।
चर्म्मरोगी तथा मूको चक्षूरोगी भवेच्च सः ॥९॥
यो जातो नृत्यलिप्सायां धर्म्मी च बहुभाषकः ।
भोगेन दुःखितश्चैव प्रवासी परपीड़कः ॥१०॥
कौतुके च शनेर्जातो राजपूज्यो महाशयः ।
दाता भोक्ता महारम्भो धार्म्मिकः पण्डितः
शुचिः ॥ ११ ॥
निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः ।
चक्षूरोगी पित्तशूली द्विभार्य्यो बहुपुत्रकः ।
विशेषतश्च धर्म्मस्य कर्म्मणश्च कदाचन ।
यदि दैवाद्दैवनिद्रा शनौ भवति निश्चितम् ।
कर्म्मनाशो धर्म्मनाशः सुधार्त्तो दुःखितः सदा ।
निन्दप्रवासी रोगी च कार्य्यनाशः पदे पदे ।
स्वामिभवेऽपि षष्ठे वा केन्द्रे वा यदि पुनः ।
तदा सर्व्वं विनाशं च वैपरीत्येन चिन्तयेत् ।
आयायाञ्च शुभस्थाने यदि निद्रा भवेत् पुनः ।
तदा सर्व्वं शुभं विद्यात् शिम्बुना परि-
कीर्त्तितम् ॥ १२ ॥
इति शनेः । ● ।
शयने च यदा राहोर्जन्म यस्य भवेत् पुनः ।
तस्य क्लेशो महादुःखं जायते च न संशयः ॥१॥
उपवेशे च यो जातः श्लीपदी रोगसंयुतः ।
बहुहानिर्भवेत्तस्य पीड़ा भवति निश्चयः ॥२॥
नेत्रपाणौ यदा जातश्चक्षूरोगी भवेद्ध्रुवम् ।
सर्पाघातो महाभीतिर्द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो धनवान् धार्म्मिकः पुनः ।
विदेशवासी लोभाढ्यो सात्त्विको धार्म्मिकः
शुचिः ॥ ४ ॥
गमने चैव यो जातो नानारोगैकतत्परः ।
दन्ताघाती महाक्रोधी पिशुनः परनिन्दकः ॥५॥
यो जातो गमनेच्छायां बहुपुत्रो महाधनः ।
पण्डितो गुणवान् दाता जायते च नरोत्तमः ॥६॥
सभायाञ्च यदा जातः कृपणो धनसंयुतः ।
नानागुणेन गुणवान् धार्म्मिकः पण्डितः
शुचिः ॥ ७ ॥
आगमने च यो जातो लम्पटो बहुभाषकः ।
धनबन्धुविनाशः स्यात् नानाक्लेशश्च जायते ॥८॥
भोजने च महादुःखी मन्दाग्निश्च दयान्वितः ।
कृपणः कुकर्म्माढ्यश्च दुःखितो निम्नसेवकः ॥९॥
यो जातो नृत्यलिप्सायां राज्ञो भवति बान्धवः ।
धनवान् भवेत्तस्य नानालाभो भवेद्ध्रुवम् ॥१०॥
कौतुके च यदा जातो गुणैः सर्व्वैः समन्वितः ।
नानाधनेन धनवान् राजवेश्यासु तत्परः ।
यदि दैवाद्दुष्टयुक्तो अधमो वा कदाचन ।
तदा सर्व्वं वैपरीत्यं जायते च न संशयः ॥११॥
यो जातो राहुनिद्रायां दुःखितः सर्व्वदैव हि ।
नानाकार्य्ये रतो वापि धनपुत्रविवर्ज्जितः ।
आयायाञ्च शुभस्थाने यदि निद्रा विधुन्तुदः ।
तदा सर्व्वं वैपरीत्यं शुभफलसमन्वितम् ॥१२॥
नानाद्रव्यं समालोक्य विमृश्य सम्यगन्वयः ।
सर्व्वनाशविचारेण सुधीः फलमिहेरयेत् ॥"
इति . ग्रहाणां शयनादिद्वादशभावविशेषः
समस्तः । इति जातकः कोष्ठीप्रदीपश्च ।
अथ लग्नादिद्वादशभावाः ।
ते च नराणां जन्मसमयविलग्नादिद्वादशकानि ।
यथा,—

"सामर्थ्यं तनु कथ्यते सहृदये वित्तं कुटुम्बं ततो विक्रान्तिं सहजं तृतीयभवने योधश्च सचिन्तयेत् ।
बन्धुं वाहनसुखालयानपि ततो धीमन्त्रपुत्रांस्ततः षष्ठेऽथ क्षतविद्विषो मदगृहे कामं स्त्रियं तत्र च ।
रन्ध्रायुर्व्वतपोऽष्टमे गुरुतपो भाग्यानि चिन्त्यास्ततो मानाज्ञास्पदकर्मणां दशमभे कुर्य्यात्ततश्चिन्तनम् ।
प्राप्त्यायावथ चिन्तयेद्व्ययगृहे व्ययेऽपि तु मन्त्रियौ
सौम्यस्वामियुतोऽथवीक्षितस्तथा भावस्ततोऽन्यथा ।
इति द्वादशभावविवेक: ।
अरातिग्रहयोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः ।
व्ययस्य द्वादशस्थाने वैपरीत्येन चिन्तनम् ।"
अराद्यादिभावापवाद: ।
अथ लग्नादिद्वादशभावस्थग्रहफलम् ।
"लग्ने सूर्य्येऽल्परोगी भ्रमति धनयुतो रूपवान् वित्तयुक्तो
भौमे चन्द्र: सुवाग्मी शशधरतनये सर्व्वशास्त्रार्थवेत्ता ।
जीवे दाता पवित्र: सुकविरथ गते भार्गवे मन्दबुद्धिः
शौरौ कण्डूतिगात्रक्षतमपि च नियतं वञ्चितो धर्म्महीन: ॥ १ ॥
वित्तेऽर्के चैव रोगी धनतनययुतो रात्रिनाथे धनाढ्यो
भौमे नित्यं प्रवासी ह्यपि सुतधनवान् सोमपुत्रे प्रधान: ।
जीवे लक्ष्मीप्रमोदी विलसति भृगुजे दर्पित: क्षौणिकेत:
शौरौ दीनोऽति नित्यं तमसि च नियतं चौरिकावित्तजीवी ॥ २ ॥
भ्रातर्य्यर्के सधर्म्म: स भवति नियतं भ्रातृहा रात्रिनाथे
चित्तो भौमेऽनुजानां यदि वधकरो भूमिकावृत्तिजीवी ।
सौम्ये वयस्य कान्ता भवति सुरगुरौ कामदेवस्वरूप:
शुक्रे राज्याधिकारी रविजदनुजयोर्भ्रातृकन्या धनाढ्य: ॥ ३ ॥
चतुर्थेऽर्के बन्धो सुदु:खी स्वजनपरिहृत: शीतगौ जातुरोगी
भौमे कृपाभवाखी भवति शशिसुते भ्रातृपुत्रान्वितोऽपि ।
जीवे रत्नोपभोगी त्रिदशरिपुगुरौ सर्व्वसौख्याधिकारी
शौरौ गेहे निवासी भवति चरिपौ मन्दकर्म्मा कुचेल: ॥ ४ ॥
बुधक्षेत्रेऽर्के नरोऽसौ प्रथमसुतहत: सिंहराशौ सपुत्र:
सोमे सर्व्वाधिकारी भवति धरणिजे पुत्रशोकाकुलोऽसौ ।
सौम्ये सुस्थ: सुदेह: प्रचुरधनयुतो देवपूज्ये सपुत्र:
कन्यायुक्तो हि शुक्रे रविजदनुजयो: पुत्रपौत्रैर्विहीन: ॥ ५ ॥
षष्ठेऽर्के शत्रुहन्ता रिपुगणरहित: क्षीणचन्द्रे गतायु:
पूर्णे शत्रुश्च हन्याद्भवति धरणिजे क्षीणदेहोऽतिदीन: ।
सौम्ये शास्त्रार्थयुक्तस्त्रिदशपतिगुरौ राज्यसौख्योपभोगी
दैत्याचार्य्येऽतिरोगी रविजदनुजयो: पापकृन्नित्यदु:खी ॥ ६ ॥
पत्न्यामर्के च जायापतिरतिविमुखो शीतरश्मौ सुपुत्र:
युक्तो भूपालरोऽसौ भवति धरणिजे हीनभार्य्यश्च नूनम् ।
सौम्ये सुस्थ: सुदेहस्त्रिदशपतिगुरौ शास्त्रवेत्ता ह्यतायु: ।
शुक्रे पुत्रप्रमोदी रविजदनुजयोर्हीनभार्य्यश्च नूनम् ॥ ७ ॥
मृत्यौ चार्के मन्दबुद्धिर्भवति च नियतं शीतरश्मौ गतायुर्भौमे: पुत्रे सुरोगी शशधरतनये मूलरोगी विकर्म्मा ।
जीवे तीर्थे च मृत्युर्भवति भृगुसुते धार्म्मिकस्तीर्थगोऽसौ
शौरौ मूर्खो गतायुर्भवति विधुरिपौ भेदसक्तो गतायु: ॥ ८ ॥
धर्म्मे चार्के नरोऽसौ विविधधनयुत: शीतगौ पुण्यकर्म्मा
धर्म्मीमान् पुण्यचेता भवति धरणिजे देवविप्रापहारी ।
सौम्ये धर्म्मेऽसुशीलस्त्रिदशपतिगुरौ राजतुल्य: सुकर्म्मा
शुक्रे तीर्थानुरागी रविजदनुजयो: पापशील: सुदु:खी ॥ ९ ॥
कर्म्मण्यर्के प्रतापी प्रचुरधनयुत: सोमपदे क्रोधदृष्टि:
सोमे शैलान्वितोऽसौ विविधधनयुतो भूमिजे बन्धुहीन: ।
नित्योत्साही च सौम्ये प्रचुरधनयुतो देवपूज्येऽभिमानी
दिव्यस्त्रीयोऽपि शुक्रे नृपतिसमधन: सौरिदैत्ये सुखी च ॥ १० ॥
आये चार्के नरोऽसौ पितृधनसहित: शीतगौ चारुशीलो
भौमे नित्यं च रोगी शशधरतनये सर्व्वदा क्रोधयुक्त: ।
जीवे धीमान् प्रदाता करितुरगपतिर्भार्गवे शास्त्रविद:
स्वर्भौ रत्नादियुक्तो रविजदनुजयो: क्रूरकर्म्मा कुचेल: ॥ ११ ॥
व्यर्के धंसो व्ययेऽसौ पुरधनरहित: चन्द्ररोगी सुदु:खी
सोमे खेदान्वितोऽसौ भवति धरणिजे क्रूरक्तो विशुद्धि: ।
सौम्ये धर्म्मार्थकारी दिनकररहिते देवपूज्येऽभिमानी
शुक्रे शास्त्रानुरागी रविजदनुजयो: क्रूरकर्म्मा कुचेल: ॥ १२ ॥
इति ज्योतिस्तत्त्वम् ॥ ४ ॥
स्त्रीणां यौवनकाले स्वभावजाष्टाविंशत्यलङ्कारान्तर्गताङ्गजप्रथमालङ्कार: । यथा,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यका: ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजा: ॥"
तत्र भाव: ।
"निर्व्विकारात्मके चित्ते भाव: प्रथमविक्रिया ।"
जन्मत: प्रभृति निर्व्विकारे मनसि उद्बुद्धमात्रो विकारो भाव: । यथा,—
"स एव सुरभि: काल: स एव मलयानिल: ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥"
इति साहित्यदर्पणे तृतीयपरिच्छेद: ॥ ५ ॥
भावस्य लक्षणान्तरं यथा,—
"शरीरेन्द्रियवर्गस्य विकाराणां विधायका: ।
भावा विभावजनिताश्चित्तवृत्तय ईरिता: ॥
पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयो: ।
समानार्थतया चात्र द्वयमैक्येन लक्ष्यते ॥" ६ ॥
पूर्व्वोक्तमानसविकाररूपभावस्य विवरणं यथा, रज:सत्त्वतमोमयचित्तविकारो भाव: । चित्तवृत्तिविशेषो भाव इत्यन्ये । अतएव मनोविकारो रत्यादिर्भाव उक्त: । भावयति जनयति रसान् भाव: अन् । तथा च भरत: ।
"नानाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाटकोविदै: ॥"
भावाश्च त्रिविधा: स्थायिनो व्यभिचारिण: सात्त्विकाश्च । तत्र स्थायिनो यथा,—
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावा: प्रकीर्त्तिता: ॥
व्यभिचारिणो यथा,—
"निर्व्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमा: ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहो धृति: स्मृति: ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिण: ।
त्रयस्त्रिंशदमी भावा: प्रयान्ति रससंस्थितिम् ॥"
सात्त्विका यथा,—
"स्वेद: स्तम्भोऽथ रोमाञ्च: स्वरभङ्गोऽथ वेपथु: ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता: ॥" इति ।
रत्यादय: स्थायिनोऽष्टौ निर्व्वेदाद्या व्यभिचारिणस्त्रयस्त्रिंशत् स्वेदादय: सात्त्विका अष्टौ चेति एकपञ्चाशद्भावा: । इत्यमरटीकायां भरत: ।

(प्रधानधर्मिणाद्विप्रभवतो भावस्य दैन्योत्पत्ति । यथुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे ।
"सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥")
भगवद्भावो यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥"
इति भक्तिरसामृतसिन्धुः ॥

भावकः, पुं, (भाव एव स्वार्थे कन् ।) भावः । भावजो विकारः । इति वाचस्पतिः ॥ (भवतीति । भू + कर्त्तरि ण्वुल् ।) भावयिते, त्रि । इति संक्षिप्तसारः ॥

भावत्कः, त्रि, (भवत इदमिति । भवत् + वुञ् ।) भवदीयः । युष्मदस्मदोरन्यतरस्यां खञ्चेति इति सिद्धान्तकौमुदी ॥

भावत्कः, त्रि, (भवतामयमिति । भवत् + "भवतष्ठक्छसौ ।" ४ । २ । ११५ । इति ठक् ।) भवदीयः । भवच्छब्दात् ठक्प्रत्ययनिष्पन्नः । इति सिद्धान्तकौमुदी । यथा, भट्टिकाव्ये ।
"भावत्कं हृदयं स्नेहदशाऽपि सुशीतलम् ॥"

भावनं क्ली, (भू + णिच् + ल्युट् ।) भवनम् । इति राजनिर्घण्टः । चालुता इति भाषा । (भावे ल्युट् ।) भावना । इति मेदिनी । ने, १०१ । (यथा, साहित्यदर्पणे ६ परिच्छेदे ।
"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ॥"
भावयतीति । भू + णिच् + ल्युः । उत्पादके, त्रि । यथा, महाभारते । १ । २४३ । ३५ ।
"इष्टे च न राजानं प्रकृती लोकभावनः ।
अवाप परमप्रीतः कीर्त्तिं कुरुसत्तम ॥")

भावना, स्त्री, क्ली, (भू + णिच् + युच् ।) ध्यानम् । (यथा, गीतायाम् । २ । ६६ ।
"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥")
पर्य्यालोचनम् । अधिवासनम् । इति मेदिनी । ने, १०१ । त्रिविधा भावना यथा,—
"त्रिविधा भावना विप्र ! विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका ।
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिकापरा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
त्रिविधभावनाभयबीजात्मकमात्रमुपचारेण त्रिविधा भावनेत्युच्यते । तत्र हि. परैः सूर्ण्णस्य ...। यतः यदध्यानमात्रमात्रमात्मनः तत्र प्रथमं भवः समार्थमिति भावः । भावना नाम ध्यानविषयिका वासना । तां त्रिविधामपि संज्ञामाहिमहाति ब्रह्माख्येति । तासेव त्रिवध-त्वेषिधेन विविनक्ति ब्रह्मभावनात्मिकेति । भाव-भावना भावो वस्तु तद्विषया भावना त्रिविधा । तत्र सर्वं ब्रह्मैव भावयामः । सर्वं कर्म्मैव कुर्म्मः । उभयमप्यस्मदनुस्मृत्य इत्येवं त्रिविधा भावना । भावनासुकृतात् जीवानुद्धरतीति सन-न्दनादय इति यावत् । इति तट्टीका ॥

भावबोधकः, पुं, (भावस्य रत्यादेर्बोधकः अनु-भावकः ।) अनुभावः । इत्यमरः । १ । ७ । २१ । भावस्य रत्यादेर्बोधकः सूचको गुणक्रियादिरनुभावः । अनुभावयति प्रतीतिविषयतां नीयते रत्यादिरने-नेति अनुभावः घञ् । तत्र रतेरनुभावाः लोचनचातुर्य्यभ्रूविभ्रमादयः । क्रोधस्य च रक्ता-क्षिपाटनारोष्ठदंशनादयोऽनुभावा एवं अन्यथा-प्यूह्यम् । किंवा भावानुभावयतीति अनुभावो सुखरागादिः । इति तट्टीकायां भरतः ॥

भावरूपः, पुं, (भावः सत्ता रूपः प्रकृतोऽस्या-स्तीति । यद्वा, भावः इष्टिः तत्र रूपः प्रवृत्तः ।) ब्रह्म । इति शब्दार्थकल्पतरुः ॥

भावाटः, पुं, (भावं भावेन वाटतीति । अट् + अच् अण् वा ।) भावकः । साधुः । निवेशः । कामुकः । नटः । इति मेदिनी । टे, ५९ ॥

भावानुगा, स्त्री, (भावं पदार्थसम्बन्धमनुगच्छ-तीति । अनु + गम् + डः । टाप् ।) छाया । इति राजनिर्घण्टः । (भावानुगामिनी, त्रि ।)

भावालीना, स्त्री, (भावेषु पदार्थेषु आलीना ।) छाया । इति राजनिर्घण्टः ॥

भावितः, त्रि, (भाव्यते स्मेति । भू + णिच् + क्तः ।) वासितः । प्राप्तः । इति मेदिनी । ते, १६० । चिन्तितः । (यथा, महाभारते । १२ । १६ । १७ ।
"ते चैवं प्रतिपद्यन्ते भक्तियोगेन भाविताः ।
वैनामिषाकृतात्मानं दर्शयन्त्येव कृष्णयः ॥")
मिलितः । मिश्रितः । भू च शुद्धिचिन्तयोर्मिश्रणे च इत्यस्मात् ण्यन्तात् क्तप्रत्ययनिष्पन्नो-ऽयम् । (वर्द्धितः । यथा, महाभारते । ५ । ९ । २५ ।
"एतत् श्रुत्वा वचनं सर्वलोकपालप्रतिष्ठितम् ।
परमेश्वरे भगवति । तस्मै सर्वमपि भावितम् ॥"
"भगवति भावितं समर्पितम् ।" इति तट्टीकायां श्रीधरस्वामी । चिन्तितः । यथा, सुश्रुते चिकि-त्सितस्थाने । १ अध्याये ।
"भल्लातकान् वायपेषु चीरं प्रागुक्त-भावितम् ॥")

भावित्रं, क्ली, (भवतीति । भू + "भुवादिभ्यो णित्रन् ।" उणा० ४ । १७० । इति णित्रन् ।) त्रैलोक्यम् । स्वर्गमर्त्त्यपातालम् । इत्युणादिकोषः ॥

भाविनी, स्त्री, स्त्रीविशेषः । इत्यमरः ॥ भावः शृङ्गारचेष्टाविशेषो विद्यतेऽस्याः भाविनी । इति तट्टीकायां भरतः ॥ (यथा, हरिवंशे । ११७ । २६ ।
"सा चिरं तत्प्रभृत्येका धनी सत्यस्य भाविनी ।
शुचित्वा दुर्वोषेता रूपवीदुरुपान्विता ॥")
क्रोधनम् । इति राजनिर्घण्टः ॥ (भाव्यमानस्य भावयमानागम्यत्वात् । यथा, महाभारते । ८ । ३६ । ११ ।
"सुदर्शनामुदात्तश्च मनाप्रसन्ना च भाविनी ।
अप्रमत्ता च मन्दाग्निः भद्रकाली च भारत ! ॥")
शर्मजनकस्थानस्य प्रतिपोषिणी च ॥

भावी, [न्] त्रि, (भविष्यतीति । भू + "भुवश्च ।" उणा० ३ । ५ । इति इनिः । स च चित्-सवति ।) भविष्यत्कालादिः । वर्त्तमानस्य भावप्रतियोग्युत्पत्तिकः । यथा,—
"वीरप्रतिपदा नाम तव भावी महोत्सवः ।"
इति कार्त्तिकशुक्लप्रतिपद्माहात्म्ये वर्त्तिं प्रति भगवद्वाक्यम् । इति तिथ्यादितत्त्वम् ।

भावुकं, क्ली, (भवतीति । भू + "लषपतपदस्थाभू-वृषेति ।"३ । २ । १५४ । इति उकञ् ।) मङ्गलम् । (यथा, प्रद्युम्नविजये १ अङ्के ।
"प्रभ ! धर्म्मेण कुशलमस्माकम् । अपि भावुकं भवः सुराणाम् ॥")
तद्वति, त्रि । इत्यमरः । १ । ४ । २६ ॥

भावुकः, पुं, (भू + उकञ् ।) भावुकी भगिनी-पतिः । इति हेमचन्द्रः ॥

भावुकः, त्रि, भवनशीलः । भवति यः । इति कर्त्तरि भूधातोरुकञ्प्रत्ययेन निष्पन्नः । रसविशेष-भावनाचतुरः । इति श्रीधरस्वामी । यथा,—
"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥"
इति श्रीभागवते । १ । १ । ३ ।
अपपठितमिप भव्यगुणमाभ्यमृतमीपत्पद्व्-धातोरभूततद्भावार्थे कर्त्तरि सार्वे उकञ्-प्रत्ययेन अस्माकमुक्त इत्यादयश्च निष्पन्नाः ॥

भाव्यं, क्ली, अवश्यभवितव्यम् । इति भूधातो-रवश्यम्भावार्थे भावे ण्यत्प्रत्ययेन निष्पन्नम् । यथा । विदेव कुशिना भाव्यम् । इति मुग्ध-बोधव्याकरणम् । कर्म्मण्यर्थेनात् कर्त्तरि च तत् त्रि । यथा,—
"सतस्तु कार्य्यं नास्ति देवाधिदेवकर्म्मणः ।
भावीतरार्थे महार्थं तव भव्याभावादतः ॥"
इति कालिकापुराणे ९७ अध्यायः ॥

भाष, ङ व्यक्ते वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ, भाषते । व, अबीभषत् अबभाषत् । इति तट्टीकायां दुर्गादासः ॥

भाषणं, क्ली, (भाष् + भावे ल्युट् ।) कथनम् । यथा । "संलापो भाषणं मिथः ।" इत्यमरः । (यथा, धर्म्मशर्म्माभ्युदये । चतुर्थसर्गे ।
"भावस्त्वीभमगन्धीगन्धवाहापेदिद्वारम् ।
आलोक्य भारतदिनानि भवतेषु पूर्वं सत्यम् ॥")

भाषा, स्त्री, (भाष्यते वाक्यवर्णादिना प्रका-श्यते इति । भाष् + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यप्रत्ययः । टाप् ।) रागिणीविशेषः । इति हलायुधः । वाक्यम् । वाग्देवता । तत्-पर्य्यायः । ब्राह्मी २ भारती ३ गीः ४ वाक् ५ वाणी ६ सरस्वती ७ व्याहारः ८ उक्तिः ९ लपितम् १० भाषितम् ११ वचनम् १२ वचः

११। इत्यमरः ।१।६।१॥ अथोदाहृतवचने । पूर्व्वपक्षकं चाराधिकृतायां हेमशायाञ्च । इति शब्दरत्नावल्यां भरतः ॥ नाट्योयादादशभाषा यथा । संस्कृतम् १ प्राकृता २ उदीच्यी ३ महाराष्ट्री ४ मागधी ५ मिश्रार्द्धमागधी ६ शकाभीरी ७ आवन्ती ८ द्राविड़ी ९ ओड्रीया १० पाश्चात्या ११ प्राच्या १२ वाह्लीका १३ दाक्षिणा १४ दाक्षिणात्या १५ पैशाची १६ आवन्ती १७ शौरसेनी १८ । एतासां लक्षणोदाहरणानि प्राकृतलङ्केश्वर-व्याकरणे द्रष्टव्यानि ।

अथ भाषाविभागः ।

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम् ॥
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारि-णाम् ॥
चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी ।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका ॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम् ।
शकाराणां शकादीनां शाकारीं संप्रयोजयेत् ॥
वाह्लीकभाषा दिव्यानां द्राविड़ी द्रविड़ादिषु ।
आभीरेषु तथाभीरी चाण्डाली पुक्कशादिषु ॥
आभीरी शावरी चापि काष्ठपत्रोपजीविषु ।
तथैवाङ्गारकारादौ पैशाची स्यात् पिशाच-वाक् ॥
चेटीनामप्यनीचानामपि स्यात् शौरसेनिका ।
बालानां षण्ढकानाञ्च नीचग्रहविचारिणाम् ।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित् ॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपद्रुतस्य च ।
भिक्षुबन्धधरादीनां प्राकृतं संप्रयोजयेत् ॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च ।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् ॥
यद्देशं नीचपात्रन्तु तद्देशं तस्य भाषितम् ।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः ॥
योषित्सखीबालवेश्याकितवाप्सरसां तथा ।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतञ्चान्तरान्तरा ॥
एषामुदाहरणान्याकारेषु बोद्धव्यानि । भाषा-लक्षणानि भाषार्णवे । इति साहित्यदर्पणे ६ परिच्छेदः ॥

अथ भाषापादः ।

तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती ।
"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः ॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषाः पदार्थविरुद्धार्थमनादिभिव्याप्तं साध्यं साधना-ङ्गाभिमतं पक्षं विदुः । अन्यथा प्रतिज्ञादोषैव साध्यदोषः स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
अपकृष्टेन वक्तव्ये व्यवहारेषु वादिभिः ॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते । नारदेनापि ।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥"
उत्तरो विजयी । यद्यप्यत्र साध्यं तद्-विशिष्टधर्म्माधर्म्मौ पक्ष इति भेदः तथाप्यत्र वाक्यतात्पर्य्यादिधर्म्मविशेषविशिष्टतया धर्म्मि-णोऽधमर्णपदेनैव साध्यतात् साध्यपक्षयोरभेदा-भिधानम् । उपसंहारे च एवंविधः पक्ष इति । मिताक्षरायान्तु । भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम् । भाषापदेनोक्ता भाषास्वरूप-प्रपञ्चमाह । अल्पाक्षर इति । निरङ्कुशः पौर्व्वापर्य्यविपर्य्ययादिशून्यः । तत्र ।
"द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ।
यानि यान्यनुदाहीना कर्त्ता तानि न पश्यति ॥"
इति यज्ञसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत् ॥ ● ॥ तच्छोधनमाह बृहस्पतिः ।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥"
तल्लिखनप्रकारमाह व्यासः ।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
फलकं काष्ठादिपट्टकम् । कात्यायनः ।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत् ॥
अन्यदुक्तं लिखेदन्योऽप्यर्थिप्रत्यर्थिनां वचः ।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः ॥"
स्वभावोक्तमच्छलम् । एतच्च स्वरविशेषादिना सुज्ञेयम् । अतएव याज्ञवल्क्यः ।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्युपपन्नं हीयते व्यवहारतः ॥"
भूतं तत्त्वार्थसम्बन्धम् । नारदः ।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम् ।
छिन्नु राजा परित्यज्य स्वधर्म्ममभिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधु वा ।
वर्णैर्व्वर्णविवादेषु वाक्छलेनावसीदति ।
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
धर्म्मैश्वर्य्यविवादेषु प्रमादाभिधानेऽपि नावसी-दति । अनयोरुदाहरणं मनुष्योक्तादि । -वर्ण-विवादपशव्याद्युक्तविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थान्न हीयत इति गम्यते । यथाह-मनेन शिरसि पादेन ताड़ितः इत्यभिधाय केवलं हस्तेन ताड़ितः इति वदन केवलं दण्ड्यः पराजीयते च । शतञ्च मे मह्यमयं धारयति मत्त अथमेव गृहीततावद्धनकत्वादिति भाषा-शरीरम् । एतच्च संस्कृतदेशभाषान्यतरेण यथा-बोधं वक्तव्यं लेख्यं वा । उभयोरपि वादिप्रति-वादिनोर्दर्शनात् । अतएवाध्यापनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे ।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥"
इति व्यवहारतत्त्वम् ।

भाषापरिच्छेदः, पुं, विश्वनाथन्यायपञ्चाननकृत-न्यायपरिभाषाग्रन्थः । अस्य प्रथमाद्यश्लोकः ।
"नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय ॥"
तस्यायमन्त्यश्लोकः ।
"सोऽयं क इति बुद्धिस्तु सादृश्यमवलम्बते ।
तद्देवौषधमित्यादौ सजातीयेऽपि दर्शनात् ॥"
अस्य टीका सिद्धान्तमुक्तावली ॥

भाषापादः, पुं, (भाषायाः पादः ।) चतुष्पाद्व्य-वहारान्तर्गतप्रथमपादः । तस्य लक्षणं यथा,—
"अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलम् ।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च ॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम् ।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च ॥
वर्षर्त्तुमासपक्षाहोवेलादेशप्रदेशवत् ।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम् ॥
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च ।
परात्मपूर्व्वजानेकराजनामभिरङ्कितम् ॥
क्षमालिङ्गात्मपीड़ावत्कथिताहर्त्तृदायकम् ।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते ॥"
इति मिताक्षरायां व्यवहाराध्यायः ॥
अस्य विवरणं भाषाशब्दे द्रष्टव्यम् ॥

भाषितं, क्ली, (भाष्यते इति । भाष्+भावे क्तः ।) वचनम् । इत्यमरः ।१।६।१॥ (यथा, मनौ ।८।२६।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥"
भाष्यते स्मेति । भाष्+कर्म्मणि क्तः ।) कथिते, त्रि । (यथा, कामन्दकीये नीतिसारे ।१।२७।
"प्रविश्य शास्त्रदृष्टस्य चित्तं चित्तप्रसन्नतः ।
समर्थयेत्तत्पक्षं साधु भाषितभाषितः ॥")

भाष्यं, क्ली, (भाष्यते विस्तरतया वर्ण्यते इति । भाष+ण्यत् ।) चूर्णिः । इति स्वामी ॥ सूत्र-विवरणग्रन्थः । तस्य लक्षणम् ।
"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥"
इति त्रिकाण्डशेषव्याख्यायां भरतः ॥ सूत्रो-क्तार्थप्रपञ्चकम् । इति हेमचन्द्रः ॥ (भाष्यते अर्थेति । ण्यत् ।) ग्रन्थविशेषः । इति माध-वीयि मधुरेशः ॥ (भाष्+ण्यत् ।) वक्तव्ये त्रि ॥

भाष्यकारः, पुं, (भाष्यं चूर्णिं करोतीति । कृ+ "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) महा-भाष्यकर्त्ता मुनिः । तत्पर्य्यायः । गोनर्दीयः २ पतञ्जलिः ३ चूर्णिकृत् ४ । इति त्रिकाण्डशेषः ॥
"अथवा भाष्यकारस्य कुमारीप्रियपाणिनी ।
नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः ॥"
इति दुर्गासिंहः ॥

भास ऋ ङ भासि । दीप्तौ । इति कविकल्प-द्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ-

स्त्रीभगात् अवभाषात्। स भाषते। इति दुर्गादासः॥

भास्, स्त्री, (भासते इति। भास+"भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।" ३।२।१७७। इति क्विप्।) प्रभा। अस्य शब्दस्य प्रथमान्तरूपं भाः। इत्यमरः। १।३।३४॥ मयूखः। इति मेदिनी। से, ७॥ इच्छा। इति धरणिः॥

भासः, पुं, (भासते इति। भास+भावे घञ्।) दीप्तिः। (यथा, महाभारते। ५।५८।११।
"चन्द्रसूर्य्यसमाभैश्च वक्त्रैश्चारुकुण्डलैः॥")
(भासन्ते गावोऽत्र। भास+आधारे घञ्।) गोष्ठम्। (भासते दीप्यते इति। भास्+कर्त्तरि घञ्।) कुक्कुटः। गृध्रः। इति विश्वः। शकुन्तविशेषः। तत्पर्य्यायः। शकुन्तः २। इति हेमचन्द्रः॥ (यथा, महाभारते। १।१३४।७०।
"तांश्च भासमारोप्य द्रुमाग्रे शिल्पिभिः कृतम्। अभिज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत्॥"
पर्व्वतभेदः। यथा, महाभारते। १४।४४।४।
"हिमवान् पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान्। श्वेतो नीलश्च भासश्च कोष्ठवांश्चैव पर्व्वतः॥")
(स्त्रियां ङीष्। प्रधायाः कन्या। यथा, महाभारते। १।६५।४६।
"अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम्। अरूपां सुभगां भासीमिति प्राधा व्यजायत॥")

भासः, [स्] क्ली, (भास्+असुन्।) दीप्तिः। इति त्रिकाण्डशेषः॥

भासन्तः, पुं, (भासते इति। भास्+"तॄभूवहिवसिभासीति।" उणा० ३।१२८। इति झच्।) सूर्य्यः। चन्द्रः। इत्युणादिकोषः॥ भासपक्षी। इति मेदिनी। ते, १२८॥ नक्षत्रम्। इति हेमचन्द्रः॥

भासन्तः, त्रि, (भासते इति। भास+झच्।) सुन्दराकारः। इति मेदिनी। ते, १२८॥

भासन्ती, स्त्री, (भासन्त। गौरादित्वात् ङीष्।) नक्षत्रम्। इत्युणादिकोषः॥

भासुः, पुं, (भास्+बाहुलकात् उन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥

भासुरं, क्ली, (भासते इति। भास्+"भञ्जभासमिदो घुरच्।" ३।२।१६१। इति घुरच्।) कुष्ठौषधम्। इति जटाधरः॥

भासुरः, पुं, (भास+घुरच्।) स्फटिकः। इति त्रिकाण्डशेषः॥ वीरः। इति धरणिः॥ कर्त्तरि घुरच्प्रत्ययनिष्पन्नत्वेन दीप्तियुक्ते, त्रि। (यथा, किरातार्ज्जुनीये। ५।५।
"मणिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तलतागृहाः॥")

भासुरपुष्पा, स्त्री, (भासुराणि पुष्पाण्यस्याः। टाप्।) वृश्चिकाली। इति राजनिर्घण्टः॥

भास्करं, क्ली, (भाः करोतीति। कृ+"दिवाविभानिशाप्रभाभास्करान्तानन्तादीति।" ३।२।२१। इति टः।) स्वर्णम्। इति राजनिर्घण्टः॥

भास्करः, पुं, (भाः करोतीति। कृ+"दिवाविभेति।" ३।२।२१। इति टः।) सूर्य्यः। (यथा, मनौ। २।४८।
"प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि॥")
अग्निः। इति मेदिनी। रे, १८६॥ वीरः। इति धरणिः॥ अर्कवृक्षः। इति राजनिर्घण्टः॥ भास्कराचार्य्यः। स च सिद्धान्तशिरोमण्यादिज्योतिर्ग्रन्थकर्त्ता॥

भास्करप्रियः, पुं, (भास्करस्य प्रियः।) पद्मरागमणिः। इति केचित्। चुनि इति भाषा॥

भास्करेष्टा, स्त्री, (भास्करस्य इष्टा।) आदित्यभक्ता। इति राजनिर्घण्टः॥

भास्वरं, क्ली, (भासते इति। भास्+"स्थेशभासपिसकसो वरच्।" ३।२।१७५। इति वरच्।) कुष्ठौषधम्। इति शब्दचन्द्रिका॥

भास्वरः, पुं, (भासते इति। भास्+"स्थेशभासपिसकसो वरच्।" ३।२।१७५। इति वरच्।) दिवसः। इति राजनिर्घण्टः॥ सूर्य्यः। इति केचित्। दीप्तियुक्ते, त्रि। इति मुग्धबोधव्याकरणम्॥ (यथा, महाभारते। १।१११।११।
"स कौस्तुभं परित्यज्य रूपं विप्रर्षभस्तदा। स्वं रूपं भास्वरं भूयः प्रतिपेदे महायशाः॥"
सूर्य्यस्यानुचरविशेषः। स च भगवता सूर्य्येण तारकासुरवधार्थं स्कन्दाय दत्तः। यथा, महाभारते। ९।४५।३०।
"सुभ्राजो भास्वरश्चैव यौ तौ सूर्य्यानुयायिनौ। तौ सूर्य्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान्॥")

भास्वान्, [त्] पुं, (भाः अस्त्यस्येति। भास्+"तदस्यास्त्यस्मिन्निति मतुप्।" ५।२।९४। इति मतुप्। मस्य वः।) सूर्य्यः। (यथा, मार्कण्डेयपुराणे। १०३।१६।
"यथा धाराधरो दिवा योऽद्रिमा कालेन च। धाराधरेण चोर्ल्लं यत् तेन दैवेन भास्वता॥")
अर्कवृक्षः। इत्यमरः॥ दीप्तिः। इति हेमचन्द्रः॥ वीरः। इति मेदिनी॥ दीप्तिविशिष्टे, त्रि॥ (यथा, कुमारसम्भवे। १।२।

"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥"

प्रकाशकः। यथा, मनौ। १।७७।
"वायोरपि विकुर्व्वाणाद्विरोचिष्णु तमोनुदम्। ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते॥"
"भास्वत् प्रकाशकम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

भिक्ष, ङ याच्ञायामलाभे लाभे च। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-याच्ञे द्विक०-लाभे अलाभे च सक०-सेट्।) ङ्ञौ याचनम्। अलाभलाभयोर्भिक्षिः। ङ, भिक्षते भूमिं नृपात् अर्थितः। अभाव इत्यर्थः। भिक्षते दातारं धनं भिक्षुः। याचत इत्यर्थः। भिक्षते दातारं दीनः। लोभादधनलोभार्थः। भिक्षते धनः। लिप्सतीत्यर्थः। इति दुर्गादासः॥

भिक्षा, स्त्री, (भिक्ष याच्ञायां+"गुरोश्च हलः।" ३।३।१०३। इति अः। ततष्टाप्।) प्रार्थनम्। याच्ञा इति मागा इति च भाषा। तत्पर्य्यायः। याच्ञा २ अर्द्दना ३ अर्थना ४। इत्यमरः। ३।२।६॥ प्रार्थनम् ५ याचना ६। इति शब्दरत्नावली॥ (तद्यथा,
"वाणिज्ये वसते लक्ष्मीस्तदर्द्धं कृषिकर्म्मणि। तदर्द्धं राजसेवायां भिक्षायां नैव नैव च॥")
सेवा। भृतिः। इति नानार्थे अमरः॥ भिक्षितवस्तु। इति मेदिनी॥ (सा च ग्रासप्रमाणा। ग्रासमात्रा भवेद्भिक्षेति शातातपवचनात्। यथा, मनुः। ३।९४।
"कृत्वैतद्बलिकर्म्मैवमतिथिं पूर्व्वमाशयेत्। भिक्षाञ्च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे॥")
उपनीतस्य भिक्षाविधिर्यथा,—
"भिक्षामाहृत्य शिष्टानां गृहेभ्यः प्रयतोऽन्वहम्।
निवेद्य गुरवेऽश्नीयात्प्राङ्मुखस्तदनुज्ञया॥
भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्॥
मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥
सजातीयगृहेष्वेव सार्व्ववर्णिकमेव वा।
भैक्ष्यस्याचरणं प्रोक्तं पतितादिविवर्जितम्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्जयेत्॥
सर्व्वं वापि चरेद्ग्रामं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचं दिशस्त्वनवलोकयन्॥
समाहृत्य तु तद्भैक्षं यावदर्थममायया।
भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥"
इति कूर्म्मपुराणे उपविभागे १२ अध्यायः॥*॥
यतेः प्रातर्भिक्षाटननिषेधो यथा,—
"कारयित्वा तु कर्म्माणि कालव्यामेन वर्त्तयेत्।
सायं प्रातर्न्नचरतान् भिक्षार्थं नावदर्शयेत्॥"
इति तत्रैव १५ अध्यायः॥*॥
सा त्रिविधा यथा,—
"हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः।
दद्यादतिथये नित्यं बुध्येत परमेश्वरम्॥
भिक्षामाहुर्ग्रासमात्रमग्रं तस्याश्चतुर्गुणम्।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते॥
गोदोहमात्रं कालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम्।
अभ्यागतान् यथाशक्ति पूजयेदतिथीन् यथा॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे।
दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो लोभवर्जितः॥
सर्व्वेषामप्यभावे तु अन्नं गोभ्यो निवेदयेत्॥"
इति तत्रैव १७ अध्यायः॥

भिक्षाकः, पुं, (भिक्षते इति । भिक्ष+"जल्प-भिक्षकुट्टलुण्टवृङः षाकन् ।"३।२।१५५। इति षाकन् ।) भिक्षुकः । इति सिद्धान्तकौमुदी ॥

भिक्षाकी, स्त्री, (भिक्षाक+षित्वात् ङीष् ।) भिक्षुकी । इति मुग्धबोधव्याकरणम् ॥

भिक्षाचरः, पुं,स्त्री, (भिक्षां चरतीति । भिक्षा+चर+"भिक्षासेनादायेषु च ।" ३।२।१७। इति टः ।) भिक्षुकः । इति सिद्धान्तकौमुदी ॥ (स्वनामख्यातो भोजनरपतेः पुत्रः । यथा, राजतरङ्गिण्याम् । ८ । १७ ।
"राज्ञां त्रिभुवनख्यातं यं भोजो हर्षभूपतेः ।
सार्द्धं ब्रह्मविद्भिः पुत्रं गुरुभिः प्रियम् ।
आयुष्मान्भिक्षाचरो नाम ...॥")

भिक्षाटनं, क्ली, (भिक्षार्थमटनं भ्रमणम् ।) भिक्षार्थगमनम् । यथा,—
"अङ्गे दानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृतं
देवेत्थं जगतीतले स्मरहराभावः समुन्मीलति ।
गङ्गा सागरमम्बरं शशिकला नागाधिपः
क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत् त्वां मां च भिक्षाटनम् ॥"
इत्युद्भटः ॥

भिक्षाशित्वं, क्ली, (भिक्षाशिनो भिक्षुकस्य भावः । भिक्षाशिन्+त्व ।) पैशुन्यम् । इति शब्दरत्नावली ॥

भिक्षाशी, [न्] त्रि, (भिक्षां अश्नातीति । अश+णिनिः ।) भिक्षुकः । इत्युणादिकोषः ॥ यथा,—
"भिक्षाशी विचरेद्ग्रामं वन्यैर्यदि न जीवति ॥"
इति प्रायश्चित्तविवेकः ॥

भिक्षुः, पुं, (भिक्षणशीलः । भिक्ष याचने+"सनाशंसभिक्ष उः ।" ३।२।१६८। इति उः ।) ब्रह्मचर्याद्याश्रमचतुष्टयान्तर्गतचतुर्थाश्रमी । आश्रमशब्दोऽयं धर्मिपरो धर्मपरश्च । इति भरतः । तत्पर्यायः । परिव्राट् २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ इत्यमरः ।२।७।४२। परिव्राजकः ६ पराशरी ७ श्रमणः ८ । इति शब्दरत्नावली । तस्य धर्म्मो यथा,—
"भिक्षोर्धर्म्मं प्रवक्ष्यामि सन्निबोधत सत्तमाः ।
वनादृषचराश्च कर्म्मेदं सर्व्ववेदविदाम् ॥
प्राजापत्यां तदन्ते तु अग्निमारोप्य चात्मनि ।
धर्म्मभूतस्थितः शान्तश्चिदर्थो सकमण्डलुः ॥
सर्व्वारामं परित्यज्य भिक्षार्थी ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नातिकाङ्क्षितः ॥
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ।
भवेत् परमहंसो वा एकदण्डी यमादिमान् ॥
सिद्धयोगस्त्यजन् देहममृतत्वमिहाप्नुयात् ।
योगाभ्यासात् भिक्षुकः परां सिद्धिमवाप्नुयात् ॥
दातातिथिप्रियो ज्ञानी गृही श्राद्धेऽपि मुच्यते ।"
इति गारुडे १०२ अध्यायः ॥ * ॥
अपि च ।
"चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनी-
षिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ! ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्द्धूतमत्सरः ॥
त्रैवर्गिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ! ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राण्निर्म्ममो भवेत् ॥
अभयं सर्व्वभूतेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च मुखे जुहोति ।
विप्रस्तु भैक्षोपगतैर्हविर्भि-
श्चिताग्निना स व्रजति स्म लोकान् ॥
मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥"
इति विष्णुपुराणे ३ अंशे ९ अध्यायः ॥ * ॥
कुशभेदः । इति जटाधरः ॥ श्रावणीक्षुपः । इति राजनिर्घण्टः ॥ कोकिलाक्षः । इति भावप्रकाशः ॥

भिक्षुकः, पुं, स्त्री, (भिक्षुरेव । भिक्षु+स्वार्थे कन् । यद्वा, भिक्षते इति । भिक्ष+उकञ् ।) भिक्षोपजीवी । तत्पर्य्यायः । मार्गणः २ याचनकः ३ वनीपकः ४ याचकः ५ । इति जटाधरः ॥ अर्थी ६ । इत्यमरः ॥ (यथा, मनुः । ३ । २४३ ।
"ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् ।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥"
पारिभाषिकभिक्षुका यथा, अत्रिः ।
"ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥")

भिक्षुसंघाटी, स्त्री, (भिक्षुं संघटते इति । भिक्षु+सम्+घट+अच् । गौरादित्वात् ङीष् ।) चीवरम् । इति हेमचन्द्रः ॥ यथा, सुश्रुते उत्तरतन्त्रे ३३ अध्याये ।
"पुरीषं कौक्कुटं केशाश्चर्म्मसर्पत्वचस्तथा ।
जीर्णाञ्च भिक्षुसंघाटीं धूपनार्थोपकल्पयेत् ॥")

भिक्षः, पुं, (भक्ष्यते इति । भक्ष्+कः । पृषोदरादित्वात् साधुः ।) भिक्षाक्षुपः । इति राजनिर्घण्टः ॥

भिक्षकः, (भिक्ष । स्वार्थे कन् ।) भिक्षाक्षुपः । इति राजनिर्घण्टः ॥

भिक्षा, स्त्री, (भिक्ष+अजादित्वात् टाप् ।) क्षुपविशेषः । भिक्षी इति ख्याता । तत्पर्य्यायः । भिक्षीतकः २ भिक्षः ३ भिक्षकः ४ क्षेत्र-सम्भवः ५ चतुष्पदः ६ चतुःपुष्पः ७ सुशाकः ८ व्यसनकः ९ करपर्णः १० वृत्तबीजः ११ । अस्या गुणाः । अम्लरसत्वम् । उष्णत्वम् । ग्राहित्वम् । रुचिकरत्वञ्च । इति राजनिर्घण्टः ॥

भिक्षीतकः, पुं, (भिक्षी सती तकति हसतीति । तक्+अच् ।) भिक्षाक्षुपः । इति राजनिर्घण्टः ॥

भित्तं, क्ली, (भिद्यते स्मेति । भिद्+क्तः । "भित्तं शकलम् ।" ८ । २ । ५९ । इति निष्ठातकारस्य नत्वाभावो निपात्यते ।) खण्डम् । इत्यमरः । १ । ३ । १६ ॥

भित्तिः, स्त्री, (भिद्यते इति । भिद्+क्तिन् ।) मृत्काष्ठैर्मृदिष्टकादिमयी वृतिः । काँथ इति भित् इति च ख्याता । तत्पर्य्यायः । कुड्यम् २ । इत्यमरः । २ । २ । ४ ॥ भित्तिका ३ कुड्यम् ४ कुडकम् ५ । इति शब्दरत्नावली ॥ (यथा, विश्वकर्म्मप्रकाशे । पञ्चमाध्याये ।
"मानेनानेन विस्तारो भित्तीनान्तु विधीयते ।
पादे पञ्चगुणं तथा भित्तीनामुच्छ्रयो भवेत् ॥")
प्रभेदः । सन्निभागः । अवकाशः । इति विश्वः । प्रदेशः । इति शब्दरत्नावली ॥ (यथा, रघौ । ५ । ४३ ।
"अथोपरिष्टाद् भ्रमरैर्भ्रमद्भिः
प्राक् सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्ति-
र्वन्यः सरित्तो गज उन्ममज्ज ॥")

भित्तिका, स्त्री, (भिद्यते भिनत्ति चेति । भिदिर विदारणे+"स्तिभिदिस्वतिभ्यः कित् ।" उणा० ३ । १४० । इति तिकन् । कित् स्यात् ।) कुड्यम् । इति शब्दरत्नावली ॥ गृही । इति हेमचन्द्रः ॥

भित्तिचौरः, पुं, (चोरयतीति । चुर+अच् । चोर एव स्वार्थे अण् । चौरः । भित्त्या कुड्यादिभेदेन चौरः ।) चौरविशेषः । सिंधाल चोर इति भाषा । तत्पर्य्यायः । खानिलः २ कुड्यच्छित् ३ । इति शब्दरत्नावली ॥

भित्तिपातनः, पुं, (पातयतीति । पत+णिच् । कर्म्मणि षष्ठी । भित्तीनां पातनः ।) महामूषकः । इति राजनिर्घण्टः ॥

भित्, [द्] स्त्री, (भिद्यते इति । भिद्+"सम्पदादिभ्यः क्विप्" इति क्विप् ।) प्रभेदः । इति जटाधरः ॥ (भिनत्तीति । भिद्+तच्छीलादिषु "अन्येभ्योऽपि दृश्यते ।" इति क्विप् ।) भेदकर्त्तरि त्रि । (यथा, ऋग्वेदे । ७ । १०४ । ८ ।
"भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥")

भिद इर् औ ञ ध भिदि । इति कविकल्पद्रुमः ॥ (रुधां०-उभ०-सक०-अनिट् ।) भित् विभेदं विदारणम् । ञ ध भिनत्ति भिन्ते कुड्यं नरो । औ भेत्ता । इर् अभिदत् अभैत्सीत् । इति दुर्गादासः ॥

भिदकं, क्ली, (भिनत्तीति । भिद् + "वहुलमन्यत्रापि ।" उणा० २।३७। इति वुन् ।) वज्रम् । खड्गे, पुं । इत्युणादिकोषः ॥

भिदा, स्त्री, (भेदनमिति भिद् + "षिद्भिदादिभ्योऽङ् ।" ३।३।१०४। इति । अङ् । टाप् ।) वस्त्रादेर्विदारणम् । चेरा इति भाषा । तत्पर्य्यायः । विदरः २ स्फुटनम् ३ । इत्यमरः । ३।२।५॥ धन्याकम् । इति शब्दचन्द्रिका । भेदः । यथा । प्रायश्चित्तस्य पूर्व्वाचरणं सामान्यभिदा तथा । इति प्रायश्चित्ततत्त्वम् ॥

भिदिः, पुं, (भिनत्तीति । भिद् + "कृगृशॄपॄकुटिभिदिच्छिदिभ्यश्च ।" उणा० ४ । १४२ । इति इः । स च कित् ।) वज्रम् । इति हेमचन्द्रः (?) कोषः ॥

भिदिरं, क्ली, (भिनत्ति विदारयतीति । भिद् + "इषिमदिमुदिखिदिच्छिदिभिदिमन्दीति ।" उणा० १ । ५१ । इति किरच् ।) वज्रम् । इत्यमरटीकायां भरतः सिद्धान्तकौमुदी च ॥

भिदुः, पुं, (भिनत्ति विदारयतीति । भिद् + "पृभिदिव्यधिगृधिधृषिहृषिभ्यः ।" उणा० १ । २३ । इति कुः ।) वज्रम् । इति सिद्धान्तकौमुदी ॥

भिदुरं, क्ली, (भिनत्तीति । भिद् + "विदिभिदिच्छिदेः कुरच् ।" ३ । २ । १६२ । इति । कुरच् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥ प्लक्षवृक्षे पुं । इति राजनिर्घण्टः ॥

भिद्यः, पुं, (भिनत्ति कूलमिति । भिद् + "भिद्योद्ध्यौ नदे ।" ३ । १ । ११५ । इति क्यप् । निपातितश्च ।) नदः । इति हेमचन्द्रः । मुग्धबोधव्याकरणञ्च । (यथा, भट्टौ । ६ । ५८ ।
"सम्पतत्पक्षपक्ष्यौ महान् भिद्योद्ध्यसन्निभान् ।
सिध्यतारामिव व्यात्तौ सुग्रीवापत्प्रवंशे ॥")

भित्रः, पुं, क्ली, (भिनत्तीति । भिद् "स्थाचितमिपचिमिसिमिदिभिदिपीति ।" उणा० ४ । १६ । इति इत्रः ।) वज्रम् । इति सिद्धान्तकौमुदी उणादिकोषश्च ॥

भिन्दिपालः, पुं, (भिन्दि + इन् । भिन्दिं विदारणं पालयतीति पालि + अण् ।) क्षेपणास्त्रविशेषः । गोफन इति ख्यातम् । इति भरतः । स्वल्पैकमुद्गरः । इति स्वामी ॥ तत्पर्य्यायः । सृगः २ । इत्यमरः । २ । ८ । ९१ ॥ (यथा, वेणीसंहारे द्वितीयाङ्के । २ ।
"भिन्दिपालास्तु गदाङ्गो गदादीर्घो हस्तसम्मिताः ।
तस्माच्चोऽपि युक्तः कर्षणमुपमक्षणः ॥"
भिन्दिपालः भिन्दिपालश्चापि इत्येवं पाठद्वयं दृश्यते ।)

भिन्नः, त्रि, (भिद्यते स्मेति । भिद् + क्तः ।) भेदविशिष्टः । भाङ्गा इति भाषा । तत्पर्य्यायः । दारितः २ । भेदितः ३ । इत्यमरः । ३ । १ । १०० ॥ विदारितः ४ । इति शब्दरत्नावली । (यथा, हरिवंशे । भविष्यपर्व्वणि । ११ । २६ ।
"आकाशादुत्पपाताथ प्रविष्टं गह्वरं स्तम्भम् ।
आहरद् विस्तरं भिन्नं विमर्दादुत्तमामुनम् ॥")

सङ्गतः । अन्यः । पुष्पः । इति मेदिनी । ने, १३ ॥ क्षतरोगविशेषः । तल्लक्षणं यथा,—
"शक्तिकुन्तेषु खड्गाग्रविषाणाद्यैराशयो हतः ।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥"
आशयः कोष्ठः । तल्लक्षणं यथा,—
"छिन्ने भिन्ने तथा विद्धे क्षते वाऽसृगतिस्रवेत् ।
रक्तक्षयात्ततः कुर्य्यात् पवनो भृशम् ॥
स्नेहपानपरीषेकलेपाभ्यङ्गादिभिर्जयम् ।
कुर्वीत स्नेहबस्तिञ्च मांसरसौषधैर्भिषक् ॥
खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।
मद्भिरकीलकरणैः सद्यः स्यात् सवेदनः ॥
कषायमधुराः शीताः क्रियाः सर्व्वाः प्रयोजयेत् ।
षष्ठे सप्ताहे तु पश्चात् पूर्व्वोक्त-
माचरेत् ॥
आमाशयस्थे रुधिरे विरेकाद्वमनं नरः ।
तथैव पक्वाशयस्थे तु मलोत्थाने विरेचनम् ॥
कायो पेयस्त्वीरसार्धं पक्वभिन्ना ततः ।
शिग्रुकैर्मधुसंयुक्तः कोष्ठं शमयेत्तथा ॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
सम्भोज्यं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥
आतोऽभिन्नपत्तीवपथकट्वाद्यामिश्राद्यारियां
मांसकामयविलाससमधुकेऽर्कसौर्यः सर्व्वैः ।
सर्पिः पिष्टमनेन सम्बद्धता मर्माश्रिताः
सारिणो
गम्भीराः सदसौ भवाः सन्ततिका गुप्ताणि
रोहन्ति च ॥
स्ववैद्योपदेशेन पारम्पर्य्योपदेशतः ।
आलोच्यते तु संक्षिप्तं चैत्यं विकल्पकं बुधैः ॥"
आमाशयस्तम् । इति भावप्रकाशः ॥ * ॥
(यथोपाङ्गचिकित्सा ।
"छिन्नं भिन्नं तथा भग्नं क्षतं पिच्छितमेव च ।
द्रव्यक्षते प्रतीकारः प्रोक्तयोपाङ्गसंयुतः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ।)

भिन्नकः, पुं, (भिन्न + संज्ञायां कन् ।) बौद्धः । यथा,
"भिन्नकः श्रपणोऽर्हन्तो बौद्धो वैनायिकः
स्मृतः ॥"
इति त्रिकाण्डशेषः ॥
(भिन्न + "अव्यक्तानुकरणात् स्यात् ।" ५ । ४ । ७ ।
इति कन् । ईषद् भिन्ने, त्रि ।)

भिन्नगन्धिका, स्त्री, (भिन्नं गन्धमस्याः । कप् । टाप् । अत इत्वम् ।) कर्कटी । इति शब्दचन्द्रिका ॥

भिन्नभिन्नात्मा, [न्] पुं, (भिन्नभिन्नो भेदयुक्त आत्मा यस्य ।) चणकः । इति शब्दचन्द्रिका ॥

भिन्नयोजनी, स्त्री, (भिन्नं योजयतीति । युज् + णिच् + णिनिः । ङीप् ।) पाषाणभेदकवृक्षः । इति भावप्रकाशः ॥

भिन्नार्थकः, त्रि, (भिन्नोऽर्थो यस्य । कप् ।) स्पष्टः । इत्यमरः । ३ । १ । ५४ ॥

भिया, स्त्री, (भीयते इति । भी + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति अङ् । इयङ् । टाप् ।) भयम् । इति हेमचन्द्रः । २ । ३०६ ॥

भिरिण्टिका, स्त्री, श्वेतगुञ्जा । इति राजनिर्घण्टः ॥

भिल्ल, पुं, (भिलयति भिलतीति वा । भिल् + बाहुलकात् । लक् ।) म्लेच्छजातिविशेषः । (?)
इति भाषा । यथा, पैठीनसिः ।
"माला भिल्लाः किरातास्त्र सर्व्वेऽपि म्लेच्छ-
जातयः ॥"
अपि च ।
"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥"
इति प्रायश्चित्ततत्त्वम् ।
स च मातृब्राह्मण्यां तीवराज्जातः । यथा,—
"पुलिन्दमेदभिल्लाश्च पुत्रो भल्लश्च माचकः ।
कुन्दकारी कोलको वा ब्रह्मपो हलिकस्तथा ।
एते वै तीवराज्जाताः ब्राह्मण्यां मातृकाश्च वै ॥"
इति पराशरपद्धतिः ।

भिल्लगवी, स्त्री, (भिल्लानां गवी ।) गवयी । इति राजनिर्घण्टः ॥

भिल्लतरुः, पुं, (भिल्लप्रियतरुः । लोध्रस्यैव हि भिल्लाद्यैर्भूरुकादिकं कुर्म्मन्तीति प्रसिद्धत्वात् तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिल्ली, स्त्री, (भिल्ल + ङीप् । भिल्लानां प्रियत्वाद्वा तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिष, इ भये । भीषधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भिषं भिषणं भिषति । इति दुर्गादासः ॥

भिषक्, [ज्] बिभेति रोगो यस्मादिति । भीति भीषाम् + "भियः षुक् ह्रस्वश्च ।" उणा० १ । १३७ । इति अजिः षुगागमो ह्रस्वश्च ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ (अस्य प्राशस्त्यादिकं यथा,—
"भिषग्बुभूषुर्मतिमान् अतः स्वगुणसम्पदि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्याद् यथा नृणाम् ॥
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥
सम्यक् प्रयोगं सर्व्वेषां सिद्धिराख्याति कर्म्मणाम् ।
सिद्धिराख्याति सर्व्वैश्च गुणैर्युक्तं भिषक्तमम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
"शास्त्रावगाहनपरीष्टिक च कर्म्मादपालने ।
भिषक्चतुष्पथे हि भिषग्व्यवहारी मतः ॥"
यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरं प्राप्य भीरुरिवाहवम् ॥
यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि ।
अर्द्धवेदधरावेतावेकपक्षाविव द्विजौ ॥
ओषध्योऽमृतकल्पास्तु शस्त्राशनिविषोपमाः ।
भवन्त्यज्ञैरुपहृतास्तस्मादेतान् विवर्ज्जयेत् ॥
स्नेहादिष्वनभिज्ञो यः छेद्यादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्मनिर्वोढुं द्विचक्रः स्यन्दनो यथा ॥"
इति सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ।)

एकदेशीयभिषग् यथा,—
"अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित्।
रोगिभ्योऽर्थं समादत्ते स एकाधीरसद्भिषक्॥"
इति ज्योतिस्तत्त्वम्॥
तस्यान्नस्याभोज्यत्वं यथा,—
"शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः।
चिकित्सकस्य क्रूरस्य तथा चोन्मत्तजीविनाम्॥
शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासं व्रती भवेत्॥"
व्रती यावकेन। तत्र शिशुवधम्। इति प्रायश्चित्तविवेकः॥ अपि च।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम्॥"
इति मानवे ४ अध्यायः॥
(शतधन्वनः शैवन: पुत्रः। यथा, हरिवंशे। ३८। ६।
"सतवर्म्मापिवक्त्रैवो शतधन्वा तु मध्यमः।
देवर्षेर्वचनात् तस्य भिषगेतरवश्च यः॥"
औषधम्। यथा, ऋग्वेदे। १। २४। ९।
"शतं ते राजन् भिषजः सहस्रमुर्व्वी
गभीरा सुमतिष्टे अस्तु॥"
"हे राजन्! वरुण! ते तव शतं भिषजः सहस्रं व्याधिनिवारकाणि शतसहस्रसंख्याकान्यौषधानि वैद्या वा सन्ति॥" इति तद्भाष्ये सायनः॥)

भिषक्प्रिया, स्त्री, (भिषजः प्रिया।) गुडूची। इति राजनिर्घण्टः॥
(विवृतिरस्या गुडूचीशब्दे ज्ञातव्या॥)

भिषग्जितं, क्ली, (भिषजा जितम्।) औषधम्। इति त्रिकाण्डशेषः॥ (चिकित्सा। यथास्य पर्य्यायः।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
इति वैद्यकरत्नमालायाम्॥)

भिषग्भद्रा, स्त्री, (भिषजि औषधौ वैद्ये वा भद्रा शुभदायिका।) भद्रदन्तिका। इति राजनिर्घण्टः॥

भिषङ्माता, [ऋ] स्त्री, (भिषजां मातेव।) वासकः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायः।
"वासको वाशिका वासा भिषङ्माता च सिंहिका।
सिंहास्यो वाजिदन्ता स्यादाटरूषोऽटरूषकः॥
आटरूषो वृषस्ताम्रः सिंहपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भिष्टा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ+"अन्येभ्योऽपीति डः। ततः पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरः। २। ९। ४९॥ अस्य रूपान्तरम्। भिक्षिटा। भिस्सिटा। भिस्सिटा। भिस्सिका। इति तट्टीकासारसुन्दरी॥

भिस्सा, स्त्री, (बभस्तीति। भस दीप्तौ+बाहुलकात् सः। हस्वेऽपि बहुलमितीत्वम्। बाहुलकेति भाष्यप्रयोगाल्लोकेऽपि। यद्वा, भिदमिति भिन्। भिद्+क्विप्। भिदं स्यतीति। षो+"आतोऽनुपसर्गे कः।" इति कः। पृषोदरादित्वात् साधुः।) अन्नम्। इत्यमरः। २। ९। ४८॥ (अस्याः पर्य्यायो यथा,—
"भक्तमन्नं तथान्धश्च क्वचित् कूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि भाषितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

भिस्सिटा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ+डः। पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरटीकासारसुन्दरी॥

भी, ग लि भये। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-अनिट्।) ग, भीनाति। लि, भिनाति। भीनः भीनिः। लिनैव क्र्यादित्वसिद्धौ गणकरणं प्वादित्वमिकल्पार्थं चकारात् भीनाथ। इति दुर्गादासः॥

भी, ञि लि भये। इति कविकल्पद्रुमः॥ (ह्वा०-पर०-सक०-अनिट्।) ञि, भीतोऽस्ति। लि, बिभेति। इति दुर्गादासः॥

भीः, स्त्री, (भी भये+सम्पदादित्वात् क्विप्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, आर्य्यासप्तशत्याम्। ३८७।
"पूर्व्वाधिको सखिनाम् बहुमानः प्रेमगर्व्वविश्वासः।
भीरधिकेयं कथयति रागं बालाविभक्तमिव॥")

भीतं, क्ली, (भी लि भये+क्तः।) भयम्। भययुक्ते, त्रि। इति मेदिनी। ते, ३०॥ (यथा, मनुः। ७। ९४।
"यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्व्वं प्रतिपद्यते॥")

भीतिः, स्त्री, (भी+क्तिन्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, मार्कण्डेये। ८४। १६।
"दुर्गे! स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥")
कम्पः। इति विश्वः॥

भीमं, त्रि, (बिभेत्यस्मादिति। भी+"भियः षुक्वा।" उणा० १। १४७। बिभेतेर्मक् धातोर्वा षुगागमश्च। इति मक्।) भयहेतुः। तत्पर्य्यायः। भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भयानकम् ७ भयङ्करम् ८ प्रतिभयम् ९। इत्यमरः॥ १। ७। २०॥ (यथा, रघुः। १। १६।
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥")

भीमः, पुं, (बिभेत्यस्मादिति। भी+मक्।) भयानकरसः। यथा,—
"भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः॥"
इत्यमरटीकायां भरतः॥
शिवः। (यथा, मार्कण्डेये। ५२। ७।
"भवं शर्व्वं तथेशानं तथा पशुपतिं प्रभुः।
भीमसुग्रं महादेवमुवाच स पितामहः॥"
विष्णुः। यथा, महाभारते। १३। १४९। ५२।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः॥")
मध्यमपाण्डवः। (यथा, महाभारते। १। १२३। १३।
"तस्मान्नाम्ना महाबाहुर्भीमो भीमपराक्रमः॥"
अस्य विवरणादिकं भीमसेनशब्दे द्रष्टव्यम्॥)
अम्लवेतसः। इति मेदिनी। मे, २१॥ महादेवस्याष्टमूर्त्त्यन्तर्गताकाशमूर्त्तिः। यथा। भीमाय आकाशमूर्त्तये नमः। इति तिथ्यादितत्त्वे शिवपूजाप्रयोगः॥ (गन्धर्व्वविशेषः। यथा, महाभारते। १। ६५। ४१।
"भीमश्चित्ररथश्चैव विख्यातः सर्व्वविद्वशी॥"
पुरुवंशीयस्य ईलिनस्य पुत्रः। यथा, तत्रैव। १। ९४। १८।
"ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान्।
दुष्मन्तं शूरभीमौ च प्रवसुं वसुमेव च॥")

भीमनादः, पुं, (भीमो भैरवो नादो यस्य।) सिंहः। इति शब्दचन्द्रिका॥ (भीमो नादः शब्दः। इति विग्रहे भयानकशब्दः। यथा, चातकाष्टके। १।
"वातैर्विधूनय विभीषय भीमनादैः
सञ्चूर्णय त्वमथवा करकाभिघातैः।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद! चातकस्य॥"
भयानकशब्दविशिष्टे, त्रि। यथा, महाभारते। १। १५६। ३१।
"भीमनादं सुतास्त्रोढं सौरथरङ्ग महारवम्॥")

भीमरथः, पुं, (भीमो भयानको रथोऽस्य।) तामसमन्वन्तरजातासुरविशेषः। स च कूर्म्मरूपिणा हरिणा हतः। यथा,—
"हरिणा कूर्म्मरूपेण हतो भीमरथोऽसुरः॥"
इति गारुडे गयामाहात्म्ये ८६ अध्यायः॥
(धृतराष्ट्रस्य पुत्रभेदः। यथा, महाभारते। १। ११७। ११।
"उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः॥")

भीमरथी, स्त्री, अवस्थाविशेषः। यथा,—
"सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणां दुरतिक्रमा॥"
इति शब्दमाला॥
अपि च।
"सप्तसप्ततिवर्षान्ते सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणामतिदुस्तरा।
तामतीत्य नरो योऽसौ दिवानि याति जीवति॥
क्रतुभिस्तानि तुल्यानि शुभकर्म्मप्रदर्शिभिः।
मतिः प्रदर्शिता विद्योज्ज्वलनं मनभावनम्।
ध्यानं गिरा शुभा चान्नं भीमरथ्याः फलश्रुतिः॥"
इति वैद्यकम्॥
नदीभेदः। यथा राजनिर्घण्टे।
"मलापहा भीमरथी च कृष्णा
यथा च तथा शकलाम्बुगा गुणैः॥"

चक्रवर्तिनो गङ्गायां भार्य्यायां जातः । स परमधर्म्मात्मा महावीरः । पितुः सत्यवतीकन्याविवाहार्थं पितृराज्यं त्यक्त्वा, यथ स्वस्य विवाहं त्यक्त्वा चक्रे । इति कौमारव्रतम् । तस्योत्पत्तिर्यथा,—

"अथ तामष्टमे जाते पुत्रे प्रहसतीमिव ।
उवाच राजा दुःखार्त्तः परीप्सन् पुत्रमात्मनः ॥
मा वधीः कासि कस्यासि किं च हंसि सुतानिति ।
पुत्रघ्नि ! सुमहत् पापं सम्प्राप्तं ते सुगर्हितं ॥"
गङ्गोवाच ।
"पुत्रकाम ! न ते हन्मि पुत्रं पुत्रवतांवर ! ।
जीर्णस्तु मम वासोऽयं यथा स समयः कृतः ॥
अहं गङ्गा जह्नुसुता महर्षिगणसेविता ।
देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह ॥
अष्टौ ये वसवो देवा महाभागा महौजसः ।
वशिष्ठशापदोषेण मानुषत्वमुपागताः ॥
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते ।
मद्विधा मानुषी धात्री लोके नास्तीह काचन ॥
तेषां जननीहेतोर्मानुषत्वमुपागता ।
जनयित्वा वसूनष्टौ जिता लोकास्त्वयाक्षयाः ॥
देवानां समयस्त्वेष वसूनां संश्रुतो मया ।
जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति ॥
तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः ।
स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम् ॥
एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः ।
मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम् ॥"
इत्यादिपर्व्वणि भीष्मोत्पत्तिनाम १०० अध्यायः ॥

भीष्मजननी, स्त्री, (भीष्मस्य जननी माता ।) गङ्गा । इति राजनिर्घण्टः ॥

भीष्मपञ्चकं, क्ली, (भीष्मेण सत्तमुपदिष्टं वा पञ्चकं पञ्चाहव्याप्यमेकादश्यादिपूर्णिमान्तपञ्चतिथिविहितव्रतम् ।) कार्त्तिकशुक्लपक्षीयैकादश्यादिपूर्णिमान्तपञ्चतिथिविहितव्रतविशेषः । यथा,—

दिलीप उवाच ।
"भगवन् ! यत् त्वया प्रोक्तं भीष्मस्य च व्रतं महत् ।
माहात्म्यं श्रोतुमिच्छामि तस्य मे वद सत्तम ! ॥
कथं चारब्धं किं दानं को विधिः कस्य पूजनम् ।
किं फलं तेन चाप्नोति तन्मे वद विस्तरात् ॥"
वशिष्ठ उवाच ।
तद्भीष्मपञ्चकमिदं माहात्म्यं विधिपूर्व्वकम् ।
कथयामि महाराज तेऽहं तव मतं पुरा ॥
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
वैशाली सर्व्वतीर्थानि च अश्वमेधादिकानि च ॥
एतत्पञ्चकमाख्यातं विष्णुना परिभाषितम् ।
तथा भीष्मपञ्चकं सर्व्वं भीष्मेण कृतं पुरा ॥
भीष्मं प्रति हरिणा प्रोक्तं धर्म्मात्मा सत्यवादिनम् ।
तेन चैव पुरा राजा कृतं व्रतमनुत्तमम् ॥
आकैशोरे च तज्ज्ञातं याति भीष्मस्य पञ्चकम् ।
विष्णोर्वै वासुदेवस्य वशिष्ठ वहन्विहं हिम ॥"

वशिष्ठ उवाच ।
"शृणु राजन् ! प्रवक्ष्यामि व्रतं सौभाग्यदायकम् ।
एतद्धि भीष्मपञ्चाख्यं विष्णुतुष्टिप्रदायकम् ॥
कार्त्तिके मासि राजेन्द्र ! प्रारभेदेकादशीतिथिम् ।
यावत् पञ्चदशी रम्या भविता चन्द्रपूर्णिता ।
पञ्चभीष्ममिति ख्यातं त्रिदशः पूजकाः स्मृताः ॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि ।
स्नात्वा मध्याह्ने पुण्ये नद्यादौ निर्म्मले जले ॥
तर्पयेद्भीष्ममुद्दिश्य कुर्य्यात्पितामहम् ।
तिलैर्भिन्नाक्षतैश्चैव जलाञ्जलिभिरेव तैः ॥
वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
तिलतोयाञ्जलिं दद्यात् प्रयच्छेद्भीष्मसंज्ञिने ॥
अनपत्यं कौरवेन्द्रं कुर्य्यादाचमनं ततः ।
अर्घ्यं दद्याद्यथाविधि चन्दनादिभिरार्च्चनैः ॥
अर्घ्यं दद्याद्यथाक्रमं च मन्त्रेणानेन भूपते ! ॥
वसूनामवताराय शन्तनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे ॥
इत्थं समापयेद्राजन् ! भीष्मपञ्चविधिं नरः ।
नियमेनोपवासेन पञ्चगव्येन वा पुनः ॥
पयोमूलफलाहारैर्हविष्यान्नाशनेऽपि वा ।
नरो वा यदि वा नारी सुस्नातो दिवं व्रजेत् ॥
भुङ्क्ते स विपुलान् भोगान् कार्त्तिके च व्रतेऽपि यः ।
अतोऽप्यतो भवेत् पञ्चभीष्माख्यं परिपूर्णितम् ।
श्रुत्वेदमश्वमेधस्य भक्त्या श्रद्धया सह ।
इम्पती च यथा भीष्मं लब्ध्वा तौ सुमङ्गलम् ॥
अस्याचारीत विप्रेन्द्र ! व्रतं साम्बो हि तत् पुरा ।
प्राप्तं राज्यं महीमितां धनधान्यसमन्विताम् ॥
प्रद्युम्नः प्रचुरान् कामान् व्रतकामो यथा सुधीः ॥
दिव्याभरणभूतौ तौ दिव्यगन्धानुलेपितौ ।
दिव्यदेहविमानेन सर्व्वलोकस्वर्गवासिनौ ।
अप्सरोगीतनृत्येन स्तूयौ देवगन्धर्व्वैः ।
अच्युतो विष्णुलोकञ्च भीष्मपञ्चव्रतानुगे ॥"
ब्रह्मोवाच ।
"इत्थेतत् कथितं वत्स ! माहात्म्यं कार्त्तिकोद्भवम् ।
भीष्मपञ्चकमाहात्म्यं पवित्रार्थं पुरातनम् ॥
तत् कर्म्म कुरु विप्रेन्द्र ! यदि ते भक्तिरच्युते ।
विचक्षणः कामपरा वचसा शुभमीदृशं ॥"
"प्रचलन्ति मनांसि यदि ते वै
भूसुरमध्ये भवद्गृहात् सुखे ॥
मतिश्च भक्त्या भगवद्द्विजः
कथाशुभेन स्तुतं प्रयाति ॥
कलिमलमथनं मानवो देवदेवं
शुभदमवनमीशान् भोजयित्वा च मानि ।
हरिगुणमभिवीक्ष्य धीरवादीरेभावे-
र्विविधजलजस्थालीलयकं यति वै ॥
इत्थं कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः ।
सर्व्वपापविनिर्म्मुक्तः स हरेः याति रविम् ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १२६ अध्यायः ॥

अपि च ।
"अतः परं प्रवक्ष्यामि ततः स्याद्विश्वकामदे ।
चातुर्म्मास्ये तत्समाप्तौ कार्त्तिके भीष्मपञ्चकम् ॥
ततः शिवतमं शुक्ल एकादश्यां समाचरेत् ।
स्नात्वा नित्यञ्च विधिवत् कृत्वा देवं केशवम् ॥
पञ्चगव्येन प्रत्यहं पञ्चगव्येन वारिभिः ।
स्नापयित्वा वपुः पश्चाद्देवं सम्पूजयेत् ॥
कृताञ्जलिपुटो भूत्वा दिक्षः पश्चिमं चरेत् ।
नैवेद्यं परमान्नञ्च दद्यादोदनं ततः ।
ॐ नमो वासुदेवाय इतीरितिवोदकम् ।
अष्टोत्तरं शतञ्चैव जप्त्वा नित्यं तु होमयेत् ॥
प्रथमेऽह्नि हरेः पादौ अर्च्चयेत् पद्मैर्हिताय वै ।
द्वितीये जानुदेशं नाभिं भक्त्या चार्च्चयेत् ॥
स्कन्धौ चतुर्थे चाभ्यर्च्य पञ्चमेऽह्नि शिरोऽर्च्चयेत् ।
सात्त्वा भूमिशायी स्यात् स्याद्धोमं प्राशयेत्
क्रमात् ॥
भीष्मपञ्चकं व्रतं हि च पञ्चमे पञ्चकव्रतम् ।
नक्तं कुर्य्यात् पञ्चदश्यां ततो ब्राह्मणभोजनम् ॥"
इति गारुडे भीष्मपञ्चाख्यितं नाम १२४ अध्यायः ।

अन्यपञ्चकम् । यथा,—
"आरभ्यैकादशीं यत्र दिनानि पञ्च चाचरेत् ।
भगवत्प्रीतये भीष्मपञ्चकं यदि मानवाः ।
तत्र प्रायोक्तं पौर्णमास्यां कुर्य्यात् कार्त्तिके ।
तथा वक्ष्ये शुक्लायामपि गवमोक्षणम् ।
पैतामहादिसन्तर्प्य गयायां पिण्डदानेन च ।
यमदंष्ट्रः कार्त्तिके कुर्य्यात् श्राद्धं पापादिभिः
विधिम् ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥

भीष्मरत्नं, क्ली, (भीष्मं भयानकं रत्नं शुभमणिः ।) हिमालयोत्तरदेशजातशुभ्रवर्णप्रस्तरविशेषः । तस्योत्पत्त्यादि यथा,—

सूत उवाच ।
"हिमवदुत्तरदेशे वीर्य्यं पतितं सुरविद्विषः ।
सम्प्राप्तमुत्तमामाकरतां भीष्ममणीनाम् ॥
शुक्लाः शङ्खाब्जनिभाः स्योनाकसदृशाः
प्रभावतः ।
प्रभवन्ति ततस्तस्मात् वज्रनिभा भीष्मपाषाणाः ।
हिमादिभवितरं गृहमपि सहसा विशन्ति नः ।
भीष्ममणिं धीरादिष्ट च कण्ठे सर्व्वदा करोति ।
शुभसुतसस्तं सन्ततं तारकाप्रभविभूषण ! ।
विशति तानि वसन्ति सर्व्वाङ्गेण सदैव ॥"
विषमावासपन्नं वै तमस्यविनाशिनः समी-
पेऽपि ।
दीप्तिमत्प्रमपूर्णपदवधारणमीशे हिंसाः ।
तस्योपरिगतोऽपि भवति भयं च नापि
सतुणभिरतम् ।
भीष्ममणिर्मुक्तः सतत्र संप्राप्तपुष्पिताः ।
विषमशेष विज्ञा अग्निपूर्व्वादिको भवति ।
सात्त्विकत्वसमुद्भवापि दर्शनमात्रसिद्धि
विचरन्ति ।
सर्व्वकार्य्यविधिनिशाकरप्रवाचि मोक्षादि भवन्ति ॥

वैश्वानरार्ककाभं पवनं पीतप्रभं प्रभाहीनम् ।
मलिनद्युतिं विवर्णं दूरात् परिवर्ज्जयेत् प्राज्ञः ॥
मूल्यं प्रकल्पमेषां विबुधवरैर्देशकालविज्ञानात् ।
दूरे भूतानां बहु किञ्चिन्निकटप्रसूतानाम् ॥”
इति गारुडे भीष्मरत्नपरीक्षा नाम ७६ अः ॥

भीष्मसूः, स्त्री, (भीष्मं सूते प्रसूते इति । सू प्रसवे + क्विप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥

भीष्माष्टमी, स्त्री, (भीष्मस्य अष्टमी भीष्मनाम्निका अष्टमी वा ।) माघशुक्लाष्टमी । तत्र भीष्मस्य तर्पणादिकं कर्त्तव्यम् । यथा, भविष्योत्तरे ।
“शुक्लाष्टम्यान्तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥”
धवलधृता स्मृतिः ।
“अष्टम्यान्तु सिते पक्षे भीष्माय तु तिलोदकम् ।
अप्रज विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः ॥”
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणशूद्रयोरप्यधिकारः । द्विजातय इति सम्बोधनम् ॥ स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम् ।
“मध्याह्नव्यापिनी ग्राह्या श्राद्धे भीष्माष्टमी तिथिः ।
स्नाने च तर्पणे दाने ग्राह्या सूर्य्योदयी परा ।
यदा कदाचित् कुम्भार्कं गता सूर्य्योदयी परा ।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं श्राद्धमेव च ॥
यदेकस्मिन् भवेच्चापि कदाचिन्नाकरी द्वयम् ।
भीष्माष्टमी द्वयं चापि तदा ग्राह्या परा तिथिः ॥
ब्राह्मणाद्यन्यवर्णानां यः करोत्यौर्द्ध्वदैहिकम् ।
स वर्णसमतां याति इह लोके परत्र च ॥”
इति मरीचिवचनन्तु भीष्मश्राद्धेतरपरम् ॥
तथा च स्मृतिः ।
“ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति ॥
अत्र वर्णजलदाननिषेधस्तु प्रकरणबलादपि श्राद्धादिविषय इति श्रीदत्तः ॥ तर्पणमन्त्रस्तु ।
“वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥
भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥”
इत्यर्घ्यमन्त्रः । पुत्रपौत्रोचितामित्यभिधानात् पितृकर्म्मरीत्या । अतएव पितृतर्पणानन्तरं चतिपस्तु तत्पूर्व्वं तर्पयेत् । इति संवत्सरप्रदीपादयः ॥ इति तिथ्यादितत्त्वम् ॥

भुक्तं, त्रि, (भुज् + कर्म्मणि क्तः ।) भक्षितम् । इत्यमरः । ३ । १ । ११ ॥ (यथा, मनुः । २ । ५५ ।
“पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति ।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम् ॥”
उपभुक्तम् । यथा, रघुः । ३ । ७ ।
“महीमहीभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरा ॥”
भावे क्तः ।) भक्षणी, स्त्री । इति त्रिकाण्डशेषः ॥
(यथा, रामायणे । २ । ५८ । १२ ।
“आसितं शयितं भुक्तं सूत ! रामस्य कीर्त्तय ।
जीविष्याम्यहमेतेन ययातिरिव साधुषु ॥”)

भुक्तसमुज्झितं, त्रि, (आदौ भुक्तं पश्चात् समुज्झितं परित्यक्तम् । स्नातानुलिप्तवत्समासः ।) पूर्व्वं भुक्तं तत् पश्चात् समुज्झितं त्यक्तम् । तत्पर्य्यायः । फेला २ । इत्यमरः । २ । ९ । ५६ । पिण्डम् ३ फेलिः ४ । इति भरतधृतरभसः ॥

भुक्तिः, स्त्री, (भुज् + क्तिन् ।) भोजनम् । इति शब्दरत्नावली । भोगः । यथा,—
“भुक्तिस्त्रिपुरुषी सिद्ध्येदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
आहर्त्ता शोधयेद्भुक्तिमागममपि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्रादिषु न किञ्चन ॥”
इति दायतत्त्वम् ॥
(यथा, मनुः । ८ । २५२ ।
“एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च ॥”)
रविभुक्तिर्यथा,—
“षाड्शभक्षो मेषे वृषः षाह्वौ घटे वृषे ।
दशैव मकरे चन्द्रे मतानि प्रतिवासरम् ।
कुलीरसिंहप्रमदातुलालिकार्म्मुकेषु च ।
मतान्येकादश तथा रविभुक्तिं प्रचक्षते ॥”
इति ज्योतीरत्नमाला ।
भोगः । दखल इति पारस्यभाषा । स च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः । यथा । लिखिताद्यभावे दिव्यमाह याज्ञवल्क्यः ।
“प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥”
इति व्यवहारतत्त्वम् ॥
तद्विवरणं यथा । अथ भुक्तिः । तत्र याज्ञवल्क्यः ।
“पश्यतोऽब्रुवतो हानिर्भूमेर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥”
विवादमकुर्व्वतः पश्यतः भूस्वामिनः परेणासपिण्डादिना भुज्यमानाया भूमेर्विंशतिवर्षनिवृत्ता स्वत्वहानिः । अत्र लोकव्यवहारकर्म्मत्वाद्वर्षगणना सावनेन । यथा च विष्णुधर्म्मोत्तरम् ।
“सर्व्वाण्युपास्याण्यथ सावनेन
लोकस्य यत् स्याद्व्यवहारकर्म्म ॥”
तत्रैव ।
“सावने च तथा मासि त्रिंशत् सूर्य्योदयाः स्मृताः ॥”
इति ॥
विशेषयति व्यासः ।
“वर्षाणि विंशतिं यस्य भूर्भुक्ता तु परैरिह ।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति ॥”
समर्थस्य बालत्वादिदोषरहितस्य । धनस्य दशवर्षनिवृत्ता स्वत्वहानिः । तथा च मनुनारदौ ।
“यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥”
सन्निधिग्रहणात् असमक्षमेव प्रोषितादिधनिरेकेण परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न रचयति नासौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यतीत्यर्थः । गौतमः । अजड़ापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति । जड़ो विकलेन्द्रियः । पौगण्डः पूर्णोऽनुत्पन्नश्मश्रुगण्डः कपोलो यस्य सः । तदाह नारदः—
“बाल आषोड़शाद्वर्षात् पौगण्डश्चापि शब्द्यते ॥”
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम् । तत्पाठेऽपि अपौगण्डस्तु पौगण्ड इति द्विरूपकोषादविरोधः । तस्माद्यथा जनादिरिव धनादद्यवर्षविंशतिवर्षादिकालैर्भोग एव स्वत्वं जनयति । यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तदेव कुसुममिति । स्वामिना चापरित्यक्तेऽपि प्राक्प्रोक्तकालीनभोगात् स्वाम्यमन्यस्य भवति । यथा जयेन राज्ञः परराष्ट्रधन इति । एवमेव श्रीकरवालोकमोल्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचण्डेश्वररत्नाकरवर्द्धमानोपाध्यायप्रभृतयः ॥ व्यवहारोऽप्येतादृगेव । एतद्विरुद्धवचनान्यन्यथा व्याख्येयानि । तन्नोपेक्षया स्वत्वहानिं भुक्त्या च स्वत्वमाह नारदः—
“भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते ।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे ॥”
अतएवाह बृहस्पतिः—
“स्थावरं सिद्धिमाप्नोति भुक्त्या हानिरुपेक्षया ।”
उपेक्षया क्षमया । तत्कारणञ्च स्वामिनः प्रीतिलज्जाभयवैक्लव्यदयाशुल्कादि । एतच्च विंशतिवर्षात् पूर्व्वं स्वत्वसिद्धिबाधकधनयाचनादेरनुपलम्भ एव स्वत्वम् । एवं दशवर्षात् पूर्व्वं स्वत्वसिद्ध्यदोषमावबादैरनप्रदानादौ एव स्वत्वम् । तत्तत्कालपरतस्तु भूमौ वादिधने च स्वत्वमिति । पूर्व्वं तत्तत्काक्षकभोगे तु चौर्य्यदोषो भवत्येव ॥ ० ॥ भोगे तु स्वत्वहानिमाध्यादीनां वारयति पश्यतोऽब्रुवत इत्यभिधाय याज्ञवल्क्यः—
“आधिसीमोपनिःक्षेपजड़बालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥”
आधिर्बन्धकद्रव्यम् । उपनिःक्षेपः ।
“वासनस्थमनाख्याय समुद्रं यन्निधीयते ॥”
इति नारदोक्तिः ॥
वासनं निःक्षेपाधारभूतसम्पुटादिकम् । समुद्रं मुद्रादियुतम् । जड़ो बुद्धिविकलः । बालोऽप्राप्तषोडशवर्षः । उपनिधिः प्रीत्या भोगार्थमर्पितः । एतच्च आध्यादिभिर्व्वहिर्पणेन विना अन्यानि यानि पुष्पभोगकालेन स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति ॥ ० ॥ मिताक्षरायां स्मृतिः—
“द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया ।
भुक्तिरेव तु गुर्व्वी स्यान्न दिव्यं न च साक्षिणः ॥”

...ब्रह्मणो गङ्गायां भार्य्यायां जातः। स परम-
...आत्मा महावीरः। येन पितुर्दाशकन्या-
...लाभार्थं चिरराज्यं त्यक्तं, यश्च भगवान् विवाहं
...कृत्वा ऊर्द्ध्वरेता जातः। इति श्रीभागवतम्।
...उत्पत्तिर्यथा,—
"...अथ तामष्टमे काले पुत्रे प्रहसतीव।
...राजा दुःखार्त्तः प्रोवाच सुमनास्तदा।
...वधीः कासि कस्यासि किञ्च वधिसि सुता-
निति।
...हि! सुमहत् पापं संप्राप्तं ते सुगर्हितम्।"
...उवाच।
...कामा! न ते हन्मि पुत्रं पुत्रकामोऽवर।
...क्षीणं मम वासोऽयं यथा न समयः कृतः।
...गङ्गा जह्नुसुता महर्षिगणसेविता।
...कार्य्यसिद्ध्यर्थमुषिता त्वया सह।
...मे वसवो देवा महात्मानो महौजसः।
...वसिष्ठशापदोषेण मानुषत्वमुपागताः।
...जनयिता नान्यस्तेषां भुवि विद्यते।
...मद्विधा मानुषी धात्री लोके नास्ति कदाचन।
...जननीत्वमुपगता।
...जनयित्वा वसवो जिता लोकास्त्वयाक्षयाः।
...चैव समयः कृतो मया।
...जातं मोचयिष्ये जन्मतो मानुषादिति।
...शापाद्विमुक्ता आपवस्य महात्मनः।
...स्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महा-
व्रतम्।
...पर्य्यायवासो मे वसूनां सन्निधौ कृतः।
...पुत्रं विजानीहि गङ्गादत्तमिमं सुतम्।"
...आदिपर्व्वणि भीष्मोत्पत्तिनाम १०० अध्यायः।
...जननी, स्त्री, (भीष्मस्य जननी माता।)
...गङ्गा। इति हारावली।
...पञ्चकं, क्ली, (भीष्मेण सम्प्रदिष्टं वा पञ्चकं
...कार्त्तिकशुक्लैकादश्यादिपूर्णिमान्तपञ्चदिनकर्त्तव्यम्।)
...कार्त्तिकशुक्लपक्षीयैकादश्यादिपूर्णिमान्तपञ्च-
...दिनव्यापकव्रतविशेषः। यथा,—
श्रीनारद उवाच।
"भगवन्! यत् त्वया प्रोक्तं भीष्मस्य च हितं
महत्।
...माहात्म्यं श्रोतुमिच्छामि तस्य मे कथय प्रभो!।
...कथं चाच्युत किं दानं को विधिः कस्य पूजनम्।
...वर्णं तत्र कार्य्यं सर्वं कथय विस्तरात्॥"
ब्रह्मोवाच।
"...तद्भीष्मपञ्चकं श्रेष्ठं माहात्म्यं विधिपूर्व्वकम्।
...वक्ष्यामि समस्तं तत् देवर्षे शृणु सुव्रत।
...वसिष्ठा भृगुर्गर्गा च कलिकल्मषनाशिनी।
...वैष्णवो धर्म्मदाता च कलिकल्मषनाशिनी।
...सम्प्रदायसाध्या विष्णुभक्तिमिच्छता।
...महात्मभिः ... सर्व्वदोषहरा शुभा।
...कार्त्तिकेऽस्मिन् ... सर्व्वात्मा केशवः प्रभुः।
...एवं पुरा दत्ता कृतं व्रतमनुत्तमम्।
...भीष्मः पञ्चभिः ... भीष्मस्य पञ्चकम्।
...विष्णोः; वसिष्ठाद्य ऋषयः सर्व्वे हि विप्र!।"

वसिष्ठ उवाच।
"श्रृणु राघव! प्रवक्ष्यामि व्रतं पौराण्य-
दायकम्।
स्वर्गं भीष्मपञ्चाख्यं विष्णुप्रीतिप्रदायकम्॥
कार्त्तिके मासि राजेन्द्र! प्रारभ्यैकादशीतिथिम्।
यावत् पञ्चदशी रम्या भविता चन्द्रपूर्णिमा।
पञ्चभीष्ममिति ख्यातं तिष्ठ्यः पुण्यदाः स्मृताः॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि।
स्नात्वा समाधिः पुरुषो मध्याह्ने विमले जले॥
तर्पयेद्भीष्मभीमार्थं कुर्व्वन्नपितामहम्।
पितृभिः सितपुष्पैश्च यवाक्षतिभिरङ्गुलैः॥
वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
तिलतोयाञ्जलिं तस्मै प्रयच्छेद्भीष्मवर्म्मणे॥
वसूनामवताराय शन्तनोरात्मजाय च।
अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे॥
एवं समापयेद्राजन्! भीष्मपर्व्वविधिं ततः।
निमन्त्रयेद्भीष्मपञ्चके सम्यगेव च पुनः॥
पयोमूलफलाहारैर्हविष्यैरथवा पुनः।
नरो वा यदि वा नारी सुकृतार्थी दिवं व्रजेत्॥
पञ्चाहं च विधानेन भीष्मं कार्त्तिके च
सर्व्वेषि च॥
अशक्तो भवेत् पञ्चभीष्माणां परिपूर्णितम्।
शुक्लैकादश्युपोषितो भक्त्या ... सह।
दम्पती च तथा भीष्मं कृत्वा तौ सुमहाव्रतम्।
... विप्रेन्द्र! व्रतं ताभ्यां हि तत् पुरा।
प्राप्तं राज्यं महोदैतौ वसुधन्यान्वितम्॥
प्रमुच्य पातकात् कालात् ब्रह्महत्यां यथा सुखे।
दिवानरावरक्तौ तौ दिव्यमाल्यानुलेपिनौ॥
दिव्यदेहौ विमानेन सर्व्वाभरणभूषितौ।
अप्सरोगीतनृत्येन स्तुतौ देवमहर्षिभिः।
सम्प्राप्तौ विष्णुलोकञ्च भीष्मपञ्चकमाश्रये॥"
ब्रह्मोवाच।
"इतीतत् कथितं वत्स! माहात्म्यं कार्त्तिको-
त्तमम्।
भीष्मपञ्चकमाहात्म्यं पौराणिकं पुरातनम्॥
तत् सर्व्वं कुरु विप्रेन्द्र! यदि ते मतिरस्ति।
विशेषः कामलस्य नरस्य सुमनीषिणः॥"
"प्रवक्ष्यामि समोद्य यत्नेन ये ये
भूतानामश्वमेधस्य प्राप्नुवन्ति शुभे॥
सर्व्वत्र ... देवताः
... पूर्व्वं प्रयान्ति॥
कलिमलमयपुण्यप्राप्तिर्भवति देवदेवे
सुमनककलमीमान् भीष्मपञ्चा च यान्ति।
कविरुत्तमसरैर्भौतिकादौनैरादि-
र्विष्णुपक्षे ... चरेत् ये॥
इत्यत् कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः।
सर्व्वपापविनिर्मुक्तः स याति परमां गतिम्॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११९
अध्यायः॥

अपि च।
"यदा हरिर्वै शेते तदा ... आरभेत्।
चातुर्म्मास्ये तत्काम्यात् कार्त्तिके भीष्मपञ्चकम्।
ततः पिण्डदानं शुक्ल एकादश्यां समाचरेत्।
चापाभिषवालं विष्णोः समासे दर्शवेदवित्।
पञ्चैतानि कृतानि पञ्चविधं कार्त्तिके॥
पापविनाशं कर्तुं दद्यात् दैवात् पितृभ्यः।
एतावद् भुक्त्वा दुर्बोधं दिनः पञ्चदिनं नरेत्।
नैवेद्यं परमान्नं च नरोत्तमः प्रदद्यात्।
ॐ नमो वासुदेवाय इति मन्त्रं जपन्नरः।
मध्ये ... सहितं मत्स्यादि तु वर्जयेत्।
प्रथमेऽह्नि हरेः पादौ अर्चयेत् पद्मकैः शुभैः।
द्वितीये बिल्वपत्रैश्च जानुदेशं ... चार्चयेत्।
तृतीये विष्णुनाभिं च पञ्चमेऽह्नि शिरोऽर्चयेत्।
मालत्या भूमिपालो ... मत्स्यमांसं वर्जयेत्
भक्त्या।
भीष्मपञ्चकमेतद्धि च पञ्चमे पञ्चमकम्।
नक्तं कुर्य्यात् पञ्चदश्यां हरौ ...
सायुज्यमाप्नुयात्॥"
इति गारुडे भीष्मपञ्चकं नाम १४ अध्यायः।
पञ्चपञ्चकम्। यथा,—
"आरभ्यैकादशीं पञ्च दिनानि व्रतमाचरेत्।
भगवत्प्रीतये भीष्मपञ्चकं यदि शक्नुयात्।
तत्र प्रार्थनं पौर्णमास्यां कुर्य्यात् कार्त्तिके।
तथा व्रतं शुक्लपक्षे च भीष्मपञ्चकम्।
येनाप्रवाहिना तुष्टाः ... ।
ततः कार्त्तिके कुर्य्यात् स्नात्वा पापादिभ्यो
विधिम्॥"
इति श्रीहरिभक्तिविलासे १६ विलासः।
भीष्मरथं, क्ली, (भीष्मं भयानकं रथं दुर्भिक्षात्।)
विष्णुवाग्योगदिनमास्तुम्बकोपरिस्थितः।
अस्योत्पत्त्यादि यथा,—
सूत उवाच।
"हिमवत्युत्तरे देशे तीर्थं पतितं सुरनिम्नगा।
अन्यप्रसवमायामागरतो भीष्मरथान्।
सुराः सम्भ्रमितास्तत्र कोमकमलिनाः
प्रभायत्।
प्रभवन्ति ततस्तस्मात् यथाविधा भीष्मरथाः।
हिमाद्रिपतितद्वं महत्यां यस्या दिव्यं च।
भीष्मरथं चोपरिष्ट च गम्यं कर्त्तव्यं सदा।
गुरुपूजाकर्ता तद्धैव वारवान्निवृत्ताः॥
दिशामि तामि ... भगवत्पुष्करिणीषु॥"
इति मत्स्यपुराणे हि तत्प्रस्तावविशेषः भगो-
वेद।
शौनकमुखप्रश्नेश्वरात् दुर्व्वाससो दिवा।
... भवन्ति सर्व्व च यति-
तपोविज्ञम्।
भीष्ममर्द्दनदर्पः यस्य ... ।
दिक्पालैर्हि विष्णुः ... ।
... विशिष्टः।
... भीष्मादि ...

घैवलबलाहकाभं मलवं पीतप्रभं प्रभाहीनम् ।
मलिनद्युतिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः ॥
मूल्यं प्रकल्पमेषां विबुधवरैर्देशकालविज्ञानात् ।
दूरे भूतानां बहु किञ्चिन्निकटप्रसूतानाम् ॥”
इति गारुडे भीष्मरत्नपरीक्षा नाम ७६ अः ॥
भीष्मसूः, स्त्री, (भीष्मं सूते प्रसूते इति । सू प्रसवे + क्विप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥
भीष्माष्टमी, स्त्री, (भीष्मस्य अष्टमी भीष्मनाम्निका अष्टमी वा ।) माघशुक्लाष्टमी । तत्र भीष्मस्य तर्पणादिकं कर्त्तव्यम् । यथा, भविष्योत्तरे ।
“शुक्लाष्टम्यान्तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥”
अपरश्च स्मृतिः ।
“अष्टम्यान्तु सिते पक्षे भीष्माय तु तिलोदकम् ।
अन्नश्च विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः ॥”
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणशूद्रयोरप्यधिकारः । द्विजातय इति सम्बोधनम् ॥ स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम् ।
“मध्याह्नव्यापिनी ग्राह्या माघे भीष्माष्टमी तिथिः ।
स्नाने च तर्पणे दाने ग्राह्या सूर्य्योदये परा ।
यदा कदाचित् कुम्भार्द्धं गता सूर्य्योदये परा ।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं श्राद्धमेव च ॥
यद्येकस्मिन् भवेन्नापि कदाचिन्नाकरी इयम् ।
भीष्माष्टमी इयं वापि तदा ग्राह्या परा तिथिः ॥
ब्राह्मणक्षत्रियवर्णानां यः करोत्यौर्द्ध्वदैहिकम् ।
तद्धर्म्मसमवी याति इह लोके परत्र च ॥”
इति मरीचिवचनन्तु भीष्मक्षेत्रपरम् ॥
तथा च स्मृतिः ।
“माघमासात्तु ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति ॥
अपरश्चं जलदानविधिस्तु प्रकरणबलादपि ब्राह्मणादिविषय इति श्रीदत्तः ॥ तर्पणमन्त्रस्तु ।
“वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥
भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥”
इत्यादिर्मन्त्रः । पुत्रपौत्रोचितामित्यभिधानात् पितृकर्म्मोद्देश्या । आद्यश्च पितृतर्पणानन्तरं चान्तिमस्तु तत्पूर्व्वं तर्पयेत् । इति संवत्सरप्रदीपादयः ॥ इति तिथ्यादितत्त्वम् ॥
भुक्तं, त्रि, (भुज् + कर्म्मणि क्तः ।) भक्षितम् । इत्यमरः । ३ । २ । ११ ॥ (यथा, मनुः । २ । ५५ ।
“पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति ।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम् ॥”
उपभुक्तम् । यथा, रघुः । ४ । ७ ।
“मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरा ॥”
भावे क्तः ।) भक्षणं, क्ली । इति त्रिकाण्डशेषः ॥
(यथा, रामायणे । २ । ५८ । १२ ।
“आसितं शयितं भुक्तं सूत ! रामस्य कीर्त्तय ।
जीविष्याम्यहमेतेन ययातिरिव साधुषु ॥”)

भुक्तसमुज्झितं, त्रि, (आदौ भुक्तं पश्चात् समुज्झितं परित्यक्तम् । स्नातानुलिप्तवत्समासः ।) पूर्व्वं भुक्तं तत् शेषं पश्चात् समुज्झितं त्यक्तम् । तत्पर्य्यायः । फेला २ । इत्यमरः । २ । ९ । ५६ ॥ पिण्डम् ३ पिलिः ४ । इति भरतधृतरभसः ॥
भुक्तिः, स्त्री, (भुज् + क्तिन् ।) भोजनम् । इति शब्दरत्नावली ॥ भोगः । यथा,—
“भुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
आहर्त्ता शोधयेद्भुक्तिमागमञ्चापि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्त्रादिषु न किञ्चन ॥”
इति दायतत्त्वम् ॥
(यथा, मनुः । ८ । २५२ ।
“एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च ॥”)
रविभुक्तिर्यथा,—
“षाडशीतिमुखे मेषे वृषे षण्णी घटे वृषे ।
दशैव मकरे द्वन्द्वे पञ्चाशत्प्रतिभाजनम् ।
कुलीरसिंहमकरतुलालिकार्मुकेषु च ।
मत्स्यैकादश तथा रविभुक्तिं प्रपद्यते ॥”
इति ज्योतीरत्नमाला ।
भोगः । दखल इति पारस्यभाषा । स च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः । यथा । लिखितादभावे दिव्यमाह याज्ञवल्क्यः ।
“प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥”
इति व्यवहारतत्त्वम् ॥
तद्विवरणं यथा । अथ भुक्तिः । तत्र याज्ञवल्क्यः ।
“पश्यतोऽब्रुवतो हानिर्भूमेर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥”
विवादमकुर्व्वतः समक्षं भूस्वामिनः परेणाऽसपिण्डादिना भुज्यमानाया भूमेर्विंशतिवर्षनिर्वृत्ता स्वत्वहानिः । अत्र लोकव्यवहारकर्म्माद्वैगुण्या साधनेन । यथा च विष्णुधर्म्मोत्तरम् ।
“समाद्युमासाम्यत्र शावेन
जीवन्त यत् श्राद्धशतादिकम्मं ॥”
तत्रैव ।
“श्रावणे च तथा माघे विंशत् सूर्य्योदयाः
स्मृताः ॥”
इति ।
विशेषयति व्यासः ।
“वर्षाणि विंशतिं यस्य भूर्भुक्ता तु परैरिह ।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति ॥”
समर्थस्य बाल्यत्वादिदोषरहितस्य । धनस्य दशवर्षैर्निर्वृत्ता स्वत्वहानिः । तथा च मनुनारदौ ।
“यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥”
यत्किञ्चिज्जनाद्यं समक्षमेव प्रेक्षादिकालैर्व्यतिरेकेण परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न रचयति नाबौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यतीत्यर्थः । गौतमः । अजडापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति । जडो विकलेन्द्रियः । पौगण्डः पूतोऽनुत्पन्नश्मश्रुर्गण्डः कपोलौ यस्य सः । तदाह नारदः—
“बाल आषोडशाद्वर्षात् पौगण्डश्चापि
शब्द्यते ॥”
अजापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम् । तत्पाठेऽपि अपौगण्डस्तु पौगण्ड इति द्विरूपकोषादविरोधः । तस्मादुक्तवाक्यादिति वचनाद्दशवर्षविंशतिवर्षादिकालैर्भोग एव स्वत्वं जनयति । यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तदेव कुसुममिति । स्वामिना अपरित्यक्तेऽपि शास्त्रोक्तकालीनभोगात् स्वाम्यमन्यस्य भवति । यथा जयेन राज्ञः परराष्ट्रधन इति । एवमेव श्रीकरपालोकमीक्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचक्रेश्वरनयवर्द्धमानोपाध्यायप्रभृतयः । व्यवहारोऽप्येतादृश एव । एतद्विरुद्धवचनान्यथा व्याख्येयानि । तत्रोपेक्षया स्वत्वहानिं भुक्त्या च स्वत्वमाह नारदः—
“भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते ।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे ॥”
अतएवाह बृहस्पतिः—
“स्थावरं सिद्धिमाप्नोति भुक्त्या स्वामिनुपेक्षया ।”
उपेक्षया क्षमया । तत्कारणञ्च स्वामिनः सुशीलत्वमदेशस्थत्वदयालुत्वादि । एतच्च विंशतिवर्षात् पूर्व्वं स्वत्वविनाश्यत्वे बोपालनादेव तत्प्रभृत्य एव स्वत्वम् । एवं दशवर्षात् पूर्व्वं स्वत्वविनाश्यदोषनपालनादेव तत्प्रभृत्यादौ एव स्वत्वम् । तत्तत्कालपरतस्तु भूमौ गवादिधने च स्वत्वमिति । पूर्व्वं तत्प्राप्तकभोगे तु चौर्य्यदोषो भवत्येव ॥ * ॥ भोगे तु स्वत्वहानिमाध्यादीनां व्यावर्त्तयति पश्यतोऽब्रुवत इत्यभिधाय याज्ञवल्क्यः—
“आधिसीमोपनिःक्षेपजडबालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥”
आधिर्बन्धकद्रव्यम् । उपनिःक्षेपः ।
“वासनस्थमनाख्याय समुद्रं यन्निधीयते ॥”
इति नारदोक्तिः ॥
वासनस्थं निःक्षेपाधारभूतसम्पुटादिस्थम् । समुद्रं मुद्रादियुतम् । जडो बुद्धिविकलः । बालोऽप्राप्तषोडशवर्षः । उपनिधिः प्रीत्या भोगार्थमर्पितः । तत्र आध्यादिभिर्व्यतिरेकेण विना अन्यानि धनानि उक्तभोगकालेन स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति ॥ * ॥ मिताक्षरायां स्मृतिः—
“हरणमात्रैकभोग्यभूजलवाक्यादिषु क्रिया ।
शुक्तिरेव तु पूर्व्वा स्यात् दिव्यं न च साक्षिणः ॥”

याज्ञवल्क्यः ।
"आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।
आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो ॥
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विना कृता ॥"
भुक्त्यागमयोः पूर्वक्रमादागतभोगाद-न्यत्वात् । अतः क्रमागतभोग आगमादबलवान् ।
तथा च बृहस्पतिः:—
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
अव्याहता त्रिपुरुषी भुक्तिरेभ्यो गरीयसी ॥"
त्रिपुरुषभोगमाह व्यासः:—
"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तत् ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः ॥
विना पितामहो यस्य जीवेच्च प्रपितामहः ।
यथाक्रमं जीवतो भोगो विज्ञेयस्त्रिपूरुषः ॥"
आगमोऽपि बलवान् भवति यत्र स्तोकापि भुक्तिरस्ति । तथा च नारदः ।
"विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु ।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् ॥"
इति दीपकलिका ।
तत्र साक्षिणो यथा आगमबलग्रहणो आगमभोग पूर्वापरभावो न निर्णीयते तत्र यत्र भुक्ति-स्वामयो बलोवान् न सम्यक्क्षेपे इति मिता-क्षरा । अर्थात् यथा आगमयोर्बलाबलं निर्णयकाय ।
"सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥"
इति याज्ञवल्क्यवचनाद्विवेचः ।
आगमस्तिति चा बलवत्प्रत्यक्षे प्राप्ते सं भवति चेद् क्रमादिना न आगम इति व्यवहार-माहत्वा । आगमः साक्षिपत्रादिरूपमिति याज्ञ-वल्क्यादीपकलिका । आगमो भवेदान्वेषोपायः क्रयादिरिति मैथिलाः । तत्रान्यैकाभियुक्त आगमकर्त्ता तत्कृतमागमं तत्पुत्रपौत्रौ नाप-मुद्धरेतां किन्तु भुक्तिरेव तत्र प्रमाणम् । विशि-ष्यापि दृश्यते ।
"आगमो दीर्घकालश्च निश्छिद्रोऽन्यरवोज्झितः ।
प्रत्यर्थिसन्निधानश्च पञ्चाङ्गो भोग इष्यते ॥"
इति मूलपाणिभूषणम् ।
तत्पुत्रादिर्न विकसैत मैथिलभूषणम् । आगमो आवेदकर्ता । अथ पुत्रस्य भुक्तिर्भोगमात्रम् ।
भुक्तिमोक्षमात्रयुक्तमिदानीम्बवी ।
"आगमो दीर्घकालश्च निश्छिद्रोऽन्यरवोज्झितः ।
प्रत्यर्थिसन्निधानश्च पञ्चाङ्गो भोग इष्यते ॥"
एतानन्यतमेन दैवः । नारदः स्मृतिवृत्तः ।
यत्र च भूमिरितरवादिनिरर्थवन्निवन्धनम्-पर्यन्तं बलवान्भोगः । सोऽभियुक्त इति यो भोगे विवमादि सोऽभियुक्तः परेतो मृतः अभावात् तत्पुत्रादिरेव तमु-द्धरेत् । तथा नारदः ।
\

"अथ यत्कृद्विवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत् ॥
भोगः केवलभोगः । तथा च स एव । आधौ तु साक्षं दानं यथा कुत्सिततु भागमेति । एव च विवादभोगः बलवानितरपरः । तथाविध-भोगस्यागमं विनापि प्रामाण्यात् । तथा च व्यासः ।
"वर्षाणि विंशतिं भुक्ता स्वामिनाव्याहता सती ।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी ॥
त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः ॥"
एतद्वचनमागमभोगविषयकमिति धर्माधिप-निबन्धभोगविषयकत्वेनाविरुद्धम् । एताडृ-शाभ्युक्तकालं इव व्याख्यानम् ।
"स्मार्त्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
अस्मार्त्ते त्वागमाभावात् क्रमात्त्रिपुरुषागता ॥"
मन्वादिभिरनुपपन्नत्वात् त्रिपुरुषभुक्तिव्यपदेशस्य यत्नमाह न सर्वेषामिति । अतएव नारदः ।
"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः ।
न तच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतम् ॥"
अन्यायेनैवमागममिति मूलमाधिवपाठः । तुरन्वयः । पिता अत्र पितरमारभ्य त्रिभि-रित्यर्थः । यत्तु ।
"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः ॥"
इति दण्डविधायकवचनं तद्भोगमात्रनिरो-धात् न तद्भावार्थपरम् । तदाह स एव ।
"यत्र विप्रतिपत्तिः स्याद्धर्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत् ॥"
एवमेव मूलमाधिः । वस्तुतस्तु अनागममिति दण्डविधायकवचनं चौरदण्डेत्यनपरम् ।
"चौरवच्च परेभ्योऽर्था न दद्याच्च चौर्य्यमिति ।
अनागमं भुज्यमानमपि दण्डयेन्नरपतिः ॥"
इति मननिषेधकनारदवचनैकवाक्यत्वात् । अत्र विप्रतिपत्तिः स्यादिति वचनमन्वितपुरा-परम् । यथैतत्र अर्थशास्त्रमात्रे निष-र्थपरत्व अर्थशास्त्रमात्रे धर्मशास्त्रमेव ।
"हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्त्यै इति वेदविदां मतम् ॥"
इति याज्ञवल्क्यीयार्थशास्त्रवचनस्य बोध-लोभविनिर्णये इति धर्मशास्त्रमवतत्वात् व्य-वहारं कटेत् । अनया ।
"धर्मेणार्थव्यवहारं धर्मार्थसंहितं वचः ॥"
इति कात्यायनोक्तमिति । अपदेशस्तु भागव-तस्तु प्रतिवादिनोऽयथार्थे पुरुषैकदम्भोगा-भिधानं चेत्पुत्रादिभोगस्य तथापि प्रमाणमा-दिशत्तु ।

अथ भुक्तिबलाबलम् ।
तत्र कात्यायनः ।
"भुक्तिस्त्रैपुरुषी सिद्धेदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
अन्यायेन च यद्भुक्तं यदर्थे चलमादिवत् ।
दुष्टन्त्यागमयुक्तेन न तद्भोगेन सिध्यति ॥

विवाहे चोपयेमुक्ते रामामाहिलवैर च ।
हस्तीयैक्षापि कालेन तेषां तत्तु न सिध्यति ॥"
आपद्यो विक्रयपणम् । विवाहो आमात्रा । इति च व्यवहारतत्त्वम् ॥

भुक्तिदः, पुं, (भुक्तिं भोगं ददातीति । भु+दा+"आतोऽनुपसर्गे ।" ३ । २ । ३ । इति कः ।) मुद्गः । इति राजनिर्घण्टः । भोग-दातरि, त्रि ॥

भुग्नः, त्रि, (भुज मोटने+क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) रोगा-दिना कुटिलीकृतः । तत्पर्य्यायः । वक्रः १ । इत्यमरः । ३ । १ । ७१ ॥ वक्रः । इति शब्द-रत्नावलीसंग्रहात् । (यथा,—
"भाद्रपदे कण्ठे स्तने धूमे कुपितवातवान् ।
अतिसारी निष्कारणाभ्यन्तर्धमनीत्रिगुणभ्रमः ॥"
इति वाग्भटे निदानस्थाने द्वितीयेऽध्याये ।
यथा, च भट्टिः । ११ । ८ ।
"भीमे भटस्योरसि भीमा स्रमी
भाहलनः पाणिकरात् भुग्नधा ॥")

भुज, औ श ओ वक्रे । इति कविकल्पद्रुमः । (तुदा०-पर०-सक०-अनिट् ।) वक्रमिति वक्रं करोतीति तौ ध्यर्थम् । औ, भुग्नः । श, भुजति वंशो वायुः । ओ, भोक्ता । इति दुर्गा-दासः ॥

भुज, ध औ पाले । भक्षे । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-अनिट् ।) ध, भुनक्ति । औ, अभौक्षीत् । आर्षं पालनम् अनयोरप तस्मात् पालने परस्मैपदम् । इति बोपदेवः । भुनक्ति पृथिवीं राजा पालयतीत्यर्थः । अन्य-त्रोति तु भुङ्क्ते अन्नो दुःखमपि भुङ्क्ते इति । दिवं मरमानिव भोक्ष्यते मयोमिति रघुः । एवं भुजमधुपरभुङ्क्ते इत्यादि च बोध्यम् । भुजो-द्दे रक्षण भक्षणमात्रस्य पालनेऽपि व्यर्थोऽपि भक्षणम्यस्थिविनवत्थानेन विधिरिति विद्यानिवासः । इति दुर्गादासः ॥

भुजः, पुं स्त्री, (भुज्यते यथा भवतीति । भुज+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । यद्वा, भुज्यतेऽनेनेति । भुज+"घञर्थे क ।" ३।३।१२१ । इति कः । इत्यत्र कारिकोक्तिः कप् । "भुजन्युब्जौ पाण्युपतापयोः ।" ७।३।६१ । इति अपि गुणाभावः कुत्वाभावश्च निपा-त्यते ।) तत्पर्य्यायः । बाहुः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० ॥ बाहः ५ बाहा ६ भुजा ७ दोषः ८ दोषा ९ । इत्यमर-टीकायां भरतः ॥ करः १० । इति हेमच-न्द्रः, ११ ॥ (यथा, रघुः । ३ । ७३ ।
"भुवं भुजङ्गेश्वरमावनारे
भुजः स भूमेर्धुरमाससञ्ज ॥")
तस्य शुभाशुभलक्षणं यथा,—
"शस्ताः नाभ्यावसरा केतकाः सुवर्णवृतेरिमिता ।
अत्यन्त अर्थपीतसायको हि कश्च दीर्घको ।
पिङ्गांशो नैव शुभाख्यौ हिंसौ च विषौ सुभौ ।

आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ।
निःस्वानां रोमशौ ह्रस्वौ श्लिष्टौ करिकरप्रभौ ।”
इति गारुडे ६५ अध्यायः ।
(हस्तिशुण्डः । यथा, महाभारते ।१।२७०।२१।
“नकुलस्तस्य नागस्य समीपपरिवर्त्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ।”)
ग्रहस्फुटीकरणार्थं राशित्रयादूनकेन्द्रभागादिः ।
राशित्रयादधिकनवपर्य्यन्तषड्भान्तरितावशेषः ।
नवराशिभ्योऽधिकं चेत् तदा द्वादशराशिभ्यः
शोधितश्च भुजः स्यात् । यथा,—
“दोस्त्रिभोनं त्रिभोर्द्ध्वं विशोध्यं रवे-
श्चक्रतोऽङ्काधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैकभं त्रिभिः स्यात् पदं
सूर्य्यमन्दोच्चमध्यान्तरार्द्धं भवेत् ॥”
इति ग्रहलाघवम् ।
क्षेत्रस्य परिमाणविशेषः । यथा,—
“कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटिं दोः कर्णतः कोटिश्रुतिभ्याञ्च भुजं वद ॥
इष्टो बाहुर्यः स्यात्तत्स्पर्द्धिन्यां दिशीतरो बाहुः ।
त्र्यस्रे चतुरस्रे वा या कोटिः कीर्त्तिता तज्ज्ञैः ।
तत्कृत्योर्योगपदं कर्णः दोः कर्णवर्गयोर्विवरात् ।
मूलं कोटिः कोटिश्रुतिकृत्योरन्तरात् पदं बाहुः ॥”
इति लीलावत्यां क्षेत्रव्यवहारः ।
भुजकोटरः, पुं, (भुजस्य कोटर इव ।) कक्षः ।
इति हेमचन्द्रः । ३ । २५३ ॥
भुजगः, पुं, (भुजं वक्रं गच्छतीति । गम् + डः । ३ ।
२।३८। इत्यत्र “डप्रकरणेऽन्यत्रापि दृश्यते ।” वार्त्तिकोक्ते
डित् । ततः टिलोपः ।) सर्पः । इत्यमरः ।
१ । ८ । ६ ॥ (यथा, मेघदूते । ६२ ।
“तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता ।
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ॥”)
भुजगदारणः, पुं, (भुजगं दारयतीति । दृ +
णिच् + ल्युः ।) गरुडः । इति राजनिर्घण्टः ॥
भुजगाभोजी, [न्] पुं, (भुजगं आ सम्यक्प्रकारेण
भुङ्क्ते इति । भुजग + आ + भुज + णिनिः ।)
मयूरः । इति राजनिर्घण्टः ॥
भुजगान्तकः, पुं, (भुजगस्य अन्तकः ।) गरुडः ।
इति राजनिर्घण्टः ॥
भुजगाशनः, पुं, (भुजगमश्नातीति । अश + ल्युः ।
भुजगः अशनं यस्येति वा ।) गरुडः । इति
त्रिकाण्डशेषः ॥
भुजङ्गः, पुं, (भुजं वक्रं गच्छतीति । गम + खच् ।
“खच डिद्वा” इति वार्त्तिके डित्पक्षे टिलोपः ।)
सर्पः । (यथा, रघुः । ९ । ७९ ।
“आकाशपूर्व्वमिव सुक्तविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥”)
विट्गः । इत्यमरः । १ । ८ । ६ । मेदिनी च ।
(सीसम् । तद्यथा,—
“सीसं वङ्गञ्च वपञ्च योगेष्टं नागनामकम् ।”
नागनामकम् । नाम: भुजङ्ग इत्यादि ।)
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अपरञ्च तद्यथा ।

“त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शरतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्त्रयम् ।
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ॥”
इति वाभटे उत्तरतन्त्रे त्रयोदशेऽध्याये ।)
भुजङ्गघातिनी, स्त्री, (भुजङ्गं सर्पं सविषं वा
हन्तीति । हन + णिनिः । स्त्रियां ङीप् ।)
क्षुपविशेषः । कङ्कालिका इति ख्यातः । तत्-
पर्य्यायः । खदिः २ सर्पाक्षी ३ चुनकरी ४
सुधा ५ । इति शब्दचन्द्रिका । सर्पनाशिनी च ।
भुजङ्गजिह्वा, स्त्री, (भुजङ्गस्य जिह्वेव आकृति-
र्यस्याः ।) महासमङ्गा । इति राजनिर्घण्टः ॥
(भुजङ्गस्य जिह्वा ।) सर्परसना च । (विवरण-
मस्या महासमङ्गाशब्दे ज्ञातव्यम् ।)
भुजङ्गप्रयातं, क्ली, (भुजङ्गवत्प्रयातं गतिरिव
भङ्गीमान् छन्दविन्यासो यस्य ।) द्वादशाक्षर-
पादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
“यदाद्यश्चतुर्थस्तथा सप्तमश्चेत्-
तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥”
(अधिकन्तु छन्दःशब्दे ज्ञातव्यम् ।)
भुजङ्गभुक्, [ज्] पुं, (भुजङ्गं भुङ्क्ते इति । भुज् +
क्विप् ।) गरुडः । इति शब्दरत्नावली । मयूरः ।
इत्यमरः । २ । ५ । ३० ॥ (मयूरार्थे पर्य्यायो
यथा,—
“मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो बर्ही शिखण्डी नीलकण्ठकः ॥
शुक्लापाङ्गः कलापी च मेघनादः कलाप्यपि ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)
भुजङ्गभोजी, [न्] पुं, (भुजङ्गं भुङ्क्ते इति ।
भुज + णिनिः ।) राजसर्पः । इति हेमचन्द्रः ॥
भुजङ्गमः, पुं, (भुज कौटिल्ये + इगुपधेति कः ।
भुजः कुटिलीभवन् गच्छतीति । भुज +
गम् + “गमेः सुपि वाच्यः ।” ३ । २ । ३८ ।
इत्यस्य वार्त्तिकात् खच् । “खच डिद्वाच्यः ।” इति
डिद्भावे टिलोपाभावः ।) सर्पः । इत्य-
मरः । १ । ८ । ६ । (यथा, रघुः । ६ । ७७ ।
“आरुह्यमद्रीनुदधीन् वितीर्य्य
भुजङ्गमानां वसतिं प्रविष्टम् ॥”)
सीसके, क्ली । इति राजनिर्घण्टः ॥
भुजङ्गलता, स्त्री, (भुजङ्गवत् कुटिला तत्प्रिया
वा लता ।) नागवल्ली । इति राजनिर्घण्टः ।
भुजङ्गहा, [न्] पुं, (भुजङ्गं हन्तीति । हन् +
क्विप् ।) गरुडः । इति त्रिकाण्डशेषः ॥
भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पुष्पं यस्याः ।
“बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।” ५ । ४ । ११३ । इति षच् ।
गौरादित्वात् ङीष् ।) रास्ना । इत्यमरः ।
२ । ४ । ११५ ॥ (रास्ना भिरनार इति कोङ्के ।
तथास्याः पर्य्यायान्तरम् ।
“नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

भुजङ्गाख्यः, पुं, (भुजङ्गस्य आख्या आख्या यस्य ।)
नागकेशरः । इति शब्दमाला सर्पनामके,
त्रि ।
भुजशिरः, [स्] क्ली, (भुजस्य शिर इव ।)
स्कन्धः । इत्यमरः । २ । ६ । ७८ ॥
भुजा, स्त्री, (भुज + टाप् ।) बाहुः । करः । इति
मेदिनी । जे, १३ ॥ (यथा, शिशुपालवधे । ७ । ७२ ।
“अविरतकुसुमावचायखेदा-
न्निहितभुजालतयैकयोपकण्ठम् ॥”)
भुजाकण्टः, पुं, (भुजायाः करस्य कण्ट इव ।)
हस्तनखः । इति हेमचन्द्रः ॥
भुजादलः, पुं, (भुजाया बाहोर्दल इव ।) हस्तः ।
इति त्रिकाण्डशेषः ॥
भुजान्तरं, क्ली, (भुजयोरन्तरं मध्यम् ।) क्रोडम् ।
इत्यमरः । २ । ६ । ७७ ॥ (वक्षः । यथा, रघुः । ३ । ५४ ।
“दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्व्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥”
भुजयोरन्तरं प्रभेदः ।) हस्तप्रभेदश्च ।
भुजिः, पुं, (भुनक्ति भुङ्क्ते वा सर्व्वानिति ।
भुज + “भुजेः किच्च ।” उणा० ४ । १४१ । इति
इः । स च कित् । सर्व्वभक्षकत्वादस्य तथा-
त्वम् ।) वह्निः । इत्युणादिकोषः । (भुज + भावे
इः । भोगः । यथा, ऋग्वेदे । ८ । ४१ । ६ ।
“आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥”
“सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव
भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च
समुद्र वाससमग्निं आहुवे आह्वयामि ।” इति
तद्भाष्ये सायनः । ● । भोक्तरि, त्रि । यथा,
ऋग्वेदे । ८ । ८ । ९ ।
“भुजौ हिरण्यपेशसा कवी गम्भीरचेतसा ॥”
“हे भुजौ हविषां भोक्तारौ ।” इति तद्भाष्ये
सायनः ।)
भुजिष्यः, पुं, (भुङ्क्ते स्वाम्युच्छिष्टमिति भुज्यते
इति वा भुज + “वसिभुजिभ्यां किष्यन् ।”
उणा० ४ । १७८ । इति किष्यन् ।) स्वतन्त्रः ।
हस्तसूत्रम् । दासः । इति मेदिनी । षे, १८ ॥
(यथा, माघे । १५ । ६१ ।
“किमहो नृपाः समममीभि-
रुपपतिसुतैर्नृपत्वभिः ।
वध्यमभिहत भुजिष्यमसुं
यच्च नाधया स्वविरराजकन्यया ॥”)
रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥
भुजिष्या, स्त्री, (भुजिष्य + टाप् ।) दासी ।
(यथा, रघुः । ६ । ५६ ।
“अथाङ्गराजादवतार्य्य चक्षु-
र्याहीति जन्यामवदत् कुमारी ।
नासौ न काम्यो न च वेद सम्यग्
द्रष्टुं न सा भिन्नरुचिर्हि लोकः ॥”)
गणिका । इति मेदिनी । षे, ८८ ॥

भुज्युः, पुं, (भुज्यतेऽसौ इति। भुज पालने+"भुजि-मृङ्भ्यां युक्त्युकौ।" उणा० ३।२१। इति युक्।) भाजनम्। इत्युणादिकोषः। ३। २०३। भोजनम्। (भुङ्क्ते सर्व्वमिति। भुज+कर्त्तरि युक्।) अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। (तन्नामा तुग्रराजपुत्रविशेषः। यथा, ऋग्वेदे। १। ११७। १४।

"अजिन्व ईमिष्वाजनो न भुज्युं
तिरो जभार ह्वरतो अधिभ्योः॥"

भुनक्ति पालयतीति। भुज पालने+युक्। रक्षके, त्रि। यथा, ऋग्वेदे। ८। २२। २।
"पूर्व्यायुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम्।"
"भुज्युं भुजपालकं सर्व्वस्य रक्षकम्।" इति तद्भाष्ये सायणः।)

भुञ्जत्, [त्] त्रि, (भुज्+शतृ।) भोजनकर्त्ता। भुजधातोः शतृप्रत्ययनिष्पन्नम्।

भुञ्जानः, पुं, (भुज्+शानच्।) भोजनकर्त्ता। यथा,—
"भुञ्जानो यद्येषु पात्रमथवा अंशं त्रि पुरम्।"
इति प्रायश्चित्ततत्त्वम्।
(तथा च।
"अजिनस्योर्ध्वं भुञ्जानो भुञ्जानश्चानाद्रात् पिबेत्।"
इति सुश्रुते सूत्रस्थाने। ४६ अ,।)

भुरिज्, [ज्] स्त्री, (भरति धर्म्मं धरतीति। भृ+"भृञ उच।" उणा० २।७२। इति इजिः। धातोरुकारान्तादेशः।) पृथिवी। इत्युणादिकोषः। (द्विवचनान्ते। बाहू। द्यावापृथिव्यौ च। यथा, ऋग्वेदे। ४। २। १४।
"इदं न अश्वो अध्वरा भुरिजो
र्ऋतं येतुः सुध्य आयुधाः॥"
"भुरिजोः विभ्रतः कर्म्मकरणशीलयोः बाह्वोः इति भुरिजौ बाहू नवौः। यद्वा, भुरिजोः द्विवा मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ।"
इति तद्भाष्ये सायणः।)

भुवनं, क्ली, (भवन्त्यस्मिन् भूतानीति। भू+"भूसू-धूभ्रस्जिभ्यश्छन्दसि।" उणा० २।८०। इत्यत्र "अन्येभ्योऽपि दृश्यते।" इत्यनुवृत्तेः क्युन्।) जगत्। (यथा, माघः।१।१।
"दुर्ब्बरं भुवनहितच्छलेन यं
जगज्जनः विनयहताबलम् अयम्।")
सलिलम्। गगनम्। जनः। इति मेदिनी। ने, १०४। चतुर्दशभुवनानि यथा,—
"चतुर्दशविधं ज्ञेयं भुवनं प्रकीर्त्तितम्।
भूर्भुवः स्वर्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः।
अतलः सुतलः श्रेष्ठः वितलो गभस्तिमान् तथा पुनः।
महातलं रसातलं सुतलेषु संयुताः।
सप्त लोकास्तथा पातालं ग्रहतलं तथा।
सुराह्वस्तथोर्द्ध्वो च पातालं सप्तमो भवेत्।
स्थानाः भारताः ख्याताः चन्द्रदिवसात् ताः
स्थिताः।
पवनाः द्वारको ह्यग्ने च तत्र भैरवश्च तदा।

भारतं किम्पुरुषाख्यं तथा हरिवर्षमुत्तमम्।
भारतं हरिवर्षं च तथा किम्पुरुषाह्वयम्।
एतान्यष्टौ तु वर्षाणि पुण्यानि कथितानि तु।
इलावृतः कुरुश्चैव नाम्नश्चैव गर्भस्तिमान्।
नागद्वीपो तथा सौम्यो गन्धर्व्वो वारुणस्तथा।
सागरसंवृतो नवमो मेरुभारतमार्थकः।
एतत्तु भारतं वर्षं कर्म्मभूमिरिति स्मृतम्।
शिवानि शेषवर्षाणि भोगस्थानानि सन्त्यपि।
भागीरथी पावनी च ह्रादिनी ह्लादिनी तथा।
सीता वंक्षुश्च सिन्धुश्च एवं गङ्गाः प्रकीर्त्तिताः।
शुभा कावेरी वेत्रवती विपाशा सुमनोहरा।
चन्द्रभागा च सरयू वितस्तामणिरेका।
एता महानद्यो विख्याताः सप्त पुण्यप्रदाः शुभाः।
हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः।
श्वेतश्च शृङ्गवांश्चैव तथा माल्यवान् गन्धमादनः।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि।
विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा।
लोकालोको महागिरिः तथैवोत्तरमानसः।
एते गिरिनिर्दिष्टाः पर्व्वतास्तासु वराः।
अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।
महातलं रसातलं पातालं सप्तमं स्मृतम्।
कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम्।
रक्तभौमं पीतभौमं श्वेतभौमं च भवन्ति वै।
नानानागाश्च दैत्याश्च सर्प्पाश्च वसन्ति तत्र।
भूमिरं प्राणि कथ्यन्ते भुवनानि चतुर्द्दश।"
इति वह्निपुराणम्।

(भूतजातम्। यथा, ऋग्वेदे। १। १६०। १।
"इमे च तामे भवतीष जतो पुरं विधेय भुवने-
ष्वन्तः।"
तथा च वाजसनेयसंहितायाम्। ८। ९।
"यस्मादिदं विश्वं भुवनमाविवेश तस्मै को
देवः सविता धर्मे नाविषत्।" ॥ मानवम्।
यथा, ऋग्वेदे। १०। ८८। १।
"तस्य भर्मणे भुवनाय देवा धर्म्मणे कं स्वधया
पप्रथन्त।" ॥ पुं, मुनिविशेषः। यथा, महा-
भारते। १२। ४६। ८।
"भिक्षुभूर्भुवनो धौम्यः शतानन्दोऽकृतव्रणः।")

भुवनकोशः, पुं, (भुवनस्य कोश इव।) भूगोलः।
(अस्य विवरणं श्रीभागवते पञ्चमस्कन्धे। १६।
१७। १८। अध्यायेषु द्रष्टव्यम्। तथा च।
"अम्बुरूपमालश्रुदशस्वाक्य-
स्थावरस्थावरात्मकाः यद्दीपाः।
जम्बूद्वीपसप्तद्वीपात्मक-
द्वीपादिसमुद्राविभक्ताः॥ १॥
जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यैः सप्त-
द्वीपैर्वृत्ताः।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवैः परिवेष्टिताः॥
तेषां मध्ये जम्बूद्वीपो नाम च सर्व्वद्वीपा-
धिपतिर्भवेत्। तस्य मध्ये स्थितो मेरुः सुवर्णमयः॥ २॥ स च योजनानाम्। शिरसा द्वात्रिंशत्
सह सौवर्णः शिवा इयम्। तस्य चतुर्द्दिक्ष्व-
केसराचलेषु च सुमेरु शाखः ॥ ३॥

नाभिः किम्पुरुषश्चैव हरिवर्षं इलावृतः।
रम्यो हिरण्मयश्चैव कुरवश्च केतुमालः॥ ४॥
भद्राश्वोऽपि विख्यातः पूर्व्वतः शिवा एतानि नव
प्रतिष्ठिताः। मध्ये मेरुर्हिमालयम्। शताव-
धानेभिः खलु वृषो वभूव॥ ५॥ सम्प्रति
भरतस्य भारतस्य पूर्व्वाख्यं वर्षमानीतं भारतं
कर्म्मभूमिः। एतन्मध्ये मेरुः सुवर्णमयः
चतुरशीतिसहस्राणि योजनानि सन्तोच्छ्रायः।
षोडशसहस्रमवगाहनः अतिदुर्गो मन्द-
रादयः ॥ ६॥ तस्यापि सकलाः पुराः। इन्द्रादि-
लोकपालानां नामराजानी। आदित्याष्टविर्व्विंशती।
मान्धी गन्धमादनः। इत्यं द्वाविंशति सहस्र-
योजनविस्तारः। पार्श्वे चतुष्टयः। उत्तरतो नीलस्य विष्कम्भोऽपि
भद्राश्वाभिन्ने आतुल्ये पुरस्कृतेः पुरस्तात्-
मेरुरिति ॥ ७॥ किम्पुरुषाणामादीनि पुरा-
णाम् भोगस्थानानि वर्षानि ह्यरतवर्षं कर्म्म-
भूमिरित्यनुवंशतुल्यम् ॥ ८॥
स एव कर्म्मभिः स्वर्गं स्थलैः पातालमापनाः।
सुनिकायैव विख्याते: प्राप्नोति प्राज्ञकर्म्मभिः॥ ९॥
सर्व्वेषां नियमो हि भारत कालि वै भावकादिकः।
वै भावकादिकस्तान् विद्धि पापान्ते स्वर्गे
कोटिशमितिनाम्॥ १०॥ अथ सप्तकुलपर्व्वताः
कथ्यन्ते। महेन्द्रः। मलयः सह्यः शुक्तिमान् ऋक्षवान्
गन्धमादनः विन्ध्यः पारियात्रः। इत्येते भारते
कुलपर्व्वताः॥ ११॥ सर्व्वदासुरलोकाश्च तथा-
गन्धर्व्वयक्षकिन्नरनागाभरणाः इत्येताः
सप्त पदः। गङ्गायमुनागोदावरीसरस्वतीनर्म्मदाकावेरी-
चन्द्रभागानि महानदाः प्रायशः॥ १२॥
अश्वत्थाश्च विख्याते कल्पद्रुममिदं शुभम्।
कदम्बोऽस्य विख्यातोऽयमिदं यत्र तु भारतम्॥ १३॥
सप्तद्वीपादिपुण्या अमराः विख्याता वै अव-
शेषे वर्षेषु पर्व्वतेषु त्रय विद्यन्ति नाति
भारतवर्षात् शान्तिं च प्राप्नुवन्ति॥ १४॥ सप्तदशः
आपूर्व्यमानाः अत्र पयोधयः। ततः परा
हिरण्मयी भूमिः। ततो लोकालोकपर्व्वतः
सप्त भूमीकः॥ १५॥ अथोर्द्ध्वादि अन्तरिक्ष-
लोकः शिवरामा द्युलोकपूर्णं सर्वतः॥ १६॥
मर्त्त्यलोकं महापुण्यं पौरुषार्थं विशेष वै।
भारतं कर्म्मभूम्याख्यं देवतानामपि काङ्क्षितम्॥ १७॥
स्वर्गं पृथिव्यामनतीतो भारतात् शैवरेषयेत्।
शीर्षकानां भवनानि चतुर्दशानि भुवने॥ १८॥
पतितः शोकपापवतादस्त्यां सप्तद्वीपाः।
नानाविधाः दिव्यनी पूर्व्वशत्रवाचकानः॥ १९॥
तत्र प्रभुत्वं सर्वं मर्त्यं यत्र प्रतिष्ठितः।
नानाविधसहस्रैश्च नानाभूमिमण्डितम्॥ २०॥
सप्तानां पर्व्वतानां पूर्व्वं मेरोः प्रभृतिभि भौमि वै।
प्रथमं भारतं सर्व्वं वैदूर्य्यमणिकावनम्॥ २१॥
इलावृतमयं पूर्व्वं प्राप्तव्यं वर्षितं स्मृतम्।
कोटयश्च अद्यपि विद्युतादि चतुर्दश॥ २२॥
परिपूर्णं सागरं सर्व्वं सर्वं तत्र विनिश्चितम्।
अत्रमापादितं सर्व्वं सर्व्वं तथाविनिश्चितम्।

पूर्व्वोत्तरदिग्भागे अन्तरं मध्यमस्य च ।
निविष्टो नाकपृष्ठे तु अप्सरसः सन्ति निर्वृताः ॥ २४ ॥
आनन्दोऽथ प्रमोदश्च स्वर्गभङ्गे तु मध्यमे ।
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ ॥ २५ ॥
आह्लादः स्वर्गराजा वै स्वर्गभङ्गे तु पश्चिमे ।
निर्म्ममो निरहङ्कारः सौभाग्यश्चातिनिर्म्मलः ॥ २६ ॥
स्वर्गाश्चैव द्विजश्रेष्ठ ! पूर्व्वभङ्गे समाश्रिताः ।
एकविंशानि स्वर्गा वै निविष्टा मेरुमूर्द्धनि ॥ २७ ॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा ।
तत्तेषु निवसन्ति ते जनाः क्रोधविवर्ज्जिताः ॥ २८ ॥
जलप्रवेशी आनन्दं प्रमोदं वह्निसाहसी ।
भृगुप्रपाती सौख्यं च रम्यं चैवास्य निर्म्मलम् ॥ २९ ॥
अनाशके तु संन्यासी मृतो गच्छेन्निविष्टपम् ।
क्रतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृतिम् ॥ ३० ॥
तडागकूपकर्त्ता च लभते पौष्टिकं द्विजः ।
सुवर्णदायी सौभाग्यं लभेत् स्वर्गतपःफलम् ॥ ३१ ॥
शीतकाले महावह्निं प्रज्वालयति यो नरः ।
सर्व्वसत्त्वहितार्थाय स्वर्गं सोऽप्सरसं लभेत् ॥ ३२ ॥
हिरण्यगोप्रदाने हि निरहङ्कारमाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥ ३३ ॥
रौप्यदानेन स्वर्गं तु निर्म्मलं लभते नरः ।
अश्वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥ ३४ ॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचते ॥ ३५ ॥
कपिलागोप्रदानेन परमार्थे महीयते ।
गोवृषस्य प्रदानेन स्वर्गं मन्मथमाप्नुयात् ॥ ३६ ॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्त्रोपानहदाता च स्वर्गं यात्युपशोभनम् ॥ ३७ ॥
देवतायतनं कृत्वा द्विजशुश्रूषकस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
उपवासी त्रिरात्राद्यैः शान्तः स्वर्गं शुभं लभेत् ॥ ३९ ॥
सरित्स्नायी जितक्रोधो ब्रह्मचारी दृढव्रतः ।
निर्म्मलं स्वर्गमाप्नोति यथाभूतहिते रतः ॥ ४० ॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥ ४१ ॥
तत्तत्स्वर्गमवाप्नोति यद्यदिच्छति मानवः ।
चत्वारि अतिदानानि कन्या गौर्भूः सरस्वती ॥ ४२ ॥
नरकादुद्धरन्त्येते जपवाहनदोहनात् ।
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति ॥ ४३ ॥
संप्राप्य न निवर्त्तेत स्वर्गं शान्तमनामयम् ।
मेरोस्तु पश्चिमे यत्र ब्रह्मा तत्र स्थितः स्वयम् ॥ ४४ ॥
पूर्व्वभङ्गे स्वयं विष्णुः मध्ये चैव शिवः स्थितः ।
अतः परं तु विप्रेन्द्र ! स्वर्गाध्वानमिमं शृणु ॥ ४५ ॥
विमानं विपुलं शुक्लमूर्द्ध्वपरिसंस्थितम् ।
प्रथमे तु कुमारस्तु द्वितीये मातरः स्थिताः ॥ ४६ ॥
तृतीये सिद्धगन्धर्व्वाः तुर्य्ये विद्याधरा द्विज ! ।
पञ्चमे नागराजा च षष्ठे तु विनतासुतः ॥ ४७ ॥
सप्तमे दिव्यपितरो धर्म्मराजस्तथाष्टमे ।
नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥ ४८ ॥
भूर्लोकाच्छतसाहस्रादूर्द्ध्वं चरति भास्करः ।
योजनानां सहस्रे द्वे विष्कम्भसमं ततः ॥ ४९ ॥
त्रिगुणं परिणाहेन सूर्य्यबिम्बं प्रमाणतः ।
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां तदा तिष्ठति भास्करः ॥ ५० ॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्करः ।
तदा संयमने याम्ये तत्रोद्यंस्तु प्रदृश्यते ॥ ५१ ॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येव सविता सदा ।
ध्रुवाधारस्तथोत्तिष्ठन् वालिखिल्यादिभिः स्तुतः ॥ ५२ ॥
इति श्रीनरसिंहपुराणे भुवनकोषे त्रिंशोऽध्यायः ॥ ३० ॥)

भुवन्युः, पुं, (भवतीति । "कन्युच् क्षिपेश्च ।" उणा० ३ । ५१ । इति चकारात् भूधातोरपि कन्युच् ।) सूर्य्यः । वह्निः । चन्द्रः । इति मेदिनी । ये, ८८ ॥ प्रभुः । इत्युणादिकोषः ॥

भुवर्लोकः, पुं, (भुवश्चासौ लोकश्चेति ।) भूरादिसप्तलोकान्तर्गतद्वितीयलोकः । यथा,—
"भूमिसूर्य्यान्तरं यच्च सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ! ॥"
इति विष्णुपुराणे । २ अंशे ७ अध्यायः ॥
(यथा च भागवते । २ । ५ । ८ ।
"भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥")

भुवः, [स्] अ, (भवतीति । भू + "भूरञ्जिभ्यां किन् ।" उणा० ४ । २१६ । इति असुन् स च कित् ।) आकाशः । इति हेमचन्द्रः ॥ (महाव्याहृतिभेदः । यथा, मनुः । २ । ७६ ।
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयान्निरदुहत् भूर्भुवः स्वरितीति च ॥")

भुविः, [स्] स्त्री, (भवतीति भवत्यस्मिन् रत्नादीनि वा । भू + "भुवः कित् ।" उणा० २ । ११२ । इति इसिन् । स च कित् ।) समुद्रः । इत्युणादिकोषः ॥

भू, सत्तायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सत्तेह द्विविधा । उत्पत्तिर्विद्यमानता च । भवति मनुष्योऽथवा विष्णुः । इति दुर्गादासः ॥

भू, क शुद्धिचिन्तयोः । मिश्रणे । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, भावयति द्विजः सर्व्वान् । अर्थोऽर्थान् । इति दुर्गादासः ॥

भू, क ङ प्राप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, भावयते । इति दुर्गादासः ॥

भू, ञ प्राप्तौ । इति कविकल्पद्रुमः । (भ्वा०-उभ०-सक०-सेट् ।) ञ, भवति भवते धर्म्मं धीरः । भवत्येव सत्तायां प्राप्तिस्वप्रत्यर्थमिति भट्टमल्लः । भवते दुरितक्षयं यथोक्तक्रतुभिर्भावयते च नाकलोकमिति हलायुधः । केचित्तु आत्मनेपदिनं मत्वा प्राप्तौ परस्मैपदं सत्तार्थस्यैवानेकार्थत्वात् समाधत्ते । इति दुर्गादासः ॥

भू, अ, (भू + क्विप् ।) रसातलम् । इति हेमचन्द्रः ॥

भूः, स्त्री, (भवन्त्यस्मिन्निति । भू + अधिकरणे क्विप् ।) पृथिवी । इत्यमरः । २ । १ । २ ॥ (यथा, मनुः । ७ । ६ ।
"न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥"
यथा च वैद्यकरत्नमालायामस्याः पर्य्यायः ।
"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः ।
क्षितिरुर्व्वी मही क्षौणी क्ष्मा धरा कुर्वसुन्धरा ॥")
स्थानमात्रम् । इति मेदिनी । भे, १ ॥ (यथा, भागवते । ६ । ४ । ३१ ।
"यच्छक्तयो वदतां वादिनां वै
विवादसंवादभुवो भवन्ति ॥"
यज्ञाग्निः । इति जटाधरः ॥

भूकं, क्ली, (भवतीति । भू + "सृवृभूशुषिमुषिभ्यः कक् ।" उणा० ३ । ४१ । इति कक् ।) छिद्रम् । कालः । इति मेदिनी । के, ३० ॥

भूकः, पुं, (भू + कक् ।) अन्धकारः । इति शब्दमाला ॥

भूकदम्बः, पुं, (भुवि कदम्ब इव ।) अलम्बुषः । इति रत्नमाला ॥ कोकसीम । इति भाषा ॥

भूकदम्बकः, पुं, (भूकदम्ब + संज्ञायां कन् ।) यवानी । इति राजनिर्घण्टः ॥ (विवृतिविशेषोऽस्य यवानीशब्दे ज्ञातव्यः ॥)

भूकन्दः, पुं, (भुवः पृथिव्याः कन्द इव ।) महाश्रावणिका । इति राजनिर्घण्टः ॥ मुलकुडी । इति भाषा ॥

भूकम्पः, पुं, (भुवः पृथिव्याः कम्पः ।) भूमिकम्पनम् । स च अद्भुतविशेषः । यथा, अद्भुतसागरे ।
"मेषे वृश्चिकभे गतः प्रचलति यायादिभिः
कम्पते
चापे मीनकुलीरभे च वृषभे धर्म्मं चलेत् कच्छपः ।
युग्मे कुम्भधरे मृगेन्द्रमिथुने कन्यान्तगे पन्नग-
श्चैवामेकतमो यदि प्रचलति क्षौणी तदा
कम्पते ॥
"कच्छपे मरणं भयं मरणञ्चापि पन्नगे ।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे ॥
प्रचितवैरमरणं अशनाश्विमारुतयोः ।
क्षुद्भयमतिवृष्टिभिरपरीचये जलाच्चापि ।
नित्यतुर्य्यचमदिने माणि चपे विपरीते ।
भवति यदा भूकम्पः प्रधाननृपनाशनं कुरुते ॥"
स च भूमिजोत्पातविशेषः । यथा,—
"चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् ।
जलाशयानां वैकृत्यं भौममन्तदपि कीर्त्तितम् ॥
भौमं चाल्पफलं प्रोक्तं चिरेण परिपच्यते ॥"
इति ज्योतिस्तत्त्वम् ॥

भूकर्ब्बुदारकः, पुं, वृक्षविशेषः । छोटालसोड़ा इति हिन्दी भाषा । तत्पर्य्यायः । श्लेष्मा-

लवः ९ भूमिष्ठः । लघुमित्रः ६ लघुभित्तिलकः ।
लघुपीत. ४ सत्यवन: ७ मधुभूतम: ८
भूकम्पसार: ९। अस्य गुणाः। मधुरत्वम्।
क्रमिशूलनाशित्वम्। वातकफोदरत्वम्। किञ्चित्
शीतत्वम्। सर्वमारकत्वञ्च। इति राज-
निर्घण्टः ॥

भूकर्णः, पुं, (भुवः पृथिव्याः कर्णः।) तृणविशेषः। इति राजनिर्घण्टः ॥

भूकदम्बः, पुं, (भुवि पृथिव्यां कदम्ब इव भुवः कदम्ब इति वा।
"तदत्र कदम्बपर्णीपुष्पकैः कामदीपनः।
मधुरोऽयं इति ख्यातो गौर विद्धि भूतले ॥"
इति भरिदेहोमब्रह्मकाल कदम्बपादपद्मसमा-
नाम तथासम्।) बाहुरेनः। इति त्रिकाण्ड-
शेषः ॥

भूकाकः, पुं, (भुवि स्थितः काकः।) स्वल्पकङ्कः।
क्रौञ्चः। नीलक्रौञ्चः। इति शब्दरत्नावली ॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव।) भूपाटली।
इति राजनिर्घण्टः ॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव।) विदारी।
इति राजनिर्घण्टः ॥

भूकेशः, पुं, (भुवः पृथिव्याः केश इव।) शैवलः।
वटः। इति मेदिनी। शे, २८ ॥

भूकेशा, स्त्री, (भूकेश+टाप्।) राक्षसी। इति
शब्दरत्नावली ॥

भूकेशी, स्त्री, (भूकेश+स्त्रियां ङीप्।) वन्द-
नुम:। इति मेदिनी। शे, ५७ ॥

भूक्षित्, पुं, (भुवं क्षितिं क्षिणोतीति+क्षिद्+
क्विप्।) शूकरः। इति त्रिकाण्डशेषः ॥

भूखर्जूरी, स्त्री, (भूजाता खर्जूरी। शाक-
पार्थिवादित्वात् समासः।) भूमिखर्जूरी। तत्-
पर्यायः। भूखर्जूरा १ बहुपादखर्जूरिका २
भूमिखर्जूरी ३। अस्या गुणाः। मधुरत्वम्।
शिशिरत्वम्। वातपित्तहरत्वञ्च। इति राज-
निर्घण्टः ॥

भूगर्त्तं, स्त्री, (भुवः पृथिव्याः गर्त्तम्।) विवरम्।
इति राजनिर्घण्टः ॥

भूगर्भः, पुं, भवभूतिः। स च मालतीमाधवादि-
नाटककर्त्ता। इति जटाधरः॥ (भू, क्षमा-
भृन्मायमहात्मा एको मर्त्ये कृष्णो बभूवेति।
विष्णुः। यथा, महाभारते। १३। १४९। ९१॥
"वीरहा विषमः शून्यो घृताशीरचलश्चलः।")

भूगोलः, पुं, (भूगोलः इव वर्त्तुलः।) भुवनकोषः।
(वर्त्तुलं पृथ्वीविस्तारम्।
"सप्त समुद्रान्तरस्य भूगोलो कोटि विस्तृति।
विशालः परमा पृथ्वी कथ्यते भास्कर-
शिरसा।")

तस्य विवरणम्। यथा,—
"जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलश्चापरो द्विजाः।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव
सप्तमः।
एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः।

पर्वतानि महाभाग। महापुण्यानि यानि तान्।
सिन्धवश्च महाभागाः सर्वाणि मुनयस्तथा ॥
भूमिरापस्तथा वायुराकाशस्तथैव च।
सुखोत्तराणि सर्वाणि तेषां भूमि: प्रधानत: ॥
प्लक्ष: सर्वेषु समया द्वीपो मध्य पश्चम:।
कुमारैश्च युक्ता: श्रौता कुर्वन्ति पठनं कलात्।
यथारोप्य युक्ता श्रुतम्। तथाप्ययं न दर्शते।
प्लक्ष: सर्वे स्वयं ते नर एव हि देवाः।
प्लक्ष: पर .. ः सर्वेषु सप्ताधि प्लक्ष
मत हि।
यदि पश्च गुणा: श्रौता जलाभूतेषु पञ्चसु।
वर्त्तन्ते सर्वभूतेषु येषु लोकाः प्रतिष्ठिताः।
अन्योन्यं नाभिवर्त्तन्ते साम्यं भवन्ति वै यदा।
यदा तु विषमं भावमाविशन्ति परस्परम्।
तदा देहैर्विमोक्ष: स्वदेहिनो नान्यथा द्विज।
अनुपूर्व्या विनश्यन्ति जायन्ते चापि सर्वशः।
सर्वाण्यपरिमेयानि तदेषां रूपमैश्वरम्।
तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः।
तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते।
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥
सुदर्शनं प्रवक्ष्यामि द्वीपन्तु कुरुनन्दन।
परिमण्डलो महाभाग। द्वीपोऽसौ चक्रसं-
स्थितः ॥
नदीजलैः प्रतिच्छन्नः पर्वतैश्चाभ्रसन्निभैः।
पुरैश्च विविधाकारै रम्यैर्जनपदैस्तथा।
वृक्षैः पुष्पफलोपेतैः सम्पन्नधनधान्यवान्।
लावणेन समुद्रेण समन्तात् परिवारितः।
यथा हि पुरुषः पश्येदादर्शे मुखमात्मनः।
एवं सुदर्शनद्वीपो दृश्यते चन्द्रमण्डले।
द्विरंशे पिप्पलस्तत्र द्विरंशे च शशो महान्।
सर्वौषधिसमायुक्तः सर्वतः परिबृंहितः।
आपस्ततोऽन्या विज्ञेया एष संक्षेप उच्यते।
अन्यानि यानि लोकेषु तानि वक्ष्यामि ते शृणु।
एवं हि सर्वमाख्यातं यथावत् कुरुनन्दन।
कुमारैः महाभाग। तस्य शोभा विभावसु।
एकः हिरण्मयं दिव्यं पीतवर्णं महाबलः।
हरितस्य ततो हैमं पिङ्गलोर्ध्वं प्रकाशते।
स्वर्णवर्णो तथैव च स्वर्णपङ्क्तिः सुवर्णभः।
हिरण्मयं ततोऽपि च विज्ञेयं पर्वतं ध्रुवम्।
शङ्खवर्णस्तथैव च श्वेतो नीलः कुमुदोपमः।
हरिवर्णं ततो वर्णं पीतं कृष्णादिकं स्मृतम्।
रविवर्णं तु श्वेतं च त्रिवर्णं कीर्तितं तु।
नाम्ना तस्य महाभाग। चातुर्वर्ण्यस्य पर्वतः।
दक्षिणे तु महेन्द्रस्य पश्चिमे मलयाचलः।
पूर्वे पश्चिमयोश्चैव महान्तं नाम पर्वतम्।
मान्यवान् पर्वतश्चैव हिमवांश्च प्रकीर्त्यते।
ब्रह्मादयश्चैव सर्वे देवाश्चैव महर्षयः ॥
परिमण्डलपर्वतेष्वेतेषु देवाः प्रवर्त्तिताः।

आदित्यतरुणाभासो विधूम इव पावकः।
सहस्रयोजनं दृष्टो यत्र रूपे त्रिविधं च।
योजनानां सहस्राणि षष्टिं चापि तु मेरुतः।
विपुलः स महाभाग। भूमिर्वै सप्तधा तु।
परिमण्डल्यां वै पोषितेव स्थितम्।
ऊर्द्धमस्य विष्णु च मनोवाचा च विराजते।
तस्य पीताम्बरं सर्वं सर्वतः परिकीर्तितम्।
विमलः सुमहान् यत्र सुवर्णस्याचलः क्षितौ।
न वै विस्मयमापन्नो कौरवाणां मेरुगिरिवरात्।
मेरुवनमध्यमासावाश्च परिवृताम्।
अतिमेघवर्णो वनस्पतीन् कथायतम्।
तस्मादिन्द्रोऽनुप्रवृत्ते सततं ज्योतिर्भिः चरः।
यत्र यान्ति नभश्चरो रविर्भूत्वैव परिक्रमन्।
इ इर्मवर्ती महाभाग। दिव्यपुष्पफलान्वितः।
भवनैरावृतः सर्वैर्जाम्बूनदमयैः शुभैः।
तत्र देवगणा राजन्। गन्धर्वाप्सरसां गणाः।
असुरोरगसंयुक्ताः शैले क्रीडन्ति सर्वदा।
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः।
समेत्य विविधैर्यज्ञैर्यजन्ते विविधैः सह।
तुम्बुरुर्नारदश्चैव विश्वावसुर्हहा हुहूः।
अभिगम्यामरश्रेष्ठा स्तवैः स्तुवन्ति भो प्रभो।
सप्तर्षयो महात्मानः कश्यपश्च प्रजापतिः।
तत्र गच्छन्ति भद्रं ते सदा पर्वणि पर्वणि।
तस्यैव मूर्ध्नि उशनाः काव्यो दैत्यैर्महीपते।
तस्य हीमानि रत्नानि तस्येमे रत्नपर्वताः।
तस्मात् कुबेरो भगवांश्चतुर्थं भागमश्नुते।
ततः कलांशं वित्तस्य मनुष्येभ्यः प्रयच्छति।
पार्श्वे तस्योत्तरे दिव्यं सर्वर्तुकुसुमं शिवम्।
कर्णिकारवनं रम्यं शिलाजालसमुद्गतम्।
तत्र साक्षात् पशुपतिर्दिव्यैर्भूतैः समावृतः।
उमासहायो भगवान् रमते भूतभावनः।
कर्णिकारमयीं मालां बिभ्रत् पादावलम्बिनीम्।
त्रिभिर्नेत्रैः कृतोद्द्योतस्त्रिभिः सूर्यैरिवोदितैः।
तमुग्रतपसः सिद्धाः सुव्रताः सत्यवादिनः।
पश्यन्ति न हि दुर्वृत्तैः शक्यो द्रष्टुं महेश्वरः।
तस्य शैलस्य शिखरात् क्षीरधारा नरेश्वर।
त्रिंशद्बाहुपरिग्राह्या भीमनिर्घातनिःस्वना।
पुण्या पुण्यतमैर्जुष्टा गङ्गा भागीरथी शुभा।
प्लवन्तीव प्रवेगेन ह्रदे चान्द्रमसे शुभे।

गुह्यकेति पञ्चैव घाता रत्ननिधिवशात् ।
वलीपलितदौर्गन्ध्यजरादोषो न विद्यते ।
कुरङ्गकुरवः शङ्खः कुसुम्भः शिखरस्तथा ।
वैकङ्कश्च त्रिकूटश्च पर्व्वतौ रुचकर्षभौ ।
पतङ्गनिषधौ नागशितिवासत्रिकूटकाः ।
शङ्खवैदूर्य्यकपिलौ द्वौ कालञ्जरनारदौ ।
गिरयो भद्रदेशे तु सुमेरोः परिकल्पिताः ॥
जठरो देवकूटश्च द्वौ नगौ मेरुपूर्व्वतः ।
अष्टादशसहस्राणि योजनान्युद्गतायतौ ॥
एषु तुङ्गौ हिमाद्रयोर्व्वं तापसर्षभ ! ।
पवनः पारियात्रश्च मेरोः पश्चिमतः स्थितौ ।
तथा प्रमाणौ कैलासकरवीरौ तु दक्षिणे ।
प्रागायतावुत्तरेण त्रिशृङ्गमकरौ तथा ॥
अष्टाभिरेतैर्गिरिभिर्भाति काञ्चनपर्व्वतः ।
मेरोर्म्मूर्द्धनि विप्राग्र्य ! मध्ये विश्वसृजः पुरी ।
चतुरस्रा शातकौम्भी योजनायतविस्तृता ॥
दिक्पालानां तथा पूर्व्वः पूर्व्वादिषु यथाक्रमम् ।
ब्रह्मपुर्य्याश्चतुर्थेन भागेन परिकल्पिता ॥
तत्र ब्रह्मा च वसति शक्रश्चापि सुरेश्वरः ।
समेत्य विविधैर्यज्ञैर्यजन्ते भूरिदक्षिणैः ॥
तुम्बुरुर्नारदश्चैव विश्वावसुर्हाहाहूहूः ।
अभिगम्यामरश्रेष्ठं स्तुवन्ति विविधैः स्तवैः ॥
सप्तर्षयो महाभाग ! काश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्व्वणि पर्व्वणि ॥
तस्यैव मूर्द्धन्युशना काव्यो दैत्यैर्महीयते ।
तस्य हैमानि रत्नानि तस्येमे रत्नपर्व्वताः ॥
तस्मात् कुबेरो भगवांश्चतुर्थं भागमश्नुते ।
ततः कलांशं वित्तस्य मनुष्येभ्यः प्रयच्छति ॥
पार्श्वे तस्योत्तरे दिव्यं सर्व्वर्त्तुकुसुमान्वितम् ।
कर्णिकारवनं रम्यं शिलाजालसमुद्गतम् ॥
तत्र साक्षान्महादेवो भीमैर्भूतैः समावृतः ।
पार्व्वत्या सह देवेशो रमते भूतभावनः ॥
कर्णिकारमयीं मालां दधत् पादावलम्बिनीम् ॥
तस्य शैलस्य शिखरात् क्षीरधारा महामते ! ।
विश्वरूपा परिमिता भीमनिर्घातनिस्वना ॥
पुण्या पुण्यतमैर्जुष्टा गङ्गा भागीरथी शुभा ।
तां धारयामास तदा दुर्द्धरां पर्व्वतैरपि ॥
शतं वर्षसहस्राणां शिरसैव पिनाकधृक् ।
मेरोस्तु शिखराद्देवी भिद्यमाना चतुर्द्धिधा ॥
सीता चालकनन्देति वङ्क्षुर्भद्रेति कीर्त्तिता ।
सीता तु महासरणात् केशरादिमहाचलात् ।
अतिक्रम्य प्रवहन्ती गन्धमादनमद्रिषु ।
पतिता द्विज ! वर्षञ्च भद्राश्वं पुनरतो क्रमात् ।
प्राच्यां दिशि महाभाग ! प्रविष्टा लवणोदधिम् ॥
माल्यवच्छिखराद्वङ्क्षुः पतिता केतुमालके ।
प्रतीच्यां दिशि विप्रेन्द्र ! प्रविवेश सरित्पतिम् ॥
भद्रा चोत्तरतो मेरुशिखरात् पतिता गिरीन् ।
अतिक्रम्य शृङ्गवतः शृङ्गाद्रिगेव पातुका ।
उत्तरांश्च कुरून् प्राप्य प्रविष्टा लवणार्णवम् ॥
तथैवालकनन्दा च पतन्ती गिरिशृङ्गेषु ।
हिमालयं विनिर्भिद्य भारतं वर्षमेव च ।
जगामाम्बुधिमभ्येति दक्षिणस्यां दिशि द्विज ! ॥

मेरोस्तु पश्चिमे पार्श्वे केतुमाले महामते ! ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ।
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ।
वीतरोगाः शोकभया नित्यमानन्दवर्त्तिनः ।
जायन्ते मानवास्तत्र प्रतप्तकनकप्रभाः ॥ ● ॥
गन्धमादनशृङ्गेषु कुबेरः सह राक्षसैः ।
अप्सरोगणगन्धर्व्वैर्मोदते गुह्यकाधिपः ॥
गन्धमादनपार्श्वे तु गन्धशैलाः सहस्रशः ।
एकादशसहस्राणि वर्षाणां परमायुषः ॥
तत्र हृष्टा नराः सर्व्वे बलवीर्य्यपराक्रमाः ।
स्त्रियश्चोत्पलपत्राभाः सर्व्वाः सुप्रियदर्शनाः ॥
उत्तराः कुरवश्चैव भारतस्य महामते ! ।
धनुःसंस्थे महाभाग ! द्विवर्षे दक्षिणोत्तरे ॥
इलावृतं मध्यमन्तु पञ्चवर्षाणि चैव हि ।
उत्तरोत्तरमेतेभ्यो वर्षमुद्रिच्यते गुणैः ॥
अपरेषु च वर्षेषु सर्व्वेषु भारतं विना ।
आयुःप्रमाणं लोकानां दशवर्षसहस्रकम् ॥
एवमेषा महाभाग ! पृथिवी पर्व्वतैश्चिता ॥"
इति पद्मपुराणे भूमिखण्डे भूगोलवर्णने १२८ अध्यायः ॥

शिव उवाच ।

"नवस्वेतेषु वर्षेषु भगवान् भूतभावनः ।
अनुग्रहाय लोकानामास्ते मायावपुर्हरिः ॥
इलावृते तु भगवान् भव एकः सहोमया ।
आस्ते विहारनिरतो नान्यस्तत्र पुमान् द्विज ! ॥
भवानीशापतो ब्रह्मन् ! प्रविशेन कदाचन ।
यत्र प्रविष्टो मोहेन सुतो वैवस्वतस्य वै ॥
इलः स्त्रीभावमापन्नो यस्यां जातः पुरूरवाः ।
तत्र सङ्कर्षणं देवं कला विष्णोर्महात्मनः ।
भवो भवान्या सहितः स्तौति भक्तिसमन्वितः ॥
भद्राश्वे द्विज ! वर्षे तु हयशीर्षाललिर्हरिः ।
वसते वर्षपुरुषास्तं स्तुवन्ति जगद्गुरुम् ॥ ● ॥
हरिवर्षे तु भगवान्नरसिंहवपुर्धरः ।
स्तूयते दैत्यपतिना प्रह्लादेन महात्मना ॥
केतुमाले च भगवान् कामदेवस्वरूपवान् ।
प्रजापतेर्दुहितृभिः सहैव रमया सदा ॥
स्तूयते परया भक्त्या जगन्मोहनरूपधृक् ॥ ● ॥
रम्यके भगवानास्ते मत्स्यरूपी दयापरः ।
मनुर्व्वैवस्वतस्तत्र स्तौति भक्त्या स्तवैः स्तवैः ॥ ● ॥
हिरण्मये तु भगवानास्ते कूर्म्मतनुं दधत् ।
प्रेताधिराजस्तं स्तौति भक्त्या परमया युतः ॥
कुरुवर्षे च भगवान् वराहः सेव्यते जनैः ।
तं देवी यं क्षितिः स्तौति तद्धर्म्मपतिभिः सह ॥
वर्षे किम्पुरुषे ब्रह्मन् ! भगवानादिपूरुषः ।
सीतया विहरन्नास्ते सततं लक्ष्मणाग्रजः ॥
तत्र किम्पुरुषैः सार्द्धं भक्त्या मारुतनन्दनः ।
आर्ष्टिषेणेन च सह स्तौति भक्त्या विभावितः ॥
भारते च तथा वर्षे नरनारायणावृषी ।
नारदः स्तौति भगवान् भगवन्तौ सतापतिः ॥
द्वीपेऽस्मिन् बहवः सन्ति गिरयः सरितस्तथा ।
देशाश्च बहवो ब्रह्मंस्तांस्ते वच्म्यनुक्रमात् ॥
मेरोश्चतुरतः सर्व्वान् पर्व्वतांश्च मनोरमान् ।

दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ।
उत्तराः कुरवो नाम पुण्याः सिद्धनिषेविताः ।
तत्र वृक्षा मधुफला नित्यं पुष्पफलोपगाः ॥
सुगन्धीनि च पुष्पाणि फलानि रसवन्ति च ।
सर्व्वे कामदुघा वृक्षा लताः कामप्रपूरिकाः ॥
अपरे क्षीरिणो नाम तरवो मुनिपुङ्गव ! ।
ये स्रवन्ति सदा क्षीरं रसैरमृतसन्निभम् ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्व्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका ॥
सर्व्वर्त्तुसुखदा नित्यं पङ्कपङ्कविवर्ज्जिता ।
स्वर्गभोगावशेषेण जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्व्वे चारुसुखान्विताः ।
मिथुनानि च जायन्ते स्त्रियः सुरसुतोपमाः ॥
तेषान्ते क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम् ।
मिथुनं जायते काले समन्ताच्च प्रवर्द्धते ॥
तुल्यरूपगुणोपेतं तुल्यवेशवयस्तथा ।
निरामया निराबाधाः सदानन्दविवर्त्तिनः ॥
एकादशसहस्राणि तत्र वर्षाणि वै जनाः ।
जीवन्ति ते महाभाग ! न चान्योन्यं त्यजन्ति च ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
तान्निर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च ॥
उत्तराः कुरवो ब्रह्मन् ! व्याख्यातास्ते समासतः ॥ ● ॥
हिरण्मये रम्यके च एष धर्म्मः प्रकीर्त्तितः ॥
मेरोः पार्श्वमहं पूर्व्वं वक्ष्ये ब्रह्मन् ! यथातथम् ।
भद्राश्वे भद्रश्वा नाम तत्र ब्रह्मन् ! महीपतिः ॥
भद्रशालवनं यत्र कालाम्रश्च महाद्रुमः ।
कालाम्रो नाम वृक्षोऽसौ सिद्धचारणसेवितः ॥
योजनैकसमुत्सेधो नित्यपुष्पफलः शुभः ।
तत्र ते पुरुषाः श्वेतास्तेजोयुक्ता महाबलाः ॥
कुमुदाभाः स्त्रियस्तत्र चारुनाशाः सुलोचनाः ।
चन्द्रप्रभावरूपाश्च पूर्णेन्दुसदृशाननाः ॥
नृत्यगीतकलाभिज्ञाश्चन्द्रशीतलकायिनः ।
दशवर्षसहस्राणि तथायुर्मानवर्षभ ! ॥
कालाम्ररसपानेन नित्यं सुस्थिरयौवनाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
सर्व्वकामफलः पुण्यः सिद्धचारणसेवितः ॥
दीर्घफलानिकरः श्रीमान् सहस्रयोजनोच्छ्रितः ।
अरत्नीनां सहस्राणि शतानि दश पञ्च च ॥
परिणाहस्तु वृक्षस्य रसानां रसभेदिनाम् ।
तस्याद्दिव्यफलांश्च जायन्ते तत्र मानवाः ॥ ● ॥
तथा माल्यवतः शृङ्गे दृश्यते हव्यवाहनः ।
नाम्ना संवर्त्तको नाम कालाग्निः प्रलयेऽन्तकः ।
तथा माल्यवतः शृङ्गे पूर्व्वे पूर्व्वानुगण्डिकाः ।
योजनानां सहस्राणि पञ्चशत्तालवान् द्विज ! ॥
महारजतवर्णाभा जायन्ते तत्र मानवाः ।
ब्रह्मलोकच्युताः सर्व्वे जायन्ते तत्र वै नराः ।
तपस्तप्यन्ति ते तीव्रं भवन्ति चोर्द्ध्वरेतसः ।
रक्षार्थेषु भूतानां न विशन्ति दिवाकरम् ।
षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अरुणस्याग्रतो यान्ति परिवार्य्य दिवाकरम् ॥

यानि पर्वतकूटानि कीर्तितानि मया तव ।
आदित्यमारुते सर्वे तिष्ठन्ति ह्यतिसत्तम ॥"
इति मात्स्ये भूमिखण्डे भूगोले १२१ अध्यायः ॥०॥
लिङ्गपुराणे ।
दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु ।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः ।
शुक्लाभिजनसम्पन्नाः सर्वे सुप्रियदर्शनाः ।
एकादशसहस्राणि समानि दश पञ्च च ।
जीवन्ति ते महाभाग ! नित्यं मुदितमानसाः ।
दक्षिणेन तु शृङ्गस्य निषधस्योत्तरेण तु ।
वर्षं हिरण्मयं नाम तत्र हैरण्वती नदी ।
तत्र नागे महाभाग ! पक्षिराट् पतगोत्तमः ।
सदा मुदाश्च वसते पक्षिणश्च महाबलाः ।
एकादशसहस्राणि वर्षाणि ते महामते ! ।
आयुःप्रमाणं जीवन्ति समानि दश पञ्च च ।
शृङ्गाणि च त्रिशिखराणि जीवन्ते मानवास्तु ये ॥
एकं मणिमयं तत्र द्वितीयं रौक्ममद्भुतम् ।
सर्वरत्नमयञ्चैव तृतीयं तत्र शोभते ।
तत्र स्वयम्प्रभा देवी नित्यं वसति शाण्डिली ।
उत्तरेण तु शृङ्गस्य वेलान्तं नाम पर्वतः ।
वर्षं वै ऐरवतं नाम राजा शृङ्गैः सह शोभते ।
अस्मिन्नेव हि तत्रस्थे प्रकाशं पर्वतं प्रति ।
चित्रवर्णः शुभवान् दिव्यो मणिमयो गिरिः ।
तस्य पार्श्वे महद्दिव्यं शुभ्रकाञ्चनसन्निभम् ।
सर्वं विष्णुपदं नाम तत्र दिव्यं मनोहरम् ।
तत्र पुण्यजना नाम सम्भवन्ति बहुप्रजाः ।
यथा सर्वमयास्तत्र चैत्ररथादि विशेषतः ।
लभेत्तु तु ततः सिद्धिं चरणानां महात्मनाम् ।
सदा धर्मार्थसंयुक्ता धर्मात्मानः सनातनाः ।
उत्तरान्ते कौलिकेरा तत्र भूमिः सनातनाः ।
भद्राश्ववर्षो ज्ञेयो भद्रा आप्लवाश्च सर्वतः ।
तत्र देवा विरूपाक्षा अमरेषु प्रतिष्ठिताः ।
श्वेतवर्णाः स्वयंभावा महात्मा प्रतिपदिताः ।
सर्वोत्तमा वा नदिनी तत्रैव च सरस्वती ।
अमरावती च शोभा च भद्रा विश्वा च पावनी ।
अरिजन्तः ऐरावताद्या यथास्य प्रसन्नता ।
उत्तराणि तत्र वर्षे कल्पवृक्षाः प्रसिद्धे ।
वायुराजा च अपि तत्र तत्र वरदानी ।
वर्षा दिव्याः यत्र महाद्रिषु कौशेषु दिव्यताः ।
दश्यन्ति वै हिमवान् हैमकूटे तु तत्रकाः ।
सर्वे नाराश्च नित्यं लोकधर्मपरायणम् ।
दैवाद्द्वारा वर्षेषु वैश्यधर्मेण गच्छति ।
अयुतं नियतं नित्यं जीवेत् वर्षपरम्परा ।
साङ्गोपाङ्ग महाभाग ! देवानां तपस्विनः ।
रजेनापि महाभाग ! अत्र स्वर्गसुखप्रदाः ।
भूतानि विविधानि जन्तूनि कुर्वन्ति च ।
नैराश्यहर्षपूरिता प्राक् देवभूमौ ।
अरूपा देवांशाः अत्र तु पूजयन्ति ।
यथा तु अनन्त महात्मा तत्र योगेन ।
इतीदं वर्षाणि वर्णितानि मयाद्य ॥ १० ॥
अधैकं कदाचिद् भारतं प्रवक्ष्यामि ।
तत्रान्तरस्य देवस्य सर्वे देवास्तत्र च ।

यथोक्तं प्रभवं । देवाश्च तथेन्द्राश्चोपेन्द्रादयः ।
तथा ऐरावतस्य मार्गानुसारं च ।
तथैव महेन्द्रस्य गिरिशोत्तमस्य च ।
सोमकस्य च राजर्षेः गिरिवरस्य महात्मनः ।
अवन्तस्य तथैव च द्विजोत्तमस्य महात्मनः ।
शुक्तिमतश्च पर्वतः । ऋक्षस्य ऋक्षलोकनाः ।
अर्बुदाश्च महाभाग ! पारियात्रो महीधराः ।
सह्यं वै सरली प्रभवं । सर्वपापप्रणाशनम् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।
तेषां सहस्रशो प्रभवं । गिरयस्तु समीपगाः ।
प्रादुर्भवाः ऋक्षवन्तो महानन्दिप्रभावतः ।
आर्षाः गोपस्य धर्मेण । तीर्थानि पुण्या
दिव्य ॥
नदीं नित्यं निम्नगां गङ्गां सिन्धुं सरस्वतीम् ।
शतद्रुं चन्द्रभागां च विपाशां सुमहानदीम् ।
ऐरावतीं वितस्तां च यमुनां च महानदीम् ।
इरावतीं विपाशां च बाहुदां सरितां वराम् ।
नदीं देविकां चैव पयोष्णीं देविकामपि ।
देवयुक्तां वेदस्मृतिं विदिशां च विरक्ताम् ।
कौशिकीं त्रिदिवां च नन्दिनीं सुरसुन्दरीम् ।
दृषद्वतीं विमलां च विपाशामिक्षुलां सतीम् ।
गोमतीं धूतपापां च विदिशां कौशिकामपि ।
लौहित्यां त्रिदिवां तथा वस्तुमध्ये महानदीम् ॥
चर्मण्वतीं वेत्रवतीं चन्दनां च महानदीम् ।
उत्तमां शतकुम्भां च शिप्रां पयोष्णीं तथा ।
करतोयां मन्दाकिनीं यामुनीं सुरमालिनीम् ।
पूर्वाभिरामां वीरां च भीमां ओघवतीमपि ।
पलाशिनीं पापहरां महेन्द्रां महानदीम् ॥
पाटलावतीं कारीषिणीं असिक्नीं च महानदीम् ।
कुशचीरां महावेगां शङ्कुमां च महानदीम् ।
पलाशिनीं पापहरां देवां हस्तवतीं तथा ।
सरयूं कुहूं देवां मधुमां पाटलावतीम् ।
पुरावतीं नदीं चैव कृष्णवेणां महानदीम् ।
कावेरीं सर्वपुण्यां च तथा वीरवतीमपि ।
कावेरीं सोमनदीं च विपुलां कपिञ्जलामपि ।
महावन्यां तुङ्गभद्रां च मत्स्यां च महानदीम् ।
विन्ध्यां वेत्रवतीं च विपाशां मरिचिमाम् ।
धनुं ऋष्यां लौहित्यां कुबेरामुपवाहिनीम् ।
प्रवाहिनीं ज्योतिरथां दुर्गवेगां महानदीम् ।
वैतरणीं शिप्रां चैव हरिवेगां महानदीम् ।
तितिरां मणिजालां च सिन्धुवारां महानदीम् ।
सर्वा नद्यां देवानां मानसोत्पत्ति विख्याताम् ।
शोणां च चित्रकूटां च लौहित्यां निम्नगामपि ।
पूर्णा महानदीं चैव रक्तवेगां रुद्रवेगाम् ।
गोदावरीं भीमरथीं कृष्णाम्बुं प्रवाहिनीम् ।
तमसां नर्मदां रक्तां वञ्जुलां च महानदीम् ।
मन्दाकिनीं तमसां च मालां च भद्रवेणाम् ।
कृतमालां ताम्रपर्णीं त्रिसामां च ऋषिकुल्याम् ॥
ऋषिकुल्यां इक्षुलां त्रिदिवां लाङ्गलिनीम् ।
चित्रोत्पलां चित्ररथां मञ्जुलां वाहिनीं तथा ।
मन्दाकिनीं मन्दगामां चोत्पलां पापहरां महानदीम् ।

शुक्तिमती मन्दगा च मद्रका वाहिनी तथा ।
कुमारी ऋषिकुल्या च नदी मन्दाकिनी तथा ।
सुवर्णा च तथा भद्रा तापिका च वरुणा ।
लौहित्यं करतोया च तथैव वृषकाह्वया ।
हिमवत्पादजाः सर्वा नदीभिरेव महाजलाः ।
तथा चतुःसमुद्राणां प्रसन्नाश्च महार्णवः ।
एतैः सरितो प्रभवं । सर्वाभिः सागरगामिनः ॥
एतानि पर्वतानि भारते सन्ति वै द्विज ॥
मलयो महेन्द्रो सैन्धवश्च त्रिकूटकः ।
ऋषभः कूटकः कोलः चण्डो देवगिरिस्तथा ।
श्रीशैलो माल्यवांश्च शुक्तिमांश्च एव च ।
ऋक्षश्च पारियात्रश्च रैवतः ककुभस्तथा ।
गोवर्धनश्चित्रकूटो वीरो मोक्षदो एव च ।
कोलाहलश्च रत्नकोलशैला नामभिरित्थं ॥
अतःपरं जनपदान् वक्ष्यामि द्विजसत्तम ॥
पाञ्चालाः कुरवस्तथाः शाल्वाः माद्रेय-
जाङ्गलाः ।
मत्स्याः कुशट्टाः सौल्याश्च कौशाः त्रिपुरोत्तर-
मकाः ।
चेदीनाः कुलिन्दाश्च कुन्तलाः कौटिकोद्भवाः ।
पाञ्चालाः कौशलाश्चैव गोपाः माषकाश्चैव च ।
वैदेहाश्च मगधाश्च केकयाः कुम्भराः ।
अम्बष्ठाश्च दशार्णाश्च कारुषोऽपरकाशकः ।
कुलूताः पलायनाश्चैव मत्स्याः किमीरकाः ।
आभीराश्च बाह्लीकाश्च चन्द्रभागाः सदा ।
मालवाश्च सौराष्ट्राश्च महेन्द्राश्च ते च ।
माठरा भद्रवाताश्च प्रस्थलाश्चैव पार्वताः ।
शकाः पुलिन्दाः कम्बोजाः यवनाः उत्तरा-
पथाः ।
अपरान्ताः पल्लवाश्च आभीराः काल-
तोयकाः ।
अपरीतिकाराश्चैव शिवपुराश्च मालवाः ॥
अपरिकान्तुरिकाश्च अङ्गाः कुशवर्तकाः ।
कुराः परान्ता मालवा मालका मागधाः ।
अश्मकाश्च एकदेशे प्रभवं । कथाः बाहर-
विग्रहाः ।
बाह्लीका वाटधानाश्च कलिङ्गाश्चैव च ।
मधुमन्तः मालवाः पुलिन्दाः वारणावताः ।
क्षत्रा त्रिगर्ता विदर्भा माकन्दा त्रिवर्तका ॥
पुण्ड्रा भीमाः किराताश्च तदेवापरे च तत् ।
सौराष्ट्राः शूरसेनाः कुणपाः पुण्ड्रकाः ।
निषादाः मलयाश्च काम्बोजाः दर्वीकाः ।
आभीराः सिन्धुसौवीराः हंसमार्गाः कन-
कदाः ।
अभीसाराः कुलूताश्च मधुमन्तः कुकुराः ।
एकपादाश्च कर्णाः । चीनाः पर्वताश्रयाः ।
दर्वीदराः बलाः वर्णाः सुराष्ट्राः प्रस्थलाः ।
वनायवो दशाः वाह्लीकाः कुलिन्दाश्च ।
एकपादाश्च करेणु । वासवाः पौरवाः ।
सप्तः कालिङ्गाश्च कुलिन्दैरिवपार्श्वकाः ।
तथा शोणाश्च मत्स्याश्च पर्वताश्रयिणः
विदेहाः काशयः किराताः पर्वतीयाश्च कलिङ्गाः

औड्रम्लेच्छाः ससैरन्ध्रा वैदेहास्ताम्रलिप्तकाः ।
तथापरे जनपदा दक्षिणा ब्राह्मणर्षभ ॥
द्रविडाः केरलाः प्राच्या भिक्षवश्चवकास्तथा ।
कोलिङ्गकास्तथा चोलाः चौलदा मलका मलाः ॥
त्वरिभुतृणवर्णकेता कोङ्कणेकुटमालवाः ॥
दक्षकाः कोरकाः प्राच्याः कुक्कुराङ्गार-
मारिकाः ।
तथैव विन्ध्यचूलिकास्त्रिगर्त्ताः शाल्वसैनयः ॥
समन्नाः कवकाश्चैव तथैवापरवर्त्तकाः ।
मवचास्तनवालाश्च पुलिन्दा वर्व्वरैः सह ।
सुनिवाटाः क्षिपाटाश्च सदा वैगवमास्तथा ।
विदर्भाः ऋषिकाः काकमनाश्च ब्राह्मणर्षभ ! ॥
यवनाश्च शकाश्चीनास्तङ्गणाः परतङ्गणाः ।
बहुरथाः कुलत्थाश्च दारवा म्लेच्छजातयः ॥
उत्तराश्चापरे म्लेच्छा हूनाः पारसिकैः सह ।
तथैव च मणाचीना दशार्णा दशमालिकाः ॥
अङ्गवङ्गकलिङ्गाश्च मद्रका गिरिगह्वराः ।
ब्राह्मीकाश्चाश्वताराश्च वैश्यशूद्रकुलानि च ।
शूद्राभीराश्च दरदा ये चान्ये म्लेच्छभूमयः ।
आत्रेयाश्च भरद्वाजास्तथैव स्तनपोषकाः ॥
द्रविकाश्च कलिङ्गाश्च किरातानाञ्च जातयः ।
तोमरा हन्यमानाश्च तथैव करभञ्जकाः ॥
एते चान्ये जनपदाः प्राच्योदीच्यास्तथैव च ।
उद्देशेन मया देशास्तव संकीर्त्तिता द्विज ! ॥
वर्षे तु भारते ब्रह्मन् ! त्रिवर्गस्य फलं भवेत् ।
दुह्यते कामधुग्धेनुर्भूमिः सम्यगनुष्ठिता ॥
तस्मिन् शुभाशुभं कर्म्म यथोक्तफलदं ध्रुवम् ।
अन्यानि यानि वर्षाणि भूमिस्वर्गाणि तानि वै ॥
भारते विहितं कर्म्म यागध्यानादिलक्षणम् ।
फलं जनयते सम्यक् विकर्म्म नरकावधि ॥
तत्र विद्धि नरा ब्रह्मन् ! तपसाराधनेन च ।
प्रयान्ति परमं लोकमपवर्गञ्च मारिष ! ॥
कृतं त्रेता द्वापरञ्च कलिश्च ब्राह्मणर्षभ ! ।
भारते तु क्रमेणैव भवन्ति हि युगानि वै ॥
चत्वारि च सहस्राणि वर्षाणां ब्राह्मणर्षभ ! ।
आयुःसंख्या कृतयुगे संख्याता भारते द्विज ! ॥
त्रीण्येव तु सहस्राणि त्रेतायां भारते ध्रुवम् ।
द्वे सहस्रे द्वापरे तु शतमेकं कलौ स्मृतम् ॥
तथापि च स्थितिर्नास्ति कलौ ब्राह्मणसत्तम ! ।
गर्भस्थाश्च म्रियन्ते च तथा जाता म्रियन्ति च ॥
महाबला महासत्त्वा ज्ञानिनो धर्म्मतत्पराः ।
तपस्विनो ध्यानविदः कृते जायन्ति मानवाः ॥
त्रेतायां धर्म्मनिष्ठाश्च स्वधर्म्मनिरताः सदा ।
द्वापरे च महाभाग ! क्रूराश्च परहिंसकाः ॥
लुब्धाश्चानृतिकाश्चैव क्रोधना दुष्कृते रताः ।
कलौ खलु भविष्यन्ति भारते तापस ! प्रजाः ॥
सर्व्वेषामपि वर्षाणां भारतं प्रवरं द्विज ! ।
तिष्ठन्ति मानवा यत्र हरिभक्तिपरायणाः ॥
प्रायो भागवताः सर्व्वे भारते द्विजसत्तम ! ।
नानारूपाणि तीर्थानि पवित्राणि ध्रुवाण्यपि ॥
जम्बूद्वीपो मया प्रोक्तो लक्षयोजनविस्तृतः ।
समानेन प्रमाणेन वेष्टितो लवणाब्धिना ॥
सप्तात्र उपद्वीपा मुनिभिः परिकीर्त्तिताः ।
सिन्धुमध्ये महाभाग ! नानाविधजनान्विताः ॥
नामानि तेषां वक्ष्यामि शृणु वात्स्यायन
-द्विज ! ॥
सगरस्य सुतैः खाताम्भोनिधौ परितो महीम् ।
खनद्भिः कल्पिता विप्र ! द्वीपा अष्टौ महार्णवे ।
स्वर्णप्रस्थश्चन्द्रशुक्लः सिंहलावर्त्तनो यथा ।
पाञ्चजन्यस्तथा मन्दहरिणो रमणकाह्वयः ।
लङ्केति कथिता विप्र ! जम्बुद्वीपस्य तेऽन्तराः ॥"
इति पाद्मे भूमिखण्डे भूगोलवर्णने १६०
अध्यायः ॥

शेष उवाच ।
"प्लक्षद्वीपं प्रवक्ष्यामि शृणु वात्स्यायन द्विज ! ।
यन्मानं जम्बुद्वीपस्य तथैव लवणोदधेः ॥
ततो द्विगुणमानोऽसौ प्लक्षद्वीपो महामते ! ।
जम्बुद्वीपस्य च यथा वेष्टनं लवणाम्भसा ॥
समानेन प्रमाणेन पुरः परिखया यथा ।
परिखाया उपवनं यथा भवति वेष्टनम् ॥
प्लक्षद्वीपस्तथैवासौ संवेष्ट्य लवणोदधिम् ।
द्विलक्षयोजनायामो वर्त्तते द्विजसत्तम ! ॥
तत्र जम्बूप्रमाणोऽस्ति द्वीपख्यातिकरस्तरुः ।
प्लक्षो नाम महाभाग ! स्वर्णवर्णोऽग्निधाम च ॥
तत्र वर्षाणि सप्तैव सुभद्रं यवसं शिवम् ।
अमृताभयशान्तानि क्रमादभयमित्यपि ॥
सप्तैव सीमागिरयो नद्यः सप्त च कीर्त्तिताः ।
मणिकूटो वज्रकूटो ज्योतिष्मानिन्द्रसेनकः ॥
हिरण्यष्ठीवो मेघमालः सुपर्णः सेतुसेवकाः ।
अरुणानृम्णा चैव सावित्र्याङ्गिरसी तथा ॥
सत्यम्भरा सुप्रभा च वात्स्यायन ! ऋतम्भरा ।
एताः सप्त महानद्यो दर्शनादेव पावनाः ॥
वर्णानां ब्राह्मणादीनां तत्र नामान्यनुक्रमात् ।
हंसश्चैव पतङ्गश्चोर्द्ध्वायनश्च तृतीयकः ॥
सत्याङ्गश्च चतुर्थो वै सर्व्वे धर्म्मार्थकोविदाः ।
अन्ये च पर्व्वतास्तत्र नद्यश्चैव महापगाः ॥
प्रागायतो महाभाग ! मलयो नाम पर्व्वतः ।
ततो मेघाः प्रवर्त्तन्ते प्रभवन्ति च सर्व्वतः ॥
ततः परेण विप्रेन्द्र ! जलधारस्तु पर्व्वतः ।
तस्माद्गृह्णाति वै तोयं वासवः पयसीश्वरे ।
वर्षासु हि ततो वृष्टिस्ततः सस्यसमुद्भवः ।
रैवतो नाम तत्रैव गिरिश्चैव प्रतिष्ठितः ॥
रेवती नाम नक्षत्रं हृषती दिवि मोदिता ।
उत्तरेण तु तस्यैव श्यामो नाम गिरिर्महान् ॥
प्रांशुः श्यामाभ्रवाभिनवमेघोपमविग्रहः ।
यस्य छाया श्यामवर्णाः प्रजास्तत्र महामते ! ॥
अतःपरं महाभाग ! दुर्गो नाम महागिरिः ।
केसरी केसरयुतो यतो वातः प्रवर्त्तते ॥
प्लक्षो नाम महाद्वीपो यत्र पूज्यस्तु शङ्करः ।
तत्र गच्छन्ति सिद्धाश्च चारणा दैवतानि च ॥
धार्म्मिकाश्च प्रजा ब्रह्मन् ! जराव्याधिविवर्जिताः ।
दीर्घायुषः क्षमावन्तो बहन्ते भोगहर्षिताः ॥
नदनाम्नी महापुण्या गङ्गा च बहुधा मता ।
महानदी मणिवरा श्रीताम्रो वैदिका तथा ।
सहस्राणि शतान्येव नद्यः संख्या न शक्यते ।
तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ॥
मगाश्च मगकाश्चैव मानसा मन्दगास्तथा ।
मगा ब्राह्मणभूयिष्ठाः स्वकर्म्मनिरता द्विज ! ॥
मगकेषु तु राजन्या धार्म्मिकाः सर्व्वकामदाः ।
मानसे च महाभाग ! वैश्यधर्म्मोपजीविनः ।
मन्दगेषु तथा शूद्राः शूद्रा धर्म्मार्थनिश्चिताः ।
न तत्र राजा विप्रेन्द्र ! न दण्डो न च दाण्डिकाः ।
स्वधर्म्मेणैव ते सर्व्वे रक्षन्ति च परस्परम् ॥
प्लक्षद्वीपप्रमाणेन समुद्रश्च ततो बहिः ।
इक्षुरसमयेनैव नानारत्नवता द्विज ! ॥
शाल्मलोऽपि तथा द्वीपः प्लक्षाद्द्विगुणमानतः ।
चतुर्लक्षयोजनेन सुरोदेनावृतो महान् ॥
यत्र वै शाल्मली नाम द्विलक्षयोजनोच्छ्रिता ।
द्वीपख्यातिकरो वृक्षः सुपर्णेन कृतालयः ।
तत्र वर्षाणि सप्तैव कथ्यन्तेऽथ सुरोचनम् ।
सौमनस्यं रमणकं देववर्षमिति क्रमात् ॥
पारिभद्रमाप्यायनमभिज्ञातमिति द्विज ! ॥
सेतुशैलाश्च सप्तैव सुरसः शतशृङ्गकः ।
वामदेवश्च कुन्दश्च कुमुदः पुष्पवर्षकः ।
सहस्रश्रुतिरिति महान् ! नद्यः सप्तैव कीर्त्तिताः ॥
अनुमतिः सिनीवाली नन्दा राका सरस्वती ।
रजनी च कुहूश्चैव महानद्यः सुपुण्यदाः ॥
तत्र विप्रादयो वर्णाः क्रमान्नामानि बिभ्रति ।
आद्यः श्रुतधरो वर्णस्ततो वीर्यधरः स्मृतः ।
वसुन्धरस्तृतीयस्तु चतुर्थस्तु इषुन्धरः ।
सर्व्वे ते सोममात्मानं भगवन्तं यजन्ति हि ॥
सुरोदं परिवेष्ट्याथ ततो द्विगुणमानकः ।
कुशद्वीपो घृतोदेन समानेनावृतो द्विज ! ॥
कुशस्तम्बो महांस्तत्र द्वीपख्यातिं करोति च ।
ज्वलन्यमानो दीप्त्या च महाज्वलनराशिवत् ॥
तत्र वर्षाणि सप्तैव समानानि प्रमाणतः ।
वसुदानं दृढरुचिर्नाभिगुप्तं महामते ! ॥
सत्यव्रतं विप्रनाम देवनामेति सप्तमम् ।
सप्तैव सीमागिरयः कीर्त्तिता द्विजसत्तम ! ॥
चक्रश्चैव चतुःशृङ्गः कपिलश्चित्रकूटकः ।
देवानीक ऊर्द्ध्वरोमा द्रविणश्चेति सप्तमः ॥
महानद्यश्च सप्तैव सर्व्वपापप्रणाशनाः ।
रसकुल्या मधुकुल्या मित्रविन्दा च मानद ! ॥
श्रुतविन्दा देवगर्भा घृतमाला घृतच्युता ।
तत्र विप्रादयो वर्णा नामान्तरगता द्विज ! ॥
कुशलः प्रथमो वर्णः कोविदश्च द्वितीयकः ।
अभियुक्तस्तृतीयस्तु चतुर्थः कुलकः स्मृतः ॥
ते सर्व्वे ज्ञानसम्पन्ना जातवेदस्वरूपिणः ।
भजन्ते भगवन्तं वै कर्म्मकौशलयाचिनः ॥
घृतोदाश्च तथा द्वीपो द्विगुणः क्रौञ्चसंज्ञकः ।
क्षीरोदेन समानेन वेष्टितो ब्राह्मणर्षभ ! ॥
क्रौञ्चो नाम गिरिर्येन द्वीपख्यातिकरो महान् ।
महासेनशराघातकृतच्छिद्रो महामते ! ॥
क्षीरोदेनाभिषिक्तश्च वरुणेनाभिपालितः ।
वर्षाणि तत्र सप्तैव तेषां नामानि मे शृणु ।
आमो मधुवहो मेघपृष्ठश्चापि सम्मतिः ।

श्रीविश्वार्थं: सुवर्णा च भाविष्यत्यपि भानवः।
किन्नरश्चापि यक्षैव गन्धर्वाप्सरसो दिवं।
गुह्यकाश्च यक्षमाणश्च शोभन्ते च सदा वसन्त:।
मध्यमो वसन्त्येव सर्वतोऽस्य दक्षिणे।
तत्र तत्र महावराः नानाः भारतवर्षे॥
भवन्ति नानाजीवा च इहिम वर्षा तथा।
शोभन्ते सर्वतो भुवा दक्षिणस्यापि वसुधा।
विशालकायाः वर्णाः ख्याताः नामान्तरेण तु।
पुरतः प्रथमो वर्णो द्वितीयो भवनः स्मृतः।
तृतीयो रविको नाम चैतन्ये चतुर्दशः।
भाति च नमदीर्घिकोऽपि च वहन्ति च॥ ७॥
एवं वदन्ति योगीन्द्रा भारतीये हि वर्षे॥
भाराभिव च विन्ध्यो हरिवर्षतपोधनः।
दक्षिणाज्यैवैष समाधिना च विद्युता।
परितो भाति नवानि शाको नाम सर्वोत्तमः।
दीप्यमानिकरः शिमान् भासयन् दीपयित्वा सदा।
वर्षाणि सप्त यत्रैव द्वीपवन्तोऽथवा।
पूर्वापरे वैषम्ये विश्वाधारे भारते॥
चतुर्दशकदर्भो नित्योऽपि च तत्र वै।
देवान् यजन्ति च मनवो महायशः।
प्रत्येकमपि च यथाचीन एव च।
ईदृशोऽपि वदेत् सर्वतोऽपरर्षिताः।
वदः कथैव विख्याता भारते वर्षे हि॥
चतुर्युगः पर्यायो विश्वं निवसति वा।
विख्यातोऽपि सर्वेऽपि महापुण्याः महाबलाः।
विशालकायाः वर्णाः ख्याताः नामान्तरेण तु।
आसौ भवन्तो नाम तत्र भवनः स्मृतः।
दानवाश्चाप्युरगाश्च सपीदाश्च चतुर्दशः।
भवन्ति पातालं भवनं च भवन्ति च॥ ८॥
तथैव दक्षिणतोऽपि च तस्मात् पुष्करो भवान्।
हिमवैव समावृत दीपः भारतवैव तु।
इन्द्रदीपः समाधिन विद्युता भारतवर्षे॥
अथ पुष्करमनुपं भवन्यानवर्जितम्।
शोभमानिकरं वसवदंशमुद्गोधिनम्।
वराहपुराणं विश्वलोकस्य प्रभावतः।
दीपवर्णितमित्येव तत्र महामते॥
स भारतोऽपरो नाम भारत इव देवता।
अत्र पुष्करद्वीपे देवौ। तत्र भारते॥
विश्वोदितवर्णेषु विशेषणं वदम्।
ततश्च भारतश्च हि वर्षे भारतः स्मृते।
प्रार्थं तत्र विरोधिनापूनद्योतनद्युतम्।
तस्यैव समावासम्भवोऽपि पुराणे च।
वसाति शोभनामानिमलदीपो दिवर्षेण॥
च; दक्षिणतस्तत्र शेषं दिव। दिवसः।
मध्ये निवसति देवैश्च सहस्रराजकम्।
अधरके च तौ वर्णौ प्रभावत्र महायशः।
तत्र संवत्सरं भाति वर्षोऽपि भारतवर्षे॥
आतुरवत्त वरणो लोकालोकस्य सम्यक्।
शोभन्ते भावनीयत्र सर्वे विरचिताः दिनः।
प्रकारं रत्न शोभा शोभान् समापवत्रमते॥
लोकालोकस्ततो नाम पर्वतो ब्रह्मलोकिनः।
प्रत्येकमपि शोभन्ते भारती यथा।
तावती आवृतो भूमिर्लोकालोकात्परे दिव॥
तत्र प्रतिष्ठितं वस्तु सर्वविश्वोपलम्भकम्।
लोकानां कल्पितोऽयं सर्वलोकसमाश्रितः।
ततः सर्वापि सर्वाणि तां भूमिं सर्वतोऽपि च।
लोकालोको गिरिर्वेष्टु लोकान्ते सर्वतो महान्॥
आदरेणापि च दैत्यापि सर्वतोऽस्मादपि दिव॥
समतिक्रम्य ज्योतींषि भ्रमन्ति च प्रकीर्तितम्।
तावन्मात्रयान् मन्वाद्यायामेन च तावतः।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना।
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः।
नद्योऽब्धिरितरे सर्वाणि सर्वेऽन्याः सुसमाहिताः।
विपुला सकला भूमिं कटाहवत् संस्थिताः।
भगवानपि सर्वेऽपि विश्वकर्मादिभिर्जनैः।
पार्थिवमदैवैकस्य एतैरङ्गैर्निरूपिते।
धारयन् जगतीमाद्यो आश्चर्यमपि भारत॥
योऽन्वर्थिकार स्तस्य भूभागे परिवर्तितः।
तावती भूरलोकाख्या आवरणसमावृता।
ततो योगिश्वरमतिश्वर्या ब्रह्माण्डगामिनम्।
ख्यातं भगवनः पादात् श्वेतद्वीप इतीरितम्।
इति ते कथितं सर्वम्। भूगोलकोशवर्णनम्॥
सनक उवाच।
य इदं शृणुयात् तत्र। भूगोलस्याह वर्णनम्।
सर्वाधिपतिना तेन सर्वैरुक्तवान्तरा।
धनायुरा च सहोदा भवती च वसुन्धरा॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम १११ अध्यायः॥ ०॥ ज्योतिषमते भूगोलम्। यथा,—
"सिद्धिं साध्यमुपैति यत्स्मरणतः क्षिप्रं प्रसादात्तथा यस्याश्चित्रपदा स्वलङ्कृतिरलं लालित्यलीलावती। नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती भारती तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे॥"
गोलप्रशंसामाह।
'मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम्। गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः॥'
अथ गोलज्ञस्य गणकस्य प्रशंसामाह।
'भोज्यं यथा सर्वरसं विनाज्यं
राज्यं यथा राजविवर्जितं च।
सभा न भातीव सुवक्तृहीना
गोलानभिज्ञो गणकस्तथेह॥
वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः सभां जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूवक्त्रवक्रोक्तिभिः। ह्रीणः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा ज्योतिर्वित्सदसि प्रगल्भगणकप्रश्नप्रपञ्चोक्तिभिः॥'
अथ गोलस्वरूपमाह।
'दृष्टान्त एवावनिभग्रहाणां
संस्थानमानप्रतिपादनार्थम्।
गोलः स्मृतः क्षेत्रविशेष एष
प्राज्ञैरतः स्याद्गणितेन गम्यः॥'
अथ गणितप्रशंसामाह।
'ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम्। ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते तस्माद् यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति॥'
अथ ज्योतिर्विदामध्ययनाधिकारिणमाह।
'द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नामधारी॥'
व्याकरणप्रशंसामाह।
'यो वेद वेदवदनं सदनं हि सम्यग्
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥'
अथ गोलग्रन्थस्य प्रशंसापूर्वकं श्रवणायाह।
'गोलं श्रोतुं यदि तव मतिर्भास्करीयं शृणु त्वं नो संक्षिप्तो न च बहु वृथा विस्तरः शास्त्रतत्त्वम्। लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्माद् विद्वन् विद्वत्सदसि वचसां प्रौढिमाविष्करोति॥'
अथ भूपृष्ठस्थं प्रश्नपूर्वकमाह।
'अल्पकायतया लोकाः स्वस्थानात् सर्वतोमुखम्।
यथा यथा यत्र तत्र तत्र तत्रैव तिष्ठति॥'
विश्वाधारा विश्वमाता भावनासंश्रिता सदा।
गोलस्याभ्यन्तरे भूमिर्भूमौ विश्वं व्यवस्थितम्॥'
अथ पञ्चभूतात्मकत्वं भूगोलस्याह।
'भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षावृत्तैर्वृत्तो वृतः सन् मृदनिलसलिलव्योमतेजोमयोऽयम्। नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात्॥'

किं दृक्कर्म तथोदयास्तसमये द्वेधा विदध्युर्बुधाः
सर्वं मे विमलं वदामलमलं गोलं विजानासि चेत्॥'

अथ त्रिप्रश्नोदितदिग्भ्रमाभेदप्रश्नं श्लोकद्वयेनाह।

'सवितुः किमधो रजनी तनु-
र्दिनमध्ये गतकोत्तरोन्नतौ।
यदु तद्दिवसो महती निशा
वद विचक्षण! दक्षिणदिग्गतौ॥
भवति किं द्युनिशं द्युनिशाधिपो
द्युमणिमर्धमितश्च सुरद्विषाम्।
गिलतु किं शशिमार्गमितं तथा
युगपदङ्घ्रियुगं द्विविधस्य किम्॥'

अथ राश्युदयमानकालभेदप्रश्नमाह।

'भवलयस्य किलार्कलवाः समाः
किमसमैः समयैः खलु राशयः।
समुपयान्त्युदयं किमु गोलवि-
न्नविषयेष्वखिलेष्वपि ते समाः॥'

अथ द्युज्याकुज्यादिसंस्थानप्रश्नं वृत्तार्द्धेनाह।

'द्युज्याकुज्यापमचरमगराप्राचलमादिकानां विद्वन्! गोले वियति हि यथा दर्शय चेत् संस्थाम्॥'

अथ चन्द्रार्कग्रहणयोः दिक्कालभेदाद्युपपत्तिप्रश्नान् श्लोकोत्तरार्द्धेनाह।

'विम्बान्ते चेत् यह उडुपतेः किम भागोऽस्तदार्कौ इन्दोः प्राच्यां भवति हि रवेः प्रग्रहः किं प्रतीच्याम्।'
लम्बनं वद किं का च नतिर्मतिमतां वर!।
ततृणं स्फुटतिथ्यौ वाऽथ किं ते चिह्ने कुतः कुतः॥'

अथ शृङ्गोन्नतौ चन्द्रस्य शुक्लस्य चयवृद्धिप्रश्नमाह।

'शुक्लस्य दिवराज एव महती बाध्या कुतः कुतः
यद्दृष्टामभवोऽप्यधो भ्रमणशालोपरिशक्रा-दिव।
संप्राप्याथ पुनश्चयोऽतनुमतस्त्वापचये नैव किं
शुक्लस्य क्रमशश्चयेन महतो वृद्धेरिति यद्वदताम्॥'

अथ प्रथमप्रश्नस्य पृथिवीसंस्थानोपपत्त्युत्तरं विवक्षुरादिसर्गे पृथिव्यादीनां तत्त्वानामादितत्त्वं निखिलजगज्जनकीभूतं परं ब्रह्म भगवत् प्रतिपद्यादौ तावत् तत्त्वमाह।

'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भे-ऽहङ्कारोऽभूत् खपवनशिखिजलोर्व्यस्ततः संहतैश्च।
ब्रह्माण्डं यज्जठरगमहीपृष्ठनिष्ठाद्विरिञ्चे-र्विश्वं शश्वज्जयति परमं ब्रह्म तत्तत्त्वमाद्यम्॥'

अथ भूमेः स्वरूपमाह।

'भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा-
वृत्तैर्वृत्तो वृतः सन् मृदनिलसलिलव्योमतेजोमयोऽयम्।
नान्याधारः स्वशक्त्या वियति च नियतं तिष्ठतीहास्य पृष्ठे
निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात्॥
सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः।
कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव॥'

अथ पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह।

'मूर्त्तो धर्त्ता चेद्धरित्र्यास्तदन्य-
स्तस्याप्यन्योऽप्येवमत्रानवस्था।
अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये
किं नो भूमिः साष्टमूर्त्तेश्च मूर्त्तिः॥'

अथ कथमियं भूमेः स्वशक्तिरित्याशङ्कां परिहरन्नाह।

'यथोष्णताऽर्कानलयोश्च शीतता
विधौ द्रुतिः के कठिनत्वमश्मनि।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्रा बत वस्तुशक्तयः॥
आकृष्टशक्तिश्च मही तया यत्
खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत् पततीव भाति
समे समन्तात् क्व पतत्वियं खे॥'

अथ बौद्धानां युक्तिमाह।

'भपञ्जरस्य भ्रमणावलोका-
दाधारशून्या कुरिति प्रतीतिः।
खस्थं न दृष्टं च गुरु क्षमातः
खेऽधः प्रयातीति वदन्ति बौद्धाः॥
द्वौ द्वौ रवीन्दू भगणौ च तद्व-
देकान्तरौ तावुदयं व्रजेताम्।
यदब्रुवन्नेवमनम्बराद्या
ब्रवीम्यतस्तान् प्रति युक्तियुक्तम्॥'

अथ तेषां युक्तिभङ्गमाह।

'भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध! मुधा कथम्।
याता यातं तु दृष्ट्वापि खे यत् क्षिप्तं गुरु क्षितिम्॥'

अथ जिनानां युक्तिभङ्गमाह।

'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथाश्रयाः।
भार्केन्दूनां विलोक्याहो ध्रुवमत्स्यपरिभ्रमम्॥'

भूगोलस्य समतां निराकुर्वन्नाह।

'यदि समा मुकुरोदरसन्निभा
भगवती धरणी तरणिः क्षितेः।
उपरि दूरगतोऽपि परिभ्रमन्
किमु नरैरमरैरिव नेक्ष्यते॥
यदि निशाजनकः कनकाचलः
किमु तदन्तरगः स न दृश्यते।
उदगयं ननु मेरुरथांशुमान्
कथमुदेति च दक्षिणभागतः॥'

अथ प्रत्यक्षविरोधशङ्कां निरस्यन्नाह।

'समो यतः स्यात् परिधेः शतांशः
पृथ्वी च पृथ्वी नितरां तनीयान्।
नरश्च तत्पृष्ठगतस्य कृत्स्ना
समेव तस्य प्रतिभात्यतः सा॥'

स्वोक्तस्य भूपरिधिप्रमाणस्य उपपत्तिमाह।

'पुरान्तरं चेदिदमुत्तरं स्यात्
तदक्षविश्लेषलवैस्तदा किम्।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं निरुक्तं परिधेः प्रमाणम्॥'

तदेव दृढीकुर्वन्नाह।

'निरक्षदेशात् क्षितिषोडशांशे
भवेदवन्ती गणितेन यस्मात्।
तदन्तरं षोडशसंगुणं स्याद्
भूमानमस्मादधिकं किमुक्तम्॥
अक्षोन्नतिग्रहयुतिग्रहयोरथास्त-
च्छायादिकं परिधिना घटतेऽमुना हि।
नान्येन तेन जगुरुक्तमहीप्रमाण-
प्रामाण्यमन्वययुजा व्यतिरेककेण॥'

अथ भूगोलपुरनिवेशमाह।

'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलश्च॥
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति।
वसन्ति मेरौ सुरसिद्धसंघा
और्वे च सर्वे नरकाः सदैत्याः॥
यो यत्र तिष्ठत्यवनीं तलस्था-
मात्मानमस्या उपरिस्थितञ्च।
स मन्यतेऽतः कुचतुर्थसंस्था
मिथश्च ते तिर्यगिवामनन्ति॥
अधःशिरस्काः कुदलान्तरस्था-
श्छायामनुष्या इव नीरतीरे।
अनाकुलास्तिर्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथात्र॥'

अथ द्वीपानां समुद्राणाञ्च संस्थानमाह।

'भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बूद्वीपं प्राहुराचार्यवर्याः।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः॥
लवणजलधिरादौ दुग्धसिन्धुश्च तस्मा-
दमृतरश्मिः श्रीश्च यस्मात् प्रसूता।
महितचरणपद्मः पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र॥
दध्नो घृतस्येक्षुरसस्य तस्मा-
न्मद्यस्य च स्वादुजलस्य चान्त्यः।
स्वादूदकान्तर्वडवानलोऽसौ
पाताललोकाः पृथिवीपुटानि॥
वसत्सु भा मणिमयैर्गृहतरकाभा
दीप्ता सुरगणाः फणिनो वसन्ति।
दीव्यन्ति दिव्यरमणीरमणीयदेहैः
निद्रा च तत्र हि यथा भुवनकामभावैः॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति॥'

[illegible]

अथ तद्युक्तिमाह ।
'यत् परिधङ्गैर्विष्कम्भं हतं लब्धा क्षितामुकम् ।
तैनाहं छाद्यते गोलः किञ्चित्तत्र शिष्यते ॥
गोलस्थैवफलात्तदूयमादक्षचैत्रफलं मतः ।
शाङ्केङ्गुणितापमं तावदेवापरे दले ॥
एवं यत्रगुणात् चैत्रफलात् पृष्ठफलं खलु ।
नाधिकं जायते तेन परिधिमं कृतः हतम् ॥
हंतचैत्रफलं यस्मात् परिधिमं न युक्तिमत् ।
दृष्टत्वाद्गणितत्वाच्च दृष्टं भूपृष्ठजं फलम् ॥"
अथान्यथा प्रतिपाद्यते ।
'गोलस्य परिधिः कल्प्यो वेदघ्न्यामितिर्मितः ।
सुखबुधगरेखाभिर्यदामलके स्थितः ॥
ताग्रन्तौ यमकालान्तु प्रागुक्तपरिधिर्मितान् ।
तदंशधःशतरेखाभिर्गोले यद्वान् प्रकल्पयेत् ॥
तत्रैकदथकचैत्रफलं खण्डैः प्रसाध्यते ।
सर्वेष्वेक्यं त्रिभज्याहं दोर्नं त्रिज्याहंभाजितम् ॥
एवं यत्फलं तत् स्याद्गोलव्यासघ्नं मतः ।
परिधिव्यासघातोऽसौ गोलपृष्ठफलं स्फुटम् ॥'
अथ भूमेः प्रलयभेदान् प्रलयञ्चाह ।
'वृद्धिर्विधेरपि भुवः समन्तात्
स्याद्योजनं भूभवभूतिपूर्वैः ।
ब्राह्म लये योजनमात्रवृद्धे-
र्नाशो भुवः प्राकृतिकेऽखिलायाः ॥
दिने दिने यन्म्रियते हि भूतै-
र्दैनन्दिनं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले
भूतानि यद्ब्रह्मतनुं प्रयान्ति ॥
ब्रह्मात्यये यत् प्रकृतिं प्रयान्ति
सर्वाण्यतः प्राकृतिकं कवीन्द्राः ।
लोकास्त्रयः कर्मपुटान्तरत्वात्
पृथक् क्रियन्ते प्रकृतेर्विकारैः ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा
मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्ति निवृत्तिमस्मा-
दात्यन्तिकं चेति लयश्चतुर्धा ॥'
अथ ब्रह्माण्डगोलमाह ।
'भूभूधरत्रिदशदानवमानवाद्या
ये चात्र धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकत्रयस्थितिरपर्यगतिप्रसिद्धा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथाम्बोदित ब्रह्माण्डमानं पूर्वोक्तमपि प्रस-
ङ्गात्स्पष्टयति सा ।
कोटिघ्नैर्नखनन्दषट्कनखभूभूभृद्भुजङ्गेन्दुभि
र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां
योजनैः १८७१२०६९२०००००००० ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं
केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः
सूरयः ॥
करतलकलितामलक-
वदमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहत-
तमसो नभसः परिधिरुदितस्तैः ॥
ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशः
समाप्तः ॥
भूच्छायं, क्लौ, स्त्री, (भुवश्छाया । "विभाषा सेना-
सुराच्छायाशालानिशानाम् ।" २ । ४ । २५ । इति
तत्पुरुषे विभाषया नपुंसकम् । छायाबाहुल्ये
तु केवलं क्लीवत्वं) अन्धकारः । इति शब्दमाला ॥
भूजम्बुः, पुं, (भुवो जम्बुरिव ।) उपरसविशेषः । इति
राजनिर्घण्टः ॥ (विशेषोऽस्य भूनागशब्दे
द्रष्टव्यः ॥)
भूजम्बूः, स्त्री, (भूवो जम्बूरिव स्वादुत्वात्) विकङ्कत-
फलम् । गोधूमः । इति मेदिनी । बे, १७ ॥
भूमिजम्बुः । इति राजनिर्घण्टः ॥
भूतं, क्लौ, (भू + क्तः ।) युक्तम् । न्यायः । क्ष्मादिः ।
पृथिव्यप्तेजोवाय्वाकाशपञ्चकम् । (यथा, मनुः ।
१२ । १४ ।
"तावुभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञ एव च ।
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥"
"स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति ।
भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चत-
न्मात्राण्युत्पद्यन्ते । तद्यथा । शब्दतन्मात्रं स्पर्श-
तन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्र-
मिति । तेषां विशेषाः शब्दस्पर्शरूपरसगन्धा-
स्तेभ्यो भूतानि व्योमानिलानलजलोर्व्व्यः ।" इति
सुश्रुते शारीरस्थाने प्रथमेऽध्याये ।)
सत्यम् । सत्यम् । इत्यमरभरतौ । पिशाचादि ।
(यथा, श्रीभागवते । ३ । १४ । २९ ।
"एषा घोरतमा वेला घोराणां घोरदर्शना ।
चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥")
जन्तुः । इति मेदिनीशब्दरत्नावल्यौ । (यथा,
मनुः । ६ । ८ ।
"स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समा-
हितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥"
स्थावरजङ्गमात्मकं द्रव्यम् । यथा, मनुः । ८ । ३०६ ।
"रक्षन् धर्मेण भूतानि राजा वध्यांश्च घात-
यन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥")
यथार्थत्वम् । यथा,—
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥
छलं प्रमादाभिहितम् । निरस्य परित्यज्य ।
भूतेन वस्तुतत्त्वानुसरणेन । व्यवहारान्नयेन्न-
नृपः । यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्त-
मनभिहितं हीयते हानिमुपगच्छति व्यवहारतो
व्यवहारेण शास्त्रादिभिः । तस्माद्भूतानुसरणं
कर्त्तव्यम् । यथार्थिप्रत्यर्थिनौ यस्मिन्नेव वस्तुन्या
समन्वेन समापतितौ तत्तथं शास्त्रादिभिरवधार्ये-
त्यथा यदि शास्त्रादिभिरपेक्षितेन निर्णेयो भव-
तीति ॥ अथ सर्वथापि भूतानुसरणं न शक्यते
कर्त्तुं तथा सति शास्त्रादिभिर्निर्णयः कार्य्य-
इत्यनुकल्पः । यथोक्तम् । भूतच्छलानुसारि-
त्वाद्द्विगतिः समुदाहृता । भूतन्तत्त्वार्थसंयुक्तं यत्
प्रमादाभिहितं छलमिति । तत्र भूतानुसारी
व्यवहारो मुख्यः । छलानुसारी त्वनुकल्पः ।
इति मिताक्षरायां व्यवहाराध्यायः ॥
भूतं, त्रि, (भाव्यते स्मेति । "व्याप्याङ्गेति मिच-
भावः । भू + क्तः । भूतिरस्यस्येति वा । अर्श-
आदित्वात् अच् । अभवदिति वा । भुवो गत्यर्थे
इति । भूतार्थे कर्त्तरि क्तः ।) प्राप्तो । जन्तुः ।
(यथा, ऋग्वेदे । १ । २७ । ६ ।
"धिया चक्रे वरेण्यो भूतानां गर्भमादधे ।"
यथा च चरके शारीरस्थाने तृतीयेऽध्याये ।
"भूतानां चतुर्विधा योनिर्भवति जरायुजाण्डस्वेदोद्भिदः ।")
अतीतम् । (यथा, कथासरित्सागरे । १ । २४ ।
"भूतं भवद्भविष्यद्वा किं तत् स्यात् जगति
प्रिये ।
भवतो यन्न जानीयादिति शर्व्वोऽभ्यधात्तताम् ।")
वृत्तम् । (यथा, सुश्रुते चिकित्सितस्थाने । १०
अध्याये ।
"गोमूत्रद्भूतानां वा पक्वानां प्रकृत् कार-
यित्वा ।")
समम् । सदृशम् । इत्यमरभरतौ । प्राप्तम् ।
(यथा, महाभारते । १२ । ३० । १५ ।
"यद् ब्राह्मणसुखात् प्राप्तं प्रतियच्छन्ति वै मधः ।
भूतानामानो महात्मानस्ते न यान्ति परा-
भवम् ॥"
"भूतः प्राप्तो वयोऽतीत आत्मा चित्तं येषां ।"
इति तट्टीकायां नीलकण्ठः ।) सत्यम् ।
इति मेदिनीशब्दरत्नावल्यौ । (यथा शाकु-
न्तले । प्रथमाङ्के । "सूत्रधारः । आर्य्ये !
आर्य्ये ! कथयामि ते भूतार्थम् ।") भूतकालस्य
पर्य्यायो यथा । वृत्तम् १ अतीतम् २ व्यतीतम् ३
निवृत्तम् ४ गतम् ५ । इति राजनिर्घण्टः ॥
उत्तरपदस्थ एव भूतशब्दः समार्थे इति
शाब्दिकाः । यथा देवभूतोऽयम् । इति भरतः ॥
(उत्तरपदस्थ भूतशब्दः स्वरूपार्थोऽपि । यथा,
मनुः । १ । ५ ।
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥")
भूतः, पुं, (भू + कर्त्तरि क्तः ।) देवयोनिविशेषः ।
स च क्रोधवशोद्भवः पिशाचभेदो रुद्रा-
नुचरो बालग्रहः । इत्यमरभरतौ । (यथा,
मार्कण्डेयपुराणे । ११ । १२ ।
"विविधैर्भूतसङ्घैश्च सहितं त्रिनयनं च ।
भूतानां मातृभिश्चापि बालकानां प्रासदे ।")
कुमारः । इति मेदिनी । ते, ३१ । योगीन्द्रः ।
इति शब्दरत्नावली । तत्पुरुषे । इति
त्रिकाण्डशेषः । ७ । भूतनामलौकिकम् । यथा,
"वेतालपरावृताङ्कं पिष्टं तक्रधारितम् ।
तेन पञ्चशरार्थं चास्तु सततं विरचम् ।

[illegible]

इति भारते १६९ । १६८ अध्यायः ॥

[illegible]

इति कालिकापुराणे ६८ अध्यायः ॥

[illegible]

भूतकेशः, पुं, (भूतस्य केश इव।) [illegible] इति रत्नमाला । [illegible] इति भरतः ॥

भूतकेशी, स्त्री, (भूतकेश + गौरादित्वात् ङीष् ।) भूतकेशः । इति रत्नमाला । [illegible]

[illegible] इति राजनिर्घण्टः ॥

[illegible] इति शब्दरत्नावली ।

भूतघ्नः, पुं, (भूतं हन्तीति । हन् + टक् ।) उष्ट्रः । इति हेमचन्द्रः । [illegible] इति राजनिर्घण्टः । [illegible]

[illegible]

भूतचतुर्दशी, स्त्री, (भूतप्रिया भूतोद्देशेन क्रियमाणा वा चतुर्दशी । मध्यपदलोपी समासः ।) [illegible]

[illegible]

इति तिथ्यादितत्त्वम् ॥

भूतजटा, स्त्री, [illegible] जटामांसी । इति शब्दमाला । [illegible]

[illegible] इति राजनिर्घण्टः ॥

[illegible]

इति राजनिर्घण्टः ॥

भूतद्रुमः, पुं, (भूतप्रियो द्रुमः ।) [illegible] इति राजनिर्घण्टः ॥

भूतधात्री, स्त्री, (भूतानि धरतीति । धृ + तृच् + ङीप् ।) पृथिवी । इति त्रिकाण्डशेषः ॥

[illegible]

भूतनाथः, पुं, (भूतानां नाथः ।) शिवः । इति शब्दरत्नावली ।

[illegible] इति राजनिर्घण्टः ॥

[illegible] इति शब्दमाला ।

[illegible] इति राजनिर्घण्टः ॥

[illegible] इति शब्दमाला ॥

[illegible]

भूतपूर्णिमा, स्त्री, [illegible] इति शब्दरत्नावली ॥

[illegible] इति शब्दमाला ।

[illegible]

(यथा, महाभारते । १३ । १४९ । १४ ।
"भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ।"
महादेवः । यथा, महाभारते ।१३।१७।१२३ ।
"अभिवाद्यो महाकर्म्मा तपस्वी भूतभावनः ।")
षट्कभैरवः । इति विश्वसारतन्त्रोक्तं तच्छतनाम्नान्तर्गतनाम । (भूतानि भावयति साजयतीति । भूतपालके, त्रि । इति श्रीधरस्वामी । यथा गीतायाम् । ९ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।")
भूतभृत्,पुं,(भूतानि बिभर्त्तीति । भृ+क्विप् । तुगागमश्च) विष्णुः । यथा, महाभारते ।१३।१४९।१४।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः । इति तस्य सहस्रनामस्तोत्रम् । (भूतधारके, त्रि । यथा, गीतायाम् । ९ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।")
भूतमारी, स्त्री, (भूतानि मारयतीति । भूत+मृ+णिच्+णिनिः ।) चीड़ानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
भूतयज्ञः, पुं, (भूतार्थो यज्ञः । भूतानि काकादिप्राणिजातानि तान्युद्दिश्य यो यज्ञ इति वा नित्यं गार्हस्थ्याचरणीय पञ्चयज्ञेषु यज्ञभेदः ।) भूतबलिः । स तु पञ्चमहायज्ञान्तर्गतबलिवैश्वदेवकर्म्मणी । यथा, भूतेभ्यो बलिहरणं भूतयज्ञः । इति हारीतवचनम् । अस्यानुष्ठानं बलिशब्दे द्रष्टव्यम् । (यथा, मनुः । ४ । २१ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ।")
भूतलिका, स्त्री, (भूतलं पृथ्वीतलं आधारत्वेन अस्त्यस्या इति । भूतल+ठन् टाप् ।) पृक्का । इति राजनिर्घण्टः ॥
भूतवासः, पुं, (भूतानां वासो यत्र ।) कलिद्रुमः । रत्नमाला । २ । ४ । ५८ । (तथा च पर्य्यायः ।
"बिभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलश्च सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमेभागे ॥
महादेवः । यथा, हरिवंशे उत्तरभविष्ये । १५ । १९ ।
"भूतवास ! नमस्तुभ्यं सर्व्वावास ! नमोऽस्तु ते ।")
भूतविक्रिया, स्त्री, (भूतानामिव विक्रियात्राम् ।) अपस्माररोगः । इति राजनिर्घण्टः ॥
भूतवृक्षः, पुं, (भूतप्रियो वृक्षः ।) श्याखोटवृक्षः । शोभाञ्जनवृक्षः । इति मेदिनी । ष, ५६ ॥
भूतवेशी, स्त्री, (भूतानामिव वेशोऽस्याः । गौरादित्वात् ङीष् ।) श्वेतनिर्गुण्डिका । इत्यमरः । २ । ४ । ७९ ॥ (विवृतोऽस्याः श्वेतशेफालिकाशब्दे द्रष्टव्यः ॥)
भूतशुद्धिः, स्त्री, (भूतानां देहारम्भकपृथिव्यादिपञ्चभूतानां शुद्धिः शोधनम् ।) पूजादौ चीनविधिवदाराधनाङ्गविविक्षितपापपुरुषदहनपूर्ब्बकशरीरशोधनम् । तत्प्रयोगो यथा । हमिति जलधारया वह्निप्राकारं विचिन्त्य श्याढ़े करानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्छ्रोत्र वाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपचतुर्व्विंशतितत्त्वानि लीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थकृष्णवर्णं पापपुरुषेण सह देहं संशोष्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत् । दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारोत्थितवह्निना दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत् । ठमिति चन्द्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा तस्य षोड़शवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटस्थचन्द्राद्गलितसुधया मातृकावर्णात्मिकया समस्तदेहं विरचय्य लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत् । मात्रासंख्या वा ॥०॥ तदुक्तं गौतमीये ।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिवस्थाने परमात्मनि दैशिकः ॥
धूम्रवर्णं ततो वायुबीजं षड्बिन्दुलाञ्छितम् ।
पूरयेदिड़या वायुं सुधीः षोड़शमात्रया ॥
मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्नया ।
द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया ॥
पूरयेदनया चैव दक्षिण्य वीजमारुतम् ।
रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितम् ॥
तेन पूरकयोगेन मात्रया षोड़शाख्यया ।
चतुःषष्ट्या मात्रया च निरुन्ध्यात् कुम्भकेन च ।
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाणं रक्तश्मश्रु विलोचनम् ।
खड्गचर्म्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत् ॥
मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तम् ।
एवं संदह्य परितो द्वात्रिंशन्मात्रया ततः ॥
भस्मना सहितं मन्त्री रेचयेदिड़या पुनः ।
वामनासापुटे चन्द्रबीजं कुन्देन्दुधवलप्रभम् ॥
भालेन्दुरापि संयोज्य ततः षोड़शमात्रया ।
सुषुम्नया चतुःषष्टिमात्रया तोयबीजकम् ॥
ध्यात्वामृतमयीं दृष्टिं पञ्चाशद्वर्णरूपिणीम् ।
तया देहं विनिर्व्विर्त्य लघुना पिङ्गलाख्यया ॥
द्वात्रिंशन्मात्रया मन्त्री वं बीजेन दृढं सुधीः ।
सहस्रारे संस्थितं तु पुनर्ल्लिङ्गेन सयन्त्रा ।
जीवं नत्वा निजं स्वस्थाने स्थापयेत्ततः ।"
इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत् ॥०॥
संक्षेपभूतशुद्धिर्यथा । पुरश्चरणचन्द्रिकायाम् ।
"अथवान्यप्रकारेण भूतशुद्धिर्विधीयते ।
धर्म्मकन्दसमुद्भूतं ज्ञाननालसुशोभनम् ॥
ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकम् ।
स्वीयहृत्पद्ममध्ये ध्यायेत् प्रणवेन विकासितम् ॥
ध्यात्वा तत्कर्णिकासंस्थं प्रदीपकलिकाविभम् ।
जीवात्मानं हृदि ध्यात्वा मन्त्री संयम्य कुण्डलीम् ।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत् ।"
इति तन्त्रसारः ॥
भूतसञ्चारः, पुं, (भूतस्य सञ्चारः ।) भूतोन्मादरोगः । तत्पर्य्यायः । आवेशः २ भूतक्रान्तिः ३ ग्रहागमः । इति राजनिर्घण्टः ॥
भूतसञ्चारी, [न्] पुं, (भूतैः सञ्चरति इति भूत+सम्+चर णिनिः ।) दावानलः । इति शब्दमाला ॥
भूतसर्गः, पुं, (सृज्यते इति । सृज+भावे घञ् । भूतानां सर्गः ।) भूतसृष्टिः । (यथा, मार्कण्डेय पुराणे । ४७ । २१ ।
"प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ।")
"ब्राह्मं प्राजापत्यैन्द्रं सौम्यमैन्द्रं तथैव च ।
गान्धर्व्वमथ कौवेरं रक्षःपैशाचमानुषम् ।
स्थावरं पाशवं सार्पं पार्षं पाक्षिकमन्यथा ।
चतुर्द्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम् ।"
इति वह्निपुराणोक्तं जीवसर्गम् ॥
भूतसारः, पुं, (भूतः प्रतः सारो यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥
भूतहन्त्री, स्त्री, (भूतानि हन्तीति हन+तृच्+ङीप् ।) वन्ध्याकर्कोटकी । नीलदूर्व्वा । इति राजनिर्घण्टः ॥
भूतहरः, पुं, (भूतानि हरतीति हृ+अच् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥
भूतहारि, [न्] क्ली, (भूतानि हरतीति हृ+णिनिः ।) देवदारु । इति राजनिर्घण्टः ॥
भूता, स्त्री, (भूत+टाप् ।) कृष्णचतुर्द्दशी । यथा, स्कान्दे ।
"मघार्क्षोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतायां पारणे कृते ।"
अपि च ।
"दिवरात्रिगते भूता कालविद्धा विवर्ज्जयेत् ।"
इति तिथ्यादितत्त्वम् ॥
भूताङ्कुशः, पुं, (भूतानामङ्कुश इव निवारकत्वात् ।) कश्यपप्रभेदः । तत्पर्य्यायः । अवकः २ शुरकः ३ तीक्ष्णः ४ क्रूरः ५ चपः ६ राजीहृदयांशः ७ भूतहारी ८ महाहृदयः ९ । अस्य गुणाः । तीक्ष्णत्वम् । वातहरत्वम् । उष्णत्वम् । कटुत्वम् । भूतग्रहादिदोषघ्नत्वम् । कफवातनिहन्तृत्वञ्च । इति राजनिर्घण्टः ॥

आमलक्युष्णवस्त्रो वै समरोचश्च भूतघ्नम् ।
भूतघ्नपर्णे वै दिक्षु निम्बपत्राणि वै यथा ।
गौरसर्षप एभिः स्यात्तैभो भूतहरः स्मृतः ॥
गेहोत्सवा मरीचानि पिप्पली वेष्टनं मधु ।
अञ्जनं लशुनैभिः स्याद् पञ्चभूतहरं शिव ! ॥
अपि च ।
"वचा निकटुकञ्चेव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चेव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादग्रहोत्सन्नीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते ॥"
इति गारुडे १८९ । १८८ अध्यायः ॥
अन्मृतवमूला यथा,—
"वृते वराहस्य मही भर्गमालाग्र वै यदा ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै प्रभुः ॥
भूतलममयर्णां चतुर्भागवतां तदा ।
ववहात् पञ्चभागस्य भूतग्रामागतो यतः ॥
यो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्विधः ।
यतस्तेभ्योऽधिका ययेस्तद्भूतग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः प्रभुतया यथा ।"
इति कालिकापुराणे ४८ अध्यायः ॥
(वसुदेवस्य पौरवीगर्भजातद्वादशपुत्राणां अन्यतमः । यथा, भागवते । ९ । २४ । ४७ ।
"पौरव्यासुषता होते भूताद्या द्वादशाभवन् ॥")

भूतकेशः, पुं, (भूतस्य केश इव ।) तृणविशेषः । तत्पर्य्यायः । गोलोमी २ । दम-भरः ३ । १ । १ । १११ ॥ भूतकेशी ४ अप-केशी ५ केशी ६ । इति रत्नमाला ॥ भूतानां केश इव भूतकेशः सोऽयमिति केचित् । स्त्री लिङ्गे । अथ पर्य्यायौ भूतकेशी गोलोमी भूतकेशीति वाचस्पतिः । इति भरतः ॥

भूतकेशी, स्त्री, (भूतकेश + गौरादित्वात् ङीष् ।) भूतकेशः । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सिते । ६० अध्याये ।
"गोलोमी चाजलोमी च भूतकेशी जटा तथा ॥")
शेफालिका । नीलसिन्दुवारः । इति राजनिर्घण्टः ॥

भूतक्रान्तिः, स्त्री, (भूतानां क्रान्तिः ।) भूतावेशः । इति राजनिर्घण्टः ॥

भूतगर्भा, स्त्री, (भूतः गर्भः विभावि प्रकटितो-ऽस्यां ।) सुरावामनम्सरयम् । इति जटा-धरः ॥

भूतघ्नः, पुं, (भूतं हन्तीति । हन् + टक् ।) उष्ट्रः । इति हेमचन्द्रः ॥ लशुनः । भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥ भूतनाशके त्रि ॥ (यथा, नागकारे ।
"भूतघ्नेषु निशोथे सोऽहं तामः प्रदीपतः ।
भूतपतिविद्याघात वेतालो भैरवाश्च ॥")

भूतघ्नी, स्त्री, (भूतं हन्तीति । हन् + टक् + ङीप् ।) तुलसी । इति राजनिर्घण्टः ॥ शङ्ख-पिण्डी । इति रत्नमाला ॥

भूतचतुर्द्दशी, स्त्री, (भूतप्रिया भूतोद्देशे क्रिया कर्त्तव्या वा चतुर्द्दशी । मध्यपदलोपी समासः ।) कार्त्तिककृष्णचतुर्द्दशी । सा एव यमचतु-र्द्दशी । तत्कृत्यं यथा, माद्ये ।
"चतुर्द्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमात्राच्च कार्य्यं वर्जयेन्नरकमीतिभिः ॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशयः ॥"
स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्द्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
किञ्च पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ।
जीवत्पिता न कुर्व्वीत तर्पणं यमभीष्मयोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ॥
देवत्वञ्च पितृत्वञ्च यमस्यास्ति द्विरूपता ॥
नक्तं यमचतुर्द्दश्यां यः कुर्य्याच्छिवमन्दिरे ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा वै शतपोषणात् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण विना लभ्या चतुर्द्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः ॥
किञ्च ।
अमावास्याचतुर्द्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः ॥"
इति श्रीहरिभक्तिविलासः ॥
अपि च । लैङ्गे ।
"कार्त्तिके कृष्णपक्षे च चतुर्द्दश्यां दिनोदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
अपामार्गमथस्तम्बं भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ॥
नरकाय प्रदातव्यो दीपः संपूज्य देवताः ।
नरकाय नरकान्तरये ।
अपामार्गपियो वै यत्र प्रयोजनविधिर्ति ॥
इति विष्णवायवि ताव्यं तत्रैव चतुर्द्दौविधा-नात् । अपामार्गप्रामणमन्त्रः ।
शीतलोष्ठसमायुक्तसकण्टकदलान्वित ।
हर पापमपामार्ग ! भ्राम्यमाणः पुनः पुनः ॥
ततः प्रदोषसमये दीपान् दद्यात् प्रयत्नतः ।
मठविष्णुशिवादीनां मठेष्वेव मठेषु च ॥
भविष्ये ।
कार्त्तिके भौमवारे च विना कृष्णचतुर्द्दशी ।
तस्यामाराधितः स्यात्तु गच्छेच्छिवपुरं ध्रुवम् ॥
यो कार्त्तिके चरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम् ।
यमुनायां विशेषेण निपतत्तर्पयेद्रुषाम् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रीन् दद्याज्जलाञ्ज-लीन् ।
जन्मप्रभृतिकृतं पापं तत्क्षणादेव नश्यति ॥"

अपामार्गदलचतुर्द्दशमाशाकभक्षणं कर्त्तव्यम् । इति निर्णयामृतम् ।
"भोजने कैतुकवास्तुकं सरसं कालश्च शिग्रुं वदां प्राणिनो निश्चमीविवाघ पटुकं चौकुरं
गुडूचीनवा ।
मण्डूकीं सुनिषण्णकं प्रिपतिते खादन्ति ये
मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते तिथौ ॥"
अत्र जयन्ती पटुकं पटोलं मौलकं मूलकम् इति ख्यातम् । सुनिषण्णकं सुसनिया इति ख्यातम् । इति तिथ्यादितत्त्वम् ॥

भूतजटा, स्त्री, (भूतस्य जटेव तद्वदाकारात् ।) जटामांसी । इति शब्दमाला ॥ (पर्य्यायो यथा,
"जटामांसी भूतजटा जटिला च तपस्विनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गन्धमांसी । इति राजनिर्घण्टः ॥

भूतदावी, [न्] पुं, (भूतान् विद्रावयति प्रावयतीति । द्रु + णिच् + णिनिः ।) भूताङ्कुशवृक्षः । रक्त-करवीरः । इति राजनिर्घण्टः ॥

भूतद्रुमः, पुं, (भूतप्रियो द्रुमः ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः ॥

भूतधात्री, स्त्री, (भूतानि धरतीति । धृ + ष्ट्रन् । + ङीप् ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, रघुवंशे । ८ । १० ।
"न्यिमग्नलोकेष्ववादित्यसुखो
मयेवं सुलानुपमात्मवेदाम् ।
संमृष्टलोकां कलिदोषवतां
सर्वे तदा प्राप्ति च भूतधात्रीम् ॥")

भूतनाथः, पुं, (भूतानां नाथः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, रघुः । २ । ५८ ।
"तद्भूतनाथानुग ! नार्हसि त्वं ॥")

भूतनायिका, स्त्री, (भूतानां नायिका नियामिका ।) दुर्गा । इति हेमचन्द्रः ॥

भूतनाशनं, क्ली, (भूतानि प्राणिवाधादि नाशयति अनेनेति । नश + णिच् + ल्युट् ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥

भूतनाशनः, पुं, (भूतान् नाशयतीति । नश + णिच् + ल्युः ।) भल्लातकः । इति रत्नमाला ॥ सर्षपः । इति राजनिर्घण्टः ॥

भूतपत्री, स्त्री, (भूत इव सर्व्वं पत्रं यस्याः । ङीप् ।) तुलसी । इति राजनिर्घण्टः ॥

भूतपुष्पः, पुं, (भूतप्रियं प्राणिविशिष्टं पुष्पं यस्य ।) श्योनाकवृक्षः । इति रत्नमाला ॥

भूतपूर्णिमा, स्त्री, (भूतानां पूर्णिमा ।) आश्विनी पूर्णिमा । तत्पर्य्यायः । शारदी २ कौमुदी ३ आश्वयुजी ४ शरत्पर्व्व ५ दमभूतिः ६ कोजा-गरा ७ । इति शब्दरत्नावली ॥

भूतब्रह्मा, [न्] पुं, (भूतानां ब्रह्मा ब्राह्मणः ।) देवलः । इति शब्दमाला ॥

भूतभावनः, पुं, (भूतानि भावयतीति आत्मनि अवयवतीति । भू + णिच् + ल्युः ।) विष्णुः ॥

(यथा, महाभारते । १३ । १४९ । १४ ।
"भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ।"
महादेवः । यथा, महाभारते ।१३।१७।१११ ।
"अभिवाद्यो महाकर्म्मा तपस्वी भूतभावनः ।")
वटुकभैरवः । इति विश्वसारतन्त्रोक्तं तस्याष्टोत्तरशतनामान्तर्गतनाम । (भूतानि भावयति पालयतीति । भूतपालके, त्रि । इति श्रीधरस्वामी । यथा गीतायाम् । ९ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।")

भूतभृत्, पुं, (भूतानि बिभर्त्तीति । भृ + क्विप् । तुगागमश्च) विष्णुः । यथा, महाभारते ।१३।१४९।१४।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः । इति तस्य सहस्रनामस्तोत्रम् । (भूतधारके, त्रि । यथा, गीतायाम् । ९ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।")

भूतमारी, स्त्री, (भूतानि मारयतीति । भूत + मृ + णिच् + णिनिः ।) चीडानामगन्धद्रव्यम् । इति राजनिर्घण्टः ।

भूतयज्ञः, पुं, (भूतार्थो यज्ञः । भूतानि काकादिप्राणिजातानि तान्युद्दिश्य यो यज्ञ इति वा नित्यं गार्हस्थाचरणीय पञ्चयज्ञेषु यज्ञभेदः ।) भूतबलिः । तौ तु पञ्चमहायज्ञान्तर्गतबलिवैश्वदेवकर्म्मणी । यथा, भूतेभ्यो बलिहरणं भूतयज्ञः । इति हारीतस्मृतिः । अस्यानुष्ठानं बलिशब्दे द्रष्टव्यम् । (यथा, मनुः । ४ । २१ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ।")

भूतलिका, स्त्री, (भूतलं पृथ्वीतलं आधारत्वेन अस्त्यस्या इति । भूतल + ठन् टाप् ।) रुचा । इति राजनिर्घण्टः ।

भूतवासः, पुं, (भूतानां वासो यत्र ।) कलिद्रुमः । इत्यमरः । २ । ४ । ५८ । (तथा च पर्य्यायः ।
"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलश्च सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
महादेवः । यथा, हरिवंशे उत्तरभविष्ये । १५ । ३३ ।
"भूतवास ! नमस्तुभ्यं सर्व्वावास ! नमोऽस्तु ते ।")

भूतविक्रिया, स्त्री, (भूतानामिव विक्रियाऽत्र ।) अपस्माररोगः । इति राजनिर्घण्टः ।

भूतवृक्षः, पुं, (भूतप्रियो वृक्षः ।) शाखोटवृक्षः । श्योनाकवृक्षः । इति मेदिनी । ये, ९६ ।

भूतवेशी, स्त्री, (भूतानामिव वेशोऽस्याः । गौरादित्वात् ङीष् ।) श्वेतशेफालिका । इत्यमरः । २ । ४ । ७१ । (विवृतोऽस्याः श्वेतशेफालिकाशब्दे द्रष्टव्यः ।)

भूतशुद्धिः, स्त्री, (भूतानां देहारम्भकपृथिव्यादिपञ्चभूतानां शुद्धिः शोधनम् ।) पूजादौ बीजविशेषद्वारामन्त्रविलीनपापपुरुषदहनपूर्ब्बकशरीरशोधनम् । तत्प्रयोगो यथा । इमिति जलधारया वह्निप्राकारं विचिन्त्य पाणी उत्तानौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपुरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रवाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपचतुर्व्विंशतितत्त्वानि लीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य तस्य षोडशवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थकृष्णवर्णपापपुरुषेण सह देहं संशोष्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत् । दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोडशवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारोत्थितवह्निना दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत् । ठमिति चन्द्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा तस्य षोडशवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटस्थचन्द्राद्गलितसुधया मातृकावर्णात्मिकया समस्तदेहं विरचय्य लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत् । मात्रासंख्यया वा ।०। तदुक्तं गौतमीये ।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिवस्थाने परमात्मनि दैशिकः ।
धूम्रवर्णं ततो वायुबीजं षड्बिन्दुलाञ्छितम् ।
पूरयेदिड़या वायुं सुधीः षोड़शमात्रया ।
मात्रया तु चतुःषष्ट्या कुम्भयेत तदन्यया ।
द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया ।
पूरयेदनया चैव शोधयन् नीलमावृतम् ।
रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितम् ।
तेन पूरकयोगेन मात्रया षोड़शाख्यया ।
चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन च ।
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम् ।
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ।
खड्गचर्म्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत् ।
मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तम् ।
एवं संदह्य मरुतो द्वात्रिंशन्मात्रया ततः ।
भस्मना सहितं मन्त्री रेचयेदिड़या पुनः ।
वामनासे चन्द्रबीजं कुन्देन्दुधवलप्रभम् ।
भालेन्दुराशौ संयोज्य ततः षोड़शमात्रया ।
सुधया चतुःषष्टिमात्रया तोयबीजकम् ।
ध्यात्वामृतमयीं वृष्टिं पञ्चाशद्वर्णरूपिणीम् ।
तया देहं विरच्यैव मनसा पिङ्गलाख्यया ।
द्वात्रिंशन्मात्रया मन्त्री लं बीजेन दृढं नयेत् ।
स्वस्थाने हंसमन्त्रेण पुनस्तेनैव वर्त्मना ।
जीवं नीत्वापि चात्मीये स्वस्थाने स्थापयेत्ततः ।
इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत् ।"
संक्षेपभूतशुद्धिर्यथा । पुरश्चरणचन्द्रिकायाम् ।
"अथवान्यप्रकारेण भूतशुद्धिर्विधीयते ।
धर्म्मकन्दसमुद्भूतं ज्ञाननालसुशोभनम् ।
ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकम् ।
स्वीयहृत्कमले ध्यायेत् प्रणवेन विकासितम् ।
कृत्वा तत्कर्णिकासंस्थं प्रदीपकलिकानिभम् ।
जीवात्मानं हृदि ध्यात्वा गत्वा संगम्य कुण्डलीम् ।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत् ।"
इति तन्त्रसारः ।

भूतसञ्चारः, पुं, (भूतस्य सञ्चारः ।) भूतोन्मादरोगः । तत्पर्य्यायः । आवेशः २ भूताक्रान्तिः ३ ग्रहागमः ४ । इति राजनिर्घण्टः ।

भूतसञ्चारी, [न्] पुं, (भूतेषु सञ्चरति इति भूत + सम् + चर + णिनिः ।) दावानलः । इति शब्दमाला ।

भूतसर्गः, पुं, (सृज्यते इति । सृज + भावे घञ् । भूतानां सर्गः ।) भूतसृष्टिः । (यथा, मार्कण्डेय पुराणे । ४७ । २१ ।
"प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ।")
"ब्राह्मं प्राजापत्यञ्च सौम्यमैन्द्रं तथैव च ।
गान्धर्व्वमथ कौबेरं रक्षःपैशाचमासुरम् ।
स्थावरं मानवं मार्गं सार्पं शाकुनिकं तथा ।
चतुर्द्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम् ।"
इति वह्निपुराणोक्तं जीवसमासम् ।

भूतसारः, पुं, (भूतः गतः सारो यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ।

भूतहन्त्री, स्त्री, (भूतानि हन्तीति हन + तृच् + ङीप् ।) वन्ध्याकर्कोटकी । नीलदूर्व्वा । इति राजनिर्घण्टः ।

भूतहरः, पुं, (भूतानि हरतीति हृ + अच् ।) गुग्गुलुः । इति राजनिर्घण्टः ।

भूतहारि, [न्] क्ली, (भूतानि हरतीति हृ + णिनिः ।) देवदारु । इति राजनिर्घण्टः ।

भूता, स्त्री, (भूत + टाप् ।) कृष्णचतुर्द्दशी । यथा, स्कान्दे ।
"कृष्णाष्टम्योरन्तरमध्ये तु यानि तोयानि सन्ति वै ।
पूजितानि भवन्तीह भूतायां पार्थ सन्ति ।"
अपि च ।
"त्रिदशाविद्धे भूतां कामविद्धां विवर्जयेत् ।"
इति तिथ्यादितत्त्वम् ।

भूताङ्कुशः, पुं, (भूतानामङ्कुश इव निवारकत्वात् ।) कृशामध्यातरुः । तत्पर्य्यायः । यवनः २ सुरकः ३ तीक्ष्णः ४ भूतः ५ यवः ६ राजेन्द्रवर्णकः ७ भूतहारी ८ महाकपः ९ । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । कफघ्नत्वम् । कटुत्वम् । भूतग्रहादिदोषघ्नत्वम् । दीपनाग्निकरत्वञ्च । इति राजनिर्घण्टः ।

भूतात्मा, [न्] पुं, (भूतानामात्मा ।) देहः । (यथा, मनुसंहितायाम् । १२ । १२ ।
"यः करोति तु कर्म्माणि स भूतात्मोच्यते बुधैः ॥"
"यः पुनरेव व्यापारान् करोति शरीरात्मा स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पठितो-क्यते ॥" इति तट्टीकायां कुल्लूकभट्टः ॥) परमेष्ठी । इति मेदिनी । मे, ४०० ॥ शिवः । गुह्यम् । इति शब्दरत्नावली ॥ विष्णुः । यथा,
"भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥"
इति महाभारते दानधर्म्मः ॥
। जीवात्मा । यथा, मनुसंहितायाम् ।५।१०८।
"अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥"
यथा च चरके शारीरस्थाने प्रथमेऽध्याये ।
"सर्व्वं करणसंयुक्तः सर्व्ववेदनाः ।
अनया प्रायविज्ञाता निरतिं नाम्यधीयतः ॥
अतःपरं ब्रह्मभूतो भूतात्मा नोपलभ्यते ।
निःसृतः सर्व्वभावेभ्यश्चिह्नं यस्य न विद्यते ॥
तस्मिन्नधिगते ब्रह्म तथा ज्ञेयमतः परम् ।
ज्ञानं ब्रह्मविदश्चात्र नाज्ञस्तज्ज्ञातुमर्ह-तीति ॥")

भूतादि,स्त्री, (भूतानां आदिः तन्निवारकत्वात् अभि-धानात् स्त्रीत्वम् ।) हिङ्गु । इति राजनिर्घण्टः ।

भूतार्त्तः, त्रि, (भूतेन आर्त्तः) भूताविष्टः । इति हेमचन्द्रः । ३ । १४९ ॥

भूतारी, स्त्री, (भूतानामरिरिव) भूपाटली । तुलसी । इति राजनिर्घण्टः ॥

भूतावासः, पुं. (भूतानामावासः) विभीतकवृक्षः । इति राजनिर्घण्टः । विष्णुः । यथा,—
"भूतावासो वासुदेवः सर्व्वासुनिलयो नयः ॥"
इति महाभारते दानधर्म्मः । (शरीरम् । यथा, मनुसंहितायाम् । ६ । ७७ ।
"जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥"
शाखोटः । तत्पर्य्यायो यथा,—
"शाखोटः पीतफलको भूतावासः खरच्छदः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

भूताविष्टः, त्रि, (भूतेन आविष्टः) पिशाचग्रस्तः । तत्प्राद्भवलक्षणम् यथा,—
"ग्रहरेखाः कनुक्षिप्य तिर्य्यग्रेखात्रयेण हि ।
पदानि वह्नरसापाद भैदमादौ तथो बयम् ।
यस्य वस रदान् वाणं मचरषि तथा ।
द्वितीयेऽप्याष्टमे वह्नि द्वितीये चौकमे श्रुतिः ॥
तथादिना सर्वं चेत्यमिथ्याहाराँ विलोकयेत् ।
यदा ग्राविंशद्रादिः स्यात्तन्वोश्च सर्व्वशः ॥
सर्व्वानाहारलालाभी दृष्टं स्यात्तु कर्म्मसु ।
दार्व्विंशत् प्रभवे चार्य्याचतुर्व्विंशमे द्वयात् ।
भूताविष्टेषु चपलामनुवतापवात् वै भ्रमम् ।
दानमन्निश्च द्यष्टयां चतुःषष्टी दशाप्यपि ॥
त्रिंश त्रिंशो धान्यकोटिमवास्थितमिरेव च ।
चतुरस्रो च वासनौ रोदनं परिकीर्त्तिताः ॥"
इति ज्योतिस्तत्त्वम् ॥

१	८	१८	२१
२०	११	९	६
७	२	२३	१७
२२	१८	४	३
५०	५०	५०	५०

भूताविष्टः, त्रि, (भूतेन आविष्टः ।) भूतक्रान्तः । भूतादिना रोगग्रस्तः । (यथा,—
"भूताविष्टेषु पञ्चाशन्मन्त्रतापशात् वै भ्रमम् ।"
इत्यादि ज्योतिस्तत्त्वम् । भूताविष्टपाख्यानावेश-समयाः । यथा,—
"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥
कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्द्दश्यां विशन्ति च ॥
दर्पणादीन् यथाच्छाया शीतोष्णं प्राणिनो.
यथा ।
स्वमणिं भास्करार्च्चिश्च यथा देहञ्च देहभृत् ।
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणम् ।"
इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ॥)

भूतावेशः, पुं, (भूतानामावेशः) भूतग्रहावेशः । भूते पाओया इति भाषा । अस्य पर्य्याय आवेशशब्दे द्रष्टव्यः ॥

भूतिः, स्त्री, (भवनमेति । भू+"क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति क्तिच् ।) महादेवस्य अणिमाद्यष्टप्रकारैश्वर्य्यम् । इत्य-मरः । १ । १ । ३८ । तत्पुरुषमते । इत्यमर-टीकायां भरतः ॥ भस्म ॥ (यथा, शिशुपाल-वधे । १ । ४ ।
"यशं चलोद्गितिम्रतवेनसाविना
स्फुटोपमं भूतिसितेन शम्भुना ॥")
सम्पत्तिः । (उत्तरोत्तरवृद्धिः । यथा, भगवद्-गीतायाम् । १८ । ७८ ।
"यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ।
तत्र श्रीर्व्विजयो भूतिर्ध्रुवा नीतिर्म्मतिर्म्मम ॥")
हस्तिशृङ्गारः । इति मेदिनी ति, ४० ॥ (हस्ति-शृङ्गारोऽत्र मण्डनम् । यथा, मेघदूते । १९ ।
"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् ।
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥")
जातिः । इति विश्वः ॥ (विश्वदेवभेदः । यथा, मार्कण्डेयपुराणे । ९६ । ३२ ।
"विश्वे विश्वभुजाराध्यो धर्म्मो धन्यः शुभावहः ।
भूतिदो भूतिकृद्भूतिः पितृणां ये गणा नव ॥"
लक्ष्मीः । यथा, भागवते । ४ । १ । ७ ।
"तयोः पुनः साक्षाद् विष्णुर्यज्ञस्वरूपधृक् ।
या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ॥"
भूतेरंशस्य लक्ष्म्याः । इति तट्टीकायां श्रीधरस्वामी ॥)
वृद्धिनामौषधम् । रोहिषतृणम् । भूतृणम् । इति राजनिर्घण्टः । (भवनमिति । भू+क्तिन्) उत्पत्तिः । सत्ता । इति भूधातोरर्थे निरुक्त-मेव विज्ञेयम् ॥

भूतिकं, स्त्री, (भू+क्तिन् । संज्ञायां कन् ।) भूनिम्बः । कत्तृणम् । इत्यमरः । २ । ४ । ८ ।

कट्फलम् । यमानी । घनसारः । इति हेम-चन्द्रः ।

भूतिकः, पुं, (भूति । संज्ञायां कन् ।) यमानी । इति रत्नमालाराजनिर्घण्टौ ।

भूतिकामः, पुं, (भूतिं कामयते इति । कम्+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) राज-मन्त्री । बृहस्पतिः । इति केचित् । ऐश्वर्य्याभि-लाषिणि, त्रि । यथा । वायव्यं श्वेतमालभेत भूतिकामः । इत्यधिकरणमालायां मीमांसाद्वै-काध्यायस्याद्ये विधिवाक्यबोधिका श्रुतिः ।

भूतिकीलः, पुं, (भूतेः शस्यादिसम्पत्तेः कील इव बाधकत्वात् ।) भूखातः । इति शब्दमाला । खाना इति भाषा ।

भूतिगर्भः, पुं, (भूतिः अणिमादिसम्पत्तिर्गर्भेऽन्तर्यस्य । यद्वा भूतिशब्द उपाधिवाचीऽन्तर्यस्य ।) भवभूतिकविः । इति भूरिप्रयोगः ॥

भूतिनिधानं, स्त्री, (निधीयतेऽस्मिन्निति । नि+धा +अधिकरणे+ल्युट् । ततः भूत्या निधानमिति, षष्ठीसमासः ।) धनिष्ठानक्षत्रम् । इति जटा-धरः ॥

भूतिमान्, [त्] त्रि, ऐश्वर्य्ययुक्तः । भूतिरस्यास्ति इत्यर्थे मतुप्प्रत्ययेन निष्पन्नः । (यथा, महा-भारते । ३ । २०९ । ३३ ।
"आयुष्मान् भूतिमांश्चैव श्रुत्वा भवति
धर्म्मवित् ॥")

भूतीकं, स्त्री, (भूतिक । पृषोदरात् साधुः ।) भूनिम्बः । यमानी । भूतृणम् । कत्तृणम् । इति मेदिनी । के, १६९ । (यथा, सुश्रुते उत्तर-तन्त्रे । ३८ अध्याये ।
"वचा पर्पटकं तुल्यं भूतीकमथ कट्फलम् ।"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा ।
भूतीकं ध्यामपौरञ्च श्यामकं धूमगन्धिकम् ॥")

भूतृणं, स्त्री, (तृणविशेषः ।) गन्धतृणम् । गन्धवेणा इति भाषा । तत्पर्य्यायः । गन्धखेटम् २ रौहि-षम् ३ भीमपत्रिकम् ४ । इति रत्नमाला । पवन ५ रामकर्पूरम् ६ कत्तृणम् ७ शरम् ८ श्याम-कम् ९ ध्यामकम् १० पौरम् ११ देवजग्धम् । इति रत्नमालान्तरम् ॥ (यथास्य पर्य्यायः ।
"गुच्छपौरस्तु भूतीकं तृणकं धमनीतिकम् ।
भूतृणन्तु गवेधुका मालातृणकमित्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूतृणः, पुं. (तृणजातिः ।) भूतृणम् । गुञ्च रौहिष इति भाषायामपि च प्रसिद्धः । तत्पर्य्यायः । रौहिषः २ भूतिः ३ भूतिकः ४ कुटुम्बकः ५ मालातृणः ६ छत्रातृणी ७ छत्रः ८ अतिच्छत्रकः ९ गुह्यबीजः १० सुगन्धः ११ गुच्छालः १२ पूतिनिवहः १३ बधिरः १४ अतिगन्धः १५ अमृतौषः १६ करी-षुकः १७ । अस्य गुणाः । कटुत्वम् । तिक्त-त्वम् । वातकफशूलपाचरिवादकदिरोग-नाशित्वञ्च । इति राजनिर्घण्टः ॥

भूतेशः, पुं, (भूतानां प्राण्यादीनां प्रमथादीनां वा ईशः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, राजतरङ्गिण्याम् । १ । १०७ ।
"क्षेत्रे सम्भाविते देवी च तदुच्छित्तये नृपः ।
तपः सन्तोषितात्लेभे भूतेशात् सुकृती सुतम् ॥")
भूत्तमं, क्ली, (भुवि उत्तमम् ।) सुवर्णम् । इति हेमचन्द्रः । ४ । १० ।
भूदरीभवा, स्त्री, (भूदर्यां भूविवरे भवतीति । भू + अच् । टाप् ।) आखुपर्णी । इति भावप्रकाशः ॥
भूदारः, पुं, (भुवं दारयतीति । दॄ + कर्म्मण्यण् । ३ । २ । १ । इत्यण् ।) शूकरः । इत्यमरः । २ । ५ । २ ॥
भूदेवः, पुं, (भुवो भुवि वा देवः ।) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥
भूधनः, पुं, राजा । भूरेव धनं यस्य सः । इति केचित् ॥
भूधरः, पुं, (धरतीति । धृ + पचाद्यच् । भुवो धरः इति षष्ठीसमासः ।) पर्व्वतः । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । ५७ । ११ ।
"तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥")
यन्त्रभेदः । यथा,—
"जलकच्छपपातालडोलाभूधरवालुकाः ।
वक्राद्या यन्त्रभेदाः स्युर्वैद्याम्नायाच्च मल्लकाः ॥"
इति शब्दचन्द्रिका ॥
(यथास्य व्यवहारः ।
"द्विपलं शुद्धसूतस्य स्वर्णार्द्धं गन्धकस्तथा ।
कन्याभीरेण संमर्द्य दिनमेकं निरन्तरम् ।
बद्धा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटे ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥
शिवः । यथा, महाभारते । १३ । १७ । १५६ ।
"भूधरो नागमौञ्जी च नागकुण्डलकुण्डली ॥"
हरिः । यथा, भागवते । ३ । १३ । ४० ।
"दंष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर भूः सभूधरा ।
यथा वनान्निःसरतो दता धृता
मतङ्गजेन्द्रस्य सपत्रपद्मिनी ॥")
भूधात्री, स्त्री, (भूम्या धात्री ।) भूम्यामलकी । इति राजनिर्घण्टः ॥ (यथास्य गुणाः ।
"भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।
पिपासाकासपित्तास्रकफकण्डूक्षतापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
बटुकभैरवः । इति विश्वसारतन्त्रे तस्य शतनामस्तोत्रम् ॥
भूध्रः, पुं, (भुवं धरतीति । धृ + मूलविभुजादित्वात् । ३ । २ । ५ । इत्यस्य वार्त्तिकोक्त्या कः ।) पर्व्वतः । इति हेमचन्द्रः । ४ । ८६ ॥
भूनागः, पुं, जन्तुविशेषः । तत्पर्य्यायः । क्षितिनागः २ भूजन्तुः ३ रक्तजन्तुकः ४ क्षितिजः ५ क्षितिजन्तुः ६ रक्ततुण्डकः ७ । अस्य गुणाः । वज्रमारकत्वम् । धात्वादिद्रावणकारकत्वम् । रसकारकत्वम् । तत्सत्त्वस्य विषापहत्वञ्च । इति राजनिर्घण्टः ॥
भूनिम्बः, पुं, क्षुपविशेषः । चिरता इति भाषा । (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ।
"मधूकभूनिम्बग्रन्थिका इति समभागाः कल्कः स्यात् ।")
तत्पर्य्यायः । अनार्य्यतिक्तः २ कैरातः ३ रामसेनकः ४ किराततिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८ । इति राजनिर्घण्टः ॥ कटुतिक्तः ९ । इति भावप्रकाशः ॥ (तथा चास्य पर्य्यायान्तरम् । वैद्यकरत्नमालायाम् ।
"किराततिक्तं कैरातं भूनिम्बः काण्डतिक्तकः ॥")
अस्य गुणाः । वातिकत्वम् । तिक्तत्वम् । कफपित्तज्वरापहत्वम् । व्रणसंरोपकत्वम् । पथ्यत्वम् । कुष्ठकृमितृष्णाघ्नत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"किरातकोऽन्यो नेपालः सोऽर्द्धतिक्तो ज्वरान्तकः ।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ॥"
इति भावप्रकाशः ॥
अस्य गुणपर्य्यायान्तरे किराततिक्तशब्दे द्रष्टव्ये ॥
भूनीपः, पुं, (भूमिलग्नो नीपः । शाकपार्थिवादिवत् समासः ।) भूमिकदम्बः । इति राजनिर्घण्टः ॥
भूनेता, [ऋ] पुं, (भुवो नेता नायकः ।) राजा । इति केचित् ॥
भूपः, पुं, (भुवं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) राजा । इत्यमरः । २ । ८ । १ ॥ अधर्म्मेण प्रजारक्षणे तस्य पापं यथा ।
"अधर्म्मेण यो भूपः प्रजारक्षां करोति च ।
दक्षिणाञ्च कुरुते च तल्लोमाब्दं वसेद्ध्रुवम् ।
ततो दक्षिणजातिश्च जन्मन्यत्र भारते ।
ततो नरश्चाङ्गहीनो व्याधी शूद्रो भवेन्नरः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
भूपतिः, पुं, (भुवः पतिः ।) बटुकभैरवः । यथा,
"भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ।"
इति विश्वसारतन्त्रोक्तभैरवस्तोत्रम् ॥
राजा । यथा,—
भूयसी यस्य मत्री न तु भवति कथं भूपती रामचन्द्रः ।
इति रामायणी वैजवीराख्यम् ॥
ऋषभौषधम् । इति राजनिर्घण्टः ॥
भूपदः, पुं, (भुवि पदानि मूलान्यस्य ।) वृक्षः । इति शब्दचन्द्रिका ॥
भूपदी, स्त्री, (भुवि पदं यस्याः । गौरादित्वात् ङीष् ।) मल्लिका । इत्यमरः । २ । ४ । ७० ॥
(यथास्याः पर्य्यायः ।
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भूपलाशः, पुं, (भुवि पलाशमस्य ।) वृक्षभेदः । विषाणी इति भाषा । यथा,—
"अशोकः शालकश्च भूपलाशो विमुच्यते ।"
इति रत्नमाला ॥
भूपाटली, स्त्री, (भुवि जाता पाटलीव ।) क्षुपविशेषः । भूपालानि इति वङ्गभाषा इति च हिन्दीभाषा । तत्पर्य्यायः । भूकुम्भी २ भूतालो ३ रक्तपुष्पिका ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । पारदे प्रयोज्यत्वञ्च । इति राजनिर्घण्टः ॥
भूपालः, पुं, (भुवं पालयतीति । पालि रक्षणे + "कर्म्मण्यण् । ३ । २ । १ । इत्यण् ।) राजा । इति शब्दमाला ॥ (यथा, मार्कण्डेये । १८ । ३ ।
"अरण्ये रक्षति शुल्कं तदभिप्रायम् यथा ।
प्रजानां द्वादशं भागं भूपालाय वणिग्जनः ॥"
सोमपालस्य पुत्रः । यथा, राजतरङ्गिण्याम् । ८ । १४८५ ।
"सोमपालात्मजो भूपद् भूपालः प्राक्तनस्थया ।")
भूपुत्री, स्त्री, (भुवः पुत्री ।) सीता । इति शब्दरत्नावली ॥ [रामचन्द्रः ॥"
("भूपुत्री यस्य पत्नी स भवतु कथं भूपती
इति रामायणम् ॥)
भूपेन्द्रः, पुं, (भूपानामिन्द्रः ।) राजराजेश्वरः । इति राजनिर्घण्टः ॥
भूभर्त्ता, [ऋ] पुं, (भुवो भर्त्ता । "याजकादिभिश्च ।" २ । २ । ९ । इति षष्ठीसमासः ।) पृथिवीपतिः । इति सिद्धान्तकौमुदी तत्पुरुषसमासः ॥ (यथा, राजतरङ्गिण्याम् । ३ । २९१ ।
"तस्मिन्नपि भूभर्त्रा शोकान्निःश्वसतानिशम् ॥")
भूभुक्, [ज्] पुं, (भुवं भुनक्ति पालयतीति । भुज् + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) राजा । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । ४ । ६१ ।
"चापमारांशि दुर्गाणि भुवः शात्रवाङ्गनाः ।
निपातय प्रयत्नेन भूभुजा भूतिमिच्छता ॥")
भूभृत्, पुं, (भुवं बिभर्त्तीति । भृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) राजा । (यथा, रघौ । ११ । ८१ ।
"तेन भूमिनिहितैककोटि तत्
कार्म्मुकञ्च बलिनाधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृताम्
धूमशेष इव धूमकेतनः ॥")
पर्व्वतः । इति मेदिनी । ते, १३० ॥ (यथा, कुमारसम्भवे । ६ । १ ।
"अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥")
भूमयी, स्त्री, (भू + मयट् + ङीप् ।) छाया । सा तु सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ मृदात्मके, त्रि ।

भूमा, [न्] पुं, बहुत्वम् । यथा । "भूयोभूयभूयिष्ठाः ।" बहोरीयसिमन् इष्ठनाश्च एते निपात्यन्ते । इति मुग्धबोधव्याकरणम् ॥ ईयसोर्भस् ईयसादौ बहोर्भूरादेशः । ईयसिप्रोरादिलोपः । इष्ठे यकारागमश्च निपात्यन्ते । अतिशयेन बहुः भूयान् । बहोर्भावः भूमा । अतिशयेन बहुः भूयिष्ठः । इति तट्टीकायां दुर्गादासः ॥ बहुमतिविशिष्टः । तत्र वाच्यलिङ्गः । यथा । भूमः भूम । इति प्रभूतशब्दपर्याये अमरटीकायां रमानाथः ॥ विराट्पुरुषः । यथा । "यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो भूमा तदमृतम् ।" इत्यादि श्रुतिभ्यो ब्रह्मभिन्नत्वं स्वप्रकाशस्य प्रतिभाति । इति वेदान्तसारटीका ॥

भूमिः, स्त्री, (भवन्ति भूतान्यस्यामिति । भू + "भुवः कित् ।" उणा० ४ । ४५ । इति मिः । स च कित् ।) पृथिवी । स्थानमात्रम् । इति मेदिनी । मे, ५५ ॥ (यथास्याः पर्यायः ।
"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः ।
क्षितिरुर्व्वी मही क्षौणी क्ष्मा धरा कुर्वसुन्धरा ॥"
इति वैद्यकरत्नमालायाम् ।)
जिह्वा । इति संक्षिप्तसारोणादिवृत्तिः ॥ योगिनामवस्थाविशेषः । यथा,—
"निवृत्तिं चेतसि पुरा सविकल्पसमाधिना ।
निर्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः ॥
व्युत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधितः ।
अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः ॥
एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये ।
विधेया भावनावृत्तिर्विना या न सिध्यति ॥"
इति गीतागूढार्थदीपिकायां मधुसूदनसरस्वती ॥ भूमेः पर्यायाः पृथिवीशब्दे द्रष्टव्याः ॥ अस्या गुणाः ।
"भूमेः स्थैर्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता ।
गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः ॥"
इति महाभारते मोक्षधर्म्मः ॥
अस्यार्थः । स्थैर्यमचाञ्चल्यम् १ । गुरुत्वं पतनप्रतियोगी गुणः २ । काठिन्यम् ३ । प्रसवार्थता धान्याद्युत्पत्तिकारणता ४ । गन्धः ५ । गुरुत्वं चित्तपुष्टिः ६ । शक्तिः गन्धग्रहणसामर्थ्यम् ७ । संघातः श्लिष्टावयवत्वम् ८ । स्थापना मनुष्याद्याश्रयत्वम् ९ । धृतिः पाञ्चभौतिके सत्यपि यो पृथ्व्यंशः । इति तट्टीका ॥ ० ॥
भूमिदानमाहात्म्यं यथा,—
"सर्व्वेषामेव दानानां भूमिदानमनुत्तमम् ।
यो ददाति महीं राजन् ! विप्रायाकिञ्चनाय वै ॥
अङ्गुष्ठमात्रमपि वा स भवेत् पृथिवीपतिः ।
न भूमिदानसदृशं पवित्रमिह विद्यते ॥
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्गगामिनौ ॥
यत्किञ्चिद्भूमिदानस्तु धर्म्मदानोपभोगजम् ।
समश्नुते । नरः कोऽपि भूमिदो भूमिमाप्नुयात् ॥
भूमिदानसमं दानं नाप्यत्र पृथिवीतले ।
तडागारामकश्चैव भुक्तिमुक्तिप्रदं परम् ॥
यथा तथा प्रकारेण भूमिदाता तु भूमिपः ।
सुखी स्यात् सर्व्वकालेषु चान्ते स्वर्गमवाप्नुयात् ।
इक्षुख्याततरं वापि भूमिदानं महत्तमम् ।
यः कश्चिद्ब्राह्मणे दत्त्वा भवतीह महीपतिः ।
सर्व्वथा सर्व्वदा देया धरित्री ब्राह्मणाय तु ।
प्राणान्तेनैव न क्वापि हरणीया जनैरपि ॥
दत्त्वा स्नातादिकं कर्म्म विप्रभूमिं नरो बलात् ।
करोति यदि राजेन्द्र ! तत् सर्व्वं निष्फलं भवेत् ॥
ब्राह्मणाद्दानपत्रं विनाग्राह्य च पार्थिव ! ।
तथा तत्परितोषञ्च तन्मूल्यादिकं विना ॥
विप्रभूमौ भूसुरोऽपि दैवं पैत्रं तथाध्वरम् ।
चरिष्यन् तडागारामप्रासादमण्डपं यजन् ॥
स्नानादिग्रहणं पितृकर्म्म भवनं गृहम् ।
सधान्यवसनादिप्राकारादिदीनमेव च ॥
पद्मासनं पुष्पोद्यानं कूपादिरोपणम् ।
वटाम्रास्वत्थतुलसीधात्रीविल्वादिरोपणम् ॥
नित्यं नैमित्तिकं काम्यं श्राद्धसन्ध्यादिकं तथा ।
पञ्चयज्ञं तपोदानादिकमेतत्तु चापरम् ॥
कीलाम्युषितं भक्तभक्तिधीकायपूर्व्वकम् ।
का कथा पितृदेवाद्यं न कुर्य्यात् पारमार्थिकः ॥
यः कर्म्मफलकामेप्सुर्न करोत्यत्र कर्म्म च ।
कुरुते सततं मोहाद्भागाद्वा धनादिनः ।
शृणुते । कुर्व्वतामेतत् सर्व्वं स्यान्निष्फलं ध्रुवम् ॥
यद्गिरधया तस्य संपूर्णं फलमेव च ।
अतो लोके हि धर्म्मात्मा ज्ञानी च धर्म्मकर्म्मवित् ॥
विवेकी धर्म्मप्राज्ञः पुराणागमवेदवित् ।
वेदान्तगो मुनिः साधुः काश्यादिको महीपतिः ॥
न कुर्य्याद्विप्रदत्तं ब्राह्मणोत्तरकारकम् ॥"
इति ब्रह्मोत्तरखण्डे ४८ अध्यायः ॥ ० ॥
अपि च । बृहस्पतिः ।
"षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥"
तथा ।
"भूमिं दत्त्वा तु यः सर्व्वं कुर्य्यादाचन्द्रतारकम् ।
यथाऽवेदनमाचार्य्यं दानमेतत्तु तद्विदुः ॥"
महाभारते ।
"अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावनीं जननीं यथा ॥
नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् ।
दाने वाप्यथवादाने नामास्याः परमं प्रियम् ॥"
दानादानकाले मनु प्रियदत्ता नामास्याः परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य दातव्या प्रतिग्राह्या च । भूमेः पूजायां दानकाले च प्रियदत्तेति विशेषणम् । भूमिर्विष्णुदैवत्या । खदिरसंबद्धमावच्छिन्नशस्यसंवादः फलम् । प्रतिपत्ते तद्भूमेः प्रदर्शनमात्रम् । भूमेरभिधाने ताम्रादिपत्रप्रदर्शनम् । इति शुद्धितत्त्वम् ॥ ० ॥ आर्द्रादिचारे रवौ भूमौ रजोद्गमो भवति तत्काले पाठादिनिषेधो यथा ज्योतिषे ।
"रजोयुक् स्याद्वसुमती च रौद्राद्यपादगे रवौ ।
तत्र पाठो बीजवापो नाविभोर्भयावहः ।
रजोयुक् क्ष्मा अनुमतौ पृथ्वी । ऋत्वी ।
यस्मिन् वारे पञ्चाङ्गपर्य्यङ्काके नियतं हरेत् ।
अम्बुवाची भवेन्नित्यं पुष्करादुकालसारथेः ॥"
तत्स्थले ।
"धरण्यामृतुमत्याञ्च भूमिकर्म्म तथैव च ।
अम्बुरागमने चैव विद्या नैव पठेद्बुधः ॥"
इति तिथ्यादितत्त्वम् ॥ ० ॥
"न स्वाध्यायं वषट्कारं न देवपितृपूजनम् ।
हलानां दोलनञ्चैव बीजानां वपनं तदा ।
दिनत्रयं न कुर्व्वीत यावद्भूमी रजस्वला ।
यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा ।
अम्बुवाचीदिनेष्वेव पाकं कृत्वा न भक्षयेत् ॥
स्वपाकं परपाकं वा अम्बुवाचीदिने तथा ।
भक्ष्यं नैव कुर्व्वीत चाक्षरालापनं स्फुटम् ॥"
इति राजमार्त्तण्डः ॥
अथ भूमिमाह देवलः ।
'सा यज्ञीया मलिना शुभा यज्ञियवास्तुका भवति ।' अयज्ञीया यथा,—
"प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः ।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः ॥
विण्मूत्रोपहतं यत्तु कुणपो यत्र दृश्यते ।
एवं कश्मलभूयिष्ठा भूरमेध्येति कथ्यते ॥"
कृमयः शवः । दुष्टा यथा,—
"कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी ।
उपघातकर्षणैः विशेषाक्षेपैश्च दुष्टा भवेत् ॥"
सभा अशोभूतयोग्या । मलिना यथा,—
"नखदन्ततनूजत्वक्तुषपङ्कमलैर्युता ।
भस्मपङ्करजोभिर्वापि प्रच्छन्ना मलिना भवेत् ॥"
तासाञ्च शुद्धिमाह ।
"दहनं खननं भूमेरुपलेपनवापने ।
पर्जन्यवर्षणं चैव शौचं पञ्चविधं स्मृतम् ॥"
दाहनं अग्न्यादिना पूरणम् । अन्यस्थानानीतमृत्स्नं पवनं वा । दुष्टायाः द्विवं त्रिवं वा । मलिनायाः इदमगोतिमलो प्रोक्षणादिकम् ।
"सप्तधा वा चतुर्द्धा वा भूरमेध्या विशुद्ध्यति ।
द्विधा दुष्टा त्रिधा वापि शुद्ध्यते मलिनैकधा ॥"
अन्यप्रकारमाह मनुः ।
"सम्मार्जनेनाञ्जनेन सेकेनोल्लेखनेन च ।
गवाञ्च परिवासेन भूमिः शुद्ध्यति पञ्चभिः ॥"
सम्मार्जनं पांश्वपनयनम् । अञ्जनं गोमयोपलेपनम् । सेको जलेन प्रोक्षणम् । उल्लेखनं तक्षणम् । परिवासो गवोषितावस्थानम् । अत्र शवदाहरूपयोर्विशेषमात्राभावश्रवणात् अन्यैरपि शुद्धिरित्यवसेयम् । मकरन्दे ।
"यामादूर्ध्वं तनुं कृत्वा यावज्जीवं चतुर्दशम् ।
भूमेः सर्व्वत्र शुद्धिः स्यात् स्नात्वा कोऽपि न विद्यते ॥"
इति चतुर्वर्गः । भरतं महापुराणम् । गीतावचनसहस्रनामनिर्वचने, ११ भूमौ दण्डी देवतादिविशेषो यथा,—
"न भूमौ विनिःक्षिपेत् रत्नं न पुस्तकं क्वचित् ।

न मुक्ता पुस्तकं स्थाप्यं न सूत्रमाहरेत् तत् ।
भूकम्पे ग्रहणे चैव अक्षरं वाथ पुस्तकम् ।
भूमौ तिष्ठति देवेशि ! जन्मजन्मसु मूर्खता ।
तदा भवति देवेशि ! तस्मात्तत् परिवर्जयेत् ॥"
इति योगिनीतन्त्रे तृतीयभागे ७ पटलः ॥

भूमिकदम्बः, पुं, (भूमिजातः कदम्बः । शाकपार्थिवादिवत् समासः ।) कदम्बविशेषः । तत्पर्य्यायः । भूनीपः २ भूमिजः ३ वृत्तपुष्पः ४ लघुपुष्पः ५ वृत्तपुष्पः ६ विषघ्नः ७ व्रणहारकः ८ । अस्य गुणाः यथा, राजनिर्घण्टे ।
"भिकदम्बाः कटूष्णाश्च रुच्या दोषहरा हिमाः ।
कषायतिक्ताः पित्तघ्ना वीर्य्यवृद्धिकराः पराः ॥"

भूमिका, स्त्री, (भूमिरिव कायतीति । कै + कः । स्त्रियां टाप् । यद्वा । भूमिरेव स्वार्थे कन् । टाप् ।) रचना । वेशान्तरपरिग्रहः । इति मेदिनी ॥
मात्राधि नाट्येऽधिष्ठाताश्वत्तहेंशास्तु भूमिकाः ।
इति हेमचन्द्रः ॥
भूमिः । भूमिरेव भूमिका स्वार्थे कप्रत्ययेन निष्पन्ना । इति व्याकरणम् ॥ वेदान्तमते चित्तस्यावस्थाविशेषः । यथा । क्षिप्तं मूढं विक्षिप्तं एकाग्रं निरुद्धं इति पञ्चभूमयः । आसुरसम्पल्लोकशास्त्रदेहवासनासु वर्त्तमानं चित्तं क्षिप्तभूमिका । १ । निद्रालस्यादिग्रस्तं चित्तं मूढभूमिका । २ । कदाचिद्ध्यानयुक्तं चित्तं क्षिप्ताद्विशिष्टतया विक्षिप्तभूमिका । ३ । तत्र क्षिप्तमूढयोः समाधिशङ्कैव नास्ति विक्षिप्ते तु समाधिरप्रयुक्तः तदितरत् भूमिद्वयं समाधिः । एकाग्रे मनसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्म्मबन्धनानि श्लथयति निरोधमभिमुखीकरोतीति सः प्रज्ञातो योग एकाग्रभूमिका । ४ । सर्व्ववृत्तिनिरोधरूपा असंप्रज्ञातसमाधिर्निरुद्धभूमिका । ५ । इति वेदान्तसंज्ञानिरूपणग्रन्थः ॥

भूमिखर्ज्जूरिका, स्त्री, (भूमिजाता खर्ज्जूरिका ।) क्षुद्रखर्ज्जूरी । तत्पर्य्यायः । स्वादी २ दुरारोहा ३ मृदुच्छदा ४ । अस्या भेदाः गुणाश्च ।
"भूमिखर्ज्जूरिका स्वादी दुरारोहा मृदुच्छदा ।
तथा स्कन्धफला काककर्कटी स्वादुमस्तका ।
पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता ।
जायते पश्चिमे देशे सा च्छोहारेति कीर्त्तिता ।
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ।
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ।
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् ।
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् ।
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
महतीभ्यो गुणैरल्पा स्वल्पखर्ज्जूरिका स्मृता ।
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥"
इति भावप्रकाशः ॥

भूमिखर्ज्जूरी, स्त्री, (भूमिजाता खर्ज्जूरी ।) भूमिखर्ज्जूरिका । इति राजनिर्घण्टः । अस्या गुणपर्य्यायाः भूखर्ज्जूरीशब्दे द्रष्टव्याः ॥

भूमिचम्पकः, पुं, (भूमिजातश्चम्पकः ।) पुष्पवृक्षविशेषः । भूँइचाँपा इति भाषा । तत्पर्य्यायः । ताम्रपुष्पः २ सन्धिबन्धः ३ द्रुघणः ४ । इति शब्दचन्द्रिका ॥ अस्य मूलं व्रणपाककारकम् ॥

भूमिजं, क्ली, (भूमेर्जायते इति । जन् + डः ।) गौरसुवर्णम् । इति राजनिर्घण्टः ॥

भूमिजः, पुं, (भूमेः पृथिव्या जायते इति । जन् + डः ।) मङ्गलग्रहः । नरकराजः । इति मेदिनी । जे, २७ ॥ भूमिकदम्बः । मनुष्यः । इति राजनिर्घण्टः ॥ (भूमिजाते, त्रि । यथा, विष्णुधर्म्मोत्तरे ।
"वराहस्त्वभवं भौमं भूकम्पमपि भूमिजम् ॥")

भूमिजगुग्गुलुः, पुं, (भूमिजो गुग्गुलुः ।) शशापुरगुग्गुलुः । तत्पर्य्यायः । दैत्यमेदजः २ दुर्गाहः ३ शशापुरसम्भवः ४ मज्जारः ५ मेदजः ६ महिषासुरसम्भवः ७ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कफवातनाशित्वम् । उमाप्रियत्वम् । भूतघ्नत्वम् । मेध्यत्वम् । सौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बुः, स्त्री, (भूमिजाता जम्बुः ।) क्षुद्रजम्बुः । तत्पर्य्यायः नादेयिका २ नादेयी ३ भूजम्बुः ४ भूमिजम्बुका ५ । इति शब्दरत्नावली ॥ काकजम्बुः ६ शीतपल्लवा ७ । इति रत्नमाला ॥
नादेयिका च नादेयी भूजम्बुर्भूमिजम्बुका ।
भूमिजम्बुलतायां स्यात् केचित्तु भूमिचम्पके ॥
इति शब्दरत्नावली ॥

भूमिजम्बूः, स्त्री, (भूमिजाता जम्बूरिति मध्यपदलोपी समासः ।) भूजम्बूः । क्षुद्रजम्बूः । तत्पर्य्यायः । ह्रस्वफला २ भृङ्गवल्लभा ३ ह्रस्वा ४ भूजम्बूः ५ भ्रमरेष्टा ६ पिकभक्षा ७ काष्ठजम्बूः ८ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । श्लेष्मपित्तनाशित्वम् । रुच्यत्वम् । संग्राहित्वम् । कण्ठदोषनाशित्वम् । वीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बूका, स्त्री, (भूमिजम्बू + स्वार्थे कन् । टाप् ।) भूमिजम्बूः । इत्यमरः । २ । ४ । ३८ ॥

भूमिजा, स्त्री, (भूमेर्जायते इति । जन् + डः । टाप्) सीता । इति त्रिकाण्डशेषः मेदिनी च । जे, २७ ॥

भूमिजीवी, [न्] पुं, (भूम्या तत्कर्षणादिना जीवतीति । जीव् + णिनिः ।) वैश्यः । इति शब्दरत्नावली ॥

भूमिदेवः, पुं, (भूमौ देव इव भूम्या देवो वा ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, किरातार्ज्जुनीये । १ । ६ ।
"अरुद्धाः क्रियाः कामदुघाः क्रतूनां
सत्याशिषः सम्प्रति भूमिदेवाः ।
आसंहतेरास्ति बधुगृह कान
समानतौ मद्धधूमावपानम् ॥")

भूमिपः, पुं, (भूमिं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) राजा । इति जटाधरः ॥ (यथा, महाभारते । १ । १०० । ८ ।
"वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः ।
पतिं भारतगोप्तारं समपद्यन्त भूमिपाः ॥")

भूमिपक्षः, पुं, (भूमिः पक्ष इव यस्य ।) वाताश्वः । इति हारावली ॥

भूमिपिशाचः, पुं, (भूमौ पिशाच इव तद्वदाकृतिमत्त्वात् ।) तालवृक्षः । इति हारावली ॥ (विवरणोऽस्य तालवृक्षशब्दे ज्ञेयः ॥)

भूमिमण्डः, पुं, (भूमिं मण्डयति भूषयतीति । मडि + अण् ।) अष्टपादिका । इति रत्नमाला ॥ मदनबालीति छापरमाली इति च भाषा ॥

भूमिमण्डपभूषणा, स्त्री, (भूमिमण्डपं भूषयतीति । भूषि + ल्युः + टाप् ।) माधवीलता । इति राजनिर्घण्टः ॥

भूमिरक्षकः, पुं, (रक्षतीति । रक्ष + ण्वुल् । भूमेः रक्षकः । गमनकाले भूमेरुपरि पादाप्रदानात् तथात्वम् ।) वाताश्वः । इति भूरिप्रयोगः ॥

भूमिलाभः, पुं, (भूमेर्लाभोऽत्र ।) मृत्युः । इति भूरिप्रयोगः ॥ (भूमेर्लाभः ।) भूमिप्राप्तिश्च ॥

भूमिलेपनं, क्ली, (भूमिर्लिप्यतेऽनेनेति । लिप् + ल्युट् ।) गोमयम् । इति हेमचन्द्रः । ४ । ३३८ ॥ (भूमेर्लेपनम्) भूमेर्लेपश्च ॥

भूमिवर्द्धनः, पुं, क्ली, (भूमिर्वर्द्धतेऽनेनेति । वृध + णिच् + ल्युट् । स्वीयमार्थिवांशप्रदानेन भूमेर्वर्द्धनादस्य तथात्वम् ।) शवः । इति हेमचन्द्रः ॥

भूमिसम्भवा, स्त्री, (भूमेः सम्भव उत्पत्तिर्यस्याः ।) सीता । इति जटाधरः ॥

भूमिस्पृक्, [श्] पुं, (भूमिं स्पृशतीति । स्पृश् + "स्पृशोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मानुषः । वैश्यः । इति मेदिनी । शे, ३८ ॥ चौरविशेषः । अन्धः । खञ्जः । इति शब्दरत्नावली ॥

भूमी, स्त्री, (भूमिः । "कृदिकारादक्तिनः ।" इति पक्षे ङीष् ।) भूमिः । इति भरतद्विरूपकोषः ॥

भूमीन्द्रः, पुं, (भूम्यामिन्द्र इव । भूमेः इन्द्र ईश्वरो वा ।) राजा । इति शब्दरत्नावली ॥

भूमीरुहः, पुं, (भूम्यां रोहतीति । रुह + कः ।) वृक्षः । यथा,—
"दीर्घाङ्गापघुला मधा विरहिणोमाकालया
वामरा
धामिन्यचपला यथा कुलवधूरह्नि गरीया
प्रिये ॥
छाया वाम्बुजभा मनोऽरविन्दावलीव भूमीरुहा
सिम्थटाः शुषिरादवना मिलितघोषे नोमिवं
हृदयः ॥"
इत्युद्भटः श्लोकः ॥

भूमीसहः, पुं, (भूमेः सहते अनुसहते अनुवहते इति सह + अच् ।) वृक्षविशेषः । भूरसह इति

हिन्दी भाषा । तत्पर्य्यायः । दारुदारुः २ मर-
दारुः ३ खरच्छदः ४ । अस्य गुणाः । शिशिर-
त्वम् । रक्तपित्तप्रसादनत्वञ्च । इति भाव-
प्रकाशः ॥

भूम्यामलकी, स्त्री, (भूमिजया आमलकी शाक-
पार्थिवादित्वात् समासः) क्षुपविशेषः । भूँइ
आमला इति भाषा । तत्पर्य्यायः । बहुपुष्पी २
शिवा ३ अध्यण्डा ४ तालिः ५ तामलकी ६
उच्चटा ७ सूक्ष्मपत्रा ८ दीर्घामलकी ९ । इति
रत्नमाला । वितुन्नकः १० झटा ११ अमला १२
अजझटा १३ ताली १४ शिवा १५ । इत्यमरः ।
२।४।१५७। झाटा १६ अमला १७ झाटामला १८
अमलाजझटा १९ । इत्यमरटीकायां भरतः ।
भूम्यामलकिका २० शिवामलकी २१ बहु-
पुष्पा २२ बहुपत्रा २३ बहुवीर्य्या २४
भूधात्री २५ । अस्या गुणाः । वातकारित्वम् ।
तिक्तत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् ।
पिपासाकासपित्तास्रकफपाण्डुक्षतनाशित्वञ्च ।
इति भावप्रकाशः ॥

भूम्यामली, स्त्री, (भूम्या आमलति आकाशं धारय-
तीति । आ+मल्+अच् ।) भूम्यामलकी ।
भुइँआँवली इति हिन्दी भाषा । भूँइ आमला
इति वङ्गभाषा । तत्पर्य्यायः । तमाली २
ताली ३ तमालिका ४ उच्चटा ५ झटामली ६
वितुन्ना ७ वितुन्निका ८ भूधात्री ९ चारटी
१० शय्या ११ शिवा १२ बहुपत्रिका १३
बहुवीर्य्या १४ अजझटा १५ विश्वपर्णी १६
हिमालया १७ अजझटा १८ वीरा १९ ।
अस्या गुणाः । कषायत्वम् । अम्लत्वम् । पित्त-
मेहदाहनाशित्वम् । शिशिरत्वम् । मूत्र-
दोषादिनाशकत्वञ्च । इति राजनिर्घण्टः ॥

भूम्याहुल्यं, स्त्री, (भूमिमाहुल्यति आच्छादय-
तीति । आ+हुल्+कः । ततः यत् ।) क्षुप-
विशेषः । भूमिखर् इति हिन्दी भाषा ।
तत्पर्य्यायः । भूकर्कु २ मार्कण्डीयम् ३ महौ-
षधम् ४ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् ।
ज्वरकुष्ठामयविषनाशित्वञ्च । इति राज-
निर्घण्टः ॥

भूयः, [स्] अ, (सर्वे भावाय यच्छति यतते
इति । भू+यस्+क्विप् ।) पुनरर्थम् । इति
शब्दरत्नावली । (यथा, विष्णुपुराणे ।१।४।२३।
"नमोऽस्तु तव देवेश सर्वात्मन् परमेश्वर ।
तत् सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः ॥"

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहु-
रिति बहु+"द्विवचनविभज्योपपदे तरबीय-
सुनौ ।" ५।३।५७। इति ईयसुन् । "बहो-
र्लोपो भू च बहोः ।" ६।४।१५८। इतीयसुन ई
लोपः भूरादेशश्च ।) बहुतरः । इति मेदिनी ।
से, १० । (यथा, मनुसंहितायाम् ।५।१३७।
"एतच्छौचं द्विगुणं भूयांसि तुरुकाणि च ।"

भूयिष्ठ, त्रि, (अयमेषामतिशयेन बहुरिति । बहु
+इष्ठन् । "इष्ठस्य यिट् च ।" ६।४।१५९।
इति यिडागमो बहोः स्थाने भूरादेशश्च ।)
प्रचुरः । इत्यमरः ।३।१।६३। (यथा, ऋग्वेदे ।
८।८५।६।
"इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वो-
र्भूयिष्ठमोजः ।")

भूयुक्ता, स्त्री, (भुवा+युक्ता ।) भूमिजम्बूरी ।
इति राजनिर्घण्टः ॥

भूरि, स्त्री, (भवति भूयते वेति । भू+"अदि-
शदिभूशुभिभ्यः क्रिन् ।" उणा० ।४।६५। इति
क्रिन् ।) स्वर्णम् । इत्यमरः । ३ । ३ । ४३ ।

भूरिः, पुं,(भवतीति । भू+"अदिशदिभूशुभिभ्यः ।"
उणा० ४ ।६५। इति क्रिन् ।) विष्णुः । ब्रह्मा ।
शिवः । इति मेदिनी । रे, ७३ । वासवः । इति
शब्दरत्नावली । (सोमदत्तस्य पुत्रभेदः । यथा,
महाभारते । १ । १८७ । १४ ।
"कौरव्यः सोमदत्तश्च पुत्राश्चास्य महारथाः ।
समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः ॥")
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६३ । (यथा,
ऋग्वेदे । ७ । ४ । २ ।
"स यो वनायुवती शुचिदन्भूरि
चिदन्ना समिदत्ति सद्यः ॥")

भूरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति भृञ् ।
"भृञ उच ।" उणा० २ । ७२ । इति इचिः
स च कित् धातोरुकारान्तादेशश्च । पृषोदरादि-
त्वात् साधुः ।) पृथिवी । इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः ॥

भूरिगन्धा, स्त्री, (भूरिः प्रचुरो गन्धोऽस्याः । तत-
ष्टाप् ।) मुरानामगन्धद्रव्यम् । इति राज-
निर्घण्टः ॥ (गन्धाढ्यामात्रे, त्रि ।)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति । भूरि+
गम+"गमश्च ।" ३ । २ । ४७ ।
इति खच् ।) गर्द्दभः । इति राजनिर्घण्टः ॥

भूरिदावा, [न्] पुं, भूरि ददाति यः । (भूरि+
दा+वनिप् ।) प्रचुरदाता । इति मुग्धबोध-
व्याकरणम् ॥ (यथा, ऋग्वेदे । २ । २७ । १७ ।
"मा हं मघोनो वरुणप्रियस्य भूरिदाव्न
आविदं शूनमापेः ॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्य्यासा
यस्याः ।) वृश्चिकाली । इति राजनिर्घण्टः ॥
(गुणाश्चास्या वृश्चिकालीशब्दे ज्ञातव्याः ।)

भूरिधनः, पुं, (भूरीणि धनान्यस्य ।) धनाढ्य-
जनः । इति राजनिर्घण्टः ॥

भूरिपलितदा, स्त्री, (भूरि पलितं कैश्यपाकं
राति ददाति इति रैप्+कः । टाप् ।)
पाण्डुरफली । इति राजनिर्घण्टः ॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः ।) शत-
पुष्पा । इति राजनिर्घण्टः ॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेमकं यस्य ।)
चक्रवाकः । इति राजनिर्घण्टः ॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः ।) चर्मक-
षा । इत्यमरः । २ । ४ । १४१ । चामार-
कषा इति भाषा ।

भूरिबला, स्त्री, (भूरि बलं यस्याः ।) अतिबला ।
इति राजनिर्घण्टः ॥

भूरिमल्ली, स्त्री, (भूरि मल्लते इति । मल्ल+अच्
ङीष् ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

भूरिमायः, पुं, स्त्री, (भूरी माया यस्य ।)
शृगालः । इत्यमरः । २ । ५ । ५ ॥

भूरिशः, [स्] अ, बहुशः । बहुत्वार्थात् कार-
कात् शस् वेति कारकभूरिशब्दात् शस्प्रत्ययविक-
ल्पोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ।
(भूरीणि भूरीणि इति वीप्सायां शस् । (यथा,
महानिर्वाणतन्त्रे । १ । १२ ।
"बहुधा प्राप्यमाणोऽपि तन्त्रिणामपि भूरिशः ।")

भूरिश्रवाः, [स्] पुं, (भूरि श्रवो यशांसि वित्तं
यस्य सः ।) चन्द्रवंशीयसोमदत्तराजपुत्रः ।
यथा, महाभारते । १ । १८७ । १४ ।
"समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः ।")
स तु अर्ज्जुनबाणच्छिन्नो हतः । इति महा-
भारतम् ॥ (बहुयशोविशिष्टे, त्रि ।)

भूरुण्डी, स्त्री,(भुवं पृथिवीं रुणद्धि भुवि रोहतीति
वा । भू+"रुध+वा रुह+कः पृषोदरा-
दित्वात् धकार हकारौ गौरादित्वात् ङीष् ।)
श्रीहस्तिनी क्षुपः । इत्यमरः । २ । ४ । १४९ ।
(भूरुण्डीति च पाठान्तरः ।) हातिशुँड़ा
इति भाषा ॥

भूरुहः, पुं, (भुवि रोहति प्रादुर्भवतीति भू+
रुह+कः ।) वृक्षः । इति शब्दमाला ।
(यथा, माघे । ७ । ५० ।
"इदमिदमिति भूरुहान् प्रसूनैः ।")

भूर्जः, पुं, (ऊर्ज+अच् । भूः ऊर्ज्जो बलं यस्य ।
भुवि ऊर्ज्जयते इति भू+ऊर्ज+अच् वा ।)
स्वनामख्यातवृक्षविशेषः । भोजपत्र इति हिन्दी
भाषा । (यथा, रघौ । ४ । ७३ ।
"भूर्जेषु मर्म्मरीभूताः कीचकध्वनिहेतवः ।")
तत्पर्य्यायः । चर्म्मद्रुमः २ भुर्जः ३ मृदुपत्री ४
भूर्ज्जपत्रकः ५ विचित्रकः ६ सितच्छदः ७ रक्षा-
पत्रः ८ विचित्रकः ९ भूतघ्नः १० बहुपुटः ११
शैलेयकः १२ । इति राजनिर्घण्टः । भूर्ज्ज-
पत्रः १३ चर्म्मी १४ बहुवल्कलः १५ । इति
भावप्रकाशः । वल्कपत्रः १६ छत्रः १७ शिर-
च्छदः १८ । इति रत्नमाला । भुर्ज्जः १९ ।
इत्यमरः । २ । ४ । ४६ । मृदुत्वचः २० । इति
भरतधृतामरः । त्वचः २१ बहुपटः २२ भुर्ज्ज-
पत्रः २३ मृदुच्छदः २४ । इति शब्दरत्ना-
वली । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफ-
मेदोऽपहत्वञ्च । इति राजवल्लभः । कटुत्वम् ।
कषायत्वम् । उष्णत्वम् । भूतरक्षाकरत्वम् ।
पित्तविषघ्नत्वम् । पथ्यत्वम् । दुष्टपित्त-
नाशित्वञ्च । इति राजनिर्घण्टः । कर्णरोग-
पित्तरक्तमेदोविषहरत्वञ्च । इति भावप्रकाशः ॥
(यथा, वामने प्रतीक्ष्याणि वनमिमानि ।
"भूर्जत्वगाबद्धशुभोत्तमाङ्गकुचस्तवाद्रिः ।
दृष्ट्वाह्वानिव ..... ॥")

भूर्जकण्टकः, पुं, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ (यथा, मनौ । १० । २१ ।
"ब्राह्मणात्तु जायते विप्रात् पापात्मा भूर्ज्ज-कण्टकः ॥")

भूर्जपत्रः, पुं, (भुवि ऊर्ज्जस्तेभ्यः उपदेशकाविभ्यः पत्राण्यस्य ।) भूर्जवृक्षः । इति रत्नमाला ॥ (यथा, रामायणे । २ । ९४ । २७ ।
"कुब्जकतरुकरवीरभूर्जपत्रोत्तरच्छदाम् ॥") तथा चास्य पर्य्यायः ।
"भूर्जपत्रः स्मृतो भूर्जश्चर्म्मी बहुलवल्कलः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

भूर्णिः, स्त्री, (बिभर्त्ति सर्व्वमिति । भृ + "घृणिपृश्निपार्ष्णिचूर्णिभूर्णिः ।" उणा० ४ । ५२ । इति निः निपातनादूत्त्वञ्च ।) पृथिवी । मरुभूमिः । इत्युणादिकोषः ॥ (भर्त्ता । यथा, ऋग्वेदे ।७।८७।५।
"आत्मा ते वातो रज आनवीनोत्-
पशुर्न भूर्णिर्यवसे स सवान् ।"
"भूर्णिर्भर्त्ता ।" इति तद्भाष्ये सायनः ॥)

भूर्लोकः, पुं, (भूःसंज्ञको लोकः । शाकपार्थिवादिवत् समासः ।) अस्मदीयादयो लोकः । मर्त्यलोकः । तस्य लक्षणं यथा,—
"पादगम्यन्तु यत्किञ्चित् वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ॥"
इति विष्णुपुराणे । २ अंशे ५ अध्यायः ॥
चरणसञ्चारयोग्यं गिरिशिखरादि यावत् तावद्दुर्लभो भूर्लोक इत्यर्थः । विस्तारो मयोदितः सर्व्वतो लोकालोकावधिः पञ्चविंशतिकोटिप्रमाणः । इति तट्टीकायां स्वामी ॥ अस्य विवरणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोलशब्दे च द्रष्टव्यम् ॥ (यथा, भागवते । २ । ५ । ३८ ।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥")

भूलग्ना, स्त्री, (भुवि लग्ना ।) ब्रह्मपुष्पी । इति राजनिर्घण्टः ॥

भूलता, स्त्री, (भुवि लता इव ।) किञ्चुलकः । इति हेमचन्द्रः । ४ । २६८ ॥

भूबदरी, स्त्री, (भूलग्ना बदरी शाकपार्थिवादिवत् समासः ।) क्षुद्रकोली । भुइबेर इति हिन्दीभाषा । तत्पर्य्यायः । क्षितिबदरी २ बल्लीबदरी ३ बदरवल्ली ४ बहुफलिका ५ लघुबदरी ६ बदरफली ७ सूक्ष्मबदरी ८ । अस्या गुणाः । मधुराम्लत्वम् । कफवातविकारकारित्वम् । पथ्यत्वम् । दीपनत्वम् । पाचनत्वम् । किञ्चित् पित्तदाहकारित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

भूशयः, पुं, (भुवि शेते इति । भू + शीङ् + "अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् ।) नकुलगोधादिः । एतेषां मांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वायुनाशित्वम् । शुक्रकारित्वञ्च । इति राजवल्लभः ॥ विष्णुः । यथा,—
"भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥

भूशेलुः, पुं, (भुवि स्थाता शेलुः शाकपार्थिवादिवत् समासः ।) भूकर्बुदारकः । इति राजनिर्घण्टः ॥

भूष कि भूषणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) कि भूषयति भूषति हारो जनम् । इति दुर्गादासः ॥

भूषणं, क्ली, (भूष्यते अनेनेति । भूष + करणे ल्युट् ।) अलङ्कारः । इति हेमचन्द्रः ।३।३१६। (यथा, चाणक्यसंग्रहे । ८ ।
"नगरभूषणं चन्द्रो नारीणां भूषणं पतिः ॥")
देवदेवभूषणादि यथा,—
"भौम्यभूषोत्तमं नित्यं भूषणानि शृणुष्व मे ।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका ॥
तालपत्रञ्च हारञ्च ग्रैवेयकमथोर्म्मिका ।
प्रालम्बिका रत्नसूत्रमुत्तुङ्गोऽवर्णमालिका ॥
पार्श्वद्योती नखद्योती त्वङ्गुलीच्छादकस्तथा ।
कटिसूत्रं माणवको महातारा कलम्बिका ॥
अङ्गदौ बाहुवलयः शिखाभूषणमिश्रिका ।
प्रायशवल्यं तदूर्ध्वं नाभिपूरोऽथ मालिका ॥
अङ्गकौ मुद्रकश्चैव दन्तपत्रञ्च कर्णकः ।
कटकञ्च नीवी च क्षुद्रघण्टं प्रकीर्णकम् ॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका ।
मुखपट्टमिति प्रोक्ता अलङ्काराः सुशोभनाः ।
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदाः ।
अलङ्काराः प्रदानेन चतुर्व्वर्गप्रदायकाः ॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये ।
तेषां देवतमुद्दिश्य पूजयेत्तु विचक्षणः ॥
शिरोगतानि चाद्यत् सौवर्णानि तु सर्व्वदा ।
चूडारत्नादिकानीह भूषणानि तु भैरव ! ॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा ।
निवेदयेत्तु देवेभ्यो मायातैजससम्भवम् ॥
रीतिसीसादिसंजातं ताम्रोपकरणादिकम् ।
दद्यादायसवर्जन्तु भूषणं न कदाचन ॥
घण्टाचामरकुम्भादि ताम्रोपकरणादिकम् ।
तद्भूषणान्तरे दद्यात् यथालाभमुपभूषणम् ॥
सर्व्वं ताम्रमयं दद्याद्वस्तुविविधभूषणादिकम् ।
सर्व्वञ्च सर्व्वसाम्यमर्घ्यपात्रे ततोऽधिकम् ॥
पूर्णपात्रं नैवेद्याधारपात्रञ्च पानकम् ।
औडम्बरं यदा विष्णोः प्रोक्षितं तोषदं तदा ॥
ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः ।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत् ॥
लोहयोगी वरः कुर्य्याद्देवानामपि भैरव ! ।
पौत्रोऽहं देवि रौप्यन्तु न कदाचिच्च भूषणम् ॥
प्राकारः पानपात्रञ्च मेखलं यन्त्रमेव च ।
पर्य्यङ्कादि मदन्यच्च सर्व्वं तदुपभूषणम् ॥
अयोमयमृते कांस्यमृते यद्भूषणं भवेत् ।
सर्व्वं रौप्यस्य चाभावे अधःकाये नियोजयेत् ॥
एतेषां भूषणानां यद्दानं प्रकृते नरैः ।
तत्तद्दानं समर्थे तु यत्नेनैव प्रदापयेत् ॥
चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम् ।
तुष्टिपुष्टिप्रीतिकरं यथाशक्त्यैव अर्पयेत् ॥
इदं ते भूषणं प्रोक्तं सर्व्वदेवस्य तुष्टिदम् ।"
इति कालिकापुराणे ६८ अध्यायः ॥
अथालङ्कारयुक्तिः । तद्धारणविधिरुच्यते ।
"देवब्राह्मणसिद्धानां दत्तादिष्वपि पर्व्वसु ।
गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम् ॥
अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम् ।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते ॥
शिरस्यं मुकुटं हारः कुण्डलञ्चाङ्गदन्तथा ।
कङ्कणं वालकञ्चैव मेखलाद्याविति क्रमात् ॥
प्रधानभूषणान्येषु यथा स्वं याति निश्चयः ।
पद्मरागश्च वज्रञ्च विद्रुमो गोविदस्तथा ॥
मुक्तावैदूर्य्यनीलञ्च यथा मरकतं क्रमात् ।
आदित्यादिग्रहाणां सर्व्वसम्पत्तिदायकाः ॥
सुवर्णमपि घटना सर्व्वत्रात्र प्रयुज्यते ।
प्रधानभूषणेष्वेवमप्रधाने न निर्णयः ॥
प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते ।
तत्र प्रधानभूतत्वादित्याह भृगुनन्दनः ।'
सुखदा मणयः शुद्धा दुःखदा दोषशालिनः ।"
इति युक्तिकल्पतरुः ॥
तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानतः ।
शुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम् ॥
ग्रहदृष्टिहरं पुष्टिकरं दुःखप्रणाशनम् ।
पापदौर्भाग्यशमनं रत्नाभरणधारणम् ॥
माणिक्यं तरणेः सुजात्यममलं मुक्ताफलम् शीतगो-
र्माहेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शने-
र्नीलं निर्म्मलमन्ययोश्च गदिते गोमेदवैदूर्य्यके ॥
भाषः प्रयतनवरत्नानां धारणं प्रीतिवर्द्धनम् ।
रक्षोघ्नमर्थमोजस्कं सौभाग्यकरमुत्तमम् ॥"
इति भावप्रकाशः ॥

भूषणः, पुं, (भूषयति भक्तहृदयमिति भूष्यतेऽनेनेति वा । भूष + ल्युः वा ल्युट् ।) विष्णुः । यथा,—
"भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ।"
इति तस्य सहस्रनामस्तोत्रम् ॥
(राजविशेषः । यथा, कथासरित्सागरे । ४० । ११ ।
"वसुदत्तारथश्चैते राजानोऽपरथा इमे ।
प्रभुरौ सुविशालश्च हरिभूषणबोधिताः ॥")

भूषा, स्त्री, (भूष + भावे अः टाप् च ।) अलङ्क्रिया । इत्यमरः । २ । ६ । १०१ ॥ (यथा, भागवते । ६ । २९ । २२ ।
"इत्यक्तोः पर्व्वदात् प्रोक्ता भूषावासःपरि-च्छदात् ॥")

भूषितः, त्रि, (भूष + क्तः ।) अलङ्कृतः । इत्यमरः । ३ । १ । १०० ॥ (यथा, भट्टिः । १ । ७ ।
"भृङ्गालीकोकिलकुहूभिर्वाग्भिर्मत्र षट्पद ॥
रोपवैर्भूषितौ मन्मानसाकं हृदयाविधम् ॥")

हिन्दी भाषा । तत्पर्य्यायः । हारहूरः २ मरु-राजुः ३ अरुष्करः ४ । अस्य गुणाः । शिशिर-त्वम् । रक्तपित्तप्रसादनत्वञ्च । इति भाव-प्रकाशः ॥

भूम्यामलकी, स्त्री, (भूमिजाता आमलकी शाक-पार्थिवादित्वात् समासः) क्षुपविशेषः । भुँइ आमला इति भाषा । तत्पर्य्यायः । बहुपुष्पी २ शिवा ३ अमला ४ ताली ५ तामलकी ६ अजटा ७ तच्छपत्रा ८ ऊर्द्धामलकी ९ । इति रत्नमाला । वितुन्नकः १० झटा ११ अमला १२ अज्झटा १३ ताली १४ शिवा १५ । इत्यमरः । २।४।१२४ ॥ झाटा १६ जटा १७ भाटामला १८ अमलाज्झटा १९ । इत्यमरटीकायां भरतः ॥ भूम्यामलकिका २० शिवामलकी २१ बहु-पुष्पा २२ बहुफला २३ बहुवीर्य्या २४ भूधात्री २५ । अस्या गुणाः । वातकारित्वम् । तिक्तत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् । पिपासाकासपित्तास्रकफपाण्डुक्षतनाशित्वञ्च । इति भावप्रकाशः ॥

भूम्यामली, स्त्री, (भूम्या आमलति आत्मानं धारय-तीति । आ+मल्+अच् ।) भूम्यामलकी । भुइँआँवला इति हिन्दी भाषा । भुँइ आमला इति वङ्गभाषा । तत्पर्य्यायः । तमाली २ ताली ३ तमालिका ४ उच्चटा ५ बहुपादी ६ वितुन्ना ७ वितुन्निका ८ भूधात्री ९ वारटी १० हृष्या ११ शिवली १२ बहुपत्रिका १३ बहुवीर्य्या १४ अहिमघरा १५ विश्वपर्णी १६ हिमालया १७ अजझटा १८ वीरा १९ । अस्या गुणाः । कषायत्वम् । अम्लत्वम् । पित्त-मेहदाहघ्नत्वम् । शिशिरत्वम् । व्रण-दोषार्त्तिप्रशमनत्वञ्च । इति राजनिर्घण्टः ॥

भूम्याहुल्यं, स्त्री, (भूमिम् आह्वयति आच्छादय-तीति । आ+ह्वे+कः । ततः टाप् ।) क्षुप-विशेषः । भूमिचाइ इति हिन्दी भाषा । तत्पर्य्यायः । भूङकेतु २ मार्कण्डीयम् ३ महो-दयम् ४ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । ज्वरकुष्ठामविकारादिघ्नत्वञ्च । इति राज-निर्घण्टः ॥

भूयः, [स्] व, (भुवे भावाय अलति अलते इति । भू+अल्+क्विप् ।) पुनरर्थम् । इति शब्दरत्नावली ॥ (यथा, विष्णुपुराणे । १।४।२४ ॥
"यथोर्द्ध्वं भव भावीशे मनाव परमेश्वर ॥
तत् वर्धि मं ममत्वेऽर्थं भूयो भूयो नमो नमः ॥")

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहु-रिति बहु+"द्विवचनविभज्योपपदे तरबीय-सुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "बहो-र्लोपो भू च बहोः ।" ६।४।१५८ । इतीयसुन ई-लोपः भूरादेशश्च ।) बहुतरः । इति मेदिनी । ने, १० ॥ (यथा, मनुसंहितायाम् । ७।११७ ॥
"उभाभ्यां त्रिद्व वर्षेषु भूयांसि सुकृतानि च ।"

भूयिष्ठं, त्रि, (अयमेषामतिशयेन बहुरिति । बहु+इष्ठन् । "इष्ठस्य यिट् च ।" ६ । ४ । १५९ । इति यिडागमो बहोः स्थाने भूरादेशश्च ।) प्रचुरः । इत्यमरः ।३।१।६३ ॥ (यथा, ऋग्वेदे । ८ । ८५ । ९ ।
"इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वो-र्भूयिष्ठमोजः ॥")

भूयुक्ता, स्त्री, (भुवा+युक्ता ।) भूमिखर्ज्जूरी । इति राजनिर्घण्टः ॥

भूरि, क्ली, (भवति भूयते वेति । भू+"अदि-शदिभूशुभिभ्यः क्रिन् ।" उणा० ४।६५ । इति क्रिन् ।) स्वर्णम् । इत्यमरः । ३ । ३ । ६१ ॥

भूरिः, पुं,(भवतीति । भू+"अदिशदिभूशुभिभ्यः ।" उणा० ४ ।६५ । इति क्रिन् ।) विष्णुः । ब्रह्मा । शिवः । इति मेदिनी । रे, ७३ । वासवः । इति शब्दरत्नावली ॥ (सोमदत्तस्य पुत्रभेदः । यथा, महाभारते । १ । १८७ । १४ ।
"कौरवः सोमदत्तश्च पुत्राश्चास्य महारथाः । समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः ॥")
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६३ ॥ (यथा, ऋग्वेदे । ७ । ३ । २ ।
"संघोषकाद्द्रवति शुचिरनुभूरि विदमात्वमिदर्शि यदः ॥")

भूरिज्, [ज्] स्त्री, (भरति धर्म्मं भरतीति भृज् । "भृज उच ।" उणा० २ । ७२ । इति इजिः स च किन् धातोरकारादेशश्च । पृषोदरादि-त्वात् साधुः ।) पृथिवी । इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥

भूरिगन्धा, स्त्री, (भूरिः प्रचुरो गन्धोऽस्याः । तत-ष्टाप् ।) मुरानामगन्धद्रव्यम् । इति राज-निर्घण्टः ॥ (प्रभूतगन्धयुक्ते, त्रि ।)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति । भूरि+गम+"गद्दहदविभिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) गर्द्दभः । इति राजनिर्घण्टः ॥

भूरिदावा, [न्] पुं, भूरि ददाति यः । (भूरि+दा+वनिप् । प्रचुरदाता । इति मुग्धबोध-व्याकरणम् ॥ (यथा, ऋग्वेदे । ८ । २७ । १७ ।
"मादे मघोनो युक्तप्रियस्य भूरिदावा आविदं भूतमादिः ॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्यासा यस्याः ।) वृश्चिकाली । इति राजनिर्घण्टः ॥ (गुणाद्योऽस्या वृश्चिकालीशब्दे ज्ञातव्याः ॥)

भूरिपत्रः, पुं, (भूरीणि पत्राण्यस्य ।) उलप-तृणम् । इति राजनिर्घण्टः ॥

भूरिपलितदा, स्त्री, (भूरि पलितं केशपाकं ददाति प्रोक्षणेन इति । दा+कः । टाप् ।) पाण्डुरफली । इति राजनिर्घण्टः ॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः ।) शत-पुष्पा । इति राजनिर्घण्टः ॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेयस्यां यस्य ।) चक्रवाकः । इति राजनिर्घण्टः ॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः ।) चर्म्म-कषा । इत्यमरः । २ । ४ । १४१ ॥ चामार-कषा इति भाषा ॥

भूरिबला, स्त्री, (भूरि बलं यस्याः ।) अतिबला । इति राजनिर्घण्टः ॥

भूरिमल्ली, स्त्री, (भूरि मल्लते इति । मल्ल+अच् ङीष् ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

भूरिमायः, पुं, स्त्री, (भूरिः माया यस्य ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥

भूरिशः, [स्] व, बहुशः । बह्वल्पार्थात् कार-कात् शस् वेति कारकाद्भूरिशब्दात् शस्प्रत्ययविधा-नोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ॥ (भूरीणि भूरीणि इति वीप्सायां शस् । यथा, महानिर्वाणतन्त्रे । १ । ५२ ।
"बहुधाध्यानवाच्छेऽपि शरीरान्यपि भूरिशः ॥")

भूरिश्रवाः, [स्] पुं, (भूरि श्रवो महाकीर्त्ति-र्यशो यस्य सः ।) चन्द्रवंशीयसोमदत्तराजपुत्रः । यथा, महाभारते । १ । १८७ । १४ ।
"समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः ॥"
स तु अर्ज्जुनशराच्छिन्नो हतः । इति महा-भारतम् ॥ (बहुयशोविशिष्टे, त्रि ॥)

भूरुण्डी, स्त्री,(ऊर्ध्वं दृढमूलं भुवि रोहतीति वा । भू+"रुध+वा रुह+कः पृषोदरा-दित्वात् नकार हकारौ गौरादित्वात् ङीष् ।) श्रीहस्तिनी वृक्षः । इत्यमरः । २ । ४ । ११८ ॥ (भूरुण्डीति च पाठान्तरम् ।) हातिशुँड़ा इति भाषा ॥

भूरुहः, पुं, (भुवि रोहति प्रादुर्भवतीति भू+रुह+कः ।) वृक्षः । इति शब्दमाला ॥ (यथा, माघे । ७ । ५० ।
"इदमिदमिति भूरुहान्प्रसूनैः ।")

भूर्जः, पुं, (ऊर्ज्ज+अच् । भुः ऊर्जो बलं यस्य । भुवि ऊर्ज्जयति इति भू+ऊर्ज्ज+अच् वा ।) हिमालयस्थवृक्षविशेषः । भोजपत्र इति हिन्दी भाषा । (यथा, रघौ । ४ । ७३ ।
"भूर्ज्जेषु मर्म्मरीभूताः कीचकध्वनिहेतवः ।")
तत्पर्य्यायः । चर्म्मद्रुमः २ भूर्जः ३ सुचर्मा ४ भूर्जपत्रकः ५ चित्रच्छद ६ चित्रत्वक् ७ रक्षा-पत्रः ८ विचित्रकः ९ भूतघ्नः १० मृदुपत्रः ११ शैलेन्द्रस्थः १२ । इति राजनिर्घण्टः ॥ बहु-पत्रः १३ चर्म्मी १४ बहुलवल्कलः १५ । इति भावप्रकाशः ॥ छत्रपत्रः १६ शिवः १७ शिरो-च्छदः १८ । इति रत्नमाला ॥ भुर्जः १९ । इत्यमरः । २ । ४ । ४६ ॥ मृदुत्वक् २० । इति भरतधृतममुः । शुक्लः २१ बहुपटः २२ भू-र्ज्जकः २३ मृदुच्छदः २४ । इति भरतपा-लाभ्रौ । अस्य गुणाः । बलकारित्वम् । भूत-रक्षापादित्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । कषायत्वम् । उष्णत्वम् । भूतरक्षाकरत्वम् । पित्तश्लेष्मघ्नत्वम् । मेदोघ्नत्वम् । दुष्टविष-नाशित्वञ्च । इति राजनिर्घण्टः ॥ कर्णरोग-पित्तरक्तविषमेदोघ्नत्वञ्च । इति भावप्रकाशः ॥ (यथा, मार्कण्डेये हरिवंशे ७० । ५१ ।
"भूर्ज्जावल्किलौटिजीर्णवल्कलवसनैः ।
पतद्द्रुमाणां समवेतैः कौशिकैश्चलद्वस्त्रम् ॥")

भूर्जकण्टक:, पुं, वर्णसङ्करजातिविशेष:। इति जटाधर:॥ (यथा, मनौ। १०। २१।
"व्रात्यात्तु जायते विप्रात् पापात्मा भूर्ज-
कण्टक:॥")

भूर्जपत्र:, पुं, (भुवि ऊर्ज्जस्थलेभ्य: उत्पद्यमानेभ्य: पत्राण्यस्य।) भूर्ज्जद्रुम:। इति रत्नमाला॥ (यथा, रामायणे। २। ६४। २४।
"कुश्यसनरसुमागभूर्जपत्रोत्तरच्छदान्॥")
तथा चास्य पर्य्याय:।
"भूर्जपत्र: स्मृतो भूर्ज्जश्चर्म्मी बहुलवल्कल:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भूर्णि:, स्त्री, (बिभर्त्ति सर्व्वमिति। भृ+"घृणिपृश्नि-पार्ष्णिचूर्णिभूर्णि:।"उणा०४। ५२। इति नि: निपातनादूत्वञ्च।) पृथिवी। मरुभूमि:। इत्यु-णादिकोष:॥ (भर्त्ता। यथा, ऋग्वेदे। ७। ८७। २।
"आत्मा ते वातो रज आनवीनोत्
पशुर्न भूर्णिर्यवसे ससवान्।"
"भूर्णिर्जगतो भर्त्ता।" इति तद्भाष्ये सायन:॥)

भूर्लोक:, पुं, (भू:संज्ञको लोक:। शाकपार्थिवादि-वत् समास:।) जम्बूद्वीपादयो लोक:। मर्त्त्य-लोक:। तस्य लक्षणं यथा,—
"पादगम्यञ्च यत्किञ्चित् वस्त्वस्ति पृथिवीमयम्।
स भूर्लोक: समाख्यातो विस्तारोऽस्य मयो-
दित:॥"
इति विष्णुपुराणे। २ अंशे ६ अध्याय:॥
चरणसञ्चारयोग्यं गिरिशिखरादि यावत् ताव-दुल्लेखो भूर्लोक इत्यर्थ:। विस्तारो मयोदित: सर्व्वतो लोकालोकावधि: पञ्चाशत्कोटि-प्रमाण:। इति तट्टीकायां स्वामी॥ अस्य विव-रणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोल-शब्दे च द्रष्टव्यम्। (यथा, भागवते। २। ५। ३८।
भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य
नाभित:॥")

भूलता, स्त्री, (भुवि लता।) ब्रह्मपुष्पी। इति राजनिर्घण्ट:॥

भूलता, स्त्री, (भुवि लता इव।) किञ्चुलक:। इति हेमचन्द्र:। ४। २६८॥

भूबदरी, स्त्री, (भूलग्ना बदरी शाकपार्थिवादिवत् समास:।) क्षुद्रकोली। भुइबेर इति हिन्दी-भाषा। तत्पर्य्याय:। क्षितिबदरी २ वल्लीबदरी ३ बदरवल्ली ४ बहुफलिका ५ लघुबदरी ६ बदरवल्ली ७ सूक्ष्मबदरी ८। अस्या गुणा:। मधुराम्लत्वम्। कफवातविकारकारित्वम्। पथ्यत्वम्। दीपनत्वम्। पाचनत्वम्। किञ्चित् पित्तापहकारित्वम्। रुच्यत्वञ्च। इति राज-निर्घण्ट:॥

भूमय:, पुं, (भुवि प्रीते इति। भू+मीङ्+ "अधिकरणे शेते:।"३। २। १५। इति अच्।) मङ्गलोषधि:। एतेषां मांसगुणा:। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वायुनाशि-त्वम्। शुक्रकारित्वञ्च। इति राजवल्लभ:॥ विष्णु:।
यथा,—
"भूशयो भूषणो भूतिर्विशोक: शोकनाशन:॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम्॥

भूषेलु:, पुं, (भुवि स्थाता शेलु: शाकपार्थिवादि-वत् समास:।) भूकर्व्वुदारक:। इति राज-निर्घण्ट:॥

भूष कि भूषणे। इति कविकल्पद्रुम:॥ (चुरा०-पर०-सक०-सेट्।) कि भूषयति भूषति नारी जनम्। इति दुर्गादास:॥

भूषणं, क्ली, (भूष्यते अनेनेति। भूष+करणे ल्युट्।) अलङ्कार:। इति हेमचन्द्र:। ३। ३१३॥ (यथा, चाणक्यसंग्रहे। ८।
"नराणां भूषणं रूपं नारीणां भूषणं पति:॥")
देवदेयभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि शृणुष्व मे।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका॥
तालपत्रञ्च हारञ्च ग्रैवेयकमथोर्म्मिका।
प्रालम्बिका रत्नसूत्रमुत्तरीयपट्टमालिका॥
पार्श्वद्योतो नखद्योतो ह्यङ्गुलीच्छादकस्तथा।
कटितटं माणवको महेतारा ललन्तिका॥
अङ्गदो बाहुवलय: शिखाभूषणमिञ्जिका।
प्रागस्थकमं तद्भार्यं नाभिपूरोऽथ मालिका॥
शृङ्खलौ ममलञ्चैव रत्नपट्टञ्च चञ्चक:।
जयछत्रञ्च नीवी च सुचिबद्धं प्रकीर्णकम्॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका।
सुखपट्टमिति प्रोक्ता अलङ्कारा: सुशोभना:॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदा:।
अलङ्कारा: प्रदानेन चतुर्व्वर्गप्रदायका:॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये।
तेषां देवतसुखार्थं पूजयेत्तु विचक्षण:॥
शिरोगतानि चादद्यात् सौवर्णानि तु सर्व्वदा।
मुक्ताफलादिकानीह भूषणानि तु भैरव!॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा।
निवेदयेत्तु देवेभ्यो नान्यलौहमयं क्वचित्॥
रीतिकांस्यादिसंजातं पाशोपकरणादिकम्।
दद्यात् सायसजन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्याद् यस्मात्तदुपभूषणम्॥
सर्व्वं ताम्रमयं दद्याद्यत्किञ्चिद्भूषणादिकम्।
सर्व्वञ्च सर्व्वदा ताम्रमभावे तदोऽधिकम्॥
पूजार्थपात्रं नैवेद्याधारपात्रञ्च पात्रकम्।
यौद्भवं यदा विष्णो: प्रीतिदं लौहजं तदा॥
ताम्रे देवा: प्रमोदन्ते ताम्रे देवा: सदा स्थिता:।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत्॥
लौहपात्रे नर: कुर्य्याद्देवानामपि भैरव!।
लौहोऽनदेशे दीयेत न कदाचिच्च भूषणम्॥
प्राकार: पात्रपात्रञ्च शैलूकं यन्त्रमेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्॥
अयोमयञ्च कांस्यञ्च यद्भूषणं भवेत्।
सर्व्वदैवस्य चाभावे अध:काये नियोजयेत्॥
एतेषां भूषणादीनां यद्दानं भवति नरै:।
तत्तद्दानात् समवेत् तु धर्म्ममेव प्रदापयेत्॥
चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम्।
तुष्टिपुष्टिप्रीतिकरं यथाशक्त्येव कल्पयेत्॥
इदं ते भूषणं प्रोक्तं सर्व्वदैवस्य तुष्टिदम्।"
इति कालिकापुराणे ६८ अध्याय:॥
अथालङ्कारयुक्ति:। तद्धारणादिगदयते।
"देवब्राह्मणसिद्धेषु हस्तादिष्वपि पञ्चसु।
गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम्॥
अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम्।
उद्वाहे राजसम्माने माङ्गल्यानाञ्च सम्मते॥
शिरस्यं मुकुटं हार: कुण्डलञ्चाङ्गदस्तथा।
कङ्कणं बालकञ्चैव मेखलाहारविति क्रमात्॥
प्रधानभूषणान्येषु यथा स्वं याति निश्चय:।
पद्मरागञ्च वज्रञ्च विद्रुमो मौक्तिकस्तथा॥
मुक्तादिवैदूर्य्यनीलञ्च यथा मरकतं क्रमात्।
आदित्यादिग्रहाणां सर्व्वसम्पत्तिदायका:॥
सुवर्णेनापि घटना सर्व्वेषामुपयुज्यते।
प्रधानभूषणेष्वेवमप्रधाने न निर्णय:॥
प्रधानभूषणं प्राय: शिरसो ह्यभिधीयते।
तस्य प्रधानभूतत्वादित्याह भृगुनन्दन:।
सुखदा मणय: शुद्धा दु:खदा दोषशालिन:॥"
इति युक्तिकल्पतरु:॥
तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानत:।
रुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम्॥
ग्रहदृष्टिहरं पुष्टिकरं दु:खप्रणाशनम्।
पापदौर्भाग्यशमनं रत्नाभरणधारणम्॥
माणिक्यं तरणे: सुजात्यममलं मुक्ताफलम्
शीतगो-
र्माहेयस्य च विद्रुमो निगदित: सौम्यस्य
गारुत्मतम्।
देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शने-
र्नीलं निर्म्मलमन्ययोश्च गदिते गोमेदवैदूर्य्यके॥
वास: प्रशस्तगन्धरसानां धारणं प्रीतिवर्द्धनम्।
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमम्॥"
इति भावप्रकाश:॥

भूषण:, पुं, (भूषयति भक्तहृदयमिति भूष्यतेऽनेनेति वा। भूष+ल्यु: वा ल्युट्।) विष्णु:। यथा,—
"भूशयो भूषणो भूतिर्विशोक: शोकनाशन:।"
इति तस्य सहस्रनामस्तोत्रम्॥
(राजविशेष:। यथा, कथासरित्सागरे। ६०। ११।
"वसुदत्तादयश्चैते राजानोऽपरथा इमे।
अङ्कुरो सुविशालश्च दण्डिभूषणशोभिता:॥")

भूषा, स्त्री, (भूष+भावे अ: टाप् च।) अल-ङ्क्रिया। इत्यमर:। २। ६। १०१॥ (यथा, भागवते। १। ११। २२।
"इत्यथो: मर्म्मदात् प्रोक्ता भूषाभाष:परि-
च्छदान्॥")

भूषित:, त्रि, (भूष+क्त:।) अलङ्कृत:। इत्य-मर:। २। ६। १०० ॥ (यथा, भट्टि:। ६। ७३।
"शृङ्गाणीलौकिककुट्टिमेऽङ्ग्नै:पत्रसञ्चय:।
दीपकैर्भूषितां पश्यामसानां हृदयानिशम्॥")

भृकुः, त्रि, (भृ + गन्तु ।) भयशीलः । तत्पर्यायः । भीरुः १ भीरुका २ । इत्यमरः । ३ । १ । ५८ । बाधुभयशीलः । इति तट्टीकायां रायमुकुटः । (यथा, मनौ । ७ । ११९ ।

"क्षत्रियं चैव वर्ण्य च ब्राह्मणश्च बहुश्रुतम् ।
भाव्ययेत् वै भूकुः कृशानपि कदाचन ॥"
"भृगुः, भवादुरादिना भईभशीलः ।" इति तट्टीकायां कुल्लूकभट्टः ।)

भूगुन:, पुं, (भुवः पृथिव्याः गुनः ।) मङ्गलग्रहः । इति शब्दमाला । (यथा, धर्मशिवाले । ५ । ४१ ।

"भद्रत्वाक्षीणपरिधेः यत्रमे भगुभूगुनौ ।")
सीतायाम् स्त्री ।

भूस्तृणं, क्ली, (भूमयं दृश्यं भुवस्तृणमिति वा । पारस्करादित्वात् सुट् ।) भूस्तृणम् । इत्यमरः । २ । ४ । १६० । (यथा, मनौ । ६ । १३ ।

"वर्जयेन्मधुमांसं च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥")
अस्य पर्यायगुणा यथा,—
"गुह्यबीजश्च भूतीकं सुगन्धं गोमयप्रियम् ।
भूस्तृणन्तु भवेच्छत्रा मालातृणकमित्यपि ॥
भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं दीपनं लघु ।
विदाहि रोचनं रुच्यमभेद्यं मुखशोधनम् ।
वस्त्यं बहुविट्कञ्च पित्तरक्तप्रदूषकम् ॥"
इति भावप्रकाशः ॥

भूस्पृक्, [श्] पुं, (भुवं स्पृशतीति स्पृश् + क्विन् ।) मनुष्यः । इति हेमचन्द्रः । ३ । १ ॥

भूस्वर्गः, पुं, (भुवि स्वर्ग इव स्वर्गलोकाधारत्वात् ।) सुमेरुपर्वतः । इति जटाधरः ॥

भ्रण, } भृतिपुरणे । इति कविकल्प-
भ्रि ड्ड ण } द्रुमः । (भ्वा०-उभ०-सक०-अनिट् । क्रि-द्रा०-उभ०-सक०-अनिट् ।) भरि-भीत्वं पुष्टिः पोषणम् । तिभ "बिभर्त्ति हरिर्वं घमुर्विभर्ति भरतः सुतम् । ड्र भरद्रुः । ड्र भर्ग्निमम् । ष्मादिरवश्च भृतिः पूरणम् । न भरति कुम्भमद्दिवं । भरति । इति दुर्गादासः ॥

भृकुंशः, पुं, (कुंश + अच् । कुशो भाषादीपनम् । पृषोदरादित्वात् साधुः । भुवा कुंशो भाव-प्रकाशः रहितभावं यस्य । निपातनात् साधु-त्वम् ।) भृकुंसः । स्त्रीवेशधारी नटः-पुरुषः । इत्यमरटीकायां रमानाथः ॥

भृकुंसः, पुं, (भृशरी नट पुंविकारि इत्यभीतः कुर्विनामादौ । स्त्रीवेशं धारयिना भ्रुवः कुंस-यति पुरुषमिति संज्ञाभावादुत्तरस्य भ्रुकारस्य च वा । कुंस + अच् । यद्वा भुवा कुंस रहितभावो यस्य । निपातनात् साधुः ।) भ्रूकुंसः । स्त्रीवेशधारी नटपुरुषः । इत्यमरटीकायां रमानाथः ॥

भृकुंशः, पुं, (भृकुंश इति कार्ये कन् ।) भृकुंसः । इति शब्दरत्नावली ॥

भृकुटिः, स्त्री, (कुट कौटिल्ये इति कुट + इन् । भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसारणम् ।) भ्रूकुटिः । यथा,—
"रचितभ्रुकुटिस्त्वं मल्लिका हारि वहे ।"
इति भरतसङ्गीतविलासः ॥

भृकुटी, स्त्री, (भृकुटि । कृदिकारादिति ङीष् ।) भ्रूकुटिः । इत्यमरटीकायां भरतः । भृकुटी-कुटिलाननी । इति मार्कण्डेयपुराणे देवी-माहात्म्यम् ॥

भृगुः, पुं, (तपसा भ्रस्यते भस्मतयाऽऽदित्यैरिति । भ्रस्ज + "प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलो-पश्च ।" उणा० १ । २८ । इति कुः सम्प्रसारणं सलोपः, ब्रस्तादिकत्वात् कुत्वम् । यद्वा भ्रस्यतीति किप् । भ्रस् ज्वाला तया पच्यतेऽसौ इति वा ।) मुनिविशेषः । स तु ब्रह्मणः पुत्रो जातः । (यथास्योत्पत्तिकथामधिकृत्य महाभारते । १३ । ८५ । १०५—१०६ ।
"भृगवा भगुना मुक्ताः खे: मे: प्रपत्तत्प्रवे: ।
भगिन्येव भृगुः पूर्वमङ्गारेभ्योऽङ्गिराभवत् ।
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् ।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृतः ॥")
अस्य भार्य्या कर्द्दमप्रजाविशेषा ख्यातिः । पुत्रः धाता विधाता च । कन्या श्रीः । इति श्रीभाग-वतम् । अपि च ।
स्वयम्भुवः ।
"कथितस्ते यथा सर्गः एवं स्वत स्वयम्भुवा ।
भृगुपत्नीं प्रथमेव सर्गी वः कथ्यतां पुनः ॥"
सूत उवाच ।
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वमुदधौ
पुनः ।
तथा धाता विधाता च तस्यां जातौ भृगोः
सुतौ ।
आयतिर्नियतिश्चैव मेरुकन्ये महात्मनोः ।
धातुर्विधातुस्ते भार्य्ये तयोर्जातौ सुतावुभौ ।
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः ।
तस्य पुत्रो द्युतिर्मेधा विशारं भार्गवो मतः ।
इत्याग्नेये गारुडे वा सर्वार्थमानाध्यायः ॥०॥
शिवः । शुक्राचार्यः । इति मेदिनी । गे, १६ ।
सानुः । प्रपातः । इति हेमचन्द्रः । अत्युच्च-स्थलस्थतामिन्दियार्थीकरणः । निरवलम्ब-पर्वतादिप्रान्तः । आरोह इति ख्यातम् । यस्मात् पतने अनवस्थितभावादितो याति । अतएव भृगुपतनमिमादिप्रयोगो भवति । इति भरतः । तत्पर्यायः । प्रपातः २ अतटः ३ । इत्यमरः । ३ । ३ । ३ । २२ ॥ । इति जटाधरः । तटकृष्णम् ६ । इति शब्दरत्नावली ॥

भृगुपतिः, पुं, (भृगूणां वंशोत्पन्नानां पतिः ।) परशुरामः । इति शब्दरत्नावली । (यथा, मेघदूते । १ । ६० ।

यथा च मेघदूते । १ । ५८ ।
"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्च-रन्ध्रम् ।")

भृगुसुतः, पुं, (भृगोः सुतः ।) शुक्रः । इति शब्दरत्नावली । परशुरामश्च ।

भृगुवर्य्यस्तिः, पुं, परशुरामः । इति शब्दरत्नावली । भृगूणामिति तिष्ठतीति पाठः ।

भृङ्गी, स्त्री, (बिभर्त्तीति । डु-भृञ् धारणे ।"भृञः किच्च सुट् च ।"उणा० १ । १२४ । इति गन् । स च किद्भवति ।) ग्रन्थिपर्णम् । अभ्रकम् इति ख्यातम् । इत्यमरः । २ । ४ । १६ । (यथा,—
"लघुपञ्चमूलमरं साद्भृङ्गवर्चसमोन्नतम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अभ्रकम् । इति राजनिर्घण्टः ॥

भृङ्गः, पुं, (बिभर्त्युद्गारानिति । भृञ् + "भृञः किच्च सुट् च ।" उणा० १ । १२४ । इति गन् । स च किद्भवति सुट् च ।) भ्रमरः । कलिङ्गरवी । इत्यमरः । २ । ५ । १६ । पिङ्गा इति भाषा । (अस्य पर्याया धूम्याटशब्दे द्रष्टव्याः ।) अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । बलपुष्टिवर्द्धनत्वञ्च । इति राजनिर्घण्टः । विटः । भृङ्गराजः । इति मेदिनी गे, १६ । (अस्य पर्य्यायः ।
"भृङ्गराजः केशराजो भृङ्गः मतङ्ग मार्कवः
इति वैद्यकरत्नमालायाम् ।
तथा च पर्य्यायान्तरम् ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
भृङ्गारः । भृङ्गरोलः । इति शब्दरत्नावली ।

भृङ्गकः, पुं, (भृङ्ग । संज्ञायां कन् ।) राजवराट-पक्षी । यथा,—
"अथ भृङ्गो भृङ्गराजो भृङ्गको राजपारकः ।"
इति शब्दरत्नावली ।

भृङ्गजं, क्ली, (भृङ्ग इव जायते इति । जन + डः ।) अगुरु । इति रत्नमाला । (गुणा-श्चास्यागुरुशब्दे विज्ञेयाः ।)

भृङ्गजा, स्त्री, (भृङ्गज + स्त्रियां टाप् ।) भार्गी । इति राजनिर्घण्टः ॥

भृङ्गमारिका, स्त्री, (भृङ्ग इव कालान्दीर्घ भृङ्गावी-मर्वेमद्वाः; इति ङीष् । ततः स्वार्थे कन् टाप् । अत इत्वञ्च । ईकारस्य ह्रस्वम् ।) घटोत्था । इति शब्दचन्द्रिका ।

भृङ्गप्रिया, स्त्री, (भृङ्गाणां प्रिया । भृङ्ग-प्रियत्वात् ।) माधवीलता । इति राज-निर्घण्टः ॥

भृङ्गमूलिका, स्त्री, (भृङ्गस्य भृङ्गराजस्येव मूलं यस्याः । कप् । अजादित्वात् टाप् । कापि अत इत्वञ्च ।) भ्रमरच्छल्ली । इति राज-निर्घण्टः ॥

* वैदूर्य्यप्रसूविशेषः । अथ क्वयोनाम । उदे ॥

भृङ्गरजः, पुं, (भृङ्गान् रञ्जयतीति अन्तर्भूतण्यर्थाद् रञ्जेरच् । पृषोदरादित्वात् न लोपः ।) भृङ्गराजः । इति भावप्रकाशः ॥ (यथा,—

"भृङ्गरजविषमोतृपतगाप्तरि-
श्चोद्भुरीयममितकारि ॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्राधिकारे ॥)

भृङ्गरजाः, [स्] पुं, (रञ्जयतीति । अन्तर्भूतण्यर्थात् रञ्जेः "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ इति असुन् । ततो "रजेश्च ।" ६।४।२६। इति नलोपः । ततो भृङ्गाणां रजाः रञ्जकः । अथवा भृङ्ग इव श्यामवर्णं रजः परागोऽस्य ।) भृङ्गराजः । इत्यमरटीकायां भरतः ।

भृङ्गराजः, पुं, (भृङ्ग इव राजते इति । भृङ्ग+राज्+अच् । यद्वा शरीरस्य भृङ्गवत् कृष्णवर्णीकारकत्वात्तथात्वम् ।) क्षुपविशेषः । केशुरिया इति वङ्गभाषा । भंगरिया इति हिन्दीभाषा । तत्पर्यायः । केशराजः २ भृङ्गः ३ पतङ्गः ४ मार्कवः ५ । इति रत्नमाला । भृङ्गाह्वः ६ केशरञ्जनः ७ पितृप्रियः ८ अङ्गारकः ९ केशः १० कुन्तलवर्द्धनः ११ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामशोथश्वित्रनाशित्वम् । तत्र नीलो रसायनः । इति राजनिर्घण्टः ॥ अपि च ।

"भृङ्गराजो भृङ्गरजः मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहृत् ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्ति-
जित् ॥"

इति भावप्रकाशः ॥

पक्षिविशेषः । (यथा, महाभारते ।३।१०८।७।

"प्रकुर्व्वत्सु विचित्राणि कूजद्भिर्विविधा गिरः ।
भृङ्गराजैस्तथा चर्व्वैदात्यूहैर्मदविह्वलैः ॥")

भ्रमरः । इति मेदिनी । जे, ६४ ॥ यन्त्रभेदः । इति धरणिः ॥

भृङ्गरिटिः, पुं, (भृङ्ग इव रटति इति । भृङ्ग+रट+इन् । पृषोदरादित्वात्साधुः ।) शिवद्वारपालः । इति भूरिप्रयोगः ॥

भृङ्गरीटः, पुं, (भृङ्गरिटि । पृषोदरात् ईत्वम् ।) शिवद्वारपालः । इति भूरिप्रयोगः ॥

भृङ्गरोलः, पुं, (भृङ्ग इव रौति । भृङ्ग+रु+बाहुलकात् ओलच् । अस्य भृङ्गतुल्यशब्दत्वात्तथात्वम् ।) कीटविशेषः । भीमरुल इति भाषा । तत्पर्यायः । वितस्तका २ वरोलः ३ क्षवट्पदः ४ । इति त्रिकाण्डशेषः ॥

भृङ्गवल्लभः, पुं, (भृङ्गाणां वल्लभः प्रियः ।) धाराकदम्बः । भूमिकदम्बः । इति राजनिर्घण्टः ॥

भृङ्गवल्लभा, स्त्री, (भृङ्गाणां वल्लभा ।) भूमिजम्बुः । इति राजनिर्घण्टः ॥

भृङ्गसोदरः, पुं, (भृङ्गाणां सोदरस्तुल्यः ।) केशराजः । इति त्रिकाण्डशेषः ॥

भृङ्गानन्दा, स्त्री, (भृङ्गाणामानन्दो यस्याः सप्तमी तत्पुरुषः । भृङ्गाणां आनन्दा आनन्दकरी वा ।) यूथिका । इति राजनिर्घण्टः ॥

भृङ्गाभीष्टः, पुं, (भृङ्गाणां अभीष्टः प्रियः । मधुबाहुल्यात् ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥ तद्युक्तफलयोः स्त्री ॥

भृङ्गारं, क्ली, (बिभर्त्ति धारयति पोषयति वेति । भृ+"शृङ्गारभृङ्गारौ ।" उणा० ३ । १२६ । इति आरन् निपातनात् नुम् गुक् च ।) लवङ्गम् । सुवर्णम् । इति राजनिर्घण्टः ॥

भृङ्गारः, पुं, (भृ+आरन् नुम् गुक् च । अथवा "भृङ्गं जलमियर्त्ति गच्छतीति ।" भृङ्ग+ऋ+कर्म्मण्यण् । इत्यमरटीकायां रघुनाथः ॥ स्वर्णघटितवारिपात्रम् । (यथा मार्कण्डेयपुराणे ।७२।०६।

"नाद्य पश्यामि ते स्वर्णं भृङ्गारमथवा पुनः ॥")

तत्पर्यायः । कनकालुका २ इत्यमरः ॥ गुडुकः ३ गडुकः ४ । इति शब्दरत्नावली । भृङ्गराजः । इति जटाधरः । अथ भृङ्गारोद्देशः ।

"राज्ञोऽभिषेकपात्रं यद्भृङ्गार इति तत्स्मृतम् ।
तदष्टधा तस्य मानमाहतिश्चापि चाष्टधा ॥
सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च ।
चान्दनं कौडमं शार्ङ्गमेतदष्टविधं मतम् ॥
भानुदिङ्नवषष्ठाष्टदशलोकशरोन्मिताः ।
अष्टावष्टौ समाख्याता आयामपरिणाहयोः ॥
द्विचतुर्ष्वष्टवेदाग्निशाखशाखाङ्गलिता ।
यथाक्रमं वसुदिङ्मादित्यादिरयां सुधाम् ॥
पद्मरागस्तथा वज्रं वैदूर्य्यमौक्तिकन्तथा ।
नीलं मारकतञ्चैव ह्रुता च सप्त कीर्त्तिताः ॥
भृङ्गारसप्तके स्थाप्या न भौमे मणिमर्पयेत् ।
ताम्रके अष्टाङ्गं वापि सर्व्वेष्वपुपयुज्यते ॥
चान्दनन्तु चितौघाणां सर्व्वद्यं सार्व्वयौगिकम् ।
शङ्खपद्मेन्दुकङ्कारं प्रथमं विन्यसेत् क्रमात् ॥
चतुर्व्विधानां भूपानां चान्यः सर्व्वेन शस्यते ।
श्वेतं रक्तं तथा पीतं श्यामं चन्दनमुच्यते ।
रत्नैश्च त्रिविधैः सेकश्चतुर्णां स्यात्क्रमेण तु ॥
मुक्ता वज्रञ्च नीलञ्च तथा लक्ष्मापराजिता ।
एतानि पुष्पाणि केषीषु चतुर्ज्जातिमहीभृताम् ॥
गोमेदं पद्मरागञ्च वैदूर्य्यं नीलमेव च ।
चत्वारो मणयो धेयाश्चतुर्णां सेचनाम्भसि ॥
इत्थं विधिज्ञ यः कुर्य्यात् नृपतिः सेकमात्मनः ।
स चिरायुर्भवेद्भोगी हतोऽप्यन्यथाचरन् ॥"

इति युक्तिकल्पतरौ भृङ्गारोद्देशः ॥

भृङ्गारिः, स्त्री, (भृङ्गं भृङ्गवद्वर्णमृच्छतीति । ऋ+इन् ।) केतकीपुष्पम् । इति राजनिर्घण्टः ॥

भृङ्गारिका, स्त्री, (भृङ्ग+ऋ+"कर्म्मण्यण्" ३ । २ । १ । इति अण् । भृङ्गारः ततः कन् । टाप् अत इत्वञ्च ।) झिल्लिका । यथा,—

"झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका च सा ।"

इति हेमचन्द्रः । ४ । ८२ ॥

भृङ्गारी, स्त्री, (भृङ्गमियर्त्ति स्वरेणानुकरोति "कर्म्मण्यण् ।" ३।२।१ । इति अण् । भृङ्गार- स्ततः गौरादित्वात् ङीप् । इत्त्वं लत्वे भृङ्गाली च ।) झिल्ली इत्यमरः । २ । ५ । २८ ॥

भृङ्गाह्वः, पुं, (भृङ्गमाह्वयते स्पर्द्धते इति । आ+ह्वे+कः ।) जीवकः । भृङ्गराजः । इति राजनिर्घण्टः ॥ (विवृतिरस्य जीवकभृङ्गराजशब्दयोर्ज्ञातव्या ॥

भृङ्गाह्वा, स्त्री, (भृङ्गमाह्वयते स्पर्द्धते । भृङ्ग+आ+ह्वे+कः स्त्रियां टाप् ।) भ्रमरच्छली । इति राजनिर्घण्टः ॥

भृङ्गिः, पुं, (बिभर्त्तीति । भृ+बाहुलकात् गिक् नुट् च ।) भृङ्गी । यथा,—

"प्राप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः ।"

इति वामनपुराणे ४५ अध्यायः ॥

भृङ्गिणी, स्त्री, (भृङ्गवत् वर्णो यस्या अस्तीति इनिः । ङीप् ।) वटवृक्षः । इति राजनिर्घण्टः ॥

भृङ्गी, स्त्री, (भृ+गक्+नुट्+गौरादित्वात् ङीष् ।) अतिविषा । इति राजनिर्घण्टः ॥

भृङ्गी, [न्] पुं, (भृङ्गः भृङ्गवद्वर्णोऽस्त्यस्येति । इनिः ।) वटवृक्षः । इति राजनिर्घण्टः ॥ शिवद्वारपालविशेषः । तत्पर्य्यायः । भृङ्गिरिटिः २ भृङ्गरीटः ३ प्रलः ४ नाडीदेहः ५ अस्थिविग्रहः ६ । इति त्रिकाण्डशेषः ॥ भृङ्गिरिटिः ७ । इति भूरिप्रयोगः ॥ तस्य जन्मकारणं यथा,—

ईश्वर उवाच ।

"रतिमात्रेण गौमायां मत्पुत्रः संभविष्यति ।
महामैथुनसंयोगात् स्कन्दपुत्री च पार्व्वती ॥
तस्मादस्य देवानां वधमाद्भवकस्तथा ।
अतो महामैथुनन्तु किन्त्विकं कथतामराः ! ॥
येन मे शुमहत्तेजो महामैथुनकारणम् ।
धार्य्यं तेनास्यं देवमानयन्त्वमराश्च तम् ॥
यो निंश्वयो निर्व्विकारो भूत्वा तेजो धरी-
ष्यति ।
तस्मै ददतु निःस्थाप्यस्य तेजः शरीरजम् ॥"

श्रीधौर्व्व उवाच ।

"एवमथवचः श्रुत्वा देवा महपुरोगमाः ।
हरतेजोधरायाथ नीतिचीर्णं प्रचुर्हिरा ॥
अथ नक्षत्रमामन्त्र तथाहूयाप्य पावकम् ।
ऊच्चा देवगणाः सर्व्वे शृणुतुरिदं वचः ॥"

और्व्व उवाच ।

"एव वैश्वानरः श्रीमान् भूरितेजोमयो वशी ।
महामैथुनयोगन्तु क्षयेण संयतौष्यति ॥
इत्युक्ता निरमाः सर्व्वे नीतिचीर्णं पुरःस्थितम् ।
तत्रो निर्द्दिश्यामासुः शम्भवे सर्व्वदैवते ॥
ततः पडङ्गं मंदेवो वाह्निते हृद्गमानने ।
उपतलं महाबाहुमहामैथुनकारणम् ॥
अवाङ्मुखतस्य मानस्य तेजसः शम्भुदर्भतः ।
अङ्गुष्ठमनिमस्यं निरिमस्य यथान्व च ॥
तयोः कारणयोः सदः समाप्तौ महराकरौ ।
एको भृङ्गवतः कृष्णो भिन्नाञ्जननिभोऽपरः ।
भृङ्गी तस्य तदा कृत्वा नाम भृङ्गीति चाकरोत् ।

महाकालेकलयेव महाकालेति चोच्यते ।
तनयौ लालयामास स्नेहतः प्रमथोत्तमैः ।
कपर्द्दिना चापि तथा प्रमथाद्यैरभिरक्षितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमापरिपालितौ ।
क्रमाद्वृद्धौ सदा तौ हरो द्वारि न्ययोजयत् ॥"
इति कालिकापुराणे ४५ अध्यायः ॥
अथ वानरमुखत्वकारणं तच्छापेन हरयोर्म-
र्त्त्यादिमनुष्यजन्मकारणञ्च यथा,—
"यदा वा वर्त्तते माता गौरी स्मरहरा-
जिनम् ।
तदा भृङ्गिमहाकालौ द्वाःस्थौ द्वारि प्रतिष्ठितौ ।
कर्म्मान्तराणि सा देवी सुरतभिन्नकञ्चुका ।
निःसृता रतिपर्य्यङ्कात्तालापा चलत्कामना ।
तौ निःसरन्तीं दयिता तथाभूतामविस्मिताम् ।
अयोग्यां वीक्षितुं चार्थेऽञ्जनवत्ते प्रियम् ॥
ददर्शतुर्महाभागौ वानिकद्वारमागतौ ।
भृङ्गी चापि महाकालः प्राप्तकालश्च कोपतः ॥
दृष्ट्वा तौ मातरं देवीं तदा भूतात्मसुतौ ।
विन्यास अम्मतु चौलं निःकन्यपतुरत्नम् ।
तौ पश्यन्तौ तदा देवी दधर्षे विस्मयतुष्टता ।
चुकोप च तदा तयोः वाक्यमेतदुवाच ह ॥
यस्मात्तात्तु मां कस्मात् पश्यन्तौ ग्रामगमनागताम् ।
भवन्तौ तनयौ मुग्धौ लोमर्ष्यासाविवर्जितौ ॥
तस्मात्ताभ्यामनर्थायौ भवन्तौ विस्मयवतौ ।
अनुमेनौ तनौ भूयात्तस्मीनेन मानुषे ॥
मानुषौ वीक्षमाणाद्य ममाशिषश्चवोचतः ।
भविष्यतो भवन्तौ तु शाखाश्वमहाशौ भुवि ॥
तौ शापदुःखौ तु तथा विमनस्कौ वराननौ ।
शापं तस्या न वेदाति प्रोचतुर्वेदसादिकाम् ॥
नियोजितौ यथा द्वारि महेश्वेन यथा वच ।
यथा नियोगं कुर्वन्तौ तिष्ठावो द्वारि संयतौ ।
अवाग्निःसरणं नेवानयेन न हि दुष्यते ॥
तयास्माकं प्रतीकारं मम मातरनिन्दिते ॥
एवं मानुषी निन्तौ भूयां वरौ भवतु मानवः ।
मानुष्ये वरजातौ जातान्तौ वरयित्वा ।
भविष्यामि मानुष्या भविष्याव भवोदरे ॥
अथ काले चलीते तु वर्मज्ञो धवभञ्जन ।
तद्वाणि कर्म्म मायेव मानुषौ च्यावतु भवम् ॥
इक्ष्वाकौ रविवंशाद्वंशाद्यौ वसुपतोऽभवत् ।
भवीशनिधानुषमा नाम तस्य पुत्रः पौष्योऽभवत् ।
पुष्यः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
तस्य पुत्रो पुत्रो भूमौ न भूतो न भविष्यति ॥
न पुनरीशो राजाभूत् पौष्यो धृतनिश्चयः ।
देवं वनाय संयाति भार्य्याभिः सह लालसम् ॥
पौष्यः परमया भक्त्या भवार्च्चं सर्व्वतोऽपचत् ।
तस्य राज्ञो भगवान् ब्रह्मा चोवाच प्रसन्नधीः ॥
ब्रह्मोवाच ।
भद्र पौष्य ! भवता भावी पुत्रवरः सुतोत्तमः ।
नरवे वै वर्द्धयिष्यामि सार्व्वभौमं धनाधर ॥
एवं वर्ष महाराज ! यथा पुत्रं सुतोत्तमम् ॥
अन्येऽवसदेव सुते काले प्राप्तेऽपि तस्य यदा ॥
कल्माषाद्यनिमादाय कस्यप्रवर्त्तकम् ।

आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संजायते भार्य्यः पवनेनतया भवान् ।
करिष्यति वरं राजन् ! भार्य्याभिस्सहितैः पुरा ।
इत्युक्ता प्रययौ ब्रह्मा राजापि सह भार्य्यया ।
वरं यदुं समारेभे भक्त्या परमया द्वतः ॥
स तु वर्षत्रयेऽतीते महादेवो वृषध्वजः ।
पौष्यस्य नृपतेः सम्यक् प्रसादार्थमिहागते ॥
ततः पुत्रार्थिनं भूपं पश्यतो वृषभध्वजः ।
प्रत्युवाचयन्तं स्थितं स्नेहेन तमुवाच ह ॥
ईश्वर उवाच ।
इदं फलं प्रदत्तं विभज्य नृपते ! प्रिया ।
भोक्ष्यन्त्यस्ताः सुभार्य्यास्ते प्रभवः सुतमाजवः ॥
एकस्या जठरे वीर्य्यं भार्य्यायास्ते भविष्यति ।
अपरस्याश्च पुत्रो मध्यमाशो भविष्यति ।
अथो मामात्तु यो भागः सोऽपरस्या भविष्यति
ततः स्वर्गभयं भूप ! यथाशास्त्रं पृथक् पृथक् ।
भोक्ष्यन्ति पत्न्यस्ते पुत्र एको भविष्यति ॥
ततः फले वरं दत्त्वा प्रविवेश वृषध्वजः ।
तत्पश्चात् तत् फलं भूपं विभागं चापदेव हि ।
ततः पश्चिमे काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल ! समाधाय्याधिताः
शुभाः ।
धन्यर्षी गर्भकाले तु गर्भिण्यः समजायत ॥
तस्माच्चं पृथक् राजा यथा भर्त्तेन भाषितम् ।
तथ राज्ञश्चं पौष्यो यथाशास्त्रं विधोक्ष्य च ॥
एवं निर्द्दं चकारासु तथ पुत्रो व्यजायत ।
तस्य वीर्य्यं तदा राजन् ! चन्द्रवेणुवका शुभा ।
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ।
चन्द्रशेखर इत्येवं ख्यात्या चन्द्रसमप्रभः ॥
एते तिष्ठुनामभावो गर्भे जातो यतो हरः ।
भवत्प्रसन्नमाभूत् प्रथितो देवजातयोः ॥"
इति कालिकापुराणे ४६ अध्यायः ॥
"अवतीर्णे महादेवे पौष्यजायाशु शेखरा ।
मानुषेण प्रसादेन तेन चन्द्रशेखरे ।
गिरिजापि कस्तूरजस्य राज्ञो भार्य्याश्वजायत ॥
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः ।
तस्य भार्य्या महामाया सर्व्वदैवत पूजिता ॥
सा मनोऽभिनिवेशा च भार्य्या पूजिता पतिव्रता ।
पुत्री च विदधे तत्राकारयं सा महात्मने ।
विभवे कालिके कृत्वा चण्डिकां समपूजयत् ॥
पूज्यमाना महादेवी चण्डिका राजभार्य्यया ।
माणिक्यापि वरं तस्यै कर्म्मे चापि विशेष च ।
सा मनोऽभिनिवेशी देवी सुवेष तनयां शुभाम् ।
तां दृष्ट्वा चारुसर्व्वाङ्गीं सरस्यामिव पद्मिनीं
शुभाम् ॥
ककुत्स्थो भार्य्यया साईमनन्तमुदितोऽभवत् ॥
देवेन चारुविहृत्य तस्या तारावतीति वै ।
नामाकरोत् पिता काले मनोज्ञे शुभलग्न ! ॥
तस्मात्तु पौष्ययोर्वीरं दृष्ट्वा राजा शनैः शनैः ।
ककुत्स्थः कारयामास चन्द्रेण सम्पदम् ॥
कथं वा पार्व्वती देवी सा च चन्द्रशेखरम् ॥
इति वदे महादेवी मानुषी योनिमाश्रिता ।

पार्व्वती च स्वयं जाता ककुत्स्थस्य विवेकिता ।
तथा भृङ्गी महाकाल एतयोरभवत् सुतः ।
तथा त्वं प्रश्न राजेन्द्र ! कथयामि यथातथम् ।
अयोनिजा स्वयं देवी विमला चन्द्रशेखरात् ।
आजन्मान् महा यज्वन् प्राप्ताते प्रतितं हर ॥
एकचित्तेन पश्यन्तौ तात्पुमायाः सहजौ सुतौ ।
सर्व्वसम्पत्प्रसूर्त्तां भाजकत्वेन भावेतान् ।
तां दृष्ट्वा महादेवी गौरी रममीश्वरः ।
एवं वै मानुषी भार्य्या: प्रिये ! तारावतीति वा ।
भृङ्गी महाकालयोस्ते जनने विहिता यदा ।
तयो शापभयात्सोऽहं भार्य्या बहुमिषेः
वदे ॥
सम्प्रति सम्प्राप्तो भृङ्गी भविष्य
भाविनि ! ॥
तव तपादयिष्यामि महाकालश्च वाङ्मम् ।
श्रीदेव्युवाच ।
ममैव मानुषो भर्त्तारयं ह्यमर्धतन ।
विधास्ति तेन पञ्चमाट्टतुमारम सुतस्वम् ।
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्मात्तु कामार्थं चतुर्भुजः ।
ततः पार्व्वत्याविहृता देवी तारावती सती ।
कामयानं महादेवं चन्द्रशेखररूपिणम् ।
कामासक्तानि तस्मात्तु महोत्सवं सुतद्वयम् ।
अभवन् नृपशार्दूल ! तथा शापावसानतः ।
तत्सुतयोर्नाम चक्रे नारदो भगवान् मुने ॥
ज्येष्ठो भैरवनामाभूद् भौरीः पुत्रो महेश्वरः ।
वेतालश्चापरः ख्यातो वेतालोऽभूत्सुपावरः ।
इति चक्रे तयोर्नाम देवर्षिः कलशः सुतः ।
आयोक्त सर्व्वज्ञः कारयामासरो तयोर्नामः ।
चकार क्रमशो बाल्यावस्थाशिक्षणोत्सवः ।"
इति कालिकापुराणे ५० । ५० । ५१ अध्यायैः
संकलितम् । तस्य भवनः प्रकारान्तरं यथा,
देव उवाच ।
प्रणते देवमीशानं त्वामहं पद्मभूरहम् ।
महादेवं महात्मानं विपक्ष भवतः शिवम् ।
अनेनमतौ देवश्रेष्ठोऽप्यविपतिभिः ।
प्राप्यापथदत्वाश्च बाणविद्याभवत्स्तव ।
अथो सुरोऽभिति वै राजन् ! कालेनापि हुतम् ॥
वह्निनाथ विदरणेन मनुष्यमीश्वरं वरिष्ठं ।
यजितां दर्शितं कार्य्यं मम मायोऽपरः पुरः ।
अथुरो जन्मतो नाम भविष्यति सुरान्तकः ।
विरक्तावसानं पत्त्य पाप्य तस्य शान्तिमिति ।
पूर्व्वजन्मनि पीठेव दैवतिष्टाष्टदेव च ॥
आभिवाशो जन्मनाशुभौभिव्यति वरा तदा ।
देवं मूर्त्तिं समा ते मारयिष्यामि कामिन्द्र ।
मयाधुना अपो भूतः सुमना मां नमन् पुरः ।
माम् प्रकामस्तां भार्य्या महेश्वरि ब्रह्मन् ।
मनुष्यकाले विष्णु स्वं तावत् विहितं भविष्यति ॥"
ततः वाणासुरे कन्यकात्स्याप्यन्तरं महा-
देवाच्छन् यथा,—
"विष्णोऽपि दानवस्थे ! परिपुष्टोऽपि देवाय ! ।
इदं वरद महं वै यतिष्यति विभाविष्यम् ।

अन्धक उवाच ।
अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥
चराचरोऽपि यदीशान ! तद्यातु विलयं मम ।
शारीरं मानसं वाग्जं दुष्कृतं दुर्विचिन्तितम् ।
तथा मे दानवो भावो व्यपयातु महेश्वर ! ।
स्थिरा त्वाजन भक्तिस्तु वरमेतं प्रयच्छ मे ॥
महेश्वर उवाच ।
एवं भवतु दैत्येन्द्र ! पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भृङ्गी गणपतिर्भव ॥
इत्येवमुक्त्वा वरदः शूलाग्रादवतार्य्य तम् ।
निर्माज्य निजहस्तेन चक्रे निर्व्रणमन्धकम् ॥
ततः स्वदेहतो देवान् ब्रह्मादीनाजुहाव च ।
ते निश्चेरुर्महात्मानो नमस्यन्तस्त्रिलोचनम् ॥
गणांश्च नन्दी चाहूय सन्निवेश्य तदग्रतः ।
भृङ्गिणं दर्शयामास वृषभेशोऽन्धकेति च ॥
ते दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम् ।
गणाधिपत्यमापन्नं प्रशशंसुर्वृषध्वजम् ॥"

इति वामनपुराणे ।४४।४५।४७ अध्यायेभ्यः सङ्कलितम् ॥

भृङ्गीफलः, पुं, (भृङ्गाः अलिविशेषाः फलमिव फलं यस्य ।) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥

भृङ्गीशः, पुं, (भृङ्गिणो भृङ्गिणः ईशः ।) महादेवः । इति शब्दरत्नावली ॥

भृङ्गेरिटिः, पुं, (भृङ्गे भृङ्गविषये रिटति । अभिलपतीति । भृङ्गे + रिट् कर्त्तरि इः । अलुक् समासः ।) भृङ्गी । इति त्रिकाण्डशेषः ॥

भृङ्गेष्टा, स्त्री, (भृङ्गाणामिष्टा ।) घृतकुमारी । भार्ङ्गी । तरुणी । काकजम्बूः । इति राजनिर्घण्टः ॥

भृज ई ङ भर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) भर्ज्जनं पाकविशेषः । ई भृक्तः । ङ भर्ज्जते तण्डुलान् जनः । इति दुर्गादासः ॥

भृज्जनः, पुं, (भृज्यन्ते तण्डुलादयोऽस्मिन्निति । भ्रस्ज् + "भूसूधूभ्रस्जिभ्यश्छन्दसि ।" उणा० २ । ८० । इति क्युन् ।) अम्बरीषः । इति उणादिकोषः । भाजना खोला इति भाषा ॥

भृतः, त्रि, भरणीयः । इत्यादिकवाच्यम् । पुष्टः । इति भृधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

भृतकः, पुं, (भ्रियते इति । भृ + कर्म्मणि क्तः । ततः स्वार्थे कन् । यद्वा, भृतेन वेतनेन उपजीवतीति कन् ।) वेतनोपजीविकर्म्मकर्त्ता । तत्पर्य्यायः । भृतिभुक् २ कर्म्मकरः ३ वैतनिकः ४ । इत्यमरः । २ । १० । १५ ॥ (यथा, मनौ । ३ । १५६ ।
"भृतकाध्यापको यश्च भृतकाध्यापितस्तथा ।")

भृतिः, स्त्री, (भ्रियते अनयेति । भृ + क्तिन् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ मूल्यम् । भरणम् । इति मेदिनी । ते, ३२ ॥ अतिरिक्तं ज्ञातकर्म्मणि दत्तम् । तत्तु अप्रतिपरत्वान्नेतरतोविधेः । यथा नारदेन च । दत्तं चतुर्विधं प्रोक्तमदत्तं षोडशात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम् ।
"पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥"
इति मिताक्षरा ॥

भृतिभुक्, [ज्] पुं, (भृत्या भुङ्क्ते उपजीवतीत्यर्थः । भुज् + कर्त्तरि क्विप् ।) भृतकः । इत्यमरः । २ । १० । १५ ॥

भृत्यः, पुं, (भ्रियते इति । भृ + "भृञोऽसंज्ञायाम् ।" ३ । १ । ११२ । इति क्यप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) दासः । इत्यमरः । २ । १० । १७ ॥ (अथास्य पर्य्यायान्तरम् ।
"परिकर्म्मा परिचरः सहायः परिचारकः ।
प्रेष्यो भृत्य उपस्थाता सेवकोऽभिसरोऽनुगः ॥"
इति वैद्यकरत्नमालायाम् ॥)
तस्य लक्षणं यथा,—
सूत उवाच ।
"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्म्मसु ॥
भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तमिमं संप्रवक्ष्यामि यद्यदा कथितानि च ॥
यथा चतुर्भिः कनकं परीक्ष्यते
तुलाघर्षच्छेदनतापनेन ।
तथा चतुर्भिर्भृतकः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्म्मणा ॥"
कुलशीलगुणोपेतः सत्यधर्म्मपरायणः ।
रूपेण सुप्रसन्नश्च राज्याध्यक्षो विधीयते ॥
मूल्यरूपपरीक्षाज्ञो भवेद्रत्नपरीक्षकः ।
बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी प्रमाथी च प्रतीहारः स उच्यते ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रसमालोकी ह्येष साधुः स लेखकः ॥
बुद्धिमान् मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च एष दूतो विधीयते ॥
समस्तशास्त्रशास्त्रज्ञः पण्डितोऽथ जितेन्द्रियः ।
शौर्य्यवीर्य्यगुणोपेतो धर्म्माध्यक्षो विधीयते ॥
पितृपैतामहो दक्षः शास्त्रज्ञः सत्यवाचकः ।
शौचयुक्तः सदाचारी सूपकारः स उच्यते ॥
आयुर्वेदकृताभ्यासः सर्व्वज्ञः प्रियदर्शनः ।
आर्य्यशीलगुणोपेतो वैद्य एव विधीयते ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादपरो नित्यमेष राजपुरोहितः ॥
इति गारुडे ११२ अध्यायः ॥

भृत्या, स्त्री, (भ्रियतेऽनया भरणमिति वा । भृ + "संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ।" ३ । ३ । ९९ । इति क्यप् । स्त्रियां टाप् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ (भरणक्रिया । यथा, ऋग्वेदे । १ । ८४ । १६ ।
"आसन्निषून् हृत्स्वसो मयोभून्
य एषां भृत्यामृणधत् स जीवात् ॥")

भृमिः, पुं, (भ्रमति भ्राम्यति वेति । भ्रम् + "भ्रमेः संप्रसारणञ्च ।" उणा० ४ । १२० । इति इन् क्रित् संप्रसारणञ्च ।) वायुविशेषः । घूरणी बातास इति भाषा । जलादिभ्रमणम् । इत्युणादिकोषः ॥ (त्रि, कर्म्मनिर्व्वाहकः । यथा, ऋग्वेदे । १ । ३१ । १६ ।
"आपिः पिता प्रमतिः सोम्यानां
भृमिरस्यृषिकृन्मर्त्त्यानाम् ॥"
"भृमिर्भ्रामकः कर्म्मनिर्व्वाहक इत्यर्थः ।" इति तद्भाष्ये सायनः ॥ भ्रमणशीलः । यथा, ऋग्वेदे । ३ । ६२ । १ ।
"इमा उ वां भृमयो मन्यमाना
युवावते न तुज्या अभूवन् ॥"
"भृमयः भ्रमणशीलाः ।" इति तद्भाष्ये सायनः ॥ वीणाविशेषे स्त्री । यथा, ऋग्वेदे । २ । ३४ । १ ।
"अग्नयो न शुशुचाना ऋजीषिणो भृमिं
धमन्तो अप गा अवृण्वत ॥"
"यद्वा, भृम्याख्यो वीणाविशेषस्तं धमन्तो वादयन्तः ।" इति तद्भाष्ये सायनः ॥)

भृश, इर् श उ अधःपतने । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) इर् अभृशत् अभर्शीत् । पुषादित्वान्नित्य ङ इत्यन्ये । श भृश्यति भ्रश्यदरिपताकिनीति हलायुधः ॥ उ भर्शित्वा भृष्ट्वा । इति दुर्गादासः ॥

भृशं, क्ली, (भृशति प्राचुर्य्येण वर्त्तते इति भृश + कः ।) अतिशयः । तद्वति, त्रि । इत्यमरः । १ । ७० ॥ (यथा, भारवौ । ११ । ४६ ।
"भृशमाराधने यत्तः स्वाराध्यस्य महात्मतः ।")

भृशम्, अ, (भृश + कः ।) प्रकर्षार्थः । सङ्करार्थः । शोभनम् । इति शब्दरत्नावली ॥

भृषत्, [द्] पुं, पाषाणः । इति शब्दरत्नावली ॥

भृष्टः, त्रि, (भ्रस्ज + कर्म्मणि क्तः ।) जलोपसेकं विना पक्वः । इति हेमचन्द्रः ॥ भाजा इति भाषा ॥

भृष्टतण्डुलः, पुं, (भृष्टश्चासौ तण्डुलश्चेति कर्म्मधारयः ।) भर्ज्जनविशिष्टधान्यनिकरः । चाल भाजा इति भाषा । अस्य गुणाः ।
"ग्रहणिः कफहा रूक्षः पित्तघ्नो भृष्टतण्डुलः ।"
इति राजवल्लभः ॥

भृष्टयवः, पुं, (भृष्टश्चासौ यवश्चेति ।) भर्ज्जनविशिष्टयवः । यव भाजा इति भाषा । तत्पर्य्यायः । धानाः २ । इत्यमरः ॥ लाजकम् ३ । इति शब्दचन्द्रिका ॥ अस्य गुणा धानाशब्दे द्रष्टव्याः ॥

भृष्टान्नं, क्ली, (भृष्टं अन्नम् ।) भृष्टतण्डुलः । मुडि इति भाषा । तत्पर्य्यायः । कुडरम् २ चाणम् ३ । इति शब्दचन्द्रिका ॥

भृष्टिः, स्त्री, (भ्रस्ज + भावे क्तिन् ।) भर्ज्जनम् । शून्यवाटिका । इति मेदिनी । टे, ९९ ॥

भृ शि भृतौ । भृति । भर्त्ते । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) शि भृणाति भूर्त्तः । भूर्त्तिः । भृति भर्त्सने । इति दुर्गादासः ॥

भेकः, पुं, (बिभेति इति। भी + "इण्भीकापाशल्यतिमर्चिभ्यः कन्।" उणा० ३। ४३। इति कन्।) मण्डूकः। व्याङ् इति भाषा। तत्पर्य्यायः। मण्डूकः २ वर्षाभूः ३ शालूरः ४ प्लवः ५ दर्दुरः ६। इत्यमरः।१।१०।२४॥ हरिभूः ७ शालूरः ८ इति जटाधरः। प्लवङ्गमः ९ अजः १० प्लवगः ११ प्लवः १२ मण्डूकः १३ महूरवीरः १४ वर्षकः १५ जिह्वामोचनः १६। इति शब्दरत्नावली। मण्डूकः १७ व्यालपथः १८ रेकः १९। इति त्रिकाण्डशेषः। मण्डूकः २० हरिः २१ लुलुकः २२। क्वचित् पुस्तके लूलकोऽपि पाठः। शालूकः २३ कटुरवः २४। अस्य मांसगुणाः। बलोपकारकत्वम्। श्लेष्मदाहकपित्तकफकृत्त्वं बलाप्रदत्वञ्च। इति राजनिर्घण्टः॥ मेघः। इति मेदिनी। के, १०॥ (यथा, आर्य्यासप्तशत्याम्। ४११।
"संवृत्तोऽसौ गृहदीर्घिकायां भेकमपि।")

भेकटः, पुं, (भेक इव टकति। भेक + टक + कः।) मत्स्यभेदः। यथा। शुक्लौ भेकटवेकटौ। इति त्रिकाण्डशेषः॥

भेकभिः, पुं, मत्स्यविशेषः। भाङ्गन इति भाषा। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। रुच्यत्वम्। 'वृष्यत्वम्।' गुरुत्वञ्च। इति राजवल्लभः। भेकभित्। इति च पाठः॥

भेकपर्णी, स्त्री, (भेकस्येव पर्णमस्याः। ङीष्।) मण्डूकपर्णी। इति वैद्यक्। (यथा,—
"तद्वर्णं कन्दकाद्यैर्वा वैद्यराजवरेणचा।
भेकपर्ण्यादिभिर्वै हृस्वामलकी हिताम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वरचिकित्सायाम्॥)

भेकराज् [ज्] पुं, (भेकं राजते इति। राज् + क्विप्।) मार्कवः। इति त्रिकाण्डशेषः॥

भेकी, स्त्री, (भेक + "जातेरस्त्रीविषयादयोपधात्।" ४।१।६३। इति ङीष्।) भेकस्त्री। तत्पर्य्यायः। शिखी २ मण्डूकी ३ वर्षाभ्वी ४ इत्यमरः।१।१०।२४॥ अत्रोपदीयमानविमर्शोऽप्य स्त्रीवाचकाः। मण्डूकपर्ण्यर्थाः। इति रमानाथः॥ (पर्य्यायोऽस्याः, मण्डूकपर्णी।
"भेकी मण्डूकपर्णी च मण्डूकी भवनन्दाऽपि॥"
इति रत्नमालायाम्॥)

भेडः, पुं, (भी + बाहुलकात् डः। यद्वा भेक इव हर्षं च।) मेषः। इति हेमचन्द्रः।४।३४२॥ अस्य भाषा भेड़ा॥

भेडी, स्त्री, (भेड + ङीष्।) मेषभार्य्या। यथा। भेड्या दुग्धगुणाः।
"आविकं लवणं स्वादु स्निग्धोष्णञ्चाश्मरीहरम्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्॥
गुरुकासेऽनिलोद्भूते केवले चानिले वरम्॥"
इति भावप्रकाशः॥

भेत्तृ [ऋ] त्रि, (भिनत्तीति। भिद् + तृच्।) भेदकर्त्ता। यथा, रघुवंशे।
"कुलाचलानामिव भेत्तृभिर्वृत्तः॥"

भेदः, पुं, (भिद् + घञ्।) शत्रुपक्षीयकरणोपायचतुष्टयान्तर्गततृतीयोपायः। तत्पर्य्यायः। उपजापः २। इत्यमरः।२।८।२१॥ परतो विच्छेद्य आत्मसात् करणं भेदः। इति भरतः॥ तद्विधिर्यथा,—

मत्स्य उवाच।

"परस्परन्तु ये दुष्टाः क्रुद्धा भीतावमानिताः।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः॥
ये तु येनैव दोषेण परस्मादपि बिभ्यति।
ते तु तद्दोषपातेन भेदनीया भृशं ततः॥
आत्मीयां दर्शयेदाशां परस्माद्दर्शयेद्भयम्।
एवं हि दर्शयेद्भिन्नान् यथावद्वशमानयेत्॥
संहता हि विना भेदं शक्रेणापि सुदुःसहाः।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः॥
स्वमुखेनाश्रयेद्भेदं भेदं परमुखेन च।
परीक्ष्य साधु मन्येत भेदं परमुखाच्छ्रुतम्॥
सद्यः स्वकार्य्यमुद्दिश्य कुशलैर्ये हि भेदिताः।
भेदितास्ते विनिर्दिष्टा नैव राजार्थवादिभिः॥
अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम्।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम्॥
सामन्तकोपो बाह्यस्तु कोपः प्रोक्तो महीक्षितः।
महिषीयुवराजाभ्यां तथा सेनापतेश्च यः॥
अमात्यमन्त्रिणाञ्चैव राजपुत्रात्तथैव च।
अन्तःकोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम्॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः।
शुद्धान्तस्तु महाप्राज्ञ! शीघ्रमेव जयी भवेत्॥
अपि शक्रसमो राजा अन्तःकोपेन नश्यति।
सोऽन्तःकोपः प्रयत्नेन तस्माद्रक्ष्यो महीक्षिता॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा।
ज्ञातीनां भेदनं कार्य्यं परेषां विजिगीषुणा॥
रक्ष्यश्चैव प्रयत्नेन ज्ञातिभेदस्तथात्मनः।
ज्ञातयः परितप्यन्ते सततं परितापिनः॥
तथापि तेषां कर्त्तव्यं सुगम्भीरेण चेतसा।
ग्रहणं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः॥
न ज्ञातिरनुग्रह्णाति न ज्ञातिर्विश्वसित्यपि।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः॥
भिन्ना हि शक्या रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुमाजौ।
सुसंहतानां हि ततस्तु भेदः
कार्य्यो रिपूणां नयशास्त्रविद्भिः॥"

इति मात्स्ये राजधर्म्मे २२४ अध्यायः॥ भेदः। विदारः। विदारणम्। इति मेदिनी। दे, ४॥ (यथा च कामन्दकीये। १९।१४।
"दूरस्य प्रयाच्य मत्वा कमल-
वाराभिमानाम्बहरौ चकार।
दुर्गः प्रमर्दनविदारणेन
प्राप्नोति तीव्रं कृत् पार्थिभेदम्॥")
विशेषः। यथा, भाषापरिच्छेदे।
"भावे तु लघुव्यावर्त्तने भेदबोधितोऽपि कण्डौ बोधितौ
वदन्त्यर्थाः सिद्धिभेदस्य वाचिकाः
कल्प्याः॥"

भेदकः, त्रि, (भिद् + ण्वुल्।) विदारकः। यथा, माघे। ९।८५॥)
("संक्रमप्रसमरीणां प्रतिमासान्य भेदकः।
प्रतिकूलमेव तत् कर्म्म भवेद्धाम्नां तथा च॥")
विशेषकोऽपि। (विशेषकोऽर्थे विषयो यथा,
"कवचत्वे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या योगे ह्येतत्समं मतम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे विषाधिकारे॥)
पृथक्कारकः। यथा। "भेदयति अवयवान् पृथक् करोतीति भेदकं काला भिन्नः स एव चार्म्मः।" इति कारकटीकायां दुर्गादासः॥ अपि च।
"भिन्नभेदकयोः स्त्रित्वं सम्बन्धोऽन्योन्यमिष्यते।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्॥"
इति कलापटीकायां भर्तृहरिकारिका॥
("धातोनामेव भेदको विविधः प्रकारः।" इति च ४।३।६९। इत्यत्र काशिकायाम्॥)

भेदनं, क्ली, (भिद्यतेऽनेनेति। भिद् + ल्युट्।) हिङ्गु। इति राजनिर्घण्टः॥ विदारणम्। इति भिद्धातोर्भावे ल्युट्प्रत्ययेन निष्पन्नम्॥ (भेदकारके, त्रि। यथा, भागवते।६।१२।२।
"वज्रस्तम्भे तत् त्वरितमपि भिनत्तु।
अष्टाङ्गसंस्कृतं तत् ते स्वयमपि भिनत्तु॥"
विरेचनकारके च। यथा च सुश्रुते।१।४५॥
"कर्म्म मिलत्कं महाशर्म्म शीतलश्लेष्मलम्।
भेदनं कफवातघ्नं गुरुं वक्ति विरोचनम्॥")

भेदरः, पुं, ("भिनत्तीति।" भिद् + कुरच्।) वज्रवेतसः॥ (भिनत्ति भूमिमिति। कुः।) शूकरः। इति राजनिर्घण्टः॥

भेदितः, त्रि, (भिद् + णिच् + कर्म्मणि क्तः।) भिन्नः। दारितः। इत्यमरः।३।१।१०४॥

भेदी, [न्] पुं, (भिनत्ति मलमिति। भिद् + णिनिः।) अम्लवेतसः। इति राजनिर्घण्टः॥ (गुणादयोऽस्यामम्लवेतसशब्दे विज्ञेयाः॥)
भेदकेऽपि विदारके च त्रि॥ (यथा भागवते। ३।१९।२३।
"भुजभारितं शूकररूपिणं मर्द्दकीलिनम्॥")

भेदुरं, क्ली, (भिदुर + पृषोदरादित्वात् साधुः।) भिदुरम्। वज्रम्। इति त्रिकाण्डशेषः॥

भेरः, पुं, (बिभेत्यस्मादिति। भी + बाहुलकात् रन्। इति रः।) पटहः। भेरी। दुन्दुभिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भेरिः, स्त्री, (बिभेति अस्याः शब्दात् इति। भी + "भीवृधाद्येश्च।" उणा० ४।५०। इति क्रिः। बाहुलकात् गुणः।) ढक्कापटहः। तत्पर्य्यायः। आनकः २ दुन्दुभिः ३। इत्यमरः।१।७।६॥ भेरी ४ आनकदुन्दुभिः ५ आनकदुन्दुभी ६। इति जटाधरः॥ (यथा, "ततो भेरीमृदङ्गाश्च पणवानकगोमुखाः। सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥" इति भगवद्गीतायाम्॥)

भेरी, स्त्री, (बिभ्यति यस्या इति । भी + क्रिन् । कृदिकारादिति पक्षे ङीप् ।) भेरी । इत्यमरटीकायां भरतः ॥

वराह उवाच ।

"भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरो जायते भूमे ! जन्मैकन्तु न संशयः ॥
तस्य वक्ष्यामि सुश्रोणि ! प्रायश्चित्तं मम प्रियम् ।
किल्बिषाद्येन मुच्येत भेरीताडनमोहितः ॥
यस्तु कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशीम् ।
आकाशशयनं कृत्वा शीघ्रं मुच्येत किल्बिषात् ॥
स एतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
अपराधं न गच्छेत मम लोकाय गच्छति ॥"

इति वराहपुराणे भेरीताडनापराधप्रायश्चित्तम् ॥ (यथा च, सुश्रुते । २ । १०६ । ६ ।

"एतेन भेर्य्यः पटहाश्च दिग्धा
नादप्रमाणा विषमाशु हन्युः ॥")

भेरुण्डं, क्ली, गर्भधारणम् । भयानके, त्रि । इति शब्दरत्नावली ॥

भेरुण्डा, स्त्री, (भेरुण्ड + टाप् ।) देवताविशेषः । पक्षिभेदः । इति मेदिनी । डे, १४ ॥ या देवता काली । यथा,—

"त्रिकोणनिलया नित्या परमामृतरञ्जिता ।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥"

इति कालीकुलसर्व्वस्वे श्रीशिवपरशुरामसंवादे काल्यायाः शतनामस्तोत्रम् ॥

भेलं, त्रि, (भी + "भ्रस्विमृभावचरेति ।" उणा० १ । २८ । इति रन् रस्य लत्वम् ।) भीरुः । मूर्खः । इति मेदिनी । ले, ४३ ॥ चञ्चलः । इति शब्दरत्नावली ॥

भेलः, पुं, (भी + रन् लत्वम् ।) प्लवः । मुनिविशेषः । इति मेदिनी । ले, ४१ ॥ भेलकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

भेलकः, पुं, क्ली, (भेल + स्वार्थे कन् ।) नद्यादितरणसाधनवस्तु । भेला इति भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ उडुपम् ४ उडुपम् ५ तरणः ६ तारकः ७ तारकः ८ । इति शब्दरत्नावली ॥ तरोषः ९ । इति जटाधरः ॥

भेष, ऋ ञ भये । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ अबिभेषत् । ञ भेषति भेषते बिभेष । इति दुर्गादासः ॥

भेषजं, क्ली, (भिषजो वैद्यस्येदमित्यण् निपातनादेत्वम् । यद्वा, भेषं रोगं जयतीति । जि + डः । औषधम् । इत्यमरः । २ । ६ । ५० ॥ ("अस्ति भेषजोत्कामः ।" इति चरकसंहिता । १ । ११ । ७ ।) अथ भेषजसेवनसमयाः ।

"भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः ।
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः ॥
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम् ।
किञ्चित् सूर्य्योदये जाते तथा दिवसभोजने ।
सायन्तने भोजने च मुहुश्चापि तथा निशि ॥"

तत्र प्रथमः कालः ।

'प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः ।
लेखनार्थे च भैषज्यं प्रभाते नान्नमाहरेत् ॥'

अथ द्वितीयः कालः ।

'भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते ।
अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् ॥
समानवाते विगुणे मन्देऽग्नौ वह्निदीपनम् ।
दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ॥
व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत् ।
हिक्काक्षेपककम्पेषु पूर्व्वमन्ते च भोजनात् ॥'

अथ तृतीयः कालः ।

'उदाने कुपिते वाते स्वरभङ्गादिकारिणि ।
ग्रासग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने ॥
प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते प्रदीयते ।
औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः ॥'

अथ चतुर्थः कालः ।

'मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च ।
सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः ॥'

अथ पञ्चमः कालः ।

'ऊर्द्ध्वजत्रुविकारेषु लेखने बृंहणे तथा ।
पाचने शमने देयमनन्नं भेषजं निशि ॥'

इति पञ्चमः कालः ॥

निरन्नस्य भेषजस्य गुणमाह ।

'वीर्य्याधिकं भवति भेषजमन्नहीनं
हन्यात्तदामयमसंशयमाशु चैव ।
तद्बालवृद्धयुवतीमृदवश्च पीत्वा
ग्लानिं परां नयति चाशु बलक्षयञ्च ॥'

सान्नस्य भेषजस्य गुणमाह ।

'शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं न च मुहुर्वदनान्निरेति ।
एतद्धितं स्थविरबालकयोषिताञ्च
प्राग्भोजनाद्यदशितं किल तच्च सद्यः ॥'

सद्य आमाशयगतं भेषजमिति शिवः ।

'औषधशेषे सुप्तं भोजनशेषे यदौषधं पीतम् ।
न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च ॥'

पीतमित्युपलक्षणम् । लीढादि च ।

'अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णा सुमनस्कता ।
लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः ॥
क्लमो दाहोऽङ्गसदनं भ्रमो मूर्च्छा शिरोरुजः ।
अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥'

अथ भेषजभक्षणविधिमाह चरकः ।

'देवान् गुरून् द्विजान् वैद्यान् पूजयित्वा प्रणम्य च ।
आशिषश्च समादाय श्रद्धया भेषजं भजेत् ॥
रसायनमिवर्षीणां देवानाममृतं यथा ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
ऋषयः ओषधिग्रामा भूतसङ्घाश्च पान्तु ते ॥'

रक्षाप्रियः ॥

'औषधं शीघ्रमत्यन्तमदूष्यमपरीक्षितम् ।
पिबेदाज्ञमनत्याप्ते प्रयतश्च भेषजः ॥
प्रमाणसूपरिज्ञाय पीतं पाकमपोहजम् ।
निःशेषाचास्य सलिलं ताम्बूलादुपयोजयेत् ॥'

अथ भेषजानां विधानानि ।

'स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥'

तत्रादौ स्वरसविधिः ।

'आहतात्तत्क्षणाकृष्टात् द्रव्यात् क्षुण्णात् समुद्धृते ।
वस्त्रनिष्पीडितो यश्च स्वरसो रस उच्यते ॥'

अथ कल्कविधिः ।

'द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।
प्रक्षिप्य गालयेद्वस्त्रे तन्मानं कर्षसम्मितम् ॥
कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ।
सितां गुडं समं दद्याद्द्रवा देयाश्चतुर्गुणाः ॥'

अथ क्वाथविधिः ।

'पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम् ॥
कर्षादौ तु पलं यावद्दद्यात् षोडशिकं जलम् ॥'

षोडशिकं षोडशगुणम् ॥ * ॥

अथ हिमविधिः ।

'क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशोषितं हिमः स स्यात्तथा शीतकषायकः ॥'

अथ फाण्टविधिः ।

'क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत् ।
मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत् पटात् ॥
स स्यात् चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम् ।
चीनं सिता गुडादींस्तु कर्षमात्रान् विनिः-क्षिपेत् ॥' * ॥

अथ तण्डुलजलविधिः ।

'कण्डितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत् ।
भावयित्वा जलं ग्राह्यं देयं सर्व्वत्र कर्म्मसु ॥'

अथ मन्थविधिः ।

'जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ।
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् ॥'

अथ चूर्णविधिः ।

'अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् ।
तत् स्याच्चूर्णं रजःक्षोदस्तन्मात्रा कर्षसम्मिता ॥
चूर्णे गुडः समो देयः शर्करा द्विगुणा मता ।
चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत् ॥'

अथ भावनाविधिः ।

'द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत् ।
भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः ॥'

अथ पुटपाकविधिः ।

'पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य मात्रेयं लेपस्याङ्गारवर्णता ।
लेपञ्च द्व्यङ्गुलं स्थूलं कुर्य्यादङ्गुष्ठमात्रकम् ॥
काश्मरीवटजम्ब्वादिपत्रैर्व्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥'

अथोष्णोदकविधिः ।

'अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।

अथवा स्वरसेनैव विदध्यादवलेहकम् ।'
अथ क्षीरपाकविधिः ।
'क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं शूलमामोद्भवं हरेत् ।'
अथावलेहविधिः ।
'क्वाथादीनां पुनः पाकाद् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहश्च तन्मात्रा स्यात् पलो-
न्मिता ।'
अथ वटिकाविधिः ।
'वटिका अथ कथ्यन्ते तन्नामगुटिका वटी ।
मोदको गुटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ।
लेहवत् साध्यते वह्नौ गुडो वा शर्करापि वा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ।'
अथ सन्धानविधिः ।
'द्रवेषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचितम् ।'
अथ धातूनां शोधनमारणविधिः । तत्र शोधनविधिः ।
'स्वर्णादीनि समानि हेम्नो दलो प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ।
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ।'॥
अथ स्वर्णस्य मारणविधिः ।
'स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्द्दयेत् ।
तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ।
गोलकञ्च ततो रुद्ध्वा शरावदृढसम्पुटे ।
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ।'
अथ स्नेहपानविधिः ।
स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा ।
मज्जा च तं पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ ।
अथ पञ्चकर्माणि ।
प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्माणि निरूहो नावनं तथा ।
अथ वमनविधिः ।
[illegible] शुद्धे [illegible] वमनं [illegible] ।
[illegible] [illegible] वा [illegible] ।
अथ [illegible]विधिः ।
[illegible] ।
[illegible] ।
अथ धूमपानविधिः ।
धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा ।
रेचनः कासहा चैव वामनो व्रणधूपनः ।
अथ गण्डूषकवलप्रतिसारणविधिः ।
तत्र गण्डूषः ।
[illegible] ।
[illegible] ।
अथ कवलः ।
[illegible] ।
[illegible] ।
अथ प्रतिसारणम् ।
[illegible] ।

स्नेहैर्देयमनुत्था तदुक्तं प्रतिमर्शकम् ।
अथ स्वेदविधिः ।
स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ।
उपनाहो द्रवः स्वेदः सर्वे वातार्त्तिहारिणः ।
अथ कर्णपूरणविधिः ।
स्वेदयेत् कर्णदेशन्तु किञ्चित् पार्श्वशायिनः ।
ततः स्वेदे रसैः सक्तैः क्षौद्रैः कोष्णं प्रपूरयेत् ।
कर्णञ्च पूरितं रक्षेच्छतं पञ्चशतानि वा ।
सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे ।
रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥०॥
अथाश्च्योतनविधिः ।
अथाश्च्योतस्य मात्रादि [illegible] ।
दोषघ्नो विन्दवः [illegible] ।
न रात्रौ [illegible] कुर्यात् उष्णमात्रं न धारयेत् ।
अथ शोणितस्रावणविधिः ।
शोणितं स्रावयेज्जन्तोरामयं प्रसमीक्ष्य च ।
प्रस्थं प्रस्थार्द्धमथवा प्रस्थार्द्धार्द्धमथापि वा ।
शरत्काले स्वभावेन शोणितं स्रावयेन्नरः ।
[illegible] न तु रुधिरमोक्षणात् ।
अथाश्च्योतनविधिः ।
[illegible] बिन्दूनां यत्तु पातनम् ।
[illegible] नेत्रे [illegible] ।
अथ बिडालकविधिः ।
बिडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जिते ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ।
अथ तर्पणविधिः ।
वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ।
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोषयोः ।
पूरयेद्घृतमण्डेन विलीनेन सुखोदकैः ।
अथाञ्जनविधिः ।
"अथ सञ्जातदोषस्य प्राप्तमञ्जनमाचरेत् ।
अञ्जनं क्रियते नेत्रे तद्दृगञ्जनमुच्यते ।
अथ प्रत्यञ्जनविधिः ।
[illegible] ।
[illegible] ।
इति भावप्रकाशः ॥०॥
अथ भेषजग्रहणप्रकरणम् । तत्र [illegible] [illegible] । [illegible] [illegible] । [illegible] ।
"[illegible] ।
[illegible] ।"
इति ज्योतिषम् ॥
([illegible] । [illegible] [illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] ।
इति चरके विमानस्थाने अष्टमेऽध्याये ॥)
भेषजाङ्गं, क्ली, (भेषजस्य औषधस्य अङ्गमुपकरणम् ।) अनुपानम् । इति हेमचन्द्रः ॥
भैक्षं, क्ली, (भिक्षाणां समूह इति । भिक्षा + "भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) भिक्षासमूहः । इत्यमरः । २ । ७ । ४६ ॥
अपि च ।
"भिक्षाद्येषमसद्भ्योऽमात् प्राश्नीयाच्च विमोचितम् ।
अथवाविस्तु तत्रैवं भैक्षं मनुरब्रवीत् ।"
इति प्रायश्चित्ततत्त्वधृतं वचनम् ॥
(भिक्षैव स्वार्थे अण् । भिक्षा । भिक्षायै भिक्षार्थं वा त्रि ।)
भैक्षजीविका, स्त्री, (भैक्षेण जीविका ।) भिक्षया जीवनोपायः । तत्पर्य्यायः । भैक्षम् २ । इति त्रिकाण्डशेषः ॥
भैक्षभुज् [ज्] त्रि, भैक्षाशी । भिक्षाशी । भैक्षं भुङ्क्ते यः । इति कर्तरि क्विप्प्रत्ययेन निष्पन्नम् । (यथा, महाभारते १ । ९१ । १२ ।
"तुरगा पुनरुत्पाती सर्वगामनपुरुषः ।
ब्राह्मणभैक्षभुक् चापि आत्मानमवितारयन् ।")
भैमी, स्त्री, (भीमस्यापत्यं स्त्री भीमस्य इयं वेति । भीम + अण् ङीप् ।) भीमैकादशी । यथा,
अथ भैमी । (इत्युक्तकीर्त्तिते ।
"माघशीर्षे शुक्लपक्षे माघि माघि प्रकाश्यते ॥
एकादश्यां सिते पक्षे भीमसेनो विशेषतः ।
द्वादश्यां वह्निकाष्ठायां तथा प्रातः ... ।
[illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ।"

मत्स्यपुराणे ।
"[illegible] ।
[illegible] ।
[illegible] ।"
[illegible] ।
[illegible] ।
[illegible] ॥

अपि च ।

पितामह उवाच ।

"माघमासे शुक्लपक्षे ह्यर्क्षे चैव शुभा पुरा ।
एकादशी तथा चैषा भीमेन समुपोषिता ।
व्याचर्य्यन्तु व्रतं कृत्वा पितॄणामनृणो भवेत् ।
भीमद्वादशीति विख्याता प्राणिनां पुण्यवर्द्धिनी ।
नयनेन विनाप्येषा महापत्यादि नाशयेत् ।
विनिघ्नन्ति महापापं कृतघ्नो विषयं यथा ।
कुपुत्रस्तु कुलं यद्वत् कुभार्य्या च पतिं यथा ।
अधर्म्मश्च यथा धर्म्मं कुमन्त्री च यथा नृपम् ।
अज्ञानेन यथा ज्ञानं शौचञ्चाशौचता यथा ।
अश्रद्धया यथा श्राद्धं सत्यञ्चैवानृतैर्यथा ।
हिमं यथोष्णमादित्यादनर्थञ्चार्थसञ्चयः ।
यथा प्रकीर्णनाहारं तपो वै विस्मयाद्यथा ।
अभिध्यया यथा पुत्रो गावो दूरगतैर्यथा ।
क्रोधेन च यथा शान्तं यथा वित्तमवर्द्धनात् ।
यथा समीहनाद्ज्ञानं पलायनाच्च यतव्रताः ।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा ।
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
उपपद्यथातानि नहि हन्ति नियुञ्चरम् ।
न चापि नैमिषं चैव कुरुक्षेत्रं प्रभासकम् ।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती ।
न चैव सर्व्वतीर्थानि एकादश्याः समानि च ।
न दानं न जपो होमो न चान्यत् सुकृतं क्वचित् ।
एकतः पृथिवीदानमेकतो हरिवासरः ।
ततोऽप्येका महापुण्या इयमेकादशी वरा ।
यस्मिन् वराहवपुषः कृत्वा देवन्तु हाटकम् ।
घटोपरि नवे पात्रे कृत्वा वै ताम्रभाजने ।
सर्व्वबीजन्तु तं विप्राः सितवस्त्रावगुण्ठिते ।
सहिरण्यप्रदीपाद्यैः कृत्वा पूजां प्रयत्नतः ।
वराहाय नमः पादौ क्रोडाकृति नमः कटिम् ।
नाभिं गम्भीरघोषाय उरः श्रीवत्सधारिणे ।
बाहुं सहस्रशिरसे ग्रीवां सर्व्वेश्वराय च ।
मुखं सर्व्वात्मने पूज्य ललाटं प्रभवाय च ।
केशाः शतमयूखाय पूज्या देवस्य चक्रिणः ।
विधिना पूजयित्वा तु कृत्वा जागरणं निशि ।
श्रुत्वा पुराणं देवस्य माहात्म्यप्रतिपादकम् ।
प्रातर्विप्राय दत्त्वा तु याचकाय शुभाय च ।
कनककोडसहितं सवित्तं सपरिच्छदम् ।
पश्चात्तु पारणं कुर्य्यात् मितः शुचिव्रतः ।
एवं कृत्वा नरो विप्रा न भूयः स्तनपो भवेत् ।
पपोषैकादशीं पुण्यां मुच्यते वै ऋणत्रयात् ।
मनोऽभिलषितावाप्तिः कृत्वा सर्व्वव्रतादिकम् ।"

इति वाराहे एकादशीमाहात्म्ये १२० अध्यायः ॥ (भीमस्य राज्ञः अपत्यं अण् स्त्री । भीमराजकन्या दमयन्ती । यथा, महाभारते । ३ । ६३ । २२ ।

"वारिम्यन् वा इपयाता भैमी तथाय सम-चित् ।")

भैरवं, त्रि, (भीरोरिदं चापवत् । भीरु+अण् ।) भयानकम् । इत्यमरः । १ । ७ । २० । (यथा, महाभारते । १ । १६४ । १० ।

"सर्व्वेण च कटीदेशे गृह्य वाहसि पाण्डवः ।
ततश्चो द्विगुणं चक्रे रवस्तं भैरवं रवम् ।")

अस्य पर्य्यायाः भयङ्करशब्दे द्रष्टव्याः ।

भैरवः, पुं, (भीर्भयङ्करो रवो यस्य । इति भीरव । ततः स्वार्थे अण् ।) शङ्करः । इति मेदिनी । वे ४६ । भयानकरसः । इत्यमरटीकायां भरतः । नदविशेषः । इति शब्दरत्नावली । रागभेदः । इति हेमचन्द्रः ॥ अष्टभैरवाणामुत्पत्तिर्यथा,

"दैत्याधिपः समुत्पत्य हरोरसि गदां क्षिपत् ।
संस्थितस्तु महायोगी सर्व्वाधारः प्रजापतिः ।
गदापातक्षताद्भूरि चतुर्द्धा रुधिरमपतत् ।
पूर्व्वधाराससुद्भूतो भैरवोऽग्निसमप्रभः ।
विद्याराजेति विख्यातः पद्ममालाविभूषितः ।
तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः ।
कामराजेति विख्यातः कृष्णाञ्जनसमप्रभः ।
नागराजेति विख्यातश्चक्रमालाविभूषितः ।
क्षतजाद्रुधिराज्जातो भैरवः शूलभूषितः ।
स्वच्छन्दराजेति विख्यात इन्द्रायुधसमप्रभः ।
भूमिष्ठाद्रुधिराज्जातो भैरवः खड्गभूषितः ।
ख्यातो लम्बितराजेति सोमाभ्रसमप्रभः ॥
ततोऽभूद्देवराजेति भैरवः क्षतजास्य ।
उग्रराजो बभूवाथ क्षतजाद्भैरवोऽपरः ।
एवं हि समरूपोऽसौ कथ्यते भैरवो शुभे ! ।
विघ्नराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ।"

इति वामनपुराणे अन्धकवरप्रदाने भैरवप्रादुर्भावे ६० अध्यायः ॥ ० ॥

शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,

"असितो महाभैरवश्च संहारभैरवं तथा ।
असिताङ्गभैरवश्च रुरुं भैरवमेव च ।
ततः कालं भैरवञ्च क्रोधभैरवमेव च ।
ताम्रचूडं चन्द्रचूडं अन्ते च भैरवद्वयम् ।
एतान् संपूज्य मध्ये च नवपत्रीश्च पूजयेत् ।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे दुर्गोपाख्याने ६१ अध्यायः ।

ताम्रचूडचन्द्रचूडयोः स्थाने कपालभैरवरुद्रभैरवौ ज्ञेयौ । इति तत्रैव गणपतिखण्डे ३१ अध्यायः ॥ ० ॥ अपि च ।

"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तभैरवः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ।"

इति तन्त्रसारः ॥ ० ॥

श्मशानाधिपभैरवो यथा,—

"नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
अहं भूत्वा महेशस्य नीतभीताक्ष्यपोषणाः ।
पैशाचवपुषौरेव शायिरे तपसो बलात् ।
महाश्मशानाधिपत्वन्तु ते जानन्ति हरं परम् ॥"

इति कालिकापुराणे ४४ अध्यायः ॥ ० ॥

अरवीरपुरराजचन्द्रशेखरपत्नीतारावतीगर्भे महादेवांशाज्जातपुत्रः । स च पुरा भृङ्गी बभूव पार्व्वतीशापात् मानुषसुतो भूत्वा भैरव इति नाम्ना ख्यातः । यथा,—

"प्रविवेश ततो देवो अयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्त्तं मनुपस्थितः ।
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपशार्दूल ! तथा शाखामृगाननम् ।
ततस्तयोर्नाम चक्रे नारदो मुनिसत्तम ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः ।
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ।"

इति कालिकापुराणे ४९ अध्यायः ॥ ० ॥

अपि च ।

"योऽसौ भृङ्गी हरसुतो महाकालोऽपि भूतलः ।
तावेव गौरीशापेन सम्भूय नरयोनिषौ ।
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।
यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा मतौ ।
योऽसौ महाभैरवाख्यः सकायः शारभो हरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ।"

इति कालिकापुराणे ४५ अध्यायः ॥ ० ॥

दुर्जयाख्यगिरिस्थभैरवो यथा,—

"तस्यास्ये भैरवो देवो भर्गसङ्गमसम्भवः ।
दुर्जयाख्ये वरगिरौ स्वर्गस्योपमभूमिगः ॥
योऽसौ शरभरूपस्य मध्यखण्डादिभैरवः ।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मन्त्रकैः ।
संपूज्य तत्र मतिमान् स याति शिवलोकताम् ॥"

इति कालिकापुराणे ८१ अध्यायः ॥ ० ॥

भैरवस्य मन्त्रो यथा,—

"केवलः सपरो हादिः षष्ठस्वरसमन्वितः ।
चन्द्रबिन्दुसमायुक्तं भयघोषस्य बीजकम् ॥
भैरवं पाण्डुनाथन्तु वसमालिङ्गसन्निभम् ।
वाद्यादित्यु बीजेन पूजयेत्तु विधानतः ॥
सपरौ शावशुक्लाखविसर्गाभ्यां समन्वितौ ।
महाभैरवमन्त्रोऽयं भैरवं तेन पूजयेत् ॥"

इति कालिकापुराणे ६९ अध्यायः ॥ ० ॥

अस्य ध्यानं यथा,—

"भैरवः पाण्डुनाथश्च रक्तगौरश्चतुर्भुजः ।
गदां पद्मञ्च शक्तिञ्च चक्रञ्चापि करेषु च ।
शिवदेव्याः पुरोभागे पूज्योऽयं विष्णुरूपधृक् ॥"

इति तत्रैव ६० अध्यायः ॥ ० ॥

अस्य गायत्री यथा,—

"महाभैरव विद्महे कीलरूपाय धीमहि ।
ततः कालो भैरवस्तु देवी शिवं प्रचोदयात् ॥
एषा भैरवरूपस्य गायत्री मे प्रतिष्ठिता ।
पञ्चमांसमद्यादिभोजनाय मया कृतः ॥
महाभैरवरूपोऽयं तथा क्षीरतिलप्रिये ।
अयन्तु वाममार्गेण पूज्यो मद्यादिभिः सदा ।"

इति कालिकापुराणे ७० अध्यायः ॥

अथ महाविद्यादीनां भैरवविवरणं यथा,—

शिव उवाच ।

"शृणु पार्व्वति सुभगे ! कालिकायाश्च भैरवम् ।
महाकालं दक्षिणाया दक्षभागे प्रपूजयेत् ।
महाकालेन वै सार्द्धं दक्षिणा रमते सदा ।
तारायाः दक्षिणे भागे अक्षोभ्यं परिपूजयेत् ।
समुद्रमथने देवि ! कालकूटं समुत्थितम् ।
सर्व्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः ।
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम् ।
अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः ।

तेन चाहं महामाया कालिको रमते सदा ।
महाविद्युत्प्रभाभ्यर्णा इतिदंष्ट्रा पूजयेत् प्रियम् ॥
यत्राहं भिरवस्य प्रतिपन्ने सुरेश्वरि ॥
तेन चाहं महादेवी सदा मामनुपूजिता ।
भगवन् महेशानि । यकारोऽति प्रकीर्तिता ॥
श्रीमद्भुवनसुन्दर्या रतिवीर्यं प्रयत्नं चरेत् ॥
भर्गो ब्रह्म च मामाये या च्याता भुवनेश्वरी ।
तस्या रमते तेन त्र्यम्बकेन सम्मतौ ॥
बह्लिर्षि कमाख्याता वर्णतत्त्वो प्रपूजितः ।
भैरवो इतिवीर्यं मातृ रत्तिवाणपीयं दृढम् ॥
पूजयेत् परमेन प्रयत्नं तथैव हि ।
छिन्नमस्तारतिवर्याधि कवयं पूजयेत् प्रियम् ॥
कबन्धपूजनाद्देवि । धर्मविद्वीश्वरो भवेत् ।
धूमावती महाविद्या विपरीतप्रधारिणी ।
वगलाया रतवाते यत्नेन प्रपूजयेत् ।
मत्तन्द्देवि विद्यार्थं अमृतं दारकारकम् ॥
मातङ्गीरतिवर्याधि च मतङ्गं पूजयेत् प्रियम् ।
तथैव रतिबाणार्थं जगदानन्दकारकम् ॥
कमलाया रतिवर्याधि विष्णुरूपं सदाशिवम् ।
पूजयेत् परमेशानि । स सिद्धो नात्र संशयः ॥
पूजयेत्तत्पूजाया रतिवर्याधि च स्वयम् ।
महामोक्षप्रदं देवि दशवक्त्रं महेश्वरम् ॥
दुर्गाया रतिवीर्यं देवि नारदं परिपूजयेत् ॥
भकारः सविकारी च रकारः पावकः सदा ।
देवः संहारकरूपमात्रकः परिकीर्तितः ॥
अन्यास्तु सर्वविद्यासु कवयः परिकीर्तितः ॥
स एव तत्त्वा मतो च रतिवाते प्रपूजयेत् ॥"

इति तोडलतन्त्रमष्टमे ॥

(भैरवलिङ्गिकः । यथा, कालिकापुराणे ।
"धविकः कपालमालासमुत्थापी भवविधा भगाः ।
महिषा गोपिका माध्वाणो काञ्च नृपतः ।
काङ्गाल कथकारेच गोपिका सरसो बरः ।
सार्धं सज्जलदेवन तत्त्ववशादिप्रकोपतः ॥
पत्रिकाभैरवादीनां बलाः परिकीर्तिताः ।
कविधिः ताळकेन दुरितवित्ताभिः कारूने प्रियम् ॥)
अथ भैरवरागस्य विवरणम् । चण्डमते षड्-
रागानां प्रथमरागः । महादेवमुखाविर्भूतः ।
अस्य जातिः औडवः । अथोक्तं देवागिरिदार-
त्रमाण्याचनमतमिति चक्रप्रतिलिखितः ।
अस्य सर्व कैलाशः । दशमी प्रातःकालः
अस्य भावकन्दः । रागमालायाम् अस्या-
कारः महादेवाकारवत् । अर्थात् दलव-
सनगौ । भक्तजनाश्रयः । कहामस्तकः ।
जटालङ्कृतशरीरः । शशाङ्कविनयस्तः । भस्म-
लग्नदेहः । त्रिनेत्रः । श्वेतदिनकरवापुः ।
माध्यन्दिनः । धननाशविनाशी । अथवा
गौरिकालोपरिस्थः । अनुजनकः । त्रिशूल-
धरः । अथवा सहस्रशीर्षविलासनः ।
नानावेशधारी च । अस्य रागिण्यः षट् । यथा ।
भैरवी वैरारी मधुमाधवी सिन्धवी बङ्गाली
च । अष्टावी पुत्राः । यथा । हर्षः निकः
दुरितः हरषः मधुः स्वरे शः मधुः परमश्च ।

कल्पिनाथमते तु भैरवमतुर्णरागः । अस्य
रागिण्यः षट् । यथा । भैरवी गुर्जरी भाषा
वेलावली कर्णाटी रक्तहंसा इत्येवमौति च
केचित् । हनुमन्मते पूर्ववत् षष्ठी पुत्राः । किन्तु
तिलकपुरीपटमञ्जरीयाश्च देवगान्धारलित-
मालकौशिकलाभेन विज्ञिताः । सोमेश्वर-
मतेऽपि रागिण्यः षट् । यथा । भैरवी गुर्जरी
रेवा गुणकली बङ्गाली बहुली च । तन्मते
रागिण्यः चक्रवाच मालवमयी गौरी ॥
भरतमते तु अस्य रागिण्यः पञ्च यथा । मधु-
माधवी ललिता वराटी गान्धारी भैरवी च ।
तन्मतेऽपि अष्टावी पुत्राः । यथा देवशाखः
ललितः हर्षः विलावलः माधवः बङ्गालः
विभासः मधमश्च । एषामष्टौ भार्या यथा ।
धत्रा वेलावली टोडी कुमारी कन्दादी
बहुलगुर्जरी पटमञ्जरी मिरवी च । इति सङ्गीत-
शास्त्रम् । * । मतान्तरे भैरवरागस्य भार्या
यथा । भैरवी बङ्गाली वराटी मध्यमा मधु-
माधवी सिन्धवी च । तत्पुत्रा यथा । कोमलः
मधमधावः प्रातः बलाधः पुरः टौलश्च ।
तत्पुत्रवध्वो यथा । षट्ी रेवा बहुला धोलिनी
दर्भिनी दया च । अथ शोभा इति काश्चित्
पाठः । इति नारदपुराणम् ॥
(नागभेदः । यथा, महाभारते ।१।३५।११।
"भैरवो मण्डलको मणिः पिण्डकोऽसितकः ।")

भैरवी, स्त्री, (भैरव + ङीप् ।) चामुण्डा । यथा,
"चामुण्डा चर्चिका चर्ममुण्डा मारी च चर्चिका ।
कर्णमोटी महागन्धा भैरवी च कपालिनी ॥"
इति हेमचन्द्रः ।२।१२०॥
भैरवीविशेषा यथा । त्रिपुरभैरवी १ सम्पत्-
प्रदा भैरवी २ कौलेशभैरवी ३ सकलसिद्धिदा
भैरवी ४ भयविध्वंसिनी भैरवी ५ चैतन्यभैरवी
६ कामेश्वरी भैरवी ७ षट्कूटा भैरवी ८ नित्या
भैरवी ९ रुद्रभैरवी १० भुवनेश्वरी भैरवी ११
त्रिपुरबाला भैरवी १२ नवकूटा भैरवी १३
अन्नपूर्णा भैरवी १४ । आसां मन्त्रा यथा,—

अथ त्रिपुरभैरवी ।
"त्रिपुरसुन्दरीमतौ भौतिको विन्दुवितारः ।
विलसत्तदेवेन्द्रादिमतं वामाक्षिविन्दुमत् ॥
आद्यामन्द्यराक्षिमो मनुः सर्वेषु सम्पदाम् ।
यथाक्रमाक्षिका विद्या देवा त्रिपुरभैरवी ॥"

अथ सम्पत्प्रदा भैरवी ।
कलाभो विघ्ना माया तथा त्रिपुरभैरवी ।
सम्पत्प्रदा नाम सत्ता: मनुः विमर्शनारसी ।
द्विपञ्चदो वाङ्ग्दो वाङ्मयं शरकालम् ।
कामराजं तथा देवि । द्विपञ्चार्णमितं सतः ॥
इमोरैवाक्षिताया तार्तीयं मनु सर्वे ॥
कालिकेति महेशानि । त्रितयो विनोचयेत् ॥
कुमार्धा: करवेहानि । त्रिशा कवेद् वेष्टयु ॥
त्रिपुरा भैरवी देवी सम्पत्प्रदा प्रिये ॥३॥
अथ कौलेशभैरवी ।
सम्पत्प्रदाभैरवीवत् पुत्रिके कौलेशभैरवीम् ।

वागाद्या मैव देवेशि । त्रिषु बीजेषु वर्णेषु
रक्षेत् कमराद्या चाह पूजयेत्
सदा ॥४॥

अथ सकलसिद्धिदा भैरवी ।
एतस्या एव विद्याया आद्यन्ते देवपत्रिके ।
करेषं परमेशानि । वाग्भा सकलसिद्धिदा ।
सम्पत्प्रदाभैरवीवत् श्लावप्राप्तिर्वं सदा ॥५॥

अथ भयविध्वंसिनी भैरवी ।
सम्पत्प्रदा भैरवी चाद्यन्ते देवविद्या चैव
भयविध्वंसिनी भैरवी भवति । इतिहाद्
नवार्णनाम् । पूजादिकन्तु सम्पत्प्रदावत् ॥६॥

अथ चैतन्यभैरवी ।
"वाग्भवं बीजमुच्चार्य कौलवाग्भवमेव च
सकलां भुवनेश्वरी विलीनं बीजमुत्तमम् ।
बीजं प्राणं बहुमितं प्रणवप्रत्यक्षम् ।
विद्यादिं महेशानि । विद्या चैतन्यभावका
सम्पादिन्याय । इति रतिकामाय च
नमः । सृष्टि महाविष्णु नमः ।
चैतन्यभैरव्यै देवताय नमः ॥६॥

अथ कामेश्वरी भैरवी ।
"कामेश्वरी च कामाख्यां पूर्वविद्याये विद्या
एतस्या एव विद्याया बीजत्रयमत्रमम् ।
तदन्ते परमेशानि । नित्यक्लिन्ने मदद्रवे ।
एतस्या एव तार्तीयं कामाख्यं परमेश्वरि ॥७॥

अथ षट्कूटा भैरवी ।
डाकिनी राकिणी बीजं लाकिनी काकिनी-
स्तम्भ ।
शाकिनी हाकिनी बीजं चाद्यञ्च भुवनेश्वरी ।
आदमेवाद्यं वृक्षमाधरीकारमस्तितम् ।
प्रणवादिमिदं देवि । तार्तीयं बीजमालिनी
त्रिकूटाख्यकामाकाम्यं नित्यं द्वैतक्षमी ॥८॥

अथ नित्या भैरवी ।
एतस्या एव विद्यायाः षट्कूटा क्रमशः स्थिता
विपरीता च यदि । विद्यां नित्यभैरवी ।
आद्यपूजादिकं सर्वमस्याः पूर्ववदाचरेत् ॥९॥

अथ रुद्रभैरवी ।
त्रिपञ्चमी ताद्धरार्णं चाणं वह्निमन्त्रितम् ।
इन्दिमिदं विपुलाख्यकाद्ये वाङ्मयं त्रि ॥
सम्पदात्मा भैरवा: कामराजं तदेव हि ।
वरारिस्तत्र बीजन्तु महाविद्यात्मकम् च ।
एषा विद्या महेशानि । वर्हितु वेष भक्तित ।

अथ भुवनेश्वरी भैरवी ।
वगादं वाग्भवाद्यं पुनश्चान्तं हरेद्दिवि ॥
भूवीजं भुवनेशानी तृतीयं बीजमुत्तमम् ।
द्विरश्चो महेशानि । भुवनेशी च भैरवी ॥११॥

अथ त्रिपुरबाला भैरवी ।
वाग्भवं त्रिपुराबालं कविपयकः हरी शृणु ।
त्रितीयं भूवनाशं महाकामं बर्हिरितं ।
एका वह्नि त्रिपुरा चैतन्यकाटीक्षरा

अथ नवकूटा बाला ।
वागावीजन्यं देवि । मुक्तवं वाग्भवी ।
नित्याकूटमयं देवि । भैरवी नवकूटक ॥१२॥

अथ संपूर्णा भैरवी ।
प्रयत्नं भुवनेश्वरि ! श्रीबीजं कामबीजकम् ।
ह्रस्वो भगवत्यन्ते माहेश्वरिमदं ततः ।
आसपूर्वं द्युगलं विद्येयं विम्बरधरी ॥ १४ ॥"
इति तन्त्रसारे भैरवीमन्त्रपरिच्छेदः ॥ रागिणी-विशेषः । सा च भैरवरागस्य पत्नी । यथा,—
"भैरवी कौशिकी चैव भाषा वेलावली तथा ।
बङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"
मतान्तरे मालवरागस्य पत्नी । यथा,—
"धानसी मालसी चैव रामकीरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥"
अस्या ध्यानं यथा,—
"सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्चयन्ती ।
तालप्रयोगप्रतिबद्धगीति-
र्गौरीतनुर्नारद भैरवीयम् ॥"
अस्या गानसमयः पूर्वाह्णकालः । यथा,—
"विभाषा ललिता चैव कामोदी पठमञ्जरी ।
रामकीरी रामकेली वेलावारी च गुर्ज्जरी ॥
देशकारी च सुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एताः पूर्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥"
इति सङ्गीतदामोदरः ॥ ० ॥
हनूमन्मते इयं सम्पूर्णजातिः । अस्याः ग्रह-स्वरविन्यासक्रमः मध्यमपञ्चमधैवतनिषादषड्-जर्षभगान्धारान्ताः । अस्या ग्रहं मध्यमस्वरः । शरत्काले प्रभाते अस्या गानसमयः । राग-मालायां अस्याः स्वरूपम् । चम्पकवर्णा । सुरूपा । सुवेशा । विस्तारवदना । विम्बाधरा । कोमलाङ्गी । रक्तवर्णा । श्वेतवसना । गजमौक्तिकचम्पकमाला । प्रफुल्लपद्मयुक्तपर्वत-गुहायां शिवपूजापरायणा । तत्र मञ्जीर-वादका गायन्ति च ॥ ० ॥ कल्लिनाथमते-ऽस्मरतमतिभेदम् ॥
भैषज्यं, स्त्री, (भेषजमेव संज्ञायां स्वार्थे वा ष्यञ् ।) जायन्ती । इति जटाधरः ॥ भेषजञ्च ॥
भैषज्यं, क्ली, (भेषजमेवेति । भेषज+"अनन्ता-वसथेतिहभेषजाञ्ञ्यः ।" ५ । ४ । २३ । इति ञ्यः ।) औषधम् । इत्यमरः । २ । ६ । ५० ॥
(अस्य पर्य्यायो यथा,—
"भैषज्यं भेषजमायुर्द्वमगदमौषधम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"दद्देव युक्तं भैषज्यं यदारोग्याय कल्पते ।"
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)
भोः, [स्] व, (भातीति । भा+बाहुलकात् डोसिः ।) सम्बोधनम् । तत्पर्य्यायः । प्याट् २ पाट् ३ अङ्ग ४ हे ५ है ६ । इत्यमरः ॥१।४।७॥ हंहो ७ हुम् ८ रे ९ अरे १० अये ११ अयि १२ । इति भरतः ॥ (यथा, मार्कण्डेये । ३ । ९२ ।
"भो भो विप्रेन्द्र ! शृणुष्व सुहृदा योग्यं वचा-
स्यथ ! ॥")
पथः । विषादः । इति शब्दरत्नावली ॥

भोक्तव्यं, त्रि, (भुज+कर्म्मणि तव्यत् ।) भोज-नीयम् । भोज्यम् । यथा,—
"यत्रैव भक्तिमीदृक्षाद्भोक्तव्यं युद्धिवर्द्धनम् ।"
इति तिथ्यादितत्त्वम् ॥
"अगात् वर्त्तुलाकारा वार्त्ताकी दुग्धवर्षिका ।
प्राणान्तेऽपि न भोक्तव्या दुग्धवर्णा कलम्बिका ॥"
इति कर्म्मलोचनञ्च ॥
(कर्म्मफले अनुभवनीये । यथा च देवीभाग-वते । ११ । ७ । २८ ।
"प्रारब्धं किल भोक्तव्यं शुभं वाप्यथवा शुभम् ।
उद्यमस्तद्वशो नित्यं कारयत्येव सर्व्वथा ॥")
भोक्ता, [ऋ] त्रि, (भुज्+कर्त्तरि तृच् ।) भोजनकर्त्ता । यथा,—
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।"
इति श्राद्धप्रयोगतत्त्वम् ॥
सुखादिभोगकर्त्ता यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
अथ भोक्तुर्लक्षणं यथा, पाकराजेश्वरे ।
"शान्तः सुधीतमृदुसुन्दरशुक्लवासा-
स्तत्कालधौतचरणः सह पुत्रमित्रैः ।
सव्यो प्रथमकृदयो रसपाकवेदी
भोक्ता विधेय सततं हि सभाभवेद्वैः ॥
अनुकूलमये स्थूले चारुचन्दनगुण्ठिते ।
आसने प्राङ्मुखो भोक्तोपविशेदाप्युरङ्मुखः ॥"
(भोजनकर्त्तरि यथा,—
"यदा कारणमासाद्य भोक्तुर्वा छन्दतोऽपि वा ।
अनेकदयोमिलाभ्यश्नीयात् विनिर्द्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ।
"भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ।
सुगन्धिपुष्परचिते रम्ये देशेऽथ भोजयेत् ॥"
इति च तत्रैव तदध्याये ।
यथा च सांख्यशास्त्रे भोक्ता भोगकर्त्ता पुरुषः ।
सति भोगप्रत्यये भोक्तृज्ञानं भवतीति तत्राप्य-माह । "चिदवसानो भोगः" इति सांख्यसूत्रम् । १ । १०४ ॥ पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्यैतादृशो भोगः सिद्धिरित्यर्थः । तस्मो भवमर्गः यथा, स्वामिनि भोग्यजातमर्पयति, तथा, इन्द्रियाणि विषयजातं सहात्मना यद्धौत्वा अन्तःकरण-प्रतिविम्बिताय पुरुषाय अर्पयति, स च पुरुषः प्रतिविम्बग्रहणमात्रेण विषयजातं शुद्धो प्रकाशयतीत्यर्थः । पुरुषस्य भोगः प्रतिविम्बा-दानमात्रं अर्थोत्पन्नः पुरुषादिः । ईदृशः परि-णामरूपो भोगः पुरुषे विधियते । "बुद्धे भोग इवात्मनि ।" इत्यादिभिरिति । एतादृक् तथा-पुरुषः भोगकर्त्ता वा भोक्ता ।" इति तट्टीकायां विज्ञानभिक्षुः ॥)
भोक्ता [ऋ] पुं, (यहूनि भोजयतीति, सुखेन पालयतीति वा भुज+तृच् ।) नृपः । यथा,—
"आजिद्भुर्भीकर्म भोक्ता सहिष्णुर्जगदादिजः ।"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
भर्त्ता । इति हेमचन्द्रः । ३ । ८१ ॥
भोगः, पुं, (भुज्यतेऽसौ इति । भुज+घञ् ।) सुखम् । स्त्र्यादिभृतिः । पण्यस्त्रीणां भृति-र्भाटिः । आदिना हस्त्यश्वादिकर्म्मकराणाञ्च भृतिः । सर्पस्य फटा । सर्पशरीरम् । इत्यमर-भरतौ । ३ । ३ । २३ ॥ (यथा, रघौ । ११ । ५९ ।
"लक्ष्यते स्म तदनन्तरं रविः
बद्धभीमपरिवेशमण्डलः ।
वैनतेयशमितस्य भोगिनः
भोगवेष्टित इव च्युतो मणिः ॥")
धनम् । (यथा, ऋग्वेदे । ३ । ३४ । ९ ।
"हिरण्ययमुतभोगं ससान हत्वी दस्यून् प्रार्य्यं वर्णमावत् ।"
"हिरण्ययं सुवर्णमयं भोगं धनम् ।" इति तद्भाष्ये सायनः ॥) अन्नम् । (यथासिन्नेव मन्त्रे । "भोगशब्दव्याख्याने भुज्यतेऽसिन्निति भोगो अन्नं वा ससान अर्पिभ्यो ददौ ।" इति सायनः ॥) पालनम् । अभ्यवहारः । इति मेदिनी । गे, १६ ॥ सर्पः । देहः । मानम् ॥ इति शब्दरत्नावली ॥ ० ॥ पुण्यपापफलभोग्य-कालः । यथा,—
"अतीतानागतो भोगो नाशः पञ्चदश स्मृतः ॥"
इति तिथ्यादितत्त्वे संक्रान्तिप्रकरणम् ॥
(पुरम् । यथा, ऋग्वेदे । ५ । २९ । ६ ।
"नव यदस्य नवतिञ्च भोगान्
साकं वज्रेण मघवा विवृश्चत् ।"
भोगान् पुराणि । इति तद्भाष्ये सायनः ।)
भूम्यादीनां भोगो यथा । त्रिपुरुषभोगमाह व्यासः ।
"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तत् ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः ॥
नारदः ।
तथारूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संशोध्यो न तं भोगो निवर्त्तयेत् ॥"
इति व्यवहारतत्त्वम् ॥
विभवभेदः । यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
(मूत्रभेदः । यथा, कामन्दकीयनीतिसारे । १८ । अध्याये । ३१ । ३८ । ५४ । श्लोकेषु ।
"यदि स्यादक्रमादुर्न्नं तदा च्यायः प्रकीर्त्तितः ।
मकलोऽकंहतो भोगो दलवीति मनीषिभिः ।
गोमूत्रिका हि वधारी प्रकटो मकरस्तथा ।
भोगभेदाः समाख्यातास्तथा परिपतन्तकः ॥
अर्थपन्नास्तु तद्रूपा भोगरूपाश्च पञ्चधा ॥")

भोगसद्म, [न्] क्ली, (भोगार्थं सद्म ।) वासगृहम् ।
यथा,—
"गर्भागारं वासगृहं भोगसद्मावरोधकम् ।"
इति शब्दरत्नावली ॥

भोगगृहं, क्ली, (भोगार्थं गृहम् ।) वासगृहम् ।
यथा,—
"वासागारं भोगगृहं कथायमज्ञाटिकाकुटाः ।"
इति हेमचन्द्रः ॥

भोगदेहः, पुं, (भोगदेहः भोगसाधको वा देहः ।)
प्रेतानां भोगार्थं सूक्ष्मशरीरम् । यथा,—
"प्रेते गतिश्चोर्ध्वगतिं नरः संवत्सरात् परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥"
इति दायतत्त्वम् ॥
अपि च ।
"अथ देहविवरणं कथयामि यथागमम् ।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् ॥
देहिनां देहबीजञ्च वदुः सर्वविदो वरम् ।
पृथिव्यादिपञ्चभूतैर्यो देहो निर्मितो भवेत् ॥
स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह ॥
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः कृतः ।
बिभर्त्ति सूक्ष्मदेहञ्च तद्रूपं भोगदेहके ॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये ।
जले न नष्टो देहो वा प्रहारे सुचिरे कृते ॥
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा ।
तप्तद्रवे तप्तलौहे तप्तपाषाण एव च ॥
प्रतप्तप्रतिमाश्लेषेऽप्यत्युच्चपतनेऽपि च ।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च ॥
कथितं देहवृत्तान्तं कारणञ्च यथागमम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः ॥

भोगपालः, पुं, (भोगं भोगसाधनमश्वादिकं पालयतीति । भोग+पालि+अण् ।) अश्वरक्षकः । इति शब्दमाला । भोगरक्षके त्रि ॥

भोगपिशाचिका, स्त्री, (भोगे पिशाचिका इव, भयङ्करत्वात् ।) क्षुधा । इति हारावली ॥

भोगभूमिः, स्त्री, (भोगार्थं भूमिः ।) सुरस्थानम् । भारतवर्षातिरिक्तवर्षम् । यथा,—
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ॥"
इति विष्णुपुराणे २ अंशे ३ अध्यायः ॥

भोगवती, स्त्री, (भोगः सर्पशरीरं भूम्ना अस्त्यस्या इति । भोग+मतुप् मस्य वः । "उगितश्च ।" ४ । १ । ६ । इति ङीप् ।) पातालगङ्गा । नागपुरी । इति मेदिनी । ते, ५१ । (नागकन्या । यथा महाभारते । १ । १७९ । १९ ।
"तव भोगवती मध्ये च गन्धर्व्वं न साहयेत् ।"
नदी । यथा, च काशीखण्डे । २८ । १९४ ।
"यथा भोगवती मध्ये भगवती भूवासिनी ।"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । ८५ ।
"सेयं भोगवती चैव वेदिका प्रथिता च सा ।")

भोगवान्, [त्] पुं, (भोगः फणः कायो वा भूम्ना अस्त्यस्येति । भोग+मतुप् मस्य व त्वम् ।) नटः । इति मेदिनी । ते, ११४ । नाट्यम् । गानम् । इति सिद्धान्तकौमुदी । भोगविशिष्टे त्रि ॥

भोगसद्म, [न्] क्ली, (भोगार्थं सद्म भोगार्थं सद्म ।) वासगृहम् । यथा,—
"गर्भागारं वासगृहं भोगसद्मावरोधकम् ।"
इति शब्दरत्नावली ॥

भोगार्हं, क्ली, (भोगाय अर्हतीति अर्ह+ "अर्हः ।" ३ । २ । १२ । इति अच् ।) धान्यम् । इति राजनिर्घण्टः ॥

भोगावली, स्त्री, (भोगानां आवली श्रेणि-र्यत्र ।) स्तुतिपाठकस्य स्तुतिः । इति जटाधरः । (यथा माघे । ५ । ६७ ।
"भोगावलीः कलगिरोऽवसरेषु पेठुः ।"
भोगावलीः प्रबन्धान् । इति तट्टीकायां मल्लिनाथः ।) नागपुरी । इति हेमचन्द्रः ॥

भोगावासः, पुं, (आवसत्यस्मिन्निति । आ+वस्+अधिकरणे घञ् । भोगार्थो वा आवासः ।) वासगृहम् । इति हारावली ॥

भोगिकः, पुं, (भोगे अश्वभोगे नियुक्त इति । भोग+बाहुलकात् ठन् ।) अश्वरक्षकः । इति शब्दमाला ॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः ।) वायुः । इति त्रिकाण्डशेषः ॥

भोगिनी, स्त्री, (भोगः अस्त्या अस्तीति । भोग+इनिः । ङीप् ।) राज्ञीभिन्ननृपपत्नी । इत्यमरः । २ । ६ । ५ ॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम् ।) चन्दनम् । इति राजनिर्घण्टः ॥

भोगी, [न्] पुं, (भोगोऽस्त्यस्येति । भोग+इनिः ।) सर्पः । इत्यमरः । १ । ८ । ८ । (यथा, विष्णुपुराणे । १ । १ । २१ ।
"इत्युक्ते तु मैत्रेय मया परावरात्मनः ।
भोगिभ्यामपि देवैर्मैत्रेयपराशरहितः ॥"
भोगभुजः । यथा, आर्य्यासप्तशत्याम् । ४१० ।
"भवनाश्लिष्ट भुजङ्गी यातः किल भोगिचक्र-वर्त्ती त्वम् ।")
ग्रामणीः । नृपः । इति मेदिनी । ने, १०२ । नापितः । इति रत्नः । वैयाकरणविशेषः । इति हेमचन्द्रः ॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोगीशः, पुं, (भोगिनामीशः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोग्यं, क्ली, (भुज+ण्यत् ।) धनम् । धान्यम् । इति राजनिर्घण्टः ॥ भोक्तव्यमिति । भोज+ण्यत् । भोगार्हे त्रि ॥ (यथा, कामन्दकीये । १ । ७ ।
"यथा दृष्टेन निर्दिष्टं वर्षं भोक्तुं विशाम्पते ।
वर्णाय बहुधा पार्थिवाय भोग्यमिदं जगत् ॥")
भार्य्याविशेषः । यथाह भरतः ।
"रिक्तस्त्रीदूषिताश्चैव प्रतिपूर्विभर्तृका च ।
अतिशिक्षितरम्भास्ते च निन्दितो निःस्पृहकः ॥
दत्तकाशीरेन्द्रेण कायदैवेनाप्यपरा ।
त्रैपुरारिः भोग्या भोग्या भोग्यकन्यैव च ॥"
भोग्याः दासादयः । भोग्यकन्या, वस्त्रभोग्याः इति तथा,—
"भार्य्या भार्य्यवती भवति भार्य्यमेव न भवति ।"

यत् भोज्यं यत्राशी वत्सभोजः श्वेताम्बुदः
स स कदाचिदपि मज्जति । इति मित्राक्षरायां
प्रायश्चित्ताध्यायः ॥

भोग्या, स्त्री, (भुज्+कर्म्मणि ण्यत् टाप् ।) वेश्या ।
इति राजनिर्घण्टः । भोग्या भूः । इति हैम-
वैद्यः । (तस्य त्रि ।)

भोजः, पुं, (भोजयतीति । भुज+"अन्दू-
दृम्भू ।" उ । १ । ९० । इत्यच् । अथो भोज ।)
बृहत्सन्तानदेशः । भोजपुर इति ख्याता
तत्सम्बन्धः । भोजकटः २ । इति शब्द-
रत्नावली । धाराधिपस्य राजविशेषः ।
तस्य उपाख्यानं यथा । धाराधामनगरी सिन्धु-
घोषो राजा आसीत् । तस्य सुतौ
भाविनौ, तयोर्ज्येष्ठस्य भोजनामा
जातः । स यदा पञ्चवर्षवयस्कस्तदा पिता
आत्मनः जरावस्थां विदित्वा भ्रात्रे मुञ्जाय राज्यं
ददौ, तदनु भोजं सुतोत्सङ्गे मुमोच । ततो राजे
परलोकं गते सिंहासनारूढे कृतकाले
कदाचित्सदस्याभिज्योतिर्विदागत्य एवं जग-
ाद । भोजस्य भाग्योदयं वक्तुं विरिञ्चोऽपि
न समर्थः किमहं वराकः बाल्येऽपि केवलं
तथापि वदामि भोजनिमित्तं शृणु । इति
राजाश्रुत्वा भोजोऽयमस्मत्राज्ये प्रभुर्भविष्यति
यथा,—
"पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।
भोजराजेन भोक्तव्यं सगौडं दक्षिणापथम् ॥"
इति श्रुत्वा मुञ्जराजोऽचिन्तयत्, यदि राज-
लक्ष्मीर्भोजं गमिष्यति तर्हि अहं जीवन्नपि मृतः ।
ततो राजा मन्त्रिणा वत्सराजमाहूय एकान्ते
वदत् वङ्गदेशमानीय निशीथे त्वं जहि, इत्य-
ादि । तथा भोजोऽपि पुत्रवत् पोषितो वत्स-
राजेन । वत्सराजः भोजकुमारं वङ्गदेशमानीय जहि,
इति । भोजमाह । ततो नियतावस्थो भोज
कुपितः प्राह, मया पाप ! राज्ञः कुमारं भो-
जयेन्न अथ मा हनिष्यसि, ततो राज्यलोभेन
कामात्मा भोजेन नाशयिष्यते शृणु,
प्राह, भोजकुमार ! एवं राजादेशवशात्
त्वं मुञ्च वधाय नय रथस्थश्च निशा-
निशि भोजे भोजे भुवनेशस्य भाग्य भोजस्य
स्वोदयमपठत् ।
"इव वृद्ध पुरुषस्मै निवेदयन्ति चः ।
गतिरिह धर्म्मं पार्थ सम्बन्ध सप्तमे ॥"
वत्सराजः विचार्य वङ्गदेशे देशान्तरे भोजे
शरणं गत्वा वत्सं तं स्वे निवेश अरण्ये
अन्धकारे भोजं रक्षित्वा कृत्रिम भोज-
मस्तकं कारयित्वा राजसभायां सभां गतः
शिरच्छेदं भोजस्य तद्वत् । राजपुत्रं
कुलं राजा तं प्राह कुतः । पुनः
वत्सराजस्य विनीतं वचनं राजानं
प्रति ऊचे । विधिः वनं देवैर्विधृतो वत्सः
अनन्तं विरह सर्वं हत्वा । ततो भोजस्य
शुद्धा राजा बभौ ।

"मान्धातेति महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते!
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति॥"

इति भोजस्य श्लोकं पठित्वा पपात च। ततो राजा पण्डितसमाजीय मया पुत्रो हतः प्रायश्चित्तमुच्यतामित्युवाच। ततस्ते ऊचुः राजन्! सत्वरं वह्निमाविश। ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्त्तां श्रुत्वा द्वारमागत्य वत्सराजो बुद्धिसागरं प्राह तात! मया भोजो न मारितः बुद्धिसागरस्य तस्य कार्य्यं किमपि कथयति। ततो वत्सराजो निष्क्रान्तः। ततस्तन्मुहूर्त्तेन साक्षात्कईश्वर इव एकः कापालिक आगतः। तं वीक्ष्य बुद्धिसागरः प्राह योगिन्! कुत आगम्यते कापालिके त्वयि जगत्समत्कारी कलाविशेषश्चौषधिविशेषो वा अस्ति। ततो राजाप्याह मया सहसा हतं पुत्रं रक्ष। कापालिकः प्राह राजन्! मा भैषीः पुत्रस्ते नायमसादेव न मरिष्यति प्रातस्तव एवं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागरमन्त्रिणा सह होमद्रव्यं प्रेषय। कापालिकेन यदुक्तं तत् सर्व्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततश्च रात्रौ गूढतया वत्सराजसकाशात् भोजस्तत्र नदीपुलिनं नीतः योगिना भोजकुमारो जीवित इति किम्वदन्ती सर्व्वत्रोऽप्यजायत। ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः। ततस्तमालिङ्ग्य वदन्तं तुष्टं निवार्य्य भोजः स्तौति। ततो राजा पश्चात्तप्तयौवः सन् निजसिंहासने भोजमुपवेश्य राज्यं दत्त्वा वनं गतः। ततो सुस्रे वनं प्राप्ते बुद्धिसागरं मुख्यामात्यं विधाय भोजः स्वयं राज्यसुखं बुभुजे। ततो राजसभायां सकलद्योः बुधवरा दिग्भ्यः समागमुः ततो राजा समाक्षमाह।

"कथं मयाकर्णितं तदर्थं विबुधस्य च।
देयं पाण्डवयन्नृप! तस्याप्यहं त्वयाम्बरम्॥"
इति।

ततः क्रमेण वररुचिसुबन्धुबाणामरदामदेवहरिवंशशङ्करकालिङ्गकर्पूरविनायकमदनविद्याविनोदकोकिलतारेन्द्रप्रमुखाः सर्व्वशास्त्रविचक्षणाः सर्व्वज्ञा इव राजसभामहर्निशमलङ्कुर्व्वन्ति। कियत्कालान्तरं कालिदासकवौ समागते तेन सार्द्धं राज्ञः परमा प्रीतिरजायत। अन्यैर्विद्वद्भिः कालिदासं वेश्यालम्पटं विदित्वा सर्व्वभावेन वैरवद्भिः न कश्चित् सभायां समागत न कोऽपि वदति। किन्तु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव। अन्येषां पण्डितानामागमनं तेषां यद्यपि समस्तपूरणादि तेभ्यो बहुलवसुदानादिवर्णनस्य ग्रन्थशेषपर्य्यन्तमस्ति। तद्ग्रन्थविस्तरभयात् न लिखितम्। इति भोजप्रबन्धपुस्तकात् सङ्कलितम्॥*॥ ऐन्द्रजालिकविद्यां भोजविद्यां वदन्ति॥

भोजकटः, पुं, भोजदेशः। इति शब्दरत्नावली॥ (रुक्मिनिर्म्मिते पुरे, स्त्री। यथा, विष्णुपुराणे। ५। २६। १३।
"इत्युक्तेन परित्यक्तः कृष्णमाक्लिष्टकर्म्मणा।
रुक्मी भोजकटं नाम पुरं कृत्वावसत्तदा॥")

भोजनं, क्ली, (भुज्+"ल्युट् च।" ३। ३। ११५। इति भावे ल्युट्।) भक्षणम्। कठिनद्रव्यस्य गलाधःकरणम्। तत्पर्य्यायः। जग्धिः २ जेमनम् ३ लेपः ४ आहारः ५ निघसः ६ न्यादः ७। इत्यमरः। २। ९। ५५॥ जमनम् ८ विघसः ९। इति तट्टीका॥ अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ खदनम् १३ निगरः १४। इति राजनिर्घण्टः॥*॥

अथ भोजनगुणविधानादि।
"भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम्।
अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम्॥
आयुर्वेदे गुरौ रोगा मृत्युर्जीर्णो विदाहिषु।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च॥
अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः।
पयसोऽष्टगुणं मांसं मांसाद्दशगुणं घृतम्॥
घृताद्दशगुणं तैलं मर्द्दनात्र च भक्षणात्।
आहारः प्रीणनः सद्यो बलकृद्देहधारकः॥*॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः॥
कुक्षेरन्नेन भागौ द्वावेकं पानेन पूरयेत्।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत्॥
दन्ते चावगतं चान्नं शोधनेनाहरेच्छलैः।
कुर्य्यादनिर्गतं तद्धि मुखस्यानिष्टगन्धताम्॥
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति॥
भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत्।
भुक्तं मयेन्द्रदत्तेन वैश्वानरमुखेन च॥
गरुडस्य च कण्ठेन समुद्रस्य च वह्निना।
वातापिर्भक्षितो येन पीतो येन महोदधिः॥
मन्मया खादितं पीतं तदगस्त्यो जरिष्यति।
पठित्वैतत् सुखासीनः क्षणं तिष्ठेदनाकुलः॥
भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत्।
एवं ह्यधोगतं चान्नं सुखं तिष्ठति जीर्य्यति॥
भुक्त्वोपविशतस्तुन्दं शयानस्य वपुर्भवेत्।
आयुश्चङ्क्रममाणस्य मृत्युर्धावति धावतः॥"
इति राजवल्लभः॥*॥

अपि च।
"ततो भोजनवेलायां कुर्य्यादङ्गप्रदर्शनम्।
तस्य प्रदर्शनं नित्यमायुर्धर्म्मविवर्द्धनम्॥
सोऽर्चिष्मान् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
माङ्गल्यौषधं कुर्य्यात् पूर्व्वं भोजनतः परम्।
पाण्डुरोगहरं हृद्यं चक्षुष्यं चायुषे हितम्॥*॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्व्विधा।
बुभुक्षा च पिपासा च सुषुप्सा सुरतस्पृहा॥
भोजनेच्छाविघातात् स्यादङ्गमर्द्दोऽरुचिः श्रमः।
तन्द्रा लोचनदौर्ब्बल्यं धातुदाहो बलक्षयः॥
विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत्।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम्।
अङ्गमर्द्दस्तथा तन्द्रा स्यादन्नापाक एव च॥
बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात्।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः॥
आहारं पचति शिखी दोषानाहारः पचति।
दोषक्षये च धातून् पचति धातुक्षये प्राणान्॥
आहारः प्रीणनः सद्यो बलकृद्देहधारणः।
स्मृत्यायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम्।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि॥"
उभयोः कालयोः प्रातः सायञ्च। तथा च।
"सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम्।
नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः॥"
प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक्। तथा च।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्।
याममध्ये रसोत्पत्तिर्युग्मादूर्द्ध्वं बलक्षयः॥"
अन्यच्च।
"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः॥"
रसादीनां पाकं चाप्याह।
"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः।
लघुता क्षुत्पिपासा च यदा कालः स भोजने॥"
अत्राप्याह।
"आहारं विजने कुर्य्यान्निर्हारमपि सर्व्वदा।
उभाभ्यां लभ्यते श्रीस्तु प्रकाशे हीयते श्रिया॥"
निर्हारो मलमूत्रोत्सर्गः। अन्यच्च।
"आहारनिर्हारविहारयोगाः
सदैव सद्भिर्विजने विधेया इति॥"*॥
भोजने येषां दृष्टिर्निवारणीया तानाह।
"हीनदीनक्षुधार्त्तानां पाषण्डस्त्रैणरोगिणाम्।
कुक्कुटाहिशुनां दृष्टिर्भोजने नैव शोभना॥"
येषां दृष्टिः शुभदा तानाह।
"पितृमातृसुहृद्वैद्यपाचकहंसबर्हिणाम्।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा॥"
कथञ्चिद्दुष्टदृष्ट्यादि तद्दोषशान्तये मन्त्रादीन् जपेत्। तद्यथा,—
"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः।
इति सञ्चिन्त्य भुञ्जानो दृष्टिदोषो न बाधते॥
अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम्।
दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम्॥"
आज्यमाह।
"दोषहृद्दीपनं पथ्यं मेध्यं भोजनभाजनम्।
रौप्यं भवति चक्षुष्यं पित्तहृत् कफवातकृत्॥

भोगसद्म, क्ली, (भोगार्थं सद्म ।) वासगृहम् । यथा,—
"वासागारं भोगसद्म कथामञ्चाट्टविस्फुटाः ।"
इति हेमचन्द्रः ॥

भोगदेवः, पुं, (भोगदेहुको भोगसाधको वा देहः ।) मरणोत्तरकभोगार्थं सूक्ष्मशरीरम् । यथा,—
"इते गतिकोत्तरके मरः संवत्सरात् परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥"
इति श्राद्धतत्त्वम् ॥

अपि च ।
"अथ देहविवरणं कथयामि यथागमम् ।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् ।
देहिनां देहबीजञ्च प्रभुः सृष्टिविधौ परम् ॥
पृथिव्यादिपञ्चभूतैर्यो देहो निर्मितो भवेत् ।
स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह ॥
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः कृतः ।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे ॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये ।
जले न नष्टो देहो वा प्रहारे सुचिरे कृते ॥
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा ।
तप्तद्रवे तप्तलोहे तप्तपाषाण एव च ॥
प्रतप्तप्रतिमाश्लेषेऽप्युच्चपातेऽपि च ।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च ॥
कथितं देहवृत्तान्तं कारणञ्च यथागमम् ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः ॥

भोगपालः, पुं, (भोगं भोगसाधनमश्वादिकं पालयतीति । भोग+पालि+अण् ।) अश्वरक्षकः । इति शब्दमाला ॥ भोगरक्षके त्रि ॥

भोगपिशाचिका, स्त्री, (भोगे पिशाचिका इव, तद्वत्कष्टदत्वात् ।) क्षुधा । इति त्रिकाण्डशेषः ॥

भोगभूमिः, स्त्री, (भोगार्थैव भूमिः ।) स्वर्गादिकम् । भारतवर्षातिरिक्तवर्षम् । यथा,—
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ।
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ।"
इति विष्णुपुराणे २ अंशे ३ अध्यायः ॥

भोगवती, स्त्री, (भोगः सर्पशरीरं भूम्ना अस्त्यस्या इति । भोग+मतुप् मस्य वः । "मतुवसो रु सम्बुद्धौ ०" इति ङीप् ।) पातालगङ्गा । नागपुरी । इति मेदिनी । ते, २१३ ॥ (नागपुरी । यथा महाभारते । १ । १०२ । १२ ।
"अथ भोगवतीं गत्वा न पश्यामि च मातरम् ।"
नदी । यथा, च रामायणे । ७५ । १९७ ।
"भवा भोगवती भवा भवानी भुवनेश्वरी ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८५ । ७५ ।
"तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः ।")

भोगवान्, [त्] पुं, (भोगः फणः कायो वा भूम्ना अस्त्यस्येति । भोग+मतुप् मस्य व वत्वम् ।) सर्पः । इति मेदिनी । ते, २१३ ॥ नाट्यम् । गानम् । इति त्रिकाण्डशेषः ॥ भोगविशिष्टे त्रि ॥

भोगसद्म, [न्] क्ली, (भोगार्थं सद्म भोगार्थं सद्म ।) वासगृहम् । यथा,—
"सभांमारं वासगृहं भोगसद्मावसथकम् ।"
इति शब्दरत्नावली ॥

भोगार्हं, क्ली, (भोगाय अर्हतीति इति अर्ह+ "अर्हः प्रशंसायाम् ।" ३ । २ । १३३ । इति शतृ ।) धान्यम् । इति राजनिर्घण्टः ॥

भोगावली, स्त्री, (भोगानां आवली श्रेणिः यस्याम् ।) स्तुतिपाठकस्य स्तुतिः । इति जटाधरः ॥ (यथा माघे । ५ । ६७ ।
"भोगावलीः कलगिरोऽवसरेषु पेठुः ।"
भोगावलीः प्रबन्धान् । इति तट्टीकायां मल्लिनाथः ॥) नागपुरी । इति हेमचन्द्रः ॥

भोगावासः, पुं, (आवसन्त्यस्मिन् इति । आ+वस् +आधिकरणे घञ् । भोगार्थो वा आवासः ।) वासगृहम् । इति तारावली ॥

भोगिकः, पुं, (भोगी अश्वभोगे नियुक्त इति । भोग+बाहुलकात् ठन् ।) अश्वरक्षकः । इति शब्दमाला ॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः ।) वायुः । इति त्रिकाण्डशेषः ॥

भोगिनी, स्त्री, (भोगः अस्या अस्तीति । भोग+इनिः । ङीप् ।) महिषीभिन्नृपपत्नी । इत्यमरः । २ । ६ । ५ ॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम् ।) चन्दनम् । इति राजनिर्घण्टः ॥

भोगी, [न्] पुं, (भोगोऽस्यास्तीति । भोग+इनिः ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, विष्णुपुराणे । १ । ९ । २६ ।
"दृष्टाश्चैव तु ये भोगैः सर्पा नारायणाश्रयाः ।
भोगिन्द्याहताः पीते ये चान्यास्तापशङ्किताः ॥"
भोगयुक्तः । यथा, आर्याणसप्तशत्याम् । ४१० ।
"भवतापिशुभ्रष्टा लाजाः किल भोगिकारणाः भम ।")
ग्रामणीः । नृपः । इति मेदिनी । ने, १०२ ॥
नापितः । इति त्रिकाण्डशेषः । वैयाकरणः । इति हेमचन्द्रः ॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोगीशः, पुं, (भोगिनामीशः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोग्यं, क्ली, (भुज+ण्यत् ।) धनम् । धान्यम् । इति राजनिर्घण्टः ॥ भोक्तुमर्हतीति । भोज+यत् । भोगार्हे त्रि ॥ (यथा, कामन्दकीये । ११ । ८१ ।
"यथा दृष्टेव विपुलं प्रयं कल्पविदाश्रया ।
तथाप यतः कामाशृङ्गोऽभ्युदितं जगत् ।")
आसेचितः । यथाह भारतः ।
"विषमशैत्यं शास्त्र प्रतिभूगादिरेव च ।
अधिकृत्य रूपादिः व निर्देशो निरूपणः ॥
सम्यक्बोधशेषश्च मारुदेवोदपरपरा ।
सं पुरुषार्थविचः भोग्यो भोग्यो भोगवतेव च ॥"
भोग्यो उपभोगः । भोग्यकारः कलभोगवर्त्ते इत्यर्थः । तद्यथा,—
"नाके वासवदो यद्वज् कलभोग्यो न दश्यति ।"

भोग्या, स्त्री, (भुज+कर्म्मणि ण्यत् टाप् ।) वेश्या । इति राजनिर्घण्टः ॥ भोग्या भूः । इति वैद्यकम् ॥ (तत्र त्रि ।)

भोजः, पुं, (भोजयतीति । भुज+"नन्दिग्रहि ०" ३ । १ । १३४ । इति ल्युः । बहुलोक्तेः ।) कान्यकुब्जातदेशः । भोजपुर इति ख्याता । तत्पर्य्यायः । भोजकटः २ । इति शब्दरत्नावली । धाराप्रभस्य राजविशेषः । तस्य उपाख्यो यथा । धारानामनगर्यां सिन्धुलो नामा राजा आसीत् । तस्य राज्ञी सावित्री, तयोर्वृद्धावस्थायां भोजनाम्नी जातः । स यदा पञ्चवर्षवयस्कस्तदा राज्ञा आत्मनः परलोकं निश्चित्य आह्वे सुतम् राज्ये दत्त्वा, तदनुजस्य मुञ्जस्य समीपे। ततो राजि परलोकं गते सिन्धुलप्रार्थितं वत्स्यति महीपतिवीरोत्सवे राज्ञाह शुभं राज्यम् । भोजस्य भाग्योदयं दृष्ट्वा निश्चित्य स समर्थः भोजं स्वयं हन्तुमारेभे । तथापि वत्सराज भोजनिहन्तुः प्रेषयत्। ततो राजाज्ञया भोजोऽवधपदाचो प्राणैः भाषत यथा,—
"मान्धाता स महीपतिः कृतयुगालङ्कारभूतो गतः ।
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।" इति श्रुत्वा मुञ्जराजोऽविमनाः, सर्वं राज्यं भोजस्य हिताय मन्यतः । ततो राजा अभिज्ञाय पुत्रानोधाय मन्त्रं रुपये दश्य कनक त्यक्त्वा उत्तरं राज्यं दत्त्वा तं प्राह, राजन् । अथ भोजविनष्टसमयेऽपि अदर्शितः मन्त्रवरः भोजकुमारोपाख्यानमाह आसीत् । भोजमानय । ततो निविडतमो भोजः कुपितः प्राह, भाः मान । राज्ञः कुमारं आत्मनि तद वा प्रति:, ततो वत्सराजं कामोदय भोजेन आहुतैः वत्सो मन्त्रवरः प्राह, भोजकुमार । एवं राजादेशवशात् । रक्षोपायं कर्त्तुं कथम् वत्सराजेन निश्चितं भोजे गते वत्सराजस्य सभायाः भोजस्य यथोचितमवद ।
"एव एव शुभ्रहन्तो मित्रोऽयं द्रोहि न: ।
शरीरेण समं नाशं सर्वमन्य करोति ।"
इत्युक्तं निशम्य वत्सराजो वैराग्यवान् भोजं गमयित्वा मयाद्य तं रथे निधाय स्वगृहं भूमिगृहान्तरे भोजं रक्षित्वा कृत्रिमं भोजमस्तकं कारयित्वा राजापणकं तथा पर श्रीमता मराचिरं रक्षता तपन् । राजपुत्रं आश्वा राजन् तं प्राह वत्सराज ! पुरं महाकवैरचितं निवाते पत्रम् । सुवर्णं शाह देव ! निर्माय सर्वं वैदिकमाले आर्ते मन्त्रं चिरस्य दृष्ट्वा । ततो भोजश्च वृक्षा राजा करोति ।

"मान्धातेति महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते !
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥"

इति भोजकृतश्लोकं पठित्वा ययौ च । ततो राजा पण्डितमानीय मया पुत्रो हतः प्रायश्चित्तमुच्यतामित्युवाच । ततस्ते ऊचुः राजन् ! सत्वरं वह्निमाविश । ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्त्तां श्रुत्वा सपद्मार-मागत्य वत्सराजो बुद्धिसागरं प्राह तात ! मया भोजो न मारितः बुद्धिसागरश्च तस्य कार्य्यं किमपि कथयति । ततो वत्सराजो निष्क्रान्तः । ततस्तन्मुहूर्त्तेन साक्षान्महेश्वर इव एकः कापालिक आगतः । तं वीक्ष्य बुद्धिसागरः प्राह योगिन् ! कुत आगम्यते कापालिके त्वयि जगचमत्कारी कलाविशेषश्चौषधिविशेषो वा अस्ति । ततो राजाप्याह मया सहसा हतं पुत्रं रक्ष । कापालिकः प्राह राजन् ! मा भैषीः पुत्रस्ते नाथप्रसादेन न मरिष्यति प्रातस्तव सद्यं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागर-मन्त्रिणा सह होमद्रव्यं प्रेषय । कापालिकेन यदुक्तं तत् सर्व्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततश्च रात्रौ गूढ़तया वत्सराजगृहात् भोजश्च नदीपुलिनं नीतः योगिना भोजकुमारो जीवित इति किम्वदन्ती सर्व्वत्रोऽप्यजायत । ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः । ततस्तमालिङ्ग्य रुदन्तं शक्तं निवार्य्य भोजः स्तौति । ततो राजा पश्चात्तप्तचेताः सन् निजसिंहासने भोजमुपवेश्य राज्यं दत्त्वा वनं गतः । ततो सुखे वनं प्राप्ते बुद्धिसागरं मुख्यामात्यं विधाय भोजः सर्व्वं राज्यसुखं बुभुजे । ततो राजसभायां भवसरो बुधवरा दिग्भ्य समागम्युः ततो राजा समाश्रमाह ।

"लक्षं महाकवेर्देयं तदर्द्धं विबुधस्य च ।
देयं ग्रामैकवैकन्तृप ! तदप्यर्द्धं तयान्वहम् ॥"

इति ।

ततः क्रमेण वररुचिसुबन्धुबाणामररामदेवहरि-वंशशङ्करकलिङ्गकर्पूरविनायकमदनविद्याविनोद कोकिलतारेन्द्रप्रमुखाः सर्व्वशास्त्रविचक्षणाः सर्व्वज्ञा इव राजसभामलञ्चक्रुर्धनं कुर्व्वन्ति । किन्तु कालान्तरं कालिदासकवौ समागते तेन सार्द्धं राज्ञः परमा प्रीतिरजायत । अन्ये विद्वांसः कालिदासं वेश्यालम्पटं विदित्वा सर्व्व-भावेन वैरचक्रुः न कश्चित् सभायां सम्प्रति च कोऽपि वदति । किन्तु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव । अत्रैषां पण्डितानामाग-मनं तेषां पद्यानि समस्यापूरणानि तेभ्यो बहुलधनप्रदानादिवर्णनञ्च ग्रन्थशेषपर्य्यन्त-मस्ति । तद्ग्रन्थविस्तरभयात् न लिखितम् । इति भोजप्रबन्धपुस्तकात् सङ्कलितम् ॥ ● ॥ ऐन्द्र-जालिकविद्यां भोजविद्यां वदन्ति ।

भोजकटः, पुं, भोजदेशः । इति शब्दरत्नावली । (रुक्मिनिर्म्मिते पुरे, क्ली । यथा, विष्णुपुराणे । ५ । २६ । १६ ।
"इत्युक्तेन परित्यक्तः क्ष्माख्याक्लिष्टकर्म्मणा ।
रुक्मी भोजकटं नाम पुरं कृत्वावसत्तदा ॥")

भोजनं, क्ली, (भुज् + "ल्युट् च ।" ३ । ३ ।११५ । इति भावे ल्युट् ।) भक्षणम् । कठिनद्रव्यस्य गलाधःकरणम् । तत्पर्य्यायः । जग्धः २ जेमनम् ३ लेपः ४ आहारः ५ निघसः ६ न्यादः ७ । इत्यमरः ।२ । ९ । ५५ ॥ जमनम् ८ विघसः ९ । इति तट्टीका ॥ अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ खदनम् १३ निगारः १४ । इति राजनिर्घण्टः ॥ ● ॥

अथ भोजनगुणविधानादि ।

"भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम् ॥
आयुर्व्वते गुडे रोगा म्लायुर्नो विदाहिषु ।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च ॥
अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसाद्दशगुणं घृतम् ॥
घृताद्दशगुणं तैलं मर्द्दनात्र च भक्षणात् ।
आहारः प्रीणनः सद्यो बलकृद्देहधारकः ॥●॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥
कुक्षेरर्द्धेन भागौ द्वावेकं पानेन पूरयेत् ।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत् ॥
दन्ते चावगतं चान्नं शोधनेनाहरेच्छनैः ।
कुर्य्यादनिर्गतं तद्धि मुखस्यानिष्टगन्धताम् ॥
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत् ।
भुक्तं मदेन्द्रदत्तेन वैश्वानरमुखेन च ॥
अगस्त्यस्य च कण्ठेन समुद्रस्य च वह्निना ।
वातापिर्भक्षितो येन पीतो येन महोदधिः ॥
मम्नया खादितं पीतं तदगस्त्यो जरिष्यति ।
पठित्वैतत् सुखासीनः सर्व्वं तिष्ठेदनाकुलः ॥
भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् ।
एवं ह्यपोगतं चान्नं सुखं तिष्ठति जीर्य्यति ॥
भुक्तोपविशतस्तुन्दं शयानस्य वपुर्भवेत् ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥"

इति राजवल्लभः ॥ ● ॥

अपि च ।

"ततो भोजनवेलायां कुर्य्यादङ्गप्रदर्शनम् ।
तस्य प्रदर्शितं नित्यमायुर्द्धर्म्मविवर्द्धनम् ॥
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
पादुकारोहणं कुर्य्यात् पूर्व्वं भोजनतः परम् ।
पादरोगहरं वृष्यं चक्षुष्यं चायुषे हितम् ॥●॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा ।
बुभुक्षा च पिपासा च सुषुप्सा सुरतस्पृहा ॥
भोजनेच्छाविघातात् स्यादङ्गमर्द्दोऽरुचिः श्रमः ।
तन्द्रा लोचनदौर्ब्बल्यं धातुदाहो बलक्षयः ॥
विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत् ।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा ॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम् ।
अङ्गमर्द्दस्तथा तन्द्रा स्यादन्नापाक एव च ॥
क्षुधितो न योऽश्नाति तस्याहारेन्धनक्षयात् ।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥
आहारं पचति शिखी दोषानाहारवर्ज्जितः पचति ।
दोषक्षये च धातून् पचति च धातुक्षये प्राणान् ॥
आहारः प्रीणनः सद्यो बलकृद्देहधारकः ।
स्मृत्यायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः ॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि ॥"

उभयोः कालयोः प्रातः सायञ्च । तथा च ।

"सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम् ।
नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः ॥"

प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक् । तथा च ।

"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥"

अन्यच्च ।

"सुत् सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"

रसादीनां पाकं ज्ञातुमाह ।

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च यदा कालः स भोजने ॥"

स्थानमाह ।

"आहारं विजने कुर्य्यान्निहारमपि सर्व्वदा ।
उभाभ्यां लभ्यते लक्ष्मी स्यात् प्रकाशे हीयते श्रिया ॥"

निहारो मलमूत्रोत्सर्गः । अन्यच्च ।

"आहारनिर्हारविहारयोगाः
सदैव सद्भिर्विजने विधेयाः इति ।" ● ।

भोजने पेयां हरितिभाण्डीया तामाह ।

"हेमरौप्यसुवर्णानां भाजनेष्वरोमिषाम् ।
कुक्कुटादिगुणा हरिर्भोजने नैव शोभना ॥"

देयां हरिः शुभदा तामाह ।

"पित्रमातृसहृद्दैवापापहर्त्तविवर्द्धिनाम् ।
धारकस्य चकोरस्य भोजने हरितत्तमा ॥"

कथञ्चिदुद्गरदोषादौ तद्दोषशान्तये मन्त्रादीन् स्मरेत् । तद्यथा,—

"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः ।
इति सञ्चिन्त्य भुञ्जानो हरिदोषो न जायते ॥
अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम् ।
हरिदोषविनाशाय हनूमन्तं स्मराम्यहम् ॥"

भाजनमाह ।

"दोषघ्नं हृद्यं पथ्यं हैमं भोजनभाजनम् ।
रौप्यं भवति चक्षुष्यं पित्तघ्नं कफवातकृत् ॥

ह्लाद्यं तुष्टिकरं बल्यं स्तम्भनवातदम्।
पैनसं वातलघुदं प्रमिकप्यला॥
आयवे शालनाशि च भोजनं निविकारकम्।
दोषशाम्यदं बल्यं कासमानकृशनम्॥
दैलये स्वछये पाये भोजनं निचितायनम्।
रात्रिदूषे विद्विषेन दमिदं प्रदूकादि च॥
मार्गं पश्चायं बल्यं दीपनं विबन्धदम्॥
अनयाभन्तु यावत्त तदपाये ज्वरो दिनम्॥
पतिर्थं घोषणं पाके चटिदं स्फाटिकेन यत्।
काथिन दधिनं तदनया वेदूष्यमभवम्॥ ॥
भोजनादौ सदा पथ्यं लवणार्द्रकभक्षणम्।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्॥"
मधुरं पैत्तं श्लेष्म। आर्द्रकन्तु कटुकमपि च
पित्तविरोधि मधुरपाकित्वात्॥
"अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम्।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान्॥
फलान्यादौ समश्नीयात् दाडिमादीनि बुद्धिमान्।
विना मोचाफलं तद्वत् वर्जनीया च कर्कटी॥
मृणालबिसशालूककन्देक्षुप्रभृतीन्यपि।
पूर्वमेव हि भोज्यानि न तु भुक्ता कदाचन॥
गुरु पिष्टमयं द्रव्यं तण्डुलान् पृथुकानपि।
न जातु भुक्तवान् खादेन्मात्रां खादेद्बुभु-
क्षितः॥
घृतपूर्वं समश्नीयात् कठिनं प्राक् ततो मृदु।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति॥"
अयमर्थः। प्राक् घृतपूर्वं कठिनं समश्नीयात्।
यथा आम्रादिफलानि प्रथमं तत्तक्रपक्वा घृतपूर्णा
रोटिका भुञ्जते। ततो मृदुयवागूयादिकमोदनं
भुञ्जते। अन्ते पुनर्द्रवाशी भोजनान्ते दधितक्र-
दुग्धादि भुञ्जते।
"कदन्नम् आतुरतं ताड विदग्धादुच्छीतलम्।
भुक्ता यत् प्रार्थयेन्मोद्य परात्पुनः स्याद्भोजनम्॥"
भोजनोत्तर गुणमाह।
"भोजनाग्रे सदा पथ्यं हृदयवाक्यं रसनादरम्।
आद रक्तस्तम्भनमद्रव्यात् च विशोधनम्॥
असामान्यं सर्वं घनि पीतं सुत्रकं दुर्जरम्।
अग्निदं अकार्यकरं तुष्टिकरं हि भोजनम्॥
अग्नितापादिदाशारो दुग्धात् शीताम्ल विप्रक्लिन्नं।
भोज्यं भोजनाद्द्रव्यं भक्ष्यर्थमवश्यम्॥"
गुरु विविधं तद्विकारकाद।
"मध्याह्ने भवो द्रव्यं मात्रातुह स्निग्धमयेत्।
व्याघ्रसमं गुरु असता कंबालो गुरु॥
आद्यभुक्तन्तु रुचारिमारोदि: मतोर्क:।
कंबालदह निवर्ते दोषक्षितमच्छदम्॥
आहारं सङ्गिति पूर्वं देव वीर्यं मधेत् च।
भोज्यं भक्ष्यं लेह्यं चूष्यं गुरु विदग्धपथ्योत्तमम्॥"
भूतं पकाकादिमादि। वेद्यं मागधाकर्णेदा-
आदि। वेदं रुचाकार्यार्थानि। गोधिना
सरी दधि क्षीरे। भोज्यं अन्नपानादि। मक्षं
मकुष्टमकाणि। वर्षं विविधपकादि।
समार्थद्वर्तप्रकारदुष्टभो: सामान्यतुल्य
अन्नच भोजनादिमाह।

"गुर्वायामदृष्टोनीहितं लघुना तृप्तिरिष्यते।"
अयमर्थः। माषपिष्टादिभिरत्रादिभिरदृष्टं लौहितं
कर्मेच्छं गुर्वादिभिः स्वाद्यादिना मात्रया तृप्तिः
कर्तव्यमिदं वः।
"द्रवो द्रवोत्तरचापि न मात्रागुरुरिष्यते।"
द्रवः पेयादिः। द्रवोत्तरः तक्रादीपक औद-
नादिमिस्तावता पिष्टोऽपि मात्रागुरुर्न भवति।
दैवस्य सर्वतो लघुत्वात्। तत्र गुरुत्वैव।
पिष्टवैद्याकरत्ववादौ गुरु विदाहकृवोत्तरमपि।
पेयं पय आदि। लेह्यं दधितकादि। भक्ष्यं
औदनादि। मक्ष्यं मोदकादि।
"द्रवाद्यमपि शुष्कन्तु सम्यङ्नैव प्रजीर्यते।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति॥"
अयमर्थः। शुष्कमपि द्रोणोदीपकमपि
द्रवाद्यं सम्यक् पाकं याति। किञ्चित् शुष्क-
स्यात्सत दोषमाह। विशुष्कमसमिभ्यादि।
अथवं तत् किं भवतीत्यपेक्षायामाह।
"पिण्डीकृतमसंक्लिन्नं विदाहं मुपगच्छति।"
पिण्डीकृतं अशीनायतनम्। असंक्लिन्नं
असम्यगार्द्रम्। विदाहमुपगच्छति विदग्धं
भवतीत्यर्थः। शुष्कादीनां वैगुण्यमाह।
"शुष्कं विरुढं विष्टम्भि वह्निव्यापादमावहेत्।"
शुष्कं निर्गिरादि। विरुढं क्षीरमङ्कुरादि।
विष्टम्भि आनकमसुरादि वह्निमान्द्यं कुर्यात्।
"न भुक्ता न हरेच्छिन्ना न शियानो न वा
पवनम्।
न स्नानानिमात दि: मात्रावत्याम् भैषयात्।
पुनर्वार्यं पृथक् पानं साविदं प्रथमा विधि।
स्नानविवश्यव गात्र प्राप्तम् मर्णवेत्॥"
निषिद्धन्ता तत्तनमाह।
"वञ्चकोतमशुभे बा वेयं तद्विबमापनम्।"
तद्वाभाष्य भविषत दोषमाह।
"कास्यालोदकादीपक्षमयि कुबटोदितम्।
शीतमाद्यं ततोः कार्यं करोति च बलपात्॥"
अधिकं जलम्। भाकाले गुणव दोषमाह।
"अपानमार्पं गणादोऽग्रममयत्युत्तमः।
नीताम आमीमाष्ट्रीति मतवायमिवक्ष्यति"
नातमकाल: आधारशिवस्य अनाराणाममर्थ-
द्वारी भर्ति मधात: आतान् आधीन्
पितीवयारिद्वाफिन्याद्यकमदीरणिमार्यात्
प्रदाति। वीर्यानित्रवि मादकमपि माद्रो-
ष्णवदं:।
"आतीर्णीतीतयतो अर्चोद्भिदुधाच्च्यतोयती।
आमूलितवारी मार्वं च आमोर्क पुन: आशा।
कुविमतस्थं भीर्येन्तागीर्म बोति पुरतीत्।
पापी: मधरगणादि भपुर्वमतेदित॥
सवैत्पाधि सनत्यं सततैगोजनविना।
न तपा सातुमायितिन रना विदिस्यभुक्ता॥
अकमगुमातथ देव्यापैम-
अलमुपापाय न तप दोषा।
वयागवत्ता प्रदिष्टर्थं व
दुपर्मे दुर्भानि विदिवत्॥

मुखपदादौ बल्यं धीतं कार्याकन्दादिरोदिकम्।
मध्ये विद्योषवं पैत्तन्ते गौतकद्रव्यम्॥"
अन्यच।
"समस्तुमवया तुलनमयाम्लपयामुदा:।"
इति वाग्भटः॥ मुखं भोजनम्।
"अग्निमत्सु च बहुशीतान् क्षुधितो न पिबेज्जलम्।
अग्निवत्सु मधिक्षुद्धो क्षुधितस्तु जलोदरी॥"
नतु निशा भोजनामे दुग्धं विशति तु कथ-
मुचितम्। यदिस्या निमतता भोजन-
कालस्य प्रथमो भागो बालस्य द्वितीय: पित्तस्य
तृतीय: कफस्य। अतएवाह।
"अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम्।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान्॥"
अत्रायमभिप्राय:। भोजने पूर्वं मधुरो मधुरो
रसो मधुरभित्वात् बालविषयो: प्रमर्द: भवति।
"भोजनाग्रे मधुराघमनमयी
पित्ताग्नये च वह्निरिति कुत:।
भोजनान्तयमये भूता: कटुतिक्त-
कषाया रसा कफं शमयन्ति॥"
भागो भोजनकालमवत कफकाल-
माला बले पैत्तमवर्ष दुग्धं पातुर्मचितं
भवति। अत उक्तम्।
"दुग्धं वातुरतं स्निग्धमोदनं धातुवर्द्धनम्।
वातपित्तहरं वृष्यं पैत्तलं गुरु शीतलम्॥"
उच्यते।
"विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः।
तद्दाहशमनार्थाय भोजनान्ते पय: पिबेत्॥"
आहार मधुरादयि।
"कुर्यात् क्षीरामलाहारं द्वयमं न कदाचित्।
लवणामलकट्वानि विदाहीनि यानि तु।
तदोषं पवमाहारं मधुरेण शमयेत्॥"
भोजनावसानसमये दुग्धादिमधुरभोजनेन
वह्निनको नवनामलकटुभोजनविभो विबन्ध
वृद्धिं मायति विमत्सितवादिभि बलावादि
वृद्धिबलोऽयमवनि भोजनकर्हानियमान्दा-
र्थीन् आमीन् उत्पादयितुं च शक्नोति॥
"सर्वं भुक्ता समाचामेत् सर्वमयप्रधम्बकम्।
भोजने दन्तलग्नानि निर्हृत्याचमनमचरेत्॥
दन्तलग्नमनिर्हार्यं लेपं मन्येत दन्तवत्।
न तत्र बहुश: कुर्यात् निर्हरणे प्रयत्नतः॥
आचम्य तत्पृथग्जलं पाणिभ्यां चक्षुषोर्मुहु:।
सृष्टा पाणितले चक्षुः अक्षुषोऽपि दीयते।
आदौ नैव स्पृशेत् तिमिराणि अपोहति।
भुक्ता च मंगलोपितमनसा पूर्वान् दुरालमान।
विद्युतपरा गौरवं दोषमाश्च वै तथा।
अगस्त्य नैव मतुर्थं भीमसेनं तथा॥
आहारपरिणामकं
अन्नं सम्यक् परिणमतु मे।
सुखश्च मे सदा दीर्घमायुरस्तु
इत्यनाहरोमत्रं अनव्युत्थितं॥
अजीर्णमसतामप्य उपापं सर्वतिथिं।
वह्नीनाम् संवहतिनं सुखं भवत्यु भोजितं॥

इत्युच्चार्य्य स्वहस्तेन परिमार्ज्य तथोदरम् ।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः ॥”
अतन्द्रितः आलस्यहीनः न तु स्वप्यात् । भुक्तमात्रस्य तु स्वप्नाच्छन्दाग्निः कुपितः कफ इति वचनात् ।
“जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेधते ।
भुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि ॥”
विदग्धे किञ्चित्पक्वे पित्तमेधते किञ्चिदपक्वे कफः ।
भुक्तमात्रे संजातकफस्य प्रतीकारमाह ।
“धूमेनापोह्य कफं वा कषायकटुतिक्तकैः ।
पूगकर्पूरकस्तूरीलवङ्गसुमनःफलैः ।
फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः ।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः ॥”
धूमेन अगुर्व्वादिधूमेन । अपोह्य कफं दूरीकृत्य । कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरीलवङ्गादिभिः । पूगैः क्रमुकैः । सुमनःफलैः जातीफलैः । फलैः एलाहरीतक्यादिफलैः ।
“इति सुभोजिते आसीत शक्तिं यान्ते च मञ्चके ।
सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलभक्षणम् ॥
शतं शतपदं गच्छेच्छनैस्तेन तु जायते ।
अन्नसंघातशैथिल्यं ग्रीवाजानुकटीसुखम् ॥
भुक्तोपविशतस्तुन्दं शयानस्य तु पुष्टता ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥”
चंक्रममाणस्य पदव्रजं शनैर्गच्छतः ॥ ० ॥
“श्वासानष्टौ समुत्तानस्तान् द्विः पार्श्वे तु दक्षिणे ।
ततश्चतुर्गुणान् वामे पश्चात् स्वप्यात् यथासुखम् ।
वामशिरायामनलो नाभेरूर्द्ध्वेऽस्ति जन्तूनाम् ।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम् ॥
शिलोच्चयगतौ यद्वा तूणी वातकपापहा ।
भूशय्या बृंहणी हृद्या खाटपट्टी तु वातला ॥”
इति भावप्रकाशः ॥ ० ॥

अन्यच्च ।
“स्नातो यथावत् कृत्वा च देवर्षिपितृतर्पणम् ।
प्रशस्तरत्नपाणिस्तु भुञ्जीत प्रयतो गृही ॥
कृते जप्ये हुते वह्नौ शुद्धवस्त्रधरो नृप ! ।
दत्त्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रिताय तु ॥
पुण्यगन्धधरः शस्तमाल्यधारी नरेश्वर ! ।
नैकवस्त्रधरोऽथार्द्रपाणिपादो नरेश्वर ! ॥
विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः ।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः ॥”
“अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः ।
न कुत्सिताहृतञ्चैव जुगुप्सावदसंस्कृतम् ॥
दत्त्वा तु भक्तं शिष्येभ्यः क्षुधितेभ्यस्तथा गृही ।
प्रशस्तशुद्धपात्रे तु भुञ्जीताकुपितो नृप ! ॥
नासन्दीसंस्थिते पात्रे नादेशे च नरेश्वर ! ।
नाकाले नातिसङ्कीर्णे दत्त्वाग्रञ्च नरोऽग्नये ॥
मन्त्राभिमन्त्रितं शस्तं न च पर्य्युषितं नृप ! ।
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥
तद्वद्धारितकेभ्यश्च गुडपक्वेभ्य एव च ।
भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर ! ॥”
हरितकेभ्यः चणकचूर्णादिभ्यः ॥

“नाशेषं पुरुषोऽश्नीयादन्यत्र जगतीपते ! ।
मध्वम्बुदधिसर्पिभ्यः सक्तुभ्यश्च विवेकवान् ॥
अश्नीयात्तन्मयो भूत्वा पूर्व्वन्तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ॥
प्राक् द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनम् ।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति ।
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन् ।
पञ्चग्रासं महामौनं प्राणाद्याप्यायनाद्धि तत् ॥
भुक्त्वा सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा ।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य मूलतः ॥
स्वस्थः प्रशान्तचित्तश्च कृतासनपरिग्रहः ।
अभीष्टदेवतानाञ्च कुर्व्वीत स्मरणं नरः ॥
अग्निराप्याययेद्धातून् पार्थिवं पवनेरितः ।
दत्तावकाशं नभसा जरयत्वस्तु मे सुखम् ॥
अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च ।
भवत्वेतत्परिणतौ ममास्त्वव्याहतं सुखम् ॥
प्राणापानसमानानामुदानव्यानयोस्तथा ।
अन्नं पुष्टिकरञ्चास्तु ममाप्यव्याहतं सुखम् ॥

अगस्तिरग्निर्वडवानलश्च
भुक्तं मयान्नं जरयत्वशेषम् ।
सुखञ्च मे तत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे ॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः ।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु ॥

विष्णुरत्ता तथैवान्नं परिणामश्च वै तथा ।
सत्येन तेन मे भुक्तं जीर्य्यत्वन्नमिदं तथा ॥
इत्युच्चार्य्य स्वहस्तेन परिमृज्य तथोदरम् ।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः ॥
सच्छास्त्रादिविनोदेन सन्मार्गादविरोधिना ।
दिनं नयेत्ततः सन्ध्यामुपतिष्ठेत् समाहितः ॥”
इति विष्णुपुराणे ३ अंशे ११ अध्यायः ॥ ० ॥

अपरञ्च ।
“भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः ।
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ॥
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ।
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ॥
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः ।
अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत् परिवर्जयेत् ॥
प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा ।
नाद्यादुदङ्मुखो नित्यं विधिरेष सनातनः ॥
प्रक्षाल्य पाणी पादौ च भुञ्जानो द्विरुपस्पृशेत् ।
शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेत् ॥
नाश्नीयाद्भार्य्यया सार्द्धं नैनामीक्षेत चाश्नतीम् ।
न भक्षयेदभक्ष्याणि नापेयं वा पिबेद्द्विजः ॥”
अभक्ष्याणि तु भक्ष्यशब्दे द्रष्टव्यम् ॥ ० ॥
“भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन् ।
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तम ! ॥
भुञ्जीत चेत् स मूढात्मा तिर्य्यग्योनिं स गच्छति ।
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा ।
नाशयत्याशु पापानि देवानामर्च्चनं तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्च्चनम् ।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः ।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥”
इति कौर्म्मे उपविभागे १७ अध्यायः ॥ ० ॥

व्यास उवाच ।
“प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा ।
आसीनस्त्वासने शुद्धे भूम्यां पादौ निधाय तु ॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥
पञ्चार्द्रो भोजनं कुर्य्याद्भूमौ पात्रं निधाय तु ।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः ॥
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ ।
आचम्यार्द्राननोऽक्रोधः पञ्चार्द्रो भोजनञ्चरेत् ॥
महाव्याहृतिभिस्त्वन्नं परिधायोदकेन तु ।
अमृतोपस्तरणमसीत्यापोशानक्रियाञ्चरेत् ॥
स्वाहाप्रणवसंयुक्तां प्राणायाद्याहुतिं ततः ।
अपानाय ततः कृत्वा व्यानाय तदनन्तरम् ॥
उदानाय ततः कुर्य्यात् समानायेति पञ्चमीम् ।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः ॥
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम् ।
ध्यात्वा तन्मनसा देवमात्मानं वै प्रजापतिम् ॥
अमृतापिधानमसीत्युपरिष्टादपः पिबेत् ।
आचान्तः पुनराचामेदयं गौरिति मन्त्रतः ॥
द्रुपदां वा त्रिरावृत्त्य सर्व्वपापप्रणाशिनीम् ।
प्राणानां ग्रन्थिरसीत्यालभेद्धृदयं ततः ॥
आचम्याङ्गुष्ठमात्रेति पादाङ्गुष्ठेऽथ दक्षिणे ।
निःस्रावयेद्धस्तजलमूर्द्ध्वहस्तः समाहितः ॥
कृतानुमन्त्रणं कुर्य्यात् सन्ध्यायामिति मन्त्रतः ।
अथाक्षरेण स्वात्मानं योजयेद्ब्रह्मणेति हि ॥
सर्व्वेषामेव यागानामात्मयोगः परः स्मृतः ।
योऽनेन विधिना कुर्य्यात् स याति ब्रह्मणः
क्षयम् ॥
यज्ञोपवीती भुञ्जीत स्रग्गन्धालङ्कृतो नरः ।
सायं प्रातर्नान्तरा वै सन्ध्यायान्तु विशेषतः ॥
नाद्यात् सूर्य्यग्रहात् पूर्व्वमह्नि सायं शशिग्रहात् ।
ग्रहकाले तु नाश्नीयात् स्नात्वाश्नीयात्तु मुक्तयोः ॥
मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा ।
अमुक्तयोरस्तं गतयोः स्नात्वा दृष्ट्वा परेऽहनि ॥
नाश्नीयात् प्रेक्षमाणानामप्रदायैव दुर्म्मतिः ।
यज्ञावशिष्टादन्यद्वा न क्रुद्धो नान्यमानसः ॥
आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम् ।
वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम् ॥
यद्भुङ्क्ते वेष्टितशिरा यच्च भुङ्क्ते उदङ्मुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
नार्द्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक् ।
न च भिन्नासनगतो न शयानः स्थितोऽपि वा ॥
न भिन्नभाजने चैव न भूम्यां न च पाणिषु ।
नोच्छिष्टो घृतमादद्यान्न मूर्द्धानं स्पृशेदपि ॥
न ब्रह्म कीर्त्तयेद्वापि न निःशेषं न भार्य्यया ।
नान्धकारे न चाकाशे न च देवालयादिषु ॥

नैकवस्त्रस्तु भुञ्जीत न च साक्षिणोऽपि वा ।
न दारुपात्रभूमौ वा न जलस्थितमाचरेत् ।
भुक्त्वैव धूममाघ्राय तदन्नं परिणामयेत् ॥"

इति कूर्म्मे उपविभागे १८ अध्यायः ॥ ० ॥

अन्यच्च ।

"दत्वा च वृत्तिं पितृदेवताभ्यो
भक्षानिदानीं भक्ष्यमथाविधिज्ञम् ।
शुचः शुचिः सद्यमपोऽपि भोज्यं
तथाम्भसं स्यात् न पुनात् शुभानि ॥
भाद्रे दानमर्थेष्वाचामामत्यं देवनिर्म्मितम् ।
वैदिके मौञ्जिकयो तु प्रजपे भाद्रे तथा ॥
उत्तरान्ते जपे देवे शुचिः सदाचमान्वितः ।
भावैस्तथां दृष्टेषु पुरा द्युत्यादिभिर्वृतः ॥
शुभंयुवं दिनं नित्यं भुञ्जीतामन्तकुमारम् ।
यत्नोऽप्युपमेषास्वाद्यं सोपचारादिभिर्युतम् ॥
अद्भुतमन्त्रवेष्टितैर्वेष्टनैस्तु सुतान्वितैः ।
अत्रप्रकारान् विविधान् भक्ष्यभोज्यकानि च ॥
पार्श्वे भूमौ यतिकाम्ये धुदृक्षे धारयन् सुधिः ।
भोजने भोजने चैव चित्तावधानमद्भुते ॥
यथेष पादपीठस्थः यदिमं हविषी करे ।
भुञ्जानस्तु विधिनैव यमदेवैर्वं निघ्नते ॥
यातुधाना पिशाचाश्च असुरा राक्षसास्तथा ।
घ्नन्ति वैवस्वतं पात्रस्थं निवर्त्तमानात् ॥
आदित्य वरदे यदा यथा चैव पितामहः ।
प्रकाशान्मुपनीयानि तस्मात् कुर्वीत मण्डलम् ॥
चतुष्कोणं द्विजातेस्तु त्रिकोणं क्षत्रियस्य तु ।
द्विकोणमाहुर्वैश्यस्य शूद्रस्य वर्त्तुलं तथा ॥
न मौखे मस्तके पात्रे भिन्नेऽपीमान् कदेऽम्बरे ।
आपः पूर्व्वमनिमग्नेन पुनाचमीत्तं सनातनम् ॥"

कृत्वा चौलिकमन्विष्य पार्श्वे दत्वान्न मण्डलं निरोधनमिमं निपातमभिमन्त्र भूम्यामन्नावपैनि भूमौ पात्रं यतिष्ठापयेत् । आपन्नधाना: पुत्र-दाराः वा यदिदाना: चान्नानां पानमुक्त्वा भागीनः सर्व्वो प्रधानस्य स्वधायीनानित्यमहोनि यदेवमन्नं पुरुषम् । तत्र अपोऽशोऽपि भाग-माहिताकर्षं धनिवसदेत् । अशोषीकारिका मनिमस्य अर्घमश्नादिदमौश्चासमभिमन्त्रयेत् । तद्भूयम्नानि आहरामिमन्त्रो प्रयोजयेत् । भूतपतये नमः भुवनपतये नमः भूतानां पतये नमः इति मन्त्रकादयानि बलित्रयं भूमौ दद्यात् । अपामेवामार्थं निनयेत् ।

"वामस्य कुर्व्वं बाह्यमन्तरमन्त्र पूर्व्वं स्नानम् ।
यमान्तो यातिथेहि तु उत्तरा: प्रमामयिनः ॥
ग्रस्तः स तु निर्दिष्टो यापः सर्व्वोत्तरमितु ।
रात्रौ मध्यन्दिने पात्रो कुरुते विधर्व्विलेन: ॥
मन्त्रामन्त्राद्धनानम्तु न वै सोऽप्यर्च्चयितः ।
यजन्ते प्राये भवान्तस्तु निरुद्धमानयन्त्रमः ॥
प्राक्पञ्चविंशुरादत्, दक्षिणैव क्रमशः ।
प्रभाम्यादेव प्राणायामसमान्विताः ।
अपूर्व्वं सर्व्वं कुर्व्वीत इत्यं प्राप्नोति सायते ।
अन्नमत्तं प्रोच्य प्राणाय निवेदयत् ।
नं भद्रभं परदूतानि दैवीः प्रदो यम् ॥"

अन्नमोपधारयमयीभ्यः अद्भ्योपस्थाय पात्रं निषण्णेत् । यतं मद्याभाव्यनिभिरहः प्रदक्षिणं परिषिच्य सर्व्वेन पानिना पानमविमुच्य मानो-पस्तरणमसीति पुरस्तादधः पौना यथान्नितः प्राणाहुतीर्जुहोति । यदि निविष्टोऽन्नं जुहोमि श्रियोमाविष्णधराद्दाय प्राणाय स्वाहा । अपाने निविष्टोऽन्नं जुहोमि श्रियोमाविष्णाः-प्रदाद्दायापानाय स्वाहा । व्याने निविष्टोऽन्नं जुहोमि श्रियोमाविष्णाप्रदाद्दाय व्यानाय स्वाहा । इति पूर्व्वी भूयो जुहुयात् । प्रभावर्णि मनसा ध्यायेत् ॥ ० ॥ प्राणाय स्वाहेति प्राण-स्तृप्यति । प्राणे तृप्यति चक्षुस्तृप्यति । चक्षुषि तृप्यति आदित्यस्तृप्यति । आदित्ये तृप्यति द्यौस्तृप्यति । दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौ-श्चादित्यश्चाधितिष्ठत स्तृप्यति तस्यानुतृप्तिं अनु-तृप्यति । व्यानाय स्वाहेति व्यानस्तृप्यति । व्याने तृप्यति श्रोत्रं तृप्यति । श्रोत्रे तृप्यति चन्द्र-मास्तृप्यति । चन्द्रमसि तृप्यति दिशस्तृप्यन्ति । दिक्षु तृप्यन्तीषु यत्किञ्चिद्दिशः यं चन्द्रमा-श्चाधितिष्ठन्ति । तत्तृप्यति तस्यानुतृप्तिं अनु-तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्च-सेनेति । अपानाय स्वाहेत्यपानस्तृप्यति । अपाने तृप्यति वाक् तृप्यति । वाचि तृप्यन्त्यां अग्नि-स्तृप्यति । अग्नौ तृप्यति पृथिवी तृप्यति । पृथिव्यां तृप्यन्त्यां यत्किञ्चित् पृथिवी चाग्नि-श्चाधितिष्ठतस्तृप्यति तस्यानुतृप्तिं अनुतृप्यति । तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्च-सेनेति । समानाय स्वाहा इति समानस्तृप्यति । समाने तृप्यति मनस्तृप्यति । मनसि तृप्यति पर्ज्जन्यस्तृप्यति । पर्ज्जन्ये तृप्यति विद्युत्तृप्यति । विद्युति तृप्यन्त्यां यत्किञ्चिद्विद्युच्च पर्ज्जन्यश्चाधि-तिष्ठतस्तृप्यति तस्यानुतृप्तिं अनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति । उदानाय स्वाहेति उदानस्तृप्यति । उदाने तृप्यति वायुस्तृप्यति । वायौ तृप्यति आकाश-स्तृप्यति । आकाशे तृप्यति यत्किञ्चिद्वायु-श्चाकाशश्चाधितिष्ठतस्तृप्यति । तस्यानुतृप्ति-मनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥ ० ॥

"प्राणेऽपि वैश्वदेवाश्च दत्त्वा हविः शुचिर्भवेत् ।
दैविक आतुर्व्वलान्योऽपि; वैदिकं कर्म्मसमा-
हृताः ॥
हृतस्तु मम भोजनं यावद्वाचं शुचि स्थितौ ।
अन्नमाविमरतमपीषुत्पत्तिरनादृ यथः स्थितेः ॥
आर्द्र पूर्व्वोत्तरेदाज्ये वक्ष्ये प्रायश्च निर्वहेत् ।
वाचा मौना च यः कश्चित् भुङ्क्ते पात्रं समृद्
क्षपेत् ॥
स पुनः पुरुषिकाश्लोकी महाभारताश्चक्रयदि ।
अन्नमादिमतममीषुत्पत्तिरात्त्, स्थितेः ॥"

अतः पौनापानाः प्राणाधारमपः पूर्व्वतः । वामतो यज्ञिनमीति पुरस्तान्नाम आदित प्रायतो यज्ञादिति इति प्राणवैदम् । निवो-वेतरमपीति सम्भाविदम् । यो वैश्वानरं-मतीति पुरस्तात् पुरस्तादेशमात्रम् अन्ते । मापिभोजनमात्र निराशो मनात् तदन्त तथाया कर्म्मतिः प्रोक्ता निवृत्तिरिति स्मृते-र्वात्त्र्यं पुरस्तम् ॥ ० ॥

"आदित्यादिरजसां च ब्रह्मचारी च ते यतः ।
अन्नन्ध एव विहन्ति येषां विदितमृतानाम् ॥
हव्यमो ब्रह्मचारी च मौनमंत्र समाचरेत् ।
प्राणादिभ्योऽप्यैन चाहोऽर्थं यदेतु च ॥
अन्नादापातरामे च पानसाधनमादेव च ।
यदोपसदो भवति यो न भुङ्क्ते कदाचन ॥
प्राणाग्निहोत्रमन्त्रास्तु निरुद्धे भोजने सति ।
जेमामिहोत्रमन्त्रस्तु प्राणाणिव तथैव तु ॥
यथा हि व्रतसेवीकतपिदीनं प्रभुज्यते ।
तद्वत् शक्यादि प्राणादि निर्द्धारितमनादिनः ॥
यथेह क्षुधिता बाला मातरं पर्य्युपासते ।
एवं सर्व्वाणि भूतानि अग्निहोत्रमुपासते ॥"

इति ॥ ० ॥

"भोजनस्य निषेधस्तु प्रवक्ष्याम्यनुपूर्व्वशः ।
सोऽप्युष्णो भवयेत् किञ्चिन्न भवेन् वा कदाचन ।
सद्यस्त्वद्यो न भुञ्जीत न पात्रिकं कदाचन ।
अनुत्तमीयदाने च पात्रे यन्त्रकेवलः ।
नोत्सावमीयमानेन च सार्द्धं तु भोजने ।
निःप्रोषि चैकपात्रस्तु न तयोरिह समाचरेत् ।
न रात्रौ निशामध्यं दधि शक्तून् भाषयन् ।
कोविदारवटाश्वत्थपत्राणि न कदाचन ।
चण्डाल कौशिकं करसाधितमपीति ।
पैतृ सर्व्वः पुरोडाशं पुष्पं गोमांसमपि ।
नोच्छिष्टैन शर्म पात्रं प्रसूत् भावमुपनिति भ्रूत् ।
पणान्नं त्रपुष्यं नापि प्राक्तनामापद्मासुप्ता ।
भावामिन्द्रमपाविष्टु नमनागोमीमपिबेत् ।
शुद्रान् कुर्य्यात् समानिर्ये अदिद् शुद्धम्भक्ते ।
नाद्यात्तत्र शिरःस्नातः शिरःप्राप्तनभ्यो निरापया ।
उपानः पीठपादश्च तथा चैवायव्ययिवत् ।
पार्श्वीपाद निषेवित तथा पर्व्वनिशो नरः ।
मानप्रमादं तथा च च दैशिकमावः ।
न च पाद्मत्य परिष्टदमपि सर्द्धनिरव्य वत् ।
हव्यमोर्भुञ्जीत न भुञ्जीत कदाचन ।
नानिर्वादितमश्रीयात् तथा नैवं निरुध्यते ।
न प्रवदेत् निःप्रतिसन्मय पाविवर्त्तिने ।
प्रत्यो पशुप्रमुखी निधायामीन्द्रयन्त्र च ।
न नैवी निरमशीयात अपुष्पं पञ्चानात् ।
अन्नमत्तु न भुञ्जीत तथा देवस्य यतात् ।
कोडे च न निर्वेन् पात्रिं माहूर्ति प्राप्तेन च ।
शुन्नामकोऽपिदाभायो देवादेर्शं तथैव च ।
आहुर्वैनरेना नर निरूपस्य पुत्रम्यः ।
अन्नमो मोऽपिविशिष्टः पुनरत्थापयन्ति ।
सर्व्वोऽर्थं निरमशानि मनोऽश्री नामतृष्णा ॥
अर्णिदवज्रा निरन्नं दत्तानि
अंशानुमायादा अदि पादेशिनो ।
वैदेहु ब्रह्मचर्यमिन्तु मौना
तो अन्यदनी सुप्तो भविष्य ॥

कपट्क्तुपविष्टानां दुष्कृतानां दुरात्मनाम् ।
नैषां तत्क्षमं तावद्यावत् पङ्क्तिर्न भिद्यते ॥
ये यो ब्राह्मणो भुङ्क्ते यस्तस्यै पितृदेवताः ।
ह्रै कुले यत्तदृद्य श्वपचानुम्यमाप्नुयात् ॥”
इति वह्निपुराणे भोजनविधानम् ॥ * ॥
त्रिविधभोजनं यथा,—
उच्छिष्टमवशिष्टं वा पथ्यं पूतमभीप्सितम् ।
ात्त्वानां भोजनं विप्रोर्नैवेद्यं सात्त्विकं मतम् ॥
न्द्रियप्रीतिजननं शुक्रशोणितवर्द्धनम् ।
ोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥
अत: परं तामसानां कट्वम्लोष्णविदाहिकम् ।
ूतिपर्युषितं चेयं भोजनं तामसप्रियम् ॥”
इति कल्किपुराणे २५ अध्याय: ॥ * ॥
श्राद्धादिषु निमन्त्रितस्यान्यत्र भोजने दोषो यथा,—
‘निमन्त्रितोऽन्यतो भुङ्क्ते श्राद्धे दैवे सपैतृके ।
स द्विजो नरके वासं लभते नात्र संशय: ॥”
देवतादिष्वभुक्तवत्सु भोजने दोषा यथा,—
“देवतातिथिभृत्येषु मन्तुषु श्रावणेषु च ।
अभुक्तवत्सु येऽश्नन्ति बालपित्रग्निमातृषु ॥
दुष्टास्ते पूयनिचये निपात्यन्तेऽधमाधमा: ।
त्वचीमुखाश्च जायन्ते क्षुधार्त्ता: किरिविग्रहा: ॥”
“एकपङ्क्त्युपविष्टाय सहुस्थाय प्रयान्ति ये ।
विड्भोजनं राजसेन्द्र ! नरकन्ते प्रयान्ति हि ॥
एकसार्थप्रयाताश्च तथाभ्यर्थापितं नरा: ।
असंविभज्य भुञ्जन्ति ते यान्ति श्लेष्मभोजनम् ॥
पायसं क्षसरं मांसं वृथा भुक्तश्च येनरै: ।
तेषामयोगुडास्तत्र: क्षिप्यन्ते वदनेऽद्भुता: ॥”
इति वामनपुराणे १२ अध्याय: ॥ * ॥
औषधातिरिक्तकिञ्चिद्भोजनवतो नित्यनैमित्तिकक्रियानिषेधो यथा,—
“स्वे भुक्ते त्वचीर्णे च नैव भुक्ता च किञ्चन ।
कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा ॥
मद्यं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
अन्नादिपिण्यल्यनाश्च फलं भुक्ता न चाचरेत् ॥
अवस्थापि नरश्रेष्ठ ! भोजनाद्यैरवाहतै ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकै: सदा ॥”
इति कालिकापुराणे ५४ अध्याय: ॥
भोजने प्राकृविधौ दिङ्नियमो यथा,—
“पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पवित्रश्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अपाच्याभिमुखे पक्वा अन्नतां विजानीहि ।
पूर्व्वामुखो धर्म्मकाम: पीकश्चानिष्ट दक्षिणे ।
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नर: ॥”
पाकपात्रनिरूपणं यथा,—
“यदा तु आयसे पात्रे पक्वा अश्नाति वै द्विज: ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्वा चतुर्वर्णो भवति वै च्यव: ।
पित्तली पक्वमन्नञ्च पित्रर्थेन यशस्विनि ! ॥
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ।
मातुरेव तु यत् पक्वं भगिन्या च वनितया ।
अगम्योनेव यत् पक्वं पोऽन्नं तदपि त्यक्तम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥”
पाककाष्ठनिरूपणं यथा,—
“उडुम्बरस्य काष्ठेन कदम्बस्य द्रुमेण च ।
श्यालेन करमर्द्देन उदरायर्कणेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्ता रात्रिमुपावसेत् ॥”
निषिद्धान्नं यथा,—
“गर्हितान्नमवीरान्नं भुक्ता चान्द्रायणञ्चरेत् ।
अप्रजा या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कालपलाशकस्यैव वचवारणकस्य च ॥
भेरुण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥”
पाकपात्रत्यागकालो यथा,—
“यदा न्यस्यपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टासु तत्पात्रं विसृजेद् गृही ॥
पशु:पाके तथा सिंहे मीने चैव वरानने ! ।
य: कुर्य्याद्भोजनं देवि ! कृच्छ्रेणैव विशुद्ध्यति ॥”
पाकार्थजलदानं यथा,—
“एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥”
भोजनस्थानादि यथा,—
“उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यत: ।
प्राङ्मुखोऽन्नानि भुञ्जीत शुचि: पीठमवस्थित: ॥”
पीठनिरूपणं यथा,—
“सार्द्धहस्ते चतुष्कोणे चक्रकारविनिर्म्मिते ।
आम्रभद्राद्रुमये प्रादेशोच्छ्रायसंयुते ॥
वटासने भवेद्दृष्टिर्भद्रके श्रियमाप्नुयात् ।
आम्रे धनविवृद्धि: स्यादभ्मेरखिक्षु भद्रके ।
शालासने कपीतकी किंशुके मरणं भवेत् ॥”
भोजने दीपनिरूपणं यथा,—
“घृतदीपाश्च यत्फलं तैले धेनुफलं लभेत् ॥”
भोजने चाण्डालादिदृष्टिनिषेधो यथा,—
“यदा भोजनकाले तु चाण्डालै: पतितैस्तथा ।
शकुक्कुटवराहैश्च श्वपक्षैश्च अन्त्यजैरपि ।
अन्नं वायस पात्रं वा हृष्टमात्रं परित्यजेत् ॥”
“रजस्वलाया: संस्पृष्टोऽथवा श्वसा प्रमादत: ।
सतलो वर्ज्जयेद्देवि ! अन्नं प्रोक्षणञ्चरेत् ॥
देवालये तथा तीर्थे सिद्धक्षेत्रे च शङ्करि ! ।
प्राङ्मन्यानां नमान्ते तु भुक्ता क्रतुफलं लभेत् ।
आचान्तो भोजनं कुर्य्यादनामायां हिरण्ययुक् ।
सुवर्णेन त्वदीदम् तदन्नं चाण्डरां विदु: ॥
रज:स्पृष्टं यदन्नञ्च भुक्ता भवति किल्विषी ।
पौष्यकेण त्वशीदममथ विष्ठान्नं भवेत् ॥
वैदूर्य्येण माणिक्येन स्फाटिकेन त्वदीदपि ।
सर्व्वेण संस्पृशेदन्नं तदन्नं शुचितामियात् ॥”
भोजने दिङ्नियमो यथा,—
“आयुष्यं प्राङ्मुखो भुङ्क्ते रात्रौ चैव उदङ्मुख: ।
यशस्वी दक्षिणे चैव पश्चिमे तु विवर्ज्जयेत् ॥”
भोजने मण्डलानि यथा,—
“मण्डलं भोजने काले चतुष्कोणं द्विजस्य च ।
क्षत्रियस्य भवेद्दीर्घं वैश्यस्य कूर्म्मपृष्ठकम् ।
स्त्रीशूद्राणां भवेद्वृत्तं शकटाकारमेव वा ॥”
अथ भोजनकाल: ।
“सायं प्रातर्द्विजातीनामशनं देवनिर्म्मितम् ।
नित्यमह्नि तमश्निन्यां सार्द्धप्रहरयामत: ॥
रात्रौ यामत्रयान्ते च सन्ध्ययोर्न कदाचन ।
अकालभोजनं कृत्वा प्राणायामेन शुद्ध्यति ।
अहोरात्रेश्च सन्ध्यायां भुक्ता कृच्छ्रं समाचरेत् ॥”
मोदकादिभक्ष्यानन्तरमन्नभोजनविधिर्यथा,—
मोदकं कन्दुपक्वञ्च भक्ष्याद्यं घृतसंयुतम् ।
पुन: पुनर्भोजने च पुनरन्नं न दुष्यति ।
त्रिसन्ध्यं भुक्तवान् यस्तु न स स्वार्थे द्विज: क्वचित् ॥
भुक्ता रात्रिमुपगमे कृच्छ्रेणैकेन शुद्ध्यति ॥
कोलं हरिद्रा सौवीरं मरीचं जातिकोषकम् ।
ग्रन्थिपर्णादिकं सर्व्वं गन्धद्रव्यं तथौषधि: ।
प्रशस्तमेषामामान्नं स्विन्नञ्चापि न दुष्यति ॥
कुटुम्बभरणार्थाय पाकं पश्चान्निवेदयेत् ।
वैश्वदेवान्तमुद्दिश्य भोजयेन्न विचारयेत् ॥
नाश्नीयात् केवलं रात्रौ तिलश्चैव तथा दधि ।
अङ्केन त्वजपुच्छेन काष्ठखण्डेन वह्निना ।
पङ्क्तिभेदं तत: कुर्य्यात् पश्चाद्भुञ्जीत वाग्यत: ।
हस्तदत्तं यदन्नञ्च शूद्रादत्तं न भक्षयेत् ॥
घृततैलञ्च लवणं पानीयं पायसं दधि ।
रविवारे तथा षष्ठ्यां भौमवारे दिनक्षये ।
पर्व्वकाले च द्वादश्यां द्विर्भक्तान्नं न भक्षयेत् ॥
न वामेन पिबेत्तोयं न रसं तक्रमेव च ।
भेकाद्यश्विमुखाद्यैरेवं तथा पारावतैरपि ॥
कणविद्धै: पत्रगैश्च पाके स्पृष्टेऽपि सुन्दरि ! ।
गोधया वनमार्ज्जारै: पाकं न विसृजेत् क्वचित् ॥
सुवर्णरौप्यमये पात्रे पाषाणे अश्मपत्रके ।
यद्यद्भुक्ता तु देवेशि ! पराकस्य फलं लभेत् ॥
पूर्व्वायां स्वर्णपात्रे च भोजनं य: समाचरेत् ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
स्वर्णपात्रे पश्चिमायां उत्तराभिमुखेन वा ।
तदन्नं शौकरं मांसं भुक्ता चान्द्रायणञ्चरेत् ॥
सर्व्वकाम: स्वर्णपात्रे यशस्वी स्वर्णरौप्ये च ।
पद्मपत्रे भवेन् पुष्टिर्विप्राग्नौ तु पुण्यवान् ॥
अर्थी भवति ताम्रे च कांस्यपात्रे दरिद्रता ।
मृत्पात्रे भवेद्राज्ञ: स्वर्णे कीर्त्तिमाप्नुयात् ॥
मधुपत्रे च रोग: स्यादष्टपत्रे तु वैभव: ।
शालपत्रे भवेत्कामी पनसे चैव सम्मति: ।
निम्बपत्रे प्ररोहे च पुन: संस्कारमर्हति ॥”
इति मत्स्यसूक्तमहातन्त्रे ३४ पटल: ॥
अथ सामुद्रभोजनविधि: । बहि:प्रक्षालितपाणिपादवदनो रमणानिर्व्वाधा द्विराचान्तो गोमयोपलिप्ते प्राशी देवे स्थले शुद्धोचासनोपविष्टो धर्म्मार्थकाम: प्राङ्मुख उदङ्मुखो वा मध्यन्दिनो भोजनिक्षमाष्टकेनराचां दक्षिणामुखो धनकाम: प्रत्यङ्मुखो भूं‍मिघ्रदक्षिणमार आचमनाद्गुग्गुलादिमार्ज्जितौ दक्षि-

नदीकूलतटाकोदपानेषु दक्षिणायनेऽपि चतु-
ष्कोणमण्डलं कृत्वा भोजनाग्नेयभागादि-
पूर्वमध्योत्तरपश्चिमदक्षिणपत्रामध्यमेषुनर-
नार्थं विधाय तत्रान्नं च व्यञ्जनं वामत
दक्षिणपात्रेण भक्ष्य पेयाणि नदुपरि भोजि-
तपात्राणामपि चत्वारि प्रतिविद्धिषरमहा-
दिकं संस्थापित्वा अर्घ्यं दत्त्वा ततश्चिन्तयेत्। तस्मात्
निवेदितान्नस्य दक्षिणस्य पंक्तौ चाचारादनु-
ष्ठोतमन्नत्रप्याचरेत् जलमिश्रितजलोपरि ॐ
नारायणाय नम इत्यनेन जलं मध्ये दद्यात्।
तदग्रे ॐ भूः स्वाहा ॐ भुवः स्वाहा
स्वाहा ॐ भूर्भुवः स्वः स्वाहा। इति चेन-
न्मुद्रया दद्यात्। तदिदं भोजनकल्पं ॐ
विष्णवे नमः इत्युक्त्वा जलं हित्वा ॐ
विष्णुपादाय नम इति दत्त्वा चाचारादि विष्णु-
निर्माल्यमुचनीयं तदिदं विष्णुपादोदकं पुरा
च गृहीतव्यमित्युपदेशः।
"ॐ शङ्ख शङ्ख महाशङ्ख भक्ताभक्तादि-
भावन।
अकालमृत्युहरणं पापोदकं प्रयच्छ मे।"
इति मन्त्रेण दक्षिणहस्तस्थाङ्गुलिभिः गृहीत्वा
पयं निःशेषं वा ॐ अमृतोपस्तरणमसि
स्वाहा इत्यनेन पीत्वा।
"ॐ अकालमृत्युहरणं सर्वव्याधिविनाशनम्।
विष्णोः पादोदकं पूर्वं पीत्वा धारयाम्यहम्।"
इत्यनेन पादोदकमपि पिबेदिति दद्यात्।
"ॐ पृथिवीविवरस्य यमुनिवहदकादिकः।
ऐन्द्रकोणायनेन विशदनानां विधानितः।"
इत्युक्त्वा अङ्गुष्ठाग्रमितकं अन्नमन्नोपस-
मारेण महासौधे अङ्गुष्ठमङ्गुलिभिश्च ॐ
प्राणाय स्वाहा इत्येव हुते दत्त्वा सर्वत्राग्नौ
जिहीर्षेत्। एवं ॐ अपानाय स्वाहा ॐ व्या-
नाय स्वाहा ॐ उदानाय स्वाहा ॐ
समानाय स्वाहा। ततो मौनेनान्नं भोजी
भुञ्जीत। ततः प्रथमं मधुरमपूर्वं मध्ये कटि-
काम्लवणादि अन्ते ककुप्पकषायादि
अन्नाद्यं भोजनं आहुरेतद्वरमोक्षु-
ल्लिनः अन्यत्र तेषु भुञ्जीत। यथारुचिं अथ
सर्वं च सम्पन्नम्, अनन्तरदक्षिणमनुष्याय-
ष्टमाङ्गैकरसावा दीर्घं उष्णोदकम्। भोजने
अंगुष्ठं तु सांसमोचके यदा प्रयत्नं नान्येभ्यो
न च समक्षान्नेन नाभिम् एव अन्यं दत्त्वा
ॐ अमृतापिधानमसि स्वाहा इति आचमनं
दत्त्वा पात्रं जलान्वितं ॐ रौरवेऽपुण्य-
निलये पद्मार्बुदनिवासिनाम्। अर्थिनामु-
दकं दत्तमक्षय्यमुपतिष्ठतु। भूमौ निक्षिपेत्।
भोजनकाले तु विष्णुमर्चयेत्तदनु
विष्णुपदं स्मृत्वा न दोषः। ततः आचमनं
च कुर्यात्। भोजनादनन्तरं मुखशुद्धिमस्तकेश
स्पर्शादिना विधानेनाचम्य स्मृत्वा यथोप-
स्थानं दक्षिणहस्तेन नित्यं तर्पयेत्।
यत्र कृत्वा भवेत् न निःशेषं भवेत् न दोषः।

ततो विष्णोः पादं श्रुत्वा भगवद्भक्तैर्गण्डूषाचमनं
कृत्वा वामो पादो च प्रक्षाल्य आचम्य पद
भूमौ पादौ दत्त्वा हिरण्यं स्वर्णं सुवर्णो-
पस्थितं संशोध्य दक्षिणपादाङ्गुष्ठे दक्षिण-
करेण—
"ॐ अङ्गुष्ठमात्रपुरुषो ह्यङ्गुष्ठञ्च समाश्रितः।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक्।"
इति मन्त्रेण जलं दद्यात्। ततो यज्ञोपवीतं
आपि अङ्गुष्ठमादिनियमेन भोजनपात्रमुक्तम्
तत् स्थानं उच्छिष्टमपनीय गोमयोदकाभ्यां
संलिप्य निधेत्। शुचः प्रक्षालितहस्तपादं
उपविश्य भोजदेवतानाम स्मृत्वा—
"ॐ अगस्त्यं कुम्भकर्णं च शनिं च वडवानलम्।
दत्तात्रेयं समाश्रित्य अरण्यमस्तु मे सुखम्।
अन्नं ग्रासाय मे भूमिर्यामिन्यां विलयं च।
भक्तिनत्यहिमनौ समाक्ष्याहतं सुखम्।
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं पुष्टिकरञ्चास्तु ममाप्याप्यायनं सुखम्।
अगस्तिरग्निर्वडवानलश्च
भुक्तं ममान्नं जरयन्त्वशेषम्।
सुखं प्रयच्छन्तु हिताय नित्यं
अव्याधिताः मम चास्तु देहे।
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनात्तमशेषमन्न-
मारोग्यदं मे परिणाममेतु।
विष्णुरत्ता तथैवान्नं परिणामश्च वै तथा।
सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं तथा।"
इत्युक्त्वा वामहस्तेनोदरं परिमार्जयेत्। ततः
पादप्रक्षालनादिकं वामपार्श्वेन विश्रामार्थं
शयितव्यम्। तत्राम्बूलादि सुवासितकर्पूरं
भोक्तव्यम्। इत्याह्निकाचारे प्रथमकाण्डोह-
तकम्। ०। अथ भोजनादिविधानम्।
"भोजनाच्चाष्टमं दक्षा दत्ता पीठपादौ द्विज।
च कुर्वीत अङ्गुष्ठ मर्देनं भोजने चापि।
विद्वान् सम्यक् पश्यन्तु पुनः सङ्कल्पयो विधेत्।
विद्यादिकं च विधाय यो दद्याद्भोजनं नरः।
अन्नं शाको धर्मं ग्रामः प्राज्ञपीडकदुष्टकी।
तदादौ भक्ष्यादिकं दत्त्वा स्तुत्वा द्विजः।"
इति गरुडपुराणम्।
भोजने वर्जनीयो यथा,—
"नाश्नीयात् सन्ध्ययोर्नाग्निरिवाश्नीयात्तु भोजनम्।
दुष्टं च नग्नं शयानं न अर्धरात्रे नैव भोजनम्।
न शुद्धेन व्याधितो भोजनं कुर्यात् द्विजः।
स्नात्वा न शिखिकः सर्वमर्यादानुगः।
आर्द्रं इन्द्रियैः भोजनं समाचरेत्।
इदमर्धं पूर्वरात्रे च ब्रह्मकर्मा द्विजे दिने।"
इति कर्मलोचनम्।
अथ विष्णुकी उच्छिष्टभोजनविचारादि। यथा,
सप्तः।
"स्त्रीशूद्रपादं भक्षि च गरुडिकाः।
अन्नं त्यजेत् स्वर्णं यत्नं भुञ्जे भुञ्जे।"

यद इति सुपः श्वानः शाकुनादयाः) पञ्च-
विधात्मनो।
"अमस्य प्राचं भोज्यं शाक वणिक् पुः।
भोजनं प्रथमे शाक रत्ने यवन्तु वृ।
हास्यकलिकोलाहलेषु मद्यमेयु।
कर्मणामपरामो कथा विधानाकवीरम्।"
सुन्दरम्भोधि।
"एवे मासि शितासि सुनासि निर्दिशेत्
भर्तृः।
सौम्याधिकानिर्धुयीविश्वये मद्ये च सर्वेः।
प्रायेषादिनिर्धिवर्जितानुमेत्तक्षदेषयुक्तः।
दानेनाम्नामिनियमेन विश्रामाधिकं
पुनः।"
पूर्वेद्युरिति प्राक्दायो दक्षिणं सम्यक् दर्
गिरादिधिषूर्वे निर्दिशेत्।
"वस्तुन्यस्मुभीक्ष्यमान्त्रेष्टमद्यम्।
विक्रोधनेकस्याम्यपदा वहनं वनस्
दुष्टः प्रमथौ कथा महाकलौ मधुदे।"
मार्कण्डेयपुराणम्।
"वैष्णाष्टुराणाम्य विद्युन्दृष्टाल च।
अनदृष्टस्य रानवासं पार्श्व च चाक्षे।
मध्याह्ने स्नानोदक प्राय्येत् पानकम्।
जनपायनकृतान्तः मानुषं न भवेत्।
दैवायनोऽपि विकृतः विनयाधारि दर्श।
प्राक्षाबिषेत्र प्रक्षाभिः नः पाठं कथः।
प्रयतं वत् मूत्रकाः द्विजानां सर्व कृत।
भोजितानां च वाच्य देवे नु भ्रम्।
लोमनाद् संयमात् भोजनात्।
"दातारो वनाद् दिवे दिवसो क्षेत्र-
[illegible]
देवी भोजनाथाः दिक्षितो वीथे यः
[illegible]
भीषे भोजनतीर्थ्यो मध्याहे विभाग
[illegible]
हृषि भोजनाभिनोः विभक्तो स्वे च
[illegible]"
इति ज्योतिषम्।
[illegible]

दिमके पात्रे सुविस्तीर्णे मनोरमे ।
सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ।
सखेभक्ष्याश्च परिशुष्काणि यानि च ।
दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ।
णि रसांश्चैव पाणीयं पानकं पयः ।
यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ।
गुडविकारांश्च रागषाड़वसट्टकान् ।
स्थापयेत्प्राज्ञो द्वयोरपि च मध्यतः ।
श्राय मतिमान् भोजनस्योपकल्पनाम् ।
रं विजने रम्ये निःसम्बाधे शुभे शुचौ ।
पुष्परचिते समे देशेऽथ भोजयेत् ।
मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ ।
ऐषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
फलानि भुञ्जीत दाड़िमादीनि बुद्धिमान् ।
योऽस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततःपरम् ।
वं समश्नीयात् केचिदाहुर्विपर्ययम् ।
मन्ते च मध्ये च भोजनस्य तु शस्यते ।
ायसयामास्तु यथा येष्वहस्सु स्मृताः ।
तुप्रवृत्तौ कार्त्स्न्येन भुञ्जीत प्रातरेव तु ।
ापि भवेयुश्च दिवसा भृशमायताः ।
तृकालविहितमपराह्णे प्रशस्यते ।
ो दिवसाश्चैव येषु चापि समाः स्मृताः ।
ाममहोरात्रं तेषु भुञ्जीत भोजनम् ।
तु सुसंस्कृतं शुच्या दोषैरेतैर्विवर्ज्जितम् ।
कगुणसम्पन्नमुपसेवेत भोजनम् ॥"
त्रं, क्ली, (भोजनस्य पात्रम् ।) भक्ष्यद्रव्या-
। यथा,—
तिष्ठन्ति यत्र नवकाञ्चननिर्म्मितानि
चीक्षतानि परितस्तु कटोरकाणि ।
ाकाशशाङ्कनवमण्डलभास्वरं यत्
णिभृतो रजतनिर्म्मितथालकं स्यात् ।
ईशनिभादर्शिकास्यमादर्शवत् शुचि ।
दर्द्दं सुविस्तीर्णं स्त्रीणामत्यन्तदुर्लभम् ।
त्रासीरे भवति वा नृपभोजनाय
सर्वेभुभाजदिशामशवारिधीना ।
ालाशभूरुहदलैरपिता मनोज्ञा
ाडंमिपर्णकगणैः परिवेष्टिता च ॥"
इति पाकराजेश्वरः ॥
तिः, पुं. (भोजानां भोजवंशीयानां पतिः ।)
राजः । यथा,—
ानामशनिर्नृणां नरवरः स्त्रीणां स्मरो
मूर्त्तिमान्
ानां स्वजनोऽसतां क्षितिभुजां शास्ता
स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराड़विदुषां तत्त्वं परं योगिनां
ोनां परदेवतेति विदितो रङ्गंगतः साग्रजः ॥"
श्रीभागवते १०स्कन्धे ४३ अध्याये १७ श्लोकः ॥
रं, क्ली, (भोजस्य भोजराजस्य पुरम् ।)
ामस्थानविशेषः ।
ार्विरभूद्भोजपुरे याचकसुरतरोः ।
दैत्यारे यमलो मूर्त्तं ते जयौ यौ ॥"
इति विदग्धमुखमण्डनम् ॥

भोजयिता, [ऋ] त्रि, (भुज्+णिच्+कर्त्तरि तृच् ।) भोजनकारयिता । भोजप्रयोजकः । यथा,
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता
सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याये ॥
भोजाधिपः, पुं, (भोजस्य अधिपः ।) कंसराजः । इति शब्दरत्नावली ॥
भोज्यं, त्रि, (भुज्यते इति । भुज्+कर्म्मणि+ण्यत् । "भोज्यं भक्ष्ये ।" ७ । ३ । ६९ । इति निपातनात् न कुत्वम्) भोजनीयद्रव्यम् । यथा,
"भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥"
इति चाणक्ये ५१ श्लोकः ॥
अपि च ।
"आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम् ॥"
चूष्यं इक्षुदण्डादि । पेयं पानकपूर्णोदकादि । लेह्यं रसालाक्वथितादि । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि । इति भावप्रकाशः ॥ (पितॄणां तृप्त्यर्थं देये अन्नादौ च ।)
भोज्यदानस्यैतिकर्त्तव्यता यथा । ॐ अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्म्मण एकोद्दिष्टविधिकसाम्वत्सरिकश्राद्धवासरे अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽक्षयस्वर्गकाम इदं सघृतसप्तव्योपकरणामान्नभोज्यमर्च्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । ततो दक्षिणा । ॐ अद्येत्यादि एतैतत्सघृतसप्तव्योपकरणामान्नभोज्यदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनमल्यं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । एतैतत्सघृतसव्योपकरणामान्नभोज्यदानकर्म्माच्छिद्रमस्तु । इति श्राद्धप्रयोगतत्त्वम् ॥
भोज्यसम्भवः, पुं, (सम्भवत्यस्मादिति सम्भव उत्पत्तिकारणम् । भोज्यं सम्भवोऽस्य ।) शरीरस्थरसधातुः । इति शब्दचन्द्रिका ॥
भोटाङ्गः, पुं, (भोटस्याङ्गमिवाङ्गमस्य ।) देशविशेषः । इति शब्दरत्नावली । भोटान् इति भाषा ॥ (भोटाङ्गोऽपि पाठः ॥)
भोभो, अ, सम्बोधनम् । इति हलायुधः ॥ (यथा, महानाटके । १ । १८ ।
"भोभो भुजङ्ग ! तरपल्लवलोलजिह्व !")
भोलानाथः, पुं, शिवः । यथा,—
"ब्रह्मणो वचनं श्रुत्वा भोलानाथः कृपानिधिः ।
संपूज्य तौ महात्मानौ कालोऽभयदोऽभवत् ॥"
इति श्रीशिवपुराणोत्तरखण्डे शुक्रियामदेवसंवादे वाराणसीमाहात्म्ये पञ्चाशीतितमायां महाकालखण्डोत्पत्तिर्नाम ८५ अध्यायः ॥ ० ॥
पुस्तकान्तरे भोलानाथ स्थाने महादेव इति पाठः ॥

भौलिः, पुं, उष्ट्रः । इति त्रिकाण्डशेषः ॥
भौतः, पुं, (भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः । भूत+अण् ।) भूतयज्ञः । बलिकर्म्म । यथा,—
"शौरो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इत्याह्निकतत्त्वम् ॥ देवलः । इति शब्दमाला ॥ (भिक्षादिभ्योऽण् । भूतसङ्घः । तस्येदमित्यण् ।) भूतसम्बन्धिनि, त्रि ॥
भौतिकं, क्ली, (भूतानां विकार इति ठञ् ।) मुक्ता । इति राजनिर्घण्टः ॥ त्रि, भूतसम्बन्धि ॥ (भूतानि क्षित्यादीनि तद्विकारश्च गोघटवृक्षादयः ।
"आहङ्कारिकत्वश्रुतेर्न भौतिकानि ।" इति । २ । २० । सांख्यसूत्रम् ॥ सृष्टिविशेषश्च । तद्यथा । "ईश्वरकृष्णकृतसांख्यकारिकायाम् । अष्ट विकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ अत्र च सर्गे चैतन्योत्कर्षापकर्षविशेषात् तारतम्यम् । यथा, तत्रैव । ऊर्द्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः । मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥
भौतिकः, पुं, महादेवः । इति त्रिकाण्डशेषः ॥ (उपद्रवः । व्याध्यादिः । पश्वादि । शरीरादि ॥ (भूतेषु महदादिषिव्यक्तेषु आत्मबुद्ध्या उपासकाः भौतिकाः । मोहविशेषाः ।
"भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः ॥"
इति पातञ्जलयोगसूत्रव्यासभाष्यटीकायां वाचस्पतिमिश्रधृतवचनम् । १ । १९ ।)
भौती, स्त्री, (भूतानां भूतयोनीनामियमिति । भूत+अण् । ङीप् । यस्यां भूतानामधिकारित्वविद्यमानत्वात्तथात्वम् ।) रात्रिः । इति हेमचन्द्रः । १२२ ॥
भौत्यः, पुं (भूतेरपत्यं पुमान् । भूतिः+अपत्यार्थे यञ् ।) भूतिमुनिपुत्रश्चतुर्दशो मनुः । यथा,—
मार्कण्डेय उवाच ।
"अतः परन्तु भौत्यस्य समुत्पत्तिं निशामय ।
देवांश्चर्षींस्तथा पुत्रांस्तस्यैव वसुधाधिपान् ॥
बभूवाङ्गिरसः पुत्रो भूतिर्नामातिकोपनः ।
तस्य भ्राता सुवर्चाभूद्यस्तेन विमलिनः ॥
शिष्यस्तु शान्तिनामाभूद्धिष्यमान्व महामुनिः ।
सदोद्युक्तं तदाचारसदारं सनियतमम् ॥
भूतिरुवाच ।
यद्वं यद्र्गमिष्यामि भ्रातुः शान्ते ! सुवर्चसः ।
तैमाद्भुतश्चया वेद यन्मे कर्णयं तत्कर्म तत ॥
अतिभागचर्यं वह्निस्तथा कार्य्यं समाचरे ।
तथा तथा प्रयतेन यथाग्निर्न शमं व्रजेत् ।
इत्यादि मदिरालः स तु शिष्येण शान्तिना ।
जगाम यज्ञं सं भ्रातुराहूतः स यवीयसा ।
शमान्तकावसाने यो भौती भूतिनिर्दयः ।
सं दृष्ट्वा तोऽभवं यात्वं शान्तिरवसाद्धुःखितः ।
भौतश्च भूतैर्दृष्ट्वा विमानन् न महाद्युतिः ।

मार्कण्डेय उवाच ।
बृहद्रथे दिविष्टानां भौत्यस्य गता गुरोः ।
शान्तिमानहितो देवः प्रयर्थं चात्मवेश्मनम् ।
न चचार तथा सोऽथ ममाङ्गे संगतात्मवः ।
सुमेधसिन्नो मेदिनां महाभागः क्षमार्जितः ।
स एवं संस्तुवतेन मनसा वह्निवाहनः ।
व्यानाममार्थाङ्गनां तदाभौत्यतो मुनेः ।
दारेषु दीर्घाद्भि ते वित्त । ममात्र वत्ते स्तुतिः कृता ।
वरं वृणीष्व भवतः प्राथितं यद्वमेष्ठितम् ।
अभवत् । हव्यवाहो विनयात् भयादिहयर्थिनम् ।
नचापि मन्त्रिवरतः भगवन् । सूनुना मम ।
अमावस्यात् संभवं यद्यदिदं विमावसो ।
नमतोपिदिवं सोऽद्य पूर्णवत् मामतो हितः ।
तथापि विमे देव । यथार्थ पुत्रके यदि ।
पुत्रो विधिवते भवतु तिरपदान् मे गुरो ।
तथा च मे यो भवेत न कदाचन मे गुरुः ।
तथा समागमेषु भवताव मतो मम ।

अग्निरुवाच ।

गुरोरस्य तथा भवत् । यानिमं यदसूतम् ।
कार्ये नैव मे भौतिकत्वेऽपि महाप्रभे । ।
अविच्छिन्नहितरूपं गुरोर्धेनु प्रार्थितं तथा ।
भौत्यो कमलभूतेषु पुत्रस्तव भविष्यति ।
अमरकराविभः पुत्रो भौत्यो नाम भविष्यति ।
महारथो महावीर्यो महाभागो गुरोस्तव ।
रक्षिता मनवत्विः शास्त्रवान् वै तुभे । ।
आदित्यसंभवः सूदः महीयो दिवं गतो यथा ।
यथादिग्वहदे वाऽपि पुरुषस्य महात्मनः ।
आत्मवीर्यादयो यथाविधिमतम् यथायतम् ।
तथाकरणात् क्षिप्रोऽसौ सर्वे धारामिवम्बयत् ।
वदीनाश्च पूर्ववत् तमाप्य न तदा गुरुः ।
यदाभिषाद् नापि मे तथाभिमपि मनुः ।
स देवि विधिवं सर्वतःपूर्वेण कथयामि मे ।
तत्र न द्यामिमान् सर्वमाप्यावेद महात्मने ।
अविचारादिर्दं विच । तमाचर यथायतम् ।
तत्पुत्रा न तदिमम्ब देवाइयो गुरुः ।
हिमवान् वरो देवान् वाड़्मिनाम् महाप्रभे ।
भौत्यो नाम मनुश्च पुत्रो भूविपालक ।
मध्य समन्वे देवान्पौत्र भूपाय मे प्रभु ।
अभिषक्त भविष्यति भरतो मम विचारात् ।
देवतो वच भविना तथ विश्वानवसैः ।
भगवान् यतिस्वाच यशिभा भाविनानद्याः ।
रचोऽस्माव रसैनै च वैश्मनाः क्षमाः ।
सुविदिश्च विश्वया नैवो विदुषो भविष्यति ।
महारथो महावीर्यः सर्वैस्त्वत्पुत्रैर्युतः ।
यदोच्चासितानुष्ट पूर्वदर्शनेऽव मन्वन्तः ।
पुत्रो विनय यदै वरः मनवः क्षमाः ।
पुत्रसंमीति मद्य महाभागः हृत च ।
भोमान्ते च दोरिय विश्व वैभवन्यवदः ।
वैरुधो पुत्रवद्वै भौत्यस्ते गतो गृहम् ।
मनुर्देव महीपते मन्वन्तरं शतपञ्च ।"
इति मार्कण्डेयपुराणे मन्वन्तरप्रकरणनाम-
ध्याय. ॥

भौमः, पुं, (भूमेरपत्यं । भूमि+शिवादित्वादण् ।) मङ्गलग्रहः । (यथा, बृहत्संहितायाम् । ६ । १० ।

"वक्रम् यदि भौमो
द्वादशधनुर्नवगते शुक्रे च ।
भौमः कुमुदाधिपति
विविधगौर्य प्रयच्छति ॥")

नरकासुरः । (यथा, हरिवंशे । १२० । २४ ।
"ताञ्छ्रुत्वा सुरगणं भौमो नरकवधा-
. . मर्पितम् ।")

तत्र्पेदमिन्द्रन्म् । भूमिमयी, त्रि । इति मेदिनी । मे, १९ । (यथा, महाभारते । १ । १६६ । २० ।
"भौमेन हाविसद्भूमिं मार्गेनैवायमद्भुतिः ।
अघमर्षणेन वाप्तेन पुरस्तादिदमैौऽभवत् ॥")
अम्बरः । इति शब्दादि । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

भौमकर्म, क्ली, (भूमि+घञ् ।) भूमिपतनोऽभि-
धाविकम् । तत् त्रिविधं यथा,—
"भौमकर्मो त्रिविधं प्रथमं त्रिविधं बुधैः ।
आगमं मध्यमं तथा साधारणं क्रमात् ॥"
तेषां लक्षणानि पुराणे ।
"यस्तोदको जलदस्य विग्रहस्यालयानिनः ।
देशोऽभूत इति ख्यात आनूपं महदं जलम् ।
मिश्रधितृणशु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे मधुरं तनु साधारणं स्मृतम् ।
आनूपं सलिलं स्वच्छं करणं मधु लघु ।
वहिकम् जनयन् पथं विकारान् कुरुते बहून् ।
आनूपं मार्गेभिस्यदि स्याद् स्निग्धं सर्वं गुरु ।
वहिकृत् कफर्दातिकं विकारान् कुरुते बहून् ।
साधारणम् मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं तृष्णादाहदोषकमनम् ॥"
अथ भौमजलेन नदीजलादीनि कल्पानि
पुराणे । तत्र नादेयस्य लक्षणं पुराणे ।
"नद्याः नदस्य वा भौमं पानीयमिति कीर्तितम् ।
नादेयमुदकं रुक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥
यतः प्रोक्तका नद्यः शीघ्रा गमनाम्भोरुहाः ।
पुण्याः हिमवत्प्रभवा मधुराः मधुराय याः ।
नदीजलवत्वानादि पूर्वपश्चादिशं ।
ज्ञातं देवभिदेव दृष्टाम् दोषाय कल्पते ॥"
इति भावप्रकाशः ॥

भौमनः, पुं, (भाविकर्मे मननीति भू+कनीति मनुः भूमा कृतः । तस्यापत्यम् । अण् । भव-नात् न टेर्लोपः ।) विश्वकर्मा । इति पुराणम् । (यथा, महाभारते । १२४६ । १२ ।
"काम्यं वै दुष्यतां भौमनो हृदयङ्गमः ।
महादेवार्थिं दृष्ट्वा कृतं सर्वं ददौ तव ।")

भौमरत्नं, क्ली, (भूमौ भवं । भूमि+अण् । मरकतं रत्नम् ।) प्रवालम् । इति राजनिर्घण्टः ॥

भौमिकः, त्रि, भूम्यधिकारी । भूमिसम्बन्धीय-
कः । एतदेव विशेषणमेव लिङ्गः । (भूमि-
स्थितः । यथा, मनौ । ६ । १२९ ।
"स्थलजानि विविधः भागौ च मातामहस् तस्यां
भौमिकेशि यथा शेषा न नैर्वतो वृत्ति ॥")

भौमी, स्त्री, (भूम्यां जाता । भूमि+अण्+
ङीप् टीप् ।) सीता । इति शब्दरत्नावली ।

भौरिकः, पुं, (भूरि सुवर्णमधिकरोतीति ठक् ।)
कनकाध्यक्षः । इत्यमरः । २ । ८ ।

भ्रण, भ्व स टु ङ शब्दे । इति कविकल्पद्रुमः ।
(भ्वा०-आत्म०-सक०-सेट् ।) भ्व भ्रणति ।
स मिमृषि अमृष्ट । टु भ्रणथुः । ङ भ्रणते ।
इति दुर्गादासः ॥

भ्राज, ष ङ भासि । इति कविकल्पद्रुमः । (भ्वा०-
आत्म०-अक०-सेट् ।) ष ङ भ्राजते । इति
दुर्गादासः ॥

भ्राश, भ्य स ङ टु भासि । इति कविकल्पद्रुमः ।
(भ्वा०-आत्म०-अक०-सेट् ।) भ्य भ्राश्यति ।
स मृषि अभ्राशि । ङ भ्राशते । टु भ्राशथुः । इति
दुर्गादासः ॥

भ्लाश, ष ङ भासि । इति कविकल्पद्रुमः । (दिवा०-
आत्म०-अक०-सेट् ।) ष ङ भ्लाशते । इति
दुर्गादासः ॥

भ्रश, ङ अधे । इति कविकल्पद्रुमः । (भ्वा०-
आत्म०-अक०-सेट् ।) भ्रश्यत्यादयः । ङ
भ्रंशते । इति दुर्गादासः ॥

भ्रंशः, पुं, (भ्रंश+भावे घञ् ।) अधःपतनम् ।
यथा । धैर्यो भ्रंशो यदोविनाश् । इत्यमरः ।
२ । १४६ । ४६ । यदोविनाशः अधःपतनम् ।
भ्रंशोऽधःपतनम् । इति भरतमल्लिकात्मक-
भरतः ॥ (यथा, कामन्दकीये नीतिसारे । ९ । ११ ।
"यदि न सावधानेषु तथापि भ्रंशो महीपतेः ॥"
नाशः । यथा, रघुवंशे काव्ये । ८ । ४१ ।
"स्मरसामग्रीषु कल्प
इवासौ विधिनिर्मितोऽप्योमम् ।
खगते देहभ्रंशं
दयिते च भाविनामुचितम् ॥")

भ्रकुंसः, पुं, (भ्रुवा कुंसो भाषणं यस्य । पृषोदरा-
दित्वात् साधुः ।) स्त्रीवेशधारी नर्तकः ।
इत्यमरटीकायाम् । (अस्य विवरणं भ्रुकुंस-
शब्दे ज्ञेयम् ॥)

भ्रकुटिः, स्त्री, (भ्रुवा कुटिर्भङ्गः कौटिल्यं वा यस्य
सः । ३ । १ । ४१ । इत्यत्र "भ्रुकुटिर्भ्रकुटी
भ्रूकुटिरिति पाठत्रयम् ।" इति सिद्धान्तकौमुद्याम् पृषो-
दरादित्वात् ।) कौटिल्यधारी नर्तकः । इति
दक्षिणः । भ्रुकुटिः, ३ भ्रुकुंसः, ४ । इत्यमरः ।
१ । ७ । ३३ भ्रकुंसः । भ्रकुंसः । इति शब्दरत्नावली ।

भ्रकुटिः, स्त्री, (भ्रुवोः कुटिः कौटिल्यम् । "भ्रु
कारीत्यादयो भवन्ति इत्यत्र ।" (६ । ३ ।
इत्यत्र वार्त्तिकोक्त्या । पक्षान्तरत्वम् ।) भौंह
टेढ़ा करना कौटिल्यम् । इत्यमरः । १ । ७ । ३८
यथा, रत्नावल्याम् । भ्रुकुटिः । भ्रूकुटिः ।
भ्रुकुटिः । भ्रकुटी । भृकुटी । (यथा, माघे । ९ । ७९ ।
"भ्रुकुटीरिदं विरहमात्रपरममत्रम् ॥")
भ्रूकुटी । भ्रकुटी । इति भरतः ।

भ्रश, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) रेफयुक्तः । भ्रशति । इति दुर्गादासः ॥

भ्रन्श, इर् य उ अधःपते । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) भ्रश्यति । इर्, अभ्रशत् । अभ्रंशीत् ॥

भ्रन्स, ङ उ ङ अधःपते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ अभ्रसत् । उ भ्रंसित्वा भ्रस्त्वा । ङ भ्रंसते । इति दुर्गादासः ॥

भ्रम, इर् चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) इर् अभ्रमत् अभ्रमीत् । इति दुर्गादासः ॥

भ्रम, भ य चाले । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) भ य भ्राम्यति । इति दुर्गादासः ॥

भ्रम, उ अ य चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) उ भ्रमित्वा भ्रान्त्वा । अ भ्रामः भ्रमः । ज्वलादित्वाण्णप्रत्ययेऽपि जनवध इत्यादिना वृद्ध्यभावे भ्रम इत्येव । तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादयः । वस्तुतस्तु । ज्वलादिपाठसामर्थ्यात् वृद्धः । य भ्रेमतुः बभ्रमतुः । य भ्रम्यति भ्रमति । चाल इह पादविक्षरणम् ।
"स चाले को वैतुर्भ्रमति विपिने भिक्षुक इव ।"
भ्रेमुः शिलोच्चयान् भीमानित्यत्र गत्यर्थविवक्षया सकर्म्मकत्वम् । इति दुर्गादासः ॥

भ्रमः, पुं, (भ्रम अनवस्थाने इति । भ्रम+भावे घञ् ।) मिथ्याज्ञानम् । (यथा, राजतरङ्गिण्याम् । ३ । ४२२ ।
पदैविदं प्रत्याब्दिकैकोद्दिष्टम् । अस्य लग्न-मलादौ नाधिकारः न त्रिंशाधिकारः अपित्वो-करणान्तानि यानि श्राद्धानि चोक्तम् । एवञ्-चैव मृताः कृताः एकमृतस्य अपि ह्यपिण्डि-तानिमा मलमासापतत्प्रत्यब्द पुनः अपित्वी-करणान्तानीति त्रिंशत्पातपुत्रस्याशौचा एवकारमपि पठीयते । ० । मघात्रयोदशी-निमित्तके श्राद्धे पुत्रवता पिण्डा न देयाः ।

"भाद्रे त्रयोदशीमासाद्य मघायुक्तां सुदुर्लभाम् ।
तत्रापि महती पूजा कर्त्तव्या पितृदैवते ।
तस्मिं पिण्डप्रदानम् ज्येष्ठपुत्री विवर्ज्जयेत् ।"

इति देवीपुराणम् । भाद्रे पञ्चमी । तत्राक-मङ्गलीमावास्या । पितृदैवते मघे मघायाम् ।

शातातपः ।

"पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते ।
अन्यथं दक्षिणा नास्ति धौमनाशं यथाविधि ।"

इति तिथ्यादितत्त्वम् ।

मघाभवः, पुं, (मघायां भवः ।) शुक्रग्रहः । इति हेमचन्द्रः । मघासम्बन्धिनि त्रि ।

मघाभूः, पुं, (मघायां मघानक्षत्रपूर्व्वफल्गुन्यां भवतीति भू + क्विप् ।) शुक्राचार्य्यः । इति त्रिकाण्डशेषः ।

मघी, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारणं तदाख्यस्त्यास्तीति । मघा + अर्श आद्यच् । गौरादित्वात् ङीष् ।) धान्यभेदः । इति मेदिनी । घ, ११ ।

मघोनी, स्त्री, (मघोनः पत्नीति । मघवन् + स्त्रियां ङीप् । वकारस्य च सम्प्रसारणम् ।) इन्द्राणी । इति मुग्धबोधव्याकरणम् ।

मङ्कुरः, पुं, (मङ्कयति भूषयतीति । मकि + बाहुलकादुरच् ।) दर्पणः । इत्यमरटीकायां भरतः ।

मङ्क्षु, [उ] त्रि, (मज्जति त्वानि इति । मस्ज् + उन् । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् ।) [illegible] । इति [illegible] अर्थेऽह [illegible] लिखनम् ।

मङ्गः, पुं, (मङ्गति गच्छतीति मगि + अच् ।) नौकाशिरः । इति हेमचन्द्रः ।

मङ्गलं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनास्मादिति वा । मगि + "मङ्गेरलच् ।" उणा० ५ । ७० । इत्यलच् ।) अभीष्टार्थसिद्धिः । इति [illegible] । तद्वति, त्रि । इत्यमरः । यथा, रामायणे । २ । ३१ । ४० ।

"मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव ।"

तत्पर्य्यायः । माङ्गल्यम् २ भद्रम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६ क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ भव्यकम् १० शिवम् ११ भावुकम् १२ कुशलम् १३ रिष्टम् १४ श्वम् १५ शस्तम् १६ । इति शब्दरत्नावली । (यथा, भागवते । ५ । १३ । १३ ।

"मङ्गलाय च लोकानां क्षेमाय च भवाय च ।"

"कल्याणं मङ्गलं श्रेयं भद्रं क्षेमं हितं शुभम् ।"

इति वैद्यकरत्नमालायाम् ।)

सितच्छत्रचमरौ च रोचनी भृङ्गराजी
सुरभिकनागो धौतकौ भूषणौ वा ।
तदनु विप्रराजौ मङ्गलार्थं प्रियः सु-
कृतमित मङ्गलदेवा वामतो निर्गमे वः ।"

इति हारीते (द्वितीयस्थाने सप्तमेऽध्याये ।) कर्म्मार्थद्वयम् । इति मेदिनी । ले, १०७ ।

मङ्गललक्षणं यथा,—

"प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम् ।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ।"

इत्येकादशीतत्त्वम् । ० ।

मङ्गलद्रव्याणि । यथा,—

"पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यञ्च दर्पणम् ।
दध्याज्यं मधु लाजञ्च पुष्पं दूर्व्वाक्षतं सितम् ।
वृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम् ।
रत्नञ्च मणिमालाञ्च फलानि विविधानि च ।
पतिपुत्रवतीं नारीं प्रदीपं मणिमुत्तमम् ।
शुक्लां पुष्पमालाञ्च गोरोचनञ्च चन्दनम् ।
इत्यद्भुतानि वस्तूनि मङ्गलानि पुरो शुभे ।
पञ्चाङ्गं नकुलं चाषं शवं वामे शुभावहम् ।
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम् ।
पारावतं शङ्खचिलं चक्रवाकञ्च मङ्गलम् ।
कृष्णसारञ्च सुरभीं चमरीं श्वेतचामरम् ।
धेनुं वत्ससंयुक्ताञ्च पताकां दक्षिणे शुभाम् ।
नानाप्रकारवाद्यञ्च शुद्धाञ्च मङ्गलध्वनिम् ।
हरिशब्दश्च संगीतं घण्टाशङ्खध्वनिस्तथा ।
दृष्ट्वा श्रुत्वा च यायाच्च वर्त्मैव तात ! मन्दिरम् ।"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः । ० । अपि च ।

"दृष्टं सर्व्वमेव मङ्गलार्हं शुभप्रदम् ।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलदायकम् ।
वामे शवं शिवां पूर्णकुम्भं नकुलमेव च ।
पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम् ।
शुक्लपुष्पञ्च माल्यञ्च चन्दनञ्च सुगन्धं शुभम् ।
दक्षिणे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम् ।
वत्सयुक्तां धेनुञ्च श्वेताश्वं राजहंसकम् ।
वेश्याञ्च पुष्पमालाञ्च पताकां दधि पायसम् ।
मणिं सुवर्णं रजतं मुक्तामाणिक्यहीरकम् ।
गोरोचनां चन्दनञ्च माध्वीकं [illegible] ।
[illegible] मत्स्यं मांसं [illegible] दर्पणं तथा ।
शिवलिङ्गं शिवाकारां सुदीप्तां प्रतिमां तथा ।
धर्म्मं दृष्ट्वा देवं तं सव्याङ्कं त्रिलोचनम् ।
शुद्धस्फटिकसङ्काशं चामरैर्व्वीजितम् ।
शुक्लोत्पलं मदनं प्रफुल्लञ्च चोरकम् ।
मार्जारं गर्भिणीं मेषं मयूरं शुकसारसम् ।
शङ्खचिल्लरवं चापि शुभाय मङ्गलम् ।
[illegible] हरिमन्दिरं [illegible] ।
हरिभूतं शुभं दृष्ट्वा [illegible] ।
प्रविशेत् पुरीं [illegible] ।"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः ।

अन्यच्च ।

"श्रोत्रियं [illegible] ब्राह्मणं [illegible] ।"

विरक्तं सर्व्वदा दिक्षु स्थायी राजा सदा [illegible] ।
एतानि प्रशस्तं पश्येद्भूषणान्वितं देवताः ।
प्रदक्षिणञ्च कुर्व्वीत तदा यात्रां प्रयोजयेत् ।

दूर्व्वां दधि सर्पिरुदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम् ।
मृद्गोमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च ।
श्वेतानि पुष्पाणि तथा शमीञ्च
हुताशनं चन्दनमर्कबिम्बम् ।
अश्वत्थवृक्षञ्च समालभेत
ततश्च कुर्य्यान्निजजातिधर्म्मम् ।"

इति [illegible] २६ पटलः ।

वर्णभेदे मङ्गलशब्दभेदो यथा,—

"ब्राह्मणान् कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु ।"

इति कौर्म्मे उपविभागे १५ अध्यायः ।

मङ्गलः, पुं, (मगि + "मङ्गेरलच् ।" उणा० ५ । ७० । इति अलच् ।) ग्रहविशेषः । तत्पर्य्यायः । अङ्गारकः २ भौमः ३ कुजः ४ आरः ५ महीसुतः ६ वक्रः ७ लोहिताङ्गः ८ लोहितः ९ अत्यञ्जः १० । इति शब्दरत्नावली । आरः ११ क्रूरदृक् १२ आवनेयः १३ । इति ज्योतिस्तत्त्वम् । स च रक्तवर्णो [illegible] । दक्षिण-दिक्[illegible] । मेषवाहनः । चतुरङ्गुलप्रमाणः । [illegible] । भरद्वाजमुनिगोत्रः । चतुर्भुजः । शक्तिवराभयगदाधारी । दक्षिणाभिमुखः । आग्नेयाधिदैवता कार्त्तिकेयः । प्रत्यधिदेवता पृथिवी । स तु त्रिकोणमण्डलः । युवा । क्रूरः । वनचारी । मध्याह्नकाले प्रबलः । सौरिकारधातुस्वामी । चतुष्पदानां प्रभुः । चतुर्भुजाकृतिः । सुवर्णकारादीनां स्वामी । अग्निभूमिचारी । पित्तप्रकृतिः । बहुरक्तः । ताम्रसुवर्णप्रवालस्वामी च । इति ग्रहयागतत्त्वादयः । ० । अस्योत्पत्तिर्यथा,—

"उत्पन्नोऽसि [illegible] मङ्गलः [illegible] ।
[illegible] ।"

सौतिरुवाच ।

[illegible]

तेन प्रवालवर्णेन कुमारः समजायत ।
तेजसा सूर्य्यसदृशो नारायणसुतो महान् ॥"
इति ब्रह्मवैवर्त्तपुराणे, ८ अध्यायः ॥
अपि च ।
"ततोऽङ्गारकलोको हि यत्रास्ते महीसुतः ।
उत्पत्तिश्चास्य वक्ष्यामि यथार्थं भूसुतोऽभवत् ॥
पुरा हि श्रमतो विष्णोः स्वेदबिन्दुः पपात ह ।
मह्यां ततः कुमारोऽसौ लोहिताङ्गो महीसुतात् ॥
जातः स्वेदेन मेदिन्या वर्द्धितः पृथिवीपते ! ।
तपसाराध्य ब्रह्माणं ग्रहत्वमुपलब्धवान् ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥
अपरञ्च ।
"पुरा दक्षविनाशाय कुपितस्य त्रिशूलिनः ।
अपतद्भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः ॥
भित्त्वा सप्तपातालानदहत् सप्त सागरान् ।
अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः ॥
वीरभद्र इति ख्यातः करपादायुतैर्युतः ।
कृत्वा स यज्ञमथनं पुनर्भूतलसम्भवः ॥
त्रिजगन्निर्द्दहन् भूयः शिवेन विनिवारितः ।
कृतं त्वया वीरभद्र ! दक्षयज्ञविनाशनम् ॥
इदानीमलमेतेन लोकदाहेन कर्म्मणा ।
शान्तिप्रदानात् सर्व्वेषां ग्रहाणां प्रथमो भव ॥
प्रेक्षिष्यन्ति जनाः पूजां करिष्यन्ति मतं मम ।
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज ! ॥
देवलोके द्वितीयञ्च तव रूपं भविष्यति ।
ये च त्वां पूजयिष्यन्ति चतुर्थ्यां त्वद्दिने नराः ।
रूपमारोग्यमैश्वर्य्यं तेष्वनन्तं भविष्यति ॥
एवमुक्तस्तदा शान्तिमगमत् कामरूपधृक् ।
संजातस्तत्क्षणाद्राजन् ! ग्रहत्वमगमत् पुनः ॥"
इति मत्स्यपुराणे अङ्गारकव्रतं नाम ६८ अः ॥
कल्पभेदे अन्धकासुरवधकाले तस्योत्पत्तिर्यथा,
"यो भूम्यां न्यपतद्विप्र ! स्वेदबिन्दुः शिवाननात् ।
तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥
स बालस्तृषितोऽत्यर्थं पपौ रुधिरमान्धकम् ।
अन्धाचोत्स्वेदसंजाता मार्गनिलिलिहेऽद्भुता ॥
ततस्तामाह बालार्कप्रभो भैरवमूर्त्तिमान् ।
शङ्करो वरदो लोकश्रेयोऽर्थाय वचो महत् ॥
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरस्तथा ।
यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि ! ॥
त्वां स्तोष्यन्ति सदा देवि ! बलिपुष्पोत्करैः करैः ।
चर्च्चिकेति शुभं नाम यस्माद्रुधिरचर्च्चिता ॥
इत्येवमुक्ता वरदेन चर्च्चिका
भूतप्रमाता हरिचर्म्मवासिनी ।
महीं समन्तात् विचचार सुन्दरी
स्थानं गता, वैद्यलमात्स्यनामम् ॥
तस्यां गतायां वरदः कुजस्य
प्रादाद्वरं सर्व्ववरोत्तमं यत् ।
ग्रहाधिपत्यं जगतः शुभाशुभं
भविष्यति त्वद्वशगं महात्मनाम् ॥
इति वामनपुराणे ६० अध्यायः ॥

अस्य स्तोत्रं यथा,—
"धरणीगर्भसंभूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥"
इति व्यासोक्तनवग्रहस्तोत्रान्तर्गतम् ॥
ऋणपरिशोधनार्थस्तोत्रं यथा,—
"मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः ।
स्थिरासनो महाकायः सर्व्वकर्म्मावरोधकः ॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूमिजो भूमिनन्दनः ॥
अङ्गारको यमश्चैव सर्व्वरोगापहारकः ।
वृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रदः ॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनमाप्नोति पुष्कलम् ॥
रक्तपुष्पैश्च गन्धैश्च धूपदीपादिभिस्तथा ।
मङ्गलं पूजयेद्भक्त्या मङ्गलेऽहनि सर्व्वदा ॥
अर्च्चरेखाः प्रकर्त्तव्या अङ्गारेण सदा बुधैः ।
प्रोञ्छयेद्वामपादेन ऋणं तस्य विनश्यति ॥
मङ्गलाय नमस्तुभ्यं नमस्ते ऋणहारिणे ।
पुत्रपौत्रप्रदात्रे च मङ्गलाय नमो नमः ॥
ऋणार्त्तं त्वत्प्रपन्नोऽहमनृणं कुरु मे विभो ! ।
एतत् कृत्वा न सन्देहो ऋणं हत्वा धनी भवेत् ।
इति स्कन्दपुराणम् ॥ * ॥
मङ्गलवारे जातस्य फलं यथा,—
"उग्रः प्रतापी क्षितिपालमन्त्री
रणप्रियो वक्रवचाः सरोषः ।
धन्यान्वितः शूरगणप्रणेता
कुजस्य वारे प्रभवो मनुष्यः ॥"
इति कोष्ठीप्रदीपः ॥

मङ्गलचण्डिका, स्त्री, (मङ्गला मङ्गलदायिका चासौ चण्डिका चेति । यद्वा, दुर्गा मङ्गला प्रलये चण्डिका । अथवा मङ्गले चण्डिका दक्षा ।) मङ्गलचण्डी । यथा, कालिकापुराणे ।
"एषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तपद्मासनस्था च रत्नकुण्डलमण्डिता ।
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ॥
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ।
उमया भाषितं मन्त्रं यत् पूर्व्वन्त्वेकमक्षरम् ।
मन्त्रमस्यास्तु तत्प्रोक्तं तेन देवीं प्रपूजयेत् ॥"
एकमक्षरं शक्तिबीजरूपम् ।
"अष्टम्याञ्च नवम्याञ्च पूजा कार्य्या विवृद्धये ।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकाम् ॥
यः पूजयेद्भौमदिने शुभङ्ग्याचलैः शुभाम् ।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात् ॥"
मङ्गलवारे कृष्णाष्टमीचतुर्द्दश्यौ चेत् पुण्यतरे भवतः । यथा,—
"शुक्लेतरस्य वारेण वारेणाङ्गारकस्य च ।
कृष्णाष्टमीचतुर्द्दश्यौ पुण्यात् पुण्यतरे स्मृते ॥"
मङ्गलवारे शुक्ला चतुर्थी पर्व्वरूपा भवति । यथा,—
"सोमवारेऽप्यमावास्या आदित्ये च सप्तमी ।
चतुर्थ्यङ्गारके वारे अष्टमी च बृहस्पतौ ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः ।
षष्टिवर्षसहस्राणि प्रतिजन्म तदक्षयम् ॥"
इति तिथ्यादितत्त्वम् ॥

मङ्गलचण्डी, स्त्री, (मङ्गला चासौ चण्डी चेति यद्वा, देवानां मुन्यादिभक्तानां मङ्गलाय दुर्गासुरादिमारणे चण्डी अत्यन्तकोपना । मङ्गले चण्डी दक्षेति वा । अथवा दुर्गा मङ्गला प्रलये चण्डी । भागवतेऽस्या नामनिरुक्तिर्यथा,—
"दक्षा मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥")
दुर्गा । यथा,—
नारायण उवाच ।
"कथितं षष्ठ्युपाख्यानं ब्रह्मपुत्र ! यथागमम् ।
देवी मङ्गलचण्डी सा तदाख्यानं निशामय ॥
तस्याः पूजादिकं सर्व्वं धर्म्मवक्त्रेण यच्छ्रुतम् ।
श्रुतिसम्मतमेवेदं सर्व्वेषां विदुषामपि ॥
दक्षायां वर्त्तते चण्डी कल्याणेषु च मङ्गलम् ।
मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका ॥
पूज्यायां वर्त्तते चण्डी मङ्गलेऽपि महीसुतः ।
मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका ॥
मङ्गलो मनुवंशश्च सप्तद्वीपधरापतिः ।
तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका ॥
मूर्त्तिभेदेन सा दुर्गा मूलप्रकृतिरीश्वरी ।
कृपारूपातिप्रत्यक्षा योषितामिष्टदेवता ॥
प्रथमे पूजिता सा च शङ्करेण पुरः पुरा ।
त्रिपुरस्य वधे घोरे विष्णुना प्रेरितेन च ॥
ब्रह्मन् ! ब्रह्मोपदेशेन दुर्गमस्थेन सङ्कटे ।
आकाशात् पतिते याने दैत्येन पातिते रुषा ॥
ब्रह्मविष्णूपदिष्टश्च दुर्गां तुष्टाव शङ्करः ।
सा च मङ्गलचण्डी च बभूव रूपभेदतः ॥
उवाच पुरतः शम्भोर्भयं नास्तीति ते विभो ! ।
भगवान् वृषरूपश्च सर्व्वेशश्च बभूव ह ॥
युद्धशक्तिस्वरूपाहं भविष्यामि तदाज्ञया ।
मयात्मना च हरिणा सहायेन वृषध्वज ! ॥
जहि दैत्यञ्च शत्रुञ्च सुराणां पदघातकम् ।
इत्युक्त्वान्तर्हिता देवी शम्भोः शक्तिर्बभूव सा ॥
विष्णुदत्तेन शस्त्रेण जघान त्रिपुरं पतिः ।
मुनीन्द्र ! पतिते दैत्ये सर्व्वे देवा महर्षयः ॥
तुष्टुवुः शङ्करं देवं भक्तिनम्रात्मकन्धराः ।
सद्यः शिरसि शम्भोश्च पुष्पवृष्टिर्बभूव ह ॥
ब्रह्मा विष्णुश्च सन्तुष्टो ददौ तस्मै शुभाशिषम् ।
ब्रह्मविष्णूपदिष्टश्च सुस्नातः शङ्करः शुचिः ।
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम् ॥
पाद्यार्घ्याचमनीयैश्च वस्त्रैर्भाल्यैर्विचित्रकैः ।
पुष्पचन्दनवैवेद्यैर्भक्त्या नानाविधैर्मुने ! ॥
छागैर्मेषैश्च महिषैर्गण्डैर्मार्जारविहङ्गमैः ।
वस्त्रालङ्कारमाल्यैश्च पायसैः पिष्टकैरपि ॥
मधुभिश्च सुधाभिश्च पक्वैर्नानाविधैः फलैः ।
संगीतैर्न्नर्त्तनैर्वाद्यैरुत्सवैः कृष्णकीर्त्तनैः ॥
ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन भक्तिपूर्व्वकम् ।
ददौ द्रव्यादि मन्त्रेण महादेवश्च नारद ! ॥

ॐ ह्रीं श्रीं क्लीं सर्वपूज्ये देवि मङ्गलचण्डिके ।
हूं हूं फट् स्वाहेत्येवञ्चाप्येकविंशाक्षरो मनुः ॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्वकामदः ।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ।
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्वकामदः ॥
ध्यानञ्च श्रूयतां ब्रह्मन् ! वेदोक्तं सर्वसम्मतम् ॥
देवीं षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम् ।
सर्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम् ॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥
बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम् ।
बिम्बोष्ठीं सुदतीं शुद्धां शरत्पद्मनिभाननाम् ॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम् ।
जगद्धात्रीञ्च दात्रीञ्च सर्वेभ्यः सर्वसम्पदाम् ।
संसारसागरे घोरे ज्योतीरूपां सदा भजे ॥
देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ! ।
प्रयतः सङ्कटग्रस्तो येन तुष्टाव शङ्करः ॥
श्रीशङ्कर उवाच ।
रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके ! ।
हारिके विपदां राशेर्हर्षमङ्गलदायिके ! ॥
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके ! ।
शुभे मङ्गलदक्षे च शुभे मङ्गलचण्डिके ! ॥
मङ्गले मङ्गलार्हे च सर्वमङ्गलमङ्गले ! ।
सतां मङ्गलदे देवि ! सर्वेषां मङ्गलालये ! ॥
पूज्ये ! मङ्गलवारे च मङ्गलाभीष्टदैवते ! ।
पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम् ॥
मङ्गलाधिष्ठातृदेवि ! मङ्गलानाञ्च मङ्गले ! ।
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि ! ॥
सारे च मङ्गलाधारे पारे च सर्वकर्मणाम् ।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे ! ॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम् ।
प्रतिमङ्गलवारे च पूजां कृत्वा गतः शिवः ॥
देव्याश्च मङ्गलं स्तोत्रं यः शृणोति समाहितः ।
तन्मङ्गलं भवेत्तस्य न भवेत्तदमङ्गलम् ॥
प्रथमे पूजिता देवी शिवेन सर्वमङ्गला ।
द्वितीये पूजिता देवी मङ्गलेन ग्रहेण च ॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च ।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता ॥
पञ्चमे मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका ।
पूजिता प्रतिविश्वेषु विश्वेशैः पूजिता सदा ॥
ततः सर्वत्र संपूज्या सा बभूव सुरेश्वरी ।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने ! ॥
बहते मनुमर्त्यानां मङ्गलस्य दिने दिने ॥"
इति ब्रह्मवैवर्ते महापुराणे प्रकृतिखण्डे नारा- यणनारदीये मङ्गलचण्डिकोपाख्यानं तच्चतुश्च- त्वर्वं नाम ४४ अध्यायः ॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलजनिका छाया यस्य ।) प्लक्षः । इति राजनिर्घण्टः ॥

मङ्गलनीराजनं, क्ली, (मङ्गलं मङ्गलकरं मङ्ग- लाय वा नीराजनम् ।) शङ्खघण्टादियुक्तं प्रदीपादिकम् । मङ्गल आरती इति भाषा ॥ यथा,—
"पठित्वाथ प्रियान् श्लोकान् महावादित्र- निःस्वनैः ।
प्रभोर्नीराजनं कुर्यान्मङ्गलाख्यं जगद्धितम् ॥
नीराजनमिदं धर्मैः कर्त्तव्यं शुचिविग्रहैः ।
परमश्रद्धयोत्थाय हृदयस्य यदा भवेत् ॥
श्लोको पूजाय सर्वेषामेतत् सर्वेष्टपूरकम् ।
समस्तदैवतादिभ्रदुरितादुपशान्तिकृत् ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

मङ्गलपाठकः, पुं, (पठतीति । पठ + ण्वुल् । मङ्गलस्य पाठकः ।) वन्दी । इति हेमचन्द्रः । ३ । ४४८ ॥ (यथा, विक्रमोर्वशीनाटके । २, अङ्के ।
'आः पाप ! दुरात्मन् ! वृथामङ्गलपाठक ! ।'

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति । प्र + दा + "आतोऽनुपसर्गे ।" ३ । २ । ३ । इति कः । टाप् ।) हरिद्रा । इति केचित् ॥ मङ्गल- दातरि त्रि ॥

मङ्गला, स्त्री, (मङ्गलमस्या अस्तीति । मङ्गल + अर्श आद्यच् । टाप् ।) पार्वती । शुक्लदूर्वा । पतिव्रता । इति शब्दरत्नावली ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ [illegible] । इति हेमचन्द्रः ॥ हरिद्रा । नीलदूर्वा । इति राजनिर्घण्टः ॥

मङ्गलागुरु, क्ली, (मङ्गलस्य तत् अगुरु चेति । विशेषणकर्मधारयः ।) अगुरुचतुष्टयान्तर्गतागुरु- विशेषः । यथा, राजनिर्घण्टः ।
"मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः ।
मङ्गल्या गुरुशिशिरा गन्धाढ्या दीपनादिकाः ॥"

मङ्गल्यं, क्ली, (मङ्गलाय साधु इति । मङ्गल + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) दधि । इति मेदिनी । ये, १०६ ॥ चन्दनम् । मङ्गलागुरु । स्वर्णम् । सिन्दूरम् । इति राज- निर्घण्टः ॥

मङ्गल्यं, त्रि, (मङ्गलाय साधु । मङ्गल + यत् ।) शुभकरम् । इति मेदिनी । ये, १०६ ॥ (यथा, उत्तररामचरिते । ७ म अङ्के ।
"पाप्मभ्यश्च पुनाति वर्द्धयति च श्रेयांसि येयं कथा ।
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ॥"
यथाच, महाभारते । १ । १ । ५४ ।
"मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥")
पवित्रम् । इति हेमचन्द्रः ॥ साधुः । इति धरणिः ॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः । मङ्गल + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) त्राय- माणा । अश्वत्थः । बिल्वः । मसूरः । इति मेदिनी । ये, १०० ॥ जीवकः । नारिकेलः । खदिरः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (जीव इति ख्यातः शाकविशेषः । अस्य पर्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)

मङ्गल्यकः, पुं, (मङ्गल्य + संज्ञायां कन् । यद्वा मङ्गलस्य मङ्गलकार्यस्य प्रियः इति यत् । ततः स्वार्थे कन् ।) मसूरः । इत्यमरः । २ । ९ । १७ ॥ (अस्य पर्यायः ।
"मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)

मङ्गल्यकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः ।) शङ्खपुष्पी । इति भावप्रकाशः ॥

मङ्गल्यनामधेया, स्त्री, (मङ्गलं मङ्गलकरं नाम- धेयं यस्याः ।) जीवन्ती । इति जटाधरः ॥

मङ्गल्या, स्त्री, (मङ्गलाय साधुरिति यत् । टाप् ।) मल्लिकागन्धागुरु । इत्यमरः । २ । ६ । १२७ ॥ शमी । अधःपुष्पी । मेथी । गुञ्जा । रोचना । इति मेदिनी । ये, १०० ॥ त्रिपुटा । शङ्खपुष्पी । इति हेमचन्द्रः ॥ माषपर्णी । जीवन्ती । ऋद्धिः । वचा । हरिद्रा । जीवा । इति राजनिर्घण्टः ॥ दूर्वा । इति रत्नमाला ॥ दुर्गा । यथा,—
"शोभनानि च श्रेष्ठानि या देवी ददते हरे ! ।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(वचार्थे पर्यायो यथा,—
"तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा ।
षड्ग्रन्थोग्रा च रक्षोघ्नी सिता हैमवती तु या ॥"
मिश्र्यर्थे यथा,— [मिश्री ॥"
"अधःपुष्पी च कृष्णा स्यान्मङ्गल्या मधुरा शिवपुष्पी । तत्पर्यायो यथा,—
"अधःपुष्पी त्वधःपुष्पी मङ्गल्यामरपुष्पिका ।"
इति च वैद्यकरत्नमालायाम् ।
रोचनार्थे पर्यायो यथा,—
"गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना ॥"
शम्यर्थे पर्यायो यथा,—
"शमी शक्तुफला तुङ्गा केशहन्त्री शिवा शिवा ।
मङ्गल्या च तथा लक्ष्मीः शमीरः कालिका स्मृता ॥"
मसूरः । तत्पर्यायो यथा,—
"मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)

मङ्गिनी, स्त्री, (मङ्गो नौकाग्रभागः अस्त्यस्या इति । इनिः ङीप् च ।) नौका । इति हेमचन्द्रः ॥

मङ्घनं, क्ली, (मङ्घ्यतेऽनेनेति । मघि + ल्युट् ।) वहि- त्रकम् । इति हारावली । १८८ ॥

मङ्क्षु, व्य, मज्जतीति । मस्ज् + बाहुलकात् सुः । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् । "स्कोः संयोगाद्योरन्ते च ।" ८ । २ । २९ । इति सलोपः ।) द्रुतम् । इत्यमरः । १ । ४ । २ । (यथा, माघे । १ । ५० ।
"अदान्निवः कटकटाङ्गटाभिमङ्क्षु- धैङ्क्ष्वाति परितः पटकैर्कौलाम् ।")
अत्यर्थम् । इति मेदिनी अव्यये । ष, ४८ ॥

मचक्नुणं, क्ली, (मकुष्ठ । पृषोदरादित्वात् साधुः ।) मकुष्ठान्नम् । इति त्रिकाण्डशेषः ॥

मच, ङ ङ उत्क्रायकथ्यर्थाभावेषु । इति कवि-कल्पद्रुमः ॥ (भ्वा०-आत्म०-धृतौ धर्थायाध सक०-दीप्तौ उच्चीभावे च अक०-सेट् ।) ङ मचते । ङ मचते । उत्क्राय उच्चीभावः । इति दुर्गादासः ॥

मच, ङ च कल्कने । दम्भे । शाठ्ये । इति कवि-कल्पद्रुमः ॥ (भ्वा०-आत्म०-दम्भे शाठ्ये च । अक०-कल्कने-सक०-सेट् ।) कल्कनमिति कल्कं करोतीति णौ रूपं चूर्णीकरणमित्यर्थः । ङ मचते तण्डुलं द्विजः चकारात् मचि ङ । इति दुर्गादासः ॥

मचर्चिका, स्त्री, (मं प्रभुं चर्चतीवेति । चर्च् + ण्वुल् । टाप् । अत इत्वम् । वस्तुतस्तु रूढोऽयं शब्दः ।) प्रशस्तम् । इत्यमरः ।१।४।२७॥ (यथा, प्रशस्तो ब्राह्मणो ब्राह्मणमचर्चिका । "प्रशंसा-वचनैश्च ।" २ । १ । ६६ । इति समासः ।)

मच्छः, पुं, (माद्यति सलिलेनेति । मद् + क्विप् । तथा सन् छ्यति इति । छो + कः ।) मत्स्यः । इति शब्दरत्नावली ॥

मज्जकृत्, क्ली, (मज्जानं करोतीति । कृ + क्विप् । तुगागमश्च ।) अस्थि । इति हेमचन्द्रः ॥

मज्जनं, क्ली, (मस्ज् + ल्युट् ।) स्नानम् । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।६।४७ । "आद्ववीमज्जनप्रीतिं न जानन्ति मरुस्थिताः ॥") मज्जा । इति शब्दचन्द्रिका ॥

मज्जसमुद्भवं, क्ली, (मज्जा समुद्भव उत्पत्ति-स्थानं यस्य ।) शुक्रम् । इति हेमचन्द्रः ॥

मज्जा, [न्] पुं, (मज्जति अस्थिष्विति । मस्ज् + "श्वन् उक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्द्धन् मज्जन्नित्यादि ।" उणा० ।१।१५८ । इति कनिन् निपात्यते च ।) इत्यादेरस्थिमध्यस्थितस्नेहभागः । मार इति ख्यातः । इत्यमरभरतौ ॥ बलमज्जगुणौ यथा,—

"यस्य यस्य पशोश्चैव वीर्यं भवति यादृशम् ।
तस्य तस्यैव वीर्येण मज्जानमभिनिर्द्दिशेत् ॥"

इति राजवल्लभः ॥

अस्थिमध्यस्थस्नेहविशेषः । तत्पर्य्यायः । कौशिकः १ शुक्रकरः २ अस्थिस्नेहः ३ अस्थिसम्भवः ४ । इति हेमचन्द्रः । ३।१८ ॥ अस्थिसारः ६ तेजः ७ जीवनम् ८ अस्थिजम् ९ जीवनम् १० देहसारः ११ । इति राजनिर्घण्टः ॥ अथ मज्जस्वरूप-माह ।

"अस्थि यत् धातुना पक्वं तस्य सारो द्रवो घनः ।
स स्नेहस्तु परमभूतः स मज्जेत्यभिधीयते ॥"

अथ मज्जस्थानमाह ।

"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः ।"

इति भावप्रकाशः ॥

अस्य गुणाः ।

"बलशुक्ररसश्लेष्ममेदोमज्जविवर्द्धनः ।
मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः ॥"

इति चरकः ॥

मज्जाशब्द आबन्तोऽपि । यथा । शृगालशी-र्षकशिग्रुमिश्रैः पियालमज्जाश्चितैस्त्विति सुश्रुतः ॥ इयमेवाह त्रिकाण्डे भागुरिः ॥

"मज्जावसानवमज्जा मांसधातास्थिधारयोः ।"

इत्यमरटीकायां भरतः ॥

मज्जा, स्त्री, (मज्जतीति । मस्ज् + अच् । अजादित्वात् टाप् ।) अस्थिसारः । इत्यमर-टीकायां भरतः ॥ अस्य गुणाः । बलकारि-त्वम् । बलपित्तकफप्रदत्वम् । मांसशुक्रबलकृत्व-त्वञ्च । कुम्भीरमत्स्यमज्जागुणाः । मधुरत्वम् । बृंहणत्वम् । बल्यत्वञ्च । मज्जवसागुणौ यथा । हैमम् । उष्णत्वञ्च । इति राजवल्लभः ॥

मज्जाजः, पुं, (मज्जाया जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

मज्जारसः, पुं, (मज्जाया रसः ।) शुक्रम् । इति राजनिर्घण्टः ॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य ।) जाती-फलम् । इति राजनिर्घण्टः ॥

मञ्जूषा, स्त्री, (मज्जन्ति द्रव्याण्यत्र । मस्ज् + ऊषन् । टाप् निपा० ।) मञ्जूषा । इत्यमर-टीकायां रायमुकुटः ॥

मञ्चः, पुं, (मञ्चति । उच्चीभवतीति । मचि + घञ् ।) खट्वा । इत्यमरः । २ । ७ । १३८ ॥ पर्य्यङ्कः । माचा इति भाषा । इति धारा वली ॥ उच्चमण्डपविशेषः । यथा,—

"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।
रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"

इति पुराणम् ॥

मञ्चकः, पुं (मञ्च + स्वार्थे कन् ।) खट्वा । इति हेमचन्द्रः । ४ । ८३ ॥ (यथा, कथासरित्-सागरे । २७ । ६१ ।

"वारिधानी तु कुम्भश्च मार्ज्जनी मञ्चकस्तथा ।
अन्यच्च मत्पतिर्वेत्ति युष्मच्चिन्तयमेव मो ॥")

इन्द्रकोषः । उच्चमञ्चः । इति त्रिकाण्ड-शेषः ॥

मञ्चकाश्रयः, पुं, (मञ्चकः खट्वादिराश्रयो यस्य ।) मत्कुणः । इति राजनिर्घण्टः ॥

मञ्चमण्डपः, पुं, (मञ्चो मण्डप इव ।) शस्य-रक्षार्थं कुटिरम् । टं इति भाषा । तत्पर्य्यायः । कुडङ्गः । इति धारावली ॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति । मञ्ज् + अरप्रत्ययः ।) मुक्ता । तिलकवृक्षः । वल्ली । इति शब्दरत्नावली ॥

मञ्जरिः, स्त्री, वल्लरिः । इत्यमरः । २ । ४ । १६ ॥ वल्लते वृणोति तरुं वल्लरिः वलति इत उ ऋतौ भाषोति वरिः । मञ्जु मनोज्ञता राति मञ्जरिः पूर्व्वेण रिः मञ्जीशादित्वात् हस्य अकारः माध्वीकारीति ईपि मञ्जरी वल्लरी च । वल्लरिर्मञ्जरिर्द्वयोरिति शाब्दिकाः । भरि-शृङ्गिपाठ ।

"मञ्जरिर्मञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी ।
वल्लरं त्रिषु वल्लिश्च वल्लरिः पत्रमालिका ॥"

इति रुद्रधरः ॥

लताग्रावयवोऽपि वल्लरिः । अग्रे वाडवलतीति प्रयोग इति मुकुटाध्यः । वल्लरीमञ्जरीभेद-मप्याहुः । यथा अनिलदर्शिता आयता सुकु-मारा सकुसुमा अकुसुमा च मञ्जरिः । यथा चूतमञ्जरिः कदम्बमञ्जरिः । वल्लरिः पुनरिर-भूतादि । यथा मालमञ्जरिः गुवाकवल्लरिरिति इयमेव मते विरभावशौरीति लक्षणाश्रौ । इति भरतः ॥

मञ्जरी, स्त्री, (मञ्जरि । कृदिकारादिति पक्षे ङीष् ।) मुक्ता । तिलकवृक्षः । लता । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । १ । २०७ ।

"निर्गते मञ्जरीकुञ्जादचक्रेन दुरन्तगः ।
कश्चे नीलनिर्वालिन्यां स नैपिषाकलोचने ॥")

मञ्जरिः । इत्यमरटीकायां भरतः ॥ (यथा, आर्य्यासप्तशत्याम् । ५३४ ।

"पापीकस्त्वे पापः कण्टकवत्यः क्षमागरा भ्रमराः ।
केतकविटप किमेतेर्न्नु जारय मञ्जरीगन्धम् ॥")

तुलसी । इति राजनिर्घण्टः ॥

मञ्जरीनम्रः, पुं, (मञ्जर्य्या मञ्जर्य्यस्यात्याममिव नम्रः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

मञ्जा, स्त्री, (मजि + पचाद्यच् । टाप् ।) छागी । इति त्रिकाण्डशेषः ॥ मञ्जरी । इति हेमचन्द्रः । ११ । २२ ॥

मञ्जिः, पुं, (मजि + इन् ।) मञ्जरी । इति त्रिकाण्डशेषः ॥

मञ्जिका, स्त्री, (मञ्जयतीति । मञ्ज + ण्वुल् । टाप् । अत इत्वञ्च ।) वेश्या । इति धारावली ॥

मञ्जिफला, स्त्री, (मञ्जिर्मञ्जरी फलेऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

मञ्जिष्ठा, स्त्री, (अतिशयेन मञ्जिमती । मञ्जि मती + इष्ठन् । मतुपो लोपः स्त्रियां टाप् ।) स्वनामख्यातरक्तवर्णलताविशेषः । मजीठ इति हिन्दी भाषा । तत्पर्य्यायः । विकसा २ जिङ्गी ३ समङ्गा ४ कालमेषिका ५ मण्डूक-पर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९ । इत्यमरः । २ । ४ । ८९ ॥ कालमेषी १० काला ११ जिङ्गिः १२ मञ्जिरी १३ मञ्जिका १४ मञ्जिः १५ । इति शब्दरत्नावली ॥ वस्त्रिनी १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वशा २० रोहिणी २१ चित्रलता २२ चित्रा २३ चित्राङ्गी २४ जगती २५ विजया २६ मञ्जूषा २७ रक्तयष्टिका २८ क्षत्रिणी २९ राग्ङ्गा ३० कालभाण्डिका ३१ अरुणा ३२ ज्वरघ्नी ३३ छत्रा ३४ नागकुमारिका ३५ भण्डीरलतिका ३६ रागाढ्या ३७ वस्त्रभूषणा ३८ । (पर्य्यायाः अस्याः यथा —

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।

ॐ ह्रीं श्रीं क्लीं सर्वपूज्ये देवि मङ्गलचण्डिके ।
हूं हूं फट् स्वाहेत्येवं चाप्येकविंशाक्षरो मनुः ॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्वकामदः ।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्वकामदः ।
ध्यानञ्च श्रूयतां ब्रह्मन् वेदोक्तं सर्वसम्मतम् ॥
देवीं षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम् ।
सर्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम् ॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥
बिभ्रतीं कवरीभारं मल्लिकामाल्यभूषितम् ।
बिम्बोष्ठीं सुदतीं शुद्धां शरत्पद्मनिभाननाम् ॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम् ।
जगद्धात्रीञ्च दात्रीञ्च सर्वेभ्यः सर्वसम्पदाम् ।
संसारसागरे घोरे पोतरूपां वरां भजे ॥
देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ॥
प्रयतः सङ्कटग्रस्तो येन तुष्टाव शङ्करः ॥
शङ्कर उवाच ।
रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके ॥
हारिके विपदां राशेर्हर्षमङ्गलकारिके ॥
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके ॥
शुभे मङ्गलदक्षे च शुभे मङ्गलचण्डिके ॥
मङ्गले मङ्गलार्हे च सर्वमङ्गलमङ्गले ॥
सतां मङ्गलदे देवि ! सर्वेषां मङ्गलालये ॥
पूज्ये ! मङ्गलवारे च मङ्गलाभीष्टदैवते ॥
पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम् ॥
मङ्गलाधिष्ठातृदेवि ! मङ्गलानाञ्च मङ्गले ॥
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि ॥
सारे च मङ्गलाधारे पारे च सर्वकर्मणाम् ।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे ॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम् ।
प्रतिमङ्गलवारे च पूजां कृत्वा गतः शिवः ॥
देव्याश्च मङ्गलं स्तोत्रं यः शृणोति समाहितः ।
तन्मङ्गलं भवेत्तस्य न भवेत्तदमङ्गलम् ॥
प्रथमे पूजिता देवी शिवेन सर्वमङ्गला ।
द्वितीये पूजिता देवी मङ्गलेन ग्रहेण च ॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च ।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता ॥
पञ्चमे मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका ।
पूजिता प्रतिविश्वेषु विश्वेशैः पूजिता सदा ॥
ततः सर्वत्र सम्पूज्या सा बभूव सुरेश्वरी ।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने ॥
भवेन्मङ्गलशाली स मङ्गलस्य दिने दिने ॥"
इति ब्रह्मवैवर्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मङ्गलचण्डिकोपाख्यानं मनसोपाख्यानं नाम ४४ अध्यायः ॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलजनिका छाया यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

मङ्गलनीराजनम्, क्ली, (मङ्गलं मङ्गलकरं मङ्गलाय वा नीराजनम् ।) मङ्गलपूर्वकदीपप्रदक्षिणादिकम् । मङ्गल आरती इति भाषा ॥ यथा,—
"पठित्वाथ प्रियान् श्लोकान् गायन्वादित्रनिःस्वनैः ।
प्रभोर्नीराजनं कुर्य्यान्मङ्गलाख्यं यथाविधि ॥
नीराजनमिदं सर्वैः कार्य्यं सुविधिवद्बुधैः ।
परमप्रभुप्रीत्यर्थं दृष्टव्यं सदा नरैः ॥
स्तोत्रं पठेच्च सर्वपापहरं सर्वेष्टपूरकम् ।
समस्तैश्वर्य्यादिप्रद्युन्नोऽनुपद्यनिमित्तकम् ॥"
इति श्रीहरिभक्तिविलासे ९ विलासः ॥

मङ्गलपाठकः, पुं, (पठतीति । पठ + ण्वुल् । मङ्गलस्य पाठकः ।) वन्दी । इति हेमचन्द्रः । ७ । ६१ ॥ (यथा, धूर्त्तसमागमनाटके । १, अङ्के 'भ्रातः पाप ! दुरात्मन् ! रे मङ्गलपाठक ! ।')

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति । प्र + दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । टाप् ।) हरिद्रा । इति केचित् ॥ मङ्गलदातरि त्रि ॥

मङ्गला, स्त्री, (मङ्गलमस्त्या अस्तीति । मङ्गल + अर्श आद्यच् । टाप् ।) पार्वती । शुक्लदूर्वा । पतिव्रता । इति शब्दरत्नावली ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ वृन्ताकवल्लीविशेषः । इति हेमचन्द्रः ॥ हरिद्रा । नीलदूर्वा । इति राजनिर्घण्टः ॥

मङ्गलागुरु, क्ली, (मङ्गलञ्च तत् अगुरु चेति । नित्यकर्मधारयः ।) अगुरुचतुष्टयान्तर्गतागुरुविशेषः । यथा, राजनिर्घण्टः ।
"मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः ।
मङ्गल्या शुक्लविशिष्टा सम्पन्ना योगवाहिका ॥"

मङ्गल्यं, क्ली, (मङ्गलाय साधु इति । मङ्गल + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) दधि । इति मेदिनी । ये, १०२ ॥ चन्दनम् । मङ्गल्यागुरु । स्वर्णम् । सिन्दूरम् । इति राजनिर्घण्टः ॥

मङ्गल्यं, त्रि, (मङ्गलाय साधु । मङ्गल + यत् ।) प्रियकरम् । इति मेदिनी । ये, १०२ ॥ (यथा, उत्तरचरिते । ७ म अङ्के ।
"मायञ्च वर्त्म पुनाति वर्द्धयति च श्रेयांसि सेयं
कथा ।
मङ्गल्या च मनोहरा च जगतो मातेव
गङ्गेव च ॥"
यथाच, महाभारते । १ । १ । २४ ।
"मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥")
रुचिरम् । इति हेमचन्द्रः ॥ साधुः । इति धरणिः ॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः । मङ्गल + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) त्रायमाणा । अश्वत्थः । बिल्वः । मसूरकः । इति मेदिनी । ये, १०० ॥ जीवकः । नारिकेलः । खदिरः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (जीव इति ख्यातः शाकविशेषः । तत्पर्य्यायो यथा,—
"जीवन्तो जीवनो जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

मङ्गल्यकः, पुं, (मङ्गल्य + संज्ञायां कन् । यद्वा मङ्गलस्य मङ्गलप्रदस्य प्रियः इति यत् । स्वार्थे कन् ।) मसूरः । इत्यमरः । २ । ९ । १७ ॥ (तथास्य पर्य्यायः ।
"मङ्गल्यको मसूरः स्यात् कल्याणका च मसूरिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

मङ्गल्यकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः ।) शङ्खपुष्पी । इति भावप्रकाशः ॥

मङ्गल्यनामधेया, स्त्री, (मङ्गल्यं मङ्गलवाचकं नामधेयं यस्याः ।) जीवन्ती । इति जटाधरः ॥

मङ्गल्या, स्त्री, (मङ्गलाय साधुरिति यत् । टाप् ।) मल्लिकागन्धागुरु । इत्यमरः । २ । ६ । १२८ ॥ शमी । अधःपुष्पी । शिवा । गुरुत्वा । रोचना । इति मेदिनी । ये, १०० ॥ शिवलिङ्गी । शङ्खपुष्पी । इति हेमचन्द्रः ॥ माषपर्णी । जीवन्ती । ऋद्धिः । वचा । हरिद्रा । पीता । इति राजनिर्घण्टः ॥ दूर्वा । इति शब्दमाला ॥ दुर्गा । यथा,—
"शोभनानि च श्रेष्ठानि या देवी ददते हरेः ।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(वचार्थे पर्य्यायो यथा,—
"गोलोमी शतपर्व्वा च वटिका मङ्गला विजया वचा ।
षड्ग्रन्थोग्रा च रक्षोघ्नी विद्या हैमवती तथा ॥"
[विश्वा ॥"]
सिताशब्दे यथा,—
"अधःपुष्पी च सुश्री स्यादङ्कुश्च मधुरा
वेगपुष्पी । तत्पर्य्यायो यथा,—
"अधःपुष्पी तथापुष्पी मङ्गल्यामर्दनिकाः ॥"
इति च वैद्यकरत्नमालायाम् ॥
रोचनार्थे पर्य्यायो यथा,—
"गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना ॥"
शम्यर्थे पर्य्यायो यथा,—
"शमी शक्तुफला तुङ्गा केशहन्त्री शिवा शिवा ।
मङ्गल्या च तथा लक्ष्मीः सुभद्रा शालिका
स्मृता ॥"
मसूरः । तत्पर्य्यायो यथा,—
"मङ्गल्यको मसूरः स्यात् कल्याणका च मसूरिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

मङ्गिनी, स्त्री, (मङ्गो नौशिरस्त्यस्या अस्तीति इनिः ङीप् च ।) नौका । इति हेमचन्द्रः ॥

मङ्गूलं, क्ली, (मङ्ग्यतेऽनेनेति । मङ्ग + ऊरच् ।) कलाचान्नम् । इति धारावली । १८ ॥

मङ्क्षु, व्य, मज्जतीति । मस्ज् + बाहुलकात् उः । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् । "स्कोः संयोगाद्योरन्ते च ।" ८ । २ । २९ । इति सलोपः ।) द्रुतम् । इत्यमरः । ३ । ४ । २ । (यथा, माघे । ५ । ४७ ।
"मङ्क्षिल्वः करटकटाहरुद्धहस्ति-
वेगैर्द्रवति परितः पदातिलोकम् ।")
अत्यर्थम् । इति मेदिनी अव्यये । ये, ४४ ।

मटचुकं, क्ली, (मद्गुच। पृषोदरादित्वात् साधुः।) मद्गुरामायम्। इति त्रिकाण्डशेषः॥

मच, ङ ड उत्क्षायप्रसर्थोभावः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-इतौ अर्थोयाच सक०-दीप्तौ उच्चौभावे च अक०-सेट्।) ङ मचते। ड मचते। उत्क्षाय उच्चौभावः। इति दुर्गादासः॥

मच, ङ च कल्कने। दम्भे। शाठ्ये। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-दम्भे शाठ्ये च। सक०-कल्कने-अक०-सेट्।) कल्कनमिति कल्कं करोतीति णौ रूपं चूर्णीकरणमित्यर्थः। ङ मचते तण्डुलं शिला चकारात् मचि ङ। इति दुर्गादासः॥

मचर्चिका, स्त्री, (मं प्रभुं चर्चतीवेति। चर्च + ण्वुल्। टाप्। अत इत्वम्। वस्तुतस्तु रूढ़ोऽयं शब्दः।) प्रशस्तम्। इत्यमरः।१।४।२७॥ (यथा, प्रशस्तो ब्राह्मणो ब्राह्मणमचर्चिका। "प्रशंसावचनैश्च।" २।१।६६। इति समासः।)

मच्छः, पुं, (माद्यति सलिलेनेति। मद् + क्विप्। तथा सन् छ्यति इति। छो + कः।) मत्स्यः। इति शब्दरत्नावली॥

मज्जकृत्, क्ली, (मज्जानं करोतीति। कृ + क्विप्। तुगागमश्च।) अस्थि। इति हेमचन्द्रः॥

मज्जनं, क्ली, (मस्ज् + ल्युट्।) स्नानम्। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्।३।४७।
"जाह्नवीमज्जनप्रीतिं न जानन्ति मदस्थिताः॥")
मज्जा। इति शब्दचन्द्रिका॥

मज्जसमुद्भवं, क्ली, (मज्जा समुद्भव उत्पत्तिस्थानं यस्य।) शुक्रम्। इति हेमचन्द्रः॥

मज्जा, [न्] पुं, (मज्जति अस्थिष्विति। मस्ज् + "श्वन् उक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्द्धन् मज्जन्नित्यादि।" उणा०।१।१५८। इति कनिन् निपात्यते च।) ह्यस्थ्यन्तःस्थस्निग्धभागः। मार इति ख्यातः। इत्यमरभरतौ॥ चरममज्जगुणो यथा,—
"यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम्।
तस्य तस्यैव वीर्य्येण मज्जानमभिनिर्द्दिशेत्॥"
इति राजवल्लभः॥
अस्थिमध्यस्थधातुविशेषः। तत्पर्य्यायः। कौशिकः १ शुक्रकरः २ अस्थिस्नेहः ३ अस्थिसम्भवः ४। इति हेमचन्द्रः।३।१८॥ अस्थिसारः ५ तेजः ६ जीवनम् ७ अस्थिजम् ८ जीवनम् ९ देहसारः १० ११। इति राजनिर्घण्टः॥ अथ मज्जस्वरूपमाह।
"अस्थि यत् स्थापिता यत्तं तस्य सारो हवो धनः।
यः स्नेहस्तु पृथग्भूतः स मज्जेत्यभिधीयते॥"
अथ मज्जस्थानमाह।
"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः।"
इति भावप्रकाशः॥
अस्य गुणाः।
"बलशुक्ररसश्लेष्ममेदोमज्जविवर्द्धनः।
मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः॥"
इति चरकः॥
मज्जाशब्द आकारान्तोऽपि। यथा। शूलासक्ती मक्तकाग्निगुणमिश्रैः विपालमज्जावहितैर्स्थिति सुप्तः। इयमेवाह त्रिकाण्डे भागुरिः॥
"मज्जा त्वस्थिकरक्ता मांसवारोत्थिसारयोः।"
इत्यमरटीकायां भरतः॥

मज्जा, स्त्री, (मज्जतीति। मस्ज् + अच्। अजादित्वात् टाप्।) अस्थिसारः। इत्यमरटीकायां भरतः॥ अस्य गुणाः। वातनाशित्वम्। बलपित्तकफप्रदत्वम्। मांसशुक्रगन्धकृत्त्वञ्च। कुम्भीरमहिषमज्जागुणाः। मधुरत्वम्। बृंहणत्वम्। बल्यत्वञ्च। मज्जशत्रगुणौ यथा। शैत्यम्। उष्णत्वञ्च। इति राजवल्लभः॥

मज्जाजः, पुं, (मज्जाया जायते इति। जन् + डः।) भूमिजगुग्गुलुः। इति राजनिर्घण्टः॥

मज्जारसः, पुं, (मज्जाया रसः।) शुक्रम्। इति राजनिर्घण्टः॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य।) जातीफलम्। इति राजनिर्घण्टः॥

मज्जूषा, स्त्री, (मज्जन्ति द्रव्याण्यत्र। मस्ज् + ऊषन्। टाप् निपा०।) मञ्जूषा। इत्यमरटीकायां रायमुकुटः॥

मञ्चः, पुं, (मञ्चति। उच्चीभवतीति। मचि + घञ्।) खट्वा। इत्यमरः।२।७।१३८॥ खाटिया। माचा इति भाषा। इति हारावली॥ उच्चमण्डपविशेषः। यथा,—
"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम्।
रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥"
इति पुराणम्॥

मञ्चकः, पुं, (मञ्च + स्वार्थे कन्।) खट्वा। इति हेमचन्द्रः।३।३४८॥ (यथा, कथासरित्सागरे।२७।६१।
"वारिधानी तु कुम्भश्च माञ्चिकी मञ्चकस्तथा।
अहञ्च सम्पतिष्यामि युष्मन्निलयमेव नौ॥")
हस्तकोषः। उच्चमण्डपः। इति त्रिकाण्डशेषः॥

मञ्चकाश्रयः, पुं, (मञ्चकः खट्वादिराश्रयो यस्य।) मत्कुणः। इति राजनिर्घण्टः॥

मञ्चमण्डपः, पुं, (मञ्चो मण्डप इव।) शस्यरक्षार्थकुटिरम्। टं इति भाषा। तत्पर्य्यायः। मुण्डकः। इति हारावली॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति। मञ्ज + अरप्रत्ययः।) मुक्ता। तिलकवृक्षः। वल्ली। इति शब्दरत्नावली॥

मञ्जरिः, स्त्री, वल्लरिः। इत्यमरः।२।४।१५॥ वल्लते वृणोति तद्वं वल्लरिः वल्लति दल इव सुमनो माञ्जतीति अरिः। मञ्जु मनोज्ञतां राति इति मञ्जरिः पूर्व्वेण चिः मनीषादित्वादुकारस्य अकारः मञ्जरीयते इवि मञ्जरी वल्लरी च। वल्लरिमञ्जरिरेवोरिति शाब्दिकः। मञ्जिमञ्जिरपि।
"मञ्जरिमञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी।
वल्लरं त्रिषु वालच वल्लरिः पुष्पकलिका॥"
इति [illegible]॥
समासान्तेऽपि वल्लरिः। अतो मञ्जरीति प्रयोग इति मुकुटादयः। वल्लरीमञ्जर्यौ भेदमप्याहुः। यथा वनितरश्मिता आयता गुच्छमारा सकुसुमा अकुसुमा च मञ्जरिः। यथा चूतमञ्जरिः कदलीमञ्जरिः। मञ्जरिः पुष्पविकारभूतापि। यथा तामममञ्जरिः सुधाकरमञ्जरिरिति इयमेव वने विरलतयापीति सम्मताः। इति भरतः॥

मञ्जरी, स्त्री, (मञ्जरि। कृदिकारादक्तिन इति पक्षे ङीष्।) मुक्ता। तिलकवृक्षः। लता। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्।१।२०७।
"निर्गते मञ्जरीकुञ्जादनन्तरं पुरस्पृशः।
कथं नीलनिचोलिन्यो न वेदिषायनोपवने॥")
मञ्जरिः। इत्यमरटीकायां भरतः॥ (यथा, आर्य्यासप्तशत्याम्।५३७।
"पापीकर्ष्ट्रे बासः कण्टकशतयः सन्ति मधुकराः
अमराः।
केतकविटप किमेतैर्नु वारय मञ्जरीगन्धम्॥")
तुलसी। इति राजनिर्घण्टः॥

मञ्जरीनम्रः, पुं, (मञ्जर्य्या मञ्जर्य्याः संख्याधिक्यान्नम्रः।) वेतसवृक्षः। इति राजनिर्घण्टः॥

मञ्जा, स्त्री, (मञ्ज + पचाद्यच्। टाप्।) छागी। इति त्रिकाण्डशेषः॥ मञ्जरी। इति हेमचन्द्रः।११।६२॥

मञ्जिः, पुं, (मञ्ज + इन्।) मञ्जरी। इति त्रिकाण्डशेषः॥

मञ्जिका, स्त्री, (मञ्जयतीति। मञ्ज + ण्वुल्। टाप्। अत इत्वम्।) वेश्या। इति हारावली॥

मञ्जिफला, स्त्री, (मञ्जिसंज्ञो फलेऽस्याः।) कदली। इति त्रिकाण्डशेषः॥

मञ्जिष्ठा, स्त्री, (अतिशयेन मञ्जिमती। मञ्जिमती + इष्ठन्। मतुपो लोपः, स्त्रियां टाप्।) स्वनामख्यातरक्तवर्णलताविशेषः। मजीठ इति हिन्दी भाषा। तत्पर्य्यायः। विकसा २ जिङ्गी ३ समङ्गा ४ कालमेषिका ५ मण्डूकपर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९। इत्यमरः।२।४।९०॥ कालमेषी १० काला ११ जिङ्गिः १२ भण्डिरी १३ भण्डिका १४ भण्डिः १५। इति शब्दरत्नावली॥ छत्रा १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वशा २० रोहिणी २१ चित्रलता २२ चित्रा २३ चित्राङ्गी २४ जननी २५ विजया २६ मञ्जूषा २७ रक्तयष्टिका २८ क्षत्रिणी २९ रागाढ्या ३० कालभाण्डिका ३१ अरुणा ३२ ज्वरहन्त्री ३३ छत्री ३४ नागकुमारिका ३५ भण्डीरलतिका ३६ रागाङ्गी ३७ वस्त्रभूषणा ३८। विशेषनामानि यथा —
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका।

ॐ त्रिम्बीभि गुरुतन्वमनमधि ग्रामधामाधि पिपदृशनामवाप्यर्द देवस्थमधि ।

इति इतम् ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इति कुशोदकम्। ॐ देवा देवैः समन्यते बर्हिषा बर्हिरिन्द्रियम्। अतेन मम व्याप्ती प्रवीतौ व्यधिरयिता। इति मन्त्रेण देवौ संशोध्य पश्चात् घटस्थापन-क्रमेण संस्थाप्य। ०। घटस्थापनमन्त्रा यथा। आमतास्याम्। ॐ महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः। इति भूमेः। ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वा उदानाय त्वा व्यानाय त्वा। इति धान्यस्य। ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः। इति कलशस्य।

"ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद।"

इति जलस्य।

ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च। इति ओषधीः। ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च। इति दूर्वायाः। ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम्। इति पञ्चपल्लवाः। ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। इति मृत्तिकायाः। ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः। इति फलस्य। ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे। इति पुष्पस्य। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। इति गन्धस्य। ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। इति हिरण्यस्य। ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः। इति वस्त्रस्य।

"ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि-
र्व्यशेम देवहितं यदायुः ॥"

इति मन्त्रेण स्थापनम्। ॐ शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणो अमृतं सम्राट् चक्षुर्विराट् श्रोत्रम्। इति शिरसि स्पर्शः। ॐ नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत्। आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः। इति नाभौ। ततो गुरुस्तं प्रतिमायां ध्यायेत्॥

विष्णुः सिद्धः इति विनियोगः। ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाण अमुं म इषाण सर्वलोकं म इषाण। इति पुष्पस्य। ०। ततः षडङ्गपुष्पाञ्जलिं दत्त्वा। ॐ विष्णुर्यज्ञ इति प्रवादो अस्माभिः। एषः पुरुषः स्रष्टा भवति, इह वास्मिन् पूर्वमनसा चैतन्य इति दीपदानम्। ॐ कर्षिज्योतिश्च वैत इति होमः। देवा यथा कर्ष्णिं सम्यग् आसामत्ते इति मन्त्रेण घटोपरि ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। इति मन्त्रेण मण्डपमध्ये सुवर्णपद्मं दत्त्वा सर्वौषधीजलपूर्ण शतमुखीमभि मण्डलमध्ये रक्तवर्णं प्रतिमां ॐ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्। इति मन्त्रेण निःक्षिप्य घटेषु देवान् पूजयेत्। ०। प्रथमघटे गणेशं द्वितीयघटे शिवं तृतीयघटे दुर्गां चतुर्थघटे विष्णुं पञ्चमे सूर्यं षष्ठे अग्निं सप्तमे वास्तुपुरुषं च समावाह्य कार्त्तिकेयमपि गणेशसमीपे। प्रणवेन मण्डपं कोणपालांश्च ॐ सोमदैवतानि पूजयेत्। ०। ततो गुरुदेवं प्रतिमायां प्राणप्रतिष्ठां कुर्यात्। प्रतिष्ठाविधिना स्थापयेत्।

"ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि-
र्व्यशेमहि देवहितं यदायुः॥"

इति मन्त्रेण निवेद्य ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। इति मन्त्रेण पवित्रीकरणं स्थापयेत्। ॐ एतावानस्य इति उपचारैः। ॐ ततो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधामभिः। इति मन्त्रपूर्वकं गोदानम्। ॐ यत्र वै स्वर्गे अमृतः यत्र ब्रह्म यत्र ... यत्र आपः ... यत्र यज्ञः यत्र सोमाः। यत्र ... पवित्रं ... इति मन्त्रेण पात्रं स्थापयेत्। ॐ इदमापः प्रवहत ... इति मन्त्रेण देवं स्नापयेत्। ॐ नमो मङ्गलाय ... ओम् इति मन्त्रेण देवमर्चयेत्। ॐ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः। इति मन्त्रेण ... आचमनं दद्यात्। ॐ हिरण्यरूपः स हिरण्यसन्दृक् अपां नपात्सेदु हिरण्यवर्णः। हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै। इति मन्त्रेण ... ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके। इति मन्त्रेण ... कलशं दत्त्वा ...

इति मन्त्रेण पिण्डपातनेन। ॐ नमो नमः ... इति मन्त्रेण ... ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः। इति मन्त्रेण जलं दद्यात्। ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। इति मन्त्रेण ... ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। इति ... प्रणवेन। ॐ ... इति मन्त्रेण ... ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। इति ... ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः। इति ... पुष्पाञ्जलिं दद्यात्। ... ॐ नमो ब्रह्मणे ... इति मन्त्रेण ... ॐ यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत्। ... इति ... गोदानं ... ॐ नमो भगवते वासुदेवाय नमः। ... इति ... ॐ यत्र ... पूर्णमेव ... ॐ ... ॥

इति मन्त्रेण विसर्जनम्।

"ॐ कर्मणोऽस्य ... स्थापितम्।
सर्वं ... देवतायै नमः॥"

इति सर्वं समाप्य। ॐ ... इति ... सुवर्णं दक्षिणां दद्यात्। इति ... ॐ ... पुष्पं ... आवाहयेत् ...

सर्व्वतः स्थाने विश्वतो वृत्वा स्थाने स्पृष्ट्वा इत्यपि पाठः। इति पठित्वा भगवन् विष्णो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निरुद्धस्व मम पूजां गृहाण। ततो यथाविध्यासनमानीय नमिति पञ्चवीजेनाभ्यर्च्य संप्रोक्ष्यासनमर्प्पयेत्। ॐ पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २। इति पठित्वा इदमासनं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे नमः। एवं सर्व्वत्र दाने। ॐ भगवन् विष्णो स्वागतम्। इति स्वागतप्रश्नः। ततस्त्रिपात्रस्थं पद्मश्यामाकदूर्व्वापराजितादियुक्तं जलं गृहीत्वा ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३। इति पठित्वा इदं पाद्यं पूर्व्ववन्मन्त्रेण पादयोर्दद्यात्। ततो गन्ध-पुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्व्वायुक्तजलं अर्घ्यपात्रे कृत्वा ॐ त्रिपादूर्द्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ्व्यक्रामत् साशनानशने अभि ४। ततः स्थाने तस्मादित्यपि पाठः। इति पठित्वा सामगानामिदमर्घ्यमन्येषामेषः अर्घः इति शिरसि दद्यात्। ततो जातीलवङ्गकक्कोलयुक्तं केवलं वा पात्रस्थं जलं गृहीत्वा ॐ ततो विराडजायत विराजोऽधिपूरुषः स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः ५। इति पठित्वा इदमाचमनीयं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वधा इति दद्यात्। ततः कांस्यपात्रस्थं दधिमधुघृतात्मकं कांस्येन पिहितं मधुपर्कं गृहीत्वा ॐ तस्माद्यज्ञात् सर्व्वहुतः संभृतं पृषदाज्यं पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६। इति पठित्वा एष मधुपर्कः ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वाहा इति दद्यात्। ततः पूर्व्वमन्त्रं पठित्वा पुनराचमनीयञ्च दद्यात्। कर्पूरवासितजलं गृहीत्वा ॐ तस्माद्यज्ञात् सर्व्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७। इति पठित्वा इदं स्नानीयजलं मन्त्रेण दद्यात्। पूर्व्ववत् पुनराचमनीयं दत्त्वा वस्त्रं गृहीत्वा ॐ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ८। इति पठित्वा इदं वस्त्रं मन्त्रेण दद्यात्। एवमुत्तरीयवस्त्रं यज्ञोपवीतं पूर्व्ववदाचमनीयं दत्त्वा आभरणं गृहीत्वा ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये ९। इति पठित्वा मन्त्रेण दद्यात्। ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते १०। अथर्व्वेदशाखायामाश्वलायनशाखायाञ्च मुखं किमस्य कौ बाहू कावूरू पादा उच्येते इति भेदः। इति पठित्वा मन्त्रेण गन्धं दद्यात्। ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११।

इति पठित्वा मन्त्रेण पुष्पं दद्यात्। ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत इति च पाठः। इति पठित्वा मन्त्रेण धूपं दद्यात्। ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकानकल्पयन् १३। इति पठित्वा मन्त्रेण दीपं दद्यात्। ततो नैवेद्योपरि मत्स्यमुद्रया मूलमन्त्रं दशधा अभिमन्त्र्य धेनुमुद्रां प्रदर्श्य ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४। इति पठित्वा नैवेद्यं मन्त्रेण दद्यात्। ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् १५। इति पठित्वा कर्पूरादिवासितं पानीयं ताम्बूलं पुनराचमनीयं दर्पणञ्च दद्यात्। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः १६। इति पठित्वा पुष्पाञ्जलित्रयं पुष्पं दत्त्वा आवरणानि संपूज्य मूलमन्त्रं यथाशक्ति जप्त्वा प्रणमेत्। *। अथर्व्वेदस्याश्वलायनशाखायान्तु यत्पुरुषेण हविषा इत्यादिना स्नानीयं ६ तं यज्ञं बर्हिषीत्यादिना वस्त्रं ७ तस्मात् यज्ञात् सर्व्वहुतः संभृतमित्यादिना यज्ञोपवीतम् ८ तस्मात् यज्ञात् सर्व्वहुत ऋचः सामानीत्यादिना चन्दनम् ९ तस्मादश्वा अजायन्त इत्यादिना पुष्पं १० यत्पुरुषं व्यदधुरित्यादिना धूपम् ११ ब्राह्मणोऽस्य मुखमासीदित्यादिना दीपम् १२ चन्द्रमा मनसो जात इत्यादिना नैवेद्यम् १३ नाभ्या आसीदन्तरिक्षमित्यादिना ताम्बूलम् १४ सप्तास्यासन् परिधय इत्यादिना नीराजनम् १५ इति भेदः अन्यत् समानम्। *। ततो गुरुः कुण्डपश्चिमे उपविश्य कुण्डे स्थण्डिले वा स्वकविधिना तदग्नौ स्वगृह्योक्तविधिना वास्तुनामानमग्निं संस्थाप्य मठस्थापनानन्तरं अभिषेकार्थं ऐशान्यां नवनवकमग्रामं बहिर्द्दध्यत-भूषितं चूताश्वत्थन्यग्रोधोडुम्बरप्लक्षपल्लवपञ्चकयुतं फलवस्त्रयुतं अन्तःक्षिप्तपञ्चरत्नं निर्म्मलजलपूर्णं दृढकलशं स्थापनानामुपरि ॐ आजिघ्र कलशमित्यादिमन्त्रेण स्थापयेत्। तत्र वरुणस्योत्तम्भनमसीति वरुणं न्यसेत्।

"ॐ गङ्गाद्याः सरितः सर्व्वाः समुद्राश्च सरांसि च।
सर्व्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥"

इति तीर्थानि च न्यसेत्। तत्रैव कलशे पञ्चस्थानादश्वस्थानात् वल्मीकात् सङ्गमात् ह्रदात्। गोकुलात् राजद्वाराच्च आनीय मृदः क्षिपेत्। सर्व्वौषधीश्च। *। नवग्रहपूजां कुर्य्यात्। अस्मिन्नन्तरे द्व्यङ्गुलविस्तारायां प्रादेशपरिमितोडुम्बरनिर्म्मितदर्व्व्यां आहुतिविस्तारायप्रादेशपरिमितोडुम्बरनिर्म्मितमेक्षणं चरुस्थाली आज्यस्थाली उदूखलमुषले स्रुवं पूर्णपात्रार्थं स्रुचं समिधं आज्यादीनि उदगग्राणि प्राञ्चं प्राञ्चं विनियोगक्रमेणासादयति। संस्थाप्य यवान् व्रीहीन् वा तदभावे तण्डुलान् शूर्पे निधाय। सामगः। ॐ विष्णवे त्वा जुष्टं निर्व्वपामि। इति यथादिग्रहतिभिक्षा चरुस्थाल्यां कृत्वा उदूखलमध्ये स्थापयेत्। यजुर्व्वेदी तु ॐ विष्णवे त्वा जुष्टं गृह्णामि ॐ विष्णवे त्वा जुष्टं निर्व्वपामि अवघातश्रवणे ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति मन्त्रं कुर्य्यात्। ऋग्वेदी तु ॐ विष्णवे त्वा जुष्टं निर्व्वपामि ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति निर्व्वापप्रोक्षणमात्रम्। यस्य यत्प्रतिष्ठा तस्यादौ जुष्टपदम्। एवं सर्व्वत्र। एवमग्न्यादिषु। ॐ अग्नये त्वा जुष्टं निर्व्वपामि एवं वायवे सूर्य्याय द्विः विष्णवे द्विः अग्नये वायवे पुनरग्नये वरुणाय पुनरपि अग्नये सूर्य्याय प्रजापतये अन्तरीक्षाय द्यवे ब्रह्मणे पृथिव्यै महाराजाय सोमाय इन्द्राय अग्नये यमाय नैर्ऋताय वरुणाय वायवे कुबेराय ईशानाय ब्रह्मणे अनन्ताय आदित्याय सोमाय मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्य इत्थं नवत्रिंशत् प्रसृतीः स्थापयेत्। दिङ्मुखो उपरिष्टाद्दक्षिणवामहस्ताभ्यां मुषलेनावहत्य शूर्पेण प्रस्फोटयेत्। एवमपरवारद्वयमवहत्य शूर्पेण प्रस्फोटयेत्। तथा कर्त्तव्यं यथा वारत्रयेण तण्डुलनिष्पत्तिर्भवति। तदशक्तौ संस्कारमात्रार्थं तण्डुलेष्वेवम्। ततस्तण्डुलान् त्रिः प्रक्षाल्य चरुस्थाल्यामष्टकं कुशोत्तराग्रं पवित्रं निःक्षिप्य तत्र तण्डुलान् निधाय कपिलाया दुग्धं निःक्षिप्य तदभावे अन्यधेनोर्दुग्धं निःक्षिप्य दर्व्व्या प्रागादिप्रदक्षिणमीषद्दूर्द्ध्वमवधूर्य्य तथा पचेत् यथा दारुकाठिन्यासिद्धिर्घनमवगाहनरहितोऽनवच्छिन्नघनो भवति ज्वलदुल्मुकेन स्थालीमध्यस्थं चरुं दृष्ट्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततमित्यनेन मन्त्रेण चाभिमन्त्र्य अनेन च एतेन सिक्ता दर्व्व्या दधिमार्ज्जनेन संमिश्रयेत्। ततोऽग्नेरुत्तरतोऽवतार्य्य पुनर्ज्वलदुल्मुकेन स्थालीमध्यस्थं दृष्ट्वा पुनः तैनाभिघारयेत्। ततः पर्य्युक्षणान्तां कुशकण्डिकां समाप्य नामवस्तु काम्यकर्म्माङ्गत्वेन तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्त्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा विरूपाक्षजपं कुर्य्यात्। ततः प्रकृते कर्म्मणि।

"ॐ विद्युदमसुरेशायः पौनागवरोदयः।
द्वामयः शाददयोऽमिः समाधिः प्रति-
भावयः॥"

इत्यादिबहुराख्येयं जप्त्वा विरूपाक्षमन्त्रं सर्व्वं जपे त्वं वाद्यकपाठायीति नाम ... वाद्यं संपूज्य प्रादेशमात्रां कुशाग्रां कर्त्तव्यं

सूर्योस्मै शुभा दिशुदिन पदं मवीमा ॐ तद्वि-
ष्णोरित्यादिमन्त्रेण जुहुयात् गणेश नाम-
मन्त्रा मन्त्रान्ते देवतोद्देशो नास्ति। अग्नये
इदं विष्णवे इति। ॐ भूः स्वाहा इदमग्नये ॐ
भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं
सूर्याय ॐ भूर्भुवः स्वः तत् सवितुर्वरेण्यं भर्गो
देवस्य धीमहि। धियो यो नः प्रचोदयात्
स्वाहा इदं सूर्याय। ॐ तद्विप्रासो विपन्यवो
जागृवांसः समिन्धते विष्णोर्यत् परमं पदं स्वाहा
इदं विष्णवे। ॐ विष्णवे ... विष्णो सुतो
विष्णो ... विष्णवे ... पाति
वंशमेदोऽसा भूमौ जनयन् देव एकः स्वाहा
इदं विष्णवे। ॐ अग्निमीळे पुरोहितं यज्ञस्य
देवमृत्विजं होतारं रत्नधातमं स्वाहा इद-
मग्नये। ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः
सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे स्वाहा इदं
वायवे। ॐ अग्न आयाहि वीतये गृणानो
हव्यदातये नि होता सत्सि बर्हिषि स्वाहा
इदमग्नये। ॐ शन्नो देवीरभिष्टय आपो भवन्तु
पीतये शंयोरभिस्रवन्तु नः स्वाहा इदं वरुणाय।
ॐ भूरग्नये स्वाहा ॐ सूर्याय स्वाहा ॐ
प्रजापतये स्वाहा ॐ अन्तरीक्षाय स्वाहा ॐ
द्यौः स्वाहा ॐ ब्रह्मणे स्वाहा ॐ पृथिव्यै स्वाहा
ॐ महाराजाय स्वाहा इत्यादि नाममन्त्रै-
र्नामदेवतोद्देशः यथा कार्यः। ॐ सोमं
राजानं वरुणमग्निमन्वारभामहे आदित्यं
विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं
सोमाय ।७। ततो दिक्पालहोमः। ॐ
त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं
शूरमिन्द्रं ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो
मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ
अग्निं दूतं वृणीमहे होतारं विश्ववेदसं अस्य
यज्ञस्य सुक्रतुं स्वाहा इदमग्नये। ॐ नाके
सुपर्णमुपयत् पतन्तं हृदा वेनन्तो अभ्यचक्षत
त्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ
शकुनं भुरण्युं स्वाहा इदं यमाय। ॐ एषा
हि विश्वतो देवी ... परितं ...:
निभृतारियसामिव स्वाहा इदं निर्ऋताय।
ॐ वरुणो भुवनामधिर्मर्मो ... मधु-
द्रुपे ... स्वाहा इदं वरुणाय ...
... स्वाहा इदं वरु-
णाय। ॐ वात आवातु भेषजं शम्भु मयोभु
नो हृदे प्र न आयूंषि तारिषत् स्वाहा इदं
वायवे। ॐ सोमं राजानं वरुणमग्निमन्वा-
रभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृह-
स्पतिं स्वाहा इदं सोमाय। ॐ अभित्वा
शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य
जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः स्वाहा इद-
मीशानाय। ॐ अस्य यज्ञस्य प्रथमं पुर-
स्तादितीमाः सुवनो वेद आपः। सुदुघा
उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
विवः स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्य

यानग्रुजामिन्द्रं गिरो ह्वनीरन्दूतस ...
धामं पुरुहूतं गुरुभिरमर्त्यं अर्यमानं दिवे
दिवे स्वाहा। इदमनन्ताय। इति स्वाहा
जुहुयात्। तत्तद्देवतोद्देशस्तु न कर्तव्यः। तत्त-
द्देवतायक्षयायाय च देवताविशेषा उक्ताः ।१।
यजुर्वेदे तु। ॐ त्रातारमिन्द्रमवितारमिन्द्रं
हवे हवे सुहवं शूरमिन्द्रं ह्वयामि शक्रं पुरुहूत-
मिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इद-
मिन्द्राय। ॐ वैश्वानरो न ऊतय आप्रयातु परा-
वतः अग्निरुक्थेन वाहसा उपयामगृहीतोऽसि
वैश्वानराय देवते योनिर्वैश्वानराय त्वा स्वाहा
इदमग्नये। ॐ अग्निमूर्द्धा दिवः ककुत्पतिः
पृथिव्या अयम् ... अपां रेतांसि जिन्वति स्वाहा इदं
यमाय। ॐ असौ देवी निर्ऋतिरावधन्त पाशं
ग्रीवास्वविचृत्यं मया विवाम्यायुषो न मध्या-
दथैतं पितुमद्धि प्रसूतः। नमो भूत्यै येदञ्च-
कारस्वाहा। इदं निर्ऋतये। शाखान्तरे
तु ॐ असौ देवी निर्ऋतिरावबन्ध दामग्रीवा
स्वविचर्त्यं इमं ते विष्यामायुषो न मध्या-
दथा जीवः पितुमद्धि प्रमुक्तः स्वाहा इदं निर्ऋ-
तये। ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदा-
शास्ते यजमानो हविर्भिः अहेडमानो वरुणेह
बोध्युरुशंस मा न आयुः प्रमोषीः
स्वाहा इदं वरुणाय। ॐ वातो वा मनो
वा गन्धर्वाः सप्तविंशतिस्ते अग्रेऽश्वमयुञ्ज-
ंस्ते अस्मिन् जवमादधुः स्वाहा इदं वायवे। ॐ
वयं सोम व्रते तव मनस्तनूषु बिभ्रतः प्रजावन्तः
सचेमहि। ... भोजनानि ...
बर्हिषो मम ... स्वाहा इदं कुबे-
राय। ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं
जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेद-
सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये स्वाहा
इदमीशानाय। ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्म-
वर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽति-
व्याधी महारथो जायतां स्वाहा इदं ब्रह्मणे।
ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ये
अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा
इदमनन्ताय ।८। सामवेदे तु। ॐ त्रातार-
मिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा
"मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा ।
मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता ॥"

इति भावप्रकाशः ॥

मत्स्यण्डी, स्त्री, शर्कराविकारः । इत्यमरः । २ । ९ । ४४ ॥ इक्षुविशेषस्य रसपाके सच्छिद्रे भारभूते वा गुडिकाकारा जायते सा मत्स्यण्डी । खण्डशालूके मिछरि इति ख्याते भवति इति ख्यातापि मत्स्यण्डीति केचित् । मत्स्याण्डाकारत्वात् मत्स्यण्डी मधोत्पादिकारणत्वात् मदादिमादेषु मत्स्यमवति मत्स्यण्डी चन शामर्थ इत्यर्थः । मदं स्यन्दते मत्स्यण्डीति केचित् । इति भरतः ॥ (यथाऽस्याः लक्षणं गुणाश्च ॥ राजवल्लभ ग्रन्थात् इति बोध्यं ।

"इक्षो रसो यः सम्पक्वो घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मात्तस्मात् मत्स्यण्डिका निगद्यते ।
मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा ।
मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

मत्स्यधानी, स्त्री, (मत्स्या धीयन्ते अस्याम् इति मत्स्य + धाञ् + ल्युट् ङीप् ।) मत्स्यरक्षणपात्रम् । खालुइ इति च भाषा । तत्पर्य्यायः । कुवेणी २ । इत्यमरः । २ । १० । १६ ॥ मत्स्यकरण्डिका३ मानिका४ मत्स्यधानी ५ कुवेणिः ६ कुवेणा ७ कुवेणीव कुवेणिः ८ । इति भरतः ॥ सा अस्या वेद कुवेणी अस्य इति शब्दरत्नावली ॥

मत्स्यघातकः, पुं, (मत्स्यान् हन्तीति हन्+णिच्+ण्वुल् । मत्स्यानां घातकः । [illegible]) धीवरः । इति भूरिप्रयोगः । मत्स्यघातकवत्यपि त्रि ।

मत्स्यघातकः, पुं, ([illegible]) धीवरः । इति हेमचन्द्रः । ३ । ६०२ ।

मत्स्यपित्ता, स्त्री, (कटुरोहिणी । इत्यमरः । २ । ४ । ८२ । (यथा भावप्रकाशे,

"कटुर्ी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ।
मत्स्यपित्ता काण्डरुहा रोहिणी कटु-
रोहिणी ।"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)

[illegible]

मत्स्योदरी, स्त्री, [illegible]

मथितं, [illegible]

ससरं निर्जलं घोलं मथितञ्चपयोदकम् ।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम् ।
छच्छिका सारहीना स्यात् स्वच्छा प्रचुर-
वारिका ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ।
“ससरं निर्जलं घोलं मथितं सरवर्ज्जितम् ।”
इति च हारीते प्रथमस्थाने अष्टमेऽध्याये ।)

मथुरा, स्त्री, (मथ्यते पापराशिर्य्यया इति । मथ+
“मन्दिवाशीत्यादि ।” उणा० । १ । ३८ ।
इति उरच् ।) स्वनामख्यातपुरी । अधुना
आगरा इति ख्यातस्थानवत्त्वस्य नगरम् ।
(यथा, रघौ । ६ । ४८ ।

“यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति ॥”)

तत्पर्य्यायः । मधुपघ्नम् २ । इति त्रिकाण्डशेषः ॥
मधुपुरी ३ मधुरा ४ । इति शब्दरत्नावली ॥
सा च मोक्षदायकतीर्थम् । यथा,—
“अयोध्या मथुरा माया काशी काञ्ची अव-
न्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
अयोध्या रामनगरी मथुरा लक्ष्मपालिता ।
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ।
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी ।
मथुरा केशवोत्तुङ्गचक्रसुदर्शनविधारिता ॥”
इत्यादिभूतशुद्धितन्त्रम् ॥०॥

तत्र विष्णुदर्शनमाहात्म्यं यथा,
“पक्षेऽत्र शुक्लद्वादश्यां स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम ! ।
ज्येष्ठामूलामले पक्षे द्वादश्यामुपवासकृत् ॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः ।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम् ॥
कश्चिदस्मत्कुले जातः कालिन्दीसलिलाप्लुतः ।
अर्च्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥
ज्येष्ठामूलसिते पक्षे येनैवं वयमप्युत ।
परामृद्धिमवाप्स्यामस्तारिताः स्वकुलोद्भवैः ॥”
इति विष्णुपुराणे ६ अंशे ८ अध्यायः ॥०॥

तस्या माहात्म्यं यथा,—
वराह उवाच ।
“न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समानं मथुराया हि प्रियं मम वसुन्धरे ! ॥”
सूत उवाच ।
“तच्छ्रुत्वा वचनं तस्य प्रणम्य शिरसा तदा ।
पुण्यानां परमं पुण्यं पृथ्वी वचनमब्रवीत् ॥
पृथिव्युवाच ।
पुष्करं नैमिषं चैव पुरी वाराणसी तथा ।
एता हित्वा महाभाग ! मथुरां किं प्रशंससि ॥
वराह उवाच ।
शृणु तत्त्वेन वसुधे ! कथ्यमानं मयानघे ! ।
मथुरेति च विख्यातं अस्ति क्षेत्रं परं मम ।
सा रम्या च सुप्रशस्ता च जन्मभूमिः प्रिया मम ।
शृणु देवि ! यथा स्तौमि मथुरां पापहारि-
णीम् ।
तन्निवासी नरो याति मोक्षं नास्त्यत्र संशयः ॥
महामाघ्यां प्रयागे तु यत् फलं लभते नरः ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
कार्त्तिक्याञ्चैव यत् पुण्यं पुष्करे तु वसुन्धरे ! ॥
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
पूर्णे वर्षसहस्रे तु वाराणस्यान्तु यत् फलम् ।
तत् फलं लभते देवि ! मथुरायां क्षणेन हि ॥
मथुराञ्च परित्यज्य योऽन्यत्र कुरुते रतिम् ।
मूढो भ्रमति संसारे मोहितो मायया मम ॥
यः शृणोति वरारोहे ! माथुरं मम मङ्गलम् ।
अन्येनोच्चारितं शृण्वन् सोऽपि पापैः प्रमुच्यते ॥
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
मथुरायां गमिष्यन्ति सुप्ते चैव जनार्द्दने ॥
मथुरां समनुप्राप्य श्राद्धं कृत्वा यथाविधि ।
तृप्तिं प्राप्नोति पितरो यावत् स्थितिपञ्चमः ॥
ये वसन्ति महाभागे ! मथुरामितरे जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥
कुब्जाम्रके शौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मुच्यते नात्र संशयः ॥
मथुरायां महापुर्य्यां ये वसन्ति शुचिव्रताः ।
बलिभिक्षाप्रदातारो ये वा ते नरविग्रहाः ॥
भविष्यामि वरारोहे ! द्वापरे युगसंस्थिते ।
ययातिभूपवंशस्य क्षत्रियः कुलवर्द्धनः ॥
भविष्यामि वरारोहे ! मथुरायां न संशयः ।
मूर्त्तिं चतुर्व्विधां कृत्वा स्थास्यामि ऋषिभिः
स्तुतः ॥
स्थास्यामि वत्सरशतं युद्धेषु कृतनिश्चयः ।
एका चन्दनवर्णाभा द्वितीया कनकप्रभा ॥
अशोकवर्णा चान्या अन्या नीलोत्पलनिभा ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ! ॥
पुण्यानि च पवित्राणि संसारोच्छेदनानि च ।
यत्राहं घातयिष्यामि द्वाविंशति वसुन्धरे ! ॥
दैत्यान् घोरान् महाभागे ! कंसादीन् घोर-
दर्शनान् ।
यमुना यत्र सुवहा नित्यं सन्निहिता ध्रुवम् ॥
वैवस्वतसुता रम्या यमुना यत्र विश्रुता ।
तां नदीं यमुनां गङ्गां प्रयागे ऋषिपूजिताम् ॥
गङ्गाशतगुणा पुण्या माथुरे मम मण्डले ।
यमुना विश्रुता देवि ! नात्र कार्य्या विचारणा ॥
तत्र तीर्थानि गुह्यानि भविष्यन्ति समानघे ! ॥
येषु स्नानाद्धरो देवि ! मम लोके महीयते ॥
अथात्र मुञ्चते प्राणान् मम कर्म्मपरायणः ।
न जायते न म्रियते जायते च चतुर्भुजः ॥
अविमुक्ते नरः स्नातो मुक्तिं प्राप्नोत्यसंशयम् ।
तत्रापि मुञ्चते प्राणान् मम लोकं स गच्छति ॥
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
धर्म्मतीर्थेषु यत् स्नानं कर्म्मतीर्थेषु यत् फलम् ।
तत् फलं लभते देवि ! दृष्ट्वा देवं गतश्रमम् ॥
न च यज्ञैर्न तपसा न ध्यानैर्न च संयमैः ।
तत् फलं लभते देवि ! स्नातो विश्रान्तिसंज्ञके ॥
कालञ्जरन्तु वसुधे ! यः पश्यति गतश्रमम् ।
स्नात्वा प्रदक्षिणं दे तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत् परं गुह्यं सर्व्वसंसारमोक्षणम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
तस्मिन् स्नातो नरो देवि ! अग्निष्टोमफलं लभेत् ॥
इन्द्रलोकं समासाद्य नरो वै तत्र मोदते ।
अथात्र मुञ्चते प्राणान् मम लोकं स गच्छति ॥
तथा कनखलं तीर्थं नाम गुह्यं परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥
अस्ति क्षेत्रं परं गुह्यं तिन्दुकं नाम नामतः ।
तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ! ॥
पाञ्चालविषये देवि ! काम्पिल्याख्ये पुरोत्तमे ।
धनधान्यसमायुक्तं सज्जनैश्च पालितम् ।
तस्मिंस्तु वसते देवि ! तिन्दुको नाम नामतः ।
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बः क्षयमागतः ॥
क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीड़ितः ।
धर्म्मवल्लपरित्यागी यो गच्छन् मथुरापुरीम् ।
ब्राह्मणादरूपे सोऽपि वसमानो वसुन्धरे ! ॥
तत्र कर्म्मपरं कृत्वा स्नानेन यमुनां नरोऽभूत् ।
तत्र दानञ्च कुरुते नित्यकालं दृढव्रतः ।
ततः कालेन महता पञ्चत्वं समुपागतः ।
तस्य तीर्थप्रभावेन जातोऽसौ ब्राह्मणोत्तमः ॥
तस्मिन् परस्ये देवि ! ब्राह्मणो योगिनो नरः ।
जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ! ॥
तस्य तीर्थप्रभावेण प्राप्ता मुक्तिः सुदुर्लभा ।
ततः परं स्वर्णतीर्थं सर्व्वपापप्रमोचनम् ।
वैरोचनेन बलिना सर्व्वलाराधितः पुरा ।
धरान्वेषेन बलिना धनकामेन वै पुरा ।
क्षुद्रवाहुर्निराहारसन्नपञ्चागतमं ततः ॥
साग्रं संवत्सरं देवि ! ततः कामसमुद्भवात् ।
तस्य प्रसन्नो भगवान् तुष्टाक्षिः प्रभाषत ।
किं कार्य्यं वद ! ब्रूहि त्वं तवास्मि सद्व्रत ॥”
बलिरुवाच ।
“भ्रष्टराज्योऽस्मि देवेश ! पातालेऽधिवसाम्यहम् ।
विजितोऽहं विरोचनस्य कुमारत्वं पुनः ॥
शक्रटापत्र वै सर्व्वे हरौ विष्णार्पितं सदा ।
विश्वात्मविं समानाय पातालगतमप्यहम् ॥
अस्मिंस्तीर्थे नरः स्नात्वा कर्म्मपाशैः प्रमुच्यते ।
तत्रापि मुञ्चते प्राणान् मम लोकं स गच्छति ॥
कोटितीर्थमिति ख्यातं मथुरे चक्रसंज्ञितम् ।
तस्मिन् स्नातो नरो देवि ! राजसूयफलं लभेत् ॥
तत्र पूर्व्वं बलन्तं दृष्ट्वा यात्रां नयः ।
तत्र वै स्नानमात्रेण पुण्यलोके महीयते ॥
तत्रापि मुञ्चते प्राणान् मम लोके महीयते ।
पुण्योऽत्र च वसुधे यः स्नानं कुरुते नरः ।
पितृन् तारयते सर्व्वान् पितृलोके दिवं गतः ॥
इदं दृष्ट्वा पुण्यतीर्थं मोक्षदायं महोत्तमम् ।

[illegible] मदो हि । मम कोऽपि मदोदयः ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] दुर्लभम् ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] दुर्लभम् ।
[illegible]
[illegible] मदः ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥"
[illegible]
[illegible]
[illegible]

मदोत्कटः, पुं, ([illegible] ।) [illegible] । इति शब्दरत्नावली ।

मदूरा, स्त्री, (मद् + बाहुलकात् ऊरः टाप् ।) [illegible] । इति [illegible] ।

मद द ङ ऋडे । [illegible] । मदे । मोदे । स्तुतौ । [illegible] । इति कविकल्पद्रुमः । ([illegible]) [illegible] ।

मद, ई अ क दद [illegible] । इति कविकल्पद्रुमः । [illegible] ।

मद, [illegible] । इति कविकल्पद्रुमः । [illegible] । इति दुर्गादासः ।

मद [illegible] । इति कविकल्पद्रुमः । ([illegible] ।) [illegible] । इति दुर्गादासः ।

मद, पुं, ([illegible] । मद् + अच् ।) [illegible] । (यथा, [illegible] ।
"[illegible]
[illegible] ।")

[illegible] । (मद्यते इति । मद् + "[illegible] ।" ३ । ३ । ६७ । इति अप् ।) हर्षः । (यथा, [illegible] ।
"[illegible]
मदः ।" "मदो हर्षः ।" इति [illegible] ।) [illegible] । अमरः । ३ । ३ । ९१ (७) रेतः । कस्तूरी । (पर्य्यायो यथा,—
"[illegible] ।"
इति वैद्यकरत्नमालायाम् ॥
[illegible] यथा,
"[illegible] ।"
इति [illegible] ।
[illegible] यथा —
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।"
इति [illegible] ।)
[illegible] । इति [illegible] । (यथा, [illegible] ।
"[illegible]
[illegible] ।")
[illegible] । इति हेमचन्द्रः । [illegible] (यथा, [illegible] ।
"[illegible] ।"
"[illegible] ।")
[illegible] । इति [illegible] ।
[illegible] यथा,—
"[illegible]
[illegible] ।"
इति [illegible] ।
[illegible]
"[illegible] ।"
इति [illegible] ।
[illegible]
"[illegible] ।"

मदकलः, पुं, ([illegible] ।) [illegible] । इति हेमचन्द्रः । ४ । २८६ ।

मदखगः, पुं, ([illegible]) [illegible] । अमरः । [illegible] । इति शब्दरत्नावली । [illegible] । (यथा, [illegible] ।
"[illegible] ।")

मदगन्धः, पुं, ([illegible]) [illegible] । इति राजनिर्घण्टः । ([illegible] ।)

मदगन्धा, स्त्री, ([illegible]) मदिरा । [illegible] । इति राजनिर्घण्टः ।

मदघ्नी, स्त्री, ([illegible]) पूतिका । इति शब्दार्थ[illegible] ।

मदनः, पुं, (मदयतीति । मद् + णिच् [illegible] ।) कामदेवः । इत्यमरः । १ । १ । २५ ।
[illegible]
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।"
इति [illegible] ।
[illegible],—
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।
[illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।"
इति [illegible] ।
([illegible]
[illegible]
१—४ ।
[illegible] ।
"[illegible]
[illegible]"
[illegible] ।
"[illegible]
[illegible]

मद+ल्युः । मदयति आनन्दजनकत्वादस्य तथा-त्वम् । यथा, महाभारते । ११ । १७ । ६८ ।
"उन्मादो मदनः कामो ह्यवस्थोऽर्थकरो यमः ।"

मत्तता । वरारोहाणां कामिनीनां भावविशेषः इति यावत् । यथा, महाभारते । १ । ३६ । २३ ।
"लोपामुद्रानेन चान्येन तुष्टाव मदनेन च ।
विलासैश्च विविधैः प्रियस्यौयतरामभवत् ॥")

वसन्तः । धुस्तूरः । सिक्थकम् । इति मेदिनी । ने, । १०३ ॥ वृक्षभेदः । मयना इति भाषा । तत्पर्य्यायः । पिण्डकः१ राठकाम्नः२ करटकौ३ । इति रत्नमाला ॥ पिण्डीतकः ५ । (तथाचास्य पर्य्यायान्तरं गुणाश्च ।
"मदनः छर्दनः पिण्डो नटः पिण्डीतकस्तथा ।
करहाटो मरुवकः शल्यको विषपुष्पकः ॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः ।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ॥"
धुस्तूरपर्य्यायो यथा,—
"धत्तूरधूर्त्तधुस्तूरा उन्मत्तः कनकाह्वयः ।
देवता कितवस्तूरी महामोहः शिवप्रियः ॥
मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मदनकः६ श्वसनः ७ करहाटकः ८ शल्यः ९ । इत्यमरः । २ । ४ । ५२—५३ ॥ भ्रमरः । इति जटाधरः ॥ माषः । इति हेमचन्द्रः ॥ खदिरवृक्षः । इति शब्दचन्द्रिका ॥ महोटवृक्षः । बकुलवृक्षः । वृक्षविशेषः । मयना-फल इति भाषा । तत्पर्य्यायः । शल्यः २ कैटर्य्यः ३ पिण्डः ४ धाराफलः ५ गरः ६ करहाटः ७ पिण्डीतकः ८ श्वसनः ९ मरु-वकः १० । अस्य गुणाः । वमिकारकत्वम् । तिक्तत्वम् । उष्णवीर्य्यत्वम् । लेखनत्वम् । लघुत्वम् । रूक्षत्वम् । कुष्ठकफानाहशोथगुल्मव्रणापहत्वञ्च । इति राजनिर्घण्टः ॥ आलिङ्गनविशेषः । तत्-लक्षणम् । नायको नायिकायाः कण्ठे हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्यदेशे दत्त्वा यदाश्लिष्यति । इति कामशास्त्रम् ॥ ("अथ मयनम् ।" मम इति भाषा ।
"मयनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम् ।
मध्वाधारो मदनकं मधूषितमपि स्मृतम् ॥
मदनं मदुसन्धानं भूतघ्नं व्रणरोपणम् ।
भग्नसन्धानकृद्वातकुष्ठवीसर्पेरक्तजित् ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ मङ्गलिनामानामासनविशेषः ॥ "स्निग्धो मदनः पार्श्विकः इत्यादि ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

मदनकः, पुं, (मदयतीति मद+णिच्+ण्वुल् स्वार्थे कः ।) दमनकवृक्षः । इति रत्नमाला ॥ (सिक्थकार्थे क्ली । तत्पर्य्यायो यथा,—
"मयनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम् ।
मध्वाधारो मदनकं मधूषितमपि स्मृतम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मदनकाकुरवः, पुं, (मदनेन हेतुना काकुः काम-जन्यो विकृतो रवः अस्फुटध्वनिर्यस्य ।) पारा-वतः । इति राजनिर्घण्टः ॥

मदनगोपालः, पुं, (मदनश्चासौ गोपालश्चेति । भक्तचित्तोन्मादकारित्वादस्य तथात्वम् ।) श्रीकृष्णः । यथा,—
"वन्दे मदनगोपालं कैशोराकारमद्भुतम् ।"
इति पाद्मे पातालखण्डे ८ अध्यायः ॥

मदनचतुर्द्दशी, स्त्री, (मदनोत्सवात्मिका चतुर्द्दशी ।) चैत्रशुक्लचतुर्द्दशी । यथा । अथ मदनचतुर्द्दशी तत्र मदनस्य पूजा कार्य्या । स्कन्दपुराणवीरा-गमयोः ।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्द्दशी ।
प्रोक्ता मदनसञ्ज्ञेति विद्विद्भि तु महोत्सवे ॥
पूजयिष्यन्ति ये मर्त्त्याः कन्दर्पमदभञ्जनैः ।
ते यान्ति परमं स्थानं मदनस्य प्रभावतः ॥
चैत्रे मासि चतुर्द्दश्यां मदनस्य महोत्सवः ।
कुर्युश्चित्तोल्लसितेभिश्च गीतवाद्यादिभिर्नृणाम् ।
भगवांस्तुष्यते कामः पुत्रपौत्रसमृद्धिदः ॥
बलिं प्रति भगवद्वाक्यम् ।
न मानयन्ति ये पर्व्व मादनं मानवाधमाः ।
तेषां पुण्यं फलं दत्तं मया ते चैत्रमासिकम् ॥
देवलः ।
चैत्रशुक्लचतुर्द्दश्यां यः कार्य्याज्ज्वरवर्जितो ।
विप्रायर्थं न तस्य स्यात् महाशय विशेषतः ॥"
इति तिथितत्त्वम् ॥

मदनत्रयोदशी, स्त्री, (मदनपूजार्थं त्रयोदशी ।) चैत्रशुक्लत्रयोदशी । तत्र मदनस्य व्रतं कर्त्तव्यम् । यथा भविष्ये ।
"चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकम् ।
हत्वा संपूज्य विधिवद्वीजयेद्व्यजनेन तु ॥
तत्र सम्पूजितः कामः पुत्रपौत्रविवर्द्धनः ।
कामदेवत्रयोदश्यां पूजनीयो यथाविधि ॥
रतिप्रीतिसमायुक्तो ह्यशोकमविभूषितः ॥"
दमनो दमनकस्तरुः । सम्पूजितः प्रीणितः । कामदेवध्यानम् ।
"ध्यायेदृक्तं कामदेवो रूपवान् विश्वमोहनः ।"
तत्र स्तुतिमन्त्रः ।
"पुष्पधन्वन् ! नमस्तेऽस्तु नमस्ते मीनकेतन ! ।
सर्व्वेषां लोकपालानां धैर्य्यच्युतिकृते नमः ॥
माधवात्मज ! कन्दर्प ! स्मरारे ! रति-प्रिय ! ।
नमस्तुभ्यं विलासिनस्तवाय मनोभवे ॥
आधयो मम नश्यन्तु व्याधयश्च शरीरजाः ।
सम्पद्यतामभीष्टं मे सम्पदः सन्तु मे स्थिराः ॥
नमो मारायं कामाय देवदेवस्य मूर्त्तये ।
ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय च ॥
इदं यः कुरुते पूजामनङ्गस्य महात्मनः ।
भवन्ति तस्य सर्व्वेषु तदिष्टान्ते वशानुगाः ॥"
इति तिथितत्त्वम् ॥

मदनद्वादशी, स्त्री, (मदनपूजाविशिष्टा द्वादशी ।) चैत्रशुक्लद्वादशी । अथ मदनव्रतं कार्य्यम् । यथा, मत्स्य उवाच ।
"श्रोतुमिच्छामहे सूत ! मदनद्वादशीव्रतम् ।
सुतानेकोनपञ्चाशत् येन लेभे दितिः पुनः ॥
सूत उवाच ।
यद्वशिष्ठादिभिः पूर्व्वं दितेः कथितमुत्तमम् ।
विस्तरेणैतदेवेदं मत्तः श्रृणुत विप्राः ॥
चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः ।
स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितम् ॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम् ।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्च्चितम् ॥
नानाभक्ष्यफलोपेतं सहिरण्यञ्च शक्तितः ।
ताम्रपात्रं गुडोपेतं तस्योपरि निवेदयेत् ॥
तस्मादुपरि कामन्तु कदलीदलसंस्थितम् ।
कुर्य्याच्छर्करयोपेतां रतिं तस्य च वामतः ॥
गन्धधूपं ततो दद्यात् गीतवाद्यञ्च कारयेत् ।
तदभावे कथां कुर्य्यात् कामकेशवयोर्नरः ॥
कामनाम्ना हरेरर्च्चां स्नापयेद् गन्धवारिणा ।
शुक्लपुष्पाक्षततिलैरर्च्चयेन्मधुसूदनम् ॥
कामाय पादौ संपूज्य जङ्घे सौभाग्यदाय च ।
ऊरू स्मरायेति पुनर्मन्मथायेति वै कटिम् ॥
स्वच्छोदरायेत्युदरं अनङ्गायेत्युरो हरेः ।
मुखं पद्ममुखायेति बाहू पञ्चशराय वै ॥
नमः सर्व्वात्मने मौलिमर्च्चयेदिति केशवम् ।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत् ॥
ब्राह्मणान् भोजयेद्भक्त्या स्वयञ्च लवणादृते ।
भुक्त्वा दक्षिणां दद्यादिमं मन्त्रमुदीरयेत् ॥
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः ।
हृदये सर्व्वभूतानामानन्दो यो विधीयते ॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत् ।
उपवासी त्रयोदश्यामर्च्चयेद् विष्णुमव्ययम् ॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत् ।
ततस्त्रयोदशे मासि घृतं धेनुसमन्वितम् ॥
शय्यां दद्याद्विजाय सर्व्वोपस्करसंयुताम् ।
काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम् ॥
वासोभिर्द्विजदाम्पत्यं पूज्य शक्त्या विभूषणैः ।
शय्यां गवादिकं दद्यात् प्रीयतामित्युदीरयेत् ॥
होमं शुक्लैस्तिलैः कुर्य्यात् कामनामानि कीर्त्तयन् ।
गव्येन सर्पिषा चैव पायसेन च धर्म्मवित् ॥
विप्रेभ्यो भोजनं दद्याद्वित्तशाठ्यविवर्ज्जितः ।
इक्षुदण्डानथो दद्यात् पुष्पमालाश्च शक्तितः ।
यः कुर्य्याद्विधिनानेन मदनद्वादशीमिमाम् ।
सर्व्वपापविनिर्मुक्तः प्राप्नोति हरिसाम्यताम् ।
इह लोके वरान् पुत्रान् सौभाग्यञ्च समश्नुते ॥"
इति मत्स्यपुराणे ७ अध्यायः ॥

मदनपाठकः, पुं, (मदनं तदुद्दीपकं पठतीति । पठ +ण्वुल् । पठेन कामोद्दीपनात्तथात्वम् ।) कोकिलः । इति राजनिर्घण्टः ॥

मदनमोहनः, पुं, (मदनं तत्कारकमपि मोहन-यतीति कर्म्मधारयः । मुह+णिच् ल्युः ।) श्रीकृष्णः । यथा,—

[illegible]

"क्रुद्धेन भीतेन पिपासितेन
शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि ।
अत्यम्लभक्ष्यावततोदरेण
साजीर्णभुक्तेन तथाबलेन ।
उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान् ॥"

तानेव विकारान् विवृणोति ।
"पानात्ययं परमदं पानाजीर्णमथापि वा ।"
पानविकारान् विवृणोति ।
"पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणम् ।"
तत्र मदात्ययस्य सामान्यं लक्षणमाह ।
"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा ।
अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः ॥
शिरःपार्श्वास्थिसन्धीनां वेदना विद्युतो यथा ।
जायतेऽतिबलात् जृम्भा स्फुरणं वेपनं श्रमः ॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः ।
शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः ॥
छर्द्दिविड्भेदहृल्लासो वातपित्तकफात्मकः ।
भ्रमः प्रलापो रूपाणामसतां चैव दर्शनम् ॥
तृणभस्मलतापर्णपांशुभिश्चावपूरितम् ।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते ॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च ।
मदात्ययस्य रूपाणि सर्व्वाण्येतानि लक्षयेत् ॥"

अथ मदात्ययस्य वातिकस्य निदानमाह ।
"स्त्रीशोकभयभाराध्वकर्म्मभिर्योऽतिकर्षितः ।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया ॥
रूक्षं परिणतं मद्यं निशि निद्रां निहन्ति च ।
करोति तस्य शीघ्रं वातप्रायं मदात्ययम् ॥"
गतमदम् । ● । अथ तस्य लक्षणमाह ।
"हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥"
अथ पैत्तिकस्य निदानमाह ।
"तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते ।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः ।
तस्योपजायते शीघ्रः पित्तप्रायो मदात्ययः ॥"
अथ तस्य लक्षणमाह ।
"तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥"
अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह ।
"मधुरान्नगुर्व्वाशी यः पिबत्यतिमात्रया ।
अव्यायामदिवास्वप्नशय्यासनसुखे रतः ।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम् ॥"
अथ तस्य लक्षणमाह ।
"छर्द्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥"
अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह ।
"त्रिदोषहेतुभिः सर्व्वैः सर्व्वलिङ्गैर्मदात्ययः ॥"
अथ परमदमाह ।
"श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा-
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥"
तन्द्रिरलसता । ● । पानाजीर्णमाह ।
"आध्मानमुग्रमथवोद्गिरणं विदाहः
पाने त्वजीर्णमुपगच्छति लक्षणानि ।"
उद्गिरणं वान्तिः उद्गारो वा । पीयत इति पानं मद्यम् । ● । पानविभ्रममाह ।
"हृद्गात्रतोदकफसंस्रवकण्ठधूम-
मूर्च्छावमीज्वरशिरोरुजनप्रदेहाः ।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेषु धीराः ॥"
कण्ठधूमः कण्ठाद्धूमनिर्गम इव । प्रदेहः कफेन लिप्ताङ्गता । द्वेषः सुरान्नविकृतेषु सुराविकारेषु अन्नविकारेषु च द्वेषः । अखिलेषु मद्यविकारेषु । ● । असाध्यानां मदात्ययादीनां लक्षणमाह ।
"हीनोत्तरोष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमतिपानहतं त्यजेच्च ।
जिह्वौष्ठदन्तमसितं त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च ॥
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं त्यजेत्तम् ॥"
अथ मदात्ययादीनां चिकित्सा ।
"मदोत्थानान्तु रोगाणां मद्यमेव हि भेषजम् ।
यथा दहनदग्धानां दहनस्वेदनं हितं ।
मिथ्यातिहीनमद्येन यो व्याधिरुपजायते ।
समेनैव निपीतेन मद्येन स हि शाम्यति ॥
बीजपूरकवृक्षाम्लकोलदाडिमसंयुतम् ।
यवानीहपुषाजाजीशृङ्गवेरावचूर्णितम् ॥
सस्नेहैः शक्तुभिर्युक्तमवदंशैर्विरोचितम् ।
दद्यात् सलवणं मद्यं पैष्टिकं वातशान्तये ॥
मद्यं सौवर्च्चलव्योषयुक्तं किञ्चिज्जलान्वितम् ।
जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥
मांसं सौवर्च्चलं हिङ्गु पूरकं पिच्छरोचकम् ।
चूर्णं मद्येन पातव्यं पानात्ययरुजापहम् ॥
तावत्तित्तिरिदक्षाणां रसैश्च शिखिनामपि ।
पचित्वा लावमत्स्यानामानूपानां तथोदनैः ॥
स्निग्धोष्णलवणाम्लैश्च वेशवारैर्मुखप्रियैः ।
स्निग्धैर्गोधूमिकैरन्नैर्वातमदात्ययं जयेत् ॥
नारीणां यौवनोष्णानां निर्दयैरुपगूहनैः ।
श्रोण्यूरुकुचभारैश्च संरोधोपरमप्रदैः ॥
शयनाच्छादनैर्वस्त्रैश्चाभरणैः शुभैः ।
उपयुक्तो मारुतात् शीघ्रं प्रशाम्यति मदात्ययः ॥
पित्तपानात्यये योज्याः सर्व्वतश्च क्रिया हिमाः ।
सितामाक्षिकसंयुक्तं मद्यमम्लेतरं पिबेत् ॥
मद्यं खर्ज्जूरमृद्वीकापरूषकरसैर्युतम् ।
सदाडिमरसं शीतं शक्तुभिश्चावचूर्णितम् ॥
सशर्करं वा माध्वीकं संयुक्तमवचावरम् ।
दद्यात् मधुरकं वापि पातुं पित्तमदात्यये ॥
शशान् कपिञ्जलानेणान् लावानसितपुच्छकान् ।
मधुरान्नान् प्रयुञ्जीत भोजने शालिषष्टिकान् ॥
पटोलयूषमिश्रं वा छागलं कल्पयेद्रसम् ।
सतीनं मुद्गमिश्रं वा दाडिमामलकान्वितम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन च ।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधात्मकान् ॥
शीतानि चान्नपानानि शीतमभ्यञ्जनानि च ।
शीतवातजलस्पर्शाः शीतान्युपवनानि च ॥
क्षौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च ।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः ॥
रूक्षतर्पणसंयुक्तं यवानीव्योषसंयुतम् ।
यवगोधूमकं चान्नं रूक्षयूषेण भोजयेत् ॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा ।
प्रभूतकटुसंयुक्तं पानान्नं वा प्रदापयेत् ॥
छागमांसरसं रूक्षमम्लं वा जाङ्गलं रसम् ।
व्योषयूषं मनागम्लं पिबेत् कफमदात्यये ॥
खात्वामथ कपाले वा भृष्टं शल्यं तु गौरवम् ।
कट्वम्ललवणं मांसं खादेत् कफमदात्यये ॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम् ।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम् ॥
यदिदं कर्म्म निर्दिष्टं वातपित्तकफान् प्रति ।
सर्व्वजे सर्व्वमेवेदं प्रयोक्तव्यं चिकित्सकैः ॥"
इति भावप्रकाशः ॥

गरुडपुराणोक्तमदात्ययनिदानादिकं तत्रैव १६० अध्याये द्रष्टव्यम् । (तथाचास्य सकारणलक्षणचिकित्सादिकं यथा,—
"हालाहलाहलसमं भवति वियोगात्
शीघ्रं न शिष्यमनुष्यैः कथितं सुधीभिः ।
तृष्णा वमिः श्वसनमोहमदात्ययाद्या
संजायतेऽतिपरमं विकलेन्द्रियत्वम् ॥
ये निर्विषमादुष्टा मदस्य मनुजा भ्रमम् ।
विषमासारसदृशी सुरा मोहनकारिणी ॥
यथा विषं प्राणहरं वियोगाद्
योगेन तथाप्यमृतं वदन्ति ।
तथा सुरा योगयुता हिता स्या-
दयोगतश्चारभतेऽनिकदम् ॥
क्षुधातुरे तृषाक्रान्ते सुरा वा भोजनं विषम् ।
न च चोर्व्वैर्विना भक्ता विनाशायातिपानकम् ॥
अत्यग्नेऽप्यजीर्णेऽपि सुरा पीता रुजाकरी ।
तस्य लक्षणमप्यापि न च पानमदात्ययः ।
दाहमूर्च्छानिनादश्च ज्वरः पित्तमदात्यये ॥
छर्द्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवम् ।
शीतता च प्रतिश्यायः कफजे च मदात्यये ।
त्रिषु दोषेषु समता त्रिदोषे चाप्युपक्रमः ।
न विरोधसमुद्भूतो मदमूर्च्छाविनश्वरः ॥
शमनञ्च प्रशमनञ्च निदानवर्ज्जनं पुनः ।
सार्द्धं त्रिकं पयःपानं भोजने कटुकं दधि ।
मस्तुसक्तं खर्ज्जूरं मृद्वीका दाडिमाम्लिका ।
आमला च पटोलञ्च वेरौ घ्नन्ति मदात्ययम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन वा ।
कल्पयेत् मधुरं नातु पानं सर्व्वमदात्यये ।

"वन्दे मदनगोपालं कैशोराकारमद्भुतम्।
यमाहुर्यौवनोद्दिष्टे श्रीमन्मदनमोहनम्॥"

इति पाद्मे पातालखण्डे ८ अध्यायः॥

मदनशलाका, स्त्री, (मदनोद्दीपिका शलाकेव। अस्याः कामोद्दीपकत्वात्तथात्वम्।) कामोद्दीपकौषधम्। सारिकापक्षी। इति मेदिनी। के, २३५। कोकिला। इति शब्दरत्नावली॥

मदनसारिका, स्त्री, (मदनोद्दीपनाय सारिका।) पक्षिभेदः। सालिक् इति भाषा॥ तत्पर्य्यायः। शलाका २ सारिका ३ चित्रलोचना ४ कुशली ५। इति जटाधरः॥

मदना, स्त्री, (मदयति मत्ततां जनयतीति। मद्+णिच्+ल्युः। यद्वा, माद्यति अनया। मद्+ल्युट्। स्त्रियां टाप्।) सुरा। इति हेमचन्द्रः। ३। ५६७॥

मदनाङ्कुशः, पुं, (मदनस्य कामस्य अङ्कुश इव।) लिङ्गम्। इति त्रिकाण्डशेषः॥ नखम्। इति कामाङ्कुशशब्ददर्शनात्। यथा,—
"कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे।"

इति श्रुतबोधे कालिदासः॥

मदनायकः, पुं, (मदनं उन्मादकं अग्रं शिरोभागो यस्य।) कोद्रवः। इति राजनिर्घण्टः॥ (विवरणमस्य कोद्रवशब्दे ज्ञातव्यम्॥)

मदनायुधः, पुं, (मदनस्यायुधः।) भगम्। इति शब्दचन्द्रिका॥

मदनायुधः, पुं, (मदनस्यायुधमिव इव समासान्तोऽत्र। निपातनात् साधुः।) कामवर्द्धकत्वात्तथात्वम्। कामवृद्धिक्षुपः। इति राजनिर्घण्टः॥

मदनालयः, पुं, (आलीयतेऽस्मिन्निति आ+ली+अधिकरणे अच्। मदनस्यालयः।) भगम्। मदनपर्य्यायशब्दोत्तरगृहपर्य्यायशब्देन भगस्योक्तत्वात्। यथा,—
"स्पृष्ट्वैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम्॥"

इति कर्पूरस्तवः॥

कामभवनस्यापि भगवाचकत्वम्। मनु भावारत्नम्।
यथा —
"स्वर्दासुतान् निजकुलस्य कुलाङ्गनानां त्रपान्
दिग्वर्त्तिनाञ्च समितिषिद्धरान् गवर्तिमाच्च विधात्।
संप्रार्थिनान् वर्द्धित धनधान्यतुष्टान् प्रसादान्
स्वर्णचौरान् मदनभवनेष्वाप्य चौरान् प्रथीयान्॥"

इति दीपिकायां मदनभवनशब्ददर्शनात्॥

मदनावस्था, स्त्री, (मदनस्यावस्था।) कामावस्था। सा तु उद्वेगरूपा। विरह इति ख्यातम्। यथा। ततः प्रविशति मदनावस्थो राजा निःश्वस्य।
"जाने तपसो वीर्य्यं सा बाला परवतीति मे
विदितम्।
न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम्॥"

इत्यभिज्ञानशाकुन्तले ३ अङ्कः॥ मदनावस्थ इति राज्ञोऽत्र उद्वेगरूपा प्रथमा कामावस्था। यदाह भरतः। उद्वेगः प्रथमः प्रोक्त इति। अचिन्तमिति केनोपायेन मम शकुन्तलालाभो भविष्यति। इति तट्टीका॥

मदनी, स्त्री, (माद्यति अनया इति। मद्+करणे ल्युट्। स्त्रियां ङीप्।) सुरा। इति हारावली॥ कस्तूरी। अतिमुक्तकः। इति राजनिर्घण्टः॥

मदनेच्छाफलः, पुं, (मदनेच्छां फलति जनयतीति अच्।) राजाम्रः। इति राजनिर्घण्टः॥

मदनोत्सवः, पुं, (मदनाय उत्सवः।) उत्सवविशेषः। होलाका इति ख्याता। तत्पर्य्यायः। वसन्तकः २। इति हारावली॥

मदनोत्सवा, स्त्री, (मदनाय उत्सवो यस्याः।) स्वर्गवेश्या। इति शब्दरत्नावली॥

मदप्रयोगः, पुं, (मदस्य प्रयोगः।) करिणो मदोद्गमः। तत्पर्य्यायः। प्रचारः २। इति त्रिकाण्डशेषः॥

मदभञ्जिनी, स्त्री, (मदं उन्मत्ततां भनक्ति दूरीकरोतीति। मद+भञ्ज+"शम्यमिदिप्सा-दिभ्यो घिनुण्।" ३। २। १४१। इति घिनुण्। स्त्रियां ङीप्।) शतमूली। इति शब्दचन्द्रिका॥ (गुणादयोऽस्याः शतमूलीशब्दे ज्ञातव्याः॥)

मदयन्तिका, स्त्री, (मदयन्ती+स्वार्थे कन् टाप्। पूर्व्व ह्रस्वश्च।) मल्लिका। इति शब्दरत्नावली॥ (यथा, सुश्रुते चिकित्सितस्थाने ८ अध्याये।
"त्रिफलाब्द त्रिकटुका सुरसा मदयन्तिका।
वायसादनिघाताख्य तुल्या कुर्य्यात् पृथक्
पृथक्॥")

मदयन्ती, स्त्री, (मद्+णिच्+शतृ+ङीप्।) वनमल्लिका। इति रत्नमाला॥ काट्मल्लिका इति भाषा॥ मल्लिका। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायो यथा,—
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"मदयन्त्यादिभिः कायसदन् गमधुरकैरः।"
इति च वैद्यकचक्रपाणिसंग्रहे रसायनाधिकारे॥)

मदयित्नु, क्ली, (मदयतीति। मद्+णिच्। "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्।" उणा० ३। २९। इति मदि+इत्नुच्। "यथामनान्तत्वोन्निनयनु।" ६। ४। ५५। इति णेरयादेशः।) मद्यम्। इति मेदिनी। ने, २०१॥

मदयित्नुः, पुं, (मदयतीति। मद्+णिच्। "स्तनीति।" उणा० ३। २९। इति इत्नुच्। णेरयादेशश्च।) कामदेवः। शौण्डिकः। इति शब्दरत्नावली॥ मदकः। इति मेदिनी। ने, १०२॥ मेघः। इति त्रिकाण्डशेषः॥

मदविक्षिप्तः, पुं, (मदेन विक्षिप्तश्चलितमनाः।) मत्तहस्ती। इति शब्दचन्द्रिका॥

मदशाकः, पुं, (मदकरः शाकोऽस्य।) उपोदकी। इति राजनिर्घण्टः॥

मदसारः, पुं, (मदं सारयति दूरीकरोति। इति मद+सृ+णिच्+अण्।) तूलवृक्षः। इति राजनिर्घण्टः॥

मदशक्तिनी, स्त्री, (मदेन शक्तिर्यस्याः।) महाकरञ्जः। इति राजनिर्घण्टः॥

मदहेतुः, पुं, (मदस्य हेतुः कारणम्।) धातकी। इति वैद्यकम्। मत्तताकारणञ्च। (मदरोगस्य हेतुः यथा,—
"यदा तु रक्तवाहीनि रसंज्ञावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता
मलाः॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा।
मदमूर्च्छाय संन्यासास्तेषां विद्यादिचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु॥"

इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये॥)

मदस्थलं, क्ली, (मदस्य स्थलम्।) मदस्थानम्। यथा, शब्दरत्नावली।
"आवर्त्तः सुरापानं शुण्डापानं मदस्थलम्।"

मदस्थानं, क्ली, (मदस्य स्थानम्।) मद्यपानस्थानम्। तत्पर्य्यायः। शुण्डापानम् २। इत्यमरः। २। १०। ४३॥

मदाढ्यः, पुं, (मदेन मदजनकरसेन आढ्यतीति ख्यातेन आढ्यः पूर्णः।) तालवृक्षः। इति राजनिर्घण्टः॥ (गुणादिविवृतिरस्य तालशब्दे ज्ञातव्या॥) मदयुक्ते, त्रि॥

मदाढ्या, स्त्री, (मदेन आढ्या।) लोहितशिरीषः। इति शब्दचन्द्रिका॥

मदातङ्कः, पुं, (मदजनितः आतङ्कः रोगः।) मदात्ययरोगः। इति राजनिर्घण्टः॥

मदात्ययः, पुं, (मदेन अत्ययो नाशोऽनुसरणात्।) मद्यपानादिजन्यरोगविशेषः। तत्पर्य्यायः। मदातङ्कः२ पानात्ययः३ मदव्याधिः४ मदः५। इति राजनिर्घण्टः॥ अथ मदात्ययरोगनिदानम्।
"विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपणाः।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः॥
तस्माद्विधिविपरीतेन तथा मात्राधिकेन च।
पुष्टेन चाहितैरन्नैःकाले चैव च।
मद्येन जन्तुं जायन्ते मदात्ययमुखा गदाः॥"
अविधिप्रयुक्तं मद्यं विकारान्तरमुत्पादयतीत्याह।
"निमत्तमेकान्तत एव मद्यं
निषेव्यमाणं मनुजेन नित्यम्।
उत्पादयेत् कष्टतमान् विकारा-
नुत्पादयेच्चापि शरीरभेदम्॥
एकान्तमो नेत्थमेव विकारान् मदात्ययादीन्।
शरीरस्य भेदं नाशम्॥ * ॥ मदात्ययरोगो
वैकल्पकरम्याह।

"क्रुद्धेन भीतेन पिपासितेन
शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि ॥
अत्यम्लभक्षावततोदरेण
साजीर्णभुक्तेन तथाबलेन ।
उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान् ॥"
तानेव विकारान् विवृणोति ।
"पानात्ययं परमदं पानाजीर्णमथापि वा ।"
पानविकारान् विवृणोति ।
"पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणम् ।"
तत्र मदात्ययस्य सामान्यं लक्षणमाह ।
"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा ।
अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः ॥
शिरःपार्श्वास्थिसन्धीनां वेदना विद्युतो यथा ।
जायतेऽतिबला जृम्भा स्फुरणं वेपनं श्रमः ॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः ।
शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः ॥
छर्द्दिविड्भेदहृल्लासा वातपित्तकफात्मकाः ।
भ्रमः प्रलापो रूपाणामसताञ्चैव दर्शनम् ॥
तृणभस्मलतापर्णपांशुभिश्चावपूरितम् ।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते ॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च ।
मदात्ययस्य रूपाणि सर्व्वाण्येतानि लक्षयेत् ॥"
अथ मदात्ययस्य वातिकस्य निदानमाह ।
"स्त्रीशोकभयभाराध्वकर्म्मभिर्योऽतिकर्षितः ।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया ॥
रूक्षं परिहतं मद्यं निशि निद्रां निहन्ति च ।
करोति तस्य शीघ्रं स वातप्रायं मदात्ययम् ॥"
तन्मद्यम् । * । अथ तस्य लक्षणमाह ।
"हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥"
अथ पैत्तिकस्य निदानमाह ।
"तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते ।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः ।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः ॥"
अथ तस्य लक्षणमाह ।
"तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥"
अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह ।
"मधुरस्निग्धगुर्व्वाशी यः पिबत्यतिमात्रया ।
अव्यायामदिवास्वप्नशय्यासनसुखे रतः ।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम् ॥"
अथ तस्य लक्षणमाह ।
"छर्द्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥"
अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह ।
"सर्व्वोत्थैर्हेतुभिः सर्व्वैः सर्व्वैर्लिङ्गैर्मदात्ययः ॥"
अथ परमदमाह ।

"श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा
तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥"
तन्द्रिस्तन्द्रा । * । पानाजीर्णमाह ।
"आध्मानमुग्रमथवोद्गिरणं विदाहः
पाने त्वजीर्णमुपगच्छति लक्षणानि ।"
उद्गिरणं वान्तिः उद्गारो वा । पीयत इति पानं मद्यम् । * । पानविभ्रममाह ।
"हृद्गात्रतोदकफसंस्रवकण्ठधूम-
मूर्च्छावमीज्वरशिरोरुजनप्रदेहाः ।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेषु धीराः ॥"
कण्ठधूमः कण्ठाद्धूमनिर्गम इव । प्रदेहः कफेन लिप्तास्यता । द्वेषः सुरान्नविकृतेषु सुराविकारेषु अन्नविकारेषु च द्वेषः । अखिलेषु मद्यविकारेषु । * । असाध्यानां मदात्ययादीनां लक्षणमाह ।
"हीनोत्तरोष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमतिपानहतं त्यजेच्च ।
जिह्वौष्ठदन्तमसितन्त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च ॥
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं त्यजेत्तम् ॥"
अथ मदात्ययादीनां चिकित्सा ।
"मद्योत्थानान्तु रोगाणां मद्यमेव हि भेषजम् ।
यथा दहनदग्धानां दहनस्वेदनं हितम् ।
मिथ्यातिहीनमद्येन यो व्याधिरुपजायते ।
समेनैव विपीतेन मद्येन स हि शाम्यति ॥
बीजपूरकवृक्षाम्लकोलदाडिमसंयुतम् ।
यवानीहपुषाजाजीव्योषैश्चावचूर्णितम् ॥
सस्नेहैः सक्तुभिर्युक्तमवदंशैश्चिरोत्थितम् ।
दद्यात् सलवणं मद्यं पैष्टिकं वातशान्तये ॥
मद्यं सौवर्च्चलव्योषयुक्तं किञ्चिज्जलान्वितम् ।
जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥
चव्यं सौवर्च्चलं हिङ्गु पूरकं विश्वदीप्यकम् ।
चूर्णं मद्येन पातव्यं पानात्ययरुजापहम् ॥
लावतित्तिरिदक्षाणां रसैश्च शिखिनामपि ।
पचिता ग्राम्यमत्स्यानामामिषैस्तु तथोरसैः ॥
स्निग्धोष्णलवणाम्लैश्च वेशवारैर्मुखप्रियैः ।
स्निग्धैर्गोधूमिकैरन्नैर्वातमद्यात्ययं जयेत् ॥
नारीणां पीनतुङ्गानां निर्दयैरुपगूहनैः ।
श्रोण्यूरुकुचभारैश्च संरोधैरुपस्वेदैः ॥
शयनाच्छादनैरुष्णैरुष्णैश्चाङ्गारकैः शुभैः ।
उपैति मारुतात् शीघ्रं प्रशाम्यति मदात्ययः ॥
पित्तपानात्यये योज्याः सर्व्वतश्च क्रिया हिमाः ।
सिताद्राक्षादिसंयुक्तं मद्यमार्द्दीकं पिबेत् ॥
मद्यं खर्ज्जूरद्राक्षाफलपरूषकैर्युतम् ।
सदाडिमरसं शीतं सक्तुभिश्चावचूर्णितम् ॥
शर्करां वा माध्वीकं संयुक्तमथवाऽपरम् ।
दद्यात् मधुरकं काले पातुं पित्तमदात्यये ॥
शशान् कपिञ्जलानेणान् लावानपि सुपाचितान् ।
मधुराम्लान् प्रयुञ्जीत भोजने शालिषष्टिकान् ॥
पटोलयूषमिश्रं वा छागलं कल्पयेद्रसम् ।
सतीनं मुद्गमिश्रं वा दाडिमामलकान्वितम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन च ।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधात्मकान् ॥
शीतानि चान्नपानानि शीतशय्यासनानि च ।
शीतवातजलस्पर्शाः शीतान्युपवनानि च ॥
क्षौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च ।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः ।
रूक्षतर्पणसंयुक्तं यवानीचोषसंयुतम् ।
यवगोधूमकं चान्नं रूक्षयूषेण भोजयेत् ॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा ।
प्रभूतकटुसंयुक्तं यवान्नं वा प्रदापयेत् ॥
छागमांसरसं रूक्षमल्पं वा चाम्लं रसम् ।
व्योषयूषं मनागम्लं पिबेत् कफमदात्यये ॥
स्नात्वाथ कपाले वा भृष्टं कृत्वा तु मौरषम् ।
कटुकलवणं मांसं खादेत् कफमदात्यये ॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम् ।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम् ॥
यदिदं कर्म्म निर्द्दिष्टं वातपित्तकफान् प्रति ।
सर्व्वजे सर्व्वमेवेदं प्रयोक्तव्यं चिकित्सकैः ॥"
इति भावप्रकाशः ॥
गरुडपुराणोक्तमदात्ययनिदानादिकं तत्रैव १६० अध्याये द्रष्टव्यम् । (तथाचास्य सकारण-लक्षणचिकित्सादिकं यथा,—
"हालाहलाहलसमं भवति वियोगात्
सेव्यं न शिष्यमनुजैः कथितं सुधीभिः ।
लब्धा मतिः भ्रममोहमदावदग्धा
संजायतेऽतिमरणं विकलेन्द्रियाणाम् ॥
ये विदधत्यादृता मद्यस्य मनुजा भयम् ।
विषमाहारमद्यपौ सुरा मोहनकारिणी ॥
यथा विषं प्राणहरं वियोगात्
योगेन तथाप्यमृतं वदन्ति ।
तथा सुरा योगयुता हिता स्या-
द्योगतश्चारभतेऽतिकष्टम् ॥
क्षुधातुरे ह्यवाक्रान्ते सुरा वा भोजनं विना ।
न च पीतैर्विना भक्ता विनाशारातिनाशकम् ॥
अत्युष्णेऽप्यशीतेऽपि सुरा पीता रुजाकरी ।
सत्त्वप्रलयनाथापि न च वातमदात्ययः ।
दाहमूर्च्छातिसारश्च ज्वरः पित्तमदात्यये ॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवम् ।
शीतता च प्रतिश्यायः कफजे च मदात्यये ।
त्रिषु दोषेषु समता लिङ्गैर्वा सूचकः क्रमः ।
स विरोधवदनूनो मदमन्यो भिषग्वर ! ॥
शमनञ्च प्रदानञ्च विरामश्चैव च क्रमः ।
वातं हितं पयःपानं भोजने मद्गुरं दधि ।
मधुरकं खर्ज्जूरं मृद्वीका दाडिमान्विता ।
चन्दनं च यष्ट्याह्वं वै घ्नन्ति मदात्ययम् ।
द्राक्षामलकखर्ज्जूरपरूषकरसेन वा ।
कल्पयेत् मधुना नष्टं वापि कफमदात्यये ।

यस्मा द्राक्षेव संयुक्तं पयःपानं मदात्यये ।”
इति मदात्ययचिकित्सा ॥
अथ पूगीफलमदात्ययचिकित्साऽऽरभ्यते ।
“पूगीफलमदे वाम्यो मोहो मूर्च्छा श्रमक्लमः ।
प्रमेहो विड्ग्रहश्चैव लालास्रावश्च जायते ॥
क्रमक्रमपरीतत्वं विशेषं पूगमर्द्दिते ।
मानवो नयनैरेभिर्ज्ञेयः पूगविमर्द्दितः ॥
तस्य शीतं जलं पीतं सद्यःशान्तिकरं भवेत् ।
शर्कराभक्षणं देयं शुक्ता वा शर्करान्विता ॥
कोद्रवाणां भवेन्मूर्च्छा देयं क्षीरं सुशीतलम् ।
धुस्तूरकमदे देयं शर्करासहितं दधि ॥
मल्लिकी करवीरस्य मोहिनी मदयन्तिका ।
अन्येषामपि कन्दानां वमनञ्चाशु कारयेत् ॥
भोजयेत् शर्करायुक्तं क्षीरं वा दधि शर्कराम् ।”
इति श्रीमदात्रेयभाषिते हारीतोत्तरे तृतीयस्थाने मदात्ययचिकित्सानाम सप्तदशोऽध्यायः ॥)

मदाध्मातः, पुं, (मदाय मत्ततोद्रेकाय आध्मायते शब्दायते कौति । आ + ध्मा + कर्म्मणि क्तः ।) ढक्का । इति हारावली । २०४ ॥ ढाकीर उपरेर बड़ा इति भाषा ॥

मदाम्बरः, पुं, (मदो दानवारि अम्बरमिवाच्छादकमस्य ।) मत्तहस्ती । इति त्रिकाण्डशेषः ॥

मदारः, पुं, (माद्यति मत्तो भवतीति । मद् + “अङ्गिमदिमन्दिभ्य आरन् ।” उणा० । ३ । १३४ । इति आरन् ।) हस्ती । धूर्त्तः । इति विश्वः ॥ शूकरः । कामुकः । गन्धभेदः । मत्तहस्ती । नृपभेदः । इत्युणादिकोषः ॥

मदामोदः, पुं, (मदार्थं मदजनकं आमोदं गन्धविशेषं ददातीति । दा + कः ।) पनसवृक्षः । इति त्रिकाण्डशेषः ॥

मदालापी, [न्] पुं, (मदेन मत्ततया आलपतीति । आ + लप् + णिनिः ।) कोकिलः । इति शब्दमाला ॥

मदाह्वः, पुं, (मदो मृगमद आह्वा आख्या यस्य । इति बहुव्रीहिः ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मदिरः, पुं, (मद् + किरच् ।) रक्तखदिरः । इति शब्दचन्द्रिका ॥ मदकरे, त्रि । यथा, ऋग्वेदे । ५ । ६१ । ११ ।
“य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु ।”
“मदिरं मदकरं मधु ।” इति तद्भाष्ये सायनः ॥)

मदिरा, स्त्री, (माद्यत्यनयेति । मद् + किरच् । अजादित्वात् टाप् ।) मद्यमात्रम् । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले । ३ । ५ ।
“यदि मदिरायतनयनां
तामधिकृत्य प्रहरतीति ।”
माद्यत्यनयेति । मद् + “इषिमदिमुदीति ।” उणा० । १ । ५२ । इति किरच् ।) मादकद्रव्यविशेषः । मद इति भाषा ॥ (यथा,—
“त्रिकाल-काल-प्रतिपान-काल सर्वोपचारवती ।
यथायामार्थिष्वेषु वातघ्नी मदिरा हिता ॥”
इति चरके चिकित्सास्थाने १० अध्यायः ॥
यथाच शान्तिशतके । ४ । २४ ।
“पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ।”)

तत्पर्य्यायः । सुरा २ हलिप्रिया ३ हाला ४ परिस्रुत् ५ वरुणात्मजा ६ गन्धोत्तमा ७ प्रसन्ना ८ इरा ९ कादम्बरी १० परिस्रुता ११ कश्यम् १२ मद्यम् १३ । इत्यमरः । २ । १० । ४० ॥ मानिका १४ । इति शब्दरत्नावली ॥ कापिशी १५ गन्धमादनी १६ माधवी १७ कत्तोयम् १८ मदः १९ कापिशायनम् २० । इति जटाधरः ॥ वारुणी २१ मत्ता २२ सीता २३ चपला २४ कामिनी २५ प्रिया २६ मदगन्धा २७ माध्वीकम् २८ मधु २९ सन्धानम् ३० आसवः ३१ अमृता ३२ वीरा ३३ मेधावी ३४ मदनी ३५ सुप्रतिभा ३६ मनोज्ञा ३७ विधाता ३८ मोदिनी ३९ हली ४० गुणारिष्टम् ४१ सरकः ४२ मधूलिका ४३ मदोत्कटा ४४ महानन्दा ४५ । इति राजनिर्घण्टः ॥ शीधुः ४६ मैरेयम् ४७ बलवल्लभा ४८ । इति भावप्रकाशः ॥ कारणम् ४९ । तत्त्वम् ५० इति कैवल्यतन्त्रम् ॥ मदिष्ठा ५१ परिप्लुता ५२ कल्यम् ५३ स्वादुरसा ५४ शुण्डा ५५ हारहूरम् ५६ मार्द्दीकम् ५७ मदना ५८ देवसृष्टा ५९ कापिशम् ६० अब्धिजा ६१ । इति हेमचन्द्रः । ३ । ५६६ ॥ सा द्वादशविधा यथा,—
“माध्वीकं पानसं द्राक्षं खार्ज्जूरं तालमैक्षवम् ।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् ।
मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव च ॥”
इति जटाधरः ॥

अस्याः सामान्यगुणाः । सुमधुरत्वम् । कफमारुतनाशित्वम् । लघुत्वम् । पुष्टिकरत्वम् । हृद्यत्वम् । धारकत्वम् । मदावहत्वञ्च ॥ * ॥ धातकीरसगुडादिकृता मदिरा गौडी । तद्गुणा यथा । तीक्ष्णत्वम् । उष्णत्वम् । मधुरत्वम् । वातनाशित्वम् । पित्तबलकारित्वम् । दीपनत्वम् । पथ्यत्वम् । कान्तितुष्टिकारित्वञ्च ॥ पुष्पफलादिमधुसारमयी मदिरा माध्वी । तद्गुणा यथा । मधुरत्वम् । नात्युष्णत्वम् । पित्तवातनाशित्वम् । पाण्डुकामलगुल्मार्शःप्रमेहशमनत्वञ्च ॥ * ॥ विविधधान्यजाता मदिरा पैष्टी । तद्गुणा यथा । कटुत्वम् । अम्लत्वम् । तीक्ष्णत्वम् । मोहोन्मत्तत्वम् । वातहरत्वम् । कफकरत्वम् । ईषत्पित्तकरत्वम् । मोहनञ्च ॥ तालादिरसनिर्यासजाता मदिरा सैधी हाला च । तद्गुणा यथा । शीतलत्वम् । कषायत्वम् । अम्लत्वम् । पित्तहरत्वम् । वातदाहकत्वञ्च ॥ * ॥ खर्ज्जूरकृतनिर्यासजमदिरागुणाः । शीतलत्वम् । गुरुत्वम् । मोहनत्वम् । बलदत्वम् । हृद्यत्वम् । तृष्णासन्तापनाशकत्वञ्च ॥ * ॥ नानाद्रव्यकृता मदिरा कादम्बरी । तद्गुणा यथा । सुमधुरत्वम् । पित्तप्रमदकरत्वम् । मदकारित्वञ्च ॥ * ॥ ऐक्षवमदिरागुणाः । शिशिरत्वम् । मदोत्कटत्वञ्च ॥ * ॥ मधूकफलमदिरागुणाः । गुरुत्वम् । विष्टम्भकत्वञ्च ॥ शर्करामधुकोद्भवमदिरागुणाः । शीतत्वम् । मनोहरत्वञ्च ॥ * ॥ शार्करमद्यगुणाः । हृद्यत्वम् । दीपनत्वम् । मोहनत्वञ्च । इति नानामद्यगुणाः ॥ * ॥ ऋतुविशेषे पेयमदिरा यथा,
“गौडी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः ।
शरद्ग्रीष्मवसन्तेषु माध्वी सायं न चान्यदा ॥
कादम्बरीशर्करादिमद्यं
सुशीतलं हृद्यकरं मदाढ्यम् ।
माध्वीसमं स्यात् खलु पथ्यकारं
मद्यं सुशीतं गुरु तर्पणञ्च ॥
अन्यथा कुरुते पानं मद्यं सन्तापशोषदम् ।
भ्रमदोषमदाद्यादिकारकं सर्व्वमेव तत् ॥”
नवजीर्णमद्ययोर्गुणाः ।
“मद्यं नवं सर्व्वविकारहेतुः
सर्व्वञ्च वातादिकदोषदायि ।
जीर्णन्तु सर्व्वं गदनाशनञ्च
पूर्व्वप्रदं हृद्यकरञ्च दीपनम् ॥”
अन्यच्च ।
“मद्यं विहितमल्पमेकमनल्पं वा पिष्टकं विप्रर्षिणा ।
दोषायप्रमविधिनामद्यं कृतं विवर्ज्जयेत् ।
मद्यप्रयोगं कुर्व्वन्ति शूद्रादिषु महान्तिषु ।
विशेषिभिस्तु न ग्राह्यं मद्यमुत्तोषयेन्मतम् ॥”
इति मद्यपर्य्यायवर्णनम् ॥ * ॥
“अन्ये द्वादशधा मद्यभेदानाहुर्मनीषिणः ।
उक्तसाम्यान्न भवन्तीति नान्येषां एपनीतितम् ॥”
इति राजनिर्घण्टे मद्यप्रकरणम् ॥
अथ मतान्तरे मद्यस्य लक्षणं गुणाश्च ।
“यद्यं यस्मादकैर्लोकैस्तन्मद्यमभिधीयते ।
यथारिष्टं सुरा सीधुरासवाद्यमनेकधा ॥
मद्यं सर्व्वं भवेदुष्णं पित्तकृत् वातनाशनम् ।
भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम् ॥
अम्लं दीपनं रुच्यं पाचनं आशुकारि च ।
तीक्ष्णं सूक्ष्मञ्च विशदं व्यवायि च विकाशि च ॥”
अथारिष्टस्य लक्षणं गुणाश्च ।
“पक्वौषधाम्बुसिद्धं यन्मद्यं तत् स्यादरिष्टकम् ।”
अरिष्टं मद्यमिति लोके । यथा, द्राक्षारिष्टम् । दशमूलारिष्टम् । बब्बूलारिष्टमिति ।
“अरिष्टं लघु पाकेन सर्व्वं तच्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥”
अथ सुराया लक्षणं गुणाश्च ।
“शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता ।
सुरा गुर्व्वी बलस्तन्यपुष्टिमेदःकफप्रदा ।
ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥”
अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च ।
“पुनर्नवाशिलापिष्टैर्विहिता वारुणी स्मृता ।
संहितैस्तालखर्ज्जूररसैर्या सापि वारुणी ॥
सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् ॥”
सुरायो मेदापं अर्चीति ॥ * ॥
अथ शीधुद्वयस्य लक्षणं गुणाश्च ।
“इक्षोः पक्वै रसैः सिद्धः शीधुः पक्वरसश्च सः ।

आमैक्षवैर्यः सीधुः स च शीतरसः स्मृतः ।
सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरो सद्यः स्नेहनो रोचनो हरेत् ॥
विबन्धमेदःशोफार्शःशोषोदरकफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥"
अथासवस्य लक्षणं गुणाश्च ।
"यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥"
अथ नवपुराणमद्यगुणाः ।
"मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥
जीर्णं तदेव रोचिष्णु क्रिमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धि गुणवल्लघुस्रोतोविशोधनम् ॥"
अथ सात्त्विकानां मद्यं पिबतां चेष्टाविशेषाः ।
सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्माणि निद्राञ्च मदिराचरेत् ॥"
आचरेत् कुर्य्यात् ।
"विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥
किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् ।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥"
अथ मद्यगन्धनाशनोपायः ।

"सुक्षीणबालगदनीरदधान्यकैला-
यश्चर्व्वयन् चर्व्वति वाचमभिव्यनक्ति ।
स्वाभाविकं सुरसमद्यभवञ्च पूतिगन्धं
गन्धञ्च मद्यलशुनादिभवञ्च नूनम् ॥"

इति भावप्रकाशः ॥

अपि च ।
"प्रसन्ना मधुराम्लाम्लकोष्णा विपाकतः ।
कर्म्मणामाग्नेयत्वात्तस्य विशेष उपदिश्यते ॥
तस्मात् वातमन्दाग्नौ पञ्चपञ्चविकारिणाम् ।
सुरा प्रशस्ता वातेषु रक्तपित्तक्षयेषु च ॥
प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
जगलो ग्राहिरूक्षोष्णः शोषघ्नो भक्तपाचनः ।
शोफार्शोग्रहणीदोषान् हन्त्यरिष्टः कफामयान् ॥"
अरिष्टो मद्यविशेषः ॥
"माध्वीकमभिनवं मद्यं गुरु दोषसमीरितम् ।
जीर्णं शोधनं वीर्य्यं दीपनं लघु रोचनम् ॥
हर्षणं प्रीणनं बल्यं मद्यं शोकभयापहम् ।
प्रागल्भ्यधृतिमाधुर्य्यधीमेधाबुद्धिस्वरप्रदम् ॥"

इति राजवल्लभः ॥

अन्यत् मद्यशब्दे द्रष्टव्यम् ।
(वसुदेवपत्नी । यथा, श्रीमद्भागवते । ९ । २४ ।
४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥")
मदिराक्षी, स्त्री, (मदिरे इव अक्षिणी यस्याः इति
अक्षि+"बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" ५।४।११३ । इति
षच् । स्त्रियां ङीष् ।) मत्तलोचना । यथा,—
"मदिरायतनयनां निर्मलं वसु किञ्चि-
न्मदमन्थरित वदनेऽसि ढक्कायत्ते ।

मम तु मनमनङ्गज्वरितारत्यपूर्ण-
मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥"

इत्युद्भटः ॥

(पुं, विराटराजस्य भ्राता । यथा, महा-
भारते । ४ । ३० । ११—१२ ।
ववन्धायसगर्भन्तु कवचं तप्तकाञ्चनम् ।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहार-
यत् ॥
सर्व्वपारशवं वर्म्म कल्याणपटलं दृढम् ।
शतानीकादवरजो मदिराश्वोऽभ्यहारयत् ॥)
मदिरागृहं, क्ली, (मदिराया गृहम् ।) मद्यस्य
गृहम् । मद्यसन्धानगृहम् । तत्पर्य्यायः । गञ्जा २
इत्यमरः । २ । २ । ८ ॥ शुण्डा ३ । यथा,—
"भाण्डागारे खनौ गञ्जं खनौ खञ्जा सुरागृहे ।
मद्यभाण्डे स्मृता गुञ्जा गुञ्जा स्यात् काक-
कुञ्चिका ॥"

इति भरतधृतचन्द्रः ॥

मदिरासखः, पुं, (मदिरायाः सखा सखाश्वत्वादिति ।
मदिरा+सखि+"राजाहःसखिभ्यष्टच् ।" ५ ।
४ । ९१ । इति टच् ।) आम्रवृक्षः । इति
जटाधरः ॥
मदिष्ठा, स्त्री, (मदोऽस्या अस्तीति । मद+इनिः ।
इयमतिशयेन मदिनीति । इष्ठन् । इनोलोपः ।)
मदिरा । इति हेमचन्द्रः । ३ । ५६६ ॥
मदी, स्त्री, (मद्नाति चूर्णीकरोति लष्टेन
लोष्टादिकमिति । मद-इन् । कृदिकारादिति
पक्षे ङीष् । पृषोदरादित्वात् साधुः ।) चषक-
वस्तु । इति नानार्थे हेमचन्द्रः ॥ लाघवकवस्तु ।
इति वैश्यवर्गे जटाधरः ॥
मदीयं, त्रि, मम इदम् । आमार इति भाषा ॥
अस्मच्छब्दादीयप्रत्यये एकवचनार्थे मदादेशेन
निष्पन्नमिदम् । इति मुग्धबोधव्याकरणम् ॥
(यथा, कथासरित्सागरे । २८ । ९० ।
"हे देवनाशमर्थेन मदीयेनैव भूपतिः ।")
मदोत्कटः, पुं, (मदेन दानवारिणा उत्कटः ।)
मत्तदन्ती । इत्यमरः । ३ । ३ । ३४ ॥ (यथा,
महाभारते । ३ । ६५ । ८ ।
"ते तान् वारणानान् दृष्ट्वा सर्व्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥")
मदोत्कटा, स्त्री, (मदेन मत्ततया उत्कटः उद्गमो
यस्याः । स्त्रियां टाप् ।) मदिरा ।
इति राजनिर्घण्टः ॥ (मदेन मत्ततया उत्-
कटः । मदोन्मत्ते, त्रि ।)
मदोद्धतः, त्रि, (मदेन मत्ततया उद्धतः ।) मत्तः ।
इति जटाधरः ॥ (यथा, वेणीसंहारे १ अङ्के ।
"धृतयन्ता मधुरगिरः प्रसाधिताशा मदोद्धता-
रम्भाः ।")
मदोदग्रा, स्त्री,(मदेन उदग्रा ।) नारी । इति शब्द
माला ॥ (मदोद्धते, त्रि । यथा, रघौ । ४ । ४५ ।
"मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ॥")
मद्गुः, पुं, (मज्जतीति । मस्ज+"भृमृशीतृ-
चरित्सरितनिधनिमिमस्जिभ्य उः ।" उणा० ।
१ । ७ । इति उः ।) पक्षिविशेषः । इत्यमरः ।
२ । ५ । ३४ । पानकौडि इति भाषा ।
अस्य मांसगुणाः । वायुनाशित्वम् । स्निग्ध-
त्वम् । भेदकत्वम् । शुक्रकारित्वम् । रक्तपित्त-
नाशित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥
(सर्पजातिभेदः । यथा, सुश्रुते कल्पस्थाने ४र्थ
अध्याये ।
"मद्गुकविकरणालापादिकाः वज्रपृष्ठिकाहावलागार-
प्रभृतयः सर्पजाताः ।")
मद्गुरः, पुं, (माद्यति जलं प्राप्य हृष्यतीति ।
मद+"मद्गुरादयश्च ।" उणा० । १ । ४२ ।
इति उरच् निपातितश्च ।) मत्स्यविशेषः ।
इत्यमरः । १ । १० । १८ ॥ मागुर इति भाषा ।
(यथा । ललितविस्तरे । १२० । ७ ।
"श्रमणो गौतमः ध्यायको बत भो
श्रमणो गौतमो मद्गुरश्चर्षिः ।")
अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । संग्रा-
हित्वम् । गुरुत्वम् । गुरुत्वञ्च । इति राज-
वल्लभः ॥ (यथाह भावप्रकाशपूर्व्वखण्डे द्वितीय-
भागे ।
"मद्गुरो वातकृद्वृष्यो ग्राह्यः कफकरो लघुः ॥"
वर्णसङ्करजातिविशेषः । यथा, महाभारते ।
१३ । ४८ । ८३ ।
"निषादं मद्गुरं सूते दासं नावोपजीविनम् ।"
"मद्गुन् मीनविशेषान् राति आदत्ते इति
रा+कः । तम् ।" इति तट्टीकायां नीलकण्ठः ।)
मद्गुरकः, पुं, (मद्गुरः+स्वार्थे कन् ।) मद्-
गुरमत्स्यः । इति शब्दरत्नावली ॥
मद्गुरसी, स्त्री, (मद्गौ पक्षिविशेषे रसो यस्याः
ङीप् ।) शकुली मत्स्यः । इति शब्दरत्नावली ॥
मद्यं, क्ली, (माद्यति अनेनेति । मद+"गदमद-
चरयमश्चानुपसर्गे ।" ३ । १ । १०० । इति करणे
यत् ।) सुरा । इत्यमरः । २ । १० । ३९ ॥
(यथा, साहित्यदर्पणे ।
"भिक्षो ! मांसनिषेवणं प्रकुरुषे किं तेन मद्यं
विना
मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः
सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा,
चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या
गतिः ॥")
अस्य गुणपर्य्यायौ मदिराशब्दे द्रष्टव्यौ । तत्
तु द्वादशविधं यथा पुलस्त्यः ।
"पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम् ।
माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ।
द्वादशन्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम् ॥"
अत्र च कारणात् सुराया विधिभेदात् मद्यान्तरो-
त्पत्तेरुत्कर्षः । अतएव वचनात् अन्
मद्यमात्रं सुराशब्दार्थः । यथा इरदत्तः ।
"गौडी माध्वी सुरा पैष्टी वेला त्रिधा कला-
न्तरे ॥

तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात् ॥"
अथान्यां सुरामिं क्रमेण प्रायश्चित्तत्रयं न स्यात्। तथा भविष्ये।
"सुरा तु पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे।"
पैष्टीति तण्डुलविकारमात्रोपलक्षणं इतरे गौडीमाध्व्यौ गुडोऽधविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौडीमाध्व्योर्गौण-सुरात्वज्ञापनार्थम्। तेन एतत्पानेऽपि महापातकत्वमतिदिशति यथैवैका तथा सर्व्वा इति पैष्टी पूर्व्वप्रसिद्धं दर्शयति। यथा पैष्टी सुरा तथा सर्व्वा गौडी माध्वी चेति पूर्व्ववचनोक्ता तु पैष्टी दृष्टान्ततयैव दर्शिता। न पातव्या द्विजोत्तमैरिति ब्राह्मणैरित्यर्थः। चैवर्णिकपरत्वे उत्तमपदानर्थक्यात् मनुवचनानर्थक्यप्रसङ्गो-द्धाराद्वेतुत्तमशब्दानपदिकानर्थक्यमयुक्तं अतो ब्राह्मणस्य त्रिविधैव सुरा महापातकहेतुः। क्षत्रियवैश्ययोस्तु सुरा वै मलमन्नानामिति वचनेन पैष्टीव इति स्थितम्। अतएव।
"एका माध्वी च गौडी च पैष्टी च त्रिविधा सुरा।
द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित् ॥"
इति यमवचने द्विजातिपदं ब्राह्मणपरमेव। अत एव त्रिविधसुरापाने न क्षत्रियादीनां महापातकम् ॥ ० ॥ तावदस्तु। दोषाभावमेवाह वृद्धयाज्ञवल्क्यः।
"कामादपि हि राजन्यो वैश्यो वापि कथञ्चन।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥"
तदेवं पैष्टीनिषेधश्चैवर्णिकानां गौडीमाध्वीनिषेधस्तु ब्राह्मणानामेव ॥ ० ॥ स्त्रीणामपि ब्राह्मणीनामपि सुरापाननिषेधः। यथा भविष्ये।
"तस्मात् पेयं विप्रेण सुरा मद्यं कथञ्चन।
ब्राह्मण्यापि न पेया वै सुरा पापमथात्मना ॥"
"या ब्राह्मणी सुरापी स्यात्
न तां देवाः पतिलोकं नयन्ति ॥"
इति श्रुतिः।
"पतत्यर्द्धं शरीरेण भार्य्या यस्य सुरां पिबेत्।
पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते ॥"
न चेदं क्षत्रियवैश्ययोर्ब्राह्मणीविषयः। ब्राह्मणीपरत्वे विशिष्टसुरापानकर्त्तृभार्य्यावचनात् भार्य्या यस्य सुरां पिबेदिति सामान्यवचनाच्च। पानञ्च द्रवीभूतस्याध्यवहारः। स च कण्ठदेशादधोनयनं न तु वक्त्रमात्रप्रवेशः। निर्गतस्यापि कण्ठादधस्तात् पानत्वसम्भवात्। यथोक्तम्।
"निष्ठ्यपि सुरां कश्चित् पिबतीत्यभिधीयते।
यावन्न निपतेत् कण्ठे मद्यस्य प्रवेशनम्।"
अथ वक्त्रप्रवेशमात्रे प्रायश्चित्तम्। मनुना ह्युपानेऽपि लोके पानशब्दप्रयोगात्। अतएव मुखप्रवेशेऽपि प्रायश्चित्तं किन्तु मुखप्रवेशेऽपि कण्ठादधोगमनं भवति अतस्तदेवप्रयुक्तमिति। अथवा ओष्ठमात्रवेधे न पानमिति। अतएवोत्तमायामल्पप्रायश्चित्तम् ॥ ० ॥
अथ सुरापानप्रायश्चित्तम्। तत्र मनुः।
"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया सकाये निर्दग्धे मुच्यते किल्बिषात्ततः ॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वामरणात् गोशकृद्रसमेव वा ॥"
अग्निवर्णां अग्निसमस्पर्शाम्। पयो घृतं गोरेव व्याख्यातम् च गोः कीर्त्तनात्। मोहमत्तेऽपि बुद्धिपूर्व्वः। देवलः। सुरापाने ब्राह्मणो रूप्यताम्रसीसकानामन्यतममग्निकल्पं पीत्वा शरीरत्यागात् पूयते। रूप्यादयोऽग्न द्रवीभूताः पीत्वेति निर्द्देशात्। स्वयमशक्तावन्यैरपि मुखे निषेचनीयाः। यथा गौतमः। सुरापस्य ब्राह्मणस्य उष्णामासिञ्चेयुः सुरामास्ये मृतः शुध्येत्। अतएव न सेचकानां वधो विहितत्वात् स्वर्ग पात इव। एतच्च मरणप्रायश्चित्तं कामकृते। यथा, हारीतः।
"सुरापाने कामकृते ज्वलन्तीं तां विनिःक्षिपेत्।
मुखे तया हि निर्द्दग्धो मृतः शुद्धिमवाप्नुयात् ॥"
कथञ्चिदिति अकामादित्यर्थः। अङ्गिराः।
सुरापानं महत् कृत्वा योऽग्निवर्णां सुरां पिबेत्।
स पावयेदथात्मानमिह लोके परत्र च ॥"
भविष्ये।
"मतिपूर्व्वं सुरापाने प्राणान्तिकमुदाहृतम्।
पैष्टीपाने तु चाग्निभिर्म्मरणं कथञ्चन ॥
शस्त्रेणापि महाबाहो। प्रायश्चित्तमुदाहृतम्।
सुरायाः कामतः पाने मुख्यायाः प्राणनाशनम् ॥"
पुनःपुनःपैष्टीविषयत्वाभिधानम्। त्रिविधा सुरा मुख्या इति भ्रमनिरासार्थम्। कथञ्चन अकामादित्यर्थः ॥ ० ॥ इतरासां अमुख्यानां गौडीमाध्वीप्रभृतीनां कामतः सकृत्पाने मरणान्तिकं न भवति गौडीमाध्व्योस्तु कामतोऽभ्यासपाने गौडीमाध्वीव्यतिरिक्तायाश्चसुराया अकामाभ्यासपाने मरणमुक्तं भविष्ये।
"गौडीमाध्व्योश्चाभ्यासे प्राणान्तिकमुदाहृतम्।
अभ्यासे त्वसुरायास्तु तामेवाग्निनिभां पिबेत् ॥"
तदेति प्रागेव इत्यर्थः। अतएव।
"अकामात् कामतः पीत्वा वारुणीं मतिभिर्द्विजः।
मरणं तत्र निर्द्दिष्टं प्रायश्चित्तं विधीयते ॥"
इति मनुवचनमपि एतद्विषयमेव अभ्यासे मरणविधानात् त्रिलोभवाद एव मरणं कार्य्यम्। गौडीमाध्व्योः कामतः सकृत्पाने भविष्ये।
"असुरामद्यपाने तु कृते विप्रस्तु कामतः।
चान्द्रायणं समभ्यस्येत् शुद्धिकामः सशुद्धये।
यदाकिञ्चित् विषये मानवोऽयं प्रकल्पयेत्।
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ॥"
पिण्याकं खलिम् ॥ ० ॥ उत्तमसुरापाने चापलेन पार्थिव इत्याह यमः।
"आपदि आत्मने तथा ब्राह्मणीं वारुणीं पिबेत् ॥"
गोबालकपौरवाधवा तत्कर्मेदं चाह उद्भवाः। गोबालकपौरवाधाः सुरादः सुरामग्निवर्णां पीत्वा शुची भवन्ति ॥ ० ॥ अज्ञानतः सकृत्-
पैष्टीपाने ब्राह्मणस्य द्वादशवार्षिकम्। तदा मनन्ताद्यमतानुगतो यमः।
"चरेत्तामेतदेवोऽसौ सुरापपुरक्षणौ।
गोमांसावृक्णस्यैव सुवर्णस्तेयसादरः ॥" ० ॥
भविष्ये।
"अकामतः सुरां पीत्वा पैष्टीं मद्यकृद्यदि।
तप्तकृच्छ्रौ कृत्वा वै पुनःसंस्कारतः शुचिः।
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ॥"
सुरापानमात्रप्रमेयरोगस्य रोगिष्ठोऽब्राह्मणः पानविषयमिदं दर्शितं भविष्ये। यथा,—
"तथाग्निमिव विषये वाग्निजं परिकीर्तितम्।
यदि रोगी भवेद्यो नैतरस्य कदाचन।
तप्तकृच्छ्रेण शुध्येत। तप्तकृच्छ्रद्वयात्मकः ॥"
तप्तकृच्छ्रातिकृच्छ्रविषयञ्च शब्दपदं न प्रायश्चित्त-परं किन्तु तप्तकृच्छ्रपरम् ॥ ० ॥ अज्ञानतो गौडीमाध्व्योः सकृत्पाने उक्तं भविष्यपुराणे।
"सकृत् पीत्वा तथा गौडीमज्ञानात् द्विजोत्तम।
तप्तकृच्छ्रौ विधिवत् कृतवानत्र एव च ॥"
अज्ञानाभ्यासे तत्रैवोक्तम्।
"गौडीमज्ञानतः पीत्वा ब्राह्मणो ब्राह्मणप्रिय।
तप्तकृच्छ्रन्तु वै कृत्वा पुनःसंस्कारतः शुचिः।
माध्वीं पीत्वा महाबाहो। अज्ञानात् द्विज-सत्तमः।
शुद्ध्येत तप्तकृच्छ्रेण विकर्मेत्यब्रवीत्तथा।
रेतोमूत्रपुरीषाणां गौडीमाध्व्योश्च पायने।
प्रायश्चित्तविज्ञाने संस्काराच्छुद्धिरिष्यते ॥"
प्राणान्तिके च पादहानिरसम्भवात् क्षत्रियवैश्ययोरपि यथोक्तं मरणान्तिकं प्रायश्चित्तमेव। द्वादशवार्षिकादौ पादपादहानिरभ्यासवचने क्षत्रियादीनां ह्रासदर्शनात्।
"विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वैश्येऽर्द्धं पादमेकन्तु शूद्रजातिषु शस्यते ॥"
पायसादिमद्यपाने तु कामकारतोऽभ्यासे प्राणान्तिकं युक्तं ब्राह्मणस्य कामतः सकृत्पाने तु पराशरः।
"अमध्यायसने चैव मद्यमांसाशने तथा।
शूद्रे चान्द्रायणं कुर्य्यात् नदीं गत्वा समुद्रगाम्।
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्।
अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ॥"
अकामतः सकृत्पाने विष्णुः।
"पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः।
कारयेत् पुनःसंस्कारं भक्त्या विप्रांश्च भोजयेत् ॥"
कामतोऽकामतश्चाभ्यासे प्रजापतिमाह यमः।
"मोहाद्बुद्धितः सकृद्वान्तापदमपानापि वा।
अभ्यासे तु सप्तभूत्वा शुद्धिमवाप्नुयात् ॥"
अपक्षेपितमात्रपाने द्वादशवार्षिकमद्यपाने निरासम्। पायसं द्वादशाब्दमित्यादिभिः पुलस्त्यः।
"मद्येनोदक्पूर्णं वा दयकारेण यो द्विजः।
सुरोनालं तं पीत्वा आपदां शूद्रेण द्विजो-त्तमः ॥"

ब्राह्मण्यादीनां पादपादार्द्धादिहीनतया। बाल-वृद्धस्त्रीणामर्द्धादिकं प्रायश्चित्तम्। इति प्रायश्चित्तविवेकः॥ *॥ अथ पुराणे ब्राह्मणस्य मद्यपानादिनिषेधो यथा,—

"अपेयञ्चाप्यपेयञ्च तथैवास्पृश्यमेव च।
द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम्॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत्।
पीत्वा पतति कर्म्मभ्यस्त्वसम्भाष्यो द्विजोत्तमः॥
भक्ष्यित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः।
अपेयानि च विप्रो वै पीत्वा सद्याति रौरवम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

मद्यपस्य विष्णोरपचर्य्याे दोषादि यथा,—

वराह उवाच।

"मद्यं पीत्वा वरारोहे! यस्तु मामुपसर्पति।
तस्य दोषं प्रवक्ष्यामि शृणु सुन्दरि! तत्त्वतः॥
इत्वा वर्षसहस्राणि दरिद्रो जायते पुनः।
ततो भवेत् स पूतात्मा मद्भक्तश्च न संशयः॥
यस्तु भागवतो भूत्वा कामरागेण मोहितः।
पौरुषो पिबते मद्यं प्रायश्चित्तं न विद्यते॥
अथवा ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!।
अग्निवर्णां सुरां पीत्वा तेन मुच्येत किल्विषात्॥
एवमेवापराधानि येन मुच्यन्ति किल्विषात्।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
न स लिप्यति पापेन संसारञ्च न गच्छति॥"

इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम्॥

अपि च।

"यानयानगमनं कृत्वा मद्यगोमांसभक्षणम्।
शुद्ध्येच्चान्द्रायणाद्दिप्रः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्विशुद्ध्यति॥"

इति मार्कण्डे २२ अध्यायः॥

एतद्गौडीमाध्व्योः कामतः सकृत्पानविषयमिति प्रायश्चित्तविवेकदर्शनात्॥*॥ द्विजस्य पूजादौ मद्यदानविधिशुक्लनिषेधा यथा,—

"मदिरां प्रयतो दद्यात् अन्यत् भावन्तु वामतः।
अभावे विहितं यत्र मद्यं तत्र द्विजः पुनः॥
नारिकेलजलं कांस्ये ताम्रे च वितरेन्मधु।
नापद्यपि द्विजो मद्यं कदाचित् वितरेदपि॥
अन्ये तु न्यायवादुक्तादन्यत्रादा विधिवत्ः।
राजपुत्रस्तथा मद्यः सचिवः सौप्तिकादयः॥
दद्युर्मदबलिं भूपसम्पत्त्या विभवाय च।
भूपालादन्यतो मद्यं ददन् पापमवाप्नुयात्॥"

इति कालिकापुराणे ६६ अध्यायः॥

अथ ब्राह्मणस्य मद्यपाननिषेधशुक्रशापो यथा,

वैशम्पायन उवाच।

"सुरापानाद्वञ्चनां प्राप्य विद्वान्
संज्ञानाशं प्राप्य चैवातिघोरम्।
दृष्ट्वा कचञ्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः।
काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्कः॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मा ब्रह्महा चैव स स्या-
दस्मिंल्लोके गर्हितः स्यात् परे च॥
मया चैमां विप्रधर्म्मोक्तिसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्व्वे॥"

इति महाभारते आदिपर्व्वणि ७६ अध्यायः॥

अथ तन्त्रे मद्यपाननिषेधो यथा,—

"नारिकेलञ्च खार्ज्जूरं पानसञ्च तथैव च।
ऐक्षवं मधुकं टाङ्कं तालञ्चैव च माक्षिकम्॥
द्राक्षन्तु दशमं ज्ञेयं गौडं चैकादशं स्मृतम्।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम्॥
मध्यमं मधुकं गौडं पैष्टञ्चोत्तममिष्यते।
एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित्।
क्षत्रियादिः पिबेत् सर्व्वं पैष्टीमेकान्तु वर्ज्जयेत्॥
सुरां पीत्वा द्विजो मोहात् कामात् तत्कादि-
निश्चिताम्।
वैशाखिकं व्रतं कुर्य्यादीषत्भिन्ने तु पार्थिवम्॥
तत्कादिनिश्चितां किञ्चित् सुरां पीत्वा त्वकामतः।
कृच्छ्रान्दपादशुद्ध्यर्थं पुनः संस्कारमर्हति॥
सुखप्रवेशमात्रन्तु प्रायश्चित्तार्द्धमाचरेत्।
अनुपनीतो देवेशि! व्रतं चैवान्तिकं चरेत्॥
चतुर्थकालाहारी स्यादुमन्त्रपूर्य्यमथापि वा।
आ पञ्च वर्षं वृद्धं वा मानार्द्धं विनिर्द्दिशेत्॥
शूद्रस्य च विशेषेण अतिकृच्छ्रयं चरेत्।
स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत्॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते।
माध्वीगौडीसुरापाने द्वादशाब्दं विधीयते॥
इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु।
राजन्यवैश्ययोश्चापि गौडी माध्वी न दुष्यति।
मोहात् पानञ्च वैश्यश्च पीत्वा तत्कृच्छ्रयं चरेत्।
शूद्रोऽपि गौडीं पैष्टीञ्च न पिबेद्बोधसंस्कृताम्।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्।
चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्द्दिशेत्॥
ज्ञानादभ्यासयोगे तु चान्द्रायणत्रयं स्मृतम्।
नारिकेलं तथा ज्ञानादिपञ्चान्द्रायणेन तु।
क्षत्रियश्चैव वैश्यश्च प्राजापत्येन शुध्यति॥
अपक्वं पनसञ्चैव आम्रञ्च बदरं तथा।
स्थापयित्वा घटे नित्यं दद्यादारामपयःपलम्॥
वैलोक्यविजयाश्चैव मातुलुङ्गं तथैव च।
सर्व्वेऽप्येव ततो दद्यात् सन्धानात् पानमीरितम्।
दधि मधु प्रभृत्यापि माक्षिकं निकषं तथा।
अनुपाने तु देवेशि! कामसद्यं प्रवर्त्तितम्॥
विकृष्टं ब्राह्मणो सर्वं————————।
मधुना सह संस्थाप्य दिवसार्द्धं समाचरेत्।
त्रिफलोदकं दत्त्वा मधुना मद्यमीरितम्।
धातकं पञ्चखर्ज्जूरं चार्द्रं क्षौमकतारकम्॥
एकीकृत्याभिसन्धानात् खार्ज्जूरं मद्यमीरितम्॥
पक्वतालं दन्तिशाकं ककुभञ्च तथैव च।
एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम्॥
इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि।
पेषि तु नवकं दत्त्वा इक्षुमद्यं प्रकीर्त्तितम्॥
नवं मधु तथा त्रिरूयं पक्वं शर्करया सह।
सन्धानाज्जायते मद्यं माध्वीकं भरतो रसम्॥
घृतावरी टङ्कमूलं लवङ्गं पद्ममेव च।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम्॥
मालूरमूलं बदरी शर्करा च तथैव च।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम्॥
इन्द्रविष्णुा पञ्चधात्री नारिकेलजलन्तथा।
कदलीफलसन्धानान्मद्यं तन्नारिकेलजम्॥
दधि त्रैलोक्यविजया तथैव च करीकया।
गुडेन सह सन्धानात् गौडीमद्यं प्रकीर्त्तितम्॥
शष्कुलीमर्द्दितद्राक्षाप्रच्छोदकसमन्वितम्।
वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम्॥
प्रैषिऽहनि तु संप्राप्ते चौवर्णं तत्र निःक्षिपेत्।
शृङ्गवेरं मरीचञ्च मातुलुङ्गं तथैव च।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्॥"

इति श्रीमत्स्यसूक्ते महातन्त्रे चतुर्व्विंशति-साहस्रे १६ पटलः॥ *॥ अपि च।

"विद्वज्ञो भवेद्वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः॥
यदि यदि सुरां पीत्वा वर्ण्णभ्रष्टा भवन्ति हि॥"

इति उत्पत्तितन्त्रे १२ पटलः॥ *॥

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥ *॥

कौर्म्मे।

"न दद्याद् ब्राह्मणो मद्यं महादेवे कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्॥"

भैरवतन्त्रे।

"नारिकेलोदकं कांस्ये ताम्रे मद्यं तथा मधु।
राजन्यवैश्ययोरेवं न द्विजस्य कदाचन।
एवं प्रदानमात्रेण ब्रह्महा ब्रह्महत्याकृतो भवेत्॥"

इति आगमतत्त्वविलासः॥ *॥

अतो कलौ मद्यपानादिनिषेधो यथा, वाक्-स्वरादौपलक्षितायां मलद्रुरालम्।

"नराश्वमेधौ मद्यञ्च कलौ वर्ज्ज्या द्विजातिभिः॥"

निषेधविषयं वदन्ति उक्तताः। "मद्यमर्हस-देवसमिताद्धम्॥" अभिप्रायमेतादर्थमिति कल्पतरुः। कालिकापुराणेऽपि।

"अज्ञानाद्रुधिरं दत्त्वा ब्राह्मण्यमसाधुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥"

स्मृतिः।

"ताम्रे देवेषु यो मद्यं यवनां सत्वर्ज्जितम्।
मद्यञ्च तालपात्राणां मद्युक्तं वर्त्तं विना॥
कलौ मद्यमिति निरूपणमयं न युतम्।" इति तिथ्यादितत्त्वम्॥ *॥ मद्युक्तं यथा,—

"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं

मद्य।

मद्यञ्च ताम्रपात्रस्थं मधुयुक्तं घृतं विना ।”

इति कर्म्मलोचनः ॥ ० ॥

अथ मद्यपाने शुद्धये कौलानां मद्यपानविधिर्लिख्यते ।

“कुलाचाररतो वीरः कुलभक्तो यदा भवेत् ।
अभिषेकविधिं कुर्य्यात् सोमपानं महेश्वरि ! ॥
कर्म्मणा कुरुते देवि ! वीरश्चोद्धतमानसः ।
दिवसे देवतायाश्च वन्दनागुरुसेवनैः ॥
रक्तचन्दनगन्धैश्च सुरभी नात्र संशयः ।
भ्रमाद्भ्रमरो वीर उन्मत्तवद्विचेष्टितः ।
सुरापानरतो नित्यं बलिपूजापरायणः ।
गन्धागन्धे मांसभोज्ये शूकर एव च ।
भ्रमकः प्रमत्तो लोका मण्डूको कूर्म्म एव सदाः ।
वानरश्च ऋक्षश्च गवाश्वादिविचक्षणाः ।
इत्यादिषु कवीन्द्रैः पूजयेत् स्वेष्टदेवताम् ।
नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने ।
कुलवारे कुलर्क्षे च तिथौ च कुलके तथा ।
भैरवाः कथितं पर्व संस्थाप्य पूर्ववत् प्रिये ! ॥
सुराणां शोधनं कुर्य्याद्गमपानं परमेश्वरि ! ॥
प्रवृत्ते भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमाः ।
निवृत्ते भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक् ॥
विजयापानमात्रेण द्विजो दद्याद्युगे युगे ।”

इति उत्पत्तितन्त्रे ६९ पटलः ॥

“मद्याभावे चार्द्रकाद्यैः पूजयेत् परदेवताम् ।
सुराभावे च गौडीरं द्विजो दद्यात् कलौ युगे ।”

इति निरुत्तरतन्त्रे ५ पटलः ॥ ० ॥

“सर्व्वत्तमां सुरां पीत्वा ब्राह्मणो ब्रह्मवान् भवेत् ।
संस्कृतान्तु सुरां पीत्वा ब्राह्मणो ब्रह्मवित् भवेत् ।
पीत्वामल्लो कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यथा कामतः पीत्वा ब्राह्मण्यादेव च्यवते ।”

इति उत्पत्तितन्त्रम् ॥ ० ॥

“ब्राह्मणस्य महामोक्षं मद्यपाने प्रियंवदे ! ।
ब्राह्मणः परमेशानि ! यदि पानादिकं चरेत् ।
तत्क्षणात् शिवरूपोऽसौ सत्यं सत्यं हि शैलजे ॥
लोके गोत्वं यथा लौहं लौहस्य तैजसं यथा ।
घटे भग्ने यथाकाशं वायौ वायुर्यथा प्रिये ! ॥
तथैव मद्यपानेन ब्राह्मणो ब्रह्म गच्छति ।
लीयते नात्र सन्देहः परमात्मनि शैलजे ! ॥
सायुज्यादिमहामोक्षं निर्वाणं सांख्यादिषु ।
मद्यपानं विना देवि ! तत्ज्ञानं न लभ्यते ॥
अतएव हि विप्रस्तु मद्यपानं समाचरेत् ।
वेदमातान्तरेणैव ब्राह्मणो नहि शैलजे ! ॥
ब्रह्मज्ञानं यदा देवि ! तदा ब्राह्मण उच्यते ।
वैराग्यजननं ब्रह्म यदि च लौकिकी सुरा ।
सुरत्वं भोगमात्रेण सुरा तेन प्रकीर्तिता ।
अमरत्वं यतो याति ब्रह्मज्ञानादिगोचरम् ।
तद्वत् हि देवेश तत्र ज्ञानमयी सुरा ।
हरिहरादिसमानेन पवित्रीभूतो यथा भवेत् ।
ज्ञानमोक्षप्रदा येन सुरा सर्व्वप्रदायिनी ।
अतएव हि देवेशि ! ब्राह्मणः पानमाचरेत् ।
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
बहु किं कथ्यते देवि ! स एव निर्म्मलात्मकः ।
शुचिमार्गमिदं देवि ! गोप्यं पशुसङ्कटे ।
प्रकाशात् सिद्धिहानिः स्यात् निन्दनीयो न चान्यथा ।”

इति मातृकाभेदतन्त्रे ३ पटलः ॥ ० ॥

“कुलस्त्रीयजनं कुर्य्यात् सर्व्वदा परमेश्वरि ! ।
रमते युवती रम्या कामोन्मत्तविलासिनीम् ।
नटी कापालिका वेश्या रजकी नापिताङ्गनाम् ।
शूद्राणी क्षेत्रपरमणी गोपनी परमेश्वरि ! ॥
मालिनीसिद्धिसिद्धिरप्यस्ति मालिनीं विना प्रिये ॥
कुलाचारपरो वीरः कुलपूजापरायणः ।
भगलिङ्गसमायोगादाक्रम्य जपमाचरेत् ।
निश्चलत्तु भवेच्चित्तं कोटिशर्म्मपर्व्वैव किम् ।
चले चित्ते भवेद्व्याधिर्निश्चले निश्चलं यथा ।
प्रमदानां साधनं देवि ! लतासाधनमुत्तमम् ।
चितायाः साधनं देवि ! सिद्धिरस्ति कलौ युगे ।

इत्युत्पत्तितन्त्रम् ।

कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम् ।
न करोति नरो यस्तु स कलौ पतितो भवेत् ।
वैदिके तान्त्रिके चैव जपहोमबहिष्कृतः ।
अब्राह्मणः स एवोक्तः स एव शक्तिनिन्दकः ।
शुनीमाहरमं तस्य सर्व्वं यत् पिष्टकापि ।
कालीतारामन्त्रं प्राप्य वीराचारं करोति न ।
शूद्रत्वं तत्क्षणादेव प्राप्नुयात् स न चान्यथा ।

इति कामाख्यातन्त्रे ६ पटलः ।

मद्यशोधनप्रकारो यथा । शिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि देवी वै शोधनक्रियाम् ।
पद्मासनेन संविश्य करपुटं समाचरेत् ।
वामे गुरुं नमस्कृत्य दक्षिणे गणपतिं चरेत् ।
मध्ये देवीं नमस्कृत्य प्राणायाममथाचरेत् ।
शरीरे मातृकां न्यस्य ऋष्यादिन्यासमाचरेत् ।
षडङ्गोक्तविधानेन करन्यासं समाचरेत् ।
पश्चाद्भूमौ त्रिकोणं वा षट्कोणं वा महेश्वरि ॥
विलिख्य मण्डलं शुद्धं तस्योपरि घटं न्यसेत् ।
बहुधा शोधनं कृत्वा फट्कारेण पुनः पुनः ।
तत्कालिनी कारणं तु गन्धेनैव च स्थापयेत् ।
मातृकार्णेन देवेशि ! विपरीतेन चैव हि ।
पुनः फट्कारमन्त्रेण शोधनं कारयेत् सुधीः ।
ततो विन्दुत्रिकोणं च चतुरस्रोपरान्वितम् ।
आदिबिन्दुयुतं कृत्वा तस्योपरि घटं न्यसेत् ।
ततो मन्त्रं प्रवक्ष्यामि मायाबीजं ततः परम् ।
पीठं योनिं मालिनीं च विन्यस्य बीजसंयुतम् ।
तदर्च्चिमा वरारोहे ! घटं कृत्वा प्रतिष्ठितम् ।
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ।
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे ।
अमावीजमये देवि ! शुक्रशापाद्विमुच्यताम् ।
ॐ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ! ब्रह्महत्यां व्यपोहतु ।
ततः सकारयुक्तञ्च वकारं बिन्दुसंयुतम् ।
एवं धकारञ्चापि सर्व्वापरसमन्वितम् ।
जप्त्वा गन्धौ ततो ध्यायेत् समन्त्रं कुलसुन्दरि ! ॥
आनन्दभैरवं ध्यायेद्यथा तथानुसारतः ।
रक्तवर्णं चतुर्बाहुं त्रिनेत्रं वरदं शिवम् ।
जटाजूटधरं देवं पाशुपतचक्रभूषितम् ।
डमरुञ्च कपालञ्च शूलं खड्गं सामयुक्तम् ।
धारयन्तं तथैवेह आनन्दभैरवं शिवम् ।
एवं ध्यात्वा महेशानि ! तस्य मध्ये प्रपूजयेत् ।
मायाबीजं ततो हुं फट् मन्त्रेणानेन संयजेत् ।
शतपत्रसहस्रकैशानि ! आनन्दभैरवीं स्मरेत् ।
आनन्दभैरवीं देवीं वराभयलसत्कराम् ।
घोररूपां महारौद्रीं त्रिनेत्रां रक्तवाससम् ।
रक्तवर्णां महारौद्रीं महाभैरवान्विताम् ।
ब्रह्मविष्णुमहेशाद्यैः पूजिता या प्रिया मम ।
इति ध्यात्वा महेशानि ! तेनैव मनुना यजेत् ।
तयोरैक्यं विभाव्यैव गायत्रीं दशधा जपेत् ।
भैरवं दैवतकथोक्तं सिद्धये सदकारम् ।
सुधादेव्यै ततः पश्चाद्धोमकीर्त्ति ततो वदेत् ।
ततो देवी ततः पश्चात्तदन्ते च प्रचोदयात् ।
इति ते कथिता देवी गायत्री परमाद्भुता ।
तस्याः स्मरणमात्रेण सर्व्वासिद्धिश्च जायते ।
तत्र प्रसादादीपोऽयं मन्त्रं सत्यं न संशयः ।
तस्य मध्ये मूलमन्त्रं विलिख्य विलिखेत् यत्नतः ।
दशवर्णेन संपूज्य सुधां पश्चात् शोधयेत् ॥ ० ॥
धर्म्मार्थकाममोक्षाणां विनयात्मका पार्व्वति ! ।
अन्येषां कारणं यस्मात् कारणं परिकीर्त्तितम् ।
अस्याकथ महेशानि ! शरीरकारणं हि तत् ।
अहुसयोऽहं वीरेशि ! वीरकार्य्यप्रचारणः ।
निर्निकारेण देवेशि ! निर्विकल्पेन चेतसा ।
सेवनार्थं कुलं भद्रे ! शक्तिसाक्षिप्रदायकम् ।
निर्विकल्पो महेशानि ! मुक्तिमार्गो न संशयः ।
सविकल्पो वरारोहे ! रौरवं याति निश्चितम् ।”

इति कैवल्यतन्त्रे २ पटलः ।

(वैद्यकोक्तदोषादि यथा,—

“लौल्याद्विकल्पसम्भ्रान्तं मद्यपानादिकं बहु ।
विकारान् विषदं मद्यमोक्षकोऽशक्तिमर्षणः ।
तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपमादिनो गुणाः ।
जीवितान्ताय जायन्ते विषे तूत्कर्षवर्त्तिनः ।
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान् ।
दशभिर्दशसंक्षोभ्य चेतो नयति विक्रियाम् ॥
आद्ये मदे द्वितीये च प्रमादायतने स्थितः ।
दुर्विकल्पहतो मूढः सुखमित्यधिमुच्यते ।
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः ।
निरङ्कुश इव व्यालो न किञ्चिन्नावचेष्टते ।
इयं भूमिरवद्यानां दौःशील्यस्येदमास्पदम् ।
एकोऽयं बहुमार्गाया दुर्गतेर्देशिकः परम् ।
निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः ।
मरणादपि पापात्मा गतः पापतरां दशाम् ।
धर्म्माधर्म्मं सुखं दुःखमर्थानर्थं हिताहितम् ।
यदासक्तो न जानाति कथं तच्छीलयेद्बुधः ।
मदे मोहो भयं शोकः क्रोधो मृत्युश्च संश्रिताः

सोन्मादमदमूर्च्छाया: सापस्मारापतानका: ।
यच्चैक: स्मृतिविभ्रंशस्तत्र सर्व्वमसाधु यत् ।
अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ।
मद्यं त्रिवर्गधीधैर्य्यलज्जादेरपि नाशनम् ।
नाति मात्रान्ति मलिना: सुताहारा मदात्मका: ।
स्निग्धा: सत्त्वयोयुक्ता मद्यनित्यास्तदन्वया: ।
मेद:कफाधिका मन्दवातपित्ता दृढाशया: ।
विपर्य्ययेऽतिमात्रान्ति विमध्या: क्षुपिताश्च ये ।
मद्येन चाल्पकेनैव शरीरं बहु नाति च ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ।)
एतानि श्रुतिस्मृतिविरुद्धत्वात् स्नेहनार्थानि शिष्टै: कदाचिदपि नाचरणीयानि ।

मद्यद्रुम:, पुं, (मद्योत्पादको द्रुम: ।) माड़वृक्ष: । इति राजनिर्घण्ट: ।

मद्यपङ्क:, पुं, (मद्यानां पङ्क इव ।) सुराकल्क: । मेयर इति भाषा । तत्पर्य्याय: । मेदक: २ जगल: ३ । इति हेमचन्द्र: । ३ । ५६८ ।

मद्यपाशनं, क्ली, (मद्यपैरश्यते भुज्यते इति । अश् + कर्म्मणि ल्युट् ।) पानचषकभक्ष्यम् । तत्पर्य्याय: । उपदंश: २ अवदंश: ३ चक्षणम् ४ । इति हेमचन्द्र: । ३ । ७२ ।

मद्यपुष्पा, स्त्री, (मद्यानि मदसाधनानि पुष्पाण्यस्या: ।) धातकी । इति राजनिर्घण्ट: । (गुणादिविशेषोऽस्या धातकीशब्दे ज्ञातव्य: ।)

मद्यमण्ड:, पुं, (मद्यस्य मण्ड: ।) मद्यफेन: । तत्पर्य्याय: । कारोत्तम: २ । इति हेमचन्द्र: । ३ । ५६८ । कारोत्तर: ३ सुरामण्ड: ४ । इत्यमर: । २ । १० । ४३ ।

मद्यवासिनी, स्त्री, (मद्यानामिव वासो गन्धोऽस्या अस्तीति । इनि: ङीप् ।) धातकीवृक्ष: । इति रत्नमालाराजनिर्घण्टौ ।

मद्यबीजं, क्ली, (मद्यस्य बीजम् ।) नानाद्रव्यकृतसुराबीजम् । तत्पर्य्याय: । किण्वम् २ नग्नहू: ३ नग्नहु: ४ । इति हेमचन्द्र: । ३ । ५६८ । बाखर इति भाषा ।

मद्यसन्धानं, क्ली, (मद्यस्य सन्धानमुत्पादनार्थं आयोजनम् ।) सुरासन्धीकरणम् । यवाङ्कुरपलाशेषु बहुकालं सन्धाय यत् क्रियते तत् । तत्पर्य्याय: । आसुति: २ आसव: ३ अभिषव: ४ । इति हेमचन्द्र: । ३ । ५६८ ।

मद्यामोद:, पुं, (मद्यस्येवामोदो गन्धो यस्य ।) बकुलवृक्ष: । इति राजनिर्घण्ट: ।

मद्र:, पुं, (मन्दते इति । मदि मोदादौ + "स्फायि तञ्चीति ।" उणा० २ । १३ । इति रक् ।) देशविशेष: । हर्ष: । इत्युणादिकोष: । तद्देशविवरणं यथा,—
"वैराटपाण्ड्ययोर्मध्ये पूर्व्वदक्षक्रमेण तु ।
मद्रदेश: समाख्यातो माद्री वा तत्र तिष्ठति ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटल: ।
(भद्रे, क्ली । यथा, चतुर्थो चाभिप्रायाश्च मद्रभद्रकदमादर्शितै: । ९ । ६ । ७१ । इत्यत्र चके । मद्रं ईश्वरचक्रमूलात् । इति काशिका ।
मद्रभद्रयो: पर्य्यायत्वादन्यतरो न पठनीय: । इति सिद्धान्तकौमुदी च ।)

मद्रक:, त्रि, (मद्रेषु जात इति । मद्र + "मद्रवृज्यो: कन् ।" ४ । २ । १३१ । इति कन् ।) मद्रदेशभव: । इति सिद्धान्तकौमुदी । (देशभेद: । यथा, मत्स्यपुराणे । ११३ । ४१ ।
"गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रका: ॥")

मद्रकार:, त्रि, (मद्रं करोतीति । कृ + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति पक्षे खच् ।) मद्रङ्कर: । यथा क्षेमप्रियमद्रात् कृञ्ञ इति मुग्धबोधव्याकरणम् ।

मद्रङ्कर:, त्रि, (मद्रं भद्रं करोतीति । कृ + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति चकारात् खच् । मुम् च ।) मङ्गलकारक: । यथा क्षेमङ्करोऽरिष्टताति: स्याच्छिवङ्करभद्रङ्करौ । इति त्रिकाण्डशेष: ।

मद्रसुता, स्त्री, (मद्रस्य सुता ।) मद्रराजकन्या । सा पाण्डुराजस्य द्वितीया भार्य्या नकुलसहदेवजननी च । इति शब्दरत्नावली ।

मद्वर्गीण:, मद्वर्गीय:, मद्वर्ग्य:, त्रि, (मद्वर्गस्यायमिति । "अशब्दे यत् खावन्यतरस्याम् ।" ४ । ३ । ६४ । इतिक्रमेण खछयत्प्रत्यया: ।) मद्वर्गसम्बन्धी । इति सिद्धान्तकौमुदी ।

मद्वा, [न्] पुं, (माद्यतीति । मद् + "सामर्दिपद्यर्त्तिपृशकिभ्यो वनिप् ।" उणा० ४ । ११२ । इति वनिप् ।) शिव: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: । (मदनशीले, त्रि । यथा, ऋग्वेदे । ८ । ८१ । १९ ।
"इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिर: ॥")
"मद्वने मदनशीलाय ।" इति तद्भाष्ये सायण: ।

मधु, क्ली, (मन्यन्ते विशेषेण जानन्ति जना यस्मिन् । मन् + "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ।" उणा० १ । १८ । इति उ: धश्चान्तादेश: ।) मद्यम् । (यथा, आर्य्यासप्तशत्याम् । ४९५ ।
"मधुमदवीतव्रीड़ा यथा यथा जपति सम्मुखं बाला ॥")
क्षीरम् । जलम् । इति मेदिनी हेमचन्द्रश्च । रसभेद: । मधुररस: इति यावत् । इति शब्दरत्नावली । पुष्परस: । फुलेर मौ इति भाषा । तत्पर्य्याय: । मकरन्द: २ । इत्यमर: । १ । ४ । १७ । मरन्द: ३ मरन्दक: ४ । इति शब्दरत्नावली । क्षुद्राभिर्मक्षिकाभि: कृतम् । मौ इति भाषा । क्षौद्रम् २ माक्षिकम् ३ । इत्यमर: । २ । ९ । १०७ । माध्वीकम् ४ कुसुमासवम् ५ पुष्पासवम् ६ पवित्रम् ७ पित्र्यम् ८ पुष्परसाह्वयम् ९ । इति राजनिर्घण्ट: । माध्वीकम् १० सारघम् ११ मक्षिकावान्तम् १२ वरटीवान्तम् १३ भ्रमरवान्तम् १४ पुष्परसोद्भवम् १५ । इति भावप्रकाश: । (तत्रास्य पर्य्याय: ।
"मधु पुष्परसं क्षौद्रं मकरन्दश्च माक्षिकम् ॥"
इति वैद्यकरत्नमालायाम् ।
मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं स्वर्य्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं रोपणं शाहीकरणं चक्षुष्यं प्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्द्दितृष्णाकृमिविषप्रशमनं ह्लादि त्रिदोषप्रशमनञ्च तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्माधुर्य्यात् कषायभावाच्च वातपित्तघ्नम् ।
"हंस्यक्षीयं मधु मदं नातिशैत्यहरं परम् ।
मेद:स्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥
दोषत्रयहरं पक्वमामम्लं त्रिदोषकृत् ।
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥"
तत्तु नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविषमक्षिकासम्भवत्वाच्चानुष्णोपचारम् ।
"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णे वा तं निहन्ति यथा विषम् ॥
तत् सौकुमार्य्याच्च तथैव शैत्या-
न्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च
तथान्तरीक्षेण जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितम् ।
अपाकादनवस्थानान्न विरुध्येत पूर्व्ववत् ॥
मध्वामात् परतरव्याधिरामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सद्यो हन्ति यथा विषम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ।)
अस्य सामान्यगुणा: । शीतत्वम् । लघुत्वम् । स्वादुत्वम् । त्रिदोषशमनाग्नित्वम् । कषायानुरसत्वम् । रूक्षत्वम् । चक्षुष्यत्वम् । व्रणशोधनाग्निमत्त्वञ्च । ७ । तदष्टविधं यथा । पौत्तिकम् १ भ्रामरम् २ क्षौद्रम् ३ माक्षिकम् ४ छात्रम् ५ आर्घ्यम् ६ औद्दालकम् ७ दालम् ८ । एतेषां लक्षणानि यथा,—
"पिङ्गला मक्षिका सैया महत्यल्या च या दिवा ।
महती पुत्तिकाख्या सा तत्कृतं पुत्तिकं स्मृतम् ।
मध्यमा मक्षिका भीमा माक्षिकमभिधीयते ।
पुत्तिकाभ्रमरक्षुद्रामक्षिकाजनितं मधु ।
पौत्तिकाद्युत्तरं ज्ञेयं वरटीच्छत्रकारकम् ।
तपोवने वरकाटोरभ्यं मधुतस्तद्भवम् ।
औद्दालकन्तु वल्मीकादिकीटविनिर्मितम् ।
दालमिक्षुविनिर्दिष्टं द्रुमकोटरकोटजम् ॥"
एतेषां वर्णा यथा,—
"माक्षिकं तैलवर्णं स्यात् घृतवर्णन्तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छुक्लं भ्रामरमुच्यते ॥"
एतेषां गुणा यथा,—
पौत्तिकं तेषु वीर्य्योष्णं कषायाद्यम्लवर्जितम् ।
वातासृक्पित्तदाहार्त्तिविदाहि मदकृत् ॥
"पैच्छिल्यात् स्वादुभूयस्त्वात् भ्रामरं गुरु कीर्त्तितम् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ।
तस्मात् लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।

ज्वरादिषु च रोगेषु प्रयुक्तं तद्विषोपमम् ।
छात्रं पिच्छिलं क्रिमिहरं रक्तपित्तहरं गुरु ।
अर्घ्यं चक्षुष्यमायुष्यं कफपित्तास्रवातजित् ।
औद्दालकं कषायोष्णं कटुकुष्ठविषापहम् ।
दालं कफहरं रूक्षं दीपनं छर्द्दिमेहनुत् ।
उष्णमुष्णार्त्तमुष्णैश्च हन्यात्तत्तु विषान्वयात् ।
मधून्युत्पत्तिविषधृतां वर्ज्यं विप्रार्थैर्थितम् ॥"
उष्णैः रोगैः उष्णे; उष्णं मधु उष्णार्त्तं रोगपीडितं हन्ति विषान्वयात् विषयुक्तत्वात् । ● । नवपुराणमधुगुणाः ।
"बृंहणीयं मधु नवं नातिश्लेष्महरं परम् ।
पुराणं लघु संग्राहि विशोषि स्थौल्यनाशनम् ।
दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत् ।"
अत्र केचिन्मधुनोऽग्निसंयोगाभावात् आमपक्वतां नाहुः । ● । मधुजातशर्करागुणाः ।
"मधुजा शर्करा रूक्षा छर्द्यतीसारजित् ।"
इति राजवल्लभे मधुवर्गः । ● ।
अपि च ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
नानापुष्परसाधाराः कपिला ब्रह्ममक्षिकाः ।
याः सूक्ष्मास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ॥
ये स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः ।
भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ॥
पिङ्गला मक्षिकाः सूक्ष्माः क्षुद्रा इति हि विश्रुताः ।
ताभिरुत्पादितं यत्तु तत् क्षौद्रं मधु कथ्यते ॥
मशको मक्षिका पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धीमद्भिः पौत्तिकं समुदाहृतम् ॥
छत्राकारन्तु पटलं वरटाः पीतपिङ्गलाः ।
ये कुर्वन्ति तदुत्पन्नं मधु छात्रकमीरितम् ॥
मक्षिकास्तीक्ष्णतुण्डा याः पीताः षट्पदसन्निभाः ।
तदुत्पन्नं महर्षिभिः तदार्घ्यं मधु भण्यते ॥
वल्मीकाः कपिलाः कीटा भूमिकर्द्दमजाः स्मृताः ।
वल्मीकान्नसदृशमौद्दालकमुदीर्यते ॥
कृष्णपीतवर्णाकाराः सूक्ष्मास्तिष्ठन्ति मक्षिकाः ।
वृक्षस्य कोटरान्तस्थाः दालमिदं क्रमात् ॥
एवं तत्काष्ठतो मैदेवत्पत्तिः कथिता क्रमात् ।
अथ यत्स्वल्पं श्रेष्ठं सर्वतोऽप्यधिकं क्रमात् ॥"
मदनपाले,—
माक्षिकं तैलवर्णं स्यात् घृतं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतवर्णकम् ॥
आर्घ्यं पीतवर्णं श्वेतं स्यात् पिङ्गवर्णमौद्दालकम् ।
औद्दालं सर्ववर्णमुपपीतं दालमुच्यते ॥
माक्षिकं मधुरं रूक्षं लघु श्वासादिदोषहृत् ।
भ्रामरं पिच्छिलं रूक्षं मधुरं मूत्रजाड्यजित् ॥
क्षौद्रन्तु शीतं चक्षुष्यं पिच्छिलं पित्तनाशकृत् ।
पौत्तिकं मधु रूक्षोष्णं रक्तपित्तदाहकृत् ॥
पित्तमेहहरमिक्षु विदाहकार्यं मूर्च्छाकरम् ।
अर्घ्यं चक्षुष्यमत्यर्थं कफपित्तादिदोषहृत् ॥
औद्दालकन्तु कुष्ठादिदोषघ्नं सर्वविषहरम् ।
दालं कटु कषायाम्लं मधुरं पित्तदाहि च ।
नवं मधु भवेत् स्थौल्यं नातिश्लेष्महरं परम् ।
देहस्थौल्यापहं ग्राहि पुराणं मधु लेखनम् ॥
पक्वं दोषत्रयघ्नं मधु विविधकफानाशमित्थं तथादि-
ध्मानं धत्ते च रूक्षं कमलनिभतरं चौर्ममुष्टि
: विधत्ते ।
आमं वेदामगुल्मामयमपनयति पित्तदाहा-
स्रदोष-
नाशं नूनं विशोषं जनयति भवति ध्वंसमस्य च
वह्नेः ॥
प्रयोगेऽपचयत्वाभ्यां प्रकर्षं दोषनाशिषु ।
आधारस्याम्बु हितं तरुणा मधुशर्कराः ॥
उष्णं सदोष्णं काले वा ययथुष्णमपादि वा ।
आमं मधु मनुष्याणां विषतापप्रदायकम् ॥
कीटकादिमृतगन्धदूषितं
यच्च पर्य्युषितकं मधु स्मृतः ।
काष्ठकोटरगतञ्च भेषजं
तच्च गेहजनितञ्च दोषकृत् ॥
एवं विचार्य मधुपानमथास्य दंष्ट्रा-
स्वादविधं मधु रसायनयोगयोग्यम् ।
छिक्कागुदाङ्कुरविशोषकफप्रमादि-
दोषापहं भवति दोषदमन्यथा चेत् ॥
माध्वी सिता मधूत्थिता मधुजा मधुशर्करा ।
माधीकशर्करा सैव क्षौद्रजा क्षौद्रशर्करा ॥
मद्गुणं यन्मधु प्रोक्तं मद्गुणास्ताश्च शर्कराः ।
विशिष्टाह्नस्मया च तर्पणं चौकर्दविनाम् ॥"
इति राजनिर्घण्टः ॥०॥०॥
मतान्तरे मधुगुणाः ।
"मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्यं व्रणशोधनरोपणम् ॥
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ॥
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ।
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलम् ॥"●।
अथ मधुभेदाः ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥"●।
अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
"मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशकम् ॥"●।
अथ भ्रामरस्य ।
"किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः पुष्पेभ्यः भ्रमरैर्भृ-
तम् ।
निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं
हिमम् ॥०॥"
अथ क्षौद्रस्य ।
"मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं
मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥"
अथ पौत्तिकस्य ।
"याः कृष्णा मशकोपमा लघुतराः प्रायो
महाविषिकाः
वृक्षाणां तरुकोटरान्तरगताः पुष्पासवं कुर्वते ।
तासाम्प्रोदित पुत्तिका निगदिताः ताभिः कृतं
सर्पिषा
तुल्यं यन्मधु तद्विचारचतुरैः संकीर्त्तितं पौत्ति-
कम् ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत् ।
विदाहि मेहकृच्छ्रघ्नं ग्रन्थ्यादिक्षतशोषि च ॥"
अथ छात्रकस्य ।
"वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ।
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं
गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत् तर्पणञ्च गुणाधिकम् ॥"
अथार्घ्यस्य ।
"मधूकवृक्षा निर्यासं वराख्यां समीरिताः ।
तत्स्रावार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः ॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदो-
पमाः ।
अर्घ्याख्यास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः ॥
आर्घ्यं मधु अतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ॥"●।
अथौद्दालकस्य ।
"प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्प-
कीटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ।
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ॥"●।
अथ दालस्य ।
"संस्रुत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं छर्द्दिप्रमेहजित् ॥
अधिकं मधुरं स्निग्धं बृंहणं गुरुभारिकम् ॥"
लघु याति । गुरुभारिकं दुर्ज्जरम् । ● । अथ
नवपुराणमधुगुणाः ।
"नवं मधु भवेत् पुष्टौ नातिश्लेष्महरं सरम् ।
पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुडस्यापि विशेषतः ।
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ॥"
अथ मधुनः शीतस्य गुणाधिकत्वात्
निषेधः ।
"विरुद्धान्यपि सर्वं मक्षिका भ्रमरादयः ।
सशीतं मधु कुर्वन्ति तच्चोष्णं दुःखदायि ॥

विशान्वयात्तद्वयाम्लं द्रव्येणोष्णेन वा सह ।
उष्णार्त्तस्योष्णकाले च स्मृतं विषवत् मधु ॥"
इति भावप्रकाशः ॥

मधुः, पुं, (मन्+उ । नस्य धः ।) मधुद्रुमः । मौलगाछ इति भाषा ॥ वसन्तर्त्तुः । (यथा, कुमारसम्भवे । ३ । २७ ।
"निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
दैत्यभेदः । (यथा, देवीभागवते । १ । ६ । १५ ।
"मधुश्च कुपितस्तत्र हरिणा सह संयुगे ॥")
इमं हत्वा विष्णुर्मधुसूदनोऽभूत् ॥ चैत्रमासः । इति मेदिनी । धे, १९ ॥ (यथा, रघुः । ११ । ७ ।
"रेजतुर्गतिवशात् प्रवर्त्तिनौ
भास्करस्य मधुमाधवाविव ॥")
अशोकवृक्षः । इति हेमचन्द्रः । २ । १५३ ॥ यष्टिमधु । इति शब्दरत्नावली ॥ असुरविशेषः । (यथा, भागवते । ९ । ११ । १४ ।
"शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥")
स च शत्रुघ्नेन हतः । यस्य नाम्ना मथुरा मधुपुरीति ख्याता ॥

मधुः, स्त्री, (मन्+उ । नस्य धः ।) जीवन्तीवृक्षः । इत्यमरः । २ । ४ । १४९ ॥

मधुकं, क्ली, (मध्विवेति । मधु+"संज्ञायाञ्च ।" ५ । ३ । ८७ । इति कन् । यद्वा, मधु मधुरं कायतीति । कै+कः ।) यष्टिमधुका । इत्यमरः । २ । ४ । १०९ ॥ (यथास्य पर्य्यायः ।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्वकेशाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)
त्रपु । इति हेमचन्द्रः ॥

मधुकः, पुं, (मधु मधुरं कायतीति । कै+कः ।) वन्दिभेदः । पलाशः । पिच्छाम्बरः । इति विश्वः ॥

मधुकण्ठः, पुं, (मधुर्मधुरः कण्ठः कण्ठस्वरो यस्य ।) कोकिलः । इति त्रिकाण्डशेषः ॥

मधुकरः, पुं, (करोति सञ्चिनोतीति । कृ+अच् । मधुनः करः ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, श्रीमद्भागवते । ४ । १८ । २ ।
"सर्व्वतः सारमादद्यात् यथा मधुकरो बुधः ॥")
कामी । इति धरणिः ॥ भृङ्गराजवृक्षः । इति शब्दमाला ॥

मधुकर्कटिका, स्त्री, (मधुर्मधुरा कर्कटिकेव ।) मधुरजम्बीरविशेषः । मउकड़ी इति भाषा । तत्पर्य्यायः । कुम्भी २ । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्या गुणाश्च यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥

मधुकर्कटी, स्त्री, (मधुर्मधुरा कर्कटी) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुका, स्त्री, (मधुक+टाप् ।) मधुयष्टिका । इत्यमरः । २ । ४ । १०९ ॥ मधुपर्णीवृक्षः । इति मेदिनी । के, १६५ ॥ क्षयवर्णकहुली । इति हेमचन्द्रः । ४ । २४३ ॥

मधुकुक्कुटिका, मधुकुक्कुटी, स्त्री, (मधुः मधुरा कुक्कुटीव । मधुकुक्कुट+स्त्रियां ङीष् । स्वार्थे कन् । स्त्रियां टाप् । पूर्व्वस्य ह्रस्वत्वञ्च ।) जम्बीरविशेषः । मख्वर इति मङ्कर इति च भाषा । तत्पर्य्यायः । मातुलुङ्गा २ सुगन्धा ३ गिरिजा ४ पूतिपुष्पिका ५ फलाम्ला ६ देवदूती ७ । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । स्वादुत्वम् । गुरुत्वम् । स्निग्धत्वम् । वातपित्तविनाशित्वञ्च । इति राजवल्लभः ॥

मधुकृत्, पुं, (मधु करोति सञ्चिनोतीति । कृ+क्विप् तुगागमश्च ।) भ्रमरः । इति हेमचन्द्रः ॥ (यथा, छान्दोग्योपनिषदि । ३ । १ । २ ।
"अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः ॥")

मधुकेशटः, पुं, (मधुनः पुष्परसस्य के शिरसि अग्रभागे शटति गच्छतीति । शट्+कर्म्मणि अच् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

मधुकैटभौ, पुं, (मधुश्च कैटभश्च तौ । इतरेतरद्वन्द्वः ।) असुरविशेषौ । तयोरुत्पत्त्यादि यथा,
"दैनन्दिने तु प्रलये प्रसुप्ते गरुडध्वजे ।
तस्य श्रवणविड्जातावसुरौ मधुकैटभौ ॥
कूर्म्मपृष्ठगता पृथ्वी विलीनेवाभवज्जलैः ।
तां विशीर्णां योगनिद्रा महामाया व्यलोकयत् ॥
तां वै दृढतरां कर्त्तुं पृथ्वीं प्रति महेश्वरी ।
उपायं चिन्तयामास कथं पृथ्वी भवेद्दृढा ॥
इदानीमाप्यवत् पृथ्वी प्रशस्ता कोमला जलैः ।
सृष्टिकाले जनान् वोढुं कथं शक्ता भविष्यति ॥
इति सञ्चिन्त्य सा माया जगतां सृष्टिकारिणी ।
उपगम्य तदा विष्णुमाससाद हृदिस्थितम् ॥
तस्य सुप्तं समासाद्य जगन्नाथं जगत्पतिम् ।
वामहस्तकनिष्ठाग्रं तस्य कर्णे न्यवेशयत् ॥
निवेश्य नखराग्रेण प्रोद्धृत्य स्रावकं मलम् ।
चूर्णीचकार सा देवी योगनिद्रा जगत्प्रसूः ॥
तत्कर्णमलचूर्णेभ्यो मधुनामासुरोऽभवत् ।
ततो दक्षिणहस्तस्य कनिष्ठाग्रेण दक्षिणे ॥
कर्णे न्यवेशयद्देवी तस्मादुद्धृतं मलम् ।
तथापि चोदयामास करशाखाग्रवेगेन तु ॥
ततोऽभूत् कैटभो नाम बलवानसुरो महान् ।
उत्पन्नः स च मायायै यदाद् अभिलषान्मधु ।
जनकस्य महादैत्यो मधुनामाकरोत्तदा ।
उत्पन्नः कीटवद्भाति महामायाकरे मलः ।
अतस्तं कैटभाख्यन्तु सर्व्वं देवी तदाकरोत् ॥
ताभ्याञ्च महामाया युध्यतां हरिणा सह ।
युवानौ मदवेगाच्च भ्रमन्तौ निखिलं जगत् ॥
यदा युद्धे प्रमाथिं च्यावो विष्णो ! रक्षाय नौ ।
वरेशायं दुर्गा हन्ता माधवो हरिरव्ययः ॥
महामायामोहितौ तौ विष्णुमर्थं तदा गुरुः ।
भ्रममाणौ ददृशतुर्नाभिपद्मस्थितं विधिम् ॥
तमूचतुस्तौ धातारं हनिष्यावोऽद्य नाशितम्
त्वं जागरय वैकुण्ठं यदि जीवितुमिच्छसि ॥
ततो ब्रह्मा महामायां योगनिद्रां जगत्प्रसूम् ।
प्रसादयामास तदा स्तुतिभिर्विविधाभिश्च ॥
चिरं स्तुताथ सा देवी ब्रह्मणा जगदात्मना ।
प्रसन्नाभवदव्यग्रमुवाच च तथा विधिम् ॥
किमर्थं संस्तुता चाहं किं करिष्याम्यहं तव ।
तद्वद त्वं महाभाग ! करिष्याम्यहमद्य ते ॥
ततस्तेन महामाया प्रोक्ता धात्रा महात्मना ।
प्रबोधय जगन्नाथं यावन्मां न जिघांसतः ।
संमोहयैतौ दुर्द्धर्षावसुरौ मधुकैटभौ ।
इत्युक्ता सा तदा देवी ब्रह्मणा जगदात्मना ।
बोधयामास वैकुण्ठं मोहयामास तौ तदा ॥
ततः प्रबुद्धः कृष्णः स ददर्श भयशालिनम् ।
ब्रह्माणं तौ तदा घोरावसुरौ मधुकैटभौ ॥
ततस्ताभ्यां स युयुधे सुरारिभ्यां जनार्द्दनः ।
नाशकद् बाधितुं वीरावसुरौ मधुकैटभौ ॥
अनन्तोऽपि यथायोग्यं नाशं धर्त्तुं नमोऽभवत् ।
युध्यमानान्महावीरान् वैकुण्ठमधुकैटभान् ॥
अथ ब्रह्मा शिलारूपां स्थितिशक्तिं तदाकरोत् ।
अष्टयोजनविस्तीर्णां सार्द्धयोजनमायताम् ॥
तस्यां शिलायां वैकुण्ठो युयुधे नृपसत्तम ! ।
सह ताभ्यां शिला सा तु प्रविवेश जलान्तरम् ॥
तस्यान्तु मग्नां मत्वा मोहेन युयुधे हरिः ।
पञ्चवर्षसहस्राणि बाहुयुद्धैर्निरन्तरम् ॥
यदा नैवाशकद्धन्तुं तौ विष्णुर्जगतां पतिः ।
तदा चिन्तां तदावाप विधातापि भयातुरः ॥
तत्क्षणादेव तं विष्णुमसुरौ मददर्पितौ ।
पुनः पुनस्तौ गर्ज्जन्तौ महामायाविमोहितौ ॥
तुष्टौ गर्ज्जन्निपुद्धेन वरं वरय माधव ! ।
तवेदं सम्प्रदास्यावः मनसेनदयानुजा ॥
तयोस्तद्वचनं श्रुत्वा भगवान् गरुडध्वजः ।
उवाच तौ युवां वध्यौ भवेतां मे महाबलौ ॥
इति देहि वरं मह्यं दातव्यं यदि विद्यते ।
तौ तदा प्राह युद्धस्थौ योग्यौ नौ प्रोभवेद्वधः ।
तत्रावां जहि नौ यत्र तोयं मद्भिर्न विद्यते ॥
तयोस्तद्वचनं श्रुत्वा माधवो जगतां पतिः ।
ब्रह्माणं प्राह प्रोद्धृत्य प्राग्देशाकर्षया ॥
ब्रह्मशिलाशिरो द्रोणगुरुस्य भैरवी यथा ।
तव शिला सहायार्थे ह्युद्धारिष्यामि महाबलौ ॥
ततो ब्रह्मा क्षणेनैव उद्धार शिलां नाम ।
तस्याः मध्ये पूर्व्वभागे ऊर्द्धं पर्व्वतरूपकम् ॥
ऊर्द्ध्वं शिला शिलां शिला प्रविवेश रसातलम् ।
ऐरावणमभवत् कूर्म्मः पर्व्वतवायवीव दिशाम् ॥
वायवाय तथाकर्मी देवेंद्राय सुरेश्वरी ।
महामाया जगद्धात्री दैत्यसंहारकारिणी ॥
चाक्षिप्ताय सर्वं विष्णुदैवकरेण कीर्त्तितः ।
उद्धृतिर्दर्शो इत्युत् भगवान् चक्रधृक् ।
मध्ये ब्रह्मा ततश्चैव शारदं तदापरः ।
ततो वरादेवस्य चरमे जलजो यतः ।
शिला शिवाकल्पं प्रकटितमशोभनम् ॥

यावै सत्ययने यत्नादारोप्य शिरसी तयोः ।
जगदाधारभूतः स चक्रेणैव संयुतः ॥
कर्मोंकैः समाक्रम्य चिच्छेद स पृथक् पृथक् ।
मधुकैटभयोः सम्यक् मेदसोः पृथिवीकृते ॥
तस्य चाक्रम्य संस्थानादुभयमसिरधोगता ।
नियमाचापि देवीयैर्मारपि मुहुर्मुहुः ॥
गतसत्योस्तु तयोः शरीरे जगतो पतिः ।
मत्स्यरूपं समुद्भूय तपातस्तौ प्रयत्नतः ।
उद्धृतयो पृथिव्यान्तु तयोर्मेदोविलेपनैः ।
सहाद्रामकरोत् पृथ्वीं कठिनां तोयराशिभिः ॥
मेदोविलेपिता यस्मात् मोदते मेदिनीति या ।
अद्यापि पृथिवी देवी देवमाश्रयराशये ॥"

इति कालिकापुराणे ६१ अध्यायः ॥

(अनयोर्नामनिरुक्तिर्यथा, महाभारते । १२ । ३४७ । २७—२६ ।

"अत्यन्तः परमेष्ठी च तयो भूतगणात् स्रजन् ।
पूर्व्वमेव च यद्गस्य पर्व्वे वर्षीयुतमभे ।
नारायणकृतो विष्णू अपामासां गुणोत्तरी ।
तावपश्यन् च भगवानवादिनिधनोऽच्युतः ॥
एकस्तत्राभवद्विन्दुर्मध्वाभो रुचिरप्रभः ।
स तामसो मधुर्जातस्तदा नारायणाज्ञया ।
कठिनस्तत्परो विन्दुः कैटभो राजसस्तु सः ॥")

मधुकोषः, पुं, (मध्वर्थं कृतः कोषः मध्वाधारः कोषो वा ।) मधुमक्षिकाकृतकोषः । मौचाक् इति भाषा । तत्पर्य्यायः । मधुक्रमः २ । इति शब्दचन्द्रिका । (यथा,—

"भ्रमरैरिव मधायं चाध्यामधुकोष व्यारब्धः ।"

इति वनिविच्छटीकाजनितेन लिखितम् ॥)

छातमुञ्च इति मौचादिभ्यो वदन्ति ॥

मधुक्रमः, पुं, (मधुनः क्रमः ।) पुनः पुनर्मधुपान-क्रमः । तत्पर्य्यायः । मधुवारः २ । इत्यमरः । २ । १० । ४१ ॥ मधुकोषः । इति शब्द-चन्द्रिका ॥

मधुक्षीरः, पुं, (मधुवत् क्षीरं निर्यासोऽस्य ।) खर्ज्जूरवृक्षः । इति चारावली ॥

मधुखर्ज्जूरिका, स्त्री, (मधुर्मधुरा खर्ज्जूरी । ततः स्वार्थे कन् टाप् । पूर्व्वस्य ह्रस्वत्वम् ।) खर्ज्जूर-विशेषः । तत्पर्य्यायः । मधुकर्कटिका २ कोल-कर्कटिका ३ कर्कटिका ४ मधुफलिका ५ माजो-मधुरा ६ मधुरखर्ज्जूरी ७ मधुखर्ज्जूरी ८ । अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातपित्त-दाहनिवारित्वम् । स्निग्धत्वम् । मधुरत्वम् । वल्यवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

मधुगायनः, पुं, (मधु गायतीति । गै + "ल्युट् च ।" ३ । ३ । ११३ । इति ल्युट् । यद्वा, मधौ वसन्ते गायन इति व्युत्पत्तिमात्रम् ।) कोकिलः । इति राजनिर्घण्टः ॥

मधुगुञ्जनः, पुं, (मधु मधुरं गुञ्जनमस्य । यद्वा, मधुनिमित्तं गुञ्जनमस्य मधुरत्वात् तथात्वम् ।) शोभाञ्जनवृक्षः । इति शब्दमाला ॥

मधुघोषः, पुं (मधुर्मधुरो घोषो यस्य ।) कोकिलः । इति शब्दमाला ॥

मधुच्छदा, स्त्री, (मधुः मधुरस्वादः पर्णमस्याः । यद्वा मधु छादयति स्वाधिक्येन पराभवतीति छद + णिच् । घः । छे ह्रस्वः ।) मयूरशिखा । इति भावप्रकाशः ॥ (तथास्या गुणाः ।

"मौलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ।"

इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुजं, क्ली, (मधुनो जातम् इति । जन् + डः ।) सिक्थकम् । इति राजनिर्घण्टः ॥

मधुजम्बीरः, पुं, (मधुर्मधुरो जम्बीरः ।) मधुर-जम्बीरः । इति राजनिर्घण्टः ॥

मधुजा, स्त्री, (मधोः मधुदैत्यस्य मेदसो जाता प्रादु-र्भूता इति । जन् + डः टाप् ।) पृथिवी । इति शब्दचन्द्रिका । (मधुनो जायते या इति । जन + डः ।) सिता । तत्पर्य्यायः । मधुसिता २ । इति चिकित्साप्रदीपः ॥ (uncertain)

मधुजित्, पुं, (मधुं मधुनामानं दैत्यं जितवानिति । जि + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्द-रत्नावली ॥ (यथा, देवीभागवते ।१।१।६२।

"ह्रिये । किं वा त्वमा विविदिषसि प्राक्तं मधुजितः ।")

मधुतृणं, क्ली, (मधुरं तृणम् ।) इक्षुः । इति चिकित्साप्रदीपः ॥ (गुणादयोऽस्य इक्षुशब्दे ज्ञातव्याः ॥)

मधुद्रवः, पुं, (मधुर्मधुरद्रवः ।) इक्षुः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"महारसोऽसितः स्यात्मधुपुष्पो मधुद्रवः ।
इक्षुर्दीर्घच्छदाकान्तारभिदग्धाभिद्रिषाम् ॥"

इति वैद्यकरत्नमालायाम् ॥

"इक्षुरसिंधवः पौण्ड्रकाख्या भूरिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुद्रवः स्मृतः ॥"

इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मधुत्रयं, क्ली, (मधूनां मधुरद्रव्याणां त्रयम् ।) मधुरत्रयम् । इति राजनिर्घण्टः ॥ (मधुत्रय-शिलाचयम् ॥)

मधुदीपः, पुं, (मधौ वसन्ते दीप्यते इति । दीप् + कः ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥

मधुदूतः, पुं, (मधोर्वसन्तस्य दूत इव । वसन्ता-गमनात् प्राक्तस्य मुकुलोद्गमदर्शनात् तथात्वम् ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥ (तथास्य पर्य्यायः ।

"आम्रः प्रोक्तो रसालश्च चूतकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुदूती, स्त्री, (मधोर्वसन्तस्य दूतीव ।) पाटला-वृक्षः । इति भावप्रकाशः ॥ (पर्य्यायादि विव-रणमस्याः पाटलाशब्दे ज्ञातव्यम् ॥)

मधुद्रः, पुं, (मधु द्राति कुसुमात् पुष्पं गच्छतीति । द्रा + कः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

मधुद्रुमः, पुं, (मधुर्मधुरो द्रुमो निर्यासोऽस्य ।) इक्षु-पिण्डः । इति शब्दरत्नावली ॥

मधुद्रुमः, पुं, (मधवे मद्यार्थं मद्यकारको वा द्रुमः । तस्य पुष्पेभ्यो मद्यकरणादस्य तथात्वम् ।)

वृक्षविशेषः । मौलमाछ इति भाषा । तत्पर्य्यायः । मधूकः २ गुडपुष्पः ३ । इत्यमरः । ४ । ११ ॥ (पर्य्यायान्तरमस्य यथा, वैद्यकरत्नमालायाम् ।

"मधूको मधुकश्च गुडपुष्पो मधुद्रुमः ।")

मधुधातुः, पुं, (मधुना तत्तुल्यवर्णेन उपलक्षितो धातुः ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।

"स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुधूलिः, स्त्री, (मधुर्मधुरा धूलिरिव ।) खण्डः । इति हेमचन्द्रः । ३ । ६ ॥ खाँड् इति भाषा ॥

मधुधेनुः, स्त्री, (मधुरचिता धेनुः ।) दानार्थं मध्वादिनिर्मितधेनुः गौः । यथा,—

वराहपुराणे ।

"मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं मधुमयीं कृत्वा संपूर्णां घटकोत्तमान् ।
चतुर्थेन तथाप्येवं वत्सकं परिकल्पयेत् ॥
क्षौमवस्त्रं सुखं कृत्वा मुक्ताफलसुवर्णकैः ।
पृष्ठं ताम्रमयं कृत्वा चामरी च मणी तथा ॥
पादानिक्षुमयान् कृत्वा सितकम्बलकम्बलाम् ।
स्तनं गुडमयं कृत्वा जिह्वां शर्करया तथा ।
ओष्ठौ पुष्पमयौ तस्या दन्ताः फलमयाः स्मृताः ।
दर्भरोममयी देवी रौप्यखुरविभूषिता ॥
गन्धपुष्पसमायुक्ता प्रमाणात् परिकल्पिता ।
पञ्चरत्नसमायुक्ता सम्यगाच्छादिता तथा ।
चत्वारि तिलपात्राणि चतुर्दिक्षु स्थापयेत् ।
छादितां वस्त्रयुग्मेन घण्टाभरणभूषिताम् ।
कांस्योपदोहनां कृत्वा गन्धपुष्पैस्तु पूजिताम् ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
संक्रान्त्यामुपरागे च दत्त्वा कामं यथेप्सया ॥
दयमानाय धर्म्मिष्ठं दृष्ट्वा तान्तु प्रदापयेत् ।
ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये ॥
आर्य्यावर्त्ते समुत्पन्ने वेदवेदाङ्गपारगे ।
तादृशाय प्रदातव्या मधुधेनुर्वरोत्तम ! ॥
पुच्छदेशोपविष्टस्तु धृतपात्रादिपूजिताम् ।
आचार्य्याय ततः पूर्व्वं दद्याद्वस्त्रसमन्विताम् ।
सहस्राः दक्षिणा देया विप्राय हितकाम्यया ।
आनुपूर्व्व्यात्तु कर्त्तव्यं प्रकारं नान्यथैव हि ।
इत्थं ता सर्व्वदेवानां सम्भूता परमा इयम् ।
पीयूषा जिह्वदेवाश्च मधुधेनो ! नमोऽस्तु ते ॥
इदमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ।
यस्त्वं स्वाहा मम देवि ! कुरुष्व मे निरीक्षणम् ।
वासं कामदुघे कामं मधुधेनो ! नमोऽस्तु ते ।
मधुपानेनिमित्तेन दत्तारस्तु दिवं व्रजेत् ।
एवं धेनुं प्रदातव्या मधुकोटितमा तथा ॥
एवं यः कुरुते भक्त्या मधुधेनुं वरानने ! ॥
दत्त्वा दानं प्राप्नोति अत्युत्तमं च दिवं व्रजेत् ॥
ब्राह्मणोऽपि निराशस्तु मधुपानं नहि भुवन् ।
एवं शृणु ते तु पुनः तत्त्वपरं तथैव वरानने ! ॥
तत्र नदी मधुवहा यत्र पायसकर्द्दमः ।

अश्वयो सुभगः शिलास्तत्र गच्छन्ति धेनुदाः ॥
तत्र भोगान्वितो शुद्धर्त्तं ब्रह्मलोके स तिष्ठति ।
क्रीडित्वा सुचिरं कालं पुनर्मर्त्त्यमुपागतः ।
स भुक्त्वा विपुलान् भोगान् विष्णुलोकं स गच्छति ॥
इदं पूर्व्वान् दशपरानात्मानञ्चैकविंशतिम् ।
नयति विष्णुसायुज्यं मधुधेनुप्रसादतः ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति ॥"
इत्यादि वराहपुराणे श्वेतोपाख्याने मधुधेनुमाहात्म्यम् ॥

मधुनारिकेलकः, पुं, (मधुर्मधुरो नारिकेलः स्वार्थे कन् । डलयोरैक्यात् डस्य लत्वं लस्य च डत्वम् ।) मधुनारिकेलः । मधुनारिकेल इति कोकणे प्रसिद्धम् । मोचानारङ्ग इति च ख्यातम् । तत्पर्य्यायः । माध्वीकफलः १ मधुफलः २ अधिकफलः ३ माक्षिकफलः ४ मृदुफलः ५ बहुकूर्च्चः ६ दृढफलः ७ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहतृष्णार्त्तिपित्तहारित्वम् । बलपुष्टिश्लेष्मकान्तिकारित्वम् । वीर्य्यविवर्द्धनत्वम् । रुच्यत्वञ्च । अपि च ।
"माध्वीकं नारिकेरं फलमतिमधुरं दुर्ज्जरं वातकारि
स्निग्धं वातातिसारश्रमशमनमथ ध्वंसनं वह्निदीप्तेः ।
आमञ्चैवावलेपं जनयति कुरुते चारुकान्तिं बलञ्च
श्लेष्मं देहस्य धत्ते बलमदनकलावर्द्धनं पित्तनाशम् ॥"
इति राजनिर्घण्टः ॥

मधुनी, स्त्री, क्षुपविशेषः । माकड़ खाता इति माकड़ चाउली इति च भाषा ॥ तत्पर्य्यायः । शतमखा १ वायसोली २ सुमङ्गला ३ । इति रत्नमाला ॥

मधुनेता, [ऋ] पुं, (मधु नयति पुष्पेभ्यः संग्रहातीति । णीञ्+तृच् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

मधुपः, पुं, (मधु पिबतीति । पा+कः ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, राजतरङ्गिण्याम् । १ । ३०८ ।
"शम्भुतिमाचमाचमि देवीधामनि धर्म्मदान् ।
भुञ्जन् वराब्धौ मधुपान् मार्वति या स गौरधीः ॥"
मधु अर्थं पातीति । पा+कः । रक्षके, त्रि । यथा, ऋग्वेदे । १ । १२ । ८ ।
"अं विरत्रं मधुपं प्रयाधमरिश्वं वा महावसुपः ।"
"मधुपं मधुपोऽम्नवः पातारं पालयितारम् ।" इति तद्भाष्ये सायनः ॥ मधुपानकर्त्तरि च, त्रि । यथा, ऋग्वेदे । १ । १८० । २ ।
"यया बहुवो विश्वगुर्गौभिरानि वाजमैरि मधुपाविरे च ।" "ये मधुपौ मधुरस्य सोमरसस्य पातारौ ।" इति तद्भाष्ये सायनः ॥)

मधुपर्क्की, स्त्री, (पृच्+घञ् । मधुना पर्कौ योगोऽत्र ।) दधिसंयुक्तमधु । तत्पर्य्यायः । मधोदयः २ । इति हेमचन्द्रः । ३ । ६९७ ॥ अपि च ।
"मधुपर्कं दधिमधुघृतमपिहितं कांस्येनेति ।
अपिहितमाच्छादितम् ।" इत्यैकादशीतत्त्वे कात्यायनसूत्रम् ॥

मधुपर्कः, पुं, (पृची+घञ् । मधुना पर्कः सम्पर्को यस्य मधुना संयोजनात् तथात्वम् ।) षोडशोपचारपूजान्तर्गतषष्ठोपचारः । तस्य प्रमाणं यथा,—
"दधि सर्पिर्जलं क्षौद्रं सितैताभिस्तु पञ्चभिः ।
प्रोच्यते मधुपर्कस्तु सर्व्वदेवौघतुष्टये ॥
जलन्तु सर्व्वतः स्वल्पं सिता दधि घृतं समम् ।
सर्व्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत् ॥
तद्दद्यात् कांस्यपात्रेण रौप्यकेनाथवा पुनः ।
ज्योतिष्टोमाश्वमेधादौ पूर्व्वं येष्टे प्रपूजने ॥
मधुपर्कः प्रतिष्ठोऽयं सर्व्वदेवौघतुष्टिदः ।
धर्म्मार्थकाममोक्षाणां साधकः परिकीर्त्तितः ॥
मधुपर्कः सौख्यमोक्षतुष्टिपुष्टिप्रदायकः ॥"
इति कालिकापुराणे ६७ अध्यायः ॥
अपि च ।
"आज्यं दधिमधुमिश्रं मधुपर्कं विदुर्बुधाः ॥"
इति तन्त्रसारः ॥
तद्दाने मुद्रा यथा,—
"संयुक्तानामिकाङ्गुष्ठा तिस्रोऽन्याः संप्रसारिताः ।
मधुपर्के च सा मुद्रा विद्वद्भिः परिकीर्त्तिता ॥"
इति हरिभक्तिविलासः ॥

मधुपर्णिका, स्त्री, (मधुवत् मिष्टं पर्णमस्याः । ततः स्वार्थे कन् टाप् । अत इत्वञ्च ।) गम्भारीवृक्षः । (अस्याः पर्य्यायो यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च ॥")
नीलीवृक्षः । इत्यमरः । २ । ४ । ९५ ॥ (अस्याः पर्य्यायो यथा,—
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ।
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥")
वराहक्रान्ता । इति शब्दचन्द्रिका ॥ गुडूची । सुदर्शना । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्याये ।
"पृश्निपर्णी बलादिपुनर्नवा मधुपर्णिका ॥"
अस्याः पर्य्यायो यथा,—
"सुदर्शना सोमवल्ली चक्राङ्गा मधुपर्णिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुपर्णी, स्त्री, (मधु इव मिष्टं पर्णं यस्याः । गौरादित्वात् ङीष् ।) गुडूची । इत्यमरः । २ । ४ । ८३ ॥ (अस्याः पर्य्यायो रत्नमालायां यथा,
"भद्रपर्णी हिमवती मधुपर्ण्यंशुतामरा ।
कृष्णवृन्तकीकी च गुडूची चक्रलक्षणा ॥")
गम्भारीवृक्षः । नीलीवृक्षः । इति मेदिनी । णे, १०५ ॥ मधुकोषपूरः । इति राजनिर्घण्टः ॥ (विकङ्कतवृक्षः । तत्पर्य्यायो यथा,—
"विकङ्कतः स्वादुकण्टः स्रुग्दारु मधुपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुपाका, स्त्री, (पाकेन मधुर्मधुरा । राजदन्तादित्वात् पूर्व्वनिपातः । टाप् ।) षड्भुजा । इति राजनिर्घण्टः ॥

मधुपायी, [न्] पुं, (मधु पिबतीति । पा+णिनिः । ततः "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) भ्रमरः । इत्यमरटीकायां रामाश्रमः ॥ मधुपानकर्त्तरि, त्रि ॥

मधुपालिका, स्त्री, (मधु पालयतीति । पालि+ण्वुल् । टाप् । अत इत्वम् ।) गम्भारी । इति शब्दमाला ॥ (विवरणमस्या गम्भारीशब्दे ज्ञेयम् ॥)

मधुपीलुः, पुं, (मधुर्मधुरः पीलुः ।) महापीलुः । इति राजनिर्घण्टः ॥

मधुपुरी, स्त्री, (मधोर्लवणाख्यो दैत्यस्य पुरी ।) मथुरा । इति शब्दरत्नावली ॥ (यथा, भागवते । ७ । १४ । ३१ ।
"नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥")

मधुपुष्पः, पुं, (मधुप्रचुराणि पुष्पाण्यस्य ।) मधुद्रुमः । इति रत्नमाला ॥ (मधूकः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥")
शिरीषवृक्षः । अशोकवृक्षः । बकुलवृक्षः । इति राजनिर्घण्टः ॥

मधुपुष्पा, स्त्री, (मधुपुष्प+स्त्रियां टाप् ।) दन्तीवृक्षः । नागदन्तीवृक्षः । इति राजनिर्घण्टः ॥

मधुप्रियः, पुं, (मधु मद्यं प्रियमस्य ।) बलरामः । इति त्रिकाण्डशेषः ॥ भूमिजम्बुः । यथा,—
"नादेयी स्त्री भ्रामरजम्बूजम्बुर्मधुप्रियः ॥"
इति जटाधरः ॥ (मद्यप्रिये, त्रि ॥)

मधुफलः, पुं, (मधु मधुरं फलमस्य । यद्वा, मधु मद्यं फलात् यस्य ।) मधुनारिकेलः । इति राजनिर्घण्टः ॥ विकङ्कतवृक्षः । इति शब्दचन्द्रिका ॥ (मधुरफलविशिष्टे, त्रि ॥)

मधुफलिका, स्त्री, (मधु मधुरं फलं यस्याः । मधुफल+संज्ञायां कन् । टाप् । अत इत्वञ्च ।) मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥ (वृत्तान्तोऽस्या मधुखर्ज्जूरिकाशब्दे ज्ञातव्यः ॥)

मधुबहुला, स्त्री, (मधुना मद्येन वा बहुला ।) वासन्तीलता । इति राजनिर्घण्टः ॥

मधुभित्, [द्] पुं, (मधुं तन्नामानं दैत्यं भिनत्ति नाशयतीति । भिद्+क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, माघे । ३ । ५८ । ३० ।

"नलिनीमु नवमुकुलितां मधुमिश्रविमे-
पीयूषद्रिवचलितैः पतितः स्रवन्ति ।")

मधुमल्लिका, स्त्री, (मधुमत्पाधिका मल्लिका ।) कीटविशेषः । मौमाछी इति भाषा । तत्पर्य्यायः । सरघा २ । इत्यमरः । २ । ५ । २८ ॥

मधुमज्जा, [न्] पुं, (मधुर्मधुरो मज्जा यस्य ।) आक्षोटवृक्षः । इति राजनिर्घण्टः ॥

मधुमती, स्त्री, (मधुर्मधुररसोऽस्त्यस्येति मतुप् । ङीप् ।) कालरोहिणी । नदीविशेषः । तस्याः जलगुणाः । यथा, राजनिर्घण्टे ।

"मधुमागगुणजलाम्बुदं जलं
किञ्च मधुमतीनदीदीपनम् ॥"

उत्तमनायिकाविशेषः । यथा,—

"तथा मधुमती सिद्धिर्जायते नाथ संशयः ।
ईदृशेति प्रमत्तं तस्य वश्या भवन्ति च ॥
स्वर्गे मर्त्ये च पाताले स यत्र गन्तुमिच्छति ।
तत्रैव चेटिका; सर्वा नयन्ति नाथ संशयः ॥"

इति तन्त्रसारदीपिकायां ३ पटलः ॥

(छन्दोभेदः । अस्याः लक्षणं यथा, छन्दोमञ्जर्य्याम् । २ । १ ।
"ननगि मधुमती ।" अयमेतं छन्दःशब्दे द्रष्टव्यम् ॥ समाधिसिद्धिभेदः । यथा, सर्वदर्शनसंग्रहे पातञ्जलदर्शने । "तत्र मधुमती नाम-भावनैरामादिवदाद्यपाकारणलमोत्तेजस-प्रकाशमयसत्त्वभावनयावद्वैशारद्यविद्योतन-ऋतम्भराप्रज्ञाख्या समाधिसिद्धिः ॥ गङ्गा । यथा, काशीखण्डे । २८ । १११ ।
"महोरगा मधुमती महापुण्या सुराख्री ॥"
इक्ष्वाकुकुलोद्भवस्य भार्य्या सा च मधोर्दैत्यस्य सुता । यथा, हरिवंशे । ९४ । १९—२२ ।
"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भवः ।
हर्य्यश्व इति विख्यातो महेन्द्रसमविक्रमः ॥
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता ।
देवी मधुमती नाम यथेन्द्रस्य शची तथा ॥"
मधुरत्वविशिष्टे, त्रि । यथा, ऋग्वेदे । ७ । ९८ । ६ ।
"समावयत्रापानमन्नाद्यानिर्यं मधुमन्तं
विपादः ॥")

मधुमथः, पुं, (मधुं तन्नामानं दैत्यं मथ्नातीति । मन्थ + अच् ।) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । ६ । ८ । १८ ।
"तमोऽवतु विरसनितं समनः अयप्रह वा
हरे मधुमथ ! प्रभुः कार्दप्रथमो कामवि-
प्रभुः मायापतरनामुजाद्गमेत्री विद्रवन्ति
च सम पुरतं संसारस्थयिनं ॥")

मधुमल्ली, स्त्री, (मधुप्रधाना मल्ली ।) मालती । इति शब्दमाला ॥

मधुमस्तकं, क्ली, (मधुर्मधुररसः मस्तके अवरि-भागे यस्य ।) पिष्टकविशेषः । यथा,—
"मधुशीर्षकनामानं वैदिकाः कथितास्तु ताः ।
मधुमस्तकमुद्दिष्टं तथान्यान्नरसार्थकम् ॥"
इति शब्दचन्द्रिका ।
अस्य गुणाः पिष्टकशब्दे द्रष्टव्याः ।

मधुमाध्वीकं, क्ली, (मधु माधुर्य्ययुक्तं माध्वीकम् ।) मद्यम् । इत्यमरटीकायां भरतः ॥

मधुमारकः, पुं, (मधूनां मारकः । भक्षकत्वा-त्तथात्वमस्य ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुरसं, क्ली, (मधु मधुरं फलम् ।) आम्रफलम् । इति शब्दचन्द्रिका । मौ आलु इति भाषा ॥

मधुयष्टिः, स्त्री, (मधुर्मधुरा यष्टिः ।) इक्षुः । इति शब्दचन्द्रिका ॥

मधुयष्टिका, स्त्री, (मधुर्मधुरा यष्टिः । ततः कन् टाप् ।) यष्टिमधु । तत्पर्य्यायः । मधुकम् २ क्लीतकम् ३ यष्टिमधुका ४ । इत्यमरः । २ । ४ । १०८ ॥ मधुयष्टी ५ । इति भरतः ॥ (तथाप्यस्याः पर्य्यायान्तरम् ।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्मृतं नाम अतस्वास्तिरमा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुयष्टी, स्त्री, (मधुयष्टि । कृदिकारादिति पक्षे ङीष् ।) मधुयष्टिका । इति शब्दमाला ॥

मधुरं, क्ली, (मधु + रः ।) वङ्गम् । इति राजनिर्घण्टः ॥ विषम् । इति मेदिनी । रे, १८५ ॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम् ॥)

मधुरः, पुं, (मधु माधुर्य्यं रातीति । रा + कः । यद्वा, मधुमाधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्क-मधो रः ।" ५ । २ । १०७ । इति रः ।) मिष्टरसः । इत्यमरः । १ । ५ । ९ । स च रसस्तौ कथ्यते । तत्पर्य्यायः । मौल्यः २ । इति राजनिर्घण्टः ॥ रसश्रेष्ठः ३ गुल्यः ४ स्वादुः ५ मधूलकः ६ । इति हेमचन्द्रः । ६ । २४ ॥ तस्य गुणाः । पोषणत्वम् । बलत्वम् । हृद्यत्वम् । वातपित्तनाशित्वम् । रसायनत्वम् । गुरुत्वम् । स्निग्धत्वम् । चक्षुष्य-त्वम् । तर्पणत्वम् । शरत्वम् । वल्यत्व ।
"रसो मधुरकः प्रोक्तो धातुवर्द्धनकारकः ।
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्यकफक्रिमीन् ॥
सोऽतियुक्तो ज्वरश्वासगलगण्डादिरोगकृत् ॥"
इति राजवल्लभः ॥

अपि च ।
"मधुरस्तु रसविशेषेति विद्यात्
मधुरः स्नेहवतोऽबोधेनैताधो ।
अतिसेवनतः श्लेष्मश्लेष्म-
कृतामान्द्यप्रदान् करोति रोगान् ॥"
इति राजनिर्घण्टः ॥

(यथा च वाभटे सूत्रस्थाने दशमेऽध्याये ।
"रसाम्लादिति मज्ञाति कर्षोति मधुरो रसः ।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम् ॥
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ।
प्रशस्तो बृंहणो कण्ठ्यः स्तन्यसन्धानकृद्गुरुः ।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ।
कुरुतेऽत्युपयोगेन समेदःकफजान् गदान् ।
स्थौल्याग्निसादसंन्यासमेहगण्डार्बुदादिकान् ॥"
अपिच ।
"तत्र मधुरो रसः शरीरसात्म्याद्रसरुधिरमांस-मेदोऽस्थिमज्जौजःशुक्राभिवर्द्धन आयुष्यः षडि-न्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुत-घ्नस्तृष्णादाहप्रशमनः त्वच्यः केश्यः कण्ठ्यो बल्यः प्रीणनो जीवनस्तर्पणो बृंहणः स्थैर्य्यकरः क्षीणक्षत-सन्धानकरः घ्राणमुखकण्ठौष्ठजिह्वाप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकाना-मिष्टतमः स्निग्धः शीतो गुरुश्च ।
स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानः स्थौल्यं मार्द्दवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाष-मग्नेर्दौर्ब्बल्यमास्यकण्ठयोर्मांसाभिवृद्धिं श्वासकास-प्रतिश्यायालसकशीतज्वरानाहास्यमाधुर्य्य-वमथुसंज्ञास्वरप्रणाशगलगण्डगण्डमालाश्लीपदगल-शोफवस्तिधमनीगुरुपलेपाक्ष्यामयाभिष्य-न्दिप्रभृतीन् कफजान् विकारानुपजनयति ।
"येऽन्यशीलमकालेऽमात्रमेवोपयुज्यते ।
मुखस्थो मधुरश्चास्यं व्याप्नुवंल्लिम्पतीव च ॥"
इति चरके सूत्रस्थाने २६ अध्यायः ॥)
जीवकः । रक्तशिग्रुः । राजाम्रः । इक्षुः । गुडः । शालिः । इति च राजनिर्घण्टः ॥ (बीजपूरविशेषः । तत्पर्य्यायो यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ दानवविशेषः । यथा, महाभारते । ८ । ४१ । ६८ ।
"मधुरः शुभधारश्च किरीटी च महाबलः ॥")

मधुरः, त्रि, (मधु माधुर्य्यमस्यास्तीति । "ऊषसुषि-मुष्कमधो रः ।" ५ । २ । १०७ । इति रः ।) मधुररसविशिष्टः । स्वादुः । (यथा, किराते । १ । ७८ ।
"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः ॥")
प्रियः । इति मेदिनी । रे, १८४ ॥ साहि-त्यिकमधुरादि यथा । विदग्धोक्तिः । विद्या-धरकृत्यादिः । मधुरे । शिवः । वाग्मीतिः । इति कविकल्पलता ॥

मधुरकः, पुं, (मधुर + संज्ञायां कन् ।) जीवक-वृक्षः । इत्यमरः । २ । ४ । १४९ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये ।
"त्रिफलाकमधुरकपयोवायम् ॥")

मधुरकण्टका, स्त्री, (मधुराः कण्टका यस्याः ।) मत्स्यविशेषः । तत्पर्य्यायः । शकुलाकाण्डकः । वामना ३ माधो ४ । इति शब्दरत्नावली ।

मधुरजम्बीरः, पुं, (मधुरो जम्बीरः । कर्म्मधारयः ।) मधुजम्बीरः । तत्पर्य्यायः । मधु-जम्बः २ मधुकर्कटः ३ दन्तहारी ४ शर्करः ५ पित्तद्रावी ६ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कफपित्तदोषवमनशोषघ्नत्वम् । इति राजनिर्घण्टः ॥

मधुरत्वचः, पुं, (मधुरा त्वक् यस्य ।) धव-वृक्षः । इति त्रिकाण्डशेषः ॥ (कुमारदीपक-शब्देऽस्य ज्ञातव्यम् ॥)

मधुरत्रयं, क्ली, (मधुराणां त्रयम् ।) सिता माक्षिकं सर्पिश्च । इति राजनिर्घण्टः ॥

मधुरत्रिफला, स्त्री, (मधुरा त्रिफला ।) द्राक्षाफलं काश्मर्य्यफलं खर्ज्जूरीफलञ्च । इति राजनिर्घण्टः ॥

मधुरनिस्वना, स्त्री, (मधुरो निस्वनो यस्याः ।) मधुरस्वरयुक्ता नारी । इति त्रिकाण्डशेषः ॥

मधुरफलः, पुं, (मधुरं फलमस्य ।) राजबदरः । इति राजनिर्घण्टः ॥

मधुरवल्ली, स्त्री, (मधुरा वल्लीति नित्यकर्म्मधारयः ।) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुरसः, पुं, (मधुर्मधुरो रसोऽस्य ।) इक्षुः । इति शब्दमाला ॥ तालः । इति राजनिर्घण्टः ॥

मधुरसा, स्त्री, (मधुर्मधुरो रसो यस्याः ।) मूर्व्वा । इत्यमरः । २।४। ८३ ॥ (अस्याः पर्य्यायो यथा,
"तेजनी पिलुनी देवी तिक्तवल्ली पृथक्त्वचा ।
मधुश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ॥
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) द्राक्षा । (तत्पर्य्यायो यथा,—
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) दुग्धिका । इति मेदिनी । से, ६० ॥ गम्भारी । इति भावप्रकाशः ॥

मधुरस्रवा, स्त्री, (मधुरस्य मधुररसस्य स्रवो यस्याः ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्टः ॥

मधुरा, स्त्री, (मधुर+टाप् ।) शतपुष्पा । (अस्याः पर्य्यायो यथा,—
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहिता छत्रिकापि च ।
छत्रा शालेयशालीनौ मिश्रेया मधुरा मिसिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) मिश्रेया । मधुरागरी । मधुकर्कटिका । मेदा । मधूली । मधुयष्टिका । इति मेदिनी । रे, १८७ ॥ काकोली । शतावरी । क्षीरकाकोली । माषपर्णी (?) । इति राजनिर्घण्टः ॥

मधुराम्लकः, पुं, (मधुरश्चासौ अम्लश्चेति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) आम्रातकः । इति शब्दचन्द्रिका ॥

मधुराम्लफलः, पुं, (मधुरं मिष्टं आम्लञ्च फलं यस्य ।) ऐरवतः । तत्पर्य्यायः । नारङ्गः २ । इति रत्नमाला ॥

मधुरालापा, स्त्री, (मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः ।) सारिका । इति राजनिर्घण्टः ॥

मधुरालाबुनी, स्त्री, (अलाबु+बाहुलकात् उन् । इत्युत्तरादित्वात् ङीष् च । ततः मधुरा चासौ अलाबुनी चेति नित्यकर्म्मधारयः ।) राजालाबुः । इति राजनिर्घण्टः ॥

मधुरिका, स्त्री, (मधुर+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च ।) क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । शालेयः २ शीतशिवः ३ छत्रा ४ मिश्री ५ मिश्रेया ६ । इत्यमरः । २।४।१०५ ॥ साखेयः ७ मिसिः ८ मिसी ९ मिश्चिः १० । इति तट्टीका ॥ अवाक्पुष्पी ११ मङ्गल्या १२ मधुरा १३ । इति रत्नमाला ॥ मधुरी १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । रोचकत्वम् । शुक्रकारित्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मधुरिपुः, पुं, (मधोरसुरविशेषस्य रिपुर्नाशकत्वात् ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा गीतगोविन्दे । २ । ९ ।
"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ॥)

मधुरेणुः, पुं, (मधुर्मधुरो रेणुरस्य ।) कटभीवृक्षः । इति राजनिर्घण्टः ॥

मधुरोदकः, पुं, (मधुराणि उदकानि यस्य ।) जलसमुद्रः । स तु स्वादूदकमयः पुष्करद्वीपवेष्टितः सप्तसमुद्राणां शेषसमुद्रः । इति जटाधरः ॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति । ला+कः ।) मद्यम् । इति शब्दचन्द्रिका ॥ (निर्म्मितोकन्या मधुविद्यायां स्त्री । यथा, ऋग्वेदे । १ । ११९ । १० ।
"श्रोणिमभूमविनिर्गृ (?) वयं महामारे
अस्य योजनं हरिशामधुत्वामधुला चकार ॥"
"हे विप्र ! त्वा त्वां मधु अम्लं चकार वित्तस्य विप्रभावं दूरेऽमनोज्ञाम्लतीचकारेति इत्येव मधुला मधुरायां निर्म्मितौ मधुविद्या यदेतदादित्यस्य मण्डले विषयोजनं तेन आम्लतीकरणं यदस्ति एषा मधुविद्या ॥" इति तद्भाष्ये सायनः ॥)

मधुलग्नः, पुं, (मधुर्मधुररसो लग्नोऽत्र ।) रक्तशोभाञ्जनः । इति रत्नमाला ॥

मधुलता, स्त्री, (मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः ।) शूलीतृणम् । इति राजनिर्घण्टः ॥

मधुलिका, स्त्री, (मधुल+संज्ञायां कन् । टाप् अत इत्वञ्च ।) राजिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या राजिका शब्दे ज्ञातव्या । स्कन्दानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । १९ ।
"एकचक्रा मधुलिका मधुकुम्भा तथैव च ॥")

मधुलिट्, [ह्] पुं, (मधु लेढि आस्वादयतीति । लिह्+क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, रघुवंशे । ९ । ३९ ।
"मधुलिहां मधुदानविशारदा
कुरवका रवकारणतां ययुः ॥")

मधुलेही, [न्] पुं, (मधु लेढीति । मधु+लिह्+णिनिः ।) भ्रमरः । इति शब्दरत्नावली ॥ (यथा, भट्टिकाव्ये । २ । ७ ।
"दृष्टावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ॥")

मधुलोलुपः, पुं, (मधुनि लोलुपः ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुवनं, क्ली, (मधुना मधुनाम्ना दैत्येन कृतं वनम् । मध्यपदलोपी कर्म्मधारयः ।) मथुरायां वनविशेषः । यथा, श्रीभागवते ४ । ८ । ४२ ।
"तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"
(मधुप्रधानं वनमिति ।) किष्किन्धायां सुग्रीवस्य वनविशेषः । इति रामायणे किष्किन्धाकाण्डम् ॥ (यथा, महाभारते । ३ । २८२ । २७ ।
"वालिना रक्षितं यत्र स्फीतं मधुवनं महत् ।
त्वया च प्लवगश्रेष्ठ ! तद्भुक्तं पवनात्मज ॥")

मधुवनः, पुं, (मधौ वनति शब्दायते इति । वन+अच् ।) कोकिलः । इति शब्दचन्द्रिका ॥

मधुवल्ली, स्त्री, (मधुप्रधाना वल्ली ।) यष्टीमधु । मोलनकम् । इति राजनिर्घण्टः ॥ (कारवेल्लकम् । तत्पर्य्यायो यथा,—
"तोयवल्ली राजवल्ली मधुवल्ली च कारवेल्लकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुवारः, पुं, (मधुनो मद्यस्य वारः समयः पर्य्यायो वा ।) मधुक्रमः । इत्यमरः ।२।१०।४१॥ स च पुनः पुनर्मद्यपानपरिपाटी । इति तट्टीकायां भरतः ॥

मधुवीजः, पुं, (मधु मधुरं वीजं यस्य ।) दाडिमः । इति राजनिर्घण्टः ॥ (गुणादिविवरणमस्य दाडिमशब्दे द्रष्टव्यम् ॥)

मधुवीजपूरः, पुं, (मधूनां मधुपूर्णानां वीजानां पूरः समूहो यत्र ।) मधुकर्कटिका । मीठा बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । मधुपर्णी २ मधुरकर्कटी ३ मधुरवल्ली ४ मधुकर्कटी ५ मधुरफला ६ महाफला ७ वर्द्धमाना ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहनाशित्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । पथ्यत्वम् । गुरुत्वम् । दुर्ज्जरत्वञ्च । इति राजनिर्घण्टः ॥

मधुव्रतः, पुं, (मधु मधुभक्षणं व्रतं व्रतमिव अवश्यकर्त्तव्यमस्य । यद्वा, मधु व्रतयति नियमं गृह्णाति इति । व्रति+अच् ।) भ्रमरः । इत्यमरः ।२।५।२९ ॥ (यथा, भागवते । १।१८।१८ ।
"मान्ति मधुव्रतवद्दुर्व्विगाह्याम् ।" (?)
मधुनि व्रतं कर्म यस्य । उदकार्थवर्मेति, त्रि । यथा, ऋग्वेदे । ६ । ७० । ५ ।
"मधुनो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ॥"
"मधुव्रते उदकार्थकर्म्माणौ ।" इति तद्भाष्ये सायनः ॥)

मधुशर्करा, स्त्री, (मधुजाता शर्करा ।) मधुजातशर्करा । मिछरी (?) इति भाषा । यथा,—

"माध्वी सिता मधुलता मधुजा मधुशर्करा ।
माधीकशर्करा चैव चौद्रका चौद्रशर्करा ॥
यदुक्तं मध्वनु क्षौद्रं तद्वत् तच्च शर्करा ।
विविधाद्यमध्या च सर्वं चौद्रदेहिनाम् ॥"
इति राजनिर्घण्टः ॥
("मधुशर्करा पुनश्छर्द्यतीसारहरी रूक्षाहिमा प्रसादनी कषायमधुरा मधुरविपाका च ।"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

मधुमाय:, पुं, (मधुर्माधुर्ययुक्ता माया यस्य ।) मधुलीढ: । इति शब्दचन्द्रिका । (मधुरमायाविशिष्टे, त्रि । यथा, वाजसनेयसंहितायाम् । ३७ । २० । "मधुमाय: सुपिप्पल: ।"
"मधुरा इव यस्य माया यस्य ।"
इति तद्भाष्ये महीधर: ॥)

मधुरिपु:, पुं, (मधुनाम्न: रिपु: ।) इत्त-मीमांग्रजयः । इत्यमरः । १ । १ । २१ ॥ (हरिका । इति ख्यातः । यथा, सुश्रुते ।१।३७। "धर्मार्थकामरिपुमधुरिपुलकावीतिकादि ।"
तत्पर्यायो यथा,—
"शुद्धो वाकुमन्थाजातशधुरिपु: प्रोमाक्षक: ॥"
इति वैद्यकरत्नमालायाम् ।
तद्गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"मधुरिपु: सरोचिका: शोफघ्नो रोचन: कटु: ।")

मधुविर्य, स्त्री, (मधुन: वीर्यो यत्र ।) छिद्रपत्रम् । इति राजनिर्घण्ट: ॥

मधुश्रेणी, स्त्री, (मधुनो मधुररसस्य श्रेणिरिव ।) मूर्वा । इत्यमरः ।२।४।८२ ॥ (अस्या: पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"मूर्वा मधुरसा देवी मोरटा तेजनी सुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥")

मधुशाखा, स्त्री, (मधुमधुर: शाखोऽस्या: ।) चोरकोरक: । इति राजनिर्घण्ट: ॥ (विवरणमस्य चोरपुष्पीशब्दे ज्ञातव्यम् ॥)

मधुशील:, पुं, (मधु मकरन्दं शीलति नि:शेषेण पिबतीति । शील्+इगुपधत्वात् क: । पृषो-दरादित्वात् हस्य शत्वम् ।) मधूकद्रुमः । इत्यमरः । २ । ४ । २८ ॥ (अस्य पर्य्यायो यथा,—
"मधूको गुडपुष्प: स्यान्मधुपुष्पो मधुस्रव: ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलक: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुसख:, पुं, (मधोर्वसन्तस्य सखा इति । "राजाह:-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) कामदेव: । इति हलायुध: ॥

मधुसारथि:, पुं, (मधुर्वसन्त: सारथिर्यस्य ।) काम-देव: । इति त्रिकाण्डशेष: ॥

मधुसूदन:, पुं, (सिञ्चतीति सिक्: सन् । अर्द्दं सन् मधु मधुरत्वं सिक्तं यस्य ।) कासारसिमेद: । इति हैमचन्द्र: । ४ । २८१ ॥

मधुसूदन, [द्] पुं, (मधोर्वसन्तस्य सुहृत् ।) कामदेव: । इति वैद्यि ॥

मधुसूदन:, पुं, (मधु पुष्परसं सूदयति भक्षय-तीति । सूद्+णिच्+ल्यु: ।) भ्रमर: । इति जटाधर: ॥ (मधुं तन्नामानं असुरं सूद-यति नाशयतीति । सूद्+णिच्+ल्यु: ।) श्रीकृष्ण: । इत्यमरटीकायां भरत: ॥ (मधुसूदन एक: विष्णोर्नाम यथा, कुमारसम्भवम् । ११ । २ ।
"प्रबुद्ध तथा सुरभिप्रचारं
प्रकामसुप्तो मधुसायके ।
मायन् वनं क्रीड़ति यद्युपीठ
मध्यपि पीत्वा मधुसूदनोऽसौ ।")
तन्नामव्युत्पत्तिर्यथा,—
"सूदनं मधुदैत्यस्य यस्मात् स मधुसूदन: ।
इति सन्तो वदन्तीदं वेदविद्भि: प्रकीर्त्तितम् ॥
मधु क्लीबञ्च माध्वीके कृतकर्म्मशुभाशुभे ।
भक्तानां कर्म्मणाञ्चैव सूदनं मधुसूदन: ॥
परिणामाशुभं कर्म्म भ्रान्तानां मधुरं मधु ।
करोति सूदनं यो हि स एव मधुसूदन: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्याय: ॥
तस्य धारणफलम् ।
"महाविपत्तौ संसारे य: स्मरेन्मधुसूदनम् ।
विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्कर: ॥"
तत्रैव प्रकृतिखण्डे ६४ अध्याय: ॥
(सरस्वतीपण्डितनामक: कविविशेष: । यथा, श्रीमद्-भगवद्गीताटीकायाम् । "श्रीमानं भगवत्पदे: प्रतिपदं श्रीमच्छ्रीगुरूणां: पुरुषोत्तमं मधुसूद-नेन तनिना छन्दायनिष्ठोऽय सतम् ।" अयं हि अद्वैतसिद्धिप्रस्थानभेदमहिम्नस्तोत्रटीका-संक्षेपशारीरकटीकासिद्धान्तबिन्दुटीकाद्यनेकग्रन्थ-कर्त्ता ॥)

मधुस्रवी, स्त्री, (मधु स्रवतीति । मधु+स्रु+णिच्+ल्यु: । स्त्रियां ङीप् ।) पातालगरुडिका । इति हेमचन्द्र: । ४ । २२९ ॥

मधुस्रव:, पुं, (मधुनो मकरन्दस्य स्रव: स्राव: यस्मादिति ।) मधूकद्रुम: । मोरटलता । इति राजनिर्घण्ट: ॥

मधुस्रवा, स्त्री, (मधुन: स्रवो यस्या: ।) मधुयष्टिका । इति जटाधर: ॥ जीवन्ती । इति शब्दचन्द्रिका ॥ (अस्या: पर्य्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यानामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मूर्वा । हंसपदी । इति राजनिर्घण्ट: ॥

मधुस्वाद:, [त्] पुं, (मधूनि स्वदति नि:शेषेण स्वदयतीति । स्वद्+णिच्+क्विप् ।) मधूकद्रुम: । इति जटाधर: ॥

मधुस्वर:, पुं, (मधुर्मधुर: स्वरो ध्वनिर्यस्य ।) कोकिल: । इति शब्दरत्नावली ॥

मधुहा, [न्] पुं, (मधुं तन्नामानमसुरं हन्तीति । हन्+क्विप् ।) विष्णु: । इति हेमचन्द्र: ॥ (मधु हन्तीति । हन्+क्विप् । मधुघातके, त्रि । यथा, महाभारते । २ । ११ । ६८ ।
"कर्कशा शूरनैरैव दुर्मेधैर्वैणवादिभि: ।
कर्म्मिभि: प्रपन्ने दण्डं मधुहा भ्रमरैरिव ॥"
मधमक्षिकाविशेष: । यथा,—
"भ्रमरी भाण्डकुसुमैरवधौतमद्याक्रिता: ।
धूमिका मधुहा पैति प्रवहा मधुपायिन: ॥"
इति वाग्भटे सूत्रस्थाने षष्ठेऽध्याये ॥)

मधूक, स्त्री, (मधतीति । मध्+"अलूका-दयश्च ।" उणा० ४ । ४१ । इति अक: निपा-तितश्च ।) यष्टिमधु । इति राजनिर्घण्ट: ॥ (गुणादयोऽस्य यष्टिमधुशब्दे विज्ञेया: ॥)

मधूक:, पुं, (मह्यते पूज्यते चैति । मह्+मधु वा+"उलूकादयश्च ।" उणा० ४ । ४१ । इति अकप्रत्ययो निपातितश्च ।) वृक्षविशेष: । मउल इति मौल इति मधुया इति च भाषा । तत्पर्य्याय: । गुडपुष्प: २ मधुद्रुम: ३ वान-प्रस्थ: ४ मधुष्ठील: ५ । इत्यमर: । २ । ४ । २८ ॥ मधुक: ६ मधु: ७ मधुपुष्प: ८ । इति शब्द-रत्नावली ॥ मधुस्रव: ९ । इति जटाधर: ॥ मधुरस: १० रोध्रपुष्प: ११ माधव: १२ ॥ (यथा, महाभारते । १४ । २६ । ११ ।
"विषाद्भुता चैव नरेन्द्रकन्या
सेना कदर्थ्यामधूकपुष्पै: ॥")
अस्य गुणा: । मधुरत्वम् । शीतत्वम् । पित्त-दाहश्रमापहत्वम् । वातलत्वम् । जन्तुशोष-णम् । वीर्य्यपुष्टिविवर्द्धनञ्च । अस्य पुष्पगुणा: । मधुरत्वम् । गुरुत्वम् । शिशिरत्वम् । पित्त-विदाहकारित्वञ्च । अस्य फलगुणा: । वाता-सनपित्तनाशित्वम् । क्षैवं मधूकबीजमेव ॥ इति राजनिर्घण्ट: ॥ अपि च ।
"मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ।
अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षत-
क्षयान् ॥"
इति भावप्रकाश: ॥
अपरञ्च ।
"मधूकपुष्पजातश्च तत्पत्रं बंहनं परम् ।
मधूकस्य फलं पक्वं वातपित्तप्रणाशनम् ॥"
तत्कामतुकाकाबलगुणम् । यथा,—
"यस्य यस्य फलस्येह वीर्यं भवति यादृशम् ।
तस्य तस्यैव वीर्येण मज्जानमपि निर्द्दिशेत् ॥"
तस्य मज्जगुणा: ।
"मधूकं शान्तिदं शुक्रोपवर्द्धनम् ॥"
इति राजवल्लभ: ॥

मधूच्छिष्टं, क्ली, (मधुन: उच्छिष्टमवशिष्टम् ।) सिक्थमित्यर्थम् । मोम इति भाषा । (यथा, हलायुधेनायाम् । २८ । ७४ ।
"द्वे वेदमांसीनतकुष्ठसर्जैर्नतावितयोः ।
मधुरत्नमपिश्चपति चोरकचोल चोरकः ॥")
तत्पर्य्याय: । सिक्थकम् २ । इत्यमर: । २ । ९ । १०७ ॥ सिक्थपकम् ३ सिक्थकम् ४ । इति शब्दरत्नावली ॥

मधूत्थितं, क्ली, (मधुन: उत्थितम् ।) सिक्थकम् । इति राजनिर्घण्ट: ॥

मधूत्सवः, पुं, (मधोश्चैत्रस्य उत्सवो यत्र ।) चैत्री पूर्णिमा । इति जटाधरः ॥ (यथाभिज्ञानशकुन्तले । ६ ।
"कञ्चुकी । प्रविश्य । सक्रोधम् । मा तावत् वालेय ! देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ॥")

मधूपघ्नं, क्ली, (मधोस्तन्नाम्नो दैत्यस्य उपघ्नः आश्रयः । अभिधानात् क्लीवत्वम् ।) मथुरा । इति हेमचन्द्रः । ४ । ४४ ॥

मधूपघ्नः, पुं, (मधोस्तन्नाम्नो दैत्यस्य उपघ्नः आश्रयः ।) मथुरा । इति जटाधरः ॥ (यथा, रघुवंशे । १५ । १५ ।
"स चखान मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः ।
यस्मात् करमिवादाय लवणाख्यं समर्षितः ॥")

मधूलः, पुं, (मधु उरति प्राप्नोतीति । मधु + उर गतौ धौभधातुः + कः । रस्य लत्वम् ।) जलजातगिरिजमधूकवृक्षौ । इति जटाधरः ॥ (अस्य पर्यायो यथा, वैद्यकरत्नमालायाम् ।
"गौरशाको मधूलोऽन्यो गिरिजः स्वल्पपत्रकः ॥")

मधूलकः, पुं, (मधूल + स्वार्थे कन् ।) जलमधूकवृक्षः । तत्पर्यायः । दीर्घपत्रकः २ । इति जटाधरः ॥ गौरशाकः ३ मधूषः ४ स्वल्पपत्रकः ५ । इति रत्नमाला ॥
"स्यान्मधूके तु जलजे गिरिजोऽपि मधूलकः ॥"
इति शब्दरत्नावली ॥
(पर्यायान्तरमस्य यथा,—
"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजोऽथ मधूलकः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
अस्य गुणाः । मधूकगुणतुल्याः । मधुररसः । इति हेमचन्द्रः ।६।२४॥ (क्लीवलिङ्गेऽपि दृश्यते । यथा, अथर्ववेदे । १ । ३४ । २ ।
"जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ॥")
मधुरे, त्रि ॥

मधूलिका, स्त्री, (मधूल + कन् । स्त्रियां टाप् अत इत्वञ्च ।) मूर्वा । इत्यमरः । २।४। ८३ । (अस्याः पर्यायो यथा,—
"मूर्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
यष्टीमधु । तत्पर्यायो यथा,—
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा ।
अन्यत्क्लीतनकन्तत्तु भवेत्तोये मधूलिका ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

मधूली, स्त्री, (मधूल + गौरादित्वात् ङीष् ।) क्षीरचम्पकम् । मधुकर्कटी । आम्रः । इति राजनिर्घण्टः ॥

मध्यं, क्ली, (मन्यते इति । मन् + "अघ्न्यादयश्च ।" उणा० ४।११२। इति यक्प्रत्ययेन निपातितः ।) दशाब्दसंख्या । अन्त्यपरार्द्धसंख्या । इति हेमचन्द्रः ॥ (यथा, महाभारते । ५ । ६१ । ४ ।
"मध्येऽपि परार्द्धस्य परस्परस्य च मध्यताम् ॥")
अवसानम् । तत्पर्यायः । विरामः २ । इति त्रिकाण्डशेषः ॥ मन्दत्वद्रुतत्वमध्येतरलयुक्तनृत्यविषयकालमानविशेषः । इति भरतः ॥ न्यायविशेषः । इति मेदः ॥ मध्यमाङ्गुलिः । इति शब्दः ॥ यथा, अमरे । १ । ६ । ७९ ।
"विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ॥"

मध्यः, पुं, क्ली, (मन् + यत् । नस्य च धः ।) देहमध्यभागः । माजा इति भाषा ॥ तत्पर्यायः । मध्यमम् २ अवलग्नम् ३ । इत्यमरः । २ । ६ । ७९ ॥ विलग्नम् ४ । इति मेदिनी । गे, ४४ ॥ (यथा, भट्टिकाव्ये । ३ । १६ ।
"इयाना वलिभं मध्यं कर्णान्ताहविलोचना ॥"
मध्यभागमात्रम् । यथा, मनुः । ४ । ३७ ।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥"
"आयुष्कालस्य मध्यमावस्थाविशेषः काल: । षोडशसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति । तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्यसम्पूर्णता । अत ऊर्द्धमीषत् परिहाणिर्यावत् सप्ततिरिति ॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यः, पुं, (मन् + यत् । नस्य धः ।) पद्मस्फुटसाधकाङ्कविशेषः । स च अयुतंभ्यन्तरैरयुताम्बराद्येकस्थानरहिताङ्कस्पर्शः । इति ज्योतिषम् ॥

मध्यः, त्रि, (मन्यते इति । मन् + यत् । नस्य च धः ।) न्याय्यः । अन्तरः । अधमः । इति शब्दरत्नावली ॥ मध्यमः । यथा,—
"उत्तमाधममध्यानि बुद्धा कार्याणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥"
इति मात्स्ये ८६ अध्यायः ॥

मध्यगन्धः, पुं, (मध्ये फलाभ्यन्तरे गन्धोऽस्य ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मध्यतः, [स्] अ, (मध्य + तसिल् ।) मध्यात् । मध्ये । इति सिद्धान्तकौमुदी ॥ सार्वः स्यात् तथादयो ये आदेशाद्येभ्यो मरन्तात्समवायमिति माधवः । तेन कुतः कुतः आगतं कौतस्कुतम् । इत्यायमनात् टिलोपः । इति दुर्गादासः ॥

मध्यदेशः, पुं, (मध्यश्चासौ देशश्चेति ।) देशविशेषः । तत्पर्यायः । मध्यमः २ । इत्यमरः ॥ तस्य सीमा यथा, मनुः । २ । २१ ।
"हिमवद्विन्ध्ययोर्मध्ये यः प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥"
विनशनं तीर्थभेदः । सा अन्तर्यामि भारतीति विनशनं सरस्वती सात्त्विकी चाद्रिः । मध्ये अदरति यस्मादे यस्मिन् पि अपि अनुदर्शन्माचबाह्नि अवभेतरेण । इति कुल्लूकभट्टः ॥

मध्यदेशीयः, त्रि, (मध्यदेशे भवः इति छः ।) मध्यदेशोद्भवः । यथा, कामन्दकीये ११ अः ।
"इत्याचेद संवसवा मध्यदेशा मताक्षिके ॥"

मध्यन्दिनः, पुं, (दिवस्य मध्यं रात्यन्ताद्दिनात् मध्यशब्दस्य पूर्वनिपातः । पृषोदरादित्वात् मकारागमः । मध्यन्दिनं पुष्पविकाशकालमाप्नोतीति । अच् ।) बन्धूकवृक्षः । इति राजनिर्घण्टः ॥ (मध्याह्ने, क्ली, यथा, मनुः ।४।१५१।
"मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ॥")

मध्यपञ्चमूलकं, क्ली, (मध्यं मध्यमं पञ्चमूलकम् ।) पञ्चमूलपाचनविशेषः । यथा,—
"बला पुनर्नवैरण्डशूर्पपर्णीद्वयेन तु ।
एकत्र योजितैरेव स्यान्मध्यं पञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥

मध्यमं, पुं, क्ली, (मध्ये भवः । मध्य + "मध्यान्मः ।" ४ । ३ । ८ । इति मः ।) देहमध्यभागः । इत्यमरः । २ । ६ । ७९ ॥

मध्यमः, पुं, (मध्ये भवः । मध्य + मः ।) सप्तस्वराणां मध्ये पञ्चमस्वरः । इत्यमरः ।१।७।१ ॥ गान्धारात्मते चतुर्थस्वरः । स तु क्रौञ्चस्वरतुल्यः । अस्योच्चारणस्थानं वक्षः । आकारस्तत्र अधरः । अयं वैश्यवर्णः । अस्य देवता वक्षः । अर्थात् चतुःस्वरमिलितः । तस्य तानाः चतुर्विंशतिः तेषां प्रत्येकं द्वात्रिंशद्भेदेन ७६८ ताना भवन्ति । इति संगीतशास्त्रम् ॥ उपपतिभेदः । तस्य लक्षणम् । प्रियायाः प्रकोपे यः प्रकोपमधुरतां वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः । यथा,—
"आस्यं यद्यपि चाश्रवर्णितमिदं मालेव चीर्णं वचो
नेत्रे श्रोणपरोजकान्तिरचिरे कापि चार्णं क्षीयते ।
मालायाः करकोऽस्मे मर्दिरोपतेः कृपालोचनोध्वंदः कुन्तलयोरपीव सुतनोः कान्तलो दृश्यते ॥"
इति रसमञ्जरी ॥
मध्यदेशः । इत्यमरः ॥ ग्रहाणां वामविकचेष्टाविशेषः । यथा,—
"तुहरचक्रहृतो दिनवन्दनः
स च गतो भववादिवन्नं पदः ।
दशहिरःद्रमध्यमभाकरे
क्षितिमवतिशिरी यदि मध्यमः ॥"
इति सिद्धान्तशिरोमणिः ॥
मल्लभेदः । रागभेदः । इति भरतः ॥

मध्यमः, त्रि, (मध्ये भवः । मध्य + "मध्यान्मः ।" ४ । ३ । ८ । इति मः ।) मध्यभवः । इति मेदिनी । मे, ४८ । (यथा, मनौ । ८ । ११९ ।
"तयोर्द्वे मध्यमस्य स्यात् तुरीयन्तु कनीयसः ॥")
तत्पर्यायः । माध्यमम् २ माध्यमीयम् ३ माध्यन्दिनम् ४ । इति हेमचन्द्रः ॥ (गुणोद्भवः ।
"इत्यादुर्धिकं बीजं मध्यमाधमगुणमम् ।
दोषस्य वातीर हत स्तीव ववाप्नि यापपूरक ॥

प्रतिपद्यन्तः समस्तीयः शाक्रीः सुकुमारकः ।
एतेषां मध्यमा संज्ञा प्रोच्यते वेदवादिभिः ।
मध्यमः सर्व्वतः यावत् मरुतो द्वह उच्यते ॥"

इति वाराहे प्रथमे स्कन्धे पञ्चमोऽध्यायः ॥

"प्राणे निरुद्धे शीघ्रा मध्यमे विलम्बितं तु ।
मूर्द्धन्यं स्थूलरूपेण तारोदात्तं संनिधिना ॥"

इति च सङ्गीतदामोदरे १४ अध्यायः ।)

मध्यमपाण्डवः, पुं, (मध्यमश्चासौ पाण्डवश्चेति । तस्य युधिष्ठिरभीमार्ज्जुननकुलसहदेवानां मध्यवर्त्तित्वात्तथात्वम् ।) अर्ज्जुनः । इति शब्दरत्नावली ॥ (यथा, किरातार्ज्जुनीये । ३ । ३६ । मल्लिनाथटीकायां धृतवचनम् ।
"ऐन्द्रः मध्यमपाण्डवो भगवतो नारायण-स्यांशजः ॥")

मध्यमलोकः, पुं, (मध्यमश्चासौ लोकश्चेति कर्म्मधारयः ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । २ । १६ ।
"तां देवतापित्रतिथिक्रियार्था-
मन्वग्ययौ मध्यमलोकपालः ॥"
"मध्यमलोकपालः भूपालः ।" इति मल्लिनाथः ।)

मध्यमभक्तः, पुं, (मध्यमश्चासौ भक्तश्चेति ।) ज्योतिषभक्तः । समय इति भाषा । यथा,—
"उत्तमस्तु पूर्व्वोक्तेन मध्यमस्तु तथैव च ।
अधमो मानवो ज्ञेयः त्रिविधैव त्रिविधो भवः ॥"

इति मिताक्षरा ।

मध्यमसंग्रहः, पुं, (मध्यमश्चासौ संग्रहश्चेति ।) स्त्रीसंग्रहणभेदः । स तु गन्ध-माल्यधूपादिभिरन्वितः । यथा । प्रथम-साहसादिरक्षणार्थं चैव तत्स्वरूपं व्याख्या-तम् ।
"त्रिविधं तत् समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकालभाषाभिर्निर्ज्जने च परस्त्रियाः ॥
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम् ।
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ॥
प्रलोभनञ्चान्नपानैर्मध्यमं साहसं स्मृतम् ।
सहासनं विविक्ते तु परस्परमुपाश्रयः ।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम् ॥"

इति मिताक्षरायां स्त्रीसंग्रहणप्रकरणम् ।

मध्यमसाहसम्, क्ली, (मध्यमं द्वितीयं साहसं वा । सहसा + अण् । मध्यमञ्च तत् साहसञ्चेति ।) वस्त्रादिरत्न तथान्नपानादिष्वपि सहसा क्रियमाणं कर्म्म । यथा,
"वस्त्रपश्वन्नपानानां गृहोपस्करणस्य च ।
एतेषामेव द्रव्याणां मध्यमं साहसं स्मृतम् ।
तत्र दण्डस्तत्समानः पञ्चशतपणस्तथा ।
एतेषामेव द्रव्याणां मध्यमं साहसं स्मृतम् ॥"

इति मिताक्षरा ।

मध्यमसाहसः, पुं, (मध्यमश्चासौ साहसश्चेति ।) दण्डभेदः । स तु पञ्चशतपणात्मकः । यथा,—
"साशीतिः पणसाहस्रो दण्ड उत्तमसाहसः ।
तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः ॥"

...भात् प्रथमं स्थानं मीनात् पूर्व्वन्तु पाचकम् ।
अपरा मध्यमा ह्येको मेषात् पूर्व्वं चतुर्थकम् ॥"

इति माधवे शान्तिप्रकरणे ८ अध्यायः ॥

मध्यमा, स्त्री, (मध्यम + टाप् ।) दृष्टरजस्का नारी । कर्णिका । अङ्गुलिभेदः । पाचक-स्तम्भः । इति मेदिनी । मे, ५० ॥ प्रदेशिन्यनामिकयोर्मध्यवर्त्ती । यथा, अलङ्कारकौस्तुभे ।
"प्रथमं मध्यमस्य सुदृढो सुदृढमध्य-
माख्यः ।"
स्त्रीणां नायिकाभेदः । तस्या लक्षणम् । हिताहितकारिण्यपि प्रियतमे हिताहित-कारिणी या सा । अस्यास्तु अवस्थाविषयको भेदः । इति रसमञ्जरी । (अङ्गुलिभेदः । तत्पर्य्यायो यथा,—
"ध्वजाङ्कुशपताकाद्युपलक्षिता च मध्यमा ॥"

इति वैद्यकरत्नमालायाम् ।)

मध्यमिका, स्त्री, (मध्यमैव । स्वार्थे कन् टापि अत इत्वम् ।) दृष्टरजस्का नारी । इति रत्नावली ॥

मध्यमीय, त्रि, (मध्यमे भवं मध्यमस्येदं वेति । "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) मध्यमम् । इति हेमचन्द्रः । ६ । ८६ ॥

मध्यमेश्वरः, पुं, (मध्यमस्य स्थानस्य ईश्वरः ।) काशीस्थशिवलिङ्गविशेषः । यथा,—
"मध्यमेशं तत्र ते देवा मन्दाकिन्याः तटे स्थिताः ।
अर्च्चयन्ति महादेवं मध्यमेश्वरमीश्वरम् ॥
स्नात्वा स्नात्वा तत्र सदा ध्यात्वा विश्वेश्वरं शिवम् ।
एकैकशः सदा विप्राः पुत्रान्तानामप्यनुक्रमम् ॥
अर्च्चयित्वा यथान्यायं रात्रावपि निशाकरे ।
यत्र पश्यं लभते सर्व्वकामान्महायशः ॥
एवमुक्त्वा महायोगी मध्यमे स्थानके प्रभुः ।
उवाच हर्षितं कार्य्यं पुत्रवत् वै महेश्वरम् ॥"

इति कौर्म्मे ३१ अध्यायः ।

मध्ययवः, पुं, (मध्यो मध्यमो यवः ।) षट्श्वेत-सर्षपपरिमाणम् । इति वैद्यकम् ॥

मध्यरात्रः, पुं, (मध्यं रात्रेः "पूर्व्वापराधरोत्तर-" २ । २ । १ । इति समासः । "अहःसर्व्वैकदेश-" इति ५ । ४ । ८७ । समासान्तोऽच् पुंस्त्वञ्च ।) निशीथः । अर्द्धरात्रः । इति हलायुधः ॥ (यथा मनौ । ७ । १०९ ।
"उदये मध्यरात्रे च विश्रान्तो विगतक्लमः ।
चिन्तयेत् धर्म्मकामार्थान् सार्द्धं तैरेक एव वा-
देन ॥")

मध्यलोकः, पुं, (मध्यश्चासौ लोकश्चेति ।) पृथिवी । मर्त्त्यलोक इति यावत् । स्वर्गपातालयोर्मध्य-वर्त्तित्वात् ॥

मध्यलोकेशः, पुं, (मध्यलोकस्य मर्त्त्यलोकस्य ईशः ।) राजा । इति हेमचन्द्रः । ३ । ३३३ ॥

मध्यस्थः, त्रि, (मध्ये वादिप्रतिवादिनोरन्तरे तिष्ठतीति । स्था + कः ।) मध्यवर्त्ती । तत् पर्य्यायः । विवादः । ५ । इति त्रिकाण्डशेषः ॥ (यथा कथासरित्सागरे । १० । १६१ ।

"प्रविष्टवन्तो मध्यस्थाः सत्यवाक्यप्रवक्तृका ।
स कीर्त्तिमायां सार्थं तमाध्वरमवासिनः ॥"
यथा च भागवते । ६ । १६ । ५ ।
"बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ।
सर्व्व एव हि सर्व्वेषां भवन्ति क्रमशो मिथः ॥"
उभयपक्षपातीव । यथा,—
"सुस्था गुरोरपि रामः कृष्णयोः यश याचते ।
लोकाभिवीक्ष्यावेव मध्यस्थः प्रभवो हित ॥"

इति श्रीभागवते १० स्कन्धे ७८ अध्यायः ।

स्वार्थाविरोधिनि परार्थघटकः । यथाह माघः ।
"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थान्
परित्य ये
मध्यस्थाः परकार्य्यसाधनपराः स्वार्थाविरो-
धेन ये ।
तेऽमी मानुषराक्षसाः परहितं यैः स्वार्थतो
हन्यते
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानी-
महे ॥"

मध्यस्थलं, क्ली, (मध्यं स्थलम् । पृषोदरादित्वात् साधुः ।) कटिदेशः । यथा,—
"कुचौ सवित्रमश्रितौ सुरभिमध्यमध्यस्थली ।
अहो निमिरमञ्जरी मधुकरी करोतु मे ।"

इत्युद्भटः ।

मध्या, स्त्री, (मध्य + टाप् ।) मध्यमाङ्गुलिः । इति हेमचन्द्रः । नायिकाविशेषः । अस्या लक्षणम् । समानलज्जामदना । एषैव चाति-प्रगल्भादिविषयभेदात् । अस्याश्चेष्टा साम्यतो प्रियति पीडं स्त्रीनिरपेक्षं परस्परम् । यथा,—

"माये प्रियामपिहितनयनाभिरेव
मायत्नो प्रियतमपक्षमदयः ।
दत्तं मनोविदग्धौ परिचितमदनो
वामं विधानुमपि प्रागपि वदेद ॥"

मध्यावस्थायां मानावस्थायां पुनस्त्रिविधा । धीरा अधीरा धीराधीरा चेति । इति रस-मञ्जरी ॥

मध्याह्नः, पुं, (मध्यं अह्नः समासान्तः टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इत्यह्नादेशः पुंस्त्वञ्च ।) अह्नोमध्यकालः । स च कुतपकालस्य मध्यादिकः । यथा,—
"अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा ।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥
मध्याह्ने सर्व्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥
मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम् ।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः ॥"

इति मत्स्यपुराणे श्राद्धकल्पे २२ अध्यायः ।
त्रिधाविभक्तदिनस्य मध्यमभागः । स च तृतीय-प्रहरादिः । इति स्मृतिः । मध्याह्नश्च
प्रहरादिमध्यदिनमध्यभागः । स तु शास्त्र-

दद्यात् परब्रह्मरूपात्मकः । इति स्कान्दमत्स्य-पुराणम् । एष नियमस्त्रिंशद्दण्डदिनाभिप्रायेण न्यूनाधिके न्यूनाधिककालो ज्ञेयः ॥०॥ मध्याह्न-कृत्यं यथा,—

"ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् ।
पुष्पाक्षतं कुशतिलान् गोमयं शुद्धमेव च ॥
नदीषु देवखातेषु तडागेषु सरित्सु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
परकीयनिपानेषु न स्नायाद्वै कदाचन ।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा सम्भवे पुनः ॥
मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि ।
अधश्च तिसृभिः कार्य्यं पादौ षड्भिस्तथैव च ॥
मृत्तिका च समुद्दिष्टा स्यादामलकमात्रिका ।
गोमयस्य प्रमाणन्तत्तेनाङ्गं लेपयेत्ततः ॥
लेपयित्वा तीरसंस्थस्तल्लिङ्गैरेव मन्त्रतः ।
प्रक्षाल्याचम्य विधिवत्ततः स्नायात् समाहितः ॥
अभिमन्त्र्य जलं मन्त्रैस्तल्लिङ्गैर्वारुणैः शुभैः ।
भावपूतस्तदव्यक्तं ध्यायन् वै विष्णुमव्ययम् ॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः ॥
प्रेक्ष्य ओँकारमादित्यं त्रिर्निमज्जेज्जलाशये ।
पुनः पुनरथाचामेत् मन्त्रेणानेन मन्त्रवित् ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् ॥
द्रुपदां वा त्रिरभ्यस्येद्व्याहृतिप्रणवान्विताम् ।
सावित्रीं वा जपेद्विद्वांस्तथा चैवाघमर्षणम् ॥
ततः सम्मार्ज्जनं कुर्य्यादापोहिष्ठामयो भुवः ।
इदमापः प्रवहत व्याहृतिभिस्तथैव च ॥
ततोऽभिमन्त्र्य तत्तोयमापोहिष्ठादिमन्त्रकैः ।
अन्तर्ज्जले त्रिरावर्त्त्य सर्व्वपापात् प्रमुच्यते ॥
अपः पाणौ समादाय जप्त्वा वै मार्ज्जने कृते ।
विन्यस्य मूर्द्ध्नि तत्तोयं मुच्यते सर्व्वपातकैः ॥
यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदनम् ॥
अथोपतिष्ठेदादित्यं मूर्द्ध्नि पुष्पान्विताञ्जलिम् ।
प्रक्षिप्यालोकयेद्देवमुद्वयं वैदिकैः परम् ॥
उदुत्यं चित्रं देवानामित्यादिभिरनन्यधीः ।
हंसः शुचिषदित्येव सावित्र्या च विशेषतः ॥
अन्यैश्च वैदिकैर्मन्त्रैः सौरैः पापप्रणाशनैः ।
सावित्रीं वै जपेत् पश्चाज्जपयज्ञः स वै स्मृतः ॥
विविधानि पवित्राणि गुह्यविद्यास्तथैव च ।
शतरुद्रीयमथर्व्वशिरः सौरमन्त्रांश्च शक्तितः ॥
प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः ।
तिष्ठंश्चेदीक्षमाणोऽर्कं जप्यं कुर्य्यात् समाहितः ॥
स्फाटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः ।
कर्त्तव्या त्वक्षमाला वा उत्तरादुत्तमा स्मृता ॥
जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः ।
न कम्पयेच्छिरोग्रीवां दन्तान्नैव प्रकाशयेत् ॥
गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभं यतः ।
एकान्ते सुशुभे देशे तस्माज्जप्यं समाचरेत् ॥
चण्डालाशौचपतितान् दृष्ट्वाचम्य पुनर्जपेत् ।
तैरेव भाषणं कृत्वा स्नात्वा चैव जपेद्बुधः ॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान् मन्त्रान् शक्तितो वै पावमानीस्तु कामतः ॥
यदि स्यात् क्लिन्नवासा वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥
प्रदक्षिणं समावृत्य नमस्कृत्वा ततः क्षितौ ।
आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाचरेत् ॥
ततः सन्तर्पयेद्देवानृषीन् पितृगणान् क्रमात् ।
आदावोङ्कारमुच्चार्य्य नमोऽन्ते तर्पयामि च ॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः ।
तिलोदकैः पितॄन् भक्त्या स्वसूत्रोक्तविधानतः ॥
अन्वारब्धेन सव्येन पाणिना दक्षिणेन च ।
देवर्षींस्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄन् ॥
यज्ञोपवीती देवानां निवीती ऋषितर्पणम् ।
प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावतः ॥
निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः ।
स्वैर्मन्त्रैरर्च्चयेद्देवान् पुष्पैः पत्रैरथाम्बुभिः ॥
ब्रह्माणं शङ्करं सूर्य्यं तथैव मधुसूदनम् ।
अन्यांश्चाभिमतान् देवान् भक्त्या चाक्रोधनोऽत्वरः ॥
प्रदद्याद्वाथ पुष्पाणि सूक्तेन पौरुषेण तु ।
आपो वा देवताः सर्व्वास्तेन सम्यक् समर्च्चिताः ॥
नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक् ।
न विष्ण्वाराधनात् पुण्यं विद्यते कर्म्म वैदिकम् ॥
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ।
तद्विष्णोरिति मन्त्रेण सूक्तेन पुरुषेण तु ॥
नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि ।
निवेदयेत् स्वमात्मानं विष्णावमलतेजसि ॥
तदात्मा तन्मनाः शान्तस्तद्विष्णोरिति मन्त्रतः ।
अथवा देवमीशानं भगवन्तं सनातनम् ॥
आराधयेन्महादेवं भावपूतो महेश्वरम् ।
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः ॥
ईशानेनाथवा रुद्रैस्त्र्यम्बकेन समाहितः ।
पुष्पैः पत्रैरथाद्भिश्च चन्दनाद्यैर्महेश्वरम् ॥
उक्त्वा नमः शिवायेति मन्त्रेणानेन योजयेत् ।
नमस्कुर्य्यान्महादेवमृतं सत्यमितीश्वरम् ॥
निवेदयीत स्वात्मानं यो ब्रह्माणमितीश्वरे ।
प्रदक्षिणं द्विजः कुर्य्यात् पञ्च वर्षाणि वै बुधः ॥
ध्यायीत देवमीशानं व्योममध्यगतं शिवम् ।
अथावलोकयेदर्कं हंसः शुचिषदित्यृचा ॥
कुर्य्यात् पञ्च महायज्ञान् गृहं गत्वा समाहितः ।
देवयज्ञं पितृयज्ञं भूतयज्ञं तथैव च ॥
मानुष्यं ब्रह्मयज्ञञ्च पञ्च यज्ञान् प्रचक्षते ।
यदि स्यात्तर्पणादर्व्वाक् ब्रह्मयज्ञः कृतो न हि ॥
कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत् ।
अग्नेः पश्चिमतो देशे भूतयज्ञान्त एव वा ॥
कुशपुञ्जे समासीनः कुशपाणिः समाहितः ।
शालाग्नौ लौकिके वाग्नौ जले भूम्यामथापि वा ॥
वैश्वदेवनिमित्तं वै देवयज्ञः स वै स्मृतः ।
यदि स्याल्लौकिके पक्षं ततोऽन्नं तत्र हूयते ॥
शालाग्नौ तत्र वैतानं विधिरेष सनातनः ।
देवेभ्यश्च हुताच्छेषात् शेषान् भूतबलिं हरेत् ॥
भूतयज्ञः स वै ज्ञेयो भूतिदः सर्व्वदेहिनाम् ।
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यो नित्यमेव च ॥
दद्याद्भूमौ बलिं त्वन्नं पक्षिभ्योऽथ द्विजोत्तमः ।
सायं चान्नस्य सिद्धस्य कुर्य्याद्देवमतन्द्रितः ॥
भूतयज्ञः स्वयं नित्यं सायं प्रातर्विधीयते ।
एकन्तु भोजयेद्विप्रं पितॄनुद्दिश्य सत्तमम् ॥
अथवान्नं यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत् ॥
पूजयेदतिथिं नित्यं नमस्येदर्च्चयेद्द्विजम् ।
मनोवाक्कर्म्मभिः शान्तमागतं स्वगृहं तम् ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुद्ध्या तं परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रं स्यात्तच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥
गोदोहमात्रं कालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम् ।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा ॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो लोभवर्ज्जितः ॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयेत् ।
भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन् ॥
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तमाः ।
भुञ्जीत चेत् सुमूढात्मा तिर्य्यग्योनिं स गच्छति ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि देवानामर्च्चनं तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्च्चनम् ।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः ।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥"

इति कौर्म्मे उपविभागे १८ अध्यायः ॥

अथ भोजनविधिर्भोजनशब्दे द्रष्टव्यः ॥

मध्वलः, (मधु तत्पानार्थं अलतीति । अल + अच् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः ।) मधुवारः । इति शब्दचन्द्रिका ॥

मध्वाम्र, क्ली, (मधु मधुरं आम्रम् । मध्यपदलोपी समासः ।) फलविशेषः । मौ आम् इति भाषा । अस्य गुणाः । रक्तपित्तघ्नत्वम् । गुरुत्वम् । शीतत्वम् । वातानुलोम-कारित्वञ्च । इति राजवल्लभः ॥

मध्वाम्रकं, क्ली, (मध्वाम्र + स्वार्थे कन् ।) फल-विशेषः । इति शब्दचन्द्रिका ॥ मौ आम् इति भाषा । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "विदारीकन्दताराटीविल्वकाश्मरीमधूक-मधूकविकसाकुमाकुवल्वाकवा-गुडदन्ताग्नुकमधुकैर्मधुरोदनादिसम्-प्रवर्त्तीनि ।")

मध्वावासः, पुं, (मधु मकरन्दस्तस्य आवासः ।) मधुकृत्सदनम् । चम्पकः ।

माधवकः ७ मधु ८ माध्वीकम् ९ । इत्यमरः । २ । १० । ४१ ॥ (यथा, मनुः ११ । ९५ अध्याये ।
"सुराश्च विविधा विद्धि त्रिविधा विविधाश्रयाः ।
मधु मध्वासवञ्चैव नैवपेयानि वै द्विजैः ॥"
विवरणमस्य माध्वीकशब्दे ज्ञातव्यम् ॥)

मध्वासविकः, पुं, (मध्वासवनिर्म्माणे नियुक्तः । मध्वासव + ठन् ।) शौण्डिकः । इति शब्दमाला ॥

मध्विजा, स्त्री, (मधु ईज्यते प्राप्यतेऽस्यामिति । ईज + कः । पृषोदरादित्वात् ह्रस्वः ।) मदिरा । इति हेमचन्द्रः । ३ । ५६७ ॥ (सुराविशेषोऽस्या मदिराशब्दे ज्ञातव्यः ॥)

मन, अर्च्चे । गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-गर्व्वे अक०-सेट् ।) मनति । इति दुर्गादासः ॥

मन, अ ङ गर्व्वे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-स्तम्भे सक०-सेट् ।) अ ङ, मानयते । गर्व्वोऽहङ्कारः । स्तम्भने । इति प्राञ्चः । मानयते इषुं मनो जम्भमानी-मर्दः । इति रमानाथः । इति दुर्गादासः ॥

मन, तु अ ग्रहे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) स्तम्भोऽयम् । मनयति । इति दुर्गादासः ॥

मन, तु ङ बोधे । इति कविकल्पद्रुमः ॥ (तना०-आत्म०-सक०-सेट् ।) तु ङ, मनुते । इति दुर्गादासः ॥

मन, य औ ङ बोधे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ, मन्यते । औ, अमंस्त । इति दुर्गादासः ॥

मनआप्, त्रि, (आप्नोतीति । आप् + क्विप् । मनस आप् ।) मनोज्ञः । इति सिद्धान्तकौमुदी ॥

मनः, पुं, (मन्यते सुरभित्वादिगुणैरेव आद्रियते इति । मन् + अः ।) जटामांसी । इति शब्दचन्द्रिका ॥

मनः, [स्] क्ली, (मन्यते बुध्यतेऽनेनेति । मन् + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८९ । इति असुन् ।) सिद्धान्तेऽन्तःकरणविशेषः । यथा । अन्तःकरणानि चत्वारि मनोबुद्ध्यहङ्काराचित्तानि । अनयोरेव ज्ञानेन्द्रियसहितं बुद्धिमनसी कर्म्मेन्द्रियसहितं प्राणपञ्चकमिति । मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः । मनस्तु कर्म्मेन्द्रियैः सहितं सत् मनोमयकोशो भवति । इति वेदान्तसारः । ज्ञानेन्द्रियाणामिव तत्तु सूक्ष्मे वस्त्री यथार्थं चैतन्यविमुखम् । यथा,—
"इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ।"
इति भगवद्गीता ।
तच्च मनश्चक्षुरादीनि मनःसहितानि भवन्ति । इति कुमारटीकायाम् । ("स्वन्ते मनः पर्य्युत्सुकं भवेत् ।" इति कुमारे द्वितीयसर्गे ३१ ॥)
तत्पर्य्यायः । चित्तम् २ चेतः ३ हृदयम् ४ स्वान्तम् ५ हृत् ६ मानसम् ७ । इत्यमरः । १ । ४ । ३१ ॥ अन्तःकरणम् ८ अक्षम् ९ । इति शब्दरत्नावली ॥ अपि च ।
"मनो महान् मतिर्ब्रह्मा पूर्ब्बुद्धिः ख्यातिरीश्वरः ।
प्रज्ञा संवित् चितिश्चैव स्मृतिश्च परिपठ्यते ।
पर्य्यायवाचकाः शब्दा मनसः परिकीर्त्तिताः ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥
न्यायमते अस्य गुणाः । परत्वम् । अपरत्वम् । संख्या । परिमितिः । पृथक्त्वम् । संयोगः । विभागः । वेगश्च । मनोग्राह्याणि यथा । सुखम् । दुःखम् । इच्छा । द्वेषः । मतिः । प्रयत्नश्च । एवं परमाणुरूपम् । हिरोमणिमते वायवीयपरमाणुरूपम् । यथा,—
"परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ।
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥"
इति भाषापरिच्छेदः ॥
अन्यथासम्बन्धमात्रं प्रति सद्गुणयोगः कारणम् । यथा, तत्रैव ।
"तयो योगो मनसा स्यादृज्ञानकारणम् ॥"
तस्य गुणाः यथा,—
"धैर्य्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा ।
सदसच्चाशुता चैव मनसो नव वै गुणाः ॥"
इति मोक्षधर्म्मः ॥
अस्य व्याख्या । धैर्य्यम् १ उपपत्तिः ऊहापोहकौशलम् २ व्यक्तिः स्मरणम् ३ विसर्गः विपरीतकर्म्मभ्रान्तिः ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ सत् वैराग्यादि ७ असत् रागद्वेषादि ८ आशुता चाञ्चल्यम् ९ । इति तट्टीका ॥ * ॥
अस्य चाञ्चल्यं यथा,—
"मनोवृत्तिरचञ्चलश्चित्तं चरवमाशनम् ।
संक्षेपो विक्षेपो गर्व्वः पारद्यं विरता मतौ ॥"
इति वैराग्यम् ॥
तस्य आहारादि यथा,—
"आहारं मम इन्द्रा ते स्वप्नभूतानुरथास्तकम् ।
अधिभूतञ्च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्वे ॥
तस्य चाञ्चल्यं यथा,—
"अतिरहस्यमाख्यातं चान्यैर्न मनः स्थानम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः ॥
तस्य शास्त्रव्यायामपद्धतिमानसानि यथा,—
"अवार्य्यं सुदुर्वं मनः सुखेनं स्वभावेन वै ।
द्विधा वसनि यत्नात्रो रौद्रमे बाल्येऽपि च ।
दुःखे शोके च मन्ति सुनासे वसन्ति चिन्ताम् ।
सुखे कार्ये विदायौ चाहते सुखं सुखम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥
तस्य मनसोऽनुग्रहो यथा,—
"मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्व्विषयं मनः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
("चतुर्विधं दुःखेषु समस्तकं चैतन्ये

तदप्यतिक्रमितुमपरोतमात्मनः । ध्येयं मनः विनिवृत्यामनाम् । आविर्भवायाम्बुद्धमतिमता-कायात्मवैकल्पिकमिद बुद्धौ सम्प्रसादः तत्र गुणयोगान्न चानेकत्वं मनसः एकत्वादर्थग्रहणात् प्रवर्त्तते । तथापि सत्ता प्रवृत्तिः । यद्गुणबाहुल्यं तद्गुणयुक्तमेव तदुपलब्धेवोपदिशन्ति चावद्यो मनुष्याणाम् । मनःपूर्व्वं दशानामिन्द्रियाणामेकमनसामपि मनसि ।"
"अणुत्वञ्च चैकत्वञ्च द्वौ गुणौ मनसः स्मृतौ ।
स एव मनसोऽतिन्द्रियत्वमिन्द्रियाणां चक्षुर्विकारादिकमपि ।" इति चरके शारीरस्थाने प्रथमेऽध्याये ।
"लक्षणं मनसो ज्ञानस्याभावो भाव एव च ।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्त्तते ।
वैवृत्त्यान्मनसो ज्ञानं सान्निध्यात्तच्च वर्त्तते ।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ ।
चिन्त्यं विचार्य्यमूह्यञ्च ध्येयं सङ्कल्प्यमेव च ।
यत्किञ्चिन्मनसो ज्ञेयं तत् सर्व्वं ह्यर्थसंज्ञकम् ।
इन्द्रियाभिग्रहः कर्म्म मनसस्तस्य निग्रहः ।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते ।
इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते ।
कल्प्यते मनसा पूर्व्वं गुणतो दोषतो यथा ।
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।
व्यवस्यति तया वक्तुं कर्त्तुं वा बुद्धिपूर्व्वकम् ।
या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते ।
याति सा तेन निर्द्देशं मनसा च मनोभवा ।
भेदात् कार्य्येन्द्रियार्थानां बहुधा बुद्धयः स्मृताः ।"
इति चरके शारीरस्थाने प्रथमेऽध्याये ।
सत्त्वगुणयुक्तस्य मनसो गुणा यथा,—
"आस्तिक्यं प्रविभज्य भोजनमनुतापश्च सत्यं तथौ मेधाबुद्धिधृतिस्मृतयश्च करुणा ज्ञानञ्च निर्दम्भता ।
कर्म्मानिन्दितमस्पृहा च विनयो धर्म्मः सदैवादरात् एते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञातिभिः ॥"
अपि च धर्म्मोपदेशोऽदातृत्वमपि सुरापानाविच्छेदाश्च भाव आस्तिक्यं अनुशयः क्रोधः धृतिः भूतानुकम्पोऽप्यमत्सरादिकं ज्ञानमाज्ञाप्यम् । निर्वञ्चनमपरामर्शः कर्म्म सर्व्वसिद्धौ अहङ्कारं [illegible] इत्यः रजोगुणयुक्तस्य मनसो गुणा यथा,—
"क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेच्छाधिका दम्भः कामुकताऽप्यसत्यवचनं चाधीरता दुष्टता ।
ऐश्वर्य्यादभिमानितातिशयितानन्दोऽटनञ्चाधिकम् प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः ॥"

अलीकवचनं मिथ्याकथनं अटनं एक्षीपरिभ्रमणम् । अथ तमोगुणयुक्तस्य मनसो गुणा यथा,—
"नास्तिक्यं सुविषमतातिमथितालस्यञ्च दुष्टा मति:
प्रीतिर्निन्दितकर्म्मशर्म्मणि सदा निद्रालुताहर्निशम् ।
अज्ञानं किल सर्व्वतोऽपि सततं क्रोधान्धता मूढ़ता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतस: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥*॥ सर्व्वं खल्विदं ब्रह्मेति प्रमाणात् अकाराद्यमनशब्दोऽप्यस्ति । यथा, उत्तरगीतायाम् । १६ अध्याये ।
"मनस्थं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिध्यन्ति योगिन: ॥")
मनःशिल:, पुं, (मनो मानसं शिलति आकर्षति सङ्गत्येनेति । शिल + क: ।) मनःशिला । यथा,
"टङ्कैर्मन:शिलगुहैरविदार्य्यमाणा ।"
इत्यमरटीकायां भरत: ॥
मनःशिला, स्त्री, (मन: शिलति आददाति आकर्षति गन्धेनेति । शिल + क: । स्त्रियां टाप् । यद्वा, मन:प्रधाना शिला धातुविशेष: ।) रक्तवर्णधातुविशेष: । मन्छल इति भाषा ॥ (यथा, कुमारे । १ । ५५ ।
"मन:शिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु ॥")
सा तु कर्पूरवीर्य्यम् । इति वैद्यकम् ॥ तत्पर्य्याय: । कुनटी१ मनोगुप्ता२ नागजिह्विका ३ । इत्यमर: । २ । ९ । १०८ ॥ नेपाली ४ शिला ५ । इति रत्नमाला । मनोज्ञा ७ नेपालिका ८ मनोगुप्ता ९ कल्याणिका १० रोगशिला ११ । इति राजनिर्घण्ट: ॥ गोला १२ दिव्यौषधि: १३ । इति भावप्रकाश: ॥ अस्या गुणा: । कटुत्वम् । तिक्तत्वम् । बैसृत्वम् । विषभूताबेशभयोन्मादनाशित्वम् । वश्यकारित्वञ्च । इति राजनिर्घण्ट: ॥ अपि च । तिक्तत्वम् । कफनाशित्वम् । सारकत्वम् । अर्द्धिकारित्वम् । कुष्ठज्वरपाण्डुकासश्वासनाशित्वम् । शुक्रमलनाशित्वञ्च । इति राजवल्लभ: ॥ अपरञ्च ।
"मन:शिला गुरुर्व्वर्ण्या सरोष्णा लेखनी कटु: ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥
मन:शिला मन्दबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण ।
मलानुबन्धं किल मूत्ररोधं
सशर्करं कृच्छ्रगदञ्च कुर्य्यात् ॥"
इति भावप्रकाश: ॥
(अस्या: मतान्तरे शोधनं गुणाश्च यथा,—
"मन:शिला च नेपाली शिलाह्वा नागजिह्विका ।
मनोज्ञा कुनटी गोला कल्याणी करवीरिका ॥
मनोज्ञा चोग्रपुष्पाभा प्रशस्ता सर्व्वकर्म्मसु ॥"
"अयस्ती भृङ्गराजोत्थै रसैरागस्त्यजै: शिला ।
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके ।
क्षालयेदारनालेन सर्व्वरोगेषु योजयेत् ॥"
मतान्तरे मन:शिलाशुद्धिर्यथा,—
"व्यगस्त्यपत्रतोयेन भाविता सप्तवासरम् ।
शृङ्गवेररसैर्व्वापि विशुध्यति मन:शिला ।
कटु: स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा ।
भूतावेशभयं हन्ति कासश्वासहरा शुभा ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ॥)
मननं, क्ली, (मन्यत इति । मन् + ल्युट् ।) श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभि: अनवरतमनुचिन्तनम् । इति वेदान्तसार: ॥ बोधनम् । (यथा, शातपथीतन्त्रे । १ । ४ ।
"मननात् पापतस्त्राणि मननात् स्वर्गमश्नुते ।
मननात् मोक्षमाप्नोति चतुर्व्वर्गमयो भवेत् ॥")
धारणम् । इति मनधात्वर्थदर्शनात् । बुद्धि: । इति राजनिर्घण्ट: ॥
मनसा, स्त्री, (मन: भक्ताभीष्टपूरणाय मननं अस्त्यस्या इति । मनस् + अर्श आदित्वादच् । ततष्टाप् । यद्वा, मनं मननमहङ्कारमिति यावत् स्यति नाशयतीति । षो + क: ।) देवीविशेष: । तत्पर्य्याय: । कद्रु: २ मनसादेवी ३ विषहरी ४ । इति जटाधर: ॥ अस्या: प्रणाममन्त्र: ।
"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा ।
जरत्कारुमुने: पत्नी मनसादेवि ! नमोऽस्तु ते ॥"
इति तस्या: पूजापद्धति: ॥
तस्या नाम्नां व्युत्पत्तिर्यथा,—
श्रीनारायण उवाच ।
"श्रूयतां मनसाख्यानं यत् श्रुतं धर्म्मवक्त्रत: ।
कन्या सा च भगवती कश्यपस्य च मानसी ॥
तेनेयं मनसादेवी मनसा या च दीव्यति ।
मनसा ध्यायते या वा परमात्मानमीश्वरी ॥
तेन सा मनसादेवी योगेन तेन दीव्यति ।
आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी ॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मन: ।
जरत्कारुशरीरञ्च दृष्ट्वा यत् गोपीश्वर: ।
गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभु: ।
वाञ्छितञ्च ददौ तस्यै कृपया च कृपानिधि: ॥
पूजाञ्च कारयामास चकार च पुन: पुन: ।
स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकत: ।
भृशं जगत्सु गौरी सा सुन्दरी च मनोहरा ।
जगद्गौरीति विख्याता तेन सा पूजिता सती ॥
शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता ।
विष्णुभक्तातीव शश्वद्वैष्णवी तेन नारद ! ॥
नागानां प्राणरक्षित्री यज्ञे जन्मेजयस्य च ।
नागेश्वरीति विख्याता सा नागभगिनीति च ॥
विषं संहर्त्तुमीशा सा तेन विषहरीति सा ।
सिद्धं योगं हरात् प्राप तेनासौ सिद्धयोगिनी ।
महाज्ञानञ्च गोप्यञ्च मृतसञ्जीवनीं पराम् ।
महाज्ञानयुतां ताञ्च प्रवदन्ति मनीषिण: ॥
आस्तीकस्य मुनीन्द्रस्य माता सा च तपस्विन: ॥
आस्तीकमाता विख्याता जगत्सु सुप्रतिष्ठिता ॥
प्रिया मुनेर्जरत्कारोर्मुनीन्द्रस्य महात्मन: ।
योगिनो विश्वपूज्यस्य जरत्कारुप्रिया तत: ॥
जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी ।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥
जरत्कारुप्रियास्तीकमाता विषहरीति च ।
महाज्ञानयुता चैव सा देवी विश्वपूजिता ॥
द्वादशैतानि नामानि पूजाकाले च य: पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
नागभीते च शयने नागग्रस्ते च मन्दिरे ।
नागक्षते महादुर्गे नागवेष्टितविग्रहे ।
इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशय: ।
नित्यं पठेद् यस्तं दृष्ट्वा नागवर्ग: पलायते ॥
दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ।
स्तोत्रसिद्धिर्भवेद्यस्य स विषं भोक्तुमीश्वर: ।
नागौघभूषणं कृत्वा स भवेन्नागवाहन: ।
नागासनो नागतल्पो महासिद्धो भवेन्नर: ॥"
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदसंवादे मनसोपाख्याने मनसास्तोत्रं नाम पञ्चचत्वारिंशत्तमोऽध्याय: ॥ * ॥ तस्या: पूजामन्त्रादि यथा,—
श्रीनारायण उवाच ।
"पूजाविधानं स्तोत्रञ्च श्रूयतां मुनिपुङ्गव ! ।
ध्यानञ्च सामवेदोक्तं देवीपूजाविधानकम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
वह्निशुद्धांशुकाधानां नागयज्ञोपवीतिनीम् ॥
महाज्ञानयुताञ्चैव प्रवरां ज्ञानिनां सतीम् ।
सिद्धाधिष्ठातृदेवीञ्च सिद्धां सिद्धिप्रदां भजे ॥
इति ध्यात्वा तु तां देवीं मन्त्रेणैव प्रपूजयेत् ।
नैवेद्यैर्विविधैर्दीपै: पुष्पधूपानुलेपनै: ॥
मूलमन्त्रश्च देवीनां सप्ताणां वाञ्छितप्रद: ।
शुभे ! कल्पतरुर्नाम सुसिद्धो द्वादशाक्षर: ॥
ॐ ह्रीं श्रीं क्लीं ऐं मनसादेव्यै स्वाहेति कीर्त्तित: ।
पञ्चलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ।
मन्त्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले ।
सुधासमं विषं तस्य धन्वन्तरिसमो भवेत् ॥
ब्रह्मन्नाषाढ़सङ्क्रान्त्यां गूढ़े देशे च यत्नत: ।
आवाह्य देवीमाषाढ्यां पूजयेद् यो हि भक्तित: ॥
पञ्चम्यां मनसाख्यायां देव्यै दद्याच्च यो बलिम् ।
धनवान् पुत्रवांश्चैव कीर्त्तिमांश्च भवेद्ध्रुवम् ॥
पूजाविधानं कथितं तदाख्यानं निशामय ।
कथयामि महाभाग ! यत् श्रुतं धर्म्मवक्त्रत: ॥"
तस्या ध्यानान्तरं यथा,—
"दुरा [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

सम्पत्तिविपद्दावेदीसां मनसां वदाम तमः ।
मनसा मनसा दैव बभूव मनसा च सा ॥"
तस्याख्यानादि यथा,—
"कुमारी सा च बभूव कालान् प्रकृतदेवनम् ।
मम्पा संपूज्य देवाद्यै तुष्टाव चन्द्रशेखरम् ।
दिव्यं वर्षसहस्रञ्च तं सिषेवे मुनेः सुता ।
आशुतोषो महेशश्च ताञ्च तुष्टो बभूव ह ॥
महाज्ञानं ददौ तस्यै पाठयामास साम च ।
कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं मुने ॥
अन्तोमाध्या कामदोषं दैवमां हृत्पद्मजया ।
त्रैलोक्यमङ्गलं नाम कवचं पूजनक्रमम् ॥
सर्वपूज्यञ्च कवचं स्तवं मुनिमनोहरम् ।
पुरश्चर्याक्रमञ्चापि वेदोक्तं सर्वसम्मतम् ॥
प्राप्य मृत्युञ्जयात् ज्ञानं परं मृत्युञ्जयं सती ।
जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया ॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः ।
सिद्धा बभूव सा देवी ददर्श पुरतः प्रभुम् ॥
दृष्ट्वा कृशाङ्गीं बालाञ्च कृपया च कृपानिधिः ।
पूजाञ्च कारयामास चकार च स्वयं हरिः ॥
वरञ्च प्रददौ तस्यै पूजिता त्वं भवे भव ।
वरं दत्त्वा च कल्याण्यै ततश्चान्तर्दधे विभुः ॥
प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
द्वितीये शङ्करेणैव कश्यपेन सुरेण च ॥
मनुना मुनिना चैव नागेन मानवादिना ।
बभूव पूजिता सा च त्रिषु लोकेषु सुव्रता ॥"
तस्या विवाहः आस्तिकस्योत्पत्तिश्च यथा,—
"जरत्कारुमुनीन्द्राय कश्यपस्तां ददौ पुरा ।
अयाचितो मुनिश्रेष्ठो जग्राह ब्राह्मणाज्ञया ।
कृत्वोद्वाहं महायोगी विश्रान्तस्तपसा चिरम् ।
सुष्वाप देव्या जघने वटमूले च पुष्करे ॥
निद्रां जगाम स मुनिः स्मृत्वा निद्रेशमीश्वरम् ।
जगामास्तं दिवानाथः सायंकाल उपस्थितः ॥
संचिन्त्य मनसा तत्र मनसा सा पतिव्रता ।
धर्मलोपभयेनैव चकारालोचनं सती ॥
अकृत्वा पश्चिमां सन्ध्यां नित्याञ्चैव द्विजन्मनाम् ।
ब्रह्महत्यादिकं पापं लभिष्यति पतिर्मम ॥
नोपतिष्ठति यः पूर्वां नोपास्ते पश्चिमां च यः ।
स च सर्वाशुचिर्नित्यं ब्रह्महत्यादिकं लभेत् ॥
वेदोक्तमिति संचिन्त्य बोधयामास तं मुनिम् ।
स च बुद्धा मुनिश्रेष्ठस्तामुवाच ततो मुनिः ॥
आस्तीकदवाच ।
कथं मे सुखभङ्गः कृतः साध्वि ! विरामदः ! पतिव्रता ।
व्यर्थं व्रतादिकं तस्या या भर्तुश्चापकारिणी ॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् ।
भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् ॥
यया पतिः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रतार्थं पत्यर्थं पतिरूपी हरिः स्वयम् ॥
सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् ।
सर्वं व्रतं तपः सर्वमुपवासादिकञ्च यत् ॥
सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम् ।
तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति षोड-
शीम् ॥
सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः
शतम् ॥
विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् ।
असत्कुलप्रजाता या तत्फलं श्रूयतां सति ! ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्रविवर्ज्जिता ॥
इत्युक्त्वा च मुनिश्रेष्ठो बभूव स्फुरिताधरः ।
चकम्पे मनसा साध्वी भयेनोवाच तं पतिम् ॥
मनसोवाच ।
सन्ध्यालोपभयेनैव निद्राभङ्गः कृतस्तव ।
कुरु शान्तिं महाभाग ! दुष्टाया मम सुव्रत ! ॥
श्रृङ्गाराहारनिद्राणां यश्च भङ्गं करोति च ।
स व्रजेत् कालसूत्रञ्च स्वामिनश्च विशेषतः ॥
इत्युक्त्वा मनसा देवी स्वामिनश्चरणाम्बुजे ।
पपात भक्त्या भीता च रुरोद च पुनः पुनः ॥
कुपितञ्च मुनिं दृष्ट्वा श्रीसूर्यं शप्तुमुद्यतम् ।
तत्राजगाम भगवान् सन्ध्यया सह नारद ! ॥
तत्रागत्य मुनिश्रेष्ठमुवाच भास्करः स्वयम् ।
विनयेन च भीतश्च यथा वक्तुं यथोचितम् ॥
श्रीसूर्य्य उवाच ।
सूर्य्यास्तसमयं दृष्ट्वा धर्मलोपभयेन च ।
बोधयामास त्वां विप्र ! नाहमस्तं गतस्तदा ॥
क्षमस्व भगवन्! ब्रह्मन् माम् शप्तुं नोचितं मुने ! ॥
ब्राह्मणानाञ्च हृदयं नवनीतसमं सदा ।
तेषां क्षणार्द्धं कोपश्च ततो भस्म भवेज्जगत् ॥
पुनः स्रष्टुं द्विजः शक्तो न तेजस्वी द्विजात्
परः ।
ब्राह्मणो ब्रह्मणो वंशः प्रज्वलन् ब्रह्मतेजसा ॥
श्रीकृष्णं भावयेन्नित्यं ब्रह्मज्योतिः सनातनम् ।
सूर्य्यस्य वचनं श्रुत्वा द्विजः प्रसन्नो बभूव ह ॥
सूर्य्यो जगाम स्वस्थानं गृहीत्वा ब्राह्मणाशिषम् ।
तत्याज मनसां विप्रः प्रतिज्ञापालनाय च ॥
रुदन्तीं शोकयुक्ताञ्च हृदयेन विदूयता ।
सा सस्मार गुरुं शम्भुमिष्टदेवं हरिं विभुम् ॥
कश्यपं जन्मदातारं विपत्तौ भयकर्षिता ।
तत्राजगाम भगवान् गोपीशः शम्भुरेव च ॥
विधिश्च कश्यपश्चैव मनसा परिचिन्तितः ।
दृष्ट्वा विप्रोऽभीष्टदेवं निर्गुणं प्रकृतेः परम् ॥
तुष्टाव परया भक्त्या प्रणनाम मुहुर्मुहुः ॥
नमश्चकार शम्भुञ्च ब्रह्माणं कश्यपं तदा ।
कथमागमनं देवा इति प्रश्नं चकार सः ॥
ब्रह्मा तद्वचनं श्रुत्वा सहसा समयोचितम् ।
प्रत्युवाच नमस्कृत्य हृषीकेशपदाम्बुजम् ॥
ब्रह्मोवाच ।
यदि त्यजसि धर्मपत्नीं मनसां धर्मिणीं सतीम् ।
कुरुष्वास्यां सुतोत्पत्तिं स्वधर्मपालनाय वै ॥
जायायां च सुतोत्पत्तिं कृत्वा पश्चात् त्यजेन्मुनिः ।
अकृत्वा च सुतोत्पत्तिं विरागी यस्त्यजेत् प्रियाम् ।
स्रवेत्तस्य तपः पुण्यं चालन्यां च यथा जलम् ॥"
ब्रह्मणः कथनेनैवा,—
"जरत्कारुर्मुनिश्रेष्ठो योगेनाङ्गुलिस्पर्शनात् ।
नाभिं पस्पर्श मनसां ॥ मन्त्रेणैव मुनीश्वरः ।
अथोवाच मुनिश्रेष्ठः पत्नीं ज्ञानवतीं सतीम् ॥
अनेनाङ्गुलिस्पर्शेन गर्भस्ते भविता शुभे ।
ततो जरत्कारुपत्नी पत्युर्गर्भं दधार सा ॥
वरारोहे ! तव सुतो भविष्यति महामुनिः ।
आसन्नप्रसवा ब्रूहि किं ते कर्त्तुं प्रियं शुभे ॥
जितेन्द्रियाणां प्रवरो धार्म्मिको वैष्णवाग्रणीः ।
तेजस्वी च तपस्वी च यशस्वी च गुणान्वितः ॥
वरो वेदविदाञ्चैव ज्ञानिनां योगिनां तथा ।
स च पुत्रो विष्णुभक्तो धार्म्मिकः कुलमुद्धरेत् ॥
नृत्यन्ति पितरः सर्वे जन्ममात्रेण वै मुदा ।
पतिव्रता सुशीला या सा प्रिया प्रियवादिनी ॥
धर्म्मिष्ठपुत्रमाता च कुलजा कुलपालिका ।
हरिभक्तिप्रदो बन्धुर्नान्यस्तत्सुखदायकः ॥
यो बन्धुश्छिन्नं न च पिता चरेत्तं वर्त्मनि ।
स तमेव पितरं च ह्यन्यकर्मविमोचयेत् ॥
विष्णुभक्तिप्रदाता च स गुरुर्विष्णुमित्रः ॥
गुरुश्च ज्ञानदाता च तज्ज्ञानं कृष्णभावनम् ।
आब्रह्मस्तम्बपर्यन्तं यतो विश्वं चराचरम् ।
आविर्भूतं तिरोभूतं किं वा ज्ञानं तदन्यतः ।
वेदजं यागजं यद्यत्तत्सारं हरिसेवनम् ।
तत्त्वानां सारभूतञ्च हरेरन्यद्विडम्बनम् ।
दत्तं ज्ञानं मया तुभ्यं स स्वामी ज्ञानदो हि यः ।
ज्ञानात् प्रमुच्यते बन्धात् स रिपुर्यो हि बन्धदः ।
विष्णुभक्तियुतं ज्ञानं न ददाति हि यो गुरुः ।
स रिपुः शिष्यघाती च यो हि बन्धान्न मोचयेत् ।
जननीगर्भजात् क्लेशात् यमताडनजात्तथा ।
न मोचयेद् यः स कथं गुरुस्तातो हि बान्धवः ।
परमानन्दरूपञ्च कृष्णमार्गमनश्वरम् ।
न दर्शयेद् यः स कथं कीदृशो बान्धवो नृणाम् ।
भज साध्वि ! परं ब्रह्माच्युतं कृष्णञ्च निर्गुणम् ।
निर्मूलञ्च कृतं कर्म्म भवेद् यत्सेवया ध्रुवम् ॥
मया छलेन त्वं त्यक्ता क्षम दैवि ! क्षम प्रिये ! ।
क्षमायुक्तानां साध्वीनां सत्त्वात् क्रोधो न विद्यते ॥
पुष्करं तपसे यामि गच्छ देवि ! यथासुखम् ।
श्रीकृष्णचरणाम्भोजे निःस्पृहाणां मनोरथाः ॥
जरत्कारुवचः श्रुत्वा मनसा शोककातरा ।
सा साश्रुनेत्रा विनयादुवाच प्राणवल्लभम् ॥
मनसोवाच ।
दोषेणाहं त्वया त्यक्ता निद्राभङ्गेन ते प्रभो ।
यत्र स्मरामि त्वां बन्धो ! तत्र मामागमिष्यसि ॥
बन्धुभेदः क्लेशतमः पुत्रभेदस्ततः परः ।
प्राणेशभेदः प्राणानां विच्छेदात् सर्वतः परः ॥
पतिः पतिव्रतानाञ्च शतपुत्राधिकः प्रियः ।
सर्वस्माच्च प्रियः स्त्रीणां प्रियस्तेनोच्यते बुधैः ॥
पुत्रे यथैकपुत्राणां वैष्णवानां यथा हरौ ।
नेत्रे यथैकनेत्राणां तृषितानां यथा जले ॥
क्षुधितानां यथान्ने च कामुकानां यथा स्त्रियाम् ।

यथा परस्ते चौराणां यथा जारे कुयोषिताम् ।
शिशूनाञ्च यथा मातरि मार्जारे वणिजां यथा ।
तथा शश्वन्मनः कान्ते साध्वीनां योषितां प्रभो ॥
इत्युक्त्वा मनसा देवी पपात स्वामिनः पदे ।
अर्द्धं चकार क्रोडे तां कृपया स कृपानिधिः ॥
नेत्रोदकेन मनसां स्नापयामास तां मुनिः ।
साश्रुणा च मुनेः क्रोडं सिषेच भेदकातरा ॥
तदा ज्ञानेन तौ द्वौ च विशोकौ च बभूवतुः ।
स्मारं स्मारं पदाम्भोजं कृष्णस्य परमात्मनः ॥
जगाम तपसे विप्रः सकान्तां सुप्रबोध्य च ।
जगाम मनसा शम्भोः कैलासं मन्दिरं गुरोः ॥
पार्व्वती बोधयामास मनसां शोककर्षिताम् ।
शिवश्चातीव ज्ञानेन शिवेन च शिवालये ॥
सुप्रशस्तदिने साध्वी सुषुवे मङ्गलक्षणे ।
नारायणांशं पुत्रञ्च ज्ञानिनां योगिनां गुरुम् ॥
गर्भस्थितो महाज्ञानं श्रुत्वा शङ्करवक्त्रतः ।
स बभूव च योगीन्द्रो योगिनां ज्ञानिनां गुरुः ॥
जातकं कारयामास वाचयामास मङ्गलम् ।
वेदांश्च पाठयामास शिवाय च शिवः शिशोः ॥
रत्नानिकोटिकलसं ब्राह्मणेभ्यो ददौ शिवः ।
पार्व्वती च गवां लक्षं रत्नानि विविधानि च ॥
शम्भुश्च चतुरो वेदान् वेदाङ्गानीतराणि च ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥
भक्तिरस्ति स्वकान्ते चाभीष्टदेवे गुरौ हरौ ।
यस्यास्तेन तत्पुत्रो बभूवास्तीक एव च ॥
जगाम तपसे विष्णोः पुष्करं शङ्कराज्ञया ।
संप्राप्य च महामन्त्रं ततश्च परमात्मनः ॥
दिव्यं वर्षलक्षञ्च तपस्तप्त्वा तपोधनः ।
आजगाम महायोगी नमस्कर्तुं शिवं प्रभुम् ॥
शङ्करञ्च नमस्कृत्य स्तुत्वा च बालकं पुरः ।
सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥
तां सपुत्रां सुतां दृष्ट्वा मुदं प्राप प्रजापतिः ।
शतलक्षञ्च रत्नानां ब्राह्मणेभ्यो ददौ मुने ! ॥
ब्राह्मणान् भोजयामास सोऽसंख्यान् श्रेयसे शिशोः ।
अदितिश्च दितिश्चान्या मुदं प्रापुः परन्तपा ॥
सा सपुत्रा च सुचिरं तस्थौ तातालये तदा ।
तदीयं पुनराख्यानं वक्ष्यामि तन्निशामय ॥”

तत्रा माघाख्यं यथा,—

“अथाभिमन्युतनये ब्रह्मशापः परीक्षिते ।
बभूव सहसा ब्रह्मन् ! दैवदोषेण कर्म्मणा ॥
सप्ताहे समतीते तु तक्षकस्त्वां भक्षति ।
शशाप शृङ्गी नृपतिं कौशिक्याश्च जलेन च ॥
राजा श्रुत्वा तत्प्रवृत्तिं गङ्गाद्वारं जगाम सः ।
तत्र तस्थौ च सप्ताहं शुश्राव धर्म्मसंहिताम् ॥
सप्ताहे समतीते तु गच्छन्तं तक्षकं पथि ।
धन्वन्तरिर्विषं भोक्तुं ददर्श मातृको शुभम् ॥
तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ।
धन्वन्तरिर्मणिं प्राप तक्षकः स्वेच्छया ददौ ॥
स ययौ तं गृहीत्वा च तुष्टः प्रहृष्टमानसः ।
तक्षको भक्षयामास नृपञ्च मञ्चकस्थितम् ॥
राजा जगाम वैकुण्ठं स्मारं स्मारं हरिं गुरुम् ।

सत्कारं कारयामास पितुर्ज्जन्मेजयः शुचा ।
राजा चकार यज्ञञ्च सर्पयज्ञं ततो मुने ! ॥
प्राणांस्तत्याज सर्पाणां समूहो ब्रह्मतेजसा ।
स तक्षकश्च भीतश्च महेन्द्रं शरणं ययौ ।
सेन्द्रञ्च तक्षकं हन्तुं विप्रवर्गः समुद्यतः ॥
अथ देवाश्च सुनयश्चाययुर्मनसान्तिकम् ।
तामुष्टाव महेन्द्रश्च भयकातरविह्वलः ॥
तत आस्तीक आगत्य यज्ञञ्च मातुराज्ञया ।
महेन्द्रतक्षकप्राणान् ययाचे भूमिपं वरम् ॥
ददौ वरं नृपश्रेष्ठः कृपया ब्राह्मणाज्ञया ।
यज्ञं समाप्य विप्रेभ्यो दक्षिणाञ्च ददौ मुदा ॥
विप्राश्च सुनयो देवा गत्वा च मनसान्तिकम् ।
मनसां पूजयामासुस्तुष्टुवुश्च पृथक् पृथक् ॥
शक्रः सम्भृतसम्भारो भक्तियुक्तः सदा शुचिः ।
मनसां पूजयामास तुष्टाव परमादरम् ॥
दत्त्वा षोड़शोपचारं बलिञ्च तत्प्रियं तदा ।
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवाज्ञया ॥
संपूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ।
इत्येवं कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥”

इन्द्रकृतमनसापूजास्तोत्रे यथा,—

नारद उवाच ।

“केन स्तुता स्तोत्रेण महेन्द्रो मनसां सतीम् ।
पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥

श्रीनारायण उवाच ।

सुस्नातः शुचिराचान्तो धृत्वा धौते च वाससी ।
रत्नसिंहासने देवीं वासयामास भक्तितः ॥
स्वर्गगङ्गाजलेनैव रत्नकुम्भस्थितेन च ।
स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥
वाससी वासयामास वह्निशुद्धे मनोहरे ।
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः ।
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ।
मन्त्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ।
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् ।
किञ्चित् शब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः ।
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ।
तेन प्रसादितस्तत्र ह्युपांशुश्चिह्नवाचिकः ।
सर्व्वं प्रसन्नमात्मनो मन्त्रिणो वाक्यात्मनि
निष्ठो ह्युपांशुनाम्नोपि वर्णात् विद्वज्जनाधम-
स्मृतः ॥" ॥
वाचिकोऽप्युच्चैरपिविशेषमाह मनुः ।
"मौनेनैव जपः कुर्य्यात् वाचिकान्तु विशिष्टः"
योगिनीतन्त्रम् ।
"न चंक्रमन् न विहसन् न पार्श्वमवलोकयन् ।
नोपाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ।
न पदा पादमाक्रम्य न चैव हि तथा करौ ।
देवर्षिं जपं कुर्य्यात् न च संतापवान् ।
वर्जयेत् श्रीमन्माणोऽधस्तात् प्राङ्मुखो
वाचि ।
प्राक् कृष्णैवमालोकी जपन्ती जपवी गुरुं ।"

बृहन्मनुः ।
"यदि स्यात् क्लिन्नवासा वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥"
व्यासः ।
"जपकाले न भाषेत व्रतहोमादिकेषु च ।
एतेष्वेवावसक्तस्तु यद्यागच्छेत् द्विजोत्तमः ।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्त्तयेत् ॥"
योगियाज्ञवल्क्यः ।
"यदि वाग्यमलोपः स्यात् जपादिषु कदाचन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥"
गौतमः ।
"क्रोधं मोहं क्षुतं निद्रां निष्ठीवनविजृम्भितम् ।
दर्शनं वनितानाञ्च वर्ज्जयेज्जपकर्म्मणि ।
आचामेत् सम्भवे चैषां स्मरेद्विष्णुं सुरार्च्चितम् ॥"
बौधायनः ।
"नाभिदेशञ्च संस्पृश्य कर्म्मकाले विवर्ज्जयेत् ॥"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
मन्त्रशब्दस्य व्युत्पत्तिर्यथा,—
"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः ॥"
मन्त्रदीक्षारहितस्य दोषो यथा, मत्स्यसूक्ते ।
"अदीक्षितानां मर्त्त्यानां दोषं शृणु वरानने ! ।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम् ।
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम् ॥"
शूद्रस्य मन्त्रविधिनिषेधमाह तन्त्रे ।
"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्म्मन्त्रं मन्त्रञ्चाजपसंज्ञकम् ॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः ।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ॥"
श्रुतिरपि ।

"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति । सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छति ।"
विशेषमाह वाराहीये ।
"गोपालस्य मनुर्देयो महेशस्य तु पादके ।
सप्तशत्याश्चापि स्तवस्य गणेशस्य महत्तथा ।
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत् ॥"
मन्त्रदीक्षाप्रशंसा यथा, गोविन्दवृन्दावने ।
"अदीक्षितस्य मरणे प्रेतत्वं न च शाम्यति ॥"
नवरत्नेश्वरे ।
"सर्व्वेषामपि दोषाणां शुद्धिः फलमखण्डितम् ।
अविरोधाद्वयस्यैव प्रायश्चित्तस्तु मन्त्रयः ॥"
तथा ।
"उपपातकलक्षाणि महापातककोटयः ।
क्षणाद्दहति देवेशि ! दीक्षा हि विधिना कृता ॥"
अथाप्यनुकूलमन्त्रं दीक्षेत ।
"स्ववारराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥"
वाराहीये ।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अथ चैव यद्युक्तो मन्त्रो नामचक्रं विचारयेत् ॥"
इति प्राधान्यतया बोध्यम् ।
तथा च ।
"धनिमन्त्रन्तु यत्नीयादनुकूलन्तथैव च ।"
इत्यादिदर्शनात्तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते । सिद्धसारस्वते ।
"तत्र शुद्धिं चाकडमाख्यां प्राक्तादकथहस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धादीनेव शोधयेत् ॥
क्षुद्रकर्म्मे त्रिया दृष्टे मालामन्त्रे च चामरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीनेव शोधयेत् ॥"
मालामन्त्रस्तु वाराहीये ।

"विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः ।
बहुबीजस्य मन्त्रस्य सिद्धादीनेव शोधयेत् ॥
सप्ताष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
एकद्विव्यादिबीजस्य सिद्धादीनेव शोधयेत् ॥
तथा । एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति ! ।
वैदिकस्य च मन्त्रस्य सिद्धादीनेव शोधयेत् ॥"
तथा चामुण्डातन्त्रे ।
"काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नात्र सिद्धाद्यपेक्षास्ति न च चक्रविचारणा ।
कालादिशोधनं नास्ति नामित्रादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःसाध्यं कदाचन ॥"
एषिका पूर्णफलप्रदा महाविद्या । यथा, मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टाः सर्व्वा हि फलदाः सदा ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः
तथा चैता महाविद्याः कलिदोषान बाधिताः ॥"
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदं प्रशंसापरम् । अस्यैव विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिदरिमन्त्रस्य प्राप्तौ तद्दोषस्य दृष्टत्वात् । इति तु साम्प्रदायिकाः ॥ * ॥ मन्त्रोद्धारार्थं अकडमादिचक्राण्यग्रे द्रष्टव्यानि । तेषां विवरणप्रकारो यथा,

कुलाकुलचक्रम् ।

वायुः	अग्निः	भूमिः	जलम्	आकाशः
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	क्ष	ळ	स	ह
वायुः	अग्निः	भूमिः	जलम्	आकाशः

अकथहचक्रम् ।

अ क थ ह	उ ङ प	आ ख द	ऊ च फ
ओ ड व	ऌ झ म	औ ढ श	ॡ ञ य
ई घ न	ऋ छ ब	इ ग ध	ॠ ज भ
अः त स	ऐ ठ ल	अं ण ष	ए ट र

मन्त्रमूढः, पुं, (मन्त्रे मन्त्रणाविषये मूढः मुग्धः ।) चरः । इति शब्दरत्नावली ।

मन्त्रयुद्धं, क्ली, (मन्त्रस्य मन्त्रणायाः युद्धम् ।) मन्त्रणासमरम् । (यथा, महाभारते । १५ । ६ । ४९ ।

"सुर्वृत्तं मन्त्रयुद्धं स्यात् वादस्य मन्त्रदैः ।
अरक्षि निःप्रयाति वा न च राज्ञो यथावत् ।")

मन्त्रजा, स्त्री, (मन्त्रात् जायते इति । मन्त्र+जन्+डः । टाप् ।) मन्त्रशक्तिः । इति पुराणम् ।

मन्त्रजिह्वः, पुं, (मन्त्र एव जिह्वा यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६६ । (यथा, माघः । २ । १०७ ।

"सन्ततं नाम यत् सप्तो मन्त्रजिह्वेन जुह्वति ।
होमेन मन्दरद्युमणिभिताभीर्विवर्णता ।")

मन्त्रधरः, पुं, (मन्त्रं धारयतीति । मन्त्र+धा+णः ।) चरः । इति हलायुधः । मन्त्रधारि, त्रि । (यथा, मनुसंहितायाम् । ८ । ३ ।

"सर्वकार्याणि विद्वद्भिर्ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ।")

मन्त्रणं, क्ली, (मन्त्र+ल्युट् ।) मन्त्रणा । मन्त्र-णायोग्यानि आयद्वयादीनि विचारणम् । (यथा, मार्कण्डेयपुराणे । १० । ८७ ।

"अवसरे मन्त्रणस्य मन्त्रेतद्गुपबलाय ।")

मन्त्रणा, स्त्री, (मन्त्र+णिच् युच् । टाप् ।) रहसि कार्यावधारणम् । इति मन्त्रमन्त्र-टीकायां भरतः । मन्त्रः । यथा,—

"वादो भवति रहसि विनिपतितैस्त्वाकर:
चोतति
क्रोधी प्राप्नोति दुर्मनः शुभमति विप्राहुतः
सतनि ।
मन्त्री हरति धर्मविच्च भवति भजायका-
धियनः
कीर्तिर्विद्यते मन्त्रणाहुति । यतिरिते यज्ञानि सर्वं
धनः ।"

इति सन्धारे कालाद्योमम् । ७ ।

मन्त्रणायां धर्मीयादि यथा,—

"मन्त्रे यथा कृतान्यतिवाद् गुणसौम्यविद्वद्यः ।
यदयाविनयीयाय क्षीणोंमध्यादिकाव्यः ।"

इति कविकल्पलता । ७ ।

अतिक्रमादिदोषसमन्वयायां दोषो यथा,—

"षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णश्च धार्यते ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न बुध्यते ।"

इति गारुडे ११२ अध्यायः ।

राजा विद्यादिगुणयुक्तेभ्यः मन्त्रिणः कार्याः । यथा,—

"मौलान् शूरान् कुर्वीत् विनयान् विद्याविदा-
यतान् ।
निर्दोष कुलीनांश्च सर्वार्थकुशलानपि ।
तान् दोषैः सर्वे कार्ये मन्त्रिणे यद्विधिवरैः ।
एकैकेन तु सर्वैश्च मन्त्रस्य तु विनिश्चयम् ।
अहोभिर्न समर्थेन कार्यस्य शाब्दिकः ।
अतं कृतं मन्त्रयुद्धं शुभ आरब्धं मन्त्रयेत् ।

अरक्षि निःप्रयाति वा न पाणिन्यौ कदाचन ।
स्त्रियश्च प्राज्ञामयान् पश्चात् शुकान् वैमा-
रिकांस्तथा ।
सर्वैर्विभागैर्हि मनुष्यात् हीनांस्तथा ।
दूरस्थं मन्त्रभेदेषु इतायां यत्र जायते ।
न तत्र मन्त्रं कुर्वीत दृष्टैर्मन्त्रविदोऽपि ।"

इति कालिकापुराणे ८५ अध्यायः ।

अथ मन्त्रनिर्णयः ।

"मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम् ।
कुर्यात्तथा यथा मन्त्रात् कर्मणामाफलोदयात् ।
अपातिनौ हि दमोमौ संशयश्च यदोच्यते ।
स मन्त्र इति विज्ञेयः विनाश शत्रु विभ्रमः ।
एकमेव विषं हन्ति शस्त्रेणैकश्च बध्यते ।
सराष्ट्रं सान्वयं हन्ति राजानं मन्त्रविप्लवः ।
कारिष्यन् न प्रभाषेत कृतान्येव तु दर्शयेत् ।
धर्मार्थकामकार्याणि तथा मन्त्रो न भिद्यते ।
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा तत्र मन्त्रो विधीयते ।
तत्र यत्र प्रयोक्तव्यं कार्येषु गुणवत्स्वपि ।
तावं कुर्वीत नैरन्तर्य प्राप्तिमपि विचक्षणः ।
अभ्यक्ष्य काम्यवधिरान् तिर्यग्योनीन् वयोऽधि-
कान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले निषेधयेत् ।
इति सम्यक् प्रोक्तो राजनीतिरियं मया ।
यतिकर्मविवर्द्धं ख्यातमनीतिकमुच्यते ।"

इति युक्तिकल्पतरौ नीतियुक्तिः ।

मन्त्रवत्, [द्] अ, (मन्त्रादिरिति । मन्त्र+ "तदर्हम् ।" ५ । १ । ११७ । इति वत्प्रत्ययः ।) मन्त्रात् । इति सिद्धान्तकौमुदी ।

मन्त्रदः, पुं, (मन्त्रं ददातीति । मन्त्र+दा+कः ।) शिष्यकर्णे तदिष्टदेवमन्त्रदानकर्त्ता । मन्त्र-दातृगुरुः । यथा,—

"परापरगुरुश्चाथ निर्द्दिष्टं प्रभु पार्वति ।
आदौ सर्वत्र देवेशि । मन्त्रदः परमो गुरुः ।
परापरगुरुश्चैव हि परमेष्ठी ततः गुरुः ।"

इति कुलार्णवतन्त्रे २ पटलः । ७ ।

तद्विचारेणापि परमगुरुत्वादियथा,—

"साम्प्रतं मन्त्रिगापि । कर्त्तव्यं पालयामि ते ।
गुरुः परमगुरुश्चैव परापरगुरुस्तथा ।
स्वगुरुः परमेष्ठीति । आचार्यस्य न संशयः ।
तद्विना परमगुरुः सर्वं विष्णुः पितौ वरा ।
तद्विना परापरगुरुमेवेश्वरस्वतः परा ।"

इति प्राणतोषण्यतर्कुलार्णवमन्त्रविमर्दिनी-मतम् ।

मन्त्रदाता, [तृ] त्रि, (मन्त्रं ददातीति । मन्त्र+दा+तृच् ।) मन्त्रदानकर्त्ता । गुरुः । यथा,—

"सर्वेषाञ्च गुरुणाञ्च मन्त्रदाता परो गुरुः ।
पितुः शतगुणैर्माता पूज्या वन्द्या गरीयसी ।
विद्यादाता मन्त्रदाता प्रायशो हरिरीश्वरः ।
पूज्यो वन्द्यश्च देवश्च मातुः शतगुणैर्गुरुः ।
मन्त्रदातृविशेषेण गुरुरिष्टमती पूर्वैः ।
अन्यो अन्यो गुरुस्तस्मात् अन्यसुखारोपितो गुरुः ।
अथात्मतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।
अदीक्षितस्य मर्त्यस्य विष्णुतिमानि निष्फलम् ।
धर्मकर्मसमर्थस्य नरके तस्य कीर्तिः ।
मन्त्रदाताप्रदाता वा माताप्य गुरुस्तथा ।
पारं कर्तुं न शक्नोति घोरे संसारसागरे ।
विद्यामन्त्रप्रदाता पितृवः पालकोऽपि ।
न मतः प्रियसूत्तुर्भीचरचैवरोपरः ।
गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः ।
गुरुर्धर्मो गुरुः शिवः धर्मात्मा निर्गुणो गुरुः ।
सर्वतीर्थाश्रयश्चैव सर्वदेवमयो गुरुः ।
सर्वदेवस्वरूपश्च गुरुरूपी हरिः स्वयम् ।
अभीष्टदेवे रुष्टे च गुरुः शक्तो हि रक्षितुम् ।
गुरौ रुष्टेऽभीष्टदेवो नहि शक्तश्च रक्षितुम् ।
यस्मै प्रसन्नो यं रुष्टो यं रुष्टो देवताश्रयः ।
तमेव रुष्टो भवति गुरुरेव हि दैवतः ।
न गुरोश्च प्रियतमो न गुरोश्च प्रियः सुतः ।
धनं प्रियं न च गुरोर्न भार्या प्रिया तथा ।
न गुरोश्च परो धर्मो न गुरोश्च परस्परः ।
न गुरोश्च परं सत्यं न पुण्यञ्च गुरोः परम् ।
गुरोः परो न शास्त्रा च नहि बन्धुर्गुरोः परः ।
देवो राजा च शास्ता च प्रियश्चाथ परो
गुरुः ।
यावत् प्रसो दातुमर्थं तावत् शास्ता प्रसादतः ।
गुरुः शास्ता च प्रियश्चायं प्रति जन्मनि जन्मनि ।
तस्मै विद्यागुरुर्देवः धर्मशास्त्री यथा पतिः ।
प्रतिजन्मनिमन्त्रेण सर्वेशाद्यपरि क्रियाः ।
पिता गुरुश्च मन्त्रश्च यत्र जन्मनि जन्मनि ।
गुरुतोऽन्यदि तथा माता गुरुश्च प्रतिजन्मनि ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे गणेशगुरु-कोषकथनं नाम ४८ अध्यायः । अपि च ।
"मान्यः पूज्यश्च सर्वेभ्यः सर्वेषां वन्द्यो भवेत् ।
यथो यश्च प्रदात्री सर्वान् प्रकाति मानवः ।
जनको जन्मदाता च रक्षणाच्च पिता स्मृतः ।
ततो विशीर्णदेहत्वात् कन्या न प्रकाशिनः ।
पितुः शतगुणैर्माता पोषणाद्गर्भधारणात् ।
वन्द्या पूज्या च मान्या च प्रभवा गरीयसी ।
मातुः शतगुणैर्मन्त्रः पूज्यो मान्योऽप्रवादतः ।
यतिमा भगवो देवो विष्णुश्च जनार्दनः ।
जनदातुः प्रतप्तमोऽभीष्टदेवः परः स्मृतः ।
गुरुरूपात्मकगुणो विद्यामन्त्रदस्तथा ।
अज्ञानतिमिरान्धस्य ज्ञानदीपेन चक्षुषा ।
यः सर्वार्थं दर्शयति तस्मात् कोऽपि बान्धवः ।
गुरुदत्तेन मन्त्रेण तपसिद्धं भवेत् ।
सर्वेषां सर्वसिद्धेः तत्परः कोऽपि बान्धवः ।
सर्वं जयति सर्वत्र विद्यया गुरुदत्तया ।
तस्मात् पूज्यो हि जगति को वा बन्धुर्गुरो-
ऽधिकः ।
विद्यान्धो वा धनान्धो वा यो मूढो न भजेद्-
गुरुम् ।
ब्रह्महत्यादिभिः पापैः स लिप्तो नात्र संशयः ।

इदिदं पतितं शुद्रं नर-मुद्राचरेदुषम् ।
सोऽशुचिस्तोयवादोऽपि नाधिकारी च कर्म्मसु ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापथ्यात् स महापातकी
शिव ! ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म गुरुर्भास्कररूपधृक् ॥
गुरुश्चन्द्रस्तथेन्द्रश्च वायुश्च वरुणोऽनलः ।
सर्वरूपी हि भगवान् परमात्मा स्वयं गुरुः ॥
नास्ति वेदात् परं शास्त्रं नहि कृष्णात् परः
सुरः ।
नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीपरम् ॥
नास्ति क्षमावती भूमेः पुत्रान्नास्ति परः प्रियः ।
न च दैवात् परा शक्तिर्न्नतं चैकादशीं विना ॥
शालग्रामात्परो यन्त्रो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वतीपरा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४
अध्यायः ॥

मन्त्रदीधितिः, पुं, (मन्त्रेण दीधितिर्दीप्तिर्यस्य ।) वह्निः । इति त्रिकाण्डशेषः ॥

मन्त्रपूतः, त्रि, (मन्त्रेण पूतः ।) मन्त्रेण पवित्रीकृतः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये । ८९ । ११ ।
"प्रक्षाल्येमन्त्रपूतेन तोयेनाभ्ये निराकृताः ॥"

मन्त्रपूतात्मा, [न्] पुं, (मन्त्रेण पूतः आत्मा यस्य ।) गरुडः । इति धरणिः ॥

मन्त्रवित्, [द्] (पुं, मन्त्रं यथाप्नमन्त्रणं वेत्तीति । विद्+क्विप् ।) चरः । इति हेमचन्द्रः । ३ । ३९७ ॥ (यथा, महाभारते । ५ । १९६ । ४ ।
"एतत् श्रुत्वा द्रुपदो यज्ञसेनः
धर्म्मं सत्यं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राजन् ।
यथायुक्तं रक्षणे वै प्रजानाम् ॥")
मन्त्रज्ञानिनि, त्रि । (यथा, छान्दोग्योपनिषदि । ७ । १ । ३ ।
"सोऽहं भगवो मन्त्रविदेवास्मि ॥"
मन्त्रं वेदार्थं वेत्तीति । विद्+क्विप् । वेदार्थवित् । यथा, मनौ । ३ । १३१ ।
"सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते ।
एकस्तान् मन्त्रवित् प्रीतः सर्वानर्हति धर्मतः ॥")

मन्त्रस्पृक्, [श्] त्रि, (मन्त्रेण स्पृशतीति । "स्पृशोऽनुदके क्विन् ।" ३।२।५८ । इति क्विन् ।) मन्त्रद्वारककार्यकर्त्ता । इति सिद्धान्तकौमुदी ॥

मन्त्रितः, त्रि, मन्त्रेण संस्कृतः । अभिमन्त्रितः । मन्त्रोऽस्य जातः । इति तारकादित्वात् इतच् । मन्त्रधातोः क्तप्रत्ययेन च निष्पन्नः । (यथा, तिथ्यादितत्त्वे ।
"दिव्यं कम्बूर्णं वेदाद्युपामन्त्रितवेदेन ।
मन्त्रितं श्रीषधीतोयैः शान्तिकुम्भजलैस्तथा ।
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥")

मन्त्री, [न्] पुं, (मन्त्रो गुप्तभाषणमस्यास्ति । मन्त्र+इनिः । यद्वा, मन्त्रयते इति । मन्त्र+ "नन्दिग्रहीति ।" ३।१।१३४ । इति णिनिः ।) मन्त्रजातकर्त्तव्यनिश्चयकर्त्ता । तत्पर्य्यायः । धीसचिवः २ अमात्यः ३ । इत्यमरः । २।८।४ ॥ सचिवः ४ धीसखः ५ सामवायिकः ६ । इति हेमचन्द्रः । ३ । ३८२ ॥ तस्य लक्षणं यथा,—
"मन्त्री भक्तः शुचिः शूरोऽनुरक्तो बुद्धिमान्
क्षमी ।
आन्वीक्षिक्यादिकुशलः परिच्छेदो सदेशजः ॥"
इति कविकल्पलता ॥
"बहुभिर्मन्त्रयेत् कामं राजा मन्त्रं पृथक्
पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्रप्रकाशनम् ॥
न क्वचित् कस्य विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च तदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्वा निश्चयावाप्तिः परबुद्ध्युपजीवनात् ।
एकस्यैव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥"
इति मत्स्यपुराणे १९८ अध्यायः ॥

मन्थ, क्लेशे । गादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मन्थति । कुन्थः केचित्तु मन्थते । इति दुर्गादासः ॥

मन्थ, स गादे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) गाद्गो विलोडनम् । स, मथ्नाति दधि बल्लवी । इयं ममन्थ समथम् । इति दुर्गादासः ॥

मन्थः, पुं, (मथ्यतेऽनेन । मन्थ+करणे घञ् ।) मन्थदण्डकः । इत्यमरः । २।९।७४ ॥ (यथा, महाभारते । १२ । १४१ । ११ ।
"आमन्थ मतिमन्थेन ज्ञानोदधिमनुत्तमम् ।
नवनीतं तथा दध्नो मलयाच्चन्दनं यथा ॥"
मथ्यते विलोड्यते इति । मन्थ+कर्म्मणि घञ् ।) सक्तुः । (मथ्नाति स्वकरैस्तिमिरं पीडयतीति । मन्थ+अच् ।) दिवाकरः । इति मेदिनी । थे, ११ ॥ सक्तुर्यथा,—
"सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः ।
नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते ॥"
इति राजनिर्घण्टः ॥
पेयविशेषः । तस्य विधिर्यथा,—
"जले चतुष्पले शीते क्षुण्णं द्रव्यं पलं क्षिपेत् ।
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं
पिबेत् ॥"
चूर्णं चूर्णीकृतम् । मन्थयेत् आलोडयेत् । इति भावप्रकाशः । (मन्थ+भावे घञ् ।) मारणम् । इति सिद्धान्तकौमुदी । नेत्रमलम् । इति धरणिः ॥ नेत्रामयः । इति विश्वः । वज्रः । इति शब्दरत्नावली ॥ क्षुब्धम् । विलोडनम् । इति मन्थानन्दसंग्रहात् ॥ (यथा, रघौ । १० । १९ ।
"कतिपयमन्थवारिधिवशादिव चिरं दृशः ।
प्रादुरभवदलभवो मन्थिरितार्णवः ॥")

मन्थजं, क्ली, (मन्थेन मन्थनेन जायते इति । जन्+डः ।) नवनीतम् । इति रत्नमाला ॥ (विवरणमस्य नवनीतशब्दे ज्ञातव्यम् ॥)

मन्थदण्डकः, पुं, (मन्थाय मन्थनाय यो दण्डः । ततः स्वार्थे कन् ।) मन्थानदण्डः । घूँटुनी इति घोलमौनी इति खङ्गिम इति च भाषा ॥ तत्पर्य्यायः । वैशाखः २ मन्थः ३ मन्थानः ४ मन्थाः ५ । इत्यमरः । २ । ९ । ७४ ॥ क्षुब्धर्षकः ६ मन्थनः ७ मन्थाटः ८ । इति शब्दरत्नावली ॥ मल्लाटः ९ । इति जटाधरः ॥

मन्थनं, क्ली, (मन्थ+ल्युट् ।) विलोडनम् । कुत्थनम् । इति मन्थधातोर्भावे ल्युट्प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते ।१। १८ । १० ।
"चिरारब्धमिदञ्चापि सागरस्यापि मन्थ-
नम् ॥")

मन्थनः, पुं, (मथ्नात्यनेनेति । मन्थ+करणे ल्युट् । यद्वा, मथ्नातीति । मन्थ+न्युः ।) मन्थानदण्डः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे ।८४।१९ ।
"गोभिश्च समकीर्णासु व्रजनिर्ह्रादभूमिषु ।
मन्थनावर्त्तपूर्णेषु गर्गरेषु नदत्सु च ॥")

मन्थनघटी, स्त्री, (अल्पो घटः । अल्पार्थे ङीष् । मन्थनार्थं मन्थनस्य वा घटी ।) दधिमन्थनपात्रम् । यथा,—
"कलशी मन्थनघटी मन्थनी चापि गर्गरी ॥"
इति जटाधरः ॥

मन्थरं, क्ली, (मन्थति संश्लिष्यतीति । मन्थ+बाहुलकात् अरन् ।) कुसुम्भम् । इति मेदिनी । रे, १९८ ॥

मन्थरः, पुं, (मन्थ+बाहुलकात् अरन् ।) कोषः । फलम् । बाधः । मन्थानः । इति मेदिनी । रे, १९८ ॥ चरः । इति विश्वः ॥ मन्दगामियोद्धा । इति भरतधृतामरः । २ । ८ । ७५ । क्रोधः । इत्यजयः ॥

मन्थरः, त्रि, (मन्थति चाटयतीति । मथि+अरन् ।) मन्दः । (यथा, कादम्बर्य्याम् ।१।१६ ।
"इतो बालकमन्थरं शुचि पदं विधाति नाभः-
पुरात् ॥")
पृथुः । वक्रः । इति मेदिनी । रे, १९८ ॥ (विस्तृतः । यथा, आर्य्यासप्तशत्याम् । ३७८ ।
"दाम्पत्याभिषेकवनितमालतीभिः कपोत
लम्बाय ।
गर्भभरमन्थराणो गच्छति पत्युर्गृहं दारा ॥")
बकः । इति शब्दरत्नावली । कोषः । इति हेमचन्द्रः । ६ । ६१ ॥ (मन्दगामी । इति हेमचन्द्रः । ३ । ११८ ॥)

मन्थरा, स्त्री, (मन्थर+स्त्रियां टाप् ।) कैकेय्या दासी । यथा,—
"रामाभिषेके विघ्नार्थं यतमानः सुरार्थनः ।
मन्थरां प्रतिहन्कारी देवैर्देवकृते नरः ॥"
इत्यध्यात्मरामायणे अयोध्याकाण्डे २ अध्यायः ॥

मन्थानः, पुं, (मन्थ+बाहुलकात् आनच् ।) आरग्वधः । तत्पर्य्यायः । पुष्करः २ । इति त्रिकाण्डशेषः ॥

मन्थशैलः, पुं, (मन्थाय समुद्रमन्थनाय कल्पितः शैलः ।) मन्दरपर्व्वतः । इति जटाधरः ॥

मन्था, स्त्री, (मथ्यते इति । मन्थ + घञ् । ततः स्त्रियां टाप् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे ।
"मथुरी चन्द्रिका मन्था मिश्रपुष्पा च मेथिका ॥")

मन्थाः, [इन्] पुं, (मन्थ + "मन्थः ।" उणा० ४ । ११ । इति इनिः । स च कित् ।) मन्थानदण्डः । इत्यमरः । २ । ९ । ७४ ॥ (यथा, किरातार्ज्जुनीये । ४ । १६ ।
"मुहुः प्रणुन्नेषु मथां विवर्त्तनै-
र्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥")

मन्थानः, पुं, (मथ्नाति आलोडयतीति । मन्थ + बाहुलकात् आनच् ।) मन्थानदण्डः । इत्यमरः । २ । ९ । ७४ ॥ (यथा, देवीभागवते । १ । १० । ४५ ।
"मन्थानादरणिर्योगान्मन्थनाच समुद्भवः ।
पावकश्च यथा भद्र कथं मे स्यात् सुतोद्भवः ॥")
आरग्वधः । इति राजनिर्घण्टः ॥ (समुद्रमन्थनदण्डत्वादस्य तथात्वम् ।) मन्दरपर्व्वतः । यथा, रामायणे । १ । ४५ । २० ।
"प्रविश्याथ पातालं मन्थानः पर्व्वतोत्तमः ॥"
महादेवः । यथा, महाभारते । १३ । १७ । १२८ ।
"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः ॥")

मन्थानकः, पुं, (मन्थान इवेति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) तृणभेदः । तत्पर्य्यायः । करिणः १ कटुमलः २ कुलाद्रिपः ३ । अस्य गुणाः । पित्तलम् । रोचकत्वं विषमम् । मधुरत्वम् । बहुवीर्य्यदत्वञ्च । इति राजनिर्घण्टः ॥

मन्थिनी, स्त्री, (मन्थो मन्थनमस्त्यस्याः । मन्थ + इनिः । ङीप् ।) दधिमन्थनपात्रम् । तत्पर्य्यायः । गर्गरी १ कलशी २ । इति हेमचन्द्रः । ४ । ७४ ॥

मन्थोदधिः, पुं, (मन्थस्य उदधिः । मन्थ + कर्म्मणि घञ् । मन्थप्रधानो उदधिरिति । मन्थाय उदधिरिति वा ।) क्षीरसमुद्रः । इति केचित् ॥

मन्दः, पुं, (मन्दते इति । मदि + अच् ।) शनिः । (यथा, ज्योतिषे ।
"गुर्व्विन्दुबुधशुक्राणां वासराः सर्व्वकर्म्मसु ।
भानुभूमिसुतयोर्मन्दे शुभकर्म्मसु केचन ॥")
प्रलयकालविशेषः । इति मेदिनी । दे, ११ ॥ यमः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ११ । ११४ ।
"तत्र मन्दभिरामोऽपि नाभिजातः न वा गुणः ।
धनस्य हि विभूतिः स्यात् संपत्तयः बहवोऽपि च ॥")
गजभेदः । इति शब्दः ॥ (गजजातिविशेषः । यथा, मातङ्गलीलायां ६ अध्याये ।
"गौरत्वङ् निम्नवक्षा बहुवलिकरटः ....
वाजबन्दादिगुणैर्भवति मन्दसंज्ञः ॥")

मन्दः, त्रि, (मदि + अच् ।) अल्पः । मूर्खः । (यथा, रघुवंशे । १ । ३ ।
"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्य-
ताम् ॥")
स्वैरः । अभाग्यः । रोगी । अलसः । इति मेदिनी । दे, ११ ॥ (यथा, मेघदूते । १ । ९ ।
"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा
त्वाम् ॥"
अलसः । यथा, श्रीमद्भागवते । १ । १ । १० ।
"प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥"
"मन्दाः अलसाः ।" इति तट्टीकायां श्रीधर-
स्वामी ॥)
मदरतः । खलः । इति हेमचन्द्रः । ३ । ३८ ॥

मन्दगः, त्रि, (मन्दं अल्पं गच्छतीति । गम् + डः ।) मृदुगामी । यथा,—
"मन्दगाश्च प्रतिपाधिर्विषयसंग्रहकर्षिणः ॥"
इति कविकल्पलता ॥
(पुं, शाकद्वीपस्थजनपदभेदः । यथा, महाभारते । ६ । ११ । ३६ ।
"तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ।
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥")

मन्दगामी, [न्] त्रि, (मन्दं गच्छतीति । गम् + णिनिः ।) मृदुगमनशीलः । तत्पर्य्यायः । मन्थरः १ । इत्यमरः । ३ । १ । ७२ ॥ धीर-गामी २ मन्दः ३ । इति शब्दरत्नावली ॥

मन्दजननी, स्त्री, (मन्दस्य शनैश्चरस्य जननी माता ।) शनैश्चरमाता । छायापत्नी । इति त्रिकाण्डशेषः ॥

मन्दटः, पुं, (मन्दमटतीति । अट् + अच् । शक-न्ध्वादित्वात् साधुः ।) पारिभद्रवृक्षः । इति शब्दरत्नावली ॥

मन्दता, स्त्री, (मन्दस्य भावः । मन्द + भावार्थे तल् । स्त्रियां टाप् ।) आलस्यम् । इति राज-निर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने ।
"दुर्गन्धता मन्दता च तथा मैथुनविप्लुता ।
शिरःकरिग्रुता चैव विज्ञेयाः वायवा गुणाः ॥")
मान्द्यम् । (यथा, कथासरित्सागरे । १ । १ ।
"उपैष्यामि मन्दतामद्यतामिति ॥"
मौनता । यथा, शार्ङ्गधरसंहितायाम् । १ । ३८ ।
"सध्यस्य प्रतिमामुपैति नयनं यशोधये-
ऽमन्दता
दूरं शास्त्ररसोऽपि रोमलतिका नैव्यत्वं
धावति ॥")

मन्दनं, क्ली, (मन्दते स्तौति अनेन । मन्द् + "लुप्सविमन्दिविजायनः ल्युः ।" उणा० २ । ७८ । इति करणे ल्युः ।) स्तोत्रम् । इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥

मन्दरः, पुं, (मन्द् + बाहुलकात् अरः ।) मन्थ-शैलः । (यथा, महाभारते । १ । १८ । १३ ।
"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासु-
किम् ॥")
मन्दारवृक्षः । इति मेदिनी । दे, ११६ ॥ स्वर्गः । आदर्शः । इति हेमचन्द्रः । ४ । ८६ ॥ हारभेदः । इति शब्दरत्नावली ॥ (कुशद्वीपस्थ-
पर्व्वतविशेषः । यथा, मार्कण्डेये । १२१ । ११ ।
"मन्दरः चैव विन्ध्यः सर्व्वधातुमयः शुभः ।
मन्द इत्येव यो धातुरपामर्थे प्रकाशकः ।
अपां विदारणाच्चैव मन्दरः स विशेषतः ॥")

मन्दरः, त्रि, (मन्द् + अरः ।) बहुलः । दृढः । इति मेदिनी । दे, ११६ ॥

मन्दवाक्, पुं, (मन्दते स्तुत्यादिकं प्राप्नोति । मन्द् + "अञ्चिवधिमन्दिदर्शिभ्यः किप् ।" उणा० २ । ७० । इति अवाक् ।) अग्निः । ताक्षः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । त्रिः । स्तुत्यादिकोषः ॥ (त्रि, मोदमानः । यथा, ऋग्वेदे । १ । १०० । १६ ।
"मन्दसानो मरुत्वान् ।"
"मन्दसानो मोदमानः सन् ।" इति तद्भाष्ये सायनः ॥)

मन्दपाड्डः, पुं, (मन्दं मन्दत्वं प्राप्नोति । मन्द + पत् + बाहुलकात् उम् ।) क्रमः । चौकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मन्दा, स्त्री, (मन्द + स्त्रियां टाप् ।) संक्रान्ति-विशेषः । सा च सूर्य्यस्य ग्रुवमृदुक्षिप्रोग्रमिश्रसंज्ञक-नक्षत्रेषु संक्रान्तिकालेन भवति । तस्याः धान्यविहितफलकत्वम् । यथा,—
"मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महो-
दरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्त
धा ॥
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ।
चरेऽथोदरी प्रोक्ता क्रूरेष्वेषु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रेष्वेषु संक्रमः ॥"
इत्येतेषां संक्रान्तिविशेषाणां फलम् । मन्दादिसंज्ञकानां नामानि फलानि च । अत्र वर्णिताः । सूर्य्यस्य मेषादिसंक्रमेण एव विष्णुपदादिसंक्रान्तिः प्रोक्ताः । इति ज्योतिस्तत्त्वम् ॥

मन्दाक्षं, क्ली, (मन्दं अक्षं यस्मिन् इति । मन्द + बाहुलकात् अक्षः ।) लज्जा । इत्युणादि-कोषः ॥ (त्रीडा । रघुवंशे । ७ । ११ ॥)

मन्दाकिनी, स्त्री, (मन्दमकति गच्छतीति । मन्द + अक + णिनिः । यद्वा, "मन्दाकिनी वियद्गङ्गा ।" किं, मन्दाकिनी इत्यमरः ।) स्वर्गङ्गा । तत्पर्य्यायः । वियद्गङ्गा १ स्वर्णदी २ सुर-दीर्घिका ३ । इत्यमरः । १ । १ । ५२ ॥ सुरनदी ४ देवनदी ५ स्वर्गवाहिनी ६ सुरापगा ७ । इति शब्दरत्नावली ॥ (यथा, कुमारसम्भवे । १ । २९ ।
"मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्रकैश्च ॥")
नद्यां विशेषः यथा,—

"प्रधानधारा या स्वर्गे सा च मन्दाकिनी स्मृता ।
योजनायुतविस्तीर्णा प्रस्थेन योजना स्मृता ।
चोरशुभ्रजला प्रस्वरशुभ्रतरङ्गिणी ।
वैकुण्ठाद्ब्रह्मलोकञ्च ततः स्वर्गं समागता ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे जाह्नवी-जन्मप्रस्तावे १४ अध्यायः ॥ ॥ गङ्गान्तर-विशेषः । अस्य प्रमाणं मन्दाग्रन्दे द्रष्टव्यम् । (चित्रकूटस्थनदीविशेषः । यथा, महाभारते । ३ । ८५ । ५८ ।
"ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते ।
मन्दाकिनीं समासाद्य सर्व्वपापप्रणाशिनीम् ।"
द्वारकास्थनदीविशेषः । यथा, महाभारते । हरिवंशपर्व्वणि । १५५ । २२ ।
"वैदूर्य्यपर्व्वतस्यैषा मन्दाकिनी नदी ।
भाति पुष्पद्रुमै रम्या पूर्व्वस्यां दिशि भारत ।"
छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"न न र र-घटिता तु मन्दाकिनी ।"
उदाहरणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मन्दाक्रान्ता, स्त्री, (मन्दं यथा तथा आक्रान्ता ।) छन्दोविशेषः । यथा,—
"चत्वारः प्राक् सुतनु गुरवो द्वौ ततोऽकारयौ चे-
ल्लघ्वी वर्णौ तदनु कुसुमामोदिनि । द्वादशान्त्यौ ।
तद्वच्चान्त्यौ पुनरपि यथैवेह कान्ते । विरामो
मन्दाक्रान्ता प्रवरकवयस्तां गिरन्ते ।"
इति श्रुतबोधः ॥
(अस्यान्या । यथा,—
"मन्दाक्रान्ता विहरति रसं नेत्रयष्टिः समग्रम् ।"
रघुवृत्तः ॥)

मन्दाक्षं, क्ली, (मन्दे सङ्कुचिते अक्षिणी येन यस्मात् । "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" ५ । ४ । ११३ । इति समासान्तः षच् ।) लज्जा । इत्यमरः । १।७।२३ ॥ (यथा, नैषधचरिते । ३ । ६१ ।
"मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा
तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्च न संशयालु-
र्गिरा मुखाम्भोजमयं युयोज ।")

मन्दाग्निः, पुं, (मन्दः पाचकादिगुणरहितः अग्निः ।) कफाद्याक्रान्तजठरानलः । तस्य निदानादि यथा,—
"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः ।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥
विषमो वातजान् रोगांस्तीक्ष्णः पित्तनिमित्तजान् ।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ।
समा समाग्नेरशिता मात्रा सम्यग्विपच्यते ।
स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते ।"
इति माधवकरः ॥ ॥
तदौषधं यथा,—
"चित्रकस्याष्टभागानि गुरवस्य च षोडश ।
शुण्ठ्यादयश्चार्द्ध भागानि मरीचानां द्वयं तथा ॥
पिप्पली पिप्पलीमूलं विडङ्गानां चतुष्टयम् ।
पथ्या सुमतिभागाश्च पिप्पलाश्चतुष्टयम् ॥
द्विगुणेन गुडेनैषां मोदकानि हि कारयेत् ।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम् ।
अतिश्रोषितमन्दाग्निश्वासांश्च निवारयेत् ।"
इति गारुडे १८८ अध्यायः ॥ ॥
अथ जठराग्निविकाराधिकारः । तत्र अग्नि-मान्द्यनिदानपूर्व्वकान् उदराग्निविकारानाह ।
"कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः ॥"
तत्र मन्दस्याग्नेर्लक्षणमाह ।
"स्वल्पापि नैव मन्दाग्नेर्मात्रा भुक्तापि पच्यते ।
छर्द्दिदाहः प्रसेकः स्याच्छिरोगौरवमाठरम् ।"
मन्दाग्निजन्यान् विकारानाह ।
"मन्दोऽग्निर्द्देहिनां कुर्य्याद्विकारान् कफसम्भवान् ।" ॥
अथ चिकित्सा ।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा ।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी ॥१॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्यातृतीयामथ दाडिमं वा ।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चोविबन्धेषु च नित्यमद्यात् ॥२॥
ओषं हन्ति निशाचिन्तं तथाग्निं विवर्द्धितम् ।
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम बलवर्णाग्निवर्द्धनम् ।
शोथोदरार्शःशूलघ्नं श्रीहपाण्डुक्षयापहम् ॥"
सर्व्वचूर्णसमो गुडो देयः । गुडाष्टकम् ॥ ३ ॥
"हरीतकी मोदकसैन्धवनागरमरिचानि चाज्य-तक्रेण ।
समाहारमिदं पाण्डुरोगाग्निपरं परमम् ।"४॥
वैश्वानरः चारः ।
"सामुद्रकाख्यं यावशूकर्बमितं शुभ्रैः ।
सौवर्चलं पञ्चकं विडचैन्धवाख्यकम् ॥
पिप्पली पिप्पलीमूलं पञ्चकं सजीरकम् ।
तालीशं तैघरं चव्यकल्केनसर्व्वं तथा ।
द्विकर्षमात्रान्येतानि प्रत्येकं कारयेद्बुधः ॥५॥
मरिचं जीरकं चित्रकैश्च कर्षमात्रकम् ।
दाडिमं स्यात्पञ्चकर्ष तस्मिन् चार्द्धकर्षके ।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधम् ॥
भक्षयेत्कर्षमात्रं तत् मस्तुतक्रकाञ्जिकैः ।
वातश्लेष्मभवं गुल्मं श्रीहानमुदरं क्षयम् ॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरम् ।
शूलं शोथं श्वासकासामवातञ्च हृद्रुजम् ॥
अश्मरीं शर्कराञ्चापि नाशयेन्मन्दतामपि ।
मन्दाग्निं नाशयेत्तद्दीपनं पाचनं परम् ॥
निहन्ति सर्व्वरोगांस्तु भास्करेणैतदीरितम् ।
तस्मात् सर्व्वप्रकारेण सेव्यमानमरं द्रवम् ।
निम्बुरसादिकं दत्त्वा गुटिकामष्टिकं कुर्व्वीत ॥६॥
टङ्कणं रसगन्धौ च समं भागं विषं त्रिभागम् ।
कपर्द्दः सज्जिकाक्षारो मागधी विश्वभेषजम् ॥
पृथक् पृथक् कर्षमात्रं वसुभागमिदं विषम् ।
जम्बीराम्लेन दिनं एवं भवेदग्निकुमारकः ॥
विषूचीशूलवातादिवह्निमान्द्यक्षयापहः ।"
चारो यवक्षारः । अग्निकुमारो रसो निगु-ण्डीरसजीर्णे ॥ ७ ॥
"पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं
निम्बुकीफलरसेन मर्द्दितम् ॥
वह्निमान्द्यदशवक्त्रनाशनो
रामबाण इति विश्रुतो रसः ।
संग्रहग्रहणिकुम्भकर्णकं
सामवातखरदूषणं जयेत् ॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः ।
रोचकः कफकुलान्तकारकः
श्वासकासवमिकृन्तनाशनः ।"८॥
पारदभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः २ जातीफलभागः १० । रामबाणो रसोऽग्नौ । इति भाव-प्रकाशः ॥ (विवरणमस्य यथा,—
"अग्निश्चतुर्व्विधः प्रोक्तः समो विषमतीक्ष्णकः ।
मन्दश्चापरः प्रोक्तः यस्य लिङ्गानि चाद्भुतम् ॥
वातपित्तकफैः साम्यात् समः सञ्जायतेऽनलः ।
तेनैव विषमं प्राप्ते विषमो जायतेऽनलः ॥
तीक्ष्णः पित्ताधिकत्वेन जायते जठरानलः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥"
इति हारीते चिकित्सितस्थाने चतुर्थाध्याये ॥
"समसर्वं विशेष्यं हि वृद्धिदोषैरनिलम् ।
विषमोऽपि समस्तेन मन्दो दीप्तेन पावकः ।"
"विश्वरविडङ्गचित्रकपथ्यामाषी-
चोदेर्वारिभिर्गुडिका भक्षयेत् ।
तैर्भक्षितैरग्निमवाप्नुयाद्या
शुक्लीत मन्दाग्निरपि प्रभूतम् ।"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे ॥
मन्दः अग्निर्यस्येति । अल्पाग्निविशिष्टे, त्रि । यथा, मार्कण्डेये । १६ । १३८ ।
"योऽश्नीतेऽत्याहितःश्रान्तो मन्दाग्निः संद-ह्यते ।
यदिमन्दा स्तनानं परमभोजनादृतम् ।")

मन्दायुः, [स्] त्रि, (मन्दमल्पमायुर्यस्य ।) अल्पायुः । यथा, श्रीभागवते । १ । १ । १० ।
"प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥"

मन्दारः, पुं, (मन्दते हृष्यते इति । मन्द + "मन्दिमदिभ्यश्च आरन् ।" उणा० ३ । १३४ । इति आरन् ।) स्वर्गस्थपञ्चदेव-वृक्षान्तर्गतवृक्षविशेषः । यथा, अमरकोषे । १।१।५१ ।
"पञ्चैते देवतरवो मन्दारः पारिजातकः ।

मन्दारः कल्पद्रुमश्च पुंसि वा हरिचन्दनम् ॥"
(यथा, अभिज्ञानशकुन्तले ७ अङ्के ।
"अजातपादर्भमार्जितस्वं
स्वजन्मशुद्धिमन्तमर्गताम्ब ।
व्यालम्बमानवरिश्चन्द्रचारा
मन्दार-माला हरिणा पिनद्धा ॥")
पारिभद्रवृक्षः । पालिता मादार इति भाषा ।
यथा, अमरकोषे । २ । ४ । २६ ।
"पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥"
अर्कवृक्षः । आकन्द इति भाषा । यथा,—
"मन्दारवृक्षपर्णेतारसदृशविलोचनाः ।
मन्दारयार्कपर्णेश्च कुसुमैरर्कसम्भवैः ॥"
इत्यमरः । २ । ४ । ८२ ॥
स्वर्गः । धूर्त्तः । इति मेदिनी । रे, १८० ॥
गोऽविशेषः । यथा,—
वराह उवाच ।
"शृणु सुन्दरि ! यत्नेन यन्मां त्वं परिपृच्छसि ।
कथयिष्यामि ते गुह्यं मन्दारस्य महाद्भुतम् ॥
कौतूहलोत्पन्नं तव वक्ष्ये मन्दारपुष्पजम् ।
मन्दारपुष्पमादाय सर्वोर्ध्वं मम वै शुचि ॥
सर्वेषामद्भुतानि निःसृतानि शिरो धरे ।
विन्ध्ये च सम्भवेत् मन्दारस्य महाद्रुमः ॥
तिष्ठोर्ध्वं तव सुश्रोणि ! महामुनयहत्तमपरा ।
चतुर्भीषणं स्नानं सर्वोर्ध्वं तु हिमालयम् ॥
मम निश्चयं देवि ! मन्दारद्रुममाश्रितः ।
निमार्ग मम मुखोऽपि । मन्दारेऽस्मिन् द्रुमे तथा ॥
द्वादश च चतुर्दश्यां च पुष्पाणि द्रुमोत्तमः ।
तत्र मध्याह्नवेलायां दीप्तमानो भवेत्ततः ।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन ।
तस्मिन् मन्दारकुण्डे तु स्नानकोविदो नरः ।
स्नानं करोति शुद्धात्मा च स गच्छेत् परां
गतिम् ॥
अथ प्राणान् परित्यज्य कुले मन्दारसंज्ञिते ।
ततः क्षमा वरारोहे ! मम लोकाय गच्छति ॥
तस्य पश्चिमपार्श्वे तु प्रथमं नाम तं निरिम् ।
तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः ।
आकृष्टनिधि स्नानं तस्मिन् चैव परं मम ॥
दक्षिणे पतते धारा भवेत् कोपदायकम् ॥
तत्र स्नातो वरारोहे ! स्नानकोविदो नरः ।
मोदते दक्षिणे शृङ्गे तस्मिन् मेरौ द्विजोत्तमे ॥
तथाच मुच्यते प्राणान् मम कर्मपरायणः ।
सर्वं तद्धि परित्यज्य मम लोकं प्रपद्यते ॥
मानवर्ष्य समाप्ताय मोदते देवनैः सह ।
तथाच मुच्यते प्राणान् स्वजनः सुनिश्चितः ।
तारयित्वा कुलं सर्वं मम लोकं प्रपद्यते ॥
तस्य दक्षिणपूर्वेण कथ्यतेऽन्यो वराङ्गने ! ।
पतते शिखराद्भूत्वा कराभुज महाद्रुमः ॥
तत्र स्नात्वा तु यः कुर्यात् दिवसोपोषितो नरः ।
मोदते पूर्वपार्श्वे तु तस्मिन्मेरौ द्विजोत्तमे ॥
अथवा मुच्यते प्राणान् मम चिन्तनान्वितः ।
दिशा वै कर्णकं तत्र मम लोकाय गच्छति ॥
मन्दारस्य तु पूर्वेण गुह्यं कोटरवन्दितम् ।

यत्र धारा पतत्येका तुषारेण समन्विता ॥
तत्र स्नानं प्रकुर्वीत पञ्चभक्तोषितो नरः ।
मोदते पूर्वपार्श्वे तु तस्मिन् मेरौ द्विजोत्तमे ॥
तथाच मुच्यते प्राणान् त्यक्त्वा कर्म सुदुष्करम् ।
मेरुपृष्ठं समुत्सृज्य मम लोकाय गच्छति ॥
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम् ।
पञ्च धाराः पतन्त्यत्र तुषारेण समन्विताः ॥
तत्र स्नानन्तु कुर्वीत अहोरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे महामेरौ द्विजोत्तमे ॥
अथाच मुच्यते प्राणान् त्यक्त्वा कर्म सुदुष्करम् ।
मेरुपृष्ठं परित्यज्य मम लोकं प्रपद्यते ॥
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि ! ।
तत्र धारा पतत्येका आदित्यसमतेजसा ॥
तत्र स्नानन्तु कुर्वीत अहोरात्रोषितो नरः ।
मोदते पश्चिमे भागे गुह्यो यत्र प्रवर्त्तते ॥
अथाच मुच्यते प्राणान् मम कर्मपरायणः ।
सर्वपापविनिर्मुक्तो मम लोके च मोदते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं दैवतमन्वितम् ।
चक्रावर्त्तं इति ख्यातममायस्य महाद्भुतः ॥
स्नानं करोति यस्तत्र पञ्चभक्तोषितो नरः ।
मोदते सर्वशृङ्गेषु मन्दरस्य महात्मनः ॥
अथ वै मुच्यते प्राणान् चक्रावर्त्ते महायशाः ।
सर्वान् सर्वान् परित्यज्य मोदते मम सन्निधौ ॥
देवं पावकमासाद्य तस्मिन् विन्ध्यशिरोत्तमे ।
तिस्रो धाराः पतन्त्यत्र सुधनाशनयः शुभाः ।
तत्र स्नानं प्रकुर्वीत मम चित्तसमन्वितः ।
मोदते सर्वशृङ्गेषु पञ्चचित्तसमाश्रितः ।
तथाच मुच्यते प्राणान् यावत् गुह्ये यशस्विनि ! ।
सर्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥
तस्य विकोणमार्गेण दक्षिणां दिशमाश्रितः ।
गुह्यं सर्वोत्तमं वसेत् कथायत्र महाद्भुतम् ॥
तत्र स्नानन्तु कुर्वीत अष्टभक्तोषितो नरः ।
मोदते धर्मशीलेषु सर्वेषु गमनालयः ॥
अथैव मुच्यते प्राणान् मम कर्मसमन्वितः ।
सर्वदोषान् परित्यज्य मम लोकं प्रपद्यते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं मे परमं महत् ।
सप्त धाराः पतन्त्यत्र अगाधस्य महाद्भुतः ॥
तत्र स्नानन्तु कुर्वीत अहोरात्रोषितो नरः ।
मोदते शक्रलोकेषु अप्सरोगणसेवितः ॥
अथ वै मुच्यते प्राणान् सर्वकर्मपरिनिष्ठितः ।
सर्वसङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
एकान्ते तत्र तिष्ठन्ति कल्पमात्रं यथा मम ।
स्वमतमपरं चैव मन्दारस्य गिरौ मम ॥
तव तिष्ठामि सुश्रोणि ! विन्ध्यस्य गिरिमूर्द्धनि ।
मन्दारे परमे गुह्यं तस्मिन् गुह्यशिरोत्तमे ॥
दक्षिणे संस्थितं चक्रं यामि यानि च वै नरा ।
आकृष्टं सुकृतञ्चैव यदि तिष्ठति चापरः ॥
स यदा मन्दराद्रिं गुह्यं मन्दारसंज्ञितम् ।
तत्र चैव तिष्ठामि मम भक्तसमाश्रयम् ॥
इत्थ याचते कथितस्य नानाविधोदितः ।
तस्य आख्यानात् श्रुताद् ये च वाराहर्त्तवि-
नाम् ॥"

इत्यादि वाराहपुराणे मन्दारमाहात्म्ये मन्दा-
गुह्यवर्णनं नामाध्यायः ॥
मन्दारषष्ठी, स्त्री, (मन्दं आख्यानपादादिमि ।) षष्ठी ।
इति मुग्धबोधसत्ती ॥
मन्दिकुक्कुरः, पुं, मत्स्यविशेषः । इति हेम-
चन्द्रः । पश्चात्तापे मल्लिकुक्कुरोऽपि पाठः ।
मन्दिरं, क्ली, (मन्दते सुष्ठु तिष्ठत्यत्र मन्दन्ते सुप्ते
इति वा । मदि ङ स्वप्ने जाड्ये + "इर
मन्दिदृशीति ।" उणा० ११५१ । इति किरच् ।)
गृहम् । इत्यमरः । २ । २ । ५ । "मन्दो
मुख्यमिव मन्दिरम् । मदि ङ स्वप्ने जाड्ये मदे
मोदे स्तुतौ गतौ चाच्योति ददः । नगरं मन्दिरं
पुरमिति पुंनपुंसकयोरप्ययं पठति । स्त्री
मन्दिरा च सर्वोत्तम मन्दिरावासदायिनि
मधुसूदनादयः ।" इति भरतोकृतो सारः ॥ ७ ॥
अथ भगवन्मन्दिरनिर्माणफलमाहात्म्यम् ।
"यः कारयेन्मन्दिरं केशवस्य
पुण्याल्लोकान् स जयेच्छाश्वतान् वै ।
दत्त्वारामान् पुष्पफलाभिपन्नान्
भोगान् भुङ्क्ते कामतः श्लाघनीयान् ॥
पितामहं पितृकुलं तथा मातृकुलं नरः ।
तारयेद्यात्मना सार्द्धं विष्णोर्मन्दिरकारकः ॥
दशाथ जिनशी देवमाया मानवि मोचिनः ।
पुरतो चतुर्दिक्ष्व हनवस्य सर्वतः ॥
अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति ।
हरिमन्दिरकर्त्ता यो भविष्यति शुचिव्रतः ॥"
इति वामने हेमाध्यायः ॥ ७ ॥
अपि च । अग्निपुराणे ।
"हे व्यापनि वरायुधा अस्मिन्नाशौ हरि-
मन्दिरम् ।
देवो दिवोषके याते पूर्वजन्मकृतोद्भवम् ॥"
किञ्च ।
"समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥"
किञ्च ।
"सप्तैकाय नयेत्सम कृतेऽथ वा कृतेः ।
सुखं वर्षं शतानामानन्दवर्द्धनेको ॥"
विष्णुधर्मोत्तरे कृष्णाय ।
"कृत्वा वासगृहं तत्र देवस्य यशस्विनः ।
रामसदाकृतेषामि कवि च सुधा ।
प्राप्नोति अक्षयं पुण्यं महोन्नतं शालिनं
विष्ण

तथाष्टादशधर्मे पुण्यं तस्मै दत्तं ध्रुवं भवेत् ।
ततो दशगुणं पुण्यं तथा हैमस्य भवेत् ।
ततो दशगुणं लौहे ताम्रे दशगुणं ततः ।
अश्मशुक्तिमये दीर्घे शताङ्गं कलधौतम् ।
ततः शतगुणं वै मौक्तिकं हेमवर्ण्यः ।
सर्वत्र अक्षयानि ह्ययोनि समायते ॥"
अन्यत्र ।
"आरभ्ते प्रथमपक्षाद् नरकमध्यम शुद्धम् ।
कार्यं विष्णुमाखीति भरकाद्वाद्देव विष्णु ।
प्राकारपरि कृशल दर्शनाप्य देवतः ।

तावद्वर्षसहस्राणि वसते विष्णुसद्मनि ।
प्रासादे कृष्णदेवस्य चित्रकर्म्म करोति यः ।
वसेत् विष्णुलोके तु यावत्तिष्ठन्ति सागराः ॥”
नारसिंहे ।
“यः कुर्य्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकमवाप्नुयात् ॥”
हयशीर्षे ।
“देवागारं करोमीति मनसा यस्तु चिन्तयेत् ।
तस्य कायगतं पापं तदह्ना विप्र ! नश्यति ।
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥
अष्टेष्टकासमायुक्तं यः कुर्य्याद्वैष्णवं सद्म ।
न तस्य फलसम्पत्तिर्व्वक्तुं शक्येत केनचित् ॥
अनेनैवानुमेयन्तु फलं प्रासादविस्तरात् ।
सत्यञ्च सर्व्वकार्य्यो यः कृत्वा प्रथमेष्टकाम् ॥
स समाप्तस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥”
विष्णुरहस्ये ।
“शाखे च क्रीडमाना ये पांशुभिर्भवनं हरेः ।
वासुदेवस्य कुर्व्वन्ति तेऽपि तल्लोकगामिनः ॥”
आदिपुराणे ।
“शैवमाच्छादनञ्चैव यः करोति पुनर्नरः ।
देवस्यायतनं कृत्वा न भवेत् कीदृशं भयम् ॥”
अथ मन्दिरनिर्म्माणकालः । मात्स्ये ।
“चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
पत्नीनाशश्चाश्विने तु कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ।
लाभन्तु बहुशो विद्यादग्निं माघे विनिर्दिशेत् ॥
काञ्चनं फाल्गुने पुत्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरा-त्रयमैन्द्रवम् ॥
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ॥
वज्रव्याघातशूलानि व्यतीपातातिगण्डके ।
विष्कम्भगण्डपरिघान् वर्ज्जं योगेषु कारयेत् ॥
श्वेतमैत्रे च माहेन्द्रे गान्धर्व्वाभिजिरौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥”
हयशीर्षे ।
“वास्तुकर्म्म न चारभ्यं कर्कटादौ विजानता ।
सप्तम्यां विभागान्ते शुक्लपादे द्विजोत्तमे ॥
चतुर्थी नवमी वर्ज्ज्या तिथयोऽन्याश्चतुर्दशी ।
भौमस्य तु दिनं वर्ज्ज्यं करणं विष्टिचिह्नितम् ॥
चित्रकरोचदिक्षौत्यैस्तान्यर्क्षमपीडितम् ।
चण्डवृष्टं चरैश्चैव अतिपातहतं तथा ॥
जलनाडीसुकूले च कार्य्यं कर्म्म विजानता ।
कुर्य्याच्च नाम प्रस्तावे नैवान्तं प्रकारेणम् ॥
पूर्व्वं पौष्णञ्च वाविश्वे वायव्यं वैष्णवं तथा ।
शिलाटिं च शिरे लग्ने कर्त्तव्योपचयान्विते ॥
केन्द्रे सौम्यग्रहो यत्र त्रिकोणे तु द्विजोत्तम ! ।
पापकोपचयस्थाने तदा कार्य्यं समारभेदिति ॥”

अथ प्रासादमानम् । हयशीर्षे ।
“पूर्व्वं देवकुलं वीक्ष्य प्रासादं स्वल्पकं तथा ।
समं वाप्यधिकं वापि न कार्य्यं विजानता ॥
उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रायसंमि-
ताम् ।
प्रासादं कारयेदन्यं नोभयं पीडयेद्बुधः ॥”*॥
अथ स्थानशोधनानि । देवीपुराणे ।
“देवो विष्णुस्तथा यक्षो भक्ताद्याः सुरसत्तमाः ।
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः ॥
गर्त्तादिरहिता धात्री सम्पन्नादेन या भवेत् ।
वर्णेन च सुरश्रेष्ठ ! सा मही सर्व्वकामदा ॥”
मात्स्ये ।
“पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तु प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ॥
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्त्रियस्य च ॥
कषाये कटुका तद्वद्वैश्यशूद्रेषु शस्यते ।
अरत्निमात्रे वै गर्त्ते स्वनुलिप्ते च सर्व्वतः ॥
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीक्षार्थं पूर्णं तत् सर्व्वदिङ्मुखम् ॥
दीप्ता पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः सम्मुखितो नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
अरत्निमात्रकं गर्त्तं परीक्ष्य खातपूरणे ॥
अधिके श्रियमाप्नोति न्यूने हानिं समे समम् ।
फालकृष्टेऽथवा देशे सर्व्वबीजानि रोपयेत् ॥
त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठा मध्या कनिष्ठा भूर्व्वर्ज्जनीयेतरा सदा ॥”
हयशीर्षे ।
“सुरभीणां रतिर्यत्र वत्सानां रवः सदा ।
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ! ॥
रात्रौ पूर्व्वं गृहं यस्यामग्नीनां पश्चिमा तथा ।
काश्मीरचन्दनामोदा कर्पूरागुरुगन्धिनी ॥
कमलोत्पलगन्धा च जातीचम्पकगन्धिनी ।
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ॥
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ।
शुक्रशोणितगन्धा च शुभदाऽवसना च या ॥
सर्व्वेषां वर्णिनां भूमिः सर्व्वकामप्रदा मता ।
दुर्गन्धा दुःस्वना या च नानावर्णा च दुर्भगा ॥
वृत्तार्द्धचन्द्रसदृशा विकाराद्दिङ्मुखायता ।
विवर्णा वर्णहीना च बद्धा शुषिरवती तथा ॥
द्विवर्णा सर्पसदृशी मोहदी च त्रिकोणिका ।
बहुधा शूलसदृशी दलितप्रोषमा च या ॥
परीक्षितपया या च दिङ्मुखा प्रकटानलः ।
एवं प्रकारा या भूमिर्वर्ज्ज्या यत्नेन देशिकैः ॥”
किञ्च ।
“प्रासादस्य विशेषेण शोभा भूमिश्चतुर्विधा ।
सुभद्रा भद्रिका पूर्णा धूम्रा चाभिजनप्रदा ॥
निम्बकेशरदिक्यैश्च बर्व्वुराद्यैश्च शोभिता ।
पट्टेन्दीवरसंयुक्ता या सुपद्मिनि विश्रुता ॥
करीरबदरीचम्पकतीर्थक्षीरकच्छोभिता ।
पुष्पदन्तककोलैश्च पीरद्रोणैश्च शोभिता ॥

कर्णिकारनलनागुल्मकुसुमप्रभाशना ।
वल्मीकदन्तपन्थिसुक्ता भद्रेति कीर्त्तिता ॥
वक्रवृक्षोत्कटकुला तथा प्रस्तरलोहितैः ।
साधवीवेष्टिता या च शुक्रशिम्वावकोद्भवैः ॥
शून्यधान्यैश्च पुन्नागैर्विपार्श्वगता च या ।
तोयञ्च स्वल्पकं यस्यां सा पूर्णा परिकीर्त्तिता ॥
बिल्वार्कखदिरपीलूनां वल्मीकैः परितो वृता ।
शर्करा च कठिना युक्ता कण्टकिभिर्द्द्रुमैः ॥
श्मशानमायुकाकानां स्थितानां या कुलाकुलैः ।
धूम्रेति कीर्त्तिता सा तु यत्नात् परिवर्ज्जयेत् ॥
ततो भूमिं परीक्षेत पूर्व्वोदक्प्रवणां शुभाम् ।
अघृष्टां तथाव्यवसामस्ततोयां परिप्लुताम् ॥
संपूर्णमात्रे खाते तु तथाधिकपदं शुभाम् ।
कुसुमप्रकरं यत्र यस्यां न म्लानिमृच्छति ॥
न निर्व्वाति तथा दीपकोऽयं शीघ्रं न शोषति ।
श्वेतारुणा पीतकृष्णा विप्रादीनां प्रशस्यते ॥
आज्यगन्धास्रगन्धा च सुरागन्धा तु या भवेत् ।
मधुरा च कषाया च अम्ला च कटुका च या ॥
कुशैः शरैस्तथा काशैः दूर्व्वाभिर्या च संवृता ।
तस्यां पूर्व्वेऽपि यत्ने कुर्य्याद्भूमिपरिग्रहम् ॥”
अथ भूमिपरिग्रहः । तत्रैव ।
“प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ।
सार्द्धं हरिद्राचूर्णेन सलाजदधिसक्तुभिः ॥
दशभिर्भूतबलिं दत्त्वा स्वमन्त्रपदेन तु ।
मानविना ततः प्रकृतिदिक्षु निवेशयेत् ॥
राक्षसाश्चापि भूताश्च येऽत्र तिष्ठन्ति भूतले ।
ते सर्व्वे अपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥
इत्यनुज्ञाप्य भूतादीन् तां भूमिं परिशोधयेत् ।
आदित्यादिग्रहांश्च लोकपालैः समं ततः ॥
आर्षनिर्दिष्टविधानेन ततो वै शोधमाचरेत् ।
चतुर्वर्गं ततः कुर्य्यात् कुम्भाकृतस्कन्ध देशिकः ॥
दद्यात् पूर्णाहुतिं पश्चात् गोवृषाभ्याञ्च देशिकः ।
वृषभो कपिलो यत्र धवलो वा विचक्षणः ।
पोषणार्थं हलञ्चैव यवीवारणभोजनम् ॥
प्रादुर्सं धौम्य समन्ततो कुल्यात्प्राहारगुम्फिनः ।
आमनी परिमोदाय हारमाभरविदम ॥
सर्व्वदैव समीरम्य शुभबीजानि वापयेत् ।
संप्राप्ते शुभकाले तु शोभितन् कारयेद्बुधः ।
पुनःपुनः कर्षयित्वा तु समीकृत्य गृहं बुधः ॥”
मात्स्ये च ।
“शोणाधिकां समां वास्तोः सर्व्वतः परिवर्ज्जयेत् ।
मन्तरप्याद्देवेषु कर्षयेत् विवर्ज्जयेत् ॥”*॥
अथ दिक्साधनम् । हयशीर्षे ।
“कारयित्वा समं कृत्वा चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम् ॥
हस्तमात्रप्रमाणेन चाष्टौ भागांस्तु भाजयेत् ।
मध्ये शिवकर्णं शङ्कुं कृत्वा रेखां विरो-
चयेत् ॥
[illegible]
[illegible]
[illegible]
[illegible]

उदीच्यां पुष्पदन्तेन सम्पदोपि च योजयेत् ।
चतुरस्रां शिलां यत्र दद्याद्वा सुशोभनाम् ॥
चतुर्दिक्षु शिलाभ्यास यत्नमिह कारयेत् ।
एवं कृत्वा यथाविधि प्राकारांश्च भोजयेत् ।
वैभवात् पायसान्नाद्यान् दातव्येन समाहितः ॥”
अथ द्वारोद्धरणम् । मात्स्ये ।
“द्वारारम्भेऽपि कर्त्तव्यः सम्पद्ये पञ्च सम्पदी ।
द्वारस्तम्भमयेनाथ प्रासादे गर्भेऽथवा ।
गर्भाद्यं मध्यं प्राकारद्वारं भवनाद्यम् ॥”
स्तम्भोर्द्ध्वे ।
“वास्तुविन्यास: मर्म्म वर्जयेद्विधिवत्तथा ।
स्तम्भो द्वारयोः वापि पञ्च वा सप्त पञ्चकः ।
कोणेऽपि यत्र वै नाम मर्म्म तत्र विनिर्द्दिशेत् ॥”
अथ वास्तुलक्षणम् । मात्स्ये ।
“एकाशीतिपदैर्वास्तु पदे तत्र प्रकीर्त्तयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ॥
पश्चात्पिष्टेन चालिप्य सूत्रेणालोड्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ॥
सर्व्ववास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ॥
पदस्थान् पूजयेद्देवान् त्रिंशत् पञ्चदशैव च ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्ते त्रयोदश ॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोध
मे ।
ईशकोणादिषु तथा पूज्यश्च शिखी नरः ।
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषश्चैव च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्च शृणुष्व तथा ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्यान्ते च समीपगाः ।
एकैकोऽन्तरितान् विद्यात् पूर्व्वादीनामतः परम् ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः
क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
आपश्चैव सावित्रश्च दिशि प्राग्दक्षिणे ॥
ब्रह्मणः परितो दिग्विदिक्षु तु सुरोत्तमाः ।
आपवत्सस्तथा सर्व्वदेवतादिर्विभागशः ॥
नैरृत्याश्च वरुणादेव वायोश्चैवोत्तरे ।
तस्यैव तु पश्चिमेऽद्रिशैलेभ्यो तु कथितः ॥
पर्जन्यश्च विदिक्ष्वेव दिशः कुबेराद्युदक्‌छता ।
उत्तरः षष्टमो दिक्‌ विदिक्ष्वेव तु कथितः ॥
बहिर्द्वात्रिंशत् वास्तुप्रोक्तं पदं पदं ।
पदं सावक्षदास्थितात् विदिक्‌ःदिक्‌ष्वमास्थितः ॥
कल्पयेद्वसवश्चैव शेषांश्चैवं स्थापयेत्तु ।
सुरोत्तमांस्तथा मध्ये सर्व्वत्र गर्भसम्भवे च ॥
इन्द्रं वायुसखा: मध्यस्थापनः समाश्रिताः ।
यत्पदं वास्तुसंस्थानं विदिक्ष्वन्तसमं तथा ॥
चतुर्थभावस्थितं पदं मर्म्म कोण संस्थितं ।
कोणवेधे सूत्रदानाद्वास्तुभागेषु कल्पयेत् ॥
कोणाश्च सूत्रसंयोगात् सम्यक् प्रत्यक् समीपगाः ॥
सूर्य्यवायौ तु ज्योतिषौ द्वारदेशौ समाश्रितौ ।
सावित्रः सविता तद्वत् दक्षिणमाश्रितौ ।
विवस्वांश्च मित्रश्च जठरे संस्थितावुभौ ।
पूषा च राजयक्ष्मा च द्वारभेदेऽभिमन्त्रितौ ॥
तथैवापवत्सौ च वामनाख्यौ समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वत् गृहक्षतः ॥
यमोऽर्च्यमाश्रितो मृगः अङ्गादीन्तुपगतौ ।
जङ्घयोर्भृङ्गराजो यो जिह्वयोः दौवारिको गतः ॥
अधः सुग्रीवका मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये तु च पूज्यते ॥
चतुःषष्टिपदो वास्तुः प्रासादे कथ्यते सदा ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वेकपदास्तथा ॥
बहिःकोणेषु चाष्टौ तु वास्तोश्चार्द्धपदाः स्मृताः ।
विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः ॥”॰॥
पद्मपुराणे ।
“वास्त्वर्थं कल्पयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेतगन्धानुलिप्ताङ्गः सर्व्वालङ्कारभूषितः ॥
चतुःषष्टि तु प्रासादे एकाशीति गृहे तथा ।
चतुरश्रीकृते क्षेत्रे अष्टधा भाजिते ॥
कोष्ठरेखा ततो दत्त्वा सुरभावास्तु कल्पयेत् ।
शिवः कोणार्द्धगो ज्ञेयः पर्जन्यः पदसंस्थितः ॥
द्विपदस्थो जयो ज्ञेयः सुरेशश्च द्विपादिकः ।
भास्करश्च पदे ज्ञेयो द्विपदः सत्य उच्यते ॥
भृशः पदस्थो विज्ञेयो नीलश्चैव पदार्द्धगः ।
कुणावह: पदार्द्धे च पूषा च पदसंस्थितः ॥
वितथो द्विपदश्चैव पदेकश्च यमस्तथा ।
वैवस्वतः पदैकस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गराजपदो ज्ञेयो मृगश्चार्द्धपदे स्थितः ।
पितरश्चार्द्धगा ज्ञेयाः पदं दौवारिकस्तथा ॥
सुग्रीवश्च पदे ज्ञेयो द्विपदः पुष्पदन्तकः ।
वारुणाश्चरिकश्चैव कथ्यते द्विसंस्थितः ॥
संयमीश्वरपदे ज्ञेयः प्रत्येकः पाद उच्यते ।
रोगश्चार्द्धपदे ज्ञेयो नागश्चापि पदे स्थितः ॥
मुख्यश्च द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ।
सोमश्चार्द्धपदे ज्ञेयो भाजकस्तु द्विपदे स्थितः ॥
अदितिः पदार्द्धदेवी चार्द्धदिताद्विसंस्थिता ।
आपो वैशाख्यतश्चार्द्धे द्विपदस्थः स्थितः ॥
अप्सरस्तु द्विपदेऽर्द्धपदे पूर्व्वसंस्थिता: ।
सविता तु पदे ज्ञेयः सावित्रो च पदे स्थिता ॥
मध्ये विवस्वान् विज्ञेयश्चतुष्पदे स्थितः ।
इन्द्रश्चैवं पदे ज्ञेयः त्रिपदे संस्थितः ॥
वह्नेश्चैव सुरेशाद्युक्तं तिरेखे संस्थितः ।
मित्रश्चतुष्पदे ज्ञेयो द्विपदे तु संस्थितः ॥
भूमिश्चतुष्पदे ज्ञेयो मध्ये ब्रह्मा प्रकीर्त्तितः ।
चतुर्म्मुखश्चतुष्कोणो मध्ये ज्ञेयः प्रजापतिः ॥”
अथ वास्तुपूजा । मात्स्ये ।
“अथातः संप्रवक्ष्यामि प्रासादविधिरुत्तमम् ।
भाद्रे परीक्षिते यत्नाद्वास्तुदेवविचक्षणः ॥
वास्तुपद्मस्य कुर्व्वीत पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु विन्यसेत् ।
श्वेतश्चेतरामे मार्गे कुर्य्यात् पञ्चरसादिकं ।
सर्व्वैः कुम्भनिधेयाद्यं चामिषैः क्षीरदधिभिः ॥
पायसैः सांसिकैश्चापि मांसौदनरसैरपि ।
कृसरापूपमोदकैश्चापि सुमनोभिः पानैस्तथा ।
कार्य्यं तु पञ्चभिर्गन्धैर्दिव्यसौगन्धिकादि वा ।
योगाग्नि अस्याञ्जलिष वास्तुदेवे बलिं हरेत् ॥
ब्रह्मविष्णुरुद्रादीं दद्यात् मन्त्रेण तु ।
ईशकोणे तृणानु शिखिने विनिवेदयेत् ॥
श्वेतं धवलं दद्यात् पर्ज्जन्याय घृतान्वितम् ।
जयन्ताय ध्वजं पीतं पीतं कुङ्कुमं संन्यसेत् ॥
इन्द्राय पञ्चरत्नानि पीतकं कुसुमं तथा ।
सितवस्त्रं च सूर्य्याय धूम्रं दत्वं तथैव च ॥
सत्याय घृतगोधूमं भृशाय दद्याद्गुडादि च ।
अन्तरीक्षाय आकाशाय दद्यात् शकुनिमाषकौ ।
पूष्णे लाजास्तु दातव्याः वितथे चन्दनम् ।
गृहक्षताय मधुदं यमाय पितृपिण्डकम् ॥
गन्धर्व्वाय गन्धमाल्ये भृङ्गे मांसं मृगस्य सुचम् ।
मृगाय माषकं दद्यात् पितृभ्यः कृसरान्नतः ॥
दौवारिके दन्तकाष्ठं पिष्टं लवणं बलिं तथा ।
सुग्रीवे पूपकं दद्यात् पुष्पदन्ताय पायसम् ॥
कुशकम्बलं वरुणे दद्यात् यदवं वारुणे ।
पिष्टं हिरण्यदं दद्यात् रोगाय सुरां तथा ॥
शोषाय च शोषाय यवो वै यावकान्नके ।
मुख्याय पक्वमांसं च भल्लाटाय मुद्गौदनम्
तत् ।
सोमाय पायसं दद्यात् सर्पेभ्यस्तु कुसुमम् ।
अदित्यै दद्यात् शोणित लड्डुकं तथा ।
दित्यै च पूरिकां दद्यात् दद्यात् आपाय घृतम् ।
सावित्राय कुशोदकमापवत्साय वै दधि ।
सवित्रे लड्डुकान् दद्यात् सवित्राय मुक्ता-
फलम् ।
अविस्तुर्गुग्गुलं च जयाय कुसुमस्वम् ।
विवस्वते तथा दद्यात् रक्तचन्दनपायसम् ।
हरिद्रान्नौदनं दद्यात्मित्राय दर्पणम् ।
इन्द्राय निवाय च वायुनाम्न ।
ब्रह्मणे पद्मं तथा मोदकं देयं ब्राह्मणाय च ।
पृथ्वीधराय मांसादि कूष्माण्डं च दापयेत् ।
मध्ये ब्रह्मणं सम्प्रार्च्य मध्ये यथाक्रमम् ।
चरकाद्यास्तदनुक्रमेण सर्व्वेभ्यः पूजयेत् च ।
इत्यादौ बलिदानेन निवेदयेत्तद्विधानम् ।
मन्त्रं ओङ्कारसहितं ब्रह्मणे निवेदयेत् ॥

एवं सम्पूजिता देवाः शान्तिं कुर्व्वन्ति ते सदा।
सुरेभ्यः कांचनं दद्याद्ब्रह्मणे गां पयस्विनीम् ॥
राक्षसीनां बलिर्देयः अपि यादृक् तथा शृणु।
मांसौदनं घृतं पद्मं केसरं हरिद्रान्वितम्।
ईशानभागमाश्रित्य चरक्यै विनिवेदयेत् ॥
दध्योदनं सरुधिरमस्थिखण्डैश्च संयुतम्।
पीतरक्तबलिं दद्यात् पूतना या तु राक्षसी ॥
वायव्यां पापराक्षस्यै मत्स्यमांससुरासवम्।
पायसं चापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात्।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्व्वतः ॥ " * ॥
ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत्।
द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्वास्तूपशमनं कृत्वा कर्म्म समारभेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ॥
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये।
इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत् ॥
दग्धोद्भवसमानेन सूत्रेण भवनादिकम्।
हस्तमेकं खनादौ च कुर्य्याद्वास्तुनिवापनम् ॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
यजेद्वायतने कुर्य्यान्न स दुःखमवाप्नुयात् ॥
न च व्याधिभयं तस्य न च बन्धुधनक्षयः।
जीवेद्वर्षशतं स्वर्गे कल्पमेकं वसेन्नरः ॥ " * ॥
हयशीर्षपञ्चरात्रे।
"एवं प्रयत्न काष्ठानि दत्त्वापूर्व्वं देशिकः।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥
ईशानाय प्रदातव्यं पायसं मधुना सह।
पर्ज्जन्याय जलं देयं पुष्पगन्धादिवासितम् ॥
जयन्ताय प्रदातव्या पताका पीतवर्णिका।
सुरेशाय च रत्नानि भास्कराय घृतं तथा ॥
धूम्रकं पीतवर्णं वा सत्ये दद्याद्वितानकम्।
दद्याद्भृशे पक्षिमांसं व्योमाय सक्तुपायसे ॥
पूष्णे लाजाः सलाजास्तु सुवर्णं वितथे तथा।
गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥
गन्धं गन्धर्व्वदेवाय भृङ्गे दद्यात्तु शाकुनम्।
मृगे तिलयवांश्चैव पितृभ्यः कृसरं तथा ॥
दौवारिके दन्तकाष्ठं सुग्रीवे पायसं तथा।
पुष्पदन्ते कुशा देया वरुणे पद्ममुत्पलम् ॥
असुरायैव देयं द्रव्यं शोषे घृतौदनम्।
यवांस्तु देयाः पापाय रोगाय घृतमण्डकम् ॥
नागाय नागपुष्पाणि भक्ष्यान् मुख्याय दापयेत्।
भिल्लोदनञ्च भल्लाटे सोमाय मधुपायसम् ॥
शमाय चापि शालूकं दिते सरकपायसम्।
चरिके पूरिका देया क्षीरं चाद्भ्यो ददेद्धविम्।
दधि क्षीरं चापवत्से अर्द्धे लड्डुकं बलिम्।
कुशोदकं सवित्रे च सावित्र्यै कुशपूर्व्वकम् ॥
विवस्वते रक्तचूर्णं रक्तचन्दनमेव च।
हरिद्रान्नं सुरेन्द्राय चान्द्रमसं जयाय च ॥
घृतपूर्णं मित्राय रुद्राय गुडपायसम्।
यक्ष्मणे चापि मांसानि प्रदद्याद्राजयक्ष्मणि ॥
पृथ्वीधराय मांसञ्च सकृन्मांसं बलिं हरेत्।
आपाय बलिमन्नैव पञ्चगव्यं तथा चरुम् ॥
ब्रह्मणे अर्घ्यं तथा दुग्धं मध्यस्थाने निवेदयेत्।
आममांसं पूर्व्वभागे सर्व्वस्कन्दे सुधोदकम् ॥
सितपद्मं घृतं मांसं विदार्य्यै चाग्निकोणके।
कृशरं वा पूपकं मांसमर्य्यम्णे दक्षिणे ॥
पिच्छञ्चैव तथा रक्तं पूतनायै नैर्ऋते तथा।
मांसस्थालं प्रदातव्यं जृम्भकायै च पश्चिमे ॥
अपिच्छलेन सहितं रक्तपिच्छेन मिश्रितम्।
प्रदेयं पापराक्षस्यै वायव्यां मांसमेव च ॥
उत्तरे पिलिपिच्छायै मांसं रक्तं बलिं हरेत्।
चरक्यै छागमांसानि ऐशान्यां दिशि दापयेत् ॥
ततो भूतगणानाञ्च राक्षसानां सुरोत्तम !॥
पिशाचानां गणानाञ्च बलिर्देयस्तु कामिकः ॥
एतान् वा पूजयेत् सर्व्वान् कुशपुष्पाक्षतैर्बुधः।
एवं संपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा।
तस्मादेतांस्तु संपूज्य गन्धपुष्पैर्मनोहरैः।
प्रासादं कारयेद्विद्वान् सद्म वा सुरसत्तम !॥"
अथ प्रासादमूलारम्भः। तत्रैव।
"वक्ष्यामि तत्र कुर्य्याद्वासुदेवस्य पूजनम्।
श्रियः संपूजनं कुर्य्यात् हृषीकेशगणस्य च ॥
पूजनन्तु ततः कुर्य्याद्वासुदेवगणस्य च।
गन्धाद्यपुष्पनैवेद्यधूपदीपैः सुरोत्तम !॥
ततः संपूजयेत्तस्मिन् सर्व्वलोकधरां महीम्।
सुरूपां प्रमदारूपां दिव्याभरणभूषिताम् ॥
ध्यात्वा समर्च्चयेद्देवीं परितुष्टां स्मिताननाम्।
ततः प्रणम्य विज्ञाप्य तन्मयत्वेन चिन्तयेत् ॥
ततः स्वनाममन्त्रेण सर्व्वदेवमयं परम्।
ध्यात्वा समर्च्चयेत्तत्र यत्नाद्वास्तुमयं नरः ॥
वक्ष्यामि ततो विद्वान् कुर्य्यादाधारसम्पतेः।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूजितम् ॥
हैमं वा राजतं वापि ताम्रमयं वा दृढं नवम्।
सर्व्वौषधीबीजयुक्तं सुवर्णरत्नतान्वितम् ॥
रत्नगर्भं सुसंपूर्णं वस्त्रपूतेन वारिणा।
प्रशस्तपल्लवोपेतं श्वेतचन्दनचर्च्चितम् ॥
पुष्पैः सुमालितं कृत्वा गन्धधूपैर्विधूपितम्।
आहतेन च शुक्लेन वस्त्रयुग्मेन वेष्टितम् ॥
वक्ष्यामि ततो मन्त्री कलशं स्थाप्य पूजयेत्।
ततश्चतुर्भुजं देवं प्रविष्टं मन्त्रविग्रहम् ॥
गन्धपुष्पैश्च नैवेद्यैः पूजयेत् सुमनोहरैः।
ततो मङ्गलवाद्ये तु प्राच्यां वा प्राङ्मुखस्थितः ॥
आचार्य्यो यज्ञसंभारान् यथावद्योजयेत् सुरान्।
शनैः कोणे रेखाभिः कोणे च चतुरश्रं ततः ॥
स्निग्धो वातघ्नो वृष्यः शुक्रस्पन्दकरः ॥
चैत्रादि मासेष्वशितो भवन्ति
बलं हि मायूरमपीह मांसम् ।
तथा हि वर्षा विशेषेषु च
सम्यग्पद्मायुःप्रविधि ।"

इति राजनिर्घण्टः ॥

एतन्मांसं बृहद्वृंहणं पित्तलं त्रिदोषहरम् । इति राजवल्लभः ॥ मयूरशिखाक्षुपः । तत्पर्यायः । तराजा २ भारती ३ शोभः ४ कोकनखकारः ५ । इत्यमरः । २ । ४ । १११ ॥ अपामार्गः । इति मेदिनी । रे, १५८ । (यथा, सुश्रुते चिकित्सितस्थाने २१ अः । "शिखरीशिखरीभागं मधुशिखिमयूरशिखावृन्दं का चीरं पिबेत् ।" असुरविशेषः । यथा, महाभारते । १ । ६७ । १६ ।

"मयूर इति विख्यातः श्रीमान् यस्तु महासुरः ।
स विष्णु इति विख्यातो बभूव पृथिवीपतिः ॥"

दक्षीणदिश्यवर्ती पर्वतविशेषः । यथा, मार्कण्डेये । ५८ । १२ ।

"कर्मभ्रमी कामचारी कृष्णो मेघधर्मिनः ।
विरजाश्च कलापाभिमयूरो दारविज्ञिका ॥"

कविविशेषः । स च मयूरभट्ट इति ख्याते परिचितः । अयं मम वाणभट्टस्य श्वशुरः कन्याकृताः इत्यमोघमधीताः कथानामा-भीरेण भाषुग्दायादेवकोपलानादरोपकोन्नटीकायामवे देवदूतकोतकदर्धिता भवेन्द्र चेत्युत्पत्ते । भवभूतिनामाश्चो बाणभट्टो मयूरस्य अलिखीतसितावीरविमुक्त-मर्थः । अत एव ।

"अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकरः ।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः ॥"

इति श्रीहर्षसभोपविष्टदिवाकरसमसंदेशादि बाणमयूरयोः कविसमर्थत्वं प्रतीयते ।

अयं हि कुष्ठरोगवान् सूर्यसमाराधनाय सूर्य-शतकं नाम कौतुकात् पठित्वा रोगात् विमुक्तः । सूर्यशतकस्यादिश्लोकः श्रीभो यथा,—

"जम्भा रातीभकुम्भो द्भवमिव दधतः सान्द्र-
सिन्दूररेणुम्

"कोऽयं कोकोऽत्र शुभे इति सत्यं कविताः
श्रीमयूरकस्य ।

बहलधवलानि मयूरस्य सूत्राणि कुरवः पाण्डौ
तिलकः ।

अमोदितं मन्दितं मनीषिभूरिवसिवत्तिलकाः स्युः
वसु

विराममद्धर्मजं पुष्पसि बधो कोकश्च के-
दारान्[?] ।")

मयूरकं, क्ली, (मयूरः मयूरपीच्छ इवास्त्यस्य, मयूर+"इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् । अस्य मयूरकचकाकिलघुपुष्प-त्वात् ।) अपामार्गः । तुत्थं इति भाषा । तत्पर्यायः । तुत्थाञ्जनं २ शिखिग्रीवं ३ वितुन्नकम् ४ । इत्यमरः । २ । ९ । १०१ ॥ (यथा, भागवते । १ ।

"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम् ।")

मयूरकः, पुं, (मयूर+इवार्थे कन् ।) अपामार्गः । इत्यमरः । २ । ४ । १०१ । (यथा, सुश्रुते उत्तरतन्त्रे । ३१ । १६ ।

"मयूरको राजवृक्षो निम्बः कोशातकी
तथा ।")

कुम्भकम् । (स्वार्थे कन् ।) मयूरः । इति त्रिकाण्डशेषः ।

मयूरशिखा । इति भरतः ।

मयूरग्रीवकं, क्ली, (मयूरस्य ग्रीवेव वर्णोऽस्य । बहुव्रीहौ कन् । स्वार्थे) तुत्थम् । इति राजनिर्घण्टः ।

मयूरघटकः, पुं, (मयूर इव घटकः ।) राजभुजङ्गः । इति भावप्रकाशः ।

मयूरचूडं, क्ली, (मयूरस्येव चूडा अस्त्यस्य इति कप् ।) शैलेयकम् । इति राजनिर्घण्टः ।

मयूरचूडा, स्त्री, (मयूरस्य चूडेव चूडा शिखा यस्याः ।) मयूरशिखा । इति वैद्यकम् ।

मयूरपत्रः, पुं, (मयूरस्य बर्हिव बर्हं यस्य ।) पोण्ड्रकः । इति राजनिर्घण्टः ।

मयूररथं, क्ली, (मयूर इव रथम् । मयूरव्याप्तस्य रथम् ।) हस्तम् । इति राज-निर्घण्टः ।

मयूरवर्णं, क्ली, (मयूरस्येव वर्णः आवृत्य) कलापः । यथा, कुमारसम्भवे ।

"कलापवेशोऽपि च भानादि तु कवलम् ।
मयूरवर्णं कामचकोरकलापी ।"

मयूरशिखा, स्त्री, (मयूरस्य शिखेव तदाकृतिपुष्पमस्त्यस्याः । इति । शिखा+इवे+कन् । शिखा स्यात् ।) वनस्पतिः । इति वैद्यकम् ।

मयूरशिखा, स्त्री, (मयूरस्य शिखेव शिखा यस्याः ।) अपामार्गप्रभेदः । तत्पर्यायः । बर्हिचूडा २ शिखिनी ३ शिखण्डः ४ शिखरी ५ शिखा ६ शिखावला ७ केकिशिखा ८ । अस्या गुणाः । हरे लघुत्वम् । आगमनम् । रक्तस्रावादिदोषहारित्वम् । बालग्रहादिक्रिमिदोषनाशित्वञ्च । इति राजनिर्घण्टः । अपि च ।

"मयूरशिखा शिखा शीता कषायापित्तश्लेष्मनुत्
मेहातिसारश्वासघ्नी विषघ्नी कण्ठरोगजित् ।"

इति भावप्रकाशः ।

मयूरिका, स्त्री, (मयूरवत् वर्णोऽस्त्यस्याः । मयूर + ठन् । टाप् ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

मयूरी, स्त्री, (मयूर + स्त्रियां ङीष् ।) मयूरस्त्री जातिः । इति व्याकरणं शिखण्डिनी च ॥ (यथा, उत्तररामचरिते । ३ । ८ ।

"भ्रमयन्नपि सितदेहकुण्डलोऽपि समीरणी ।
कम्पितीर्मयूरीव चकितोत्कण्ठिता शिवा ॥")

मरकः, पुं, (म्रियन्ते जना यस्मात् । मृ + अपादाने अप् । ततः स्वार्थे संज्ञायां वा कन् । यद्वा, मृ + भावे अप् । मरो मरणमिति शब्देन कायति शब्दायते इति । कै + कः ।) मारिः । इति हेमचन्द्रः । २ । ११८ ॥ मड़क इति भाषा । तत्पर्यायः । मारी १ मारकः २ । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । १३ । २० ।

"दुर्भावनो वर्णं व्याधिर्दुर्भिक्षो मरकस्तथा ।
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥")

तस्य कारणादि यथा,—

"यावन्मार्गान्तरशुक्रोऽपि यदि च भवेत् मध्ये यान्ति नार्यो
तावद्दुर्भिक्षपीडा भवति च मरकं संश्रयं यान्ति लोकाः ।
बाणाबाणा तपोन्यौ भयजभयकरौ क्रूरराविव भौमैः
नृपयामा भवेद्वृष्टैरपतिरचिता सूरिकाजालमाला ॥
चक्रं करोति रविजो परजोऽसतो वा
गवयंहस्तमघरेवतिमेचमित्र ।
कूर्मोपमस्थपदानि च योनिकायां
यस्येव लोकमरकं जनयीतदेशः ॥
भौमार्कोऽपि समारोप्य साधनादूर्ध्ववाच्यपाः ।
चा प्रमाणोऽपि मध्ये पुरस्य प्रविशन्ति चेत् ॥
विहरन्ति यवादौ च ग्रहाणां ता भवो भवेत् ।
चौरैव हन्ते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रवर्त्तन्ते तस्य देशस्य विप्लवः ॥"

इति ज्योतिषतत्त्वम् ॥

अपि च ।

"आर्द्रैश्वविभवे गौरिकास्वे च मुहानि ।
दुर्भिक्षकुष्णाभ्रे बारिदे चापि निर्दिशेत् मरकम् ॥"

इति मङ्गलप्रकरणे शिवादितत्त्वम् ॥

अन्यदपि ।

"इन्द्राविन्दौ मघादङ्गा मन्दहारे गुरावृषे ।
योगया गुरुशुक्राभ्यां रोगया वृषराववे ॥
मघे च अकरा देवो वृषभाद्दुष्टरूक्षे ।
योगायां मरकाद्यैः स्यात् रोगायां मरकं भवेत् ॥"

इति यवनाचार्यप्रणीतकर्णे ज्योतिषम् ॥ * ॥

अस्य शान्तिः । दैवीमाहात्म्यपाठः । रुद्रजपः । दुर्गापूजा । यथा,

"उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥"

इति मार्कण्डेयपुराणम् ॥

"मारीभये राजभये तथा चौराग्निजे भये ।
औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने ।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः ॥"

इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पः ॥

"अश्वमेधैः शान्तिकैश्च किं क्रियन्ति नरा द्विज ।
महाशान्तिकरः श्रीमान् तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् सर्वान् दुर्निमित्तान्यशेषतः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"

अथ ब्रह्मपुराणीयो मन्त्रः ।

"ॐ नमस्ते चतुर्भुजाय विष्णवे परमात्मने स्वाहेति ।"

इति ज्योतिषतत्त्वम् ॥

(जातिविशेषः । यथा, मार्कण्डेये । ५८ । ५१ ।

"शाल्वीदा मरकाश्चैव कुरटाश्चाप्रदारकाः ।
एकपादाः खशा घोषाः स्वर्गभौमानवद्यकाः ॥")

मरकतं, क्ली, (मरकं मारिभयं तरत्यनेन । तॄ । डः । यद्वा, मरकं मरणं तनोतीति । शोभाचरणमनाशय तस्मिन् रत्ने प्रवर्त्तते इति मरकतमिति कारकोति शब्दाः । इत्यमरटीकायां भरतः ।) हरिद्वर्णमणिविशेषः । पान्ना इति भाषा । तस्य देवता बुधः । इति ज्योतिषम् ॥ तत्पर्यायः । गारुत्मतम् २ अश्मगर्भम् ३ हरिन्मणिः ४ । इत्यमरः । २ । ९ । ९२ ॥ मरतम् ५ राजनीलम् ६ गरुडाङ्कितम् ७ । इति शब्दरत्नावली ॥ रौहिणेयम् ८ सौपर्णम् ९ गरुडोद्गीर्णम् १० बुधरत्नम् ११ अश्मगर्भजम् १२ गरलारिः १३ वापवोलम् १४ गारुडम् १५ । कुत्रचित् पुस्तके गरुडोद्गीर्णस्थाने गरुडोत्तीर्णं वापवोलस्थाने वाप्यवाले इति च पाठः ॥ अस्य गुणाः । विषघ्नत्वम् । शीतलत्वम् । ईषन्मधुरत्वम् । आमपित्तहरत्वम् । रुच्यत्वम् । पुष्टिदत्वम् । भूतनाशकत्वञ्च ॥ * ॥ अस्य लक्षणम् ।

"अच्छञ्च गुरु वर्णाढ्यं स्निग्धं मार्दवसंयुतम् ।
अव्यङ्गं बहुरङ्गं शृङ्गारी मरकतं शुभं विदुः ॥"

तस्य कुलक्षणम् ।

"शर्करिलं विकटं कर्कशं मलिनं मधुरोचकान्ति कृष्णाभम् ।
लाघवयुतं विरूपाङ्गं मरकतममरोऽपि नोपभुञ्जीत ॥" * ॥

तस्य परीक्षा ।

"मध्ये वाथ हिरण्यकारकवरैरच्छापैच वायुवेरेः
अच्छोदैच च शालकोरकुरा दैरोक्तमेव च ।
छायाभिः समतां दधाति यदिदं निर्दिष्टमरामर्षं
सार्धं यत्नवतापिमन्मथरितो नावक्तं रत्नवित् ॥"

इति राजनिर्घण्टः ॥ * ॥

ग्रन्थान्तरे तस्य परीक्षादि यथा,—

सूत उवाच ।

"दानवाधिपतेः पित्तमादाय भुजगाधिपः ।
द्विधा कुर्वन्निव व्योम सत्वरं वासुकिर्ययौ ॥
स तदा स्वशिरोरत्नप्रभासोभिते नभोऽम्बुधौ ।
राजतः स महानेकः सकलेन्दुरिवाबभौ ॥
ततः पक्षनिपातेन संहरन्निव रोदसी ।
गरुत्मान् पन्नगेन्द्रस्य प्रहर्त्तुमुपचक्रमे ॥
सहसैव मुमोच तत् फणीन्द्रः
सुरसाद्युत्तुरष्कपादपानाम् ।
नलिकावनगन्धवासितायां
वरमाणिक्यगिरेरुपत्यकायाम् ॥
तस्य प्रपातसमनन्तरकालमेव
तद्वद्वरालयमतीत्य रमासमीपे ।
स्थानं क्षितेरपयोनिधितीरलेखं
तत्प्रभृत्याकरतताकरतां जगाम ॥
तत्रैव किञ्चित् पततस्तु पित्ता-
दुपात्तमप्याशु ततो गरुत्मान् ।
मूर्च्छापरीतः सहसैव घोणा-
रन्ध्रद्वयेन प्रमुमोच भूमौ ॥
तत्राकठोरशुककण्ठशिरीषपुष्प-
खद्योतपृष्ठचरशाद्वलशैवलानाम् ।
कल्हारशस्त्रकशुकभुजाश्च पत्र-
प्रान्तश्रियो मरकताः शुभदा भवन्ति ॥
यदुग्र भोगीन्द्रभुजा विमुक्तं
पपात पित्तं दितिजाधिपस्य ।
तस्याकरस्यातितरां स देशो
दुःखोपलभ्यश्च गुणैश्च युक्तः ॥
तस्मिन्नाकरतस्थाने यत्किञ्चिदुपजायते ।
तत्सर्वं विषरोगाणां प्रशमाय प्रकीर्तितम् ॥
सर्वमन्त्रौषधिगणैर्यन्न शक्यं चिकित्सितुम् ।
महाहिदंष्ट्राप्रभवं विषं तत्तेन शाम्यति ॥
अन्यमप्याकरे तत्र यद्दोषैरपवर्जितम् ।
जायते तत् पवित्राणामुत्तमं परिकीर्तितम् ॥
अत्यन्तहरितवर्णं कोमलमर्चिर्भिरिद्धजटिलञ्च ।
काञ्चनचूर्णस्यान्तःपूर्णमिव लक्ष्यते यच्च ॥
युक्तं संस्थानगुणैः समरागं गौरवेण विमलम् ।
सवितुः करसंस्पर्शाच्छुरयति समन्तं दीप्त्या ॥
हित्वा च हरितभावं यस्यान्तर्निर्हिता
प्रभा भाति ।
अचिरप्रभाप्रभावतदिन्द्रधनुःसन्निभा भाति ॥
तत्र मरकतः प्रकारं विरचाभि निर्दिष्टमपि-
मालम् ॥
तन्मरकतं महागुणमिति रत्नविशेषविदः ॥
यत्तु मालत्र्यंश्यत्क्षस्तु रत्नकतो महाघ्रैः ।
रत्नहेमान्तकारैस्तु महामरकतं हि तत् ।
चतुर्थी जातिभिस्तु महामरकते स्थितौ ।
सार्धमीष निधि सहस्राणां कर्षे ॥" * ॥

[illegible]

मरणतरणी, स्त्री, (मरणमिव घर्म्म यस्याः । ङीष् ।) [illegible] वापी । इति राजनिर्घण्टः ।

मरणं, क्ली, [illegible] मरणधर्म्मिः । इति [illegible]

मरणं, स्त्री, [illegible] मृ + करणे ल्युट् ।) [illegible] इति राजनिर्घण्टः । [illegible]

[illegible]

तेन साद्धं प्रयात्येवं सन्तुष्टो हृष्टमानसः ।
स्वर्गद्वारमासाद्य धर्मात्मा तत्र हि गच्छति ।
शिबिका तस्य चायाति सुयानं सुमनोहरम् ॥
विमानैरेव यात्येव वायोर्वेगेन चोत्तमः ।
छत्रेण ध्रियमाणेन चामरव्यजनैस्तथा ।
वीज्यमानः स धर्मात्मा पुण्यैरेव समन्ततः ॥
गीयमानस्तु धर्मात्मा स्तूयमानस्तु पण्डितैः ।
वन्दिभिश्चामरैर्दिव्यैर्ब्राह्मणैर्वेदपारगैः ॥
साधुभिः स्तूयमानस्तु सर्वसौख्यसमन्वितः ।
यथादानप्रभावेण फलमाप्नोति तत्र सः ॥
आरामवाटिकामध्ये स प्रयाति सुखेन वै ।
अप्सरोभिः समाकीर्णो दिव्याभिर्मङ्गलैर्युतः ॥
देवैस्तु स्तूयमानस्तु धर्मराजं प्रपश्यति ।
देवाश्च धर्मसंयुक्ता अम्नुः सान्त्वमेव ते ॥
एह्येहि त्वं महाभाग ! भुङ्क्ष्व भोगाननो-
रमान् ।
एवं संपश्यते धर्मं सौम्यरूपं महामतिः ॥
तस्य पुण्यस्य भावेन भुङ्क्ते स्वर्गमनुत्तमम् ।
भोगक्षयात् स धर्मात्मा पुनर्मर्त्त्यं प्रयाति च ॥
विप्रधर्मप्रसादात् स कुलं पुण्यं प्रयाति च ।
साधकस्य सुपुण्यस्य ज्ञानिनस्य तथैव च ॥
धनाढ्यस्य सुपुण्यस्य वैश्यस्य च महामते ! ।
धर्म्मेण मोदते भद्र पुनः पुण्यं करोति सः ॥”
इति श्रीपद्मपुराणे भूमिखण्डे सुमनोपाख्याने
१५ अध्यायः ॥ * ॥
अथ पापिनां मरणलक्षणम् ।

सोमशर्म्मोवाच ।

“पापिनो मरणं भद्रे ! कीदृशेनैव चेष्टितम् ।
तन्मे त्वं विस्तराद्ब्रूहि यदि जानासि भामिनि ! ॥

सुमनोवाच ।

श्रूयतामभिधास्यामि तत्कान्त निश्चितं श्रुतं मया ।
पापिनो मरणं कान्त ! यादृशं चिह्नमेव च ॥
महापातकिनश्चैव यान्त्येते यद्दारुणम् ।
निश्छायैरपि वृक्षैर्भूमिं पापसमन्विताम् ॥
स तां प्राप्य सुदुष्टात्मा प्राणान् दुःखेन मुञ्चति ।
चाण्डालभूमिं संप्राप्य मरणं याति दुःखितः ॥
गर्दभारोहितो भूमिं वैश्यागारं समाश्रितः ।
मद्यपानपरं मत्वा वेश्यागृहमच्छति ।
चाण्डालसंगतैः पूर्वमाश्रितः पापकिल्विषैः ॥
तामसाच्च स दुष्टात्मा मृत्युं प्राप्नोति निश्चितम् ।
अन्यो पापसमाचारो प्राप्य मृत्युं स गच्छति ॥
अथ चैवं प्रवक्ष्यामि भूतानां प्रिय ! निश्चि-
ताम् ॥
भैरवान् राक्षसान् घोरान्निशाचांश्च घोररान् ।
पिशाचान् प्रेतभूतांश्च अतिचेतान्महो-
दरान् ।
अङ्कुशांश्च करालांश्च कृष्णमांसवपोपमान् ।
दीर्घदंष्ट्राकरालांश्च विशालान् भयंकरान् ॥
स तान् दृष्ट्वा प्रकम्पेत विरौति च मुहुर्मुहुः ।
विचार्यवदनो घोरान्करालान्करामति ! ॥
सुवर्णं दृष्टाः धर्मे कर्मणे तु तस्य हि ।
मृते मायावशास्ते वक्त्रे महाभयोदरे ॥

समाश्रय भयस्थेते चादेति वदतो मुहुः ।
म्रियमाणस्य या पीडा तामेवं प्रवदाम्यहम् ॥
परद्रव्यापहरणं परभार्याविकर्षणम् ।
अर्थं परस्य सर्वस्वं गृहीतं यैस्तु पापिभिः ॥
पुनर्णेव प्रदत्तं हि लोभाज्ञानविमोहितैः ।
अन्यदेव महापापं कृतमत्यन्तमेव च ॥
कण्ठमायान्ति ते सर्वे म्रियमाणस्य तस्य च ।
यानि कानि च पापानि पूर्वमेव कृतानि च ॥
आयान्ति कण्ठमूलं हि महापापस्य नान्यथा ।
दुःसहत्वाद्यमर्द्दैते कथकथ्येन दारुणम् ॥
पीडाभिर्दारुणाभिश्च कण्ठो घुरघुरायते ।
रोदते कम्पतेऽत्यर्थं मातरं पितरं पुनः ।
स्मरति भ्रातरं तत्र भार्य्यां पुत्रं पुनः पुनः ॥
पुनर्विस्मरणं याति महापापेन मोहितः ।
तस्य प्राणा न गच्छन्ति बहुपीडासमाकुलाः ॥
पतते कम्पते चैव मूर्च्छति च पुनः पुनः ।
एवं पीडासमायुक्तो दुःखं भुङ्क्तेऽतिमोहितः ॥
तस्य प्राणा सुदुःखेन महाकष्टैः प्रचालिताः ।
अपानं मार्गमाश्रित्य प्रस्रुतान्ताः प्रयान्ति ते ॥
एवंशाया दुरात्मानो लोभमोहसमन्विताः ।
सीदन्ति च महाभूतैस्तैर्वा दुःखं मरान्तकम् ॥”
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापिमरणं
नाम १६ अध्यायः ॥ * ॥
पापिनां यमालयगमनमार्गपीडाविवरणं
यथा,—

सुमनोवाच ।

“अन्धकारपथे मार्गे हन्यमानो हि नीयते ।
रुदमानः स दुष्टात्मा पीड्यमानः पुनः पुनः ॥
यमातपो महातीव्रो द्वादशादित्यतापितः ।
नीयते तेन मार्गेण यमदूतैर्दुरात्मभिः ॥
घर्मतैश्चैव दुर्गेषु छायाहीनैस्तु दुर्मतिः ।
नीयते तेन मार्गेण क्षुधातृष्णादिपीडितः ॥
स दूतैस्ताड्यमानस्तु यदा दण्डैः परश्वधैः ।
कशाभिस्ताड्यमानस्तु भिद्यमानस्तु कुन्तकैः ॥
ततः शीतमये मार्गे वायुना धावते पुनः ।
तेन शीतेन दुःखी स भूत्वा याति च संभ्रमः ॥
ताड्यमानो दूतैस्तु नानादुःखेन नीयते ।
एवं पापी स दुष्टात्मा देवब्राह्मणनिन्दकः ॥
सर्वपापसमायुक्तो नीयते यमकिङ्करैः ।
यमं पश्यति दुष्टात्मा कज्जलाञ्जनसन्निभम् ।
महिषं दारुणं भीमं यमदूतैः समावृतम् ।
सर्वव्याधिसमाकीर्णं चित्रगुप्तसमन्वितम् ॥
आरुह्य महिषं देवं धर्मराजं द्विजोत्तम ! ।
दंष्ट्राकरालमत्युग्रं कृष्णाक्षं कालसन्निभम् ॥
घोरवर्णं महावक्त्रं रक्तमश्रुविलोचनम् ।
रक्तमाल्यानुलिप्तं महावलं भयङ्करम् ॥
एवंविधं महाकायं यमं पश्यति दुर्मतिः ।
तं दृष्ट्वा कम्पयुक्तं सर्वकर्मैर्विवर्जितम् ॥
यमः पश्यति तं दुष्टं पापिनं धर्मवर्जितम् ।
ताडयेत्तु महादुःखैः पीडाभिर्बहुभिः प्रिये ॥
तावद्दुःखसहस्राणि तावत् कालं प्रपच्यते ।
नानापापप्रदेशेषु पचते च पुनः पुनः ॥

नरकञ्च प्रयात्येवं कृमिकोटिषु पापकृत् ।
अस्थिष्वपि पच्यते नित्यं ज्वालामुखो निपीडितः ॥
मरणश्चैव पापात्मा एवं याति सुनिश्चितम् ।
एवं पापस्य सम्भोगं भुङ्क्ते चैव सुदुर्मतिः ॥
पुनर्जन्म प्रवक्ष्यामि यासु योनिषु जातिषु ।
म्लेच्छयोनिं समुत्प्राप्य भुङ्क्ते पातकं पुनः ॥
व्याधो भवति दुष्टात्मा रासभं याति वै पुनः ।
मार्ज्जारशूकरी योनिं सर्पयोनिस्तथैव च ॥
नानाभेदासु सर्वासु तिर्यक्षु च पुनः पुनः ।
पापयोनिषु संयाति अन्यासु गर्हितासु च ।
चाण्डालभिल्लजातिश्च पुलिन्दी याति पाप-
कृत् ॥
एतत्ते सर्वमाख्यातं पापिनो जन्म चैव हि ।
पापपुण्यसमाचारलक्षणं कथितं मया ॥”
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पाप-
पुण्यविवेको नाम १७ अध्यायः ॥ * ॥
प्राणयामाभिलाषार्थं मरणवचनम् । यथा,—

राजान ऊचुः ।

“पुरा नारायणस्यास्य कर्णैः समुद्गतौ ।
यथं कृपा इमे लोका अनयो मांसजाश्च ये ॥
प्रेत्य भक्तिमितां या वा दर्शी विविधमानवाः ।
पृच्छामस्त्वामिमं भक्त्या स कथा परमात्मनः ॥
कस्य वा विदिता राजन् ! किं वा नैवमितौ
तव ।
श्रोतुमिच्छामहे राजन् ! विश्वाम्बरपारणीम् ।
कथां भागवतीं सद्यः संसाराग्निनाशिनीम् ॥

ऋषिश्च उवाच ।

योधौ घोरतरो युद्धं अद्भुतामोघविक्रमाः ।
कृतं यच्चक्रभृद्धारि सुदृढं सहस्रशः ॥
पुरा प्रमथशान्तौ यौ तावेव पुण्यमावृतौ ।
मधोश्च मे विचारस्ते शतवीर्यौ महाबली ॥
चकार कामं सर्वेषां मनोपवर्गमुखे ।
जाताश्च पृथिवीः प्राणिनो हरितवत्सलौ ॥
एकदा कुम्भकः क्रूरो कुम्भेन निद्रितौ ।
मातरौ सौम्य यत्र पुरं यत्रं तमात्मजं मम ॥
तं सौम्य जातविन्यासौ सुवर्णा परिपीडितौ ।
कोऽपि तौ पतितौ तत्र शोषितौ क्षितिमण्डले ॥
महावनौ सौम्य किंवा पर्वताश्च सुमेरुः ।
अपाराश्च सौम्य सर्वा चतुर्पादातपीडिताः ॥
चापौ महोग्रा अचलाः हिमाचलौ बलिया-
स्मिन् ।
मधिमध्ये पूर्वाणामात्र सुमेरुः विधिनाशनः ॥
चक्राहिनिद्राचक्राणामाद्धि तावुभौ ।
कोऽपि सर्वविश्वासेन वदो पुनः चतुर्मुखो ॥
प्रापो वैकुण्ठविनयं सर्वदीक्षमन्वयम् ।
ततः क्रिया दृष्टदर्शं अद्भुतो कोपमानयौ ॥
अन्योऽपि सर्वतः कुमारास्तुरयं वै ।
देवोऽपि भावनया दुश्चदुःखम् ।
ततो मुनिं हरातात् सस्तरर्दं करे ।
परिदृश्य सोऽपि ब्रह्मादिनिद्राकश्च ।
कारिणमर्थं अथवाः किं तदा. चक्र-
ममम् ।

[illegible]

इति भावप्रकाशः ।

[illegible]

मरीचिः, पुं, स्त्री, [illegible]

[illegible]

मरीचिका, स्त्री, [illegible]

[illegible]

मरुबकः । इति भावप्रकाशः ॥ (निमि-वंशीयहर्य्यश्वपुत्रः । यथा, श्रीमद्भागवते । ९ । १३ । १५ ।
"तस्माद्बृहद्रथस्तस्य महावीर्य्यः सुधृत्पिता ।
सुधृतेर्धृष्टकेतुर्वै हर्य्यश्वोऽथ मरुस्ततः ॥")
सूर्य्यवंशीयभाविराजविशेषः । तस्य विवरणं यथा,—
"रामात् कुशोऽभूदतिथिस्ततोऽभून्निषधात्मजः ।
नभादभूत् पुण्डरीकः क्षेमधन्वाभवत्ततः ॥
देवानीकस्ततो हीनः पारिपात्रोऽथ हौनजः ।
बलाहकस्ततोऽर्कश्च रजनाभस्ततोऽभवत् ॥
खगणाद्विधृतस्तस्माद्धिरण्यो नाभगस्ततः ।
ततः पुष्यो ध्रुवस्तस्मात् सुदर्शनोऽग्निवर्णकः ॥
तस्मात् शीघ्रोऽभवत् पुत्रः पिता मेऽतुलविक्रमः ।
तस्मात् मरुं मां कलौ च बुधयामि सुमित्रकम् ॥
कलापग्राममासाद्य विद्धि सन्तपसि स्थितम् ।
तवावतारं विज्ञाय व्यासात् सत्यवतीसुतात् ॥
प्रतीक्ष्य कालं तत्पार्श्वं कालप्राप्तस्त्वदन्तिकम् ।
कल्किरुवाच ।
मरो ! त्वामभिषेक्ष्यामि निजायोध्यापुरेऽधुना ।
हत्वा म्लेच्छानधर्म्मिष्ठान् प्रजाभूतविहिंसकान् ॥
विशाखयूपभूपालतनयां विनयान्विताम् ।
विवाहे दिव्यवरामाङ्गीं सुन्दरीं त्वां प्रदास्यति ॥"
इति कल्किपुराणे १८ अध्यायः ॥
(वसुनामन्यतमः । यथा, हरिवंशे ।१६६।४० ।
"साध्वानुमता देवी जनयामास वै सुतान् ।
मरुं वै प्रथमं देवं द्वितीयं ध्रुवमव्ययम् ॥")

मरुजः, पुं, (मरौ निर्ज्जलदेशे जायते इति । जन्+डः ।) नखीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ (वंशाङ्कुरे, क्ली । तत्पर्य्यायो यथा,
"करीरं मरुजं यवम् ——— ।"
इति वैद्यकरत्नमालायाम् ॥)

मरुदेशवासी, त्रि ॥

मरुजा, स्त्री, (मरुज+स्त्रियां टाप् ।) [illegible]-मीरः । इति राजनिर्घण्टः ॥

मरुटा, स्त्री, उच्चललाटयुक्तस्त्री । इति शब्दरत्नावली ॥

मरुण्डा, स्त्री, उच्चललाटा नारी । इति त्रिकाण्डशेषः ॥

मरुत्, पुं, (म्रियन्ते प्राणिनो यदभावादिति । मृ + बाहुलकात् उत् ।) वायुः । (यथा, अभिज्ञानशकुन्तले ।
"तदेषा सुखमरुतैव विमर्द्दं करवाणि ॥")
देवः । इति अमरहेमचन्द्रौ । मरुवकविशेषः । इति शब्दचन्द्रिका ॥

मरुत्, पुं, (म्रियते प्राणी यस्याभावादिति । मृ + "मृग्रोरुतिः ।" उणा० १ । ९४ । इति उतिः ।) वायुः । इत्यमरः । १ । १ । ६१ ॥ (यथा, मेघदूते । १ । ४४ ।
"भवनाभ्यसा मया भवान्
मदराखाति गुणारबायकान् ॥")

मरुवकः । इति भावप्रकाशः ॥ (अस्य गुणा यथा,—
"मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः ।
वृश्चिकादिविषश्लेष्मवातकुष्ठक्रिमिप्रणुत् ॥
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
देवः । (यथा, रघुः । १२ । १०१ ।
"मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनः सन्धानशङ्किनाम् ॥")
साध्यविशेषः । यथा, हरिवंशे । १६६ । ४५ ।
"धर्म्माल्लब्धोद्भवः कामः साध्या साध्यान् व्यजायत ।
प्रभवं च्यवनञ्चैवमीशानं सुरभीं तथा ।
आरण्यं मरुतश्चैव विश्वावसुबलध्रुवौ ॥")
आत्मवत्सलदेवताविशेषः । यथा,—
"भ्रातुर्ज्येष्ठस्य प्रायणं भ्राता योऽनुतिष्ठति धर्म्मवित् ।
स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ॥"
इति श्रीभागवते ६ स्कन्धे ५ अध्यायः ॥
"प्रायणं प्रकृष्टं गमनम् । पुण्यमेव बन्धुर्यस्य मरुद्भिरात्मवत्सलैर्देवैः ।" इति तट्टीकायां श्रीधरस्वामी ॥ (हिरण्यम् । इति निघण्टुः । १ । २ ॥ ऋत्विक् । इति तत्रैव । ३ । १८ ॥) ग्रन्थिपर्णी, स्त्री । इति मेदिनी । ते, १४ ॥ पृक्कायां, स्त्री । इति शब्दरत्नावली ॥

मरुत्करः, पुं, (करोतीति । कृ+अच् । मरुतोऽपानवायोः करः ।) राजमाषः । इति शब्दचन्द्रिका ॥ (मरुत्कारिणि, त्रि । यथा,—
"कषायमधुराः शीताः कटुपाका मरुत्कराः ।
बद्धमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

मरुत्क्रिया, स्त्री, (मरुतः क्रिया ।) अपानोत्सर्गः । वातकर्म्म इति ख्यातः । इति केचित् ॥

मरुत्तः, पुं, (मरुदस्त्यस्येति । मरुत्+"तप् पर्व्वमरुद्भ्याम् ।" ५ । २ । १२२ । इत्यत्र काशिकोक्त्या तप् ।) चन्द्रवंशीयराजविशेषः । स च अवीक्षिद्राजपुत्रः । यथा—
क्रौष्टुकिरुवाच ।
"अवीक्षितस्य पुत्रोऽभूत् मरुत्तस्य महात्मनः ।
श्रोतुमिच्छामि चरितं ब्रूहि मेऽतिचेष्टितम् ॥
चक्रवर्त्ती महाभागः शूरः कान्तो महामतिः ।
धर्म्मविद्धर्म्मकृच्चैव सम्यक् पालयिता भुवः ॥
मार्कण्डेय उवाच ।
स पितुः समनुज्ञातो राज्यं प्राप्य पितामहात् ।
धर्म्मतः पालयामास प्रजाः पुत्रानिवौरसान् ॥
इयाज सुमहायज्ञान् यथावदाप्तदक्षिणान् ।
ऋत्विक्पुरोहितादेशादविशङ्को महीपतिः ॥
तस्याप्रतिहतं चक्रमासीद्द्वीपेषु सप्तसु ।
गगनेऽप्यविहता च गतिः पातालवारिषु ॥"
इति मार्कण्डेयपुराणे १०१ अध्यायः ॥
(तुर्वसुवंशीयः करन्धमपुत्रः । यथा, भागवते । ९ । २३ । १७ ।
"त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः ।
मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥"
शिनेयुराजपुत्रः । यथा, महाभारते । हरिवंशपर्व्वणि । ३१ । ७ ।
"शिनेयुरभवत् पुत्र उशनः प्रभुतावनः ।
मरुत्तस्तस्य तनयो राजर्षिरभवन्नृप ! ॥")

मरुत्तकः, पुं, (मरुदिव तरति द्रवतीति । तक गतौ + अच् ।) मरुवकः । इति भावप्रकाशः ॥

मरुत्पथः, पुं, (मरुतां पन्थाः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इत्यः ।) आकाशम् । इति हेमचन्द्रः ॥

मरुत्पालः, पुं, (मरुतो देवान् पालयतीति । पालि + अच् । देवराजत्वादस्य तथात्वम् ।) इन्द्रः । इति केचित् ॥

मरुत्पुत्रः, पुं, (मरुतो वायोः पुत्रः ।) भीमसेनः । इति हेमचन्द्रः । ७०७ ॥ (अस्य मरुत्पुत्रत्वविवरणम् । यथा । पुरा किल पाण्डुर्नाम महीपतिर्म्मृगयार्थं वनं गत्वा मायामृगरूपधारिणं ऋषिं रममाणं कामभोगिनं जघान । ततस्तेनाभिशप्तो विषयभोगे रतुमसौ न शक्तः । अथ अन्यदा कदाचित् कुन्ती पुत्रकामस्य भर्त्तुः पाण्डुराजस्यादेशात् इन्द्रादीन् देवानाहूय तेभ्यस्तनयान् लेभे । तेषां मरुतो भीमसेनो जात इति पौराणिकी वार्त्तानुसन्धेया । अस्य विवरणन्तु महाभारते ।१।११८—१२३ । अध्यायेषु द्रष्टव्यम् ॥) हनूमांश्च ॥

मरुत्प्लवः, पुं, (मरुदिव प्लवते द्रुतं गच्छतीति । प्लु+अच् ।) सिंहः । इति त्रिकाण्डशेषः ॥

मरुत्फलं, क्ली, (मरुतां वायूनां फलमिव ।) घनोपलः । इति शब्दमाला ॥

मरुत्वान्, [त्] पुं, (मरुतो देवाः पालनीयत्वेन सन्त्यस्य इति । मरुत्+"मध्वादिभ्यश्च ।" ४ । २ । ८६ । इति मतुप् मस्य वः । संज्ञायां वकारे परे न तस्य दः ।) इन्द्रः । इत्यमरः । १ । १ । ४४ ॥ (यथा, रघौ । ३ । ४ ।
"दिवं मरुत्वानिव भोक्ष्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः ॥"
धर्म्मपुत्रदेवगणविशेषः । यथा, महाभारते । १२ । २०७ । २३ ।
"धर्म्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः ।
विश्वेदेवाश्च साध्याश्च मरुत्वन्तश्च भारत ॥"
मरुत्प्रकर्षेणास्त्यस्येति । मतुप् । मस्य वः ।) हनूमान् । इति शब्दरत्नावली ॥ (वायुविशिष्टे, त्रि । कर्म्मोदाहरणं यथा, ऋ । १० । ३८ ।
"कमौ मरुत्वान् विजनः कहौ
कमौ मरुत्वान् विजनः कहुः ।
कमौ मरुत्वान् विजनः कहरौ
कमौ मरुत्वान् विजनः कहुरः ॥"
क्ली, इन्द्रस्य हविर्विशेषः । यथा, ऋग्वेदे । ६ । ६ । ३ ।

[illegible]

"मर्कटी लूता ।" इति टीका ।) स्थावरविषभेदः । इति हेमचन्द्रः । मयोगाख्यपक्षी । इति त्रिकाण्डशेषः । शाङ्गिल् इति भाषा ।

मर्कटकः, पुं, (मर्कट + स्वार्थे संज्ञायां वा कन् ।) वानरः । लूता । धान्यभेदः । इति मेदिनी । के, ३०८ । (यथा, विष्णुपुराणे । २ । ६ । २५ ।
"ग्रामाकाश्च नीवारा वर्त्तिकाः सगवेधुकाः ।
तथा वेणुयवाः प्रोक्तास्तद्वत् मर्कटका मुने ॥")
मत्स्यभेदः । दैत्यः । इति शब्दरत्नावली ।

मर्कटतिन्दुकः, पुं, (मर्कटप्रियस्तिन्दुकः । मध्यपदलोपी कर्म्मधारयः ।) कुपीलुः । इति भावप्रकाशः ।

मर्कटपिप्पली, स्त्री, (मर्कटस्य पिप्पलीव ।) अपामार्गः । इति राजनिर्घण्टः । (विवरणमस्य अपामार्गशब्दे ज्ञातव्यम् ।)

मर्कटप्रियः, पुं, (मर्कटस्य प्रियः ।) क्षीरवृक्षः । इति शब्दमाला ।

मर्कटवासः, पुं, (मर्कटः ऊर्णनाभस्तस्य वासः आवासस्थानम् ।) लूतातन्तुः । माकड़सारजाल इति भाषा । तत्पर्य्यायः । जालाबन्धः २ । इति शब्दरत्नावली ।

मर्कटशीर्षं, क्ली, (मर्कटस्य शीर्षमिव तद्वर्णसादृश्यात् तथात्वम् ।) हिङ्गुलम् । इति रत्नमाला । (यथा, वैद्यकरत्नमालायाम् ।
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥")

मर्कटास्यं, क्ली, (मर्कटस्य आस्यमिव तद्वर्णसादृश्यात् तथात्वम् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ ॥ (मर्कटस्यास्यम् ।) वानरमुखम् । (मर्कटस्यास्यमिवास्यं यस्य ।) वानरमुखे, त्रि ॥

मर्कटी, स्त्री, (मर्कति वायुवेगेन इतस्ततो गच्छतीति । मर्क + अटन् । स्त्रियां ङीप् ।) कपिकच्छुः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कपिकच्छुरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजरा कण्डुरा चण्डा दुःस्पर्शा प्रावृषायणी ।
लाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ॥")
अपामार्गः । (यथा,—
"अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अजमोदा । इति राजनिर्घण्टः । (यथा, सुश्रुते उत्तरतन्त्रे । ३१ । ५ ।
"कुक्कुटी मर्कटी शिम्बीमनन्ताञ्चापि धारयेत् ।
मांसमार्षं तथा वर्षं शोणितञ्च चतुष्पथे ॥")
करञ्जभेदः । इत्यमरः । २ । ४ । ४० । माकड़ाकरञ्ज इति भाषा । (अस्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"करञ्जोऽन्यश्चिरबिल्वः षड्ग्रन्था हस्तिवारुणी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ॥"
मर्कट + ङीप् ।) वानरी च ।

मर्कटेन्दुः, पुं, (मर्कटे तन्नामविशेषे इन्दुरिव ।) काकतिन्दुकवृक्षः । यथा,—
"काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके ।
मर्कटेन्दुः विषतुन्दो द्वाविंशौ तत्र कीर्त्तितौ ॥"
इति शब्दचन्द्रिका ।

मर्करः, स्त्री, (मर्कति गच्छतीति । मर्क + बाहुलकात् अरः ।) भृङ्गराजः । इति शब्दरत्नावली । (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ।)

मर्करा, स्त्री, (मर्कर + स्त्रियां टाप् ।) दरी । भाण्डम् । सुरङ्गा । निष्फला स्त्री । इति विश्वः ।

मर्च, क शब्दे । चौरोऽयं धातुः । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) तालव्यवर्गप्रथमान्तः । मर्चः । इति दुर्गादासः ।

मर्च्चूः, स्त्री, (मृज्यते इति । मृज् शुद्धौ + "मृजेर्गुणश्च ।" उणा० १ । ८१ । इति ऊः । गुणश्च ।) शुद्धिः । इति मेदिनी । जे, १२ ।

मर्ज्जूः, पुं, (मार्ष्टि शोधयति वसनमिति । मृज् + ऊः ।) रजकः । इति हेमचन्द्रः । पीठमर्द्दः । इति शब्दरत्नावली ।

मर्त्तः, पुं, (म्रियतेऽसौ इति । मृ + "हसिमृग्रिणि-" इति ।"उणा० ३ । ८६ । इति तन् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (यथा, मार्कण्डेये । १०० । १८ ।
"पौर्णमास्याममावस्यां पर्व्वस्वन्येषु प्रस्तवः ।
मासैव संयुक्तो मर्त्तैर्भविता पापनाशनः ॥")
भूलोकः । इति संक्षिप्तसारोणादिवृत्तिः । (म्रियतेऽत्रेति । भूलोकः । ऋग्वेदः । ६ । ८६ ।)

मर्त्त्यः, पुं, (म्रियतेऽत्रेति । मर्त्तो भूलोकस्तत्र भवः । मर्त्त + यत् । यद्वा, मर्त्त एव यदित्यमरटीकायां भरतः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । २६ ।
"पृथ्वी च यथा मर्त्त्यानां रक्षिका तथा ।")
भूलोकः । इति जटाधरः । (क्ली, शरीरम् । यथा, भागवते । ३ । ३१ । ३९ ।
"तस्मात्तद्वीनविधुतमार्ज्ज मर्त्त्यमभूत् यदि ।")

मर्द्दनं, क्ली, (मृद् + भावे ल्युट् ।) अङ्गमर्द्दनम् । मालिषा इति भाषा । तत्पर्य्यायः । संवाहनम् २ । इत्यमरः । ३।२।२२ । मर्दनम् ३ । इति शब्दरत्नावली । (यथा, "सन्तु पूर्व्वशिरःकृतसंवाहिताभ्यङ्गसंदधदेशपरिषेकोत्सादनादेरारम्भादि प्रमार्ष्टि तद्भिः परिमार्ज्जनम् ।" इति चरके सूत्रस्थाने ११ अध्यायः ।) अस्य गुणाः । श्रमहरत्वम् । निद्राप्रसुप्तहरत्वम् । शौचरक्तमलप्रसादकारित्वम् । वायुकफघ्नत्वञ्च । इति राजवल्लभः । चूर्णनम् । इति धरणीसंग्रहः । (दलनम् । यथा, भागवते । १ । ३ । २ ।
"तेषां मेरोरकैरिव निमीलनवैतवाम् ।
विद्योतनि दशाशानेन् वेन्याम्नि मर्द्दनम् ॥"
मृद् + ल्युः । मर्द्दनकारके, त्रि । यथा, महाभारते । १२ । १३ । १४२ ।
"हन्ते दितिधनाशारी मर्द्दन त्रिदशेश्वरम् ॥")

मर्द्दलः, पुं, (मर्द्दं मर्द्दनं लातीति । ला + कः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ । मादल इति भाषा । तत्पर्य्यायः । मुरजः २ । इति शब्दरत्नावली । (यथा, महाभारते । ८ । ४४ । १८ ।
"मृदङ्गानकशङ्खानां मर्द्दलानाञ्च निस्वनैः ।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ॥")

मर्द्दितं, त्रि, (मृद् + कर्म्मणि क्तः ।) मर्द्दितम् । इति त्रिलिङ्गसंग्रहटीकायां भरतः । चूर्णितम् । यथा,—
"तिमिङ्गिलरसेन मर्द्दितो
रामबाण इति विश्रुतो रसः ॥"
इति भावप्रकाशः ॥

मर्ब्ब, गत्याम् । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) मर्ब्बति । इति दुर्गादासः ।

मर्म्म, [न्] क्ली, (मृ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) स्वरूपम् । तत्त्वम् । यथा, नैषधे । २ । ६ ।
"अगमा न विशोयते कृपे-
रपि धर्म्मागममर्म्मपारगैः ।
अरसुन्दर ! मां यदत्यज
स्तव धर्म्मः सदयो दयोज्झनः ॥"
सन्धिस्थानम् । इति शिक्षादिसंग्रहे अमरभरतौ । जीवस्थानम् । इति राजनिर्घण्टः ॥ * ॥ अथ मर्म्माणि ।
"सन्निपातः शिरास्नायुसन्ध्यस्थिमांसजो भवः ।
मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ॥
सप्तोत्तरं मर्म्मशतं सन्ति देहे मर्म्माणि देहिनाम् ।
तान्येकादश शाखे स्युरष्टादश त्रिषु सन्ति हि ॥
षष्ठी वै विंशतिस्तानि ग्रीवायां सप्तविंशतिः ।
चत्वारिंशत्पदेकच शिरामर्म्माणि तत्र तु ॥
द्वाविंशतिः सप्तविंशी नायव्येव तु सप्तके ।
द्वादशोऽस्थि कुष्ठो च एकदेशे चतुर्द्देश ॥
मौसाया अङ्गभागे तु सप्तविंशत्यानि हि ॥
मर्म्माणि तानि सन्ति यथथा भवन्ति ।
तान्याह ।
अतःपरमवश्यानि स्पृशन्मानिकोवस्तितः ।
मर्म्मदेशाय्यवधिंशत् स्युः कालान्तरमारकाः ॥
चत्वारिंशच्च चत्वारि वैकल्यं कथयन्ति हि ।
मर्म्माष्टकं चत्वारि विशल्यं विद्धं मतम् ॥
मधाटकादधिपतिः शङ्खौ कण्ठशिरादयम् ।
हृदयं वस्तिनाभी च अष्टौ प्राणं हरन्ति हि ॥
मधाटकानि चत्वारि चत्वार्यधिपतिश्चैकः ।
शिरामुखानि शिरश्च सर्वे संयोज्यमानं तानि
चत्वारि शिरामर्म्माणि वदन्त्युपत्यमाकानि
चत्वारि सन्ति सद्योमारकाणि । अधिपतिः ।
मस्तकाभ्यन्तरे शङ्खिसिरयोः सन्धिस्थान
सर्व्वसद्योमारकं क ततः सन्धिमर्म्मं अद्ग-
प्रमाणं सद्योमारकम् । शङ्खौ भ्रुवोरन्तरे
कर्णललाटमध्ये द्वे अर्द्धाङ्गुलौ अर्द्ध-
मुष्टि सद्योमारके । कण्ठशिराः मन्याः
नीलाः षडन्यास्तस्याष्टौ चतस्रः शिराः
द्वौ शिरामर्म्माणि चतुरङ्गुलानि सद्योमार-

[illegible]

[illegible]

[illegible]

मर्म्मवित्, [द्] पुं, (मर्म्म वेत्तीति । विद्+क्विप् ।) मर्म्मज्ञः । तत्पर्य्यायः । कार्पटिकः २ । इति त्रिकाण्डशेषः । मार्म्मिकः ३ मर्म्मवेदी ४ । इति जटाधरः ।(यथा, कथासरित्सागरे । ६२ । ६० ।
"वक्रवाक्सततोऽभाषीदस्योऽयं परमर्म्मवित् ।")

मर्म्मवेदी, [न्] पुं, (मर्म्म वेत्तीति । विद्+णिनिः ।) मर्म्मवित् । तत्त्वज्ञः । इति जटाधरः ।

मर्म्मस्पृक्, [श्] त्रि, (मर्म्म स्पृशतीति । स्पृश्+ "स्पृशोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मर्म्मपीडकः । तत्पर्य्यायः । अरुन्तुदः २ । इत्यमरः । ३ । १ । ८३ । व्यथकः ३ । इति हेमचन्द्रः । ६ । १६५ ।

मर्म्माविध्, } [ध्] त्रि, (मर्म्म विध्यतीति । मर्म्म
मर्म्माविद् } +व्यध्+क्विप् । "ग्रहिज्येति ।" ६ । १ । १६ । इति सम्प्रसारणम् । "नहि-वृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६।३।११६ । इति दीर्घत्वम् ।) सन्धिस्थानवेधकर्त्ता । मर्म्मघ्नः । यथा, भट्टिकाव्ये । ५ । ५२ ।
"चिरं क्लिश्नन्ति मर्म्माविद्धामो विलुभितद्रवम् ।
सन्द्रायमाणमवाजीहयदं चकदाचरम् ।"
"मर्म्माणि विध्यतीति क्विप् नि: सौवधी पद्-
भाविति दीर्घनिर्द्देशात् क्वचित् क्विबन्ते पूर्व्व-
पददीर्घत्वं स्यादिति सूचितं चाद्पूर्व्वस्य रूपं
वा मर्म्मावित् मर्म्मज्ञो वा वेत्ति रूपम् ।" इति
तट्टीकायां भरतः ।

मार्म्मिकः, त्रि, (मर्म्म वेत्तीति । मर्म्म+ठक् ।) मर्म्मवित् । इति जटाधरः ।

मर्य्या, स्त्री, (म्रियतेऽवधिर्म्रियतेऽत्र । मृ+यत् । टाप् ।) सीमा । इति मर्य्यादाशब्दटीकायां रायमुकुटः ।

मर्य्यादकः, त्रि, मर्य्यादाकर्त्ता । मर्य्यादां करोतीति कर्त्तरि टचि कारिणि कप्प्रत्यये केऽणः इत्ये वेत्ति वेति आकारस्य ह्रस्वे निष्पन्नोऽयं शब्दः ।

मर्य्यादा, स्त्री, (मर्य्या+दा+अङ् । आप्यप-स्थितिः । (यथा, महाभारते । १५।०२।१५ ।
"मर्य्यादायां स्थितो धर्म्मः शमश्चैवास्य कथ-
ञ्चन ।")
तत्पर्य्यायः । संस्था २ धारणा ३ स्थितिः ४ । इत्यमरः । २ । ८ । २६ । "मर्य्यादोयते मर्य्यादा मर्य्यादपूर्व्वात् दाणो डः निपातनात् यस्य मः ।" इति तट्टीकायां भरतः । "मर्य्येति सीमार्थे अव्ययं तत्र दीयते मर्य्यादेति स्वामी ।" इति रायमुकुटः । "म्रियन्तेऽवेति मर्य्या तां ददातीति मर्य्यादा ।" इति सारसुन्दरी । सीमा । इति जटाधरः ।
कूलम् । इति हेमचन्द्रः । ४ । १४२ । (यथा, रघोवंशे । १ । १ ।
"रत्नाकरस्तत्कीर्त्तिमर्य्यादांश्चक्रेऽऽ
कीर्त्तिमर्य्यादया शश्वद् वर्द्धमानः ।"
देवानिषे, धर्मौ । यथा, महाभारते । १ ।
८१ । २१ । [नाम ।")
"देवाविधिः प्राप्य देवेन्द्रोऽप्यवदेद्धर्य्यादा

मर्य्यादागिरिः पुं. (मर्य्यादा सीमा तज्ज्ञापको गिरिः ।) कुलाचलः । वर्षसीमापर्व्वतः । यथा ।
"उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादा-गिरयः प्रागायता: । उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्व-स्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति । एवं दक्षिणेनेलावृतं निषधो हेम-कूटो हिमालय इति प्रागायता यथा नीला-दयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुष-भारतानां यथासंख्यम् । तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ।" इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ।

मर्व्व, पूर्त्तौ । गतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) मर्व्वति पयसा कुम्भं चेटी । इति दुर्गादासः ।

मर्षः, पुं, क्षान्तिः । मृषधातोर्भावे घञ्प्रत्य-येन निष्पन्नः । (यथा, किरातार्ज्जुनीये । १ । ३३ ।
"अ-मर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ।")

मर्षणं, क्ली, (मृष्+ल्युट्) क्षमा । मृषधातो-र्भावे अनट्प्रत्ययेन निष्पन्नम् । (धर्षणम् । यथा, महाभारते । १ । ११३ । २८ ।
"न चाप्यधर्म्मो न सुहृद्भिरेषो
परस्परारे परदारमर्षणे ।
स्वदर्म्मभावे च रमेकजः सदा
कृष्णा सदाख्यानमिदं विजानताम् ।"
मर्षयतीति । मृष्+णिच्+ल्युः । मर्षके, त्रि । यथा, श्रीमद्भागवते । ४ । ७ । ३८ ।
"इदं पवित्रं परमीशचेष्टितं
यशस्यमायुष्यमघौघमर्षणम् ।")

मर्षितः, त्रि, क्षमायुक्तः । क्षान्तिविशिष्टः । मृष-धातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । (यथा, श्रीमद्भागवते । १ । ७ । ५१ ।
"तथाहाममर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः ।
न भर्त्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून्
वृथा ।")
भावे क्तः, क्ली । (मर्षणम् ।)

मर्षितवान्, त्रि, क्षान्तः । मृषधातोः कर्त्तरि क्तवतुप्रत्ययेन निष्पन्नः ।

मल, क धृतौ । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) क मलते । इति दुर्गादासः ।

मलः, पुं, क्ली, (मल्यते धार्य्यते इति । मल्+ "अचोऽपि दृश्यते ।" उणा० १ । १०८ । इति अच् इत्यादि । यद्वा, मलते धारयति व्याधीनिति । मल्+अच् ।) पापम् । (यथा, मनुः । ९ । १०२ ।
"प्रक्षिप्तायां जलाभोगे मलं चलति दिवौकसाम् ।"
"दिवाभिर्नीतं चारं विद्धति ।" इति तट्टीकायां कुल्लूकभट्टः । ० ।) विट् । (यथा, मनुः । ४ । २२० ।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ।"
"विष्ठा मलमेकमेव च ।" इति तट्टीकायां मेधा-तिथिः ।) किट्टम् । इत्यमरः । ३ । ३ । १९५ ।
(यथा, अभिज्ञानशकुन्तले । ६ ।
"छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ।")
"पापं किल्विषम् । विट् । विष्ठा । किट्टं
कलङ्को मण्डूरादि स्वेदादि च एषु मलः ।
'वसा शुक्रमसृङ्मज्जा मूत्रं विट्कर्णविण्नखाः ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ।'
इति स्मृतिः ।" इति तट्टीकायां भरतः । कर्पू-रम् । इति शब्दचन्द्रिका । वातपित्तकफाः । यथा,—
"सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ।"
इति माधवकरः ।
(पारिभाषिकमलं यथा, महाभारते । ८ । ४५ । २१ ।
"अशिवस्य मलं भैक्ष्यं ब्राह्मणानां मलम् ।
मलं पृथिव्या वाह्लीकाः स्त्रीणां मद्रस्त्रियो
मलम् ।")

मलघ्नः, पुं, (मलं हन्तीति । हन्+टक् ।) शाल्मली-कन्दः । इति राजनिर्घण्टः । मलनाशके, त्रि ।

मलघ्नी, स्त्री, (मलघ्न+स्त्रियां ङीष् ।) नाग-दमनी । इति राजनिर्घण्टः ।

मलजं, क्ली, (मलाज्जायते इति । जन्+डः ।) पूयः । इति शब्दचन्द्रिका । मलोद्भवे, त्रि ।

मलदूषितं, त्रि, (मलेन दूषितम् ।) मलिनम् । इत्यमरः । ३ । १ । ५५ ।

मलद्रावी, [न्] पुं, (मलं विष्ठां द्रावयति चाल-यतीति । द्रु+णिच्+णिनिः ।) जयपालः । इति राजनिर्घण्टः ।

मलनं, क्ली, (मल्यते मर्द्यते इति । मल्+ल्युट् ।) मर्द्दनम् । इति हैमी । ५, १०३ ।

मलनः, पुं. (मलते धारयति हस्त्यादीन् । मल धृतौ+ल्युः ।) पटवासः । इति हैमी । ५, १०४ । ताँबु इति भाषा ।

मलपूः, स्त्री, (मलात् पापात् पुनातीति । पू+क्विप् ।) काकोदुम्बरिका । इत्यमरः । २ । ४ । ६१ । (यथा, भावप्रकाशे ।
"फल्गुर्ज्जघन्यफला मलपूश्चापि
काकोदुम्बरिका च ॥")

मलमुक्, [ज्] पुं (मलं भुङ्क्ते इति । भुज्+क्विप् ।) काकः । इति शब्दरत्नावली ।

मलभेदिनी, स्त्री, (मलं भिनत्ति । भिद्+णिनि: । स्त्रियां ङीप् ।) कटुका । इति राज-निर्घण्टः ।

मलमासः, पुं, (मलो मलिनस्तत्कर्म्मस्वविहितत्वात् मासः ।) असंक्रान्तमासः । अधिमासः ।

[illegible]

[illegible]

[illegible]

कार्य्यमन्यगतं नित्यां कुर्य्यान्नैमित्तिकीं क्रियाम् ॥"
इति मलमासतत्त्वम् ॥•॥
अपि च ।
"अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च ।
देवव्रतवृषोत्सर्गचूडाकरणमेखलाः ।
माङ्गल्यमभिषेकञ्च मलमासे विवर्ज्जयेत् ॥"
इति गारुडे १२८ अध्यायः ॥•॥
अथ मलमासकर्त्तव्यव्रतादि । "चातुर्मास्यव्रतमाषाढ़शुक्लैकादश्यां विहितं तदप्यारम्भं आषाढ़ादिमलमासेऽपि कर्त्तव्यं आषाढ़ादिप्रतिदिनकर्त्तव्यत्वेन निरवकाशत्वात् ।
'मध्ये तु दिवसेभ्योऽपि कपिलो बादरायणिः ।'
इति ज्योतिःशास्त्रे पितामहेन एकमासस्याभिधानाच्च । यच्च ।
'संवत्सरन्तु यः पूर्व्वमेकभक्तेन तिष्ठति ।'
इत्यादौ माघाद्युल्लिखितसंवत्सरव्रतमारब्धं तन्मलमासेऽपि कर्त्तव्यम् ।
'अधिमासोदशमासाः संवत्सर इति श्रुतेः ।'
पञ्चप्रतिमासविहितं न माघाद्युल्लेखेन तन्मलमासेऽपि कर्त्तव्यम् । तथा च रम्भातृतीयायामपि भविष्योत्तरम् ।
'मासि मलिम्लुचेऽप्येवं यजेद्देवीं सदाम्बराम् ।
किन्तूद्यापनं कार्य्यमित्याह भगवान् शिवः ॥'
उद्यापनं प्रतिष्ठा । मलारम्भोऽपि निषिद्धः । पूर्व्वोक्तकाम्यवचनात् । ज्यैष्ठादिमासविशेषविहितं सावित्रीव्रतादिकन्तु तत्कालमलमासे न कार्य्यम् । किन्तु शुद्ध एव ज्यैष्ठादौ कर्त्तव्यमिति । हेमाद्रिः ।
'नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥'
नियमस्वरूपः पुरश्चरणविहितं सामान्यापचमहादानादि काम्यमपि तथाविधं संकल्पितं बलिविद्वयस्यापि पूजादि । यत्तु भविष्ये ।
'कुर्य्यात् प्रायश्चित्तकं कर्म्म प्रयतः सन् मलिम्लुचे ।
नैमित्तिकञ्च कुर्व्वीत यावत्कामं न यद्भवेत् ॥'
कालमाधवीये मत्स्यपुराणम् ।
'सर्व्वं चाहरहः श्राद्धं दानञ्च प्रतिवासरम् ।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे ।'
कालत्रयपरिशिष्टम् ।
'यस्त्वं मलमासात् प्राक् यत् कर्म्म न समापितम् ।
वैशाखे मलमासेऽपि तत् समाप्यमसंशयम् ॥'
ब्रह्मसिद्धान्ते ।
'आरब्धं कर्म्म यत्किञ्चित्तस्मात्ते च मलिम्लुचे ।'
नैमित्तिकं गर्भाधानजातकर्म्मादिनिमित्तोत्पन्नम् ।
आवश्यकर्म्मादिपि मलमासे कार्य्यम् ।
'आवश्यकान्यकर्म्माणि गर्भाद्यं तथैव च ।
मघायोगे महालये श्राद्धं चान्द्रे च चौड़कम् ।
स्वजन्मदिवसे कार्य्यं रामचन्द्रग्रिपादिकम् ।
कार्य्यं तन्मलमासेऽपि नित्यं नैमित्तिकं तथा ॥'
स्मृतिः ।
'आब्दिकानि च कार्य्याणि ये च संस्कारसाधिताः ।
मलिम्लुचेऽपि कर्त्तव्याः काम्या इष्टीश्च वर्ज्जयेत् ॥'
संस्कारा अन्नप्राशननिष्क्रमणादयः । इति माधवाचार्य्यः । अन्यत्कर्म्माणि यज्ञदानगोदानविच्छेदनान्यशिवयादीनि । यमश्चाह ।
'चतुर्थे सप्तमे चैव नवमैकादशे तथा ।
यदन्नं दीयते जन्तोस्तदपश्राद्धमुच्यते ॥'
इति यमोक्तम् ।
अथ चतुर्थ्यादिपक्षार्थं मरणादिसम्भवीति । बालकादभूतप्रजनदाधिपभूतमृत्युदुःखदरोगाभिभवाद्भुतदुःस्वप्नग्रहदोषशान्त्यादिनिमित्तं शान्तिकर्म्मापि मलमासेऽपि कर्त्तव्यम् । विष्णुना शान्तिस्वस्त्ययनैर्दैवोपघातान् शमयेत् परचक्रोपघाताच्च इत्युक्तम् ।" इति मलमासतत्त्वम् ॥

मलयः, पुं, (मलते धरति चन्दनादिकमिति । मल + "कलिमलितनिभ्यः कयन् ।" उणा० ४ । ९९ । इति कयन् ।) सप्तकुलाचलान्तर्गतः । तत्पर्य्यायः । आषाढ़ः २ दक्षिणाचलः ३ इति हेमचन्द्रः । ४ । ९५ । चन्दनाद्रिः ४ मलयाचलः ५ । इति शब्दरत्नावली । (स च सप्तकुलाचलान्तर्गतः । यथा, मार्कण्डेये । ५७ । १०—११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः ॥")
शैलाङ्गम् । देशविशेषः । (यथा, मात्स्ये । ११६ । ४४ ।
"अङ्गा वङ्गा मद्गुरका अन्तर्गिरिबहिर्गिरी ।
ततः प्लवङ्गमातङ्गमलयामलवर्त्तिकाः ॥")
आरामः । इति मेदिनी । ये, ९९ । नन्दनवनम् । इति धरणिः । अष्टादशोपद्वीपान्तर्गतद्वीपविशेषः । इति शब्दमाला । ऋषभदेवस्य शतपुत्रान्तर्गतपुत्रविशेषः । (यथा, श्रीभागवते । ५ । ४ । १० । "तमनु कुशावर्त्त इलावर्त्तो ब्रह्मावर्त्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग् विदर्भः कीकट इति नव नवतिप्रधानाः ।")
गरुड़पुत्राणामन्यतमः । यथा, महाभारते । ५ । १०१ । १४ ।
"सुमुखो मधुपर्कश्च हेमवर्णस्तथैव च ।
मलयो मातरिश्वा च निशाकरदिवाकरौ ॥")

मलयगन्धिनी, स्त्री, (मलयस्य गन्धः अस्त्यस्याः । मलयगन्ध + इनिः । स्त्रियां ङीप् ।) [illegible]विशेषः । इति शब्दमाला ।

मलयजं, क्ली, (मलयात् जायते इति । जन् + डः ।) चन्दनम् । इत्यमरः । २ । ६ । १३१ ॥ (यथा, गीतगोविन्दे । १ । ११ ।
"दुरितविरहवाती वाति सुचन्दनवायुः
कुशलकनकपीठो यस्ते न वा मलयाद्रिः ।
मलयजरजो वेदं भक्त्या [illegible]
मदन न रमस्यानसङ्गे ! मुदा किम्
दारिव ॥"
मलयजाते, त्रि । यथा, महाभारते । १ । २७ । ६ ।
"उत्पतद्भिर्विराजायं रूपैर्मलयजैरपि ॥")
यथा च ।
"रागं मलयजं शुद्धं पैठीनं हारमाकुलम् ।
सम्यक् सुधाम्बरं सिंहासनमाला नृपाङ्कयेत् ॥"
इति [illegible]तत्त्वम् ॥

मलया, स्त्री, (मल + कयन् । टाप् ।) त्रिवृता । इति मेदिनी । ये, ९९ ।

मलयाचलः, पुं, (मलयश्चासावचलश्चेति ।) मलयपर्व्वतः । इति शब्दरत्नावली । (यथा, सुश्रुते उत्तरतन्त्रे । ३७ अध्याये ।
"कुमारमातामरभोरलतोपकारे
सजिताम् यथे कमलरेषलदशि ध्रुवोत ।
यथानुतानिलविकम्पितपुष्पदान्ति
हैमन्तविन्ध्यहिमवन्मलयाचलानाम् ॥")

मलयानिलः, पुं, (मलयस्यानिलः ।) चन्दनाचलीयवायुः । तत्पर्य्यायः । वासन्तः २ । इति त्रिकाण्डशेषः । (यथा, साहित्यदर्पणे । १ । १२ ।
"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥")

मलयूः, स्त्री, (मलयूः । पृषोदरादित्वात् यत्वम् ।) मलयूः । इति शब्दरत्नावली ।

मलयोद्भवं, क्ली, (मलयः उद्भव उत्पत्तिकारणं यस्य ।) चन्दनम् । इति राजनिर्घण्टः ।

मलविनाशिनी, स्त्री, (मलं विनाशयतीति । वि + नश् + णिच् + णिनिः । स्त्रियां ङीप् ।) शङ्खपुष्पी । इति राजनिर्घण्टः ।

मलहन्ता, [ऋ] पुं, (मलं हन्तीति । हन् + तृच् ।) शाल्मलीकन्दः । इति राजनिर्घण्टः ।

मला, स्त्री, (मल + अच् । टाप् ।) भूम्यामलकी । इति शब्दचन्द्रिका ।

मलाकर्षी, [न्] पुं, (मलं विष्ठां आकर्षति आदाय स्थानान्तरं नयतीति । आ + कृष् + णिनिः ।) हाड़िकः । इति शब्दमाला । हाड़ि इति भाषा ॥

मलाका, स्त्री, (मलेन मनोमालिन्येन अकति कुटिलं गच्छतीति । अक् + अच् । स्त्रियां टाप् ।) कामिनी । हस्तिनी । दूती । इति संक्षिप्तसारोणादिवृत्तिः ।

मलापकर्षणं, क्ली, (अप + कृष् + भावे ल्युट् । मलस्यापकर्षणम् ।) पापमोचनम् । मलदूरीकरणम् । इति केचित् ।

मलापहा, स्त्री, (मलमपहन्तीति । अप + हन् + डः । स्त्रियां टाप् ।) नदीविशेषः । यथा,—
"मलापहा भीमरथी च वाहुदा
यथा च हस्ता [illegible] दुःखैः ।
मलापहाम्बुप्लवकेन वाचा
पर्णं कथं कारुण्यं कृष्णानिलम् ॥"
इति राजनिर्घण्टः ।

मलावहं, क्ली, (मलं आवहतीति । आ + वह + अच् ।) कर्त्तव्यकार्य्याकरणरूपपापविशेषः । यथा, मनौ । ११ । ७१ ।

"हरिकीटश्च योऽश्वः मज्जामृगनभोऽजकम् ।
धर्मोऽप्युत्क्षिप्तमधीत्यैव मलावहम् ॥"

मलारिः, पुं, (मलस्यारिर्नाशको रेचकत्वात् ।) सर्ज्जक्षारः । इति राजनिर्घण्टः ॥

मलिनं, त्रि, (मलते धारयतीति । मल + "बहुलमन्यत्रापि ।" उणा० २ । ४८ । इति इनच् । यद्वा, "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इत्यत्र । "मलशब्दादिनजीमसचौ प्रत्ययौ निपात्येते ।" इति काशिकोक्त्या इनच् ।) मलदूषितवस्तु । तत्पर्य्यायः । मलीमसम् २ कच्चरम् ३ मलदूषितम् ४ । इत्यमरः । ३ । १ । ५५ ॥ (यथा, महानिर्व्वाणतन्त्रे । १ । ४३ ।
"परस्त्रीहरणे पापपङ्कपरिवर्ज्जिताः ।
निर्धना मलिना दीना दरिद्राश्चिररोगिणः ॥")
दूषितम् । (यथा, आर्य्यासप्तशत्याम् । ४०२ ।
"पटपट इव रजकीभिर्मलिनो गुह्यापि निर्द्दयं ताभिः ।
धर्म्मध्वज इव विना जघन्य ! यत्कोऽसि कुलटाभिः ॥")
कृष्णम् । इति मेदिनी । ने, १०४ ॥ नित्यनैमित्तिकक्रियाभ्रष्टौ । इति मार्कण्डेयपुराणम् ॥ (निकृष्टम् । यथा, शिशुपालवधे । ८ । २१ ।
"द्युतिमपहरद्ध्यपगतो जघनः
प्रकटीभवन्ति मलिनाशयताः ॥"
"मलिनाशयताः निकृष्टाशयत्वात् ।" इति तट्टीकायां मल्लिनाथः ॥)

मलिनं, क्ली, (मलते धरति दोषमिति । मल + इनच् ।) घोलम् । इति शब्दचन्द्रिका ॥ दोषः । इति हेमचन्द्रः ॥ टङ्कणः । इति राजनिर्घण्टः ॥

मलिनमुखः, पुं, (मलिनं कृष्णवर्णाभासो मुखं यस्य ।) वह्निः । गोलाङ्गूलः । इति मेदिनी । खे, १८ ॥ प्रेतः । इति हेमचन्द्रः ॥

मलिनमुखः, त्रि, (मलिनं दूषितं मुखं यस्य ।) क्रूरः । खलः । इति मेदिनी । खे, १८ ॥ हेमचन्द्रश्च । व्यामवदनश्च ॥

मलिनाम्बु, क्ली, (मलिनं कृष्णवर्णं अम्बु ।) मसी । इति हेमचन्द्रः । ३ । ३८ ॥

मलिनास्यः, त्रि, (मलिनं दूषितमास्यं यस्य ।) खलः । इति शब्दमाला ॥

मलिनी, स्त्री, (मलमस्त्या अस्तीति । मल + इनिः । स्त्रियां ङीप् ।) रजस्वला नारी । इत्यमरः । २ । ६ । २० ॥

मलिम्लुचः, पुं, (मली सन् म्लोचतीति । म्लुच् इगुपधात् + कः ।) मलमासः । यथा,—
"तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः ॥
यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्व्वमासाद्-न्यमासपर्य्यन्तरविरस्तः सन् गच्छेत् मासान्तरे राशिमन्तरं गच्छेत् तदा आद्योऽतिक्रान्तमासो मलिम्लुचो ज्ञेयः । मली सन् म्लोचति गच्छतीति मलिम्लुचः । द्वितीयस्तु प्रकृतः शुद्धः कर्म्मार्हश्चेत् ।" इति मलमास-तत्त्वम् । अग्निः । चौरः । इति मेदिनी । चे, २१ ॥ (यथा, माघे । १६ । ५२ ।
"प्रहितः प्रधनाय माधवा-
नहमाकारयितुं महीभृता ।
न परेषु महौजसश्छला-
दपकुर्व्वन्ति मलिम्लुचा इव ॥")
वायुः । इति शब्दमाला ॥ (पञ्चयज्ञपरिभ्रष्टः । इति हेमचन्द्रः । ३ । ५२२ ॥)

मलिष्ठा, स्त्री, (अतिशयेन मलिनी । मलिनी + इष्ठः । स्त्रियां टाप् ।) रजस्वला नारी । इति त्रिकाण्डशेषः ॥

मलीमसं, क्ली, (मलमस्यास्तीति । मल + "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति ईमसच् प्रत्ययेन निपातितः ।) लौहम् । पुष्पकासीसम् । इति मेदिनी । से, ५८ ॥

मलीमसः, त्रि, (मलमस्यास्तीति । मल + ईमसच् । निपात्यते ।) मलिनः । इत्यमरः । ३ । १ । ५५ ॥ (यथा, माघे । १ । ३८ ।
"उपप्लुतं पातुमदो मदोद्धते-
स्त्वमेव विश्वम्भर ! विश्वमीशिषे ।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः ॥"
श्यामवर्णः ; यथा, श्रीकण्ठचरिते । ६ । १८ ।
"मलीमसश्रीर्मधुपाङ्गनानां
भिन्ने लताः पुष्पवतीः स्फुटं यः ।
स एव चैत्रेऽत्र वने द्विरेफः
पुष्पेषुराज्ये विदितः पुरोधाः ॥")

मलूकः, पुं, (मल + बाहुलकात् ऊकः ।) कृमिविशेषः । इत्युणादिकोषः ॥

मल्ल, ङ धृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, मल्लते । इति दुर्गादासः ॥

मल्लः, पुं, (मल्लते धरति बलमिति । मल्ल + अच् ।) बाहुयोधी । इत्यमरभरतौ । माल इति भाषा । (यथा, श्रीमद्भागवते । १० । ४३ । १७ ।
"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् ।")
सङ्कीर्णजातिविशेषः । माला इति भाषा । स च ब्रात्यक्षत्रियात् सवर्णायां जातः । इति मानवे १० अध्यायः ॥ स च लेटात् तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्रत्याश्च छन्दकारात्मजाः । इति भरतमल्लिकः ॥ पात्रम् । कपोलम् । मत्स्यभेदः । इति मेदिनी । ले, ४४ ॥ देशविशेषः । यथा,—
"दशार्णा नवराष्ट्रञ्च मल्लाः शाल्वा युगन्धराः ॥"
इति विराटपर्व्वणि १ अध्यायः ॥

मल्लकः, पुं, (मल्ल इव । मल्ल + कन् । तद्भावादस्य तथात्वम् । यद्वा, मल्ल धारणे + ण्वुल् ।) दन्तः । इति हेमचन्द्रः । ३ । २९२ ॥ (भाजनविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ३१०० ।
"निर्माल्यैकमाहन्तौ यष्टौ तौ स्वामिनी यथा ।
हस्तादिविभूषितमङ्गी द्विरूपा मल्लकाभिधः ॥")

मल्लकः, पुं, स्त्री, (मल्लते धारयति प्रदीपमिति । मल्ल + ण्वुल् ।) दीपाधारः । नारिकेलस्य पात्रविशेषः । माला इति भाषा । स्त्रियां मल्लिका । इत्यमरभरतौ ॥ प्रदीपः । इति मथुरेशः ॥

मल्लजं, क्ली, (मल्ले मल्लकदेशे जायते इति । जन + डः ।) मरिचम् । इति जटाधरः ॥

मल्लतूर्य्यं, क्ली, (मल्लैर्वाद्यमानं तूर्य्यम् । मल्लस्य तूर्य्यमिति वा ।) वाद्यविशेषः । तत्पर्य्यायः । मद्दालकः २ । इति त्रिकाण्डशेषः ॥

मल्लनागः, पुं, (नागो गज इव मल्लः । पूर्व्वनिपातः ।) वात्स्यायनमुनिः । (मल्लो बलीयान् नागः ।) अभ्रमातङ्गः । इति मेदिनी । गे, ४० ॥ (मल्लो नाग इव ।) शैलधारः । इति शब्दरत्नावली ॥ कामशास्त्रविशेषः । इति धरणिः ॥

मल्लभूः, स्त्री, (मल्लानां भूर्भूमिः ।) मल्लभूमिः । इति जटाधरः ॥

मल्लभूमिः, स्त्री, (मल्लानां भूमिः स्थानम् ।) मल्लक्रीडास्थानम् । तत्पर्य्यायः । अक्षवाटः २ रङ्गभूमिः ३ रङ्गस्थली ४ । इति शब्दरत्नावली ॥ मल्लभूः ५ अक्षपाटः ६ । इति जटाधरः ॥ देशविशेषश्च ॥ (यथा,—
"अधःपात्रे पयःपानं शालपत्रे च भोजनम् ।
शयनं शालपत्रे च मल्लभूमेरियं स्थितिः ॥"
इत्युद्भटः ॥)

मल्लयात्रा, स्त्री, (मल्लानां यात्रा ।) मल्लानां युद्धार्थयात्रा । तत्पर्य्यायः । मालती २ । इति धारावली ॥

मल्लयुद्धं, क्ली, (मल्लानां युद्धम् ।) मल्लानां संग्रामः । तत्पर्य्यायः । नियुद्धम् २ बाहुयुद्धम् ३ । इति शब्दरत्नावली ॥ तत्प्रकारो यथा,—
"अथ सर्व्वेण तं मल्लं योधयामास मल्लराट् ।
योधमानश्चासौ भीमो दुःखेनैवाकरोन्मतिम् ।
मतिं प्रकरोति विपुलं प्रख्यातुं बराल्पवत् ।
ततः स पुरुषव्याघ्रः शार्दूलशिथिलस्वरः ।
प्रविवेश महारङ्गं विराटमभिपूजयन् ।
बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनान् ।
ततस्तं वृत्रसङ्काशं भीमो मल्लं समाह्वयत् ।
जीमूतं नाम तं मल्लं तत्र प्रख्यातविक्रमम् ।
तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ ।
मत्ताविव महाकायौ वारणौ षष्टिहायनौ ।
ततस्तौ नरशार्दूलौ बाहुयुद्धे समीयतुः ।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ।
आसीत् सुभीमः सम्पातो वज्रपर्व्वतयोरिव ।
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यस्यान्तरप्रेप्सू परस्परजयैषिणौ ।
उभौ परमसंहृष्टौ मत्ताविव महागजौ ।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ॥ ११ ॥
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ।
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृताभिस्तथैव च ।
मुखाबाहुप्रहारैश्च पादोद्धूतैश्च दारुणैः ।

बाहुभिः क्षिप्तनिर्घोषैः शिरोभिश्चावघट्टितैः ।
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ॥
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ।
अरज्यत जनः सर्व्वः सोत्कृष्टनिनदोत्थितः ।
बलिनौ संयुगे राजन् ! वृत्रवासवयोरिव ।
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ।
आकर्षतामथान्योन्यं जानुभिश्चाभिजघ्नतुः ॥१०॥
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ॥
बाहुभिः समसज्जेतामायसैः परिघैरिव ।
चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा ॥
विनदन्तमभिक्रोशन् शार्दूल इव वारणम् ।
समुद्यम्य महाबाहुर्भ्रामयामास वीर्य्यवान् ॥
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ।
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनम् ।
प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः ॥१३॥
तस्मिन् विनिहते मल्ले जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्बान्धवैः सह ।
स हर्षात् प्रददौ वित्तं बहु राजा महामनाः ॥"

इति विराटपर्व्वणि १२ अध्यायः ।

एषां टीका यथा ।"दु रौव अप्रकटमराणाञ्चा-लङ्कारेणैव । विश्रुतं लोकप्रसिद्धम् । शार्दूल-शिथिलः सिंह इव व्याघ्र इव वा शिथिलः श्लथः । व्याघ्रे सिंहेऽपि च शार्दूल इति दर्शनात् । कथा कण्ठम् । सम्पातः संघर्षः । १० । वज्रहटैः काटः करप्रयोगः श्लिष्टः कक्षा इति प्रसिद्धः । सन्निपातैः परस्परस्थितिप्रति-घातैः । विधैर्विविधैश्चान्योन्यमिति शेषः । ११ । सन्निपातैश्चादि । एते मल्लानां शिक्षाविशेषाः । अभिपातैः परस्परसंघातैरवधूतैर्बहुस्वच्छन्दा-घातैः प्रमाथैः भ्रामयित्वा पेषणैः । उन्मथनैः कराभ्यां भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रच्यावनैः । वज्राङ्गुलिकरो मुष्टिः ।

'अङ्गुष्ठं व्यस्तं भ्रामयित्वा तथैव च ।
विमर्द्य मन्दः स भवेत्राघोद्भूतनिस्वनः ।
तर्ज्जन्यङ्गुष्ठमध्ये च प्रसारितकरो हि यः ।
संप्रहारतलाघातस्तु संघट्टो भविष्यति ।'
आरम्भात्तु [illegible] ।
'प्रसार्याङ्गुलिवक्त्रेण प्रहारः प्रहृतिः स्मृता ।
रिपुकोष्ठबाहुसंघोषाणि मयापनम् ।
प्रहारः कत्थनाकाराः स्यात् पादोद्धृतः परा-
हतम् ।'

बाहुभिस्ताडितैः[illegible]परस्परप्राप्तिभिः करणैरन्यत्पादानि तैः । बलप्राणेन बलो-त्कर्षेण । सोत्कृष्टनिनदोत्थितः उत्कोशन सिंहनादवानित्यर्थः । प्रकर्षणं बाहुसंयुक्ता-कर्षणं परस्परकर्षणं तदेवाकर्षणमभ्याकर्षणाभ्य-वकर्षणम् । अभ्याकर्षः सामान्यः कर्षणम् । विकर्षणं बलात् परं तदेव विपरीतकर्ष-णम् । उत्कर्षेण संकर्षणमिति । १२ । शत गुणं शतवारम् । १३ ।" इत्यर्जुनमिश्रकृत-भारतार्थदीपिका ।

मल्ला, स्त्री, (मल्लते धारयति विभवादिकमिति । मल्ल धारणे + अच् । स्त्रियां टाप् ।) नारी । पत्रवल्ली । मल्लिका । इति शब्दरत्नावली ॥ (लोठनराजपत्नी । यथा, राजतरङ्गिण्याम् । ८ । १८९० ।
"तयेव पुत्रा प्रोषन्ती प्रोक्ताद्युद्धतायया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥")

मल्लारः, पुं, (मल्लं अच्छति प्राप्नोतीति । ऋ + अण् ।) रागविशेषः । स तु षण्णां रागाणां मध्ये द्वितीयः । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकी-
र्त्तिताः ॥"

अस्य षट्रागिण्यो यथा,—
"वेलावली पूरवी च कानडा माधवी तथा ।
कोडा केदारिका चैव मल्लारस्य प्रिया इमाः ॥"
अस्य गानसमयः ।
"मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥"
अस्य स्वरूपं यथा,—
"प्रह्लादरागं पतितं दधानः
प्रलम्बकर्णः कुशदेहयष्टिः ।
कौपीनवासाः सविकारचारी
मल्लाररागः शुचिमाननीयः ॥"
इति सङ्गीतदामोदरः ॥
(तथा च सङ्गीतदर्पणे रागाध्याये ।
"भैरवः पञ्चमो नाटो मल्लारो गौडमालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यन्ते लोकविश्रुताः ॥"
"मेघमल्लारिका मालकौशिकः पटमञ्जरी ।
आशावरीति विज्ञेया रागा मल्लारसंश्रयाः ॥"
इति रागार्णवमतम् ॥)

मल्लारी, स्त्री (मल्लार + ङीप् ।) वसन्तरागस्य रागिणी । यथा,—
"आन्दोलिता च देशाख्या लोला प्रथम-
मञ्जरी ।
मल्लारी चेति रागिण्यो वसन्तस्य वराङ्गनाः ॥"
इति सङ्गीतदामोदरः ॥
मेघरागस्य रागिणी । इति हलायुधः ॥
(अस्या परावरत्वादिकं यथा सङ्गीतदर्पणे ।
"मल्लारी धनशोभा स्यात् षड्जाद्यन्तपूर्णिका ।
औडुवा गीयते प्रोक्ता वर्षासु सुखदा मता ॥"
ध नि स रि ग म ध । अस्या ध्यानं यथा,—
"गौरी तनुः कोकिलकण्ठनादा
गीतच्छलेनाश्रुपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती
मल्लारिका यौवनदुःखिता ।")

मल्लिः, पुं, (मल्लते धारयति विभवादिकमिति । मल्ल + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) चतुर्विंशतितीर्थङ्करान्तर्गततीर्थङ्करविशेषः । इति हेमचन्द्रः ॥ १ । २८ ॥

मल्लिः, स्त्री, (मल्ल + इन् ।) मल्लिका । इति शब्दरत्नावली ।

मल्लिकः, पुं, (मल्लाति धारयतीति । मल्ल + इन् । स्वार्थे कन् ।) मल्लिकाक्षपक्षिविशेषः । मल्लिकैः कृष्णवर्णैश्चञ्चुचरणैः उपलक्षितः शुक्लपक्षः । हंसविशेषः । कुण्ठाद्युपाधिविशिष्टस्य । (यथा, भरतमल्लिकः । तथा च भट्टिकाव्यटीकाकारस्य मल्लिनाथस्य श्लोकः ।
"यथा मधुरमन्दगौरा मल्लिकाक्षाः ।
भट्टिटीकां प्रकुरुते भरतो मुग्धबोधिनीम् ॥")

मल्लिका, स्त्री, (मल्लिरिवेति । मल्लि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, मल्लिरिव इव शुक्लत्वात् । मल्लि + इवार्थे कन् ।) स्वनामख्यात पुष्पवृक्षः । बेलफुल इति भाषा ॥ (यथा, काव्यादर्शे । २ ।
"मल्लिकामुकुले चण्डि ! भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥")
तत्पर्य्यायः । शीतभीरुः १ भूपदी २ सप्तभीरुः ३ । इत्यमरः । २ । ४ । ६९ ॥ अस्फोटा ५ शीतभीरुः ६ । इति भरतः ॥ मदयन्ती ७ गौरी ८ नवमालिका ९ प्रिया १० मोदिनी ११ नारीष्टा १२ गिरिजा १३ सिता १४ मल्ली १५ मदयन्ती १६ चन्द्रिका १७ मोदिनी १८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । मुखपाककुष्ठविस्फोटकक्रिमि-विषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफवातापित्तत्वम् । इति राजवल्लभः ॥ उष्णत्वम् । लघुत्वम् । वृष्यत्वम् । वातपित्ताक्षिमुखाक्ष-र्व्विषनाशित्वञ्च । इति भावप्रकाशः ॥ ७ ॥
अस्या उत्पत्तिर्यथा,—
"प्रियवन्तं तदा भूयो मदीयं कुसुमायुधः ।
आरात् [illegible] ।
ततस्तमपतो दृष्ट्वा क्रोधात् कामरिपुः स्मरः ।
[illegible] ।
आलोक्य [illegible] ।
पारदस्य तदा शक्रः ! पाराशरश्च वर्व्वरः ।
प्रवदमानो चरन्तो दृष्टा वै कुसुमायुधः ।
उत्थाय मत्तः क्षेत्रं गन्धमादाय चञ्चलः ।
पराधोकुरितं नवमङ्कुरं मनोरमम् ।
स च कामवन्तान्तः कामभाज्ञो दृताक्षिकः ।
बाणस्थानं कुसुमाकारं बाणोऽवत्यज्यतम् ।
तन्मात्रे वैकुण्ठाख्यं कुसुमं नाम्नो यतः ।
सा च कोटी शुभा ख्यातो'त्यथोभिपूर्विका ।
जाताः सा मालका द्वया मल्लिकाविभूषिता ।
[illegible] ।
सर्व्वदुःखापहन्त्री ख्याता दिव्यैरधिष्ठिता ।
कामे एषा यतः ख्याता कामं विदलत्यन्तम् ।
मल्लारकुसुमा कामे खड्गा शिवा शुभे ॥"
इति कालिकापुराणे ६ अध्यायः ॥
मल्लरिंहरः । मदयन्तिका । इति मेदिनी ॥ के, १३९ ॥ पानपात्रम् । इति हेमचन्द्रः ॥

मल्लिकाक्षः, पुं, (मल्लिकाकुसुममिव अक्षिणी यस्य ।) "मल्लिकाक्षाः ।" ३ । ३ । ८९ ॥

इति अण्।) मल्लिकपक्षचञ्चुचरणयुक्तहंसः। इति हेमचन्द्रः। ४। ३९२॥ धूसरवर्णपक्षचरणयुक्तहंसः। इति हलायुधः॥ (यथा, हरिवंशे। २४१। २५—२६।
"मल्लिकाक्षान् विक्रमाक्षान् क्रौञ्चवर्णान् मनोजवान्।
अश्वमेधं महाबाहुरश्वप्रतिमपौरुषः।
विसर्जयामास बली मदया भीमविक्रमः॥")

मल्लिकाक्षः, पुं, मल्लिकपक्षचञ्चुचरणयुक्तहंसः। इत्यमरटीका। ते सिता हंसा मलिनैः किञ्चिद्धूसरवर्णैर्लोहितैश्चञ्चुचरणैरुपलक्षिता मल्लिकाक्षा मल्लिकनामानः। मल मल्ल ह धृतौ लान्तः भात्यीति इकः। मल्लिकौ धूसरमेदे अक्षानुरूपत्वात् मल्लिका। इति वनः। शुक्लत्वान्मल्लिकापुष्पमिव अक्षि येषां ते मल्लिकाक्षा इति स्वामी। इति भरतः॥ (यथा, उत्तररामचरिते। १। २६।
"एतस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः।
बाष्पाम्भःपरिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो भुवो विभागाः॥")

मल्लिकाख्या, स्त्री, (मल्लिकेति आख्या यस्याः।) विपुलमालीपुष्पम्। तत्पर्य्यायः। मोदिनी २ बटपत्रा ३ मोदना ४। इति रत्नमाला॥

मल्लिकागन्धं, क्ली, (मल्लिकाया इव गन्धो यस्य।) मल्लकागुरु। इति राजनिर्घण्टः॥

मल्लिकापुष्पः, पुं, (मल्लिकाया पुष्पमिव पुष्पं यस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ वनबर्बरः। इति हेमचन्द्रः। करया शिवु इति भाषा। वनमल्लातपुष्पवृक्ष॥

मल्लिगन्धि, क्ली, (मल्लेरिव गन्धो यस्य तत्। "उपमानाच्च।" ५। ४। १३७। इति इकारादेशः।) अगुरु। इति शब्दचन्द्रिका॥

मल्लिपत्रं, क्ली, (मल्लेः पत्रमिव पत्रं यस्य।) छत्राकः। इति त्रिकाण्डशेषः॥

मल्ली, स्त्री, (मल्लि + कृदिकारादिति पक्षे ङीष्।) मल्लिका। इति राजनिर्घण्टः शब्दरत्नावली च॥ (यथा, राजशेखरकर्पूरे। ४९।
"किं राकेन्दुकरच्छटाभिरचितं किं मौक्तिके-
र्घटितं
किं मल्लीसुमनैः सितं विरचितं किं मालती-
कुड्मलैः॥")

मल्लीकरः, त्रि, (आगममपि आत्मानं मल्लमिव करोतीति। कृ+अच्।) चौरः। इति शब्दरत्नावली॥

मल्लुः, पुं, (मलते मलं धारयतीति। मल+बाहुलकात् उः।) भल्लुकः। इति शब्दचन्द्रिका॥

मव, बन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मवो बन्धनम्। मवति चौरं कोषः। इति दुर्गादासः॥

मवितः, त्रि, (मव+कर्म्मणि क्तः।) बद्धः। इत्यमरटीकायां स्वामी॥

मव्य, बन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मव्यति चौरं राजा। मव्याल्लोऽयमविवेकी। इति दुर्गादासः॥

मश, ध्वनौ। कोपे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मशति मशकः। इति दुर्गादासः॥

मशकः, पुं, (मशति ध्वनतीति। मश+अच्। संज्ञायां कन्।) कीटविशेषः। मशा इति भाषा॥ तत्पर्य्यायः। वज्रतुण्डः २ सूच्यास्यः ३ क्षुद्रमक्षिकः ४ रात्रिजागरदः ५। इति राजनिर्घण्टः॥ (यथा, श्रीमद्भागवते। ३। ३१। २७।
"कुरम्भायमानं दंशा मशका मत्कुणादयः।
दशन्ति विगतमानं क्रमयः कृमिकं यथा॥")
तन्नाशकधूपो यथा,—
"निम्बतार्क्ष्यपुष्पाणि भल्लातकशिरीषकम्।
लाक्षाधन्वंरयश्चैव विडङ्गश्चैव गुग्गुलुः।
एतैर्धूपैर्मक्षिकाणां मशकानां विनाशनम्॥"
इति गारुडे १८१ अध्यायः॥
चर्म्मकीलः। स तु श्वनामकालवर्म्मनिर्गतखेदादिस्रावम्। रोगविशेषः। मसा इति हिन्दी। आँचिल इति वङ्गभाषा॥ इति शब्दरत्नावली॥ * ॥ मशकरोगमाह।
"अवेदनं स्थिरञ्चैव यस्तु गात्रे प्रदृश्यते।
माषवत् कृष्णमुन्नतं मलिनं मशकं दिशेत्॥"
स्थिरं अचलम्। अस्य चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकांस्तिलकालकान्।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः॥"
इति भावप्रकाशः॥
अपि च
"लशुनानान्तु चूर्णस्य चर्णौ मशकनाशनः॥"
इति गारुडे १७५ अध्यायः॥

मशकी, [न्] पुं, (मशकाः सन्त्यस्मिन्निति। मशक+इनिः।) उदुम्बरवृक्षः। इति हेमचन्द्रः। ४। १९८॥

मशहरी, स्त्री, (मशं मशकं हरतीति। हृ+"हरतेरनुद्यमनेऽच्।" ३। २। ९। इति अच्। स्त्रियां ङीष्।) मशकनिवारकशयनावरणविशेषः। मशारि इति भाषा॥ चतुष्की २। इति जटाधरः॥

मशुनः, पुं, (मे शनये चयनि वहेते इति। मि+बाहुलकात् उनन्। ततः निपातितः।) कुक्कुरः। इति शब्दमाला॥

मष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मषति। इति दुर्गादासः॥

मषिकूपी, स्त्री, (मषेः कूप इव। मषिकूप+अल्पार्थे ङीष्।) मस्याधारः। इति हेमचन्द्रः। ३। ४८८॥

मषिधानं, क्ली, (धीयतेऽस्मिन्निति। धा+अधिकरणे ल्युट्। मषीणां धानम्।) मस्याधारः। इति हेमचन्द्रः। ३। ४८८॥

मषीबेल्लकः, पुं, (मषीभिर्बलं श्वेतयोर्ब्बलं यस्य।) कीताफर्षः। इति राजनिर्घण्टः॥

मस, ई र य ई परिमाणे। परिणामे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्। निष्ठायामनिट्।) ई र, अमसत् अमासीत् अमसीत्। अयमात् पुष्पादित्वादिति ङ रमणे। य, मस्यति धान्यं धनी। परिमातीत्यर्थः। ई, मस्तः। परिणामे कश्चिदिदुरोधात्। इति दुर्गादासः॥

मसकः, पुं, (मस्यति परिमीयतेऽसौ। मस+कर्म्मणि घः। स्वार्थे कन्।) क्षुद्ररोगविशेषः। मासा इति लोके प्रसिद्धः। तल्लक्षणं यथा,—
"अवेदनं स्थिरञ्चैव यस्तु गात्रे प्रदृश्यते।
माषवत् कृष्णमुन्नतं मलिनं मशकं दिशेत्॥"
अवेदनं वेदनारहितम्। स्थिरम् अचलम्।
तच्चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकांस्तिलकालकान्।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्याम-
शेषतः॥"
इति भावप्रकाशः॥

मसनं, क्ली, (मस्यते इति। मस्+ल्युट्।) सोमराजीवृक्षः। इति शब्दचन्द्रिका॥

मसरा, स्त्री, (मस+बाहुलकात् अरच्। स्त्रियां टाप्।) मसूरः। इति जटाधरः॥

मसारः, पुं, (मस्+भावे क्विप्। मसं परिमाणं ऋच्छतीति। ऋ+अच्।) इन्द्रनीलमणिः। इति शब्दरत्नावली॥ (यथा, नैषधचरिते। ९। १०४।
"चकास्ति बिन्दुच्युतकातिचातुरी-
घनाश्रुबिन्दुस्रुतिकैतवात्तव।
मसारताराक्षि! ससारमात्मना
तनोति संसारमसंशयं यतः॥")

मसारकः, पुं, (मसार+स्वार्थे कन्।) इन्द्रनीलमणिः। इति शब्दरत्नावली॥

मसि, स्त्री, पुं, (मस्यति परिणमते इति। मस्+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) लिपिप्रयोजनी। कालिवत् इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। मसिजलम् २ पत्राञ्जनम् ३। इति त्रिकाण्डशेषः॥ मेला ४ काली ५ अञ्जनम् ६ मषी ७। इति शब्दरत्नावली॥ रञ्जनी ८। इति काली॥ मलिनाम्बु ९ मषी १०। इति हेमचन्द्रः। ३। ४८८॥ शेफालिकाञ्जनम्। इति वनः शब्दरत्नावली च॥

मसिका, स्त्री, शेफालिका। इति शब्दरत्नावली॥ मलिका इति पाठान्तरे पाठः॥

मसिधानं, क्ली, (मसीनां धानम् आधारः।) मस्याधारः। इति शब्दरत्नावली॥

मसिधानी, स्त्री, (मसिधानी।) मस्याधारः। दोयात इति भाषा॥ तत्पर्य्यायः। मसिमणिः २ मेलाम्बुः ३ मसीकूपिका ४ मेलानन्दा ५ मेलाम्बु ६ मसिभाजनम् ७। इति शब्दरत्नावली॥ मषिकूपी ८। इति हेमचन्द्रः॥ मसिकूपिका ९। इति जटाधरः॥

मसिकं, क्ली, (मस्यते परिमीयते गन्धनयेति। मस् +"बहुलमन्यत्रापि।" उणा० २। ३८। इति इकन्।) सर्पबिलम् २। इत्युणादिकोषः॥

मसिपथः, पुं, (मसिः कालो पन्था यस्य।) लेखकः। इति त्रिकाण्डशेषः॥

मसिप्रसूः, स्त्री, (मसिं प्रकर्षेण सूते उद्गिरतीति। प्र+सू+क्विप्।) मस्याधारः। इति हारावली। लेखनी। इति केचित्॥

मसिमणिः, स्त्री, (मस्याधारो मणिरिवेति।) मस्याधारः। इति शब्दरत्नावली॥

मसिवर्द्धनं, क्ली, (मसिं वर्द्धयतीति। वृध्+णिच् +ल्युः।) रसगन्धः। इति त्रिकाण्डशेषः॥

मसी, स्त्री, (मसि+कृदिकारादिति ङीष्।) कालो। (यथा, नैषधचरिते। ८। ६१।
"लदास्य निर्म्मलदलीकदुर्यशो-
मसीमयं सञ्चितरूपभागिव।")
शिफाशिखाद्रुमम्। इति शब्दरत्नावली॥

मसीजलं, क्ली, (मस्या जलम्। राधोः शिर इतिवत् अभेदे षष्ठी।) मसी। काली। इति त्रिकाण्डशेषः॥

मसीधानी, स्त्री, (मस्या धानी पात्रम्।) मस्याधारः। इति त्रिकाण्डशेषः॥

मसीना, स्त्री, (मस्+"बहुलमन्यत्रापि।" उणा० २। ४८। इति। इनच्। पृषोदरादित्वात् दीर्घः। स्त्रियां टाप्।) [illegible]। यथा, शब्दचन्द्रिकायाम्।
"मसीना चातसी चित्रा सुमीनामालिका मता॥"

मसुरः, पुं, (मस्यते परिमीयतेऽसौ। मस्+"मसेश्च।" उणा० १। ४१। इति। उरच्।) मसूरकलायः। इति त्रिकाण्डशेषः॥

मसुरा, स्त्री, (मस्यति पण्यत्वेन परिणमत्या-त्मानमिति। मस्+उरच्। स्त्रियां टाप्।) वेश्या। ब्रीहिभेदः। इति मेदिनी। रे, २०१॥

मसूरः, पुं स्त्री, (मस्यते परिमीयतेऽसौ। मस्+"मसेरूरन्।" उणा० ४। ९। इति ऊरन्।) ब्रीहिभेदः। मसुरी कलाइ इति भाषा॥ (अस्याधिपतिर्मङ्गलः। यथा, बृहत्संहितायाम्। ४१। ५।
"वस्त्राविकद्रुतपानां
मकरोऽधिपमरालवराणाम्।
आढकमाषीवधोच
धनपश्च च कौर्त्तितो मैनः॥")
तत्पर्य्यायः। मङ्गल्यकः २। इत्यमरः।२।९।१७॥ मसुरः ३ ब्रीहिकाञ्चनः ४। इति त्रिकाण्डशेषः॥ मसुरा ५ मसूरा ६। इति मेदिनी। रे, २०१॥ राजदालिः ७ मङ्गल्यः ८ पृथुबीजकः ९ शूरः १० कल्याणबीजः ११ गुडबीजः १२ मसूरकः १३। इति राजनिर्घण्टः॥ मङ्गल्या १४ मसूरिका १५। इति शब्दरत्नावली॥ अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। संग्राहित्वम्। कफपित्तनाशित्वम्। वाताभयकरत्वम्। मूत्रकृच्छ्रहरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ धान्यवरत्वम्। रूक्षत्वम्। ज्वरनाशित्वञ्च। इति भावप्रकाशः॥ तस्य यूषगुणाः। संग्राहित्वम्। स्वादुपाकित्वम्। प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च। इति राजनिर्घण्टः॥

मसूरकः, पुं, (मसूर इव प्रतिकृतिरिति। मसूर+कन्। संज्ञायां कन् वा।) उपबर्हविशेषः। गोल बालिश इति भाषा। तत्पर्य्यायः। चतुरः २ चातुरः ३ चक्रिकः ४ चक्रगण्डुः ५। इति शब्दरत्नावली॥ (क्लीवेऽपि दृश्यते। यथा, बृहत्संहितायाम्। ४२। ४३।
"चक्राम्बि नीलरक्तं
हृतोयमिन्द्रेण भूषणं दत्तम्।
असितं यमचतुष्पं
मसूरकं कान्तिमदपश्यत्॥")

मसूरविदला, स्त्री, (मसूरस्येव विदिरं दलमस्याः। स्त्रियां टाप्।) श्यामत्रिवृत्। इत्यमरः। २। ४। १०८॥ (यथा, राजतरङ्गिण्याम्। ६। १८०।
"मसूरविदलाकारतुलाधिगतचेवरः।
पीवि चाब्दे चतुस्त्रिंशे चयमेऽब्दे सिते मृतः॥")
श्यामलता। इति रत्नमाला॥

मसूरा, स्त्री, (मस्यति परिणमतीति। मस्+ऊरन्। स्त्रियां टाप्।) वेश्या। मसूरकलायः। इति मेदिनी। रे, २०१॥

मसूरिका, स्त्री, (मसूरेव। मसूरा+कन्। स्त्रियां टाप्। अत इत्वञ्च।) कुट्टनी। इति शब्दमाला॥ ॥ वसन्तरोगः। तल्लोकप्रसिद्धिय टीका इति ख्याता। सा तु शीतला-वर-माला-मसूरिकापूर्व्वेण भवति। यथा,—
"विस्फोटमसूरिका वराभाष मसूरिका।
तत्कर्ण बाहुमूलाच प्रस्फोटेन प्रचीतयाम्।
बाहुमूले च प्रत्यन्ति रक्तोऽर्पितकराणि च।
तत्कर्ण रक्तमिश्रितं स्फोटकज्वरभञ्जनम्॥"
इति वसन्तरोगतन्त्रम्॥
तत्पर्य्यायः। पापरोगः २ रक्तवटी ३ मसूरी ४। इति शब्दरत्नावली॥ ॥ अथ मसूरिकाधिकारः। "तत्र मसूरिकाविषयकनिदानपूर्व्विकां संप्राप्तिमाह।
'कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः।
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः।
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः॥'
भावार्थस्तु। विरुद्धाध्यशनादिभिः कदाचिद्विरुद्धान्नाशनादिभिः। अत्र च अध्यशनादयं वाशिवमदर्श अध्यशनम्। दुष्टनिष्पावशाकाद्यैः दुष्टनिष्पावशाकादिभिः। शाकश्चात्र कलायादिप्रभृति। ते:। प्रदुष्टपवनोदकैः कलितदुष्टशर्करैर्वाष्पीकृताः। कुम्भीवनत्वादि देशे देशे कुपिताः दोषाः। दुष्टरक्तसंयुक्ता मसूराकृतिः अधुना ईदृश पिडकाः। दुष्टानि मसूरिकोत्पत्तिकारणानि। मसूराकृतिसंस्थाना मसूरस्य या आकृतिः तद्वत्संस्थानमाकृतिर्यासां ताः॥ ॥ अथ पूर्व्वरूपमाह।
'तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः।
त्वचि शोथः सवैवर्ण्यो नेत्ररागश्च जायते॥'
वातजामाह।
'स्फोटाः श्यावारुणा रूक्षास्तीव्रवेदनयान्विताः।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः॥
'सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः।
शोषस्ताल्वोष्ठजिह्वानां तृष्णा चारुचिसंयुता॥'
पैत्तिकामाह।
'रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्रवेदनाः।
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः॥
'विड्भेदश्चाङ्गमर्द्दश्च दाहस्तृष्णारुचिस्तथा।
मुखपाकोऽक्षिपाकश्च ज्वरस्तीव्रः सुदारुणः॥'
रक्तजामाह।
'रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः॥'
अथ कफजामाह।
'श्वेताः स्निग्धा भृशं स्थूलाः कण्डूरा मन्दवेदनाः।
मसूरिकाः कफोत्थाश्च चिरपाकाः प्रकीर्त्तिताः॥
कफप्रसेकः स्तैमित्यं शिरोरुग्गात्रगौरवम्।
हृल्लासः सारुचिर्निद्रा तन्द्रालस्यसमन्विताः॥'
सान्निपातिकीमाह।
'नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः।
पूतिस्रावाश्चिरं पाकाः प्रभूताः सर्व्वदोषजाः॥'
चर्म्मपिडकामाह।
'मसूरिकात्वचं प्राप्ता जलबुद्बुदसन्निभाः।
स्वल्पदोषाः प्रयत्नेन भिन्नाः सिध्यन्ति च॥'
अयं भावः। स्वल्पदोषत्वाच्च इव यतन्ते रक्ता-श्रयत्वात्॥ ॥ रक्तजामाह।
'रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः।
साध्या नात्यर्थदुष्टास्तु भिन्ना रक्तं स्रवन्ति च॥'
अत्या रक्तस्था रक्तर्जा:। नात्यर्थदुष्टास्तु अत्यर्थ-दुष्टशोणिताः कृच्छ्रसाध्याः। भिन्ना रक्तं स्रवन्ति च इत्यपि बाध्याः॥ ॥ मांसजामाह।
'मांसस्थाः कठिनाः स्निग्धाश्चिरपाकाः घनत्वचः।
गात्रशूलारतिकण्डूज्वरतृष्णासमन्विताः॥'
मेदजामाह।
'मेदोजा मण्डलाकारा मृदवः किञ्चिदुन्नताः।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः।
सम्मोहारतिसन्तापाः कश्चिदाभ्यो विनिस्तरेत्॥'
अस्थिमज्जगते द्वाह।
'क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः।
मज्जजा भृशसम्मोहा वेदनारतिसंयुताः।
छिन्दन्ति मर्म्मधामानि प्राणानाशु हरन्ति च।
भ्रमरेणैव विद्धानि कुर्व्वन्त्यस्थीनि सर्व्वशः॥'
अस्थिमज्जगतानाह। भ्रमरेणेव ... इति। अस्थिगतेति अस्थिगतमज्जगताः शुक्रगतास्तु कथं

मस्तुलुङ्गक:, पुं, (मस्तुलुङ्ग+स्वार्थे कन्।) मस्तिष्कम्। इति हेमचन्द्र:। ३।२८८॥

मघ, पुषि। इति कविकल्पद्रुम:। (भ्वा०-पर०-सक०-सेट्।) मघति। इति दुर्गादास:॥

मघ, इ क लिखि। इति कविकल्पद्रुम:। (चुरा०-पर०-सक०-सेट्।) इ क, मंघयति। लिखि दीप्तौ। इति दुर्गादास:॥

मघ, इ ङ हठौ। इति कविकल्पद्रुम:। (भ्वा०-आत्म०-सक०-सेट्।) इ, मंघते। ङ, मंघते। इति दुर्गादास:॥

मघ, ऊ क पूजे। इति कविकल्पद्रुम:। (अदन्त-चुरा०-पर०-सक०-सेट्।) मघयति। इति दुर्गादास:॥

मघ:, पुं, (मह्यते पूज्यतेऽसाविति। मह+"पुंसि संज्ञायां घ: प्रायेण।" ३।३।११८। इति घ:। मह+अप् इत्युज्ज्वलदत्त: ।३।१८८।) उत्सव:। इत्यमर:। १।७।१८८॥ (यथा, माघे। ६।१९।
"न खलु दूरगतोऽप्यतिवर्त्तते
महमसाविति बन्धुतयोदितै:॥"
मह्यते पूज्यते इति।) तेज:। इति मेदिनी। हे, ७॥ यज्ञ:। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ७१।१८।
"तस्मात् प्राशवि राधाम: यज्ञे यज्ञं सुरा सुता:।
मघै: सुरेश्वमर्षन्ति वयमन्ये च मानवा:॥")
माहिष:। इति हेमचन्द्र:॥ (त्रि, महत्। यथा, ऋग्वेदे। १०।६१।८।
"मघे इयते मान्दं मधु।"
"मघे महति।" इति तद्भाष्ये सायण:।)

मघ:, [स्] क्ली, (मह्यते पूज्यतेऽसाविति। मह+"सर्वधातुभ्योऽसुन्।" उणा० ४।१८८। इति असुन्।) धनम्। (मह्यते पूज्यते इति। मह+असुन्।) तेज:। इति मेदिनी। से,१०॥ (यथा, रघुटीकायां मल्लिनाथ:।
"अमरावतिनिरोधमशान्त्यै
मानवायनमचिन्त्यविभवम्।
तं भरं भुवि ऊर्ध्वं सुरी
मन्वते किमपि तुन्दिलं मघ:॥"
महन्ते पूज्यन्ते देवा येनेति। मह+असुन्।) यज्ञ:। इति शब्दरत्नावली॥ (उदकम्। इति निघण्टु:।१।१२॥ पूज्यमाने, त्रि। यथा, वाजसनेयसंहितायाम्। २०।६।
"त्विषा मे भर्ग वाक्यो मघो मघु: जरायु
भाम:॥"
"वाच वाविरिन्दं मघ: पूज्यमानात्।" इति तद्भाष्ये महीधर:॥ महति। यथा, ऋग्वेदे। ८।७२।११।
"मघो राधे तनुमा अभिधीमहि।" "मघो महते राधे धनाय।" इति तद्भाष्ये सायण:॥)

मघक:, पुं, (मघ: बाहुवि ... प्रभावत्यपि। मघक+के+क:। पृषोदरादित्वात् साधु:।) बहुधान्येर:। इति जटाधर:॥

मघत्, स्त्री, (मह्+अति। निपातितश्च।) राध्यम्। इति मेदिनी। घे, १०॥ (यथा, छान्दोग्योपनिषदि। ५।२।४।
"अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ इत्यादि॥" मघा। यथा, महाभारते। १।२१९।४४।
"सुसेन चौषियो भवति तपसा विन्दते मघत्॥"
उदकम्। इति निघण्टु:। १।१२।)

मघत्, त्रि, (मह्यते पूज्यतेऽसौ इति। मह्+"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा० २।८४। इति अति:। निपात्यते।) महान्। महती। बहु:। इति मेदिनी। ति, ९४०॥ तत्पर्याय:। विमहत्तम् २ पृथु ३ बृहत् ४ विशालम् ५ पृथुलम् ६ बहुग् ७ उरु ८। विपुलम् ९। इत्यमर:। ३।१।६०॥ पुलम् १० विशोचम् ११। इति शब्दरत्नावली॥ (यथा, रघौ। १२। ४०।
"तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम्॥")
तद्वैदिकपर्याय:। मघ: २ भाम: ३ इवत् ४ उशिन:५ तवस: ६ तविष:७ महिष: ८ अभ्व: ९ ऋभुक्षा:१० उक्षा ११ विहाया: १२ यहः १३ ववक्षिथ १४ विवक्षे १५ अम्भृण:१६ माहिन: १७ गभीर: १८ ककुह: १९ रभस: २० व्राधन् २१ विरप्शी २२ अद्भुतम् २३ वेतिष्ठ: २४ बर्हिषत् २५। इति पञ्चविंशतिर्महन्नामानि। इति वेदनिघण्टौ ३ अध्याय: ३। (प्रकृतेराद्यो विकार:। यथा, सांख्यतत्त्वम्। १। ६१।
"सत्त्वरजस्तमसां साम्यावस्था प्रकृति: प्रकृतेर्महान् महतोऽहङ्कार:॥" इति॥) महच्छब्दश्च शब्दादिशब्दविशेषणत्वे पूर्वं प्रयोगविधिर्यथा,—
"महति तेजे तथा भाषि वेदे ज्योतिषिके द्विधे। भाषायां यदि नेदाये महच्छब्दो न दीयते॥" इति भट्टिप्रथमसर्गीयचतुर्दशश्लोकटीकायां भरत:॥

महती, स्त्री, (महत्+ङीप्।) वल्लकीभेद:। इति मेदिनी। ते,१३०॥ नारदवीणा। इत्यमरटीकायां भरत:॥ (यथा, शिशुपालवधे। १।१०।
"रणद्भिराघट्टनया नभस्वत: पृथग्विभिन्नश्रुतिमण्डलै: स्वरै:।
स्फुटीभवद्‌ग्रामविशेषमूर्च्छना-
मवेक्षमाणं महतीं मुहुर्मुहु:॥")
बृहती। वार्त्ताकी। इति राजनिर्घण्ट:॥ (कृच्छ्रौषधव्रतविशेष:। यथा, मात्स्ये। १९१। ७१।
"महती भक्ती भोक्ता पुत्रदेवा शक्ति: सुता। अपाठापोऽपि बृहता द्रुतमोऽथ बक-
धव:॥"
प्रादेशमात्रवर्त्तवक्त्रीविशेष:। यथा, मात्स्ये। ११६। २३—२४।
"वर्षाका चन्द्रका चैव कावेरी महती तथा। धारा धर्मावती दुष्ता विदुषा वेदवत्यपि। त्रिपुरा सरस्वती कृष्णा च पारियात्राश्रिता:
स्मृता:॥")

महतीद्वादशी, स्त्री, (महतीति ख्याता द्वादशी।) श्रवणद्वादशी। यथा,—
"मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता। महती द्वादशी ज्ञेया उपवासे महाफला॥"
इति मार्कण्डे १४। अध्याय:॥

महत्त्वं, क्ली, (महत: तत् तत्त्वमिति।) चतुर्विंशतितत्त्वान्तर्गतद्वितीयतत्त्वम्। तत्तु प्रकृतेरुत्पन्नम्। अहङ्कारस्य कारणम्। तत्पर्याय:। यथा,—
"महानात्मा मतिर्विष्णुर्जिष्णु: शम्भुश्च वीर्य-
वान्।
बुद्धि: प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृति: स्मृति:। पर्यायवाचकै: शब्दैर्महानात्मा विभाव्यते। तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधि-
गच्छति॥"
इति महाभारते आश्वमेधिकपर्व॥

अपि च।
"एका सर्वगता भाषा मन्त्रियुक्तेश्वरा:। अविकारात् प्रधानात् महत्तत्त्वं प्रजायते। महानिति यत: ख्यातिर्लोकानां जायते सदा। अहङ्कारश्च महतो जायते मानवर्षभ:॥"
इति मात्स्ये ३ अध्याय:॥

महत्तर:, पुं, स्त्री, (अनयोरतिशयेन महान्। महत्+तरप्।) शूद्र:। यथा,—
"शूद्र: स्यात् पादजो दासो ग्रामकूटो मह-
त्तर:॥"
इति त्रिकाण्डशेष:॥
(यथा, कथासरित्सागरे। ९। ३४।
"कैमार्थं रचितोऽसीति पोऽपृच्छच्च महत्तरान्। ते च न्यवेदयंस्तस्मै ब्रवीहि निवसाम माम्॥") अतिशयमहति, त्रि। (यथा, महाभारते। ७।१९९।५९।
"ददर्श अपद्रदेशं गर्मदीपैरभिद्रुतम्। अशोभनमथाभ्यय इदमत्र महत्तरम्॥")

महत्त्वं, क्ली, (महत्+त्व।) महतो भाव:। यथा, भाषापरिच्छेदे।
"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्।"
"महत्त्वं षड्विध इति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन। द्रव्यसमवेतसमवेतानां रूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणम्।" इति सिद्धान्तमुक्तावली॥ (श्रेष्ठत्वम्। यथा, रामायणे। २।१११।३०।
"अवाप गुरोरपि महत्त्वमीयुष:॥"
"महत्त्वं श्रेष्ठत्वम्।" इति तट्टीका।)

महत्त्वीक:, पुं, (महत्त्वाय बीकयति। बीक+ अण्।) भूरादिसप्तलोकान्तर्गतचतुर्थलोक:। यथा,—
"भूर्भुव: स्वर्महश्चैव जनश्च तप एव च। सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिता:। चतुर्थस्त्वथ महल्लोको कल्पस्थायिनां"

तदा हि दह्यते सर्व्वं त्रैलोक्यं भूर्भुवादिकम् ।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः ॥"
इति वह्निपुराणम् ॥
"चतुर्थे तु महर्लोके तिष्ठन्ते कल्पवासिनः ॥"
इति देवीपुराणम् ॥

महर्षभी, स्त्री, (महती चासौ ऋषभी चेति कर्म्मधारयः ।) कपिकच्छुः । इति राजनिर्घण्टः ॥

महर्षिः, पुं, (महांश्चासौ ऋषिश्चेति ।) व्यासादिः । इति त्रिकाण्डशेषः ॥ अस्य व्युत्पत्त्यादिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतैः ।
एष सन्निचयो यस्माद् ब्रह्मणश्च ततस्त्वृषिः ॥
निवृत्तिसमकालन्तु बुद्ध्याऽव्यक्तऋषिस्त्वयम् ।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः ॥
गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम् ।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता ॥
सेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः ।
निवर्त्तमानैस्तैर्बुद्धा महान् परिगतः परः ॥
यस्मादृषिः परत्वेन महांस्तस्मान्महर्षयः ।
ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वै ।
ऋषयस्तत्परत्वेन भूतादिऋषयस्ततः ।
ऋषिपुत्रा ऋषीकास्तु मैथुनाद्गर्भसम्भवात् ॥
परत्वेन ऋषन्ते वै भूतादिऋषिकास्ततः ।
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्रकाः ॥
श्रुत्वा ऋषं परत्वेन नाम तस्मात् श्रुतर्षयः ।
अव्यक्तात्मा महात्मा वाहङ्कारात्मा तथैव च ।
भूतात्मा चेन्द्रियात्मा च तेषान्तु ज्ञानमुच्यते ।
इत्येवमृषिजातिस्तु पञ्च तान् नामभिः शृणु ॥
भृगुर्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः ।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश ।
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः ।
परत्वेनर्षयो यस्मान्मतास्तस्मान्महर्षयः ॥"
इति मात्स्ये १२० अध्यायः ॥

महल्लकः, पुं, (महसः स्त्रीरक्षादिरूपात् विपुलात् भारात् निवर्त्तः लाति प्राप्नोति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ततः स्वार्थे कन् । यद्वा, महान्तं चरित्रगुणं लाति आददातीति । लक् आस्वादने + अच् ।) अन्तःपुररक्षकः । तत्पर्य्यायः । सौविदल्लः २ कञ्चुकी ३ स्थापत्यः ४ सौविदः ५ विराङ्गः ६ । इति जटाधरः ॥ सौविदल्लकः ७ वास-वेदिकः ८ । इति शब्दरत्नावली ॥

महल्लिकः, पुं, (महान्तं चरित्रगुणं लिखतीति । महत् + लिख + कः । पृषोदरादित्वात् साधुः ।) अन्तःपुरचरः । खोजा इति भाषा । तस्य लक्षणं यथा,—
"उन्मत्तोऽनपत्यो यः स्त्रीस्वभावो महल्लिकः ॥"
इति शब्दमाला ॥

महस्, क्ली, (मह्यते पूज्यतेऽनेनेति । मह + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८९ । इति असुन् ।) तेजः । उत्सवः । इत्युणादि-कोषः ॥

महा, स्त्री, (मह्यते पूज्यते इति । मह + घ । स्त्रियां टाप् ।) गोपघण्टी । इति शब्दचन्द्रिका । गोरक्षचाकुलिया इति भाषा ॥ स्त्रीगवी । इति शब्दरत्नावली ॥

महाकच्छः, पुं, (महान् विपुलः कच्छो जल-प्रायदेशोऽस्य ।) समुद्रः । वरुणः । इति मेदिनी । छे, ६ ॥ पर्व्वतः । इति शब्दरत्नावली ॥

महाकण्टकिनी, स्त्री, (महती चासौ कण्टकिनी चेति ।) विन्धारकम् । इति शब्दचन्द्रिका । पलिमनसा इति भाषा ॥

महाकन्दः, पुं, (महांश्चासौ कन्दश्चेति ।) रसोनकः । इत्यमरः । २ । ४ । १४८ ॥ मूल-कम् । इति शब्दरत्नावली ॥ चाण्डमूलकम् । रक्तलशुनम् । राजपलाण्डुः । इति राज-निर्घण्टः ॥

महाकपित्थः, पुं, (महांश्चासौ कपित्थश्चेति ।) बिल्ववृक्षः । इति त्रिकाण्डशेषः ॥

महाकरञ्जः, पुं, (महांश्चासौ करञ्जश्चेति ।) करञ्जविशेषः । बड़ करञ्जा इति भाषा ॥ तत्पर्य्यायः । षड्ग्रन्था २ हस्तिचारिणी ३ उद-कीर्य्यः ४ विषघ्नी ५ काकघ्नी ६ मदहस्तिनी ७ सारङ्गिका ८ मधुमती ९ रसायनी १० हस्ति-रोहणकः ११ कलिकरञ्जकः १२ सुमनाः १३ काकभाण्डी १४ मधुमत्ता १५ । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । कटुत्वम् । विषवात-विचर्च्चिकाकुष्ठकण्डूदोषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

महाकर्णिकारः, पुं, (महांश्चासौ कर्णिकारश्चेति ।) आरग्वधः । इति राजनिर्घण्टः ॥

महाकायः, पुं, (महान् कायोऽस्य ।) नन्दी । स च शिवद्वारपालः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १३ । १५० । ३४ ।
"नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः ॥")
हस्ती । इति केचित् ॥ (महान् कायः शरीर-मिति ।) बृहत् शरीरम् । तद्वति, त्रि ॥ (यथा, महाभारते । १ । १५६ । १९ ।
"महाभरं महाकायं महामायमरिन्दमम् ॥"
स्त्रियां टाप् । कुमारानुचरमातृकाविशेषः । यथा, महाभारते । ९ । ४६ । ३३ ।
"रोहिताक्षी महाकाया चर्च्चिका च
भूमिप ॥")

महाकार्त्तिकी, स्त्री, (महती चासौ कार्त्तिकी चेति ।) रोहिणीनक्षत्रयुक्ता कार्त्तिकी पूर्णिमा । यथा,—
"प्राजापत्यं यदा ऋक्षं तिथिश्चैव तदा भवेत् ।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ॥"
इति पाद्मे [illegible] खण्डे [illegible] अध्यायः ॥

महाकालः, पुं, (महांश्चासौ कालश्चेति ।) विष्णु-महादेवयोरवतारविशेषः । यथा । काशी-खण्डात् महाकालात् । इति लिङ्गार्च्च-नतन्त्रम् ॥ महादेवः ॥ (अस्य निर्वचनं यथा, महा-निर्व्वाणतन्त्रे । ४ । ३१ ।
"कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः ।
महाकालस्य कलनात् त्वमाद्या कालिका
परा ॥")
प्रमथगणविशेषः । इति मेदिनी । ले, १११ ॥ (उज्जयिनीस्थशिवलिङ्गविशेषः । यथा, कथा-सरित्सागरे । ११ । ३१—३२ ।
"अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः ।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥
यस्यां वसति विश्वेशो महाकालवपुः स्वयम् ।
शिथिलीकृतकैलासनिवासव्यसनो हरः ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ४९ ।
"महाकालं ततो गच्छेन्नियतो नियताशनः ।
कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत् ॥")
लताविशेषः । माकाल इति भाषा ॥ तत्-पर्य्यायः । उरुकालः २ किम्पाकः ३ काक-मर्द्दकः ४ । इति रत्नमाला ॥ काकमर्द्दः ५ देवदालिका ६ दाला ७ दालिका ८ जलजः ९ घोषकाकृतिः १० । इति राजनिर्घण्टः ॥ (यथा,
"अनाम्नि लिङ्गदेवेन बदरास्यदारिता ।
महाकालफलेनैव कः स्वादेन न वञ्चितः ॥"
उद्भटः ॥)
शिवपुत्रविशेषः । तस्य जन्मवृत्तान्तं यथा,—
श्रीदेवा ऊचुः ।
"एष वैश्वानरः श्रीमान् भूरितेजोमयो वशी ।
गङ्गामेत्य पुनश्चैव मत्तः संगतोऽस्मि ॥
दृष्ट्वा विस्मिताः सर्व्वे योनिकोपं पुरःस्थितम् ।
ततो निवेदयामासुः शम्भवे सर्व्वदैवते ॥
ततः शम्भुः स्वं रेतो वह्नौ दहनाय तत् ।
उग्रकर्म्म महाबाहुर्भेदाभेदगुणकारणम् ॥
अपाठ्यपद्यमालस्य तेजसः प्रमद्रभीनः ।
अप्रमेयमनिमर्त्य त्रिदिवेषु प्रयाति च ॥
तयोः कारणयोः सतः शंभुर्महाकालयोः ।
एको भृङ्गाख्यः सतो निरालम्बनिर्भोऽपरः ॥
भृङ्गी तस्य तदा जज्ञे नाम भर्तोति वाक्येन ।
महाकालेति वहनस्य महाकालेति कीर्त्तनम् ॥
तनसौ मातृनाम शङ्करः प्रमथोत्तमैः ।
आजन्मा नादि तदा क्रमान्मध्येऽभवर्हिनी ॥
शम्भो तौ महाकालौ तेजोमात्रा निराकृती ।
क्रमात्कर्षकौ जना तौ हरौ द्वारि तत्रो-
भवत् ॥"
इति कालिकापुराणे ४६ अध्यायः ॥
तस्य तपस्याकारणं तन्नामास्य यथा,—
"अथैकदा महाकालौ विष्णुं दृष्टिमान्निदरे ।
कन्याकलोक्तराद्वैयो क्रोधेनो रविनन्दनः ॥
तदा वा तं बुद्धि तथा वृद्धौ अन्तरान्तरम् ।
तदा तं सुमहाकालो द्वारि द्वारि प्रतिष्ठितौ ।
कर्म्मावतारे वा देवो शुभवं सर्व्वदम् ।
तं अवलोकनं दृष्ट्वा स्वभावात्मा पश्चिमः ॥
अवतारात् क्रमाद्भैरवो रुद्रवैशङ्कितोऽभवत् ।
त्रिशूलधृता रक्तरक्ताम्बरधरा ।
निःश्वासं दिव्यदृष्ट्या प्रहारात् तथैव च ।
देवताभ्यः त्रिदिवं सर्व्वं सिद्धेश्वरः ॥

तौ निःसरन्तौ सहसा तथाभूतामनिन्दिताम् ।
चयोन्मां वीक्षितुं चाभ्येहं गच्छन्ती प्रियम् ॥
दृष्टवन्तुर्महाकामौ भाविशुद्धात्ममानसौ ।
भृङ्गी चापि महाकालः प्राप्तकालश्च कोपनः ॥
दृष्ट्वा तौ मातरं देवीं तदा भूतावधोमुखौ ।
चिन्ताव्याकुलचित्तौ तौ निःश्वसन्तुष्टमम् ॥
तौ चयन्तौ तदा देवी ददर्श स्मितपूर्विका ।
चुकोप च तदापश्यं वाक्यमेतदुवाच ह ॥
यद्भूतान्तु मां कथादृष्टमहामयमतात् ।
भवन्तौ तनयौ पुत्रौ हीनमर्यादाविवर्जितौ ॥
तस्मादिमामनर्यादां भवन्तौ निरपत्रपौ ।
अङ्गन्तौ तनौ भूपावत्तलोर्णव मानुषि ॥
मानुषौ योनिमासाद्य मानुषोयसदोषतः ।
भविष्यतो भवन्तौ तु माद्वाल्यगतावुभौ भुवि ॥
इति तावुभया प्रभो वरपुत्रौ महामतौ ।”
“अथोभया धर्म देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप ॥
दृष्ट्वैव चरन्तौ तावुमायाः पञ्चौ पुत्रैः ।
गर्भेतयथवमूर्तौ साधवश्चैव मानवौम् ॥
तौ दृष्ट्वा स्मरद्देवी गौरीं वृषभकेतनः ।
स्मितप्रसन्नवदनः प्रहसन्निव भाविनीम् ॥

ईश्वर उवाच ।

यं ते मानुषी गर्भः प्रिये तारावतीति या ।
भृङ्गीमहाकालयोस्तु जन्मनि विहिता स्वयम् ॥
तस्यां ममान्यकामोऽयं नाम्नी प्रसुमिथोऽस्ति ।
त्वमिदानीं स्वयं वाक्यं यतो प्रविश्य

भाविनि ! ॥

तत्र उत्पादयिष्यामि महाकालश्च भृङ्गिणम् ।

देव्युवाच ।

ममैव मानुषी गर्भोऽयं वृषभकेतन ! ।
विमानि तेऽत्र वचनामुत्पादय सुतद्वयम् ।
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्मात्तु कामार्थं समुपस्थितः ॥
ततः चापमेवाविशद् देवी तारावती सती ।
कामयाथ महादेवं स्वयमेवाममत्सरा ।
तस्मिन् कालेऽभवद्गर्भः कापालो चाद्रिमात्स-

जः ।

तामावतारे तस्यान्तु सदो जातं सुतद्वयम् ।
वानरद्वयमाद्यं च । तथा प्राज्ञात्मजाननम् ।”

इति कालिकापुराणे ४९—५१ अध्यायाः ॥

वामापुराणे महाकालस्य यथा,—

सनत्कुमार उवाच ।

“कपिनो भवना सर्वेः संदृश्य चापि घातिताः ।
अन्धकारान्धकाभास ! त्वनन्तार्थं कथं गुरो ! ॥
श्रुत्वा चासुरमिच्छागो वचनैतद्विजोत्तम ! ।
कोऽयं भृङ्गी महाकालो नामो वेताल भैरवौ ॥
वेतालश्च महाकालं भैरवं भृङ्गिणं तथा ।
तत्र मे दिवाकामुं न ! कथयेदां चतुष्टयम् ॥

मार्कण्डेय उवाच ।

श्रुत ततो महाकाले मानुषत्वे च भृङ्गिणि ।
वेतालभैरवाख्ये च तथाभूते द्विजोत्तमाः ॥
तरत्ये च वेताले भैरवे तेन वन्दते ।
अन्यकं तपसा पूर्वं भृङ्गिणमकरोद्धरः ।
अन्धकस्तु हरं पूर्वं विरुध्याभ्यागतः ।
पश्चाद्धरं समाराध्य पुत्रोऽभूत्तस्य सोऽसुरः ।
भृङ्गिशेषादृषिद्भृङ्गिं तं संज्ञया चाकरोद्धरः ।
सदैव तु महाकालं नाथं चलितुं हरः ।
विष्णुना छिन्नबाहुं तं महाकालमथाकरोत् ।
एवं सुनिपातितो संजातश्च चतुष्टयम् ।
वेतालो भैरवो भृङ्गी महाकालिस्तु क्रमात् ।”

इति कालिकापुराणे ५५ अध्यायः ॥ ० ॥

तस्य ध्यानादि यथा,—

“महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिशुम् ॥
व्याघ्रचर्मावृतकटिं तुन्दिलं रक्तवाससम् ।
त्रिनेत्रमूर्द्धकेशञ्च मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखण्डमुग्रं ज्वलन्निभम् ॥
तथा च कुमारीकल्पे ।
देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत् ।
हूं स्फ्रों या रां लां वां क्रों महाकालभैरव
सर्वविघ्नान्नाशय नाशय ह्रीं श्रीं फट् स्वाहा ।
इत्यनेन पाद्यादिभिराराध्य निवर्पयित्वा मन्त्रेण
देवीं यथोपचारैः पूजयेत् । तथा च काली-
तन्त्रे ।
महाकालं यजेद्यत्नात् पश्चाद्देवीं प्रपूजयेत् ।
कालीकल्पे ।
कवचं स्फ्रों पशुकुल यां रां लां वाच क्रोम्ततः ।
महाकालभैरवेति सर्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुद्धरेत् ।
फट् स्वाहया समायुक्तो मन्त्रः सर्वार्थसाधकः ॥”

इति तन्त्रसारः ॥

महाकाली, स्त्री, (महाकाल + सम्बन्धे ङीप् ।)
महाकालस्य पत्नी । सा तु पञ्चवक्त्रादशभु-
जाकालीविशेषः । इति तन्त्रम् ॥ (इयमेव परात्मशक्ते-
स्तामसी शक्तिः । यथा, देवीभागवते ।१।५।२०।
“सत्त्वात्तु सात्त्विकी शक्ती राजसी तामसी
तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः
स्त्रियः ॥”)

अथ महाकालीमन्त्रः ।

“ॐ फ्रें फ्रें क्रों क्रों पशून् गृहाण हूं फट्
स्वाहा । अस्य महाभैरवीमन्त्रेण यावत् क्रूर-
कर्माणि प्रयोगः कर्त्तव्यः । अथ महाकाली-
मन्त्रप्रयोगः । तत्र न्यासमुद्रादिकं न कर्त्त-
व्यम् । तथा च ।
न्यासमुद्रादिकं किञ्चिन्नात्र कार्यं विचारणा ।
सङ्कल्पैव संपूर्णं सद्य कृत्वाऽथ कालिकाम् ॥
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रत्रिलोचनाम् ।
प्रतिवक्त्रं दंष्ट्राकरालवदनां भयानाम् ॥
दशबाहुयुतां देवीं ध्यायेत् सुविभूषिताम् ।
ध्यात्वैवं साधकः सार्द्धं साधयेत् सर्वसिद्धिम् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री चामुण्डा चापराजि-
तयो ।
पूर्वादीशानपर्यन्तं क्रमशस्ते स्थिता इमाः ।
तत्र क्रमः । देवीं ध्यात्वा दशदिक्षु देवी
संपूज्य मातृगणदेवताः पूर्वादिक्रमेण पूज-
येत् । तथा ।
नानोपचारसंयुक्तं बलिं प्रकल्पितोऽस्मरे ।
मुण्डमालैरियं श्रद्धो देवीमखं यथाक्रमा ।
अभिषः पिशुमद्रेय तथा निर्मितकाविकाः ।
सद्धूमसमालाभिर्निर्मिताङ्गारशोभनः ।
समाधाहेरियं बलि कालिकामन्त्रयोजनः ।
उच्चाटनं मारणे च सर्वकार्ये तथा ।
दक्षिणस्यां दिशि स्थित्वा मामादेवैविधा-

मताः ॥”

इति तन्त्रसारः ॥

जिनानां चतुर्विंशतिशासनदेवतान्तर्गतदेवी-
विशेषः । इति हेमचन्द्रः ॥ ० ॥

महाकाव्यं, क्ली, (महच्च तत्काव्यञ्चेति ।) काव्-
यग्रन्थविशेषः । तत्पर्यायः । सर्गबन्धः २ । इति
त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
“सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥”

इति साहित्यदर्पणे ६ परिच्छेदः ॥ ० ॥

महाकाव्यस्य यथा, कालिदासकृतकुमार-
सम्भवरघुवंशप्रभृतयः । माघकविकृतशिशुपाल-
वधम् । भारविकृतकिरातार्जुनीयम् । श्रीहर्ष-
कृतनैषधचरितम् । भट्टिकाव्यम्, रावणव-
धकाव्यम् ॥

महाकुररा, स्त्री, (महती चासौ कुररा चेति ।)
काकमारी । इति राजनिर्घण्टः ॥

महाकुम्भी, स्त्री, (महती चासौ कुम्भी चेति ।)
कट्फलः । इति राजनिर्घण्टः ॥

महाकुलः, त्रि, (महत् कुलं वंशोऽस्य ।) उच्च-
कुलजातः । तत्पर्यायः । कुलीनः १ आर्यः २
सभ्यः ३ सज्जनः ४ साधुः ५ । इत्यमरः । २ ।
७ । ३ ॥ कुलजः ६ अभिजातः ७ कौलेयः ८

जाय: १०। इति हेमचन्द्र: । ३ । ११६ । महाकुल: ११ कौलेय: १२ कौलेयक: १३ । इत्यमरटीका । कुक्कुर: १४ सारमेय: १५ कुलश्रेष्ठ: १६ । इति शब्दरत्नावली । (यथा, वृहत्संहितायाम् । ६७ । ४ ।
"भेदे वृत्तिविनाशो भेद: सुहृदां महाकुला-नाञ्च ।"
क्ली, उत्तमं कुलम् । यथा, राजतरङ्गिण्याम् । १ । ६१ ।
"द्वयोराप्लोकितं चित्रं तस्मिंस्तस्मिन् महा-कुले ।")

महाकुलीन:, त्रि, (महाकुलस्य अपत्यम् । महाकुल + "महाकुलादञ्खञौ ।" ४ । १ । १४१ । इति पक्षे खः ।) महाकुल: । यथा,—
"महाकुलीन ऐश्वाकं वंशं दाशरथिर्मम ।
पितु: प्रियकरो भर्त्ता क्षेमकारस्तपस्विनाम् ।"
इति भट्टि: । ५ । ७० श्लोक: ।
(स्त्रियां टाप् । यथा, रामायणे । २ । ३८ । ३ ।
"धीते ! महाकुलीनासि धर्म्मे च निरता सदा ।")

महाकुष्ठं, क्ली, (महच्च तत् कुष्ठञ्चेति ।) वृहत्कुष्ठरोग: । तत् सप्तविधं यथा,—
"पूर्व्वाविकं तथा श्वित्रं तत: काकणकं तथा ।
पुण्डरीकर्ष्यजिह्वे तु महाकुष्ठानि सप्त च ॥
पूर्व्वाविकं कपालोडुम्बरमण्डलाख्यम् । विश्व-सम्भोऽकारात्मो बहुधकविच्युः । ननु कथं विसर्पस्य महाकुष्ठेषु गणना सुश्रुतेन क्षुद्रकुष्ठेषूक्तत्वात् । उच्यते । लक्षणाघाता विसर्प्पिका सुश्रुतेन च क्षुद्रकुष्ठेषूक्ता धातुप्रविष्टस्तु चिरं महाकुष्ठमेव । एवंविधस्य विसर्पस्य चरकेण महाकुष्ठेषु दर्शितत्वात् । एतानि महाकुष्ठानि यौगुणदोषप्रभावसमावेशात् उत्तमदोषवत्त्वात् चिकित्सा ऽदुःसाध्या ।"
इति भावप्रकाश: । (एषां चिकित्सा क्षुद्रकुष्ठशब्दे द्रष्टव्या ।)

महाकूप:, पुं, (महांश्चासौ कूपश्चेति ।) वृहत्कूप: । गर्त्तविशेष: । अवट: २ । इति जटाधर: ।

महाकूल:, पुं, (महत् कूलमस्य ।) महाकुल: । बाहुज: । इति त्रिकाण्डशेष: ।

महाकोशफला, स्त्री, (महान् कोश: फले यस्या: ।) देवदाली लता । इति राजनिर्घण्ट: ।

महाकोशातकी, स्त्री, (महती चासौ कोशातकी चेति ।) हस्तिकोषा । इति राजनिर्घण्ट: । (अस्या: पर्य्यायो यथा,—
"महाकोशातकी घोषा हस्तिघोषा महा-फला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स्मृत: ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

महागद:, पुं, (महांश्चासौ गदश्चेति ।) ज्वर: । इति राजनिर्घण्ट: । (महारोग: । यथा, सुश्रुते । १ । ३३ अध्याये ।
"वातव्याधि: प्रमेहश्च कुष्ठमर्शो भगन्दर: ।
अश्मरी मूढगर्भश्च तथैवोदरमष्टमम् ।
अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदा: ।"
औषधविशेष: । यथा, सुश्रुते कल्पस्थाने ५ अध्याये ।
"एषोऽगदो हन्ति विषं प्रयुक्त:
पानाञ्जनाभ्यञ्जननस्ययोगै: ।
अवार्य्यवीर्य्यो विषवेगहन्ता
महागदो नाम महाप्रभाव: ।"
महती गदा ऽस्त्यस्येति महागदाविशिष्टे, त्रि । यथा, श्रीमद्भागवते । ३ । १८ । ८ ।
"मरकतवर्णं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम् ।
मर्म्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तै:
प्रचण्डमन्यु: प्रहसंस्तं बभाषे ।")

महागन्धं, क्ली, (महान् गन्धोऽस्य ।) हरिचन्दनम् । बोलम् । इति राजनिर्घण्ट: । (महागन्धयुक्ते, त्रि । यथा, हरिवंशे । १४३ । ४४ ।
"तत्र कण्ठे समासज्य महागन्धं नराधिप ! ।
आययावच्युतो यत्र दुरात्मा बलदर्पित: ।")

महागन्ध:, पुं, (महान् गन्धोऽस्य ।) कुटजवृक्ष: । इति राजनिर्घण्ट: । जलवेतस: । इति शब्दचन्द्रिका ।

महागन्धा, स्त्री, (महान् गन्धो यस्या: । स्त्रियां टाप् ।) नागबला । केविकापुष्पम् । इति राजनिर्घण्ट: । चामुण्डा । यथा, हेमचन्द्र: । २ । १२० ।
"चामुण्डा चर्च्चिका चर्म्ममुण्डा मार्ज्जारकर्णिका ।
कर्णमोटी महागन्धा भैरवी च कपालिनी ।"

महागव:, पुं, (महांश्चासौ गौश्चेति । "गोरतद्धितलुकि ।" ५ । ४ । ९२ । इति समासान्तष्टच् । गोशब्दस्यावस्य तथात्वम् ।) गवय: । यथा,—
"गवयो गवय: प्रोक्तो वनभवो महागव: ।"
इति राजनिर्घण्ट: ।

महागिरि:, पुं, (महान् गिरिकार्यमोक्षाधिपैस्य । यद्वा, महान् गिरिरिव ।) भीमसेन: । यथा—
"महागिरि: पुरुषादो भयानना दश-पूर्व्वज: ।"
इति हेमचन्द्र: । २ । ९३ ।
महान् गिरि: पर्व्वत: ।) वृहत्पर्व्वतश्च । (यथा, महाभारते । १ । ११० । १६ ।
"नागशतसमा प्रख्या इदमेव महागिरि: ।
आरोढुं नापि शक्नोति महाभिनवरागमस्य ।"
राजविशेष: । यथा, हरिवंशे । २ । ८६ ।
"अच्युतस्य [illegible] तदंशजो महागिरि: ।")

महागुरु:, पुं, (महांश्चासौ गुरुश्चेति ।) अतिगुरु: । स च पुरुषस्य पिता माता आचार्य्यश्च । स्त्रिया: पति: । अप्रजस्य पिता माता च । यथा । अत: पुत्रकर्त्तुर्जनको जननी माता पितामहश्चेति । इति मिताक्षरा । तदर्थविशेषणमाह शाता [illegible] ।
"त्रयो लिङ्गिदं वाराणि वाले वै पूर्व्वाचार: । [illegible] देवस्तु इतरे च ।"
शातातप: ।
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरु: ।
पतिरेको गुरु: स्त्रीणां सर्व्वस्याभ्यागतो गुरु: ।"
एकमपि यज्ञोक्ता नियमाद्वयापरि: । [illegible] अपि च समवेतं पठन्ति आचार्य्यस्य । पित्रादयो ये गुरवस्तेषामधिक: सर्व्वगुरुर्महागुरुश्च । आचार्य्यश्च उपनीय वेदं दद्यादयमाचार्य्य: स उदाहृत: । इति याज्ञवल्क्योक्त: । तत्र एषां मिताक्षरोक्तेन वेनाहृदिसम: । आश्वलायन: । मेतव्यो राजा पापेषु । आर्त्ते न पचेदुद्दिष्टमेवोपवास: स्मृत: । अप महते आश्रमस्य आशौचम् इति वच-नावसायात् । अवधार: कटादि: । अथ तवर्ण आरनालिकादिविलवणमिश्रं नभ पैष्टकं माम्भरि च । इति शुद्धितत्त्वम् । ० ।
तस्य गुरुमरणे संवत्सरपर्य्यन्तं निषिद्धकर्म्माणि यथा, कर्म्मलोचने ।
"महागुरुनिपाते च काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मचर्य्यञ्च यावत् पूर्णो न वत्सर: ।
अम्भमाद्यं परान्नञ्च गन्धं माल्यञ्च मैथुनम् ।
वर्ज्जयेद्गुरुपाते च यावत् पूर्णो न वत्सर: ।
तीर्थयात्रां विवाहञ्चाध्ययनं तर्पणन्तथा ।
संवत्सरं न कुर्व्वीत महागुरुनिपातने ।"
अपि च ।
"विशेषत: प्रियायुक्तो प्रमत्तपितृको द्विज: ।
यावत्संवत्सरं कर्म्म मनसापि न चाचरेत् ।
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मयज्ञं च यागं देवतत्तच यत् ।"
इति कालिकापुराणे ६७ अध्याय: ।

महागुल्मा, स्त्री, (महान् गुल्मो यस्या: ।) सोमवल्ली । इति राजनिर्घण्ट: ।

महागुहा, स्त्री, (महती गुहा यस्या: ।) शालपर्णी । इति राजनिर्घण्ट: ।

महागोधूम:, पुं, (महांश्चासौ गोधूमश्चेति ।) वृहद्गोधूम: । बड़ गम इति भाषा । यथा,—
"गोधूम: सुमनोऽपि स्यात्त्रिविध: स च कीर्त्तित: ।
महागोधूम इत्याख्य: पश्चाद्देशात् स चागत: ।
मधूली तु तत: किञ्चिदल्पा सा मध्यदेशजा ।
निःशूको दीर्घगोधूम: क्वचिन्नन्दीमुखाभिध: ।
गोधूमो मधुर: शीतो वातपित्तहरो गुरु: ।
कफशुक्रप्रदो बल्य: स्निग्ध: सन्धानकृत् सर: ।
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्य: स्थिरत्व-कृत् ।"
[illegible]
"मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघु: ।
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुख: स्मृत: ।"
इति भावप्रकाश: ।

महाग्रीवः, पुं, (महती दीर्घा ग्रीवा कन्धरा यस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (शिवः । यथा, महाभारते । १३ । १७ । ८६ ।
"महानासो महाकम्बुर्महाग्रीवः श्मशान-
भाक् ॥"
शिवानुचरभूतविशेषः । यथा, हरिवंशे भविष्य-
पर्व्वणि । १३ । ९ ।
"कृशोदरो महाग्रीवः स्थूलजिह्वो हिमाङ्कुशः ।
पार्श्वकः सिंहहास उग्रतेजो महाहनुः ॥"
देशविशेषः । यथा, मार्कण्डेये । ५८ । १७ ।
"ताम्रग्रीवा महाग्रीवा श्वेतुरा शकु-
धारिणः ॥")
तद्वद्ग्रीवायुक्ते, त्रि ॥
महाघासः, पुं, महतो देशस्य महता भूमेर्भा-
गाः । इति मुग्धबोधव्याकरणटीकायां दुर्गा-
दासः ॥
महाघूर्णा, स्त्री, (महती घूर्णा शरीरभ्रमणं यस्याः ।) सुरा । इति शब्दचन्द्रिका । (महती-
चासौ घूर्णा चेति ।) अतिशयभ्रमिश्च ॥
महाघोरः, त्रि, (महांश्चासौ घोरश्चेति ।) अतिशयभयानकः । यथा, शुद्धितत्त्वे ।
"यमद्वारे महाघोरे तप्ता वैतरणी नदी ।
तां च तर्त्तुं ददाम्येनां कृष्णां वैतरणीञ्च गाम् ॥"
महाघोषं, क्ली, (महान् घोषः कोलाहलो यत्रास्ति ।) हट्टम् । इति मेदिनी । षे, ५६ ॥
तद्वच्छब्दयुक्ते, त्रि ॥ यथा, महाभारते । १ । २२१ । ११ ।
"तेषां पुण्यमभागामनी मेरौ ध्यानादिकौ तथा ।
समाजघ्ने महाघोषां यादनस्य परिष्कृताम् ॥")
महाघोषः, पुं (महांश्चासौ घोषश्चेति ।) अति-
घोषकम् । इति मेदिनी । षे, ५६ ॥
महाघोषा, स्त्री, (महान् घोषो यस्याः । टाप् ।) कर्कटशृङ्गी । इति मेदिनी । षे, ५६ ॥ कुम्भकर्णी । इति शब्दचन्द्रिका ॥
महाङ्गः, पुं, (महान्ति दीर्घाणि अङ्गान्यस्य ।) उष्ट्रः । इत्यमरः । २ । ९ । ७५ ॥ गोक्षुरकः । इति राजनिर्घण्टः ॥ तद्वद-
ङ्गयुक्ते, त्रि ॥ (यथा, महाभारते ।१३।१७।८६।
"ऋषिश्च ऋषिभावश्च भासो भानकरो लघुः ।
उन्नतश्च महाङ्गश्च महागर्भपरायणः ॥")
महाचञ्चुः, स्त्री, (महती चञ्चुरग्रमस्याः ।) शाक-
विशेषः । तत्पर्य्यायः । दन्तचञ्चुः २ शिखाढ्यः ३
ग्रथनुका ४ स्थूलचञ्चुः ५ दीर्घपत्री ६ तिक्त-
पत्रा ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् ।
कषायत्वम् । अम्लमोदनत्वम् । गुल्मशूलो-
दराष्ठीलाविबन्धनाशित्वम् । रसायनत्वञ्च । इति
राजनिर्घण्टः ॥ पुं, तद्वच्चञ्चुयुक्ते च ॥
महाचक्रः, पुं, (महांश्चासौ चक्रश्चेति ।) धर्म-
चक्रः । इति हैमचन्द्रिकायामृषिः । चक्रवर्ति,
त्रि ॥
महाचरः, पुं, (महान् चरः स्पशः ।) देव-
ताचरः । इति रत्नमाला । तद्वत्परश्च ॥

महाच्छायः, पुं, (महती छाया यस्य ।) वटवृक्षः । इति राजनिर्घण्टः ॥ तद्वच्छायायुक्ते, त्रि ॥
महाच्छिन्ना, स्त्री, (महच्छिन्नमस्याः ।) महामेदा । इति राजनिर्घण्टः ॥ तद्वच्छिन्नयुक्ते, त्रि ॥
महाजः, पुं, (महांश्चासौ अजश्चेति ।) वृष-
च्छागः । (महतो जायते इति । महत्+जन्
+कर्त्तरि डः । पृषोदरादित्वात् साधुः ।)
महाकुलोद्भवे, त्रि ॥
महाजटा, स्त्री, (महती जटा अस्याः ।) रुद्रजटा । इति राजनिर्घण्टः ॥ (महती जटा ।) तद्व-
ज्जटा च ॥
महाजनः, पुं, (महांश्चासौ जनश्चेति ।) साधुः ।
यथा, महाभारते । ३ । ३१२ । ११९ ।
"वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
मन्वादिः । यथा,—
"प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्बत माययालम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्म्मणि युज्यमानः ॥"
इति श्रीभागवते षष्ठस्कन्धे अजामिलोपाख्याने
यमवाक्यव्याख्याने श्रीधरस्वामी ॥ (धनी । यथा,
मृच्छकटिके । १ ।
"मन्नं नैव हि कश्चिदस्य कुरुते सत्कारमाले
माद्दरात्
संप्राप्ता गृहमुत्सवेषु धनिनां मावज्ञयालोकते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापात-
कम् ॥")
महाजवः, पुं, (महान् जवो वेगो यस्य ।) शम्बरः ।
मृगारौ मृगः । इति राजनिर्घण्टः । अति-
वेगयुक्ते, त्रि ॥ (यथा, श्रीमद्भागवते । ७।८।२८।
"तस्माद्भयार्त्तं सत्वरावमोक्षणं
विमोचितास्तं ग्रहीत् महाजवः ॥"
स्त्री, कुमारानुचरगणविशेषः । यथा, महा-
भारते । ९ । ४६ । २९ ।
"महोलूकमुखी तद्वत् स्तनद्या महाजवा ॥")
महाजम्बुः, स्त्री, (महती चासौ जम्बुश्चेति ।)
वृक्षजम्बुः । यथा,—
"महाजम्बुर्महाजम्बू राजजम्बुर्ब्बृहत्फला ।"
इति रत्नमाला ॥
महाजम्बूः, स्त्री, (महती चासौ जम्बूश्चेति ।)
वृहज्जम्बुः । तत्पर्य्यायः । राजजम्बुः २ स्वर्ण-
माता ३ महाफला ४ शिखरिणी ५ कोकिलेष्टा
६ महानीला ७ वृहत्फला ८ । अस्य गुणाः ।
उष्णत्वम् । मधुररसत्वम् । कषायत्वम् । श्रम-
हरत्वम् । श्लेष्मातिसारविकारनाशित्वम् । वात-
करत्वम् । विष्टम्भित्वम् । दोषप्रशमनत्वम् ।
अग्निमान्द्यातिसारक्षयत्वम् । कण्ठकर्षकता-
पहरत्वञ्च । इति राजनिर्घण्टः ॥ जातिश्च ।

"कर्केन्द्रः कथितो गन्धो राजजम्बुफलार्णवः ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ।
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ।"
इति भावप्रकाशः ॥
महाजातिः, स्त्री, (महती जातिरस्याः इति ।
यद्वा, महती जातिरिव यस्याः प्रसिद्धत्वात् ।)
वासन्ती लता । इति राजनिर्घण्टः ॥ (महती
जातिरिति ।) श्रेष्ठवंशश्च ॥
महाजातीयः, त्रि, (महत्+"प्रकारवचने
जातीयर् ।" ५ । ३ । ६९ । इति जातीयर् ।
ततः । "आन्महतः समानाधिकरणजाती-
ययोः ।" ६ । ३ । ४६ । इति महतः आकारादेशः ।)
महतः प्रकारः । इति व्याकरणम् ॥
महाज्वाली, स्त्री, (ज्वालयति आच्छादयतीति ।
ज्वल आच्छादने+णिजन्तात् अच् । स्त्रियां ङीष् ।
ततः । महती चासौ ज्वाली चेति । यद्वा,
महांश्चासौ ज्वालश्चेति स अस्या अस्ति इति
अर्श आद्यच् ततः ङीप् । इत्यमरटीकायां भरतः ।)
घोषकलता । इत्यमरः । २ । ४ । ११० ।
राजकोषातकी । इति राजनिर्घण्टः ॥ तद्व-
ज्जालयुक्ते, त्रि ॥
महाज्यैष्ठी, स्त्री, (महती चासौ ज्यैष्ठी चेति ।)
महत्त्वविशिष्टा ज्यैष्ठीपूर्णिमा । सा यथा ।
यथा, स्कन्दपुराणे ।
"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता ।
ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्याम् ॥ १ ॥
विना गुरुवारेणापि ।
ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥ २ ॥
अनुराधायामनुराधापि ।
ऐन्द्रे मैत्रे यदा जीवश्चन्द्रश्चैव रविः ।
पूर्णिमा शक्रचन्द्रेण महाज्यैष्ठी प्रकीर्त्तिता ॥ ३ ॥
अनुराधायां चन्द्रेऽपि । वाचस्पतिः ।
ऐन्द्रर्क्षे यदा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥ ४ ॥
राजमार्त्तण्डे ।
ज्येष्ठे संक्रमे चैव ज्यैष्ठमासस्य पूर्णिमा ।
ज्येष्ठायाञ्च समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता ॥ ५ ॥
ज्येष्ठवृषभराशौ ।
ज्येष्ठायामपि वाचोर्ये सर्वे स्युस्तत्रैवम् ।
इति विष्णुधर्म्मोत्तरीयो पाठः ।
न तु संक्रमादिपदवाच्यमनर्थविशेषः । ज्येष्ठ
इति वर्णविशेषस्य वैयाकरणिकैः । संक्रमे
यदि स्यादिति पाठः कल्पितः ॥ ६ ॥
महाज्यैष्ठ्यां तु यः कुर्य्यात् स्नानं पुरुषोत्तमे ।
विष्णोर्लोकमवाप्नोति मोदते सह बान्धवैः ॥"
इति तिथ्यादितत्त्वम् ॥
महाज्योतिष्मती, स्त्री, (महती चासौ ज्योतिष्मती
चेति ।) लताविशेषः । सा ज्योतिष्मती इति
हिन्दी भाषा । तत्पर्य्यायः । तेजोवती २ स्व-
र्णा ३ कनकप्रभा ४ मौसला ५ हेमपर्णी ६

लवणा ७ अग्निदीप्ता ८ तैलस्विनी ९ सुरसता १० अग्निवक्त्रा ११ अग्निगर्भा १२ कङ्गुनी १३ पैलसुता १४ सुनैला १५ सुवेगा १६ वायसी १७ तीव्रा १८ काकाण्डी १९ वायसादनी २० पीतैला २१ श्रीफला २२ सौम्या २३ ब्राह्मी २४ लवणकिंशुका २५ पारावतपदी २६ पीता २७ पीततैला २८ वाग्मिनी २९ मेधा ३० मेधावती ३१ भीरा ३२। अस्या गुणाः। तिक्ततरत्वम्। रूक्षत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वम्। दाहदत्वम्। दीपनत्वम्। मेधाप्रज्ञाकारित्वञ्च। इति राजनिर्घण्टः॥

महाज्वालः, पुं, (महती ज्वाला शिखास्य।) होमाग्निः। इति हेमचन्द्रः।४।५००॥ (नरकविशेषः। यथा, विष्णुपुराणे।२।६।१२।
"सुतां सुतामपि गत्वा महाज्वाले निपात्यते॥"
महादेवः। यथा, महाभारते।१३।१७।८१।
"अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः॥")

महाज्वाला, स्त्री, (महती ज्वाला दीप्तिर्यस्याः।) जिनानां विद्याधरीविशेषः। इति हेमचन्द्रः।४।५००॥ (महती ज्वाला।) बृहदग्निशिखा च॥

महाढ्यः, पुं, (महान् आढ्यः शोभासम्पन्नः।) कदम्बः। इति राजनिर्घण्टः॥ (महांश्चासौ आढ्यश्चेति।) अतिशयधनवति, त्रि। (यथा, कथासरित्सागरे।२५।११८।
"ततः प्रभृति चैतस्य वाराणस्यामुवास सः। अर्थार्थिनो महाढ्यस्य गृहेव वणिजो यदि॥")

महातमःप्रभा, स्त्री, (महती तमसां प्रभा प्रकाशो यस्याम्।) नरकविशेषः। स चातिशयान्धकारमयः। यथा, हेमचन्द्रः।५।३।
"घनोदधिघनवाततनुवातनभःस्थिताः।
रत्नशर्करावालुकापङ्कधूमतमःप्रभाः।
महातमःप्रभा चैषाधोऽधो नरकभूमयः॥"

महातलः, पुं, (महांश्चासौ तलश्चेति।) कुलीरवः। इति हेमचन्द्रः।४।२०६॥ (महादेवः। कालिदासस्य कुबेरस्तुतिप्रसङ्गे वक्रोक्तिप्रयोगो यथा,—
"ततः पारिजाताद्यः कुबेरस्यो महातलः॥")
इत्युद्भटः॥

महातलं, क्ली, (महच्च तत्तलञ्चेति।) पातालविशेषः। यथा, शब्दमालायाम्।
"अतलं वितलञ्चैव नितलञ्च तलातलम्।
महातलञ्च सुतलं पातालञ्च रसातलम्॥"
(यथा च श्रीमद्भागवते।२।१।२६।
"पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जङ्घे॥")

महातारा, स्त्री, (तारयति संसारादिति। तॄ+णिच्+अच्। स्त्रियां टाप्। ततो महती तारेति कर्म्मधारयः।) जिनानां देवीविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मना १३ खदिरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ शङ्खिनी १८ वसुधारा १९ धनन्ददा २० त्रिलोचना २१ लोचना २२। इति हेमचन्द्रः॥

महाताली, स्त्री, (महान् अनेकफलाणी यत्र। स्त्रियां ङीष्।) आवर्त्तकी इति राजनिर्घण्टः॥

महातिक्तः, पुं, (महानतिशयस्तिक्तस्तिक्तरसो यत्र।) महानिम्बः। इति राजनिर्घण्टः॥ अतिशयतिक्तरसयुक्ते, त्रि॥

महातिक्ता, स्त्री, (महती गुरुतरा तिक्ता।) यवतिक्ता। इति राजनिर्घण्टः॥ (यथा, गोविन्ददासविरचितभैषज्यरत्नावल्याम्।
"धात्री शिग्रुर्महातिक्ता विशाला कृमिपञ्चकम्॥")
पाठा। इति शब्दचन्द्रिका॥

महातीक्ष्णा, स्त्री, (महती तीक्ष्णा।) भल्लातकवृक्षः। इति राजनिर्घण्टः॥ अतिशयतीक्ष्णे, त्रि॥

महातेजः, [स्] क्ली, (महदतिशयं तेजोऽस्य।) पारदः। इति राजनिर्घण्टः॥

महातेजाः, [स्] पुं, (महदतिशयं तेजो बलमस्य।) कार्त्तिकेयः। इति जटाधरः। अग्निः। इति शब्दचन्द्रिका॥ (महादेवः। यथा, महाभारते।१३।१७।३६।
"वृषतेजा महातेजा जन्यो विजयकालवित्॥")
अतिशयतेजस्विनि, त्रि। (यथा, मनुः।१।६२।
"स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा।
चाक्षुषश्च महातेजा विवस्वत्सुत एव च॥")

महात्मा, [न्] त्रि, (महानात्मा स्वभावोऽस्य।) उत्तमस्वभावयुक्तः। (यथा, कामन्दकीयनीतिसारे।१।११।
"महात्मानाद्भुतमाकिशैवमाचामितेजसः।
कथं नाम महात्मानो हिंसन्ते विषयादिभिः॥")
तत्पर्य्यायः। महेच्छः २ उदात्तः ३ उदारः ४ महाशयः ५ उदीर्णः ६ महामनाः ७ महाशयः ८। इति हेमचन्द्रः।३।११॥ (पुं, परमात्मा। यथा, मनुः।१।५४।
"युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः॥"
"तस्मिन् महात्मनि।" इति कुल्लूकभट्टः। महत्तत्त्वम्। यथा, श्रीमद्भागवते।८।७।३१।
"मनः शरीरं तव नाम ताम्र हवीषि वाचं कार्येन सर्व्व भूतानि महात्मनि॥"
"महात्मनि महत्तत्त्वे।" इति श्रीधरस्वामी॥ विष्णुविशेषः। यथा, मार्कण्डेये।४६।१६।
"महान् महात्मा महितो महिमावान् महाबलः॥"
महादेवः। यथा, महाभारते।१३।१७।१४।
"महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्व्वभूतात्मा विश्वरूपो महाहनुः॥")

महादक्षः, पुं, (महान् दक्षः कार्य्यकुशलः।) यदुवंशीयनृपविशेषः। इति हरिवंशपुराणे ३६ अध्यायः॥ (महान् दक्षः।) बृहद्दक्षः॥ (यथा, महाभारते।१।१५४।१०।
"यस्माज्जातो न मन्दात्मा मामको मोक्षमर्हति।
तस्मान्मयो महादक्षो धार्म्मिकः स्यादिति मे मतिः॥")

महादन्तः, पुं, (महान्तौ दन्तौ यस्येति।) गजदन्तः। तत्पर्य्यायः। दैत्यदन्तः २। इति त्रिकाण्डशेषः॥ बृहद्दन्तयुक्ते च॥ (महादेवः। यथा, महाभारते।१३।१७।८०।
"महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥"
महान् दन्तोऽस्य।) तद्युक्ते, त्रि॥

महादानं, क्ली, (महच्च तद्दानञ्चेति।) षोडशदानम्। तत्तु तुलापुरुषादिषोडशप्रकारम्। यथा, मत्स्यपुराणे।
"अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्॥"
इत्यभिधाय।
"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम्।
कल्पपादपदानञ्च गोसहस्रञ्च पञ्चमम्।
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च।
पञ्चलाङ्गलकं तद्वद्धरादानन्तथैव च।
हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा।
द्वादशं विश्वचक्रञ्च ततः कल्पलतात्मकम्।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च।
महाभूतघटस्तद्वत् षोडशः परिकीर्त्तितः॥" ५१
अत्र बाहुल्यभयम्। एतद्विधानप्रकारार्थं महादानम्। विधानादिकं तत्रैव तद्देवतादिपूजा-पूर्व्वं वा। तथा मत्स्यपुराणम्।
"विनायकादिग्रहलोकपाल-
वस्वष्टरुद्रादितिजाश्विनाञ्च।
ब्रह्माच्युतेशानफणीन्द्रगौरी
समन्वितो होमचतुष्टयं स्यात्।
अथापि सर्व्वेषु तथैव वेदा-
मन्त्रविशेषाणि ददाति क्रमम्॥"
इत्यादिना दानचतुर्दशोत्तरषोडशविधं महादानमुक्तमिति। अत्र देवीपुराण-मते। न तु पुण्यवर्द्धनदेवताभेदेनार्थं विवरणमिदम्। अन्यदपि लक्ष्यम्। इत्थम्।
"अवश्यमेव कर्त्तव्यं दानं दक्षिणयान्वितम्।
यथा न परिवाद्वैरं वर्द्धिते दाने च यः॥"
इति कूर्म्मपुराणोक्तदानमत्र सेव्यम्॥
अथवा बहुविधकल्पने, महादानानि-

साधारणत्वानुमानेऽसम्भवाभावात् । अतो न वैप-
रीत्यमिति ।
"धर्मेणाथैव दासानामिच्छन्त्यानुगं भवम् ।"
इति मलमासतत्त्वम् ।
महाराष्ट्र, क्ली, (महत् राष्ट्रं यत्र ।) देशविशेषः ।
इति जटाधरः ॥ (महत् राष्ट्र।) इत्यत्र कारकम् ॥
महादेवः, पुं, (महांश्चासौ देवश्चेति । यद्वा,
महतां देवानामपि देवः ।) शिवः । इत्यमरः ।
१ । १ । ३३ ॥ अस्य तत्त्वमागमोक्तमीदृशम् ।
यथा, महादेवाय धीमहि तन्नो नमः । इति
शिवपूजापद्धतिः ॥ * ॥ अस्य व्युत्पत्तिर्यथा—
"महान्तीनां सुराणाञ्च सर्वेषां महतामपि ।
देवाय महतां देवो महादेवः प्रकीर्त्तितः ॥
महतो पूजिता विश्वे महत्त्वस्थितिरीश्वरी ।
तस्या देवः पूजितश्च महादेवः स च स्मृतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥
तस्य पञ्चवक्त्रत्रिनेत्रत्वकारणं यथा,—
"अतीव कमनीयाङ्गं किशोरं श्यामसुन्दरम् ।
वक्त्री निर्मलनीलाभ्र दृष्ट्वा रूपमनुत्तमम् ।
न बभूव विश्वस्य लोचनाभ्यां विलोकनः ।
ममाभिमेवदृष्टिमिति मत्वा समाचरत् ।
बहुदेवाश्रयाभक्तो चरीद प्रेमविह्वलः ।
बहुवक्त्रादमोऽपश्यो भावयाञ्च चतुर्भुजः ।
बहुभिर्लोचनैर्दृष्ट्वा तुष्टाव बहुभिर्मुखैः ।
पश्यामि किं वा किं स्तौमि संप्राप्य वाय-
मीश्वरम् ।
आश्चर्येण लोचनाभ्यां चतुर्णां च पुनः पुनः ।
समाचरत् कृष्णलीलां शङ्करे च तपस्विनि ।
तदभूत् चतुर्वक्त्रं पूर्वेण चैव पञ्चमम् ।
एकैकस्य मुखे लोचनैश्च त्रिभिस्त्रिभिः ।
बभूव तेन तत्रास पञ्चवक्त्रस्त्रिलोचनः ।
चतुर्भिः पुनरुत्पाद्य तस्य मधुसूदनः ।
अर्थ दर्शनम इति तस्य देहं विनाशनम् ।
अथाद्य तथा प्रभुः पञ्चम् याति च याति
मान् ।
रामेति रामेत्याह नामैव च नामवान् ।
वसुधामाप्नुयात् क्वाप्य कालत्रयाहरत्वा च ।
संसारेऽपि संसर्गदुःखितैव नृणाम् ।
कोटिनामजपेनापि सर्वकोटिजपादपः ।
कैलासे निवासं लोकानां शम्भुरीश्वरः ॥"
तस्य भक्तायत्तकारणं यथा,—
"विभूतिमान् न विषः कतीमत्वात्ममपकः ।
वने तस्य अभिमतो प्रेमभावेन भक्त च ।
आत्मारामो बहुदीर्घकालापि पूर्णमत्सरम् ।
अतीतं सर्वेषां च धामं धामं चरीर च ।
दम्भानुब नश्यति चराम चत्र चत्र च ।
विहरीतस्य तत्र बभूव समाविष्टित्वम् ।
तदा स्वरूपदेवस्य कथा सर्वासि शङ्करः ।
यथाव र्यथैसौ भूमा विहरीति च राधिके ।
तदा तथा सदैवात्मा तत्र कोटि करोमि च ।
चावर्द्ध दिव्यात्मय मनो द्योतकरं परम् ।
तदा शिवस्य वपुषः सर्वोत्तम चकार च ।

सर्वेऽतस्तरेव कालेन तां संप्राप्य प्रियां सतीम् ॥"
तस्य दिगम्बरत्वजटाधारित्वकारणं यथा,—
"दिगम्बराधारी योगेन नैष्ठाऽसिद्धे यदि विभोः ।
जटासम्पद्यकालीना यतोऽद्यापि विवेकतः ।
न पैष्टा वैराग्यसंस्कारे स्वाप्नवैरिण योगिनः ।
समता चन्द्रे मृद्वी लोष्टे रत्ने समीश्वरे ॥"
तस्य नागभूषणभस्मधारणत्वकारणं यथा,—
"गरुडदेविधो नागाः प्रभुरं शरणं ययुः ।
बिभर्त्ति स्वयया स्वाङ्गे तानेव शरणागतान् ॥
यावर्य दुरत्ययोऽनस्यास्तं पीडुमपचः ।
त्रिपुरस्य वधे पूर्वं सर्वदा श्रपयदत्वः ॥"
तस्य धुस्तूरपुष्पबिल्वपत्रप्रियत्वव्याघ्रचर्मधारित्व-
स्मशानवासित्वकारणं यथा,—
"धारिदाराधादिकं पुष्पं सुगन्धिचन्दनादिकम् ।
यदि संन्यस्य तिष्ठेद प्रीतिर्नास्ति सदाशिव ।
धुस्तूरे तत् सदा प्रीतिर्बिल्वपत्रानुलेपने ।
गन्धद्रोणे प्रकृतौ च योगिदे व्याघ्रचर्मणि ।
दिव्यलोके दिव्यपर्णे चन्दनार्यां च तत्र च ।
श्मशानेऽपीवदहनि ध्यायते नामकृतिमम् ॥"
तस्य महिमादि यथा,—
"ध्यायत्यत्थनर्यन्तं ध्यायत्यन्वेति शिवः ।
मनाशिमेवमीषितःव दृष्टे तत्सप्तनामसम् ।
मत्तः पतनेनापि मूलनामिः सती भवेत् ।
तत्त्वायुषः प्रमाणञ्च नाहं जानामि का श्रुतिः ।
ध्यानं मनुष्यार्थं मूलं धत्ते मनोजपा परम् ।
शिवा नाम न कोपितं शङ्करं वैभुमीश्वरः ।
शङ्करः परमात्मा मे प्राणेभ्योऽपि परः शिवः ।
आत्मके समानः स्मृतः प्रियो मे भगवान् परः ।
न संवसामि गोलोके वैकुण्ठे तव वचसि ।
सदाशिवस्य हृदये निवहः प्रेमभावतः ।
पञ्च पक्षो हि यद्य भूमङ्गलेन पश्यति यः ।
ब्रह्माण्डनिकरे योगात योगी शङ्करात् परः ।
दिव्यशीन यः पञ्चमं भूमङ्गलेन यः ।
मदुक्तापादिकं भक्तो न यातो शङ्करात् परः ।
मम भक्तिश्च दास्यञ्च सुलिप सर्वमन्दरम् ।
सर्वेषिद्धिं दातुमीशो न दाता शङ्करात् परः ।
सप्तबन्धेन भवान् यशो नामयशेषिद्रम् ।
तदर्थं ध्याये ह्यत्र भक्तः शङ्करात् परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः ॥
शिवलैङ्गाभवत्तदर्शनकारणादिकं यथा,—
राधिकोवाच ।
"दशैपूजक च विभोः सर्वे दक्ष महात्मनः ।
न दृष्टं कथयस्वैवं हृदि सन्देहभञ्जन ॥"
श्रीकृष्ण उवाच ।
अत्र देवि ! पुरतो ह्यसितकार्यं पुरातनम् ।
पार्श्वेश्वरो दृष्टे ब्रह्मदर्पविद्वितोऽपम् ।
ततो भुक्तात्मावो वैकुण्ठदेवता च बभाण च ।
दश्यैं शुश्रूषया नाथं कारयन्तं शिवः ।
सुराणां प्रियैः कौतैश्च प्रभवं भजितो सुरा ।
चावीवे दृष्टो यदी वपुरो भगवान्यः ।
ब्रह्मपार्षिक तथैव मुखं चेनपि शिवक ।
देविपदस्य वपुर्वा भयकारं च दुर्लभम् ।

पिङ्गाक्षमेव च महतां सुरवै शूलपाणिके ।
मस्तुनिकाय तत् कर्णे शुलस्य प्राविमचितः ।
सुखा सदुर्लभं यत्नु समर्पे प्रेमविह्वलः ।
ययास्य कमवदेहात् संभूय चाक्रमर्यं च ।
स्वयं निपत्य पपात्य वदनुभ्यां नमाय च ।
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ।
सुरा ननाम शीघ्रं सम्पयमदशेषता ।
चरणं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रदक्ष वार्ता मणव कुमारं शूलपाणिनः ।
धर्मं तं कथयामास कुमारः संपुटाञ्जलिः ।
सुला शुक्लीव सा देवी शिवं सम्पुटिताधरा ।
सुला मनोहरं मौनं न प्रमाय शिवे शिवा ।
दुर्गं चक्रं मदुच्चिन्त्यभयं विदुवामपि ।
सुचिरञ्च तपस्तप्त्वा मया लब्धमसीश्वरः ।
तथा विष्णोः प्रसादेन वनिताहं कथं विभो ।
यतो न दृष्टं नैवेद्यं विष्णोर्भक्ष्यं तथापुरा ।
असौ मनो महाशैलात् चलति सर्वेश्वर ।
अद्य प्रभृति ये लोका नैवेद्यं शम्भोस्तव ।
ते भवन्ति सारमेया भविष्यन्तीव भारते ।
इत्युक्ता पार्वती माताहरोद पुरतो विभोः ।
हरिः प्रयास तत्रस्थो नीलकण्ठो बभूव सः ।
अपूर्णं तव नैवेद्यं चकारानुरागतः परम् ।
सर्वं दुर्गं मनश्चापान् यत्र देवं जमाति च ।
शिवलिङ्गे च यद्यत्तं तद्दत्वा गृह्णीश्वर ।
सुमहिमं भवेच्च विष्णोर्नैवेद्यमिति यत् ।
इत्युक्त कथितं सर्वं तथा इदं सुरेश्वरि ।
आशिषस्तं शङ्करस्य निर्माल्यं देव देवता ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० अध्यायः ॥
तस्यावतारा यथा,—
सूत उवाच ।
"वेदव्यासावताराणि द्वापरे कथितानि तु ।
महादेवावताराणि कलौ शृणुत सुव्रताः ॥
आद्यो कलियुगे श्वेते देवदेवो महाद्युतिः ।
नाम्ना हिताय विप्राणामभूद्वैवस्वतेऽन्तरे ।
हिमवच्छिखरे रम्ये छागले पर्वतोत्तमे ।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः ।
श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वेतलोहितः ।
सुतारको मदनावो मारुकश्च देवारकः ।
सुनाभो दमनश्चाथ सुहोत्रः कङ्कणस्तथा ।
लोकाक्षिश्च योगीन्द्रो जैगीषव्यस्तु सप्तमे ।
अष्टमे दधिवाहः स्यान्नवमे ऋषभः प्रभुः ।
भृगुस्तु दशमे प्रोक्तस्तस्मादुग्रः परः स्मृतः ।
द्वादशेऽत्रिः समाख्यातो बाली चाथ त्रयोदशे ।
चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम् ।
गोकर्णश्चाभवत्तस्माद्गुहावासः शिखण्डधृक् ।
जटामाली चाट्टहासो दारुको लाङ्गली क्रमात् ।
श्वेतस्तथा परः शूली डिण्डी मुण्डी च वै क्रमात् ।
सहिष्णुः सोमशर्मा च नकुलीशोऽन्तिमे प्रभुः ।
वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिशूलिनः ।
अष्टाविंशतिराख्याता ह्यन्ते कलियुगे प्रभोः ।
तीर्थे कायावतारः स्याद्देवेशो नकुलीश्वरः ॥"
इति कू॰ पु॰ ५० अध्यायः ॥

तस्याष्टषष्टिनामानि क्षेत्राणि च यथा,—

ब्रह्मोवाच।

"मन्दरस्थं महादेवं ब्रह्मा पृच्छति शङ्करम्।
केषु केषु च स्थानेषु द्रष्टव्योऽसि मया प्रभो!॥

ईश्वर उवाच।

वाराणस्यां महादेवं प्रयागे तु महेश्वरम्।
नैमिषे देवदेवञ्च गयायां प्रपितामहम्॥
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिभूषणम्।
पुष्करे तु ह्ययोगन्धिं विश्वञ्च विमलेश्वरे॥
अट्टहासे महानादं महेन्द्रे तु महाव्रतम्।
उज्जयिन्यां महाकालमाकोटे तु महोत्कटम्॥
शङ्कुकर्णं महातेजं गोकर्णे च महाबलम्।
भैरवे भैरवाकारं भवं वस्त्रापदे विदुः॥
रुद्रं कनखले चैव मदकर्णीह्रदे शिवम्।
देवदारुवने दिण्डिं चण्डीशं मध्यमङ्गले॥
लकुलीशं भरुके तु सकलाख्ये कपर्द्दिनम्।
शमिवाटकमेकाग्रे रुद्रं तान्त्रालिकेश्वरे॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं मण्डलेश्वरे।
ध्यानं विद्धेश्वरे योगी गायत्रीचोत्तरेश्वरे॥
विजयं नाम काश्मीरे जयन्तं मरुकेश्वरे।
हरिश्चन्द्रे हरिश्चैव पुरश्चन्द्रे तु शङ्करम्॥
जटावाटेश्वरे विद्धि सौम्यं कुक्कुटकेश्वरे।
भूतेश्वरे भस्मगात्रं जललिङ्गे जलेश्वरम्॥
त्रिशूलं कार्त्तिकायान्तु वाराहं विन्ध्यपर्वते।
ताक्ष्यं पश्चिमसन्ध्यायां विरजायां त्रिलोचनम्॥
कर्णेश्वरे त्रिशूलन्तु श्रीशैले त्रिपुरान्तकम्।
अमलिङ्गे विदुः कालिं कापालिं करवीरके॥
दीप्तचक्रेश्वरे वेदं नेपाले पशुपतिं पतिम्।
श्रीकारारोहणे कूटं देविकायामुमापतिम्॥
गङ्गायां सागरे ख्यातमोङ्कारममरकण्टके।
चमत्कारपुरे भीमं स्वयम्भुं नकुलेश्वरे॥
कर्णिकारे गणाध्यक्षं कैलासे च गणाधिपम्।
हिमकूटे विरूपाक्षं भूर्भुवं गन्धमादने॥
विष्णेश्वरन्तु आकाशे नालाके वसुदेश्वरम्।
अष्टषष्टिश्च नामानि देवदेवस्य धीमतः।
श्रुत्वा चोपगीतानि ब्रह्मणश्च स्वयम्भुवा॥
यः पठेत् प्रातरुत्थाय स्नातो वा यदि वा शुचिः।
मुच्यते सर्वपापेभ्यः शिवलोकं स गच्छति॥"

इत्यादि देवीपुराणे अष्टषष्टिनामानि महादेवस्य॥*॥ तस्य द्वादशनामस्तोत्रम्।

"प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः।
तृतीयः शङ्करो ज्ञेयश्चतुर्थो वृषभध्वजः॥
पञ्चमः कृत्तिवासाश्च षष्ठः कामाङ्गनाशनः।
सप्तमो देवदेवेशः श्रीकण्ठश्चाष्टमः स्मृतः॥
ईश्वरो नवमो ज्ञेयो दशमः पार्व्वतीपतिः।
रुद्र एकादशश्चैव द्वादशः शिव उच्यते॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
कृतघ्नश्चैव गोघ्नश्च ब्रह्महा गुरुतल्पगः॥
स्त्रीबालघातकश्चैव सुरापो वृषलीपतिः।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति॥"

इति स्कन्दपुराणम्॥*॥

तन्नामोच्चारणफलं यथा,—

"कोटयो ब्रह्महत्यानामगम्यागमकोटयः।
सद्यः प्रलयमायान्ति महादेवेति कीर्त्तनात्॥
महादेव महादेव महादेवेति वादिनम्।
वत्सं गौरिव गौरीशो धावन्तमनुधावति॥"

इति पुराणम्॥*॥

तस्य प्रणाममन्त्रः।

"नमस्ते त्वां महादेव! लोकानां गुरुमीश्वरम्।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम्॥"

इति श्रीभागवतम्।

"महादेवं महात्मानं महायोगिनमीश्वरम्।
महापापहरं देवं मकाराय नमो नमः॥"

इति तन्त्रम्॥*॥

तस्य कालरूपवर्णनं यथा,—

नारद उवाच।

"कालरूपी त्वया ख्यातः शम्भुर्गगनगोचरे।
लक्षणञ्च स्वरूपञ्च सर्व्वं व्याख्यातुमर्हसि॥

पुलस्त्य उवाच।

स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः।
अश्विनी भरणी चैव कृत्तिका प्रथमांशकम्।
मेषकं हि विजानीयात् कुजक्षेत्रमुदाहृतम्।
आग्नेयांशास्त्रयो ब्रह्मन्! प्राजापत्यं कवेर्गृहम्॥
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम्।
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यगृहन्त्विदम्॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः।
आदित्यांशश्च पुष्यश्च आश्लेषा शशिनो गृहम्॥
राशिः कर्कटको नाम पार्श्वे मखविनाशिनः।
पित्र्यर्क्षं भगदैवत्यं उत्तरांशश्च केसरी॥
रविक्षेत्रं विभोर्ज्ञेयं हृदयं परिकीर्त्तितम्।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका स्मृता॥
सोमपुत्रस्य सद्मैतत् द्वितीयं जठरं विभोः।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम्॥
द्वितीयं शुक्रसद्मं तुलाभिधमुदाहृतम्।
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम्॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः।
मूलं पूर्व्वोत्तरांशश्च देवाचार्य्यगृहं धनुः॥
ऊरुयुगलमीशस्य अमरर्षे! प्रगीयते।
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने!॥
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते।
धनिष्ठार्द्धं शतभिषा प्रौष्ठपद्यांशकत्रयम्॥
सौरेः सद्मापरमिदं कुम्भो जङ्घे च विश्रुते।
प्रौष्ठपद्यांशमेकन्तु उत्तरा रेवती तथा॥
द्वितीयं जीवसद्मं मीनस्तु चरणावुभौ॥
एवं कृत्वा कालरूपं त्रिनेत्रो
यज्ञं क्रोधान्मार्गणैराजघान।
विद्धश्चासौ वेदनाबुद्धिमुक्तः
खे सन्तस्थौ तारकाभिश्चिताङ्गः॥"

इति वामनपुराणे ५ अध्यायः॥

महादेवी, स्त्री, (महादेवस्य पत्नीति। पुंयोगे ङीष्। यद्वा, महती चासौ देवी चेति।) दुर्गा। यथा,
"शालग्रामे महादेवी शिवलिङ्गे जलप्रिया॥"

इति मात्स्ये॥

तस्याः पुष्पविधेयथा,—

"पूज्यते या सुरैः सर्व्वैर्ब्रह्माद्यैश्च प्रयत्नतः।
धातुर्मृत्तिपूजायां महादेवी ततः स्मृता॥"

इति देवीपुराणे ४५ अध्यायः॥

राज्ञी। पाटरानी इति भाषा। तत्पर्य्यायः। महिषी १ महाराज्ञी २ महादेवी ३। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। ५। ५८।
"अलिखत् स महादेवीं योगमन्दस्य तां पटे।
सजीवामिव तच्चित्रं राजवेश्मन्यभूत्॥")

महादिव्यः, पुं, (महांश्चासौ दिव्यश्चेति।) भौत्यमन्वन्तरीयदेवविशेषः। यथा,—

"चतुर्द्दशस्य भौत्यस्य मनोः पुत्रान्निबोध मे।"

इत्युपक्रम्य।

"शुचिरिन्द्रो महादिव्यो दिवृर्ज्जना हरिः
क्षयम्॥"

इति गारुडे ८७ अध्यायः॥

महाद्रावकः, पुं, (द्रावयति रोगानिति। द्रु + णिच् + ण्वुल्। महांश्चासौ द्रावकश्चेति।) औषधविशेषः। द्रावक इति भाषा। यथा,—

"पञ्चादस्य भागौ द्वौ स्फटिकारेकयो मताः।
एकीकृत्य प्रविष्यामि मर्द्दयेत्तन्नरोत्तमैः॥
द्रव्यं तत्र विपेत् भाण्डे वेष्टयेत् पञ्चवेदिके।
अत्यमोलकमाषन्तु हिङ्गुलं निक्षिपेद्बुधः॥
उद्धर्वेऽधरेऽपि पचेत् यावल्लमोद्भवम्।
ततो व्याप्याययतः स्थाप्यं पात्रान्तं जायते
द्रवम्॥
ततो द्रवं विनिष्कृष्य स्थापयेत् काचभाजने।
लक्षेन वटीं कुर्य्यात् यथा वसनावके॥
जीर्णज्वरादिसन्निपातेषु दापयेत् रत्तिकां भिषक्।
प्रकोपकरोति रोगञ्च महाद्रावकसंज्ञकः॥
पित्ते च वृद्धरोगे च प्रमेहे द्रावके च।
वाहुरज्जुनं तस्य दधि दत्त्वा प्रवेशयेत्॥"*॥

अपि च।

"तुलसिकनवामार्द्धं त्रिफला कुलत्थानविका।
शुण्ठी तालस्य पुष्पञ्च वराभूर्धिनर्थ तथा॥
दन्ती चारलाङ्गलं विष्णुक्रान्तैव च।
आलविस्ता चारनीयं मधुरञ्च कारयेत्॥
एकानपैन संदीप्य पादं शतखरकोथिनम्।
एतस्य द्विपलं पादं चरणाद्रवमुद्भवम्॥
अष्टिकाद्वित्वकचैव चरणार्द्धं तथा।
पचाद्वै वेल्लकं पादं उद्धर्वं तौलकरम्॥
काथोर्ध्वं लोहचूर्णेन तताङ्कित लौकम्।
तस्माद्धर्वं द्रवंयन्तौ मुख्यं शक्तुद्वेशनम्॥
क्षेपितेष्य संस्थूलं पक्वयेत् पात्रेद्धृ।
महाद्रावकत्वेन तु औषधञ्च द्रवकारति।
अग्निना तुङ्गाद्विवाद् रोगान् शङ्कुदोषी वे-
दाश्च वा॥"॥

इति वैद्यकरसायनम्॥

(सप्रयोग।

"चुई काचनमाधिद्र अशुनं औषध-
... ...

त्रिकूष्माण्डं त्रिफलां हरिद्राद्वयं वेद वन्हिपदैः।

धारो मणिरवयवो सुरभितो मामाख्य-
मीषां यथा:
ममावो महद्भ्रु दम्भमिव महीं कुमार:
स्मृत: ।
मधुना मदिरकादिका विशदम: सुहो यथ-
स्थापय:
कामोदितमर्द्दं महापथमर्थं बभूवुर्वं धर्मं
स्यचेत् ।
धर्मे मायाधे मद्मरहते मोऽर्थं महादायको
मां यत् प्रभवेत्सुख मितरो मध्यगुणं भूयते ।
यगहमगुरुं विदितो सुखा सद्रैव वा
भवद्याम् परिवाभिर्म बहुगुणं साम्यकं
भजयेत् ।
धाममध्यात् कषयामि मे मया गुणात् कोिच-
समाश्चात् महान्
निःद्वेषं विविधमि तामि विरमाम्बदोदराणि
सुखम् ।
गुणं पालुपभोमर्थं सुखभिमामदोषिका
कामम्।
मध्यार्थं विमायिता बहुविधान् दोषोच
मूलान्यपि ।"७।
इति वैद्यकरसायनसंग्रहे मोहाधिकारे ।)
महाद्रुमः, पुं, (महांश्चासौ द्रुमश्चेति ।) अश्वत्थ-
द्रुमः । इति शब्दचन्द्रिका । हरिद्रुमश्च ।
(यथा, हरिवंशे । १२१ । ७८ ।
"महोदः प्रभवाश्च महकोकिलधारणः ।
द्रुमिमान् वलिनाथाश्च संयतान्ति महाद्रुमान् ।"
माकन्दीवपरैर्भवस्य कामः पुमः । यथा, माघे ।
६ । ११ । ६१ ।
"नन्दश्च कुमारश्च सुकुमारो मनोवहः ।
कुमोदरोपि मेधावो मनसस्तु महाद्रुमः ।")
महाद्रोणा, स्त्री, (महती चासौ द्रोणा चेति ।)
द्रोणविशेषः । महो द्रोणपुष्पी इति हिन्दी
भाषा । तत्पर्यायः । देवकुसुमा २ दिव्यपुष्पा
३ महाद्रोणी ४ देवी ५ चाली ६ देवद्रोणा
७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् ।
उष्णत्वम् । भूतादिनाशकत्वं विषाद्यनर्थशमनम् ।
पुष्पा पारदमोचकत्वम् । इति राजनिर्घण्टः ।
महाद्रोणी, स्त्री, (महती चासौ द्रोणी चेति ।)
महाद्रोणपुष्पः । इति राजनिर्घण्टः ।
महाद्रुमः, पुं, (महान् द्रुमः कोलादयो द्रुम ।)
पुष्करम् । इति शब्दरत्नावली । अतिपूर्ण-
सम्पद ।
महाध्वं, स्त्री, (महत् अर्धं यत्र प्रवालैकामा ।)
रत्नजातम् । इत्यमरः । २ । ६ । ११२ ।
सुवर्णम् । सिद्धम् । इति मेदिनी । घ, ४०१ ।
बाहुल्यम् । इति हेमचन्द्रः । कवि: । इति
शब्दरत्नावली । (महत्वेनं पदमत्वात् ।
संन्याय: । इति सिद्धु: । २ । १७ । यथा,
भट्टौ । ८ । ४१ । १९ ।
"मा यो भविष्यसत्वे महार्घमारभद्
यथा ।"

"महाधने संग्रामे ।" इति तद्भाष्ये माधवः ।
महद्य तद्धनचेति । प्रभूतधनम् । यथा, ऋग्-
वेदे । १ । ७ । ५ ।
"इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ।"
"महाधने प्रभूतधननिमित्तम् ।" इति तद्भाष्ये
माधवः । बहुमूल्ये, त्रि । यथा, किरातार्जु-
नीये । १ । १८ ।
"पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य संस्थलीं
जहासि निद्रामशिवैः शिवारुतैः ।")
अतिश्रमधनयुक्ते, च त्रि ।
महाधातुः, पुं, (महांश्चासौ धातुश्चेति ।) स्वर्णम् ।
इति शब्दचन्द्रिका ।
महाध्वनिकः, पुं, (अध्वानं गच्छतीति । अध्वन् +
ठक् । महांश्चासौ आध्वनिकश्चेति ।) पुण्यार्थं
हिमालयादिधिकमहापथगमनेन प्राणादित्-
यागः । यथा, "अनपेक्षकर्षणामदेयाजारवा-
दंश्याधानमहाध्वनिकागाढकर्षिया
कार्या यतःशौचं भवतीति ।" इति शुद्धितत्त्व-
धृतशङ्खवचनम् ।
महान्, [त्] त्रि, (महते पूज्यते चेति । मह +
"वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा०
२ । ८४ । इति अतिः । निपात्यते ।) वृहत् ।
इत्यमरः । ३ । १ । ६० । (यथा, मनौ । ८ । १५६ ।
"प्राणवत्सु महत्स्वर्हं गोगजोष्ट्रहयादिषु ।")
अस्य पर्यायः महच्छब्दे द्रष्टव्यः ।
महान्, पुं, (महते पूज्यते आमोदते मनसा-
पीति । मह + अतिः ।) उष्ट्रः । इति राज-
निर्घण्टः । दुर्गा । यथा,—
"महान् माया शिवा सर्वं महा या प्रकृति-
र्मता ।
ख्यातिः संसारबाहिकी नियतो च नियामता ।"
इति देवीपुराणे ४५ अध्यायः ।
महत्तत्त्वम् । यथा —
"अविकारात् प्रधानात् तु महत्तत्त्वं प्रजायते ।
महानिति यतः ख्यातिर्लोकानां जायते सदा ।"
इति मात्स्ये ३ अध्यायः ।
(महादेवः । यथा, महाभारते । १३ । १७ । ९१ ।
"अमृतो प्रमतो महती यदिनो भाषो
महान् ।")
महच्छब्दप्रयोगविषयो यथा,—
"वर्षे तेते सदा शाटि वेदे ख्यातिवि विधि ।
पाकाद्वा यदि निशाया महच्छब्दो न दोषदः ।"
इति महिम्नस्तवस्वपुष्पदन्तोद्धृतवाक्यानि मतम्।
महानटः, पुं, (महांश्चासौ नटो नर्तकश्चेति ।
प्रलयनर्तनकारकत्वात् तथात्वम् ।) शिवः । इति
त्रिकाण्डशेषः ।
महानदी, स्त्री, (महती चासौ नदी चेति ।)
दुर्भिक्षमदिवानर्थभूतपवित्रादिधामलदेवी-
विशेषः । महा मामालावं विलोकना । यथा,
"नदी तव महापुष्या विभ्रवाद्भिविराजिता ।

पितोभयोभि विभाता महानदी गता ।
विश्वेश्वरा महानदी ।" इति कृष्णीयम-
नवम् । नद्या । यथा,—
"अनुगममपि वारं
बाणं न जायते अमुतारम् ।
सुरवर ! तव विदरेण
पापामलजालवहानदी याचा ।"
इत्युत्तरः ।
महानन्दः, पुं, (महांश्चासौ आनन्दश्च ।) मुक्तिः ।
इति हलायुधः । (महान् आनन्दः ।) अति-
शयाह्लादश्च । (नृपतिविशेषः । यथा, मार्क-
ण्डेये । ११८ । ४० ।
"इत्युक्ता तान् सचीवाचात् महानन्दसुतान्
वली ।
अथाब्रवीत्तदा गत्वा महारिप्रमथो नृप: ।"
वैद्यविशेषः । यथा, भट्टीनरायणौदरे ।
"महानन्दवाथा नन्दौ विश्वोद्य वसया ।
चकार उपरतथा मातृष्विकामा: ।")
महानन्दा, स्त्री, (महानानन्दोऽस्याः ।) सुरा ।
इति राजनिर्घण्टः । मायापुरस्य नदी । यथा,
भविष्ये ।
"मायामयस्य या पुण्या नद्यो लोकपूजिता ।
महानन्देति सा प्रोक्ता महादेवस्य हृदान् ।
स्नानं दानं जपो होमो देवार्चनसुपोषणम् ।
यत्र तत्र कृतं दीर्घं महाफलं दिवसे भवेः ।"
इति तिथ्यादितत्त्वम् ।
नदीविशेषः । सा पद्मायां विनिःसृता राम-
पुरालयामार् पश्चिमे पतितोऽस्ति । ।
(दक्षिणदेशीयो नदीभेदः । यथा, महाभारते ।
६ । ९ । ३६ ।
"पुनर्दृश्यामन्दाक महानन्दाश्च येऽपि ये ।
नन्दने दृश्यते पानकास्तोऽभिदर्शक: ।")
महानन्दिः, पुं, (अति अत्यन्तं नन्दतीति । आ+
नन्द + "सर्वधातुभ्य इन् ।" उणा० ४ । ११७ ।
इति इन् । ततः । महांश्चासौ नन्दिरिति ।)
नन्दिवर्द्धनराजपुत्रः । यथा,—
"अष्टाविंशत्समा भावी राजा वै नन्दिवर्द्धनः ।
चत्वारिंशत्समाश्चैव महानन्दिर्भविष्यति ।
महानन्दिसुतश्चापि शूद्रायां कलिकालजः ।
उत्पत्स्यते महापद्मः सर्वक्षत्रान्तको नृपः ।
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
एकराट् च महापद्म एकच्छत्रो भविष्यति ।"
इति मत्स्यपुराणे २७१ अध्यायः ।
अपि च ।
"महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महा-
पद्मनन्दः परशुराम इवापरोऽखिलक्षत्रान्त-
कारी भविता ततः प्रभृति शूद्रा भूपाला
भविष्यन्ति । स च महापद्मस्ततः पृथिवीं
भोक्ष्यति ।" इति विष्णुपुराणे चतुर्थांशे ।
महानरकः, पुं, (महांश्चासौ नरकश्चेति ।
नरकः ।) अतिदुःखजनकनरकविशेषः ।
इति पुराणम् । (यथा, मनुः । ४ । ८८ ।

"तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रञ्च महानरकमेव च ॥")

महानलः, पुं, (महांश्चासौ नलश्चेति ।) देवनलः । इति राजनिर्घण्टः ॥ (महांश्चासौ अनलश्चेति ।) हुतवहश्च ॥

महानवमी, स्त्री, (महती चासौ नवमी चेति ।) आश्विनशुक्लनवमी । यथा,—

श्रीभगवानुवाच ।

"दुर्गातन्त्रेण सर्व्वेषु दुर्गामहोत्सवम् ।
महानवम्यां शरदि बलिदानं नृपादयः ॥
आश्विने शुक्लपक्षस्य भवेद्या अष्टमी तिथिः ।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा ॥
ततोऽनु नवमी या स्यात् सा महानवमी स्मृता ।
सा तिथिः सर्व्वलोकानां पूजनीया शिवाप्रिया ॥"

इति कालिकापुराणे ५० अध्यायः ॥

अपि च ।

"प्राहट्काले विशेषेण आश्विने त्वष्टमीषु च ।
महाशब्दो नवम्यान्तु लोके ख्यातिं गमिष्यति ॥"

इति तिथ्यादितत्त्वम् ॥

महानसं, क्ली, (महच्च तत् अनश्चेति । +"अनोऽश्मायःसरसां जातिसंज्ञयोः ।" ५ । ४ । ९४ । इति संज्ञायां टच् । "आन्महतः समानाधिकरणजातीययोः ।" ६ । ३ । ४६ । इति महत आकारादेशः ।) रन्धनगृहम् । तत्पर्य्यायः । रसवती २ पाकस्थानम् ३ । इत्यमरः । २ । ९ । २७ ॥ (तथास्य लक्षणं यथा,—

"प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि ।
सजालकं गवाक्षाढ्यमाप्तवर्गनिषेवितम् ॥
विकक्षदत्तसंचारं सवितानं कृतार्च्चनम् ।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम् ॥
तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम् ।
शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः ॥
संविभक्ताः सुमनसो नीचकेशनखाः स्थिराः ।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयुताः ॥
तस्मादाज्ञा विधेयाः स्युर्विविधाः परिचारकाः ॥
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः ॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत् ॥
माहानसिकवोढारः सौपौदनिकपौपिकाः ॥
भवेयुर्वैद्यवशगा ये चाप्यन्ये तु केचन ॥"

इति सुश्रुते कल्पस्थाने प्रथमेऽध्याये ॥)

तद्दर्शनं यथा,—

"आग्नेय्यां दिशि कर्त्तव्यमाहारस्य महानसम् ।
प्रशस्तकाष्ठमार्गेण मध्येऽभिन्नगवेषितम् ॥
चुल्ली तत्र प्रकर्त्तव्या पूर्व्वपश्चिममायता ।
चत्वारोऽपि भाजनानि स्थापितानि च वारिका ।
पिण्डं तत्र सर्व्वं दृष्ट्वा सर्व्वमेकत्र ।
अग्नौ रक्षेद्धि चतुरस्रोऽपि कारयेत् ।
कोष्ठे माचितं यत्र तत्रैव मतिदं शुचि ।
यत्र ताम्रमये चिह्नं न दृश्यं सम्यगीप्सितम् ॥
सौवर्णं राजते पात्रमाढ्याभूमिस्थितां यदि ।
तत्रापि सर्व्वदोषघ्नं धिनोतु सुखदायकम् ॥"

अथ महानसोपयोग्योपकरणानि ।

"वस्तूनि भोजनार्हाणि विविधानि पुनः पुनः ।
चर्म्माणि शुष्कशुक्लानि स्थापितानि महानसे ॥
दास्याममाष्टर्नी वाटा पूनश्चौ शकुर्पिका ।
कर्त्तव्यो मेखर्य पात्रं जलपूर्णस्तलिङ्गरः ॥
वह्निर्गन्धनवो भावः कृहालं शक्तठारकः ।
दारुखण्डानि शुष्काणि स्तम्भाभानि चैन्धनम् ॥
अश्मीरम्यनतिस्थूलाभ्यक्षन्धमलानि च ।
तिलपुष्पानसी पीठी सुखलं चाप्युदूखलम् ॥
चर्म्मणोद्भिन्ना दर्व्वी चतुरस्रावपहिका ।
संदंशकञ्च युगलं पक्वस्वकचतुष्टयम् ॥
कालिका क्षुरिका चैव शूलं शकटाचकम् ।
वह्निपचाजनार्थाय दर्व्वी दीर्घा शलौवला ॥
तन्दूरमभीरी साया तप्तकं इन्धनी ।
इत्यादि वस्तुजातं हि युज्यते च महानसे ॥"

इति पाकराजेश्वरः ॥

तत्र रक्षणीया जना यथा,—

"कुद्याखविधानज्ञाः परामिता कुलोद्भताः ।
सर्व्वे महानसे धार्य्याः शुभकेशनखा जनाः ॥"

इति मात्स्ये १९८ अध्यायः ॥

महानसोऽपि पुंसि । इत्यमरटीकायां रमानाथः ॥

महानाटकं, क्ली, (महच्च तत् नाटकञ्चेति ।) नाटकविशेषः । तस्य लक्षणं यथा,—

"एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम् ।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ॥
एतदेव नाटकम् । यथा, बालरामायणम् ।"

इति साहित्यदर्पणः ॥ हनुमत्ख्यातश्रीरामचरितग्रन्थविशेषः । यथा,—

"एष श्रीहनूमता विरचिते श्रीमन्महानाटके वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः । मिश्रश्रीमधुसूदनेन कविना सन्दर्भ्य सज्जीकृते स्वर्गारोहणनामकोऽत्र नवमो यातोऽङ्क ईदृशो ।"

इति तस्यान्तिमः श्लोकः ॥

महानाडी, स्त्री, (महती चासौ नाडी चेति ।) वकरा । इति राजनिर्घण्टः ॥ (विवरणमस्याः वकराशब्दे ज्ञेयम् ॥)

महानादः, पुं, (महान् नादोऽस्य ।) शङ्खः । वर्षुकाब्दः । (महांश्चासौ नादश्चेति ।) महाशब्दः । इति मेदिनी । दे, ३९ । (यथा, महाभारते । ३ । ९९ । २ ।

"इत्यमिष्टः सर्व्व सत्वा ये वैश्वियुतयन्तः ।
प्रतिघ्नन्तो महानादं नदन्ति अवर्द्धिताः ॥")

सिंहः । कर्णः । इति हेमचन्द्रः ॥ जदः । गजः । इति राजनिर्घण्टः ॥ जावकबादुः । इति शारदानी ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ४८ ।

"विश्वावसुः प्रेतचारी भूतचारी महेश्वरः ।
बालयोगी महानादः सर्व्वकामचतुष्पथः ॥"

महाशब्दयुक्ते, त्रि । यथा, रामायणे । ४ । ४० । १८ ।

"तस्य कालमेव प्रतिमं महोरगनिषेवितम् ।
अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥")

महानिद्रा, स्त्री, (महती शरीरा चासौ निद्रा चेति ।) मरणम् । इति जटाधरः ॥

महानिम्बः, पुं, (महांश्चासौ निम्बश्चेति ।) निम्बवृक्षविशेषः । घोड़ा निम इति भाषा । तत्पर्य्यायः । कैटर्य्यः २ पर्व्वतः ३ पार्व्वतः ४ । इति रत्नमाला ॥ (यथा,—

"भूतशुलाभ्यामाव सर्व्वं मुक्तं प्रकल्पयेत् ।
महानिम्बस्य चूर्णेन चतुर्भिः समभावयेत् ।
मधुना वेदवेत्तावं लालासिद्धपद्मानि ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)

अस्य गुणाः । परमपादित्वम् । कषायत्वम् । अश्मत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥ (महास्य पर्य्यायान्तरं गुणाश्च ।

"महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः ।
केशमुष्टिर्निम्बकश्च कार्म्मुको जीव इत्यपि ॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ।
कफपित्तभ्रमच्छर्दिकुष्ठहृल्लासरक्तजित् ।
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महानिशा, स्त्री, (महती घोरा निशा ।) निशामध्यभागः । तत्पर्य्यायः । निशार्द्धः २ निशीथः ३ । इति हेमचन्द्रः । २ । ५८ । ४ ॥ शुक्लमहानिशा चार्द्धप्रहरोपरि प्रहरद्वयम् ।

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तत्र स्नानं न कुर्व्वीत काम्यनैमित्तिकाद्ृते ॥"

इति रघुनन्दनभट्टाचार्य्यधृतवचनात् ।

महानिशायां रात्र्यन्तस्य माघौषधस्य च अरविन्दस्य परार्द्धे पूर्व्वादिदक्षिणेभोजनाद्यपि ... तदिवसकृत्यमन्याद्यपि सिद्धिकामीच विष्णवाप्त ॥ ० ॥ तत्र प्रसङ्गविशेषो यथा,—

"चतुर्भुजे कर्मणि तु रावणेन महानिशा ।
कथं शक्यमानं नव शुक्ल च मारव ॥
सोमावतिक्रमणं नामकन कर्म जनम् ।
दुःखमयं दृढवायोरितमादि का कथा ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥

तत्र यात्राविशेषो यथा,—

"न रात्रौ यात्रां कुर्व्वीत ... ।
दिवाधौ यात्रां कुर्व्वीत ... महानिशायाम् ॥
महानिशायां यात्रां निषिद्धाम् ... ।
... यात्रां कुर्व्वीत ... ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ... अध्यायः ॥ देवीभेदः । महानिशा ... लिपि । सा ... ।

प्रथमरजन्या । तस्यां शिवलिङ्गोद्भवो यथा,
"माघकृष्णचतुर्द्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः ॥"
अपि च ।
"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः ॥"
इति देवलोक्तमहानिशा ॥
घटिका दण्डद्वयरूपा । इति तिथ्यादितत्त्वम् ॥
तान्त्रिकमहानिशा यथा, तन्त्रसारे ।
"मते तु प्रथमे यामे प्रणीयमहरावधि ।
महानिशायां कर्त्तव्यं रात्रिशेषे चरेत तु ॥"
अपि च ।
"निशा तु परमेशानि ! सर्व्वं कालमुपागते ।
मध्ये च गते रात्रौ घटिके द्वे परे च मे ।
महानिशा समाख्याता तत्रचानिमहानिशा ॥
अर्द्धरात्रे गते देवि ! पशुभावेन पूजयेत् ।
दशदण्डे तु या पूजा तत् सर्व्वमधमं भवेत् ॥
एकादशे महेशानि ! तत् सर्व्वसमतोपमम् ।
द्वादशादूर्द्ध्वे देवि ! सर्व्वं चौरोपमं भवेत् ॥
त्रयोदशादूर्द्ध्वे देवि ! दत्तमुत्तं न संशयः ।
अतःपरं महेशानि ! विरुद्धो न संशयः ॥
तस्मात् सर्व्वं महेशानि ! पशुभावे मयोदितम् ।
दिव्यवीरमते देवि ! तत्स्थानेन पूजयेत् ॥
पञ्चतत्त्वं समानीय यदि पूजापरो भवेत् ।
कालाकालं महेशानि ! विचारं तत्र वर्जयेत् ॥
अर्द्धरात्रगते देवि ! कुलपूजा प्रकीर्त्तिता ।
भवेन्नवापुष्यदेव नमं पूजादिकञ्चरेत् ॥
आर्द्धरेण देवेशि ! तत्र स्थाने प्रकाशितम् ।
प्रपीठेयं करादिष्टे पदार्थं नैव कारयेत् ॥"
इति मुण्डमालातन्त्रे ६ पटलः ॥
महानीचः, पुं, (महांश्चासौ नीचः ।) रजकः । इति शब्दमाला । अतिशयनीचश्च ॥
महानील, पुं, (महान् नीलः नीलवर्णः ।) भृङ्गराजः । नागविशेषः । मणिविशेषः । इति मेदिनी । ले, १६६ ॥ (यथा, शिशुपालवधे । १ । १६ ।
"महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरे ॥"
"सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृताः ।
इति भरतमल्लः ॥" इति तट्टीकायां मल्लि-नाथः ॥) तस्य लक्षणं यथा,—
"यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तद्यत् सर्व्वं महानीलः स उच्यते ॥"
इति गारुडे ७२ अध्यायः ॥
(गुग्गुलुविशेषः । तद्यथा,—
"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥
महानीलस्तु विज्ञेयः सदा नीलसमप्रभः ।
महिषाक्षो महानीलो हस्तिनां हितकृन्मतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
सुमेरोर्दक्षिणपार्श्वस्थपर्व्वतविशेषः । यथा, मार्क-ण्डेये । ५५ । ७ ।

"द्वीपार्द्धचक्रमुखस्य सुमेरोरुप पङ्कजात् ।
मणिशैलोऽथ वृषभः महानीलो भवाचलः ॥")
महानीला, स्त्री, (महती चासौ नीला नील वर्णा चेति ।) महाजम्बूः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य महाजम्बूशब्दे ज्ञेयः ॥)
महानीली, स्त्री. (नील + "नीलादोषधौ ।" ४ । १ । ४२ । इति वार्त्तिकोक्त्या ङीष् । ततः महती चासौ नीली चेति ।) नीलापराजिता । वृहन्नीली । तत्पर्य्यायः । श्रमरा २ अति-नीलिका ३ तुत्था ४ श्रीफलिका ५ मेला ६ कैशार्हा ७ भृङ्गपत्रिका ८ । अस्या गुणाः । गुल्मोदरघ्नत्वम् । रक्तपित्तघ्नत्वम् । सर्व्वदोषघ्नत्वम् । नीलिकागुणैरन्यैः सर्व्वकर्म्मसु पटुत्वञ्च । इति राजनिर्घण्टः ॥
महानुभावः, त्रि, (महाननुभावो माहात्म्यं यस्य ।) महाशयः । यथा,—
"शतशो दुष्कृतान् घ्नतो धर्म्मं च धर्म्मशासनम् ।
महाशयो महेश्वरः क्षम्यतामनुभाव इत्यपि ॥"
इति शब्दरत्नावली ॥
(महात्मा । यथा, शिशुपालवधे । १ । १० ।
"महानुभावाम् परिचर्य्यया गुरु-
र्महानुभावा हि नितान्तमर्थिनः ॥")
महान्तः, पुं, (महत् + प्रथमावहुवचनरूपम् ।) मत्स्याभिप्लुतान्वयः । ते ब्रह्मणो मानसपुत्राः । यथा,—
"शिवः शेषश्च धर्म्मश्च ब्रह्मा विष्णुर्भवान्
विराट् ।
सनत्कुमारः कपिलः सनकश्च सनन्दनः ॥
वोढुः पञ्चशिखो दक्षो नारदश्च सनातनः ।
भृगुर्मरीचिरत्रिश्च कश्यपः पुलहोऽङ्गिराः ॥
मेधातिथिः कपिलः शुक्रो वसिष्ठः क्रतुरेव च ।
हरन्तिः कर्द्दमश्च प्रचेताः पराशरः ॥
मार्कण्डेयो वालखिल्य प्रह्लादश्च महीधरः ।
यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः ॥
अक्रूरश्च उद्धवश्च नारदश्च वासुकिः ।
नरो नारायणः कूर्म्मो हनुमान् विभीषणः ॥
मत्स्याभिप्लुताश्च हर्य्यक्ष परमात्मनः ।
एते महान्तो धर्म्मिष्ठा भक्तानां प्रवराश्च ते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः ॥
महापद्मकं, क्ली, (पद्मानां विलासिन्यादीनां समाहारः । ततः महच्च तत् पद्मकञ्चेति ।) वृहत् पद्मकम् । तद्यथा,—
"रक्तोत्पलयुता श्वेतास्तामरसैः पारदा
तथा ।
कर्म्मसु विविधैर्युक्तं त्याज्यं वा चन्दनकम् ॥"
इति राजनिर्घण्टः ॥
(यथा, सुश्रुते चिकित्सितस्थाने १० अध्याये ।
"इन्द्रसरोरुहोपमं संरक्षेत्र तमर्द्दुरः ।
पीतं महापद्मकं सर्पिर्वा पायसविस्मृतानाम् ॥")
महापञ्चविषं, क्ली, (पञ्चानां विषाणां समाहारः । ततो महच्च तत् पञ्चविषञ्चेति ।) वृहत्पञ्चविषम् । तद्यथा,—

"शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः ।
शङ्खकर्णीति योगोऽयं महापञ्चविषाभिधः ॥"
इति राजनिर्घण्टः ॥
महापत्ना, स्त्री, (महान्ति पत्राण्यस्याः ।) महाजम्बुः । इति रत्नमाला । वृहज्जम्बुश्च ॥
महापथः, पुं, (महाश्चासौ पन्थाश्चेति । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति समासान्तः अप्रत्ययः । "अत् पूरव्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति समासान्तोऽकारः ।) प्रधानपथः । तत्पर्य्यायः । घण्टापथः २ संसरणम् ३ श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रमणम् ६ उप-निष्करम् ७ । इति हेमचन्द्रः । ४ । ५१ ॥ (यथा, रामायणे । २ । ८० । १८ ।
"पताका शोभिताः सर्व्वे सुनिर्म्मितमहापथाः ॥"
यथा च महाभारते । ५ । ८४ । २० ।
"संमृष्टसिक्तरजसः प्रतिवेद्य महापथम् ॥")
महाप्रस्थानपथः । "यज्ञाधीतं यदि विदाह्यं महापथम् न रोचते ॥" इत्यत्र प्रतिपद्यमार्यतयाप्य तदानयम् । यथा, कथासरित्सागरे । ४ । ४४ ।
"तप्योकादिकस्य स्वस्थ पिता यातो महा-
पथम् ॥"
सुषुम्ना । यथा, हठयोगप्रदीपिकायाम् । ३ । ३ ।
"सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
श्मशानं शाम्भवी मध्यमार्गश्चेत्येकवाचकाः ॥")
महापथगमः, पुं, (महापथस्य महापथे वा गमः गमनम् ।) मरणम् । इति जटाधरः ॥
महापद्मः, पुं, (महत् पद्मं नाम्ना चिह्नं शिरसि यस्य ।) अष्टनागान्तर्गतनागविशेषः । तत्पर्य्यायः । अतिशुक्लः २ दशशिशुभञ्जनः ३ । इति हेमचन्द्रः । ४ । १०५ ॥ (यथा, हरि-वंशे । १ । ११९ ।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥"
दक्षिणदिग्गजविशेषः । नृप यथा । "तस्मिन् यवीं महापद्मः प्रदक्षिणं कौबेरीं गतो महा-पद्मोऽसौ यथा च महाबलः प्रवराश्वो कौलि-नाग्नो महेभूतः परिवर्त्तः प्रकल्पः वरुणः यशो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भूपीठोपरि विलिख्यः कुमारिकाः स्थिर-पदं करमर्दः पौरोदरो महाबिलः अच्छर्द्याः प्यायितिव इति ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ।) कुबेरस्य नवनिध्यन्तर्गतनिधि-विशेषः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६७ । ५ ।
"यत्र पद्म महापद्मौ तथा मकरकच्छपौ ।
मुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः ॥"
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥"
पुरविशेषः । यथा, महाभारते । १२ । ३५४ । १ ।
"आसीत् किल कुरुश्रेष्ठ ! महापद्मे पुरोत्तमे ।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः ॥"
दैत्यभेदः । यथा, हरिवंशे । २४१ । ३ ।
"महापद्मो विदूरश्च पूर्वकालश्च वीर्य्यवान् ॥"
गणभेदः । यथा, महाभारते । ६ । ६१ । ११ ।

"तस्य चान्येऽपि दिङ्नागा बभूवुरश्वयायिनः ।
अञ्जनो वामनश्चैव महापद्मश्च सुप्रभः ॥")
क्ली, शतकोटिसंख्या । इति लीलावती ॥ (यथा, महाभारते । २ । ६९ । ३ ।
"अयुतं प्रयुतं चैव पद्मं खर्व्वमथार्ब्बुदम् ।
शङ्खश्चैव महापद्मं निखर्व्वं कोटिरेव च ॥")
शुक्लपद्मम् । इति रत्नमाला ॥

महापातकं, क्ली, (महदतिशयितं पातकम् ।) पापविशेषः । तत्तु पञ्चविधम् । यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥"
इति मानवे ११ अध्यायः ॥
"महापातकजं चिह्नं सप्तजन्मसु जायते ।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ॥"
इति शातातपीयकर्म्मविपाकः ॥
"तुलापुरुषमेधेषु प्रातःस्नानं विधीयते ।
इत्थिं बहुपर्य्यन्तं महापातकनाशनम् ॥"
इति मलमासतत्त्वम् ॥
"तच्चेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति राजेन्द्र ! महापातककोटयः ॥"
इति पुराणम् ॥

महापातकी, [न्] त्रि, (महापातकमस्यास्तीति । महापातक+इनिः ।) पञ्चप्रकारमहापातकयुक्तः । स च पतितः । यथा,—
"महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ।
पतितान्नं न दातव्यं स्नानाद्यैर्दानाशनमेव च ।
न चाश्रयात् पितॄणां वा कार्य्यं श्राद्धादिकं क्वचित् ।
पतितानां तु यः करोति विमोचनम् ।
तप्तकृच्छ्रेणैव तस्य शुद्धिर्नं चान्यथा ॥"
इति शुद्धितत्त्वधृतविष्णुपुराणवचनम् ॥
पारिभाषिकमहापातकी यथा,—
"तत्पापपतितांश्च भीषैर्वा पतितो द्विज ! ।
कुर्य्यात् न प्रकृतिस्थस्तु स महापातकी स्मृतः ॥"
इति देवीपुराणे पापनाशस्तवः ॥
अपि च ।
"पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कामात् स महापातकी
द्विज ! ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥
(यथा च महानिर्व्वाणतन्त्रे । ११ । ८१ ।
"वातिषिद्धो न कर्त्तव्यः प्रमादे परमात्मनः ।
योऽगुरुरुद्धं कुरुते स महापातकी भवेत् ॥")

महापापं, क्ली, (महच्च तत् पापञ्चेति ।) महापातकम् । यथा,—
"महापापं यदि स्यात् नरकं यमशासने ।
दत्वा तदैव शक्तं चाप्ता व्याधिनाशनम् ॥"
इति मलमासतत्त्वम् ॥

महापारेवतं, क्ली, (महच्च तत् पारेवतञ्चेति ।) फलविशेषः । बड़ा पारेवत इति हिन्दी भाषा । तत्पर्य्यायः । स्थूलपारेवतम् २ बाला-पिकम् ३ आर्त्तिनम् ४ रक्तरैवतकम् ५ राज-पारेवतम् ६ द्वीपजम् ७ द्वीपखर्ज्जूरम् ८ । अस्य गुणाः । मधुरत्वम् । बलकारित्वम् । पुष्टिवर्द्धनत्वम् । वृष्यत्वम् । मूर्च्छाश्रमघ्नत्वम् । पारेवतादधिकगुणत्वञ्च । इति राजनिर्घण्टः ॥

महापाशः, पुं, (महान् पाशोऽस्य ।) यमदूतविशेषः । इति वृहद्धर्म्मपुराणे ५६ अध्यायः ॥ (महांश्चासौ पाशश्चेति ।) वृहत्पाशश्च ॥

महापाषकः, पुं, (पचति पाययति निराकरोति परकायेश्वरादिकमिति । पच्+ण्वुल् । ततः महांश्चासौ पाचकश्चेति ।) बुद्धभिक्षुकः । तत्पर्य्यायः । पैलुकः २ श्रामणेरः ३ प्रव्रजितः ४ गोमीनः ५ । इति त्रिकाण्डशेषः ॥ (महोपायक इति पाठः क्वचित् दृश्यते ॥)

महापिच्छीतकः, पुं, (पिच्छीं तनोतीति । तन्+डः संज्ञायां कन् । ततः महांश्चासौ पिच्छीतकश्चेति । पिच्छाकारपत्रत्वादस्य तथात्वम् ।) क्षुद्रवर्ण्णमहामदनवृक्षः । तत्पर्य्यायः । राठः २ । अस्य गुणाः । श्वेतत्वम् । कटुतिक्तरसान्वितत्वम् । हृद्यत्वम् । कफज्वरोगपक्वाशयशोधनत्वञ्च । इति राजनिर्घण्टः ॥

महापिच्छीलः, पुं, (महांश्चासौ पिच्छीलश्चेति ।) वृक्षविशेषः । पेंड़रा इति हिन्दी भाषा । तत्पर्य्यायः । श्वेतपिच्छीलः २ करघाटः ३ लुरः ४ मुक्ताकीलकः ५ हरः ६ पिच्छीलकः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । त्रिदोषशमनत्वम् । चर्म्मरोगापहत्वम् । विशेषात् रक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

महापीलुः, पुं, (पीलति प्रतिष्टभ्नाति विषपित्तादिकमिति । पील+"मृगय्वादयश्च ।" उणा० १।३७ । इति कुः । ततो महान् पीलुरिति कर्म्मधारयः ।) पीलुप्रभेदः । तत्पर्य्यायः । वृहत्पीलुः २ महाफलः ३ राजपीलुः ४ महावृक्षः ५ मधुपीलुः ६ । अस्य फलगुणाः । मधुरत्वम् । वृष्यत्वम् । विषनाशित्वम् । पित्तप्रशमनत्वम् । रुच्यत्वम् । आमघ्नत्वम् । दीपनीयत्वञ्च । इति राजनिर्घण्टः ॥

महापुराणं, क्ली, (महच्च तत् पुराणञ्चेति ।) एकादशलक्षयुक्तश्रीभागवताद्यष्टादशलक्षपुराणविशेषः । तस्य लक्षणं यथा,—
"सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च ।
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ।
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३१ अध्यायः ॥
(अष्टादशमहापुराणानां विशेषविवरणमष्टादशं पुराणशब्दे द्रष्टव्यम् ।)

महापुरुषः, पुं, (महांश्चासौ पुरुषश्चेति ।) परमेश्वरः । (यथा, श्रीमद्भागवते । ६ । १६ । ३० ।
"भगवन्नाथ सीतायां ते तेजसी स्वरूपं न प्रतिपत्तुम् ।
यद्विज्ञायाक्षरं ब्रह्म महापुरुषतां गतः ॥")
नारायणः । यथा,—
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम् ॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष ! ते चरणारविन्दम् ॥"
इति श्रीभागवतधृतश्रीभागवतम् ॥

महापुरुषदन्ता, स्त्री, (महापुरुषस्य दन्ता इव मूलानि यस्याः ।) शतावरी । इति रत्नमाला ॥ (विवरणमस्याः शतमूलीशब्दे ज्ञातव्यम् ॥)

महापुरुषदन्तिका, स्त्री, (महापुरुषदन्ता + स्वार्थे कन् । स्त्रियां टाप् अत इत्वञ्च ।) महाशतावरी । इति राजनिर्घण्टः ।

महापुष्पा, स्त्री, (महत् प्रशस्तं पुष्पमस्याः । स्त्रियां टाप् ।) अपराजिता । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते उत्तरतन्त्रे ५८ अध्याये ।
"दन्तपुष्पा महापुष्पा प्रसन्नाविषविनाशना ॥"
महापुष्पविशिष्टे, त्रि ॥)

महापृष्ठः, पुं, (महत् विपुलं पृष्ठमस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥ त्रि, वृहत्पृष्ठश्च ॥

महाप्रकृतिः, स्त्री, (महती श्रेष्ठा प्रकृतिर्मूलकारणम् ।) दुर्गा । यथा,—
"चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
महत्त्वात् प्रकृतित्वाच्च महाप्रकृति-
रीरिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

महाप्रभः, त्रि, महती प्रभा यस्येति । अतिशयदीप्तियुक्तः । (यथा, हरिवंशे भविष्यपर्व्वणि । ४८ । २९ ।
"तमश्चर्मं महाघोरं महाकारं महाप्रभम् ॥")

महाप्रभा, स्त्री, (महती चासौ प्रभा चेति ।) महती दीप्तिः । यथा । महाप्रभामाविर्भाव-भास्वत्तरः । इति कादम्बरीकथायां चन्द्रापीडः ॥

महाप्रभुः, पुं, (महांश्चासौ प्रभुश्चेति ।) परमेश्वरः । यथा,—
"सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं
बृहत् ॥"
इति श्वेताश्वतरोपनिषत् ॥
"स्वेच्छामयस्य" इत्यादि
दर्शयति । (यथा, ...) श्रीचैतन्यः । यथा,—
"प्रभोश्च चैतन्यस्य [illegible] च
[illegible]"

ये ते दिविदिव्यामला: सुरनिम्नगाद्या
दिव्यापगा: ।
आरामाश्च न चैव नन्दनवनचैत्ररथादिका:
मन्ये तदेव महाप्रलयं हर विना शून्यानि सर्वा-
णि वै ॥"
इति चैतन्यचन्द्रोदयनाटकम् ॥
महाप्रलयः, पुं, (महांश्चासौ प्रलयो ब्रह्मणो-
ऽवसानमिति ।) ब्रह्मप्रलयः । तत्पर्य्यायः ।
संहारः २ । इति हलायुधः ॥ तस्य विवरणं
यथा,—
मार्कण्डेय उवाच ।
"मन्वन्तरं गतो: कालो यावत् पालयते प्रजा: ।
तावो मनु: स कालस्तु मन्वन्तरमिति स्मृतम् ।
तद्वद्ब्रह्मदिनस्यैव कालमेव जायते ।
निवृत्ते प्रलये काले दिनमेकन्तु वेधस: ॥
दिनान्ते वेधसो जाते सुप्ते तत्र जायते ।
प्रलयस्तु महामाया समायाति पितामहम् ॥
तामेवाद्यं पश्चिमाय विष्णोरमिततेजस: ।
सुप्तं न पुनः भगवान् ब्रह्मा लोकपितामह: ॥
ततो विष्णु: स्वयं भूत्वा वराहो जनार्द्दन: ।
पूर्व्वमाक्रम्य न सर्व्वं भुवनत्रयम् ॥
वायुना वह्निना सर्व्वं दाहयामास वै तथा ।
महाप्रलयकालेषु तथा सर्व्वं जगत्त्रयम् ॥
सर्व्वं याति प्रलयतां सचराचरजीविनम् ।
त्रैलोक्यं दाहयामास पीडिता दाहकाग्निना ।
तत: कालानलैर्मेघैर्नानावर्णैर्बलाहकै: ।
तमुत्थाप्य महाप्रलयमापूर्य्य भुवनत्रयम् ॥
जलमयं त्रैलोक्यं वायुना महता तत: ।
विनाश्य पश्चात् लोकान् विलीनान् स जनार्द्दन: ॥
मानवर्षेषु शतेषु पुनः स परमेश्वर: ।
सुप्तार्णवे जलमध्ये शेषाख्ये स जगत्पति: ॥
संहृत्य लोकानखिलान् सृष्ट्वा सृष्ट्वा पितामहम् ।
पुनः ॥
पुनः स भोगिशय्यायां ब्रह्मा नारायणात्मक: ॥
योगनिद्राख्यं कालमेकोऽस्थापयत् हरि: ॥
त्रैलोक्यमखिलं तस्य यदा कालाग्निना तदा ।
भस्मन: पृथिवीं कृत्वा विष्णोरमिततेजस: ॥
तेन कृता तु पृथिवी मत्प्रसादाज्जले यथा ।
पतिता कूर्म्मपृष्ठे तु विष्णोरेव महात्मन: ॥
कूर्म्मोऽपि ब्रह्मणो जलाधस्तात् पृथिवीं धृत्वा ।
ब्रह्माण्डं धुन्धुरावस्था यत्र तत्र जले तदा ।
ब्रह्माण्डखण्डमध्योत्थितया पृथिवी भवेत् ।
इति वा वराहरूपस्तु कूर्म्मरूपी जनार्द्दन: ॥
जलसंशोषकर्त्तारमनन्त: भवता तदा ।
कूर्म्मरूपं वहन्तोऽसौ गच्छति ते जगन्मयम् ॥
अनन्तस्य शिरसि तु ब्रह्मपीठं तत्पार्श्वत: ।
तत एवं स्थिता पूर्व्वं ब्रह्मणं जनार्द्दनम् ॥
अहरहर्महत: सर्व्वं ब्रह्मणोऽव्यक्तजन्मन: ।
पूर्व्वं कर्त्तुं स्थितो हि यद् ब्रह्मा महाप्रभ: ॥
विष्णुर्नाभ्युद्भवात् देवानां परमेश्वर: ॥
सर्व्वान् लोकान् महत्त्वादेव रचिता जगत् ॥
पुनरो ब्रह्मोऽर्थे जनार्द्दनो महाप्रभ: ॥
तालतुल्यं तदा चक्रे स शिव: पश्चिमां स्वयम् ।
स्थाणु शीर्षमासाद्य प्रियतमो जनार्द्दनम् ॥
ततश्च चक्रं गन्धर्व्वाविनिवृत्तो हि महाप्रभः ।
वैष्णवमाया पश्यता स तत्र समस्तं तदा ॥
ततो महाप्रभ माहेश्वर तथैव विविधायुधम् ।
यानि चान्यानि तस्यायमभाषिता वशगा तथा ॥
सर्व्वं कृत्वा सर्व्वं कार्य्यं प्रणतोऽयं तदा हरिः ।
एवमिन्धनकायेन महामायान्त चाश्रित ॥
त्रैलोक्यमखिलं तस्य ततश्च तं जनार्द्दनम् ।
लोपायत्तमहद्दीर्घं जगत्कारणकारणम् ॥
निरालम्बं देवमयं ब्रह्मरूपं परमेश्वरम् ।
जगत्कारणरूपाय जगन्नाथमकारणम् ॥
भूतभव्यभवनाथं परापरपतिं हरिम् ।
इत्यादि दिव्यमायान्त: यदयमेव तदा तदा ॥
एवं महाप्रलयेनैव ब्रह्मणैव स्थिता हरि: ।
सन्ध्याय कर्म्मविपाकं पुनि नारायणोऽव्यय: ।
महादेवश्च प्रणतो ब्रह्मणः स्वादिभि विभो ।
महादेवाद्विचर्यमिति व्यापयन्ति पुरातना: ॥
स्वगीतायां शिवायान्तु ब्रह्मा लोकपितामह: ।
ब्रह्मा विष्णुः महेशश्च न पुन: स्वयं विभु ॥"
इति कालिकापुराणे २७ अध्याय: ॥
अन्यमतं अन्यभावानधिकरणकाल: । स च
परमार्थसत्त्व: ॥
महाप्रसाद:, पुं, (महांश्चासौ प्रसादश्चेति ।)
विष्णुनैवेद्यादि: । यथा,—
"पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषत: ।
महाप्रसाद इत्युक्ता ग्राह्यं विष्णो: प्रयत्नत: ॥"
इति कात्यायनीतन्त्रपुराणवचनम् ॥
श्रीजगन्नाथस्य महाप्रसादमाहात्म्यं जगन्नाथ-
क्षेत्रे द्रष्टव्यम् ॥ अतिप्रसन्नता च । (महान्
प्रसादोऽस्य । त्रिः । यथा, महाभारते ।१।
१०।१११।
"महाप्रसादो इत्यत: प्रभुणा भिन्नविग्रह: ॥")
महाप्रस्थानगमनं, क्ली, (प्रस्थीयते अस्मिन्निति ।
प्र+स्था+ल्युट् । महत् प्रस्थानं महाप्रस्थ: ।
तत्र गमनम् ।) महाप्रस्थगमनम् । तत्तु मरणो-
द्देशेन हिमालयपर्व्वतगमनम् । तत्र कलौ
निषिद्धम् । यथा, उद्वाहतत्त्वे ।
"समुद्रयात्रास्वीकार: कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वध: ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैव कन्याया: पुनर्दानं परस्य च ।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखम् ।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषि-
णि: ॥"
इत्युद्वाहतत्त्वम् ॥
महाप्राणः, पुं, (महान् दीर्घश्वासात्मकप्रयत्न:
प्राणो यस्य स: ।) द्रोणकाक: । इति राज-
निर्घण्ट: ॥ वर्णविशेष: । ख घ । छ झ । ठ ढ ।
थ ध । फ भ । श ष स ह ॥ इत्यादय: । यथा,—
"वर्गाणां प्रथमतृतीयपञ्चमा: प्रथमतृतीयौ
य र ल वाश्चाल्पप्राणा: । अन्ये महाप्राणा:
स्मृता: ।" इति सिद्धान्तकौमुदी । (महाप्राणे,
त्रि । यथा, श्रीमद्भागवते । ६ । ११ । ६ ।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतस: ॥")
महाबलः, पुं, (महत् भूमादौ प्रद्वर्त्तुं पूर्व्वं मह-
द्बलमस्य ।) सिंहद्रुम: । इति रत्नमाला ॥
(महत् तत् बलञ्चेति ।) चतुरङ्गी, स्त्री । (यथा,
महा । ३ । १६० ।
"श्रीनिवासेन इमानि बलवन्त्यपि राक्षसा: ।
यद्धर्ममार्गं विभाव तथो हि महाबलम् ॥")
महाबला, स्त्री, (महत् बलं कार्य्यसाधिका
यस्या: ।) सहदेवी । इति मेदिनी ॥
(अस्या: पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे
प्रथमे भागे ;
"ऐश्वर्योद्धाटकी तिक्ता नागाख्या महाबला ।
वाट्या च पराप्युक्ता सा विदारा महाबला ॥
चोननुप्ता जगत्यां च असितोत्पलमादरी ।"
राजबला ; तत्पर्य्यायो यथा, तत्रैव ।
"बृहच्चन्द्रावलिपिनाका राजबलम्मेहाबला ।"
कटुतुम्बी । तत्पर्य्यायो यथा, तत्रैव ।
"इक्ष्वाकु: कटुतुम्बी स्यात् सा तुम्बी च महा-
फला ।"
महाकोषातकी । तत्पर्य्यायो यथा, तत्रैव ।
"महाकोषातकी प्रोक्ता हस्तिघोषा महा-
फला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृत: ॥")
महाबिला, स्त्री, (महती बिला ।) बिलोटी ।
इति शब्दचन्द्रिका ।
महाबलं, क्ली, (महद्दीप्तिरूपितं बलं सामर्थ्यमस्य ।
महत् बलमस्येति वा ।) सीसकम् । इति
हेमचन्द्र: ॥ (तथास्य पर्य्याय: ।
"नागं महाबलं सीसं शिरं सीसपत्रकम् ।"
इति वैद्यकरत्नमालायाम् ॥)
महाबलः, पुं, (महद्गुणत्वे बलं देवर्षे यस्य ।)
बुद्ध: । इति त्रिकाण्डशेष: ॥ (विष्णुरपि ।
यथा, मार्कण्डेये । ८६ । ४६ ।
"महान् महात्मा सर्व्वतो भक्तिमारात् महा-
बल: ।
सर्व्वा: पथ तथैवैते विप्रत्वे वासवाग्रजः ॥")
वायु: । बलवति, त्रि । इति हेमचन्द्र: । ३ ।
१०६ ॥ (यथा, रामायणे । १ । ९ । १० ।
"विष्णुस्तमथो राज्यान्ते देवकार्य्ये महाबल: ।
न जगाम वर्षं घोरे रामनारायणात्मक: ॥")
महाबला, स्त्री, (महद्बलमस्या: ।) सहदेवी ।
पीतपुष्पाबला: । सहदेवी: । बलवती ।
पतिव्रता । पीतपुष्पी ॥ इति रत्नमाला ॥
(अस्या: पर्य्यायो यथा,—
"बाला वाट्यालिका वाट्या चैव वाट्याहादिनि ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

(तथाच गुणाः ।
"हरेन्महाबला तक्तं भवेद्वातानुलोमनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महाबोधिः, पुं, (बुध्यते सर्व्वं जानातीति । बुध् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ततो महांश्चासौ बोधिश्चेति ।) बुद्धः । इति हेमचन्द्रः । २ । १४६ ॥

महाब्राह्मणः, पुं, (महानतिशयनिन्दितः ब्राह्मणः । "वेदौ ज्योतिर्विदे द्विजे ।" इति निषेधवचन-सामर्थ्यादेवास्य तथात्वम् ।) निन्दितब्राह्मणः । इति पाणिनिव्याकरणम् ॥ अस्मिन् देशे अयं अग्रदानिनेन प्रसिद्धः ॥ (यथा, मृच्छकटिके १ अङ्के ।
"विटः । महाब्राह्मण ! मर्षय मर्षय ॥")

महाभटः, पुं, (महांश्चासौ भटश्चेति ।) अतिशययोद्धा । यथा,—
"तदोजसा दैत्यमहाभटार्पितं
चकासदङ्गः स उदीर्णदीधिति ।
चक्रेण चिच्छेद निशातनेमिना
हरिर्यथा तार्क्ष्यपतत्रमुज्झितम् ॥"
इति श्रीभागवते ३ स्कन्धे १९ अध्यायः ॥

महाभद्रा, स्त्री, (महत् भद्रं मङ्गलं यस्याः ।) गङ्गा । इति शब्दमाला । काश्मरी । इति राजनिर्घण्टः ॥ (मेरोरुत्तरपार्श्वस्थसरोवरे, स्त्री । यथा, मार्कण्डेये । ५५ । २ ।
"अरुणोदं सरः पूर्व्वं मानसं दक्षिणे तथा ।
शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे ॥")

महाभारतं, क्ली, (महत् भारतम् । यद्वा, महान्तं भारं तनोतीति । महाभार + तन् + डः ।) व्यासप्रणीतेतिहासग्रन्थम् । तन्नामकारणं यथा,—
"एकतश्चतुरो वेदा भारतञ्चैतदेकतः ।
पुरा किल सुरैः सर्व्वैः समेत्य तुलया धृतम् ॥
चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽभ्यधिकं यदा ।
तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते ॥
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ॥"
इति महाभारते आदिपर्व्व ॥१॥
लोकविशेषेषु तस्य श्लोकसंख्याव्यवस्था च यथा,
"त्रिंशच्छतसहस्राणि चकारान्यां स संहिताम् ।
विंशच्छतसहस्रञ्च देवलोके प्रतिष्ठितम् ॥
पित्र्ये पञ्चदश प्रोक्तं रक्षोयक्षे चतुर्दश ।
एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम् ॥
नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ।
गन्धर्व्वयक्षरक्षांसि श्रावयामास वै शुकः ॥
अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान् ॥"
इति महाभारते १ पर्व्वणि अनुक्रमणिकाध्यायः ॥१॥ तस्य शतपर्व्वाणि तेषामष्टादश मुख्यानि यथा,—

"आदिसभावनविराट-
उद्योगभीष्मद्रोणकर्णाश्च ।
शल्यसौप्तिकपर्व्व तथा स्त्री-
शान्त्यनुशासनाश्वमेधाः ॥
आश्रममौषलप्रास्थानिकस्वर्गाः
पर्व्वाणि पर्व्वाणि नाम विहिताः ॥
इति भारतटीका ॥०॥

हरिवंशसहितोनविंशतिपर्व्वणामन्तर्गतशत-पर्व्वविभागस्तेषामध्यायश्लोकसंख्या च यथा,— १ आदिपर्व्वणि १९ पर्व्वाणि २२७ अध्यायाः ८९८४ श्लोकाः ॥ २ सभापर्व्वणि ९ पर्व्वाणि ७८ अध्यायाः २५११ श्लोकाः ॥ ३ आरण्यकपर्व्वणि १६ पर्व्वाणि २६९ अध्यायाः ११६६४ श्लोकाः ॥ ४ विराटपर्व्वणि ४ पर्व्वाणि ६७ अध्यायाः २०५० श्लोकाः ॥ ५ उद्योगपर्व्वणि ११ पर्व्वाणि १८६ अध्यायाः ६६९८ श्लोकाः ॥ ६ भीष्मपर्व्वणि ५ पर्व्वाणि ११७ अध्यायाः ५८८४ श्लोकाः ॥ ७ द्रोणपर्व्वणि ८ पर्व्वाणि १७० अध्यायाः ९९०९ श्लोकाः ॥ ८ कर्णपर्व्वणि १ पर्व्व ६९ अध्यायाः ४९६४ श्लोकाः ॥ ९ शल्यपर्व्वणि ४ पर्व्वाणि ५९ अध्यायाः ३२२० श्लोकाः ॥ १० सौप्तिकपर्व्वणि ३ पर्व्वाणि १८ अध्यायाः ८७० श्लोकाः ॥ ११ स्त्रीपर्व्वणि ५ पर्व्वाणि २७ अध्यायाः ७७५ श्लोकाः ॥ १२ शान्तिपर्व्वणि ४ पर्व्वाणि ३३९ अध्यायाः १४७३२ श्लोकाः ॥ १३ अनुशासनपर्व्वणि १ पर्व्व १४६ अध्यायाः ८००० श्लोकाः ॥ १४ अश्वमेधपर्व्वणि २ पर्व्वणी १०३ अध्यायाः ३३२० श्लोकाः ॥ १५ आश्रमवासपर्व्वणि ३ पर्व्वाणि ४२ अध्यायाः १५०६ श्लोकाः ॥ १६ मौषलपर्व्वणि १ पर्व्व ८ अध्यायाः ३०० श्लोकाः ॥ १७ महाप्रास्थानिकपर्व्वणि १ पर्व्व ३ अध्यायाः ३२० श्लोकाः ॥ १८ स्वर्गपर्व्वणि १ पर्व्व ५ अध्यायाः २०० श्लोकाः । १९ हरिवंशे आश्चर्य्यपर्व्वणि १ पर्व्व २३४ अध्यायाः १२००० श्लोकाः ॥ हरिवंशे भविष्यपौष्करप्रादुर्भावे १ पर्व्व ११२ अध्यायाः ३४४८ श्लोकाः ॥ इति महाभारते आदिपर्व्वणि पर्व्वसंग्रहनामकः २ अध्यायः ॥०॥ तच्छ्रवणविध्यादि यथा,—

जनमेजय उवाच ।
"भगवन् ! केन विधिना श्रोतव्यं भारतं बुधैः ।
फलं किं के च देवाश्च पूज्या वै पारणेष्विह ॥
देयं समाप्ते भगवन् ! किञ्च पर्व्वणि पर्व्वणि ।
वाचकः कीदृशश्चात्र एतच्चाचक्ष्व पृच्छतो मे ॥०॥
वैशम्पायन उवाच ।
शृणु राजन् ! विधिमिमं फलं यच्चापि भारतात् ।
श्रुताद्भवति राजेन्द्र ! यत्त्वं मामनुपृच्छसि ॥
दिवि देवा महीपाल ! क्रीडार्थमवनिं गताः ।
कृत्वा कार्य्यमिदञ्चैव ततश्च दिवमागताः ॥
हन्त यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः ।
ऋषीणां देवतानाञ्च सम्भवं वसुधातले ॥
अत्र रुद्रास्तथा साध्या विश्वेदेवाश्च शाश्वताः ।
आदित्याश्चाश्विनौ देवौ लोकपाला महर्षयः ।
गुह्यकाश्च सगन्धर्व्वा नागा विद्याधरास्तथा ।
सिद्धा धर्म्मः स्वयम्भूश्च मुनिः कात्यायनो वरः ।
गिरयः सागरा नद्यस्तथैवाप्सरसो गणाः ।
ग्रहाः संवत्सराश्चैव अयनान्यृतवस्तथा ।
स्थावरं जङ्गमञ्चैव जगत् सर्व्वं सुरासुरम् ।
भारते भरतश्रेष्ठ ! एकस्थमिह दृश्यते ॥
तेषां श्रुत्वा प्रतिष्ठानं नामकर्म्मानुकीर्त्तनात् ।
कृत्वापि पातकं घोरं सद्यो मुच्येत मानवः ॥१॥
इतिहासमिमं श्रुत्वा यथावदनुपूर्व्वशः ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारत ! ॥
तेषां श्राद्धानि देयानि श्रुत्वा भारत ! भारतम् ।
ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ ! ॥
महादानानि देयानि रत्नानि विविधानि च ।
गावः कांस्योपदोहाश्च कन्याश्चैव स्वलङ्कृताः ॥
सर्व्वकामगुणोपेता यानानि विविधानि च ।
भवनानि विचित्राणि भूमिर्व्वासांसि काञ्चनम् ॥
वाहनानि च देयानि हया मत्ताश्च वारणाः ।
शयनं शिविकाश्चैव स्यन्दनाश्च स्वलङ्कृताः ॥
यद्यद्गृहे वरं किञ्चित् यद्यदस्ति महद्वसु ।
तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनवः ॥
श्रद्धया परया दत्तं क्रमशस्तस्य पारगः ।
शक्तितः सुमना हृष्टः शुश्रूषुरविकल्पकः ॥०॥
सत्यार्ज्जवरतो दान्तः शुचिः शौचसमन्वितः ।
श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु ॥
शुचिः शीलान्विताचारः शुक्लवासा जितेन्द्रियः ।
संस्कृतः सर्व्वशास्त्रज्ञः श्रद्दधानोऽनसूयकः ।
रूपवान् सुभगो दान्तः सत्यवादी जितेन्द्रियः ।
दानमानगृहीतश्च कार्य्यो भवति वाचकः ॥
अविलम्बमनायस्तमद्रुतं धीरमूर्ज्जितम् ।
असंसक्ताक्षरपदं स्वरभावसमन्वितम् ॥
त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमीरितम् ।
वाचयेद्वाचकः स्वस्थः स्वासीनः सुसमाहितः ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ईदृशाद्वाचकाद्राजन् ! श्रुत्वा भारत ! भारतम् ।
नियमस्थः शुचिः श्रोता शृण्वन् स फलमश्नुते ॥
पारणे प्रथमं प्राप्ते द्विजान् कामैश्च तर्पयेत् ।
अग्निष्टोमस्य यज्ञस्य फलं वै लभते नरः ॥
अप्सरोगणसङ्कीर्णं विमानं लभते महत् ।
प्रहृष्टः स तु देवैश्च दिवं याति समाहितः ॥
द्वितीयं पारणं प्राप्य अतिरात्रफलं लभेत् ।
सर्व्वरत्नमयं दिव्यं विमानमधिरोहति ॥
दिव्यमाल्याम्बरधरो दिव्यगन्धविभूषितः ।
दिव्याङ्गदधरो नित्यं देवलोके महीयते ॥
तृतीयं पारणं प्राप्य द्वादशाहफलं लभेत् ।
वसत्यमरसङ्काशो वर्षाण्ययुतशो दिवि ॥
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलम् ।
उदितादित्यसङ्काशं ज्वलन्तमनलोपमम् ॥
विमानं विबुधैः सार्द्धमारुह्य दिवि गच्छति ।
वर्षायुतानि भवने शक्रस्य दिवि मोदते ॥
षष्ठे द्विगुणमस्तीह सप्तमे त्रिगुणं फलम् ।
कैलासशिखराकारं वैदूर्य्यमणिवेदिकम् ।
परिक्षिप्तं बहुविधैर्मणिविद्रुमभूषितम् ।
विमानं समधिष्ठाय कामगं साप्सरोगणम् ।

सर्वान् लोकान् विभाति दिनेव इव भास्करः ।
अष्टके दानधर्मज्ञ पारणे भवति यद्यम् ॥
चन्द्रसूर्याभं द्व्यं विमानमधिरोहति ।
चन्द्रादित्यनिभाकारैर्वेष्टितं मणोरथैः ॥
तिष्ठमानो वरस्त्रीणां चन्द्रात् कामवरैर्युतैः ।
केलयानां विनादेन नूपुराणां च निस्वनैः ।
ततः परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे त्वद्दानस्य पारणेषस्य भारत ! ॥
काञ्चनमणिवर्दे वैदूर्यकनकोज्ज्वलम् ।
चामरादीनि श्वेतानि तुल्यं तानि ददन् ।
किङ्किणीजालसञ्छन्नं सर्वकाममयं पुरम् ॥
विमानं यानमधिष्ठाय विभा परमया ज्वलन् ।
हिमवत्कान्तसदृशी शिखाचन्द्रवर्णिनः ।
मोदते देवैः सार्द्धं दिवि देव इवापरः ।
दशमे पारणं प्राप्य किङ्किणीजालमिश्रितं च ।
किङ्किणीजालनिर्घोषैः सुनाशाभ्यवशीभितम् ॥
वसुदेवविसर्ग्गार्थं वैदूर्यमणिशोभितम् ।
हेमवामनपरिक्षिप्तं प्रवालवृकोसुखम् ॥
गन्धर्वैरप्सरोभिश्च नृत्यद्भिरिव शोभितम् ।
विमानं सुमनाकारं सुकृतैरुपपद्यते ॥
शुक्लाम्बरधरैर्देवैः कामनुराभिपूजिता ।
हिमवच्छिखराकारो विमानाद्विभूषितः ।
दिवान् लोकान् विचरति दिव्यैर्भोगैः समन्वितः ।

तिसृणां प्रथमादेव विभा परमया पुनः ॥
अथ षोडशामेव भात्मनिं महीयते ॥
अथ समस्तैर्वाहिनः सहस्राण्यमरेन्द्रितम् ।
पुरन्दरपुरे रम्ये प्रतीक्ष्य सह मोदते ॥
दिव्यवादित्रनादेषु गीतेषु विविधेषु च ।
दिव्यमाल्याम्बरधरो दिव्यगन्धानुलेपनः ॥
ततः प्रभृति सर्वाणि भवति प्रियतमा ।
द्विवर्षं भवति राजन् ! विमानमिति सर्वत्र ।

एवमेतत्समाख्यातं ! सर्व कामानि विचारय ।
वत्सरेणैव वै भाद्रे देवमायामनुवर्तिन ॥
कौरव्य तु दानवं प्रथमं सद्वर्तिमान् ।
स्वर्गनद्यां पुष्पवनेषु गन्धर्वैः शिवितः ।
चतुर्थं पुरुषं चैव सपुत्रं मनाशम् ।
स्वर्गेण विविधैश्च नन्दनेन विमानः ।
देवान् पूजयेत् विष्णोर्गन्धमाल्यागतान् । ० ।
अतः परं प्रवक्ष्यामि दानि देयानि भारत ।
वाण्यानि तु विविधानि राजन् ! धर्माणि धर्मविदः ॥
कार्णे दैवतं स्वर्गं भाद्राणां भरतर्षभ ! ।
सर्वदानानि विज्ञाय स्थितवान् महामते ! ॥
मासेनानेन विचारयेत् ततः क्षमि धारयेत् ।
मासं वै षष्ठिं ततः प्रथमे पुरुषेत् द्विजान् ।
भाद्रे तु पायसान्नं दद्यान्मधुसर्पिषान्वितम् ।
पितृदैवतेभ्यो च राजन् ! मधु दापयेत् ततः ॥
ततो भरतश्रेष्ठ पायसं मधुसर्पिषा ।
आश्विने श्रीवृद्धये तु प्रसन्नेन दद्याद्देवम् ।
कार्तिके तु पूर्वेण भोजयेत् सुसंस्कृतम् ।
मार्गशीर्षे राजेन्द्र ! सर्वं भोजयेद् द्विजान् ।

आरम्भे वै गन्धमाल्यैर्यथेष्टं द्विजोत्तमान् ।
अर्घ्येणार्चयेत् राजन् कनकभाजं प्रदापयेत् ॥
सर्वाणि च सुगन्धानि रत्नानि भक्ष्याणि च ।
धर्मकामगुणोपेतं विविधोदकं प्रदापयेत् ।
विराटपर्वणि तथा कार्त्तिकं विविधानि च ।
उद्योगे भरतश्रेष्ठ ! धर्मकामगुणान्वितम् ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ।
भीष्मपर्वणि राजेन्द्र ! दत्त्वा यानमुत्तमम् ।
ततः सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितम् ।
शराश्च देया राजेन्द्र ! चापान्यसिवरास्तथा ।
कर्णपर्वण्यपि तथा भोजनं सार्वकामिकम् ।
विप्रेभ्यः संस्कृतं सम्यक् दद्यात् संयतमानसः ।
शल्यपर्वणि राजेन्द्र ! मोदकैः सगुडौदनैः ।
अपूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ।
गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥
स्त्रीपर्वणि तथा रत्नैस्तर्पयेत् द्विजोत्तमान् ।
घृतौदनं पुरस्ताच्च ऐषीके दापयेत् पुनः ॥
ततः सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिपर्वण्यपि तथा हविष्यं भोजयेद्
द्विजान् ।
आश्वमेधिकमासाद्य भोजनं सार्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यं भोजयेद् द्विजान् ॥
मौषले सार्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत् सर्वकामगुणान्वितम् ॥
स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद् द्विजान् ।
हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ॥
पारणे पारणे राजन् ! यथावद्भरतर्षभ ! ।
समाप्य सर्वाः प्रयतः संहिताः शास्त्र-
कोविदः ॥
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ।
शुक्लाम्बरधराः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः ॥
अर्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकान् राजन् ! प्रयतः सुसमा-
हितः ॥
भक्ष्यैर्माल्यैश्च पेयैश्च कामैश्च विविधैः शुभैः ।
हिरण्यञ्च सुवर्णञ्च दक्षिणामथ दापयेत् ॥
देवताः कीर्त्तयेत् सर्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलङ्कृत्य द्विजोत्तमान् ।
तर्पयेद्विविधैः कामैर्दानैरुच्चावचैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
प्राप्नुयाच्च क्रतुफलं तथा पर्वणि पर्वणि ।
वाचको भरतश्रेष्ठ ! व्यक्ताक्षरपदस्वरः ॥
भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ ! ।
भुक्तवत्सु द्विजेन्द्रेषु यथावत् सम्प्रदापयेत् ॥
वाचकं भरतश्रेष्ठ ! भोजयित्वा स्वलङ्कृतम् ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः । ० ।
ततो हि वरणं कार्यं द्विजानां भरतर्षभ ! ॥
सर्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ।
इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर ! ॥
श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि ।

भारतश्रवणाद्धि पारणे च नृपोत्तम ! ॥
सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता ।
भारतं शृणुयान्नित्यं भारतं परिकीर्तयेत् ॥
भारतं भवने यस्य तस्य हस्तगतो जयः ।
भारतं परमं पुण्यं भारते विविधाः कथाः ॥
भारतं सेव्यते देवैर्भारतं परमं पदम् ।
भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ ! ॥
भारताद् प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते ।
महाभारतमाख्यानं क्षितिं गाञ्च सरस्वतीम् ॥
ब्राह्मणान् केशवञ्चैव कीर्त्तयन्नावसीदति ।
वेदे रामायणे पुण्ये भारते भरतर्षभ ! ॥
आदौ चान्ते च मध्ये च हरिः सर्वत्र गीयते ।
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः ।
तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता ॥
एतत् पवित्रं परमभेतद्धर्मनिदर्शनम् ।
एतत् सर्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥"
इति महाभारते हरिवंशे भविष्यपर्वणि श्रवणानुकीर्त-
नम् ॥ ० ॥ मित्रविन्दचन्द्रशुद्धमिश्र कियति
वर्णाः । अ इ उ ऋ ऌ इति ह्रस्वपञ्चकम् ।
आ ई ऊ ॠ ॡ इति दीर्घपञ्चकम् । ए ऐ
ओ औ इति सन्ध्यक्षरम् । ए ऐ ओ औ च
दीर्घाः । अनुस्वारविसर्गौ । कं खं गं
घं इति स्पर्शः । ङ ञ इति अनुस्वारो
ह्री । अनुनासिकश्चैकः । तथा कादिमावसानाः
स्पर्शाः पञ्चविंशतिः । यरलवाः । शष-
सहा इति विवृतिः । इति । ० । वर्णास्तु
त्रिप्रकारा स्वरास्ति भवन्ति तानि यथा,—
"स्वरः क्षयः शिरःस्थानि विश्वार्णवो-
द्भविता ।
आदौ त्रयाणि वर्णानि ये तिस्त्रोऽपि
सप्तकस्य ॥"
मात्रकं यथा,—
"भारतं पञ्चमोऽपि नुविषा प्रकीर्तिता ।
धर्मनिर्देशमिच्छेत सर्वता भारतं स्मृतम् ॥"
इति त्रिकाण्डशेषः ।
"भूतानां प्रथमं मौर्यं द्वितीयं स्मृतिविस्तरम् ।
चतुर्वर्गाणां प्रणीतम्भीष्माख्यं तु त्रिवेदम् ।
पञ्चमं दोषदर्शनं कथितं भारतं मतः ।
निर्धोषाणामन्तु शान्तिपर्वणामधिकृतम् ।
सप्तमं सर्वधर्माणामाश्रमेधिकं, परम् ।"
इति च भारतटीकायां अर्जुनमिश्रः ।
(अस्त्रपुत्रमि भारतशब्दे द्रष्टव्यम् ।)
महाभीता, स्त्री, (महत्याधिका भीतिः ।) लज्जालु-
वृक्षः । यथा, शब्दचन्द्रिकायाम् ।
"लज्जालुश्च महाभीता रक्तिका च सती-
र्त्तिः ॥"
(महाराणिवती भीरुः ।) अतिशयभयशीले, त्रि ।
महाभीम, पुं, (महाभयङ्करः भीमः ।) शान्तनु-
राजसुतः । विचित्रवीर्याग्रजस्य भ्राताः ।
द्वाविंशतिः । इति भरतः । भीष्मः ।
शिवपार्षदः । इति त्रिकाण्डशेषः । मही-
ष्मकाख्ये, त्रि ।

महाभीरः, पुं, (महानतिशयो भीरुः ।) गोपालिकाख्यकीटविशेषः । इति हेमचन्द्रः । ४ । २१६ । अतिभयशीले, त्रि ॥

महाभीरुः, पुं, (महानतिशयो भीरुः ।) शाम्तगुदाखः । इति त्रिकाण्डशेषः ॥

महाभूतं, क्ली, (महत् भूतम् । पञ्चतन्मात्रेभ्यः स्थौल्यादस्य तथात्वम् ।) पृथिव्यादिपञ्चभूतम् । यथा,—
"महाभूतानि पञ्चैव खानिलाग्न्यम्बुभूमिभिः ॥"
इति शब्दचन्द्रिका ॥
(अस्य विषय उत्पत्तिश्च यथा,—
"तन्मात्रेभ्यो वियद्वायुवह्निवार्य्युवसुन्धराः ।
एतानि पञ्च जायन्ते महाभूतानि तत्क्रमात् ॥"
एकोत्तरपरिवृद्धा वियदादयो जायन्त इत्यर्थः । तद्यथा । शब्दतन्मात्राच्छब्दगुणं वियज्जायते । शब्दतन्मात्रसहितात् स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुर्जायते । शब्दतन्मात्रस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शरूपगुणो वह्निर्जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रसहिताद्रसतन्मात्राच्छब्दस्पर्शरूपरसगुणं वारि जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रसहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा वसुन्धरा जायते ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥" "माहाभूतविकारा एव तन्मात्राकाशात्मकं शब्दः श्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च । वाय्वात्मकं स्पर्शः स्पर्शनञ्च रौक्ष्यं प्रेरणं धातुव्यूहनं चेष्टाश्च शारीर्य्यः । अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यञ्च । अबात्मकं रसो रसनं शैत्यं मार्द्दवः स्नेहः क्लेदश्च । पृथिव्यात्मको गन्धः घ्राणं गौरवं स्थैर्य्यं मूर्त्तिश्च ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥ शिवः । महाप्राणिनः । यथा, महाभारते । १ । ११८ । ३८ ।
"रक्षताको महाभूतैः सिद्धैश्च परमर्षिभिः ॥")

महाभद्रः, पुं, (महान् भद्रं यस्मिन् ।) नीलभृङ्गराजः । इति राजनिर्घण्टः ॥

महाभैरवः, पुं, (महान् भैरवः ।) शरभरूपी हरः । यथा,—
"ओंमो महाभैरवाख्यः शङ्करः शरभो हरः ।
भैरवः पञ्चरात्रं महाशब्दो हरात्मजः ॥"
इति कालिकापुराणे ४६ अध्यायः ॥
(क्ली, शिवाविशेषः । यथा च प्रबोधचन्द्रोदये । १ । ५१ । "तत्र महाभैरवी शिवा धर्म्ममहामोदायन्तमहामहः ॥")

महाभोगा, स्त्री, (महान् आभोगः परिपूर्णभावः । यद्वा, महान् भोगः सुखरूपसम्पत्तिः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्यायः ।
"महादेवात्मिका देवी महाभोगा ततः स्मृता ॥"
(महाभोगो विद्यमानोऽस्य । महाविस्तारशालिनि, त्रि । यथा, कथासरित्सागरे । १०१ । ७८ ।
"तत्रैव महाभोगं महावनसमुत्कटम् ।
ददर्श्श सरस्तीरस्थं महामहीरुहम् ॥")

महामण्डूकः, पुं, (महान् मण्डूकः ।) पीतमण्डूकः । इति राजनिर्घण्टः । कोलाबेङ् इति भाषा ॥

महामतिः, त्रि, (महती मतिर्यस्य ।) अतिबुद्धिमान् । यथा,—
"किमेतन्नाभिजानामि जानन्नपि महामते ! ।
यत् प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

महामदः, पुं, (महान् मदो यस्य ।) मत्तहस्ती । इति शब्दरत्नावली ॥ (महान् मदः ।) अतिशयहर्षः । अतिशयमत्तता च । तद्युक्ते, त्रि ॥

महामनाः, [स्] त्रि, (महत् प्रशस्तं मनो यस्य ।) महाशयः । यथा,—
"महेच्छे तूदात्तोदारोदात्तोदीर्णमहाशयाः ।
महामना महात्मा च————॥"
इति हेमचन्द्रः । ३ । ११ ॥
(यथा, ऋग्वेदे । १० । १०३ । ९ ।
"इन्द्रस्य वृष्णो वरुणस्य राज्ञ
आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां
घोषो देवानां जयतामुदस्थात् ॥"
"महामनसां उदारमनसाम् ।" इति तद्भाष्ये सायनः ॥ महाशालपुत्रः । यथा, हरिवंशे । ३१ । २० ।
"महामना नाम सुतो महाशालस्य धार्म्मिकः ॥")

महामहावारुणी, स्त्री, (महती वारुणी महावारुणी चेति ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रशुभयोगयुक्तचैत्रकृष्णत्रयोदशीरूपः । यथा,—
"शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

महामांसं, क्ली, (महत् गर्हितं मांसम् । अत्र मांसशब्दस्य पूर्व्वप्रयुक्तत्वात् महच्छब्दस्य गर्हितार्थत्वम् ।
"षट्के तैले तथा मांसे वैद्ये ज्योतिषके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"
इति स्मरणात् ।)
नरादिपिशितम् । यथा,—
"अस्थ्ना रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः ।
पूजयेद्भूतनाथेशं बलिभिर्व्विवरैः शिवाम् ॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥
अपि च ।
"नीवरौ भावनाविबलवरास्थिरोद्वोधनम् ।
महामांसार्च्चनं देवि ! देवताप्रीतिकारकम् ॥"
इति नीलतन्त्रदीपिका ॥

महामात्रः, पुं, (महती मात्रा मर्य्यादापरिमाणं यस्य ।) प्रधानः । इत्यमरः । २ । ८ । ४ ॥ भैया बहादुर इति भाषा ॥ महती मात्रा अर्थ इत्यर्थो वा यस्य । इति भरतः ॥ (यथा, रामायणे । २ । ११ । १८ ।
"तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ।
वर्षमध्ये वीरः शासनं तदा ॥
चतुर्विंशतितीर्थकृतां महाप्रदीपे ॥
वर्धमानः कर्त्ता पूजा कार्त्तिकमासे ॥
प्रभावोद्भवं कैवल्यं निर्वाणं तुष्टाः ॥

ग्निर्वाणं चतुर्भेदं तत्र श्रीवृषभा दधुः ।
निर्मोक्षोऽपि यथाशक्ति नियमैर्व्वकमस्थिरे ।
ईशाः षड्वर्षमासाब्जनिभधूलासु रेमिरे ।
वीतिश्चैव तु यत् पूर्व्वं वक्तारम्भयरयतात् ।
परस्मिन्निष्क्रमारम्भं भारकायुक्रमक्रमे ।
तत्र श्राविकसम्यक्त्वात् खण्डितं प्रथमश्चितौ ।
प्रापद् वर्षसहस्राणामशीतिं चतुरुत्तराम् ।
चर्तुर्विंशतु चतुराः स च चैमसमहोक्तितः ।
चक्री श्राविकसम्यक्त्वप्रभावोऽप्यनुत्तरः ।
चक्री धारिणीको यो यो भवः स तथापरे ।
कुमारा मानवर्षेषु महापालःपुरस्थितः ।
सम्यक्त्वं शीलवद्दानं प्रोषधं जिनपूजनम् ।
प्रतिपद्य जिनेन्द्रोक्तं जिनेन्द्रं जिनसद्गृहम् ।
ततः प्रयच्छ ईशेन्द्रा जिनेन्द्रं स्तोत्रपूर्व्वकम् ।
यथार्थं चतुर्युक्ता जिनवर्णितमादरम् ।
सोऽपिकोऽपि गुणश्रेणीसमवकेरभिरूढवान् ।
अभिदृश्य जिनं नत्वा प्रविष्टस्तद्धीपुरम् ।
निःसरद्भिर्विमुक्तिश्च सभा जैनी जनोर्म्मिभिः ।
क्षुभीम क्षुभितैर्वेला नदीपूरैरिवाम्बुधिः ।
व्याकीर्णमेव नैत्रिंशं सभामण्डलमर्हतः ।
चौयते वा कदा स्तौति भ्रातृभिर्मातृमण्डलम् ।
गोदयात्स्मितं तत्र ग्रायते मधमण्डलम् ।
धर्म्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ।
तत्र तीर्थंकरः कुर्व्वन् प्रश्नं धर्म्मदेशनम् ।
दीपितः श्रीजिनेन्द्रस्य न हि श्राविकापरंपरा ।
गौतमश्च समासाद्य सदा तदुपदेशतः ।
सर्व्वानुयोगमार्गेषु प्रवीणः स गुणोऽभवत् ।
ततो जिनवरैस्तुङ्गैरास्ता राजगृहं पुरम् ।
ततमर्त्तवैद्यामनर्षं महितोत्सवैः ।
ततः सामन्तपंक्तिर्मध्यमनिपुरोहितैः ।
प्रजाभिर्मैत्रिभिर्वाक्यौ मगधो विषयोऽखिलः ।
पुरेषु ग्रामघोषेषु पर्व्वमाणे स्वहरन ।
नदीतटवनान्तेषु तदा तद्जिनावली ।
निरुद्धैव महोदये विघटयन्नीदृग्र्थकारोमतिं
माग्दैशप्रमया विधाय मगधादेर्ग्र्यं प्रवृद्धयम् ।
तद्दत्ता एषु देशगणमसमयाष्णेष्वीधरं
मिथ्याज्ञानतिमिराग्रहाक्लिनवर्विवर्द्धितप्रभा-
मण्डलः ॥")
कोकिलः । इति हेमचन्द्रः । धनुर्वेदः । इति
शब्दरत्नावली । एकवीरवृक्षः । इति राज-
निर्घण्टः । जम्बुकः । यथा,—
"जम्बुकश्च महावीरे प्रविशे रघुनन्दने ।"
जडरादिः । यथा,—
"जडरादिभिर्महावीरैर्वेष्टितं चन्दनप्रियम् ।"
इति तन्त्रसारे हनूमत्कवचम् ।
हनूमान् पवनस्य महावीरत्वेन प्रसिद्धः ।
महावीरा, स्त्री, (महावीर + टाप् ।) क्षीर-
काकोली । इति रत्नमाला ।
महावीर्य्यः, पुं, (महत् विश्वरूपे विपुलं वीर्य्य-
मस्य ।) ब्रह्मा । इति शब्दरत्नावली । (महत्
वीर्य्यं तपोबलमस्य ।) बुद्धभेदः । इति त्रिकाण्ड-
शेषः । वाराहीकन्दः । इति राजनिर्घण्टः ।
(वितथस्य पुत्रभेदः । यथा, भागवते । ९ ।
२१ । १ ।
"वितथस्य सुतान्मन्योर्बृहत्क्षत्रो जयस्ततः ।
महावीर्य्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥")
अतिशयबलयुक्ते, त्रि । (यथा, महाभारते ।
५ । १७३ । ६९ ।
"ततः स्थित महावीर्य्यो भीष्मः शान्तनवो
नृपान् ।
अधिक्षिप्य महातेजास्तिस्रः कन्या जहार
ताः ॥"
विराजः पुत्रः । यथा, विष्णुपुराणे ।४।१।१९।
"नरो गयस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ।")
महावीर्य्या, स्त्री, (महत् वीर्य्यमस्याः टाप् ।) संज्ञा ।
सा च सूर्य्यपत्नी । इति त्रिकाण्डशेषः । वन-
कार्पासी । इति शब्दरत्नावली । महाशता-
वरी । इति राजनिर्घण्टः ।
महावृषती, स्त्री, (महती वृषती ।) वार्त्ताकी ।
इति त्रिकाण्डशेषः ।
महावृषः, पुं, (महान् वृषः ।) कुशीवृषः ।
इति हलायुधः । (यथास्य पर्य्यायः ।
"वनवृषो महावृषः कुशी कुष सुधा गुडा ।"
यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"महावृषनयःपीतैर्घृतान्तकुलैः छता ।
पीता विरेचयत्याशु गुडेनोत्कारिका क्षता ॥")
इत्यदूरवच ।
महावेगः, पुं, (महान् अमोघो दुर्न्निवारो वा वेगो
यस्य ।) शिवः । इति महाभारते तस्य सहस्रनाम-
स्तोत्रम् । (महान् वेगः ।) अतिजवः । (महान्
वेगोऽस्य ।) तद्युक्ते, त्रि । (यथा, महाभारते ।
१ । १५६ । १२ ।
"विकर्षन्तौ महावेगौ गर्ज्जमानौ परस्परम् ।
पश्य त्वं युधि विक्रान्तावेतौ च नरराक्षसौ ॥")
महाव्याधिः, पुं, (महांश्चासौ व्याधिश्चेति ।)
महारोगः । स तु कुष्ठादिः । यथा,—
"सर्व्वव्याधिविनिर्मुक्तो महाव्याधिविशेषतः ।
पठनात् धर्म्मराजस्य जीवन्मुक्तो भवेन्नरः ॥"
इति मदर्थमते गायत्रीकवचम् ।
महाव्याहृतिः, स्त्री, (महती चासौ व्याहृतिश्चेति ।)
प्रणवस्वाहायुक्तव्याहृतित्रयम् । यथा । ॐ भूः
स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ।
इति भवदेवभट्टः । (यथा, मनौ । २ । ८१ ।
"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) दुष्करम् ।
माघी वा इति भाषा । यथा,—
"कुर्य्यात् वामदशाद्व्रतं तथाद्वादशकं मिथे ।
महाव्रतविमोक्षाय विद्याहारं महेश्वरः ॥"
इति तिथ्यादितत्त्वधृतवाराहीतन्त्रवचनम् ।
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) द्वादश-
वार्षिकव्रतम् । यथा । 'तेन वधकाद्यादौ पूर्व्व
विहितद्विविधमहत्त्व यावत्कामिदं वाक्यपरि-
भाषमहाव्रतानुष्ठानात् द्वेष्यो दातव्याः ।' इति
प्रायश्चित्तविवेके भवदेवभट्टमतम् । द्वाद-
शाब्दीयदुर्गापूजनम् । यथा,—
"महाव्रतं महापुण्यं शङ्करादैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितैः ॥"
इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ।
अरुणोदयकालीनमाघस्नानम् । यथा,—
"वासुदेवं हरिं कृष्णं श्रीधरञ्च मारेशतः ।
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"
इति मलमासतत्त्वधृतपद्मपुराणवचनम् ।
(महाव्रतधारिणि, त्रि । यथा, महाभारते ।
१३ । ५४ । २१ ।
"ततोऽश्वमिम् वनोद्देशे पुनरेव ददर्श तम् ।
कौशिकीं ह्यथ दामोदर स्वयमानं महा-
व्रतम् ॥")
महाव्रती, [न्] पुं, (महाव्रतं योगविषयाद्भावना-
दिकमस्त्यस्येति । व्रत + इनिः ।) शिवः । इति
हेमचन्द्रः ।२।११३। चरस्कटः । इति त्रिकाण्ड-
शेषः । महाव्रतयुक्ते, त्रि । (यथा, कथासरित्-
सागरे । ६७ । ९८ ।
"यतक्षुत्स्वापि वाक्याश्च गच्छनिर्जितादा ।
कपुनिधधर्षं ते पतारः महाव्रतिनः ॥")
महाशक्तिः, पुं, (महत्यः शक्तयः माहात्म्यादयो
मदद्या सामर्थ्यं वा यस्य ।) कार्त्तिकेयः । इति
शब्दमाला । (महती शक्तिः ।) अतिशयपरा-
क्रमः । तद्वतीशक्तिरस्य तद्युक्ते, त्रि ।
महाशङ्खः, पुं, (महान् शङ्ख इव शुभ्रत्वात् ।)
नरास्थि । संख्याविशेषः । स च दश-
निखर्व्वः । शतार्बुदम् । इति मेदिनी । खे, ११ ।
(महान् महार्घः शङ्खः ।) निधिविशेषः । इति
त्रिकः । कर्म्मणैवमोभिनवतारिते । यथा,—
"कर्म्मणैवमारासाशि महाशङ्खः प्रकीर्त्तितः ।"
तस्य मालया जपविधिर्यथा,—
"महाशङ्खमयी माला ज्ञेयाधारमतं शिवे ।
कृतकाष्टाखिललक्षेन रचिता जपमालिका ।
महाशङ्खमयी माला ताराविद्याप्रियं शिवे ॥"
इति तन्त्रसारधृतमुण्डमालातन्त्रम् ।
(महान् शङ्खः ।) वृहच्छङ्खः । यथा,—
"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥"
इति श्रीमद्भगवद्गीतायाम् १ अध्यायः ।
(सर्पभेदः । यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पाताले नागलोकपतयो वासुकि-
प्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जय-
धृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महा-
भोगिनो महामर्षा निवसन्ति ।")
महाशठः, पुं, राजधत्तूरः । इति राजनिर्घण्टः ।
(महांश्चासौ शठश्चेति ।) अतिधूर्त्ते, त्रि ।
महाशतावरिका, स्त्री, (अल्पं पुष्पं इति कनार्थे
ङीष् । ततः स्वार्थे कन् स्त्रियां टाप् पूर्व्वस्य
ह्रस्वश्च । महत्येव शतावरिका यस्याः । महती-
चासौ शतावरिका चेति ।) इक्षुकन्दी ।

तत्पर्य्यायः। शतपर्व्वी २ श्वेतपुष्पा ३ महाशिता ४ महाश्वेतघण्टी ५ महाश्वेता ६। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। शूलत्वम्। रक्तपित्तामकत्वम्। कृच्छ्रमूत्रमोचनलघुत्वादिषु प्रोक्तत्वञ्च। इति राजनिर्घण्टः॥

महाशता, स्त्री, (महत् शतञ्च फलानि यस्याः। टाप्।) महाशतावरी। इति राजनिर्घण्टः॥

महाशतावरी, स्त्री, (महती चासौ शतावरी चेति।) दृहच्छतावरी। तत्पर्य्यायः। शतवीर्य्या २ सहस्रवीर्य्या ३ सुरसा ४ महापुरुषदन्तिका ५ वीरा ६ तुङ्गिनी ७ बहुपुत्रिका ८ ऊर्द्ध्वकण्टी ९ महावीर्य्या १० पर्व्विवल्लिका ११ महाशता १२ सुवीर्य्या १३। अस्या गुणाः। शीतत्वम्। मधुरत्वम्। पित्तनाशित्वम्। हिमत्वम्। मेहकफवातप्रशमत्वम्। तिक्तत्वम्। पौष्टत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"महाशतावरी मध्या शतमूल्यूर्द्ध्वकण्टिका।
सहस्रवीर्य्या विज्ञेया अभ्यप्रोक्ता महोदरी॥
महाशतावरी मेध्या हृद्या वृष्या रसायनी।
शतवीर्य्या निहन्त्यर्शोग्रहणीनयनामयान्॥"
इति भावप्रकाशः॥

महाशयः, त्रि, महान् आशयोऽभिप्रायो मनो वा यस्य सः। इति भरतः॥ तत्पर्य्यायः। महेच्छः २। इत्यमरः। ३।१।३॥ महानुभावः ३। इति शब्दरत्नावली॥ उदारः ४ महामनाः ५। इति जटाधरः॥ उद्भटः ६ उदारः ७ उदीर्णः ८ महात्मा ९। इति हेमचन्द्रः। ३।११॥ (यथा, कथासरित्सागरे। ४१।११८।
"देवस्मृतः सुमनाश्च वराहो महाशयः॥"
महान् आशयो जलानामाधारः।) समुद्रे, पुं। इति शब्दरत्नावली॥

महाशय्या, स्त्री, (महती चासौ शय्या चेति।) राजशय्या। इति हेमचन्द्रः। ३।१८०॥ हस्तिशय्या च॥

महाशरः, पुं, (महांश्चासौ शरश्चेति।) स्थूलशरः। इति राजनिर्घण्टः॥

महाशल्कः, पुं, (महान् शल्कः शल्को यस्य।) चिङ्गटमत्स्यः। इति हारावली।१८७॥ (यथा, मनुः। ३।२७२।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः॥"
(महान् शल्कः।) दृहच्छल्कञ्च। तद्युक्ते, त्रि॥

महाशाकं, क्ली, (महच्च तत् शाकञ्च।) दृहच्छाकविशेषः। इति वैद्यकम्॥

महाशाखा, स्त्री, (महती शाखा यस्याः।) नागबला। इति राजनिर्घण्टः॥

महाशालिः, पुं, (महांश्चासौ शालिश्च।) स्थूलशालिः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। शालिवरः २। इति हेमचन्द्रः। ४।२४१॥ (अ च धान्यविशेषः। तद्यथा,—
"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्द्दमको महाशालिश्च दूषकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महाशिवः, पुं, (महांश्चासौ शिवकल्याणरूपी च।) महादेवः। यथा,—
"इत्यर्च्चितावदनञ्च महाभूतस्वमूर्त्तिकम्।
महाशिवं शिवकरं शिववीजं शिवाश्रयम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २८ अध्यायः॥

महाशीता, स्त्री, (महत्यधिका शीता शीतवीर्य्या।) शतमूली। इति शब्दचन्द्रिका॥ (महत् शीतं शीतगुणोऽस्य।) अतिशीतवीर्य्ययुक्ते, त्रि॥

महाशुक्तिः, स्त्री, (महती शुक्तिः। मुक्ताकरत्वेनास्या महत्त्वम्।) मुक्तामाता। या च शुक्तिः। इति राजनिर्घण्टः॥ (महती स्थूला शुक्तिः।) दृहच्छुक्तिश्च॥

महाशुक्ला, स्त्री, (महती चासौ शुक्ला शुक्लवर्णा च।) सरस्वती। इति भूरिप्रयोगः॥ अतिशुक्लवर्णयुक्ते, त्रि॥

महाशुभ्रं, क्ली, (महान् शुभ्रो वर्णोऽस्य।) रजतम्। इति राजनिर्घण्टः॥ अतिशुभ्रवर्णयुक्ते, त्रि॥

महाशूद्रः, पुं, (महान् शूद्रः।) आभीरः। इति महाशूद्रीशब्ददर्शनात्॥

महाशूद्री, स्त्री, (महाशूद्रस्य भार्य्या इति। "अजाद्यतष्टाप्।" ४।१।४। इत्यस्य "महत्पूर्व्वस्य प्रतिषेधः।" इति वार्त्तिकोक्त्या पुंयोगलक्षणा ङीष्।) आभीरी। इत्यमरः। २।६।१३॥

महाशौकी, स्त्री, (महती चासौ शौकी च।) श्वेतविकिनीकीटः। इति राजनिर्घण्टः॥

महाश्मशानं, क्ली, (महच्च तत् श्मशानञ्च। अत्र हि जीवानां मरणे तारकब्रह्मोपदेशात् पुनर्जन्मसंसाराभावात् तथात्वम्।) काशी। इति काशीखण्डम्॥

महाश्यामा, स्त्री, (महती चासौ श्यामा च।) श्यामालता। इति रत्नमाला॥ शिंशपावृक्षः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते उत्तरतन्त्रे १८ अध्याये। "श्यामामहाश्यामावल्लीत्यादि।" हस्तपादिकः। तत्पर्य्यायो यथा,—
"वृद्धदारा महाश्यामा हस्तिकर्णीति कथ्यते॥"
इति गारुडे २०८ अध्याये॥)

महाश्रमणः, पुं, (महान् श्रेष्ठश्चासौ श्रमणो बौद्धभिक्षुश्चेति।) बुद्धविशेषः। स च शाक्यमुनिः। तत्पर्य्यायः। सर्व्वार्थसिद्धः २ शुद्धोदनिः ३ गौतमः ४। इति हेमचन्द्रः॥

महाश्रावणिका, स्त्री, (महती चासौ श्रावणिका च।) क्षुपविशेषः। सा कदम्बपुष्पी इति भाषा। तत्पर्य्यायः। महामुण्डी २ श्रवणी ३ कदम्बपुष्पी ४ तिक्ता ५ श्रोणा ६ प्रोक्ता ७ पलङ्कषा ८ वरीवरनः ९ हस्तिका १० कुण्डलिका ११ माला १२ स्थविरा १३ कोलकी १४ भूकदम्बः १५ कदम्बिका १६। अस्या गुणाः। उष्णत्वम्। तिक्तत्वम्। ईषन्मधुरत्वम्। वायुप्रशमनत्वम्। कटुत्वम्। रेचनत्वम्। देहत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"मुण्डी भिक्षुरपि प्रोक्ता श्रावणी च तपोधना।
श्रवणाह्वा मुण्डितिका तथा श्रवणशीर्षिका॥
महाश्रावणिकान्या तु सा स्मृता भूकदम्बिका।
कदम्बपुष्पिका च स्यादव्यथा तु मतिप्रभो॥
मुण्डितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः।
मेध्या गण्डापचीमूत्रकृमियोन्यर्त्तिपाण्डुनुत्॥
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्त्तिहृत्।
महाश्रावणी च मुण्डी च गुणैस्तुल्या महर्षिभिः॥"
इति भावप्रकाशः॥

महाश्रीः, स्त्री, (महती श्रीरिव।) बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ आर्य्यतारा ३ स्वाहा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदिरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्दा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥

महाश्वेता, स्त्री, (महत्यतिशया श्वेता। महान् श्वेतो वर्णो यस्या वा।) सरस्वती। इति त्रिकाण्डशेषः॥ खण्डविकारः॥ तत्पर्य्यायः। क्षीरविदारी २ अश्वगन्धिका ३। इत्यमरः। २।४।११०॥ क्षीरविदारिका ४ क्षीरशुक्ली ५ क्षीरकन्दा ६। इति जटाधरः॥ क्षीरिका ७। इति शब्दरत्नावली॥ श्वेतापराजिता। इति रत्नमाला॥ (पर्य्यायोऽस्या यथा,—
"गिरिकर्णी महाश्वेता कृष्णपुष्पा सिता
कथिता॥"
इति वैद्यकरत्नमालायाम्॥)
सिता। तत्पर्य्यायः। मधुरा २। इति त्रिकाण्डशेषः॥ श्वेतविविधीरुधः। इति राजनिर्घण्टः॥
(पर्य्यायोऽस्या यथा,—
"वटभी विजिती श्वेता महाश्वेता च
रोहिणी॥")
दुर्गा। यथा, देवीपुराणे ४५ अध्याये।
"श्वेतं दृष्टं त्रिपद्मार्थं कर्णान्ते समाहिता।
महाभावनमुद्रया महाश्वेता ततः स्मृता॥"
([illegible] अन्या। [illegible] विजयो स्मृता॥)

महाषष्ठी, स्त्री, (महती चासौ षष्ठी च। महाष्टम्याः पूर्व्वा षष्ठी वा।) दुर्गा। यथा, ॐ ह्रूं ह्रूं ह्रूं ह्रूँ ह्रूँ [illegible] [illegible]।" इति [illegible] महाषष्ठीमन्त्रः॥

महाष्टमी, स्त्री, (महत्या महादेव्या अष्टमी। महती अष्टमीति वा।) आश्विनशुक्लाष्टमी। यथा,—
"आश्विने शुक्लपक्षस्य भवेद् या अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥"
इति कालिकापुराणे ५८ अध्यायः॥
अस्यां पूजाविधिः पूजकस्य उपवासनिषेधश्च यथा,—
"अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः।
पूजयेद्बहुनानीवेद्यैर्बलिभिर्भोजनैः शिवाम्॥
सिन्दूरैः पट्टवासैश्च नानाविधविलेपनैः।
पुष्पैर्नैकप्रकारैश्च फलैर्बहुविधैरपि॥
उपवासं महाष्टम्यां पुत्रवान् न समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्॥
पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्जयेद्दशम्यान्तु श्रवणे शावरोत्सवैः॥"
इति तत्रैव ६० अध्यायः॥
महाष्टमीपूजा। यथा,—
"कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत्।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः॥
पूजा समारभेद्विद्या नवम्यां वासरेऽपि वा।
पशुघातश्च कर्त्तव्यो गवलाजवधस्तथा॥"
इति देवीपुराणवचने वाक्यपदेन पूर्व्वाषाढ़ोक्तेः। इति तिथ्यादितत्त्वम्॥
महासनः, पुं, (महानतिशयः सनो विभवः कुवेरस्य। यद्वा, महतो हिमाद्रेर्महादेवस्य वा आसनः निकटवर्त्ती।) कुवेरः। इति शब्दमाला॥ (महदासनं यस्य।) अतिविकटश्च॥
महासरः, पुं, (महांश्चासौ सरश्च।) वृहत् शोणाम्लः। अस्य गुणाः। यथा,—
"महासरसंज्ञस्तु तिक्तः पित्तकफापहः।
शिशिरो मधुरो वर्णो वातपित्तहरः स्मृतः॥"
इति भावप्रकाशः॥
महासमङ्गा, स्त्री, (महती चासौ समङ्गा च।) क्षुपविशेषः। कांकिया इति हिन्दीभाषा। तत्पर्य्यायः। श्वेतसिता २ श्वेतमञ्जरी ३ बला ४ दला ५ शक्रता ६ सुफला ७ सुवर्ण्णका ८ शीतपाकिनी ९ शीतवला १० शीतावला ११ वलोत्तरा १२ बला १३ सिद्धेश्वरी १४ वालिका १५। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। दोषनाशित्वम्। मूत्रकृच्छ्रप्रयोगे ज्वरदाहनाशित्वञ्च। इति राजनिर्घण्टः॥
महासर्जः, पुं, (महांश्चासौ सर्जश्च।) पनसः। असनवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"अजकर्णो वीरसर्जो महासर्जोऽसनस्तु सः॥")
महासहः, पुं, (महते इति। सह+अच्। महान् सहः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥ काँटाकुब्ज इति गौड़देशे प्रसिद्धः। महासहस्य पर्य्यायः।
"अम्लानोऽम्लाटकः प्रोक्तस्तथाम्लातक इत्यपि।
कुरण्टको वर्णपुष्पः स एवोक्तो महासहः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
महासहा, स्त्री, (महासह+स्त्रियां टाप्।) माषपर्णी। (पर्य्यायोऽस्या यथा,—
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा।
हयपुच्छा च काम्बोजी पाण्डुलोमशपर्णिनी॥"
इति वैद्यकरत्नमालायाम्॥
पर्य्यायान्तरं यथा,—
"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च हयपुच्छा महासहा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
अम्लानकः। इत्यमरः।२।४।७३। (कुब्जकः। तत्पर्य्यायो यथा,—
"कुब्जको भद्रतरुणी वृत्तपुष्पोऽतिकेशरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
महासान्तपनं, क्ली, (महत् सान्तपनम्।) व्रतविशेषः। यथा। अथ महासान्तपनम्। तत्र दक्षसाध्यसान्तपनमुक्त्वा याज्ञवल्क्यः।
"पृथक्सान्तपनैर्द्रव्यैः षडहः सोपवासकः।
सप्ताहेनैव कृच्छ्रोऽयं महासान्तपनः स्मृतः॥
एतत् सप्ताहसाध्यम्। जावालः।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकैकं क्रमशोऽश्नीयादहोरात्रमभोजनम्॥
कृच्छ्रः सान्तपनो नाम सर्व्वपापप्रणाशनः।
एकैकमेतदेवं हि त्रिरात्रमुपयोजयेत्॥
त्र्यहञ्चोपवसेदन्त्यं महासान्तपने विधिः॥"
एतत् सप्ताहसाध्यसान्तपनयुक्ता एकविंशति-दिनसाध्यं महासान्तपनयुक्तम्। महासान्तपनं धेनुषट्कदानसमम्। जावालोक्तमहासान्तपनस्य एकविंशतिदिनसाध्यत्वेन सप्ताहसाध्यसान्तपनात् त्रिगुणत्वात् महासान्तपने धेनुषट्कं देयम्। इति प्रायश्चित्तविवेकः॥
महासारः, पुं, (महान् सारः स्थिरांशो यस्य।) शुभ्रखदिरः। इति राजनिर्घण्टः॥
महासाहसं, क्ली, (महच्च तत् साहसञ्च।) अतिबलात्कारेण कृतकार्य्यम्। अतिशयधृष्टता। इति साहसशब्दार्थे मेदिनी। सौ, ४५॥ (महत् साहसञ्च।) अतिदुष्करकर्म्म। अतिशयदम्भः। इति साहसशब्दार्थे हेमचन्द्रः।३।४००॥
महासाहसिकः, त्रि, (महानतिशयः साहसिकः।) चौरः। इति केचित्॥ अतिसाहसयुक्तश्च। अपूर्व्वोपकारकः। यथा,—
"शाठ्यसहस्रदुर्म्मुखप्रहासमहासाहसिकादिभिः।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः॥"
इति याज्ञवल्क्यवचनम्॥
शाठाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापकारिणः सक्वराः। दुर्मुखाः स्वच्छन्दाभिलाषिणः। महतो वलं सहसा बलेन कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तते इति महासाहसिकाः।
महाक्लेशादिभ्यः। इति मिताक्षरायामाचाराध्यायः १॥
महासिंहः, पुं, (महान् सिंह इव।) शरभः। इति राजनिर्घण्टः॥ (महांश्चासौ सिंहश्च।) वृहत्सिंहः। स च देवीवाहनम्। यथा,—
"उत्थाय च महासिंहं देवी चण्डमधावत॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
महासुखं, क्ली, (महत् सुखमस्मात्।) शृङ्गारः। इति त्रिकाण्डशेषः॥ (महच्च तत् सुखञ्च। अतिशयानन्दः। महत् सुखमस्य तदस्ति, त्रि।)
महासुखः, पुं, (महत् सुखं ईश्वरानन्दोऽस्य अस्माद् वा।) बुद्धः। इति त्रिकाण्डशेषः॥
महासुगन्धा, स्त्री, (महान् सुगन्धोऽस्याः।) गन्धनाकुली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे २६ अध्याये।
"महासुगन्धामथवा पालिन्दीं वाप्यथैवताम्।
पीतांश्चात्र परोऽपि क्वाथ प्रदेशानथ योजयेत्॥")
अतिसुगन्धयुक्ते त्रि॥
महासूक्ष्मा, स्त्री, (महत्यतीव सूक्ष्मा।) वालुका। इति राजनिर्घण्टः॥ अतिशयसूक्ष्मे, त्रि॥
महासेनः, पुं, (महती सेना यस्य।) कार्त्तिकेयः। इत्यमरः।१।१।४१॥ (यथा अथर्व्वपरिशिष्टे।३।२६
"महासेनो यस्य प्रमथगणसंघातचरितैः
सदैमुक्तो जीवन्निरिव धरणक्ता समभवत्।
इमाश्च यावालां भुजगमहादुर्गविषमा
मयं वीरो वारावजयदुपविंशाद् बहुमतीम्॥"
महती सेना अनुचरोऽस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। महासेनापतिः। इति मेदिनी। ने, २०६॥ (यथा महाभारते। ५। १८९। ११।
"स च राजा दशार्णेषु महानासीत् सद्धर्मः।
हिरण्यवर्म्मा दुर्द्धर्षो महासेनो महामनाः॥")
इक्ष्वाकुवंशिनृपविशेषः। इति हेमचन्द्रः। राजविशेषः। यथा, कथासरित्सागरे।११।३।
"अवन्तिदेशे तत्रास पुण्योऽप्रतिमशासनः।
वसुन्धरो महासेननामा नृपतिकुञ्जरः॥")
महास्कन्धा, स्त्री, (महान् स्कन्धः शाखादि-भागो यस्याः।) जम्बूवृक्षः। इति राजनिर्घण्टः॥ (महान् स्कन्धोऽस्य।) वृहत्स्कन्धयुक्ते त्रि॥
महास्थली, स्त्री, (स्थल+"जानपदकुण्डगोणे-त्यादि।" ४।१।४२। इति ङीष्। महती स्थली।) पृथिवी। इति शब्दमाला। भेक-स्थानञ्च॥
महास्थाणुः, पुं, (महती स्थाणुः अविरतस्थायी।) शङ्करः। इति हेमचन्द्रः।२।११२॥
महास्थानी, [न्] पुं, (महत्यो स्थानं अविरतस्थायी वा अस्त्यस्येति विनिः।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्।१३।१७।१४३॥
महास्वनः, पुं, (महान् स्वनः शब्दो यस्य।) मर्द्दलभेदः। इति त्रिकाण्डशेषः॥ (महांश्चासौ स्वनः।) वृहच्छब्दः। तद्युक्ते, त्रि॥ (यथा, महाभारते। ३। १५। ६।

"यमश्चैव कौन्तेयो हृद्रश्च पाण्डवः ।
कर्मभेदादावुभौ भौमादित्तिर्यक्पिशौ महा-
स्वनः ।")

महाहनुः, पुं, (महती हनुर्यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ।१३।१७।१३। हस्तहनुयुक्ते, त्रि । (सर्पविशेषः । यथा, महाभारते । १ । ५७ । १० ।
"मुद्गरः शिशुरोमा च सुरोमा च महाहनुः ।
एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम् ।")

महाहविः, [स्] क्ली, (महत् सुप्रशस्तं हविः ।) गव्यघृतम् । यथा,
"गवामामथवा पिण्डं खड्गमांसं महाहविः ।
कालशाकं तिलाढ्यं वा लघुरं माघकम्ये ।"
इति मार्कण्डेयपुराणे श्राद्धकल्पः ॥
(तदात्मतया सर्वं जगत् हूयतेऽस्मिन् । यद्वा, महान्ति हवींषि आज्यपुरोडाशादिरूपाण्यस्य ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान्ति हवींष्यत्र । ऋतुयागविशेषः । यथा, शतपथब्राह्मणे । २ । ५ । ३ । २० ।
"अथातो महाहविष एव तद् यथा महाहविषस्तथो तस्य ।"
"चातुर्मास्येषु प्रधानभूतायां महाहविराख्यायां इष्टौ तदारम्भं प्रतिजानीते अथात इति ।" इति तद्भाष्यम् ।")

महाह्वः, पुं, (महानुच्चैर्ह्वः ।) अट्टहासः । इति शब्दरत्नावली ॥

महाहिगन्धा, स्त्री, (अहेर्गन्धो येन हिंसाकरः सम्पूर्णोऽस्त्यस्यामिति । गन्ध + अर्श आदित्वात् अच् टाप् च । महती चाहिगन्धा ।) गन्धनाकुली । इति राजनिर्घण्टः ॥

महाह्ना, स्त्री, (महती चासौ अह्ना च ।) वर्षिकक्षुः । इति शब्दमाला । अतिवर्षे त्रि ॥

मही, स्त्री, (महति इति । मह पूजायां अच्छन्दसि + "सर्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) पृथिवी । इति शब्दमाला ॥ (महत् । यथा, ऋग्वेदे । २ । २४ । १३ ।
"स्वसौ सम्यक्षि वर्म करिष्यतः ।"
"महि महत् कर्म करिष्यतः ।" इति तद्भाष्ये सायनः ॥ महिमा । यथा, भागवते । ८ । ८ । ३ ।
"तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः ।
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिम् ॥"
"महिं महिमानम् ।" इति तट्टीकायां श्रीधरः ॥ महत्त्वम् । यथा, भागवते । २ । १ । ११ ।
"विद्याम कृतिं महिमानमपि ।"
"महिं महत्त्वम् ।" इति तट्टीकायां श्रीधरः ।)

महिका, स्त्री, (मह + "कुषिडिलिभ्यां कन्-पुंस्कारि ।" उणा० । ४ । १५ । इति कन् टाप् । अत इत्वम् ।) हिमम् । इत्यमरः । ३ । ३ । १८ ।

महितं, त्रि, (महते कीर्त्ति । मह पूजायाम् + "मतिबुद्धिपूजार्थेभ्यश्च ।" ३ । २ । १८८ । इति क्तः ।) पूजितम् । यथा, भट्टिः । १० । ७ ।

"रावणपक्षितोऽध्यावितुधारिपुरे
कलशं स राममहितः प्लवगात् ।
व्यसदर्पितयानवदम्य बलात्
कलशं स राममहितः प्लवगात् ।"

(पितृगणविशेषः । यथा, मार्कण्डेये । ९६ । ४६ ।
"महान्महात्मा महितो महिमावान्महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥"
स्त्रियां टाप् । नदीभेदः । यथा, महाभारते । ६ । ९ । २१ ।
"नीवारां महिताञ्चापि सुप्रयोगां जना-
धिप ॥")

महिनं, क्ली, (महति महाते वा । मह पूजायां + "महेरिनण् च ।" उणा० । २ । ५६ । इति चकारादिनुक्तः इनन् ।) राज्यम् । इत्युणादिकोषः ॥ (पूजनीये, त्रि । यथा, ऋग्वेदे । १ । ५६ । ८ ।
"वयं ते अस्यामिन्द्र ! द्युम्नहूतौ सखायः स्याम
महिन ! प्रेष्ठाः ।"
"हे महिन पूजनीय इन्द्र !" इति तद्भाष्ये सायनः ।)

महिमा, [न्] पुं, (महतो भावः । महत् + "पृथ्वादिभ्य इमनिज्वा ।" ५।१।१२२। इति इमनिच् । ततः "टेः ।" ६ । ४ । १५५ । इति टिलोपः ।) शिवस्याष्टैश्वर्यान्तर्गतैश्वर्यविशेषः । इति हेमचन्द्रः । २ । ११६ ॥ स च महत्त्वं येन चतुर्दश भुवनान्युदरे करोति । इत्यमरटीकायां भरतः ॥ (तदुक्तं यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥"
माहात्म्यम् । यथा, भागवते । ८ । ६ । १३ ।
"तथा संकथ्यमानेन महिम्ना सात्वतां पतेः ।
नातितृप्यति मे चित्तं सुचिरं तापनाशनम् ।")
उत्कर्षः । यथा, पुराणम् ।
"अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥"
(मणिविशेषस्य गुणः । यथा, राजतरङ्गिण्याम् । ६ । २२० ।
"स्वभूप चक्रे राज्यं महिम्नः पद्मसाधितः ।")

महिरः, पुं, (महति पूज्यत इति । मह + "इषि-मञ्जिमहीति ।" उणा० । १ । ५१ । इति किरच् । बाहुलकात् इरन् ।) सूर्यः । इति त्रिकाण्डशेषः ॥

महिला, स्त्री, (महति इति । मह पूजायाम् + "सलिकल्यनिमहि ।" उणा० । १ । ५५ । इति इलच् टाप् ।) स्त्रीमात्रम् । प्रियङ्गुलता । इत्यमरः । २ । ६ । २ । रेणुकानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ मत्तस्त्री । इति शब्दरत्नावली ॥

महिलाह्वया, स्त्री, (महिला इत्याह्वया यस्याः ।) प्रियङ्गुलता । इत्यमरः । २।४।५४ । (अस्याः पर्यायः ।
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया ।
गुन्द्रा गुन्द्रफला श्यामा विष्वक्सेनाङ्गनाप्रिया ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

महिषः, पुं, (महति पूजयति देवानेनेति । महि + "अविमह्योष्टिषच् ।" उणा० । १ । ४६ । इति टिषच् ।) स्वनामख्यातपशुविशेषः । तत्पर्यायः । लुलायः २ वाहद्विषत् ३ कासरः ४ सैरिभः ५ । इत्यमरः । २ । ९ । ४ ॥ यमवाहनः ६ विषाणरः ७ दंशभीरुः ८ रक्ताक्षः ९ । इति शब्दरत्नावली ॥ आनूपः १० हलायुधः ११ अश्वारिः १२ । इति जटाधरः ॥ क्रोधी १३ कलुषः १४ मन्दः १५ विषाणी १६ गवली १७ बली १८ । तस्य मदोदा यथा,—
"विषमे चयसमार्गं कुरुते स्तन दैत्युधा ।
भारं वहति वा दूरं महिषोऽशानिषन्दी ॥
प्रभूतसर्पिःफलदानसप्रदेन सर्वथा ।"
तद्यथा ।
"भर्त्सं लभ्या; पतिनाथ हृद्दृढमथबोधकाः ।
बलाधिक्ये मारकाय महिषा श्वशातनः ॥१॥
केशराः कामलाः सूक्ष्मा भर्त्सं कुराय मारकाः ।
बलाधिक्ये बहुला महिषाः धनघातनः ॥२॥
यथार्हाः पौनःपुन्येन सुरुचा भारवाहिनः ।
असारका बहुला महिषा वैरघातनः ॥३॥
पीताः पीतवर्णाः पीतमणुपीनाश्च ये ।
अस्ताग्निनो भारवहा महिषाः पुत्रघातनः ॥४॥
सर्वेषां धनमिच्छन्ति मैत्रयेता महोभयः ।
भारवहाः कृष्णवर्णा तीक्ष्णा महिषा
मताः ॥५॥
एको रोगा गुणा यापि हरकारवेदृशः ।
पौरुषवापि संख्यायां हयस्त्रं तथा मतम् ॥"
इति युक्तिकल्पतरुः ॥
वनमहिषमांसगुणाः । रौक्ष्यकारित्वम् । सद्-
त्वम् । दीपनत्वम् । बलदायित्वम् । मांसोप-
महिषमांसगुणाः । स्निग्धत्वम् । अधिक-
करत्वम् । पित्तकरत्वञ्च । इति राजनिर्घण्टः ॥
तर्पणत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधु-
रत्वम् । गुरुत्वम् । निद्रापुंस्त्वस्तन्यदेहदार्ढ्यम्
स्रोतरोधत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"महिषो चोष्णवातिः स्यात् मधुरश्च बलप्रदः ।
पौष्टिकः शुक्रकारी गुरुर्मो बलकारकः ।
महिषमांसमिदं याति विपाकोऽयं रक्तपित्तकम् ।
निद्रापुंस्त्वबलस्तन्यदेहदार्ढ्यं च ।
कुमारं करोत्यनुमानं वातनिवारणम् ।"
इति भावप्रकाशः ॥
यमवाहनत्वेन पञ्चचैतन्यं न स्पृशेत् मरणं
वाञ्छन् यमराजवाहनं वैश्यवृत्तेः पावित्र्य
देवार्चने बलिदानाय च । यथा, मनुसंहिते ।
"महिषाश्च लोहितो वृषोत्सर्गे नियुक्तः स ।
गत्वा ययाति देवी ते देवार्चने बलयश्च ।
वर्षे मासे विधौ तत्कामितं मनसः ।
मातङ्गो विघ्नः सर्वं दक्षोत्सवे स्वरेश्च ।
देवी दुर्गार्चने बलयः धर्मार्थिभिः ।

निःश्वासाश्चाट्टहासाः ख्याताश्चैव महात्मना ।
एका लम्बकाम्बोजाः पारदाः पह्नवास्तथा ।
कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः ।
सगरस्य वचनाद्राजन् ! वशिष्ठेन महात्मना ॥"
इति प्रायश्चित्ततत्त्वम् । * ॥
अर्हद्ध्वजविशेषः । इति हेमचन्द्रः । ३ । १४० ॥
महिषासुरः । यथा, मार्कण्डेये । ८२ । १-२ ।
"महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ।
तत्रासुरैर्महावीर्य्यैर्देवसैन्यं पराजितम् ॥
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥"
(देवताभेदः । यथा, निरुक्ते । ७ । २६ । "अथा-
सुपर्णो महिषा अयमृषत् विश्वो राजावधृत्यत्
चेन्द्रियम् ।" महिषाः माध्यमिकाः देवगणाः ।
अथवा महिषः स एव "महान् ।" इति
नारीणामाम् दुर्गाचार्य्यः । कुमारीपस्थपर्व्वत-
विशेषः । यथा, मात्स्ये । १२१ । ५८ ।
"अद्रस्तु पर्व्वतस्तत्र महिषो मेघसन्निभः ॥"
अग्निविशेषः । यथा, तत्रैव । १२१ । ६० ।
"तस्मिन् योऽग्निर्निवसति महिषो नाम योऽप्-
सुजः ।"
कुमारीपस्य वर्षविशेषः । यथा, तत्रैव । १२१ ।
६८ ।
"महिषं महिषस्यापि पुनश्चापि प्रभाकरम् ॥"
कृताभिषिक्तः भूपालः ।
'कृताभिषेके भूपाले तुलाये महिषः स्मृतः ॥'
इत्यमरटीकायां भरतः ॥ देशभेदः । यथा, बृहत्-
संहितायाम् । ९ । १० ।
"भरणीपूर्व्वे मण्डलमेतच्चतुर्ष्कं सुभिक्षकर-
मादम् ।
बह्वाह्रमहिषबाह्लिकनिम्नदेशेषु भयजन-
नम् ॥"
अनुकारस्य पुत्रभेदः । यथा, भागवते । ९ ।
२८ । १६ ।
"अनुकारस्य धर्मायां बाहलो महिषस्तथा ।"
दानासुरः । यथा, हरिवंशे । १८९ । ३१ ।
"महिषश्च सदमश्च विभ्रातस्तथापि ॥")
महिषकन्दः, पुं, (महिषाख्यया प्रसिद्धः कन्दः ।)
महाकन्दविशेषः । तत्पर्य्यायः । शुभ्रालुः २
सुगन्धकन्दः ३ शुक्लकन्दः ४ महिषीकन्दः ५ ।
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवाता-
मयापहत्वम् । शुक्रवर्द्धकत्वम् । बल्यत्वम् ।
ज्वलितवेदृ महावीर्य्यकरत्वञ्च । इति राज-
निर्घण्टः ॥
महिषघ्नी, स्त्री, (महिषं महिषासुरं हन्तीति ।
हन् + बाहुलकात् टक् । ङीप् ।) दुर्गा ।
यथा, दुर्गोत्सवपद्धतौ ।
"महिषघ्नि ! महामाये चामुण्डे मुण्ड-
मालिनि ! ।
आयुरारोग्यविजयं देहि देवि ! नमोऽस्तु ते ॥"
अपि च । देवीपुराणे ।
"विन्ध्यमाश्रित्य कन्यार्थे निहतो महिषो यया ।
महिषघ्नी ततो देवी कन्या वै विन्ध्यवासिनी ॥"

महिषध्वजः, पुं, (महिषो ध्वजश्चिह्नं वाहनत्वेन
यस्य ।) यमः । अर्हद्विशेषः । इति हेमचन्द्रः ।
२ । ९९ ॥
महिषमर्द्दिनी, स्त्री, (महिषं महिषाख्यमसुरं
मर्द्दयतीति । मृद् + णिनिः । ङीप् ।) दुर्गा ।
इति शब्दरत्नावली ॥ अस्या मन्त्रो यथा, सार-
दायाम् ।
"भान्तं वियत् समयवं श्वेतो मर्द्दिनि ठद्वयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ॥"
नारायणीयके ।
"वियं हि मन्वा कालोऽग्निरग्निरग्निरिड्यो निठ-
द्वयम् ॥"
वियं सकारः । हि स्वरूपम् । मन्वा मकारः ।
कालो मकारः । अग्नी रेफः । अग्निरिड्यकारः ।
ठद्वय इति वचनादिकारयुक्तो दकारः । अयं
मन्त्रः आद्यादिमायादिः कामादिर्वाग्भवादि-
र्मधुबीजादिः कवचादिश्च भवावहः । तथा च
विश्वसारे ।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।
मधुबीजादिकां वापि कवचाद्यां जपेत्तथा ॥
सर्व्वकार्य्येषु सर्व्वत्र कामाद्यां प्रजपेत् सुधीः ।
वाग्भवाद्यां जपेत्तावत् देवीं वाक्यविशुद्धये ॥"
अस्या ध्यानम् । गारुडोपलसन्निभां मणिमय-
कुण्डलमण्डितां नौमि भालविलोचनां महिषो-
त्तमाङ्गनिषेदुषीम् । शङ्खचक्रकृपाणखेटकबाण-
कार्म्मुकशूलकान् तर्ज्जनीमपि बिभ्रतीं निज-
बाहुभिः शशिशेखराम् ॥ इति तन्त्रसारः ॥
महिषवल्ली, स्त्री, (महिषशब्दवाच्या वल्ली ।
शाकपार्थिवादिवत् समासः ।) लताविशेषः ।
छिरहिट्टी इति हिन्दी भाषा । तत्पर्य्यायः ।
सोम्या २ प्रतिसोमा ३ अमृतलिका ४ स्वल्प-
माला ५ । अस्या गुणः । रसवीर्य्यविपाके
सोमवल्लीसमत्वम् । इति राजनिर्घण्टः ॥
महिषवाहनः, पुं, (महिषो वाहनं यस्य ।) यमः ।
इति शब्दरत्नावली ।
महिषासुरः, पुं, (महिष एव महिषाख्यो वा
असुरः ।) रम्भासुरपुत्रः । तस्य उत्पत्तिर्यथा,—
श्रीवामने उवाच
"आराधितो महादेवो रम्भेण सुरवैरिणा ।
पितेव च सुप्रीतस्तपसा तस्य शङ्करः ॥
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमुक्तवान् ।
प्रीतोऽस्मि ते वरं रम्भ ! वरयस्व यथेप्सितम् ॥
एवमुक्तः प्रहृष्टात्म रम्भस्तं चन्द्रशेखरम् ।
अयुक्तोऽहं महादेव ! यदि ते मय्यनुग्रहः ।
मम जन्मनि पुत्रो भवान् भवतु शङ्कर ! ॥
अवध्यः सर्व्वभूतानां जेता च त्रिदिवौकसाम् ।
चिरायुश्च यशस्वी च लक्ष्मीवान् सत्यसङ्गरः ।
एवमुक्तस्तु देवेन प्रहृष्टात्मा वृषध्वजः ।
भवत्येतद्वाञ्छितं ते भविष्यामि सुतस्तव ॥
इत्युक्त्वा च महादेवस्तत्रैवान्तरधीयत ।
रम्भोऽपि यातः स्वस्थानं हर्षोत्फुल्लविलो-
चनः ॥

अथ गच्छन् स रम्भोऽपि ददर्श महिषीं
शुभाम् ।
त्रिहायणीं चित्रवर्णां सुन्दरीं चारुमालिनीम् ।
स तां दृष्ट्वा महिषीं रम्भः कामेन मोहितः ।
सोऽभ्यगच्छत्ततोऽसौ च तदा चकार सुरतोत्सवम् ।
तयोः प्रहृष्टे सुरते सा तदा तस्य तेजसा ।
दधार महिषी गर्भं तदाभून्महिषासुरः ।
तस्यां जातेषु गिरिगह्वरेषु पुत्रमनवाप्तवान् ।
ववृधे स तदा बाहुभिः सुखप्रदो महाबलः ॥"
तस्य योषिद्रूपत्वं यथा,—
"तस्य कात्यायनसुतिः प्रययात् महिषासुरम् ।
दुर्ज्जयं घोरं त्रिलोकेषु त्रिलोकानुपदवारकम् ॥
कात्यायनेन धर्मं तं विनाय महिषासुरम् ।
प्राह प्रणयपूर्व्वेण वाचिकां चन्द्रशेखरः ॥"
ईश्वर उवाच ।
"देवि ! कात्यायनेनापि धर्मोऽयं महिषा-
सुरः ।
योषिद्विनाशकर्त्तेति भविष्येति कलानिधि ! ।
निःसंशयमशेषेण भविष्यति न संशयः ॥
मदीयो माहिषः कायस्त्वया देवि ! शमान्वित ! ।
स्वस्थः सततं योगयुक्तः पूर्व्वे परेऽपि च ।
इति पूर्व्वमिदं तद्वा योगमार्गोऽपि पुना ।
ममायं माहिषः कायस्तत्र योऽसौ भविष्यति ।
इति पूर्व्वं महादेवो देवीं प्रार्थितवान् पुरा ।
तेन देवी महादेवं जगाद महिषासुरम् ।
त्रिषु लोकेषु पुत्रोऽभूत् रम्भस्य भगवान्
शिवः ।
दृष्टिमर्त्यं च रम्भोऽपि रम्भ एव तथाभवत् ।
असुरलोकस्थितेऽपि तपः परमदारुणम् ।
तपसाराधितः शम्भुः पुत्रार्थं प्रददौ वरम् ।
तथैव महिष्यां मिथो प्रथमं सुरताय वः ।
तस्यां तथाभवद्वीरो दानवो महिषासुरः ।
तथैव धीरो भगवान् मुनिः कात्यायनस्तु तम् ।
इति शप्ते पूर्व्वस्मिन् पराजितः न तु जगाम ।
माहिषः पुत्रमिवाप देवीं वरमथाचत ।
शरीरे अन्तरिक्षं परं प्राप्य कल्याणमेवतः ।
नैव मे अन्या भवतोऽपि वरमथाचत ।
तेन देवीपदमपि सिद्धमेवोऽपरोऽप्युत ।
योऽप्यतिरपि यज्ञांश्च संवर्त्तयेत् नायक
! ॥"
एवं देवीप्रसादेन महादेवात्मजः ।
महासत्त्वाय सततं प्रतिमायां महासुरः ।
इति ते कथितं राजन् ! यथा स महिषा-
सुरः ।
देवीपादतलं प्राप्य यथा योऽद्यापि मोदते ॥"
इति कालिकापुराणे ५९ अध्यायः ॥ * ॥
अपि च ।
नारद उवाच ।
"अस्याधो महिषो नाम रक्तबीजस्य वै ।
काशी वाराणसी नाम या चाऽन्यैः प्रतिता-
सुरम् ।
सताम् विघ्नरवकाय ! यथाश्रुतमसंख्ये ॥"

पुलस्त्य उवाच।
"शृणुष्व संप्रवक्ष्यामि कथां पापप्रणाशिनीम्।
धर्म्मदां वरदां दुर्गां शिवां कात्यायनीं शुभे!॥
सुरासुरवरौ रौद्रौ जगत्क्षोभकरावुभौ।
रम्भश्चैव करम्भश्च दानवौ सुमहाबलौ॥
तावपुत्रौ च देवर्षे! पुत्रार्थं तेपतुस्तपः।
बहून् वर्षगणान् दैत्यौ स्थितौ पञ्चनदे जले॥
तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमी।
करम्भश्चैव रम्भश्च यक्षं मालवटं प्रति॥
एकं निमग्नं सलिले ग्राहरूपेण वासवः।
चरणाभ्यां समादाय निजघान यथेच्छया॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः।
वह्नौ स्वशीर्षं संछिद्य होतुमैच्छन्महाबलः॥
ततः प्रगृह्य केशेषु खड्गञ्च रविसंप्रभम्।
छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः॥
उक्तश्च दैत्यवर्य्य! मा मैवं नाशयात्मानमात्मना।
दुस्तरा परवध्यापि स्ववध्याप्यतिदुस्तरा॥
यच्च प्रार्थयसे वीर! तद्ददामि यथेप्सितम्।
मा म्रियस्व मृतस्येह नष्टा भवति वै कथा॥
ततोऽब्रवीद्वचो रम्भो वरं चेन्मे ददासि हि।
त्रैलोक्यविजयी पुत्रः स्यान्मे त्वत्तेजसाधिकः॥
अजेयो दैवतैः सर्व्वैः पुंभिर्दैत्यैश्च पावक!।
महाबलो वायुरिव कामरूपी कृतास्त्रवित्॥
तं प्रोवाच कविर्ब्रह्मन्! बाढमेवं भविष्यति।
यस्यां चित्तं समालम्ब्य करिष्यसि ततोऽसुर!॥
इत्युक्तो दैवेन वह्निना दानवो ययौ।
द्रष्टुं सुनिरटं पार्श्वं यक्षैश्च परिवारितम्॥
तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः।
गजाश्च महिषाश्चान्ना गावोऽश्वाश्च परिप्लुताः॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः।
महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन!॥
समागम्य दैत्येन्द्रं कामयन्ती तरस्विनी।
स चापि गमनं चक्रे भवितव्यप्रचोदितः॥
तस्यां समभवद्गर्भस्तां प्रगृह्याथ दानवः।
पातालं प्रविवेशाथ ततः स्वभवनं गतः॥
दृष्टश्च दानवैः सर्व्वैः परित्यक्तश्च बन्धुभिः।
अकार्य्यकारकेत्येवं भूयो मालवटं गतः॥
सापि तेनैव पतिना महिषी चारुदर्शना।
समं जगाम तत्पुण्यं यक्षमण्डलमुत्तमम्॥
ततस्तु वसतस्तस्य श्यामा सा सुषुवे शुभे!।
अजीजनत् सुतं शुभ्रं महिषं कामरूपिणम्॥"
इति वामनपुराणे १० अध्यायः॥ *॥
अन्यच्च। वराह उवाच।
"आसीत् पूर्व्वं महावीरो महिषो नाम दानवः।
सोऽभवद्ब्रह्मणा भूत्वा चैवासुरमजोऽथवा?।
तेन जगत्त्रयं देवान् त्रैलोक्यमपि कोपितम्।
महिषाख्योऽसुरश्रेष्ठ कुपितो महबलिकः।
देवता न क्षमो देवः कथं नहि जयं दधुः॥
वराह उवाच।
एवं वदन्ती सा देवी महाबलपराक्रमा।
अवैत् किञ्चिन्महेशानं सर्व्वं देवं जगौ प्रभुम्।
आकाशे स्थितो दैत्यो दैत्यानां मध्ये स्थितौ।
महिषाख्योऽपरः पश्चात् स वै चैवासुरः पुनः।
नन्दया निहतो विन्ध्ये महाबलपराक्रमः॥
अथवा ज्ञानशक्तिः सा महिषोऽज्ञान-
मूर्त्तिमान्।
अज्ञानं ज्ञानसाध्यन्तु भवतीति न संशयः॥
मूर्त्तिपक्षे चैतिहासमूर्त्ते चैकमूर्त्तिदं।
व्याख्यायते वेदवादैस्तु इत्थं या वेदवादिभिः॥"
इति वराहपुराणम्॥
महिषासुरसम्भवः, पुं, (महिषासुरात् तद्रक्तात् सम्भवतीति। सम्+भू+अच्।) भूमिज-गुग्गुलुः। इति राजनिर्घण्टः।
महिषासुरघातिनी, स्त्री, (हन्+णिनि+ङीप्। महिषासुरस्य घातिनी।) दुर्गा। यथा,—
"महिषासुरघ्न्याश्च प्रतिष्ठा दक्षिणायने।"
इति तिथ्यादितत्त्वधृतपद्मपुराणवचनम्॥
महिषाक्षः, पुं, (महिषस्य अक्षीवेति। "अक्ष्णो-ऽदर्शनात्।" ५।४।७६। इति समासान्तोऽच्।) गुग्गुलुः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"लटाम्रः कालनिर्य्यासः कौशिको गुग्गुलुः पुरः।
देवधूपः सर्व्वसहो महिषाक्षः पलङ्कषा॥"
इति वैद्यकरत्नमालायाम्॥
अस्य व्यवहारविषयो यथा,—
"महिषाक्षो महानीलो गजेन्द्राख्यो हिताहुभौ।
त्रिविधेऽपि मनुष्याणां क्रमशः परिकीर्त्तितः।
कदाचित्कालिदासाच्च यतः कौशिकमप्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
महिषाक्षकः, पुं, (महिषाक्ष। स्वार्थे कन्।) गुग्गुलुः। इति राजनिर्घण्टः॥
महिषी, स्त्री, (महिषस्य कृताभिषेकस्य नृपस्य पत्नी। "पुंयोगादाख्यायाम्।" ४।१।४८। इति ङीष्।) कृताभिषेका राजपत्नी। इत्यमरः। २।६।५॥ (यथा, रघौ। २।२२।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य॥")
सैरिन्ध्री। ओषधिभेदः। इति मेदिनी। षे,१३। महिषकोविद। तत्पर्य्यायः। मध्यममाधव? महायोरा १ पयस्विनी २ दुग्धदाश्या ३ बहुभा ४ सुरभिरस ५ नीलाक्षी ६ दत्तावती ७। अस्याः क्षीर-गुणाः। मधुरत्वम्। निद्राजनकत्वम्। गुरुत्वम्। शुक्रवृद्धिकरत्वम्। पित्तघ्नत्वम्। पित्तदाहवारित्वञ्च।
"माहिषं मधुरं स्निग्धं शुक्रदं गुरु।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम्॥
तस्य दधिगुणाः। मधुरत्वम्। स्निग्धत्वम्। श्लेष्मवातावहत्वम्। रक्तपित्तप्रसादनत्वम्। बलाक्षवर्द्धकत्वम्। वृष्यत्वम्। बलत्वम्। शोथ-कृत्वम्।
"माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत्।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वस्रदूषकम्॥"
अस्या नवनीतगुणाः। कषायत्वम्। मधुर-रसत्वम्। शीतत्वम्। वृष्यत्वम्। बलत्वम्। ग्राहित्वम्। पित्तघ्नत्वम्। सुन्दरत्वम्।
"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम्॥"
अस्या घृतगुणाः। धनत्वम्। पवित्रत्वम्। शुक्रलत्वम्। कान्तिदत्वम्। वातश्लेष्मापहत्वम्। बलकरत्वम्। वर्णप्रसादजनकत्वम्। दुर्नाम-ग्रहणीविकारप्रशमनत्वम्। मन्दानलोद्दीपनत्वम्। चक्षुष्यत्वम्। गव्याच्च चैतन्यम्। सुन्दरत्वम्। मधुरत्वञ्च।
"माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम्।
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते॥"
इति भावप्रकाशः॥ *॥
अस्या मूत्रगुणाः। आनाहशोफगुल्मोदर-नाशित्वम्। कटुत्वम्। उष्णत्वम्। कुष्ठ-कण्डूतिशूलोदररोगनाशित्वञ्च। इति राज-निर्घण्टः॥ (अस्या दुग्धगुणाश्च यथा, चरके सूत्रस्थाने २७ अध्याये।
"महिषीणां गुरुतरं गव्याच्छीततरं पयः।
स्नेहान्न्यूनमनिद्राय हितमत्यग्नये च तत्॥")
महिषीप्रिया, स्त्री, (महिषीणां प्रिया।) बल्वली-तृणम्। इति राजनिर्घण्टः॥
मही, स्त्री, (महती इति। मह+अच्। मह +"गौरादिभ्यश्च।" ४।१।४१। इति ङीष्। यद्वा, महि। कृदिकारादिति ङीष्।) पृथिवी। इत्यमरः। २।१।२॥ (यथा विष्णुपुराणे। १।४।४८।
"उत्तिष्ठतस्तस्य जलार्द्रकुक्षे-
र्महावराहस्य महीं विगृह्य।
विधुन्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयः स्तुवन्ति॥")
नदीविशेषः। सा च मालवदेशे वर्त्तते। इति मेदिनी। हे,। ७। तज्जलगुणाः।
"महीजलन्तु सुखादु पथ्यं पित्तदं गुरु।"
इति राजनिर्घण्टः॥
गौः। इति जटाधरः॥ हिममौक्तिका। इति त्रिकाण्डशेषः॥ (लोकः। यथा, ऋग्वेदे। १। २२। ९।
"तिस्रो महीरुपराः।"
"महीः लोकाः।" इति तद्भाष्ये सायणः॥)
महीक्षित्, पुं, (महीं क्षयति ईष्टे। क्षि+क्विप्। तुक् च।) राजा। इत्यमरः। २। ८। १॥ (यथा, महाभारते। ७। ३३। ११।
"एवमस्मिन्महारौद्रे वर्त्तमाने जनक्षये।
त्रिदशाः सम्मुखा राजन्! क्षत्रियाश्च मही-
क्षितः॥")
महीजं, क्ली, (मह्यां जायते इति। जन+डः।) आर्द्रकम्। इति राजनिर्घण्टः॥ मङ्ग-लग्रहे। पुं। (यथा, महाभारते ५।१४३।८।
"व्याक्रान्तो महीजातो नक्षत्राणामवस्थितः॥"

वावाग्रभागौ शुभाभौ तथा मध्यतयाथिनान् ।
वाजिनो बहुभिः शंखैः धमन्तान् पर्य्यवारयन् ॥")

महीजः, पुं, (मह्यां जातः । जन+डः ।) मङ्गलग्रहः । यथा, समयप्रदीपे ।

"रवौ रसाभ्रौ सितगौ नभाश्वौ
शर्मं महीजे विधुगे धराद्री ।
गुरौ धराद्री भृगुगे शतोर्यं
शनौ रसाश्वानिति चपायाम् ॥"

महीध्रः, पुं, (महीं धरतीति । धृ+कः ।) पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (यथा, श्रीभागवते । २ । ७ । १२ ।

"नाभेरसावृषभ आस सुदेविसूनु-
र्यो वै चचार समदृग्जडयोगचर्य्याम् ।
यत्पारमहंस्यमृषयः पदमामनन्ति
स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥"

मह्यां धरति उद्धरतीति । धृ+कः । महीधर्त्ता । यथा, तत्रैव । ३ । १३ । २८ ।

"उत्क्षिप्तवालः खचरः कठोरः
सटा विधुन्वन् खररोमशत्वक् ।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान् महीध्रः ॥"

"महीध्रः पृथिव्या उद्धर्त्ता ।" इति तट्टीकायां स्वामी ॥)

महीपालः, पुं, (महीं पालयतीति । पाल+अण् ।) राजा । यथा, मार्कण्डेयपुराणे । ८८ । ६१ ।

"स ययाच महीपृष्ठं प्रकम्पं धनमाहवः ।
कौरवश्च महीपालः रक्तबीजो महासुरः ॥"

(राजविशेषः । यथा, कथासरित्सागरे । ५६ । ७ ।

"चक्रस्वामिन् ! महीपालो नाम्ना कार्य्यः सुतस्तथा ।
राजा भूत्वाचिरं महान् पालयिष्यत्यथ महीम् ॥")

महीप्राचीरं, क्ली, (मह्याः प्राचीरमिव । तद्वेष्टनकारित्वात् ।) समुद्रः । इति त्रिकाण्डशेषः ॥

महीभृत्, पुं, (महीं बिभर्त्ति धरतीति । भृ+क्विप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमः ।) पर्व्वतः । यथा, कुमारसम्भवे । १ । ५७ ।

"महीभृतः पुत्त्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा ॥"

(महीं बिभर्त्ति धारयतीति । भृ+क्विप् ।) राजा । यथा, मार्कण्डेयपुराणे । ८६ । १६ ।

"हे महीभृद्गणा स्त्रिय प्रभावश्चसोऽपधैः ।
अद्रक्ष्यं पूर्व्वमेव कृतैश्चक्रमहीभृताम् ॥"

महीलकः, त्रि, (मह्यां लेखादौ यद्वर्त्तते ? महो+मशक ?) अनिष्कासितः । यथा,— मार्कण्डेयपुराणे । ८६ । ७ ।

"तौ तस्मिन् पुलिने देवाः कृत्वा मूर्त्तिं महीमयीम् ।
अर्हणाञ्चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥"

महीरुहः, पुं, (मह्यां रोहति जायते इति । रुह्+कः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (यथा, विष्णुपुराणे । १ । १५ । १ ।

"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥")
शाकवृक्षः । इति राजनिर्घण्टः ॥

महीलता, स्त्री, (मह्या लतेव ।) किञ्चुलकः । इत्यमरः । १ । १० । २१ ॥ (विशेषोऽस्याः किञ्चुलकशब्दे ज्ञातव्यः ॥)

महीसुतः, पुं, (मह्याः सुतः ।) मङ्गलः । इत्यमरः । १ । ३ । २५ ॥ (यथा, बृहत्संहितायाम् । १०४ । १४ ।

"रिपुमदकोपभयानि षष्ठमे
तनयकलत्रकृतो महीसुते ।
तुलितरपि नाशं चिरं भवेत् स्थिरा
स्थिरमपि कम्पयति मालती लता ॥")

महेच्छः, पुं, (महती इच्छा यस्य । बहुव्रीहिसमासः ॥) महाशयः । इत्यमरः । ३ । १ । ३ ॥ (यथा, बृहत्संहितायाम् । ६६ । १० ।

"प्रलम्बवसिमहेच्छव्यवसायपराक्रमोपेतः ॥")

महेन्द्रः, पुं, (महांश्चासाविन्द्रश्च ऐश्वर्य्यवानित्यर्थः ॥) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । शक्रः । (यथा, भागवते । ६ । १२ । ३६ ।

"अथ यज्ञपाकस्तं महेन्द्रमिदमब्रवीत् ॥")

जम्बूद्वीपस्य पर्व्वतविशेषः । इति मेदिनी । रे, १०० ॥ (स च कुलाचलानामन्यतमः । यथा, मार्कण्डेये । ५७ । १० ।

"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥")

महेन्द्रकदली, स्त्री, (महेन्द्रप्रभवा कदली वा कदली ।) कदलीभेदः । इति राजनिर्घण्टः ॥

महेन्द्रनगरी, स्त्री, (महेन्द्रस्य नगरी ।) अमरावती । इति शब्दरत्नावली ॥

महेन्द्रवारुणी, स्त्री, (महेन्द्रवरुणयोरियं प्रियत्वात् । अण् । ङीप् ।) लताविशेषः । बड् माकाल इति भाषा । तत्पर्य्यायः । चित्रफली २ महाफला ३ महेन्द्री ४ चित्रफला ५ मधुरी ६ मधुपा ७ आमरणा ८ विशाला ९ दीर्घवल्ली १० अमृतफला ११ सुरवारुणी १२ ब्रह्मफला १३ इन्द्रवारुणी १४ सौम्या १५ मुनिनिर्मिता १६ त्रिपदी १७ धनुःश्रेणी १८ आत्मरक्षा १९ ऐन्द्रवारुणी २० । अस्या गुणाः । इन्द्रवारुणीगुणसादृश्यम् । रसे वीर्य्ये विपाके च किञ्चिद्गुणाधिकत्वञ्च । इति राजनिर्घण्टः ॥

महेन्द्राणी, स्त्री, (महेन्द्रस्य भार्य्येति । महेन्द्र । "इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक् ।" ४ । १ । ४९ । इति ङीप् । "हिमारण्ययोर्महत्त्वे ।" ४ । १ । ४९ । इति आनुगागमः ।) इन्द्रभार्य्या । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ४१ । १६ ।

"ततः शुक्लाम्बरधरां सर्व्वाभरणभूषिताम् ।
आजगाम महेन्द्राण्या शक्रः सुरगणैर्वृतः ॥")

महेरणा, स्त्री, (महत् ईरणं प्रेरणमस्याः । यद्वा, महं गन्धोत्सवमीरयतीति । ईर+ल्युः । टाप् ।) शल्लकीवृक्षः । इत्यमरः । २ । ४ । १२ ॥ महेरुणा इत्यपि पाठः । इत्यमरटीकायां भरतः ॥ (यथास्याः पर्य्यायः ।

"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महेला, स्त्री, (मह्यते पूज्यते इति । मह+ "सलिकल्यनिमहीति ।" उणा० १ । ५५ । इति इलच् । पृषोदरादित्वादिकारस्यैकारः । यद्वा, महस्योत्सवस्य इला भूमिः ।) नारी । इति शब्दरत्नावली । (यथा, नषोदये । २ । १८ ।

"शमसुदन्ततैलाभिस्तरित-
सुधाभिस्तत्वरसहेलाभि
र्लीः प्रमदमहेलाभिरत्यैव
सुवर्णतिभिः परमहेलाभिः ॥")

महेलिका, स्त्री, (महेला+स्वार्थे कन् । टाप् । अकारस्येत्वम् ।) नारी । इति शब्दरत्नावली ॥

महेशः, पुं, (महान् ईशः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, शिवध्याने ।
"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम् ॥")

महेशबन्धुः, पुं, (महेशो बन्धुरिव बाल्यरूपेण सन्निधानात् ?) बिल्ववृक्षः । इति शब्दचन्द्रिका ॥

महेश्वरः, पुं, (महांश्चासावीश्वरश्च कर्त्तुमकर्त्तुमन्यथाकर्त्तुं वा समर्थः । यद्वा, महता महामायया ईश्वरः ।) शिवः । इत्यमरः । १ । १ । ३२ । अस्य व्युत्पत्तिर्यथा,—
"विश्वभावाच्च सर्व्वेषां महतामीश्वरः स्वयम् ।
महेश्वरश्च तेनैव प्रवदन्ति मनीषिणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ११ अध्यायः ॥
अस्य शिवत्वकरणत्वं यथा,—
"महेश्वरसमायुक्तमीक्षते यः करोतु सदा ।
स याति तस्य कल्याणं वाञ्छितञ्च सदाभवेत् ॥"
इति कालिकापुराणे शिवविवाहे ४४ अध्यायः ॥
(परमेश्वरः । तदुक्तं भावप्रकाशे ।
"सर्व्वलोकैकनाथस्य तेजसो दृष्टा
जगच्चिन्तितवान् यत्नाद्धरम् ।
दिव्यकालौ सर्व्व यद्रूपं चाक्षरे
महेश्वरोऽसौ भगवानीश्वरः ॥"
महान् ईश्वरः प्रभावो यस्य । दिग्विजयी राजा । यथा, महाभारते । १ । १९८ । १८ ।
"ततः प्रभृति विख्यातः किरणानां महेश्वरः ।
पाञ्चालं लब्ध्वा भ्रातृभ्यां सहस्रशः ॥")

महेश्वरकुसुमा, स्त्री, (महेश्वरस्य वरार्हं पुष्पम् ।) कर्णिकारवृक्षः । इति वैद्यक । भौरीतिरासवचने महेश्वरसमवेतरक्षाप्रवाहेश्वरमानाम्

कारस्य तोयं विद्यतेऽस्मिन्निति करतोया। इत्यमर-टीकायां भरतश्च ॥

महेश्वरी, स्त्री, (महेश्वरस्य स्त्री। महेश्वर+ ङीष्। महती चासौ ईश्वरी मन्वादीनां नियन्त्रीति वा।) महेश्वरपत्नी। यथा,—

"ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम्।
श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी ॥"

इति तन्त्रसारे भुवनेश्वरीकवचम् ॥

अपराजिता। इति शब्दचन्द्रिका ॥ कांस्यम्। इति हेमचन्द्रः। ४। ११४ ॥ राजरीतिः। इति राजनिर्घण्टः ॥

महैरण्डः, पुं, (महांश्चासावेरण्डश्च।) स्थूलैरण्डः। इति राजनिर्घण्टः ॥

महैला, स्त्री, (महती चासावेला च।) स्थूलैला। इति राजनिर्घण्टः ॥ (गुणादिविषयोऽस्याः स्थूलैलाशब्दे द्रष्टव्यः ॥)

महोक्षः, पुं, (महान् उक्षा। "अचतुरविचतु-रेति।" ५। ४। ७७। इति समासान्तः अच्। निपातितश्च।) वृहद्वृषः। इत्यमरः। २। ९। ६१ ॥ तत्पर्य्यायः। वृषभः २ वृषः ३ पुङ्गवः ४ वली ५ गोनाथः ६ ऋषभः ७ गोप्रियः ८ उक्षा ९ गोपतिः १०। इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे। ६०। ६६।

"महोक्षः स त्वया दृष्टः संज्ञतस्य कृतो यदि।
तदिहानय तं शुल्कं यावत् पश्यामि
कीदृशः ॥")

महोटिका, स्त्री, (महान्तः फलेभ्यः स्थूला उटा पत्राण्यस्याः। ततः स्वार्थे कन्। टाप्। अकारस्येत्वम्।) वृहती। इति राजनिर्घण्टः ॥

महोटी, स्त्री, (महान्त उटाः पत्राणि यस्याः।) वृहती। इति भावप्रकाशः ॥ वृहदुत्पलञ्च ॥

महोक्ष, स्त्री, (महान् उक्षः दर्पोद्धतको लोको यस्याः।) विद्युत्। इति केचित् ॥

महोत्पलं, क्ली, (महच्च तत् उत्पलञ्च।) पद्मम्। सारसपद्मी। इत्यमरः। १। १०। ३८ ॥

महोत्सवः, पुं, (महांश्चासावुत्सवश्च।) अतिशय-हर्षजनककर्म्म। यथा,—

"सर्व्वेष जन्मदिवसे स्नातैर्म्मङ्गलपाणिभिः।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं पितरौ तथा देवप्रजापतिः।
प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः ॥"

इति तिथ्यादितत्त्वे ब्रह्मपुराणवचनम् ॥

अपि च। कालिकापुराणे ६९ अध्याये।

"दुर्गातन्त्रेण मन्त्रेण कुर्य्याद्दुर्गामहोत्सवम्।
महानवम्यां शरदि बलिदानं नृपादयः ॥"

महोत्साहः, त्रि, (महान् उत्साहो यस्य।) अति-शयोत्साहयुक्तः। (यथा, महाभारते ।५।५१।१।

"सर्व्व एते महोत्साहा ये त्वया परिकीर्त्तिताः।
एकतस्त्वेव ते सर्व्वे समेता भीम एकतः ॥")

तत्पर्य्यायः। महोद्यमः २। इत्यमरः। ३।१।३ ॥ (विष्णुः। यथा, महाभारते।१३।१४९।३१।

"अतीन्द्रियो महामायो महोत्साहो महाबलः ॥")

महोत्साहः, पुं, (महान् उत्साहो यस्य।) राज्याङ्गग्रामराजपुरुषः। यथा,—

"सम्यगस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः ॥"

इति शब्दमाला ॥

अतिशयोद्यमश्च ॥

महोदधिः, पुं, (महांश्चासावुदधिश्च।) समुद्रः। यथा, महानाटके।

"लङ्का दग्धा वनं भग्नं लङ्घितश्च महोदधिः।
यत् कृतं रामदूतेन स रामः किं करिष्यति ॥"

महोदयं, क्ली, (महान् उदय उन्नतिर्यस्मिन्।) पुरविशेषः। तत्पर्य्यायः। कान्यकुब्जम् २ कन्या-कुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुशस्थलम् ६। इति हेमचन्द्रः ॥

महोदयः, पुं, (महान् उदयः समुन्नतिर्यस्मिन्।) कान्यकुब्जदेशः। आधिपत्यम्। (महान् उदय उत्कर्षो यस्मिन्।) अपवर्गः। इति मेदिनी। ये, १२६ ॥ (महान् उदय उत्कर्षो यस्य।) स्वामी। इति हेमचन्द्रः। ३। ४९७ ॥ (महान् उदयः फलं यस्मिन् यस्माद्वा। महा-फले, त्रि। यथा, मनौ। ७। ५५।

"अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम् ॥"
"महोदयं महाफलम्।" इति तट्टीकायां कुल्लूकभट्टः ॥)

महोदया, स्त्री, (महानुदयो यस्याः। टाप्।) नागबला। इति राजनिर्घण्टः ॥

महोदरी, स्त्री, महाशतावरी। इति भाव-प्रकाशः ॥ (महत् उदरमस्य।) वृहदुदरयुक्ते, त्रि ॥ (महच्च तदुदरञ्च। वृहदुदरे, क्ली। यथा, श्रीभागवते। ९। ७। १७।

"पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम्।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत ॥"

पुं, नागविशेषः। यथा, महाभारते। १। ३५। १६।

"कर्कराकर्करौ नागौ कुण्डोदरमहोदरौ ॥"

दानवविशेषः। यथा, तत्रैव। १। ६५। २५।

"एकपादेकचक्रश्च विरूपाक्षमहोदरौ ॥"

धृतराष्ट्रस्य पुत्रविशेषः। यथा, तत्रैव। १। ६७। ९७।

"सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ।")

महोद्यमः, त्रि, (महान् उद्यमो यस्य।) महोत्साहः। इत्यमरः। ३। १। ३। (यथा, राज-तरङ्गिण्याम्। ५। १४१।

"अथ निर्व्विंश दायादांस्तथा वर्म्मा विनीतमरः।
जिष्णुर्दिग्विजयं कर्त्तुं श्रीमान्नायोऽकरो-द्यमः ॥"

महानुद्यमः।) अतिशयोद्योगे, पुं ॥

महोन्नतः, पुं, (महानतिशय उन्नतः।) ताल-वृक्षः। इति भावप्रकाशः ॥ अत्युन्नतियुक्ते, त्रि ॥

महोन्नतिः, स्त्री, (महती चासावुन्नतिश्च।) अतिशयवृद्धिः। यथा,—

"भूयात्ते महदैश्वर्य्यं पुत्रादीनां महोन्नतिः।
अथाधिना शरीरेण चिरं जीव सुखी भव ॥"

इत्युद्भटः ॥

महोन्मदः, पुं, (महानतिशय उन्मदः।) मत्स्य-विशेषः। मङ्गुर इति भाषा। यथा,—

"राजमीनस्तिमिङ्गलः चलकी च महोन्मदः।"

इति शब्दरत्नावली ॥

अत्युन्मत्ते त्रि ॥

महोरगं, क्ली, (महान् उरग इव।) तगर-मूलम्। इति रत्नमाला ॥

महोरगः, पुं, (महांश्चासावुरगश्च।) सर्पजाति-विशेषः। इति हेमचन्द्रः। २। ४ ॥ वृहत्सर्पमात्रञ्च ॥ (यथा, भागवते। ८। १०। ४७।

"महोरगाः समुत्पेतुः दन्दशूकाः सवृश्चिकाः ॥")

महोल्का, स्त्री, (महती चासावुल्का च।) उल्काविशेषः। यथा,—

"विद्युत्स्तनितनिर्घातमहोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
महोल्कानाञ्च संप्लवे इतस्ततोऽनेकमहोल्कानां सन्निपाते। उल्कालक्षणमाह दृहद्वशिष्ठः।
"दण्डच्छिखा च छायाया रक्तनीलशिखो-ज्ज्वला।
पौरुषी च प्रमाणेन उल्का नानाविधा
स्मृता ॥"

इति तिथ्यादितत्त्वम् ॥

महौजाः, [स्] त्रि, अतितेजोयुक्तः। महदोजो यस्येतिविग्रहे वहुव्रीहौ प्रथमैकवचने अत्वसन्तस्येति दीर्घे कृते महौजा इतिपदं निष्पन्नम् ॥ (यथा, मनौ। १। ६२।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे।
सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौ-जसः ॥"

कावेयपुत्रासुरविशेषः। यथा, महाभारते १। ६७। ५१।

"पञ्चमस्तु बभूवैषां प्रवरो यो महासुरः।
महौजा इति विख्यातो बभूवेह परन्तपः ॥")

महौषधं, क्ली, (महत् औषधम्।) शृङ्गवेरम्। शुण्ठी। (पर्य्यायो यथा,—

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लशुनम्। (पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वाराहीकन्दः। वत्सनाभः। इति राजनिर्घण्टः ॥ पिप्पली। इति शब्दचन्द्रिका ॥ अतिविषा। इत्यमरः। २।४।९८ ॥ (महाभेषजम्। यथा, कथासरित्सागरे। ६६। १९।

"अभर्त्तृ मे पैमं तैलाच महामन्त्राद्यौषधैः।
चिकित्सां कारयामास पौरानुत नरोत्त-मान् ॥")

नानाप्रकारैर्गुमाल्यैः तथा पर्व्वतवासिनाम्।
वासिभिर्बहुभिः सार्द्धं समन्तात् पर्य्यवारयन्॥")
महीजः, पुं, (मह्यां जातः। जन+डः।) मङ्गलग्रहः। यथा, समयप्रदीपे।
"इन्दौ रणाग्नौ विततौ कुजाख्यौ
त्वं महीजे विधुजे प्रदिष्टौ।
गुरौ प्रदिष्टौ भृगुजे हतीयं
शनौ रणादन्तमिति प्रपायाम्॥"
महीध्रः, पुं, (महीं धरतीति। धृ+कः।) पर्व्वतः। इत्यमरः। २।३।१। (यथा, श्रीभागवते। ९।७।३९।
"गोपैर्मखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः।
धर्त्तोच्छिलीन्ध्रमिव सप्तदिनानि सप्त-
वर्षो महीध्रमनघैककरे सलीलम्॥"
महीं धरति उद्धरतीति। धृ+कः। महीधर्त्ता। यथा, तत्रैव। ३।१३।२६।
"उत्क्षिप्तवालः खचरः कठोरः
सटा विधुन्वन् खररोमशत्वक्।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान् महीध्रः॥"
"महीध्रः पृथिव्या उद्धर्त्ता।" इति तट्टीकायां स्वामी॥)
महीपालः, पुं, (महीं पालयतीति। पाल+अण्।) राजा। यथा, मार्कण्डेयपुराणे। ८८।११।
"स प्रयाति महीपृष्ठे प्रख्यातं वसुमानितः।
कोरूपश्च महीपाल! रक्तबीजो महासुरः॥"
(राजविशेषः। यथा, कथासरित्सागरे। ५६।७।
"पुत्र स्वामिन्! महीपालो नाम्ना कार्य्यः
सुतस्त्वया।
राजा भूत्वाचिरं यस्मात् पालयिष्यत्ययं
महीम्॥")
महीप्राचीरं, क्ली, (मह्याः प्राचीरमिव। सर्व्वदिशु स्थितत्वात्तथात्वम्।) समुद्रः। इति त्रिकाण्डशेषः॥
महीभृत्, पुं, (महीं बिभर्त्ति धरतीति। भृ+क्विप्। "ह्रस्वस्य पिति कृति तुक्।" ६।१।७१। इति तुगागमश्च।) पर्व्वतः। यथा, कुमारसम्भवे। १।२७।
"महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा॥"
(महीं बिभर्त्ति पालयतीति। भृ+क्विप्।) राजा। यथा, मार्कण्डेयपुराणे। ८१।११।
"ये समाहृतमना नित्यं यथास्वमभीप्सवः।
प्रदर्शितं द्रुतं तेऽद्य पुत्रिण्यप्यमहीभृताम्॥"
महीमयः, त्रि, (मह्याः विकारोऽवयवो वेति। मही+मयट्।) मृत्तिकानिर्म्मितः। यथा,— मार्कण्डेयपुराणे। ८६।७।
"तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं
महीमयीम्।
अर्हणाञ्चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः॥"
महीरुहः, पुं, (मह्यां रोहति जायते इति। रुह+कः।) वृक्षः। इत्यमरः। २।४।५। (यथा, विष्णुपुराणे। १।१५।२।
"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः॥")
शाकवृक्षः। इति राजनिर्घण्टः॥
महीलता, स्त्री, (मह्याः लतेव।) किञ्चुलुकः। इत्यमरः। १।१०।२१॥ (विवृतोऽस्याः किञ्चुलुकशब्दे ज्ञातव्यः॥)
महीसुतः, पुं, (मह्याः सुतः।) मङ्गलः। इत्यमरः। १।३।२५॥ (यथा, बृहत्संहितायाम्। १०४।१४।
"रिपुभयकोपभयानि षष्ठे
तनयहतिञ्च सुतो महीसुते।
द्युतिरपि नास्य चिरं भवेत् स्थिरा
स्थिरमिव वधिरिव मालती लता॥")
महेच्छः, पुं, (महती इच्छा यस्य। इत्यत्र आत्वाभावः।) महाशयः। इत्यमरः।३।१।३। (यथा, बृहत्संहितायाम्। १६।१८।
"प्रख्यातधनिमहेच्छव्यवसायपराक्रमोपेताः॥")
महेन्द्रः, पुं, (महांश्चासाविन्द्रश्च ऐश्वर्य्यातिशयः।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ शक्रः। (यथा, भागवते।६।१३।६।
"अवमत्य द्रुपादेशं महेन्द्रमिदमब्रवीत्॥")
अमुद्रीपस्य पर्व्वतविशेषः। इति मेदिनी। रे, १००॥ (स च सप्तकुलाचलानामन्यतमः। यथा, मार्कण्डेये। ५७।१०।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः॥")
महेन्द्रकदली, स्त्री, (महेन्द्रस्य प्रिया सद्वर्णा वा कदली।) कदलीभेदः। इति राजनिर्घण्टः॥
महेन्द्रनगरी, स्त्री, (महेन्द्रस्य नगरी।) अमरावती। इति शब्दरत्नावली॥
महेन्द्रवारुणी, स्त्री, (महेन्द्रवरुणयोरियं प्रियत्वात्। अण्। ङीप्।) लताविशेषः। बड़ माकाल इति भाषा। तत्पर्य्यायः। चित्रवल्ली २ महाफला ३ महेन्द्री ४ चित्रफला ५ त्रपुषी ६ त्रपुषा ७ आम्लरक्ता ८ विशाला ९ दीर्घवल्ली १० महत्फला ११ महावारुणी १२ बृहत्फला १३ इन्द्रवारुणी १४ सौम्या १५ गर्व्वचिर्भटा १६ विषदेवी १७ वृद्धःपेटी १८ सुवर्णवर्णा १९ महाफला २०। अस्याः गुणाः। इन्द्रवारुणीगुणाधिकत्वम्। रसे वीर्य्ये विपाके च किञ्चिद्गुणाधिकत्वञ्च। इति राजनिर्घण्टः॥
महेन्द्राणी, स्त्री, (महेन्द्रस्य भार्य्येति। महेन्द्र। "पुंयोगादाख्यायाम्।" ४।१।४८। इति ङीष्। "इन्द्रवरुणेति।" ४।१।४९। इति आनुगागमः।) इन्द्रभार्य्या। इति शब्दरत्नावली॥ (यथा, महाभारते। १।३१।१९।
"तथा सहस्रनयनमैरावतशिरोगतः।
आजगाम महेन्द्राण्या सह सुरगणैर्वृतः॥")
महेरणा, स्त्री, (महत् ईरणं प्रेरणमस्याः। यद्वा, महं गन्धोत्सवमीरयतीति। ईर+ल्युः। टाप्।) शल्लकीवृक्षः। इत्यमरः।२।४।१२३। महेरुणा इत्यपि पाठः। इत्यमरटीकायां भरतः॥ (यथास्याः पर्य्यायः।
"शल्लकी गजभक्षा च सुवहा सुरभीरसा।
महेरणा कुन्दुरुकी वल्लकी च बहुस्रवा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
महेला, स्त्री, (मह्यते पूज्यते इति। मह+"कलिकल्यनिमहीति।" उणा० १।५६। इति इलच्। पृषोदरादित्वादिकारस्यैकारः। यद्वा, महस्योत्सवस्य इला भूमिः।) नारी। इति शब्दरत्नावली॥ (यथा, महोदये। ९।१८।
"अधरुहमहेलाभिस्स्फुरित-
मुखाभिस्तनपारमहेलाभि
भीः प्रवरमहेलाभिस्तथैव
सुवर्णतिभिः परमहेलाभिः॥")
महेलिका, स्त्री, (महेला+स्वार्थे कन्। टाप्। अकारस्येत्वम्।) नारी। इति शब्दरत्नावली॥
महेशः, पुं, (महान् ईशः।) शिवः। इति शब्दरत्नावली॥ (यथा, शिवध्यानम्।
"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु-
चन्द्रावतंसम्॥")
महेशबन्धुः, पुं, (महेशो बध्यते प्रीयते येन तत्पत्रदानकत्वात्।) बिल्ववृक्षः। इति शब्दचन्द्रिका॥
महेश्वरः, पुं, (महांश्चासावीश्वरश्च कर्त्तुमकर्त्तुमन्यथाकर्त्तुं वा समर्थः। यद्वा, महत्या महामायया ईश्वरः।) शिवः। इत्यमरः। १।१।३१। अस्य व्युत्पत्तिर्यथा,—
"विश्वानामपि सर्व्वेषां महतामीश्वरः स्वयम्।
महेश्वरञ्च तेनेमं प्रवदन्ति मनीषिणः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ११ अध्यायः।
अस्य शिवत्वकारणं यथा,—
"महेश्वरसमाख्यानमिदं यः शृणुयात् सदा।
यतते तस्य कल्याणं वाञ्छितञ्च भविष्यति॥"
इति कालिकापुराणे शिवविवाहे ४६ अध्यायः।
(परमेश्वरः। तदुक्तं न्यायमाले।
वायोर्वैलादय वैष्णवो हुता
कलापितिप्राभवतां चतुर्दश।
दिक्पालकोः पद्म वह्नि चासरे
महेश्वरोऽष्टौ मनकादेव च॥"
महान् ईश्वरः प्रभावान् प्रभुः। ऐश्वर्य्यशाली राजा। यथा, महाभारते। १।११८।२६।
"ततः शक्रोऽभिसंहृष्टः किरणान् महीश्वरः।
पाण्डवं प्रथमाकाश तापसो बहुधानयन्॥")
महेश्वरखड्गुला, स्त्री, (महेश्वरस्य करात् प्लुता।) करतोया नदी। इति केचित्। गौरीविवाह-समये हरकरच्युतकन्यादानोदकजातत्वात्

करस्य तोयं विद्यतेऽस्येति करतोया। इत्यमरटीकायां भरतः॥

महेश्वरी, स्त्री, (महेश्वरस्य स्त्री। महेश्वर+ ङीष्। महती चासौ ईश्वरी महदादीनां नियन्त्रीति वा।) महेश्वरपत्नी। यथा,—

"ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम्।
श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी॥"

इति तन्त्रसारे भुवनेश्वरीकवचम्॥

अपराजिता। इति शब्दचन्द्रिका॥ कांस्यम्। इति हेमचन्द्रः। ४। ११४॥ राजरीतिः। इति राजनिर्घण्टः॥

महैरण्डः, पुं, (महांश्चासावेरण्डश्च।) स्थूलैरण्डः। इति राजनिर्घण्टः॥

महैला, स्त्री, (महती चासावेला च।) स्थूलैला। इति राजनिर्घण्टः॥ (गुणादिविषयोऽस्याः स्थूलैलाशब्दे द्रष्टव्यः॥)

महोक्षः, पुं, (महान् उक्षा। "अचतुरविचतु-रेति।" ५। ४। ७७। इति समासान्तः अच्। निपातितश्च।) वृहद्वृषः। इत्यमरः। २। ९। ६१॥ तत्पर्य्यायः। ऋषभः २ वृषः ३ पुङ्गवः ४ बली ५ गोनाथः ६ ऋषभः ७ गोप्रियः ८ उक्षा ९ गोपतिः १०। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। ६०। ६६।

"महोक्षः स त्वया दृष्टः संस्तवस्य कृतो यदि।
तदिहानय तं युक्त्या तावत् पश्यामि कीदृशः॥")

महोटिका, स्त्री, (महान्तः फलेभ्यः स्थूला उटा पत्राण्यस्याः। ततः स्वार्थे कन्। टाप्। अकार-स्येत्त्वम्।) वृहती। इति राजनिर्घण्टः॥

महोटी, स्त्री, (महान्त उटाः पत्राणि यस्याः।) वृहती। इति भावप्रकाशः॥ वृहद्दुग्धला च॥

महोत्क, स्त्री, (महान् उत्कः दर्शनोत्सुको लोको यस्याः।) विद्युत्। इति केचित्॥

महोत्पलं, क्ली, (महच्च तत् उत्पलञ्च।) पद्मम्। सारसपक्षी। इत्यमरः। १। १०। ३६॥

महोत्सवः, पुं, (महांश्चासावुत्सवश्च।) अतिशय-सुखजनककर्म्म। यथा,—

"सर्व्वेष्वब्दादिवसे स्नातैर्मङ्गलपाणिभिः।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः॥
अवयवाश्च पितरौ तथा देवप्रजापतिः।
प्रतिसंवत्सरश्चैव कर्त्तव्यश्च महोत्सवः॥"

इति तिथ्यादितत्त्वे ब्रह्मपुराणवचनम्॥

अपि च। कालिकापुराणे ६९ अध्याये।

"दुर्गातन्त्रेण मन्त्रेण कुर्य्याद्दुर्गामहोत्सवम्।
महानवम्यां शरदि बलिदानं नृपादयः॥"

महोत्साहः, त्रि, (महान् उत्साहो यस्य।) अति-शयोत्साहयुक्तः। (यथा, महाभारते। ५। ५१। १।

"सर्व्वं एते महोत्साहा ये त्वया परिकीर्त्तिताः।
एकतस्त्वेव ते सर्व्वे समेता भीम एकतः॥")

तत्पर्य्यायः। महोद्यमः २। इत्यमरः। ३। १। ३॥ (विष्णुः। यथा, महाभारते। १३। १४९। ९१।

"अतीन्द्रियो महामायो महोत्साहो महाबलः॥")

महोत्साहः, पुं, (महान् उत्साहो यस्य।) राज्याङ्गप्राप्तराजपुरुषः। यथा,—

"सम्यक्तस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः॥"

इति शब्दमाला॥

अतिशयोद्यमश्च॥

महोदधिः, पुं, (महांश्चासावुदधिश्च।) समुद्रः। यथा, महानाटके।

"लङ्का दग्धा वनं भग्नं लङ्घितश्च महोदधिः।
यत् कृतं रामदूतेन स रामः किं करिष्यति॥"

महोदयं, क्ली, (महान् उदय उन्नतिर्यस्मिन्।) पुरविशेषः। तत्पर्य्यायः। कान्यकुब्जम् २ कन्या-कुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुशस्थलम् ६। इति हेमचन्द्रः॥

महोदयः, पुं, (महान् उदयः समुन्नतिर्यस्मिन्।) कान्यकुब्जदेशः। आधिपत्यम्। (महान् उदय उत्कर्षो यस्मिन्।) अपवर्गः। इति मेदिनी। ये, १२६॥ (महान् उदय उत्कर्षो यस्य।) स्वामी। इति हेमचन्द्रः। ३। ४८७॥ (महान् उदयः फलं यस्मिन् यस्माद्वा। महा-फले, त्रि। यथा, मनौ। ७। ५५।

"अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥"

"महोदयं महाफलम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

महोदया, स्त्री, (महानुदयो यस्याः। टाप्।) नागबला। इति राजनिर्घण्टः॥

महोदरी, स्त्री, महाशतावरी। इति भाव-प्रकाशः॥ (महत् उदरमस्य।) वृहदुदरयुक्ते, त्रि॥ (महच्च तदुदरञ्च। वृहदुदरे, क्ली। यथा, श्रीभागवते। ९। ७। १७।

"पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम्।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत॥"

पुं, नागविशेषः। यथा, महाभारते। १। ३५। ११।

"कर्कोटककर्कोटौ नागौ कुण्डोदरमहोदरौ॥"

दानवविशेषः। यथा, तत्रैव। १। ६५। २५।

"एकपादेकचक्रश्च विरूपाक्षमहोदरौ॥"

धृतराष्ट्रस्य पुत्रविशेषः। यथा, तत्रैव। १। ६७। ९७।

"सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ।")

महोद्यमः, त्रि, (महान् उद्यमो यस्य।) महोत्-साहः। इत्यमरः। ३। १। ३। (यथा, राज-तरङ्गिण्याम्। ५। १४६।

"अथ निर्ज्जित्य दायादांस्तस्मात् लक्ष्मीं पितो-श्वरः।
निग्रहीतुमियं कर्त्तुं श्रीमानानीकदो-द्यमः॥"

महानुद्यमः।) अतिशयोद्योगे, पुं॥

महोन्नतः, पुं, (महानतिशय उन्नतः।) ताल-वृक्षः। इति भावप्रकाशः॥ अत्युन्नतियुक्ते, त्रि॥

महोन्नतिः, स्त्री, (महती चासावुन्नतिश्च।) अतिशयवृद्धिः। यथा,—

"भूयात्ते महदैश्वर्य्यं पुत्त्रादीनां महोन्नतिः।
अव्याधिना शरीरेण चिरं जीव सुखी भव॥"

इत्युद्भटः॥

महोन्मदः, पुं, (महानतिशय उन्मदः।) मत्स्य-विशेषः। मचुइ इति भाषा। यथा,—

"राजीवश्चित्रफलः फलकी च महोन्मदः॥"

इति शब्दरत्नावली॥

अत्युन्मत्ते त्रि॥

महोरगं, क्ली, (महान् उरग इव।) तगर-मूलम्। इति रत्नमाला॥

महोरगः, पुं, (महांश्चासावुरगश्च।) सर्पगण-विशेषः। इति हेमचन्द्रः। २। ४॥ वृहत्सर्प-मात्रञ्च॥ (यथा, भागवते। ८। १०। ४७।

"महोरगाः समुत्पेतुः दन्दशूकाः सवृश्चिकाः॥")

महोल्का, स्त्री, (महती चासावुल्का च।) उल्काविशेषः। यथा,—

"विद्युत्स्तनितनिर्घातमहोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥
महोल्कानाञ्च संप्लवे इत्यत्रानेकमहोल्कानां सन्निपाते। उल्कालक्षणमाह वृहद्वशिष्ठः।
"दृश्चिक्षसा च दृश्याया रक्तनीलशिखो-ज्ज्वला।
पौरुषी च प्रमाणेन ह्युल्का नानाविधा स्मृता॥"

इति तिथ्यादितत्त्वम्॥

महौजाः, [स्] त्रि, अतितेजोयुक्तः। महदोजो यस्येति विग्रहे महदोजो प्रथमैकवचने आत्वे-ऽप्यादिवशेन दीर्घे कृते महौजा इतिपदं निष्पन्नम्॥ (यथा, मनौ। १। ६१।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे।
सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौ-जसः॥"

काश्यपपुत्त्रासुरविशेषः। यथा, महाभारते। १। ६७। ५१।

"पश्चमस्तु बभूवैषां प्रवरो यो महासुरः।
महौजा इति विख्यातो बभूवेह परन्तपः॥")

महौषधं, क्ली, (महत् औषधम्।) शृङ्गा-वेरम्। शुण्ठी। (पर्य्यायो यथा,—

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लशुनम्। (पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वाराहीकन्दः। वत्सनाभः। इति राजनिर्घण्टः॥ पिप्पली। इति शब्दचन्द्रिका॥ अतिविषा। इत्यमरः। २। ४। ९८॥ (महाभेषजम्। यथा, कथासरित्सागरे। ६६। ९८।

"अभर्त्तृन् प्रेक्ष्य तेनाथ महाभस्माङ्कदौषधैः।
चिकित्सा कारयामासुर्नितरां तस्य सर्व्वतः॥")

महौषधि, स्त्री, (महती ओषधिः ।) दूर्व्वा । लज्जालुक्षुपः । इति शब्दचन्द्रिका । महाप्रभावौषधिविशेषः । यथा,—
"सहदेवी तथा ब्राह्मी बला चातिबला तथा ।
महामुग्धी तथा सिंही व्याघ्री च सुवर्च्चला ॥
महौषध्यष्टकं प्रोक्तं महास्नाने नियोजयेत् ॥"
इति गोविन्दानन्दधृतमहास्नानवचनम् ॥
अपि च ।
"एभिरष्टौ श्यामलता भृङ्गराजः शतावरी ।
गुडूची सहदेवी च महौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥
श्रेष्ठौषधिश्च । (यथा, महाभारते ।१।२८८।(
"विशल्यां चापि सुग्रीवः कर्णमूले चकार ह ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया ॥"
महौषधी । यथा, रघौ । १५ । ६१ ।
"हता विभिन्नना तेन लङ्कायां राघवीकृता ।
जानकीविजयश्रीभिः परीतेव महौषधिः ॥"
"महौषधीः मणीन्मन्त्रान् जनैव ।" इति तट्टीकायां मल्लिनाथः ॥)
महौषधी, स्त्री, (महौषधि + ङीप् ।) श्वेतकण्टकारी । ब्राह्मी । (पर्य्यायोऽस्या यथा,—
"ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
कटुका । अतिविषा । इति राजनिर्घण्टः ॥
हिलमोचिका । इति त्रिकाण्डशेषः ॥
मा ङ न माने । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) ङ न मायते । इति दुर्गादासः ॥
मा ङ लि शब्दे । माने । इति कविकल्पद्रुमः ॥ (जुहो०-आत्म०-सक०-अनिट् ।) ङ लि मिमीते । शुक्रा धर्म्मं मिमीते यः । इति हलायुधः ॥ इति तट्टीकायां दुर्गादासः ॥
मा क माने । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) क माति भूमिं भवेन राजा । न मान्ति मानिनो यस्य यशस्त्रिभुवनोदरे ॥"
इति हलायुधः ॥ इति दुर्गादासः ॥
मा, व्य, (मा + क्विप् ।) वारणम् । (यथा रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः
समाः ॥")
निषेधः । इति मेदिनी । अव्ययवर्गे, ४८ ॥
मा, स्त्री, (मा + क्विप् । यद्वा, मा + क । ततष्टाप् ।) लक्ष्मीः । इति मेदिनी । मे, १ ॥ माता । (यथा, आह्निकतत्त्वे । १० म ।
"मारमा शुभमा चारुवचा मारवधूमता ।
मारपूर्णममायाता मा वामा देहतु मा
रमा ॥")
मानम् । इत्येकाक्षरकोषः शब्दरत्नावली च ॥
मा, } त्रि, (अस्मद् + द्वितीयैकवचने । "त्वामौ
मां } मौ द्वितीयायाः ।" ८ । १ । २३ ।
इति मामित्यस्य स्थाने विकल्पेन मादेशः ।)
मदीया कर्म्मता । आमाके इति भाषा ॥ अस्मच्छब्दात् द्वितीयैकवचननिष्पन्नं पदम् । इति व्याकरणम् ॥ (यथा, देवीभागवते । १ । ५ । ६६ ।
"विष्णोः पुत्त्री रोदिता किं ममाद्य !
कथाद्देवी प्रेषति वायवीयाम् ।
धनधन्ये काश्यपालापराधी
पुत्त्रार्थिनं मोहिनी मां कुरुष्व ॥")
मांसं, क्ली, (मन्यते इति । मन ज्ञाने + "मनेर्दीर्घश्च ।" उणा० ३ । ६४ । इति सः दीर्घश्च ।) रक्तधातुविशेषः । मास् इति भाषा ॥ तत्तु गर्भस्थबालकस्य त्रिभिर्मासैर्भवति । इति सुखबोधः ॥ भावप्रकाशमते चतुर्भिर्मासैर्भवति । तत्पर्य्यायः । पिशितम् २ तरसम् ३ पललम् ४ क्रव्यम् ५ आमिषम् ६ पलम् ७ । इत्यमरः । २ । ६ । ६३ ॥ अस्रजम् ८ आद्रकम् ९ कीरम् १० । सर्व्वमांसगुणाः । वातापहत्वम् । हृद्यत्वम् । बल्यत्वम् । रुच्यत्वम् । बृंहणत्वम् । पेशलानलमांसाद्भिर्भूयो गात्रोपचयश्च ॥ ० ॥ प्रसह-भूशयानूपवारिजवारिचारिणामगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । शुक्रवर्द्धनत्वञ्च ॥ ० ॥ विष्किर-प्रतुदजाङ्गलमांसगुणाः । लघुत्वम् । शीतलत्वम् । मधुरत्वम् । कषायत्वम् । दृष्टौ हितत्वञ्च ॥ ० ॥ अङ्गविशेषमांसगुणाः ।
'एकदेहेऽपि पूर्व्वार्द्धं भवत्यल्पं गुरु परम् ।
सर्व्वेषाञ्च शिरःस्कन्धौ पृष्ठकट्युरसं गुरु ॥
पारदुष्टाल्पमांसव्याधिसुखरोगाश्च मेदसाः ।
धातवः शोणिताद्याश्च गुरवः स्युर्यथोत्तरम् ॥'
प्रसह्यप्रमाणमांसं यथा,—
'बस्तानां विविधं सद्योहतं मांसं प्रशस्यते ।
मृतञ्च व्याधितं वृद्धं शुष्कं बालं विवर्ज्जयेत् ।
अगोचरहतं चापूयहितं मांसमुत्सृजेत् ॥'
अष्टविधा मांसयोनिविधेयाः । प्रसहाः १ प्रसह्य भक्षणात् कुररश्येनादयः । भूशयाः २ बिलशायित्वात् नकुलगोधादयः । आनूपाः ३ अनूपसञ्चरणाद्वराहादयः । जलजाः ४ कुम्भीरादयः । जलेचराः ५ हंसबकप्लवादयः । जाङ्गलाः ६ हरिणच्छागादयः । विष्किराः ७ विकीर्य्य चरणात् तित्तिरमयूरकुक्कुटादयः । प्रतुदाः ८ प्रतुद्य चरणात् कपोतपारावतादयः । इति राजनिर्घण्टः ॥ ० ॥ अपि च ।
'मांसं वातहरं सर्व्वं बृंहणं बलपुष्टिकृत् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥' ० ॥
अथ तद्भेदाः ।
'मांसवर्गो द्विधा ज्ञेयो जाङ्गलानूपभेदतः ॥'
तत्र जाङ्गलस्य लक्षणं गुणाश्च ।
'जाङ्गलोऽष्टविधः स्याच्च विष्किरश्च प्रतुदस्तथा ।
तथा पर्णमृगः प्रोक्ता विष्किराः प्रतुदा अपि ॥
प्रसहा अपरे च भूशयाः जलवासिनः ।
आनूपाश्च वारिशया वारिचारिश्च मत्स्यकाः ॥
बहुलाः इत्येवं हि जाङ्गलाः दोषत्रयहरा रसा
सकला विविधाश्चैव प्रकृत्या रुच्या मताः ।
माधुर्य्यमधुराद्यं चोष्णवीर्य्यं मधुरं लघु ।
दीपनं शमनं श्लेष्मणामात्रायुधवीर्य्यवर्द्धनम् ॥' ४४ ॥
अथानूपस्य लक्षणं गुणाश्च ।
'कुम्भीराः प्रसहाश्चापि कोरकाः पारिप्लवाः ।
मत्स्याः एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः
स्मृताः ॥' ० ॥
अथ जाङ्गलानां गणना विशिष्टा गुणाश्च ।
'हरिणैणकुरङ्गर्श्यपृषतन्यङ्कुशम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गल-
संज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋश्यो नीलाङ्गको लोके मदीय इति कीर्त्तितः ।
पृषतश्चन्द्रविन्दुः स्याद्धरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ॥
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ।
जाङ्गलाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ॥
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥'
अथ विलेशयानां गणना गुणाश्च ।
'गोधाशशभुजङ्गाखुशल्लकाद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ।
बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः ॥'
अथ गुहाशयानां गणना गुणाश्च ।
'सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा ।
बभ्रुजम्बुकमार्ज्जाराः इत्याद्याश्च गुहाशयाः ॥
गुहाशया वातहरा गुरूष्णमधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारि-
णाम् ॥'
अथ पर्णमृगाणां गणना गुणाश्च ।
'वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥
स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे
हिताः ।
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥'
अथ विष्किराणां गणना गुणाश्च ।
'वर्त्तकालावविष्किरकपिञ्जलकतित्तिराः ।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥
विकीर्य्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः ।
अविष्किरा इति प्राज्ञैः कथिता मोहवर्जिताः ॥
विष्किरा मधुराः शीताः कषायाः कटुपाकिनः ।
बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः
स्मृताः ॥'
अथ प्रतुदानां गणना गुणाश्च ।
'पारावतकपोताख्यशुकसारिकखञ्जनाः ।
हारीता दात्यूहश्च प्रतुदाः प्रतुदाः स्मृताः ॥
प्रतुद्य भक्षयन्त्येते तुदन्ति प्रतुदास्ततः ।

कपोतो धवलः पाण्डुः प्रसभनो हरच्छुकः ।
प्रतुदा मधुराः पित्तकफघ्नास्तु वरा हिमाः ।
सबलो बहुवर्णस्त्वाः किञ्चिद्वातकराः स्मृताः ॥'
अथ प्रसहानां गणना गुणाश्च ।
'काको गृध्र उलूकश्च चिल्लश्च शशघातकः ।
चाषो भासश्च कुररः इत्याद्याः प्रसहाः स्मृताः ।
प्रसहाः कीर्त्तिता एते प्रसह्याच्छिद्य भक्षणात् ।
प्रसहाः खलु वीर्य्योष्णाः तन्मांसं भक्षयन्ति ये ।
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि ॥'
शशघातकस्थाने शतघातकोऽपि पाठः । चाष इति लोके ॥०॥ अथ ग्राम्याणां गणना गुणाश्च ।
'छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तदाः ।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धनाः ॥'
अथ कूलेचराणां गणना गुणाश्च ।
'गजगवयमहिषरुरुचमरसृमरवराहखड्गाद्याः ।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यमी ॥
कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः ।
मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः ॥'
अथ प्लवानां गणना गुणाश्च ।
'हंससारसकारण्डवबककौञ्चशरारिकाः ।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ॥
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः ॥
स्थूला कठोरा हस्वा च यस्याश्चञ्चुरसिताः ।
गुटिका चञ्चुसदृशी ज्ञेया नन्दीमुखीति सा ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥'
अथ कोषस्थानां गणना गुणाश्च ।
'शङ्खः शङ्खनखश्चापि शुक्तिशम्बूककर्कटाः ।
जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिताः ॥
कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
बृंहणा बहुवर्चस्का वृष्याश्च बलवर्द्धनाः ॥'
अथ पादिनां गणना गुणाश्च ।
'कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्याद्याः पादिनः स्मृताः ।
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः ॥'
इति भावप्रकाशः ॥

अन्यच्च ।
मांसं वातहरं सर्व्वं बृंहणं बलवर्द्धनम् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥'
तस्योत्पत्तिस्थानमष्टविधं यथा,—
'प्रसह्य भक्षयन्तीति प्रसहास्तेन कीर्त्तिताः ।
भूशया बिलवासित्वादानूपोऽनूपसंश्रयात् ॥
जले निवासाज्जलजा जले चर्य्याज्जलेचराः ।
स्थलजा जाङ्गलाः प्रोक्ता मृगा जाङ्गलचारिणः ॥
विकीर्य्य विष्किराश्चैव प्रतुद्य प्रतुदाः स्मृताः ।
योनिरष्टविधा त्वेषा मांसानां संप्रकीर्त्तिता ॥'
'प्रसहा भूशयानूपवारिजा वारिचारिणः ।
गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः ॥
लावाद्यो विष्किरो वर्गः प्रतुदा जाङ्गला मृगाः ।
लघवः शीतमधुराः सकषाया हिता नृणाम् ॥'
अथ मांसयूषगुणाः ।
'रसो मांसस्य धातुघ्नो बृंहणः प्राणवर्द्धनः ।
हृद्यो वातविकारघ्नः स्मृत्योजःस्वरवर्द्धनः ।
भग्नविश्लिष्टसन्धीनां क्षतानां शुष्यतां हितः ॥'
अथ तैलपक्कमांसगुणाः ।
'मांसं तैलसंसिद्धं वीर्य्योष्णं पित्तलं कटु ।
अग्निसन्दीपनं रुच्यं दृष्टिघ्नं पुष्टिदं गुरु ॥'
घृतपक्कमांसगुणाः ।
'मांसन्तु घृतसंसिद्धं हृदिष्टं पुष्टिदं लघु ।
प्रीणनं सर्व्वधातूनां विशेषाच्चक्षुषोर्हितम् ॥'
परिशुष्कप्रदिग्धमांसयोर्लक्षणं गुणाश्च ।
मांसं बहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥
परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौजःशुक्रवर्द्धनम् ॥
तदेव गन्धकाद्यं प्रदिग्धं कथितं तथा ।
प्रदिग्धं बलमांसाग्निवर्द्धनं वातपित्तजित् ॥'
शूलिकापक्वमांसगुणाः ।
'मांसन्तु शूलिकाप्रोतमङ्गारैः विपाचितम् ।
ज्ञेयं गुरुतरं रुच्यं दीप्ताग्नीनां सदा हितम् ॥'
वेशवारमांसस्य लक्षणं गुणाश्च ।
'निरस्थि पिशितं पिष्टं सिद्धं गुडघृतान्वितम् ।
कणामरिचसंयुक्तं वेशवार इति स्मृतम् ॥
वेशवारो गुरुः स्निग्धो बलोपचयवर्द्धनः ।
द्रव्यैश्च येन येनेह यन्नाम मत्स्यमांसयोः ।
तस्य तस्य तयोश्चैतद्गुणदोषैर्विभावयेत् ॥'
एकत्र सर्व्वमांसभक्षणदोषो यथा,—
'एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥'
मांसस्य गुरुत्वं यथा,—
'अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनाच्च न भक्षणात् ॥'
इति राजवल्लभः ॥

वर्ज्जनीयमांसानि यथा,—
'क्रव्यादपक्षिदात्यूहशुकमांसानि वर्जयेत् ।
सारसैकशफान् हंसान् बलाकाबकटिट्टिभान् ॥
कुररं जालपादञ्च खञ्जरीटमगाहिजान् ।
चाषान् मातृस्थान् रक्तपादान् जग्ध्वा वै कामतो नरः ॥
कच्छुरं कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।'
इति गारुडे ९६ अध्यायः ॥

मांसभक्षणे दोषो यथा,—
'लोभात् स्वभक्षणार्थाय जीविनं हन्ति यो नरः ।
मज्जाकुण्डे वसेत् सोऽपि तद्दोषी लक्षवर्षकम् ॥
ततो भवेत् स शशको मीनश्च सप्तजन्मसु ।
ब्रह्मणश्च कर्म्मभ्यस्तः शुद्धिं लभेद्ध्रुवम् ॥'
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अपि च ।
'बलाकं हंसदात्यूहं कलविङ्कं शुकं तथा ।
कुररञ्च चकोरञ्च जालपादञ्च कोकिलम् ॥
चाषञ्च खञ्जरीटञ्च श्येनं गृध्रं तथैव च ।
उलूकं चक्रवाकञ्च भासं पारावतन्तथा ।
कपोतं टिट्टिभञ्चैव ग्रामटिट्टिभमेव च ।
सिंहव्याघ्रञ्च मार्ज्जारं श्वानं शूकरमेव च ॥
शृगालं मर्कटञ्चैव गर्द्दभञ्च न भक्षयेत् ।
न भक्षयेत् सर्व्वमृगान् पक्षिणोऽन्यान् वनेचरान् ॥
जलेचरान् स्थलेचरान् प्राणिनश्चेति धारणा ॥'
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
अन्यच्च ।
'नाद्यादविधिना मांसं विधिज्ञो नापदि द्विजः ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ।
यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥
कुर्य्याद्घृतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्ज्जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्य पितॄन् देवान् ततोऽन्यो नास्त्यपुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात् ॥
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विवर्ज्जयेत् ॥'
इति मानवे ५ अध्यायः ॥
अन्यच्च । श्रीभागवतपञ्चमस्कन्धगद्यम् । 'ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते । याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशवो इव निहता यमसदने यातयन्तो रक्षोगणाः । सौनिका इव स्वधितिना वदायासृक् पिबन्तीति ॥'
ब्रह्मपुराणम् ।
'यश्चेत्तु सार्व्वमासञ्च न मांसं खादयेत् क्वचित् ।
एकमांसं गर्भशय्यां सुन्दमांसमथापि वा ॥'
महाभारतम् ।
'रोगार्त्तोऽभ्यर्थितो वापि यो मांसं नात्ति लोलुपः ।
फलमाप्नोत्ययत्नेन सोऽश्वमेधशतस्य च ॥'
वह्निपुराणम् ।
'यश्चोपदेशं कुरुते मरणे तु महात्मनः ।
मांसस्य वर्ज्जनफलं सोऽश्वमेधफलं लभेत् ॥'
भविष्यपुराणम् ।
'आमिषं रक्तमाकञ्च यो ददाति च दर्वहिंने
समश्नन् भवेत् कुष्ठी दरिद्रश्चोपजायते ॥'

पितृपुराणम् ।
चतुर्द्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥'
इति तिथ्यादितत्त्वम् ॥

अथ मांसभक्षणविधिः ।
'श्राद्धे देवान् पितॄन् पार्थ खादन् मांसं
न दोषभाक् ।
वसेत् स नरके घोरे दिनानि पशुरोमभिः ॥
अविधानेन दुराचारो यो हन्यविधिना पशून् ।
मांसं संप्राप्य संप्राप्य कामान् याति ततो
ऽधमम् ॥'
इति गारुडे ९९ अध्यायः ॥

अपि च ।
'मांसा कूर्म्मः शशः खड्गी शल्लकश्चेति
पञ्चमाः ।
भक्ष्यान् पञ्चनखानित्थं मनुराह प्रजापतिः ।
मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
मयूरं तित्तिरञ्चैव कपोतञ्च कपिञ्जलम् ।
वार्द्ध्रीणसं बकं भक्ष्यं मीनहंसं पराजिताः ॥
शफरं सिंहतुण्डञ्च तथा पाठीनरोहितौ ।
मत्स्येष्वेते समुद्दिष्टा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तश्च प्राणानामपि चात्यये ॥
भक्षयन्नपि मांसानि शेषभोक्ता न लिप्यते ।
औषधार्थमशक्तौ वा नियोगाद्यज्ञकारणात् ॥
आमन्त्रितस्तु यः श्राद्धे दैवे वा मांसमुत्सृजेत् ।
यावन्ति पशुरोमाणि तावतो नरकान् व्रजेत् ॥
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ।

अपि च ।
'मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्ज्जने ।
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया ॥
यथाविधिनियुक्तस्तु प्राणानामेव चात्यये ।
प्राणस्यान्नमिदं सर्व्वं प्रजापतिरकल्पयत् ॥
स्थावरं जङ्गमञ्चैव सर्व्वं प्राणस्य भोजनम् ।
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः ॥
अहस्ताश्च सहस्तानां शूराणाञ्चैव भीरवः ।
नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि ॥
धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ।
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ॥
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ।
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा ॥
देवान् पितॄंश्चार्च्चयित्वा खादन् मांसं न दुष्यति ॥
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥'
इति मात्स्ये ५ अध्यायः ॥ ० ॥

वैष्णवपुराणम् ।
'चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
महापातकोपहारेण दग्धार्थेनैतदुदाहृतम् ।
तेनैव विधिनाश्नीयात् स्वयं भुञ्जीत नान्यथा ॥'

याज्ञवल्क्यः ।
'प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।
देवान् पितॄन् समभ्यर्च्च्य खादन् मांसं न
दोषभाक् ॥'

यमः ।
'भक्षयेत् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया ।
दैवे नियुक्तः श्राद्धे वा नियमे च विवर्ज्जयेत् ॥'
इति तिथ्यादितत्त्वम् ॥ ० ॥

मांसामिषं यथा,—
'गोधूमसामिषं चोरं पथि बन्धोरसामिषम् ।
आमिषं रत्नमालञ्च सर्व्वञ्च एवमामिषम् ॥'
गोधूमसामिषं चौरमिषञ्च पथामामिषं
पयोमिति च पाठः । इति कर्म्मलोचनः ॥
(अस्योत्पत्तिर्यथा,—
'रक्तात्तस्य ततो मांसं मांसात् मेदः प्रजायते ॥'
इति सुश्रुते सूत्रस्थाने १४ अध्याये ॥)

मांसः, पुं. (मन+सः । दीर्घश्च ।) कालः ।
कीटः । इति शब्दरत्नावली । (वर्णसङ्करजाति
विशेषः । यथा, महाभारते । १३ । ४८ । २१ ।
"चतुरो मागधो सूते क्रूरान्मायोपजीविनः ।
मांसं स्वादुकरं क्षौद्रं सौगन्ध्यमिति विश्रुतम् ॥")

मांसकारि, क्ली, (मांसं करोतीति । कृ+णिनिः ।)
रक्तम् । इति हेमचन्द्रः । ३ । २८६ ॥

मांसच्छदा, स्त्री, (मांस इव छदः पर्णमस्याः ।
तद्वदतिकोमलपत्रत्वात्तथात्वम् ।) मांस-
रोहिणीविशेषः । तत्पर्य्यायः । मांसी २ मांस-
रोही ३ रसायनी ४ सुलोमा ५ लोमकर्णी
६ । इति राजनिर्घण्टः ॥

मांसजं, क्ली, (मांसाज्जायते इति । जन्+डः ।)
मेदः । इति हेमचन्द्रः । ३ । २८८ । (मांस-
जाते, त्रि ॥)

मांसतेजः, [स्] क्ली, (मांसात् तेजोऽस्य ।)
मेदः । इति हेमचन्द्रः । ३ । २८८ ॥

मांसदलनः, पुं, (मांसं शीघ्रमेव दलति खण्डी-
करोतीति । दल+ल्युः ।) शोथघ्नवृक्षः । इति
शब्दचन्द्रिका ॥

मांसद्रावी, [न्] पुं, (मांसं द्रावयति द्रवीभूतं
करोतीति । द्रु+णिच्+णिनिः ।) अम्लवेतसः ।
इति राजनिर्घण्टः ॥ (विवृतिरस्याम्लवेतस-
शब्दे ज्ञातव्या ॥)

मांसपचनं, क्ली, (मांसस्य पचनम् ।) मांसपाकः ।
तस्य प्रकारादि मांसपाकः । इति भावप्रकाशः ॥

मांसपेशी, स्त्री, (मांसस्य पेशी ।) कर्णाटकवत्-
विशेषः । यथा,—
"कुरुवः सहसाञ्च मांसपेशी मणेतनः ।
द्विजप्रासाद् भवेत् पेशी रक्तमांसविना तदा ॥
शोकक्लेशाद्गुरुः पेशः यथादिष्टनिराकृतः ॥"
इति मुग्धबोधः ॥ ० ॥

अथ मांसस्य पेशीप्रकारः ।
कथमेनन्तुम्बा शुष्ठी याहि कोलाति हारयेत् ।
अस्थिपक्वं पिशितं पेशीभिरावृतं तथा ।"
यथार्थं यथाप्रयोजनम् ॥ ० ॥ मांसपेशीनां
संख्यामाह ।
"मांसपेश्यः समाख्याताः नृणां पञ्चशतानि च ।
तासां शतानि चत्वारि शाखासु कथितानि च ॥
कोष्ठे षट्षष्टिः कथिता ग्रीवायूर्द्धं चतुस्त्रिंशत् ।
योषितां तु नितम्बाद्धि चतुर्विंशत् प्रको-
र्त्तिताः ॥"
ताः शाखागताः प्राह । एकैकस्यां पादाङ्गुल्यां
तिस्रस्तिस्र इत्येवं पञ्चदश १५ पादाग्रे दश १०
पादोपरि कूर्च्चसन्निविष्टा दश १० गुल्फतलो-
र्द्ध्वं दश १० गुल्फजान्वोरन्तरे विंशतिः २०
जानुनि पञ्च ५ ऊरौ विंशतिः २० वंक्षणे
दश १० एवमेकस्मिन् सक्थिनि शतम् १००
भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ ।
अथ कोष्ठगताः प्राह । गुदे तिस्रः मेढ्र-
त्वचेका १ सेवन्यामेका १ वृषणयोर्द्वे २ स्फिचोः
पञ्च पञ्च ५ । ५ वस्तिशिरसि द्वे २ उदरे पञ्च
नाभ्यामेका १ पृष्ठोर्द्धसन्निविष्टा उभयतः पञ्च
पञ्च दीर्घाः ५ । ५ पार्श्वयोः षट् ६ वक्षसि
दश १० अक्षकांसौ प्रति समन्तात् सप्त ७ ।
हृदयामाशययोः इति कोष्ठे । ग्रीवां उर्द्ध्वम् ।
ग्रीवायां चतस्रः ४ हन्वोरष्टौ ८ काकलकगल-
योरेका १ तालुनि द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां
द्वे ललाटे चतस्रः ४ शिरस्येका १ एवं मांस-
पेश्यः पञ्चशतानि भवन्ति ॥ ० ॥
"स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तराः ।
स्तनयोः स्मरमार्गे योनौ च स्फिचोरपि ॥"
ताः पञ्चशतानि मांसपेश्यः । स्त्रीणां
विंशतिरधिकाः । स्तनयोः प्रत्येकं पञ्च पञ्च इति दश ।
अपत्यपथे चतस्रः । शुक्रार्त्तवप्रवेशिन्यां तिस्रः । योन्यां
गर्भच्छिद्रे तिस्रः । एवमधिकविंशतिर्योषितां
स्त्रीणां तिस्रः । शुक्रार्त्तवप्रवेशिन्यौ तिस्रः १ योना-
वभ्यन्तरतो गुह्ये चापरे द्वे २ योनौ तिस्र
बहिर्निबद्धोष्ठान्तर्गतगर्भाशये द्वे २ योनि-
स्कन्धे इति यावत् द्वे २ स्तनयोः पञ्च पञ्च
५ । ५ यौवने तासां वृद्धिर्भवति ।
"पुंसां पेश्यः पुरस्तात् याः प्रोक्ता लक्षण-
मुष्कजाः ।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥"
अस्यायमर्थः । पुंसां मेढ्रवृषणयोः यास्ताः
मांसपेश्यः पूर्व्वमुक्ताः स्त्रीणां मेढ्रवृषणा-
भावात् गर्भं सम्भाव्य कायेन तिष्ठन्ति । स्त्रीणां
यास्तास्ताः । स्त्रीणां मांसपेश्यधिकविंशतिरिति
पञ्चशतानि । तथा च भोजः ।
"मध्यपेश्योऽप्युदराभ्येत्य योन्यां शिरे पृष्ठे च ।
धातवश्चिती सौषणं स्त्रीणां द्विवर्ष सुश्रुतः ॥
अथ मांसपेशीनां कर्म्मादिकमाह ।
"शिराम्नायुविस्रंसिनि अवष्टम्भादिरोऽनिकाः ।
पेशीभिः संवृतान्येव बलवन्ति भवन्ति हि ॥"
इति भावप्रकाशः ॥

(यथा, महाभारते । १ । ११५ । १२ ।
"ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता ॥")

मांसफला, स्त्री, (मांसमिव फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

मांसभक्षः, त्रि, (मांसं भक्षयतीति । भक्ष + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) मांसभक्षणकर्त्ता । मांसं भक्षयतीति ण्यन्तात् भक्षिति कर्म्मणि अण्प्रत्ययेन निष्पन्नः ॥ (दानवविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । २३२ । ६ ।
"मांसपो मांसभक्षश्च वेगवान् केतुमाञ्छ्रिविः ॥")

मांसमाषा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥

मांसरोहिणी, स्त्री, (मांसं रोहयतीति । रुह + णिच् + णिनिः । ङीप् । न पुक् ।) सुगन्धिद्रव्यभेदः । तत्पर्य्यायः । अग्निरुहा २ वृत्ता ३ चर्म्मकषा ४ वसा ५ विकसा ६ मांसरोही ७ । अस्या गुणाः । वृष्यत्वम् । सारकत्वम् । दोषत्रयनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायो गुणाश्च ।
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकषी लघा ।
प्रहारवल्ली विकसा वीरवत्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मांसलं, क्ली, (मांसं तद्वत् पुष्टिकरो गुणोऽस्त्यस्मिन् वा । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) काव्यस्य गौडीरीत्यनुगतस्य ओजोगुणस्याङ्गविशेषः । यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ॥"
इति काव्यचन्द्रिका ॥

मांसलः, त्रि, (अतिशयमांसमस्त्यस्येति । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) बलवान् । इत्यमरः । ३ । १ । ४४ । स्थूलः । यथा, गारुडे ६६ अध्याये ।
"विस्तारवन्तुरेखाः स्युर्निर्दिश्याश्चिबुके शुभैः ।
मांसलैश्च घनोपेतैरवक्रैरधरैर्नृपाः ॥"
(मांसयुक्तः । यथा, बृहत्संहितायाम् । ६८ । २८ ।
"हृदयं समुन्नतं पृथु न वेपनं मांसलञ्च
नृपतीनाम् ॥"
अतिस्थूलः । यथा, नैषधे । ६ । २१ ।
"हृदस्य हंसावलिमांसलश्रियो
बलाकयेव प्रबला विड़म्बना ॥")

मांसलफला, स्त्री, (मांसलं फलमस्याः ।) वृन्ताकी । इति राजनिर्घण्टः ॥

मांसविक्रयी, [न्] त्रि, (मांसविक्रयोऽस्यास्तीति । मांसविक्रयेण जीवति वेति इनिः ।) आमिषविक्रयकर्त्ता । इति हलायुधः ॥ तत्पर्य्यायः । वैतंसिकः २ कौटिकः ३ मांसिकः ४ । इत्यमरः । २ । १० । १४ ॥ शौलिकः ५ । इति जटाधरः ॥ कौटकिकः ६ । इति शब्दरत्नावली ॥ (यथा मनौ । ३ । १५१ ।
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥")

मांससारः, पुं, (मांसस्य सारः ।) मेदः । इति राजनिर्घण्टः ॥ (मांसेष्वपि सारो बलं यस्य । सबलस्थूलकायः । यथा, बृहत्संहितायाम् । ६८ । १०० ।
"उपचितदेहो विद्वान् धनी सुरूपश्च मांस-
सारो यः ।
सङ्घात इति च सुश्लिष्टसन्धितासुखभुजो
ज्ञेयाः ॥")

मांसस्नेहः, पुं, (मांसानां स्नेहः ।) मेदः । इति राजनिर्घण्टः ॥

मांसहासा, स्त्री, (मांसेन हासः प्रकाशो यस्याः ।) चर्म्म । इति शब्दरत्नावली ॥

मांसाष्टका, स्त्री, (मांसेन सम्पाद्या अष्टका । मांसप्रधाना अष्टका वा ।) गौणचान्द्रमाघकृष्णाष्टमी । तत्र मांसोपकरणकश्राद्धमावश्यकम् । यथा; अथाष्टकाश्राद्धम् ।
"पित्रादानाय शस्ते स्युरष्टकास्तिस्र एव च ।
[illegible] वरिष्ठा हि पूर्व्वा चैन्द्री निगद्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
मूलं प्रधानस्थाने । अमावास्या हि श्राद्धस्य प्रधानकालः तद्वदिति यावत् । ऐन्द्री सार्व्वेन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेविकी च । मांसैः पशौ । तथा च गोभिलः । पशुश्चास्यतरसंभारः स्यात् तदा पशुनैव कुर्य्यादिति । पशुरेति निपातसमुदायो यद्यर्थे । पशुरपि छाग एव । छागोऽभावे हि पशुरिति गौतमात् । न च सैषा ऊर्द्धं अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात् कथमनुपदिष्टत्वमिति वाच्यम् । तदसम्भवे पशुनेत्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात् । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः ।
"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय मृगं हत्वा महाबल ! ॥"
इत्यादिना मृगमांसबोधनात् । पश्वभावे स्थालीपाकेन । यथा, गोभिलः । अपि वा स्थालीपाकं कुर्व्वीतेति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पिकम् ।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु ॥"
इति छन्दोगपरिशिष्टीयं ग्राह्यम् । अन्विति ओदनचरोः पश्चात् । अतएव ।
"पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥"
इति शातातपोक्तम् । तत्रादनं प्रधानं पूपादिकन्तु उपकरणत्वेन स्मृत्यन्तरावश्यकं सदेति श्रवणात् । इति श्राद्धतत्त्वम् ॥

मांसिकः, पुं, (मांसाय प्रभवति "तस्मै प्रभवति सन्तापादिभ्यः ।" ५ । १ । १०१ । इति । मांस + ठञ् । मांसेन जीवतीति ठन् वा । मांसं पण्यमस्य । "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति ठक् वा । अथवा, मांसं नियुक्तमस्मै दीयते । इति "श्राणामांसौदनाट्टिठन् ।" ४ । ४ । ६७ । इति टिठन् ।) मांसविक्रयी । इत्यमरः । २ । १० । १४ ॥

मांसिनी, स्त्री, (मांसवत् पदार्थोऽस्यामस्तीति । इनिः । ङीप् ।) जटामांसी । इति राजनिर्घण्टः ॥

मांसी, स्त्री, (मांसवत् पदार्थोऽस्यास्त्यस्यामिति । मांस + अर्श आदित्वादच् । गौरादित्वात् ङीष् ।) जटामांसी । कक्कोली । इति मेदिनी । से, ८ । मांसच्छदा । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेशी मांसी लघ्वजटा जटी ॥")

मांसेष्टा, स्त्री, (मांसमिष्टं प्रियमस्याः ।) वल्गुली । इति राजनिर्घण्टः ॥

माकन्दः, पुं, (मातीति । मा + क्विप् । माः परिमितः सुघटितः कन्द इव फलमस्य ।) आम्रवृक्षः । इति मेदिनी । दे, २८ ॥ (यथा, गीतगोविन्दे ।
"माकन्द ! कन्द कामाधर ! धरणितलं
गच्छ यच्छामि यावद्
भावं मञ्जारसारस्वसमिह जयदेवस्य विश्व-
ग्वचांसि ॥"
तथास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

माकन्दी, स्त्री, (माकन्द + ङीष् ।) आमलकी । नगरभेदः । इति मेदिनी । दे, ३८ ॥ (यथा, महाभारते । ५ । ७२ । १५ ।
"————पञ्चग्रामा वृता मया ।
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ।
अवसानञ्च गोविन्द ! कञ्चिदेवात्र पञ्चमम् ॥")
पीतचन्दनम् । इति शब्दमाला । मादाकी इति माद्रनी इति च हिन्दी भाषा । तत्पर्य्यायः । बहुमूली २ मारनी ३ गन्धमूलिका ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मधुरत्वम् । दीपनत्वम् । रुच्यत्वम् । अरुणवातकारित्वम् । पथ्यत्वम् । सर्व्वांश न चिरातिसारघ्नत्वञ्च । एका विषघ्नी च श्यामला च तथापरा । इति राजनिर्घण्टः ॥

माकरी, स्त्री, (मकरयुक्ता पौर्णमास्यत्रेति । मकर + अण् + ङीप् ।) माघशुक्लसप्तमी । अस्य स्नानादिविधिर्यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
प्रयागे यदि लभ्येत सूर्य्यग्रहशतैः समाः ॥"
कोटिभास्करा कोटिसप्तमीतुल्या तस्या भास्करदेवताकत्वात् । सूर्य्यग्रहणसमं स्नानम् । सन्निहिते कुरुक्षेत्रनिम्नगायाम् । तेन बहुस्नानसूर्य्यग्रहणकालीनस्नानफलसमफलं ज्ञेयम् । ७ । [illegible]

माघ शुक्लपञ्चम्यां विष्णुः। तत्रवहदस्नानादि भस्मार्कपत्रादि च द्विरङ्ग विधाय,—
"अथ पक्षत्रयमाहतं मार्षं मया समस्तु चन्द्रस्य।
तच्च रोगव्च शोकच माघस्नानं यस्तु करोति ॥"
इत्युक्तमर्घ्यं दद्यादिति शेषः। रोगं छिद्रम्।
तिथितत्त्वस्य पौर्णमास्यामाघाद्यमाघ माक-
रीयस्य मकराकारस्याद्यमासीयप्रतिपदम्।
तिथितत्त्वे च सप्तम्यां शते सुखादिमेव च।
विधावारी च पौर्णम्यां मार्षं शुक्ले विशिष्टं दि-
दिनि मत्स्यपुराणात् मत्स्यवाराहदिमेव तथा
मुख्याय। यथा, मत्स्यपुराणम्।
"ययाश्रयस्तराशी तु रथसप्तमीति प्रकाशता।
माघमासस्य सप्तम्यां तस्यां वा रथसप्तमी॥
अरुणोदयवेलायां तस्यां स्नानं महाफलम्।"
अनन्तवाराहे रथसप्तम्यामिदमुक्तम्॥ ७॥
अर्घ्यदानपरिपाटी यथा,—
"अर्कपत्रैः सबदरैर्दूर्वाक्षतसचन्दनैः।
अरुणदीधितिमालायै दत्त्वा दिवाकराय च।
अर्घ्यप्रमोदमागृत्य भास्करं हि निवेदयेत्॥
अर्घ्यमन्त्रः।
सप्तमी सर्वभूतानां सप्तमी सप्तवाहिनी।
सप्तसप्तिप्रिये देवि नमस्ते रविमण्डले॥
प्रणाममन्त्रः।
यमजन्म यदि यत् जन्मजन्मसु सञ्चितम्।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी॥"
इति तिथ्यादितत्त्वम्॥ ७॥
माघ्यां पूर्णिमायां स्नानदानफलं यथा,—
"माघमासस्य पञ्चम्यां देवं मामधुरं नराः।
रथयात्रां प्रकुर्वन्ति धर्मसत्त्वविवर्जिताः॥
प्रयान्ति तत्परं धाम सर्वपापप्रभेदकम्।
इत्यत्र कथितं देवि। सामगायनजादयम्।
पापसमस्तनाशाय महापातकनाशनम्॥"
इति वराहपुराणम्।
माघ, ऋ वृद्धि। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ऋ माङ्घति धनधान्ये-नैवेदमिति इत्युक्त्वो वैदेशिकारस्मेदाय। इति दुर्गादासः।
माक्षिकं, क्ली, (मक्षिकाभिः कृतम्। मक्षिका+ "तेनाधानम्।" ४।३।११७। इति अण्।) मधु। इत्यमरः। २।९।१०७॥ पीतवर्ण-मध्यमक्षिकाकृतमेतद्वर्णमधु। अस्य गुणाः। पीतामृतदनम्। रूक्षणम्। लेखनम्। श्वासादिरोगविनाशनः सर्वदरफलम्। इति राजवल्लभः॥ धातुविशेषः। धातुमाक्षी इति हिन्दीभाषा। तद्विविधम्। स्वर्णमाक्षिकं रौप्यमाक्षिकञ्च। तत्पर्यायः। माक्षीकम् २ मौलकम् ३ धातुमाक्षिकम् ४ ताप्यकम् ५ ताप्यम् ६ ताप्यम् ७ आवर्तनम् ८ पीतमाक्षिकम् ९ आवर्त्तम् १० मधुधातुः ११ पीत-धातुः १२ माक्षिकधातुः १३। इति राज-निर्घण्टः॥ कदमः १४ चक्रनाभ १५ मद-मालकम् १६। इति हेमचन्द्रः। ४।१३०।
अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। अम्ल-त्वम्। सर्वप्रमेहापस्मारोन्मादत्वविषा-पहत्वञ्च।
"माक्षिकं द्विविधं प्रोक्तं हेमाख्यं तारमाक्षिकम्।
भिन्नवर्णविशेषादपि गौरादिकं पृथक्॥
तारमाक्षिकं तारमाक्षिकञ्च प्रशस्यते।
हेमं हेमाभकं प्रोक्तं रोगघ्नत्वगुणादिकम्॥"
इति राजनिर्घण्टः।
अपि च।
"क्षेत्रजो माक्षिको धातुः सुवर्णरजतद्युतिः।
जराविन् पाण्डुरोगघ्नः चक्षुष्योऽरोगकः॥
मधुरोऽम्लः कटुः पाके किञ्चिदुष्णोऽमृतोपमः॥"
इति भावप्रकाशः।
(उपधातुविशेषः। यथा, सुश्रुते।
"माक्षिकं तुत्थकाभ्रे च नीलाञ्जनशिलालकाः।
रसकश्चेति विज्ञेया एते सप्तोपधातवः॥")
माक्षिकजं, क्ली, (माक्षिकात् जातम्। जन+ डः।) सिक्थकम्। इति राजनिर्घण्टः॥
माक्षिकफलः, पुं, (माक्षिकवत् मधुरं फलमस्य।) मधुनारिकेलिकः। इति राजनिर्घण्टः॥
माक्षिकाश्रयं, क्ली, (माक्षिकाणामाश्रयः। अभिधानात् क्लीवत्वम्।) सिक्थकम्। इति राजनिर्घण्टः॥
माक्षीकं, क्ली, (मक्षिकाभिः सम्भृतम्। विधा-ताद्यैर्णम्।) मधु। इति राजनिर्घण्टः॥ (धातुविशेषः। यथा, कथासरित्सागरे। ७६।१।
"माक्षीकधातुमधुधारसशोदपूर्ण-
प्रायासिताभ्युपिष्टरसानि धोऽस्यात्।
ऐकानि विमितदानि वराङ्गिणोऽपि
मोऽप्तोनिकोऽपि रसमयकलां सुवेव॥")
माक्षीकशर्करा, स्त्री, (माक्षीकजाता शर्करा शाकपार्थिवादिवत् समासः।) सितोपलः। इति राजनिर्घण्टः॥
मागधः, पुं, (मगधस्य राज्ञ अपत्यम्। "द्व्य-ञ्मगधकलिङ्गसूरमसादण्।" ४।१।१७०। इति। अण्।) पाठिमागधः। इति महा-भारतम्॥ वैश्यक्षत्रियसङ्करजातिः जातिविशेषः स्तुति-कारी। तत्पर्यायः। मधुकः २ बन्दी ३ स्तुति-पाठकः ४। इत्यमरभरतौ। २।८।९७।
तदुत्पत्तिर्यथा,—
ततोऽथ दक्षिणं यज्ञं समजायत तदा द्विजाः।
सम्भृते च यथाभूत् पृथुर्वैन्यः प्रतापवान्॥
तत्र वै जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतः सुतो ज्ञानकृतः प्रसूतोऽपि महामते॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ॥
स्तूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान्॥"
इत्यादिमिति मुनिरभिसूति अभिधूयते अश्वते
मोमोऽध्यापमिति मुनिः सोमाभिमन्त्रितमिति-
वाद्यः। सोऽसाविति तस्मिन्नेव हविः। इति
विष्णुपुराणे १ अंशे १३ अध्यायः। सा च॥
(यथा, महाभारते। ११।१८।१२।
"बन्दी तु मागधो वैश्यात् क्षत्रियायां भवति जातिकः।
वैश्यामागधवैदेहौ राजविप्राङ्गनासुतौ॥")
धर्मसङ्करजातिविशेषः। (यथा, माघे। १०।११।
"क्षत्रियात् विप्रकन्यायां सूतो भवति जातितः।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ॥")
स तु क्षत्रियायां वैश्याज्जातः। मागध इति ख्यातः। मगधेषु भवो मागधः क्षः इत्यमर-भरतौ। २।१०।१। धराधरराजः।
तथा,—
"मागधी मत्त मन्त्रो भूयः कलां करोऽस्मि।"
इति श्रीभागवते १० स्कन्धः।
शुक्लजीरकः। मगधदेशोद्भवे त्रि। इति मेदिनी। धे, १४। (यथा, महाभारते। ६।८।१८।
"अन्धाश्च बहवो राजसमाद्रिकोऽपि च।
बहिर्गिर्यामलना मागधा मालवाश्चना॥")
मागधदेशी, स्त्री, राधिका। यथा,—
"तातान् मागधदेशी तमश्रमीवरप्रभा।
वृन्दावनेश्वरी राधा नाम्ना मागधवेशकाम्॥"
इति पाद्मे पातालखण्डे ८ अध्यायेऽपीदम्॥
मागधी, स्त्री, (मगधे जाता। मगध+अण्, ङीप्।) यूथिका। पिप्पली। इत्यमरमेदिनी-करौ। धे, ४१।२।४।८६। (अस्याः पर्यायः।
"पिप्पली च मागधीका वैदेही मागधी-
कणा।
उपकुल्या मगधी कोलाशनिका तथा॥"
इति वैद्यकरत्नमालायाम्।)
शुण्ठिः। गुजराटी एलाचि इति भाषा। इति शब्दचन्द्रिका। शर्करा। इति शब्दार्थः। भाषाविशेषः। इति हेमचन्द्रः। यथा च साहित्यदर्पणे। ६। १६०।
"अन्तःपुरे मागधी भाषा राजाश्च,प्रत्यादि-काम्॥"
(तद्देशभवे, त्रि। यथा, महाभारते। ११।८२।४१।
"अथवा खलु मागधोऽयमपि अयतो बाढ़
तत्रत्यस्य कर्म परीक्षितम्॥)
माघः, पुं, दीर्घाक्षदुर्बिलुशोधकशतवाक
कर्ता। इति सदुपदेशविशुद्धिका। तत्प्रश-
स्यातमहाकाव्यम्। यथा,—
पुष्पेषु जाती नगरीषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः।
नदीषु गङ्गा नृपतौ च रामः
काव्येषु माघः कविकालिदासः॥"
इति प्राचीनाः॥
पैशाचविदारकमाघसम्मतसदृशमानः।
महातुषारा पौर्णमासी यत्र स माघः। मात्-
पर्य्यायः। तपाः २। इत्यमरः। १।४।१५।
स च विविधः। मकरसंक्रान्त्यादिकचैत्र-
मासादिदर्शान्तो चान्द्रमासः १। सौर्येति-

मघादियौर्णमास्यन्तो गौणचान्द्रः २ । मकरस्थ-रविकः सौरः ३ । इति मलमासतत्त्वीयलिङ्गनग्रहणात् । तत्र स्नानफलम् ।

"विद्याविनीतः स्वकुलप्रधानः
सदा सदाचाररतः प्रवीणः ।
योगानुरक्तो विषयेष्वसक्तो
माघेऽथ मासे मघवाभिषेकः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

अथ, माघस्नानम् । मात्स्ये ।
"स्वर्गलोके चिरं वासो येषां मनसि वर्त्तते ।
यत्र क्वापि जले तैस्तु स्नातव्यं मृगभास्करे ॥"
मृगो मृगास्येन मकरः । तत्स्थे भास्करे । तत्र सङ्कल्पः । अरुणोदयकाले जले मज्जनं कृत्वा आचम्य उत्तराभिमुखः ॐ तत् सदित्युच्चार्य्य कुशकुसुमतिलजलान्यादाय ओमद्य माघे मासि अमुकपक्षे अमुकतिथावारभ्य मकरस्थरविं यावत् प्रत्यहममुकगोत्रोऽमुकदेवशर्म्मा स्वर्गलोके चिरकालवासकामो विष्णुप्रीतिकामो वा प्रातःस्नानमहं करिष्ये इति संकल्प्य गङ्गाव्यतिरिक्तजलमात्रेऽपि स्नानं कर्त्तव्यम् । प्रतिदिनसङ्कल्पे तु आरभ्य मकरस्थरविं यावत् प्रत्यहमिति न वक्तव्यं किन्तु मासमन्तरं मकरस्थे रवावित्यधिकं वक्तव्यम् । चान्द्रस्नानपक्षस्तु वैशाखस्नानेऽनुसन्धेयम् । तत्र सङ्कल्पं कृत्वा यथोक्तविधिना स्नानेति कर्त्तव्यतां विधाय,—
"ॐ दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम् ॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव ! यथोक्तफलदो भव ॥"
इत्युच्चार्य्य स्नायात् । ततो वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ।
"ॐ दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"
चान्द्रस्नाने मकरार्कास्तङ्काले मकरस्थे रवावित्यस्य न पाठः । असमवेतार्थत्वात् । तीर्थे तु ।
"माघमासमिमं पुण्यं स्नाम्यहं देव माधव ।
तीर्थस्यास्य जले नित्यं प्रसीद भगवन् हरे ॥"
इति पठित्वा दुःखदारिद्र्यनाशायेत्यादिकं पठितव्यम् । गङ्गायान्तु मत्स्यपुराणे ।
"दिने दिने दशशत सुवर्णानां विधास्यते ।
तेन दत्तं हि गङ्गायां यो माघे स्नाति माधव ॥"
माधव इति क्वचित् पाठः । एकदा सङ्कल्पे तु प्रतिदिनदशशतसुवर्णदानजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा माघमासं यावत् प्रत्यहं गङ्गायां प्रातःस्नानमहं करिष्ये । इति वाक्ये विशेषः । प्रतिदिनसंकल्पे तु दशशतसुवर्णदानजन्यफलसमफलप्राप्तिकामो विष्णुप्रीतिकामो वा गङ्गायां प्रातःस्नानमहं करिष्ये इति यथोक्तविधिना स्नानेतिकर्त्तव्यतां विधाय ।
"ॐ माघमासमिमं पुण्यं स्नाम्यहं देव माधव ।
तीर्थस्यास्य जले नित्यं प्रसीद भगवन् हरे ॥
दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम् ॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव यथोक्तफलदो भव ॥"
इति पठित्वा स्नायात् । ततः
वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ।
"दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"

इति पठेत् ॥ * ॥

स्कन्दपुराणम् ।
"सम्प्राप्ते मकरादित्ये पुण्ये पुण्यप्रदे शुभे ।
कर्त्तव्यो नियमः कश्चिद्व्रतरूपी नरोत्तमैः ॥"
तत्तत्पुण्यकामः श्रीविष्णुप्रीतिकामो वा इति वाक्ये विशेषः ॥ * ॥ पौष्याः पौर्णमास्या ऊर्द्धं माघपौर्णमासीपर्य्यन्तं मदिरानुकल्पान्मूलकं न भोक्तव्यम् ॥ * ॥ पौष्या ऊर्द्धं माघकृष्णाष्टम्यां छागमांसेन श्राद्धं कर्त्तव्यम् । मांसाभावे पायसोपकरणेन । तदभावे केवलान्नेन वा श्राद्धं कर्त्तव्यम् ॥ * ॥ अथ रटन्तीचतुर्द्दशी ।
"माघे मास्यसिते पक्षे रटन्त्याख्यचतुर्द्दशी ।
तस्यामुदयवेलायां स्नात्वा नावेक्षते यमम् ॥"
उदयवेलायां अरुणोदयवेलायाम् ।
"अनर्काभ्युदिते काले माघे कृष्णचतुर्द्दशी ।
सतारव्योमकाले तु तस्यां स्नानं महाफलम् ॥
स्नात्वा सन्तर्प्य तु यमान् सर्व्वपापैः प्रमुच्यते ।"
अत्र तिथितत्त्वलाघवाचारादरः । तत्रोभयदिने अरुणोदयसतारकाले मुहूर्त्तान्यूनचतुर्द्दशीलाभे पूर्व्वदिने स्नानं यमतर्पणञ्च । एकदिनमात्रे तल्लाभे तद्दिने । माघस्नानकालाभ्यन्तरे तादृशचतुर्द्दशीलाभे माघप्रातःस्नायिना तत्रैव द्वयं कार्य्यम् । तत्र ॐ तत् सदद्य माघे मासि कृष्णे पक्षे रटन्त्यां चतुर्द्दश्यां तिथौ अरुणोदयवेलायां अमुकगोत्रः श्रीअमुकदेवशर्म्मा यमादर्शनकामो गङ्गायां स्नानमहं करिष्ये इति सङ्कल्प्य यथाविधि स्नानं प्रागुक्तं चतुर्द्दशयमतर्पणञ्च कुर्य्यात् ॥

अथ श्रीपञ्चमी ।

'तत्रोभयदिने पूर्व्वाह्णे पञ्चमीलाभे पूर्व्वदिने लक्ष्मीसरस्वत्योः पूजनं कुर्य्यात् । एकदिनप्राप्ते तद्दिने । एवं मङ्गलवर्षे शुक्लपञ्चमीप्रसेऽपि । ततश्च ॐ तत् सदित्युच्चार्य्य ॐमद्येत्यादि लक्ष्मीप्रीतिकामो लक्ष्मीपूजनमहं करिष्ये इति सङ्कल्प्य शालग्रामे जले वा पूजयेत् । ॐ
पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययोः ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ॥
रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु ॥
इत्यनेन ध्यात्वा एतत् पाद्यं ॐ लक्ष्म्यै नमः ।
इत्यादिना नैवेद्यान्तेन पूजयेत् ।
ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात् ॥
इत्यनेन पुष्पाञ्जलित्रयेण प्रणमेत् ॥ * ॥ ॐ तत् सदित्युच्चार्य्य ओमद्येत्यादि सरस्वतीप्रीतिकामः सरस्वतीपूजनमहं करिष्ये इति सङ्कल्प्य शालग्रामे घटादिस्थजले वा पूजयेत् ।
"ॐ तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥"
इति ध्यात्वावाह्य एतत् पाद्यं ॐ सरस्वत्यै नमः ।
इत्यादिना नैवेद्यान्तेन पूजयेत् । ततः
"ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च स्वाहा ॥"
इति मन्त्रपुराणीयेन पुष्पाञ्जलिना त्रिः पूजयेत् ।
मत्स्यसूक्ते । सरस्वतीं संपूज्य ।
"ॐ यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत् ।
न विहीनं त्वया देवि ! तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ! ॥"
इति मत्स्यपुराणीयैः प्रार्थ्य प्रणमेत् ॥ * ॥
"मस्तुलीञ्च दीपञ्च सरस्वत्यै न दापयेत् ।
आधारात् पुस्तकञ्च पूजयेत् । ॐ मस्याधाराय नमः । इति मस्याधारं पूजयेत् । ॐ लेखन्यै नमः । इति लेखनीं पूजयेत् ॥ * ॥

अथ माघसप्तमी ।

तत्रोभयदिने अरुणोदयकाले सप्तमीलाभे पूर्व्वदिने एकदिने तल्लाभे तद्दिने । अरुणोदयकाले स्नानान्यजले ॐ अद्येत्यादि सूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकाम आयुरारोग्यसम्पत्कामो वारुणोदयवेलायां स्नानमहं करिष्ये । इति सङ्कल्प्य यथाविधि स्नानेति कर्त्तव्यतां विधाय सप्तबदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय ।
"ॐ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी ॥"
इत्युच्चार्य्य स्नायात् । ततो यथाकालं ताम्रबदरीपत्रार्कपत्राक्षततिलदूर्व्वारक्तचन्दनयुक्तजलमादाय ओमद्येत्यादि आयुरारोग्यसम्पत्कामः श्रीसूर्य्यायार्घ्यमहं ददे । इति सङ्कल्प्य
'ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने ।'
इत्यनन्तरम् ।
"ॐ जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि ! नमस्ते रविमण्डले ॥"
इति पठित्वा इदमर्घ्यं श्रीसूर्य्याय नम इत्यर्घ्यं दत्वा ।
"ॐ सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
इत्यनेन प्रणमेत् । शूद्रैरपि स्नाने तूष्णीं विधानात् स्नानमन्त्रं विना अन्यप्रणाममन्त्राः पाठ्याः पौराणिकत्वात् । गङ्गायान्तु सूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकामो

महापापी भवन्महं करिष्ये इति मार्गं विधेयः। अथवापेदावमहं एतत् यतारेव माघमासः-स्नानं तन्निवेव विध्यति। ०।

अथ विधानप्रयोगम्।

प्रथमतो माघमासात् आचम्य ॐ सूर्यः सोम इत्यादि पठित्वा ताम्रादिपात्रे कुशतिलजला-न्यादाय ॐ तत् सदित्युच्चार्य ओमद्य माघि मासि शुक्ले पक्षे कन्याराशिस्थाभ्य प्रति-मासीयप्रारम्भमारभ्य पौषमासीं यावत् माघो-त्सवमनुकामो भोगाविपुलककामो वा अमो-घारोग्यभोगकामो विष्णुलोकप्राप्तिकामो वा भगवत्प्रीत्यर्थं करिष्ये इति सङ्कल्प्य संकल्पारम्भदिनं तत्प्रभृति तत्तन्नियमं कुर्य्यात्। तत्र माघि अर्घ्यपात्रं गृह्णीत। फाल्गुने अन्तरीक्ष-मतीतं करिष्यति नमस्कारमावं तदभावे अष्टमीमप्यपराह्णे। चैत्रे मरीचमैथम्। वैशाखे तिलिभ्यामम्। ज्यैष्ठे आपकश्रस्तो-भनमञ्जनवासनम्। आषाढ़े अश्वत्थादिमुक्त-नार्थं सवत्सार्थं कुशजलम्। श्रावणे मासं मासे अर्घ्यश्रेष्ठप्रीतिदम्। भाद्रे गुडोदनाशः। आश्विने पञ्चमाहेवासे मधुराक्षप्रमाणं हवि-ष्यान्नम्। कार्त्तिके सर्व्वमस्तिमात्रं कपिला-घोरं तदभावे चाराम्लम्। मार्गशीर्षे प्राड्-गुणो वायुभक्षम्। पौषे घृतं घृतम्। तदन-न्तरञ्च।

"माघमासं मयापेत् मया गुरुपादोत्तिरामिवैः।
विधाय दक्षिणा देया विभवस्यानुरूपतः।
अन्नस्वाद माघे कुर्य्यात् कल्पमुदितेन च।
तामानतिरत्नादीनि प्रणयेन विसर्ज्जयेत्।
समाप्तिं मधुप्रकाशेनसमानुयातः।"

चान्द्रमासादिषैरोक्तिमेतत् अनन्तादिकलय-मतमाषौरे तत्तु कर्त्तव्यम्। ०।

अथारोग्यसप्तमी।

तत्र पूर्व्ववत् कन्याराशिगतस्थे ऐहिकारोग्य-कामनायामपारलौकिकसुखभयानप्राप्तिकामः संव-त्सरं यावत् आरोग्यकामीतनमहं करिष्ये इति सङ्कल्प्य प्रतिमासं शुक्लसप्तम्यां तामपात्रे कदाचित्सन्नवदी वा पूजयेत्। तस्यां शुक्लाक्ष-तेन स्नात्वा यत् माघे ॐ सूर्य्याय नम इत्यादिभिः संपूज्य।

"आदित्य भास्कर रवे भानो सूर्य्य दिवाकर।
प्रभाकर नमस्तेऽस्तु रोगारम्भात् प्रमोचय।"

इति त्रिः पूजयेत्। एवं संवत्सरे पूर्णे दक्षिणां दद्यात्। ब्राह्मणांश्च भोजयेत्। विधिमासानु-देशारम्भमासावनतरवत् सप्तमास्तेऽपि कर्त्तव्यम्।

अथ भीष्माष्टमी।

अस्यां माघस्य शुक्लाष्टम्यां तर्पणं यथा

"ॐ वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे।"

इति त्रिरर्घ्यं भीष्मं तर्पयेत्। ततः प्रणा-मः।

"भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।

आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्।" इत्यनेन प्रार्थयेत्। वसिष्ठादिभिः पितृतर्पणात् पूर्व्वं तर्पणं कर्त्तव्यम्। ०। मैत्रामैत्रावरुणा-युषोऽस्य द्वादश्यां तिलोद्वर्त्तनमाघस्नानं कर्त्त-व्यम्। ब्राह्मणभोजनादि यथा-शक्ति कुर्य्यात्। ०। माघपौर्णमास्यां युगाद्या-त्वेन माघविधिना श्राद्धं कर्त्तव्यम्। ब्रह्म-वैवर्त्तामयथा दानादिच कर्त्तव्यम्।

तथा दानप्रमाणञ्च निर्णयसिन्धुवर्णितम्।

इति तत्त्वमृतम्। ०। ०।

अथ माघस्नानफलम्।

"व्रतदानैस्तपोभिश्च न तथा प्रीयते हरिः।
माघमज्जनमात्रेण यथा प्रीणाति केशवः।
न यत्र विद्यते किञ्चित् तैलः सौरेश मैथुना।
तद्वत् पापेन माघस्य न समाः क्रतुभिः

क्रियाः।

प्रीतये वासुदेवस्य सर्व्वपापापहानये।
माघस्नानं प्रकुर्व्वीत स्वर्गलाभाय मानवः।
किं दधिभिस्त्वैर्दिव्यैः सुपुष्टैश्च वर्णीयसा।
अभुक्तानु येषेन माघस्नानं विना भवेत्।
मकरस्थे रवौ यो हि न स्नात्युदिते रवौ।
कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत्।
ब्रह्महा वेदहारी च सुरापो गुरुतल्पगः।
माघस्नायी विपापः स्यात् तत्संसर्गी च पापकः।
उपपातकानि सर्व्वाणि पातकानि महान्ति च।
भस्मीभवन्ति सर्व्वाणि माघस्नानेन मानवे।
पावका इव दीप्यन्ते माघस्नाता नरोत्तमाः।
विमुक्ताः सर्व्वपापेभ्यो मेघेभ्य इव चन्द्रमाः।
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्म्मभिः कृतम्।
माघस्नानं दहेत् सर्व्वं पावकः समिधो यथा।
प्रामादिकञ्च यत् पापं ज्ञानाज्ञानकृतञ्च यत्।
स्नानमात्रेण तत्सर्व्वं मकरस्थे दिवाकरे।
मिथ्यापापविदिदं यान्ति माघिका यान्ति शुद्ध-

ताम्।

कल्पकोऽत्र न सन्देहो माघस्नाने नराधिप।
सर्व्वेऽधिकारिणो ह्यत्र विष्णुभक्तो यथा नृप।
सर्व्वेषां मासेषो माघः सर्व्वेषां माधवायनः।
एतदेव परो मन्त्रो ह्येतदेव परं तपः।
प्रायश्चित्तं परञ्चैव माघस्नानमनुत्तमम्।
कृत्वा अब्दान्तरोद्भवात् माघस्नानमनिर्भयेत्।
सप्ताश्वमेधदीक्षायां अन्यत्र्ययाद्वयवरा नृप।
अंशादष्टद्वमाषेणपत्रानवविनादनम्।
यावत् माघस्नात्वा माघस्नानं महत्तरम्।
स्नाना माघे च ये राजन् सर्व्वकामफलप्रदे।
ते नाके सुरभौ सौख्यमक्षयं भोक्ष्यमाणः।"

इति पद्मपुराणे उत्तरखण्डे अध्यायः।

माघवनी, स्त्री, (मघवन् देवता अस्याः यस्याः, मघवन इत्यथिति। मघवन्+अण्। "मघवा बहुलम्।" ६।४।१२८। इति आदेशः। ङीप्।) पूर्व्वदिक्। इति राजनिर्घण्टः। माघवनं, क्ली, इन्द्रस्यापि धनुः। मघवन् इद-मिदं अन्यत्रेव विग्रहः। इति मुग्धबोध-व्याकरणम्। (मघवन्+अण्। "मघवा बहु-लम्।" ६।४।१२८। इति त्रिकाण्ड-शेषः। त्रि, यथा, माघे। ८।२५।

"बहुधान्तिःक्षतिरावृतनी
मटर्ष पश्चात्मविनयसधनाम्।
स्फुरदंशुमालस्य प्रीतस्य:
ककुभं समस्तुवत माघवीम्।")

माघी, स्त्री, (मघया युक्तः कालः अस्ता इति। मघा+"नक्षत्रेण युक्तः कालः।" ४।२।३। इत्यण् ङीप्।) मघायुक्ता पौर्णमासी। यथा,

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे।"

इत्यमरः। १।४।१६। माघी पूर्णिमा। यथा, ज्योतिषतत्त्वे भरतश्रुतौ।

"आषाढ़ी कार्त्तिकी माघी तिथयः पुण्य-

वासराः।

अश्वदानवती यासु सहस्राश्वमेधो फलः।"

विष्णुधर्म्मोत्तरे।

"पौर्णमासी तथा माघी माघसी च यो-

गम्।

प्रोष्ठपद्यामगीतायां तथा शक्रा यदोदितौ।
एताश्च माहकामान् वै विमानाख प्रया-

न्ति:।"

सा च कलियुगाद्या। यथा,—

"अथ भाद्रपदे कृष्णे त्रयोदश्यां द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं

स्मृतम्।"

अस्यां कर्म्मबोऽनन्तफलं यथा, मात्स्ये।

"एतानिमृतये पुण्यं यच्छन् दिनमथ।
विदुषे प्रतापरूपमा या मा वैश्रवणम्।"

या या मा वेद आषाढ़ीकार्त्तिकीमाघीवैशा
खीषु। इति तिथ्यादितत्त्वम्। माघी मघा-
योगाभावे शिवकगुरुभाद्रपदनक्षत्रयोर्वा यथा,
ग्रामातरः।

"माघ्यां यदि मघा नास्ति किं पुनरन्त-

रम्।"

राजमार्त्तण्ड इदः।

"गुरौ शशिनि च सिंहमागु-
पौर्णमासी मघा शुभीना।
यदा न माघी मघयाग्रमा स्याद्-
तदा च कर्म्मोदयं वदन्ति।"

इत्यत्र माघ्यां मघायोगाभावेऽपि पूर्णिमाया-
मघायोगेऽपि गुरौ भवति सिंहस्थे गुरौ तद्-
यदि माघीद्वय। इति मलमासतत्त्वम्।

माघोनी, स्त्री, (मघवान् देवतास्याः। अधि-
दयतिरिति वा। इति मघवन्+अण् ङीप्।)
पूर्व्वा दिक्। इति राजनिर्घण्टः। (एतन्न-
निनि, त्रि। यथा, ऋग्वेदे। १०।६६।१।

"मघुमय इन्द्रे ससे वीभारि
माघोने बर्हं वदन्त ब्रवः।"

"माघोनि मघवन् ...... महेवी।"
इति महाभारते।)

माघ्यं, क्ली, (माघे जातमिति । माघ+"तत्र जातः ।" ४ । ३ । २५ । इति यत् ।) कुन्दपुष्पम् । इत्यमरः । २ । ४ । ७३ ॥
माङ्गल्यं, त्रि, (मङ्गलाय हितमिति । मङ्गल+ष्यञ् ।) मङ्गलाय हितम् । यथा, राजमार्त्तण्डे ।
"माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः ॥"
इत्युद्वाहतत्त्वम् ।
अपि च । भीमपराक्रमे ।
"अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते मासि ।
पक्षेऽपि शुभे कुर्य्यान्न माङ्गल्यं विवाहञ्च ॥"
इति मलमासतत्त्वम् ॥
(मङ्गलस्य भावः । "मङ्गेरलच् ।" उणा० १ । ७० । इत्यस्य वृत्तौ "भावे ष्यञि माङ्गल्यम् ।" इत्युज्ज्वलदत्तः ॥)
माङ्गल्यार्हा, स्त्री, (माङ्गल्यस्य अर्हा ।) त्रायमाणा लता । इति राजनिर्घण्टः ॥
माचः, पुं, (मा अञ्चतीति । अनुच+कः ।) पन्थाः । इति शब्दरत्नावली ॥
माचलः, पुं, (मा चलति भोगमदत्त्वाविरोधेन स्थानं न मुञ्चतीति । चल+अच् ।) ग्राहः । रोगः । (मा चलति स्वच्छन्दं न प्रचरतीति । चल+अच् ।) बन्दी । चौरः । इति शब्दरत्नावली । मेदिन्यां ग्राहस्थाने ग्राह इति पाठः ॥
माचिका, स्त्री, (मा अञ्चति यत्तादिकं प्रमादं न गच्छतीति । अनुच्+कः । ततः कन् । टाप् । अत इत्वम् ।) मक्षिका । इति त्रिकाण्डशेषः । अम्बष्ठा । इति राजनिर्घण्टः ॥
माचिरं, व (मा चिरम् ।) शीघ्रम् । यथा,—
"अथाब्रवीत्तदा मत्स्यस्तानृषीन् प्रहसन् शनैः ।
अस्मिन् हिमवतः शृङ्गे नावं बध्नीत माचिरम् ॥"
इति वनपर्व्वणि मत्स्योपाख्यानम् ॥
माचीपत्रं, क्ली, सुरपर्णम् । इति राजनिर्घण्टः ॥
माजलः, पुं, (मा जलमित्यभिप्रायोऽस्य । वर्षापारिभ्योऽस्य चञ्च्वोर्भारवत्त्वात् तथात्वम् ।) चाषपक्षी । यथा, शब्दचन्द्रिकायाम् ।
"माजलश्चाषकः क्रुञ्चो किङ्कारो किङ्करेखकः ।"
माञ्जिष्ठं, क्ली, (मञ्जिष्ठया रक्तम् । "तेन रक्तं रागात् ।" ४ । २ । १ । इत्यण् ।) लोहितवर्णः । (यथा, बृहत्संहितायाम् । ३० । २२ ।
"कक्षायवधूमपिशङ्गविधिममाञ्जिष्ठहरितशबलाभाः ।"
तद्वति, त्रि । इति हेमचन्द्रः ॥
माटाक्षकः, पुं, (माटाख्य आम्रः । ततः कन् ।) वृक्षभेदः । यथा,—
"वनाहो वर्ब्बरोऽर्ब्बादः छिट्टुमाटाक्षकौ समौ ।"
इति भूरिप्रयोगः ॥
माठरः, पुं, सूर्य्यपार्श्वपरिवर्त्तिविशेषः । यथा,—
"माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ।"
इत्यमरः । १ । ३ । ३१ ॥
मठति निवसति सूर्य्यसमीपे माठरः मठ वासमदयोः शाम्यतीति अरच् मठरस्यापत्यं माठर इति स्वामी । पिङ्गलवर्णत्वात् पिङ्गलः । दण्डकारित्वाद्दण्डः । इति स्वामी । परितः पार्श्वे वर्त्तन्ते पारिपार्श्विकाः ठञ् वादिति ष्णिकः । सूर्य्यः कार्त्तिकेयादिभ्यो वरं दास्यतीति धिया इन्द्रादयोऽष्टाग्रनामान्तरेण मण्डला अस्य पार्श्वेषु स्थिताः । अत्र प्राधान्यात्त्रयोऽभिहिताः । अत्र माठरनामा यमः । पिङ्गलनामा वह्निः । दण्डनामा शक्रः । तथा चागमः ।
"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः ।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः ॥
यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञकः ।"
एवमपरे खरगुहादयः कुल्माषपक्ष्यादिसंज्ञकाः पूर्व्वद्वारादिषु स्थिताः । इति तट्टीकायां भरतः ॥ व्यासः । इति मेदिनी । रे, २०१ ॥ विप्रः । इति हेमचन्द्रः । ३ । ५१० ॥ शौण्डिकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
माडः, पुं, वृक्षविशेषः । माडवेणी इति लोके प्रसिद्धः । तत्पर्य्यायः । माडाढ्यः २ दीर्घः ३ ध्वजद्रुमः ४ विलासकः ५ मद्यद्रुमः ६ । अस्य गुणाः । मोहकारित्वम् । श्रमहरत्वम् । पित्तकारकत्वञ्च । इति राजनिर्घण्टः ॥
माडवः, पुं, वर्णसङ्करजातिविशेषः । यथा,—
"लेटस्तीवरकन्यायां जनयामास षट्सुतान् ।
माल्लं मल्लं माडवञ्च भड़ं कोलञ्च कन्दरम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
पुस्तकान्तरे माडवस्थाने मातर इति पाठः । कन्दरस्थाने कलन्दर इति पाठः ॥
माड्डुकः, पुं, (मड्डुकवादनं शिल्पमस्येति । "मड्डुकझर्झरादणन्यतरस्याम् ।" ४ । ४ । ५६ । इति अण् ।) माड्डुकिकः । मड्डुवादकः । इति सिद्धान्तकौमुदी ॥
माढिः, स्त्री, (माढतीति । माढ+"अन्येभ्योऽपि दृश्यन्ते ।" उणा० ४ । १०५ । इति क्तिन् ।) दैन्यभेदः । पत्रशिरा । इति रत्नकोषः ॥ दन्तभेदः । इति केचित् । इत्यमरटीकायां भरतः ॥ पत्रभङ्गम् । दैन्यप्रकाशनम् । इति मेदिनी । ढ, ३ ॥ शब्दरत्नावली च ॥ माढिर्दैन्ये पत्रशिरायां मद्भक्तिरिति चर्च्चे । इति हेमचन्द्रः ॥ ३ । १६० ॥
माढी, स्त्री, (माढि+कृदिकारादिति ङीष् ।) दन्तशिरा । इति शब्दरत्नावली ॥
माणकं, क्ली, (मीयते पूज्यते परिमीयते वेति । माङ् मा वा+अण् । स्वार्थे कन् । निपातनाच्च णत्वम् ।) कन्दविशेषः । मानकचु इति भाषा । अस्य गुणाः । स्वादुत्वम् । शीतत्वम् । गुरुत्वम् । शोथहरत्वम् । मदुत्वञ्च । इति राजवल्लभः ॥ यथा, सुश्रुते सूत्रस्थाने । ४६ अध्याये ।
"माणकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम् ॥")
माणकः, पुं, (मन्+अण् । ततः कन् निपातनात् णत्वञ्च ।) कन्दाम्लातकः । माणकचुमाड इति भाषा । तत्पर्य्यायः । स्थलपद्मः २ इति रत्नमाला । मानः ३ हस्तिकर्णः ४ इभपर्णः ५ इति केचित् । (यथा, सुश्रुते सूत्रस्थाने ४६ अः ।
"स्थूलसूरणमाणकप्रभृतयः ॥")
माणवः, पुं, (मनोरपत्यं पुमान् । मनु+अपत्यविवक्षायां अण् ।
"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः ॥"
४ । १ । १६१ । इत्यस्य काशिकावृत्तिः ।) मनुष्यः । बालकः । इति शब्दरत्नावली ॥ षोडशयष्टिकहारः । इति हेमचन्द्रः । ३ । ३२४ । ४ ॥
माणवकः, पुं, (अल्पो माणवः । "अल्पे ।" ५ । ३ । ८५ । इति कन् ।) बालकः । स च षोडशवर्षपर्य्यन्तप्रथमवयस्कः । (यथा, श्रीभागवते । ८ । १८ । १२ ।
"एवं ते स्वागमैश्वर्यं मियं वैचोपयाः सुतम् ।
छादयित्वा प्रकाय मायामाणवको हरिः ॥"
माणवको बालः स इव ।) हारभेदः । स तु विंशतियष्टिकः । बिसनरहार इति भाषा । इत्यमरभरतौ । २ । ६ । १०६ । (बृहत्संहितामते तु षोडशयष्टिको हारः । यथा, तत्रैव । ८१ । ३२ ।
"द्वात्रिंशता गुच्छो विंशत्या कीर्त्तितोऽर्द्धगुच्छाख्यः ।
षोडशभिर्माणवको द्वादशभिश्चार्द्धमाणवकः ॥")
कुपुरुषः । इति मेदिनी । के, २०९ ॥ बटुः । इति हेमचन्द्रः ॥
माणवीनं, त्रि, माणवसम्बन्धि । माणवस्येदमित्यर्थे खीनप्रत्ययेन निष्पन्नम् । (माणवाय हितं । "माणवचरकाभ्यां खञ् ।" ५ । १ । ११ । इति माणव+खञ् ।)
माणव्यं, क्ली, शिशुसमूहः । इत्यमरः । २ । ७ । ४२ ॥ माणवानां समूहो माणव्यं विकारसङ्घेति यत् । माणवो बालः मूर्खमध्यः इत्यन्यत्र दृष्टे । इति तट्टीकायां भरतः ॥ (माणवानां समूहः । "ब्राह्मणमाणववाडवाद् यत् ।" ४ । २ । ४२ । इति यत् ।)
माणिका, स्त्री, (माणक+टाप् अकारस्येत्वम् ।) अष्टपलपरिमाणम् । इति शब्दमाला ॥
माणिक्यं, क्ली, (मणिप्रकारः । मणि"+स्थूलादिभ्यः प्रकारवचने कन् ।" ५ । ४ । ३ । इति प्रकारार्थे कन् । ततो मणिकमेवेति । मणिक+"चातुर्वर्ण्यादीनामुपसंख्यानम् ।" ५ । १ । १२४ । इति वार्त्तिकवचनात् ष्यञ् ।) रत्नविशेषः । माणिक इति भाषा । तत्पर्य्यायः । शोणरत्नम् २ रत्नराट् ३ रविरत्नकम् ४ शृङ्गारी ५ रङ्गमाणिक्यम् ६ तरलम् ७ रत्ननायकम् ८ रागयुक् ९ पद्मरागः १० रत्नम् ११ शोणोपलः १२ सौगन्धिकम् १३ लोहितकम् १४ कुरुविन्दम् १५ । अस्य गुणाः । मधुरत्वम् ।

अन्यच्च ।
"न पितुर्वचनं कार्य्यं यथा मातुः शुभेन हि ।
पिता च पतितस्त्याज्यो न माता पतितेन हि ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥
दशविद्यागुणाचार्य्यो गौरवेणातिरिच्यते ।
तेभ्यः पिता दशगुणस्तु माता चैव गरीयसी ।
मातृतोऽभ्यो न दैवोऽस्ति तस्मात् पूज्या सदा सतैः ।
मातुश्च यद्धितं किञ्चित् कुरुते भक्तितः पुमान् ।
तद्धर्म्मं हि विजानीयादेवं धर्म्मविदो विदुः ॥"
इति वह्निपुराणम् ॥
अन्यच्च ।
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्त्रगुणैर्यदि ।
स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसापि वा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाचरेत् ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
मातामह्यादीनां मातृतुल्यत्वम् यथा,—
"मातरीव प्रत्येक यश्च संभावते नरः ।
सा मातृतुल्या सर्व्वेव धर्म्मेः मान्या मतापि ॥
यथा पितृसमप्राप्ते कारयत्वं प्रयाति नः ।
तत्र घोरे रथञ्चैव पातव्ये सङ्गमो भवः ॥
देवर्षितं पावित्र्य तत्र चैव पुनो पुनम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १० अध्यायः ॥
शिवस्य सहचारिविशेषः । स च अष्टप्रकारा ब्रह्मादीनां देवशरीरनिर्गतत्वात् तत्तच्छक्तिरूपा- ल्पो यथा,—
"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा चर्च्चिकेत्यष्ट मातरः ॥"
मतान्तरेऽपि यथा,—
"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौबेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥"
इत्यमरटीकायां भरतः ॥
गौर्य्यादिषोडशमातरः । यथा,—
"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"
इति श्राद्धतत्त्वे वसुधारापरिशिष्टम् ॥
वैष्णव्या मातरश्च यथा,—
"सप्त मातरः पूज्याश्च ऊर्ध्वाः सुयत्नतः ।

गदा भागवती पौर्णमासी महाकाराष्ट्रिका ।
महाबलिम्लानवदनाप्योऽस्थिकाम्ला ।
गायत्र्युलूकी शाकोदरी महाचेटकाः ।
सिंहमुखी दारुकोदरी कोटरी त्रिशिराः ।
शीतला शौर्य्यौ कृष्णा चपला वा शरवेधः ।
रुक्मिण्यादायका चाट मातृकारिणी ता
स्मृताः ॥"
इति पाद्मे उत्तरखण्डे ७८ अध्यायः ॥
अथ मातरो यथा,—
"आत्ममाता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
गावी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥"
इति केचित् पठितम् ॥
मातृतुल्या यथा ।
"मातृष्वसा मातुलानी पितृपत्नी पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥
गौः । भूमिः । इति मेदिनी । ते, ३६ ॥ (विवृतिश्च । "यदूर्द्धस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ।" "मातुः अस्याः पृथिव्याः ।" इति तद्भाष्ये दुर्गाचार्य्यः ।) विभूतिः । इति शब्दरत्नावली । लक्ष्मीः । इति हेमचन्द्रः । ४।३३१ । रेवती । इत्यजयपालः ॥ आखुकर्णी । इन्द्रवारुणी । महाश्रावणी । जटामांसी । इति राजनिर्घण्टः ॥ परिमाणकर्त्तरि, त्रि । अभिपूर्व्वं परिमाणार्थमाधातोः कर्त्तरि तृच्प्रत्ययेन निष्पन्नः ॥ (निर्म्माणकर्त्तरि च, यथा, ऋग्वेदे । १ । ६१ । ७ ।
"अस्मेदु मातुः सवनेषु सद्यो महः ।"
"मातुः इषिदारेव बलमस्य जगतो निमातुः ।"
इति तद्भाष्ये सायनः ।)
माता, स्त्री, (मान्यते पूज्यते इति । मान पूजायां + तृन् नप्तादिपि निपातनात् साधुः ।) जननी । यथा
'विश्वेश्वरी विश्वमाता चण्डिका प्रकाशात्मकम् ।'
इति शिवदत्ते दुर्गास्तवदर्शनात् आकारान्तोऽयं शब्दः ॥
मातापितरौ, पुं, (माता च पिता च । "आनङ् ऋतो द्वन्द्वे ।" ६ । ३ । २५ । इत्यानङादेशः ।) जननीजनकौ । तत्पर्य्यायः । पितरौ २ मातरपितरौ ३ मातापितरौ ४ । इत्यमरभरतौ । २ । ६ । ३७ । सिद्धान्तकौमुदीमतेऽयम् । (यथा, मनौ । ३ । १५७ ।
"अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ।")
मातामहः, पुं, (मातुः पिता । "पितृव्यमातुलमातामहपितामहाः ।" ४ । २ । ३६ । इति डामहच् निपातनात् ।) मातुः पिता । इत्यमरः । २ । ६ । ३३ । दौहित्रस्य मातामहश्राद्धे यथा,—
"आभीरको दुर्मतिको बहुलीको रुरुक्तः ।
कमनः ऊनकृमाणारि दुर्योधनः ॥
अथोः कथा एतोकार्य्य मातुर्मुखीन्वा ।
मूढः पुत्त्रपूजकः कर्त्तोऽप्यादि पीड्यते ।
सर्व्वमिदं कुर्वे माता कर्त्तव्य मर्य्यादाम् ।

मातुश्च निर्व्वपेदापि मातामह्यै शुचिः ।"
इत्यग्निपुराणम् ।
तस्याप्यविशेषाशौचं यथा । मातामहयोः मरणे त्रिरात्रं स्यादशौचकम् । इति कूर्म्मपुराणम् ॥ * ॥ पुत्त्रपौत्त्राभावे तस्य श्राद्धे दौहित्रस्याधिकारो यथा,—
"मातामहानां दौहित्राः कुर्य्युः श्राद्धमपि यत्नतः ।
ते च तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वशः ॥"
इति शुद्धितत्त्वम् ॥
पुत्त्रपौत्त्राभावे तस्य धने दौहित्रस्याधिकारो यथा । तत्राह दौहित्रः ।
"पौत्त्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इति मनुवचने पौत्त्रतुल्याभिधानेन एवं पुत्त्राभावे पौत्त्रवत् पुत्त्रिकायां दौहित्रः ।
अतएव गोविन्दराजमतेऽपि विष्णुः ।
"अपुत्त्रपौत्त्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्त्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
मातामही, स्त्री, (मातामहस्य पत्नीति । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीष् ।) मातामहपत्नी । मातृमाता । आइ इति भाषा । यथा,—
"मातामही मातृमाता मातृतुल्या च पूजिता ।
प्रमातामहीति विज्ञाता प्रमातामहस्य प्रेयसी ।
वृद्धप्रमातामही ज्ञेया तत्प्रियः कामितो यथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १० अध्यायः ॥
तन्मरणे पक्षिण्यशौचं यथा,—
"मातुले पक्षिणीं रात्रिं शिष्ये ऋत्विजि बान्धवे ।
पद्यौरेव पक्षिणीं रात्रिं तथा मातामहेष्वपि ॥"
इति शुद्धितत्त्वम् ॥
पुत्त्रपौत्त्राभावे तच्छ्राद्धे दौहित्रस्याधिकारो यथा । तत्राह दौहित्रः । मातुलपुत्राद्यभावदर्शनात् ।
"पौत्त्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
एतेन यथा पुत्त्राभावे पौत्त्रस्तथा पुत्त्रिकायां दौहित्रः । इति मनीषोक्तमात् ।
"मातुलो भागिनेयश्च स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ।
एतेषाञ्चैव भार्य्याभ्यः स्वस्रुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ॥"
इति वृद्धमातामहस्यैव मातामह्याश्च दौहित्रेण पिण्डदानवृत्तिः बहुविधाभिमानः ।
इति शुद्धितत्त्वम् ॥ * ॥ तथा कौशिके पौत्रपुत्राभावे दौहित्राधिकारः । पौत्रके तु पुत्रवंशाभावे दौहित्राधिकारो यथा,—
"दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत् ।"
इति मनुवचने दौहित्रे पौत्त्रवदित्यतिदेशात् पुत्रेण प्रमीतपितृकपौत्रेण सह दौहित्राभावे आधिकार । इति दायतत्त्वम् । पुत्त्राभावे दौहित्रोऽधिकारी । इ"

धिकारात् प्राक्दुहितुरधिकारस्मृतेः तद्धाधिकाया दुहितुः पुत्रेण बाध्यपुत्रबाधस्यैव न्याय्यत्वात्। इति दायक्रमसंग्रहश्च ॥

माताली, स्त्री, (मातुः आली। पृषोदरादित्वात् तकारलोपः। यद्वा, मातायाः आली।) मातुः सखी। इति शब्दमाला ॥

मातुलः, पुं, (मातुर्भ्राता। "पितृव्यमातुलेति।" ४।२।३६। इति निपात्यते। तत्र "मातुड्डुलच्।" इति वार्त्तिकात् डुलच्।) मातृभ्राता। पितृश्यालकः। इत्यमरः। २। ६। ३१। मामा इति भाषा। तन्मरणे भागिनेयस्य पक्षिण्यशौचम्। यथा, शुद्धितत्त्वे।

"मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च।"

स च मातामहपुत्राभावे अपुत्रस्य तस्य प्रेतक्रियाधिकारी। यथा,—

"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च।"

इति शातातपोक्तपाठक्रमात्। इति शुद्धितत्त्वम् ॥ (मायति स्वार्थादिना मीयते। मात + बाहुलकात् डुलच्।) व्रीहिभेदः। मदनद्रुमः। (मादयतीति। मद + णिच् + बाहुलकात् उलच् पृषोदरात् दस्य तकारत्वञ्च।) धुस्तूरः। इति मेदिनी। ले, १२३ ॥ पर्यायो यथा,—

"धत्तूरः धूर्त्तधुत्तूरौ उन्मत्तः कनकाह्वयः।
देवता कितवस्तूरी महामोहः शिवप्रियः।
मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ मा विद्यते तुला तुलना यस्य।) सर्पविशेषः। इति हेमचन्द्रः। ३। २१६ ॥

मातुलकः, पुं, (मातुल + स्वार्थे कन्।) धुस्तूरवृक्षः। इति राजनिर्घण्टः ॥ (मातुलः। यथा, पञ्चतन्त्रे। १। २४१ ॥

"सोऽपि तव मातुलको न समायातः ॥")

मातुलपुत्रकः, पुं, (मातुलस्य धुस्तूरस्य पुत्रकः।) धुस्तूरफलम्। इत्यमरः। २। ४। ७८ ॥ (यथास्य पर्य्यायः।

"मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) मातुलतनयः। इति मेदिनी। के, २३५ ॥

मातुला, } स्त्री, (मातुल + टाप्। मातुलस्य
मातुलानी, } स्त्री। "इन्द्रवरुणेति। ४। १। ४९। ङीष् आनुक् च।) मातुलपत्नी। इत्यमरभरतौ। २।६।३०। मामी इति भाषा। तन्मरणे पक्षिण्यशौचम्। यथा,—

"श्वश्र्वोर्भगिन्याश्च मातुलान्याश्च मातुले।
पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम् ॥"

इति शुद्धितत्त्वम् ॥

मातुलानी, स्त्री, (मा निषेधे तुला नयति प्राप्नोतीति। नी + क्विप्। ङीप्।) कलायः। भङ्गा। इति मेदिनी। ने, ९०३ ॥ (यथास्याः पर्य्यायः। भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ॥")

शणः। इति हेमचन्द्रः। ४। २४५ ॥ प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका ॥

मातुलाहिः, पुं, (मा तुलयतीति इति। तुल + मूलविभुजादित्वात् कः। मातुलश्चासौ अहिश्च।) सर्पविशेषः। माजुया साप इति मेदुयाटी इति च भाषा। अयं खड्गाकृतिः आयतदेहः दीर्घलाङ्गूलः चतुष्पात्। इति मधुमाधवशाद्वयः। तत्पर्य्यायः। मातुधानः २। इत्यमरः। १। ८। ९ ॥

मातुली, स्त्री, (मातुलस्य स्त्री। "मातुल + इन्द्रवरुणभवेति।" ४।१।४९। इति ङीष्। "मातुलोपाध्याययोरानुग् वा।" इति वार्त्तिकोक्तेः पक्षे आनुगभावः।) मातुलपत्नी। इत्यमरः। २। ६। ३०। भङ्गा इति शब्दचन्द्रिका।

मातुलुङ्गः, पुं, (मा न तुलं गच्छतीति। गम + डः। पृषोदरादित्वात् अकारस्योकारः उम् च।) बीजपूरः। इत्यमरटीकायां भरतः ॥ (यदा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।

"केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्।
शर्कराडाडिमाभ्यां वा लाजाचूर्णरयोस्तथा॥"

(तथास्य पर्य्यायः।

"बीजपूरो मातुलुङ्गः सुचलः फलपूरकः।
रुचकः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"

इति वैद्यकरत्नमालायाम्।

तथास्य गुणाः।

त्वगम्लमातुलुङ्गः कफवातहन्ता
हृद्यो लघीयान् जठरामयघ्नः।
स दोषरक्तादिविकारपित्त-
सन्दीपनः शूलविकारहारी ॥

श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनम्।
दीपनं लघु चाम्लञ्च मातुलुङ्गमुदाहृतम् ॥
त्वक्तिक्ता दुर्ज्जरा तिस्रात् कृमिवातकफापहा।
स्वादु शीता गुरुः स्निग्धा स्वल्पांसं वातपित्तजित् ॥
मेध्यं शूलानिलच्छर्द्दिकफारोचकनाशनम्।
दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केशरम् ॥
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्।
शूलाजीर्णादिरोगेषु मन्दाग्नौ कफमारुते ॥
अरुचिश्वासकासेषु रसोऽस्योपदिश्यते।
रसोऽतिमधुरो हृद्यो वीर्य्यपित्तानिलापहः ॥
कफदुर्ज्जरः पाके मातुलुङ्गस्य कल्कतः।
तिक्तं पुष्पन्तु बीजञ्च गुल्मशूलातनाशनम् ॥"

इति हारीते प्रथमे स्थाने दशमेऽध्याये।

"त्वक्तिक्ता कटुका स्निग्धा मातुलुङ्गस्य वातजित्।
वृंहणं मधुरं मांसं वातपित्तहरं गुरु ॥
लघु तत्केशरं श्वासकासहिक्कामदात्ययान्।
आस्यशोषानिलच्छर्द्दिविबन्धच्छर्द्दिरोचकान् ॥
गुल्मोदरार्शःशूलानि मन्दाग्नित्वञ्च नाशयेत् ॥"

इति वाग्भटे सूत्रस्थाने षष्ठेऽध्याये ॥)

मातुलुङ्गकः, पुं, (मातुलुङ्ग + संज्ञायां स्वार्थे वा कन्।) छोलङ्गवृक्षः। तत्पर्य्यायः। फलपूरः २ बीजपूरः ३ रुचकः ४। इत्यमरः। २। ४। ७८ ॥ मातुलुङ्गः ५ अम्लकः ६ फलपूरकः ७ सुरुचः ८ पूरकः ९ पूरः १० बीजपूर्णः ११ अम्लकेशरः १२ छोलङ्गः १३। इति रत्नमाला। अस्य गुणाः। हृद्यत्वम्। अम्लत्वम्। लघुत्वम्। अग्निदीपनत्वम्। श्वासकासगुल्मप्लीहकृमिरोगोदावर्त्तनाशित्वम्। विबन्धहिक्काशूलच्छर्द्दिरोगप्रशमकत्वञ्च। अस्य त्वग्गुणाः। तिक्तत्वम्। दुर्ज्जरत्वम्। कफवातनाशित्वम्। कृमिहरत्वञ्च। तत्केशरगुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। वायुपित्तनाशित्वञ्च। इति राजवल्लभः ॥

मातुलुङ्गा, स्त्री, (मातुलुङ्ग + टाप्।) मधुकुक्कुटी। यथा,—

"मातुलुङ्गा सुगन्धाख्या शिशिरा पूतिपुष्पिका।
ब्रह्मा देवदूती च सा कथिता मधुकुक्कुटी ॥"

इति रत्नमाला ॥

मातुलुङ्गिका, स्त्री, (मातुलुङ्ग + संज्ञायां कन्। टाप् अकारस्येत्वम्।) वनबीजपूरः। इति राजनिर्घण्टः ॥

मातृकच्छिदः, पुं, (मातुः कं शिरश्छिनत्तीति। छिद + कः। पिशाचादित्वात् मातृशिरश्छेदनादस्य तथात्वम्।) परशुरामः। इति केचित् ॥

मातृका, स्त्री,(मातेव। मातृ + "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन् टाप्।) धात्रिका। (यथा, बृहत्संहितायाम्। ४१। ६६।

"इभ्यतुरङ्गच्छेदने बालपीडा
राज्ञो मातुः पीडनं मातृकायाः ॥"

मातेव। मातृ + स्वार्थे कन्।) माता। देवीभेदः। वर्णमाला। इति मेदिनी। के, ११८। करणम्। स्वरः। उपमाता। इति हेमचन्द्रः। मातृकाणामुत्पत्तिर्यथा,—

"तत्र देवोऽप्यसौ देवं विसृष्टिनादनदृभ्रमम्।
तस्याहतस्य नदतः पतत्सु नभसे किल।
तत्रान्धका असंख्याता बभूवुरपरे भ्रमम्।
तद्दृष्ट्वा महदाश्चर्य्यं रुद्रः शूलेऽन्धकं कृती।
गृहीत्वा विधिनाप्येव ननर्त्त परमेश्वरः।
रक्तेऽप्यन्धकाः सर्व्वे चक्रेण परमेष्ठिना।
नारायणेन विहतास्तत्र येऽन्ये समुत्थिताः।
अन्धकासुरात्तद्वेषु शूलप्रोतस्य चाचलत्।
क्षमारतं धनुष्वतः स्वतो वक्रो वराञ्चितः।
तस्य कोपेन महता मुखाज्ज्वाला विनिर्ययौ।
तद्रूपधारिणी देवी याञ्ची योगेश्वरी विभुः।
स्वरूपधारिणी चान्या विष्णुनापि विनिर्म्मिता।
ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च।
वाराहेण च देवेन विष्णुना परमेष्ठिना।
पातालोद्धरणं रूपं तस्या देव्या विनिर्म्ममे।
माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः।
कारणं यस्य यत् प्रोक्तं विश्वमेतद्धारितम्।
शरीरादेव मातृणां तदिदं कीर्त्तितं तथा।

वामः क्रोधयुता चामो मती मोहोऽथ
सप्तमः ॥

मात्सर्ये चाष्टमित्याहुः पैशुन्यं नवमं तथा ।
असूयावाचमी ज्ञेया दशैता अष्ट मातरः ॥
कामं योगीश्वरी विद्धि क्रोधं माहेश्वरी तथा ।
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ।
मोहः स्वयन्तु कौमारी मात्सर्ये चेन्द्रजां विदुः ।
यामी दण्डधरा देवी पैशुन्यं स्वयमेव च ।
असूयया वाराहाख्या इत्येताः परिकीर्त्तिताः ।
कामादिभिक्व यश्चोऽयं शरीरं परिकीर्त्तितम् ।
अथाह पार्थिव यथा तथा ते कीर्त्तितं मया ।
यथाभिर्देवताभिश्च तत्र इति तु शोभिते ।
पर्षे मनाहरी मायाम च सिद्धोऽनघोऽभवत् ।
इमानि धर्मसाख्यानान्यक्लिष्टानन्त्यमया ।
स एतत्कुरुवाभिर्यं मातृणामग्र्यं शृणु ।
तस्य ताः श्वसिता एवा क्रुत्भयपूरिमं इष ॥
हैवेरन्यं यस्ती भव्य मातृभ्यः कुमारोत्तम ॥
न यम: मनोहरा काचिद्विज्ञोऽथ गच्छति ।
तासाञ्च प्रकृता इता अष्टमी सिद्धगता ।
एताः संपूर्णदेवस्य विषयाचारो भरः सदा ।
तत्र ताः परितुष्टाश्च चैमारोप्यं ददाति च ॥"
इत्यादि वाराहपुराणे कामादिमातृकोत्पत्ति-
नामाध्यायः ॥ अपि च ।
"अभिप्रपूर्वविधानां तपश्रेष्ठ च पश्यतः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपेश्वरिका मृतुः ॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥"
इति मार्कण्डेयपुराणम् ॥

मातरो यथा,—
"रुद्रोः षष्ठी दशवक्त्री त्रिवक्त्री च वा षष्ठी ।
षष्ठी च मातृपञ्चाशी चतुर्वक्त्री च तन्वयः ॥
उग्रा त्रिनेत्रपदांशुः सर्वा अस्तु: सनकथा ।
अवरो नवखणी च हरिणी शुभ्री तथा ॥
ब्राह्मीन्द्रहस्ता च भाषी भामाश्ररातिका ।

तमंषामोन्नरामी च भयानातुरा जानिनी ॥
एता देवगणोत्पन्नाः सर्वैता मातरः स्मृताः ।
एतास्वपि च सर्वासु स्तनया नास्ति काशु च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४६ अध्यायः ॥
षोडश मातरो यथा,—
"गुणवती सावयवी देवसेना तथा वसुः ।
विजोः पत्नी स्मृता प्रज्ञयवती भ्रमवती च मानुषी ॥
सिद्धवती स्वाहावती अपूर्व भजितोऽयता ।
षोडशा: मातरो देवी च पुनः षोडश मातरः ॥"
इति तत्रैव ५७ अध्यायः ॥
अथ मातृकान्यासः ।
भगवानुवाच ।
"मातृकान्यासमधुना शृणु वैनायकेश्वर ।
येन देवत्वमायाति मर्त्योऽपि विधिना नरैः ॥
वागभवाद्योपयुता देवी मातृकाः परि-
कीर्त्तिताः ।
सर्वा सत्याणि सर्वाणि सहस्राणि सदाऽऽश्रयः ।
अर्द्धबिन्दुयुतानि सर्वकामप्रदानि च ।
अधिष्ठातृमातृकाया ऋषिः परिकीर्त्तितः ।
प्रोक्ता छन्दस्तु गायत्री देवता च सरस्वती ।
शरीरशुद्धिहस्तात्सर्वकामार्थसाधने ॥
विनियोगः षडङ्गेषु मातृकायाः प्रकल्पने ।
आकारेण सर्वं कादिवर्गा सः प्रथमः स्मृतः ॥
तैरेवान्विन्दुसंयुक्तैरक्षरैरेकवर्णैः ।
आकारादि तदीयाश्च चतुष्काणां क्रमशः ।
प्रथमं मातृकानामन्तरायतो न्यसेत् ॥
शिरे वर्णाः स्वरैः सार्द्धं ये वाम्ये न्यासमीरिताः ।
ते सर्वे पञ्चबिन्द्वन्तो युक्ताः क्रमशो दर्शिताः ॥
कुम्भेकारस्य कर्णेषु दीर्घकाराञ्चनेन तु ।
तत्संयोगविन्यासः पश्चाद् न्यासान्तेन तु पूर्ववत् ॥
कृष्णोकारस्य च दीर्घकाराञ्चनेन तु ।
मध्यमानुयते सम्पक् सर्वपूर्णेन विन्यसेत् ॥
एकारादितदन्तेन ऐकारान्तेन चैव तु ।
अधिदन्तानिकाचापि विन्यसेत् तत्र भैरव ॥
ओकारादिमर्यान्तु औकारान्तेन दक्षिणम् ।
बीजपूर्णं कविकारो विन्यसेत् कामेष्वपि ॥
अंकारादिमकारादिवर्गैश्च चान्यासैव च ।
षः एकान्ते तदपूर्णैर्न्यसेत् मातृकाः ॥
सम्यक्कार्यं देवतानां क्रमश्चाहि विन्यसेत् ।
कुरुकार्यकमदिर् पूर्ववत् क्रमतो न्यसेत् ॥
अङ्गुष्ठाद्युत्तमाङ्गेषु क्रमात् वाङ्मुखमुद्रादिभिः ।
कुञ्चका पादवाकृदवद्भक्षं तु पार्श्वतोः ।
पश्चात् च विन्यसेच्चास्तु क्रमात् पूर्वेवद्रदरैः ॥
वाचोः पार्श्वेऽथवा वक्षे नाभौ च वरदे
तथा ।
सम्यगेतद्विन्यासं सदा इह भिः कामार्थदैः ।
वक्षे च विद्वृते वक्षे सर्वमेव कृणादिके ।
कण्ठे कर्णे च वक्त्रदर्शैः पूर्वलक्षणमाचरेत् ।
रोमकूपे मकारन्तु हृदि सहायाः तथा ।
करेषु पादवर्णेषु तथा पूर्ववत्तादेत् ।
अस्तु मातृकान्यासं सः कुर्यात्सदसनः ।
स सर्वपापं दूषात् पुनो वीरश्च जायते ॥

मातः परतरं सर्वं विद्धि श्रियदेव हि ।
यः सर्वकामार्थं पुष्टं चतुर्भिर्वर्णदर्म् ।
वामदेवतो हृदि ध्यात्वा नाहं सर्वोदयादि
च ।
विद्या च मातृकाख्येयं संप्रोक्ता त्रिदेवत्य ।
न वाच्यो परितो श्रीमान् आचरेत् च वदः
इति ।
"अथ बिन्दुसमायुक्तान् स्वरान् पूर्वान् परेद्रुतं
मातृकाणि च सर्वाणि वैष्णवानि प्रवेशत ।
अकारादिक्षकारान्तान्येव सूर्यनेत्रः ।
सर्व वदतश्च यत्र पठितव्यदर्शनम् ।
अभिमतस्तु मन्त्रार्थं प्रथमं पूर्वके: विदुः ।
कुम्भकैव हितीयन्तु तृतीयञ्च रेचकैः ।
एवं सकलिकारस्तु प्रोक्ता तीर्थं विद्यमतः ।
बद्धाञ्च पठितो भूयात् कुम्भीभूतमिवः ।
विद्याधानन्त पौनेव मातृकामवलम्बनम् ।
तीर्थं कविसमायोगेन सर्वाङ्गं कामानवैव च ।
यतन्तं कुरुते यस्तु मातृकासकलाश्रितम् ।
लोमपापं महामायः पूरककामारेचकैः ॥
स सर्वकामान् संप्राप्य पुत्रपौत्रसमन्वितः ।
भुक्ता मथाविर्वितो समया तम्बिकात् ।
सर्वेण सहाभो भूत्वा याति शोकसायुम् ।
तावावमथवा तावानार्थी पुत्रवानिव वा ।
अङ्गीकरोति च विरात् मातृकामस्तकः ।
आतस्तत्र क्रमः प्रोक्तो सर्वश्च इव हु ।
अपराधो क्षमैवाय लोमपार्थ समाचरेत् ।
ये ये मन्त्रा देवतानामनीमादम दयाम् ।
ते मन्त्रा मातृकायन्त्रे निरुद्धेन्नस्थिताः ।
सर्वाङ्गमन्त्राणां सर्वदेवमयकला ।
चतुर्वर्गप्रदार्थं मातृकान्यासं उच्यते ।
इति ते कथितः पुत्र मातृकान्यास उत्तमः ॥"
इति कालिकापुराणे मातृकान्यासः ६८ अः ॥
अथ तस्य प्रयोगः ।
अस्य मातृकामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो
मातृकासरस्वती देवता हलो बीजानि स्वराः
शक्तयो मातृकान्यासे विनियोगः । शिरसि ॐ
ब्रह्मणे ऋषये नमः । मुखे ॐ गायत्रीच्छन्दसे
नमः । हृदि ॐ मातृकासरस्वत्यै देवतायै
नमः । गुह्ये ॐ व्यञ्जनेभ्यो बीजेभ्यो नमः
पादयोः ॐ स्वरेभ्यः शक्तिभ्यो नमः । ततो
ध्यानमेव ।
"मातृकां प्रणवं ध्यायेत् । अथ पारंगम-
वीन् ।
पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां
देवता शारदाहृदयोत्तमां अष्टमवदन्यम् ।
इन्दुरस्तु कला देवि वक्षस्थानयोऽत्र ॥"
नमः अङ्गुष्ठाभ्यां । अं कं खं गं घं ङं आं
अङ्गुष्ठाभ्यां नमः । इं चं छं जं झं ञं ईं
तर्जनीभ्यां स्वाहा । उं टं ठं डं ढं णं ऊं
मध्यमाभ्यां वषट् । एं तं थं दं धं नं ऐं
अनामिकाभ्यां हुं । ओं पं फं बं भं मं औं
कनिष्ठाभ्यां वौषट् । अं यं रं लं वं शं षं सं हं

अं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं ५ आं हृदयाय नमः। इत्यादि। तथा च ज्ञानार्णवे।
"अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम्॥
ओं औं मध्ये पवर्गन्तु बिन्दुयुक्तं न्यसेत् प्रिये!।
अनुस्वारविसर्गाभ्यां यवर्गौ सलक्षकौ॥
हृदयञ्च शिरो देवि! शिखा कवचकं तथा।
नेत्रमन्त्रं न्यसेत् मेऽन्तं नमः स्वाहा क्रमेण तु॥
वषट् हुं वौषट्कन्तञ्च फडन्तं योजयेत् प्रिये!।
षडङ्गोऽयं मातृकायाः सर्व्वपापहरः स्मृतः॥"॥
अथान्तर्मातृकान्यासः।
अकारादिषोडशस्वरान् सबिन्दून् षोडशदल-कमले कण्ठमूले न्यसेत्। ककारादिद्वादश-वर्णान् सबिन्दून् द्वादशदलकमले हृदये न्यसेत्। डकारादिदशवर्णान् सबिन्दून् दशदलकमले नाभौ न्यसेत्। बकारादिषड्वर्णान् सबिन्दून् षड्दलकमले लिङ्गमूले न्यसेत्। वकारादि-चतुरो वर्णान् सबिन्दून् चतुर्द्दलकमले मूला-धारे न्यसेत्। हक्षवर्णद्वयं सबिन्दुं द्विदलपद्म-भ्रूमध्ये न्यसेत्। तथा च ज्ञानार्णवे।
"द्व्यष्टपत्राम्बुजे कण्ठे स्वरान् षोडश विन्यसेत्।
द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत्॥
दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे बकारादींश्च षट्॥
आधारे चतुरो वर्णान् वसादीन् चतुर्द्दले।
हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये!॥"
अगस्त्यसंहितायाम्।
"एकैकवर्णमेकैकपद्मान्ते विन्यसेत् प्रिये!।
एवमेताः प्रविन्यस्य मनसा तो वशिन्यसेत्॥"॥
वैयाने तु।
एकैकवर्णस्थापनं मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥
अथान्तर्मातृकान्यासो मूलाधारे चतुर्द्दले।
सुवर्णाभे व श ष स चतुर्भिर्विभूषिते॥
षड्दले विद्रुमनिभे स्वाधिष्ठानेऽब्जपालिनि।
ब भ मैर्य र लैर्युक्ते वर्णैः षड्भिश्च सुमति!॥
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिफान्तदलैर्युक्ते विन्दुन्यासितमस्तकैः॥
अनाहते द्वादशारे प्रवालरश्मिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयाम्बुजे॥
विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाञ्छिते॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादित्रिरेखाढ्ये ह ल क्ष भयभूषिते॥
तन्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्न्यासोऽयमान्तरः॥"
ततो बाह्यमातृकान्यासम्।
"पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्याञ्च हस्ता-म्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-माश्रये॥"
एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिनियमस्तन्त्रे।
"ललाटेऽनामिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्ज्जनीमध्यमानामा वृद्धानामे च नेत्रयोः॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमाञ्चोष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमास्तनमाङ्गके।
मुखेऽनामां मध्यमाञ्च हस्तपादे च पार्श्वयोः॥
कनिष्ठानामिकामध्यास्तास्तु पृष्ठे च विन्यसेत्।
ताः साङ्गुष्ठा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत्॥
हृदये च तलं सर्व्वं अंसयोश्च ककुत्सु च।
हृत्पूर्व्वं हस्तपत्कुक्षि मुखेषु तलमेव च॥
एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः।
अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः॥"
गौतमीये।
"ललाटमुखवृत्ताक्षिस्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोःपत्सन्ध्यग्रकेषु च॥
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽंसके।
ककुद्यंसे च हृत्पूर्व्वं पाणिपादयुगे तथा।
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात्॥"
तद्यथा। अं नमो ललाटे। आं नमो मुख-वृत्ते। इं ईं चक्षुषोः। उं ऊं कर्णयोः। ऋं ॠं नसोः। ऌं ॡं गण्डयोः। एं ओष्ठे। ऐं अधरे। ओं ऊर्द्ध्वदन्ते औं अधोदन्ते। अं ब्रह्मरन्ध्रे। अः मुखे। कं दक्षबाहुमूले। खं कूर्परे। गं मणिबन्धे। घं अङ्गुलिमूले। ङं अङ्गुल्यग्रे। एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु। एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु। एवं तं ५ वामपादमूलसन्ध्यग्रकेषु। पं दक्षिणपार्श्वे। फं वामपार्श्वे। बं पृष्ठे। भं नाभौ। मं जठरे। यं हृदि। रं दक्षबाहुमूले। लं ककुदि। वं वामबाहुमूले। शं हृदादिदक्षहस्ते। षं हृदादिवामहस्ते। सं हृदादिदक्षपादे। हं हृदादिवामपादे। ळं हृदाद्युदरे। क्षं हृदादि-मुखे। सर्व्वत्र नमोऽन्तेन न्यसेत्। तथा च।
"ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दु-वर्ज्जितः।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः॥"
इति मन्त्रः॥
अथ संहारमातृकान्यासः।
तस्या ध्यानं यथा,—
"अक्षस्रजं हरिणपोतमुदग्रटङ्कं
विद्याः करैरविरतं दधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिमरुणामरविन्दरामां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम्॥"
न्यासस्तु क्षकाराद्यकारान्तः। यथा क्षं नमो हृदादिमुखे इत्यादि॥ अपरञ्च।
"चतुर्धा मातृका प्रोक्ता केवला बिन्दुसंयुता।
सविसर्गा सोभया च रहस्यं शृणु कथ्यते॥
विद्याकरी केवला च सोभया भुक्तिदायिनी।
पुत्त्रदा सविसर्गा तु सबिन्दुर्वित्तदायिनी॥"
विशुद्धेश्वरे।
वाग्भवाद्या च वाक्सिद्ध्यै रमाद्या श्रीप्रवृद्धये।
शक्त्याद्या सर्व्वसिद्ध्यै कामाद्या लोकवश्यदा।
श्रीकण्ठाद्यान्निमान्न्यसेन् दर्व्वमन्त्रः प्रसीदति॥"
श्रीविद्याविषये नवरत्नेश्वरे।
"वाग्भवाद्या नमोऽन्ताश्च न्यस्तव्या मातृका-क्षराः।
श्रीविद्याविषये मन्त्री वाग्भवाद्यर्थसिद्धये॥"
इति तन्त्रसारः॥
(मातृ+"स्वार्थे कन्।"५।४।५। इति कन्।) त्रि। मातुरागतम्। यथा, महाभारते। १। ८०। १०।
"योऽन्वयो मातृकस्तस्य स एनमभिपेदि-वान्॥")

मातृकेशटः, पुं, (मातृके कुले शटति पुत्त्ररूपेण गच्छतीति। शट+अच्।) मातुलः। इति त्रिकाण्डशेषः॥

मातृनन्दनः, पुं, (मातॄणां नन्दनः पुत्त्र आनन्द-वर्द्धनो वा।) कार्त्तिकेयः। यथा,—
"कथं त्वं ललिकापुत्त्रस्तथा त्वं शुरं गुहम्।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः॥"
इत्यादि वाराहपुराणे स्कन्दोत्पत्तिनामाध्यायः॥

मातृमण्डलं, क्ली, (मातॄणां मण्डलम्।) नेत्रयो-र्मध्यम्। तत्तु आसन्नमृत्युर्न पश्यति। यथा, काशीखण्डे ४२ अध्याये।
"अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्म्मातृमण्डलम्॥"
(यथा च हरिवंशसंहितायाम्। "मातॄणामपि मातृमण्डलविदो विप्रान् विदुर्म्मैथिलः॥")

मातृमुखः, पुं, अज्ञः। इति हेमचन्द्रः। ३। १९॥

मातृबन्धुः, पुं, (मातुर्बन्धुः।) मातृबान्धवः। यथा। बन्धवस्त्रिविधाः। आत्मबन्धवः पितृ-बन्धवो मातृबन्धवश्चेति। यथोक्तम्।
"आत्मपितृष्वसुः पुत्त्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्त्राश्च विज्ञेया आत्मबान्धवाः॥
पितुः पितृष्वसुः पुत्त्राः पितुर्म्मातृष्वसुः सुताः।
पितुर्म्मातुलपुत्त्राश्च विज्ञेयाः पितृबान्धवाः॥
मातुः पितृष्वसुः पुत्त्रा मातुर्म्मातृष्वसुः सुताः।
मातुर्म्मातुलपुत्त्राश्च विज्ञेया मातृबान्धवाः॥"
इति मिताक्षरा॥

मातृबान्धवः, पुं, (मातुर्बान्धवः।) मातृबन्धुः। स च मातामहभगिनीपुत्त्रः। मातामही-भगिनीपुत्त्रः। मातृमातुलपुत्त्रश्च। यथा,—
"मातुः पितृष्वसुः पुत्त्रा मातुर्म्मातृष्वसुः सुताः।
मातुर्म्मातुलपुत्त्राश्च विज्ञेया मातृबान्धवाः॥"
इत्युद्वाहतत्त्वम्॥

मातृवाहिनी, स्त्री, (मातरं वहतीति। वह+णिनिः।) वल्गुलापक्षी। इति राजनिर्घण्टः॥

मातृहारिणः, पुं, (मातुः हारिणः। ... वैष्णवं मायैव हारिणः न तु विचा-र्य्यादिभिरिति भावः।) म्लेच्छः। इति हेम-चन्द्रः। ३। २६।

मातृष्वसा, स्त्री, (मातुः स्वसा। "मातृपितृभ्यां स्वसा।" ८। ३। ८४। इति षत्वम्।) मातृ-भगिनी। मासी इति भाषा। सा मातृ-तुल्या यथा,—
"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा। श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः॥"
इति दायभागः॥

मातृष्वसेयः, पुं, (मातृष्वसुरपत्यं पुमान्। मातृ-ष्वसृ + "मातृष्वसुश्च।" ४। १। १३४। इत्यत्र "छण्प्रकरणे ढगपि वक्तव्यः।" इति काशिकोक्तेः ढक्।) मातृष्वसृपुत्रः। मासितुतो भाइ इति भाषा। तत्पर्य्यायः। मातृष्वस्रीयः २। इति हेमचन्द्रः। ३। २०८॥

मातृष्वसेयी, स्त्री, (मातृष्वसुरपत्यं स्त्री। मातृ-ष्वसृ + "मातृष्वसुश्च।" ४। १। १३४। इति ढक्। टिड्ढाणञिति ङीप्।) मातृभगिनी-कन्या। इत्यमरः। २। ६। २५। मासितुतो भगिनी। इति भाषा। (दायभाक्त्वेऽस्याः प्रमाणं यथा, महाभारते। १। २२१। ५।
("मम मातृष्वसेया त्वं भ्राता श्यालश्च मम॥")

मातृष्वस्रीयः, पुं, (मातृष्वसुरपत्यं पुमान्। मातृष्वसृ + "मातृष्वसुश्च।" ४। १। १३४। इति छण्।) मातृभगिनीपुत्रः। इत्यमरः। २। ६। २५। मासितुतो भाइ इति भाषा॥

मातृष्वस्रीया, स्त्री, (मातृष्वस्रीय + टाप्।) मातृभगिनीकन्या। इत्यमरः। २। ६। २५। मासितुतो भगिनी इति भाषा॥

मातृर्षिको, स्त्री, वाचकः। इति शब्दरत्नावली॥

मात्रं, क्ली, (मीयत इति। मा + त्रन्।) कार्त्स्न्यम्। अवधारणम्। इत्यमरः। ३। ३। १७०॥ मात्रं केवलं यथा जीवमात्रं न हिंसेत्। अवधा-रणे यथा पयोमात्रं भुङ्क्ते। इति तट्टीकायां भरतः॥

मात्रा, स्त्री, (मीयते अनया। मा + "हुयामाश्रु-भसिभ्यस्त्रन्।" उणा० ४। १६७ इति त्रन् टाप्।) कर्णभूषणम्। अल्पम्। परिच्छदः। इत्यमरः। ३। ३। १७०॥ परिच्छदो वस्त्रादिः। अल्पे यथा। ग्रासमात्रा। परिच्छदे यथा। वि-त्तमात्रोपजीवी। इति तट्टीकायां भरतः॥ (यथा, कथासरित्सागरे। २५। ७४। "अल्पमात्रे भवेन्मात्रा।") अर्थांशुका। वित्तम्। अक्ष-रावयवः। इति मेदिनी। रे, ७१। १३। (ह्रस्व-दीर्घप्लुतादिर्भेदः। यथा, श्रुतबोधे।
"स्वराः काले दधते द्वादश मात्रा तथा प्रकीर्त्ति-ताः॥")
कालविशेषः। यथा,—
"कालेन यावता पाणिः पर्य्येति जानुमण्डलम्।
सा मात्रा कविभिः प्रोक्ता ह्रस्वदीर्घप्लुते मता॥"
इति प्रायश्चित्ततत्त्वम्॥
अपि च।
"जानुमण्डलमङ्गुल्यावर्त्तनं परिवर्त्तनम्। कालेन मात्रा सा प्रोक्ता सुनिभिर्वेदपारगैः॥"
इति शब्दरत्नावली॥
इन्द्रियवृत्तिः। यथा,—
"मात्रास्पर्शास्तु कौन्तेय! शीतोष्णसुखदुःखदाः। आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥"
इति भगवद्गीता॥
"मीयन्ते आभिर्विषया इति मात्रा इन्द्रियवृत्तयः।"
इति तट्टीकायां श्रीधरस्वामी॥
इन्द्रियम्। इति पूर्व्वोक्तश्लोकटीकायां मधु-सूदनसरस्वती॥ धनम्। यथा,—
"न योषितः पूर्वदत्तायाः स्वयंदत्तायाश्च दायहरः। मातापितृभ्यां भ्रातृभिर्वा दत्तं यत्तः स्मृता॥"
इति दायतत्त्वम्॥
(द्रव्यमूल्यम्। यथा, ऋग्वेदे। ६। ४। ६। १।
"प्र मात्राभी रिरिचे।"
"मात्राभिः मीयन्ते परिच्छिद्यन्त इति मात्राः द्रव्याणि।" इति तद्भाष्ये सायणः॥ प्रमाणम्। यथा, पञ्चतन्त्रे। १। १६८। "का मात्रा समु-द्रस्य यो मम प्रसूतिं दूषयिष्यति॥" अव-यवः। यथा, मनौ। ७। ३।
"यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।"
"मात्राः अवयवाः।" इति तट्टीकायां मेधा-तिथिः॥ अंशः। यथा, भागवते। ५। ११। १२।
"तस्य माया गुणः प्रधानः।" "माया अंशः। अल्पम्।" इति तट्टीकायां स्वामी॥)

मात्सर्य्यं, क्ली, (मत्सर + ष्यञ्।) मत्सरस्य भावः। परशुभद्वेषः। यथा,—
"मात्सर्य्यविरहादेकमनः प्रसादं कथमभिलाषोऽप्यहेतु देहि। मात्सर्य्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि॥"
इति भारवौ ३ अध्यायः॥

मात्स्यिकः, त्रि, (मत्स्यान् हन्ति। "तदस्य पण्यम्।" ४। ४। ५१। इति मत्स्य + ठक्।) जालिकः। मत्स्यघातकः। इति सिद्धान्त-कौमुदी॥

माथ ऋ कृन्ते। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ऋ, अमाथीत्। कृन्तो वधच्छेदौ। इति दुर्गादासः॥

माथः, पुं, (मथ्यते हीयते जनः यत्रेति। माथ + घञ्। अकर्त्तरि च कारके संज्ञायाम् इति घञ्।) पन्थाः। इति त्रिकाण्ड-शेषः॥ (मन्थ + भावे घञ्।) मन्थनम्। इति शब्दरत्नावली॥

माथुरः, पुं, (मथुरा + अण्।) मथुराया व्याकरणः। इति मुग्धबोधव्याकरणम्॥ (तत्र जातः इत्यण् वा। मथुरावासी। यथा, कथा-सरित्सागरे। ११। ८१।
"ततः स हरदत्ताख्यस्तत्राद्य पुरोहितः। पुरी यत्र तव माथुरा दक्षिणापथे। माथुरः॥"
अन्येन कृता माथुरेण प्रोक्ता। "तेन प्रोक्तम्।" ४। ३। १०१। इति अण् ङीप्। माथुरी वृत्तिः। इति काशिका॥)

मादः, पुं, (माद्यत इति मद् + घञ्।) प्रमादः। हर्षः। इत्यमरः। ३। ३। १६। गर्वः। इति तट्टीकायां भरतः। मत्तता। इति शब्दरत्नावली॥

मादकः, पुं, (मादयति हर्षयति कामिनीति। मद्+ण्वुल्।) दात्यूहपक्षी। इति शब्दमाला॥ (मादयति प्रमत्तान् भूतानीति। मद्+णिच्+ण्वुल्।) मदकारकद्रव्ये, त्रि। (यथा, देवी-भागवते। ६। १०। ४१।
"इन्द्रियाणि मदान्धानि मादकानि दुरि-तानि।
अधीरस्य दुरन्तानि भवन्ति सततं नृप॥")

मादनं, क्ली, (मादयति विरहिणः। इति मद्+णिच्+ल्युः।) लवङ्गम्। इति शब्दचन्द्रिका॥ (मादयतीति मद्+णिच्+ल्युः।) हर्षकारि-णादि, त्रि॥)

मादनः, पुं, (मादयति विरहिजनान्मादयतीति। मद्+णिच्+ल्युः।) कामदेवः। मदनवृक्षः। धुस्तूरः। इति केचित्॥

मादनी, स्त्री, (मादन + स्त्रियां ङीप्।) मादनी। इति राजनिर्घण्टः। विजया। इति भाव-प्रकाशः॥

मादृशः, त्रि, (अहमिव दृश्यते इति। अस्मद् + "त्यदादिषु दृशोऽनालोचने कञ्।" ३।२।६०। इति कञ्।) मत्सदृशः। इति व्याकरणम्॥ (यथा, महाभारते। ७। १०२। ७५।
"नाहं त्वं सदृशीं कन्यां मत्कृते पाण्डवान्मम। मादृशान्कर्हि कालो मादृशैरभियोजितः॥
कथं तु भार्य्या मादृशी तव हन्त! यथा
(इति)॥
पट्टवन्द्य भगिनी यथा मद्रेश माद्री॥")

माद्री, स्त्री, (मद्रे भवा। मद्र+अण् ङीप्। मद्रादित्वात् न वृद्ध्यभावः।) पाण्डुराजस्त्री। सा जनीभूताद्य शुभे: क्षतात् मेंथुनादित्याश्र-मादिन आहतया अश्विनीकुमाराभ्यां नकुल-सहदेवौ जनयामास। इति महाभारतवैयास-क्यानम्। (यथा, महाभारते। १। ६७। १३६।
"कुन्ती माद्री च जज्ञाते मतिस्तु सुबलात्मजा।")
अतिविषा। इति राजनिर्घण्टः॥

माद्रीनन्दनः, पुं, (माद्र्याः नन्दनः।) नकुलः। इति शब्दरत्नावली॥

माधवः, पुं, (मधुकुलस्य अपत्यं पुमान्। इति मधु + अण्। मा लक्ष्मीस्तस्याः धवः। मात्र विद्याया धव इति वा।) विष्णुः। तस्य व्युत्पत्ति-र्यथा,—
"मा च ब्रह्मरूपा वा धवस्तस्याप्रवर्ती॥"

नारायणीति विख्याता विष्णुमाया सनातनी ।
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च
माधवः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
(यथा, महाभारते । ५ । ७० । ४ ।
“मौनाद्ध्यानाच्च योगाच्च विद्धि भारत !
माधवम् ।”)
तन्नाममाहात्म्यं यथा,—
“योनिश्चैवाचरे सर्व्वे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥”
इति वह्निपुराणम् ॥
(मधोर्वसन्तस्यायम् मधूनि मधुमन्ति कुसुमानि
सन्त्यस्मिन् वा । मधु+“मधोर्ञ च ।” ४ । ४ ।
१२९ । इति ञः ।) वैशाखमासः । इत्यमरः ।
१ । ४ । १६ ॥ (यथा, मार्कण्डेये । ११७।२७ ।
“स तेन सख्या सहितो जगामान्तर्वणं वनम् ।
सखीभिः स समं रन्तुं माधवे मासि पार्थिव ! ॥”
(मधु+स्वार्थे अण् ।) वसन्तः । इति विश्वः ॥
(यथा, सुश्रुते । १ । १९ । ८ । “मधुमाधवौ
वसन्तः ।”
“माधवप्रथमे मासि नभस्यप्रथमे पुनः ।”
इति चरके सूत्रस्थाने सप्तमेऽध्याये ।
“माधवनभस्यशब्दाभ्यां यथासंख्यं वैशाख-
भाद्रपौषाख्यां स्मृतिरभिहितस्तासु तेषां प्रथमे-
ऽपि वर्त्तमानेऽपि मासि चैत्रादौ विषय इति
निष्कर्षः । इति चरकटीकाकृदभिप्रायः ॥)
मधूकवृक्षः । लक्ष्मणः । इति राजनिर्घण्टः ॥
(भौत्यमन्वन्तरीयसप्तर्षीणामन्यतम ऋषि-
विशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
“अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥”
सायनाचार्य्यस्य भ्राता । यथा, कायनस्तथातु-
वृत्तौ । इति पूर्व्वदक्षिणपश्चिमसमुद्राधीश्वर-
कम्पराजसुतसङ्गमराजमहामन्त्रिणा सायन-
पुत्रेण माधवसहोदरेण सायनाचार्य्येण विर-
चिता माधवीया धातुवृत्तिः ॥)
माधविका, स्त्री, (माधवी+कन् टाप् । पूर्व्व-
ह्रस्वश्च ।) माधवीलता । इत्यमरटीकायां
भरतः ॥
माधवी, स्त्री, (मधौ साधुपुष्पाति । मधु+“कालात्
साधुपुष्प्यत्पच्यमानेषु ।” ४ । ३ । ४३ । इत्यण् ।
ङीप् ।) स्वनामख्यातपुष्पलता । तत्पर्य्यायः ।
अतिमुक्तः २ पुण्ड्रकः ३ वासन्ती ४ लता ५ ।
इत्यमरः । २ । ४ । ७२ ॥ अतिमुक्तकः ६
माधविका ७ माधवीलता ८ । इति तट्टीकायां
भरतः ॥ चन्द्रवल्ली ९ सुगन्धा १० भ्रमरोत्सवा
११ भद्रप्रिया १२ भद्रलता १३ भूमिमण्डप-
भूषणा १४ वसन्तोदूती १५ । इति जटाधरः ॥
वसन्तमाधवी १६ । इति शब्दरत्नावली ॥ (यथा,
देवीभागवते । ९ । १२ । ७ ।
“माधवेनोपसंभुक्तेव माधवीमण्डपावृताम् ।”)
अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषाय-
त्वम् । मदगन्धित्वम् । पित्तकासव्रणदाहशोष-
नाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि
च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा ।”
इति भावप्रकाशः ॥
सितिः । मधुशर्करा । कुट्टनी । (मधुनो विकार
इत्यण् ङीप् ।) मदिरा । इति मेदिनी । वे,
४६—४७ ॥ (यथा, महाभारते ।४। १५ । ६ ।
“अस्ति मे शयनं दिव्यं त्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥”
माधवस्येयमित्यण् ङीप् । तत्प्रियत्वात्तथा-
त्वम् ।) तुलसी । इति शब्दमाला ॥ (मधौ वसन्ते
शैघ्र्यार्थवीथीति अण् ।) दुर्गा । इति शब्दरत्ना-
वली ॥ माधवस्य पत्नी च ॥ (मधुर्वंशजा कन्या ।
यथा, महाभारते । १।९५।१९ । ‘जनमेजयः
खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे
प्राचिन्वान् ॥’)
माधवीलता, स्त्री, (माधव्याख्या लता ।) स्वनाम-
ख्यातपुष्पलता । इत्यमरटीकायां भरतः ॥
माधवेष्टा, स्त्री, (माधवस्य इष्टा ।) वाराहीकन्दः ।
इति राजनिर्घण्टः ॥
माधवोचितं, क्ली, (माधवस्योचितम् । सुगन्धि-
त्वात् तथात्वम् ।) कक्कोलकम् । इति
राजनिर्घण्टः ॥ (विशेषोऽस्य कक्कोलशब्दे
ज्ञातव्यः ॥)
माधवोद्भवः, पुं, (माधवादुद्भवोऽस्य ।) राजा-
दनी । इति राजनिर्घण्टः ॥
माधुकः, पुं, वर्णसङ्करजातिविशेषः । इति जटा-
धरः ॥ (यथा, महाभारते । १३ । ४८ । २० ।
“मैरेयकञ्च वैदेहः सम्प्रसूतेऽथ माधुकम् ॥”)
माधुमताः, पुं, (मधुमत्सु भवाः । मधुमत्+
“कच्छादिभ्यश्च ।” ४ । २ । १३३ । इत्यण् ।)
काश्मीरदेशभवाः । इति हेमचन्द्रः ।४।२४॥
माधुरं, क्ली, (मधु अस्ति अस्य अस्मिन् वेति ।
मधु+“ऊषसुषिमुष्कमधो रः ।” ५।२।१०७।
इति रः । ततः स्वार्थेऽण् ।) मल्लिका । इति
त्रिकाण्डशेषः ॥ (मधुरात् सम्भवतीत्यण् ।)
मधुरसम्भवे, त्रि ॥
माधुरी, स्त्री, (माधुर+गौरादित्वात् ङीष् ।)
मद्यम् । इति भूरिप्रयोगः ॥ माधुर्य्यम् । यथा,
“तानि स्पर्शसुखानि ते च तरलाः स्निग्धा
दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां
वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मा-
नसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं
वर्द्धते ॥”
इति गीतगोविन्दे ३ सर्गः ॥
माधुर्य्यं, क्ली, (मधुरस्य भावः । मधुर+“वर्ण-
दृढादिभ्यः ष्यञ् च ।” ५।१।१२३ । इति ष्यञ् ।)
मधुरस्य भावः । मधुरत्वम् । इति हेमचन्द्रः ॥
३ । १७३ । (यथा, सुश्रुते सूत्रस्थाने एका-
दशाध्याये ।
“माधुर्य्यं भजतेऽत्यर्थं तैक्ष्ण्यभावं विमुञ्चति ॥”)
लावण्यम् । यथा,—
“रूपं किमप्यनिर्व्वाच्यं तनोर्माधुर्य्यमुच्यते ।”
इत्युज्ज्वलनीलमणिः ॥
पाञ्चालीरीतिविशिष्टकाव्यगुणः । यथा,—
“मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ।”
इति साहित्यदर्पणे ९ परिच्छेदः ॥ तस्य लक्षणं
यथा, साहित्यदर्पणे ८ परिच्छेदे ।
“चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥
मूर्द्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना ।
रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः ॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।”
(नायिकानामयत्नजोऽलंकारविशेषः । यथा,
साहित्यदर्पणे । ३ । १२९ ।
“सर्व्वावस्थाविशेषेषु माधुर्य्यं रमणीयता ।”
सात्त्विकनायकगुणभेदः । यथा, तत्रैव ।३।८१।
“महत्यपि व्यसनेऽनुद्वेगो माधुर्य्यं परिकीर्त्तितम् ।”)
माध्यन्दिनं, त्रि, (मध्ये भवम् । मध्य+“अन्तः-
पूर्व्वपदात् ठञ् ।” ४।३।६० । इत्यत्र काशिका-
वृत्तौ “मध्योमध्यं दिनण् चास्मात् ।”
इति दिनण् ।) मध्यमम् । इति हेमचन्द्रः ।
६ । ८६ ॥ (मध्यन्दिनसम्बन्धि । यथा, ऋग्वेदे ।
३ । २८ । ४ ।
“माध्यन्दिने सवने जातवेदः पुरोडाशमिह
कवे ! जुषस्व ।”
“माध्यन्दिने मध्यन्दिनसम्बन्धिनि” तथा “माध्य-
न्दिनं मध्यं दिनस्येदमित्यर्थे उत्सादित्वादञ्
जित्वादादिवृद्धिः नित्वादेवाद्युदात्तत्वम् ।” इति
च तद्भाष्ये सायनः ॥ मध्यन्दिनेन प्रोक्तामधीते
वा । इत्यण् ङीप् । शुक्लयजुर्व्वेदस्य शाखाभेदः ।
यथा, आश्वलायनीयश्रौतसूत्रे । ५ । ५ । १९ ।
“दिवा सोममभिषुणुतेदं इति तिस्रोऽपरोदीच्य
सोमकामं त्वाहुत्वाय सोमप्रमिष्ठवर्तिनाय
सोमाः स दिवो विदाना आपूर्णो अस्य कलशः
स्वाहेति माध्यन्दिनः ।”)
माध्यमं, त्रि, (मध्ये भवं । मध्य+“अन्तःपूर्व्वपदाट्-
ठञ् ।” ४ । ३ । ६० । इत्यत्र काशिकावृत्तौ
“मध्यमो च मध्यमो वक्तव्यौ ।” इति
मश् ।) मध्ये भवम् । यथा,—
“मध्यमं माध्यमं मध्यमीयं माध्यन्दिनञ्च तत् ।”
इति हेमचन्द्रः । ६ । ८६ ॥
माध्यस्थ्यं, क्ली, (मध्यस्थ+ष्यञ् ।) मध्यस्थस्य
भावः । मध्यस्थत्वम् । यथा, कुमारसम्भवे ।
१ । ५२ ।
“अथाविताारं गिरिश देवदेव-
मतिः सुता धारयितुं दधाव ।

स्वादुवेणाभ्युदितेन यापु-
...मिदं मानकमे...वे ॥"

माध्वई, स्त्री, (माध्वीक। पृषोदरादित्वात् ईका-रस्याकारः।) माध्वीकम्। इत्यमरटीकायां भानुदीक्षितः॥

माध्वी, स्त्री, (मधुनो विकारः। मधु+अण्। ङीप्। "अनपत्यवाचमाध्वीति।" ६। ४। १७५। अत्र निपातनात् यणादेशो निपात्यते।) मद्यम्। इति विश्वमेदिन्यौ। मधुजातिरूपा सुरा। इति राजनिर्घण्टः॥ (यथा, मनौ। ११। ९४।
"गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।"
मधु मधुररसोऽस्त्यस्य अर्श आद्यच्।) मधुररसयुक्तः। इति शब्दरत्नावली॥ (मधुयुक्ते, त्रि। यथा, ऋग्वेदे। ७। ७१। १।
"हिरण्यवर्त्ती माध्वी माध्वीरा नः।"
हे माध्वी। मधुमन्तौ। इति तद्भाष्ये सायणः। नदीविशेषः। यथा, भागवते। १०। ८१।
"तैभ्यः माध्वा च माध्वी च द्वे नद्यौ सम्प्र-यातम्।")

माध्वीकं, क्ली, (माध्वी+स्वार्थे कन्।) मधूकपुष्पजातमद्यम्। तत्पर्यायः। मध्वासवः २ माधवकः ३ मधु ४। इत्यमरः। २। १०। ४१॥ मधुमाध्वीकमित्युक्तं द्राक्षेति केचित्। पुष्पोद्भवे पुष्पजे। (यथा, महाभारते। १। १४०। १८।
"कर्त्तं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम्।
लोधं गौरीरसं कुर्म्म्यानारो कपित्थविति प्रातः॥")
यतो द्वौ द्राक्षाविकारे। इति भरतः। मार्द्वीकमिति वा पाठः। इति रमानाथः। माध्वीकस्यार्थे माधवकमिति भानुदीक्षितः॥ (यथा, नैषधे। १८। १११।
"अधरे निहितं माध्वीकं वा न वा रागमित्याशयः।
कुसुमकरन्दौघैः कुसुमार्द्रिमनोहरैः।
एवं तु किमपि त्वयीतदं ...
मधु निःसरद्भ्यो ...॥"
"माध्वीकं मकरन्दम्। इति तट्टीकायां नारायणः॥) तद्गुणा यथा,—
"मधुमाध्वीकमाध्वीकमदिराक्षीकं मदिरादिति।
अभिमानकरं ... ॥"
इति भावप्रकाशे पूर्वखण्डे द्वितीये भागे॥)

माध्वीकफलः, पुं, (माध्वीकं मधुमत् फलमस्य।) मधुनारिकेलः। इति राजनिर्घण्टः॥

माध्वीमधुरा, स्त्री, (माध्वीमदस्य मधुरेति।) मधुरखर्जूरिका। इति राजनिर्घण्टः॥

मान, त्रि अर्च्चे। इति कविकल्पद्रुमः॥ (चुरा-पक्षे आ०-पर०-अक०-सेट्।) त्रि मानयति मानेते। इति दुर्गादासः॥

मान, ह विचारे। अर्च्चे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ह मीमांसते मानं धीरः। अर्थयात् विचारणे च स्तुतिरिति रमानाथः। इति दुर्गादासः॥

मानं, क्ली, (मीयतेऽनेनेति। मा+करणे ल्युट्।) परिमाणम्। तत्पर्यायः। पौतवम् २ द्रुवयम् ३ पाय्यम् ४ पौतवम् ५। तत्तु तुलाङ्गुलिप्रस्थैस्त्रिविधं भवति। तत्र तुलापरिमाणं पलादनुसरति। अङ्गुल्या हस्तादि। प्रस्थेन द्रोणादि। इत्यमरभरतौ। २। ९। ८५॥ प्रमाणम्। इति मेदिनी। ने, १९॥ यत्र ताभ्यां त्रिरुक्तिनम्। तदेव मानद्वयम्। कार्षं विदर्भं भवति अधमानम्। इति वैद्यकमानम्॥

अथ मानपरिभाषा।
"न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्।
अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया॥
चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः।
विहाय सर्वमानानि मागधं मानमुच्यते॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः।
त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते॥
जालान्तरगतैः सूर्यकरैर्वंशी विलोक्यते।
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्॥
षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधानकौ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते॥
कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः पाणिमानिका।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम्॥
विडालपदकञ्चैव तथा षोडशिका मता।
करमध्यो हंसपदं सुवर्णं कवलग्रहम्॥
उदुम्बरञ्च पर्यायैः कर्ष एव निगद्यते।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा।
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका।
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात् कुडवोऽर्द्धशरावकः।
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका।
शरावोऽष्टपलन्तद्वज्ज्ञेयमत्र विचक्षणैः।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकः।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलश्च सः।
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोन्मनः।
उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञकः।
शूर्पाभ्याञ्च भवेद्द्रोणी वाही गोणी च सा स्मृता।
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः।
चतुःसहस्रपलिका षण्णवत्यधिका च सा॥
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः।
तुलापलशतं ज्ञेया सर्वत्रैवैष निश्चयः।
माषटङ्काक्षबिल्वानि कुडवः प्रस्थमाढकम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः॥"
मागधपरिभाषायां बहुविधो मानकर्षादिरिति तदुक्तौ शरावादिरिति परे। अर्धं चरकमतः। द्रवमात्रे। द्रवार्द्रयोर्माने द्विगुणमानमात्रतः। सुश्रुतमते पलादिमानं दृष्टान्ताध्यायेषु। अत एव कालिङ्गपरिमाणमानमपि। एतद्वयावहारिकं मानं द्राक्षादिपरिमाणकम्। आद्यं रञ्जनमितं कर्षः।
"गुञ्जादिमानमारभ्य यावत् स्यात् कुडवस्थितिः।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम्॥
प्रस्थादिमानमारभ्य द्विगुणं तद्द्रवार्द्रयोः।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम्॥
मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम्।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत्॥"
इति मागधमानम्॥

अथ कालिङ्गमानम्।
"यवो गौरसर्षपैः षड्भिर्गुञ्जा स्यात्तत्त्रयं यवाः।
अतस्तु माषा वक्ष्यन्ते प्रोच्यते गुञ्जकाः कथम्।
यवो द्वादशभिर्गौरैः सर्षपैः प्रोच्यते बुधैः।
यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्।
चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च।
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषिकः।
चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः।
चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः।
कलिङ्गादिकरोद्भूता मानपरिभाषा नानास्थिताः।
प्रकृतिं रोगदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत्।
वालां वृद्धं वयं कार्यं बलाबलं तथा-
पवम्।
अग्निमानञ्च रोगञ्च मता वाच्यं प्रयुक्तम्॥"
इति मानपरिभाषा। इति भावप्रकाशः॥

मानः, पुं, (मननं मुहुर्मुहुरभिमननमिति। मन+घञ्।) चित्तसमुन्नतिः। इत्यमरः। १। ७। २२॥ चित्तस्य समुन्नतिरुत्कृष्टता मानः। आत्मनि श्लाघ्यत्वबुद्धिरिति यावत्। न्यक्कृतौ सत्यामपि अकार्यं मानः। इति तट्टीकायां भरतः॥ (यथा, मनौ। २। ११६।
"दैवं इत्यत्र मानश्च मानं मैत्र्यांश्च वर्द्धयेत्॥")
अभिमानम्। प्रत्यभिमानः। इति मेदिनी॥ अनुरक्तयोर्दम्पत्योर्मानोऽप्यविरहयिं। यथा,—
"दम्पत्योर्मानं स्नेहस्य ममोद्भवस्तयोः।
सम्भोगार्थं प्रेमबन्धकल्पितर्यो मान उच्यते॥"
इत्युज्ज्वलनीलमणिः॥
पुष्पकम्। यथा,—
"अतः परं तुल्यसङ्कल्पं कल्पितानाम-
मानम्॥"

उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥
मानो हि मूलमर्थस्य माने म्लाने धनेन किम् ।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां
धनम् ॥"

इति मार्कण्डे ११५ अध्यायः ॥

प्रियापराधसूचिका चेष्टा मानः । स च लघु-र्मध्यमो गुरुश्चेति । अक्लेशापनेयो लघुः । कष्टापनेयो मध्यमः । कष्टतमापनेयो गुरुः । अस्याधारस्तु रसाभासः । अपरस्त्रीदर्शनादिजन्मा लघुः । गोत्रस्खलनादिजन्मा मध्यमः । अपरस्त्रीसम्भोगदर्शनादिजन्मा गुरुः । अन्यथासिद्धकुतूहलाद्यपनेयो लघुः । अन्यथावादाद्युपपाद्यापनेयो मध्यमः । चरणपातभूषणदानाद्यपनेयो गुरुः । अपरस्त्रीदर्शनादिजन्मा यथा,—
"स्वेदाम्बुभिः क्वचन पिच्छिलमङ्गभूमौ
आमोदरि क्वचन कण्टकितत्वकान्ति ।
अन्यां विलोकयति भावयति प्रियेऽपि
मानः क धास्यति पदं तव तन्न विद्मः ॥"
गोत्रस्खलनादिजन्मा यथा,—
"यद्गोत्रस्खलनं सखु क्षमो यदि न मन्यसे ।
रोमालिव्याजसंख्यानं शपथं सन्धि ! कारय ॥"
अपरस्त्रीसम्भोगदर्शनादिजन्मा यथा,—
"दयितस्य निरीक्ष्य भालदेशं
चरणालक्तकचित्रितं सपत्न्याः ।
शुशुभे नयनस्य कोणभागः
सुतिसक्ता शिखरोपमा बभूवुः ॥"

इति रसमञ्जरी ॥

ग्रहः । इति मेदिनी । ने, १५ ॥ (परिच्छेदके, त्रि । यथा, ऋग्वेदे । ७ । ८८ । ५ ।
"हस्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्ते ।"
"मान्त्यस्मिन् सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः ।" इति तद्भाष्ये सायनः ॥ पुं, मन्त्रः । यथा, ऋग्वेदे । १ । १८९ । ८ ।
"अनीषाम विवचमान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।"
"मीयत इति मानो मन्त्रः तस्य सूनुरग्निः मन्त्रेणोत्पद्यमानत्वात् षष्ठ्यर्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥ निर्माता । यथाच । १० । १४४ । ५ ।
"यं ते श्येनश्चारुमवृकं पदाभरदरुणं मान-मन्धसः ।"
"मानं यागद्वारा निर्मातारम् ।" इति तद्भाष्ये सायनः ॥)

मानकं, क्ली, पुं, (मानं इयत्तुपरिमाणमस्य । "शेषाद्विभाषा ।" ५ । ४ । १५४ । इति कप् ।) मानकम् । मानकचु इति भाषा ।
"कचोरु पिण्डिका प्रोक्ता पिण्डालुर्मानके ।"

इति शब्दचन्द्रिका ॥

"स्थूलकन्दो महाकन्दः स्थूलपत्रस्तु मानकः ।"

इति रत्नमाला ॥

अस्य गुणाः ।
"मानकं स्वादु शीतञ्च गुरु शोथहरं कटु ।"

इति राजवल्लभः ॥

अपि च ।
"मानकः स्यान्महापत्रः कथ्यते तद्गुणा अथ ।
मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥"

इति भावप्रकाशः ॥

(विषयोऽस्य यथा,—
"पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यस्तं पायसन्तु तत् ॥
हन्तु वातोदरं शोथं यदृणीं पाण्डुतामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥"
इति वैद्यकचक्रपाणिसंग्रह उदराधिकारे ॥)

मानग्रन्थिः, पुं, (मानस्य ग्रन्थिरिव । बाधकत्वात् ।) अपराधः । इति हारावली ॥ (मानस्य ग्रन्थिः । अभिमानवर्द्धनम् । यथा, छन्दोमञ्जर्याम् । ५ । ७ ।
"केशवबंशजगीतिरलौकमनोभवबन्धविरोधी जयति ।
गोपीमानग्रन्थिविमोचनी दिव्यगायनमाधुर्या ॥")

मानधानिका, स्त्री, कर्कटी । इति शब्दमाला ॥

माननीयं, त्रि, (मान्यते पूज्यते इति । मान+अनीयर् ।) मान्यम् । यथा,—
"मानो मान्योऽपि हरेषु माननीयः सुरा-सुरैः ।
स्थापयामि महादेवीं मानं देहि यशो मम ॥"

इति दुर्गोत्सवपद्धतिः ॥

मानरन्ध्रा, स्त्री, (मानार्थं समयपरिमाणज्ञापकं रन्ध्रमस्याम् ।) ताम्री । तांवी । इति भाषा । यथा,—
"ग्रामघोषोऽथ ताम्री स्यान्मानरन्ध्रा विकालिका ।"

इति त्रिकाण्डशेषः ॥

मानवः, पुं, (मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान् । मनु+अण् ।) मनोरपत्यम् । मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, महाभारते । १ । ७५ । १२—१३ ।
"मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत् ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥")
बालः । इति शब्दरत्नावली ॥ (मनुना प्रोक्तम् । मनु+अण् । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १३—१४ ।
"सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम् ॥")

मानवर्जितः, त्रि, (मानेन वर्जितः ।) मानरहितः । यथा, महाभारते । ३ । ४६ । ४८ ।
"तस्मात् त्वं नर्तनः पार्थ ! स्त्रीमध्ये मान-वर्जितः ।")
नीचः । इति धरणिः ॥

मानवी, स्त्री, (मानव+स्त्रीत्वात् ङीप् ।) मनुष्यस्त्रीजातिः । तत्पर्यायः । मानुषी २ मानुषी ३ नारी ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । ६ । ४१ ।
"दिवौकसं कामयते न मानवी
नवीनमश्वावि तवाननादिदम् ।")
शासनदेवताविशेषः । इति हेमचन्द्रः । १ । ४५ ॥ स्वायम्भुवमनुकन्या । इति महाभारतम् ॥ (यथा, भागवते । ३ । २१ । ३ ।
"स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम् ।")

मानवौघः, पुं, (मानवानां ओघः यस्मिन् ।) ताराविद्यायाः पीठस्य उत्तरे वायव्यादीशपर्यन्तं पूज्यगुरुपङ्क्तिविशेषः । यथा । ताराचक्रभानुमत्यम्बजयाम्बविद्याम्बमहोदर्यम्बसुखानन्दनाथपरानन्दनाथपारिजातानन्दनाथकुसुमेश्वरानन्दनाथविरूपाक्षानन्दनाथपादुका: पूजयेत् । एते मानवौघाः । तथा च तन्त्रे ।
"अथ तारागुरून् वक्ष्ये इष्टाद्दष्टफलप्रदान् ।
कालकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ।
दिव्यौघाः सिद्धिदा यत्र । सिद्धौघान् शृणु
यत्नतः ।
वशिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः ।
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्-
गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ।
सुखानन्दः परानन्दः पारिजातः कुसुमेश्वरः ।
विरूपाक्षः भैरवी च कथितं तारिणीकुलम् ।
आनन्दनाथशब्दान्ता गुरवः धर्मसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपास्तु अम्बान्ताः परिकी-
र्तिताः ॥"

इति तन्त्रसारः ॥

मानव्यं, क्ली, (मानवानां समूहः इति । "ब्राह्मणमाणववाडवाद्यत् ।" ४ । २ । ४२ । इति यत् ।) मानवसमूहः । माणवानां समूहो माणव्यं विवारस्वमिति व्याः माणवो बालः । महीभ्रममध्यः इत्यमध्य इत्येके । इत्यमरटीकायां भरतः ॥ (मनोर्गोत्रापत्यं । "मनु+गोत्रादिभ्यो यम् ।" ४ । १ । १०५ । इत्यनेन यम् । मनुवंशीये, त्रि ।)

मानसं, क्ली, (मन एव । मनस् "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) मनः । इत्यमरः । १ । ४ । ३१ ॥ (यथा, मार्कण्डेये । १५ । ६१ ।
"यस्य दानतपोधीश परत्र च न भूतये ।
भवन्ति तस्य यज्ञानि परिणामे न मानसम् ॥")
तस्य गुणा यथा,—
"परापरज्ञं संकल्पाः पञ्च चैतच्च मानसे ।"

इति भाषापरिच्छेदः ॥

(मनसि भवो जातो वा । मनस्+अण् ।) मनोभवे, त्रि । यथा, मनुः । कर्ममानसम् ।
इत्यमरः । १ । ५ । ५ ।
"विषयेष्वभिसंरागो मानसो मल उच्यते ।"

इति कोशीखण्डे...।

मध्यंवामनमुखेन चातु-
र्मांश्यकामितोपायमगौर्वं ॥"

माध्वर्व, क्ली, (माध्वीव । पृषोदरादित्वात्साधु: ।) माध्वीकम् । इत्यमरटीकायां भानुदीक्षितः ॥

माध्वी, स्त्री, (मधुनो विकारः । मधु+अण् । ङीप् । "सारघाच्चाक्षमाध्वीति ।" ६ । ४ । १७५ । अपि त्रिषु चकारैर्यो निपातितौ ।) मद्यम् । इति त्रिकाण्डशेषः । मध्वादिजन्या सुरा । इति राजनिर्घण्टः । (यथा, मनौ । ११ । ९५ ।

"गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।"

मधु मधुररसोऽस्त्यस्य बहुलार्थ्ये अण् ।) मधुररसयुक्तः । इति शब्दरत्नावली । (मधुमति, त्रि । यथा, ऋग्वेदे । ७ । ७१ । १ ।

"हिरण्यवर्त्तं माध्वी चावीर्या नः ॥"

ई माध्वी । मधुमती । इति तट्टीकायां सायनः ॥ हरीतिकीव: । यथा, माघे । १० । ७१ ।

"तैस्त्रः प्राणा च माध्वी च ये मदौ मन्मथमानाम् ।")

माध्वीक, क्ली, (माध्वी+स्वार्थे कन् ।) मधूकपुष्पजमद्यम् । तत्पर्य्यायः । मध्वासवः २ माधवकः ३ मधु ४ । इत्यमरः । २ । १० । ४१ ॥ मधुमाध्वीकमित्थं चापीति केचित् । पुष्पौ तौ तुल्यमहौ । (यथा, महाभारते । १ । ९६० । १८ ।

"इदं हि पीता माध्वीकं पीता च मधुमाधवीम् ।

...वीपीत्वै कुर्दमानौ वाविदिनि यारे ।")

मदौ ध्वौ द्राक्षाविकारे । इति भरतः । माद्वीकमिति वा पाठः । इति रमानाथः । माध्वीकमिति माधवकमिति भानुदीक्षितः । (यथा, नैषधे । १६ । ११ ।

"यत्र चलिते माध्वीकं वा च वा मिष्टाशनः ।
कुसुमचयनहेतोः कुसुमकलिकोपधरोद्भवः ।
एव तु विवृते दाक्षीतमे द्राक्षाविवृमा
मधु विवस्वद्भारोसेवक्षुपानादरणामकम् ॥"

"माध्वीकं मधुरम् । इति तट्टीकायां चारित्रवर्द्धनः ॥) तत्पर्य्यायो यथा,—

"मधुमाधवमाध्वीकमाद्वाक्षमधौरिष्टम् ।
माध्वाररसोपघ्राणपुष्पोद्भवम् ॥"

इति भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे ॥)

माध्वीकफल:, पुं, (माध्वीकं मधुरम् फलमस्य ।) मधुनारिकेलः । इति राजनिर्घण्टः ।

माध्वीमधुरा, स्त्री, (माध्वीमधुरेव मधुरैव ।) मधुखर्ज्जूरिका । इति राजनिर्घण्टः ।

मान, कि अर्च्चे । इति कविकल्पद्रुमः । (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) कि मानयति मानति । इति दुर्गादासः ।

मान, ङ विचारे । अर्च्चे । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) ङ मीमांसते धीरः । अर्थान्तरे निवारणे च स्तुतिरिति रमानाथः । इति दुर्गादासः ।

मानं, क्ली, (मीयतेऽनेनेति । मा+करणे ल्युट् ।) परिमाणम् । तत्पर्य्यायः । पौतवम् २ द्रवयम् ३ पाय्यम् ४ पौतवम् ५ । तत्तु तुलाङ्गुलिप्रस्थैस्त्रिविधं भवति । तत्र तुलायां पौतवम् । अङ्गुल्या द्रवयादि । प्रस्थेन पाय्यादि । इत्यमरभरतौ ॥ प्रमाणम् । इति मेदिनी । ने, ११ ॥ अथ मानो त्रिविधम् । तदेव द्रव्यमाने । लघुदीर्घम् । घनं विषमं अनौनं अनागतम् । इति वङ्गीतप्रकाशम् ॥०॥

अथ मानपरिभाषा ।

"न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया ॥
चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः ।
विहाय सर्व्वमानानि मागधं मानमुच्यते ॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः ।
त्रसरेणुस्तु पर्य्यायनाम्ना वंशीति कथ्यते ॥
जालान्तरगतैः सूर्य्यकरैर्वंशी विलोक्यते ।
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥
षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधान्यकौ ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ।
कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः पाणिमानिकः ।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम् ।
विडालपदकञ्चैव तथा षोडशिका मता ।
करमध्यो हंसपदं सुवर्णं कवलग्रहम् ।
उदुम्बरञ्च पर्य्यायैः कर्ष एव निगद्यते ।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा ।
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ।
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्त्यते ।
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते ।
प्रसृतिभ्यामञ्जलिः स्यात् कुडवोऽर्द्धशरावकः ।
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका ।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकः ।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलश्च सः ।
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्म्मणः ।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ।
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः ।
शूर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च सा

स्मृता ।

द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ।
चतुःसहस्रपलिका षण्णवत्यधिका च सा ।
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः ।
तुलाप्रमाणशतकं शतमानं तथैव च ।
माषटङ्काक्षबिल्वानि कुडवः प्रस्थमाढकम् ।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम् ।
गुञ्जादिमानमारभ्य यावत् स्यात् कुडवस्थितिः ।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ।
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः ।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम् ।
मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम् ।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत् ॥"

इति मानपरिभाषा ॥०॥

अथ कालिङ्गमानम् ।

"यवो गन्धादयो ज्ञेया द्वादशगौरसर्षपाः

यवी ।

यवस्तु माषा तद्द्वौ गुञ्जा प्रोक्ता तद्द्वयकम् ।
षडौ वल्लमभिहितः कर्षैः प्रोच्यते बुधैः ।
अष्टवल्लैर्गुञ्जा स्यात् निष्को धर्म्म उच्यते ।
माषो गुञ्जाभिर्दशभिः षड्भिर्वा भवेत् क्वचित् ।
चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च ।
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषिकः ।
चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः ।
चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्व्ववन्मताः ।
कलिङ्गानाञ्च मानानां कालमानेऽपि वर्णितम् ।
प्रस्तार्य बोद्धव्यो च दृष्ट्वा मानं प्रयोजयेत् ।
चरके चरकोक्तं च सुश्रुतोक्तं च सुश्रुते ।
मागधमानञ्च दोषाय यथा दत्त्वा प्रयुज्यते ॥"

इति मानपरिभाषा । इति भावप्रकाशः ॥

मानः, पुं, (मन्यते पूज्योऽनेन इति । मन+घञ् ।) चित्तसमुन्नतिः । इत्यमरः । १ । ७ । २१ ॥ चित्तस्य समुन्नतिरुत्कर्षः मानः । कार्य्ये यथा-युक्तं नैव कार्य्यमिति चित्तोत्कर्ष इति । अहङ्कारो वाक्यमिति अपरे मानः । इति तट्टीकायां भरतः ॥ (यथा, मनौ । ४ । १८६ ।

"दैवं प्रयत्नं मानञ्च त्रीणि पुण्यानि वर्द्धयेत् ।")

आत्मनि पूज्यत्वबुद्धिः । इति नीलकण्ठः ॥ अपराधेऽतिकोपेनाभिव्यक्तिः । यथा,—

"स्त्रीणामीर्ष्या कृतो मानः कोपोऽन्यासङ्गिनि प्रिये ।
मानोऽस्यापि स्थाप्यो ह्यूहमानोऽन्यतः सविभावः ॥"

इत्युज्ज्वलनीलमणिः ।

दुष्पकम् । यथा,—

"आधानः कोपितस्यापि चाञ्चल्यस्य

प्रकरणः ।

माध्वीकफलः, पुं, ...

उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥
मानो हि मूलमर्थस्य माने म्लाने धनेन किम् ।
प्रध्वस्तमानदर्पस्य किं धनेन किमायुषा ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां
धनम् ॥"

इति मार्कण्डे ११५ अध्यायः ॥

प्रियापराधसूचिका चेष्टा मानः । स च लघु-र्मध्यमो गुरुश्चेति । अल्पापनेयो लघुः । कष्टापनेयो मध्यमः । कष्टतमापनेयो गुरुः । अस्यान्तु रसाभासः । अपरस्त्रीदर्शनादिजन्मा लघुः । गोत्रस्खलनादिजन्मा मध्यमः । अपरस्त्रीसम्भोगदर्शनादिजन्मा गुरुः । अन्ययासिद्ध-कुतूहलाद्यपनेयो लघुः । अन्ययावाद्यप्रपथाद्यपनेयो मध्यमः । चरणपातभूषणदानाद्यपनेयो गुरुः । अपरस्त्रीदर्शनादिजन्मा यथा,—

"स्वेदाम्बुभिः क्वचन पिच्छिलमङ्गभूमौ
रामोदरि क्वचन कण्टकितञ्चकास्ति ।
अन्यां विलोकयति भाषयति प्रियेऽपि
मानः क धास्यति पदं तव तन्न विद्मः ॥"

गोत्रस्खलनादिजन्मा यथा,—

"यद्गोत्रस्खलनं तत्तु क्षमो यदि न मन्यते ।
रोमालिव्यालसंस्पर्शं शपथं सन्वि ! कारय ॥"

अपरस्त्रीसम्भोगदर्शनादिजन्मा यथा,—

"दयितस्य निरीक्ष्य भालदेशं
चरणालक्तकपिञ्जरं सपत्न्याः ।
सुदृशो नयनस्य कोणभागः
श्रुतिमुक्ताः शिखरोपमा बभूवुः ॥"

इति रसमञ्जरी ॥

ग्रहः । इति मेदिनी । ने, १५ ॥ (परिच्छेदके, त्रि । यथा, ऋग्वेदे । ७ । ८८ । ५ ।

"इदन्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्ते ।"

"मान्यन्ति सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः ।" इति तद्भाष्ये सायनः ॥ पुं, मन्त्रः । यथा, ऋग्वेदे । १ । १८९ । ८ ।

"अनोपाम विवचनान्यस्मिन्मानस्य सूनुः
सहसाने अग्नौ ।"

"मीयत इति मानो मन्त्रः तस्य सूनुरग्निः मन्त्रेणोत्पद्यमानत्वात् षष्ठ्यर्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥ निर्माता । यथाचैव । १० । १२४ । ५ ।

"यं वै श्लेनमादमनकं महाभरद्वयं मान-
मन्यतः ।"

"मानं धातदारा निर्मातारम् ।" इति तद्भाष्ये सायनः ॥)

मानकं, क्ली, पुं, (मानं इयत्तुपरिमाणमस्य । "प्रैमादिमाना ।" ५ । ४ । १५४ । इति कप् ।) मानकम् । मानकचु इति भाषा ।

"कन्दो तु पिच्छिला प्रोक्ता त्रिलोकपर्णमानके ।"

इति शब्दचन्द्रिका ॥

"स्थलकन्दो माण्यकन्दः स्थलपद्मस्तु मानकः ।"

इति रत्नमाला ॥

अस्य गुणाः ।

"मानकं स्वादु शीतञ्च गुरु शोथहरं कटु ।"

इति राजवल्लभः ॥

अपि च ।

"मानकः स्यान्महापत्रः कथ्यते तद्गुणा अथ ।
मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥"

इति भावप्रकाशः ॥

(विषयोऽस्य यथा,—

"पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यस्येत् पायसन्तु तत् ॥
हन्तु वातोदरं शोथं ग्रहणीं पाण्डुतामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥"

इति वैद्यकचक्रपाणिसंग्रहे उदराधिकारे ॥)

मानग्रन्थिः, पुं, (मानस्य ग्रन्थिरिव । बाधकत्वात् ।) अपराधः । इति हारावली ॥ (मानस्य ग्रन्थिः । अभिमानवर्द्धनम् । यथा, छन्दोमञ्जर्याम् । ५ । ७ ।

"केशवस्य जगौतिर्लोकमनोज्ञगहारिणी जयति ।
गोपीमानग्रन्थिविमोचनी दिव्यगायनाश्चर्या ॥")

मानधानिका, स्त्री, कर्कटी । इति शब्दमाला ॥

माननीयः, त्रि, (मान्यते पूज्यत इति । मान + अनीयर् ।) मान्यम् । यथा,—

"मानो मान्योऽसि हर्षेषु माननीयः सुरा-
सुरैः ।
स्नापयामि महादेवीं मानं देहि नमो मम ॥"

इति दुर्गोत्सवपद्धतिः ॥

मानरन्ध्रा, स्त्री, (मानार्थं समयपरिमाणज्ञापकं रन्ध्रमस्याम् ।) ताम्री । ताँबी । इति भाषा । यथा,—

"यामघोषोऽथ ताम्री स्यान्मानरन्ध्रा चिका-
लिका ।"

इति त्रिकाण्डशेषः ॥

मानवः, पुं, (मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान् । मनु + अण् ।) मनोरपत्यम् । मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, महाभारते । १ । ७५ । १०—११ ।

"मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत् ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥")

बालः । इति शब्दरत्नावली ॥ (मनुना प्रोक्तम् । मनु + अण् । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १३—१४ ।

"सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम् ॥")

मानवर्जितः, त्रि, (मानेन वर्ज्जितः ।) मानरहितः । यथा, महाभारते । १ । ८६ । ४८ ।

"तस्मात् त्वं नर्मिनः पार्थ ! स्त्रीमध्ये मान-
वर्ज्जितः ।")

क्लीबः । इति धरणिः ॥

मानवी, स्त्री, (मानव + स्त्रीत्वात् ङीप् ।) मनुष्य-स्त्रीजातिः । तत्पर्यायः । मानुषी २ मानुषी३ नारी ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । ६ । ४१ ।

"दिवौकसं कामयते न मानवी
नवीनमत्रापि तवाननादिदम् ।")

शासनदेवताविशेषः । इति हेमचन्द्रः ॥१॥४५॥ स्वायम्भुवमनुकन्या । इति महाभारतम् ॥ (यथा, भागवते । ३ । २१ । ६ ।

"स वै देवर्षिवर्य्यस्तां मानवीं समनुव्रताम् ।")

मानवौघः, पुं, (मानवानां ओघः यस्मिन् ।) तारा-विद्यायाः पीठस्य उत्तरे वायव्यादीशानपर्यन्तं पूज्यगुरुपङ्क्तिविशेषः । यथा । ताराश्व्यमभानुमत्यम्बजयाम्बविद्याम्बमहोदर्य्यम्बसुखानन्दनाथ-परानन्दनाथपारिजातानन्दनाथकुसुमेश्वरानन्द-नाथविरूपाक्षानन्दनाथपर्य्यन्ताः पूजयेत् । एते मानवौघाः । तथा च तन्त्रे ।

"अथ तारागुरून् वक्ष्ये इष्टाइष्टफलप्रदान् ।
अहैकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स ! सिद्धौघान् शृणु
यत्नतः ।
वशिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि सद्-
गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुसुमेश्वरः ।
विरूपाक्षः पैरवी च कथितं तारिणीकुलम् ॥
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकी-
र्त्तिताः ॥"

इति तन्त्रसारः ॥

मानव्यं, क्ली, (माणवानां समूहः इति । "ब्राह्मण-माणववाडवाद्यत् ।" ४ । २ । ४२ । इति यत् ।) माणवसमूहः । माणवानां समूहो माणव्यं विकारसंयोग इत्यतः माणवो बालः । गर्हैव-मध्यः दन्त्यमध्य इत्येके । इत्यमरटीकायां भरतः ॥ (मनोर्गोत्रापत्यं । "मनु + गोत्रादिभ्यो यञ् ।" ४ । १ । १०५ । इत्यनेन यञ् । मनु-वंशीये, त्रि ॥)

मानसं, क्ली, (मन एव । मनस् "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) मनः । इत्यमरः ।१।४।३१ ॥ (यथा, मार्कण्डेये । १५ । ६१ ।

"महदानवपीडेव परत्र च न भूतये ।
भवन्ति तस्य पञ्चार्त्तेमरिजाधि च मानसम् ॥")

तस्य गुणा यथा,—

"पराणत्वं संस्कारः पञ्च वैशेष मानसे ।"

इति भाषापरिच्छेदः ॥

(मनसि भवो जातो वा । मनस् + अण् ।) मनोभवे, त्रि । यथा, चतुर्व्वर्गः कर्म्ममानसम् ॥ इत्यमरः । १ । ५ । १ ॥

"विषयेन्द्रियसंरागो मानसो मत उच्यते ।"

इति वैद्यकपरिभाषा ॥

"मनुष्याश्चर्यवीर्येण समेतं मानसी कथा ॥"

इति शब्दः ॥

मानसवादी यथा,—

"मानसोदिवसमयस्यरमीसमोर्वसिद्धयः ।
दौर्भाग्यवतामवैश्वर्यं मानसैःप्रियमानयः ॥
मानसोऽपि प्रियमाणः माप्तो भवति दैवतः ॥"

इति विष्णुपुराणे ५ अंशे ५ अध्यायः ॥

चिदिवमानसबर्थः । यथा,—

"मानसमेव मयानां सनमाचिदर्चितम् ।
दिनमानस्वेदेऽच चिदिदं कर्म मानसम् ॥"

इति सिद्धान्तशिरोमणिः ॥

मानसलीला यथा,—

मानसोदयोमनोभवमानीनमरेश्वरेश्वरम-
विस्मयवायमानसर्वमनसः । अथवा ।
मानसवनमानसवर्षमानसस्वमानसरसः ।
इति भारतवाक्यः ॥ ७ ॥ (मनसा कल्पितं मन-
सिजम् ।) मनोरमविशेषः । इति मेदिनी ।
स, ११ । स च कैलासे ब्रह्मणा निर्मितः ।
यथा,—

"कैलासपर्वते राजन् मनसा निर्मितं परम् ।
ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः ॥
तस्मात् सुस्राव सरयूः सरोरूपा पुरानघा ।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥"

इति रामायणे आदिकाण्डे २४ सर्गः ॥७॥

(पुं, नागविशेषः । यथा, महाभारते १ । ५७ । ६ ।
"सुमानसः कपोतश्च तुरगो मानसो नगः ।"
वाराणसीतीर्थस्थ कुण्डविशेषः । यथा, काशीखण्डे ।
९९ । ७१ ।

"मित्रस्य वाणिनस्यैव मानसं तीर्थमुत्तमम् ।
तत्रैव मानसस्यैव कुण्डस्य धर्मसंस्थितम् ॥"

पुष्करतीर्थस्थतीर्थविशेषः । यथा, मात्स्ये ।
"तीर्थाणि परिमितः सन्ति मानसो मितः ॥")

मानसचक्रः, पुं, (मानसेन चक्रो यस्य ।) सिवा
कर्मेन्द्रियवारकम् । यथा,—

"दिवा दशसहस्राणि कर्मेन्द्रियकारिणाम् ।
तत्र सर्वेषु देवेषु मानसः स मनः स्मृतः ॥
तस्मात् दिव्यो मानसेन । यथा च ।
"मनुष्येषु पुंसकोऽपि सर्वज्ञानेषु मान-
सम् ।
मनोवाक्यो दिव्यान् ब्रह्मचैव सहात्मकम् ।
न योगी मानसे काले सर्वज्ञोऽपि भवेत् ॥"

इति तन्त्रसारः ॥

मानसतीर्थं, क्ली, (मनसं तीर्थम् । तीर्थानां
सर्वेषां मतम् ।) तीर्थविशेषः । यथा,
तत्र,

तत्र उवाच ।

"तीर्थानि कथितान्येव भौमानि शृणु सत्तम ।
मानसानीह तीर्थानि कथ्यन्ते विस्तरतः ॥
सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः ॥"

इति काशीखण्डपुराणे ६ अध्यायः ॥

मानसपूजा, स्त्री, (मानसेन पूजा । शाक-
पार्थिववत् समासः ।) मनोरूपेण सम्पादित-
पूजनम् । यथा, कुलार्णवे देवीं विभाव्य
कुर्यादात्मसमर्पणं सर्वदा मानसं पूजा-
मारभेत् । ततो मानसपूजां कृत्वा हृदय-
कमलमध्ये प्रदीपकलिकाकारां ध्यायेत् मान-
सीयं शक्तिं । पूर्वविहितेन तत्त्वेन आवाह्य ।
पाद्यार्घ्यं विधाय सुधां दत्त्वा आचमनीयं
स्नानार्थं तथा गन्धपुष्पं धूपं दीपं नैवेद्यं
इत्यादि क्रमेण दत्त्वा पुष्पाणि च प्रदाप-
येत् । तत्रैव अर्घ्यं दीपं वाचकं धूपं दद्यात्
चामरं व्यजनं दर्पणं छत्रं गन्धं पुष्पं दद्यात्
नैवेद्यं पायसं तारपूर्ण पात्रं सर्वस्वमिति
मनसा निवेदयेत् । ततः सुधासमुद्रं मणि-
मण्डपं ब्रह्माण्डपुरीं मायया दद्यात् ।

"मनोमयैर्मनसा मन्त्रादिविरचितैः ।
पूजयेदिष्टदेवं तं मनसा परमेश्वरीम् ॥"

एवं संपूज्य अधिदेव मनः कार्यः । इति तन्त्र-
सारे विष्णुपूजाक्रमः ॥ ७ ॥ मानसपूजा
यथा, गौतमीये ।

"ततो मानसमार्गेण पूजयेत् परमेश्वराम् ।
कल्पिताः सर्ववस्तूनां तत्पूजानुसारेण च ॥
पादुकौ मार्गे नक्रं नैवेद्यं कुर्यादेव च ।
तत्रैव वायुगन्धं आकाशं नैवेद्यं मोदकम् ।
अमृतं जलमर्घ्यं ज्योतिरेव दीपमेव च ।
तत्र वायुधर्मं धूपादिकं चन्द्रानमुक्तं पुनः ॥
कर्पूरं तारार्थं भक्त्या च समर्पयेत् तुषारे ॥"

अपि च ।

"सिन्दूरं विन्दिता तु मानसैरुपचारकैः ।
मौलिकैः पुष्पैर्दद्यात् सुमानसमर्चितैः ।
मृत्पात्रादिमयैर्दिव्यैर्विधिवत्पूजिकैः ।
कलिकायुक्तमध्ये तु सन्ध्यामानसयुक्ता तथा ।
अङ्गुष्ठेन समायोगात् सुदृढं च कौलिकाः ।
पुष्पिकाञ्जलयः सर्वदा मानसादिकमर्पयेत् ।
पूजा मानसतः कृत्वा पीठे पीठे सर्वदाऽपि ।
दशाङ्गं च नैवेद्यं पूजा मनोविभावितैः ।
तत्र वायुधर्मं सदा मनसा तत्पूजनं सुधीः ॥"

इति कुलार्णवे ।

अन्यच्च ।

"मानसैरुपचारैश्च संपूज्य कामदेवताम् ।
सर्वं भूताशयं ध्यानादयसारं तत् परम् ॥
मनः प्राणार्थं देहं विचार्य दीपकेन च ।
नैवेद्यमन्नं दद्यात् बाह्यैर्वस्त्रालङ्कारम् ॥
चामरं छत्रं मनसा गन्धाख्यं दद्याच्च ।
तत्र पूजनादिमानसैः पुष्पाञ्जलिं चरेत् ।
मनसा हि सर्वं कृत्वा समाप्य सर्वं तदेव ॥"

इति मनुस्मृतितन्त्रम् ॥

पुष्पाञ्जलिम् । विभज्य आकाशादिगन्धरस-
तत्त्वमयस्वरूपेण पुष्पगन्धमिति मानसे-
नैवोपचारसमर्पणम् । कथितान्यां यं पृथि-
व्यात्मकं गन्धं समर्पयामि नमः । वाय्वात्मकं
धूपं प्राणात्मकं पुष्पं समर्पयामि नमः । तेज-
आत्मकं दीपं समर्पयामि नमः ।
अमृतात्मकं नैवेद्यं समर्पयामि
नमः । सर्वात्मकं ताम्बूलं सर्वं
समर्पयामि नमः । इति कुलार्णवतन्त्र-
पूजादीपिका मन्त्रविधानम् ॥

मानसवर्त्तं, क्ली, (मानसवर्त्तं सरः । शाकपार्थि-
ववत् समासः ।) वर्त्तिविशेषः । यथा,—

"कर्त्तव्या पञ्चसंवर्त्तं सर्वमयसमस्तकम् ।
एतानि मानसान्याहुर्वेदानि तु सरांसि ॥"

इति ब्रह्मपुराणम् ॥

मानसालयः, पुं, (मानसे आलयो यस्य ।) हंसः ।
इति हारावली ॥

मानसिकं, त्रि, (मानस + ठञ् ।) मनोभवम् ।
मानसप्रभवात् चित्तसम्भवं विषयम् ॥ (पुं,
विष्णुः । यथा, महाभारते । १३ । १४९ ।
"नमस्ते देवदेवेश । निर्गुण ।
निर्गुण । मानसिक । मानसाख्य ॥")

मानसी, स्त्री, (मानस + स्त्रियां ङीप् ।) विद्या-
देवीविशेषः । इति हेमचन्द्रः ॥ ११ ॥ मनो-
भवा च । (यथा, विष्णुपुराणे । १ । ७ । ६ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ॥")

मानसूत्रं, क्ली, (मानस्य मानप्रमाणस्य वा
सूत्राणि वा सूत्रम् ।) कटिदेशिकासूत्र-
सूत्रम् । इति अमरः । गोट् इति भाषा ॥

मानसौकाः, [स्] पुं, (मानसं सर ओको स्थानं
यस्य ।) हंसः । इत्यमरः । ३ । ५ । २२ ।
(यथा, महाभारते । ५ । ३२ । ११ ।
"एवं गन्धर्वराजेन मुक्तो मानसौकसः ॥")

मानिका, स्त्री, (मानयति सर्वान् । मान +
णिच् + ण्वुल् टाप् अकारस्येत्वम् ।) मद्यम् ।
इति शब्दचन्द्रिका ॥ (मानं प्रमाणमिति । मान
+ कन् ।) अष्टपल परिमाणम् । इति वैद्यकपरिभाषा ।
सेर इति भाषा ॥

मानिनी, स्त्री, मानो अस्याः । इति मेदिनी । न,
१०८ । (मानं अस्त्यस्याः । मान + इनिः । ङीप् ।)
मानवती च । (यथा, श्रीमद्भागवते । ५ । २ ।
"करोति मिथुनानि यथा चकोरे ।
विस्मयमिव सृजसि मन्त्रि । सर्वे स्म
मानी मानिनी मानिनि । मामके ॥"
अभिमानवती च । यथा, कुमारे ५ । २१ ।
"इदं मनोरथवतीं यदि
अनुरूपमात्मनः मानिनी ।
जगत्पार्थं सम्प्राप्य विस्मयात्
विचारयन्ती यमनुग्रहणीयमिति ॥"
"मानिनीमानसोल्लासनीयदन्तदर्शनसंवर्धनेन
मानवी ।" इति साहित्यदर्पणः ॥)
शालवृक्षस्य स्त्री । यथा, भागवते ॥ ५ । ७ ॥

"विदूरथस्य तनया दाक्षिणात्यस्य भूभृतः ।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")

मानी,[न्]त्रि,(मानोऽस्यास्तीति । मान+इनिः ।) मानविशिष्टः । इति मेदिनी । ने, १०८ ॥ (यथा, मार्कण्डेये । १२१ । २९ ।
"ततस्ते भूभृतः सर्व्वे बहुशस्तेन मानिना ।
निराकृताः सुनिर्व्विण्णाः प्रोचुरन्योन्यमाकुलाः ॥")
सिंहः । इति राजनिर्घण्टः ॥

मानुषः, पुं, (मनोर्जातः । मनु+"मनोर्जातावञ्यतौ षुक् च ।" ४ । १ । १६१ । इत्यण् षुगागमश्च ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, मनौ । ९ । २८४ ।
"चिकित्सकानां सर्व्वेषां मिथ्याप्रचरतां दमः ।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥"
मनुष्यस्येदम् । अण् । मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १३ । ६ । २० ।
"कृत्वा मानुषं कर्म्म यो दैवमनुवर्त्तते ।
वृथा श्राम्यति संप्राप्य पतिं क्लीवमिवाङ्गना ॥")

मानुषिकं, त्रि, (मनुष्यस्य भावः कर्म्म वा । मनुष्य+ठञ् ।) मनुष्यस्य कर्म्मादि । मनुष्यस्येदमित्यर्थे ठिकप्रत्ययेन निष्पन्नम् ॥

मानुषी,स्त्री,(मानुषस्य स्त्री । मानुष+जातित्वात् ङीष् ।) मनुष्यस्त्रीजातिः । यथा,—
मनुष्यी मानुषी नारी मानवी मानुषस्त्रियाम् ।
इति शब्दरत्नावली ॥
(मनुष्य+अण्+ङीप् ।) चिकित्साविशेषः । यथा,—
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता ।"
इति शब्दचन्द्रिका ॥

मानुष्यं, क्ली, (मनुष्यस्य भावः । मनुष्यस्येदमिति वा । मनुष्य+ष्यञ् ।) मनुष्यस्य भावः । मनुष्यत्वम् । (यथा, भागवते । ४ । २३ । २८ ।
"स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ।
लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥")
मनुष्यशरीरम् । यथा,—
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वे याज्ञवल्क्यवचनम् ॥
(मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १ । १५१ । ११ ।
"गच्छ जानीहि के त्वेते शेरते वनमाश्रिताः ।
मानुष्यो बलवान् गन्धो घ्राणं तर्पयतीव मे ॥")

मानुष्यकं, क्ली, (मनुष्याणां समूहः । मनुष्य+"गोत्रोक्षोष्ट्रोरभ्रेति ।"४।२।३९। इति वुञ् ।) मनुष्यसमूहः । इत्यमरः ।३।२।४१। (मनुष्यस्येदं मानुष+यत् । स्वार्थे कन् । (मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ७७ । ८ ।
"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम् ।
कृतं मानुष्यकं कर्म्म दैवेनापि विरुध्यते ॥")

मानोज्ञकं, क्ली, (मनोज्ञस्य भावः कर्म्म वेति । "द्वन्द्वमनोज्ञादिभ्यश्च ।" ५ । १ । १३३ । इति वुञ् ।) मनोज्ञता । मनोज्ञस्य भाव इत्यर्थे वुञ् प्रत्ययेन निष्पन्नम् ॥

मान्द्यं, क्ली, (मन्दस्य भावः कर्म्म वा । मन्द+"पत्यन्तपुरोहितादिभ्यो यक् ।"५।१।१२८। इति यक् ।) रोगः । इति हेमचन्द्रः ॥ मन्दता च । (यथा, कथासरित्सागरे । २४ । १९५ ।
"विश्वस्तं च ततस्तस्मिन् पुरोधसि चकार सः ।
मान्द्यमल्पतराहाररसग्नौ रसततसुन्देवा ॥")

मान्धाता, [ऋ] पुं, (मां धास्यतीति । धेट्+तृच् ।) युवनाश्वराजपुत्रः । तत्पर्य्यायः । युवनाश्वजः २ । इति हेमचन्द्रः । ३ । ३६४ । तद्विवरणं यथा । 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत् । तस्य च पुत्रस्यानिर्व्वेदान्मुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता । तस्याञ्चार्द्धरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलशं वेदीमध्ये निवेश्य ते मुनयः सुषुपुः । सुप्तेषु च तेषु अतीव तृट्परीतः स भूपालस्तमाश्रमं विवेश । सुप्तांश्च तानृषीन् नैवोत्थापयामास । तच्च कलशमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ । प्रबुद्धाश्च ऋषयः पप्रच्छुः । केनैतन्मन्त्रपूतं वारि पीतम् । अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति । इत्याकर्ण्य स राजा अजानता मया पीतमित्याह । गर्भश्च युवनाश्वोदरेऽभवत् । क्रमेण च ववृधे । प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्चक्राम । न चासौ राजा ममार । जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः । अथागम्य देवराडब्रवीत् । मामयं धास्यति । ततोऽसौ मान्धाता नामतोऽभवत् । वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ । तांश्चामृतस्राविणीमास्वाद्याह्नैवैकेन व्यवर्द्धत । स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे । भवति चात्र श्लोकः ।
"यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"
मान्धाता शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे । पुरुकुत्समम्बरीषं मुचुकुन्दञ्च तस्यां पुत्रत्रयमुत्पादयामास । पञ्चाशच्च दुहितरस्तस्यामेव तस्य नृपतेर्बभूवुः ।" इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः, त्रि, (मान्यत इति । मान+कर्म्मणि यत् ।) अर्च्यः । तत्पर्य्यायः । पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५ । इति जटाधरः ॥ (यथा च मनौ । २ । १३९ ।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।"
प्रार्थनीयः । यथा, रामायणे । २ । ८ । १८ ।
"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौशल्यातोऽतिरिक्तञ्च मम शुश्रूषते बहु ॥"
"मान्यः प्रार्थनीयः श्रेयस्करः । यथा तद्वत् ।" इति तट्टीकायां रामानुजः ।)

मान्यस्थानं, क्ली, (मान्यस्य स्थानं ।) पूज्यत्वकारणम् । यथा,—
"वित्तं बन्धुर्व्वयः कर्म्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥"
इति मानवे २ अध्यायः । कौर्म्मे ११ अध्यायेऽप्येवम् ॥

मान्या, स्त्री, (मान्य+स्त्रियां टाप् ।) मत्स्याक्षी । यथा,—
"अग्निर्मान्या तु मान्या च मत्स्याक्षा च मोचका ।"
इति शब्दमाला ॥
पूज्या च ॥

मापत्यः, पुं, (मा विद्यतेऽपत्यमस्य ।) कामः । इति जटाधरः ॥

मापनः, पुं, (मापयति स्वर्णादिकमनेनेति । मा+णिच्+करणे ल्युट् ।) तुला । इति शब्दचन्द्रिका । परिमाणे, क्ली । (स्त्रियामप्यत्र । यथा, महाभारते । १ । ५१ । १५ ।
"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता ॥")

मामकं, त्रि, (ममेदम् । अस्मद्+"तवकममकावेकवचने ।" ४ । ३ । ३ । इति अण् ममकादेशश्च ।) मदीयम् । इति मेदिनी । के, १९८ ॥ (यथा, महाभारते । १ । १०२ । १२ ।
"ततो मामाह स मुनिर्गर्भस्थस्तव मामकम् ॥")
ममतायुक्तः । इति शब्दमाला ॥ यथा च महाभारते । ४ । ५० । १७ ।
"अथवा मामिका बुद्धिः श्रूयतां यदि रोचते ॥")

मामकः, पुं, (माम+स्वार्थे कन् ।) मातुलः । इति मेदिनी ॥ के,१९८॥ ममायं वा ममेदमिति बुद्धिर्यस्य । कप् ।) कृपणः । इति शब्दमाला ॥

मामकीनं, त्रि, (ममेदम् । अस्मद्+"तवकममकावेकवचने ।"४। ३ । ३। इति खञ् । ममकादेशश्च ।) मदीयम् । ममेदमित्यर्थे खीने कृते अस्माद एकवचनादेशे अस्य च ममकादेशे कृते मामकीनम् । इति दुर्गादासः ॥ (यथा, कथासरित्सागरे । ३९ । १४३ ।
"एतच्च मे क्षमत् किं हि न युष्मा वाक्यपाल-
नम् ।
प्रदानं मामकीनं च श्रूयतां वर्णयामि ते ॥")

मायः, पुं, (माया अस्त्यस्येति । माया+अर्श आदित्वादच् ।) पीताम्बरः । (यथा, महाभारते । १२ । ४७ । ३११ ।
"नमो विश्वाय मायाय चिन्त्याचिन्त्याय ते नमः ॥")
(मयस्यापत्यं पुमान् । मय+अण् ।) असुरः । इति मेदिनी । ये, ३६ ॥

माया, स्त्री, (मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति । मा+"माछाससिसूभ्यो यः ।" उणा० ४ । १०९ । इति यः टाप् ।) दम्भाचारः

"अनूढामन्नपीड्वेव ममेयं मानसी व्यथा ॥"
इति प्राञ्चः ॥
मानसतापो यथा,—
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्या मात्सर्यादिमयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥
त्रिविधमानसकर्म । यथा,—
"परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥
मानसरोगा यथा,—
कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्य-
विषादेर्ष्यासूयामात्सर्यप्रभृतयः । अथवा ।
उन्मादापस्मारमूर्च्छाभ्रमतमःसंन्यासप्रभृतयः ।
इति भावप्रकाशः ॥ ● ॥ (मनसा ब्रह्मणैव कल्पितत्वात् ।) सरोवरविशेषः । इति मेदिनी । से, ११ ॥ स च कैलासे ब्रह्मणा निर्म्मितः । यथा,—
"कैलासेऽपि गुह्यभ्यो दानवेभ्यश्च कल्पितः ।
मन्दराद्युतगम्भर्वैर्नित्यं सेवितकन्दरः ॥
श्रीमान्मनोहरश्चैव नित्यं पुष्पितपादपः ।
हेमपुष्करसंछन्नं तेन वैखानसं सरः ॥
कल्पितं मानसञ्चैव राजहंसनिषेवितम् ॥"
इति महाभारते हरिवंशे मार्कण्डेये २२८अः ॥
अपि च ।
"कैलासपर्व्वते राम ! मनसा निर्म्मितं परम् ।
ब्रह्मणा नरशार्दूल ! तेनेदं मानसं सरः ॥
तस्मात् सुस्राव सरसः सायोध्यामुपगूहते ।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥"
इति रामायणे आदिकाण्डे २४ सर्गः ॥ ● ॥
(पुं, नागविशेषः । यथा, महाभारते ।१।५७।१६।
"अपराजितः कामठकः सुषेणो मानसो व्ययः ।"
शाकद्वीपस्य वर्षविशेषः । यथा, मात्स्ये ।
५१ । २६ ।
"श्वेतञ्च हरितञ्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥"
पुष्करद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये ।
"द्वीपार्द्धस्य परिक्षिप्तः पश्चिमे मानसो गिरिः ।")
मानसजपः, पुं, (मानसेन कृतो जपः ।) धिया
वर्णश्रेण्युच्चारणम् । यथा,
"धिया यदक्षरश्रेण्या वर्णस्वरपदात्मिकाम् ।
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥
तस्यैव विषयो नास्त्येव । तथा च ।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वप-
न्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव समभ्यसेत् ।
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
इति तन्त्रसारः ॥
मानसतीर्थं, क्ली, (मानसं तीर्थमिव । रागाद्य-
भावात् तथात्वम् ।) रागादिरहितं मनः ।
यथा,

सूत उवाच ।
"तीर्थानि कथितान्येवं भौमानि मुनिसत्तम ! ।
मानसानीह तीर्थानि फलदानि विशेषतः ॥
मनो निर्म्मलतीर्थं हि रागादिभिरनाविलम् ॥"
इति नारसिंहपुराणे ६६ अध्यायः ॥
मानसपूजा, स्त्री, (मानसकृता पूजा । शाक-
पार्थिववत् समासः ।) मनोरचितगन्धपुष्पाद्युप-
चारैः पूजा । यथा, कृत्स्नमध्ये देवीं विभाव्य
कुलकौलमार्गस्थेन ब्रह्मद्वारच्युतेन पाद्यं देव्या-
श्चरणे दद्यात् । ततो मनश्चार्घ्यं दत्त्वा सहस्र-
दलपद्मब्रह्मरन्ध्रस्थितचन्द्रामृतजलेन आचम-
नीयं स्नानं । मधुविधुं च तत्त्वेन गन्धञ्च ।
अहिंसां विज्ञानं क्षमां दयां अलोभं अमोहं
अमात्सर्यं अमायां अनहङ्कारं अरागं अद्वेषं
इन्द्रियाणि द्वादश एतानि पुष्पाणि च प्रदाप-
येत् । ततस्तेजोरूपं दीपं वायुरूपं धूपं दद्यात्
चामरं चामरं दर्पणं रत्नं पद्मं छत्रं पश्चात्
तेजसा आनन्दं सारयुक्तं धनाढ्यत्वनिमर्षी
घण्टां निवेदयेत् । ततः सुधारसाम्बुधिं मीन-
पर्व्वतं कपालपूरितं पायसञ्च दत्त्वा ।
"मनोजनिभवत्तालैः शृङ्गारादिरसोद्भवैः ।
शुक्लैर्गीतैश्च नाट्यैश्च तोषयेत् परमेश्वरीम् ॥"
एवं संपूज्य अभेदेन जपः कार्य्यः । इति तन्त्र-
सारे त्रिपुराप्रकरणम् ॥ ● ॥ मानसेन्द्रपूजा
यथा, गौतमीये ।
"ततो मानससम्भारैः पूजयेत् शक्तसुन्दरम् ।
कनिष्ठा पृथिवीतत्त्वं तद्योगाद्गन्धयोजनम् ॥
अङ्गुष्ठो गगनं तत्त्वं तेनैव पुष्पयोजनम् ।
तर्ज्जनी वायुतत्त्वं स्याद्धूपं तेनैव योजयेत् ॥
अनामा जलतत्त्वं स्यात्तेनैव योजयेत् क्रमम् ।
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥
अर्घं समर्प्य भक्त्या च प्रणमेद्दण्डवद्भुवि ॥"
अपि च ।
"नियुर्न चित्तभिक्षा तु मानसैरुपचारकैः ।
भौतिकैः पूजयेद्विद्वान् सुमानसमन्वितैः ॥
भूम्याकाशमरुद्वह्निवारिभिश्चैः सबिन्दुकैः ।
कनिष्ठाङ्गुलितर्ज्जन्यौ मध्यमानामिके तथा ॥
अङ्गुष्ठेन समायोगान्मुद्राः पञ्च प्रकीर्त्तिताः ।
पृथिव्यात्मकगन्धः स्यादाकाशात्मकपुष्पकम् ॥
धूपो वाय्वात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः ।
रसात्मकञ्च नैवेद्यं पूजा पञ्चोपचारिका ॥
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥"
इत्यमदानकल्पः ॥
अन्यच्च ।
"मानसैरुपचारैश्च संपूज्य कल्पयेत् सुधीः ।
गन्धं भूम्यात्मकं दद्यादाकाशपुष्पं ततः परम् ॥
धूपं वाय्वात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यमम्बु दद्यात् पानीयं वरुणात्मकम् ॥
चामरं छत्रं दद्याच्चामरं छत्रमेव च ।
तत्तन्मुद्राविधानेन संपूज्यात्मगृहं जपेत् ॥
यथाशक्ति जपं कृत्वा समाप्य कवचं पठेत् ॥"
इति कङ्कालमालिनीतन्त्रम् ॥

पूजाक्रमस्तु । निजगुरुं ध्यात्वा सुकाम्यद्वारा-
सुकमलामार्गपादुकां पूजयामीति मानसै-
र्गन्धाद्युपकुसुमैरर्च्चयेत् । कनिष्ठाभ्यां लं पृथि-
व्यात्मकं गन्धं समर्पयामि नमः । अङ्गुष्ठाभ्यां हं
आकाशात्मकं पुष्पं समर्पयामि नमः । तर्ज्ज-
नीभ्यां यं वाय्वात्मकं धूपं समर्पयामि नमः ।
मध्यमाभ्यां रं वह्न्यात्मकं दीपं समर्पयामि
नमः । अनामिकाभ्यां वं अमृतात्मकं नैवेद्यं
समर्पयामि नमः । इति कुलार्णवतारव्या-
ख्यानटीकायां तृतीयकाण्डम् ॥
मानसव्रतं, क्ली, (मानसकृतं व्रतम् । शाकपार्थिव-
वत् समासः ।) अहिंसादि । यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥"
इति वराहपुराणम् ॥
मानसालयः, पुं, (मानसे आलयो यस्य ।) हंसः ।
इति राजनिर्घण्टः ॥
मानसिकं, त्रि, (मानस+ठञ् ।) मनोभवम् ।
मानसशब्दात् ष्णिकप्रत्ययेन निष्पन्नम् । (पुं,
विष्णुः । यथा, महाभारते । १२ । ३३८ ।४।
"नमस्ते देवदेवेश ! निष्क्रिय !
निर्गुण ! मानसिक ! नामनामिक ! ।")
मानसी, स्त्री, (मानस+स्त्रीत्वात् ङीप् ।) विद्या-
देवीविशेषः । इति हेमचन्द्रः ।२।१५। मनो-
भवा च । (यथा, विष्णुपुराणे । १ । ७ । ६ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ।")
मानसूत्रं, क्ली, (मानस्य गात्रप्रमाणस्य तत्
मानार्थं वा सूत्रम् ।) स्वर्णादिनिर्म्मितकटि-
सूत्रम् । इति धनञ्जयः । गोट् इति भाषा ।
मानसौकाः, [स्] पुं, (मानसं सर ओको वासस्थानं
यस्य ।) हंसः । इत्यमरः । २ । ५ । २२ ।
(यथा, महाभारते । ८ । ४१ । ११ ।
"वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।")
मानिका, स्त्री, (मानयति सम्मानं करोतीति । मान+
णिच्+ण्वुल् टाप् अकारस्येत्वम् ।) मद्यम् ।
इति शब्दरत्नावली ॥ (माने प्रभवतीति । मान
+ठक् ।) द्रोणः । इति वैद्यकपरिभाषा ।
सेर इति भाषा ॥
मानिनी, स्त्री, मानो हठः । इति मेदिनी । ने,
१०८ ॥ (मानं अस्त्यस्याः । मान+इनिः । ङीप् ।
मौनवती च ॥ (यथा, गीतगोविन्दे । ९ । ५ ।
"हरिरभिसरति वहति मधुपवने ।
किमपरमधिकसुखं सखि ! भवने ॥
माधवे मा कुरु मानिनि ! मानमये ॥"
अभिमानवती च । यथा, कुमारे ।५।६३।
"इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्य्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥"
"मानिनीमानवतीपदयोरत्र अर्थतश्चिरभि-
मानवती ।" इति टीकायां मल्लिनाथः ।)
रौच्यमनोर्मनोः पत्नी । यथा, मार्कण्डेये ।१०१।१०।

"विदूरथस्य तनया दाक्षिण्यालस्य भूभृतः ।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")
मानी, [न्] त्रि, (मानोऽस्यास्तीति । मान+इनिः ।) मानविशिष्टः । इति मेदिनी । ने, १०८ ॥ (यथा, मार्कण्डेये । १२३ । २२ ।
"ततस्ते भूभृतः सर्वे बहुशस्तेन मानिना ।
निराकृताः सुनिर्विण्णाः प्रोचुरन्योन्यमाकुलाः ॥")
सिंहः । इति राजनिर्घण्टः ॥

मानुषः, पुं, (मनोर्जातः । मनु+"मनोर्जातावञ्यतौ षुक् च ।" ४ । १ । १६१ । इत्यण् षुगागमश्च ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, मनौ । ८ । २८४ ।
"चिकित्सकानां सर्व्वेषां मिथ्याप्रचरतां दमः ।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥"
मनुष्यस्येदम् । अण् । मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १३ । ६ । २० ।
"अकृत्वा मानुषं कर्म्म यो दैवमनुवर्त्तते ।
वृथा श्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना ॥")

मानुषकं, त्रि, (मनुष्यस्य भावः कर्म्म वा । मनुष्य+ठञ् ।) मनुष्यस्य कर्म्मादि । मनुष्यस्येदमित्यर्थे ठञ्प्रत्ययेन निष्पन्नम् ॥

मानुषी, स्त्री, (मानुषस्य स्त्री । मानुष+जातित्वात् ङीष् ।) मनुष्यस्त्रीजातिः । यथा,—
मनुष्यी मानुषी नारी मानवी मानुषस्त्रियाम् ।
इति शब्दरत्नावली ॥
(मनुष्य+अण्+ङीप् ।) चिकित्साविशेषः । यथा,—
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता ।"
इति शब्दचन्द्रिका ॥

मानुष्यं, क्ली, (मनुष्यस्य भावः । मनुष्यस्येदमिति वा । मनुष्य+ष्यञ् ।) मनुष्यस्य भावः । मनुष्यत्वम् । (यथा, भागवते । ४ । २३ । २८ ।
"स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ।
लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥")
मनुष्यशरीरम् । यथा,—
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वे याज्ञवल्क्यवचनम् ॥
(मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १ । १५६ । ११ ।
"अथ नानीहि के मेते पीरसी वनमाश्रिताः ।
मानुष्यो वदवान् गन्धो घ्राणं तर्पयतीव मे ॥")

मानुष्यकं, क्ली, (मनुष्याणां समूहः । मनुष्य+"गोत्रोक्षोष्ट्रोरभ्र—" ४।२।३९। इति वुञ् ।) मनुष्यसमूहः । इत्यमरः ।३।२।४३।(मनुष्यस्येदं मानुष+यत् । स्वार्थे कन् । (मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ७७ । ८ ।
"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम् ।
कर्म्म मानुष्यकं कर्म्म दैवेनापि विरुध्यते ॥")

मानोज्ञकं, क्ली, (मनोज्ञस्य भावः कर्म्म वेति । "द्वन्द्वमनोज्ञादिभ्यश्च ।" ५ । १ । १३३ । इति वुञ् ।) मनोज्ञता । मनोज्ञस्य भाव इत्यर्थे वुञ् प्रत्ययेन निष्पन्नम् ॥

मान्द्यं, क्ली, (मन्दस्य भावः कर्म्म वा । मन्द+"पत्यन्तपुरोहितादिभ्यो यक् ।"५।१।१२८। इति यक् ।) रोगः । इति हेमचन्द्रः ॥ मन्दता च । (यथा, कथासरित्सागरे । २४ । १६५ ।
"विश्वस्ते च ततस्तस्मिन् पुरोधाश्च चकार सः ।
मान्द्यमल्पतराहारसम्भीतस्ततनुर्व्यथा ।")

मान्धाता, [ऋ] पुं, (मां धास्यतीति । धेट्+तृच् ।) युवनाश्वराजपुत्रः । तत्पर्य्यायः । युवनाश्वजः २ । इति हेमचन्द्रः । ३ । ३६४ । तद्विवरणं यथा । 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत् । तस्य च पुत्रस्याभिनिर्व्वेदात् सुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता । तस्याश्चार्द्धरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलसं वेदीमध्ये निवेश्य ते मुनयः सुषुपुः । सुप्तेषु च तेषु तीव्रतृट्परीतः स भूपालस्तमाश्रममण्डलं विवेश । सुप्तांश्च तानृषीन् नैवोत्थापयामास । तच्च कलसजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ । प्रबुद्धाश्च ऋषयः पप्रच्छुः । केनैतन्मन्त्रपूतं वारि पीतम् । अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति । इत्याकर्ण्य स राजा अजानता मया पीतमित्याह । गर्भश्च युवनाश्वोदरेऽभवत् । क्रमेण च ववृधे । प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्चक्राम । न चासौ राजा ममार । जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः । अथागम्य देवराडब्रवीत् । मामयं धास्यति । ततोऽसौ मान्धाता नामतोऽभवत् । वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ । ताञ्चामृतस्राविणीमास्वाद्याह्नैवैकेन व्यवर्द्धत । स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे । भवति चात्र श्लोकः ।
"यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"
मान्धाता शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे । पुरुकुत्समम्बरीषं मुचुकुन्दञ्च तस्यां पुत्रत्रयमुत्पादयामास । पञ्चाशच्च दुहितरस्तस्यामेव तस्य नृपतेर्बभूवुः ।" इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः, त्रि, (मान्यत इति । मान+कर्म्मणि यत् ।) अर्च्यः । तत्पर्य्यायः । पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५ । इति जटाधरः ॥ (यथा च मनौ । २ । १३९ ।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।"
प्रार्थनीयः । यथा, रामायणे । २ । ८ । १८ ।
"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौशल्यातोऽतिरिक्तञ्च मम शुश्रूषते बहु ॥"
"मान्यः प्रार्थनीयः श्रेयस्करः । यथा तद्वत् ।"
इति तट्टीकायां रामानुजः ॥)

मान्यस्थानं, क्ली, (मान्यस्य स्थानं ।) पूज्यत्वकारणम् । यथा,—
"वित्तं बन्धुर्व्वयः कर्म्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥"
इति मानवे २ अध्यायः । कौर्म्मे ११ अध्यायेऽप्येवम् ॥

मान्या, स्त्री, (मान्य+स्त्रियां टाप् ।) मलकाला । यथा,—
"अनिर्मान्या तु मान्या च मलकाला च मोहना ।"
इति शब्दमाला ॥
पूज्या च ॥

मापत्यः, पुं, (मा विद्यतेऽपत्यमस्य ।) कामः । इति जटाधरः ॥

मापनः, पुं, (मापयति स्वर्णादिकमनेनेति । मा+णिच्+करणे ल्युट् ।) तुलः । इति शब्दचन्द्रिका । परिमाणे, क्ली । (क्रियामध्ये च । यथा, महाभारते । ९ । ५१ । १५ ।
"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता ॥")

मामकं, त्रि, (ममेदम् । अस्मद्+"तवकममकावेकवचने ।" ४ । ३ । ३ । इति अण् ममकादेशश्च ।) मदीयम् । इति मेदिनी । के, १९८ ॥ (यथा, महाभारते । १ । १०५ । १२ ।
"ततो मामाह स मुनिर्गर्भस्तु एष मामकम् ।")
ममतायुक्तः । इति शब्दमाला ॥ यथा च महाभारते । ४ । ५० । १० ।
"अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते ।")

मामकः, पुं, (माम+स्वार्थे कन् ।) मातुलः । इति मेदिनी ॥ के,१९८॥ ममायं वा ममेदमिति बुद्धिर्यस्य । कप् ।) कृपणः । इति शब्दमाला ॥

मामकीनं, त्रि, (ममेदम् । अस्मद्+"तवकममकावेकवचने ।"४। ३ । ३। इति खञ् । ममकादेशश्च ।) मदीयम् । ममेदमित्यर्थे खीने कृतेऽपि अस्माद् एकत्वाक्षरादेशे अस्य च ममकादेशे कृते मामकीनम् । इति दुर्गादासः ॥ (यथा, कथासरित्सागरे । १२ । १३२ ।
"एतच्च मे क्रियत् किं चिन्न मुद्रा धारयाम्यहम् ।
प्रमाणं मामकीनं च श्रूयतां वर्णयामि ते ॥")

मायः, पुं, (माया अस्त्यस्येति । माया+अर्श आदित्वादच् ।) पीताम्बरः । (यथा, महाभारते । १२ । ४३ । ११ ।
"नमो हिताय मायाय निष्कायानिष्काय वै नमः ।")
(मयस्यापत्यं पुमान् । मय+अण् ।) असुरः । इति मेदिनी । ये, ४६ ॥

माया, स्त्री, (मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति । मा+"माछाससिभ्यो यः ।" उणा० ४ । १०९ । इति यः टाप् ।) दम्भादिः

तत्पर्य्यायः । शाम्बरी २ । इत्यमरः । २ । १० । ११ । इन्द्रजालिः ३ कुहकम् ४ कुसृतिः ५ शाम्बरिः ६ । इति जटाधरः । शाम्बरी ७ । इति शब्दरत्नावली । माति विश्वमस्यां मनो-भावि । शम्बरस्य दैत्यस्य इयं शाम्बरी तेन प्रादुर्भावितत्वात् । इति भरतः । ● । बुद्धिः । इति मेदिनी । ये, ४६ । (मीयते ज्ञायते संख्यायतेऽनयेति । मा + यः टाप् ।) दया । दम्भः । इति नानार्थे हेमचन्द्रः । शठता । यथा,—

"माया तु शठता शाठ्यं कुसृतिर्निकृतिश्च सा ।"

(प्रज्ञा । यथा, ऋग्वेदे । २ । १७ । ५ ।

"अधारयत् पृथिवीं विश्वधायस मस्तभ्नात् मायया द्यामवस्रसः ।"

"मायया प्रज्ञया ।" इति तद्भाष्ये सायनः ।) राज्ञां क्षुद्रोपायविशेषः । यथा,—

"मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः ।"

लक्ष्मीः । इति च हेमचन्द्रः । बुद्धमाता । इत्यमरटीकायां मायादेवीसुतशब्ददर्शनात् । दुर्गा । यथा,—

"दुर्गे शिवेऽभये माये नारायणि सनातनि ।
जये मे मङ्गलं देहि नमस्ते सर्व्वमङ्गले ॥
इत्यत्र । मोक्षवचनो माश्च याश्च प्रापणवाचकः ।
तं प्रापयति या सद्यः सा माया परिकीर्त्तिता ॥
माश्च मोक्षार्थवचनो याश्च प्रापणवाचकः ।
तं प्रापयति या नित्यं सा माया परिकीर्त्तिता ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः ॥ अपि च ।

"विचित्रकार्य्यकारणा अचिन्तितफलप्रदा ।
स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः । ● ।

विश्वमप्रतीतिसाधनं माया । इति वागोको-भट्टः । अघटनघटनपटीयसी माया । इति केचित् । ईश्वरशक्तिः । तस्या नामान्तरं यथा । प्रकृतिः २ अविद्या ३ अज्ञानम् ४ प्रधानम् ५ शक्तिः ६ अजा ७ । ईदृशाद्भगवान् आदौ मायां प्रकाशयामास । सा हृद्गतसत्त्वगुणस्वरूपा कार्य्यकारणरूपा च । सत्त्वरजस्तमोगुणमयी । तस्याः शक्तिद्वयं आवरणं विक्षेपश्च । तस्याः मायाया महत्तत्त्वं जातम् । तस्मादहङ्कारः । तस्मात् पञ्चभूतम् । तस्मात् ब्रह्माण्डम् । इति श्रीभागवतमतम् ॥ (मायास्वरूपम् । यथा च पञ्चदश्याम् । ६ । १२९—१३१ ।

"तामनिर्वचनीयामेव व्यायामसविचारिकाम् ।
इत्येव प्रतिपत्तिः स्यात् वास्तव स्फुटमुच्यते ॥
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।
अस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत् ॥
इति श्रुत्यनुसारेण न्यायो निर्णय ईश्वरे ।
तथा सत्यविरोधः स्यात् स्थावरान्तेशवादिनाम् ॥
माया चेयं तमोरूपा तापनीये तदीरणात् ।
अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम् ॥
जड़ं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः ।
आबालगोपं स्पष्टत्वादानन्त्यं तस्य साब्रवीत् ॥
अचिदात्मघटादीनां यत् स्वरूपं जड़ं हि तत् ।
यत्र कुण्ठीभवेद् बुद्धिः स मोह इति लौकिकाः ॥
इत्थं लौकिकदृष्ट्यैतत् सर्व्वैरप्यनुभूयते ।
युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतिः ॥
नासदासीद् विभातत्वान्नो सदासीच्च बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥
तुच्छाऽनिर्व्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥
अस्य सत्त्वमसत्त्वञ्च जगतो दर्शयत्यसौ ।
प्रसारणाच्च सङ्कोचात् यथा चित्रपटस्तथा ॥
अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिम् ।
स्वतन्त्रापि तथैव स्यादसङ्गस्यान्यथाकृतेः ॥
कूटस्थासङ्गमात्मानं जगत्त्वेन करोति सा ।
चिदाभासस्वरूपेण जीवेशावपि निर्म्ममे ॥
कूटस्थमनुपद्रुत्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि ।
मायाया दुर्घटत्वञ्च स्वतः सिध्यति नान्यथा ॥
न वेत्ति मायिनं लोको यावत् तावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ॥
प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ।
न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥
चोद्येऽपि यदि चोद्यं स्यात् त्वच्चोद्ये चोद्यते मया ।
परिहार्य्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम् ॥
विस्मयैकशरीराया मायायाश्चोद्यरूपतः ।
अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥
मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु ।
लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम् ॥
न निरूपयितुं शक्या विस्पष्टं भासते च या ।
सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे ॥")

विष्णुमायास्वरूपं यथा,—

"यामेतां भाषसे देव ! मम मायेति विश्वगः ।
का माया कीदृशी विष्णो ! किं वा मायेति चोच्यते ।
ज्ञातुमिच्छामि मायार्थं दृश्यं परमुत्तमम् ॥
तस्यास्तु वचः श्रुत्वा विष्णुर्मायाकरण्डकः ।
प्रहस्य मधुरं वाक्यं प्रत्युवाच वसुन्धराम् ॥
भूमे ! मा पृच्छ मायां मे वृथा पृच्छसि सादरम् ।
कृपा खेदं किमर्थं त्वं प्राप्स्यसि मद्विलोकनात् ।
अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहाः ॥
मम माया विशालाक्षि ! किं पुनस्त्वं वसुन्धरे ! ॥
पर्ज्जन्यो वर्त्तते यत्र तत्रत्येन प्रपूर्य्यते ।
देशो निर्म्मलतां याति एषा माया मम प्रिये ! ॥
सोमोऽपि क्षीयते पक्षे पक्षे चापि विवर्द्धते ।
अमायां स न दृश्येत मायेयं मम सुन्दरि ! ॥
हेमन्ते सलिलं कूपे उष्णं भवति तत्त्वतः ।
ग्रीष्मे च शीतलं तोयं मायेयं मम तत्त्वतः ॥
पश्चिमां दिशमाश्रित्य अस्तं याति भास्करः ।
उदेति पूर्व्वतः प्रातर्मायेयं मम सुन्दरि ! ॥
शोणितञ्चैव शुक्रञ्च स्त्रियाः प्राप्य च तिष्ठति ।
गर्भे च जायते जन्तुर्मे मायैव चोत्तमा ॥
जीवः प्रविश्य गर्भे तु सुखदुःखानि विन्दति ।
जातश्च विस्मरेत् सर्व्वमेषा माया ममोत्तमा ॥
आत्मकर्म्माश्रितो जीवो बद्धसंज्ञो गतस्पृहः ।
कर्म्मणा नीयतेऽन्यत्र मायैषा मम चोत्तमा ॥
शुक्रशोणितसंयोगाज्जायन्ते यदि जन्तवः ।
अङ्गुल्यश्चरणौ चैव कर्णौ शीर्षं कटिस्तथा ॥
एवं सर्व्वोदरञ्चैव दन्तौष्ठपुटनासिका ।
कर्णौ नेत्रकपोलौ च ललाटं जिह्वया सह ॥
एतया मायया युक्ता जायन्ते यदि जन्तवः ।
तस्यैव जीर्य्यते जन्तोर्भुक्तं पीतञ्च वहुधा ।
अयञ्च क्षयते जन्तुरेषा माया ममोत्तमा ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
अस्मात् प्रवर्त्तते जन्तुरेषा माया मम प्रिये ! ॥
गर्भेऽपि निराकारः आकारं लभते तथा ।
तत्त्वं न ज्ञायते तस्य मायैषा मम सुन्दरि ! ॥
आपो पित्राज्ञया भीमा आपो चैव प्रतिष्ठिताः ।
न च वृद्धिं प्रयान्त्यत्र मायैषा परमा मम ॥
इष्टो मधुरकाः सर्व्वे प्रस्रवाणि सरांसि च ।
यौवने सम्भवन्ति क्षुभ्यन्ति एतन्मायाबलं मम ॥
हिमवच्छिखराज्जाता गङ्गा मन्दाकिनी नदी ।
गाङ्गला सा भवेज्ज्ञा मायैषा मम कीर्त्तिता ॥
मेघा वहन्ति सलिलं लवणात् सलिलार्णवात् ।
वर्षन्ति मधुरं लोके सर्व्वं मायाबलं मम ॥
दीयमाना जन्तवः केचित् भक्षयन्ति महौषधम् ।
तस्य वीर्य्यं समाश्रित्य माया तु विषमाव्ययम् ॥
औषधे दीयमाने तु जन्तुः पञ्चत्वमेति यत् ।
निर्वीर्य्यमौषधं ज्ञात्वा कालो भूत्वा हराम्यहम् ॥
प्रथमं जायते गर्भः पश्चाज्जायेत वै कुमारः ।
जायते यौवनं रूपं ततोऽपि जरया पुनः ।
तत इन्द्रियनाशश्च एतन्मायाबलं मम ॥
एकबीजात् प्ररोहन्ति जायन्ते तानि भूरिशः ।
तमाश्चर्य्यं विजानामि मायायोगेन माधवि ! ॥
लोक एवं विजानाति गरुड़ो वहतेऽच्युतम् ।
भूत्वा वेगेन गरुड़ो वहाम्यात्मानमात्मना ॥
या एता देवताः सर्व्वा यज्ञभागेन तोषिताः ।
मायामेतामहं कृत्वा तोषयामि दिवौकसः ॥
लोकाः सर्व्वे विजानन्ति देवा नित्यं मखाशिनः ।
मायामेवामहं कृत्वा धरामि निरयात् धराम् ॥
सर्व्वोऽपि यजते लोको यदारभ्य हृदयादिम् ।
मायामाङ्गिरसीं कृत्वा पालयामि दिवौकसः ॥
सर्व्वे लोका विजानन्ति वरुणः पाति सागरम् ।
मायान्तु वारुणीं कृत्वाहं रक्षामि महोदधिम् ॥
सर्व्वे लोका विजानन्ति कुवेरोऽयं धनेश्वरः ।
कुवेरमायामादाय अर्थं रक्षामि तद्धनम् ॥
एवं लोका विजानन्ति वृत्रः शक्रेण संहतः ।
शाक्रीं मायां समाश्रित्य मया वृत्रो निसूदितः ॥
एवं लोका विजानन्ति आदित्यश्च तपो महान् ।
सैव मायामयं कृत्वा वहाम्यादित्यमेव च ॥
एवं जानाति लोको वर्षं विभजतेऽर्ज्जुन ।
वरुणात्तत्समादाय निहामि तदहं जलम् ॥
वायुं मायामयं कृत्वा मेघेषु विचलाम्यहम् ।
यदिदं जायते लोकः कूपेन तिष्ठते जलम् ॥

देवा अपि न जानन्ति अन्यत् क्व तिष्ठति ।
मम मायानियोगेन तिष्ठते सौषधं वने ॥
लोके भूरि विजानाति राजा पालयते प्रजाः ।
राजमायामहं कृत्वा पालयामि वसुन्धराम् ॥
ये तु वै द्वादशादित्या तपेयन्ति सुमध्यमे ।
प्रविश्य तानहं भूमे ! मायां लोके तपाम्यहम् ॥
यदेव पांशुना भूमिर्लोकेषु पतति सदा ।
मायां पांशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥
वर्त्तते यच्च संवर्त्तो धाराभिर्मुञ्चमानति ।
मायां वारिमयीं यत्र पूरयाम्यखिलं जगत् ॥
यत् स्वपामि वरारोहे ! शिवस्योपरि वारिधि ।
अनन्तमायया चाहं धारयामि क्षमामि च ॥
वराहमायामादाय भूमे ! जानामि किन्न वै ।
देवा यत्र विलीयन्ते सा माया मम कीर्त्तिता ॥
तथापि वैष्णवीं मायां कृत्वा जानासि किन्न
तत् ।
धारितासि च सुश्रोणि ! धारान् समरयेन तु ॥
माया तु मम देवीयं कृत्वा लोकार्थिनां मतीम् ।
मम मायाबलं क्षितद्वयेन तिष्ठाम्यहं जले ॥
प्रजापतिं ब्रह्म यदं सृजामि च हरामि च ।
तेऽपि मायां न जानन्ति मम मायाविमो-
हिताः ॥
अथ पिङ्गलाक्षेव य एते सूर्य्यवर्च्चसः ।
मायां पिङ्गलमयीं कृत्वा तक्षामि हि च तस्वतः ॥
किन्तु मायैव सुश्रोणि ! अन्यच्च शृणु
सुन्दरि ! ॥"

इति वाराहे मायाचक्रम् १०॥

अथ मायास्तोत्रम् ।

शौनक उवाच ।

"शाल्मिकी महाराजः श्रुत्वा मायां गतः
कुतः ।
का वा मायास्तुतिः सूत ! वद तत्त्वविदांवर ! ।
या तत्कथा विष्णुकथा वक्तया वा विमुक्तये ॥"

सूत उवाच ।

"महार्थं मुनयः सर्वे मार्कण्डेयाय पृच्छति ।
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥
तत् प्रवक्ष्य प्रवक्ष्यामि यथाधीतं यथाश्रुतम् ।
सर्वकामप्रदं नृणां पापतापविनाशनम् ॥"

शुक उवाच ।

"मार्कण्डेयार्य महा विष्णुभक्तः शाल्मिकीजः ।
शरीरसंसारमोक्षाय मायास्तवमलं जगौ ॥"

शाल्मिकीज उवाच ।

"ॐ ह्रींकारी चन्द्रधारी विशुद्धा
कर्मधारी मातरं वेदबोध्याम् ।
तन्वीं स्वाहां भूततन्मात्रकक्षां
वन्दे वन्द्यां देवगन्धर्वसिद्धैः ॥
लोकातीतां द्वैतभीतां समीड्ये
भूतैर्भव्यां व्यापसासाविकार्यैः ।
नानारूपैर्देवतिर्य्यङ्मनुष्यै-
स्तामाधारां ब्रह्मरूपां नमामि ॥
यस्या भासा त्रिजगद्भाति भूतै-
र्न भासैवतदभावे विधातुः ।
विद्धीलां कालकल्लोलकोलां
लीलापाङ्गीं क्षिप्तसंसारदुर्गाम् ।
पूर्णां प्राप्यां द्वैतलभ्यां शरण्या-
माद्यां शेषे मध्यतो या विभाति ।
नानो देवे कर्म्म योपाधयो ये
तस्यां तासां तां विशिष्टां नमामि ॥
भूमौ गन्धो रसमाप्सु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृशत्वम् ।
खे शब्दो वै यच्छिदा भाति नाना
तामाद्यां तां विश्वरूपां नमामि ॥
सावित्री त्वं ब्रह्मरूपा भवानी
भूतेशस्य श्रीपतेः श्रीस्वरूपा ।
शची शक्रस्यापि नाकेश्वरस्य
पत्नी श्रेष्ठा भासि मायो ! जगत्सु ॥
बाल्ये बाला युवती यौवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगैश्च धर्म्यौ
भक्त्या यै त्वं कामवश्या विभासि ॥
वरेण्या त्वं वरदा लोकसिद्धा
साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादेशे रूपवेशैर्विभासि ॥
तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्त्या ।
श्रुतियुगकुहरे वा संश्रुतं धर्म्मसम्पत्
जयति जगदादौ सर्व्वशिहिच तेषाम् ॥
मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादवाप्यापि सिद्धिं लेभे शाल्मिकीजः ॥
कोकामुखे तपस्तप्त्वा हरिं ध्यात्वा वना-
न्तरे ।
सुदर्शनेन निहतो वैकुण्ठशरणं ययौ ॥"
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये माया-
स्तव कथनं त्रिंशोऽध्यायः ॥ (शक्तिः सामर्थ्यं वा ।
यथा, ऋग्वेदे । ४ । २ । २१ ।
"दासानामिन्द्रो मायया ।"
"मायया स्वकीयया शक्त्या ।" इति तद्भाष्ये
सायनः ॥)

मायाकारः, पुं, (मायां इन्द्रजालव्यापारं करो-
तीति । कृ + अण् ।) ऐन्द्रजालिकः । बाजी-
कर इति भाषा । तत्पर्य्यायः । प्रातिहारिकः
२ । इत्यमरः । २ । १० । ११ ॥ मायां छद्म-
जलादौ जलस्थलादिमानं करोतीति माया-
कारः अण् । प्रतिहरणं प्रतिहारो व्याजः भावे
घञ् स प्रयोजनमस्य प्रातिहारिकः ठिकः
स्त्रियां ङीबिति वह्निः । प्रतिहारक इत्यपि
पाठः । तत्र प्रति प्रथमं स्तुतु मनो नयने च
हरति व्याते न किंचिदिति प्रतिहारकः ।
अज्ञानात् स्वार्थे के प्रातिहारकश्च अणि प्रति-
हारश्च । इति तट्टीकायां भरतः ॥

मायाकृत्, पुं, (मायां छद्मकारी जलस्थलादि
भ्रमं करोति कारयतीति । कृ + क्विप् । तुमा-
गमश्च । करोतिरत्रान्तर्भूतण्यर्थः ।) माया-
कारः । यथा,—
"शाम्बरी शाम्बरी माया मायाकृत् भिक्षुके
नटे ।"
इति शब्दरत्नावली ॥

मायाजीवी, [न्] पुं, (मायया इन्द्रजालविद्यया
जीवति जीवनयात्रां सम्पादयति इति,
जीव + णिनिः ।) प्रातिहारिकः । इति हेम-
चन्द्रः । ३ । ५८८ ॥

मायातिः, पुं, (मायया सह अतति । यद्वा, मा
अततीति । अत + "अस्यतिभ्यो च ।" उणा०
४ । १३० । इति इञ् ।) मरकतः । यथा,—
"मायातीनाथ निर्वीतं स्वयतां सुनिवसन ! ।
यत्राप्यधर्म्मवेदोक्तं पलहानिर्यतिक्रमे ॥
पितृमातृविहीनश्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविलोभकम् ॥
अनादिकं विशुद्धञ्च अक्षुद्रं स्नातकं परम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मत्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मौ संपूज्य चन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा परदारेण यत्नतः ।
वर्षान्ते च यज्ञवृक्षस्य दुर्गायै तं निवेदयेत् ॥
अक्षमीलक्ष्मीयभ्यो दशान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥
बलिं दत्त्वा च श्रुत्वा च धृत्वा च यतयं बुधः ।
प्रयाय्य इक्ष्वद्भूमौ दत्ताज्ञिनाय दधिषाम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६६ अध्यायः ।

मायारः, पुं, (मायया छलेन धर्म्मेश्वर्यैः प्राणि
भक्षयतीति । अर + अच् ।) कुम्भीरः । इति
त्रिकाण्डशेषः ॥

मायादेवीसुतः, पुं, (मायादेव्याः सुतः ।) बुद्धः ।
इत्यमरः । १ । १ । १५ ॥

मायाफलं, क्ली, फलविशेषः । माजुफल इति
भाषा । तत्पर्य्यायः । मायिफलम् मायिकम्
छिद्रफलम् ४ मायि ५ । अस्य गुणाः । काल-
ज्वरत्वम् । कटुत्वम् । उष्णत्वम् । दोषिच्छार्द्दो-
षतकेशप्रकाशदाहत्वञ्च । इति राजनिघण्टुः ॥

मायामोहः, पुं, (मायया मोहयति असुरानिति ।
मुह + णिच् + अच् । माया च मोहश्च मो
यस्मिन् वा ।) विष्णुदेहनिर्गतासुरमोहक-
पुरुषविशेषः । यथा,—

श्रीपराशर उवाच ।

"इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥"

श्रीभगवानुवाच ।

"मायामोहोऽयमखिलान् दैत्यांस्तान्
मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥
स्थितौ स्थितस्य मे वध्या यावन्तः परिपन्थिनः ।
ब्रह्मणो ह्यधिकारस्य देवदैत्यादिकाः सुराः ॥
तद्गच्छत न भीः कार्य्या मायामोहोऽयमग्रतः ।
गच्छन्नद्योपकाराय भवतां भविता सुराः ॥"

श्रीपराशर उवाच ।
"इत्युक्ता प्रणिपत्यैनं पप्रच्छ तं यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महासुराः ॥"

इति विष्णुपुराणे ३ अंशे १७ अध्यायः ॥

मायावती, स्त्री, (मायाऽस्त्यस्या इति । माया+मतुप् । मस्य वः । उगित्वात् ङीप् ।) रतिः । कामपत्नी । इति जटाधरः ॥ तस्या नामकारणं यथा,—

श्रीपराशर उवाच ।
"एतस्मिन्नन्तरे प्राप्तः स च लम्बेन नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥
एष ते तनयः सुभ्रु ! हत्वा शम्बरमागतः ।
हृतो येनाभवद्बालो भवत्याः सूतिकागृहात् ॥
इयं मायावती भार्य्या तनयस्यास्य ते सती ।
शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम् ॥
मन्मथे तु गते नाशं तदुद्भवपरायणा ।
शम्बरं मोहयामास मायारूपेण रूपिणी ॥
विवाहाद्युपभोगेषु रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥"

इति विष्णुपुराणे ५ अंशे २७ अध्यायः ॥

(विद्याधरीविशेषः । यथा, कथासरित्सागरे । ११ । ६५ ।
"अहं मायावती नाम राजन् ! विद्याधराङ्गना ।
इयन्तं कालमभवं शापदोषेण हस्तिनी ॥"
राजकन्याविशेषः । यथा,तत्रैव । ६१२ । ११२ ।
"अभूत् कलयसिंहाख्यो राजा राजपुरे पुरा ।
तस्य मायावतीत्यासीद्दुहिताप्रतिमा सुता ॥")

मायावचिकः, त्रि, (मायया वर्च्चं आच्छादनं करोतीति ठन् ।) परप्रतारकः । इति शब्दमाला ॥ (मायारचिक इति वा पाठः ।)

मायावान्, [त्] पुं, (माया अस्त्यस्य । माया+"अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति पक्षे मतुप् । मस्य वः ।) कंसराजः । इति शब्दरत्नावली ॥ मायायुक्ते, कपटयुक्ते च त्रि । (यथा, ऋग्वेदे । ४ । १६ । ९ ।
"अतिभिस्तमिषणो शुष्णकृतो नि मायावानब्रह्मा दस्युरर्त ।"
"मायावान् कपटवान् ।" इति तद्भाष्ये सायणः ।)

मायावी, [न्] पुं, (प्रशस्ता माया अस्त्यस्य । माया+"अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) मायाकारः । तत्पर्य्यायः । शंबरः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५ । इति जटाधरः ॥ (यथा, मार्कण्डेये । २२ । ७ ।
"मायावी दानवः कोऽपि मुनिरूपं समाश्रितः ।
स प्राह राजपुत्रं तं पूर्ववैरमनुस्मरन् ॥")
विडालः । इति राजनिर्घण्टः ॥ (मोहनशक्तियुक्तः परमात्मा । यथा, पञ्चदश्याम् । ६ । १० ।
"मतविरन्तर्यामी तु मायावी चक्रवर्तितः ।
यथात्मा सूत्रदेहेन विराडित्युच्यते परः ॥")

मायासीता, स्त्री, (मायाकल्पिता सीता ।) योगेन वह्निरक्षितसीताप्रतिकृतिः । यथा,—

वह्निरुवाच ।
"भगवन् ! श्रूयतां वाक्यं कालेन यदुपस्थितम् ।
सीताहरणकालोऽयं तवैव समुपस्थितः ॥
दैवस्य दुर्निवार्य्यत्वं न च दैवात् परं बलम् ।
मत्प्रसूं मयि संन्यस्य छाया रक्षान्तिकेऽधुना ॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम ।
देवैः प्रस्थापितोऽहञ्च न च विप्रो हुताशनः ॥
रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ।
स्वीचकार च स्वच्छन्दं हृदयेन विदूयता ॥
वह्निर्योगेन सीताया मायासीतां चकार सः ।
तत्तुल्यगुणसर्व्वाङ्गीं ददौ रामाय नारद ! ॥
सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषिध्य च ।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥
वने गत्वा रघुश्रेष्ठो जघान सायकेन च ।
अथान्तरे रावणश्च सीतां संप्राप दुःखिताम् ॥
ताञ्च वह्निपरीक्षायां कारयामास सत्वरम् ।
हुताशनस्तदा चैव वास्तवीं जानकीं ददौ ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता ।
करिष्यामीति किमहं तदुपायं वदस्व मे ॥"

वह्निरुवाच ।
"त्वं गच्छ तपसे देवि ! पुष्करञ्च सुपुण्यदम् ।
तत्र तपस्या तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः ।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह ॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ।
कामिनी पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा ॥
सत्ये युगे वेदवती कुशध्वजसुता शुभा ।
त्रेतायां रामपत्नी च सीतेति जनकात्मजा ॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ।
त्रिहायणीति सा प्रोक्ता विद्यमाना युगत्रये ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

मायासुतः, पुं, (मायायाः मायादेव्याः सुतः ।) बुद्धः । इति हेमचन्द्रः । २ । १४६ ॥

मायिकं, क्ली, (माया मोहजनकः विद्यतेऽस्मिन् । माया+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाफलम् । इति राजनिर्घण्टः ॥ पुस्तकान्तरे मायिका मायका इत्यपि पाठः ॥

मायिकः, पुं, (माया अस्त्यस्य । माया+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाकारः । इति जटाधरः ॥ (यथा, देवीभागवते । ४ । १८ । ४ ।
"यज्ञायामोहितश्चाहं बद्धा वर्त्म पराक्रमः ।
परवान् दानवानां च मायिकस्य यथा यथे ॥"
मायाविशिष्टे, त्रि ।)

मायी, [न्] पुं, (मायाऽस्त्यस्य । माया+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) मायाकारः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ शंबरः ४ कुहकः ५ दाक्षाजिनिकः ६ जालिकः ७ । इति हेमचन्द्रः । ३ । ४६ ॥ (मायायुक्ते, त्रि । यथा, कुमारे । २ । ४१ ।
"यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥"
मायोपाधिके परमेश्वरे च । यथा, पञ्चदश्याम् । ६ । १४३ ।
"मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ॥")

मायुः, पुं, (मिनोति प्रक्षिपति देहे उष्मादिकमिति । मिञ् प्रक्षेपणे+"कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "मीनाति मिनोतिदीङां ल्यपि च ।" ६ । १ । ५० । इत्यात्वम् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) पित्तम् । इत्यमरः । २ । ६ । ६२ ॥ (शब्दः । यथा, ऋग्वेदे । १ । १६४ । २८ ।
"सृक्वाणं घर्म्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥"
"मायुं शब्दं मिमाति निर्म्मिमीते करोति ।" इति तद्भाष्ये सायणः ॥ वाक् । इति निघण्टौ । १ । ११ ॥)

मायुराजः, पुं, कुवेरपुत्रः । इति त्रिकाण्डशेषः ॥

मायूरं, क्ली, (मयूराणां समूहः । मयूर+"प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इत्यण् ।) मयूरसमूहः । इत्यमरः । २ । ५ । ४२ ॥ (मयूराणामिदमित्यण् ।) मयूरसम्बन्धिनि, त्रि । यथा, महाभारते । १३ । १०४ । ८० ।
"चाषं शशं तथा मांसं मायूरञ्चैव वर्जयेत् ॥")

मायूरिकः, पुं, (मयूरं हन्ति । मयूर+"पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् ।) मयूरघाती । इति सिद्धान्तकौमुदी ॥

मायूरी, स्त्री, अजमोदा । इति राजनिर्घण्टः ॥

मारः, पुं, (मृ+भावे घञ् ।) मृतिः । (यथा, बृहत्संहितायाम् । ६ । ३१ ।
"कुम्भारकहृदपटविभः सस्यो हन्ता विरोधिनृपः ।")
म्रियन्ते प्राणिनोऽनेन । मृ+घञ् ।) कामदेवः । (यथा, नैषधे । ४ । ७८ ।
"अनुममार न मारं ! कथं नु सा
रतिरतिप्रथितापि पतिव्रता ।
विरहिणीगणघातनपातकी
दयितयापि तयापि किमुज्झितः ॥")
विघ्नः । इति मेदिनी । रे, ७६ ॥ (मृ+णिच्+घञ् ।) मारणम् । इति हेमचन्द्रः । २ । ३६ ॥ धुस्तूरः । इति शब्दचन्द्रिका ॥ मारस्योत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"आत्मभवस्य वचनं श्रुत्वा चतुराननः ।
विमृश्यैव तदावाक्यं शुभाशुभप्रचारकम् ।
सर्वस्य मोहने ब्रह्मा चिन्ताविष्टोऽभवत्तदा ।
समर्थो मोहितुमिति निश्चयाय मुहुर्मुहुः ।
चिन्तायमानस्य तस्य मायाख्या महाप्रभाः ।
जाता गणा नीलजिह्वा नीलकाशाभिभास्वराः ॥
तुरङ्गवदनाः केचित् केचिदुष्ट्रमुखास्तथा ।
सिंहव्याघ्रमुखाश्चान्ये मकरादिकराननाः ॥

अन्ये मार्जारवदनाः शरभास्याः शुकाननाः ।
प्लवगोमायुवक्त्राश्च सरीसृपमुखाः परे ॥
गोरूपा गोमुखाः केचित्तथा पक्षिमुखाः परे ।
महादीर्घा महाह्रस्वा महास्थूला महाकृशाः ॥
पिङ्गाक्षा विरलाक्षाश्च अर्धैकाक्षा महोदराः ।
एककर्णास्त्रिकर्णाश्च चतुष्कर्णास्तथापरे ।
स्थूलकर्णा दीर्घकर्णा बहुकर्णा विकर्णकाः ।
दीर्घाक्षा स्थूलनेत्राश्च सूक्ष्मनेत्रा विचक्षुषः ॥
चतुष्पादाः पञ्चपादास्त्रिपादैकपदास्तथा ।
ह्रस्वपादा दीर्घपादाः स्थूलपादा महापदाः ॥
एकहस्ताश्चतुर्हस्ता द्विहस्तास्त्रिभुजास्तथा ।
त्रिहस्ताश्च विरूपाक्षा गोधिकाकृतयः परे ॥
मनुष्याकृतयः केचित् शिशुमारमुखाः परे ।
क्रौञ्चाकारा बकाकारा हंससारसरूपिणः ॥
तथैव मद्गुरचककङ्ककाकमुखास्तथा ।
अर्द्धनीला अर्द्धरक्ताः कपिलाः पिङ्गलास्तथा ॥
नीलाः शुक्लास्तथा पीता हरिताश्चित्ररूपिणः ॥
अवादयन्त ते शङ्खान् पटहान् परिवादिनः ॥
मरट्टान् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा ।
सर्व्वे जटाभिः पिङ्गाभिस्तुङ्गाभिश्च करान्विताः ॥
विरलाभिर्विप्रेन्द्रा गणाः स्यन्दनगामिनः ।
शूलहस्ताः पाशहस्ताः खड्गहस्ता धनुर्धराः ॥
शक्त्यङ्कुशगदाबाणपट्टिशप्रासपाणयः ।
नानायुधा महानादं कुर्व्वन्तस्ते महाबलाः ॥
मारय च्छेदयेत्युच्चैर्ब्रुवन्तः पुरतो गणाः ।
तेषान्तु वदतां तत्र मारय च्छेदयेत्युत ।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे ॥
अथ ब्रह्माणमाभाष्य तान् दृष्ट्वा मदनो गणान् ।
उवाच वारयन् वक्तुं गणानामग्रतः स्मरः ॥

मदन उवाच ।

किं कर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा विधे ! ।
किं नामधेया एते वा तत्रैतान् विनियोजय ।
नियुज्यैतान् निजे कार्य्ये स्थानं दत्त्वा च नाम च ।
तत्ता पश्चान्महामायाप्रभावं कथयस्व मे ॥"

मार्कण्डेय उवाच ।

"अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामहः ।
गणान् समदनानाह तेषां कर्म्मादिकं दिशन् ॥

ब्रह्मोवाच ।

"एते तूत्पन्नमात्रा हि मारयेति यदब्रुवन् ।
मुहुर्मुहुरतोऽमीषां नाम मारेति जायताम् ॥
मारात्मकत्वादप्येते माराः सन्तु च नामतः ।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनार्च्चनम् ।
तवानुगमनं कर्म्म तत्त्वमेवं मनोभव ! ॥
यत्र यत्र भवान् याता स्वकर्म्मार्थं यदा यदा ।
तत्रानुगाश्च तत्रैते साहाय्याय तदा तदा ॥
चित्तोद्भ्रान्तिं करिष्यन्ति त्वच्छरवशवर्त्तिनाम् ।
ज्ञानिनां ज्ञानमार्गं च विघ्नयिष्यन्ति सर्व्वदा ।
यथा भौतिकं कर्म्म सर्व्वं कुर्व्वन्ति जन्तवः ।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वतः ॥
इमे यास्यन्ति सर्व्वत्र देहिनः कामरूपिणः ।
त्वमेवैषां गणाध्यक्षः पञ्चयज्ञाङ्गभोगिनः ।
नित्यक्रियावतां तोयभोगिनोऽपि भवन्त्विमे ॥"

इति कालिकापुराणे ६ अध्यायः ॥

मारकः, पुं, (म्रियन्ते प्राणिनः यस्मिन् येनेति वा । मृ + घञ् । ततः संज्ञायां कन् ।) मरकः । तत्पर्य्यायः । मारिः २ उत्पातः ३ । इति त्रिकाण्डशेषः ॥ पक्षिविशेषः । बाज् इति भाषा । तत्पर्य्यायः । घातिपक्षी २ ग्राहकः ३ । इति भूरिप्रयोगः ॥ मारणकर्त्तरि त्रि ॥

मारजित्, पुं, (मारं कामं जितवान् । जि + क्विप् । तुगागमः ।) बुद्धः । इत्यमरः । १ । १ । १३ ॥

मारणं, क्ली, (मार्य्यते इति । मृ + णिच् + भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११४ ॥ (यथा, मनौ । ५ । ३८ ।
"यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥")
अभिचारविशेषः । यथा,—
"एवन्तु मारणं देवि ! विशेषात् कथयामि ते ।
शान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
कूर्च्चयुग्मं ततो देवि ! अमुकं मारय मारय ।
चतुर्द्दशाक्षरो मन्त्रो स्वाहान्तः शत्रुनाशकः ॥
खदिराङ्गारमादाय कुजाष्टम्यां विशेषतः ।
लेखयेत् पुत्तलीं शत्रुरूपां लौहपत्रके ॥
निशायां मस्तके नेत्रे ललाटे हृदये करे ।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये ॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत् ।
संहाररूपां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम् ॥
दीर्घाकारां कृष्णवर्णां घोराट्टहासमस्तकाम् ।
शुष्कस्तनयुगलं हस्तं चर्व्वयन्तीं दिगम्बरीम् ॥
शत्रुनाशकरीं देवीं ध्यायेत् शत्रुजयाय च ।
एवं ध्यात्वेष्टिकाचूर्णैर्व्वामहस्तेन शङ्करि ! ॥
ॐ शत्रुनाशकर्य्यै नमः इति दत्त्वा महेश्वरि ! ।
हरिद्राचूर्णसहितां धारां दद्यादनेन तु ॥
अमुकस्य शोणितं पिब पिबेति तत्परम् ।
मांसं खादय खादय ह्रीं नम इति मन्त्रम् ॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा शताष्टकम् ।
जपेदेकादशाहे च रोगः स्यान्नात्र संशयः ॥
दशाधिकैकविंशाहे मृत्युरेव रिपोर्भवेत् ॥ ० ॥
अथवान्यप्रकारेण शत्रुनाशमहं वदे ।
पुंगोमूत्रं समादाय पूजयेद्व्रतचारिणा ॥
विपरीतक्रमेणैव जपपूजादिकं चरेत् ।
महादेवाय नम इति पुंगोमूत्रं समाचरेत् ॥
शिवाय नम इति मन्त्रेण घटञ्च समाचरेत् ।
पशुपतये नम इति प्राणान् संस्थापयेत्ततः ॥
लौहपात्रे महेशानि ! खदिराङ्गारयोगतः ।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेत् शिवम् ॥
ततो ध्यायेन्महारुद्रं ध्यानन्तु शृणु मानिनि ।
प्रलोन्मेषःस्थितं रुद्रं ज्वलदग्निसमप्रभम् ।
वामहस्तधरं वैरं दक्षिणं पाशकर्षकम् ।
मरणोन्मत्तरं देवं महाभाषादिवेष्टितम् ॥
पिनाकधृक् इहागच्छागच्छ इत्यादिनावाह्य यत्नतः ।
भूतपतये नम इति स्थापयेत् साधकोत्तमः ॥
महेश्वराय नम इति पाद्यादिना प्रपूजयेत् ।
ईशानादिस्तथा गर्भैर्युतक्रमेण प्रपूजयेत् ॥
अग्निकोणादिपर्य्यन्तं पूर्व्वरीत्या महेश्वरि ! ।
नमः शिवायेति मन्त्रमष्टाविंशति संजपेत् ।
हुँ अमस्त्विति वामेन करेण तु विसर्ज्जयेत् ॥
आनीत कैश्य विष्णो हरे सह्य जनार्द्दन ।
हंस नारायण स्वाहा मन्त्रमेव सञ्जपेत् ॥ "
हुँ नमो भगवते वासुदेवाय स्वाहा नम इत्यपि सञ्जपेत् ।
एवमेकादशाहेन शत्रूच्छेदनमञ्जसा ।
अवश्यं जायते देवि ! सत्यं सत्यं त्रिलोचने ! ॥"

इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटलः ॥

अपि च ।
"शवास्थिञ्च गवास्थिञ्च मत्स्यनिर्म्माल्यमेव च ।
अरेर्यो निखनेत् द्वारे पञ्चत्वमुपयाति सः ॥"

इति गारुडे १८६ अध्यायः ॥

मारिः, स्त्री, (मार्य्यते इति । मृ + णिच् + इन् ।) मारणम् । वधः । इति मेदिनी । रे, ७७ ॥ जनक्षयः । तत्पर्य्यायः । मारकः २ मरकः ३ उत्पातः ४ । इति त्रिकाण्डशेषः ॥

मारिचिकं, त्रि, (मरिच + "संस्कृतम् ।" ४।४।३ इति ठक् ।) मरिचेन संस्कृतम् । इति सिद्धान्तकौमुदी ॥

मारितः, पुं, (मार्य्यते नाश्यते भस्मीक्रियते इति । मृ + णिच् + कर्म्मणि क्तः ।) मर्द्दितः । भस्मीकृतः । यथा, भावप्रकाशे ।
"असम्यङ्मारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत् ।
करोति रोगान् मृत्युञ्च तद्धन्यात् यत्नतस्ततः ॥"
अपि च ।
"पूर्व्वं वङ्गसमं तालं निम्बाम्बेन विमर्द्दयेत् ।
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ॥
तालेन दशमांशेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"
अपरञ्च ।
आर्द्रत्वञ्च घनत्वञ्च तैक्ष्ण्यं गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥"
अन्यच्च ।
"शुद्धो रसो भवेद्ब्रह्मा बद्धस्तस्तु जनार्द्दनः ।
मारितो रुद्ररूपी स्यात् बद्धः साक्षात् सदाशिवः ॥"

इति वैद्यदर्पणः ॥

मारिव्यसनवारकः, पुं, (मारिजन्यं व्यसनं वारयतीति । वृ + णिच् + अण् ।) राजर्षिविशेषः । यथा,—
"कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः ।
मृतस्वमोक्ता धर्म्मात्मा मारिव्यसनवारकः ॥"
इति हेमचन्द्रः । ३ । ३७७ ॥

मारिषः, पुं, (मर्षति दोषानिति । मृष + अच् । विद्यावान् विज्ञम् । यद्वा, मा रिष्यति हिनस्ति

श्रीपराशर उवाच ।
"इत्युक्ता प्रणिपत्यैनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महासुराः ॥"
इति विष्णुपुराणे ३ अंशे १७ अध्यायः ॥

मायावती, स्त्री, (मायास्त्यस्या इति । माया + मतुप् । मस्य वः । उगित्वात् ङीप् ।) रतिः । कामपत्नी । इति जटाधरः । तस्या नामकारणं यथा,—

श्रीपराशर उवाच ।
"एतस्मिन्नन्तरे प्राप्तः सर्वं लब्धेन नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥
एष ते तनयः सुभ्रु ! हत्वा शम्बरमागतः ।
हृतो येनाभवद्बालो भवत्याः सूतिकागृहात् ॥
इयं मायावती भार्य्या तनयस्यास्य ते सती ।
शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम् ॥
मन्मथे तु गते नाशं तदुद्भवपरायणा ।
शम्बरं मोहयामास मायारूपेण रूपिणी ॥
विवाहाद्युपभोगेषु रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥"
इति विष्णुपुराणे ५ अंशे २७ अध्यायः ॥
(विद्याधरीविशेषः । यथा, कथासरित्सागरे । ११ । ३५ ।
"अहं मायावती नाम राजन् ! विद्याधराङ्गना ।
इयन्तं कालमभवं मायया मोहिता बालिके ॥"
राजकन्याविशेषः । यथा तत्रैव । २१७ । ११२ ।
"अभूत् कामकर्ष्ठाख्यो राजा राजगृहे पुरा ।
तस्य मायावती नाम्नी दुहितासीदनुत्तमा ॥")

मायावसिकः, त्रि, (मायया वसं आच्छादनं करोतीति ठन् ।) प्रच्छादकः । इति शब्दमाला ॥ (मायावञ्चिक इति वा पाठः ॥)

मायावान्, [त्] पुं, (माया अस्त्यस्य । माया + "तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ । इति मतुप् । मस्य वः ।) कंसराजः । इति शब्दरत्नावली । मायायुक्ते, कपटयुक्ते च त्रि । (यथा, ऋग्वेदे । ४ । १६ । ९ ।
"कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।")
"मायावान् कपटवान् ।" इति तद्भाष्ये सायनः ॥)

मायावी, [न्] पुं, (प्रशस्ता मायाकापट्यमस्यास्तीति । माया + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) मायाकारः । तत्पर्य्यायः । शम्बरः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५ । इति जटाधरः ॥ (यथा, मार्कण्डेये । २१ । ७ ।
"मायावी दानवः कोऽपि तानिरूपं समाश्रितः ।
न प्राह राजपुत्रं तं पूर्ववैरमनुस्मरन् ॥")
बिडालः । इति राजनिर्घण्टः ॥ (मोहनशक्तियुक्तः परमात्मा । यथा, भागवते । ६ । ४ ।
"अतत्त्वितर्क्यं महिमा तु मायावी तत्त्वदर्शितः ।
सत्त्वात्मा ऋतमपरो निराविरभुङ्क्ते परः ॥")

मायासीता, स्त्री, (मायाकल्पिता सीता ।) वह्नेः समर्पितसीताप्रतिकृतिः । यथा,—

अग्निरुवाच ।
"भगवन् ! श्रूयतां वाक्यं कालेन यदुपस्थितम् ।
सीताहरणकालोऽयं तवैव समुपस्थितः ॥
दैवञ्च दुर्निवारञ्च न च दैवात् परं बलम् ।
मत्प्रसूं मयि संन्यस्य छायां रक्षान्तिकेऽधुना ॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम ।
देवैः प्रस्थापितोऽहञ्च न च विप्रो हुताशनः ॥
रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ।
स्वीचकार च तद्वाक्यं हृदयेन विदूयता ॥
वह्निर्योगेन सीताया मायासीतां चकार सः ।
तद्रूपगुणसर्व्वाङ्गां ददौ रामाय नारद ! ॥
सीतां ददौ स वह्निः गोप्यं वक्तुं निषिध्य च ।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥
एतस्मिन्नन्तरे रामो जघान मायकेन च ।
वनान्ते रावणश्च सीतां संप्राप दुःखिताम् ॥
तां च वह्निपरीक्षाञ्च कारयामास सत्वरम् ।
हुताशनश्च काले च वास्तवीं जानकीं ददौ ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता ।
करिष्यामीति किमहं तदुपायं वदस्व मे ॥"

वह्निरुवाच ।
"त्वं गच्छ तपसे देवि ! पुष्करञ्च सुपुण्यदम् ।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः ।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह ॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ।
कामिनी पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा ॥
सत्ये युगे वेदवती कुशध्वजसुता शुभा ।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा ॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ।
त्रिहायणीति सा प्रोक्ता विद्यमाना युगत्रये ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

मायासुतः, पुं, (मायायाः मायादेव्याः सुतः ।) बुद्धः । इति हेमचन्द्रः । २ । १४६ ॥

मायिकं, क्ली, (माया मोहनगुणः विद्यतेऽस्मिन् । माया + "व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाफलम् । इति राजनिर्घण्टः ॥ पुस्तकान्तरे मायिका मायका इत्यपि पाठः ॥

मायिकः, पुं, (माया अस्त्यस्य । माया + "व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाकारः । इति जटाधरः ॥ (यथा, देवीभागवते । ४ । १८ । ७ ।
"महामायामोहितश्चाद्य कदा वर्त्ते पराक्रमः ।
परवान् राक्षसाधायी मायिकस्य यथा नटः ॥"
मायाविशिष्टे, त्रि ॥)

मायी, [न्] पुं, (मायाऽस्त्यस्य । माया + "व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) मायाकारः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ कंसकः ४ कुहकः ५ प्रातिहारिकः ६ मायिकः ७ । इति हेमचन्द्रः । ३ । ४६ ॥ (मायायुक्ते, त्रि । यथा, कुमारे । २ । ४९ ।
"यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥"
मायोपाधिके परमेश्वरे च । यथा, श्वेताश्वतरोपनिषदि । ४ । १०२ ।
"मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ॥")

मायुः, पुं, (मिनोति प्रक्षिपति देहे उष्माणमिति । मिञ् प्रक्षेपणे + "कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "मीनाति मिनोतिदीङां ल्यपि च ।" ६ । १ । ५० । इत्यात्वम् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) पित्तम् । इत्यमरः । २ । ६ । ६२ ॥ (शब्दः । यथा, ऋग्वेदे । १ । १६४ । २८ ।
"सृक्वाणं घर्ममभिवावशाना मिमाति मायुं पयते पयोभिः ॥"
"मायुं शब्दं मिमाति निर्मिमीते करोति ।" इति तद्भाष्ये सायनः । वाक् । इति निघण्टुः । १ । ११ ।)

मायुराजः, पुं, कुबेरपुत्रः । इति त्रिकाण्डशेषः ॥

मायूरं, क्ली, (मयूराणां समूहः । मयूर + "प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इत्यञ् ।) मयूरसमूहः । इत्यमरः । २ । ५ । ४६ ॥ (मयूराणामिदमित्यण् ।) तत्सम्बन्धिनि, त्रि । यथा, महाभारते । १३ । १०४ । ८० ।
"छागं गव्यं तथा शौचं मायूरञ्चैव वर्जयेत् ॥")

मायूरिकः, पुं, (मयूरं हन्ति । मयूर + "पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् ।) मयूरव्याधः । इति सिद्धान्तकौमुदी ॥

मायूरी, स्त्री, अजमोदा । इति राजनिर्घण्टः ॥

मारः, पुं, (मृ + भावे घञ् ।) मृतिः । (यथा, हरिवंशे भविष्यपर्व्वणि । १ । ११ ।
"कुम्भारकाद्घटक्षिभः साक्षी हृदयो विरोधिलिन्दनः ॥")
म्रियन्ते प्राणिनोऽनेन । मृ + घञ् ।) कामदेवः । (यथा, नैषधे । ४ । ७८ ।
"अहममार न मार ! कथं नु वा
रतिरतिप्रथितापि पतिव्रता ।
विरहिणीहतलाघवगाथकी
दयितयापि तयापि किमुज्झितः ॥")
विघ्नः । इति मेदिनी । रे, ७६ ॥ (मृ + णिच् + घञ् ।) मारणम् । इति हेमचन्द्रः । २ । ११ ॥ धुस्तूरः । इति शब्दचन्द्रिका ॥ मारस्योत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"मनोभवस्य वचनं श्रुत्वा चतुराननः ।
किञ्चुदपि तदाश्चर्यं श्रुत्वा मुनयवादकारकम् ॥
धर्म्मस्य मोहने श्रद्धा किमाविद्वोऽभवद्धि ।
समर्थो मोहितुमिति चिन्तयाञ्च मुहुर्मुहुः ॥
चिन्तयमानस्याञ्च तस्य निश्वासा महाबलाः ।
जाता नाना ललमिलिकादीनानाभिधवराः ॥
तुरङ्गवदनाः केचिन्केचिद्गर्दभमुखास्तथा ।
शिंशुमारमुखाश्चान्ये नराश्वमुखाननाः ॥

म्बमार्जारवदना: शरभास्या: शुकानना: ।
गोमायुवक्त्राश्च सरीसृपमुखा: परे ॥
रूपा गोमुखा: केचित्तथा पक्षिमुखा: परे ।
हादीर्घा महाह्रस्वा महास्थूला महाकृशा: ॥
मप्रांशा विरलाश्चाथ चार्म्मैकाश्च महो-
दरा: ।
कर्णाश्चिकर्णाश्च चतुष्कर्णास्तथापरे ।
लकर्णा दीर्घकर्णा बहुकर्णा विकर्णका: ।
दीर्घाक्षा स्थूलनेत्राश्च सूक्ष्मनेत्रा विहस्तय: ॥
चतुष्पादा: पञ्चपादास्त्रिपादैकपदास्तथा ।
ह्रस्वपादा दीर्घपादा: स्थूलपादा महापदा: ॥
एकहस्ताश्चतुर्हस्ता द्विहस्तास्त्रिप्रयास्तथा ।
विहस्ताश्च विरूपाश्च गोधिकाननय: परे ॥
मनुष्याननय: केचित् शिशुमारमुखा: परे ।
क्रौञ्चाकारा बकाकारा हंससारसरूपिण: ॥
तथैव मद्गुरवककङ्ककाकमुखास्तथा ।
अर्द्धनीला अर्द्धरक्ता: कपिला: पिङ्गलास्तथा ।
नीला: शुक्लास्तथा पीता हरिताश्चित्ररूपिण: ॥
अवादयन्त ते शङ्खान् पटहान् परिवादिन: ॥
मड्डून् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा ।
सर्व्वे जटाभि: पिङ्गाभिस्तुङ्गाभिश्च करान्विता: ॥
शिरस्त्राभिर्व्विशिष्टा गणा: स्यन्दनगामिन: ।
शूलहस्ता: पाशहस्ता: खड्गहस्ता धनुर्धरा: ॥
शक्त्यङ्कुशगदाचापपट्टिसप्रासपाणय: ।
नानायुधा महानादं कुर्व्वन्तस्ते महाबला: ॥
मारय च्छेदयेत्यूचुर्ब्रह्मण: पुरतो गणा: ।
तेषाञ्च वदतां तत्र मारय च्छेदयेत्युत ।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे ॥
अथ ब्रह्माणमाभाष्य तान् दृष्ट्वा मदनो गणान् ।
उवाच वारयन् वक्तुं गणानामग्रत: स्मर: ॥

मदन उवाच ।

किं कर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा
विधे ! ।
किं नामधेया एते वा सर्व्वैतान् विनियोजय ॥
नियुज्यैतान् निजे कृत्ये स्थानं दत्त्वा च नाम च ।
तथा पश्चान्महामायाप्रभावं कथयस्व मे ॥”

मार्कण्डेय उवाच ।

“अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामह: ।
मदनं समदनादाह तेषां कर्म्मादिकं दिशन् ॥

ब्रह्मोवाच ।

“एते तूत्पन्नमात्रा हि मारयेति यदब्रुवन् ।
मुहुर्मुहुरतोऽमीषां नाम मारेति जायताम् ॥
मारात्मकत्वादप्येते मारा: सन्तु च नामत: ।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनार्च्चनम् ।
तवानुगमनं कर्म्म मुख्यमेषां मनोभव ! ॥
यत्र यत्र भवान् याता स्वकर्म्मार्थं यदा यदा ।
गन्तारस्तत्र तत्रैते साहाय्याय तदा तदा ॥
चित्तोद्भ्रान्तिं करिष्यन्ति त्वदस्त्रवशवर्त्तिनाम् ।
ज्ञानिनां ज्ञानमार्गञ्च विघ्नयिष्यन्ति सर्व्वदा ।
यथा शारीरिकं कर्म्म सर्व्वे कुर्व्वन्ति जन्तव: ।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वत: ॥
एषे स्थास्यन्ति सर्व्वत्र वेगिन: कामरूपिण: ।
स्त्रीभिरेषां गणाध्यक्ष: पञ्चयज्ञाङ्गभोजिन: ।
नित्यक्रियावतां तोयभोगिनोऽपि भवन्त्विमे ॥”

इति कालिकापुराणे ६ अध्याय: ॥

मारक:, पुं, (म्रियन्ते प्राणिन: यस्मिन् येनेति वा । मृ + घञ् । तत: संज्ञायां कन् ।) मरक: । तत्पर्य्याय: । मारि: २ उत्पात: ३ । इति त्रिकाण्डशेष: ॥ पक्षिविशेष: । बाज् इति भाषा । तत्पर्य्याय: । घातिपक्षी २ ग्राहक: ३ । इति भूरिप्रयोग: ॥ मारयितरि त्रि ॥

मारजित्, पुं, (मारं कामं जितवान् । जि + क्विप् । तुगागम: ।) बुद्ध: । इत्यमर: । १ । १ । १३ ॥

मारणं, क्ली, (मार्य्यते इति । मृ + णिच् + भावे ल्युट् ।) वध: । इत्यमर: । २ । ८ । ११४ ॥ (यथा, मनौ । ५ । ३८ ।
“यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्न: प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥”)
अभिचारविशेष: । यथा,—
“एवन्तु मारणं देवि ! विशेषात् कथयामि
ते ।
शान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
कूर्च्चयुग्मं ततो देवि ! अमुकं मारय मारय ।
चतुर्दशाक्षरो मन्त्रो स्वाहान्त: शत्रुनाशक: ॥
खदिराङ्गारमादाय कुजाष्टम्यां विशेषत: ।
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहचक्रके ॥
शिखायां मस्तके नेत्रे ललाटे हृदये करे ।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये ॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत् ।
संहारमुद्रां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम् ॥
दीर्घाकारां कृष्णवर्णां शराङ्कनगमस्तकाम् ।
त्रिशूलयुगलं हस्ते चर्व्वयन्तीं दिगम्बरीम् ॥
शत्रुनाशकरीं देवीं ध्यायेत् शत्रुक्षयाय च ।
एवं ध्यात्वेरिकापूर्व्वं वामहस्तेन शङ्करि ! ॥
ओँ शत्रुनाशकर्य्यै नम: इति दत्त्वा महेश्वरि ! ।
हरिद्रापूर्णसहिता धारा दद्यादनेन तु ॥
अमुकस्य शोणितं पिब पिबेति ततपरम् ।
मांसं खादय खादय हूँ नम इति मन्त्रम् ॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा शताष्टकम् ।
जपेदेकादशाहे च रोग: स्यान्नात्र संशय: ॥
द्वादशाहैकविंशाहे मृत्युरेव रिपोर्भवेत् ॥ ● ॥
अथवान्यप्रकारेण शत्रुनाशमहं वदे ।
पुंगोमलन्तु समादाय पूजयेद्रक्तवारिणा ॥
विपरीतक्रमेणैव जपपूजादिकं चरेत् ।
महादेवाय नम इति पुंगोमलं समाचरेत् ।
शिवाय नम इति मन्त्रेण घटनञ्च समाचरेत् ।
पशुपतये नम इति प्राणान् संस्थापयेत्तत: ॥
लौहपात्रे महेशानि ! खदिराङ्गारयोगत: ।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेत् शिवम् ॥
ततो ध्यायेन्महादेवं ध्यानन्तु सुसमाहित: ।
ग्रचोर्म्मध्य:स्थितं चन्द्रं ज्वलदग्निसमप्रभम् ।
वामहस्तधरं कीर्णं दक्षिणं प्राणकर्षणम् ।
नरचर्म्माम्बरं देवं महाध्वानादिवेष्टितम् ॥
पिनाकधृक् इहागच्छागच्छ इत्यादिनावाह्य
मन्त्रत: ।
शूलपाणये नम इति स्नापयेत् साधकोत्तम: ॥
महेश्वराय नम इति पाद्यादिना प्रपूजयेत् ।
ईशानादिस्तथा मूर्त्तिर्न्निजक्रमेण प्रपूजयेत् ॥
अग्निकोणादिपर्य्यन्तं पूर्व्वरीत्या महेश्वरि ! ।
नम: शिवायेति मूलमष्टाविंशति संजपेत् ।
हुँ क्षमस्वेति वामेन करेण तु विसर्ज्जयेत् ॥
ज्वलत् केशव विष्णो हरे सत्य जनार्द्दन ।
हंस नारायण स्वाहा मन्त्रमेव सञ्जपेत् ।
हुँ नमो भगवते वासुदेवाय स्वाहा नम इत्यपि
सञ्जपेत् ।
एवमेकादशाहेन शत्रूच्छेदनमञ्जसा ।
अवश्यं जायते देवि ! सत्यं सत्यं त्रिलोचने ! ॥”

इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटल: ॥

अपि च ।
“श्मशानेषु गवास्थीनि मूत्रनिर्म्माल्यमेव च ।
अरेर्यो निखनेत् द्वारे पञ्चत्वमुपयाति स: ॥”

इति गारुडे १८६ अध्याय: ॥

मारि:, स्त्री, (मार्य्यते इति । मृ + णिच् + इन् ।) मारणम् । वध: । इति मेदिनी । रे, ७७ ॥ जनक्षय: । तत्पर्य्याय: । मारक: २ मरक: ३ उत्पात: ४ । इति त्रिकाण्डशेष: ॥

मारिचिकं, त्रि, (मरिच + “संस्कृतम् ।” ४।४।३ इति ठक् ।) मरिचेन संस्कृतम् । इति सिद्धान्तकौमुदी ॥

मारित:, पुं, (मार्य्यते नाश्यते भस्मीक्रियत इति । मृ + णिच् + कर्म्मणि क्त: ।) नष्टीकृत: । भस्मीकृत: । यथा, भावप्रकाशे ।
“असम्यङ्मारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत् ।
करोति रोगान् मृत्युञ्च तद्धन्यात् यत्नतस्तत: ॥”
अपि च ।
“पूर्व्वं वङ्गसमं नागं शिलाम्लेन विमर्द्दयेत् ।
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ॥
तालेन दशमांशेन याममेकं तत: पुटेत् ।
एवं दशपुटै: पक्वं वङ्गं भवति मारितम् ॥”
अपरञ्च ।
“आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥”
अन्यच्च ।
“शुद्धो रसो भवेद्ब्रह्मा मूर्च्छितस्तु जनार्द्दन: ।
मारितो रुद्ररूपी स्यात् बद्ध: साक्षात् सदा-
शिव: ॥”

इति वैद्यदर्पण: ॥

मारिव्यसनवारक:, पुं, (मारिजन्यं व्यसनं तद्वारयतीति । वृ + णिच् + ण्वुल् ।) राजर्षिविशेष: । यथा,—
“कुमारपालश्चौलुक्यो राजर्षि: परमार्हत: ।
मृतस्वमोक्ता धर्म्मात्मा मारिव्यसनवारक: ॥”
इति हेमचन्द्र: । ३ । ३७७ ॥

मारिष:, पुं, (मर्षति दोषादिकं । मृष + अण् । निपातनात् सिद्धम् । यद्वा, मा रिष्यति हिंसति

कश्चिदस्यौति। (रिष + कः।) शाकभेदः। इत्यमरः। २। ४। १३४॥ (क्वचित् पुरुषार्थे-ऽपि। यथा, देवीभागवते। १। ११। ६५।
"आचार्य्यं ते करिष्यामि सन्ततप्याप्य महामते ! ।
भविता यदि संग्रामस्तव चेन्द्रेण मारिष ! ॥"
तथा च महाभारते। ७। ४६। १९।
"दार्य्यमाणाश्च ... भारतेन मारिष ! ॥")
तण्डुलीयशाकविशेषः। मरषा इति हिन्दी भाषा। तत्पर्य्यायः। कण्टरः २ मारिषः ३। (शाकार्थे पर्य्यायो गुणाश्च यथा। [अथ चौत-मरषा। लोहितमरषा भवद्रा इति च लोके।]
"मारिषो वास्तुको मार्षः श्वेतो रक्तश्च स स्मृतः।
मारिषो मधुरः शीतो विष्टम्भी पित्तनुद्गुरुः।
वातश्लेष्मकरो रक्तपित्तविषमाग्निजित्।
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)
मारिषा, स्त्री, (मारिष + टाप्।) दक्षमाता। इति मेदिनी। षे, ११। (यथा, मत्स्यपुराणे। ४। ४८।
"सोमकन्याभवत् पत्नी मारिषा नाम विश्रुता।
तस्यास्तु दक्षमेकं सा पुत्रमग्र्यमजीजनत्॥"
अस्या जन्मवृत्तान्तो यथा, विष्णुपुराणे। प्रथमांशे १५ अध्याये।
"कण्डुर्नाम मुनिः पूर्ब्बमासीद्वेदविदां वरः।
सुरम्ये गोमतीतीरे स तेपे परमं तपः॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता॥"
इत्यारभ्य—
"तावदिदं स विप्रर्षिस्तां यदीति सुमध्यमाम्।
तावत्कन्दुर्द्दरवनाद् या बभूवातिवेपथुः॥
प्रस्वेदमार्द्रां ... सतीम्।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात्।
आकाशगामिनी स्वेदं ममार्ज्ज तरुपल्लवैः॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः।
निर्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः।
निर्ज्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः॥
तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः॥
वृक्षाग्रगर्भसम्भूता मारिषाख्या वरानना।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम्॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता।
ममापत्यं तथा वायोः प्रम्लोचातनया च सा॥"
शूरस्य पत्नी। यथा, भागवते। ९। २४। २७।
"देवमीढस्य शूरस्य मारिषा नाम पत्न्य-भूत्॥")
मारी, स्त्री, (मारि + कृदिकारादिति पक्षे ङीष्।) मरकः। मरकः। इति मेदिनी। रे, ७६। माहेश्वरी शक्तिः। यथा,—

"मारी चिण्डेव जघान चान्यान् महासुरानापतितानरांश्च कौशिकी।"
इति वामने ५५ अध्यायः।
मारीचः, पुं, (मरीचेरयं पुमान्। मरीचि + अण्।) राक्षसविशेषः। स च ताडकाराक्षसी-पुत्रः रावणसहचरः सीताहरणकाले माया-मृगरूपोऽसौ श्रीरामेण हतश्च। इति रामा-यणम्। अस्य विवरणं यथा,—
"एतस्मिन्नन्तरे रामो ददर्श कनकं मृगम्।
सीता तं प्रेरयामास गन्तुं मृगपूर्ब्बकम्॥
संस्थाप्य लक्ष्मणं रामो जानक्या रक्षणे वने।
स्वयं जगाम तूर्णं तं विव्याध सायकेन च॥
हा लक्ष्मणेति शब्दञ्च कृत्वाप मायया मृगः।
प्राणांस्तत्याज सहसा पुरो दृष्ट्वा हरिं स्मरन्॥
जगदेवं परित्यज्य दिव्यं देहं विधाय च।
रत्ननिर्म्माणयानेन वैकुण्ठं स जगाम ह॥
वैकुण्ठद्वारे द्वार्य्याधीशौ किङ्करौ द्वारपालयोः।
जयश्च विजयश्चैव महाबलपराक्रमौ।
शापेन सनकादीनां संप्राप्य राक्षसीं तनुम्।
पुनर्ज्जगाम च द्वारदेशे च द्वारपालयोः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १९ अध्यायः॥
कश्यपः। यथा,—
"इति संचिन्त्य भगवान् मारीचः कुरुनन्दन !।
उवाच किञ्चित् कुपित आत्मानञ्च विगर्हयन्॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः॥
(तथा च महाभारते। १२। ३५। १०७।
"मरीचिभ्यो मरीचिस्तु मारीचः कश्यपो ह्यभूत्॥")
कक्कोलकम्। राजकमासकः। इति मेदिनी। चे, १७। राजकली। इति जटाधरः॥
मारीची, स्त्री, (मरीचेरियम्। इत्यण्। ङीप्।) देवताभेदः। इति मेदिनी। चे, १७। सा तु मायादेवी। तत्पर्य्यायः। त्रिमुखा २ वज्र-कालिका ३ विकटा ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७। इति त्रिकाण्डशेषः॥
मारुकः, पुं, मर्य्याकः। पत्नाः। गोमयगच्छम्। इति मेदिनी। के, ११५॥
मारुतः, पुं, (मरुदेव। मरुत् + "प्रज्ञादिभ्यश्च।" ५। ४। ३८। इति स्वार्थेऽण्।) वायुः। इत्यमरः। १। १। ६१॥ म्रियतेऽनेन मुद्गेन प्राण्यते च स उत् मरुत् मरुदेव मारुतः स्वार्थे ष्णः। इति तट्टीकायां भरतः॥
(यथा, मनौ। ४। १२२—१२३।
"अतिथिञ्चाननुज्ञाप्य मारुते वाति वा भृशम्।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते।
सामध्वनावृग्यजुषी नाधीयीत कदाचन॥")
अस्योत्पत्तिर्यथा,—
कश्यप उवाच।
"पुत्रस्ते भविता भद्रे ! इन्द्रहा देवबान्धवः।
संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि॥"
अन्यच्च तत्रैव।
"संवत्सरं पुंसवनं व्रतमेतदविप्लुतम्।
धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः॥
बाढमित्यभ्युपेत्याथ दिती राजन् ! महामनाः।
काश्यपं गर्भमाधत्त व्रतञ्चाञ्जो दधार सा॥
मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद !।
शुश्रूषणेनाश्रमस्थां दितिं पर्य्यचरत् कविः॥
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप !।
प्रेप्सुः पर्य्यचरज्जिह्मो मृगहेव मृगाकृतिः॥
नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते !।
चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्शिता।
अस्पृष्टवार्य्यधौताङ्घ्रिः सुष्वाप विधिमोहिता॥
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः।
दितेः प्रविष्ट उदरं योगेशो योगमायया॥
चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम्।
रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः॥
तमूचुः पाट्यमानास्ते सर्व्वे प्राञ्जलयो नृप !।
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव।
मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः॥
अनन्यभावान् पार्षदानात्मनो मरुतां गणान्।
न ममार दितेर्गर्भः श्रीनिवासानुकम्पया।
... दैवात्ते मरुतोऽभवन्।
व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः॥
दितिरुत्थाय ददृशे कुमाराननलप्रभान्।
इन्द्रेण सहितान्देवी पर्य्यतुष्यदनिन्दिता॥
अथेन्द्रमाह ताताहमादित्यानां भयावहम्।
अपत्यमिच्छन्त्यचरं व्रतमेतत् सुदुष्करम्॥
एकः सङ्कल्पितः पुत्रः सप्त सप्ताभवन् कथम्।
यदि ते विदितं पुत्र ! सत्यं कथय मा मृषा॥
इन्द्र उवाच।
अम्ब ! तेऽहं व्यवसितमुपधार्य्यागतोऽन्तिकम्।
लब्धान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्म्मदृक्॥
कृत्तो मे सप्तधा गर्भ आसन् सप्त कुमारकाः।
तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे॥
ततस्तत्परमाश्चर्य्यं वीक्ष्याध्यवसितं मया।
महापुरुषपूजायाः सिद्धिः काप्यनुषङ्गिणी॥
तदिदं मम दौर्ज्जन्यं बालिशस्य महीयसि !।
क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः॥
श्रीशुक उवाच।
इन्द्रस्तयाभ्यनुज्ञातः शुद्धभावेन तुष्टया।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः॥
(जनपदविशेषः। यथा, महाभारते। ६। ९। ५८—६०।
"मारुता धेनुकाश्चैव तङ्गणाः परतङ्गणाः।
बाह्लीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत !॥
एते जनपदा राजन् ! दक्षिणं पथमा-श्रिताः॥"
ऋषिभेदः। यथा, शतपथब्राह्मणे। ३।६।
"ऋषिस्तु मारुतो नाम सम्पाते विश्रुतः॥"
मरुद्गणसम्बन्धिनि, त्रि। यथा, ऋग्वेदे ।५।१।११२।

"राधि चर्ये राधि मित्रमभ्मे राधि भर्धं इन्द्र मारुतं नः ।"
"मारुतं मरुतां देवविशां समष्टि ।" इति तद्भाष्ये सायनः ।)

मारुतव्रतं, क्ली, (मारुतस्य इवमिव व्रतं नियमो-ऽत्र ।) राजधर्म्मविशेषः । यथा,—
"प्रविश्य सर्व्वभूतानि यथा चरति मारुतः ।
तथा चरैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥"
इति मात्स्ये २०० अध्यायः ॥

मारुतात्मजः, पुं, (मारुतस्यात्मजः ।) हनूमान् । इति जटाधरः ॥ (भीमश्च ॥)

मारुतापहः, पुं, (मारुतमपहन्ति । हन + डः ।) वरुणवृक्षः । इति राजनिर्घण्टः ॥ वायुनाशके, त्रि ॥

मारुताशनः, पुं, (मारुतोऽशनमस्य । अश्नातीति । अश + ल्युः । मारुतानां अशनो भक्षकः ।) सर्पः । पवनाशन इत्यमरटीकायाम् । (यथा, महाभारते । ५ । १०३ । ११ ।
"भक्षः पयस्तु मह्यं वै बाहुभ्यां संश्रितस्तव: ।
स्थितः स्थापयितुं विष्णोर्निर्घृष्टो मारुताशनः ॥")
वायुभक्षके, त्रि ॥ (कार्त्तिकेयस्य सैनिकविशेषः । यथा, महाभारते । ९ । ४५ । ६० ।
"विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥")

मारुतिः, पुं, (मारुतस्यापत्यं पुमान् । मरुत + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) हनूमान् । इति शब्दरत्नावली ॥ (यथा, रघौ । १२ । ६० ।
"प्रवृत्तावुपलब्धायां तस्याः सम्पातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्म्ममः ॥")
भीमसेनः । इति जटाधरः ॥ (यथा, देवीभागवते । २ । ७ । २१ ।
"तच्छ्रुत्वा वचनं भ्रातुर्ज्येष्ठस्यामिततेजसः ।
संप्रेक्ष्य महाबाहुर्मारुतिः कुपितोऽब्रवीत् ॥")

मार्कः, पुं, भृङ्गराजः । इति रत्नमाला ॥

मार्कण्डः, पुं, (मृकण्डोरपत्यम् । मृकण्डु + अण् ।) मार्कण्डेयमुनिः । इति शब्दरत्नावली ॥

मार्कण्डिका, स्त्री, लताविशेषः । भूइ खाखसा इति हिन्दीभाषा । सा तु काकोलीभेदः । तत्-पर्य्यायः । भूमिचरी २ मार्कण्डी ३ मृदुरेचनी ४ । अस्या गुणाः । कटुत्वम् । ऊर्द्ध्वाधः-कायशोधनत्वम् । विषदुर्गन्धकासगुल्मोदरना-शित्वञ्च । इति भावप्रकाशः ॥

मार्कण्डीयं, क्ली, भूम्याहुल्यम् । इति राज-निर्घण्टः ॥

मार्कण्डेयः, पुं, (मृकण्डोरपत्यं । मृकण्डु + "शुभ्रा-दिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) मृकण्डु-मुनिपुत्रः । जन्मतिथ्यादौ पूजायां तस्य ध्यानं यथा,
"द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेत् चिरायुषम् ॥"
तस्य प्रार्थनामन्त्रः ।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग ! सप्तकल्पान्तजीवन ! ।
आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ॥"
इति तिथ्यादितत्त्वम् ॥

तस्योत्पत्त्यादिर्यथा,
मार्कण्डेय उवाच ।
"देवौ धातृविधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ।
भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ।
मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ॥
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥"
इति श्रीमार्कण्डेयपुराणे पञ्चाशोऽध्यायः ॥

अपि च ।
पुलस्त्य उवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डोत्पत्तिमुत्तमाम् ।
पुरा कल्पे मुनिः पूर्व्वं मृकण्डुर्नाम विश्रुतः ॥
भृगोः पुत्रो महाभागः सभार्य्यस्तप्तवांस्तपः ।
तस्य पुत्रस्तदा जातो वसतस्तु वनान्तरे ॥
स पञ्चवर्षको जातो बाल एव गुणान्वितः ।
ज्ञानिना च तदा दृष्टो भ्रमता तस्य प्राङ्गणे ॥
स्थित्वा च सुचिरं कालं वीक्षय ततो दिनम् ।
वीक्ष्य चिन्तापरो ज्ञानी किं वर्षो बालकस्तव ॥
दिनं खण्डितम् ।
संख्यया षष्ठवर्षाणि जातानीति न्यवेदयत् ।
मृकण्डुनैव उक्तस्तु स ज्ञानी वाक्यमब्रवीत् ॥
मासमायुश्च पुत्रस्य तेऽवशिष्टं मुनीश्वर ! ।
नैव शोकस्त्वया कार्य्यः सत्यमेतदुदाहृतम् ॥
एतत् श्रुत्वा वचो भीम ! ज्ञानिना यदुदाहृतम् ।
व्रतोपनयनं चक्रे बालकस्य पिता तदा ॥
आह चैनं पिता पुत्रमृषिं त्वमभिवादय ।
एवमुक्तः स वै पित्रा ऋषिं भक्त्या ननाम सः ॥
एतस्मिन्नन्तरे तत्र प्रदीप्ताः पावकोपमाः ।
मार्गेणापि समायातास्तेन सप्तर्षयोऽमलाः ॥
बालेन तेन दृष्टास्ते सर्व्वे समभिवादिताः ।
आयुष्मान् भव तैरुक्तः स बटुर्दण्डमेखलाम् ॥
उक्ताश्चैव पुनर्म्मानी पञ्चमः सौख्यजीवितम् ।
दिनानि पञ्च ते चायुर्ज्ञात्वा भीताभवन् पुनः ॥
तमुत्क्षिप्य ब्राह्मणा वै गतास्ते ब्रह्मणोऽन्तिकम् ।
प्रतिगृह्य च तं बालं प्रणिपेतुः पितामहम् ॥
आयुष्मान् भव इत्याह तेन ब्रह्माभिवादितः ।
चिरायुर्ब्रह्मणा बालः प्रोक्तः स ऋषिसन्निधौ ॥
ततस्ते मुनयः प्रीताः श्रुत्वा वाक्यं पितामहात् ।
पितामहस्तु समर्षीन् दृष्ट्वा प्रोवाच विस्मितान् ॥
कार्य्येण केन वा याताः कोऽयं बालो निवेद्यताम्,
ततः सप्तर्षयो राजन् ! सर्व्वं तस्मै न्यवेदयन् ॥
भृगोः सुतो मृकण्डुस्तु पौत्रोऽयं तस्य बालकः ।
अल्पायुष्कस्ततस्तस्य बटोस्तेनास्य मेखला ॥
यज्ञोपवीतं दण्डश्च दत्ता तेन प्रबोधितः ।
यं कञ्चित् पश्यसे लोके भ्रमन्तं भूतले जनम् ॥
तस्याभिवादनं कार्य्यमेवमाह पितामहः ।
तावद्वयमनेनाथ क्षितौ दृष्टाः परिभ्रमन् ॥
एकाकमार्षम् ।
तीर्थयात्राप्रसङ्गेन दैवयोगात् पितामह ! ।
चिरायुर्भव वै विप्र ! वाक्यमस्माभिरीरितम् ॥
कथं चिरायुः स्याद्विप्रबालकः साम्प्रतं प्रभो ! ।
कथं नानृतिनो देव ! भवामो भवता वयम् ॥
एवमुक्तस्तदा तैस्तु ब्रह्मा लोकपितामहः ।
ऋतवाचो भविष्यामः सर्व्व एव वयं स्थिताः ॥
मत्समश्चायुषा बालो मार्कण्डेयो भविष्यति ।
ऋषीणां मुख्यतश्चासौ मत्सहायो भविष्यति ।
कल्पस्यादौ तथा चान्ते वृतो मुनिभिरुत्तमैः ॥
एवन्ते मुनयो बालं ब्रह्मा लोकपितामहः ।
सम्बोध्य प्रेषयामास भूयोऽप्येवं परन्तप ! ॥
तीर्थयात्रां गता विप्रा मार्कण्डेयो निजं गृहम् ।
जगाम गत्वा तं विप्रं पितरं स तथाब्रवीत् ॥"
इति पाद्मे सृष्टिखण्डे ३० अध्यायः ॥

अपरञ्च ।
व्यास उवाच ।
"मार्कण्डेयेन मुनिना यथा मृत्युः पराजितः ।
तथा ते कथयिष्यामि शृणु वत्स ! महामते ! ॥
भृगोः पौत्रो महाभागो बाल्ये च महाद्युतिः ।
यद्यपि बलभी बालः पिता तस्य कृतक्रियः ॥
स तस्मिन् वै जातमात्रे आदेशी कश्चिदब्रवीत् ।
वर्षे द्वादशमे पूर्णे मृत्युरस्य भविष्यति ॥
श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः ।
तौ दृष्ट्वा दुःखसम्पन्नौ मार्कण्डेयो महामतिः ॥
उवाच वचनं तत्र किमर्थं दुःखमीदृशम् ।
वक्तुमर्हसि दुःखस्य कारणं मम पृच्छतः ॥
कथयामास तत् सर्व्वमादेशी यदुवाच ह ।
तत् श्रुत्वा तौ मुनिः प्राह मातरं पितरं पुनः ॥
पिता चाहं त्वया मातर्न कार्य्यं दुःखमण्वपि ।
अपनेष्यामि मे मृत्युं तपसा नात्र संशयः ।
यथा चाहं चिरायुः स्यां तथा कुर्य्यामहं तपः ॥
सूत उवाच ।
इत्युक्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात् ।
तत्र विष्णुं प्रतिष्ठाप्य गन्धपुष्पादिभिः क्रमात् ।
पूजयामास देवेशं मार्कण्डेयो महामुनिः ॥
पूजयित्वा हरिं तत्र तपस्तेपे सुदुष्करम् ।
निराहारो मुनिस्तत्र वर्षमेकमतन्द्रितः ॥
माघोत्तरायणदिने तत्र महामतिः ।
स्नात्वा यथोक्तविधिना तत्र विष्णोश्च पार्श्वतः ।
हृदि हरिं निदधानं विशुद्धेनान्तरात्मना ।
आसनं स्वस्तिकं बद्ध्वा कृत्वा प्राणसंयमम् ॥
ओङ्कारोच्चारवातेन हृदि पद्मं विकाशयन् ।
तन्मध्ये रविसोमाग्निमण्डलानि यथाक्रमम् ।
कल्पयित्वा हरेः पीठं तस्मिन्नेव सनातनम् ।
पीताम्बरधरं विष्णुं शङ्खचक्रगदाधरम् ।
ब्रह्मरूपं हरिं ध्यायंस्ततो महत्तरोरवम् ॥
इत्येवं ध्यायतस्तस्य मार्कण्डेयस्य धीमतः ।
मनस्येव संजप्य देवदेवमनुस्मृती ।

ततो यमाज्ञयागत्य आगता यमकिङ्कराः ।
पाशहस्तास्तु तं नेतुं विष्णुदूतैस्तु ते हताः ॥
पुनर्यमस्याज्ञया तु दृष्टश्च पुनः पुनः ।
अयं निहता गच्छामो मृत्युरेवागमिष्यति ॥
आगतश्च ततो मृत्युः पार्श्वे महात्मनः ।
मार्कण्डेयस्य बद्धाय विष्णुकिङ्करमध्यगः ॥
ते चापि दृष्ट्वा मृत्युं तु विष्णुकिङ्कराः ।
विष्णुाज्ञया हनिष्यामो मृत्युमस्मेति संस्थिताः ॥
ततो विष्णुर्पितमना मार्कण्डेयो महामतिः ।
तदा च प्रणतो भूत्वा देवदेवं जनार्द्दनम् ॥
विष्णुदेवोपदिष्टञ्च स्तोत्रं कर्त्तुं महात्मनः ।
समाविष्टेन मनसा तेन तुष्टाव माधवम् ॥
ॐ नमो भगवते वासुदेवाय ।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति ॥
गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
शङ्खचक्रधरं देवं छन्नरूपिणमव्ययम् ।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
वाराहं वामनं विष्णुं नारसिंहं जनार्द्दनम् ।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
पुरुषं पुष्करं बीजं क्षेमबीजं जगत्पतिम् ।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
सहस्रशिरसं देवं व्यक्ताव्यक्तं सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
इत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः ।
अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीड़ितः ॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्ल्लभम् ॥
मृत्युञ्जयमिदं पुण्यं मृत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥"
श्रीभगवानुवाच ।
"य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥"
व्यास उवाच ।
"अन्तःपद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्य्यादपि राजमानो
मृत्युं स योगी जितवांस्तदैव ॥"
इति नारसिंहपुराणे मार्कण्डेयमृत्युञ्जयो नाम
* अध्यायः ॥ (मार्कण्डेयेन प्रोक्तम् । मार्कण्डेय
+अण् । पुराणविशेषः । यथा, देवीभाग-
वते । १ । ३ । १—३ ।
"शृणुध्वं संप्रवक्ष्यामि पुराणानि मुनीश्वराः ।"
इत्यारभ्य—
तथा यज्ञवराहञ्च मार्कण्डेयं महाद्भुतम् ॥")
मार्करः } पुं, भृङ्गराजः । इत्यमरः ।२।४।१५१।
मार्कवः } मर्कति केशरञ्जनार्थं गच्छति मर्कवः ।
मर्कं सर्वं मार्ष्टीति अचः निपातनादृद्धिः ।
मार्कवोऽन्तःस्थचतुर्थान्तः मर्कविन्दादित्वात्
पृषोदरादित्वादिकारागमो दीर्घश्चेति परेण साधि-
तत्वात् । (यथा, सुश्रुते चिकित्सितस्थाने ।१८अः।
"आम्रमार्कवस्य च रसेन विपक्वमेतत्
नाड्यौ कपालिकहतामपचौ प्रलीय ॥")
मार्करो रेफान्त इति केचित् । इति तट्टीकायां
भरतः ॥ (अस्य नामधेयपर्य्याया यथा,—
"भृङ्गराजः केशराजो भृङ्गः पतङ्गमार्कवम् ।
इति वैद्यकरत्नमालायाम् ।
भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
मार्कवः केशराजश्च भृङ्गराजो निगद्यते ॥"
इति वाग्भटेऽष्टाधिकद्विशततमेऽध्याये ।)
मार्ग, क संस्कारे । गतौ । इति कविकल्प-
द्रुमः ॥ (चु०-पर०-सक०-सेट् ।) क मार्गयति ।
इति दुर्गादासः ॥
मार्ग कि अन्वेषे । इति कविकल्पद्रुमः ॥ (चु०-पक्षे
भ्वा०-पर०-सक०-सेट् ।) अन्वेषः प्रतियत्ना-
नम् । कि मार्गयति मार्गति गुणं गुणी ।
मार्गत्वा पि देवभावानियाक्रमेपदं सकलता-
निवृत्तम् । इति दुर्गादासः ॥
मार्गः, पुं, (मार्ग्यते संस्क्रियते पादेन अन्यते
गमनायान्विष्यते इति वा । मार्गं वा मृग+
+घञ् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥
तत्परिमाणं यथा,—
"विंशहस्तैर्विस्तीर्णो देवमार्गस्तु तैः स्मृतः ।
विंशहस्त्यामार्गः भीमामार्गो दशैव तु ॥
धनूंषि दशविस्तीर्णः श्रीमान् राजपथः स्मृतः ।
नृपालिरथनागाश्वसम्बाधः सुखसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरथ्यका ॥
जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
वृत्तिपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परिवारः पादमात्रः समन्ततः ।
साहदूकाये तु पादको कर्त्तव्या अन्यथा नहि ॥
इति देवीपुराणे त्रैलोक्याभ्युदये गोपुरद्वार-
लक्षणाध्यायः ॥ (यथा, महाभारते । १ ।
१० । १० ।
"एका नारानभिन्ना च मार्गाद्याभद्योचिता ।
धनुषिपाषाणपरीताङ्गो दुष्करं यदि जीवति ॥")
मृगम् । तत्पर्य्यायः । वायुः १ तस्करः २ ।
इति त्रिकाण्डशेषः ॥ अग्रहायणः ३ । इत्यमरः ।
२ । ६ । ७१ ॥ मृगमदः । (मृगाणामिदम् । मृग
+अण् । मृगसम्बन्धिनि, त्रि । यथा, सुश्रुते ।
सूत्रे १ अः ।
"मार्गाङ्गिकाम्यच्यार्थं सदा स्वचर्म सुतम् ।"
यथा च मार्कण्डेये । ११ । १० ।
"तदस्यां यत्किञ्च तात ! यदेव निषादस्यैव ।
मार्गमाविकमीदृक् च सर्व्वमेकशफं तथा ॥"
(अस्मिन् मृगशिरानक्षत्रयुक्ता पौर्णमासी च ।
मृग् + अण् ।) मार्गशीर्षमासः । अन्वेषणम् ।
इति मेदिनी । गे, १० । मृगमिदो मलयम् ।
इति हेमचन्द्रः । विष्णुः । इति तस्य सहस्रनाम
स्तोत्रम् ॥ (यथा, महाभारते । १३ । १४९ । ९३ ।
"विधरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥")
मार्गकः, पुं, (मार्ग । स्वार्थे कन् ।) अग्रहायण-
मासः । इति शब्दमाला ॥
मार्गणं, क्ली, (मार्ग्यते अन्विष्यते इति । मार्ग+
भावे ल्युट् ।) अन्वेषणम् । तत्पर्य्यायः । अन्वे-
षणम् २ विचयनम् ३ मृगणा ४ मृगः ५ ।
इत्यमरः । ३ । २ । ३० ॥ याच्ञा । इति
मेदिनी । णे, ७१ । प्रणयः । इति जटाधरः ।
(मार्गयतीति । मार्ग+ल्युः ।) याचके, त्रि ।
इत्यमरः । ३ । १ । ४८ ॥
मार्गणः, पुं, (मार्गयति लक्ष्यमिति । मार्ग+ल्युः ।)
शरः । इत्यमरः । २ । ८ । ८७ ॥ यथा, महा-
भारते । ६ । ११६ । ३३ ।
"ते सर्व्वे दृढधन्वानः संयुगेष्वपलायिनः ।
बहुधा भीष्ममानर्च्छुर्मार्गणैः कृतमार्गणैः ॥"
मार्गयति धनाय दातारमिति । मार्ग+ल्युः ।)
याचकः । इति मेदिनी । णे, ७१ ॥
मार्गणकः, पुं, (मार्गण+स्वार्थे कन् ।) याचकः ।
इति हलायुधः ॥
मार्गधेनुः, पुं, (मार्गस्य धेनुः परिमाणम् ।)
योजनपरिमाणम् । इति शब्दमाला ॥
मार्गधेनुकं, क्ली, (मार्गधेनु+स्वार्थे कन् ।)
योजनम् । इति त्रिकाण्डशेषः ॥
मार्गपाली, स्त्री, (मार्गं पालयति हिंस्रेभ्यो
रक्षतीति । पाल+अण् । गौरादित्वात् ङीष् ।)
[illegible] । यथा,
"ततोऽपराह्णसमये पूर्व्वस्यां दिशि नारद ! ।
मार्गपालीं प्रबध्नीयाद्दुर्गस्तम्भे च पादपे ॥
कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्वृताम् ।
भूषयित्वा गजानश्वान् गुरुपूर्वादिमंस्कृतान् ॥
गोवृषान् महिषांश्चैव मदाभरणभूषितान् ।
भेरीमृदङ्गपटहवादित्रध्वनिवादितान् ॥
तस्याः स्थाने नयेत् सार्द्धं शान्तिमात्रादि-
वन्दितः ॥
मार्गपालि नमस्तुभ्यं सर्व्वलोकसुखप्रदे ।
तले तव सुखेनाश्वा गजा गावः प्रयान्तु मे ॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ।
मार्गपालीं समाक्रम्य नीरोगाः स्युः सदैव हि ॥
ततो मार्गं संपूज्य गन्धपुष्पादिभिः क्रमात् ।
आत्मनः क्षेमाय भूप इति पूर्वां करोति हि ॥
अयनः क्षेमञ्च मे मार्गो मार्गो मे च मम प्रदः ।
मार्गो मे सर्व्वतः शम् गतो मार्गे कल्याणम् ॥
या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥
या लक्ष्मीर्देवदेवे च विष्णौ-
र्या लक्ष्मीर्धनदस्य च ।
या धेनुर्मयि तु [illegible]
या लक्ष्मीर्वरदा ममास्तु ॥

लभेतत् सर्व्वमानन्दाद्रावी देवप्रसादतः ।
पूजां कृत्वा ततः पश्चात् मध्यगद्रूतं समारभेत् ॥”
इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये
१२१ अध्यायः ॥

मार्गशिरः, पुं, (मृगशिरानक्षत्रयुक्ता पौर्ण-
मास्यत्र । मृगशिरा+अण् ।) मार्गशीर्ष-
मासः । इति शब्दरत्नावली ॥ (यथा, भाग-
वते । ६ । १९ । २ ।
“शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया ।
आरभेत व्रतमिदं सार्व्वकामिकमादितः ॥”)

मार्गशीर्षः, पुं, (मार्गशीर्षी+अण् ।) अग्र-
हायणमासः । मृगशीर्षेण युक्ता पौर्णमासी
मार्गशीर्षी साऽस्मिन् मासे भवति मार्गशीर्षः
अः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः ।
सहाः २ मार्गः ३ आग्रहायणिकः ४ । इत्य-
मरः । १ । ४ । १४ ॥ मार्गशिरः ५ सहः ६ ।
इति शब्दरत्नावली ॥ वृश्चिकस्थरविप्रारब्ध-
शुक्लप्रतिपदादिदर्शान्तोऽयं मुख्यचान्द्रः । एता-
दृशमुख्यचान्द्रमासीयपौर्णमास्यन्तः अयं गौण-
चान्द्रः । वृश्चिकराशिस्थरविकोऽयं सौरः । इति
स्मृतिः ॥ * ॥ तत्र जातफलम् ।

“यस्य प्रसूतिः खलु मार्गमासे
सौर्य्ये प्रवासे सततं मतिः स्यात् ।
परोपकारी धनसाधुवृत्तिः
बहुश्रुतिशुक्तो बलनाभिलाषी ॥”

इति कोष्ठीप्रदीपः ॥ * ॥

(तदस्य विषयः । कार्त्तिकमार्गशीर्षौ शरत् ।
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥)

अथ मार्गशीर्षकृत्यम् ।

आश्विनशुक्लपक्षे नवान्नश्राद्धाकरणे मार्ग-
शीर्षस्य विंशतिदण्डाधिकत्रयोविंशतिदिनाभ्य-
न्तरे शुक्लपक्षे तत् श्राद्धं कर्त्तव्यम् । तत्र मार्ग-
शीर्षस्य विंशतिदण्डाधिकप्रथमदिनव्यतिरेकेषु
कृष्णपक्षिशुक्रवारेतरेषु नन्दारिक्ताष्टम्योदर्शानन्तर-
तिथिषु अकालचन्द्रताराभिजातभिन्नजन्मनक्षत्र-
त्रयमघाश्लेषेतरेषु पूर्व्वात्रयमघाभरण्याश्लेषा-
र्द्रेतरेषु नक्षत्रेषु श्राद्धं तच्छेषभोजनञ्च कुर्य्यात् ।
श्राद्धानधिकारिभिस्तु प्रागुक्तकाले देवादिभ्यो
नवान्नं दत्त्वा भोक्तव्यम् । किन्तु अष्टमीकालितिका-
र्त्तिकानक्षत्रपूर्व्वभाद्रपदादिषु अपि नवान्नभोजनं
न कर्त्तव्यम् । चन्द्रताराद्यशुद्धौ प्रतीकारमाह
दैवज्ञः ।

“कर्म्म कुर्य्यात् यथाशास्त्रं चन्द्रादिशोभने बुधः ।
सन्नकाले स्थिरं सर्व्वं कार्य्यः कालमपेक्षते ॥
चन्द्रे च शङ्खं लवणञ्च तारे
तिथ्याऽभद्रे चित्ततण्डुलांश्च ।
धान्यञ्च दद्यात् करणस्यवारे
योगे तिलान् हैममथोच लग्ने ॥
राजमार्त्तण्डे ताराभिदारुणक्षपरिमाणमाह ।
“दद्यादिषमथ च हिताय दद्यात् प्रतानि
लवणस्य ।
क्रमशो जन्मविपत्प्रत्यरिसाध्याल्ताराम ॥

मलन्तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम् ।
तोलकत्रितयं चैवं ज्योतिर्ज्ञैः स्तुतिसम्मतम् ॥
तत एवं दध्याज्यसंयुक्तं नवं विप्राभिमन्त्रितम् ।
मन्त्राणाद्देशे गायत्रीति गायत्र्याभिमन्त्रितम् ॥
नवमन्नं ब्राह्मणानुज्ञां गृहीत्वा प्राश्नीयात् ।
नूतनधान्याभावे पुरातनेनापि श्राद्धं कर्त्तव्यम् ।
वृश्चिके शुक्लपक्षे तदकरणे हरिशयनात् पूर्व्वं
मीनधनुश्चरवीतरत्र माघादौ कर्त्तव्यम् ॥ * ॥
वृश्चिकस्थरवौ शुक्लचतुर्द्दश्यां सौभाग्यकामः
पाषाणाकारपिष्टकैर्देवीं पूजयेत् तदपि भक्षये-
न्नक्तम् ॥ * ॥ अग्रहायण्यां पौर्णमास्यां पार्व्वण-
विधिना श्राद्धमावश्यकम् ॥ * ॥ भविष्यपुराणे ।
“रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा ।
ग्रहणायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥”

इति कृत्यतत्त्वम् ॥

(स्त्रियां आग्रहायणी पूर्णिमा । यथा, महा-
भारते । ३ । ८९ । २६ ।
“मार्गशीर्ष्यामतीतायां पुष्येण प्रययुस्ततः ॥”)

मार्गिकः, त्रि, (मृगान् हन्तीति । मृग+“पक्षि-
मत्स्यमृगान् हन्ति ।” ४ । ४ । ३५ । इति ठक् ।)
मृगहन्ता । (मार्गो गन्तव्यत्वेनास्त्यस्य । ठन् ।)
पथिकः । इति सिद्धान्तकौमुदी ॥

मार्गितं, त्रि, (मार्ग अन्वेषणे+क्तः ।) अन्वे-
षितम् । इत्यमरः । ३ । १ । १०५ ॥

मार्ग्यं, त्रि, (मृज्यते इति । मृज्+“ऋदुपधाच्चाक्लृपिचृतेः” ।
विभाषा ।” ३ । १ । ११३ । इति पक्षे ण्यत् ।
वृद्धिश्च । “चजोः कुघिण्ण्यतोः ।” ७ । ३ । ५२ ।
इति कुत्वम् ।) मार्ज्जनीयम् । इति सिद्धान्त-
कौमुदी ॥ (यथा, भट्टिकाव्ये । ६ । ५६ ।
“मृग्युत्तस्य त्वया मार्ग्यो मृग्यः शोकश्च
तेन ते ।”)

अन्वेषणीयश्च ॥

मार्ज्ज क मार्ज्जने । ध्वनौ । इति कविकल्पद्रुमः ॥
(चुरा०-पर०-सक०-सेट् ।) क मार्ज्जयति ।
इति दुर्गादासः ॥

मार्ज्जः, पुं, (मार्ज्जयति पापमलं प्रक्षाल्य उद्धरति
जगतामिति । मार्ज्ज+णिच्+अच् ।) विष्णुः ।
इति हेमचन्द्रः । २ । ४४ ॥ (मार्ज्जयति वसन-
मलमिति । मार्ज्ज्+अच् ।) रजकः । इति
शब्दमाला ॥ मार्ज्जनम् । इत्यमरटीकायां
भरतः ॥

मार्ज्जनं, क्ली, (मार्ज्जनमिति । मार्ज्ज्+भावे
ल्युट् ।) प्रोञ्छनादिना अङ्गनिर्म्मलीकरणम् ।
माजा इति भाषा । तत्पर्य्यायः । मार्ष्टिः २
मार्ज्जा ३ मार्ज्जना ४ मृजा ५ । इति शब्द-
रत्नावली ॥ मार्ज्जः ६ मार्ज्जा ७ । इत्यमर-
टीकायां भरतः ॥ (यथा, श्रीमद्भागवते । ८ ।
४ । १८ ।
“स वै मनः कृष्णपदारविन्दयो
र्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्ज्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये ॥”)

स्नानकाले शरीरमार्ज्जनगुणाः ।
“दौर्गन्ध्यं गौरवं कण्डूं कच्छूं मलमरोचकम् ।
स्वेदं बीभत्सतां हन्ति शरीरपरिमार्ज्जनम् ॥”

इति राजवल्लभः ॥

देवीगृहमार्ज्जनफलं यथा,—
“देव्या गृहन्तु यः शुक्र ! संमार्ज्जयति नित्यशः ।
स भवेद्बलवान् सौम्यसर्व्वसम्पत्तिसंयुतः ॥
देव्या गृहन्तु यः शुक्र ! गोमयेनानुलेपयेत् ।
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च
गच्छति ॥”

इति देवीपुराणे ४२ अध्यायः ॥

अथ भगवन्मन्दिरमार्ज्जनमाहात्म्यम् ।
“नरसिंहगृहे नित्यं यः संमार्ज्जनमाचरेत् ।
समस्तपापनिर्म्मुक्तो विष्णुलोके स मोदते ॥”

इति नृसिंहपुराणम् ॥

“संमार्ज्जनन्तु यः कुर्य्यात् पुरुषः केशवालये ।
रजस्तमोभ्यां निर्म्मुक्तः स भवेन्नात्र संशयः ॥
पांशूनां यावतां राजन् ! कुर्य्यात् संमार्ज्जनं
नरः ।
तावन्त्यब्दानि स सुखी नाकमाप्नोति मोदते ॥”

इति विष्णुधर्म्मोत्तरम् ॥

“यावत्कानि प्रवाहाणि भूमिसंमार्ज्जने दृढः ।
तावद्वर्षसहस्राणि शाकद्वीपे महीयते ॥
जायते मम भक्तश्च सर्व्वधर्म्मसमन्वितः ।
शुचिर्भागवतः शुद्धो ह्यपराधविवर्ज्जितः ॥
ततो मुक्ता सर्व्वभोगान् तीर्त्वा संसारसागरम् ।
शाकद्वीपात् परिभ्रष्टः स्वर्गलोकं स गच्छति ॥
नन्दनं वनमाश्रित्य मोदते चाप्सरैः सह ।
नन्दनाच्च परिभ्रष्टो मम कर्म्मव्यवस्थितः ।
सर्व्वसङ्गान् परित्यज्य मम लोकन्तु गच्छति ॥”

इति वराहपुराणम् ॥ * ॥

स्नानविशेषः । यथा । आतुरायाञ्च ।
“अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु
कर्म्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥”
इति जाबालवचनादिशरो विहाय गात्रप्रक्षा-
लनं तदशक्तौ वस्त्रगात्रमार्ज्जनं आर्द्रेण वाससा
कुर्य्यात् । इत्याह्निकाचारतत्त्वम् ॥ * ॥ वैदिक-
सन्ध्योपासनान्तर्गतमार्ज्जनं यथा । छन्दोगपरि-
शिष्टम् ।
“शिरसो मार्ज्जनं कुर्य्यात् कुशैः सोदक-
बिन्दुभिः ।
प्रणवो भूर्भुवः स्वश्च गायत्री च तृतीयिका ।
अब्दैवत्यं त्र्यृचञ्चैव चतुर्थमिति मार्ज्जनम् ॥”
ओङ्कारो भूरादिव्याहृतित्रयं तृतीया च गायत्री
चतुर्थमापोहिष्ठेति त्र्यृचम् । इतीदं मार्ज्जनं
मार्ज्जनक्रियाकरणमित्यर्थः । रामायणम् ।
“स्नात्वा मार्ज्जनं कुर्य्यात् मार्जनी वा समाहितः ।
आपोहिष्ठेत्यृचा कार्य्यं मार्ज्जनन्तु कुशोदकैः ॥
प्रतिप्रणवसंयुक्तं क्षिपेद्वारि पदे पदे ।
नवप्रणाडीत्यथवा कुर्य्यादापो हिरण्मीरकम् ॥

"आपोहिष्ठेति सूक्तस्य सिन्धुद्वीप ऋषिः स्मृतः ।
आपो वै देवता छन्दो गायत्री मार्ज्जने
स्मृतम् ॥"
इत्याह्निकाचारतत्त्वम् ॥

मार्ज्जनः, पुं, (मार्ष्टि शोधयतीति । मृज् + ल्युट् ।) लोध्रवृक्षः । इत्यमरः । २ । ४ । ३३ ॥ श्वेतलोध्रः । इति सुभूतिः ॥ रक्तलोध्रः । इति स्वामी ॥

मार्ज्जना, स्त्री, (मार्ज्जनम् इति । मार्ज्ज + भावे युच् ।) मार्ज्जनम् । इत्यमरः । २ । ६ । १२१ ॥ मुरजध्वनिः । इति हेमचन्द्रः । ६ । ३०० ॥

मार्ज्जनी, स्त्री, (मार्ज्ज्यतेऽनयेति । मार्ज्ज + करणे ल्युट् + स्त्रियां ङीप् ।) सम्मार्ज्जनी । झाँटा इति भाषा । यथा,—
"नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्ज्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥"
इति स्कान्दे शीतलास्तोत्रम् ॥

मार्ज्जनीयः, त्रि, (मार्ज्ज्यते इति । मृज् + अनीयर् ।) मार्ज्जनयोग्यः । मार्ष्टव्यः ॥ इति मृजधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नः । अग्निः । शोधनम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

मार्ज्जारः, पुं, (मृज् + "कञ्जिमृजिभ्यां चित् ।" उणा० ३ । १३७ । इति आरन् चित् । "मृजेर्वृद्धिः ।" इत्युज्ज्वलदत्तोक्तेर्वृद्धिश्च ।) रक्तचित्रकः । इति राजनिर्घण्टः ॥ बिडालः । इत्यमरः । २ । ५ । ६ ॥ (यथा, महाभारते । ५ । १६० । १६ ।
"मार्ज्जारः किल दुष्टात्मा निश्चेष्टः सर्व्व-
कर्म्मसु ॥")
खट्टाशः । इति हेमचन्द्रः । ४ । ३६० ॥ ७ ॥
मार्ज्जारस्पर्शे दोषो यथा,—
"अभोज्यसूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटान् ।
पतितापविद्धचण्डालमृतहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यते स्नानादुदक्याग्रामशूकरौ ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥ ७ ॥
पारिभाषिकमार्ज्जारो यथा,—
"स्वार्थं यतते यश्च तपते पचते तथा ।
न परार्थमुद्युक्तो मार्ज्जारः परिकीर्त्तितः ॥"
तस्यास्पृश्यत्वं यथा,—
'अभोज्याः सूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटाः ।'
इति वामनपुराणे १४ अध्यायः ॥

मार्ज्जारकः, पुं, (मृज् + आरन् वृद्धिश्च । "संज्ञायां कन् ।" ५ । ३ । ७५ । इति कन् च ।) मयूरः । इति त्रिकाण्डशेषः ॥ (मार्ज्जार + स्वार्थे कन् । बिडालः । यथा, महाभारते । १ । २३१ । २३ ।
"इमे मार्ज्जारकाः पुत्त्र ! नित्यमुद्वेजयन्ति
नः ॥")

मार्ज्जारकण्ठः, पुं, (मार्ज्जारस्येव कण्ठः कण्ठस्वरो यस्य । यद्वा, मार्ज्जारो भक्ष्यः कण्ठो यस्य ।) मयूरः । इति शब्दरत्नावली ॥

मार्ज्जारकर्णिका, स्त्री, (मार्ज्जारस्य कर्णौ इव कर्णौ यस्याः । स्त्रियां ङीष् स्वार्थे कन् । टाप् पूर्व्वस्य ह्रस्वश्च ।) चामुण्डा । यथा,—
"चामुण्डा चर्च्चिका चर्म्ममुण्डा मार्ज्जार-
कर्णिका ॥"
इति हेमचन्द्रः ॥

मार्ज्जारकर्णी, स्त्री, मार्ज्जारस्येव कर्णावस्याः । ङीष् । चामुण्डा । यथा,—
"मार्ज्जारकर्णी चामुण्डा कर्परिणी त्रिचर्च्चिका ॥"
इति त्रिकाण्डशेषः ॥

मार्ज्जारगन्धा, स्त्री, (मार्ज्जारस्येव गन्धोऽस्याः ।) मुद्गपर्णीविशेषः । इति रत्नमाला ॥

मार्ज्जारगन्धिका, स्त्री, (मार्ज्जारगन्ध । कन् । टाप् । अत इत्वञ्च ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिका सहा ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्ज्जारी, स्त्री, (मार्ष्टि शोधयति केशादिकमनया । मृज् + आरन् । स्त्रियां ङीष् ।) कस्तूरी । जन्तुविशेषः । गन्धगोकुला इति खाटाशी इति च भाषा । तत्पर्य्यायः । पूतिका २ पूतिकजः ३ गन्धचेलिका ४ । अस्या गुणाः । कान्तिधारकत्वम् । चक्षुष्यत्वम् । कफवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

मार्ज्जारीयः, पुं, (मार्ज्जारस्यायम् । मार्ज्जार + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) बिडालः । शूद्रः । कायशोधनम् । इति मेदिनी । ये, १२० ॥

मार्ज्जालः, पुं, मार्ज्जारः । रलयोरैक्यात् ॥

मार्ज्जालीयः, पुं, (मृज् + "स्थापतिमलेरालच् बालमालीयचः ।" उणा० ५ । ११५ । इति आलीयच् ।) बिडालः । शूद्रः । कायशोधनम् । इति हेमचन्द्रः ॥ (महादेवः । यथा, महाभारते । १ । १८ । ७० ।
"ललाटाक्षाय शर्व्वाय सौम्यक्ष्णे शूलपाणये ।
पिनाकगोप्त्रे सूर्य्याय मार्ज्जालीयाय वेधसे ॥")

मार्ज्जिता, स्त्री, (मार्ज्यते शुध्यते पाकेनेति । मृज् + णिच् + कर्म्मणि क्तः । स्त्रियां टाप् ।) रसाला । इत्यमरः । २ । ९ । ४४ ॥ सा तु दधिखण्डमधुघृतमरिचादिमिलितकर्पूरादिवासितखाद्यद्रव्यविशेषः । इत्यमरटीकायां भरतः ॥ (गुणादयोऽस्या रसालाशब्दे ज्ञातव्याः ॥) शोधिते, त्रि ॥

मार्त्तण्डः, पुं, (मृताण्डे भवतीति । मृताण्ड + "तत्र भवः ।" ४ । ३ । ५३ । इति अण् ।) सूर्य्यः । (तन्निरुक्तिश्च । यथा,—
"अदित्यैव गर्भेण पुत्रं दृष्ट्वा पितामहैः ।
मारितं भव माऽऽण्डेति मार्त्तण्डस्तेन च स्मृतः ॥"
यथा, मार्कण्डेये । ७७ । १ ।
"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः ।
संज्ञा नाम महाभागा तस्यां भानुरजीजनत् ॥")
अर्कवृक्षः । इत्यमरः ॥ शूकरः । इति मेदिनी । टे, ११ ॥ मार्त्तण्डोत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"एवं सा नियता देवी चक्रे स्तोत्रमिदं द्विज ।
निराहारा विवस्वन्तमारिराधयिषुर्मुने ! ॥
ततः कालेन महता भगवांस्तपनो मुने ! ।
प्रत्यक्षतामगात्तस्या दाक्षायण्या द्विजोत्तम ! ॥
सा ददर्श महाकूटं तेजसोऽम्बरसंस्थितम् ।
भूमौ च संस्थितं भास्वज्ज्वालाभिरतिदुर्द्दृशम् ॥
तच्च दृष्ट्वा ततो देवी साध्वसं परमं गता ।
जगादाद्य ! प्रसीदेति न त्वां पश्यामि गोपते ! ॥
यथा दृष्टवती पूर्व्वमम्बरस्थं सुदुर्द्दृशम् ।
संस्थानं तेजसश्चाद्य पश्यामि भूतले ॥
प्रसादं कुरु पश्येयं यद्रूपं ते प्रभाकर ! ।
भक्तानुकम्पन ! विभो ! भक्ताहं पाहि मे
सुतान् ॥"
श्रीमार्कण्डेय उवाच ।
"ततः स तेजसस्तस्मादाविर्भूतो विभावसुः ।
अदृश्यत तदादित्यस्तप्तताम्रोपमप्रभः ॥
अथ तां प्रणतां देवीं तस्य सन्दर्शनान्मुने ! ।
प्राह भास्वान् वृणुष्वेष्टं वरं मत्तो यमिच्छसि ॥
प्रणता शिरसा सा च जानुपीडितमेदिनी ।
प्रत्युवाच विवस्वन्तं वरदं समुपस्थितम् ॥
देव ! प्रसीद पुत्त्राणां हृतं त्रिभुवनं मम ।
यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः ॥
तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते ! ।
अंशेन तेषां भ्रातृत्वं गत्वा नाशय तद्रिपून् ॥
यथा मे तनया भूयो यज्ञभागभुजः प्रभो ! ।
भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर ! ॥
तथानुकम्पां पुत्त्राणां सुप्रसन्नो रवे ! मम ।
कुरु प्रपन्नार्त्तिहर ! स्थितिकर्त्ता त्वमुच्यसे ॥"
मार्कण्डेय उवाच ।
"ततस्तामाह भगवान् भास्करो वारितस्करः ।
प्रणतामदितिं विप्र ! प्रसादसुमुखो विभुः ॥
सहस्रांशेन ते गर्भे सम्भूयाहमशेषतः ।
त्वत्पुत्त्रशत्रूनदिते ! नाशयाम्याशु निर्वृता ॥
इत्युक्त्वा भगवान् भानुरन्तर्द्धानमुपागमत् ।
निवृत्ता साऽपि तपसः सम्प्राप्ताखिलवाञ्छिता ॥
ततो रश्मिसहस्रान्तः सुषुम्णाख्यो रवेः करः ।
विप्रावतारं संचक्रे देवमातुरथोदरे ॥
कृच्छ्रचान्द्रायणादीनि सा चक्रे सुसमाहिता ।
शुचिः सन्धारयाम्येनं दिव्यं गर्भमिति द्विज ! ॥
ततस्तां कश्यपः प्राह किञ्चित्कोपप्लुताक्षरम् ।
किं मारयसि गर्भाण्डमिति नित्योपवासिनी ॥
सा च तं प्राह गर्भाण्डमेतत् पश्येति कोपना ।
न मारितं विपक्षाणां मृत्युरेव भविष्यति ॥
इत्युक्त्वा तं तदा गर्भमुत्ससर्ज्ज सुरारणिः ।
जाज्वल्यमानं तेजोभिः श्वशुरस्य च कोपिता ॥
तं दृष्ट्वा कश्यपो गर्भमुद्यद्भास्करवर्च्चसम् ।
तुष्टाव प्रणतो भूत्वा वाग्भिराद्याभिरादरात् ॥
संस्तूयमानः स तदा गर्भाण्डात् प्रकटोऽभवत् ।
पद्मपत्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः ॥
अथान्तरीक्षादाभाष्य कश्यपं मुनिसत्तमम् ।
सतोयमेघगम्भीरा वागुवाचाशरीरिणी ॥

मारिनश्च यत: प्रोक्तमेतदण्डं त्वयादितिम् ।
तस्मान्मुने! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ।
सूर्य्याधिकारञ्च विभुर्जगत्येव करिष्यति ।
हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् ॥
देवा निशम्येति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदायुक्तो दानवाश्च समाययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
शस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः ।
तुष्टुवुस्तेजसां योनिं मार्त्तण्डमदितिन्तथा ॥
स्वाधिकारं ततः प्रापुर्यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत् ॥
कदम्बपुष्पवद्भास्वानधश्चोर्द्धञ्च रश्मिभिः ।
वृतोऽग्निपिण्डसदृशो दधे नातिस्फुटं वपुः ॥"

इति मार्कण्डेयपुराणे सूर्य्यमाहात्म्ये मार्त्तण्डोत्पत्तिर्नामाध्यायः ॥

मार्त्तण्डवल्लभा, स्त्री, (मार्त्तण्डस्य वल्लभा प्रिया । यद्वा, मार्त्तण्डो वल्लभः प्रियोऽस्याः ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ सूर्य्यपर्णी च ॥

मार्त्तिकः, पुं, (मृत्तिकाया विकार इति । मृत्तिका+"तस्य विकारः ।" ४ । ३ । १३४ । इति ठक् ।) शरावः । इति शब्दरत्नावली ॥ मृत्तिकानिर्म्मिते, त्रि ॥

मार्द्दङ्गं, क्ली, (मृत् अङ्गमस्य । ततः स्वार्थे अण् ।) पत्तनम् । इति हारावली ॥ (मृदङ्गवादनं शिल्पमस्येति । अण् ।) मृदङ्गवादके, त्रि ॥

मार्द्दङ्गिकः, त्रि, (मृदङ्गवादनं शिल्पमस्य । मृदङ्ग+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) मृदङ्गवादकः । तत्पर्य्यायः । मौरजिकः २ । इत्यमरः । २।१०।१२ ॥ मार्द्दङ्गिकः ३ मौरजिकः ४ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ८१ । ३८ ।
"विमला मार्द्दङ्गिका आर्यन्त्याणकाश्च विभीतकाः ।
अपतन्नर्भकाश्चासन् भरद्वाजस्य तेजसा ॥")

मार्द्दवं, क्ली, (मृदोर्भाव इति । मृदु+"पृथ्वादिभ्य इमनिज् वा ।"५।१।१२२। इत्यत्र । "चादवचनमणादेः समावेशार्थम् ।" इति काशिकोक्तेरण् ।) परदुःखप्रदर्शनात् चित्तार्द्रता । मृदुता । यथा,—
"मार्द्दवं कोमलस्यापि संस्पर्शासहतोच्यते ।
उत्तमं मध्यमं प्रोक्तं कनिष्ठञ्चेति तत्त्रिधा ॥"
उत्तमं यथा,—
　　"अभिनवमालिकामियं वाक्यमनर्थिरागाधिका विशिखे ।
　　न कुसुमपटलं ददापि अन्वौ
　　तदनुभवानुदेव सम्रयाधीत् ॥"

मध्यमं यथा,—
　　"चित्रं धनिष्ठे तनुवाससोऽपि
　　चीनस्य पीनस्तनि! सङ्गमेन ।
　　लिप्तेन तस्मोद्धितचन्दनेन
　　मूर्त्तिर्दिदूना सखि! लोहिताधीत् ॥
कनिष्ठं यथा,—
　　रससुधाकरे आमोदमामोदनमादधानं निलीनलीलालकचञ्चरीकम् ।
　　चक्रेण मध्यासुरपद्ममाधीत्
　　त्विषा रवेः कोमलयापि ताम्रम् ॥"
　　　　　　　　　इत्युज्ज्वलनीलमणिः ॥
(अकाठिन्यम् । यथा, रघौ । ८ । ४३ ।
　　"विललाप सवाष्पगद्गदं
　　सहजामप्यपहाय धीरताम् ।
　　अभितप्तमयोऽपि मार्द्दवं
　　भजते कैव कथा शरीरिषु ॥")

मार्द्दवः, पुं, (मार्द्दवं मृदुत्वमस्यास्तीति । मार्द्दव+ अर्श आद्यच् ।) वर्णसङ्करजातिविशेषः ।
"माधुकी मार्द्दवश्चुकारश्चा च्छिक्किकादयः ।"
　　　　　　　　　इति जटाधरः ॥

मार्षः, पुं, (मृष्यति क्षमते जनानिति । मृष्+"इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । मृषः । ततः । स्वार्थे अण् ।) नाट्योक्तौ श्रेष्ठः । इति हेमचन्द्रः । २ । २४ ॥ मारिषशाकः । इत्यमरटीकायां भरतः ॥ (शाकार्थे पर्य्यायो यथा,—
"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्षिकः, पुं, (मार्ष+ठक् ।) मारिषशाकः । इति राजनिर्घण्टः ॥

मार्ष्टिः, स्त्री, (मृज्+क्तिन् । "मृजेर्वृद्धिः ।" ७ । २ । ११४ । इति वृद्धिश्च ।) मार्ज्जनम् । इत्यमरः । ३।६।१२९ ॥ तैलाभ्यञ्जनम् । यथा,
"तैलमल्पं यदङ्गेषु न भवेत् बाहुसङ्गतम् ।
सा मार्ष्टिः पृथगभ्यङ्गो महत्कारी प्रकीर्त्तितः ॥"
　　　　　　　　　इत्याह्निकतत्त्वम् ॥

मालं, क्ली, (माति मानहेतुर्भवतीति । मा+"कमेन्द्राग्यवयेघ्यादि ।"उणा० १ । २८ । इति रक् । पृषोदरादित्वाद्रस्य लत्वम् ।) क्षेत्रम् । इति मेदिनी ॥ ले, ४५ । (यथा, मेघदूते ।१६।
"सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥") कापटम् । वनम् । इति हेमचन्द्रः ॥ (हरितालम् । यथा,—
"हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जकं रोमहरणं तालकं पातमिष्यपि ॥"
इति वैद्यकरत्नेन्द्रसारसंग्रहे नारकमारणाधिकारे ।)

मालः, पुं, (मातीति । मा+रन् । रस्य लत्वम् ।) जातिविशेषः । इति मेदिनी ॥ ले, ४५ । स च म्लेच्छजातिः । यथा,—
"माला भिल्लाः किराताश्च सर्व्वेऽपि म्लेच्छजातयः ॥"
(यथा, महाभारते । ६ । ९ । ३९ ।
"तत्रेमे कुरुपाञ्चालाः शाल्वा माद्रेयजाङ्गलाः ।
शूरसेनाः पुलिन्दाश्च बोधा मालास्तथैव च ॥") जनः । इति च हेमचन्द्रः । ३ । ५९८ ॥ देशविशेषः । स च मेदिनीपुरप्रदेशे मालभूमिरिति ख्यातः । विष्णुः । यथा,—
'मा लक्ष्मीं लातीति मालो विष्णुः तं अततीति मालती ।'
　　　　　　　　इति मालतीशब्दटीकायां भरतः ॥

मालकं, क्ली, (मलते धारयति शोभामिति । मलधारणे+ण्वुल् ।) स्थलपद्मम् । इति जटाधरः ॥

मालकः, पुं, (मलते धारयत्युपवीर्य्यं रोगनाशने इति । मलधारणे+ण्वुल् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (निम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मालका, स्त्री, (मलते धारयति शोभाम् । मल+ण्वुल् । स्त्रियां टाप् ।) माल्यम् । इति शब्दरत्नावली ॥

मालकौशः, पुं, (मालस्य हरेः कोषात् कण्ठान्निर्गत इति । अच् ।) रागविशेषः । तस्य नामान्तरं कौशिकः । स च हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः । हरस्य हरेर्वा कण्ठान्निर्गतः । अस्य जातिः सम्पूर्णा तत्र सप्त स्वरक्रमः स ऋ ग म प ध नि । अस्य ग्रहं षड्जस्वरः । शरदृतौ रात्रिशेषे गानसमयः । रागमालायामस्य स्वरूपम् । पाटलवर्णपुरुषः । नीलपरिच्छदः । यष्टिहस्तः । यौवनमदमत्तः स्त्रीभिः सह हास्यकौतुकान्वितः प्रसूनकमाल्यगलोऽथवा हन्तृतुल्लामाल्यगलः । अस्य रागिण्यः पञ्च यथा । टोडी १ गौरी २ गुणकरी ३ खम्भावती ४ ककुभा ५ । अस्याष्टौ पुत्रा यथा । मारः १ मेवाड़ः २ बड़हंसः ३ प्रबलः ४ चन्द्रकः ५ नन्दः ६ भ्रमरः ७ खोखरः ८ अत्र मिश्राङ्गोऽपि पाठः । भरतमते तस्य रागिण्यः पञ्च यथा । गौरी १ दयावती २ देवदाली ३ खम्भावती ४ ककुभा ५ । तन्मते अष्टौ पुत्रा यथा । गान्धारः १ शुद्धः २ मकरः ३ चिम्बुकः ४ बड़हंसः ५ ब्रह्मकमलः ६ मालीगौरः ७ कामोदः ८ । अष्टपुत्रभार्य्या यथा । धनाश्रीः १ मालश्रीः २ जयतश्रीः ३ सुघोरायी ४ दुर्गा ५ गान्धारी ६ भीमपलाशी ७ कामोदी ८ । इति सङ्गीतशास्त्रम् ॥

मालचक्रकं, क्ली, (माला चक्रं कटामस्यास्तीति । अर्श आदित्वादच् । न यत्नमिदम् । कन् ।) चक्रस्फूरसन्धिः । इति शब्दचन्द्रिका । मालाइचाकि इति भाषा ।

मालती, स्त्री, (मलते शोभां धारयतीति । मल्+"भृञशीङ्तॄयजिधारि ।"उणा० ३ । ११० । इत्यत्र "बाहुलकात् मलतेरतच् । गौरादित्वान्ङीषुपधाया दीर्घत्वम् ।" इत्युज्ज्वलदत्तोक्तेः अतच् उपधाया दीर्घत्वम् ङीष् च । मां लक्ष्मीं

आपोहिष्ठेतिमन्त्रस्य सिन्धुद्वीप ऋषिः स्मृतः ।
आपो वै देवता छन्दो गायत्री मार्ज्जने स्मृतम् ॥"
इत्याह्निकाचारतत्त्वम् ॥

मार्ज्जनः, पुं, (मार्ज्ज्यतेऽनेनेति । मार्ज्ज + ल्युट् ।) लोध्रवृक्षः । इत्यमरः । २ । ४ । ३३ । श्वेतलोध्रः । इति सुभूतिः ॥ रक्तलोध्रः । इति स्वामी ॥

मार्ज्जना, स्त्री, (मार्ज्जनमिति । मार्ज्ज + भावे युच् ।) मार्ज्जनम् । इत्यमरः । ३ । ४ । १९१ ॥ मुरजध्वनिः । इति हेमचन्द्रः । २ । २०० ॥

मार्ज्जनी, स्त्री, (मार्ज्ज्यतेऽनयेति । मार्ज्ज + करणे ल्युट् + स्त्रियां ङीप् ।) सम्मार्ज्जनी । झाँटा इति भाषा । यथा,—
"नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्ज्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥"
इति स्कान्दे शीतलास्तोत्रम् ॥

मार्ज्जनीयः, त्रि, (मार्ज्ज्यते इति । मृज + अनीयर् ।) मार्ज्जनयोग्यः । शोध्यः । इति मृजधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नः । अग्निः । शोधनम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

मार्ज्जारः, पुं, (मृज + "कञ्जिमृजिभ्यां चित् ।" उणा० ३ । १३७ । इति आरन् चित् । "मृजेर्वृद्धिः ।" इत्युज्ज्वलदत्तोक्तेर्वृद्धिश्च ।) रक्तचित्रकः । इति राजनिर्घण्टः ॥ विडालः । इत्यमरः । २ । ५ । ६ ॥ (यथा, महाभारते । ५ । १६० । २१ ।
"मार्ज्जारः किल दुष्टात्मा निश्चेष्टः सर्व्वकर्म्मसु ॥")
खट्टाशः । इति हेमचन्द्रः । ४ । ३६७ ॥
मार्ज्जारस्पर्शे दोषो यथा,—
"अभोज्यसूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटान् ।
पतितापविद्धचाण्डालमृतहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यति स्नानादुदक्याग्राममूकरौ ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
भारिभोजिमार्ज्जारो यथा,—
"इमार्थं भजते यश्च नश्यते भजते तथा ।
स दत्वापेक्षदृष्टो मार्ज्जारः परिकीर्त्तितः ॥"
तन्मांसाभक्ष्यत्वं यथा,—
'अभोज्याः सूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटाः ।'
इति वामनपुराणे १४ अध्यायः ॥

मार्ज्जारकः, पुं, (मृज + आरन् ततः स्वार्थे "संज्ञायां कन् ।" ५ । ३ । ७५ । इति कन् च ।) मयूरः । इति त्रिकाण्डशेषः ॥ (मार्ज्जार + स्वार्थे कन् । विडालः । यथा, महाभारते । १ । १११ । ४१ ।
"इमे मार्ज्जारकाः पुत्र ! निरुद्विग्नमनि- नः ॥")

मार्ज्जारकण्ठः, पुं, (मार्ज्जारस्येव कण्ठः कण्ठध्वनिर्यस्य । यद्वा, मार्ज्जारो भक्षकः कण्ठो यस्य ।) मयूरः । इति शब्दरत्नावली ॥

मार्ज्जारकर्णिका, स्त्री, (मार्ज्जारस्य कर्णौ इव कर्णौ यस्याः । स्त्रियां ङीष् स्वार्थे कन् । टाप् पूर्व्वस्य ह्रस्वश्च ।) चामुण्डा । यथा,—
"चामुण्डा चर्च्चिका चर्म्ममुण्डा मार्ज्जारकर्णिका ॥"
इति हेमचन्द्रः ॥

मार्ज्जारकर्णी, स्त्री, मार्ज्जारस्येव कर्णावस्याः । ङीष् । चामुण्डा । यथा,—
"मार्ज्जारकर्णी चामुण्डा कर्म्ममोटी च चर्च्चिका ॥"
इति त्रिकाण्डशेषः ॥

मार्ज्जारगन्धा, स्त्री, (मार्ज्जारस्येव गन्धोऽस्याः ।) मुद्गपर्णीविशेषः । इति रत्नमाला ॥

मार्ज्जारगन्धिका, स्त्री, (मार्ज्जारगन्ध । कन् । टाप् । अत इत्वम् ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायः ।
"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिका सहा ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्ज्जारी, स्त्री, (मार्ष्टि शोधयति केशादिकमनया । मृज + आरन् । स्त्रियां ङीष् ।) कस्तूरी । जन्तुविशेषः । गन्धगोकुला इति खट्टाशी इति च भाषा । तत्पर्य्यायः । पूतिका २ पूतिकः ३ गन्धचेलिका ४ । अस्या गुणाः । चालिधारकत्वम् । चक्षुष्यत्वम् । कफवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

मार्ज्जारीयः, पुं, (मार्ज्जारस्यायम् । मार्ज्जार + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) विडालः । शूद्रः । कायशोधनम् । इति मेदिनी । ये, १२७ ॥

मार्ज्जालः, पुं, मार्ज्जारः । रलयोरैक्यात् ॥

मार्ज्जालीयः, पुं, (मृज + "स्थाचतिमृजेरा- लञ् वालञ्वालीयचः ।" उणा० १ । ११५ । इति आलीयच् ।) विडालः । शूद्रः । काय- शम् । इति हेमचन्द्रः ॥ (महादेवः । महाभारते । १ । १९ । ७० ।
"ललाटाक्षाय सर्व्वाय सोढ्रपि शूलपा-
विभावसोर्ह्रि सर्व्वाय मार्ज्जालीयाय वै

मार्ज्जिता, स्त्री, (मार्ज्ज्यते शुध्यति मार्ज्जि- + णिच् + कर्म्मणि क्तः । स्त्रियां टाप्
इत्यमरः । २ । ९ । ४४ ॥ सा तु
दधिमरिचादिमिश्रितकर्पूरादिवा-
विशेषः । इत्यमरटीकायां भर-
३८३ इत्याकाशपदे ख्यातः ।

मार्त्तण्डः, पुं, (मृतप्राये च
भवतीति । मृताण्ड + "
३३ । इति अण् ।) सू-
यथा,—
"अदित्यामेव मार्त्त
मार्त्तण्डं मह माण्डे
यथा, मार्कण्डेये ।
"मार्त्तण्डस्य रवे
संज्ञा नाम महा
मार्त्तण्डः । र
दे, ११ । मः

मार्कण्डेय उवाच ।
"एवं सा नियता देवी चक्रे
निराहारा विवस्वन्तमारिर
ततः कालेन महता भगवा
प्रत्यक्षतामगात्तस्या दाक्षा
सा ददर्श महाकूटं तेजो
भूमौ च संस्थितं भास्वन्
तच दृष्ट्वा ततो देवी
जगाद्धा । प्रसीदेति
यथा सहसा पूर्व्व
संभ्रमं तेजसस्त
प्रसादं कुरु मद्
भक्तानुकम्पन

"ततः स दे
अहत्
अद्य मा
प्राह
यस्मा
प्रस
दि
र

एतद्वचनन्तु अष्टोत्तरशतादिविषयम् ॥ ● ॥
शक्तिविषये पुनः । श्रीक्रमे ।
अनामिकात्रयं पर्व्व कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्वणि ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत् ॥
चंयारमेश्वरे ।
पर्व्वद्वयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाचरेत् ॥
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्व्वति ! ।
शक्तिमाला समाख्याता सर्व्वतन्त्रप्रदीपिका ॥
तथा ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
मध्यमामूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥ ● ॥
श्रीविद्यायामयं विशेषः ।
अनामाया मध्यमाया मूलाग्रञ्च द्वयं द्वयं ।
कनिष्ठायाश्च तर्ज्जन्यास्त्रयं पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्यादुदितं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेत्त्रिपुरसुन्दरीम् ॥”
इति यामलवचनात् ॥

मुण्डमालातन्त्रे ।
“अनामिका द्वयं पर्व्वप्रादक्षिण्यक्रमेण तु ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्ज्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥”
इदमपि अष्टोत्तरशतादिविषयम् ॥ ● ॥
अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अन्यच्चापि ।
अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत्सर्व्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत्तज्जपं यतः ।
गृह्णन्ति राक्षसास्तेन गणयेत् सर्व्वथा बुधः ॥
यथाङ्गुलिजपं कुर्व्वन् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
अङ्गुष्ठेन विना कर्म्म कृतं तदफलं भवेत् ॥
विश्वसारे ।
जपसंख्या तु कर्त्तव्या नासंख्यातं जपेत् सुधीः ।
असंख्याकारकस्याह सर्व्वं भवति निष्फलम् ॥
तन्त्रे ।
हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥
इति करमाला ॥ ● ॥
जपसंख्यायां निषिद्धद्रव्यमाह यामले ।
नाक्षतैर्हस्तपर्व्वैर्वा न धान्यैर्न च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां न कारयेत् ॥
विहितद्रव्यमाह ।
लाक्षाकुशीदसिन्दूरगोमयञ्च करीषकम् ।
एभिर्विनिर्म्माय गुटिकां जपसंख्यान्तु कारयेत् ॥
अथ वर्णमाला । सनत्कुमारे ।
क्रमोत्क्रमगतैर्म्माला मातृकार्णैः समेरुकैः ।
सबिन्दुकैः साष्टवर्गैरन्तर्य्यजनकर्म्मणि ॥
आदिक्षु टुपुय शषोऽष्टौ वर्गाः प्रकीर्त्तिताः ।
तद्यथा । अकारादिवर्णान् सबिन्दून् प्रत्येकं कृत्वा शतं संजप्य अकारादीनां वर्णानां कवर्गादीनाञ्चान्तिमं वर्णं सानुस्वारं कृत्वा पूर्व्वमुच्चार्य्य शेषाष्टवारमन्त्रजपः कार्य्यः । अनेन प्रकारेण अष्टोत्तरशतसंख्यो जपो भवति । अन्तर्य्यजनेत्युपलक्षणम् । तथा ।
सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ।
वर्णमाला समाख्याता अनुलोमविलोमगः ॥
इति नारदवचनात् ।

विशुद्धेश्वरे ।
अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितान्
मनून् ।
कुर्य्याद्वर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ॥ ● ॥
मालिनीविजये सूत्रनियमः ।
अन्तर्विद्रुमभासमानभुजगीसूत्रोतवर्णोज्ज्वलाम् ।
आरोहप्रतिरोहतः शतमयीं वर्गाष्टकाष्टोत्तराम् ॥
इति वर्णमाला ॥ ● ॥
अथाक्षमाला । तत्र मालायां मणिनिर्णयः ।
पद्मबीजादिभिर्म्माला बहिर्यागे स्मृताश्च ताः ।
रुद्राक्षशङ्खपद्माक्षपुत्त्रजीवकमौक्तिकैः ॥
स्फाटिकैर्म्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा ।
राजतैः कुशमूलैश्च गृहस्थस्याक्षमालिका ॥ ● ॥
अङ्गुलीगणनादेकं पर्व्वण्यष्टगुणं भवेत् ।
पुत्त्रजीवैर्दशगुणं शतं शङ्खैः सहस्रकम् ॥
प्रवालैर्म्मणिरत्नैश्च दशसाहस्रकं मतम् ।
तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशलक्षं स्यात् सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या कोटिशतं रुद्राक्षैः स्यादनन्तकम् ॥
सर्व्वैर्व्विरचिता माला नृणां मुक्तिफलप्रदा ।
कालिकापुराणे ।
रुद्राक्षैर्व्वा यदि जपेत् इन्द्राक्षैः स्फाटिकैस्तथा ।
नान्यमध्ये प्रयोक्तव्यं पुत्त्रजीवादिकञ्च यत् ॥
यद्यन्यत्तु प्रयुञ्जीत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
मुण्डमालायाम् ।
श्मशानधुस्तूरैर्म्माला ग्रथ्या धूमावतीविधौ ।
नराङ्गुल्यस्थिभिर्म्माला रचिता सर्व्वकामदा ॥
नाड्या संग्रथनं कार्य्यं रक्तेन वाससा प्रिये ! ।
सदा गोप्या प्रयत्नेन जनन्या जारवत् प्रिये ! ॥
कामनाविशेषे तु ।
पद्माक्षैर्व्विहिता माला शत्रुनाशकरी मता ।
कुशग्रन्थिमयी माला सर्व्वपापप्रणाशिनी ॥
पुत्त्रजीवफलैः कृप्ता कुरुते पुत्त्रसम्पदम् ।
निर्म्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा ।
प्रवालैर्व्विहिता माला प्रयच्छेत् विपुलं धनम् ॥
भैरवीविद्यायान्तु वाराहीतन्त्रे ।
सुवर्णमणिभिर्म्माला स्फाटिकी मुक्तिमिश्रि-
ताम् ।

प्रवालैर्वा कुर्य्यात् पुत्त्रजीवैर्विवर्ज्जयेत् ।
पद्माक्षैश्च रुद्राक्षमिश्रितैश्च विधीयतः ॥ ● ॥
त्रिपुरामन्त्रजपादौ तु रक्तचन्दनबीजादिभिरतिप्रशस्ता । तथा च तन्त्रराजे ।
रक्तचन्दनमाला तु भोगदा मोक्षदा भवेत् ॥
तथा ।
वैष्णवे तुलसीमाला गजदन्तैर्गणानने ।
त्रिपुरायां जपे शस्ता रुद्राक्षै रक्तचन्दनैः ॥ * ॥
कुमारीकल्पे ।
रुद्राक्षैः शक्तिमन्त्रञ्च भक्तो यः प्रजपेत् प्रिये ! ।
स दुर्गतिमवाप्नोति निष्फलस्तस्य तज्जपः ॥
कालिका च्छिन्नमस्ता च त्रिपुरा तारिणी तथा ।
एताः सर्व्वा न दुष्यन्ति जपे रुद्राक्षमालया ॥
दिवा नैव प्रजप्तव्यं रुद्राक्षमालयापि च ।
पुरश्चर्य्यान्तरे चात्र दूषणन्तु वरानने ! ॥
महाशङ्खमयी माला नीलसारस्वते विधौ ।
नृकपालास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला ताराविद्याजपे प्रिये ! ।
कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ॥
मणिनियमस्तु मुण्डमालायाम् ।
अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ।
कीटादिभिरदुष्टानि न जीर्णानि नवानि वै ॥
तथा गौतमीये ।
पञ्चाशल्लिपिभिर्म्माला विहिता सर्व्वकर्म्मसु ।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ॥
क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥ ● ॥
चामुण्डातन्त्रे ।
नित्यं जपं करे कुर्य्यात् न तु काम्यमबोधनात् ।
काम्यमपि करे कुर्य्यात् मालाभावेऽपि सुन्दरि ! ॥
तेन मालायाः प्राधान्यम् ॥ ● ॥ कामनाभेदे तु गौतमीये ।
समासेनाक्षसूत्रस्य विधानमिह कथ्यते ।
पञ्चविंशतिभिर्म्मोक्षं त्रिंशद्भिर्धनसिद्धये ॥
सर्व्वार्थाः सप्तविंशत्या पञ्चदशाभिचारके ।
पञ्चाशद्भिः काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः ।
अष्टोत्तरशतैः सर्व्वसिद्धिरुक्ता मनीषिभिः ॥
अथ मालासंस्कारः । तत्र सनत्कुमारीये ।
‘कार्पाससम्भवं सूत्रं धर्म्मकामार्थमोक्षदम् ।
तच्च विप्रेन्द्रकन्याभिर्न्निर्म्मितञ्च सुशोभनम् ॥’
यद्वा ।
‘शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा ।
शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजयेषु च ॥
शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् ।
सर्व्वेषामेव वर्णानां रक्तं सर्व्वेप्सितप्रदम् ॥
आनयेत्तु तथा चैव रक्तं सर्व्वसुसिद्धिदम् ।
त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् शिल्पशास्त्रतः ॥
एकैकं मातृकावर्णं तत्र तु प्रजपन् सुधीः ।
मणिमादाय सूत्रेण ग्रथयेद्वक्त्रमध्यतः ॥
ब्रह्मग्रन्थिं विधायैवं मेरुञ्च ग्रन्थिसंयुतम् ।
ग्रथयित्वा पुरो मालां ततः संस्कारमारभेत् ॥
अश्वत्थपत्रे गन्धसिद्धया पद्मवेत् । तथा च दक्षिणाकल्पे ।
‘मातृकामन्त्रतो यद्वि विद्वान् ग्रन्थिं च कारयेत् ।

सुवर्णादिमुखैर्वापि जपयेत् साधकोत्तमः ॥
मलपर्य्यन्तं ततो रुद्राक्षमपाममथापि वा ।
कषायैर्मथितैर्मालां ध्यायेत्परायणः ॥
सर्व्वोर्द्ध्वं ततो मेरुं सूत्रद्वयसमन्वितम् ।
ग्रथयेत्तारयोगेन सुधीमान् साधकोत्तमः ।
एवं निष्पाद्य देवेशि ! प्रतिष्ठाञ्च समाचरेत् ॥
गौतमीये ।
'हरो मूलञ्च संयोज्य पुच्छे पुच्छं नियोजयेत् ।
गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा ।
एवं निर्म्माय मालां वै शोधयेच्छुचितमः ॥
अश्वत्थपत्रनवकैः पद्माकारेण कल्पयेत् ।
तन्मध्ये स्थापयेन्मालां मातृकां मनसा स्मरन् ।
क्षालयेत् पञ्चगव्येन सद्योजातेन मन्त्रतः ॥'
सद्योजातस्तु ।
'ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवेऽभवेऽनातिभवे भजस्व मां भवोद्भवाय नमः ॥
चन्दनागुरुकर्पूरैर्वामदेवेन घर्षयेत् ॥'
वामदेवमन्त्रस्तु । ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्व्वभूतदमनाय नमो मनोन्मनाय नमः । धूपयेत्तामघोरेण । अघोरमन्त्रस्तु । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्व्वतः सर्व्वशर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः । लेपयेत्तत्पुरुषेण तु । तत्पुरुषमन्त्रस्तु । ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।
'मन्त्रयेत् पञ्चमेनैव प्रत्येकन्तु शतं शतम् ।
मेरुञ्च मन्त्रयेदेव मनुना च शतं शतम् ॥'
मन्त्रस्तु । ॐ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शिवो मेऽस्तु सदाशिवोम् । प्रत्येकन्तु शतं शतम् ।
इति वा । तथा च तत्रैव ।
'एकैकं मन्त्रयेन्मन्त्री पञ्चमेन शतं शतम् ।'
तथा च गौतमीये समुदायमालामधिकृत्य ।
'पञ्चमेनैव सर्व्वेण मन्त्रमूलेन मन्त्रयेत् ।'
इति वर्णमालायां वा मतभेदः ।
तदारोप्य पीठदेवे यथाविभवविस्तरैः ।
मालायाः प्राणप्रतिष्ठानन्तरं देवतां पूजयेत् ॥
तथा सनत्कुमारे ।
'संस्कृत्यैवं सुधीर्मालां तन्त्रान्विताथ स्थापयेत् ।
जपमन्त्रेण तां मालां पूजयेद्विधिपूर्व्वकम् ॥'
वाराहीतन्त्रे ।
'माले माले महामाले सर्व्वतत्त्वस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
मायाबीजादिकां तस्या रक्तपुष्पैः प्रार्थयेत् ॥'
इति प्रतिष्ठाविधिः ॥
विष्णुविषये तु ब्रह्मपुराणे ।
'प्रक्षाल्य तथा गन्धोदकादिभिर्मालिकां ततः ।
देवाग्रे कुशरत्नाभ्यां सर्व्वत्राविव पूजयेत् ।
तत्रादौ सूक्तमन्त्रेण चैतन्योद्बोधितां ततः ।
गन्धैः संस्कारमेतैश्च मन्त्रैन्यासैः प्रजपेत् ॥'

योगिनीतन्त्रे ।
'होमकर्म्म ततः कुर्य्याद्देवताभावसिद्धये ।
अष्टोत्तरशतं कृत्वा सम्पातार्घ्यं विनिःक्षिपेत् ।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ॥
तन्मध्यमन्त्रं जप्त्वासौ कम्पयेन्न विघूर्णयेत् ।
कम्पनात् सिद्धिहानिः स्याद्धूननं बहुदुःखदम् ॥
शब्दे जाते भवेद्रोगः करभ्रष्टा विनाशिका ।
छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ॥
जपान्ते कर्णदेशे वा उच्चदेशे तथा न्यसेत् ।
त्वं माले सर्व्वभूतानां सर्व्वसिद्धिप्रदा मता ॥
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ।
इत्थं सा परिपूज्याथ गोपयेद्यत्नतो बुधः ॥'
मालाभावपक्षस्य विधानमाह तन्त्रसारे ।
'अङ्गुलिजपमालाभिर्मन्त्रं जपति यो नरः ।
धर्म्मं स त्रिविधं विन्द्यात् सुधा भवति देवता ॥'
मालाभावे तु अङ्गुलिनियमः । गौतमीये ।
'तर्ज्जन्यङ्गुष्ठयोगेन शत्रूच्चाटनमुत्तमम् ।
अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता ॥
अङ्गुष्ठानामिकायोगादुच्चाटोत्पादने मतौ ।
कनिष्ठाङ्गुष्ठयोगेन प्रभूतं ज्ञानं मतम् ॥'
वैशम्पायनसंहितायाम् ।
'अङ्गुष्ठमध्यमाभ्याञ्च चालयेन्मध्यमध्यतः ।
तर्ज्जन्या न स्पृशेदेनां मुक्तिदो गणनक्रमः ॥
कोटिं स्पृशेत् पुनः सर्व्वं यदापि स्यात् शतं जपेत् ।
प्रमादात् पतिता हस्तात् शतमष्टोत्तरं जपेत् ॥
अधारादिकसंस्पर्शे क्षालयित्वा यथोदितम् ।
छिद्रेऽष्टोत्तरशतमः कार्य्यः । करमालाविधानयोस्तुल्यत्वात् ॥०॥ प्रकारान्तरं चागमकल्पद्रुमे ।
'मूलमन्त्रादिकां मालां समाप्य तत्र पूजयेत् ।
तत्तिद्वर्णविशिष्टाश्च दुर्गामायाश्च मन्त्रयेत् ।
पञ्चगव्ये ततः क्षिप्त्वा दर्भैरैश्च मन्त्रयेत् ।
तस्मादुत्थाप्य तां मालां कण्ठपार्श्वे निधाय च ।
यथोक्तविधिनादौ चन्दनादिभिः क्रमात् ।
तोयधूपान्तरैः सम्यक् यथाशक्तिविधिं बुधः ॥
समादायैव संस्थाप्य स्थापयेच्चोत्तरे बुधः ॥
ततश्चन्दनमालिकाकर्पूरकुङ्कुमादिभिः ।
तामालिप्य स्वीयमन्त्रमष्टोत्तरशतं जपेत् ॥
ततो मन्त्रदत्तैव दिक्पालांश्च प्रपूजयेत् ।
ततः संपूज्य च गुरुं दद्याद्वाज्यादिकं शुभाम् ॥
अन्यमानाय शुद्धाय गुरोरपि न दर्शयेत् ।
भूतराक्षसवेतालाः सिद्धगन्धर्व्वचारणाः ।
हरन्ति प्रकटं यस्मात्तस्माद्गुप्तं समाचरेत् ॥'
इति जपमाला । इति तन्त्रसारः ।
अपि च ।
'विद्याधराश्च रोमेशा विघ्नाःस्तेऽपरराक्षसाः ।
भूताश्च किन्नराः सिद्धाः पैशाचा चारणादयः ।
हरन्ति जपयज्ञाद्यं यान्ति तानि च नारद ॥
अनृजौ नैव विस्मार्य चार्व्वाकादिभिर्जपेत् ।
रुद्राक्षजनिता तुलसीकाष्ठसम्भवा ।
दन्ताङ्गुलिमयी दैवी दर्भसूत्रमयी तथा ।
महादेवाख्यरुद्राक्षदर्भाश्चाशनमाप्यच ।

धात्रीपुत्रजीवकलैर्ग्गाला या परिकीर्त्तिता ।
मुक्तामणिमयी रौप्या स्फाटिकी वैदूरी तथा ।
जपकर्म्मसु कर्म्मेषु नाममाला प्रकीर्त्तिता ॥१॥
वश्यात्मकर्षे माला इन्द्राक्षसमुद्भवा ।
मान्या माला: च मन्त्रार्थे पद्माङ्गुलिमयी रिता ।
हेमी मणिमयी माला प्रशस्ता कमलाश्रये ।
सरस्वत्या स्तम्भने रौप्या मुक्ताविनिर्म्मिता ।
प्रजापतिरूपे माला पुत्रजीवसमुद्भवा ।
पुत्रकामनराणाञ्च सदा पुत्रप्रदा तु सा ।
रामसमर्थने माला पद्मबीजसमुद्भवा ।
धात्रीफलमयी माला विष्णोः कामप्रदा जपे ।
वज्राचैन्द्रानुभवा हस्तबीजसमुद्भवा ।
गणेशाननमन्त्रे स्फटिकता मालाः फलप्रदाः ।
कुशग्रन्थिमयी शुद्धा गायत्री वैदिकी जपे ।
स्फाटिकी धर्म्मदेवानामथवा सर्व्वदेवे ।
कीदेरङ्गुलिमयी जपे माला शुभप्रदा ॥'
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
अपरञ्च ।
'जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ।
निधाय मण्डलस्थाने पञ्चगव्यमयेऽथ वा ।
ॐ मां माले महामाये सर्व्वशक्तिस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे ।
मध्यमाया मध्यभागे स्थापयित्वा तु तर्ज्जनीम् ॥
अनामिकाकनिष्ठाभ्यां पुनस्तां वस्तमाथवः ।
स्थापयित्वा तत्र मालामङ्गुष्ठाग्रेण तत्पुनः ।
प्रत्येकं बीजमादाय जपं कुर्य्यात्तु भैरव ॥
प्रतिवारं पठेन्मन्त्रं मेरोरुर्द्ध्वं न चालयेत् ।
मालाबीजन्तु नमयेत् स्पृशेन्न हि परस्परम् ।
पूर्व्वमायात्तु बीजैवाङ्गुष्ठाग्रेण भैरव ॥
पूर्व्वबीजं जपन् यस्तु परबीजन्तु संस्पृशेत् ।
अङ्गुष्ठेन भवेत्तस्य निष्फलस्तस्य सञ्चयः ॥
मालां चतुरमायति धृत्वा दक्षिणपाणिना ।
एवं विधिनयम् सर्व्वं कुर्य्यादपि न संशयः ॥
स्फाटिकैश्चाक्षमालाभिः पुत्रजीवसमुद्भवैः ।
सुवर्णमणिभिः सम्यक् प्रवालैरथवाम्बुजैः ।
जपमाला तु कर्त्तव्या दैवी पौष्टिका तथा ।
अरिष्टपद्मैः सततं कुरुमाया तु पालिका ॥
नानाबीजेषु सर्व्वेषु रुद्राक्षो मन्त्रसिद्धिदः ।
अक्षयोनिकरो मन्त्रजापादावचको वशी ।
प्रवालैर्वा कुर्य्याद्दशांशिनि यो जपेत् ।
पद्मबीजमया याति च चुर्वेनाविधेयेष्व वा ।
अहोरात्रे जपेन्ध्यानं प्रवाले स्फाटिकैस्तथा ।
कार्य्यं ग्रामे यथोक्तं पुत्रजीवादिकेन वा ।
यत्नात् प्रयत्नेन मालायां जपकर्म्मणि ।
तत्र कारणं गोपनञ्च न दर्शयेत् निन्दयेत् ।
कन्यान्तरे जायते च विनेशयाज्ञापनः ।
मिश्रीभावे तथा याति चाश्वमेधादयोऽपि ये ।
एते वैष्णवाः देवाः सर्व्वतः सुखदाः ।
आर्द्धं सर्व्वं तन्त्रकारात् स्तुतं स्तुतं तथा ।
निन्दीयं ब्रह्मरूपम् सर्व्वीसारात् हि कारणः ।
प्रतिश्रुतं कुर्व्वीत इतिपोर्ण यथा निगम् ॥

अथवा ग्रन्थिरहितं हृद्गन्धकुसुमान्वितम् ।
निराश्रयाथ मध्येऽथवाङ्गुष्ठाग्रान्तदेशतः ॥
ग्रन्थिः प्रदक्षिणावर्त्तः स मध्यग्रन्थिसंज्ञकः ।
नामना योजयेन्मालां नामन्त्रो योजयेद्बुधः ॥
दृढं सूत्रं नियुञ्जीत जपे त्रुट्यति नो यथा ।
यदा हस्तात् च्यवते जपतः सकृत् तदाचरेत् ।
हस्ताच्च्युतायां विघ्नः स्यात् छिन्नायां मरणं
भवेत् ।
एवं यः कुरुते मालां जप्यं च नयकोविदम् ।
स प्राप्नोतीप्सितं कामं हीने स्यात्तु विपर्य्ययः ॥
अन्यत्रापि जपेन्मालां जप्यं देवमनोहरम् ।
ईदृशं साधकः कुर्य्यात् नान्यथा तु कदाचन ॥
यथाशक्ति जपं कुर्य्यात् संख्ययैव प्रयत्नतः ।
असंख्यातन्तु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ।
जप्त्वा मालां शिरोदेशे प्रशस्तानेऽथवा न्यसेत् ॥
इति कालिकापुराणे ५८ अध्यायः ॥*॥

अथ मालादिधारणम् ।

ततः कृष्णार्पिता माला धारयेत्तुलसीदलैः ।
पद्माक्षैस्तुलसीकाष्ठैः फलैर्धात्र्याश्च निर्म्मिता ॥
धारयेत्तुलसीकाष्ठभूषणानि च वैष्णवः ।
मस्तके कर्णयोर्बाह्वोः करयोश्च यथारुचि ॥*॥

अथ मालाधारणविधिः ।

स्कान्दे ।
संनिवेद्यैव हरये तुलसीकाष्ठसम्भवाम् ।
मालां पश्चात् स्वयं धत्ते स वै भागवतोत्तमः ॥
हरये नार्पयेद्यस्तु तुलसीकाष्ठसम्भवाम् ।
मालां धत्ते स्वयं मूढः स याति नरकं ध्रुवम् ॥
क्षालितां पञ्चगव्येन मूलमन्त्रेण मन्त्रिताम् ।
गायत्र्या चाष्टकृत्वो वै मन्त्रितां धूपयेच्च ताम् ।
विधिवत् परया भक्त्या सद्योजातेन पूजयेत् ॥
तुलसीकाष्ठसम्भूते मालि कृष्णजनप्रिये ।
बिभर्म्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ।
तथा मां कुरु देवेशि ! नित्यं विष्णुजनप्रियम् ॥
दाने मां धातुवह्निष्ठो त्राहि मां हरिवल्लभे ! ।
भक्तेभ्यश्च समस्तेभ्यस्तेन माला निगद्यते ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णगलेऽर्पिताम् ।
धारयेद्वैष्णवो यो वै स गच्छेद्वैष्णवं पदम् ॥”*॥

अथ मालाधारणनित्यता ।

तत्रैव स्कान्दे कार्त्तिकप्रसङ्गे ।
“धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि ।
वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥”
गारुडे ।
“धारयन्ति न ये मालां हैतुकाः पापबुद्धयः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥”
अन्यत्र स्कान्दे तत्रैव ।
“न जह्यात्तुलसीमालां धात्रीमालां विशेषतः ।
महापातकसंहर्त्रीं धर्म्मकामार्थदायिनीम् ॥*॥

अथ मालामाहात्म्यम् ।

अगस्त्यसंहितायाम् ।
“निर्माल्यतुलसीमालायुक्तो यश्चार्चयेद्धरिम् ।
यद्यत् करोति तत् सर्व्वमनन्तफलदं भवेत् ॥
यः कुर्य्यात्तुलसीकाष्ठैरक्षमालां सुरूपिणीम् ।
कण्ठमालाञ्च यत्नेन कृतं तस्याक्षयं भवेत् ॥”
नारदीये ।
“ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये वा ललाटफलके लसदूर्द्ध्वपुण्ड्राः ।
ये बाहुमूलपरिचिह्नितशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥”
किञ्च ।
“भुजयुगमपि चिह्नैरङ्कितं यस्य विष्णोः
परमपुरुषनाम्नां कीर्त्तनं यस्य वाचि ।
ऋजुतरमपि पुण्ड्रं मस्तके यस्य कण्ठे
सरसिजमणिमाला यस्य तस्यास्मि दासः ॥”
विष्णुधर्म्मोत्तरे श्रीभगवदुक्तौ ।
“तुलसीकाष्ठमालाञ्च कण्ठस्थां वहते तु यः ।
अप्यशौचोऽप्यनाचारो मामेवैति न संशयः ॥”
स्कान्दे ।
“धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ।
दृश्यते यस्य देहे तु स वै भागवतो नरः ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु यः ।
विष्णूत्तीर्णां विशेषेण स नमस्यो दिवौकसाम् ॥
तुलसीदलजा माला धात्रीफलकृतापि वा ।
ददाति पापिनां मुक्तिं किं पुनर्विष्णुसेविनाम् ॥
तत्रैव कार्त्तिकप्रसङ्गे ।
यः पुनस्तुलसीमालां कृत्वा कण्ठे जनार्द्दनम् ।
पूजयेत् पुण्यमाप्नोति प्रतिपुष्पं गवायुतम् ॥
अयुतसंख्यगोदानफलमित्यर्थः ।
यावल्लुठति कण्ठस्था धात्रीमाला नरस्य हि ।
तावत्तस्य शरीरे तु प्रीत्या लुठति केशवः ॥
स्पृशेद् यानि लोमानि धात्रीमाला कलौ
नृणाम् ।
तावद्वर्षसहस्राणि वसते केशवालये ॥
यावद्दिनानि वहते धात्रीमालां कलौ नरः ।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुग्मञ्च यो नित्यं धात्रीतुलसिसम्भवम् ।
वहते कण्ठदेशे च कल्पकोटिं दिवं वसेत् ॥”
तुलसिसम्भवमिति ह्रस्वश्छान्दसः । गारुडे च
मार्कण्डेयोक्तौ ।
“तुलसीदलजां मालां कृष्णोत्तीर्णां वहेत्तु यः ।
पत्रे पत्रेऽश्वमेधानां दशानां लभते फलम् ॥*॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
फलं यच्छति दैत्यारिः प्रत्यहं द्वारकोद्भवम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ।
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दनः ॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे ।
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
तुलसीकाष्ठसम्भूतं शिरसो यस्य भूषणम् ।
बाह्वोः करे च मर्त्त्यस्य देहे तस्य सदा हरिः ॥
तुलसीकाष्ठमालाभिर्भूषितः पुण्यमाचरेत् ।
पितॄणां देवतानाञ्च कृतं कोटिगुणं कलौ ॥
तुलसीकाष्ठमालान्तु प्रेतराजस्य दूतकाः ।
दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथा दलम् ॥
तुलसीकाष्ठमालाभिर्भूषितो भ्रमते यदि ।
दुःस्वप्नं दुर्न्निमित्तञ्च न भयं शस्त्रजं क्वचित् ॥”
गौतमीये पुरश्चरणप्रसङ्गे ।
“तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितैः ।
इत्यादि ॥*॥ तत्रैव ।
पुण्डरीकभवा माला गोपालमनुसिद्धिदा ।
आमलकीभवा माला सर्व्वसिद्धिप्रदा मता ।
तुलसीसम्भवा या तु मोक्षं वितनुतेऽचिरात् ॥
इति हरिभक्तिविलासः ॥*॥४॥

अथ रुद्राक्षमालाधारणफलादि ।

लिङ्गपुराणे ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
संवत्सरप्रदीपे ।
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥
यद्यप्येकादिचतुर्दशमुखरुद्राक्षेषु जन्मफल-विशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमत्राभिधीयते । यथा, स्कान्दे ।
“पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ॥
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥”
इति तिथ्यादितत्त्वम् ॥

मालाकण्टः, पुं, (मालाकाराः कण्टाः कण्टका अस्य ।) अपामार्गः । इति राजनिर्घण्टः ॥

मालाकन्दः, पुं, (माला गण्डमाला नाशकः कन्दः । शाकपार्थिववत् मध्यपदलोपी ।) कन्दविशेषः । तत्पर्य्यायः । आलिकन्दः २ त्रिशिखिदला ३ ग्रन्थिदला ४ पादिकन्दः ५ कन्दलता ६ । अस्य गुणाः । तीक्ष्णत्वम् । गण्डमालानाशित्वम् । दीपनत्वम् । गुल्महारित्वम् । वातश्लेष्मापकर्ष-कारित्वञ्च । इति राजनिर्घण्टः ॥

मालाका, स्त्री, (मालैव । माला + स्वार्थे कन् टाप् ।) माला । इति शब्दरत्नावली ॥

मालाकारः, पुं, (मालां करोतीति । कृ + अण् ।) वर्णसङ्करजातिविशेषः । मालिकः । माली इति ख्यातः । तत्पर्य्यायः । मालिकः २ । इत्यमरः । २ । १० । ५ । मालाकारः ३ पुष्पाजीवी ४ वनार्थकः ५ पुष्पलावः ६ । इति जटाधरः ॥ पुष्पलावकः ७ । इति शब्दरत्नावली ॥ स तु शूद्रायां विश्वकर्म्मणो जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ अपि च ।
“तैलिकात् कर्म्मकाराच्च मालाकारस्य सम्भवः ॥”
इति पराशरपद्धतिः ॥
तद्गृहानीतपुष्पस्य पर्य्युषितदोषाभावो यथा,
“न पर्य्युषितदोषोऽस्ति तुलसीबिल्वपत्रके ।
जलजे बकुलेऽप्येवं मालाकारगृहेषु च ॥”
इति मैथिले ५ प्रकाशः ॥
(यथा, बृहत्संहितायाम् । १० । ८ ।
“हन्ति मालिकशाक्तिक-
चौरभिषक्कर्णिकचक्रोपचाराः ।

स्यन्ताः कौशल्यका मालाकारात्र यत्प्रत्यो । स्त्रियां ङीप् । यथा मनौ । ८० । ६ ।

"निकृष्टिका प्रवत्तिता दासो धात्री कुमारिका रण्डिका ।
मालाकारी दुराध्मा वसौ नायिनी दूत्यः ।")

मालापर्णिः, पुं, (मालेव पर्णिरस्य ।) माला-दूर्वा । इति राजनिर्घण्टः ॥

मालाहर्य, क्ली, (मालाकारं हर्म्यम् ।) भृङ्गजम् । इति राजनिर्घण्टः ॥

मालाहर्व, क्ली, (मालाश्न । स्वार्थे कन् ।) भूतृणम् । इत्यमरः ।२।४।१६७ । ह्रं गन्धतृण इति ख्याते । मालाहर्ष क्षम मालाहर्व स्वार्थे कः । सुवकृष्णं भूतवम्भान् भूतृणं समीरादिमात् भावनः । मालाहकमभूतृणे । इति कोषे । इति सुभूतिधरः । मालाःहकमभूतृणादिति पुंस पठन्ति केचित् । भावां तु । हकाविन्याविभूतृणानां पर्यायमात्र यथा,—

"भूतृणो रौहिषो भूतिर्भूतिकोऽथ कुटुम्बकः ।
मालाहकच पालग्रन्थानिक्तबकसपेरित ।"
रामद्रुंडं बहुपत्रकं बटूंदरसुगन्धि ।
दरन्सु मलविमिकाघतुरसटमलं भूतमथ भवती-
अलयोऽनिर्: । इति तझैकाश्रो भरत: ॥ (तपाच्च
पर्यायः ।

"गुह्यबीजञ्च भूतीकं सुगन्धं समुखप्रियम् ।
भूतृणञ्च भवेच्छ्वा मालाहक्तमितिङ्गपि ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

मालादूर्वा, स्त्री, (माला इव ग्रन्थियुक्ता दूर्वा ।) दूर्वाविशेषः । मालिया दूर्वा इति भाषा । तत्पर्यायः । बलिदूर्वा २ पालिदूर्वा ३ माला-ग्रन्थिः ४ ग्रन्थिला ५ ग्रन्थिदूर्वा ६ भूलपत्रिः ७ वैलती ८ ग्रन्थिगणा ९ रोहतुपर्णा १० पर्व-वल्ली ११ सिरालाना १२ । अस्या गुणाः । समधुरत्वम् । तिक्तत्वम् । हिमरुचत्वम् । पित्त-दोषशमनत्वम् । कफवाविप्रणापहत्वञ्च । इति राजनिर्घण्टः ॥

मालारिका, स्त्री, पाची । इति राजनिर्घण्टः ॥

मालावलका, स्त्री, (मालां वलतीति । वल+ण्वुल्
टाप् अत इत्वञ्च ।) एला । इति राजनिर्घण्टः ॥

मालावली, स्त्री, (मालामवति । अव+अच् । ङीप् ।) एला । इति राजनिर्घण्टः ॥

मालिः, पुं, राक्षसविशेषः । यथा,—

"माल्यवानिति सुमाली विख्यातस्तु महाबलः ।
ततः देवती नाम विदग्धा चारुरूपिणा ।
पितृ गोष्ठेयु विख्याता सुमुखोसुमहासिनी ।
तां सुकेशाय धर्मात्मा ददौ रक्षःश्रियं यथा ॥
वरप्रदानैश्वर्यं वा तं प्राप्य पतिं प्रियम् ।
सुवाभीहितको तदा सर्वं प्रापेव निर्झरः ॥
स तया सह सम्हृष्टो दरात रजनीचरः ।
ततः सापि सुकेशस्तु जनयामास राघव ॥
त्रीन् पुत्रान् जनयामास चेताग्निकमसप्रभान् ।

माल्यवन्तं सुमालिञ्च मालिञ्च बलिनां वरम् ।"
इति रामायणे उत्तरकाण्डे ५ सर्गः ॥

मालिकः, पुं, (माला शिल्पमस्य । माला+"तदस्य पण्यम् ।" ४ । ४ । ५१ । इति ठक् । यद्वा, मालानिर्माणं शिल्पमस्येति । "शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) मालाकारः । इत्य-मरः ।२।१०।५।। (यथा, राजतरङ्गिण्याम् ।६।११८।
"निरासे पुष्पलावूल्यौपलोद्दुमनातिशीलवे ।
ग्नतन्दिनांसिकेरदक्ताद् वा कोवैराददृष्टिः ।")
पक्षिभेदः । इति मेदिनी । के, १९८ । रञ्जकः । इति शब्दरत्नावली ॥

मालिका, स्त्री, (मालेव । माला+कन् टाप् अत इत्वञ्च ।) सप्तला । पुत्री । ग्रीवालङ्कारम् । पुष्पमाल्यम् । नदीविशेषः । इति मेदिनी । के, १९८ । सुरा । इति शब्दावली । शुमा । इति शब्दचन्द्रिका ॥

मालिनी, स्त्री, (माला कुसुममालास्त्यस्याः अस्त्यां वा । माला+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ङीप् ।) मालाकारभार्या । (मालिन्+ङीप् ।) मालिकपत्नी । गौरी । चम्पानगरी । (यथा, महाभारते ।१२। ५ । ६—७ ।
"प्रीतो ददौ स कर्णाय मालिनीं नगरीमथ ।
अङ्गेषु नरव्याघ्र ! स राजासीत् सपत्नजित् ।
पालयामास चम्पाच कर्णः परबलार्दनः ॥")
मन्दाकिनी । नदीभेदः । इति मेदिनी । (यथा, महाभारते । १ । ७२ । ८ ।
"अश्वमासाद्य सुनिर्मलसलिलां सुपुण्यामाम् ।
ददर्श हिमवतो रम्ये मालिनीमभितो नदीम् ।")
अग्निशिखावृक्षः । दुरालभा । इति शब्दचन्द्रिका । सा च वृत्तभेदः पञ्चदशाक्षरपाद-च्छन्दः । यथा,—
"न न म य य युतेयं मालिनी भोगिलोकैः ।
त्रासमरततपर्धा मीतनीलपत्राद-
नतिनिचितविचित्रावाक्षयामा ।
अङ्गुलिविरचितसीधि पैमद्युगुकाद्यपको
ललमुद्दिलोला मालिनी पातु राधा ।"
इति छन्दोमञ्जरी ॥
अप्सरोविशेषः । यथा, कथासरित्सागरे । ३१ । १२२ ।
"विद्याधरप्रकाश्यामासा पद्मनी विद्याधरी ।
दशारुमी मालिनीति नाम्ना कामकामिनी ॥
सम्मथाद्युमामसमसा । चैव विद्युदारम्भा-
सम्पन्ना । यथाचैव । ३ । २९७ । १० ।
"द्वारो च दलिता चैव मालिनी च ।
...
मालायणं ...
कौपदा नामामरम् ।
च । ३६ ।
"मालिनीति मे नाम
...

राक्षसीभेदः । सा च विभीषणस्य माता । यथा, महाभारते । ३ । २७४ । १—८ ।
"स राजराजो सद्धायाः विषधस्त्राञ्चनः ।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ।
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः ।
ऋषिं भरतशार्दूल ! नृत्यगीतविशारदाः ।
पुष्पोत्कटा च राका च मालिनी च विशाम्पते ! ।
अन्योन्यस्पर्धया राजन् ! श्रेयस्कामा सुमध्यमाः ।
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान् ।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान् ।
पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि ॥
मालिनी जनयामास पुत्रमेकं विभीषणम् ।
राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा ।"
शोभनकुमाला । यथा, मार्कण्डेये ।६८।६—७ ।
"तयेति तेन चाप्युक्ता तथा चोभानिदुर्दरीम् ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः ॥
ददाच पुलिने तस्मिन् न चर्मीं निर्ययाम ।
ग्रपाच पार्थिवं विधिवत् समायाचं महात्मनीद् ।
तस्यां तस्य सुतो जज्ञे महावीर्यो महामतिः ।
रौच्योऽभवत् पितुर्मासा ख्यातोऽत्र यशधाम ।"
कृत्तिकेण यत्री । यथा, हरिवंशे ।१६१।८ ।
"तस्मादुग्रसुतात्मानं नारदो प्रतिपद्यत ।
सुधाररीन्द्रैर्विना सुधुमालिनी मालामालिनी ।")

मालिन्यं, क्ली, (मलिन+"गुण वचन ब्राह्मणादिभ्यः कर्मणि च ।" ५।१।१२४ । इति ष्यञ् प्रत्ययः ।) मलिनत्वम् । मलिनस्य भाव इत्यर्थे अनेकार्थीन् विकल्पम् । (यथा, राजतरङ्गिण्याम् । ३ । १०८ ।
"स्रोतसीतेव मालिन्यं मितु अम्बितोऽपि नः ।
न स्पृशते तमः प्रतिबिम्बोमिव ।")

माली, [न्] पुं, (माला पण्यशिल्पत्वेन । माला+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) मालाकारः । इति शब्दरत्नावली ॥ सुकेशराक्षसपुत्रः । यथा,—
"सुकेशपुत्रैर्मन्त्रज्ञ ! पितामहवरोद्धतैः ।
अहं निरुद्धो वचसे ब्रह्मार्थं दैवताकृतम् ।
अर्द्धं समय दशकम्बोऽर्थं रविसुतम् ।
इति माली सुमाली च माल्यवांश्चैव राक्षसाः ।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः ।"
इति रामायणे उत्तरकाण्डे ६ सर्गः ॥
(अधिमात्र अवकीर्णैरिति । मुखादिः ।
यथा, महाभारते । ११ । १८ । १० ।
... स्त्री श्रीको नरचाधिप ।"
... स्त्री । यथा,
...

मालुधान:, पुं, (मालु मर्त्यं विदधातीति । धा+ल्युः ।) मातुलाहिः । इत्यमरः । १ । ८ । ६ । मालुया साप इति भाषा ॥ अष्टनागान्तर्गतनागविशेषः । यथा,—
"मालुधानश्चित्रघर्षो मत्तापद्मोऽपि दृश्यते ।"
इति धारावली ॥

मालुधानी, स्त्री, लताभेदः । इति मेदिनी । ने, २०३ ॥

मालूकः, पुं, कृष्णार्जकः । इति राजनिर्घण्टः ॥

मालूरः, पुं, (मां परेषां हृत्पाल्लरायां श्रियं प्रभावं लुनातीति । लूञ् + बाहुलकात् रः ।) बिल्ववृक्षः । इत्यमरः । २ । ४ । ३२ ॥ (यथा, नैषधे । १ । ९४ ।
"स चारुमारीकुचलक्ष्मितोदरं
ददर्श मालूरफलं पचेलिमम् ।")
कपित्थवृक्षः । इति राजनिर्घण्टः ॥ (बिल्ववृक्षार्थे पर्य्यायो यथा,—
बिल्वो महाकपित्थाख्यः श्रीफलो गोहरीतकी ।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च ॥)

माल्पेया, स्त्री, (मल+ढक् टाप् ।) स्थूलैला । इति रत्नमाला ॥ (स्थूलैलाशब्देऽस्या विशेषो ज्ञेयः ॥)

माल्यं, क्ली, (मालैव । माला+चतुर्व्वर्णादित्वात् ष्यञ् ।) पुष्पम् । पुष्पस्रक् । इति मेदिनी । ये, ४५ ॥ पुष्पार्थकमाल्यशब्दस्य प्रयोगो यथा,
"यथा चाल्पेन माल्येन वासितं तिलसर्षपम् ।
न मुञ्चति स्वकं गन्धं तद्वत् सूक्ष्मस्य दर्शनम् ॥"
इति महाभारते मोक्षधर्म्मे १०५ अध्यायः ॥
मूर्द्धि स्रक्पुष्पदाम । इत्यमरः ।२ । ६ । १३५ ॥
अस्य पर्य्यायादिर्माल्यशब्दे द्रष्टव्यः ॥ * ॥
(पुष्पसर्गस्य गुणा यथा,—
"वृष्यं सौगन्ध्यमायुष्यं काम्यं पुष्टिबलप्रदम् ।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिषेवणम् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ।)
माल्यदानफलं यथा,—
"गन्धमाल्यैरलङ्कारैस्तुष्टा हृष्टाश्च निर्म्मलाः ।
गन्धमाल्यप्रदा ये तु दाननिश्चयतत्पराः ॥
धर्म्मात्मानः सत्यशौचाश्च सर्व्वदुःखविवर्ज्जिताः ।
सुचिरं दैवतैः सार्द्धं क्रीडन्ति हि महामुने ! ॥"
इति वह्निपुराणम् ॥
अपि च । नारसिंहे ।
"जातीपुष्पसहस्रेण यच्छेन्मालां सुशोभनाम् ।
विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः ॥
जातीपुष्पकृतां मालां कर्पूरपटवासिताम् ।
निवेद्य देवदेवाय यत्फलं प्राप्नुयान्नरः ।
न तद्वर्णयितुं शक्यमपि वर्षशतैरपि ॥
स्कान्दे ।
गायत्रीकलिकामालामोदकलितां हरेः ।
दत्त्वा शिरसि विप्रेन्द्र ! वाजिमेधफलं लभेत् ॥
तत्रैव ।
मालतीमालया विष्णुः पूजितो येन कार्त्तिके ।
पापाचरणतां मालां पटात् सौरिः प्रमार्ज्जति ॥
सौरिर्यमः । विष्णुरहस्ये ।
स्वर्णलक्षाधिकं पुष्पं माला कोटिगुणाधिका ॥
इति श्रीहरिभक्तिविलासे ७ विलासः ॥ * ॥
माल्यगलस्य वह्निर्गमननिषेधो यथा,—
"वहिर्माल्यं वहिर्गन्धं भार्य्यया सह भोजनम् ।
विकथ्य चार्दं छत्वा वा प्रवेशञ्च विवर्ज्जयेत् ॥"
इति कूर्म्मपुराणे उपविभागे १५ अध्यायः ॥ * ॥
स्वयं माल्यापकर्षणनिषेधो यथा,—
"नाश्नीयात् सन्ध्यवेलायां न गच्छेन्नापि संविशेत् ।
न चैव प्रलिखेद्भूमिं नात्मनोपहरेत् स्रजम् ॥"
इति मानवे ४ अध्यायः ॥
न च मालां धृतां स्वयमेवापनयेत् । अर्थादन्येनापनयेदित्युक्तम् । इति कुल्लूकभट्टः ॥ * ॥
केशवाह्ये माल्यधारणनिषेधो यथा,—
"नहि गन्धकथां कुर्य्यात् वहिर्माल्यं न धारयेत् ।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥"
इति च मानवे ४ अध्यायः ॥
केशकलापाद्वहिर्माल्यं न धारयेदिति कुल्लूकभट्टः ॥ * ॥ स्वयं माल्यधारणनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्टञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥"
इति कर्म्मलोचनम् ॥ * ॥
माल्यचन्दनदानविधिर्यथा,—
"आमन्त्रयित्वा यो विप्रान् गन्धमाल्यैश्च मानवः ।
तर्पयेच्छ्रद्धया शक्तः स मानर्चयते सदा ॥"
इति वह्निपुराणम् ॥

माल्यपुष्पः, पुं, (माल्याकाराणि पुष्पाण्यस्य ।) शणवृक्षः । इति राजनिर्घण्टः ॥

माल्यपुष्पिका, स्त्री, (माल्यपुष्प+कन् टाप् । अत इत्वञ्च ।) शणपुष्पी । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः शणपुष्पीशब्दे ज्ञेयाः ॥)

माल्यवान्, [त्] पुं, (माल्य+मतुप् । मस्य वः ।) पर्व्वतविशेषः । इत्यमरः । २ । ३ । ३ ।
माल्यं मालाकारता विद्यतेऽत्र माल्यवान् सतु ।
इति तट्टीकायां भरतः ॥ स च केतुमालेलावृतवर्षयोः सीमापर्व्वतः । नीलनिषधपर्व्वतपर्य्यन्तविस्तारः । इति सिद्धान्तशिरोमणिः ॥ (यथा, महाभारते । ३ । १५८ । २५ ।
"उपतस्थुर्महाभागा माल्यवन्तं महागिरिम् ।")
राक्षसविशेषः । स च सुकेशराक्षसात् ग्रामणीनामकगन्धर्व्वस्य कन्यायां देववत्यां जातः । अस्य भ्राता सुमाली तस्य कन्यायां निकषायां पुलस्त्यपुत्रविश्रवसो रावणो जातः । इति रामायणे उत्तरकाण्डे ५ सर्गः ॥ (मालाविशिष्टे, त्रि । यथा, महाभारते । १ । १०१ । ११ ।
"शिरोवेष्टेन सन्नाह माल्यवान् सुदर्शनः ।"

स्त्रियां ङीप् । नदीभेदः । यथा, रामायणे २ । ५६ । ३५ ।
"सुरम्यमासाद्य तु चित्रकूटं
नदीञ्च तां माल्यवतीं सुतीर्थाम् ।
ननन्द हृष्टो मृगपक्षिजुष्टां
जहौ च दुःखं पुरविप्रवासात् ॥")

माल्लः, पुं, (मल्ल+चातुरर्थिकत्वात् अण् ।) सङ्कीर्णजातिविशेषः । स च शिटात्तीवरकन्याया जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

माल्लवी, स्त्री, (मल्ल+स्वार्थेऽण् । तस्य स्त्री गमनं यत्र ।) मल्लयात्रा । इति धारावली ॥

माशब्दिकः, त्रि, (मा शब्दयतीति । माशब्द+"प्राग्वहतेष्ठक् ।" ४ । ४ । १ । इत्यत्र । "तदाहेति माशब्दादिभ्य उपसंख्यानम् ।" इति वार्त्तिकात् ठक् ।) निषेधकर्त्ता । तत्पर्य्यायः । प्रतिषेद्धा २ । इति त्रिकाण्डशेषः ॥

माष:, पुं, (माषस्य फलम् । माष+अण् । "लुप् च ।" ४ । ३ । १६६ । इत्यस्य "फलपाकशुषामुपसंख्यानम् ।" इति कात्यायनोक्तेर्लुप् । यद्वा, मष+घञ् पृषोदरादित्वात् साधुः ।) व्रीहिभेदः । माषकलाइ इति उरिद् इति च भाषा । तत्पर्य्यायः । कुरुविन्दः २ धान्यवीरः ३ वृषाकरः ४ मांसलः ५ बलाढ्यः ६ पित्र्यः ७ पितृभोजनः ८ । अस्य गुणाः । स्निग्धत्वम् । बहुमलकरत्वम् । शोषकत्वम् । श्लेष्मकारित्वम् । अतुल्यवीर्य्यत्वम् । झटितिरक्तपित्तप्रकोपकत्वम् । वातहरत्वम् । गुरुत्वम् । बलकरत्वम् । रोचकत्वम् । स्वादुत्वम् । अमरत्वषतां नराणां नित्यं सेवनीयत्वम् । इति राजनिर्घण्टः ॥ अपि च ।
"माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः ।
उष्णः सन्तर्पणो बल्यः शुक्रलो बृंहणः परः ॥
भिन्नमूत्रमलस्तन्यमेदःपित्तकफप्रदः ।
गुदकीलार्दितश्वासपंक्तिशूलानि नाशयेत् ॥"
इति ।
कफपित्तकरा माषाः । इति च भावप्रकाशः ॥
अन्यच्च ।
"माषो बहुमलो वृष्यः स्निग्धोष्णो मधुरो गुरुः ।
वातघ्नः स्रंसनो बल्यो मेदःश्लेष्मकफप्रदः ॥"
इति राजवल्लभः ॥
माषचर्णेन मूलकभक्षणं निषिद्धं यथा,—
"मूलकं माषचूर्णेन मधुना च न भक्षयेत् ॥"
इति च राजवल्लभः ॥
चतुर्द्दश्यां रविवारे च माषभक्षणनिषेधो यथा, तिथितत्त्वे माघके । इति ।
"माषमाषिकमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद्यो रवेर्वारे सप्तजन्मसु रोगवान् ॥"
इति च तिथ्यादितत्त्वम् ॥ * ॥
परिमाणविशेषः । माषा इति भाषा । तत्-

पर्य्यायः । माषकः २ मासः ३ । इत्यमरभरतौ । पञ्च-गुञ्जः धान्यकः ४ । स च माषपरिमाणे षड्गुञ्जमिति ५ गुञ्जापरिमाणम् । चरकमते १८ गुञ्जापरिमाणम् । कालिङ्गमाने षड्गुञ्जमिति ६ । ७ । ८ गुञ्जापरिमाणम् । इति भावप्रकाशः । वैद्यकमते १० गुञ्जापरिमाणम् । यथा,—

"गुञ्जाभिर्दशभिर्माषः माषो माषचतुष्टयम् ।"

इति वैद्यकपरिभाषा ।

(माषार्थे यथा,—

"द्वात्रिंशन्माषकैर्माषकं दक्षा तु तैः पलम् ।

चरकोक्तं स्मृतिमानं चरके दशरक्तिकैः ।

माषैः पलं चतुःषष्ट्या पञ्चशीतं प्रचक्षते ॥"

इति वैद्यकपरिभाषायां मागधमानाधिकारे ।)

ज्योतिःशास्त्रमते १२ गुञ्जापरिमाणम् । यथा,

"पलं तु लौकिकैर्माषैः षाड्दशकपरिमाणकम् ।

लौकिकमिदं ज्ञेयं ज्योतिर्भिः शास्त्रसम्मतम् ॥"

इति निघण्टिरत्नाकरवचनेन पलं षड्दशपरिमितमाषकमाषपरिमितं लक्ष्यते । यद्वै माषकपरिमाणं द्वादशरत्तिकं भवति । ७ । मूर्खः । अज्ञोऽपरः । इति मेदिनी षे, २१ ।

माषकः, पुं, (माषप्रकारः । माष + "स्थूलादिभ्यः प्रकारवचने कन् ।" ५ । ४ । ३ । इति कन् ।) माषकः । पञ्चरत्तिकपरिमाणम् । यथा । गुञ्जाः पञ्चाद्यमाषकः । इत्यमरः ॥

"इमाङ्गुष्ठं प्रवदन्ति माषं माषाञ्जयैः षोडशभिश्च कर्षम् ॥"

इति लीलावती च ॥

"षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधान्यकौ ।

माषो गुञ्जाभिर्दशभिः पञ्चभिर्वा भवेत् क्वचित् ॥"

इति भावप्रकाशः ॥

(वीजविशेषः । तद्वर्थे विस्तो यथा,—

"द्वात्रिंशन्माषकैर्माषः ।"

परिमाणार्थे यथा,—

"————————पञ्चगुञ्जस्तु माषकः ।

द्वादशभिर्माषकैश्चतुःषष्ट्या तु तैः पलम् ॥"

इत्युक्ते वैद्यकपरिभाषायां मागधमानाधिकारे ।)

माषकलायः, पुं, (माषसदृशः कलायः । शाक-पार्थिववत् समासः ।) कलायविशेषः । यथा । कलायभेदो दिने धान्यविशेषे च कल-ह्य माषकलाय इत्यादि प्रयोगः । इत्यमर-टीकायां भरतः ॥

माषपर्णी, स्त्री, (माषस्य पर्णमिव पर्णं यस्याः । गौरादित्वात् ङीष् ।) वनमाषः । माषाणी इति भाषा । तत्पर्य्यायः । सूर्य्यपर्णी २ काम्बोजी ३ महासहा ४ । इत्यमरः । २ । ४ । ११४ । सिंह-पुच्छी ५ अतिरोमा ६ कृष्णवृन्ता ७ काम्बोजी मत्स्यपर्णी ८ च । इति रत्नमाला । आर्द्र-माषा ९ ऋषभाख्या १० अङ्कुरा ११ पाण्डु-रोमिका १२ हयपुच्छिका १३ पाण्डुरा १४ माषपर्णिका १५ मधुरा १६ माषपर्णिका १७ कृष्णपर्णी १८ शालिपर्णी १९ पिच्छादिनी २० आर्द्रोत्था २१ मधुस्रवा २२ सहस्नुः २३ शुभगा २४ धना २५ सिंहविन्ना २६ विसा-रिणी २७ । अस्या गुणाः । तिक्तरसत्वम् । शीतलत्वम् । दाहज्वरापहत्वम् । शुक्रवृद्धिकारि-त्वम् । बलदत्वम् । शोषापहत्वम् । पुष्टिवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च भावप्रकाशे ।

"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका ।

पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा ।

माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत् ।

मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित् ॥"

माषभक्तबलिः, पुं, (माषस्य भक्तस्य तद्युक्तो बलिः ।) माषतण्डुलदधिमिश्रितपूजोपहार-विशेषः । अथ कश्चित् बलिदानमन्त्राप निगदन्ति । यथा । एष माषभक्तबलिः ।

"ॐ भव त्वं काल ! धर्मेश धर्मभूतगणावृत !

एष मां विश्वभूतेभ्यो बलिं ग्रह नियच्छ ! ॥"

ॐ कालाय नमः । प्रार्थनामन्त्रो यथा,—

"ॐ मातर्मातर्मिरे दुर्गे धर्मकामार्थसाधिनि ।

अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे ॥"

इति छन्दोगतत्त्वम् ।

भूतेभ्योऽप्ययं बलिर्देयः ।

माषवर्द्धकः, पुं, (माषं वर्द्धयतीति । वृध + णिच् ण्वुल् ।) स्वर्णकारः । इति शब्दमाला ॥

माषाशः, [स्] क्ली, प्रतिमाषम् । माषं माषं ददाति इत्यर्थे माषुषादेन निष्पन्नम् । इति सिद्धान्त-कौमुदी ॥

माषाशः, पुं, (माषमश्नातीति । अश् + अण् ।) अश्वः । इति शब्दरत्नावली । माषभक्षके, त्रि ॥

माषीणं, माष्यं, } क्ली, (माषाणां भवनं क्षेत्रम् । माष + "विभाषा तिलमाषोमाभङ्गाणुभ्यः ।" ५ । २ । ४ । इति यत् पक्षे खञ् ।) माषक्षेत्रम् । यथा,—

"निष्पन्नशालिकलमाषीणमाषमुद्गादिकं यथा ।"

इत्यमरः ।

यथा तिलस्य क्षेत्रं तिल्यं तैलीनञ्च भवति तथा माषादीनामपि द्विरूपता वैकल्पे भवति । इति तट्टीकायां भरतः ॥

मास्, पुं, (मस + भावे "सर्व्वधातुभ्योऽसुन् ।" ४ । १८९ । इत्यसुन् ।) चन्द्रः । (यथा, ऋग्वेदे । १० । १२ । ७ ।

"यदी ज्योतिरदधुर्मास्यक्तून् परि द्योतनिं चरतो अजस्रा ॥"

"मासि चन्द्रसि ।" इति तद्भाष्ये सायणः ॥ मीयतेऽनेनेति । मा + "माङ्मो णि च" । ४ । १४६ । इत्यत्र "मासुभावान् बिभ्यादि मोऽर्थः ।" इत्युज्ज्वलदत्तोक्तेरसुन् ।) मासः । इति मेदिनी । से, ७ । अत्र प्रथमैकवच-नान्तरूपं माः । (यथा, मनौ । ५ । १५ ।

"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् ।

षष्ठेऽन्नप्राशनं मासि यदेष्टं मङ्गलं कुले ॥"

मासि, स्त्री । यथा, ऋग्वेदे । १ । १९ । ४ ।

"पौषघृता मासि शारदी

मासि शरदि मघवा श्रोत्रमाणः ॥"

"माः मासानि ।" इति तद्भाष्ये सायणः ॥)

मासः, पुं, (मसृ परिमाणे + भावे घञ् ।) माष-परिमाणम् । इत्यमरटीकायां भरतः । मास इति भाषा । (मस्यते परिमीयते कालोऽनेनेति मसृ + घञ् ।) त्रिंशद्दिनपरिमितकालः । स च चैत्रादिद्वादशसंज्ञकः । इत्यमरः । १ । ४ । १२ ॥ मासः कालाङ्गार्थे मासः । चान्द्रमासश्चैव मुख्यतः । चैत्रादिषु मासेषु परिमाणेऽन्यार्थो वा मासः । तद्वर्थे ईं परिमाणे घञ् । माः मासोऽपि । मासु मासोऽपि कथ्यते । इति यज्ञः । इति भरतः ॥ ॥ स्त्रीलिङ्गेऽपि चैत्रादिद्वादशसंज्ञकः । यथा,—

"चैत्रात् प्रतिवर्त्तते धर्मः कालवशाद्गतः ।

मासः कार्त्तिकं माघं वर्ज्यं मासविवर्जितम् ।

मासविष्णु कर्त्तव्यं पौषमासाद्यैव हि ।

मतश्च द्विधानेन च मासः परिकीर्त्तितः ॥"

इति बृहद्धारीतः ।

कार्त्तिकादिद्वादशसंज्ञकोऽपि । यथा,—

"कल्पोपाख्यौ शिशौ ज्ञेयौ माघफाल्गुनौ शिशिरा-मतः ।

श्रैष्ठ्या मासा हिमा शेषाः शरत्कार्त्तिक-

स्मृता ॥"

स च चैत्रादिद्वादशसंज्ञश्च । यथा वर्षं मत्स्यपुराणम् ।

"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि ।

शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ॥

प्रवर्त्तयामास तदा कालस्य गणनामपि ।

ग्रहान् राशीनृतून् मासान् वत्सरान् वत्सराधि-

पान् ॥"

इत्येव मासशब्दस्य चान्द्रमासत्वम्

मत्स्यपुराणेऽपि ।

"वैशाखादिव्यवस्थायां तैर्मासैर्माणुष्यवत्सरः ।

यज्ञादौ चान्द्रमासेन भवति हि वैशिकः ॥"

वैशाखादिचैत्रान्ततत्त्वनिरूपणमाहात्म्यमदः ।

अपि च ।

"सौरादिषु चतुर्विधमासादिव्यवस्थया ।

भवेन्नित्यं चान्द्रमासेनाद्य कार्यं प्रोक्तः ॥"

चान्द्रमासस्यैव प्रयोगस्तत्र च चतुर्विधः ।

मुख्यतिथ्यादिप्रयोजनात् । तत्र चान्द्रो-ऽपि द्विविधः । शुक्लप्रतिपदादिदर्शान्तो मुख्यः ।

कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः । स-विशेषविधानाभावेऽपि द्विविधो गौणः ।

सिंहस्थोदयाभावः माघः । सार्द्धैक-राशिभोगात्मकः सौरः । सार्द्धदिनचतुष्टया-त्मकचन्द्रमासावधारणञ्च सावनः ।

तथा च ब्रह्मसिद्धान्ते ।

"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः ।

एकराशौ रविर्यावत् कालं मासः स भास्करः ॥

सर्व्वर्त्तुपरिवर्त्तैस्तु नाक्षत्र इति चोच्यते ॥”
सूर्य्यसिद्धान्ते ।
“नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते ।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते ॥”
तत्त्रिंशता नाक्षत्रदिनत्रिंशता मासो नाक्षत्रमासः । तथा त्रिंशता ॥ * ॥ स्मार्त्तशूलपाणिमते मुख्यचान्द्र एव मासपदशक्यः । जीमूतवाहनमते सौर एव शक्यः । चान्द्रप्रमाणं प्रागुक्तम् । सौरप्रमाणन्तु । सौरास्तु मासा मेषाद्यो द्वादश एव सौराः । तथा च श्रुतिः । तपस्तपस्यौ शैशिरावृतू । मधुश्च माधवश्च वासन्तिकावृतू । शुक्रश्च शुचिश्च ग्रैष्मावृतू । अथैतदुदगयनं देवानां दिनम् । नभाश्च नभस्यश्च वार्षिकावृतू । इषश्च ऊर्ज्जश्च शारदावृतू । सहाश्च सहस्यश्च हैमन्तिकावृतू । अथैतद्दक्षिणायनं देवानां रात्रिरिति । अयनस्य सौरत्वेन तद्घटकतपस्तपस्यादीनामपि सौरपरत्वमिति । अतो भूयसामनुरोधेन वैशाखादयः सौराश्चिनोऽवधार्य्यन्ते । इति मलमासतत्त्वम् ।
अपि च ।
“मेषस्थिते रवेर्मासो वैशाखोऽन्यस्तथा
स्मृतः ।”
इति सङ्केतकौमुदी ।
अथ कर्म्मविशेषे मासविशेषादिः । तत्र पितामहः ।
“आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥”
प्रथमादिपदं यात्रापक्षापरम् । यत् कर्म्म सूर्य्यभोग्यराश्युल्लेखेन यच्च विहितोदगयनादि विहितं तत्परञ्च अयनस्य सौरमासघटितत्वात् । यज्ञ चूडोपनयनादि । द्वितीयादिपदं सम्वत्सरप्रायश्चित्तादुर्गापूजाश्राद्धमाघामपुष्यादिमत्स्योदयनामकरणान्नप्राशननिष्क्रमणचूडादिपरम् । तथा च विष्णुधर्म्मोत्तरे ।
“अब्दायनञ्च यच्चान्यत्कर्म्म
सौरेण मानेन सदाव्यवस्येत् ।
यज्ञादिमासाद्यन्य सावनेन
चान्द्रेण यत् स्यादृणवत्सरकर्म्म ॥”
अब्दायनं अब्दगमनं वार्षिकमिति यावत् ॥ * ॥
अथ सौरादिमासविहितकर्म्माणि ।
“विवाहोत्सवयज्ञेषु सौरं मासं प्रशस्यते ।
पार्व्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके ॥”
अत्र यज्ञपदस्योपनयनादिविहितयज्ञपरताभिप्रायं पितामहोक्तञ्च विष्णुधर्म्मोत्तरोक्तयज्ञपरम् । गर्गः ।
“आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा ।
सावनेन तु कर्त्तव्या यज्ञानामुपासना ॥”
सूर्य्यसिद्धान्ते ।
“उपकारादिपारार्थे दिनमासाब्दपास्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता ॥”
मध्यमग्रहभुक्त्यादिगणना प्रसिद्धा ॥ * ॥

नाक्षत्रमासप्रयोजनं विष्णुधर्म्मोत्तरे ।
“नक्षत्रसत्राण्ययनानि चेन्दो-
र्मासेन कुर्य्याद्गणनाक्रमेण ॥”
नक्षत्रसत्राणि माससाध्ययागविशेषरूपाणि याज्ञिकप्रसिद्धानि । इन्दोरयनानि सोमायनाख्यसत्राणि । इति समयप्रकाशः ॥ एवं जन्मनक्षत्रे शनिभौमवारे फलं नाक्षत्रमासेन योग्यत्वात् । यथा, मलमासतत्त्वे ।
“जन्मर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ ।
स मासः कल्मषो नाम मनोदुःखप्रदायकः ॥”
मलमासविवरणं मलमासशब्दे द्रष्टव्यम् ॥ * ॥
अथ मासकृत्यम् ।
“आषाढ़शुक्लैकादश्यां कुर्य्यात् स्वापं महोत्-
सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणाविधिम् ।
भाद्रे च जन्मदिवसे उपवासपरो भवेत् ।
प्रतिपञ्च पारिवर्त्तमाश्विने मासि कारयेत् ॥
उत्थानं श्रीहरेः कुर्य्यादन्यथा विष्णुदोहनम् ।
शुभे चैवाश्विने मासि महामायाञ्च पूजयेत् ॥
कार्त्तिके मासि यत् कृत्यं शृणु देवि वरानने ! ॥
सम्वत्सरः प्रमाणेन दीपः स्यादचलस्थितः ।
पञ्चाम्ने च प्रकर्त्तव्या दीपमाला बलिः शुभा ।
मार्गशीर्षे सिते पक्षे षष्ठ्याञ्च सितवस्त्रकैः ॥
पूजयेज्जगदीशञ्च तूलवस्त्रैर्विशेषतः ।
पौषे पुष्याभिषेकञ्च वर्ज्जयेच्चन्दनं तथा ॥
संक्रान्त्यां माघमासि च साधिवासितसत्तिलान् ।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत् ॥
जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो ! ।
तवाज्ञयाणिमता प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूरागुरुमिश्राणि घृताक्तानि निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरःस्थितान् ॥
अर्द्धञ्च भगवद्भक्त्या द्विजांश्च भगवद्धिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भोजिता ॥
विप्रभोजनमात्रेण सर्व्वं साङ्गं भवेद्ध्रुवम् ।
पञ्चम्यां शुक्लपक्षे तु स्नापयित्वा च केशवम् ।
पूजयेद्गन्धकृत्या चन्दनचम्पकमिश्रितैः ॥
अगुरुधूपैश्च विविधैर्वासितैः पटवासितम् ।
काननं रमणीयञ्च प्रदीप्तदीपदीपितम् ॥
द्राक्षेक्षुरम्भाजम्बीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्री च पनसाम्रहरीतकौ ॥
अन्यैश्च हृद्यवृक्षैश्च सर्व्वर्त्तुकुसुमान्वितम् ।
पुष्पैश्च विविधैश्चैव पत्रपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्वारिपूर्णघटैस्तथा ।
चूतपल्लवमालाभिः शोभितं छत्रचामरैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्द्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्पूर्णसन्धितो ।
पूजयेद्विधिवद्भक्त्या मधुपुष्पकदर्द्दिभिः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ॥
हरिद्रापारयोगाच्च रक्तरम्यैर्मनोहरैः ॥
अयेभ्यो रक्तवस्त्रैश्च प्रीणयेत् परमेश्वरम् ।
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ।

पञ्चाहानि त्र्यहाणि वा दोलोत्सवो विधीयते ॥
दक्षिणाभिमुखं कृष्णं दोलयानं सुसत्तमाः ।
ब्रह्महत्यादिपापैर्मुक्तास्ते नात्र संशयः ॥
निक्षिप्य जलमध्ये तु मासि माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा मृण्मयेऽपि वा ॥
तोयस्थं योऽर्च्चयेद्देवं शालग्रामसमुद्भवम् ।
प्रत्यहं मां महाभागे ! तस्य पुण्यं न गण्यते ॥
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणी भाद्रे कर्त्तव्यञ्च तदर्पणम् ॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मण्डले वा स्वकाङ्गणे ॥
सुगन्धचन्दनेनाङ्गपुण्ड्राङ्गो दिने दिने ।
यथा प्रयत्नतः कार्य्यः कृष्णाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुष्ठं कुङ्कुमरोचना ।
जटामांसी मुरा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि हरेरङ्गानि लेपयेत् ।
एकञ्च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमुच्यते ॥
अस्मिन् काले कृष्णभक्त्या ये प्रपश्यन्ति माधवम् ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिभिर्मितैस्तोयैः स्नापयित्वा जगद्गुरुम् ।
अथवा पुष्पमध्ये च स्थापयेज्जगदीश्वरम् ॥
वृन्दावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तद्विशेषतः ॥
नारिकेलफलं नीरं कोषयोर्हृत्य दापयेत् ।
कण्टकफलञ्च पनसं कोषमुद्धृत्य दीयते ॥
यथा यथेष्टया दद्यात् यथाशक्ति नियोगतः ।
दध्ना विमिश्रितान्नञ्च घृतेनाढ्यं च दापयेत् ॥
पायसं पिष्टकं धातुरसाद्यं घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं गुडञ्च दापयेत् ॥
यद्यद्देवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीनादद्यान्न कथञ्चन ।
तत्सर्व्वं विष्णुमुद्दिश्य सद्भक्तेभ्यो विशेषतः ॥
इति ते कथितं किञ्चित् समासेन महेश्वरि ! ।
गोप्तव्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ॥”
इति पाद्मे पातालखण्डे १९ अध्यायः ॥

माषकः, पुं, माषकपरिमाणम् । यथा । गुञ्जाः पञ्चाद्यमाषकः । इत्यमरः ॥ पञ्चगुञ्जाः आद्यः प्रथमो माषकः । दशगुञ्जाभिश्चापरमधमम् । माष्णीयमात् गुञ्जो माष इत्यर्थो वा । मस्यते परिमीयतेऽनेन माषः मसिर्यं इ परिमाणे परीणामे घञ् स्वार्थे कः माषोऽयं इत्यन्ये । मव हिंसायां मस्तीयान्तक्षयाद् घञ् तेन माषो मर्त्यान्त इति जिनेन्द्रमतम् । इत्यमरटीकायां भरतः ॥

माषाशः, पुं, दाखूखग्गो । इति शब्दरत्नावली ॥ (माषं आश्नाति । आ+अशः ॥) माषभक्षकर्त्तरि, त्रि ॥

माषाणं, क्ली, धोमराजी । इति शब्दचन्द्रिका ॥

माषमाषः, पुं, (माषैर्दारमभिमानमस्य ।) वरुटः ॥ इति त्रिकाण्डशेषः ॥ (माषस्य मापम् ॥) माषपरिमाणे, क्ली ॥

मासरः, पुं, (मस + क्विप् + भावुकवत् ...।) भक्तमण्डः। इत्यमरः। २। ९। ४९ ॥ इति हेमचन्द्रः। ३। ६। ४६ ॥

मासवर्त्तिका, स्त्री, पक्षिविशेषः। इति शब्दमाला ॥

मासान्तः, पुं, (मासस्यान्तः।) अमावस्या। यथा,—

अमान्ते पितृपक्षे वा मासान्ते शरदं शुभम्।

इति कालकौमुदी ॥

संक्रान्तिदिनम्। यथा,—

"मासान्ते पितरो यान्ति पितृलोकात् स्वमन्दिरम्।
अमावास्यां च वैशाखे पितरो भवन्ति सर्वदा ॥
मासान्ते विशेषेण पितृभ्यो दद्यात् तर्पणम्।
तर्पणात् तृप्तिमाप्नोति पितृलोके वसन्ति ते ॥"

इति स्मृतिः ॥

मासिकं, क्ली, (मासि भवम्। मास + "कालाट्ठञ्।" ४। ३। ११। इति ठञ्।) प्रेतस्य संवत्सराभ्यन्तरे प्रतिमासमृतदिवसे कर्त्तव्यश्राद्धम्। प्रतिमासकर्त्तव्यं एकोद्दिष्टश्राद्धम्। तत्पर्य्यायः। अन्वाहार्य्यम् २। इत्यमरः। २। ७। ३१ ॥ मासि भवं मासिकं पार्व्वणश्राद्धं तच अन्वाहार्य्यं वदन्ति। यदाह मनुः। अमावास्यायां दिवसात्। अन्वाहार्य्यं पितृभ्यो दद्यात् इति। तत्र अन्वाहार्य्यम् अन्नदानम्। अन्वाहार्य्यं पितृयज्ञात् अनुपश्चात् आहार्य्यं भवति प्रतिमासं यत् श्राद्धं तदन्वाहार्य्यमिति केचित्। इत्यमरटीकायां भरतः। तयोः प्रमाणम्।

"श्राद्धानि षोडशाद्यानि आद्ये प्रथमे पूर्व्वोक्ते तु ते।
मासिकानि यथोक्तेन विधिना दापयेत् तु वै ॥"

इति प्रेतकल्पः।

"पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः।
तच्चामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः ॥"

इति मनुः। ३। १२३ ॥

मासिकश्राद्धस्य व्यवस्था यथा। पौरन्दरो-पाध्यायविरचिते एकोद्दिष्टे परिभाष्य इत्यादि कर्मः प्रयोग इत्यादि विना देशः इत्यादि वर्ज्जयित्वा इत्यादिकमधसूत्रपद्धतिनापि च श्राद्धेऽपिदेशात् अवाप्ते अवाप्ते द्वादश मासिकानि कार्य्याणि। एकादशमासाभ्यन्तरे प्रथमाद्यशौचकर्म्मामासिकानि। द्वादशमासाभ्यन्तरे प्रथमासपाणेऽपि एकमासिकपूर्व्वदिनादेव प्रथमादशाहिकम्। तथा षष्ठीद्वादशमासिकस्य पूर्व्वदिनो द्वितीयदशाहिकम्। एवं श्राद्धादिको-क्ति एकमासान्मासिकद्वितीयश्राद्धमासिकोक्तेः। इदं तद्वर्जं यत् सपिण्डनं तत्सर्व्वकालार्थं अधिकादशाहाद् प्रागेव सपिण्डनदिनेऽपि वा प्रथम-मासं कर्त्तव्यम्। अशौचान्तद्वितीयदिने वा कर्त्तव्यम्। एकादशाहादिमात्रापि अपि तथा यदि अपकृष्य दिवसविशेषादिकादिषु अवाप्तानि। अथ मासिकैकोद्दिष्टप्रयोगः। पूर्व्वदिने निरामिषैकभक्तः प्रातः कृतस्नानादि तथा कुशोदकमादाय आचम्य प्रत्युदङ्मुखः प्रतिमुखः अहम-मुक्तगोत्रः प्रेतस्य पुष्पाञ्जलिमाचरन् प्राङ्मुखः कुर्य्यात्। यथा अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः प्रथम-मासिकैकोद्दिष्टश्राद्धं धर्म्मपञ्चाशत्तिलं करिष्ये। ॐ कुरुष्वेत्युत्तरम्। ततो गायत्रीं जपेत्। देवताभ्य इत्यादि त्रिधा पठेत्। ततः पुण्डरी-काक्षं स्मृत्वा तच्चान्नेन यज्ञोपवीती प्रोक्षयेत्। स्वार्थमुदकपूर्णपात्रमेकदेशे स्थापयेत्। ततः ॐ अमुकगोत्र प्रेत अमुकदेवशर्म्मन्नेतत् इत्यासनं दद्यात्। इत्येव प्राङ्मुखासनार्घ्ये दद्यात्। अपसव्येनानेन तिलान् विकीर्य्य अर्घ्यं स्पृष्ट्वा आवाहनमुक्तौ कुशमयमेकं प्रादेशमात्रं तदुपरि आसनार्थं संस्थाप्य ॐ पवित्राणि वैष्णवीत्यनेनाभिमन्त्र्य ॐ तिलोऽसिसोमदेवत्यो गोसवो पुन-र्भवत्वेन प्रोक्षितमेकदर्भं पवित्रं तदुपरि निधाय ॐ इतः पितॄनिमांल्लोकानित्यनेन सर्व्वं दद्यात्। ततः ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहा। इत्येव तिलान् दत्त्वा गन्धपुष्पादिना अर्घं निर्म्माय कुशा-न्तरेणाच्छाद्य तत् कुशमुद्धृत्य आवाहितं पवित्रं दत्त्वा अनामकेन दत्त्वा पुष्पान्तरेण शिरः-प्रभृतिसर्व्वाङ्गेषु मम इति संस्पृश्य तत्पात्रं वामहस्तेनैव निधाय दक्षिणहस्तेनाच्छाद्य ॐ या दिव्या इति पठित्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते अर्घः स्वधा। ततः ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतानि ते गन्ध-पुष्पधूपदीपाच्छादनानि स्वधा। एतद्गन्धं एष ते गन्धः एतानि पुष्पं एष ते धूप एष ते दीपः एतत्ते आच्छादनम्। ततो भाजनाभ्युक्षण-कुशादिकमपनीय वस्त्रादिमाल्यं दक्षिणा-प्रान्तस्थित वामहस्तेन अन्नेन अनुप्लोच-मानं तस्मा तत्र भोजनपात्रं निदध्यात्। तत्र पात्रं वर्म्मपदादिना परिवेष्ट्य ॐ इदं विष्णुर्विचक्रमे इत्यनेन अन्नादावङ्गुष्ठं निवेश्य ॐ अपहता इत्यादिना तिलान् विकीर्य्य भाजने अन्नमन्नं दत्त्वा गायत्रीं पठित्वा ॐ मधु दत्त्वा तदभावे दुग्धं दत्त्वा घृतं दत्त्वा ॐ मधुवात-इत्यादि मधु मधु मधु इति च पठित्वा आपो-शानं धृत्वा गायत्रीं अन्नादूर्द्ध्वं दत्त्वा वाम हस्तेनान्नपात्रं धृत्वा ॐ अमुकगोत्र प्रेतामुक-देवशर्म्मन्नेतत्ते काम्यान्नं सोपकरणं स्वधा-इत्येवं उत्सृजेत्। इदं नानिवार्य्य इदं चाभिः इत्या अङ्गुष्ठ-मात्रं गृहीत्वा ओदनादि तथाऽन्नं भावयेत्। इत्येव अन्नपूर्णं दद्यात्। ततो गायत्री-त्रिः अथवा ॐ मधुवाता इत्यादि मधु मधु मधु इति ॐ अन्नहीनमित्यादि च पठेत्। भुक्तवाचयेत् तृप्तास्थ इत्यादि पठेत्। ॐ तृप्ताः स्थ इत्यादि ॐ सौम्या इत्यादि पाठ-

एकोद्दिष्टकल्पं ॐ सर्व्वोपचारादि ॐ तृप्तो-स्म इत्यादि ॐ तृषितः इत्यादि मन्त्रं पठेत्। ततो दक्षिणाग्रान् कुशान् भूमौ संस्थाप्य भूमिं प्रोक्ष्य सर्व्वप्रकारमन्नमुद्धृत्य उच्छिष्टसमीप-भागेऽधस्तात् ॐ अग्निदग्धाश्चेत्यादिमन्त्रेणैव कुशोपरि विकिरेत्। ततो हस्तौ प्रक्षाल्य दक्षिणाग्रे कुशान् पुरतो दत्त्वा आचम्य प्रेताय अन्नपूर्णं दत्त्वा पूर्व्ववत् गायत्रीं मधुवाता इत्यादि मधु मधु मधु इति च पठित्वा ॐ देवताभ्य इत्यादि त्रिः पठित्वा ॐ इदाय शौचमानीयतां इत्युक्त्वा ॐ पिण्डदानमहं करिष्ये ॐ कुरुष्वे-त्युक्ते आचम्य अग्निर्मे ॐ निहन्मि सर्व्वमिति मन्त्रं निगद्य दक्षिणाग्रेषु कुशेषु वामहस्तेन अनुल्लेखमन्त्रं पठित्वा वामहस्ता-दक्षिणहस्तेन संगृह्य वामहस्तेनाप्रभृति दक्षिणाग्रान् पवित्रे उपस्थाप्य ॐ अपहता इत्यादिना तिलान् विकीर्य्य कुर्य्यात्। तद्भूमौ पुष्पं निदध्यात्। तेषां पुरः सपवित्रम् आस्तीर्य्य कुशान्तरे ॐ शुन्धन्ताम् इति पठित्वा ॐ इह पितृलोके इत्यादिभिः पठित्वा पूर्व्वकैर्मन्त्रैः इत्यादि वाम-हस्ते भावयेत्। दक्षिणवामभ्यां गृहीत्वा सव्येन अवनेज्य पितृतीर्थेन दत्त्वा पात्रमुत्तानीकृत्य विकिरेत्। ततो वामहस्तेन पतितमन्नं गृहीत्वा वामहस्तात् दक्षिणहस्तेन संगृह्य ॐ अमुकगोत्र प्रेताऽमुक-देवशर्म्मन्नेतत्ते पिण्डं स्वधा इत्येव दद्यात् ततः पातयेत् मधु घृतेनैव प्रत्यक्षं महाभावम् शिरसा कृत्वा ॐ मधुवातेत्यादि चत्वारि मधु मधु मधु इति पठित्वा पिण्डं दत्त्वा पिण्डपात्रं निदध्यात्। अमुकगोत्र प्रेताऽमुकदेवशर्म्मन्नेतत्ते इति पिण्डं दत्त्वा पितृतीर्थेन तत्र पिण्डोपरि दद्यात्। ततः ॐ अत्र पितः मादयस्व यथाभागम् आवृषायस्व इति पठित्वा वामावर्त्तेनोद-ङ्मुखो भूत्वा आसनप्राणायामं कृत्वा तथैव पुनः प्रत्यावृत्य प्रेतं भावयन् आसनं ॐ अमीमदन्त पित इति भावयन् इत्यादि इति दक्षिणाभिमुखो भवन् जपेत्। ततः प्रार्थ येत्। ॐ नमस्ते पित इत्यादि मन्त्रं इति षडाज्ञमिश्रं जपेत्। ॐ गृहान् नः पितरो दत्त इति तद्दक्षिणां पठेत्। ॐ सदो वः पितरो देष्म इति निदध्यात् पठेत्। ततो मधुसर्पिर्वा पुष्पाक्षत-दधिसहितं तु तन्त्रसूक्तादिभिः सूत्रेण सहैव ॐ एतद्वः पितरो वास इति दत्त्वा निदध्यात्। ततः ॐ अमुकगोत्र प्रेतामुकदेव-शर्म्मन्नेतत्ते वासः स्वधा। इत्येवं दद्यात्। तत्पुष्पं पिण्डे संपूज्य ॐ अन्नादिदानं-

मन्त्रेण मधूत्सृमसकुर्य्यात्। ततः ॐ सुसम्प्रोक्षितमस्तु इति माजनायभूमिमाभिषिञ्चेत्। ॐ शिवा आपः सन्तु इति ब्राह्मणे जलं दद्यात्। ॐ सन्त्विति प्रतिवचनम्। ॐ सौमनस्यमस्त्विति पुष्पं ॐ अस्त्विति प्रतिवचनम्। ॐ अक्षतचारिष्टञ्चास्तु इति यवान् दद्यात्। ॐ अस्त्विअनुज्ञायम्। ततस्तिलाज्यमधुयुक्तं जलं गृहीत्वा ॐ अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणो दत्तमिदमन्नपानादिकमुपतिष्ठताम्। ॐ उपतिष्ठतामिति प्रतिवचनम्। ॐ अघोरः प्रेतोऽस्तु इति वदेत्। ॐ अस्त्विति प्रतिवचनम्। ॐ गोत्रं नो वर्द्धतामिति वदेत्। ॐ वर्द्धतामिति प्रतिवचनम्। ततः पिण्डोपरि सपवित्रकुशापाणीयं ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे प्रेतमित्यनेन वारिधारया सिञ्चेत्। ततः ॐ अद्येत्यादि अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः सतैतन्यसमासिकैकोद्दिष्टश्राद्धकर्म्मणः प्रतिष्ठार्थं दक्षिणामिदं रजतं तन्मूल्यं वा विष्णुदैवतं यथानामगोत्राय ब्राह्मणायाहं ददामीति दद्यात्। ततो दक्षिणां दिशं पश्यन् वरं याचेत। नात्र पात्रमालभ्य जपेत्। नाशिषः प्रार्थयेदिति प्रचेतोवचनादाशिषं न प्रार्थयेत्। ततः ॐ देवताभ्य इति त्रिः पठेत्। ॐ अभिरम्यतामिति विसर्ज्जनम्। ॐ अभिरतोऽस्मीति प्रतिवचनम्। ॐ वाजेवाजेति प्रदक्षिणवारिधारया वेष्टयेत् पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा क्षिपेत्। श्राद्धीयद्रव्यं ब्राह्मणाय दद्यात् जले वा क्षिपेत्। ततो वामदेव्यं गायेत् अच्छिद्रावधारणं दीपाच्छादनं विष्णुस्मरणञ्च कुर्य्यात्। एवं प्रकारेण द्वितीयादिमासिकं कर्म्म। इति सार्व्वभौमाचार्य्यकृतश्राद्धप्रयोगतत्त्वम्। * । अन्यत् श्राद्धशब्दे द्रष्टव्यम्।

मासिकः, त्रि, माससम्बन्धी। मासि भव इत्यर्थे ठञ्प्रत्ययेन निष्पन्नः। (यथा, मनौ। ७।१२६।
"पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम्।
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु
मासिकः॥")

मासुरी, स्त्री, (मसुर+अण् ङीप्।) श्मश्रुः। इति हेमचन्द्रः। ३। २३७। (माषमयी। यथा, ब्रह्मवैवर्त्ते। १। १०। १४५।
"पिष्टकस्य विसुभेदो माषमयी च मासुरी।")

मास्क, अ, (मा च स्क च तयोः समाहारः।) वारणम्। तत्पर्य्यायः। मा २ अलम् ३। इत्यमरः। ३।३।११। (यथा, रामायणे। २।१२।८२।
"मास्म मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः।")

माह ऋ न माने। इति कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-सेट्।) ऋ अममाहत्। ऋदनुबन्धकार्य्यं ङउपराष्ट्रश्च इत्येके। न माहति माहते। इति दुर्गादासः।

माहाकुलः, त्रि, (महाकुलस्यापत्यमिति।) "महाकुलादञ्खञौ।" ४।१।१४१। इति अञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहाकुलीनः, त्रि, (महाकुलस्यापत्यमिति। "महाकुलादञ्खञौ।" ४। १। १४१। इति खञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः।

माहात्म्यं, क्ली, (महात्मनो भावः इति। महात्मन्+ष्यञ्।) महात्मता। महिमेति यावत्। यथा, तिथ्यादितत्त्वे।
"माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्ततः॥"

माहानामिकः, } पुं, ("तदस्य ब्रह्मचर्य्यम्।"
माहानाम्निकः, } ५। १। ९४। इत्यत्र। "महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्॥" महानाम्नी नाम व्रतमभवत्।' इत्यादि अस्य: । तासां ब्रह्मचर्य्यमस्य इति ठञ्। हरदत्तस्तु "भस्याढे।" इति पुंवद्भावात् माहानामिक इत्याह। इति सिद्धान्तकौमुदी।) महानाम्न्यचायिता ब्राह्मणः। इति केचित्॥

माहिनं, क्ली, (मह्यते पूज्यते अस्मिन् इति। मह्+"महेरिनण् च।" उणा०। २। ५६। इति इनण्।) राज्यम्। इत्युणादिकोषः॥ (मंहनीये, त्रि। यथा, ऋग्वेदे। १।२६।८।
"इन्द्र! यत्ते माहिनं दत्रमस्ति।"
"माहिनं मंहनीयम्।" इति तद्भाष्ये सायणः॥ प्रवृद्धे च। यथा, तत्रैव। १। ५६। ६।
"इन्द्र! सद्मनेषु माहिनः।"
"माहिनः प्रवृद्धः।" इति तद्भाष्ये सायणः॥)

माहिरः, पुं, (मह्यते पूज्यतेऽसौ। मह्+बाहुलकात् इरच्।) इन्द्रः। इति त्रिकाण्डशेषः॥

माहिषिकः, पुं, (महिष्यां दोषवतीऽसौ। महिषी+ठक्।) महिषीपतिः। व्यभिचारिण्यनुरक्तपतिः। यथा,—
"महिषीत्युच्यते नारी या च स्याद्व्यभिचारिणी।
तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः॥"
इति स्कान्दे काशीखण्डम्॥
महिषीपजीवी। (महिषी नारी पण्यमस्येति। महिषी+"तदस्य पण्यम्।" ४।४।५१। इति ठक्।) भगदारोपार्ज्जितस्त्रीधनोपजीवी। यथा,
"महिषीत्युच्यते भार्य्या भगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः॥"
इति विष्णुपुराणे ३। ६। १९ श्लोकस्य टीकायां श्रीधरस्वामी॥

माहिष्यः, पुं, (महिष्यां साधुरिति महिषी+ष्यञ्।) सङ्कीर्णजातिविशेषः। स च क्षत्रियाद्वैश्यायां जातः। इत्यमरः। २।१०।२१। (यथा, याज्ञवल्क्यसंहितायाम्। १। ९२।
"वैश्याशूद्रयोस्तु राजन्यात् माहिष्योग्रौ सुतौ स्मृतौ।")

माहेन्द्रः, पुं, (महेन्द्रस्यायम्। महेन्द्र+अण्।) शुभदण्डविशेषः। रथादिषमवारेषु वायुदहनयममाहेन्द्राणामेकैकदण्डा भवन्ति। तत्र इन्द्रयमयोर्दण्डौ शुभौ। वायुदहनयोर्दण्डावशुभौ। यथा,—
"रव्यादौ वा च यमा सूर्य्ये मा वा च य कथा
निधौ।
च य मा वा कुजे सौम्ये मा वा च य गुरौ
शुक्रे॥
गुरौ वा च य मा चैव मा वा च यमथाभृगौ।
सूर्य्यपुत्त्रे य मा वा च घटीयुग्मं शुभाशुभम्॥
माहेन्द्रे विजयो नित्यं वारुणे च धनागमः।
वायौ च भ्रमते नित्यं यमेऽपि मरणं ध्रुवम्॥")
इति सारसंग्रहः॥
(माहेन्द्रकायपुरुषस्य लक्षणं यथा,—
"माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रबुद्धिता।
भृत्यानां भरणञ्चापि माहेन्द्रं कायलक्षणम्॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥
महेन्द्रो देवतास्येति। महेन्द्र+"महेन्द्राद्घाणौ च।" ४। २। २९। इति अण्। महेन्द्रदैवत्ये, त्रि। यथा, भट्टिकाव्ये। ५।८१।
"अविभ्रलक्षतः प्रक्षमेणीकं राघवो रथं।
सद्यध्वसद्दासान्न माहेन्द्रं समार्थितम्॥")
महेन्द्रसम्बन्धिनि च। (यथा, रघौ। ९।८६।
"मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम्॥")

माहेन्द्री, स्त्री, (महेन्द्रस्येयम्। महेन्द्र+अण्। स्त्रियां ङीप्।) इन्द्राणी। इति शब्दरत्नावली॥ गौः। इति राजनिर्घण्टः॥

माहेयः, त्रि, (मही+ढक्) मह्या अपत्यम्। इति मुग्धबोधव्याकरणम्॥ (मङ्गलग्रहे, पुं। यथा, महाभारते। ६। ९। ४०।
"कृष्णाः पराञ्चा माहेयाः कचाः सात्त्वकुविस्फुटाः॥"
मङ्गलग्रहः। यथा, भागवते।
"कदाचित्तस्य सद्वृत्ता शिरःपीडा भयावहाम्।
माहेयः कुरुते घोरं बुधस्यान्तर्दशां गतः॥")

माहेयी, स्त्री, (मह्याः सुरभ्याः अपत्यमिति। मही+"नद्यादिभ्यो ढक्।" ४। २। ९७। इति ढक्। स्त्रियां ङीप्।) गौः। इत्यमरः। २। ९। ६७। (यथा, महाभारते। ३। १६। १०।
"सर्व्वेन्तेन माहेयी वने जाता विशाम्पते।
उपातिष्ठत पाञ्चाली वाशितेव महर्षभम्॥"
अस्याः पर्य्यायो यथा,—
"सुरभिः सौरभेयी च माहेयी सौरभायना॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

माहेशी, स्त्री, (महेशस्येयम्। महेश+अण्+स्त्रियां ङीप्।) दुर्गा। यथा,—
"महादेवात् समुत्पन्ना महामायेति यत्ततः।
माहेश्वर्य्याः समुत्पन्ना माहेशी तेन सा स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
(महेशेन सम्बद्धम्। क्ली, दाराविशेषः।
"वानुन्नयाद माहेशाद् आदौ आसरसाकंवरात्।
तानि किं परदत्तानि मन्त्रा पालिनिशोऽब्रवीत्॥"
इत्युद्भटः।)

माहेश्वरी, स्त्री, (महेश्वरस्येदम्। महेश्वर+अण्। ङीप्।) वरनिशा। इति राजनिर्घण्टः। दुर्गा। (यथा, महाभारते। ६।२३।१३।
"भगदेवानुयाताश्च कर्माणां कामचोदना।
माहेश्वरी महादेवी प्रोच्यते पार्वती हि या।")
मातृभेदः। इति शब्दरत्नावली। (यथा, मत्स्ये। ६। ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।) पिठ्ठः। यथा,—
कथा यथा॥
"कर्ण्ण विमानमे बान्धा वेषं वा मनस्विना।
कौमार्यं भाति बहुधा बहुबाहलकोचनः॥
निशम्य नाम्ना वचनं हरिस्वरवाहनः।
आकरार महायोगी शूलाधिपतिरच्युतः॥
चर्चं नारायणो गौरी कमलाला वराननः।
विभव संक्षिप्तो देवः छायार्थं बहुधीश्वरः॥
न मे पितः परं नाम्ना दैवाता न सम्भवः।
इवोद्धर्व देवदेवानां भवानी विष्णुरेव च॥
अर्ध्वं हि मित्रिपः प्राप्तः देवदो मित्रसेवनः।
मामेव देवदं देवमाहुर्वेदीमयानिकाम्।
इह माता विधाता च कारणं कार्य्यमेव च।
कर्ता कारयिता विष्णुर्मोहशक्तिसमन्वरः॥
मोक्षा युमावतीः कंसमी कालकृपचन्।
एवा माता नारायणो विनाक्षा विनतोत्सुकः॥
भूदन्ती इन्दरो नारीयोमी नारायणः स्वयम्।
नारदः पुनो क्षामा वेदवं परमं परम्॥
इदा माहेश्वरी गौरी मम शक्तिर्निरञ्जना।
प्रामा यथा नारायणा परं पदमिति श्रुतिः॥
अन्याः सर्वमिदं जानाति च तदेवानि।
एवेव सर्वभूतानां गतीनामुत्तमा गतिः॥"
इति कौर्म्मे १२ अध्यायः॥
(योगमायाभेदः। इति देवीभागवते।७।१०।७९।
महेश्वरस्य इदम्। महेश्वर+अण्। स्त्री। वाग्दुरादिवदिदः। यथा, देवीभागवते।१।
३।१८।
"माहेश्वरं भागवतं वासिष्ठञ्च सविस्तरम्।
एतान्युपपुराणानि कथितानि महात्मभिः॥"
महेश्वरसम्बन्धिनि, त्रि। यथा, मार्कण्डेये।
१०८।७१।
"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तथा।
विधा यस्य प्रकृतयः भावो मायाश्च सत्यदा॥")
मि डु ञ र क्षेपे। इति कविकल्पद्रुमः। ("स्वा०-उभ०-सक०-अनिट्।) डु मित्रिमम्। ञ र मिनोति मिनुते। इति दुर्गादासः॥
मिच्छ, इ बाधे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-सेट्।) इ मिच्छ्यते मिच्छति। बाधो विहतिः। इति दुर्गादासः॥
मितः, त्रि (मा+क्तः "द्यतिस्यतिमास्थामित्ति किति।" ७।४।४०। इत्याकारस्येकारादेशः।) परिमितः। प्रमितः। क्षिप्तः। इति धरणीविश्वप्रकाशयोः मेदिनीकृतिमनुसारेण मिच्छम्। (यथा, मनुस्मृते। ८।१३१।
"एतेषु दृष्टैर्न्यायैः विवादानुपलब्धये ते।
पौष्पाद्यैरभिर्मितः क्रमो मुनयाक्सयर्थेषः॥"
यथा च वैषधचरिते। ५।७।
"मितञ्च सारञ्च वचो हि वाग्मिता॥")
मितङ्गमः, पुं, स्त्री, (मितं परिमितं गच्छतीति। गम+"मितनखेच।" ३।२।३८। इत्यत्र "खच् प्रकरणे गमेः सुप्युपसंख्यानम्।" इति काशिकोक्तेः खच्। मुम् च।) हस्ती। इति सिद्धान्तकौमुदी। परिमितगामिनि, त्रि॥
मितद्रुः, पुं, (मितं द्रवतीति। द्रु+"परिमितयो-र्डुः।" उणा० १।३४। इति डुः। स च डित्।) समुद्रः। इति हेमचन्द्रः। ४। १४८। (परिमितगतौ, त्रि। यथा, भट्टौ।४।१५।
परिक्रमा मितद्रवेति चोत्थायिभिर्नो मद्गुरपा
आगा वा।"
"मितद्रुः परिमितगतिः वद्।" इति तट्टीकायां भरतः। मितमार्गे च। यथा, भट्टे। १०।
५१।१।
"तैम्रो धर्म्मोदयमद्गुरोदयं दिव्ये प्रवन्तु
वाजिनो मितद्रवः।"
"मितद्रवो मितमार्गाः मन्थर्या परिच्छेदकाः।"
इति तट्टीकायां सायणः।")
मितम्पचः, त्रि, कृपणः। इत्यमरः। ३। १। ४८। (मितं परिमितं पचतीति। मित+पच्+"मितनखे च।" ३। २। ३४। इति खश्। "अरुर्द्विषदजन्तस्य मुम्।" ६। ३। ६७। इति मुम् च।) परिमितपाककर्त्तरि च॥
मिताशनः, त्रि, परिमितभोजी। मितमश्नाति यः इति व्युत्पत्त्या कर्त्तरि (ल्यु) अनप्रत्ययेन निष्पन्नः॥
मितिः, स्त्री, (मीयते इति। मा+भावे क्तिन्।) मानम्। निर्णयम्। अवच्छेदः। इति शब्दरत्नावली। (यथा, कुसुमाञ्जलौ। ४। ४।
"मितिः सम्यक् परिच्छित्तिः॥")
मित्रं, क्ली, (मेद्यति स्निह्यतीति। "अमिचिमिदिशसिभ्यः क्त्रः।" उणा० ४। १६४। इति क्त्रः।) सख्यः पदम्। इत्यमरः। २। ८। ९। अत्र सख्युः परमशक्तिमो राजा मित्रं कथयितुम्। मिदति स्निह्यतीति व्युत्पत्तिः। स विनायात् सुखाभावः। द्विगकारं इत्यमरव्याख्यायाम्। इति महीपाको भरतः। अपि च।
"राज्ञा प्रकृतिरिति स्यात् स्वायंभुविनिर्णीतः।
सूर्य्यकान्तिरेवी राजा न मित्रं मित्रवाचितः॥"
इति शब्दरत्नावली।
मित्रं, क्ली, सखा। मित्रा इति भाषा। तत्पर्य्यायः। सख्याः ५ सुहृत् ६। इत्यमरः। २। ८। १२॥ माननीति बारयति क्लं मित्रं तौ हि प्रक्षा। धार्य्यते हिताः मित्रसमतर्थानि। विपदा-जम इति विमलदय। इति महीपाको भरतः। तत्पुर्य्याङ्गम्। सहायः ६ अमात्यः ८ सचिवः ९ अनिलः ४। इति महाभारते राज-धर्मे। १०। मित्रमोऽपुराणियंथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचित्
रिपुः।
कारणादेव जायन्ते मित्राणि रिपवस्तथा॥"
कर्म्ममित्रं यथा,—
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम्।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्जयेत्॥
कुमित्रे नास्ति विश्वासः कुराज्ये नास्ति
जीवितम्॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं मायामयमरिं यथा॥"
मित्रलक्षणं मित्रकं यथा,—
"न मीयते न मरं कुर्य्यात् न सुखी भवति
मित्रः॥
ललितं यस्य विश्वासः पुत्रः स विशेषितः॥"
इति गारुडे ११। १३। ११४ अध्यायाः॥७॥
मित्रपदनामादेयंथा,—
"यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥
यानि कानि च मित्राणि कर्त्तव्यानि शतानि च।
पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥
यस्मात्पौरुषा मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि
पण्डितः॥
अनुभूय यदि सुखं कामतहितस्य च।
गतश्च च प्रियः सुखाः धर्मसुखा हरिना॥"
इति हितोपदेशः॥
मित्रः, पुं, सूर्य्यः। इत्यमरः। १। ३। २९॥ (यथा, श्रीः रामायणे। ६। १५। २३।
"अस्ति मित्रः सदाविहे, अस्ति वरा हिमगु
रेः॥")
द्वादशादित्यान्यतमः। यथा, महाभारते।
१। ६५। १५।
"धाता मित्रोऽर्य्यमा शक्रो वरुणश्चांश एव च॥"
मरुतामन्यतमः। यथा, हरिवंशे। १५६। ३०।
"सहस्रो महस्वी देवादवन् सुतान्।
अदितिपुर्वीतिस्थौनि वासिनो मित्र एव च॥"
वसिष्ठस्य अन्यत्मर्भजातः पुत्रविशेषः। यथा,
भागवते। ४। १। ४०।
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च।
उत्थमो वसुभृद्यानो द्युमान् शक्त्यादयो-
ऽपरे॥")
मित्रयुः, त्रि, (मित्रं याति। या+"अन्ये-ष्वपि।" ३। २। १०१। इति डुः।) मित्र-वत्सलः। इति हेमचन्द्रः। ३। १२६॥
मित्रयुः, पुं, (मित्रं यातीति। या+"मृगय्वा-दयश्च।" उणा० १। ३७। इति कुः। निपात-नात्।) लोकयात्रिकः। इत्युणादिकोषः। मित्रयुभरतलोकादिकेशिव। (ऋषिविशेषः। सर्वमि-वर्तयतिन्। यथा, विष्णुपुराणे। ४। ४। १९।
"प्रमतिसमान्तिवर्षीय मित्रयुः कुंडीरथः॥)

मित्रयुद्धं, क्ली, (मित्रेण सह युद्धम् ।) सुहृत्संग्रामः । तत्पर्य्यायः । मैत्रेयिका २ । इति त्रिकाण्डशेषः ॥

मित्रलब्धिः, स्त्री, } मित्रलाभः, पुं, } (मित्रस्य लब्धिः । यद्वा । मित्रस्य लब्धिर्यस्मात् ।) सुहृत्प्राप्तिः । यथा, हितोपदेशे ।
"मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च ॥"

मित्रवत्सलः, त्रि, (मित्रस्य मित्रे वा वत्सलः ।) मित्रप्रियः । तत्पर्य्यायः । मित्रयुः २ । इति हेमचन्द्रः ॥

मित्रशीः, [स्] त्रि, (मित्रं शास्ति इति । शास् + "शास इदङ्हलोः ।" ६ । ४ । ३४ । इत्यत्र "क्वौ च शास इत्वं भवतीति वक्तव्यम् ।" इति काशिकोक्तेः किप् इत्वं ततो दीर्घश्च ।) सुहृच्छास्ता । मित्रं शास्ति यः । इति मुग्धबोधव्याकरणम् ॥

मित्रसप्तमी, स्त्री, (मित्राय मित्रजन्मने मित्रस्य वा सप्तमीति समासः ।) मार्गशीर्षशुक्लसप्तमी । यथा,—
"अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः ।
मार्गशीर्षस्य मासस्य शुक्ले पक्षे शुभे तिथौ ॥
सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी ।
तत्रोपवासः कर्त्तव्यो भक्ष्याण्यथ फलानि वा ॥"
इति श्रीगोविन्दानन्दाचार्य्यकृतवर्षकौमुदीधृतभविष्यपुराणवचनम् ॥

मित्रा, स्त्री, (मित्र + स्त्रियां टाप् ।) सुमित्रा । शत्रुघ्नजननी । इति शब्दरत्नावली ॥ (अप्सरोविशेषः । यथा, महाभारते । १३ । १९ । ४४ ।
"अलम्बुषा घृताची च मित्रा चित्राङ्गदा रुचिः ॥"
पराशरशिष्यमैत्रेयजननी । यथा, श्रीमद्भागवते । ३ । ४ । ३५ ।
"कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ ! ।
पापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥")

मिथ ऋ ज वधे । मेधायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अमिमेथत् । ज, मेथति मेथते प्राज्ञार्थं शिष्यः धारयतीत्यर्थः । इति दुर्गादासः ॥

मिथः, [स्] अ, (मेथति इति मेथृसङ्गमे असुन् । पृषोदरादित्वात् ह्रस्वः ।) अन्योन्यम् । रहः । इत्यमरः । ३ । ४ । २५५ ॥ (यथा, मनुः । १० । ५३ ।
"व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥")

मिथिः, पुं, (मेथति हिनस्ति शत्रुकुलं इति । मिथ् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) निमिराजपुत्त्रः । स तु जनकराजः । यथा । अपुत्त्रस्य तस्य निमेर्भूभुजः शरीरमराजकभीरवस्ते मुनयः अरण्यां ममन्थुः । तत्र च कुमारो जज्ञे । जननाज्जनकसंज्ञां चावाप । अभूद्विदेहोऽस्य पितेति वैदेहः । मथनान्मिथिरभूत् । तस्योदावसुः पुत्त्रोऽभवत् । इति विष्णुपुराणे ४ अंशे ५ अध्यायः ॥ (तथाच रामायणे । १ । ७१ । ४ ।
"निमिः परमधर्म्मात्मा सर्व्वसत्त्ववतां वरः ।
तस्य पुत्त्रो मिथिर्नाम जनको मिथिपुत्त्रकः ॥")

मिथिला, स्त्री, (मथ्यन्ते शत्रवो यस्याम् । मथ् + "मिथिलादयश्च" उणा० १ । ५८ । इति इलच् अकारस्येत्वं निपात्यते ।) स्वनामख्यातनगरी । सा तु जनकराजपुरी । यथा । विदेहा मिथिला प्रोक्ता । इति हलायुधः ॥ (यथा, महाभारते । १ । ११३ । २८ ।
"ततः कोषं समादाय वाहनानि च भूरिशः ।
पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः ॥")
अभिधानस्य निरुक्त्यादिकं यथा,—
"गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे ! ।
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः । तैरभुक्ता त्रिहुत इति ख्याता ॥ तन्नामकारणं यथा,—
"अराजकभयं नॄणां मन्यमाना महर्षयः ।
देहं ममन्थुः स्म निमेः कुमारः समजायत ॥
जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः ।
मिथिलो मथनाज्जातो मिथिला येन निर्म्मिता ॥"
इति श्रीमद्भागवते ९ स्कन्धे १३ अध्यायः ॥
अपि च ।
"निमेः पुत्त्रस्तु तत्रैव मिथिर्नाम महान् स्मृतः ।
प्रथमं भुजबलैर्येन तैरहूतस्य पार्श्वतः ॥
निर्म्मितं स्वीयनाम्ना च मिथिलापुरमुत्तमम् ।
पुरीजननसामर्थ्यात् जनकः स च कीर्त्तितः ॥"
इति भविष्यपुराणम् ॥

मिथुनं, क्ली, (मेथतीति । मिथ् + "क्षुधिपिशिमिथिभ्यः कित् ।" उणा० ३ । ५५ । इति उनन् कित्त्वाद्गुणाभावश्च ।) स्त्रीपुंसयोर्युग्मम् । तत्पर्य्यायः । द्वन्द्वम् २ । इत्यमरः । २ । ५ । ३८ ॥ (यथा, रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥")
युगलम् । इति तट्टीकायां रामाश्रमः ॥ मेषादिद्वादशराश्यन्तर्गततृतीयराशिः । तत्पर्य्यायः । जितुमः २ । तच्च द्विपदं ग्राम्यं समसंज्ञकम् । अस्योदयस्य सूक्ष्मानं षट्पलाधिकपञ्चदण्डाः । इति ज्योतिस्तत्त्वम् ॥ अस्याधिष्ठातृदेवता गदाधारिपुरुषः वीणाधारिस्त्री च । मृगशिरःशेषार्द्ध आर्द्रासमुदायः पुनर्व्वसोस्त्रिपादं एतैर्भवति । तत्तु शीर्षोदयं पश्चिमदिक्स्वामिवायुप्रकृतिशब्दकरं वनस्थितं शूद्रवर्णं स्निग्धं मध्यस्त्रीसङ्गं मध्यमसन्तानञ्च । तत्र जातो जनः स्त्रीचपलः मितभाषी दक्षः वञ्चकः धर्म्ममतिः विनयभाजनञ्च भवति । इति ज्योतिषजातकादयः ॥
अथ मिथुनजन्मजातफलम् ।
"मिथुनोदयसञ्जातो मानी स्वजनवत्सलः ।
त्यागी भोगी धनी कामी दीर्घसूत्रोऽरिमर्द्दनः ॥"
इति कोष्ठीप्रदीपः ॥ ० ॥
राशौ तत्फलनिरूपणं यथा,—
"दन्तसंख्यभवने भवाङ्गना-
वल्लभे सदसगनाममध्यगे ।
कोमलाङ्गि ! मिथुनोदयात् प्रिये !
कालखाननकलाः प्रियेऽभवन् ॥" ५ । ६ ।
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

मिथ्या, अ, (मथ्यते इति । मथविलोडने । मेथति हिनस्ति वेति । मथ वा मेथ + क्यप् । निपातनात् साधु ।) असत्यम् । तत्पर्य्यायः । मृषा २ वितथः ३ अनृतम् ४ । इति शब्दरत्नावली ॥ मिछा इति भाषा ॥ (यथा,—
"यदसद्भासमानं तन्मिथ्या स्वप्नगजादिवत् ।"
इति साङ्ख्यप्रवचनभाष्यधृतम् ॥
सा चाधर्म्मपत्नी । यथा,—
"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता ।
यया विना जगन्मुक्तमुच्छन्नं विधिनिर्म्मितम् ॥
सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी ।
अर्द्धावयवरूपा च द्वापरे संवृता भिया ॥
कलौ महाप्रगल्भा च सर्व्वत्र व्यापिका बलात् ।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥
अपि च ।
"अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना ।
तस्याः पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः ॥
स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम् ।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् ॥"
इति कल्किपुराणे १ अध्यायः ॥
विषयभेदे मिथ्याभाषणे दोषाभावो यथा,—
शर्म्मिष्ठोवाच ।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"
मिथ्याकथने दोषो यथा,—
"पृष्टास्तु साक्ष्ये प्रवदन्ति येऽन्यथा
भवन्ति मिथ्यापतिता नरेन्द्र ! ।
एकार्थतायान्तु समाहितायां
मिथ्या वदन्तं ह्यनृतं हिनस्ति ॥"
ययातिरुवाच ।
"राजा प्रमाणं भूतानां स विनश्येन्मृषा वदन् ।
अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे ॥"
इति मात्स्ये ३१ अध्यायः ॥
अथासत्याभिधानप्रायश्चित्तम् । तत्र कुत्रचिदभावे तस्यानुसारं प्रायश्चित्तम् । यथा, विष्णुपुराणम् ।
"कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हर्य्यनुस्मरणं परम् ॥"
अज्ञानाद्यदि विप्रः । विप्रेभ्यो धनादानं वाणिज्यं कुर्य्यादित्यर्थः । अथवा मासं गुरुशिवनिन्दापापोक्तिरूपं हत्वा तत्प्रायश्चित्तं कुर्य्यात् । अतिदूरतरकालाभ्यासे मनुः ।
"ब्रह्मदारापानहरणं मार्गं क्षोभयमत्युत्तरम् ।"

चतुर्थमंशं हि मासि ऽपुनरावर्तिऽनुपाहननामा-
याभ्य मार्यविभावात् यावत्कृतः ।
"स्त्रीणां हि यत्रो यत्र तत्र मार्जिन्यं वदेत् ।
तत्तद्वयात्र निर्मोक्षयतः मानसी त्रिभिः ॥"
मूले तु मिथः । स्त्यादयश्च तुष्टामोऽपि निर्णीत-
इति मुक्तयात् । मानवेनोऽपि इदं गौतमवचन
मार्ग मित्यत्यात् । मित्यन्तेनैवपदात्पवाक
वारीत । गौतमीयवचनमाविशाचमसोपुन-
वामवर्णमथर्व मोक्षाचमविनय कुर्वीत् मिथ्या
न मिथ्या इति । तथा च मनुः ।
"न वर्णेदूर्ध्वं बर्ण्यं निष्पति
न जेहयार्थं न च मेदुनार्थं ।
प्रातःकाले चामिपनावहारे
मयागुनाच्च्यापुरवेशनादि ॥"
इति प्रायश्चित्तविवेकः ॥

मिथ्याचारः, त्रि, (मिथ्या आचारोऽस्य ।)
असदाचारः । वाक्किल्व इत्यर्थः । इति श्रा-
मायणीयटीकायां नीलकण्ठः । यथा,—
"कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स
उच्यते ॥"
इति श्रीमद्भगवद्गीतायां ३ अध्यायः ॥

मिथ्यादृष्टिः, स्त्री, (मिथ्या च सा दृष्टिश्चेति ।)
कर्मफलाभावादिज्ञानम् । तत्पर्यायः । नास्ति-
कता २ । इत्यमरः । १ । ५ । ३ । नास्तिक-
दर्शनम् ॥

मिथ्याध्यवसितिः, स्त्री, (मिथ्या असत्या च सा
अध्यवसितिर्निश्चितिः ।) मिथ्याध्यवसायः । अल-
ङ्कारः । इति केचित् ॥

मिथ्यानिरसनं, क्ली, (मिथ्या असत् निरस्यते
अनेन । निर् + अस् + करणे ल्युट् ।) शपथः ।
इत्यमरटीकायां भरतः ॥

मिथ्याभियोगः, पुं, (मिथ्या असत्यमभियोगः ।)
मिथ्यावादः । धनं मे धारयत्यसाविति (मिथ्या)-
ज्ञापनम् । तत्पर्यायः । अभ्याख्यानम् २ ।
इत्यमरभरतौ ॥

मिथ्याभिशंसनं, क्ली, (मिथ्या असत्यस्य अभिशंसनं
कथनम् ।) अदृष्टेऽपि मया त्वमिदं कृतमिति मिथ्या-
पूर्वकं वचनम् । तत्पर्यायः । अभिशापः २ ।
इत्यमरभरतौ ॥

मिथ्याभिशापः, पुं, (मिथ्या अभिशापः ।)
मिथ्यापवादः । यथा, मनौ ।
"ब्रह्मघ्नी यत्पुनीनां पिबेत् चरमकं पापकम् ।
मिथ्याभिशापं कुरुते स तत्तेनैव मे मतः ॥"
इति मिथ्याभिशापम् ॥

मिथ्यामतिः, स्त्री, (मिथ्या चासौ मतिश्चेति ।)
भ्रान्तिः । इत्यमरः । १ । ५ । ३ । अपव-
र्गेऽपि च ॥

मिथ्यावादी, [न्] त्रि, (मिथ्या असत्यं वदति-
तच्छीलः इति णिनिः ।) कूटवादी । तस्य तु प-
रलोके दुःखमाह धर्मशास्त्रम् ।
"यत्तैः प्रकर्तुं राज्ञो वस्तु अपरानं गुरुस्वकः ।

[मिथ्योपकल्पने] अन्यदपरं कुरु: मुष्ट: पयु: पूर्व-
गामिनः ॥"
मिथ्यावादस्वरूपं दोषमाह यात्रवल्क्यः ।
"ये महापातकिनो लोका ये चोपपातकिनां तथा ।
अग्निदानां च ये लोका ये च स्त्रीबालघाति-
नाम् ॥
सतान् सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ।
सुकृतं यत्त्वया किञ्चित् जन्मान्तरशतैः कृतम् ।
तत् सर्वं तस्य जानीहि यं पराजयसे मृषा ॥"
इति मिताक्षरा ।

मिथ्योत्तरं, क्ली, (मिथ्या असत्यमुत्तरं ।) चतुर्वि-
धोत्तरान्तर्गतोत्तरविशेषः । तत्र लक्षणम् ।
"अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवम् ।
मिथ्या तत्तु विज्ञेयमुत्तरं व्यवहारतः ॥"
इति नारदः ।
तच्चतुर्विधम् । मिथ्यैतत् १ अहं नाभिजानामि
२ तदा तत्र न सन्निधिः ३ अजातश्चास्मि तत्काले
४ । यथा, व्यासः ।
"मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतु-
र्विधम् ॥"
इति व्यवहारतत्त्वम् ॥

मिद इ क मिदि । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-अक०-सेट् ।) इ क मिन्दयति चक्षिका
स्नेहेन । इति दुर्गादासः ॥

मिद इर् य ञा मिदि । इति कविकल्पद्रुमः ॥
(दिवा०-पर०-अक०-सेट् ।) इर् अमिदत्
अमेदीत् । य इति आचार्यमतेऽत्र श्यना-
भावो न भेदनमिति रमानाथः । ञा मेदितं
मिन्नं तैल । इति दुर्गादासः ॥

मिद ऋ ञ वधमेधयोः । इति कविकल्पद्रुमः ॥
(भ्वा०-उभ०-सक०-सेट् ।) ऋ अमिमेदत् ।
ञ मेदति मेदते ख्यायां द्विधा कारयणो-
मर्थः । मिमिदः मिमिदुः । इति दुर्गा-
दासः ॥

मिद, ङ ञा ष मि ञ मिदि । इति कविकल्पद्रुमः ॥
(भ्वा०-आत्म०-अक०-सेट् ।) ङ अमिदत् ।
षि मिन्दोऽस्ति । ञ मेदते । इति दुर्गादासः ॥

मिद, अ मिदि । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-अक०-सेट् ।) अ मेदयति चक्षिका स्नेहेन ।
इति दुर्गादासः ॥

मिन्मिनः, त्रि, सानुनासिकवाग्निर्दिष्टः । खोना
इति भाषा । तस्य विवरणं यथा,—
"धातुस्थ वायुः श्लेष्मणा सहितः स्रोतसां बलात् ।
करोति मिन्मिनत्वं तु सानुनासिक्यवाक्यताम् ॥"
इति भावप्रकाशः ॥
कफावृतात् इन्द्रवायुप्रवर्तितेन च वायुः ।
अव्यक्तात् अव्यक्तं वक्ति । तेन मिन्मिनत्वात् ।
न तत्र वायुः प्रवृत्तः तथा अक्षरात् वाक्यवत् ।
निर्गमनात् वायुनाशात् । अतएव पुनरुक्त-
वाक्यजनितवाक्यदोषः मिन्मिनत्वं । सर्वा
व्यक्तपदात्मकोऽपि तु वृद्धेरुक्तोऽपि वाक्य-

मध्याह्ने पिबेत् क्षीरं येऽपि वाक्यं तत्र ते निवेशाः ।
"द्रवां पुनस्तु पश्येद्वैः मिथुनाशयस्थानस्थो-
ऽपि ॥
अपि यदि मिश्रं मिश्रं अर्थस्यां वाचा ।
विविधवृत्तयुक्तभावं मधुरमुदक्तं भवत्
मिश्रः ।
स्नातिमतिथिमार्गितमाः कुर्यात् संस्कार-
मर्दितः ।
चारभार्णं कृतम् ।
"कर्दमिका कथा कृते मिश्रको विपरीतकम् ।
अपरो आगमोदा च कदीमपृच्छेत्यरम् ।
मताहि सामान्यानि सत्त्वमुखानि धारयेत् ।
तद्वर्ण अपि वाम्येष प्रकर्षं मत्सरेषु ।
दर्विकृतिरामिक मनिङ्गुलियो वरः ।
मिश्रकमितिविद्यो मतसोऽविकलितमनः ॥"
इति भावप्रकाशस्य द्वितीये भागे समस्ते
बालरोगाधिकारे ॥

मिल, श ञ मिलि । इति कविकल्पद्रुमः ॥ (तुदा०-
उभ०-अक०-सेट् ।) मिलि सङ्गमे । श ञ
मिलति मिलते जलं दुग्धेन । अर्थ शुद्धि-
रिति कृत्स्नवत् । तेन कार्यविवक्षयैव
सकर्मकत्वमपि यथा जलमिदम् । इति दुर्गा-
दासः । मिलितमपि ।
"मधुपानकिमः पद्मं मिलितं न हि: क्व ॥"
इति दुर्गादासः ॥

मिलितः, त्रि, मिलनमस्य सञ्जातं तारकादित्वात्
इतच् । मिश्रः । सङ्गतः । समवेतः । युक्तः ।
(यथा, देवीभागवते । १ । ११ । ३० ।
"पुरवेशात् ततः सौ मिलिता देवदानवाः ।
युद्धार्थमागता दैत्याः समायान्त सम्भावत ॥")

मिव, इ मेवे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) इ मिन्वति । इति दुर्गा-
दासः ॥

मिश, शब्दे । रोषे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-अक०-सेट् ।) मेशति । इति दुर्गादासः ॥

मिशि, स्त्री, (मिश + इन् ।) मधुरिका । शत-
पुष्पा । इत्यमरटीकायां भरतः । जटामांसी ।
इति शब्दरत्नावली ॥

मिशी, स्त्री, (मिशि + कृदिकारादिति वा
ङीष् ।) जटामांसी । इति शब्दरत्नावली ॥
मधुरिका । इत्यमरटीकायां भरतः ॥

मिश्र, क ञ इमाग्र । इति कविकल्पद्रुमः ॥
(चुरा०-पर०-सक०-सेट् ।) सामान्यम् ।
पृथक्त्वम् इति सर्वदिक्साधारणम् । क्विप् मिश्रो-
स्थात् । मिश्रयति मिश्रापयति पयसा
दुग्धं । इति दुर्गादासः ॥

मिश्रं, क्ली, (मिश्र + भावुकत्वात् अच् ।) मिश्रण-
गन्धम् । इति राजनिर्घण्टः । विमिश्र ।
यथा,—
"मैरेयम् ऋषिरेति वारुणी रेवतीप्रियः ।
मार्दीकं मधुकार्तीं च मिश्रं त्रिधा मतम् ॥"
इति मिश्रादिवर्गम् ॥

मिश्रः, पुं, (मिश्र+बाहुलकात् रक् ।) गजजाति-विशेषः । यथा,—

"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ।"

इति हेमचन्द्रः । ४ । २८४ ॥

श्रेष्ठः । यथा । गौरविताख्यार्यमिश्राः । इति भूरिप्रयोगः ॥ संयुक्ते, त्रि । यथा,—

"करम्बः कबरो मिश्रः संपृक्तः खचितः समाः ।

इति हेमचन्द्रः । ६ । १०५ ॥

उग्रादिचरगणान्तर्गतगणविशेषः । स तु कृत्तिका विशाखाभ्यां भवति । इति ज्योतिषतत्त्वम् ॥

मिश्रकं, क्ली, (मिश्र+कन् ।) देवोद्यानम् । इति जटाधरः । औषरलवणम् । इति राजनिर्घण्टः ॥ (मिश्र+ण्वुल् । त्रि, मिश्रणकर्त्ता । यथा, मनौ । ११ । ५० ।

"पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम् ।
धान्यचौरोऽङ्गहीनत्वमातिरैक्यन्तु मिश्रकः ।"

तीर्थभेदः । यथा, महाभारते ।३।८३।८२।

"ततो गच्छेत धर्म्मज्ञ ! मिश्रकं लोकविश्रुतम् ।
तत्र तीर्थानि राजेन्द्र ! मिश्रितानि महा-
त्मना ॥")

मिश्रकावणं, क्ली, (मिश्रकाया वनम् । "वनगिर्य्योः संज्ञायां कोटरकिंशुलकादीनाम् ।" ६ । ३ । ११७ । अकारस्याकारः "वने पुरगामिश्रका-शिध्रकाशारिकाकोटराग्रेभ्यः ।" ८ । ४ । ४ । इति णत्वम् ।) इन्द्रस्योद्यानम् । यथा,—

"नन्दनं कन्दसारं स्यान्मिश्रकावणमित्यपि ।"

इति त्रिकाण्डशेषः ॥

मिश्रजः, पुं, (मिश्रात् भिन्नजातीययोः सम्मिलनात् जात इति । जन+डः ।) खेचरः । इति राजनिर्घण्टः ॥

मिश्रणं, क्ली, मिश्रधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम् । संयोजनम् । एकत्रीकरणम् । (यथा, प्रबोधचन्द्रोदये । २ । ५ ।

"तदेतैर्वाञ्छितमपि गुडमरदुरितोदयाय ॥")

मिश्रपुष्पा, स्त्री, (मिश्राणि परस्परं संश्लिष्टानि पुष्पाण्यस्याः ।) मेथिका । इति राजनिर्घण्टः ॥

मिश्रवर्णं, क्ली, (मिश्रः मिलितः वर्णोऽस्य ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ नानावर्णयुक्ते, त्रि ॥

मिश्रवर्णफला, स्त्री, (मिश्रवर्णं फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

मिश्रशब्दः, पुं, (मिश्रः मिलितः अश्वरासभयोरिव शब्दोऽस्य ।) खेचरः । इति राजनिर्घण्टः ॥

मिश्रितं, त्रि, (मिश्रः मेलनमस्य संजातम् । मिश्र +इतच् । यद्वा, मिश्र+क्तः ।) गौरवितम् । इति जटाधरः ॥ मिलितञ्च ॥

मिश्रिता, स्त्री, (मिश्रित+टाप् ।) मन्दादिसप्तधात्वान्तर्गतसंक्रान्तिविशेषः । यथा,

"मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकी-
र्त्तिता ॥
चरेषु महोदरी ज्ञेया क्रूरेषु च राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षेषु संक्रमे ॥"

इति तिथ्यादितत्त्वम् ॥

मिश्रेया, स्त्री, मधुरिका । इत्यमरः । २।४।१०५ ॥ मौरि इति भाषा ।

"मिश्रेया सुरसा पेया लघ्वाढ्या स्कन्दवन्धना ।"

इति शब्दचन्द्रिका च ॥ शाकविशेषः । शतपुष्पा । शलुफा इति भाषा । तत्पर्य्यायः । तालपर्णी २ तालपर्णी ३ मिशिः ४ शालेया ५ शीतशिवा ६ शालीना ७ वनजा ८ अवाक्पुष्पी ९ मधुरिका १० छत्रा ११ संहितपुष्पिका १२ सुपुष्पा १३ सुरसा १४ वज्रा १५ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । कटुत्वम् । पचनकफहरत्वम् । वातपित्तोत्थदोषशोफजन्तुविनाशित्वञ्च । इति राजनिर्घण्टः ।

तत्पर्य्यायगुणाः ।

"शतपुष्पा शताह्वा च मधुरा कारवी मिशिः ।
अतिच्छत्रा सितच्छत्रा संहितच्छत्रिकापि च ॥
छत्रा शालेयशालिन्यौ मिश्रेया मधुरा मिशिः ।
शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ॥
उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत् ।
मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥
अग्निमान्द्यहरी हृद्या बद्धविट्कृमिशूलहृत् ।
रूक्षोष्णा पाचनी कासवमिश्लेष्मानिलान्
हरेत् ॥"

इति भावप्रकाशः ॥

मिष उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) उ मेषित्वा मिष्ट्वा । इति दुर्गादासः ॥

मिष श स्पर्द्धे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) स्पर्द्धः पराभिभवेच्छा । इति वोपदेवः ॥ श मिषति बली बलवन्तम् । इति दुर्गादासः ॥

मिषं, क्ली, (मिष्+कः ।) छलम् । इति मेदिनी । षे, २१ ॥ (यथा, नैषधे । १ । ११८ ।

"प्रियासु बालासु रतक्षमासु च
द्विपत्रितं पल्लवितञ्च बिभ्रतम् ।
स्मराज्जितं रागमहीरुहाङ्कुरं
मिषेण चञ्चोश्चरणद्वयस्य च ॥")

मिषः, पुं, (मिष्+कः ।) स्पर्द्धनम् । इति मेदिनी । षे, २१ ॥ (यथा, कथासरित्सागरे । ६४ । १२५ ।

"इति ध्यायन् मिषं कृत्वा तदैवास्फुटया गिरा ।
निर्गत्यैव विरक्तात्मा वनदेशान्तिकं ययौ ॥")

मिषिः स्त्री, (मिष्+इन् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इति शब्दचन्द्रिका ॥ (यथास्य पर्य्यायः ।

"अवाक्पुष्पी च छत्रा स्यान्मध्यला मधुरा
मिषिः ।"

इति वैद्यकरत्नमालायाम् ॥)

शतपुष्पा । इत्यमरटीकायां भरतः ॥

मिषिका, स्त्री, (मिषि+कन्+टाप् ।) जटामांसी । इति शब्दरत्नावली ॥

मिष्टं, त्रि, सिक्तम् । स्पर्द्धितम् । इति मिष्धातोः क्तप्रत्ययेन निष्पन्नम् ॥

मिष्टः, पुं, (मिष्+क्तः ।) मधुररसः । यथा,

"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"

इति भावप्रकाशः ॥

"नूतनसर्षपशाकं नवौदनं पिच्छिलानि च
दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्ट-
मश्नाति ॥"

इति छन्दोमञ्जरी च ॥

मिष्टपाकः, पुं, (मिष्टेन पाको यस्य ।) शर्करारसपक्वफलादिः । मोरब्बा इति पारस्यभाषा ॥ तदेकप्रकारो यथा । आमफलं द्विखण्डं कृत्वा तन्मध्ये शलाकया छिद्रजालकरणानन्तरं चूर्णमिश्रितजले दण्डचतुष्टयं स्थापयित्वा जलेन धौतं कुर्य्यात् । ततो जलेन सिद्धं कृत्वा जलत्यागपूर्व्वकमेकतारबद्धशर्करारसे मज्जनानन्तरं तापं दद्यात् । रसे घनीभूते यद्दशाहं यावत् तापेन निष्पन्नो भविष्यति । इति पाकराजेश्वरः ॥

मिष्टान्नं, क्ली, (मिष्टमन्नम् ।) मधुरद्रव्यम् । इति हलायुधः । अपि च ।

"मिष्टान्नपानदाताय सततं श्रद्धयान्वितः ।
देवपूजापरो नित्यं न प्रेतो जायते नरः ॥"

इत्यग्निपुराणम् ॥

मिषिः, } स्त्री, (मस्यति परिणमतीति+इन्
मिषी, } बाहुलकादत इकारः । पक्षे ङीष् ।)
मधुरिका । (यथास्य पर्य्यायः ।

"मिषिर्मधुरिका मता ।"

इति शार्ङ्गे । २०८ अः ॥) जटामांसी । शतपुष्पा । इत्यमरभरतौ ॥ (शतपुष्पायाः पर्य्यायो यथा,—

"शतपुष्पा शताह्वा च मधुरा कारवी मिषिः ।
अतिलम्बी सितच्छत्रा संहितच्छत्रिकापि च ॥
छत्रा शालेयशालिन्यौ मिश्रेया मधुरा मिषिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

उशीरी । इति राजनिर्घण्टः ॥ अजमोदा । इति मेदिनी । षे, ८ ॥

मिस्न्नृ श शब्दाम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यमध्योऽयम् । दन्त्यमध्य इति वर्णदेशनायाम् । श्रुतिः संयोजनम् । मिस्नयति मिस्नापयति इतवादं लोकः । इति दुर्गादासः ॥

मिह औ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक०-अनिट् ।) औ अमिक्षत् । इति दुर्गादासः ॥

मिहिका, स्त्री, (मेहति सिञ्चतीति । मिह+संज्ञायां क्वुन् टाप् अत इत्वम् ।) नीहारः । इति शब्दरत्नावली ॥ (यथा, नैषधे ।११।११ ।

"विश्रान्ति कुरुतिस्मारे रात्रौ धूर्त दिङ्कचक्रवाकम् ।
दिवसनिशिके नाथे (चनालिमा) च दिशावहि ।")

मिहिरः, पुं, (मेहति सिञ्चति मेघद्वारा भुवम्। मिह + "इषिमदिमुदि..." उणा० १। ५२। इति किरच्।) सूर्य्यः। (यथा, मार्कण्डेये १०८।८।

"अथ मिहिरमयमानसोऽपि
भवति [illegible]
मिहिर ! [illegible]
[illegible]॥")

अर्कवृक्षः। इत्यमरः। २। ४। ८०॥ मेघः। इति मेदिनी। रे, ४०॥ वायुः। [illegible] इति शब्दरत्नावली। [illegible] यथा,—

"[illegible]
[illegible]।
[illegible]
[illegible]॥"

इति [illegible]॥

मिहिराणः, पुं, [illegible] शिवः। इति त्रिकाण्डशेषः॥

मी क्यौ ग न वधे। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-अनिट्।) क्री मीनाति मीनीते। इति दुर्गादासः॥

मी [illegible] इति कविकल्पद्रुमः॥ [illegible] इति दुर्गादासः॥

मी ङ य वधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) ङ य मीयते। इति दुर्गादासः॥

मीढ़, त्रि, मूत्रितम्। इत्यमरः। ३। १। ८६॥ [illegible]

मीढ़ुष्टम, पुं, [illegible]

"[illegible]।
[illegible]॥"

[illegible]

मीढ़ुष्, [स्] पुं, [illegible]

"[illegible]॥"

इति [illegible]

"मीढ़ुषे तेजसा दुरीर्यविता।" इति तद्भाष्ये [illegible]॥)

मीनः, पुं, (मीयते इति मीङ् हिंसायाम्। "फेन-मीनौ।" उणा० ३।३। इति नक् निपात्यते च।) मत्स्यः। इत्यमरः। १। १०। १७॥ (यथा, भागवते। ३। ५। ८।

"[illegible]
[illegible] मीन [illegible]॥")

[illegible] अश्रावधम् [illegible] मीनः [illegible] इति ज्योतिषतत्त्वम्॥ अपि च। [illegible] चान्यरूपः। [illegible]। [illegible] इति [illegible] अपि च।

"[illegible]।
[illegible]॥"

इति कोष्ठीप्रदीपः॥ ७॥

[illegible] मीनलग्ने ३। १६ [illegible] यथा,—

"[illegible]
[illegible]
[illegible]
[illegible]॥ ६ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]॥"

६ ७। ६६॥

इति [illegible] यथा,

"[illegible]
[illegible]।
[illegible]
[illegible]॥"

इति [illegible]॥

[illegible]

"[illegible]।
[illegible]

[illegible]
[illegible]।
[illegible]।
[illegible]।
[illegible]
[illegible]
[illegible]॥"
[illegible]॥

इति [illegible]॥

मीनकेतनः, पुं, (मीनः केतने यस्य।) कन्दर्पः। इत्यमरः। १। १। २६॥ (यथा, रघुकुमार-चरिते। १।)

"अथ मीनकेतनशरासनेन [illegible]।"

मीनगोधिका, स्त्री, [illegible] यथा,—

'[illegible] मीनगोधिका।'

इति त्रिकाण्डशेषः॥

मीनघाती, [न्] पुं, (मीनं हन्ति। हन + णिनिः।) बकः। इति राजनिर्घण्टः॥ [illegible]॥

मीननेत्रा, स्त्री, [illegible] इति राजनिर्घण्टः॥

मीनरः, पुं, [illegible] मकरः। इति त्रिकाण्डशेषः॥ [illegible]

मीनरङ्गः, पुं, [illegible] इति त्रिकाण्डशेषः॥ [illegible]

मीना, स्त्री, [illegible] यथा, [illegible]

"[illegible]।
[illegible]
[illegible]॥"

मीनाक्षी, स्त्री, [illegible] इति राजनिर्घण्टः॥ ([illegible])

मीनाण्डी, स्त्री, शर्करा। इति राजनिर्घण्टः॥

मीनालयः, पुं, समुद्रः। [illegible] इति हेमचन्द्रः॥ [illegible]

मीनाक्षी, स्त्री, [illegible] इति राज-निर्घण्टः॥ [illegible]

मीम् [illegible] इति कविकल्पद्रुमः॥ [illegible] इति दुर्गादासः॥

मीमांसकः, पुं, (मीमांसते इति। मीमांस + "[illegible]" ३। १। १३३। इति ण्वुल्।) मीमांसाशास्त्रवेत्ता। [illegible] ([illegible] यथा,—

"इयत्तं समयोऽपि योऽभमधियां मीमांसकानां मतम् ।"

छायापाततमश्चापि समन्यातगुणकर्म्मणोः ।
इयत्तं केचिदिच्छन्ति मीमांसकमतानुगाः ॥"
इति वैयाकरणभूषणसारधृतवचने प्रथमश्लोके ।)

पूर्व्वमीमांसासूत्रकर्त्ता जैमिनिः । वृत्तिकर्त्ता कुमारिलभट्टः । भाष्यकर्त्ता शवरस्वामी । प्रभाकरः कुमारिलभट्टस्य छात्रः । स एव गुरुत्वेन भण्यते । तन्मतं गुरुमतम् तच्छिष्याः प्राभाकराः । अतएव वार्त्तिकभट्टाचार्य्येण प्राभाकरैरभिहितमित्युक्तम् । उत्तरमीमांसासूत्रकर्त्ता वेदव्यासः । तस्य भाष्यकर्त्ता शङ्कराचार्य्यः । स च अद्वैतवादी । रामानुजः विशिष्टाद्वैतवादी । माध्वः द्वैतवादी च । (यथा, भक्तिरसामृतसिन्धौ । १ । २ । ३ ।

"मीमांसको मद्‌वाचैः कठिनामपि
कुण्ठयन्नसौ निष्ठाम् ।")

मीमांसा, स्त्री, (मानविचारे + "मान् वधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ।" ३।१।६। इति सन् । अः टाप् । अभ्यासस्येकारस्य दीर्घश्च ।) षड्दर्शनान्तर्गतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । विचारणा २ । इति हेमचन्द्रः । २।१६५। अस्या व्याख्या विंशतिः । तत्र पूर्व्वमीमांसा द्वादशाध्यायात्मिका जैमिनिप्रणीता यज्ञादिकर्म्मकाण्डनिरूपिका । अस्या अन्तर्गतानि लोकव्यवहारनियमार्थं मनुयाज्ञवल्क्यादिभिः बहूनि धर्म्मशास्त्राणि कृतानि । तत्रोत्तरमीमांसा चतुरध्यायात्मिका वेदव्यासप्रणीता ब्रह्मनिरूपिका । अस्या नाम वेदान्तः । अपराध्यायचतुष्टयं सङ्कर्षणप्रणीतं उपासनाकाण्डं षड्दर्शनबहिर्भूतम् । ● । प्रमाणादयः प्रधानाः द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम् । १ । द्वितीये यागदानादिकर्म्मभेदः । २ । तृतीये प्रयाजादीनां दर्शपूर्णमासार्थकत्वेन शेषत्वम् । ३ । चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्ता अनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्तेत्येवमादयः । ४ । पञ्चमे क्रमनियतिविधेयत्वादयः । ५ । षष्ठे कर्त्तुरधिकारो नान्धादेरित्यादयः । ६ । सप्तमे समानमितरच्छ्येनेन इत्यादि प्रत्यक्षवचनेनातिदेशादिनामाङ्गुलिवचनेन च सामान्यतोऽतिदेशः । ७ । अष्टमे सौर्य्यं चरुं निर्व्वपेदित्यत्र निर्व्वापसाहित्येन देवतानिर्द्देशः एकदेवतत्वमौषधद्रव्यकत्वमित्यादिना लिङ्गेनाग्नेयपुरोडाशेतिकर्त्तव्यतानाम् सौर्य्ये इत्येवमादिविशेषातिदेशः । ८ । नवमे प्रकृतावग्नये जुष्टं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण सूर्य्याय जुष्टं निर्व्वपामीत्येवमादिरूहः । ९ । दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणाभावेन लोप इत्येवमादिर्बाधः । १० । एकादशे बहूनामाग्नेयादीनां प्रयाजानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम् । ११ । द्वादशे प्रधानस्य पशोरुपकाराय अनुष्ठितेन प्रयाजाद्यङ्गेन पशुपुरोडाशोऽप्युपकार इत्यादिप्रसङ्गः । १२ । (एतदध्यायप्रतिपाद्यार्थानां विवरणं यथा,—

'प्रथमाध्यायस्य प्रथमे पादे विधिरूपं प्रमाणमीरितम् । द्वितीयेऽर्थवादरूपम् अर्थवादो मन्त्रस्याप्युपलक्षकः । तृतीये स्मृतिरूपम् । स्मृतिराचारमप्युपलक्षयति । चतुर्थे उद्भिच्चित्रादिनामरूपम् । द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकम् । अपूर्व्वसद्भाव इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः । द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः । तृतीये रथन्तरादीनां कर्म्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः ।

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता । द्वितीये लिङ्गम् । तृतीये वाक्यप्रकरणादि । चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसद्भावः । पञ्चमे प्रतिपत्तिकर्म्माणि । षष्ठेऽनारभ्याधीतानि । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि ।

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षाद्यानयनस्य प्रयोजिकेत्यादि प्रधानप्रयोक्तृत्वं विचारितम् । द्वितीये अप्रधानं वत्सापाकरणं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम् । तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता । चतुर्थे राजसूयगतजघन्याङ्गाक्षद्यूतादिचिन्ता ।

पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः । द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादिक्रमविशेषः । तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकादशत्वमित्यादिवृद्धिः । अदृष्टप्रयोजनविचार इत्यादि वृद्ध्यभावः । चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्ब्बलभावः ।

षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकारः । कर्त्तुरन्धादेर्नास्ति स्त्रिया अस्ति । योऽस्ति स च पत्या सहैवेत्येवमादिकाधिकारो निरूपितः । द्वितीये सत्राधिकारिणां प्रत्येकं क्रतुफलम् । दर्शपौर्णमासयोः कर्त्तव्यनियमः काम्यकर्म्म समापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ताः । तृतीये द्रव्यस्य प्रतिनिधिरस्ति । देवादीनाम् मन्त्रादीनामधिकारिणश्च न नास्तीत्यादि निरूपणम् । चतुर्थे पदार्थलोपनं विचारितम् । अवत्तनाशे यजमानेन यष्टव्यम् । इडाद्यर्थानि शेषाणि भक्षयितव्यानीत्यादिकम् । पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम् । ज्योतिष्टोमसोमादयो दर्शिताः । द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम् । षष्ठे सत्राधिकारिणस्तुल्यकल्पा एव सर्व्वे विप्रा एवेत्येवमादिकं चिन्तितम् । सप्तमे पित्रादिकं न देयम् । महाभूमिर्न देयेत्येवमादिदेयविचारः । अष्टमे लौकिकाग्न्याद्युपनयनहोमः । स्थपतीष्टिवैश्यैवमाद्यपि विचारः कृतः ।

सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनातिदेशः । द्वितीये पूर्व्वोक्तातिदेशस्य शेषो विचारितः । तृतीयेऽग्निहोत्रनाम्नातिदेशः । चतुर्थे निर्व्वापौषधद्रव्यादिलिङ्गातिदेशः ।

अष्टमाध्यायस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः । तद्यथा सौर्य्यचरावतिदेशकानि निर्व्वापसाहित्येन देवतानिर्द्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि । द्वितीये स्पष्टैर्लिङ्गैरतिदेशः । तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविधयोऽतिदिश्यन्ते तत्र लिङ्गमस्पष्टम् । श्रौतं तद्गुणद्रवत्वानुपादानात् । तृतीये प्रबलेन लिङ्गेनातिदेशः । तद्यथा । आभिचारिकेष्टावाद्यैष्टव्यवहारस्य तन्त्रत्वेऽपि हविःषु विभिन्नलिङ्गेन यथाक्रममाग्नेयादिविधयः प्राप्ते द्विदेवत्वलिङ्गेन प्रथमं आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विधयोऽतिदिष्टाः । प्रबलत्वं द्विदेवत्यत्वम् । शब्दोच्चारणमात्रेण झटिति प्रतिभासनात् । क्रमस्तु विलम्बितप्रतीत्या दुर्ब्बलः । चतुर्थे दर्व्विहोमेष्वतिदेशोऽपोद्यते ।

नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्व्वकमूहविचारारम्भः । तत्र प्रयाजादयो धर्म्मा अपूर्व्वप्रयुक्ताः । अवघातमन्त्रादिमात्रवर्णितं व्रीह्यादिकं साधनविशेषमात्रं विवक्षितमित्यादिरूपोपोद्घातः । अविकल्पपूर्व्वप्रज्ञानां विकृतिषु नास्त्यूहः । अग्नये त्वा जुष्टं इत्यादि ऊहविचारारम्भः । द्वितीये सामोहः । तृतीये मन्त्रोहः । चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः ।

दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः । तद्यथा स्वयं कृता वेदिर्भवतीत्यत्र वेदिनिर्म्माणरूपस्य द्वारस्य लोपेन निर्म्माणकारणानामुद्धननादीनां बाधः । कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः । द्वितीये ऋत्विग्दक्षिणारूपस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः । तृतीये बाधकारणं कार्य्यैकत्वम् । तद्यथा प्रकृतौ गवाश्वादिरूपदक्षिणायाः ऋत्विक्परिक्रयः कार्य्यम् । तच्च विकृतिरूपे भूम्यादिदाने धेनुमात्रया दक्षिणयैव कार्य्यम् । ततो भिन्ना गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते । चतुर्थे नक्षत्रेष्टिविहिता उपहोमाः चोदकप्राप्तैर्होमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः । पञ्चमे ग्रहादिगतः प्रसङ्गः । षष्ठः प्रपद-

स्त्वादिर मध्येनच द्रव्यादिप्रयत्नपूर्वाकर्त्तव्यी द्रव्यादिविचारः। षष्ठे चाध्याये निमित्ताद्याधिकारपूर्वाकः कालविचारः। सप्तमे सर्ववैकृतविधिः। अष्टमेऽतिदेशपूर्वाकः प्रयोगविचारः। [illegible] इति [illegible] विचारः।

प्रथमाध्याये प्रथमे पादे शब्दप्रामाण्यविचारः। द्वितीये [illegible]। तृतीये [illegible]। चतुर्थे [illegible]।

[illegible]

मत्स्यमासेषाम् [illegible] ॥

[illegible]

इति [illegible] ॥

अथ मीमांसकम्।

"[illegible] ॥"

[illegible]

अथवा इति [illegible] समस्तानिति ॥

मीरः, पुं, (मिमेति प्रक्षिपति जलं [illegible]। मिञ्+ "शुषिचिमिनां दीर्घश्च।" उणा० २। १३। इति रक् दीर्घश्च।) समुद्रः। इत्यमरटीकायां भरतः। समुद्रः। इत्युणादिकोषः। पर्वतैकदेशः। सीमा। पानीयम्। इति संक्षिप्तसारोणादिवृत्तिः ॥

मील, ङ निमेषे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) ङ अमिमीलत् अमीमिलत्। मीलति चक्षुः प्रमाणिराजतं चार्थः। इति दुर्गादासः ॥

मीलं, क्ली, (मीलतीति। मील+कः।) वस्त्रम्। इति केचित् ॥

मीवर्द्ध, क्ली, [illegible]।

मीलितं, त्रि, (मील+क्तः।) [illegible]

("[illegible]")

मीव, पीने। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) मीवति। पीनः स्थूलः स्यात्। इति दुर्गादासः ॥

मीवरः, त्रि, (मीवति [illegible]। मीव+ "[illegible]" उणा० २। १२१। इति वरच्।) [illegible] पूज्यः। इति संक्षिप्तसारोणादिवृत्तिः ॥

मीवा, स्त्री, (मीवति [illegible]। मीव+ "[illegible]" उणा० १। १५२। इति कन् टापू च।) उदरकृमिः। इत्युणादिकोषः। वायुः। [illegible] इति [illegible] ॥

मु, पुं, (मन+बाहुलकात् डुः। टिलोपश्च।) बन्धनम्। इत्येकाक्षरकोषः। मोक्षः। इति चतुर्वर्गः ॥

मुकुन्दः, पुं, [illegible]।

मुकु, पुं, (मुच+बाहुलकात् कुः। पृषोदरादित्वात् साधु।) मुक्तिः। यथा,—

"[illegible]।" इति दुर्गादासधृतवचनम् ॥

मुकुटं, क्ली, (मङ्कते मण्डयते। मकि+उटन् [illegible]) [illegible]।

२।६।१०२॥ मौलिः ३ कोटीरम् ४ उष्णीषम् ५। इति हेमचन्द्रः। ३।३१४॥ मकुटम् ६ मौलीकः ७ शेखरम् ८ अवतंसः ९ वतंसः १० उत्तंसः ११ उष्णीषकम् १२ कोटीरकम् १३। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ८६। ७७।
"मुकुटेनापतत्तस्य काञ्चनो वज्रभूषितः।"
तथा च महाभारते। १। १०। ६८।
"दधाति मुकुटान्येषा सुस्थितानि यथर्त्तवम्।"
टाप्। स्त्री, मातृगणविशेषः। यथा, भारते। ९। ४६। २९।
"काचेटिका वामनिका मुकुटा चैव भारत॥")
मुकुटी, स्त्री, अङ्गुलिमोटनम्। इति शब्दरत्नावली॥
मुकुन्दः, पुं, विष्णुः। तस्य व्युत्पत्तिर्यथा,—
"मुकुमव्ययमान्तञ्च निर्व्वाणमोक्षवाचकम्।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम्।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥ निधिविशेषः। (यथा, मार्कण्डेये। ६८। ५।
"यत्र पद्ममहापद्मौ तथा मकरकच्छपौ।
मुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः॥"
अस्य गुणादिकं निधिशब्दे उक्तम्।) रत्नभेदः। कुन्दुरः। इति मेदिनी। दे, ३८॥ (यथा च पर्य्यायः।
"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पारदः। इति हेमचन्द्रः। ४। १२९॥
मुकुन्दकः, पुं, पलाण्डुः। केचित्तु मुकन्दकस्थाने मुकुन्दक इति पठित्वा लवणानां मुदं कन्दतीति पृषोदरादित्वात् इत्युक् कन्दरोत्त इत्येति व्याचष्टे। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १। ४६।
"विशेषो तत्र भूयिष्ठं वदकः समुकुन्दकः।")
षष्टिकब्रीहिः। यथा, भावप्रकाशे।
"षष्टिकः शतपुष्पश्च प्रमोदकमुकुन्दकौ।
महाषष्टिक इत्याद्याः षष्टिकाः समुदाहृताः॥"
मुकुन्द, पुं, (मोचयति विषयान्तराद्रागमिति। अन्तर्भूतण्यर्थे मुच्+कः। मृगय्वादित्वात् कुत्वम्। तं उन्मार्गीकरोतीति। उन्द+उरच्। पृषोदरादित्वात् साधुः।) कुन्दुरः। इत्यमरटीकायां मथुरानाथः॥
मुकुम्, व, निर्व्वाणम्। भक्तिरसः। प्रेम। यथा,
"मुकुमव्ययमान्तञ्च निर्व्वाणमोक्षवाचकम्।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम्।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अः॥
मुकुरः, पुं, (मक+"मकुरदर्दुरौ।" उणा० १। ४१। इत्युरच्। बाहुलकादकारस्थाने उकारः इत्युज्ज्वलदत्तोक्तेः उरच्।) दर्पणः। (यथा, नैषधे। ४। ५९।
"कुरु करे गुरुमेकमयोघनं
बहिरितो मुकुरञ्च कुरुष्व मे॥")

बकुलद्रुमः। कुलालदण्डः। इति मेदिनी। रे, २०३॥ मल्लिकापुष्पवृक्षः। इति विश्वः॥ (यथा,
"मुकुरकुसुमभृङ्गारातपत्रं ध्वजं वा
दधिफलमथ नौकाममलताम्बूलवत्सम्।
कमलकलशपुष्पं भूषणं काञ्चनं वा
भवति सकलसिद्ध्यै श्रेयसे रोगिणाञ्च॥"
इति हारीते द्वितीयस्थाने द्वितीयेऽध्याये॥) कुलदण्डः। इति शब्दरत्नावली॥ कोरकः। इति हेमचन्द्रः॥
मुकुलः, पुं, क्ली, (मुच्यति कलिकात्वम्। मुच्+उलक्। इति भरतः॥ मुचेरुलः। कलमुलश्चेति कल्पे चकारस्योक्ते मुकुल इति रायः।) ईषद्विकसितकलिका। तत्पर्य्यायः। कुड्मलः २। इत्यमरः। २। ४। १६॥ (यथा, रघौ। ९। ३१।
"उपहितं शिशिरापगमश्रिया
मुकुलजालमशोभत किंशुके॥")
मकुलः ३ पौटकोरकः ४। इति शब्दरत्नावली॥ शरीरम्। आत्मा। इति धरणिः॥ (राजपुरुषविशेषः। यथा, राजतरङ्गिण्याम्। ६। २५३।
"इत्थं तस्य तदा राज्ञी तत्र्याध्ययशोहृता।
यशोधरं शुभधरं मुकुलञ्च न्यपातयत्॥")
मुकुष्टः, पुं, वनमुद्गः। तत्पर्य्यायः। मयष्टः २। इति रत्नमाला॥ अस्य गुणाः। शीतलत्वम्। ग्राहित्वम्। कफपित्तज्वरनाशित्वञ्च। इति राजवल्लभः॥
मुकुष्टकः, पुं, (मुकुं लक्कति प्रतिहन्ति। लक+अच्। पृषोदरादित्वात् साधुः।) वनमुद्गः। मुगानी इति भाषा। तत्पर्य्यायः। मयष्टकः २। इत्यमरः। २। ९। १७॥ मकुष्ठः ३ मयष्ठः ४। इति श्रीधरः॥ मयष्ठकः ५। इत्यन्ये। इति भरतः॥ मुकुष्ठकः ६ मकुष्टकः ७ मयुष्टकः ८। इति टीकान्तरम्॥ (तथास्य विषयः॥
"विदलानानि वक्ष्यामि शृणु पुत्र! यथाक्रमम्।
यवगोधूमचणका माषास्त्वाढकी तथा।
मुकुष्टकाः कुलत्थाश्च मसूरास्त्रिपुटास्तथा।
निष्पावकाः कलायाद्या विदलानानि कीर्त्तयेत्॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये॥
"मुद्गान् मसूरांश्चणकान् कुलत्थान् समुकुष्टकान्।
आहारकाले यूषार्थे ज्वरिताय प्रदापयेत्॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)
मुकूलकः, पुं, (मुच्+बाहुलकादूलच् पृषोदरादित्वात् कुत्वम्। ततः संज्ञायां कन्।) दन्तिवृक्षः। इत्यमरटीकायां रामाश्रमः॥ (तथास्य पर्य्यायः॥
"चित्रा दन्ती निकुम्भः स्यादुपचित्रा मुकूलकः।
दासायनी विशल्या च तथोदुम्बरपर्ण्यपि॥"
इति वैद्यकरत्नमालायाम्॥
"इन्द्रदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः।
द्रवन्ती नामतश्चित्रा न्यग्रोधी मूषिकाह्वया॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये॥)

मुक्तः, त्रि, (मुच्+क्तः।) प्राप्तमोक्षः। मोचितः। इति मेदिनी। ते, ४४॥ नन्दितः। इति शब्दरत्नावली॥ (नृपविशेषः। यथा, राजतरङ्गिण्याम्। ७। १६९५।
"सुरचम्पकभृत्यस्य चेलकाख्यस्य तत्सुतम्।
मुक्तो नामान्तिकं प्राप्तो नृपतेरागतामगात्॥"
ऋषिविशेषः। यथा, मार्कण्डेये। १००। ३१।
"आत्रेयश्चाभिवाशिष्ठ शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽनिलश्च धर्म्मेते तदा सप्तर्षयः स्मृताः॥")
मुक्तकं, क्ली, (मुच्यते क्षिप्यते इति। मुच्+क्तः। संज्ञायां कन्।) क्षेपणीयास्त्रम्। इति केचित्॥ (काव्यविशेषः। यथा, साहित्यदर्पणे। ६। २९५।
"वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च॥")
मुक्तकञ्चुकः, पुं, (कञ्चुक इव कञ्चुकः मुक्तः कञ्चुको येन।) अचिरत्यक्तत्वक्सर्पः। तत्पर्य्यायः। निर्मुक्तः २। इत्यमरः। १। ८। ६॥ उज्झितकञ्चुके, त्रि॥
मुक्तवसुः, [स्] पुं, (मुक्तं सर्व्वतः क्षिप्तं वसु येन।) सिंहः। इति शब्दमाला॥ मुक्तधने, त्रि॥
मुक्तरसा, स्त्री, (मुक्तः रसो यया।) रास्ना। इति रत्नमाला॥ (विवरणमस्या रास्नाशब्दे ज्ञातव्यम्।) त्यक्तरसे, त्रि॥
मुक्ता, स्त्री, (मुच्यते स्म। मोच्यते निःसार्य्यते इति वा। मुच्+क्तः। टाप्।) रास्ना। इति रत्नमाला॥ रत्नविशेषः। मोती इति हिन्दीभाषा। अस्या अधिष्ठात्री देवता चन्द्रः। इति ज्योतिषम्॥ तत्पर्य्यायः। मौक्तिकम् २। इत्यमरः। २। ९। ९३॥ सौम्या ३ शौक्तिकेयम् ४ तारम् ५ तारा ६ मौक्तिकम् ७ तौतिकम् ८ अम्भःसारम् ९ शीतलम् १० नीरजम् ११ नक्षत्रम् १२ इन्दुरत्नम् १३ लक्ष्मीः १४ मुक्ताफलम् १५ बिन्दुफलम् १६ शुक्तिका १७ शौक्तिकम् १८ शुक्तिमणिः १९ शशिप्रभम् २० स्वच्छम् २१ हिमम् २२ हिमवलम् २३ सुधांशुभम् २४ सुधांशुरत्नम् २५। लक्ष्मीस्थाने लक्ष्मं शशिप्रभस्थाने शशिप्रियं हिमवलस्थाने हैमवतं सुधांशुभस्थाने भूतवं इति च पाठः। इति राजनिर्घण्टः॥ शौक्तिकम् २६। इति भावप्रकाशः॥ शुक्तिबीजम् २७ वारि २८। इति शब्दरत्नावली॥ कुवलम् २९। इति जटाधरः॥ अस्या गुणाः। धारकत्वम्। शीतत्वम्। कषायत्वम्। स्वादुत्वम्। वृष्यत्वम्। चक्षुष्यत्वञ्च। सदाचारगुणः। पापालक्ष्मीविनाशित्वम्। इति राजवल्लभः॥ वृष्यत्वम्। वलपुष्टिकरत्वञ्च। इति भावप्रकाशः॥ अपि च।
"मौक्तिकञ्च मधुरं सुशीतलं
दृष्टिरोगशमनं विषापहम्।
राजयक्ष्ममुखरोगनाशनं
क्षीणवीर्य्यबलपुष्टिवर्द्धनम्॥"
अस्या लक्षणं यथा,—
"नक्षत्राभं सुवृत्तमत्यच्छं
स्निग्धं स्थूलं निर्मलं निर्व्रणञ्च॥

[illegible]

इति युक्तिकल्पतरुः ॥

(अस्याः पर्य्यायाः मौक्तिकम् ।

[illegible]

इति वैद्यकरत्नमालायां [illegible]

[illegible]

मुक्ताकलापः, पुं, (मुक्तायाः कलापः [illegible]) मुक्ताहारः । यथा,—

[illegible]

इति हेमचन्द्रः । ३ । ३२४ ॥

(यथा, कुमारसम्भवे । १ । ४४ ।

[illegible]

मुक्तागारं, क्ली, (मुक्तायाः आगारमिव ।) शुक्तिः । इति शब्दचन्द्रिका ॥ मौक्तिकप्रसूश्च ॥

[illegible]

इति राजनिर्घण्टः ॥

[illegible]

इति मेदिनी । [illegible]

[illegible]

पार्श्वे हि नार्य्यश्चलतो भवन्ति
मुक्ताफलस्याहितिरोभवस्य ॥
निम्नाशया रत्नधनं विधिज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रक्षाविधानं सुमहद्विधाय
कुम्भोपरिस्थं क्रियते यदा तत् ॥
तदा मदाद्दुन्दुभिमन्द्रघोषै-
र्विमुक्तनानास्फुरितान्तरालैः ।
पयोधराक्रान्तिविलम्बलम्बै-
र्नभो नभस्या नियतोऽन्तरीक्षम् ॥
न तं भुजङ्गा न च यातुधाना
न व्याधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याहिशिरःप्रसूतं
मुक्ताफलं तिष्ठति पुण्यभाजः ॥
नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्कैःप्रभाजालहतदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रताराप्रभवं समग्रम् ।
दिवा यथा रात्रिकरं तथैव
तमोऽवगाढास्वपि तन्निशासु ।
विचित्ररत्नद्युतिवारितोय-
चतुःसमुद्राभरणोपपन्ना ।
समग्रा न वा स्यादिति निश्चयो मे
मूल्यं मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तत्प्रभवं कदाचिद्-
विपाकयोगात्सकृतः शुभस्य ।
सपत्नहीनां स महीं समग्रां
स शास्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि तस्य जन्म ।
तद्योजनानां परितः सहस्रं
सर्व्वाननर्थान् विमुखीकरोति ॥
नक्षत्रमालेव दिवो विशीर्णा
दन्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्मणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सु स्थितमापवीत-
मासन् पुराण्यम्बुभवानि यानि ॥
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारु मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्तोयधरावकीर्णं
शुक्तौ स्थितं मौक्तिकतामवाप ॥
सैंहलिकपारलौकिकसौरा-
ष्ट्रिकताम्रपर्णीपारशवाः ।
कौवेरपाण्ड्यहाटक-
हैमका इत्याकराश्चाष्टौ ॥
बहुद्रवं मातिनिशाकरवर्णं
प्रमाणवत्स्थानगुणप्रभाभिः ।

उत्पद्यते यद्यपि पारसीक-
पातालसौराष्ट्ररसिंहलेषु ।
चिन्त्या न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्थास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाकृतयो भवन्ति ॥
सितस्य शुक्तिप्रभवस्य मुक्ता-
फलस्य माषेण चतुर्मितस्य ।
मूल्यं सहस्राणि तु रूपकाणां
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्माषकार्द्धेन ततो विहीनं
तत्पञ्चभागत्रयहीनमूल्यम् ।
यन्माषकांस्त्रीन् बिभृयात् सहस्रे
द्वे तस्य मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकौ द्वौ भजतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ॥
अर्द्धाधिकं माषकसम्मितस्य
सपञ्चविंशं त्रितयं शतानाम् ।
गुञ्जाश्च षट् धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ॥
अध्यर्द्धगुञ्जापचितं धृतं स्यात्
मूल्यं शतैकस्य समन्वितस्य ।
यदि षोडशभिर्भवेदनूनं
धरणं तत्प्रवदन्ति दार्व्विकाख्यम् ।
अधिकं दशभिः शतस्य मूल्यं
समवाप्नोत्यपि कान्तिमत्त्वयुक्तात् ।
द्विगुणैर्दशभिर्भवेदनूनं
धरणं तद्भवकं वदन्ति तज्ज्ञाः ॥
नवतिप्रतिमाप्नुयात् स मूल्यं
यदि न स्याद्गुणसम्पदा विहीनम् ।
त्रिंशता धरणं पूर्णं शिक्यं तस्येति कीर्त्यते ।
चत्वारिंशद्द्वेलाख्याः परं मूल्यं विनिश्चयः ।
चत्वारिंशद्वेष्टिकयो विंशं मूल्यं लभेत वा ॥
षष्टिर्निकरशीर्षे स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्मलितश्चैव कुप्येति परिकीर्त्तिता ।
एकादश स्यान्नव च तयोर्मूल्यमनुक्रमात् ॥
आदाय तत् शकलमेव ततोऽम्भसाक्तं
जम्बीरजातरसयोजनया विपक्वम् ।
एवं ततो मृदुतनूकृतपिष्टमूलैः
कुर्य्यादुपेतमनुमौक्तिकमाशु विद्वान् ।
अशिग्रमत्स्यपुटमध्यगतञ्च तस्मा
पश्चात् पचेत्तु शनकैश्च शिलामयया ।
दुग्धे ततः पयसि तं विपचेत् सुधायां
पक्वं ततोऽपि पयसा शुचि चिक्कणेन ।
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यान्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
व्याडिर्जगाद जगतो हि महाप्रभाव-
सिद्धो विदग्धहितकृत्परया दयालुः ।
चेनरापदमं नारं वेसोद्गमतमौक्तिकम् ।
रत्नमणि प्रधार्य्येत मौक्तिकं देहभूषणम् ॥

एवं हि सिंहले देशे कुर्व्वन्ति कुशला जनाः ।
यस्मिन् सविमसन्देहः क्वचिद्भवति मौक्तिके ॥
उष्णे सलवणे स्नेहे निशां तद्वासयेज्जले ।
व्रीहिभिर्म्मर्द्दनीयं वा शुष्कवस्त्रोपवेष्टितम् ॥
यत्तु यायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ॥
सितं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्म्मलम् ।
तेजोऽधिकं सुवृत्तञ्च मौक्तिकं गुणवत् स्मृतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
सितं सुवृत्तं समसूक्ष्मवेधम् ।
अकृत्रिमप्यावहति प्रमोदं
यन्मौक्तिकं सद्गुणवत् प्रदिष्टम् ।
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।
न तस्य भर्त्तारमनर्थजात
एकोऽपि कश्चित् समुपैति दोषः ॥"
इति गारुडे ६९ अध्यायः ॥

मुक्तामलः, त्रि, (मुक्तश्च असलश्चेति विशेषणयो-
र्द्वन्द्वः ।) विभाविमः । अस्य प्रयोगो मले
शुष्के च प्रायो वर्त्तते । इति हलायुधः ॥
मुक्तालता, स्त्री, (मुक्ताभिर्लतेव ।) मुक्ताहारः ।
इति हेमचन्द्रः । ३ । ३२२ ॥
मुक्तावली, स्त्री, (मुक्तानां आवल्यत्र) मुक्ता-
हारः । इत्यमरः । २।६।१०५ ॥ (मुक्तानामा-
वली ।) मौक्तिकश्रेणी च ॥ (तालविशेषः । यथा,
सङ्गीतदामोदरे ।
"द्रुतयं सविरामान्तं गौ पुनः द्रुतयं तथा ।
प्लुतौ गः द्रुतयं गल यत्र मुक्तावली तु सा ॥")
मुक्तास्फोटः, पुं, (मुक्तानां स्फोटः विकाशोऽत्र ।)
शुक्तिः । इत्यमरः । १ । १० । २३ ॥
मुक्तास्फोटा, स्त्री, (मुक्तास्फोट+टाप् ।) शुक्तिः ।
इति राजनिर्घण्टः ॥
मुक्तिः, स्त्री, (मुच्+भावे क्तिन् ।) आत्यन्तिक-
दुःखनिवृत्तिः । इति नैयायिकाः ॥ निरतिशयसुखा-
वाप्तिः । इति वेदान्तिकाः । शरीरेन्द्रियाभ्याम्
आत्मनो मुक्तत्वं मुक्तिः । इति भरतः ॥ मोक्षः ॥
तत्पर्य्यायः । कैवल्यम् २ निर्व्वाणम् ३ श्रेयः ४
निःश्रेयसम् ५ अमृतम् ६ मोक्षः ७ अपवर्गः ८ ।
इत्यमरः । १।५।६ ॥ अपुनर्भवः ९ शिवः १०
अभयम् ११ । इति जटाधरः ॥ सा पञ्चविधा ।
सार्ष्टिः १ सालोक्यम् २ सारूप्यम् ३ सामीप्यम् ४
निर्व्वाणम् ५ । यथा,—
"सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"
इति श्रीभागवतम् ॥
"मुक्तिस्तु द्विविधा साध्वि ! श्रुत्युक्ता सर्व्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥
हरिभक्तिस्वरूपाञ्च मुक्तिं वाञ्छन्ति वैष्णवाः ।
अन्ये निर्व्वाणरूपाञ्च मुक्तिमिच्छन्ति साधवः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
मुक्तिकरयोगो यथा,—
"अथो वक्ष्ये महायोगं भुक्तिमुक्तिकरं परम् ।
ध्यानिनामपमर्थं भयानुपठितं सदा ॥

गुञ्जाश्च षड्धारयतः प्रति द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ।
गुञ्जाष्टको विंशतिमुक्ताहार्ह-
दर्हं शतेनाप्यधिकं त्रिभिर्वा ॥
अतः परं स्यादृधवप्रमाणं
संख्याविनिर्दिष्टविनिश्चयोक्तिः ।
भयोदशानां धरणं शतानां
द्विकोति नाम प्रवदन्ति तज्ज्ञाः ॥
अष्टार्धमाषश्च शतं शतं स्या-
न्मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि षोडशभिर्भवेत् सुपूर्णं
धरणं तत्प्रवदन्ति दार्विकाख्यम् ॥
अधिकं दशभिः शतैश्च मूल्यं
समवाप्नोत्यपि वालिशस्य हस्तात् ।
यदि विंशतिभिर्भवेत् सुपूर्णं
धरणं मौक्तिकजं वदन्ति तज्ज्ञाः ॥
नवचमतिमाप्नुयात् समूल्यं
यदि न स्याद्गुणयुक्तितो विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्येति परिकीर्त्यते ।
चत्वारिंशत्परं तस्य मूल्यमेव विनिश्चयः ॥
चत्वारिंशद्भवेत् शिक्या त्रिंशन्मूल्यं लभेत सा ।
पञ्चाशत्तु भवेत् सोमस्तस्य मूल्यन्तु विंशतिः ॥
षष्टिर्निकरशीर्षं स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्भवतिर्येति कुप्येति परिकल्प्यते ॥
एकादश त्रयोदश च तयोर्मूल्यमनुक्रमात् ।
शतमष्टाधिकं द्वे च चूर्णोऽयं परिकीर्तितः ॥
अत्र पञ्च नवञ्चैव तेषां मूल्यमनुक्रमात् ॥
प्राधात् परं माषकमेकमेकं
यावद्विवर्द्धेत गुणैरपीदम् ।
मूल्येन तावद्विगुणेन योग-
माप्नोत्यभावद्विशतेऽपि दृष्टे ॥
छन्दांसि वल्गोत्तममध्यमानी
यन्मौक्तिकानामिह मूल्यमुक्तम् ।
तत्त्वानिमानेन न चातु कार्यं
गुणैरयोगस्य हि तत् प्रदिष्टम् ॥
यत्तु चन्द्रांशुसङ्काशमीषदिन्द्रपलाशति ।
स्यन्दनात् प्रथमं भागमहत्त्वात्रभिनत्तु ॥
पीतकस्य भवेदर्द्धमष्टमस्य त्रिभागतः ।
विषमस्य चतुर्थं वा षड्भागं मध्यमादिषु ।
अर्द्धरूपाणि मत्स्योढात् पद्मपूर्णानि यानि च ।
यशाराणि च यानि स्युः करवाकारवन्ति च ॥
एकदेशप्रभावन्ति सकलानि स्थितानि च ।
यानि चातकवर्णानि कांस्यवर्णानि यानि च ॥
मौलनेत्रवर्णानि पक्षिभिः संहृतानि च ।
मद्योषाणि च यानि स्युस्तेषां मूल्यं पदांशिकम् ॥
अन्यच्च तु ।
यवानां शोषये गुञ्जा वा त्रिभो रूपकं भवेत् ।
रूपकैर्दशभिः पोलः कलङ्को नाम नामतः ॥
कलञ्जमानकं द्रव्यमेकदेशे निपातयेत् ।
अयतो वलनिम्बन्तु तोलयेत् विविधैषैत् ॥
चत्वारि मौलि पुष्पं वा तथैकं बहु वा स्थितम् ।
धर्मं कलञ्जमानेन गुञ्जामानादतः क्रमात् ॥
नवमात् पञ्चमं यावत् कलञ्जेन समं यदा ।
तत्क्रमादुत्तमं ज्ञेयं मौक्तिकं रत्नवेदिभिः ॥
चतुर्दशात् समारभ्य दशसंख्यावधिं क्रमात् ।
कलञ्जस्य समानं वा मौक्तिकं मध्यमं विदुः ।
आरभ्य विंशतितमात् क्रमात् नवदशावधि ।
चतुर्गाला: कथिता मुक्ता मल्यश्च तदनुक्रमात् ।
कलञ्जद्वयमानेन यद्येकं मौक्तिकं भवेत् ।
न धार्यं नरनाथैस्तु देवयोग्यमनाशवम् ॥
इत्थं विचार्य यो मुक्तां परिधत्ते नराधिपः ।
तस्यायुश्च यशो वीर्यं विपरीतमतोऽन्यथा ॥”

इति युक्तिकल्पतरुः ॥

(अथास्याः शोधनम् ।
“स्वेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च ।
मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) अन्यत् मुक्ताफलशब्दे द्रष्टव्यम् ॥०॥ अथ मुक्ताधारणदिनम् ।
“रेवत्याश्विधनिष्ठासु हस्तादिषु च पञ्चसु ।
प्रवालहेममुक्तानां परिधानं प्रशस्यते ॥”

इति समयप्रदीपः ॥

मुक्ताकलापः, पुं, (मुक्तानां कलापः समूहोऽत्र ।) मुक्ताहारः । यथा,—
“हारो मुक्तावली प्रालम्बकलापावलीलता: ।”

इति हेमचन्द्रः । ३ । ३२२ ।

(यथा, कुमारसम्भवे । १ । ४२ ।
“कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव
साधारणो भूषणभूष्यभावः ॥”)

मुक्तागारं, क्ली, (मुक्ताया आगारमिव । मुक्तोत्पादनाधारत्वादस्य तथात्वम् ।) शुक्तिः । इति शब्दचन्द्रिका । मौक्तिकगृहञ्च ॥

मुक्तापुष्पः, पुं, (मुक्ता इव पुष्पाण्यस्य ।) कुन्दवृक्षः । इति राजनिर्घण्टः । (गुणादिविवरणमस्य कुन्दशब्दे द्रष्टव्यम् ।)

मुक्ताप्रसूः, स्त्री, (मुक्तां प्रकर्षेण सूते जनयतीति प्र+सू+क्विप् ।) शुक्तिः । इति राजनिर्घण्टः ॥

मुक्तापालम्बः, पुं, (मुक्तानां प्रालम्बः हारभेदः ।) मुक्ताहारः । इति हेमचन्द्रः । ३ । ३२२ ॥

मुक्ताफलं, क्ली, (मुक्ताफलमिव ।) कर्पूरम् । (मुक्तेव फलमिव ।) मौक्तिकम् । (यथा, मुग्धबोधटीकायां कारके । टिकापादिस्थम् । दुर्गादासधृतम् ।
“मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति सुजनिक्रमश्वपनाय ॥”)
लवलीफलम् । इति मेदिनी । ले, १५५ ॥
(मौक्तिकार्थेऽस्य पर्यायः ।
“मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।”

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
यथास्य भक्षणविधिः ।
“मुक्ताफलानि शुद्धानि सक्तौ पिष्ट्वा पुटेत् पुनः ।
एवं भस्मसमाप्नोति———————— ।”
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।) बोपदेवस्तत्पत्यविशेषः । यथा,—
“मुक्ताफलेन यत्नेन बहारायतमुक्तिना ।
भक्तिस्रात्मना सुधमार्कं कविमनुमिषा ।
विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत् ॥”

इति तस्य चतुर्वर्गचिन्तामणिटीकाग्रन्थम् ॥

अथ मुक्ताफल परीक्षा ।
“द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषाञ्च शुक्त्युद्भवमेव भूरि ॥
तत्रैव चैकस्य हि मूल्यमात्रा
निर्दिश्यते रत्नपरस्य चातु ।
वेध्यत्र शुक्त्युद्भवमेव तेषां
विधाप्यवेध्यानि वदन्ति तज्ज्ञाः ॥
स्तकृत्याचनागेन्द्रतिमिप्रसूतं
यत् शङ्खजं यच्च वराहजातम् ।
प्रायो विमुक्तानि भवन्ति भांसा
शस्तानि माङ्गल्यतया तथापि ॥
या मौक्तिकानामिह जातयोऽष्टौ
प्रकीर्तिता रत्नविनिश्चयज्ञैः ।
कम्बुप्रवे तैमवमप्यदिष्ट-
मुत्पद्यते यच्च गजेन्द्रकुम्भात् ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
प्राङ्गं हरत्कोषफलप्रमाणम् ।
उत्पद्यते वारणकुम्भमध्या-
दापीतवर्णं प्रभया विहीनम् ॥
ये कम्बवः प्राङ्गिसुतावमर्द-
पीतस्य शङ्खवरस्य योनि-
मतन्नु अरचापि विशुद्धवर्णा-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
पाठीनपृष्ठस्य समानवर्णं
मीनात् सुवृत्तं लघु नातिसूक्ष्मम् ।
उत्पद्यते वारिचरानमेषु
मत्स्याश्च ते मध्यचराः पयोधेः ॥
वराहदंष्ट्राप्रभवं प्रदिष्टं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भुवः प्रदेशे
प्रजायते सूकरवर्त्मनिष्ठः ॥
दर्वीपलानां समवर्णशोभं
स्तकुधारपन्नगसमप्यादिष्टम् ।
ते विज्ञो दिव्यजलौघभोम्ये
स्थाने प्ररोहन्ति न धार्मिकम् ॥
भोजङ्गमं मीननियुक्तवर्णं
संख्यानतोऽणुष्णसवर्णमीलम् ।
निशान्तधौतप्रविकल्यमान-
निस्त्रिंशधाराविमलप्रकाशानि ॥
प्राप्नोति रत्नानि महाप्रभाणि
राज्यं श्रियं वा महतीं दुरापाम् ।

पात्रं हि मार्गण्यगतो भवन्ति
मुक्ताफलस्याधिहिरोभवस्य ।
विज्ञाय या रत्नधनं विधिज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रक्षाविधानं सुमहद्विधाय
हम्र्योपरिस्थं क्रियते यदा तत् ।
तदा महादुन्दुभिमन्द्रघोषै-
र्दिक्चक्रवालस्फुरिताम्बराभैः ।
पयोधराक्रान्तिविलम्बलग्नै-
र्घनैर्घनेन्द्रा प्रियतेऽन्तरीक्षम् ।
न तं भुजङ्गा न च यातुधाना
न व्याधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याधिशिरःप्रवृत्तं
मुक्ताफलं तिष्ठति पुण्यभाजम् ॥
नाम्बेति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्चिःप्रभाणाहृतदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजांसि रत्नस्य कृताग्निमेन्दु-
नक्षत्रतारोपभवं समग्रम् ।
दिवा यथा दीप्तिकरं तथैव
तमोऽवगाढ़ास्वपि तन्निशासु ।
विचित्ररत्नद्युतिसारतोय-
चतुःसमुद्राभरणोपपन्ना ।
तत्तुल्यं न वा स्यादिति निश्चयो मे
मूल्यं मही तस्य सुवर्णपूर्णा ।
हीनोऽपि यत्नलभते कदाचित्
विपाकयोगाज्जनः शुभस्य ।
सपत्नहीनां स महीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभलक्षणस्य
भाग्यैः प्रजानामपि तस्य जन्म ।
यद्योजनानां परितः सहस्रं
सर्व्वाननर्थान् विनिहन्ति वेति ॥
नक्षत्रमालेव दिवो विशीर्णा
दन्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ति-
र्मौक्तिकप्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सु क्षितमात्रतोय-
मातत् पुराम्बुधभयानि यानि ।
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारु मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्तोयधराभकीर्णे
शुक्तौ स्थितं मौक्तिकतामवाप ॥
सैंहलिकपारलौकिकसौरा-
ष्ट्रिकताम्रपर्णपारशवाः ।
कौवेरपाण्ड्यवाटक-
हैमा इत्याकराण्यष्टौ ॥
समुद्भवं नातिनिकृष्टवर्णं
प्रमाणवर्णस्थानगुणप्रभाभिः ।

उत्पद्यते वह्निभयाद्यशीक-
पातालनोकान्तरसिंहलेषु ।
भिन्ना न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्थास्ति गुणागुणेषु
सर्वत्र सर्व्वाकृतयो भवन्ति ॥
एकस्य शुक्तिप्रभवस्य मुक्ता-
फलस्य मात्रैव चतुष्किकस्य ।
मूल्यं सहस्राणि तु त्रयकार्णां
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्माषकार्द्धेन ततो विहीनं
तत्पञ्चभागानयुतानि सत्यम् ।
यन्माषकांश्चीन् बिभृयात् महत्त्वे
द्वे त्रयस्तु मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकौ द्वौ यदतीऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मानितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ।
अर्द्धाधिकं माषकमुन्मितस्य
सपञ्चविंशत्रितयं शतानाम् ।
गुञ्जाश्च षड्धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ॥
अथार्द्धगुञ्जाधिकतां शतं स्यात्
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि मौक्तिमभिर्भवेदनूनं
धरणं तस्य वदन्ति दाम्भिकाख्यम् ॥
अधिकं दशभिः शतञ्च मूल्यं
समवाप्नोत्यपि वालिशस्य हस्तात् ।
त्रिगुणैर्दशभिर्भवेदनूनं
धरणं तद्भवकं वदन्ति तज्ज्ञाः ॥
नवमप्रतिमाश्रयात् स्वमूल्यं
यदि न स्याद्गुरुवत्सदा विहीनम् ॥
अंशता धरणं पूर्वं शिक्यं तस्येति कीर्त्यते ॥
चत्वारिंशद्भवेत्तस्याः परं मूल्यं विनिश्चयः ।
चत्वारिंशद्भवेच्छुक्त्यो निर्ग्गत्यं लभते च वा ॥
षष्टिर्निकरशीर्षं स्यात्तस्य मूल्यं चतुर्द्दश ।
अशीतिर्भवति चैव कुप्येति परिकीर्त्तिता ।
एकादश स्यात् च तयोर्न्नामतुक्रमात् ॥
आदाय तत् चक्रमेव ततोऽतिमात्रं
जम्बीरजातरसयोजनया विपक्वम् ।
पश्चात्ततो मृदुतनूकृतपिष्टशालेः
कुर्य्यादुपोदमनुमौक्तिकमाशु विद्धम् ॥
स्निग्धप्रसन्नप्रदमध्यगतन्तु तस्मात्
पश्चात् प्रवेश्य तदथ क्षितिमधस्ता ।
दुष्टे ततः प्रयति तं विमलेन सुधावी
पक्वं ततोऽपि पयसा शुचि विमर्दयेत् ॥
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यान्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
व्याडिर्जगाद जगतो हि मयाप्रभाव-
सिद्धो विदग्धहितकृतपरया दयाद्यः ॥
स्नेहकाश्वनं नादं देशाद्यमनोविनम् ।
दुरास्तौ पश्चार्धेत मौक्तिकं देवभूषणम् ॥

एवं हि सिंहले देशे कुर्व्वन्ति कुशला जनाः ।
यस्मिन् छ्विमसन्देहः क्वचिद्भवति मौक्तिके ॥
उष्णे सलवणे स्नेहे निशां तदुपवासयेत् ।
व्रीहिभिर्म्मर्दनीयं वा शुष्कवस्त्रोपवेष्टितम् ॥
यत्तु नायाति वैवर्णं विज्ञेयं तदकृत्रिमम् ।
सितं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्म्मलम् ।
तेजोऽधिकं सुवृत्तञ्च मौक्तिकं गुणवत् स्मृतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
सितं सुवृत्तं समसूक्ष्मवेधम् ।
अक्रेतुरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।
न तस्य भर्त्तारमनर्थजात
एकोऽपि कश्चित् समुपैति दोषः ॥"
इति गारुडे ६९ अध्यायः ॥

मुक्तामुक्तः, त्रि, (मुक्तश्च अमुक्तश्चेति विधिद्वयो-
द्देशत् ।) विभागिमः । अस्य प्रयोगो क्वचि
मुक्ते च प्रायो वर्त्तते । इति हलायुधः ॥
मुक्तालता, स्त्री, (मुक्ताभिर्ल्लतेव ।) मुक्ताहारः ।
इति हेमचन्द्रः । ३ । ३२२ ॥
मुक्तावली, स्त्री, (मुक्तानां आवल्यत्र) मुक्ता-
हारः । इत्यमरः । २।६।१०५ ॥ (मुक्तानामा-
वली ।) मौक्तिकश्रेणी च । (तालविशेषः । यथा,
सङ्गीतदामोदरे ।
"द्रुतयं सविरामान्तं लौ पुनः द्रुतयं तथा ।
प्लुतौगः स्मृतो यत्र यत्र मुक्तावली तु सा ।")
मुक्तास्फोटः, पुं, (मुक्तानां स्फोटः विकाशोऽत्र ।)
शुक्तिः । इत्यमरः । १ । १० । २२ ॥
मुक्तास्फोटा, स्त्री, (मुक्तास्फोट+टाप् ।) शुक्तिः ।
इति राजनिर्घण्टः ॥
मुक्तिः, स्त्री, (मुच्+भावे क्तिन् ।) आत्यन्तिक-
दुःखनिवृत्तिः । इति नैयायिकाः । निजसुखा-
वाप्तिः । इति वेदान्तिकाः । शरीरेन्द्रियाभ्यां
आत्मनो मुक्तत्वं मुक्तिः । इति भरतः । मोक्षः ।
तत्पर्य्यायः । कैवल्यम् २ निर्व्वाणम् ३ श्रेयः ४
निःश्रेयसम् ५ अमृतम् ६ मोक्षः ७ अपवर्गः ८ ।
इत्यमरः । १।५।६ । अपुनर्भवः ९ शिवः १०
अक्षरम् ११ । इति जटाधरः । सा पञ्चविधा ।
सार्ष्टिः १ सालोक्यम् २ सारूप्यम् ३ सामीप्यम् ४
निर्व्वाणम् ५ । यथा,—
"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"
इति श्रीभागवतम् ॥
"मुक्तिस्तु द्विविधा साध्वि! श्रुत्युक्ता सर्व्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥
हरिभक्तिस्वरूपाञ्च मुक्तिं वाञ्छन्ति वैष्णवाः ।
अन्ये निर्व्वाणरूपाञ्च मुक्तिमिच्छन्ति साधवः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
मुक्तिकारणोक्ता यथा,—
"अस्ति माङ्गलदायीनं मुक्तिमुक्तिकरं परम् ।
सर्व्वैश्वर्य्यप्रदम् भक्त्याशुपदितं प्रभुः ॥

ममेति मूलं दुःखस्य न ममेति च निर्वृतिः ।
हर्षाग्रियो ज्ञानकार्य इममाह महामतिः ॥
अहमित्यङ्कुरोत्पन्नो ममेति स्कन्धवान् महान् ।
गृहक्षेत्रोपशाखश्च पुत्रदारादिपल्लवः ॥
धनधान्यमहापत्रो नैककालेर्द्धि वर्द्धितः ।
पुण्यापुण्याग्रपुष्पश्च सुखदुःखमहाफलः ।
विमिषन् मुक्तिमार्गस्थं भावोऽज्ञानमहातरुः ॥
संसाराध्वपरिश्रान्ता ये च च्छायां समाश्रिताः ।
भ्रान्तिज्ञानसुखायैव तेषामात्यन्तिकं कुतः ॥
यैस्तु सत्सङ्गपाषाणनिशितेन महात्मनः ।
छिन्नो विद्याकुठारेण ते गता लयमीश्वरे ॥
प्राप्य ब्रह्मरसं शीतं नीरजस्कमकण्टकम् ।
प्राप्नुवन्ति परां प्राज्ञा ज्ञाननिर्वृतिमेव च ॥
भूतेन्द्रियमयं स्थूलं न त्वं राजा न चाप्यहम् ।
न तन्मात्रादिकं चापि नैवान्तःकरणं तथा ॥
कं वा पश्यसि राजेन्द्र ! प्रधानमिदमावयोः ।
यतः परोऽस्ति क्षेत्रज्ञः संघातोऽयं गुणात्मकः ॥
मशको दुःखमाप्नोति जातो मनुष्योऽन्यथा यथा ।
एकत्वेऽपि पृथग्भावस्तथा चैवात्मनो नृप ! ॥
ध्यानपूर्व्वाभियोगोऽतिज्ञानेन सह योगिनः ।
या मुक्तिसंज्ञका चैक्यमनैक्यं नृप ! ते गुणैः ।
तद्वृत्तं यस्य वचनितच्छ्रोण्यं येन जीवति ॥"
इति गारुडे २२९ अध्यायः ॥

अपि च ।
"हरिरात्मा न सन्देहो यदा सन् समभ्यसेत् ।
तदा मुक्तः स संसारी विष्णोरेवात्मतां व्रजेत् ।
नान्यथा मुच्यते ह्यात्मा भ्रमन् वै घटियन्त्रवत् ॥
पूर्व्वकर्म्मनिबद्धोऽपि सर्व्वयोनिषु नित्यशः ।
कूटस्थः पश्यतो याति आत्मज्ञानविवर्जितः ॥
कर्म्मबद्धं ममेतीदमेवं दुःखाय कल्पते ।
अहङ्कारो हि यथा कार्य्यं क्लिश्यते वै ममेश्वरः ।
चौराद्यनादिभिर्यद्वद्भाण्डं तद्वद्दहति ।
चन्द्रकान्तमणिर्यद्वद् गृह्णाति चोपचारान् गुणान् ।
सुखं दुःखं तथा क्षेमं संसरन् गुणमीश्वरः ॥
स्वप्ने यः पुरुषो नित्यमटते कर्म्मबन्धनात् ।
मन्यमानः सुखं दुःखं सोऽप्येव हि प्रमुच्यते ॥
अनासक्ते न बद्धिः स्यादासक्ते वर्द्धते सदा ।
तस्मात्त्यजतु सर्व्वं विद्वान् ज्ञानं नाधिकमेव च ॥
यत्र तत्र स्थितो ज्ञानी परमात्मविदन् सदा ।
विषयान्तरसक्तो वा याति देहे गते हरिम् ॥
न तस्य प्रतिबन्धोऽस्ति यदृच्छयाऽपि लीलया ।
मुच्यते यद्वत् नैव मनावचभिवात्मना ॥
यथा सुदुर्गमं घातं निघृष्टैर्वशस्थितम् ।
तद्वन्तु निर्मलात्मा तु ज्ञानी विषयवर्जितः ॥
कर्म्मस्थोऽपि मुच्येत भावमुक्तः पदे पदे ।
जीवन्मुक्तः स मुक्तः स्यान्निद्राविरहितस्तु यः ।
कर्त्ता हर्त्ता च भोक्ता च सर्व्वेशः सर्व्वगो हरिः ।
एवं मनश्चञ्चलस्य मुक्तिरित्यभिधीयते ॥
जीवन्मुक्तिसमापन्नो गर्व्वाहङ्कारविग्रहः ।
विमुक्ता इवाभान्ति महाधैर्य्यसमर्जिताः ।
निर्गुणः स तु विज्ञेयः सुखदुःखमतीतवान् ।
जीवन्मुक्तो भवेद्यत्र तत् सुखं निष्प्रयोजनम् ॥
अन्यच्छद्मस्यजीवन्मुक्तस्तु भवेद्यथा ।
तिष्ठन्ति काष्ठवद्देहे च संविन्तिपरिवर्जिताः ॥
ते च मायोदरे लीना ब्रह्माण्डधरोपमाः ।
आकाशवद्भवेदात्मा विदेहो निष्प्रपञ्चकः ॥
स्थूलं क्षणेन मोचेत चेतनारहितेन च ।
बन्धेन च संसारी विषयासक्तचेतनः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
चक्रवत्तावुभौ यातौ संसारे संव्यवस्थितः ॥
ईदृशं हि परं ज्ञानं वेदादीनामपीप्सितः ।
सुखस्य च फलं मुक्तिः स्वर्गो चैव द्विजोत्तम ! ॥
यत्र याति परे स्थाने सुखदुःखविवर्जितः ।
केवलं जीवनाशोऽयं मोक्षस्थानमनामतः ॥
चेतनारहितो ज्ञानमाकाशस्योऽपचेतनः ।
स्तम्भकुड्यलोष्टादिशिलापट्टकवद्भवेत् ॥
अथ श्रान्तो नरो यद्वत् सुतप्तः सुखमश्नुते ।
बोध्यमानः सचेतापि सुखाद्बोद्धुं न मन्यते ॥•॥
कैषा मुक्तिरियं मोक्षः सुखमत्यन्तकेवलम् ।
तदहं संप्रवक्ष्यामि शृणुष्व गदतो मम ॥
दुःखानामागमो नास्ति यत्र सौख्यं निरन्तरम् ।
विद्यते तत् परं ब्रह्म योऽप्यानन्दसुखी भवेत् ॥
सर्व्वज्ञानप्रभावाच्च स्वच्छन्दात्मकमाश्रिताः ।
न तेषां पुनरावृत्तिर्यान्ति विष्णुलयं बुधाः ॥
अस्ति देवो हरिः शान्तः कार्य्योपायविवर्जितः ।
तं ज्ञात्वा तु भवेन्मुक्तिर्निर्म्मला आत्मयोगिनः ॥
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्य्यादयः सुराः ।
न विभक्तिं शरीरस्य यान्ति मुक्तिर्न विद्यते ॥
तस्माद्दानादिधर्म्मोऽपि संयमेन्द्रियगोचरः ।
विष्णुर्मायापतिर्यो वै सदोपेक्ष्युक्तिमात्मनः ॥
नान्यच्च विद्यातपसो नान्यच्चेन्द्रियनिग्रहात् ।
नान्यच्च सर्व्वसंन्यासात् मोक्षं विन्दति मानवः ॥
तस्माद्धर्म्मसुखी भूत्वा संयम्यात्मानमात्मना ।
धर्म्मं कुर्य्यादिहार्थे यो धर्म्मात्मा सुखमेधते ॥
धर्म्मादेवाप्यते देहो दाराः पुत्रा धनं तथा ।
धर्म्मात् स्वर्गश्च मोक्षश्च यद्यदपि दुर्लभम् ॥
ऋषयो देवगन्धर्व्वाः स्वधर्म्ममनुगामिनः ।
स्वर्गे तिष्ठन्ति विपुलं ततो यान्ति परां गतिम् ॥
धर्म्ममर्थञ्च कामञ्च मोक्षञ्च चाविचलम् ।
समाप्नोति पुमानित्थं नारायणपरायणः ॥"
इति वह्निपुराणम् ॥

(निवृत्तिर्यथा, सांख्यसूत्रम् । ६ । २० ।
"मुक्तिरन्तरायध्वस्तेर्न परः ।"
यथाच, अष्टावक्रसंहितायाम् । १ । २ ।
"मुक्तिमिच्छसि चेत्तात ! विषयान् विषवत्त्यज ।
क्षमार्ज्जवदयातोषसत्यं पीयूषवद्भज ॥")

मुक्तिदं, क्ली, (मुक्तिं ददातीति । मुक्ति+दा+कः ।) भगवन्नामविशेषः । यथा,—
"अत्याचारस्य नाशार्थं महापापस्य मुक्तिदम् ।
नानासिद्धिप्रदातारं परं विघ्नविनाशनम् ॥
गुह्याद्गुह्यतरं नाम नारायणं परम् ।
सर्व्वं सुखचतुर्वर्गसर्व्वार्थप्रसाधकम् ॥
नाम नारायणायेति नमोऽन्ताद्यौ नियोजितः ।
ओमिति तत्परे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"
इति वह्निपुराणम् ।

मुक्तिदातरि, त्रि । (यथा, देवीभागवते । ५ । ९ । १० ।
"तां ध्यात्वा मनुजो मायां मुक्तिदां निर्गुणा-
त्मिकाम् ॥")

मुक्तिमण्डपः, पुं, (मुक्तिदायकः मण्डपः । यद्वा मुक्तेर्मण्डपः ।) विश्वेश्वरस्य दक्षिणपार्श्वस्थमण्डपः । यथा,—
"निमेषमात्रं स्थिरचित्तवृत्त्या
तिष्ठन्ति ये दक्षिणमण्डपेऽत्र ।
अनन्यभावा अपि गाढमोहा
न ते पुनर्गर्भदशामवाप्स्यति ॥"
इति काशीखण्डम् ।
श्रीजगन्नाथमन्दिरदक्षिणपार्श्वस्थमण्डपश्च ।

मुक्तिमुक्तः पुं, (मुक्ता मोचनेन मुक्तः त्यक्तः ।) सिल्हकम् । इति रत्नमाला ॥

मुखं, क्ली, (खनति विदारयति अन्नादिकमनेन खन्यते विधात्रा मुखमनेन इति वा । खन्+"खनेर्डड् चोदात्तः ।" उणा० । ५ । २० । इति करणे अच् । स च डित् मुडागमश्च ।) शरीरावयवविशेषः । स तु मुखविवरम् । (तन्निरुक्तिर्यथा,—
'प्रवाह्यते यतः स्वातं तस्मात्तन्मुखं बुधाः ।'
इत्यमरटीकाभरतम् ।)
कवयस्तु तदुपलक्षिते वक्त्रादौ प्रयुञ्जते । इति भरतः ॥ तत्तु गर्भस्थस्य पञ्चमासैर्भवति । इति मुग्धबोधः ॥ तत्पर्य्यायः । वक्त्रम् २ आस्यम् ३ वदनम् ४ तुण्डम् ५ आननम् ६ लपनम् ७ । इत्यमरः । २ । ६ । ८९ ॥ (यथा, नैषधचरिते ९ । ४४ ।
"मुखं विमुच्य श्वसितस्य धारया
त्वयैव नाथामपथावनम्रः ।")
तस्य स्वरूपं यथा,—
'ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो मुखादि सकलं सप्ताङ्गं मुखमुच्यते ॥'
इति भावप्रकाशः ।
रतिक्रियायां स्त्रीमुखस्य योगात् स्वबालकमुखस्य च चुम्बने शुद्धत्वं यथा,—
"मक्षिका सन्तता धारा भाण्डारौ भस्मबिन्दवः ।
स्त्रीमुखं बालकमुखं न दुष्टं मनुरब्रवीत् ॥"
इति कर्म्मलोचनम् ॥ • ॥
निःसरणम् । इत्यमरः । २ । २ । १८ ॥ तत्तु गृहस्य निष्क्रमणप्रवेशनवर्त्म । इति सर्व्वधरः । गृहादिद्वारप्रदेशः । इति स्वामी । चक्र-मण्डपादेः प्रवेशविशेषः । इति कोक्कटः । यथागृहादिनिःसरणपथः । इति रमानाथः । इत्यमरटीकायां भरतः ॥ प्रारम्भः । (यथा, रघुवंशे । ३ । १ ।
"अथेप्सितं भर्तुरुपस्थितोदयं
सखीजनोद्वीक्षणकौमुदीमुखम् ।

निशानिशाङ्ककुलस्य सन्ततेः
सुदर्शिना दीर्घदृशश्चलं दधौ ॥"
"कौमुद्याः सुखं प्रारम्भम् ।" इति तट्टीकायां मल्लिनाथः ।) उपायः । सन्धिविशेषः । (यथा, दशरूपके । १ । २९ ।
"मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा ।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥")
नाटकादेः शब्दः । इति मेदिनी । खे, ४ ॥
आद्यम् । (यथा, रामायणे । २ । ५० । ७ ।
"अवक्षुर्विषयं प्रायाद् यथार्कः क्षणदामुखे ॥")
प्रधानम् । (यथा, महाभारते । २ । ३८ । १७—२८ ।
"राज्ञां मुखं मनुष्याणां नदीनां सागरो मुखम् ।
नक्षत्राणां मुखं चन्द्र आदित्यस्तेजसां मुखम् ॥
पर्वतानां मुखं मेरुर्गरुडः पततां मुखम् ।
यदेवेषु लोकेषु भगवान् केशवो मुखम् ॥")
शब्दः । नाटकः । वेदः । इति शब्दरत्नावली ॥
(द्वारम् । यथा, रघुवंशे । ६ । २८ ।
"निपेयैयावद्मपश्यीन वाङ्मयं
गरीमुखेनेव समुद्रमाविशत् ॥"
"यथा मुखं द्वारम् । मुखन्तु वदने मुख्यारम्भे द्वाराभ्युपाययोरिति यादवः ।" इति तट्टीकायां मल्लिनाथः । अग्रभागः । यथा, हठयोगप्रदीपिकायाम् । ३ । ५ ।
"तस्मात् सर्व्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥")
मुख, पुं, चक्षुः । यथा,—
'अक्षणो विक्षणो हृत्तः खगवक्त्रो मुखो वक्षुः ।'
इति शब्दचन्द्रिका ॥
मुखगन्धकः, पुं, (मुखे गन्धः अस्मात् । कप् ।) पलाण्डुः । इति राजनिर्घण्टः ॥
मुखघण्टा, स्त्री, (मुखे घण्टेव शब्दसादृश्यात् ।) हुलहुलीध्वनिः । इति त्रिकाण्डशेषः ॥
मुखचौरी, स्त्री, (मुखस्य चौरं वस्त्रविशेष इव । मुखचौर+स्वार्थे ङीष् ।) जिह्वा । इति शब्दमाला ॥
मुखजः, पुं, (मुखात् जायते इति । जन्+डः ।) ब्राह्मणः । इति पुराणम् ॥ मुखजाते त्रि ॥
मुखतीयं, त्रि, (मुखस्य इति । मुख+तसिल् । तसन्तः । ततः "मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयप्रत्ययो वक्तव्यः ।" ४।२।१०। इत्यस्य वार्त्तिकोक्त्या ईयः । "मुखपार्श्वतसोर्लोपश्च ।" ४।२।१३८। इत्यत्र काशिकोक्तेश्च टिलोपः ।) मुखसम्बन्धि । इति सिद्धान्तकौमुदी ॥
मुखदूषकः, पुं, (मुखं दूष्यति अनेनेति । दुष्+णिच्+करणे ल्युट् ।) पलाण्डुः । इति राजनिर्घण्टः ॥
मुखदूषिका, स्त्री, (मुखं दूषयति विवर्णं करोतीति । दुष्+णिच्+ण्वुल् टाप् अत इत्वञ्च ।) मुखजातक्षुद्ररोगविशेषः । मेचेता इति भाषा । तल्लक्षणमाह ।
"शाल्मलीकण्टकप्रख्याः कफमारुतपित्तजाः ।
जायन्ते पिडका यूनां वक्त्रे या मुखदूषिकाः ॥"
प्रख्याः सदृश्यः । एता यूनामेव मुखे भवन्ति स्वभावात् ॥ * ॥ अथ तच्चिकित्सा ।
"अङ्गुलस्य चतुर्थांशो मुखे लेपः कनिष्ठकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति ।
शुष्कस्तु गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
मुखलेपमाह ।
"लोध्रधान्यवचालेपस्तारुण्यपिडकापहः ।
तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनम् ॥
सिद्धार्थकवचालोध्रैः सैन्धवेन प्रलेपनम् ।
वमनञ्च निहन्त्याशु पिडकां यौवनोद्भवाम् ॥
केवलाः पयसा पिष्टास्तीक्ष्णाः शाल्मलिकण्टकाः ।
आलिप्तं त्र्यहमेतेन भवेत् पद्मोपमं मुखम् ॥"
इति भावप्रकाशः ॥
मुखधावनं, क्ली, (मुखस्य धावनं । धावु गतिशुद्ध्योः +ल्युट् ।) आस्यप्रक्षालनम् । मुखधोया इति भाषा । यथा, भावप्रकाशे ।
"पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो मुखधावने ॥"
मुखधौता, स्त्री, (मुखं धौतं मार्ज्जितमनेनेति । धाव्+कर्म्मणि+क्तः स्त्रियां टाप् ।) ब्राह्मयष्टिका । इति शब्दचन्द्रिका ॥
मुखनिवासिनी, स्त्री, (मुखे निवसति या सा । नि+वस्+णिनिः स्त्रियां ङीप् । वाणीरूपत्वादस्यास्तथात्वम् ।) सरस्वती । इति केचित् ॥
मुखनिरीक्षकः, पुं, (मुखं निरीक्षते इति । निर्+ईक्ष्+ण्वुल् । उद्योगं विहायान्यमुखापेक्षितत्वेनावस्थानादस्य तथात्वम् ।) अलसः । इति शब्दरत्नावली ॥
मुखपूरणं, क्ली, (मुखं पूर्य्यते अनेनेति । पूर्+करणे ल्युट् ।) गण्डूषः । इति वैद्यकम् ॥
मुखप्रियः, पुं, (मुखस्य प्रियः ।) नारङ्गः । इति भावप्रकाशः ॥ मुखरोचके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"मुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशकः ।")
मुखभूषणं, क्ली, (मुखं भूषयति इत्यनेनालङ्करोतीति । भूष्+णिच्+ल्युः ।) ताम्बूलम् । इति वैद्यकम् ॥
मुखमण्डनकः, पुं, (मुखं मण्डयति भूषयतीति । मडि+ल्युः स्वार्थे कन् ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ आस्यभूषके, त्रि । (मुखमण्डनमप्यत्र ॥)
मुखमोदः, पुं, (मुखस्य मोदः हर्षः अस्मात् ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥
मुखयन्त्रणं, क्ली, (मुखं अश्वादीनां यन्त्रते सङ्कोच्यते येनेति पथि सङ्कोचने+करणे ल्युट् ।) कविका । यथा,—
"कवी खलीनं कविका कवियं मुखयन्त्रणम् ।"
इति हेमचन्द्रः । ४ । ३१६ ॥
मुखरः, त्रि, (मुखं अस्त्यस्येति । मुख+ऊष-सुषिमुष्कमधो रः ।" ५ । २ । १०७ । इत्यत्र "रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् ।" इति काशिकोक्त्या मत्वर्थीयत्वात् रः । "निन्दितं मुखमस्यास्तीति रः ।" इत्यमरटीका ।) अप्रियवादी । तत्पर्य्यायः । दुर्म्मुखः २ अबद्धमुखः ३ । इत्यमरः । ३ । १ । ३६ ॥ (यथा,—
"एका भार्य्या प्रकृतिमुखरा चञ्चला च द्वितीया ।"
इत्युद्भटः ॥
शब्दायमानः । यथा, मृच्छकटिकनाटके १ अङ्के ।
"त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं गन्धश्च भीरु ! मुखराणि च नूपुराणि ॥"
अग्रयायी । यथा, हितोपदेशे ।
"यदि कार्य्ये विपत्तिः स्यान्मुखरस्तत्र हन्यते ॥")
मुखरः, पुं, (मुख+रः ।) काकः । शङ्खः । इति राजनिर्घण्टः ॥
मुखरोगः, पुं, (मुखस्य रोगः ।) वक्त्रामयः । (यथा, मार्कण्डेये । १५ । ३५ ।
"पङ्ग्वन्धो बधिरः कुष्ठी यक्ष्मणा च प्रपीडितः ।
मुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥")
तत्र मुखस्य स्वरूपमाह ।
"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते ॥"
अथ मुखरोगाणां संख्यामाह ।
'स्युरष्टावोष्ठयोर्दन्तमूले तु दश षट् तथा ।
दन्तेष्वष्टौ रसनायां नव स्युर्नव तालुनि ॥
कण्ठे सप्तदश प्रोक्तास्त्रयः सर्व्वसराः स्मृताः ।
एवं मुखामयाः सर्व्वे सप्तषष्टिर्मता बुधैः ॥'
मुखरोगाणां निदानमाह ।
'आनूपपिशितक्षीरदधिमाषादिसेवनात् ।
मुखमध्ये गदान् कुर्य्युः क्रुद्धा दोषाः कफोत्तराः ॥'
तत्रोष्ठरोगाः ।
तेषां निदानपूर्व्विकां संख्यामाह ।
'पृथग्दोषैः समस्तैश्च रक्तेनो मांसमेदसा ।
मेदोभ्यामभिघातेन स्युरष्टावोष्ठजा गदाः ॥'
तत्र वातिकस्य लक्षणमाह ।
'कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥'
परुषौ रूक्षौ । दाल्येते विदार्य्येते । परिपाट्येते विविधदोषैर्व्यथां भिद्येते । पैत्तिकमाह ।
'चीयेते पिडकाभिस्तु सरुजाभिः समन्ततः ।
सदाहपाकपिडकौ पीताभासौ च पित्ततः ॥'
श्लैष्मिकमाह ।
'सवर्णाभिस्तु चीयेते पिडकाभिरवेदनौ ।
कण्डूमन्तौ कफाच्छूनौ पिच्छिलौ शीतलौ गुरू ॥'
सान्निपातिकमाह ।
'सकृत्कृष्णौ सकृत् पीतौ सकृच्छ्वेतौ तथैव च ।
सन्निपातेन विज्ञेयावनेकपिडकान्वितौ ॥

रक्तजमाह ।
'खर्जूरफलवर्णाभिः पिड़काभिर्निपीड़ितौ । रक्तोपसृष्टौ रुधिरं स्रवन्तौ शोणितप्रभौ ॥'
मांसजमाह ।
'मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुद्गतौ । जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात् ॥'
जन्तवः कृमयः । मूर्च्छन्ति वर्द्धन्ते । मुखादुभयतः सृक्कण्योः ॥ * ॥ मेदोजमाह ।
'सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू । अच्छस्फटिकसङ्काशमास्रावं स्रवतो भृशम् ॥'
अभिघातजमाह ।
'क्षतजाभौ विदीर्य्येते पाट्येते चाभिघाततः । ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥'
ग्रथितौ स्फुटिताविव । अतएव क्षतजाभौ रुधिराभाविति यावत् ॥ * ॥ अथौष्ठरोगाणां चिकित्सा ।
'मुखदन्तमूलदशनच्छदेषु रोगाः कफास्र-भूयिष्ठाः ।
तस्मादेतेष्वसकृद्रुधिरं विस्रावयेद्बहुलम् ॥
चतुर्विधेन स्वेदेन मधूच्छिष्टयुतेन च ।
वातजेऽभ्यञ्जनं कुर्य्यान्नाड़ीस्वेदञ्च बुद्धिमान् ॥'
चतुर्विधेन स्नेहेन तैलघृतवसामज्जरूपेण ।

वेधं शिराणां वमनं विरेकं
तिक्तस्य पानं रसभोजनञ्च ।
शीताः प्रदेहाः परिषेचनञ्च
पित्तोपसृष्टेष्वधरेषु कुर्य्यात् ॥

शिरोविरेचनं धूमः स्वेदः कवल एव च ।
हृते रक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मके ॥
मेदोजे स्वेदिते भिन्ने शोधिते ज्वलनो हितः ।
प्रियङ्गु त्रिफला लोध्रं सक्षौद्रं प्रतिसारणम् ॥'
प्रतिसारस्य विधिमाह ।
'दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहनैः ।
शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
ओष्ठरोगिषु सर्व्वेषु प्रकृत्या दोषमुपाचरेत् ।
तेषु प्रयत्नं मतिमान् यथावत् समुपाचरेत् ॥'
अथ दन्तवेष्टरोगाः । तत्र दन्तवेष्टरोगाणां नामानि संख्याश्चाह ।
'शीतादो गदितः पूर्व्वं दन्तपुप्पुटकस्तथा ।
दन्तवेष्टः शौषिरश्च महाशौषिर एव च ॥
ततः परिदरः प्रोक्तस्ततश्चोपकुशः स्मृतः ।
वैदर्भश्च ततः प्रोक्तः खलिवर्द्धन एव च ॥
अधिमांसकनामा च दन्तनाड्यश्च पञ्च च ।
दन्तविद्रधिरप्येवं दन्तवेष्टेषु षोड़श ॥'
तत्र शीतादस्य लक्षणमाह ।
'शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥'
दन्तवेष्टेभ्यः दन्तवेष्टनमांसेभ्यः । अकस्मात् अभिघातं विना शीर्य्यन्ते पतन्ति । पचन्ति च परस्परं पाकोद्भवानि मांसानि शोणितं पचन्ति शोणितं मांसानि पचति । दन्तपुप्पुटमाह ।
'दन्तयोस्त्रिषु वा यत्र श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥'
दन्तवेष्टमाह ।
'स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥'
अत्र दन्तान् वेष्टयतीति कर्त्तृपदमध्याहरणीयम् ।
शौषिरमाह ।
'श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः ।
लालास्रावी कण्डुरश्च विज्ञेयः शौषिरो गदः ॥'
महाशौषिरमाह ।
'दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
यस्मिन् स सर्व्वजो व्याधिर्महाशौषिरसंज्ञकः ॥'
तालु चाप्यवदीर्य्यते चकारात् दन्तवेष्टौ चाप्यवदीर्य्येते । सप्तरात्रात् मारकश्चायं यत आह भोजः । महाशौषिर एवैष सप्तरात्रात् निहन्त्यसून् ॥ * ॥ परिदरमाह ।
'दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥'
उपकुशमाह ।
'वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति हि ।
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनम् ॥
आध्मायते सुते रक्ते मुखं पूति च जायते ।
यस्मिन्नुपकुशः स स्यात् पित्तरक्तकृतो गदः ॥'
आघट्टिताः स्पृष्टाः ॥ * ॥ वैदर्भमाह ।
'घृष्टेषु दन्तमूलेषु संरम्भो जायते महान् ।
चलन्ति च रदा यस्मिन् स वैदर्भोऽभिघातजः ॥'
संरम्भः शोथः । चलन्ति चेति चकाराद्वेदना-दाहपाकाः ॥ * ॥ खलिवर्द्धनमाह ।
'मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ संजाते रुक् प्रशाम्यति ॥'
संजाते दन्ते ॥ * ॥ अधिमांसकमाह ।
'हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥'
हानव्ये हनुभवे पश्चिमे दन्ते ॥ * ॥ पञ्चदन्तनाड़ीराह ।
'दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ॥'
यथेरिता यथा नाड़ीव्रणे वातपित्तकफसन्निपातागन्तुनिमित्ताः पञ्च नाड्यः कथितास्तथात्रापीत्यर्थः ॥ * ॥ दन्तविद्रधिमाह ।
'दन्तमांसमलैः सास्रैर्बाह्यान्तःश्वयथुर्महान् ।
सदाहरुक् स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥'
दन्तमांसमलैः दन्तवेष्टगतदोषैः । सास्रैः सरक्तैः ॥ * ॥ अथ दन्तवेष्टरोगाणां चिकित्सा ।
'शीतादे हृतरक्ते तु तोये नागरसर्षपान् ।
निष्क्वाथ्य त्रिफलाञ्चापि कुर्य्याद्गण्डूषधारणम् ॥
'कासीसलोध्रकणामनःशिलाप्रियङ्गुतेजोह्वाः ।
एतैश्चूर्णं मधुयुक् शीतादे पूतिमांसहरम् ॥'
तेजोह्वा तेजबल इति लोके ।
'तैलं घृतं वा त्रिफलं शीतादे संप्रशस्यते ।' * ।
'दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ।
सपञ्चलवणः क्षारः सक्षौद्रः प्रतिसारणम् ॥
शिरोविरेकश्च हितो नस्यं स्निग्धञ्च भोजनम् ।
विस्राविते दन्तवेष्टे व्रणन्तु प्रतिसारयेत् ।
लोध्रपतङ्गमधुकलाक्षाचूर्णैर्मधूत्तरैः ॥'
प्रतिसारयेत् अङ्गुल्या घर्षयेत् । पतङ्गं पोयर्ज इति लोके ।
'गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ।
चलदन्तस्थैर्य्यकरं कार्य्यं बकुलचर्व्वणम् ॥
भद्रमुस्ताभयाव्योषविड़ङ्गारिष्टपल्लवैः ।
गोमूत्रपिष्टैर्गुटिकां छायाशुष्कां प्रकल्पयेत् ॥
तां विधाय मुखे शीर्णमूलदन्तातुरो नरः ।
नातःपरतरं किञ्चिच्चलदन्तस्य भेषजम् ॥'
भद्रमुस्तादिवटिका ।

'तुला घृतं नीलसहाचरस्य
द्रोणाम्भसा संश्रपयेद्यथावत् ।
तत्पादशेषेण रसेन तैलं
पचेत् स्नेहैर्द्विपलप्रमाणैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्ब्वाम्रयष्टीमधुकोत्पलानाम् ।
तत्तैलमास्ये च धृतं मुखेन
स्थैर्य्यं द्विजानां विदधाति सद्यः ॥'

नीलसहाचरः नीलपुष्पकाटरैया । अनन्ता दुरालभा तदभावे यवासो ग्राह्यः । अरिमेदो दुर्गन्धखदिरः । सहाचरादितैलम् ॥ * ॥
'शौषिरे हृतरक्ते तु लोध्रमुस्तारसाञ्जनैः ।
सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ॥
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः ।
संशोध्योभयतः कायं शिरश्चोपकुशे तथा ॥
काकोदुम्बरिकापत्रैर्मेयं विस्रावयेद्भिषक् ।
लवणैः क्षौद्रयुक्तैश्च सव्योषैः प्रतिसारयेत् ॥'
'शस्त्रेणोत्कृत्य वैदर्भे दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च शीतलाः ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत् ।
कृमिदन्तकवच्चात्र विधिः कार्य्यो विजानता ॥'
एवं खलिवर्द्धनस्य चिकित्सा ॥ * ॥
'छित्त्वाधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठासर्ज्जिकायावशूकजैः ॥'
तेजोवती तेजबल्कलं सर्ज्जिक्षारमिति च ।
'क्षौद्रद्वितीयाः पिप्पल्यः कवले चात्र कीर्त्तिताः ।
पटोलनिम्बत्रिफलाकषायश्चात्र धावने ॥' * ॥
'नाड़ीव्रणहरं कर्म्म दन्तनाड़ीषु कारयेत् ।
यद्दन्तमधि जायेत नाड़ी दन्तं तदुद्धरेत् ॥
छित्त्वा मांसानि शस्त्रेण यदि नोपरिगो भवेत् ।
उद्धृत्य च दहेच्चापि क्षारेण ज्वलनेन वा ॥
भिन्नमुपेक्षितो दन्तो हनुकास्थिगतं ध्रुवम् ।
समूलं दशनं तस्मादुद्धरेद्भग्नमस्थि च ॥
उद्धृते तूत्तरे दन्ते शोणितं प्रस्रवेदति ।
रक्तातियोगात् पूर्व्वोक्ता घोरा रोगा भवन्ति हि ॥
काणः संजायते जन्तुरर्द्दितं तस्य जायते ।
चलमप्युत्तरं दन्तमतो नैवोद्धरेद्भिषक् ॥
धावनं जातिमदनस्वादुकण्टकखादिरैः ।"
कषायैरिति शेषः ।
कषायैर्जातिमदनकटुका-स्वादुकण्टकैः ।

'मञ्जिष्ठालोध्रखदिरवट्याङ्कैश्चापि यत् छृतम्।
तैलं तत्साधितं तत्र हन्यात् दन्तगतां गतिम्॥'
आखादिचतुष्टयस्य कषायेण मञ्जिष्ठादिचतुष्टयस्य च कल्केन तैलमिदं पचेत्। जातिः चमेली इति लोके। तस्याः पत्रं ग्राह्यम्। मदनो मुकुरस्तस्यापि पत्रमत्र ग्राह्यम्। हस्ती हस्तिकटारं तस्याः फलं ग्राह्यम्। स्वादुकण्टको गोक्षुरः तस्य पञ्चाङ्गं ग्राह्यम्। आखादितैलम्॥ *॥
'विधियुक्तं विधिं युक्तं विदध्याद्दन्तविद्रधौ।
शस्त्रकर्म्म नरस्तत्र कुशलेनैव कारयेत्॥'*॥
अथ दन्तरोगाः। तत्र रोगाणां नामानि संख्याचाह।
'दालनः कथितः पूर्व्वं क्रमिदन्तक एव च।
मौलो भञ्जनको दन्तहर्षो वै दन्तशर्करा॥
कपालिका च कथिता श्यावदन्तक एव च।
करालश्च इत्यष्टौ दन्तरोगाः प्रकीर्त्तिताः॥'
तत्र दालनस्य लक्षणमाह।
'दीर्य्यमाणेष्विव रुजा यत्र दन्तेषु जायते।
दालनो नाम स व्याधिः सदागतिनिमित्तजः॥'
क्रमिदन्तकमाह।
'कृष्णच्छिद्रश्चलस्रावी ससंरम्भो महारुजः।
अनिमित्तरुजो वातात् स ज्ञेयः क्रमिदन्तकः॥'
ससंरम्भः दन्तमूलशोथयुक्तः। तत्रैव जातो शोथः। अनिमित्तरुजः अकस्मादिनिमित्तं विनैव महारुजावान्॥ *॥ भञ्जनकमाह।
'वक्त्रं वक्रं भवेद्यत्र दन्तभङ्गश्च जायते।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञकः॥'
दन्तहर्षमाह।
'शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः।
यत्र स्युर्वातपित्ताभ्यां दन्तहर्षः स कीर्त्तितः॥'
दन्तशर्करामाह।
'मलो दन्तगतो यस्तु कफवातानिलशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥'
शर्करा सिकता॥ *॥ कपालिकामाह।
'कपालेष्विव दीर्य्यत्सु दन्तेषु सततेषु च।
कपालिकेति विज्ञेया दन्तच्छित् दन्तशर्करा॥'
कपालानि मृत्तिकाघटादिघटकानि तेष्विव। सततेषु दन्तेषु सततच्छिद्रदन्तावयवेषु दीर्य्यत्सु या दन्तशर्करा सा कपालिकेति विज्ञेया। सा कपालिका दन्तच्छित् दन्तनाशिनी॥*॥ श्यावदन्तकमाह।
'योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः॥'
दग्धः दग्ध इव॥ *॥ करालमाह।
'शनैः शनैः प्रकुरुते यत्र दन्तान्वितोऽनिलः।
करालान् विकटान् दन्तान् स करालो न सिध्यति॥'
करालान् भयानकान्। अयं शस्त्रसाध्यः। संग्रहकारेण सहोक्तः॥*॥ अथ दन्तरोगाणां चिकित्सा।
'तैलं वातहरं चोरं दृपक प्रशमितं पचेत्।
नसाः पललमितैरेतैः काथयेदपि चतुर्गुणैः॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तैलं वदने धृतम्॥'
कट्फलस्थाने पतङ्ग इति च पाठः।
'दालनं दन्तचालञ्च दन्तमोर्षं कपालिकाम्।
शीतादं पूतिवक्त्रञ्च विरसं विरसास्यताम्।
हन्यादास्य गदानेतान् कुर्य्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥'
लाक्षाद्यतैलम्॥ *॥
'जयेत् विस्रावणैः स्विन्नमचलं क्रमिदन्तकम्।
तथावपीडैर्वातघ्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः।
क्रमिदन्तापहं कोष्णं हिङ्गु दन्तान्तरे स्थितम्॥
हस्तीभूमिकदम्बीपञ्चाङ्गुलकण्टकारिकाक्वाथः।
गण्डूषस्नेहयुतः क्रमिदन्तकवेदनाशमनः॥
नीलो वायसजङ्घा कटुतुम्बी फलमेकैकम्।
चर्व्वणं दशनविधृतं दशनक्रमिनाशनं प्राहुः॥
स्नेहानां कवलाः कोष्णाः सर्पिषश्चैतस्य च।
निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः॥'
स्नेहस्य सर्पिषः त्रिवृता पक्वस्य सर्पिषः कवल इत्यर्थः।
'स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च।
पेया रसा यवागूश्च क्षीरसन्तानिकाघृतम्॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः॥'
अथ दन्तहर्षे।
'अच्छिन्दन् दन्तमूलानि शर्करामुद्धरेद्भिषक्।
लाक्षाचूर्णैर्मधुयुतैस्ततस्तां प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका तत्क्षणतमा तत्राप्येषा क्रिया हिता॥'
अथ दन्तशर्करायाम्। एषा क्रिया दन्तहर्षक्रिया॥ *॥
'चलान्यन्यानि शीतानां हृत्वास्य दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत्॥'
अथ जिह्वारोगाः।
तत्र जिह्वारोगाणां निदानमामसंख्याः प्राह।
'वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः।
उपजिह्विका च सदा जिह्वायां पञ्च कीर्त्तिताः॥'
तत्र वातजस्य लक्षणमाह।
'जिह्वानिलेन स्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।'
स्फुटिता सञ्जातविदीर्णा। प्रसुप्ता स्पर्शानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मत्स्यभूमिजो वृक्षस्तद्वत् कण्टकाचिता॥ *॥ पित्तजमाह।
'पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपि कण्टकैश्च॥'
अयं रोगो लोके जली इति ख्यातः॥ *॥ कफजमाह।
'कफेन गुर्व्वी बहुला चिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाभैः॥'
बहुला स्थूला। मांसोच्छ्रयैः मांसवत्कण्टकैः॥ अलासमाह।
'जिह्वातले यः श्वयथुः प्रगाढः
सोऽलाससंज्ञः कफरक्तमूर्त्तिः।
जिह्वां स तु स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम्॥'
प्रगाढः प्रकर्षेण गाढो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः। भृशपाकेन पित्तञ्च। अतस्त्रिदोषोऽयमसाध्यश्चायम्॥*॥ उपजिह्विकामाह।
'जिह्वाग्ररूपः श्वयथुर्हि जिह्वा-
मुन्नाम्य जातः कफपित्तयोनिः।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति॥'
जिह्वाग्ररूपो जिह्वाग्राकृतिः॥ *॥ अथ जिह्वारोगाणां चिकित्सा।
'जिह्वागतविकाराणां प्रशस्तं शोणितमोक्षणम्।
गुडूचीपिप्पलीनिम्बकवलः कटुभिः सह॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम्।
कण्टकेष्वनिलोत्थेषु तत्कार्य्यं भिषजा खलु॥
पित्तजे परिघृष्टे तु निःसृते दुष्टशोणिते।
प्रतिसारणगण्डूषनस्यानि मधुरं हितम्॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये।
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥
व्योषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम्।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलञ्च पाचयेत्॥'
अथ तालुरोगाः। तत्र तालुरोगाणां नामानि संख्याचाह।
'गलशुण्डी तुण्डिकेरी च अध्रुष एव च।
तालुकच्छपः कथितो मांससंघात एव च॥
तालुपुप्पुटनामा च तालुशोषस्तथैव च।
तालुपाकश्च कथितास्तालुरोगा अमी नव॥'
तत्र गलशुण्डीलक्षणमाह।
'श्लेष्मासृग्भ्यां तालुमूलात् प्रवृद्धो
दीर्घः शोफो ध्मातवस्तिप्रकाशः।
तृष्णाकासश्वासकृत् तं वदन्ति
वैद्याः व्याधिं कण्ठशुण्डीति नाम्ना॥'
ध्मातवस्तिप्रकाशः वातपूरितचर्म्मपुटतुल्यः॥*॥ तुण्डिकेरीमाह।
'शोथः स्थूलस्तोददाहप्रपाकी
प्रागुक्ताभ्यां तुण्डिकेरी मता तु॥'
प्रागुक्ताभ्यां श्लेष्मासृग्भ्याम्। तुण्डिकेरी वनकार्पासीफलं तद्रूपत्वात्॥*॥ अध्रुषमाह।
'शोथस्तम्भो लोहितः शोणितोत्थो
ज्ञेयोऽध्रुषः सज्वरोऽथ रुक् च॥'
कच्छपमाह।
'कूर्म्मोन्नतो वेदनान्तोऽतिवक्ता
रोगो ज्ञेयः कच्छपः श्लेष्मणा स्यात्॥'
कूर्म्मोन्नतः कूर्म्मवत् उन्नतः॥ *॥ तालुपुप्पुटमाह।

'पद्माकारं तालुमध्ये तु शोथं
विद्याद्रक्तादर्बुदं पित्तलिङ्गम् ।'
पद्माकारं पद्मकर्णिकाकिञ्जल्कैरिव पार्श्वतो दीर्घ-
मांसाङ्कुरैर्वेष्टितम् ॥ * ॥ मांससंघातमाह ।
'दुष्टं मांसं श्लेष्मणा नीरुजञ्च
ताल्वन्तःस्थं मांससंघातमाहुः ।'
तालुपुप्पुटमाह ।
'नीरुक् स्थायी कोलमात्रः कफात्मा
मेदोयुक्तः पुप्पुटस्तालुदेशे ॥
तालुशोषमाह ।
'शोषोऽत्यर्थं दीर्य्यते चापि तालु
श्वासो वातात्तालुशोषोऽयमुक्तः ।'
तालुपाकमाह ।
'पित्तं कुर्य्यात् पाकमत्यर्थघोरं
तालुन्येनं तालुपाकं वदन्ति ॥'
अथ तालुरोगाणां चिकित्सा ।
'शुण्ठीयवक्षारायुक्तयापाटाम्बैः सह ।
तस्याद्रैर्भिषजा कार्य्यं गलशुण्डीप्रघर्षणम् ॥'
मव: कैवर्त्तीमोथा गुडूचसौ इति च लोके ।
'अङ्गुष्ठाङ्गुलिसन्दंशेनोत्क्षिप्य गलशुण्डिकाम् ।
छिन्द्यान्मण्डलाग्रेण जिह्वोपरि तु संस्थिताम् ॥'
मण्डलाग्रेण शस्त्रविशेषेण ।
'अतिच्छेदात् स्रवेद्रक्तं ततो हिंसोऽभिधीयते च ।
हीनच्छेदाद्भवेच्छोथो लालास्रावो भ्रम-
स्तथा ॥
तस्मात् वैद्यः प्रयत्नेन दृष्टकर्मा विशारदः ।
गलशुण्डीं तु संछिद्य कुर्य्यात् प्रासामिमां
क्रियाम् ॥
पिप्पल्यतिविषाकुष्ठवचामरिचनागरैः ।
क्षौद्रयुक्तैः ससर्षपैर्भावितैः प्रतिसारयेत् ॥
वचामतिविषापाठारास्नाकटुकरोहिणीः ।
निष्क्वाथ्य पिचुमर्द्दञ्च कवलं तत्र धारयेत् ॥
तुण्डिकेर्य्यध्रुषे कूर्म्मे संघाते तालुपुप्पुटे ।
एष एव विधिः कार्य्यो विशेषः शस्त्रकर्म्मणि ॥
तालुपाके तु कर्त्तव्यं विधानं पित्तनाशनम् ।
स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः ॥'
अथ गलरोगाः । तत्र गलरोगाणां नामानि
संख्याचाह ।
'रोहिण्यो पञ्चधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः ॥
ततो वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः ।
गलौघः स्वरघ्नश्च मांसतानस्तथैव च ॥
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥'
तत्र पञ्चानामपि रोहिणीनां सामान्यसम्प्राप्ति-
माह ।
'गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरयं हि रोहिणी ॥'
अनिलः मूर्च्छितः प्रवृद्धः । पित्तकफौ च
मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः ।
न तु त्रयोऽपि मूर्च्छिताः एकमूर्च्छया अपि-

पद्ममाग्लानात् ॥ * ॥ तस्य वातजाया लक्षण-
माह ।
'जिह्वामभितः प्रवृद्धास्तु
मांसाङ्कुराः कण्ठनिरोधिनः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता ॥'
समन्तात् जिह्वायाः सर्वतः । वातात्मकोपद्रव-
गाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता ॥ * ॥
पित्तजामाह ।
'क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ।'
श्लेष्मजामाह ।
'स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु ।'
स्रोतोऽत्र कण्ठस्रोतः ॥ * ॥ सन्निपातजामाह ।
'गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ।'
रक्तजामाह ।
'स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ।'
रक्तजेतरा पञ्चानामवधिमाह ।
'सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा ।
पञ्चाहात् पित्तसंभूता सप्ताहात् पवनोत्थिता ॥'
कण्ठशालूकमाह ।
'कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥'
कण्टकशूकभूतः कण्टकवच्छूकवच्च वेदनाजनकः ।
अधिजिह्वामाह ।
'जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादपि रक्तमिश्रात् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥'
आगता निष्पन्दैवाश्वयः ॥ * ॥ वलयमाह ।
'बलाश एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥'
अलासमाह ।
'गले तु शोथं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेतदाहु-
रलाससंज्ञं निपुणा विकारम् ॥'
मर्म्मच्छिदं हृदयमर्म्मणि छिद्रमिव वेदनाजनकम् ।
एकवृन्दमाह ।
'वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यमृदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्बलासक्षतजप्रसूतः ॥'
अन्तः गलमध्ये । अपाकी ईषत्पाकी । अमृदुः
ईषन्मृदुः ॥ * ॥ वृन्दमाह ।

'समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति ।
तच्चापि पित्तक्षतजप्रकोपाद्-
विद्यात् सतोदं पवनात्मकन्तु ॥'
शतघ्नीमाह ।
'वर्त्तिर्घना कण्ठनिरोधिनी तु
चितातिमात्रं पिशितं प्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीसदृशी शतघ्नी ॥'
घना कठिना । अनेकरुक् वातपित्तकफसमोद-
दाहकण्ड्वादियुक्ता । शतघ्नीसदृशी लौहकण्टक-
संछन्ना शतघ्नी प्रहरणी शिला तत्तुल्या यतः
प्राणहरी ॥ * ॥ गिलायुमाह ।'
'ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः ।
संलक्ष्यते सक्तमिवाशितञ्च
स शस्त्रसाध्यस्तु गिलायुसंज्ञः ॥'
गलविद्रधिमाह ।
'सर्व्वं गलं व्याप्य समुत्थितो यः
शोथो रुजः सन्ति च यत्र सर्व्वाः ।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य ॥'
गलौघमाह ।
'शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ ॥'
वायुगतेर्निहन्ता उदानवायुगतिरोधकः ॥ * ॥
स्वरघ्नमाह ।
'प्रताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥'
ताम्यमानस्तमः पश्यन् । शुष्कविमुक्तकण्ठः
शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः ।
अनिलायनेषु वायुवहेषु श्वसनात् वातात् ॥ * ॥
मांसतानमाह ।
'प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितोऽवलम्बी
प्राणप्रणुत् सर्व्वकृतो विकारः ॥'
प्रतानवान् विस्तारवान् । सुकष्टः अतिशयितं
कष्टं यस्य सः ॥ * ॥
विदारीमाह ।
'सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥'
पार्श्वे विशेषात् स तु येन शेते स दुष्टो येन
पार्श्वेन विशेषादाहुल्येन शेते तस्मिन् पार्श्वे सा
विदारी भवति इत्यर्थः ॥ * ॥

अथ गलरोगाणां चिकित्सा ।

'रोहिणीनान्तु साध्यानां हितं शोणितमोक्षणम् ।
छर्दनं धूमपानञ्च गण्डूषो नस्यकर्म्म च ॥
वातजान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
विस्राव्य पित्तसम्भूतां सिताक्षौद्रप्रियङ्गुभिः ।
घर्षयेत् कवलो द्राक्षापरूषैः क्वथितैर्हितः ॥
आगारधूमकटुकैः कफजां प्रतिसारयेत् ॥'
आगारधूमं झुल इति लोके । कटुकानि शुण्ठीपिप्पलीमरिचानि ।
'श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवले च कफोदये ॥'
श्वेता अपराजिता ।
'पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नं वा भुञ्जीत स्निग्धमल्पशः ।
उपजिह्विकवच्चापि साधयेदधिजिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ।
अमर्म्मस्थं सुसंपक्वं भेदयेत् गलविद्रधिम् ॥'
अथ सामान्यानां कण्ठरोगाणां चिकित्सा ।
'कण्ठरोगेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्सान्तु कुर्य्याच्चैव समाचरेत् ॥
क्वाथं दद्याच्च दार्व्वीत्वङ्निम्बताक्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा हितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठामुस्ताकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ॥
मरीचकटुकाचोचदार्व्वीत्वक्त्रिफलाघनम् ।
पाठा रसाञ्जनं दारु तेजोह्वेति सुचूर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगाश्चैते त्रयः प्रोक्ता वातपित्तकफापहाः ॥

यवाग्रजं तेजवतीञ्च पाठां
रसाञ्जनं दारु निशां सकृष्णाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेन् सर्व्वगलामयेषु ॥'

अथ सर्व्वसरमुखरोगाः । तत्र तेषां निदानं संख्याञ्चाह ।
'पृथग्दोषैस्त्रयो रोगाः समस्तमुखजाः स्मृताः ।'
तत्र वातिकस्य लक्षणमाह ।

"स्फोटैः सतोदैर्वदनं समन्तात्
यस्याचितं सर्व्वसरः स वातात् ॥*॥

पैत्तिकमाह ।

'रक्तैः सदाहैः पिडकैः सपीतै-
र्यस्याचितं चापि स पित्तकोपात् ॥'*॥

श्लैष्मिकमाह ।

'अवेदनैः कण्डुयुतैः सवर्णै-
र्यस्याचितं चापि स वै कफेन ।'

अवेदनैः वेदनारहितैः । यत उक्तं सुश्रुतेन । अल्पवेदनैरिति ।*। मुखरोगेष्वसाध्यानाह ।

'ओष्ठप्रकोपे वर्ज्याः स्युर्म्मांसरक्तत्रिदोषजाः ।
दन्तवेष्टेषु वर्ज्यौ तु त्रिलिङ्गगतिशौषिरौ ॥'
त्रिलिङ्गगतिः त्रिदोषजा नाडी । महाशौषिरश्च ।
'दन्तेषु च न सिध्यन्ति श्यावदालनभञ्जनाः ।
जिह्वारोगेष्वलासस्तु तालुष्वर्व्वुदं तथा ॥
स्वरघ्नो वलयो वृन्दो बलाशः स हि दारुणः ।
गलौघो मांसतानश्च शतघ्नी रोहिणी गले ॥
असाध्याः कीर्त्तिता ह्येते रोगा दश नवोत्तराः ।
तेषु चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥'
अथ समस्तमुखरोगाणां चिकित्सा ।
'वातात् सर्व्वसरं चूर्णैर्लवणैः प्रतिसारयेत् ।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः ॥*॥
पित्तात्मके सर्व्वसरे शुद्धकायस्य देहिनः ।
सर्व्वपित्तहरः कार्य्यो विधिर्मधुरशीतलः ॥*॥
प्रतिसारणगण्डूषधूमसंशोधनानि च ।
कफात्मके सर्व्वसरे क्रमं कुर्य्यात् कफापहम् ॥*॥
मुखपाके सिरावेधः शिरसश्च विरेचनम् ।
मधुमूत्रघृतक्षीरैः शीतैश्च कवलग्रहः ॥१॥
जातीपत्रामृताद्राक्षायासदार्व्वीफलत्रिकैः ।
क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत् ॥२॥
कार्य्यश्च बहुधा नित्यं जातीपत्रस्य चर्व्वणम् ।
लघ्वीरकशुण्ठीन्द्रयवचर्व्वणतस्तथा ।
मुखपाकव्रणक्लेददौर्गन्ध्यमुपशाम्यति ॥३॥
पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो मुखधावने ॥४॥
पञ्चपल्लवजः क्वाथस्त्रिफलायाश्च वाऽथवा ।
मुखपाके प्रयोक्तव्यः सक्षौद्रो मुखधावने ॥५॥
स्वरसः क्वथितो दार्व्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा ॥६॥

सप्तच्छदोशीरपटोलमुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥७॥'

राजद्रुमः धनवहेरा इति लोके ।
'तिलाः नीलोत्पलं सर्पिः शर्करा क्षीरमेव च ।
क्षौद्राढ्यदिग्धकल्कस्य गण्डूषो मुखपाकनुत् ॥८॥
आस्वादिता सकृदपि मुखगन्धं सकलमपनयति ।
लवङ्गपूगफलका पवनमसाध्यञ्च नाशयति ॥९॥
हरिद्रा निम्बपत्राणि मधुकं नीलमुत्पलम् ।
तैलमेभिर्विपक्वं मुखपाकहरं परम् ॥१०॥
यष्टीमधुपलमेकं पिष्ट्वा नीलोत्पलस्य तैलस्य ।
प्रस्थं तद्द्विगुणपयोविधिना पक्वं तु नस्येन ।
विधिसरजस्य सार्द्धं च्यवयति गात्रस्य दोषसंधानम् ।
कचरन्ध्रैर्व्वमयग्रं क्रमशोऽभ्यङ्गेन जम्बूनाम् ॥११॥
इति मुखरोगाधिकारः । इति भावप्रकाशः ।*।
अपि च ।
गण्डूषकगोक्षुरमूलं पीतं पयोऽन्वितम् ।
कामलादिहरं प्रोक्तं मुखरोगहरं तथा ॥१२॥
शुण्ठ्यगरुकशुण्ठीनां चारो हिङ्गुलनाशनम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ।
बाधिर्य्यं कर्णमूलञ्च पूयस्रावञ्च कर्णयोः ।
पूरणादस्य तैलस्य कृमयः कर्णयोः स्थिताः ॥
क्षिप्रं विनाशमायान्ति शशाङ्कतिलकेश्वर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥११॥"
इति गारुडे १८८।१९८ अध्यायौ ।
(तथाचास्य समस्तचिकित्सितम् ।

"मुखामये मारुतजे तु शोष-
कार्कश्यरौक्ष्याणि चलाचलञ्च ।
श्यावारुणं निम्नतनं सुशीतं
प्रसंसनस्पन्दनतोदभेदाः ॥
तृष्णाज्वरस्फोटकतालुदाह-
धूमायनञ्चाप्यवसीर्णता च ।
पित्तात् समूर्च्छा विविधाव्रणाश्च
वर्णाश्च शुक्लारुणवर्ज्जवर्ण्याः ॥
कण्डूर्गुरुत्वं सितविज्जलत्वं
स्नेहोऽरुचिर्जाड्यकफप्रसेकौ ।
उत्क्लेशमन्दानलता च तन्द्रा
रुजश्च मन्दाः कफवक्त्ररोगे ॥
सर्व्वाणि रूपाणि तु यत्र रोगे
भवन्ति यस्मिन् स तु सर्व्वजः स्यात् ।
संस्थानदूष्याकृतिनामभेदा-
श्चैते चतुःषष्टिविधा भवन्ति ॥
प्रागायतने विहितानि तेषां
निमित्तरूपाकृतिभेषजानि ।
यथाप्रदेशञ्च चतुर्व्विधस्य
क्रियां प्रवक्ष्यामि मुखामयस्य ।'

इति मुखरोगः ॥*॥

'मूलतिक्तकटुक्षौद्रकषायैः कवलग्रहः ।
धूमः प्रधमनं शुद्धिरधश्चोर्द्ध्वञ्च लङ्घनम् ॥
भोज्यञ्च मुखरोगेषु यथास्वन्दोषनुद्धितम् ।
पिप्पल्यगुरुदार्व्वीत्वग् यवक्षारो रसाञ्जनम् ॥
पाठा तेजोवती पथ्या समभागं सुचूर्णितम् ।
मुखरोगेषु सर्व्वेषु सक्षौद्रं तद्विधारयेत् ॥
गोधूमाश्वमाषोकैः स्नेहोऽयं कवलग्रहः ।
तेजोह्वाभयामेला समङ्गा कटुकं घनम् ।
पाठा ज्योतिष्मती लोध्रं दार्व्वी कुष्ठञ्च चूर्णयेत् ।
दन्तानां घर्षणञ्चैव शोणितस्रावनाशनम् ॥'
'यवधूमो यवक्षारपाठाव्योषं रसाञ्जनम् ।
तेजोह्वा त्रिफला लोध्रं चित्रकश्चेति चूर्णितम् ॥
सक्षौद्रं धारयेदेतत् गलरोगविनाशनम् ॥'
इति कालकचूर्णम् ।*।
मनःशिला यवक्षारो हरितालं ससैन्धवम् ।
दार्व्वीत्वक् चेति तत्कल्कं माक्षिकेण समायुतम् ॥
मूर्च्छितं घृतमण्डेन कण्ठरोगेषु धारयेत् ।
मुखरोगेषु च श्रेष्ठं पीतकं नाम कीर्त्तितम् ॥
इति पीतकचूर्णम् ।*।
'कटुकातिविषापाठा दार्व्वीमुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ।
स्वरसः क्वथितो दार्व्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा ।
सामुद्रोत्थ [illegible]

लावणं मधुरा: स्निग्धा: शीताश्चैव रसा हिता:।
सुखपाके शिराकर्म शिर:कायविरेचनम्।
स्नेहैस्तैलघृतक्षौद्रक्षीरैश्च कवलग्रह:॥
मसूरादाडिमफलापाठा मधूकाश्चातिपद्मका:।
कषायतिक्तका: शीता: कायाश्च सुखधावना:।
मुखे खदिरसारस्य त्रिगुणामदिमेदस:॥
प्रलाप्य जर्ज्जरीकृत्य चतुर्द्दीर्घिऽम्भस: पचेत्।
द्रोणशेषं कषायन्तं पुना भूय: पचेच्छनै:॥
मनसाभिन् घनीभूते चूर्णीकृत्यावभागिकम्।
चन्दनं पद्मकोशीरं मञ्जिष्ठा धातकी घनम्॥
प्रपुण्डरीकं यष्ट्याह्वत्वगेलापद्मकेशरम्।
लाक्षा रसाञ्जनं मांसी त्रिफला लोध्रवालकम्॥
रजन्यौ फलिनीमेला धमङ्गा कट्फलं वचाम्।
यवासमगुरुपत्रङ्गगैरिकाञ्जनमावपेत्॥
लवङ्गनखकक्कोलजातिकोशान् प्रलोडितान्।
कर्पूरकुडवयापि पुन:शीतेऽवतारिते॥
ततस्तु गुलिका: कार्य्या: शुष्का वक्त्रेण धार-
येत्।
तैलस्यानेन कल्केन कषायेण च साधयेत्।
दन्तानां चलनभ्रंशशौषिर्यक्रिमिरोगनुत्।
सुखपाकास्यदौर्गन्ध्यजाड्यारोचकनाशनम्॥
साध्योपजेपपैच्छिल्यवैरस्यंगलरोगहृत्।
दन्तास्यगलरोगेषु धर्म्मेणा तत्परायणम्॥"
इति खदिरादिगुटिकातैलञ्च॥ इति सुख-
रोगचिकित्सा॥ इति चरके चिकित्सास्थाने
२६ अध्याय:॥)

सुखलाङ्गल:, पुं, (सुखं लाङ्गलमिव भूविदारक-
मस्य।) शूकर:। इति जटाधर:॥

सुखवन्धनं, क्ली, (सुखं ग्रारम्भविषय: तस्य बन्धनं
संघटोऽत्र।) ग्रन्थारम्भे तत्र वक्तव्यकथनम्।
तस्य नामान्तरम्। अनुक्रमणिका। भूमिका।
इति छन्दोमञ्जर्य्यां सुखबन्धनाख्यप्रथमस्तवक:।
इति तद्ग्रन्थकर्त्तृगङ्गादासवैद्येन लिखितम्॥

सुखवल्लभ:, पुं, (सुखस्य वल्लभ: प्रीतिकर:।)
दाडिमवृक्ष:। इति शब्दमाला॥ सुखप्रिये, त्रि॥

सुखवासिका, स्त्री, (सुखं वासयति शोधयतीति।
वस्+णिच्+ण्वुल्+स्त्रियां टाप्। अत
इत्वं च।) अम्बष्ठा। इति राजनिर्घण्ट:॥

सुखवाद्यं, क्ली, (सुखेन वाद्यम्।) मङ्गलवाद्यम्।
धाक इति भाषा। इति त्रिकाण्डशेष:॥
सुखस्य मुखेन च वाद्यस्य। शिवपूजान्ते बम्
इति शब्देन गल्लवाद्यम्। यथा,—
"लिङ्गं निर्म्माय विधिवत् विधिवत् पूजयेच्च तम्।
मङ्गलं जपित्वा वै सुखवाद्यं शुचिस्मिते!॥"
इति लिङ्गार्च्चनतन्त्रे १५ पटल:॥
अपि च।
"सुखवाद्यं महत्त्वं च शृणु त्वं परमेश्वरि!।
गाल्लनामसुविहितं मुखवाद्यं सुदुर्लभम्।
अकारादिमकारान्तमनुलोमविलोमत:।
उच्चार्य्य परमेशानि! सुखवाद्यं शुचिस्मिते!।
आविष्ट: परमुच्चार्य्य पञ्चाशद्वर्णका प्रिये!।
अनुलोमविलोमेन सर्व्वत्र वरानने!।
अनेनैव विधानेन सुखवाद्यं करोति य:।
स शिव: स्वयम: सोऽपि स शिवो नात्र संशय:।
अनुग्रहोऽयं देवेशि! सुखवाद्यप्रसादत:॥
यस्मिन् काले महेशानि! असुरो बलवान् भवेत्।
तस्मिन् काले महेशानि! सुखवाद्यं करोम्यहम्॥
तत् श्रुत्वा परमेशानि! असुरा राक्षसाश्च ये।
पलायन्ते महेशानि! सत्यं सत्यं परमेश्वरि!॥
ये नरा भुवि तिष्ठन्ति सुखवाद्यं विना प्रिये!।
स धर्म्मयातनां भोगी अन्ते कुम्भीरतां व्रजेत्॥"
इति च लिङ्गार्च्चनतन्त्रे ८ पटल:॥

सुखवास:, पुं, (सुखस्य वास: सौरभ्यमस्मात्।)
गन्धद्रव्यम्। इति राजनिर्घण्ट:॥

सुखवासन:, पुं, (सुखं वासयतीति। वस्+
णिच्+ल्यु:।) सुखसुगन्धकारकद्रव्यम्। तत्-
पर्य्याय:। आमोदी २। इत्यमर:। ३।५।१२। के
सुखवासनवटिकादौ आमोदयुक्त: कर्पूरादि-
रामोदी स्यात्। सुखं वासयति सुखवासन:
गन्धादिलादन:। नानाद्रव्यरचित एकैकश्च
एव वा कर्पूरादिभिर्मुखोपयोग्यमुखवासनवटि-
रामोदीति स्मर्यते। शुभवासन इति पाठे
शुभं मनोहरं वासनं वासो यस्य कैश्चित् स
आमोदीत्याहुरिति सुभूति:। चोरस्वामिना तु
समाकर्षादिचतुष्टयेन इष्टगन्धादिचतुष्टयेन च
पर्य्यायद्वयमाख्यातम्। शब्दार्णवे तु।
"कस्तूरिकायामामोद: कर्पूरे सुखवासन:।
मङ्कुले स्यात् परिमलश्चम्पके सुरभिस्तथा।
गन्धा द्विपदिरप्येते युक्तियुक्तौ विलिप्तका॥"
इति भरत:॥

सुखविलुण्ठिका, स्त्री, (सुखेन विलुण्ठयतीति।
लुण्ठ+णिच्+ण्वुल्। स्त्रियां टाप्। अत इत्वं
च।) छागी। इति शब्दरत्नावली॥

सुखविष्ठा, स्त्री, (सुखे विष्ठा मलमस्या:।)
तैलपायिका। यथा,—
"वल्गुलिका सुखविष्ठा परोष्णी तैलपायिका।"
इति हेमचन्द्र:॥

सुखशफ:, पुं, (सुखं शफं खुर इव तीक्ष्णमस्य।)
दुर्मुख:। इति शब्दमाला॥

सुखशुद्धि:, स्त्री, (सुखस्य शुद्धि:।) सुखशोधनम्।
यथा, आह्निकतत्त्वे।
"अभावे दन्तकाष्ठानां प्रतिषिद्धदिने तथा।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"

सुखशोधनं, क्ली, (सुखस्य शोधनम्।) त्वचम्।
इति राजनिर्घण्ट:॥

सुखशोधन:, पुं, (सुखं शोधयत्यनेनेति। शुध्+णिच्
+करणे ल्युट्।) कटुरस:। इति हेमचन्द्र:॥

सुखशोधी, [न्] पुं, (सुखं शोधयतीति। शुध्+
णिच्+णिनि:।) जम्बीर:। इति राजनिर्घण्ट:॥
(गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्या:॥)

सुखशील:, त्रि, (सुखं शीलति निरस्यति विरसं
करोतीति भाव:। शील+इगुपधात् क:
इकोरणादित्वात् अस्य तत्त्वम्।) दुर्मुख:। इति
शब्दमाला॥

सुखसम्भव:, पुं, (सुखात् सम्भव उत्पत्तिरस्य।)
ब्राह्मण:। इति हेमचन्द्र:। ३। ४७८॥

सुखसुरं, क्ली, (सुखस्य सुरा इति "विभाषा
सेनासुराच्छायाशालानिशानाम्। २।४।२५।
इति षष्ठीसमासे सुराशब्दस्य क्लीवत्वम्।)
ताम्बूलरस:। इति त्रिकाण्डशेष:। ताड़ी इति
भाषा॥

सुखस्राव:, पुं, (सु स्रावि+घञ्। सुखात् स्राव:
पतनमस्य।) लाला। इति राजनिर्घण्ट:॥

सुखाग्नि:, पुं, (सुखं सुखोऽग्नि:।) दावाग्नि:।
यथा,—
"हिमकिलिद्दंपोषाय मराङ्क: स्वाहुवासन:।
सुखोल्का भूतधारी सुखाग्निर्भैरवस्वर:॥"
इति शब्दमाला।
प्रमथमुखे इत्यपि:। इति लोके। शाक्ते तु
शिर:स्थाने। यथा,—
"देवाद्यभिसुखा: सर्व्वे सुखोल्का तु कुता-
श्रनम्।
सुखोल्का पाथिना चैव मत्तमेलदुदीरयेत्॥
ज्वाला तु दुष्प्रहं कर्म्म जायता शाम्यभावता।
अनुकालवशं प्राप्य नरं पञ्चत्वमागतम्।
धर्म्माधर्म्मसमायुक्तं लोममोघमाहृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स
गच्छतु।
इत्युक्त्वा तत: कुर्य्यात् ज्वाला चैव प्रदक्षिणम्।
ज्वलमानं तथा वह्निं शिर: स्थाने प्रदापयेत्॥
चातुर्वर्ण्येषु संस्थानमेवं भवति पुत्रिके!॥"
इति शुद्धितत्त्वम्॥

सुखामय:, पुं, (सुखस्यामय:।) सुखरोग:। इति
राजनिर्घण्ट:॥

सुखार्द्धक:, पुं, अर्कक:। इति राजनिर्घण्ट:॥

सुखाख्य: पुं, (सुखं आख्यमिवास्य।) कर्कट:।
इति त्रिकाण्डशेष:॥

सुखोल्का, स्त्री, (सुखं उल्केव यस्या:।) दावा-
नल:। इति शब्दमाला॥

सुख्य:, पुं, प्रथम: कल्प:। इत्यमर:। ३।४।१॥
यागादिषु शास्त्रोक्त: प्रथम: कल्पो सुख्य:
स्यात्। यथा, व्रीहिभिर्यजेतेत्यादिना अनुकल-
ल्पात् सुखमिव सुख्य: विकारदर्शनादिना
इत्यर्थे य:। इति तट्टीकायां भरत:॥

सुख्य:, त्रि, श्रेष्ठ:। इत्यमर:। ३।१।५७॥
(तथास्य पर्य्याय:।
"प्रधानमुत्तमं श्रेष्ठं श्रेष्ठं सुख्यमनुत्तमम्।
वरं वरेण्यं प्रमुखं पराद्ध्यं प्रवरमपि।"
इति वैद्यकरत्नमालायाम्॥
यथा, मालती। ४। ७६। ६५।
"सुख्यानामपरिहार्य्यताप्यवहरवी॥")

सुख्यसर्ग:, पुं, (सुख्यानां सर्ग इति।) स्थावर-
सृष्टि:। यथा,—
"सुख्यसर्गश्चतुर्थस्तु सुख्या वै स्थावरा: स्मृता:।"
इति मार्कण्डेयपुराणम्॥

सुगूढ:, पुं, शाकुनपक्षी। इति भूरिप्रयोग:॥

मुग्धः, त्रि, (मुह+कर्त्तरि क्तः।) मूढः। (यथा, ऋग्वेदे। ५। ४०। ५।
"अक्षेत्रविद् यथा मुग्धो भुवनान्यदीधयुः॥")
सुन्दरः। इति विश्वः॥ (यथा, मेघदूते। ६७।
"हन्तोदृगाद्भुतकिरणं सुधयस्य मुग्धसिद्धाङ्गनाभिः॥")

मुग्धबोधं, क्ली, (मुग्धः सुन्दरः बोधः ज्ञानं पदपदार्थानां यस्मात्। यद्वा, मुग्धान् मूढान् अल्पबुद्धीन् जनान् बोधयतीति। मुग्धबोधम्। इति दुर्गादासः। मुग्ध+बुध्+"कर्म्मण्यण्। ३। २। १। इति अण्।) वोपदेवकृतव्याकरणविशेषः। यथास्यादिश्लोकः।
"मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।
मुग्धबोधं व्याकरणं परोपकृतये मया॥"

मुग्धा, स्त्री, (मुग्ध+टाप्।) नायिकाविशेषः। (सा च नायिका स्वीयापरकीयाभेदेन द्विविधा।) तत्र स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तत्राङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा। सैव जातप्रश्रया विश्रब्धनवोढ़ा। अस्याश्चेष्टा क्रिया मनोहरा। कोपे मार्द्दवं नवविभूषणे समीहा च॥ मुग्धा यथा।
"व्यापार्य किल कामदेवचरणोपाक्षेन न्यासे शुभे वस्तु वास्तुविधिं विधास्यति सखी लावण्यमेणीदृशः।
दृष्टा खञ्जनचातुरी सुखरुचा सौधाकरी माधुरी
वाचा किञ्च सुधासमुद्रलहरी लावण्यमामज्जते॥"०॥
अज्ञातयौवना यथा,—
"नीरानीरसमागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः
श्रोणे स्वमिदं किमुत्पथमिति ज्ञातुं करं न्यस्यति।
पैशाकाङ्कुरशङ्कया श्वसितसखी रोमावलीं प्रोञ्छति
माताग्रीति मुहुः सखीमविदितश्रोणीभरा पृच्छति॥"
ज्ञातयौवना यथा,—
"स्वयम्भूः शम्भुरम्भोजलोचने त्वत्पयोधरः।
नखेन कस्य धन्यस्य चन्द्रचूड़ो भविष्यति॥"
नवोढ़ा यथा,—
"दृष्टे घतापि शयने विनिवेशितापि
क्रोड़े कृतापि यतते बहिरेव गन्तुम्।
जानीमहे नवनवधूरेव तस्य वश्या
यः पारदं स्थिरयितुं क्षमते करेण॥"
द्वितीया यथा,—
"बलान्नीता पार्श्वं मुखमभिमुखं नैव कुरुते
धुनाना मङ्गानि क्षिपति वदनं चुम्बनविधौ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च॥"
विश्रब्धनवोढ़ा यथा,—
"दरमुकुलितनेत्रपालिनीवी-
नियमितबाहुलतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढ़ा
स्वपिति समीपमुपेत्य कस्य यूनः॥"
इति रसमञ्जरी॥

मुच ङ ड } कल्कने। दम्भे। शाठ्ये। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) द्वौ पञ्चमस्वरिणौ। ङ मुचते। ड मुचते ड मोचते। इति दुर्गादासः॥

मुच ऌ श य भ औ मोक्षे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-बन्धनरहितीभावे अक०-अनिट्।) मोचस्त्यागः। ऌ अमुचत्। श य भ मुञ्चति मुञ्चते धनं दाता। बन्धनरहितीभावे अकर्म्मकोऽयम्। आलानान्मुक्तो गजः कर्त्तरि क्तः। एवं पापान्मुक्त इत्यादौ पापबन्धनान्मुक्त इत्यर्थः। इति दुर्गादासः॥

मुच क मोक्षे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मोचयति। मोचस्त्यागः। इति दुर्गादासः॥

मुचिरः, त्रि, (मुञ्चति धनादिकं ददातीति। मुच्+"इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचीति।" उणा० १। ५२। इति किरच्।) दाता। इति त्रिकाण्डशेषः॥

मुचिरः, पुं, (मुच्+किरच्।) धर्म्मः। वायुः। देवता। इति संक्षिप्तसारोणादिवृत्तिः॥

मुचुकुन्दः, पुं, (मुच्+बाहुलकात् कुः। मुचुः कुन्द इवेति। राजदन्तादित्वात् पूर्व्वनिपातः।) पुष्पवृक्षविशेषः। मेकचन्द इति हिन्दी भाषा। (यथा, राजेन्द्रकर्णपूरे। १०।
"आनन्दं मुचुकुन्दकन्दलि! भज त्वय्यापि वासन्तिके!।")
तत्पर्य्यायः। छत्रवृक्षः २ चित्रकः ३ प्रतिविष्णुकः ४। इति भावप्रकाशः॥ बहुपुष्पः ५ सुदलः ६ हरिवल्लभः ७ सुपुष्पः ८ अर्घार्हः ९ लक्षणकः १० रक्तप्रसवः ११। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफवातनाशित्वम्। कोषकण्डूकरत्वम्। त्वग्दोषशोफशमनत्वम्। कोष्ठकण्ठरवविनाशनत्वञ्च। इति राजनिर्घण्टः॥ शिरःपीड़ापित्तास्रविषनाशित्वम्। इति भावप्रकाशः॥०॥ मान्धातृराजपुत्रः। इति श्रीभागवतम्। ९। ७। ३८।
(यथा च देवीभागवते। ७। १०। ४।
"तस्यासनृपात्मयामास मान्धाता द्वौ सुतौ नृप!।
पुरुकुत्सं सुविख्यातं मुचुकुन्दं तथापरम्॥")

मुचुटी, स्त्री, अङ्गुलिमोटनम्। आङ्गुलमट्काण इति भाषा। यथा,—
"मुचुटी छुटकी चैव भवेदङ्गुलिमोटने।"
इति शब्दरत्नावली॥
मुष्टिः। मुठा इति भाषा। यथा,—
"दन्ताघ्नितां बुधः।याकिर्मुष्टिर्मुष्टौ तु मुचुटिः।"
इति हेमचन्द्रः। ३। २६६॥

मुज इ क } शब्दार्थयोः। इति कविकल्पद्रुमः॥ मुज क } (चुरा०-पर०-भावने सक०-अन्यत्र अक०-सेट्।) द्वौ पञ्चमस्वरिणौ। इ क मुञ्जयति। क मोजयति। इति दुर्गादासः।

मुञ्चकः, पुं, (मुचिर+ण्वुल्।) मुष्ककवृक्षः। इति राजनिर्घण्टः॥

मुञ्जः, पुं, (मुञ्जते मृज्यते अनेन। मुज+करणे अच्।) तृणविशेषः। मूँज इति भाषा॥ (यथा, पञ्चदश्याम्। १। ४२।
"यथा मुञ्जादिषीकैवमात्मा युक्त्या समुद्धृतः।
शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते॥")
तत्पर्य्यायः। मौञ्जीतृणाख्यः २ ब्रह्मण्यः ३ तेजनाह्वयः ४ वाणीरकः ५ मुञ्जनकः ६ शरी ७ दर्भाह्वयः ८ दूरमूलः ९ दृढ़तृणः १० दृढ़मूलः ११ बहुप्रजः १२ रञ्जनः १३ शतुभङ्गः १४। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। कफपित्तदोषनाशित्वम्। भ्रमदाहदोषास्रु च पावनत्वम्। भूतनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेधसः।
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा॥
दाहतृष्णाविसर्पास्रमूत्रबस्त्यक्षिरोगजित्।
दोषत्रयहरं वृष्यं मेखलास्वपयुज्यते॥"
इति भावप्रकाशः॥
शरः। इति रत्नमाला। उपनयनकाले मुञ्जमेखलाधारणविधिर्यथा। अथैवं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं त्रिवृतं मुञ्जमेखलां परिधापयन् मन्त्रद्वयं पाठयति। इति भवदेवभट्टः॥

मुञ्जकेशी, [न्] पुं, (मुञ्जा इव केशाः यस्य। इनिः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥

मुञ्जरं, क्ली, (मुञ्जाति प्रचाल्यते इति। मुञ्ज+बाहुलकात् अरन्।) शालूकम्। इति शब्दमाला॥

मुञ्जातकः, पुं, (मुञ्जं अतति तत्तुल्याकारं प्राप्नोतीति। अत+अच्। ततः स्वार्थे कन्।) दुग्धशाकभेदः। अस्य गुणाः। गुरु स्वादुत्वम्, वृष्यत्वम्। पित्तानिलापहत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"हलिकवंशुप्रानकलायमञ्जप्रभृतीनि।")

मुट इ मर्द्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ मुण्टति। मर्द्दो मर्द्दनम्। इति दुर्गादासः॥

मुट कि चूर्णे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-अक०-सेट्।) चूर्णं चूर्णीकरणे। कि मोटयति लड्डुकं शिशुः। मोटति मोटयति लडुकं इत्यन्ये॥

मुट शि आक्षेपे च। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मर्द्दनादिः। शि मुटति अङ्गानि मूर्खः। चकारात् चूर्णे च। मुटति शिलां दृषं च इति चतुर्भुजः। इति दुर्गादासः॥

मुठ इ ङ पलायने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-पालने सक०-सेट्।) पवर्गशेषादिः। पञ्चमस्वरी। इ मुण्ठ्यते। ङ मुण्ठते चौरः। इति दुर्गादासः॥

मुड इ छिदि। मर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ मुण्ड्यते। छिदिरिह लोमच्छेद एव। मुण्डति मुखं नापितः। लोमरहितं करोतीत्यर्थः। इति दुर्गादासः॥

मुड इ ङ मर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) पवर्गशेषादिः। पञ्चमस्वरी। मथमिति मन्थधातोः क्ते रूपं मन्थनमित्यर्थः। इ मुण्ड्यते। ङ मुण्डते प्रस्तरो जले। चतुर्भुजस्तु मार्जने इति पठित्वा मार्जनं शुद्धिरिति व्याख्याय मुण्डते जलेन गात्रं लोक इत्युदाहृतवान्। इति दुर्गादासः॥

मुण प्र प्रतिज्ञाने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) प्र मुणति सतं लोकः। प्रतिजानातीत्यर्थः। मोणिता। इति दुर्गादासः॥

मुण्डं, क्ली, (मुण्ड्यन्ते उप्यन्ते केशा यस्मात् यद्वा, मुणति मज्जतीति। मुड+अच्।) शिरः। इति नपुंसकलिङ्गसंग्रहे अमरः।३।५।३४॥ (यथा, मोहमुद्गरे। १५।

"अङ्गं गलितं पलितं मुण्डं
दशनविहीनं जातं तुण्डम्।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डम्॥"

उपनिषद्विशेषः। तद्यथा,—
"ईशाकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरि।
छान्दोग्यं बृहदारण्यमैतरेयं तथा दश॥")
बोलम्। मुण्डायसम्। इति राजनिर्घण्टः॥

मुण्डः, पुं, (मुण्डनं मुण्डः केशापनयनं मुडि खण्डने भावे घञ्। ततः अर्श आद्यच् इत्यमरटीकायां रायभरतौ।) बलिराजस्य सैनिकदैत्यविशेषः॥ (यथा, हरिवंशे भविष्यपर्वणि। २१२। ५।
"एकाक्ष एकपान्मुण्डो विदुरश्चतुर्भुजः।"
शुम्भसेनापतिदैत्यभेदः। यथा, मार्कण्डेयपुराणे। ८७। १८।
"हे चण्ड! हे मुण्ड! बलैर्बहुभिः परिवारितौ।")
मुण्डमेवाप्यस्त्येनास्त्यस्य। अच्।) राहुग्रहः। इति मेदिनी। डे, २२॥ (मुण्डं मुण्डनं जीविकात्वेनास्त्यस्य। अच्।) नापितः। इति जटाधरः। (मुण्डनं स्कन्धावच्छेदे स्कन्धम-स्त्यस्य। अच्।) स्थाणुरूपः। इति केचित्॥

मुण्डः, पुं, क्ली, (मुण्ड+अच्।) षड्डी। इति मेदिनी। डे, २२॥

मुण्डः, त्रि, मुण्डितः। इत्यमरः।२।६।४८॥ द्वे मुण्डितमस्तके। मुडि खण्डने भावे घञि मुण्डो मुण्डनं केशापनयनं तद्योगात् अर्शआद्यच्। मुण्डः पुमान् स्त्रियां मुण्डा। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १।११९।८।
'चरन् भैक्षं मुनिर्मुण्डश्चरिष्यामि महीमिमाम्॥')

मुण्डकं, क्ली, (मुण्डमेवेति मुण्ड+स्वार्थे कन्।) मस्तकम्॥ (उपनिषद्विशेषश्च॥)

मुण्डकः, पुं, (मुण्डयतीति। मुडि+ण्वुल्।) नापितः। इति हेमचन्द्रः। ३। ५६०॥

मुण्डचणकः, पुं, (मुण्डित इव चणकः।) कलायः। इति राजनिर्घण्टः॥

मुण्डनं, क्ली, (मुण्ड+ल्युट्।) केशच्छेदनम्। तत्पर्यायः। भद्राकरणम् २ वपनम् ३ परिवापनम् ४ क्षौरम् ५। इति हेमचन्द्रः।३।५८०॥ (यथा, महाभारते। १२। २१। ४६।
"आतुरस्य हितं मार्गं मया धर्मोऽयमुत्तमः।
एवं एव हि राजेन्द्र! धर्मधर्मौ न मुण्डनम्॥")

मुण्डफलः, पुं, (मुण्डवत् फलमस्य।) नारिकेल-वृक्षः। यथा,—
"तथा मुण्डफलञ्चापि किमामिश्रकपित्थोऽपि च।"
इति शब्दरत्नावली॥

मुण्डशालिः, पुं, (मुण्डो मुण्डित इव शालिः।) शालिभेदः। तत्पर्यायः। शूकलकः २ निःशूकः ३ अशूकः ४। अस्य गुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। बलप्रदत्वम्। रुचिकारित्वम्। दीपनत्वम्। पथ्यत्वम्। सुख-प्रदत्वञ्च। इति राजनिर्घण्टः॥

मुण्डा, स्त्री, (मुण्ड+स्त्रियां टाप्।) मुण्डीरिका। इति मेदिनी। डे, २२॥ मुण्डिता स्त्री। इत्यमरटीकायां भरतः॥

मुण्डाख्या, स्त्री, (मुण्डेत्याख्यास्याः।) महाश्रावणिका। इति राजनिर्घण्टः॥

मुण्डायसं, क्ली, (मुण्डञ्च तत् अयश्चेति। मुण्ड+अयस्+"अनोऽश्मायःसरसां जातिसंज्ञयोः।" ५।४।९४। इति टच्।) लौहम्। इति राजनिर्घण्टः॥

मुण्डितं, क्ली, (मुण्ड्यते खण्ड्यते इति। मुडि खण्डने+कर्मणि क्तः।) लौहम्। इति राजनिर्घण्टः॥ नापितमुण्डे, त्रि। इत्यमरः।३।१।८२॥

मुण्डितिका, स्त्री, (मुण्डित+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) वृक्षविशेषः। मुण्डीरी इति भाषा। तत्पर्यायः। अलम्बुषा २ श्रावणी ३ पलङ्कषा ४ कदम्बपुष्पा ५ अव्यथा ६ भूतघ्नी ७ कुम्भला ८ अरुणा ९। इति रत्नमाला॥

मुण्डी, [न्] पुं, (मुण्डयति केशान् वपति इति। मुण्ड+णिनिः।) नापितः। इत्यमरः। २। १०। १०॥ (योगाचार्यविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। ७। १०। ५—६॥
'महाकालश्च शूली च दण्डी मुण्डी तथैव च।'
इत्यादावारभ्य।
'अष्टाविंशतिसंख्याता योगाचार्या युगक्रमात्।'
सम्पादितकेशच्छेदनः। यथा, महाभारते।१३। १४। १०१।
"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखली-कृतः॥")

मुण्डीरिका, स्त्री, (मुडि+बाहुलकात् ईरन्। स्त्रियां ङीष् स्वार्थे कन्। स्त्रियां टाप् "केऽणः।" ७।४।१३। इति पूर्वस्य ह्रस्वः।) मुण्डितिका। इति जटाधरः॥

मुत्, स्त्री, (मोदतेऽनया इति। मुद्+क्विप्।) हरिद्रामौषधम्। इति राजनिर्घण्टः॥

मुत्, [द्] स्त्री, (मोदनमिति। मुद्+भावे क्विप्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, रघुवंशे। ३। २५।
"उवाच धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः॥")

मुद क संसर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मोदयति घृतेनान्नं लोकः। इति दुर्गादासः॥

मुद शि ङ हर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) [illegible]। शि मुदितोऽस्ति। ङ मोदते धनी। इति दुर्गादासः॥

मुदा, स्त्री, (मुद्+भावे अः ततष्टाप्।) हर्षः। यथा। ससभासान्वयुर्मुदा। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ११६। १०।
"तं मखं क्रियमाणं तु मणिभित्तौ भूषणा।
तत्पार्श्ववर्त्तिनी कन्या शुश्रावाथ मुदा-वती॥")

मुदितः, त्रि, (मुद्+क्तः। यद्वा, मुदा अस्य जाता। मुदा+इतच्।) आनन्दितः। यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥"
इति शुद्धितत्त्वम्॥
आलिङ्गनविशेषः। तस्य लक्षणं यथा। नायिकया नायकस्य वामपार्श्वे उपविश्य वामपादं तस्योरुद्वयमध्ये स्थापयित्वा उभौ मिलित्वा यदवस्थानम्। इति कामशास्त्रम्॥

मुदिता, स्त्री, (मोदते इति मुद्+सर्वधातुभ्य इन् संज्ञापूर्वकविधेरनित्यत्वात् गुणाभावः। मुदिः तस्य भावः इति तल्+टाप्।) मुदा। हर्षः। इत्यमरटीकायां मथुरेशः॥ (यथा, पातञ्जलसूत्रम्। १। ३३।
"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥")

मुदिरः, पुं, (मोदन्ते अनेन प्रजा इति। मुद्+"इषिमदिमुदीति।" उणा० १। ५१। इति किरच्।) मेघः। इत्यमरः।१।३।७॥ (यथा,— गीतगोविन्दे। १। १।
"प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिर-सुवेशम्॥")
कामुकः। इति मेदिनी। रे, २०५। भेकः। इति संक्षिप्तसारोणादिवृत्तिः॥

मुद्गः, पुं, (मोदते अनेन इति । मुद्+"मुदिग्रो-र्गग्गौ ।" उणा० १ । १२७ । इति गक् ।) पक्षिविशेषः । तत्पर्य्यायः । जलवायसः २ । इति हेमचन्द्रः । ४ । ४१८ ॥ शमीधान्यभेदः । मुग इति भाषा । (यथा, मनुः । ६ । ३६ ।
"मौद्गः प्राचयो मुद्गाशिलामायाजया यवाः ।")
तत्पर्य्यायः । सूपश्रेष्ठः २ वर्णार्हः ३ रसोत्तमः ४ भुक्तिप्रदः ५ हयानन्दः ६ सुफलः ७ वाजिभोजनः ८ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । कफपित्तास्रजित्त्वम् । लघुत्वम् । ग्राहित्वम् । शीतत्वम् । पाके कटुत्वम् । चक्षुष्यत्वम् । नातिवातलत्वञ्च । तद्यूषगुणाः । पित्तभ्रमार्त्तिशमनत्वम् । लघुत्वम् । सन्तापहारित्वम् । शरीरकनाशित्वम् । सतुषेऽप्ययुक्तश्चेत् रक्तप्रसादनत्वम् । सर्व्वदाहापहारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । रूक्षत्वम् । लाघुत्वम् । अल्पानिलत्वम् । ज्वरघ्नत्वञ्च । इति भावप्रकाशः ॥०॥ वनमुद्गगुणाः ।
"मुकुष्टः शीतलो ग्राही कफपित्तज्वरापहः ॥"
तद्विशेषा यथा, राजवल्लभे ।
"प्रधाना हरितास्तत्र वन्यमुद्गास्तु मुद्गवत् ।
कृष्णमुद्गा महामुद्गा गौरा हरितपीतकाः ।
श्वेता रक्ताश्च निर्द्दिष्टा लघवः पूर्व्वपूर्व्ववत् ॥"
मुद्गपर्णी, स्त्री, (मुद्गस्येव पर्णान्यस्याः मुद्गपर्ण+ जातौ ङीष् ।) वनमुद्गः । मुगानी इति भाषा । तत्पर्य्यायः । काकमुद्गा २ सहा ३ । इत्यमरः । क्षुद्रसहा ४ शिम्बी ५ मार्ज्जारगन्धिका ६ वनजा ७ रिङ्गिणी ८ कृष्णा ९ सर्पपर्णी १० कुरङ्गिका ११ कोशिका १२ वनोद्भवा १३ वनमुद्गा १४ आरण्यमुद्गा १५ मन्या १६ । कुरङ्गिकास्थाने कारङ्गिका इति च पाठः । अस्या गुणाः । हिमत्वम् । कासवातरक्तक्षयपित्तदाहज्वरनाशित्वम् । चक्षुष्यत्वम् । शुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । यथा, भावप्रकाशे ।
"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिकापि च ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ॥
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वाद्वी च शुक्रला ।
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
शोथघ्नी ग्रहणीनाशी वातपित्तार्शोऽतिसारहृत् ॥"
मुद्गभुक्, [ज्] पुं, (मुद्गं भुङ्क्ते इति । भुज्+ क्विप् ।) घोटकः । इति जटाधरः ॥
मुद्गभोजी, [न्] पुं, (मुद्गं भुङ्क्ते इति । भुज्+ णिनिः ।) अश्वः । इति राजनिर्घण्टः ॥
मुद्गमोदकः, पुं, (मुद्गेन साधितो मोदकः ।) मोदकविशेषः । मतिचुर इति भाषा । यथा,—
"मुद्गानां धूमसीं सम्यग्घोलयेन्निर्म्मलाम्बुना ।
कटाहस्थघृतस्योर्द्धे झाझँरं स्थापयेत्ततः ॥
धूमसीन्तु द्रवीभूतां प्रक्षिपेत् झाझँरोपरि ।
पतन्ति बिन्दवस्तस्मात् सुपक्वान् तानुद्धरेत् ।
सितापाकेन संयोज्य कुर्य्यात् हस्तेन मोदकान् ॥"
अस्य गुणाः । यथा, भावप्रकाशे ।
"लघुर्मोदो त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ।
चक्षुष्यो ज्वरहृत् बल्यस्तर्पणो मुद्गमोदकः ॥"
मुद्गरं, क्ली, (मुदं आनन्दं गिरति विकिरतीति । गॄ +अच् ।) मल्लिकाभेदः । लोष्टादिभेदने, पुं । इति मेदिनी । रे, २०४ । (यथा, महाभारते । १ । २११ । ३ ।
"गदापट्टिशधारिण्या शूलमुद्गरहस्तया ।
प्रस्थितौ सहधर्म्मिण्या महत्या दैत्यसेनया ॥")
मुद्गरः, पुं, (मुद्+गॄ+अच् ।) कर्म्मारद्रव्यः । पुष्पवृक्षविशेषः । तत्पर्य्यायः । गन्धसारः २ सप्तपत्रः ३ अतिगन्धः ४ गन्धराजः ५ चिटप्रियः ६ प्रियः ७ जनेष्टः ८ स्फोटः ९ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । सुरभित्वम् । सौख्यदायकत्वम् । मनोज्ञकारित्वम् । मधुपानन्दकारित्वम् । पित्तप्रकोपनाशित्वञ्च । इति राजनिर्घण्टः ॥ ॥ अस्त्रविशेषः । मुगुर इति भाषा । तत्पर्य्यायः । द्रुघणः २ घनः ३ । इत्यमरः ॥ द्रुघनः ४ । इति भरतः ॥ प्रघणः ५ । इति जटाधरः ॥ मुद्गरः कोरकाक्षयोः । इति हेमचन्द्रः ॥ (यथा, रघौ । १२ । ७३ ।
"मादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ॥")
मुद्गरकः, पुं, (मुद्गरमिवेति प्रतिकृतौ कन् ।) कर्म्मारः । इति राजनिर्घण्टः । कामराङ्गा इति भाषा ॥
मुद्गलं, क्ली, रोहिषतृणम् । इति राजनिर्घण्टः ॥
मुद्गलः, पुं, हर्य्यश्वराजपुत्त्रः । यथा,—
"मुद्गलः सृञ्जयः बृहदिषुः यवीनरः काम्पिल्यश्च पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्त्रा/ इति पित्राभिहिता इति पञ्चालाः । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (मुद्गं लातीति । ला+कः । इत्युज्ज्वलदत्तः ।) गोत्रकारकमुनिविशेषः । तस्य भार्य्या इन्द्रसेना । इति पुराणम् ॥ (उपनिषद्विशेषः ।)
मुद्गष्टः, पुं, वनमुद्गः । इति शब्दरत्नावली ॥
मुद्गष्टकः, पुं, (मुद्गष्ट+स्वार्थे कन् ।) वनमुद्गः । इत्यमरः । २ । ९ । १७ ॥
मुद्गार्द्रवटः, पुं, (मुद्गेनार्द्रः वटः ।) वटकविशेषः । आदावड़ा इति भाषा । यथा,—
"मुद्गपिष्टीविरचितान् वटकांस्तैलपाचितान् ।
हस्तेन चूर्णयेत् सम्यक् तक्रांपूर्णे विनिक्षिपेत् ।
आर्द्रं हिङ्ग्वार्द्रकं सम्यक् मरिचं जीरकं तथा ।
निम्बूरसं यथायोग्यं युक्त्या सर्व्वं विमिश्रयेत् ॥
मुद्गपिष्टीं पचेत् सम्यक् स्थाल्यामङ्गारकोपरि ।
तस्याश्च गोलकं कुर्य्यात्तत्रार्द्रं पूरयं क्षिपेत् ॥
तैलै तान् गोलकान् पक्वा कथितायां निमज्जयेत् ।
गोलकाः पाचकैः प्रोक्ताः आर्द्रवटा अपि ॥"
अस्य गुणाः । यथा, भावप्रकाशे ।
"मुद्गार्द्रवटा रुच्या लघवो बलकारकाः ।
दीपनास्तर्पकाः पथ्याश्चिदोषेऽप्रशस्यकाः ॥"
मुद्रा, स्त्री, (मोदते अनयेति । मुद्+"स्फायितञ्चीत्यादि ।" उणा० २ । १३ । इति रक् ततः टाप् ।) प्रत्ययकारिणी । इति त्रिकाण्डशेषः । नामेर मोहर इति भाषा । अङ्गुलिमुद्रा । इति शब्दरत्नावली । छापेर आङ्गटी इति भाषा । अक्षरादिमुद्रिका च । (यथा, अभिज्ञानशाकुन्तले । २ ।
"इमां मुद्रां त्वदङ्गुलौ निवेशयता मया ।"
चिह्नम् । यथा, श्रीमद्भागवते । ६ । २४ । १७ ।
"ज्ञानविज्ञानयोगेन कर्म्मणामुद्धरन् जटाः ।
हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥")
मोहर टाका इत्यादि भाषा । इति लोकप्रसिद्धिः ॥०॥ पञ्चधातुमयमार्गेतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—
"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्यांप्रा धरिणी शुभदा चर ! ।"
इति वाराहीतन्त्रम् ॥
"लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं नार्म्मेव सर्व्वदा ॥"
इति खड्गमालातन्त्रम् ॥०॥
पञ्चमकारान्तर्गततद्द्रव्यविशेषः । यथा,—
"पृथुकास्तण्डुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! मुद्रा मुक्तिप्रदायिनी ॥"
इति निर्व्वाणतन्त्रे ११ पटलः ॥
तस्याः शोधनं यथा,—
"ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् । ॐ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदम् ।
इति मन्त्राभ्यां शोधनम् । इति भूततन्त्रम् ॥
शरीरे शङ्खपद्मचक्रगदाद्यादिचिह्नम् । छाप इति भाषा । यथा,—
"ततो नारायणीं मुद्रां धारयेत् प्रीतये हरेः ।
मत्स्यकूर्म्मादिचिह्नानि चक्राद्यान्यायुधानि च ॥
अथ मुद्राधारणनियता स्मृतौ ।
"अङ्कितः शङ्खचक्राभ्यामुभयोर्बाहुमूलयोः ।
समर्च्चयेद्धरिं नित्यं नान्यथा पूजनं भवेत् ॥"
आदिपुराणे ।
"शङ्खचक्रोर्द्ध्वपुण्ड्रादिरहितं ब्राह्मणाधमम् ।
गर्द्दभं तु समारोप्य राजा राष्ट्रात् प्रवासयेत् ॥"
गारुडे श्रीभगवदुक्तौ ।
"सर्व्वकर्म्माधिकारश्च शुचीनामेव चोदितः ।
शुचित्वञ्च विजानीयान्मदीयायुधधारणात् ॥"
इति पाद्मे चोत्तरखण्डे ।
"शङ्खचक्रादिभिश्चिह्नैर्विप्रः प्रियतमैर्हरेः ।
रहितः सर्व्वधर्म्मेभ्यः प्रच्युतो नरकं व्रजेत् ॥"
श्रुतौ च यजुःकठशाखायाम् ।
"यतोऽहमङ्ग हृतचक्रधारी
विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं
परात्परं यन्महतो महान्तम् ।"

अधर्म्मेऽपि च ।

'एभिर्म्मयस्त्वत्प्रभवस्य चिह्नै-
रङ्किता लोके सुभगा भवेम ।'

तद्विष्णोः परमं पदं ये गच्छन्ति लाञ्छिताः ।
इत्यादि ।

अन्यत्र ब्रह्मपुराणे ।
'शङ्खायुधाङ्कितं दृष्ट्वा सम्मानं न करोति यः ।
द्वादशाब्दार्ज्जितं पुण्यमपहाय विगच्छति ।'*।
अथ मुद्राधारणमाहात्म्यम् ।
स्कान्दे श्रीसनत्कुमारमार्कण्डेयसम्वादे ।
'यो विष्णुभक्तो विप्रेन्द्र ! शङ्खचक्रादिचिह्नितः ।
स याति विष्णुलोकं वै दाहप्रलयवर्ज्जितम् ।'
तत्रैवान्यत्र ।
'नारायणायुधैर्नित्यं चिह्नितं यस्य विग्रहम् ।
पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥
शङ्खोद्धारे तु यत् प्रोक्तं वसतां वर्षकोटिभिः ।
तत् फलं लिखिते शङ्खे प्रत्यहं दक्षिणे भुजे ॥
यत् फलं पुष्करे नित्यं पुण्डरीकाक्षदर्शने ।
शङ्खोपरिस्तने मर्त्त्यस्तत् फलं समवाप्नुयात् ॥
वामे भुजे गदा यस्य लिखिता दृश्यते कलौ ।
गदाधरो गयापुण्यं प्रत्यहं तस्य यच्छति ॥
यच्चामरपुरे प्रोक्तं चक्रस्वामिसमीपतः ।
गदाधो लिखिते चक्रे तत् फलं ह्यब्जदर्शने ॥'
श्रीभगवदुक्तौ च ।
'यः पुनः कलिकाले तु मत्पुरीसम्भवां मृदम् ।
मत्स्यकूर्म्मादिकं चिह्नं यन्नीत्वा कुरुते नरः ॥
देहे तस्य प्रविष्टोऽहं जानन्तु त्रिदशोत्तमाः ।
तस्य मे नान्तरं किञ्चित् कर्त्तव्यं नेह दृश्यते ॥
मत्स्यावतारचिह्नानि दृश्यन्ते यस्य विग्रहे ।
मर्त्त्यैर्मर्त्त्यो न विज्ञेयः स नूनं मामकी तनुः ॥
पापं कृतयुगस्यान्तु नाशयेत् तस्य देहिनः ।
मदायुधानि यस्याङ्गे लिखितानि कलौ युगे ॥
उभाभ्यामपि चिह्नाभ्यां योऽङ्कितो मत्कृप-
सुदया ।
कूर्म्मेणापि सकं तेजो निहितं तस्य विग्रहे ॥

शङ्खश्च पद्मश्च गदा रथाङ्गं
मत्स्यश्च कूर्म्मो रचितं स्वदेहे ।
करोति नित्यं सुकृतस्य वृद्धिं
पापक्षयं जन्मशतार्ज्जितस्य ॥'

तत्रैव श्रीब्रह्मनारदसम्वादे ।
'शङ्खचक्राङ्कनचर्म्म सुभैर्यं देवदानवैः ।
अक्षय्यं सर्व्वभूतानां सुरूपा रक्षसामपि ॥
लक्ष्मीः सरस्वती दुर्गा सावित्री हरवल्लभा ।
नित्यं तस्य वसेद्देहे यस्य शङ्खाङ्किता तनुः ॥
गङ्गा गया कुरुक्षेत्रं प्रयागं पुष्करादि च ।
नित्यं तस्य सदा तिष्ठेद्यस्य पद्माङ्कितं वपुः ॥
यस्य कौमोदकीचिह्नं भुजे वाम कलिप्रिय ! ।
प्रत्यहं तत्र हृष्टो ब्रह्माद्यामरसत्तमः ॥
यस्य करे गदाचक्रारथाङ्गं तिष्ठति यदि ।
तस्यैव रक्षितं तत्र त्रैलोक्यं सचराचरम् ॥
अथोऽप्यनन्यगो देवा विलोक्योऽपि यदापि च ।
निवसन्ति सदा तस्य यस्य देहे सुदर्शनम् ॥'

किञ्च ।
'शङ्खायुधाङ्किता मुद्रा यस्य नारायणी करे ।
शङ्खलोकाधिकारी च स स्वर्य्याच्छशी पतिः ॥
शङ्खमुद्राप्रयुक्तस्तु देये पित्र्ये करोति यः ।
नित्यं नैमित्तिकं काम्यं प्रत्यक्षाचार्य्य भवेत् ॥
पीयूषमिव न तत्रैव यद्धा कण्ठाचि राघवः ।
अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी करे ॥'
नारदे श्रीसनत्कुमारोक्तौ ।
'शङ्खायुधाङ्कितं देहं गोपीचन्दनमृत्स्नया ।
प्रयागादिषु तीर्थेषु न गत्वा किं करिष्यति ॥
यदा यस्य प्रपश्येत देहं शङ्खादिचिह्नितम् ।
तदा तदा जगत्स्वामी तुष्टो हरति पातकम् ॥
भवते यस्य देहे तु अहोरात्रं दिने दिने ।
शङ्खचक्रगदापद्मं लिखितं सोऽच्युतः स्वयम् ॥
नारायणायुधैर्युक्तं शङ्खाभावं कलौ युगे ।
कुरुते पुण्यकर्म्माणि मेरुतुल्यानि तस्य वै ॥
शङ्खादिनाङ्कितो भक्त्या श्राद्धं यः कुरुते द्विजः ।
विधिहीनमपि संपूर्णं पितॄणान्तु गयासमम् ॥
यथाग्निर्दहते कक्षं वायुना प्रेरितो भृशम् ।
तथा दहन्ति पापानि दृष्ट्वा शङ्खायुधानि वै ॥'
पाद्मे श्रीब्रह्मनारदसम्वादे ।
'विष्णुनामाङ्कितां मुद्रां अष्टाक्षरसमन्विताम् ।
शङ्खादिकायुधैर्युक्तां स्वर्णरूप्यमयीमपि ॥
धत्ते भागवतो यस्तु कलिकाले विशेषतः ।
मत्प्रादस्य समो धीयो नान्यथा कलिवल्लभ ! ॥'
किञ्च ।
'शङ्खाङ्कितनुर्विप्रो भुङ्क्ते यस्य च वेश्मनि ।
तदन्नं स्वयमश्नाति पितृभिः सह केशवः ॥
शङ्खायुधाङ्कितो यस्तु श्मशाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद ! ॥
शङ्खायुधैः कलौ नित्यं मण्डितं यस्य विग्रहम् ।
तमाश्रयं प्रकुर्व्वन्ति विबुधा वासवादयः ॥
यः करोति हरेः पूजां शङ्खचक्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः ॥
कृत्वा काष्ठमयं बिम्बं शङ्खचक्रैस्तु चिह्नितम् ।
यो दहयति चात्मानं तत्समो नास्ति वैष्णवः ॥
पापकल्पितप्रायैर्माक्षिशालामपातकैः ।
न लिप्यते कलिकृतैः शङ्खचक्राङ्कितो नरः ॥
किञ्च ।
'अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी भवेत् ।
शङ्खपद्मादिभिर्युक्ता पूज्यतेऽसौ सुरासुरैः ॥
धृता नारायणी मुद्रा प्रह्लादेन पुरा यतः ।
विभीषणेन बलिना ध्रुवेण च शुकेन च ॥
मान्धात्राम्बरीषेण मार्कण्डप्रमुखैर्द्विजैः ।
शङ्खादिचिह्नितैः शङ्खैर्देवं तथा कलिप्रिय ! ।
आराध्य केशवात् प्राप्तं समीहितफलं महत् ॥'
किञ्च ।
'गोपीचन्दनमृत्स्नाया लिखितं यस्य विग्रहे ।
शङ्खपद्मादिचक्रं वा तस्य देहे वसेद्धरिः ॥'
तत्रैव श्रीसनत्कुमारोक्तौ ।
'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्निता ।
धात्रीफलतुला माला तुलसीकाष्ठसम्भवा ॥

द्वादशाक्षरमन्त्रैस्तु नियुक्तानि कलेवरे ।
आयुधानि च विप्रस्य सत्तमः स च वैष्णवः ॥'
किञ्च ।
'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्निता ।
सर्व्वाङ्गं चिह्नितं यस्य शङ्खैर्नारायणोद्भवैः ॥
मयेषो नास्ति मायस्य कवचं तस्य वैष्णवम् ।'
अन्यच्च ।
'हरिभागवतैश्चिह्नैः कलिकाले द्विजातयः ।
भवन्ति मर्त्त्यलोके ते प्रायादुपसकारकाः ।'*।
अथ मुद्राधारणविधिः । गौतमीये ।
"ललाटे च गदा कार्य्या मूर्द्ध्नि चापः शरस्तथा ।
नन्दकञ्चैव हृन्मध्ये शङ्खचक्रं भुजद्वये ॥
शङ्खचक्राङ्कितो विप्रः श्मशाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम ! ॥
चक्रञ्च दक्षिणे बाहौ शङ्खं वामेऽपि दक्षिणे ।
गदां वामे गदाधस्तात् पुनश्चक्रञ्च धारयेत् ॥
शङ्खोपरि तथा पद्मं पुनः पद्मञ्च दक्षिणे ।
खड्गं वक्षसि चापञ्च शरं शिरसि धारयेत् ॥
इति पञ्चायुधान्यादौ धारयेद्वैष्णवो जनः ।
मत्स्यञ्च दक्षिणे हस्ते कूर्म्मं वामकरे तथा ॥'
तथा चोक्तम् ।
'दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ।
सव्ये चैवापरेऽथ शङ्खं कूर्म्मं गदां तथा ॥
साम्प्रदायिकशिष्टानामाचाराच्च यथारुचि ।
शङ्खचक्रादिचिह्नानि सर्व्वाङ्गेषु धारयेत् ॥
भक्त्या निवेदितान्यस्य धारयेत्तत्पदान्यपि ।
चक्राङ्कौ च धार्य्येते संनिधावेव केशव ॥'
यत उक्तं ब्रह्मवैवर्त्ते ।
'केवलं बोदरे चक्रमाद्यौ चातुरवियकम् ।
अलचक्रविमिश्रं तं बिभृयाद्वैष्णवः सदा ॥
श्रीगोपीचन्दनेनैवं चक्रादीनि बुधोऽन्वहम् ।
धारयेच्छयनादौ तु तप्तानि किल तानि हि ॥'
अथ चक्रादीनां लक्षणानि ।
'द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
चक्रं स्याद्दक्षिणावर्त्तः शङ्खस्तु दीर्घकः स्मृतः ॥
गदापद्मादिकं लोकसिद्धमेव मतं बुधैः ।
मुद्रा च भगवन्नामाङ्किता चाष्टाक्षरादिभिः ॥'
इति श्रीहरिभक्तिविलासः ॥*॥
अपि च ।
'यथा मुद्रा शीतलाख्या तथा तप्ता न संशयः ।
तत्तयोः शीतलायाश्च विशेषो नैव वर्त्तते ॥
नामचिह्नादिना देहे चिह्नितो वा नराधमः ।
या दीक्षा प्रोच्यते भूप ! बाह्यतो नाधिका
मता ॥
वैष्णवैर्विष्णुभक्तैश्च माध्वैर्वेदपारगैः ।
यस्मात्तैर्धृतिका मुद्रा गोपीचन्दनसंयुता ॥'
इति नारदपञ्चरात्रम् ।
'शङ्खनामादिभिर्मन्त्रैश्चन्दनादिना ।
स लोकपावनो भूत्वा विष्णुलोकमवाप्नुयात् ॥
अङ्कितेन च चक्रेण शङ्खो बाहुमूलयोः ।
अङ्कयित्वा सर्व्वकर्म संसारान्मोक्षमाप्नुयात् ॥'
इति पद्मपुराणम् ।

'तप्राया चाहृतं सर्व्वं वसनं भाजनादिकम् ।'
इति हारीतस्मृतिः ॥ ७ ॥
देवताविशेषप्रीतिजनिकाङ्गुलिरचना । यथा,
मुद्राप्रयत्नमिमाह तन्त्रे ।
'मोदनात् सर्व्वदेवानां द्रावणात् पापसन्ततेः ।
तस्मान्मुद्रेति सा ख्याता सर्व्वकामार्थसाधनी ॥
अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु कल्पिताः ।
याभिर्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥
अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि ।
स्नाने चावाहने शङ्खे प्रतिष्ठायाञ्च रक्षणे ॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्राः प्रदष्टव्याः स्वस्वलक्षणलक्षिताः ॥
आवाहनादिका मुद्रा नव साधारणा मताः ।
तथा षडङ्गमुद्राश्च सर्व्वमन्त्रेषु योजयेत् ॥
शङ्खोर्व्विश्मिर्म्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥
वनमाला तथा ज्ञानमुद्रा विल्वाख्यया तथा ।
गरुडाख्या परा मुद्रा विष्णोः सन्तोषवर्द्धिनी ॥
नारसिंही च वाराही हायग्रीवी धनुस्तथा ।
वाणमुद्रा ततः परशुर्जगन्मोहनिका परा ॥
काममुद्रा पराख्याता शिवस्य दश मुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्यामालेष्टाभीमृगाह्वयाः ।
खट्वाङ्गञ्च कपालाख्या डमरुः शिवतोषदाः ॥
सर्व्वस्यैव पद्माख्या सप्तमुद्रा गणेशितुः ।
दन्तपाशाङ्कुशा विघ्नपरशुलड्डुकसंज्ञिताः ।
बीजपूराह्वया मुद्रा विज्ञेया विघ्नपूजने ॥
पाशाङ्कुशवराभीतिखड्गचर्म्मधनुःशराः ।
मौषली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ॥
लक्ष्मीपूजार्थने लक्ष्मा वाग्वादिन्याश्च पूजने ।
अक्षमाला तथा वीणाव्याख्यापुस्तकमुद्रिकाः ॥
सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने ।
मत्स्यमुद्रा च कूर्म्माख्या लेलिहा मुण्डसंज्ञिका ॥
महायोनिरिति ख्याता सर्व्वसिद्धिप्रदायिका ।
प्रत्यर्च्चने महायोनिः श्यामादौ मुण्डमुद्रिका ॥
मत्स्यकूर्म्मलेलिहाख्या मुद्रा साधारणी मता ।
तारार्च्चने विशेषात्तु कथ्यन्ते पञ्च मुद्रिकाः ॥
योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी ।
लेलिहानेति संप्रोक्ताः पञ्चमुद्राः प्रकाशिताः ॥
दशधा मुद्रिका ज्ञेया त्रिपुरायाः प्रपूजने ।
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ।
खेचरी बीजयोन्याख्या त्रिखण्डा परिकीर्त्तिताः ॥
कुम्भमुद्राभिषेके स्यात् पद्ममुद्रासने तथा ।
कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ॥
गालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि ।
श्रीमीनार्च्चने वेणुं वरेणार्पित्रसंज्ञिका ॥
वराहस्य च पूजायां वाराहाख्यां प्रयोजयेत् ।
हयग्रीवार्च्चने चैव हायग्रीवीं प्रदर्शयेत् ॥
रामार्च्चने धनुर्बाणमुद्रे परशुरामार्च्चने ।
परशुरामस्य विज्ञेया जगन्मोहनसंज्ञिका ॥
वासुदेवाख्यया ध्याने कुम्भमुद्रा तु दर्शयेत् ।
सर्व्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥ ८ ॥
एतेषां लक्षणमाह तन्त्रसारे ।

हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्व्वणोः ।
अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता ॥ १ ॥
अधोमुखी त्वियं चेत् स्यात् स्थापनी मुद्रिका स्मृता ॥ २ ॥
उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात् सन्निधापनी ॥ ३ ॥
अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधनी मता ॥ ४ ॥
उत्तानमुष्टियुगला संमुखीकरणी मता ॥ ५ ॥
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः ॥ ६ ॥
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता ॥ ७ ॥
अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः ।
तथैव तर्ज्जनी मध्या धेनुमुद्रा प्रकीर्त्तिता ॥
अमृतीकरणं कुर्य्यात्तया साधकसत्तमः ॥ ८ ॥
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुली ।
महामुद्रेयमुदिता परमीकरणे बुधैः ।
प्रयोजयेदिमा मुद्रा देवताह्वानकर्म्मणि ॥ ९ ॥
वैष्णवीनान्तु मुद्राणां कथ्यन्ते लक्षणान्यथ ।
वामाङ्गुष्ठन्तु संगृह्य दक्षिणेन तु मुष्टिना ॥
कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ।
वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः ॥
दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका ॥ १ ॥
हस्तौ तु संमुखौ कृत्वा सम्नतप्रोथिताङ्गुली ।
तलान्तर्मिलिताङ्गुष्ठौ सुभुग्नौ सुप्रसारितौ ।
कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका ॥ २ ॥
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली ।
अङ्गुल्यौ मध्यमे भूयः संलग्ने सुप्रसारिते ।
गदा मुद्रेयमुदिता विष्णोः सन्तोषवर्द्धिनी ॥ ३ ॥
हस्तौ तु संमुखौ कृत्वा सम्नतप्रोथिताङ्गुली ।
तलान्तर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका ॥ ४ ॥
ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ।
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ।
तर्ज्जनीमध्यमानामाः किञ्चित् संकुच्य चालिताः ।
वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः ॥ ५ ॥
अन्योन्यपृष्ठकरयोर्मध्यमानामिकाङ्गुली ।
अङ्गुष्ठेन तु बध्नीयात् कनिष्ठामूलसंस्थिते ।
तर्ज्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका ॥ ६ ॥
अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका ।
कनिष्ठयान्यया बद्धा तर्ज्जन्या दक्षया तथा ॥
वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके ।
अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः पराः ॥
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका ॥ ७ ॥
स्पृशेत् कण्ठादिपादान्तं तर्ज्जन्याङ्गुष्ठया तथा ।
करद्वयेन मालावत् मुद्रेयं वनमालिका ॥ ८ ॥
तर्ज्जन्यङ्गुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् ।
वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी ॥ ९ ॥
अङ्गुष्ठं वाममुद्दण्डितमितरकराङ्गुष्ठकेनापि बद्धा
तस्याग्रं पीडयित्वाङ्गुलिभिरपि च ता वाम-
हस्ताङ्गुलीभिः ।
बद्धा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्
मारबीजं

विल्वाख्या मुद्रिकैषा स्फुटमिह गदिता गोप-
नीया विधिज्ञैः ॥ १० ॥
हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके ।
मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥
मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत् ।
एषा गरुडमुद्रा स्याद्विष्णोः सन्तोषवर्द्धिनी ॥ ११ ॥
जानुमध्ये करौ कृत्वा चिबुकौष्ठौ समावुभौ ।
हस्तौ तु भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥
मुखं विवृतकं कुर्य्यात् लेलिहानाञ्च जिह्विकाम् ।
नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्द्धिनी ॥'
अथवा ।
'अङ्गुष्ठाभ्यान्तु करयोस्तथाक्रम्य कनिष्ठिके ।
अधोमुखीभिः सर्व्वाभिर्मुद्रेयं नृहरेर्मता ॥ १२ ॥
देवोपरि करं वामं कृत्वोत्तानमधः सुधीः ।
भ्रमयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥'
यद्वा ।
'दक्षहस्तस्योर्द्ध्वमुखं वामहस्तमधोमुखम् ।
अङ्गुल्यग्रन्तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥ १३ ॥
वामहस्ततले दद्यादङ्गुलीस्तास्वधोमुखीः ।
संरोध्य मध्यमां तासामन्याभिर्विकुञ्चयेत् ॥
हयग्रीवप्रिया मुद्रा तन्मूर्त्तेरनुकारिणी ॥ १४ ॥
वामस्य मध्यमाग्रन्तु तर्ज्जन्यग्रेण योजयेत् ।
अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीडयेत् ।
दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमीरिता ॥ १५ ॥
दक्षमुष्टेस्तु तर्ज्जन्या दीर्घया बाणमुद्रिका ॥' १६ ॥
यद्वा शारदायाम् ।
'यथा हस्तगतं चापं तथा हस्तं कुरु प्रिये ! ।
चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ॥ १७ ॥
यथा हस्तगता वाणास्तथा हस्तं कुरु प्रिये ! ।
वाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥ १८ ॥
तले तलन्तु करयोस्तिर्य्यक् संयोज्य चाङ्गुलीः ।
संहताः प्रसृताः कुर्य्यात् मुद्रा परशुसंज्ञिका ॥ १९ ॥
उच्छ्रिताङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी ॥ २० ॥
हस्तौ तु संपुटौ कृत्वा प्रसृताङ्गुलिकौ तथा ।
तर्ज्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमाश्रितौ ।
काममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी ॥ २१ ॥'
महादेवप्रियायान्तु कथ्यन्ते लक्षणान्यथ ।
उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन वेष्टयेत् ।
वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च वेष्टयेत् ।
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥ १ ॥
मिथः कनिष्ठिके बद्धा तर्ज्जनीभ्यामनामिके ।
अनामिकोर्द्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ।
अङ्गुष्ठाग्रद्वयं न्यसेत् योनिमुद्रेयमीरिता ॥ २ ॥
अङ्गुष्ठेन कनिष्ठान्तु बद्धा शिष्टाङ्गुलीत्रयम् ।
प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ॥ ३ ॥
अङ्गुष्ठतर्ज्जन्यग्रे तु ग्रथिताङ्गुलित्रयम् ।
प्रसारयेदक्षमाला मुद्रेयं परिकीर्त्तिता ॥ ४ ॥
ऊर्द्ध्वाङ्गुलिो दक्षकरः प्रसृतो वरमुद्रिका ॥ ५ ॥
ऊर्द्ध्वाङ्गुलि वामकरः प्रसृतोऽभयमुद्रिका ॥ ६ ॥
मिलितानामिकाङ्गुष्ठं मध्यमाग्रे निवेशयेत् ।
शिष्टाङ्गुल्यौ कुञ्चितौ [illegible] ॥ ७ ॥
[illegible] ॥
पद्माङ्गुष्ठौ दक्षिणाग्रे

अङ्गुष्ठमुद्रा विख्याता त्रिपुरातिप्रिया मता ।८।
पाशवद्वामवक्त्रञ्च कृत्वाङ्घ्रि वामके तथा ।
निधायोच्छ्रितवत् कुर्य्यात् मुद्रा कापालिकी मता ।९।
मुष्टिञ्च शिथिलां बद्धा ईषदुच्छ्रितमध्यमाम् ।
दक्षिणाङ्गुष्ठमस्य कर्णदेशे प्रचालयेत् ।
एषा मुद्रा कमलका सर्व्वविघ्नविनाशिनी ।१०।●।
तथा गणेशमुद्राणां लक्षणं शृणु पार्व्वति ।
उत्तानोर्द्ध्वहस्तौ मध्या सरला बद्धमुष्टिका ।
दन्तमुद्रा समाख्याता सर्व्वागमविशारदैः ।१।
वामहस्तेन तर्ज्जन्या दक्षहस्तेन तर्ज्जनीम् ।
संयोज्याङ्गुष्ठकाभ्याञ्च तर्ज्जन्यग्रे खले क्षिपेत् ।
एषा पाशाख्यया मुद्रा विद्वद्भिः परिकीर्त्तिता ।२।
अन्योन्य मध्यमां कृत्वा तर्ज्जनीमध्यपर्व्वणि ।
संयोज्याकुञ्चयेत् किञ्चिदेषाङ्कुशप्रदर्शिका ।३।
तर्ज्जनीमध्यमानामाकनिष्ठाङ्गुष्ठमुद्रिका ।
अधोमुखौ दीर्घरूपा मध्यमा विघ्नमुद्रिका ।४।
परशुमुद्रा ५ निगदिता प्रसिद्धा लड्डुमुद्रिका ।६।
बीजपूराख्यया मुद्रा प्रसिद्धत्वादुपेक्षिता ।७।●।
शक्तेर्योगाच्च मुद्राणां लक्षणं शृणु पार्व्वति ।
पाशा १ ङ्कुश २ वरा ३ भीति ४ धनु ५
र्ब्बाणाः समीरिताः । ६ ।
कनिष्ठानामिके बद्धा स्वाङ्गुष्ठेनैव दक्षतः ।
शिष्टाङ्गुली तु प्रसृते संश्लिष्टे खड्गमुद्रिका ।७।
वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसार्य्य च ।
आकुञ्चिताङ्गुलीः कुर्य्यात् चर्म्ममुद्रेयमीरिता ।८।
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् ।
कुर्य्यान्मुषलमुद्रेयं सर्व्वविघ्नविनाशिनी ।९।
मुष्टिं कृत्वा कराभ्याञ्च वामस्योपरि दक्षिणाम् ।
कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता ।१०।
चक्रमुद्रां तथा बद्धा मध्यमे द्वे प्रसार्य्य च ।
कनिष्ठिके तथानीय तदग्रेऽङ्गुष्ठकौ क्षिपेत् ।
अश्वीमुद्रा मता शौरेः सर्व्वसम्पत्प्रदायिनी ।१।
वीणावादनवद्धस्तौ कृत्वा सञ्चालयेच्छिरः ।
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ।१।
वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका ।२।
दक्षिणाङ्गुष्ठतर्ज्जन्यावग्रये पराङ्गुलीः ।
प्रसार्य्य संहतोत्ताना एषा व्याख्यानमुद्रिका ।३।
श्रीरामस्य परस्यास्य अक्षमालेयसी मता ।●।
मणिबन्धस्थितौ कृत्वा प्रसृताङ्गुलिकौ करौ ।
कनिष्ठाङ्गुष्ठयुगले मिलिताग्रौ प्रसारयेत् ।
धनुर्व्वाणमुद्रेयं वैष्णवप्रियङ्करी ।१। ● ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।
तर्ज्जनी मध्यमानामा संहता भुग्नवर्ज्जिता ।
मुद्रैषा गालिनी प्रोक्ता मस्तकोपरि चालिता ।
दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशामेकमुष्टिं कुर्य्यात् सा कुम्भमुद्रिका ।
मुष्टीकृत्योच्छ्रिताङ्गुष्ठौ तर्ज्जन्यग्रे तु विन्यसेत् ।
मत्स्यरूपाकरौ कृत्वा दन्तमुद्रा प्रकीर्त्तिता ।●।
प्रसृताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ च संमुखौ ।
कुर्य्यात् स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका ।●।
अस्त्रकृत्यनिहुता स्वाहादेवताख्या च या ।

अङ्गुष्ठाङ्गुष्ठतौ कृत्वा हस्तयोः संलग्नयोर्द्वयोः ।
तावेवाभिमुखौ कुर्य्यात् मुद्रैषा कालकर्षिका ।●।
दक्षिणा शिविङ्गा मुष्टिर्व्विकार्पिततर्ज्जनी ।
मुद्रा विस्मयसंज्ञा स्यात् विस्मयावेशकारिणी ।
मुष्टिवद्धोच्छ्रिताङ्गुष्ठा दक्षिणा नादमुद्रिका ।
तर्ज्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ।●।
अधोमुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्तकम् ।
क्षिप्त्वाङ्गुलीरङ्गुलीभिः संयम्य परिवर्त्तयेत् ।
एषा संहारमुद्रा स्यात् विसर्ज्जनविधौ स्मृता ।
दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् ।
अङ्गुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी ।
वामहस्तस्य तर्ज्जन्यां दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्ज्जन्यां वामाङ्गुष्ठेन योजयेत् ।
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ।
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्यात् दक्षिणस्य करस्य च ।
कूर्म्मपृष्ठसमं कुर्य्यात् दक्षपाणिञ्च सर्व्वतः ।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि ।'
एष कोषे ।●।
'अन्तराङ्गुष्ठमुष्टिन्तु कृत्वा वामकरस्य च ।
मध्यमाग्रं दक्षिणस्य तथानम्य प्रयत्नतः ।
मध्यमेनाथ तर्ज्जन्यामङ्गुष्ठाग्रेण योजयेत् ।
दक्षिणं योजयेत् पार्श्वं वाममुष्टौ तु साधकः ।
दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते ।●।
तर्ज्जनीमध्यमानामाः समं कुर्य्यादधोमुखम् ।
अनामायां क्षिपेद्‌वृद्धामृज्वीं कृत्वा कनि-
ष्ठिकाम् ।
लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्त्तिता ।
तर्ज्जन्यनामिकामध्याकनिष्ठाक्रमयोगतः ।
करयोर्य्युगपच्चैव कनिष्ठामूलयोगतः ।
अङ्गुष्ठाग्रे तु निःक्षिप्य महायोनिः प्रकीर्त्तिता ।'
सारदाया योन्यादिमुद्रा—यथा । योनिमुद्रा च वक्ष्यते भूतिनी वक्ष्यते बीजाख्यापि ॥
'परिवर्त्त्य करौ स्पृष्टौ कनिष्ठाद्यमध्यमे ।
अनामायुगलञ्चाधस्तर्ज्जनीयुगलं पृथक् ।
अन्योन्यं मिलितं बद्धाङ्गुष्ठाग्रेऽनामिके ततः ।
तारबधूमकमाख्या मुद्रैषा कथिता प्रिये ! ।
अथास्तु बन्धनाङ्गुलौ बन्धनाङ्गुष्ठौ ध्रुवम् ।
मध्यं त्रिकारितं समाप्यधो विकाश्य चालयेत् ।
पार्श्वस्थं मुष्टियुगलं शैलिकाचेति कीर्त्तिता ।'
एषा ताराराधनेऽन्या केलिशाखा यक्षया ।
'योनिर्म्मायाथवः शैनुधेनुः कूर्म्मः क्रमादिह ।
बीजानि योजयन् मन्त्री मुद्राबन्धनमाचरेत् ।
तर्ज्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ।
वामचेरस्तोक्ताः प्रकाममन्येऽथ मुद्रिकाः ।
अथ देवि ! प्रवक्ष्यामि मुद्राः सर्व्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु सान्निध्यं त्रैपुरं भवेत् ।
परिवर्त्त्य करौ स्पृष्टावर्द्धचन्द्राकृती यमौ ।
अनामामध्यमे कृत्वा तर्ज्जन्यौ कुटिलाकृती ।
कनिष्ठिके निबध्नीत विस्फार्य्य महेश्वरि ! ।
त्रिखण्डेयं समाख्याता त्रिपुराह्वानकर्म्मणि ।

मध्यमामध्यगे कृत्वा कनिष्ठेऽङ्गुष्ठरोधिते ।
तर्ज्जन्यौ दण्डवत् कृत्वा मध्यमोपर्य्यनामिके ।
एषा च प्रथमा मुद्रा सर्व्वसंक्षोभकारिणी ।
एतस्या एव मुद्राया मध्यमे सरले यदा ।
क्रियेते परमेशानि ! सर्व्वविद्राविणी तदा ।
मध्यमातर्ज्जनीभ्याञ्च कनिष्ठानामिके समे ।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि ! ।
अङ्गुष्ठौ तु नियुञ्जीत कनिष्ठानामिकोपरि ।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षिणी परा ।
पुटाकारौ करौ कृत्वा तर्ज्जन्यावङ्कुशाकृती ।
परिवर्त्तक्रमेणैव मध्यमे तदधोगते ।
क्रमेण देवि ! तेनैव कनिष्ठानामिके तथा ।
संयोज्य निविडाः सर्व्वा अङ्गुष्ठावयवेऽग्रतः ।
मुद्रेयं परमेशानि ! सर्व्ववशङ्करी मता ।
सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेऽन्ययोः ।
अनामिके तु सरले तद्वहिस्तर्ज्जनीद्वयम् ।
दण्डाकारौ तदङ्गुष्ठौ मध्यमानखदेशगौ ।
मुद्रैषोन्मादिनी नाम्ना क्लेदिनी सर्व्वयोषिताम् ।
अस्यास्त्वनामिकायुग्ममधः कृताङ्कुशाकृती ।
तर्ज्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशा मुद्रा सर्व्वकामार्थसाधिनी ।●।
सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणम् ।
बाहुं कृत्वा महादेवि ! हस्तौ संपरिवर्त्त्य च ।
कनिष्ठानामिके देवि ! युक्ते तेन क्रमेण च ।
तर्ज्जनीभ्यां समाक्रान्ते सर्व्वोर्द्धमपि मध्यमे ।
अङ्गुष्ठौ तु महेशानि ! सरलावपि कारयेत् ।
इयं सा खेचरी नाम्ना पार्थिवस्थानयोजिता ।
परिवर्त्त्य करौ स्पृष्टावर्द्धचन्द्राकृती प्रिये ! ।
तर्ज्जन्यङ्गुष्ठयुगलं युगपत् कारयेत्ततः ।
अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्व्वाधस्तादनामिके ।
बीजमुद्रेयमचिरात् सर्व्वसिद्धिविवर्द्धिनी ।●।
मध्यमे कुटिले कृत्वा तर्ज्जन्युपरि संस्थिते ।
अनामिके मध्यगते तथैव हि कनिष्ठिके ।
सर्व्वा एकत्र संयोज्या अङ्गुष्ठपरिपीडिताः ।
एषा तु परमा मुद्रा योनिमुद्रेयमीरिता ।●।
एता मुद्रा महेशानि ! त्रिपुराया मयोदिताः ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ।
वामहस्तेन मुष्टिन्तु बद्धा कर्ण्णदेशके ।
तर्ज्जनीं सरलां कृत्वा भ्रामयेच्चानुविक्रमः ।
सौभाग्यदण्डिनी मुद्रा आवाहनेऽपि चर्चिता ।
अन्तरङ्गुष्ठमुष्टिन्तु विधाय तर्ज्जनीमिमाम् ।
रिपुजिह्वाग्रहा मुद्रा न्यासकाले तु चर्चिता ।
बद्धा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ।
अङ्गुष्ठेन तदग्रे तु मुद्रेयं भूतिनी मता ।●।
वाममुष्टिं विधायाथ तर्ज्जनीमध्यमे ततः ।
प्रसार्य्य तर्ज्जनीमुद्रा निर्द्दिष्टा चक्रपाणिना ।'
इति तन्त्रसारे मुद्राप्रकरणं समाप्तम् ॥●॥
अपि च ।
'उक्ताः कालमहावारः प्रवलं पुरतो ध्रुवम् ।
मुद्रायां परिवर्त्ताद्यं वक्ष्यन्ते यथाक्रमम् ।
वेष्टनं सम्पुटं चैव प्राञ्जलिर्म्मिलपद्मकौ ।

नाराचो मुक्तहस्तौ च योनिरर्द्धं तथैव च ।
वन्दनी च महामुद्रा महायोनिस्तथैव च ।
भगश्च पुटकश्चैव निःशङ्खोऽप्यर्द्धचन्द्रकः ।
खड्गश्च त्रिशूलश्चैव प्रमुद्गराख्य मुष्टिकः ।
चक्रञ्चैव तथा बद्धं तयोर्निर्विमलस्तथा ।
घटः शिखरिणी मुद्रः पुच्छोऽथ ह्यर्द्धचन्द्रकः ।
संमीलनी च कुम्भश्च चक्रं शूलं तथैव च ।
सिंहवक्त्रं गोमुखश्च प्रोन्नामोन्नमनं तथा ।
बिम्बं पाशुपतं शुद्धं व्यासोऽथ धावनी तथा ।
प्रधावनी चोग्रमुद्रा कुम्भली पुष्पमेव च ।
त्रिशूलपाशिवज्री च योगो भैरोऽथ मोचनम् ।
नाग्नो गजश्च मुष्टीरं मुद्रा एतास्तु सत्तमाः ।
अष्टोत्तरशतं मुद्रा मन्मथ याः प्रकीर्त्तिताः ।
तासान्तु पञ्चपञ्चाशद्देवाः पाद्यास्तु पूजने ।
येषान्तु पाश्चिमपञ्चाशन्मुद्रास्ताः समयेषु च ।
दशावपञ्चकेतनटनादिषु ताः स्मृताः ।
देवानां विकृते योगे ध्याने जप्ये विसर्ज्जने ।
पायास्तु पञ्चपञ्चाशन्मुद्रा भैरव ! कीर्त्तिताः ।
मुद्रां विना तु यज्जप्यं प्राणायामः सुरार्च्चनम् ।
योगो ध्यानासने चापि निष्फलानि च भैरव ! ।
प्रत्येकं लक्षणं तेषां शृणुतं तनयौ युवाम् ।
दक्षवामध्यमायेन वामहस्तस्य तर्ज्जनीम् ।
योजयेत् सव्यमध्यान्तु तर्ज्जन्या दक्षिणेन वै ।
तथा दक्षानामिकया वामहस्तकनिष्ठिकाम् ।
अनामिकान्तु वामस्य दक्षिणस्य कनिष्ठया ।
योजयेत्क्षिमात् सम्यक् दक्षिणावर्त्तनेन तु ।
धेनुमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥१॥
संयोज्य द्वौ तलौ सर्व्वाण्यङ्गुल्यान्यपि हस्तयोः ।
संयोज्य पार्श्वतोऽङ्गुष्ठौ संपुटः प्रोच्यते सुरैः ।
सर्व्वेषामपि देवानां संपुटः शस्यते सदा ।
ध्यानसंपुटयोगाद्वै सम्पुटः शस्यते सदा ॥२॥
त्रिकुष्वयुगलं पाण्योः संयोज्याद्धिन एव च ।
मध्यशून्यः पुटाकारः प्राञ्जलिः परिकीर्त्तितः ॥३॥
अङ्गुष्ठमन्तरं कृत्वा पाण्योर्मुष्टिं विधाय च ।
संयोज्य बिल्ववत्ते तु बिल्वमुद्रा प्रकीर्त्तिता ॥४॥
मणिबन्धादाकरभं संयोज्य करयोर्द्वयोः ।
अङ्गुष्ठे चापि संयोज्य तथैव च कनिष्ठिके ।
निःक्षिप्तौ द्वयोः पाण्योरङ्गुलीर्निरजाख्यतः ।
पद्ममुद्रा समाख्याता चतुर्व्वर्गप्रदा नृणाम् ॥५॥
अङ्गुष्ठाग्रेण तर्ज्जन्याः संयोज्याधोऽर्द्धरेखया ।
अन्याङ्गुलीस्तथाक्रम्य नाराचः स्यात् प्रसा-
र्य्यते ।
मम चैव प्रियायाश्च प्रीतिदेयं प्रियङ्करी ।
नाराचमुद्रा सततं प्रोक्ता वेतालभैरव ! ॥६॥
अनामाङ्गुष्ठमुष्टिञ्च कृत्वा वामकरस्य तु ।
मध्यमाभ्यां दक्षिणस्य तथाक्रम्य प्रयत्नतः ।
मध्यादेवाथ तर्ज्जन्या अङ्गुष्ठाभ्यामियोज्य च ।
दीर्घं योजयेत् पार्श्वं वामहस्तौ तु साधकः ।
दर्शयेद्दक्षिणे भागे शुद्धमुद्रेयमिष्यते ।
एतन्तु शक्तमाश्रस्य प्रीतिदा मुक्तिदोत्तमा ।
सर्व्वेषामपि देवानां तुष्टिदा सर्व्वकर्म्मसु ॥७॥
अङ्गुष्ठमध्यमाभ्याञ्च सव्यमाक्रम्य तर्ज्जनीम् ।

प्रसार्य्य दक्षमुद्रेति दक्षिणस्य करस्य तु ॥८॥
सर्व्वाङ्गुलीस्तु संयोज्य करयोरुभयोरपि ।
संवेष्ट्य रज्जुवद्बद्धे तु पाण्योरपि कनिष्ठिके ।
वामस्य वाममध्येन तद्वयं विनियोजयेत् ।
दक्षस्य मध्यमूलेन तथायं वाममेव च ।
योजयेत् योजनात् पश्चादाकर्षेत् करशाखिकाः ।
योन्याकारन्तु तन्मध्यं योनिमुद्रा प्रकीर्त्तिता ।
कामाख्यायाः पञ्चमूर्त्तेर्दुर्गाया अपि भैरव ! ।
प्रीतिदा योनिमुद्रेयं मम वामस्य च प्रिया ॥९॥
संयुक्ताश्चाङ्गुलीः सर्व्वाः प्रसार्य्याङ्गुष्ठपर्व्वणा ।
अपेय च कनिष्ठाया अपेयापि च योज-
येत् ।
करस्य दक्षिणस्येयमर्द्धयोनिः प्रकीर्त्तिता ॥१०॥
संपुटं प्राञ्जलिं वापि यदि मूर्द्ध्नि नियोजयेत् ।
वन्दनीया समाख्याता मुद्रा विष्णुप्रमोदिनी ॥११॥
सैव चेत् सम्यगासक्ता महामुद्रा प्रकीर्त्तिता ॥१२॥
दक्षिणाङ्गे तु सा सक्ता वैष्णवी परिकी-
र्त्तिता ॥१३॥
महायोनिस्तु कथिता वैष्णवीतन्त्रगोचरे ।
द्वयोर्मूले स्वङ्गुष्ठाग्रमङ्गुलीश्च कनिष्ठयोः ।
नियोज्य प्रकृतौ च द्वे पाणी योजयेत् पुनः ।
भगमुद्रा च सा ख्याता लक्ष्मीवाणीशिवा-
प्रिया ॥१४॥
सर्व्वाङ्गुलीनामग्रौघं दक्षिणस्य करस्य च ।
संयोज्यैकत्र पुरतो निर्द्दिष्टः पुटकः स्मृतः ॥१५॥
कनिष्ठानामिकाङ्गुष्ठाङ्गुलीनां योजयेद्बुधः ।
अयाग्रैकत्र मध्यान्तु तर्ज्जनीञ्च प्रसार्य्य वै ।
कुञ्चीकृत्य करद्वन्द्वं पृथगग्रे नियोजयेत् ।
निःशङ्खो नाम मुद्रेयं मत्सिंहवराहयोः ॥१६॥
कनिष्ठानामिकामध्यामाकुञ्च्य दक्षिणस्य च ।
करस्य तर्ज्जन्यङ्गुष्ठे प्रसार्य्य क्रियते तु या ।
सा मुद्रा ह्यर्द्धचन्द्राख्या मदाद्यां प्रीतिदा-
यिनी ॥१७॥
ऊर्द्धीकृत्य तथाङ्गुष्ठं दक्षिणस्य करस्य च ।
कृत्वा मध्यं तदङ्गुष्ठं वाममुष्टिं तयोर्द्धतः ।
ऊर्द्धाङ्गुष्ठं तथा कुर्य्यादङ्कुशमुद्रा प्रकीर्त्तिता ॥१८॥
एतस्या एव मुद्रायाः कनिष्ठादिविमोचनः ।
अष्टौ मुद्राः समाख्याता नाम तासां पृथक्
पृथक् ।
त्रिशूलञ्चैव १९ मुष्टिश्च २० चक्र २१ मावद्ध २२
मेव च ।
विमलश्च २३ घटश्चैव २४ मुद्गरः २५ पुच्छ २६
स्तथैव च ।
मयानां विष्णुमूर्त्तीनां वाहेमाष्टैव मुद्रिकाः ।
क्रमाशय समाख्याता नायिकानां तथैव च ।
संयोज्य करयोः पृष्ठे तथावर्त्त्य तु वै समम् ।
प्रसार्य्य तर्ज्जनीयुग्मं संयुक्तं सर्व्वतः पुनः ।
अङ्गुष्ठौ च तथा सक्तौ घटमुद्रा प्रकीर्त्तिता ॥२७॥
उत्तानमञ्जलिं कृत्वा अङ्गुष्ठे द्वे कनिष्ठयोः ।
मूले निःक्षिप्य तु करौ संयोज्याथ प्रदर्शयेत् ।
सयोनिरिति सा ख्याता मुद्रा देवीप्रतुष्टिदा ॥२८॥
मुष्टिर्द्दक्षिणहस्तस्य तर्ज्जन्यङ्गुष्ठिका भवेत् ।

सा स्यात् शिखरिणी मुद्रा नागेशीसूर्य्यप्रिया
च सा ॥२९॥
अनामिके कनिष्ठे तु संयोज्य ऋजुना पुनः ।
मध्यमातर्ज्जनीनान्तु धेनुमुद्रेव चन्द्रगम् ।
बाद्धेधेनुरिति ख्याता चन्द्रप्रीतिविवर्द्धिनी ॥३०॥
करयोरङ्गुलीः सर्व्वाः सर्व्वाधाराग्रैकतः स्थिताः ।
नियोज्याद्धंतले चैव तदधोऽपि विमुच्य च ।
अधरेशं योजयेत् मुद्रा सम्मीलनी तु सा ॥३१॥
भौमभूमिसुनीशानामियं प्रीतिविवर्द्धिनी ।
सर्व्वाङ्गुलीस्तु संसक्ता दक्षिणस्य करस्य च ।
क्षिपद्वामं तथान्यस्य तलं कुर्य्यात्तु कुम्भवत् ।
समाख्याता कुम्भमुद्रा बुधवाणीशिवाप्रिया ॥३२॥
सर्व्वाङ्गुलीनां मध्येषु वामहस्तस्य चाङ्गुलीः ।
प्रसार्य्याङ्गुष्ठयुगलं संयोज्याग्रेण भैरव ! ।
तदङ्गुष्ठद्वयं कार्य्यं समुखं वितरेणतः ।
चक्रमुद्रा समाख्याता गुरुविष्णुशिवप्रिया ॥३३॥
अङ्गुष्ठं मध्यमाञ्चैव नामयित्वा करस्य च ।
दक्षिणस्यापराङ्गिसौ योजयेद्यतः पुनः ।
शूलमुद्रा समाख्याता मम शुक्रगुरुप्रिया ॥३४॥
निकुञ्चीकृत्य तु करौ वामाङ्गुलिगणस्य तु ।
चगाणि योजयेन्मध्ये तलस्याधस्य हस्ततः ।
अधः कृत्वा वामहस्तं मुद्रा सिंहमुखी
स्मृता ॥३५॥
इयं प्रीत्यै तु दुर्गायाः सर्व्वपुत्रस्य चक्रिणः ।
भगमुद्रा करांमूले गोमुखाख्या प्रकीर्त्तिता ।
मम विष्णोस्तथा राहोः सर्व्वदा प्रीति-
दायिनी ॥३६॥
मुष्टिद्वयमधोत्तानं कृत्वा संयोज्य पार्श्वतः ।
दक्षिणस्य कनिष्ठादीन् प्रसार्य्य क्रमतः पुनः ।
तथा वामकनिष्ठाद्यामेकैकेन प्रसारयेत् ।
अष्टौ मुद्राः समाख्याता नामतः क्रमतः शृणु ।
प्रोन्नामी ३७ नमन ३८ श्चैव बिम्बं ३९ पाशु-
पतं ४० तथा ।
शुद्धं ४१ व्यासः ४२ धावनी ४३ च तथा चैव
प्रधावनी ४४ ।
आकुञ्च्य करशाखास्तु दक्षिणाः सा तु मुद्रिका ।
उग्रमुद्रा समाख्याता महत्तस्य विमर्द्दनात् ॥४५॥
इन्द्रादिलोकपालानां दश मुद्राः प्रकीर्त्तिताः ।
सर्व्वेषामपि देवानां परमप्रीतिवर्द्धनाः ।
अङ्गुष्ठाग्रन्तु तर्ज्जन्या अग्रभागेन योजयेत् ।
आकुञ्च्य मध्यमाभ्यान्तु दक्षहस्तस्य चाङ्गुलीः ।
दर्शयेत् कुम्भनाकारं कुम्भलीमुद्रिकाद्वयम् ।
सर्व्वेषामपि देवानां तथा तुष्टिकरं महत् ॥४६॥
अङ्गुष्ठतर्ज्जनीमध्ये अग्रभागे नियोज्य च ।
मध्यमाञ्च कनिष्ठाञ्च आकुञ्च्य दक्षिणे करे ।
त्रिशूलाख्या समाख्याता विश्वेदेवप्रिया वरा ।
केनोः प्रियेयं सततं मातृणामपि तुष्टिदा ॥४७॥
तर्ज्जन्यङ्गुष्ठयोरग्रभागौ संयोज्य चाङ्गुलीः ।
अन्या आकुञ्चयेत् नित्यं नाभिकन्नो प्रकीर्त्तिता ।
पितृणामपि साध्यानां सदानां त्रिदशेश्वरः ।
सर्व्वदा प्रीतिजननी वाचिकवी प्रकीर्त्तिता ॥४८॥
साधौ सकाश्चौ

ऊर्द्ध्वं संयोजयेद्वामौ अङ्गुष्ठौ तथाञ्जलिः ।
योनिमुद्रा समाख्याता योगिनां सर्व्वदायिनी ॥
सर्व्वेषामपि देवानां पूजने चिन्तने तथा ।
योनिमुद्रा समाख्याता तुष्टिप्रीतिकरी सदा ॥४९॥
प्राञ्जलिर्नाम मुद्रा तु ऊर्द्ध्वाधोभावयोजिनाम् ।
विभिद्य दर्शयेद्धस्तौ ऊर्द्ध्वाधः प्रसृतौ ततौ ॥
भिन्नमुद्रा समाख्याता मम विष्णोर्विधेः प्रिया ॥५०॥
अङ्गुष्ठे द्वे तु निःक्षिप्य करयोरुभयोस्तले ।
अपरे योजयेत् पश्चात् कनिष्ठायुगलं ततः ।
उभयोर्हस्तयोर्वाग्रात्तर्ज्जन्याद्यांश्च योजयेत् ॥
अपरांस्तु पृथक्कृत्य दर्शयेत्तु कनिष्ठिकाम् ।
मुद्रा सम्मोहनं नाम कामदुर्गादिमाश्रिया ॥
सर्व्वेषामपि देवानां मोहनं प्रीतिदं स्मृतम् ॥५१॥
आनम्य पञ्चहस्तस्य मध्यमानामिके तथा ।
तयोः पृष्ठे तु संयोज्य अङ्गुष्ठाग्रं ततः परम् ।
कनिष्ठां तर्ज्जनीं चैव अग्रेण योजयेत्ततः ।
वायुमुद्रा समाख्याता सर्व्वदैवस्य तुष्टिदा ॥५२॥
मध्याङ्गुलीस्तु सङ्गोप्य अङ्गुष्ठमथ तर्ज्जनीम् ।
प्रसार्य्य करयोः पश्चादङ्गुष्ठाग्रन्तु योजयेत् ।
अङ्गुष्ठाग्रेण तज्ज्येष्ठा अग्रेणापि च तर्ज्जनीम् ।
यथाञ्जलि प्रसार्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ॥५३॥
सर्व्वाङ्गुलीनामग्राणि आकुञ्च्याग्रे नियोजयेत् ।
अनामिकायाः पृष्ठे तु अङ्गुष्ठाग्रं नियोजयेत् ।
शृङ्गं तूणीरवत् तस्मात् तेनासमस्तु भैरव ! ।
तूणीरमुद्रा व्याख्याता सर्व्वेषां प्रीतिवर्द्धिनी ॥५४॥
मुद्रासु संस्थिता पूजा मुद्रासु परिचिन्तनम् ।
मुद्रासु संस्थिता योगा मुद्रा मोदकरा यतः ॥
यदा यदा पूजनेषु चिन्तने ध्यानकर्म्मणि ।
यथादौ कामने वापि तत्कालं न विद्यते ।
तदा मुद्रायुतं कुर्य्यादिष्टापूर्त्तं करद्वयम् ।
पञ्चाङ्गेषु देवस्तो कक्षौ मुद्रासु च यमः ।
तदा मुद्रां विधायैव तत्तु कर्म्म समाचरेत् ॥
मुद्राविधुतहस्तस्तु क्रियते कर्म्मदैविकम् ।
तस्य तन्निष्फलं यस्मात्तस्मान्मुद्रान्वितो भवेत् ॥
विसर्ज्जने तु देवानां यस्य या परिकीर्त्तिता ।
मुद्रां तां पूजनादौ तु तस्य चैव प्रयोजयेत् ॥
विसर्ज्जनान्ते मुद्रां मुद्रायुक्तः समाचरेत् ।
पूजनादि समस्तञ्च कर्म्म देहे विचक्षणः ॥
ततो मुदं परं धाम मुद्रा पुण्यप्रदायिनी ।
देवानां मोददा मुद्रा तस्मात्तां यत्नतश्चरेत् ॥
अर्द्धयोनिर्म्महायोनिर्योनिर्मोक्षी च वैष्णवी ।
मुद्रा विसर्ज्जने प्रोक्ता त्रिकाभिपुरयोः सदा ।
दुर्गायाः सर्व्वरूपेषु मुद्रा एताः प्रकीर्त्तिताः ।
योनिश्च सम्पुटश्चैव महायोनिस्तथैव च ॥
वर्ज्जयित्वा यथाभावादुक्तारम्भं योजयेत् ।
भवेन्मुद्रा विसर्ज्जामन्या मुद्राः समस्ततः ॥
ता यथाभावतामाः समुद्रा मोदकराः सदा ।
इत्थं वा कथिता मुद्राः पूजने पुण्यवर्द्धनाः ॥"
इति कालिकापुराणे ६८ अध्यायः ॥

मुद्राङ्कितः, त्रि, (मुद्रया अङ्कितः ।) मुद्रया चिह्नितः । छापमारा मोहरकरा इत्यादि भाषा । यथा,—

"धाता विश्वविधाधमात्रनिरतो देवोऽपि गौरी-भुजा-
श्लेषानन्दविघूर्णमाननयनो दक्षाध्वरध्वंसकृत् ।
दैत्यारिः कमलाकपोलमकरीमुद्राङ्कितोरःस्थलः
प्रीतोऽस्माभिरतीव कमुत्र पुनः का नाम शान्तेः कथा ॥"
इति प्रबोधचन्द्रोदयनाटके १ अङ्कः ॥

मुद्रालिपिः, स्त्री, (मुद्रया लिपिः ।) पञ्चधा-लिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—
"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरिणी शुभदा हर ! ॥"
इति वाराहीतन्त्रम् ॥
अस्याः प्राशस्त्यं धार्य्यत्वञ्च यथा,—
"शेमुषा लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥"
इति शङ्करमालातन्त्रम् ॥

मुद्रिका, स्त्री, (मुद्रा स्वार्थे कन् + स्त्रियां टाप् । पूर्व्वाकारस्य ह्रस्वत्वम् । अत इत्वं च ।) स्वर्ण-रूप्यादिनिर्म्मितमुद्रा । मोहर टाका इत्यादि भाषा । यथा,—
"सौवर्णीं राजतीं ताम्रीमायसीं वा सुशो-भिताम् ।
सलिलेन समाहृतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥"
इति मिताक्षरायां व्यवहाराध्यायः ॥

मुद्रितं, त्रि, (मुद्रा मुद्रणं अस्य जातेति । मुद्रा इतच् ।) अप्रफुल्लम् । मोदा इति भाषा । तत्पर्य्यायः । अकुञ्चितम् २ निमीलं ३ मीलितम् ४ । इति हेमचन्द्रः ॥ मुद्राङ्कितञ्च ॥ (परि-त्यक्तम् । यथा, नैषधचरिते । ५ । १२ ।
"मुद्रितान्यजनसंकथनः सन्
नारदं बलिरिपुः समभाषीत् ।"
"मुद्रितं परित्यक्तम् ।" इति तट्टीका ॥)

मुधा, व्य, (मुह्यतीति । मुह + बाहुलकात् का । पृषोदरादित्वात् हस्य धः ।) व्यर्थकम् । इत्य-मरः । ३ । ४ । ४ । (यथा, महाभारते । १३ । १०७ । ३ ।
"मुधा ज्ञानं मुधा दत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्म्मः स्यात् सोऽमुधात्यन्तमश्नुते ॥")

मुनिः, पुं, मनुते जानाति यः । (इति मन् + "मनेरुच्च ।" उणा० ४ । १२२ । इति इन् + अत उच्च ।) मौनव्रती । इत्यमरे । इति भरतः ॥ तत्पर्य्यायः । वाचंयमः २ । इत्यमरः । २ । ७ । ४२ ॥ मौनी ३ व्रती ४ ऋषिः ५ मायाच्छः ६ समवाक् ७ । इति जटाधरः ॥ (यथा, नैषधे । १ । ११ ।
"अवैव च यैव च वारिभूतां
मुनेर्दिवैत्रं मम यस्य वागपः ॥")
तस्य लक्षणं यथा,—
"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥"
इति श्रीभगवद्गीता ॥२॥
तस्य धर्म्मो यथा,—

मत्स्योवाच ।
"मुनिभिश्चरिता धर्म्मा उक्ता व्यास ! यथा तव ।
यैर्विष्णुस्तुष्यते देवः शुक्लादिपरिभाषितैः ॥
तपसैव च होमेन सन्ध्यया यज्ञेन च ।
प्राप्यते भगवान् विष्णुर्धर्म्मकामार्थमोक्षदः ॥
धर्म्मो विष्णुर्मतो विष्णुः पूजा विष्णुस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं
हरिः ॥"
इति गारुडे २२६ अध्यायः ॥७॥
महाकल्पे पर्य्यायानि यथा । अतिविपुला १ हरिकेशिनः २ हिरण्यश्मश्रुकाता ३ धूम-धूम्रः ४ मुनिसुतः ५ दुर्मदीकः ६ मत्कवः ७ इत्यत्र ८ । इति कविकल्पलता ॥७॥ मुनिविशे-षाणां मानसोऽङ्गविभागादुत्पत्तिर्यथा,—
"पुलस्त्यो दक्षकर्णाभ्यां पुलहो वामकर्णतः ।
दक्षनेत्रात्तथात्रिश्च वामनेत्रात् क्रतुः स्वयम् ॥
अरणिर्नासिकारन्ध्रादङ्गिराश्च मुखाद्रुचिः ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥
छायायाः कर्द्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षसश्चैव वोढुश्च कण्ठदेशाच्च नारदः ॥
मरीचिः स्कन्धदेशाच्च अपान्तरतमा गलात् ।
वशिष्ठो रसनादेशात् प्रचेता अधरोष्ठतः ॥
हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
सृष्टिं विधातुञ्च विधिश्चकारार्थं सुतानपि ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ८ अध्यायः ॥७॥
गयासुरशरीरे यज्ञार्थं ब्रह्मणो मानसात् सृष्टा मुनयो यथा,—
"ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ।
अग्निशर्म्माणमनघं शौनकं आर्ष्टिमङ्गम् ।
कुशलिं वेदकौण्डिन्यं हारीतं काश्यपं तथा ।
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमव्ययम् ।
वृद्धं पाराशरं कण्वं माण्डव्यं श्रुतिकेवलम् ।
श्वेतं सुतालं दमनं सुहोत्रं कङ्कमेव च ।
लौगाक्षिञ्च महाबाहुं जैगीषव्यं तथैव च ।
दधिपञ्चमुखं विप्र ! ऋषभं कर्कमेव च ।
कात्यायनं गोभिलञ्च मुनिसत्यं महाव्रतम् ।
जटामालिनमव्ययं पाञ्चरात्रञ्च राघवम् ।
आत्रेयं पाण्डिरं सौमत्यं महाबलम् ।
गोकर्णञ्च सुवाचार्य्यं शिलाक्षिनसुमाधनम् ।
सुघावकं मौनमथ तथा वेदशिरो मुनम् ।
सत्याकर्णोञ्च विप्रेन्द्रान् ब्रह्मा लोकपितामहः ।
परिकल्प्याकरोद्यागं गयासुरशरीरके ॥"
इति वायुपुराणे गयामाहात्म्यम् ॥७॥
मुनिविशेषनाम्नां व्युत्पत्तिर्यथा,—
"अतिक्ष्मानरोऽतीतः प्रभुः सर्व्वदर्शी गुरुः ।
मरीचिमिव्यैर्मिनिभिः कार्य्यं कश्यपोऽभूत् सः ।
विधिनेरद्यनाश्च कश्यपोऽस्माद्भूव सः ।
आरद्धेति विख्यातो समीक्षेत्र वैतुना ।
यः पुत्रवत्पो धातुर्म्मभूत् कणिद्वयः ।
तेन प्रविता इति तन्नाम चक्रे पितामहः ।
अभूव मातुर्यः पुत्रः कश्यपः सागरार्थतः ।
कर्म्मकर्म्मास्ति इत्येव तेन एषः प्रकीर्त्तितः ॥

वेदेषु कर्द्दमः शब्दश्छायायां वर्त्तते स्फुटः ।
समूहः कर्द्दमाज्जातः कर्द्दमस्तेन कीर्त्तितः ॥
तेजोभेदे मरीचिश्च वेदेषु वर्त्तते स्फुटम् ।
जातः सद्योऽतितेजस्वी मरीचिस्तेन कीर्त्तितः ॥
क्रतुसंघश्च यागेन सुतो जन्मान्तरेऽमुना ।
तत्पुत्रोऽपि समाख्यः क्रतुरित्यभिधीयते ॥
प्रधानाङ्गं सुखं धातुस्ततो जातश्च बालकः ।
इरस्तेजस्विवचनोऽङ्गिरास्तेन प्रकीर्त्तितः ॥
अतितेजस्विनि भृगुर्व्वर्त्तते नास्ति शौनक ! ।
जातः सद्योऽतितेजस्वी भृगुस्तेन प्रकीर्त्तितः ॥
वशीभूतश्च शिष्टश्च जातः सद्यो हि बालकः ।
वशिष्ठश्च धातुश्च वशिष्ठस्तेन कीर्त्तितः ॥
सखोऽप्यस्यवर्यश्च जातः सद्यो हि तेजसा ।
प्रख्यन् पूर्व्वतपसा चाख्यस्तेन कीर्त्तितः ॥
दंश ध्याता वशी यस्य योगेन योगिनो ध्रुवम् ।
दक्षः परमयोगीन्द्रस्तेन दक्षः प्रकीर्त्तितः ॥
अमलं यस्य यतश्च तपःसु बालकस्य च ।
प्रकीर्त्तितो यतिस्तेन संयतः सर्व्वकर्म्मसु ॥
पुलस्तपःसु वेदेषु वर्त्तते च स्फुटेऽपि च ।
स्फुटं तपःस्वरूपश्च पुलहस्तेन कीर्त्तितः ॥
पुलस्तपःसमूहश्च यस्यास्ति पूर्व्वजन्मनाम् ।
तपःसंघः समूहश्च पुलस्त्यस्तेन बालकः ॥
त्रिगुणायां प्रकृत्यां त्रिविद्यायाञ्च प्रवर्त्तते ।
तयोर्म्मतिः समा यस्य तेन बालोऽत्रिरुच्यते ॥
जटाश्चाग्निशिखारूपा यस्य चाग्निश्च मस्तके ।
तपस्तेजोमया यस्य स च पञ्चशिखः स्मृतः ॥
अपान्तरतमे देवि तपस्तेपेऽन्यजन्मनि ।
अपान्तरतमा नाम शिशोस्तेन प्रकीर्त्तितम् ॥
स्वयं तपः समाप्नोति वाहयेत् प्रापयेत् परान् ।
वोढुः समर्थस्तपसि वोढुस्तेन प्रकीर्त्तितः ॥
तपस्तेजसा बालो दीप्तिमान् स्वकृतो मुने ! ।
तपःसु रोचते चित्तं रुचिस्तेन प्रकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः ॥
वकवृक्षः । जिनः । इति मेदिनी । ने, २५ ॥ प्रियालवृक्षः । पलाशवृक्षः । इति हेमचन्द्रः । १ । ७१ ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, दक्षकन्या । सा च कश्यपपत्नीनामन्यतमा । यथा, महाभारते । १।६५।११-१२ ।
"मरीचेः कश्यपः पुत्त्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥
अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ॥"
अष्टवसून्तर्गतस्य आपनामकस्य वसोः पुत्त्रे, पुं । यथा, हरिवंशे भविष्यपर्व्वणि । ६ । ४० ।
"आपस्य पुत्त्रो वैतण्डः श्रमः शान्तो मुनिस्तथा ।"
क्रौञ्चद्वीपस्य देशविशेषः । यथा, मत्स्यपुराणे । १२१ । ८२-८५ ।
"क्रौञ्चस्य कुशलो देशो वामनस्य मनोऽनुगः ।
मनोऽनुगात् परश्चोष्णस्तीयोऽपि स उच्यते ॥
उष्णात् परे पावनकः पावनादन्धकारकः ।
अन्धकारकदेशात्तु मुनिदेशस्ततःपरः ॥"
(द्युतिमतः पुत्त्राणामन्यतमः । यथा, मार्कण्डेये । ५३ । २९ ।
"तथा द्युतिमतः सप्तपुत्त्रांस्तांश्च निबोध मे ।
मुनिश्च दुन्दुभिश्चैव सप्तमः परिकीर्त्तितः ॥"
कुरुपुत्त्रभेदः । यथा, महाभारते ।१।९४।५१।
"अविक्षितमभिष्वन्तं तथा चैत्ररथं मुनिम् ॥")

मुनिखर्ज्जूरिका, स्त्री, (मुनिप्रिया खर्ज्जूरिका इति मध्यपदलोपी समासः ।) खर्ज्जूरीभेदः । यथा,
"मुनिखर्ज्जूरिका त्वन्या राजेष्टा मधुसंमिता ॥"
इति राजनिर्घण्टः ॥

मुनिच्छदः, पुं, (मुनयः सप्तादयः अत्र तत्संख्यकाः छदाः पत्राण्यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री । मेथिका । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
'मेथिका मेथिनी मेथी दीपनी बहुपुत्त्रिका ।'
इत्यादि ।
'कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ।'
इत्यन्तम् ।)

मुनितरुः, पुं, (मुनेरगस्त्यस्य प्रियः तरुः । इति मध्यपदलोपी समासः ।) वकवृक्षः । इति रत्नमाला ॥

मुनिद्रुमः, पुं, (मुनेरगस्त्यस्य प्रियः द्रुमः । इति मध्यपदलोपी समासः ।) श्योनाकवृक्षः । इति रत्नमाला ॥ श्योनाकभेदः । वकवृक्षः । इति राजनिर्घण्टः ॥ (यथा, नैषधचरिते ।१।८६।
"मुनिद्रुमः कोरकितः शितिद्युति-
र्वनेऽमुनाऽमन्यत सिंहिकासुतः ॥"
"मुनिद्रुमः वकवृक्षः ।" इति तट्टीका ॥ अस्य पर्य्यायो यथा,—
"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"श्योनाको भूतपुष्पश्च पूतिवृक्षो मुनिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो मण्डूकपर्णकोऽरलुः ॥"
इति वैद्यकरत्नमालायाञ्च ॥)

मुनिनिर्म्मितः, पुं, (मुनिना निर्म्मितः ।) डिण्डिशः । यथा, भावप्रकाशे ।
"डिण्डिशो रोमशफलो मुनिनिर्म्मित इत्यपि ।
डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मघ्नः स्मृतः ।
सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥"

मुनिपित्तलं, क्ली, (मुनीनां पित्तलमिव ।) ताम्रम् । इति त्रिकाण्डशेषः ॥

मुनिपुङ्गवः, पुं, (मुनिः पुङ्गव इव ।) मुनिश्रेष्ठः । इत्यमरटीका ॥ (यथा, रामायणे ।१।१।१।
"तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥")

मुनिपुत्त्रः, पुं, (मुनीनां पुत्त्र इव । मुनिप्रियत्वादस्य तथात्वम् ।) दमनकवृक्षः । इति भावप्रकाशः ॥ अविमुक्तश्च ॥

मुनिपुत्त्रकः, पुं, खञ्जनः । इति त्रिकाण्डशेषः ॥ (यथा, तिथितत्त्वे कृत्यविधिप्रकरणे ।
"त्वं योगयुक्तो मुनिपुत्त्रकस्त्वं
अदृश्यतामेषि शिरोऽग्रमेव ।
संदृश्यसे प्रावृषि निर्गतायाम्
त्वं खञ्जनाश्चर्य्यमयो नमस्ते ॥")

मुनिपुष्पं, क्ली, (मुनिद्रुम इति । "ष्ठाचा शाबूई द्वितीयादचः ।" ५ । ३ । ८३ । इत्यत्र "विनापि प्रत्ययेन पूर्व्वोत्तरपदयोर्विभाषा लोपो वक्तव्यः ।" इति काशिकोक्तेः द्रुम इत्यस्य लोपे मुनिः तस्य पुष्पम् ।) वकपुष्पम् ॥ (यथा, तिथितत्त्वे ।
"विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्त्तिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥"
वकवृक्षे, पुं । तत्पर्य्यायो यथा,—
"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मुनिपुष्पकं, क्ली, (मुनिपुष्प + संज्ञायां कन् ।) वकपुष्पम् । यथा, योगिनीतन्त्रे ।
"बिल्वपत्रञ्च माध्वञ्च तमालामलकीदलम् ।
कह्लारं तुलसीचैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिका-
त्मकम् ॥"
इत्येकादशीतत्त्वम् ॥

मुनिपूगः, पुं, (मुनिप्रियः पूगः ।) गुवाकविशेषः । तत्पर्य्यायः । रामपूगः २ काशीनः ३ सुरेघटः ४ । इति त्रिकाण्डशेषः ॥

मुनिभेषजं, क्ली, (मुनीनां भेषजम् ।) अगस्त्यः । हरीतकी । लङ्घनम् । इति मेदिनी । जे, २९ ॥

मुनिसुव्रतः, पुं, (मुनिषु सुव्रतः ।) जिनार्हन् । स च बुद्धविशेषः । इति हेमचन्द्रः । १ । २१ ॥

मुनिस्थानं, क्ली, (मुनीनां स्थानम् ।) आश्रमः । इति हेमचन्द्रः । ४ । ६० ॥

मुनीन्द्रः, पुं, (मुनीनां मननशीलानां योगिनामिन्द्रः श्रेष्ठः ।) बुद्धः । इत्यमरः ।१।१।१४ ॥ मुनि-श्रेष्ठश्च ॥ (यथा, कथासरित्सागरे ।७५।१०८।
"पठन्नेव तथाच पार्श्वयोः स तमग्रहीत् ।
मुनीन्द्रः प्रकटीभूय समाश्वास्य जगाद च ॥"
दानवभेदः । यथा, हरिवंशे । ३१ । ९ ।
"वृषपर्व्वा विरूपाक्षो मुनीन्द्रश्चन्द्रलोचनः ।")

मुमुच उ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । ओष्ठ्यवर्ग-द्वितीयादिः । वोपधः । उ मुचित्वा मुक्ता । इति दुर्गादासः ॥

मुमुक्षुः, पुं, (मोक्तुमिच्छतीति । मुच् + सन् + उः ।) मुक्तिमिच्छुः । (यथा, श्रीमद्भगवद्गीतायाम् । ४ । १५ ।
"एवं ज्ञात्वा कृतं कर्म्म पूर्व्वैरपि मुमुक्षुभिः ।
कुरु कर्म्मैव तस्मात्त्वं पूर्व्वैः पूर्व्वतरं कृतम् ॥")
तत्पर्य्यायः । श्रमणः २ यतिः ३ वाचंयमः ४ व्रती ५ साधुः ६ अनगारः ७ ऋषिः ८ मुनिः ९ निर्ग्रन्थः १० भिक्षुः ११ । इति हेमचन्द्रः । १ । ७२ ॥ अथ मुमुक्षुलक्षणम् । मनुः ।
"इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्त्यते ।
निष्कामं ज्ञानपूर्व्वन्तु निवृत्तमुपदिश्यते ॥

प्रवृत्तं कर्म संसेव्य देवानामेति साष्टिताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥"
कामनापूर्व्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं तदेव कर्म्म कामनारहितं पुनर्मोक्ष-साधनाभ्यासपूर्व्वकं संसारनिवृत्तिहेतुत्वात् निवृत्त-मुच्यते। साष्टितां समानगतितां सर्व्वोत्कर्षत्वात् पञ्चभूतान्यत्येति अतिक्रामति मोक्षं प्राप्नोती-त्यर्थः। विष्णुपुराणे च।(१।०।६८) विशिष्टफलदा काम्या निष्कामाणाञ्च मुक्तिदा। भगवद्गीतायाम्।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठि-कीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥"
युक्तः ईश्वराय कर्म्माणि न फलाय इत्येवं समाहितः। फलं त्यक्त्वा कर्म्माणि कुर्व्वन्निति शेषः। शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवाम्। सत्त्वशुद्धिः ज्ञानप्राप्तिः सर्व्वकर्म्म-संन्यासः ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। अयुक्तस्तद्बहिर्म्मुखः। कामकारेण कामप्रेरित-तया कामतः प्रवृत्तेरिति यावत्। फले सक्तः सन् ममेदं कर्म्म करोमीत्येवं फले सक्तो नितरां बन्धं प्राप्नोति। तथा च अर्ज्जुनं प्रति भगवद्वाक्यम्।
"मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥"
संन्यस्य निःक्षिप्य समर्प्य इति यावत्। अध्यात्म-चेतसा विवेकबुद्ध्या ईश्वराय भृत्यवत् करोमि इत्यनया बुद्ध्या निराशीस्त्यक्तकामसङ्कल्पः। अतएव निर्म्ममः ममतारहितः। विगतज्वरः विगतशोकः। अतएवाह स एव।
"यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय। तत् कुरुष्व मदर्पणम् ॥"
विष्णुपुराणम्।
"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥"
कर्म्ममहीं भारतवर्षरूपाम्। एकादशस्कन्धे।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥"
वेदोक्तमेव कुर्व्वाणो न तु निषिद्धम्। ननु कर्म्मवि-धिवाक्यानि तत्तत्फलश्रवणात् स्वार्थैव न तु नैष्कर्म्म्यपरा फलसिद्धिरत्र यस्य निःसङ्गो-ऽर्पितमित्येवमाह ईश्वरेऽर्पितं न तु फलोद्देशेन। अथ फलस्य श्रुतत्वात् कर्म्माणि कृते फलं भवत्येव इत्याह रोचनार्थेति कर्म्मणि रुच्युत्पादनार्था। अतएव तत्रैव।
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम् ॥
उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च।
आसक्तमनसो मर्त्त्या आत्मनोऽनर्थहेतुषु ॥
न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि।
कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः ॥
एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः।
फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ॥"
इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थपरा न भवति किन्तु बहिर्म्मुखानां नृणां मोक्षविवक्षया अन्त-र्यामिकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं यथा, भैषज्ये खण्डादि रुच्युत्पादनम्। यथा,—
"पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान्।
पित्रैवमुक्तः पिबति न फलं तावदेव तु ॥"
तथापि निम्बपानस्य न खलु खण्डादिलाभ एव प्रयोजनं किन्त्वारोग्यम्। तथा वेदोऽप्यवान्तर-फलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते। ननु कर्म्मकाण्डे मोक्षस्य नामापि न श्रूयते कथ-मेवं व्याख्यायते अत आह उत्पत्त्यैवेति द्वाभ्याम्। उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबल-वीर्य्यादिषु स्वजनेषु पुत्रदारादिषु अनर्थहेतुषु परिणामतो दुःखहेतुषु आसक्तात् स्वार्थं परम-सुखमविदुषः अजानतः अतो न तान् प्रत्यो-भूताम् बुधो वेदो यद्बोधयति तदेव श्रेयः इति विश्वसितान् इत्यर्थः। तान् एवम्भूतान् वृजिना-ध्वनि कामवर्त्मनि देवादियोनौ भ्राम्यतः ततः पुनस्तमोभूतस्थावरादियोनिं विशत इति। पशु-काम इति च स्वर्गपुत्रादिकाम इति च अर्थं पुनस्तेष्वेव कामेषु अयं बुधो वेदो युञ्ज्यात् प्रव-र्त्तयेत्। तथा सत्यवादः स्यात् इति भावः। कथं तर्हि कर्म्ममीमांसकाः फलपरतां वदन्ति तत्राह। एवमिति व्यवसितं वेदस्याभिप्रायं अविज्ञाय कुसुमितामवान्तरफलरोचनया रम-णीयां परमफलश्रुतिं वदन्ति कुबुद्धयः कुबुद्धि-त्वाद्धि यस्मात् वेदज्ञा व्यासादयः न तथा वदन्ति इति। अतएव निष्कामकर्म्मैव आत्म-ज्ञानार्थतोक्ता यथा,—
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते ॥"
सोऽपि दुरितक्षयद्वारा न साक्षात्। तथा च।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥"
तथा श्रुतिः।
"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति
यज्ञेन दानेन तपसाऽनाशकेनेति।"
तं आत्मतत्त्वम् अतएव महाजनेन मोक्षमिच्छताऽवश्यं निष्कामेषु कर्म्मसु प्रव-र्त्तितव्यम्। पञ्चरात्रेऽपि भक्तेः काम्ये कर्म्मणि न प्रवर्त्तितव्यं इत्याह यत्नतः।
"काम्यं निःश्रेयसं विद्यादरिष्टाय कर्म्म च।
न दाति रोगिणेऽपथ्यं वाञ्छतोऽपि भिषक्-तमः ॥"
दाति ददाति इति भवप्रदीपे व्याख्या।
"हरिर्दास्यमहारत्नं भवदुःखक्षयम्।
पुरुषोत्तमतुल्यं यदिदं सर्व्वकामिकम् ॥
मद्भक्तिरूपं लोके यत्नात् कश्चित् सुधीः।
तस्मादिदं श्रीमदपि वैष्णवस्य धनिनः ॥"
इदं दानं मात्रेणकार्य्यदानकमेव विष्णुप्रीतिसि-द्धिस्त्र सर्व्वमेव दाने। विष्णुप्रीतेः सामान्यतः श्रुतत्वात्। अथ विष्णुप्रीतौ देवताधिकरणस्य-विरोध इति चेन्न सर्व्वेषदधिकारित्वेऽप्युक्तमेव तत्स्वार्थयाचकान् इत्याहुः। मात्राकल्पद्रुम-कर्म्म किं मानमिति चेत् वामनपुराणे तत्सु-माधवेन तत्तद्दानमभिधाय।
"विष्णुप्रीत्यर्थमेतानि देयानि ब्राह्मणेभ्य।
देयानि विप्रमुख्येभ्यो मधुसूदनतुष्टये ॥"
इत्यभिधाय दाशेराशिमिमादिवसन्त्रमामि-मानात्। तथा च विष्णुधर्म्मोत्तरादिपुराणयोः।
"यत्र यत्र भवेत् प्रीतिर्विषयेभ्यो महात्मने।
तत्तदच्युततुष्ट्यर्थं विप्रेभ्यः प्रतिपादयेत् ॥"
विष्णुधर्म्मोत्तरतृतीयकाण्डे तु विष्णुसम्प्रदान-मेव दानं यथा,—
'विष्णोः प्रथमदानेन यावल्लोकमाप्नुयात्।'
इत्यादिना।
"सौरपत्तसमायुक्तान् कलशान् सुविभूषितान्।
दत्त्वा वै देवदेवाय वाजिमेधफलं लभेत् ॥"
इत्यन्तेन तत्तत् फलं तत्तद्दानमभिधायोक्तम्।
"अकामः सात्त्विको लोको यत् किञ्चिदपि वै-दयेत्।
तेनैव ज्ञानमाप्नोति यत्र गत्वा न शोचति।
धर्म्मार्थकामिका मूढाः सकामा नराधमाः।
अर्थयन्ति अनर्थाय ते कामानामनन्तरम्।
अकामस्तु फलं विष्णोः तद्भवत्यक्षयं सदा ॥"
तथा।
"यद्दत्तं प्रतीच्छते देवः सकामेन निवेदितम्।
सर्व्वं प्रतीच्छते दत्तमकामेन द्विजोत्तमाः ॥"
उक्तवामनपुराणवचने सार्व्वकालिकमिश्रमेव मधमाधाद्यपि विष्णुप्रीत्यर्थं देयमिति। इति मलमासतत्त्वम्।
(तत्र मुमुक्षुतायामुदयनाचार्य्य व्याख्यातामः। तत्र लोकशोकहारिणो मुमुक्षोरादित एवाचार्य्या-भिगमनं तत्त्वोपदेशात् ज्ञानम्। अपि च पाप-क्षयः धर्म्मशास्त्रानुगमनं तदर्थावबोधकमार-म्भणाच्च यथोक्ताः क्रियाः क्रमानुपालनमनन्तरं परित्यक्तं च शास्त्रविहितं कर्म्मेतत् सर्व्वं धर्म्ममूलविल-क्षणमनन्तिकादि परीक्ष्य ततः सर्व्वप्राणिषु आत्मवेदनया सर्व्वानामव्यवहारण-सम्प्राप्ता अवश्यमावश्यक योगो सर्व्वपरित्याग-त्वात् कीर्त्तिं प्रत्याख्यानं मानुरागविषयं क्रयावीचनरूपतो; सती निष्कर्षं योगाभ्यास-हेतोः सम्यक्ज्ञानं इत्यादिरूपं अत्यन्तमोक्ष-मार्गं प्राप्यसारसर्व्वस्वनिकायमध्ये प्रथो-मपद एवाम्यवहारः। अनामयमपि प्रोक्तं-मुत्थमभ्यन्तरबाह्यकौमपाम्भं व्याख्यातैः काय-निरूपणं वसैव विवेकात्; तथा विशालतादि-कर्म्मबन्धं इन्द्रियार्थमनुरागोपतापर्यवसायिनः सम्यक्ज्ञानादिनिराकारविचारप्रवृत्तिवेदादि-धर्म्मात्मेषु अभिभूमिका प्रवृत्तिः प्रकार-सुनिश्चयमात्रत्वमार्गं अनुपितामालचन्म"

शीतोष्णवातवर्षासुखदुःखसंप्रयोगजमलं शोकदैन्यविषमदमानलोभरागेर्ष्याभयक्रोधादिभिरस्थवनं अहङ्कारादिमुपसर्गसंज्ञा लोकपुरुषयोः सर्गादिग्रामाण्यविषयं कार्यकारणमयं योगारम्भे सततमभिर्वेदः सत्त्वोपघातोऽपवर्गाय धीधृतिस्मृतिबलाधानं नियमनमिन्द्रियाणां चेतसि चेतस आत्मन्यात्मनश्च धातुभेदेन शरीरावयवसंख्यानं अभीक्ष्णं सर्वं कारणवद्दुःखमस्वमनित्यमित्यभ्युपगमः। सर्वप्रवृत्तिषु दुःखसंज्ञा सर्वसंन्यासे सुखमित्यभिनिवेशः एष मार्गोऽपवर्गाय अतोऽन्यथा बध्यते इत्युदयनानि व्याख्यातानि। इति चरके शारीरस्थाने प्रथमेऽध्याये।)

मुमुचानः, पुं, (मुञ्चति जलं इति। मुच्+"मुचिमुचिभ्यां कानच्च।" उणा०। २। ८९। इति कानच्। द्वित्वञ्च। मेघः। इति संक्षिप्तसारोणादिवृत्तिः॥ (मुक्तः। यथा, ऋग्वेदे।

"इरम्मदेव मुमुचानः खिनः जातो मत्सादिव।"

"खिनो धर्माक्तो जातो मुमुचानो मुक्तो-भवति।" इति तत्र गुणविष्णुटीका॥)

मुमूर्षुः त्रि, (मर्त्तुमिच्छुः। मृ+सन्+उः।) आसन्नमृत्युः। (यथा श्रीमद्भागवते। ७।८।११।

"यस्त्वं मे मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे।

मुमूर्षूणां हि मन्दात्मन्! ननु स्युर्विक्लवा गिरः॥")

अथ मुमूर्षुकृत्यानि। हारीतः।

'शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः।

स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति॥'

शूद्रान्नं शूद्रस्वामिकान्नम्। तद्दत्तमपि भोजनकाले तद्गृहावस्थितं यत् तदपि शूद्रान्नम्। तथाङ्गिराः।

'शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।

निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥'

अपिशब्दात् आपात् तद्दत्ततण्डुलादि न तु तद्दत्तपरेणादिना क्रीतमपि। अस्यहानौ पुनरङ्गिराः।

'यथायसगतो ग्रामः शुद्धिं याति नदीं गताः।

शूद्राद्गृहप्रवेशनं प्रविशत्तु यदा शुचि॥'

प्रविष्टं तस्यापादकप्रतिपत्त्यादिना इति शिवः। अतएव पराशरः।

'तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः।

द्विजातिकरसंस्पृष्टं सर्वं तद्धविरुच्यते॥'

स्पृशति प्रतिगृह्णाति इति कल्पतरुः। तत्र संशोध प्रायश्चित्त विष्णुपुराणम्।

'संशोधयित्वा शूद्रीयाच्छूद्रान्नं यदभ्यागतम्।'

तत्र पाकान्तरे प्रायश्चित्तं अङ्गिराः।

'अपाके यत्तु विप्रस्तं शूद्रो यच्छति निर्भयः।

पाकान्तरगतं प्राश्यं दुर्गं व्यवदमागतम्॥'

एतेन व्यवदमागतस्यैव शुद्धत्वम्।

तद्वृत्तगतस्य शूद्रान्नदोषभागित्वं प्रतीयते। तदवैश्यापि दानशूद्रवा सर्वथा शूद्रान्नं न भोक्तव्यम्॥०॥

पूजारत्नाकरे।

'शालग्रामशिला यत्र तत्र सन्निहितो हरिः।

तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं पदम्॥'

लिङ्गपुराणे।

'शालग्रामसमीपे तु क्रोशमात्रं समन्ततः।

कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः॥'

कीकटो मगधः॥०॥ वैष्णवामृते व्यासः।

'तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्।

स निर्भर्त्स्य यमं पापी लीलयैव हरिं विशेत्॥

प्रयाणकाले यस्यास्ये दीयते तुलसीदलम्।

निर्वाणं याति पक्षीन्द्र! पापकोटियुतोऽपि सः॥'

कूर्मपुराणम्।

'गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले।

जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे॥'

स्कान्दे।

'गङ्गायां त्यजतः प्राणान् कथयामि वरानने!।

कर्णे तत् परमं ब्रह्म ददामि मामकं पदम्॥'

तथा।

'तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते।

अत्र दानं जपो होमो गङ्गायां नात्र संशयः॥

अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥'

गव्यूतिः क्रोशयुगम्। तीर्थचिन्तामणौ ब्रह्मपुराणम्।

'अत्र दूरे समीपे च मध्ये योजनद्वयम्।

गङ्गायां मर्त्त्यैनैव नाम कार्या विचारणा॥'॥०॥

एवं गङ्गादिमरणेन प्राप्तब्रह्मलोकस्याप्यौर्द्ध्वदेहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्यत्वात्। तथा च श्रीमद्भागवते।

'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः।

आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत्॥

संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले।

सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥

तस्य निर्हरणादीनि संपरेतस्य भार्गव!।

युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत्॥'

सर्वे आत्मनि परमात्मनि आत्मानं जीवात्मानं निवेश्य एकीकृत्य स भीष्मः उपारमत् मुक्तिं गतवान्। निष्कले निरुपाधौ ब्रह्मणि संपद्यमानं मिलितं आज्ञाय आकलय्य तस्य भीष्मस्य निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक् परेतस्य मुक्तस्यापि। भार्गवेति शौनकस्य सम्बोधनम्। एवञ्च एतेषामपि तत्तत्कर्म्मभिः तत्तत्पर्य्यायप्रेतपदस्य पितृपदस्य च मन्त्रादिषु यथायथं प्रयोगविधानात् प्रयोगः कर्त्तव्यः।

'आसन्नमृत्युना देया गौः सवत्सा च पूर्व्ववत्।

तदभावे च गौरेका नरकोद्धारणाय वै॥

तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम्।

शक्तोऽन्योऽप्यथवा तदा दत्त्वा श्रेयो ददात् मृतस्य च॥'

पूर्व्ववदिति मत्स्यपुराणादिना।

अत्र मृतस्य चेति अन्यान् एकादशाहादौ वैतरणीदानाचारः। कल्पतरौ च।

'सार्द्धः प्रवसतो मित्रं भार्य्या मित्रं गृहे सतः।

आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥'

वराहपुराणे।

"व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः।

पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः॥

गोभूतिलहिरण्यादि दत्तमक्षयतामियात्॥"

निरवकाशत्वादत्र मलमासादिदोषो नास्ति सूतकमपि न। तथा च शुद्धिरत्नाकरे दक्षः।

"दानकाले स्थितं सर्वं सूतकं परिकीर्त्तितम्।

आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम्॥"

इति शुद्धितत्त्वम्॥

मुर, श वेष्टने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मवर्गशेषादिः। श मुरति वर्त्मं लता। मोरिता। इति दुर्गादासः॥

मुरं क्ली, (मर्य्यते इति। मुर्+अन्यत्रापीति भावे कः।) वेष्टनम्। इत्यमरटीकायां मथुरेशः॥

मुरः, पुं, (मुरति वेष्टतेऽसौ। मुर्+इगुपधत्वात् कर्त्तरि कः।) दैत्यविशेषः। इति मेदिनी। रे, ७०॥ यं हत्वा विष्णुर्मुरारिनामाभूत्॥ (यथा, श्रीमद्भागवते। ३।३।११।

"प्रमरं द्विविदं कार्य्यं मुरं बल्वलमेव च।

अन्यांश्च दन्तवक्रादीनवधीत् कांश्च घातयत्॥")

मुरगजः, पुं, (मुरं वेष्टनमिव गच्छति इवति अनेन। गम+अप्।) वरजः। इति जटाधरः। वबेक इति भाषा॥

मुरजः, पुं, (मुरात् संवेष्टनात् जायतेऽसौ। मुर+जन+डः।) मृदङ्गः। इत्यमरः। १।७।५॥

(यथा, रामायणे। ५।१८।३९।

"मुरजपणवमेघघोषवद्-

दशरथवेश्म बभूव यत् पुरा।

विलपितपरिदेवनाकुलं

व्यसनगतं तदभूत् सुदुःखितम्॥")

मुरजफलः, पुं, (मुरजवत् फलमस्य।) पनसवृक्षः। इति त्रिकाण्डशेषः॥

मुरण्डः, पुं, (मुरेण वेष्टनेन अण्ड इव शोभाकारित्व। इत्यमरादिगादेशात् पररूपम्।) लम्पाकदेशः। तद्देशस्थे, पुं भूम्नि। इति हेमचन्द्रः। ४।२७॥

मुरन्दला, स्त्री, (मुरं वेष्टनं दलं खण्डं दलति भिनत्ति। दल+अच्+स्त्रियां टाप्।) नर्म्मदा-नदी। इति त्रिकाण्डशेषः॥

मुरमर्द्दनः, पुं, (मुरं तन्नामानमसुरं मर्द्दयति चूर्णीकरोतीति। मर्द+ल्युः।) विष्णुः। इति पुराणम्॥

मुररिपुः, पुं, (मुरस्य रिपुः।) विष्णुः। इति शब्दरत्नावली॥ (यथा, छन्दोमञ्जर्य्याम्।१।१।

"नालिनतलितमधुरितकरनिपुणा निविलसता।

मुररिपुणा रतिपुलका बहुलितिता भ्रमरनिता॥")

मुरला, स्त्री, (मुरं वेष्टनं लाति। ला+कः।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥ (यथा, उत्तररामचरिते।३।[illegible]

नामा सुरला च। नमया। अस्ति सुरले! किमपि वनान्तेव। केरलदेशस्था काचिन्नदी। यथा च। रघुवंशे। ४। ५५।
"सुरलामारुतोद्धूतमगमत् कैतकं रजः।
तद्योधवारवाणानामयत्नपटवासताम्॥"
"सुरला नाम केरलदेशेषु काचिन्नदी।" इति तट्टीकायां मल्लिनाथः॥)

सुरली, स्त्री, (सुरं मधुरध्वनिविशेषं लाति प्राप्नोतीति ला+कः+स्त्रियां ङीष्।) वनामकवाद्यसुषिरवाद्यम्। तत्पर्यायः। वंशी २ वंशिका ३ वंशनालिका ४ धानेयिका ५ धानेयी ६ धानिका ७ सुरलाधिका ८। शिवचतुष्टयं नानापि। इति शब्दरत्नावली॥ (यथा, राधातन्त्रे। २१।
"वादयन् सुरलीं तत्र मन्त्रं वेद्यं तथापरम्।
कात्यायनीं नमस्कृत्य हरिः पद्मदलेक्षणः॥")

सुरलीधरः, पुं, (धृ+अच्। सुरल्याः धरः।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, तत्रैव।
"वैकुण्ठदक्षिणे भागे गोलोकं धर्मगोचरम्।
तत्रैव राधिका देवी द्विभुजो सुरलीधरः॥")

सुरवा, [न्] पुं, (सुरं वणोति। वन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

सुरा, स्त्री, (सुरति सौरभेण वेदयति। सुर+इगुपधत्वात् कः टाप् च।) गन्धद्रव्यविशेषमन्यद्रव्यम्। (यथा, गरुडपुराणे। १८०।
"तथा स्त्रियो हरेत् पीता सौवर्चलयुतासुरा।")
तत्पर्यायः। तालपर्णी २ दैत्या३ गन्धकुटी ४ गन्धिनी ५। इत्यमरः। २। ४। १२९।
(तथास्याः पर्यायान्तरं गुणाश्च।
"सुरा गन्धकुटी दैत्या सुरभिः प्रावणयिका।
सुरा तिक्ता हिमा स्वादी लघ्वी पित्तानिला-
पहा।
ज्वरदाहभ्रमच्छर्दिकुष्ठदाहविनाशिनी।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥
तस्या वचनं यथा। सुरा पीता वरा प्रोक्ता। इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे॥)
अस्या मधुरत्वगुणाः। अपस्मारज्वरोन्माद-नाशित्वम्। इति राजवल्लभः॥ राजनिर्घण्टोक्त-गुणपर्यायौ मुरामब्दे द्रष्टव्यौ॥

सुरारिः, पुं, (सुरस्यारिः।) श्रीकृष्णः। अस्य व्युत्पत्तिर्यथा,—
"सुरः क्लेशे च सन्तापे कर्मभोगे च कर्मिणाम्।
दैत्यभेदेऽप्यरिस्तेषां सुरारिस्तेन कीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
अस्य वधवृत्तं यथा,—
श्रीनारद उवाच।
"कोऽसौ सुरारिर्विप्रर्षे! दैत्यो यस्तु त्वं नरः।
दैत्यो वा राक्षसो वापि पार्थिवो वा तदुच्यताम्॥"
पुलस्त्य उवाच।
"कोऽसौ दनुःकदम्बान्गतस्तस्य समागतः।
निर्भयः सर्वतो वापि सुरारिर्भोगतत्परः॥"
श्रीनारद उवाच।
"योऽसौ सुर इति ख्यातः कस्य पुत्रश्च गोपते।
कथञ्च निहतः संख्ये विष्णुना तद्वदस्व मे॥"
पुलस्त्य उवाच।
"श्रूयतां कथयिष्यामि सुरासुरनिबर्हणम्।
विचित्रमिदमाख्यानं पुण्यं पापप्रणाशनम्॥
कश्यपस्यौरसः पुत्रो सुरो नाम महाबलः।
स ददर्श रणे मृत्युं दितिपुत्रोऽसुरोत्तमः॥
ततः स मरणाद् भीतस्तप्त्वा वर्षगणान् बहून्।
आराधयामास विभुं ब्रह्माणमपराजितम्॥
ततोऽस्य तुष्टो वरदः प्राह वत्स! वरं वृणु।
स च वव्रे सदा दैत्यो वरमेनं पितामहात्॥
यं यं करतलेनाहं स्पृशेयं समरे विभो!।
स स मद्धस्तसंस्पृष्टस्त्वमरोऽपि म्रियत्विति॥
बाढ़मुक्त्वा च भगवान् ब्रह्मा लोकपितामहः।
ततोऽभ्यगात्तत्खलितेशा सुरः सुरगिरिं बली।
समाह्य धर्मराजानं विचेतुं दण्डपाणिनम्॥"
सुर उवाच।
"यम! मनार्थमभिवितिश्रुतं कर्तुमर्हसि।
यो चैतयाद्य छित्वाहं महीमं पालये भुवि॥
तस्माद्य धर्मराट्वाक्यं यदि मां संयमेद्वयात्।
गोपितादिपि पुरा धन्यं करिष्ये वचनं तव॥
सुरस्तमाह भवतः कः संयमा मदस्त मात्।
अहं तव पराजित्य पारयामि न संशयः॥
यमस्तं प्राह मां विष्णुर्देवशङ्खगदाधरः।
ज्वितश्चापनिवासी यः स मां संयमतेऽव्ययः॥
इत्येव सुतो वचनं तुण्डाभिमगमत्सुरः॥
तमागतं प्राह सुने! मधुघ्नः
प्राप्तोऽसि केनासुर! कारणेन।
स प्राह युद्धं यच्छ वै मयाद्य
तं प्राह भूयः सुरमुग्रधन्वा॥
यदीह मां योद्धुमुपागतोऽसि
तत् कम्पते ते हृदयं किमर्थम्।
ज्वरातुरस्येव सुहुर्मुहुर्मे
तस्मैव योत्स्ये सह कातरेण॥
इत्येवमुक्तो मधुसूदनेन
सुरस्तदा स्वे हृदये स्वहस्तम्।
कथं नु कम्पेति सुविस्मितोऽसौ
निपातयामास विपन्नबुद्धिः॥
करेण वक्षं स्वयमात्मनैव
समीक्ष्य तत्स्य स्थिरस्तु प्रभोः।
चिच्छेद देवास्तु मनःस्वभावम्
दैत्यं प्रहर्षन्ति च पद्मनाभम्।
इतः प्रसिद्धं मधुसूदनाम
सुरारिरित्येव हरिर्बभाषे॥"
इति वामने ६०। ६८ अध्यायौ॥ ०॥
अनर्घराघवनाटककर्त्ता। यथा। 'अस्ति मौद्गल्यगोत्रसम्भूतस्य महाकवेर्भट्टश्रीवर्द्धमानाङ्कस्य तनुमतीतनयस्य सुरारिनामधेयस्य कवेः कृतिरनर्घराघवं नाम नाटकं तदद्य भवतां सामाजिकानामग्रे।' इति तत्प्रस्तावना-गदम्॥

सुधँ क्षा मोहे। उच्छाये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पवर्गादिः। उच्चे। तेन क्विपि रात्तीय इति क्वौ सुरौ सुरः। क्षा मध्यवृत्तं लृशं तेन। मोहो मानरहितोभावः। उच्छायो वृद्धिः। सम्बेति रोगी। सुगर्ध्ये यशं रामस्य यमावश्चे वराविति रघुः। इति दुर्गादासः॥

सुभिक्षी, स्त्री, अङ्गारधानिका। इति शब्द-चन्द्रिका॥

सुर्मुरः, पुं, तुषानलः॥ (यथा, माघे। ६। ६।
"शरद्गुताशनासुर्मुरचूर्णतां
दधुरिवाग्रवनस्य रजःकणाः।
निपतिताः परितः पथिकव्रजा-
नुपरि ते परितापुरतो भ्रमम्॥")
मन्मथः। रविवाजिः। इति मेदिनी। रे, ९०॥
(स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ६। २२१। २५।
"भारती सुप्रयोगा च कावेरी सुर्मुरा तथा।
सुरवेणा ह्यमवेणा कपिला ग्रोव एव च॥")

सुन्र्वे इं बधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्विपायामनिट्।) अन्तःस्थमध्यः। नः सुरौ सुरः। मन्दो नमनम्। ई नर्थः। इति दुर्गादासः॥

सुर्क्ष रोपणे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्। अङ्कार्थे भ्वा०-उभ०-सक०-सेट्।) रोपणं आरोपणम्। स मोपयति दृषं लोकः। गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं वपन इति व्याख्याति। इति दुर्गादासः॥

सुषटी, स्त्री, (सुष+अटन्। पृषोदरादित्वात् साधुः।) चितकरुः। इति हेमचन्द्रः॥

सुष(ष)विका, स्त्री, (सुष+"इषादिभ्यश्चित्।" उणा० १।१०७। इति अकविन् स्यात्। टाप्। ततः संज्ञायां कन्। अत्वात्वमिति।) पक्षी। तालमूली। तत्पर्यायः सुषवा२ तालपत्रिका३ गोधापदी४ हेमपुष्पी५ मूलाखी६ दीर्घकन्दिका७ सुषली८ तालिका९ तालमूलिका १०। इति शब्दरत्नावली। आर्द्रा११। इति जटाधरः॥ अस्या गुणाः। मधुरत्वम्। शीतत्वम्। उष्णत्वम्। पुष्टिबलप्रदत्वम्। पिच्छिलत्वम्। कफदत्वम्। पित्तदाहश्रमनाशित्वञ्च।
"सुषवी च हिमा प्रोक्ता श्वेता श्वापर-
संज्ञिका।
श्वेता कफघ्नकौषिता अपरा च रसायनी॥"
इति राजनिर्घण्टः।
"तालमली तु विद्विद्भिर्मुशली परिकीर्त्तिता।
मुशली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा॥"
इति भावप्रकाशः॥

सुष वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मोषति। इति दुर्गादासः॥

सुष न पुष्टौ। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-सेट्।) स सुष्णाति। इति दुर्गादासः॥

मुष य हर् छिदि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) छिद इह खण्डनम् । य मुष्यति विपर्णं चतुरः । इर् अमुषत् अमोषीत् अमात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

मुषलः, पुं, क्ली, (मोषति मुष्यतेऽनेन वेति । मुष्+ "वृषादिभ्यश्चित् ।" उणा० १ । १०८ । इति कलच् चित् स्यात् ।) अयोऽग्रम् । इत्यमरटीकायां भरतः ॥ इत्यमधोऽपि ॥ (यथा, मार्कण्डेये । ११६ । १८ ।

"मुषन्दं नाम मुषलं त्वष्टा यन्निर्मितं पुरा । तत्नहार स दुरात्मा तेन हन्ति रणे रिपून् ॥"

विश्वामित्रसुतः । यथा, महाभारते ।१३।४।५२।

"बाहुश्चिर्मुषलश्चैव वचोमीवस्तथैव च ॥"

(तालव्यमध्योऽप्ययम् । "मुष् खण्डने मुषलः ।" उणा० १ । १०८ । इत्यनेनोज्ज्वलदत्तवृत्तिः ॥)

मुषली, स्त्री, (मुष्यत इति । मुष्+कलः ङीष् ।) तालमूलिका । गृहगोधिका । इति शब्दरत्नावली ॥

मुषल्यः, त्रि, (मुषलमर्हतीति । मुषल+ "दण्डादिभ्यो यः ।" ५ । १ । ६६ । इति यः ।) मुषलवध्यः । इत्यमरटीकायां भरतः ॥

मुषा, स्त्री, (मुष्+कः टाप् ।) मूषा । इत्यमरटीकायां रायमुकुटः । २ । १० । ३३ । मुची इति भाषा ॥

मुषितं, त्रि, (मुष्+कर्मणि क्तः ।) चोरितद्रव्यम् । तत्पर्य्यायः । मूषितम् २ । इत्यमरः ।३। १।८८। (वञ्चितः । यथा, भागवते ।१।१३।२७।

"नाहं वेद व्यवसितं पितोर्वः कुलनन्दन ।। गान्धार्या वा महाबाहो । मुषितोऽस्मि महात्मभिः ॥"

"मुषितो वञ्चितोऽस्मि ॥" इति तट्टीकायां श्रीधरः ॥)

मुष्कः, पुं, (मुष्णाति वीर्य्यमिति । मुष्+"सृवृभूशुषिमुषिभ्यः कक् ।" उणा० ३ । ४१ । इति कक् ।) अण्डकोषः । इत्यमरः । २ । ६ । ६६ । (यथा, वाग्भटे निदानस्थाने नवमे अध्याये ।

"आनाहुतमहत्तं हि मुष्कयोरन्तरेऽनिलः ॥")

मोक्षकवृक्षः । संघातः । इति मेदिनी । के, ११ ॥ तस्करः । मांसलः । इति हेमचन्द्रः ।३।२७६।

मुष्ककः, पुं, (मुष्क । संज्ञायां कन् ।) वृक्षविशेषः । घण्टापारुल इति बङ्गभाषा । मोखा इति हिन्दी भाषा । तत्पर्य्यायः । मोक्षकः २ मुष्ककः ३ घण्टापाटलिः ४ मोक्षः ५ । इत्यमरः । २ । ४ । ५९ । मोचकः ६ मुष्कः ७ मोषकः ८ मुषकः ९ गोलिहः १० मेहनः ११ वारदण्डः १२ पाटली १३ विषापहः १४ जटालः १५ वनवासी १६ तीक्ष्णकः १७ । इति राजनिर्घण्टः ॥ गोलिहः १८ चारमेदः १९ घण्टा २० घण्टाकः २१ भाटः २२ । इति शब्दरत्नावली ॥ स तु श्वेतकृष्णवर्णभेदाभ्यां द्विविधः । तस्य गुणाः । कटुत्वम् । तिक्तत्वम् । पाचित्वम् । उष्णत्वम् । कफवातक्षयकारित्वम् । विषमेदोगुल्मकण्डुपित्तरोगशमिशुक्राश्मिलत्वच । इति भावप्रकाशः ॥ रेचनत्वम् । पाचनत्वम् । प्लीहोदरार्त्तिनाशित्वच । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । चिकित्सास्थाने । ६ अध्यायः ।

"नीर्थ्यं पक्वं तद्वरिद्रायेन दग्धात् कुष्ठं मुष्कके चापि सर्पिः ॥")

मुष्करः, पुं, (प्रशस्तः मुष्कोऽस्यास्ति । मुष्क+ "ऊषसुषिमुष्कमधो रः ।" ५।२।१०७ इति रः ।) प्रलम्बाण्डः । इति हेमचन्द्रः । ३ । १२१ ॥ (यथा, शतपथब्राह्मणे । ३ । ७ । २ । ८ ।

"रेतो विकरोति मुष्करो भवत्येष वै प्रजनयिता यन्मुष्करस्तस्मान्मुष्करो भवति सं न ध ॥")

मुष्कशून्यः, पुं, (मुष्केण शून्यः ।) दृषणरहितः । स तु राज्ञोऽन्तःपुररक्षकः । खोजा इति भाषा । तत्पर्य्यायः । अशुपस्थः २ स्त्रीस्वभावः ३ महल्लिकः ४ । इति शब्दमाला ॥

मुष्टिः, पुं, स्त्री, (मुष्+क्तिच् ।) पलपरिमाणम् । चारि तोला इति भाषा । (वैद्यके आठतोला इति प्रसिद्धिः ।

"स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा । शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रचतुर्थिका ॥"

इति वैद्यकशार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥

'पलार्द्धं शुक्तिमिच्छन्ति तथाष्टमाषकाख्यिति ।' पलं बिल्वञ्च मुष्टिः स्यात्————॥"

इति गारुडे अष्टाधिकद्विशततमेऽध्याये ।)

बद्धपाणिः । मुटा इति भाषा । तत्पर्य्यायः । सम्पिण्डिताङ्गुलिपाणिः २ मुस्तः ३ संपुटी ४ । इति हेमचन्द्रः । ३ । २६१ ॥ त्सरुः । इति मेदिनी । टे, २५ ॥ खड्गेर मुट् इति भाषा । (यथा, महाभारते । १ । १६ । १७ ।

"परिघैरायसैस्तीक्ष्णैः सन्निकर्षे च मुष्टिभिः । निघ्नतो समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥")

कुडवचतुर्भागः । छटाक इति भाषा । यथा,—

"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलः ।" इति प्रायश्चित्ततत्त्वम् ॥

(मुष्+क्तिन् ।) मोषणम् । इति मुग्धबोधव्याकरणात् । प्रहारविशेषः । किल इति भाषा । यथा, मार्कण्डेयपुराणे । ८० । १५—१६ ।

"विच्छेदायततक्षाख्य मुद्गरं निशितैः शरैः । तथापि सोऽभ्ययावन्नी मुष्टिमुद्यम्य वेगवान् ॥ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः । देव्यास्तञ्चापि सा देवी तलेनोरस्यताडयत् ॥"

पथि स्थापितस्य तिलादीनां मुष्टिमवहति चौर्य्याभावः । यथा, कौर्म्मे उपविभागे १५ अध्याये ।

"तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः । क्षुधार्त्तैर्नान्यथा विप्र ! धर्म्मविद्भिरिति स्थितिः ॥"

(मुष् स्तेये+अधिकरणे क्तिन् ।) मुष्टिमोषणकालः । यथा, महाभारते । ३ । ५ । ६५ ।

"अचिरञ्च मुष्टिच पदरात्रे परन्तप । अचिराय महाराज ! निहंसि समरे रिपून् ॥"

"मुष्टिः प्रजानां मोषणकालः दुर्भिक्षमिति यावत् ॥" इति तट्टीकायां नीलकण्ठः ॥)

मुष्टिकः, पुं, (मुष्णाति परवीर्य्यमिति । मुष्+क्तिच् संज्ञायां कन् ।) कंसराजमल्लविशेषः । इति श्रीमद्भागवतम् । (यथा च हरिवंशे ।८१।१६०।

"नागं कुवलयापीडं चाणूरं मुष्टिकं तथा ।"

मुष्टिः प्रयोजनमस्य । मुष्टि+कन् ।) स्वर्णकारः । इति हेमचन्द्रः । ३ । ५७२ ॥

मुष्टिकान्तकः, पुं, (मुष्टिकस्यान्तकः ।) बलदेवः । इति शब्दरत्नावली ॥

मुष्टिद्यूतं, क्ली, (मुष्ट्या द्यूतं क्रीडनम् ।) द्यूतक्रीडाविशेषः । पुरमुद् खेला इति भाषा । तत्पर्य्यायः । क्षुल्लकम् २ । इति शब्दमाला ॥

मुष्टिन्धयः, पुं, (मुष्टिं धयति पिबति । धेट्+ "नाडीमुष्ट्योश्च ।" ३ । २ । ३० । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) बालकः । इति सिद्धान्तकौमुदी ॥

मुष्टिबन्धः, पुं, मुष्टिबन्धनक्रिया । मुटाबाँधा इति भाषा । तत्पर्य्यायः । संग्राहः २ । इत्यमरः । ३ । २ । १४ ॥ मुष्टेर्बन्धोऽङ्गुलिविन्यासो मुष्टिबन्धः । मुष्टिना बन्धो दृढग्रहणं संग्राह इत्यपरे । मुष्ट्यामेव संग्रह इत्यन्ये । मुष्टिः क्रियाच संग्रह इति कोषान्तरः । इति भरतः ॥

मुष्टीमुष्टि, अ, मुष्टामुष्टि । मुष्टिभिर्मुष्टिभिः प्रहृत्य यद्युद्धं वृत्तं तत् । किलाकिलि इति भाषा । इति मुग्धबोधव्याकरणम् ॥

मुष्ठकः, पुं, (मुष्+बाहुलकात् ठयन् । ततः संज्ञायां कन् ।) राजसर्षपः । इति रत्नमाला ॥ मुष्टक इति वा पाठः ॥

मुस य हर् छिदि । खण्डने । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) य मुस्यति विपर्णं चतुरः । इर् अमुसत् अमोसीत् । अमात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

मुसलः, पुं, क्ली, (मुस्यति खण्डयतीति । मुस+ "वृषादिभ्यश्चित् ।" उणा० १।१०८ । कलः चित् स्यात् ।)धान्यावघातसाधनकाष्ठादिनिर्म्मितलौहाग्रयष्टिः । तत्पर्य्यायः । अयोऽग्रम् २ । इत्यमरः । २ । ९ । २५ ॥ मुषलम् ३ अयस्कीलकः ४ । इति शब्दरत्नावली । मुस्यति मुस्यति खण्डयति मार्तृभिरिति वा कलः । मुषली दन्त्यसकारः । एवं मुस इति दहिरौ द्वितीयात् कलः मुर्द्धन्यवान्तव । इत्यमरटीकायां भरतः ॥ (आयुधविशेषः । तत्कारो यथा, वैशम्पायनोक्तधनुर्वेदे ।

"मुसलस्तु घटीबाहो करैः पादैर्विवर्ज्जितः । मध्ये चार्त्तो निखननः पातनं पोथनं द्वयम् ॥")

यथा, मनौ । ८ । ३१५ ।

"स्कन्धेनादाय मुषलं लगुडं वापि खादिरम् । शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥")

मुसलामुसलि, अ, मुसलेन मुसलेन प्रहृत्य प्रवृत्तम् । इति सिद्धान्तकौमुदी ॥

मुसली, स्त्री, (मुसल+गौरादित्वात् ङीष्।) तालमूलिका। गृहगोधिका। इत्यमरः। २। ५। १२।

मुसली, [न्] पुं, (मुसलं प्रहरणत्वेनास्त्यस्येति। मुसल+इनिः।) बलदेवः। इत्यमरः।१।१।२४।

मुसल्यः, त्रि, (मुसलमर्हतीति। मुसल+यः।) मुसलेन वध्यः। इत्यमरः। २। ३। ३५।

मुस क खण्डने। इति कविकल्पद्रुमः। (दिवा०-पर०-सक०-सेट्।) पञ्चमस्वरादिः। क मुस्यति। इति दुर्गादासः।

मुस्तः, पुं, (मुस्तयति सङ्घातं करोतीति। मुस्त+अच्। एकाधिकारात् बहुलकात् तथा...।) मुस्तकम्। इति शब्दरत्नावली। (यथा बृहत्संहितायाम्। ७७। ११।
"भागैश्चतुर्भिः सितशैलमुस्ता:
श्रीवासमांसी नखगुग्गुलू च।
धूपं इलोयो मधुपिण्डितोऽयं
कोपच्छदो नाम नरेन्द्रधूपः॥")

मुस्तकः, पुं स्त्री, (मुस्त+स्वार्थे कन्।) स्वनामख्यातक्षुपविशेषः। मुथा इति भाषा। तत्पर्य्यायः। कुरुविन्दः २ मेघनामा ३ मुस्ता ४। इत्यमरः। २। ४। १५८। मुस्तः ५ राजकशेरुः ६। इति शब्दरत्नावली। वैवाग्रम् ७ वाङ्गेयम् ८ भद्रमुस्तकम् ९। इति रत्नमाला। घननामकः १० श्रीभद्रा ११ भद्रकः १२ भद्रा १३। इति शब्दरत्नावली। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। वायुनाशित्वम्। पाचित्वम्। दीपनत्वञ्च। इति राजवल्लभः। अपि च।
"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकः।
कुरुविन्दश्च ख्यातोऽपरः कोरविन्दकः।
भद्रमुस्ताश्च गुन्द्रा च तथा नागरमुस्तकः।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्।
कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुजित्।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम्॥"
इति भावप्रकाशः॥

मुस्तकः, पुं, (मुस्तयति संहतीकरोति बधिर-मिति। मुस्त+कः। ततः स्वार्थे कन्।) कर्णरोगविशेषः। इति हेमचन्द्रः। २। ५९६।
(यथा, सुश्रुते कल्पस्थाने। २।
"धमन्यादिसृष्टत्वमपि मुस्तके दर्शीलिङ्गे॥")

मुस्ता, स्त्री, (मुस्त+टाप्।) मुस्तकः। इत्यमरः। २। ४। १५८। (तथास्याः पर्य्यायः।
"मेघाख्यं मुस्तकं मुस्ता वाहियं भद्रमुस्तकम्।"
इति वैद्यकरत्नमालायाम्॥
यथा सुश्रुते सूत्रस्थाने। ३३।
"नीरजा पद्मबीजाश्च दीर्घं मुस्तकसेवनात्।
बोधं विदधत् मुस्ता त्रिफलामलकं तथा॥")

मुसारः, पुं, (मुसमालतीति। अर्+घञ्।) मूषकः। इति जटाधरः।

मुस्ताभं, क्ली, (मुस्ताभिवाभा यस्य।) मुस्तकविशेषः। कासर मुथा इति भाषा। तत्पर्य्यायः। कुरुवि-टम् २ पुरम् ३ बलम् ४ परिपेलवम् ५। इति रत्नमाला। (गुणा अस्य मुस्तकशब्दे ज्ञातव्याः।)

मुहः, पुं, (मुह्यति अज्ञानत्वेन। मुह्+बाहुलकात् कुन्।) मूर्खः। इति हेमचन्द्रः। ३। २६२।

मुहं, स्त्री, मुखम्। मुखधातोरौणादिककप्रत्य-येन निष्पन्नम्। ५। ११। इति सिद्धान्तकौ-मुद्यामुणादिवृत्तिः। (अपभ्रंशमिदमुक्तम्।)

मुह ग ञ लि वैचित्त्ये। इति कविकल्पद्रुमः। (दिवा०-पर०-अक०-वेट्। रधादित्वादिट्।) वैचित्त्यं ज्ञानराहित्यमाह। य, येन मुह्यति चित्ताय मे मनः। इति हलादिः। ञ मोहि-ष्यति मोक्ष्यति। ग अमुहत्। लि मुग्धः मूढोऽस्ति। इति दुर्गादासः।

मुहिरः, पुं, (मुह्यति ज्ञानरहितो भवत्यनेन लोकः मुह्यति यमायामिति वा। मुह+"इषिमदीति उणा०।" १। ५२। इति किरच्।) कामः। मूर्खः। इति मेदिनी। रे, २०५। (अयमर्थः इन्द्रमुखरत्ने।)

मुहुः, [स्] अ, (मुह+"मुहेः किच्।" उणा० ४। १४१। इति उसिः किच्।) पुनः पुनः। इत्यमरः। ३। ४। १। (यथा, भट्टिकाव्ये। ७। १०१।
"आयुष्मानपरोक्षेव दृष्ट्वा पातम् सभागरम्।
विषादयद्दमताः असुभावपुरिवं मुहुः॥")

मुहुर्भाषा, स्त्री, (मुहुः भाषा भाषणम्।) पुनः पुनःकथनम्। तत्पर्य्यायः। अनुलापः २। इत्यमरः। १। ६। १६।

मुहूर्त्तः, पुं स्त्री, (हूर्छतीति। "अशिशकिभ्यः क्तः।" उणा० ३। ८८। इत्यत्र बाहुलकात् हूर्च्छेरपि इति उज्ज्वलदत्तः। मुहुरागमश्च माट्। "राल्लोपः।" ६। ४। २१। इति छलोपः।) द्वादशक्षणपरिमितकालः। इत्यमरः। १। ४। ११। घटिकाद्वयम्। इति राजनिर्घण्टः। (अस्य विंशतिर्मता। तत्र अभ्यर्दोबारक्षमाभोऽधिविभेदः। मयदश्याचि-मिसेनाः काष्ठा। विंशत्काष्ठाः कला। विंशतिकलो मुहूर्त्तः कलाः पञ्चमाश्च। त्रिंश-न्मुहूर्त्तमहोरात्रम्। इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये।) दिनस्य पञ्चदशभागमात्रः। यथा,
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"
इति तिथ्यादितत्त्ववचनम्॥०॥
कर्म्मविधौ तस्य परिमाणं यथा। अत्र प्रयोग-पारिजाते घटिकेवापि वा भवेदित्यत्र घटिकापदं दण्डपरं मुहूर्त्तपरं वा। घटिका-पारदत्वचतुर्द्दशकामलकाबीरमध्यावधि वचयो घटिकाः मासरश्मोरभ उच्यते दणानो प्रभाति घटिकाद्वयं घटिके घटिकाद्वयम्। दिवसम् सर्व्वकार्य्याणि कारयेत् विचारयेदिति दण्डद्वय-प्रतिविशिष्यमाणाविमामासिति मध्यमोदेव-मध्यमेव उभयत्र प्रयोगदर्शनादिति चेद्धवः। अत्रोच्यते। आह्वादावधमामिबोति घटिका-मिथामध्यवचनमृदुत्वरूपे मामेवसीमाधा घटिकाया मुहूर्त्तत्रिकमयावयमङ्गीकारात् तात्पर्य्यावधेन बलादाकपि तथाहम्।
"घटिकैकाप्यमावास्या प्रतिपत्सु न दृश्यते।
कर्म्म तदाहुरं दानं देवे कर्मापि चोदितम्॥"
इति घटिकाद्वये हिन्दामभिधाय घटिकामात्रे कर्म्मार्हेति वक्ष्ये मुहूर्त्तमयमावास्याप्रतिपत्सु भवेद्यदा। उदारतुतमं श्रेयं श्रेयं पूर्व्वं हि पूर्व्वदिवसेनेव मुहूर्त्तमात्रं कर्म्मार्हमाचराय। तथापि मुहूर्त्तः किं तत्दिनारात्रियकाल एव इत्यत्र्यम्। आह्वः प्रतिदिवदिवारात्री-भागद्वित्वात् तथाताराषामपि न्यूनाधिकादिवि-भिदायतेः। नापि द्वितीयः, द्वादशस्य विंशद् दशाधिकदिवारात्रियतत्वात् मुहूर्त्तस्य दशाद्याधिकन्यूनकालानामपि विंशद्दशा-धिकन्यूनदिवारात्रिमयत्वाद्वाद्यो मुहूर्त्त-प्रतिपादनेन विनियमनाविरहात् विकल्प-दशतया कर्म्माङ्गदिवारात्र्यवर्त्तमयत्वाच्च पञ्चदशकौ अयनाद्यन्तमेवोत्तरायणपूर्व्वार्द्ध-दिनमानयत्पूर्वस्थितदण्डौ यचरां-भ्रष्ट पादोनदण्डद्वयस्य मुहूर्त्तमात्रादित्वविशिष्ट-क्रियायां तावन्मुहूर्त्तकालस्यापि पक्षात् भवेत् न्यूनकालत्वच्छेदे चावाङ्कतया तत्रैव पादोन-दण्डद्वयात्मकस्य मुहूर्त्तस्य ग्रहणं कार्य्यम्।
"यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या क्षीयमाणा तदेव श्राद्धमिष्यते॥"
इति कात्यायनोक्तस्य चतुर्द्दशीयामाभिहित-चतुर्थयामस्य भागकालाध्याये आह्विका-भाग मध्याह्नदाक्षिण्यादौ अपराह्णमुहूर्त्तादिष्वपि विपर्य्ययाभाव पादोनदण्डद्वयात्मकमुहूर्त्तपञ्च-कात्मकत्वात्। तत्र यामद्वयाध्याये तद-धिकमुहूर्त्तपराह्णाद्यसम्भवात्। तत्र च मुहूर्त्त-पराह्णेयपादोनदण्डद्वयात्मकमुहूर्त्तानामस्य चत्वा-रिंशत्पर्वाविमाविंशत् विंशद्दण्डात्मकदिवस एव। अत एव कात्यायनाद्यैरपि यदा चतुर्द्दशी-यामभिमध्य साध्याभि तिथ्यादितत्त्वे यथा विहितम्। न च विंशद्दण्डात्मको ह्रस्वदिन-वत्सरात्। तस्य विंशद्दण्डके तु मुहूर्त्ते दशदण्डाख्यानात्। ते तु विंशद्दण्डाख्यस्य दश-मुहूर्त्तो दासप्रधानकः। अष्टादशविंशत्यौ दशदण्डमुहूर्त्तौ बाधकः। अत्रैवाङ्गतया न्यूनकालदण्डाच्छेदौ तत्र इति वाच्यं विकल्प-दण्डानां प्रतिपादकत्वे उपन्यस्तकालात् कालनिर्णयाकरस्थैव वचनैकवाक्यतयैव मुहूर्त्तस्यैव-मावाय विकल्पदण्डता एव भवन्ति। इत्थं च; अथवित्थं इतरत्र प्रतिपादकत्व प्रत्य-स्तमितोऽयमपि प्रमाणमेव। विकल्पप्रयत्न-प्रयत्नकालमात्रमयोत्तविकल्पदण्डकाला एव। विकल्पप्रयत्नकालाः प्रतिपत्त्यनन्तरमृदुस्वरीत

मुहूर्त्तार्थबोधकत्वं प्रकृतसम्बन्धज्ञानञ्च विना पदतात्पर्य्यज्ञानानुपदमेव पदार्थोपस्थापकत्वात्। सा च निरूढ़लक्षणा अभिधातुल्यार्थबोधकत्वात् कपिचार्थप्रयोगतोऽनुमानादपि निर्णीयते। वस्तुतस्तु श्रुतिस्मृतिः पञ्चदशाधिकाधिकत्वमुक्तनिरूढ़मुहूर्त्तपदलक्षणया विनिगमनाविरहमौरवाभ्यामेव कुण्ठिता यतोऽन्यन्न्यूनधारोदरदण्डद्वयात्मकमुहूर्त्तपदार्थं च्यस्वमेव। यथाऽत्यन्तन्यूनतया सर्व्वानुगमाय तद्ग्रहणमिति चेत् अत्यन्ताधिकतया धपादरदण्डद्वयात्मकमुहूर्त्तस्यैव कुतो न ग्रहणं स्यात् तस्मात्
"प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम्।
दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेत्॥"
इति ज्योतिःसारोक्तवचनविधायां रजन्यां प्रात्यक्षादन्तचतुष्टयम्। शाङ्गीणामदुमे सन्धिदिवसाद्यन्तसंक्षित इति अन्तर्वेदवचनयोरेकदण्डद्वयात्मककाले घटिकापदनिरूढ़लक्षणासिद्धौ तया पर्य्यायदारा कोषोक्तरूपा च समञ्जसतः पार्व्वणयोर्न्यदण्डद्वयात्मककाल एव घटिकापदानुपस्थाप्यते अतः सर्व्वसाधारण्येन न्यूनकालावच्छेदाय सैव ग्राह्या लाघवात्। अतएव यदा चतुर्द्दशीयामं तुरीयमनुपूरयेदन्त यदा यत्र दिने अमावास्यानुकूलापराङ्गीयएकदण्डन्यूनकालव्यापनं यथा स्यात्तथैव चतुर्द्दशीयामं तद्युक्तत्वीययाममनुक्षपीलत्य तत्र प्रदत्य चतुर्थयामं पूरयेत् व्याप्नोतीत्यन्वयः। अन्यथा चतुर्द्दशमुहूर्त्ताधिकपूरणाभिधानं व्यर्थं स्यात्। एतेनैव दर्शश्राद्धेऽपि सम्यापराह्णादरः कार्य्यः। प्रातःकालादिपञ्चधाविभागे कुतपादिसंज्ञायाश्च दिनमानपञ्चदशांशमुहूर्त्तस्यैव सैव पञ्चकम्। तद्बोधकशास्त्रसंवादात्। अत एकोद्दिष्टे दिनमानपञ्चदशांशमुहूर्त्तो योग्यतया च न्यूनकालावच्छेदको ग्राह्यः। कुतपरौहिणान्तरमानपाककयुक्तेः। एवं विधिनिषेधाभिधानात् शुक्ररात्रौ दण्डमात्रं अन्वाहार्य्यकार्य्यौदार्य्यादौ च कलाकाष्ठारूपोऽपि प्रतिकारो नृत्युक्तः। तयोर्व्यक्ताल एव न्यूनकालावच्छेदको ग्राह्यः। ततश्च विधिवक्तालप्राप्तकर्म्मेतरकर्म्मणः प्रशस्तादिकाले तयोर्व्यदण्डन्यूनकालविधिरेव व्याख्येयतानुगतविधिः कर्म्मणामप्रशस्तादिति तत्त्वम्। इति चन्द्रशेखरवाचस्पतिकृतद्वैतनिर्णयः॥

मुहिरः, पुं. (मुह्यति विचित्तोभवतीति। मुह + "कोटादयः।" उणा० १।५२। इति किरच्।) कामः। इति संक्षिप्तसारोणादिवृत्तिः॥

मुह वधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) पवर्गपञ्चमादिः। ह मवते। इति दुर्गादासः॥

मू, [र] स्त्री, मूर्च्छा। इति मूर्च्छधातोर्भावे क्विप् निपातनम्। इति मुग्धबोधव्याकरणम्॥

मू, स्त्री, (मवते इति। मव + क्विप्। "ज्वरत्वरस्रिव्यविमवामुपधायाश्च।" ६।४।२०। इति साधीयकारस्योठ् इत्यादेशः।) बन्धनम्। इति सिद्धान्तकौमुदी॥

मूकः, त्रि, (मवते बध्यतेऽसौ। मव + "बाहुलकात् कक्।" उणा० ३।४१। इति उपधायाया वकारस्य चोट्।) वाक्यरहितः। बोवा इति भाषा। तत्पर्य्यायः। अवाक् २। इत्यमरः। ३।१।३३। (यथा, महाभारते। २।५।१२५।
"कच्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि॥"
अस्योत्पत्तिहेतुर्यथा, गर्भवैकृत्यात्
"गर्भो वातप्रकोपेण दौर्हृदे वावमानिते।
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिन्मिन एव च॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥
रोगविशेषस्य विषयो यथा,—
"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥"
इति च तत्र निदानस्थाने प्रथमेऽध्याये॥)

मूकः, पुं. (मवते बध्यते जालिकैरिति। मव + कक्। पूर्व्ववत् साधनम्।) मत्स्यः। इति त्रिकाण्डशेषः॥ दैत्यः। इति मेदिनी। के, ३९॥ (दानवभेदः। यथा, महाभारते। ३।३९।७।
"स शक्तिकर्म्मामान्य पार्थस्याक्लिष्टकर्म्मणः।
मूकं नाम दनोः पुत्त्रं ददर्शाद्भुतदर्शनम्॥")
दीनः। इति हेमचन्द्रः। २।३३। (तक्षकपुत्त्रः। यथा, महाभारते। १।५७।१०।
"पिच्छलो मण्डलको मूकः सुकुमारः प्रवेपनः।
मुद्गरः शिशुरोमा च सुरोमा च महाहनुः॥
एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम्॥")

मूढः, त्रि, (मुह + क्तः।) मूर्खः। इत्यमरः। ३।१।४८॥ (यथा, पञ्चतन्त्रम्। ७।१०।
"अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः।
एकीभूय भवेन्मूढस्तत्र मूढैः प्रयुज्यते॥")
बालः। तन्द्रितः। इति मेदिनी। ढ, ६॥ अज्ञः। इति हेमचन्द्रः॥

मूतः, त्रि, (मव स्त्र. बद्धे वा क्तः।) बद्धः। इत्यमरः। ३।१।४५॥ (धान्यादिरक्षार्थं तृणमय आधारविशेषः। यथा, शतपथब्राह्मणे। २।६।२।१७। "तान् द्वयोर्मूतयोरुपनह्य वेणुयष्ट्यां वा कुटे वोभयत आवध्योर्द्ध परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत्॥" "यच्च तृणमये आवपने धान्यं बध्यते तन्मूतं मूतमेव मूतकम्। वेदमयी यद्यालम्बतः यष्टि।" इति तद्भाष्ये महीधरः॥)

मूत्र, त क प्रस्रावे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-उभ०-सक०-सेट्।) दीर्घी। मूत्रयति मूत्रापयति। इति दुर्गादासः॥

मूत्रं, क्ली, (मूत्र्यते इति। मूत्र + घञ्। कोषावयवात् क्लीवत्वम्। यद्वा, मुच्यते क्षिप्यते इति। मुच + "सिविमुच्योष्टेरूच्च।" उणा० ४।१६२। इति ष्ट्रन् टिद्भवति। ऊकारादेशः।) उपस्थनिर्गतजलम्। तत्पर्य्यायः। प्रस्रावः २। इत्यमरः। २।६।६७॥ मेहनम् ३। इति जटाधरः॥ गुह्यनिस्यन्दः ४ प्रस्रवम् ५ वस्तः ६। इति राजनिर्घण्टः॥ ७॥ (अस्योत्पत्तिविषयो यथा,—
"आहारस्य रसः सारः सारहीनो मलद्रवः।
शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात्॥"
इति पूर्व्वखण्डे चतुर्थेऽध्याये शार्ङ्गधरेणोक्तम्॥
"बस्तिपूरणविक्षेदकृन्मूत्रम्।"
तथास्य चयवृद्धिलक्षणं यथा,—
"मूत्रक्षये बस्तितोदोऽल्पमूत्रता च।"
"मूत्रं मुहुर्मुहुः प्रवृत्तिं बस्तितोदमाध्मानञ्च।"
इति सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये॥
तथास्य दोषादि विज्ञानस्य परीक्षा लक्षणम्॥
"वातेन पाण्डुरं मूत्रं रक्तं पीतञ्च पित्ततः।
रक्तमेव भवेद्रक्तात् धवलं पिच्छिलं कफात्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
तस्योत्सर्गविधिर्यथा,—
"दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्य्यान्मूत्रपुरीषे तु रात्रौ वै दक्षिणामुखः॥"
इति गारुडे ९४ अध्यायः॥
अपि च।
"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥"
इति मनुः। ४। ५०॥
"कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्।
विण्मूत्रे च गृही कुर्य्याद् यद्वा कर्णे समाहितः॥"
इति यमः॥
यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति। कर्णे दक्षिणकर्णे। इति वाचस्पतिः॥
"छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥
न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः।
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्जनम्॥"
इति मनुः। ४। ४५—४८॥
"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्बुद्धिकार्य्याणि तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये॥"
इति वह्निः॥
निर्हारो मलमूत्रोत्सर्गः। ७॥
"गोमायत्वाम्बुवायूनां पृष्ठाश्च न कदाचन।
कुर्य्यात् शौचविदर्म्मूत्रमहासद्वैर्च पण्डितः॥"
इति विष्णुपुराणम्॥
न च वीजमुखो मलमूत्रे कुर्य्यादिति। इत्यापस्तम्बः॥

"करञ्जबीजपाकेन कृत्वा तक्रपुरीषके।
मूत्रकृच्छ्रं वातोत्थं पीत्वा चाश्वायनश्चरेत्॥"

इति सुश्रुतः॥ ॥

प्रमेहमयात् मूत्रकृच्छ्रे दोषो यथा,—
"वारिमात्रं करे कृत्वा मूत्रं त्यजति यो नरः।
सुरापानसमं पापं तत्क्षणं मदिरामयम्॥"

इति कर्म्मलोचनम्॥ ॥

मूत्रकृच्छ्रस्य दोषो यथा,—
"निःस्वाः मूत्रकृच्छ्रकाः स्युर्नृपा निःस्वधारया।
भीमाद्याः समभवन् निःस्वाः सुवर्ण-
धातिनः॥"

इति मार्कण्डे ११ अध्यायः॥ ॥

"विष्णुज्ञानाचलखेद चौरत्वात्प्रादिरत्नकम्।"
इति तत्रैव १८ अध्यायः॥ ॥ अथ मूत्रगुणाः। तीक्ष्णत्वम्। उष्णत्वम्। लवणत्वम्। पित्तकारित्वम्। कटुत्वम्। लघुत्वम्। रूक्षत्वम्। कृमिदद्रुवातश्लेष्मोदराविषकुष्ठनाशित्वञ्च। इति राजवल्लभः।

मूत्रकृच्छ्रं, क्ली, (मूत्रे कृच्छ्रम्। मूत्रस्य कृच्छ्रमिति वा।) रोगविशेषः। तत्पर्य्यायः। मूत्ररोधः २ अश्मरी ३ कृच्छ्रम् ४। इति राजनिर्घण्टः॥ ॥ अथ मूत्रकृच्छ्राधिकारः। तत्र मूत्रकृच्छ्रस्य विप्रकृष्टं निदानमाह।

"व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गनित्यद्रुतपृष्ठयानात्।
आनूपमत्स्याध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ॥"

तीक्ष्णौषधं राजिकामूत्रादिरूपम्। रूक्षेति मद्यविशेषणम्। प्रसङ्गः सततं सेवा। द्रुतं पृष्ठं यस्य तत् द्रुतपृष्ठयानम्। द्रुतपृष्ठयानात् अश्वादिना गमनात्। आनूपं प्रचुरजलदेशभवं मत्स्यम्। आदौ वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजपुरीषजशुक्रजाश्मरीजानि। तत्र सम्प्राप्तिपूर्व्वकं लक्षणमाह।

"पृथङ्मलाः स्वैः कुपिता निदानैः
सर्व्वेऽथवा कोपमुपेत्य बस्तौ।
मूत्रस्य मार्गं परिपीडयन्ति
यदा तदा मूत्रयतीह कृच्छ्रात्॥"

तेषु वातिकमाह।

"तीव्रा रुजो वङ्क्षणबस्तिमेढ्रे
स्वल्पं मुहुर्मूत्रयतीह वातात्।"

तीव्रा महत्यस्तीव्रा वङ्क्षणमेढ्रयाम्भना-
दयश्च्यौ॥ ॥ पैत्तिकमाह।

"पीतं सरक्तं सरुजं सदाहं
कृच्छ्रं मुहुर्मूत्रयतीह पित्तात्।"

कृच्छ्रमिति क्रियाविशेषणम्। श्लैष्मिकमाह।

"बस्तेः सलिङ्गस्य गुरुत्वशोथौ
मूत्रं सपिच्छं कफमूत्रकृच्छ्रे।"

सपिच्छं पिच्छिलम्। सान्निपातिकमाह।

"सर्व्वाणि रूपाणि च सन्निपातात्
भवन्ति तत् कृच्छ्रतमं हि कृच्छ्रम्॥"

कृच्छ्रं मूत्रकृच्छ्रम्॥ ॥ शल्यजमाह।

"मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणम्।
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्द्दिशेत्॥"

मूत्रवाहिषु स्रोतःसु। शल्येन कण्टकेन। क्षतेषु छिन्नेषु अथवा अभिहतेषु मुद्गरादिभिरभिहतेषु। तदाघातात् मूत्रमार्गाघातात् मूत्रकृच्छ्रं जायते। भृशदारुणं मारकं तस्य शल्यजस्य॥ ॥ पुरीषजमाह।

"शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः।
आध्मानं वातशूलञ्च मूत्रकृच्छ्रं करोति च॥"

प्रतीघातात् निरोधात्। विगुणतां दुष्टताम्। शुक्रजमाह।

"शुक्रदोषैरुपहते मूत्रमार्गे विधावति।
सशुक्रं मूत्रयेज्जन्तुः कृच्छ्राद्बस्तिमेहनशूलवान्॥"

उपहते दूषिते॥ ॥ अश्मरीजमाह। अश्मरी-हेतुकमपि मूत्रकृच्छ्रमश्मरीजम्। सुश्रुते शर्करातोऽपि मूत्रकृच्छ्रमुक्तम् न तु तस्य सम्प्राप्तिरप्रवर्त्तकमश्मरीशर्करयोः साम्यमाह।

"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे।
विशेषं शर्करायाः शृणु कीर्त्तयतो मम॥"

सम्भवः कारणम्।

"पच्यमानाश्मरी पित्ताच्छोष्यमाणा च
वायुना।

विमुक्तकफसन्धाना क्षरन्ती शर्करा मता॥"

पित्तेन पच्यमाना मूत्रशुक्रश्लेष्मसंहतिः प्रथमं पित्तेन सन्तप्यमाना पच्यमाना। पश्चाद्वातेन शोषिता कठिनादिका अश्मरी। सैव विमुक्तकफसन्धाना श्लेष्मकणाङ्किता सती शर्कराख्या मूत्रमार्गेण क्षरन्ती शर्करा मता। एतावता क्लिष्टिरेव भेदः॥ ॥ शर्करायाः उपद्रवानाह।

"हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्ब्बलः।
तथा भवति मूर्च्छा च मूत्रकृच्छ्रञ्च दारुणम्॥"

शूलं कुक्षाविशेषणम्। तथा शर्करया॥ ॥

अथ मूत्रकृच्छ्रस्य चिकित्सा।

"त्रिकण्टकारग्वधदर्भकाश-
दुरालभापर्व्वतभेदपथ्याः।
निघ्नन्ति पीता मधुनाश्मरीञ्च
सम्प्राप्तमृत्योरपि मूत्रकृच्छ्रम्॥"

त्रिकण्टकादिक्वाथः॥ १॥

"एलाश्मभेदकशिलाजतुपिप्पलीनां
चूर्णानि तण्डुलजलैर्लुलितानि पीत्वा।
यद्वा गुडेन सहितान्यवलिह्य धीमान्
आसन्नमृत्युरपि जीवति मूत्रकृच्छ्री॥"

एलादिचूर्णम्॥ २॥

"गवेधुकः कल्कमिदं मधुना सह योजितम्।
मूत्रकृच्छ्रं विहन्त्याशु संपीतं दिवसत्रयात्॥३॥
दध्ना मिश्रितं चौरं कटुकं कामतः पिबेत्।
मूत्रकृच्छ्रेषु सर्व्वेषु शर्करावाश्च विकारः॥४॥
धात्रीरसेक्षुरसयोः पिबेत
कृच्छ्रे वराङ्गे मधुना विमिश्रम्।
दत्त्वाभिघातोत्थितमूत्रकृच्छ्रे
कार्य्या क्रिया मारुतकृच्छ्रयुक्ता॥५॥
क्वाथो गोक्षुरबीजस्य यवक्षारसमन्वितः।
पीतः प्रशमयत्येव कृच्छ्रं चिरभवमपि॥६॥
विषखायाः सुषिद्धायाः कल्कं कोलसमन्वितम्।
वारिणा लवणाढ्येन पिबेन्मूत्रविबन्धहृत्॥"७॥
कोलं बदरम्।
गुडूच्यामलकं शुण्ठीं धान्यकं तण्डुलं पिबेत्।
पित्तादिमूत्रकृच्छ्रहरं परम्॥८॥
सुधाक्षमात्रपुत्रितो यवक्षारः सितायुतः।
भक्षितो नाशयत्येव मूत्रकृच्छ्रं न संशयः॥९॥
मायापितोपवारुणः पीतः कर्षमितो नरैः।
मधुना पलमात्रेण मूत्रकृच्छ्रं व्यपोहति॥१०॥
पाटलागोक्षुरक्वाथः सितामाक्षिकसंयुतः।
नाशयेन्मूत्रकृच्छ्राणि तथैवोष्णसमीरणम्॥"११॥
उष्णपभीरणं प्रबद्धं मूत्राघातविशेषम्।
इति भावप्रकाशः॥ (तथास्य चिकित्सा-
प्रकारान्तरम्।

"सुशीतलं जलं कर्षमात्रं स्यात् मूत्रकृच्छ्रहृत्।
दध्नमुना च संमिश्रपथ्यं सुखप्रदम्॥
मूत्रकृच्छ्रे यवक्षारचूर्णं विज्ञपयोऽन्वितम्।
कूष्माण्डस्य रसमथ शर्करायुक्तं पिबेत्॥
यो हि निरोधनमलजकृच्छ्रविकारवान्॥"
"आरग्वधफलं गर्भे पुराणमा धान्यकमुता-
र्करः।

पाषाणभिद्यपि क्वाथोऽयं मूत्रकृच्छ्रे स्यात्॥"
इति हारीते चिकित्सितस्थाने १८ अध्याये।
अथास्य पथ्यानि।

"यवो पुराणोऽपि मयोऽपि
पुराणमा लोहितशालयश्च।
तक्रं पयो दध्यपि गोपयश्च
धन्वामिषं सुखलाः सिता च।
पुराणकूष्माण्डफलं पटोलं
नवार्द्रकं गोक्षुरकः कुमारी।
गुवाकयुक्तं खर्जूरिकेल-
तालाङ्कुमानाप्य शिरांसि यथा।
तालास्थिमज्जाद्धर्ष्णमपुरं पुटिका
शीतानि पानान्यशनानि चापि।
प्रमेहमिदं हिमवालुका च
मिनं नृणां स्यात् यदि मूत्रकृच्छ्रे॥"

अपथ्यानि।

"मद्यं श्रमं निधुवनं गजवाजियानं
कर्म्म विरुद्धमशनं विषमाशनञ्च।
ताम्बूलमत्स्यलवणार्द्रकतैलभृष्ट-
पिण्याकहिङ्गुतिलसर्षपवेगरोधान्।
माषान् करीरमतितीक्ष्णविदाहिरूक्ष-
मम्लञ्च मुञ्चतु जनः यदि मूत्रकृच्छ्री॥"

इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्रकृच्छ्राधि-
कारे।)

मूत्रदोषः, पुं. (मूत्रस्य दोषो यस्मात्।) प्रमेहः।
इति राजनिर्घण्टः। (यथा, सुश्रुते। कल्प-
स्थाने १म अः।

"मूत्रकादिरिवैव मद्योऽविनाशयाम।
मूत्रदोषकरो गुरुः पित्ताख्यो बलिनः॥"

मूत्राघातादिः । अस्य चिकित्सा यथा,—
“निदिग्धिकायाः स्वरसं पिबेत् कुडवसम्मितम् ।
मूत्रदोषहरं कल्कमथवा क्षौद्रसंयुतम् ॥”
“अत ऊर्द्धं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम् ।
स्नेहस्वेदोपपन्नानां हितमेतद्विरेचनम् ॥
ततः संशुद्धदेहानां हिताश्चोत्तरवस्तयः ॥”
“क्षीराढकार्द्धं दत्त्वा तु मानन्तु क्षीरसर्पिषोः ।
मधुकस्यापलञ्चैव तथैव सुरसस्य च ॥
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत् ।
एतदेकध्यमानीय सर्व्वेणाभिप्रमन्थयेत् ॥
तस्य पाणितलं चूर्णं लीढ्वा क्षीरं ततः पिबेत् ।
एतन्नाभिः प्रयुञ्जानः शुद्धदेहो नरः सदा ॥
मूत्रदोषान् जयेत् सर्व्वानित्ययोगैः सुदुर्ज्जयान् ।
मध्ये शोणितदोषाच्च वन्ध्या गर्भं लभेत च ।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते ॥”
इत्युत्तरतन्त्रेऽष्टपञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥)

मूत्रनिरोधः, पुं, (मूत्रस्य निरोधः । यद्वा मूत्रं निरुणद्धीति । रुध्+अण् ।) मूत्रप्रतिबन्धक-रोगविशेषः । अस्य चिकित्सा यथा,—
“पिष्टं वै मालतीमूलं क्षौद्रकाञ्जे समाक्षतम् ।
सर्पिषं छागदुग्धेन पीतं शर्करयान्वितम् ।
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्कराम् ॥”
इति गारुडे १८१ अध्यायः ॥
(चिकित्सान्तरं यथा,—
“तैलेन पद्मिनीकन्दं मधुगोमूत्रमिश्रितम् ।
निषेवन्मूत्रनिरोधे तु सतीश्चैतदमान्वितम् ॥”
इति हारीते चिकित्सितस्थाने त्रिंशेऽध्याये ॥)

मूत्रपतनः, पुं, (मूत्रस्य पतनमस्मात् पुरीष-निरोधकरत्वादस्य सततमूत्रपतनात् तथा-त्वम् ।) गन्धमार्ज्जारः । इति राजनिर्घण्टः ॥

मूत्रपुटं, क्ली, (मूत्रस्य पुटम् ।) नाभेरधो भागः । यथा,—
“नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च ।”
इति हेमचन्द्रः । ३ । २७० ॥

मूत्रफला, स्त्री, (मूत्रं मूत्रवर्द्धनं फलं यस्याः ।) कर्कटी । त्रपुषी । इति राजनिर्घण्टः ॥
(कर्कटीत्रपुषीशब्दयोरस्या विवृतिर्ज्ञेया ॥)

मूत्रलं, क्ली, (मूत्रं लाति आदत्ते वर्द्धयतीत्यर्थः । ला+कः ।) त्रपुषम् । इति शब्दचन्द्रिका ॥ मूत्रवर्द्धके, त्रि ॥ (यथा, सुश्रुते । सूत्र-स्थाने । ४५ अः ॥
“कामलो मद्ध्वभिष्यन्दस्तुवरो वातकोपनः ।
शीतलः सरासनो रुचो मूत्रलः कफवातनुत् ॥”)

मूत्रला, स्त्री, (मूत्रल+टाप् ।) कर्कटी । इति त्रिकाण्डशेषः । त्रपुषी । इति राजनिर्घण्टः ॥

मूत्राघातः, पुं, (मूत्रस्याघातो निरोधो येन ।) मूत्रावरोधकरोगविशेषः । अथ मूत्राघातस्य विवरणं सनिदानं संख्याञ्चाह ।
“प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकादयः ।
जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश ॥”
मूत्रविघातादेरित्याद्यपदेन पुरीषशुक्रादिवेग-विघातानां कषायाशीताद्याच्च ग्रहणम् । मूत्र-विघातादेः कुपितैर्दोषैरित्यन्वयः । ननु मूत्र-कृच्छ्रमूत्राघातयोः को भेदः । उच्यते । मूत्र-कृच्छ्रे कृच्छ्रमधिकं विबन्धोऽल्पः । मूत्राघाते तु विबन्धो बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः ॥ ० ॥ वातकुण्डलिकाया निदानं संप्राप्तिं लक्षणञ्चाह ।
“रौक्ष्याद्वेगविघाताद्वा वायुर्बस्तौ सवेदनः ।
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः ।
मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते ।
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदा-रुणम् ॥”
रौक्ष्यात् कायस्य । वेगविघातात् मूत्रादि-वेगनिरोधात् आविश्य प्राप्य रौक्ष्यादिभि-र्वेगविघातादिभिश्च विगुणो दुष्टः कुण्डलीकृतो वायुर्बस्तौ मूत्राशये चरति प्रतिधावति आवर्त्तनादूर्द्ध्वमुत्तिष्ठति इत्यर्थः । आविशत् । मूत्रमिति तस्मान्मूत्रमल्पमल्पं सरुजं प्रवर्त्तते । तद्व्याधिं वातकुण्डलिकामाहुः । सुदारुणम् । मारणात्मकत्वात् ॥ १ ॥ ० ॥ अष्ठीलामाह ।
“आध्मापयन् वस्तिगुदं रुद्ध्वा वातश्चलोन्नताम् ।
कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम् ॥”
वातः वस्तिगुदं रुद्ध्वा अर्थात् तदन्तर्गतं मूत्रं मलञ्च निरुध्य वस्तिगुदं वस्तिं गुदञ्च आध्मा-पयन् आध्मानं कुर्व्वन् अष्ठीलां लोष्ठाकृतिं व्याधिं कुर्य्यात् । चलोन्नता चला उन्नता च ॥ २ ॥ वातबस्तिमाह ।
“वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः ।
निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः ।
मूत्रसङ्गो भवेत्तेन वस्तिकुक्षिनिपीडितः ।
वातबस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः ॥”
अकुशलो मूर्खः । तस्य पुरुषस्य वस्तिमुखं निरुणद्धि वस्तिगतो वायुः । तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति वस्तिकुक्षिनिपी-ड़ित इति वस्तौ कुक्षौ च निपीड़ितः संपी-ड़ितो वायुरिति सम्बन्धः ॥ ३ ॥ मूत्रातीतमाह ।
“चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते ।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते ॥”
मेहमानस्य मूत्रमुत्सृजतः । मन्दं वा अल्पं वा ॥ ४ ॥ ० ॥ मूत्रजठरमाह ।
“मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः ।
अपानः कुपितो वायुरुदरं पूरयेद्भृशम् ।
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनाम् ।
तं मूत्रजठरं विद्यादधोबस्तिनिरोधनम् ॥”
तदुदावर्त्तहेतुक इति मूत्रवेगधारणजनितो-दावर्त्तनिदानमाध्मानं कुर्य्यात् । अधोबस्ति-निरोधनं पक्वाशयोद्देशे विबन्धकारकम् ॥ ५ ॥ मूत्रोत्सङ्गमाह ।
“वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः ।
मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ।
स्रवेच्छनैरल्पमल्पं सरुजं वाथ नीरुजम् ।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः ॥”
नाले मेढ्रे मणौ मेढ्रमध्यप्रदेशे सज्जेत निरुद्धं स्यात् सरक्तं सत् वा प्रवर्त्तते । प्रवाहत इति कष्टहृदयेन सप्रयत्नं मूत्रपुरीषवाताशयमधः प्रेर्य्य प्रवाहणं तेन कुपितेन वायुना वस्त्यादि-भेदात् सरक्तं मूत्रं स्रवेदित्यर्थः ॥ ६ ॥ मूत्रक्षय-माह ।
“रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ ।
मूत्रक्षयं सरुग्दाहं जनयेतां सुदारुणम् ॥”
क्लान्तदेहस्य म्लानदेहस्य सुदारुणं मूत्रक्षय-संज्ञम् ॥ ७ ॥ मूत्रग्रन्थिमाह ।
“अन्तर्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् ।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ॥”
अन्तर्वस्तिमुखे वस्तिमुखस्याभ्यन्तरे अल्पः क्षुद्रामलकप्रमाणः । ननु अश्मर्य्या सह को भेदः । उच्यते । अश्मरी क्रमशः सञ्चयेन जायते अयन्तु सहसा भवेदिति भेदः । अपरो भेदः । अश्मर्य्यां पित्तादिकं संबध्यते अत्र तु रक्तमेव । अत उक्तं तन्त्रान्तरे ।
“रक्तं वातकफाद्दुष्टं वस्तिद्वारे सुदारुणम् ।
ग्रन्थिं कुर्य्यात् स कृच्छ्रेण सृजेन्मूत्रं तदा-वृतम् ॥” ८ ॥ इति ॥
मूत्रशुक्रमाह ।
“मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम् ।
स्थानच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते ।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥”
मूत्रितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उद्धतं ऊर्द्ध्वं नीतम् । भस्मोदक-प्रतीकाशं भस्मघटितजलसदृशम् ॥ ९ ॥ उष्ण-वातमाह ।
“व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिला-वृतम् ।
वस्तिं मेढ्रं गुदञ्चैव प्रदहन् स्रावयेदधः ।
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा ।
कृच्छ्रं पुनः पुनर्जन्तोरुष्णवातं वदन्ति तम् ॥”
व्यायामादिनिषेवणेन कौष्ठ्यधातुपथात् तेजो-वृद्धा पित्तवृद्धिः स्यात् कुपितं पित्तं अनिलावृतं वस्तिं प्राप्य वस्त्यादिकं प्रदहत् मूत्रमधः स्रावयेत् । कीदृशं हारिद्रं अथवा सरक्तं रक्तेनोपहितम् ॥ १० ॥ मूत्रसादमाह ।
“पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत् ।
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत् ।
सदाहं रोचनाशङ्खचूर्णवर्णं भवेत्तु तत् ।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति हि ॥”
संहन्येते घनीक्रियेते । शुष्कं घनं समस्तवर्णं रक्तश्वेतपीतसंयुतम् ॥ ११ ॥ विड्विघातमाह ।
“रूक्षदुर्ब्बलयोर्वातेनोदावर्त्तं शकृद् यदा ।
मूत्रस्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः ।
विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमा-दिशेत् ॥”
उदावृत्तं ऊर्द्ध्वं नीतं विट्सम्पृक्तं वा । शकृत्सं-सृष्टो दोषः ॥ १२ ॥ बस्तिकुण्डलमाह ।

मूत्रस्तम्भनदाहार्त्तो विन्दुविन्दु स्रवत्यपि ।
मौहिनस्तु यदिकारो बस्तामोदैर्वसोर्त्तिमान् ।
बस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् ।
पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः ।
तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
श्लेष्मणा गौरवं शोथो मूत्रं स्निग्धं घनं सितम् ।"
कुण्डलवत्कुण्डलीभूतं मार्गावरणम् । उद्वृत्तः उन्मिषः । स्तब्धं निश्चलगम् । घोरं मारकम् । शस्त्रविषोपमं शस्त्रं खड्गादि तद्वच्छीघ्रमारकम् । विषमिव गरः तद्वत् विलम्बमारकम् । तस्याश्च मारकमत्यन्तं शीघ्रं विलम्बेन वा । १३ । ७ । तत्रोपायाभ्यसं च सञ्चमाह ।
"शान्तस्वहृदि(?)तो बस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तविलः साध्यो न च यः कुण्डलीकृतः ।
स्यादस्तौ कुण्डलीभूते तृष्णामोहः श्वास एव च ।"
विलं बस्तिद्वारम् । पित्तोदीर्णः पित्तोद्धतः । अविभ्रान्तविलः अभिन्नाश्रितविलः अविभ्रान्तविलः यश्चात् कुण्डलीकृतः स साध्यः । अतेन कुण्डलीभूतोऽसाध्यः । कुण्डलीभूतस्य लक्षणमाह । हृद्भ्रादि-कुण्डलीभूतस्यावमर्षः । अतेन विनावरोधा-न्मन्दवातः कुण्डलाकारेण तिष्ठतीत्यर्थः । १ ।
अथ मूत्राघातस्य चिकित्सा ।
"नलकुशकाशेक्षुवालकार्थं प्रातः सुशीतलं
पिबितम् ।
पिबतो प्रयाति नियतं मूत्रस्य ग्रहस्तु
वाति ।"
वाति सुखः ।
"कर्पूररजसा युक्ता वर्त्तयः शनैः शनैः ।
मेढ्मार्गान्तरे न्यस्ता मूत्राघातं व्यपोहति ।
धात्रीमोचरसः क्वाथः कल्कविहं सितं हनम् ।
मूत्राघाते मूत्रकृच्छ्रे गुडरोगे च दारयेत् ।"
धात्रीमोचरसं हनम् ।
"मूत्रकृच्छ्रेऽश्मरीरोगे विधिर्यो यः प्रकीर्त्तितः ।
मूत्राघातेषु सर्वेषु तं कुर्य्यादविकारवित् ।"
इति मूत्राघाताधिकारः । इति भावप्रकाशः ॥ अष्टाङ्गहृदयोक्तनिदानं तत्र ११ अध्याये द्रष्टव्यम् । (तथाच सुश्रुतः ।
"बस्तिवस्तिशिरोमेढ्रकटीवृषणपायवः ।
एकसम्बन्धना प्रोक्ता गुदास्थिविवराश्रयाः ।
अधोमुखोऽपि बस्तिर्हि मूत्रवाहिशिरामुखैः ।
पार्श्वेभ्यः पूर्य्यते सूक्ष्मैः स्यन्दमानैरनारतम् ।
यैस्तैरेव प्रविशन्ति दोषाः कुपिताः विंशतिम् ।
मूत्राघातान् प्रमेहांश्च कृच्छ्राण्यश्मरीमाश्रयात् ।"
इति वाग्भटे निदानस्थाने नवमोऽध्यायः ।
अथास्य पथ्यापथ्यानि ।
"स्नानमुष्णैश्च वारिभिरवलि-
प्तैरायतैस्तारमयैश्च ।
पुराणकौषिनबाधकञ्च
तांवाणि खनतमयानि मदम् ।
इक्षुं मधोदकानि मानपूर्वं
पुराणकूष्माण्डकवर्ज्जं पटोलकम् ।
मत्स्यार्द्रं तालसंस्थानि
हरीतकीकोमलतालपिष्टकम् ।
गुवाकखर्जूरकमालिपेत-
तालद्रुमाणामपि मस्तकानि ।
यथामलं सर्व्वमिदञ्च मूत्रा-
घातातुराणां हितमादिशन्ति ।
विरुद्धानि च कर्म्माणि व्यायामं मार्गशोषणम् ।
रूक्षं विदाहिविष्टम्भिव्यायामं विमधारणम् ।
करीरं वमनञ्चापि मूत्राघाती विवर्ज्जयेत् ।"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्राघाताधि-कारे ।)
मूत्राशयः, पुं, (मूत्रस्याशयः आधारः ।) नाभि-रधोदेशः । तत्पर्य्यायः । मूत्रपुटम् २ बस्तिः ३ । इति हेमचन्द्रः । ३।२७० । (अथास्य विवरणम् ।
"मूत्राशये वा गुदसम्प्रयोग
क्षीणो यथा मूत्रविनिग्रहश्च ।"
इति सुश्रुते उत्तरतन्त्रे ५८ अध्यायः ।
यथा च तत्रैव निदानस्थाने ३ अध्याये ।
"एकसम्बन्धिनी प्रोक्ते गुदास्थिविवराश्रिताः ।
मूत्राशयो महाप्राणः प्राणायतनमुत्तमम् ।")
मूत्रितः, त्रि, (मूत्रमस्य संजातम् । मूत्र + इतच् । यद्वा मूत्रयति स्म इति । मूत्र + क्तः ।) सञ्जातमूत्रः । तत्पर्य्यायः । मीढः २ । इति हेमचन्द्रः । ३ । १ । ८६ ।
मूर्खः, पुं, (मुह् + "मुहेः खो मूर् च ।" उणा० ५।२२। इति खः धातोः मूरादेशश्च ।) माषः । इति त्रिकाण्डशेषः । माषकलायः । यथा,
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ।
क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः । मूर्खस्य गायत्रीरहितस्य । गायत्रीमात्रमपि न जानाति यः । महारोगिणः पापरोगा-क्रान्तमरोमकः तैः च पञ्चाशत्कुष्ठरोगो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः । अश्मरी-उपदंशो पापरोगा महारोगाः । यथेष्टा-चरणस्य शूद्रवैश्यादाचरणस्य । इति शुद्धि-तत्त्वम् ॥
मूर्खः, त्रि, (मुह् + खः । मूरादेशः ।) मुह्यति यः । तत्पर्य्यायः । अज्ञः २ मूढः ३ यथाजातः ४ वैधेयः ५ बालिशः ६ । इत्यमरः । ३।१।४८ ॥ तस्य लक्षणोपायो यथा,—
"प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात् समुद्रमपि सन्तरेत् प्रचलदूर्म्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत् न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।"
इति भर्तृहरिः ।
"पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।"
इति हितोपदेशः ॥
मूर्खता, स्त्री, (मूर्खस्य भावः । मूर्ख + "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति तल् टाप् ।) मूर्खत्वम् । यथा,—
"अहाता वंशदोषेण कर्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ।"
इति चाणक्यम् ॥
"अहन्या दारिद्र्यमपि मूर्खत्वं यथा,—
"कनहो जायते पित्ते तिर्य्यग्योनिषु निम्नगे ।
ताभ्यां शरीरबाधः स्यादारिद्र्यं च मूर्खता ।"
इति गिमासिद्धान्तम् ।
मूर्खमालकः, पुं, (मूर्खो भ्राताऽस्येति विग्रहे कप् ।) मूर्खो भ्राता यस्य सः । इति सिद्धान्तकौमुदी ॥
मूर्च्छना, स्त्री, (मूर्च्छि + युच् । टाप् ।) गीताङ्ग-विशेषः । सा तु ग्रामत्रयस्य सप्तसप्तकात् । तथा च एकविंशतिरागमानि च यथा,—
"क्रमात् स्वरानां सप्तानामारोहश्चावरोहणम् ।
मूर्च्छनेत्युच्यते ग्रामत्रये ताः सप्त सप्त च ।
ललिता मध्यमा चित्रा रोहिणी च मतङ्गजा ।
सौवीरी षड्जमध्या च षड्जग्रामसमाश्रयाः ।
पञ्चमी मत्सरी चैव मृदुमध्या च शुद्धान्ता च कलावती ।
तीव्रा रौद्री तथा ब्राह्मी वैष्णवी खेचरी सुरा ।
नादावती विशाला च त्रिषु ग्रामेषु विश्रुताः ।
एकविंशतिरित्युक्ता मूर्च्छनाः स्वरमौक्तिकाः ।
मूर्च्छनां साधयतो गुरुपथो-
र्द्दिग्वासायितविविधवितानैः ।
मूर्च्छनां मधुरस्वरपरीषि-
रहूना रतिपतेरिव सेना ।"
इति सङ्गीतदामोदरः ॥
सप्तमस्वरी षड्जादिस्वरस्य आरोहणावरोहणे यत्र क्रमो भिन्नेति सा मूर्च्छना । भरतमते षड्जस्य ग्रामस्य वा सप्तमे सप्त स्वरस्य मध्यस्य वा कम्पनं वा मूर्च्छना । सा एकविंशति-प्रकारा । तत्र षड्जग्रामस्य मूर्च्छना ललिता १ मध्यमा २ चित्रा ३ रोहिणी ४ मतङ्गजा ५ सौवीरी ६ षड्जमध्या च ७ । मध्यमग्रामस्य मूर्च्छना पञ्चमा १ मत्सरी २ मृदुमध्या ३ शुद्धा ४ अन्ता ५ कलावती ६ तीव्रा च ७ । गान्धारग्रामस्य मूर्च्छना रौद्री १ ब्राह्मी २ वैष्णवी ३ खेचरी ४ सुरा ५ नादावती ६ विशाला च ७ । इति सङ्गीतशास्त्रम् ॥
मूर्च्छा, स्त्री, (मूर्च्छ + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः टाप् ।) मोहः । तत्पर्य्यायः । कश्मलम् २ मोहः ३ । इत्यमरः । १।७।३०॥ मूर्च्छनम् ४ । इति शब्दरत्नावली ॥ मूर्च्छा ५ । अथ मूर्च्छाधिकारः । तत्र मूर्च्छाया निदानपूर्व्विकां संप्राप्तिमाह ।
"क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभिघाताद्धीनसत्त्वस्य वा पुनः ।
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ।"
बहुदोषस्य अधिकदोषस्य । न क्षीणदोषस्य । तदा मूर्च्छा विशेषेण स्यात् तथाह को

दोषः तम । पृथग्दोषजानां मूर्च्छानां सम्भवात् । वेगाघातात् मल्लादौ अभिघातात् मुद्गरादिना हीनसत्त्वस्य स्वल्पसत्त्वगुणस्य अर्थादधिकतमोगुणस्य अत उक्तं मूर्च्छा पित्ततमःप्रायेति करणायतनेषु करणं मनस्तस्यायतनेषु ज्ञानेषु बाह्येषु कर्म्मेन्द्रियेषु । अभ्यन्तरेषु बुद्धीन्द्रियेषु ।●। सामान्यं लक्षणमाह ।

"संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः ।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ।
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥"

तमोगुणः अज्ञानहेतुः । अभ्युपैति आगच्छति । सुखदुःखव्यपोहकृत् सुखदुःखज्ञाननाशकरम् । अतो सुखदुःखत्यागे नरः काष्ठवत् पतति तां मोहो मूर्च्छेति प्राहुरित्यन्वयः । मूर्च्छाया मूर्च्छायोऽपि पर्यायः । यत उक्तम् ।

"संज्ञोपघातो मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा ।
कश्मलं प्रलयो मोहः संन्यासस्तु मृतोपमः ॥" इति ।

षडपि मूर्च्छा विवृणोति ।

"वातादिभिः शोणितेन मद्येन च विषेण च ।
षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ॥"

अत उक्तम् । मूर्च्छा पित्ततमःप्रायेति ।●। पूर्व्वरूपमाह ।

"हृत्पीडा जृम्भणं ग्लानिः संज्ञादौर्ब्बल्यमेव च ।
सर्व्वासां पूर्व्वरूपाणि यथास्वं ता विभावयेत् ॥"

तत्र वातिकं मूर्च्छायमाह ।

"नीलं वा यदि वा कृष्णमाकाशमथवारुणम् ।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते ।
वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च ।
कार्श्यं श्यावारुणा छाया मूर्च्छाये वातसम्भवे ॥"

नीलं नीलवर्णम् । कृष्णं कृष्णवामम् । अरुणं अव्यक्तरागम् । तमः प्रविशति मूर्च्छतीति । श्यावारुणा छाया गात्रस्य ।●। पैत्तिकमाह ।

"रक्तं हरितवर्णं वा वियत् पीतमथापि वा ।
पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते ।
सपिपासः ससन्तापो रक्तपीताकुलेक्षणः ।
सम्भिन्नवर्च्चाः पीताभो मूर्च्छाये पित्तसम्भवे ॥"

श्लैष्मिकमाह ।

"मेघसङ्काशमाकाशं तमोभिर्व्वा वृतं तमः ।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ।
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्म्मणा ।
सप्रसेकः सहृल्लासो मूर्च्छाये कफसम्भवे ॥"

मेघसङ्काशं शुभ्रमेघसङ्काशमित्यर्थः । अत आह सुश्रुतः ।

"कफेन पश्यति रूपाणि श्वेताभ्रप्रतिमानि तु ।"

सर्व्वैर्व्विवृतैस्तमोभिः । गुरुभिरार्द्रेण चर्म्मणा प्रावृतैः । सहृल्लासेन मूर्च्छायाः वमिषु सहः ।●। सन्निपातिकमपि मूर्च्छायमाह ।

"सर्व्वाकृतिः सन्निपातादपस्मार इवागतः ।
स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥"

अपस्मार इव तेन सहसाभिघातेन पतति चिरेण प्रतिबुध्यते । तर्हि तयोः को भेद इत्यत आह । स सान्निपातिको मूर्च्छायः विना बीभत्सचेष्टितैः फेनवमनदन्तखादनाक्षिविकृत्यादिभिः विना पातयति ।●। रक्तजाया मूर्च्छाया निदानमाह ।

"पृथिव्यम्बुतमोरूपं रक्तगन्धश्च तन्मयः ।
तस्मादसृक्स्य गन्धेन मूर्च्छन्ति भुवि मानवाः ॥"

तमोरूपं तमोबहुलम् । मानवाश्च ये तामसाः न तु सात्त्विका राजसाश्च । अनेके वदन्ति नैषा युक्तिः अमीषोमा तर्हि अम्पकादिगन्धेनापि मूर्च्छा प्रसज्येत तथापि गन्धस्य पार्थिवत्वात् । अत आह ।

"द्रव्यस्वभाव इत्येके यद्दृष्ट्वापि विमुह्यति ।"

अथाह भोजः ।

"दर्शनादसृजस्तस्मादभ्यासादेव प्रमुह्यति ।"

रक्तेन मूर्च्छितस्य लक्षणमाह ।

"स्तब्धाङ्गदृष्टिरसृजा गूढोच्छ्वासस्तु मूर्च्छितः ।"

मद्यविषजयोर्निदानमाह ।

"गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः ।
त एव तस्मात् ताभ्यान्तु मोहौ स्यातां यथेरितौ ॥"

ये गुणा लघुरूक्षाशु विशदव्यवायितीक्ष्णविकाशिसूक्ष्माम्लानिर्द्देश्यरसाख्याः । तेषां द्रव्ये मद्यस्य तीव्राश्च सन्ति त एव गुणाः विषमद्ययोस्तु तीव्रतरत्वेन स्थिताः । तथापि भेदः । त एव मद्ये दशगुणा विषे तु बलवत्तरा इति ।●। मद्यजाया मूर्च्छाया लक्षणमाह ।

"मद्येन विलपन् शेते नष्टविभ्रान्तमानसः ।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत् ॥"

नष्टविभ्रान्तमानसः नष्टं सर्व्वथा स्मृतिहीनं विभ्रान्तं यथैवानपूर्वं मानसं यस्य सः । जरां जीर्णताम् । तत् मद्यम् ।●। विषजाया लक्षणमाह ।

"वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते ।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणम् ॥"

विषस्य नवकन्दकनकजीरादिभेदभिन्नस्य यथा स्वर्णं स्वं लक्षणमुक्तं बोद्धव्यं तस्यैवानुसारेण लक्षणं यथाविषय तीव्रतरं वेदितव्यम् । अथ संज्ञानाशेन साधर्म्यान्मूर्च्छाभ्रमतन्द्रानिद्राणां को भेद इत्यत आह ।

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥"

रजःपित्तानिलाद्भ्रम इति चात्र अनुबन्धः । वैकल्पिकस्य भ्रमकोऽस्मात् । भ्रमकारकत्वेन भ्रमरसूक्ष्मं शरीरस्य भ्रमत इव भानं वा ।●। तन्द्राया लक्षणमाह ।

"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः ।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्द्दिशेत् ॥"

इन्द्रियाणामर्थः प्रयोजनं शब्दादि तेषु अर्थेषु विषयेषु असंवित्तिः असम्यग्ज्ञानम् । इति इन्द्रियार्थासम्यग्ज्ञानादि । निद्रायां प्रवृत्तस्य ज्ञानाभावस्तन्द्रायान्तु प्रबोधितस्यापि ज्ञान इत्यनयोर्भेदः ।●। क्लमस्य लक्षणमाह ।

"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्ज्जितः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ॥"

इन्द्रियार्थप्रबाधकः इन्द्रियाणां बुद्धीन्द्रियाणां कर्म्मेन्द्रियाणाञ्च अर्थः प्रयोजनं विषयश्चार्थं तस्य प्रबाधकः आवरकश्च ।●। निद्रालक्षणमाह ।

"यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः ।
विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ॥"

क्लान्ते ग्लाने श्रान्त इति यावत् । कर्म्मात्मानः कर्म्मेन्द्रियाणि ज्ञानेन्द्रियाणि च क्लमान्विताः श्रान्ताः ।●। संन्यासस्य संज्ञाभिपूर्व्वकं लक्षणमाह ।

"वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ।
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः ।
प्राणैर्व्वियुज्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम् ॥"

आक्षिप्य विनाश्य संन्यस्यन्ति मूर्च्छयन्ति । प्राणायतनं हृदयम् । संन्यस्तः मूर्च्छितः । काष्ठीभूतः क्रियारहितः । अतएव मृतोपम इति । सद्यःफलां क्रियां तीक्ष्णाञ्जनावपीडन-नखान्तरसूचीवेधदहनादिरूपाम् ।●। संन्यासस्य मूर्च्छातो भेदमाह ।

"दोषेषु मदमूर्च्छायाः गतवेगेषु देहिनः ।
स्वयमेवोपशाम्यन्ति संन्यासो नौषधैर्व्विना ॥"

मदमूर्च्छायाः मदः [illegible] उन्मादः । मूर्च्छायाः मूर्च्छाः ।●। अथ मूर्च्छायाश्चिकित्सा ।

"सेकावगाहौ मणयः सहाराः
शीताः प्रदेहा व्यजनानिलाश्च ।
शीतानि पानानि च गन्धवन्ति
सर्व्वासु मूर्च्छास्वनिवारितानि ॥"

मणयः चन्द्रकान्तादयः । हाराः मुक्ताहाराः । शीताः प्रदेहाः कर्पूरचन्दनादिलेपनानि । शीतानि पानानि पित्तप्रशमकानि पानकानि । गन्धवन्ति कर्पूरादिसुगन्धवन्ति । सर्व्वासु मूर्च्छास्वनिवारितानि । अस्वाप्यमभिप्रायः । [illegible] मूर्च्छासु पित्तस्यैव बलवत्त्वाद्धितानि च निवारितानि । तथाहि पित्तस्य प्राधान्यात् ।

"[illegible] सर्व्वे मधुरं पयांसि
[illegible] रक्षार्थम् ।
[illegible]
मूर्च्छासु [illegible] ॥"

[illegible] कथाश्च ।

"[illegible] दोषच्छविर्तिनः ।
दीर्घं मूर्च्छा [illegible] ।
[illegible]
[illegible] ।

कुर्य्याच्च गात्राण्यनुलेपनानि
चौरं निषेव्याश्च मनुष्यभोज्याम् ।
मत्तालिमालाकुलपद्मखण्ड-
कल्हारनीलोत्पलपङ्कजानि ।
पिबेन्मधूनि च शीतलानि
पिबन्त्वरं यानि च यावकानि ।
शिशिरनीरजव्यजनानिलपङ्कजैः ।
मनुजं व्रजन्तु प्रबोधाय हरणोपायसंस्कृतेः ॥"
अन्यच्च ।
"मज्जनं शाखगारस्य संसुधिन्दुद्रिलोचनैः ।
प्रमोहदोऽपि भवति मालिनः मिथ्याचारैः ॥"
शिखा मयःशिखा । उक्तं मरीचम् ।
"मधुकसारमिक्षुरसद्राक्षाकाश्मर्य्याः समाः ।
उष्णं विहारमणा मद्यं कुर्य्यात् संज्ञाप्रबो-
धनम् ॥"
अथ रक्तजादीनां मूर्च्छानां चिकित्सा ।
"रक्तजायान्तु मूर्च्छायां हितः शीतक्रिया-
विधिः ।
मद्यजायां पिबेन्मद्यं निद्रां सेवेत वा सुखम् ।
विषजायां विषघ्नानि भेषजानि प्रयोजयेत् ॥"
अथ संन्यासस्य चिकित्सा ।
"प्रभूतदोषतमसोऽतिरेकात्
संमूर्च्छितो नैव विबुध्यते यः ।
संन्याससंज्ञः स हि दुश्चिकित्स्यो
मतो भिषग्भिः परिकीर्त्तितोऽसौ ॥
अञ्जनान्यवपीडश्च धूमाः प्रधमनानि च ।
सूचीभिस्तोदनं शस्तं दाहः पीडा नखान्तरे ॥
लुञ्चनं केशलोम्नाञ्च दन्तैर्दशनमेव च ।
आत्मगुप्तावघर्षश्च हितास्तस्य प्रबोधने ॥"
अवपीडः कल्कीकृतौषधरसस्य नासापुटे
दानम् । तस्य संन्यासस्य ॥ ० ॥ अथ मूर्च्छायां
रसः ।
"क्षमामृतरसं मूर्च्छायां प्राशयेद्भिषक् ।
शीतशैत्यप्रभावादि कर्माङ्गे पौरुषं भवात् ॥"
रसं मारितम् ।
"तालचूर्णं समोदीरं नैमलं शीतवारिणा ।
पीतं मूर्च्छां हरं सद्यः ..."
ताम्रचूर्णं मारितताम्रचूर्णम् ॥ ० ॥ अथ भ्रमस्य
चिकित्सा ।
पिबेद्दुरालभाक्वाथं घृतं भ्रमप्रशान्तये ।
शतावरीघृतं सिद्धं त्रिफलायुतेन वा ॥
गुडूच्यामलकाद्याभ्यां बालकाभ्यां पलं पलम् ।
गुडस्य द्व समावेश्य गुटिका भ्रमनाशिनी ॥
तासां मुहुरमात्राभिः भोजयेत् ... ।
... ॥"
अथ तन्द्रायाः ... चिकित्सा ।
"तुरङ्गलालारसकोलसैन्धव-
मनःशिलामालसिलाजतूनि ।
नियोजितान्यञ्जनमिव ...
तन्द्रां ... विनिवारयन्ति ॥"
स्नुक् कर्पूरम् ।
"कैकुर्वं चन्दनादिक्षं करंजः कुष्ठेन च ।

मलामलैव संपिष्टं नस्यं तन्द्राविनाशनम् ॥"
चेतोमर्दनं शिरसोऽञ्जनम् ।
"गुडूचीकण्टकारीफलकोलफलानि
मज्जेन तन्द्राधिकमोक्षणानि ।
नुदाम्ब्वपायौश्च ... ।
मार्गौषधाभ्यां क्वथितानि पानात् ॥"
शिवा हरीतकी । इति मूर्च्छाभ्रमतन्द्राति-
निद्रासंन्यासाधिकारः । इति भावप्रकाशः ॥
(अथास्याः पथ्यविधिः ।
"शैत्यस्नानानि मधवः क्षीराद्याः
शीताः प्रदेहा व्यजनानिलाश्च ।
शीतानि पानानि च भक्षणानि
धारागृहं शीतमरीचिरोचिः ॥
धूमोऽञ्जनं नावनमञ्जनोषौ
दाहश्च चर्मोपरितोदनानि ।
रोधां कथानामपि कर्णनानि
मनस्ताडपीडा दशनोपदंशः ॥
वाणान्तृमङ्गारमदनिरोधो
विरेचनच्छर्दनमर्दनानि ।
क्रोधो भयं दुःखकरी च वार्त्ता
कथा विचित्रा च मनोहरा च ॥
छायाम्भोऽम्भःपयसौषधानि-
र्यूषाणि तिक्तानि च जाङ्गलाः ।
जीर्णा यवा लोहितशालयश्च
कौम्भं हविर्मुद्गयवोषमूकाः ॥
धन्वोद्भवा मांसरसाश्च रामाः
धन्वाकृता मधवः सिता च ।
पुराणकूष्माण्डपटोलमोच-
कदोलसौराष्ट्रिमनारिकेलम् ॥
मधूकपुष्पाणि च तण्डुलीय-
धर्मीरिकामाणि मधूनि चापि ।
प्रभौरथीरं सितचन्दनानि
कर्पूरचौरं हिमवालुका च ॥
अम्बुधामोऽम्बुतरङ्गाणि
शीतानि वातानपि चोत्पलानि ।
मूर्च्छानिमित्तमाहारविधा-
र्थ्याः मूर्च्छासु सतः पथ्यवर्गः ॥"
अपथ्यविधिः ।
"ताम्बूलं पत्रशाकानि दन्तघर्षणमातपम् ।
विरुद्धान्नपानानि व्यवायं स्वेदनं कटुम् ।
क्षुन्निद्रावेगरोधं सह मूर्च्छागदी त्यजेत् ॥"
इति वैद्यकपथ्यापथ्यविधौ मूर्च्छाधिकारे ॥)
मूर्च्छालः, त्रि, (मूर्च्छा अस्त्यस्येति । "सिध्मादि-
भ्यश्च ।" ५ । २ । ९७ । इति लच् ।) मूर्च्छितः ।
इत्यमरः । ३ । १ । ४६ ॥
मूर्च्छितः, त्रि, (मूर्च्छा संजाता । मूर्च्छा +
तारकादित्वात् इतच् ।) मूर्च्छायुक्तः । तत्-
पर्य्यायः । मूर्त्तः २ मूर्च्छालः ३ । इत्यमरः । ३ ।
१ । ४६ ॥ (यथा, माघे । ६ । २२ ।
"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।")
उच्छ्रितः । वृद्धः । इति मेदिनी । तः । व्याप्तः । इत्य-
मरः ॥ (व्याप्तः यथा, रामायणे । ३ । १२ । १६-२० ।

"किं नु खल्वस्य गम्भीरो मूर्च्छितो न निशाम्यते ।
यथापुरमयोध्यायां गीतवादित्रनिःस्वनः ।
मादकोमदगन्धश्च माल्यगन्धश्च मूर्च्छितः ।
चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥")
मूर्त्तः, त्रि, (मूर्च्छ + क्तः ।) मूढः । इति शब्द-
रत्नावली रायमुकुटः ॥
मूर्त्तः, त्रि, (मूर्च्छ + क्तः "राल्लोपः ।" ६ । ४ । २१ ।
इति छलोपः । "न ध्याख्यापृमूर्च्छिमदाम् ।" ८ ।
२ । ५७ । इति निष्ठातकारस्य नत्वाभावः ।)
मूर्च्छितः । इत्यमरः । ३ । १ । ४६ ॥ कठिनः ।
मूर्त्तिमान् । इति मेदिनी । तः, ११ ॥
व्यापकत्वे पृथिवी जलं तेजः वायुः मनश्च ।
एषां गुणाः । रूपं रसः गन्धः स्पर्शः परत्वं
अपरत्वं गुरुत्वम् । स्नेहः वेगश्च । मूर्त्तामूर्त्त-
साधारणगुणाः । यथा, भाषापरिच्छेदे ।
संख्या परिमितिः पृथक्त्वं संयोगः विभागश्च ।
(यथा, मार्कण्डेये । ४१ । ३० ।
"यथाग्नमूर्त्तं यच्च मूर्त्तं समस्तं
यद्वा भूतेष्वेकमेकञ्च किञ्चित् ।
यद्दृश्यस्ति ध्यातव्ये स्थितो वा
तत्सर्वञ्च मनुष्येर्वेश्मवेश्म ॥")
मूर्त्तिः, स्त्री, (मूर्च्छ + क्तिन् । "न ध्याख्येति ।"
८ । २ । ५७ । इत्यनेन नकारस्य नत्वम् ।)
काठिन्यम् । शरीरम् । इत्यमरः । ३ । ३ ।
६६ ॥ (यथा, मनौ । १२ । १२० ।
"खं संनिवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गाञ्च मूर्त्तिषु ॥")
प्रतिमा । इति हेमचन्द्रः ॥ स्वरूपः । यथा,—
"आद्यायां मङ्गलो मूर्त्तिः पिता मूर्त्तिः
प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्त्तिर्माता साक्षात् क्षिते-
स्तनुः ।
दयाया भगिनी मूर्त्तिर्धर्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्त्तिः सर्वभूतानि चात्मनः ॥"
इति श्रीभागवते । ६ । ७ । २९—३० ॥
(धर्मपत्नीविशेषः । यथा, तत्रैव । ४ ।
१ । ४९—५२ ।
"तत्पुत्रा भूर्त्तिश्रेष्ठाद्या नरनारायणाद्‌ ऋषी ।
धृमायमा विकृताद्या अभौ मूर्त्तिजरा दिशाः ॥")
मूर्त्तिमत्, क्ली, (मूर्त्तिः काठिन्यमस्त्यस्मिन् । मूर्त्ति +
मतुप् ।) शरीरम् । इति हेमचन्द्रः । ३ । २२७ ॥
मूर्त्तिमान्, [त्] त्रि, (मूर्त्तिरस्त्यस्य । मूर्त्ति +
मतुप् ।) मूर्त्तिविशिष्टः । यथा,—
"मकरोमपतिर्मूर्त्तो वरदः कौशी कनी
मूर्त्तिमान् ।"
इत्यादि श्रीभागवतम् । (यथा च रघौ । १५ । ६ ।
"वृत्तं कमनाख्यं वैदेह्या इव मूर्त्तिमत् ।"
कुमद्रूपः । यथा, हरिवंशे । ४० । १९ ।
"कुमदपा समुद्रार्थं चकारो दैत्यवर्धनः ।
कुपितः कुमदनामा कुमारी मूर्त्तिमानिवा ॥"
मिथ्यो दोषः । यथा, महाभारते । १ । १०७ । ६ ।
"एकैकामास्य तं मञ्जु तदा मूर्त्तिमती स्वयम् ।")

मूर्द्धकः, पुं, (मूर्द्धन्यभिषिक्त इति । मूर्द्धन् + संज्ञायां कन् ।) क्षत्त्रियः । इति शब्दरत्नावली ॥
मूर्द्धकर्णी, स्त्री, छत्रम् । इति हारावली ॥
मूर्द्धखोलं, स्त्री, (मूर्द्ध्नः खोल इव ।) छत्रम् । इति त्रिकाण्डशेषः ॥
मूर्द्धजः, पुं, (मूर्द्ध्नि जायते । जन + डः ।) केशः । इति जटाधरः ॥ (यथा, बृहत्संहितायाम् । ६८ । ८१ ।
"बहुमूलविषमकपिला
स्थूलस्फुटिताग्रपरुषह्रस्वाश्च ।
अतिकुटिलाश्चातिघनाश्च
मूर्द्धजा वित्तहीनानाम् ॥")
मूर्द्धि जाते, त्रि ॥
मूर्द्धन्यः, त्रि, (मूर्द्धन् + यत् ।) मूर्द्धनि भवः । यथा । ऋवर्णं ट ठ ड ढ ण र षा मूर्द्धन्याः । इति मुग्धबोधव्याकरणम् ॥ (यथा च भागवते । १ । ७ । ५५ ।
"अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना ।
मणिं जहार मूर्द्धन्यं द्विजस्य सहमूर्द्धजम् ॥")
मूर्द्धपुष्पः, पुं, (मूर्द्धि पुष्पमस्य ।) शिरीषवृक्षः । इति शब्दमाला ॥ (गुणादयोऽस्य शिरीषशब्दे विज्ञेयाः ॥)
मूर्द्धरसः, पुं, (मूर्द्धस्थस्तदुपरिस्थो रसः ।) भक्तफेनः । इति शब्दचन्द्रिका ॥
मूर्द्धवेष्टनं, क्ली, (मूर्द्ध्नः वेष्टनम् ।) उष्णीषः । इति हेमचन्द्रः । ३ । ३३१ ॥
मूर्द्धा, [न्] पुं, (मूर्च्छति बध्नाति यमिति । मुर्च्छ + "श्वन् उक्षन् पूषन्" । उणा० १ । १५८ । इति कनिन् । उकारस्य दीर्घः छकारस्य धकारश्च ।) मस्तकः । इत्यमरः । २ । ६ । ९५ । (यथा, बृहत्संहितायाम् । ७७ । २ ।
"लोहे पात्रे तण्डुलान् कोद्रवाणां
चुल्ले पक्त्वोदश्चितेन साकम् ।
पिष्ट्वा सम्यङ् मूर्द्धि शुक्लाञ्जकेषु
दत्त्वा तिष्ठेच्छादयित्वार्कपत्रैः ॥")
मूर्द्धाभिषिक्तः, पुं, क्षत्त्रियः । राजा । इत्यमरः । २ । ८ । १ ॥ मूर्द्धन्यभिषिक्तो मूर्द्धाभिषिक्तः राज्यारोपणसमये प्रथमः क्षत्त्रियो मूर्द्धाभिषिक्तः । तत्प्रभवत्वात् योग्यतयानभिषिक्तोऽपि मूर्द्धाभिषिक्तः । (यथा, भागवते । ८ । १२ । ४१ ।
"राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः ।
तीर्थसंसेवया चांहो जह्यङ्गाच्युतचेतनः ॥")
वर्णसङ्करविशेषः । स तु विप्रात् क्षत्त्रियायां जातः । प्रधानः । इति भरतः ॥ मन्त्री । इति मेदिनी । ते, ९९२ ॥
मूर्द्धावसिक्तः, पुं, वर्णसङ्करभेदः । स तु क्षत्त्रियायां ब्राह्मणेनोत्पादितः । यथा,—
"स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्
सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥"
इति मानवे १० अध्याये ६ श्लोकः ॥ ७ ॥
'स्त्रीष्विति आद्यश्लोकेन अनन्तरवर्णजातीयासु भार्यासु द्विजातिभिः उत्पादिताः पुत्राः । यथा । ब्राह्मणेन क्षत्त्रियायां क्षत्त्रियेण वैश्यायां वैश्येन शूद्रायाम् । तान् मातृहीनजातीयत्वदोषेण गर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वादय आहुः । पितृसदृशवचनात् मातृजातितश्चोत्कृष्टाः पितृजातितो निकृष्टा ज्ञेयाः । एतेषाञ्च नामानि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्यादिभिरुक्तानि । इतरथैवाम्बष्ठमुक्तोक्ताः । अश्वरथहस्तिशिक्षास्त्रधारणञ्च मूर्द्धावसिक्तानाम् । नृत्यगीतनक्षत्रजीवनं शस्यरक्षा च माहिष्याणाम् । द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षा च पारशवोग्रकरणानामिति । इति तट्टीकायां कुल्लूकभट्टः ॥
मूर्द्धा, [न्] पुं, (मूर्च्छ + कनिन् । वस्य धः दीर्घश्चोकारस्य ।) शिरः । यथा,—
मूर्द्धा मूर्द्धां शिरोदेशे पुंसि ख्यातामिमौ बुधौ ।
इत्युणादिकोषः ॥
मूर्व्वी नदि मूर्द्धां मूर्द्धा च । अस्य धनञ्जयौ ।
इति तट्टीका ॥ (यथा, देवीभागवते । २ । ७ । २८ ।
"दृष्ट्वा येर्थौ सतौ मूर्द्धि कण्ठवं लोचने तथा ।
अथिं प्रवीता तरसा हेमदं नान्यथा
सुतम् ॥")
मूर्व्वा, स्त्री, (मूर्व्वति इति । मुर्व्व + अच् टाप् ।) लताविशेषः । धनुर्गुणोपयुक्ता मुरमा इति ख्याता । तत्पर्य्यायः । देवी २ मधुरसा ३ मोरटा ४ तेजनी ५ स्रवा ६ मधूलिका ७ धनुःश्रेणी ८ गोकर्णी ९ पीलुपर्णी १० । इत्यमरः । २ । ४ । ८३ ॥ सुवा ११ मूर्व्वी १२ । मधुश्रेणी १३ गुडः १४ श्रेणी १५ । इति तट्टीकायां भरतः ॥ सुरङ्गिका १६ । देवश्रेणी १७ पृथक्त्वचा १८ मधुस्रवा १९ अतिरसा २० पीलुपर्णिका २१ दिव्यलता २२ ज्वलिनी २३ गोपवल्ली २४ । अस्या गुणाः । अतितिक्तत्वम् । कषायत्वम् । उष्णत्वम् । हृद्रोगकफवातास्रप्रमेहकुष्ठविषमज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मूर्व्वा सरा गुरुः स्वाद्वी तिक्ता पित्तास्रमेहनुत् ।
त्रिदोषतृष्णाहृद्रोगकण्डूकुष्ठज्वरापहा ॥"
इति भावप्रकाशः ॥
(तथास्याः पर्य्यायः ।
"तेजनी पिलुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ॥
"मूर्व्वा मधुरसा श्रेवा तेजनी तिक्तवल्लिका ।"
इति गारुडे २०८ अध्याये ॥)
मूल क रोपणे । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट् ।) दीर्घी रोपणमारोपणम् । क मूलयति रूपं लोकः । गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्मेति व्याख्याति । इति दुर्गादासः ॥
मूल श प्रतिष्ठायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सेट् ।) पवर्गशेषादिरयम् । प्रतिष्ठा स्थितिरिति गोविन्दभट्टः । श मूलति मूलते मनः । अयं परस्मैपदीत्यन्ये । इति दुर्गादासः ॥
मूलं, क्ली, (मवते बध्नाति वृक्षादिकमिति । मू + "मूशक्यविभ्यः क्लः ।" उणा० ४ । १०८ । इति क्लः ।) शिफा । शिकड़ इति भाषा । तत्पर्य्यायः । बुध्नः २ अङ्घ्रिनामकः ३ । इत्यमरः । २ । ४ । १२ ॥ कन्दः ४ ब्रध्नः ५ । इति शब्दरत्नावली ॥ जटा ६ । इति जटाधरः ॥ (यथा, मनौ । ३ । २२७ ।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ।
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥")
आद्यम् । (यथा, महाभारते । १ । १६१ । ६ ।
"कुतोमूलमिदं दुःखं ज्ञातुमिच्छामि तत्त्वतः ।
विदित्वाप्यपकर्षेयं शक्यं चेदपकर्षितुम् ॥")
नक्षत्रविशेषः । (यथा, मार्कण्डेये । ३३ । ११ ।
"कुर्व्वंस्तथाश्वराधासु लभते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यमुत्तमम् ॥"
निकुञ्जः । अन्तिकम् । इति विश्वः ॥ (यथा, मार्कण्डेये । ८६ । ६ ।
'जगादोच्चैः प्रयातीति मूलं शुम्भनिशुम्भयोः ॥)
मूलवित्तम् । इति भरतधृतमेदिनी ॥ (यथा, मनौ । ८ । २०२ ।
"अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः ।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥")
निजम् । इत्यजयपालः ॥ चरणम् । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । १० । ८७ । १० ।
"त्रेधा मूलं यातुधानस्य वृश्च ।"
"मूलं चरणम् ।" इति तद्भाष्ये सायणः ॥)
टीकाद्यपेक्ष्यः । यथा । समाप्तवेलादि मूलम् । इति प्रायश्चित्ते गदाधरभट्टाचार्य्यः ॥ शूरणम् । इति शब्दचन्द्रिका ॥ पिप्पलीमूलम् । पुष्करमूलम् । इति राजनिर्घण्टः ॥ विहितमूलस्य अन्वेषणविशेषो यथा,—
"नदीनामग्निहोत्राणां भारतस्य कुलस्य च ।
मूलान्वेषो न कर्त्तव्यो मूलाद्दोषो न हीयते ॥"
इति भारते ११६ अध्यायः ॥
(कारणम् । यथा, मनौ । ११ । ८४ ।
"धर्म्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते ।"
"मूलं कारणम् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)
मूलः, त्रि, (मूलतीति । मूल प्रतिष्ठायाम् + कः ।) आदिम्यादिसर्व्वप्रतिपदमात्मसन्तोषैश्वर्य्य-वन्म् । यथा,—
"दृष्टा याती भरमा चक्री करालो शृङ्गि ।
स्तान् पुंसि पुरुषयज्ञो नवमकी क्षिप्ता
देवाः ॥"
इति निघण्टरत्नम् ॥
"मूलमादि त्रिकाण्ड त्रिकटे मे तु वाचि-
काम् ।"
शब्दरत्नावली च ॥

न तु निर्ऋतिदैवताकः। इति ज्योतिस्तत्त्वम्॥ (वैवस्वताधारः। इति हलायुधनाममालिः॥ प्रधानर्क्षनिर्णयतारामयश्च। अस्मिन् नक्षत्रे-षु दिते जीवनपथादौ यथानि यथानि भवन्ति। यथा,—

"जीवितमापि मयतारकाहिते
जन्मनि सुतम्। मदर्थर्गमपि।
निजिनाङ्कमराजकुनाथे
निर्ममान प्रपुरीमलन्तः॥"

इति कालिदासकृतरात्रिविचारविद्यापत्रम्॥

अस्मिन् जन्मनि जातस्य फलम्।

"मूलं रितह्रास्यदं सभलं
कूर्म दक्षमेव वदन्ति यमाः।
पीदृग्वासः पुत्रा विधिनाम्
सौभाग्यमायुश्च सुखानुवर्ति॥"

इति कोष्ठीप्रदीपः॥

अस्मिन् मांसभक्षणविधिर्यथा,—

"विभाजकलालाभवतां नैवं
चौरं विद्यात्समतिषमृषु कर्म्मम्।
मूले श्रमी भाद्रपदासु सोर्वं
योविष्णासाधविभावेनराशु॥"

इति विद्यादितत्त्वम्॥

मूलकं, क्ली, पुं, (मूल+संज्ञायां कन्।) कन्दविशेषः। मूला इति भाषा। तत्पर्य्यायः। हरिलाकुः २ महाकन्दः ३ हस्तिदन्तकः ४। इति शब्दरत्नावली। नीलकण्ठम् ५ मूलाकम् ६ दीर्घमूलकम् ७ अथ दीर्घमूलमपि पाठः। कृषारम् ८ कन्दमूलम् ९ हस्तिपर्णम् १० विषम् ११ रक्तफलम् १२ हरितपर्णम् १३ बन्धिरम् १४ दीर्घकन्दकम् १५ कुञ्जरशरणम् १६। अस्य गुणाः। तीक्ष्णत्वम्। कटुत्वम्। कटूष्णवीर्यपरीचयत्वम्। दुर्नामगुल्मक्षयतीवकास-नाशित्वम्। कफघ्नत्वम्। गुणश्च। इति राजनिर्घण्टः॥ ७॥ अपि च।

"नाशमुक्तरूपो तु दोषघ्नी बलिरीयणी।
तद्वर्धं गुरु विदाहि तीक्ष्णमामं त्रिदोषकृत्।
तदेव स्निग्धसिद्धं पित्तश्लेष्मापहम्।
शुष्कं त्रिदोषशमनं दोषघ्नं गरविनाशनम्।
तत्पुष्पं कफपित्तघ्नं तत्फलं कफवातजित्॥"

इति राजवल्लभः॥

अन्यच्च।

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
याचामरुचिकं विशे सार्थं मरुमालकम्।
नागजातक्षं तीक्ष्णं तथा बलदीपनम्।
मैनामनपवनालादुमीरुवरमालम्।
लघुमूलकमुक्तं स्वाद्वेवं लघु च दाहनम्।
दीपनकरं गौल्मं ज्वरश्वासविनाशनम्।
नासिकाकण्ठरोगघ्नं नयनामयनाशनम्।
महत्तदेवरुक्षोष्णं गुरु दोषत्रयप्रदम्।
सस्नेहं सिद्धं तदेव वाताद्यविनाशनम्॥"

इति भावप्रकाशः॥

(तथाचास्य गुणाः।

"बालं दोषहरं वृद्धं त्रिदोषं मारुतापहम्।
स्निग्धसिद्धं विशुष्कन्तु मूलकं कफवातजित्॥"

इति चरके सूत्रस्थाने। २७ अध्यायः॥)

भक्ष्यमपि तद्भक्षणे दोषो यथा,—

"मत्तो यश्चैव विंशे चार्यासुकन्या।
कार्त्तिके मूलकश्चैव यत्रो गोमांसमक्षणम्॥"

इति कर्म्मलोचनम्॥

पौषेमासादिमासमाघशपक्षस्य।

"त्रिवर्षो देवनाद्य मूलकं नैव दापयेत्।
द्रव्यदत्तमाप्नोति सुक्षीत ब्राह्मणो यदि।
ब्राह्मणो मूलकं भुक्त्वा परेवान्नारचं व्रतम्।
अन्यथा याति नरकं पश्चो विट् शूद्र एव च।
तथा।

"वर्ज्जं नवमनमन्तरेण पित्र्या गर्हितञ्च यत्।
चार्म्मेणीयं प्रयत्नेन मूलकं मदिरासमम्॥"

इति मलमासतत्त्वम्॥

मूलकः, पुं, (मूले जातः। मूल+"पूर्व्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्।" ४। ३। २८। इति वुन्।) चतुर्विंशनक्षत्रेभ्यः विषयात्मकः सविषभेदः। इति हेमचन्द्रः। ४। २६८॥ (मूलप्रकार इति। मूल+"स्थूलादिभ्यः प्रकारवचने कन्।" ५। ४। ३। इति कन्। मूल-स्वरूपः। यथा, भागवते। ६। ८। ३१।

"मारीकावस्त्वृक्षो निःशेषं मूलकोऽभवत्॥")

मूलकपर्णी, स्त्री, (मूलकस्य पर्णमिव पर्णमस्याः। गौरादित्वात् ङीष्।) शोभाञ्जनः। इति राजमाला॥

मूलकर्म्म, क्ली, (मूलस्य तत् कर्म्म चेति।) औषधादिमूलेन यत् आयवीक्षकरणमध्यबशीकरणादिकर्म्म। जो इति ख्यातम्। इति भरतः॥ योगा इति सुकुटः॥ तत्पर्य्यायः। कार्म्मणम् २। इत्यमरः॥ ३। ५। ६॥ उपपातकविशेषः। अन्यमपार्थुतमप्राप्ति-साधनीभूतोपायविशेषः। यथा,—

"कुर्व्वातभिचारो महापातकमर्पितम्।
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म्म
च॥"

इति मनुः। ११। ६४॥

"स्त्रीनिषेवादिना वशीकरणम्।" इति मनु-
भाष्यतत्त्वाख्याने कुल्लूकभट्टः॥

मूलकषणा, स्त्री, (मूलकमिव कषमस्याः।) चौर-पुष्पीवृक्षः। इति राजमाला॥

मूलकारः, पुं, (मूलं करोतीति। मूल+कृ+अण्। इत्यणु।) मूलग्रन्थकर्त्ता। यथा। भाष्य-मूलकार: किन्तु मूलकार:। इति वैयाकरणटीकायां गोपीचन्द्रः॥

मूलकारिका, स्त्री, (मूलकारक+स्त्रियां टाप्। अकारस्येत्वम्।) चुल्ली। इति शब्दरत्नावली॥ मूलग्रन्थार्थप्रकाशकवचनम्। मूलपाठस्य वृत्ति-विशेषश्च॥

मूलकृच्छ्रं, क्ली, (मूलैव तत्साधनेन कृच्छ्रम्।) एकादशविधवर्ज्जकृच्छ्रान्तर्गतव्रतविशेषः। यदा अधिनाति ग्रहणानि मासं पीयते मूल-जलमनश्येषु अधिते। यथाह मार्कण्डेयः।

"पत्रैर्मतोक्त कथितः फलकृच्छ्रो मनीषिभिः।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा।
मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते।
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु॥"

इति मिताक्षरायां प्रायश्चित्ताध्यायः॥

(पुंलिङ्गोऽप्ययं मार्कण्डेयपुराणोक्तत्वात्।)

मूलजं, क्ली, (मूलात् जायते इति। जन+डः।) आर्द्रकम्। इति राजनिर्घण्टः॥ (त्रिलिङ्गो-ऽप्यार्द्रकवाच्ये ज्ञातव्यः।)

मूलजः, पुं, (मूलात् जायते। जन+डः।) उत्पलादिः। इति हेमचन्द्रः। ४। २६६॥ मूलोद्भवे त्रि॥

मूलत्रिकोणं, क्ली, (मूलस्य मूलत्रिकोणमिति।) ग्रहाणामुच्चाद्यनन्तरराशिविशेषः। स तु रवेः सिंहः। चन्द्रस्य वृषः। कुजस्य मेषः। बुधस्य कन्या। गुरोर्धनुः। भृगोस्तुला। शनेः कुम्भः। यथा,—

"सिंहो वृषश्च मेषश्च कन्या धन्वी तुला घटः।
अर्कादीनां त्रिकोणानि ज्ञेयानि स्वाद्यः
क्रमात्॥"

अथ मूलत्रिकोणांशावस्था।

"रविभौमबुधगुरुभृगुशनैश्चराणां त्रिकोण-
भागाः स्युः।
नखरविदिग्मुनितिथिदश विंशतिरंशमानिका
क्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

मूलदेवः, पुं, (मूलदायी देवो दाता यस्य।) कंसराजः। इति त्रिकाण्डशेषः॥

मूलद्रव्यं, क्ली, (मूलस्य तद्द्रव्यञ्चेति।) मूलधनम्। इति हेमचन्द्रः। ६। ३३॥

मूलधनं, क्ली, (मूलस्य तद्धनञ्चेति।) आदिधनम्। पुँजी इति भाषा। तत्पर्य्यायः। परिपणम् २ नीवी ३। इत्यमरः। २। ९। ८०॥

मूलपर्णी, स्त्री, (मूले पर्णान्यस्याः। ङीष्।) मण्डूक-पर्णी। इति राजमाला॥

मूलपुष्करं, क्ली, (मूले पुष्करमस्य। पुष्करमिव मूलमस्येति वा।) पुष्करमूलम्। इति राज-निर्घण्टः॥

मूलपोती, स्त्री, (मूलप्रधाना पोती।) पूतिका-शाकभेदः। तत्पर्य्यायः। क्षुद्रपोती २ पोतिका ३ क्षुद्रपोतिका ४ क्षुद्रपोतकसाखी ५ पति-शाकपोतिका ६। अस्या गुणाः। त्रिदोष-घ्नत्वम्। रुच्यत्वम्। पथ्यत्वम्। लघुत्वम्। वस्ति-शुद्धिकारित्वम्। बलत्वम्। जठरानलदीप-नत्वञ्च। इति राजनिर्घण्टः॥

मूलप्रकृतिः, स्त्री, (मूला चासौ प्रकृतिश्चेति।) आद्या प्रकृतिः। यथा,—

"अविकृतानां प्रकृतिः पीठकाः प्रकृतिः स्मृता।
न प्रकृतः प्रकृतेर्विकृतिर्विकृतिः पुरुषः स्मृतः॥"

सर्व्वं विधातुं मायेशो न शक्तिर्मायया विना ।
सा च सर्व्वं तिरोभूता सृष्टिसंहारकारके ।
आविर्भूता सृष्टिकाले सा च नित्या परेश्वरः ॥
कुलालश्च घटं कर्त्तुं यथाशक्तो मृदं विना ।
स्वर्णं विना स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥
सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया ।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ।
वेदाश्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी ।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
वागधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधाऽसौ स्वयं देवी मूलप्रकृतिरीश्वरी ।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ।
मायया सृष्टिकाले च तद्विना न भवेद्भवः ॥
सृष्टिश्च प्रतिबिम्बं च ब्रह्मन् ! ब्रह्मोद्भवा सदा ।
पाता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४० अः ॥

मूलफलदः, पुं, (मूले च फलं ददातीति । दा + कः ।) पनसवृक्षः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विषयो ज्ञातव्यः ॥)

मूलभद्रः, पुं, (मूलस्थायी भद्रश्चेति ।) कंसराजः । इति त्रिकाण्डशेषः ॥

मूलरसः, पुं, (मूले रसोऽस्याः ।) मोरटलता । इति रत्नमाला ॥

मूलशाकटः, त्रि, (मूलानां भवनं क्षेत्रम् । मूल + "भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ।" ५ । २ । २९ । इत्यत्र वार्त्तिकवचनात् शाकटः ।) मूलक्षेत्रम् । क्षेत्रार्थे शाकटप्रत्ययेन निष्पन्नम् ॥

मूलशाकिनः, त्रि, (मूल + शाकिनः ।) क्षेत्रार्थे शाकिनप्रत्ययेन निष्पन्नम् ॥

मूला, स्त्री, (मूलानि बहूनि सन्त्यस्याः । मूल + अर्श आदित्वात् अच् टाप् ।) शतावरी । इति राजनिर्घण्टः ॥ मूलनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, कालकाचार्य्यविरचिते रत्नमाले १ अध्यायः ।
"द्वितीयां षष्ठीमष्टम्यां वारयेत् प्राजापत्यमेव च ।
चित्रोत्तरमघाश्च पुष्या पुनर्वसुस्तथा ॥")

मूलाधारः, पुं, (मूलानामाधारः । मूलं प्रधानं आधार इति वा ।) गुह्यलिङ्गयोर्मध्ये चतुरङ्गुलपरिमितस्थानम् । स तु शरीरस्थषट्चक्राणां प्रथमस्थानम् । अत्र व श ष स वर्णचतुष्टययुक्तं चतुर्द्दलपद्ममस्ति । तन्मध्ये इच्छाज्ञानक्रियात्मकं त्रिकोणं वर्त्तते । तन्मध्ये कोटिसूर्य्यसमप्रभं स्वयम्भुलिङ्गमस्ति । अत्र डाकिनी वर्त्तते । तत्रैव मृणालसूत्रवत् सूक्ष्मसार्द्धत्रिवलयाकारस्वयम्भुलिङ्गवेष्टितविद्युत्तुल्यप्रभकुलकुण्डलिनी वर्त्तते । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे हेमवर्णाभं व स वर्णैश्चतुर्द्दलम् ॥"
इति तन्त्रसारः ॥

"अथाधारपद्मं सुषुम्नास्यलग्नं
ध्वजाधो गुदोर्द्ध्वं चतुःशोणपत्रम् ।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥
अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि शूलाष्टकैरावृतं तत् ।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम् ॥
वज्राख्या वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत्त्रैपुराख्यं तडिदिव विलसत् कोमलं कामरूपम् ।
कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः ॥
तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिसलयाकाररूपः स्वयम्भूः ।
विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपप्रकारः ॥
तस्योर्द्ध्वे बिसतन्तुसोदरलसत् सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं संछादयन्ती स्वयम् ।
शङ्खावर्त्तनिभा नवीनचपलामालाविलासास्पदा
सुप्ता सर्पसमा शिवोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥"
इति श्रीतत्त्वचिन्तामणौ षट्चक्रभेदः ॥१॥

तत्रस्थतीर्थानि यथा, रुद्रयामले ।
"इडा भगवत्यार्त्तिविनाशिनी या
धर्म्मात्मिका या यमुनाप्रवाहिका ।
तया सुषुम्ना भवदेवमार्गिणी
सरस्वती इच्छति मध्यकालकम् ॥
समीरतत्त्वानमतो मनुष्यो
मन्त्रक्रियायोगविधिप्रमत्तवित् ।
महातीर्थे विमले जले सदा,
मूलाम्बुजे याति सुतत्त्वभावमेव ॥
सर्व्वाणि तीर्थे सुरतीर्थवाससो
गङ्गा महाजलविधिर्यता यतौ ॥

करोति पापत्रयमेव शुक्तिं
ददाति साधारमलार्यपुष्पदा ॥"

मूलाढ्या, स्त्री, (मूलमाढ्यं यस्याः ।) मूलकम् । इति राजनिर्घण्टः ॥

मूली, [न्] पुं, (मूलमस्यास्तीति । मूल + इनिः ।) वृक्षः । इति शब्दचन्द्रिका ॥ (स्त्रियां ङीप् । ओषधिः । यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।
"चक्रकामोषधिं विद्यात् ...
मूलिनीमष्टभिः पर्णैः सरलाशुकपोमयैः ॥")

मूली, स्त्री (मूल + गौरादित्वात् ङीष् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥ (नदीभेदः । यथा, मात्स्ये । ११३ । ३१ ।
"ताम्रपर्णी तथा मूली शरवा विमला तथा ॥")

मूलेरः, पुं, (मूलतीति । मूल + "मुषेरादयः ।" उणा० १ । ६२ । इति एरक् । जटा । इत्युणादिकोषः । राजा । इत्युज्ज्वलदत्तः ।)

मूल्यं, क्ली, (मूलेन आनाम्यते अभिभूयते मूलेन समं वा इति । मूल + "नौवयोधर्म्मविषमूल—" ४ । ४ । ९१ । इति यत् ।) पटादीनामुत्पत्तिकारणम् । मूलं मूलेन क्रयविक्रयार्थमिदं तन्त्वादिति यः । इति भरतः ॥ दर इति दाम इति च भाषा । तत्पर्य्यायः । वस्नः २ अवक्रयः ३ । इत्यमरः । २ । १० । ७९ ॥ (यथा, मनौ । ८ । १२२ ।
"यथाप्रमत्तमल्पधिकं हस्तादेवमिष्यते ।
शिवे लिकारमश्रुवं मूल्यादर्थं प्रकल्पयेत् ॥")
मूल्यते धार्य्यते इदम् । माहिना इति भाडा इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः ५ भर्म्म ६ वेतनम् ७ भरण्यम् ८ भरणम् ९ निर्व्वेशः १० पणः ११ । इति च अमरः । २ । १० । ३८ ॥ (यथा, मिताक्षरायाम् ।
"मूल्येन यः कर्म्म करोति स भृतकः ।")

मूल्यं, त्रि, (मूलं रोपणमर्हतीति । मूल + यत् ।) प्रतिष्ठायोग्यः । रोपणयोग्यः । इति मूलशब्दार्थदर्शनात् ॥ (मूलेन समुपाद्यते इति । "नक्रमल्लावर्हे ।"॥ । ४ । ८८ । इति यत् । मूलेन समुपाद्यमाने तद्वारे ।)

मूष स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मूषति । यो मूषति परस्वम् । इति हलायुधः ॥ मूषकैः । मोषति । इति दुर्गादासः ॥

मूषः, पुं-स्त्री, (मोषति अपहरतीति । मुष + इगुपधत्वात् कः ।) मूषिकः ॥ (यथा, पञ्च-तन्त्रे । १ । १९९ । "एष प्रतिभाति मे मूष-राजः ।") तैलपायिनी । इति शब्दरत्नावली ॥

मूषकः, पुं-स्त्री, (मूष + स्वार्थे कन् ।) उन्दुरः ॥ इति शब्दरत्नावली ॥ (यथा, रामायणे । ३ । ११ । १६ ।
"[illegible]
मूषके:

मूषककर्णी, स्त्री, (मूषकस्य कर्णं इव पत्राण्यस्याः । ङीष् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

मूषकमारी, स्त्री, (मूषकं उन्दुरं मारयतीति । मृ + णिच् + "कर्मण्यण् ।" ३ । २ । १ । इति अण् । ङीप् ।) ग्रामभेदोद्भवः । इति राजनिर्घण्टः ॥

मूषका, स्त्री, (मूषक + स्त्रियां टाप् । प्रत्ययस्था- दित्यात् न अत इत्वम् ।) मूषिका । इति शब्द- रत्नावली ॥

मूषकारातिः, पुं, (मूषकाणां अरातिः घातकः ।) बिडालः । इति राजनिर्घण्टः ॥ मूषिकारातिः इति च पाठः ॥

मूषा, स्त्री, (मूषति रत्नादीनीति । मूष + कः + स्त्रियां टाप् ।) स्वर्णादितापनपात्रम् । मूची इति भाषा ॥ (यथा, पञ्चदशाम् । ४ । २ । "मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा । रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥") तत्पर्यायः । तैजसावर्तनी २ । इत्यमरः । २ । १० । ३३ ॥ मुषा ३ मुषी ४ आवर्तनी ५ मूषी ६ । इति भरतः ॥ "इष्टकाङ्कैर्दृढैः पूर्वां मध्ये मूषां विधापयेत् । निरुध्यांशे गुरुद्राक्षे तदङ्के पुटयेच्च तत् ॥" इति भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे ॥) मूषिका ७ । इति रत्नमालाः ॥ देवताडकः । इति शब्दचन्द्रिका ॥ मूषिकश्रेणिः । इति शब्दरत्नावली ॥ गवाक्षः । यथा,— "दृष्टशिखराशिकपाटकर्मितमधो भूमि मे भूमिभर्तु- र्वेश्मा दृश्येऽन्तरे चतुरधिरचिते दत्तमूषा- विराजे ।" इत्यादि कौमारभाषे चैत्रोत्सवाद्वारः ॥

मूषाकर्णी, स्त्री, (मूषायाः कर्णः इव पत्राण्यस्याः ।) आखुकर्णी । इति शब्दरत्नावली ॥

मूषातुत्थं, क्ली, (मूषायाः तुत्थम् ।) नील- तुत्थम् । तत्पर्यायः । कांस्यनीलम् २ हेम- तुत्थम् ३ शिखितुत्थम् ४ । इति हेमचन्द्रः । ४ । ११८ ॥

मूषिकः, पुं, (मुष्णाति द्रव्याणीति । मुष् + "मूषेर्दीर्घश्च ।" उणा० २ । ३२ । इति किकन् दीर्घश्च ।) आखुविशेषः । इन्दुर इति भाषा । (यथा, हितोपदेशे मित्रलाभप्रकरणे । १११ । "अनेन धनराशिना मूषिको बलान्वितः प्रोक्तः । सदार्थं मूषिकः प्रायः सर्वाभिगमनो भवः ॥") तत्पर्यायः । उन्दुरः २ आखुः ३ । इत्यमरः । २ । ५ । १२ ॥ गिरिः ४ मूषीकः ५ उन्दुरुः ६ वज्रः ७ वृषः ८ खनकः ९ वृषः १० । इति शब्दरत्नावली ॥ खनकः ११ गिरिः १२ धान्य- चरः १३ बली १४ क्षनकः १५ बिलकारी १६ कामचारिः १७ कुन्दरः १८ । अस्य मांस- गुणाः ।

"मूषिकमांसमुद्भवमिश्रं वातकफापहं मधुरं विशदम् कथितम् ॥

कायामिकवाद्यदरं तद्वदिव विदराद्यतरम् ॥ अन्ये विशेषता ये तु मूषिकोद्भवाद्यपः । मर्दितं तस्य मांसं च मदमोरवदुर्धरम् ॥"

इति राजनिर्घण्टः ॥

अपि च ।

"मूषिको मद्गुरः क्रौञ्चो मार्जारो वनवल्गुलः ।"

इति राजवल्लभः ॥ ० ॥

पारिभाषिकमूषिको यथा,—

"क्रिमये यदि मेवाति न ददाति कुत्रोति च । समाकृष्टं तथार्थं सदा मूषिक इत्युच्यते ॥"

इति मार्कण्डेयपुराणे आचाराध्यायः ॥

(जनपदविशेषः । यथा, महाभारते । ६ । ९ । ६० । "स्त्रीपिकाः वैरवाः प्राच्या मूषिका वन- वासिकाः ।")

मूषिकपर्णी, स्त्री, (मूषिककर्णस्य पर्णानि यस्याः ।) क्षुपविशेषः । इन्दुरकानीपाना इति भाषा । (यथा, चरके चिकित्सास्थाने चतुर्थे- ऽध्याये ।

"मूषिकपर्णी सकलामयापहं प्रदद्यात् ।")

तत्पर्यायः । चित्रा २ उपचित्रा ३ न्यग्रोधी ४ द्रवन्ती ५ शम्बरी ६ वृषा ७ प्रत्यक्श्रेणी ८ सुतश्रेणी ९ रण्डा १० । इत्यमरः । २ । ४ । ८८ ॥ मूषकश्रेणी ११ आखुपर्णिका १२ उन्दुरकर्णी १३ आखुकर्णी १४ मूषिका १५ वृश्चिकपर्णिका १६ । इति रत्नमाला ॥ मूषिकपर्णिका १७ कर्णिका १८ पुरीषकर्णी १९ द्रवन्तिका २० । इति शब्द- रत्नावली ॥

मूषिका, स्त्री, (मूषिक + अजादित्वात् टाप् ।) मूषिकपर्णी । इति रत्नमाला ॥ उन्दुरः । इति शब्दरत्नावली ॥ मूषा । इत्य- मरटीकायां रमानाथः ॥ (यथा, सुश्रुते चिकित्- सितस्थाने ६० अध्याये ।

"घोरं महातपस्त्वं मूषिकां बालघातिनी- नाम् ।")

मूषिकाङ्कः, पुं, (मूषिकः अङ्कश्चिह्नम् यस्य ।) गणेशः । इति जटाधरः ॥

मूषिकाञ्चनः, पुं, (मूषिकं अञ्चति वाहनतया प्राप्नोतीति । अञ्च् + ल्युः ।) गणेशः । इति त्रिकाण्डशेषः ॥

मूषिकारातिः पुं, (मूषिकाणामरातिः ।) बिडालः । इति राजनिर्घण्टः ॥

मूषिकाह्वयः, पुं, (मूषिकस्य आह्वा आख्या यस्य ।) मूषिकपर्णी । इति जटाधरः । (तथाऽस्य पर्यायः ।

"हस्तिकुम्भदर्वी छागिकुम्भीः च गुडूच्यः । इन्द्रवारुणीफलपिप्पली मूषिकाह्वया ॥"

इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

मूषिकपर्णिका, स्त्री, (मूषिकपर्ण + कप् टाप् अत- इत्वम् ।) मूषिकपर्णी । इति शब्दरत्नावली ॥

मूषी, स्त्री, (मूष् + कः । स्त्रियां ङीष् ।) मूषा । स्वर्णादितापनपात्रम् । इत्यमरटीकायां भरतः ॥ महामहिषः । यथा,—

"हस्तो महामूषिकः खाम्बूरो निर्हिदानकः । महाभूः इत्यमारी च भूपको भिन्नताडकः ॥"

इति राजनिर्घण्टः ॥

मूषीकः, पुं, स्त्री, (मूषति इति । मूष + बाहुल- कात् ईकन् ।) मूषिकः । इति शब्दरत्नावली ॥

मूषीककर्णी, स्त्री, (मूषीकस्य कर्णं इव पर्णं यस्याः ।) मूषिककर्णी । इति शब्दरत्नावली ॥

मूषीका, स्त्री, (मूषीक + टाप् ।) उन्दुरः । यथा, "दीना मूषीका मता च मूषीका मूषिकेऽपि ।"

इति शब्दरत्नावली ॥

मूर्च्छायकः, त्रि, (मोचति अपहरतीति । मुष + कः चौरः । तस्मात् इति । मुष + कन् । बाहुलकात् दकाभावः ।) उन्मत्त- चित्तकः । मूढोऽन्तमः । इति केचित् ॥

मृ, ङ प्राणत्यागे । इति कविकल्पद्रुमः ॥ (तुदा०- आत्म०-अक०-अनिट् ।) म्रियते प्राणत्यागः । ङ प्र म्रियते प्राणी । (कर्मणि) प्राणान् मरणम् । मृतः मरिष्यति । इति दुर्गादासः ॥

मृकण्डः, पुं, (मृगस्य कण्डुरिति समासे पृषो- दरादित्वात् साधुः ।) मृकण्डुः मृकण्ड इति केचि- च्च पठन्ति । शब्दकल्पद्रुमः । ततः अंशार्थे अण् ।) मार्कण्डेयः । इति शब्दरत्नावली ॥

मृकण्डुः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरा- दित्वात् साधुः । शब्दकल्पद्रुमः ।) मुनि- विशेषः । (यथा, मार्कण्डेये । ५२ । १६ । "मार्कण्डेय मृकण्डुश्च पिता मम महायशाः ।") तस्य पुत्रो मार्कण्डेयः । यथा,—

"मार्कण्डेयोऽपि मार्कण्डो मृकण्डुज इत्य- च्यते ।"

इति शब्दरत्नावली ॥

मृग मृ ग ष मार्गणे । (चुरा०-आत्म०-सक०- सेट् ।) ङ रागी मृगं मृगयते वनौकसाम् । इति महाभारतम् । कालिकारी मृग अपि- कृते इति हितादेशेऽन्यत्र वायुव स्यात् पूर्वतिङोऽपि चोरानुकरणात् अचेतनोऽपि । अन्यतः परस्मै तथान्यतः ऋत्वा च एतानि माम् । इति तु चरकाध्यायेन भावे किं अधारनेऽपि अर्थं करोतीति अकारादिभ्यः ण्यः धात्वम् । इति दुर्गादासः ॥

मृगः, पुं, (मृग्यते अन्विष्यते व्याधादिभिः अन्यो वा इति । मृग् + इगुपधात् कः ।) पशुमात्रम् । (यथा, मनुः । ५ । ९ । "आरण्यानां च सर्वेषां मृगाणां माहिषं विना ।"

मत्तमयूरे मृगेन्द्रतयां पशुमात्रम् । इति तट्टीकायां कुल्लूकः ।) हरिणविशेषः । मृगमात्रः । (यथा, रघुवंशे । "आविर्भूतमनसा च पुनः कृष्णमृगकान्तः ।") कस्तूरिका । (यथा, कादम्बर्याम् । ४ । १६ । "वनकाये कालं मृगमदकालिमञ्जरी- वको वैडूर्येति यन्त्रवदनात् गृहीतम् ॥

तरङ्गाभसंवैदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥”
कनकस्य सुवर्णस्य मृगो अन्वेषणे । यथे ।
कनकमृगो हेमहरिणो वा टष्या इत्यर्थः ।)
याचना । इति मेदिनी । गे, १८ ॥ मार्गशीर्ष-
मासः । यज्ञविशेषः । इत्यजयपालः ॥ मृग-
नाभिः । इत्यमरटीकायां भरतः ॥ मकर-
राशिः । यथा,—
“मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापराः ॥”
इति तिथ्यादितत्त्वम् ॥
चतुष्पादपशुविशेषः । मृग्यते अन्विष्यतेऽसौ
व्याधैः । (यथा, अभिज्ञानशाकुन्तले । १।१० ।
“न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।”)
तत्पर्य्यायः । कुरङ्गः २ वातायुः ३ हरिणः ४
अजिनयोनिः ५ । इत्यमरः ॥ सारङ्गः ६
वातप्रमीः ७ जिनयोनिः ८ कुरङ्गमः ९
ऋष्यः १० अयः ११ रिष्यः १२ रिश्यः १३
एणः १४ एणकः १५ । इति शब्दरत्नावली ॥
स नवविधः । यथा,—
“चमरो रोहितो न्यङ्कुः कुरङ्गः शम्बरो रुरुः ।
एणश्च हरिणश्चेति मृगा नवविधा मताः ॥”
पाठान्तरं यथा,—
“एणश्च रोहितो न्यङ्कुः शम्बरो बभ्रुणो रुरुः ।
पृषतश्च हरिणश्चेति मृगा नवविधा मताः ॥
हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव ! ।
ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा ।
एते बलिप्रदाने च चर्म्मदाने च कीर्त्तिताः ॥”
इति कालिकापुराणे ६७ अध्यायः ॥ * ॥
अपि च । अथ जाङ्गलानां गणना ।
“हरिणैणकुरङ्गर्क्ष्यपृषतन्यङ्कुशम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋष्यो नीलाङ्गको लोके गवोहरिति कीर्त्तितः ।
पृषतश्चित्रितः स्याद्धरिणात् किञ्चदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो
वृतः ।
यो मृगः श्मश्रुहीनः स्यात् स मुण्डीति निग-
द्यते ॥”
अथ तेषां गुणाः ।
“जाङ्गला मारुताः सर्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥”
इति भावप्रकाशः ॥
अथ मृगपरीक्षा ।
“मृगाणां समादाय कौतुकार्थं तथा नृपः ।
मृगाः पोष्या महीन्द्रेण तेषां वच्मि,
लक्षणम् ॥
एवं बहुगुणमनस्केऽपोऽधिकास्तु यथा ।
विद्यते नैकमेदास्तु समस्ता मृगजातयः ॥”

तद्यथा,—
‘ये गन्धिनः क्षीणशरीरवर्णा-
स्ते पार्थिवा गन्धमृगाः प्रदिष्टाः ।
सर्व्वाङ्गमेषां सुरभि प्रकामं
पुण्ये प्रदेशे प्रभवन्ति ते तु ॥
ये वै विशाला गुरुदीर्घशृङ्गा
धर्म्मानिलाक्षीणखुरप्रदेशाः ।
आप्यास्तु ते वै प्रचरन्ति भूरि
सर्व्वत्र देशे प्रभवन्ति चैव ॥
धावन्ति ये वातमिवान्तरीक्षे
दीर्घास्तु ते वातमृगाः प्रदिष्टाः ।
ते यत्र यत्रैव भवन्ति शक्ता-
स्तत्रैव सर्व्वाणि शुभानि सन्ति ॥
लघुप्रमाणा लघुवीर्य्यसत्त्वा
निर्गन्धदेहाल्पगणप्रमाणाः ।
ते नागना वेगकरा नराणां
सूक्ष्मा न ते नापि निरीक्षणीयाः ॥
ये लघ्ववर्णा गुरुदीर्घशृङ्गाः
क्रुद्धा भृशं यान्ति च वायुवेगाः ।
ते लघ्वसाराः खलु तेजसास्तु
पुण्यप्रदेशे प्रभवन्ति ते तु ॥’
भोजोऽप्याह ।
‘पार्थिवादिमृगः सर्व्वस्तुर्य्यातिर्भवेत् पृथक् ।
सुस्निग्धास्तनुलोमानो नात्यच्चा मृगजातयः ॥
क्रुद्धाः पश्चरिद्धाङ्गाश्च चत्रियाः खरलोमशाः ।
आवर्त्तमध्याङ्गलसो हरिणा वैश्यजातयः ॥
कुश्रङ्गा वाप्यदङ्गा वा शूद्राः खरतनूरुहाः ।
अश्वानां ये गुणा दोषास्ते ज्ञेया हरिणेष्वपि ॥
तथापि दोषाः यथामी वस्यन्ते हरिणाश्रयाः ।
नेत्रयोरन्तरे यस्य लोमावर्त्तः स पापकृत् ॥
विषमौ विलतौ शृङ्गौ यस्य स क्षेमनाशनः ।
आवर्त्तः पृष्ठतो यस्य स्वामिनमभिविन्दति ॥
मध्याह्ने यस्य आवर्त्तौ स्यातां भयकारकौ ।
यमैश्चपदादीनां वैकल्यात्मनाशनः ॥’
गार्ग्यः ।
‘दोषवन्मृगजातीनां विजातीनामथापि वा ।
दर्शनात् स्पर्शनाच्चैव नश्यादानाच्च पोषणात् ।
भवेद्धर्म्मपरः सर्व्वादाशया चैवायपोषणात् ॥’
शुक्रोऽपि ।
‘हरिणपोषणतो धरणीभुजां
नहि भवेन्नवहनपोषणम् ।
न पविवह्निजारिपुजं भयं
तदव तं हरिणं सुखिनं नृप ! ॥’
इति मृगपरीक्षा ॥ इति युक्तिकल्पतरुः ॥
(अस्य गुणविशेषो यथा,—
“दूरे जलान्तिकस्था दूरे पानीयगोचराः ।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो
मताः ॥
अतीवासन्ननिलयाः समीपोदकगोचराः ।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
मृगादिविकारोपशमो यथा,—

गर्ग उवाच ।
“प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति
जलोद्भवाः ॥
स्थलजाश्च जलं यान्ति घोरं रावन्ति
निर्भयाः ।
गृहं कपोतः प्रविशेत् कव्यादो मूर्द्ध्नि लीयते ॥
मधु वा मक्षिकाः कुर्य्युर्मूर्द्ध्नि शुभपतेर्यदि ॥
मृगपक्षिविकारेषु कुर्य्याद्धोमं सदक्षिणम् ।
देवाः कपोत इति च जप्तव्याः पञ्चभिर्द्विजैः ॥
गावश्च देया विधिवत् द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वा विनिवेदितं यत् ॥”
इति मात्स्ये २११ अध्यायः ॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । तस्य लक्षणं
यथा,—
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ।
“शशके पद्मिनी तुष्टा मृगे तुष्टा च चित्रिणी ।
वृषभे शङ्खिनी तुष्टा हये तुष्टा च हस्तिनी ॥
पद्मिनीशशयोर्योनिर्मेढ्रौ चतुरङ्गुली ।
चित्रिणीमृगयोर्योनिर्मेढ्रौ च तथाविधौ ॥”
इति रतिमञ्जरी ॥
(अन्वेष्टा । यथा, ऋग्वेदे । १ । १५४ । २ ।
“मृगो न भीमः कुचरो गिरिष्ठाः ।”
“मृगः अन्वेष्टा ।” इति तद्भाष्ये सायनः ॥)
मृगक्षीरं, क्ली, मृगीदुग्धम् । तदादौ पेति पकार-
स्याकुलत्वप्रयोजनत्वात् मृग्याः क्षीरं मृगक्षीरं
मृग्याः पदं मृगपदं इत्यादिष्वपि ग्रहणम् ।
इति सुग्धबोधटीकायां दुर्गादासः ॥
मृगगामिनी, स्त्री, (मृग इव गच्छतीति । गम +
णिनिः । ङीप् ।) विडङ्गा । इति राजनिर्घण्टः ॥
मृगसदृशगमनशीला च ॥
मृगचर्म्मजं, क्ली, (मृगचर्म्मणः मृगाजिनचर्म्मणः
मृगाज्जायत् जायते इत्यर्थः । जन् + डः ।)
जवादिनामकगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
मृगचर्म्मजाते, त्रि ॥
मृगचेटकः, पुं, (मृगान् पशून् चेटयति प्रेरयति
शब्दैरेव रात्रिशेषं ज्ञापयतीति । चिट् +
णिच् + ण्वुल् ।) खट्वाशः । इति शब्दमाला ॥
मृगचालिका, स्त्री, (मृगाणां चालिका ।) वन-
मल्लिकापुष्पम् । तत्पर्य्यायः । वाटुरा २ ।
इति हेमचन्द्रः । ४ । १८२ ॥
मृगजीवनः, पुं, (मृगैः पशुभिः जीवतीति । जीव
+ ल्युः ।) व्याधः । इति शब्दरत्नावली ॥
(यथा, महाभारते । १ । ४१ । २८ ।
“शिरिसंदं धनुर्दृष्ट्वा तं विद्धि मृगजीवनः ।”)
मृगया, स्त्री, (मृग + इष् ।) आखेटाख्यव्यापार-
विशेषः । यथा,—
“संशीलयन् विफलं मार्गणं मृगया जवः ।”
। १ । ५ । १० ।

मृगतृट्, [ष्] स्त्री, (मृगाणां तृट् पिपासा यस्याः सकाशात् ।) मृगतृष्णा । इति शब्द-रत्नावली ॥

मृगतृषा, स्त्री, (मृगाणां तृषा अस्यामिति । अर्श आदित्वात् अच् । टाप् ।) मृगतृष्णा । इति शब्दरत्नावली । (यथा, शान्तिशतके । १ । ११ ।

"कृतमृगतृषातुल्यं चौर्यं चलमङ्गुरम् ।
सततं क्षुधतः कुर्यात् धर्माय च सुखाय च ।")

मृगतृष्णा, स्त्री, मृगाणामकस्मात् जलार्थी तृष्णा विद्यतेऽस्याम् । ग्रीष्मे मरुदेशे सिकतादावर्क-करैः प्रतिफलिताः दूरस्थानां जलभ्रमामासि मरीचिका । इति टीकाकारः ॥ मधुकटरवि-रश्मिजन्यतिसिकताजलाभासं मरीचिका । दूर-भूमौ जलाद्रीभूतमिव दृश्यते स्फुरते । इति भरतः ॥ तत्पर्यायः । मरीचिका २ । इत्य-मरः । १ । ३ । ११ ॥ मृगतृष्णिका २ । इति भरतः ॥ मृगतृट् ३ मृगतृषा ४ । इति शब्द-रत्नावली ॥

मृगतृष्णिका, स्त्री, (मृगतृष्णा + स्वार्थे कन् + स्त्रियां टाप् अत इत्वञ्च ।) मृगतृष्णा । इत्य-मरटीकायां भरतः ॥ (यथा, अभिज्ञान-शाकुन्तले । ६ ।

"चोरितवसां यथि विकाशमनामनोय
आतः कर्त्ता ! मुखयान् मृगतृष्णिकायाम् ।")

मृगदंशकः, पुं, (मृगान् दशति दंशति । दंश् + ण्वुल् ।) कुक्कुरः । इत्यमरः ॥

मृगधूर्त्तः, पुं, (मृगेषु पशुषु धूर्त्तः । धूर्त्तत्वात् ।) शृगालः । इति शब्दचन्द्रिकायां समानवाचः ॥

मृगधूर्त्तकः, पुं, (मृगधूर्त्त + स्वार्थे कन् ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥

मृगनाभिः, पुं, (मृगस्य नाभिः । तद्धन्यत्रे जातत्वात् तथात्वम् ।) कस्तूरी । तत्पर्यायः ।

"मृगनाभिर्मृगमदः कस्तूरी च सहस्रभित् ।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ।"

सा त्रिविधा यथा,—

'कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् ।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा
स्मृता ॥
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् ।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा स्मृता ।'

अस्या गुणाः ।

'कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः ।
कफवातविषच्छर्दिशीतदौर्गन्ध्यशोषहृत् ।'

इति भावप्रकाशः ॥

अपि च कस्तूरीशब्दे द्रष्टव्यम् । (तथाच हर्षचरितम् ।

'मृगनाभिर्मृगमदो मदः कस्तूरिकाह्वयः ।'

इति वैद्यकरत्नमालायाम् ।)

मृगनाभिजा, (स्त्री, मृगनाभिदेशे । जन् + ड । स्त्रियां टाप् ।) कस्तूरी । यथा,—

"कस्तूरिका विज्ञेया च मृगनाभिजा ।
मृगनाभिर्मृगमदः कस्तूरी गन्धधूलिवत् ॥"

इति हेमचन्द्रः । ३ । ३०७-८ ॥

मृगनेत्रा, स्त्री, (मृगनेत्र + "नेत्रस्येव उपसंख्या-नम् ।" ५ । ४ । ११६ । इत्यत्र वार्त्तिकोक्तेः अच् ।) मृगो मृगशिरा नेत्रा प्रापयिता यस्या रात्रेः सा रात्रिः । इति मुग्धबोधटीकायां दुर्गादासः ॥ या मध्यरात्रवत्या किंप्रतिरूपाधिकबहोदिन-दिनावधिपर्यन्तमितपक्षैर्या प्राप्यः सम्भवति । तत्र मृगशिरसाकृतिविशेषो यथा । मलमासतत्त्वे ।

"शनिवेक्ष मृगमघे तु भवानां मन्यते बुधैः ।
अपरे द्विमासं हि धनुष्येव सतं भवेत् ॥
यद्वापि मृगं सतं याहि मलमेवाद्य राविषु ।
पितरस्तस्य तृप्यन्ति मघासानिविधाङ्कुरः ॥"

अपरे तस्यमघे । मृगो नेता प्रापयिता यासां रात्रीणामितिपुंवत्त्वात् मघवत्तित्वविहितत्वादु-पिधानतत्पुरुषं विग्रहम् । तथाच स्मार्त्तः पूर्वा-र्द्धेन प्रतिपादितमापे रात्रावारम्भकसायं-प्रदत्तादिवदन्नाद्यो मृगनेत्राः । इति मल-मासतत्त्वम् ॥ (मृगस्य नेत्रे इव नेत्रे यस्याः । मृग तुल्यनेत्रे, त्रि ।)

मृगपतिः, पुं, (मृगाणां पशूनां पतिः ।) सिंहः । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । २४ । १० ।

"यत्रोचो मृगपतिरादेशेऽभवद्या-
मादाय कनकमयाञ्जुधाररोधैः ।"

'मृगपतिः सिंहः ।' इति तट्टीकायां श्रीधर-स्वामी । कामदेवेऽपि । यथा तत्रैव टीकायाम् ।
"मृगया इति मृगाः कामदपराभ्यां पति-र्यस्य ।")

मृगप्रियः, पुं, (अपिप्रवदते भाषते इति । अपि + वद् + बाहुलकात् संज्ञायां कुः । अपेरकारलोपश्च । मृगः हरिणः प्रियश्च ।) चषकः । इति त्रिकाण्डशेषः ॥

मृगप्रियं, क्ली, (मृगाणां प्रियम् ।) पर्वततृणम् । इति राजनिर्घण्टः ॥

मृगभक्षाजीवः, पुं, (मृगवधेन आजीवतीति । आ + जीव् + अच् ।) व्याधः । इत्यमरः । २ । १० । २१ ॥

मृगमदनी, स्त्री, (मृगः भक्षते यदिति । भक्ष + ल्युट् + स्त्रियां ङीप् ।) मृगमधुपर्णिकाख्यम् । तत्पर्यायः । वायुरा १ । इत्यमरः । २ । १० । २६ ॥

मृगमाता, स्त्री (मृगैर्भक्ष्यते । भक्ष + कर्मणि अप् टाप् ।) मृगादनी । इति राजनिर्घण्टः ॥

मृगमदः, पुं, (मृगस्य मादनं यस्मिन् मर्दयतीति । मद् + अच् ।) कस्तूरी । इत्यमरः । २ । ६ । १२५ ॥ (यथा, हर्षचरितम् । २ । ११ । ३ ।

"मृगमदतलपत्रविलीनचन्दनाया
स्विन्नमदविन्दुकस्फुरदल्पदलमयाः ।")

मृगमदवासा, स्त्री, (मृगमदस्येव वासः सौरभ्यो-ऽस्याः ।) कस्तूरीमल्लिका । इति राजनिर्घण्टः ॥

मृगया, स्त्री, (मृग्यन्ते मृगरोगाख्यो यदि । मृग + शः । "रुचा ।" ३ । ३ । १०९ । इत्यत्र पठितत्वात् परिप्रश्नादिष्वपठितस्यादर्शनाबाधकत्वम् । इति वार्त्तिकोक्तौ ध्वनियितोऽनेकः । इति सिद्धान्त-कौमुदी ।) राज्ञां धर्मेषु मृगयादिका । मृगवधो धनलिप्सया वा । शिकार इति भाषा । तत्पर्यायः । आच्छोदनम् २ मृगव्यम् ३ आखेटः ४ । इत्यमरः ॥ तद्विषयविधिर्यथा,—

"चचार मृगयां तत्र रुरून् आशिगुकान्वितः ।
विजन आचामनदद्दां मनुजवन्नाभकृत् ॥ ११ ॥
अप्यत्र हन्यमालिक्य भीराणां पितुम्पतः ।
आद्दत्य विनिर्मीमात्र ववधीपशून् ॥ १२ ॥
तीर्थेषु प्रतिदृष्टेषु राज्ञा मेध्यान् पशून् वधे ।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते ।" ८ ॥

इति श्रीमद्भागवते ४ स्कन्धे २६ अध्यायः ॥

अस्यार्थः स्वयोक्ता टीका श्रीधरस्वामिकृता । कार्मुकञ्च भीमादिभिर्निशेषदर्पं येन । आत्मा निरीक्षणी बुद्धिं विहाय । अनुदर्शी ज्ञात्वान्-र्थाम् । आत्मनि चिन्ताः आच्छन्नो इति अयमात्मा चित्तः भेदे चरणे भीमादयतिकेन लायतं पतितवान् यत्र ॥ १ ॥ बाले रागादिभिः । येषु भवतोऽ-वैधितम् । सर्वांश्वरान् भयचकितस्तान् । अदहनं भयचौष्वैरिवाप्रत्यक्षतान् त्यजतान् । अयास्ते तु स्वयं ॥ १ ॥ अज्ञाता इति-मानिन इति विमिति अज्ञाता विन्दते । प्रपातेषु सायकाभ्यां विदितेन वा । पत्ताव-पत्ते अपि चौरत्वे विषभोजी पिहित इव एवमादाय तीर्थेष्विति विधिः । अर्थ भावः । न हि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते । नियमेन सङ्-चिते दर्शयति । यदि अवश्यमेव लुब्धो राजा पशून् हन्यात् तर्हि तीर्थेषु श्राद्धादिष्वेव तथापि प्रतिदृष्टेषु प्रशस्तेष्वेव न निषिद्धादिषु । तथापि राजैव । मेध्यानेव । वध एव । यावद-प्रयोजनमेव इति । एवं चौरत्व विषयेऽपि यावदुपयोगं न ततोऽधिकमिति नियम एव द्रष्टव्यः । ७ । इति तट्टीकायां श्रीधरस्वामी ॥ सा राज्ञां व्यसनम् च स्मात् । यथा,—

"मृगयाक्षाः स्त्रियो मद्या-
निन्दावाक्पारुष्यं व्ययम् ।
अर्थदण्डस्तु पैशुन्यं
अवगमाय च भूभुजां गणम् ॥"

इति मेदिनी २ वर्गे १० श्लोकः ॥

सा च कामजव्यसनविशेषः । यथा,—

"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो
मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥"

इति मनुमानवशास्त्रम् ॥

मृगयुः, पुं, (मृगं याति । मृग + "मृगय्वादयश्च ।" उणा० १ । ३७ । इति कुः । निपात्यते च ।) व्याधः । मृगार्थः । व्याधः । इति मेदिनी । ये, १०९ ॥ (यथा, भट्टिकाव्ये । ५ । ६० ।

"मृगयुरिव सन्दरोच रथोपमा
शिरसिज स्थावरौ मायाहरात् ।")

मृगरुहा, स्त्री, (मृगस्य मृगमदस्येव रुदो यस्याः ।) वन्दूरी । इति राजनिर्घण्टः ॥

मृगराजः, पुं, (मृगाणां पशूनां राजा अधिपतिः। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) सिंहः। इति शब्दरत्नावली। (यथा, रघुवंशे। ६।३।
"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह।"
व्याघ्रः। यथा, महाभारते। १।१४१।३४।
"इह मे त्वं महाबाहो। यद्वाक्यं मृधिकोऽब्रवीत्।
चिरवृत्तं मृगराजस्य मयाख्यातं मृगो यतः।")
मृगराट्, [ज्] पुं, (राजते दीप्यतेऽसौ राज्+क्विप्। ततः मृगाणां राट्।) सिंहः। इति शब्दरत्नावली। (यथा, शिशुपालवधे। ८।१८।
"पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।")
मृगराटिका, स्त्री, (मृग+रट्+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च।) जीवन्ती। इति राजनिर्घण्टः।
मृगरिपुः, पुं, (मृगाणां रिपुः।) सिंहः। इति हलायुधः।
मृगरोमजं, त्रि, (मृगाणां रोमभ्यो जायते इति। जन्+डः।) पशुलोमजातवस्त्रादि। तत्पर्य्यायः। राङ्कवम् २। इत्यमरः। २।६।१११।
मृगलाञ्छनः, पुं, (मृगः लाञ्छनं चिह्नमस्य।) चन्द्रः। इति शब्दरत्नावली।
मृगवल्लभः, पुं, (मृगाणां वल्लभः प्रियः।) कुन्दुरुतृणम्। इति राजनिर्घण्टः।
मृगवाहनः, पुं, (मृगो वाहनमस्येति।) वायुः। इति जटाधरः।
मृगव्यं, क्ली, (मृगान् विध्यति यत्र इति। व्यध्+"अन्येष्वपि दृश्यते।" ३।२।४८। इति कार्त्तिकोक्त्या अधिकरणे डः।) मृगया। इत्यमरः। २।१०।२३। (यथा, मार्कण्डेये। १२७।१।
"बदाचिन्नाथपुत्रोऽसौ मृगव्यमचरद्वने।")
मृगशिरः, [स्] क्ली, (मृगस्येव शिरोऽस्य।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चमनक्षत्रम्। तत्पर्य्यायः। मृगशीर्षम् २ आग्रहायणी ३। इत्यमरः। १।३।२३। (यथा, बृहत्संहितायाम्। १०।५।
"मृगशिरसि वस्त्रयाजक-
यजमानार्य्यजनमध्यदेशाश्च।")
तत्तु बिडालपदाकृति तारात्रयात्मकं चन्द्राधिदैवतम्। इति ज्योतिषम्। गगनमध्ये तस्योदये दशावयवस्य राशेस्त्रयुत्पकानि गतानि भवन्ति। यथा,—
"अधिकाम्रगपदाकृतौ विधौ
व्योममध्यमिलिते त्रितारके।
खारदेश्वरमिते। कन्यकोदया-
दीप्यमानलवकाः कलावति।।"
इति कालिदासकृतरात्रिलग्ननिरूपणम्।
तत्र जातफलम्। यथा,—
"मरालनाभोदरतो विनीतः
परापरज्ञो गुणिनां गुणेषु।
भक्तानुरक्तो विभवेन पूर्णः
सन्मार्गवर्त्ती मृगजन्मभागी।।"
इति कोष्ठीप्रदीपः।
मृगशिरा, स्त्री, (सर्व्वे नाम्ना अकारान्ताश्चेति मृगशिरोऽदन्तः। मृगशिर+टाप्।) मृगशिरोनक्षत्रम्। इति शब्दरत्नावली।
मृगशिराः, [स्] पुं, (मृगस्येव शिरो यस्य।) मृगशिरोनक्षत्रम्। इत्यमरटीकायां रायमुकुटः।
मृगशीर्षं, क्ली, (मृगस्य शीर्षमिव शीर्षमस्य।) मृगशिरोनक्षत्रम्। इत्यमरः। (यथा, भागवते। ५।२३।६।
"तथैव मृगशीर्षादीन्युदगयनानि।")
मृगशीर्षः, पुं, (मृगस्येव शिर्षोऽस्य।) मृगशिरोनक्षत्रम्। इति केचित्। इत्यमरटीकायां भरतः।
मृगशीर्षा, स्त्री, (मृगशीर्ष+टाप्।) मृगशिरोनक्षत्रम्। इति त्रिकाण्डशेषाभिधः। इत्यमरटीकायां भरतः। (यथा, बृहत्संहितायाम्। २१।८।
"मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च।")
मृगशीर्षा, [न्] पुं, (शीर्षस्य शीर्षन् इत्यादेशः। ततो मृगस्येव शीर्षास्य।) मृगशिरोनक्षत्रम्। इति केचित्। इत्यमरटीकायां भरतः।
मृगा, स्त्री, (मृगः मृगनाभितुल्यः रसोऽस्ति अस्याः अर्शआदिभ्योऽच्।) सहदेवीलता। इति राजनिर्घण्टः।
मृगाक्षी, स्त्री, (मृगस्येव अक्षि तद्वत्पुष्पं अक्षिणी वा अस्याः। अक्षि+"बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" ५।४।११३। इति षच्। स्त्रियां ङीष्।) विशाला। (यथास्याः पर्य्यायः।
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी चामरपुष्पा सा विशाला महाफला।
श्वेतपुष्पा मृगाक्षी च मृगैर्व्वारुमृगादनी।।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
मृगलोचनतुल्यनेत्रा स्त्री। इति मेदिनी। षे, ४४। (यथा, छन्दोमञ्जर्य्याम्। २।११।८।
"वक्षसि मे सरसिरुहाक्षि-
शोभिमृगाक्षीललितपूर्णैः।
वाञ्छितसिद्धेः प्रवितरस्व
ताहशकुम्भा भगति न कस्य।।")
मृगाङ्कः, पुं, (मृगः अङ्को यस्य।) चन्द्रः। (यथा, नैषधचरिते। १।८८।
"विनिदमपारिताशितिकेतवाम्
मृगाङ्कचूडामणिवर्ज्जनार्ज्जितम्।")
कर्पूरः। इत्यमरः। १।३।१४। वायुः। इति विश्वः। मृगचिह्नम्। चन्द्रे तच्चिह्नकारणं यथा,—
"लोकच्छायामयं लक्ष्म तवाङ्के शशसंज्ञितम्।
न विदुः सोमदेवापि ये च नक्षत्रयोनिनः।।"
इति महाभारते भीष्मपर्व्व। यथा, दर्पणं प्राप्य नराहता नयनरश्मयो ग्रीवास्थमेव मुखं दर्पणगतमिव पश्यन्ति एवं चन्द्रमण्डलं प्राप्य पराहताश्चक्षूरश्मयो दूरत्वदोषात् पृथिवीमयच्छायामिव चन्द्रमण्डलगतां पश्यन्ति स एव चन्द्रे कलङ्क इत्युपचर्य्यते। इति तट्टीका। यक्ष्मरोगस्य औषधविशेषः। यथा,
"रसादर्द्धेन यमं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः।।
सर्व्वं तद्गोलकं कृत्वा काञ्जिकेन विशोषयेत्।
भाण्डे लवणपूर्णेऽथ पचेद् यामचतुष्टयम्।
मृगाङ्कसंज्ञको ज्ञेयो रोगराजनिकृन्तनः।।"
अपि च।
'रसस्य भागो हेम पिष्टीकृत्य प्रयोजयेत्।
गुञ्जाचतुष्टयचाण्यमरिचैर्भक्षयेन्नरः।'
इति मधुमती।
(एतन्नामकौषधान्तरं यथा,—
"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं द्वयम्।
दीर्घं मुद्गानुपानेन मृगाङ्कोऽयं क्षयापहः।।"
इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे।)
मृगाजीवः, पुं, (मृगैः आजीवतीति। जीव्+अच्।) व्याधः। इत्यमरः। २।१०।२१।
मृगाण्डजा, स्त्री, (मृगाण्डात् जायते इति। जन्+डः+स्त्रियां टाप्।) कस्तूरी। इति राजनिर्घण्टः। (तथास्या विषयः।
"एतैः समस्तैर्द्विपलप्रमाणै-
रालोड्य सर्व्वं विधिना विपक्वम्।
कर्पूरकाश्मीरमृगाण्डजानां
चूर्णीकृतानां दिपलप्रमाणम्।।"
इति भैषज्यरत्नावल्यां वातरोगे गन्धमहाराजतैले।)
मृगाद्, [द्] पुं, स्त्री, (मृगान् अत्तीति। अद्+क्विप्।) व्याघ्रः। इति केचित्।
मृगादनः, पुं, (अत्तीति। अद्+ल्युः। मृगस्य अदनः।) क्षुद्रव्याघ्रः। तत्पर्य्यायः। तरक्षुः २। इत्यमरः। २।५।१। तर्क्षुः ३ तरक्षुः ४ तरचक्षः ५। इति शब्दरत्नावली। इष्टाकुरुकारे लक्कडबाघा इति ख्याते। इति भरतः। चीता इति ख्याते। इत्यन्ये।
मृगादनी, स्त्री, (मृगैरद्यते भक्ष्यतेऽसौ इति। अद्+कर्म्मणि ल्युट्+स्त्रियां ङीप्।) इन्द्रवारुणी। सहदेवी। मृगेर्व्वारुः। इति राजनिर्घण्टः। (यथा,—
"शिरीषञ्च महातिक्ता वराहुली मृगादनी।"
इति गोविन्ददासकृतभैषज्यरत्नावल्याम् कुष्ठचिकित्सायाम्।) क्षुद्रवार्त्ताकी च।
मृगान्तकः, पुं, (मृगाणां अन्तकः नाशकः।) चित्रव्याघ्रः। इति राजनिर्घण्टः।
मृगारातिः, पुं, (मृगाणां अरातिः।) कुक्कुरः। इति शब्दमाला। सिंहश्च। यथा,—
"मार्गे मार्गे मनसि मृगारातिशङ्का विलोके लोके लोके नगरि कथं कमले कमलेक।"
इति महानाटकम्।

मृगारिः, पुं, (मृगाणामरिः।) सिंहः। व्याघ्रः। इति मेदिनी। रे, १०८॥ कुक्कुरः। रक्तशिग्रुः। इति राजनिर्घण्टः॥

मृगाविध्, [ध्] पुं, (मृगान् विध्यति इति। व्यध्+ क्विप्। "अन्येषामपि दृश्यते।" ६।३।१३७। इति दीर्घः।) व्याधः। इति जटाधरः॥ (मृगवेधनशीलः। यथा, भट्टिकाव्ये।५।८४।
"भ्रमसि वनान्ते मांसार्थी मो मृगाविन् मृगयामयी।")

मृगितः, त्रि, (मृग+क्तः।) अन्वेषितः। इत्यमरः॥

मृगी, स्त्री, (मृग+जातौ ङीष्।) मृगजातिस्त्री। इति व्याकरणम्॥ (यथाभिज्ञानशाकुन्तले।४।
"ग्रासावभिनवकवलच्छ च नरोभिर्माहुरिमया व्ययः
यस्मिं सञ्जनतात्र वामनयनं वत्सप्रमाणं मृगीम्॥")
अन्यत् रुग्रुजा: प्रासोद्भवदृग्भ्रमयुक्ता:। यथा,
'मतीवं वातश्लेष्मजा अपस्मारोद्भवं यतः।'
इति भावप्रकाशः॥
पुलहभार्य्या। सा कश्यपकन्या। तस्याः अपत्यं हरिणादि। यथा,—
"क्रोधायाः जज्ञिरे कन्या द्वादशैवात्मसम्भवाः।
ता भार्य्याः पुलहस्यासन् मृगी च हरिणी तथा।
भूता च कपिशा दंष्ट्रा ऋषा तिर्य्या तथैव च।
श्वेता च सरमा चैव सुरसा चेति विश्रुताः॥
मृग्यास्तु हरिणाः पुत्त्रा मृगाश्चान्ये शशादयः।
न्यङ्कवः शरभा ये च रुरवः पृषताश्च ये॥"
इति वह्निपुराणम्॥
छन्दोविशेषः। यथा। री मृगी। 'मा मृगीलोचना। राधिका प्रेयसी।' इत्यस्य। इति छन्दोमञ्जरी॥ सप्तमाक्षरैः। इति कोषे चारः। (रोमाञ्चविशेषः।)

मृगेक्षणा, स्त्री, (मृगस्येव ईक्षणे विद्येते इति। ईक्ष्+ल्युट्+स्त्रियां टाप्।) मृगेर्वारुः। इति राजनिर्घण्टः॥ मृगनयना स्त्री च॥ (यथा, कथासरित्सागरे।१४।१६।
"वासीकताङ्कुरस्त्वलक्षणोत्पलोत्पादित-
परागैः।
सेनापि मृगेक्षणाभिर्हेमलतासु सन्ध्या-
वाभिः॥")

मृगेन्द्रः, पुं, (मृगाणामिन्द्रः श्रेष्ठः।) सिंहः। इत्यमरः।२।५।१॥ (यथा, श्रीमद्भागवते।१।१९।१४।
"मृगेन्द्र इव विक्रान्तो निषेध्यो हिमवानिव।
तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव॥"
छन्दोविशेषः। यथा, श्रीमद्भागवतस्य।१०।१०।
"मृगेन्द्र मृगेन्द्रो पिशाचमर्द्दनम्॥"
इत्यादि द्रष्टव्यम्॥)

मृगेन्द्रचटकः, पुं, (मृगेन्द्र इव निर्भयः चटकः।) श्येनपक्षी। इति जटाधरः॥

मृगेन्द्राणी, स्त्री, (मृगेन्द्रम् आनयति इति। आ+नी+गौरादित्वात् ङीष्।) वासकः। इति राजनिर्घण्टः॥ (विवृतोऽस्या वासकशब्दे ज्ञातव्यः॥)

मृगेर्वारुः, स्त्री, (मृगस्य प्रिया इर्वारुः।) श्वेतेन्द्रवारुणी। चिर्भिटी इति हिन्दीभाषा॥ तत्पर्य्यायः। मृगादनी १ चित्रफला २ मृगाक्षी ३ चित्रवल्ली ४ बहुफली ५ कपिलाक्षी ७ मृगेक्षणा ८ चित्रा ९ चित्रफला १० मृगा ११ विषघ्ना १२ मृगाचिर्भिटा १३ मृगाक्षा १४ कुलिनी १५ देवी १६ कटुफला १७ मृगचिर्भिटा १८। अस्या गुणाः। दुर्जरत्वम्। गुरुत्वम्। मन्दाग्निकारित्वम्। रक्तपित्तकारित्वञ्च। इति राजनिर्घण्टः॥

मृगेष्टः, पुं, (मृगाणामिष्टः।) राजचम्पकः। इति राजनिर्घण्टः॥

मृग्यः, त्रि, (मृग्यते अन्विष्यते यः। मृग् + कर्म्मणि यत्।) अन्वेष्यः। अन्वेषणीयः। इति व्याकरणम्॥ (यथा, श्रीमद्भागवते।७।७।२३।
"देहस्तु सर्व्वसंघातो जगत्तस्थुरिति द्विधा।
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन्॥")

मृच क च म कि भृषे। गत्यां। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) क मर्च्चयति मर्च्चति। म मर्च्चा। कि मार्च्चयति। लौ मार्च्चयति शब्दार्थमिति हलायुधः। इति दुर्गादासः॥

मृज य क म शुद्धौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च। य मार्ष्टि धौतोऽयमिति तल-मिति हलायुधः। क मार्ज्जयति मार्ज्जति मतम्। मार्ज्जयति मार्ज्जतीति भट्टिः। म मृजा। इति दुर्गादासः॥

मृजः, पुं, (मृज्यते। इति मृज्+"इगुपधे" इत्यादिना कर्म्मणि कः।) वाद्यविशेषः। मादल इति भाषा। यथा। मर्द्दलो मादलो मृजः। इति शब्दरत्नावली॥

मृजा, स्त्री, (मृज्यते इति। मृज्+"षिद्भिदा-दिभ्योऽङ्।" ३।३।१०४। इति अङ्+टाप् च।) मार्ज्जनम्। इत्यमरः।२।६।१२१॥ (यथा, महाभारते विराटपर्व्वणि ८ अध्याये।
"अस्नाता मार्ज्जनैः क्लिष्टा मृजावर्ज्जितविग्रहा।
अप्यस्याः शुद्धिवसनो मृजावर्ज्जितवेशकः।")

मृज्यं, त्रि, मृज्यते यत् इति। मृज्। "ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) मार्ग्यम्। मार्ज्जनीयम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टौ।६।५६।
"तम्बुद्धिं सदा मार्ग्यं मृज्यः प्रोतेन
नैव ते॥")

मृड श ष सुखे। इति कविकल्पद्रुमः॥ (क्र्या०-वा तुदा०-पर०-सक०-सेट्।) मोद इव मृडी-करणम्। श मृड्णाति परमया च मृडति

सुखयतीत्यर्थः। श मृडति सौख्यं दाता। मर्द्दयति सुखकारयतीति भट्टिः। मर्द्दिता। इति दुर्गादासः॥

मृडः, पुं, (मृडति सुखयतीति। मृड्+इगुपधात् कर्त्तरि कः।) शिवः। इत्यमरः।१।१।३३॥ (यथा, श्रीमद्भागवते।४।५।७।
"प्रादुरभवन् मृडं दृष्ट्वा व्यालचर्म्मपरान्मुनिः॥")

मृडङ्कणः, पुं, (मृडयति सुखयतीति। मृड्+"मृडः कीकन् कङ्कणौ।" उणा० ४।२४। इति कङ्कण।) बालकः। शिशुः। इति कोषः॥

मृडा, } स्त्री, (मृड+टाप् ङीष् च।) दुर्गा।
मृडी, } इति जटाधरः॥

मृडीकः, पुं, (मृडतीति। मृड्+"मृडः कीकन् कङ्कणौ।" उणा० ४।२४। इति कीकन्।) हरिणः॥

मृण, श हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मृणति। इति दुर्गादासः॥

मृणालं, क्ली, पुं, मृणति हिनस्ति भयमाद्य-दम्। (मृण्+"तमिविशिविडिमृणिकुलिकपि-पलिपञ्चिभ्यः कालन्।" उणा० १।११७। इति कालन्। पद्मनाडीनां भावम्।) मृणाल इति ख्यातम्। इति भरतः॥ (यथा, नैषध-चरिते।२।१००।
"मरन्दकन्दलितमृणालकन्दलः
प्रियः प्रियङ्गुरिव लसन्नितम्बिनि॥")
तत्पर्य्यायः। बिसम् १। इत्यमरः।१।१०।४२॥ बिसम् २। इति त्रिकाण्डशेषः॥ पद्मनालम् ३ मृणाली ४ मृणालिनी ५ मृदुनालः ६ बिसिनी ७ नलिनीरुहम् ८। अस्य गुणाः। शिशिर-त्वम्। पित्तत्वम्। कषायत्वम्। पित्तदाहास्र-तृष्णाविकारहरत्वाभिनवरत्वञ्च। इति राज-निर्घण्टः॥ (ब्राह्मीविशेषः। तत्पर्य्यायो यथा,
"मण्डूकपर्णी ब्राह्मी च मण्डूकी च मता।
मृणालं नलं बिसाङ्गं तत्कन्दश्च कथितः॥"
तथास्य गुणाः। शीतार्त्ते श्राद्धकाले च॥
"मृणालं शीतलं वृष्यं पित्तदाहास्रजिद्गुरु।
दुर्ज्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृणालं, क्ली, (मृण+कालन्।) वीरणमूलम्। इति मेदिनी। ले, ११३॥ (अस्य पर्य्यायो यथा,
"मृणालमथ वीरणस्य मूलमुशीरमुच्यते॥"
इति वैद्यकरत्नमालायाम्॥
"मृणालवीरं मृणालञ्च वीरं मृणालमथवा॥"
इति भावप्रकाशे पूर्व्वखण्डे १०८ भागः॥)

मृणालिनी, स्त्री, (मृणालानि सन्त्यस्याः। मृणाल+"पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप् च।) पद्मिनी। इति शब्दरत्नावली। सा तु पद्मसमूहः पद्मयुक्तदेशश्च॥ (यथा, रघुवंशे।१६।७।
"निशासु भास्वत्कलनूपुराणां
यः सञ्चरोऽभूदभिसारिकाणाम्॥")

मृणाली, स्त्री, (मृणाल+गौरादित्वात् ङीष्।) मृणालम्। इति राजनिर्घण्टः॥ (यथा, उत्तरचरिते। ३।
"हरिर्मदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता॥")
(अल्पं मृणालं इति। मृणाल+अल्पार्थे ङीष्।) स्वल्पमृणालनालिः। यथा,—
"शान्तं चन्दनमङ्के मलयिता: मायो मृणालीलताः।
इति राजशेखरः। इत्यमरटीकायां भरतः॥
मृणाली, [न्] पुं, (मृणालमस्त्यस्येति। मृणाल+इनिः।) पद्मः। इति केचित्॥
मृत्, [द्] स्त्री, (मृद्नाति प्रलये चूर्णतया स्वकार्य्ये लीयते इति। मृद्+कर्त्तरि क्विप्।) मृत्तिका। इत्यमरः। २।१।४। (यथा, मनुसंहितायाम्। ४। ३९।
"मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्।
प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन्॥"
(अस्या गुणाः।
"कषाया मारुतं पित्तमूषरा मधुरा कफम्।
कोपयेन्मृदथादौ च रौक्ष्याद्भुक्तञ्च रूक्षयेत्।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि।
इन्द्रियाणां बलं हत्वा तेजोवीर्य्यौजसी तथा।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम्॥"
इति माधवकरकृतरुग्विनिश्चये पाण्डुरोगाधिकारे।) तुवरी। इति राजनिर्घण्टः॥ *॥
मृत्तिकाशौचं यथा,—
"दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्य्यान्मलपुरीषे तु रात्रौ चेद्दक्षिणामुखः॥
ततो लिङ्गपदोत्थाय मृद्भिरभ्युद्धृतैर्जलैः।
गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः॥"
इति गारुडे ९४ अध्यायः॥
मृतं, क्ली, (मृ+क्तः।) याचितम्। इत्यमरः। २।९।३। याचनवृत्तिमरणमिव दुःखजनकत्वात् मृतं भावे कर्म्मणि वा क्तः। इति भरतः। मृत्युः। इति हेमचन्द्रः॥
मृतः, त्रि, याचितवस्तु। गतप्राणः। मरा इति भाषा। तत्पर्य्यायः। परासुः २ प्राप्तपञ्चत्वः ३ परेतः ४ प्रेतः ५ संस्थितः ६ प्रमीतः ७। इत्यमरः। २।८।११६॥ कलौ मृतस्य धन्यत्वं यथा,
"धर्म्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्च दूरे गतं
पृथ्वी मन्दफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः।
मर्त्त्याः स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नता
हा कष्टं खलु जीवितं कलियुगे धन्या जना ये मृताः॥"
इति गारुडे ११५ अध्यायः॥
(कार्य्याकार्य्यज्ञानविकलत्वमपि मृतत्वं तद्यथा,—
"वृद्धो न मृते मूढो भयहर्षैर्न विह्वलः।
कार्य्याकार्य्यविभागाज्ञो मृतादप्यपरो मृतः॥"
इति माधवकरकृतरुग्विनिश्चये मानात्ययाद्यधिकारे। यथा च।
"उत्तिष्ठोत्तिष्ठ गच्छ त्वं वद मौनं समाचर।
ये पराधीनतां यान्ति तेऽपि जीवन्ति के मृताः॥"
इत्युद्भटः॥)
मृतकं, क्ली, (मृत+स्वार्थे कन्।) शवः। इति हेमचन्द्रः। ३। ३२८॥ मरणाशौचम्। यथा,
"यदि स्यात् सूतके सूतिर्मृतके च मृतिस्तथा।
शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम्॥"
इति शुद्धितत्त्वम्॥
मृतकल्पः, त्रि, (मृत+"ईषदसमाप्तौ कल्पप्। देश्यदेशीयरः।" ५।३।६७। इति कल्पप्।) मृतप्रायः। ईषदूनो मृतः। इति मृतशब्दादीषदूनार्थे कल्पप्रत्ययेन निष्पन्नम्॥
मृतकान्तकः, पुं, (मृतकस्य अन्तकः नाशको भक्षकत्वात्।) शृगालः। इति हारावली॥
मृतजीवः, पुं, (मृतश्चासौ जीवश्चेति नीललोहितादिवत् विशेषणसमासः।) तिल्वकवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य तिल्वकशब्दे ज्ञातव्यम्॥)
मृतण्डः, पुं, (मृतः अण्डः कारणत्वेन यस्य शकन्ध्वादित्वात् पररूपम्।) सूर्य्यपिता। इति सार्थकशब्दटीकायां भरतः॥
मृतमत्तः, पुं, (मृतेन शवेन मत्तः। भक्षणाभावात्।) शृगालः। इति त्रिकाण्डशेषः॥
मृतमत्तकः, पुं, (मृतमत्त+स्वार्थे कन्।) शृगालः। इति शब्दरत्नावली॥
मृतवत्सा, स्त्री, (मृता वत्सा यस्याः।) मृतापत्या। अजीवत्सन्ताना। गर्भाद्वधिवर्षं यावत् पुनःपुनर्मृतसन्ताना। अस्या दोषशान्तिर्यथा,—
"सप्तमीस्नपनं वक्ष्ये सर्व्वलोकहिताय वै।
बालस्य मृतवत्सायाः सप्तमे मासि नारद!।
अथवा शुक्लपक्षस्य सप्तम्यामेतदेव प्रशस्यते॥
नक्षत्राणां शुभं लब्ध्वा कृत्वा वा विप्रवाचनम्।
बालस्य जननीं चैव संवेष्टयेत् सबुधः।
तद्दूरयातुरामाणां क्षयं स्यादिवसेषु च।
गोमयेनानुलिप्तायां भूमावेकाग्निसन्ततः।
तण्डुलैः रक्तशालीयैश्च गोक्षीरसंयुतम्।
निर्व्वपेत् सूर्य्यरुद्राभ्यां तन्मन्त्राभ्यां विधानतः॥
कीर्त्तयेत् सूर्य्यदैवत्यं सप्तर्चैव हुताशनीः।
जुहुयाद्रुद्रसूक्तेन तद्वदत्र नारद!॥
होतव्याः समिधश्चात्र तदर्कक्षीरशाखयोः।
यवकृष्णतिलैर्होमः कर्त्तव्योऽष्टशतं पुनः।
आहुतिभिरथाज्येन तदेवाष्टशतं द्विज!।
हुत्वा स्नानञ्च कर्त्तव्यमश्वत्थेन च धीमता।
विप्रेण वेदविदुषा विधिवद्धर्म्मवादिना।
स्थापयित्वा चतुरः कुम्भान् कोणेषु सोमनन्द॥
पञ्चमञ्च पुनर्मध्ये दध्यक्षतविभूषितम्।
स्थापयेदव्रणं कुम्भं सप्तर्चैवाभिमन्त्रितम्।
सौरेण तीर्थतोयेन पञ्चरत्नसमन्वितम्॥
सर्व्वान् सर्व्वौषधैर्युक्तान् पञ्चगव्यसमन्वितान्।
पञ्चरत्नफलैर्युक्तान् वारीभिरभिवेष्टयेत्॥
गजाश्वरथ्यावल्मीकसङ्गमात् हृदगोकुलात्।
राजद्वारप्रदेशाच्च मृदमानीय निःक्षिपेत्॥
चतुर्ष्वपि च कुम्भेषु रत्नगर्भेषु मध्यमम्।
गृहीत्वा ब्राह्मणस्तत्र सौरान्मन्त्रानुदीरयेत्॥
सप्तभिरपि नारीभिरव्यङ्गाभिरपावृतम्।
पूजिताभिर्यथाशक्त्या माल्यवस्त्रविभूषणैः।
सविप्राभिश्च कर्त्तव्यं मृतवत्साभिषेचनम्।
दीर्घायुरस्तु बालोऽयं जीवपुत्रा च भाविनी॥
आदित्यश्चन्द्रमाः सार्द्धं ग्रहनक्षत्रमण्डलैः।
शक्रः सलोकपालो वै ब्रह्मविष्णुमहेश्वराः।
एते चान्ये च देवौघाः सदा पान्तु कुमारकम्॥
मित्रोऽग्निश्च हुतभुक् च बालग्रहाः क्षिपन्तु।
पीडां कुर्व्वन्तु बालस्य मा मातुर्जनकस्य वै॥
ततः शुक्लाम्बरधरा कुमारी पतिसंयुता।
सप्तकं पूजयेद्भक्त्या स्त्रीवासश्च गुरुं पुनः॥
काञ्चनीञ्च ततः कृत्वा तिलपात्रोपरिस्थिताम्।
प्रतिमां कूर्म्मराजस्य गुरवे विनिवेदयेत्॥
शुक्लमाल्याम्बरधरौ गन्धैर्भक्ष्यैः सधूपकैः।
पूजयेन्नाथवर्गं तद्दिने ब्राह्मणविप्रर्षिभिः॥
शुक्ला च शुक्लया धेनुः दक्षिणा सप्रदापिता॥
दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं समम्।
यत्किञ्चिदस्य दुरितं निःक्षिप्तं वडवानले॥
ब्रह्मा रुद्रो वसुः स्कन्दो विष्णुर्देवो हुताशनः।
रक्षन्तु सर्व्वदुष्टेभ्यो वरदाः सन्तु सर्व्वदा॥
एवमादीनि वाक्यानि वदन्तं पूजयेद्गुरुम्।
शक्तितः कपिलां दद्यात् प्रणिपत्य विसर्ज्जयेत्॥
गुरुश्च पुत्रसहिता प्रणम्य रविशङ्करौ।
हुतशेषं तदाश्नीयादादित्याय नमोऽस्तु ते॥
इदमेवाद्भुतोद्वेगदुःस्वप्नेषु प्रशस्यते।
कर्त्तुर्जन्मदिनर्क्षाणि देवान् संपूजयेत् सदा।
शान्त्यर्थं शुक्लसप्तम्यामेतत् कुर्व्वन्न सीदति॥
सदानेन विधानेन दीर्घायुरभवन्नृपः।
वत्सराजस्तु सुतं प्रदाय पृथिवीमिमाम्॥"
इति मात्स्ये ६८ अध्यायः॥
तत्र चक्रपाण्युक्तौषधानि यथा,—
"गर्भः संजातमात्रो वा यस्याः सा म्रियते यदि।
तयैव दिवसेनास्याः पुनः सा प्रसूयते॥
तस्य योगं प्रवक्ष्यामि यथा शङ्करभाषितम्।
मार्गशीर्षे तथा ज्येष्ठे पूर्णिमायां शिवे दिने।
मूलवं कलशं पूर्वं पूरयित्वा जले हरेः।
पञ्चपल्लवसमायुक्तं वस्त्रयुग्मसमन्वितम्।
पुरश्चर्य्याविधानेन सुवर्णं रत्नं च क्षिपम्।
तस्मिन् पूजयेद्देवीं पटात्मीयाम्बरान्विताम्।
गन्धपुष्पाक्षतैर्धूपैर्नैवेद्यैश्च हरेः।
पूजयेद्दशमादेव मन्त्रैरेतैः कलशके।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथा चैन्द्री चामुण्डा च स्मरेत्॥

दधिमस्तानि पिष्टानि मधुकराणि कारयेत् ।
षट्पञ्चाङ्गुलं च यवेन मानयः कल्पयेत् दृढम् ।
निष्कोष्ठः समानं मित्रं गुप्तिस्थाने ततः स्थितम् ।
तैलेन वश्यमानस्य दैवस्थाने कारमारभेत् ।
अथवा श्रीमती कारा भोजयेत् मधुसूदनः ।
हरिद्रा हलदेवाख्या हिरण्यापि च वामनः ।
विधाय देवतापाय बली चतुर्दशधोत्तमम् ।
चतुर्थं श्रीमद्भक्तौ सुधीर सुममालिहितम् ।
विपरीते पुनः कार्ये कार्ये तत्र दुविहितम् ।
प्रतिस्तोमिदं कार्यं दीर्घकीलित्तं भवेत् ।"
ॐ ह्रीं स्तनपरोदीपनाय नमः । अनेन
मन्त्रेण पूजा करणं कार्यः । ० ।
"शालूकः शालिपायसं कस्तूरीलौहकं पचेत् ।
तद्भक्तं पैत्तयोगैः कर्पूरार्थं यदा पिबेत् ।
या श्रीमत्पुरं हनुमदेवं
चोरेण सर्वं पतितेन निर्मितम् ।
यान्ती निर्मं या तु यति प्रयाति
दीर्घायुषं या तमथं तपते ।
महिषा शाखं कुर्वं पिष्टा मुक्तेन यथा ।
देवा यथा श्रीकोलीनस्यैवाधसम्भवम् ।
अर्धमोक्षा वारिते हि विदुः कटुकरोहिणी ।
अनुनयं कृतं मात्रा काकोलोमूलं कसकम् ।
यष्टिकां कर्कैर्मधूलिकैस्तक्रं विभावयेत् ।
शतावरीत्वं चोरं कटफलं मधुर्धृतम् ।
सैन्धवैश्चितं नारी निर्मं चोद्य न प्रस्तौ ।
कुमार्या जननी नारी मैथायाम् विपरीतेन तु ।
या चैवाक्षिरक्षोः क्षात् या नारी जनयेत्
सुतम् ।
अन्यांकुरच जनयेद् वा न कन्याः प्रसूयते ।
श्रीनिरोधे दमीनरोधे गर्भपाते च दृश्यते ।
यथावदेवायुर्धं वर्धनपरिचारकम् ।
नाना वस्त्रं हीतरामुचं वस्त्रोनितम् ।
स्त्रीस्य अष्टकार्यं यस्माच विश्रिमताः ।
श्रीवत्सायुक्षवर्णान्तराय तु दीयते ।
मन्त्रयोगमर्थेनाय बहुश्लोका प्रदीयते ।"
अथ स्तनप्रा श्रीरद्भतमूलिकृताख्यम् । अनु-
दर्श श्रीनम् । इति दत्तात्रेयके अनवद्या-
विचिन्त्या । ० । अथच । अथ स्तनप्रद्युत-
श्रीरश्रीरायः ।

ईश्वर उवाच ।
"प्रभोः कंकालमालिन सत्यात् मानस्य प्रदायम् ।
विजने दिव्यवारिदेवेषु या स्तनप्रदा ।
यज्ञेभा शुभमध्ये स्तनामान्नं धननम् ।
यज्ञेभा अथवा वाच्यं सर्वकर्मसु सदा ।
दीना या जायते सर्वे दीर्घकीलिता भवेत् ।
यन्त्रे यन्त्रे च दातव्यं वाञ्छया मधुरीरितम् ।
स्तनावधीरिताख्यं श्रीरसादिक देवियेत् ।
अनुसारे तु यत्नार्थं दीर्घकीलितका भवेत् ।
यत्नं यत्नं यज्ञदेवं यथा मधुवाहिनम् । ० ।
प्रकंपोरैरा यथा श्रीदे पूर्वाणि मैत्रे यते ।
पूर्वं यतते पूर्वं प्रमपोषेव कारयेत् ।
प्रायापचयस्तूढं यातवैश्वदर्शनम् ।

सुवर्णकुम्भिकाद्रूपं षट्कोणमध्ये लिखेत् ।
तन्मध्ये पूर्वदिग्दिग्विदिक्कोणाभ्यासिभ्यः ।
मध्यद्वाग्रागेष्वीहैः दैवैर्वैष्णवैरैन्दवैः ।
आर्द्रवैकुलिनारेल पूर्वं मार्यं तथा मधु ।
वाराही च तथा चैन्द्री ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी देवी पत्रस्थ षोडश मातरः ।
पुष्पैकाञ्चनारैः दधिपिष्टानि कारयेत् ।
अनयाग्रायमासानि षट्पदा यत्र पावकः ।
यज्ञमनु दमन् कृत्वा हुतिस्थाने विधिवत् ।
तत्पूर्वं यज्ञमानस्य कर्मणा मधुकाम्यः ।
श्रीमद्दैवाद्विजो दत्वा प्रणामं कारयेत्तथा ।
विचरन्दैत्येन्द्रैर्यदि चारो लक्ष्मदेवताम् ।
चतुर्थं श्रीमद्भक्तौ सुधीर सुममालिहेत् ।
विपरीते पुनः कार्यं यार्यं तावत् हविरद्भुतम् ।
प्रतिदर्शनं कुर्यात् दीर्घकीलितं भवेत् ।
विद्वेषोत्पत्तिं कार्यं भावया मधुरीरितम् ।"
अथ मन्त्रः । ॐ हां ह्रीं अस्य मन्त्रस्य स्तनप्रो-
दये दीर्घकीलितं कुरु कुरु स्वाहा । ० ।
अथ काकवन्ध्या । ईश्वर उवाच ।
"पूर्वं प्रसवती या या कन्यिका भवेद्यदि ।
काकवन्ध्या तु या प्रोक्ता चिकित्सा तत्र कथ्यते ।
रिक्तद्वादशी वन्ध्याः पितृमातृसंयुते ।
सविदोषयदीप्तं च अनुकार्यं तु भवेत् ।
एवं यथाविधं कुर्यात् यज्ञदिव्य पूर्वेण ।
गर्भं या लभते नारी काकवन्ध्या तु गोतमम् ।
अश्वगन्धोपमानं पाचयेत् पुष्पगन्धकैः ।
पिबेत्काकविरोधेन गर्भार्थं भवेत् यदा ।
जगदाद्यमते गर्भे काकवन्ध्या चिराद् ध्रुवम् ।
यज्ञे यज्ञे च दातव्यं वाञ्छया मधुरीरितम् ।"
अथ मन्त्रः । ॐ नमः शक्तिरूपाय अस्या गर्भ
पुत्रं कुरु कुरु स्वाहा । १०००० जपात् सिद्धिः ।
इति श्रीद्रव्याभिधाने ईश्वरपार्वतीसंवादे
काकवन्ध्यारोगे दुग्धरक्तं नाम षट्पञ्चाशत्तमः
पटलः । ० ।
स्तनन्धयी, स्त्री, (स्तनं धयति स्तनन्धयः पिबति
शोभि । धेट् + खश् + ङीष् च ।) क्षीरप-
स्त्री । इति शब्दरत्नावली ।
स्तनन्धयवर्जिता स्त्रिया । यथा । अथ स्त-
नन्धयी स्त्रिया ।
"नारी स्तनन्धयमध्ये तदपु स्थविरं तावत्
नाहृतीव
धीवरेण "अवरं यो भवति च स्वतं मधुरं
वाहुनीनम् ।"
स्तनयित्नुर्धनरथवारसंस्कारः । कुंकुमनीरीति
अङ्गरागकलेन कुंकुमलेपैः । तेन ह्रीं
नमः प्रणवः ततो ह्रूं मः अनः वषट्स्वाहान्तः ।
अथैव श्रमसकला । ततो ह्रीं प्रणवः ह्रूं मः
मनः वषट्स्वाहान्तः । अस्य जपात् सर्व-
सिद्धिर्भवति । ० । अथ मुद्रोत्पादिका स्तनसृ-
क्श्रो विद्या । प्रातःकाल पञ्चोपचारस्नानं
आमलकक्षालं पञ्चगव्याद् । ततो काकबाल
दशमपात्रमार्द्रं पूर्णं पूरितव्यम् ।

निरोधपात्रप्रान्तरं गर्भाशयविधि यथावत् ।
शतोषधारणभरं सुवर्णपीतमात्रया ।
यत्र पात्रम् ।
"अथ च यत्नार्थदिव्यदिन्दुमसङ्ग्रहे वल्मी
पूर्वकुम्भौ
शाल्मलिमादलाये विषमस्तनयोः हि यतौ
रिक्तपूर्णौ ।
शाम्भौ द्वौ च स्तनौ विस्तृत प्रतिवक्ता
नाभ्यैः प्रारम्भं
दीर्घ दैव्यो दंपतः प्रविश्य निरामयस्तनयः
स्निग्धः ।"
एवं स्थानापाद प्रवराविप्राभ्याम् यदाय
नमः । दशैव पूजयेत् । अस्य जपात् सर्व-
सिद्धिः । दत्तात्रेयसंहितायाः । (यथा च
मार्कण्डेयपुराणे मार्कण्डेये ६८ । ११ ।
"मलाहलाय श्रीकृष्ण स्तनप्रोक्षी परम् ।
महामायानुगा तस्य प्रयत्नेन समीरितः ।"
(श्री । यथा, मार्कण्डेये । ५८ । ४१ ।
"ततः कुम्भयार्थं तं यस्मान्नाम दुग्धस्तनः ।
कृष्णमासास तत्पूर्वं स्तनस्तोत्रकारिणम् ।)
स्तनभार:, त्रि, (शालिभ्यारोपमस्त्यस्मिन्
स्तनं यस्य स्तनद्वयस्य विषमा भारः ।) स्तनो-
द्भेदभारः । तत्पर्यायः । स्तनभारः २ । रघु-
वंशे । १ । १९ । स्तनद्वयस्य भारस्य भरे ।
वक्षस्तरयं भारस्य भरे । इति भारती । इति
तत्तैतास्त्रया भरतः ।
स्तनभारं, क्ली, (स्तनद्वयस्य भारम् ।) स्तनो-
द्भेद भारम् । तत्पर्यायः । स्तनभारम् २ ।
इति हैमचन्द्रः । ३ । १८ ।
स्तनयित्नुः, [न्] पुं, (स्तनयत् गर्जनवारिवं
तपतीति । स्तन् + णिच्छन्दोऽभिताम् । ३ । ४ ।
८३ । इति पचि सूत्रम् ।) राजार्थः । इति
हैमचन्द्रः । ३ । १०० ।
स्तनाग्रं, क्ली, (स्तनः मधः मानसः आवरणम् ।)
चुचुकम् । इति शब्दचन्द्रिका ।
स्तनांशुकं, क्ली, (स्तनावाच्छादितं भूषणोत्ति । स्तन +
छिद् + खुन् ।) कञ्चुली । इत्यमरः । २ । ६ । ११८
(तत्पर्यायः ।
"श्रीरामे तुरगो कोषी स्तनपट्टवस्त्रकः ।
कञ्चुको वारि वा स्तनी कञ्चुका च कुण-
चालिका ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)
स्तनि:, स्त्री, (स्तन + क्तिः ।) स्तननम् । इति वैद्य-
कम् । ५ । ९११ । (यथा, कौमुदीकारे ।
१ । १३ । ६३ ।
"हरे तु श्रीरमन्तरस्य या श्री-
दीर्घवर्षेस्तनिं पुनः सः ।"
वसन्तराजः विधत्तः ।
"श्रीमीरदन्तो विरचितं कान्ति
स्वर्णाभं श्रीमदूरेण वच ।
तथा च स्तं वारि मधुवना
श्रीदं विषमा अपशीतं च ॥ ."

यो वैपरीत्यं यथवेन शब्दं
गृह्णाति वा यो शृणुते स धीमन् ।
स वै मृतिं पश्यति यो न पश्येत्
छायां स्वकीयां धरणीप्रपन्नाम् ॥"
इति शारीरे द्वितीयस्थाने तृतीयेऽध्याये ॥)

मृत्करः, पुं, (करोतीति कृ+अच् । मृदो करः । घटादिनिर्माणत्वादस्य तथात्वम् ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥

मृत्कांस्यं, क्ली, शरावः । इति त्रिकाण्डशेषः ॥

मृत्किरा, स्त्री, (मृदं किरतीति । कॄ+"इगु-पधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । "ऋत इद्धातोः ।" ७ । १ । १०० । इति इत् ।) घुर्घुरी । इति त्रिकाण्डशेषः । झुर्घुरिया इति भाषा ॥

मृत्खनिर्, स्त्री, चर्मकषाह्वयः । इति शब्द-चन्द्रिका ॥

मृत्ताडं, क्ली, (मृदं ताडयति प्रतिष्ठापयतीति । तड्+णिच्+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) आढ़की । इति शब्दरत्नावली ॥

मृत्तालकं, क्ली, (मृत्ताल+संज्ञायां कन् ।) तुवरिका । तुवरिकायां इति चक्र इति च ख्यातम् । इत्यमरटीकायां भरतः । सौराष्ट्र-मृत्तिका । इति राजनिर्घण्टः ॥

मृत्तिका, स्त्री, (मृदेव इति । मृद्+"मृदस्तिकन् ।" ५।४।३९ । इति स्वार्थे तिकन् । स्त्रियां टाप् ।) तुवरी । इति राजनिर्घण्टः ॥ मृत् । इत्यमरः । २ । १ । ४ ॥ माटी । इति भाषा । तत्पर्य्यायः । मृदा २ मृत्तिः ३ । इति भरतः ॥ (अस्या भक्षणात् पाण्डुरोगोत्पत्तिः । तद्यथा, "मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः । कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥" इति माधवकरसंगृहीतरुग्विनिश्चये पाण्डु-रोगाधिकारे । अन्यत् मृत्शब्दे द्रष्टव्यम् ।) स्नानकाले मृत्तिकालेपनविधिर्यथा,—
"मृदा प्रक्षाल्य लिङ्गन्तु द्वाभ्यां नाभेस्तथोपरि ।
अधश्च तिसृभिः कार्यं षड्भिः पादौ तथैव च ॥
कटिश्च तिसृभिश्चापि हस्तयोरेव मृत्तिकाः ।
प्रक्षाल्य कायं हस्तौ च हिरण्यञ्च यथाविधि ।
ततः संमार्ज्य दत्वा मृदमेवाभिमन्त्रयेत् ॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ! ।
उद्धृतासि वराहेण कृष्णेनामितबाहुना ॥
मृत्तिके हर मे पापं यन्मया पूर्व्वसञ्चितम् ।
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता ।
मृत्तिके सर्व्वरत्नानि पाप्मना च धनेन च ॥
मृत्तिके त्वां प्रणम्यामि काश्यपेनाभिमन्त्रिताम् ।
मृत्तिके यदि मे पापं मनसा दुष्कृतं कृतम् ।
तया हतेन पापेन गच्छामि परमां गतिम् ॥"
इति वह्निपुराणम् ॥०॥
शौचार्थमृत्तिकाग्रहणविधिर्यथा,—
"आहरेन्मृत्तिकां विप्रः कूलात् ससिकतां तथा ।
कर्म्मारम्भत: शौचं विशुद्धैरुद्धृतोदकैः ॥
नाहरेन्मृत्तिकां विप्रः पांशुलाञ्च न कर्द्द-
माम् ।
न मार्गान्नोषराद्देशाच्छौचशिष्टां परस्य च ॥
न देवायतनात् कूपात् गेहान्न च जलात्तथा ।
उपस्पृशेत्ततो नित्यं पूर्व्वोक्तेन विधानतः ॥"
इति कौर्म्मे उपविभागे १२ अध्यायः ॥
तस्याः परीक्षा भक्ष्यरशब्दे द्रष्टव्याः ॥

मृत्पत्नी, स्त्री, (मृदि पतनमस्याः । ङीष् ।) कुष्ठौषधम् । इति शारावली ॥

मृत्युः, पुं, (म्रियते अस्मादिति मृ+"भुजिमृङ्भ्यां युक्त्युकौ ।" उणा० । ३ । २१ । इति त्युक् ।) यमः । इति हेमचन्द्रः ॥ कंसः । यथा,—
"प्रत्यग्रे स्वयवे पुत्रान् मोचये कृपयामिमाम् ।
सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत
चेत् ॥"
इति श्रीभागवते १० स्कन्धे १ । ४८ ॥

मृत्युः, पुं,स्त्री, प्राणवियोगः । तत्पर्य्यायः । पञ्चता २ कालधर्म्मः ३ दिष्टान्तः ४ प्रलयः ५ अत्ययः ६ अन्तः ७ नाशः ८ मरणम् ९ निधनः १० । इत्यमरः ॥ पञ्चत्वम् ११ मृतम् १२ मृतिः १३ । इति तट्टीकायां रमानाथः ॥ नैधनम् १४ । इति तट्टीकासारसुन्दरी ॥ संस्था १५ कालः १६ परलोकगमः १७ दीर्घनिद्रा १८ निमीलनम् १९ अस्तम् २० अवसानम् २१ । इति हेमचन्द्रः ॥ भूमिलाभः २२ निपातः २३ विलयः २४ व्यापादनम् २५ । इति शब्दरत्नावली ॥ अप्ययः २६ । (मरणार्थे यथा,—
"जीवस्य यस्य सुतरां चुटीभिर्देहिनेस्तथा ।
न शाम्यतोऽपानैश्च तस्य मृत्युरुपस्थितः ॥
प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥"
इति सुश्रुते सूत्रस्थाने ३१ अः ॥
"एकोत्तरं मृत्युशतमथर्व्वाणः प्रचक्षते ।
तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः ॥
दोषागन्तुजमृत्युभ्यो रसमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥"
इति च तत्र तत्रैवस्थाने । ३४ अः ॥)
तत्प्रभावं यथा,—
"अहमात्मोद्भवानीशो भूतानां सुहृदीश्वरः ।
अहं सर्व्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥"
इति श्रीमद्भागवते ११ स्कन्धे । १६ । १० ॥
स तु अधर्म्मो गुरुतो जातः । यथा,—
"भार्य्याधर्म्मस्य निकृतिस्य परिमोक्षस्य नारद ! ।
हिंसाया निकृतेः अधर्म्मो गुरुः स्मृतम् ॥"
इति श्रीभागवते २ स्कन्धे ६ अध्यायः ॥
कल्पान्तरे भयात् मायायां जातः । यथा,—
"हिंसा भार्य्या त्वधर्म्मस्य तयोर्जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥
माया च वेदना चैव मिथुनं त्विदमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ।
वेदना च सुतञ्चापि दुःखं जज्ञेऽथ रौरवात् ॥०॥
अस्यापत्यानि यथा,—
"मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ।
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ॥
नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ह्यूर्द्ध्वरेतसः ॥
निर्ऋतिश्च तथा चान्या मृत्योर्भार्य्याभवन्मुने ।।
अलक्ष्मीर्नाम तस्याश्च मृत्योः पुत्राश्चतुर्दश ॥
अलक्ष्मीपुत्रका ह्येते मृत्योरादेशकारिणः ।
विनाशकाले च नरान् भजन्त्येते शृणुष्व तान् ।
मेढ्रशृङ्गी, स्त्री, (मेढ्रस्य शृङ्गमिव शृङ्गमस्याः । गौरादित्वात् ङीष् ।) मेषशृङ्गीवृक्षः । इति रत्नमाला ॥

मेण्ठः, पुं, हस्तिपकः । इति हारावली ॥

मेण्डः, पुं, हस्तिपकः । इति त्रिकाण्डशेषः ॥

मेण्ढः, पुं, मेषः । इति शब्दरत्नावली ॥

मेथ, ऋ ञ सङ्गे । वधे । मेधायाम् । इति कवि- कल्पद्रुमः ॥ (भ्वा०-उभ०-सङ्गे अक०-वधे-मेधा- याच सक०-सेट् ।) ञ, मेथति मेथते धीरो सुधिया सङ्गत इत्यर्थः । ऋ, अमिमेथत् । मिमेथ । इति दुर्गादासः ॥

मेथिः, पुं, (मेथन्ते सङ्गच्छन्ते यत्रेति । मेथ सङ्गे + "सर्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) खले पशुबन्धनार्थमवस्थाप्यः । मेह काठ इति भाषा । यथा,—
"मेथिर्मेधिः खलेदारौ खले गोबन्धनाय यत् ।"
इति हेमचन्द्रः । ४ । ६८ ।
(स्त्री, मेथिका । तत्पर्यायो यथा,—
"मेथिका मेथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
क्वचित् मेथीति पाठो दृश्यते ॥)

मेथिका, स्त्री, (मेथतीति । मेथ् + ण्वुल् । टापि अत इत्वम् ।) क्षुपविशेषः । मेथिशाक इति भाषा । तत्पर्यायः । मेथिनी २ मेथी ३ दीपनी ४ बहुपत्रिका ५ बोधिनी ६ गन्धबीजा ७ ज्योतिः ८ गन्धफला ९ वल्लरी १० चन्द्रिका ११ मन्था १२ मिश्रपुष्पा १३ कैरवी १४ कुञ्चिका १५ बहु- पर्णी १६ पीतबीजा १७ । अस्या गुणाः । कटु- त्वम् । उष्णत्वम् । रक्तपित्तप्रकोपकत्वम् । अरो- चकहरत्वम् । दीप्तिकारित्वम् । वातघ्नत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अथ मेथी वनमेथी । तयोर्नामगुणाः ।
"मेथिका मेथिनी मेथी दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥
मेथिका वातशमनी श्लेष्मघ्नी ज्वरनाशिनी ।
ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता ॥"
इति भावप्रकाशे पूर्वखण्डे प्रथमे भागे ॥

मेथिनी, स्त्री, (मेथतीति । मेथ् + णिनिः । ङीप् ।) मेथिका । इति राजनिर्घण्टः ॥

मेथी, स्त्री, (मेथिः + कृदिकारादक्तिन इति पक्षे ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (अन्यत् । यथा, शतपथब्राह्मणे । ४ । ६ । ९ । २१ ।
"विमते मेथि मेथीत्वमिन्दुरिवोदकमौ
मधु च मात्रे ।"
"मेथी खलकम् ।" इति तद्भाष्यम् ।)

मेद, ऋ ञ बधमेधयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अमिमेदत् । ञ, मेदति मेदते शत्रुं हिनस्ति मेधाविनं वेत्ति । मिमेद । इति दुर्गादासः ॥

मेदः, [स्] क्ली, (मेद्यति स्निह्यतीति । मिद् + "सर्वधातुभ्योऽसुन् ।" उणा० ४ । १८९ । इति

धातुः।) मांसप्रभवधातुविशेषः। तत्पर्य्यायः। वपा २ वसा ३। इत्यमरः।२।६।६४। मेदः ४। अकारान्त इति भरतः। अस्य गुणाः। वात-नाशित्वम्। बलपित्तकफदाहत्वञ्च। इति राज-वल्लभः। अथ मेदसः स्वरूपमाह।

"स्वकार्य्यं धातुना पक्वं सम्यक् तत् स्नेह इति कथ्यते। शरीरं दृढ़ स्निग्धं मेदःकार्य्यतिर्दयम्॥"

अथ मेदसः स्थानमाह।

"मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम्। अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत्॥"

इति भावप्रकाशः॥

रोगविशेषः। तत्र मेदसो विप्रकृष्टं निदान-माह।

"अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः। मधुरोऽन्नरसः प्रायः स्नेहान्मेदो विवर्द्धयेत्॥"

अन्नरसः आमरसः। तथा च सुश्रुतः। आमरसान्नरसो मधुरश्च भवतीति। मेदसो-ऽतिवृद्धौ वैगुण्यमाह।

"मेदसावृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः। मेदस्तु चीयते तस्मादशक्तः सर्व्वकर्म्मसु॥"

अन्ये धातवः अस्थ्यादयः शुक्रान्ताः। न पुष्यन्ति न पुष्टा भवन्ति। चीयते सञ्चितं भवति वर्द्धते इति यावत्। तस्मात् मेदस्वी सर्व्वकर्म्मसु अशक्तः स्यात्। मेदसः सौकुमार्य्यात्। अपरा-नपि दोषानाह।

"क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः। युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः। मेदसः स्नेहदौर्गन्ध्यादायान्ति जरयो नरः॥"

क्रथनं कण्ठावरोधः। कण्ठेन घुर्घुर इत्यन्ये। अन्ये तु क्लिभ्यः। मेदसः स्थानमाह।

"मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितम्। अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत्॥"

मेदस्विनोऽपि वृद्धौ हेतुमाह।

"मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः। चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि। तस्मात् स शीघ्रं जरयत्याहारञ्चापि काङ्क्षति। विकारान् सोऽश्नुते घोरान् कांश्चित् काल-व्यतिक्रमात्॥"

सन्धुक्षयति प्रदीपयति। स मेदस्वी आहारं शीघ्रं जरयति पुनर्भोक्तुं काङ्क्षति स दोषादिः कालव्यतिक्रमात् भोजनकालातिक्रमात्। कां-श्चिद्विकारान् वातपित्तकरान् घोरान् अश्नुते प्राप्नोति। एतौ वातपित्तौ मेदसावृतौ विशेषा-दुपद्रवकरौ इत्याह।

"एतावुपद्रवकरौ विशेषात् पित्तमारुतौ। एतौ हि दहतः स्थूलं वनं दावानलो यथा॥"

एतौ पित्तमारुतौ मेदसा वृतमार्गत्वात् कोष्ठ-स्थौ वृद्धौ सन्तौ विशेषादुपद्रवकरौ दहतः पादपेनाम्। मेदसोऽतिवृद्धौ विनाशहेतुमाह।

"मेदस्यतीवसंवृद्धे सहसैवानिलादयः। विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवि-तम्॥"

विकारान् प्रमेहपिड़काज्वरभगन्दरविद्रधिवात-रोगाणामन्यतमान्। अतिस्थूलतया वैगुण्य-माह।

"अतिस्थूलेषु संवृत्ता विसर्पाः सभगन्दराः। ज्वरातीसारमेहार्शःश्लीपदापचिकादयः॥"

अतिस्थूलस्य लक्षणमाह।

"मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः। अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते॥"

अयथोपचयोत्साहः न यथा उपचयो मांसोप-चयः उत्साहो बलञ्च यस्य सः॥१०॥ अथ मेदसश्चिकित्सा।

"पुराणाः शालयो मुद्गाः कुलत्थोद्दालकोद्रवाः। लेखना बस्तयश्चापि सेव्या मेदस्विना सदा॥ श्रमचिन्ताव्यवायाध्वक्षौद्रजागरणप्रियः। हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनः॥ प्रातर्वातारिपत्रस्य हिङ्गुयुक्तं पिवेन्नरः। सहितं भक्तमण्डेन मेदोवृद्धिनिवृत्तये॥ गुड़ूचीत्रिफलाक्वाथः पीतो मेदोहरः स्मृतः। गुड़ूचीत्रिफलाक्वाथस्तथा ब्योषरसोत्तमम्॥ चौद्रेण त्रिफलाक्वाथः पीतो मेदोहरः परः। प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम्। उष्णमन्नस्य मण्डं वा पिवेत् कृशतनुर्भवेत्॥ व्योषाग्निचित्रकत्रिफलासविडङ्गैर्गुग्गुलुं समम्। खादेत् सर्व्वान् जयेद्रोगान् मेदःश्लेष्मामवातजान्॥ पिप्पली मधुना सेव्या मेदःकफविनाशिनी॥

धत्तूरपत्रस्वरसेन गाढ़-
मुद्वर्त्तनं स्थौल्यहरं प्रदिष्टम्॥

बाधादलरसो लेपाच्छङ्खचूर्णेन संयुतः। बिल्वपत्ररसो वापि देहदौर्गन्ध्यनाशनः॥ निम्बपत्रस्वरसः प्रलिप्तमथ्यादियोजितं जयति। इन्दुवरिकोद्भवमपि चिरादिरदेहदौर्गन्ध्यम्॥

शिरीषलामज्जकहेमलोध्र-
स्त्वग्दोषसंस्वेदहरः प्रघर्षः।
शरीरदौर्गन्ध्यहरः प्रदेहः
पत्राम्बुलोध्राभयचन्दनानाम्॥"

शिरीषस्यात्र पर्णं ग्राह्यं व्यवहारात्। लाम-ज्जकं सुगन्धिकाविशेषवंशवाभे उशीरं ग्राह्यम्। हेम नागकेशरम्। अम्बु बालकम्। अभयं उशीरम्।

"हरीतकीं तु संपिष्य देहमुद्वर्त्तयेन्नरः। पश्चात् स्नानं प्रकुर्व्वीत स्वेददोषप्रशान्तये॥ वकुलस्य दलैः सम्यगारिष्टा परिपेषितैः। देहमुद्वर्त्तयेत् पश्चाद्धरीतक्या सुपिष्टया॥ भूय उद्वर्त्तनं कुर्य्यात् पश्चात् स्नानं समाचरेत्। प्रस्वेदान् मुच्यते शीघ्रं मेदोवृद्धिसमुद्भवात्॥"

इति मेदोऽधिकारः॥ इति भावप्रकाशः॥

(तथाच विशेषः। यथा,—

"मेदः स्नेहस्वेदौ दृढ़त्वं पुष्टिमस्थ्नाञ्च।"

अस्य क्षीणलक्षणं यथा,—

"मेदः क्षये प्लीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च।" अस्यातिवृद्धिलक्षणं यथा,—

"मेदः स्निग्धाङ्गतामुदरपार्श्ववृद्धिं कासश्वासा-दीन् दौर्गन्ध्यञ्च।"

"पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परम्। तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम्॥"

"क्षपयेद्बृंहयेच्चापि दोषधातुमलान् भिषक्। तावद्यावदरोगः स्यादतो रोगसमन्वितः॥"

इति सुश्रुते सूत्रस्थाने १५ अध्यायः॥

"तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानां-मुदरस्थमण्वस्थिषु च महत्सु च मज्जा भवति॥"

इति तत्रैव शारीरस्थाने ४ अध्याये॥)

मेदः, पुं, (मेद्यति स्निह्यतीति। मिद् + अच्।) वपा। इति शब्दचन्द्रिका॥

"हृद्याकचहमिहरो मलक्षो मेदकच्छवा॥"

इति भरतधृतशाब्दिकः॥)

म्लेच्छजातिविशेषः। इति जटाधरः। अल-म्बुषा। इति राजनिर्घण्टः॥ (ऐरावतकुलजो नागविशेषः। यथा, महाभारते।१।५७।११।

"बिहङ्गः शरभो मेदः प्रमोदः संहतापनः। ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्॥")

मेदकः, पुं, (मिद् + ण्वुल्।) जगलः। इत्यमरः। २।१०।४२॥ मेदा इति भाषा॥

मेदजः, पुं, (मेदात् जायते इति। जन् + डः।) भूमिजगुग्गुलुः। इति राजनिर्घण्टः॥ मेदो-भवश्च॥

मेदःसारा, स्त्री, (मेदः सारोऽस्याः।) मेदा। इति राजनिर्घण्टः॥ (विवृतिरस्या मेदाशब्दे द्रष्टव्या॥)

मेदस्कृत्, क्ली, (मेदः करोतीति। मेदस् + कृ + क्विप्।) मांसम्। इति हेमचन्द्रः॥

मेदा, स्त्री, (मेदो अस्याः अस्तीति। मेद + अच्। टाप्।) अष्टवर्गप्रसिद्धौषधिविशेषः। तत्पर्य्यायः। मेदोद्भवा २ जीवनी ३ श्रेष्ठा ४ मणिच्छिद्रा ५ विभावरी ६। इति रत्नमाला॥ वसा ७ स्नेहवर्त्तिका ८ मेदःसारा ९ स्नेह-वती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेधा १४ वरा १५ साध्वी १६ स्वल्पा १७ बहुरन्ध्रिका १८ पुरुषदन्तिका १९। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाहार्त्ति-कासराजयक्ष्मज्वरनाशित्वम्। वातदोषकारि-त्वञ्च। इति राजनिर्घण्टः॥ तस्य लक्षणं यथा,

"शुक्लकन्दो नखच्छेद्यो मेदो धातुमिव स्रवेत्। यः स मेदेति विज्ञेयो जिज्ञासानृपदर्शनैः॥"

इति मेदामहामेदाख्याने इत्यादयो द्रष्टव्याः। इति भावप्रकाशः॥ अस्या विवरणं महामेदाशब्दे द्रष्टव्यम्॥ (अष्टवर्गोऽस्य यथा। "मेदाभावे चाश्वगन्धा।" इति वैद्यकपरिभाषायाम्॥)

मेदिनी, स्त्री, (मेदोऽस्या अस्तीति। मेद + इनिः। ङीप्।) मेदा। काश्मरी। इति राज-निर्घण्टः॥ पृथिवी। इत्यमरः।२।१।२॥ मेदो विद्यतेऽस्याः मेदिनी आभ्यन्तरे इत्यादिषु मेदो विद्यतेऽस्याः मेदिनी इति वा। मधुकैटभ-समासाद्यतोऽन्यो मेदसोऽपि। तन्मात्रा

कर्णमलतो जातयो मेदसा पूरितेति ग्रामिकोशः । मेदसा कार्दिति इव । यथा चोक्तम् ।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता । तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः ॥"
मेदयतीति वा मेदिनी स्निग्धा स्थिति पदार्थ-स्थापिन् । इति तट्टीकायां भरतः ॥ (एतन्नाम-निरुक्तिर्यथा, देवीभागवते । ९ । ८ । ८२-८४ ।
"जलमग्नौ तदा जातौ दानवौ मधुकैटभौ । घातरः कश्चौ भगवता मे मेदसा तयोः ॥ मेदिनीति ततो जातं नाम एतस्याः समन्ततः । अमध्या भविता तेन कारणेन सुमोत्तरा ॥"
अपि च । तत्रैव । ९ । ६१ । ५ ।
"मधुकैटभयोर्मेदःसंयोगान्मेदिनी स्मृता । धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः ॥")
तस्या जन्मनिर्णयो यथा,—
"श्रूयतां वसुधायाश्च जन्मसृष्टेश्च कारणम् । विघ्नविघ्नकरं पापनाशनं पुण्यवर्द्धनम् ॥ अहो केचिद्वदन्तीति मधुकैटभमेदसा । बभूव वसुधा धन्या तद्विरुद्धमतं शृणु ॥ ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा । आवां वध न यत्रोर्वी पयसा संवृतेति च ॥ तयोर्जीवनकाले च प्रत्यक्षा साभवेत् स्फुटम् । ततो बभूव मेदश्च मरणानन्तरं तयोः ॥ मेदिनीति च विख्याता प्रोक्ता मतं शृणु । जलधौता पुरा पूर्वं वर्द्धिता मेदसा यतः । कथयामि च तज्जन्म सार्थकं सर्वसम्मतम् ॥ पुरा श्रुतं यच्छ्रुतौ च धर्मवक्त्राच्च पुष्करे । महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम् ॥ मलो बभूव कालेन सर्वाङ्गव्यापको ध्रुवम् । स च प्रविष्टः सर्वेषां लोम्नां विवरेषु च ॥ कालेन महता तस्माद्बभूव वसुधा मुने । प्रत्येकं प्रतिलोम्नाञ्च कूपेषु या स्थिता स्थिता ॥ आविर्भूता तिरोभूता सा जले च पुनः पुनः । आविर्भूता सृष्टिकाले तज्जलोपर्युपस्थिता ॥ प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे नारायणनारद-संवादे वसुन्धरोपाख्याने ८ अध्यायः ॥

मेदिनीशः, त्रि, (मेदिन्याः ईशः ।) नृपः । इति त्रिकाण्डशेषः ॥

मेदुरः, त्रि, (मेदति स्निह्यतीति । मिद् + "मिदि-भासिभिदो घुरच् ।" ३ । २ । १६१ । इति घुरच् ।) अतिस्निग्धः । तत्पर्यायः । सान्द्रस्निग्धः २ । इत्यमरः । ३ । १ । ७० ॥ (यथा, गीतगोविन्दे । १ । १ ।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।")

मेदुरा, स्त्री, (मेदुर + टाप् ।) काकोली । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः काकोली-शब्दे ज्ञेयाः ॥)

मेदोजं, क्ली, (मेदसो जायते इति । जन + डः ।) अस्थि । इति राजनिर्घण्टः ॥

मेदोद्भवा, स्त्री, (मेदस उद्भवोऽस्याः ।) मेदा । इति राजनिर्घण्टः ॥

मेदोऽसृक्, पुं, (मेदोवर्द्धकः असृक् ।) सर्वधातुसारभूत-विशेषः । इति जटाधरः ॥ (यथा, मनुः । १० । ४८ ।
"मेदोऽसृङ्मूत्रपुरीषमांसरक्तस्नायुवसासृक्पूर्णम् ।"
क्वचित् मेदोऽम्बु इत्यपि पाठः ॥)

मेदस्वती, स्त्री, (मेदोऽस्त्यस्याः इति । मेदस् + मतुप् । मस्य वः ।) मेदा । इति राजनिर्घण्टः ॥ (मेदोविशिष्टे, त्रि ॥)

मेध, ऋ ञ सङ्गमे मेधाहिंसयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अमिमेधत् । ञ, मेधति मेधते । इति दुर्गादासः ॥

मेधः, पुं, (मेध्यते हन्यते पश्वादिरत्रेति । मेध + घञ् ।) यज्ञः । इति जटाधरः ॥ (यथा, महाभारते । १ । १२१ । १८ ।
"पाण्डवेषु महीपालानेव विजित्य महाबलः । आहृभिः वह्निभी वीरश्रीर्मेधान्मेधाधिपतिः ॥"
हविः । इति ऋग्वेदे । १० । १०० । ६ । भाष्ये सायनः ॥)

मेधा, स्त्री, (मेधति सङ्गच्छते अस्यामिति । मेध + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । टाप् ।) धारणावती बुद्धिः । इत्यमरः । १ । ५ । २ ॥ धारणायुक्ता धीर्मेधा मेधते सङ्गच्छते अर्थं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ सङ्गमे अङ् मेधावी विमलान् करोति; धारणायुक्तविषयीकरणे धारणा बहुलं धारणा बुद्धेर्गुणविशेषः इति । इति भरतः ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्य-स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")
मेधाकरं औषधं यथा,—
"मण्डूकी वचा ब्राह्मी शङ्खपुष्पी मधुप्रदेया । अमृता च गुडूची च अश्वगन्धापुष्पी । एतैरेवसमैर्भागैर्घृतं प्रस्थं विपाचयेत् ॥ मण्डूकार्द्धा तथा प्रस्थं दत्त्वा च समन्वितम् । एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥"
इति गारुडे १९८ अध्यायः ॥ ७ ॥
मेधाकरमन्त्रो यथा । ओं नमो भगवते । ब्रह्मादीनां मेधाकरमन्त्रोपकरणम् । अति-शायार्थेऽस्मिन् च । इति पुराणम् ॥ (दक्षप्रजा-पतिकन्याविशेषः । यथा,—
"कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥"
इति मार्कण्डेयपुराणे ब्रह्मादिसर्गाध्याये ॥
धनम् । इति निघण्टुः । २ । १० ॥ "मिह मेध सङ्गमे च । अकारात् हिंसार्थस्यापि । मेधः अन्नधनं । इति माधवः । धनं । यद्धन्मेधैरेव अन्नं लभ्यते । हिंसन्ति वा तस्मात् चौरादिभिः अपि चेनार्दनात् इति महाभारतम् ॥ अन्ना, यतो धीयते कर्मविद्यां दक्षिणां याजक-मिति अवधानात् पुष्टो धनं धर्मते । तत्र मति-

प्रज्ञ उपपदे धातोः प्रत्यये चकिरागम् इति च । प्रथोदरादित्वात् साधित्वमेधायाः ।"
इति यज्ञाख्ये देवराजयज्वा ॥)

मेधाः, [स्] पुं, (मेधते इति । मेधृ + असुन् ।) स्वायम्भुवमनुपुत्रः । यथा,—
"अग्नीध्रश्चाग्निबाहुश्च वपुः सवनश्च च । ज्योतिष्मान् द्युतिमान् भव्यो मेधा मेधातिथि-स्तथा ॥
प्रियव्रतस्य पुत्रास्ते मनोर्दश सुताः ॥"
इति मात्स्ये ९ अध्यायः ॥

मेधाकृत्, स्त्री, (मेधां करोतीति । कृ + क्विप् ।) सितावरशाकम् । इति राजनिर्घण्टः ॥ मेधा-कारके, त्रि ॥

मेधाजित्, पुं, (मेधां जितवानिति । जि + क्विप् ।) कात्यायनमुनिः । इति त्रिकाण्डशेषः ॥

मेधातिथिः, पुं, (मेधायाः धारणायुक्तबुद्धेरतिथि-रिव ।) मनुसंहिताटीकाकृत् । मुनिविशेषः ।
यथा, श्रीभागवते । १ । १९ । १० ।
"मेधातिथिर्देवल आर्ष्टिषेणो भरद्वाजो गौतमः पिप्पलादः ॥"
(प्रियव्रतपुत्रः स च शाकद्वीपाधिपतिः । यथा, श्रीमद्भागवते । ५ । २० । २५—२६ ।
"तस्मिन् हि शाको नाम महीरुहः स्वक्षेत्र-व्यपदेशकः । यस्य ह महासुरभिगन्धस्तद्द्वीप-मनुवासयति । तस्यापि प्रैयव्रत एवाधिपति-र्नाम्ना मेधातिथिः ॥") (कण्वस्य पुत्रः ऋषि-विशेषः । यथा, देवीभागवते । ६ । ३ । १० ।
"मेधातिथिः पपाठैव क्रतो सारस्वतं तथा ॥"
प्रजापतेः कर्दमस्य पुत्रः । यथा, मार्कण्डेये । ९६ । ११ ।
"ऋषिर्मेधातिथिश्च वसुदानः सनातनः ॥"
स्वायम्भुवमन्वन्तरे सप्तर्षिमध्यतमः । यथा, मार्कण्डेये । ९४ । ८ ।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमा-स्तथा ।
सप्तर्षयोऽन्ये सवनस्तथान्यो हव्यवाहनः ॥"
नदीविशेषे, स्त्री । यथा, महाभारते । १ । २२१ । २१ ।
"कर्मठमती मन्दा चैव मेधा मेधातिथिस्तथा । ताम्रावती वेत्रवती सरित्सुख्योऽथ कौशिकी ॥")

मेधारुद्रः, पुं, (मेधया रुद्र इव ।) कालिदासः । इति त्रिकाण्डशेषः ॥

मेधावती, स्त्री, (मेधा देवत्वेन अस्ति अस्याः इति । मेधा + मतुप् । मस्य वः । ङीप् । मेधा-वर्द्धकत्वाद्वाऽस्यास्तथात्वम् ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ मेधाविनी च ॥

मेधाविनी, स्त्री, (मेधास्याः अस्तीति । मेधा + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः । ततो ङीप् ।) ब्राह्मी । इति वैद्यकम् । (सा, ५०४ ।

मेधावी, [न्] पुं, (मेधास्त्यस्येति । मेधा + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति

विनि:) शुक्रपर्णी । इति मेदिनी । ने, २०४ ॥ मदिरा । इति राजनिर्घण्टः ॥ पण्डितः । इति हेमचन्द्रः ।३।६॥ याज्ञिकः । इति त्रिकाण्डशेषः ॥ (कस्यचित् ब्राह्मणस्य पुत्रः । यथा, महाभारते, १२ । १७५ । ३ ।

"द्विजातेः कस्यचित् पार्थ ! स्वाध्यायनिरतस्य वै ।
बभूव पुत्रो मेधावी मेधावी नाम नामतः ॥")

मेधायुक्ते, त्रि । इति मेदिनी । ने, २०४ ॥ (यथा, रामायणे । १ । ४ । ६ ।

"स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥")

तद्वेदिपर्य्यायः । विप्रः १ विपः २ मनुषः ३ धीरः ४ वेनः ५ मेधाः ६ कण्वः ७ ऋभुः ८ नवेदाः ९ कविः १० मनीषी ११ मन्धाता १२ विधाता १३ विपः १४ मनश्चित् १५ विपश्चित् १६ विपन्यवः १७ आकेनिपः १८ उशिजः १९ कीस्तासः २० अद्धातयः २१ मतयः २२ मतुथाः २३ वाघतः २४ । इति चतुर्विंशतिर्मेधाविनामानि । इति वेदनिघण्टौ । ३ । १५ ॥

मेधि:, पुं, (मेध्यते खले स्थाप्यते इति । मेध + "सर्व्वधातुभ्य इन् ।" उणा० ४।११२। इति इन् ।) खले पशुबन्धनार्थस्तम्भः । इत्यमरः । २ । ९ । १५ । खले धान्यमर्द्दनस्थानमध्ये पशुबन्धननिमित्तं निहितं यद्दारु स मेधिः । मेढ़ इति ख्याते । इति भरतः ॥ तत्पर्य्यायः । मेथिः १ खलेवाली २ । इति हेमचन्द्रः ॥ अस्य स्थापनदिनं तत्र वारौ शुक्रवृहस्पती । नक्षत्राणि रेवती स्वाती प्रभृति मूलं ज्येष्ठा । तत्र वर्ज्यं स्थिरम् । इति ज्योतिस्तत्त्वम् ॥

मेधिरः, त्रि, (मेधामाप्नोतीति । मेधा + "मेधारथा-भ्यामिरन्निरचौ वक्तव्यौ ।" ५ । २ । १०९ । इति वार्त्तिकोक्त्या इरन् ।) मेधावी । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे । १ । २५ । २० ।

"त्वं विश्वस्य मेधिर ! दिवश्च ग्मश्च राजसि ।"
"हे मेधिर ! मेधाविन् ! वरुण ।" इति तद्भाष्ये सायनः ॥ यज्ञवान् । यष्टव्यवान् । यथा, ऋग्वेदे । १० । १०० । ६ ।

"इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।"
"मेधो यज्ञः तद्वान् ।" इति तद्भाष्ये सायनः ॥)

मेधिष्ठ:, त्रि, (अयमेषामतिशयेन मेधावीति । मेधाविन् + "अतिशायने तमबिष्ठनौ ।" ५।३।५५। इति इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६५ । इति विनो लुक् ।) अतिशयमेधायुक्तः । इति व्याकरणम् ॥

मेध्यं, त्रि, (मेध्यते इति । मेध् + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । यद्वा, मेधामर्हतीति । मेधा + दण्डादित्वात् यत् ।) पवित्रम् । इत्यमरः । ३ । १ । ५५ । (यथा,—

"यानैव मेध्यमविज्ञमध्यमेध्यं भ्रामयन्तो भवेत् ।
ब्रह्मस्थाने समुत्पन्ने मेध्यामेध्यं न विद्यते ॥"
इति तिथ्यादितत्त्वधृतवचनम् ॥)

"पवित्रः प्रयतः पूत इति ब्रह्मवर्गे प्रायश्चित्तमात्र उक्तं इह त्वशुचिद्वेषि ।" इति भरतः ॥

"पूतं मेध्यं पवित्रं स्यात्शौचं प्रयतनिर्म्मलम् ।
निःशोध्यं शोधितं मृष्टं निर्णिक्तमनवस्करम् ॥"
इति शब्दरत्नावली ॥

(नित्यमेध्यम् । यथा, मनुः । ५ । १२९ ।

"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं नित्यमेध्यमिति स्थितिः ॥")

शुचिः । इति मेदिनी । ये, ४७ ॥ (यथा, अनर्घराघवे । २ । १४ ।

"तन्नाहत्य हव्यपूतकोमलयवक्षेत्राहिर-
ण्येतिभि-
र्मेध्या वत्सतरी विहस्य बटुभिः सोल्लुण्ठमाल-
भ्यते ॥"

मेधाजनकः । यथा,—

"मण्डूकपर्ण्याः स्वरसः प्रयोज्यः
क्षीरेण यष्टीमधुकस्य चूर्णम् ।
रसो गुडूच्यास्तु समूलपुष्प्याः
कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः ॥
आयुःप्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्यानि चैतानि च शङ्खपुष्पी ॥"
इति चरके चिकित्सास्थाने प्रथमेऽध्याये ॥)

मेध्यः, पुं, (मेधायै हितः । मेधा + "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् ।) खदिरः । यवः । छागः । इति राजनिर्घण्टः ॥

मेध्या, स्त्री, (मेधायै हिता । मेधा + यत् । टाप् ।) रोचना । रोचना । इति मेदिनी । ये, ४७ ॥ केतकी । ज्योतिष्मती । शङ्खपुष्पी । ब्राह्मी । श्वेतवचा । शमी । मण्डूकी । इति राजनिर्घण्टः ॥ (नदीविशेषः । यथा, महाभारते । ३ । २२२ । २२ ।

"चर्म्मण्वती मही चैव मेध्या मेधातिथिस्तथा ॥")

मेनका, स्त्री, (मन्यते इति । मन् + "मनेरादिरेव च ।" इति वुन् । ततः "प्रत्ययस्थात्कात्पूर्व्वस्य" इत्यादि ७ । ३ । ४४ । इत्यत्र वार्त्तिकोक्त्या अकारस्य इत्वम् ।) स्वर्वेश्या । इति शब्दरत्नावली ॥ तस्याः कन्या शकुन्तला । यथा,—

"विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद्भगवान् कण्वो वीर ! किं करवाम ते ॥"
इति श्रीभागवते । ९ । २० । १३ ॥

(मेनैव । मेना + स्वार्थे कन् ।) पार्व्वतीमाता । यथा,

"ततः पौनाख्य पितरस्तेषां रत्नसम्भवा त्रिधाम् ।
मेना देवाश्च देवाश्च हिमवद्वाश्च वै स्थाः ॥
तां मेनां हिमराजस्य प्रददुस्ते पितामहाः ।
पौतिमानस्यशरणां दत्वा च यथाविधि ॥
ततो हिमाद्रिः पितृकन्यां वर्त्तं
दृष्ट्वा नितरां निरवं नवविस्मितम् ।
जग्मौऽथ तां तत्सुतां मेना
स्वर्गमर्हेता तपसोऽपि तपोनिधिः ॥

पुलस्त्य उवाच ।
मेनायां कन्यकास्तिस्रो जाता रूपगुणान्विताः ।
सुनाभ इति विख्यातश्चतुर्थस्तनयोऽभवत् ॥
रक्ताङ्गनयनप्रख्या रक्ताम्बरविभूषणा ।
रूपेणाप्रतिमा कालो पर्व्वया मेनकासुता ॥
आगाधाः कन्यकास्तिस्रः सुभ्रुकात् परतो युगे । ।
कर्त्तुं तपः प्रयातास्ता देवास्ता ददृशुः शुभाः ॥
ततो मते कन्यके द्वे प्राप्ता मेना तपस्विनी ।
तपसो वारयामास उमे ति जननी च सा ॥
तदेव माता नामाख्या तस्के पितृसुता शुभा ।
उमेत्येव हि कन्यायाः सा जगाम तपोवनम् ॥"
इति वामने ७४—७५ अध्यायः ॥ * ॥

अपि च ।

"कथं गिरिसुता काली बभूव जगतां प्रभुः ।
रामायणी महाभागः कथमाप हरं पतिम् ॥"

मार्कण्डेय उवाच ।

पुराणजगत् देवी पूर्व्वं रामायणी सती ।
तदेव मनसागच्छन्नित्यं हिमवद्गिरिम् ।
जगन्माया तदा देवी भूता हिमवतः सुता ॥
प्रियाविन्यसमनसा चतुर्विंशतिवत्सरान् ।
विनाय मेनया देवी सामान्यतामिच्छती ॥
चतुर्विंशतिवर्षान्ते उमाजाता जगन्मयी ।
सुपीता भवदर्थं प्राह प्रसन्ना सती ॥

श्रीदेव्युवाच ।

यत् प्रार्थितं मया देवि ! मत्तस्तु प्रार्थनादृता ।
ततः सा प्रथमं पुत्रशतं वरे यशस्विनी ।
पश्चात् तदमायेकां कन्यामुत्तमशालिनीम् ।
कुलद्वयानन्दकरीं सुरकार्यबृंहणाम् ॥
ततो भगवती प्राह मेनकां हर्षविह्वलाम् ॥

श्रीदेव्युवाच ।

शतं पुत्राः संभवन्तु भवत्या वीर्यसंयुताः ।
सुता च तव देवार्थं मानुषार्थं च भवानि ॥
विनाय दर्शयामि भविष्यत्यन्यमेव ते ।
मन्मुखा जगद्धात्री तथैवान्तरधीयत ॥
ततः सा कालिका देवी पौर्णमास्यां जगन्मयी ।
पूर्व्वमुक्तसनातेन्यास्तत्सर्व्वं मेनकां ययौ ॥
जगत्प्रसादहेतोश्च मेनकाजठरे स्थिता ।
सहसा च महाभागा सा जगतीति जायताम् ॥
स्वर्गस्थमहे देवी मेनया मनसोत्सवः ।
वर्द्धं चैवौ महामाया सर्व्वेषां हृदि मेनकात्वात् ॥"
इति कालिकापुराणे ४० अध्यायः ॥

मेनकात्मजा, स्त्री, (मेनकाया आत्मजा ।) दुर्गा । इति शब्दार्णवः ॥ (शकुन्तला । यथा, महाभारते । १ । ७२ । १६ ।

"मेना विश्वामित्रे सार्द्धं मेनका प्रोवाच माक्कन्दिनः ।
ऋषेरुदन्त तां तत्र शकुन्तला मेनकात्मजाम् ॥")

मेनकाप्राणेशः, पुं, (मेनकायाः प्राणेशः पतिः ।) हिमालयः । इति हेमचन्द्रः । ४ । ९६ ॥

मेना, स्त्री, (मन्यते पूज्यते इति । मन पूजायाम् "मनुकम्पदादिभ्यो" उणा० २ । ८६ । इति इनन् नकारस्य निपातनात् वाढेः ।) मेनका । इति शब्दरत्नावली । सा हिमवान् । यथा,

"तां मानवीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे॥"

इति कुमारसम्भवे। १। १८॥

यथा च, कौर्म्मे १५ अध्याये।

"अग्निष्वात्ता बर्हिषदो पिता मेना मनस्विनी।
मेना मनाका यथा बहि मेना वैतरणी तथा।"

(स्त्री। यथा, ऋग्वेदे। १। ६२। ७।

"सनो च मेने मदमे सोमसपारपमोदको हर्य-
श्वः।"

"मेनेति स्त्रीनाम। मेने स्त्रीरूपमापन्ने रोदसी।"

इति तद्भाष्ये सायनः॥ वृषणश्वस्य कन्या। यथा, ऋग्वेदे। १। ५१। १३।

"मेना भवो वृषणश्वस्य।"

"हे इन्द्र। त्वं वृषणश्वस्य एतन्नाम्नो राज्ञो मेना भवः मेनानाम कन्यका भूः।" इति तद्भाष्ये सायनः॥ वाक्। इति निघण्टुः। १। ११॥ "मानयन्त्यनेन इति मेना। 'मङ्गलान्यपि दृश्यन्ते' इति वचनादित्वम्। बहुवचनात् भवति।' इति वचनादिसूत्। बहुवचनात् कवीनाम्। पूर्व्वोक्तापवर्ग्गपदादिपदान्तमेव पूर्व्वा वा देवतात्।" इति तट्टीकायां देवराजयज्वा॥ नदीविशेषः। यथा, महाभारते। ६। ९। २१।

"कारिचिबलोहिनीचैव कृष्णवेणां महानदीम्।
मन्दाकिनी पयसी मेना वेणा पुण्यवती तथा॥")

मेनाजा, स्त्री, (मेनायाः जायते इति। जन्+डः। स्त्रियां टाप्।) पार्व्वती। इति हेमचन्द्रः॥

मेनाद, पुं, (मे इति नादोऽस्य।) बिडालः। छागः। मयूरः। इति मेदिनी। दे, १९॥

मेनाधवः, पुं, (मेनाया धवः स्वामी।) हिमालयः। इति त्रिकाण्डशेषः॥

मेन्धिका, स्त्री, (मां शोभामिन्धयति प्रकाशयतीति। इन्ध+णिच्+ण्वुल्। टापि अत इत्वम्।) गुल्मविशेषः। इति वैद्यकम्। मेहदी इति भाषा॥

मेन्धी, स्त्री, (मां शोभामिन्धयतीति। इन्ध+णिच्+अच्। गौरादित्वात् ङीष्।) गुल्मविशेषः। इति वैद्यकम्। मेहदी इति भाषा॥

मेप, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अमिमेपत्। ङ, अमि-मेपत्। इति दुर्गादासः॥

मेरकः, पुं, विष्णुशत्रुविशेषः। इति हेमचन्द्रः॥

मेरुः, पुं, (मि+"मिपीभ्यां रुः।" उणा० ४। १०१। इति रुः।) पर्व्वतविशेषः। तत्पर्य्यायः। सुमेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरालयः ५। इत्यमरः। मिनोति क्षिपति ज्योतींषि प्रभया मेरुः। डुमिञ् क्षेपे मिनोति मीनाति रुः। इति भरतः॥ (यथा, माघे। १३। ...

"देवैरैरावतमेरुणः प्रथमो मेरुपर्व्वते।
प्रागभवत् कमीरबं नरसो नाम पर्व्वतः॥")

जपमालायामध्यमणिर्मेरुश्च माल्या। यथा,—

"मालामेकैकमादाय सर्व्वं सम्पादयेत् सुधीः।
ग्रन्थौ ग्रन्थौ ततो ग्रन्थे ग्रन्थस्य मोचयेत्।
गोपुच्छवन्मुखी कार्य्या यथा वर्त्तितमिमां वेत्।
तद्‌ग्रथनाधोमुखैकाद्यं मेरुविशयतो न्यसेत्॥"

इति तन्त्रसारे १० पटलः॥ ० ॥

करमालायां मेरुर्यथा,—

"निषोधहृदनाविपर्व्वणो मध्यमा चैकपर्व्विका।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्।"

इत्यत्र शक्तिमिन्नविषयम्॥ ० ॥

शक्तिविषये मेरुर्यथा,—

"मध्यमानामिकायाः पर्व्वत्रीणि वै क्रमात्।
पर्व्वैकं मध्यमायाश्चानामिकं समाचरेत्।
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्व्वति!॥"

श्रीविद्याविषये मेरुर्यथा,—

"अनामामध्यमायाश्च मूलात्तु द्वयं द्वयम्।
कनिष्ठामाद्य तर्ज्जन्याद्यं पर्व्व हरेत्ततः॥
अनामामध्यमायाश्च मेरुः स्यात्तिलयं शुभम्॥"

तत्राक्षिलमपि दोषो यथा,—

"अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत्॥"

इति तन्त्रसारः॥

मेरकः, पुं, (मिनोति क्षिपति गन्धानिति। मि+रुः। स्वार्थे कन्।) यक्षधूपः। इति शब्द-चन्द्रिका॥ धूना इति भाषा। (मध्यदेशस्थ पर्व्वतविशेषः। यथा, हरिवंशे विष्णुपर्व्वणि। १३। २९।

"ऐन्द्रावां मेरुकमदराण्यशुमाचलौ कोलाही-
वरः।
अभिगारदरदताङ्कनकुन्तलौ तिम्बकरा स्वाः॥")

मेरुसावर्णिः, पुं, एकादशमनुः। यथा,—

"ततस्तु मेरुसावर्णी ब्रह्मसूनुर्मनुः स्मृतः।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा॥"

इति मार्कण्डेये ९ अध्यायः॥

मेलकः, पुं, (मिल्+भावे घञ्। स्वार्थे कन्।) सङ्गः। इत्यमरः। ३। २। २८॥ ("बहुमाल्य-मेलकैः वराङ्गनाजनम्।" इति। २। ११६। भट्टीकायां कृष्णभट्टः॥)

मेलकलवणं, क्ली, (मिलतीति। मिल+ण्वुल्। मेलकं लवणम्।) सौवर्च्चलवणम्। इति राज-निर्घण्टः॥

मेला, स्त्री, (मिल्+णिच्+अच्। टाप्।) मेलकः। मसि। इति मेदिनी। ले, २६॥ अञ्जनम्। इति हेमचन्द्रः। मषीपी। इति राजनिर्घण्टः॥

मेलानन्दा, स्त्री, (मेलया मस्या आनन्दो यस्याः।) मस्याधारः। इति जटाधरः॥

मेलाम्बु, स्त्री, (मेलायां अम्बु कृष्णिका।) मस्याधारः। इति जटाधरः॥

मेलान्धुः, पुं, (मेलैव अम्बु यस्य।) मस्याधारः। इति शब्दरत्नावली॥

मेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अमिमेवत्। ङ, मेवते। इति दुर्गादासः॥

मेषः, पुं, (मिषति अन्योन्यं स्पर्द्धते इति। मिष् स्पर्द्धायाम्+अच्।) पशुविशेषः। भेड़ा इति मेढ़ा इति च भाषा। (यथा, मनुः। ३। २५१।

"मेषैव सुरकारनी कलशौ यत्र बलैः।
स भविष्यत्यपक्कं नागराज्ञी भवावहः।")

तत्पर्य्यायः। मेढ्रः २ उरभ्रः ३ उरणः ४ ऊर्णायुः ५ वृष्णिः ६ एडकः ७। इत्यमरः। २। ९। ७६॥ मेषुः ८ हुडः ९ भेड्रः १० अविः ११ लोमशः १२ भवी १३ रोमशः १४ मेषुः १५ भेडकः १६ मेढ्रकः १७ हुडुः १८ इति शब्दरत्नावली। मेण्ढकः १९ हुडुः २० संघटः २१। इति हेमचन्द्रः। ४। ३४१॥ अस्य मांसगुणाः। मधुरत्वम्। शीतत्वम्। गुरुत्वम्। विष्टम्भित्वम्। बृंहणत्व। इति राजनिर्घण्टः॥ अपि च। पित्तश्लेष्मकरत्वम्। कृशमात्राकेन तत्र प्रशस्तत्वम्। इति राज-वल्लभः॥ ० ॥ लग्नविशेषः। औषधविशेषः। इति मेदिनी। षे, १२९॥ (यथा, रघौ अनर्घराघवे। १० अध्याये।

"मेषस्य पृष्ठेऽङ्गुलिभि र्विदूर्तं
तद्‌ग्रन्थं सर्व्वतो प्रमोचयेत्।
क्रियाय सर्व्वैः शतशोऽपि वै चितः
क्रमः परित्यागविधि चापि विश्रुतः॥")

राशिविशेषः। तत्पर्य्यायः। क्रियः २। (यथा, श्रीमद्भागवते ५। २२। ५। "यदा मेषतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवन्ति। यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहा-न्येव वर्द्धन्ते ह्रसति च मासि मासि एकैका घटिका रात्रिषु।") अस्याधिष्ठात्री देवता मेषः। अश्विनीभरणीकृत्तिकापादैरेव मे-षराशिर्भवति। अस्य भाग पैत्तो भवति। विषमाधारे मेषस्थो दृष्टस्तु मघो नागदूतो धार्म्मिकः धीरः सद्‌गमीभावो च। स तु एषोदयः। अस्य वर्णः। भास्वरः। पौरुषः। अर्थ कूरः। विशोल्कभावः। आविर्भावः। समानाङ्गः। चर्म्मचारी। पूर्व्वदिग्विधपतिः। पैत्रवर्णः। अल्पस्त्रीसङ्गः। अल्पसन्तानः। शुष्कः। अतिरव। इति ज्योतिषम्॥ ० ॥

तत्राधिनतदाधिकारवर्णं यथा,—

"मेषे स्थिते पुरुषः सुवेषः
समाश्रयः स्वामयपतिः समायः।
पुत्रा गुणः स्थितस्त्रा च धीरा
कर्त्तादृत्य वा धनं मनीषाः॥" ० ॥

अन्याधिष्ठातृधिकारवर्णं यथा,—

"मिष्टचलो दर्शनः सुपर्वैः
ह्रस्वकुचः समराधिकोऽभवेत्।
अथ हि हिमवाद यतीनां
विषयाकुलता कविनः स्थितः॥" ० ॥

तद्‌गभावाश्रयं यथा,—

"मेषवर्णे जन्मिनकाले काले भवे तनः
कोऽपि भवनखा च विक्रमी करेक्षणः॥"

इति कोष्ठीप्रदीपः॥

तन्नयस्य स्फुटमानम् । ३ । ४७ । इति ज्योतिस्तत्त्वम् ॥ ॥ सितारकशरोन्नतिश्रवणानवत्स गगनमध्योदये मेषलग्नस्य षडादशपलाधिकदण्डैको गतो भवेत् । यथा,—

"तारकात्रयमिते शरोन्नतौ
कैरवे गगनमध्यवर्त्तिनि ।
मत्तवारणगतेऽजलग्नतो
निर्ययुर्गणमहीधलिप्तिकाः ॥"

मर्द्दलाह्वतिमपतारकधनिष्ठागणनस्य मस्तकोपर्युदये मेषलग्नस्य षट्त्रिंशत्पलाधिकदण्डद्वयं गतं स्यात् । यथा,—

"मस्तकोपरि समागते घने
मर्द्दलाह्वतिनि पञ्चतारके ।
याति कालिमति मेषलग्नतः
वासवाश्च रसपक्षलिप्तिकाः ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

मेषकः, पुं, (मिषतीति । मिष् + अच् । संज्ञायां कन् ।) जीवशाकः । राजनिर्घण्टः ॥

मेषकम्बलः, पुं, (मेषलोमनिर्म्मितः कम्बलः । मध्यपदलोपी कर्म्मधारयः ।) मेषलोमनिर्म्मितवस्त्रम् । तत्पर्य्यायः । ऊर्णायुः २ । इत्यमरः । २ । ६ । १०७ ॥

मेषलोचनः, पुं, (मेषस्य लोचनमिव पुष्पमस्य ।) चक्रमर्द्दः । इति भावप्रकाशः ॥ मेषचक्षुस्तुल्यचक्षुषि, त्रि ।

मेषवल्ली, स्त्री, (मेषप्रिया वल्ली ।) अजशृङ्गी । इति भावप्रकाशः ॥

मेषविषाणिका, स्त्री, (मेषस्य विषाणं शृङ्गमिव प्रतिकृतिरस्याः । विषाण + प्रतिकृतौ कन् । टापि अत इत्वम् ।) मेषशृङ्गी । इति रत्नमाला ॥

मेषशृङ्गः, पुं, (मेषस्य शृङ्गमिव । तदाकृतित्वात् ।) स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६३ ॥ (यथा, सुश्रुते उत्तरतन्त्रे । १७ अध्याये ।
"मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि ॥")

मेषशृङ्गी, स्त्री, (मेषशृङ्ग + गौरादित्वात् ङीष् ।) अजशृङ्गीक्षुपः । मेढ़ाशृङ्गी इति भाषा । (यथा, सुश्रुते । १ । ३८ ।
"मेषशृङ्गी मातुलुङ्गी सुवर्च्चलेत्यादि ॥")
तत्पर्य्यायः । मन्दोरूणः २ मेषविषाणिका ३ वर्षः ४ चक्षुर्म्मर्द्दनम् ५ मेढ़शृङ्गी ६ सत्कृमा ७ । इति रत्नमाला । (तथास्याः पर्य्यायो गुणाश्च ।
"मेषशृङ्गी विषाणी स्यान्मेषवल्ल्यजशृङ्गिका ।
मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत् ।
रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माक्षिशूलहृत् ।
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत् ।
दीपनं स्रंसनं कासकृमिव्रणविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मेषा, स्त्री, (मिष्यतेऽसौ । मिष् + कर्म्मणि घञ् । टाप् ।) त्रुटिः । इति शब्दचन्द्रिका । गुजराटी एलाइच इति भाषा ॥

मेषाण्डकुसुमः, पुं, (मेषाण्डमिव कुसुममस्य ।) चक्रमर्द्दः । इति रत्नमाला ॥

मेषाण्डः, पुं, (मेषस्याण्डमिवाण्डमस्य ।) इन्द्रः । इति पुराणम् ॥

मेषाम्ली, स्त्री, (मेषस्य अम्लमिव अस्य स्वल्पलतायाः ।) वत्सादनीक्षुपः । इति राजनिर्घण्टः ॥

मेषालुः, पुं, (मेषप्रियः आलुः ।) वर्व्वरीक्षुपः । इति शब्दचन्द्रिका ॥

मेषाह्वयः, पुं, (मेषस्याह्वयः आह्वा यस्य ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ (विवरणमस्य चक्रमर्द्दशब्दे ज्ञातव्यम् ॥)

मेषिका, स्त्री, (मेषी + स्वार्थे कन् । टाप् । ह्रस्वः ।) मेषी । इति शब्दरत्नावली ॥

मेषी, स्त्री, (मिष्यते स्पृह्यते असौ इति । मिष + घञ् । ङीष् ।) तिनिशवृक्षः । जटामांसी । इति राजनिर्घण्टः ॥ मेषस्त्रीजातिः । भेड़ी । (यथा, वाजसनेयसंहितायाम् । २ । ५९ ।
"भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजं
सुखं मेषाय मेष्यै ॥")
तत्पर्य्यायः । जालकिनी २ अविः ३ । इति त्रिकाण्डशेषः ॥ एड़का ४ मेषिका ५ इति शब्दरत्नावली । कुररी ६ रजा ७ अविका ८ वेणी ९ । इति हेमचन्द्रः । ४ । ३४२ । अस्या दुग्धगुणाः । मधुरत्वम् । गाढ़त्वम् । स्निग्धत्वम् । कषायत्वम् । वातामयकरत्वम् । औल्यत्वम् । लोमशायाश्चेत् गुरुत्वम् । तृप्तिदत्वञ्च । इति राजनिर्घण्टः ॥ ॥ अपि च ।
"आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत्
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम् ।
गुरुकासेऽनिलोद्भूते केवले चानिले वरम् ॥"
इति भावप्रकाशः ॥
अस्या दधिगुणाः । सुस्निग्धत्वम् । कफपित्तकरत्वम् । गुरुत्वम् । वाते रक्तवाते च पथ्यत्वम् । शोफव्रणनाशित्वञ्च ॥ ॥ अस्या नवनीतगुणाः । विष्टम्भत्वम् । शीतलत्वम् । मेधाकरत्वम् । पुष्टिदत्वम् । स्थौल्यत्वम् । मन्दाग्निदीपनत्वम् । धारकत्वम् । पाके हिमत्वम् । लघुत्वम् । योनिशूले कफे वाते दुर्नाम्नि च हितत्वञ्च । दुर्नाम्नि स्थाने गुदशूले इति पुस्तकान्तरे पाठः ॥ ॥ तस्या घृतगुणाः । अतीवगौरवात् सुकुमारदेहिनां वर्ज्ज्यत्वम् । बुद्धिपाटवकरत्वम् । बलावहत्वम् । वपुर्विरद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ तन्मांसगुणाः । यथा, भावप्रकाशे ।
"छागमेषवृषाश्वाद्याः ग्राम्याः प्रोक्ता महर्षिभिः ।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां वृंहणा बलवर्द्धनाः ॥"

मेसूरणं, क्ली, दशमलग्नम् । यथा,—
"कर्म्मास्पदञ्च दशमं खं मेसूरणमाम्बरम् ।"
इति ज्योतिस्तत्त्वम् ॥

मेहः, पुं, (मेहति क्षरति शुक्रादिरनेनेति । मिह् + घञ् ।) प्रमेहरोगः । इत्यमरः । २ । ६ । ५६ ॥ (अस्यौषधं यथा,—
"वङ्गभस्म द्विवल्लञ्च वैद्यैर्मधुना सह ।
ततो गुडसमं गन्धं भक्षयेत् कर्षमात्रकम् ॥
गुडूचीसत्त्वमथवा शर्करासहितं तथा ।
सर्व्वमेहहरो योगो वङ्गावलेह उत्तमः ॥"
इति वङ्गावलेहः ॥
"भस्मसूतं समं कान्तमभ्रकञ्च शिलाजतु ।
शुद्धतार्क्ष्यं शिलाव्योषं विफलाङ्कोठबीजकम् ॥
कपित्थरजनीचूर्णं समं भाव्यञ्च भृङ्गिणा ।
विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा ।
माषमात्रं हरेन्मेहं मेहबद्धरसो महान् ॥"
इति मेहबद्धरसः ॥
"रसभस्म समायुक्तं वङ्गभस्म प्रभक्षयेत् ।
अस्य माषद्वयं हन्ति मेहान् घोरसमन्वितम् ॥"
इति वङ्गेश्वररसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥ अन्यत् प्रमेहशब्दे द्रष्टव्यम् ॥ ॥ मेहतीति । मिह + अच् ।) मेषः । इति शब्दचन्द्रिका ॥ प्रस्रावः । इति हेमचन्द्रः । ३ । २९७ ॥ (अस्याप्यभिमुखं सत्करणे दोषो यथा, मनौ । ४ । ५२ ।
"प्रत्यग्निं प्रतिसूर्य्यञ्च प्रतिसोमोदकद्विजान् ।
प्रतिगां प्रतिवातञ्च प्रज्ञा नश्यति मेहतः ॥"
"अग्निसूर्य्यचन्द्रजलब्राह्मणगोवाताभिमुखं मूत्रपुरीषे कुर्व्वतः प्रज्ञा नश्यति ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

मेहघ्नी, स्त्री, (मेहं हन्तीति । हन् + टक् । ङीप् ।) हरिद्रा । इति रत्नमाला ॥

मेहनं, क्ली, (मेहति सिञ्चति मूत्ररेतसीति । मिह सेचने + ल्युट् ।) शिश्नः । इत्यमरः । २ । ६ । ७६ ॥ (यथा, ऋग्वेदे । १० । १६३ । ५ ।
"मेहनाद्वनं करणाल्लोम ।"
"मेहनात् मेढ्रात् ।" इति तद्भाष्ये सायनः ॥
यथा, च सुश्रुते । १ । १५ ।
"वृषणौ यस्य वर्ण्णानि सुमहन्त्यपि मेहनम् ।
तयोरत्यल्पकोऽद्वापि न च स्यात् प्रमाणतः ॥
उरुंच्य अवधौ स्यादादापा चोच्चा प्रवीरिका ।
चरतो भवतो वापि दन्तानां प्रक्षरति ॥
पिबति यच्च विभाज्य स कौवेद्य पर्व्वमिति ॥")
मूत्रम् । इति मेदिनी । मे, ११ ॥ (यथा, सुश्रुते । १ । १२ ।
"यदातिक्षपन् यस्य भूमौ पतति यस्तुल्यतामेति मयपतेः प्रमेहश्च मनुजः ॥")
भावेऽधिकृते प्रमेहे गर्भोऽवयवे च ॥

मेहनः, पुं, (मेहति सिञ्चति रजांसीति । मिह + ल्युः ।) मुष्ककवृक्षः । इति राजनिर्घण्टः ॥

मेहना, स्त्री, (मेहते चाञ्चल्ये सुखयति अंशैः । मिह सेचने + क्विप् + अञ्चयते इति क्विप् । स्त्रियां टाप् ।) महिला । इति केचित् ॥ (मेहनेन । यथा, ऋग्वेदे । ५ । ३९ । १ ।
"यदिन्द्रचित्र मेहनास्ति त्वादातमद्रिवः ॥")

मैत्रं, क्ली, (मित्रादागतमिति । यद्वा, मित्रदेवतमिति । मित्र+"तस्येदम् ।" ४।३।१२०। इति अण् ।) अनुराधानक्षत्रम् । २७ । यथा,—

"मैत्रादयादे अदितौ च विष्णु-
र्ब्राह्ममघे पार्वणेषु च ।
सौम्याश्वयोश्च हस्तादिषु ता
प्रकुर्वते मातृवतुर्दशेन ।"

इति तिथ्यादितत्त्वम् ॥

(मित्रः सूर्य्यो देवताऽस्येति । आदित्यलोकः । यथा, महाभारते । १२ । ३१७ । ३ ।
"पायुभ्यां ... मैत्रं स्थानमवाप्नुयात् ।
पृथिवीं चरणाभ्यां च ... प्रजापतिम् ।"
यद्वा, मनुः । १२ । ७२ ।
"मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् ।")
पुरीषोत्सर्गः । यथा,—
"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ।
कल्यं उषःकालम् । मैत्रं मित्रदैवतपायुकर्म-त्वात् पुरीषोत्सर्गः ।" इत्याह्निकाचारतत्त्वम् ।
अपि च ।
"ब्राह्मे मुहूर्त्ते चोत्थाय शुचौ देशे समाहितः ।
शरीरचिन्तां निर्वर्त्य मैत्रं कर्म समाचरेत् ।"
मैत्रं मलत्यागोत्सर्गः । इति राजधर्मः ॥
तत्र निषिद्धस्थानादि यथा,—
"छायाकूपनदीगोष्ठचैत्याम्भःपथिमध्यगः ।
भस्मौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ।
न गोमये न कृष्टे वा महावृक्षे च शाड्वले ।
न तिष्ठन् वा न निर्व्वासा न च पर्व्वतमस्तके ।
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन् वा समाचरेत् ।
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वापि न तीर्थे न चतुष्पथे ।
नद्यां मन्दमोदेषु वा नोदके न पराङ्मुखः ।
न सोपानत्पादुको वा छत्री वा नान्तरीक्षके ।
न चैवाभिमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरपामपि कदाचन ।
न ज्योतींषि निरीक्षन् वा न सन्ध्याभिमुखोऽ-
थवा ।
प्रत्यादित्यं प्रत्यनलं प्रतिसोमं तथैव च ।"
इति कौर्म्मे उपविभागे १३ अध्यायः ॥
अस्य विस्तारस्तु वह्निपुराणे १८० अध्याये द्रष्टव्यः ॥ ० ॥ (मित्रस्य भावः । मित्र+अण् ।
मित्रता । यथा, मनुः । ८ । ३१८ ।
"लोभात् मोहात् भयात् मैत्रात् कामात्
क्रोधात् तथैव च ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ।")
त्रि, मित्रसम्बन्धी । (यथा, महाभारते । १२ ।
३३१ । ४६ ।
"विदुषी वै न भवत्नि मित्रधैरवौ विरम् ।
अतं मैत्रस्य भावस्य वै ततः प्रत्यक्षामिकः ।"
मित्रसहायी । यथा, श्रीमद्भगवद्गीतायाम् ।
१२ । १३ ।

"अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्म्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"
"मित्रभावो मैत्रो मित्रतया वर्त्तते ।" इति श्रीधरस्वामी । "मैत्रः स्नेहेन सहितः ।" इति मधुसूदनस्वामी ।)
मैत्रः, पुं, ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, मनुसंहितायाम् । २ । ८७ ।
"जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥"
"मित्रमेव मैत्रः स्वार्थे अण् ।" इति टीकायां मेधातिथिकुल्लूकौ ॥ (परमात्मगुणेषु प्रतीक-पूर्णः । तथा च ब्रह्मवैवर्त्ते ।
"आर्द्रः सार्द्रस्तथा मैत्रः शुभो वासव एव
च ।"
यथा, कुमारे । ७ । ६ ।
"मैत्रे मुहूर्त्ते शशलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु ।"
वर्णसङ्करविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ।")
मैत्र्यं, क्ली, (मैत्रस्य तत् भव इति ।) अनुराधा-नक्षत्रम् । इति जटाधरः ॥
मैत्रावरुणः, पुं, (मित्रश्च वरुणश्चेति । "देवता-द्वन्द्वे च ।" ६।३।२६ । इत्यानङ् । ततः "देवता-द्वन्द्वे च ।" ७।३।२१ । इति मित्रस्य वृद्धिः ।
"दीर्घाच्च वरुणस्य ।" ७।३।२३ । इति वरुणस्य न वृद्धिः । तयोरपत्यमिति । मित्रा-वरुण+अण् ।) अगस्त्यः । इति शब्दरत्ना-वली ॥ (यथा, अथर्व्ववेदे । ४ । २९ । ६ ।
"य वां मैत्रावरुणं मन्त्रममिर्व्वति ।"
अस्य विवरणं यथा, ऋग्वेदे । ७ । ३३ । ११ ।
"उतासि मैत्रावरुणो वसिष्ठोर्व्वश्या ब्रह्मन्
मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे
त्वाददन्त ।"
"उतापि च हे वसिष्ठ ! मैत्रावरुणः मित्रावरु-णयोः पुत्रोऽसि ब्रह्मन् वसिष्ठ ! उर्व्वश्या अप्स-रसो मनसो ममादं पुनः जातोऽसि देवात् संकल्पात् स्कन्नं रेतः मित्रावरुणयोर्द्रप्सं मार्ग-मात् उत्पन्नमासीत् । तस्मादधिजातोऽसि । यथा च वक्ष्यते । तन्नैवनारायणीयं । दर्शनाच्च तत्र देवेन दैव्येन ब्रह्मणा वैद-रादिना अनुष्टुप सुन्दं पुष्करे विश्वेदेवा अददन्त अधारयन् । तथाचाद्यरुर्व्वशी मैत्रा-वरुणौ अभादि इति ताम्र प्रकृते ।
तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ।
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः ।
बहुधा पतितं रेतः कलशे च जले स्थले ।
स्थले वसिष्ठस्तु मुनिः सम्भूतः ऋषिसत्तमः ।
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महा-
द्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महायशाः ।
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते ।
कुम्भ इत्यभिधानञ्च परिमाणस्य लक्ष्यते ।
ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ।
सर्व्वतः पुष्करे तं हि विश्वे देवा अधारयन् ।"
इति सायणे भाष्यः ॥)
मैत्रावरुणिः, पुं, (मैत्रावरुणयोरपत्यमिति । मैत्रा वरुण+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) अगस्त्यः । इत्यमरः । १ । ३ । ४० ॥
(यथा, महाभारते । ३ । १०४ । १३ ।
"तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।
आश्रमस्थं तपोराशिं कर्म्मभिः स्वैरभिष्टुतम् ।")
मैत्री, स्त्री, (मित्र+ङीप् । यद्वा, मित्र+भावे ष्यञ्+ङीष् । ततः "यस्येति च ।" ६ । ४ ।
१४८ ।" इति यलोपः ।) मित्रस्य भावः ।
मित्रस्य कर्म्म । इत्यमरभरतौ । अतिविस्तृत-मैत्रीकरणनिषेधो यथा,—
"विशिष्टपतितोन्मत्तबहुवैरातिकोटकैः ।
बन्धकीबन्धकीभर्तृक्षुद्रानृतकथैः सह ।
तथातिव्ययशीलेन परीवादरतैः शठैः ।
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ।"
इति विष्णुपुराणे ३ अंशे १२ अध्यायः ॥
"विशिष्टादिभिर्मैत्रीं न कुर्व्वीत । बहुभिर्वैर यस्य । अतिकोटकः अत्यन्तं कोटयन् पीडकः । कलहकोटीति पाठेऽपि स एवार्थः । बन्धकी असती ।" इति तट्टीका ॥
मैत्रेयकः, पुं, (मैत्रो मित्रस्य वंश्यस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥
मैत्रेयः, पुं, (मैत्रे मित्रतायां साधुरिति । मैत्र+ढञ् ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥
(मित्रयोः अपत्यमिति । मित्रयु+"गृष्ट्यादि-भ्यश्च ।" ४ । १ । १३६ । इति ढञ् । ततः "केकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ । २ ।
इति युस्थाने इयादेशे साधुः । "दाक्षिणात्य-शालिवाहन ।" ४ । ३ । १०१ । इति गुरौरी विशेषितः ।) मुनिविशेषः । यथा,—
"सर्व्वं पुराणं मैत्रेयं देवानन्दो गुरुः ।
सौमनिक भारतेन विदुरः पराशरः ।"
इति विभागवते । ३ । ७ । १ ।
(एकः । यथा, महाभारते । ३ । १० । ५७ ।
"ईश्वरस्य महात्मानौ विभाज्य विभागीयेषु
चरावरान् पन्थानं मैत्रेयः कक्षाविरः
वर्णसङ्करजातिविशेषः । यथा, मनुसंहिता-याम् । १० । ३३ ।
"मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये ।"
"मैत्रेयकं नाम वर्णम् ।" इति तट्टीकायां मेधातिथिः ।
स्त्री । मैत्रेयीः अग्निस्तम्भिकेनामिका कारकः
कात्यायन्या सह च ।) मित्रसम्बन्धि, त्रि ।

(मित्रयुश्चोद्भवाशी च । यथा, हरिवंशे । ३२ । ७३—७८ ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि दिवोदासस्य सन्ततिम् ।
दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः ।
मैत्रायणी ततः शाखा मैत्रेयास्तु ततः स्मृताः ॥")

मैत्रेयिका, स्त्री, मित्रयुद्धम् । इति त्रिकाण्डशेषः ॥ (मित्रयूणां भावः कर्म्म वा । मित्रयु+"गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ।" ५।१।१३४ । इति वुञ् । ततः "केकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ । २ । इति इयादेशः । यथा, "मैत्रेयिकया श्लाघते ।" इति काशिका । ७ । ३ । २ ॥)

मैत्र्यं, क्ली, स्त्री, (मित्र+ष्यञ् ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ । २ । ५ । ३८ ॥ (यथा, पञ्चतन्त्रे । ३ । ७० ।
"प्राहुः साप्तपदं मैत्र्यं जनाः शास्त्रविचक्षणाः ।
मित्रतां च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ॥")

मैथिली, स्त्री, (मिथिला निवासोऽस्येति । मिथिला+"सोऽस्य निवासः ।" ४ । ३ । ८९ । इति अण् । मैथिलस्तन्नामा राजा तस्यापत्यं स्त्री । मैथिल+इञ् । ङीप् ।) सीता । इति हेमचन्द्रः ॥ (यथा, भट्टिकाव्ये । २ । ४७ ।
"विरक्षयी प्राक्कलतेव चन्द्रमा
श्रुतादिवः स्वास्तुरिवाचिरप्रभा ।
ध्वाङ्गकान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥"
मिथिलाधिपतिमात्रे, पुं । यथा, महाभारते । १२ । ९९ । ३ ।
"जनको मैथिलो राजा महात्मा सर्व्वतत्त्ववित् ।
योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च ॥")

मैथुनं, क्ली, (मिथुने सम्भवतीति । मिथुन+"संभूते ।" ४।३।४१ । इति अण् । मिथुनस्येदमिति अण् वा ।) व्यवायाधानम् । यथा, [illegible] ।
"असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ॥
मैथुने मिथुनशब्दाच्च स्त्रीपुंसयोः व्यवायाधानप्रयोगप्रकारौ ।" इत्युद्वाहतत्त्वम् ॥०॥ सुरतम् । रतम् । इत्यमरः ।३।३।१९१॥ "सङ्गतिः सङ्गमो दारसंयोगः विवाह इति कश्चित् । रतं सुरतम् । अनयोर्मैथुनम् । मिथुनात् सङ्गमे इदमर्थे स्वार्थे वा अण् । अथवा सुरते युग्मे दाम्पत्ये मिथुनमिष्यते । इति शाब्दिकः ।" इति टीकायां भरतः ॥०॥ तस्य पर्य्यायः । सुरतम् २ अभिमानितम् ३ पवितम् ४ संप्रयोगः ५ व्यवायम् ६ ब्रह्मचर्य्यघ्नम् ७ उपगतम् ८ विमदम् ९ क्रीडारत्नम् १० महासुखम् ११ । इति त्रिकाण्डशेषः । व्यवायः १२ ग्राम्यधर्म्मः १३ रतम् १४ निधुवनम् १५ । इत्यमरः । २ । ७ । ६१ ॥ अस्य गुणाः । धातुक्षयकारित्वम् । रतिवल्लभराजत्वम् । अतिमात्रमैथुनस्य बलहानिज्वरकारित्वम् । अमैथुनस्य अमेदोवृद्धिग्रन्थिरोगाग्निमान्द्यकारित्वम् । स्त्रीसंसर्गरहितस्य धातुरनुरागशरीरबलवर्णस्थिरोपचितमांसानि भवन्ति । पुण्यस्थानगुरुस्थानदेवस्थानलोकसमीपप्रातःकालसन्ध्याकालपर्व्वकालेषु तस्य त्याज्यत्वम् । एतत्कर्म्मणि रजस्वलाकामा मलिना वन्ध्या वर्णज्येष्ठा वयोज्येष्ठा व्याधियुक्ताङ्गहीनागर्भवती वेश्या योनिदोषयुक्ता सगोत्रा गुरुपत्नी भिक्षुकी कपटव्रतधारिणी वृद्धा च त्याज्या । रजस्वलागमने दृष्ट्यायुस्तेजःक्षयोऽधर्म्मश्च भवति । कपटव्रतयुक्तागुरुपत्नी सगोत्राव्रद्धागमने एवं पर्व्वकाले सन्ध्याकाले च स्त्रीमैथुने पापमायुःक्षयश्च भवति । वयोरूपगुणोपेतां कुलशीलसमन्विताम् । अधिकामां दृष्टामलङ्कृतां वाजीकरणपीडिताश्च प्रमदां कृष्णोऽधिकामश्च पुरुषः सेवेत । शुक्रवर्द्धकद्रव्यं सशर्करं क्षीरसवणकं वा पीत्वा कामसायकक्षतां सुरूपामनिन्द्यां दृष्ट्वा प्रमदामायस्वरे दृढः कामुको गत्वा तदनु सुखं स्वपेत् । अयथावद्गमने तु नरो धातुवैषम्यमेति । रतान्ते स्नानं सशर्करक्षीरपानं निद्रा गोधूमारसभोजनञ्च हितम् । इति राजवल्लभः ॥ ० ॥ ("तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति । यश्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते । द्वितीयेऽप्येवं सूतिकागृहे वा । तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति । न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं गुणकरं भवति यथा नद्यां प्रतिस्रोतः प्लाविद्रव्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्ध्वं गच्छति तद्वदेव द्रष्टव्यम् । तस्मान्नियमवतीं त्रिरात्रं परिहरेत् । अतःपरं मासादुपेयात् ।"
"ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् ।
कललं जायते तस्या वर्जितं पैतृकैर्गुणैः ॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ।)
व्रतदिवसे अष्टाङ्गमैथुनस्य त्याज्यत्वं यथा,—
"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
मैथुनं विविधं त्याज्यं व्रते क्रीडाविहङ्गमे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४ अध्यायः ॥
अस्य विधिनिषेधौ यथा,—
"ऋतावुपगमः शस्तः स्वपत्न्यामवनीपते ।
पुन्नामर्क्षे शुभे काले ज्येष्ठयुग्मासु रात्रिषु ॥
नाशातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम् ।
नानिष्टां न प्रकुपितां नाप्रशस्तां न गुर्व्विणीम् ॥
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् ।
क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः ॥
स्नातः स्रग्गन्धधृक् प्रीतो नाध्मातः क्षुधितोऽपि वा ।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥
चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि [illegible] क्रान्तिरेव च ॥
तैलस्त्रीमांससंभोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं नरः ॥
अशेषपर्व्वस्वेतेषु तस्मात् संयमिभिर्बुधैः ।
भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः ॥
नान्ययोनावयोनौ वा नोपयुक्तौषधस्तथा ।
देवद्विजगुरूणाञ्च व्यवायी नाश्रमे भवेत् ॥
चैत्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे ।
नैव श्मशानोपवने सलिलेषु महीपते ॥
प्रोक्तपर्व्वस्वशेषेषु नैव भूपाल सन्ध्ययोः ।
गच्छेद्व्यवायं मतिमान् न मूत्रोच्चारपीडितः ॥
पर्व्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप ।
भुवि रोगावहो नॄणामप्रशस्तो जलाशये ॥
परदारान्न गच्छेत मनसापि कदाचन ।
किमु वाचास्थिबन्धोऽपि नास्ति तेषु व्यवायिनाम् ॥
मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः ।
परदाररतिः पुंसामुभयत्रापि भीतिदा ॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि ॥"
इति विष्णुपुराणे । ३ । ११ । १११-१२४ ॥०॥
परस्त्र्यादिगमने दण्डो यथा,—
"ब्राह्मणः क्षत्रियो वैश्यः क्षत्रविट्शूद्रयोषितः ।
व्रजन्दाप्यो भवेद्राज्ञा दण्डमुत्तमसाहसम् ॥
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे ।
मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद्भवेत् ॥
शूद्रः सवर्णागमने शतं दण्ड्यो महीपते ।
वैश्यस्य द्विगुणं राजन् ! क्षत्रियस्य त्रिगुणं तथा ॥
ब्राह्मणश्च भवेद्दण्ड्यस्तथा दाप्यश्चतुर्गुणम् ।
अगुप्तासु भवेदेवः सुगुप्तास्वधिको भवेत् ॥
माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा ॥
भागिनेयी तथा चैव राजपत्नी तथैव च ।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च ॥
एतासामन्यतमागमने नरः ।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ॥
आत्मार्थागमने पूर्व्वो दण्डस्तु द्विगुणो भवेत् ।
[illegible]
तिर्य्यग्योनौ च गोवर्ज्जं मैथुनं योऽभिसेवते ।
स सर्वं प्राप्नुयाद्दण्डं [illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]"
इति मात्स्ये २०६ अध्यायः ॥

मैनाकः, पुं, (मेनकाया अपत्यं पुमान् । मेनका+अण् वा । मेनका+ [illegible]

कायु: ।) धर्मपक्षिविशेष: । तत्पर्याय: । श्वेतच्छ-
दाभ: २ सुनाभ: ३ विमलपुलक: ४ । इति भट्टा-
चार्य: । स तु हिमालयस्थ ब्रह्मपुत्र: । यथा,—
"ततो भगवती प्राह मेनकां मुनिसत्तमाम् ।
हिमालयं तदा तस्याः पुरतश्च मनोरमम् ॥
श्रीदेव्युवाच ।
यदर्थं युवाः संभवत्सु भवता मोक्षकांक्षया ।
तदेवाहं भवत्योः सुता: प्रथमं संभविष्यति ॥
तदनु त्वा ममहानि तदेवाक्षरमोक्षत ।
मेनका च सुतं लब्धा सत्कार्यं प्रतिपेदे च ।
ततः काले तु संप्राप्ते मेनाकमथ मोक्षतम् ।
पश्चात् भव श्रीदेवी हिमसङ्गे पर्वतो ॥
मेनका सुते देवी देवी ध्याहसा सताम् ।
अस्यादुत्पन्नं पुमान् क्रमात् वा दद्वी च स ॥"
इति कालिकापुराणे ३० अध्यायः ।
(वानरविशेष: । इति हरिवंशे भविष्यपर्वणि ।
२१२ । ९ ।)

मेनकात्मजा, [ज] स्त्री, (मेनकाया आत्मजा ।) पार्वती । इति हेमचन्द्र: । २ । ११८ ।

मैनिक:, पुं, (मीनं हन्तीति । मीन+"पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् ।) जालिक: । इति सिद्धान्तकौमुदी ।

मैन्द:, पुं, विष्णुव्याहारविशेष: । इति हेमचन्द्र: । ४ । ३६३ । (यथा, हरिवंशे । ११२८—११०।
"असुर: मैन्दकाख्यं प्रादुर्भावो महासुर: ।
विख्यातो मायुरे बली सर्वलोकविनाशके ॥
यत्र स्थानच मैन्दश्च द्विविदं संयमेन च ।
रैवतात् मातृदेवताद् धनमानाय वीर्य-
वान् ॥"
वानरविशेष: । इति रामायणम् । (यथा, महाभारते । ३ । ११ । १८ ।
"तत्र वानरराजाभ्यां मैन्देन द्विविदेन च ।
युयुधे विरुपाक्ष यत्र च च यो विनाशं मतौ ॥")

मैन्दहा, [न्] पुं, (मैन्दं हतवानिति । हन्+क्विप् ।) विष्णु: । इति हेमचन्द्र: ।

मैरेयं, क्ली, (मारं कामं करोतीति । मार+ढक् । निपातनात् साधु: ।) मद्यविशेष: । इत्यमर: । २ । १० । ४१ । "अपि च ।
'सौवीरिकरदेवै: सर्वैरपवैरावरणं भवेत् ।
मैरेयं धातकीपुष्पगुडधानाम्लसंहितम् ।'
इति माधवेन मैर: स्मृत: । तथापि सहस्रमधक-
ष्टिरसुरम् । मारं कामं जनयति मैरेयं चेत: ।
विशतपादात् ढकम् ।" इति भरत: । (यथा,
"मद्यं कोटुमैरेयमिता च मदिरा सुरा ।
कादम्बरी वारुणी च हालापि बलवल्लभा ॥"
इति भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे ।
कवित, तुलिङ्गोऽपि दृश्यते । यथा,—
"गौरव. कषायो लघुत् पुष्पोवत्दुकम्बुः ।
तनिदेशोऽभिलाषरो मैरेयो मधुरो गुरु: ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ।)

मेनाद:, पुं मयूर: । यथा । "नैमनुक्षरदप-
वादोऽद्रतिस्वरकण्ठरथलमयोऽधातरन्धुविद-

तत्सौमित्रेन्द दत्यादि ।" इति वररुचिकृततत्त्व-
कौमुदी वाक्यमध्ये: ।

मोक्ष, कि मोक्षे । इति कविकल्पद्रुम: । (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) क, मोक्षयति मोक्षति । इति दुर्गादास: ।

मोक्ष:, पुं,(मोक्ष+भावे घञ् । मोक्ष्यते दुःखमनेन । मोक्ष+करणे घञ् । इति भरत: ।) मुक्ति: । (यथा, सांख्यकारिकायाम् । ५ । ७ । ४१ ।
"न मोक्षो नभस: पृष्ठे न पाताले न भूतले ।
सर्वाज्ञानक्षये चेत:क्षयो मोक्ष इति श्रुति: ॥")
मोक्षधर्मस्तु महाभारते शान्तिपर्वणि द्रष्टव्य: ।
पाटलिवृक्ष: । मोचनम् । इति मेदिनी । षे,
१६ । (यथा, मेघदूते । ६१ ।
